वाचस्पत्यम्

(बृहत् संस्कृताभिधानम्)

द्वितीयो भागः

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१

॥ श्रीः ॥

चौखम्बा संस्कृत ग्रन्थमाला

ग्रन्थ संख्या ९४

॥ श्रीः ॥

वाचस्पत्यम्

(बृहत् संस्कृताभिधानम्)

गवर्नमेंटसंस्कृतमहाविद्यालय-दर्शन-व्याकरणाध्यापक-

श्रीतारानाथ-तर्कवाचस्पति-भट्टाचार्येण

सङ्कलितम्

तेनैव संस्कृतम्

द्वितीयो भागः

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१

विक्रम सं० २०१८] [ई० १९६२

प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१
मुद्रक : विद्याविलास प्रेस, वाराणसी-१

The
Chowkhamba Sanskrit Series Office,
P. O. Box 8, Varanasi-1
(INDIA)
1962
Phone : 3145

PK
925
T37
V. 2.
920661

THE
CHOWKHAMBA SANSKRIT SERIES
WORK NO. 94

VACHASPATYAM

(A Comprehensive Sanskrit Dictionary)

COMPILED BY

SRI TARANATHA TARKAVACHASPATI

Professor of Grammar and Philosophy
Govt. Sanskrit College, Calcutta.

VOL. II

THE
CHOWKHAMBA SANSKRIT SERIES OFFICE
POST BOX 8, VARANASI-1 (India) Phone : 3145
1962

LIBRARY
AUG 17 1964
UNIVERSITY OF TORONTO

920661

प्रभुरग्निः प्रपचने भूमिरावपने प्रभुः” भा०आ०८८अ०। करणे ल्युट्। ४वपनसाधने त्रि० ‘भूतानामावपनं सर्व्वेषाम्” शत०ब्रा०स्त्रियां ङीप्। त्वमस्यावपनी जनानाम्” अथ० १२,१,६१। अन्तर्भूतण्यर्थे ल्युट्। ५केशादेः सर्व्वमुण्डने।

आवपनिष्किरा स्त्री आवप निष्किर इत्युच्यते यस्यां क्रियायां मयूर० स०। आवपननिष्किरणार्थनिर्देशक्रियायाम्।

आवय पु० आ+अज–अच् वीभावः। १आगतौ। कर्त्तरि अच्। २आगन्तरि ३देशभेदे पु०। धूमा०वुञ् आवयकः। आवयदेशभवे त्रि०। [आच्छादके वस्त्रादौ।

आवरक न० आ+वृ–करणे अप् संज्ञायां वुन्। अपवरके,

आवरण न० आव्रियते देहः चैतन्यं वाऽनेन आ+वृ–करणे ल्युट्। (ढाल) १चर्म्मफलके। वेदान्तिमतसिद्धे चैतन्यावरणे २अज्ञाने आवरणशक्तिशब्दे विवृतिः। ३आच्छादनसाधनमात्रे “तमस्तु नेत्रावरणं प्रवृत्य” रघुः “स्फुटमिवावरणं हिममारुतैः” माघः “लब्धान्तरा सावरणेऽपि गेहे” रघुः पुरादिषु आच्छादनसाधने ४प्राचीरादौ च यथा काश्यां सप्तावरणानि। वेड़ा) ५वेष्टने भावे ल्युट्। ६आवृतौ” “हृदयावरणं नित्यं कुर्य्याच्च मितमध्यगः” सुश्रु०। “स्रोतसां भेदकोयश्च तेषां चावरणे रतः” मनुः। “सूर्य्ये तपत्यावरणाय दृष्टेः” “तस्य सावरणदृष्टसन्धयः” रघुः “नलिनीदलकल्पितं स्तनावरणम्” शकु०

आवरणशक्ति स्त्री आवरणे शक्तिः आवृणोति संज्ञायां कर्त्तरि ल्युट् कर्म्म धा०वा। वेदान्तिमतसिद्धे अज्ञानस्य चैतन्यापिधानशक्तिभेदे यथोक्तं वेदा०सा० आवरणशक्तिस्तावदल्पोऽपि मेघोऽनेकयोजनायतमादित्यमण्डलमवलोकयितृनयनपथपिधायकतया यथाच्छादयतीव तथाऽज्ञानं परिच्छिन्नमप्यात्मानमपरिच्छिन्नमसंसारिणमवलोकयितृबुद्धिपिधायकतयाच्छादयतीव तादृशं सामर्थ्यम्। तदुक्तं “घनच्छन्नदृष्टिर्घनाच्छन्नमर्कं यथा निष्प्रभं मन्यते चातिमूढः। तथा बद्धवद्भाति यो मूढदृष्टेः स नित्योपलब्धिस्वरूपोऽहमात्मा” अनयावृतस्यात्मनः कर्त्तृत्वभोक्तृत्वसुखित्वदुःखित्वादिसंसारसंभावनाऽपि भवति यथा स्वाज्ञानावृतायां रज्ज्वां सर्पत्वसम्भावना”।

आवरसमक न० अवरं समानाम् एक० त० “चौरावरसमात् वुञ्” पा०नि० स्वार्थः अवरसमे वर्षस्याद्यकाले देयस्वरूपम् वुञ्। वर्षस्याद्यसमये देये ऋणे।

आवर्जित त्रि०आ+वृज–णिच्–क्त। १दत्ते २त्यक्ते “न हि तेन पथा तनुत्यजस्तनयावर्ज्जितपिण्डकाङ्क्षिणः” नूनमावर्जितं मया” “हविरावर्ज्जितं होतस्त्वया विधिवदग्निषु” इति च रघुः। ३निम्नीकृते च ‘अधःप्रस्थापिताश्वेन समावर्ज्जितकेतुना” “आवर्ज्जितजटामौलिविलम्बिशशिकोटयः” कुमा०।

आवर्त्त पु० आ+वृत–भावादौ घञ्। चक्राकारेण जलस्य स्वयं १भ्रमणे, (घुरणी) ग वाख्ये घोटकचिह्ने २रोमसंस्थानभेदे राजावर्त्तनामके ३मणौ ४आवर्त्तने,। ५मेघाधिपभेदे च ६माक्षिकधातौ न०। “रूपं तमावर्त्तमनोज्ञनाभिः” रघुः “तथापि ममतावर्त्ते मोहगर्त्ते निपातिताः” देवीमा० “त्रियुते, शाकवर्षे तु चतुर्भिः शेषिते क्रमात्। आवर्त्तं विद्धि संवर्त्तं पुष्करं द्रोणमम्बुदम्। आवर्त्तो निर्ज्जलोमेघः संवर्त्तश्च बहूदकः। पुष्करोदुष्करजलो द्रोणः सस्यप्रपूरकः” ज्यो०त०। “आवर्त्तिनः शुभफलप्रदशुक्तियुक्ता आपन्नदेवमणयोभृतरन्ध्रभागाः। अश्वा व्यधुर्वसुमतीमतिरोचमानास्तूर्णं पयोधय इवोर्मिभिरापतन्तः” माघः। “आवर्त्तिनः दशावर्त्तयुक्ताः प्रशस्तवाजिनि। ते च “द्वावुरसौ शिरस्यौ द्वौ द्वौ द्वौ रन्ध्रोपरन्ध्रयोः। एकोभाले च पाने च दशावर्त्ता ध्रुवाः स्मृताः” पयोधिपक्षे जलभ्रमः” मल्लि० आन्यावर्त्तास्त्र अश्वशब्दे ५०२पृष्ठे उक्ताः। ७आवर्त्ताकारे देहिनां रोमसंस्थाने पु० अश्वानामपि उक्तध्रुवरूपावर्त्तोरोमसंस्थानविशेष एवेति बोध्यम्। णिच्-भावे अच्। ८पुनः पुनश्चालने ९परिघट्टने (आओटान) १० धातूनां द्रावणे (गलान) ११चिन्तायाञ्च चिन्तया हि चित्तं स्वविषयेषु पुनःपुनश्चाल्यते इति तस्याः तथात्वम्। आवर्त्त्यते समन्तात् अनेककोटिषु आ+वृत-णिच्-कर्म्मणि अच्। अनेककोटिस्पर्शिनि १२ संशये “भ्रमं संमोहमावर्त्तमभ्यासाद्विनिवर्त्तयेत्” भा०शा०२७२ अ० आवर्त्तमनेककोटिस्पर्शेन संशयम् अभ्यासात् तत्त्वाभ्यासात्” नीलक०। आवर्त्तते कर्त्तरि अच्। १३आवर्त्तमाने त्रि० “दक्षिणावर्त्तशङ्खोऽयं हन्त चूर्णीकृतोमया” सा०द० १४ संसारे पु० तस्यानियमावर्त्तमानत्वात्तथात्वम्। “इममावर्त्तं नावर्त्तन्ते” इति श्रुतिः “शङ्खनाभ्याकृतिर्योनिस्त्र्यावर्त्ता सा प्रकीर्त्तिता। तस्यास्तृतीये त्वावर्त्ते गर्भशय्या प्रतिष्ठिता” “शङ्खावर्त्तनिभाश्चापि उपर्य्युपरि संस्थिताः। गजतालुनिभाश्चापि वर्णतः सम्प्रकीर्त्तिताः” इति सुश्रुतोक्ते देहान्तर्वर्त्तिनि आवर्त्ताकारे १२ नाडीरन्ध्रविशेषभेदे च।

आवर्त्तक पु० आवर्त्तएव स्वार्थे कन् । १मेघाधिपभेदे "रजनिकरविम्बचुम्बितावर्त्तकाम्बुदविड़म्बकेन" काद०। तदीयास्तोयदेष्वद्य पुष्करावर्त्तकादिषु" कुमा० जातं वंशे भुवनविदिते पुष्करावर्त्तकानाम्" मेघदू० । आवर्त्त इव कायति कै—क । २आवर्त्ताकारे आवर्त्त शब्दोक्ते अश्वरोमचिह्नभेदे आवर्त्तयति आ—वृत-णिच् ण्वुल्। ३पुनः पुनरावर्त्तके त्रि०

आवर्त्तकी स्त्री आवर्त्त इव कायति प्रकाशते कै—क—गौ० ङीष् । कोङ्कणे (भगतबल्ली) प्रसिद्धे लताभेदे सा च विषाणाकारा रक्तपुष्पी रक्ताकारा पीतकीलकयुक्ता चर्म्मरञ्जनकारिणी "कषायाम्ला शीतवीर्य्यकारिणी पित्तनाशिनी" वैद्य० २भद्रदन्तिकायां च राजनि० ।

आवर्त्तन न० आ+वृत—आधारे ल्युट् । सूर्यस्य पश्चिमदिगवस्थितच्छायायाः १पूर्व्वदिग्गमनसमये मध्याह्नकाले "आवर्त्तनात् पूर्व्वाह्णोऽपराह्णस्तु ततःपरम्" स्मृतिः । "आवर्त्तनसमीपे वा इङ्गिमाद्यमुपक्रमेत्" स्मृतिः आ+वृत—णिच्-भावे ल्युट् (आवोटान) २आलोडने ३गुणने च धातूनां ४५।वधे(गलान) । आवर्त्तयति संसारचक्रम् आ+वृत-णिच्-कर्त्तरि ल्यु।५विष्णौ "आवर्त्तनोनिवृत्तात्मा" विष्णु सह० ६जम्बुद्वीपोपद्वीपभेदे च । आवर्त्त्यतेऽनया ल्युट् ङीप् । ७दर्व्याम् स्त्री आधारे ल्युट् ङीप् । (मुचि) धातुद्रव्यद्रावणाधारे ८मूषायाम् स्त्री करणे ल्युट् । ६वेष्टने प्राचीरादौ न०।

आवर्त्तनीय त्रि० आ+वृत—णिच्-अनीयर् । १द्रावणीये धात्वादौ २आलोड्ये दुग्धादौ गुण्ये ३अङ्कादौ च । पुनः पुनः ४पाठ्ये पदादौ च।"त्रिङ्गिपदमावर्त्तनीयम्" सा०कौ०

आवर्त्तमणि पु० आवर्त्ताकारो मणिः । राजावर्त्तमणौ ।

आवर्त्तिक त्रि०आवर्त्तः प्रयोजनमस्य ठक् । आवर्त्ताकारधूमसाधने धूपादौ "आवर्त्तिकैर्गुरुभिर्धूपैरामोदिमन्दिरे" काशी० ।

आवर्त्तित त्रि० आ+वृत—णिच्-क्त । १कृतावर्त्तने दुग्धादौ द्राविते २धात्वादौ, ३गुणिते ४अभ्यस्ते च । आवर्त्तो जातोऽस्य तार० इतच् । ५जातावर्त्ते जलादौ ।

आवर्त्तिन् त्रि०आ+वृत-णिनि । १पुनःपुनर्वर्त्तनशीले "आब्रह्मभुवनाल्लोकाः पुनरावर्त्तिनोऽर्जुन:" गीता "कालान्तरावर्त्तिशुभाशुभानि" कि० । णिच्-णिनि । आवर्त्तके २द्रावके ३दुग्धादेरावर्त्तके स्त्रियामुभयतो ङीप् ।

आवर्त्तिनी स्त्री आवर्त्तः वस्त्राकारवेष्टनमस्त्यस्याः इनि ङीप्। अजशृङ्गीवृक्षे राजनि० ।

आव(ब)र्हित त्रि० आ+वृह-उद्यमे णिच्—क्त आ+वर्ह—हिंसायां क्त वा । उत्पाटिते उन्मूलिते ।

आव(लि)ली स्त्री आ+वल-इन् वा ङीप् । १श्रेणौ सजातीयसमुदायेन कृतपङ्क्तौ "इत्यावलिः धनावलिरिति। "के वा न सन्ति भुवि तामरसावतंसा हंसावलीवलयिनो जलसन्निवेशाः" उद्भटः । "द्विजावलीबालनिशाकरांशुभिः" माघः। "व्यलोकयच्चम्पककोरकावलीः" नैष० २परम्परायाञ्च । [च।

आवलित आ+वल—चलने क्त। ईषच्चलिते सम्यक्चलिते

आवशीर पु० अवशीरदेशेभवः तस्य राजा वा अञ् । १अवशीरदेशभवे जने २तन्नृपे च।"आवशीरांश्च योधांश्च अहिच्छत्रं च योधयन्" भा० व० २५२ । स च देशः वत्सभूमेः पूर्व्वदिग्वर्त्ती "पूर्व्वां दिशं विनिर्ज्जित्य वत्सभूमिं तयागमत्" इत्यनन्तरश्लोके पूर्व्वां दिशमित्यभिधानात् ;

आवश्यक न० अवश्यं भावः मनोज्ञा० वुञ् । १अवश्यंभावे नैयत्ये "ण्य आवश्यके" पा० अवश्य भवः वा० २वुञ् २नियते त्रि० "एतेष्वावश्यकस्त्वसौ" भापा०" ३अवश्यकर्त्तव्ये नियमात् कर्त्तव्ये "उत्थायावश्यकं कृत्वा कृतशौचः समाहितः" मनुः । कालप्रतीक्षाराहित्येन ४निरवकाशे च "नेहैतात्र विशेषेऽन्यथानन्यत्वावश्यकाद्विधेः" पु० "आवश्यकात् निरवकाशात्" मल्ल०त०रघु० ।

आवश्यपुत्रक न०न वश्यः अवश्यः पुत्रः तस्य भावः मनोज्ञा० वुञ् । पुत्रस्य वश्यत्वाभावे ।

आवसति स्त्री वसत्यत्र गृहे वसतिः रात्रिः सम्यग्वसतिः प्रा० स० । निशीथे वसतेः सम्यक्त्वञ्चावश्यगृहवासयोग्यत्वं तच्चार्द्धरात्रेऽवश्यं भवतीति तस्य तथात्वम् ।

आवसथ पु० आवसत्यत्र आ+वस—अथच् । १वसतिस्थाने, २विश्रामस्थाने ३ग्रामे ४व्रतभेदे च । तत्र वासस्थाने "दूरादावसथान्मूत्रं दूरात् पादावसेचनम्" मनुः विश्रामस्थाने । "आसनावसथौ शय्यामनुव्रज्यामुपासनाम्" मनुः विश्रामस्थाने "स किलाश्रममन्त्यमाश्रितो निवसन्नावसथे पुराद्बहिः" रघुः । ग्रामे "सहर्षं त आवसथान् मापयाञ्चक्रे" क्षा०उ० । ५आर्य्याच्छन्दोरचिते कोषभेदे । [गृहस्थे ।

आवसथिक त्रि० आवसथे गृहे वसति ठण् स्त्रियां ङीप् ।

आवसथ्य पु० आवसथस्यायं ञ्य । १गृहसम्बन्धिनि लौकिकेऽग्नौ "आवसथ्यं द्विजाः प्राङ्गदीप्तमग्निं महाप्रभम्" भा०व० २१अ० । "आवसथ्यस्तथाधाने" इत्युक्ते

अग्न्याधानकर्माङ्गे २वह्नौ च । "आवसथ्याहवनीयौ दक्षिणाग्निस्तथैव च । अन्वाहार्य्यो गार्हपत्य इत्येते पञ्च वह्नयः इत्युक्ते यज्ञाङ्गवह्निपञ्चकान्तर्गते३वह्निभेदे च । स च गृह्याग्निः आवसथशब्दार्थगृहसम्बन्धाच्च तस्य गृह्यत्वम् । [सीमान्तवासिनि स्त्रियां ङीप् ।

आवसान त्रि० अवसानमभिजनोऽस्य तस्य० अञ् । ग्राम-

आवसानिक त्रि० अवसाने तत्काले भवः ठञ् । अव-सानकाले (शेषकाले) भवे स्त्रियां ङीप् ।

आवसित न० आ+अव+सो—क्त । १पक्वधान्ये, मर्द्दनानन्तर-मपनीततृणे राशीकृते २धान्ये च । ३निर्णीते ४अव-धारिते ५समाप्ते च त्रि० ।

आवस्थिक त्रि० अवस्थायां भवः ठञ् । कालकृतावस्थाभवे "आवस्थिकं क्रमञ्चापि मत्वा कार्य्यं निरूहणम्" सुश्रु० ।

आवह पु० आवहति आभिमुख्येन गच्छति आ+वह-अच् । सप्तस्कन्धापन्नवायोः प्रथमे स्कन्धे १भूवायौ । "भूवायुरावह इह प्रवहस्तदूर्द्ध्वम्" सि०शि० । अनिलशब्दे १६४ पृष्ठे विवृतिः "आवहः प्रवहश्चैव विवहश्च समीरणः । परावहः संवहश्च उद्वहश्च महाबलः । तथा परिवहः श्रीमान्" हरिवं० २२६ अ० । आवहति प्रापयति आ+वह—अच् । २प्रापके त्रि० "क्लेशावहा भर्त्तुरलक्षणाहम्" रघुः । फलैधःकुसुमस्तेयमधैर्य्यञ्च मलावहम्" मनुः । "समुत्सृजेत् साहसिकान् सर्वभूतभयावहान्" मनुः ।

आवहमान त्रि० आ+वह—शानच् । क्रमागते ।

आवाप पु० आ+वप—आधारे वा घञ् । १आलवाले तत्र हि जलसेकेन वृक्षान् आवपन्तीति तस्य तथात्वम् २धान्यादेः पात्रभेदे, (यल्या) भावे घञ् । ३समन्तात् वपने । "शस्यावापे कर्षीवलाः" भार० ४धान्यादिस्थापने ५शत्रुचिन्तने ६पर-राष्ट्रचिन्तने, "तन्त्रावापविदा योगैर्मण्डलान्यधितिष्ठता" माघः । ७प्रधानहोमे च । ८आक्षेपे, "आवापो द्वापाभ्याम्" सा० द० । आक्षेपोत्क्षेपाभ्यामित्यर्थः आ+वप-कर्म्मणि घञ् । ९आवपनीये प्रक्षेपणीये "पञ्चच्छन्दा आवाप चार्वेवःपवमान" इति ताण्ड्य० ब्रा० अवापः आवनीयः आवापश्च स्तोमवृद्धये साम्न आक्षेप इति भा० १०वलये च" । ईषदुह्यतेऽत्र आधारे घञ् । ११निम्नोन्नतभूमौ तत्र हि शस्यादिक न सम्यक् वप्तुं शक्यते इति तस्यास्तथात्वम् ।

आवापक पु० आ+वप—कर्म्मणि घञ् संज्ञायां कन् । १प्रकोष्ठा-भरणे वलयादौ । कर्त्तरि ण्वुल् । २आवपनकर्त्तरि त्रि० ।

आवापन न० आ+वप—णिच्-करणे ल्युट् । (ताँत) १सूत्रयन्त्रे । भावे ल्युट् । २केशादेः सम्यग् मुण्डने च ।

आवापिक न० आवापाय साधु ठक् । आवापे साधौ ।

आवारि न० समन्तात् व्रियते आच्छाद्यते आ+वृ—बा० इण् । १समन्तादाच्छाद्ये हट्टस्थाने शब्दचि० । २सम्यग्जल-युक्ते त्रि० ।

आवाल न० आवाल्यते जलमनेन आ+वल सञ्चरणे णिच् करणे अच् । १आलवाले वृक्षादेरधोभागे मृदादिनिर्म्मिते जलाधारे सेतुभेदे । आ+वन—भावे घञ् । २सञ्चारे ।

आवास पु० आ+वस—आधारे घञ् । १वासस्थाने गृहादौ "आवासोन्मुखबर्हिणान्" रघुः । आवासमेवोपशमाय शोभम्" भा० आ० ११६ अ० । भावे घञ् । २सम्यग्वासे

आवाहन न० आ+वह—णिच् ल्युट् । सान्निध्याय देवा-नामाह्वाने । "चकारावाहनं तत्र भागार्थं सर्वदैवतम्" पुरा० 'प्रतिमास्थानेष्वप्सु नो नावाहनविसर्ज्जने" ति० त० पुरा० ।

आवाहनी स्त्री आवाह्यतेऽनया आ+वह—णिच्—करणे ल्युट् ङीप् । देवाह्वानार्थे "हस्ताभ्यामञ्जलिं बद्ध्वाऽनामिका मूलपर्व्वणोः । अङ्गुष्ठौ निक्षिपेद्यत्र मुद्रा सावाहनी स्मृता" तन्त्रोक्तलक्षणे मुद्राभेदे ।

आविक स० अविना तल्लोम्ना निर्म्मितं ठक् । १कम्बले । "सर्वञ्च तान्तवं रक्तं शाणक्षौमाविकानि च" मनुः अवे-र्मेषस्य २सम्बन्धिनि त्रि० "आविकं सन्धिनीक्षीरं विव-त्सायाश्च गोः पयः" । "वस्त्रोवस्त्रानुपूर्व्येण शाणक्षौमा-विकानि च" मनुः । कौशेयाविकयोरूषैः कुतपानामरि-ष्टकैः" मनुः ।

आविकसौत्रिक न० सूत्रमेव सौत्रं कर्म्म० आविकसूत्रेण निर्म्मितम् टक् । मेषलोमनिर्म्मिते । "वैश्यस्याविक-सौत्रिकम्" मनुः ।

आविक्य न० आविकानां भावः पुरो० यक् । आविकसम्बन्धित्वे

आविग्न पु० आ+विज—कर्त्तरि क्त । उद्विग्ने (पाणिआमला) वृक्षे पु० ।

आविज्ञान्य न० अविज्ञानमेव चातु० स्वार्थे ष्यञ् । विज्ञान-हीने "तदाविज्ञान्यमिव हवींषि" शत० ब्रा० "आवि-ज्ञान्यं विज्ञानविहीनमिव" भा० । [विदूर्य्ये" पा० ।

आविदूर्य्य न० अविदूरस्य भावः ष्यञ् । सन्निकर्षे । "अभेषा-

आविद्ध त्रि० आ+व्यध—क्त । १ताडिते २विद्धे ३छिद्रिते ४क्षिप्ते च "नश्यतीषुर्यथाऽऽविद्धः" मनुः । [पाठायाम् ।

आविद्धकर्णी स्त्री आविद्धौ कर्णाविव पत्रमस्याः गौ० ङीष् ।

आविध पु० आविध्यतेऽनेन आ+व्यध— घञर्थे क। काष्ठादिवेधनसाधने (भमर) (तुरपिन) सूच्याकाराग्रे अस्त्रे।

आविर्भाव पु० आविस्+भू—घञ्। १प्रकाशे सांख्यमतसिद्धे उत्पत्तिस्थानीयेऽभिव्यक्तिस्वरूपे २भावधर्मभेदे तथा हि नैयायिकादयः क्रियानिरोधबुद्धिव्यपदेशार्थक्रियाव्यवस्थाभेदात् कार्य्यस्य कारणात् भिन्नतया कारणादुत्पत्तिरित्यूचुः तदेतन्मतमनूद्य सां०त०कौ० दूषयित्वा सतामेव कार्य्याणामाविर्भावः इति स्थिरीकरणेन कार्य्यकारणयोरभिन्नत्वं समर्थितम् यथा तत्रापि 'क्रियानिरोधबुद्धिव्यपदेशार्थक्रियाव्यवस्थाभेदाश्च नैकान्तिकं भेदं साधयितुमर्हन्ति एकस्मिन्नपि तत्तद्विशेषाविर्भावतिरोभावाभ्यामेतेषामविरोधात् यथा हि कूर्म्मस्याङ्गानि कूर्मशरीरे निविशमानानि तिरोभवन्ति निःसरन्ति चाविर्भवन्ति न तु कूर्म्मतस्तदङ्गान्युत्पद्यन्ते प्रध्वंसन्ते वा एवमेकस्या मृदः सुवर्णस्य वा घटमुकुटादयोविशेषा निःसरन्त आविर्भवन्त उत्पद्यन्त इत्युच्यन्ते न पुनरसतामुत्पादः सतां वा निरोधः। यथाह भगवान् कृष्णद्वैपायनः 'नासतोविद्यते भावो नाभावो विद्यते सत इति"। यथा कूर्म्मः स्वावयवेभ्यः सङ्कोचिविकाशिभ्योन भिन्नः एवं घटमुकुटादयोऽपि मृत्सुवर्णादिभ्योन भिन्नाः। एवञ्चेत् तन्तुषु पट इति व्यपदेशो यथेह वने तिलका इत्युपपन्नः। न चार्थक्रियाभेदोऽपि भेदमापादयति एकस्यापि नानार्थक्रियादर्शनात् यथैक एव वह्निर्दाहकः प्रकाशकः पाचकश्चेति। नाप्यर्थक्रियाव्यवस्था वस्तुभेदे हेतुः तेषामेव समस्तव्यस्तानामर्थक्रियाव्यवस्थादर्शनात् यथा प्रत्येकं विष्टयो वर्त्मदर्शनलक्षणामर्थक्रियां कुर्व्वन्ति न तु शिविकावहनं, मिलितास्तु शिविकां वहन्ति एवं तन्तवः प्रत्येकं प्रावरणमकुर्व्वाणा अपि मिलिताः आविर्भूतपटभावाः प्रावरिष्यन्ति। स्यादेतत्। आविर्भावः पटस्य कारणव्यापारात् प्राक् सन्नसन् वा असंश्चेत् प्रागुत्तस्य सत उत्पादनम्। अथ सन्, कृतं तर्हि कारणव्यापारेण, न हि सति कार्य्ये कारणव्यापारप्रयोजनं पश्यामः। आविर्भावे चाविर्भावान्तरकल्पनेऽनवस्थाप्रसङ्गः। तस्मादाविर्भूतपटभावास्तन्तवः क्रियन्त इति रिक्तं वचः। अथासदुत्पद्यत इत्यत्रापि मते केयमसदुत्पत्तिः सती असती वा, सती चेत् कृतं तर्हि कारणैः, असती चेत्तस्या अप्युत्पत्त्यन्तरमित्यनवस्था। अथोत्पत्तिः पटान्नार्थान्तरम् अपि तु पट एवासौ तथापि यावदुक्तं भवति पट इति तावदुक्तं भवत्युत्पद्यत इति। ततश्च पट इत्युक्ते उत्पद्यत इति न वाच्यं पौनरुक्त्यात् विनश्यतीत्यपि न वाच्यं उत्पत्तिविनाशयोर्युगपदेकत्र विरोधात् तस्मादियं पटोत्पत्तिः स्वकारणसमवायो वा स्वसत्तासमवायो वा उभयथापि नोत्पद्यते अथ च तदर्थानि कारणानि व्यापार्य्यन्ते एवं पटादेराविर्भावेऽपि कारणापेक्षेत्युपपन्नम्। न च पटरूपेण कारणानां सम्बन्धः, तद्रूपस्याक्रियत्वात् क्रियासम्बन्धित्वाच्च कारकाणाम् अन्यथा कारकत्वाभावात्। तस्मात् सत्कार्य्यमिति सुष्ठूक्तम्" सा०कौ०। प्रपञ्चस्तु अभिव्यक्तिशब्दे २०० पृष्ठादौ दृश्यः। वाह्यमेयविलक्षणतापादकः कश्चनान्तरो धर्मः सत्त्वं तस्योद्रेकः रजस्तमसी अभिभूयाविर्भावः" सा०द०। देवादीनां मनुष्याद्याकारग्रहणरूपे ३अवतारे च। "तदा मे समसाध्यातो दयासिन्धुर्जनार्द्दनः। भक्तानामनुकम्पार्थं यस्याविर्भावमिच्छति जैमि०भा०।

आविर्भूत त्रि० आविस्+भू—कर्त्तरि क्त। १प्रकटिते २अभिव्यक्ते "आविर्भूता महाघोरा योगिनीकोटिभिः सह" योगि०त० आविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम्" मेघदू० "आविर्भूतपटभावाः" सा०कौ०।

आविल त्रि० आविलति दृष्टिं स्तृणाति विल—स्तृतौ क। १कलुषे अथ बिल भेदने बिलप्रकृतिकत्वात् वर्ग्यवमध्य इतिरायमु० "समलक्ष्यत बिभ्रदावि(वि)लाम्" "तस्याबि(वि)लाम्भःपरिशुद्धिहेतोः"। "ननन्दुरानन्दजलावि(बि)लाक्षाः," रघुः "यथा त्वदीयैश्चरितैरनावि(बि)लैः" कुमा।

आविष्करण न० आविस्+कृ—भावे ल्युट् षत्वम्। १प्रकाशने "असूयया गुणेषु दोषाविष्करणम्" सि०कौ० करणे ल्युट्। २प्रकाशसाधने स्त्रियां ङीप्। घञ्। आविष्कारोऽप्युभयत्र पु० आविष्कारातिशयश्चाभिधेयवत्प्रतीयते" सा०द०।

आविष्कर्त्तृ त्रि० आविस्+कृ—तृच्। प्रकाशके स्त्रियां ङीप्।

आविष्कृत त्रि० आविस्+कृ—कर्मणि क्त। प्रकाशिते। "कृतापचारोऽपि परैरनाविष्कृतविक्रियः" माघः "बाल्यादनाविष्कृतलाञ्छनेन" कुमा० "आविष्कृतमुदन्वता" रघुः

आविष्ट त्रि० आ+विश—क्त। १भूतादिग्रस्ते, २आवेशयुक्ते, ३निविष्टे ४व्याप्ते च।

आविस् अव्य० आ+अव—इसुन्। प्रकाशे। कृभ्वस्तियोगेऽस्य गतित्वम्। एतेन सह भूधातुः प्रकाशार्थे यथा आविर्भावः, कृञ्धातुः प्रकाशकरणेऽर्थे यथा आविष्कारः। "स्वरादिपाठात् अव्ययत्वम् "तेषामाविरभूत् ब्रह्मा परिम्लानमुखश्रियाम्" कुमा० देवानां कार्य्यसिद्ध्यर्थमाविर्भवति सा यदा" देवीमा०। "आचार्य्यकं विजयि मान्म-

यमाविराशीत्" "शरसन्ततमखण्डितमाविष्कुरुते भुजामूलम्" सा०द० ।

आविस्तराम् अव्य० आविस्+तरप् आमु । अतिशय प्रकाशे "आविस्तरां वा अग्निः कर्म्मणा" श०ब्रा०। तमप् आमु आविस्तमाम् । अत्यन्तप्रकाशे ।

आवी स्त्री अवीरेव स्वार्थे अण् ङीप् । रजस्वलायां १नार्य्यां २गर्भवत्याञ्च । "गर्भस्पन्दनमावीनां प्रणाशःश्यावपाण्डुता" सुश्रु० ।

आवीत त्रि० आ+व्ये—क्त । १समन्तात्स्यूते उत्क्षिप्य २धृते च । भावे क्त । ३सम्यक् स्यूतौ ४उत्क्षिप्य धारणे च न० ।

आवीतिन् पु० आवीतमनेन इष्टा० इनि । "उद्धृते दक्षिणे पाणावुपवीत्युच्यते बुधैः । सव्ये प्राचीन आवीती निवीती कण्ठलम्बिते" मनूक्ते सव्यपाणिं बहिष्कृत्य दक्षिणस्कन्धोपरिधृतयज्ञसूत्रे प्राचीनावीतिनि । [माध्योक्तौ जनके ।

आवुक पु० अवति रक्षति अव—बा० उण् संज्ञायां कन् ।

आवीरचूर्ण पु० आ समन्तात् विशेषेण ईर्य्यते क्षिप्यते आ+वि+ईर-घञ् कर्म्मधा०।(आवीर) इति ख्याते फल्गुनि "आवीरचूर्णं रुचिरं गृह्यतां परमेश्वर" । पुरा०

आवृत् स्त्री आ+वृत-सम्प० क्विप् । १आवर्त्तने २भ्रामणे ३पुनःपुनश्चालने "सूर्य्यस्यावृतमन्वावर्त्ते दक्षिणामन्वावृतम्" अथ० १०,५,३७, ४पुनःपुनरेकजातीयक्रियाकरणे । आधारे क्विप् । ५परिपाट्याम् अनुक्रमे ६इतिकर्त्तव्यताप्रकारे । "अनयैवावृता कार्य्यं पिण्डनिर्वापणं बुधैः" मनुः। "आवृते सोमपीतये" ऋ० २,४२,२, ७संस्कारे च । "अ "मन्त्रिका तु कार्य्या वै स्त्रीणामावृदशेषतः । संस्कारार्थं शरीरस्य यथाकालं यथाक्रमम्" मनुः । ८तूष्णीम्भावे च । "आवृतैव पर्य्यग्नि कृत्वोदकं नयन्ति" आश्व०गृ० । "आवृतैव तूष्णीमेवेत्यर्थः" वृत्तिः । कर्त्तरि क्विप् । ९आवर्त्तमाने त्रि० ।

आवृत त्रि० आ+वृ—क्त । १कृतावरणे अप्रकाशीकृते आच्छादिते "अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः" गीता एतच्चानावृतत्वेतविषयम् आवृते तु पुनर्मार्गंत्वेनेऽपि दोष एवेति" मिता० "ब्राह्मणादुग्रकन्यायामावृतो नाम जायते" मनूक्ते २संकीर्णवर्णभेदे पुंस्त्री स्त्रियां जातित्वात् ङीप् ।

आवृति स्त्री आ+वृ—क्तिन् । आवरणशब्दार्थे ।

आवृत्त त्रि० आ+वृत—क्त । १पुनःपुनरभ्यस्ते २आवर्त्यमाने च ३परावृत्ते ४प्रतिनिवृत्ते च "आवृत्तानां गुरुकुलात् विप्राणां पूजकोभवेत्" मनुः । "कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्" कठोप० "आवृत्तं व्यावृत्तं चक्षुः श्रोत्रादिकमिन्द्रियजातं विषयाद्यस्य" भा० ।

आवृत्ति स्त्री आ+वृत—क्तिन् । १पुनः पुनरभ्यासे २भूयएकजातीयक्रियाकरणे "आवृत्तिः सर्व्वशास्त्राणां बोधादपि गरीयसी" उद्भटः । "उदयावृत्तिपथेन नारदः" रघुः। "एकद्रव्ये कर्म्मावृत्तौ सकृन्मन्त्रवचनम्" कात्या० १,७,९। "आवृत्तिरसकृदुपदेशात्" शा०सू०। ३प्रत्यावृत्तौ ४"पुनरागतौ "अनावृत्तिः शब्दात्" शा०सू० "तत्र प्राप्तविवेकस्यानावृत्तिः" सां०सू० । "यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः" गीता । "गुर्व्वीं कामापदं हन्तुं कृतमावृत्तिसाहसम्" किरा० । "तपोवनावृत्तिपथं गताभ्याम्" रघुः ।

आवृत्तिदीपक न० आवृत्त्या दीपकम् । दीपकावृत्तिरूपे अर्थालङ्कारभेदे तल्लक्षणं २०० उक्तम् ।

आवृष्टि स्त्री आ+वृष-क्तिन् । सम्यग्वर्षणे "भूयश्च शतवार्षिक्यामनावृष्ट्यामनम्भसि" देवीमा० ।

आवेग पु० आ+विज—घञ् । उत्कण्ठाजनके त्वरान्विते च मानसे वेगे । वेगश्च क्रियाजन्यः गुणविशेषः मानसवेगस्योत्कण्ठादिसाधनत्वे आवेगत्वम् । "सावेगमपाङ्गुलिरस्य तूणौ" किरा० । २व्यभिचारिभावभेदे । व्यभिचारिणस्तु सा०द० दर्शिता यथा निर्वेदावेगदैन्यश्रममदजड़ता औग्र्यमोहौ विबोधः" इत्यादयः । तत्र आवेगः सम्भ्रमस्तत्र वर्षजे पीड़िताङ्गता । उत्पातजे स्रस्तताङ्गे धूमाद्याकुलताग्निजे । राजविद्रवजादेस्तु शस्त्रनागादियोजनम् । गजादेः स्तम्भकम्पादिः पांश्वाद्याकुलतानिलात् । इष्टाद्धर्षाः शुचोऽनिष्टाज्ज्ञेयाश्चान्ये यथायथम्" ।

आवेगी स्त्री आवेगोऽस्त्यस्याः अर्श आद्यच् गौरा०ङीष् । वृद्धदारकवृक्षे ।

आवेदक त्रि० आ+विद—णिच्-ण्वुल् । १विज्ञापके "कृत्याचारव्यपेतेन मार्गेणाधर्षित परैः । आवेदयति चेद्राज्ञे व्यवहारपदं हि तदिति" स्मृत्युक्ते व्यवहारोत्थापके २वादिनि च

आवेदन न० आ+विद-णिच्-ल्युट् । १विज्ञापने व्यवहारोत्थापने (नालिशकरा) "राज्ञे कुर्य्यात् पूर्व्वमावेदनं यः" इति नारदः । आवेद्यते अनेन करणे ल्युट् । व्यावहारोत्थापके ३भाषापत्रे (आरजी) तल्लक्षणादि स्मृतौ दर्शितं यथा "प्रत्यर्थिनोऽग्रतोलेख्यं यथाऽऽवेदितमर्थिना । समामासतदर्द्धाहर्नामजात्यादि-

चिह्नितम्” या॰स्मृ॰। “निवेश्य कालं वर्षञ्च मासं पक्षं तिथिं तथा। वेलां प्रदेशं विषयं स्थानं जात्याकृती वयः। साध्यं प्रमाणं द्रव्यञ्च संख्यां नाम तथात्मनः। राज्ञां च क्रमशो नाम निवासं साध्यनाम च। क्रमात् पितॄणां नामानि पीड़ामाहर्त्तृदायकौ। क्षमालिङ्गानि चान्यानि पक्षं संकल्प्य कीर्त्तयेत्” कात्या॰। “अर्थवत्-क्रमसंयुक्तं परिपूर्णमनाकुलम्। साध्यवद्वाचकपदं प्रकृतार्थानुबन्धि च। प्रसिद्धमविरुद्धञ्च निश्चितं साधनक्षमम्। संक्षिप्तं निखिलार्थञ्च देशकालाविरोधि च। वर्षर्त्तु-मासपक्षाहर्वेलादेशप्रदेशवत्। स्थानावसथसाध्याख्या-जात्याकारवयोयुतम्। साध्यप्रमाणसंख्यावदात्मप्रत्यर्थिनाम च। परात्मपूर्व्वजानेकराजनामभिरङ्कितम्। क्षमालिङ्गा-त्मपीड़ावत् कथिताहर्त्तृदायकम्। यदावेद्यते राज्ञे तद्भाषेत्यभिधीयते” नार॰ अत्र विशेषः वीरमि॰। ‘देशश्चैव तथा स्थानं सन्निवेशस्तथैव च। जातिः संज्ञा निवासश्च प्रमाणं क्षेत्रनाम च। पितृपैतामहञ्चैव पूर्व्वराजानुकीर्त्त-नम्। स्थावरेषु विवादेषु दशैतानि निवेशयेत्” कात्या॰ संख्याविशेषनिर्द्देशे ‘आसनं शयनं यानं ताम्रं कांस्य-मयोमयम्। धान्यमश्मसमयं यच्च द्विपदञ्च चतुष्पदम्। मणिमुक्ताप्रवालानि हीरकं रूप्यकाञ्चनम्। यदि द्रव्यसमूहः स्यात् संख्या कार्य्या तदैव तु। यस्मिन् देशे च यद्द्रव्यं येन मानेन मीयते। तेन तस्मिंस्तदा संख्या कर्त्तव्या व्यवहारिभिः” हारी॰ “देशकालविहीनश्च द्रव्यसंख्या विवर्ज्जितः। क्रियामानविहीनश्च पक्षोनादेय इष्यते” कात्या॰। क्रिया प्रमाणं, मानं साध्यपरिमाणम्। भाषादोषाश्च नारदोक्ता यथा। “अन्यार्थमर्थहीनञ्च प्रमाणागमवर्ज्जितम्। लेख्यहीनाधिकं भ्रष्टं भाषादोषा उदाहृताः” इति विभज्य तेषां लक्षणान्याह स एव। “अर्थे साधारणेऽप्येकोऽसम्बन्धोऽथाभियुक्तकः। लेखयेत् यन्तु भाषार्थमन्यार्थं तं विदुर्बुधाः। ब्रह्महायमिति द्वेषात् क्रोधाद्वापि वदेत्तु यः। साध्यञ्च मोचयेत् पश्चादर्थहीनन्तु तं विदुः। गणिते लिखिते मेये तथा क्षेत्रगृहा-दिषु। यत्र संख्या न निर्द्दिष्टा सा प्रमाणविवर्ज्जिता। विद्यया प्राप्तमर्थार्थं लब्धं क्रीतं क्रमागतम्। न त्वेवं लिख्यते यत्र सा भाषा स्यादनागमा। समा मासस्तथा पक्षास्तिथिर्वारस्तथैव च। यत्रैतानि न लिख्यन्ते लेख्य-हीनां तु तां विदुः” लेखयित्वा तु तां भाषामनि-र्दिष्टे तथोत्तरे। निर्दिशेत् साक्षिणः पूर्व्वमधिकां तां

विनिर्दिशेत्। यत्र स्यात्तु यथापूर्व्वं निर्दिष्टं पूर्व्व-वादिना। सन्दिग्धमेव लेख्येन भ्रष्टां भाषां तु तां विदुः”। भाषादोषान्तरमाह” कात्या॰। अप्रसिद्धं नि-राबाधं निरर्थं निःप्रयोजनम्। असाध्यं वा विरुद्धं वा पक्षाभासं विवर्ज्जयेत्”। तत्र अप्रसिद्धमाह वृह॰ “न केनचित् कृतो यस्तु सोऽप्रसिद्ध उदाहृतः”। यथा “शशशृङ्ग कृतं क्षेत्रमपहृतम्” वीरमि॰ “मदीयं शशविषाणं गृहीत्वा न प्रयच्छति” मिता॰ ‘स्वल्पापराधः स्वल्पार्थो निरर्थक इति स्मृतः” वृह॰ “यथाहमनेन सस्मितमीक्षित इति” स्मृति-चन्द्रिका। “कार्य्यबाधाविहीनस्तु विज्ञेयो निष्प्रयो-जनः” वृह॰। “यथाऽयं देवदत्तो मदीयगृहसन्निधौ सुस्वरमधीते इत्यादि” मिता॰ निरर्थकनिष्प्रयोजनौ अन्यथाऽपि वृह॰ लक्षितौ यथा “कुसीदाद्यैः पदै-र्हीनो व्यवहारो निरर्थकः। वाक्पारुष्यादिभिश्चैव विज्ञे-यो निष्प्रयोजनः”। “कुसीदऋणदानं तत्प्रभृतिभिस्त-दृशभिरर्थविषयव्यवहारैः हीनो निरर्थकः, पारुष्यादिभि-र्हिंसात्मकैश्चतुर्भिर्हीनो निष्प्रयोजनः” वीरमि॰। असा-ध्यविरुद्धावाह वृह॰। “ममानेन प्रदातव्यं शशशृङ्गकृतं धनुः। असम्भाव्यमसाध्यं तं पक्षमाहुर्मनीषिणः। यस्मिन्नावेदिते पक्षे प्राड्विवेकोऽथ राजनि। पुरे राष्ट्रे विरोधः स्याद्विरुद्धः सोऽभिधीयते” अन्येऽपि पक्षाभासाः स्मृतिचन्द्रिकायामुक्ता यथा “भिन्न-क्रमो व्युत्क्रमार्थः प्रकीर्णार्थो निरर्थकः। अतीत-कालोऽथ हिन्नःपक्षोनादेय इष्यते। यथास्थानानिवेशेन नैव पक्षार्थकल्पना। गम्यते तेन पक्षः स भिन्नक्रम उदा-हृतः”। व्यत्यस्ताक्षरसन्निवेशो भिन्नक्रम इत्यर्थः। व्युत्-क्रमार्थो व्यवहितान्वयेनार्थबोधकः। प्रकीर्णार्थोऽस-ङ्कलितार्थः। “मूलमर्थं परित्यज्य तद्गुणो यत्र लिख्यते। निरर्थकः स वै पक्षो भूतसाधनवर्ज्जितः। भूतकालमति-क्रान्तं द्रव्यं यत्र हि लिख्यते। अतीतकालः पक्षोऽसौ प्रमाणे सत्यविस्तृतः। यस्मिन् पक्षे द्विधा साध्यं भिन्नकाल-विमर्षणम्। विलक्ष्यते क्रियाभेदात् द्विष्टः स इह चोच्यते”। अन्ये च भाषाया दोषास्तत्रैवोक्ताः। “अन्याक्षरनिवेशेन अन्यथागमनेन च। आकुलं तु भवेल्लेख्यं क्रिया चैवा-कुला भवेत्। साधनं सह साध्येन निर्द्दिष्टं यत्र लेखयेत्। उक्तिक्रमविहीनत्वात् सोऽपि पक्षो न सिद्ध्यति। विरु-द्धश्चाविरुद्धश्च द्वावप्यर्थौ निवेशितौ। एकस्मिन् यत्र दृश्येते तं पक्षं दूरतस्त्यजेत्। परापरविरुद्धानि यः पदानि

निवेशयेत् । विरुद्धपदसंकीर्णा भाषा तस्य न सिध्यति" अनेकपदसंकीर्णस्य दुष्यत्वं च युगपत्तत्साधनायोग्यस्थले एव । क्रमेण तु तत्साधनयोग्यत्वे तदपि ग्राह्यमेव "बहु प्रतिज्ञं यत् कार्य्यं व्यवहारेषु निश्चितम् । कामं तदपि गृह्णीयाद्राजा तत्त्वबुभुत्सयेति" कात्या० उक्तेः भाषापत्रञ्च संस्कृतदेशभाषान्यतरेण यथाबोधं लेख्यम् मूर्खाणामपि वादिप्रतिवादि तादर्शनात् अतएव अध्यापनेऽपि तथात्वं विष्णु ध० उक्तम् । "संस्कृतैः प्राकृतैर्वाक्यैर्यः शिष्यमनुरूपतः । देशभाषाद्युपायैश्च बोधयेत् स गुरुः स्मृतः" इति । येन सर्वेषामवबोधस्तथा लेख्यम् व्य०त० रघु० । तत्र यावदुत्तरं पाण्डु लेखं कृत्वा शोधनीयम् यथोक्तं पूर्व्वपक्षं स्वभावोक्तं प्राड्विवेकोऽभिलेखयेत् । पाण्डु लेखेन फलके ततः पत्रे निवेशयेत्" वृह० । "पाण्डु लेखेन फलके भूमौ वा प्रथमं लिखेत् । ऊनाधिकं तु संशोध्य पश्चात् पत्रे निवेशयेत् । शोधयेत् पूर्व्वशादन्तु यावन्नोत्तरदर्शनम् । अवरुद्धस्योत्तरेण निवृत्तं शोधनं भवेत्" नार० ।

आवेदनीय त्रि० आ+विद–णिच्–अनीयर् । १विज्ञापनीये यं प्रति ज्ञानाय आवेदनं क्रियते तस्मिन्, यस्य पदार्थस्यावेदनं क्रियते तस्मिंश्च । व्यवहारे २आवेद्ये ऋणादानादौ च ।

आवेदित त्रि० आ+विद+णिच्–कर्म्मणि क्त । १विज्ञापिते यं प्रति विज्ञापनं कृतं तस्मिन्, यस्य पदार्थस्य वेदनं कृतं तस्मिंश्च । व्यवहारे आवेदनकाले २निवेदिते पदार्थे च । "लिखितं साक्षिणो वापि पूर्व्वमावेदितं न चेत्" नारदः "यथावेदितमर्थिना" या० स्मृतिः ।

आवेदिन् त्रि० आ+विद–णिच्–णिनि । १विज्ञापके । व्यवहारे २वादिनि च । "अनिष्टावेदिनं स्वप्नं दृष्ट्वा" रामा० स्त्रियां ङीप् । आ+विद–णिनि । २आज्ञातरि त्रि० स्त्रियां ङीप्

आवेद्य त्रि० आ+विद–णिच्–यत् । १विज्ञाप्ये २आवेदनीयार्थे आ+विद–णिच्–ल्यप् । ३विज्ञाप्येत्यर्थे अव्य० ।

आवेध्य त्रि० आ+विध–ण्यत् । आवेधार्हे मुक्तादिमणौ ।

आवेश पु० आ+विश–घञ् । १अहङ्कारभेदे, २संरम्भे, ३अभिनिवेशे, ४आसङ्गे, ५अनुप्रवेशे, यथा भूतावेशः । ६ग्रहभये, ७भूताद्यावेशरोगे च । "तस्मै स्वयावेशविवर्ज्जिताय" रघुः "तपनं प्रियविच्छेदे स्मरावेशोऽन्यचेष्टितम्" सा०द० । "आवेशमोहौ क्रोधश्च गान्धारीधृतराष्ट्रयोः" भा० आ० प० १अ० "पञ्चानामिन्द्रियार्थानां शोकावेशद्दवानलः" भा० व० ११अ०

आवेशन न० आ+विश–आधारे ल्युट् । १शिल्पशालायाम् तत्र हि मनोऽभिनिवेशेनैव कार्य्यकरणात्तस्यास्तथात्वम् २भूतावेशादिरोगे ३सूर्य्येन्दुपरिधौ च । "मनःक्षेपस्त्वपस्मारो ग्रहाद्यावेशनादिजः" सा०द० । "जीर्णोद्यानान्यरण्यानि कारुकावेशनानि च" मनुः आवेशशब्दार्थे ४कोपादौ च आधारे ल्युट् । ५गृहे च । आ+विश–णिच्+ल्युट् । ६प्रवेशसम्पादने व्यापारे

आवेशिक त्रि० आवेशे गृहे भवः आगतो वा ठञ् तत । १अतिथौ २असाधारणे ३बान्धवादौ च । [३वेष्टके (वेड़ा)

आवेशित त्रि० आ+विश–णिच्–क्त । निवेशिते, "न मय्यावेशितधियां कामः कामाय कल्पते" भाग० । "मय्यावेशित चेतसः" गीता ।

आवेष्टक पु० आवेष्टयति ण्वुल् । आवरणकारके प्राचीरादौ

आवेष्टन न० आ+वेष्ट–भावे ल्युट् । १आवरणे करणे ल्युट् । आवरणसाधने २प्राचीरादौ । (वेड़ा)इति ३पदार्थे च

आव्दिक त्रि० अब्दे भवः ठक् । वर्षभवे श्राद्धादौ "आब्दिके पितृकृत्ये च चान्द्रं मासं विनिर्दिशेत्" स्मृतिः "तथा स्यात्सोमगृहीतव्योराघ्राद्राज्ञाब्दिकः करः" मनुः षट्त्रिंशदाब्दिकं चर्य्यम्" मनुः असंक्रान्तेऽपि कर्तव्यमाब्दिकं प्रथमं द्विजैः" लघुहा० । "एकाहः पुनराब्दिके" स्मृतिः । [मादौ

आव्य त्रि० अवेर्मेषस्य विकारः ष्यञ् । मेषसम्बन्धिनि दुग्धलो-

आव्याध पु० आ+व्यध–घञ् उपसृष्टत्वात् न अप् । सम्यक्पीड़ने

आव्याधिन् त्रि० आ+व्यध–णिनि । सम्यक्पीडके । स्त्रियां ङीप् । सा च २चोरसेनायाम् "नर्त्तिकाः पुरुषव्याघ्राः परिमोषिण आव्याधिन्यस्तस्करा अरण्येष्वाजायेरन्" शत० ब्रा० "आव्याधिन्यः चोरसेनाः" भा० ।

आव्रश्चन न० ईषत् व्रश्चनं छेदनम् प्रा०स० । १ईषच्छेदने, "आव्रश्चनाद्वनस्पतयोऽनुप्रजायन्ते" शत०ब्रा० । आधारे ल्युट् । २छेद्यवृक्षप्रदेशे त्रि० आहुत्या हि यो यूपः संस्कर्त्तव्यः तस्याणुः आव्रश्चनशब्देनउच्यते "अतस्त्वमित्याव्रश्चने जुहोति" कात्या० ६.१,२०। व्याख्यातं यूपोऽस्मादाव्रश्चनः स्थाणौ छेदनप्रदेशः" वृत्तिः "आव्रश्चनमभिजुहोति" शत० ब्रा० ।

आव्रस्क पु० आ+व्रश्च–घञ् कुत्वम् । ईषच्छेदने । आत्मनोऽनाव्रस्काय" तैत्ति० श्रुतिः । [वुञ् । निर्लज्जदेशे ।

आव्रीडक पु० अव्रीडस्य निर्लज्जस्य विषयो देशः राजन्या०

आश पु० अश–भोजने घञ् । भोजने । प्रातराशः, सायमाशः, कर्मणि उपपदे कर्त्तरि अण् उपपदस० । तत्तद्वस्तुभक्षके

यथा क्षताशः आम्रयाशः मांसांशः पलाशः हविष्याशः।

आशंसा स्त्री आ+शस–अ। अप्राप्तस्य १प्राप्तीच्छायाम्, २इष्टार्थाशंसने च। "निदधे विजयाशंसां चापे सीतां च लक्ष्मणे" रघुः "आशंसायां भूतवच्च" "आशंसावचने लिङ्" पा०। ल्युट् आशसनमप्यत्र न० "इष्टार्थाशंसनमाशीः" रघु०। [भूते। भावे क्त ३आशंसायाम् न०।

आशंसित त्रि० आ+शन्स–क्त। १कथिते २इच्छाविषयी-

आशंसितृ त्रि० आ+शंस–तृच्। भाविशुभेच्छावति। स्त्रियां ङीप्। [कर्त्तरि स्त्रियां ङीप्।

आशंसिन् त्रि० आ+शन्स–णिनि। आशंसी आशंसा

आशंसु त्रि० आ+शन्स–उ। इच्छाकारके भाविशुभाशंसावति "लक्ष्मीः पुंयोगमाशंसुः कुलटेव कुतूहलात्" भट्टिः

आशक त्रि० अश्नाति अश–ण्वुल्। १भक्षके २भोगयुक्ते। णिच्–ण्वुल्। ३भोगसम्पादके। "तमेतं ब्राह्मणा-विविदिषन्ति–तपसाऽनाशकेन" श्रुतिः।

आशक्त प्रि० सम्यक् शक्तः प्रा०स०। सम्यक्शक्तियुक्ते

आशङ्कनीय त्रि० आ+शकि–अनीयर्। १शङ्कया विषयीकार्य्ये २अनिष्टतया चिन्तनीये च।

आशङ्का स्त्री आ+शकि–अ। १भये त्रासे अनिष्टतया २चिन्तने "समुद्धृताशङ्कमनीचकाशे" माघः। "रत्या च साशङ्कमनुप्रयातः" कुमा०। "गुदपरिकर्त्तनमाशङ्का पाण्डुरोगग्रहणीदोषशोषाणाम्" सुश्रु०सम्यक्शङ्कायां ३सन्देहे इत्याशङ्कायामाह इति भूरिशः जगदीशः गदाधरश्च प्रायुङ्क्त।

आशङ्कित त्रि० आ+शकि–कर्त्तरि क्त। १भीते कर्मणि क्त अनिष्टतया २चिन्तिते ३सन्दिग्धे च। भावे क्त। ३भये ४सन्देहे ५अनिष्टतया चिन्तने च न०।

आशङ्किन् त्रि० आ+शकि–णिनि। आशङ्कायुक्ते "रघोरभिभवाशङ्कि चुक्षुभे द्विषतां मनः" रघुः। "अशुभाशङ्कि हृदयम्" रामा० कुञ्जा नोचतयैव यान्ति शनकैरात्मेक्षणाशङ्किनः" रत्ना०। स्त्रियां ङीप्।

आशङ्क्य त्रि० आ+शकि–कर्मणि ण्यत्। १सन्देहविषयीकार्य्ये २अनिष्टतया चिन्त्ये ल्यप्। ३संदिह्येत्यर्थे ४अनिष्टतया ज्ञात्वेत्यर्थे च अव्य० "अव्याप्यवृत्तिसाध्यकसङ्केताव-व्याप्तिमाशङ्क्याह" दीधितिः।

आशन पु० अशन एव स्वार्थे अण्। १अशनवृक्षे द्विरूपकोषः अश–णिच् ल्यु। २भोजयितरि त्रि०। अशनिः अशनिजीवी स्वार्थे पर्श्वा०अण्। ३वज्रजीविनि त्रि० आशनः आशनौ बहुषु तस्य लुक् अशनय इत्येव। अशनिरेव प्रज्ञा० अण्। ४वज्रे स्वार्थिकप्रत्ययस्य प्रकृतिलिङ्गत्वात् पुंस्त्री०।

आशय पु०आ–शी–अच्। १अभिप्राये, २आधारे, ३विभवे, ४पनसवृक्षे वैद्यकोक्ते ५स्थानभेदे च। आ फलविपाकात् चित्तभूमौ शेते इति कर्त्तरि अच् कर्मजन्ये ६वासनारूपे संस्कारे, "क्लेशजन्मकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः" पात०स्०धर्माधर्मरूपे ७अदृष्टे च। अधारे अच्। आशयवति ८चित्ते। "अहमात्मा गुडाकेश। सर्व्वभूताशयस्थितः" गीता०। भावे अच्। १०शयने ११स्थाने च "यो वक्ता नेदृगाशयः" किरा० "पत्रोत्तुकामादरिणाशयेन" नैष० विषमोऽपि विगाह्यते नयः कृततीर्थः पयसामिवाशयः" किरा० "गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात्" वैद्यकोक्ताः देहान्तर्वर्त्तिन आशयास्तु सप्त यथा ह" सुश्रुते "त्वचः सप्त, कलाः सप्त, आशयाः सप्त" इति विभज्य आशयास्तु वाताशयः पित्ताशयः श्लेष्माशयः रक्ताशयः आमाशयः पक्वाशयः मूत्राशयः, स्त्रीणां गर्भाशयोऽष्टम" इति। एषां स्थानानि भावप्र०। "उरोरक्ताशयस्तस्मादधःश्लेष्माशयः स्मृतः। आमाशयस्तु तदधः तज्ज्ञं चरकोऽवदत्" नाभिस्तनान्तरं जन्तोराहुरामाशयं बुधाः। आमाशयादधः पक्वाशयादूर्द्ध्वं तु या कला। ग्रहणीनामिका सैव कथितः पावकाशयः। ऊर्द्ध्वमग्न्याशयो नाभेर्मध्यभागे व्यवस्थितः। तस्योपरि तिलं ज्ञेयं तदधः पवनाशयः। पक्वाशयस्तु तदधः स एव च मलाशयः। तदधः कथिता वस्तिः सा हि मूत्राशयो मतः। पुरुषेभ्योऽधिकाश्चान्ये नारीणामाशयास्त्रयः। एको गर्भाशयः प्रोक्तः पित्तपक्वाशयान्तरे। स्तनौ प्रसिद्धौ तावेव बुधैः स्तन्याशयौ स्मृतौ"। १२कोष्ठागारे १३बौद्धमतसिद्धे आलयविज्ञानरूपे विज्ञानसन्ताने १४आश्रये १५किंपचाने पशुधारणार्थगर्त्तरूपे १६खातभेदे च। "अयञ्च पार्थो बीभत्सुर्वरिष्ठो ज्याविकर्षणे। आस्ते परमसन्तप्तो नूनं सिंह इवाशये" भा०व० २५अ०।

आशयाश पु० आशयमाश्रयमश्नाति अश–अण् उप०स०। वह्नौ जोरस्वामी तस्य स्वाश्रयकाष्ठादेर्भक्षकत्वेन तथात्वम्

आशर पु० आशृणाति आ+शॄ–अच्। १अग्नौ, २राक्षसे च।

आशव न० आशोर्भावः पृथ्वा० वा अण्। पक्षे इमनिच् आशिमा पु०। त्व आशुत्वम् न०तल् आशुता स्त्री तत्रार्थे।

आशस् त्रि०आ+शन्स–क्विप्। १आशंसनकर्त्तरि। भावे क्विप्

आशंसने "नमसा इच्छ्रमानसावाशसा जातवेदोयदीदम्" ऋ० ४,५,११, 'तदाशसा स्तत्स्तुत्या' भा०।

आशसन न० आ शन्स–वा ल्युट्। १अयने २आशंसायाञ्च। "तस्मा आहनन्ं हत्या भेनिराशसनम्" अथ० १२, ५,२९, "क्षिप्रे ऽस्याशसनं जनिष्यते" शत०ब्रा०।

आशस्त त्रि० आ+शन्स-क्त। स्तुते। "यच्चिद्धि सत्य सोमपा अनाशस्ता इव स्मसि" ऋ० १,२,९१।

आशा स्त्री समन्तात् अश्नुते आ+अश-अच्। दिशि, "अगस्त्याचरितामाशामनाशास्यजयोययौ" रघुः "करभकण्ठकडारमाशाः" माघः। "गच्छतस्तस्य चित्ररथतनया न केवलमन्तर्बहिरपि सैव सर्व्वाशास्विवलम्बनमासीत्" काद०। दिश् च नैयायिकादिमते संख्यापरिमितिपृथक्त्वसंयोगविभागाश्रयोद्रव्यभेदः दैशिकपरत्वापरत्वयोरसमवायिकारणसंयोगाश्रयतया तत्सिद्धिः तस्या एकत्वेऽपि उपाधिभेदात् प्राच्यादिव्यवहारः तथा च यत्पुरुषस्य उदयगिरिसन्निहिता या दिक् सा तस्य प्राची, उदयगिरिव्यवहिता प्रतीची तत्पुरुषीयमेरुसन्निहिता दिगुदीची "सर्व्वेषामेव वर्षाणां मेरुरुत्तरतः स्थितः" इत्युक्तेस्तस्यास्तथात्वम्। तद्व्यवहिता दिक् अवाची। इयञ्च दिक् ईश्वर एवेति रघुनाथः "दिक्कालावीश्वरान्नातिरिच्येते" इति पदार्थखण्डने तस्योक्तेः सां०कौ० मते यदुपाधिना पूर्व्वापरत्वव्यवहारस्तदुपाधेरेव दिक्शब्दवाच्यत्वं न तदाश्रयत्वेनातिरिक्तदिक्कल्पनम् तथा च गगनात्मकत्वमेव दिशः "दिक्कालावाकाशादिभ्यः" सां०सू० आकाशोपाधिभ्यामेव दिक्कालयोर्नाशान्तरत्वमिति व्यवस्थापितम्।

२अप्राप्तोपायार्थविषयायाम् तीव्राकाङ्क्षायाम् ३अप्राप्तप्राप्तीच्छायां तृष्णायां च। "आशा बलवती राजन्! शल्योजेष्यति पाण्डवान्" "तामाशां हृदये कृत्वा" भा० शल्यप०। "आशा हि परमं दुःखं नैराश्यं परमं सुखम्। यथा संछिद्य कान्ताशां सुखं सुष्वाप पिङ्गला" पुरा० "मनो बभूवेन्दुमतीनिराशम्"। "राघवोरथमप्राप्तं तामाशाञ्च सुरद्विषाम्" रघुः आशायाश्च ब्रह्मरूपेणोपासनं श्रुतौ विहितं यथा "स्मराद्वाव भूयोऽस्तीति तन्मे भगवान् ब्रवीत्विति" प्रश्ने "आशावाव स्मराद्भूयस्याशेद्धो वै स्मरोमन्त्रानधीते कर्म्माणि कुरुते पुत्रांश्च पशूंश्चेच्छत इमं च लोकममुञ्चेच्छत आशामुपास्वेति। स य आशां ब्रह्मेत्युपास्ते आशयास्य सर्व्वे कामाः समृध्यन्त्यमोघाः ह्यस्याशिषो भवन्ति यावदाशाया गतं तत्रास्य यथा कामचारो भवति य आशां ब्रह्मेत्युपास्ते" छा०उ० व्याख्यातं च भा०। यथा "आशा वाव स्मराद्भूयसी। अप्राप्तवस्त्वाकाङ्क्षा आशा तृष्णा काम इति याम्ाहुः पर्य्यायैः। सा च स्मरात् भूयसी। कथम्? आशया ह्यन्तःकरणस्थया स्मरति स्मर्त्तव्यम्। आशा विषयरूपं स्मरन्नसौ स्मरो भवति आशेद्ध आशयाभिवर्द्धितः स्मरभूतः स्मरन्नृगादीन्मन्त्रानधीतेऽधीत्य च तदर्थं ब्राह्मणेभ्यो विधींश्च श्रुत्वा कर्म्माणि कुरुते तत्फलाशयैव। पुत्रांश्च पशूंश्च कर्म्मफलभूतानिच्छतेऽभिवाञ्छति आशयैव तत्साधनान्यनुतिष्ठन् इमञ्च लोकमाशेद्ध एव स्मरन् लोकसंग्रहहेतुभिरिच्छत्यमुञ्च लोकमाशेद्धः स्मरन् स्मराकाशादिनामपर्य्यन्तं जगच्चक्रीभूतं प्रतिप्राणि, अत आशायाः स्मरादपि भूयस्त्वमित्यत आशामुपास्व। यस्त्वाशां ब्रह्मेत्युपास्ते शृणु तस्य फलम् आशया सदोपासितयास्योपासकस्य सर्व्वे कामाः समृध्यन्ति समर्द्धिं गच्छन्त्यमोघाशास्याशिषः प्रार्थनाः सर्व्वा भवन्ति यत् प्रार्थितं सर्व्वं तदवश्यं भवतीत्यर्थः"। वैयक्ते इमाशायैव आशाकामतृष्णादेर्भेदः तदभिप्रायेणैव "आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला" इत्यादौ आशादीनां भेदेन वर्णनम्।

आशा(षा)ढ पु० आषाढ+पृ०। आषाढशब्दार्थे द्विरूपकोषः

आशाढा(षाढा) स्त्रीपृ० आषाढानक्षत्रे "मार्गे च फाल्गुने चैव आशा(षे)ढे कार्त्तिके तथा। पक्षयोर्भिन्नमासस्य द्वितीयां परिवर्ज्जयेत्" मल० त० पु०। आषाढा प्रयोजनमस्य अण्। २ब्रह्मचारिधार्य्ये पालाशे दण्डे। आषाढानक्षत्रयुक्ता पौर्णमासी अण् ङीप्। आषाढी चान्द्राषाढपौर्णमास्याम् स्त्री सा यत्र मासे अण्। चान्द्राषाढे पु०।

आशादामन् न० आशा दामेव उपमि० स०। आशारूपबन्धनसाधने दामनि आशारूपरज्ज्वौ।

आशापाल पु० आशां दिशं पालयति पा–णिच्–अण् उप०स०। १दिक्पाले इन्द्रादौ ते च "इन्द्रोवह्निः पितृपतिर्नैर्ऋतोवरुणोमरुत्। कुबेर ईशः पतयः पूर्व्वादीनां दिशां क्रमात्" इत्यमरोक्ता अष्टौ ऊर्द्ध्वाधोदिशोश्च ब्रह्मानन्तौ चेति दश। २अश्वमेधीयपशुरक्षके राजकुमारभेदे च। तेषां स्वरूपादिकमुक्तं शत०ब्रा०। "आदित्यानेवैनं गमयति देवा आशापाला एतं देवेभ्योऽश्वं मेधाय प्रोक्षितं रक्षतेति शतं वै तल्पग्रा राजपुत्रा आशापालास्तेभ्य एवैनं परिददातीह रन्तिरिह रमतामिह धृतिरिह स्वधृतिः स्वाहेति संवत्सरमाहुतीर्जुहोति

षोडश नवतीरेता वा अश्वस्य बन्धनं ताभिरेवैनं बध्नाति तस्मादश्वः प्रमुक्तो बन्धनमागच्छति षोडश नवतीरेता वा अश्वस्य बन्धनं ताभिरेवैनं बध्नाति तस्मादश्वः प्रमुक्तो बन्धनं जहाति । राष्ट्रं वा अश्वमेधः राष्ट्रएते व्यायच्छन्ते येऽश्वं रक्षन्ति तेषां य उदृचं गच्छन्ति राष्ट्रेणैव ते राष्ट्रं यन्ति अथ ये नोदृचं गच्छन्ति राष्ट्रात्ते व्यवच्छिद्यन्ते तस्माद्राष्ट्रियोऽश्वमेधेन यजेत परा वा एष सिच्यते योऽबलोऽश्वमेधेन यजते यद्यमित्रा अश्वं विन्देरन् यज्ञोऽस्य विच्छिद्येत पापीयान् तस्माच्छतं कवचिनो रक्षन्ति यज्ञस्य संतत्या अव्यवच्छेदाय न पापीयान् भवत्यथान्यमानीय प्रोक्षेयुः, सैव तत्र प्रायश्चित्तिः" शत०ब्रा० । अधिकमश्वमेधशब्दे द्रष्टव्यम् ।

आशापुर न० पुरभेदे यत्र प्रशस्तगुग्गुलसम्भवस्तादृशे नगरे ।

आशापुरसम्भव न० आशापुरे सम्भवति सम्+भू अच् । गुग्गुलुभेदे ।

आशाबन्ध पु० आशां दिशं बध्नाति अच् । १मर्कटजाले, बन्ध–घञ् ६त० । २तृष्णाबन्धे ६त० । ३दिशां बन्धे च । ४समाश्वासे । आशा बन्ध इव । ५आशारूपे बन्धे । "आशाबन्धः कुसुमसदृशं प्रायशोह्यङ्गनानाम्" मेघदू० ।

आशावह त्रि० वह–अच् ६त० । १आशाधायके आशासंपादके । २नृपतिभेदे "आशावहो निरुद्धश्वमीकः सारिमेजय" भा०आ०१८६अ० ३दिवः पुत्रभेदे च पु० "दिवः पुत्रो बृहद्भानुश्चक्षुरात्मा विभावसुः । सविता च ऋचीकोऽर्कः भानुराशावहो रविः" भा०आ० १अ० ।

आशास्य त्रि० आ+शास–ण्यत् । आशीःसाध्ये, आशंसनीये "आशास्यमन्यत् पुनरुक्तमेव" रघुः । "अनाशास्यजयोययौ" रघुः ।

आशित त्रि० आश्नाति आ+अश–क्त । १सम्यग्भुक्ते, अन्नादौ भावे क्त । २सम्यग्भक्षणे न० । आशितमस्त्यस्य अर्श० अच् । ३अशनेन तृप्ते त्रि० "नातिप्रगे नातिसायं न सायं प्रातराशितः" मनुः ।

आशितङ्गवीन त्रि० आशिता अशनेन तृप्ता गावो यत्र खञ् नि० मुम् । यत्र स्थले घासादिभक्षणेन गावस्तृप्तिमाप्तास्तादृशे प्रचुरघासे स्थले "कृत्वाशितङ्गवीनानि" भट्टिः ।

आशितम्भव त्रि० आशितोऽशनेन तृप्तो भवत्यनेन आशित+भू–करणे खच् मुम् उ०स० । १यस्य भोजनेन प्राणिनस्तृप्ता भवन्ति २तादृशेऽन्नादौ । भावे खच् । ३अशनेन तृप्तभवने न० । "फलैर्येश्वाशितम्भवम्" भट्टिः । [ङीप् ।

आशितृ त्रि० आ+अश–तृच् । तृप्त्या भक्षके हेम० । स्त्रियां

आशिन् त्रि० अश–भोजने णिनि । भक्षके "श्मशानवासी मांसाशी खर्पराशी मदान्तकृत्" वटुकस्तोत्रम् । "नायश्चित्तस्त्रिवेदोऽपि सर्वाशी सर्वविक्रयी" "भोजनार्थन्तु ते शंसन् वान्ताशीत्युच्यते बुधैः" "आगारदाही गरदः कुण्डाशी सोमविक्रयी" "विघसाशी भवेन्नित्यं नित्यं वाऽमृतभोजनः" इति च मनुः । "दिवोपवासी तु निशानिशाशी" काशी० "एवं कृत्वा हविष्याशी जपेल्लक्षमनन्यधीः" तन्त्रम् ।

आशिन त्रि० आशिन्+स्वार्थे अण् वेदे नि० न टिलोपः । भक्षके "नमोयुवभ्योनम आशिनेभ्यः" ऋ० १,२७,१३ ।

आशिमन् पु० आशोर्भावः पृथ्वा० इमनिच् डिद्वत् । शीघ्रत्वे ।

आशिर् त्रि० आश्रीयते पच्यते आ+श्री–क्विप् नि० । पच्यमाने क्षीरादौ "शुक्रा आशिरं याचन्ते" ऋ०८,२, १० । "आशिरं क्षीरादिकं श्रपणद्रव्यम्" भा० । "ताँ आशिरं पुरोडाशमिन्द्रियम्" ऋ०८,२,१० । "इन्द्राय गाव आशिरं दुदुह्रे वज्रिणे मधु" ऋ०८,५८,६ ।

आशिर त्रि० आशीरेव स्वार्थे अण् । श्रपणीये क्षीरादौ । "अथ यद्धेनुर्भवति साशिरमेवैतत् क्रीणाति" शत० ब्रा० ३,३,१ । आ+अश–व्याप्तौ भोजने वा इरच् । २अग्नौ ३सूर्य्ये ४राक्षसे च पु० सि०कौ० । अग्निराक्षसयोः सर्वभक्षकत्वात्, सूर्यस्य च दीप्त्या सर्वव्यापित्वात्तथात्वम् ।

आशिषिक त्रि० आशिषा चरति ठक् "इसुसुक्तान्तात्" पा०सूत्रे प्रतिपादोक्तस्यैव ग्रहणात् न कः किन्तु ठक एव । आशीर्वादेन चारिणि आशीरभिरते ।

आशिष्ट त्रि० आ+शास–क्त । कृताशीर्वादे ।

आशिष्ठ त्रि० अतिशयेन आशु इष्ठन् डिद्वत् । अत्यन्तशीघ्रे ।

आशिस् स्त्री आ+शास् क्विप् आङ्पूर्व्वकत्वात् अतइत्वम् । १इष्टार्थाविष्करणे । "यां वै काञ्च यज्ञ ऋत्विज आशिषमाशासते यजमानस्यैव सा" शत० ब्रा० १,८,१,२६ । "आशीर्नमस्क्रिया वस्तुनिर्द्देशोवाऽपि तन्मुखे" सा०द० । "जगच्छरण्यस्य निराशिषः सतः" कुमा० "अमोघाः प्रतिगृह्णन्तावर्घानुपदमाशिषः" रघुः । २प्रार्थनायाञ्च "तस्य कामाः समृध्यन्त्यमोघाह्यस्याशिषो भवन्ति" छा०उ० । "आशिषः प्रार्थनाः" भा० "वेदोक्तमायुर्मर्त्यानामाशिषश्चैव कर्म्मणाम्" मनुः । आशीश्च "वात्सल्याद्यत्र मान्येन कनिष्ठस्याभिधीयते । इष्टावधारकं वाक्यमाशीः सा परिकीर्त्तिता" इत्येवं लक्षणा प्रार्थना वाक् अत्र कनिष्ठस्येत्युपलक्षणम् । "तस्मै जयाशीः ससृजे पुरस्तात् सप्तर्षिभिस्तान् स्मितपूर्व्वमाह" कुमा० सप्तर्षिकर्त्तृकाशीर्वादस्य मान्

आशी स्त्री आशीर्य्यतेऽनया आ+शॄ क्विप् पृ० । "१सर्प-दंष्ट्रायाम् । आशीविषः । "विषमाशीभिरनारतं वमन्तः माघः । "आशीमिव कलामिन्दोः" राजेश्वरः "आशी उरगदंष्ट्रायाम्" वैद्य० । "आशी तालुगता दंष्ट्रा तया विद्धो न जीवति" आशिस् पृ० । २आशीर्व्वादे द्विरूप-कोषः ३वृद्धिनामौषधौ च । स्त्रियां ङीप् ।

आशीयस् त्रि० अतिशयेनाशुः ईयसुन् डिद्वत् । अत्यन्तशीघ्रे

आशीर्त्त त्रि० आ+श्री–क्त वेदे नि०। आश्राणे पक्वे दुग्धादौ "मध्यत आशीर्त्तः" सि०कौ० धृता श्रुतिः ।

आशीर्वत् त्रि० आशीरस्त्यस्य मतुप् वेदे मस्य वः । आशी-र्व्वादयुक्ते "सवनान्याशीर्व्वन्ति" कात्या० २,८,८ लोके तु आशीर्मानित्येव स्त्रियां ङीप् ।

आशीर्वाद पु० आशिषो वादः वचनम् । इष्टार्थाविष्करण-वाक्ये "मङ्गल्यं दीर्घवर्णान्तमाशीर्वादाभिधानवत्" मनुः "संजानन्त्यतुलं वीर्य्यमाशीर्वादपरायणाः" भा० आ०प० ८अ० । आशीर्वचनादयोऽप्यत्र । "आशीर्वचनसंयुक्तां नित्यं यस्मात् प्रकुर्व्वते" सा०द० ।

आशीविष पु० आश्यां विषमस्य । १सर्पे तद्भेदाश्चाहिशब्दे ५८१ पृष्ठे उक्ताः । "गरुत्मदाशीविषभीमदर्पैः" रघुः २दर्वीकरसर्पभेदे च अहिशब्दे सुश्रुते उदा० "आशीविषैः कृष्णसर्पैर्भीमसेनमदंशयत् । सर्व्वेष्वेवाङ्गदेशेषु न ममार च शत्रुहा" भा०व०१२अ० । "नैर्घिकं भुञ्जते यस्तु मणिनागस्य भारत ! । दष्टस्याशीविषेणापि न तस्य क्रमते विषम्" भा०अ० ८४अ० । "स्वद्रम् मतः सत्यशीलान् सत्यधर्म्मानुपालिनः । आशीविषानिव क्रुद्धान् पतीन् परिचराम्यहम्" भा०व०२३२अ० ।

आशु त्रि० अश–व्याप्तौ उण् । १शीघ्रे "यदाशुभिः पतति योजना पुरः" ऋ०२,१६,२,गुणवचनत्वात् स्त्रियां वा ङीप् । वर्षाभवे २धान्यभेदे पु० (आउश) । तस्य षष्टिदिवसमध्ये पच्यमानतयाऽऽशुपाकात् आशुत्वम् तद्गुणलक्षणानि भाव-प्र० । "वार्षिकाः कथिताः शुक्लाव्रीहयश्चिरपाकिणः । कृष्णव्रीहिः पाटलश्च कुक्कुटाण्डक इत्यपि । शालीमुखोजतु मुख इत्याद्याव्रीहयः स्मृताः । कृष्णव्रीहिः स विज्ञेयो यः कृष्णतुषतण्डुलः (कोद्रव) । पाटलः पाटलापुष्प वर्णको व्रीहिरुच्यते (राङ्गिधान्य) कुक्कुटाण्डाकृतिर्व्रीहिः कुक्कुटाण्ड इहोच्यते । शालीमुखः कृष्णशुकः कृष्णतण्डुल उच्यते । लाक्षावर्णं मुखं यस्य स्योजतुमुखस्तु सः । व्रीहयः कथिताः पाके मधुरा वीर्य्यतो हिमाः । अल्पाभि-ष्यन्दिनोबद्धवर्चस्काः षष्टिकैः समाः" "कृष्णव्रीहिर्व्वर-स्तेषां तस्मादल्पगुणाः परे" ३पाटले व्रीहौ न० । ४क्रियाविशेषणत्वे न० । "प्रत्युद्यातः कथमपि भवान् गन्तुमाशु व्यवस्येत्" शान्तिं नेयं प्रणयिभिरितोवर्त्म भानोस्त्यजाशु" मेघदूतम् "स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः" "कुलान्येव नयन्त्याशु ससन्तानि च शूद्रताम्" मनुः

आशुकारिन् त्रि० आशु शीघ्रं करोति कृ–णिनि स्त्रियां ङीप् । १शीघ्रकरे "आशुकारी तथाशुत्वाद्धावत्यम्भसि तैल-वत्" सुश्रुतोक्ते २द्रवभेदे च । क्विप् । आशुकृदप्यत्र त्रि० ।

आशुक्रिया स्त्री आशु यथा तथा क्रिया । शीघ्रकरणे "अष्टा-स्वप्यायुर्वेदतन्त्रेषु एतदेवाधिकमभिमतमाशुक्रियेति" सुश्रु० ।

आशुग पु० आशु+गम–ड । १वायौ, २सूर्य्ये च । एतयोः शीघ्रगामित्वात् तथात्वम् । "वायुर्वै क्षेपिष्ठा देवतेति" श्रुतौ क्षिप्रगामित्वोक्तेः शीघ्रगतित्वप्रसिद्धत्वाच्च वायोस्तथात्वम् सूर्य्यस्याशुगत्वमनुपदं वक्ष्यते ३वाणे "पपावनास्वादितपूर्व्व-माशुगः" "रावणस्यापि रामास्तो भित्त्वा हृदयमाशुगः" रघुः ४शीघ्रगामिनि त्रि० विनीतैस्तु व्रजेन्नित्यमाशुगैर्लक्षणा-न्वितैः" मनुः । "दिशां गजन्तु श्वेताख्यं (ऐरावतम्) श्वेताऽजनयताशुगम्" भा० आ० प० ६६अ० । "जवमानाशुगां-श्चैव कराग्रं समुपानयत्" भा०स०प०२६२अ० "शोभ-माना रथे युक्तास्तरिष्यन्त इवाशुगाः" भा०व०प०१६१अ० । आशुगत्वं च अल्पकालमध्ये गन्तव्यदेशगमनात् भवति कालाल्पत्वञ्च आपेक्षिकं ततश्च "शीघ्रोऽल्पभागे बहुभाग-मन्दे" इत्यादौ नील०ता० ग्रहाणां शीघ्रमन्दत्वमापेक्षिक-मिति बोध्यम् तथा च स्वस्वकक्षायां ग्रहाणां तुल्यगतित्वे-ऽपि कक्षाणामल्पत्वबृहत्त्वाभ्यां गन्तव्यदेशाल्पत्वाधिकत्वभे-दात् गतिभेदः ग्रहाणां कक्षामानं च ग्रहकक्षाशब्दे वक्ष्यते । तथा च स्वल्पकक्षास्थग्रहस्य बृहत्कक्षा-स्थग्रहापेक्षया शीघ्रगत्वम् तच्च स्वाभाविकम् । अत्र प्रसङ्गात् ग्रहाणां शीघ्रमन्दगतित्वे कारणमुच्यते तथा हि सर्वेषां ग्रहाणां राशिचक्रस्य स्वस्वकक्षासु तुल्यप्रागन्तित्वेऽपि स्वस्वकक्षाणामल्पत्वबृहत्त्वाभ्याम् अल्पाधिककालाभ्यामेव स्वस्वकक्षास्थराशिचक्रस्यस्थान-भोगः इत्यतो यस्य कक्षा लघ्वी स शीघ्रगः यस्य च बृहती स मन्दग इत्युच्यते एतदभिप्रायेणैव ग्रहाणां राशि-भोगे कालभेदो दर्शितः यथा "रविमासं निशा-नाथः सपाददिनसद्वयम् । पक्षत्रयं भूमिपुत्रो बुधोऽष्टा-दश वासरान् । वर्षमेकं सुराचार्य्यस्त्वष्टाविंशं दिनं भृगुः ।

शनिः सार्द्धद्वयं वर्षं राहुः सार्द्धसमां तथा" ज्यो० सूर्य्यस्य तथापि चन्द्रबुधशुक्रापेक्षया मन्दगतित्वम् तथापि कुजगुरुराहुशन्यपेक्षया शीघ्रगतित्वात् आशुगत्वम्। स्वस्वकक्षायां सूर्य्ययोगेन च ग्रहाणां पुनःशीघ्रगत्वं "सूर्य्ययुक्ता ग्रहाः शीघ्रा इत्युक्तेः। ग्रहाणां शीघ्रकेन्द्रशीघ्रफलादिकम्" सि०शि० दर्शितं विस्तरभयान्नोक्तं तत एवावसेयम्। किञ्च सर्व्वग्रहापेक्षया राशिचक्रस्य शीघ्रगतित्वात् प्रतिदिनं स्वगत्यनुसारेण ग्रहाणां प्राग्गतित्वेऽपि राशिचक्रस्य प्रवहवायुना पश्चात् नीयमानतया तदारूढग्रहादेः पश्चाद्गतित्वभ्रमात् तदनुरूपशीघ्रगत्वमारोप्यते। ग्रहाणां राशिचक्रभोगार्थं स्वस्वकक्षायां या प्राग्गतिस्तस्या अल्पकालसाध्यत्वे शीघ्रत्वमिति बोध्यम्। एवं ग्रहाणां स्वाभाविक्यां स्वस्वकक्षायां गतौ स्थितायामपि प्रवहानिलेन पश्चाद्भ्राम्यमाणस्य राशिचक्रस्य प्रतिदिनं पृथिवीभ्रमणात् तद्गतेश्च सर्व्वग्रहापेक्षयातिशीघ्रत्वात् तत्र च संभ्राम्यमाणराशिचक्रस्य गतौ तत्स्थग्रहगतित्वारोपेण नौकागतौ तत्स्थवस्तुगतित्वारोपवत् ग्रहाणां राशिचक्रवच्छीघ्रगतित्वं पुराणादावुक्तम् यथा "योजनानां सहस्रे द्वे द्वे शते द्वे च योजने। एकेन निमिषार्द्धेन क्रममाण! नमोऽस्तु ते। भवतियोंजनानाञ्च सहस्राणि च सप्ततिः। यावद्घटिकमात्रेण तावच्चरति भास्करः" आदित्यहृ०। "यदा चेन्द्राः पुर्य्याः प्रचलति पञ्चदशभिर्घटिकाभिर्याम्यां सपादकोटिद्वयं योजनानां सार्द्धद्वादशलक्षाणि साधिकानि चोपयाति" भाग०५स्क०२०अ० "साधिकानि पञ्चविंशतिसहस्राधिकानि" श्रीधरः। तेन पञ्चदशभिर्घटिकाभिर्यदि २२७७५००० योजनानि तदा ६० दण्डात्मके दिने प्राप्नोति चतुर्भिर्गुणितानि तानि प्रत्यहं राशिचक्रगतिमानं तदारोपाच्च सूर्य्यादीनां तथागतित्वमिति बोध्यम्। एतदपि पुराणाश्रितं वस्तुतोराशिचक्रस्य प्रत्यहं पृथ्वीभ्रमणात् राशिचक्रपरिधिमानमेव अहोरात्रे गन्तव्ययोजनमानमेतच्च गोलाध्याये वक्ष्यते। तथा च अल्पकालेन गन्तव्यस्थानगामित्वमाशुगत्वमिति सिद्धम्।

आशुगामिन् त्रि० आशु गच्छति गम–णिनि। १शीघ्रगामिनि स्त्रियां ङीप्। २सूर्य्ये पु० "आशुगामी तमोघ्नश्च हरिताश्च ईड्यते" भा०व०प० ३अ० सूर्य्यस्तवः।

आशुङ्ग त्रि० आशु गच्छति वेदे नि० खच् मुम्। शीघ्रगामिनि "निर्भक्षितः प्रपताशुङ्गः श्येनो यथा" अथ०६,१८,२

आशुतोष पु० आशु शीघ्रं तोषो यस्य। १शिवे स्वल्पकालार्चनेनैव तस्य तुष्टत्वात् तथात्वम्। २शीघ्रतोषिणि त्रि०।

आशुपत्त्री स्त्री आशु पत्रं यस्याः गौ०ङीष्। शल्लकीलतायाम्

आशुपत्वन् पु० आशु पतति पत–वनिप्। १शीघ्रगामिनि "श्येनःश्येनेभ्य आशुपत्वा" ऋ० ४,२६,४। स्त्रियां ङीप् रश्च। आशुपत्वरी।

आशुमत् त्रि० आशु शैघ्र्यं विद्यतेऽस्य मतुप्। शीघ्रतायुक्ते "यथा सूर्य्यस्य रश्मयः परापतन्त्याशुमत्" अथ०६,१०५,२

आशुव्रीहि पु० कर्म्म०। वार्षिके धान्यभेदे (आउस) आशुधान्ये विवृतिः।

आशुशुक्षणि पु० आ+शुष–सन्+अनि।१अग्नौ, २वायौ च। अस्य च वेदएव प्रयोगः लोकेऽपि कश्चित्तेन "मन्त्रपूतानि हवींषि प्रतिगृह्णात्येतत्प्रीत्याशुशुक्षणिः" भाट० "अजनात्मा स्वयं साक्षान्निचितोह्याशुशुक्षणिः" काशी०।

आशुशुष्माण त्रि० आ+शुष–वा० कानच्। सम्यक् शुष्यमाणे

आशुहेषस् त्रि० आशु+हेष–शब्दे–असुन्। शीघ्रं शब्दायमाने। "इन्द्राविष्णू अश्विना वाशुहेषसा" ऋ०८,१०,२, "आशुहेषसा शीघ्रं शब्दायमानौ" भा०।

आशू त्रि० आशु+वेदे पृ०दीर्घः। शीघ्रे। "इन्द्रः प्राशूभवा सचा" यजु०२४,५६, "आशुशब्दो दीर्घश्छान्दसः" वेददीपः। [कुटति–णिनि। पर्व्वतभेदे शब्दमाला।

आशीकुटिन् पु० आशेतेऽस्मिन् आ+शी+क्विप् स इव

आशोकेय त्रि० अशोक+चतुरर्थ्यां सख्या० ढञ्। अशोकसन्निकृष्टदेशादौ। अशोका+शुभ्रा० ढक्। अशोकाया अपत्ये। स्त्रियां तु शार्ङ्गरवा० ङीन्। आशोकेयी।

आशौच न० अशुचेर्भावः अण् "नञः शुचीत्या०" पा० पूर्व्वपदस्य वा वृद्धिरुत्तरपदस्य नित्यम्। अशौचशब्दार्थे ४८६ पृष्ठे विवृतिः। "दशाहं शावमाशौचं ब्राह्मणस्य विधीयते" "सर्व्वेषां शावमाशौचं मातापित्रोस्तु सूतकम्" "त्रिरात्रमाहुराशौचमाचार्य्ये संस्थिते सति" मनुः ष्यञ्। आशौच्यमप्यत्र न० "आशौच्यात् विप्रमुच्येत ब्राह्मणान् स्वस्तिवाच्य च" शु०त०स्मृतिः।

आश्चर्य्य न० आ+चर–यत् "आश्चर्य्यमनित्ये" पा० सुट्। १अद्भुते २विस्मयरसे ३तद्वति त्रि०। "येषां स्थिरत्वमिच्छन्ति किमाश्चर्य्यमतः परम्" भा०व०। "आश्चर्य्यवत् पश्यति कश्चिदेनमाश्चर्य्यवत् वदति तथैव चान्यः–आश्चर्य्यवच्चैनमन्यः शृणोति" गीता। "पुष्पमाश्चर्य्यमेघाः" रघुः। "किमाश्चर्य्यं क्षारदेवे प्राणदा यमदूतिकाः" उद्भटः।

आश्चो(श्च्यो)तन त्रि० आ+श्चु(श्च्यु)त–ल्यु । १सम्यक्क्षरणयोग्ये भावे ल्युट् । २सम्यक्क्षरणे भ० । "तर्पणैः पुटपाकैश्च धूमै-राश्च्योतनैस्तथा" । "हितमक्ष्णोर्दकं सेके तथाश्च्योतनमेव" च । "क्षौमावद्धं पथ्यमाश्च्योतने वा सर्पिर्दृष्टं यष्टि-काह्वं शरोभम्" इति च सुश्रु० ।

आश्म पु० अश्मनोविकारः अण् वा टिलोपः । प्रस्तरविकारे

आश्मक पु० अश्मना कायति कै–क । शाल्वदेशावयव ग्रामभेदे "साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ्" पा० । तत्र भवः इञ् । आश्मकिः तद्ग्रामभवे त्रि० ।

आश्मन पु० अश्मनोविकार अण् वा टिलोपाभावः । पाषाण-विकारे "यथादमाश्मनमस्त्रं सेतुं भक्तोऽभ्युद्रवं हम्" भट्टिः । अश्मनः सूर्य्यसारथेरपत्यम् अण् तदपत्ये पुंस्त्री

आश्मन्य त्रि० अश्मन्+चतुरर्थ्याम् संकाशा० ण्यः । प्रस्तरबहुलदेशादौ ।

आश्मभारक त्रि० अश्मभारं हरति वहति आवहति वा वंशा० ठण् । प्रस्तरस्य १हारके २वाहके ३तदावाहके च ।

आश्मरथ्य पु० अश्मरथस्य मुनेरपत्यम् गर्गा० यञ् । अश्मर-थर्षेरपत्ये "अभिव्यक्तेरित्याश्मरथ्यः" शा० सू० । गोत्रा-पत्ये तु कण्वा० अण् । आश्मरथ इत्येव स्त्रियां ङीप् ।

आश्मरिक पु० अश्मर्य्येव स्वार्थे वा० ठञ् । अश्मरीरोगे "भिषग्वर्जिताश्मरिको न सिध्यति" सुश्रुतः ।

आश्मायन पुंस्त्री अश्मनोगोत्रापत्यम् अश्वा० फञ् । अश्मना-मर्षेर्गोत्रापत्ये स्त्रियां ङीप् ।

आश्मिक त्रि० भारभूतमश्मानं हरति वहति आवहति वा वंशा० ठण् । भारभूतप्रस्तरस्य १हारके २वाहके ३आवाहके च ।

आश्मेय पुंस्त्री अश्मन्+शुभ्रा० ढक् । अश्मनामकर्षेरपत्ये ।

आश्यान त्रि० आ+श्यै–क्त । घनीभूते शुष्कप्राये "पथश्चाश्यान-कर्द्दमान्" रघुः । "अन्तराश्यानाश्यानहरिणरुधिर-बिन्दुना" काद० ।

आश्र त्रि० अश्रमेव स्वार्थेऽण् । चक्षुर्जले ।

आश्रपण न० आ+श्रा–णिच् पुक् स्वार्थे ल्युट् । पाके ।

आश्रम पुंन० आ+श्रम–आधारे घञ् अवृद्धिः । ब्रह्मचर्य्या-दिके शास्त्रोक्ते १धर्मभेदे, "विनाश्रमं न तिष्ठेत्तु दिन-मेकमपि द्विजः । आश्रमेण विना तिष्ठन् प्रायश्चित्तीयते द्विजः" दक्षः । अत्र द्विजपदस्योपलक्षणपरता यत् रघु-नन्दनेन स्थापितं तदाशुतयस्ते निराकृतम् ७५२ पृष्ठे दृश्यम् । मुनीनां २वासस्थाने, ३मठे ४तपोवने "प्रत्युद्ययावाश्रममश्रमेण" "तौ दम्पती वसिष्ठस्य गुरोर्जग्मतु-राश्रमम्" । "स किलाश्रममन्त्यमाश्रितः" "स दुष्प्रा-पयशाः प्रापदाश्रमं श्रान्तवाहनः" "अभ्युत्थिताग्नि-पिशुनैः–अतिथीनाश्रमोन्मुखान्" इति च रघुः । "कमलासनमिवाश्रमगुरुम्" इति काद० । "भूया देवं तत्र सहचरो रामगिर्य्याश्रमस्थः" मेघदू० । सर्व्वक्लेशापहानेन विश्रामस्थाने ५परमेश्वरे च । "आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः" विष्णुस० । "आश्रमवत् सर्वेषां संसारारण्ये भ्रमतां विश्रामस्थानत्वादाश्रमः" इति भा० । तत्र आश्रमेषु कुत्र कस्याधिकार इति तावन्निर्णीयते । "चत्वार आ-श्रमाश्चैव ब्राह्मणस्य प्रकीर्त्तिताः । गार्हस्थ्यं ब्रह्म-चर्य्यञ्च वानप्रस्थं तु भिक्षुकम् । क्षत्रियेचापि कथिता आश्रमास्त्रयएव हि । ब्रह्मचर्य्यञ्च गार्हस्थ्यमाश्रमद्वितयं विशः । गार्हस्थ्यमुचितं त्वेकं शूद्रस्य क्षणमाचरेत्" माध० धृतवामनपु० । "चत्वारो ब्राह्मणस्योक्ता आश्रमाः श्रुति-चोदिताः । क्षत्रियस्य त्रयः प्रोक्ता द्वावेकोवैश्यशूद्रयोः" नि०सि०कूर्मपु० वचनक्रमेण चातुराश्रम्यादयः इति । तत्र कलौ दीर्घकालब्रह्मचर्य्यवानप्रस्थाश्रमौ न स्तः गृहस्थभिक्षु-काश्रमावेव । "गृहस्थो भिक्षुकश्चैव आश्रमौ द्वौ कलौ युगे" इति स्मरणात् । तत्र संन्यासे विप्रस्यैवाधिकारः ब्राह्मणाः प्रव्रजन्तीति जाबालश्रुतेः "आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेत् गृहादिति" या० स्मृतेरिति" बहवः । "ब्राह्मणः क्षत्रियोवाथ वैश्यो वा प्रव्रजेद्गृहादिति" कौर्मवाक्यात् क्षत्रियादीनामपि तत्राधिकारः पूर्व्ववचनन्तु कषायादिवस्त्र त्रिदण्डधारणविषयम् "मुखजानामयं धर्मो यद्विष्णोर्लिङ्ग-धारणम् राजन्यवैश्ययोर्नैव दत्तात्रेयमुनेर्मतम्" बौधा० स्मृतेः । अयमेव पक्षो मल्लिनाथेन समर्थितः यथा "अत्र यद्यपि "ब्राह्मणाः प्रव्रजन्ति" इति श्रुतेः "आत्मन्यग्नीन् समारोप्य ब्राह्मणाः प्रव्रजेद्गृहात्" इति मनुस्मरणात् "मुखजानामयं धर्मो यद्विष्णोर्लिङ्गधारणम् । बाहु-जातोरुजातानामयं धर्मो न विद्यते" इति निषेधाच्च ब्राह्मणस्यैव प्रव्रज्या न क्षत्रियादेरिति तथापि "यद-हरेव विरजेत् तदहरेव प्रव्रजेत्" इत्यादिश्रुतेस्त्रैवर्णिक-साधारण्यात् "त्रयाणां वर्णानां वेदमधीत्य चत्वार आ-श्रमाः" इति सूत्रकारवचनात् "ब्राह्मणः क्षत्रियो वापि वैश्यो वा प्रव्रजेद् गृहात्" इति स्मरणात् 'मुखजानामयं धर्मो वैष्णवं लिङ्गधारणम् । बाहुजातोरुजातानां त्रि-दण्डं न विधीयते" इति निषेधस्य त्रिदण्डविषयत्व-दर्शनाच्च क्वचिद्ब्राह्मणपदस्योपलक्षणमाचक्षाणाः केचित्

त्रैवर्णिकाधिकारं प्रपेदिरे । तथा यति "स भिक्षाश्रममन्त्यमाश्रितः" इति अत्रापि कविनाप्ययमेव पक्षो विवक्षित इति प्रतीमः । अन्यथा वानप्रस्थाश्रमतया व्याख्याने "विदधे विधिमस्य नैष्ठिकं यतिभिः सार्द्धमनग्निमग्निचित्" इति वक्ष्यमाणेनानग्निसंस्कारेण विरोधः स्यात् अग्निसंस्काररहितस्य वानप्रस्थस्यैवाभावात्" । अतएव मनुना "अनेन क्रमयोगेन परिव्रजति यो द्विजः इति द्विजमात्रस्य परिव्रज्यधिकार उक्तः । एवञ्च महता प्रयत्नेन शङ्कराचार्य्येण ब्राह्मणस्यैव संन्यासेऽधिकारस्य समर्थनं त्रिदण्डविषयमिति । एतेषु आश्रमेषु ब्रह्मचर्य्यस्य नित्यत्वम् इतराश्रमाणां "यमिच्छेत्तु तमावसेत्" इति मिता० धृतवचनात् इच्छाधीनतया काम्यत्वम् । तत्राश्रमाणां समुच्चयपक्षः कामनावतएव, विकल्पस्तु अकामनावतो विरक्तस्य, । अधिकारिभेदाच्च आश्रम समुच्चयविकल्पपक्षौ मिता०समर्थितौ यथा

"वनात् गृहाद्वा कृत्वेष्टिं सार्ववेदसदक्षिणाम् । प्राजापत्यान्तदन्ते तानग्नीनारोप्य चात्मनि । अधीतवेदो जपकृत् पुत्रवानन्नदोऽग्निमान् । शक्त्या च यज्ञकृन्मोक्षे मनः कुर्य्यात्तु नान्यथा" या० । यावता कालेन तीव्रतपःशोषितवपुषोविषय कषायपरिपाको भवति । पुनश्च मदोद्भवाशङ्कानोद्भाव्यते । तावत्कालं वनवासं कृत्वा तत्समनन्तरं मोक्षे मनः कुर्य्यात् । वनगृहशब्दाभ्यान्तत्सम्बन्ध्याश्रमोलक्ष्यते । मोक्षशब्देन च मोक्षैकफलकचतुर्थाश्रमः । अथ वा गृहात् गार्हस्थ्यादनन्तरं मोक्षे मनः कुर्य्यादनेन च पूर्वोक्तश्चतुराश्रमसमुच्चयपक्षःपाक्षिक इति द्योतयति । तथा च विकल्पो जावालश्रुतौ श्रूयते । "ब्रह्मचर्य्यं परिसमाप्य गृही भवेत् गृही भूत्वा वनी भवेत् वनी भूत्वा प्रव्रजेत् यदि वेतरथा ब्रह्मचर्य्यादेव प्रव्रजेद्गृहाद्वा वनाद्वेति" । तथा गार्हस्थ्येतराश्रमबाधश्च गौतमेन दर्शितः । "एकाश्रमन्त्वाचार्य्याः प्रत्यक्षविधानात् गार्हस्थ्यस्येति" । एषाञ्च समुच्चयविकल्पबाधपक्षाणां सर्वेषां श्रुतिमूलत्वादिच्छया विकल्पः । अतो यत्कैश्चित् पण्डितंमन्यैरुक्तम् । स्मार्त्तत्वान्नैष्ठिकत्वादीनाङ्गार्हस्थ्येन श्रौतेन बाधः । गार्हस्थ्यानधिकृतान्धक्लीवादिविषयता वेति । तत्स्वाध्यायाध्ययनवैधुर्य्यनिबन्धनमित्युपेक्षणीयम् । किञ्च । यथा त्रिणुक्रमणाज्यावेक्षणाद्यसमर्थस्य पङ्ग्वादीनां श्रौतेष्वनधिकारस्तथा स्मार्त्तेष्वप्युदकुम्भाहरणभिक्षाचर्य्याक्षमत्वात् कथं पङ्ग्वादिविषयतया नैष्ठिकत्वाद्याश्रमनिर्वाहः । अस्मिंश्चाश्रमे ब्राह्मणस्यैवाधिकारः । "आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद्गृहात्" । तथा "एष वोऽभिहितो धर्म्मो ब्राह्मणस्य चतुर्विधः" इत्युपक्रमोपसंहाराभ्यां मनुना ब्राह्मणस्याधिकारप्रतिपादनात् । "ब्राह्मणाः प्रव्रजन्तीति" श्रुतेश्चाग्रजन्मन एवाधिकारो न द्विजातिमात्रस्य । अन्ये तु त्रैवर्णिकानाम् प्रकृतत्वात् "त्रयाणाम् वर्णानाम् वेदमधीत्य चत्वार आश्रमा" इति सूत्रकारवचनाच्च द्विजातिमात्रस्याधिकारमाहुः । यदा वनात् गृहाद्वा प्रव्रजति तदा सार्ववेदसदक्षिणाम् सार्ववेदसी सर्वधनसम्बन्धिनी दक्षिणा यस्याः सा तथोक्ता ताम् प्रजापतिदेवताकामिष्टिं कृत्वा तदन्ते तान्वैतानानग्नीन् आत्मनि श्रुत्युक्तविधानेन समारोप्य चशब्दात् "उदगयने पौर्णमास्याम् पुरश्चरणमादौ कृत्वा शुद्धेन कायेन अष्टौ श्राद्धानि निर्वपेत् द्वादश वा" इति बौधायनाद्युक्तं पुरश्चरणादिकञ्च कृत्वा । तथाऽधीतवेदो जपपरायणोजातपुत्रोदीनान्धकृपणार्थिसार्थाय यथाशक्त्यन्नदश्च भूत्वा अनाहिताग्निज्यैष्ठत्वादिना प्रतिबन्धाभावे कृताधानो नित्यनैमित्तिकान् यज्ञान् कृत्वा मोक्षे मनः कुर्य्यात् चतुर्थाश्रमं प्रविशेत नान्यथा । अनेनानपाकृतर्णत्रयस्य गृहस्थस्य प्रव्रज्यायामनधिकारन्दर्शयति । तथाह मनुः । "ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् । अनपाकृत्य मोक्षन्तु सेवमानो व्रजत्यधः इति" । यदा तु ब्रह्मचर्य्यात् प्रव्रजति तदा न प्रजोत्पादनादिनियमः । अकृतदारपरिग्रहस्य तत्रानधिकाराद्रागप्रयुक्तत्वाच्च विवाहस्य । न च ऋणत्रयापाकरणविधिरेव दारानाक्षिपतीति शङ्कनीयम् । विद्याधनार्जननियमवदन्यप्रयुक्तदारसम्भवेतस्यानाक्षेपकत्वात् । ननु "जायमानोवै ब्राह्मणस्त्रिभिर्ऋणवान् जायते ब्रह्मचर्य्येण ऋषिभ्यो, यज्ञेन देवेभ्यः, प्रजया पितृभ्यः" इति जातमात्रस्यैव प्रजोत्पादनादीन्यावश्यकानीति दर्शयति, नैवम् न हि जातमात्रोऽकृतदाराग्निपरिग्रहो यज्ञादिष्वधिक्रियते । तस्मादधिकारी जायमानो ब्राह्मणादिर्यज्ञादीननुतिष्ठेदिति तस्यार्थः । ततश्चोपनीतस्य वेदाध्ययनमेवावश्यकम् । कृत दारपरिग्रहस्य प्रजोत्पादनमपीति" ततश्च ब्रह्मचर्य्याश्रमस्यैव नित्यत्वमितरेषां तु "यमिच्छेत्तु तमावसेत्" इति मिताक्षराधृतवचनात् काम्यत्वमेव । ऋणत्रयापाकरणावश्यकता तु कृतविवाहस्यैवेति सिद्धम् ।

आश्रमाश्च चतुर्विधाः । ब्रह्मचर्य्यगार्हस्थ्यवानप्रस्थभिक्षुकभेदात् । "ब्रह्मचारी गृहस्थश्च वानप्रस्थोय-

तिस्तथा । एते गृहस्थप्रभवाश्चत्वारः पृथगाश्रमाः" मनूक्तेः तत्र ब्रह्मचारी द्विविधः । नैष्ठिक उपकुर्व्वाणश्च मरणान्तं गुरुकुलवासितया कृतब्रह्मचर्य्यः नैष्ठिकः । षट्त्रिंशदब्दादिकं गुरौ वसित्वा गार्हस्थ्यार्थं कृतसमावर्त्तन उपकुर्व्वाणः । गृहस्थोऽपि द्विविधः । अकृतदारः स्नातकः कृतदारश्च । तत्र कृतसमावर्त्तनोऽपि कन्यालाभात् पूर्व्वं धृतस्मार्त्तधर्मभेदः स्नातकः । तद्धर्म्माश्च आप्लवशब्दे ७५२ पृष्ठेऽभिहिताः । कृतदारोऽपि द्विविधः साग्निर्निरग्निश्च साग्निरपि द्विविधः श्रौताग्नियुक्तः स्मार्त्ताग्नियुक्तश्च । वानप्रस्थोऽपि द्विविधः सदारोऽदारश्च "पुत्रेषु दारान् निक्षिप्य वनं गच्छेत् सहैव वा" मनूक्तेः सदारादारत्वपक्षयोः समधिगमात् । तत्र अदारस्य अपचमानाश्मकुट्टकदन्तोलूखलादिसंज्ञा । सदारस्य पचमानसंज्ञा । भिक्षुरपि चतुर्विधः कुटीचक बहूदक हंस-परहंसेतिभेदात् । भिक्षुकोऽपि प्रकारान्तरेण द्विविधः विविदिषासन्न्यासी विद्वत्संन्यासी च तदेतत् जीवन्मुक्तौ विद्यारण्येन निरूपितं यथा "वक्ष्ये विविदिषान्यासं विद्वन्न्यासञ्च भेदतः । हेतू विदेहमुक्तेश्च जीवन्मुक्तेश्च तौ क्रमात् ॥ संन्यासहेतुर्वैराग्यं यदहर्विरजेत्तदा । प्रव्रजेदिति वेदोक्तेस्तद्भेदस्तु पुराणतः । विरक्तिर्द्विविधा प्रोक्ता तीव्रतीव्रतरेति च । सत्यामेव तु तीव्रायां न्यसेद्योगी कुटीचके ॥ शक्तो बहूदके तीव्रतरायां हंससंज्ञिते । मुमुक्षुः परमे हंसे साक्षाद्विज्ञानसाधने । पुत्रदारधनादीनां नाशे तात्कालिकी मतिः । धिक् संसारमितीदृक् स्याद्विरक्तेर्मन्दता हि सा ॥ अस्मिन् जन्मनि मा भूवन् पुत्रदारादयो मम । इति या सुस्थिरा बुद्धिः सा वैराग्यस्य तीव्रता ॥ पुनरावृत्तिसहितो लोको मे मास्तु कश्चन । इति तीव्रतरत्वं स्यान्मन्दे न्यासो न कोऽपि हि ॥ यात्राद्यशक्तिशक्तिभ्यां तीव्रे न्यासद्वयं भवेत् । कुटीचको बहूदश्चेत्युभावेतौ त्रिदण्डिनौ । द्वयं तीव्रतरे ब्रह्मलोकमोक्षविभेदतः । तल्लोके तत्त्वविद्धंसो लोकेऽस्मिन् परहंसकः ॥ एतेषान्तु समाचाराः प्रोक्ताः पाराशरस्मृतेः । व्याख्यानेऽस्माभिरत्रायं परहंसो विविच्यते । जिज्ञासुर्ज्ञानवांश्चेति परहंसो द्विधा मतः । प्राक्तज्ज्ञानाय जिज्ञासोर्न्यासं वाजसनेयिनः । "प्रव्राजिनो लोकमेतमिच्छन्तः प्रव्रजन्ति हि" । एतस्यार्थन्तु गद्येन वक्ष्येमन्दविबुद्धये ॥ लोको हि द्विविधः आत्मलोकोऽनात्मलोकश्चेति । तत्रानात्मलोकस्य त्रैविध्यं वृहदारण्यके तृतीयाध्याये श्रूयते । "अथ त्रयोवाव लोकाः मनुष्यलोकः पितृलोको देवलोक" इति । सोऽयं मनुष्यलोकः पुत्रेणैव जय्योनान्येन कर्म्मणा । कर्म्मणा पितृलोको विद्यया देवलोक" इति । आत्मलोकश्च तत्रैव श्रूयते । "योहवा अस्माल्लोकात् स्वं लोकमदृष्ट्वा प्रैति स एनमविदितो न भुनक्तीति" । "आत्मानमेव लोकमुपासीत" "स य आत्मानमेव लो[illegible] उप स्ते न हास्य कर्म क्षीयत" इति च । षष्ठाध्याये[illegible] "[illegible] प्रजया करिष्यामो येषां नोऽयमात्माऽयञ्च लोक" इति । एवञ्च सति एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति" इत्यत्रात्मलोकोविवक्षित इति गम्यते "स वा एष महानज आत्मेति" प्रक्रान्तस्यात्मन एव एतच्छब्देन परामृष्टत्वात् । लोक्यते अनुभूयत इति लोकः । तथा चात्मानुभवमिच्छन्तः प्रव्रजन्तीति श्रुतेस्तात्पर्य्यार्थः सम्पद्यते । स्मृतिश्च "ब्रह्मविज्ञानलाभाय परहंससमाह्वयः । शान्तिदान्त्यादिभिः सर्व्वैः साधनैः सहितो भवेदिति" । इह जन्मनि जन्मान्तरे वा सम्यगनुष्ठितैर्वेदानुवचनादिभिरुत्पन्नया विविदिषया सम्पादितत्वादयं विविदिषा सन्यासो द्विविधः जन्मापादककर्म्मादित्यागमात्रात्मकः प्रैषोच्चारणपूर्व्वकदण्डधारणाद्याश्रमरूपश्चेति । त्यागश्च तैत्तिरीयादौ श्रूयते "न कर्म्मणा न प्रजया न धनेन, त्यागेनैके अमृतत्वमानशुरिति" । अस्मिंश्च त्यागे स्त्रियोऽप्यधिक्रियन्ते । अतएव मैत्रेयीवाक्यमाम्नायते "येनाहं नामृता स्यां किमहं तेन कुर्य्याम् यदेव भगवन् ! वेद तदेव मे ब्रूहीति" । ब्रह्मचारिगृहस्थवानप्रस्थानां केनचिन्निमित्तेन सन्न्यासाश्रमस्वीकारे प्रतिबद्धे सति स्वाश्रमधर्म्मेष्वनुष्ठीयमानेष्वपि वेदनार्थो मानसकर्म्मादित्यागो न विरुध्यते श्रुतिस्मृतीतिहासपुराणेषु लोके च तादृशानान्तत्त्वविदां बहूनामुपलम्भात् । यस्तु दण्डधारणादिरूपो वेदनहेतुः परमहंसाश्रमः स पूर्व्वैराचार्य्यैर्बहुधा प्रपञ्चित इत्यस्माभिरुपरम्यते । इति विविदिषासंन्यासः ।

"अथ विद्वत्संन्यासं निरूपयामः ॥ सम्यगनुष्ठितैः श्रवणमनननिदिध्यासनैः परतत्त्वं विदितवद्भिः सम्पाद्यमानो विद्वत्संन्यासः । तञ्च याज्ञवल्क्यः सम्पादयामास । तथाहि विद्वच्छिरोमणिर्भगवान् याज्ञवल्क्यो विजिगीषुकथायां बहुविधेन तत्त्वनिरूपणेनाश्वलायनप्रभृतीन्मुनीन् विजित्य वीतरागकथायां संक्षेपविस्ताराभ्यामनेकधा जनकं बोधयित्वा मैत्रेयीं बुबोधयिषुस्तस्याः स्वरया तत्त्वाभिरुह्याय स्वकर्त्तव्यं सन्यासं प्रतिजज्ञे ततस्तां बोधयित्वा संन्यासञ्चकार । तदुभयं मैत्रेयीब्राह्मणस्याद्यन्तयोराम्नायते" "अथ ह

याज्ञवल्क्योऽन्यद्वृत्तमुपाकरिष्यन् मैत्रेयीति होवाच याज्ञवल्क्यः, प्रव्रजिष्यन् वा अरे अहमस्मात् स्थानादस्मीति, एतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यः प्रवव्राजेति"॥ कहोले ब्राह्मणेऽपि विद्वत्संन्यास आम्नायते "एतं वैतमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्य्यं चरन्तीति"। नचैतद्वाक्यं विविदिषासंन्यासपरमिति शङ्कनीयं" पूर्व्वकालवाचिनो विदित्वेति क्त्वाप्रत्ययस्य ब्राह्मणशब्दस्य च बाधप्रसङ्गात्। नचात्र ब्राह्मणशब्दो जातिवाचकः वाक्यशेषे पाण्डित्यबाल्यमौनशब्दाभिधेयैः श्रवणमनननिदिध्यासनैः साध्यं ब्रह्मसाक्षात्कारमभिप्रेत्याथ ब्राह्मण इत्यभिहितत्वात्। ननु तत्र विविदिषासंन्यासोपेतः पाण्डित्यादौ प्रवर्त्तमानोऽपि ब्राह्मणशब्देन परामृष्टः तस्मात् ब्राह्मणः पाण्डित्यं निर्व्विद्य बाल्येन तिष्ठासेदिति" नैवं भाविनीं वृत्तिमाश्रित्य तत्र ब्राह्मणशब्दस्य प्रयुक्तत्वात्। अन्यथा अथमथ ब्राह्मण इति साधनानुष्ठानोत्तरकालवाचिन मथशब्दं प्रयुञ्जीत। शारीरब्राह्मणेऽपि विद्वत्संन्यासविविदिषासंन्यासौ स्पष्टं निर्द्दिष्टौ "एतमेव विदित्वा मुनिर्भवत्येतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्तीति"। मुनित्वं मननशीलत्वम्। तच्चासति कर्त्तव्यान्तरे सम्भवतीत्यर्थात् संन्यास एवाभिधीयते। एतच्च वाक्यशेषे स्पष्टीकृतम् "एतद्ध स्म वै तत् पूर्व्वे विद्वांसः प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोक इति" "ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्य्यं चरन्तीति"। अयं लोक इत्यापरोक्ष्येणानुभूयत इत्यर्थः। नन्वत्र मुनित्वेन फलेन प्रलोभ्य विविदिषासंन्यासं विधाय वाक्यशेषे स एव प्रपञ्चितः अतो न संन्यासान्तरं कल्पनीयं मैवं वेदनस्यैव विविदिषासंन्यासफलत्वात्। न च वेदनमुनित्वयोरैकत्वं शङ्कनीयं विदित्वा मुनिर्भवतीति पूर्व्वोत्तरकालीनयोस्तयोः साध्यसाधनत्वप्रतीतेः। ननु वेदनस्यैव परिपाकातिशयरूपमवस्थान्तरम् मुनित्वम् अतो वेदनद्वारा पूर्व्वसंन्यासस्यैवैतत् फलमिति चेत् बाढम् अतएव साधनरूपात् संन्यासादन्यं फलरूपमेनं संन्यासं ब्रूमः। यथा विविदिषासंन्यासिना तत्त्वज्ञानाय श्रवणादीनि सम्पादनीयानि तथा विद्वत्संन्यासिनापि जीवन्मुक्त्यै मनोनाशवासनाक्षयौ सम्पादनीयौ। एतच्चोपरिष्टात् प्रपञ्चयिष्यामः। सत्यप्यनयोः संन्यासयोरवान्तरभेदे परमहंसत्वाकारेणैकीकृत्य चतुर्व्विधा भिक्षव इति स्मृतिषु चतुःसंख्योक्ता। पूर्व्वोक्तयोः संन्यासयोः परमहंसत्वं जाबालश्रुतावगम्यते। तत्र हि जनकेन संन्यासे पृष्टे सति याज्ञवल्क्योऽधिकारिविशेषविधानेनोत्तरकालानुष्ठेयेन च सहितं विविदिषासंन्यासमभिधाय पश्चादत्रिणा यज्ञोपवीतरहितस्याक्षिप्तेऽब्राह्मण्ये पश्चादात्मज्ञानमेव यज्ञोपवीतमिति समादधौ अतो बाह्ययज्ञोपवीताभावात् परमहंसत्वं निश्चीयते। तथान्यस्यां कण्डिकायां तत्र परमहंसा नामेत्युपक्रम्य संवर्त्तकादीन् बहुविधान् ब्रह्मविदो जीवन्मुक्तानुदाहृत्य "अव्यक्तलिङ्गा अव्यक्ताचारा अनुन्मत्ता उन्मत्तवदाचरन्तः" इति विद्वत्संन्यासिनो दर्शिताः। तथा "त्रिदण्डं कमण्डलुं शिक्यं पात्रं जलपवित्रं शिखां यज्ञोपवीतञ्चेत्येतत् सर्व्वं भूःस्वाहेत्यप्सु परित्यज्यात्मानमन्विच्छेदिति" त्रिदण्डिनः सत एकदण्डरूपं विविदिषासंन्यासं विधाय तत्फलरूपं विद्वत्संन्यासमेवमुदाजहार। "यथा जातरूपधरो निर्द्वन्द्वो निष्परिग्रहस्तत्त्वब्रह्ममार्गे सम्यक् सम्पन्नः शुद्धमानसः प्राणसन्धारणार्थं यथोक्तकाले विमुक्तो भैक्षमाचरन्नुदरपात्रेण लाभालाभौ समौ कृत्वा शून्यागारे देवगृहतृणकूटवल्मीकवृक्षमूलकुलालशालाग्निहोत्रनदीपुलिनगिरिकुहरकन्दरकोटरनिर्झरस्थण्डिलेष्वनिकेतवास्यप्रयत्नो निर्म्ममः शुक्लध्यानपरायणोऽध्यात्मनिष्ठः शुभाशुभकर्म्मनिर्म्मूलनपरः संन्यासेन देहत्यागं करोति स परमहंसो नामेति"। तस्मादनयोरुभयोः परमहंसत्वं सिद्धम्। समानेऽपि परमहंसत्वे सिद्धे विरुद्धधर्म्माक्रान्तत्वादवान्तरभेदोऽप्यभ्युपगन्तव्यः। विरुद्धधर्म्मत्वञ्चारुण्युपनिषत्परमहंसोपनिषदोः पर्य्यालोचनायामवगम्यते। "केन भगवन्! कर्म्माण्यशेषतो विसृजामीति" शिखायज्ञोपवीतस्वाध्यायगायत्रीजपाद्यशेषकर्म्मत्यागरूपे विविदिषासंन्यासे शिष्येणारुणिना पृष्टे सति गुरुः प्रजापतिः "शिखां यज्ञोपवीतम्" इत्यादिना सर्व्वत्यागमभिधाय "दण्डमाच्छादनं कौपीनञ्च परिग्रहेदिति" दण्डादिस्वीकारं विधाय "त्रिसन्ध्यादौ स्नानमाचरेत्। सन्धिं समाधावात्मन्याचरेदिति" "सर्व्वेषु वेदेष्वारण्यकमावर्त्तयेदुपनिषदमावर्त्तयेदुपनिषदमावर्त्तयेदिति" वेदनहेतूनाश्रमधर्म्माननुष्ठेयतया विधत्ते। "अथ योगिनां परमहंसानां कोऽयं मार्गः" इति विद्वत्संन्यासे नारदेन पृष्टे सति गुरुर्भगवान् स्वपुत्रमित्रेत्यादिना पूर्व्ववत् संन्यासमभिधाय "कौपीनं दण्डमा-

च्छादनञ्च स्वशरीरोपभोगार्थाय लोकस्योपकारार्थाय च परिग्रहेदिति" दण्डादिस्वीकारस्य लौकिकत्वमभिधाय "तच्च मुख्ये नास्तीति" शास्त्रीयत्वं प्रतिषिध्य "कोऽयं मुख्य इति चेदयं मुख्योन दण्डं न शिखां न यज्ञोपवीत नाच्छादनञ्चरति परमहंसः" इति दण्डादिलिङ्गराहित्यस्य शास्त्रीयतामुक्त्वा "न शीतं न चोष्ण"मित्यादिना वाक्येन "आशाम्बरो निर्नमस्कार" इत्यादिवाक्येन च लोकव्यवहारातीतत्वमभिधायान्ते "यत्पूर्णानन्दैकबोधस्तद्ब्रह्माहमस्मीति कृतकृत्यो भवति" इत्यन्तेन ग्रन्थेन ब्रह्मात्मानुभवमात्रपर्य्यवसानमाचष्टे । अतोविरुद्धधर्म्मोपेतत्वादस्त्वेवानयोर्महान् भेदः । स्मृतिष्वप्ययं भेद उक्तदिशा द्रष्टव्यः । "संसारमेवं निःसारं दृष्ट्वा सारदिदृक्षया । प्रव्रजन्त्यकृतोद्वाहाः परं वैराग्यमाश्रिताः । प्रवृत्तिलक्षणो योगो ज्ञानं संन्यासलक्षणम् । तस्माज्ज्ञानं पुरस्कृत्य संन्यसेदिह बुद्धिमान्" इत्यादिविविदिषासंन्यासः । "यदा तु विदितं तत्स्यात् परं ब्रह्म सनातनम् । तदैकदण्डं संगृह्य सोपवीतां शिखां त्यजेत् । ज्ञात्वा सम्यक्परं ब्रह्म सर्व्वं त्यक्त्वा परिव्रजेदिति" विद्वत्संन्यासः । ननु कलाविद्यादाविव कदाचिदौत्सुक्यमात्रेणापि वेदितुमिच्छा सम्भवत्येव विद्वत्ताप्यापातदर्शिनः पण्डितंमन्यमानस्याप्यवलोक्यते । न च तौ प्रव्रजन्तौ दृष्टौ अतोविविदिषाविद्वत्ते कीदृश्यौ विवक्षिते इति चेदुच्यते । यथा तीव्रायां बुभुक्षायामुत्पन्नायां भोजनादन्यो व्यापारो न रोचते । भोजने च विलम्बोन सोढुं शक्यते । तथा यदा जन्महेतुषु कर्म्मस्वत्यन्तमरुचिः वेदनसाधनश्रवणादिषु च त्वरा महती सम्पद्यते तादृशी विविदिषा संन्यासहेतुः । विद्वत्ताया अवधिरुपदेशसाहस्र्यामभिहितः । "देहात्मज्ञानवज्ज्ञानं देहात्मज्ञानबाधकम् । आत्मन्येव भवेद्यस्य स नेच्छन्नपि मुच्यते" इति । श्रुतावपि "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे इति" । परमपि हैरण्यगर्भादिपदमवरं यस्मादसौ परावरः । हृदये बुद्धौ साक्षिणस्तादात्म्याध्यासोऽनाद्यविद्यानिमित्तत्वेन ग्रन्थिवद्दृढसंश्लेषरूपत्वाद्ग्रन्थिरित्युच्यते । आत्मा साक्षी कर्त्ता वा, साक्षित्वेऽप्यस्य ब्रह्मत्वमस्ति न वा, ब्रह्मत्वेऽपि तद्बुद्ध्या वेदितुं शक्यते न वा, शक्यत्वेऽपि तद्वेदनमात्रेण मुक्तिरस्ति नवेत्यादयः संशयाः । कर्माण्यनारब्धानि आगामिजन्मकारणानि । तदेतत् ग्रन्थ्यादित्रयमविद्यानिमित्तत्वादात्मदर्शनेन निवर्त्तते । स्मृतावप्ययमर्थ उपलभ्यते "यस्य नाहंकृतोभावोबुद्धिर्यस्य न लिप्यते । हत्वापि स इमाँल्लोकान्न हन्ति न निबध्यत" इति । यस्य ब्रह्मविदो,भावः सत्ता स्वभाव आत्मा, नाहं कृतोनाहङ्कारेण तादात्म्याध्यासादाविर्भावितः, बुद्धिलेपः संशयः । तदभावे त्रैलोक्यवधेनापि न निबध्यते किमुतान्येन कर्म्मणेत्यर्थः । नन्वेवं सति विविदिषाफलेन तत्त्वज्ञानेनैवागामिजन्मनां निवारितत्वाद्वर्त्तमानजन्मशेषस्य भोगमन्तरेण निवारयितुमशक्यत्वादलमनेन विद्वत्संन्यासप्रयासेनेति चेन्नैवं विद्वत्सन्यासस्य जीवन्मुक्तिहेतुत्वात् । तस्माद्वेदनाय यथा विविदिषासंन्यासः एवं जीवन्मुक्तये विद्वत्संन्यासः सम्पादनीयः इति विद्वत्संन्यासः" ।

"दीर्घकालं ब्रह्मचर्य्यम् इत्यादिना पुराणे यद् कलिवर्ज्ज्ये दीर्घकालब्रह्मचर्य्यसंन्यासाश्रमयोरुत्कीर्त्तनम् तत् नैष्ठिकब्रह्मचर्य्यषट्त्रिंशदब्दादिब्रह्मचर्य्ययोर्निषेधपरम् न पुनर्गृहस्थान्तिकब्रह्मचर्य्यमात्रस्य निषेधः दीर्घकालेतिविशेषणसामर्थ्यात् तेन "षट्त्रिंशदाब्दिकं चर्य्यं गुरौ त्रैवेदिकं व्रतम् । तदर्द्धिकं पादिकं वा ग्रहणान्तिकमेव वा" इति मनुनोक्तपक्षचतुष्टयमध्ये अल्पकालिकस्यैव कलौ कर्त्तव्यता । "तथाऽग्निहोत्रं गवालम्भं संन्यासं पलपैतृकमिति" निगमवाक्यमपि त्रिदण्डविषयम् "यावद्वर्णविभागोऽस्ति यावद्वेदः प्रवर्त्तते । संन्यासञ्चाग्निहोत्रञ्च तावत् कुर्य्यात् कलौ युगे" देवलस्मरणात् । "चत्वार्य्यब्दसहस्राणि चत्वार्य्यब्दशतानि च । कलेर्यदा गमिष्यन्ति तदा त्रेतापरिग्रहः । संन्यासश्च न कर्त्तव्यो ब्राह्मणेन विपश्चित" इति व्यासवचनन्तु त्रिदण्डविषयम् । महानिर्वाणतन्त्रे तु । "पुरैव कथितं तावत् कलिधर्म्मविचेष्टितम् । तपःस्वाध्यायहीनानां नृणामल्पायुषामपि । क्लेशप्रयासाशक्तानां कुतोदेहपरिश्रमः । ब्रह्मचर्य्याश्रमोनास्ति वानप्रस्थोऽपि न प्रिये । गार्हस्थ्यो भैक्षुकश्चैव आश्रमौ द्वौ कलौ युगे ! गृहस्थस्य क्रियाः सर्व्वा आगमोक्ताः कलौ शिवे । नान्यमार्गैः क्रियासिद्धिः कदापि गृहमेधिनाम् । भैक्षुकेऽप्याश्रमे वापि वेदोक्तं दण्डधारणम् । कलौ नास्त्येव तत्त्वज्ञे ! यतस्तच्छ्रौतसंस्कृतिः । शैवसंस्कारविधिनाऽवधूताश्रमधारणम् । तदेव कथितं भद्रे ! संन्यासग्रहणं कलौ । विप्राणामितरेषाञ्च वर्णानां प्रबले कलौ । उभये आश्रमे देवि ! सर्व्वेषामधिकारिता । सर्वेषामेव संस्कारकर्म्मणी शैववर्त्मना । विप्राणामितरेषाञ्च

कर्म्म लिङ्गं पृथक् पृथक्” । उभावेवाश्रमौ विहितौ एतदागमाधिकारिणः पतितब्राह्मणादेरकृतप्रायश्चित्तस्यैव बोध्यम् । आगमविधावधिकारिणश्च आगमग्रन्थे ६१४ पृष्ठे उक्ताः इतरेषान्तु न श्रौतदण्डादिधारणनिषेधः तेषां श्रौत एवाधिकारात् । वस्तुतः आगमवाक्येऽपि प्रबले कलाविति विशेषोक्तेः प्रबले कलौ सर्व्वेषामेव पतित प्रायत्वस्यावश्यम्भावादागमधर्म्मस्यैवावलम्बनीयतया तेषामेव तदानीमागमोक्ताश्रमद्वयेऽधिकार इति भेद इति दिक् ।

आश्रमगुरु पु० आश्रमाणां ब्रह्मचर्य्यादीनां गुरुर्नियन्ता । आश्रमनियन्तरि नृपे । “कर्त्तुमाश्रमगुरुः स नाश्रमत्” माघः ।

आश्रमधर्म्म पु० आश्रमविहितोधर्म्मः । ब्रह्मचर्य्यादिविहिते धर्म्मे धर्म्मो हि षड्विधः वर्णधर्म आश्रमधर्म्मो वर्णाश्रमधर्म्मो गुणधर्म्मो निमित्तधर्म्मोसाधारणधर्म्मश्चेति । तत्र वर्णधर्म्मो ब्राह्मणो नित्यं मद्यं वर्ज्जयेदित्यादिः । आश्रमधर्म्मोऽग्नीन्धनभैक्ष्यब्रह्मचर्य्यादिः वर्णाश्रमधर्म्मो ब्राह्मणादि क्रमेण पालाशादिदण्डधारणादि”नैमित्तिकधर्म्मोविहिताकरणनिषिद्धसेवननिमित्तं प्रायश्चित्तम्, साधारणधर्म्मोऽहिंसादि मांहिंस्यात् सर्व्वाभूतानीत्याचाण्डालं साधारणधर्म्मः श्रत्युक्तः इति” मिता० । अन्यत्र चान्ये आश्रमधर्म्माः दर्शिताः । “ब्रह्मचारिणः स्वाध्यायः, गृहस्थस्य दानं दमो यज्ञश्च, वानप्रस्थस्य तपः, भिक्षुकस्य “अभयं सत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः” इत्यादिकः तथा च “यस्याश्रमं समाश्रित्य चाधिकारः प्रवर्त्तते । स खल्वाश्रमधर्म्मस्तु भिक्षादण्डादिकं यथा । यतीनां तु शमो धर्म्मोनियमोवनवासिनाम् । दानमेव गृहस्थानां शुश्रूषा ब्रह्मचारिणामिति”स्मृत्वा स्मृत्वा च येये धर्म्मा यत्र यत्राश्रमे विहितास्तेते आश्रमधर्म्मशब्देनोच्यन्ते ते च धर्म्मास्तत्तच्छब्दे प्रपञ्चेन वक्ष्यन्ते । [वनादौ आश्रमस्थानादयोऽप्यत्र ।

आश्रमपद न० आश्रमस्य पदम् । मुन्यादेर्विश्रामस्थाने तपो-

आश्रमवास पु० आश्रमे वासः । मुन्यादीनां १तपोवनादौ वासे आश्रमवासमधिकृत्य कृतोग्रन्थः अण् । धृतराष्ट्रादीनामाश्रमवासाधिकारेण आवर्णिते भारतान्तर्गते २पर्व्वभेदे । “एतदाश्रमवासाख्यम्” भा०आ० १अ० ।

आश्रमवासिक न० आश्रमवासः प्रतिपाद्यतयाऽस्त्यस्य ठन् । भारतान्तर्गते धृतराष्ट्रादेराश्रमवासप्रतिपादके पर्व्वभेदे ।

आश्रमसद् त्रि० आश्रमे सीदति सद–क्विप् । आश्रमवासिनि तपोवनवासनिरते वानप्रस्थादौ ।

आश्रमिक त्रि० आश्रमोऽस्त्यस्य ठन् । आश्रमयुक्ते ।

आश्रमिन् त्रि०आश्रमोऽस्त्यस्य इनि । आश्रमयुक्ते स्त्रियां ङीप् । “तथैवाश्रमिणः सर्व्वे गृहस्थे यान्ति संस्थितिम्” “चतुर्भिरपि चैवैतैर्नित्यमाश्रमिभिर्द्विजैः” मनुः ।

आश्रय न० आश्रीयतेऽसौ आ+श्रि–कर्म्मणि अच् । १आश्रयणीये “यद्विष्णुमाश्रयमनागतमभ्युपैति” “द्रव्याश्रयेष्वपि गुणेषु रराज नीलः” माघः । “चित्रं यथाश्रयमृते स्थाण्वादिभ्यो विना यथाच्छाया । तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गम्” सां०का० २आधारे “आसत्तिराश्रयाणान्तु सामान्यज्ञानमिष्यते” “हेतोरेकाश्रये येषां स्वसाध्यव्यभिचारिता “जन्यानां जनकःकालो जगतामाश्रयो मतः” भाषा० “तमाश्रयं दुष्प्रसहस्य तेजसः” रघुः ३गृहे । “पितृमातृाश्रये गच्छ” ४अवलम्बे “विनाश्रयं न तिष्ठन्ति पण्डिता वनिता लताः” उद्भटः “निराश्रयं मां जगदीश ! रक्ष” पुरा० ५विषये “बभूव यत् प्रेमपरस्पराश्रयम्” रघुः अरिभिःपीड्यमानेन बलवदाश्रयणरूपे षड्गुणान्तर्गते राज्ञां ६गुणभेदे यथाश्रयः कर्त्तव्यस्तथोक्तमग्निपुराणे “बलिनोर्द्विषतोर्मध्ये वाचात्मानं समर्पयन् । द्वैधीभावेन तिष्ठेत काकाक्षिवदलक्षितः । उभयोरपि संपाते सेवेत बलवत्तरम् । यदा द्वावपि नेच्छेतां संश्लेषं जातसंविदौ । तदोपसर्पेत्तच्छत्रुमधिकं वा स्वयं व्रजेत् । उच्छिद्यमानो बलिना निरुपायप्रतिक्रियः । कुलोद्भूतं सत्यमार्य्यमासेवेत बलोत्कटम् । तद्दर्शनोपासितता नित्यं तद्भावभाविता । तत्कारितप्रश्रयिता वृत्तं संश्रयिणः स्मृतम्” । भावे अच् । ७अवलम्बने । “योऽवमन्येत ते मूले हेतुशास्त्राश्रयेण च” मनुः । ८आश्रयणे “गुणवदाश्रयलब्धगुणोदये” माघः । त्व । आश्रयत्वम् आधारत्वे न० । “आश्रयत्वविषयत्वभागिनी” सं०शा० तल् । आश्रयता । तत्रार्थे स्त्री आधारशब्दे विवृतिः ।

आश्रयण न०आ+श्रि-ल्युट् ।१आसेवायाम् २अवलम्बने च । कर्त्तरि ल्युट् । ३आश्रयकर्त्तरि त्रि० स्त्रियां ङीप् । “अहमेत्य पतङ्गवर्त्मना पुनरङ्काश्रयणी भवामि ते”कुमा० ।

आश्रयणीय त्रि० आ+श्रि–कर्म्मणि अनीयर् । यस्याश्रयः क्रियते १तस्मिन् २अवलम्ब्ये च ।

आश्रयवत् त्रि०आश्रयोऽस्त्यस्य मतुप् मस्य वः स्त्रियां ङीप् । आश्रययुक्ते सावलम्बे साधारे पदार्थे ।

आश्रयाश पु० आश्रयमश्नाति अश–अण् उप०स० ।

३वह्नौ तस्य आश्रयस्य काष्ठादेर्दाहकत्वात्तथात्वम्। "दुर्वृत्तः क्रियते धूर्त्तैः श्रीमानात्मविवृद्धये। किं नाम खलसंसर्गः कुरुते नाश्रयाशवत्" उद्भटः २चित्रकवृक्षे ३कृत्तिकानक्षत्रे च। ४आश्रयनाशके त्रि०।

आश्रयासिद्ध पु० आश्रयोऽसिद्धोऽस्य। न्यायोक्ते हेत्वाभास भेदे यथा गगनपद्मं सुरभि पद्मत्वात् सरोजपद्मवदित्यादौ गगनपद्मरूपस्य हेतोराश्रयस्याप्रसिद्धत्वात् हेतोर्दुष्टत्वम्।

आश्रयासिद्धि स्त्री आश्रयस्य सिद्धिः अप्रसिद्धिः न्यायोक्ते हेतोर्दोषभेदे असिद्धिशब्दे ५५४पृष्ठे विवृतिः।

आश्रयिन् त्रि० आश्रयति आ+श्रि-इनि। आश्रय कारके आश्रिते। "मयूरपृष्ठाश्रयिणा गुहेन" रघुः "पर्य्यन्ताश्रयिभिर्निजस्य सदृशं नाम्नः किरातैः कृतम्" रत्ना०।

आश्रव त्रि० आशृणोति वाक्यम् आ+श्रु-अच्। वाक्यस्थिते वाचि प्रवणे वाक्यं श्रुत्वा तदर्थानुष्ठायिनि। "संगवस्तु भिषजामनाश्रवः" रघुः। भावे+अप्। २अङ्गीकारे ३क्लेशे च।

आश्राव त्रि० आ+श्रु-णिच्-अच्। १श्रावणे २अङ्गीकारणे च

आश्रि स्त्री सम्यक् अश्रिः प्रा०स०। सम्यक्कोणे शब्दच०

आश्रित त्रि० आ+श्रि-क्त। आश्रयप्राप्ते, शरणागते, आधेये "प्रायश्चलं गौरवमाश्रितेषु" कुमा० "अथ द्रव्याश्रिता गुणाः"। "अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिहेष्यते इति" च भाषा०।

आश्रित्य अव्य० आ+श्रि-ल्यप्। अवलम्ब्येत्यर्थे।

आश्रिन् त्रि० आश्रं चक्षुर्जलमस्त्यस्य तुन्दा० इनि। चक्षुर्जलयुक्ते स्त्रियां ङीप्। [क्विप्। २अङ्गीकर्त्तरि त्रि०।

आश्रुत् स्त्री आ+श्रु-भावे क्विप्। १अङ्गीकारे। कर्त्तरि

आश्रुत त्रि० आ+श्रु-क्त। १अङ्गीकृते, २आकर्णिते च। "एवं सर्व्वत्राश्रुतेषु" कात्या० २,२.६।

आश्रुति स्त्री आ+श्रु-क्तिन्। १अङ्गीकारे २श्रवणे च।

आश्रेय त्रि० आ+श्रि-यत्। १आश्रयणीये २अवलम्ब्ये च।

आश्लिष्ट त्रि० आ+श्लिष-क्त। १आलिङ्गिते २संबद्धे "शिखाभिराश्लिष्टइवाम्भसांनिधिः" "आश्लिष्टभूमिं रसितारमुच्चैः" इति च माघः।

आश्लेष पु० ईषदेकदेशेन श्लेषः संबन्धः आ+श्लिष-घञ्। १एकदेशसंबन्धे। "सामीप्याश्लेषविषयैर्व्याप्त्याधारश्चतुर्विधः" मुग्धबो०। २आलिङ्गने च। "आश्लेषलोलुपवधूस्तनकार्कश्यसाक्षिणीम्" माघः वेदे नि० क्वचित् लस्य रः। आश्रेषोऽप्युक्तार्थे पु० अश्लेषैव स्वार्थे अण्। अश्लेषानक्षत्रे स्त्री। "आश्लेषा नक्षत्रं सर्पा देवताः" तैत्ति०

आश्व न० अश्वानां समूहः अण्। १अश्वसमूहे अश्वं वहते शैषिकः अण् अश्वस्येदं वाह्यम् अञ् वा। २अश्ववाह्ये त्रि० सि०कौ०। अश्वस्य भावः कर्म्म वा प्राणभृज्जातित्वात् अञ्। ३अश्वभावे ४तत्कर्म्मणि च न०। अश्वस्येदम् अण्। ५अश्वसंबन्धिनि त्रि०। "आश्वं कफहरं मूत्रं कृमिदद्रुषु शस्यते" सुश्रुतः।

आश्वतराश्वि पु० अश्वतराश्वस्यापत्यम् इञ्। बुद्धिवृत्तौ।

आश्वत्थ न० अश्वत्थस्य फलमण् प्लक्षा० तस्य न लुक्। १अश्वत्थफले। अश्वत्थस्येदम् अण्। २अश्वत्थसम्बन्धिनि त्रि० स्त्रियां गौ० ङीष्। आश्वत्थी शाखा समिद्वा। "सर्पिरासिच्याश्वत्थीस्तिस्रः समिधः" शत०ब्रा०। तस्मादाश्वत्थे ऋतुपात्रे स्याताम्" शत०ब्रा० अश्वत्थेन युक्ता अण्। अश्वत्थनक्षत्रयुक्तायां ३रात्रौ स्त्री। गहा० छ। आश्वत्थीयः आश्वत्थसम्बन्धिनि त्रि०।

आश्वत्थिक च० अश्वत्थशब्दे ५०७ पृष्ठे विपद्दादि। चान्द्राश्विने मासि। [सम्बन्धिनि।

आश्वपत त्रि० अश्वपतेरिदम् अश्वपत्या० अण्। अश्वपति

आश्वपस् त्रि० आशु आप्नोति असुन् ह्रस्वः। शीघ्रप्रापरि।

आश्वपालिक पुंस्त्री अश्वपाल्याः अपत्यं रेवत्या० ठक्। अश्वपाल्या अपत्ये। [णिनि। अश्वपेजर्षिप्रोक्ताध्यायिषु।

आश्वपेजिन् त्रि० ब०व०। अश्वपेजेन प्रोक्तमधीयते शौनका०

आश्वबाल त्रि० अश्वबालाया ओषधेरयम् अण्। अश्वबालोषधेः संबन्धिनि। "आश्वबालः प्रस्तरः, यज्ञो ह देवेभ्योऽपचक्राम सोऽश्वोभूत्वा पराङावर्त्त तस्य देवा अनुहाय बालानभिपेदुस्तानालुलुपुस्तानालुप्य सार्द्धं संन्यासुस्तत एता ओषधयः समभवन् यदश्वबालाः शिरो वै यज्ञस्यातिथ्यं जघनार्धो बाला उभयतएवैतद्यज्ञं परिगृह्णाति यदाश्वबालः प्रस्तरोभवति" शत०ब्रा०।

आश्वभारिक त्रि० अश्वबाह्य भारमश्वभूतं भारं वा हरति वहति आवहति वा वंशा० ठञ्। अश्वबाह्यस्य अश्वभूतस्य वा भारस्य १हारके २वाहके ३आवाहके च।

आश्वमेधिक त्रि० अश्वमेधाय हितं ठञ्। अश्वमेधसाधने द्रव्यादौ अश्वमेधद्रव्याणि च अश्वमेधशब्दे ५११ पृष्ठे उक्तानि अश्वमेधमधिकृत्य कृतः ग्रन्थः ठञ्। शतपथब्राह्मणान्तर्गते १२ प्रपाठके पञ्चाध्यायीरूपे ग्रन्थभेदे तत्र पञ्चस्वध्यायेषु अश्वमेधस्योत्पत्तिः फलञ्च। तस्य धर्मविषयः आध्वर्य्यवौद्गात्रब्रह्मत्वयाजमानविषयाः तत्र प्रथमाध्यायत्रयेण मन्त्रव्याख्यानेन सह विशेषधर्म्मा

अनुक्रान्ताः। शेषाध्यायद्वयेन च तएव धर्म्मान्तरसहिता अनुक्रान्ता इति भेदः। अश्वमेधमधिकृत्य कृतोग्रन्थः ठञ्। युधिष्ठिराश्वमेधाधिकारेण व्यासकृते भारतान्तर्गते २पर्व्वभेदे न०। "इत्याश्वमेधिकं पर्व्व प्रोक्तमेतन्महाद्भुतम्" भा०आ० प० १ अ०। अश्वमेधः प्रतिपाद्यतयाऽस्त्यस्य ठन्। अश्वमेधिकमप्यत्र न०। "ततोऽश्वमेधिकं नाम पर्व्व प्रोक्तं चतुर्द्दशम्" भा०आ०प०१अ०।

आश्वयुज पु० आश्वयुजी अश्विनीनक्षत्रयुक्ता पौर्णमासी यस्मिन् मासेऽण्। शुक्लप्रतिपदादिके दर्शान्ते चान्द्रे आश्विने मासे। "त्यजेदाश्वयुजे मासि मुन्यन्नं पूर्व्वसञ्चितम्" मनुः "भाद्रपदाश्वयुजौ वर्षा" "गाङ्गमाश्वयुजे मासि प्रायशोवर्षति" इति च सुश्रु०।

आश्वयुजक त्रि० आश्वयुज्यामुप्तो माषः वुञ्। चान्द्राश्विनपौर्णमास्यामुप्ते माषे स हि तस्यामेव तिथौ उप्तः सन् प्ररोहति वर्द्धते च इति लोकप्रसिद्धिः।

आश्वयुजी स्त्री अश्वयुजा अश्विनीनक्षत्रेण युक्ता पौर्णमासी "नक्षत्रेण युक्तः कालः" पा० अण्। आश्विनमासीयपौर्णमास्याम् "आश्वयुज्यां पौर्णमास्यां निकुम्भो वालुकार्णवात्" ब्रह्मपु०। "तेन यक्ष्यमाणः पञ्चवर्षाण्याश्वयुजीशुक्लेषु चतुस्त्रिंशतं पश्रूनालभते मारुतान्" कात्या० २२,२,४। "आश्वयुज्या वुञ्" पा०।

आश्वरथ त्रि० अश्वयुक्तो रथः अश्वरथस्तस्येदम् एत्वपूर्व्वकत्वात् अञ्। अश्ववाह्यरथसम्बन्धिनि।

आश्वलक्षणिक त्रि० अश्वलक्षणं वेत्ति तज्ज्ञापकशास्त्रमधीते वा ठक्। १अश्वलक्षणाभिज्ञे २तद्बोधकशास्त्राध्येतरि च

आश्वलायन पु० अश्वल+अश्वपाहकः मुनिभेदस्तस्यापत्यं नडा० फक्। ऋग्वेदीयश्रौतगृह्यसूत्रकारके ऋषिभेदे "सहस्रकाण्डं स्रकृतं सूत्रं ब्राह्मणसन्निभम् शिष्याश्वलायनप्रीत्यै शौनकेन विपाठितम्" इत्युक्तेः शौनकोपदिष्टेन तेन च "अथैतस्य समाम्ना यस्य विताने योगापत्तिं वक्ष्यामः" इत्युपक्रम्य "नमः शौनकाय" इत्यन्तम् अध्यायचतुष्टयात्मकं वैतानिककर्म्मोपयोगि श्रौतसूत्रम् "उक्तानि वैतानिकानि गृह्याणि वक्ष्यामः" इत्युपक्रम्य "नमः शौनकाय" इत्यन्तम् अध्यायचतुष्टयात्मकं गृह्यकर्म्मोपयोगि गृह्यसूत्रं, तत् परिशिष्टञ्चाध्यायचतुष्टयात्मकं सूत्रं शौनकाचार्य्यप्रसादात् रचितम्। तदीयसूत्रोपरि देवस्वामिना भाष्यं कृतं तन्मूलकमथा गर्गगोत्रेण नरसिंहपुत्रेण नारायणोपाध्यायेन वृत्तिः रचिता तत्र श्रौतसूत्रे प्रतिपाद्यविषयास्तावदभिधीयन्ते।

तत्र प्रथमाध्याये प्रधानस्याङ्गसंहतिज्ञानाय सर्वादौ दर्शपूर्णमासयोर्व्याख्यानम्। १अग्निहोत्रादिषु ऋक्समाम्नायस्य प्रयोगस्वरूपकथनप्रतिज्ञा। २ऋक्समाम्नातकर्मसु आहिताग्नेरधिकारकथनम्। ३अङ्गसङ्करूपविध्यन्तरज्ञानायादौ दर्शपूर्णमासयोर्व्याख्यान प्रतिज्ञा। ४दर्शपूर्णमासयोर्व्याख्यारम्भः। ५अनोषधिहविष्करूपेऽप्रणीते कर्मणि अपरेणाग्निप्रपदनम्। ६ अवटरूपचात्वालवत्सु पशुसोमादिषु अपरेण चात्वालप्रपदनम्। ७ चात्वालरूपस्याध्वनो वैदिकी तीर्थसंज्ञा। ८ होतुः प्राङ्मुखत्वस्य मनोवाक्काययन्त्रणादीनाञ्च चेष्टाया नित्यता। इति परिभाषा संग्रहः। ९ उपस्थीकरणरूपाया अङ्गधारणाया नित्यत्वम्। १० यज्ञोपवीतग्रहणनियमस्यान्तर्विहारे शौचनियमस्य च नित्यत्वम्। ११ विहारे कर्म कुर्वतस्तत्पृष्ठतः करणनिषेधः। १२ एकाङ्गोल्लेखे दक्षिणप्रतीतिः। १३ सर्व्वदक्षिणानुल्लेखेऽपि दक्षिणप्रतीतिः। १४ कर्त्तृरहिते क्रियाविधौ होतर्य्येव कर्त्तृज्ञानम्। १५ दानविधौ यजमाने कर्त्तृज्ञानम्। १६ जुहोति जपतीति प्रायश्चित्ते ब्रह्मणि कर्त्तृज्ञानम्। १७ ऋचो मूलग्रहणे कृत्स्नवेदनम्। १८ सूक्तादौ गायत्र्यादिभागरूपे पादे हीने गृह्यमाणे सूक्तज्ञानम्। १९ सूक्तादावसूक्तादौ चाधिकपादग्रहणे तृचज्ञानम्। २० अस्मिन् शास्त्रे जपादीनामुपांशुप्रयोक्तव्यत्वम्। २१ मन्त्राणां कर्मकरणानाञ्चोपांशुत्वकथनम्। २२ सामान्यविशेषयोर्विशेषविधेर्बलीयस्त्वम्। २३-२४ होतुरवस्थानकथनम्। २५ कर्त्तुरासनकथनम्। २६ वचनादतिरिक्तस्य कर्त्तव्यत्वम्। २७ सामिधेन्यर्थं प्रेषितस्य होतुर्जपविधानम्। २७सूत्राणि प्रथम कण्डिकायाम्। १साकिधेन्यर्थजपः। २तज्जपानन्तरं सामिधेनीनाम् ऋचामनुवचनम्। ३ हिङ्कारपूर्वकप्रणवान्तव्याहृतित्रयजपविधानम्। ४सजपहिङ्कारस्याभिहिङ्कारसंज्ञाकथनम्। ५ कौत्समते निरोङ्कारव्याहृतित्रयजपानन्तरहिङ्करणदर्शनम्। ६कौत्समते सामिधेन्यर्थोक्तजपस्याकरणम्। ७ऋचामेव सामिधेनीत्वप्रदर्शनम्। ८सामीधेनीनाम् ऋचामैकश्रुत्येन सान्तत्येन चानुवचनम्। ९ऐकश्रुत्यलक्षणम् १०सन्ततलक्षणम् ११सन्ततस्यावसानत्वकथनम्। १२पूर्वोच्छ्वासाविभ्रमे उत्तरोच्छ्वासारम्भः। १३प्रणवेनावसानकथनम्। १४ विहिते ऽवसाने प्रणवस्य चतुर्मात्रत्वेनोच्चारणम्। १५ प्रणवान्त्यमकारस्य वर्णान्तरापत्तिकथनप्रतिज्ञा। १६ प्रणवान्त्यमकारेण स्वस्मात् परस्य यस्य कस्यचित् स्पर्शवर्णस्य तद्वर्गी-

वान्तवर्णापादनम्। १७ प्रणवान्तमकारेण यवलान्तस्थासु परान्तस्थानामनुनासिकत्वापादनम्। १८ रेफोष्मसु वर्णेषु प्रणवान्तमकारस्यानुस्वारत्वापत्तिः। १९ प्रथमोत्तमे ऋचौ त्रिरभ्यर्धीकृत्य तयोरनुवचनम्। २० अर्धर्चयोर्ऋचोर्वचनावसानेऽर्धर्चचतुष्कात्मिकयोर्द्वयोर्ऋचोर्वचनम्। २१ उत्तमायामृचि आदौ द्वे पश्चात् अर्धर्चौ। २२ एकादशानामृचां द्वयोस्त्रिरभ्यासयोगेन पञ्चदशसंख्यापूरणनिदर्शनम्। २३ यस्त्वयाज्यादिषु सामिधेनीनां कतिपयधर्मातिदेशः। २४ सामिधेनीभ्योऽन्यत्राध्यर्धकरणप्रतिषेधादयः २५ विहितेऽवसानेऽभिहिङ्काराभ्यासनिषेधः। २६ यस्त्वेष्वेव होतृकाणामभिहिङ्कारविधानात् यावत्तु तत्सन्निषेधसाधनम्। २७ प्रणवेन निगदसन्धानानन्तरं तेनैव तदवसानविधानम्। २७खं० १अ० २क०। १यजमानस्यार्षेयप्रवरणम्। २ अन्यक्षेत्रजातद्व्यामुष्यायणार्षमार्षेयप्रवरणप्रकारः। ३ राजन्यविशां त्रैवर्णिकानुलोमस्त्रीजातानाञ्च पुरोहितार्षेयभागित्वम्। ४राज्ञां राजर्षिप्रवरणं पौरोहित्यप्रवरणं वा ५ प्रवराज्ञाने तत्संशये च वर्णत्रयस्य मानवप्रवरः। ६चतुर्दशनिवित्पदकथनम् आवाहननिगदकथनं, सामिधेन्यादीनां चावाहनीयाभिधायित्वम्। ७अग्निरूपप्रथमदेवतावाहनम्। ८ अग्नीषोमदैवताज्यभागयागयोराख्या। ९ अग्नेरग्नीषोमयोश्च पौर्णमास्यां प्रधानदेवतात्वम्। १०अमावास्यायां दधिपयोभ्यां यागमकुर्वतोऽग्नीषोमयोः स्थाने इन्द्राग्न्योः प्रधानदेवतात्वम्। ११तद्दिने उक्तयागरूपसन्नयनकारिणोऽग्नीषोमस्थाने इन्द्रमहेन्द्रयोरन्यतरावाहनम्। १२उभयोरपि पर्वणोरैतरेयिणाम् विष्णुदेवताकोपांशुयागकरणम्। १३ शाखान्तरीयाणाम् उभयोरपि पक्षयोरुपांशुयागभिन्नयागाभावः। १४पित्र्याद्युपांशुयागानाम् आवाहनादिनिगदचतुष्टये आवाहनादीनां षण्णां पदानाम् उच्चैरितिसंज्ञाविधानम्। १५उपांशुयाजवचनानामन्येषाम् परोक्षाणाम् उपांशुत्वानुवादः, विकल्पेनोच्चैः संज्ञाविधानं च। १६विहितदेवतानामरूपस्य प्रत्यक्षस्योपांशुत्वम्। १७ प्रतिनोदितदेवतमावाहनभेदः। १८ एकप्रदानानां सर्वासां देवतानामावाहने सकृदेवावहशब्दप्रयोगः। १९ उत्तरनिगमेषु एकदेवतात्वेन संस्तवः। २० एकप्रयोजनार्थाया देवतायाः कारणवशात् एकवचनेनैव समानता। २१ अपराव्यवहिताया देवताया निगमेषु सकृदेकवचनभाक्त्वम्। २२ आवापोद्धारयोग्यासु प्रधानदेवतासु कृतावाहनासु देवाज्यपाश्विष्टकृतामावाहनप्रक्रिया।

२३ आश्रावयिष्यतेऽध्वर्यवेऽनुमन्त्रणं तदनन्तरकरणीयञ्च। २४ उत्थानपूर्वकं षष्ट्येतिमन्त्रपाठः। २५ अंसे पार्श्वस्थेन पाणिनाध्वर्य्वन्वारम्भणम्। २६ सव्येन पाणिनाङ्क्ष्णोरुणा वाऽऽग्नीध्रकर्तृकमन्वारम्भणम्। २७ उक्तोभयान्वारम्भणे साधारणमन्त्रः। २८ इध्मसन्नहनरूपैस्तृणैरात्ममुखसंमार्जनम्। २९ संस्कारकर्म्मावृत्तिमात्रे सकृन्मन्त्रेण द्विस्तूष्णीं संस्करणम्। ३० उदकस्पर्शानन्तरं होतृषदनाभिमन्त्रणम्। ३१ दक्षिणोत्तरिणोपस्थेनोपवेशनं होतृषदनात् तृणनिरसनञ्च। ३२ उक्तयोरेतयोर्निरसनोपवेशनयोः सर्वासनेषु प्रथमप्रयोग एव समानत्वम्। ३३ गौतमाचार्य्यमते द्वितीयेऽपि प्रयोगे तादृशनिरसनोपवेशनयोः सद्भावः। ३३खं० १अ० ३क०। १अग्न्याधेये ब्रह्मौदनप्राशनकाले ब्रह्मणो द्विर्निरसनोपवेशनकरणम्। २ सर्वेषु सोमेषु बहिष्पवमानात् प्रत्येत्य ब्रह्मणः पूर्वासने पुनः करणम्। ३ आसने पर्य्यस्तमुपविष्टस्य होतुः सदःप्रसर्पणानन्तरं तत्रैव पुनः करणम्। ४ पशौ स्वाहाकृत्यर्थयोः स्रुगवदापनयोः पुनः करणम्। ५ पत्नीसंयाजार्थोपवेशनाकरणम्। ६ कौत्समते होतृभिक्षानामेतयोर्निरसनोपवेशनयोरकरणम्। ७उपविश्यानन्तरं देवेत्यादिमन्त्रपाठः। ८ जान्वप्येण बर्हिरुपस्पृश्य अभिहिषेत्यादिमन्त्रजपः। ९ इध्मप्रदीप्ते उक्तजपानन्तरं भूपतये नम इति निगदेनाध्वर्यवे स्रुगावदापनम्। १० अग्निर्होतेति निगदमवसाय होतारमद्या इति मन्त्रजपः ११ अग्निर्होतेत्यादिना सह घृतवतीत्यादिकमेकनिगदं विधाय तत्समापनम्। १२ उक्तनिगदे समाप्तेऽध्वर्युकर्तृकमाश्रावणम्। १३ उत्करदेशे तिष्ठत आग्नीध्रं प्रत्याश्रावणप्रकारः। १३खं० १अ० ४क०। १ याज्यलक्षणप्रयाजैर्यजनम्। २ तनूनपान्नराशंसयोरन्यतरेण प्रयाजानां पञ्चसङ्ख्याकत्वम्। ३ सकृत्प्रेषितस्य न सर्वयजनम्। ४ अनानुयाजानां सर्वासां याज्यानामादिरागूर्भवतीति। ५ये यजामह इति आगूः स्वरूपं, वषट्कारस्वरूपञ्च। ६ याज्याया एव उच्चैस्तरत्वबलीयस्त्वोभयधर्मवत्त्वम्। ७ आगूर्वषट्कारयोराद्योः प्लुतिकरणम्। ८ याज्यान्तस्य प्लावनम्। ९ विविक्तयोः सन्धिजातयोरेकारैकारयोरोकारौकारयो आ इ, इति आउ इत्येवं, व्यञ्जनान्तानां सन्ध्यक्षराणां सर्वदा स्वरूपेणैव च प्लावनम्। १० अनवर्णोपधस्य विसर्जनीयस्य रेफिभावः। ११ रेफिसंज्ञिनोऽवर्णोपधस्य विसर्जनीयस्य रेफिभावः। १२ वषट्-

कारसन्धौ अरेफसंज्ञस्यावर्णोपधस्य विसर्जनीयस्य लोपः । १२ वर्गाणां प्रथमस्य स्ववर्गीयतृतीयवर्णापादनम् । १४म-कारे सानुनासिकभावस्य नित्यत्वम् । १५ वौषट्शब्दस्य वषटकारस्वरूपत्वम् । १६इत्येवंरूपः प्रथमप्रयाजः । १७ वषट्कारोच्चारणपूर्व्वकोऽनुमन्त्रणप्रकारः । १८वषट्कारस्य द्विराकीर्त्तनीयत्वम् । १९ अनुमन्त्रणस्यापि द्विराकीर्त्त-नीयत्वम् । २० इत्येवं याज्यास्वरूपम् । २१वशिष्ठादि-भिन्नानां तनूनपादित्यादिः द्वितीयप्रयाजः।२२वशिष्ठादीनां नरांश स इत्यादिः द्वितीयप्रयाजः ।२३इडो अग्न इत्यादिः सर्व्वेषां तृतीयप्रयाजः।२४बर्हिरग्ने इत्यादिः चतुर्थः स्वाहा-सुमित्यादि पञ्चमप्रयाजः ।२५अग्निमन्थनादौ मन्द्रस्वरप्र-योगः।२६शंयुवाकादूर्ध्वं मन्द्रस्वरेण प्रयोगः।२७प्रयाजेभ्य ऊर्द्ध्वमास्विष्टकृतो मध्यमेन प्रयोगः । २८इडादिशंयु-वाकान्तरूपस्य शेषस्योत्तमेन प्रयोगः। २९ पूर्व्वोत्तरयो-राज्यभागनामकयागयोरागोरणदेवतादेशयाज्यासन्धानपूर्वको यागः । ३० अनुवाक्यावतीनामप्रैषाणां चान्याया-त्वाभ्योऽन्यासां देवतानाम् आदेशपूर्व्वकयागः । ३१ अङ्ग-प्रधानरूपे सोमकर्म्मणि वैश्वानरीयपत्नीसंयाजशब्दबोधि-तयोः पदार्थयोर्मध्ये तत्रोत्पन्नाभ्यो देवताभ्योऽन्यासाम् आदेशपूर्व्वको यागः । ३२ पौर्णमास्यामाज्यभागयोः सनिमित्ता वार्त्रघ्नसंज्ञा । ३३ अनुवाक्यातएवविधारा-वगमादि । ३४वाजघ्नयोरानुवाक्यादेवतानन्यत्वम् । ३५ आदित आरभ्याजघ्नभागपर्य्यन्तं वाग्यमनम् ।३६याज्या-दिभ्योऽन्यदप्यारभ्यासमाप्तेर्वाग्यमनम् । ३७ यज्ञसाधन-वचसोऽन्यत्र वाग्यमननियमः । ३८ वाग्यमननिय-मातिक्रमे अतो देवा अवन्तु न इति वैष्णव्या ऋचो जपः । ३९उक्तातिक्रमेऽन्यस्या अपि वैष्णव्या ऋचो जप-विधानम् ।३९सू०१अ०५क०।१विधिक्रमप्राप्तानां देवतानां वक्ष्यमाणलिङ्गक्रमाभ्यां याज्यानुवाक्यायोजना । २प्रधा-नानन्तरं स्विष्टकृतो यागः सर्व्वत्र च पूर्व्वमनुवाक्यायाः पश्चाद्याज्याया प्रयोगः । ३ ये याजमहे इत्युक्त्वा षष्ठ्या विभक्त्या देवतामादिश्य प्रिया धामान्ययाडिति मन्त्रपाठः । ४प्रथमदेवतायाः पुरस्तादयाडग्निशब्दन्त्यक्त्वा उत्तरासाम-याट्शब्दस्यैव सर्व्वासामुपरिष्टात् प्रिया धामानिशब्दस्य च मन्त्रप्रयोगः । ५ याज्याविशेषेऽनुच्छ्वासस्य कर्त्तव्यत्वम् । ६याज्यापाठे अर्धर्चे श्वोच्छ्वासकर्त्तव्यता ।६सू०१अ०६क० १ अध्वर्युणा प्रदेशिनीपर्वाङ्गनपूर्वकौष्ठापवर्गशोधने । २ ओष्ठाधरशोधनस्य मन्त्रविशेषः । ३ अध्वर्युणा इडा-

प्रहणपूर्वकावान्तरेडावदापनप्रकारः । ४ स्वयं यजमानेन इडाया अवान्तरेडाग्रहणप्रकारः । ५ अध्वर्युकर्तृकं वा तद्ग्रहणम् । ६ इडोपह्वानप्रकारः । ७ सह दिवेत्यादिना तस्मिन्नुपह्वत इत्यन्तेन मन्त्रेण इडोपह्वानम् । ८होतृय-जमानपञ्चमानां वा सर्व्वेषामवान्तरेडाभक्षणपूर्व्वकेडाभक्ष-णम् । ८सू०अ०७क० । १इडाभोक्तृमार्जनपूर्व्वकमनु-याजचरणम् । २मार्जनप्रकारः । ३अनुयाजलक्षणम् । ४ प्रयाजानुयाजयोर्गुणकथनम् । ५अनुयाजानां त्रित्व-व्यवस्थापनम् । ६ एकैकं प्रैषितस्य यजनविधानम् । ७ अनुयाजमन्त्राणां स्थलविशेषे क्वचिदवसानपूर्व्वकं क्वचि-त्त्वानवसानपूर्त्तकं यजनविधानम् । ७सू०अ०८क०।१सूक्त-वाकाय सम्प्रैषितस्य देवतादेशानन्तरम् इदं हविरित्युपस-न्ननम् । २उत्तरा अपि देवता आदिश्येदं हविरित्येव-सुपसन्ननम् । ३ द्विदैवतबहुदैवतयोरर्थवशेनावृतेत्यस्य स्थाने अक्रातामक्रतेत्यूहस्य कर्त्तव्यता । ४आवह स्वाहेति-निगदस्य पशुयागेऽपि प्रयोगः ।५आवापिकदेवताक्रमप्राप्त्य-र्थम् आवापिकान्तमित्येतदादिकथनम् । ५सू०१अ०९क०। १शंयुवाकाय प्रैषितस्य तच्छंयोरिति मन्त्रपाठे प्रणवनिषेधः। २ तादृशप्रैषितायाध्वर्युणा वेददानम् । ३ वेदग्रहणे वेदोऽसीति मन्त्रपाठः । ४प्रकृतिविकारभावेऽपि तत्तन्मन्त्र-प्राप्तिः, आज्येन सोमयाग एव याज्यानुवाक्याव्यत्यापनं यागएव केवलं देवताविशेषाणामनुद्दत्तिकथनं च । ५मन्त्र-भेदानां पत्नीसंयाजसंज्ञाविधानम् । ६ प्रजाकामस्य यज-मानस्य यागभेदः । ७यजमाने सन्निहितेऽपि होतुरेव कर्तृत्वं याज्यानुवाक्ययोर्होतृकर्तृत्वस्यान्यतः प्रसिद्धिः, कुहूमह-मिति मन्त्रपाठे यजमानस्य स्वयंकर्तृत्वं च । ८पाणि-तलस्याज्यरूपेडोपह्वानानन्तरं तद्भक्षणविधिः । ९ आज्ये-डाया ऊर्द्ध्वं शंयुवाको भवति न वेति संशये इतिकर्त्तव्यता-विधानम् । ९सू०१अ०१०क०।१होत्राऽध्वर्युणा वा पत्न्यै वेदं प्रदाय वेदोऽसीत्यादि-कामायेत्येवमन्तमन्त्रवाचनम् । २प्रजाकामायाः पत्न्या वेदशिरसा स्तनाभ्यालम्भनम्। ३कामनाभावे वाचनानन्तरं योक्त्रविमोकः । ४ द्विगुणितं योक्त्रं निधाय तस्योपरिष्टात् वेदतृणानां निधानम् । ५तृणेभ्यः पुरस्तात् वेदतृणसंश्लिष्टस्य पूर्णपात्रस्य निधानम् । ६आत्मानमभिमृशतीं पत्नीमभिमृशतः पूर्णमसीति मन्त्रवाच-नम् । ७पूर्णपात्रादुदकं गृहीत्वा तदुदश्चन् तां चैवं कुर्वतीं वाचयतीत्युक्तिः । ८योक्त्रस्याधस्तात् पत्न्यञ्जलिसुत्तानमात्मनश्च सव्यं पाणिमुत्तानं निधाय पूर्णपात्रं निनयन् माहं प्रजा-

मिति तां वाचयतीत्युक्तिः । ९ वेदतृणानि गृहीत्वा गार्हपत्यादारभ्य तन्तुं तन्वन्नित्यादिना सन्ततं स्तृणन् आहवनीयं गच्छतीत्युक्तिः । १० सर्व्वाणि वेदतृणानि न स्तरितव्यानि नियमेन शेषितव्यान्युत्तरक्रियार्थमित्युक्तिः । ११ श्रौतातिरिक्तेषु गार्ह्येष्वपि मन्त्रसाध्येषु कर्म्मसु स्वाहाकारस्यैव कर्त्तव्यत्वं न वषट्कारस्येत्युक्तिः । १२ अविहितविशेषाणां होमाभ्याधानोपस्थानानां, तत्तदितिकर्त्तव्यताप्रकारस्य च विधानम् । १३ एकमन्त्राणि कर्म्माणीति न्यायेन व्याहृतिभिरिति बहुवचननिर्द्देशात् चतुर्णां कर्म्मणां क्रमेणैव करणम् । १४ प्रयोगमध्ये मार्गान्तरेण निष्क्रान्तस्यापि नियमा भवन्त्येवेत्यस्य व्यतिरेकमुखेण व्यवस्थापनम् । १५ संस्थाजपः तस्य च सोमेष्टिषु निषेधः । १६ होतुरेव केवलमेतावत्त्वम् अग्नीध्रस्यान्यदपीत्युक्तिः । १ सू० १ अ० ११ क० । १ ब्रह्माधिकारे विषयः । २ व्याख्यातानां होत्राचमनयज्ञोपवीतशौचानां ब्रह्माधिकारेऽतिदेशनम् । ३ तत्र कर्म्मसु कश्चिद्गच्छति कश्चित्तिष्ठति तत्र भूयसामेव धर्म्मस्याचरणं ब्रह्मणः इति व्यवस्थापनम् । ४ बहिर्वेदि ऋत्विजामभिमुखादिशः प्राचीत्वोक्तिः । ५ एकस्मिन्नपि प्रयोगे कचिदासनस्य कचित् स्थानस्य च लाभोक्तिः । ६ तिष्ठतां होमेषु अनुवषट्कारेषु च स्थानासनयोर्विकल्पः । ७ अनन्तरसूत्रद्वयविषयादन्यत्रासनकथनम् । ८ समस्तपाण्यङ्गुष्ठस्याप्ये आहवनीयं परीत्य तस्य दक्षिणतः कुशेषूपवेशनम् । ९ उक्तोपवेशनानन्तरं मन्त्रभेदजपः । उक्तजपस्य ब्रह्मजपत्वम् । ११ अध्वर्य्युकर्त्तृकम् उपविष्टातिसर्जनम् । १२ ओं प्रणयेत्येतद्रूपातिसर्जनरूपानुज्ञाप्रकारः । १३ कर्म्मानुरूपाणाम् आदेशानां कर्त्तव्यतोक्तिः । १४ उत्तरविवक्षार्थम् उच्चैः प्रणवादिकथनम् । १५ प्रणवादूर्द्ध्वं वा उच्चैर्भावोक्तिः । १६ प्रणीताप्रणयनकालादूर्द्ध्वं हविष्कृन्मन्त्रोच्चारणपर्यन्तं वाग्यमनपूर्व्वकमासनम् । १७ पशुयागे चात्वालमार्जनपर्य्यन्तं वाक्संयमः । १८ सर्व्वसोमेषु घर्म्माभिप्रैषारम्भपूर्व्वकं सुब्रह्मण्यापर्य्यन्त वाङ्नियमः । १९ प्रातरनुवाककालात् परम् अन्तर्यामग्रहयागपर्य्यन्तं वाग्यमनोक्तिः । २० सवनत्रयेऽपि पुरोडाशप्रचारादि, तदिडापर्य्यन्तं वाग्यमनोक्तिश्च । २१ स्तोत्रादौ स्तुध्वमित्यादिशस्त्रयाज्यावषट्कारपर्य्यन्तं वाग्यमनोक्तिः । २२ पवमानस्तोत्रेषु उपाकरणादि समाप्तिपर्य्यन्तं वाग्यमनोक्तिः २३ सर्व्वत्र मन्त्रवति कर्म्मणि वाग्यमनोक्तिः । २४ उक्तादन्यत्रापि विषये होतृत्वस्यवाग्यमनभावः ।

२५ वाग्यमनभ्रंशे प्रायश्चित्तविधानम् । २६ अग्नीषोमीयप्रणयनावधिवाग्यमनम् । २७ दक्षिणतो ब्रजत एवायुःशिशान इति सूक्तजपः । २८ गमनादपरिसमाप्तावपि उपवेशनादिकरणं, ब्रह्मजपविधानञ्च । २९ सोमयागे अग्निप्रणयनान्ते ब्रह्मजपनिषेधः । ३० विसृष्टवाक्यस्यापि यज्ञमनस्त्वोक्तिः । ३१ विपर्य्यासान्तरितयोः प्रायश्चित्तविशेषोक्तिः । ३२ वेदभेदेन श्रेषेऽग्निभेदे प्रायश्चित्तभेदः । ३३ सर्व्वेभ्यो वेदेभ्यो युगपद्भ्रेषापाते समस्ताभिर्व्याहृतिभिरेकाहुतिरूपप्रायश्चित्तम् । ३४ स्रुगादापनात् प्रागङ्गारस्य बहिःपरिधि पाते कर्म्मभेदः । ३५ तत्र दिग्भेदेन निर्गतौ होमभेदः कर्म्मणि स्वाहाकारान्तत्वभावः । ३६ अध्वर्य्युनुप्रहरणोक्तिः ३७ । सहस्रश्टङ्ग इत्यादिना प्रकृताङ्गारहोमोक्तिः । ३७ सू० १ अ० १२ क० । १ प्राशित्रहरणनिधानपूर्व्वकं तत्प्राशनम् । २ इडाभक्षणमार्जनपूर्व्वकं चतुर्धाकरणे कृते प्राशित्रहरणे ब्रह्मण आनीतब्रह्मभागस्य निधानम् । ३ प्राशित्रहरणदेशस्य पश्चात् कुशेषु यजमानभागनिधानम् । ४ प्रजापतेरित्यादि मन्त्रेणान्वाहार्य्यावेक्षणम् । ५ अन्येनाङ्गेनान्वाहार्य्यावप्राशविधानं ब्रह्मभागे शिष्टभागविधानञ्च । ६ प्रस्थास्याम इति अध्वर्य्युमन्त्रपाठानन्तरं प्रतिष्ठत्येवानुज्ञोक्तिः । ७ समिदनुयानं, जघन्यीभवतः सर्व्वप्रायश्चित्तहोमः, आग्नीध्रस्य ब्रह्मान्वारम्भणं च । ८ इतरेषां होत्रारम्भणविधिः । ९ उक्तयोरेतयोर्होम एव कार्य्ये अन्वारम्भस्य परस्परभावः । १० सर्व्वेषां होमकर्त्तृणामन्वारम्भकर्त्तृणां च संस्थाजपेन उपासनविधानम् । १० सू० १ अध्याये १२ क० ।

१ पौर्णमासेनेष्टिपशुसोमानामुपदिष्टत्वम् । २ उपदिष्टैरिष्टिपशुसोमैरमावास्यायां पौर्णमास्यां वा यागस्य कर्त्तव्यत्वोक्तिः । ३ क्षत्रियवैश्ययोः पर्व्वणोरेवाग्निहोत्रहोमकर्त्तव्यताविधानम् । ४ राजन्यवैश्ययोः पर्व्वेतरेषु कालेषु तपस्विब्राह्मणायौदनदानम् । ५ कृतसत्यस्वभावस्य सोमयाजिनश्च क्षत्रियस्य वैश्यस्य वा सदा होमविधानं न केवलं पर्व्वणोरित्युक्तिः । ६ बहूनां समानानां पश्चाद्विधाने सति क्रमेण सम्बन्धोक्तिः । ७ एकस्या एकस्या देवताया द्वे द्वे ऋचौ याज्यानुवाक्ये । ८ देवताविशेषस्य तल्लिङ्गयाज्यानुवाक्यानादेशे नित्ययोस्तयोर्प्र्होतव्यत्वोक्तिः । ९ कर्म्मानुमानभूतानामग्न्याधेयप्रभृतीनां मध्ये गार्हपत्याद्यग्न्युत्पत्त्यर्थमङ्गार-

निधानरूपाग्न्याधानम् । १० कृत्तिकादीनां सप्तानां नक्षत्राणामन्यतमेऽग्न्याधानविधानम् । ११ उक्तानां सप्तानां कस्मिंश्चित् नक्षत्रे पर्व्वणि वाऽग्न्याधानस्य कर्त्तव्यत्वम् । १२ वसन्ते ब्राह्मणगुणकाधानविधिः । १३ ग्रीष्मे क्षत्रियगुणकं वर्षासु वैश्यगुणकं शरदि उपक्रुष्टगुणकं चेति आधानत्रयविधानम् । १४ आपदि आधानपक्षे कालनियमाभावः । १५ कृतसोमयागसङ्कल्पस्य आधानमिच्छत आधानकालानवेक्षणम् । १६ आधानार्थमध्वर्युयजमानयोः शमीगर्भादश्वत्थादरण्याहरणविधिः । १७ अग्न्याधेयस्य पूर्णाहुत्यन्तस्य कर्त्तव्यत्वम् । १८ इष्टीनामग्निसाधनत्वोक्तिः । १९ प्रथमायामिष्टौ केवलाग्निपवमानाग्निनामके द्वे देवते । २० पवमानगुणकस्य द्वितीयस्याग्नेर्याज्यानुवाक्योक्तिः । २१ स्विष्टकृत्स्वग्निन्योर्याज्यानुवाक्ययोर्व्वा संयाज्यात्वसंज्ञा । २२ सर्व्वत्र देवतागमे प्राकृतीनां सर्व्वासां देवतानामुद्धारोक्तिः । २३ आज्यभागौ स्विष्टकृतं दान्तरा वर्ण्यानां देवतानामुद्धर्त्तव्यत्वं विकृतौ पुनर्विहितानां तद्धर्म्मिकत्वञ्चेति । २४ देवताभ्योऽन्यत्रापि अतिदिष्टस्य विधेरेककार्य्यत्वोक्तिः । २५ द्वितीयायामिष्टौ पावकाग्निशुच्यग्निनामिके द्वे देवते । २६ शाखान्तरादेर्ऋग्द्वयस्य संयाज्यात्वकथनं, तृतीयायामिष्टौ अधिकसामिधेन्योद्वयोक्तिः । २७ अग्नीषोमाविन्द्राग्नी विष्णुरित्यस्य वैकल्पिकत्वम् । २८ अदितिनामिका इष्टिः । २९ अदितीष्टेर्याज्योक्तिः । ३० प्रेद्धो अग्न इमो अग्न इत्यनयोः संयाज्यात्वोक्तिः विराजौ धाय्ये इत्युक्तिश्च । ३१ आद्योत्तमे इष्टी । ३२ आद्या वा इष्टिः । ३३ आद्यायां धाय्याविराजौ । ३४ वैराजतन्त्रया इष्टेर्ज्ञापनम् । ३५ आधानेनेष्टिभिश्च सिद्धा अग्नयो द्वादशाहोरात्रं वर्षे स्वरूपेणैव धार्य्यन्ते इत्येतदजस्रधारणोक्तिः । ३६ गतश्रियामग्नयो यावज्जीवमजस्रा भवन्ति न द्वादशाहमेवेत्युक्तिः । ३६सू०२अ०१क० । १ गार्हपत्यात् आहवनीयोद्धरणम् । २ देवं त्वेति मन्त्रेणाग्निहोत्रार्थमुद्धरणम् । ३ आहवनीयं प्रति मन्त्रपूर्व्वकाग्निप्रणयनमन्त्रः । ४ आहवनीयायतनेऽग्निनिधानमन्त्रः । ५ सायं प्रातरुपःकालेषु निधानान्तकर्म्मकरणम् । ६ रात्रिं यदेम इति मन्त्रेणाग्निप्रणयनम् । ७ आहिताग्नेर्व्रतचारित्वोक्तिः । ८ अनुदितहोमिन ओदयाद्व्रतचारित्वोक्तिः । ९ अस्तमनसमये होमविधानम् । १० आचमनस्य नित्यत्वम् ।

११ अग्निपर्य्युक्षणमन्त्रोदकादानविधिः पर्य्युक्षणे अग्नीनामुत्पत्तिक्रमस्य होमक्रमस्य वा विधानम् । १२ दक्षिणाग्निगार्हपत्याहवनीयपर्य्युक्षणे क्रमोक्तिः । १४ गार्हपत्याद्विच्छिन्नोदकधाराहरणम् । १५ अधिश्रयणार्थं गार्हपत्यात् कतिपयाङ्गारपृथक्करणविधिः । १६ होमसाधनभूताग्निहोत्राधिश्रयणम् । १७ अधिश्रयणे मन्त्रविकल्पः । १८ दध्यधिश्रयणानधिश्रयणविकल्पः १८सू०२अ०२क० । १ अकामकर्त्तृकस्य नित्याग्निहोत्रहोमस्य पयसा कार्य्यता । २ ग्रामाद्येन्द्रियतेजस्कामानां यवाग्वोदनदधिसर्पींषि यथासङ्ख्यमग्निहोत्रद्रव्याणि भवन्तीत्युक्तिः । ३ कालविक्षेपं विना अधिश्रितमात्र एवावज्वलनविधानम् । ४ अपक्वद्रव्यदध्यादीनामधिश्रितानामप्यवज्वलनविधिः । ५ पयसा होमे समन्त्रकदोहनपात्रप्रक्षालनपूर्व्वं स्रुवेण प्रतिषेकविकल्पः । ६ एकस्मिन् पुरुषे प्रतिषेकाप्रतिषेकयोरसङ्करत्वोक्तिः । ७ अवज्वलनार्थं मन्त्रपूर्व्वकं गार्हपत्यात् गृहीतेनोल्मुकेन पुनः परिहरणविधानम् । ८ पच्यमानपयोऽवतारणमन्त्रः । ९ गार्हपत्येऽङ्गाराणां प्रक्षेपमन्त्रः । १० आहिताग्नेरतिसर्ज्जनमन्त्रः । ११ आहिताग्नेः पत्न्याश्च इतिकर्त्तव्यताकलापः । १२ अतिसृष्टस्योन्नयनविधिः । १३ पुत्राणां तारतम्यमिच्छतः सपुत्रस्य यजमानस्य काम्यकल्पः । १४ एकपुत्रस्यापि काम्यकल्पः । १५ समिद्धरणानन्तरं समन्त्रकं तदाधानविधानम् । १६ समिदाधानानन्तरम् आचमनपूर्व्वकं तदवधिहोमविधानम् । १७ पूर्व्वाहुत्यनन्तरं कुशेषु स्रुक्सादनपूर्व्वकं गार्हपत्यावेक्षणम् । १८ पूर्व्वाहुतेः प्रागुदक् उत्तरतो वा उत्तराहुत्यर्थं द्रव्योत्पादनविधानम् । १९ होमेषु सर्व्वत्र प्रजापतिध्यानविधानम् । २० भूयिष्ठद्रव्यपूर्णस्रुक्कम्पनानन्तरं तद्गतलेपस्य मर्ज्जनं पाणितलगतलेपमार्ज्जनञ्च । २१ लेपनिमार्ज्जनकुशमूलानां दक्षिणत उत्तानाङ्गुलिनिधानम् । २२ कुशमूलानां दक्षिणतो जलावनिनयनविधानम् । २३ स्रुङ्निधानानन्तरं जलोपस्पर्शनम् । २४ आहिताग्निकर्त्तृकानुमन्त्रणविधानम् । २५ समन्त्रकमाधीयमानसमिदनुमन्त्रणम् । २६ ता अस्येत्यृचा पूर्व्वाहुत्यनुमन्त्रणम् । २७ समीपस्थेन शकटाक्षमीक्षित्वाहुत्यनुमन्त्रणम् । २८ याभिः ताभिश्च तावराभिराग्नेयीभिर्ऋग्भिरुत्तराहुत्यनुमन्त्रणम् । २९ पूर्व्वसूत्रोक्तस्य कर्षां त्रयस्य निरूपणम् २९सू०२अ०३क० । १ पूर्णे पूर्णे संवत्सरेऽधिकाभिर्ऋग्भिः सकृदनुमन्त्रणम् । २ पर्व्वविहितयवाग्वादिना सायम्प्रातर्होमेषु यजमानस्य स्वयं

कर्त्तव्यम् । ३ पूर्व्वसंवत्सरेतरकाले येन केनापि ऋत्विजाग्निहोत्रहोमः । ४ पुत्रशिष्ययोरन्यतरेणान्तेवासिना होमस्तत्रविशेषश्च । ५ होमकर्त्तुः स्रुग्गतशेषभक्षणप्रकारः । ६ अपरत्विंजो होमपूर्व्वकं स्रुग्गतशेषभक्षणम् । ७ प्रथमोत्तरभक्षणद्वये मन्त्रभेदौ । ८ समिदाधानपूर्व्वको गार्हपत्ये होमविधिः । ९ उत्तराहुतेर्नित्यत्वोक्तिः । १० समिदाधानपूर्व्वकं दक्षिणाग्निहोमप्रकारः । ११ उत्तराहुतेः पूर्व्ववत् नित्यत्वोक्तिः । १२ उक्तशेषभक्षणानन्तरं स्रुचाऽपां निनयनम् । १३स्रुक्प्रक्षालनानन्तरं प्रागुदीच्योः चतुर्थी पूर्णानां स्रुचां निनयनीयत्वम् । १४ कुशदेशे पञ्चमी स्रुक् गार्हपत्यस्य पश्चात् चरीत्युक्तिः । १५ आहवनीये प्रतापितायाः स्रुचोऽन्तर्वेदिदेशे निधानम् । १६ परिचारकद्वाय परिकर्म्मिणे वा तादृश्याः स्रुचोदानम् । १७ उदङ्मुखेन समित्त्रयस्याधानं पर्य्युक्षणादिकरणञ्च । १८तिसृणां समिधां प्रथमायाः समन्त्रकाधानम् । १९आहवनीयगार्हपत्यदक्षिणाग्निषु दीदिहि दीदाय दीदिद्दायेति मन्त्राणां क्रमेण स्वाहान्तानां पाठत्वम् । २० उक्तकार्य्ये पूर्व्ववत् पर्य्युक्षणविधानम् ।२१पर्य्युक्षणद्वयधर्म्मस्य परिसमूहनद्वयेऽतिदेशः । २२पर्य्युक्षणाभ्यां परिसमूहनयोः पूर्व्वभावोक्तिः ।२३सायंप्रातरुभयत्राग्निहोत्रहोमयोरेकाकारत्वम् ।२४सूर्य्योदयसमीपकालशेषकालादित्योदयकालानां प्रातर्होमस्य प्रधानकालत्वम् ।२५प्रातर्होमे विशेषोक्तिः २अ०४क०। १प्रवत्स्यत आहिताग्नेरग्निप्रज्वालनाचमनाभिक्रमानन्तरं तदुपस्थानम् ।२ दक्षिणाग्न्युपावनानन्तरं समन्त्रकं गार्हपत्याहवनीयेक्षणविधानम् । ३ आहवनीयदक्षिणाग्न्युपासनपूर्व्वकं गार्हपत्याहवनीयेक्षणं कृत्वाहवनीयसमीपं गत्वा तदुपस्थानम् । ४ प्रवतोऽग्नीननवेक्षमाणस्याहिताग्नेर्यथेष्टगमनम् । ५ अग्निसमीपं गत्वा वाग्विसर्गविधानम्, इतः प्राक् वाग्यमविधानञ्च । ६ अभिवाञ्छितदेशगामिनं पन्थानं प्राप्य सदा सुगः पितुरिति मन्त्रपाठः । ७ यदि दैवात् मानुषाद्वा निमित्तात् अनुपस्थिताग्नेः प्रोषितस्य इहैवेति मन्त्रपूर्व्वकं प्रतिदिशमग्न्युपस्थानम् । ८ प्रोष्य स्वपाससमीपं प्राप्य अपि पन्थामिति मन्त्रपाठः । ९ समित्पाणेर्वाग्यतस्याहिताग्नेर्ज्वलनप्राणाभिक्रमपूर्व्वकम् आहवनीयेक्षणम् । १० नानाग्निषु समिध उपनिधायाहवनीयोपस्थानम् । ११ उपनिहितानां समिधामभ्याधानम् । १२ दक्षिणाग्निसमीपे स्थितस्याहिताग्नेः गार्हपत्याहवनीयेक्षणविधानम् । १३ वाग्विसर्गस्य प्रकारभेदः । १४ दशरात्रादूर्द्ध्वं प्रोष्य चतुर्गृहीतेनाज्येन प्रायश्चित्तहोमः । १५ एकानेकाग्निहोत्रविच्छेदे पूर्व्वोक्तयाहुत्या होमविधानम् । १६ उक्ताहुतिहोमानन्तरं प्रतिहोमविधानम् । १७अनाहिताग्नेरपि देशप्रपदनयोः कर्त्तव्यत्वविधानं न केवलमाहिताग्नेरित्युक्तिः ।१८प्रवासादागतस्य तदहनि विदितस्याप्यहीकस्य न निवेदनीयत्वम् । १९ प्रवासादागतस्याहरहरग्निहोत्रहोमोपस्थानं तत्स्थानं तत्प्रयोगक्रमश्च २अ०५क०। १ अमावास्यायामपराह्णे पिण्डपितृयज्ञविधानम् । २ दक्षिणाग्नेरेकोल्मुकं गृहीत्वा तस्मादेव प्राग्दक्षिणायां दिशि मन्त्रपूर्व्वकं तत्प्रणयनम् । ३ अशिष्टदिकानां सर्व्वेषां कर्म्मणां प्राग्दक्षिणां दिशमभिकर्त्तव्यत्वम् । ४ उभयोरपि अग्न्योरुपसमाधानपरिस्तरणपूर्व्वकं दक्षिणाग्नेः प्रागुदक् प्रत्यगुदग् वा एकैकशः चरुस्थालीप्रभृतीनां यज्ञपात्राणां सादनम् । ५ अग्निसमीपस्थितं शकटं दक्षिणत आरुह्य शूर्पोपरि व्रीहिपूर्णस्थालीनिमार्जनरूपतदासदेशाद्व्रीहिग्रहणम् । ६ स्थाल्यासदेशात् शूर्पोपरि पातितानां व्रीहीणां शकटे निधानम् । ७ कृष्णाजिननिहिते उलूखले स्थाल्यन्तर्गतावशिष्टान् व्रीहीन् कृत्वा यजमानपत्नीकर्त्तृकस्तदवघातः । ८ अवहतानां व्रीहीणां दक्षिणाग्नौ श्रपणम् । ९ दक्षिणाग्निप्रणीतयोरन्तराले रेखोल्लेखनम् । १०सकृदाच्छिन्नावस्तीर्णाभ्युक्षितरेखायां ध्रुवास्थितमाज्यं दक्षिणतो दक्षिणाग्नेर्निधाय तेनाज्येन अभिघारितस्य स्थालीपाकस्य दक्षिणाग्नेः पश्चादासादनम् । ११ आञ्जनादीनां दक्षिणाग्नेर्दक्षिणतो निधानम् । १२ प्राचीनावीतिनो यजमानस्य उपसमाहितैरिध्मैर्मेक्षणेन गृहीतैरवदानैर्मदा होमः । १३ स्वधानमःशब्दस्य स्थाने स्वाहाकारं कृत्वा होमः । १४ अग्नौ मेक्षणानुप्रहरणपूर्व्वकं पिण्डस्थानेषु लेखायां त्रिभिर्मन्त्रैस्त्रिर्निनयनम् । १५ रेखायां पिण्डनिपरणम् (दानम्) । १६गाणगारिमते पितादीनां त्रयाणां ये मृताः स्युस्तेषां पिण्डदानं जीवतां प्रत्यक्षार्चनम् । १७ तौल्वलिमते पितादिभ्यस्त्रिभ्यः प्रेतेभ्यो जीवद्भ्यश्च सर्व्वेभ्यो निपरणम् । १८ गौतममते त्रयाणामेकस्मिन् द्वयोः सर्व्वेषु वा जीवत्सु यावदर्थं परान् पितॄन् गृहीत्वा त्रिभ्यः प्रेतेभ्यः पिण्डनिपरणम् । १९ पितादीनां जीवितानां

मृतानाञ्च पिण्डदाने उपायविशेषकथनप्रतिज्ञा ।२०क्रमेण गौतमगाणगारितीस्वलोनां मतदूषणाति । २१जीवव्यवहितेभ्यः पितृभ्यो न निपरणम् । २२ जीवेभ्यो होमः मृतेभ्यो निपरणम् । २३ सर्वजीविनः सर्वहुतविधाने तत्र पिण्डहोमस्य निपरणमन्त्रेण स्वाहाकारेण कर्त्तव्यत्वम्, अन्येषामपि प्रयोजनानां चिन्त्यनीयत्वञ्च । २४ पित्रादीनां नामाख्याने ततृपितामहप्रपितामहयद्दानां नामस्थाने प्रयोगः । २अ० ६क० । १निपूर्त्तानां पिण्डानामनुमन्त्रणम् ।२उक्तानुमन्त्रणप्रयोगे नियमोक्तिः । ३तद्भोमेन चरोः प्राशनस्य कार्यत्वम् । ४उदकोपनयननिनयनस्य नित्यकर्तव्यत्वम् ।५पिण्डेषु अभ्यञ्जनाञ्जनदानम् ।६पिण्डेषु वासोदानं तत्र विशेषोक्तिः । ७यजमानस्य पितृपार्श्वं तत्र मन्त्रश्च । ८ तिसृभिर्ऋग्भिः पितृप्रस्थानम् । ९ पिण्डस्थानां पितॄणां प्रवाहणम् । १० यजमानस्य दक्षिणाग्निं प्रति गतिः । ११ दक्षिणाग्निप्रतिगत्यनन्तरं यजमानस्य गार्हपत्याग्निं प्रति गतिः । १२यजमानकर्तृकं पिण्डानां मध्यमादानम् । १३ पत्नीकर्तृकं ताडयहीतमध्यमपिण्डप्राशनम् । १४ अवशिष्टपिण्डद्वयस्याप्सु प्रक्षेपः । १५ अतिप्रणीते वाऽग्नौ प्रक्षिप्य ताडमपिण्डद्वयदाहः । १६ यक्ष्मादिभावोभिर्निक्षिप्तः ताडमेन पिण्डस्य प्राशनम् । १७ मयकुष्टादिमहारोगवतः ताडमपिण्डाशने सद्य एवारोगित्वमरणयोरन्यतरगतिकामोक्तिः । १८ अनाहिताग्नेरप्येवं पिण्डपितृयज्ञकरणम् । १९ चरुश्रपणानन्तरं तदतिप्रणयनं ततउपसमाधानतत्परिस्तरणे कृत्वा होमकरणम् । २० द्विधः चरुपूर्णपात्रायामुत्सर्गः । २१ एकस्यातिरिक्तस्य द्रव्येण द्वित्वं सम्पाद्य तदुत्सर्गकरणविधानम् । २अ० ७मव० । १ दर्शपूर्णमासावारम्भमाणस्यान्वारम्भणीयेष्टिकरणम् । २ अग्नेर्भगीतिगुणोक्तिः । ३ इष्टेर्याज्यानुवाक्योक्तिः । ४ आधानानन्तरं सम्वत्सरे दोनार्धकामिकमनिमित्तयज्ञादे पुनराधेयस्य, पुनराधेये च पञ्चप्रमाणाया इष्टेः कर्त्तव्यत्वम् ।५ उक्तायामिष्टौ विभक्तिभिः संहिताभ्यां प्रयाजानुयाजाभ्यां यजनम् । ६ नराशंसिनः भराशंसः । ७ आग्नेययोराज्यभागयोरुक्तिः । ८ याज्यभागयोर्गुणद्वयोक्तिः । ९ निगमेषु उभुणयोरेवानुषक्तिः । १० याज्यायां देवतादेशकाणाया इज्यायाः कथनम् ; ११ अनुमानाश्चिनामाचार्याणां मते पूर्वस्य चेरण-

त्वाग्नेः, अग्निर्भागोत्यनुवाक्यायाच नित्यत्वम् । १२उक्तमते उत्तरस्यापि केवलस्याग्नेरक्तानुवाक्याया नित्यत्वविधानम् । १२ उत्तरे याज्यामन्त्रे हविःमन्त्रस्य नित्यत्वोक्तिः । १४ संयाज्यामन्त्रभेदः । २अ० ८ क० । १ व्रीहिश्यामाकयवैः संवत्सरे प्रथम अन्नैः आग्रयणकर्मकरणम् । २ आग्रयणेनानिष्ट्वा नवनिष्पन्नस्य भोजननिषेधः । ३ वर्षद्वयस्य लोकस्य आग्रयणेन यागविधानं व्रीह्याग्रयणे शरत्कालस्य प्राधान्यम् । ४ आग्रयणाख्या इष्टिः प्रथमः कल्पः, तदसम्भवेऽग्निहोत्रीयां धेनुं व्रीहिश्यामाकयवानामन्यतममाशयित्वा तत्पयसा सायंप्रातरग्निहोत्रहोम इति द्वितीय इति कल्पद्वयम् । ५ यवैराग्रयणस्य क्रियाऽक्रिया वा इति विकल्पः । ६ अविशेषेण सर्वत्रयाणां कल्पद्वये प्राप्ते राज इष्टिरेव नान्य इति विशेषोक्तिः । ७ एकेषां मते सर्वेषां इष्टिरेवेति व्यवस्थापनम् । ८ वर्षायां श्यामाकाग्रयणेष्टौ सोमदैवत्यचरुव्यवस्थापनम् । ९ अवान्तरेडाप्राशनानन्तरम् सव्ये पाणौ कृत्वा तदभिमर्शनम् । १० इडाप्राशनानन्तरम् आचमनपूर्वको नाभ्यालम्भः । ११उक्तेन विधिना सर्वभक्षेषु सर्वेषां ऋत्विजां सर्वभक्षणम् । १२व्रीहीणां यवानां चाग्रयणेष्टौकालादि तत्र यवाग्रयणस्य वसन्तकालविधानम् ध्याय्याविराजमहणञ्च । १३श्यामाकाग्रयणस्य समानतन्त्रेण करणे सोमस्य तृतीयत्वव्यवस्थापनम् । १४ तत्र इन्द्राग्न्योः सोमस्य च याज्यानुवाक्याः । २अ० ९क० । १चातुर्मास्येभ्यः पूर्वं काम्या इष्टयः । २आयुष्कामेष्ट्यां सोपानुमत्यौ द्वे देवते अग्निरिन्द्रश्च । ३ उक्तयोर्देवतयोरग्नेरायुष्मत्त्वं गुणः, इन्द्रस्य च त्रातृत्वं गुणः । ४ आयुष्कामेष्ट्याम् अग्नीन्द्रयोर्देवतयोः संयाज्ये ।५स्वस्त्ययनीयेष्ट्यां रक्षितवन्तौ देवौ अग्निः सोमश्च । ६उक्तयोरग्नीषोमयोः संयाज्ये । ८ पुत्रकामेष्टौ अग्निः पुत्री देवता । ९उक्तायामिष्टौ द्वे संयाज्ये । १० पञ्चप्रमाणयोरिष्ट्योरग्निदेवतात्वम् । ११मूर्च्छतोऽग्नेर्नित्ये संयाज्ये । १२ कामगुणकस्याग्नेर्याज्यानुवाक्ये । १३ उत्तरयोरिष्ट्योर्वैकल्पत्वं, तयोर्याज्यानुवाक्यायुगलयोर्वाप्रमाणयोरिन्द्रदेवतात्वं, तस्य चेन्द्रस्य विमृधद्गुणकत्वं वैकल्प्यगुणकत्वं वा, अतस्तयोर्वैकल्प्यसम्भवाभावञ्च । १४पुष्टिकामस्य याज्यानुवाक्ये । १५ इन्द्रो दाता च पुरन्दाता वा देवता भवति । १६ उभयथापि इन्द्रस्य याज्यानुवाक्ये । १७ आमानामाभापाकानां वा देवता-

त्वम् । १८ आयायापाद्यानां याज्यानुवाक्यासाम्यम् । १९इष्टिविशेषस्य लोकेष्टिसंज्ञोक्तिः ।२०पृथिव्यादीनां पृथग्देवतात्वकथनम् ।२१त्रयाणां हविषां याज्यानुवाक्याद्युपास्तिस्त क्रमः। २२त्रयाणां हविषां तिसृणाम् ऋचां विनियोजनम् २अ०१०मक०।१ मित्रविन्देहभूता महावैराजी नामेष्टिः। २महावैराज्यामग्न्यादीनां दशानां देवतात्वम् एकप्रदानत्वञ्च । ३ उक्तानां दशानां देवतानामनुवाक्योक्तिः । ४ प्रतिलोममादिष्टानामुक्तानां दशानां यजनम् । ५ अष्टौ वैराजतन्त्रा इष्टयः । ६ तासां प्रथमाः षडिष्टय एकहविषः । ७ स्नुषाश्वशुरीया नाम आभिचारिकी इष्टिः । ८ स्नुषाश्वशुरीयेष्टौ याज्यावाक्यालिङ्गात् देवतायाः कल्पनीयत्वं, सा चेन्द्रः. इन्द्रः स्वरगुणो नेति । ९ पूर्वोक्ताया देवतायाः संयाज्ये। १० स्वामिभृत्ययोः सम्मतिकामानां संज्ञानी नाम इष्टिः। ११ संज्ञान्यां चतसृणां गुणानां देवतानाम् एकप्रदानत्वम् । १२ अग्निसोमेन्द्रादित्यानां सगुणानां देवतानां प्रतिपादनम् । १३ भेदकामानाम् ऐन्द्रामारुती इष्टिः । १४ इन्द्रस्य नित्ये याज्यानुवाक्ये । १५ इन्द्रमरुतोर्विकल्पविधानम् । १६ मारुतयागादूर्द्धम् ऐन्द्रो यागः । १७ राजश्रियोरसम्पत्तिकामानाम् आहिताग्नीनां च प्रकृत्यैव संज्ञानी नामेष्टिः । १८ यतुभिः प्रष्टव्यमाणानाम् ऐन्द्राबार्हस्पत्या नाम इष्टिः । १९ अध्वर्य्यश्चेत् ऐन्द्राबार्हस्पत्यं निरुप्य इन्द्राय नोदयेयुः यद्वा बार्हस्पत्यं निरुप्य इन्द्राय नोदयेयुः तदा उभयोरपि पक्षयोः याज्यानुवाक्यासाम्यम् १९ सू० । २अ० ११ क० । १ संवत्सरमतिप्रवसतः शुद्धिकामस्य पवित्रेष्टिविधानम् । २पवित्रेष्टौ पावकवत्यौ धाय्ये। ३ पवित्रेष्टौ न याज्ये। ४ पवित्रेष्टौ संयाज्ये। २अ०१२क० वर्षकामाणां कारीरी नामेष्टिः । २ कारीर्यां धाय्याद्वयम् । ३वर्षकामेष्टिमात्रेऽप्सुमन्तौ गायत्रौ देवौ । ४ वर्षकामेष्टिमात्रेऽग्नेः सोमस्य च मन्त्रभेदः । ५ उक्तेष्टिमात्रे धामच्छद् वाऽग्निः । ६ उत्तराङ्गिको मरुद्देवत्याइष्टयः पिण्डीसंज्ञकाः। ७ धामच्छद्गुणकस्याग्नेर्याज्यानुवाक्याद्वयस्य व्यवस्थया योजनीयत्वम् । ८ पिण्डीयागस्य करणम् ९ संस्थितायामिष्टौ सर्वासां दिशाम् उपासनम् २अ० १३क० । १ इष्ट्रयनसंज्ञकानि कर्माणि । २ एकानेकसंवत्सरसाध्यानि सांवत्सरिकाणि कर्माणि । ३ सांवत्सरिकाणां कर्मणां फाल्गुन्यां पौर्णमास्यां चैत्र्यां वा

प्रयोग ।४तुरायणं नाम इष्ट्रयनम् ।५अहन्यहनि अग्निदेवत्या इन्द्रदेवत्या विश्वदेवदेवत्या चैताश्तिस्र इष्टयः त्रिषु सवनेषु यथासङ्ख्यम् एकैकेष्टेः कार्य्यत्वञ्च। ६ त्रिहविष्काया एकस्या एवेष्टेरुक्ताभिर्देवताभिर्युक्तायाः प्रतिदिनम् प्रातःसवन एव कर्त्तव्यत्वम् । ७ दाक्षायणयज्ञे पौर्णमास्याभावास्ययागद्वयम् । ८ आद्यस्योः पूर्वे ये ते नित्ये न विकृते । ९ उत्तरयोस्तु एष विकारो यत् पौर्णमास्यां द्वितीयं हविस्तस्य ऐन्द्रत्वम्.। १०अमावस्यायां द्वितीयस्य हविषो मैत्रावरुणत्वम् । ११ प्रतिपर्व्वकर्त्तव्यं प्राजापत्यम् इडादधो नामेष्ट्रयनम् । १२ द्यावापृथिव्योरयनं नामेष्ट्ययनम् । १३ उक्तस्य इष्ट्ययनस्य कालविधाम् ।१४ एतच्छास्त्रानाम्नातास्विष्टिषु पौर्णमासात् तन्त्रान्यत्वविधानम् । १५ यजुर्वेदएव प्रकृतं तन्त्रं मान्यदपरमिति । १६ अग्निमन्थनसंयुक्तायामिष्टौ वैराजमेव तन्त्रम् । १७ अग्निमन्थने सत्यपि धाय्ये एव केवले तन्त्रं न तदन्यत् । १८ याज्यानुवाक्यास्वरूपोक्तिः । १९ अनुवाक्यालक्षणोक्तिः । २० असम्भवे विहितच्छन्दसोऽन्यस्य वा याज्यानुवाक्यानां कर्त्तव्यत्वम् । २१ सर्वयाऽनुवाक्यापेक्षया याज्याया न लघीयस्त्वम् । २२उष्णिग्बृहत्योर्न याज्यात्वम् ।२३आमनद्दृतदग्धवतीनां वर्जनम् । २४देवतापदश्रुत्ये न लक्षणान्तरान्वेषणम् ।२५ देवतापदेऽव्यक्ते लक्षणस्य गायत्र्यादेराश्रयणीयत्वम् ।२६ देवतानामानधिगमे शाखान्तरादाहर्त्तव्यत्वोक्तिः । २७ सर्व्वथाऽनधिगमे याभ्यां काभ्याञ्चिदृग्भ्यां यागोऽनुवचनञ्च। २८ व्याहृतिभिर्वा यागानुवचने। २९ द्वितीयया विभक्त्या देवतानामादिश्य प्रयवनं यजनञ्च । ३० नमःसंज्ञाभ्याम् ऋग्भ्यां वा प्रयवनयजने ।३१ नमःसंज्ञके ऋचौ । ३२ देवतापदरहिते ऋचौ भवत इति । २अ० १४क०। १ अग्निर्दैवत्ये चातुर्मास्याख्येष्ट्ययनस्यारम्भार्थं पूर्वेद्युर्वैश्वानरपार्जन्याया इष्टेः कर्त्तव्यत्वम्। २ अग्न्याधेयादीनां उपांशुप्रधानत्वोक्तिः । ३ सोमोत्पन्ना इष्टयः । ४ प्रायश्चित्त[illegible]ोत्पन्ना इष्टयः ।५ अन्वायात्यानाम् एककपाला[illegible] यागानां उपांशुप्रयोक्तव्यत्वम् । ६ सर्वत्र वा वारुणवर्जम् उपांशुत्वम् । ७चातुर्मास्येषु सावित्रयागस्य उपांशु[illegible] वैश्वदेववरुणप्रघासमाहेन्द्रशुनासीरीयेष्वाम् उपांशु[illegible] , ९ तन्त्रयुक्तानां पित्र्योदस्वाजकानामिष्टीनामुपांशुत्वम् । १० उत्तमादनुयाजात् प्राक् पुनराधेयेष्टेः स्वतन्त्रोपांशुत्वम् । ११ स्वतन्त्रोपांशुत्वविधिष्टानां सर्वेषाम-

त्रिष्टोमानां तु मन्द्रतमत्वम् ।१२ आगूःप्रणववषट्काराणां सर्वत्र उच्चैर्भावोक्तिः । १३ आग्रयणेष्टौ आग्नेन्द्रस्य ऐन्द्राग्नस्य वा प्रथमस्य हविष उच्चैर्भावकथनम् । १४ उच्चविहितस्य पुरोऽनुवाक्याप्रणवस्य प्राणसन्ततत्वम् ।१५ याज्याया आगूर्वषट्कारयोः प्राणसन्ततत्वम् ।१६ उपांशोरन्त्यस्वराणाम् उच्चत्वम् । १७ उपांशुतन्त्रायां तानि उच्चानि मन्द्रस्वराणि भवन्तीत्युक्तिः । २अ० १५क० । १ प्रातर्वैश्वदेव्यां प्रोषितस्याग्निमन्थनीयानुवचनाभिहिङ्कृतिकरणे । २ संप्रैषश्रवणपर्यन्तं पूर्वर्गवसाने आरामो नोत्तरादानम् । ३ मध्ये ऋगवसाने यत्रारामविधिः तत्राप्यासर्वप्राप्नोत्तरारम्भः । ४ मथ्यमानोऽग्निर्यदि जायते तदाऽग्नेराजन्मनः पुनः पुनः अभे इंसीति ऋक्नावापनम् । ५ अग्निजन्मश्रवणानन्तरम् उक्तसूक्तीयप्रवचनेन शिष्टार्धर्चोपसन्तननम् । ६ अनावापपक्षे जातश्रवणानन्तरं शिष्टेनार्धर्चेन उत्तराया ऋच उपसन्तननम् । ७ यज्ञेनेत्यनया ऋचा समापनम् । ८ सर्वत्र पश्वादिषु उत्तमाया ऋचः समापनीयत्वम् । ९बर्हिरग्न इति प्रयाजानन्तरं प्रयाजान्तरादीनामावपनम् १० देवताष्टकोल्लेखः महतां सतवत्त्वेति गुणकथनञ्च । ११ प्रकरणपठितानां निर्गुणानां महतां धाय्याद्वयकथनम् । १२ अनुयाजानां द्वैयकथनम् । १३अनुयाजाद्यन्यतमे काले वाजिभ्यो यागः । ०१४ अर्द्धजानुनाऽनवानयाज्याप्रयोगः । १५ यत्र क्व च विषये एकस्मिन्नेवाध्वर्युसंप्रैषे तुल्यरूपयोरतुल्यरूपयोर्द्वयोर्वषट्कारयोः समवाययोर्द्विरनुमन्त्रणम् ।१६याज्याधर्मेषु इतरेषु अनुवषट्कारादिषु आगुरः प्रतिषेधः ।१७इष्टयिष्ट वाजिनम् इडामिव भक्षार्थं अग्नौ निधाय उपह्वयाचनम् ।१८अध्वर्युब्रह्माग्नीध्राणां समीपे उपह्वयाचनम् । १९ उक्तवाजिनस्य किञ्चिदादाय वक्ष्योक्तमन्त्रेणावघ्राणम् । २०होतृभक्षणानन्तरम् अध्वर्युब्रह्माग्नीध्राणां क्रमेण वाजिनभक्षणम् । २१यजमानादितरेषां सर्वेषां दीक्षितानां गृहपतेरन्ये वाच्च प्रत्यक्षमेव तद्भक्षणम् । २२ वैश्वदेवीष्टिदिवसादपरस्मिन् दिने पौर्णमासेष्टेः तदानीमेव पञ्चमासानां चातुर्मास्यव्रतानां केशनिकृन्तनमध्वादिवर्जनरूपाणाम् आचरणारम्भः । २३केशनिकृन्तनम् । २४ श्मश्रुवपनाधःशय्ये काम्ये मधुमांसलवणस्त्रीसेवनानि वर्ज्यानि । २५ कालविशेषे प्रतिषिद्धस्य प्रतिप्रसवार्थम् ऋतौ भार्योपगमनविधानम् । २६ उत्तरविरामार्णानुवादरूपं सर्वपर्वसु वापनम् । २७ आद्योत्तमयोर्वा पर्वणोर्वापनं न मध्यमयोरिति ।

२अ० १६क० ।१प्रकृतवैश्वदेवेष्टिकायां पौर्णमासीमारभ्य पञ्चम्यां पौर्णमास्यां वरुणप्रघासैर्यागविधानम् । २प्रणीयमानस्याग्नेः पश्चादुपविश्य प्रोषितस्याग्निप्रणयनीया प्रतिपत्तिः । ३ आसीनस्य सप्रणवायाः प्रथमाया उपांश्वनुवचनम् । ४ उपांशुस्वरस्थानां स्वरान्तरस्थानसङ्क्रमे प्रणवेनावसाय अर्धर्चस्य उत्तरस्या ऋच आरम्भः । ५ उक्तावसानानुक्रासपूर्वकम् उत्तरारम्भस्य प्राणसन्ततभावित्वम् । ६ प्रणीयमानयोर्द्वयोरुत्तरमग्निमनुव्रजत उत्तरासामृचामनुवचनम् । ७ राजन्यवैश्ययोराद्ये ऋचौ । ८ उत्तरस्या वेदेः पश्चादवस्थाय शेषसमापनम् । ९ सोमेषु उत्तरवेदेः पश्चादवस्थाय समापनम् । १० यस्मिन्नेवासने पूर्वोक्तमनुवचनमारब्धं तस्मिन्नुपविश्य व्याहृतित्रयरूपवाग्विसर्जनम् । ११ अन्यत्रापि अनुवचनानुव्रजनयोर्वाग्विसर्गः । १२ तिष्ठतः संप्रैषेषु तिष्ठत एव वाग्विसर्गः । १३ वैश्वदेव्या समानोऽग्निमन्थना नाम इष्टिः । १४मध्यादीनां तिसृणां हविषाम् ऐन्द्राग्नाद्दीनां कर्तव्यत्वम् । १५ तत्सूक्तगतमन्त्रस्य उपह्वयाचने तृतीयत्वम् । भक्षणे चतुर्थत्वम् । उपह्व याचनभक्षणयोश्च विशेषकथनम् । वैश्वदेव्यामपि एवम्भावश्च । १६ इष्टौ संस्थितायामवभृतकर्म निमित्तं अध्वर्यूणाम् उदकदेशगमनम् । १७अवभृथस्यानित्यत्वात् इष्ट्यभावेऽन्येषामपि यव-धानादीनां सम्भवश्च । १८चातुर्मास्याङ्गत्वेन द्वयोर्मासयोरैन्द्राग्ननामकपश्वन्तरविधानम् । २अ० १८क० ।

१ वरुणप्रघासेभ्यः परम् ऐन्द्राग्नपशूपरं अनीकवदाद्यादित्यान्तकर्मरूपाणां साकमेधानां यजनम् । २ साकमेधीयपौर्णमास्याः पूर्वेद्युः सवने सवने एकैका इष्टिः । ३ उक्तानुसवनीयानामिष्टीनां प्रथमायामनीकवान् अग्निः एतदुत्तरस्यां सधन्वन्तो, मरुतः सान्तपनाः तदुत्तरा आज्यभागप्रभृतीडान्ता इष्टिः । ४ गृहमेधेभ्यो मरुद्भ्यो देवताभ्य आम्नातयोर्धाय्ययोरुल्लेखः । ५ पुष्टिमतोर्विराजयोर्निगदरहितसंयाज्यात्वम् । ६ गृहमेधीयादन्यत्रापि आवाहनरहिते स्थले अनिगदयोः संयाज्ययोः सम्भवः । ७ पित्र्यायां पशौ चेतीष्टिद्वये आवाहने सत्यपि अनिगदं संयाज्याद्वयम् ।। ८समापितेष्टिकायां रात्रौ बहूनां याज्ञिकानाम् अन्नदानम् । ९ रात्रेः पश्चाद्भागे पौर्णदर्वनामकस्य होमकर्मणः कर्तव्यत्वम् । १०वृषभरवे श्रूयमाणे उक्तहोमकालः । ११ मेघध्वनौ श्रूयमाणे तद्धोमकालः । १२ तस्योक्तद्वयस्याप्यभावे ब्रह्मप्रत्ययस्येनाग्नीध्रं सम्बोध्य केचित् स्वप्रावर्तनम् ।

१३पूर्णादर्वीत्यादिमन्त्रयोरध्वर्युणा होतुर्मध्ये याज्यानुवाक्यात्वम् । १४ क्रीडिभ्यो मरुद्भ्य उत्तरा इष्टिः ।१५ क्रीडिनां मरुतां परोक्षवार्त्तिमायाज्यभागौ । १६अक्रीडिनां मरुतां याज्यानुवाक्ये । १७ माहेन्द्री इष्टिः । १८ माहेन्द्र्यामिष्टौ अष्टदेवतोक्तिः । १९माहेन्द्र्यां याज्याकथनम् । १९सू०२अ० १८क० । १ दक्षिणाग्नेरग्निमानीय तमन्यत्र स्थापयित्वा तत्र पितृयज्ञाख्यकर्मकरणम् । २ पितृयज्ञाया इष्टेर्मुप्रजपानुमन्त्रणादित्वम् । ३तस्यां पितृयज्ञायामिष्टौ कर्मणां प्राङ्मुखत्वम् । ४ अन्यस्यामिष्टौ दक्षिणामुखत्वम् । ५ इतरदिङ्मुखानि प्रकृतौ यथान्वयं करणीयानि । ६ अनुच्छ्वसता उपन्तस्यतस्या ऋचस्त्रिरनुवचनं तत्र च तासामेव सामिधेनीनां न पुनरभ्यासः । ७ तासां सामिधेनीनामनुक्रमेण प्रथमेन प्रतिपत्तिः । ८ आज्यभागान्तदेवतावाहनानन्तरं प्राकृतात् स्विष्टकृतावाहनात् परं कव्यवाहनाख्याग्निसमावाहनम् । ९ उत्तमे च प्रयाजे आज्यपेभ्यः पूर्वं कव्यवाहनाख्याग्निनिगमनम् । १०सूक्तवाके विशेषोद्धेखः । ११कार्यार्थमन्त्रलोपेऽपि कार्यलोपप्राप्तौ कार्यस्य लोपप्रतिषेधः । १२पितृयज्ञायामिष्टौ अवान्तरेडाभक्षणेडाभक्षणयोरभावः । १३ इडाभक्षणे मार्जनाभावः । १४ सूक्तवाके यजमाननामादेशाभावः ।१५ईक्षितः सीद होतरिति वोक्तस्योपवेशनम् ।१६सव्योपर्युपस्थानां प्राचीनावीतिनां हविर्भिर्जीवानुमदुद्धारणम् । १७ पितृयज्ञायामाग्नीध्रस्य दक्षिणत्वम् अध्वर्योरुत्तरत्वम्, अनुवाक्याद्वयम्, अध्यर्द्धीयामन्त्रणम् । १८आश्रावणप्रत्याश्रावणसंशैषेषु ओँ स्वधेत्यादीनां दीर्घान्तानां प्रयोक्तव्यत्वम् । २०प्लुतीनां नित्यत्वव्यवस्थापनम् । २१ पितॄणां सोमवता सोमस्य पितृमता बर्हिषदः अग्निष्वात्ताचेतिगुणोक्तिः । २२मन्त्राणां पितॄणां त्रित्वस्त्रित्वस्य कथनुक्तिः । २३ वैवस्वतस्य चेद्देवतात्वं तदा उत्तमे त्रिके मध्यमायां याज्यात्वं प्रथमोत्तरयोरनुवाक्यात्वम् । २४ स्विष्टकृतो याज्योक्तिः । २५ स्विष्टकृतोऽग्नेः कव्यवाहनसंज्ञा । २६ स्विष्टकृत ऊर्द्ध्वं प्रकृतिभावः । २७ मन्त्रलोपादिभिन्नानां सव्योपर्युपस्थतादीनामभावाय प्रकृतिभावविधानम् । २८ प्रकृतिभावादेशानुवाक्याया एकैकत्वम् । २९ वषट्कारक्रियायामेव संयाज्याद्वयम् । ३० विशेषनियमार्थं दक्षिणाहुतो दक्षिणाग्नेरुपस्थानम् । ३१पितृयज्ञायामिष्टौ आवर्त्तनविरहेणोपस्थानम् । ३२दक्षिणाग्नेरुपस्थानमन्त्रः । ३३गार्हपत्याहवनीययोरुपस्थानम् । ३४ आहवनीयोपस्थानमन्त्रः । ३५ तन्मन्त्र इत्येकयर्चा गार्हपत्योपस्थानम् ।३६प्रादक्षिण्येन गार्हपत्यमभितः समागमने मन्त्रः । ३७गार्हपत्यानन्तरं सव्याहृद्भिस्त्र्यम्बककर्मभेदार्थगमनम् । ३८अध्वर्यूक्तस्य यजमानैरपि कर्त्तव्यत्वम् । ३९ प्रत्येत्य अदितिदेवताकया ऋचा चरणम् । ४०पुष्टिमत्यौ धाय्ये विराजौ । ४० सू० २अ० १९क० ।

१ साकमेधकालमारभ्य पञ्चम्यां पौर्णमास्यां शुनासीरीया नामेष्टिः । २ पञ्चम्याः पौर्णमास्या अर्वागपि वा शुनासीरीयारम्भः । ३ नियुत्वानिति वायोर्गुणः शुनासीरीयः शुनश्चेति इन्द्रस्य गुण इत्युक्तिः । ४एतत्प्रकरणगतानां शास्त्रान्तरीयाणाञ्च देवतानां एतत्प्रकरणाम्नाता एव याज्यानुवाक्या इत्युक्तिः । ५ज्योतिष्टोमप्रकृतिकौ चातुर्मास्याङ्गभूतौ पशुसोमौ ताभ्यां यक्तिभेदेन व्यस्तसमस्ताभ्यां यागः । ६ चातुर्मास्यानां समाप्तौ पुनरभ्यासः ६सू० २अ०२०क० ।

३अध्याये पशुकर्माधिकारः । १प्रायश्चित्तात् पूर्वं पशुशुल्कं कर्म । २पशोरुभयतोऽन्यतरतो वा इष्टिकरणम् । ३ पशुयागसम्बन्धिन्या इष्टेरग्निर्देवत्यधिकल्पः । ४ पशुयागसम्बन्धिन्या इष्टेः करणपक्षे देवताविकल्पः । ५ एकस्मिन् पशुप्रयोगे आग्नेयी चाग्नावैष्णवी चेति इष्टिद्वयम् । ६ उभयेष्टिकरणपक्षे एकस्याः पुरस्तात् अपरस्या उपरिष्टात् कर्त्तव्यत्वम् । ७ सविधिकस्य वाचप्राशित्रक्षीकस्याग्निप्रणयनस्य पुनरुल्लेखः । ८ पशुबन्धयागसम्बन्धिन्या वेदेः पश्चादुपविष्टस्यानुवचनार्थं प्रेषितस्य यूपमज्यमानमभिधातुम् ऋग्विशेषानुवचनम् । ९ अञ्यमानयूपानुवचनपरिधानयोर्मन्त्रभेदौ । १० सपशुकयूपबहुत्वे एकपशुतन्त्रके कर्मणि अन्त्ययूपानुवचनं परिधायान्त्ययूपस्तवनञ्च । ११प्रथमोत्तमयोरनभ्यासविधानम् । १२ पशुदेवताभ्योऽनन्तरं वनस्पत्यावाहनम् । १३ संमार्गैः संमार्जनानन्तरं प्रहुताहुतिभिर्होमः । सकृदुपहवणपूर्वकैकाहुतिहवनानन्तरं पुनः सकृदुपहवणपूर्वकपञ्चाहुतिहोमः, मन्त्रविपर्ययश्च । १५ सौत्य एवाहनि पूर्वोक्तहोमः । १६ तीर्थेनैव लब्धविहारप्रपदनाय प्रयास्त्रे समन्तकदण्डदानम् । १७ प्रयास्तुदक्षिणोत्तराभ्यां पाणिभ्यां समन्तकदण्डप्रतिग्रहणम् । १८ यावत् प्रैषवचनं नास्ति तावत् उक्तेन दण्डेन स्वपरयोः संस्पर्शननिषेधनियमः । १९ उपद्रुतानान्येषामपि यज्ञाङ्गानां विहारेण व्यवायनिषेधः ।

२० प्रेषितस्य मैत्रावरुणस्य प्रैषानुवचनप्रकारः । २१ मैत्रावरुणस्यानुवाक्यानुवचनम् । २२ मैत्रावरुणस्य पर्य्यग्नि स्तोकमनोदतोवीमानसूक्तपाठः । २३ आसीनेनैव मैत्रावरुणस्य होमाधिकरणककर्मान्तरस्य करणम् ।२३ सू० ३ अ० १ क० । १ पशुयागे एकादशप्रयाजनियमः । २ तत्र तेषां प्रयाजानां प्रैषा अपि एकादशसंख्याः । ३ प्रकृताद्दुक्तमप्राकृतेष्वपि प्रैषेषु स्यादित्येवमर्थं पूर्वोक्तस्य प्रैषसूक्तस्य पुनरुपदेशः । ४ अध्वर्युप्रैषस्य होतुरनाकाङ्क्षणीयत्वम् । ५ प्रैषलिङ्गाभिराप्रीभिर्होतृयजनम् । ६ शुनकानां, वसिष्ठानां, सर्वेषाञ्चाप्रीसूक्तभेदकथनम् । ७ ऋषिनामधेयस्यानुगुणानामाप्रीणां ग्राह्यत्वम् । ८ प्राजापत्ये तु वसिष्ठशुनकसहितानां सर्व्वासामाप्रीणां जामदग्न्यत्वम् । ९ दशसु सूक्तेषु प्रेषितस्य मैत्रावरुणस्य प्रैषवचनम् । १० उक्तप्रैषवचनस्य होतुरन्तर्वेदि दण्डनिधानम् । ११ अध्रिगुशब्दवाच्ये दैव्याः शमितार इत्यादिके मन्त्रेऽङ्गादिशब्दानामूहः । १२ स्त्रीपुंसयोः समाहारे पुंलिङ्गेनैवोहः । १३ स्त्रीदेवतायामभिधेयायां मेधपतिशब्दस्य पुंवद्वचनम् । १४ स्त्रीपशौ मेधशब्दस्य पुंवद्वा स्त्रीवद्वा वचनविकल्पः । १५ अध्रिगोरूर्द्धम् अङ्गादिशब्दानामितरेषाञ्चोहनं, स्त्रीपुंसमाहारेषु सर्व्वत्र पुंवदेवाभिधानञ्च । १६ न केवलमस्योहविधेः पशुकर्मार्थत्वं किन्तर्हि सर्वेषु यजुःषु निगदेषु चार्थवशेन कार्य्यत्वम् । १७ प्रकृतौ समर्थनिगमेषूहनम् । १८ मन्त्रगतानां शब्दानां प्राकृतत्वेन अनूहनम् । १९ प्रतिनिधिष्वपि प्राकृतानां शब्दानामनूहनम् । २० उपमार्थानां श्येनादीनां शब्दानामूहनम् । २० सू० ३ अ० २ क० । १ अध्रिगुनामकमन्त्रविशेषकथनं तत्रस्थानां पदानामूहश्च । २ अस्नेत्यादीनां त्रयाणां शब्दानां स्वे स्वे स्थाने उपांशुप्रयोक्तव्यत्वम् । ३ षट्‌विंशतिशब्दस्याभ्यासनियमः । ४ मन्त्रविशेषजपानन्तरं विहारादाहृत्य दक्षिणावृत्त आवर्त्तनम् पृष्ठतः कृत्वा आसनञ्च । ५ मैत्रावरुणस्याप्यत्र पृष्ठतः करणम् । ६ पुनरावर्त्तनकाले पराचामेवासनम् ६ सू० ३ अ० ३ क० । १ वपायां श्रप्यमाणायां तत्संस्कारार्थं प्रेषितस्य स्तोकेभ्योऽनुवचनम् । २ स्वाहाकृत्यर्थं अनुगादापनस्य कर्तव्यत्वम् । ३ उत्तमा आप्रीयाज्या । ४ वपा पुरोडाशो हविरिति पशोर्यागाः । ५ नानादैवतेषु पशुषु याज्यानुवाक्याभेदादेव वपायागवत् पृथग्भावः । ६ प्रतिपशु मनोतामन्त्रस्यावर्त्तनम् । ७ एकेषां मते मनोताया अनावर्त्तनम् । ८ उक्तप्रदानगतप्रैषाणां समानलिङ्गत्वोक्तिः । ९ प्रदानप्रैषेषु विकृतिषु च या देवतास्तासामेकैकस्या देवताया अग्नीषोमस्थाने निर्द्दिश्य यष्टव्यत्वम् । १० गोमेषछागानामेकैकस्या जातेर्द्वयोर्द्वयोः शब्दयोर्नियमनस्य वैकल्पिकत्वम् । ११ वनस्पतिस्विष्टकृत्सूक्तवाकप्रैषेषु प्रदानप्रैषीयप्रयोगवत् प्रयोगः । १२ सूक्तवाकप्रैषेषु पुरोडाशेन पशुदेवतावर्ज्जनम् । १३ हविषां नानारूपत्वात् स्वेन स्वेनैव शब्देन निगमने प्राप्ते पुरोडाशशब्देनैव चर्वादीनां निगमनविधानम् ।१४ मेधोरभीयानित्येतयोः पदयोः पश्वभिधायकत्वम् । १५ आम्नायसिद्धानां द्विवचनान्तानाम् एकवचनबहुवचनयोरिष्टकारपरिग्रहार्थं पाठविशेषः १५ सू० ३ अ० ४ क० । १ वपाहोमानन्तरं सप्लक्षकानां [illegible] सर्व्वेषां सह मार्ज्जनम् । २ इदमाप इत्यनयर्चा यजुषा च उभाभ्यां मार्जनम् । ३ प्रत्यक्षभूतायामिष्टौ आतिदेशिकमार्जनस्य प्रत्यर्थस्पर्शौ मार्जनस्य एतावत्त्वोक्तिः । ४ पुरोडाशश्रपणपर्य्यन्तं तीर्थेन निष्क्रम्यासनविधिः । ५ प्रधानस्विष्टकृतोर्भेदप्रतिपत्त्यर्थं प्रधानेन चरित्वा स्विष्टकृता चरणविधिः । ६ स्विष्टकृच्चरणावसरे आगन्तुकैर्यागैरपि पशुपुरोडाशस्विष्टकृतां चरणम् ।७ अन्वायत्तदेवतानां हविषां चावाहनादिषु निगमेषु अनुष्टव्यभावः ।८ पुरोडाशानामिति हविर्भेदे प्रैषस्योह्यत्वम् ।१० इडाया ऊर्द्धम् उक्तप्रैषस्योह्यता १० सू० ३ अ० ४ क० । १ इडोपधानानन्तरं मनोतानुचरणम् ।२ हविषा चरणम् प्रैषाणां तत्पूर्वलिङ्गत्वञ्च । ३ हविःप्रैषे कतर एवाग्नीषोमावेवेत्यत्र ऐतरेयाणां सम्मतिः । ४ द्विदेवतादन्यत्र एकदैवते बहुदेवते पशौ मैत्रावरुणयोर्देवतात्वम् । ५ एकदैवतेषु बहुदैवतेषु च प्रैषेषु तथादृष्टत्वम् । ६ प्रकृतिभावे गाणगारिमतोल्लेखः । ७ अर्थभेदरहिते आम्नाये विकारस्य निरार्थकत्वम् । ८ वपाहोमे कृते अर्द्धर्चयोर्मध्ये वाजग्रायाः समापनम् । ९ प्रैषसमाम्नायपठितं वनस्पतिप्रैषमभितो ये ऋचौ तयोर्वनस्पतियाज्यानुवाक्यात्वम् । १० आज्यभागयोः करणे प्रैषे प्रधानदेवताशब्दस्य तयोर्निगमनम् । ११ स्विष्टकृति इडोपह्वानानन्तरम् अनुयाजैश्चरणम् । १२ उक्तस्थलेऽनुयाजानामेकादशसङ्ख्याविधानम् । १३ प्रकृतिभ्योऽन्यासां वैश्वदेव्यानामावर्त्तव्यत्वम् । १४ प्रैषाधिकारनिवृत्त्यर्थम् अवदानशब्दस्य पुनरावृत्तिः । १५ पुनरवदानस्य व्याख्यानार्थोल्लेखः । १६ सूक्तवाकप्रैषे आज्यभागयोर्ग्रहणम् । १७ पशुतन्त्रे पदत्रयस्याभ्यासत्वाभावाय पठितस्यापि पुनरभ्यासः । १८ देवताना-

मेकजातीयपशुकत्वकथनम् । १९ पशुशब्दाभावेवर्त्तनं नान्ययोर्देवयोः ।२० उत्तरे पूर्वस्योक्तस्योल्लेखः । २१ अनवभृथे कर्म्मणि सूक्तवाकप्रैषसमापनानन्तरम् आहवनीये दण्डानुप्रहरणम् । २२ सावभृथे कर्म्मणि अवभृथानुप्रहरणम् । २३ वेदस्तरणोत्तरकल्पः संस्थाजपात् प्राक् निष्क्रम्य उद्यमानस्य हृदयशूलस्यानुमन्त्रणे मन्त्रश्च । २४ उद्यमानस्य हृदयशूलस्य उपरिष्टात् अपामुपस्पर्शनमन्त्रः ।२५ बहुषु द्वादशहृदयशूलानाम् अन्योन्यसंस्पर्शावेक्षणमन्तरेणैव सर्वेषामेकैकेन समिद्द्वयस्य ग्रहणम् । २६ मन्त्रविशेषपूर्वकं प्रथमायाः द्वितीयायाः तृतीयायाश्च समिधोऽभ्याधानम् । २७पूर्वग्रहीतुरेव पूर्व्वमाभ्याधानं न सर्वेषां युगपत्" । २८संस्थाजपान्तं पशुतन्त्रम् । २८सू० २अ०६क० । १ प्रदानाख्यकर्म्मोक्तप्रैषा एव सर्व्वत्र भवन्ति नान्ये" इत्युक्तिः । २ येषां पशूनां यानि प्रदानानि तेषां पशूनां याज्यानुवाक्याकथनप्रतिज्ञा ।३सर्वत्र पूर्वसुक्ता अनुवाक्याः उत्तरा याज्या इति ज्ञापनम् । ४ याज्यानुवाक्याभिर्ज्ञापितदैवतेन वक्ष्यमाणानां पशूनां नानात्वोक्तिः । ५ अग्नेर्याज्यानुवाक्याः । ६ सरस्वत्या याज्यानुवाक्याः । ७सोमदेवतायाः याज्यानुवाक्याः । ८ पूष्णो याज्यानुवाक्याः । ९ बृहस्पतेर्याज्यानुवाक्याः। १० विश्वेषां देवानां याज्यानुवाक्याः । ११ इन्द्रस्य याज्यानुवाक्याः । १२ मरुतां याज्यानुवाक्याः । १३इन्द्राग्न्योर्याज्यानुवाक्याः । १४सवितुर्याज्यानुवाक्याः ।१५वरुणस्य याज्यानुवाक्याः । १५सू०२अ० ७क० । १ अष्टादशभिर्ऋग्भिः पशुकर्म्मविधानम्, तासाञ्चर्चां प्रजापतिदेवताकत्वम् । २ याज्यानुवाक्याभिः प्रकल्पितदैवत्यानामिष्टिरूपाणां पशूनां विधानं, साकल्येनैतदध्यायगणितानां तासां लिं यत्सङ्ख्यकत्वोक्तिः । ३ खण्डद्वये समाम्नातानां पशूनां मध्ये केषाञ्चित् सोमाङ्गत्वं केषाञ्चित् स्वतन्त्रत्वञ्च । ४ पशूनां प्रकृतिभूतस्य ऐन्द्राग्नस्य निरूढनामकस्य पशोः कर्त्तव्यत्वम् । ५ निरूढस्य पशोः षट्सु षट्सु मासेषु वत्सरे वत्सरे वा कार्य्यता ।६प्राजापत्योपांशुसावित्रसौर्य्यवैष्णववैश्वकर्म्मरूपपाशुकतन्त्रेषु उपांशुजपविकारोक्तिः । ७प्रैषादेरपि आगुरः स्थानभाजित्वम् । ८ आददादीनां सप्तानां यथास्थानमुपांशुत्वम् । ८सू० ३अ०८क० ।१सौत्रामण्याख्य कर्म्माधिकारः। २तत्राश्विनसारस्वतैन्द्राःपशवःबार्हस्पत्यश्चतुर्थः ऐन्द्रसावित्रवारुणाः पशुपुरोडाशाः यथासङ्ख्येन भवन्तीत्युक्तिः।३वालाग्रमार्जनानन्तरम् आश्विनसारस्वतैन्द्राणां प्रचरणं तेषाञ्चानुवाक्या प्रैष याज्यानां कथनम् । ४कुम्भीस्थसुरावेक्षणमन्त्रः ग्रहपात्रस्थसुरावेक्षणप्रकारश्च । ५ सुराग्रहपयोग्रहयोर्भक्षजपविधानम् । ६ सुराग्रहेष्वेव प्राणभक्षविधानम् । ६सू० ३अ०९क० । १विधानान्यथाभावे प्रायश्चित्ताधिकारः । २ विहितस्याभावे प्रतिनिध्युपादानम् । ३ इष्टिमध्यरूपस्याहिताग्नेः प्रयाणोपपत्तौ अग्नीनां दृयगुचयनम् । ४ समन्त्रकं साज्याहुतिहोमकं समारोपणं कृत्वा गमनविधानम् । ५ समारोपस्वरूपम् । ६ यजमानकर्त्तृकं गार्हपत्ये पाणिद्वयस्य सकृत्प्रतपनम् । ७उक्तप्रकारेणाहिताग्नेः समारोपणानन्तरमहुत्वा गमनविधानम् । ८ यजमानकर्त्तृकं समन्त्रकमरणीमन्थनविधानम् । ९अवदीप्यमानस्याहवनीयस्य शम्यापरासाद्‌र्वाक् संवपनम् । १० यदि तृतीयाद्यमावास्यां पौर्णमासीं यातीयाद्यदि वाऽन्यस्याग्निषु यजेत यदि वास्यान्योऽग्निषु यजेत यदि वास्यान्योऽग्निरग्नीन् व्यवेयाद्यदि वा साग्निहोत्र उपसन्ने हविषि वा निरुप्ते अक्षीवच्छ्रा पुरुषोवाऽविविहारमन्तरियाद्यदि वाश्वो प्रमीयेत इत्येवं निमित्ते इष्टिविधानम् । ११ उक्ताया इष्टेः पथिकृद्वाग्निदेवताकत्वम् । १२ उक्तायामिष्टौ अनडुद्दक्षिणा । १३पूर्वोक्ताया इष्टेः अग्निभिन्नव्यवधाननिमित्तकत्वे विधानभेदः । १४शुनां व्यवाये श्वपदानां भस्मना परिपूरणम् । १५ भस्मराजयोदकराज्या च तन्वने प्रतिराजि मन्त्रावृत्तिः । १६उक्तराजिभ्यां समागं कृत्वाऽऽहवनीयानुगमनानन्तरं ततः प्रणीय तदुपस्थानम् । १७ पथि स्रुतस्य अन्यवत्सेन दोहनीयाया गोः पयसाग्निहोत्रान्तरं प्रातरादौ प्राग् देशाग्निसंस्कारात् कृत्वा दाह इत्युक्तिः। १८ अपरपक्षे आहिताग्नेर्मरणशङ्कायां तत्पश्चाद्वशिष्टाहुतिभिः एतत्पूर्वपक्षनयनम् । १९आधानानन्तरं प्रधानयागादर्वाक् हविर्व्यापत्तौ तस्य प्रधानयागादेः सर्वस्याज्येनेष्टिं समाप्य पुनरिज्या न भवतीत्युक्तिः । २० च्युतकेशनखादिभिरन्यैर्वा बीभत्सैर्हविःषु दुष्टेषु नान्यः इत्युक्तःशुद्ध्युपायः । २१ कठिनानां भेदने द्रवाणां चरणे हविषां दुष्टत्वम् । २२ दुष्टानां हविषां अप्सु प्रक्षेपः । २३साकाय्यस्य दुष्टस्य मध्यमेन पलाशपर्णेन वल्मीकद्वारे प्रतिषेचनम् अप्सु वा तूष्णीमिति विकल्पः । २४ अन्तःपरिधिदेशे विष्यन्दमानस्य हविषो निर्वपणम् । २५प्रातर्दोहे अदुष्टे द्वयोः पात्रयोः कृत्वाऽन्यतरत्

दधिभावाय आतञ्च ताभ्यां दधिपयोभ्यां प्रचरणम् । २६ पयसि दुष्टे तत्स्थाने पुरोडाशव्यवस्था । २७ दधिपयोरूपे सान्नाय्यद्वये दुष्टे इन्द्राग्निदैवत्योदनसिद्ध्यर्थं पञ्चशरावपरिमितव्रीहिनिर्वपणम् । २८ इन्द्राग्न्योः पृथक् चरणम् । २९ एकेषां मते केवलमिन्द्रदेवताकपञ्चशरावोत्पादनानन्तरम् इन्द्राग्न्योः पृथक्चरणम् । ३० सान्नाय्यार्थमपाकृतानां वत्सानां पाने वायुदेवत्यया यवाग्वा यजनम् । ३१ गर्भमिति मन्त्रेण स्रवतोऽधिश्रितस्याग्निहोत्रस्याभिमन्त्रणम् । २१ख० २अ० १०क० । १ उपावसृष्टाया दुह्यमानायाश्च अग्निहोत्र्या गोरभिमन्त्रणम् । २ उक्ताया गोरुत्थापनम् । ३उक्ताया गोरूधसि सुप्ते चोदपात्रस्योद्गृह्य दुग्ध्वा ब्राह्मणाय पानार्थं तत्प्रदानम् । ४शब्दायमानायै उक्तायै गवे वरदानम् ।५दुग्धस्य शोणिताकारत्वे निरवशेषस्य गार्हपत्ये दाहविधानमन्येन द्रव्येण च होमकरणम् । ६ दोहनोत्तरं पात्रस्य भेदने पात्रात् पतने वा विच्छिन्नपतितत्यागेनान्यस्यादुष्टस्याभिमन्त्रणम् । ७दोहनावस्थायां पयसः स्यन्दने स्कन्नांशाभिमन्त्रणम् । ८परिशिष्टेन स्थालीस्थेन होमः। ९ होमस्यापर्याप्तौ अभ्यानीयाज्येन होमः । १०पयसि स्कन्ने प्रायश्चित्तम् । ११स्कन्ने स्कन्नाभिमर्शनम् । १२ पयःशेषेण होमविधिः । १३ कुम्भगतस्याऽशेषे पुनरुन्नीय होमकरणम् । १४स्थालीपात्रे शेषाभावे संस्कृतेनाज्येनोन्नीय होमः । १५ प्रधानहोमद्वयपर्य्यन्तम् उक्तरूपा प्रायश्चित्तिः । १६ पूर्व्वोक्तहोमे प्राकृतस्य मन्त्रस्यापवादरूपया वारुण्या ऋचा होमः वारुणीजपश्च । १७ वारुणीजपो वारुणीहोमः अनशनमिति त्रयस्य शेषेण होमे मासापचारहोमे पुनरुन्नीय होमे च कर्त्तव्यता । १८ गाणगारिमते उक्तपञ्चत्रये पुनर्होमः। १९ सरस्वतीति शब्दायमानस्याग्निहोत्रद्रव्यस्य अभिमन्त्रणम् । २० उद्वासिते विष्यन्दिते च प्रायश्चित्तान्तरम् । २१ शोभते मध्यमेन पलाशपर्णेन होमः । २२ अभिहुतेऽधिकसमिदाधानम् । २३ उत्तरस्या आहुतेः स्यन्दने समिदाधानम् । २३ख० २अ० ११क० । १ सायं होमस्य प्रदोषान्तकालविधानम् । २ सङ्गवान्तस्य प्रातर्होमकालत्वम् । ३ सायं प्रातर्होमेऽतीते चतुर्गृहीतेनाज्येन होमः । ४ कस्मिन् काले केन मन्त्रेण होमस्तदुक्तिः । ५ अग्निहोत्रे समाप्ते वारुणीष्टिः कार्य्या । ६होमोत्तरकाले प्रातः इष्ट्यन्ते वरदानम् ।

७अग्निहोत्रसमाप्तौ आहवनीयस्यानुगमनं ज्ञात्वा पुनस्तदुद्धरणम् । ८ तन्निमित्ता मित्रसूर्य्योभयदेवताका इष्टिः । ९ इष्टिसमाप्तौ यतवाचोः पत्नीयजमानयोरग्नीन् ज्वलयतोरन्यतोरहःशेषमुपोषणम् । १० द्वयोर्गवोर्दुग्धेन रात्रेः पूर्वचतुर्थभागे सायमग्निहोत्रहोमः । ११ एकस्मिन् पयस्यधिश्रिते द्वितीयमवनीय तेन होमकरणम् ।१२प्रातःकालातिपातनिमित्ता प्रातरिष्टिः । १३ उक्तायामिष्टौ प्रतभृत्यकस्याग्नेर्दैवतात्वम् । १४स्वकाले एव प्रणीतेष्वग्निषु होमकालातिपत्तौ प्रायश्चित्तोक्तिः । १५ दुःखेनाश्रुपाते प्रायश्चित्तिः । १६ अग्निहोत्रार्थं विधिनानुद्धृते आहवनीये यद्यस्तमियादर्कस्तदा बहुविद्ब्राह्मणेन तस्य निधानान्तं कारयेदित्युक्तिः ।१७पूर्व्ववत् अनुद्धृतेऽभ्युदितो यद्यर्को बहुविद्ब्राह्मणेन तत्प्रणयनम् ।१८आज्यस्य केसरजतापनयनरूपकार्य्यान्तरोक्तिः ।१९कालात्ययेन प्रायश्चित्तविशेषोक्तिः ।२०उक्तविषये प्रातःकाले विशेषोक्तिः ।२१विद्यमाने आहवनीये गार्हपत्यानुगमने इतिकर्त्तव्यताविधानम् । २२ मथनसमर्थकाष्ठाभावे भस्मनाऽरणी लेपयित्वा तन्मन्थनम् । २३ मन्थनविषये इतिकर्त्तव्यताकलापः ।
२४ उक्तमन्थनविषये द्वितीयः कल्पः । २५ पुनर्मन्थनविषये कल्पान्तरम् । २६ त्रिगुणयुक्तोऽग्निरेवात्र मन्थनविषये एका देवता । २७ अग्निहोत्रार्थं प्रणीते आहवनीयेऽनुगतप्रायश्चित्तत्वेन इष्टिविशेषोक्तिः । २८ ज्योतिष्मद्गुणकाग्निशरणयोः प्रकृते देवतात्वोक्तिः । २९ सर्व्वेष्वग्निष्वनुगतेषु आदित्येऽस्तमिते उदिते वाऽस्याग्नेः पुनराधानरूपप्रायश्चित्तोक्तिः । ३० अरण्योः समारूढेषु अग्निषु अरण्योर्नाशे अग्न्याधेयस्य पुनराधेयस्य वा कर्त्तव्यत्वम् ।३०ख० ३अ० १२क० ।१अतःपरं भाविनीनामिष्टीनाम् आग्नेयत्वोक्तिः। २व्रतातिपाते आग्नेयीष्टिः ।३कृतेऽग्निकर्म्मणि दोषेनेष्टिः किन्तु व्याहृतिहोमः । ४ आगारदाहे क्षामायाग्नये, ग्रामाग्निसंसर्जने च शुचयेऽग्नये, इष्टिः । ५ सर्व्वेषां द्वयोर्वा अग्न्योः परस्परं संसर्गे विविचयेऽग्नये उक्तेष्टिः । ६गार्हपत्याहवनीययोः संसर्गे वीतयेऽग्नये इष्टिः ७ पचनाग्निना संसर्गे संवर्गायाग्नये इष्टिः । ८ वैद्युतेऽग्नौ अप्सुमत्काय, शूद्राणामन्नभोजने वैश्वानरनामकायाग्नये चेष्टिकरणम् । ९ पुरोडाशकपाले नष्टेऽनुद्वासिते पूर्व्वोक्तैवेष्टिः । १० अभ्याश्राविते उक्ताया इष्टेः कर्त्तव्यत्वम् । ११ जीवत्येवाहिताग्नौ मृतशब्दोत्थे सुमतयेऽग्नये इष्टिः । १२ तत्रेष्टौ मरुतो देवता ।

१३ आमावास्याख्ये कर्मण्यारब्धे चन्द्रमसः पुरस्तादभ्युदये जाते मरुद्देवताका उक्तेष्टिः। १४ प्रायश्चित्तप्रकरणोक्तानां ब्राह्मणोक्तानाञ्चेष्टीनां वैकल्पिकत्वकथनम्। १५ हविषां स्कन्नानामभिमर्शनम्। १६ बर्हिष्परिधि स्कन्नया आहुत्या आग्नीध्रकर्त्तृको होमः। १७हुतवते आग्नीध्राय पूर्णपात्रदानम्। १८ देवताविपर्य्यासरूपव्युत्क्रमे महाव्याहृतिहोमः प्रायश्चित्तं हिरण्यदानञ्च। १९कस्मिंश्चित् कर्मणि यष्टव्यदेवतावाहनमकृत्वा उत्तरकर्म्मप्रवृत्तौ यदा स्मरणम् भवति तदैवोत्थाय तदावाहनं कर्त्तव्यम्। २०मनसा वा तदावाहनमित्यन्यमतम्। अस्यानिन्याः देवताया स्मरणक्रमेण यागः। २०सू० ३अ०१३क०।

१ अपक्वहविषा होमे कृते चतुःशरावौदनेन चतुर्ब्राह्मणभोजनरूपा प्रायश्चित्तिः। २अदग्धं किञ्चिद्धविरवदानेभ्यो न पर्य्याप्तञ्चेत्तदा पूर्व्वोक्तप्रायश्चित्तम्। ३ हविष्यशेषे दग्धे पुनराहृत्तिः कार्य्या। ४ आवाहनात् प्राक् हविर्दोषे पुनराहृत्तिरेव। ५ गुणभूतानां पुनराहृत्तिकथनम्। ६ स्विष्टकृतः प्राक् प्रधानभूतानां पुनराहृत्तिकथनम्। ७ अवदानदोषे पुनरायतनादवदानोक्तिः। ८नामे शेषेणेष्टा द्वे द्वे दक्षिणादानं न ऋत्विग्भ्य इत्युक्तिः। ९धर्म्मेषु कर्म्मसु विहितदक्षिणादाने शक्यसम्भवभूमिदानम्। १० पुरोडाशश्रपणादूर्द्ध्वं प्रायश्चित्ताभावः। ११ श्वादिभिरवलीढ़ानां तद्दर्शनादिभिरभिक्षिप्तानाम् अन्यथा वाऽशुचिभूतस्थानां कपालानामभिन्नानाम् अपामभ्यवहरणम्। १२कपालेभ्योऽन्येषां मृण्मयानां भिन्नानामभिन्नानाञ्च अपामभ्यवहरणम्। १३स्फुटितोत्पतितपुरोडाशानां निधानाभिमन्त्रणे। १४अग्निहोत्रहोमायाग्निप्रणयनकाले मथ्यमानेऽग्नौ न जाते लौकिकमग्निं प्रणीय तत्र होमकरणम्। १५अग्न्यादौ हुते तेषां पूर्व्वपूर्व्वालाभे उत्तरोत्तरग्रहणम्। १६ब्राह्मणराजन्यादिषु पञ्चसु आहुतिधारणाशी समिद्धवति इन्धनार्थाः समिधो न भवन्त्येवेति। १७होमानन्तरं मन्थनमपि भवतीत्युक्तिः। १८ यदि शाणौ जुहुयात् तदा बार्हस्पत्यो ब्राह्मणस्य नावरोधः कर्णीय इत्युक्तिः। १९ शद्राभकर्णे जुहुयात् तदा आगमंसवर्ज्जनम्। २० काम्बे चेत् दर्भाणामनभिशयनम्। २१अश्व चेत् नोजनीयाभोजनीयरूपविवेकाभावः। २२सांवत्सरिकयावज्जीविकयोर्न तयोर्विवेकोक्तिः। २३ आहुत्योरन्तराऽग्न्यनुगमने सति निहिते हिरण्ये द्वितीयाहुतिहोमः। ३अ० १४क०

चतुर्थाध्याये सोमयागेतिकर्त्तव्यताकलापः।

१ आधानानन्तरमारब्धयोर्दर्शपूर्णमासयोरनन्तरम् इष्टिपशुचातुर्मास्यैरिष्ट्वा सोमेन यजनम्। २ एकेषां मते दर्शपूर्णमासानन्तरम्, अन्येषां मते ताभ्यां पूर्व्वमपि सोमेन यजनम्। ३ सोमयागकर्तृणामृत्विजां संख्यानिरूपणाय प्रतिज्ञा। ४ते च त्रिपुरुषस्तस्य चत्वारस्तेन तत्र षोड़शर्त्विजः। ५ वक्ष्यमाणस्थले षोड़शर्त्विजां मध्ये स्वस्वापेक्षया उत्तरे त्रयः स्वस्वगणभूता इति चतुर्णामेव मुख्यत्वमित्युक्तिः। ६ होता मैत्रावरुणोऽच्छावाकोग्रावस्तुत् इत्येकोगणः। अध्वर्य्युः प्रतिप्रस्थाता नेष्टोन्नेता इत्येकोगणः। ब्रह्मा ब्राह्मणाच्छंसी आग्नीध्रः पोता इत्येको गणः उद्गाता प्रस्तोता प्रतिहर्त्ता सुब्रह्मण्य इत्येको गण इत्येवं चतुर्षु ऋत्विग्गणेष्वाद्याश्चत्वारोमुख्याः।७एतेषामेव ऋत्विजाम् अहीनैकाहैर्याजनं न सदस्यमित्येकमताध्वर्यूणां कर्त्तृत्वमिति ज्ञापनम्। ८-गृहपतिसप्तदशानामुक्तानां षोड़शानाम् ऋत्विजां सर्व्वैर्यजनम्। ९ ऐष्टिके तन्त्रे सत्रिणां पुरुषाणां समावापादिकर्म्मणि यथार्थमूहस्य कर्त्तव्यत्वम्। १० अनग्नीनां दीक्षणात् प्रभृत्येव यथार्थसभिधानमैष्टिके तन्त्रे इत्युक्तिः। ११ याज्यानुवाक्ययोः अग्निर्मुखमित्यूहः। १२ दक्षप्रदाने ऊहविधानम्। १३ प्रैषेषु निवित्सु अप्राप्तस्य ऊहस्य विधानम्। १४ अनैष्टिकत्वात् सूक्तवाक्ये इतयाज्यायाप्रयाणोहविधानम्। १५सूक्ताद प्राप्तौ कुह्वाञ्चोहविधिः।१६अच्छावाकस्य निगदे उपहवे प्रत्युपहवे चोहः।१७आर्षेयवरणे गृहपतिप्रवरणानन्तरम् आत्मादीनां मुख्यानां प्रवरणम्। १८ सर्व्वोत्सवर्गादित्वं स्वतोत्क्रमस्य। १९ समानार्षेयाणां समानगोत्राणां तन्त्रता। २० द्रव्यान्वयानां संस्काराणाम् आवर्त्तनम्। २१ एकेषां मते अग्निचित्यावभृथ ऋतव उखासम्भरणीयम् ऐष्टिकं कर्म्म। २२ ब्रह्मण्वत्यत्नवत्यत्नभृत् गक्षानां त्रयाणामग्नीनां देवतात्वोक्तिः। २३ [illegible] उत्तरोत्तरं शनैस्तरां भवितव्यम्। २४ [illegible] रणीयस्य पौर्णमासात् शनैस्तरत्वोक्तिः। २५ सोमप्रवहणस्य प्रायणीयातुल्यतोक्तिः। २६ औपवसथ्येऽग्निप्रणयनस्य प्रक्रमाया ऊर्द्ध्वं स्वरेषु नियमाभावः। २७वर्मे मध्यमोत्तमयोर्नियमाभावोक्तिः। २७सू० ४अ० १क०।

१दीक्षणीयायामिष्टौ विराजौ धाय्ये। २ दीक्षणीयायामग्नाविष्णू देवते। ३ साग्निचित्ये [illegible] [illegible]। ४ अन्ययोरुभयोराग्नावैष्णवादधिकानि ह-

वौषि । ५भुवद्वत्र आदित्येभ्यः भुवनपतिभ्यो वा आदित्येभ्यो याज्यानुवाक्ये । ६ इदमादिषु उदयनीयायाः प्राक् मार्जनाभावोक्तिः । ७ इड़ायां सूक्तवाके च स्थितानामाशिषां स्थाने आगूर्नामकमन्त्रस्य प्रयोगः । ८इड़ानिगदकथनम् । ९सूक्तवाकनिगदोक्तिः । १० नामादेशाभावोक्तिः । ११ सवनीयपश्विड़ायाः कथनम् । १२ अग्निप्रणयनोत्तरकालं गार्हपत्याहवनीययोर्मध्ये दीक्षितानामासनशयनरूपसञ्चारदेशः ।१३सत्रिणां दीक्षाविधानम् । १४महाव्रतसहिते सत्रे विशेषोक्तिः १५ द्वादशाहतापश्चितेषु यत्संख्याः सुत्यास्तत्संख्याएवोपसदो दीक्षाश्च भवन्तीति । १६ विकल्प्यैकाहानां कर्माचारः । १७ दीक्षाकालएव विधातव्ये दीक्षोपसत्सहितामामेकाहः-प्रयोगकालविधानम् ।१८दीक्षाहःसु परिसमाप्तेषु अनन्तरं यदहस्तस्मिन्नहनि सोमक्रयविधानम् । १८सू० ४अ० २क०।१ सोमक्रयदिवसे प्रायणीयेष्टिकरणम् । २प्रायणीयेष्टेः शंय्वन्तत्वम्, नोदयनीयान्तत्वमिति । ३ उक्ताया इष्टेरनाज्यभागत्वं नोदयनीयत्वमिति । ४ अहर्गणेषु सोमक्रयस्य सकृदेव कर्त्तव्यत्वम् । ४ सू० ४अ० ३क० । १ सोमक्रयरूपं कर्म । २ क्रीतं सोमं प्राग्वंशसमीपं नेष्यत्सु अध्वर्युषु अग्रतः पश्चात् त्रिपदमात्रेऽतीते शकटस्य शोर्ध्वभागस्य सरलदेशे प्रेषितस्य सतः पार्ष्णीवचालयतः प्रपदेन दक्षिणस्यां दिशि त्रिःपांशूद्वपनम् । ३ अन्तरेणैव वर्त्मनी अनुव्रजतएव उत्तराअनुवचनम् न व्रजनविक्षेपे इत्युक्तिः।४अवस्थितस्यानसो दक्षिणपार्श्वेन सोमसमीपं गत्वा तमीक्षमाणस्य तत्रैवावस्थानम् । ५ अवस्थितेऽनसि दक्षिणात् पश्चादभिक्रान्तस्य सोमाभिमुखं अवस्थानम् । आहवनीयस्याग्रतोऽनुव्रजनञ्च । ६सोमे निहिते तिष्ठतएव परिधानोक्तिः । ७ उपसर्जनविधस्य विकल्पोक्तिः । ७सू० ४ अ० ४क० ।

१ इड़ान्ता आतिथ्या नाम इष्टिः । २ आतिथ्येरग्निमन्थनरूपाङ्गकथनम् । ३ आतिथ्येष्टौ धाय्याद्वयं, शंयाज्याद्वयम्, आर्त्विज्यं करिष्यतां सहमभिमर्शनम् । ४उदकस्पर्शानन्तरं सोमाप्यायनम् । ५ उपसत्सु तदस्पर्शे उष्णोदकपरिग्रहणम् । ६ आप्यायनमन्त्रः । ७उदकस्पर्शानन्तरं नमस्काराञ्जलिहृदयेषु पाणिनिधानस्य कर्त्तव्यत्वम् । ७सू० ४अ० ५क० । १ उदकस्पर्शनानाम् आप्यायननिह्नवानन्तर्यक्रियोक्तिः । २ प्रत्युपगम्यशाखकेऽक्ता प्रस्तरेण तदरणानम् । ३पूर्वस्याभिष्टवनस्य एतानवकाशमनु

२सू० ४अ० ६क० । १ याज्याव्यवधाने सत्यप्येकमेवाभिष्टवनम् । २ होत्रादिषु उपविष्टेषु अध्वर्युकर्तृकधर्मदुघाह्वानस्य उत्तरारम्भे हेतुत्वोक्तिः । ३ अभिहिङ्कारवर्जम् उत्तराभिष्टवनविधानम् । ४ उत्तरपटलस्य समष्टिप्रयोजनानि । ५ उत्तमयोः प्रवर्ग्ययोः स्वरूपकथनम् । ५ सू० ४अ० ७क० । १प्रवर्ग्योपसदोः सम्बन्धाय प्रवर्ग्यार्थं प्रपदस्य उपसत्करण विधानम् । २ उपसदि पित्र्याया जपलोपः । ३पित्र्यायैव प्रवेशोपवेशनयोर्व्याख्यानम् ।४ पित्र्याया उपवेशनातिदेशात् दक्षिणोपर्युपस्थताविधानम् । ५ उपसद्यायमीढुषे इत्याद्याः तिस्रः सामिधेन्यः ।६ तासामुत्तमेन प्रणवेनाग्निं सोमं विष्णुमावाह्योपवेशनम् । ७ एकेषां मते देवतानाम् नावाहनम् अनावाहनेऽपि उक्ता एव देवताः इत्युक्तिः। ८ स्विष्टकृदादिप्रयाजाज्यभागलोपकथनम् । ९ आप्यायननिह्नवयोर्नित्यत्वकथनम् । १०अपराह्णेऽपि कर्त्तव्याया-मुपसदि विशेषादिकथनम् ।११तत्र पूर्वापराह्णिककर्म्माणि। १२पौर्वाह्णिकीनामुपसदां पूर्वाह्णे, आपराह्णिकीनाञ्च अपराह्णे कार्य्यतोक्तिः । १३पूर्वाह्णिक्यापराह्णिक्या-ऽपसदो एकीकृत्य एकोपसद्व्यवहारः, तादृश्या उपसदश्च त्रिरहःसु कर्त्तव्यत्वम् । १४षट्सु वेति व्यवस्थाविकल्पः । १५अहीनादीनाम् अध्वर्युप्रत्ययादुपसद्विषयः ।१६ एकेषां शाखिनां ज्योतिष्टोमस्य प्रथमप्रयोगे धर्मैक्याभावोक्तिः । १७ औपवसथ्येऽहनि वर्त्तमानयोरुपसदोः पूर्वाह्णएव कर्त्तव्यत्वम् । १८होता दीक्षितश्चेत् तदा औपवसथ्येऽहनि प्रथमोपसदि समाप्तायां प्रेषितः पुरीष्यचित्यर्थमनुवचनम् । १९होतरि अदीक्षिते यजमानस्यानुवचनम् । २० पश्चात् पदमात्रे स्थित्वाऽभिहिङ्कृत्य पुरीष्यासोऽग्नयः इति प्रथमया ऋचस्त्रिरनुवचनम् । २१ उमन्द्रेणैवानुवचनं नोपांश्विति । २२ व्रजत्सु अध्वर्युषु अनुमुव-तोऽनुव्रजनम् । २३ तिष्ठत्सु अध्वर्युषु अनुवचनारम्भस्थाने स्थित्वा भूर्भुवः स्वरिति वाचं विसृज्य प्रचयतीति सर्व्वमानुवचनम् । २४ होता दीक्षितश्चेत् प्रशोष्टकार्य सञ्चितस्य अग्नेः अनुगीतस्याशंसनरूपसंस्कृतिः । २५ निर्म्मथ्यसया वाचा पूर्वोक्तमग्न्यनुशंसनम् । २६ अग्निपुच्छस्य पश्चात् वैश्वानरीययजनम । सार्ग्निचित्येषु क्रतुषु पुरीष्यचितिः, अनुशंसनं, वैश्वानरीयमित्येतत् त्रयं भवतीत्युक्तिः । २८ ब्रह्मणो नियमभेदः । २९ उक्तस्याग्निप्रवचनस्य कर्त्तव्यत्वम् । ३० दीक्षितश्चेद्ब्रह्मा तदा तस्य

वसोर्धाराहोमकाले तत्प्रतिगमनविधानम् ३० ख० ४अ० ८क०। १हविर्धानयोः शकटयोः अध्वर्युकर्तृकं प्रवर्त्तनम्। २उक्तप्रवर्त्तने सोमप्रवहणेन कार्य्यतोक्तिः। ३ पूर्व्वोक्तानुवचने विशेषकथनम्।४रराट्यामवज्ञायाम् अधिहयोरिलथया ऋच अर्द्धर्चेऽवसानम्। ५वद्धां रराटीमीक्षमाणस्य ऋग्विशेषानुवचनम्। ६उपनिहतयोर्मेथ्योः ऋग्विशेषेण परिधानम् ६ख०४अ०९क०। १प्रेषितानुवचने इतिकर्त्तव्यताकलापः। २ अनुव्रजत उत्तरानुवचनम्। ३ ऋग्विशेषसमाप्तौ प्रणवेनोपरमः। ४ आग्निध्रीयमभिव्रजत्सु अध्वर्य्युषु उत्तरेण तमतिव्रज्य ऋग्विशेषस्यानुवचनम् ऋग्विशेषस्य पार्श्वे आरामः। ५प्रपद्यमानस्य सोमस्याऽनुप्रपदनप्रकारः। ६ शालामुखे भद्रोपवेशनप्रकारः।७ब्रह्मकर्त्तृकस्य सोमप्रणयनस्य पाक्षिकत्वकथनम्। ८ सोमप्रणयतो ब्रह्मणः कर्त्तव्यभेदः। ९ आहवनीयस्य दक्षिणतः ब्रह्मोपवेशने नियमः। १० अग्निचित्यासहितायां सोमयागक्रियायाम् अग्निपुच्छस्य दक्षिणत उपवेशनम्। ११ अग्निषोमीये प्रयौ उक्तब्रह्मासनातिदेशः।१२सौत्ये चाहनि वपाहोमपर्य्यन्तमाहवनीयस्य दक्षिणत आसनम्। १३स्वहस्तवे सोमं प्रहृत्य हविर्धाने चाग्रेण यदि गतः स्यात्तदा प्रपद्यमाने सोमे आसादमार्थं पुनः प्रवेशादिप्रक्तिः। १२ख० ४अ०१०क०। १ अग्निषोमीयेण पशुना चरणम्। २ प्रणयनपर्य्यन्तमुत्तरवेदिसमीपे आदण्डप्रदानस्य कार्य्यभेदाः। ३होतुः स्वस्य धिष्ण्यस्य पश्चादुपवेशने कार्य्यभेदः। ४मैत्रावरुणस्य स्वधिष्ण्यस्य पश्चादवस्थानम्। ५ देवसूनां हवींषीति संज्ञाकथनम्, तत्र सर्व्वासामष्टानां देवतानां सगुणत्वम्, रुद्रस्य गुणविकल्पश्च। ६उक्तदेवतानां याज्यानुवाक्याकथनम्। ६ख० ४अ०११ क०। १ सर्व्वपृष्ठानीतिवक्ष्यमाणानां हविषां संज्ञा, तासाञ्चाम्नायात्मत्व तद्देवतोपदेशस्य ध्यानार्थत्वं तासामष्टौ संज्ञाः तत्रादितः षण्णामेकैकस्याश्चत्वारश्चत्वारो गुणशब्दाः ततोविष्णुपत्नी अदितिरित्येका, ततश्चानुमतिरिति द्वे। उक्तानामष्टानां देवतानां याज्यानुवाक्याकथनम्। वैश्वानरीयस्य नवमत्वं, कायस्य दशमत्वञ्च। ३ औपयाजैरङ्गारैर्व्यवायपरिहारे यत्नस्य कार्य्यता। ४ आग्नीध्रस्योत्तरेण होतुर्नयनं दक्षिणे होत्रीये निधानम्।५शामित्रोदाहरणे दक्षिणेन मैत्रावरुणं, होत्रीय एव निधानम्। ६उपोत्थाननिष्क्रमणे तथा वेदग्रहणम्। ७हृदयशूलोद्वासनप्रकारः।

दक्षसतीवरीणां परिहारे क्रियमाणे दीक्षितानामन्तर्भावः अदीक्षितानां बहिर्भावश्च। ४अ०१२क०। १ यस्यां रात्रौ पशोः समाप्तिस्तस्यास्तुर्य्यभागे पक्षिप्रवादनात् प्राक् प्रातरनुवाकायामन्त्रितस्य विधिपूर्व्वकः आहुतिहोमः। २ उक्तविषये द्वितीयाहुतिहोमः। ३ ब्रह्मणश्च होतुश्चायं विधिः समान इति। ४ हविर्धाने प्राप्य रराट्यभिमर्शनम्। ५ दक्षिणेन पाणिना पर्य्यायेण रराट्यभिमर्शनम्। ६ मन्द्रस्वरेण प्रातरनुवाकानुवचनम्। ७ प्रातरनुवाकार्थमाम्नानविशेषः। ८ अग्निदेवताकक्रतुः ४अ०१३क०। १औषसक्रतुः। २तत्रेतिकर्त्तव्यताकलापः ४अ०१४क०। १आश्विनः क्रतुः। २तत्र प्रातरनुवाकः। ३पूर्व्वोक्तादन्यः प्रातरनुवाकः। ४अन्यैश्छन्दोभिराग्नेयस्य गायत्रस्य छन्दसोनात्यापनम्। ५ राजन्यस्य न त्रैष्टुभ, वैश्यस्य न जागतमिति। ६ अध्यासवत् एकपदद्विपदाना संहितानामन्ते प्रणवकरणम्। ७माङ्गलादीनां यथाक्रमं वक्तव्यता।८ प्रेप्सतः स्वर्गकामस्य माङ्गलकथनम्। ९ तमसोपघातपर्य्यन्तं सङ्खेद्यावोयधूक्तावर्त्तनम्। १० तमसोपघातकाले ईडेद्यामीयस्य उर्मयर्चा प्रतिप्रियतममिति सूक्तस्योपसन्ननम्। ११ उत्सर्पणस्वरूपकथनम्। ११ख० ४अ० १५क०।

५ अध्याये। १परिधानोत्तरानुवचनप्रकारः। २ तत्र निगदादि। ३ अपोनप्त्रीयायां प्रयोगमन्त्रौ। ४ प्रातःसवनस्य मन्द्रस्वरेण प्रयोगः। ५ अध्यर्द्धकारस्यानुच्छासेन वचनम्। ६ दृष्टिकामस्य सामधेनीवत् प्रकत्यावचनम्। ७ प्रकृतिभावे यथर्चमर्द्धर्चे विकल्पाकाङ्क्षा। ८ दशमीपक्षे ब्रह्मणानुवादः। ९ एकधनासु अप्सु आवर्त्तमानीयर्चकथनम्। १० दृष्टिपथमागतासु तासु जप्यमन्त्रः। ११ समीपागतासु तासु जप्यमन्त्रः। १२वसतीवरीषु समायातासु ब्राह्मणोक्तकार्य्यचरणम्। १०तीर्थदेशे होतृचमसे अपां पूर्य्यमाणे आपोनदेवीःइति मन्त्रं समाप्य प्रणवेनोपरमः। १४ निगदकथनेन निष्क्रमणविधिः। १५ आसामेकधनानामामन्त्रीनां सुखतो गत्वा ता। अपरेणातीत्य उत्तरतः स्थितिविधिः। १६ तास्वदूरेणातीतास्वन्वावर्त्तनम्। १७ अन्वाहृत्य मन्त्रक्रमेण व्रजनम् आगच्छनपक्षे प्रणवेनसन्तानक्रिया।१८तिसृणाम् उत्तमयानुप्रपदनम्।१९त्वाभिरुनेन होमाभिमुखे उपवेशनप्रकारः। १९ख० ५अ० १क०। १ उपांशुनामपक्षे हूयमाने तदभिमुखीभूय प्राणवायोर्नासिकाद्वारेण बहिष्करणम्। २बहिःस्थस्य वायो-

नासिकयां देहे प्रवेशनप्रकारमन्त्रौ । ३ उपांशुप्रहार्थशोमसवनसाधनपाषाणं व्यानाय त्वेत्यभिमन्त्र्य वाग्विसर्गः । ४ मैत्रावरुणब्रह्मणोः कार्य्यभेदः । ५ ताभ्यामितरेषां दीक्षितानां कार्य्यभेदः । ६ विप्रुड्ढोमौ हुत्वा अध्वर्युमुखा अन्योन्यं स्पृशन्त आतीर्थदेशात् सर्पन्तीत्युक्तिः । ७ बहिष्पवमानस्तुत्यर्थमुद्गातारमभिमुखीकृत्य ऋत्विजामुपवेशनम् । ८ तत्रैवासीनेन होत्रा तेषामुपविष्टानामनुमन्त्रणे मन्त्रः । ९ होतुर्दीक्षितत्वेऽनुमन्त्र्य यजमानार्थं गमनम् । १० दीक्षितस्य होतुरुत्तरसवनयोः सर्पणमपि । ११ ब्रह्ममैत्रावरुणयोर्विधानभेदः । १२ प्रातःसवने ब्रह्मणः कार्य्यभेदः । १३ तस्यैव द्वितीयतृतीयसवनयोः कार्य्यभेदः । १४ मन्त्रभेदं जप्त्वा मैत्रावरुणं प्रति स्तुध्वमित्युक्त्वैतेन नियोजनम् । १४ ख० ५ अ० २ क० । १ सवनीयेन पशुना चरणम् । २ शाखान्तरे या देवता पाथोरुक्ता तद्दैवतः पशुः कार्य्यः । ३।४ क्रतुभेदे देवताभेदः । ५ अग्नीषोमीयपशुधर्म्मविशेषातिदेशः । ६ परिव्ययणप्रकारः । ७ ऐष्टिकेषु निगमेषु आवाहनप्रकारः । ८ हारियोजने विशेषः । ९ विषयभेदे प्राशित्रादिनिषेधः । १० अनिर्दिष्टदेवताकहोमानां देवताः सवनदेवता एवेति तासामावाहनम् । ११ स्वकृतावेऽपि तासामनुवर्त्तनम् । १२ अच्छावाकं विनाऽन्येषां वषट्कर्त्तॄणाम् पशुसाङ्गति होमः । १३ पात्राणामार्ज्जनप्रभृति पाशुकं कर्म्म कृत्वा सौम्यिककर्म्मकरणम् आदित्याद्युपस्थानञ्च । १४ आदित्याद्युपस्थानप्रकारः । १५ निर्म्मन्थ्यदेशे यूपादिभिः सह आदित्यादीनामुपस्थानम् । १६ यामित्रोऽध्यगोष्ठचात्वालोत्करास्तावानां सव्याहृतानामुपस्थानम् (आस्तावो बहिष्पवमानस्तुतिदेशः)। १७ आग्नीध्राच्छावाकसदनस्थानदक्षिणमार्जालीयपश्चमसासादनदेशरूपस्थानानां दक्षिणाहृतानामुक्तप्रकारेण उपस्थानम् । १८ आग्नीध्रमुत्तरेण परिव्रज्य सदोद्वारं प्राप्य सदोऽभिमर्शनमन्त्रः १९ द्वारिभवे स्थूणे अभिमृश्य शालामुखीयादीनामुपस्थानम् । २० उपस्थितानुपस्थितयोर्दर्शनपूर्व्वकं सर्व्वतोऽध्या सदसः पूर्व्वद्वारस्थेनोपस्थानं कार्य्यम् । २१ उरुव इत्यृचं सह जपन्तः होता मैत्रावरुणः ब्राह्मणाच्छंसी पोता नेष्टेत्येते पञ्च पूर्व्वद्वारेण सदः प्रविश्योपतिष्ठेरन्नित्युक्तिः । २२ तेषामुत्क्रमेण सदःप्रवेशः, व्युत्क्रमेण उपवेशनं ततो मन्त्रविशेषजपः । २३ प्रसर्पकाणामृत्विजामुपस्थानादिजपान्तधर्म्मस्य ब्रह्मचर्य्यातिदेशः । २४ स्वस्वभक्ष्यचमससमीपे तेषामुपवेशनम् । २५ उक्तरूपेणाग्नीध्रस्य शुप्रकाशम् आग्नीध्रीयस्थानप्रवेशः । २६ प्रसर्पिणां तेषां दक्षिणादय उदक् संस्थानानीत्युक्तिः । २७ आद्ययोर्होतृमैत्रावरुणयोर्वैपरीत्यं ततश्च मैत्रावरुणदक्षिणतः स्वस्थानतश्चोत्तरतो होतुः स्थानम् । २८ तेषां यथास्थानमुपविष्टानां स्वस्वस्थानस्योत्तरदेशस्य विसंस्थितसंचारसंज्ञा । २९ अनुक्तस्थानानामृत्विजां दक्षिणाधिष्ण्यमुत्तरेण विसंस्थितसञ्चार इत्युक्तिः । २९ ख० ५ अ० ३ क० । १ प्रतिसवनमिन्द्रदैवतैः पुरोडाशैश्चरणम् । २ प्रातःसवने धानावन्तं करम्भिणमित्यनुवाक्या । ३ माध्यन्दिनतृतीयसवनयोः प्रैषभेदः । ४ आदेशपदमुद्धृत्य तेनैव पदेन यागः । ५ यत्र क्वचित् कर्म्मणि प्रैषेण यागे कर्त्तव्ये यज योऽस्तु इत्युद्धृत्य तयोः स्थाने आगूर्वषट्कारौ कृत्वा याग इत्युक्तिः । ६ अनुसवनमनुवाक्याभेदः । ७ अनुवाक्यास्थपुरोडाशस्य बहुवचनान्ततोक्तिः । ८ ऋग्भेदे ऊहनिषेधः । ८ ख० ५ अ० ४ क० । १ द्विदैवत्ययाज्याप्रैषानुवाक्याभिश्चरणम् । २ द्विदैवत्ययोरनुवाक्ययोरुक्तिः, ते अप्यपृथक्समप्रणवे प्रयोज्ये ते च सहानवानम् । ३ प्रैषाणामनवाननिर्णयः । ४ ऋग्भेदे द्वे याज्ये ते च सहानवानम् एकागुरे पृथक् वषट्कारे च वक्तव्ये इत्युक्तिः । ५ प्रातःसवने इदमादि अनवानं याज्यानुवाक्ययोरिति निर्णयः । ६ प्रैषौ याज्यानुवाक्ये च उत्तरयोर्द्वयोरनवानं भवतीत्युक्तिः । ७ सोमप्रहणपात्रमहुत्वा अध्वर्युणा तद्ग्राह्यम् । ८ तत्र च मन्त्रः । ९ तद्गृहीत्वा दक्षिणोरुच्छादनेन तत्र स्थापयित्वा आकाशवतीभिरङ्गुलीभिरपिधानम् । १० एवमुत्तरपात्रयोर्ग्रहणासादनपिधानानि । ११ प्रतिप्रहभक्षणकाले सव्येन पिधानम् । १२ मैत्रावरुणस्यासादने विशेषः । १३ अनुवचनयाज्यासंप्रैषाः नित्यमध्वर्युणा कार्य्याः । १४ अनुसवनं चमसेषून्नीयमानेभ्यः सोमेभ्य एकैकसूक्तजपः । १५ अनुसवनं प्रेषितस्य होतुःस्वाभिः प्रस्थितयाज्याभिर्यजनम् । १६ प्रशास्त्रादीनां नामादेशं प्रेषितानामेव यजनम् । १७ प्रशास्त्रादिप्राह्मकथनम् । १८ प्रातःसवनीयप्रस्थितयाज्योक्तिः । १९ तृतीयसवनीयानुवषट्कारः । २० मारुत्वतीये हारियोजने प्रस्थितयाज्यादिभेदः आश्विने याज्यान्यूनत्वञ्च । २१ यज्ञगाथा । २२ प्रतिवषट्कारं भक्षणम् । २३ तूष्णीमेवोत्तरभक्षणम् । २४ अध्वर्योराहवनीयदेशात् सदसो गतिः । २५ आगच्छन्तमध्वर्युं प्रति अयभिग्नीदिति होतुः प्रश्नः । २६ दृष्टस्य तस्य होतारं प्रति अथाड्ढुत्तरोक्तिः ।

२७ ततो होतृजप्यमन्त्रः। २७सू० ५अ० ५क०। १इतरपात्रद्वयं सव्येनापिधाय ऐन्द्रावायवपात्रं दक्षिणहस्तेनोत्तरभागे गृहीत्वा अध्वर्युणापि तस्य ग्रहणाय एष वसुरिति मन्त्रेण होत्रा प्रणयनम्। २ नासिकाभ्यामवघ्राय होत्रा सोमस्य भक्षणे मन्त्रः।३ होत्रा भक्षितमध्वर्युणा च प्रतिभक्षितं होतृचमसे किञ्चिद्दवनीय अनाचम्यैवोपह्वानादि कृत्वा पुनः सह भुक्त्वा शेषं होतृचमसे आनीय तत्पात्रोत्सर्गः। ४ उत्तरग्रहपात्रे उक्तधर्मातिदेशः। ५ उत्तरग्रहपात्रयोर्न पुनर्भक्षणम्। ६ द्विदेवत्यानां मध्ये कस्यचित् ग्रहस्य होतृचमसे अनवनीतस्य नोत्सर्गः। ७ होतुः मैत्रावरुणस्य ग्रहपात्रस्याध्वर्यवे पूर्ववत् प्रणयनम्। ८ तस्य दक्षसव्याभ्यां नेत्राभ्यां क्रमेणेक्षणम्। ९ मैत्रावरुणस्योत्सर्गान्तं कर्म कृत्वा दक्षहस्तेनाश्विनमपिधाय सव्येन होतृचमसादाने मन्त्रोक्तिः। १० सव्यस्यारत्निना सव्योरुवसनमाच्छाद्य तत्र निधायाष्टताङ्गुलीभिरपिधानम्। ११ होतृचमसं सव्येनापिधाय दक्षिणेनाश्विनं गृहीत्वा पूर्ववत् प्रणामनम्। १२ आश्विनस्ततस्त्यज्य दक्षहस्तेन होतृचमसं निधाय जलं स्पृष्ट्वा इडोपह्वानम्। १३ इडोपह्वानकाले चमसिनः स्वस्वचमसस्येडासमीपे उद्यमनम्। १४ अत्रान्तरेडां प्राश्याचम्य होतृचमसभक्षणम्। १५ दीक्षितस्य होतुः दीक्षिता उपह्वयध्वमित्युक्त्वा चमसभक्षणम्। १६यजमाना उपह्वयध्वमित्युक्त्वा वा होतृचमसभक्षणम्।१७मुख्यान् प्रति पृथक् तत्तन्नामोत्कीर्त्तनेन इतरानमुख्यान् प्रति होतृका उपह्वयध्वमिति कीर्त्तनेन च चमसभक्षणम्। १८ उक्तरूपेण दीक्षितादीक्षितानां मैत्रावरुणादीनां स्वस्वचमसभक्षणम्। अदीक्षितानां समानभक्षं प्रति पूर्ववत् उपह्वानं कृत्वा चमसभक्षणमिति भेदः २० अवमन्दानां(?) मुख्यचमसाद्भक्षणम्। २१ द्रोणकलशादुद्धृत्याचमसानां सोमभक्षणम्। २२ सर्व्वत्र सोमभक्षणे वाग्देवीत्यादिमन्त्रजपः। २३ होतुर्वषट्कर्त्तृत्वात् प्रथमभक्षणं पश्चादुद्गात्रादीनां भक्षणमिति गौतममतम्। २४ तौल्वलिमते इतरेषामभक्षणम्। २५ गाणगारिमते सर्व्वेषां भक्षणम्। २६ सोमभक्षोत्तरं मुखहृदयस्पर्शे मन्त्रः २७ प्रथमद्वितीययोः सवनयोराद्यानां द्वितीयानाञ्च चमसानां जलेनाभिमर्शने मन्त्रद्वयम्। २८तृतीयसवने आद्यानामेव तथाभिमर्शनम्। २९ ऊर्द्ध्वपात्राणि विना सर्व्वपात्राणां मुखहृदयाभिमर्शनम्। ३० इत्थमाप्यायनेन भादितानां चमसानां नाराशंससंज्ञा ३०सू०५अ०६क०। १अस्मिन्काले अच्छावाकस्याग्नीध्रस्योत्तरं सदोगत्वा स्वस्थाने उपवेशनम्। २अध्वर्युणा दत्तं पुरोडाशखण्डमिडामिश्रोद्यम्य प्रेषितस्याच्छावाकस्य जप्यं वचन्। ३ यजमानेत्यादिना अन्त्येन प्रणवेनोपसन्तननरूपनिगदः। ४उक्तनिगदसमाप्तौ अध्वर्युणा होतुरुपह्वयाकाङ्क्षा।५उपह्वाने प्रकारः।६उन्नीयमानाय प्रत्यक्षा इति सूक्तस्याच्छावाकेनानुवचनपूर्व्वकं यजनम्। ७पुरोडाशखण्डं निधाय जलं स्पृष्ट्वा चमसभक्षणम्। ८अस्पृष्टोदकानां सोमेतरहविषां स्पर्शनिषेधः। ९पुरोडाशखण्डप्राशनप्रकारः।१०यदाच्छावाक उपविष्टस्तदा ब्रह्मा तीर्थेन निष्क्रम्य बहिर्वेद्यामाग्नीध्रीयं प्राप्नोति अच्छावाकश्च इगलरूपं पुरोडाशखण्डं प्राश्य तीर्थेन निष्क्रम्याचम्य तं देशं प्राप्नुयात् इतरे होत्रादयोऽप्यनुपविष्टएवाच्छावाके तं देशं प्राप्नुयुरित्युक्तिः। ११ अस्मिन् काले चुक्षिष्टस्यर्थमन्यदपि प्राश्य प्रतिसृप्य उत्तरकाण्डकोक्तं कर्म कार्य्यम् ११सू० ५अ०७क०। १ सर्व्वेषु प्रतिसृप्तेषु ऋतुयाजैश्चरणम्। २ तत्र प्रैषाः। ३ प्रैषसमाम्नाये पञ्चमसूक्तस्य ऋतुयाजानां प्रैषत्वम्। ४स्वस्वप्रैषेण प्रेषितस्य यजनम्। ५ अध्वर्युगृहपतिभ्यां प्रेषितस्य होतुर्यजनम्। ६ पार्ष्णिके षष्ठेऽहनि अध्वर्युगृहपतिभ्यां स्वयंयजनम्। ७ तयोर्यजनप्रकारः। ८ वषट्कर्त्तृणामानान्तर्य्येण ऋतुपात्रभक्षणम्। ९तत्र अध्वर्य्योः पृथक्भक्षणम्। १०तत्रैव काले प्रतिभक्षकस्योपह्वानम् ५अ०८क०। १ ऋतुपात्रभक्षोत्तरमध्वर्य्योः कार्य्यप्रकारः। २प्रातःसवने शस्त्रादिषु पूर्व्वोक्तप्रकारातिदेशः, पर्य्यायप्रभृतीनां शस्त्रान्तःशस्त्रत्वम्। ३ उक्तेनोपाह्वानेनोत्तरयोरुपसन्तननम्। ४ओथामोदैवेत्यस्य प्रतिगरसंज्ञा सच शस्त्रस्वरतुल्यस्वरः इत्युक्तिः। ५ आहावे शोंसामोदैवेत्यादेः प्रतिगरसंज्ञा ६प्रणवे प्लुतादि अवसाने अप्लुतादिरिति परिभाषितम्। ७ आहावोत्तरे प्रणवे प्रणवत्वं न प्लुतादित्वम्। ८अवसाने प्रणवस्य प्रतिगरसंज्ञा। ९ प्रणवान्तस्य उक्तविषयद्वयविकल्पः। १०अन्तःशस्त्रप्रणवावसाने प्रतिगरसंज्ञा शस्त्रान्ते तु प्रणवत्वं न प्लुतादित्वम् ११ त्रिपदेषट्पदादौ शंसनावसानविशेषः। १२ निविदो यथापठितमवसानं कर्त्तव्यं तत्रैकस्त्वयञ्च। १३ निविदां आह्वानाभावः। १४ तस्या उपसन्तननाभावश्च। निविदामुक्तमेन पदेनाज्यसूक्तस्योपसन्तननम्। ...प्रकारेण सर्व्वा

निविदः शंसव्या इत्युक्तिः । १७ पदसमाम्नायानामपि निविदां तुल्यशंसव्यत्वम् । १८अस्या निविदोऽन्यासु निवित्सु पदसमाम्नायेषु च उपसन्तननम् । १९ अन्यासु निवित्सु आह्वानञ्च भवतीत्युक्तिः । २० यत्र द्वे सूक्ते त्रीणि वा आज्यकार्य्ये विहितानि तत्राद्यस्यैवाद्यायाः त्रिःशंसनं नोत्तरस्येति नियमनम् अर्द्धर्चशोविग्रहश्च तथात्वम् । २१ विपर्य्यये प्राणसन्तानस्य कार्य्यता । २२प्रतिपदामाद्याया ऋचः पूर्वोक्तप्रकारेण गन्तव्यता । ऋगावानस्य तथात्वञ्च । २३ ब्राह्मणविहितस्य आनुपूर्व्ये विकल्पः ।२४याज्यान्तानां शस्त्रत्वस्तुत्तमाया आह्वानपूर्व्वकपरिधानीयत्वञ्च ।२५सर्व्वासु शस्त्रपरिधानीयासु उक्थधर्म्मातिदेशः । २६उक्थं वाचीत्यादि शस्त्रा जपः तत्र याज्या, उक्थपात्रस्याप्ये भक्षणञ्च २७ सर्व्वशस्त्रयाज्यान्तेषु चमसिनश्चमसभक्षणम् । २८आदित्यशावित्रग्रहयोर्वषट्कर्त्तुर्भक्षणाभावः। ५अ०६क० । १शस्त्रात् परं स्तोत्रं भवतीत्युक्तिः । २एषेति प्रोक्ते प्रस्तोत्रा उद्गातुर्हिङ्कारकाले प्रातःसवने शस्त्रायाह्वयीरन् इत्युक्तिः । ३ उत्तरयोः सवनयोः प्रतिहारकाले तथाह्वानम् । ४ वायुरग्रेगा यज्ञप्रीरित्यादीनां सप्तानामृचां पुरोरुक्संज्ञा तस्यास्तस्या उपरिष्टात् तृचं तृचं तत्र शंसेदित्युक्तिः। गायत्रायाहि दर्शतेति सप्तानां तृचसंज्ञा ६शस्त्रस्य प्रउगसंज्ञा । तत्र द्वितीयायास्त्रिःपाठ्यत्वम् । ७ पुरोरुक्संज्ञकानां सप्तानामृचां मध्ये विश्वान् देवानित्येतस्या षष्ठ्याः अर्द्धर्चे अर्द्धर्चे त्रिरवसानेनाह्वानम् । ८ पुरोरुचा उत्तमया न शंसेत् तस्या अशंसनेऽपि तृचे आह्वानं कर्त्तव्यम् । ९प्रउगस्य माधुच्छन्दसार्षत्वम् । १०उक्थं वाचि श्लोकायत्वेति शस्त्रा जपः । तत्र विश्वेभिः सोम्यं मध्विति याज्या । एतस्मात् ब्राह्मणाच्छंसी अच्छावाक इत्येते त्रयः शस्त्रिणो होत्राकाश्च इत्युक्तिः । ११उक्तानां त्रयाणां प्रातःसवने चतुराहावानि शस्त्राणि । तृतीयसवने पर्य्यायेषु अतिरिक्तेषु भवन्तीत्युक्तिः। १२माध्यन्दिने पञ्चाहावानि । १३स्तोत्रियानुरूपेभ्यः प्रतिपदनुचरेभ्यः प्रगाथेभ्यःधाय्याभ्यश्च [illegible]गाह्वानं कार्य्यम् । १४होतुरप्येतानि उपह्वावस्य निमित्तानि । १५ तेभ्योऽन्यदथमन्तरम् । होत्रा कर्त्तव्यम् । १६आदौ निविद्धानीयानां सूक्तानामनेकत्वेत् प्रथमेऽप्याहावः । १७आपो हि ष्ठा इत्यादि तृचे आहावः कार्य्यः। १८ तेषां शस्त्रादिषु ये तृचास्ते स्तोत्रियानुरूपाख्येषु आहावः कार्य्यः । १९ माध्यन्दिने तेषामेव

शस्त्रेषु तृतीया आदेशास्ते प्रगाथाः ज्ञेयाः । २०प्रगाथ इत्युक्ते स्तोत्रियोभवति नान्यथेत्युक्तिः । २१ याज्यान्तानि शस्त्राणि । उक्थं वाचीत्यादि शस्त्रा प्रातःसवने जपः । २३ षोड़शिन ऊर्द्ध्वं यानि शस्त्राणि तेष्वपि अयमेव शस्त्रा जपः कार्य्यः । २४ सषोडशिनि उक्थे उक्थ वाचीत्यादे माध्यन्दिने विशेषः । २५ अनन्तरस्य पूर्व्वेण तुल्यविधत्वोक्तिः । २६ छन्दःप्रमाणलिङ्गदैवतैः स्तोत्रियाणां तुल्यता । २९ आर्षेणापि तुल्यतेत्येके आहुः ।२८आग्नेमित्रावरुण इत्यादयोयाज्याभेदाः तासां मध्ये कामाश्चित् स्तोत्रीयानुरूपत्वम् । तासां मध्ये यासु कासुचिद्यदि छन्दोगाः स्तुवीरन् तदा तिसृभिरेव स्तोत्रियां कृत्वा शिष्टाभिरनुरूपः कर्त्तव्य इत्युक्तिः ५अ०१०क० । १,२,३,४,५ अतिरात्रषोड़शिनि होत्रादीनां निष्क्रमणप्रवेशादिप्रकारः । ६ यजमानस्य पूर्व्वद्वारेण प्रतिसर्पणम् ५अ०११क०।१उक्तकाले ग्रावस्तुतः प्रपदनम् ।२तस्य उपसर्पणमपि तद्वत्.।३तस्य हविर्द्धानशकटस्य उत्तरशिरोरूपाक्षशिरोदेशे तृणनिरसनं कृत्वा सोमाभिमुखं स्थितिः । ४तत्रोपवेशने मन्त्राभावः। ५उपविष्टस्य यो अद्य सौम्येति मन्त्रजपः । ६ अध्वर्य्युणा तस्मै उष्णीषदानम् । ७तस्याञ्जलिना ग्रहणेन तेन संमुखे शिरसोवेष्टनोत्तरं सोमाभिषवाव ग्रावाभिष्टवनम् ।८इदमादि मध्यमसवनं तत्र मध्यमस्वरेण प्रयोगश्च । ९ अर्बुदनामधेयसूक्तोक्तिः । १० तस्य प्रागुत्तमायाः आ व ऋञ्जसे इति सूक्तपाठः । ११ उक्तसूक्तयोरुपरिष्टात् शिष्टयाऽर्बुदस्योत्तमया परिधाय वेद्यं यजमानस्योष्णीषं तस्मै देयम् ।१२अन्येषु दिनेषु आदाय पुनर्यजमानाय दानम् । १३ अन्यदिनेषु येन तद्दत्तं तस्मै एव तद्दानम् । १४ गाणगारिमते अपराभिरूपकरणम् । १५आप्यायस्व समेतु ते इत्यादयः द्वादश ऋचस्तासु चत्वारस्तृचा भवन्ति अर्बुदस्य चतुर्थी उद्धर्त्तव्या तत्र उत्तमा परिधानीया शिष्टा द्वादश ता अपि चत्वारस्तृचा एताः पावमान्यः। १६,१७,१८,१९, एषां चतुर्णां तृचानां क्रमेण कर्म्मभेदे विनियोगज्ञापनम् यथा उदकसेकरूपे आप्यायने प्रथमम् मार्जने द्वितीयम् दोहने तृतीयं अभिषवेण द्रवीकृतस्याधवनीये सम्भरणरूपे आसेचने चतुर्थम् । १०प्रतिहृच्छस्त्रं चतुर्थ्यां विनियोगः ।११ मन्द्रेना चिदन्यङ्गीति ऋचो विनियोगः ।१२अर्बुदपावमानीभ्योऽन्यत् सर्व्वं समानम् । १४ केषाञ्चिन्मते अर्बुदस्यैव समता १५ अन्यमते प्र दो पावाण इत्यस्य समता १६,१७ स्तुते

माध्यन्दिने पावमाने विहृत्याङ्गारान् उपसर्पणम् । ५अ० १२क०। १प्रवर्ग्यवति क्रतौ दधिघर्मेण चरणम् । (दधिघर्मः कर्मभेदः) । २ ऋगावानस्य तद्धर्मत्वम् । ३ भक्षिण कृत्या । ४होतर्वदस्वेत्युक्तस्य उत्तिष्ठतोऽवमस्यतेत्युक्तिः । ५ श्रातं हविरित्युक्तौ श्रातं हविरित्यनुवचनम् इयमनुवाक्या: । ६ परि त्वाग्ने इत्यादि मन्त्रजपे निमित्तभेदोक्तिः । ७ दीक्षितस्यैव अनिष्टा जपः । ८सवनीयानां पुरस्तादुपरिष्टाद्वा पशुपुरोडाशेन चरणम् । ६ एकमते तेन नाचरणम् ।१०आश्मरथ्यमते तेनाचरणम् । ११ अहीनैकाहेषु नाराशंसासादनात् परं दक्षिणानयनम् १२अहीनैकाहेषु दीक्षितस्य जप्यमन्त्रोक्तिः । १३ आग्नीध्रेण उन्नेष्यमाणानां दक्षिणाहुतीनां हवनम् ।१४आहुतिमन्त्रप्रकारौ १५विहारदेशाभिक्रमेण नीतेषु दक्षिणाद्रव्येषु मध्ये प्राणिरूपदक्षिणाद्रव्यप्रतिपत्तौ मन्त्रभेदः ।१६अप्राणिद्रव्यस्याभिमर्शनमात्रम् । १७ कन्याया दैवविवाहविधिना दत्ताया आदानेऽभिमर्शनमात्रम् न पाणिग्रहणम् । १८ एवं प्रतिग्रहनियमः सर्वत्र । १९ प्रतिग्रहाग्नीध्रीयं प्राप्य उच्छिष्टहविषः सर्वैः प्राशनम् । ५अ० १३क० ।

१ मरुत्वतेन ग्रहेन चरणम् । २ तत्पात्रभक्षणे मन्त्रः। मरुत्वतशस्त्रशंसनम् । ३ माध्यन्दिनसवने शस्त्रादिषु अध्वर्य्योराह्वावप्रकारः । ४ मरुत्वतौ प्रतिपदनुचरसंज्ञौ तृचौ । इन्द्रनिहवः प्रगाथः । ६ ब्राह्मणस्पत्यप्रगाथः । ७तृचाः प्रतिपदनुचराः, द्व्यृचाः प्रगाथाः । आद्यमारभ्य ब्राह्मणस्पत्यपर्य्यन्तं सर्व्वमर्द्धर्चशः । ८ स्तोत्रियानुचराः प्रतिपदनुचराः सर्व्वत्र प्रगाथाः । ९ गायत्र्यादीनि पङ्क्त्यन्तानि अर्द्धर्चशः शस्तानि भवन्तीत्युक्तिः । १०पङ्क्त्या उत्तरेषु त्रिषु या अचतुष्पदास्तासामर्द्धर्चशः शंसनम् । ११ पञ्चपदासु पङ्क्तिषु द्वयोर्द्वयोः पादयोर्द्विरवसानम् । १२ आश्वनशस्त्रे याः पङ्क्तयस्तासामर्द्धर्चशः शंसनम् । पङ्क्तिशंसनं वेति विकल्पः । १३उक्तगतायाः पङ्क्तेः पच्छः शंसनकथनम् । १४ पङ्क्तेः पच्छः शंसने ये उत्तमे पदे अतिरिच्येते तयोः समं कृत्वा शंसनम् । १५ उक्तादन्यत्र पच्छः शंसनम् । १६अर्द्धर्चान्ते प्रणवं कृत्वा सन्तननम् । १७ तत्र धाय्याभेदाः । १८ मरुत्वतः प्रगाथः । १९ जनिष्ठा उग्र इति सूक्तोक्तिः । २० उक्तसूक्तस्यार्द्धा एकाधिकाः शस्त्वा तदन्तराले इन्द्रोमरुत्वान् इत्येतस्या निविदोधानम् । ११ माध्यन्दिने अयुग्मासु तया धानम् । १२तृचे एकां शस्त्वा युग्मासु च अर्द्धां शस्त्वा निविद्धानम् । १३ तृतीयसवने एकां शस्त्वा निविद्धानम् । १४त्रिष्वपि सवनेषु नेत्रे मूजतात्मनः पापं ध्यायता च निविद्धेया । १५सर्व्वत्र तथैव परिधानातिदेशः । १६शस्त्वा जप्यमन्त्रः याज्यामन्त्रश्च । ५अ०१४क० ।

१निष्केवल्येति शस्त्रनाम । २यदि पृष्ठकार्य्ये रथन्तरं सामसामगाः कुर्वीरन् अभि त्वा शूर । नोनुमः" अभि त्वा पूर्व्वपीतय इत्येतौ प्रगाथौ स्तोत्रियानुचरौ स्याताम् पृष्ठशब्देनात्र ज्योतिष्टोमाङ्गभूतं सामाभिव्यक्तमृगक्षरं यस्माद्य स्तुतिजन्यं शास्त्रैकसमधिगम्यं कार्य्यमुच्यते । ३ अन्ययोरपि प्रगाथयोः स्तोत्रियानुरूपत्वोक्तिः । ४ उक्तानां सर्वेषां प्रगाथत्वम् सामगैर्द्विपदोत्तरं तृचाकारतया गानेऽपि बहृचैरर्द्धर्चत्वेन शंसनम् कार्य्यम् । अनभ्यासेन तृचाकारस्तवनेऽपि ता द्व्यृचा एव न तृचाः कार्य्याः ताभिश्च शंसनं कार्य्यम् । ६बृहतीच्छन्दस्कद्व्यृच प्रगाथे चतुर्थषष्ठौ पादौ पुनरभ्यस्य पञ्चमसप्तमयोः पादयोरवसानकरणविधिः । ७ यदि तिस्रोऽष्टहत्य एव चिकीर्षितास्तदा चतुर्थषष्ठौ पादौ द्विरभ्यस्यावसानं कार्य्यम् । काकुभेषु प्रगाथेषु तृतीयपञ्चमौ अभ्यस्यावसानं कार्य्यम् ९ प्रत्यादानेन उत्तरा ककुप् भवति । १० येष्वहःसु बृहद्रथन्तरं वा तयोः संहतिर्वा पृष्ठकार्य्ये भवति तत्र बृहद्रथन्तरस्तोत्रियानुरूपयोः शसनं यथा भवति तथा इन्द्रनिहवब्राह्मणस्पत्यानां शंसनम् । ११ इतरपृष्ठेषु तेषां बृहतीं कृत्वा शंसनम् । १२ यदा बृहद्रथन्तरे गायत्र्यादिषु अभ्यस्तासु तिसृषु ऋक्षु स्तुवते स्वयोनिषु वा द्विपदोत्तराकारं तदापीन्द्रनिहवब्राह्मणस्पत्यानां बृहतीं कृत्वा शंसनम् । १३येषां होत्रकाणां प्रगाथाः स्तोत्रियानुरूपाःतेऽपीन्द्रनिहवब्राह्मणस्पत्यवच्छस्याः । १४ उक्तभिन्नस्य सर्वस्य यथाश्रुतं शंसनम् । । १५ एकस्मिन् दिने सर्वधर्म्मभागितया उपदिश्यमानोज्योतिष्टोम एकाहशब्दवाच्यः परिमितशस्त्रः परिपूर्णशसनयुक्तः । १६स एकाहः यद्युभयसामा बृहद्रथन्तरसामसाध्यः तस्य पवमाने योनिरनुरूपा भवतीति । १७ज्योतिष्टोमभिन्नः यःकश्चिदुभयसामा एकाहः स्यात् तत्र पवमाने यद् कृतं तस्य योनिरनुरूपा शस्या । १८निष्केवल्ये धाय्याया ऊर्द्ध्वं स्थानं योनिस्थानं तदेव शंसनस्थानम् । १९ अनेकासां सामयोनीनां सह शंसने प्राप्ते आदावेव सर्वासामाह्वानं सकृत् पृथक् वा कार्य्यम् । २० ब्राह्मणस्पत्यमरुत्वतीयसामप्रगाथानामनेकेषां सहपातेषु इन्द्रनिहवादूर्द्ध्वमाह्वावः कार्य्यः । २१ तत्र

धाय्यासामप्रगाथयोः प्रदर्शनम् । २२ ऋग्विशेषे ऐन्द्री निविद् धेयेत्युक्तिः । २३ अनुब्राह्मणं स्वरः उक्थं वाचीत्यस्य शस्त्वा जपः। पिबा सोममित्यादि याज्या । ५अ० १५क०।१होत्रकाणां स्तोत्रियानुरूपौ प्रगाथौ याज्या चेति- निरूपणः । १ तत्रैव याज्यान्तरं तत्काले सवनसंस्था निमित्तकर्म कार्य्यता ५अ० १६क० । १ उत्तमस्वरेण तृतीयसवनम् २ आदित्यग्रहेण चरणम् । ३ हूयमान ग्रहाणामीक्षणे जप्यमन्त्रः । ४स्तुते आर्भवे पवमाने विहृत्याङ्गारान् मनोतादिपश्विडान्तं पशुकर्म्म कृत्वा नाराशंससादनपर्य्यन्तं पुरोडाशादिकर्म्म कार्य्यम् ।५नाराशंसेषु सादितेषु पुरोडाशस्य मृदुतमात् प्रदेशात् गृहीत्वा सर्व्वे चमसिनः पुरोडाशं तिस्रःतिस्रः पिण्डीकृत्य स्वात् स्वाच्चमसात् दक्षिणतः स्वान् स्वान् पितॄनुद्दिश्य चमसान्तिके अत्र पितर इति मन्त्रे स्व स्व पित्र्युपस्तेत्युक्तिः ६ सव्यावृतः आग्न्योध्रीयं प्राप्य हविरुच्छिष्टं सर्व्वे प्राश्नीयुः । ५अ० १७क०। १सावित्रेण ग्रहेण चरणम् । २तत्र मन्त्रभेदः। ३वषट्कृते होतुः शस्त्रवैश्वदेवशस्त्रोक्तिः । संयता तेन द्वेष्यदिशं विहाय सर्व्वदिग्ध्यानञ्च । ४ माध्यन्दिनसवने शस्त्रादिषु आहावमन्त्रः। ५ तत् सवितुरित्यादि मन्त्राणां वैश्वदेवतोक्तिः तत्र उत्तमायाः परिधानीयत्वम् । ६ वैश्वदेवाग्निमारुतयोः सूक्तेषु सावित्रादिनिविदोधानम् । ७ तत्र चतस्रोवैश्वदेवशस्त्रे प्रयोज्याः ८ आग्निमारुते शस्त्रे उत्तराश्चिसस्त्रचः धाय्याः । ९ सूक्तानां दैवतस्यैव निविद्दैवतात्वम् । १० दैवतेन सूक्तान्तनानात्वम् तथाच यावतां सूक्तानामेकं दैवतं तावदेक एव सूक्तान्त इत्युक्तिः । ११ वैश्वदेवाग्निमारुतयोरेकपातिन्य एव धाय्याः । १२ सर्व्वत्र प्रकृतौ विकृतौ च वैश्वदेवेशस्त्रे द्विः पच्छः अर्द्धर्चशः सकृद् भूम्युपस्पर्शने परिधाने च मन्त्रः १३उक्थं वाचीत्यादि शस्त्वा जपः । विश्वे देवाः शृणुतेत्यादियाज्याः । ५अ०१८क० ।

१ सौम्यस्य चरुहविष्कर्म्मभेदस्य याज्या । २ तस्योभयपार्श्वे घृतयाज्याभ्यामुपांशुयागः । ३ तत्रैव विशेषोक्तिः । ४अध्वर्युणाऽऽहृतस्य उद्गातृभ्यः पूर्व्वं गृहीत्वे चरुस्य मन्त्रः। ५ तस्मिं श्चरौ घृतयुते स्वस्वच्छायाऽदर्शने नैमित्तिकः मन्त्रद्वयजपः तौ च मन्त्रौ । ६ अङ्गुष्ठोपकनिष्ठाभ्यामाज्येन नेत्रे अभ्यज्य छन्दोगेभ्यः प्रदानार्थमध्वर्य्यवे दानम् । ७ दर्भैर्धिष्ण्यभवाग्निषु विहृतेषु पात्नीवतस्य आग्नीध्रस्य उपांशुजप्यमन्त्रः । ८ नेष्टुर्व्विसंस्थितग्रहारेण तमनुप्रपद्य तस्यान्तिक उपविश्य पात्नीवतस्य भक्षणम् । ५अ० १९क० । १ सदसोनिष्क्रम्य आग्नीध्रं प्रति गतिः । २ आग्निमारुत शस्त्रं द्रुतयावृत्त्या प्रयोक्तव्यम् । ३ तस्याद्यामृचं पच्छः अगावानं शंसेत् यदि सा पच्छः शस्या भवेत् तदा पादेपादेऽनुच्छ्वसन्नेव शंसेत् । ४ यदि सा अर्द्धर्चशःशस्या तदार्द्धर्चेऽवसायानवानम् । ५ उत्तमेन वचनेन द्वितीयायाः सन्तननं कर्त्तव्यम् । ६ स्तोत्रारम्भे प्रावृतशिरस्कत्वादिभूमिस्पर्शान्तगुणोक्तिः । ७ परिधानीयाया उत्तमेन वचनेन ध्रुवग्रहस्यावसेचनं होतृचमसे कार्य्यम् । ८ आग्निमारुते याज्याकथनम् । एतदन्तसोमयागस्याग्निष्टोमसंज्ञा ५अ० २०क० ।

६अध्याये । १ तृतीयसवने होत्रकाणामपि शस्त्राणि भवन्ति । २ तत्र याज्याङ्गशस्त्राणां प्रदर्शनम् । ३ तदन्तस्य उक्थ्यक्रतुत्वम् । ३सू०६अ० १क० । १यदि षोड़शी क्रतुःस्यात् तदा तृतीयसवने होत्रकशस्त्रानन्तरं तस्य कार्य्यता । अथ शस्त्रनाम षोड़शी तस्य विधानाधिकारः । २ तत्र स्तोत्रियानुरूपौ तत्र च षड़्चः । ३ तत्र तिस्रोगायत्र्यः । ४ एका बृहत्या पङ्क्ती । ५ तृचौ उष्णिहयार्हतौ । आधूर्ष्व सा इति द्विपदा साच पच्छः शस्या । ६ अन्येषां तृचानां त्रिष्टुबादीनामुक्तिः । ७ तत्र पूर्व्वं तृचं द्वेधा कृत्वा शंसेत् एकैकामृचं द्वे द्वे कृत्वा शंसेत् । अस्य तृचस्य सप्तपदात्मकत्वात् एकैकामृचमेकैकामनुष्टुभमेकैकां गायत्रीञ्च सम्पादयेत् तथा च आद्यैश्चतुर्भिश्चतुर्भिः पादैरनुष्टुभः शिष्टैस्त्रिभिस्त्रिभिः गायत्र्यः । अनेन प्रकारेण तृचा अपि षड़्भवन्तीति । ९ निविद्दतिपरौ आकाश्यानुष्टुभे तृचे निविद्धेयेति परिधानीयानुष्टुभतृचदर्शनम् । १० उत्तरमस्योत्तमांशिष्ट्वा उत्तमां निविदं दध्यात् । ११निविद्विशेषस्य लिङ्गप्रदर्शनम् । १२ परिधानीया ऋक् । तां जप्त्वा यागः ६ अ० २क० । १ विहृतस्य षोडशिनः इन्द्राजुषस्वेत्याद्याः सूत्रे पठिताः षड़्चः स्तोत्रियानुरूपौ भवतः । २ स्तोत्रियानुरूपाभ्यामूर्द्धं विहृते यच्छस्त्रं तदेव गन्तव्यम् । ३ द्वाभ्यां पादाभ्यामर्द्धर्चान्तेऽवमानम् अनूगस्ते प्रणव इत्यमर्द्धर्चशः शंसनम् । ४ गूर्श्चदं पूर्वपदानां शंसनम् । ५ गायत्रीणां पङ्क्तिभिर्व्विहरणम् । ६ पङ्क्तीनां द्वे द्वे शिष्येते ताभ्यां प्रणवनम् । ७ उष्णिक्कोष्टकृतोभिर्व्विहरणम् उष्णिक्स्वस्थानान् पादान् द्वौ कुर्य्यात् । ८ चतुरोभागान् कृत्वा

बृहतीपादैर्विहरणम् तेन अष्टाक्षरमन्त्यमाद्यं चतुरक्षरं यथा भवति तथा विहरणम् । ९ द्विपदाश्च तत्र ताः सर्वाश्चतुर्थ्यो कर्त्तव्याः । प्रथमायां सर्वे भागा व्यूहेनाव्यूहेन च पञ्चाक्षराः उत्तरास्तु चतुरक्षराः । तत्र च प्रथमां त्रिष्टुभा विहरेत् । उत्तरास्तिस्रोजगतीभिः । १० उत्तमायाद्विपदाया यच्चतुर्थमक्षरं तत् प्रथमस्य भागस्यान्त्यं तदेव द्वितीयस्याद्यम् । ११ तत्र विहरणप्रकारः । १२उत्तरास्तु इतरान् पादान् चतुरान् कृत्वाऽनुष्टुभं च कृत्वा शंसनम् । १३ स्तोत्रियानुरूपाभ्यामूर्द्ध्वं प्रोथ्या इत्ये वदन्तस्य यज्ञावयवस्य विहृतसंज्ञा । १४ यत्र यत्र विहृतो भवति तत्र तत्र यौ प्रतिगरौ तयोरुदाहृतिः । १५याज्यायाजपेन मिश्रणम् । १६ विहरणप्रकारः । १७ विहृतस्य विशेषस्ततोऽन्यत्र सर्वमविहृतेन समानम् । १८ विहृतस्यैव विशेषः । १९ आहुतं षोड़शिपात्र सम्पद्धार्य भक्षयेत् । २० धर्म्मे ये भक्षिणस्तेऽपि भक्षयन्तीत्यतिदेशः । २१ सुब्रह्मण्यवर्ज्जितमैत्रावरुणादयस्त्रयश्छन्दोगाः । २२ षोड़शिभक्षमन्त्रः । ६ अ० २ क० । १ अतिरात्राधिकारः । २ प्रथमे पर्य्याये ये स्तोत्रियानुरूपास्तेषामाद्यस्याद्यामर्द्धर्चं विना अन्यासु सर्वासु ऋक्षु प्रथमानि पदानि द्विरुक्त्वा तत्रावसानम् । ३ त्रिष्टुयोः पादयोः समस्य प्रणवनम् । ४ होतुराद्यां विना मध्यमानि सर्वासां पदानि सकृदुक्त्वाऽवसाय तान्येव प्रत्यादाय तैरुत्तमानि सन्धाय प्रणवनम् । ५उत्तमे पर्य्याये स्तोत्रियानुरूपेषु सर्वासामृचामुत्तमानि पदानि मध्ये सर्वे शस्त्राच्छावाकाः द्विरुक्त्वा तैः प्रणुयुः । ६ उत्तमे पर्य्याये अच्छावाकः अन्त्यचतुरक्षराणि द्विरुक्त्वा प्रणुयात् । ७ शस्त्राणां चतुःपर्य्यायत्वम् । ८तत्राद्यं शस्त्रं होतुः।९आज्याभ्यः पूर्व्वप्रतीकानि पर्व्वसंज्ञा ।१०पर्व्वणोदाहरणम् । तेषां पर्य्यवसानापि ।११पर्य्यायभिन्नानां गायत्र्यादावापस्य ६ अ० १अतिरात्रे पर्य्यायेषु समाप्तेषु छन्दोगा आश्विनशस्त्रेण स्तुवते । २ शंसिष्यन् विरंस्थितसञ्चरेण निष्क्रम्याग्नीध्रीये जानुभङ्गेन सङ्घातीर्ज्जुहुयात् तत्र मन्त्राः तत्राज्यस्येदप्राशनं तूष्णीमेव कुर्य्यात् । ३ होमार्थं पृथक्, ततस्ताज्यस्य शिष्टमाज्यं प्राश्य अप उपस्पृश्याचामेत् अनाचमनेऽपि नाशुद्धिरित्यत्र देवच इत्यादिश्रुतिनिदर्शनम् । ४प्राश्य प्रतिप्रसृप्य पश्चात् स्वस्थानस्य, समस्तकुलीरवरबिम्बाम् उपस्यं कृत्वा (पादाङ्गुलीभिर्भूमिमाश्रित्य) उत्पतिष्यन् मध्येव उपविशेत् । ५कृतोपस्थोपवेशनस्यैव आश्विनशंसनम् । ६ एकपातिन्याः प्रतिपदः पच्छः शंसनम् । ७ प्रतिपदा गायत्र्यस्याग्नेयस्योपसन्तननम् । ८स्तोत्रशंसने प्रातरनुवाकधर्म्मातिदेशः । ९त्रयो वार्हताः स्तृचा स्तोत्रियाः प्रगाथा वा तान् यथादैवतं यथाश्रुतं शंसेत् । १० अन्येषु छन्दःसु यथादैवतं शंसेत् । ११ द्विपदाः पच्छः शंसेत् । १२ एकपदाः प्रणवेनोपसन्तनुयात् । १३ एकपदाभ्यो याउत्तराः ताः एकपदान्तगैः प्रणवैरुपसन्तनुयात् । १४ अर्द्धर्चशस्त्रेषु पच्छः शस्याः पच्छः शस्त्रेषु चार्द्धर्चशस्या यास्ता उद्धरेत् । १५ सूक्तान्यावेन वा शंसनम् नोद्धार इति विकल्पः । त्रिष्टुब्जगतीभ्योऽन्यत्र विशेषः । १७ उदिते सूर्य्ये प्रतिमियतममि यस्योत्तमेन प्रणवेन सूर्य्योनोदिव इत्येतत् सन्धाय तदादीनि सौर्य्याणि सूक्तानि शंसेत् । १८ सौर्य्यसूक्तानि सूर्य्योनोदिव इत्यादीनि दर्शितानि । १९ बृहस्पते अति यदर्य इत्यादि परिधानीया। २०प्रतिपदे परिधानीयाया आह्वानविधानम् । २१ यदि बृहत्साम कुर्य्यात् तस्य योनिम् त्वामिद्धि हवामह इति त्वचम् । एतेषु प्रगाथेषु द्वितीयाम् इन्द्रक्रतुमित्यस्योपरिष्टात्, तृतीयाम् अभि त्वेत्यस्योपरिष्टात् शंसेत् । २२तत्र विकल्पः । २३आश्विनपक्षेण पुरोडाशेन चरणम् । तत्र अनुवाक्या प्रैषः याज्याद्वयम् अध्यर्द्धा आनयानस्य क्रमेणोक्तानि । २५ आश्विनपुरोडाशस्य स्विष्टकृताचरणे संयाज्याद्वयम् इत्यन्तोऽतिरात्रः क्रतुः । ६ अ० ५ क० । १ नैमित्तिककार्य्यभेदकथनायोत्तरग्रन्थः यदि सर्वे पर्य्यायाः प्रयुक्ता न भवन्ति इत्येवमाशङ्का स्यात् व्यतिक्रान्तप्राया रात्रिः सा पर्य्यायाणामाश्विनस्य चापर्य्याप्तेति तदा सर्वेभ्यःपर्य्यायेभ्यः एकं पर्य्यायं समुद्धृत्य कुर्य्युः । २ तत्र वारणप्रकारः । प्रथमात् पर्य्यात् होता स्वं शस्त्रमाददीत । मैत्रावरुणब्राह्मणाच्छंसिनौ द्वितीयात् पर्य्यायात् स्वे शस्त्रे, उत्तमादच्छावाकः स्वमेव शस्त्रमित्येवं प्रकारः । ३ यदा तु प्रथमः पर्य्यायः प्रयुक्तः मध्यमोत्तमावप्रयुक्तौ तयोराश्विनस्य चापर्य्याप्ता रात्रिरित्याशङ्का स्यात् तदैवं कुर्य्युः । द्वौ होतृमैत्रावरुणौ प्रथमात्, ब्राह्मणाच्छंस्यच्छावाकौ तु उत्तमात् शस्त्रमाददीत । ४ सर्वेषां वा स्तोमनिर्ह्रासः । ५ स्तोमनिर्ह्रासे शस्त्रनिर्ह्रासप्रकारः । ६ स्तोमनिर्ह्रास सम्भरणयोर्निर्ह्रासविधानम् । ७ एके शाखिनः होतृवर्ज्जं स्तोमनिर्ह्रासं कुर्व्वन्ति । ८ अग्ने ! विश्वदूतस इत्येतत् आश्विनीय एकस्तोत्रियः । ९ आग्नेये क्रतौ तस्य एकस्तोत्रियस्य बृहतीछन्दः । १०त्रीणि षष्टियतानि

आश्विने पुरस्तात् शंसनम् यथाश्रुतमनुदैवतं ११ । १२ द्विषामद्विषां वा नद्यादिभिरव्यवधाने इत्या-सन्निपाते सम्भवोदोषः । १३ तथा दोषसम्भावनायाम् आ सवनदेवतावाहनात् सम्यक्त्वरां कृत्वा कर्म्म कार्य्यम् । १४ सम्भवे दोषे सति मरुत्वतीये शस्त्रं यस्मिन् सूक्ते निवि-धीयते तस्य सूक्तस्य पुरस्तादिदं सूक्तं शंसेत् । १५ निष्के-वल्ये सोजात इवेति सूक्तशंसनम् । १६ वैश्वदेवशस्त्र वैश्व-देवसूक्तस्य पुरस्तात् शंसनम् । १७ एतेषु आगन्तुषु निविदादध्यात् यस्य पुरस्तात् शस्तानि सूक्तानि विहि-तानि तान्युद्धरेत् । १८ निविदः स्थानं यद्यतिहरेत् तदा यस्मिन् सूक्ते निविदतिपन्ना तत्पूर्व्वापरभूतं समाप्य आगन्तुकात् दैवतात् पुरस्तात् "मा प्रगामेति" सूक्तम-परिहृतं यस्मात्ऽन्यस्मिन्नागन्तुके तद्दैवतानां निविदं दध्यात् । ६अ० ६क० । १ सवनार्थस्य सोमस्य सवने समाप्ते अतिरेके सोमातिरेकसंज्ञा । स च स्तुतशस्त्रो-पजननो भवति तत्र छन्दोगैः स्तोतव्यं, बह्वृचैः शस्तव्यम् । २ तत्र प्रातःसवने स्तोत्रियानुरूपयाज्याकथनम् । ३गाय-त्र्या वैष्णव्या यजनं वेति विकल्पः । ४ गायत्रातिरि-क्ते ऐन्द्रावैष्णव्या यजनम् । ५ "ऐन्द्रावैष्णवी" च सं वां कर्म्मणेत्यादि" त्रिष्टुप्छन्दस्कात्र यजने याज्या । ६ माध्यन्दिनसवने स्तोत्रियानुरूपयोः याज्यायाश्च उक्तिः। ७ तृतीयसवने यद्यग्निष्टोमे सोमातिरेकः तदा उक्थ्यं कुर्य्यात् । यद्युक्थ्ये सोमातिरेकस्तदा षोड़शिनं कुर्य्यात् यदि षोड़शिनि तथा स्यात् तदाऽतिरात्रं कुर्य्यात् इत्युक्तिः। ८अतिरात्रान्ते तु सोमातिरेकस्तदा प्रतक्ते इत्यादि स्तोत्रियानुरूपौ कृत्वा माध्यन्दिनसवनवत् शेषकरणम् । ९ माध्यन्दिनीययाज्यात्रयम् ६अ० ७क० । १ क्रीते सोमे नष्टे दग्धे वा प्रायश्चित्तविधिः । २ सदोऽपिधा-नानि हविर्धानानि अमन्त्रकं कुर्युरिति पूर्व्वपक्षः। ३सम-न्त्रकं वा तदाचरणमिति सिद्धान्तः।४सोमेन यागसिद्धिरि-त्यतोऽन्यसोमविधानेन सोमाभिषवः । ५ सोमान्तरालाभे पूतिका फाल्गुनानि वा संहृत्याभिषुणुयुः। (पूतिका सोम-सदृशी लतारूपा फाल्गुनानि च सोमरूपा ओषधिभेदः अभियुक्तोपदेशेन स्वरूपतोज्ञेयाः) । ६ फाल्गुनालाभे दूर्व्वादिसंसृष्टपूतिकाग्रहणम् । ७दीक्षासमाप्तौ क्रीतसोम-नाशे वा सोमनाशात् दीक्षाकालवर्द्धनम् उपसत्सु जातासु सोमनाशे उपसत्कालवर्द्धनम् । तत्र सर्व्वत्र प्रधानका-लानुरोधेन कालवर्द्धनम् । कालवर्द्धनेऽपि सोमालाभे प्रतिनिधिना प्रधानकालमध्ये यागसमापनम् इत्येकः पक्षः । भूः स्वाहेति प्रायश्चित्तं कृत्वारब्धं प्रयोगं विसृज्य सोमं सम्पाद्य पुनर्यागकरणमिति सिद्धान्त पक्षः । ८ सुत्यासु नष्टे सोमे तदलाभे प्रति-निधिप्रयोगकरणमेव न तत्राहुर्द्दिः प्रयोगत्यागोवेति सिद्धान्तः । प्रातःसवने सोमे नष्टे प्रतिनिधिद्रव्यम-भिषुत्य तद्रसेन प्रतिदुहोमिश्रणम् (सद्योदुग्धं पयः प्रतिधुक्) । १० माध्यन्दिने तत्र पक्वपयोमिश्रणम् । ११ तृतीयसवने पूर्व्ववत् दधिमिश्रणम् । १२ फाल्गुना-नां प्रतिनिधित्वेन पक्षे आयन्तीयं साम ब्रह्म-साम भवति वारवन्तीयञ्च यज्ञायज्ञीयस्थाने । १३ ब्रह्मसाम तु तत्रविषये आयन्तीयं साम यज्ञायज्ञीयं तु यथोक्तमेवेति एकमतम् । १४ प्रतिनिधिना उदवसानी-यान्तं यज्ञं समाप्य तस्मादेशादुदवसाय सोमं सम्पाद्य पुनर्यागः कार्य्यः ।१५ पुनः प्रयोगे पुनर्दक्षिणा । १६यद्यु-पात्तेऽपि प्रतिनिधौ यागात् प्राक् सोमलाभः तदा-प्रतिनिधिद्रव्यत्यागेन यथोक्तमेव सोमेन यजनम् प्रतिनि-धिनिमित्तानि सोमभक्षणादीनि न भवन्ति । यदा पुनर-हर्गणेषु सुत्यासम्भवात् प्रतिनिधिनैवैकमहः क्रियते तदा सत्रप्रयोगं समाप्य उदवसाय तदेवाहः पुनः प्रयुञ्जीरन् तथा च आरब्धं फलसाधनं यत्र प्रयुज्य-समाप्यैतत् कर्त्तव्यं नायान्तरमेकस्याह्नः प्रयोगः एका-हेषु प्रतिनिधावुपात्ते प्रतिनिधिनैवेष्टा पुनर्यागः ।१६ सू० ६अ० ८क० । १ दीक्षितानां मध्ये कस्यचित् व्याध्या-द्युपतापे प्रायश्चित्तविधानम् । २जीवानामस्यता इत्यादि मन्त्रचतुष्टयेन या ओषधीरिति सूक्तेन च पीड़ितं स्नपयित्वानुमार्जनं कार्य्यम् एतत्सर्व्वं ब्रह्मणा कार्य्यम् । ३ अनुमार्जने मन्त्रभेदाः । ४ एवमुपतप्तस्य कर्म्मणि हते सर्व्वेषां यथास्थानं गतिः । ५ तस्मिन्निमित्ते त्रातार-मिन्द्रमित्याद्या ऋक् नाभ्यं कार्य्यं स्वाद्या भवति । ६ तस्मिन् वैश्वदेवसूक्तादिजपः कार्य्यान्तरञ्च । ७रोगनिवृत्तौ यथो-पदिष्टतया प्रकृत्यैव सर्व्वं कार्य्यम् । ७सू० ६अ० ९क० । १ मृते तस्मिन् अतीर्थेन निर्गमय्य अवभृतार्थं सङ्कल्पिते देशे मृतस्य प्रेतालङ्कारादिकरणम् । २ मृतस्य वाग्यमस्तु-लोमनखवापनम् । ३उशीरेणानुलेपनम् । ४ नलदमालापरिधापनम् । ५प्रेतस्य देहस्यान्त्राणि निःपुरीषाणि कृत्वा पृषदाज्येन पूरयित्वा पुनर्देहे बन्धनीयानीत्येकमतम् । ६ मृतस्य वाससा वेष्टनप्रकारः । ७ तस्यैव

पक्षस्यैकदेशस्य प्रेतक्रियाधिकारिणा ग्रहणम् । ८प्रेतस्या-
ग्नीन् द्वयोररण्योः समारोप्य देवयजनस्य बहिर्वेदि प्रेतमा-
नीयाग्निं मथित्वा विहृत्य तत्रैव दहेयुः।९अनाहिताग्ने-
रौपासनरूपेणाऽऽहार्येण दाहः । १०दीक्षितस्य पत्नीमर-
णेऽपि लौकिकाग्निना दाहः । आहिताग्नेरपि सर्वा-
धाने लौकिकाग्निनैव पत्न्या दाहः । औपसनाग्निसत्त्वे
तु तेन दाह इति भेदः । ११प्रेतदाहदेशादागत्य पूर्वा-
परीभूताहःसमापनं यथाशिष्टं कुर्युः । १२ दी-
क्षितदहनोत्तरं शास्त्रानुवचनाभिष्टवनसंस्तवनेषु विशे-
षोक्तिः । १३ श्मशानायतने परितः कर्त्तव्यभेदः ।
१४ होतुःस्वस्थानात् पश्चादुपवेशनम् । १५तत्र अध्व-
र्योरुपवेशनप्रकारः । १६ तत्र आयं गौरित्यादिषु ऋक्षु
उपांशुस्तुतिप्रदर्शनम् । १७ स्तवनोत्तरं होतुः कर्त-
व्यम् । १८ । १९ । तत्र यमदृष्टान्ततया प्रेहिप्रेहीत्यादि
सूक्तजपः । २० अनुद्रवणास्थिसञ्चने कृत्वा यथासन-
मृत्विजामासादनम् । २१ तेषां भक्षणप्रकारादि । २२
दीक्षितस्य मृत्युदिने उक्तप्रकारं कर्म समाप्य सप्तदशस्तोमं
त्रिवृत्पवमानकं रथन्तरपृष्ठमग्निष्टोमसंस्थं बृहद्रथन्तरं
दीक्षितमरणनिमित्तं सत्रमध्ये सत्रिणः कुर्युः । २३उक्ते
अह्नि समाप्ते एतान्यस्थीनि अवभृतकाले अवभृतार्थं संक्ल-
प्तितास्वप्सु कुम्भेन सह क्षिपेयुः एतस्य मृतस्य तद्-
हरिति वदन्तः सर्वे सत्रिणः कुर्युः। २४मृतस्य दाहा-
दारभ्य कार्यान्तरोपदेशः ।२५शेषसमापने मृतस्य संख्या-
पूरणाय तत्सन्निकृष्टं दीक्षयित्वा सत्रसमापनं कुर्युः
२६ गृहपतौ मृते तदहःप्रभृत्त समाप्यावभृथं
कृत्वा सदोदग्ध्वा च सत्रादुत्थानं भवति न पुनः शेष-
समापनम् ।२७गृहपतेरपि अस्थिसंचयनादयः पूर्ववत् तुल्याः
कार्याः । २८ एकाहेषु यजमानस्य पूर्व्वासने तस्य तस्य
शयनम् । २९ मृतस्य गृहपतेः पत्नीषु अप्सु अवभृथ
कर्म कृत्वा प्रेतस्य तत्र निक्षेपः एवमाक्षेपणस्य गाथा
र्थस्योक्तिः । ३० आत्मरण्यमृते तस्य यज्ञपात्रैः सह-
दाहः । ३१ एतत्पक्षे अयमेव अवभृथोनान्यः ।
६अ० १०क० । १ सोमयागस्य अग्निष्टोमोऽत्यग्नि-
ष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्याम इति
सप्त संस्थाः । २तासां मध्ये वाक्षुपयन्ति तस्मात् यज्ञपुच्छं
नाम कर्म कर्त्तव्यम् । ३यज्ञपुच्छस्य प्रकारः । तत्र
सूक्तवाकप्रैषस्य कृत्तमानम् । ५तत्र पुरोडाशकरणं
तद्देवता च । ६सवनीयस्य पशोःपशुपुरोडाशपक्षे अमीष्टदेवतां
पुरोडाशैरिति वचनमित्युक्तिः । ७ सवनीयैः काम्यभिः
इन्द्रवद्भिः पशुपुरोडाशेन पशुदेवतावद्भिः । ८ शंयु-
वाकादूर्द्ध्वं हारियोजनं कार्यम् ।९हारियोजनस्य अनु-
वाक्याप्रैषयाज्याः । १०अहर्गणेषु अन्त्येष्वहःसु उक्ते
एव याज्यानुवाक्ये । ११अहर्गणेष्वन्त्येभ्योऽन्यानि, तेषां च
प्रतीकोक्तिः । १२ सारस्वतसत्रादिषु यानि सुत्यानि सौत्या-
होभिरुत्तरवन्ति तेष्वन्त्येष्वनुवाक्या । १३ हारियो-
जने मैत्रावरुणस्य अनुवषट्कारात् प्राक्अतिप्रैषनामक-
प्रैषकथनम् । १४ अतिरात्रे तेऽश्वः इत्यत्र तेऽद्येति
प्रयोगः । १५ वक्ष्यमाणे श्वःसुत्यामित्यत्र अद्य सुत्या-
मिति प्रयोगः । १६ आग्नीध्रः अतिप्रैषस्यान्तं श्रुत्वा
यज्ञः श्वः सुत्यामित्यादि मन्त्रं वदेत् ६ अ०
११क० । १ उन्नेताहृतं द्रोणकलशमिडामिव प्रतिगृह्यो-
पहवमिष्ट्वा द्रोणकलशस्यसोममवपश्येत् । २यस्तुः प्राणभक्ष
मन्त्रः हरिवत इत्यादि । द्रोणकलशस्थमोसं गृहीत्वा
मन्त्राभ्यां सुसहृदयमभिमृश्य येन पथा सदोहवि-
र्धाने वा गतः तेन पथा तत्र प्रतिनिवृत्तिः । विनि-
सृप्ताहुतिनामकौ होमौ कुर्य्यात् तत्र होममन्त्रौ च ।
२ षड्भिर्मन्त्रैः आहवनीये षट्षट्शकलाभ्याधानम् ।
३ च देवकृतस्यैनस इत्यादयः सूक्तोक्ताः षट् । ४ द्रोण-
कलशाद्धानागृहीत्वा पश्येयुः तत्र मन्त्रः आपूर्य्या इत्युक्तिः
५ तूष्णीमवघ्राय ता धानाः अन्तःपरिधिदेशे निवपेयुः।
आहवनीयदेशात् सर्वे दक्षिणावृतः प्रत्येत्याग्नीध्रीयं
गच्छेयुः विनिसृप्ताहुतिपर्यन्तमेतत् सर्वं सर्वे कुर्युः ।
७ तांश्चमसान् गत्वा आर्द्रदूर्वाजातीयानि निष्पीड्य
क्षेसे चमसैरन्तरा प्रक्षिप्य सर्वे चमसिनः स्वान् स्वान्
चमसान् दूर्वादिरसयुक्तान् गृहीत्वा प्रोक्षिताभिरद्भिः स्वं
स्वमात्मानं दक्षिणैः पाणिभिरप्रदक्षिणं पर्युक्षेरन् । ८सव्यै
र्वा पाणिभिः प्रदक्षिणं पर्युक्षेरन् । ९तत्र पर्युक्षणे गाथा-
मन्त्रः । १०पित्रादित्रयजीवने नैता गाथा पाठ्याः नापि
पर्युक्षणं कुर्युः तद्वर्ज्जं सर्वं सर्वे कुर्युः । ११ अवभाषा-
भिमर्शनमन्त्राः । १२ सयजमानर्त्विजां परस्परस्य हस्त
ग्रहणे मन्त्राः ६अ० १२क०। १पत्नीसंयाजैश्चरित्वा-
पत्न्यै वेदप्रदानादि पूर्णपात्रनिनयनान्तं कर्म कृत्वा
वेदस्तरणं कृत्वाऽकृत्वा वा प्रायश्चित्तानि जुहूयात् ।
२ पञ्चभक्तिकस्य साम्नोनिधनरूपामन्त्यां भक्तिं कृत्वा
सर्वेऽवभृथं कुर्युः । ३ जले क्रियमाणा इष्टिरवभृथेष्टिः ।
तया चरणम् । ४ ५ अत्र विशेषाः । अस्माभिरेौ प्रया-

प्राद्यनुयाजान्ता नास्त्यामिड़ा न बर्हिष्मन्तौ प्रयाजानुयाजावग्नु मन्तौ तौ च गायत्रौ । ६ तत्र वारुणं हविः हविर्दोषे सति यागावसरे हविरेवोत्पाद्य यष्टव्यम् । ७ स्विष्टकृद्यागे अग्नीवरुणौ देवते अव ते हेड़ोवरुण नमोभिरिति द्वे ऋचौ तत्र साधनम् । अत्र च निगदाभावात् अग्नीवरुणावादिश्य ऋ त्वं न इत्यृचा यष्टव्यम् । ८अवस्थामिष्टौ नमोवरुणाय इति मन्त्रेण दक्षिणान्पादानुदके निदध्युः । ९ तत्र आचमने मन्त्रत्रयम् । १० आचमनप्रकारः । ११ यौवाङ्गमाचमनं कृत्वा स्नानाङ्गमाचमनं कृत्वा आस्नायुः तत्र मन्त्राः । १२अदीक्षितानामुक्तमन्त्रैराप्लावनं वाऽभ्युक्षणं वा । १३ उन्नेता सत्रायणोक्तविधिना सर्व्वानुदकादुत्तारयेत् । १४ उन्नेत्रा उन्नीयमानाः उद्वेतरित्यादि मन्त्रं जपेयुः । १५उदकादुत्तीर्य उद्वयं तमस इत्यादि मन्त्रं जपेयुः । १६ इतऊर्द्धं संस्थाजपपर्य्यन्तं हृदयन्तुवेन समानं तथा च अनवेक्षमाणाः इत्यादयः समिदाधानान्ताः सर्व्वैः कार्य्याः । १७ अपहतकर्म्माणः संस्थाजपं कुर्य्युः १७सू० ६अ० १२क० । १ गार्हपत्ये उदयनीयया चरणम् । २ सा च प्रायणीयया तुल्या । ३सर्व्वसाम्येऽपि अयं विशेषः । तत्र चतस्र आज्यहविषोदेवता अदितिः पञ्चमी चरुहविः पथ्या स्वस्तिस्तत्र प्रथमा इह चतुर्थी भवतीति । ४ याज्यानुवाक्ये च विपरीते तत्र या याज्या सा इह अनुवाक्या । तत्रानुवाक्या इह याज्या । ५ प्रायणीयायाः कर्त्तार एवात्र कर्त्तारः । ६ संयाज्याया ऐकरूप्यं न याज्यात्वेन वैपरीत्यम् । ७उदयनीयायां समाप्तायां मैत्रावरुणदैवतोऽनूबन्ध्यः पशुः । ८ सदसि आसीनैर्होत्रादिभिः पशुः कार्य्यः स च वारुणीय इत्येके ९ उत्तरवेदिसमीपे आसीनैस्तैः कार्य्य इत्येके । १०तत्र नैमित्तिकः कर्म्मभेदः । अनूबन्ध्याप्रयोगे वपायां हुतायां यद्येकादशिन्यपतः कृता तदाऽग्निषोमीयेण सञ्चरेण गत्वा गार्हपत्ये त्वाष्ट्रेण पशुना चरणम् । ११ त्वाष्ट्रपशुकरणप्रकारः । त्वाष्ट्रं पशुं यूपाञ्जनादि कृत्वा उत्सृजेत् इत्येकः पक्षः । १२यदि अध्वर्य्यव आज्येन तं पशुयागं समापयेयुः तदा होतापि तथा कुर्य्यात् १३ आज्येन समापने अनेके पक्षाः । ब्राह्मणोक्तादिशा वेद्याः ।१४ आज्येन करणपक्षे पशुवत् मन्त्रप्रयोगः । १५ वशात्र देविका हवींषि अनुनिर्वपेयुः धाताऽनुमतिः राका सिनीवाली कुहूरिति पञ्च देवताः ।१६तत्र धातृरूपस्थाने मन्त्रभेदः ।१७एतासु पञ्चानां देव्य इति संज्ञा । देवीत्वपक्षे सूर्य्यः द्यौः उषा गौः पृथिवीति पञ्च देवताः।१८तत्र सूर्य्यस्य चातुर्मास्येभ्यो याज्यानुवाक्ये प्राह्ये ।१९अनुबन्ध्यपशुद्रव्यस्यालाभे मैत्रावरुणीया पयस्या कर्त्तव्याः। २०सा च आज्यभागादिः वाजिनान्ता कार्य्या ।२१ कर्म्मिणो वाजिनं भक्षयेयुः ।सत्रविषये सर्व्वे भक्षयेयुः । २२ उदवसनीयया चरणं तत्करणप्रकारः । २४ प्रकृतेन ज्योतिष्टोमाख्येन सोमेन यजमानदक्षिणीयया दीक्षां प्रविष्टः स सोमेनेष्ट्वा अवभृथेष्टौ दीक्षोन्मोचनं कृत्वा तस्मादुत्थित एवानूबन्ध्यान्तं प्रयोगं समाप्य तदन्तेऽग्नीनरण्योः समारोप्य उदग्देवयजनात् यो देशस्तस्मिन्नग्नीन्मथित्वोदवसानीयया यजते इत्येकोऽर्थः । अपरस्तु यदि सर्व्वे दीक्षिताः स्युः सत्त्रेति दीक्षिता उत्थिता इति पाठः कर्त्तव्यः समासपाठेऽर्थस्य दुर्गमत्वात् यदि सर्व्वे दीक्षिताः स्युस्तदा पूर्व्ववदेवानूबन्ध्यान्तं कर्म कृत्वा सर्व्वे स्वान् स्वानाग्नीन् स्वे स्वे चारणीषु पृथक् पृथक् समारोप्य पूर्व्ववन्मथित्वा पृथगेवोदवसानीयया यजेरन्निति विशेषतोऽर्थः । सेयमुदवसानीया एवंरूपा भवति । पुनराधाने याम्नाता इष्टिस्तद्रूपा । सा च अविकृता अविभक्ताज्यभागविकारा उपांशुत्वरहिता केवलमग्निदेवता । ६अ० २४क०

इत्थं पूर्व्वार्द्धस्य षडाध्यायीरूपस्य प्रतिसूत्रमभिधेयार्था दर्शिताः उत्तरार्द्धमपि षड्ध्यायीरूपम् बाहुल्यभयात् तत्रत्यप्रतिसूत्रप्रतिपाद्यार्था न दर्शिता मूलग्रन्थे द्रष्टव्याः। संक्षेपेणायमर्थस्तत्रत्यः । सप्तमाष्टमाध्याययोः सत्राधिकारेण इतिकर्त्तव्यतादिदर्शनम् ।नवमे अहीनैकाहाधिकारेण इतिकर्त्तव्यताकलापः। दशमे रात्रिसत्रविवरणम्। एकादशे कामनाविशेषेण तदाचरणम् गवामयनचरणञ्च । द्वादशे गवायमनस्यैव दिनसङ्कलनादि । प्रागस्य चतुरध्यायात्मकत्वोक्तिः प्रामादिकी ।

तदीयगृह्यसूत्रे प्रतिपाद्यविषया यावदभिधीयन्ते । तत्र प्रथमाध्याये।स्थालीपाकाद्युपाकर्म्मान्तानि कर्म्माणि । १ गृह्यव्याख्यानप्रतिज्ञा । २ पाकयज्ञप्रकारः । ३ पाकयज्ञप्रकारस्य त्रैविध्योपदेशः । ४ एतान्यपि कर्म्माणि नित्यानि श्रौतैस्तुल्यानि आहिताग्नेरपीत्युक्तिः । ५ पाकयज्ञानामर्थवादरूपं ब्राह्मणम् । १अ० १क० । १ सायम्प्रातःपक्वहविष्यहोमः । २ देवयज्ञः । ३ स्वाहाकारेण बलिहरणम् । ४ बलिप्रदानार्हदेवतानिर्णयः । ५ दिक्षु देवताभ्यो देवतापुरुषेभ्यो बलिहरणम् । ६ मध्ये ब्रह्मणे ब्रह्मपुरुषेभ्यश्च बलिहरणम् । ७ मध्ये विश्वेभ्यो

देवेभ्यो बलिहरणम् । ८ मध्ये, दिवसे, दिवाचारिभ्यो भूतेभ्यो बलिहरणम् । ९ रात्रौ, नक्तञ्चारिभ्यो भूतेभ्यो बलिहरणम् । १० सर्व्वशेषे रक्षोभ्यो बलिहरणम् । ११ पितृयज्ञे प्राचीनावीती अन्यत्र नियमादिषु दक्षिणावीतीत्युक्तिः । १अ० २क० । १वक्ष्यमाणकर्म्मणां होमविधिः । २ पवित्राभ्यामाज्यस्योत्पवनम् । ३पवित्रलक्षणोत्पवनयोर्निर्णयः । आज्यहोमेषु परिस्तरणं कार्य्यं वा न वेति निर्णयः । ५ पाकयज्ञेषु आज्यभागौ कार्य्यौ वा न वेति निर्णयः । ६ धन्वन्तरियज्ञं शूलगवञ्च वर्ज्जयित्वा सर्व्वेषु पाकयज्ञेषु ब्रह्मा कार्य्यो वा नवेति निर्णयः । ७ अनादेशे नामधेयेन होमः । ८ अनादेशे देवतानिर्णयः । ९ एकवर्हिरादियज्ञाः समानकालिकाः । १० पूर्व्वोक्तस्य प्रमाणार्थं यज्ञगाथोदाहरणम् । १अ० ३क० । १चौलकर्म्मादीनां कालविधिः । २एके आचार्य्याः सर्व्वस्मिन् काले विवाहमिच्छन्ति । ३ आज्यहोमः । ४ अनाज्ञातयोश्चाहूताज्ञातयश्च । ५ उभयाहुतिवचनप्रपञ्चः । एके अनादेशाहुतिमिच्छन्तीत्युक्तिः । ७तेषामाहुतयः । १अ०४क० ।१ वंशपरीक्षा । २ वरगुणकथनम् । ३कन्यागुणकथनम् ।४ परीक्षान्तरम् । ५ क्षेत्रादिस्थलमृद्भिः परीक्षा । ६ पिण्डानां तद्विशेषकथनम् । १अ०५क० ।१ब्राह्माद्यष्टविधविवाहोक्तिः । १अ० ६क० । १ विवाहे देशधर्म्मग्रामधर्म्मकुलधर्म्माणां कर्त्तव्यता । २ जनपदादिधर्म्मस्य सर्व्वत्र समानत्वमित्युक्तिः । ३ पाणिग्रहणविधिः । पुत्रकामिना अङ्गुष्ठस्य ग्रहणम् । ४ दुहितृकामिना अङ्गुलीग्रहणम् । ५ उभयकामिनां अङ्गुष्ठाङ्गुलिसहितहस्तस्य ग्रहणम् । ६ अग्न्युदककुम्भप्रदक्षिणे वधूजप्यमन्त्रः । ७अश्मारोहणे आचार्य्यजप्यमन्त्रः । ८लाजहोमप्रकारः । लाजादिहविर्लाजानावपतीत्युक्तिः । ९ वरोऽश्मदमन्त्रयेत् त्रिर्लाजानावपति । १० लाजेषु हविरवधारणम् । ११ वरकर्त्तृकमवदानम् । १२अवदानस्य सर्व्वत्रातिदेशः । १३ वरकर्त्तृकहोममन्त्राः । १४ अमन्त्रकं शूर्पपुटेन वधूकर्त्तृकं लाजदानम् । १५ एके लाजानोप्य पश्चात्परिणयमाहुरित्युक्तिः । १६शिखाविमोचनम् । १७दक्षिणशिखाविमोचनम् । १८ उत्तरशिखाविमोचनम् । १९ सप्तपदीगमनम् । २० उभयोः शिरसि उदकुम्भसेचनम् । २१ग्रामान्तरगमने अन्तरा वसतिः ।२२ ध्रुवारुन्धत्यादिदर्शना वाग्विसर्ज्जनम् । १अ०७क० ।१ यानारोहणमन्त्राः ।

२नावारोहणमन्त्रः । ३उदकादुत्तारणमन्त्रः । ४वधूर्यदि रोदिति तदा मन्त्रविशेषं जपेत् । ५विवाहाग्निं गृहीत्वा गन्तव्यम् । ६ देवहृदयचतुष्पथादौ जप्यमन्त्रः । ७पथिका दैत्यकाः सन्ति चेत् तदोच्चार्य्यमन्त्रः । ८ गृहप्रवेशमन्त्रः । ९ उपवेशनदधिप्राशनहृदयाञ्जनादयः । १०विवाहावधि ब्रह्मचर्य्यधारणादिः । ११ त्रिरात्रं द्वादशरात्रं वा ब्रह्मचर्य्यधारणम् । १२ संवत्सरं वा ब्रह्मचर्य्यधारणम् । १३व्रतानन्तरं वधूवस्त्रदानम् । १४ब्राह्मणेभ्योऽन्नदानम् । १५ स्वस्तिवाचनम् । १अ० ८क० । १ पाणिग्रहणप्रभृतिगृह्याग्निपरिचरणम् । २ अग्नौ नष्टे प्रायश्चित्तं कृत्वा पुनरग्निपरिग्रहणम् । ३ एके अग्न्युपयान्तौ पत्न्या उपवासं वदन्तीत्युक्तिः । ४तदग्निपरिग्रहणं अग्निहोत्रविधानेनेत्युक्तिः । ५होमादिकालव्यवस्था ।६होमद्रव्याणि । ७ उक्तद्रव्याभावे द्रव्यान्तरप्रतिनिधिः। ८सायम्प्रातर्होमः । १अ०९क०। १पार्व्वणस्थालीपाकः । २भोजननियमः । ३ इध्मवर्हिषोर्ब्बन्धनम् । ४ तद्देवता । ५ काम्यदेवता । ६ शूर्पहस्तनिर्व्वपणम् । ७ शूर्पस्थप्रोक्षणम् । ८ अवघातप्रक्षालनेनानेकत्र श्रपणानि । ९ एकत्र श्रपणं वा ।१०नानाश्रपणप्रकारः । ११ एकत्र श्रपणप्रकारः । १२ आज्योत्पवनादिः । १३ आघाराज्यभागौ स्विष्टकृद्धोमश्च । १४ आग्नेयादिहोमः । १५ आज्यभागयोर्यज्ञचक्षुष्ट्वम् । १६ यज्ञपुरुषस्य उपवेशननियमः । १७ अग्नेरुत्तरपूर्व्वदेशे होमः।१८हविःस्थापनदेशः ।१९यथाहुतिहोमनिर्णयः । २०स्विष्टकृद्धोमनियमः । २१स्विष्टकृद्धोमे हविःशेषाभावः ।२२स्विष्टकृद्धोममन्त्रः ।२३पूर्णपात्रनिनयनम् । २४ पूर्णपात्रनिनयनकालः ।२५पाकयज्ञतन्त्रम् । २६दक्षिणादानम् । १अ०१०क०। १ पशुकल्पः ।२अग्न्युपस्पर्शनम् । ३ पशुप्रोक्षणम् । ४पशुनियमनम् । ५ मन्त्रवर्ज्जं पशुनिनयनम् । ६ उल्मुकाहरणम् । ७ शामित्रोक्तिः । ८ पश्वारम्भणम् । अन्वारम्भे कर्त्तृकथनम् । १० वपाहोमः । ११स्थालीपाकश्रपणम् । १२ पश्ववदानं स्थालीपाकहोमश्च । १३अवदानपर्युक्षितहोमो वा । १४ प्रत्येकावदाने द्विर्द्विरवदानम् । १५ तूष्णीं हृदयशूलावधारणम् । १अ० ११क० । १ चैत्ययज्ञे स्विष्टकृतः प्राक् बलिहरणम् । २ विदेशस्थचैत्यपक्षे पलाशदूतेन बलिहरणम् । ३ भयसम्भावनायां दूताय शस्त्रदानम् । ४ नद्यन्तरा चेत् प्लवदानम् । ५ धन्वन्तरि-

चैत्यचेत्पुरोहिताय बलिहरणम् । १अ० १२क० । १ पुंसवनम्, अनवलोभनञ्च । २ तृतीयमासे पुष्यनक्षत्रे उपोष्य तुल्यवर्णावत्सायागोर्दधिमात्रया प्राशनम् ।३प्रश्नवचनम् । ४ त्रिःप्राशनम् । ५ दूर्वारसस्य नासिकायां सेचनम् । ६ नक्षत्रवरणम् । ७ हृदयस्पर्शमन्त्रः। १अ० १३क० ।१ सीमन्तोन्नयनं कर्म्म। २ तस्य कालनिर्णयः । ३ होममन्त्रः ।४सीमन्तव्यूहनम् । ५चतुर्धा व्यूहनम् । ६ वीणागाथकप्रेषणम् । ७गेयगाथाकथनम् ।८ब्राह्मण्यो यद्ब्रूयुस्तदाचरणम् । ६दक्षिणादानम् । १अ०१४क० । १ जातकर्म । २ मेधाजननजपः । ३ अंसस्पर्शनम् । ४ नामकरणम् । ५नामलक्षणम् । ६ चतुरक्षरं वा नाम । ७नाम्नि कामनाभेदेनाक्षरनिर्णयः।८पुंनामधेयानि युग्माक्षराणि । ६ स्त्रीनामधेयानि अयुग्माक्षराणि । १०येन नाम्ना उपनीतः तेनाभिवादनं कुर्य्यात् । ११ मूर्द्धाघ्राणे मन्त्रजपः । १२ कुमार्य्या अमन्त्रकं कर्म्म ।१अ०१५क०। १ अन्नप्राशनम् । २ अजमांसाद्याशनम् । ३तित्तिरिमांसाद्याशनम् । ४ दध्योदनाद्याशनम् । ५ अन्नाशनमन्त्रः । ६ कुमार्य्या अमन्त्रकम् । १अ०१६क०१ चौलं कर्म । २पूर्वपात्राधानम् । ३ कुमारावस्थानं द्रव्यासादनञ्च । ४ कुशपिञ्जूलहस्तकुमारपितृवस्थानम् । ५ब्रह्मा वा कुशपिञ्जूलानि धारयेत् । ६ अपां निनयनमन्त्रः । ७ शिरउन्दनमन्त्रः । ८ कुशपिञ्जूलनिधानमन्त्रः । ६ तेषु ताम्रक्षुरस्थापनमन्त्रः । १० केशच्छेदनमन्त्रः । ११ केशस्थापनम् । १२ द्वितीयस्य तृतीयस्य मन्त्रौ । १३चतुर्थस्य मन्त्रः । १४ एवमुत्तरतस्त्रिर्वारम् । १५क्षुरधारशोधनमन्त्रः । १६ नापितानुशासनम् । १७ केशशिखाविन्यासकरणम् । १८ कुमार्य्या अमन्त्रकम् । १अ०१७ १ गोदानं कर्म्म । २ तत्र कालनिर्णयः । ३ मन्त्रे विशेषेषु श्मश्रुप्रक्षालनकरणम् । ४ श्मश्रुवपनम् । ५क्षुरधारशोधने विशेषमन्त्रः । ६ नापितानुशासनम् । ७ आचार्याय दानप्रार्थना । ८ गोमिथुनदक्षिणादानम् । ६ संवत्सरव्रताचरणादेशः । १अ० १८क० । १ उपनयनम् । अष्टमे वर्षे ब्राह्मणस्य । २ गर्भाष्टमे वर्षे वा । ३ एकादशे वर्षे क्षत्रियस्य । ४ द्वादशे वैश्यस्य । ५ आ षोडशात् ब्राह्मणस्य नातीतः कालः । ६आ द्वाविंशात् क्षत्रियस्य, आ चतुर्विंशात् वैश्यस्य ।७अत ऊर्द्ध्वम् अधीतधर्म्मसावित्रीकान् नाध्यापयेत् । ८ संवीतधर्मनिर्णयः। ६ परिधेयवासोनिर्णयः । १० मेखलाधिकारः । ११ जातिभेदे मेखलानिर्णयः । १२ दण्डाधिकारः । १३ जातिभेदे दण्डनिर्णयो दण्डपरिमाणञ्च । १अ०१६क०। १ सर्वे दण्डाः सर्वेषां वा भवन्ति । २आचार्य्यान्तिके उपवेशननिर्णयः ।३ब्रह्मचारिण उपवेशननिर्णयः। ५ प्राङ्मुखपाणिग्रहणम् । ५पाणिग्रहणमन्त्रः । ६आदित्यावेक्षणम् । ७ तत्र जप्यमन्त्रः । ८प्रदक्षिणावर्त्तनम् । हृदयस्पर्शनम् । १० अमन्त्रकं समिदाधानम् । १अ० २०क० । १ एकमते मन्त्रेण समिदाधानम् । २ मुखमार्ज्जनम् । ३तेजसा मार्जनम् ।४ सावित्र्युपदेशप्रार्थना । ५सावित्र्युपदेशः । ६सावित्रीवाचनम् । ७ ब्रह्मचारिणो हृदयदेशे ऊर्द्ध्वाङ्गुलिस्थापनं मन्त्रश्च ।१अ०२१क०। १ब्रह्मचर्य्यादेशः । २ ब्रह्मचर्य्यादेशमन्त्रः । ३ वेदब्रह्मचर्य्यकालनिर्णयः । ५ वेदग्रहणान्तं वा ब्रह्मचर्य्यं भवति । ५ भिक्षाकालनिर्णयः । ६ समिदाधानकालनिर्णयः । ७प्रथमभिक्षानिर्णयः । ८भिक्षामन्त्रः । ६भैक्ष्यमाहृत्याचार्य्याय निवेदनम् । १० पाकयज्ञः । ११ आघाराज्यभागान्तहोममन्त्रः। १२ सावित्र्या द्वितीयम् । १३ सदसस्पत्यादिहोमः । १४ऋषिभ्यस्तृतीयम् । १५सौविष्टकृतं चतुर्थम् । १६ वेदसमाप्तिवाचनम् । १७ ब्रह्मचर्य्यव्रतधारणम् । १८ मेधाजननम् । १६ उदकुम्भाभिषेकवाचनम् । २० व्रतादेशशेषः । २१ अनुपेतस्य विधिविशेषः । २२ उपेतस्य विधिः । २३ सतमसतश्च । २४ गोदानमनूक्तम् । २५ कालोऽनिरुक्तः । २६ प्रायश्चित्तार्थं सावित्र्यन्तरम् । १अ० २२क० । १ ऋत्विग्लक्षणम् । २ एके युवानं वदन्ति । ३ वरणनिर्णयः । ४ वरणविशेषनिर्णयः । ५ सदस्यवरणम् । ६ वरणविशेषः । ७ होतृवरणमन्त्रः । ८ ब्रह्मवरणमन्त्रः । ६ अध्वर्य्वादिवरणमन्त्रः । १० होतृप्रतिज्ञा । ११ब्रह्मप्रतिज्ञा ।१२अपरप्रतिज्ञा जप्यमन्त्रश्च ।१३याजनम् ।१४ । १५ । १६ । १७। १८ आगाध्वनिर्णयः।१६सोमप्रवाकप्रश्नः।२०कल्याणैः सह संप्रयोगः । २१तत्र निषिद्धानि । २२ आज्याहुतिहोमः । २३अनाहिताग्निगृह्यशेषः । १अ० २३क० १ऋत्विजे मधुपर्काहरणम् । २ एवं गृहागताय स्नातकाय, विवाहार्थिने । ३ राज्ञे उपस्थिताय । ४ आचार्य्यश्वशुरपितृव्यमातुलेभ्यः । ५ मधुपर्कस्वरूपनिर्णयः । ६ दध्यलाभे तद्द्रव्यप्रतिनिधिः । ७ आसनपाद्यार्घाचमनीयानि गाश्च त्रिस्त्रिर्वेदयेत् । ८ आसनग्रहणे मन्त्रप्रकारौ ।

९ पादप्रक्षालननिर्णयः । १० वामपादादिप्रक्षालनम् । ११ अर्घ्यग्रहणम् । १२ अर्घ्यग्रहणमन्त्रः । १३ मधुपर्केक्षणमन्त्रः । १४ मधुपर्कग्रहणादिमन्त्राः । १५ निरुद्धरणम् । १६ मधुपर्कभोजनम् । १७ सर्व्व-भक्षणनिषेधः । १८ तृप्तिनिषेधः । १९ अवशिष्टमधुपर्क-प्रक्षेपः । २० सर्व्वभक्षणं वा । २१ आचमनम् । २२ द्वि-तीयाचमनम् । २३ आचान्तोदकाय गोदानम् । २४ आ-लम्भनपक्षे जपोऽनुज्ञा च । २५ उत्सर्गपक्षे उत्स-र्गमन्त्रः । २६ मधुपर्काङ्गं भोजनममांसं न भवति । १अ० २४क० ।

२ अध्याये । १ श्रवणाकर्म्मकालः । २ सक्तुकलश-दर्व्वीस्थापनम् । ३ दिवाहुतदानादि । ४ अस्तमिते स्थालीपाकहोमः । ५ अवस्थाननिर्णयः । ६ पुरोडाशो-परिहोमः । ७धानाञ्जलिहोमः । ८हुतशेषस्य प्रतिपत्तिः ९ सर्पबलिहरणम् । १० प्रदक्षिणोपवेशने परिदान-मन्त्रश्च । ११ अमात्याय परिदानम् । १२ परिदानान्त-रम् । १३ बलिमात्मानं चान्तरा न व्यवेयुरन्ये ।१४ सायं-प्रातर्बलिहरणम् । १५ प्रकारान्तरबलिहरणम् । २अ० १क०आश्वयुज्याम् आश्वयुजीकर्म्म । २ स्थालीपाक-होमः । ३ पृषातकहोमः । ४ आहिताग्नेः आग्रहय-णेष्टिः तायां स्थालीपाकश्च । ५ अनाहिताग्नेर्लौकिकेऽग्नौ-२अ० २क० । मार्गशीर्ष्यां चतुर्द्दश्याम् प्रत्यवरोहण-कर्म्म । २ पौर्णमास्यां वा । ३ पायसहोममन्त्रौ । ४ स्विष्टकृन्निषेधः । ५ ध्यानं तन्मन्त्रश्च । ६ पुनर्जप्य-मन्त्रः । ७अमात्यप्रवेशः । दक्षदक्षतर प्रवेशः । ९ मन्त्र-विदो मन्त्रजपः ।१०उत्थाय विजप्यमन्त्रः । ११ त्रिदिक्षु-खानां जपब्राह्मणभोजनस्वस्त्ययनानि, चतुर्थजप्यमन्त्रश्च १२स्वस्त्ययनवाचनम् । २अ० ३क० । १अष्टकाकर्म्मकालः । २ एकस्याम् अष्टम्यां वा । ३ पूर्व्वदिवसे सप्तम्यां पितृभ्यो दानम् । ४ तत्र ओदनकृशरपायसानां श्रपणम् । ५ चतुःशरावपरिमितधान्यं पिष्ट्वा पूपश्रपणम् । ६ मन्त्रा-ष्टकैर्होमः, यावद्भिः कामयेत तावद्भिर्व्वा । ७ परदिने अष्टम्याम् अष्टका, पशुना स्थालीपाकेन वा । ८ अनु-डुहो यवसमाहरेद्वा । ९ तयाणामप्यसम्भवे अग्नि-ना कक्षं दहेत् । १० यवसदाने कक्षदाहे मनसा ध्यानम् । ११चतुर्थाभिकस्याप्यनुष्ठाने नानष्टकः स्यात् । १२ देवताविकल्पप्रदर्शनम् । १३ वपाहोममन्त्रः । १४ सप्त होममन्त्राः । १५ स्विष्टकृति अष्टमहोमः । १६ ब्राह्मणभोजनोत्तरं स्वस्त्ययनवाचनम् । २अ० ४क० । १आन्वष्टक्यं तदुत्तरनवम्यां कार्य्यम् । २मांसकल्पादि ।३ पिण्डपितृयज्ञकल्पत्वप्रदर्शनम् । ४ पितृभ्यः मधुमन्थवर्जं पिण्डनिपरणम् । ५मातृपितामहीप्रपितामहीभ्यः सुराच-मेन पिण्डनिपरणम् । ६ अवटसंख्यानिर्णयः । ७पित्रा-दिपिण्डस्थानम् ।८मात्रादिपिण्डस्थानम् ।९आग्रायणप-क्षीयसप्तम्यादिदिनत्रये कर्त्तव्ये साध्यावशे उक्तधर्म्मातिदेशः । १० कृष्णपक्षे अयुग्मासु तिथिषु आन्वष्टक्यवत् । मासि मासि पितृभ्य एव श्राद्धं कर्त्तव्यं न मात्रादिभ्यः । ११ आन्वष्टक्ये नवावरान् भोजयेत् ।१२अयुग्मौ सप्त पञ्च त्रीन् एकं वा । १३ वृद्धिकर्म्मणि पूर्त्तकर्म्मणि च युग्मान् भोजयेत् । १४इतरत्र युग्मब्राह्मणभोजनम् तिलस्थाने यव-दानञ्च । २अ० ५क० । १ रथारोहणात् पूर्व्वं तत्-स्पर्शनमन्त्रः । २ अक्षस्पर्शनमन्त्रः । ३ आरोह[illegible]-मन्त्रश्च । ४ रश्मिस्पर्शनमन्त्रः । ५ गमनप्रवर्त्तमानेषु रथेषु जप्यमन्त्रः । ६ शकटाद्यारोहणेऽपि तस्य जपः ।७ शकटाद्यङ्गस्पर्शनमन्त्रः । ८ नावारोहणमन्त्रः । ९ नवरथे विशेषः ।१०कुटुम्बोपयोगिद्रव्याहरणम् ।११गृहसमीपाग-मनम् ।१२रथावरोहणमन्त्रः ।१३नवरथावरोहणमन्त्रः । १४तत्र जप्यमन्त्रः । १५तत्र पुनर्जप्यमन्त्रः । २अ०६क० । १ वास्तुपरीक्षा । २ भूमिलक्षणम् । ३ भूमेरपरलक्षणम् । ४भूमेरन्यलक्षणञ्च ।५ विरुद्धवृक्षोत्पाटनम् । ६भूमेरव-भिन्नतानिर्णयः । ७ भोजनगृहस्थाननिर्णयः । ८तत्-फलम् । ९ सभागृहस्थाननिर्णयः । १० तत्फलम् । ११ तदपरस्थाननिर्णयः २अ०७क० । १ वास्तुपरीक्षण-क्रमः । २तत्र खातखननं तत्पूरणञ्च । ३प्रशस्तमध्य-मगर्हितवास्तुनिर्णयः । ४अस्तमितेऽर्के जलैस्तत्पूरणम् । प्रशस्तमध्यमगर्हितनिर्णयः । ६ ब्राह्मणवास्तुनिर्णयः । ७क्षत्रियवास्तुनिर्णयः । ८ वैश्यवास्तुनिर्णयः । ९ बहु-फलैः वास्तुकर्षणम् । १० समचतुष्कोणं दीर्घं वा । ११ वास्तुप्रोक्षणम् । १२ अविच्छिन्नधारया प्रोक्षणे मन्त्रः । १३अवान्तरगृहप्रभेदनिर्णयः । १४स्थूणानां गर्त्तेषु विशे-षविधिः ।१५मध्यमस्थूणागर्त्ते विशेषः । १६मध्यमस्थूणा-गर्त्ते मन्त्रः ।२अ०८क० ।१वंशाधानानुमन्त्रणम् । २वंशा-धानमन्त्रः ।३मणिकप्रतिष्ठापनम् । ४तन्मन्त्रान्तरविधानम् । ५मणिकसेचनमन्त्रः । ६ वास्तुदोषशमनम् । ७ तत्प्रो-क्षणम् । ८ अविच्छिन्नजलधारादानम् । ९ स्थालीपा-कश्रपणादि शिववाचनञ्च ।२अ०९क० । १गृहप्रपदनम् ।

२गोअश्वदुम्टइप्रपदनम् ।३तत्कालनिर्णयः । ४ तत्र होमकर्म्म । ५अनुमन्त्रणम् । ६आयतीनां गवामनुमन्त्रणे मन्त्रः । ७एके अन्यस्तत्रमिच्छन्ति । ८अयातीनां गवामनुमन्त्रणे । २अ०१०क०

तृतीयाध्याये पञ्चयज्ञादिसमाहान्तानि कर्म्माणि । १ पञ्चयज्ञप्रतिज्ञा ।२ पञ्चानां नामकथनम् ।३पञ्चानां स्वरूपकथनम् । ४तेषामहरहःकर्त्तव्यता । ३अ०१क०। १ स्वाध्यायविधिः। २ स्वाध्यायाध्ययननियमः । ३ ओंपूर्व्वां व्याहृतीः समस्ता ब्रूयात् । ४ सावित्र्यध्ययननियमः। ३अ० २क० । १ स्वाध्यायक्रमः । २ अध्ययने दैशाकृतिनिर्णयः । ३ अध्ययने पैलाकृतिनिर्णयः । ४ अध्ययने कालावधिनिर्णयः । ३अ० ३क० । १ देवतर्पणम् । २ ऋषितर्पणम् । ३ प्राचीनावीती । ४ आचार्य्यतर्पणम् । ५ पितृतर्पणम् । दक्षिणावीती । ६तिथिविशेषादौ निषेधवचनं नित्यस्वाध्यायस्यैव, न ब्रह्मयज्ञस्य । ७ब्रह्मयज्ञानध्यायः ३अ०४क०। १ अध्ययनप्रारम्भः । २ अध्ययनकालनिर्णयः । ३तत्र कालान्तरम् । ४ आज्यभागाहुतिः । ५ दधिसक्तुहोमः । ६होममन्त्रः ।७तत्रान्ये तृचा मन्त्राः । ८ एकोमन्त्रः । ९ तत्रापरोमन्त्रः । १० देवताहोमादिमार्जनम् । ११ जपनियमः । १२ व्याहृतिसावित्रीजपोवेदारम्भश्च । १३उत्सर्गविधिः । १४अध्ययनकालनिर्देशः । १५ ब्रह्मचारिधर्म्मयुक्तोऽधीयीत । १६ ब्रह्मचारिणामपि अध्ययनम् । १७ समावर्त्तोभार्य्यां गच्छेदित्येके । १८प्रजोत्पत्त्यर्थं जायागमनमपरे । १९ उपाकरणकर्म्म । २० माघ्यां पौर्णमास्यां तत्करणम् । २१ तत्र सावित्र्यादितर्पणम् । १२आचार्य्यादितर्पणम् । २३ ततः षण्मासोत्तरमुत्सर्जनकर्म्म । ३अ० ५क० । १काम्यकर्म्मस्थाने पाकयज्ञः । पुरोडाशस्थाने चरुः । ३ कामप्राप्तिफलम् । ४ नैमित्तिकहोमः । ५ होममन्त्रः । ६अशुभस्वप्नदर्शने उपस्थानमन्त्रः । ७ तत्र मन्त्रान्तरम् । ८ क्षुतादौ जपमन्त्रः । ९ अगमनीयगमनादौ आज्यहोमः । १० तत्र समिदाधानं वा । ११ तत्र मन्त्रजपो वा । ३अ०६क०। १अभ्युदितेऽर्के स्वपतः प्रायश्चित्तम् २ तत्र मन्त्रचतुष्टयम् । अभिनिर्मुक्तस्य प्रायश्चित्तहोमः । ३ सन्ध्योपासनम् । ४ तत्र सायङ्काले कर्त्तव्यभेदः । ५ तत्र प्रातर्नियमभेदः । ६ तत्र कालनिर्णयः । ७ कपोतपाते होमजपौ । ८ अर्थार्थं गच्छतो होमजपौ । ९ गृहं वस्तु तन्तुमिच्छतो होमजपौ । १० महान्तमध्वानं गमिष्यतो होमजपौ । ३अ०७क० । १ समावर्त्तनम् । तत्र आचार्य्याय आत्मने वा एकादशद्रव्याहरणम् । २उभयोर्हेमद्रव्यालाभे आचार्य्यायैव दानम् । ३ समिदाहरणनियमः । ४ कामनाविशेषे समिद्विशेषः । ५उभयकामस्यार्द्रशुष्का समित् । ६ समिदाधानादि गोदानम् ।७मन्त्रान् आत्मवाचकान् कुर्य्यात् ।८कर्णाभ्यामर्दनम् । ९ स्नानाञ्जनविधिः । १० कुण्डलबन्धनम् । ११ अनुलेपनविधिः । १२ स्रग्बन्धनम् । १३ मात्राविधिः । १४ छत्रादानम् । १५ वैणवदण्डादानम् । १६मधुपर्कीयसमिधादानम् । ३अ०८क० ।

तृतीये १ उपदेशमन्त्रः । २ तत्रैवं समिदाधानम् । ३ मधुपर्केण पूजनम् । ४ अनुज्ञाते समावर्त्तनस्नानम् । ५ व्रतविशेषः । ६ निषेधविशेषः । ७ निषेधान्तरम् । ८ स्नातकस्य माहात्म्यम् । ३अ०९क० । १ गुरवे नामकथनम् । २ उपवेशमाहुत्या । ३ यशर्नामकथनम् । ४ उपांशुजपने मन्त्रः । ५ शिष्यस्य उपांशुजपने मन्त्रः । ६आचार्य्यजपमन्त्रः । ७अपान्तरम् अनुमन्त्रणञ्च । ८ तत्प्रशंसा । ९ पक्षिणाम् अमङ्गला वाचः श्रुत्वा जपमन्त्रः । १० मङ्गलमनोज्ञा वाचः श्रुत्वा जपमन्त्रः । ११ भयप्राप्तौ जपमन्त्रः । ३अ०१०क० । १ सर्व्वाभ्योदिग्भ्यो भयप्राप्तौ जपमन्त्रोहोमश्च । २ तत्र जपमन्त्रः स्थलविशेषश्च । ३अ०११क० । १ राजसन्नाहनम् । २तत्र जपमन्त्रः। ३राज्ञे कवचदानेमन्त्रः । ४ धनुर्दाने मन्त्रः । ५ राज्ञोजपमन्त्रः । ६ शीघ्रजपमन्त्रः । ७इषुधिदाने मन्त्रः । ८रथगमने जपमन्त्रः । ९अश्वानुमन्त्रणम् । १०[illegible] जपमन्त्रः। ११संग्रामगमनराजजपमन्त्रः । १२[illegible] जपमन्त्रः। १३राजेषुपतनमन्त्रः । १४[illegible]मन्त्रः । १५अहङ्कमेण रथगमनम् । १६युद्धप्रदेशे[illegible] । १७दुन्दुभिवादने मन्त्रः ।१८वाणावागमनमन्त्रः । १९युद्धकाले राजनि पुरोहितजपमन्त्रः ।२०तत्रपुनर्मन्त्रः।३अ०१२क०

चतुर्थाध्याये । आहिताग्नेः पीडासम्भवादिश्मशानोदकपर्य्यन्तानि कर्म्माणि ।१ व्याधिपीडितस्याहिताग्नेः कर्त्तव्यम् ।२ग्रामकामत्वे प्रमाणम् ।३ग्रामे वासत्वे [illegible] । ४अगदः सोमादिभिरिष्ट्वा ग्रामं प्रविशेत् । ५ अनगदो वा ग्रामं प्रविशेत् । ६मृतस्याहिताग्नेर्दिशाखननम् ।७आतस्य निर्मोचनतानिर्देशः ।८आतस्य [illegible] ।

९ स्नातस्य विसृतिनियमः । १० स्नातस्य अधोनिर्णयः । ११ श्मशानदेशनिरूपणम् । १२ तत्श्मशानस्य बहूषधिकत्वम् । १३ कण्टकिवृक्षाद्युद्वासनम् । १४ दहनश्मशानस्य विशेषविधिः । १५ प्रेतस्य केशादिवपनम् । १६ बर्हिराज्यादिसंस्थापनम् । १७ पृषदाज्यानयनम् । ४अ०१क० । १ अग्नियज्ञपात्रादिनयनम् । २ प्रेतनयनकर्त्तृनिर्णयः । ३ शकटादिना प्रेतनयनमित्येके । ४ अनुस्तरण्युपस्तीर्णनयनम् । ५ अनुस्तरणीं गामाजरेके छागाम् एकवर्णामजामित्यपरे ८ पद्योः सव्यबाहुबन्धनं कृत्वा आनयनम् । ९ तदनु अमात्यादीनामागमनम् । १० दाहकर्त्तुः कर्त्तव्यभेदः । ११ दक्षिणपूर्वदेशे आहवनीयनिधानम् । १२ उत्तरपश्चिमे गार्हपत्यनिधानम् । १३ दक्षिणपश्चिमे दक्षिणाग्निनिधानम् । १४ चिताग्निचयनम् । १५ चितायां प्रेतसंवेशनम् । १६ प्रेतपत्नीसंवेशनम् । १७ क्षत्रियप्रेतस्य धनुःसंवेशनम् । १८ देवरादिना पत्न्युत्थापनम् । १९ तत्र उत्थापने कर्त्रा, देवरे तेनैव मन्त्रस्य जपः । २० धनुरपनयने मन्त्रः । २१ पुनः कर्त्त्रुत्थापकयोर्मन्त्रजपः । २२ धनुर्भङ्क्त्वा क्षेपः । ४अ०२क० । १ पात्रयोजनम् । २ दक्षहस्ते जुहूयोजनम् । ३ सव्ये उपभृतानयनम् । दक्षे पार्श्वे स्फ्यस्य सव्येऽग्निहोत्रहवन्या योजनम् । ५ उरःप्रभृतिषु ध्रुवादिनिधानम् । ६ नासिकयोः स्रुवाधानम् । ७ एकां स्रुवं भित्त्वा नासिकाद्वये योजनम् । ८ कर्णयोः प्राशित्राधानम् । ९ एकस्मिंस्तु भित्त्वोभयत्र तन्निधानम् । १० उदरे हविः पात्रीनिधानम् । ११ तत्र समवत्तधानचमसयोजनम् । १२ उपस्थे शम्यानिधानम् । १३ अरणीमूर्वोः, उलूखलमुसले जङ्घयोर्निदध्यात् । १४ पादद्वये शूर्पनिधानम् । १५ एकस्मिंस्तु छित्वा निधानम् पूर्व्ववत् । १६ आसेचनपात्रे पृषदाज्यपूरणम् । १७ तदुपस्थाद्युपयोगद्रव्यनिधानम् । १८ लौहमृण्मयादिनिधानम् । १९ अनुस्तरण्या वपामुत्खिद्य तत्र प्रेतस्य शिरोमुखाच्छादनं तन्मन्त्रश्च । २० प्रेतपाण्योर्वृक्कयोर्निधानम् । २१ हृदये हृदयाधानम् । २२ प्रेतपाण्योः पिण्डद्वयाधानमित्येके । २३ वृक्काभावे पिण्डद्वयाधानमित्यन्ये । २४ प्रणीताप्रणयनानुमन्त्रणे । २५ दक्षिणजानुपातेन दक्षिणाग्नौ चतुराज्याहुतिहोमः । २६ प्रेतस्योरसि पञ्चमाहुतिहोममन्त्रः । ३अ०३क० । १ युगपदग्निप्रज्वालने प्रेक्षणम् । आहवनीयस्य प्राक् प्रेतदेहप्राप्तौ प्रेतस्य स्वर्गलोकगतिः पुत्रस्य ऋद्धिश्च फलम् । गार्हपत्यस्य तथात्वे प्रेतस्यान्तरिक्षलोकप्राप्तिः पुत्रस्य ऋद्धिश्च फलम् । दक्षिणाग्नेस्तथात्वे प्रेतस्य मनुष्यलोकप्राप्तिः पुत्रस्य ऋद्धिश्च फलम् । ५ युगपत्प्राप्तौ सर्व्वसमृद्धिः फलम् । ६ दहनमन्त्रः । ७ दहनप्रशंसा । ८ जातमात्रे गर्भेऽवस्थाय दाहोत्तरमातृपितृकशरीरमास्थाय धूमेन सह स्वर्गलोकगमनम् । ९ दाहकर्त्तृजप्यमन्त्रः पृष्ठतोऽनीक्षित्वा सर्व्वेषां गमनञ्च । १० सकृदुन्मग्नाः प्रेताय जलाञ्जलिं दत्त्वान्यानि वासांसि परिधाय दिवा आनक्षत्रदर्शनात् तत्रावस्थानम् । ११ रात्रौ आदित्यमण्डलं दृष्ट्वा गृहं प्रविशेत् । १२ गृहप्रवेशे वृद्धादिपूर्व्वापरनिर्णयः १३ गृहमागत्य अश्मादीनामुपस्पर्शः । १४ तस्मिन् दिने अन्नं न पचेत् । १५ क्रीतान्नेन वर्त्तेरन् । १६ सपिण्डानां त्रिरात्रमक्षारलवणाशनम् । १७ महागुरुमृतौ द्वादशरात्रं तथात्वं दानाध्ययनवर्जनञ्च १८ सपिण्डेषु दशाहं दानाध्ययनवर्ज्जनम् । १९ उपनेतृगुरौ असपिण्डेऽपि दशाहं द्वादशाहं वाऽशौचम् । २० अदत्तासु स्त्रीषु मृतासु दशाहम् । २१ एकदेशाध्यापकेषु त्रिरात्रम् । २२ असपिण्डज्ञातौ त्रिरात्रम् । २३ दत्तासु स्त्रीषु त्रिरात्रम् । २४ अदन्तजाते त्रिरात्रम् । २५ असम्पूर्णगर्भे त्रिरात्रम् । २६ सहाध्यायिषु मृतेषु एकाहम् । २७ समानग्रामीये श्रोत्रिये एकाहम् । १ अस्थिसञ्चयनम् । २ स्त्रीपुरुषभेदेन कुम्भनियमः । ३ प्रोक्षणमन्त्रः । ४ सञ्चयने पूर्व्वापरनिर्णयः । ५ सञ्चयनानन्तरमवधाननिर्णयः । ६ पांशुप्रक्षेपः । ७ पांशुप्रक्षेपानन्तरम् उत्तरामृचं जपेत् । ८ कपालेन कुम्भं पिधाय पृष्ठतोऽनवेक्षमाणा गत्वाप उपस्पृश्य प्रेताय श्राद्धदानम् । ४अ०५क० । १ मृतगृहस्यान्यतोवाऽपक्षीयमाणपक्षादिकालामावस्यायां शान्तिकर्म । २ क्रव्यादाग्निहरणम् । ३ चतुष्पथे तदग्निपरित्यागः । ४ पृष्ठतोऽनवेक्षमाणादि कृत्वा प्रत्यागत्याप उपस्पृश्य केशादीन् वापयित्वा नवघटादिकुम्भपिञ्जूलान्तकल्पनम् । ५ पचमनासाग्निजननम् । ६ अग्निदीपनम् । ७ अग्निसेवनम् । ८ अनडुच्चर्म्मण्यमात्यारोहणम् (कर्त्रभिन्नाः सर्व्वे पुमांसः स्त्रियश्चामात्याः) । ९ परिधिपरिधानम् । १० आहुतिचतुष्टयमन्त्रः । ११ अमात्याः स्त्रियः तरुणदर्भैर्नवनीतं गृहीत्वा तेनाङ्गुष्ठोपकनिष्ठाभ्यां चक्षुषी आञ्जीरन् । १२ अञ्ज्यमानानां स्त्रीणां कर्त्रीक्षणम् । १३ कर्त्तुः अश्माभिमर्शनम्

।१४परिक्रमणजपः । १५स्विष्टकृदादिसमापनम् । १६ अहतशाखास्वाध्यायोपदेशनम् । १७ आ उदयादासपन्न आसीरन् ।१८होमसमापनम् । ४अ०६क०।१ श्राद्धाधिकारः ।। २पार्व्वणकाम्यवृद्धिश्राद्धैकोद्दिष्टरूपश्राद्धे पात्रविप्रलक्षणसंख्ये ।३सपिण्डीकरणभिन्ने यथेष्टं विप्रसंख्या तत्र तु त्रयाणां त्रय एव कार्य्या इति भेदः। ४पिण्डपितृयज्ञोक्तानां पिण्डनिपरणादीनां श्राद्धेऽतिदेशः। ५ ब्राह्मणाय जलदानम् ।६दर्भासनदानम् ।७पुनर्जलदानम् । ८अर्घपात्रे तिलावपनं तन्मन्त्रश्च। ९ पित्र्यं कर्म्म अप्रदक्षिणं कार्य्यम् । १०अर्घदानम् । ११ अर्घदानात् पूर्व्वं जलदानम् । १२अर्घस्थजलनिवेदनम् । १३ अर्घानुमन्त्रणं तन्मन्त्रश्च । १४अर्घ्या आपो यस्मिन् पात्रे एकीकृताः तत् प्रथमपात्रं नोद्धरेत् । ४अ०७क० । १ गन्धादिदानम् । २ अग्नौ करणानुज्ञा । ३ प्रत्यनुज्ञा । ४ अग्नौ करणहोमः । ५ पाणिष्वेव वा होमः । ६ देवपितॄणां क्रमेणाग्निमुखपाणिमुखत्वे । ७ भोजनपात्रेऽन्नदानविधानम् । ८ हुतशेषान्नदानम्। ९ भोजनपात्रे अधिकान्नदानम् ।१०भोजनात् तृप्तेषु पाठ्यमन्त्रः ।११पिण्डार्थमन्नमुद्धृत्य शेषनिवेदनम्। १२ अनाचान्तेषु पिण्डनिपरणम् । १३आचान्तेषु तदित्येके। १४ब्राह्मणानुज्ञानविकिरदानम् । १५अस्तु स्वधेति प्रत्यनुज्ञानम् विसर्जनञ्च ।४अ०८क० । १ अथ शूलगवः । २ तस्य कालादिनिर्णयः । ३ पशुनिरूपणम् । ४पशुलक्षणम् । ५कृष्णाबिन्दुयुक्तः पशुरित्येके । ६ अभ्युदये कृष्णं कामं गृह्णीयात् । ७ पशुभिषेकः ।८शिर आरभ्य पुच्छदेशपर्य्यन्तमभिषेकः ।९पशूत्सर्गः । १० पर्य्यग्निपर्य्यन्तं पालनम् । ११ तत्र दिग्निर्णयः । १२ग्रामदर्शनाभावोपदेशे पालनम् । १३अर्द्धरात्रादूर्द्ध्वं उदितेऽर्के वा काले शूलगवः कार्य्यः । १४यूपनिखननं तत्र पशुबन्धनञ्च । १५प्रोक्षणादि पशुकल्पेन समानम् । १६ त्रिपर्णमयं पात्र्या पलाशेन वा वपाहोमः । १७हरादि द्वादशनामकः होममन्त्रः । १८ उग्रादिषड्नामको वा मन्त्रः । १९षड्नामको वा मन्त्रः । २०बलिहरणम् । २१चतुर्भिः कर्षैः चतुर्दिग्बलिप्रदानम् ।२२[illegible] तस्यातिदेशः । २३स्थालीपाकौषधीनां तुषफलीकरणानां पुच्छचर्म्मशिरःपादानामग्नावनुहरणम् । (तुषकणाः फलीकरणाः)२४[illegible] विशेषः । २५ [illegible] शोणितनिनयनम् । २६ संस्रवनदेशे भूमौ निपतितं रुधिरं सर्पेभ्य उद्दिशेत् । २७ सर्व्वयज्ञानां रुद्रनामधेयत्वेऽप्यस्य सर्वात्मत्वम् । २८ अस्यैव सर्व्वा सेनाः । २९ सर्व्वाण्युत्कृष्टान्यस्यैवांशभूतानि । ३० इत्येवं विदं यजमानं रुद्रः प्रीणाति ।३१अस्य कर्म्मणो कर्त्तारञ्च रुद्रो न हिनस्ति । ३२अस्य हुतशेषं न प्राश्नीयादेकमतम् । ३३अस्य द्रव्याणि ग्रामं नाहरेयुः । ३४ नात्रागन्तव्यमिति पुत्रादीन् प्रतिषेधयेत्। ३५ नियमेन हुतशेषं प्राश्नीयाति सिद्धान्तः। ३६ शूलगवस्य फलानि ३७ शूलगवेनेष्टा अन्यं पशुमुत्सृजेत्। ३८सर्व्वदानुत्सृष्टपशुर्नैव स्यात् ३९शूलगवनामकेन पशुकर्म्मणा रहितो न भवेत् तेन शूलगवस्य नित्यता । ४० शन्तातीयं जपित्वा गृहप्रवेशः । ४१पशूपतापे गोष्ठे अस्यैव रुद्रस्य यजनम् । ४२ स्थालीपाकं निधाय सर्व्वहुतं कुर्य्यात् । ४३ प्रतिधूमं गवानयनम् । ४४ शन्तातीयं जपन् पशूनां मध्यमियात् । ४५समाप्तिज्ञापनार्थं आचार्य्यनमस्कारः । ४अ०४५क०

आश्वलायनगृह्यपरिशिष्टप्रतिपाद्यार्थाः । १ आचमनादि सामान्याङ्गम् । २ सन्ध्योपासनाङ्गाचमनादि । ३ मार्जनम् । ४ पापशोधनम् । ५ गायत्रीस्वरूपादि । ६तस्या ध्यानादि । ७ आचमनमन्त्रादि । ८ मन्त्राणामृषिदैवतच्छन्दांसि । ९ स्नानविधिः । १० माध्यन्दिनस्नानविधानम् । ११ मन्त्रस्नानम् । १२ वैश्वदेवः । १३ स्वस्तिवाचनादि । १४होमे स्थण्डिलादि । १५स्रुक्स्रुवादिसम्मार्गः । १६ ब्रह्मणः षट्कर्म्माणि । १७पार्व्वणस्थालीपाकः । १८ नित्यमौपासनम् । १९ पुनराधानम् । २० अनेकभार्य्यस्य परतऊढाया धर्म्मभागित्वम् । २१ कन्यावरणम् । २२ उपयमनादि । २३ अन्योन्यावलोकनम् । २४ आर्द्राक्षतारोपणादि । २५ ऋतुमतीकृत्यादि । २६ जातकर्म्मादि । इत्येते १अ० गताः

२अध्याये १ पञ्चयज्ञादि । २ पञ्चयज्ञसम्भारादि । ३ अर्च्चनाङ्गानि । ४अर्च्चनविधिः । ५आवाहनमन्त्राः । ६ पञ्चानामधिदेवतादि । ७ गणपत्यादिदेवतावाहनम् । ८ अग्न्युपधानादि । ९ यजमानाभिषेकः । १० होमविधानादि । ११ भोजनविधिः । १२ शयनादिविधिः । १३ श्राद्धानि । १४ ब्राह्मणनियमः । १५ गन्धादिदानादिपिण्डपितृयज्ञान्तं कर्म । १६ अग्नौ करणादिकर्म । १७ पिण्डदानादिश्राद्धशेषसमापनान्तं कर्म । १८ अग्निदग्धपिण्डदानादि । १९ आभ्युदयिके विशेषः । इत्येते २अ०गताः पदार्थाः।

तृतीयाध्याये १पितृमेधः । २ अस्थिदाना[illegible] ।

३ अग्निकार्य्यसमापनम् । ४कर्तृदकाबाधः । ५ पिण्डक्रिया । ६ नवश्राद्धानि । ७ सञ्चयनम् । ८ दशाहकृत्यम् ९ एकोद्दिष्टम् । १० एकोद्दिष्टविधिः । ११ सपिण्डीकरणम् । १२आमश्राद्धम् । १३ अतीतसंस्कारः । १४पालाशविधिः । १५ नारायणबलिः । १६ नागबलिः । १७ पुराणमेकोद्दिष्टम् । १८वृषोत्सर्गः । ३अ० पदार्थाः ।

४अध्याये १पूर्त्तकर्म्मादीनि अग्निकार्य्यान्तानि कर्म्माणि । १पूर्त्तानि । २ मण्डलादिविधिः । ३प्रतिमाद्र्याणि । ४ प्रासादप्रतिष्ठादि । ५तदनुष्ठानादि । ६अग्निस्थापनादि । ७देशाभिषेकादि । ८शान्तिप्रतिष्ठादि । ९ वाप्यादिविधिः १०आरामादिविधिः । ११ होमविशेषः । १२प्राचीं दिशमन्वावर्त्तते । १३ दक्षिणां दिशमन्वावर्त्तते । १४ प्रतीचीं दिशमन्वावर्त्तते । १५ उदीचीं दिशमन्वावर्त्तते १६ पृथिवीमन्वावर्त्तते । १७ अन्तरिक्षमन्वावर्त्तते १८ दिवमन्वावर्त्तते । १९ रात्रिमन्वावर्त्तते । २० परमन्वावर्त्तते । २१ सर्व्वा दिशोऽन्वावर्त्तते । २२ अग्निकार्य्यफलम् । ४अ० गताः एते पदार्थाः ।

आश्वायन पुंस्त्री अश्व+गोत्रे अश्वा०फञ् । अश्वर्षेर्गोत्रापत्ये स्त्रियां ङीप् । [अश्वावतानर्षेरपत्ये स्त्रियां ङीप् ।

आश्वावतान पुंस्त्री० अश्वावताननामर्षेरपत्यम् विदा०अञ् ।

आश्वास पु० आ+श्वस–घञ् ।१निर्वृतौ २आश्रयदाने ३भीतस्य भयनिवारणार्थे व्यापारे ४सान्त्वने च "धारणमाश्वासजननं श्रमप्रश्न" सुश्रु० । [२सान्त्वनासम्पादके ।

आश्वासक त्रि० आ+श्वस–णिच्–ण्वुल् । १आश्वासकारके

आश्वासन न० आ–श्वस–णिच्–ल्युट् । १सान्त्वने ।"आश्वासनञ्च कृष्णेन दुःखार्त्तायाः प्रकीर्त्तितम्" भा०आ० १अ० कर्त्तरि ल्यु । २आश्वासकारके "तदिदं द्वितीयं हृदयाश्वासनम्" शकु० । [तद्भावदर्शनाश्वासि" शकु० ।

आश्वासिन् त्रि० आ+श्वस–णिनि । प्रत्याशायुक्ते । "मनस्तु

आश्वास्य त्रि०आ+श्वस–णिच्–यत् । १सान्त्वनीये । ल्यप् । २सान्त्वयित्वेत्यर्थे अव्य० ।

आश्विक त्रि० अश्वान् भारभूतान् हरति वहति आवहति वा ठञ् । भारभूतस्याश्वस्य १हारके २वाहके ३आवाहके च । अश्वस्य निमित्तं संयोग उत्पातो वा ठक् । अश्वलाभसूचके ४संयोगे ५उत्पाते ६निमित्ते च ।

आश्विन पु० आश्विनी पूर्णिमा यस्मिन् मासे अण् । स्वनाम ख्याते चान्द्रे मासभेदे "अहमप्याश्विने तद्वत् सायाह्ने बोधयाम्यहम्" दुर्गाबोधनमन्त्रः । १अश्विमानुपधान आश्वि-मिष्टकानाम् अण् मतोर्लुक् । २इष्टकाभेदे स्त्री ङीप् । "ये चैता आश्विनीरुपदधाति" शत०ब्रा०८,२,१,११। आश्विनौ देवते अस्य अण् ।३चितिभेदे च "प्र त आश्विनीः पवमान" ऋ०९,८६,४, पञ्चाश्विन्योऽह वदतव्ये पञ्च वैश्वदेव्यः पञ्च प्राणभृतः पञ्चायस्या एकया न विंशतिर्व्वयस्यास्ता एकचत्वारिंशद्द्वितीया चितिः" शत०ब्रा० । ४यज्ञियकपालभेदे पु० "सौम्येन सहाश्विनो द्विकपालः सर्व्वत्र" कात्या० १२,६,२, "मैत्रावरुणश्च म आश्विनश्च मे इति" यजु० १८,१९, अश्विन्यां भवः अण् ।५अश्विनीकुमारयोः द्वि०व० । अश्विनौ देवते अस्य अण् । अश्विनीकुमारदेवताके ६ यज्ञे ७यस्ते च । आश्वलायनशब्दे उदा० ।

आश्विनी स्त्री अश्विना अश्वाकारवता नक्षत्रेण युक्ता पूर्णिमा नक्षत्राण् ।१आश्विनपौर्णमास्याम् २आश्विनशब्दोक्तार्थे च ।

आश्विनेय पु० द्विव० अश्विन्याः घोटकाकारवत्याः संज्ञायाः अपत्यं ढक् । १अश्विनीकुमारयोः तयोः तस्या उत्पत्तिकथा अरुणात्मजशब्दे ३२९पृष्ठे दृश्या । तस्यापत्यं विदा० अञ् ।२नकुले ३सहदेवे च पु० तयोर्माद्र्यामश्विनीकुमाराभ्यामुत्पादितत्वात् तथात्वम् । "जिगाय समरे वीरानाश्विनेयः प्रतापवान्" भा०स०प०३अ० । अश्वस्यैकाहगमः पन्थाः ढक् । ४अश्वस्यैकाहगम्ये अध्वनि ।

आश्वीन पु० अश्वस्यैकाहगमः पन्थाः वा खञ् । अश्वस्यैकाहगम्ये देशे "सहस्राश्वीने वा इतः स्वर्गो लोकः" ऐत० ब्रा० । "चतुश्चत्वारिंशदाश्वीनानि" श्रुतिः ।

आश्वेय त्रि० अश्वा देवता अस्य ढक् । १ तद्देवताके हविरादौ अश्वाया अपत्यम् शुभ्रा०ढक् । २अश्वाभवे ।

आषाढ पु० आषाढी पूर्णिमाऽस्मिन् मासेऽण् । स्वनाम ख्याते चान्द्रे १मासभेदे "आषाढस्य प्रथमदिवसे" मेघदू० "शेते विष्णुः सदाषाढे कार्त्तिके प्रतिबुध्यते" इति पुरा० । आषाढी पूर्णिमा प्रयोजनमस्य अण् । व्रतिनां धार्य्ये पालाशे २दण्डे "उपहिताषाढम्" काद० "तत्पुत्रेण च गृहीतव्रतेनाषाढिना" काद० । "अथाजिनाषाढधरः प्रगल्भवाक्" कुमा०। ३मलयपर्व्वते पु०मेदि०पृ०ढस्य डः । आषाडोऽप्युक्तार्थेषु । स्वार्थे कन् आषाढकोऽप्युक्तार्थेषु ।

आषाढा स्त्री आ+सह–क्त "श्रवणाषाढेति" पा० निर्द्देशात् नि० षत्वमोत्त्वाभावश्च । राशिचक्रस्थे १विंशतितमे २एकविंशे च नक्षत्रे "मूलं पूर्व्वाषाढा प्रथमश्चाप्युत्तरांशकोधन्वी । मकरस्तत्परिशेषं श्रवणा चार्द्धं धनिष्ठाया" इत्युक्तेः सा च पूर्व्वा उत्तरा च । तत्र पूर्व्वस्याः प्रथमपादस्य

धनूराशिघटमत्स्यसुरायाश्च शेषपादत्रितयस्य मकरराशि-घटकत्वम् तदर्थे न० च आषाढभूः" नक्षत्रपदः तस्य तत्र जातत्वात्तथात्वम् ।

आषाढाभव पु० आषाढायां नक्षत्रे भवति भू—अच् । मङ्गल-ग्रहे आषाढाजातोऽप्यत्र क्विप् । आषाढाभूरप्यत्र ।

आषाढि स्त्री आ+षह—क्तिन् नि०न ओत् सत्वञ्च । १सम्यक् सहने "तयाषाढैः सौम्रसतेयषोपदधुः" शत० ब्रा०६,२,१, १७ । २रतिदेव्याः स्थाने च यज्ञार्थेर० ।

आषाढी स्त्री आषाढया नक्षत्रेण युक्ता पूर्णिमा "नक्षत्रेण युक्तः कालः" पा० इत्यण् । १आषाढमासीयपौर्णमास्याम् । २यज्ञियेष्टकाभेदे च ।

आषाढीय त्रि० आषाढायां भवः "श्रविष्ठाषाढाभ्यामिति" पा० तस्येदम् इत्यर्थात् वा छ । १आषाढानक्षत्रे भवे २आषा-ढसम्बन्धिनि च ।

आष्टम पु० अष्टमोभागः अण् । अष्टमे भागे ।

आष्ट्र अश—व्याप्तौ ष्ट्रन् उणि० । आकाशे उज्ज्व०।

आस उपवेशनेऽदादि० आ० अक० सेट् । आस्ते आसाम् आसते आसीत आसाम् आस्व आध्वम् आस्त आसत आसिष्ट आसांबभूव आसामास आसाञ्चक्रे आसिता आसिष्यते । आसीनः आसितम् आसितवान् आसितुम् आसिता आसितः आसः आसनम् आसना "य आस्ते मनसा स्मरन्" गीता "दिवि देवास आसते" ऋ०१,२०,२ । "भीतामरणात् आस्ता" नासीत गुरुणा सार्द्धं शिला-फलकनौषु च" इति च मनुः । "सुखितमास्व, ततः परदा गतम्" सा०द० ।"निबुध्माध्वं पिबतास्व शेध्वम्" भट्टिः । "जगन्ति यस्यां सविकाशमासत" माघः । "आसिष्ट नैकत्र शुचा व्यरंसीत्" भट्टिः भावे आस्यते "आस्यतामिति चोक्तः सन्नासीताभिमुखं गुरोः" मनुः । "इच्छामि नित्य-मेवाहं त्वया पुत्र ! सहासितुम्" भा०व०। अ० "जन-कोह वैदेह आसाञ्चक्रे" शत० ब्रा० १४,६,१,१ । तूष्णीभूय भयादासाञ्चक्रिरे नगपक्षिणः" भट्टिः "कैलास-शिखरासीनम्" तन्त्रम् "आसीनानां सुरभितशिलं नाभि-गन्धैर्मृगाणाम्" मेघदू० । "आसितं भाषितं चैव मतं यच्चाप्यनुष्ठितम्" रामा०। "सुखासितादिकम्" सा०द०।

अधि—अध्यारोहणे सक० । गगनमध्यमध्यास्ते दिवाकरः काद० "छायामध्यास्य सैनिकाः "ययौ मृगाध्यासित-शाद्वलानि" इति च रघुः । "जम्बूविटपमध्यास्ते परभृता" शिक्षमा० । "आपन्नो दिवमध्यास्य शासनात् परमेष्ठिनः" रघुः । अत्राधारस्य कर्म्मता ।

अनु—पश्चादुपवेशनेन सेवने सक० । "अन्वासितमरुन्धत्या स्वाहयेव हविर्भुजम्" रघुः । "ततः सखायमन्वास्ते सदैव मनदं नृपः" भा० स० १० अ० ।

अभि—आभिमुख्येन स्थितौ नैकट्ये च अक० अभ्यासः अ-भ्यासीयत्तं कपूययोर्निमापद्येरन्" छा०उ० ।

उद्—औदास्ये प्रकृतकर्म्मण उपरमे अक० "विधाय वैरं सामर्षे नरोऽरौ य उदासते" माघः। "उदासीनवदासीनः" गीता

उप—सेवने सक० । "नोपास्ते यस्तु पश्चिमाम्" मनुः । "उपासते हरिहरौ ब्रह्मादेरव्ययते यतः" वाक्यप० । "वायुसञ्चाद्गुगच्छन्ति तथा दोषाद्युपासते" मनुः । "ऋतवस्त्व-मुपासते" कुमा० ।

परि—उप—उपासनस्य प्रकर्षार्थे "यथेव क्षुधिता बाला मातरं पर्य्युपासते" "पितामहं च के तस्यां सभायां पर्य्युपासते" भा०स० १अ० । (एनम्) "भुजङ्गाः पर्य्युपासते" कुमा० ।

सम्—उप—सम्यगुपासने सक० । "समुपास्यत पुत्रभोग्यया" रघुः

परि—परितः स्थितौ अक० सम्यक् सेवने सक० । "तामेतद्देवाय पर्य्यासते ये केचे ब्राह्मणाः" शत०ब्रा० ।

सम्—सम्यक् स्थितौ उपवेशने च । "भोगिभोगसमासीनम्" "पश्चिमां तु समासीनः" मनुः ।

आस् अव्य० आ+अस्—क्विप्—आस+क्विप् वा । १ स्मरणे, २आक्षेपे "आः क एष मयि जीवतीति" उद्भारा० । "आङ्गुरालम्बु ह्यामकूणपाठक." वेणी० । ३कोपे, ४सन्तापे, ५पीड़ायां सगर्वगर्जने च । "आः किमेतदिति क्रोधादाभाष्य महिषासुरः" देवीमा० । ६खेदे "निद्या-मातरमाः प्रदर्श्य नपत्नून् भिक्षामहे निष्त्रपाः" उद्भटः ।

आस पु० आस—घञ् । १आसने २स्थितौ ३उपवेशने आस्यतेऽ-नेन करणे घञ् । ४उपवेशनस्थाने गुह्यपार्श्वभागे "यथा कप्यासं पुण्डरीकमेवमक्षिणी" छा०उ०शान्द्र०भा० न० । अस्यते क्षिप्यतेऽनेन अस—करणे घञ् । ५धनुषि "स सासिः सासुसूः सासः" किरा० "सासः सचापः" मल्लि० । इष्वासः अस क्षेपे भावे घञ् । ६ विक्षेपे निरासः ।

आसक्त त्रि० आ+सन्ज—क्त । १आसङ्गयुक्ते विषयान्तरपरि-हारेण तदेकतानतयाभिनिविष्टे २अनवरते म०जटा० ३त-दृते ४सम्यक्संबद्धे च त्रि० आसक्तचित्तः आसक्तचेताः ।

आसक्ति स्त्री० आ+सन्ज—क्तिन् । विषयान्तरपरिहारेणै-कविषयावलम्बने "ते देवा आसक्तिमन्तं वदन्तः" "आस-क्तमन्तं वदन्तः इति च" शत०ब्रा०८,२,१,११,१२ "नीच-

बोद्धितं भवति तत्वासक्तिर्व्यज्यते" ऋ०१०,८५,२८ ।

आसङ्ग पु० आ+सन्ज–घञ् । १अभिनिवेशे, प्राप्तस्योपस्थितस्य वा नश्यतो वस्तुनः २रक्षणाभिलाषे, ३भोगाभिलाषे, ४कर्त्तृत्वाभिमाने ५ विषयान्तरपरिहारेण चेतस एकत्राभिनिवेशे च । "नयनप्रीतिः प्रथमं चित्तासङ्गस्ततोऽथ सङ्कल्पः" सा०द० । "तेऽसुरराक्षसेभ्य आसङ्गाद्बिभयाञ्चक्रुः" शत०ब्रा०१,१,२,२ "तयोर्हैन स्रुयमाण मासङ्गो न विन्दति" शत०ब्रा०५,२,२,५, "त्यक्त्वा कर्म्मफलासङ्गम्" गीता । ६सम्यक् सम्बन्धे "सर्वैरवासङ्गमपि प्रकाशते" कुमा० । आसज्यते कर्म्मणि घञ् । ७आसङ्गनीये उत्तरासङ्गः "त्वगुत्तरासङ्गवतीं निवीतिनीम्" कुमा० । ८सौराष्ट्रमृत्तिकायां राजनि० ९अनवरते न०१० तद्वति त्रि० शब्दा० । सौराष्ट्रमृत्तिकाया गात्रे आसञ्जनीयत्वात्तथात्वम् । अनवरतस्य च सततसम्बन्धात् आसङ्गत्वम् ।

आसङ्गत्य न० न सङ्गतः तस्य भावः ष्यञ् चतुरादिषु पर्य्युदासात् नोत्तरपदवृद्धिः । साङ्गत्याभावे असम्बन्धे ।

आसङ्गिनी स्त्री आसङ्गः सातत्यमस्त्यस्य इनि ङीप् । १वात्यायां त्रिकाण्ड० । २आसङ्गयुक्ते त्रि०स्त्रियां ङीप् ।

आसङ्गिम पु०आसङ्गे भवः डिमच् । सुश्रुतोक्ते वर्त्म्मरोगान्तर्गतर्म्मबन्धनाख्यरोगभेदे । "तत्र समासेन पञ्चदश वर्त्मबन्धना स्तयोभवन्ति वक्रच भन्थूक आसङ्गिम" इत्यादिना विभज्य "अभ्यन्तरदीर्घैरूपाश्रिरासङ्गिमः" इति सुश्रुते वर्णितः ।

आसञ्जन न० आ+सन्ज–ल्युट् । १आसक्ते २अवच्छम्बन्धे "प्रततिवलयासञ्जनात्" शकु० । णिच्–ल्युट् । ३योजने

आसञ्जित त्रि० आ+सन्ज–णिच्–क्त । संयोजिते

आसत्ति स्त्री आ+सद–क्तिन् । १नैकट्यसंबन्धे २प्राप्तौ न्यायमते ३प्रत्यक्षजनकसन्निकर्षे "आसत्तिराश्रयाणां तु सामान्यज्ञानमिष्यते" भाषा० । ४शाब्दबोधोपयोगिन्यामव्यवधानेन पदजन्यपदार्थोपस्थितौ । "आसत्तियोग्यताकाङ्क्षातात्पर्य्यज्ञानमिष्यते । कारणं सन्निधानन्तु पदस्यासत्तिरुच्यते, भाषा० "यत्पदार्थस्य यत्पदार्थेनान्वयोऽपेक्षितस्तयोरव्यवधानेनोपस्थितिः कारणम् । तेन गिरिर्भुक्तमग्निमान् देवदत्तेनेत्यादौ न शाब्दबोधः । नीलो घटो द्रव्यं पट इत्यादावासत्तिभ्रमाच्छाब्दभ्रमः । आसत्तिभ्रमाच्छाब्दभ्रमाभावेऽपि न क्षतिः । ननु यत्र छत्री कुण्डली वासस्वी देवदत्त इत्युक्तं तत्रोत्तरपदस्मरणकाले पूर्वपदस्मरणस्य नाशात् अव्यवधानेन उत्तरपदस्मरणासम्भव इति चेन्न प्रत्येकपदसंस्कारैः चरमतावद्विषयकस्मरणस्याव्यवधानेनोत्पत्तेः नानासन्निकर्षैरेकप्रत्यक्षस्येव नानासंस्कारैरेकस्मरणोत्पत्तेरपि सम्भवात् । तावत्पदसंस्कारसहितचरमवर्णज्ञानस्योद्बोधकत्वात् । कथमन्यथा नानावर्णकपदस्मरणम् । परन्तु तावत्पदार्थानां स्मरणादेकदैव खलेकपोतन्यायात् तावत्पदार्थानां क्रियाकर्म्मभावेनान्वयबोधरूपः शाब्दबोधो भवतीति केचित्" मुक्ता० ।

शाब्दबोधहेतुः आसत्तिश्च शब्दचिन्तामणौ निरूपिता यथा । "आसत्तिश्चाव्यवधानेनान्वयप्रतियोग्युपस्थितिः सा च स्मृतिर्नानुभवोऽतोनान्योन्याश्रयः अथ नानाविशेषणककर्म्मकर्त्तृकरणाधिकरणक्रियादिपदज्ञानजन्यक्रमिकपदार्थस्मृतीनां न यौगपद्यं सम्भवति आशुतरविनाशिनां क्रमिकाणां मेलकानुपपत्तेरिति कथन्तावत्पदार्थान्वयबोधः विशेषणज्ञानसाध्यत्वाद्विशिष्टज्ञानस्येति चेत् श्रोत्रप्रत्येकवर्णानुभवजन्यसंस्कारमेलकादेव तावत्पदस्मृतिः तत्र एकदैव तावत्पदार्थस्मृतौ सत्यां वाक्यार्थानुभवः न चान्त्यविषयसंस्कारेणान्यस्य न स्मरणमिति वाच्यं वाक्यार्थानुभवानुपपत्त्या फलबलेन संस्काराणां परस्परसहकारेण तत्रैकस्मरणकल्पनात् प्रत्येकवर्णसंस्काराणामिवानन्यगतिकतया पदस्मरणे । अथ "यद्यदाकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते । तेन तेनान्वितः स्वार्थः पदैरेवावगम्यते" नचैवमन्वयान्तराभिधानं न स्यात् विरम्य व्यापाराभावादिति वाच्यं एवमपि प्रथममन्वये चैत्वनुपन्यासात् उत्तरस्य ह्रीदं सामग्रीवैकल्यं न पूर्वस्येति चेत् अस्तु तावदेवं तथापि चरमन्तावत्पदार्थघटितवाक्यार्थानुभवे उक्तैव गतिरनन्यगतिकत्वात् । अत्र वदन्ति । सन्निधानं-पदजन्यार्थान्वयबोधहेतुः द्वारमित्यादावध्याहृतेनापि पिधानादिनान्वयबोधदर्शनात् न च द्वारं पिधेहीतिशब्द एवाध्याह्रियते अनुपयोगात् अर्थस्यैवान्वयप्रतियोगित्वादावश्यकत्वाच्च अर्थापत्तेरुपपादकविषयकत्वात् न च शब्दमात्रमुपपादकमपि तु तदर्थः । अवश्यं कल्प्यार्थेनाप्यर्थेन ह्रैवमसम्पन्नशब्दस्मृतेरन्यथासिद्धेः अन्यथा पदबोधितस्यैवार्थस्यान्वयबोधकत्वमिति नियमशक्तिकल्पनापत्तिः स्वार्थान्वयपरत्वाच्छब्दानां द्वारमिति न पिधानान्वयबोधकमिति तदन्वयबोधार्थमवश्यं शब्दकल्पनमिति चेत् लक्षणायां व्यभिचारात् तत्राक्षेपाच्छिन्नेन कर्त्राऽन्वयबोधाच्च अथ द्वारपदसहभावमात्रं पिधेहि शब्दस्य कल्प्यते लाघवात् न च पिधानाभिधायकानेकशब्दोपस्थितौ विनिगमनाविरहः संस्कारतारतम्यात्-

पदविशेषस्मृतेरिति चेत् न आकाङ्क्षादिमत्प्रतियोग्युपस्थितस्यार्थपरत्वस्य क्लृप्तत्वाल्लाघवेनार्थाध्याहारात् न च श्रुतपदानि स्वप्रयोजनानीति कथमध्याहृते तेषां तात्पर्य्यमिति वाच्यं श्रुतार्थान्वयानुपपत्त्याध्याहृते तात्पर्य्यात् कथन्तर्ह्योदनं पचतीत्यत्र समभिव्याहृतमात्रादन्वयबोधः कलायादेरपि स्मृतत्वादिति चेत् न तात्पर्य्यनियमादित्यवेहि "यत्परः शब्दः स शब्दार्थः" इति न्यायात् अन्यथा तवापि दैवात् स्मृतकलायपदोपस्थानेनान्वयबोधः स्यात् अथ देवदत्त ओदनमित्यादिवाक्ये क्रियापदाध्याहाराभावेन कर्त्तुरनभिधानात् तृतीया स्यादिति चेत् न अध्याहृतेनापि पचतिपदेन कर्त्तुरनभिधानात्। कर्त्तृसंख्याभिहितेति चेत् न, देवदत्तस्य पाककृत्यत्र तृतीयापत्तेः तात्पर्य्यं तत्र व्यवस्थेति चेत् तुल्यं ननु द्वारं पिधेहीत्यादौ पिधानशाब्दानुभवे पिधानोपस्थापकपदत्वेनान्वयबोधजनकत्वमिति चेत् न अन्वयप्रतियोग्युपस्थापकपदत्वेन जनकत्वात् न तु तदुपस्थापकयावत्पदत्वेन गौरवात् एवं पिधानान्वयबोधेऽपि अन्यथा गोपदलाक्षणिकयोरन्वयबोधो न स्यात् तयोरननुभावकत्वादिति उच्यते क्रियापदोपस्थापिता क्रिया कारकपदोपस्थापितं च कारकं परस्परमाकाङ्क्षति न तूपस्थितिमात्रम् अन्यथा द्वारं कर्मता पिधेहि द्वारं पिधानकृतिरित्यत्रापि क्रियाकर्माध्याहार इवान्वयबोधप्रसङ्गः क्रियाकर्म्मणोरुपस्थितेस्तुल्यत्वात् एवंविधपदोपस्थापिते परस्परमाकाङ्क्षा नास्तीति चेत् तर्ह्याकाङ्क्षायां पदविशेषोपस्थापितत्वं तन्त्रं न तूपस्थितिमात्रम्। अर्थविशेषेऽसाधुत्वात् न तत्रान्वयबोध इति चेत् न पिधेहीति पदं विना द्वारमित्यस्याप्यसाधुत्वात् तदर्थप्रयोगे साधुत्वस्य तुल्यत्वात् साधुत्वज्ञानस्यान्वयबोधेऽप्रयोजकत्वाच्च गोणीयाद्यपभ्रंशादावन्वयबोधाच्च न चात्रासंसर्गाग्रहो बाधकाभावात्। तस्मात् क्रियापदस्य कारकपदेन, कारकपदस्य च क्रियापदेन सहान्वयबोधकत्वं नत्वेकं विनापरस्य। अपि च सकर्म्मकक्रियापदप्रयोगं विना द्वितीयानुपपत्तिः क्रियापदार्थयोगे द्वितीया चेत् घटः आनयनं कृतिरित्यत्रापि द्वितीयापत्तेः तथा पुष्पेभ्य इत्यत्र स्पृहयतिपदाध्याहारं विना चतुर्थ्यनुपपत्तिः यदि च स्पृहयतिपदार्थयोगे चतुर्थी तदा पुष्पमिच्छतीत्यत्रापि स्यात् स्पृहयतीच्छति पदयोरेकार्थत्वात्। अथ साधुत्वार्थं द्वारं पुष्पेभ्य इत्यत्र पिधेहि स्पृहयति पदाध्याहारोऽनुमन्यते नत्वन्वयबोधार्थं तस्यान्वयप्रतियोगिज्ञानादेवोत्पत्तेरिति चेत् तर्हि क्रियापदप्रयोगं विना न कारकविभक्तिः कारकपदप्रयोगं विना न तदन्वययोग्यं क्रियापदमिति केवलकारके क्रियापदाध्याहारः केवलक्रियायाञ्च कारकपदाध्याहारः साधुत्वार्थमावश्यक इति तज्जन्यैवोपस्थितिरन्वयबोधौपयिकी। तस्मात् क्रिया कारकपदोपस्थापितयोरेव क्रियाकारकयोः परस्परान्वय इति शब्दाध्याहार एव कर्त्तव्ये वक्ष्यामः"।

व्याख्यातं चैतत् मथुरानाथेन दिङ्मात्रमत्रोदाह्रियते "आसत्तिं निरूपयति आसत्तिश्चेति अन्वयप्रतियोगिनोःपदार्थयोरव्यवधानेनोपस्थितिरासत्तिरित्यर्थः स्वाव्यवहितत्वसम्बन्धेन तत्पदार्थोपस्थितिमती तत्पदार्थोपस्थितिस्तत्पदार्थे तत्पदार्थस्यासत्तिरिति फलितार्थः नचैवमासत्त्यामासत्त्यविभागव्याघातः समूहालम्बनरूपपदार्थोपस्थितेरेव सर्वत्र शाब्दबोधोपयोगितया गिरिर्भुक्तमग्निमान् देवदत्तेनेत्यादावपि शाब्दानुभवाव्यवहितपूर्ववर्त्तिसमूहालम्बनोपस्थितिमादायैवाव्यवधानेनोपस्थितिसत्त्वात् उपस्थितेरैक्येन व्यवधानासम्भवादिति वाच्यं भेदगर्भाव्यवधानस्य पूर्वोत्तरक्षणसाधारणस्यात्र प्रवेशात् तत्र स्वध्वंसाधिकरणभिन्नत्वे सति यः स्वप्रागभावाधिकरणक्षणप्रागभावानधिकरणक्षणस्तदवच्छेदेन स्वसमवायिदेशोत्पत्तिकत्वे सति स्वभिन्नत्वम्। इत्यस्य प्रथमं या प्रत्येकपदेभ्यः प्रत्येकपदार्थानां क्रमिका स्मृतिः सैवासत्तिरन्वयबोधाव्यवहितपूर्ववर्त्तिसमूहालम्बनरूपोपस्थितिः। अतएवासत्तिज्ञानं हेतुः प्रत्येकपदजन्यपदार्थोपस्थितीनामाशुविनाशिनीनां युगपच्छाब्दबोधात् पूर्व्वमसम्भवेन स्वरूपसत्तया तुल्यासम्भवात् नचैवं दण्डी कुण्डली खड्गी देवदत्त इत्यादावनेकविशेषणानां विशेषणकान्वयबोधस्थले आसत्त्यभावप्रसङ्गः तत्र विशेषणोपस्थितेर्विशेषणान्तरोपस्थित्या व्यवधानादिति वाच्यं प्रकृतान्वयबोधाननुगुणायः स्वध्वंसाधिकरणक्षणसत्त्वविशिष्टस्याव्यवधानघटकीभूतसत्यन्तदलार्थत्वात् विशेषणान्तरोपस्थितिश्च न प्रकृतान्वयबुद्ध्यननुगुणः अननुगुणत्वञ्च फलबलकल्प्यं यादृशयादृशक्षणेन व्यवधानेऽप्यन्वयबोधोऽनुभवसिद्धस्तत्क्षणभिन्नत्वस्यैवाननुगुणत्वरूपत्वात्। अतएव गिरिर्भुक्तमित्यादौ भुक्तादिपदार्थोपस्थितिक्षणोत्पत्तिकपदोच्चारणानन्तरं चिरतरं विलम्ब्यान्यपदमुच्चारितं तत्र व्यवधायकक्षणोऽपि चाननुगुणस्तत्रान्वयबोधानुत्पत्तेरिति तदुभयत्र नासत्तिः। नचैवं यत्र पदोपस्थितिर्व्यवधानेन, पदार्थोपस्थितिश्चाव्यवधानेन, तत्रासत्त्यापत्तिरिति वाच्यं तत्पदोपस्थित्यव्यवहिततत्पदोपस्थितिजन्या तत्पदार्थो

पस्थितेरव्यवधानेन तत्पदार्थोपस्थितिस्तत्पदद्वयजन्यतत्पदार्थयोरन्वयबोधे आसत्तिरिति विवक्षितत्वात्। एवञ्च यत्र पदोपस्थितिरव्यवधानेन, पदार्थोपस्थितिश्च व्यवधानेन, यत्र वा पदार्थोपस्थितिरव्यधानेन, पदोपस्थितिश्च व्यवधानेन, तत्रोभयत्रापि नासत्तिः किन्त्वेकपदोपस्थितिजन्यपदार्थोपस्थितिरपरपदोपस्थितिश्च समूहालम्बनरूपा ततोऽपरपदार्थोपस्थितिः पदान्तरोपस्थितिश्च समूहालम्बनरूपेत्यादिक्रमेण पदार्थोपस्थितिस्तत्रैवासत्तिः पदोपस्थितेरव्यवधानमपि पूर्वोक्तरूपसाधारणं प्रकृतान्वयबोधानुगुणलक्षणघटितं बोध्यम् नतु आसत्तिभ्रमादन्वयबोध इति सर्वैर्गीयते स कुत्रेति वाच्यं यत्र व्यवहितपदोपस्थितावव्यवहितत्वधीर्व्यवहितायां पदार्थोपस्थितौ अव्यवहितत्वधीर्वा तत्र तत्सम्भवात्। अथैवमासत्तिज्ञानस्य शाब्दबोधहेतुत्वे स्वरूपसत्याः पदजन्यपदार्थोपस्थितेः पृथक्कारणत्वे किं मानं, न च विशेषणज्ञानसाध्यं विशिष्टज्ञानमिति विशेषणज्ञानत्वेन कारणमिति वाच्यम् आसत्तिज्ञानस्यैव पदार्थविषयकत्वेन विशेषणज्ञानत्वादिति चेन्न तद्विलम्बेनापि शाब्दधीविलम्बात् तस्यापि पृथक्कारणत्वात् न च तद्व्यतिरेकस्थाने आसत्तिविलम्बादेव शाब्दधीविलम्ब इति वाच्यं नह्यासत्तिः स्वरूपसती हेतुः किन्तु तज्ज्ञानमेव तद्व्यतिरेकस्थानेऽपि सम्भवादिति निर्णयकृतस्तदसत् एकतदुपस्थाप्यकृतिवर्त्तमानत्वयोरन्वयबोधस्थानेऽप्याप्नेयंत्वानुमित्यादिना एकदैव पदजातमनुमितं स्मृतं वा ततश्च समूहालम्बनपदार्थस्मरणं जातं तत्राव्याप्तेश्च तत्र प्रत्येकपदार्थोपस्थितेरभावात् नच तत्रापि क्रमिकप्रत्येकपदार्थोपस्थितिः कल्पनीयेति वाच्यम् अनुभवविरोधात् प्रत्येकपदार्थोपस्थितिमन्तरेणापि तत्र शाब्दबोधस्यानुभविकत्वात् किञ्चैतस्याः स्वरूपसद्धेतुत्वं स्वयमेव निराकृतं क्रमिकप्रत्येकपदार्थोपस्थितेः शाब्दबोधात् पूर्वं विनष्टत्वात् नाप्येतज्ज्ञानं कारणं मानाभावात् नह्युपस्थितिज्ञानविलम्बात् शाब्दबोधविलम्ब आनुभविकः न च दैवादहृष्टादिना पदार्थोपस्थितौ पदजन्यत्वभ्रमेण शाब्दबोधानुदयात् तज्ज्ञानस्यापि हेतुत्वमिति वाच्यं दृत्त्या पदजन्यपदार्थोपस्थितेः स्वरूपसतोहेतुत्वात्तद्भ्रमे शाब्दबोधाभावात् अव्यवधानांशवैयर्थ्याच्च न चैतद्भ्रमानन्तरं शाब्दानुभवदर्शनादेतज्ज्ञानं हेतुरिति वाच्यं नहि यत्सत्त्वे यदुत्पद्यते तदेव तत्कारणं, यदाव्यवहितपूर्ववर्त्तिसावत्पदार्थानामेव घटहेतुत्वापत्तेः

न च पदजन्यपदार्थोपस्थितौ अव्यवहितत्वाव्यवहितपदजन्यत्वयोः संशये व्यवहितत्वव्यवहितपदजन्यत्वनिश्चये च शाब्दबोधानुत्पत्तेस्तन्निश्चयो हेतुः तयोः प्रतिबन्धकत्वकल्पने गौरवादिति वाच्यं तात्पर्यज्ञानसत्त्वे व्यवहितत्वव्यवहितपदजन्यत्वग्रहेऽपि शाब्दबोधदर्शनादनुत्पत्तेरेवासिद्धेः नचैवं व्यवहितपदकदम्बात्मकश्लोकादौ योजनायां कारितायामेवान्वयबोधोनत्वन्यथा इत्यत्र किं बीजमिति वाच्यं योजनायास्तात्पर्यग्राहकत्वात्। अतएव यस्य योजनां विनैव तात्पर्यग्रहस्तस्य न योजनापेक्षा। एतेन अन्वयप्रतियोगिपदं तदुपस्थापकपरं तथा च तदुपस्थापकपदोपस्थित्यव्यवधानेन तदुपस्थापकपदोपस्थितिस्तयोरासत्तिः न तु पदार्थोपस्थितीनामव्यवधानमपेक्षितमिति केषाञ्चिन्मतमप्यपास्तं वक्ष्यमाणान्योन्याश्रयाशङ्का[illegible]तेः समूहालम्बनोपस्थितिमादाय सर्वत्रास्याः सत्त्वेन आसत्त्यासत्त्यर्थविभागव्याघातापत्तेः। न च भेदगर्भमव्यवधानं विवक्षणीयं पूर्वोक्तदोषाणामपि हत्तेः। एतज्ज्ञानस्य कारणत्वे उक्तरूपेण मानाभावाच्च। केचित्तु अव्यवधानेनेति विशेषणे तृतीया अन्वयप्रतियोगिपदस्य अन्वप्रतियोगिन उपस्थिति र्यस्मात् इति व्युत्पत्त्या अन्वयप्रतियोग्युपस्थापकपरं तथा च तत्पदार्थान्वितत्तत्पदार्थशाब्दबुद्धौ तत्पदे तत्पदाव्यवधानमासत्तिः नतूपस्थितीनामव्यवधानं विवक्षितं नीतिश्लोकादौ विपर्यासरूपदोषविशेषात् अव्यवधानभ्रमेणान्वयबोधः। न चैवं श्लोकादौ योजनायामप्यन्वयबोधो न स्यात् यत्रेदं व्यवधानेनोच्चारितमिति विशेषदर्शनेन भ्रमासम्भवात् इति वाच्यं योजनयोपस्थितवाक्यान्तरादेव तत्रान्वयबोधात् न तु श्लोकादितः। अव्यवधानज्ञानानुगुणलक्षणभेदाभेदसाधारणं स्वपरसाधारणञ्च वाच्यं तेनैकपदाद्युपस्थितयोः कृतिवर्त्तमानत्वयोरन्वयबोधेऽपि न काप्यनुपपत्तिरित्याहुः तदप्यसत् वक्ष्यमाणान्योन्याश्रयशङ्कानुत्थितेस्तात्पर्यादिज्ञानसत्त्वे अव्यवधानज्ञानाभावेऽपि शाब्दबुद्धेरानुभविकत्वाच्च नव्यास्तु दृत्त्या पदधीजन्यपदार्थोपस्थितिरासत्तिरियञ्च स्वरूपसत्येव हेतुः अतएव सिद्धान्तग्राम् आसत्तिस्तु यद्यपि स्वरूपसत्येव प्रयोजिका इत्यादिप्रभाकरोपाध्यायेनोक्तं न च एतज्ज्ञा अपि कारणत्वेमानाभाव इति वाच्यं तथासति आनयेति वाक्यमाकर्णयतः प्रत्यक्षेण घटं पश्यतोघटस्य शाब्दबोधापत्तेः घटमानयेति वाक्यमाकर्णयतः कारणतया घटपदकारणा

कारणत्वेन आकाङ्क्षायाः शाब्दबोधापत्तेः नचैवं गिरि-र्भुक्तमग्निमान् देवदत्तेनेत्यादितो गिरिरग्निमान् भुक्तं देवदत्तेनेत्यन्वयबोधापत्तिरिति वाच्यं तथा तात्पर्य्य-ग्रहदशायां इष्टापत्तेः कदाचित्तु तत्र तथान्वयबोधस्य सर्वैरेव इष्टत्वात् नचैवं कश्चिद्योजनायाः कथमुपयोग इतिवाच्य तात्पर्य्यग्रहार्थं तदुपयोगितेत्युक्तत्वादिति प्राहुः अव्यवधानेनान्वयप्रतियोग्युपस्थितिरासत्तिरुक्ता सा च शाब्दबोधादेव तथा च तस्यापि आसत्तिः कारणं सा च शाब्दबुद्धिरूपा तस्याञ्च यद्यपरासत्तिः कारणं तदा अन-वस्था फलीभूता चेत् अन्योन्याश्रय इत्यतआह सा चेति प्रघट्टकादन्वयबोधनिर्वाहकपदजन्यपदार्थोपस्थितिपरिपाटी मद्यपि ज्ञानाहृते चर्येति नव्यास्तु ननु इत्यत्र पद जन्यप-दार्थोपस्थितिश्चेदासत्तिस्तदा नानाविशेषणकस्थाने कथमन्वय-बोधः ? सर्व्वासां पदार्थोपस्थितीनाम् एकदाऽसम्भवादि-त्याशङ्क्य चर्येति इत्याहुः। नेत्यं नेत्तनम् । विशेषणज्ञान-साध्यत्वादिति विशेषणं पदार्थस्तदुपस्थितिसाध्यत्वात् इत्यर्थः इत्यत्र पदधीजन्येत्यादिः । विशिष्टज्ञानस्य शाब्दबोधानुभ-वस्य । नेत्यात् समूहात् एकदैव तावत्पदस्मृतिः न च सक-लपदगोचरस्मरणाभावेऽपि प्रत्येकपदानुभवजनितप्रत्येकपदार्थ-स्मरणाहितसंस्कारेभ्य एव सकलपदार्थगोचरमनेकं स्मरणं सम्भवति तथा च सकलपदगोचरैकस्मरणपर्य्यन्तानुधा-वनं विफलमिति वाच्यं प्रकारान्तरेण पदार्थोपस्थितेः शाब्दबोधाहेतुत्वात् पदज्ञानजन्यत्वोपपत्तये तदनुधावनात् ननु श्रोत्रेण प्रत्येकपदानुभवोऽपि न सम्भवति तथाहि आदौ घोत्पत्तिस्ततो द्वितीयकाले घत्वनिर्विकल्पकोत्पत्तिः अकारोत्पत्तिश्च अथ तृतीयकाले अकारतत्त्वनिर्विकल्पक-घत्वविशिष्टधीटोत्पत्तिनाशाः ततश्चतुर्थकाले घत्वविशिष्टधी टत्वनिर्विकल्पकाकारनाशघटाकारोत्पत्तयः इदानीञ्च घकारभानं न सम्भवति प्रत्यक्षं प्रति विषयस्य हेतुत्वात् ततः पञ्चमकाले टत्वविशिष्टबोधाकारतत्त्वनिर्विकल्पकटकारनाशाः इदानीं प्राथमिकाकारभानं न सम्भवति तदभावात् ततः षष्ठक्षणे अत्वविशिष्टबोधाकारनाशौ इदानीं टकारभानं न सम्भवति तदभावात् तथा च कथं वर्णसमूहात्मकपद-गोचरश्रोत्रानुभवः न च पूर्व्वपूर्व्ववर्णोपनयसहितान्त्य-वर्णस्य इति कर्णात् श्रोत्रानुभवसम्भव इति वाच्यं बहि-रिन्द्रियजप्रत्यक्षे उपनीतं विशेषणतयैव भासते इति नियमात् प्रत्येकवर्णसमूहस्य विशेष्यकपदप्रत्यक्षस्योपनय-मर्य्यादया असम्भवात् पदप्रत्यक्षे प्रत्येकं सर्वस्य वर्णस्य

तद्विशेष्यत्वात् न च पूर्व्ववर्णोऽन्त्यवर्णविशेषणतया भासत इति वाच्यं पूर्व्ववर्णेऽन्त्यवर्णविशेषणत्वनियामकस्य तत्सम्बन्धस्याभावात् इति चेत् मैवं वादिवदतामत्र न घटादिपदं टघादेरपि घटपदत्वापत्तेरपि तु अव्यवहितो-त्तरत्वसम्बन्धेन पूर्वपूर्ववर्णवदुत्तरोत्तरवर्ण एव पदं तत्र अव-सा न दुर्घटं पूर्व्वपूर्ववर्णोपनयसहकारेणाव्यवहितोत्तरत्व-सम्बन्धेन उत्तरोत्तरवर्णविशेषणतया पूर्वपूर्ववर्णप्रत्यक्षसम्भवात् वैयाकरणास्तु पूर्व्ववर्णस्य ज्ञानरूपाया उपनयसामग्र्याः सत्त्वे-ऽपि पूर्ववर्णस्यैवोत्तरवर्णे विशेषणत्वेन भाने नियाम-काभावात् विनिगमनाभावेन अव्यवहितपूर्व्वत्वसम्बन्धेनैव उत्तरोत्तरवर्णस्यापि विशेषतया भानस्य दुर्वारतया असृतमद्यदोस्तुल्यपदत्वापत्तेः तथा च अनुपदोच्चारणे तपदस्य श्रवणा प्राज्ञत्वापत्तिरित्यतोवर्णसमुदयादन्यः स्फोट एव पदमित्याहुः तद्विशेषश्च स्फोटशब्दे वक्ष्यते ।

अत्रायं विशेषः । चिन्तामणिमते शब्दाध्याहारएव मथु-रानाथेन तु आसत्तिग्रन्थशेषे अर्थाध्याहारोऽपीति व्यवस्थापितम् । यथा "अस्तु वा शब्दाध्याहार एवावश्यक-स्तथापि तज्जन्यपदार्थोपस्थितित्वेन कुतो हेतुत्वं लाघ-वात् पदार्थोपस्थितित्वेन हेतुत्वस्योचितत्वात् तथा च ओदनं पचनीत्यादौ सति तात्पर्य्यग्रहे यथाकथञ्चिदुप-स्थितकर्त्रादेरप्यन्वयबोध इत्यर्थाध्याहारपक्ष एव सम्यक्" "वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः" सा॰द॰ । "आसत्तिक्रमेणान्वयः" रघु॰ ।

आसदन न॰ आ+सद–ल्युट् । १प्राप्तौ २नैकट्यसम्बन्धे च ।

आसन न॰ आस–ल्युट् । १स्थितौ "एकत्रासनभोजने" स्मृतिः। २स्वस्थानस्थितिरूपे राज्ञां षड्गुणान्तर्गतगुण-भेदे च । तद्विभागस्तत्रोक्ते । "परस्परस्य सामर्थ्य-विघातादासनं स्मृतम् । अरेश्च विजिगीषोश्च यानवत् पञ्चधा स्मृतम्" । यानस्य पञ्चविधत्वञ्च । "विगृह्य सन्धाय तथा सम्भूयाथ प्रसङ्गतः । उपेक्षया च निपुणैर्यानं पञ्चविधं स्मृतमिति" कर्त्रोक्तम् । "परस्य स्वस्य सैन्यानां साम्यं मत्वा स्थिरत्वम् । आसनं स्वामिने ब्रूयात् मन्त्री स्वाभिहिते रतः" इत्युक्ते ३विजिगीषोर्यात्रानि-वर्त्तकव्यापारे च । आस्यतेऽत्र आधारे ल्युट् । ४उपवेशना-धारे कम्बलाद्यासने । "आरुह्य वसनं मया दारापत्य-ममतास्तु । आत्मनस्तु शुचि मोक्षं न परेषां सदासनं" आ॰त॰पु॰ । "प्रयत्नसङ्गासनया सङ्गागताः" रघुः । "सहसा तत्र नभिनासने शुचिः" कामः "कुशासनं कौतुकने-

दिमध्यम्" कुमा० "शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः" गीता "स्थापयेदासने तस्मिन् खिन्नः कार्यक्षणे न्टणाम्" मनुः । "स वासवेनासनसन्निकृष्टम्" "प्राञ्जलिर्जलजासनम्" कुमा० । ५ देवतापूजाङ्गे उपचारभेदे तद्भेदादि कालि० पु०। "आसनं प्रथमं दद्यात् पौष्पं दारुजमेव वा । वास्त्रं वा चार्म्मणं कौशं मण्डलस्योत्तरे सृजेत् । पौष्पासनं यद्विहितं यस्य तद्यदि गर्भकम् । निवेदयेत्तदा पद्मे त्रिपुलं द्वारि चोत्सृजेत् । पौष्पं पुष्पौघरचितं कुशस्तूलादिसंयुतम् । अतिप्रीतिकरं देव्या ममाप्यन्यस्य भैरव ! । यज्ञदारुसमुद्भूतमासनं मसृणं शुभम् । नोच्छ्रायं नातिविस्तीर्णमासनं विनियोजयेत् । अन्यदारुद्भवञ्चापि दद्यादासनमुत्तमम् । सकण्टकं चीरयुक्तं दारु सारविवर्जितम् । चैत्यश्मशानसंभूतं वर्जयित्वा विभीतकम् । वाल्कलं कोषजं फालं वस्त्रमेतत्त्रयं मतम् । रोमजं कम्बलञ्चैव तदनेन चतुष्टयम् । अनेन रचितं दद्यादासनं चेष्टभूतये । सिंहव्याघ्रतरक्षूणां छागस्य महिषस्य च । गजानां तुरगाणाञ्च कृष्णसारस्य चर्म्मणा । सृमरस्याथ रामस्य मृगाणां नवभेदिनाम् । चर्म्मभिः सर्व्वदेवानामासनं प्रीतिदं स्मृतम् । वास्त्रेषु कम्बलं शस्तमासनं देवतुष्टये । राङ्कवं चार्म्मणं श्रेष्ठं दारवं चन्दनोद्भवम् । यच्चासनं कुशमयं तदासनमनुत्तमम् । सर्वेषामपि देवानामृषीणाञ्च यतात्मनाम् । योगपीठस्य सदृशमासनं स्यामसुच्यते । आसनस्य प्रदानेन सौभाग्यं भुक्तिमाप्नुयात् । सृमरो रोहितो न्यङ्कुः शंवरो बभ्रुणो रुरुः । शशेणहरिणाश्चेति मृगा नवविधा मताः । हरिणस्यापि विज्ञेयः पञ्चभेदोऽत्र भैरव ! । ऋष्यः खड्गो रुरुश्चैव पृषतश्च मृगस्तथा । एते बलिप्रदानेषु चर्म्मदाने च कीर्त्तिताः । सर्व्वेषां तैजसानाञ्च आसनं ज्येष्ठमुच्यते । आयसं वर्ज्जयित्वा तु कांस्यं सीसकमेव च । शिलामयं मणिमयं तथा रत्नमयं मतम् । आसनं देवताभ्यस्तु भुक्त्यै मुक्त्यै समुत्सृजेत् । अत्रैव साधकानाञ्च आसनं शृणु भैरव ! । यत्रासीनः पूजकस्तु सर्व्वसिद्धिमवाप्नुयात् । ऐणञ्च चार्म्मणं वास्त्रं तैजसञ्च चतुष्टयम् । आसनं साधकानाञ्च सततं परिकीर्त्तितम् । पूर्व्वोक्तं यच्च देवेभ्य आसनं परिकीर्त्तितम् । तत् सर्व्वमासनं शस्तं पूजाकर्म्मणि साधके । न यदेष्टासनो भूयात् पूजाकर्म्मणि साधकः । काष्ठादिकासनं कुर्य्यात् मितमेवं सदा बुधः । चतुर्विंशत्यङ्गुलेन दीर्घं काष्ठासनं मतम् । षोडशाङ्गुलविस्तीर्णमुत्सेधे चतुरङ्गुलम् । पञ्चाङ्गुलं वा कुर्य्यात्तु नोच्छ्रितं चात्र कारयेत् । पूर्व्वोक्तं वर्ज्जयेद्वर्ज्ज्यमासनं पूजनेष्वपि । वास्त्रं द्विहस्ताद्यो दीर्घं सार्द्धहस्ताच्च विस्तृतम् । त्र्यङ्गुलात्तु तथोच्छ्रायं पूजाकर्म्मणि संश्रयेत् । यथेष्टं चार्म्मणं कुर्य्यात् पूर्व्वोक्तं सिद्धिदायकम् । षडङ्गुलाधिकं कुर्य्यान्नोच्छ्रये तु कदाचन । काम्बलं चार्म्मणं चैलं महामायाप्रपूजने । प्रशस्तमासनं प्रोक्तं कामाख्यायास्तथैव च । त्रिपुरायाश्च सततं विष्णोश्चापि कुशासनम् । बहूच्छ्रायं न चैव स्यात् तथैव बहुविस्तृतम् । दारु भूमिसनं प्रोक्तमश्मापि सर्व्वकर्म्मणि । पृथक् पृथक् कल्पयेच्च शोभनं तादृशासनम् । न पत्रमासनं कुर्य्यात् कदाचिदपि पूजने । न प्राण्यङ्गं न मृद्भूतमस्थिजं द्विरदाहृते । मातङ्गदन्तसञ्जातमासनं कामिके चरेत् । चर्म्म पूर्व्वोदितं प्राह्यं तथा गव्यमृगस्य च । सलिले यदि कुर्व्वीत देवतानां प्रपूजनम् । तत्राप्यासनमासीनो नोत्थितस्तु समाचरेत । तोये शिलामयं कुर्य्यादासनं कौशमेव वा । दारवं तैजसं वापि नान्यदासनमाचरेत् । आसनारोपसंस्थानस्याभावे तु पूजकः । आसनं कल्पयित्वा तु मनसा पूजयेज्जले । यद्यासनस्य संस्थानं तोयमध्ये न विद्यते । अन्यत्र वा तदा स्थित्वा देवपूजां समाचरेत् । इत्येतत् कथितं पुत्र ! पूज्यपूजकसङ्गतम्" । आस्यतेऽनेन करणे ल्युट् । ५ देहस्थैर्य साधने करचरणादिबन्धभेदरूपे योगाङ्गभेदे "यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधयोऽष्टावङ्गानि" विभज्य "स्थिरसुखमासनम्" पात० सू० लक्षितं तस्य वृत्तिः यथा "निश्चलं सुखावहं च यदासनं तद्योगाङ्गम् । आस्यतेऽनेनेत्यासनं तच्च द्विविधम् बाह्यं शारीरं च तत्र चैलाजिनकुशोत्तरं बाह्यं, शारीरं पद्मस्वस्तिकादि । तत्र पद्मासनं प्रसिद्धम् । सव्यमाकुञ्चितचरणम् दक्षिणजङ्घोर्व्वन्तरे, दक्षिणं च सव्यजङ्घोर्व्वन्तरे, निक्षिपेदिति स्वस्तिकासनम् । द्वे पादतले वृषणसमीपे संपुटीकृत्य संपुटोपरिपाणिकच्छपिकां न्यसेदिति भद्रासनम् । योगपट्टेन सोपाश्रयासनम् । जानुप्रसारितबाहोः शयनं पर्य्यङ्कासनं क्रौञ्चोष्ट्रगजादिनिषदनवेशनं क्रौञ्चाद्यासनं द्रष्टव्यम् । आसनस्थैर्य्योपायमाह । "प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम्" पात० सू० । "स्वाभाविकः प्रयत्नः चलत्वादासनविघातकः तस्योपरमेणासनं सिध्यति अनन्ते नागनायके स्थिरतरफणासहस्रविधृतविश्वमण्डले चित्तस्य समापत्त्या देहाभिमानाभावेनासनदुःखास्फूर्त्तेरासनं सिध्यति । तत्सिद्धिचिह्नमाह । "ततो द्वन्द्वानभिघातः" पात० सू० । "आसन-

जयाच्छीतोष्णादिभिरनभिघातो बाधाभावो भवति” इत्तिः इदञ्च राजयोगाङ्गं हठयोगाङ्गानि पुनरन्येऽपि बन्धाः- काशी० उक्ताः यथा “महामुद्रां नभोमुद्रामुड्डीयानं जलन्धरम्। मूलबन्धन्तु योवेत्ति स योगी योगसिद्धिभाक्। शोधनं नाड़िजालस्य घटनञ्चन्द्रसूर्ययोः। रसानां शोषणं सम्यक् महामुद्राभिधीयते। योनिं वामाङ्घ्रिणापीड्य कृत्वा वक्षःस्थले हनुम्। हस्ताभ्यां प्रसृतं पादं धारयेद्दक्षिणञ्चिरम्। प्राणान् कुक्षौ समापूर्य्य चिरं सञ्चारयेच्छनैः। एषा प्रोक्ता महामुद्रा महारोगविनाशिनी। चन्द्राङ्गे तु समभ्यस्य सूर्य्याङ्गे पुनरभ्यसेत्। या तत्तुल्या भवेत् संख्या ततोमुद्रां विसर्जयेत्। न हि पथ्यमपथ्यं वा रसाः सर्व्वेऽपि नीरसाः। अपि घोरं विषं पीतं पीयूषमिव जीर्य्यति। क्षयकुष्ठगुदावर्त्तगुल्माजीर्णपुरोगमाः। तस्य दोषाः क्षयं यान्ति महामुद्राञ्च योऽभ्यसेत्। कपालकुहरे जिह्वा प्रविष्टा विपरीतगा। भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी। न पीड्यते स रोगेण न च लिप्येत कर्म्मणा। बाध्यते न स कालेन योमुद्रां वेत्ति खेचरीम्। चित्तञ्चरति खे यस्माज्जिह्वा चरति खेगता। तेनैषा खेचरी नाम मुद्रा सिद्धैर्निषेविता। यावद्विन्दुः स्थितोदेहे तावन्मृत्युभयं कुतः। यावद्बद्धा नभोमुद्रा तावद्विन्दुर्न गच्छति। उड्डीनङ्कुरुते यस्मादहोरात्रं महाखगः। उड्डीयानं ततः प्रोक्तं तत्र बन्धोऽभिधीयते। जठरे पश्चिमं जानुनाभेरूर्द्ध्वञ्च धारयेत्। उड्डीयानं ह्ययं बन्धोमृत्योरपि भयं जयेत्। बध्नाति हि शिराजालमधोगामि न भोजनम्। एष जलन्धरो बन्धः कण्ठे दुःखौघनाशनः। जलन्धरे कृते बन्धे कण्ठसङ्कोचलक्षणे। न पीयूषं पतत्यग्नौ न च वायुः प्रधावति। पार्ष्णिभागेन संपीड्य योनिमाकुञ्चयेद्गुदम्। अपानमूर्द्ध्वमाकृष्य मूलबन्धोऽभिधीयते। अपानप्राणयोरैक्यं क्षये मूत्रपुरीषयोः। युवा भवति वृद्धोऽपि सततं मूलबन्धनात्”।

रुद्रयामलेऽनेकविधान्यासनानि दर्शितानि यथा। “अथासनप्रभेदञ्च शृणुष्व सिद्धिकाङ्क्षिणाम्। यत्र तत्र पूजकानां स्थिरत्व महीतले। अधोमुखासनं नाथ ! सर्व्वेषां प्राणिनां सुखम्। ऊर्द्ध्वमार्गेण देवेश ! धारयेत् मारुतं सुधीः। सर्व्वासनानां श्रेष्ठं हि ऊर्द्ध्वपादो हि यत् चरेत्। तदैव महितां सिद्धिं ददाति वायवी कला। पद्मासनं तथा कुर्य्यात् प्राणवायुषु सिद्धये। शुभासनं सदा ध्यायेत् पूरयित्वा पुनःपुनः। ऊरुमूले वामपादं पुनस्तद्दक्षिणं पदम्। वामोरौ स्थापयित्वा च पद्मासनमिति स्मृतम्। सव्यापसव्ययोगेन आसनं परिकल्पयेत्। तदैकासनकाले तु द्वितीयासनमारभेत्। पृष्ठे पादद्वयं सीम्बिष्ठाङ्गुष्ठद्वयं सुधीः। कायसङ्कोचमाकृत्य धृत्वा वज्रासनं भवेत्। इति वज्रासनं बद्ध्वा वायुबद्धः पुनःपुनः। चिबुके स्थापयेद्यत्नाद्धृदि तेजश्च भास्करे। इत्यासनं हि सर्व्वेषां प्राणिनां सिद्धिकारणम्। वायुं वशे तु कुर्य्याद्यः स योगी नात्र संशयः। भावसिद्धिकरं नाथ ! सर्व्वेषां इष्टिकारणम्। वामपादतले कुर्य्यात् पादं दक्षिणमेव तत्। सव्यापसव्ययोगेन आसनद्वयमेव च। सर्व्वत्रैवं प्रकारञ्च कृत्वा नातीव साधयेत्। शृणुष्वान्यान्यासनानि द्वात्रिंशत्संख्यकानि च। सव्यापसव्ययोगेन द्विगुणं प्रभवेदिह। चतुःषष्ट्यासनानीह वदामि वायुशोधनात्। द्वात्रिंशद्ग्रन्थिभेदेन कल्पयेत् वायुसिद्धये। कार्म्मुकासनमाकृत्य उदरे पूरयेत् सुखम्। तदा वायुर्वशं याति कालेन सूक्ष्मवायुना। बद्धपद्मासनं मन्त्री वेष्टयित्वा प्रधारयेत्। करेण दक्षिणेनैव वामपादाङ्गुलीतटम्। सव्यापसव्यद्विगुणं कार्म्मुकासनमेव च। कार्म्मुकद्वययोगेन शरवद्वायुना नयेत्। कुक्कुटासनमावक्ष्ये नाड़ीनिर्म्मलहेतुतः। सत्कुलागमभार्गेण कुर्य्यात् वायुनिवेशनम्। निजहस्तद्वयं भूमौ पातयित्वा जितेन्द्रियः। पद्मरां बद्ध्वा करौ देव ! कर्परद्वयमध्यतः। सव्यापसव्ययुगलं कुक्कुटं ब्रह्मणा कृतम्। बद्धं कृत्वा अधःशीर्षं यः करोति खगासनम्। खगासनप्रसादेन श्रमलोपोभवेद्ध्रुवम्। पुनःपुनः श्रमादेव विषयश्रमलोपकृत्। लोलासनं सदा कुर्य्यात् वायुलौल्यापघातनात्। स्थिरवायुप्रसादेन स्थिरचेता भवेद्ध्रुवम्। पद्मासनं समाकृत्य पादयोः सन्धिगह्वरे। हस्तद्वयमधोदेशे नियोज्य कुक्कुटाकृति। निजहस्तद्वयं लग्नं निपात्य हस्तनिर्भरम्। तस्मात् शरीरमुत्थाप्य स्थिरपद्मासनेऽनिलम्। स्थित्वैतदासने मन्त्री अधःशीर्षं करोति चेत्। उत्तमं त्वासनं ज्ञेयं योगिनामतिदुर्ल्लभम्। एतदागममात्रेण शरीरं शीतलं भवेत्। पुनःपुनः शोधनेन चेतना कुण्डली भवेत्। सव्यापसव्ययोगेन यः करोति पुनःपुनः। पूरयित्वा मूलपद्मे सूक्ष्मवायुं विकुम्भयेत्। कृत्वा कुम्भकमेवं हि सूक्ष्मवायौ लयद्विधौ। मूलादिब्रह्मरन्ध्रान्ते स्थापयेत् गगने पदे। एतत् शुभासनं कृत्वा सूक्ष्मरन्ध्रविशेषतः। सूचीरन्ध्रे यथा सूत्रं पूरयेत् सूक्ष्मवायुना। एवं क्रमेण षण्मासात् पूरकस्यापि

लक्षणम् । महासुखं समाप्नोति योगाष्टाङ्गनिषेवणात् । अथ वक्ष्ये महादेव! पर्वतासनमुत्तमम् । यत् कृत्वा स्थिररूपःस्यात् षट्चक्रादिविलोड़नः । योन्यासनं सर्व्वयोगे योगिनामवलम्बनम् । तत्कालं सकलं तावत् खेचरोयावदेव हि । पादगोष्ठेन चाक्रम्य लिङ्गाग्रं योनियोजयेत् । अन्यं पादमुरौ दत्त्वा तत्र योन्यासनं भुवि । एतन्मध्ये महादेव! बद्धयोन्यासनं शृणु । यत् कृत्वा विचरेत् योगी पृथिव्यामीश्वरो यथा । कृत्वा योन्यासनं नाथ! लिङ्गगुह्यादिबन्धनम् । सुखनासानेत्रकर्णं कनिष्ठाङ्गुलिभिस्तथा । ओष्ठाधरं कनिष्ठाभ्यामनामाभ्याञ्च नासिके । मध्यमाभ्यां नेत्रयुग्मं तर्जनीभ्यामथ श्रुती । एतत् सिद्धासनं नाम योगिनामतिदुर्लभम् । कृत्वा वायुस्तम्भनं च मूलमारभ्य स्तम्भयेत् । सव्यापसव्ययोगेन सिद्धो भवति साधक.। शनैःशनैः समारुध्य कुम्भयेच्च प्रपूरयेत् । अरुणोदयकालाच्च वसुदण्डेन भैरव!! सव्यापसव्ययोगेन गृहीत्वा बाह्यगानिलम् । द्वितीयप्रहरे कुर्यात् बाह्यपूजां मनोरमाम् । एतदासनमाकृत्य सिद्धो भवति साधकः । अथान्यदासनं वक्ष्ये यत् कृत्वा चामरोभवेत् । मत्साधकः शुचिः श्रीमान् कुर्य्याद्भावाभिभावितः । भेकनामासनं योग्यं नाथ! वक्ष्यामि तद्गुणम् । निधाय पादयुगलं स्कन्धे बाहौ पदोपरि । ध्यायेदिष्टपदं श्रीमान् आसनस्थः सुखाय च । यदि सर्व्वाङ्गमुत्तोल्य गगने खेचरासनम् ।महाभेकासनं प्रोक्तं सर्व्वसिद्धिप्रदायकम् । महाविद्या—महामन्त्रं प्राप्नोति जपतीह यः । एतत् प्रभेदं वक्ष्यामि यः करोति सचामरः । एकं पादमुरौ बद्धा स्कन्धेऽन्यपादरक्षणम् । एतत् प्रणासनं नाम सर्वसिद्धिप्रदायकम् । वायुं मूले समारोप्य प्रत्याकुञ्चय प्रसारयेत् । केवलं पादमेकञ्च स्कन्धे चारोप्य यत्नतः। एकपादेन गगने तिष्ठेत् स दण्डवत् प्रभो!। अपानासनमेतद्धि सर्वेषां पूरकाश्रयम् । कृत्वा सूक्ष्मशीर्षपद्मे समारोप्य च वायुभिः । तदा सिद्धो भवेन्मर्त्यो नात्र कार्य्या विचारणा । प्राणापानासने कृत्वा मन्त्री योगेश्वरो भुवि ।समानासनमावक्ष्ये सिद्धिमन्त्रादिसाधनम् । एकं पादमुरौ दत्त्वा गुह्येऽन्यं लिङ्गवत्प्रभो । एतद्वीरासनं नाथ! समानासनसंज्ञकम् । इत्यासनं जयेन्मन्त्रं धृत्वा वायुं चतुर्दले । कुण्डलीं भावयेन्मन्त्री कोटिविद्युल्लताकृतिम् । आत्मचन्द्रामृतरसैराप्लुतां योगिनीं सदा । वीरासनं तु वीराणां योगवायुप्रसाधनम् । योजानाति महावीरः स योगी भवति ध्रुवम् । अथ वक्ष्ये महाकाल । समानासनसाधनम् । भेदक्रमेण यज्ज्ञात्वा वीराणामधिपोभवेत् । समानासनमाकृत्य बद्धाङ्गुष्ठं करेण च । एतेन साधुकारी स्यात् सर्वयोगादिसाधने । आसनं योहि जानाति वायुना हरणं तथा। कालादीनां निर्णयन्तु स कदाचित् न नश्यति । कालेन लभ्यते सिद्धिः कालरूपोमहोज्ज्वलः । साधकैर्योगिभिर्ध्येयः सिद्धवीरासनात्मना । अथ वक्ष्ये नीलकण्ठ । ग्रन्थिभद्रासनं शुभम् । ज्ञात्वा रुद्रो भवेत् क्षिप्रं सूक्ष्मवायुनिषेवणात् । कृत्वा-पद्मासनं मन्त्री जङ्घायाः कुहरे करौ । कर्परस्थलपर्य्यन्तं विभिद्य स्कन्धधारणम् । भित्त्वा पद्मासनं मन्त्री हस्तार्द्धेन विपाटयन् । येन शीर्षं भवेन्नम्नं सर्वाङ्गुलिभिराश्रितम् । ग्रन्थिभेदासनं कुर्य्यात् खेचरादिप्रदर्शनम् । कृत्वा सूक्ष्मवायुलयं परमात्मनि कारयेत् । अथान्यासनमाः स्वेयोगपूर्वकरक्षणात् । कृत्वा पद्मासनं पादाङ्गुष्ठं जङ्घां हि संस्थितम् । हस्तमेकन्तु जङ्घायां कार्म्मुकं कर्परोर्द्धकम् । पद्मासने समाधाय अङ्गुष्ठं परिधारयेत् । कार्म्मुकासनमेतद्धि सव्यापसव्ययोगतः । पद्मासनं वेष्टयित्वा अङ्गुष्ठं च प्रधारयेत् । यः करोति सदा नाथ! कार्म्मुकासनमुत्तमम् । रोगादिनाशं शत्रूणां क्षयं नीत्वा सुखी भवेत् । अथ वक्ष्येऽत्र संक्षेपात् सर्वाङ्गासनमुत्तमम् । यत् कृत्वा निपुणो योगी विद्याभिः पण्डितो भवेत् । अधो निधाय शीर्षञ्च ऊर्द्ध्वपादद्वयञ्चरेत् । पद्मासनं तु तत्रैव भूमौ कर्परयुग्मकम् । दण्डे दण्डे तु यः कुर्य्यात् श्वासशान्तिपरः सुधीः! नित्यं सर्वासनं हित्वा न कुर्य्याद्वायुधारणम् । मासेन तस्य सिद्धिः स्यात् सर्व्वरोगविनाशनम्" । अन्यान्यप्यासनानि तत्रोक्तानि विस्तरात्र दर्शितानि । निर्वाणतन्त्रे जन्तुसंख्यया चतुरशीतिलक्षसंख्यकान्यासनान्युक्तानि किन्तु तेषां लक्षणविशेषास्तत्र नोक्ताः तेषां मध्ये द्वयोरेव प्राधान्यमित्यपि तत्रैवोक्तम् । यथा "आसनानि कुलेशानि! यावन्तोजीवजन्तवः । चतुरशीतिलक्षाणि चैकैकं समुदाहृतम् । आसनेभ्यः समस्तेभ्यः साम्प्रतं द्वयमुच्यते । एकं सिद्धासनं नाम द्वितीयं कमलासनम्" । एषां बहुविधानामासनानां मध्ये "सुखेनैव भवेद्यस्मिन्नासने ब्रह्मचिन्तनम् । आसनं तद्विजानीयादितरत् सुखनाशनम्" इत्यभियुक्तोक्तेः पातञ्जलोक्तस्य स्थिरसुखस्यैवासनस्य ब्रह्मचिन्तने प्राशस्त्यमवसेयम् । तन्मध्ये योगाङ्गासनानि पञ्च सलक्षणान्यु-

क्तानि यथा "पद्मासनं स्वस्तिकाख्यं भद्रं वज्रासनन्तथा । वीरासनमिति प्रोक्तं क्रमादासनपञ्चकम् । ऊर्व्वोरुपरि विन्यस्य सम्यक् पादतले उभे । अङ्गुष्ठौ च निबध्नीयाद्धस्ताभ्यां व्युत्क्रमात्ततः । पद्मासनमिदं प्रोक्तं योगिनां हृदयङ्गमम् । जानूर्व्वोरन्तरे सम्यक् कृत्वा पादतले उभे । ऋजुकायो विशेद्योगी स्वस्तिकन्तत् प्रचक्षते । सीमनि पार्श्वयोर्न्यस्य गुल्फयुग्मं सुनिश्चलम् । वृषणाधः पार्श्वपादौ पाणिभ्यां परिरक्षयेत् । भद्रासनं समुद्दिष्टं योगिभिः परिकल्पितम् । ऊर्व्वोः पादौ क्रमान्न्यस्य तत्प्रत्यक्‌मुखाङ्गुलौ । करौ निदध्यादाख्यातं वज्रासनमनुत्तमम् । एकम्पादमधः कृत्वा विन्यस्योरौ तथेतरम् । ऋजुकायो विशेन्मन्त्री वीरासनमितीरितम्" यत्र महामात्रोवसति तस्मिन् ६गजस्कन्धदेशे आस्यतेऽनेन आ+अस–कर्म्मणि ल्युट् । ७सम्यग् विक्षेपणसाधने । असनएव अण् ।८असनवृक्षे पु०९जीवकवृक्षे पु० । आसनशब्दस्थाने शसादौ तद्धितयाजादौ च परे आसन्नादेशः इति काशिकादयः मनोरमायान्तु तत् दूषयित्वा आस्यशब्दस्थाने एव तदादेश इत्युक्तं यथा "यत्तु आसनशब्दस्य आसन्नादेश इति काशिकायामुक्तन्तत् प्रामादिकम् "आस्नोवृकस्य वर्त्तिकाम-भीके" इति मन्त्रे मुखादित्यर्थस्यौचित्यात् "वृकस्य चित् वर्त्तिकामन्तरास्यादिति" मन्त्रान्तरसंवादाच्च वाख्यातत्त्व तथैव वेदभाष्ये इति । ["निषेदुषीमासनबन्धधीरः" रघुः ।

आसनबन्ध पु० आसनार्थो बन्धः । करचरणादीनामन्योन्यबन्धे

आसनमन्त्र पु० आसनस्य शुद्ध्यर्थो दानार्थो वा मन्त्रः । तन्त्रोक्ते "आधारशक्तिकमलासना य नमः" इत्यादिके तत्तत्करणोक्ते १मन्त्रभेदे २देवेभ्य आसनदानार्थे मन्त्रभेदे च । स च मन्त्रः "पुरुष एवेदं सर्व्वं यद्भूतं यच्च भाव्यम् । उतामृतत्वस्येशानो यदन्नेनाभिरोहति" श्रौतः । "शेषमन्त्रं महादिव्य फणामणिसहस्रकम् । कोटिसूर्य्यप्रतीकाशं गृहाणासनमीश्वर !" इति पौराणिकश्च । एवमन्योऽपि तत्तत्कल्पोक्तो बोध्यः । आसनपरिग्रहार्थे १मन्त्रं च "आसनमन्त्रस्य मेरुपृष्ठ ऋषिः सुतलं छन्दः कूर्म्मो देवता आसनपरिग्रहे विनियोगः" तन्त्रसा० ।

आसना स्त्री आस–युच् ।१स्थितौ २उपवेशने ।

आसनादि पु० आसनमादिर्यस्य । मन्त्रोक्ते पूजाङ्गे आसनप्रभृतौ उपचारगणे "आसनं स्वागतं पाद्यमर्घमाचमनीयकम्" उपचारशब्दे निवृतिः ।

आसनी स्त्री आस–आधारे ल्युट् ङीप् । १ विपणौ २मर्य्यादायाञ्च मेदि० । [नि० । वासुदेवे मेदि० ।

आसन्द पु० आसीदन्त्यस्मिन् प्रलयकाले आ+सद्–शब्दादि०

आसन्दी स्त्री आसद्यतेऽस्याम् आ+सद–शब्दादि० नि० गौरा० ङीष् । १ उपवेशनयोग्ये आसनयन्त्रे (केदारा) २ क्षुद्रखट्टायाम् (कौँच) । ३सभामध्यवेदिकायाम् "औदम्बरीमासन्दीं नाभिदघ्नामरत्निमात्रसुता हरन्ति" कात्या० ७,२७। ४उक्तलक्षणायां पीठिकायाञ्च । आसन्दीशब्दस्य निरुक्तिरपि शत० ब्रा० दर्शिता । "इयं वा आसन्दी अस्यां हीदं सर्व्वमासन्नम् तस्मादस्या आसन्दीमाहरन्ति" इति । स्वल्पार्थे कन् । क्षुद्रासनयन्त्रभेदे स्त्री । "जाम्बूनदमयीमासन्दिकाम्" काद० । आसन्दी+अस्त्यर्थे मतुप् मध्वा० मस्य वः । आसन्दीयुक्ते त्रि० स्त्रियां ङीप् । "आसन्दीवान् ग्रामभेदः" सि० कौ० ।

आसन्न त्रि० आ+सद–क्त । १निकटस्थे, २उपस्थिते च । "आसन्नपतने कूले कूलं पिपतिषतीति" शा० भा० । ३सन्निधानयुक्ते ४सम्यक्स्थिते च "सन्नमत्वासन्नमिति" शत० ब्रा० । ६शाब्दबोधसाधनासत्तियुक्ते वाक्ये "आसन्नानासन्नविभागव्याघातः" शब्दचिन्ता० । ५उमूर्षौ च ।

आसन्नकाल पु० आसीदत्यस्मिन् काले आ+सद–आधारे क्त कर्म्म० । मृत्युकाले ।

आसन्य पु० आस्ये भवः यत् आसन्नादेशः । मुखभवे मुखान्तर्विलस्थे मुख्ये प्राणे "अथ हैनमासन्यं प्राणमूचुः" शत० ब्रा० ।

आसन्वत् त्रि० आस्यसमानार्थकः आसन्शब्दोऽस्ति ततः अस्त्यर्थे मतुप् । आस्ययुक्ते समुखे । "यद्भूतं यच्च भाव्यमासन्वत्तेन ते वारये विषम्" अथ० ६,१२,२ ।

आसमञ्ज पु० असमञ्ज एव स्वार्थे अण् । सूर्य्यवंश्ये सगरपुत्रे क्षत्रियभेदे ।

आसम्बाध त्रि० समन्तात् संबाधा यत्र । सङ्कीर्णस्थाने परस्परसंघर्षणेन क्लिष्टे । "आसम्बाधा भविष्यन्ति पन्थानः शरवृष्टिभिः" रामा० ।

आसव पु० आसूयते आ+सु–कर्म्मणि अप् । १ अभिषवजाते मद्ये (चोयानमद) तक्रसुरादि भावप्र० । "यत् पक्वौषधाम्बुभ्यां सिद्धं मद्यं स आसवः । आसवस्य वीजद्रव्यगुणैर्यागुणाःसमाः" नवपुराणमद्ययोर्गुणास्तत्रैव । "मद्यं नवमभिष्यन्दि त्रिदोषजनकः परम् । अहृद्यं बृंहणं पाहि दुर्गन्धं विशदं गुरु । जीर्णं तदेव रोचिष्णु क्रमिश्लेष्मानिलापहम् । हृद्यं सुगन्धि गुणवल्लघु श्रम-

विशोधनम्”। सात्त्विकादिपानकर्त्तृभेदेन चेष्टाविशेषाश्च तत्रोक्ताः “सात्त्विकोगीतिहास्यादि राजसो साहसादिकम्। तामसो निन्द्यकर्म्माणि निद्रां च मदिरां चरन्”। चरन् पिबन् कुर्य्यादिति शेषः। “विधिना मात्रया काले हितैरन्नैर्यथाबलम्। प्रहृष्टो यः पिबेन्मद्यं तस्य स्यादमृतं यथा। किन्तु मद्यं स्वभावेन यथैवान्नं तथा स्मृतम्” सुश्रुते तु मद्यभेदेन गुणविशेषादिकमुक्तं यथा

“सर्व्वं पित्तकरं मद्यमम्लं दीपनरोचनम्। भेदनं कफवातघ्नं हृद्यं वस्तिविशोधनम्; पाके लघु विदाह्युष्णं तीक्ष्णमिन्द्रियबोधनम्। विकाशि सूक्ष्मविशदं शृणु तस्य विशेषकम्। माद्वीकमविदाहित्वान्मधुरान्वयतस्तथा। रक्तपित्तेऽपि सततं बुधैर्न प्रतिषिध्यते। मधुरं तद्धि रूक्षञ्च कषायानुरसं लघु। लघुपाकि सरं शोषविषमज्वरनाशनम्। माद्वीकाल्पान्तरं किञ्चित् खार्ज्जूरं वातकोपनम्। तदेव विशदं रुच्यं कफघ्नं कर्षनं लघु। कषायमधुरं हृद्यं सुगन्धीन्द्रियबोधनम्। कासार्शोग्रहणीदोषमूत्राघातानिलापहा। स्तन्यरक्तक्षयहिता सुरा बृंहणदीपनी। कासार्शोग्रहणीश्वासप्रतिश्यायविनाशिनी। श्वेता मूत्रकफस्तन्यरक्तमांसकरी सुरा। छर्द्यरोचकहृत्कुक्षितोदशूलप्रमर्द्दनी। प्रसन्ना कफवातार्शोविबन्धानाहनाशिनी। पित्तलाल्पकफा रूक्षा यवैर्वातप्रकोपणी। विष्टम्भिनी सुरा गुर्व्वी श्लेष्मला तु मधूलिका। रूक्षा नातिकफा हृद्या पाचनी चाक्षिकी स्मृता। त्रिदोषो भेद्यष्टम्भ कोहलो यदनप्रियः। याह्युष्णोऽजमलः पक्वा रूक्षसृट्कफशोफहृत्। हृद्यः प्रवाहिकाटोपदुर्नामानिलशोषहृत्। वक्कसो हृतसारत्वाद्विष्टम्भी वातकोपनः। दीपनः सृष्टविण्मूत्रो विशदोऽल्पमदो गुरुः। कषायो मधुरः शीधुर्गौडः पाचन दीपनः। शार्करो मधुरो रुच्यो दीपनो वस्तिशोधनः। वातघ्नो मधुरः पाके हृद्य इन्द्रियबोधनः। तद्वत् पक्वरसः शीधुर्बलवर्णकरः सरः। शोफघ्नो दीपनो हृद्यो रुच्यः श्लेष्मार्शसां हितः। कर्षनः शीतरसिकः श्वयथूदरनाशनः। वर्णकृज्जरणः स्वर्य्यो विबन्धघ्नोऽर्शसां हितः। आक्षिकः पाण्डुरोगघ्नो व्रणघ्नः संग्राहको लघुः। कषायमधुरः शीधुः पित्तघ्नोऽसृक्प्रसादनः। जाम्बवो बद्धनिष्यन्दस्तुवरो वातकोपनः। तीक्ष्णः सुरासवो हृद्यो मूत्रलः कफवातनुत्। सुखप्रियः स्थिरमदो विज्ञेयोऽनिलनाशनः। लघुर्मध्वासवश्छेदी मेहकुष्ठविषापहः। तिक्तः कषायशोफघ्नस्तीक्ष्णः स्वादुरवातकृत्। तीक्ष्णः कषायो मदकृद्दुर्नामकफगुल्महृत्। कृमिमेदोऽनिलहरो मैरेयो मधुरो गुरुः। बल्यः पित्तहरो वर्ण्यो मृद्वीकेक्षुरसासवः। शीधुर्मधूकपुष्पोत्थो विदाह्यग्निबलप्रदः। रूक्षः कषायकफहृद्वातपित्तप्रकोपणः। निर्द्दिशेद्रसतश्चान्यान् कन्दमूलफलासवान्। नवं मद्यमभिष्यन्दि गुरु वातादिकोपनम्। अनिष्टगन्धं विरसमहृद्यञ्च विदाहि च। सुगन्धि दीपनं हृद्यं रोचिष्णु कृमिनाशनम्। स्फुटस्रोतस्करं जीर्णं लघु वातकफापहम्। अरिष्टो द्रव्यसंयोगसंस्कारादधिको गुणैः। बहुदोषहरश्चैव दोषाणां शमनश्च सः। दीपनः कफवातघ्नः सरः पित्तविशोधनः। शूलाध्मानोदरप्लीहज्वराजीर्णार्शसां हितः। पिप्पल्यादिकृतो गुल्मकफरोगहरः स्मृतः। चिकित्सितेषु वक्ष्यन्तेऽरिष्टा रोगहराः पृथक्। अरिष्टासवशीधूनां गुणान् कर्म्माणि चादिशेत्। बुद्ध्या यथास्वं संस्कारमवेक्ष्य कुशलो भिषक्। सान्द्रं विदाहि दुर्गन्धं विरसं कृमिलं गुरु। अहृद्यं तरुणं तीक्ष्णमुष्णं दुर्भाजनस्थितम्। अल्पौषधं पर्य्युषितमत्यच्छं पिच्छिलञ्च यत्। तद्वर्ज्यं सर्व्वदा मद्यं किञ्चिच्छेषन्तु यद्भवेत्। तत्र यत् स्तोकसम्भारं तरुणं पिच्छिलं गुरु। कफप्रकोपि तन्मद्यं दुर्जरञ्च विशेषतः। पित्तप्रकोपि बहुलं तीक्ष्णमुष्णं विदाहि च। अहृद्यं फेनिलं पूति कृमिलं विरसं गुरु। तथा पर्य्युषितञ्चापि विद्यादनिलकोपनम्। सर्व्वदोषैरुपेतन्तु सर्व्वदोषप्रकोपणम्। चिरस्थितं जातरसं दीपनं कफवातजित्। रुच्यं प्रसन्नं सुरभि मद्यं सेव्यं मदावहम्। तस्यानेकप्रकारस्य मद्यस्य रसवीर्य्यतः। सौक्ष्म्यादौष्ण्याच्च तैक्ष्ण्याच्च विकाशित्वाच्च वह्निना। समेत्य हृदयं प्राप्य धमनीरूर्द्ध्वमागतम्। विक्षोभ्येन्द्रियचेतांसि वीर्य्यं मदयतेऽचिरात्। चिरेण श्लैष्मिके पुंसि पानतो जायते मदः। अचिराद्वातिके दृष्टः पैत्तिके शीघ्रमेव तु। सात्त्विके शौचदाक्षिण्यहर्षमण्डनलालसः। गीताध्ययनसौभाग्यसुरतोत्साहकृन्मदः। राजसे दुःखशीलत्वमात्मत्यागं ससाहसम्। कलहं सानुबन्धन्तु करोति पुरुषे मदः। अशौचनिद्रामात्सर्य्यागम्यागमनलोलताः। असत्यभाषणञ्चापि कुर्य्याद्धि तामसे मदः। रक्तपित्तकरं शुक्तं छेदि भुक्तविपाचनम्। वैस्वर्य्यं जरणं श्लेष्मपाण्डुक्रिमिहरं लघु। तीक्ष्णोष्णं मूत्रलं हृद्यं कफघ्नं कटुपाकि च। तद्वत्तदासुतं सर्व्वं रोचनञ्च विशेषतः। गौड़ानि

रसयुक्तानि मधुयुक्तानि यानि च । यथापूर्व्वं गुरुतराण्यभिष्यन्दकराणि च । सर्वां तु दीपनं हृद्यं हृत्पाण्डुक्रमिरोगनुत् । ग्रहण्यर्शोविकारघ्नं भेदि सौवीरकं तथा । धान्याम्लं धान्ययोनित्वाद्दीपनं दाहनाशनम् । स्पर्शात्पानात्तु पवनकफतृष्णाहरं लघु । तैक्ष्ण्याच्च निर्हरेदाशु कफं गण्डूषधारणात् । मुखवैरस्यदौर्गन्ध्यमलशोषक्लमापहम् । दीपनं जरणं भेदि हितमास्थापनेषु च । समुद्रमाश्रितानाञ्च जनानां सात्म्यमुच्यते ।"

स्मृतौ तु जातिभेदेन मद्यविशेषपाननिषेधार्थं मद्यविभागादि दर्शितं यथा प्रा० वि० मनुहारीतयमैः । "सुरा वै मलमन्नानां पाप्मा च मलमुच्यते । तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुराम्पिबेत्" । तथा च श्रुतिः "सुरा वै मलमन्नानामन्दतं पाप्मतमं सुरेति" । यद्यप्यन्नशब्दः स्तूकधान्यतण्डुलविकारविशेषे ओदने प्रसिद्धस्तथापि बहुतरवचनात् पिष्टयवान्नादिविकारमपि लक्षयति । तेनान्नविकारविशेषोमदहेतुः सुरा इत्युच्यते । अत्रिः । "गौड़ी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा । यथैवैका तथा सर्व्वा न पातव्या द्विजोत्तमैरिति" त्रिविधैव सुरेति पनसादिविकारव्यावृत्तस्य त्रितयस्यानुगतस्यैकस्य प्रवृत्तिनिमित्तस्याभावात् न पानक्रियाव्याप्यत्वम् इतरव्यावर्त्तकधर्म्मश्च महापातकहेतुपानकर्मत्वमुपाधिः सुराज्ञानाधीनं महापातकं तज्ज्ञानाधीनञ्च सुराज्ञानम् इतरेतराश्रयापत्तेः-पुलस्त्यवचनविरोधाच्च यथा पुलस्त्यः । "पानसं द्राक्षं माधूकं खार्ज्जूरं तालमैक्षवम् । माक्षिकं टाङ्कं माध्वीकमैरेयं नारिकेलजम् । समानानि विजानीयान्मद्यान्येकादशैव तु । द्वादशन्तु सुरा मद्यं सर्वेषामधमं स्मृतम्" । अनेनैकादशानां सुरात्वं निषेधति । मद्यशब्दस्तु-मदहेतुद्रवद्रव्यमात्रवचनः अस्मादेव वचनात् न तु मद्यमात्रं सुराशब्दस्यार्थः तथा च वृहस्पतिः । "गौड़ीं माध्वीं सुरां पैष्टीं पीत्वा-विप्रः समाचरेत् । तप्तकृच्छ्रं पराकञ्च चान्द्रायणमनुक्रमात्" । त्रयाणां सुरात्वे क्रमेण प्रायश्चित्तत्रयं न स्यात् । तथा भविष्ये "सुरा पैष्टी तु मुख्योक्ता न तस्यास्त्वितरे समे" । पैष्टीति तण्डुलविकारमात्रोपलक्षणम् । इतरे गौड़ीमाध्व्यौ । अतो अन्नविकार एव सुराशब्दस्य मुख्यत्वात् त्रिविधा सुरेति गौड़ीमाध्व्योर्गौणसुरात्वज्ञापनार्थम् तेनैतत्पानेऽपि महापातकत्वमतिदिशति यथैवैका तथा सर्वेति पैष्ट्यां पूर्व्वप्रसिद्धिं दर्शयति यथा पैष्टी सुरा तथा सर्व्वा गौड़ी माध्वी च । पूर्ववचनोक्तापि पैष्टी दृष्टान्तत्वेनात्र दर्शिता । न पातव्या द्विजोत्तमैर्ब्राह्मणैरित्यर्थः । त्रैवर्णिकपरत्वे उत्तमपदानर्थक्यात् । न तु बहुवचनानर्थक्यपरीहारार्थं सत्तमप्रातिपादिकानर्थक्यं युक्तं बहुवचनस्य सजातीयोपस्थापकत्वेन चरितार्थत्वात् । अतो ब्राह्मणस्य त्रिविधसुरापानं महापातकम् । "क्षत्रियवैश्ययोस्तु" सुरा वै मलमन्नानामिति वचनेन पैष्ट्येवेति स्थितम् गोविन्दराजविश्वरूपवीरेश्वराणामयमनुमतोऽर्थः । अत एव "एवं माध्वी च गौड़ी च पैष्टी च त्रिविधा सुरा । द्विजातिभिर्न पातव्या कदाचिदपि कर्हिचित्" इतिमनुवचनेऽपि द्विजातिपदं ब्राह्मणपरमेव । अतएव द्विविधसुरापाने क्षत्रियादीनां महापातकं तावदस्तु दोषाभावमेवाह याज्ञवल्क्यः । "कामादपि हि राजन्योवैश्यो वापि कथञ्चन । मद्यमेवासुरां पीत्वा न दोषं प्रतिपद्यते" तदेवं पैष्टीनिषेधस्त्रैवर्णिकानाम् गौडीमाध्वीनिषेधस्तु ब्राह्मणस्यैव ननु ब्राह्मणराजन्याविति कर्तृविशेषणं पुंलिङ्गं तत्र विवक्षितम् अतः कथं ब्राह्मण्याः सुरापानं महापातकम् उच्यते निषिध्यमानक्रियायाविधेयत्वेन तत्कर्त्तुरनुपादेयत्वात्तद्विशेषणं लिङ्गमविवक्षितम् हविरुभयत्ववत् । अतस्तज्जातिस्त्रीणामपि पाननिषेधः । तथा च भविष्ये "तस्मान्न पेयं विप्रेण सुरामद्यं कथञ्चन । ब्राह्मण्यापि न पेया वै सुरा पापभयावहा" । "यद्ब्राह्मणी सुरापी स्यान्न तां देवाः पतिलोकं नयन्तीति" श्रुतिः । "पतत्यर्द्धशरीरेण भार्य्या यस्य सुरां पिबेत् । पतितार्द्धशरीरस्य निष्कृतिर्नोपपद्यते" । न चैवं क्षत्रियवैश्यस्त्रीणामनिषेधः ब्राह्मणीपदस्य निषिद्धसुरापानकर्त्तृभार्य्योपलक्षकत्वात् "भार्य्या यस्य सुरां पिबेदिति सामान्यश्रवणाच्च ।

वेदविहितः मद्यसवनप्रकारस्तु सौत्रामणीशब्दे वक्ष्यते । "यक्षरक्षःपिशाचान्नं मद्यं मांसं सुरासवम् । तद्ब्राह्मणेन नात्तव्यं देवानामश्नता हविः" मनुः । "अनासवाख्यं करणं मदस्य" कुमा० । "नानासवपात्रसङ्कुलम्" काद० । "सुखं लालाक्लिन्नं पिबति चषकं सासवमिव" शान्तिश० । "संविदासवयोर्मध्ये संविदेव गरीयसी" तन्त्र० । भावे घञ् । २मद्यादेरभिषवे (मदचोयान) आसूयतेऽत्र आधारे घञ् । ३अभिषवपात्रे । आ+सृ—प्रसवे अच् । ४प्रसवकर्त्तरि त्रि० । "देवस्य सवितुर्मतिमासवं विश्वदेव्यम्" श्रुतिः । [त० । तालवृक्षे ।

आसवद्रु पु० आसवस्य (ताड़ी) मद्यभेदस्य कारणं द्रुः शब्द० ।

आसवनीय त्रि० आ+सु-कर्म्मणि अनीयर् । अभिषवणीये-

आसा स्त्री आ+सो–अङ्। अन्तिके निरु०"पितुर्न यस्या-सया" ऋ०१,१२७,८, "आसया अन्तिकेन" भा०। तस्य क्लीवत्वमपि। "आ न इन्द्रो दूरादासात्" ऋ०४,२०,१, "आसादन्तिकादिति" भा०।

आसादन न०आ+सद–णिच्–ल्युट्। १सन्निधापने, २स्थापने "कलोत्तरपरिपन्थादिकरोत्यान्वासादनात्" कात्या०६,२,५, आश्वला० श्रौ० उदा० ३आसन्नतासम्पादने ४मर्दने च "वयमासादने तस्य दर्पमद्य करेमहि" भा०स०२०अ०।

आसादित त्रि०आ+सद–णिच्–क्त। १निकटीकृते २प्राप्ते च "आसादितप्रकटनिर्मलचन्द्रहासः" सा०द० ३आयो-जिते ४सन्निधापिते ५सम्पादिते ६कामकेलिपरे च।

आसाद्य त्रि० आ+सद–णिच्–यत्। प्राप्ये "अभूदनासाद्यम-धिज्यधन्वनः" रघुः। २निकटीकार्य्ये ३अवसादं प्रापणीये आ+सद–णिच्–ल्यप्। ४प्राप्येत्यर्थे अव्य०।

आसार पु०आ+सृ–घञ्। १धारासम्पाते२वेगवृष्टौ, "त्वामा-सारप्रशमितवनोपप्लवं साधु मूर्ध्ना"। "पुष्पासारैः स्नपयतु भवान् व्योमगङ्गाजलार्द्रैः" मेघदू० "आसारसिक्तक्षिति-बाष्पयोगात्" रघुः। ३प्रसरणे, ४सैन्यानां सर्वतो व्याप्तौ च। ५करणे घञ्। सुहृद्बले। ६द्वादशराजमण्डलमध्ये नृपभेदे। द्वादशराजमण्डलञ्चाग्नेये दर्शितम् यथा "आत्ममण्डलमेवात्र प्रथमं मण्डलं भवेत्। समन्तात्तस्य विज्ञेया रिपवो मण्डलस्य तु। उपेतस्तु सुहृत् ज्ञेयः शत्रुमित्रमतः परम्। मित्रमित्रमतो ज्ञेयं मित्रमित्र रिपुस्ततः। एतत् पुरस्तात् कथितं पश्चादपि निबोध मे। पार्ष्णिग्राहस्ततः पश्चात् तत आक्रन्द उच्यते। आसारस्तु ततोऽन्यः स्यादाक्रन्दासार उच्यते। जिगीषोः शत्रुयु-क्तस्य विमुक्तस्य तथा द्विज!। तत्रापि निश्चयः शक्योवक्तुं मनुजपुङ्गव! निग्रहानुग्रहे शक्तोमध्यस्थः परिकीर्त्तितः। निग्रहानुग्रहे शक्तः सर्वेषामपि यो भवेत्। उदासीनः स कथितो बलवान् पृथिवीपतिः। मण्डलं तव संप्रोक्त मेतत् द्वादशराजकम्"। ६षड्विंशगणैः रचिते दण्डकच्छन्दोभेदे च।

आसाव्य त्रि० आ+सु–ण्यत्। अभिषवणीये मद्यादौ।

आसिक पु० असिः प्रहरणमस्य ठक्। खड्गेन युद्धकारके

आसिका स्त्री पर्य्यायेणासनम् आस–पर्य्याये ण्वुल्। पर्य्या-येण उपवेशने। "उद्धासिकाः सुप्यन्ते" पात०भा०।

आसिक्त त्रि०ईषत् सम्यक् वा सिक्तः आ+सिच–क्त। १ईषत् सिक्ते २सम्यक्सिक्ते च।

आसित न० आस+भावे–क्त। १ उपवेशने। आसधातौ उदा०। आधारे क्त। उपवेशनाधारे स्थाने। आसि-तस्य मुनेरपत्यं शिवा० अण्। असितमुनेरपत्ये स च शाण्डिल्यगोत्रे प्रवरः।

आसिधार न० असिधारा इवास्त्यत्र अण्। "युवा युवत्या सार्द्धं यत् मुग्धभर्त्तृवदाचरेत्। अन्तर्निवृत्तसङ्गः स्यात् आसिधार-व्रतं हि तत्" इति यादवोक्ते व्रतभेदे "अभ्यस्यतीव व्रत-मासिधारम्" रघुः।

आसिद्ध त्रि० आ+सिध–क्त। राजाज्ञया वादिना कृतावरोधे प्रतिवादिनि "नासिद्धस्तं विलङ्घयेत्" नार०।

आसिनासि पुं स्त्री असिरिव तीक्ष्णाग्रा नासा यस्य असिनासः मुनिभेदस्तस्यापत्यम् इञ्। तदपत्ये ततः युवापत्ये फक् तौल्व० न लुक्। आसिनासायनः तत्पौत्रे।

आसिबन्धकि पु० असिबन्धकस्यापत्यम् इञ्। असिबन्धका-पत्ये ततः युवापत्ये फक् तस्य तौल्व० न लुक्। आसि-बन्धकायनः तत्पौत्रे।

आसीन त्रि०आस+शानच्। उपविष्टे आसधातौ उदा०

आसीनप्रचलायित न० आसीनेन उपविष्टेनैव प्रचलवत् आचरितम् प्रचल–क्यच् भावे क्त। उपविश्य निद्रावशेन प्रचलनरूपे (बसेढोला) दोलने।

आसुत् त्रि० आ+सु–क्विप्। कृताभिषवे। तस्येदम् गहा० छ। आसुतीयः। तत्सम्बन्धिनि त्रि०।

आसुति स्त्री आ+सु–क्तिन्। सोमादिनिष्पीडने १अभिषवे, २मद्यनिष्पादने(चोयान)इति ख्याते मद्यपाके च। "परिष्कृ-तस्य रसिन इयमासुतिश्चारुर्मदाय" ऋ०८,१,२६। आ+सु–प्रसवे क्विप्। ३प्रसवे। "योनाविन्द्र! सुध्यङ्ग्रोव आसुतिं दाः" ऋ०१,१०४,७। आसुतेः सन्निकृष्टदेशादि चतुरर्थ्यां मध्वा० मतुप्। आसुतिमत् तद्वति त्रि० स्त्रियां ङीप्।

आसुतीवल पु० आसुतिरस्त्यस्य वलच् दीर्घः। १शौण्डिके। २सोमाभिषवशालिनि याज्ञिके च।

आसुर त्रि० असुरस्येदम् अण्। असुरसंबन्धिनि। "आसुरं तद्भवेत्तोयं पीत्वा चान्द्रायणञ्चरेत्" स्मृतिः "कुलाल-चक्रनिष्पन्नमासुरं मृण्मयं स्मृतम्। तदेव हस्तघटितं स्थाल्यादि दैविकं भवेत्" कात्या०स्मृ०। तेन (मानसा) प्रभृतिसूक्ष्मयस्य हस्तघटितत्वेन ग्राह्यताऽन्येषां त्याज्यता। स्त्रियां ङीप्। "आसुरी रात्रिरव्यस्त तस्मातां परिवर्जयेत्" स्मृतिः। २असुरवदाचारयुक्ते तदाचारश्च गीतायामुक्तोयथा।

"द्वौ भूतसर्गौ लोकेऽस्मिन् दैवआसुर एव च। दैवोविस्तरशः प्रोक्तआसुरं पार्थ मे शृणु। प्रवृत्तिञ्च निवृत्तिञ्च जना न विदुरासुराः। न शौचं नापि चाचारं न सत्यं तेषु विद्यते। असत्यमप्रतिष्ठन्ते जगदाहुरनीश्वरम्। अपरस्परसम्भूतं किमन्यत् कामहेतुकम्। एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः। प्रभवन्त्युग्रकर्म्माणः क्षयाय जगतोऽहिताः। काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः। मोहाद्गृहीत्वाऽसद्ग्राहान् प्रवर्त्तन्तेऽशुचिव्रताः। चिन्तामपरिमेयाञ्च प्रलयान्तामुपाश्रिताः। कामोपभोगपरमा एतावदिति निश्चिताः। आशापाशशतैर्बद्धाः कामक्रोधपरायणाः। ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान्। इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथम्। इदमस्तीदमपि मे भविष्यति पुनर्धनम्। असौ मया हतः शत्रुर्हनिष्ये चापरानपि। ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी। आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया। यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः। अनेकचित्तविभ्रान्ता मोहजालसमावृताः। प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ। आत्मसम्भाविताः स्तब्धा धनमानमदान्विताः। यजन्ते नाम यज्ञैस्ते दम्भेनाविधिपूर्व्वकम्। अहङ्कारं बलं दर्पं कामं क्रोधञ्च संश्रिताः। मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः। तानहं द्विषतः क्रूरान् संसारेषु नराधमान्। क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु। आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि। मामप्राप्यैव कौन्तेय! ततोयान्त्यधमां गतिम्। त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः। कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्। एतैर्विमुक्तः कौन्तेय! तमोद्वारैस्त्रिभिर्नरः। आचरत्यात्मनः श्रेयस्ततोयाति परां गतिम्। यः शास्त्रविधिमुत्सृज्य वर्त्तते कामचारतः। न स सिद्धिमवाप्नोति न सुखं न परां गतिम्। तस्माच्छास्त्रं प्रमाणन्ते कार्य्याकार्य्यव्यवस्थितौ। ज्ञात्वा शास्त्रविधानोक्तं कर्म्म कर्त्तुमिहार्हसि"।

२असुरवत् कर्त्तव्ये विवाहभेदे पु०। स च"ब्राह्मोदैवस्तथैवार्षः प्राजापत्यस्तथासुर"इति विभज्य "पैशाचश्चासुरश्चैव न कर्त्तव्यो कदाचन"इति निषिध्य"ज्ञातिभ्योद्रविणं दत्त्वा कन्यायै चैव शक्तितः। कन्याप्रदानं स्वाच्छन्द्यादासुरोधर्म उच्यते" इति मनुना लक्षितः। ब्राह्मादिविवाहेषु प्रशस्तप्रजालाभरूपफलमुक्त्वा "इतरेषु च शिष्टेषु नृशंसानृतवादिनः। जायन्ते दुर्विवाहेषु ब्रह्मधर्म्मद्विषः सुताः"। अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजा। निन्दितैर्निन्दिता नृणां तस्मान्निन्द्यान् विवर्जयेत्"। "कुविवाहैः क्रियालोपैर्वेदानध्ययनेन च कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च"इति मनुना तस्य निन्दा कृता"आसुरोद्रविणादानात्" या० स्मृ०। आसुरादिविवाहस्तु कर्त्तव्योह्यग्निसाक्षिकः" इत्युक्तेः तत्राप्यग्न्याधानं कार्य्यमेव "आसुरादिविवाहेषु पितृगामि भवेद्धनम्" स्मृतिः "अप्रजस्त्रीधनं भर्त्तुर्ब्राह्मादिषु चतुर्ष्वपि। दुहितॄणां प्रसूता चेच्छेषेषु पितृगामि तत्" या० स्मृ०। "शेषेष्वासुरगान्धर्व्वराक्षसपैशाचेषु भार्य्यात्वं प्राप्तायाः" इति मिता०। दायभागकृता तु तत्तद्विवाहकालेषु दत्तं धनमिति व्याख्यातम्। ४राजसर्षपे (राइसरिषा) स्त्री राजनि०।५विड्लवणे न०। स्वार्थे अण्। ६असुरे। "तस्मादप्यद्येहाददानमश्रद्दधानमयजमानमाहुरासुरोवतेति"छा० उ० उक्ते ७अयजनशीले अयजनादिकर्त्तृत्वादस्यासुरत्वम्। अतएव मनुना"अयज्वनां हि यद्वित्तमासुरस्वं तदुच्यते इति" तद्द्रव्यस्यासुरधनत्वमुक्तम्। ततश्च शास्त्रानभ्यनुज्ञातविषयभोगहेतुरागप्रधाना, वैदिकनिषेधातिक्रमेण स्वभावसिद्धरागद्वेषानुसारिसर्व्वानर्थहेतुप्रवृत्तिहेतुभूता च राजसी प्रवृत्तिः आसुरी प्रकृतिः। आसुरी सम्पत्तु असुरमणहेतुभूता रजस्तमोमयी सम्पद् सा च अशुभवासनासन्ततिजन्या तल्लिङ्गं तु "दम्भोदर्पोऽभिमानश्च क्रोधः पारुष्यमेव च। अज्ञानं चाभिजातस्य पार्थ!। सम्पदमासुरीम्"गीतोक्तम्।"दैवी सम्पद् विमोक्षाय निबन्धायासुरी मता"गीता ८क्षेदात्मकचिकित्साभेदे स्त्री शब्दच०।

आसुरस्व न० ६त०। "अयज्वनान्तु यद्द्रव्यमासुरस्वं तदुच्यते" इति मनूक्ते अयाज्ञिकधने।

आसुरायण पु० आसुरेरपत्यं युवा फक्। आसुरेर्युवगोत्रापत्ये स च शुक्लयजुःसम्प्रदाय प्रवर्त्तक "आसुरायणाच्च यास्कादासुरायणः" शत० ब्रा० "आसुरेरुपसंख्यानम्" वार्त्ति०उक्तेः स्त्रियां ष्फ षित्त्वात् ङीष्। आसुरायणी।

आसुरि पु० तत्त्वज्ञानोपदेशेन अस्यति संसारम् अस-उरच् असुरः कपिलस्तस्य छात्रः इञ्। साङ्ख्ययोगाचार्य्ये कपिलशिष्ये ऋषिभेदे। "एतत्पवित्रमग्र्यं मुनिरासुरयेऽनुकम्पया प्रददौ। आसुरिरपि पञ्चशिखाय तेन बहुधा कृतं तन्त्रम्" सा०का०। सएव प्रत्यहं तर्पणीयर्षिगणे पठितः। "सनकश्च सनन्दश्च तृतीयश्च सनातनः। कपिलश्चासुरिश्चैव वोढुः पञ्चशिखस्तथेति"तर्पणे स्मृतिः।

युवापत्ये तु फक् तस्य तौल्व० न लुक्। आसुरिः तत्पुत्रः आसुरायणः तत्पौत्रः स च यजुर्वेदसंप्रदायप्रवर्त्तकः आसुरायणशब्दे उदा०।

आसुरिवासिन् पु० आसुरौ तत्समीपे वसति णिनि। आसुरिमुनेरन्तेवासिनि प्राश्नीपुत्रे शुक्लयजुःसंप्रदाय प्रवर्त्तके ऋषिभेदे। "प्राश्नीपुत्रात् आसुरिवासिनः प्राश्नीपुत्रः" शत० ब्रा०। [२सम्यक्सेके च।

आसेक पु० आ+सिच–घञ्। जलादिना १वृक्षादेरीषत्सेचने

आसेक्य पु० आसेकमर्हति यत् आ+सिच-ण्यत् वा। "पित्रोस्तु तुल्यवीर्यत्वादासेक्यः पुरुषो भवेत्। स शुक्रं प्राश्य लभते ध्वजोन्नतिमसंशयम्" इति वैद्यकोक्ते नपुंसकभेदे। ध्वजोन्नतये तस्य जन्मोत्तरं शुक्रसेकयोग्यत्वात् तथात्वम्।

आसेचन त्रि० न सिच्यते तृप्यति मनोऽत्र आधारे ल्युट् असेचनः स्वार्थेऽण्। १यद्दर्शने मनो न तृप्यति तस्मिन् मन आनन्दविशेषहेतौ पदार्थे। स्वार्थे कन्। तत्रैव। "नयनयुगासेचनकम्" सा० द०। रायमुकुटस्तु असेचनइत्येवाह। आ+सिच-भावे ल्युट्। २सम्यक्सेके न०। "तस्य सर्पिरासेचनं कृत्वा" शत० ब्रा०। करणे ल्युट्। ३आसेचनसाधने पात्रे। "या पात्राणि पूष्ण आसेचनानि" ऋ० १,१६२,१३। ४तादृशे क्षुद्रपात्रे स्त्री ङीप्।

आसेदिवस् त्रि० आ+सद-क्वसु। १निकटागते २प्राप्ते च। स्त्रियां ङीप् वस्रोत्त्वम् इटोनिवृत्तिश्च। आसेदुषी।

आसेद्धृ त्रि० आ+सिध-तृच्। व्यवहारे राजाज्ञया प्रतिवादिनो गत्यादिरोधकर्त्तरि वादिनि स्त्रियां ङीप्। आसेधशब्दे उदा०।

आसेध पु० आ+सिध–भावे घञ्। व्यवहारे राजाज्ञया वादिना प्रतिवादिनः स्थानान्तरगत्याद्यवरोधे, तत्कालप्रकारभेदादिः मिता० नारदेनोक्तः। "वक्तव्येऽर्थे ह्यतिष्ठन्तमुत्क्रामंस्तु तद्वचः। आसेधयेद्विवादार्थी यावदाह्वानदर्शनम्। स्थानासेधः कालकृतः प्रवासात् कर्म्मणस्तथा। चतुर्विधःस्यादासेधो नासिद्धस्तं विलङ्घयेत्। आसेधकाल आसिद्धः आसेधं योऽतिवर्त्तते। स विनेयोऽन्यथा कुर्व्वन्नासेद्धा दण्डभाग् भवेत्। नदीसन्तारकान्तारदुर्द्देशोपप्लवादिषु। आसिद्धस्तं परासेधमुत्क्रामन्नापराध्नुयात्। निर्वेष्टुकामोरोगार्त्तो यियक्षुर्व्यसने स्थितः। अभियुक्तस्तथान्येन राजकार्य्योद्यतस्तथा। गवां प्रचारे गोपालाः शस्यावापे कृषीवलाः। शिल्पिनश्चापि तत्कालमायुधीयाश्च विग्रहे"। नासेद्धव्या इति शेषः

आसेवन न० सम्यक् सेवनम्। १सततसेवने २पौनःपुन्ये च। "नित्यवीप्सयोः" "निसस्तपतावनासेवने" पा०। "आसेवनं पौनःपुन्यम्" सि० कौ०।

आसेवा स्त्री आ+सेव–अ। १पौनःपुन्ये "पौनःपुन्यमासेवा" सि० कौ०। २सम्यक्सेवायाञ्च।

आसेवित त्रि० आ+सेव–क्त। १सम्यक्सेविते २पौनःपुन्येन सेविते च भावे क्त। ३आसेवायां न०। ततः इष्टा० इनि। आसेवितिन्। आसेवनकर्त्तरि त्रि० स्त्रियां ङीप्।

आस्कन्द पु० आ+स्कन्द–घञ्। १ उत्प्लवने २आक्रमणे ३संशोषणे ४तिरस्कारे घोटकानामास्कन्दिताख्ये ५गतिभेदे

आस्कन्दन न० आस्कन्द्यतेऽत्र आधारे ल्युट्। १युद्धे भावे ल्युट्। २तिरस्कारे ३आक्रमणे "चरणास्कन्दननामिताचलेन्द्रः" किरा०। ४अश्वगतिभेदे च।

आस्कन्दित आ+स्कन्द–स्वार्थे णिच्–क्त आस्कन्दोजातोऽस्य तारका० इतच् वा। १अश्वानां गतिभेदे स च पञ्चविधः तल्लक्षणमुक्तं हेमचन्द्रेण। "गतयः पञ्च धारास्यास्तुरङ्गाणां क्रमादिमाः। तत्र धौरितकं धौर्य्यं धोरणं धोरितञ्च तत्। बभ्रुकङ्कशिखिक्रोडगतिवद्वल्गितं पुनः। अग्रकायसमुल्लासात् कुञ्चितास्यं नतत्रिकम्। प्लुतं तु लङ्घनं पक्षिमृगयोरनुहारकम्। उत्तेजितं तेरितं स्यात् मध्यवेगेन या गतिः। उत्तेरितमुपकण्ठमास्कन्दितमित्यपि। चतुर्भिश्च पदैः कोपादिव उत्प्लुत्य या गतिः"। संज्ञायां स्वार्थे वा कन्। तत्रैव। तार० इतच्। २आस्कन्दनयुक्तमात्रे त्रि०।

आस्क्र त्रि० आ+क्रम-ड वेदे नि० सुट्। आक्रामके "आनो विश्वा आस्क्रा गमन्तु देवाः" ऋ० १,१८२,२। "आस्क्राः शत्रूणामाक्रमितारः" भाष्यम्।

आस्त त्रि० आ+अस+विक्षेपे क्त। सम्यक्क्षिप्ते।

आस्तर पु० आ+स्तॄ–कर्मणि अप्। १हस्तिपृष्ठस्थकम्बले (झुल) इति ख्याते। २विस्तरणीये कटादौ "वासो वल्कलमास्तरः किसलयः" शा० श०। भावे अप्। ३सुविस्तारे

आस्तरण न० आस्तीर्य्यते कर्म्मणि ल्युट्। १आस्तीर्य्यमाणे कटादौ "दिवास्तरणसंकीर्णे विस्तीर्णे गमनोत्तमे"। "दर्भास्तरणमास्तीर्य्य" भा० व० २५० अ०। २आस्तरण पद्याम् स्त्री ङीप्। भावे ल्युट्। ३विस्तारे। "निवेशनं पुनर्नवीकृत्य लेपनास्तरणोपस्तरणैः" आश्व० गृ०। आस्तरणे दीयते कार्य्यं वा व्युष्टा० अण्। ४आस्तरणे दीयमाने ५तत्र कार्य्ये च त्रि०।

आस्तरणिक त्रि॰ आस्तरणं प्रयोजनमस्य ठञ्। आस्तरणसाधने वस्त्रादौ। "अथास्तरणिकं सर्वं हृताङ्गं समवेशयन्" रामा॰। तस्येदम् इत्यत्वात् छ। आस्तरणीय आस्तरणसम्बन्धिनि त्रि॰।

आस्तायन त्रि॰ अस्तीत्यव्ययम् अस्ति+विद्यमानस्य सन्निकृष्टदेशादि पक्षा॰ फक्। विद्यमानसन्निकृष्टदेशादौ। [घञ्

आस्तार पु॰ आस्तीर्यते आ+स्तॄ—घञ्। १विस्तार्ये २विस्तारे

आस्तारपङ्क्ति स्त्री कर्म॰। वैदिके छन्दोभेदे सा च सर्व्वानु॰ कात्या॰ दर्शिता यथा "पञ्चमं पङ्क्तिः पञ्चपदा। अथ चतुष्पदाद्या विराट् दशका। अयुजौ जागतौ ततोऽष्टहत्यौ युजौ तद्विपरीतावाद्यौ चेत् प्रस्तारपङ्क्तिरन्त्यौ चेदास्तारपङ्क्तिराद्यन्त्यौ चेत् संस्तारपङ्क्तिर्मध्यमौ चेद्विष्टारपङ्क्तिः"।

आस्ताव पु॰ आस्तुवन्त्यत्र आ+स्तु+आधारे घञ्। यज्ञे स्तोतॄणां १स्तवनाधारे देशे। "ततोद्गातॄनास्तावे स्तोष्यमाणानुपोपविशेत्" छा॰उ॰। "उद्गातॄन् उद्गातृपुरुषान् आगत्य आस्तुवन्त्यस्मिन्निति आस्तावस्तस्मिन्नास्तावे" भा॰। "उदञ्चोगत्वाऽऽस्तावचात्वालशामित्रान् उदङ्मुखोनभोऽसंस्पृष्टः" द्राह्यायणः। "उदङ्मुखास्तिष्ठन्तः ततः आस्तावदेशं चात्वालं शामित्रं च स्तुत्वादिभिर्मन्त्रैर्यथाक्रममुपतिष्ठेरन्" ताण्ड्यब्रा॰ भा॰। "बहिर्वेद्यास्तावे वा स्थापयेयुः" आश्व॰ श्रौ॰। भावे घञ्। २सम्यक्स्तवे।

आस्तिक त्रि॰ अस्ति परलोक इति मतिर्यस्य ठक्। १परलोकास्तित्ववादिनि "आस्तीत्युक्त्वा गतो यस्मादास्तिकस्तेन कथ्यते" इति निरुक्तसंज्ञके जरत्कारुमुनिसुते २मुनिभेदे आस्तिकोत्पत्तिकथा आस्तीकशब्दे वक्ष्यते। "आस्तिकस्य मुनेर्माता भगिनी वासुकेस्तथा जरत्कारुमुनेः पत्नी मनसादेवि ते नमः" मनसाप्रणाममन्त्रः।

आस्तिकार्थद पु॰ आस्तिकायार्थं ददाति दा—क। जनमेजये राजनि शब्दच॰।

आस्तिक्य न॰ आस्तिकस्य भावः ष्यञ्। आस्तिकत्वे परलोकाद्युपगन्तृत्वे "माहात्म्यमपि चास्तिक्यं सत्यं शौचं दयार्जवम्। विद्वद्भिः कथ्यते लोके पुराणैः कविसत्तमैः। भा॰आ॰ १अ॰। "भावितैः करणैः पूर्व्वमास्तिक्याच्छ्रुतिदर्शनात्" भा॰व॰ ८५अ॰। "आस्तिक्यशुद्धमवतः प्रियधर्म्म धर्म्मम्" किरा॰।

आस्तीक पु॰ वासुकिभगिन्यां जरत्कारुनाम्न्यां जरत्कारुमुनेःपुत्रे मुनिभेदे तदुत्पत्तिकथा यथा।

"तत्र तां भैक्षवत्कन्यां प्रादात्तस्मै महात्मने। नागेन्द्रो वासुकिर्ब्रह्मन् स तां प्रत्यगृह्णत। अस्वनामेति वै मत्वा भरणे चाविचारिते। मोक्षभावे स्थितश्चापि द्वन्द्वभूतः परिग्रहे। ततो नाम स कन्यायाः पप्रच्छ भृगुनन्दन!। वासुकिं भरणं चास्या न कुर्य्यामित्युवाच ह। भा॰ आ॰ ४६अ॰। "सौतिरुवाच। वासुकिस्त्वब्रवीद्वाक्यं जरत्कारुमृषिं तदा। सनाम्नी तव कन्येयं स्वसा मे तपसाऽन्विता। भरिष्यामि च ते भार्य्यां प्रतीच्छेमां द्विजोत्तम। रक्षणञ्च करिष्येऽस्याः सर्वशक्त्या तपोधन!। त्वदर्थं रक्ष्यते चैषा मया मुनिवरोत्तम!। ऋषिरुवाच। न भरिष्येऽहमेतां वै एष वै समयः कृतः। अप्रियञ्च न कर्त्तव्यं कृते चैनां त्यजाम्यहम्। सौतिरुवाच। प्रतिश्रुते तु नागेन भरिष्ये भगिनीमिति। जरत्कारुस्तदा वेश्म भुजगस्य जगाम ह" इत्युपक्रम्य। "उत्सङ्गेऽस्याः शिरः कृत्वा सुष्वाप परिखिन्नवत्। तस्मिंश्च सुप्ते विप्रेन्द्रे सविताऽस्तमियाद्गिरिम्। अह्नः परिक्षये ब्रह्मंस्ततः साऽचिन्तयत्तदा। वासुकेर्भगिनी भीता धर्म्मलोपान्मनस्विनी। किन्नु मे सुकृतं भूयाद्भर्त्तुरुत्थापनं न वा। दुःखशीलो हि धर्म्मात्मा कथं नास्यापराध्नुयाम्। कोपो वा धर्म्मशीलस्य धर्म्मलोपोऽथवा पुनः। धर्म्मलोपो गरीयान्वै स्यादित्यत्राकरोन्मतिम्। उत्थापयिष्ये यद्येनं ध्रुवं कोपं करिष्यति। धर्म्मलोपो भवेदस्य सन्ध्याऽतिक्रमणे ध्रुवम्। इति निश्चित्य मनसा जरत्कारुर्भुजङ्गमा। तमृषिं दीप्ततपसं शयानमनलोपमम्। उवाचेदं वचः श्लक्ष्णं ततो मधुरभाषिणी। उत्तिष्ठ त्वं महाभाग! सूर्य्योऽस्तमुपगच्छति। सन्ध्यामुपास्स्व भगवन्नपः स्पृष्ट्वा यतव्रत!। प्रादुष्कृताग्निहोत्रोऽयं मुहूर्त्तो रम्यदारुणः। सन्ध्या प्रवर्त्तते चेयं पश्चिमायां दिशि प्रभो!। एवमुक्तः स भगवान् जरत्कारुर्महातपाः। भार्य्यां प्रस्फुरमाणौष्ठ इदं वचनमब्रवीत्। अवमानः प्रयुक्तोऽयं त्वया मम भुजङ्गमे!। समीपे ते न वत्स्यामि गमिष्यामि यथागतम्। शक्तिरस्ति न वामोरु! मयि सुप्ते विभावसोः। अस्तं गन्तुं यथाकालमिति मे हृदि वर्त्तते। न वाऽप्यवमतस्येह वासो रोचेत कस्यचित्। किं पुनर्धर्म्मशीलस्य मम वा मद्विधस्य वा। एवमुक्ता जरत्कारुर्भर्त्रा हृदयकम्पनम्। अब्रवीद्भगिनी तत्र वासुकेः सन्निवेशने। नावमानात्कृतवती तवाहं विप्रबोधनम्। धर्म्मलोपो न ते विप्र! स्यादित्येतन्मया कृतम्। उवाच भार्य्यामित्युक्तो जरत्कारुर्महातपाः।

ऋषिः कोपसमाविष्टस्त्यक्तुकामो भुजङ्गमाम् । न मे वाग-नृतं प्राह गमिष्येऽहं भुजङ्गमे ! । समयो ह्येष मे पूर्व्वं त्वया सह मिथः कृतः । सुखमस्म्युषितो भद्रे ! ब्रूयास्त्वं भ्रातरं शुभे ! । इतो मयि गते भीरु ! गतः स भगवानिति । त्वं चापि मयि निष्क्रान्ते न शोकं कर्त्तुमर्हसि । इत्युक्ता साऽनवद्याङ्गी प्रत्युवाच मुनिं तदा । जरत्कारुं जर-त्कारुश्चिन्ताशोकपरायणा । वाष्पगद्गदया वाचा मुखेन परिशुष्यता । कृताञ्जलिर्व्वरारोहा पर्य्यश्रुनयना ततः । धैर्य्यमालम्ब्य वामोरूर्हृदयेन प्रवेपता । न मामर्हसि धर्म्मज्ञां परित्यक्तुमनागसम् । धर्म्मे स्थितां स्थितो धर्म्मे सदा प्रियहिते रताम् । प्रदाने कारणं यच्च मम तुभ्यं द्विजोत्तम ! । तदलब्धवतीं मन्दां किं मां वक्ष्यति वासुकिः । मातृशापाभिभूतानां ज्ञातीनां मम सत्तम ! । अपत्यमी-प्सितं त्वत्तस्तच्च तावन्न दृश्यते । त्वत्तोह्यपत्यलाभेन ज्ञा-तीनां मे शिवं भवेत् । संप्रयोगो भवेन्नायं मम मोघ-स्त्वया द्विज ! । ज्ञातीनां हितमिच्छन्ती भगवंस्त्वां प्रसादये । इममव्यक्तरूपं मे गर्भमाधाय सत्तम ! । कथं त्यक्त्वा महात्मा सन् गन्तुमिच्छस्यनागसम् । एवमुक्तस्तु स मुनिर्भार्य्यां वचनमब्रवीत् । यदुक्तमनुरूपञ्च जरत्कारुं तपोधनः । अस्त्ययं सुभगे ! गर्भस्तव वैश्वानरोपमः । ऋषिः परमध-र्म्मात्मा वेदवेदाङ्गपारगः । एवमुक्त्वा स धर्म्मात्मा जरत्का-रुर्महान्नृपः । उग्राय तपसे भूयो जगाम कृतनिश्चयः” । “ततः प्रववृधे गर्भो महातेजा महाप्रभः । यथा सोमो द्विजश्रेष्ठ ! शुक्लपक्षोदितो दिवि । अथ काले तु सा ब्रह्मन् ! प्रजज्ञे भुजगस्वसा । कुमारं देवगर्भाभं पितृमातृभयाप-हम् । ववृधे स तु तत्रैव नागराजनिवेशने । वेदांश्चाधि-जगे साङ्गान् भार्गवाच्च्यवनात्मुनेः । चीर्णव्रतो बाल एव बुद्धिसत्त्वगुणान्वितः । नाम चास्याभवत् ख्यातं लोकेष्वा-स्तीक इत्युत । अस्तीत्युक्त्वा गतो यस्मात्पिता गर्भस्थमेव तम् । वनं तस्मादिदं तस्य नामास्तीकेति विश्रुतम्” । भा०आ० ४७अ० “यो जरत्कारुणा जातो जरत्कारौ महायशाः । आस्तीकः सर्पसत्रे वः पन्नगान् योऽभ्यरक्षत । तं स्मरन्तं महाभागा ! न मां हिंसितुमर्हथ । सर्पापसर्प भद्रं ते गच्छ सर्प ! महाविष ! । जनमेजयस्य यज्ञान्ते आस्तीकवचनं स्मर । आस्तीकस्य वचः श्रुत्वा यः सर्पो न निवर्त्तते । शतधा भिद्यते मूर्द्धि शिंशवृक्षफलं यथा” तत्रैव । “आस्तीकस्य कवेः साधोः शुश्रूषापरमात्मनः” भा० आ०१५अ० आस्तीकमधिकृत्य कृतो ग्रन्थः अण् । २आस्ती-कचरिताख्यापके भारतान्तर्गते अवान्तरपर्व्वभेदे । “पौष्यं पौलोममास्तीकमादिवंशावतारणम्” भा० आ०१अ० । “आयुष्मानिदमाख्यानमास्तीकं कथयामि ते” भा०आ० १५अ० । आस्तीके भोजयेद्राजन् ! दद्याच्चैव गुड़ौदनम्” भा०स्वर्गा०प०६अ० ।

[जरत्कारुमुनिपत्न्याम् ।

आस्तीकजननी स्त्री ६त० । मनसादेव्यां वासुकिभगिन्यां

आस्तीर्ण त्रि० आ+स्तॄ–क्त । विस्तीर्णे कृतप्रसारणे “आ-स्तीर्णतल्परचितावसथः क्षणेन” माघः । “आस्तीर्णाजि-नरत्नासु” रघुः ।

आस्तृत त्रि० आ+स्तृ–क्त । विस्तीर्णे

आस्तेय स्त्री अस्तीत्यव्ययं तत्र विद्यमाने भवः “दृतिकुक्षी-त्यादि०” पा० ढक् । विद्यमानपदार्थभवे ।

आस्त्र त्रि० अस्त्रस्येदम् अण् । अस्त्रसम्बन्धिनि । “त्वं त्यमिन्द्र-त्यमास्त्रबुध्नाय वेन्यम्” ऋ० १०,१७१,३ । “आस्त्रबु-ध्नाय अस्त्रस्त्रवन्धिसुणतुल्यमूलाय” भा० ।

आस्था स्त्री आ+स्था–अङ् । १आलम्बने, २अपेक्षायां, ३श्रद्धायां, ४स्थितौ, ५यत्ने “६आदरे च “अनास्थया सूनकरप्रसारिणीम्” नैष० । “स्त्री पुमानित्यनास्थैषा” “अनास्था बाह्यवस्तुषु” इति च कुमा० । “मर्त्येष्वा-स्थापराङ्मुखः” “पिण्डेष्वनास्था खलु भौतिकेषु” रघुः । “कास्थाभेकेऽस्मिन् तव राम ! रामे” भट्टिः । आधारे अङ् । ७सभायाम् आस्थाने ।

आस्थान न० आस्थीयतेऽत्र आ+स्था आधारे ल्युट् । १सभा-याम् “तदीयमास्थाननिकेतनाजिरम्” किरा० “राजा-नमास्थानमण्डपगतम्” काद० । २विश्रामस्थाने । आस्थानीत्यपि सभायाम् । टित्त्वात् ङीप् । आस्था नीधूर्त्तः सभाधूर्त्तः । भावे ल्युट् । ३आस्थायां ४श्रद्धायाञ्च न० ।

आस्थापन न० आ+स्था–णिच्–पुक् ल्युट् । १सम्यक्स्थापने । करणे ल्युट । २सुश्रुतोक्ते व्रणोपक्रमणीयवस्तिभेदे च । “द्विविधोवस्तिः नैरूहिकः स्नैहिकश्च । आस्थापनं निरूह इत्यनर्थान्तरम् । “सदोषनिर्हरणात् शरीररोग हरणाद्वा निरूहः वयःस्थापनादायुःस्थापनाद्वास्थापनम्”

आस्थापित त्रि० आ+स्था+णिच्–पुक् क्त । सम्यक् स्थापिते आचितादिपाठात् अस्यान्तोदात्तता न ।

आस्थायिका स्त्री आ+स्था-धात्वर्थनिर्द्देशे ण्वुल् स्त्रीत्वात् टापि अत इत्त्वम् । १आस्थाने आस्थितौ । “जनकोह वैदेह आसाञ्चक्रे श०उ०भाष्ये “आसाञ्चक्रे आस्थायिकां दत्त-

वानितित्युक्तम् कर्त्तरि ख्वुल्। आस्थापकः २आस्थान-कर्त्तरि त्रि०। स्त्रियां टाप् अत इत्त्वम्।

आस्थित त्रि० आ+स्था–क्त। १अवस्थाने २प्राप्ते ३आरूढे "एकं स्यन्दनमास्थितौ" रघुः। ३आश्रिते च।

आस्थिति आ+स्था–क्तिन्। १कृतास्थायां २तात्पर्य्येण वर्त्तने च।

आस्थेय त्रि०आ+स्था-कर्म्मणि यत्। अवलम्ब्ये। "नह्येषा बुद्धिरास्थेया" रामा०। "यत्नान्तरमास्थेयम्" काशिका।

आस्नात त्रि० आ+स्ना–कर्त्तरि क्त। कृतस्नाने कृतावगाहने

आस्नान त्रि० आ+स्ना-भावे ल्युट्। प्रक्षालनेन शुद्धौ। "आस्नाने तां निदध्मसि" अथ०१४,२,६५। [आस्नभवे।

आस्नेय त्रि० आस्ने भवः ढक् आसन्नादेशः अतोलोपः।

आस्पद न०आ+पद–घ सुट् च। १प्रतिष्ठायाम्,२पदे,३स्थाने, "ध्यानास्पदं भूतपतेर्विवेश" स्तनद्वयेऽस्मिन् हरिचन्दनास्पदे "सरागमस्या रशनागुणास्पदम्" इति च कुमा०। "तदास्पदं श्रीर्युवराजसंज्ञितम्"। रघुः "व्योम्नीव भ्रुकुटीच्छलेन वदने केतुश्चकारास्पदम्" माघः ४कृत्ये,५प्रभुत्वे च ६अवलम्बने ७विषये च। "निधनता सर्व्वापदामास्पदम्" किरा०। "तस्मात् केवलप्रकृतास्पदा तुल्ययोगितेति" माघस्य ५,२१व्या०मल्लि०। ८अवस्थाने उपगच्छास्पदञ्चैव" मनुः। ९लग्नावधिदशमस्थाने। "कर्म्मस्थानञ्च दशमं मेषूरणमास्पदं खञ्च" ज्योतिषम्।

आस्पन्दन न० आ+स्पन्द–ल्युट्। १ईषत्कम्पने ईषच्चलने

आस्पात्र न० आस्यरूपं पात्रं ष०। आस्यरूपे पात्रे "आस्पात्रं जुहूर्देवानामिति" शत०ब्रा०१,४,२,१२। "आस्यरूपं पात्रमास्पात्रम्" भा०।

आस्फाल पु० आ+स्फल–चाले णिच्–अच् स्फुल+घञ् स्फालादेशः वा। १चालने २हस्तिकर्णचालने हारा०

आस्फालन न० आ+स्फल–चाले–णिच्–ल्युट्। १ताड़ने २चालने च। "ऐरावतास्फालनकर्कशेन" कुमा०सुरद्विपास्फालनकर्कशाङ्गुलौ" "ऐरावतास्फालनविश्लथं यः" "आसां जलास्फालनतत्पराणाम्" रघुः। अनवरतधनुर्ज्यास्फालनेति" शकु०। "एलालतास्फालनलब्धगन्धः" माघः। ३आटोपे ४प्रागल्भ्ये च।

आस्फालित त्रि०आ+स्फल+णिच्-क्त। १चालिते २आघट्टिते ३ताड़िते च। "अजस्रमास्फालितवल्लकीगुणः" माघे पाठान्तरम्

आस्फुजित् पु०आस्फुलति आ+स्फुल–बा०डु तं जयति जि–क्विप्। शुक्राचार्य्ये। "शुक्रोभृगुर्भृगुसुतः सित आस्फुजिच्च" ज्यो०त०

आस्फोट पु० आ+स्फुट–णिच्–कर्त्तरि अच्। १अर्कवृक्षे शब्दरत्ना० २नवमल्लिकायां स्त्री। ३भुजादेर्वाहुशब्दे (ताल ठोका) ३संघर्षणजातशब्दमात्रे "लाङ्गूलास्फोटशब्दाच्च चालितः स महागिरिः भा०व० १२अ०।

आस्फोटक च० आ+स्फुट–णिच्–ण्वुल्। (आखरोट) १प्रसिद्धे पर्व्वतपीलुभेदे २बाहुशब्दकारके त्रि०।

आस्फोटन न० आ+स्फुट-णिच्-भावे ल्युट्। १प्रकाशने २बाह्वादेः शब्दकरणे "आस्फोटननिनादांश्च बालानां खेलतां तथा" रामा०। ३शूर्पादिना धान्यादेस्तुषादिनिरसने (आच्ड़ान) व्यापारे च। "कुञ्चनास्फोटनाध्मानवेपथुव्यधनैः" सुश्रु०।

आस्फोटनी स्त्री आस्फोट्यते विदार्य्यतेऽनया आ+स्फुट–णिच्–करणे ल्युट् स्त्रीत्वात् ङीप्। (तुरपिन) वेधनास्त्रे।

आस्फोटित न० आ+स्फुट-णिच्–भावे क्त। वाह्वादेः शब्दे २प्रकाशने च। कर्म्मणि क्त। विदलिते त्रि०।

आस्फोत पु० आ+स्फुट–अच् पृषो० टस्य तत्वम्। १अर्कवृक्षे २कोविदारवृक्षे, ३पलाशवृक्षे च "आस्फोतजातिकरवीरपत्रैः" सुश्रु०। स्वार्थे कन्। आस्फोतकोऽर्कवृक्षे।

आस्फोता स्त्री आ+स्फुट–अच् पृषो०। १अपराजितायां, सा च द्विविधा श्वेतपुष्पी नीलपुष्पी च तयोर्गुणपर्य्यायौ भावप्र० "आस्फोता गिरिकर्णी च विष्णुक्रान्ताऽपराजिता। अपराजिते कटुके शीते कण्ठ्ये सुदृष्टिके। कुष्ठमूत्रत्रिदोषामशोथज्वरविषापहे। कषाये कटुपाके च सुतिक्ते स्मृतिबुद्धिदे। २सारिवायाम् (हापरमाली) लताभेदे च।

आस्माक त्रि० अस्माकमिदम् अस्मद्+इदमर्थेऽण् अस्माकादेशः। अस्मत्सम्बन्धिनि। स्त्रियां ङीप्। "रामादितादात्म्याङ्गीकारे चास्माकीं सिद्धान्तशय्यामधिशय्य" सा० द०। [सम्बन्धिनि।

आस्माकीन त्रि०अस्माकमिदम् खञ् अस्माकादेशः। अस्मत्-

आस्य न० अस्यते ग्रासोऽत्र+अस–आधारे ण्यत्। १मुखे "तदास्यदास्येऽपि गतोऽधिकारिताम्" नैष०। "तं हि स्वयंभूः स्वादास्यात्" यस्यास्येन सदाश्नन्ति" "पाण्वास्योहि द्विजः स्मृतः" "नित्यमास्यं शुचि स्त्रीणाम्" इति च मनुः। २तन्मध्ये च। शसादौ तद्धितयाजादौ अस्य स्थाने वा आसन्नादेशः। तदादेशपक्षे आस्ने भवः आसन्यः यथा च अस्यैव आसन्नादेशस्थानिता तथासनशब्दे ८८६ पृष्ठे उक्ता। आस्ये भवः यति वा नासन्नादेशः यलोपः।

२मुखभवे त्रि० । "तुल्यास्यप्रयत्नम्" पा० आस्ये भवमास्यं ताल्वादिस्थानम्" सि०कौ० ।

आस्यन्दन आ+स्यन्द--भावे ल्युट् । ईषत्क्षरणे ।

आस्यन्धय त्रि० आस्यं धयति--धे--ख--मुम्--उप०स० । मुग्ध० । मुखामृतास्वादके मुखचुम्बके ।

आस्यपत्र न० आस्यमिव पत्रमस्य । १पद्मे शब्दचन्द्रिका ।

आस्यलाङ्गल पु० आस्यं लाङ्गलमिव भूमिविदारकं यस्य । शूकरे । [(दाड़ि) ।

आस्यलोमन् न० आस्यभवं लोम । पुरुषमुखजाते लोम्नि

आस्यहात्य त्रि० असिनाऽहत्याऽहननम् ततः अस्त्यर्थे विमुक्तादि० अण् । अनुशतिका० द्विपदवृद्धिः । खड्गेन हननशून्ये ।

आस्या स्त्री आस-भावे क्यप् । १स्थितौ, गतिराहित्ये । "आस्या वर्णकरी स्थौल्यसौकुमार्यकरी शुभा" सुश्रु० ।

आस्यासव पु० आस्यस्यासव इव । (लाल) इति ख्याताया लालायाम् ।

आस्र न० अस्रमेव स्वार्थेऽण् । रुधिरे । ततः सुखादि० अस्त्यर्थे इनि । आस्री रुधिरयुक्ते त्रि० स्त्रियां ङीप् ।

आस्रप पु० आस्रं रुधिरं पिबति पा--क उप०स० । १राक्षसे तद्देवताके २मूलनक्षत्रे च ।

आस्रव पु० आस्रवति मनोऽनेन करणे अप् ।१क्लेशे। कर्त्तरि अच् । २अर्हन्मतसिद्धे पदार्थभेदे । अर्हच्छब्दे ३८१पृष्ठे विवृतिः ।

आस्राव पु० आस्रवति रुधिरमस्मात् आ+स्रु-अपादाने घञ् । १क्षते "जातएव तवास्रावस्त्वन्तु मोहान्न बुध्यसे" भा०उ०५७अ० । भावे घञ् । २सम्यक्क्षरणे कर्त्तरि ण । सम्यक्क्षरणयुक्ते त्रि० । आस्रवति आ+स्रु-ण । मुखलालायाम्" "च्युतेरास्रावबत् विद्यात् निगिरन्नेव तत् शुचिः" आ०त०गौत० "आस्रावोलाला" रघु० ।

आस्राविन् त्रि० आ+स्रु--णिनि । मदादिक्षरणशीले । "महागजश्चास्रावी प्रभञ्जन् विविधान् द्रुमान्" भा०व०प०१३६ आस्रावयुक्ते च "दुष्टशोणितास्रावी दीर्घकालानुबन्धी चेति दुष्टव्रणलिङ्गानि" सुश्रु० ।

आस्वनित आ+स्वन--क्त पक्षे इट् । शब्दिते ।

आस्वाद पु० आ+स्वद--कर्म्मणि घञ् । १मधुरादिरसे २शृङ्गारादिरसे च । भावे घञ् । ३रसानुभवे । "मध्वापातोविषास्वादः, मनुः "न जायते तदास्वादो विना रत्यादिवासनाम् । "तदास्वादे विभावादेः परिच्छेदो न विद्यते" सा०द० "चूताङ्कुरास्वादकषायकण्ठः" कुमा० । आस्वादश्च माधुर्य्यादिरसानुभवहेतुव्यापारभेदः स च लोके चर्व्वणादिः शृङ्गारादिरसास्वादे अन्यविधएव व्यापारः यथाह सा०द० । "न जायते तदास्वादोविना रत्यादिवासनाम् । वासना चेदानीन्तनी प्राक्तनी च रसास्वादहेतुः तत्र यदि आद्या न स्यात् श्रोत्रियजरन्मीमांसकादीनामपि सा स्यात् यदि द्वितीया न स्यात् रागिणामपि केषाञ्चिद्रसोद्बोधोन दृश्यते तन्न स्यात् उक्तञ्च धर्म्मदत्तेन 'सवासनानां सभ्यानां रसस्यास्वादनं भवेत् । निर्व्वासनास्तु रङ्गान्तःकाष्ठकुड्याश्मसन्निभाः" इति । ननु कथं रामादिरत्याद्युद्बोधकारणैः सीतादिभिः सामाजिकरत्याद्युद्बोधइत्युच्यते । व्यापारोऽस्ति विभावादेर्नाम्ना साधारणीकृतिः । तत्प्रभावेन यस्यासन् पाथोधिप्लवनादयः । सभ्यानां तदभेदेन स्वात्मानं प्रतिपद्यते । ननु कथं मनुष्यमात्रस्य समुद्रलङ्घनादावुत्साहोद्बोधइत्युच्यते । उत्साहादिसमुद्बोधः साधारण्याभिमानतः । नृणामपि समुद्रादिलङ्घनादौ न दुष्यति । रत्यादयोऽपि साधारण्येन प्रतीयन्ते इत्याह । साधारण्येन रत्यादिरपि तद्वत् प्रतीयते । रत्यादेरपि स्वात्मगतत्वेन प्रतीतौ सभ्यानां पीड़ातङ्कादिर्भवेत् परगतत्वेन त्वरस्यापातः । विभावादयोऽपि प्रथमतः साधारण्येन प्रतीयन्ते इत्याह । परस्य न परस्येति ममेति न ममेति च । तदास्वादे विभावादेः परिच्छेदोन विद्यते । ननु तथापि कथमेवमलौकिकत्वमेतेषां विभावादीनामित्युच्यते । विभावनादिव्यापारमलौकिकमुपेयुषाम् । अलौकिकत्वमेतेषां भूषणं न तु दूषणम् । आदिशब्दादनुभावनसञ्चारणे । तत्र विभावनं रत्यादेर्विशेषेण आस्वादाङ्कुरणयोग्यतानयनम् । अनुभावनमेवंभूतस्य रत्यादेः समनन्तरमेव रसादिरूपतया भावनम् । सञ्चारणं तथाभूतस्यैतस्य सम्यक्चारणम् । विभावादीनां यथासंख्यं कारणकार्य्यसहकारित्वे कथं त्रयाणामपि रसोद्बोधे कारणत्वमित्युच्यते कारणकार्य्यसञ्चारिरूपा अपि हि लोकतः । रसोद्बोधे विभावाद्याः कारणान्येव ते मताः । ननु तर्हि कथं रसास्वादे तेषामेकः प्रतिभासइत्युच्यते । प्रतीयमानः प्रथमं प्रत्येकं हेतुरुच्यते । ततः संवलितः सर्व्वोविभावादिः सचेतसाम् । प्रपानकरसन्यायाच्चर्व्व्यमाणोरसोभवेत् । यथा खण्डमरिचादीनां संमेलनादपूर्व्व इव कश्चिदास्वादः प्रपानकरसे संजायते विभावादिसंमेलनादिहापि तथेत्यर्थः" "ज्ञातास्वादो विवृतजघनां को विहातुं समर्थः" मेघदू० ल्युट् । आस्वादनमप्यत्र न० उक्त सा०द०वाक्ये उदा० ।

आस्वादक त्रि॰ आ+स्वद-ण्वुल्। आस्वादनकर्त्तरि "दर्शयन् मर्त्तकोनैव रसस्यास्वादको भवेत्" सा॰द॰।

आस्वादित त्रि॰ आ+स्वद-णिच्-क्त। कृतास्वादे भक्षिते पदार्थे "आस्वादितार्द्रक्रमुकाः समुद्रात्" माघः।

आस्वाद्य त्रि॰ आ+स्वद-णिच्-यत्। १आस्वादयोग्ये पदार्थे "घ्राणेन न तदाघ्रेयं नास्वाद्यञ्चैव जिह्वया" भा॰आ॰प॰ ३॰अ॰। "आस्वाद्यतोयाः प्रभवन्ति नद्यः समुद्रमासाद्य भवन्त्यपेयाः" हितो॰। आ+स्वद+णिच्-ल्यप्। २भक्षयित्वेत्यर्थे अव्य॰।

आस्वान्त त्रि॰ आ+स्वन-इडभावे दीर्घः। शब्दिते।

आह अव्य॰ब्रू अच् णि॰ आहादेशः उवाचेत्यर्थे तिपोणलि ब्रुवादेशस्तु वर्त्तमानकथनवाची एतस्माद्भिन्नः तच्च क्रियापदम् अयन्तु क्रियाप्रतिरूपकमव्ययम्। "अथाह वर्णी विदितो महेश्वरः" कुमा॰।

आहक पु॰ आहन्ति आ+हन-ड संज्ञायां कन्। वैद्यकोक्ते ज्वरभेदे (नासाज्वर) "तनुना रक्तशोथेन युक्ता नासापुटान्तरे। गात्रशूलज्वरकरः श्लेष्मणा ह्याहकोज्वरः" वै॰।

आहत त्रि॰ आ+हन-क्त। १ताड़िते, "आह्लादिकह्लारसमीरणाहते" "नयनयुगनिमोलनत्तावदेवाहतोऽसौ" माघः। २अभ्याहतोऽहमित्यादौ मृषार्थके वाक्ये न॰। ३ढक्कायाम् पु॰। "ईषद्धौतं नवं शुभ्रं सदशं यन्न धारितम्। आहतं तद्विजानीयात् सर्व्वकर्म्मसु पावनम्" वर्णितोक्तलक्षणे ४वस्त्रे न॰। "आहतेन वसनेन तां परिदध्यात्" गोभि॰। "आच्छादनं तु योदद्यादाहतं चाङ्गकर्म्मणि" वायु॰पु॰। "परिणाम्याहते शुक्ले वाससी हेमकुण्डले" छन्दो॰ ५पुराणवस्त्रे न॰ तस्य उपभोगेन मर्द्दितमायत्वात्तथात्वम्। ६आघातप्राप्ते ७मर्द्दिते त्रि॰ "पादाहतं यदुत्थाय मूर्द्धानमधिरोहति" माघः। ८आघूर्णिते। ९अभ्यस्ते १०गुणिते च त्रि॰ "सूर्य्याब्धिसंख्यया द्वित्रिसागरैरयुताहतैः" सू॰सि॰।

आहतलक्षण पु॰ आहतमभ्यस्तं लक्षणं यस्य। गुणैः प्रसिद्धे अमरः प्रसिद्धगुणानां हि सर्व्वैर्ज्ञातत्वेन परिचिततयाभ्यस्तगुणत्वात् तथात्वम्।

आहति स्त्री आ+हन-क्तिन्। शब्दहेतुसंयोगभेदे १आघाते २ताड़ने "प्रभातवाताहतिकम्पिताकृतिः" भट्टिः ३आगमने अत्र श्लोके पक्षे आहतिरागतिरित्यर्थः ४गुणने "अंशाहतिञ्छेदवधेन भक्ता" लीला॰। ५मर्द्दने च।

आहनन आ+हन-करणे ल्युट्। १ताडनसाधने दण्डादौ तत्र भवः यत्। आहनन्यः। आहननदण्डादिभवे "नमो दुन्दुभ्याय चाहनन्याय च" यजु॰ १६,३५। "आहन्यते वाद्यतेऽनेनाहननं वाद्यसाधनं दण्डादि तत्र भवस्तस्मै" वेददी॰। भावे ल्युट्। २आहतिशब्दार्थे।

आहनस् त्रि॰ आ+हन-असुन्। १आहननीये २निष्पीड्ये सोमादौ। "तदाहना अभवत् पिप्युषी" ऋ॰२,२३,१। आहनाः आहननीयः सोमादिः" भा॰ आहनसे साधु यत्। "आहनस्यं तत्साधने त्रि॰। "आहनस्याद्वै रेतः सिच्यते" ऐत॰ब्रा॰।

आहर त्रि॰ आहरति आ+हृ-अच्। सञ्चयकारके "वनान्तरादुपावृत्तैः समित्कुशफलाहरैः" रघुः। टचि तु कर्म्मोपपदएव साधुरिति भेदः।

आहरकरटा स्त्री आहर करट! इत्युच्यते यस्यां क्रियायां मयूर॰। करटं प्रति आहरणार्थायां निदेशक्रियायाम्

आहरचेटा स्त्री अहर चेट! इत्युच्यते यस्यां क्रियायाम् मयू॰। चेटं प्रति आहरणार्थनिदेशक्रियायाम्।

आहरण न॰ आ+हृ-भावे ल्युट्। स्थानात् स्थानान्तरप्रापणे १आनयने। "स्तदाहरणसंघट्टौ प्रतिष्ठाह्वानमेवच"। देवीपु॰ "करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरम्" सां॰का॰ "समिदाहरणाय प्रस्थिता वयम्" शकु॰ २आयोजने अनुष्ठाने च "अश्वमेधस्य कौरव्य! चकाराहरणे मतिम्" भा॰ आश्व॰७१अ॰। कर्म्मणि ल्युट्। ३आह्रियमाणे पदार्थे ४विवाहादौ उपढौकनद्रव्ये "सत्त्वानुरूपाहरणीकृतश्रीः" रघुः। [यनीये ३उपढौकनीये च।

आहरणीय त्रि॰ आ+हृ-अनीयर्। १आयोजनीये २आन-

आहरनिवपा स्त्री आहर निवप इत्युच्यते यस्यां क्रियायाम् मयू॰। आहरणनिवापार्थनिदेशक्रियायाम्।

आहरनिष्किरा स्त्री आहर निष्किर इत्युच्यते यस्यां क्रियायाम् मयू॰। आहरणनिष्किरणनियोगक्रियायाम्। एवमाहरविताना आहरवसना आहरसेना इत्यादयोऽपि मयू॰ पठिताः तत्तत्कर्म्मार्थनियोगक्रियायाम्।

आहर्त्तृ त्रि॰ आ+हृ-तृच् स्त्रियां ङीप् १अर्ज्जके। "आहर्त्ता शोधयेत् भुक्तिमागमञ्चापि संसदि" इह॰ २आयोजके "आहर्त्ता तस्य सत्रस्य त्वदन्योऽस्ति नराधिप!" भा॰आ॰ ५अ॰ ३आनेतरि "आहर्त्ता सर्वरत्नानां सर्वेषां न सुखावहः" भा॰व॰१४अ॰। ४अनुष्ठातरि "आहर्त्ता क्रतूनाम्" काद॰ शीलार्थे तृणि तु कर्म्मणि न षष्ठी। "आत्मनोवधमाहर्त्ता क्वासौ विहगतस्कर" विक्रमो॰।

आहव न० आहूयन्तेऽरयोऽत्र आ+ह्वे—अप् संप्रसारणे गुणः। १युद्धे। "एवं विधेनाहवचेष्टितेन" रघुः "प्राविशन्नाहवरङ्गा आह्वानमुपलिप्सवः" भट्टिः "न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे" गीता। "उद्यतैराहवे शस्त्रैः क्षत्रधर्म्महतस्य च" "डिम्बाहवहतानाञ्च विद्युता पार्थिवेन च" इति च मनुः। आहूयतेऽत्र आ+हु—आधारे अप्। २यज्ञे "तत्र नाभवदसौ महाहवे" माघः 'आहवोयागः' मल्लि०

आहवन न० आहूयतेऽस्मिन् आधारे ल्युट्। १यज्ञे "इष्टमाहवनमग्रजन्मनाम्" माघः। भावे ल्युट्। २समन्ताद्धवने च "त्वे अग्ने आहवनानि भूरि" ऋ०७,१,१७।

आहवनीय पु० आहूयते १प्रणीयते प्रक्षिप्यते वा हविरत्र आ+हु—कर्म्मणि आधारे वा० अनीयर् आहवनमर्हति छ वा। १अग्निभेदे। तदुद्धरणप्रकारः आश्व०श्रौ० उक्तः। "उत्सर्गेऽपराह्णे गार्हपत्यं प्रज्वाल्य दक्षिणाग्निमानीय विट्कुला द्वित्तवतो वा वैकयोनय इत्येके भ्रियमाणं वा प्रज्वाल्याऽरणीमन्तं वा मथित्वा गार्हपत्यादाहवनीयमुद्धरेत्" सू० दिवाशेषचतुर्थयामे गार्हपत्यं प्रादुष्कृत्य दक्षिणाग्निं प्रज्वाल्य च वैश्यगृहात् द्रव्यवतोऽन्यस्य गृहात् गार्हपत्याद्वा आनयेत्। तथा च अग्निमन्थनादिनाऽन्यतमप्रकारेण दक्षिणाग्निं साधयित्वा गार्हपत्यात् ज्वलन्तमग्निमाहवनीयार्थमुद्धरेत् पात्रान्तरेण पृथक् कुर्य्यादिति तदर्थः। तत्र मन्त्रादिकविनियोग उत्तरसूत्रादावुक्तः। "आहवनीये वैश्वानरं द्वादशकपालमधिश्रयति" तैत्ति०। "यस्य गार्हपत्याहवनीयौ मिथः संसृज्याताम्" ऐत०ब्रा०। "पिता वै गार्हपत्योऽग्निर्म्माताग्निर्दक्षिणः स्मृतः। गुरुराहवनीयस्तु साग्नित्रेता गरीयसी" मनुः। कर्मणि अनीयर्। २सम्यग् होतव्ये हविरादौ त्रि०।

आहार पु० आ+हृ—घञ्। १आहरणे। उपसर्गयोगात् २भोजने "निराहारौ यताहारौ तन्मनस्कौ समाहितौ" देवीमा० आहारविधिश्च सुश्रुते उक्तः यथा "अथाहारविधिं वत्स! विस्तरेणाखिलं शृणु। आप्तान्वितमसंकीर्णं शुचि कार्य्यं महानसम्। तत्राप्तैर्गुणसम्पन्नमन्नं भक्ष्यं सुसंस्कृतम्। शुचौ देशे सुसंगुप्तं समुपस्थापयेद्भिषक्॥ विषघ्नैरगदैः स्पृष्टं प्रोक्षितं व्यजनोदकैः। सिद्धैर्मन्त्रैर्हतविषं सिद्धमन्नं निवेदयेत्। वक्ष्याम्यतःपरं कृत्स्नमाहारस्योपकल्पनम्। घृतं कार्ष्णायसे देयं पेया देया तु राजते। फलानि सर्वभक्ष्यांश्च प्रदद्याद्वै दलेषु च। परिशुष्कप्रदिग्धानि सौवर्णेषु प्रकल्पयेत्। प्रद्रवाणि रसांश्चैव राजतेषूपहारयेत्। कट्वराणि खडांश्चैव सर्व्वान् शैलेषु दापयेत्। दद्यात्ताम्रमये पात्रे सुशीतं सुशृतं पयः। पानीयं पानकं मद्यं मृण्मयेषु प्रदापयेत्। काचस्फटिकपात्रेषु शीतलेषु शुभेषु च। दद्याद्वैदूर्य्यपात्रेषु रागखाण्डवशर्कराः। पुरस्ताद्विमले पात्रे सुविस्तीर्णे मनोरमे। सूदः सूपौदनं दद्यात् प्रदेहांश्च सुसंस्कृतान्। फलानि सर्व्वभक्ष्यांश्च परिशुष्काणि यानि च। तानि दक्षिणपार्श्वे तु भुञ्जानस्योपकल्पयेत्। प्रद्रवाणि रसांश्चैव पानीयं पानकं पयः। खडान् यूषांश्च पेयांश्च सव्ये पार्श्वे प्रदापयेत्। सर्व्वान् गुडविकारांश्च रागखाण्डवशर्कराः। पुरस्तात् स्थापयेत्प्राज्ञो द्वयोरपि च मध्यतः। एवं विज्ञाय मतिमान् भोजनस्योपकल्पनाम्। भोक्तारं विजने रम्ये निःसम्बाधे शुभे शुचौ। सुगन्धिपुष्परचिते समे देशेऽथ भोजयेत्। विशिष्टमिष्टसंस्कारैः पथ्यैरिष्टैरसादिभिः। मनोज्ञं शुचि नात्युष्णं प्रत्यग्रमशनं हितम्। पूर्व्वं मधुरमश्नीयान्मध्येऽम्ललवणौ रसौ। पश्चाच्छेषान् रसान् वैद्यो भोजनेष्ववचारयेत्। आदौ फलानि भुञ्जीत दाडिमादीनि बुद्धिमान्। ततः पेयांस्ततो भोज्यान् भक्ष्यांश्चित्रांस्ततः परम्। घनम्पूर्व्वं समश्नीयात् केचिदाहुर्विपर्ययम्। आदावन्ते च मध्ये च भोजनस्य तु शस्यते। निरत्ययं दोषहरं फलेष्वामलकं नृणाम्। मृणालविसशालूककन्देक्षुप्रभृतीनि च। पूर्व्वं योज्यानि भिषजा नतु भुक्ते कथञ्चन। सुखमुच्चैः समासीनः समदेहोऽन्नतत्परः। काले सात्म्यं लघु स्निग्धं क्षिप्रमुष्णं द्रवोत्तरम्। बुभुक्षितोऽन्नमश्नीयान्मात्रावद्विदितागमः। काले भुक्तं प्रीणयति सात्म्यमन्नं न बाधते। लघु शीघ्रं व्रजेत्पाकं स्निग्धोष्णं बलवर्द्धनम्। क्षिप्रं भुक्तं समं पाकं यात्यदोषं द्रवोत्तरम्। सुखं जीर्य्यति मात्रावद्धातुसाम्यं करोति च। अतीवायतयामास्तु क्षपा येषु ऋतुषु स्मृताः। तेषु तत्प्रत्यनीकाढ्यं भुञ्जीत प्रातरेव तु। येषु चापि भवेयुश्च दिवसा भृशमायताः। तेषु तत्कालविहितमपराह्णे प्रशस्यते। रजन्यो दिवसाश्चैव येषु चापि समाः स्मृताः। कृत्वा सममहोरात्रं तेषु भुञ्जीत भोजनम्। नाप्राप्तातीतकालं वा हीनाधिकमथापि वा। अप्राप्तकाले भुञ्जानः शरीरे ह्यलघौ नरः। तांस्तान् व्याधीनवाप्नोति मरणं वा नियच्छति। अतीतकाले भुञ्जानो वायुनोपहतेऽनले। कृच्छ्राद्विपच्यते भुक्तं द्वितीयञ्च न काङ्क्षति। हीनमात्रमसन्तोषं करोति च बलक्षयम्। आलस्यगौरवाटोपसादांश्च कुरुतेऽ-

'धिकम् । तस्मात्तु संस्कृतं युक्त्या दोषैरेतैर्विवर्जितम् । यथोक्तगुणसम्पन्नमुपसेवेत भोजनम् । विभज्य कालदोषादीन् कालयोरुभयोरपि । अचोक्षं (अपरिष्कृतम्) दुष्टमुच्छिष्टं पाषाणतृणलोष्टवत् । द्विष्टं व्युषितमस्वादु पूति चान्नं विवर्जयेत् । चिरसिद्धं स्थिरं शीतमन्नमुष्णीकृतं पुनः । अशान्तमुपदग्धञ्च तथा स्वादु न लक्ष्यते । यद्यत् स्वादुतरं तत्र विदध्यादुत्तरोत्तरम् । प्रक्षालयेदद्भिरास्यं भुञ्जानस्य मुहुर्मुहुः । विशुद्धे रसने तस्मै रोचतेऽन्नमपूर्ववत् । स्वादुना तस्य रसनं प्रथमेनापि तर्पितम् । न तथा स्वादयेदन्यत्तस्मात्प्रक्षाल्यमन्तरा । सौमनस्यं बलं पुष्टिमुत्साहं हर्षणं सुखम् । स्वादु सञ्जनयत्यन्नमस्वादु च विपर्य्ययम् । भुक्त्वा च यत्प्रार्थयते भूयस्तत् स्वादु भोजनम् । अपिबंश्चोदकं युक्त्या भुञ्जानश्चान्तरा पिबेत् । दन्तान्तरगतं चान्नं शोधनेनाहरेच्छनैः । कुर्य्यादनाहृतं तद्धि मुखस्यानिष्टगन्धताम् । जीर्णेऽन्ने वर्द्धते वायुर्विदग्धे पित्तमेव तु । भुक्तमात्रे कफश्चापि तस्माद्भुक्ते हरेत्कफम् । धूमेनापोह्य हृद्यैर्वा कषायकटुतिक्तकैः । पूगकक्कोलकर्पूरलवङ्गसुमनःफलैः । कटुतिक्तकषायैर्वा मुखवैशद्यकारकैः । ताम्बूलपत्रसहितैः सुगन्धैर्वा विचक्षणः । भुक्त्वा राजवदासीत यावदन्नक्लमो गतः । ततः पदशतं गत्वा वामपार्श्वेन संविशेत् । शब्दरूपरसस्पर्शान् गन्धांश्च मनसः प्रियान् । भुक्तवानुपसेवेत तेनान्नं साधु तिष्ठति । शब्दरूपरसस्पर्शगन्धाश्चापि जुगुप्सिताः । अशुच्यन्नं तथाभुक्तमतिहास्यञ्च वामयेत् । शयनं चासनं वापि नेच्छेद्वापि द्रवोत्तरम् । नाग्न्यातपौ न प्लवनं न यानं नापि वाहनम् । नचैकरससेवायां प्रसज्येत कदाचन । शाकावरान्नभूयिष्ठमम्लञ्च न समाचरेत् । एकैकशः समस्तान् वा नाप्यश्नीयाद्रसान् सदा । प्राग्भुक्ते त्वविविक्तेऽग्नौ द्विरन्नं न समाचरेत् । पूर्व्वभुक्ते विदग्धेऽन्ने भुञ्जानो हन्ति पावकम् । मात्रागुरुं परिहरेदाहारं द्रव्यतश्च यः । पिष्टान्नं नैव भुञ्जीत मात्रया वा बुभुक्षितः । द्विगुणञ्च पिबेत्तोयं सुखं सम्यक् प्रजीर्य्यति । पेयलेह्याद्यभक्ष्याणां गुरु विद्याद्यथोत्तरम् । गुरूणामर्द्धसौहित्यं लघूनां तृप्तिरिष्यते । द्रवोत्तरो द्रवश्चापि न मात्रागुरुरिष्यते । द्रवाढ्यमपि शुष्कन्तु सम्यगेवोपपद्यते । विशुष्कमन्नमभ्यस्तं न पाकं साधु गच्छति । पिण्डीकृतमसंक्लिन्नं विदाहमुपगच्छति । स्रोतस्यन्नवहे पित्तं पक्तौ वा यस्य तिष्ठति । विदाहि भुक्तमन्यद्वा तस्याप्यन्नं विदह्यते । शुष्कं विरुद्धं विष्टम्भि वह्निव्यापदमावहेत् । आमं विदग्धं विष्टब्धं कफपित्तानिलैस्त्रिभिः । अजीर्णं केचिदिच्छन्ति चतुर्थं रसशेषतः । अत्यम्बुपानाद्विषमाशनाद्वा सन्धारणात्स्वप्नविपर्य्ययाच्च । कालेऽपि सात्म्यं लघु चापि भुक्तमन्नं न पाकं भजते नरस्य । ईर्ष्याभयक्रोधपरिक्षतेन लुब्धेन रुग्दैन्यनिपीड़ितेन । प्रद्वेषयुक्तेन च सेव्यमानमन्नं न सम्यक् परिणाममेति । माधुर्य्यमन्नं गतमामसंज्ञं विदग्धसंज्ञं गतमम्लभावम् । किञ्चिद्विपक्वं भृशतोदशूलं विष्टब्धमाबद्धविरुद्धवातम् । उद्गारशुद्धावपि भक्तकाङ्क्षा न जायते हृद्गुरुता च यस्य । रसावशेषेण तु सप्रसेकं चतुर्थमेतत् प्रवदन्त्यजीर्णम् । मूर्च्छाप्रलापो वमथुः प्रसेकः सदनं भ्रमः । उपद्रवा भवन्त्येते मरणं चाप्यजीर्णतः । तत्रामे लङ्घनं कार्य्यं विदग्धे वमनं हितम् । विष्टब्धे स्वेदनं पथ्यं रसशेषे शयीत च । वामयेदाशु तं तस्मादुष्णेन लवणाम्बुना । कार्य्यं चानशनं तावद्यावन्न प्रकृतिं भजेत् । लघुकायमतश्चैनं लङ्घनैः समुपाचरेत् । यावन्न प्रकृतिस्थः स्याद्दोषतः प्राणतस्तथा । हिताहितोपसंयुक्तमन्नं समशनं स्मृतम् । बहु स्तोकमकाले वा विज्ञेयं विषमाशनम् । अजीर्णे भुज्यते यत्तु तदध्यशनमुच्यते । त्रयमेतन्निहन्त्याशु बहून् व्याधीन् करोति च । अन्नं विदग्धं हि नरस्य शीघ्रं शीताम्बुना वै परिपाकमेति । तद्ध्यस्य शैत्येन निहन्ति पित्तमाक्लेदिभावाच्च नयत्यधस्तात् । विदह्यते यस्य तु भुक्तमात्रे दह्येत हृत्कण्ठगलञ्च यस्य । द्राक्षाभयां माक्षिकसम्प्रयुक्तां लीढ्वाभयां वा स सुखं लभेत । भवेदजीर्णं प्रति यस्य शङ्का स्निग्धस्य जन्तोर्बलिनोऽन्नकाले । प्रातः स शुण्ठीमभयामशङ्को भुञ्जीत सम्प्राश्य हितं हितार्थी । स्वल्पं यदा दोषविबद्धमामं लीनं न तेजःपथमावृणोति । भवत्यजीर्णेऽपि तदा बुभुक्षा सा मन्दबुद्धिं विषवन्निहन्ति" । "पञ्चभूतात्मके देहे आहारः पाञ्चभौतिकः । विपक्वः पञ्चधा सम्यग्गुणान् स्वानभिवर्द्धयेत् । अविदग्धः कफं, पित्तं विदग्धः, पवनं पुनः । सम्यग्विपक्वो निःसार आहारः परिबृंहयेत् । विण्मूत्रमाहारमलः सारः प्रागीरितो रसः । स तु व्यानेन विक्षिप्तः सर्व्वान् धातून् प्रतर्पयेत् । कफः पित्तं मलः शेषः स्वेदः स्यान्नखरोम च । नेत्रविट्त्वक्षु च स्नेहो धातूनां क्रमशो मलाः । दिवा विबुद्धे हृदये जाग्रतः पुण्डरीकवत् । अन्नमक्लिन्नधातुत्वादजीर्णेऽपि हितं निशि । हृदि सम्मीलिते रात्रौ प्रसुप्तस्य विशेषतः । क्लिन्नविस्रस्तधातुत्वादजी-

र्यं न हित दिवा" भाव०प्र० भोजनकालदेशपात्रादिभेददर्शनपूर्व्वमेतद्व्याख्या प्रसङ्गात् कृता यथा। "आहारं पचति शिखी दोषानाहारः पचति। दोषक्षये धातून् पचति पचति च धातुक्षये प्राणान्। आहारः प्राणिनां सद्योबलकृद्देहधारणः। स्मृत्यायुःशक्तिवर्णौजःसत्वशोभाविवर्द्धनः। यथोक्तगुणसम्पन्नमुपसेवेत भोजनम्। विचार्य्य देशकालादीन् कालयोरुभयोरपि"। उभयोःकालयोः प्रातः सायं च। तथा च "सायंप्रातर्मनुष्याणामशनं श्रुतिबोधितम्" नान्तरा भोजनं कुर्य्यादग्निहोत्रसमोविधिः"। प्रातः प्रथमयामादुपरि द्वितीययामादर्व्वाक् तथा च "याममध्ये न भोक्तव्यं यामयुग्मं न लङ्घयेत्। याममध्ये रसोत्पत्तिर्यामयुग्माद्बलक्षयः" अन्यच्च "क्षुत्सम्भवति पक्वेषु रसदोषमलेषु च। काले वा यदि वाऽकाले सोऽन्नकाल उदाहृतः"। रसादौ पाकस्थानमाह "उद्गारशुद्धिरुत्साहो वेगोत्सर्गौ यथोचितः। लघुता क्षुत्पिपासा च यदा कालः स भोजने"। स्थानमाह "आहारन्तु नरः कुर्य्यान्निर्हारमपि सर्व्वदा। निर्जने लक्ष्म्युपेतः स्यात्प्रकाशे हीयते श्रिया। निर्हारो मलमूत्रोत्सर्गः। अन्यच्च "आहारनिर्हारविहारयोगाः सदैव सद्भिर्विजने विधेयाः" इति। भाजनमाह "दोषहृद्दृष्टिदं पथ्यं हैमं भोजनभाजनम्। रौप्यं भवति चाक्षुष्यं पित्तहृत्कफवातकृत्। कांस्यं बुद्धिप्रदं रुच्यं रक्तपित्तप्रसादनम्। पैत्तलं वातकृद्रूक्षमुष्णं क्रिमिकफप्रणुत्। आयसे कान्तपात्रे च भोजनं सिद्धिकारकम्। शोथपाण्डुहरं बल्यं कामलापहमुत्तमे। शैलजे मृण्मये पात्रे भोजनं श्रीनिवारणम्। दारुजे विशेषेण रुचिदं श्लेष्मकारि च। पात्रं पत्रमयं रुच्यं दीपनं विषपापनुत्। जलपात्रं तु प्रागुक्तं तदभावे मृदोहितम्। पवित्रं शीतलं पात्रं घटितं स्फटिकेन यत्। काचेन रचितं तद्वत्तथा वैदूर्य्यसंभवम्। (प्रागुक्तं सुश्रुते सौवर्णादुक्तं तच्चाम्बुशब्दे २२० पृष्ठे" दर्शितम्)। "भोजनाग्रे सदा पथ्यं लवणार्द्रकभक्षणम्। अग्निसन्दीपनं रुच्यं जिह्वाकण्ठविशोधनम्" लवणस्य पित्तजनकत्वादार्द्रकस्य कटुत्वेन पित्तलत्वात् बुभुक्षितस्य वृद्धपित्तस्य कथं प्रथमं लवणार्द्रकभक्षणमुचितम् उच्यते "लवणं सैन्धवं ज्ञेयं चन्दनं रक्तचन्दनमिति' वचनाल्लवणमत्र सैन्धवं तच्च त्रिदोषघ्नम् यत आह गुणग्रन्थे [illegible] "सैन्धवं लवणं स्वादु दीपनं पाचनं लघु। स्निग्धं रुच्यं हिमं वृष्यं सूक्ष्मं नेत्र्यं त्रिदोषहृत्" आर्द्रकं तु पित्तविरोधि मधुरपाकित्वात् यत आह तत्रैव "आर्द्रिका भेदिनी गुर्व्वी तीक्ष्णोष्णा दीपनी च सा। कटुका मधुरा पाके रूक्षा वातकफापहा"। अन्यदपि लवणार्द्रकं च नात्रपित्तविरोधि संयोगस्वभावात् संयोगस्वरूपञ्चैतादृशं भोजनस्य पूर्व्वं लवणार्द्रकभक्षणबोधकवचनमेव प्रमाणयति। भोजनादौ दृष्टिदोषविनाशाय ब्रह्मादीन् स्मरेत्। तद्यथा "अन्नं ब्रह्मा रसोविष्णुर्भोक्ता देवो महेश्वरः। इति संचिन्त्य भुञ्जानं दृष्टिदोषो न बाधते। अञ्जनागर्भसंभूतं कुमारं ब्रह्मचारिणम्। दृष्टिदोषविनाशाय हनूमन्तं स्मराम्यहम्" "अश्नीयात्तन्मना भूत्वा पूर्व्वं तु मधुरं रसम्। मध्येऽम्ललवणौ पश्चात्कटुतिक्तकषायकान्। फलान्यादौ समश्नीयद्दाड़िमादीनि बुद्धिमान्। विना मोचाफलं तद्वद्वर्जनीया च कर्क्कटी। मृणालविसशालूककन्देक्षुप्रभृतीन्यपि पूर्व्वमेव हि भोज्यानि न तु भुक्त्वा कदाचन"। मृणालं पद्मनालं, विसं विसखण्डक, शालूककन्दं प्रसिद्धम्। "गुरु पिष्टमयं द्रव्यं तण्डुलान् पृथुकानपि। न जातु भुक्तवान् खादेन्मात्रां खादेद्बुभुक्षितः। घृतपूर्व्वं समश्नीयात्कठिनं प्रकृतीन्मृदु। अन्ते पुनर्द्रवाशी तु बलारोग्ये न मुञ्चति" अयमर्थः प्राक् घृतपूर्व्वं कठिनं समश्नीयात् यथाकाश्यादिवासिनः प्रथमं सव्यञ्जनां घृतपूर्वां रोटिकां भुञ्जते ततो मृदुलसूपादिकमोदनं भुञ्जते अन्ते पुनर्द्रवाशिनः भोजनान्ते दधिदुग्धतक्रादि भुञ्जते। "यदग्रत् स्वादूत्तरं तद्विदध्यादुत्तरोत्तरम्। भुक्त्वा यत्प्रार्थ्यते भूयस्तदुक्तं स्वादु भोजनम्"। स्वाद्वन्नस्य गुणमाह। "सौमनस्यं बलं पुष्टिमुत्साहं रसनासुखम्। स्वादु सञ्जनयत्यन्नमस्वादु च विपर्य्ययम्"। अत्युष्णान्नं बलं हन्ति शीतं शुष्कं च दुर्ज्जरम्। अतिक्लिन्नं ग्लानिकरं युक्तियुक्तं हि भोजनम्। अतिद्रुततयाहारो गुणान् दोषांश्च विन्दति। भोज्यं शीतमहृद्यं च स्वाद्विलम्बितमश्नतः। त्रिविधं गुरु तन्निवारयन्नाह "मन्दानलो नरो द्रव्यं मात्रागुरु विवर्जयेत् स्वभावतश्च गुरु यत्तथा संस्कारतो गुरु। मात्रागुरुस्तु मुद्गादिर्माषादिः प्रकृतेर्गुरुः। संस्कारगुरु पिष्टान्नं प्रोक्तमित्युपलक्षणम्। आहारः षड्विधः चूष्यं पेयं लेह्यं तथैव च। भोज्यं भक्ष्यं तथा चर्व्व्यं गुरु विद्याद्यथोत्तरम्। चूष्यं इक्षुदाडिमादि, पेयं पानकशर्करोदकादि। लेह्यं रसालाकथितादि (कढी) इति लोके प्रसिद्धम्। भोज्यं भक्तसूपादि। भक्ष्यं लड्डुकमण्डकादि (खरं विशदमभ्यवहार्य्यं भक्ष्यमितिपात०भा०)। चर्व्व्यं चिपिटचणकादि। स्वभावगुरुसंस्कारगुर्व्वोः स्वभावलघुनश्च भक्ष्यस्य भोजनपरिमाणमाह "गुरूणामर्द्धसौहित्यं

लघूनां तृप्तिरिष्यते" अयमर्थः मांसपिष्टान्नादिभिरर्द्धं सौहित्यं कर्त्तव्यं भक्ष्यादिभिः स्वाभाविक्या मात्रया तृप्तिः कर्त्तव्येति। "द्रवोद्रवोत्तरश्चापि न मात्रागुरुरिष्यते"। द्रवः पेयादिः द्रवोत्तरः तक्राद्यधिक ओदनादिः मात्रातोऽधिकोऽपि मात्रागुरुत्वं मन्तव्यः पेयस्य सर्वतोलघुत्वात् उक्तञ्च सुश्रुते "पेयलेह्याद्यभक्ष्याणां गुरु विद्याद्यथोत्तरमिति" पेयं क्षीरादि लेह्यं रसालादि आद्यम् ओदनसूपादि भक्ष्यं मोदकादि "द्रवाढ्यमपि शुष्कं तु सम्यगेवोपपद्यते। विशुष्कमन्नमभ्यस्तं न पाकं साधु गच्छति"। अयमर्थः शुष्कमपि स्रोतोरोधकरमपि द्रवाढ्यं सम्यक् पाकं याति। केवलस्य शुष्कान्नस्य दोषमाह विशुष्कमन्नमित्यादि। अपक्वं तत् किं भवतीत्यपेक्षायामाह "पिण्डीकृतमसंक्लिन्नं विदाहमुपगच्छति" पिण्डीकृतम् अष्ठीलावद्गूतम् असंक्लिन्नमसम्यगार्द्रं विदाहमुपगच्छति विदग्धं भवतीत्यर्थः। शुष्कादीनां वैगुण्यमाह "शुष्कं विरुद्धं विष्टम्भि वह्निव्यापदमावहेत्" शुष्कञ्चिपिटादि विरुद्धं क्षीरमत्स्यादि, विष्टम्भि चणकमसूरादि, वह्निमान्द्यकुर्य्यात्। "न भक्षा न रदैश्छित्वा, न निशायां न वा बहून्। न जलान्तरितानद्भिः सक्तूनद्याच्च केवलान्। पुनर्द्दानं पृथक्पानं सामिषम्पयसा निशि। दन्तच्छेदनमुष्णं च सप्त सक्तुषु वर्जयेत्" विषमाशनस्य लक्षणमाह। "बहु स्तोकमकाले वा ज्ञेयं तद्विषमाशनम्" बहुत्वाल्पस्य भक्षितस्य दोषमाह "आलस्यगौरवाटोपशब्दांश्च कुरुतेऽधिकम्। हीनमात्रमसन्तोषं करोति च बलक्षयम्" अधिकमन्नम्। अकाले भुक्तेर्दोषमाह "अप्राप्तकाले भुञ्जानो ह्यसमर्थतनुर्नरः तांस्तान् व्याधीनवाप्नोति मरणञ्चाधिगच्छति" अप्राप्तकाले कालादतिप्राक् भुञ्जानः असमर्थशरीरो भवति तथा सति तांस्तान् व्याधीन् शिरोव्यथाविसूचिकाऽलसकविलम्बिकादीन् आप्नोति तेषामाधिक्ये मरणमपि प्राप्नोतीत्यर्थः "कालेऽतीतेऽश्नतोजन्तोर्वायुनोपहतेऽनले। कृच्छ्राद्विपच्यते भोक्तुर्न स्याद्भोक्तुं पुनः स्पृहा"। कुक्षेर्भागद्वयं भोज्यैस्तृतीये वारि पूरयेत्। वायोः सञ्चारणार्थाय चतुर्थमवशेषयेत्"। "रसेनान्नस्य रसना प्रथमेनोपतर्पिता। न तथा स्वादुमाप्नोति यथा सेव्याम्बुनान्तरा" "अत्यम्बुपानान्न विपच्यतेऽन्नमनम्बुपानाच्च स एव दोषः। तस्मान्नरो वह्निविवर्द्धनाय मुहुर्मुहुर्वारि पिबेदभूरि। भक्तस्यादौ जलं पीतं कार्श्यमन्दाग्निदोषकृत्। मध्येऽग्निदीपनं श्रेष्ठमन्ते स्थौल्यकफप्रदम्। अन्यच्च "समस्थूलकृशा भुक्तमध्यान्तप्रथमाम्बुपाः" इति वाग्भटः" भुक्तं भोजनम् "तृषितस्तु नं चाश्नीयात् क्षुधितो न पिबेज्जलम्। तृषितस्तु भवेद्गुल्मी क्षुधितस्तु जलोदरी। ननु शिष्टा भोजनान्ते दुग्ध पिबन्ति तत्कथमुचितं यतस्त्रिधा विभक्तस्य भोजनकालस्य प्रथमो भागोवातस्य, द्वितीयः पित्तस्य, तृतीयः कफस्य, यत आह "अश्नीयात्तन्मना भूत्वा पूर्वं तु मधुरं रसम्। मध्येऽम्ललवणौ पश्चात्कटुतिक्तकषायकान्" अस्यायमभिप्रायः भोजने पूर्व्वं भुक्तो मधुरो रसो बुभुक्षितस्य वातपित्तयोः शमको भवति। भोजनमध्ये भुक्ते अम्ललवणे पित्तोपशमनेन वह्निवृद्धिं कुरुतः। भोजनान्त्यसमये भुक्ताः कटुतिक्तकषाया रसाः कफं शमयन्तीति। अतोभोजनावसानसमयस्य कफकालत्वात् तत्र कथं श्लेष्मजनकं दुग्धं पातुमुचितं भवति। यतउक्तम्। "दुग्धं स्वादुरसं स्निग्धमोजस्यं धातुवर्द्धनम्। वातपित्तहरं वृष्यं श्लेष्मलं गुरु शीतलमिति" उच्यते "विदाहीन्यन्नपानानि यानि भुङ्क्ते हि मानवः। तद्विदाहोपशान्त्यर्थं भोजनान्ते पयः पिबेत्" अतएव ब्रह्मपुराणे "कुर्य्यात् क्षीरान्तमाहारं न दध्यन्तं कदाचनेति लवणाम्लकटूष्णानि विदाहीन्यपि यानि तु। तद्दोषं हर्त्तुमाहारं मधुरेण समापयेदिति" भोजनावसानसमये दुग्धादिमधुरभोजने वातकफोपशमनेन लवणाम्लकटुभोजनजनितां पित्तस्य वृद्धिं नाशयति पित्तवृद्धिनाशनेन च पित्तवृद्धिरुपक्षीणा भवतीति कफवृद्धिरग्निमान्द्यादीनुत्पादयितुं न शक्नोति"।

आह्निकतत्त्वेस्मार्त्ताहारविधिरुक्तो यथा विष्णुपु०। "स केवलमघं भुङ्क्ते योभुङ्क्ते त्वतिथिं विना। अघं स केवलं भुङ्क्ते यः पचत्यात्मकारणात्। इन्द्रियप्रीतिजननं वृथापाकं विवर्जयेत्" तथा "सुवासिनीदुःखितश्च गर्भिणीवृद्धबालकान् भोजयेत्। संस्कृतान्नेन प्रथमं, चरमं गृही। अभुक्तवत्सु चैतेषु भुञ्जन् भुङ्क्तेऽतिदुष्कृतिम्। मृतश्च नरकं गत्वा श्लेष्मभुग्जायते नरः। अस्नात्वाशी मलं भुङ्क्ते अजत्वा पूयशोणितम्। अहुत्वा च कृमिं भुङ्क्ते अदत्त्वा विषभोजनम् असंस्कृतान्नभुङ्मूत्रं बालादिप्रथमं शकृत्। भुञ्जतश्च यथा पुंसः पापबन्धोन जायते। इह चारोग्यमतुलं बलवृद्धिस्तथा नृप"। तथा "प्रशस्तरत्नपाणिस्तु भुञ्जीत प्रयतोगृही। अन्नं प्रशस्तं पथ्यञ्च प्रोक्षितं प्रोक्षणोदकैः। न कुत्सिताहृतं नैव जुगुप्सावदसंस्कृतम्"। विष्णुपु० "मन्त्राभिमन्त्रित शस्तं न च पर्युषितं नृप!। अन्यत्र फलमांसेभ्यः शुष्कशाकादिकात्तथा। तद्वद्धार्दरकेभ्यश्च गुड़पक्वेभ्यएव च।

भुञ्जीतोद्धृतसाराणि न कदाचिन्नरेश्वर ! । नाशेषं पुरुषोऽश्नीयादन्यत्र जगतीपते ! । मध्वम्बुदधिसर्पिर्भ्यः सक्तुभ्यश्च विवेकवान् । अश्नीयात्तन्मना भूत्वा पूर्व्वन्तु मधुरं रसम् । लवणाम्लौ तथा मध्ये कटुतिक्तादिकांस्ततः । प्राग्द्रवं पुरुषोऽश्नन् वै मध्ये च कठिनाशनः । पुनरन्ते द्रवाशी तु बलारोग्ये न मुञ्चति । अनिन्द्यं भक्षयेदित्थं वाग्यतोऽन्नमकुत्सयन् । पञ्च ग्रासान् महामौनं प्राणाद्याप्यायनाय तत्”। मन्त्राभिमन्त्रितमिति मन्त्रानादेशे गायत्रीति वचनात् गायत्र्याभिमन्त्रितम्। गारुडे “शाकं सूपञ्च भूयिष्ठं अत्यम्लञ्च विवर्जयेत्। नचैकरससेवायां प्रसज्येत कदाचन”। छन्दोग० प०। “मुनिभिर्द्दिरशनमुक्तं विप्राणां मर्त्यवासिनां नित्यम् । अहनि च तथा तमस्विन्यां सार्द्धप्रहरयामान्तः” । अहनि अचिरोदितास्तमितसूर्य्येतरदिनमात्रे । तत्राप्यायुर्वेदीये विशेषः । “याममध्ये न भोक्तव्यं त्रियामन्तु न लङ्घयेत्” । याममध्ये रसस्तिष्ठेत्त्रियामे तु रसक्षयः”। तत्रापि पञ्चमयामार्द्धोमुख्यकालो दक्षवचनात् (तच्चाह्निकशब्दे ९०६ पृष्ठे वक्ष्यते त्रियामन्त्विति द्वियाममित्येवायुर्वेदीये पाठः । दक्षवचनानुरोधात् त्रियाममिति पाठकल्पनं बोध्यम्)। महामौनं हुङ्कारादिरहितम् । तथाचात्रिः“मौनव्रत महाकष्टं हुङ्कारेणैव नश्यति। तथासति महान् दोषस्तस्मात्तु नियतश्चरेत् । एष क्रमः पौराणिकत्वात् सर्व्वसाधारणः । विष्णुः । “न तृतीयमथाश्नीयादापद्यपि कदाचन” । गीतासु । “आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्द्धनाः। रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः। कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः। आहारा राजसस्येष्टा दुःखशोकामयप्रदाः। यातयामं गतरसं पूतिपर्य्युषितञ्च यत् । उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्” मनुः । “आयुष्यं प्राङ्मुखोभुङ्क्ते यशस्यं दक्षिणामुखः । श्रियः प्रत्यङ्मुखोभुङ्क्ते ऋतं भुङ्क्ते ह्युदङ्मुखः”। नियमे त्वेवम् अनियमे तु नोदङ्मुखः । हारीतः “नोदङ्मुखोऽश्नीयात्” । निष्कामस्य तु प्राङ्मुखेनैव यथाह देवलः ।“प्राङ्मुखोऽन्नानि भुञ्जीत शुचिःपीठमधिष्ठितः । विशुद्धवदनःप्रीतोभुञ्जीत न विदिङ्मुखः” । जीवन्मातृकस्य दक्षिणामुखत्वनिषेधमाह आप० “दक्षिणामुखोन भुञ्जीत एवंविधभोजनमनायुष्यं मातुरुपदिशति” । चित्रु “कुहूस्नानं गयाश्राद्धं तिलैस्तर्पणमेव च । न जीवत्पितृकः कुर्य्याद्दक्षिणामुखभोजनम्” इत्याचाररत्नाकरधृताज्जीवत्पितृकस्यापि निषेध इत्याहुः । व्यासः “पञ्चार्द्रोभोजनं कुर्य्यात् प्राङ्मुखोमौनमास्थितः । हस्तौ पादौ तथैवास्यमेषु पञ्चार्द्रता मता”। व्यासः “अप्येकपङ्क्त्यां नाश्नीयात् संवृतः स्वजनैरपि । कोहि जानाति किं कस्य प्रच्छन्नं पातकं महत् । भस्मस्तम्भजलद्वारमार्गैः पङ्क्तिञ्च भेदयेत्” । जलादिना पङ्क्तिभेदाकरणे तु मनुः । “एकपङ्क्त्युपविष्टानां विप्राणां सहभोजने । यद्येकोऽपि त्यजेत् पात्रं शेषमन्नं विवर्जयेत् । मोहात् भुञ्जीत यः पङ्क्त्यामुच्छिष्टसहभोजनम् । प्राजापत्यं चरेद्विप्रः चात्रः सान्तपनन्तथा” ! । एतत्समानार्थमभिधायाह गोभिलः। “भुञ्जानेषु तु विप्रेषु यस्तु पात्रं परित्यजेत्। भोजने विघ्नकर्त्तासौ ब्रह्मघ्नोऽपि तथोच्यते”। आप०“दिवा पुनर्न भुञ्जीतान्यत्र फलमूलेभ्यः”। मनुः “नातिप्रगे नातिसायं न सायं प्रातराशितः” अतिप्रगेऽचिरोदितसूर्य्ये अतिसायं सूर्य्यास्तमितसमये एवं प्रातराशितः दिनभोजनेनातितृप्तः न सायं न रात्रौ भुञ्जीतेत्यर्थः। आप० “यस्तु भोजनशालायां भोक्तुकामउपस्पृशेत् । आसनस्थोनचान्यत्र स विप्रः पङ्क्तिदूषकः” बौधा० “उपलिप्ते समे स्थाने शुचौ लघ्वासनान्विते । चतुरस्रं त्रिकोणञ्च वर्त्तुलञ्चार्द्धचन्द्रकम् । कर्त्तव्यमानुपूर्व्व्येण ब्राह्मणादिषु मण्डलम्” । “अकृत्वा मण्डलं ये तु भुञ्जतेऽधमयोनयः । तेषान्तु यक्षरक्षांसि हरन्त्यन्नानि तद्बलात्” । आप० । “भिन्नकांस्ये तु योविप्रोयदि भुङ्क्ते तु कामतः । उपवासेन चैकेन पञ्चगव्येन शुद्ध्यति” तथा शूद्रादिभोजनेनापरिष्कृतपात्रेऽपि वृद्धमनुः “ताम्रपात्रे न भुञ्जीत भिन्नकांस्ये मलाविले । पलाशपद्मपत्रेषु गृही भुक्त्वैन्दवं चरेत्” । नव्यवर्द्धमानधृताग्निपु० “अर्कपत्रे तथा पृष्ठे आयसे ताम्रभाजने । करे कर्पटके चैव भुक्त्वा चान्द्रायणञ्चरेत्” । पृष्ठे कदलीपत्रादिपृष्ठे । पैठी० “ताम्ररजतसुवर्णाश्मशङ्खशुक्तिस्फटिकानां भिन्नमभिन्नमिति न दोषः” । अत्र पाषाणपात्रं भोजने विहितम् । “तैजसानां मणीनाञ्च सर्व्वस्याश्ममयस्य च । भस्मनाद्भिर्मृदा चैव शुद्धिरुक्ता मनीषिभिः” इति मनुना पाषाणपात्रस्य शुद्धिविधानाच्च । प्रचेताः “ताम्बूलाभ्यञ्जने चैव कांस्यपात्रे च भोजनम् । यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत्” । अत्रिः “आसने पादमारोप्य योभुङ्क्ते ब्राह्मणः क्वचित्। मुखेन चान्नमश्नाति तुल्यं गोमांसभक्षणैः” । मुखेन हस्तोत्तोलनं विना गवादिवदित्यर्थः । आश्वमेधिके “आर्द्रपादस्तु भुञ्जीत

प्राङ्मुखश्चासने शुचौ । पादाभ्यां धरणीं स्पृष्ट्वा पादेनैकेन वा पुनः" । बौधा० "भोजनं हवनं दानमुपहारः परिग्रहः । बहिर्जानु न कार्य्याणि तद्वदाचमनं स्मृतम्" हारीतः "मार्ज्जनार्च्चनबलिकर्म्मभोजनानि देवतीर्थेन कुर्य्यात्" । पराशरभा० वृद्धमनुः "न पिबेन्नच भुञ्जीत द्विजः सव्येन पाणिना । नैकहस्तेन च जलं शूद्रेणावर्जितं पिबेत्" । मार्क० पु० "पादप्रसारणं कृत्वा न च वेष्टितमस्तकः" । मनुः "पूजयेदशनं नित्यमद्याच्चैवमकुत्सयन् । दृष्ट्वा हृष्येत् प्रसीदेच्च प्रणमेच्चैव सर्व्वदा । अन्नं दृष्ट्वा प्रणम्यादौ प्राञ्जलिः प्रार्थयेत्ततः । अस्माकं नित्यमस्त्वेतदिति भक्त्याथ वन्दयेत्" । विष्णुपु० "नागः कूर्म्मश्च कृकरो देवदत्तो धनञ्जयः । बहिःस्था वायवः पञ्च तेषां भूमौ प्रदीयते । अदत्त्वा बाह्यवायुभ्यः प्राणादिभ्यो न होमयेत्" । इति शिष्टपठितवचनान्नागादिभ्यो बलिदानमिति प्राचीनाचारः । तत्रान्नं देवेभ्यो दत्त्वैव भोक्तव्यं तथा च गीता "इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः । तैर्दत्तानप्रदायैभ्यो योभुङ्क्ते स्तेन एव सः" । यज्ञैः भाविता संवर्द्धिताः वो युष्मभ्यं भोगानन्नादीन् वृष्ट्यादिद्वारा दास्यन्ति अतो देवैर्दत्तान् अन्नादीन् तेभ्योऽदत्त्वा योभुङ्क्ते स चौर एव । स्मृतिः "निवेद्य प्राशनात् पूर्व्वं देवपादोदकाहुतिः । होतव्या जठरे वह्नौ स्वेन पाणितलेन तु" । तेन पादोदकेनापोशानं कृत्वा प्राणाहुतिर्नैवेद्येन कार्य्या । स्वदत्तनैवेद्यभक्षणन्तु पश्चादुपपादयिष्यते । ब्रह्मपु० "आपोशानञ्च गृह्णीयात् सर्व्वतीर्थमयञ्च यत् । अमृतोपस्तरणमसि विष्णोरन्नमयस्य च । अत्र चास्तरणार्थन्तु प्राश्यते ह्यमृतं सकृत् । अमृतोपस्तरणमसि स्वाहेति च समुद्धरेत्" । सन्ध्यापद्धतौ लिखितवचनं प्रमाणयन्तोऽसीत्येतदनन्तरं स्वाहाकारं कुर्व्वन्ति । ब्रह्मपु० "हस्तेन लङ्घयेन्नान्नं नोदकेन कदाचन । दम्भाद्योलङ्घयेन्मूढस्तेनान्नं निहतं भवेत् । हतञ्चान्नमभक्ष्यत्वं तस्य याति दुरात्मनः । प्राणेभ्यस्त्वथ पञ्चभ्यः स्वाहाप्रणवसंयुताः । पञ्चाहुतीस्तु जुहुयात् प्रलयाग्निनिभेषु च । प्राणाहुतिमुद्रामाह शौनकः । "तर्ज्जनीमध्यमाङ्गुष्ठैर्लग्ना प्राणाहुतिर्भवेत् । मध्यमानामिकाङ्गुष्ठैरपाने जुहुयात्ततः । कनिष्ठानामिकाङ्गुष्ठैर्व्याने च जुहुयाद्धविः । तर्ज्जनीन्तु बहिष्कृत्वा उदाने जुहुयात्ततः । समाने सर्व्वहस्तेन समुदायाहुतिर्भवेत्" । स्मृत्यर्थसारे । "प्राणाहुतौ घृताभावे पश्चाद्भुञ्जीत नो घृतम्" । देवलः "न भुञ्जीत घृतं नित्यं गृहस्थो भोजनद्वये । पवित्रमथ जुष्टञ्च सर्पिराहुरघापहम्" । काशी० "दर्भपाणिस्तु योभुङ्क्ते तस्य दोषो न बाधते । केशकीटादिसम्भूतस्ततोऽश्नीयात् सदर्भकः । यावदेशान्नमश्नीयान्न ब्रूयात्तद्गुणागुणान् । अतो मौनेन योभुङ्क्ते स भुङ्क्ते केवलामृतम्" । मनुः "स्वाध्याये भोजने चैव दक्षिणं पाणिमुद्धरेत्" । उद्धरेद्वस्त्राद्बहिः कुर्य्यादित्यर्थः । बौधा० "आचम्य संवृते देशे उपविश्यान्नं संगृह्य सर्व्वाङ्गुलीभिरशब्दमश्नीयात्" । संगृह्य अन्नपात्रं सम्यक् स्पृष्ट्वेत्यर्थः । काशी० "प्रदद्याद्भुवः पतये भुवनपतये तथा । भूतानां पतये स्वाहेत्युक्त्वा भूमौ बलित्रयम् । आपोशानं विधानेन कृत्वाश्नीयात् सुधीर्द्विजः" । ब्रह्मपु० "तेजोसीति जपस्त्वन्नं प्रणमेदमृतञ्च यत् । आपोशानञ्च गृह्णीयात् सर्व्वतीर्थमयञ्च यत् । अमृतोपस्तरणमसि विष्णोरन्नमयस्य च" । अन्नमयस्य विष्णोर्यदास्तरणमसीत्यर्थः ततश्च तेजोसीति नमस्कृत्य भुञ्जीतेत्यर्थः । भविष्यो० "स्नातस्तु वरुणस्तेजो जुह्वतोऽग्निः श्रियं हरेत् । भुञ्जानस्य यमस्त्वायुस्तस्मान्न व्याहरेत्त्रिषु" । मौने विशेषमाह आप० । "तत्र वै विद्यादृद्धैर्मुनिभिरन्यैराश्रमिभिर्बहुश्रुतैर्दन्तैर्दन्तानसन्धायान्तर्मुख एव यावद्यावदर्थं भाषेत न मन्त्रलोपो भवतीति विज्ञायते इति" मन्त्रलोपो मौनव्रतलोपः । ब्रह्मपु० "यस्तु पाणितले भुङ्क्ते यस्तु फुत्कारसंयुतम् । प्रसृताङ्गुलिभिर्यस्तु तस्य गोमांसवद्भवेत् । करेण च पिबेत्तोयं यावन्मांसं न भक्षयेत् । मांसलिप्तकरे तोयं तुल्यं गोमांसभक्षणैः" । अत्र मांसलिप्तकरेण जलपाननिषेधात् मांसलिप्तकरं प्रक्षाल्यैवापोशनं कर्त्तव्यम् । प्रत्यापोशाने तु हस्तप्रक्षालननिषेधात् मांसलिप्तकरं प्रक्षाल्य पुनरन्नलिप्त करेण प्रत्यापोशानं कर्त्तव्यम् । षट्त्रिं० "पिबतो यत् पतेत्तोयं भाजने मुखनिःसृतम् । अभक्ष्यं तद्भवेदन्नं भुक्त्वा चान्द्रायणञ्चरेत् । वामपार्श्वे स्थिते तोये योभुङ्क्ते ज्ञानदुर्बलः । ग्रासे ग्रासे मलं भुङ्क्ते पानीयं रुधिरं पिबेत् । विद्यमाने तु हस्ते तु ब्राह्मणो ज्ञानदुर्बलः । तोयं पिबति वक्त्रेण श्वादिर्जायेत नान्यथा । उद्धृत्य वामहस्तेन यत्तोयं पिबति द्विजः । सुरापानेन तुल्यं स्यात् मनुराह प्रजापतिः" । वामहस्तेन केवलवामहस्तेन । अत एव "पीतशेषन्तु यत्तोयं तत्पिबेच्च द्विजोत्तमः" । "पीतशेषं पिबेन्नैव" इति ब्रह्मपु० अविशेषात् सर्व्वं

निषिद्धम्”। ब्रह्म० “तिलकल्कं जलं क्षीरं दधि क्षौद्रं घृतानि च। न त्यजेदर्द्धजग्धानि सक्तुं शाकं कदाचन”। भारते “पानीयं पायसं सर्पिर्दधिक्षौद्रघृतान्यपि। निरस्यं शेषमेतेषां न प्रदेयन्तु कस्यचित्”। एतन्न त्याज्यं अशक्तौ कस्यचिन्न देयमित्यर्थः। निरस्यं निःशेषमशनोयमित्यर्थः। तथा “अन्नं प्रशस्तं पथ्यञ्च प्रोक्षितं प्रोक्षणोदकैः”। इति प्रागुक्तविष्णुपुराणाद्युक्तेतरभक्षणे दोषमाह मनुः “आलस्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसति”। अन्नदोषस्त्रिविधः दृष्टद्वारकः अदृष्टद्वारकः दृष्टादृष्टद्वारकः। दृष्टद्वारकश्चायुर्व्वेदोक्तः। अदृष्टद्वारकः स्मृत्युक्तः। उभयत्रोक्तास्तु बालवत्साविवत्सादुग्धादिदोषा दृष्टादृष्टद्वारकाः। अतएव मनुनैवोक्तम् “स्वाध्याये चैव युक्तः स्यात् नित्यमात्महितेषु च” युक्त उद्युक्तः। हारीतः “पृथक् पानं पुनर्दानमामिषं पायसानि च। दन्तच्छेदनमुष्णञ्च सप्त सक्तुषु वर्जयेत्”।

सचाहारस्त्रिविधः सात्विकराजसतामसभेदात् यथोक्तं गीतायाम् “आहारस्त्वपि सर्व्वस्य त्रिविधोभवति प्रियः। यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु” इत्युपक्रम्य “आयुःसत्त्वेत्यादि” तत्र वाक्यम् आ०त० ९०१पृष्ठे दर्शितम्”। अत्र सर्व्वत्र “कृदभिहितोभावोद्रव्यवत् प्रकाशते” इति भाष्योक्तेः आह्रियते भुज्यते कर्म्मणि घञि वा आहारशब्दस्य भक्ष्यपरत्वम् अतएव भावप्र० “आहारः षड्विधश्चूष्यमित्यादि” ८९९पृष्ठे उक्तम्। स च षोढा “आहार्य्यं षड्विधं भोज्यं भक्ष्यं चर्व्व्यं तथैव च। लेह्यं चूष्यं तथा पेयं तदुदाहरणानि तु। भोज्यमोदनपूपादि भक्ष्यमोदनमण्डके। चर्व्व्यं चिपिटधानादि रसालादि तु लिह्यते। चूष्यमाम्रफलेक्ष्वादि पीयते पानकं पयः” भावप्र०उक्तेः। आह्रियते इत्याहारः। २शब्दादिविषयज्ञाने च आहारशुद्धि शब्दे या०भा० वाक्यम् उदा०।

आहारपाक पु० आहारस्य भक्ष्यस्य पाकः रसादिभावेन परिणामः। वैद्यकोक्ते भुक्तस्यान्नादेराहारस्य रसादिरूपेण परिणामरूपे पाकभेदे तत्पाकप्रकारः पदार्थादर्शहृतयगास्य वत्वाक्ये उक्तः तत्र आग्निशब्दे ४९पृष्ठे दर्शितम्। भावप्रकाशोक्तस्तत्प्रकारस्तु असृक्करशब्दे ४५८ पृष्ठे एक्तः।

आहारशुद्धि स्त्री आहारस्य भक्ष्यादेः शुद्धिः। १भक्ष्यादिद्रव्यस्य शुद्धौ सा च शुद्धिः स्मृत्युक्तदिशाऽवसेया। सा च अभक्ष्यवर्ज्जनेन भक्ष्यभोजनएव भवति। अभक्ष्याणि च अभक्ष्यशब्दे २७४पृष्ठे उक्तानि। आहारदोषनिवारणार्थायां शुद्धिः। २दुष्टाहारजन्यदोषनिवारणार्थायां शुद्धौ प्रायश्चित्ते। “आहारशुद्धिं वक्ष्यामि तन्मे निगदतः शृणु। अक्षारलवणं भैक्ष्यं पिबेद्ब्राह्मीं सुवर्च्चसम्” इत्यादिना अत्रिस० दर्शिता। ३शब्दादिविषयज्ञानशुद्धौ च “आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः” छा०उ०। “आह्रियते इत्याहारः शब्दादिविषयज्ञानम् तद्धि भोक्तुर्भोगायाह्रियते तस्य विषयोपलब्धिलक्षणस्य विज्ञानस्य शुद्धिराहारशुद्धिः रागद्वेषमोहदोषैरसंस्पृष्टविषयविज्ञानमित्यनर्थान्तरं तस्याहारस्य शुद्धौ सत्यां तद्वतोऽन्तःकरणसत्त्वस्य शुद्धिर्नैर्मल्यं भवति” भाष्यम्। आहारशब्दस्य भक्ष्यार्थतामपहाय तथा व्याख्यानं तु “रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन्” इति गीतोक्तिमनुसृत्यैवेति आनन्दगिरिः।

आहारसम्भव पु० आहारात् भोज्यद्रव्यात् सम्भवति सम्+भू–अच्। आहारपाकजे देहस्थे रसधातौ। रसस्य यथाऽऽहारजत्वं तथाऽसृक्करशब्दे ४५८पृष्ठे उक्तम्।

आहार्य्य त्रि० आ+हृ–ण्यत्। १आहरणीये “अथ मूलमनाहार्य्यं प्रकाशक्रयशोधनम्” मनुः। २व्याप्ये “कार्य्यञ्च तस्य दशधाहार्य्यं धार्य्यं प्रकाश्यञ्च” सा०का० “आहार्य्यं व्याप्यं कर्म्मेन्द्रियाणां वचनादानविहरणोत्सर्गानन्दा यथायथं व्याप्यास्ते च यथायथं दिव्यादिव्यतया दशेत्याहार्य्यं दशधेति” सां०कौ०। ३कृत्रिमे “आहार्य्यशोभारहितैरमायैः” भट्टिः। स्वार्थे कन् तत्रैव “आहार्य्यकमपि तस्याः सहजमिवाशोभत” ७,२१, कुमा०मल्लि०। ४लौकिके ५औपासनिकेऽग्नौ च “आहार्य्येणानाहिताग्निम्” “पत्नीञ्च” आश्व०श्रौ०। “येनाहिताग्निना सर्व्वाधानं कृतं तस्य पत्नीं लौकिकेन, यस्यौपासनश्चास्ति तस्य पत्नीमौपसनिकेन दहेयुः” नारा०। ६इच्छाप्रयोज्यारोपेण विषयीकार्य्ये बाधनिश्चयकालिके तद्धर्म्माभाववति तद्धर्म्मवत्त्वेन ज्ञेये। भावे क्त। ७तादृशज्ञाने न०। यथा निर्वह्निः पर्व्वतो वह्निमानिति ज्ञानं तत्र वह्न्यभाववति पर्व्वते वह्निप्रकारकत्वात् इच्छाप्रयोज्यत्वाच्च आहार्य्यम्। तच्च प्रत्यक्षमेव तदभाववत्त्वेन निश्चितेऽपि धर्म्मिणि तद्बोधस्य इच्छाप्रयोज्यत्वात् “परोक्षज्ञानम् अनाहार्य्यम् निश्चयश्चेति सिद्धान्तः” चिन्ता०। “शाब्दबोधोऽप्याहार्य्योभवत्यालङ्कारिका यथा अयं मुखमित्यादौ चन्द्रभिन्ने मुखे चन्द्राभेदज्ञानम् तच्चाहार्य्यमेव ८०४पृ०आरो-

पशब्देऽधिकमुक्तम् । “भवेदभिनयोऽवस्थानुकारः स चतुर्विधः । आङ्गिकोवाचिकश्चैवमाहार्य्यः सात्विकस्तथा” सा० द०उक्ते नटादिभिरात्मनि कर्त्तव्ये रामाद्यारोपहेतुके ८अभिनयभेदे च । आ+हृ—कर्म्मणि ण्यत् उपसर्गयोगात् ६भक्ष्ये “आहार्य्यं षड्विधं भक्ष्यमित्यादि” भाव० प्र० ।

आहाव पु०आ+ह्वे+घञ् संप्रसारणे वृद्धिः । कूपसमीपे गवादीनां जलपानाय प्रस्तरादिना रचिते(खाल) १ क्षुद्रजलाशये निपाने “प्राविशन्न इवप्रज्ञा आहावमुपलिप्सवः” भट्टिः ।“आहावमुदकाधारम्”जयम० “निपानमाहावः” पा०। २युद्धे । भावे घञ् । ३आह्वाने आ+हु–आधारे घञ् । ४अग्नौ । “नाभिं यज्ञानां सदनं रयीणां महामाहावमभि संनवन्त” ऋ० ६,७,२ । आहूयतेऽस्मिन्नाहावमग्निम् वृष्ट्युदकधारणमाहावं निपानास्थानीयं वा” भा०। आ+ह्वे—भावे करणे वा घञ् । ५मन्त्रविशेषेणाह्वाने ६आह्वानसाधने मन्त्रभेदे च “आदौ निविद्धानीयानां सूक्तानामनेकश्चेत् प्रथमेष्वाहावः” आश्व०श्रौ० । “तस्यानेकत्वे प्रथम एवाहावः”वृत्तिः“तृतीयसवने शस्त्रादिष्वाहावः आश्व०श्रौ० । “एषु आहावः प्रातःसवनेन शास्त्रादिषु” आ०श्रौ०। “एषु स्थानेषु ऋगन्तरेणाह्वाने विहिते शोंसावोमित्यनेनैवाह्वानं कुर्य्यात् नान्येनेति नियम्यते” वृत्तिः “शों सामो दैवेत्याहावे”आश्व० श्रौ० प्रतिगरसंज्ञार्थमिमे सूत्रे ।

आहिंसि पुंस्त्री अहिंसस्यापत्यम् इञ् । अहिंसकापत्ये ततः युवापत्ये फक् तौल्व०तस्य न लुक् । आहिंसायनः तत्पौत्रे ।

आहिक पु० अहिरिव कन् स्वार्थे अण् । १केतुग्रहे हेमच० तस्य सर्पतुल्याकृतित्वात्तथात्वम् ।२पाणिनिमुनौ च त्रिका०।

आहिच्छत्र त्रि०अहिच्छत्रदेशे भवः अण् । अहिच्छत्रदेशे भवे

आहिण्डिक पु० निषादेन वैदेह्यां जनिते अन्त्यजवर्ण सङ्करभेदे “आहिण्डिको निषादेन वैदेह्यामेव जायते” मनुः । “बाह्यसंरक्षणादायाहिण्डिकानाम्” औशनसस्मृत्योक्ता तद्वृत्तिर्ज्ञेया ।

आहित त्रि० आ+धा—क्त ह्यादेशः । १न्यस्ते, २स्थापिते, ३अर्पिते । “व्यावर्त्तनैरहिपतेरयमाहिताङ्कः” किरा० ४कृते,५कृताधानसंस्कारे च“प्रणीताश्चाप्रणीतश्च यथाऽग्निर्दैवतं महत्” मनुव्या० “आहितोऽनाहितोवाग्निरिति” कुल्लू० । [विख्याते २न्यस्तचिह्ने च ।

आहितलक्षण त्रि० आहितं लक्षणं यस्य । १गुणादिद्वारा

आहिताग्नि त्रि० आहितोऽग्निर्येन । वेदमन्त्रादिना कृत संस्काराग्नियुक्ते तदाधानप्रकारः आधानशब्दे ७०८ पृष्ठे उक्तप्रायः । आश्व०श्रौ० २प्र० २क० विस्तरेणोक्तः । “न दर्शेन विना श्राद्धमाहिताग्नेर्द्विजन्मनः”मनुः।“गुरोरपीदं धनमाहिताग्नेः” रघुः । “आहिताग्निः सत्यव्रत्यमिदं चरेत्”तैत्ति०“न वाऽऽहिताग्निनानृतं वदितव्यम्” शत० ब्रा० २.२.२,२० । “देवान् वा एष उपावर्त्तते य आहिताग्निर्भवति” ऐत०ब्रा० । आहार्य्येणैवानाहिताग्निम्” आश्व०श्रौ०। वा परनिपाते अग्न्याहितोऽप्यत्र ।

आहिताग्निगण पु०पाणिन्युक्ते वा परनिपातार्थे शब्दसमूहभेदे । स च गणः आहिताग्नि जातपुत्र जातदन्त जातश्मश्रु तैलपीत घृतपीत मद्यपीत ऊढभार्य्य गतार्थ” “आकृतिगणः तेनान्येऽपि” सि०कौ० ।

आहिति स्त्री आ+धा क्तिन् ह्यादेशः । १स्थापने २आधाने मन्त्रेणाग्न्यादेः संस्कारे ३आहुतौ च ।“तस्मिन् यत्किञ्चाद्ध्यादाहितय एव ताः आहितयोह वै ता आहुतय इत्याचक्षते”शत०ब्रा०१०,६,२,२२,। [(सापुड़े) ।

आहितुण्डिक त्रि०अहितुण्डेन दीव्यति ठक् । व्यालग्राहिणि

आहिमत त्रि० अहिमतोऽदूरभवः अण् । सर्पविशिष्टदेशादूरभवे ।

आहुक पु० यदुवंश्ये क्षत्रियभेदे स च वसुदेवएव । “केशवोऽपि मुदा युक्तः प्रविवेश पुरोत्तमम् । पूज्यमानो यदुश्रेष्ठैरुग्रसेनमुखैस्तथा । आहुकं पितरं वृद्धं मातरंच यशस्विनीम् । अभिवाद्य बलञ्चैव स्थितः कमललोचनः”इति भा० सभा०२अ० । अत्र केशवपितृत्वेन कीर्त्तनात् वसुदेवस्य नामान्तरत्वं तस्य प्रतीयते “एवं आहुकश्चाहुकी चैव ख्यातौ ख्यातिमतांवरौ” हरि० ३८अ०। एवमाहुकिन् तद्वंश्ये क्षत्रिये पु० ।

आहुत न० उद्देश्यस्याभिमुख्येन साक्षादेव हुतं दत्तम् आ+हु—क्त । गृहस्थकर्त्तव्येषु पञ्चसु यज्ञेषु १मनुष्ययज्ञे, २भूतयज्ञे चेत्यन्ये । कर्म्मणि क्त ।३आभिमुख्येन हुते देवादौ त्रि०

आहुति स्त्री आ+हु-क्तिन् । देवोद्देशेन मन्त्रेणाग्नौ हविःक्षेपे । “अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते”मनुः । “वेत्थ सौम्य ! यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति” छा०उ० । “प्रातराहुत्यां हुतायां पूर्णाहुत्यन्ते वरदानम्” कात्या० २०,१,२०। “जुहुयात्सर्पिराहुतीः” मनुः “प्राणाद्याहुतिपञ्चकम्” स्मृतिः। आहूयते कर्मणि क्त ।२आहूयमाने हवनीयद्रव्ये हविरादौ ।“पुनानं पवनोद्धूतैर्धूमैराहुतिगन्धिभिः”रघुः।“ब्रह्माहुतिहुतं यज्ञ”मनुः।

आहुल्य न॰ आ+ह्वल–बा॰क्यप् संप्रसारणञ्च। काम्मीरादौ (तरवट) इति प्रसिद्धे काञ्चनवर्णपुष्पे शिल्वीफले क्षुपभेदे।

आहुव त्रि॰आ+ह्वा–घञर्थे कर्म्मणि क संप्र॰उवङ्। आह्वातव्ये "अनुकृटीनामन्वाहुवः" ऋ॰ ८.२२,१९, आहुवः आह्वातव्यः"भा॰। [२आहूयमाने च।

आहू त्रि॰ आह्वयति आ+ह्वे–क्विप् संप्र॰। १आह्वायके।

आहूत त्रि॰ आ+ह्वे–क्त। कृताह्वाने १आकारिते "आहूत इव मे शीघ्रम्" भाग॰१०स्कन्धे। "नचाहूतोवदेत् किञ्चिद्धीनोदण्ड्यश्च स स्मृतः"या॰स्मृतिः। "यियक्षमाणेनाहूतः पार्थेनाथ द्विषन्मुरम्"माघः।"आहूतो न निवर्त्तेत द्यूतादपि रणादपि"। आभूत+पृ॰भस्य हः। २आभूतप्रलयपर्य्यन्ते "पटोलानि कदम्बानि हन्ताकसहितानि च। न त्यजेत् कार्त्तिके यस्तु यावदाहूतनारकी" ति॰त॰पु॰ "आहूतम् आभूतप्रलयपर्य्यन्तम्" रघु॰ ३नामकृतव्यपदेशे विश्वे च। सृष्टिकाले हि भूतानां तत्तन्नामव्यपदेश इति विश्वव्यपदेशपर्य्यन्तमित्येव तस्यार्थोन्याय्यः। भावे क्त। ४आह्वाने।

आहूतप्रपलायिन् त्रि॰आहूतः विवादनिर्णयाय राज्ञाहूतोऽपि प्रपलायते प्र+परा–अय–णिनि रस्य लः। व्यवहारे हीनवादिभेदे स च पञ्चविधः। "अन्यवादी क्रियाद्वेषी, नोपस्थाता निरुत्तरः। आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः"मिता॰स्मृत्युक्तेः।

आहूतसंप्लव पु॰ आहूतस्य नाम्ना कृतव्यपदेशस्य विश्वस्य संप्लवोयत्र। प्रलयकाले तत्र हि कृतव्यपदेशस्य विश्वस्य व्यपदेशाभावेन व्यवहार्य्यत्वाभावः।"आहूतसंप्लवस्थानममृतत्वं भाषते"इति पुराणे आभूतेत्यत्राहूतेति पाठान्तरम्।

आहूति स्त्री आ+ह्वे-क्तिन्। आह्वाने (डाका)।

आहूय अव्य॰आ+ह्वे–ल्यप्। आह्वानं कृत्वेत्यर्थे "आहूय दानं कन्याया ब्राह्मोधर्म्मः प्रकीर्त्तितः"मनुः।

आहृत त्रि॰ आ+हृ–क्त। आनीते कृताहरणे।

आहृति स्त्री आहृ–क्तिन्। आहरणे आनयने।

आहृत्य अव्य॰ आ+हृ–ल्यप्। आहरणं कृत्वा आनीयेत्यर्थे "सगाहृत्यान्यतन्त्राणि" अमरः।

आहेय त्रि॰अहेरिदम् ढक्। सर्पसम्बन्धिनि विषचर्म्मास्थ्यादौ

आहो अव्य॰आ+हन–डो।१प्रश्ने, २विकल्पे, ३विचारे च। "यत्रायं पुरुषोम्रियत उदस्मात् प्राणाः क्रामन्त्याहो नेति" शत॰ब्रा॰१४,६,२,१२, "आहो विद्वानमुं लोकं प्रेत्य-कश्चित् समश्नुते" कठो॰। "आहो निवत्स्यति समं हरिणाङ्गनाभिः" शाकुन्तले सखींप्रति दुष्मन्तप्रश्नः।

आहोपुरुषिका स्त्री अहमेव पुरुषः शूरः मयू॰ अहोपुरुषः तस्य भावः वुञ् स्त्रीत्वात् टाप्। दर्पजन्ये आत्मनि उत्कर्षसम्भावने (बाहादुरी) "आहोपुरुषिकां पश्य मम सद्रत्नकान्तिभिः" भट्टिः।

आहोस्वित् अव्य॰आहो च स्विच्च द्व॰। १विकल्पे, २प्रश्ने च "आहोस्वित् शाश्वतं स्थानं तेषां तत्र द्विजोत्तम!"भा॰स॰५अ॰। द्विपदमित्येके।

आह्न न॰ अह्नां समूहः खण्डिका॰ अञ्। दिनसमूहे"अहोरात्रे वा अभिवर्त्तमाने संवत्सरमाप्नुतः संवत्सर इदं सर्व्वमाह्नायैवैतामरिष्टिं स्वस्तिमाशास्ते" शत॰ब्रा॰६,६,४,२, अह्ना निर्वृत्तादि चतुरर्थ्याम् संकलादि॰ अञ्। दिननिर्वृत्तादौ त्रि॰।

आह्निक त्रि॰ अह्नि भवः अह्ना निर्वृत्तं साध्यं ठञ् स्त्रियां ङीप्। १दिनभवे २दिनसाध्ये च। "भरद्वाजस्तु कौन्तेय कृत्वा स्वाध्यायमाह्निकम्"भा॰द्रो॰१२७अ॰। "अत्राह्निकं सुरश्रेष्ठोजपते समरुद्गणः"भा॰व॰१४२ अ॰। दिनकर्त्तव्यानि आह्निकतत्त्वे आह्निककृत्यप्रदीपादौ उक्तानि। दिवसकर्त्तव्यान्याचारशब्दे ६२१ पृष्ठे उक्तप्रायाणि दिनविभागेषु कर्त्तव्यभेदोदक्षेण संक्षेपात् दर्शितो यथा। "प्रातरुत्थाय कर्त्तव्यं यद्द्विजेन दिने दिने। तत्सर्वं संप्रवक्ष्यामि द्विजानामुपकारकम्। उदयास्तमयं यावन्न विप्रः क्षणिकोभवेत्। नित्यनैमित्तिकैर्युक्तः काम्यैश्चान्यैरगर्हितैः। यः स्वकर्म परित्यज्य यदन्यत् कुरुते द्विजः। अज्ञानाद्यदि वा मोहात् स तेन पतितोभवेत्। दिवसस्याद्यभागे तु कृत्यं तस्योपदिश्यते। द्वितीये च तृतीये च चतुर्थे पञ्चमे तथा। षष्ठे च सप्तमे चैव अष्टमे च पृथक् पृथक्। विभागेष्वेषु यत्कर्म्म तत्प्रवक्ष्याम्यशेषतः। उषःकाले तु संप्राप्ते शौचं कृत्वा यथार्थवत्। ततः स्नानं प्रकुर्व्वीत दन्तधावनपूर्व्वकम्। अत्यन्तमलिनः कायोनवच्छिद्रसमन्वितः। स्रवत्येष दिवा रात्रौ प्रातःस्नानं विशोधनम्। क्लिद्यन्ति हि प्रसुप्तस्य इन्द्रियाणि स्रवन्ति च। अङ्गानि समतां यान्ति उत्तमान्यधमैः सह। नानास्वेदसमाकीर्णः शयनादुत्थितः पुमान्। अस्नात्वा नाचरेत् कर्म जपहोमादि किञ्चन। प्रातरुत्थाय योविप्रः प्रातःस्नायी भवेत् सदा। समस्तजन्मजं पापं त्रिभिर्वर्षैर्व्यपोहति। उषस्युषसि यत्स्नानं सन्ध्यायामुदिते रवौ। प्राजापत्येन तत्तुल्यं महापातकनाशनम्। प्रातःस्नानं प्र-

शंसन्ति दृष्टादृष्टकरं हि तत्। सर्व्वमर्हति पूतात्मा प्रातःस्नायी जपादिकम्। स्नानादनन्तरं तावदुपस्पर्शनमुच्यते। अनेन तु विधानेन आचान्तः शुचितामियात्। प्रक्षाल्य पादौ हस्तौ च त्रिः पिबेदम्बु वीक्षितम्। संवृत्याङ्गुष्ठमूलेन द्विःप्रमृज्यात्ततोमुखम्। संहत्य तिसृभिः पूर्व्वमास्यमेवमुपस्पृशेत्। ततः पादौ समभ्युक्ष्य अङ्गानि समुपस्पृशेत्। अङ्गुष्ठेन प्रदेशिन्या घ्राणं पश्चादनन्तरम्। अङ्गुष्ठानामिकाभ्याञ्च चक्षुःश्रोत्रे पुनःपुनः। कनिष्ठाङ्गुष्ठेन नाभिं हृदयञ्च तलेन वै। सर्व्वाभिस्तु शिरः पश्चाद्बाहू चाग्रेण संस्पृशेत्। सन्ध्यायाञ्च प्रभाते च मध्याह्ने च ततः पुनः। सन्ध्यां नोपासीत यस्तु ब्राह्मणोहि विशेषतः। स जीवन्नेव शूद्रः स्यान्मृतः श्वा चैव जायते। सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्व्वकर्म्मसु। यदन्यत् कुरुते कर्म न तस्य फलमश्नुते। सन्ध्याकर्मावसाने तु स्वयंहोमोविधीयते। स्वयं होमे फलं यत्तु तदन्येन न जायते। ऋत्विक् पुत्रोगुरुर्भ्राता भागिनेयोऽथ विट्पतिः। एभिरेव हुतं यत्तु तद्धुतं स्वयमेव हि। देवकार्य्यं ततः कृत्वा गुरुमङ्गलवीक्षणम्। देवकार्य्याणि पूर्वाह्णे मनुष्याणाञ्च मध्यमे। पितॄणामपराह्णे च कार्य्याण्येतानि यत्नतः। पौर्वाह्णिकन्तु यत् कर्म यदि तत् सायमाचरेत्। न तस्य फलमाप्नोति वन्ध्यस्त्रीमैथुनं यथा। दिवसस्याद्यभागे तु सर्वमेतद्विधीयते। द्वितीये च तथा भागे वेदाभ्यासोविधीयते। वेदाभ्यासोहि विप्राणां परमं तपउच्यते। ब्रह्मयज्ञः स विज्ञेयः षड़ङ्गसहितस्तु सः। वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः। ततोदानञ्च शिष्येभ्योवेदाभ्यासोहि पञ्चधा। समित्पुष्पकुशादीनां स कालः समुदाहृतः। तृतीये चैव भागे तु पोष्यवर्गार्थसाधनम्। पिता माता गुरुर्भार्य्या प्रजा दीनाः समाश्रिताः। अभ्यागतोऽतिथिश्चाग्निः पोष्यवर्गउदाहृतः। ज्ञातिर्बन्धुजनः क्षीणस्तथाऽनाथः समाश्रितः। अन्योऽप्यधनयुक्तश्च पोष्यवर्गउदाहृतः। भरणं पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनम्। नरकं पीड़ने चास्य तस्माद्यत्नेन तं भरेत्। सार्वभौतिकमन्नाद्यं कर्त्तव्यन्तु विशेषतः। ज्ञानविद्भ्यः प्रदातव्यमन्यथा नरकं व्रजेत्। स जीवति यएवैकोबहुभिश्चोपजीव्यते। जीवन्तोमृतकाश्चान्ये य आत्मम्भरयो नराः। बह्वर्थे जीव्यते कैश्चित् कुटुम्बार्थे तथा परैः। आत्मार्थेऽन्योन शक्नोति स्वोदरेणापि दुःखितः। दीनानाथविशिष्टेभ्योदातव्यं भूतिमिच्छता। अदत्तदाता जायन्ते परभाग्योपजीविनः। यद्ददाति विशिष्टेभ्योयज्जुहोति दिने दिने। तत्तु वित्तमहं मन्ये शेषं कस्यापि रक्षति। चतुर्थे च तथा भागे स्नानार्थं मृदमाहरेत्। तिलपुष्पकुशादीनि स्नानञ्चाकृत्रिमे जले। नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते। तेषां मध्ये तु यन्नित्यं तत्पुनर्भिद्यते त्रिधा। मलापहरणं पश्चान्मन्त्रवत्तु जले स्मृतम्। सन्ध्यास्नानमुभाभ्याञ्च स्नानभेदाः प्रकीर्त्तिताः। मार्जनं जलमध्ये तु प्राणायामोयतस्ततः। उपस्थानं ततः पश्चात् सावित्र्याजपउच्यते। सविता देवता यस्या मुखमग्निस्त्रिधा स्थितः। विश्वामित्रऋषिश्छन्दोगायत्री सा विशिष्यते। पञ्चमे च तथा भागे संविभागोयथार्हतः। पितृदेवमनुष्याणां कीटानाञ्चोपदिश्यते। देवैश्चैव मनुष्यैश्च तिर्य्यग्भिश्चोपजीव्यते। गृहस्थः प्रत्यहं यस्मात्तस्माज्ज्येष्ठाश्रमी गृही। त्रयाणामाश्रमाणान्तु गृहस्थोयोनिरुच्यते। तेनैव सीदमानेन सीदन्तीहेतरे त्रयः। मूलप्राणोभवेत् स्कन्धः स्कन्धाच्छाखाः सपल्लवाः। मूलेनैव विनष्टेन सर्वमेतद्विनश्यति। तस्मात् सर्व्वप्रयत्नेन रक्षितव्योगृहाश्रमी। राज्ञा, चान्यैस्त्रिभिः पूज्योमाननीयश्च सर्व्वदा। गृहस्थोऽपि क्रियायुक्तो न गृहेण गृहाश्रमी। न चैव पुत्रदारेण स्वकर्मपरिवर्जितः। अस्नात्वा चाप्यहुत्वा चाजप्त्वाऽदत्त्वा च मानवः। देवादीनामृणी भूत्वा नरकं प्रतिपद्यते। एकएव हि भुङ्क्तेऽन्नमपरोऽन्नेन भुज्यते। न भुज्यते सएवैकोयोभुङ्क्तेऽन्नं ससाक्षिणा। विभागशीलो योनित्यं क्षमायुक्तोदयापरः। देवतातिथिभक्तश्च गृहस्थः स तु धार्म्मिकः। दया लज्जा क्षमा श्रद्धा प्रज्ञा योगः कृतज्ञता। एते यस्य गुणाः सन्ति स गृही मुख्यउच्यते। संविभागं ततः कृत्वा गृहस्थः शेषभुग्भवेत्। भुक्त्वा तु सुखमास्थाय तदन्नं परिणामयेत्। इतिहासपुराणाद्यैः षष्ठञ्च सप्तमं नयेत्। अष्टमे लोकयात्रा तु बहिःसन्ध्या ततः पुनः। होमोभोजनकञ्चैव यच्चान्यद्गृहकृत्यकम्। कृत्वा चैवं ततः पश्चात् स्वाध्यायं किञ्चिदाहरेत्। प्रदोषपश्चिमौ यामौ वेदाभ्यासेन तौ नयेत्। यामद्वयं शयानोहि ब्रह्मभूयाय कल्पते। नैमित्तिकानि काम्यानि निपतन्ति यथा यथा। तथा तथैव कार्य्याणि न कालस्तु विधीयते। अस्मिन्नेव प्रयुञ्जानोह्यस्मिन्नेव तु लीयते। तस्मात् सर्व्वप्रयत्नेन कर्त्तव्यं सुखमिच्छता। सर्वत्र मध्यमौ यामौ हुतशेषं हविश्च यत्। भुञ्जानश्च शयानश्च ब्राह्मणोनावसीदति"

अह्ना पाठ्यम् ठञ्। २ सूत्रात्मकशास्त्रभाष्यस्य पादांशव्याख्याभेदे न०। यथा कणादगौतमपाणिनिसूत्रभाष्यस्य

पादांशव्याख्यारूपाणि अङ्गा पाठ्यत्वात् आह्निकानि "तमधीष्टोभृतो भूतोवेति" पा० ठञ्। दिवसे-सद्कृत्य-नियोजिते २अध्यापके ४भृते वेतनेन क्रीते दासादौ ५भूते स्वसत्तया व्याप्ते ज्वरादौ च।

आह्लाद पु० आ+ह्लद-घञ्। । आनन्दे। "नन्दस्त्वात्मज उत्पन्ने जाताह्लादो महामनाः" भाग०।

आह्लादन न० आ+ह्लद-णिच्-ल्युट्। १आनन्दसम्पादने कर्त्तरि ल्यु। २आनन्दसम्पादके त्रि०। करणे ल्युट्। ३आनन्दसाधने त्रि०स्त्रियां ङीप्।

आह्लादित त्रि०आ+ह्लद-णिच्-क्त। १कृतानन्दने। यस्मानन्दो जनितस्तस्मिन्। आह्लादोजातोऽस्य तार० इतच्। २जाताह्लादे च।

आह्लादिन् त्रि० आ-ह्लद-णिनि १आनन्दयुक्ते णिच्-णिनि। २आनन्दकारके। स्त्रियामुभयतो ङीप्।

आह्व त्रि० आह्वयति आ+ह्वे-ड। आह्वानकारके।

आह्वय पु० आह्वैर्यायते प्राप्यते या-घञर्थे क ३त०। १नामनि आह्वायकैर्हि नामोच्चारणेनैव आहूयते इति आह्वायकत्वप्राप्तौ नाम्न करणत्वात्तथात्वम्। आ+ह्वे वा० करणे श इत्यन्ये "काव्यं रामायणाह्वयम्," रामा०। गजाह्वयं शताह्वयं नागाह्वयम् इत्यादि। २प्राणिभिर्मेषादिभिः सपणद्यूतभेदे च सचाष्टादशविवादान्तर्गतः। "तेषामाद्यमृणादानम्" इत्युपक्रम्य "द्यूतमाह्वयएव च। पदान्यष्टादशैतानि व्यवहारस्थिताविहेति" मनूक्तेः। अस्य सम्पूर्व्वकतापि "अप्राणिभिर्यत् क्रियते तल्लोके द्यूतमुच्यते प्राणिभिः क्रियमाणस्तु स विज्ञेयः समाह्वयः" मनुना तथा प्रयोगात् तत्स्वरूपमुक्तं मिता० नार० "अक्षवध्रशलाकाद्यैर्देवनं जिह्मकारितम्। पणक्रीड़ा वयोभिश्च पदं द्यूतसमाह्वयम्" व्याख्यातञ्च मिता० यथा "अक्षाः पाशकाः वध्रश्चर्म्मपट्टिका शलाका दन्तादिमय्यो दीर्घचतुरस्राः आद्यग्रहणात् चतुरङ्गादिक्रीड़ासाधनकरितुरगादिकं गृह्यते। तैरप्राणिभिर्यद्देवनं क्रीड़ा पणपूर्व्विका क्रियते तथा वयोभिः पक्षिभिः कुक्कुटपारावतादिभिः चशब्दान्मल्लमेषादिभिश्च प्राणिभिर्या पणपूर्व्विका क्रीडा क्रियते तदुभयं द्यूतसमाह्वयाख्यं विवादपदम्। द्यूतञ्च समाह्वयश्च द्यूतसमाह्वयम्। तत्प्रकारः तत्रैव दर्शितो यथा। "तत्र द्यूतसभाधिकारिणो वृत्तिमाह। "ग्लहे शतिकवृद्धेस्तु सभिकः पञ्चकं शतम्। गृह्णीयाद्धूर्त्तकितवादितराद्दशकं शतम्" या०। परस्परं सम्प्रतिपत्त्या कितवैः परिकल्पितः पणोग्लह इत्युच्यते। तत्र ग्लहे तदाश्रया शतिका शतपरिमितादधिकपरिमाणा वा वृद्धिर्यस्यासौ शतिकवृद्धिः धूर्त्तकितवात्सञ्चकंतस्मा शतमात्मवृत्त्यर्थं सभिको गृह्णीयात्। पञ्च पणाद्यायो यस्मिन् शते तच्छतं पञ्चकं "तदस्मिन् वृद्ध्यायलाभेत्यादिना" (पा०)कन्। जितस्य ग्लहस्य विंशतितमम्भागं गृह्णीयादित्यर्थः। सभा कितवनिवासार्था यस्यास्त्यसौ (ठन्) सभिकः कल्पिताक्षादिनिखिलक्रीड़ोपकरणस्तदुपचितद्रव्योपजीवी सभापतिरुच्यते। इतरस्मात् पुनरपरिपूर्णशतिकवृद्धेः कितवाद्दशकं शतञ्जितद्रव्यस्य दशमम्भागं गृह्णीयादिति यावत्। एवं क्लृप्तवृत्तिना सभिकेन किङ्कर्त्तव्यमित्यत आह। "स सम्यक्पालितोदद्याद्राज्ञे भागं यथा कृतम्। जितमुद्ग्राहयेज्जेत्रे दद्यात्सत्यं वचःक्षमी" या०। यएवं क्लृप्तवृत्तिर्द्यूताधिकारी स राज्ञा धूर्त्तकितवेभ्यो रक्षितस्तस्मै राज्ञे यथा कृतं सम्प्रतिपन्नमंशन्दद्यात्। तथा जितं यत् द्रव्यन्तदुद्ग्राहयेद्बन्धकग्रहणेनासेधादिना च पराजितसकाशादुद्धरेदुद्धृत्य च तद्धनं जेत्रे जयिने सभिकोदद्यात्। तथा क्षमी भूत्वा सत्यञ्च वचोविश्वासार्थं द्यूतकारिणां वदेत्। तदुक्तन्नारदेन। "सभिकः कारयेद्द्यूतन्देयन्दद्याञ्च यत्कृतमिति"। यदा पुनः सभिकोदापयितुन्न शक्नोति तदा राजा दापयेदित्याह। "प्राप्ते नृपतिना भागे प्रसिद्धे धूर्त्तमण्डले। जितं ससभिके स्थाने दापयेदन्यथा न तु" या०। प्रसिद्धेऽप्रच्छन्ने राजाध्यक्षसमन्विते ससभिके सभिकसहिते कितवसमाजे सभिकेन च राजभागे दत्ते राजा धूर्त्तकितवमविप्रतिपन्नं जितम्पणन्दापयेत्। अन्यथा प्रच्छन्ने सभिकरहिते अदत्तराजभागे द्यूते जितम्पणञ्जेत्रे न दापयेत्। जयपराजयविप्रतिपत्तौ निर्णयोपायमाह। "द्रष्टारो व्यवहाराणां साक्षिणश्च तएव हि" या०। द्यूतव्यवहाराणां द्रष्टारः सभ्यास्तएव कितवाएव राज्ञा नियोक्तव्याः न पुनःश्रुताध्ययनसम्पन्ना इत्यादिनियमोऽस्ति। साक्षिणश्च द्यूते द्यूतकाराएव कार्य्याः न सा तत्र स्त्रीबालवृद्धकितवेत्यादि निषेधोऽस्ति। क्वचित् द्यूतन्निषेद्धुन्दण्डमाह। "राज्ञा सचिह्नन्निर्वास्याः कूटाक्षोपधिदेविनः" या०। कूटैरक्षादिभिरुपधिना च मतिवञ्चनहेतुना मणिमन्त्रौषधादिना ये दीव्यन्ति तान् श्वपदादिनाङ्कयित्वा राजा स्वराष्ट्रान्निर्वासयेत्। नारदेन निर्वासने विशेष उक्तः। "कूटाक्षदेविनः पापान् राजा राष्ट्राद्विवासयेत्। कण्ठेऽक्षमालामासज्य स ह्येषां विनयः स्मृत" इति। यानि च मनुवचनानि द्यू-

तन्निषेधपराणि "द्यूतं समाह्वयञ्चैव यः कुर्य्यात्कारयेत वा। तान् सर्वान् घातयेद्राजा शूद्रांश्च द्विजलिङ्गिनः" इत्यादीनि तान्यपि कूटाक्षदेवनविषयतया राजाध्यक्षमभिकरहितद्यूतविषयतया च योज्यानि। किञ्च "द्यूतमेकमुखं कार्य्यन्तस्करज्ञानकारणात्" या०। यत्पूर्वोक्तं द्यूतन्तदेकं मुखं प्रधानं यस्य द्यूतस्य तत्तथोक्तं कार्य्यम्। राजाध्यक्षाधिष्ठितं राज्ञा कारयितव्यमित्यर्थः तस्करज्ञानकारणात् तस्करज्ञानरूपप्रयोजनम्पर्य्यालोच्य। प्रायशः चौर्य्यार्जितधना एव कितवा भवन्त्यतश्चौरविज्ञानार्थमेकमुखं कार्य्यम्। द्यूतधर्मं समाह्वयेऽतिदिशन्नाह। "एष एव विधिर्ज्ञेयः प्राणिद्यूते समाह्वये" या०। ग्लहे शतिकवृद्धेरित्यादिना योद्यूते धर्म्म उक्तः सएव प्राणिद्यूते मल्लमेषमहिषादिनिर्वर्त्त्ये समाह्वयश्चब्दके ज्ञातव्यः"।

आह्वयन न० आह्वयं करोत्यनेन आह्वय+णिच् करणे ल्युट्। नामादेशसाधने शब्दभेदे। कर्त्तरि ल्यु। आह्वानकारके त्रि० "रामस्याह्वयना द्विजाः" रामा०।

आह्वयितव्य त्रि० आह्वयं करोति आह्वय+णिच्–कर्म्मणि तव्य। आह्वानीये आकारणीये। "नेयमाह्वयितव्या ते शयने वार्षपर्वणी" भा० आ० ८२ अ०।

आह्वर त्रि० आ+ह्वृ–अच्। १कुटिले २उशीनरदेशोत्पन्ने च। तेन कन्याशब्दस्य षष्ठीसमासे क्लीवत्वम्। आह्वरकन्थम्। अतोत्तरपदस्याद्युदात्तत्वम्।

आह्वा स्त्री आ+ह्वे–अङ्। १आह्वाने। करणे अङ्। २संज्ञायाम् नामनि "लेपश्च शस्यते श्विकृच्छ्रताह्वगौरसर्षपैः" सुश्रु०।

आह्वान न० आ+ह्वे–ल्युट्। आकारणे (डाका) "दूराह्वाने च गाने च रोदने च प्लुतोमतः" व्या०का०। करणे ल्युट्। २संज्ञायां नामनि नाम्ना ह्याऽऽकारणं हि क्रियते इति तस्य तथात्वम्। करणे ल्युट्। ३आह्वानसाधने राजकीयपत्रे। (तलवनामा) "यावदाह्वानदर्शनम्" भावे ल्युट्। व्यवहारे विवादनिर्णयार्थं ४राज्ञाऽऽकारणे (तलपकरा) तत्र वर्ज्यावर्ज्यप्रकारादि मिता० स्मृतिवाक्यात् दर्शितम्। यथा "ज्ञात्वा कार्य्यं न्याय्यं चेदाह्वानार्थमतः परम्। मुद्रां वा निक्षिपेत्तस्मिन् पुरुषं वा समादिशेत्। अकल्यबालस्थविरविषमस्थक्रियाकुलान्। मत्तोन्मत्तप्रमत्तार्त्तभृत्यान्नाह्वानयेन्नृपः। न हीनपक्षां युवतिं कुलजातां प्रसूतिकाम्। सर्ववर्णोत्तमां कन्यां तां ज्ञातिप्रभुकाः स्मृताः। तदधीनकुटुम्बिन्यः स्वैरिण्योगणिकाश्च याः। निष्कुला याश्च पतितास्तासामाह्वानमिष्यते। कालं देशञ्च विज्ञाय कार्य्याणाञ्च बलाबलम्। अकल्यादीनपि शनैर्यानैराह्वानयेन्नृपः। ज्ञात्वाभियोग येऽपि स्युर्वने प्रव्रजितादयः। तानप्याह्वानयेद्राजा गुरुकार्य्येष्वकोपयन्निति" अत्र सर्व्वत्र आह्वानं–करोति णिचि आह्वानयेदिति सिद्धम्। "इतोल्क् प्रकृतिवच्च कारकमिति वार्त्तिकं तु नेह प्रवर्त्तते बहुलग्रहणात्।

आह्वायक त्रि० आ+ह्वे–ण्वुल् युच्। आह्वानकारके आकारके। "आह्वायकेभ्यः श्रुतसन्नुवृत्तिः" भट्टिः णिनि आह्वायीत्यप्यत्र स्त्रियां ङीप्।

आह्वारक त्रि० आ+ह्वृ–ण्वुल्। कुटिले।

आह्वृति स्त्री आ+ह्वृ–क्तिन्। १कौटिल्ये कर्त्तरि क्तिच्। २राजभेदे "रुक्मी चैवाह्वृतिश्चैव नीलोनार्मदएव च" हरि० १४१अ० "रुक्मी चैवाह्वृतिश्चैव तस्यतुर्निश्चितौ रणे" हरिवं० १४२अ० "जरासन्धं समाश्रित्य तथैवाह्वृतिभीष्मकौ, हरि० १६०अ०।

इति श्रीतारानाथतर्कवाचस्पतिसंकलिते वाचस्पत्ये आकारादिशब्दार्थनिर्णयः।

इ

इ पु० अस्य विष्णोरपत्यम् अ+इञ्। १कामदेवे स हि रुक्मिण्यां विष्णोरंशात् कृष्णात् जातः तत्कथा यथा "रुक्मिण्यां वासुदेवाच्च लक्ष्म्यां कामोधृतव्रतः। शम्बरान्तकरो जज्ञे प्रद्युम्नः कामदर्शनः" हरि० १६२अ०। एवं व्युत्पत्तिमत्त्वेन कामदेवस्यैव इशब्दार्थता नाभिधायस्येति बहवः। कामदेवदैवत्याच्च अभिलाषे औपचारिक इत्यन्ये। नञर्थकस्य अ इत्येदम् अ+इञ्। २भेदे, ३रोषोक्तौ, ४निराकरणे, ५अनुकम्पायाम्, ६खेदे, ७विस्मये, ८निन्दायाम्, ९सम्बोधने च अव्य० चादि। निपातैकाच्कत्वात् अस्य प्रगृह्यसंज्ञा तेन इ इन्द्र इत्यादौ न सन्धिः

इ गतौ भ्वादि० पर० सक० अनिट्। अयति ऐषीत् इयाय इयतुः इयुः इययिथ इयेथ। अयन् इतः इतिः अयनम्। आयः इत्वा। "उदयति स तदद्भुतमालिभिः" नैष० "अयमुदयति मुद्राभञ्जनः पद्मिनीनाम्" उद्भटः। "उदयति विततोर्द्ध्वरश्मिरज्जौ" माघः। अयञ्च धातुः

कटो गतौ इत्यत्र इ ई इति प्रश्लेषात् लब्धः सि०कौ०

इक् स्मरणेऽधिपूर्व्वक एव कित् कित्करणमधीगर्थेत्यादौ विशेषणार्थम् अदादि०पर०सक०अनिट्। अध्येति अध्यैषीत् अध्यगात् इत्यन्ये इण इवास्य तिङि रूपं न भवति। अधीयन्। "ससीतयोराघवयोरधीयन्" भट्टिः। एतद्योगे कर्म्मणि संबन्धविवक्षायां षष्ठी। मातुरध्येति। प्रतिपदविहिततयाऽनया षष्ठ्या न समासः मातुरध्ययनम्। "कियत्स्विदिन्द्रो अध्येति कियन्मातुः कियत् पितुः" ऋ०४, १७,१२। "रामस्य दयमानोऽसावध्येति तव लक्ष्मणः" भट्टिः सम्बन्धाविवक्षायां तु द्वितीया। "अग्निं स्वर्ग्यमध्येषि मृत्यो!" कठो०। "अयमारुणिः संप्रतीममात्मानं वैश्वानरमध्येति" छा० उ०। "अधीहि भगवन्। ब्रह्मेति" छा०उ०। [वंशाङ्कुरे

इकट पु० एति भूमिमुद्भिद्य गच्छति इ-कटन् वा गुणाभावः।

इक्कट पु० ईयते इ-क्विप् इत् लभ्यः कटो यस्मात् ५ त० तस्य कः। कटसाधने तृणविशेषे त्रिका० इत्कट इति हारा०। तस्य सन्निकृष्टदेशादिः कुमुदा० चतुरर्थ्यां ठच्। इक्कटिक तत्सन्निकृष्टदेशादौ त्रि० स्त्रियां ङीप्। प्रेक्षा० चतुरर्थ्याम् इनि। तदर्थे स्त्रियां ङीप्।

इक्कवाल पु० "चेत् कण्टके (१ ४ ७ १०) पनफरे (२,५,८,११) तु ग्रहाः समस्ताः स्यादिक्कवालइति राज्यसुखाप्तिहेतुः" नील० ता०उक्ते सर्वलग्नतः उक्तस्थानानामन्यतमस्थाने-रव्यादिसमस्तग्रहाणां स्थितिहेतुके राजयोगभेदे।

इक्षु पु० इष्यतेऽसौ माधुर्य्यात् इष+क्सु। मधुररसयुते असिपत्रे स्वनामख्याते वृक्षे। तद्भेदगुणादिकमुक्तं भावप्र०। "इक्षुर्दीर्घच्छदः प्रोक्तस्तथा भूमिरसोऽपि च। गुडमूलोऽसिपत्रश्च तथामधुतृणः स्मृतः। इक्षवोरक्तपित्तघ्ना बल्या वृष्याः कफप्रदाः। स्वादुपाकरसाः स्निग्धा गुरवो मूत्रला हिमाः। अथेक्षुभेदाः "पौण्ड्रकोभीरुकश्चापि वंशकः शतपोरकः। कान्तारस्तापसेक्षुश्च काण्डेक्षुः सूचिपत्रकः। नैपालोदीर्घपत्रश्च नीलपोरोऽथ कोषकृत्। इत्येताजातयस्तेषां कथयामि गुणानपि। तत्र पौण्ड्रकभीरुकयोर्गुणाः वातपित्तप्रशमनोमधुरोरसपाकयोः। सुशीतोबृंहणोबल्यः पौण्ड्रकोभीरुकस्तथा अथ (कुशिया) कोषकृतोगुणाः "कोषकारो गुरुःशीतोरक्तपित्तक्षयापहः। अथ (काजला) कान्तारेक्षुगुणाः कान्तारेक्षुर्गुरुर्वृष्यः श्लेष्मलोबृंहणः सरः। (वडौंसा) वंशकगुणाः "दीर्घपोरः सुकठिनः सक्षारो वंशकःस्मृतः। शतपोरकगुणाः "शतपर्वाभवेत्किञ्चित्कोषकारगुणान्वितः। विशेषात्किंचिदुष्णश्च सक्षारःपवनापहः" सुश्रुते तु काण्डेक्षुरित्यत्र काष्ठेक्षुरिति पाठः इतोऽवशिष्टानां गुणास्तत्रोक्ता यथा "कान्तारतापसाविक्षू वंशकानुकरौ गुणै। एवंगुणस्तु काष्ठेक्षुःस तु वातप्रकोपणः। सूचीपत्रो नीलपोरो नैपालो दीर्घपत्रकः। वातलाःकफपित्तघ्नाः सकषाया विदाहिनः" भाव०प्र० "बालयुवबृद्धेक्षुगुणाः बालइक्षुः कफं कुर्यान्मेदोमेहकरश्च सः। युवा तु वातहृत्स्वादुरीषत्तीक्ष्णश्च वातनुत्। रक्तपित्तहरोवृद्धः क्षतहृद्बलवीर्य्यकृत्। अथाङ्गभेदेन गुणभेदः मूले तु मधुरोऽत्यर्थं मध्येऽपि मधुरः स्मृतः। अग्रेष्वक्षिषु विज्ञेय इक्षूणां लवणोरसः। अथ दन्तपीडितेक्षुरसस्य गुणाः दन्तनिष्पीडितस्येक्षोरसः पित्तास्रनाशनः। शर्करासमवीर्य्यःस्यादविदाही कफप्रदः। अथ यन्त्रपीडितेक्षुरस गुणाः मूलाग्रजन्तुग्रन्थ्यादिपीडनान्मलसङ्करात्। तस्माद्विदाही विष्टम्भी गुरुः स्याद्यान्त्रिकोरसः। अथ पर्य्युषितेक्षुरसगुणाः रसःपर्य्युषितोनेष्टोह्यम्लोवातापहो गुरुर्विकफपित्तकरः शोषी भेदनश्चातिमूत्रलः। अथपक्वेक्षुरसस्य गुणाः इक्षोर्विकारास्तृड्दाहमूर्च्छापित्तास्रनाशनाः। गुरवोमधुरा बल्याः स्निग्धा वातहराःस्मृताः। तृष्णामोहहराःख्याता बृंहणाविषहारिणः। अथ (झोला) फाणितस्य लक्षणं गुणाश्च इक्षोरसस्तु यः पक्वः किञ्चिद्गाढो बहुद्रवः। स एवेक्षुविकारेषु ख्यातःफाणितसंज्ञया। फाणितं गुर्व्वभिष्यन्दि बृंहणं कफशुक्रकृत्। वातपित्तश्रमान् हन्ति मूत्रवस्तिविशोधनम्। अथ मत्स्यण्ड्याः(सारगुड) (राव) इति ख्याताया लक्षणं गुणाश्च इक्षोरसोयः संपक्वोघनः किंचिद्द्रवान्वितः। मन्दं विस्यन्दते यस्मात् मत्स्यण्डीति ततः स्मृता। मत्स्यण्डी भेदिनी बल्या लघ्वी पित्तानिलापहा। मधुरा बृंहणी वृष्या रक्तदोषापहा स्मृता। अथ (ढिमे गुड़) गुड़स्य लक्षणं गुणाश्च इक्षोरसोयः सम्पक्वोजायतेलोष्टवद्दृढः। स गुड़ोगौड़देशे तु मत्स्यण्ड्येव गुड़ोमतः। गुड़ोवृष्योगुरुः स्निग्धोवातघ्नो मूत्रशोधनः। नातिपित्तहरो मेदःकफक्रिमिबलप्रदः। अथ नवपुराणगुडगुणाः गुड़ोनवः कफश्वासकासक्रिमिहरोऽग्निकृत्। पित्तघ्नो मधुरः स्निग्धो वातघ्नोऽसृक्प्रसादनः स पुराणोऽधिकगुणो बुधैः पथ्यतम स्मृतः" द्रव्यभेदेन युक्तस्य गुड़स्य गुणाः श्लेष्माणमाशु विनिहन्ति सदार्द्रकेण पित्तं निहन्ति च तदेव हरीतकीभिः। शुण्ठ्या समं हरति वातमशेषमित्थं दोषत्रयक्षयकराय नमो गुड़ाय" (खांड) खण्डस्य गुणाः

खण्डन्तु मधुरं वृष्यं चक्षुष्यं वृंहणं हिमम्। वातपित्तहरं स्निग्धं बल्यं वातहरं परम्। (चिनि) सितायाः लक्षणं गुणाश्च खण्डन्तु सिकतारूपं सुश्वेतं शर्करा सिता। सिता सुमधुरा रुच्या वातपित्तास्रदाहहृत्। मूर्च्छाच्छर्दिज्वरान् हन्ति सुशीता शुक्रकारिणी। अथ "(मिचरि) सितोपलगुणाः भवेत् पुष्पसिता शीता रक्तपित्तहरी मता। सितोपलनिभा लघ्वी वातपित्तहरा हिमा। शर्करा छर्द्यतीसारतृड्दाहरक्तपित्तनुत्। यथा यथैव नैर्मल्यं मधुरत्वं तथा तथा। स्नेहगौरवशैत्यानि सरत्वं च तथा तथा" इति भावप्र० इक्षुवर्गः। एतत्प्रसङ्गात् सुश्रुते खण्डादिजातद्रव्याणामन्यद्रव्यजातशर्कराणाञ्च गुणा उक्ता यथा। "यो यो मत्स्यण्डिकाखण्डशर्कराणां स्वको गुणः। तेन तेनैव निर्दिश्यास्तेषां विस्रावणे गुणाः। सारस्थिता सुविमला निःक्षारा च यथा यथा। तथा तथा गुणवती विज्ञेया शर्करा बुधैः। मधुशर्करा पुनश्छर्द्यतीसारहरी रूक्षा छेदनी प्रह्लादनी कषायमधुरा मधुरविपाका च। यवासशर्करा मधुरकषाया तिक्तानुरसा श्लेष्महरी सरा चेति। यावत्यः शर्कराः प्रोक्ताः सर्वा दाहप्रणाशनाः। रक्तपित्तप्रशमनाश्छर्दिमूर्च्छातृष्णापहाः। रूक्षं मधूकपुष्पोत्थं फाणितं वातपित्तकृत्। कफघ्नं मधुरं पाके कषायं वस्तिदूषणम्" "मन्दाक्रान्ता वितरति रसं नेक्षुयष्टिः कदाऽपि हन्दो०। श्रीफलञ्चेक्षुदण्डञ्च विप्राणां तु बलिर्मतः" कालिकापु० "कुष्माण्डमिक्षुदण्डांश्च" देवी पु० इक्षोर्विकारः अण्। ऐक्षव गुडादौ त्रि०। "ऐक्षव गुडवर्जितम्"स्मृतिः। इक्षूणां भवनं क्षेत्रं शाकटच् शाकिनच् च वा तद्भवने क्षेत्रे। इक्षूणां छाया। इक्षुच्छायम् न० "इक्षुच्छायानिषादिन्य" रघुः अत्र छायानिषादिन्य इतिच्छेदः सि०कौ०इक्षूणां वनम्। अवनस्पतित्वात् नित्यं णत्वम् इक्षुवणम्। २कोकिलाक्षे च राजनि०। २इक्षुछायाम् [तृणभेदे स्वार्थे कन्। २इक्षुदण्डे

इक्षुक पु० इक्षुप्रकारः स्थूला० कन्। १इक्षुतुल्यस्वादे (नडा)

इक्षुकाण्ड पु० इक्षोः काण्डइव काण्डोऽस्य। १काशतृणे २मुञ्जतृणे (मुज) इक्षुः काण्डइव २इक्षुदण्डे च। "क्षिप्तं पुरो न जगृहे मुहुरिक्षुकाण्डम्" माघः।

इक्षुकीय त्रि० इक्षवः सन्त्यस्मिन् छ नड़ा० कुक् च। इक्षुयुक्ते देशे तत्र भवः अण् बिल्व०छस्य लुक्। ऐक्षुकस्तत्र भवे त्रि० स्त्रियां ङीप्।

इक्षुकुट्टक पु० इक्षून् कुट्टयति कुट्ट–णिच्–शिल्पिनि क्वुन् ईत०। इक्षुच्छेदके गुड़कारके कर्मीवलभेदे। [२काशतृणे स्त्री भावप्र०

इक्षुगन्ध पु० इक्षोरिव गन्ध एकदेशावयवो यस्य। १क्षुद्रगोक्षुरे

इक्षुगन्धा स्त्री इक्षोर्गन्ध इव गन्धोऽस्याः। शुक्लविदार्य्याम्.

इक्षुज त्रि०इक्षोस्तद्रसाज्जायते जन–ड ५त०। इक्षुविकारे गुड़ादौ "फाणितञ्चैव मत्स्यण्डी गुड़ः खण्डकमेव च। सिता सितोपलाश्चैते षड्भेदा इक्षुजामताः। इक्षुशब्दे दृष्टे तद्गुणादिकमुक्तम्। [शिशेवे २काशतृणे च।

इक्षुतुल्या स्त्री इक्षुणा तुल्या पत्रादिना। (जनार) १धान्य-

इक्षुदण्ड पु०इक्षुर्दण्ड इव दण्डकारे दीर्घत्वौ इक्षुयष्टिरप्यत्र स्त्री

इक्षुदर्भा स्त्री इक्षोरिव दर्भोगन्धोऽस्याः। तृणपत्रिकायाम् राजनि०। [इक्षुरसतुल्यजलवाहिनि नदीभेदे।

इक्षुदा स्त्री इक्षुमिक्षुरसास्वादं ददाति जलेन दा–क।

इक्षुनेत्र न०इक्षुर्नीयते पुनरुत्पादनायारोप्यतेऽनेन नी-ष्ट्रन् इक्षोर्नेत्रमिव वा। इक्षुनेत्राकारे तद्ग्रन्थौ।

इक्षुपत्र पु० इक्षोः पत्रमिव पत्रमस्य। (जनार) धान्यभेदे।

इक्षुपाक पु० इक्षोः पाकः पच्यमानेक्षुरसादिः। गुड़ादौ

इक्षुप्र पु०इक्षुरिव पूर्य्यते पृ–कर्मणि शब्दार्थक हस्वपत्ते नोत्। शरवृक्षे रत्नमा०।

इक्षुबालिका स्त्री इक्षोर्बालः केशइव बालः शीर्षस्थपत्रादिरस्याः। इक्षुतुल्यशीर्षे काशतृणे राजनि०।

इक्षुभक्षिती स्त्री इक्षुर्भक्षितो यया जातिवाचकपूर्व्वपदनिष्ठान्तत्वात् ङीप्परनि०। इक्षुभक्षणकर्त्र्यां स्त्रियाम्

इक्षुमती स्त्री इक्षुः इक्षुरसोऽस्त्यस्याम् नद्यां मतुप् ङीप्। नदीभेदे "सीता चेक्षुमती वेत्रा देविका च महानदी" भा० आ०८अ० [६त०। इक्षुमूले २तद्ग्रन्थौ न०।

इक्षुमूल पु०इक्षोर्मूलं ग्रन्थिरिव मूलं ग्रन्थिर्यस्य। १वंशवृक्षे।

इक्षुमेह पु० इक्षुरसतुल्योमेहः। सुश्रुतोक्ते प्रमेहभेदे तद्भेदा विंशतिर्निदानसंहितास्तत्रोक्ता यथा "दिवास्वप्नव्यायामालस्यप्रसक्तं शीतस्निग्धमधुरमेद्यद्रवान्नपानसेविनं पुरुषं जानीयात्प्रमेही भविष्यतीति। तस्य चैवं प्रवृत्तस्यापरिपक्वा एव वातपित्तश्लेष्माणो यदा मेदसा सहैकत्वमुपेत्य मूत्रवाहिस्रोतांस्यनुसृत्याधो गत्वा वस्तेर्मुखमाश्रित्य निर्भिद्यन्ते तदा प्रमेहान् जनयन्ति। तेषान्तु पूर्व्वरूपाणि हस्तपादतलदाहः स्निग्धपिच्छिलगुरुता गात्राणां मधुरशुक्लमूत्रता तन्द्रा सादः पिपासा दुर्गन्धश्च श्वासस्तालुगलजिह्वादन्तेषु मलोत्पत्तिर्जटिलीभावः केशानां वृद्धिश्च नखानाम्। तत्राविलप्रभूतमूत्रलक्षणाः सर्व्व एव सर्व्वे

दोषसहत्याः सह पिडकाभिः । तत्र कफादुदकेक्षुसुरासिकताशनैर्लवणपिष्टसान्द्रशुक्रफेनमेहाः दश साध्या दोषदूष्याणां समक्रियत्वात् । पित्तान्नीलहरिद्राम्लक्षारमञ्जिष्ठाशोणितमेहाः षट् याप्या दोषदूष्याणां विषमक्रियत्वात् । वातात्सर्पिर्वसाक्षौद्रहस्तिमेहाश्चत्वारोऽसाध्यतमा महात्ययिकत्वात् । तत्र वातपित्तमेदोभिरन्वितः श्लेष्मा श्लेष्मप्रमेहान् जनयति वातकफशोणितमेदोभिरन्वितं पित्तं पित्तप्रमेहान् । कफपित्तवसामज्जमेदोभिरन्वितो वायुर्वातप्रमेहान् । तत्र श्वेतमवेदनमुदकमेही मेहति इक्षुरसतुल्यमिक्षुमेही, सुरामेही सुरातुल्यं, सरुजम् सिकतानुविद्धं सिकतामेही शनैः सकफ मल्पं शनैर्मेही, विशदं लवणतुल्यं लवणमेही, हृष्टरोमा पिष्टरसतुल्यं पिष्टमेही, आविलं सान्द्रं सान्द्रमेही, शुक्रतुल्यं शुक्रमेही स्तोकं स्तोकं सफेनं फेनमेही मेहति । अत ऊर्द्ध्वं पित्तनिमित्तान्वक्ष्यामः । सफेनमच्छं नीलं नीलमेही मेहति सदाहं हरिद्राभं हरिद्रामेही, अम्लरसगन्धमम्लमेही, सुत क्षारप्रतिभं क्षारमेही, मञ्जिष्ठोदकप्रकाशं मञ्जिष्ठामेही । शोणितप्रकाशं शोणितमेही मेहति । अत ऊर्द्ध्वं वातनिमित्तान्वक्ष्यामः । सर्पिः प्रकाशं सर्पिर्मेही मेहति वसाप्रकाशं वसामेही, क्षौद्ररसवर्णं क्षौद्रमेही, मत्तमातङ्गवदजस्रं हस्तिमेही मेहति । मक्षिकोपसर्पणमालस्यं मांसोपचयः प्रतिश्यायः शैथिल्यारोचकाविपाकाः कफप्रसेकच्छर्दिनिद्राकासश्वासाश्चेति श्लेष्मजानामुपद्रवाः । वृषणयोरवदरणं वस्तिभेदो मेढ्रतोदो हृदिशूलमम्लीकाज्वरातीसारारोचका वमथुः परिधूमायनं दाहो मूर्च्छा पिपासा निद्रानाशः पाण्डुरोगः पीतविण्मूत्रनेत्रत्वञ्चेति पैत्तिकानाम् । हृद्ग्रहो लौल्यमनिद्रा स्तम्भः कम्पः शूलं बद्धपुरीषत्वञ्चेति वातजानाम् । एवमेते विंशतिः प्रमेहाः सोपद्रवा व्याख्याताः । तत्र वसामेदोभ्यामभिपन्नशरीरस्य त्रिभिर्दोषैरनुगतधातोः प्रमेहिणो दश पिडका जायन्ते । तद्यथा । शराविका सर्षपिका कच्छपिका जालिनी विनता पुत्रिणी मसूरिका अलजी विदारिका विद्रधिका चेति । शरावमात्रा तद्रूपा निम्नमध्या शराविका । गौरसर्षपसंस्थाना तत्प्रमाणा च सर्षपी । सदाहा कूर्म्मसंस्थाना ज्ञेया कच्छपिका बुधैः । जालिनी तीव्रदाहा तु मांसजालसमावृता । महती पिडका नीला पिडका विनता स्मृता । महत्यल्पाचिता ज्ञेया पिडका सा तु पुत्रिणी । मसूरसमसंस्थाना ज्ञेया सा तु मसूरिका । रक्तासिता स्फोटवती दारुणा त्वलजी भवेत् । विदारीकन्दवद्वृत्ता कठिना च विदारिका । विद्रधेर्लक्षणैर्युक्ता ज्ञेया विद्रधिका बुधैः । ये यन्मयाः स्मृता मेहास्तेषामेतास्तु तत्कृताः । गुदे हृदि शिरस्यंसे पृष्ठे मर्म्मणि चोत्थिताः । सोपद्रवा दुर्ब्बलस्य पिडकाः परिवर्ज्जयेत् । कृत्स्नं शरीरं निष्पीड्य मेदोमज्जवसायुतः । अधः प्रक्रमते वायुस्तेनासाध्यास्तु वातजाः । प्रमेहपूर्व्वरूपाणामाकृतिर्यत्र दृश्यते । किञ्चिच्चाप्यधिकं मूत्रं तं प्रमेहिणमादिशेत् । कृत्स्नान्यर्द्धानि वा यस्मिन् पूर्व्वरूपाणि मानवे । प्रवृत्तमूत्रमत्यर्थं तं प्रमेहिणमादिशेत् । पिडकापीडितं गाढमुपसृष्टमुपद्रवैः । मधुमेहिनमाचष्टे स चासाध्यः प्रकीर्त्तितः । स चापि गमनात् स्थानं, स्थानादासनमिच्छति । आसनाद्वृणुते शय्यां, शयनात् स्वप्नमिच्छति । यथाहि वर्णानां पञ्चानामुत्कर्षापकर्षकृतेन संयोगविशेषेण शवलबभ्रुकपिलकपोतमेचकादीनाम् वर्णानामनेकेषामुत्पत्तिर्भवति । एवमेव दोषधातुमलाहारविशेषेणोत्कर्षापकर्षकृतेन संयोगविशेषेण । भवति चात्र । सर्व्वएव प्रमेहास्तु कालेनाप्रतिकारिणः । मधुमेहत्वमायान्ति तदाऽसाध्या भवन्ति हि"तत्रैव चिकित्सास्थाने सर्वप्रमेहस्य प्रकारान्तरेण द्वैविध्यमुक्तम् । यथा "द्वौ प्रमेहौ सहजोऽपथ्यनिमित्तश्च भवतः तत्र सहजोमातृपितृवीजदोषकृतः । अहिताहारजोऽपथ्यनिमित्तः। तयोः पूर्व्वेणोपद्रुतः कृशो रूक्षोऽल्पाशी पिपासुर्भृशं परिसरणशीलश्च भवति उत्तरेण स्थूलो बह्वाशी स्निग्धः शय्यासनस्वप्नप्रायेणेति" 'तत्रोदकमेहिनं पारिजातकषायं पाययेत् इक्षुमेहिनं वैजयन्ती कषायम्" च सुश्रु॰

इक्षुयन्त्र न॰ इक्षोर्निष्पीडनं यन्त्रम् शा॰त॰। इक्षुनिष्पीडके यन्त्रे (महाशाल) "गोकुले कन्दुशालायां तैलयन्त्रेक्षुयन्त्रयोः । अमीमांस्यानि शौचानि" स्मृतिः ।

इक्षुयोनि पु॰ इक्षोरिव योनिर्यस्य । पुण्ड्रके इक्षौ राजनि॰

इक्षुर पु॰ इष—बा॰—क्सुरच् । १कोकिलाक्षे (कुलेखारा) रत्ना॰ २गोक्षुरे (गोखुरी) ३इक्षौ च शब्दरत्ना॰ ४काशे राजनि॰ । संज्ञायां कन् । १कोकिलाक्षे । २काशतृणे ३स्थूलशरे च राजनि॰ ।

इक्षुरस पु॰ इक्षोः रस इव रसो यस्य । (नडा) इति ख्याते काशे १तृणभेदे । "काशः काशेक्षुरुद्दिष्टः स स्यादिक्षुरसस्तथा । इक्षुवालिकेक्षुगन्धा च तथा पोटगलः स्मृतः । काशः-स्यान्मधुरस्तिक्तः स्वादुपाको हिमः सरः । मूत्रकृच्छ्राश्मरीदाहक्षयपित्तास्ररोगहृत्" भाव॰प्र॰ । ६त॰ ।

इक्षोः रसे पु० । तस्य गुणादिकमिक्षुशब्दे उक्तम् ।

इक्षुरसक्वाथ पु० इक्षुरसस्य क्वाथः पाकभेदः । फाणितादौ ।

इक्षुवल्ली(ल्लरी) स्त्री इक्षुरिव सुस्वादा वल्ली वल्लरी या लता । क्षीरविदार्य्याम् । (क्षीरकन्द) । राजनि०

इक्षुवालिका स्त्री इक्षुरिव वलति वल–ण्वुल् । (तालमाखना) इतिख्याते १इक्षौ २काशे च ।

इक्षुवाटी स्त्री इक्षोर्वाटीव । पुण्ड्रके इक्षौ राजनि० । ६त० । २इक्षूत्पादकक्षेत्रे । स्वार्थे कन् । उभयत्र ।

इक्षुविकार पु० ६त० । इक्षुजशब्ददर्शिते षड्विधे गुड़ादौ

इक्षुवेष्टन पु० इक्षोरिव वेष्टनमस्य । भद्रमुञ्जे । "भद्रमुञ्जःशरो-वाततेजन स्त्विक्षुवेष्टनः । मुञ्जद्वयं तु मधुरं तुवरं शिशिरं तथा । कम्पास्रदाहतृष्णार्त्तिमूत्रवस्त्यक्षिरोगहृत् । दोषत्रयहरं वृष्यं मेखलास्वपयुज्यते" भावप्र० ।

इक्षुशर पु० इक्षुरिव शृणाति शॄ–अच् । ४कामभेदे तद्वने हि गन्तुर्गात्रक्षतेर्दृष्टत्वात् तस्येक्षुवत् हिंसकत्वम् ।

इक्षुशाकट न० इक्षूणां भवनं क्षेत्रम् इक्षु+शाकटच् । (दोकल्प) इति ख्याते इक्षुभवनयोग्ये क्षेत्रे । तदर्थे शाकिनच् । इक्षुशाकिनशब्दोऽप्यत्रार्थे न० ।

इक्षुसमुद्र पु० इक्षुरसस्वादूदकः समुद्रः । समुद्रभेदे । "लवणेक्षुसुरासर्पिर्दधिदुग्धजलान्तकाः" पुरा० तत्स्थलम् सि० शि० उक्तम् । "भूमेरर्द्धं क्षारसिन्धोरुदक्स्थं जम्बुद्वीपं प्राहुराचार्य्यवर्य्याः । अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये, क्षारक्षीराद्यम्बुधीनां निवेशः" "दध्नोघृतस्येक्षुरसस्य तस्मान्मद्यस्य च स्वादुजलस्य चान्ते" ।

इक्षुसार पु० ६त० । फाणितादौ ।

इक्ष्वाकु पु० इक्षुमिच्छामाकरोति इक्षु+आ+कृ–डु । १कटुतुम्ब्याम् २सूर्य्यवंश्ये आदिराजे च । "यस्येक्ष्वाकुरुपव्रते" ऋ० १०, ६, ४ । स च वैवस्वतमनोः पुत्रः । "मनोर्वैवस्वतस्यासन् पुत्रा वै नव तत्समाः । इक्ष्वाकुश्चैव नाभागो धृष्णुः शर्यातिरेव च । नरिष्यः प्रांशुषष्ठास्ते नाभागारिष्टसप्तमाः करूषश्च पृषध्रश्च नवैते भरतर्षभ" ।। "इक्ष्वाकुर्ज्येष्ठदायादो मध्यदेशमवाप्तवान्" हरिवं० १० अ० "तस्योत्पत्तिप्रकारस्तत्रैवोक्तः क्षुवतस्तु मनोः पुत्र इक्ष्वाकुरभवत्ततः" । "तस्य पुत्रशतं चासीदिक्ष्वाकोर्भूरिदक्षिणम् । तेषां ज्येष्ठो विकुक्षिस्तु विकुक्षित्वादयोधिनाम्" "इक्ष्वाकुस्तु विकुक्षिं वै अष्टकायामथादिशत्" हरि० । इक्ष्वाकोरपत्यम् । अण् दाण्ड० नि० । ऐक्ष्वाकस्तदपत्ये बहुषु तस्य लुक् इक्ष्वाकवः – "इक्ष्वाकूणां दुरापेऽर्थे" "गलितवयसामिक्ष्वाकूणामिदं हि कुलव्रतम्" "इक्ष्वाकुभिः पुण्यतरीकृतानि" इति च रघुः ।

इक्ष्वारि पु० इक्षुरिव समन्तादृच्छति आ+ऋ–इन् । काशतृणे । [इक्षुरिवालति अल–ण्वुण् वा । काशतृणे भावप्र०

इक्ष्वालिका स्त्री इक्षूणामालिरिव कायति प्रकाशते कै क–

इख गतौ भ्वादि० पर० सक० सेट् । इखति ऐखीत् । इयेख ईखतुः । एखिता एखिष्यति ऐखिष्यत् ।

इखि गतौ इदित् भ्वादि० पर० सक० सेट् । इङ्खति ऐङ्खीत् । इङ्खाम्–बभूव–आस–चकार । इङ्खिष्यति । इङ्खिता ऐङ्खिष्यत् । प्रेङ्खन् प्रेङ्खितम् प्रेङ्खणम् ।

इगि गतौ इदित् भ्वादि० पर० सक० सेट् । इङ्गति ऐङ्गीत् । इङ्गिष्यत् । इङ्गितम् । "त्वया सृष्टमिदं विश्वं यच्चेङ्गं यच्च नेङ्गति" भा० व० ४२ अ० । तस्यात्मनेपदित्वमपि "योऽवतिष्ठति नेङ्गते" यथा दीपोनिवातस्थो नेङ्गते सोपमा स्मृता" गीता । अत्र स्पन्दनमात्रपरतयाम-ऽकर्म्मकत्वम् । णिच्–इङ्गयति चालयतीति प्रेरयतीति वार्थः । उद्–प्रेरणे "शुनमष्ट्रामुदिङ्गय" ऋ० ४, ५७ ५७, । सम्+सम्यक् चालने । "पुष्करिणीं समिङ्गयति सर्व्वतः" ऋ० ४, ७, ७,

इङ् अध्ययने अधिपूर्व्व एव ङित् अदा० आत्म० सक० अनिट् । अधीते अधीयीत अध्यैष्ट–अध्यगीष्ट । 'अधिजगे, अध्यैष्यत–अध्यगीष्यत "योऽधीते शक्तितोऽन्वहम्" स्मृतिः । 'नाधीयीत कदाचन' मनुः । "अध्यैष्ट वेदांस्त्रिदशानयष्ट" भट्टिः शानच् अधीयानः । अकृत्क्विपि कर्त्तरि शतृ अधीयन् "अधीयन्नात्मविद्विद्यां धारयन् मस्करिव्रतम्" भट्टिः अध्येतव्यम् "श्रोतव्यमिह शूद्रेण नाध्येतव्यं कदाचन" । "स्वाध्यायोऽध्येतव्यः" श्रुतिः । अध्ययनीयम् । अध्येयः "वेदएव सदाऽध्येयः" स्मृतिः । अध्येता । अधीतः "अधीतवेदवेदाङ्गत्वेन" वेदान्त सा० । ज्ञानार्थत्वात् कर्त्तरि क्त अधीतः "अधीते शतशाखस्म्" स्मृतिः "अधीतिः "अधीतिबोधाचरणप्रचारणैः" नैष० । अध्येष्यमाणः । "पीत्वापोऽध्येष्यमाणस्तु आचमेत् प्रयतोऽपि सन्" मनुः भावे अधीतम् । अधीतमनेन इनि अधीती । "त्वगुत्तरासङ्गवतीमधीतिनीम्" कुमा० अधीत्य "अनधीत्य द्विजोवेदान् योऽन्यत्र कुरुते श्रमम्" स्मृतिः । "अधीत्य चतुरोवेदान्" पुरा० । अध्ययनम् । "अध्ययनेनाविप्रकृष्टः" पा० । "शस्त्राण्डवैरध्ययनं विनापि" मथुरा० अध्यायः "स्वाध्यायोऽध्येतव्यः" श्रुतिः णिच् अध्यापयति "अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीत" श्रुतिः अध्यापिपत् अध्यजिगपत्

"अध्यापयामास पितॄन्" मनुः णिच्–सन् । अध्यापिपयिषति–ते अधिजिगापयिषति–ते केवलात् सन्। अधिजिगांसते । अध्यापकः अध्यापकशब्दे उदा॰अध्यापितः "अध्यापितस्योशनसापि नीतिम्" कुमा॰ । "भृतकाध्यापको यश्च भृतकाध्यापितस्तथा" मनुः ।

इङ्ग पु॰ इगि भावे घञ् । १चलने कम्पने २इङ्गिते च । कर्त्तरि अच् । ३जङ्गमे "त्वया सृष्टमिदं सर्व्वं यच्चेङ्गं यच्च नेङ्गति" भा॰व॰४२अ॰ । ४अद्भुते च त्रि॰ मेदि॰ ।

इङ्गन न॰इगि भावे ल्युट् । १इङ्गिते २चलने ३ज्ञाने च । णिच्–ल्युट् । ४चालने । "उपांशुसवनस्यानिङ्गनश्रुतेः" कात्या॰ १०'१,६, यतउपांशुसवनस्यानिङ्गनमचालनम् श्रूयते "अनिङ्गयमानानि हुरे आहृतीयसवनात्" श्रुतिः । कर्क॰ । युच् इङ्गना प्यत्र स्त्री ।

इङ्गि(ड)ल पु॰इगि–इलच् वा लस्य डः । इङ्गुदवृक्षे । "वीरणतूलमिश्रमिङ्गिड़प्रपुटेन जुहोति" श्रुतिः ।

इङ्गित न॰ इगि–भावे क्त । १चलने २हृद्गतभावावेदके चेष्टाविशेषे "इङ्गितं हृद्गतो भावः इति" सज्जनोक्ते ३हृदयस्थे भावे । "अगूढ़सद्भावमितीङ्गितज्ञया" कुमा॰"वाह्यै र्विभावयेल्लिङ्गैर्भावमन्तर्गतं नृणाम् । स्वरवर्णेङ्गिताकारैश्चक्षुषा चेष्टितेन च" मनुना तस्य अन्तर्गतभावावेदकत्वमुक्तम् । "तत्र स्वरो गद्गदादिः, वर्णोऽस्वाभाविकः इङ्गितं स्वेदवेपथुरोमञ्चादि" व्य॰त॰ रघु॰ । "स विद्यादस्य कृत्यानि निगूढेङ्गितचेष्टितैः" आकारमिङ्गितं चेष्टां भृत्येषु च चिकीर्षितम्" "इङ्गिताकारचेष्टज्ञं शुचिं दक्षं कुलोद्भवम्" मनुः । "तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च"रघुः। कर्त्तरि क्त ४चलिते त्रि॰।

इङ्गु पु॰ इङ्गति चलत्यनेन इगि–उण् । रोगे ।

इङ्गुद पु॰ इङ्गुः रोगस्तम् द्यति दो-क । १तापसतरौ "इङ्गुदः कुष्ठभूतादिग्रहव्रणविषक्रमीन् । हन्त्युष्णः श्वित्रशूलघ्नस्तिक्तकः कटुपाकवान्"भाव॰प्र॰। गौरा॰ ङीष् इङ्गुदीत्यप्यत्र स्त्री । "तामिङ्गुदीस्नेहकृतप्रदीपम्"रघुः तस्याःफलम् अण् प्लक्षादि॰न लुक् । ऐङ्गुदं तत्फले न॰। अस्याः पर्य्यायद्वारा लक्षणं दर्श्यते । हिङ्गुपत्रता विषहारिता वातनाशकता तैलफलत्वम् तीक्ष्णकण्टकता पूतिगन्धिता कोष्टुफलत्वम् । २ज्योतिष्मतीवृक्षे पु॰रत्नमा॰।

इङ्गेज पु॰ इङ्गते भोगार्थम् इगि–रन् इङ्गः लण्डदेशस्तत्र जायते जन–ड अलुक् समा॰। लण्डनस्यजने । "पूर्व्वाम्नाये नवशतं षड़शीतिः प्रकीर्त्तिताः । फिरङ्गभाषया मन्त्रास्तेषां संसाधनात् कलौ । अधिपामण्डलानाञ्च संग्रामेष्वपराजिताः । इङ्गेजाः नवषट्पञ्च लण्डजाश्चापि भाविनः" मेरुत॰ २३प्रकाशे ।

इच्छक पु॰ इच्छा+अस्त्यत्रेत्यर्थे अच् इच्छकमिव रसोऽस्य कप् । (टावालेबु) इति ख्याते १वृक्षे । अस्त्यर्थे अच् स्वार्थे कन् । २इच्छायुक्ते त्रि॰ ।

इच्छा स्त्री इष-भावे श । इदं मे भूयादिति वेदान्तादिमते मनोधर्म्मभेदे सुखतत्साधनविषयचित्तवृत्तौ न्यायमते, सुखादिज्ञानेन तत्साधनत्वज्ञानेन च जायमाने इदं मे भूयादित्येवंरूपे आत्मधर्म्मे २अभिलाषे च । "आत्मजन्या भवेदिच्छा इच्छाजन्या भवेत् कृतिः । कृतिजन्या भवेच्चेष्टा चेष्टाजन्या भवेत् क्रिया" न्यायसिद्धान्तः। "कामः संकल्पोविचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्व्वं मन एवेति" श्रुतेः मनोधर्म्मत्वमिति सांख्यवेदान्तिनः । "विगतेच्छाभयक्रोधाः" गीता "जन्मनि क्लेशबहुले किं न दुःखमतः परम् इच्छासंपद्यतो नास्ति यत्रेच्छा न निवर्त्तते"हिता॰।"नीतो रात्रिः क्षणइव मया सार्द्धमिच्छारतैर्या" मेघ॰ । "महीं महेच्छः परिकीर्य्य सूनौ" "विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया"रघुः ।"योऽहिंसकानि भूतानि हिनस्त्यात्मसुखेच्छया" "देवदत्तां पतिर्भार्य्यां विन्दते नेच्छयात्मनः" "सर्व्वं शस्त्रभृतां वासाद्विदुषामिच्छयात्मनः"इति च मनुः। "स्वेच्छया विभजेत् सुतान्"दायभा॰स्मृतिः। सा च द्विविधाफलोपायरूपविषयभेदात् यथाह भाषा॰ "सुखन्तु जगतामेव काम्यं धर्म्मेण जन्यते । अधर्म्मजन्यं दुःखं स्यात् प्रतिकूलं सचेतसाम् । निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेव जायते । इच्छा तु तदुपाये स्यादिष्टोपायत्वधीर्यदि । चिकीर्षा कृतिसाध्यत्वप्रकारेच्छा च या भवेत् । तद्धेतुः कृतिसाध्येष्टसाधनत्वमतिर्भवेत् । बलवद्द्विष्टहेतुत्वमतिः स्यात् प्रतिबन्धिका। तदहेतुत्वबुद्धेस्तु हेतुत्वं कस्यचिन्मते" । व्याख्यातं च मुक्ता॰ । 'इच्छा हि फलविषयिणी उपायविषयिणी च । फलन्तु सुखं दुःखाभावश्च । तत्र फलेच्छां प्रति फलज्ञानं कारणम् । अतएव स्वतः पुरुषार्थः सम्भवति । यज्ज्ञातं सत् स्ववृत्तितयेष्यते स स्वतः पुरुषार्थ इति तल्लक्षणात् । इतरेच्छानधीनेच्छाविषयत्वं फलितोऽर्थः । उपायेच्छां प्रतीष्टसाधनताज्ञानं कारणम् । कृतिसाध्यत्वप्रकारिका कृतिसाध्यक्रियाविषयिणीच्छा चिकीर्षा पाकं कृत्या साधयामीति तदनुभवात् ।

चिकीर्षां प्रति कृतिसाध्यताज्ञानमिष्टसाधनताज्ञानञ्च कारणम्। अतएव इच्छायां कृतिसाध्यताज्ञानाभावान्न चिकीर्षा। बलवदिति बलवद्द्विष्टसाधनताज्ञानं तत्र प्रतिबन्धकम्। अतो मधुविषसंपृक्तान्नभोजने न चिकीर्षा। बलवद्द्वेषः प्रतिबन्धक इत्यन्ये। कस्यचिन्मत इति। बलवदनिष्टाजनकत्वज्ञानं कारणमित्यर्थः। कृतिसाध्यताज्ञानादिमतो बलवदनिष्टसाधनताज्ञानशून्यस्य बलवदनिष्टजनकत्वज्ञानं विनापि चिकीर्षायां विलम्बाभावात् कस्यचिन्मत इत्यस्वरसो दर्शितः"।

विवृतमेतत् दिनक॰ यथा "तत्र तयोर्मध्ये। अतएव फलज्ञानस्य फलेच्छां प्रति हेतुत्वादेव पुरुषार्थः संभवतीति सुखं दुःखाभावश्च पुरुषार्थः संभवतीत्यर्थः। ननु यज्ज्ञातं सदित्यादेः स्वविषयज्ञानजन्येच्छाविषयत्वमर्थस्तथा चोपायेऽतिव्याप्तिः तस्यापि स्वविषयकेष्टसाधनताज्ञानजन्येच्छाविषयत्वात् अत आह। इतरेच्छेति"।

अत्र ईश्वरेच्छामादायातिव्याप्तिवारणार्थं द्वितीयेच्छायां जन्यत्वं विशेषणीयम्। असम्भववारणाय आद्येच्छायामपि जन्यत्वं विशेषणीयम्। भवति च सुखेच्छायाः इतरविषयकेच्छानधीनत्वम् उपायेच्छायाश्च फलेच्छाधीनत्वञ्च। इष्टसाधनस्य फलेच्छाधीनेच्छाविषयित्वात् न तत्र लक्षणप्रसरः। पुरुषान्तरीयेच्छामादायातिव्याप्तिवारणाय समवायद्वयघटित सामानाधिकरण्यं निवेशनीयम् वस्तुतः स्वसमवायिसमवेतत्वप्रयोज्यत्वोभयसम्बन्धेन स्ववत्वाख्यभिन्नाया जन्येच्छायाविषयत्व तत्त्वम् स्वपदमिच्छापरम् इत्यन्यत्र विस्तरः। तत्रेदं बोध्य फलेच्छायां कारणं यत् सुखज्ञानमुक्तं तत् स्मरणानुमित्यादिसाधारणम्। प्रत्यक्षत्वे प्रत्यक्षं प्रतिविषयस्य हेतुतया विषयज्ञानजन्यसुखादेर्वर्त्तमानत्वे एव तत्सम्भवेन वर्त्तमानस्य सुखस्य सिद्धत्वात् सिद्धे च इच्छाविरहात् न तद्विषयकेच्छासम्भव इति सूचितं चैतत् कणादसूत्रोपस्कारयोः" यथा। "सुखाद्रागः" का॰ सू॰। "स्रक्चन्दनवनितासेवनजन्मनः सुखादुत्तरोत्तरं तज्जातीये सुखे तत्साधने वा राग इच्छा जायते" उप॰ "तन्मयत्वाच्च" सू॰ विषयासङ्गजनितो दृढतरः संस्कारविशेषस्तन्मयत्वम् तद्वशात् कामातुरस्य कामिनीमलभमानस्य सर्व्वत्र कामिनीदर्शनम्" उप॰। "तन्मयत्वे तत्प्रकाशो बाह्याभ्यन्तरतस्तथा" इत्यन्यत्राप्युक्तम्। अत्र संस्कारादेव इच्छा जायते इत्युक्तेः संस्कारसाध्यस्मृतिद्वारैव संस्कारस्य हेतुत्वमवसीयते। क्वचिददृष्टवशात् क्वचित् जातिभेदवशाच्च इच्छासम्भवः तदप्युक्तम् तत्रैव "अदृष्टाच्च" "जातिविशेषाच्च" सू॰। यद्यप्यदृष्टं साधारणं कारणं तथापि क्वचिदसाधारणकारणतामनुभवति शैशवे तज्जन्माननुभूतकामिनीसेवनसुखस्यापि यौवनोद्भेदे कामिनीरागः" उप॰। न च तत्रापि अद्यप्रसूतबालकस्य स्तन्यपानराग इव जन्मान्तरीयतत्संस्कारजज्ञानस्यैव हेतुत्वमस्तु किमदृष्टस्य साधारणकारणस्यासाधारणकारणताकल्पने नेति चेत् तत्कल्पनेऽपि तत्र जीवनादृष्टस्येव अत्रापि अदृष्टविशेषस्यैवोद्बोधकस्थानीयतया अवश्यकल्पनीयत्वे तस्यैव हेतुत्वौचित्यात्। पदार्थभेदे जातिभेदकृत एव रागः। यथा मनुष्यजातीतानामन्नादौ रागः मृगजातीयानां तृणादौ, करभजातीयानां कण्टकादौ, शूकरादेर्विष्ठादौ रागोत्पत्तिः। तथा च विषयविशेषरागं प्रति जातिविशेष एव कारणतया कल्पनीयः। तत्रापि जातिविशेषोत्पादकतयादृष्टस्य कारणत्वेऽपि जातिविशेषस्य कारणत्वमस्त्येव तमनुत्पाद्यादृष्टस्याकारणत्वादिति बोध्यम् सुखं मे भूयादिति दुःखं मे मा भूयादित्येवं रूपः सुखदुःखाभिलापः।

उपायेच्छां प्रति तु इष्टसाधनताज्ञानं हेतुः। भवति च पाके भोजनसाधनतया, भोजने च क्षुन्निवृत्तिसाधनतया ज्ञानात् इच्छा। तदुल्लेखिवाक्यन्तु पाको जायताम् इत्येवं रूपम्। सेयमिच्छा ज्ञानकृत्यादिवत् सविषया तद्विषयश्च द्विविधः बाधिताबाधितभेदात्। यत्र इष्टसाधने वस्तुनि इष्टसाधनत्वज्ञानादिच्छा सा सद्विषयिणी यत्र तु अनिष्टसाधने वस्तुनि इष्टसाधनत्व भ्रमजा असद्विषयिणी। सा च प्राणिमात्रसाधारणी ईश्वरेच्छा तु सदा सद्विषयिणी तस्या बाधितपदार्थविषयकत्वाभावादेव तथात्वम् तेन तस्या नित्यत्वेन इष्टसाधनत्वज्ञानाधीनत्वाभावेऽपि न क्षतिः। योगिनां तु प्राकाम्यकामावसायितारूपैश्वर्य्ययोगात् कामानुसारिणएव विषयाभवन्तीति नासद्विषयिणीति भेदः यथोक्तं सां॰ कौ॰। "प्राकाम्यमिच्छानभिघातः यतो भूमावुन्मज्जति निमज्जति यथोदके। कामावसायित्वं सा सत्यसङ्कल्पता। यथाऽस्य सङ्कल्पो भवति भूतेषु, तथैव भूतानि भवन्ति। अन्येषां निश्चया निश्चेतव्यमनुविधीयन्ते योगिनान्तु निश्चेतव्याः पदार्थाः निश्चयम्"। निश्चेतव्यनिश्चयशब्दौ काम्यकामावुपलक्षयतः तथा च यथाकामं तेषां विषया भवन्तीति न असद्विषयकत्वं तेषां कामानामिति विवेच्यम्। इयमिच्छा

प्रवृत्तौ हेतुः इच्छाया बाधितविषयकत्वे प्रवृत्तिविसंवादिनी तदुत्तरं फललाभाभावेन तस्याः विसंवादित्वात् । सद्विषयकत्वे संवादिन्येवेति भेदः तथा च प्राणिमात्राणां प्रवृत्तौ इच्छा हेतुर्नेश्वरस्य प्रवृत्तौ तस्या नित्यत्वात् । गवादीनामपि हरितस्य दर्शनादिना जायमानायाः प्रवृत्तेरुपलम्भात् तत्कारणमिच्छास्तीत्यनुमीयते इयांस्तु भेदः तेषां वस्तुनः सदसद्विवेकशून्यतयाऽसद्विषयेऽपीच्छा जायते । सेयमिच्छा सुबन्तोत्तरविहित काम्यच्क्यजादिना, धातूत्तरविहितसनादिना च वाच्या । तत्र पुत्रकाम्या, अशनाया, उदन्या इत्यादौ काम्यजादिवाच्या, पिपासा बुभुक्षा लिप्सा इत्यादौ सन्वाच्या । सर्वत्र च इष्टसाधनज्ञानादेव तत्तद्विषयेषु इच्छा जायते सन्प्रत्ययवाच्यायां चिकीर्षायां तु नैव किन्तु तत्र मतभेदे कारणान्तरमप्यस्ति तथा हि कृतिसाध्यत्वप्रकारकेच्छा चिकीर्षा पाकः कृत्या साध्यतामित्याकारिका । तत्र च कृतिसाध्यत्वज्ञानं कारणमिति गुरवः तेन वृष्टिजलादौ कृतिसाध्यत्वाभावेन न तत्र चिकीर्षा । कृतिसाध्येष्टसाधनत्वज्ञानं बलवदनिष्टाननुबन्धित्वज्ञानञ्च हेतुरिति नैयायिकाः । तेन श्यामजलताडनादौ कृतिसाध्यत्वपक्षेऽपि न चिकीर्षा तत्र इष्टसाधनत्वपक्षाभावात् । विषमिश्रितान्नादेरिष्टसाधनत्वपक्षेऽपि बलवदनिष्टसाधनत्वपक्षाच्च चिकीर्षा । तदेतत् मुक्ता० उक्तं तच्च प्राक् दर्शितं तत्रत्यदिनकरीयेऽपि यथा ।

"ननु कृतिसाध्यताज्ञानस्य स्वातन्त्र्येण चिकीर्षां प्रति हेतुत्वे मानाभावः । तद्धर्मावच्छिन्नविशेष्यकेष्टसाधनताज्ञानस्य तद्धर्मप्रकारकेच्छां प्रति हेतुतायाः क्लृप्तत्वात् कृतिसाध्यपाकत्वावच्छिन्नविशेष्यकेष्टसाधनताज्ञानादेव चिकीर्षायाः सम्भवादिति चेन्न यत्र कृतिसाध्यपाकत्वेनेष्टसाधनत्वं न गृहीतमपि तु गुडपाकत्वेन कृतिसाध्यत्वं गुडपाकत्वेनेष्टसाधनत्वं च गृहीतं तत्रापि पाकगोचरप्रवृत्तेरानुभविकतया तदनुरोधेन चिकीर्षाया अप्यावश्यकत्वेन तन्निर्वाहाय कृतिसाध्यताज्ञानस्य स्वातन्त्र्येण हेतुताया आवश्यकत्वात् । अथ कृत्यसाध्यताज्ञानस्य प्रतिबन्धकत्वादेव वृष्ट्यादौ चिकीर्षानुत्पादात् कृतिसाध्यताज्ञानस्य चिकीर्षां प्रतिहेतुत्वे मानाभाव इति चेन्न कृतिसाध्यत्वाभाव तद्व्याप्यतदवच्छेदकधर्मज्ञानानां प्रतिबन्धकत्वकल्पनापेक्षया कृतिसाध्यताज्ञानस्य हेतुत्वे लाघवात् । इष्टसाधनताज्ञानमिति । अन्यथा निष्फलत्वज्ञानेऽपि चैत्यवन्दनादौ चिकीर्षापत्तिरिति भावः । अत्रेदमवधेयम् । पाकविशेष्यकेष्टसाधनताज्ञानस्य कार्यतावच्छेदकं न कृतिसाध्यपाकगोचरचिकीर्षात्वम् कृतिसाध्यत्वप्रकारकत्वनिवेशे प्रयोजनविरहात् पाको जायतामितीच्छाया असंग्रहापत्तेश्च किन्तु पाकत्वावच्छिन्नमुख्यविशेष्यकेच्छात्वम् पाकसाध्यं सुखं जायतामितीच्छायां व्यभिचारवारणाय मुख्येति । इष्टसाधनतेत्यत्रेच्छा स्वरूपसती विशेषणम् । तेनेच्छाज्ञानशून्यकालेऽपि चिकीर्षानिर्वाह इति । अतएव कृतिसाध्यताज्ञानस्य हेतुत्वादेव । बलवद्द्विष्टेति । द्विष्टं द्वेषविषयीभूतं द्वेषश्च दुःखे तद्रूपेण ज्ञानात्, सर्पादौ तत्साधनताज्ञानात् । द्वेषे बलवत्त्वं च जातिविशेषः । प्रतिबन्धकमिति । ननु बलवद्द्वेषविषयसाधनत्वज्ञानस्य प्रतिबन्धकत्वे चैत्रस्यागम्यागमनजन्यनरके यदा बलवान् द्वेषस्तदा मैत्रस्य तादृशद्वेषशून्यस्यागम्यागमने तादृशनरकसाधनत्वज्ञानवत इच्छाप्रवृत्त्योरनुपपत्तिः एवं चैत्रस्यैव कालान्तरे तादृशद्वेषसत्त्वेऽपि । न च तत्कालीनतत्पुरुषीयेच्छां प्रति प्रवृत्तिं प्रति च तत्कालीनतत्पुरुषीयबलवद्द्विष्टजनकत्वज्ञानस्य प्रतिबन्धकत्वं कल्प्यते । यत्पुरुषस्य यदा न कापि द्वेषस्तत्कालपुरुषान्तर्भावेन तादृशप्रतिबन्धकत्वस्याकल्पनाच्च तत्र तादृशप्रतिबन्धकाप्रसिद्धिरतस्तदभावरूपकारणस्याभावात् प्रवृत्त्यनुपपत्तिरिति वाच्यम् यत्पुरुषस्य यदाऽगम्यागमनजन्यनरके बलवद्द्वेषस्तदा तत्पुरुषस्य तत्रेच्छानुत्पादादगम्यागमनगोचरतत्पुरुषीयतत्कालीनेच्छाया अप्रसिद्ध्या तत्पुरुषतत्कालज्ञानाभावेन तादृशकार्यकारणभावस्याभावेन तत्र तत्पुरुषीयागम्यागमनगोचरेच्छानुत्पादप्रयोजकस्य दुर्भिक्षापत्तेरिति चेन्न तद्धर्मप्रकारकद्वेषविशिष्टस्य तद्धर्मावच्छिन्नजनकत्वज्ञानस्य तत्र प्रतिबन्धकत्वकल्पनेनोक्तापत्त्यभावात् । तद्धर्मप्रकारकद्वेषानुत्तरतादृशेच्छायां तादृशद्वेषाभावः, तादृशद्वेषोत्तरतद्गोचरेच्छायां तद्धर्मावच्छिन्नजनकज्ञानाभावः कारणम् । बलवद्द्वेष इति । पाकादिगोचरेच्छायां बलवद्द्वेषविषयसाधनत्वज्ञानजन्यः पाकगोचरो द्वेषः प्रतिबन्धकः पूर्वोक्तप्रतिबन्धकत्वद्वयकल्पनापेक्षया लाघवादिति भावः यत्र चोत्कटसुखोत्कटदुःखजनकमेकमेव कर्म गृहीतं तत्र सत्प्रतिपक्षस्थल इवेच्छाद्वेषयोरनुत्पत्तेस्त्वन्मते तत्र कार्यकाले द्वेषाभावस्य सत्त्वेनेच्छोत्पादापत्तिः । न च यत्र बलवद्द्विष्टसाधनत्वज्ञानेन द्वितीयक्षणे द्वेषो जनितः तदुत्तरक्षणे इच्छोत्पादापत्तिस्तत्र

पीति वाच्यम् । तत्रेच्छोत्पादद्वेषत्वात् चयविलम्बस्य प्रथमनिर्णेयत्वादिति क्वचिदित्यनेनास्वरसः सूचितः । बलवदनिष्टाजनकत्वज्ञानमिति । अत्रापि तद्धर्मप्रकारकद्वेषोत्तरेच्छायां तद्धर्मावच्छिन्नाजनकत्वज्ञानं कारणं तादृशद्वेषानुत्तरेच्छायां तु तद्धर्मप्रकारकद्वेषाभावः कारणमिति निष्कर्षो बोध्यः । मूले कश्चिन्मत इत्यनेनास्वरसः सूचितः । स च बलवदनिष्टाननुबन्धित्वज्ञानत्वस्य हेतुतावच्छेदकत्वे बलवदनिष्टजनकत्वप्रकारतानिरूपिताभावविशेष्यताशालित्वादेस्तादृशनिरूप्यनिरूपकभावघटितत्वेन गौरवात्तदघटितबलवदनिष्टसाधनत्वज्ञानाभावत्वेनैव हेतुत्वं युक्तम् । नचाप्रामाण्यज्ञानानास्कन्दितबलवदनिष्टाननुबन्धित्वज्ञानत्वापेक्षया प्रामाण्यनिश्चयानास्कन्दिततदनुबन्धित्वज्ञानत्वस्य प्रतिबन्धकतावच्छेदकत्वे गौरवमिति वाच्यम् । युद्धादौ बलवदनिष्टसाधनत्वसन्देहेऽपीच्छाप्रवृत्त्योरुदयाद्बलवदनिष्टानुबन्धित्वनिश्चयस्यैवेच्छाप्रतिबन्धकतायास्तदननुबन्धित्वसंशयस्यापि प्रतिबन्धकतायाश्च वाच्यतया चविपरीतगौरवादिति । न च बलवदनिष्टाननुबन्धित्वज्ञानस्याप्रवर्त्तकत्वे तद्विषयस्य विध्यर्थत्वाभावात् "न कलञ्जं भक्षयेदित्यादि"-वाक्यानामप्रामाण्यापत्तिरिति वाच्यम् । तज्ज्ञानस्य प्रवृत्तिजनकत्वाभावेऽपि प्रवृत्तिप्रतिबन्धकबलवदनिष्टसाधनत्वज्ञानविघटकत्वेन प्रवृत्तिप्रयोजकत्वात् प्रवृत्तिप्रयोजकज्ञानविषयस्य विध्यर्थत्वानपायात् । अत्र यद्यपि यत्र प्रथमक्षणे द्वेषः द्वितीयक्षणे फलेच्छा तृतीयक्षणे फलसाधनताज्ञानं तत्र तृतीयक्षणे द्वेषनाशान्नन्तरं च चतुर्थक्षणे उपायेच्छा । यत्र फलेच्छादिक्रमेणैवानुत्पत्तिस्तत्र फलेच्छारूपकारणाभावादेव नोपायेच्छा । एवमन्यत्रापि । आत्मविशेषगुणानां यौगपद्यानङ्गीकारादिति बलवदनिष्टानुबन्धिज्ञानस्य द्वेषस्य वा प्रतिबन्धकत्वं न युक्तं न युक्तं च बलवदनिष्टाननुबन्धित्वज्ञानस्य हेतुत्वं तथापि द्वित्रिक्षणान्तरितेऽपि द्वेषे इच्छाप्रवृत्त्योरनुदयस्यानुभविकतया तादृशयोरेव का यौगपद्यमित्यभ्युपगमाद्वा पूर्वोक्तप्रतिबन्धकत्वस्य हेतुत्वस्य वावश्यकत्वमिति ध्येयम्" ।

तत्त्वचिन्तामणौ तु प्रपञ्चः । तत्र कृतिसाध्यत्वनिश्चयस्य चिकीर्षादिहेतुत्वम् पूर्वपक्षीकृत्य प्रत्युच्यते इत्यादिना स्वमतसिद्धं कारणं दर्शयित्वा सिद्धान्तितं यथा । "चिकभक्षणादिप्रवर्त्तक कृतिसाध्यत्वज्ञाने इष्टसाधनत्वं विषयतावच्छेदकं साधयतु न तु स्वविशेषणवत्ताप्रतिसन्धानजन्यत्वं गौरवात् न च सिद्धासिद्धत्वयोः साध्यत्वसाधनत्वयोर्विरोधः निर्विशेषितयोरविरोधात् पाकोऽसिद्धः साध्यः सिद्धः साधनमित्यनुभवात् तदा साध्यत्वं हि तदा साधनत्वविरोधि नियमतस्तेनैव तस्य प्रतिक्षेपात् स्वरूपावस्थाननियमात् न तु साधनत्वस्य अन्यदा साधनत्वस्य वा तयोरप्रतिक्षेपात् अन्यदासाधनत्वेऽपि साधनत्वमस्त्येव सामान्यभावे विशेषभावप्रसङ्गात् एवं तदासिद्धत्वस्य तदाऽसिद्धत्वेन विरोधः नियमतस्तस्यैव प्रतिक्षेपात् न तु सिद्धत्वमात्रेण अन्यदापि तत्र सिद्धत्वाभावप्रसङ्गात् । निर्विशेषितयोर्विरोधे च सिद्धत्वासिद्धत्वयोरन्यतरदेव पाकादौ स्यान्न तु समयभेदेऽप्युभयम् न च तदा कृतिसाध्यत्वे सति तदेष्टसाधनत्वज्ञानं प्रवर्त्तकम् । अतएव "वाजपेयेन यजेतेत्यत्र" यागस्य करणावस्थायां सिद्धत्वेन वाजपेयस्य न साध्यता एकदाद्वयविरोधादिति कर्मनामधेयत्वं न तु करणस्य सिद्धत्वेन साध्यत्वविरोधः यागस्वरूपे तयोः सत्त्वात् अथ विरुद्धयोरवच्छेदभेदमादायैकत्र प्रतीतिः स्यात् नच कृतिसाध्यत्वेष्टसाधनत्वयोः समयभेदमादाय प्रतीतिरस्ति तथा विरोधाभावादिति चेत् न साध्यत्वसाधनत्वयोरविरोधस्योक्तत्वात् एवं सिद्धासिद्धत्वयोर्भावाभावरूपत्वेऽपि न विरोधः एकधर्मिगतत्वेन मानसिद्धत्वात् । एवं संयोग तदभावयोरिव येन प्रकारेण ययोर्विरोधस्तेन तयोरेकधर्मिगतत्वं न प्रतीयते न तु रूपान्तरेणापीति । अपि च यदि साध्यत्वसाधनत्वयोर्विरोधस्तदापीष्टसाधनत्वेन कार्य्यं साधनत्वेन वा कार्य्यत्वं नानुमीयेत हेतुसाध्ययोर्विरोधेन सामानाधिकरण्याभावेन व्याप्त्यसिद्धेः पक्षे साध्यसाधनयोरन्यतराभावे बाधासिद्ध्योरन्यतरप्रसङ्गाच्च । न च साध्यमिदानीं मत्कृतिसाध्यत्वं साध्यम् अपि मदिष्टसाधनत्वं हेतुः, दैवाद्यनधीनत्वे सति यद्यन्मदिष्टसाधनं तदिदानीं मत्कृतिसाध्यमिति व्याप्तेः तथा च समयभेदमादाय साध्यत्वसाधनत्वयोरविरोध इति । इदानीमित्यनयोः पदार्थयोर्नानात्वादनुगतरूपाभावेन व्याप्तेरग्रहात् एवं न्यायेनान्यत्रापि वक्तव्यमयान्तर्भावेन साध्यत्वसाधनत्वयोरप्रतीतेः । प्रतीतौ वा ममापीदानीं कृतिसाध्यत्वे सत्यपि इष्टसाधनत्वज्ञानं प्रवर्त्तकमस्तु । न च पाकसाध्येष्टत्वेन कृतिसाध्यत्वमनुमेयं असिद्धावस्थावतः पाकादिष्टानुत्पत्तेः पाकस्य सिद्धत्वमवगम्य तत्साध्यत्वमिष्टस्यावगन्तव्यम् असिद्धत्वस्यावगम्य कृतिसाध्यत्वमिति सिद्धत्वासिद्धत्वयोर्विरोधोऽत्रापि दुर्वारः । अपि च बलवदिष्टविशेषणाधीनजन्यकार्य्यताज्ञानाभावात् सुखे कथं चिकीर्षा न हि कृतिसाध्यताज्ञानस्याभावात् वा सञ्जातत्वा-

धस्य विषभक्षणादौ चिकीर्षाप्रसङ्गात्। अथोपायचिकीर्षायां तत्कारणं इच्छाकारणसुखत्वज्ञाने कृतिसाध्यत्वं यदा विषयस्तदा सुखे चिकीर्षा नो चेदिच्छामात्रमिति द्वयमेव चिकीर्षाहेतुरिति चेत् तर्हीच्छाहेतुज्ञाने यदा कृतिसाध्यत्व भासते तदा चिकीर्षा नो चेदिच्छामात्रमित्येव सुखंतदुपायचिकीर्षाकारणमस्तु लाघवात् सुखत्वज्ञानवदिष्टसाधनताज्ञानस्यापीच्छाकारणत्वात्। अतएव पाके इष्टसाधनताज्ञाने कृतिसाध्यत्वं विषय इति चिकीर्षा न तु इच्छादिज्ञाने तद्विषयत्वमितीच्छामात्रं सुखचिकीर्षायामिच्छाकारणज्ञाने कृतिसाध्यताविषयके चिकीर्षाजनकत्वावधारणात् अन्यथा तत्र चिकीर्षानुत्पत्तेः। वस्तुतस्तु उपायचिकीर्षा इष्टसाधनताज्ञानसाध्या उपायेच्छात्वात् इष्टेच्छावत् न च भोगचिकीर्षावत् तेन विनापि स्यादित्यप्रयोजकत्वात् उपायेच्छायास्तदन्वयव्यतिरेकानुविधानात् इष्टे च स्वतोऽसुकरत्वेन इच्छानुत्पत्तेः। अनुगतोपायेच्छायामनुगतस्य प्रयोजकत्वे सम्भवति बाधकं विना त्यागायोगाच्च। न च चिकीर्षान्यत्वे सति उपायेच्छात्वमिच्छात्वं वा तज्जन्यत्वे प्रयोजकं गौरवात् सुखेच्छायां तदभावाच्च। एवञ्चोपायचिकीर्षायामिष्टसाधनताज्ञाने भुवेऽतिप्रसङ्गवारणार्थं कृतिसाध्यत्वप्रकारकत्वनिर्वाहार्थञ्च कृतिसाध्यत्वमपि विषयतयावच्छेदकमस्तु न तु तद्विहाय मन्मात्र, कृतिप्रकारत्वं विना कार्य्यानुत्पत्तेः। अतएव स्तनपानप्रवृत्तावप्युपायेच्छाकारणत्वेन गृहीतस्येष्टसाधनताज्ञानस्यापि कल्पनं दृष्टानुरोधित्वात् कारणतायाः। ननु साधनत्वमिच्छाविरोधि तस्य सिद्धधर्म्मत्वात् इच्छादौ तत्साध्येष्टज्ञानादिच्छेति चेत् न निर्विशेषितयोः सिद्धत्वासिद्धत्वयोरविरोधेनेच्छासाधनत्वयोरविरोधात् तदा असिद्धत्वं तत्सिद्धत्वञ्च नेच्छासाधनत्वयोः प्रयोजकमिति तथा न ज्ञायत एव। यत्तु तत्साध्येष्टज्ञानात् इच्छादाविच्छेति तत्तुच्छं असिद्धावस्थादृष्टेच्छादेरिष्टानुत्पत्तेरवश्य सिद्धत्वमनागतत्वमिच्छाविरोधित्वाच्चासिद्धत्वमिति तत्रापि विरोध एव दृष्टौ संख्यामिष्टं तथा विना नेत्यन्वयव्यतिरेकपदस्य दृष्टिसिद्धत्वमादाय दृष्टिसिद्धपितेषु साध्यत्वग्राहकत्वात्। किञ्च चिकीर्षाजन्यकृतिसाध्यं मण्डलीकरणमित्यर्थप्रतिपादकं मण्डलीं कुर्य्यादिति वाक्यं प्रमाणं स्यात् विषयाबाधात्। एतेन नवीनमतमपास्तं परस्य हि कृतिसाध्यत्वौदनकामनावत्त्वेष्टसाधनताज्ञानानां ज्ञानं तथात्वस्य ओदनकामनावत्त्वेष्टसाधनताज्ञानस्य ज्ञानं न प्रवृत्तिकारणं गौरवात् किन्तु मत्कृतिसाध्यत्वे सति मदिष्टसाधनताज्ञानमेव लाघवात् तथा च साध्यसाधनत्वयोर्न विरोधोऽनागतस्य पाकादेः कृतिसाध्यताज्ञानस्य यथा, तथोपपादितं पुरस्तात्। किञ्च स्वकृतिसाध्यत्वमन्तरेणापि स्वकृतिसाध्येष्टसाधनताज्ञानात् स्वकल्पितेलिप्यादौ, यौवने कामोद्भेदात् संभोगादौ प्रवृत्तेश्च अदृष्टं प्रवर्त्तकम्। वस्तुतस्तु सिद्धविषयककृतिसाध्यताज्ञानात् कथं “पाकं कृत्वा साधयामीतीच्छा”? सिद्धे इच्छाविरहात् असिद्धस्याज्ञानात् अथ सिद्धविषयादेव कृतिसाध्यताज्ञानादसिद्धविषया कृतिसाध्यत्वेनेच्छा जायते इच्छाया असिद्धविषयत्वस्वभावत्वात्। एकप्रकारकत्वेन ज्ञानचिकीर्षयोः कार्य्यकारणभावेनत्वेकविषयत्वे सति गौरवात् इच्छाया अनागतविषयत्वात्तस्य चाज्ञानात्तथा कल्पनात् सुखादीच्छायामप्येवमिति चेत् न असिद्धविषयेच्छानुरोधेनानागतोपायज्ञानस्य दर्शितत्वात्। अस्तु चैवं तथापि कृतिसाध्यताज्ञाने इष्टसाधनत्वमेव व्यावर्त्तकमस्तु स्वपरकीयेष्टसाधनताज्ञानस्य फलकामनाज्ञानापेक्षया लघुत्वात् ज्ञानज्ञानस्य फलकामनाज्ञानस्य हेतुत्वे मानाभावाच्च”।

सेयमिच्छा अन्तःकरणधर्म्मो नात्मधर्म्मः इति वेदान्तिनः प्रतिपेदिरे। आत्मनो निर्गुणत्वात् प्रागुक्तया “कामः सङ्कल्पः इत्यादि श्रुत्या मनोधर्म्मत्वावगमाच्च तथात्वम्। यथा च कामादीनां नात्मधर्म्मत्वं तथा शङ्करपूर्व्वकं इ० उ० भाष्ये समर्थितम्। यथा

“सुखित्वदुःखित्वादिदर्शनान्नेति चेत् न “न लिप्यते लोकदुःखेन बाह्यः” इति श्रुतेः। प्रत्यक्षादिविरोधादयुक्तमिति चेत् न उपाध्याश्रयजनितविशेषविषयत्वात्प्रत्यक्षादेः “न दृष्टेर्द्रष्टारं पश्येर्विज्ञातारमरे केन विजानीयादविज्ञातं विज्ञातृ” इत्यादिश्रुतिभ्यो नात्मविषयं विज्ञानम्, किन्तर्हि बुद्ध्याद्युपाध्यात्मप्रतिच्छायाविषयमेव सुखितो दुःखितोऽहमित्येवमादिप्रत्यक्षविज्ञानमयमहमिति विषयेण विषयिणः सामानाधिकरण्योपचारात् “नान्यदतोऽस्ति द्रष्टृ” इत्यन्यात्मप्रतिषेधाच्च। देहावयवविशेष्यत्वाच्च सुखदुःखयोर्विषयधर्म्मत्वम् “आत्मनस्तु कामाय” इत्यात्मार्थत्वश्रुतेरयुक्तमिति चेन्न। “यत्र वा अन्यदिव स्यात्” इत्यविद्याविषयात्मार्थत्वाभ्युपगमात् “तत्केन कं पश्येत्” “नेह नानास्ति किञ्चन” “तत्र को मोहः कः शोक” इत्यादि विद्याविषये तत्प्रतिषेधाच्च नात्मधर्म्मत्वम्। तार्किकसमयविरोधादयुक्तमिति

चेन्न सुखस्याप्यात्मनो दुःखित्वानुपपत्तेः। न हि दुःखेन प्रत्यक्षविषयेणात्मनो विशेष्यत्वं, प्रत्यक्षाविषयत्वात्। आकाशस्य शब्दगुणवत्त्ववदात्मनो दुःखित्वमिति चेन्न एकप्रत्ययविषयत्वानुपपत्तेः। न हि सुखग्राहकेण प्रत्यक्षविषयेण प्रत्ययेन नित्यानुमेयस्यात्मनो विषयीकरणमुपपद्यते। तस्य च विषयीकरणे आत्मन एकत्वाद्विषयाभावप्रसङ्गः। एकस्यैव विषयविषयित्वं दीपवदिति चेन्न युगपदसम्भवादात्मन्यंशानुपपत्तेश्च। एतेन विज्ञानस्य ग्राह्यग्राहकत्वं प्रत्युक्तम्। प्रत्यक्षानुमानविषययोश्च दुःखात्मनोर्गुणगुणित्वेनानुमानम् दुःखस्य नित्यमेव प्रत्यक्षविषयत्वाद्रूपादिसामानाधिकरण्याच्च मनःसंयोगजत्वेऽप्यात्मनि दुःखस्य, सावयवत्वविक्रियावत्त्वानित्यत्वप्रसङ्गात्। न ह्यविकृत्य संयोगि द्रव्यं गुणः कश्चिदुपयन्नपयन् वा दृष्टः कश्चित्। न च निरवयवं विक्रियमाणं दृष्टं क्वचित् अनित्यगुणाश्रयं वा नित्यम्। न चाकाश आगमवादिभिर्नित्यतयावगम्यते। न चान्यो दृष्टान्तोऽस्ति विक्रियमाणमपि तत्प्रत्ययानिवृत्तेर्नित्यमेवेति चेन्न द्रव्यस्यावयवान्यथात्वव्यतिरेकेण विक्रियानुपपत्तेः। सावयवत्वेऽपि नित्यत्वमिति चेन्न सावयवस्यावयवसंयोगपूर्व्वकत्वे सति विभागोपपत्तेः। वज्रादिष्वदर्शनान्नेति चेन्नानुमेयत्वात्संयोगपूर्व्वत्वस्य। तस्मान्नात्मनो दुःखाद्यनित्यगुणाश्रयत्वोपपत्तिः। परस्यादुःखित्वेऽन्यस्य च दुःखिनोऽभावे दुःखोपशमनाय शास्त्रारम्भानर्थक्यमिति चेन्नाविद्याऽध्यारोपितदुःखित्वभ्रमापोहार्थत्वात्"।

यथा च कामस्य हृदयाश्रितत्वं तथाऽऽत्मकामशब्दे ७१८पृष्ठे दर्शिते बृ०भा०वाक्ये प्रपञ्चितम्। एवमेव सांख्याः पातञ्जलाश्च ज्ञानादिवत् सुखदुःखेच्छाद्वेषप्रयत्नधर्म्माधर्म्मा अपि बुद्धेरेव धर्म्मा इत्याहुः। ईश्वरेच्छा तु सगुणब्रह्मात्मिका सर्व्वं जगत् भूयादित्याकारिका। "सोऽकामयत बहु स्यां प्रजायेयेत्यादि" श्रुतिः। "सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः" इति स्मृतिश्च तस्य तत्त्वे प्रमाणम्। सा च नित्येति नैयायिकादयः नित्यत्वाच्च न तत्र कारणापेक्षा। व्योमादिवदनित्येति वेदान्तिनः। नित्यत्ववादिमतेऽपि सृज्यमानजीवादृष्टरूपसहकारेणैव तत्तत्कार्य्योत्पत्तिरिति ईश्वरशब्दे वक्ष्यते। मनोधर्म्मत्ववादिमते मनसस्त्रिगुणात्मकत्वेऽपि रजस एव तत्कारणत्वम् "काम एष क्रोध एष रजोगुणसमुद्भवः" गीतायां कामस्य रजोगुणकार्य्यत्वोक्तेः। ततश्च बुद्धेस्त्रिगुणात्मकत्वेन — रजःकार्य्यं कामस्य तद्धर्म्मत्वमेवोचितम्। अतएव इच्छाशक्तिक्रियाशक्तिज्ञानशक्तिस्वरूपिणीत्यादौ प्रकृतेरिच्छाशक्त्यादिरूपत्वकथनमपि सङ्गच्छते शक्तिशक्तिमतोरभेदात् प्रकृतिशक्त्याश्च तस्या बुद्धिगुणत्वमवगम्यते। अतएव "या देवी सर्व्वभूतेषु इच्छारूपेण संस्थिता" देवीमा० सर्व्वभूतेषु इच्छारूपेण प्रकृतिस्थितिरुक्ता

ईश्वरोपाधिमायाया इच्छादिमत्त्वेनैवेश्वरस्य तद्वत्त्वं तत्त्वत्रयपरीक्षायामुक्तं यथा "नित्यं निर्दोषगन्धं निरतिशयसुखं ब्रह्म चैतन्यमेकं धर्म्मो धर्म्मीति भेदद्वितयमपि पृथग्भूय मायावशेन। धर्म्मस्तत्रानुभूतिः सकलविषयिणी सर्व्वकार्य्यानुकूला शक्तिश्चेच्छादिरूपा भवति गुणगुणस्याश्रयस्त्वेक एव। कर्त्तृत्वं तत्र धर्म्मी कलयति जगतां पञ्चकृत्यादिकत्वं धर्म्मः पुंरूपमाप्य सकलजगदुपादानभावं बिभर्त्ति। स्त्रीरूपं प्राप्य दिव्या भवति च महिषी स्वाश्रयस्यादिकर्त्तुः, प्रोक्तौ धर्म्मप्रभेदावपि निगमविदा धर्म्मिवत् ब्रह्मकोटी" इति तथा च एकमेव ब्रह्मानादिसिद्धया मायया कर्त्ती धर्म्म चेति द्विविधमभूदित्यर्थः। तन्त्रोक्ते कालिकायाः २पीठशक्तिभेदे। "इच्छाज्ञानक्रियाश्चैव कामिनी कामदायिनी। रतीरतिप्रिया नन्दा मध्ये चैव मनोन्मनी" तन्त्रसा० कालिकापीठशक्तिकथने।

इच्छाकृत त्रि० इच्छया कृतः। "कामकृते। १अशीतिभागो वृद्धिः स्यात्" इत्युक्तातिक्रमेण अधमर्णेन यथेष्टं कृतायां २वृद्धौ स्त्री "इच्छेद्विहितप्रवृद्धिः प्रतिभाषन्तु कालिकी। इच्छाकृता कामकृता कायिका कायकर्म्मणा" आह्नि० त० याज्ञवल्क्यवचनत्वेन धृतम्। मिताक्षरायां तु नैतद्वचनं दृश्यते। तत्र कारिता वृद्धिर्नारदवचनेन दर्शिता "वृद्धिः सा कारिता नाम यर्णिकेन स्वयंकृतेति"

इच्छानिवृत्ति स्त्री ६त०। पित्रादीनां धनादिभोगतृष्णोपरमे। "पितर्युपरतस्पृहे इत्यादि" स्मृतेः तादृशस्पृहानिवृत्तौ पित्रादेः स्वस्वत्वहानिः, पुत्रादेः स्वत्वोत्पत्तिश्च। तेन पुत्रादीनां तत्र पैत्रादिधनविभागः।

इच्छावत् त्रि० इच्छाऽस्त्यस्य मतुप् मस्य वः। धनादिस्पृहायुक्ते स्त्रियां ङीप्। सा च धनादितृष्णायुक्तायां कामुकायाम् स्त्रियां रमणेच्छायुक्तायां तु कामुकीति भेदः।

इच्छावसु पु० इच्छयैव वसु यस्य। कुवेरे जटा०

इच्छित पु० इच्छा जातास्य तारका० इतच्। स्पृहायुक्ते

इच्छु त्रि० इच्छति इष–उ नि० इच्छादेशः। इच्छायां वाच्ये "वत्स-धर्म्मोऽपि गृहीतुच्छुः" "उभयेच्छुरुभयोः" काल्या० १८,५,१२,१३

इज्जल पु० ईयते कर्म्मणि–क्विप् इत् सच्छिद्रतया गतं जलमनेन । (हिजोल) ख्याते तस्य जलसन्निकृष्टदेश-जातत्वात् तथात्वम् ।

इज्य पु० इज्याऽस्त्यस्य अर्श० अच् । १वृहस्पतौ "जीवाङ्गिरःसुरेज्यानां धिषणाः सुरजादयः" ज्यो०त० 'वित्-सितेज्यदिवसे' मु० चि० । जीवदेवताके २पुष्यनक्षत्रे च "त्वष्टा हराज्येन्दुकरान्त्यमैत्रेत्यादि दीपि० ३गुरौ ४पर-मेश्वरे ५विष्णौ च । "यज्ञ इज्यो महेज्यश्च" विष्णु०स० । "यष्टव्योऽप्ययमेवेतीज्यः" "ये यजन्ति च सर्वाणि दैवतानि पितॄनपि । आत्मानमात्मना नित्यं विष्णुमेव यजन्ति ते ४हरिवंशोक्तेः" भा० ६पूज्यमाने त्रि० । सुरेज्यः

इज्या स्त्री यज–भावे क्यप् स्त्रीत्वात् टाप् । १यज्ञे "सोऽहमिज्याविशुद्धात्मा" । "जगत्प्रकाशं तदशेषमिज्यया" रघुः यजेर्दानाद्यर्थत्वात् २दाने, ३सङ्गमे च । कर्म्मणि क्यप् । ४प्रतिमायाम् ५कुट्टिन्याञ्च । [जूके अमरः ।

इज्याशील पु० इज्या शीलमस्य । सततयजनशीले याय-

इञ्चाक पु० चञ्चा दीर्घाऽस्त्यस्य आकन् पृ० । (चिङ्गिड़ि) मत्स्यभेदे त्रिका० २जलवृश्चिके इति केचित् ।

इट गतौ भ्वादि०पर०सक०सेट् । एटति ऐटीत् । इयेट ईटतुः "त्वं त्यमिटतो रथमिन्द्र प्रावः सुतावतः" ऋ० १०,१७१,१ ।

इटसून न० इट–क इटं सूनं स्यूनं श्वि–क्त पृ०यस्य सः । शाखामये कटे । "वैतसे इटसून उत्तरतोऽश्वस्यावद्यन्ति" शत०ब्रा० १३,२,२,१९, "इटसूने शाखामये कटे" भा०

इट्चर पु० इष–संपदा०भावे क्विप् इषा कामेन चरति चर-अच् । गोपतौ (षाँड़) वृषभे

इड् (ल) स्त्री इल–क्विप् वा लस्य डः । १हविषि अन्ने "होता दनिलः प्रथमं यतध्यै" ऋ० २,४,२, "इडो हवीरूपाण्य-न्नानि" भा० "इड़स्पतिर्मघवा दस्मवर्चाः" ऋ० ६,५८,४, "इड़ः अन्नस्य पतिः" भा० २भूमौ "इन्द्रपानमूर्जिम-त्खतेड़ः" ऋ० ७,४७,१, "इड़इड़ाया भूमेः" भा० ईड्यते ईड–क्विप् पृ०। ३अन्ने ४वर्षर्त्तौ ५प्रजासु दर्शपौर्णमासा-ङ्गेषु पञ्चसु प्रयाजेषु तृतीये ६प्रयाजे च । प्रयाजाश्च "समिधो यजति तनूनपातं यजति इडो यजति बर्हिर्यजति स्वाहाकारं यजतीति" श्रुत्युक्ताः पञ्च । तेषां प्रयाजत्व-निर्वचनपूर्वकं पञ्चानामृतुरूपत्वमुक्तम् यथा "ऋत-वो ह वै प्रयाजाः तस्मात् पञ्च भवन्ति पञ्च ऋतवः" इत्युपक्रम्य "ततो देवा अर्चन्तः श्राम्यन्तश्चेरुस्त एतान् प्रया-जान् ददृशुस्तैरयजन्त ते ऋतून् संवत्सरं प्राजयन्नृतुभ्यः संवत्सरात् सपत्नानन्तरायंस्तस्मात् प्रजया प्रजया ह वै नामैतत् यत् प्रयाजाः इति तथो एवैष एतैर्ऋतून् संव-त्सरं प्रजयत्यृतुभ्यः संवत्सरात् सपत्नानन्तरेति तस्मात् प्रयाजैर्यजते" इति प्रयाजनिर्वचनेन ऋतुरूपत्वमेषा-मभिधाय समिदादीनां वसन्तादिरूपत्वमुक्तं तत्रैव यथा "समिधो यजति तद्वसन्तं, समिन्धे स वसन्तः समिद्धोऽन्या-नृतून् समिन्धे ऋतवः समिद्धाः प्रजाश्च प्रजनयन्त्योषधीश्च पचन्ति तद्वै खलु सर्वानृतून्निराहाऽथ यजयजेत्येवोत्तरा-नाहाऽजामितायैजामि ह कुर्य्याद्यत्तनूनपातं यजेड़ो यजेति ब्रूयात्तस्मादुयज यजेत्येवोत्तरानाह, स वै समिधो यजति । वसन्तो वै समिद्वसन्तमेव तद्देवा अवृञ्जत वसन्तात् सपत्नानन्तरायन् वसन्तं वेष एतद्वृङ्क्ते वसन्तात् सपत्ना-नन्तरेति तस्मात् समिधो यजति । अथ तनूनपातं यज-ति । ग्रीष्मो वै तनूनपाद्ग्रीष्मो ह्यासां प्रजानां तनूस्तपति ग्रीष्ममेव तद्देवा अवृञ्जत ग्रीष्मात् सपत्नानन्तरायन् ग्रीष्मं वेष एतद्वृङ्क्ते ग्रीष्मात् सपत्नानन्तरेति तस्मात्तनूनपातं यजति । अथेड़ो यजति । वर्षा वा इड़ इति ह वर्षा इड़ो यदिदं क्षुद्रं सरीसृपं ग्रीष्महेमन्ताभ्यां नित्यक्तं भवति तद्वर्षा ईड़ितमिवान्नमिच्छमानं चरति तस्माद्वर्षा इड़ो, वर्षा एव तद्देवा अवृञ्जत वर्षाभ्यः सपत्नानन्तरायन् वर्षा उ एवैष एतद्वृङ्क्ते वर्षाभ्यः सपत्नानन्तरेति त-स्मादिड़ो यजति । अथ बर्हिर्यजति । शरद्वै बर्हिरिति ह शरद्बर्हिर्या इमा ओषधयो ग्रीष्महेमन्ताभ्यां नि-त्यक्ता भवन्ति ता वर्षा वर्धन्ते ताः शरदि बर्हिषो रूपं प्रस्तीर्णाः शेरे तस्माच्छरद्बर्हिः शरदमेव तद्देवा अवृञ्जत शरदः सपत्नानन्तरायञ्छरदं वेष एतद्वृङ्क्ते शरदः सपत्ना-नन्तरेति तस्माद्बर्हिर्यजति । अथ स्वाहास्वाहेति यजति । अन्तो वै यज्ञस्य स्वाहाकारोऽन्त ऋतूनां हेमन्तो वसन्ताद्धि पराद्धोऽन्ते नैव तदन्तं देवा अवृञ्जतान्तेनान्तात् सपत्नानन्त-रायन्नन्तेनो एवैष एतदन्तं वृङ्क्तेऽन्तेनान्तात् सपत्नानन्तरेति तस्मात् स्वाहास्वाहेति यजति" शत०ब्रा० १,५,२,११। समि-दादीनां निरुक्त्यन्तरं प्रदर्श्य प्रजारूपत्वमिड़ादेरुक्तं यथा "स वै समिधो यजति । प्राणा वै समिधः प्रा-णानेवैतत् समिन्धे प्राणैर्ह्ययं पुरुषः समिद्धस्तस्मादभिमृ-शेति ब्रूयाद्यद्युपतापी स्यात् स यद्युष्णः स्यादेव तावच्छंसेत समिद्धो हि स तावद्भवति यद्यु शीतः स्यान्नाशंसेत । तत्प्राणानेवास्मिन्नेतद्दधाति तस्मात् समिधो यजति । अथ तनूनपातं यजति । रेतो वै तनूनपाद्रेत एवैतदस्मिन्

तस्मात्तनूनपातं यजति । अथेड़ो यजति प्रजा वा इड़ो यदा वै रेतः सिक्तं प्रजायतेऽथ तदोड़ितमिवाद्यमिवच्छमानं चरति तत् प्रैवैतज्जनयति तस्मादिड़ो यजति । अथ बर्हिर्यजति । भूमा वै बर्हिर्भूमानमेवैतत् प्रजनयति तस्माद्बर्हिर्यजति । अथ स्वाहास्वाहेति यजति । हेमन्तो वा ऋतूनां स्वाहाकारो हेमन्तो हीमाः प्रजाः स्वं वशमुपनयते तस्माद्धेमन्तान्म्लायन्त्योषधयः प्र वनस्पतीनां पलाशानि मुच्यन्ते प्रतितरामिव वयांसि भवन्त्यधस्तरामिव वयांसि पतन्ति विपतितलोमेव पापः पुरुषो भवति हेमन्तो हीमाः प्रजाः स्वं वशमुपनयते' । शत० ब्रा० १,५,४,२ । ऋतूनां पञ्चप्रयाजभागित्वमग्नितः प्रार्थनयैव जातम् इत्यप्युक्तं तत्रैव "ऋतवोह वै देवेषु यज्ञे भागमीषिरे आनो यज्ञे भजत मा नो यज्ञादन्तर्गतास्त्वेव नोऽपि यज्ञे भाग इति । तद्वै देवा न जज्ञुः । त ऋतवो-देवेष्वजानत्स्वसुरानुपावर्तन्ताप्रियान्देवानां द्विषतो भ्रातृव्यान् । ते हैतामेधितुमेधाञ्चक्रिरे । यामेषामेतामनुशृण्वन्ति कृषन्तो ह स्मैव पूर्वे वपन्तोयन्ति लुनन्तोऽपरे मृणन्तः शश्वद्भ्योऽकृष्टपच्या एवौषधयः पेचिरे । तद्वै देवानामागआस । कनीयइत्तु तो द्विषन्द्विषतेऽरातीयति किन्वेतावनुमानमुपजानीत यथेदमितोऽन्यथा सदिति । ते होचुः ऋतूनेवानुमन्त्रयामहा इति केनेति प्रथमानेवैनान् यज्ञे यजामेति । सहाग्निरुवाच । आयतनमां पुरा प्रथमं यजथ क्वाहं भवानीति न त्वामायतनाद्भ्रंशयाम इति ते यदृतूनभिक्रममाणा व्ययाग्निमायतनाच्चाव्यावयंस्तस्मादग्निरच्युतोऽच्युतो ह वा आयतनाद्भवति यस्मिन्नायतने भवति य एवमेतमग्निमच्युतं वेद । ते देवा अग्निमब्रुवन् । परेहि नांस्त्वमेवानुमन्त्रयस्वेति स हेत्याग्निरुवाच ऋतवोऽपिदं वै वो देवेषु यज्ञे भागमिति कथं नोऽविद इति प्रथमानेव वो यज्ञे यक्ष्यन्तीति । त ऋतवोऽग्निमब्रुवन् आ वयं त्वामस्मासु भजामो यो नो देवेषु यज्ञे भागमविद इति स एषोऽग्निर्ऋतुष्वाभक्तः समिधो अग्ने तनूनपादग्न इड़ो अग्ने बर्हिरग्ने स्वाहाग्निमिति" शत० ब्रा० १,६,१,७,८ । प्रयाजैर्यजन्तीत्युपक्रम्य "इड अग्न आज्यस्य व्यन्त्विति तृतीयः" आश्व० श्रौ० । "इडस्पदे समिध्यसे" यजु० १५,३० "इड़ः पृथिव्याः" वेददी० ।

इड़ा (ला) स्त्री इल–अच् वा लस्य डत्वम् । १गवि, २वाचि, ३भूमौ "प्रबुध्यते नूनमिड़ास्पदस्य" भा०व० २२५ अ० । "इडा पिन्वते विश्वदानीम्" ऋ० ४,५०,८, "इडा भूमिः" भा० । इल+गतौ करणे घञर्थे क । देहस्थे ४नाडीभेदे । "इड़ा च पिङ्गला चैव सुषुम्णा च सरस्वती अलम्बुषा कुहूश्चैव शङ्खिनी शिखिनी तथा । विश्वोदरी विश्वमुखी व्याप्नुर्याद्येताश्चतुर्दश" इति तन्त्रोक्तासु प्रधानासु चतुर्दशसु नाडीषु तिस्रः प्रधानाः तथा हि । "शिराः शतानि सप्तैव" या० "शिराः नाभिसंबद्धाश्चत्वारिंशत् वातपित्तश्लेष्मवाहिन्यः सकलकलेवरव्यापिन्योनानाशाखाः सत्यः सप्त शतानि भवन्तीति" मिता० । "सप्त शिराशतानि, सुश्रु० । तेन देहमध्ये सप्त शतानि नाड्यः तन्मध्ये एताश्चतुर्दश प्रधानतयोक्ताः । तासु मध्येऽपि तिस्रः प्रधानाः देहस्थनाडीरुपक्रम्य । शारदा० "नाड्यस्तत्र समुद्भूतास्तासु मुख्यास्तिस्रः समीरिताः । इड़ा वामे स्थिता नाड़ी पिङ्गला दक्षिणे मता । तयोर्मध्यगता नाड़ी सुषुम्णा च समाहिता । पादाङ्गुष्ठद्वयं याता शिखाभ्यां शिरसा पुनः । ब्रह्मस्थानं समापन्ना सोमसूर्य्याग्निरूपिणी । तस्या मध्यगता नाड़ी चित्राख्या योगिवल्लभा । ब्रह्मरन्ध्रं विदुस्तत्र पद्मसूत्रनिभं परम् । इड़ायां सञ्चरेच्चन्द्रः पिङ्गलायां दिवाकरः । ज्ञातौ योगनिदानज्ञैः सुषुम्णायां तु तावुभौ" तत्स्थानचक्रा कार्य्यमाह "इड़याकर्षयेद्वायु बाह्यं षोड़शमात्रया । धारयेत्पूरितं योगी चतुःषष्ठ्या तु मात्रया । सुषुम्णामध्यगं सम्यक् द्वात्रिंशन्मात्रया शनैः । नाड्या पिङ्गलया चैनं रेचयेद्योगवित्तमः । प्राणायाममिमं प्राहुर्योगशास्त्रविशारदाः" २५ पटले । "पिङ्गलायां स्थिता ह्रस्वा इड़ायां सप्लुताः परे (दीर्घाः) । सुषुम्णामध्यगा ज्ञेयाश्चत्वारो ये नपुंसका" शार० ५प० । दीर्घादिरयमित्यन्ये । ५हविर्भेदे च "यजमानपञ्चमा इड़ां भक्षयन्ति" श्रुतिः । इडस्य तत्रैव "इड़ां नोमित्रावरुणोत वृष्टिम्" ऋ० ७,६४,२ "इड़ामन्नम्" भा० "घृतैर्गव्यूतिमुक्षतमिडाभिः" ऋ० ७,६४,४ । "इड़ाभिरन्नैः" भा० । ६देवीभेदे "स्तुतिः प्रीतिरिडा कान्तिः शान्तिः पुष्टिः क्रिया तथा । शिष्टाश्च देव्यः" इत्युपक्रम्य । "उपतस्थुर्महाभागं बलिमिन्द्र महारथम्" हरिवं० २५६ अ० "इड़ा देवी भारती विश्वतूर्तिः" ऋ० ५,२,८ । "अभि न इड़ा यूथस्य माता" ऋ० ५,४१,१९ । "इड़ा गोरूपधरा मनोः पुत्री माध्यमिका वाक् वेति" भा० । बुधस्य जायायां पुरूरवसो मातरि पश्चात् मनुपुत्रत्वे सुद्युम्नतया ख्यातायां मित्रावरुणयोरंशजातायां कन्यायाञ्च तत्कथा हरिवं० "अकरोत् पुत्रकामस्तु मनुरिष्टिं प्रजापतिः । मित्रावरुणयोस्तात पूर्वमेव

विशाम्पते! । अनुत्पन्नेषु नवसु पुत्रेष्वेषु तु भारत! । तस्यां तु वर्त्तमानायामिष्ट्यां भरतसत्तम! । मित्रावरुणयोरंशे मनुराहुतिमाजुहोत् । आहुत्यां हूयमानायां देवगन्धर्वमानवाः । तुष्टिञ्च परमां जग्मुर्मुनयश्च तपोधनाः । अहोऽस्य तपसो वीर्य्यमहो श्रुतमहोऽद्भुतम् । तत्र दिव्याम्बरधरा दिव्याभरणभूषिता । दिव्यसंहनना चैव इडा जज्ञे इति श्रुतिः । तामिलेत्येव होवाच मनुर्दण्डधरस्तदा । अनुगच्छस्व मां भद्रे तमिला प्रत्युवाच ह । धर्मयुक्तमिदं वाक्यं पुत्रकामं प्रजापतिम् । इडोवाच । मित्रावरुणयोरंशे जाताऽस्मि वदतांवर! । तयोः सकाशं यास्यामि न मां धर्मो हतोऽवधीत् । सैवमुक्त्वा मनुं देव मित्रावरुणयोरिडा । गत्वाऽन्तिकं वरारोहा प्राञ्जलिर्वाक्यमब्रवीत् । अंशेऽस्मिन् युवयोर्जाता देवौ! किं करवाणि वाम् । मनुना चाहमुक्ता वै अनुगच्छस्व मामिति । तां तथा वादिनीं साध्वीमिडां धर्मपरायणाम् । मित्रश्च वरुणश्चोभावूचतुर्यन्निबोध तत् । अनेन तव धर्म्मेण प्रश्रयेण दमेन च । सत्येन चैव सुश्रोणि! प्रीतौ स्वो वरवर्णिनि! । आवयोस्त्वं महाभागे ख्यातिं कन्येति यास्यसि । मनोर्वंशकरः पुत्रस्त्वमेव च भविष्यसि । सुद्युम्न इति विख्यातस्त्रिषु लोकेषु शोभने । जगत्प्रियो धर्म्मशीलो मनोर्वंशविवर्द्धनः । निवृत्ता सा तु तच्छ्रुत्वा गच्छन्ती पितुरन्तिकम् । बुधेनान्तरमासाद्य मैथुनायोपमन्त्रिता । सोमपुत्राद्बुधाद्राजंस्तस्यां जज्ञे पुरूरवाः । जनयित्वा सुत सा तमिला सुद्युम्नतां गता" ।

दुर्गायाञ्च "आवार्थां मदिरां चर्णोमिडां मलयवासिनीम्" हरिवं०१७८अ० दुर्गास्तवः । इडैव स्वार्थे कन् तत्रार्थे

इडाचिका स्त्री इडावत् सूक्ष्मं मध्यभागम् अचति अच—ण्वुल् इत०टापि अत इत्वम् । वरटायाम्"(बोलता) शब्दच०

इडिक्क पु० वनभवे छागे हेम० [अप् । इमे चोरस्ना०

इडुर पु० इलतीति इट् इडस्तस्तौ तया धियते हृ—कर्म्मणि

इडीय त्रि० इडाया अदूरदेशः उत्करा०छ । अस्मास्मादूरदेशादौ

इण् णित् इङोभेदार्थम् अदा० पर० सक० अनिट् । एति इतः यन्ति । इयात् इहि एतु आयन् अगात् इयाय ईयतुः ईयुः इययिथ इयेथ ईयिव । एता एष्यति ऐष्यत् एतव्यम् अयनीयम् इत्यम् । एता आयकः इतः इतिः अयनम् अयः आयः यन् ईयिवान् ईयुषी । इत्वा इत्य उपेत्य । "समयमेति नानदत्" ऋ०१,१४०,५, "इतः स्म मैत्रावरुणौ किमेतौ?" भट्टिः "अहञ्च भाष्यकारश्च कुशाग्रीयधियावुभौ, नैव शब्दाम्बुधेः पारम्" कलापप० "एमीदेषां निष्कृतं जारिणीव" ऋ०१०,३४,५. "आयन्नापोऽयनमिच्छमानाः" ऋ० २,२२,७, "अगात् सराजं जलमभ्ययोध्यम्" "ईयुर्भरद्वाजमुनेर्निकेतम्" "तत्पृष्ठतः प्रष्ठमियाय नम्रः" भट्टिः "सुष्टद्रयोवर्त्तते यन्" ऋ० १,१८३,२ "यन्ति वा आप एत्यादित्य एति चन्द्रमा यन्ति नक्षत्राणि" शत०ब्रा० ११.५.७,१० "मामेवैष्यत्य संशयम्" "मामेवैष्यति कौन्तेय!" इति च गीता "अपोदासौ स धर्म्मात्मा इयाय दर्शनम् रहः" भा०आ०८२अ० कर्म्मणि ईयते "इन्द्रो मायाभिः पुरुरूप ईयते" श्रुतिः "वनितयाऽनितया" रजनीवधूः" रघुः

अति+अतिक्रमे सक० "नात्येति सकृदाहृता" स्मृतिः "षडशीतिमुखेऽतीते" "अतीते चोत्तरायणे" स्मृतिः "अर्द्धं चेत् पश्चिमीं रात्रिमतीत्य परतो भवेत्" शुद्धित० स्मृतिः अभि+अति+आभिमुख्येनातिक्रमे सक० "योऽस्य स्वर्गो लोकोऽजितो भवेत् तमभ्यत्येति" शत० ब्रा०१२,५,२,८, । वि+अति+विशेषेणातिक्रमे "व्यतीतकालस्त्वहमभ्युपेतः"

अधि+चिन्तने गत्यर्थस्य प्राप्त्यर्थत्वात् ज्ञानार्थत्वाच्च लाभे ज्ञाने च । इकवत्

अनु+अनुगमने सक० । "आदित्यं वा अस्तं यान्तमन्ये देवा अनुयन्ति" शत०ब्रा० ११,६,२,४ । "श्रुतान्वितो दशरथ इत्युदाहृतः" भट्टिः सन्ततसम्बन्धे अन्वयः । "तदन्वये शुद्धिमति" रघुः शाब्दबोधोपयोगिसम्बन्धभेदे च । "साकाङ्क्षशब्दैर्यो बोधस्तदर्थान्वयगोचरः" शब्दशक्ति० सम+अनु सम्यगन्वये । "तत्तु समन्वयात्" पा०सू० ।

अन्तर्+अन्तर्गतौ अन्तरायः अन्तरेति इङ् शब्दे ९१८पृ०उदा० ।

अप+अपगमने अपसरणे अक० "अनुमेतमपेतकल्मषम्" भाग० "ध्रुवमपायेऽपादानम्" "अपाये यदुदासीनम्" भर्तृह० "सत्त्वे निविशतेऽपैति" भाष्यका० वि+विशेषेण विगमे "व्यपैति ददतः स्वधा" स्मृतिः "स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः" या०स्मृतिः ।

अपि+प्राप्तौ सक० "स्वमपीतो भवतीति स्वपितीत्याचक्षते" श्रुतिः "पञ्च नद्यः सरस्वतीमपियन्ति सस्रोतसः" वाज० लये अक० अप्ययः अपीतिः "अपीतौ दर्शनात्" "स्वाप्ययात्" शा०सू०

अभि--आभिमुख्येन गतौ सक० "देहान् यथेष्टमभ्येति हित्वेमां मानुषीं तनुम्" अभि+उप+आभिमुख्येन प्राप्तौ सक० ।

"व्यतीतकालस्त्वहमभ्युपेतः" रघुः "यत्त्वे तथा न गणितं तदि-हाभ्युपैति" उद्भटः स्वीकारे "अभ्युपेत्य च शुश्रूषाम्" स्मृतिः

अव—अवगमे,ज्ञाने, सक० "अवैमि ते सारमतः खलु त्वाम्" कुमा०।अधोगतौ अक०। अनु+अव+सन्ततसम्बन्धे । अन्ववायः । वि+अव+व्यवधाने "गार्हपत्याहवनीयौ न व्यवेयात्" कात्या० १,८,२२ । "नान्तरा यज्ञाङ्गानि व्यवेयात्" श्रुतिः "अनुमत्या व्यवेयात्" स्मृतिः स्त्रीपुंसयोः संभोगार्थव्यापारे व्यवायः। सम्+अव+सम्यक्सम्बन्धे अयुतसिद्धरूपसंबन्धे। स चावयवावयविनोः, गुणगुणिनोः, क्रियाक्रियावतोः जातिव्यक्त्योश्च सम्बन्धः । समवेतः समवायः। "संयुक्तसमवायतः तत्रापि समवेतानाम्" भाषा० । सम्बन्धमात्रे च "एते ह वै रात्री सर्व्वा रात्रयः समवयन्ति" शत०ब्रा०११,१,७,४,सांहत्ये,"सेनायां समवेतायां सैन्यास्ते" अमरः 'धर्म्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः" गीता ।

आ—आगमने सक०। "पञ्चालानां समितिमेयाय" "तस्मा-देयाय" तस्माल्लोकात् पुनरैत्यस्मै लोकाय" छा० उ० 'यूनः स्थविरआयति' मनुः अनु+आ+अन्वागमने सक० । अभि+आ+अभ्यागमने आभिमुख्येनागतौ "गङ्गामभ्येहि सततं प्राप्स्यसे सिद्धिमुत्तमाम्" भा०अनु० २६अ०। उद्+आ+उद्गमने । उप+आ । समीपागमने । प्रति+आ+प्रत्यागमने 'प्रत्यायत्यां रात्रौ" शत०ब्रा०२, २,४०२ । "नैनमेते रश्मयः प्रत्यायन्ति" शत०ब्रा०१४, ८,६,२ ।

उद्—उद्गतौ अक० । "उदेति सविता ताम्रस्ताम्र एवास्तमेति च" सा०द० । उदयः । उत्क्रमणे अक० । "उदेति ह वै सर्वेभ्यः पाप्मभ्योय एवं वेद" छा०उ० । अभि+उद्+आभिमुख्येनोद्गतौ "किञ्चिदभ्युदिते रवौ"म०त०पु०। प्रति+उद् प्रत्युद्यानेन गतौ"प्रत्युदियाय पार्व्वती"कुमा० सम्+उद् सम्यगुदये"यथादित्यःसमुद्यन् वै तमः पूर्व्वं व्यपोहति" भा०व० २०६अ० । "एककार्य्यसमुद्यन्तौ कृष्णौ युद्धेऽपराजितौ"भा०सभा०१अ० । सांहत्ये च समुदयः

उप+समीपगमने प्राप्तौ च "उपेयुषां मोक्षपथं मनीषिणाम्" माघः "योगी परं स्थानमुपैति दिव्यम्" गीता उपायः

दुर+दुर्गमे ।   ["अत्यद्दत्तं त्वम्" भट्टिः

निर्—निर्गमने ।"निर्यदन्त्रविभूषितम्" दुर्गाध्यानम् । निरगा-

परा—प्रेतभावप्राप्तौ परेतः । पलायने च "यः परैति स जीवति" प्रतिपत्तौ "नैव श्रेयो धार्त्तराष्ट्रः परैति" भा०सम० ५अ० ।

परि—व्याप्तौ सक० परीतः"पथिलं पर्य्यैषि विश्वतः"ऋ० ७, १०६,१४, परिक्रमणे "प्रदक्षिणमग्निं परीत्य" स्मृ० । परिपाट्याम् पर्य्यायः "जिह्वा पर्य्येति मे मुखम्" भा० आदि० १५२ अ०।   [यन्ति" अथ०१५,१०,८ ।

अनु+परि+परिपाट्या अनुगमने "संवत्सर एतद्वतोऽनुपरि-

आ+परि अभिमुख्येन व्याप्तौ   वि+परि+व्युत्क्रमप्राप्तौ विपर्य्ययः "विपर्य्ययन्तौ वा एतावग्निं भवतः" शत० ७,२,१,१५ ।"विपरीतमतोऽन्यथा"ज्योति०। "निमित्तानि च पश्यामि विपरीतानि केशव !" गीता

प्र+परलोकगतौ अक० प्रेतः "प्रेत्य संभावि"कठो० अपगतौ च "तस्मात्तदात्तस्मात् प्रैति रसः" वृह०उ० । प्रकर्षेण गतौ सक०"प्रयन्ति सर्व्वबीजानि रोप्यमाणानि चैव ह" भा०व० १९१ अ०।

अभि+प्र+अभिलाषे "कर्म्मणा यमभिप्रैति स सम्प्रदानम्" पा०अभिप्रायः 'अभिप्रेतार्थसिद्धिमङ्गलम्'’रघु० ।

प्रति+प्रतिगमने "शरत्स्वतोऽद्वैतवनं प्रतीयुः" "राज्ञः प्रतीयाय गुरोः सकाशम्" रघुः प्रतीयुषा पूर्दहने जनेन" भट्टिः । ज्ञाने प्रत्ययः प्रतीतिः । "उच्चावचा जानपदधर्म्मा ग्रामधर्म्माश्च तान् विवाहे प्रतीयात्" आश्व० प० "सर्व्वोह्यात्मास्तीति प्रत्येति न नाहमस्मीति" "सर्व्वो-लोको नाहमस्मीति प्रतीयात्" शा०भा०"कलहंसमालाः प्रतीयिरे श्रोत्रसुखैर्निनादैः" भट्टिः । विख्यातौ "सोऽयं वटःश्याम इति प्रतीतः" रघुः "तं प्रतीतं स्वधर्म्मेण" मनुः "चतुर्वर्गफलप्राप्तिर्हि काव्यतः—प्रतीतैव" सा०द० विश्वासे "पतिः प्रतीतः प्रसवोन्मुखीं प्रियाम्"रघुः"बल-वदपि शिक्षितानामात्मन्यप्रत्ययं चेतः" 'बलवदपि दूयमानं प्रत्यापयतीव मां हृदयम्" शकु० "ताः स्वचारित्रमुद्दिश्य प्रत्याययत मैथिली"रघुः।

सम्+प्रति+सम्यग्ज्ञाने निश्चये सम्यग्विश्वासे च। "किं भवत्कृतं वेत्युपलब्धसंज्ञाविकल्पयन्तोऽपि न संप्रतीयुः" भट्टिः ।

वि+विगमे भरिष्ये "पितरः कामं"व्येतु मोमानसोज्वरः'भा० आ०९६अ० 'अनुमानं द्विविधं वीतमवीतञ्च'’सा०कौ० "वीतशोकभयो विप्रो ब्रह्मलोके महीयते" 'नियतो वीतमत्सरः" मनुः । 'वीतशोकभयक्रोधः" गीता ।

सम्+सङ्गमे मेलने अक० "आप्यायस्व समेतु ते विश्वतः सोम ! वृष्ण्यम्"ऋ०१,९१,१६,"पार्थिवाः सर्व्वे समीयुस्तत्र भारत!" भा०आ०१८०अ०"राक्षसौ हरियुग्माभ्यां दशराय समीयतुः" "क्रिंमर्य्यो राघवश्चैव समीयुर्भ्रातृभिः सह"रामा०

अभि+सम् आभिमुख्येन सम्यग्गतौ सक० "तं जातमभिसंयन्ति देवाः" अथ ११,५,२, णिचि अबोधने गमादेशः। अमगति ते अजीगमत् त बोधनेतु प्रत्या(प)ययति ते प्रत्यापिपत् त-प्रत्याययित् त। सनि अबोधने गमादेशःजिगमिषति बोधे तु प्रतीषिषिषति।. उपसर्गस्थावर्णात् परस्य गुणभावेन एत्वं प्राप्तौ वृद्धिरेकादेशः। अवैति अवैमि उपैति।

इखण्ड पु०न० इदि–रक् प्र०। उखाकर्षके संट्याकारे पदार्थे "अर्धेनमिखण्ड्वाभ्यां परिगृह्णाति असौ वा आदित्य एषोऽग्निरहोरात्रे इखण्डे अह्नं तदादित्यमहोरात्राभ्यां परिगृह्णाति तस्मादेषोऽहोरात्राभ्यां परिगृहीतः यद्वेवैनमिखण्ड्वाभ्यां परिगृह्णाति असौ वा आदित्य एषो अग्निरिमा उभयलोकाविखण्डे अह्नं तदादित्यमाभ्यां लोकाभ्यां परिगृह्णाति तस्मादेष आभ्यां लोकाभ्यां परिगृहीतः परिमण्डले भवतः परिमण्डलौ हीमौ लोकौ मौञ्जे त्रिवृती तस्यो एवोक्तोऽयो अनतिदाहाय" शत० ब्रा० ६,७,१,२५-२६, "परिमण्डलाभ्यामिखण्ड्वाभ्यामुखां परिगृह्णाति" कात्या०१६, ५,२,२, "उखा याभ्यां गृह्यते तौ इखण्डौ" कर्क०।

इत् त्रि०एति गच्छति इ–क्विप्। गत्वरे व्याकरणोक्ते प्रक्रियाकालोच्चारिते प्रयोगकालेऽस्थायिनि वर्णे वेदे यथा तिप् सिप् इत्यादौ पकारादि ते च "उपदेशेऽजनुनासिक इत्" "हलन्त्यम्" "न विभक्तौ तुस्माः" "आदिर्ञिटुडवः" "षः प्रत्ययस्य" "चुटू" "लशक्वतद्धिते" पा०सूत्रेषु सापवादं दर्शिताः तस्य लोप" इत्यनेन तस्य प्रयोगेऽदर्शनञ्च विहितम् "आदिरन्त्येन सहेता" पा० २ अनन्तरार्थे ३अवधारणार्थे च अव्य० "यदेदन्ता अदहन्त पूर्व आदित्" यजु०१७,२५,, "आत् इत् इति च्छेदः इत् एवार्थे" वेददी०"उपोपेनु मघवन्! भूय इन्नु" यजु०२,२४, इत् एवार्थे" वेददी० ५इत्थमित्यर्थे च "समाहितस्त्वेतानि वरुणस्य व्रतानि" यजु०४,२०, इदित्यव्ययमित्थमित्यर्थे" वेददी०

इत त्रि०इ–क्त १गते "वनितानितवा रजनीवधूः" रघुः भावे क्त। २गतौ "तदितादियादशो पयः" शत०ब्रा०६,२,१,१९। ३ज्ञाने च न०। "वीतमवीतञ्चेति" सां०कौ०।

इतर त्रि०इना कामेन तीर्य्यते तॄ–अप् तरति पचाद्यच् वा। १नीचे पामरे "इतरइव परिभूय ज्ञानम्, अविगणय्य तपःप्रभावम्, उन्मूल्य गाम्भीर्य्यं, मन्मथेन जडीकृतः" काद०। ईयतेऽनेन इतः विशेषस्तं राति रा क। २भेदाश्रये। "इतरतापशतानि यथेच्छया वितर तानि सहे चतुरानन!" उद्भटः। "यत्र हि द्वैतमिव भवति तदितर इतरम् पश्यति" श्रुतिः। "ते यतध्वं परं शक्त्या विजयायेतराय वा" भा०आ०१०अ०। वर्णाश्रमेतराणां नो ब्रूहि धर्म्मानशेषतः" या० स्मृ० "इतराणि च रत्नांसि मेतुर्वानरकोटिषु" "इतरोदहने स्वकर्म्मणाम्" रघुः "तमिमं कुरु दक्षिणेतरम्" कुमा०। अस्य सर्व्वनाम कार्य्यम्। इतरे इतरस्मै इतरस्मात् इत्यादि। "विजयायेतराय वै इत्यादि छान्दसम् न तत्कार्य्यम्। वर्णाश्रमेतराणामित्यत्र बहुव्रीहिः तेन न सर्व्वनामकार्य्यम्। एवं "पर्ट सव्येतरे भुजे" रघुश्लोकेऽपि बहुव्रीहिः। तसिल् इतरतः। "जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्" भाग०। थाल् इतरथा "एवं देवत्रेतरथा मानुषे" शत०ब्रा ६'८'१,८, इतरेण निर्वृत्तम् संकलादि०अञ्। ऐतरः। इतरनिर्वृत्ते त्रि० इतरस्या पत्यम् शुभ्रा० ढक्। ऐतरेयःतदपत्ये पुंस्त्री।

इतरेतर त्रि०इतर+द्वित्वं समासवद्भावश्च। अन्योन्यशब्दार्थे। "स्त्रीनपुंसकयोरुत्तरपदस्यायाविभक्तेराम्भावो वा वक्तव्यः" वार्त्ति० इतरेतराम् इतरेतरं वा इमे ब्राह्मण्यौ कुले वा भोजयतः" सि०कौ०। समासवद्भावात् दृत्तिमात्रे पुंभावः इतरेतरेण "दलद्वये टाबभावः क्लीबे चाङ्विरहःस्वमोः। समासे सोरलुक् चेति सिद्धं बाहुलकात्त्रयमित्युक्तं कार्य्यं तेन क्लीबे इतरेतरमित्येव। "इतरेषां तु वर्णानामितरेतरकाम्यया" मनुः। "यथा नाभिचरेतां तौ वियुक्तावितरेतरम्" मनुः। परमतर्दादिवत् सर्व्वनामकार्य्यम्। किन्तु नाट्ड इति भेदः "व्यूढावुभौ तावितरेतरस्मात्" रघुः

इतरेतरयोग: पु०इतरेतरस्य योगः अन्वयः। प्रत्येकप्राधान्येन सर्व्वेषामन्वये। तदर्थे हि द्वन्द्वसमास इष्यते तत्रानेकवत् प्रत्येकप्राधान्यात्। धवश्च खदिरश्च इति वाक्ये हि धवखदिरौ इत्यत्र भिनत्तीत्यादि क्रियायां प्रत्येकस्य प्राधान्येनैवान्वयः तथा च एकजातीयक्रियान्वयितावच्छेदकविशिष्टे प्रत्येकान्वयबोधकत्वे इतरेतर योगाख्यः द्वन्द्वः संहतिप्राधान्ये तु समाहारद्वन्द्वः इति भेदः। २परस्परसम्बन्धे च।

इतरेतराश्रय पु० इतरेतरमाश्रयति आ+श्रि–अच्। अन्योन्याश्रये तर्कदोषभेदे अन्योन्याश्रय शब्दे २१७पृष्ठे विवृतिः।

इतरेद्युस् अव्य० इतरस्मिन्नह्नि इतर+एद्युस्। इतर–दिवसे इत्यर्थे

इतर्थेतस् अव्य०। इतश्च इतश्च। अनियतदिग्भागादौ।

"इतश्चेतश्च विचरन् तस्मिन् मुनिवराश्रमे" देवीमा०।

इतस्ततस् अव्य०द्वन्द्वः। अनियतस्थाने इत्यर्थे "लाङ्गूलविक्षेपविसर्पिशोभैरितस्ततश्चन्द्रमरीचिगौरैः" कुमा०।

इतस् अव्य० इदम्+तसिल् इशादेशः। १अस्मादित्यर्थे "इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम्" कुमा०। २अस्मिन्नित्यर्थे च। "इतोनिषीदेति विसृष्टभूमिः" कुमा०। "प्रयुक्तमप्यस्त्रमितो वृथा स्यात्" रघुः।

इति अव्य० इण-क्तिच्। १हेतौ, २प्रकाशने, ३निदर्शने, ४प्रकारे, ५अनुकर्षे, ६समाप्तौ, ७प्रकरणे, ८स्वरूपे, ९सान्निध्ये, १०विवक्षानियमे, ११मते, १२प्रत्यक्षे, १३अवधारणे, १४व्यवस्थायाम्, १५परामर्शे, १६माने, १७इत्थमर्थे, १८प्रकर्षे, १९उपक्रमे च। तत्र स्वरूपद्योतकता त्रिधा शब्दस्वरूपद्योतकता प्रातिपदिकार्थद्योतकता वाक्यार्थद्योतकता चेति भेदात्। तत्र शब्दस्वरूपद्योतकत्वे तद्योगे न प्रथमा। "कृष्णेति मङ्गलं नाम यस्य वाचि प्रवर्त्तते" पुरा० "अतएव गवित्याह भूसत्तायामितीदृशम्" भर्तृहरिः "रामरामेति रामेति कूजन्तं मधुरं वचः" रामा० "रामेति रामभद्रेति रामचन्द्रेति वा जपन्" रामकवचम्। प्रातिपदिकार्थद्योतकत्वे प्रथमा। "चयस्त्विषामित्यवधारितं पुरस्ततः शरीरीति विभाविताकृतिम्। विभुर्विभक्तावयवं पुमानिति क्रमादमुं नारद इत्यबोधि सः" माघः। "दशरथ इत्युदाहृतः" भट्टिः। "वदन्त्यपर्णेति च तां पुराविदः" कुमा०। वाक्यार्थद्योतकत्वे न प्रथमा निपातेनाभिहिते प्रतिपादिकार्थे एव प्रथमाविधानात् वाक्यस्य च शक्त्या लक्षणया वा एकार्थबोधकत्वाभावेन प्रातिपदिकत्वाभावात् "भू सत्तायामितीदृशम्" भर्तृ० "श्रुतार्थस्य परित्यागादश्रुताश्रुतार्थस्य कल्पनात्। प्राप्तस्य बाधादित्येवं परिसंख्या त्रिदोषिका" मीमांसाका०। तत्र हेतौ "इतोव धारासवधीर्य्य" नैष० "इति स्म सा कारुतरेण लेखितम्" नैष०। प्रकारे "इति मदमदनाभ्यां रागिणः स्पष्टरागाः" माघः प्रकाशार्थे इतिहरि इत्यादौ अव्ययी०इदमर्थे "विरोधिसिद्धमितिकर्त्तुमुद्यतम्" प्रकरणे इतिकर्त्तव्यमितिकर्त्तव्यम्। इतिवृत्तम्। भावे क्तिन्। २०गतौ २१ज्ञाने च स्त्री "प्रावावीद्धिपतन्न चतुष्पदित्यै" ऋ० १,१२४,१"। २२ ऋषिभेदे पु०।

इतिक त्रि० इत गमनमस्त्यस्य ठन्। गतिमति ततः नडा० गोत्रापत्ये फक्। ऐतिकायनः तद्गोत्रापत्ये पुंस्त्री

इतिकथ त्रि० इति इत्थं कथा यस्य। अर्थशून्यवाक्यप्रयोक्तरि अश्रद्धेयवचने।

इतिकथा स्त्री इति इत्थं कथा। अर्थशून्यवाक्ये मेदि०।

इतिकर्त्तव्य त्रि० इति इत्थं कर्त्तव्यम्। इत्थं कर्त्तव्ये परिपाटीयुक्ते कर्तव्ये। "एवं सर्वं विधायेदमितिकर्त्तव्यमात्मनः" मनुः "संदिदेशेतिकर्त्तव्यम् वध्ववेगप्रमाथिनौ" भा०व०२८५अ० "स च व्यवहारः कीदृशः कतिविधः कथञ्चेतिकर्त्तव्यताकलापोनाभिहितः" इति मिता० "कथयन्त्वितिकर्त्तव्यं श्वःकाले करवामहे" भा० आ० १९५ अ०। "धर्मे प्रमीयमाणे हि वेदेन करणात्मना। इतिकर्त्तव्यताभागं मीमांसा पूरयिष्यति" पुरा० इतिकर्त्तव्यादयोऽप्यत्र। "तेषु तेष्वितिकृत्यं हि पुरुषस्य समाप्यते" मनुः। "ततोऽर्ज्जुनस्य कृष्णस्य विनिश्चित्येतिकृत्यताम्" भा० आ०२२० अ०।

इतिवृत्त न० इत्थं वृत्तम्। इदंप्रकारान्विते चरिते। "इतिवृत्तं नरेन्द्राणामृषीणाञ्च महात्मनाम्" भा० आ०२अ० उपचारात् तज्ज्ञापके २पुराणादौ च। "ममेतिवृत्तं किल गेयमद्भुतम्" रामा०। "दूरानुवर्त्तिनि स्यात् तस्य प्रासङ्गिकेतिवृत्ते तु" सा०द०।

इतिश पु० ऋषिभेदे। तस्य गोत्रापत्यम् नडा० फक्। ऐतिशायनस्तद्गोत्रापत्ये पुंस्त्री।

इतिह अव्य० इति एवं ह किल द्वन्द्वः। उपदेशपरम्परायाम् यथाऽत्र वटे यक्ष इत्युपदेशपरम्परैव न तु केनापि दृष्टा तथा कथितम्। इति तस्य प्रसिद्धिमात्रता "इति होचुर्वृद्धा" सा०कौ०।

इतिहास पु० इतिह पारम्पर्योपदेश आस्तेऽस्मिन् आस-आधारे घञ् ३त०। "धर्मार्थकाममोक्षाणामुपदेशसमन्वितम्। पूर्ववृत्तकथायुक्तमितिहासं प्रचक्षते" इत्युक्तलक्षणे पुरावृत्तप्रकाशके भारतादिग्रन्थे। "इतिहासपुराणाद्यैः षष्ठं सप्तमं नयेत्" दक्षः "स्वाध्यायं श्रावयेत् पित्रे धर्मशास्त्राणि चैव हि। आख्यानानीतिहासांश्च पुराणानि खिलानि च" मनुः। "वाकोवाक्येतिहासपुराणः पञ्चमोवेदानां वेदः" छा०उ० "इतिहासोत्तमादस्माज्जायन्ते कविबुद्धयः। पञ्चभ्य इव भूतेभ्योलोकसंविधयस्त्रयः। भारतस्येतिहासस्य पुण्यां ग्रन्थार्थसंयुताम्। संस्कारोपगतां ब्राह्मीं नानाशास्त्रोपबृंहिताम्" भा०आ० १अ० इत्युक्ते, भारतस्येतिहासरूपत्वम्। "इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्" स्मृतिः। २अन्यस्मिन् पुरावृत्ते स च भारते शान्तिप-

क्यादौ "अत्राप्युदाहरन्तीममितिहासं पुरातनम्" इत्यनेन बहुशो दर्शितः। "नवमेऽहनि तार्क्ष्यो वैपश्यितस्तस्य वयांसि विषयस्तानीमान्यासत इति वयांसि ब्रह्मचारिण इत्युपसमानीताः स्युस्तानुपदिशतीतिहासोवेदः सोयमितीतिहासमाचक्षीत" आश्व० श्रौ० वेदभागविशेषस्यैवेतिहासरूपत्वमुक्तम्। तत्र पुरावृत्तप्रतिपादकत्वात् तथेति बोध्यम् तदभिप्रायेणैव "वाकोवाक्यमितिहासपुराणमिति" छान्दोग्यवाक्यमिति द्रष्टव्यम्। पौराणिकमतसिद्धे २ऐतिह्ये प्रमाणे च।

इतिहासपुराण न० इतिहासावेदकं पुराणम्। आथर्वण-वेदभागभेदे समा० द्व० २इतिहासपुराणसमाहारे च।

इत्कट पु० इतं गन्तारं जनं कटति आवृणोति स्वशिखाग्रफलेन कट—आवरणे अच् ईत० (ओकड़ा) इक्षु तत्समीपगन्तुर्वस्त्रादौ हि तत्फलसंयोगात् गतिनिरोध इति लोकप्रसिद्धम्।

इत्किला स्त्री किल—शौक्ल्ये क किलः इत् गतः किलः शौक्ल्य यस्मात्। रोचनायाम् गन्धद्रव्यभेदे शब्दच०।

इत्थम् अव्य० इदम्+थमु। १इदंप्रकारे इत्थम्भावः इत्थम्भूतः। २अनेन प्रकारेणेत्यर्थे च "इत्थमस्य विलपन्तमसुश्रुत्" नैष०। "इत्थं रतेः किमपि भूतमदृश्यरूपम्" कुमा० "इत्थं व्रतं धारयतः प्रजार्थम्" रघुः। "इत्थमाराध्यमानोऽपि" कुमा० "इत्थ क्षितीशेन वशिष्ठधेनुः" रघुः। "सिद्धाप्रयोगे एतस्मिन् उपपदे णमुल्। इत्थङ्कारम् इत्थम्भावमित्यादि।

इत्थम्भाव पु० इत्थं भावः प्राप्तिः भू—प्राप्तौ घञ्। कस्यचित् प्रकारस्य प्राप्तौ।

इत्थम्भूत त्रि० इत्थं कञ्चित् प्रकारं भूतः प्राप्तः भू—कर्त्तरि क्त। कञ्चित् प्रकारं प्राप्ते "इत्थम्भूतलक्षणे" लक्षणेत्थम्भूताख्यानभागवीप्सास्विति" च पा०।

इत्थशाल पु० इत्थं शल—अच् पृ०। नील० ता० उक्ते योगभेदे तल्लक्षणं यथा "शीघ्रेऽल्पभागैर्बहुभागमन्देऽग्रस्थे निजं तेज उपाददीत स्यादित्थशालोऽयमथो त्रिविधा शिघ्रार्द्ध-हीनोयदि पूर्णमेतत्। शीघ्रोयदा भान्त्यलवस्थितः सन् मन्देऽग्रभस्थे निदधाति तेजः। स्यादित्थशालोयमथैष दीप्तांशकाधिकांशैरिह मन्दपृष्ठे। तदा भविष्यद्गणनीयमित्थशालं त्रिधैवं सुधयोऽभ्यधुः"। "लग्नेशकार्य्याधिपयोर्यदैव योगस्तदा कार्य्यमुशन्ति सन्तः। लग्नेशकार्य्याधिपतत्सहायायत्र सुरश्मिन् पतिसौम्यदृष्टे। तदा बलाढ्यं कथयन्ति योग विशेषतः स्नेहदृशाऽतियत्नः। स्वर्क्षादिषत्स्थानगतः शुभैश्चेत् युतेक्षितोभूद्गविलम्बयाप्ते।

तदा शुभं प्रागभवत् सुपूर्णमग्रे भविष्यत्यपवर्त्तते च। व्यत्यस्तमस्माद्विपरीतभावेऽथ दृष्टेक्षितोऽनिष्टपदं प्रपन्नः। अभूच्छुभं प्रागशुभं त्विदानीं संयातकाले न च भावि वाच्यम्" नील० ता०। "प्रागिक्कशालोऽपर इन्दुवारस्तथेत्थशालोऽपर ईसराफः" "चेदृष्टमेशेन कृतेत्थशालः" नील० ता० कम्बूलादौ विशेषः तत्तच्छब्दे वक्ष्यते अस्त्यर्थे इनि। इत्थशाली तादृशयोगवति ग्रहे।

इत्था अव्य० इदम्+थाल्—इदादेशः। १इत्थमित्यर्थे। "क इत्था वेद यत्र सः" कठो० "इन्द्रमित्थागिरोममाच्छाः" ऋ० ३०२,४,२। २सत्ये निरु० इदम्+थम् डादेशः। ३इदंप्रकारेत्यर्थे। "इत्थाधिया यज्ञवन्तः" ऋ० ३,२७,६,

इत्य त्रि० इण—कर्म्मणि क्यप्। गम्ये। "इत्यः शिष्येण गुरुवत्" भट्टिः। "इत्येऽनभ्यासस्य" वार्त्ति० सुम् अन्भ्यासमित्यः दूरतः परिहर्त्तव्यः" सि० कौ०। भावे क्यप्। २गतौ स्त्री। "स्तेनस्येत्यामन्विहि तस्करस्य" यजु० १२,२२ "इत्यां गतिम्" वेददी०।

इत्यक पु० इत्यार्थं कायति शब्दायते कै—क इत्यायां गतौ राजभवनप्रवेशे अधिकृतोवा कन् ह्रस्वः। प्रतीहाराधिकारिणि द्वारपाले। [ईत्वरी।

इत्वन् त्रि० इण्—क्वनिप्। गन्तरि स्त्रियां ङीप् वनोरश्च।

इत्वर त्रि० इण्—क्वरप्। १पथिके, २नीचे, ३क्रूरकर्म्मणि च। ४षण्डे पु०। स्त्रियां क्वरबन्तत्वात् ङीप्। सा चाभिसारिकायां ५स्त्रियाञ्च "सपत्नीत्वरं स्था जगत्" ऋ० १०,८८,४। [इच्छब्दे उ०।

इद् अव्य० इदि क्विप् वा० नलोपः। इत् इत्यस्यार्थे एवकारार्थे

इद ऐश्वर्य्ये इदित् भ्वा० पर० अक० सेट्। इन्दति ऐन्दीत् इन्दाम्—बभूव आस चकार। इन्द्रः।

इदंयुग न० कर्म्म०। एतद्युगे। इदंयुगे साधुः प्रतियुगा० खञ्। ऐदंयुगीनः एतद्युगसाधौ त्रि०।

इदङ्कार्य्या स्त्री इदं कार्य्यं यस्याः। १दुरालभायां शब्दच० २एतद्रूपकार्य्यान्विते त्रि०।

इदन्तन त्रि० अस्मिन् काले भवः नि० ख्युल् तुट् च। इदानीन्तने "शक्तिक्षीणैरिदन्तनैः" वृह० स्मृतिः।

इदन्ता स्त्री इदमो भावः। इदंशब्दार्थभावे अङ्गुल्यादिना दर्शनयोग्यतायाम् "अनिर्देश्यमिति" श्रुतिपदव्याख्याने "इदन्तयानिर्देष्टुमशक्यम्" भाष्यम्।

इदन्द्र पु० इदं पश्यति दृश—बा० क्रम् ईत०। परमात्मनि तस्य निरुक्तिरैतरेये दर्शिता यथा "स एतमेव पुरुषं ब्रह्म

ततममपश्यदिदमदर्शमिति तस्मादिदन्द्रोनाम इदन्द्रो-ह वै नामैनमेवमिदमिन्द्रं सन्तमित्याचक्षते परोक्षेण, परोक्षप्रिया हि देवाः" ऐत० उ० विवृतञ्चैतद्भाष्ये ।"यस्मादिदमित्येव यत्साक्षादपरोक्षाद्ब्रह्म सर्व्वान्तरमपश्यदपरोक्षेण । तस्मादिदं पश्यतीति इदन्द्रो नाम परमात्मा । इदन्द्रो-ह वै नाम प्रसिद्धो लोके ईश्वरः । तमेवं इदन्द्रम् । इदमितिपरोक्षाभिधानेनाचक्षते ब्रह्मविदः संव्यवहारार्थं पूज्यतमत्वात् प्रत्यक्षनामग्रहणभयात् । तथा हि परोक्षप्रियाः परोक्षनामग्रहणप्रिया एव ह्येव हि यस्माद्देवाः किमु सर्व्वदेवानामपि देवो महेश्वरः" विवृतमेतदानन्दगिरिणा "तस्येदन्द्रनामप्रसिद्धावपि तस्य ज्ञानस्याऽपरोक्षत्वमिति वक्तुं तस्मादिन्द्र इति वाक्यम् तद्व्याचष्टे । यस्मादिति । यस्मात् सर्वान्तरं ब्रह्म इदमित्यपरोक्षं प्रत्यगात्मत्वेनाऽपश्यदित्यन्वयः । कथमिदन्द्रनामत्वमत आह । इदन्द्रो ह वा इति । नन्विन्द्रो मायाभिरित्यादावादिन्द्रप्रसिद्धेर्न त्विदन्द्र इत्यत आह । तमेवमिति । इदन्द्रस्यैव सतः परोक्षत्वार्थम् अक्षरलोपेनेन्द्र इत्याहुरित्यर्थः । परोक्षोक्तेः प्रयोजनमाह । पूज्येति । पूज्यानां परोक्षतयैव नाम वक्तव्यमित्यत्र प्रमाणमाह । तथा हीति । देवा इति पूज्या इत्यर्थः । अत एवाचार्य्या उपाध्याया इत्युक्तावेव प्रीतिं कुर्व्वन्ति लोके, न तु विष्णुमित्रादिनामग्रहणे इति भावः । नाम्नः परोक्षत्वं नाम यथार्थनाम्नो रूपान्तरकरणेन स्वरूपाच्छादनमिति ज्ञेयम्" ।

इदम् त्रि० इदि–कमि नलोपश्च । १पुरोवर्त्तिनि २हृद्ये ३बुद्धिस्थापिते "इदमस्तु सन्निकृष्टं समीपतरवर्त्ति चैतदोरूपम् । अदसस्तु विप्रकृष्टम् तदिति परोक्षे विजानीयात्" इत्युक्तेः सन्निकृष्टवाचित्वमस्य अतएव "अस्येति प्रत्यक्षादिसन्निधापितस्य जगत इदमा निर्देशः" शा० भा० उक्तम् । सन्निकृष्टत्वञ्च बुद्धिमात्रेण, तच्च प्रत्यक्षतया स्मरणादिना च भवति तेन "कौमुदीयं विरच्यते" इत्यत्र भाविन्यामपि कौमुद्यां बुद्ध्या सन्निधापितत्वेन इदंशब्दप्रयोगः । अतएव तदादेः बुद्धिस्थत्वोपलक्षितधर्म्मावच्छिन्ने शक्तिरिति नैयायिकादयः । तादृशार्थपरत्वे एवास्य सर्व्वनामता शब्दस्वरूपपरत्वे तु न । "इदमोऽन्वादेशे" पा० "इदमा निर्देशः" शा० भा० "इदमस्तु सन्निकृष्टम्" "अयमुदयति विततोर्द्ध्वरश्मिलोलः" माघः । "अयमत्ति पञ्चशराहतः" सा० द० टी० "इदं किलाव्याजमनोहरं वपुः" शकु० "अयमसौ भगवानुत पाण्डवः" किरा० । "इमं विवस्वते योगम्" गीता "इमं लोकं मातृभक्त्या पितृभक्त्या तु मध्यमम्" मनुः । अन्वादेशे एनादेशः द्वितीयाटौस्सु "एनं युवानं पतिं वः" इति वृषोत्सर्गमन्त्रः" । "यद्येनमुज्झसि तदा कतरोऽपरस्ते" नैष० । "अनेन यूना सह पार्थिवेन" रघुः । अमुक्तौ एनेन । एवम् अनयोः एनयोः । सर्व्वनामकार्य्यम् । इमे अस्मै अस्मात् एषाम् अकिन् स्त्रियाम् इयम् । "इयं महेन्द्रप्रभृतीनधिश्रियः" कुमा० "इतीयं वैदिकी श्रुतिः" मनुः । अस्यै अस्याः आसाम् । अत्राकच् । इमकौ इमकेनेत्यादि प्रत्यक्षविषयतयाऽस्य शब्दार्थेऽस्य क्वचित् वृत्तिः "अयं जनः प्रष्टुमनास्तपोधने !" "जनोऽयमुच्चैःपदलङ्घनोत्सुकः" "इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम्" कुमा० । इह । थमु इत्थम् थाल् इत्था । दानीम् इदानीम् । त्रल् अत्र तसिल् इतः । अयम् अव्ययमपि । तेन ख्युल् तुट् च । इदन्तनः । मयट् इदमयः । स्त्रियां ङीप् । वति इयान् स्त्रियाम् ङीप् इयती ।

इदा अव्य० इदम् दाच् वेदे नि० । इदानीमित्यर्थे "इदा हि ते विषतः" ऋ० ६,२१ "इदा इदानीमिति भा० । इत्था इत्थ० । सम्यगवधारणादौ तद्युक्ते इत्येवंरूपे । इदावत्सरः । तस्य निरुक्तिस्तच्छब्दे वक्ष्यते ।

इदानीम् अव्य० इदम्–दानीम् इश् च । सम्प्रत्यर्थे । "इदानीमावयोर्मध्ये सरित्सागरभूधराः" उद्भटः । "सा चेदानीं प्रचेतसः" रघुः "इदानीं त्वं क्षातः क्षिपसि यमनायैव द तदा" जगन्नाथः । भवार्थे ख्युल् तुट् च । इदानीन्तनः वर्त्तमानकालभवे त्रि० स्त्रियां ङीप् । "वासना चेदानीन्तनी प्राक्तनी वेति" सा० द० ।

इदावत्सर पु० इदाचिह्नितः वत्सरः । वत्सरपञ्चकान्तर्गते वत्सरभेदे तदानयनप्रकारो यथा "शकाब्दात् पञ्चभिः शेषात् समाद्याद्यास्तु वत्सराः । सपरीदानुपूर्व्वास्ते तथेदापूर्व्वका मताः" ज्यो० तथा च एकाङ्के शिष्टे संवत्सरः, द्व्यङ्के परिवत्सरः, त्र्यङ्के इदावत्सरः, चतुरङ्के अनुवत्सरः, पञ्चाङ्के शिष्टे उद्वत्सरः । तेषां फलन्तु मल० त० विष्णुध० । "संवत्सरे तथा दानं तिलस्य तु महाफलम् । परिपूर्व्वे तथा दानं यवानाञ्च द्विजोत्तम ! । इदापूर्व्वेऽथ वस्त्राणां धान्यानामनुपूर्व्वके । उदासंवत्सरे दानं रजतस्य महाफलम्" उदावत्सरस्थाने इद्वत्सरोऽपि "परिवत्सरोऽथोदावत्सरोऽपीद्वत्सरोऽपि" राज० स० "नभोमण्डलं सह द्यावापृथिव्योर्मण्डलाभ्यां कात्स्न्येन सह भुञ्जीत तं कालं संवत्सरं परिवत्सरमिदावत्सरमनुवत्सरमुद्-

त्सरमिति भानोर्मान्द्यशैघ्र्यसमागतिभिः समामनन्ति” भाग०५स्क०। “मण्डलाभ्यां चन्द्रार्कमण्डलाभ्यां सह भुङ्क्तीति तेन यदा सूर्य्यस्य शुक्लप्रतिपदि संक्रान्तिर्भवति तदा सौरचान्द्रयोर्मासयोर्युगपदुपक्रमो भवति स संवत्सरः। ततः सौरमानेन वर्षे षट् दिनानि वर्द्धन्ते चान्द्रमानेन च षट् ह्रसन्तीति द्वादशदिनव्यवधानादुभयोरप्यपस्वाद्भावो भवति एवं पञ्च वर्षाणि गच्छन्ति तत्र द्वौ मलमासौ भवतः। ततः पुनः षष्ठः संवत्सरः” श्रीधरः। तथा च समकालारब्धसौरचान्द्रमासयुक्तोवत्सरःसंवत्सरः चान्द्रसौरमासयोरारम्भे समत्वपरिवर्ज्जितमासारब्धोवत्सरः परिवत्सरः। इडु इत्थं परिवत्, आरम्भे समत्वपरिवर्ज्जनवत्त्वेऽपि अन्ते तयोः समत्वस्यागतिमान् वत्सरः इदावत्सरः। अनुगतः सौरसंक्रान्तिं चान्द्रोमासो यत्र तादृशोवत्सरः अनुवत्सरः। अस्य वर्षस्यासंक्रान्तमासशून्यतया संक्रान्त्यनुगतचान्द्रमासघटितत्वेन तथात्वम्। उत्क्रान्तो रविसंक्रान्तिं चन्द्रमासोऽत्र पुनः समकालारम्भागतिमांश्च योवत्सरः स उदावत्सरः। अस्यैव इद्वत्सरत्वं चान्द्रसौरयोर्मासयोरारम्भे समकालप्राप्त्यैव। एवमेषामन्वर्थकता द्रष्टव्या। पञ्चमवर्षे मलमासद्वयपातकथनमपि “पञ्चमे पञ्चमे वर्षे द्वौ मासावधिमासकौ। तेषां कालातिरेकेण ग्रहाणामतिचारतः” एतच्च प्रायिकं “द्वात्रिंशद्भिर्गतैर्मासैः दिनैः षोड़शभिस्तथा। घटिकानां चतुष्केण पतति ह्यधिमासकः” काल० धृतसिद्धान्तवाक्यात् तेन प्रागुक्तभारतवाक्यं “मलमासः स विज्ञेयोमासे त्रिंशत्तमे भवेदिति” काठकगृह्यवाक्यञ्च ज्योतिःशास्त्रोक्तमध्यमानमाश्रित्यैव। सिद्धान्तवाक्यं तु स्फुटमानमाश्रित्येत्यनयोरविरोधः। एवमेव माधवादयः

इद्वत्सर पु० इडु—उ वत्सरः। इदावत्सरे। “इद्वत्सराय परिवत्सराय संवत्सराय” अथ०६,५५,२।

इद्ध न० इन्ध—भावे क्त। १आतपे, २दीप्तौ, ३आश्चर्य्ये। च। कर्त्तरि—क्त। ४दीप्ते ५दग्धे च त्रि०। “समिद्धशरणादीप्ता” भट्टिः। “तमिद्धमाराधयितुं सकर्म्मकैः” माघः। “इद्धाबोधैरिति” भट्टौ बोधे इद्धत्वं सर्वशास्त्रस्फूर्त्याधेयाहितत्वम् शासने इद्धत्वमप्रतिहतत्वम्। [मद्धो ददाति” भाग०।

इद्धा अव्य० इन्ध-धाच् नि०। प्राकाश्ये स्वरादिः “समिद्धमिद्धेय!

इध्म न० इध्यतेऽग्निरनेन इन्ध—मक्। १काष्ठे “यस्त इध्मा जभरत् सिष्विदानः” ऋ०४,२,६, “इध्मं काष्ठभारम्” भा०। २यज्ञियसमिद्भेदे पु०। तत्प्रमाणकरणप्रकारादि कात्या०श्रौ०दर्शितम्। “अयुग्धातूनि यूनानि” सू०। “इध्मबन्धनबर्हिर्बन्धनार्थानि यूनानि संनहनानि रज्जवोऽयुग्धातूनि भवन्ति। धातवस्तृणमुष्टिप्रक्षेपाः अयुजो विषमा एकत्रिपञ्चसप्तनवादिविषमसंख्या धातवोयेषां तान्ययुग्धातूनि। तथा चापस्तम्बः “त्रिधातु पञ्चधातु वा शुल्वं करोतीति” शुल्वं रज्जुमित्यर्थः। “पञ्चविंशतिकुशमयानि यूनानि” इति यज्ञपार्श्वे। तथा “समूलानाममूलानां वा दर्भाणां पूर्ववत् शुल्वं कृत्वोदगग्रं निधायेति” इध्मप्रस्तावे। मानवे च “शुल्वं प्रतिदधात्ययुग्धातु प्रदक्षिणमिति”। तित्तिरिसूत्रे। “अथ त्रिरन्वाहितं शुल्वं कृत्वेति” कर्क० बर्हिषो बन्धनप्रकारमाह। “प्रागग्रे यूनउदगग्रं बर्हिराचिनोति” सू०। प्रागग्रे यूने प्रागग्रे संनहने बन्धनार्थायां रज्जौ उदगग्रं बर्हिराचिनोति बन्धनार्थं स्थापयति” कर्क०। अथेध्मबन्धनस्य प्रकारमाह। “उदगग्रे प्रागग्रमिध्मम्” सू०। आचिनोतीत्यनुवर्तते उदगग्रे यूने संनहने प्रागग्रमिध्ममाचिनोति बन्धनार्थं निदधाति” कर्क०। “प्रत्यग्ग्रन्थीनवगूहति” सू०। इध्मबर्हिर्बन्धनार्थानां यूनानां ग्रन्थीन् प्रत्यगवगूहति यूने गाढं बद्ध्वा यूनस्याग्रमूले संकल्प्य प्रदक्षिणमावेष्ट्य इध्मबर्हिषोरग्रभागे प्रोतयित्वा पश्चादिति तयोर्मूलभागे अवगूहति प्रेरयति प्रत्यक्शब्देन इध्मबर्हिषोःपश्चाद्भागो मूलभाग इत्युच्यते दिग्वाचिनोर्बर्हिरुदगग्रे निहिते असम्भवात्। काठके “ग्रन्थिं कृत्वा पुरस्तात् प्रत्यञ्चमपकर्षतीति”। मानवे “शुल्वान्तौ समायम्य “पूषा ते ग्रन्थिमिति” प्रदक्षिणमावेष्टयति पश्चात् प्रत्यञ्चमपकर्षतीति” तैत्तिरीयेऽपि “पश्चात्प्राञ्चमुपगूहतीति”। आपस्तम्बः “पुरस्तात् प्रत्यञ्चं ग्रन्थिमुपगूहति पश्चाद्वा प्राञ्चमिति”। “अष्टादशेध्मं परिधिष्ठाणाम्” सू०। “परिधीनां इध्माः पलाशखदिरविकङ्कतादयः परिधिष्ठाः तेषां परिधिष्ठाणां सम्बन्धिनः अष्टादशसंख्यकाष्ठकामिध्मं कुर्य्यात्। मानवे “समूलैर्दर्भैः पालाशं खादिरं रौहितकं वाष्टादशदारविध्मं संनह्यति त्रींश्च परिधीन् योर्याज्ञियवृक्षस्येति”। काठके “अष्टादशदारु शुल्वं समानवृक्षस्य संनह्यति विंशति मिष्टौ पशुबन्धे चेति”। अतएव सामिधेनीवृद्धौ काष्ठवृद्धिर्भवति ह्रासे च ह्रासो न भवति पित्र्यादौ, तथाह्यापस्तम्बः “सामिधेनीवृद्धौ काष्ठानि विवर्धन्ते प्रकृतितो ह्रसमानाद्य प्रकृतिवदिति”। उपसङ्ग्रहे तु “मालावदिध्मा

बर्हिरिति” वचनात् ह्रासः। “इध्मप्रमाणं चारत्निरिति सद्भिः प्रकीर्तितमिति”कात्यायनः(कर्मप्रदीपे) तथा “समित्-पवित्रं वेदं च कुर्य्यात् प्रादेशसंमितम्। इध्मस्तु द्विगुणः कार्य्यः परिधिस्त्रिगुणः स्मृतः” “अरत्निं प्रादेश इध्मो वा द्विगुणः परिधिस्तत” इति। “एकविंशति वा” सू०। अथ वा एकविंशतिमेकविंशतिसंख्याककाष्ठकमिध्मं कुर्य्यात् तथा चापस्तम्बः “खादिरं पालाशं वैकविंशतिदारुकमिध्मं करोति”। “ततः परिधीनेके” सू०। एके आचार्या-स्तत एकविंशतिसंख्यकाष्ठकादिध्मात्त्रीणि काष्ठान्यरत्नि-मात्राण्येवोपादाय परिधीन् परिदधति“तद्वेकइध्मस्यैवैतान् परिधीन् परिदधतीति” श्रुतेः। अथ वैकमेवेदं सूत्रम् “एकविंशति वा ततः परिधीनेके” इति एके आचार्य्या विकल्पेन एकविंशतिसंख्यकाष्ठमिध्मं कुर्वन्ति तत इति तस्मादेवैकविंशतिकाष्ठकेध्मात् परिधीन् परिदधति च। एतदेव युक्ततरम् आपस्तम्बसूत्रे एकविंशतिकाष्ठानां विभागदर्शनात्। तथाचाहापस्तम्बः “खादिरं पालाशं वैक-विंशतिदारुकमिध्मं करोति त्रयः परिधयः पालाशकाष्ठकाः खादिरोदुम्बरविल्वरोहितकविकङ्कतानां ये वा यज्ञिया वृक्षा आर्द्राः शुष्का वा सत्वचकाः,स्थविष्ठो मध्यमोऽणी-यान्द्राघीयान्दक्षिणार्ध्यो ह्रसिष्ठ उत्तरार्ध्यो द्वे, आघार समिधावनुयाज समिदेकविंशतिः समूलानाममूलानां वा दर्भाणां पूर्ववत्कुल्वं कृत्वोदगग्रं निधायेति”। अथ एवंविधमेकीयमतम् यदेकविंशतिकाष्ठकः इध्मः। तस्मिन् पक्षे चेध्मादेव त्रीणि काष्ठान्यादाय परिधिपरि-धानमिति। बन्धनानन्तरमिध्मवर्हिषोर्भूमौ निधानं न कार्य्यम् आपस्तम्बसूत्रे अनधोनिदधातीत्युक्तत्वात्। तद्वैक इध्मस्यैवैतान् परिधीन् परिदधतीत्यत्र हरिस्वामिनः तदु तथा न कुर्य्यादनवक्लृप्ता हि तस्यैते भवन्तीति वाक्यमाद्रैः परिधिभिरार्द्रैश्च भवितव्यम्। इध्मस्तु शुष्कः इन्धनत्वादेव हिमादेशस्य तेन ते इध्मैकदेशभूताः परिधित्वायासमर्थाः स्युः तदिदमाह अभ्याधानाय होति शुष्को ह्याधाधेयः यावत्पर मात्रमाहवनीये परे सम्भवन्तीत्यभिप्रायः यस्तु परिधिवद्राग्रा आहरति सोऽवध्यमेष्मीयादग्निस्वरादति-रिक्तमेवाहरति अग्निवेष्टनं च दाहभयाच्च शुल्वमिति तऽएषावक्लृप्ता इति” कात्या० १,२,१४,२१।

“अपरमितं प्रणयनीयं त्रियूनम” सू०। “प्रणयनस्यायं प्रण-यनीयः तं प्रणयनीयमग्निप्रणयनार्थमिध्ममपरिमितमपरि-मितकाष्ठकं त्रियूनं तिसृभिः संनहनरज्जुभिर्वेष्टितं कुर्य्यात् त्रीणि यूनानि बन्धनानि यस्य स त्रियूनः तं त्रियूनमिति। अपरिमितत्वं च प्रागुक्तेध्मकाष्ठसंख्यापेक्षयातिशये-नाधिकसंख्यकाष्ठकत्वम्। तेन चतुर्विंशतिसामिधेनीको यद्दष्टकापशुस्तत्र सप्तविंशतिः काष्ठानि भवन्ति। ततश्च प्रणयनीये ततो ऽप्यधिकानि अष्टाविंशतिप्रभृतीनि इष्टकासंख्यानि काष्ठानि भवन्ति”कर्क०।

छन्दोगप० “प्रादेशद्वयमिध्मस्य प्रमाणं परिकीर्त्तितम्। एवंमिताः स्युरेवेह समिधः सर्व्वकर्म्मसु। समिधोऽष्टा-दशेध्मस्य प्रवदन्ति मनीषिणः। दर्शे च पौर्णमासे च क्रियास्व-न्यासु विंशतिः। समिदादिषु होमेषु मन्त्रदैवतवर्ज्जिता। पुरस्ताच्चोपरिष्टाच्च इन्धनार्थं समिद्भवेत्। इध्मोऽप्ये-धार्थमाचार्य्यैर्हविराहुतिषु स्मृतः। यत्र चास्य निवृत्तिः-स्यात्तत् स्पष्टीकरवाण्यहम्। अङ्गहोमसमित्तन्त्रसोष्यन्त्या-ख्येषु कर्म्मसु। येषां चैतदुपर्य्युक्तं तेषु तत्सदृशेषु च। अक्षभङ्गादिविपदि जलहोमादिकर्म्मणि। सोमाहुतिषु सर्व्वासु नैतेष्विध्मो विधीयते। “इध्मजातीयकाष्ठार्द्धप्रमाणं मेक्षणं भवेत्”। “सुमन्द्भीतिरिध्मभृतिः पक्थ्यर्कैः” ऋ०६,२०,१२।“इध्मानां काष्ठानां भृतिः”भा०। तुषि-तदेवगणभेदे स च भाग० ४स्क०१अ० दर्शितो यथा “तोषः प्रतोषः सन्तोषो भद्रः शान्तिरिडस्पतिः। इध्मः कविर्विभुः स्वाह्नः सुदेवो रोचनोद्विषट्। तुषिता नाम ते देवा आसन् स्वायम्भुवेऽन्तरे” भाग०।

इध्मजिह्व पु० इध्मं काष्ठं जिह्वेवास्य। वह्नौ।

इध्मवाह पु० लोपामुद्रागर्भजाते अगस्त्यपुत्रे ऋषिभेदे“सह-स्रसम्मितः पुत्र एकोऽप्यस्तु तपोधन!” इति लोपामुद्रया-मार्थितोऽगस्त्यस्तस्यां पुत्रमुत्पादयामास तस्य नाम दृढस्युरि-ध्मवहनाच्च इध्मवाह इति नामान्तरं तदेतक्तं भा०व० ९९।“तत आधाय गर्भन्तमगमत् वनमेव सः” “तस्मिन् वन-गते गर्भोववृधे सप्त शारदान्। सप्तमेऽब्दे गते चाथ प्रा-च्यवत् स महोज्ज्वलः। ज्वलदग्निप्रभावेन दृढस्युर्नाम भारत!। साङ्गोपनिषदान् वेदान् जपन्निव महातपाः। तस्य पुत्रोऽभवदृषेः स तपस्वी महाद्विजः। स बाल एव तेजस्वी पितुस्तस्य निदेशने। इध्मानां भारवहनादिध्म-वाहस्ततोऽभवत्”।

इन गतौ तना०पर०सक०सेट्। निरुक्ते इन्वतीति बहुवचनान्त इति केचित् इनोति इनुतः इन्वन्ति इनोमि इन्वः इनुवः इनुयात् इनोतु इनु इनवानि ऐनोत्। ऐनीत् इयेन। निरुक्ते इन्वति इति एकवचनान्तत्वेन इन्वधातुरेवायमिति

बहुवः स च भ्वादि० प० सेट् । इन्वति ऐन्वीत् इन्वामास तद्रूपम् । "ऋणायमाण इन्वसि" ऋ०१,१७६,१ ।

इन पु० इण–नक् । १ सूर्य्ये, "नन्दत्रिषड्लग्नभवव्ययपुत्रव्यया इनाद्धर्षपद स्वभोज्ञम्" नील० ता० । २प्रभौ "न न महीनमहीनपराक्रमम्" रघुः । ३न्टपविशेषे च ।

इनक्ष णक्ष गतौ छान्दस इकारोपसर्जनः भ्वा०पर०स०नक्षवद्रूपम् इनक्षति "दूरेचत्तायच्छन्त सङ्घनं यदिनक्षत्" ऋ०१,१२२,६, "इनक्षत् व्याप्नोति णक्ष गतौ छान्दस इकारोपसर्जन इति भा० "शुक्रेण शोचिषाद्यामिनक्षत्, ऋ०१०,४५,७, [इन्ते राजनि० ।

इनानी स्त्री इनमानयति आन–णिच्–अण् गौरा० । वटपत्री

इन्थिहा स्त्री ताजकोक्तायां मुथहायाम् । तदानयनप्रकारादि नील० ता० उक्तम् यथा "स्वजन्मलग्नात् प्रतिवर्षमेकैकराशिभोगा मुथहा क्रमेण । स्वजन्मलग्नं रवितष्टयातं शरद्युतं सा भमुखेन्थिहा स्यात् । प्रत्यहं शरलिप्ताभिर्वर्द्धते चानुपाततः । सार्द्धमंशद्वयं मासस्त्याहुः केऽपि सूरयः । स्वामिसौम्येक्षणात् सौम्यं क्रूरदृष्ट्या भयं रुजः । भावालोकनसंयोगात् फलमस्या निरूप्यते । वर्षलग्नात् सुखास्तान्त्यरिपुरन्ध्रेष्वशोभना । पुण्यकर्मायगा स्वास्थ्यं दत्तेऽन्यत्रोद्यमाद्धनम् । शत्रुक्षयं मानसतुष्टिलाभं प्रतापवृद्धिं न्टपतेः प्रसादम् । शरीरपुष्टिं विविधोद्यमांश्च ददाति सौख्यं मुथहा तनुस्था । उत्साहतोऽर्थागमनं यशश्च स्वबन्धुसम्मानसुपाश्रयाश्च । मिष्टान्नभोगोबलपुष्टिसौख्यं स्यादर्थभावे मुथहा यदाब्दे । पराक्रमाद्वित्तयशःसुखाप्तिः सौन्दर्य्यसौख्यं द्विजदेवपूजा । सर्वोपकारस्तनुपुष्टिकान्तिर्न्टपाश्रयश्चेन्मुथहा तृतीये । शरीरपीड़ा रिपुभीः स्ववर्गैर्वैरं मनस्तापनिरुद्यमत्वे । स्यान्मुन्थहायां सुखभावगायां जनापवादामयदृष्टिदुःखम् । यदीन्थिहा पञ्चमगाब्दवेशे सद्बुद्धिसौख्यात्मजवित्तलाभः । प्रतापवृद्धिर्विविधाविलासा देवद्विजार्च्चा न्टपतिप्रसादः । क्षमत्वभङ्गेषु रिपूदयश्च भयं रुजस्तस्करतो नृपाद्वा । कार्य्यार्थनाशो मुथहाऽरिगा चेत् दुर्बुद्धिवृद्धिः स्वकृतेऽनुतापः । कलत्रबन्धुव्यसनारिभीतिरुत्साहभङ्गो धनधर्म्मनाशः । स्मरोपगा चेन्मुथहा तनोः स्याद्रुजा मनोमोहविरुद्धचेष्टा । भयं रिपोस्तस्करतोविनाशो धर्म्मार्थयोःसुव्यसनामयश्च । मृत्युस्थिता चेन्मुथहा नराणां बलक्षयः स्याद्गमनं विदूरे । स्वामित्वमर्थोपगमो नृपेभ्योधर्मोत्सवःपुत्रकलत्रसौख्यम् । देवद्विजार्च्चा परमं यशश्च भाग्योदयो भाग्यगतेन्थिहा स्यात् । नृपप्रसादं च जनोपकारं सत्कर्मसिद्धिं द्विजदेवभक्तिम् । यशोऽभिवृद्धिं विविधार्थलाभं दत्तेऽम्बरस्था मुथहा धनाप्तिम् । यदीन्थिहा लाभगता विलाससौभाग्यनैरुज्यमनःप्रसादाः । भवन्ति राजाश्रयतोधनाप्तिः सन्मित्रपुत्राभिमताप्तयश्च । व्ययोऽधिको दुष्टजनैश्च सङ्गोरुजस्तथा विक्रमतोऽप्यसिद्धिः । धर्मार्थहानिर्मुथहा व्ययस्था यदा तदा स्वजनतोऽपि वैरम् । क्रूरैर्दृष्टःयुतदृष्टा यो भावो मुथहात्र चेत् । शुभं तद्भावजं नश्येदशुभञ्चापि वर्द्धते । शुभस्वामियुक्तेक्षिता वीर्य्ययुक्सेन्थिहा स्वामिसौम्येत्थशाले प्रपन्ना । शुभं भावजं पोषयेन्नाशुभं साऽन्यथात्वेऽन्यथा भावजञ्चोविमृश्य । जनुर्लग्नतोऽस्तान्त्यषण्मृत्युबन्धुस्थिताब्दे हता क्रूरखेटैस्तु चेत् । विनश्येत् स यत्रेन्थिहा भाव एवं शुभस्वामिदृष्ट्या न नाशः शुभं च । यदोभयत्रापि हतो भावोनश्येत् स सर्वथा । उभयत्र शुभत्वेऽपि भावोऽसौ वर्द्धतेतराम् । वर्षे त्वनिष्टगेहस्था यद्भावे जनुषि स्थिता । क्रूरोपघातात्तं भावं नाशयेत् शुभयुक् शुभा । जनुर्लग्नतस्तुर्य्यगा सौम्ययुक्ताब्दवेशे पितुर्द्रव्यलाभं विधत्ते । नृपाद्भीतिदा पापयुक्तातिकष्टात्समादावपीत्थं विमृश्याभिधेयम् । यस्मिन् भावे स्वामिसौम्येक्षिता सा भावोजन्मन्येष यत्नस्य वृद्धिः । एवं पापैर्नाश उक्तस्तु तस्येत्यूह्यं वीर्य्याद्धर्षतः सौख्यमेव । यदीन्थिहा सूर्य्यगृहे युतेक्षिता सूर्य्येण राज्यं नृपसङ्गमञ्च । दत्ते गुणानां परभागमाप्तिं स्थानान्तरस्था फलदा हर्षेति । कुजेन युक्ता कुजभे कुजेन दृष्टा च पित्तोष्णरुजन्तनोति । शस्त्राभिघातं रुधिरप्रकोपं सौरेक्षिता सौरगृहे विशेषात् । चन्द्रेण युक्तेन्दुगृहेऽथ दृष्टेन्दुनापि वा धर्मयशोऽभिवृद्धिः । नैरुज्यसन्तोषमतिप्रवृद्धिं ददाति पापेक्षणतोऽतिदुःखम् । बुधेन शुक्रेण युतेक्षितापि तद्भेऽपि वा स्त्रीमतिलाभसौख्यम् । धर्मं यशश्चाप्यतुलं विधत्ते कष्टं च पापेक्षणयोगतः स्यात् । युतेक्षिता वा गुरुणा गुरोर्भे यदीन्थिहा पुत्रकलत्रसौख्यम् । ददाति हेमाम्बररत्नकोषं शुभेत्थशालादिह राज्यलाभः । शनेर्गृहे तेन युतेक्षितापि यदीन्थिहा वातरुजं विधत्ते । मानक्षयं वह्निभयं धनस्य हानिं च जीवेक्षणतः शुभाप्तिम् । तमोमुखे चेन्मुथहा धनाप्तिर्यशःसुखं धर्मसमुन्नतिश्च । सितेज्ययोगेक्षणतः पदाप्तिः सुवर्णरत्नाम्बरलब्धयश्च । भोग्या राहोर्लवास्तस्य मुखं पृष्ठं गता लवाः । ततः सप्तमभं पुच्छं विमृश्येति फलं वदेत् । तत्पृष्ठभागेन शुभा यदा स्यात्तत्पुच्छगापद्रिपुभीतिदुःखम् । पापेक्षणादर्थसुखस्य हानिस्त्वेन्मनोत्थं न्टहवित्तनाशः । ये जन्म-

काले बलिनोऽप्यकाले चेद् बलास्ते त्वशुभं समाप्ते। विपर्य्यये पूर्व्वमनिष्टमुक्तं तुल्यं फलं स्यादुभयत्र साम्ये। यद्यष्टमेऽन्त्ये भुवि चेत्त्रिषष्ठेयोऽस्तगोऽथ वक्रोऽशुभदृष्टयुक्तः। क्रूरास्त्रतुर्थास्तगतश्च भव्यो न स्याद्गुणं यच्छति वित्तनाशम्। यद्यष्टमेशेन युतोऽथदृष्टः शुभास्यदृष्ट्या न शुभस्तदापि। योगद्वये स्यान्निधनं यदैको योगस्तदा व्यत्युसमत्वमाहुः। शुभग्रहास्तत्पतिर्वापि जन्मनोऽत्रितयुक् शुभैः। वर्षारम्भे शुभं दत्तेऽब्देशेदन्तेऽन्यथा शुभम्”।

इन्दम्बर इदि–क्विप् इन्द् ऐश्वर्य्यान्वितमम्बरमिव नीलवर्णत्वात्। नीलोत्पले” शब्दमा०।

इन्दि (न्दी) स्त्री इदि–इन्। लक्ष्म्याम् वा ङीप् तत्रैव।

इन्दिन्दिर पु० इन्दि–किरच् नि०। भ्रमरे त्रिका०।

इन्दिरा स्त्री इदि–किरच्। लक्ष्म्याम् “इन्दिरा लोकमाता च लक्ष्मीस्तवः। [वह्निः २पद्मे हे त०। २लक्ष्मीगृहे।

इन्दिरामन्दिर न० इन्दिराया मन्दिरमिव। १विष्णौ राज-

इन्दिरालय पु०६त०। १पद्मे २नीलोत्पले च। क्लीवत्वमपि।

इन्दिवर न०इन्दिरं लक्ष्मीस्तस्याश्वरं वरणीयम्। नीलोत्पले वा ङीप् इन्दीवरमप्यत्र। “इन्दीवरदलश्याममिन्दिरानन्दवर्द्धनम्” विष्णुस्तव: “इन्दीवरैरुत्पलचितान्तरेव” रघुः २उत्पलमात्रे च “नीलेन्दीवरलोचनत्रययुताम्” तन्त्र०[२तद्युक्तलतायाञ्च।

इन्दीवरिणी स्त्री इन्दीवर+समूहे इनि। १उत्पलसमुदाये,

इन्दीवरी स्त्री इन्दीं लक्ष्मीं वृणाति वृ–अच् गौरा० ङीष्। शतमूल्याम्। मेदि० इन्द्रचिर्भिट्यां टाबन्तः राजनि०।

इन्दीवार पु० इन्द्याः लक्ष्म्या वारो वरणमत्र। नीलोत्पले।

इन्दु पु० उनत्ति चन्द्रिकया भुवं क्लिन्नां करोति उन्द–उ आदेरिञ्च। १ चन्द्रे. “दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव” रघुः “तस्याः प्रसन्नेन्दुमुखप्रसादम्” महोदधेः पूर इवेन्दुदर्शनात्” रघुः “रामस्येन्दोरिव श्रियः” रघुः “न नर्म्मशाविव्यमकारि नेन्दुना” “विप्राद्ववेन्दोः सरयोऽधिवेलम्” माघः “करैरिन्दोरन्तस्फुरित इव संभिन्नमुकुलः” वेणी० अमृतकरैः सकलतापनिवारणेनास्य इन्दुत्वम्। २तद्देवताके मृगशिरोनक्षत्रे “त्वष्टा हरीज्येन्दुकरान्त्यमैत्रे दीपिति २एकसंख्यायुक्ते, नवेन्दुवेदेषुकृताश्च-लब्ध्या” सि०शि०। ४कर्पूरे च।

अयं गगनमण्डले राशिचक्रे ग्रहाणां मध्ये सर्व्वाधाम बलात् स्थितः यथाह सू० सि०। “मन्दामरेज्यभूपुत्र सूर्य्यशुक्रेन्दुजेन्दवः। परिभ्रमन्त्यधोऽधस्थाः”। तस्य कक्षामानमुक्तम्। सि० शि० यथा “वाद्यद्रिगोमनु शराश्विमिताऽर्ककक्षा (४३३१४९७। ३०) चान्द्री सहस्र गुणिता जिनरामसंख्या” (३२४०००)। एतन्मितयोजनानि इन्दुकक्षामानम्। अनुलोम गच्छतां ग्रहाणां राशिचक्रे इष्टसमये कीदृशांशेऽवस्थितिरिति ज्ञानाय अहर्गणेन तस्य स्फुटीकरणप्रकारादि तत्रैव दर्शितं यथा। “अभ्रेभिभाङ्क गजकुञ्जरगोऽङ्कपक्षाः (२५९८८९८५०) कक्षां स्वनन्ति गणका भगणस्य चेमाम्। “अत्र रविकक्षातो भकक्षा षष्टि गुणा, एवं भकक्षायाः षष्ठ्यंशोरविकक्षा” प्रमि० “कल्पोद्भवैः क्षितिदिनैर्गगनस्य कक्षा भक्ता भवेद्दिनगति र्गगनेचरस्य। “पादोनगोऽक्षष्टिभूमितयोजनानि (११८५८४०) खेटा व्रजन्त्यनुदिनं निजवर्त्मनीमे” सि०शि० “यदि कुदिनैः कक्षामितयोजनानि गच्छन्ति तदैकेन किमिति फलं दिनगतियोजनानि। तानि च स्थूलत्वेन तावत् पादोनगोऽक्षष्टिभूमितानि स्युः” प्रमि०। ग्रहानयनमाह। “अहर्गणात् कुचिनवाङ्कनिघ्नात् (९९२१) नवेन्दुवेदेषुकृताश्च (२५४१९) लब्ध्या। अहर्गणो गोऽक्षष्टतीन्दु (११८५९) निघ्नो विवर्जितः स्युर्गतयोजनानि” स्वयास्वया तानि पृथक् च कक्षया हृतानि वा स्युर्भगणादिका ग्रहाः” सि० शि०। “अहर्गणे भूनेत्रनवनन्द ९९२१ गुणे नत्रशशिश्रुतिवाणाग्निभिः २५४११ भक्ते यल्लब्धं तेन विवर्ज्जितः कार्य्यः। कः?। नन्देन्द्रियष्टतीन्दु ११८ गुणोऽहर्गणः। एवं गतयोजनानि स्युः तेभ्यः पृथक् पृथक् स्वया स्वया कक्षया भाजितेभ्यो भगणादिका ग्रहा लभ्यन्ते अत्रोपपत्तिः। दिनगतियोजनैरहर्गणे गतयोजनानि भवन्तीति सुगमम्। अत्र सुखार्थं गोऽक्षष्टतीन्दुभिः ११८५९ संपूर्णैरहर्गणो गुणितः। सोऽधिको जातः। यदधिकं तच्छोध्यम्। तस्याधिकस्य ज्ञानार्थमुपायः। परमोऽहर्गणः कुदिनतुल्यः। तेन गुणकेन गुण्यः। एवं गोऽक्षष्टतीन्दुनिघ्नः सन् खकक्षातोऽधिको भवति। तस्मात् खकक्षां विशोध्य शेषेणानुपातः। यदि कुदिनतुल्येनाहर्गणेनैतावदधिकं भवति तदिष्टेनाहर्गणेन किमिति। अत्र कुदिनानां तस्य शेषस्य च पञ्चपञ्चदुगवेदैरयुतगुणितैः ४४५५०००० रपवर्ते कृते सति शेषस्थाने कुचिनवाङ्का उत्पन्नाः कुदिनस्थाने नन्देन्दुवेदेषुकृताश्चाः। एव त्रैराशिकेन यल्लभ्यते तेन स्थूलगतिगुणितेऽहर्गणे वर्जिते गतयोजनानि भवन्ति। सर्वेषां ग्रहाणां तान्येव गतेस्तुल्यत्वात्। अथ ग्रहार्थमनुपातः। यदि कक्षातुल्यैर्ग-

तयोजनैरेको भगणस्तैर्भिः किमिति फलं गतभगणाद्याः सर्वे ग्रहा भवन्तीत्युपपन्नम्" प्रमिता० । "ग्रहस्य कक्षैव हि तुङ्गपातयोः पृथक् च कल्प्यात्र तदीयसिद्धये । अर्कस्य कक्षैव सितज्ञयोः सा ज्ञेया तयोरानयनार्थमेव । उक्ते तयोर्ये चलतुङ्गकक्षे तत्रैव तौ च भ्रमतोऽर्कगत्या" सि० शि० "अतोच्चस्य पातस्य च या कक्षा गच्छति सा तयोरानयनार्थमेव कल्प्या । अन्यथा या ग्रहस्य कक्षा सैव तयोरपि । यतो ग्रहकक्षाया उच्चप्रदेशस्योच्चव्यपदेशः । यत्र च विमण्डलेन सह संपातस्तस्य प्रदेशस्य पातसंज्ञेति गोले सम्यक् प्रतिपादितमस्ति । तथा बुधशुक्रयोरत्र ये अर्ककक्षातुल्ये कक्षे आगच्छतस्ते तयोरानयनार्थमेव । किन्तु तयोर्ये चलकक्षे तत्रैव तौ च भ्रमतः परमर्कगत्या । एतदुक्तं भवति भूमध्यादर्कं प्रति नीतं सूत्रं यत्र स्वचलकक्षायां लगति तत्र बुधो यत्र शुक्रचलकक्षायां लगति तत्र शुक्रो भ्रमतीत्यर्थः" प्रमि० ।

अत्र गगनकक्षा च कल्पाहर्गणः । यथाहार्य्यभट्टः । 'योयत्र भ्रमति खगस्तद्वृत्तं भवति तस्य कक्षाख्यम् । अम्बरकक्षा कल्पाहर्गणनाम्ना भवेद्द्युगतिः" । स्वस्वकक्षायां स्थितानामपि ग्रहाणां नीचोच्चस्थानस्थितिवशतः परिधिभेदादिकं भवतीति ग्रहशब्दे वक्ष्यते । अत्र बुधशुक्रकक्षयोः रविकक्षातुल्यत्वं यदुक्तं तन्मध्यकक्षया फलानयनार्थम् । श्रीपतिना तु ग्रहान्तराणां कक्षामितिरुक्ता यथा ।"अब्ध्यङ्गषट्तुगजाः (८१४६८१६) क्षितिनन्दनस्य, चास्ये शदन्तकृतखेन्दुमिताथ (१०४३२११) जैवी । रूपाश्विनागयुगशैलगुणेन्दुबाणाः (५१३७४८२१) खाग्न्यङ्कसागररसोत्कृतयः (२६६४६३०) सितस्य । भूधराहिनगनागरसर्त्तुक्ष्माधराश्विशशिनः (१२७६६८७८७) शनिकक्षा । एतच्च खगोलशब्दे विस्तरेण वक्ष्यते ।

इन्दुश्च जलमयः सूर्य्यसम्पर्कात् उज्ज्वलितो भवति तेन च दिने दिने यथा यथा शुक्ले पक्षे रविवियोगभेदात्तेजःसम्पर्कविशेषस्तथा तथा वर्द्धते कृष्णे तु रविमण्डलसन्निकृष्टतया क्रमशो दिने दिने तत्तेजःसम्पर्कविशेषाभावस्तेन क्रमेण दिने दिने क्षय इत्यादिकमप्युक्तं सि० शि० । "तरणिकिरणसङ्गादेष पीयूषपिण्डो दिनकरदिशि चन्द्रश्चन्द्रिकाभिश्चकास्ति । तदितरदिशि बालाकुन्तलश्यामलश्रीर्घट इव निजमूर्त्तिच्छाययैवातपस्थः । सूर्य्यादधःस्थस्य विधोरधःस्थमर्धं न दृश्यं स्वकलाऽसितं स्यात् । दर्शेऽथ भार्धान्तरितस्य शुक्लं तत् पौर्णमास्यां परिवर्त्तनेन । कक्षाचतुर्थे तरणेर्हि चन्द्रःकर्णान्तरे तिर्यगितो यतोऽस्मात् । पादोनषट्काष्ट (८५।४५) लवान्तरेऽतो दलं न्वदृश्यस्य दलस्य शुक्लम् । उपचितिमुपयाति शौक्ल्यमिन्दोस्त्यजत इनं भजतश्च मेचकत्वम् । जलमयजलजस्य गोलकत्वात् प्रभवति तीक्ष्णविषाणरूपतास्य । यद्याम्योदक् तपनशशिनोरन्तरं सोऽत्र बाहुः कोटिस्तूर्ध्वाधरमपि तयोर्यच्च तिर्यक् स कर्णः । दोर्मूलेऽर्कः शशिदिशि भुजोऽग्राच्च कोटिस्तदग्रे चन्द्रः कर्णो रविदिगनया दीयते तेन शौक्ल्यम्" ।

"प्राग्वद्भित्ते रुत्तरपार्श्वे चन्द्रकक्षां रविकक्षां च विलिख्य तत्रोर्ध्वरेखां तिर्यग्रेखां च कृत्वा चन्द्रकक्षोर्ध्वरेखासंपाते चन्द्रविम्बं विलिख्येदं दर्शयेत् । तिर्यग्रेखाया उपरि चन्द्रकक्षाव्यासार्धमितेऽन्तरेऽन्यां तिर्यग्रेखां कुर्यात् । सा रेखा प्रत्यग्रविकक्षायां यत्र लग्ना तत्र स्थित एवार्के ऊर्ध्वरेखावच्छिन्नचन्द्रविम्बार्धं पश्चिमतः शुक्लं भवति । तस्यार्धमधस्तनं मनुष्यादृश्यम् । तत्रस्थेऽर्के व्यर्केन्दु सपादचतुर्भागोनं(८५।४५)राशित्रयं भवति । एतावत्येव व्यर्केन्दुभुजे विम्बार्धं पश्चिमं पूर्वं वा शुक्लं भवितुमर्हति प्रमि० "धाम्ना धामनिधेरयं जलमयो धत्ते सुधादीधितिः सद्यःकृत्तमृणालकन्दविशदच्छायां विवस्वद्दिशि । कृष्णे घर्मघृणेः करैर्घट इवान्यस्मिन् विभागे पुनर्बालाकुन्तलकालतां कलयति स्वच्छां तनोश्छायया" श्रीपतिः । 'भानुश्चेत् प्रतिविम्बितो जलमये शीतांशुगोले दिशा निस्तेजा निशि सुप्रभः कथमथो किं सूर्यविम्बासमः । गोलार्धं रविणोज्ज्वलं च सकलं न स्यात् तड़ागे यथा मासार्धेऽखिलदृश्यतेति गणकान् ज्ञानाह्वयः पृच्छति" ज्ञानराजः ।

वृह० सं० शौक्ल्यादि प्रकारादि प्रदर्श्य तद्द्वारादिफलमुक्तं यथा "नित्यमधःस्थस्येन्दोर्भाभिर्भानोः सितं भवत्यर्द्धम् । स्वच्छाययान्यदसितं कुम्भस्येवातपस्थस्य । सलिलमये शशिनि रवेर्दीधितयो मूर्च्छितास्तमो नैशम् । क्षपयन्ति दर्पणोदरनिहिता इव मन्दिरस्यान्तः । त्यजतोऽर्कतलं शशिनः पश्चादवलम्बते यथा शौक्ल्यम् । दिनकरवशात्तथेन्दोः प्रकाशतेऽधःप्रभृत्युदयः । प्रतिदिवसमेवमर्कात् स्थानविशेषेण शौक्ल्यपरिवृद्धिः । भवति शशिनोऽपरार्द्धे पश्चाद्भागे घटस्येव । ऐन्द्रस्य शीतकिरणो मूलाषाढाद्वयस्य वा यातः । याम्येन, बीजजलचरकाननहा वह्निभयदश्च । दक्षिणपार्श्वेन गतः शशी विशाखानुराधयोः पापः । मध्येन तु प्रशस्तः पित्र्यस्य विशाखयोश्चापि । षडनागतानि पौष्णाद् द्वादश रौद्राच्च मध्ययोगीनि । ज्येष्ठाद्यानि

नक्षत्राण्युडुपतिनातीत्य युज्यन्ते । उन्नतमीषच्छृङ्गं नौसंस्थाने विशालता चोक्ता । नाविकपीड़ा तस्मिन् भवति शिवं सर्व्वलोकस्य । अर्धोन्नते च लाङ्गलमिति पीड़ा तदुपजीविनां तस्मिन् । प्रीतिश्च निर्निमित्तं मनुजपतीनां सुभिक्षं च । दक्षिणविषाणमर्धोन्नतं यदा दुष्टलाङ्गलाख्यं तत् । पाण्ड्यनरेश्वरनिधनकृदुद्योगकरं बलानां च । समशशिनि सुभिक्षक्षेमवृष्टयः प्रथमदिवससदृशाः स्युः । दण्डवदुदिते पीड़ा गवां नृपश्चोग्रदण्डोऽत्र । कार्म्मुकरूपे युद्धानि यत्र तु ज्या ततो जयस्तेषाम् । स्थानं युगमिति याम्योत्तरायतं भूमिकम्पाय । युगमेव याम्यकोट्यां किञ्चित्तुङ्गं स पार्श्वशायीति । विनिहन्ति सार्थवाहान् वृष्टेश्च विनिग्रहं कुर्य्यात् । अभ्युच्छ्रायादेकं यदि शशिनोऽवाङ्मुखं भवेच्छृङ्गम् । आवर्जितमित्यसुभिक्षकारि तद्गोधनस्यापि । अव्युच्छिन्ना रेखा समन्ततो मण्डला च कुण्डाख्यम् । अस्मिन्माण्डलिकानां स्थानत्यागो नरपतीनाम् । प्रोक्तस्थानाभावादुदगुन्नः सस्यवृद्धिवृष्टिकरः । दक्षिणतुङ्गश्चन्द्रो दुर्भिक्षभयाय निर्द्दिष्टः । शृङ्गेणैकेनेन्दुं विलीनमथवाप्यवाङ्मुखशृङ्गम् । सम्पूर्णं चाभिनवं दृष्टैको जीविताद्भयं पश्येत् । संस्थानविधिः कथितो रूपाण्यस्माद्भवन्ति चन्द्रमसः । स्वल्पो दुर्भिक्षकरो महान् सुभिक्षावहः प्रोक्तः । मध्यतनुर्व्वज्राख्यः क्षुद्भयदः सम्भ्रमाय राज्ञां च । चन्द्रो मृदङ्गरूपः क्षेमसुभिक्षावहो भवति । ज्ञेयो विशालमूर्त्तिर्नरपतिलक्ष्मीविवृद्धये चन्द्रः । स्थूलः सुभिक्षकारी प्रियधान्यकरस्तु तनुमूर्त्तिः । प्रत्यन्तान् कुनृपांश्च हन्त्युडुपतिः शृङ्गे कुजेनाहते, शस्त्रक्षुद्भयकृद्यमेन, शशिजेनावृष्टिदुर्भिक्षकृत् । श्रेष्ठान् हन्ति नृपान्महेन्द्रगुरुणा, शुक्रेण चाल्पान् नृपान्, शुक्ले ह्याप्यमिदं फलं यद्धतं कृष्णे यथोक्तागमम् । भिन्नः सितेन मगधान् यवनान् पुलिन्दान् नेपालभृङ्गिमरुकच्छसुराष्ट्रमद्रान् । पाञ्चालकैकयकुलूतकपूरुषादान् हन्यादुशीनरजनानपि सप्त मासान् । गान्धारसौवीरकसिन्धुकीरान् धान्यानि शैलान्द्रविड़ाधिपांश्च । द्विजांश्च मासान्दश शीतरश्मिः सन्तापयेद्वाक्पतिना विभिन्नः । उग्रान्सह वाहनैर्न्नरपतींस्त्रैगर्त्तकान्मालवान् कौलिन्दान् गणपुङ्गवानथ शिबीनायोध्यकान् पार्थिवान् । हन्यात् कौरवमत्स्यशुक्त्यधिपतीन् राजन्यमुख्यानपि प्रालेयांशुरसृक्प्रभे तनुगते षण्मासमर्यादया । यौधेयान् सचिवान् सकौरवान् प्रागीशानथ चार्जुनायनान् । हन्यादर्कजभिन्नमृगाङ्कः शीतांशुर्द्दशमासपीड़या । मगधान्मथुरां च पीड़येद् वेणायाश्च तटं शशाङ्कजः । अपरत्र कृतं युगं वदेद् यदि भित्त्वा शशिनं विनिर्गतः । क्षेमारोग्यसुभिक्षविनाशी शीतांशुः शिखिना यदि भिन्नः । कुर्य्यादायुधजीविविनाशं चौराणामधिकेन च पीड़ाम् । उल्कया यदा शशी यस्य एव हन्यते । हन्यते तदा नृपो यस्य जन्मनि स्थितः । भस्मनिभः परुषो ऽरुणमूर्त्तिः शीतकरः किरणैः परिहीणः । श्यावतनुः स्फुटितः स्फुरणो वा क्षुत्समरामयचौरभयाय । प्रालेयकुन्दकुमुदस्फटिकावदातो यत्नादिवाद्रिसुतया परिमृज्य चन्द्रः । उच्चैःकृतो निशि भविष्यति मे शिवाय यो दृश्यते स भविता जगतः शिवाय । यदि कुमुदमृणालहारगौरस्तिथिनियमात् क्षयमेति वर्धते वा । अविकृतगतिमण्डलांशुयोगी भवति नृपाणां विजयाय शीतरश्मिः । शुक्ले पक्षे सम्प्रवृद्धे प्रवृद्धिं ब्रह्मक्षत्रं याति वृद्धिं प्रजाश्च । हीने हानिस्तुल्यता तुल्यतायां कृष्णे सर्व्वं तत्फलं त्वन्यथेन" । "भूमध्यात् चन्द्रादेरुच्छ्रितियोजनमपि" सि० शि० उक्तं यथा "नगनगाग्निनवाष्टरसा(६८९३७७) रवेः रसरसेषुमहीषुमिता ५१५६६ विधोः । निगदितावनिमध्यत उच्छ्रितिः श्रुतिरियं किल योजनसंख्यया" "अत्रोपपत्तिः कक्षाध्याये चन्द्रार्कयोः कक्षे कथिते किन्तु व्यासौ नोक्तौ तौ त्रैराशिकेनानेयौ । यदि भनन्दाग्निमित ३९२७ परिधेः खशरद्व्यमितो१२५० व्यासः (लीलावत्युक्तदिशा आनीतः तदा) ४३२१४६७ । २० मितायाः सूर्य्यकक्षायाः, २२४०००मितचन्द्रकक्षाया वा कोऽयम् इत्यनुपातेन व्यास आनेयः तदर्द्धमेव श्रुतिः । इयमेव भूमध्यात् चन्द्रार्कयोः उच्छ्रितिः प्रमि०" इयं मध्यश्रुतिः, उच्चनीचयोरन्यैव यथा "मन्दश्रुतिर्द्राक् श्रुतिवत् प्रसाध्या" सि० शि० उच्चनीचवृत्तपरिधिना उच्छ्रितिः साध्या त्रैराशिकेनानेया" प्रमि० युक्तञ्चेदम् ग्रहाणां स्वस्वकक्षायां तुङ्गादिस्थानविशेषोऽस्ति तत्रोच्चस्थानस्थितौ परिधेराधिक्यं नीचस्थाने तु न्यूनता मध्ये मध्यता इति तदनुसारेण परिधिवैलक्षण्यात् उच्छ्रितिवैलक्षण्यमिति । एवमन्येषां ग्रहाणामपि स्वस्वकक्षाभिरनुपातेन व्यासमानीय तदर्द्धं मध्य श्रुतिरित्याद्यवगम्यम् । अत्रेदं सूक्ष्ममीक्षणीयम् अत्र भूमध्यादिति भूमिव्यासार्द्धमध्यादित्येवार्थकं न तु भूपृष्ठमध्यत इत्यर्थकम् । तथा च भूव्यासार्द्धस्य तत्तदुच्छ्रितेर्व्वर्ज्जने भूपृष्ठादुच्छ्रितिर्भवति भूपृष्ठात्तु उक्तः उच्छ्रायो नैव युज्यते ग्रहाणां कक्षाकपरिधेर्व्यासार्द्धस्य भूमीकार्द्धकान्तत्वेन तदर्द्धपर्य्यन्तमेव तद्वृत्तव्यासार्द्धस्यावधित्वादिति

एवं सौरागमादिभिः इन्दुमण्डलस्य सूर्य्यमण्डलादधःस्थायित्वे सिद्धे”भाग०५स्क०। “एवं चन्द्रमा अर्कगभस्तिभ्य उपरिष्टात् लक्षयोजनत उपलभ्यमानोऽर्कस्य संवत्सरभुक्तिं, पक्षाभ्यां मासभुक्तिं, सपादर्क्षाभ्यां दिनेनैव पक्षभुक्तिमग्रचारो द्रुततरगमनो भुङ्क्ते अथापूर्य्यमाणाभिरपक्षीयमाणाभिश्च कलाभिः पितॄणामहोरात्राणि पूर्व्वापरपक्षाभ्यां वितन्वन् सर्व्वजीवनिवहप्राणो जीवश्च एकमेकं नक्षत्रं त्रिंशता मुहूर्त्तैर्भुङ्क्ते य एष षोडशकलः पुरुषो भगवान्मनोमयोऽन्नमयोऽमृतमयो देवपितृमनुष्यपशुपक्षिसरीसृपवीरुधां प्राणाप्यायनशीलत्वात् सर्व्वमय इति वर्णयन्ति”। अत्र अर्कगभस्तिभ्य इत्यत्र हेतौ पञ्चमी अन्वयश्चास्य उपलभ्यमान इत्यत्र। यथा च सूर्य्यकिरणैरेव चन्द्रस्योपलब्धिस्तच्च प्रागुक्तवचनैः समर्थितम्। न तु अपादाने पञ्चमी उपरिष्टात् इत्यत्रान्वयिनी। तथात्वे सौरागमविरोधः स्यात्। उपरिष्टात् इत्यत्र भूमेरित्यध्याहार्य्यं लक्षयोजनमिति बहुयोजनपरमिति न काचिदनुपपत्तिः। एवमन्यान्यपि पौराणिकवचनानि व्याख्यातव्यानि। इन्दुपक्षद्वयेन यथा पित्र्यदिनस्य सम्पादनं तदप्युक्तम्”सि०शि०। “विधूर्द्ध्वभागे पितरो वसन्तः स्वाधःसुधादीधितिमामनन्ति। पश्यन्ति तेऽर्कं निजमस्तकोर्द्ध्वं दर्शे यतोऽस्मात् द्युदलं तदेषाम्। भार्द्धान्तरत्वान्न विधोरधःस्थं तस्मान्निशीथः खलु पौर्णमास्याम्। लग्ने रविः पक्षदलेऽभ्युदेति शुक्लेऽस्तमेत्यर्थत एव सिद्धम्” अत्राधःस्थत्वमर्कस्य पित्र्यपेक्षया बोध्यम् तद्विषयमेव वा पौराणिकं सूर्य्यस्याधःस्थत्ववचनमिति न किञ्चिदनुपपन्नम्”। चन्द्रस्याधःस्थित्वेन यथा तिथ्यादिसम्भवः तथोक्तम् कालमाधवीये “अर्काद्विनिःसृतः प्राचीं यद्यात्यहरहः शशीति” वचनव्याख्याने।

“अयमर्थः अधः प्रदेशवर्त्ती शीघ्रगामी चन्द्रः ऊर्द्ध्वप्रदेशवर्त्ती अशीघ्रगामी सूर्य्यः। तथा सति तयोर्गतिविशेषवशाद्दर्शे चन्द्रमण्डलमन्यूनमनतिरिक्तं सत् सूर्य्यमण्डलस्याधो भागे व्यवस्थितं भवति तदा सूर्य्यरश्मिभिः साकल्येनाभिभूतत्वाच्चन्द्रमण्डलमीषदपि न दृश्यते। उपरितने दिने शीघ्रगत्या प्राचीं याति राशेर्द्वादशभिरंशैः सूर्य्यमुल्लङ्घ्य गच्छति। तदा चन्द्रस्य पञ्चदशसु भागेषु प्रथमभागो दर्शनयोग्यो भवति। सोऽयं भागः प्रथमकलेत्यभिधीयते तत्कलानिष्पत्तिपरिमितकालः प्रतिपत्तिथिर्भवति एवं द्वितीयादितिथिष्ववगन्तव्यमिति”। तदेतद्विष्णुधर्म्मोत्तरे विस्पष्टमभिहितम्‘चन्द्रार्कगत्या कालस्य परिच्छेदं यदा भवेत्। तदा तयोः प्रवक्ष्यामि गतिमाश्रित्य निर्णयम्। भगणेन समग्रेण ज्ञेया द्वादश राशयः। त्रिंशांशश्च तथा राशेर्भाग इत्यभिधीयते। आदित्याद्विप्रकृष्टस्तु भागद्वादशकं यदा। चन्द्रमाःस्यात्तदा राम! तिथिरित्यभिधीयते” “सेयं द्वादशभिर्भागैः सूर्य्यमुल्लङ्घितवती प्रथमा चन्द्रकला शृङ्गद्वयोपेतसूक्ष्मरेखाकारा शौक्ल्यमीषदुपयाति उत्तरोत्तरदिनेषु सूर्य्यमण्डलविप्रकर्षात् तारतम्यानुसारेण शौक्ल्यमुपचीयते। अनयैव रीत्या सन्निकर्षतारतम्येन मेचकत्वमुपचीयते तदेतदुक्तम्” सि०शि०। उपचयमुपयाति शौक्ल्यमिन्दोरित्यादि ।९३१पृष्ठे उक्तम्। सूर्य्याचन्द्रमसोर्यौ सन्निकर्षविप्रकर्षौ तयोरवसानन्दर्शपूर्णिमयोः संपद्यते तदाह गोभिलः। “यः परो विप्रकर्षः सूर्य्याचन्द्रमसोः सा पूर्णमासी यः परः सन्निकर्षः सामावास्येति”नन्वत्र चन्द्रकलानां सूर्य्ये प्रवेशनिर्गमौ प्रतीयेते सोमोत्पत्तौ ९३४पृ०तु वह्न्यादिदेवतासु। नायन्दोषः। अस्मदादिदर्शनापेक्षया ज्योतिःशास्त्रस्य प्रवृत्तत्वात् सोमोत्पत्तौ तु वह्न्यादिदेवतानान्तत्कालप्रयुक्ता तृप्तिर्विवक्षिता तत्र यदि सूर्य्ये प्रवेशनिर्गमौ यदि वा वह्न्यादिदेवतादिषु सर्व्वथापि कलाप्रयुक्ता एव प्रतिपदादितिथयः”कालमा०। पक्षाणां कक्षानुसारेणैव स्वस्वकक्षास्थराश्यंशादिमानम् तथा च स्वल्पकक्षायां स्थितस्य राश्यंशकलादिकं स्वल्पं महत्यां स्थितस्य महत् यथोक्तमार्य्यभट्टेन। “षष्ट्या सूर्य्याब्दानां प्रपूरयन्ति ग्रहा भपरिणाहम्। दिव्येन भपरिधिं समं भ्रमन्तः स्वकक्षासु। मण्डलमल्पमधस्तात् कालेनाल्पेन पूरयति चन्द्रः। उपरिष्टात् सर्व्वेषां महच्च महता शनैश्चापि। अल्पे हि मण्डलेऽल्पा महति महान्तश्च राशयो ज्ञेयाः। अंशाः कलास्तथैवं विभागतुल्याः स्वकेषु। भानामधःशनैश्चरसुरगुरुभौमार्कभृगुबुधचन्द्राः। एषामधश्च भूमिर्मेधीभूता च मध्यस्था”। तेन ग्रहाणां प्रागुक्तस्वस्वकक्षा द्वादशभिर्भक्ताः राशिप्रमाणयोजनानि। ते च पुनस्त्रिंशद्भक्ता अंशमानयोजनानि। ते षष्ट्या भक्ता कलामितयोजनानि एवं षष्ट्याभागे विकलादियोजनानि। अधिकं चन्द्रशब्दे चन्द्रोत्पत्तिरविज्ञातशब्दे ११११पृष्ठे उक्ता।

इन्दुकः पु० इन्दुरिव शुभ्रत्वात् कन्। अश्मन्तकवृक्षे। राजनि०

इन्दुकक्षा स्त्री ६त०। चन्द्रस्य राशिचक्रस्थे परिधौ तन्मानमिन्दुशब्दे ९३१ पृ०उक्तम्।

इन्दुकमल न॰ इन्दुरिव शुभ्रं कमलम्। सितोत्पले राजनि॰

इन्दुकला स्त्री ६त॰। चन्द्रस्य षोडशभागैकभागे। कलाश्च षोड़श। अमाशब्दे ३२०पृष्ठे दर्शितास्ताश्च कृष्णपक्षे क्रमेण वह्न्यादिभिः पीयन्ते यथोक्तं कालमा॰ सोमोत्पत्तिवाक्यम् "प्रथमां पिबते वह्निर्द्वितीयां पिबते रविः। विश्वे देवास्तृतीयां तु चतुर्थीं सलिलाधिपः। पञ्चमीं तु वषट्कारः षष्ठीं पिबति वासवः। सप्तमीमृषयो दिव्या अष्टमीमजएकपात्। नवमीं कृष्णपक्षस्य यमः प्राश्नाति वै कलाम्। दशमीं पिबते वायुः पिबत्येकादशी उमा। द्वादशीं पितरःसर्वे समं प्राश्नन्ति भागशः। त्रयोदशीं धनाध्यक्षः कुबेरः पिबते कलाम्। चतुर्द्दशीं पशुपतिः पञ्चदशीं प्रजापतिः। निष्पीतः कलया शेषश्चन्द्रमा न प्रकाशते। कला षोडशिका या सा त्वपः प्रविशते सदा। अमायां तु सदा सोमस्त्वोषधीः प्रतिपद्यते। तमोषधिगतं गावः पिबन्त्यनुगतं च यत्। तत्क्षीरममृत भूत्वा मन्त्रपूतं द्विजातिभिः। हुतमग्निषु यज्ञेषु पुनराप्याय्यते शशी। दिने दिने कलावृद्धिः पौर्णमास्यान्तु पूर्य्यते" इति। "पुनश्च ताः पीताः कलास्तेनैव क्रमेण वह्न्यादिदेवताभ्यो निर्गत्य चन्द्रमण्डलं पूरयन्तीति" माधवः। यथा च कलापानसम्भवस्तथा इन्दुशब्दे दर्शितेन ९३३पृ॰ कालमा॰वाक्येन समर्थितम्। तासांकलानां यद्यपि तिथिविशेषरूपता तथापि नामान्तराणि शारदा॰ उपासनार्थमुक्तानि यथा। "अमृता मानदा पूषा तुष्टिः पुष्टीरतिर्धृतिः। शशिनश्चन्द्रिका कान्तिः ज्योत्स्ना श्रीः प्रीतिरङ्गदा। पूर्णा पूर्णामृताख्या च कामदा स्वरजाः कलाः"। तथा च षोड़शभ्यः स्वरेभ्य आसामुत्पत्तिरपि ध्येयाः" "शतमिन्दुकलाक्षये" स्मृतिः।

इन्दुकलिका स्त्री इन्दुरिव शुभ्रा कलिका यस्याः। १केतक्याम्। ६त॰ स्वार्थे कन्। २चन्द्रकलायाम्।

इन्दुकान्त पु॰ इन्दुःकान्तइव निष्यन्दकारित्वात् प्रियोऽस्य। १चन्द्रकान्ते मणौ इन्दुःकान्तः पतिः स्वोदयेन कारकत्वादीशो यस्याः। २रात्रौ। इन्दुःकान्तइव प्रकाशकत्वात् यस्याः। ३केतक्याम्। ६त॰। ४चन्द्रप्रियायाञ्च स्त्री।

इन्दुक्षय पु॰। इन्दुःक्षीयतेऽत्र क्षि—आधारे अच् ६त॰। १दर्शे तत्र हि इन्दोः कलानां सूर्य्यकिरणास्पर्शात् क्षयइव भवतीति इन्दुकलाशब्दे दर्शितम् "शतमिन्दुक्षये पुण्यं सहस्र तु दिनक्षये" मल॰त॰पु॰। भावेऽच्। २चन्द्रस्य क्षये।

इन्दुज पु॰ इन्दोर्जायते जन—ड। वृहस्पतिभार्य्यातारागर्भे चन्द्रेणोत्पादिते बुधे तदुत्पत्तिकथा हरिवं॰ २६अ॰ सोमस्य राजसूययज्ञकरणानन्तरमैश्वर्य्येण मत्तस्य मतिभ्रान्तिमुपवर्ण्य "वृहस्पतेः स वै भार्य्यां तारां नाम यशस्विनीम्। जहार तरसा सर्व्वानवमत्याङ्गिरःसुतान्" इत्युपक्रम्य ऋषीणां तत्र युद्धं वर्णयित्वा तत्र युद्धोपद्रवेण उपद्रुतदेवैः प्रार्थितेन ब्रह्मणा यत् कृत तदुक्तं तत्रैव "ततोनिवार्य्योशनसं तं वै रुद्रं भयङ्करम्। ददावङ्गिरसे तारां स्वयमेव पितामहः। तामन्तःप्रसवां दृष्ट्वा तारामाह वृहस्पतिः। मदीयायां न ते योनौ गर्भो धार्य्यः कथञ्चन। योनेरुदसृज त्वं वै कुमारं दस्युहन्तमम्। इषीकास्तम्बमासाद्य ज्वलन्तमिव पावकम्। जातमात्रः स भगवान् देवानामक्षिपद्वपुः। ततः संशयमापन्नास्तारामूचुः सुरोत्तमाः। सत्यं ब्रूहि सुतः कस्य सोमस्याथ वृहस्पतेः। पृच्छ्यमाना यदा देवैर्नाह सा साध्वसाधु वा। तदा तां शप्तुमारब्धः कुमारोदस्युहन्तमः। तं निवार्य्य ततो ब्रह्मा तारां प्रपच्छ संशयम्। यदत्र तथ्यं तद्ब्रूहि तारे! कस्य सुतोह्ययम्। सा प्राञ्जलिरुवाचेदं ब्रह्माणं वरदं शनैः। सोमस्येति महात्मानं कुमारं दस्युहन्तमम्। तं मूर्द्ध्न्याघ्राय तनयं सोमोधाता प्रजापतिः। बुध इत्यकरोन्नाम तस्य पुत्रस्य धीमतः"। अस्यैव ग्रहत्वप्राप्तिः काशी॰वर्णिता यथा "हरिवंशवत् बुधस्योत्पत्तिं वर्णयित्वा। "ततः सर्व्वेभ्योदेवेभ्यस्तेजोरूपबलाधिकः। बुधः सोमं समापृच्छ्य तपसे कृत निश्चयः। जगाम काशीं निर्वाणराशिं विश्वेशपालिताम्। तत्तो लिङ्गं प्रतिष्ठाप्य स्वनाम्ना स बुधेश्वरम्। तपश्चचार चात्युग्रमुग्रं संशीलयन् हृदि"। इति तत्तपोवर्णितम् तत्तपसा तोषितश्च महादेवस्तस्मै ग्रहरूपेण गगनेस्थिति रूपं वरं ददौ" यथा "ततः प्राह महेशानस्तत्स्तुत्या परितोषितः। रौहिणेय! महाभाग्य! सौम्य! सौम्यवचोनिधे!। नक्षत्रलोकादुपरि तव लोको भविष्यति। मध्ये सर्व्वग्रहाणाञ्च सपर्य्यां लप्स्यसे पराम्" राशिचक्रे तत्स्थानञ्च सू॰सि॰ "मन्दामरेज्यभूपुत्रसूर्य्यशुक्रेन्दुजेन्दवः। परिभ्रमन्त्यधोऽधःस्थाः सिद्धविद्याधराघनाः" इत्यनेन चन्द्रस्थानादुपरि शुक्राच्चाधः प्रदेशे उक्तम्। तत्कक्षामानञ्च। इन्दुशब्दे पृ॰९३१श्रीपतिवाक्ये उक्तम् तस्य चारप्रकारः वृहत्संहितायां दर्शिता यथा।

"नोत्पातपरित्यक्तः कदाचिदपि चन्द्रजो व्रजत्युदयम्। जलदहनपवनभयकृद्धान्यार्घक्षयविवृद्ध्यै वा। विचरन्कृ(?)ष-

धनिष्ठाप्राजापत्येन्दुविश्वदेवानि । स्पृशन् हिमकरतनयः
करोत्यवृष्टिं सरोगभयाम् । रौद्रादीनि मघान्तान्युपाश्रिते
चन्द्रजे प्रजापीड़ा । शस्त्रनिपातक्षुद्भयरोगानावृष्टिसन्तापैः ।
हस्तादीनि विचरन् षड्भान्युपपीड़यन् गवामशुभः ।
स्नेहरसार्घवृद्धिं करोति चोर्वीं प्रभूतान्नाम् । आर्यमणं
हौतभुजं भाद्रपदामुत्तरां यमेशं च । चन्द्रस्य सुतो निघ्नन्
प्राणभृतां धातुसङ्क्षयकृत् । आश्विनवारुणमूलान्युपमृद्नन्
रैवतीं च चन्द्रसुतः । पण्यभिषग्नौजीविकसलिलजतुर-
गोपघातकरः । पूर्वाद्यृक्षत्रितयादेकमपीन्दोः सुतोऽभिमृ-
द्नीयात् । क्षुच्छस्त्रतस्करामयभयप्रदायी चरन् जगतः ।
प्राकृतविमिश्रसङ्क्षिप्ततीक्ष्णयोगान्तघोरपापाख्याः । सप्त परा-
शरतन्त्रे नक्षत्रैः कीर्त्तिता गतयः । प्राकृतसंज्ञा वायव्य-
याम्यपैतामहानि बहुलाश्च । मिश्रा गतिः प्रदिष्टा शशि-
शिवपितृभुजगदैवानि । सङ्क्षिप्तायां पुष्यः पुनर्वसुः फल्गु-
नीद्वयं चेति । तीक्ष्णायां भाद्रपदाद्वयं सशाक्राश्वयुक्
पौष्णम् । योगान्तिकेति मूलं द्वे चाषाढे गतिः सुत-
स्येन्दोः । घोरा श्रवणस्त्वाष्ट्रं वसुदेवं वारुणं चैव । पापाख्या
सावित्रं मैत्रं शक्राग्निदैवतं चेति । उदयप्रवासदिवसैः
स एव गतिलक्षणं प्राह । चत्वारिंशत्त्रिंशद् द्विसमेता
विंशतिर्द्विं नवकं च । नव मासार्धं दश चैकसंयुताः प्राकृता-
द्यानाम् । प्राकृतगत्यामारोग्यवृष्टिसस्यप्रवृद्धयः क्षेमम् ।
सङ्क्षिप्तमिश्रयोर्मिश्रमेतदन्यासु विपरीतम् । ऋज्व्यतिवक्रा
वक्रा विकला च मतेन देवलस्यैताः । पञ्चचतुर्द्व्येकाहा
ऋज्व्यादीनां षड़भ्यस्ताः । ऋज्वी हिता प्रजानामतिवक्रार्थं
गतिर्विनाशयति । शस्त्रभयदा च वक्रा विकला भयरोग-
सञ्जननी । पौषाषाढश्रावणवैशाखेष्विन्दुजः समाघेषु ।
दृष्टो भयाय जगतः शुभफलकृत् प्रोषितस्तेषु । कार्त्तिके-
ऽश्वयुजि वा यदि मासे दृश्यते तनुभवः शिशिरांशोः ।
शस्त्रचौरहुतभुग्गदतोयक्षुद्भयानि च तदा विदधाति ।
रुद्धानि सौम्येऽस्तमिते पुराणि यान्युद्गते तान्युपयान्ति
मोक्षम् । अन्ये तु पश्चादुदिते वदन्ति लाभः पुराणां भव-
तीति तज्ज्ञाः । हेमकान्तिरथ वा शुकवर्णः सस्यकेन
मणिना सदृशो वा । स्निग्धमूर्त्तिरलघुश्च हिताय व्यत्यये
न शुभकृच्छशिपुत्रः" । गगने बुधस्थानमुक्तं भा०५स्क० ।
"ततो बुधः सोमसुत उपलभ्यमान तत उपरिष्टात् प्रायेण
शुक्रवत् । यदार्कात् व्यतिरिच्येत तदातिभयप्रायाना-
वृष्ट्यादिभयमाशंसते" । इन्दुजातेन्दुनन्दनेन्दुपुत्रादयोऽ-
प्यत्र । २नर्म्मदायां नद्यां स्त्री सा च मेकलकन्यका
सोमसुता मुनिशापात् नदीत्वमाप्ता । इयं च प्रतीच्यामवन्तिषु
स्थिता प्रत्यक्स्रोतोवहा च यथा । "अवन्तिषु प्रतीच्यां वै
कीर्त्तयिष्यामि ते दिशि । यानि तत्र पवित्राणि पुण्या-
न्यायतनानि च । प्रियङ्ग्वाम्रवणोपेता वानीरफलमालिनी ।
प्रत्यक्स्रोता नदी पुण्या नर्मदा तत्र भारत ! ।
त्रैलोक्ये यानि तीर्थानि पुण्यान्यायतनानि च । सरिद्व-
नानि शैलेन्द्रा देवाश्च सपितामहाः । नर्मदायां कुरुश्रेष्ठ !
सह सिद्धर्षिचारणैः । स्नातुमायान्ति पुण्यौघैः सदा वारिषु
भारत" भा० आ० ८९अ० ।

इन्दुजनक पु० ६त० । १अत्रिमुनौ तस्य ततउत्पत्तिकथा अत्रि-
जातशब्दे १११ पृष्ठे दृश्या । २समुद्रे ततस्तस्योत्पत्तिकथा
"ततः शतसहस्रांशुर्मथ्यमानात्तु सागरात् । प्रसन्नात्मा
समुत्पन्नः सोमः शीतांशुरुज्ज्वलः" भा० आ० १८अ० ।
दृश्या । [जाङ्गलीवृक्षे ।

इन्दुपुष्पिका स्त्री इन्दुरिव शुभ्रं पुष्पमस्याः । (विषलाङ्गला)

इन्दुभ न० इन्दोश्चन्द्रस्य भं नक्षत्रं राशिर्वा । चन्द्रदेवताके
१मृगशिरोनक्षत्रे अश्लेषाशब्दे ४९८पृष्ठे नक्षत्राणामीशा
दर्शिताः । २कर्कटराशौ च "कुजशुक्रबुधेन्द्वर्कसौम्यशुक्रावनी
भुवाम्—क्षेत्राणि सुरजादयः ज्यो० । [२चन्द्रप्रभायाम् ।

इन्दुभा स्त्री इन्दुना भाति भा—क ३त० । १कुमुद्वत्याम् । ६त० ।

इन्दुभृत् पु० इन्दुं बिभर्त्ति भृ—क्विप् । शिवे । तस्य चन्द्र-
लाधारणमिन्दुमौलिशब्दे ९३६पृष्ठे सप्रमाणं दर्शयिष्यते ।

इन्दुमणि पु० इन्दुः कान्तोऽस्य तत्करेण स्यन्दनात् तादृशो
मणिः शाक० त० । १चन्द्रकान्तमणौ तस्य चन्द्रोदये निष्य-
न्दात् तन्मणित्वम् । तत्प्रियो मणिः स इव शुभ्रो मणिर्वा ।
२मुक्तायाम् ।

इन्दुमण्डल न० ६त० । चन्द्रस्य बिम्बे मण्डलाकारे
पदार्थे "हुत्वा स्तुत्वा नमस्कृत्य विसृजेदिन्दुमण्डले"
तन्त्रसा० । तन्मण्डलमानञ्च सि० शि० दर्शितं यथा ।
"बिम्बं रवेर्द्विद्विशरर्त्तु (६५२२) संख्यानीन्दोः खनागा-
म्बुधि(४८०) योजनानि । भूव्यासहीनं रविबिम्बमि-
न्दुकर्णाहतं भास्करकर्णभक्तम् । भूविस्तृतिर्लब्धफलेन हीना
भवेत् कुभाविस्तृतिरिन्दुमार्गे" "रवेर्योजनात्मकं बिम्बं मध्यमं
द्वियमबाणषट्कतुल्यानि (६५२२) योजनानि इन्दोस्तु
शून्यवसुवेद (४८०)मितानि । अथ राहोरुच्यते । रवि-
बिम्बं भूव्यासेन(१५८१) हीनं (?५?)हत्वेन्दुकर्णेन स्फु-
टेन योजनात्मकेन संगुण्य रविकर्णेन स्फुटेन भजेत् फलेन
भूव्यासतो वर्ज्जितचन्द्रकक्षाया भूभाव्यासो भवति ।

फलानि योजनविम्बानि । अत्रोपपत्तिः यस्मिन् दिने अर्कस्य मध्यतुल्यैव स्फुटा गतिः स्यात् तस्मिन् दिने उदयकाले चक्रकलाव्यासार्धमितेन यष्टिद्वितयेन मूलमिलितेन तत्स्यदृष्ट्या तदग्राभ्यां बिम्बप्रान्तौ विध्येत् । या यष्ट्यग्रयोरन्तकलास्ता रविबिम्बकला भवन्ति मध्यमाः। ताश्च द्वात्रिंशत् किञ्चिदधिकैकत्रिंशद्विकलाधिकाः २२ २१ । २२ । एवं विधोरपि पौर्णमास्यां यदा मध्यैव गतिः स्पष्टा तदा विध्येत् तस्यैवं द्वात्रिंशत् कलाः २२। ०। ६ । उत्पद्यन्ते । बिम्बकलानां योजनीकरणायानुपातः । यदि त्रिज्याव्यासार्धे एतावत्प्रमाणं बिम्बं तदा पाठतश्रुतियोजनैः किमित्येवमुत्पद्यन्ते द्विद्विषर्तु (६५२२)संख्यानि योजनानि । विधोस्तु खनागाब्धि (४८०) मितानीति”। प्रमि० । बिम्बमेव गोलस्य व्यासशब्देनाभिधीयते “व्यासारवीन्दुक्षितिगोलकानां क्रमेण तेजोजलमृण्मयानाम् । स्युर्योजनन्यात्नतिशाखषड्भि(६५२२) र्व्योमाष्टवेदैः (४८०) ऋगजेषुचन्द्रैः । (१५८१) इति श्रीपतिना बिम्बस्थाने व्यासशब्दप्रयोगात् । तस्यैव विष्कम्भ इति संज्ञा । “विष्कम्भमानं किल यत्न सप्त”इति लीला० व्यासस्थाने विष्कम्भशब्द प्रयोगात् अतएवार्यभट्टेन व्यासनिरूपणे । “शशिविष्कम्भविवर्जितमित्युक्तम् ।“व्यासे भनन्दाग्नि(१६२७) हते विभक्ते खबाणसूर्यैः (१२५० परिधिः स सूक्ष्मः” इति लीला० उक्तदिशा रविचन्द्रयोरुक्तव्यासमानेन परिधिरानेयः । स च रवेः किञ्चिदून (२०४६६) योजनमितः, चन्द्रस्य किञ्चिन्न्यून(१५०८) योजनमितः । तथा च मण्डलशब्दस्य व्यासपरत्वे (४८०) योजनानि परिधिपरत्वे किञ्चिन्न्यून (१५०८) योजनानि इन्दोर्मण्डलस्य मानमित्यवधेयम् ।

इन्दुमती स्त्री इन्दुःप्रशस्तोऽस्त्यस्याम् प्राशस्त्ये मतुप् । १पौर्णमास्याम् २अजनृपपत्न्यां विदर्भराजभगिन्याञ्च । “अथेश्वरेण क्रथकैशिकानां स्वयंवरार्थं स्वसुरिन्दुमत्याः” रघुः ५ “मनोबभूवेन्दुमतीनिराशम्” रघुः । सा च हरिणी नाम सुराङ्गना तृणविन्दुशापात् मानुषजन्मप्राप्ता तदेतत् वर्णितं रघौ । “चरतः किल दुश्चरं तपस्तृणविन्दोः परिशङ्कितः पुरा । प्रजिघाय समाधिभेदिनीं हरिरस्मै हरिणीं सुराङ्गनाम् । स तपःप्रतिबन्धमन्युना प्रमुखाविष्कृतचारुविक्रिया । अशपद्भव मानुषीति तां शमवेलाप्रलयोर्मिणा भुवि । भगवन् ! परवानयं जनः प्रतिकूलाचरितं क्षमस्व मे । इति चोपनतां क्षितिस्पृशं कृतवानासुरपुष्पदर्शनात् । क्रथकैशिकवंशसम्भवा तव भूत्वा महिषी चिराय सा । उपलब्धवती दिवश्च्युतं विवशा शापनिवृत्तिकारणम्”इति अजं प्रति वशिष्ठसन्देशः ।

इन्दुमौलि पु० इन्दुर्मौलावस्य । महादेवे स हि इन्दुतपसा तुष्टस्तत्कलां शिरस्येकां दधारेति काशी० कथा यथा “तुष्टेन देवदेवेन स्वमौलौ या धृता सदा । आदाय तां कलामेकां जगत्संजीवनीम् पराम् । पश्चात् दक्षेण शप्तोऽपि मासान्ते क्षयमाप्य च । आप्याय्यतेऽसौ कलया पुनरेव तया शशी”।

इन्दुरत्न न० ६त० इन्दुरिव शुभ्रं रत्नम् वा । मुक्तायां तस्याश्चन्द्रदेवताकत्वात् चन्द्रदोषोपशान्त्यर्थत्वेन तत्प्रीतये दीयमानत्वात् तद्वच्छुभ्रत्वाच्च तद्रत्नत्वम् । ग्रहशब्दे ग्रहरत्नानि वक्ष्यन्ते ।

इन्दुलेखा स्त्री इन्दोर्लेखेव ।१चन्द्रकलायाम् २तदंशजन्यायां १सोमलतायाम्, तस्याः सोमादुद्भवकथा इन्दुवल्लीशब्दे ८२८पृष्ठे दृश्या। तद्वदाप्यायनकारिण्याम् ३अमृतायां, तद्वद्गुरुगुणत्वात् ४यमानिकायाञ्च । तस्य रः। इन्दुरेखाप्यत्र ।

इन्दुलोक पु०६त०। चन्द्रलोके । स हि कर्म्मिणामुपभोगस्थानतया श्रुत्यादिषु कथितः । चन्द्रलोके कर्म्मिणाम् आप्यशरीरं जायते तच्च कर्म्मसमवायिजलसूक्ष्मांशेभ्य एवेति निरूपणाय छा० उ० पञ्चाग्निविद्या प्रस्ताविता यथा

“असौ वाव लोको गौतमाग्निस्तस्यादित्य एव समिद्, रश्मयो धूमो,ऽहरर्चि,श्चन्द्रमा अङ्गारा,नक्षत्राणि विस्फुलिङ्गाः । तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुतेः सोमो राजा सम्भवति १। पर्जन्यो वाव गौतमाग्निस्तस्य वायुरेव समिदभ्रं धूमो, विद्युदर्चिरशनिरङ्गारा, ह्रादुनयो विस्फुलिङ्गाः । तस्मिन्नेतस्मिन्नग्नौ देवाः सोमं राजानं जुह्वति तस्या आहुतेर्वर्षं सम्भवति २। पृथिवी वाव गौतमाग्निस्तस्याः संवत्सर एव समिदाकाशो धूमो, रात्रिरर्चिर्दिशोऽङ्गारा, अवान्तरदिशो विस्फुलिङ्गाः । तस्मिन्नेतस्मिन्नग्नौ देवा वर्षं जुह्वति तस्या आहुतेरन्नं सम्भवति ३। पुरुषो वाव गौतमाग्निस्तस्य वागेव समित्, प्राणो धूमो,जिह्वाऽर्चिश्चक्षुरङ्गाराः, श्रोत्रं विस्फुलिङ्गाः । तस्मिन्नेतस्मिन्नग्नौ देवा अन्नं जुह्वति तस्या आहुतेरेतः सम्भवति ४। योषा वाव गौतमाग्निस्तस्या उपस्थ एव समिद्यदुपमन्त्रयते स धूमो, योनिरर्चिर्यदन्तः करोति तेऽङ्गारा, अभिनन्दा विस्फुलिङ्गाः । तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति तस्या आहुतेर्गर्भः सम्भवति ५। इति

तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति स उल्बावृतो गर्भो दश वा नव वा मासानन्तः शयित्वा यावदाथ जायते स जातो यावदायुषं जीवति तं प्रेतं दिष्टमितोऽग्नय एव हरन्ति यत एवेतो यतः सम्भूतो भवति” छा० उ० । “असौ वाव लोकोऽग्निर्हे गौतम ! यथाऽग्निहोत्राधिकरणम् आहवनीयम् इह तस्याग्नेर्द्युलोकाख्यस्यादित्य एव समित् तेन हीद्धोऽसौ लोको दीप्यते अतः समिन्धनात् समिदादित्यः । रश्मयो धूमस्तदुत्थानात् समिधो हि धूम उत्तिष्ठति । अहरर्चिः प्रकाशसामान्यात् आदित्यकार्य्यत्वाच्च । चन्द्रमा अङ्गाराः अह्नः प्रशमेऽभिव्यक्तेः अर्चिषो हि प्रशमेऽङ्गारा अभिव्यज्यन्ते । नक्षत्राणि विस्फुलिङ्गाश्चन्द्रमसोऽवयवा इव विप्रकीर्णत्वसामान्यात् । तस्मिन्नेतस्मिन् यथोक्तलक्षणेऽग्नौ देवाः यजमानप्राणा अग्न्यादिरूपाः अधिदैवतं श्रद्धाम् अग्निहोत्राहुतिपरिणामावस्थारूपाः सूक्ष्मा आपः श्रद्धाभाविताः श्रद्धा उच्यन्ते “पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ती”त्यपां होम्यतया प्रश्ने श्रुतत्वात् ।“श्रद्धा वा आपः श्रद्धामेवारभ्य प्रणीय प्रचरन्तीति”च विज्ञायते । तां श्रद्धामब्रूपां जुह्वति । तस्या आहुतेः सोमो राजा । अपां श्रद्धाशब्दवाच्यानां द्युलोकाग्नौ हुतानां परिणामः सोमो राजा सम्भवति । यथा ऋग्वेदादिपुष्परसा ऋगादिमधुकरोपनीतास्तु आदित्ये यश आदिकार्य्यं रोहितादिरूपलक्षणमारभन्त इत्युक्तम् । तथेमा अग्निहोत्राहुतिसमवायिन्यः सूक्ष्माः श्रद्धाशब्दवाच्या आपोद्युलोकमनुप्रविश्य चान्द्रं कार्य्यमारभन्ते फलरूपमग्निहोत्राहुत्योः । यजमानाश्च तत्कर्त्तार आहुतिमया आहुतिभावनाभाविता आहुतिरूपेण कर्म्मणाऽऽकृष्टाः श्रद्धाप्समवायिनो द्युलोकमनुप्रविश्य सोमभूताभवन्ति । तदर्थं हि तैरग्निहोत्रं हुतम् । आहुतिपरिणाम एव पञ्चाग्निसम्बन्धक्रमेण प्राधान्येन विवक्षित उपासनार्थम् । न यजमानानां गतिम् । तां त्वविदुषां धूमादिक्रमेणोत्तरत्र वक्ष्यति विदुषाञ्चोत्तरां विद्याकृताम् १। द्वितीयहोमपर्य्यायार्थमाह । पर्जन्यो वाव पर्जन्य एव गौतमाग्निः पर्जन्योनाम वृष्ट्युपकरणाभिमानी देवताविशेषः । तस्य वायुरेव समित्, वायुना हि पर्जन्योऽग्निः समिध्यते पुरोवातादिप्राबल्ये वृष्टिदर्शनात् । अभ्रं धूमो, धूमकार्य्यत्वाद्धूमवच्च लक्ष्यमाणत्वात् । विद्युदर्चिः प्रकाशसामान्यात् । अशनिरङ्गाराः काठिन्यात् विद्युत्सम्बन्धाद्वा । ह्रादुनयो विस्फुलिङ्गाः । ह्रादुनयो गर्जितशब्दाः मेघानां विप्रकीर्णत्वसामान्यात् । तस्मिन्नेतस्मिन्नग्नौ देवाः पूर्ववत् सोमं राजानं जुह्वति । तस्या आहुतेर्वर्षं सम्भवति । श्रद्धाख्या आपः सोमाकारपरिणता द्वितीये पर्य्याये पर्जन्याग्निं प्राप्य वृष्टित्वेन परिणमन्ते २। पृथिवी वाव गौतमाग्निरित्यादि पूर्ववत् । तस्याः पृथिव्याख्यस्याग्नेः संवत्सर एव समित् संवत्सरेण हि कालेन समिद्धा पृथिवी व्रीह्यादिनिष्पत्तये भवति । आकाशो धूमः पृथिव्या इवोत्थित आकाशो दृश्यते यथाऽग्नेर्धूमो, रात्रिरर्चिः, पृथिव्या ह्यप्रकाशात्मिकाया अनुरूपा रात्रिः तमोरूपत्वात् अग्नेरिवानुरूपमर्चिः। दिशोऽङ्गारा उपशान्तत्वसामान्यात् । अवान्तरदिशो विस्फुलिङ्गाः क्षुद्रत्वसामान्यात् । तस्मिन्नित्यादि समानम् । तस्या आहुतेरन्नं व्रीहियवादि सम्भवति ३। पुरुषो वाव गौतमाग्निः तस्य वागेव समित् वाचा हि मुखेन समिध्यते पुरुषो न मूकः । प्राणो धूमो धूम इव मुखान्निर्गमनात् । जिह्वार्चिर्लोहितत्वात् । चक्षुरङ्गारा भास आश्रयत्वात् । श्रोत्रं विस्फुलिङ्गाः विप्रकीर्णत्वसाम्यात् । समानमन्यत् । अन्नं जुह्वति व्रीह्यादि संस्कृतम् । तस्या आहुते रेतः सम्भवति ४। योषा वाव गौतमाग्निः । तस्या उपस्थ एव समित् तेन हि सा पुत्राद्युत्पादनाय समिध्यते । यदुपमन्त्रयते स धूमः स्त्रीसम्भवादुपमन्त्रणस्य । योनिरर्च्चिर्लोहितत्वात् । यदन्तः करोति तेऽङ्गारा अग्निसम्बन्धात् । अभिनन्दाः सुखलवा विस्फुलिङ्गाः क्षुद्रत्वात् । तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति तस्या आहुतेर्गर्भः सम्भवतीति ५। एवं श्रद्धासोमवर्षान्नरेतोहवनपर्य्यायक्रमेणाप एव गर्भीभूतास्ताः । तत्रापामाहुतिसमवायित्वात् प्राधान्यविवक्षा आपः पञ्चम्यामाहुतौ पुरुषवचसो भवन्तीति । न त्वाप एव केवलाः सोमादिकार्य्यमारभन्ते । न चापोऽत्रिवृत्कृताः सन्तीति । त्रिवृत्कृतत्वेऽपि विशेषसंज्ञालाभो दृष्टः पृथिवीयमिमा आपोऽयमग्निरित्यन्यतमबाहुल्यनिमित्तः । तस्मात्समुदितावभूतानि बाहुल्यात्कर्म्मसमवायीनि सोमादिकार्य्यारम्भकाण्याप इत्युच्यन्ते । दृश्यते च द्रवबाहुल्यं सोमवृष्ट्यन्नरेतोदेहेषु बहुद्रवञ्च, शरीरं यद्यपि पार्थिवं तत्र पञ्चम्यामाहुतौ हुतायां रेतोरूपा आपो गर्भीभूताः । इति तु एवन्तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति व्याख्यात एकः प्रश्नः । यत्तु द्युलोकादीनां प्रत्याहृतयोरा-

कुक्ष्योः प्रविशौ पुरुषं स्त्रियं क्रमेणाविश्य लोकं प्रत्युत्थायी भवतीति वाजसनेयके उक्तं तत्प्रासङ्गिकमिहोच्यते । इह च प्रथमे प्रश्न उक्तं वेत्थ यदितोऽधि प्रजाः प्रयन्तीति । तस्य चायमुपक्रमः । स गर्भोऽपां पञ्चमः परिणामविशेषः आहुतिकर्मसमवायिनीनां श्रद्धाशब्दवाच्यानाम्, उल्बावृत उल्बेन जरायुणाऽऽवृतो वेष्टितो दश वा नव वा मासानन्तर्मातुः कुक्षौ शयित्वा यावता कालेन न्यूनेनातिरिक्तेनानन्तरं जायते । उल्बावृत इत्यादिर्वैराग्यहेतोरिदमुच्यते । कष्टं हि मातुः कुक्षौ मूत्रपुरीषवातपित्तश्लेष्मादिपूर्णे तदनुलिप्तस्य गर्भस्योल्बाऽशुचिपूयावृतस्य लोहितरेतोऽशुचिबीजस्य मातुरशितपीतरसानुप्रवेशेन च विवर्द्धमानस्य निरुद्धशक्तिबलवीर्यतेजःप्रज्ञाचेष्टस्य शयनम् । ततो योनिद्वारेण पीड्यमानस्य कष्टतरा निःसृतिर्जन्मेति वैराग्यं ग्राहयति । मुहूर्तमप्यसह्यं दश वा मासानतिदीर्घकालमन्तः शयित्वेति । स एवं जातो यावदायुषं पुनर्घटीयन्त्रवद्गमनागमनाय कर्म कुर्वन् कुलालचक्रवद्वा तिर्यग्भ्रमणाय यावत्कर्मणोपात्तमायुस्तावज्जीवति । तमेवं क्षीणायुषं प्रेतं मृतं दिष्टं कर्मणा निर्दिष्टं परलोकं प्रति । यदि चेज्जीवन् वैदिके कर्मणि ज्ञाने वाधिकृतस्तमेनं मृतमितोऽस्माद्ग्रामादग्नयेऽग्न्यर्थमृत्विजो हरन्ति पुत्रा वान्त्यकर्मणे, यत एव इत आगतोऽग्नेः सकाशाच्छ्रद्धाद्याहुतिक्रमेण, यतश्च पञ्चभ्योऽग्निभ्यः सम्भूत उत्पन्नो भवति तस्मा एवाग्नये हरन्ति स्वामेव योनिमग्निमापादयन्तीत्यर्थः" भा०। एवं चन्द्रभावप्राप्तिप्रकारमुक्त्वा तत्प्राप्त्यनुगुणं कर्मभेदं प्रदर्श्य तत्र गतिप्रकारमाह "अथ य इमे गृहस्थाः ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसम्भवन्ति, धूमाद्रात्रिं, रात्रेरपरपक्षम्, अपरपक्षाद्यान् षड्दक्षिणैति मासांस्तान्नैते संवत्सरमभिप्राप्नुवन्ति, मासेभ्यः पितृलोकं, पितृलोकादाकाशमाकाशाच्चन्द्रमसमेष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति । तस्मिन् यावत्सम्पातमुषित्वाऽथैतमध्वानं पुनर्निवर्त्तन्ते' छा०उ० । "अथेत्यर्थान्तरप्रस्तावनार्थो य इमे गृहस्थाः । ग्राम इति गृहस्थानामसाधारणं विशेषणमरण्यवासिभ्यो व्यावृत्त्यर्थम् । यथा वानप्रस्थपरिव्राजकानामरण्यं विशेषणं गृहस्थेभ्यो व्यावृत्त्यर्थं तद्वत् । इष्टापूर्ते इष्टमग्निहोत्रादि वैदिकं कर्म पूर्त्तं वापीकूपतडागारामादिकरणम् । दत्तं च बहिर्वेदि यथाशक्त्यर्हेभ्यो द्रव्यसंविभागो दत्तम् इत्येवंविधं परिचरणपरित्राणाद्युपासते इतिशब्दस्य प्रकारदर्शनार्थत्वात् । ते दर्शनवर्जितत्वाद्धूमं धूमाभिमानिनीं देवतामभिमुख्येन सम्भवन्ति प्रतिपद्यन्ते । तयाऽतिवाहिता धूमाद्रात्रिं रात्रिदेवतां, रात्रेरपरपक्षदेवताम्, एवमेव कृष्णपक्षाभिमानिनीम्, अपरपक्षाद्यान् षण्मासान् दक्षिणा दक्षिणां दिशमेति सविता तान्, मासान् दक्षिणायनान् षण्मासाभिमानिनीर्देवताः प्रतिपद्यन्त इत्यर्थः । सङ्घचारिणी हि षण्मासदेवता इति मासानिति बहुवचनप्रयोगस्तासु । नैते कर्मिणः प्रकृताः संवत्सरं संवत्सराभिमानिनीं देवतामभिप्राप्नुवन्ति । कुतः पुनः संवत्सरप्राप्तिप्रसङ्गो यतः प्रतिषिध्यते । अस्ति हि संवत्सरस्य प्रसङ्गोह्येकस्यावयवभूते दक्षिणोत्तरायणे तत्रार्चिरादिमार्गप्रवृत्तानामुदगयनमासेभ्योऽवयविनः संवत्सरस्य प्राप्तिरुक्ता । अत इहापि तदवयवभूतानां दक्षिणायनमासानां प्राप्तिं श्रुत्वा तदवयविनः संवत्सरस्यापि पूर्ववत्प्राप्तिरापन्नेत्यतस्तत्प्राप्तिः प्रतिषिध्यते नैते संवत्सरमभिप्राप्नुवन्तीति । मासेभ्यः पितृलोकं, पितृलोकादाकाशमाकाशाच्चन्द्रमसम् । कोऽसौ यस्तैः प्राप्यते चन्द्रमा य एष दृश्यतेऽन्तरिक्षे सोमो राजा ब्राह्मणानां तदन्नं देवानां तं चन्द्रमसमन्नं देवता इन्द्रादयो भक्षयन्ति । अतस्ते धूमादिना गत्वा चन्द्रभूताः कर्मिणो देवैर्भक्ष्यन्ते । नन्वनर्थायेष्टादिकरणं यद्यन्नभूता देवैर्भक्ष्येरन्, नैष दोषः अन्नमित्युपकरणमात्रस्य विवक्षितत्वात् । न हि ते कवलोत्क्षेपेण देवैर्भक्ष्यन्ते, किं तर्ह्युपकरणमात्रं देवानां भवन्ति ते, स्त्रीपशुभृत्यादिवत् । दृष्टश्चान्नशब्द उपकरणेषु स्त्रियोऽन्नं पशवोऽन्नं राज्ञामित्यादि । न च तेषां स्त्र्यादीनां पुरुषोपभोग्यत्वेऽप्युपभोगो नास्ति । तस्मात्कर्मिणो देवतानामुपभोग्या अपि सन्तः सुखिनो देवैः क्रीडन्ति । शरीरञ्च तेषां सुखोपभोगयोग्यं चन्द्रमण्डले आप्यमारभ्यते । तदुक्तं पुरस्ताच्छ्रद्धाशब्दा आपो द्युलोकाग्नौ हुताः सोमो राजा सम्भवतीति । ता आपः कर्मसमवायिन्य इतरैश्च भूतैरनुगताः द्युलोकं प्राप्य चन्द्रत्वमापन्नाः शरीराद्यारम्भिका इष्टाद्युपासकानां भवन्ति । अन्त्यायाश्च शरीराहुतावग्नौ हुतायामग्निना दह्यमाने शरीरे तदुत्था आपो धूमेन सहोर्द्ध्वं यजमानमावेष्ट्य चन्द्रमण्डलं प्राप्य कुशमृत्तिकास्थानीया बाह्यशरीरारम्भिका भवन्ति । तदारब्धेन च शरीरेणेष्टादिफलमुपभुञ्जाना आसते यावत्तदुपभोगनिमित्तस्य क्षयः कर्मणः । सम्पतन्ति येनेति सम्पातः कर्मणः क्षयो या-

चन्द्रमस्मात् यावत्कर्मणः चय इत्यर्थः । तावत्तस्मिं श्चन्द्रमण्डले उषित्वा अथाऽनन्तरमेतमेव वच्यमाणमध्वानं मार्गम् पुनर्निवर्त्तन्त इति प्रयोगात्पूर्वमध्यसञ्चन्द्रमण्डलं गता निष्पत्त्यावसादिति गम्यते । तस्मादिह लोके इष्टादिकर्मोपचित्य चन्द्रं गच्छन्ति तत्क्षये चावर्त्तन्ते । क्षणमात्रमपि तत्र स्थातुं न लभ्यते स्थितिनिमित्तकर्मक्षयात् स्नेहक्षयादिव प्रदीपस्य । किं तत्र येन कर्मणा चन्द्रमण्डलमारूढस्तस्य सर्वस्य क्षये तस्मादवरोहणं किं वा सावशेष इति । किन्ततः । यदि सर्वस्यैव क्षयः कर्मणश्चन्द्रमण्डलस्थस्यैव मोक्षः स्यात् न वेति तत्र आगतस्येह शरीरोपभोगादि न सम्भवति । ततः शेषेणेत्यादिस्मृतिविरोधश्च स्यात् । नन्विष्टापूर्त्तदत्तव्यतिरेकेणापि मनुष्यलोके शरीरोपभोगनिमित्तानि कर्माण्यनेकानि सम्भवन्ति न च तेषां चन्द्रमण्डल उपभोगः । अतः क्षीणानि यन्निमित्तं चन्द्रमारूढास्तान्येव क्षीणानीत्यविरोधः शेषशब्दश्च सर्वेषां कर्मत्वसामान्यादविरुद्धः" भा० । एवं चान्द्रायणादिकं तत्प्राप्तिहेतुः ।

इन्दुलौह न० ६त० । इन्दुर्देवताके, लौहे धातौ रौप्ये धातुमध्ये तस्येन्दुवर्णत्वात् इन्दुदीपोपशान्त्यर्थं देयत्वाच्च तथात्वम् । स्वार्थे कन् । तत्रैव ।

इन्दुवदना स्त्री "इन्दुवदना जजसनैः सगुरुयुग्मैः" वृत्त०र० उक्ते चतुर्दशाक्षरपादके वर्णवृत्तभेदे

इन्दुवल्ली स्त्री ६त० । चन्द्रनामिकायां सोमलतायाम् । तत्प्राप्तिस्थानमुक्तं सुश्रुते यथा "नैवासादयितुं शक्या सोमाः सोमसमास्तथा । पीतावशेषमस्तं देवैर्ब्रह्मपुरोगमैः । निहितं सोमवीर्य्यासु सोमे चाप्योषधीगतौ । देवसुन्दे ह्रदवरे तथा सिन्धौ महानदे । दृश्यते च जलान्तेषु मध्ये मन्ददूर्बलाः" तत्समास्त्र ओषधिशब्दे वक्ष्यन्ते

इन्दुवार पु० "आपोक्लिमे (३,६,९,१२,)यदि खगाः स किलेन्दुवारो न साम्कुधः क्वचन ताजकशास्त्रगीतः" नी० ता० उक्ते वर्षलग्नतः (३,६,९,१२,) स्थानानामन्यतमस्थाने सर्वग्रहस्थितिरूपयोगभेदे ।

इन्दुव्रत न० इन्दुलोकप्राप्त्यर्थं व्रतम् शाक०त० । चान्द्रायणे व्रते तस्य चन्द्रलोकप्राप्तिसाधनत्वात् चन्द्रह्रासवृद्धिवशानुसारेण भोजने ह्रासवृद्धिमत्त्वाच्च चान्द्रायणत्वम् तदेतत् पञ्चविधं तत्स्वरूपविभागादि प्रा०वि० दर्शितं यथा । "एकैकं ह्रासयेत् पिण्ड कृष्णे शुक्ले च वर्द्धयेत् । उपस्पृशंस्त्रिषवणमेतच्चान्द्रायणञ्चरेत् । एतदेव विधिं कृत्वा आचरेत् यवमध्यमे । शुक्लपक्षादि नियतश्चरेच्चान्द्रायणव्रतम्" । "अष्टावष्टौ समश्नीयात् पिण्डान्मध्यदिने गते । नियतात्मा हविष्यस्य यतिचान्द्रायणञ्चरन् । चतुरः प्रातरश्नीयात् पिण्डान् विप्रः समाहितः । चतुरोऽस्तमिते सूर्य्ये शिशुचान्द्रायणं व्रतम् । अष्टावष्टौ समश्नीयात् पिण्डान्मध्यदिने गते । मासेनाश्नन् हविष्यस्य चन्द्रस्यैति सलोकताम्" मनुः । एतत् पञ्चविधं चान्द्रायणम् पिपीलिकातनुमध्यम्, यवमध्यं, यतिचान्द्रायणम्, सर्वतोमुखं शिशुचञ्च । यथाह जावालः "पिपीलिकायवमध्यं यतिचान्द्रायणन्तथा । चान्द्रायणन्तथा ज्ञेयं चतुर्थं सर्वतोमुखम् । पञ्चमं शिशुचञ्च तुल्यं पुण्यफलोदयम्" । कृष्णप्रतिपदमारभ्य मासमेकं यदा क्रियते तदा पिपीलिकामध्यं भवति, शुक्लप्रतिपदारम्भे यवमध्यमुभयत्रामावास्यायामभोजनं कृष्णप्रतिपदि चतुर्द्दशग्रासभोजनारम्भे ह्रासक्रमेण चतुर्द्दश्यामेकग्रासः अमावास्यायामभोजनम् एवं प्राप्नोति तथा च वसिष्ठः । "मासस्य कृष्णपक्षादौ ग्रासानद्याच्चतुर्द्दश" । नन्वेवं क्रमेण पञ्चविंशत्युत्तरं ग्रासशतद्वयं स्यात् न चत्वारिंशद्ग्रासाधिकं शतद्वयम् तच्च याज्ञवल्क्येनोक्तम्" "यथा कथञ्चित् पिण्डानां चत्वारिंशच्छतद्वयमिति" । "यथा कथञ्चित् पिण्डानां तिस्रोऽशीतीः समाहितः" इति मनुनाप्युक्तम् । उच्यते संयमदिवसे पौर्णमास्याम् अमावास्यायां वा पञ्चदशग्रासभोजनेन संख्यापूरणसम्भवात् अथ वा पञ्चदश्यादिक्रमेवेदं व्रतम् न प्रतिपदादिकं चतुर्द्दश्यामेव व्रतसङ्कल्पः । यथाह गौतमः पौर्णमास्यां पञ्चदश ग्रासान् भुक्त्वैकैकापचयेनापरपक्षमश्नीयात् अमावास्यायामुपोष्य एकैकोपचयेन पूर्वपक्षम्, विपरीतमेकेषाम्" शङ्खलिखितौ "अमावस्यायां व्रतोपायनं यवमध्यम् अमावस्यायां पञ्चदश पिण्डानश्नीयात्" उपायनमारम्भः । शुक्लञ्चेदम् अमावास्यामपि पञ्चदशकलात्मकस्य चन्द्रमसः सूर्य्यप्रविष्टत्वात् तत्र एकैककलानिर्गमस्य प्रतिपदादिषु वृद्धिशब्दवाच्यत्वात् । जावालः "एकैकं वर्द्धयेद्ग्रासं शुक्ले कृष्णे च ह्रासयेत् । अमावस्यां न भुञ्जीत यवमध्यञ्चरन् द्विजः । एकैकं ह्रासयेद्ग्रासं कृष्णे शुक्ले च वर्द्धयेत् । पौर्णमास्यां न भुञ्जीत पिपीलितनुमध्यमम्" । अत्र कल्पतरुव्याख्यानम् । एकैकं ह्रासयेदिति कृष्णप्रतिपदि पञ्चदशग्रासमारभ्य एकैकापचयेनामावास्यायामेकोग्रासः तदनन्तरं शुक्लप्रतिपदि द्वौ ग्रासावेवं वृद्धिक्रमेण चतुर्द्दश्यां पञ्चदश ग्रासाः सम्पद्यन्ते पौर्णमास्याञ्चोपवास इति" पिपीलिका

तनुमध्यं चान्द्रायणम्”। ऋषिचान्द्रायणमाह यमः “त्रींस्त्रीन् पिण्डान् समश्नीयात् नियतात्मा दृढव्रतः। हविष्यान्नस्य वै मासमृषिचान्द्रायणं स्मृतम्”। अत्र चत्वारिंशच्छतद्वयसंख्या नास्ति। ग्रासपरिमाणमाह पराशरः “कुक्कुटाण्डप्रमाणन्तु यावद्वा प्रविशेन्मुखम्। एवं ग्रासं विजानीयाच्छुद्ध्यर्थं कायशोधनम्”। सकलचान्द्रायण एव चतुर्द्दश्यामुपवासं कृत्वाऽपरदिने पञ्चदश्यां संयमः कार्य्यः। यथा बौधायनः “शुक्लां चतुर्द्दशीमुपवसेत् कृष्णचतुर्द्दशीं वा केशश्मश्रुनखलोमानि वापयित्वा” इत्याद्यभिधाय “तिथिनक्षत्रादिहोमं प्रत्यहमुक्तवान्” विस्तरभयान्न लिखितम्। अत्र सामान्यव्रतधर्म्मः कर्त्तव्यः। विशेषमाह यमः “आर्द्रवासाश्चरेत् कृच्छ्रं स्नात्वा वस्त्रं न पीड़येत्। अङ्गुल्यपस्थितं ग्रासं गायत्र्या चाभिमन्त्रयेत्। भक्षयित्वा उपस्पृश्य पुनरेवाभिमन्त्रयेत्। आयसं तैजसं पात्रं चक्रोत्पन्नं विवर्ज्जयेत्। असुराणां हि तत् पात्रं पानपात्रमचक्रजम्” अचक्रजं कुलालचक्रानिष्पन्नम्। अपरे धर्म्मा बौधायनादिषु द्रष्टव्याः। तेन एकत्रिंशद्दिनसाध्यं चान्द्रायणव्रतम्”। या० स्मृ०। “तिथिवृद्ध्या चरेत् पिण्डान् शुक्ले शिख्यण्डसम्मितान्। एकैकं ह्रासयेत् कृष्णे पिण्डं चान्द्रायणं चरन्। यथाकथञ्चित् पिण्डानां चत्वारिंशच्छतद्वयम्। मासेनैवोपभुञ्जीत चान्द्रायणमथापरम्। कुर्य्यात्त्रिषवणस्नायी कृच्छ्रं चान्द्रायणं तथा। अनादिष्टेषु पापेषु शुद्धिश्चान्द्रायणेन तु। धर्म्मार्थं यश्चरेदेतच्चन्द्रस्यैति सलोकताम्” अत्र (२४०) ग्राससंख्योक्तेर्मध्ये नोपवास इति प्रतीयते तथा हि प्रतिपादादिपञ्चदशसु ग्रासवर्द्धनेन भवणे “सैकपदघ्नपदार्द्धमथैकाद्यङ्कयुतिः किल सङ्कलिताख्येति” लीला० उक्तदिशा (१२०) ग्राससंख्या, पुनः कृष्णे ह्रासेन तथैव संख्येति (२४०) भोज्यग्राससंख्या। तथाच समर्थासमर्थभेदेन अनयोर्व्यवस्थेति सिद्धान्तः।

इन्दुशेखर पु० इन्दुः शेखरे यस्य। महादेवे इन्दुमौलिशब्दे ९३९पृ० विवृतिः। चन्द्रशेखरादयोऽप्यत्र।

इन्दूर पु० उन्द-ऊर+पृ० उत्त्वम्। मूषिके जटाध०।

इन्द्र पु० इदि-रन्। १परमेश्वरे। “इन्द्रोमायाभिः पुरुरूप ईयते” श्रुतिः। द्वादशादित्यमध्ये २आदित्यभेदे। ते च अदित्यां कश्यपेनोत्पादिताः “धाताऽर्य्यमा च मित्रश्च वरुणोंऽशुर्भगस्तथा। इन्द्रोविवस्वान् पूषा च पर्ज्जन्यो दशमः स्मृतः। ततस्त्वष्टा ततोविष्णुरजघन्यो जघन्यजः” विष्णुध०। भा०आ०६५अ० तु इन्द्रस्थाने शक्रनाम्ना पठितः यथा “अदित्यां द्वादशादित्याः सम्भूता भुवनेश्वराः। ये राजन्नामतस्तांस्ते कीर्त्तयिष्यामि भारत!। धातामित्रोऽर्यमा शक्रो वरुणस्त्वंशुरेव च। भगो विवस्वान् पूषा च सविता दशमः स्मृतः। एकादशस्तथा त्वष्टा द्वादशोविष्णुरुच्यते। जघन्यजस्तु सर्व्वेषामादित्यानां गुणाधिकः”। कल्पभेदान्नामभेद इति न विरोधः। ३कुटजवृक्षे ४रात्रौ च धरणिः ५ भारतवर्षोपद्वीपभेदे शब्दमा० इन्द्रदेवताके ६ज्येष्ठानक्षत्रे विष्कम्भादिषु योगेषु ७षड्विंशे योगे छन्दोग्रन्थप्रसिद्धे षण्मात्राप्रस्तावे आद्यन्तगुरुद्वयेन लघुद्वयमध्येन युते ८चतुर्थे भेदे। ९देवराजे स च मन्वन्तरभेदात् चतुर्द्दशविधः यथा “मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वरः। ऋषयोंऽशावतारश्च हरेः षड्विधमुच्यते” भाग०८स्क०१अ०। इत्थं मन्वन्तरे षड्विधकीर्त्तनीयमुपक्रम्य मन्वन्तरभेदेन तत्तन्नामानि कथितानि अतोनामभेदात्तस्य चतुर्द्दशसंख्या तत्रोक्ता यथा “तुषिता नाम ते देवाः आसन् स्वायम्भुवेऽन्तरे। मरीचिमिश्राऋषयोयज्ञः सुरगणेश्वरः” भाग०८स्क०१अ०। १मन्वन्तरे यज्ञः। “स्वारोचिषो द्वितीयस्तु मनुरग्नेः सुतोऽभवत्” इत्युपक्रम्य “तत्रेन्द्रोरोचनस्त्वासीत् देवाश्च तुषितादयः” तत्रैव। २म० रोचनः। “तृतीय उत्तमोनाम प्रियव्रतसुतो मनुः” इत्युपक्रम्य “सत्यावेदश्रुता भद्राः देवा इन्द्रस्तु सत्यजित्” तत्रैव। ३म०सत्यजित्” “चतुर्थ उत्तमभ्राता मनुर्नाम्ना च तामसः” इत्यु० “सत्यका हरयो वीरा देवास्त्रिशिख ईश्वरः” तत्रैव। ‘ईश्वरइन्द्रः’ श्रीधरः। ४म०त्रिशिखः। “पञ्चमो रैवतोनाम मनुस्तामससोदरः” इत्यु० “विभुरिन्द्रः सुरगणा राजन्! भूतरयादयः” तत्रैव ५अ०। ५म०विभुर्नाम। “षष्ठश्च चक्षुषःपुत्रश्चाक्षुषो नाम वै मनुः”, इत्यु० “इन्द्रो मन्त्रद्रुमस्तत्र देवा आप्यादयो मताः” तत्रैव ५अ०। ६म०मन्त्रद्रुमः। “मनुर्विवस्वतः पुत्रः श्राद्धदेव इति श्रुतः। सप्तमो वर्त्तमानोऽयम्” इत्युप० “आदित्यावसवोरुद्रा विश्वे देवा मरुद्गणाः। अश्विनावृभवो राजन्निन्द्रस्तेषां पुरन्दरः”। तत्रैव अ०१३। ७म०पुरन्दरः। “अष्टमेऽन्तर आयाते सावर्णिर्भविता मनुः” इत्यु० “तत्र देवाः सुतपसो विरजा अमृतप्रजाः। तेषां विरोचनसुतो बलिरिन्द्रो भविष्यति” १३अ०। ८म०बलिः। “नवमो दक्षसावर्णिर्मनुर्वरुणसम्भवः” इत्युप० “परोमरीचिगर्भाद्या देवा इन्द्रः

सुतः स्मृतः" तत्रैव १२अ०। ९म०सुतः। "दशमोब्रह्मसावर्णिरुपश्लोकसुतोमहान्" इत्यु० "सुवासनविरुद्धाद्या देवाः शम्भुः सुरेश्वरः" १२अ०। १०म०शम्भुः। "मनुर्वै धर्मसावर्णिरेकादशम आत्मवान्" इत्यु० "विहङ्गमाःकामगमानिर्वाणरुचयः सुराः। इन्द्रस्तु वैधृतस्तेषा मृषयश्चारुणादयः"१२अ०। ११म०वैधृतः। "भविता रुद्रसावर्णिर्नाम द्वादशमो मनुः" इत्यु०"ऋतधामा च देवेशो देवाश्च हरितादयः"१२अ०। १२म०ऋतधामा। "मनुस्त्रयोदशोभव्यो वेदसावर्णिरात्मवान्" इत्युप०"देवाः सुकर्म्मसुत्रामसंज्ञा इन्द्रोदिवस्पतिः" १२अ०। १३म०दिवस्पतिः। "मनुर्वा इन्द्रसावर्णिश्चतुर्दशम एष्यति" इत्यु० "पवित्राश्चाक्षुषादेवाः शुचिरिन्द्रो भविष्यति" १२अ०। १४म०शुचिः। पुराणान्तरादौ नामान्तराणि चतुर्दश कल्पभेदादविरुद्धानि। विस्तरभयात्तानि नोक्तानि। एवंशक्रनामसंख्यासाम्यात् १० चतुर्दशसंख्यायाम्। स च शचीपतिः वृत्रादिहन्ता, पूर्व्वदिग्पालः, वृष्टिदायकः, अमरेशः मेघवाहनः तस्य पुत्रो जयन्तः, वनं नन्दनं हयउच्चैःश्रवाः गजऐरावतः, पुरी अमरावती नेत्राणि सहस्रं वज्रमस्त्रम् हरीवाहः। विवृतिस्तत्तच्छब्दे दृश्या। तस्यानेकविधानि कार्य्याणि पुराणादौ वर्णितानि विस्तरभयान्नोक्तानि मनुकालपर्य्यन्तं तस्याधिकारकालस्तत्समाप्तौ तस्य प्रजापतेः सकाशात् ब्रह्मविद्याप्राप्तेरग्रे वक्ष्यमाणत्वात् कैवल्यप्राप्तिः "योयो देवानां प्रत्यबुध्यत" इत्यादिश्रुतेः। इत्येतत् नानाशास्त्रश्रुतीतिहासेषु प्रसिद्धम् स्वकालमध्येऽपि त्वष्टृपुत्रविश्वरूपवधजनितब्रह्महत्यास्कन्दनभिया तस्य स्वपदच्युतिः। तत्पापस्य विभज्यान्यत्र संक्रामसे पुनः स्वपदप्राप्तिः। असुरादिभिरपि बलाधिक्यवशात् तं युधि निर्जित्य कियत्कालपर्य्यन्तं तत्पदेऽधिकारिता प्राप्ता इत्यपि पुराणादौ प्रसिद्धम् "जित्वा च सकलान् देवान् इन्द्रोऽभून्महिषासुरः" देवीमा० "शताश्वमेधकरणे अन्यस्यापि इन्द्रत्वप्राप्तियोग्यतेत्यत्र इन्द्रलोकशब्दे प्रमाणं वक्ष्यते।

इन्द्रश्च प्रजापतिसकाशात् एकशतवर्षं ब्रह्मचर्य्याचरणेन ब्रह्मविद्यां प्रापेति छा० उ० वर्णितं यथा "यदाहुरेकशतं ह वै वर्षाणि मघवान् प्रजापतौ ब्रह्मचर्य्यमुवास तस्मै होवाच। मघवन्! मर्त्त्यं वा इदं शरीरमात्तं मृत्युना तदस्यामृतस्याशरीरस्यात्मनोऽधिष्ठानमात्मा वै सशरीरः प्रियाप्रियाभ्यामात्तो न वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्त्यशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः इत्यादि।

"मघवन्! मर्त्त्यं वै मरणधर्म्मि शरीरम्। यन्मन्यसेऽक्ष्याधारादिलक्षणः सम्प्रसादलक्षण आत्मा मयोक्तो विनाशमेवापीतो भवतीति। शृणु तत्र कारणम्। यदिदं शरीरं वै पश्यसि तदेतन्मर्त्त्यं विनाशि। तच्चात्तं मृत्युना ग्रस्तं सन्ततमेव। कदाचिदेव म्रियत इति मर्त्त्यमित्युक्ते न तथा सन्त्रासो भवति यथा ग्रस्तमेव सदा व्याप्तमेव मृत्युनेत्युक्ते इति वैराग्यार्थं विशेष इत्युच्यते आत्तं मृत्युनेति। कथं नाम देहाभिमानतो विरक्तः सन्निवर्त्तेत इति। शरीरमित्यत्र सदेहेन्द्रियमनोभिरुच्यते। तच्छरीरमस्य सम्प्रसादस्य त्रिस्थानतया गम्यमानस्यामृतस्य मरणादिदेहेन्द्रियमनोधर्म्मवर्जितस्येत्येतत्। अमृतस्येत्यनेनैवाशरीरत्वे सिद्धे पुनरशरीरस्येति वचनं वाय्वादिवत्सावयवत्वमूर्त्तिमत्त्वे मा भूतामिति। आत्मनो भोगाधिष्ठानम् आत्मनो वा सत ईक्षितुस्तेजोऽबन्नादिक्रमेणोत्पन्नमधिष्ठानम् जीवरूपेण प्रविश्य सदेवाधितिष्ठत्यस्मिन्निति वाधिष्ठानम्। यस्येदमीदृशं नित्यमेव मृत्युग्रस्तं धर्म्माधर्म्मजनितत्वात्प्रियाप्रियवदधिष्ठानं तदधिष्ठितस्तद्वान् सशरीरो भवति। अशरीरस्वभावस्यात्मनस्तदेवाऽहं शरीरं शरीरमेव चाहमित्यविवेकादात्मभावः सशरीरत्वम्। अत एव सशरीरः सन्नात्तो ग्रस्तः प्रियाप्रियाभ्याम्। प्रसिद्धमेतत् तस्य च न वै सशरीरस्य सतः प्रियाप्रिययोर्बाह्यविषयसंयोगनिमित्तयोर्नितरयोर्बाह्यसंयोगवियोगौ ममेति मन्यमानस्यापहतिर्विनाश उच्छेदः सन्ततिरूपयोर्नास्तीति। तं पुनर्देहाभिमानादशरीरस्वरूपविज्ञानेन निवर्त्तितविवेकज्ञानमशरीरं सन्तं प्रियाऽप्रिये न स्पृशतः। स्पृशिः प्रत्येकं सम्बध्यते प्रियं न स्पृशत्यप्रियं न स्पृशतीति वाक्यद्वयं भवति। न ह्लेच्छाशुच्यधार्म्मिकैः सह सम्भाषेतेति यद्वत्। धर्म्माधर्म्मकार्य्ये हिताहिते, यतोऽशरीरता एतत्स्वरूपमिति। तत्र धर्म्माधर्म्मयोरसम्भवात्तत्कार्य्यभावो दूरत एवेत्यतो न प्रियाप्रिये स्पृशतः। ननु यदि प्रियमप्यशरीरं न स्पृशतीति यन्मघवतोक्तं सुषुप्तस्य विनाशमेवापीतो भवतीति. तदेवेहाप्यापन्नम्। नैष दोषो धर्म्माधर्म्मकार्य्ययोः शरीरसम्बन्धिनोः प्रियाप्रिययोः प्रतिषेधस्य विवक्षितत्वात् "अशरीरं न प्रियाप्रिये स्पृशतः" इत्यादिश्रुत्या। आगमापायिनोर्हि स्पर्शशब्दो दृष्टो यथा शीतस्पर्श उष्णस्पर्श इति। न त्वग्नेरुष्णप्रकाशयोः स्वभावभूतयोरग्निना स्पर्श एव भवति। तथाग्नेः सवितुर्वोष्णप्रकाशवत्स्वरूपभूतस्य नित्यस्य प्रियस्यापि

मेव प्रतिषेधो "विज्ञानमानन्दम्" "आनन्दो ब्रह्मेति" श्रुतिभ्यः इहापि "भूमैव सुखम् इत्यु,क्तत्वात्" भा०। इत्युपक्रम्य बहूपदेशः कृतः। प्रपञ्चस्तत्र दृश्यः।

इन्द्रश्च देवानां मध्येऽतिशयेन ब्रह्मवित्तमः तथाहि। केनोपनिषदि असुरविजये देवानां महिमाभिमाने जाते तदभिमानापनोदनार्थं यक्षभूतेनाविर्भूतेन परब्रह्मणा अग्निवाय्वोरभिमाननिरसने तयोर्निवृत्तौ इदंभक्तिमिन्द्रं प्रत्येव हैमवत्युपदेशेन तस्यातिशयमहिमा सूचितः ततो दिङ्मात्रं तद्भाष्यञ्च दर्श्यते। "ब्रह्म ह देवेभ्यो विजिग्ये तस्य ह ब्रह्मणो विजये देवा अमहीयन्त त ऐक्षन्तास्माकमेवायं विजयोऽस्माकमेवायं महिमेति तद्धैषां विजज्ञौ तेभ्यो ह प्रादुर्बभूव तन्न व्यजानन्त किमिदं यक्षमिति। तेऽग्निमब्रुवन् जातवेदः! एतद्विजानीहि किमेतद्यक्षमिति तथेति तदभ्यद्रवत्तमभ्यवदत् कोऽसीति अग्निर्वा अहमस्मीत्यब्रवीज्जातवेदा वा अहमस्मीति। तस्मिंस्त्वयि किं वीर्य्यमित्यपीदं सर्व्वं दहेयं यदिदं पृथिव्यामिति। तस्मै तृणं निदधावेतद्दहेति तदुपप्रेयाय सर्व्वजवेन तन्न शशाक दग्धुं स तत एव निववृते नैतदशकं विज्ञातुं यदेतद्यक्षमिति" के० उ०। एवं वाय्वोरप्यभिमाननिरसनमुपवर्ण्य "अथेन्द्रमब्रुवन्मघवन्नेतद्विजानीहि किमेतद्यक्षमिति तथेति तदभ्यद्रवत्तस्मात्तिरोदधे। स तस्मिन्नेवाकाशे स्त्रियमाजगाम बहुशोभमानामुमां हैमवतीं तां होवाच किमेतद्यक्षमिति। सा ब्रह्मेति होवाच ब्रह्मणो वा एतद्विजये महीयध्वमिति ततो हैव विदाञ्चकार ब्रह्मेति। तस्माद्वा एते देवा अतितरामिवान्यान्देवान् यदग्निर्वायुरिन्द्रस्ते ह्येनन्नेदिष्ठं पस्पर्शुस्ते ह्येनत् प्रथमो विदाञ्चकार ब्रह्मेति तस्माद्वा इन्द्रोऽतितरामिवान्यान् स ह्येनन्नेदिष्ठं पस्पर्श स ह्येनत् प्रथमो विदाञ्चकार ब्रह्मेति" के० उ०। "तथेन्द्रमब्रुवन्मघवन्नेतद्विजानीहि इत्यादिपूर्व्ववदिन्द्रः परमेश्वरो मघवान् बलवत्त्वात्तथेति तदभ्यद्रवत्तस्मादिन्द्रादात्मसमीपगतात्तद्ब्रह्म तिरोदधे तिरोभूतमिन्द्रत्वाभिमानोऽतितरां निराकर्त्तव्य इत्यतः संवादमात्रमपि नादात् ब्रह्मेन्द्राय।

तद्यत्र यस्मिन्नाकाशे आकाशप्रदेशे आत्मानं दर्शयित्वा तिरोभूतमिन्द्रश्च ब्रह्मणस्तिरोधानकाले यस्मिन्नाकाशे आसीत् स इन्द्रस्तस्मिन्नेवाकाशे तस्थौ। किं तद्यक्षमिति ध्यायन्न निववृतेऽग्न्यादिवत्तस्येति यत्ते भक्तिं बुद्ध्वा विद्या उमारूपिणी प्रादुर्भूता स्त्रीरूपा। स इन्द्रस्तामुमां सर्वेषां हि शोभमानानां शोभनतमां विद्यां तदा बहुशोभमानेति विशेषणमुपपन्नम्भवति। हैमवतीं हेमकृताभरणवतीमिव बहुशोभमानामित्यर्थः। अथवा उमैव हिमवतो दुहिता हैमवती नित्यमेव सर्व्वज्ञेन ईश्वरेण सा वर्त्तत इति ज्ञातुं समर्था इति कृत्वा तामुपजगाम इन्द्रस्तां ह उमां किलोवाच पप्रच्छ ब्रूहि किमेतद्दर्शयित्वा तिरोभूतं यक्षमिति। सा ब्रह्मेति होवाच ह किल ब्रह्मण ईश्वरस्यैव विजये ईश्वरेणैव जिता असुरा यूयं तत्र निमित्तमात्रं तस्यैव विजये यूयं महीयध्वं महिमानं प्राप्नुथ। एतदिति क्रियाविशेषणार्थम्। मिथ्याभिमानस्तु युष्माकमेव महिमेति। ततस्तस्मादुमावाक्याद्ध एव विदाञ्चकार ब्रह्मेतीन्द्रोऽवधारणात्ततो हैवेति न स्वातन्त्र्येण। यस्मादग्निवाय्विन्द्रा एते देवा ब्रह्मणः संवाददर्शनादिना समीपमुपगतास्तस्मादैश्वर्य्यगुणैरतितरामिव शक्तिगुणादिभिर्महाभाग्यैरन्यान्देवानतितरामतिशयेन शेरते इवैते देवाः। इवशब्दोऽनर्थकोऽवधारणार्थो वा। यदग्निर्वायुरिन्द्रस्ते हि देवा यस्मादेतद्ब्रह्म नेदिष्ठमन्तिकं समीपं प्रियतमं पस्पर्शुः स्पृष्टवन्तो यथोक्तैर्ब्रह्मणः संवादादिप्रकारैस्ते हि यस्माच्च हेतोरेनद्ब्रह्म प्रथमः प्रथमाः प्रधानाः सन्त इत्येतद्विदाञ्चकार विदाञ्चक्रुरित्येतद्ब्रह्मेति। यस्मादग्निवायू अपीन्द्रवाक्यादेव विदाञ्चक्रतुः इन्द्रेण ह्युमावाक्यात्प्रथमं श्रुतं ब्रह्मेत्यतस्तस्माद्वै इन्द्रोऽतितरामतिशयेन शेते इवान्यान्देवान्, स ह्येनन्नेदिष्ठं पस्पर्श यस्मात्स ह्येनत्प्रथमो विदाञ्चकार ब्रह्मेति" भा० ११ अन्तरात्मनि "इन्द्रियमिन्द्रलिङ्गमित्यादि" पा० १२ ऐश्वर्य्यान्विते त्रि०। भावे रन्। १३ऐश्वर्य्ये। १४इन्द्रवारुण्यां स्त्री टाप्। राजनि०। "इन्द्रायेन्दो! पवस्वते" ऋ० ९,६४,२२। "तदिन्द्रसन्दिष्टमुपेन्द्र! यद्वचः" माघः। "हरी इन्द्रस्य" निरु०। १५न्दपमात्रे "महोमहेन्द्रस्तमवेक्ष्य वक्षणम्" नैष०। "राष्ट्रस्यैतत् कृत्यतमं राज्ञां चैवाभिषेचनम्। अनिन्द्रमबलं राष्ट्रं दस्यवोऽभिभवन्त्युत" भा० शा० ६७ अ० "देवताद्वन्द्वे उत्तरपदस्यस्य नेन्द्रस्य परस्य न वृद्धिः आग्नेन्द्रम् कर्म सि० कौ० लिङ्गाद्यर्थे च। इन्द्रियम्। इन्द्रियशब्दे विवृतिः। इन्द्रो जीविकास्य देवपथा० कन् तस्य लुप्। इन्द्रस्तत्प्रतिकृतिर्जीविकायति लुपि व्यक्तिवचनत्वात् पु०। इन्द्रो देवताऽस्य अण्। इन्द्रदेवताके हविरादौ "ऐन्द्रं दध्यमावस्यायाम्" श्रुतिः। स्त्रियां ङीप्। "ऐन्द्र्या गार्हपत्यमुपतिष्ठते" श्रुतिः। "ऐन्द्रीतमसुरेश्वरम्"

देवीमा० ऐन्द्री दिक् "उपमितसमासे उत्तरपदइन्द्रः श्रेष्ठत्वद्योतकः मनुजेन्द्रः वारणेन्द्र इत्यादि ।

इन्द्रक न० इन्द्रस्य राज्ञः कं सुखं यत्र । १सभागृहे हेम० । ६त० । २इन्द्रसुखे ।

इन्द्रकर्म्मन् पु० इन्द्रस्येव ऐश्वर्य्यान्वितं कर्म्मास्य । विष्णौ "इन्द्रकर्म्मा महाकर्म्मा कृतकर्म्मा कृतागमः" विष्णुस० ।

इन्द्रकील पु० इन्द्रस्य कील इव अत्युच्चत्वात् । १मन्दरपर्व्वते इन्द्रस्य कील इव । २इन्द्रध्वजे न० "विषमेन्द्रकीलचतुष्पथश्मशानासुपरिष्टात्" सुश्रु० ।

इन्द्रकुञ्जर पु० ६त० । ऐरावते तस्यामृतमन्थनकाले इन्द्रेण ग्रहीतत्वात् तथात्वम् यथाह "श्वेतैर्दन्तैश्चतुर्भिस्तु महाकायस्ततः परम् । ऐरावणो महानागोऽभवद्वज्रभृता धृतः" भा०आ० १८अ० । इन्द्रगजशक्रगजादयोऽप्यत्र ।

इन्द्रकूट पु० इन्द्र ऐश्वर्य्यान्वितः कूटोऽस्य । पर्व्वतभेदे "ततस्तु पर्व्वताः सप्त केशवं समुपस्थिताः । जयन्तो वजयन्तोऽथ नीलो रजतपर्व्वतः । महामेरुः सकैलास इन्द्रकूटश्च नामतः" हरि० १७१ अ० ।

इन्द्रकृष्ट न०कृष्टं कर्षणं भावे क्त ततः अस्त्यर्थे अच् इन्द्रेण इन्द्रहेतुकवर्षणेन कर्षणजातम् । वृष्टिजलसम्पन्ने धान्यभेदे "इन्द्रकृष्टैर्वर्त्तयन्ति धान्यैश्चैव नदीमुखैः" भा०स०५१अ० ।

इन्द्रकोष पु० इन्द्रस्य कोषइव सुखदायकत्वात् । १मञ्चे, २खट्वायाञ्च । [पर्व्वतादयोऽप्यत्र ।

इन्द्रगिरि पु०इन्द्रनामा गिरिः । महेन्द्रपर्व्वते । इन्द्र-

इन्द्रगुरु पु० ६त० । वृहस्पतौ इन्द्राचार्य्यादयोऽप्यत्र ।

इन्द्रगोप पु० इन्द्रो गोपो रक्षकोऽस्य वर्षाभवत्वात्तस्य । वर्षाकालिके कीटभेदे शक्रगोपादयोऽप्यत्र । "अविरलवपुरसुरेन्द्रगोपाः" किरा० । "इन्द्रगोपकवर्णाभां शुक्लवर्णां मनोजवाम्" भा०स०४० अ० । शुभ्रतया वर्णनात् "तरुणयोवनया शक्रगोपकालोहितरागेणांशुकेन" काद० रक्ततया वर्णनाच्च तस्य कीटस्य द्वैविध्यं रक्तश्वेतभेदात् ।

इन्द्रघोष पु० इन्द्र इतिशब्देन विस्पष्टं घुष्यते घुष-कर्म्मणि घञ् । इन्द्रे "इन्द्रघोषस्त्वा वसुभिः पुरस्तात् पातु" यजु० ५,११ । [श्वेतचन्दने राजनि० ।

इन्द्रचन्दन न० इन्द्रप्रियं चन्दनम् शा०त० । हरिचन्दने

इन्द्रचाप पु०इन्द्रे इन्द्रस्वामिके मेघे चापइव । १शक्रधनुषि । "विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः" मेघदू० । "विद्युता सहितः सूर्य्यः सेन्द्रचापे घने यदा" भा०व०२२०अ० । तदुत्पत्तिप्रकारादि वृह०स०उक्तम् इन्द्रायुधशब्दे विवृतिः ६त० । २शक्रस्य शरासने च

इन्द्रचिर्भिटी इन्द्रस्यात्मनःप्रिया चिर्भटी शा०त० । लताभेद । सा च इन्द्रतुल्यवर्णकुसुमा पुष्पान्वितमञ्जरीका दीर्घवृन्ता. युग्मफलान्विता कट्वी शीतवीर्य्या पित्तश्लेष्मकासव्रणदोषकृमिनाशिनी चक्षुष्या च राजनि० ।

इन्द्रच्छन्दस् न० इन्द्र इव सह मेण सहस्रगुच्छेन छाद्यते छद-असुन् नि०नुट् । सहस्रगुच्छे हारभेदे हेम० ।

इन्द्रजनन न० इन्द्रस्यात्मनः जनन देहसम्बन्धभेदः । आत्मनोदेहसम्बन्धभेदे । तदधिकृत्य कृतः ग्रन्थः छ । इन्द्रजननीयं तदधिकारेण कृते ग्रन्थभेदे न० ।

इन्द्रजाल न० इन्द्रेण कौशलाद्यैश्वर्य्येण जालं द्रष्टुर्नेत्रावरणं यथास्थितवस्तुदर्शनाक्षमत्वसाधनात्, इन्द्रस्य परमेश्वरस्य जालं मायेव वा । मन्त्रौषधादिना अन्यथास्थितस्य वस्तुनोऽन्यथात्वेन दर्शनसाधने (कुहक) (वाजी) १पदार्थे २मायारूपे जाले च । "एतएव महान्तोऽस्याः प्रवदन्तीन्द्रजालताम् । एतस्मात् किमिवेन्द्रजालमपरं यद्गर्भवासस्थितं रेतश्चेतति हस्तमस्तकपदप्रोद्भूतनानाङ्कुरम् । पर्य्यायेण शिशुत्वयौवनजरावेशैरनेकैर्वृतं पश्यत्यत्ति शृणोति जिघ्रति तथा गच्छत्यथागच्छति । देहवदु वटधानामपि सुविचार्य्यावलोक्यताम् । क धानाः क च वा वृक्षास्तस्मान्मायेति निश्चित" प०द० "स्थूणाकर्णेन्द्रजालञ्च सौरञ्चापि तथार्ज्जुनः । आग्नेयञ्चापि सौम्यञ्च ससर्ज कुरुनन्दनः" भा०व०२७४अ० । इन्द्रेण इन्द्रकृतेन योगविशेषेण जालम् । ३क्षुद्रोपायभेदे च । इन्द्रजालञ्च द्रव्यविशेषसंयोगेन अद्भुतवस्तुदर्शकव्यापारः (किमिष्टिर) इति वङ्गभाषाप्रसिद्धः मन्त्रद्रव्यविशेषेण वस्तुनोऽन्यथा करणञ्च । तच्च दत्तात्रेयतन्त्रे मन्त्रविशेषसाध्यम् विस्तरेणाभिहितम् । इन्द्रजालतन्त्रे तु ओषधिविशेषेण तथाकरणं यदुक्तं ततोदिङ्मात्रं प्रदर्श्यते । "अथातः संप्रवक्ष्यामि चेन्द्रजालमनुत्तमम्" इत्युपक्रम्य

"अथातः संप्रवक्ष्यामि ओषधीनां विधिं वरे ! येन विज्ञानमात्रेण सर्व्वसिद्धिर्भविष्यति । महाकालस्य वीजानि प्रस्थमेकं समाहरेत् । धात्रीरसेन देवेशि ! सप्त वारान् विभावयेत् । कर्त्तव्या गुटिका तां तु मुखे निक्षिप्य पार्व्वति ! आचिरोपि कालेन स्वयं पारावतो भवेत् । अथातः संप्रवक्ष्यामि शृणु त्वं मम वल्लभे ! । वागिस्य शीर्षं संगृह्य तत्र कृष्णमृत्तिकां पूरयित्वा पुनर्धत्तूरबीजानि वापयेत् यत्काले तानि पुष्पितानि भवन्ति तदा यस्योपरि

निक्षिपेत् स छागो भवति । मयूरशीर्षमादायकृष्णचतुर्दश्यां मृत्तिकां पूरयेत् शणवीजानि वापयेत् यदा फलितः पुष्पितो भवति तदा शणवीजानि शीर्षायां बन्धयेत् मयूरो भवति । कृष्णचतुर्दश्यां मयूरशीर्षमादाय कृष्णमृत्तिकां पूरयेत् कार्पासवीजानि वापयेत् तदा फलिताः पुष्पिता भवन्ति पुष्पफले संगृह्य समस्तं पेषयित्वा अङ्गं विलिप्य पानीयमध्ये प्रविश्य यदा जले तिष्ठति तदा मयूरो भवति । कृष्णकाकशीर्षमादाय काकमाचीवीजानि वापयेत् यदा फलिता पुष्पिता भवति तत्फलं संगृह्य मुखे प्रक्षिप्य काको भवति । काक इव गच्छति मद्यामुद्गीर्णे मोक्षः । पारवतशीर्षमादाय कृष्णमृत्तिकां पूरयित्वा तिलवीजानि वापयेत् क्षीरोदकेन सेचनीयं यदा पुष्पितो भवति तदा मुखे संस्थाप्य अन्तर्हितो भवति । तेषां फलानां चूर्णं कृत्वा तेन चूर्णेन यं स्पृशति स किङ्करो भवति । सर्व्वस्वं ददाति । तानि तिलानि संगृह्य नेत्राञ्जनेन सह पिष्ट्वा कपिलादुग्धेन गुटिकां कारयेत् सप्तरात्रं पाचयेत् तां गुटिकां मुखे निक्षिप्य अन्तर्हितो भवति देवैरपि न दृश्यते मनुष्याणां का कथा । उद्गीर्णे पुरुषो भवति । जीवेद्वर्षशतं स्त्रियः सर्वे जनाश्च वश्या भवन्ति । गृध्रशिरः समादाय कृष्णचतुर्दश्यां कृष्णमृत्तिकायां निक्षिपेत् लशुनवीजानि वापयेत् यदा फलं पुष्पं भवति तदा पुष्यनक्षत्रे पुष्पं गृहीत्वा अञ्जनेन सह कपिलाघृतेन कज्जलं पातयेत् चक्षुरञ्जनीयं यावत् तावत् योजनशतं पश्यति मेदिन्यां, दिवा नक्षत्राण्यपि पश्यति । एवं उष्ट्रगर्द्दभमहिषादीनां दृढ्जीवानां शिरसि यत् यत्वीजं यस्य शिरसि वापयेत् यदा पुष्पितः फलितो भवति तदा यस्य वीजानि मुखे निक्षिप्यन्ते स जीवो भवति नात्र सन्देहः । मातुलङ्गस्य मूलन्तु धुस्तूरवीजकेन च । पलाण्डुपुष्पमादाय सूक्ष्मचूर्णन्तु कारयेत् । योऽस्य गन्धं समाघ्राति स च स्नेहेन पश्यति । दुन्दुभिं पटहांश्चैव शङ्खांश्चैव तु लेपयेत् । एष भूतोपसृष्टानां कुमारीणां गृहेषु च । भूपतिं सेवमानानां तथा तत्कर्म्मजीविनाम् । न चाग्निर्दह्यते वेश्म यत्रैष सोऽगदो भवेत् । पारावतस्य हृदयं चक्षुर्जिह्वा च शोणितम् । अञ्जनं रोचनायुक्तं वनितावशकृत् परम् । कपालं मानुषं गृह्य वानकस्य फलानि च । कर्पूरं मधुसंयुक्तं निघृष्य तिलकेन च । नारी वा पुरुषोऽनेन वश्यो भवति नित्यशः ।

एष कापालिको योगो वशिष्ठस्य शुभं मतम् । नरजिह्वां समुद्धृत्य सूक्ष्मचूर्णन्तु कारयेत् । जलेन च सुशीतेन दापयेत्तद्विचक्षणः । पाने फले च पुष्पे च भक्ष्ये भोज्ये च दापयेत् । प्रजापतिकुलोद्भूता यदि साक्षादरुन्धती सापि रक्ता प्रियं याति नान्यं पुरुषमिच्छति । हरितालं श्मशाने कृष्णचतुर्दश्यां क्षिप्त्वा कुष्ठविमिश्रं ग्राह्यम् अवश्यं वशीभवेत् स नरः । नरतैलं प्रेताम्बरवर्त्तिकं कृत्वा पात्रे रात्रौ प्रज्वाल्यार्कदलस्कन्धे कज्जलं कृत्वा चक्षुषी अभ्यञ्जेत् यं पश्यति स वश्यो भवति । कर्णदन्तमलं लाला स्वदेहाक्षिमलत्रयम् । नासिकोद्भवरक्तञ्च चूर्णमेतद्बलायुतम् । एतत् सर्वं समुद्धृत्य गुटिकां कारयेद्बुधः । पानभोजनके देयं वशीकरणमुत्तमम् । काकजिह्वा वचा कुष्ठमात्मनो रुधिरं स्त्रियः । तद्गात्रदन्नं कञ्चिष्ठा तगरं गौरसर्षपाः । शिवनिर्माल्यसंयुक्तं समभागानि कारयेत् । भोज्ये पानेऽथवा देयं स्त्रीणान्तु वशकारकम् । नित्यं पुरुषमिच्छन्ती मृतमप्यनुगच्छति । कृष्णसर्पस्याङ्गुलप्रमाणं शिरश्छित्त्वास्यास्यं सर्षपादिभिः । पूरयित्वा छायाशुष्कं शोषयेत् । परतः सर्षपान् ग्राहयित्वा तानि यस्मै दीयते स वश्यो भवति । पूगीफलं गिलित्वाऽपानमार्गेण निर्गतं संगृह्य धुस्तूररसान्तरितं कृत्वा सप्त दिनानि पूजयेत् । पुनः कुङ्कुमचन्दनैरधिवास्य यस्मै दीयते स वश्यो भवति । दर्दुरयुग्मं गृहीत्वा तद्धूमेन दाहयेत् । तद्भस्म सह पानेन वश्यकृत् परमो मतः । अजगन्धस्य पत्राणि वचां कुष्ठेन भावयेत् । श्मशानभस्मसंयुक्तं चूर्णं त्रैलोक्येषु दुर्लभम् । अनेनैव तच्चूर्णेन योजयेत् त्रींश्च पादपान् । पुष्पितं फलितं दृष्ट्वा चूर्णं वृक्षाद्विलग्नयेत् । तत् क्षणात् फलते वृक्षो नरनारीषु का कथा । जिह्वामूले सप्तरात्रं सैन्धवेनापि मिश्रितम् । ददाति यस्य पानेषु सोऽपि वश्यो भवेत् क्षणात् । गोपितं सैन्धवञ्चैव वृहतीफलमेव च । लेपमेतत् प्रयोक्तव्यं नरनारीवशङ्करम् । उद्घातः पद्ममलिन आत्मनो रुधिरान्वितम् । स्त्रीपुंसयोः प्रदातव्यं वशीकरणमुत्तमम् । श्वेतार्कं रोचनायुक्तमात्ममूत्रेण पेषयेत् । ललाटे तिलकं कृत्वा त्रैलोक्यं क्षोभयेत् क्षणात् । दृष्टमात्रेण तेनैव सर्वो भवति किङ्करः । श्वेतार्कं चन्दनेनैव रञ्जयेत् सह लेपयेत् । दीयते कस्य चिद्वापि पश्चात् दासो भविष्यति । मधूकं सह तैलेन सार्षपेण तु पेषयेत् । एतेन पाणिमभ्यज्य भर्त्ता सा सहिता स्वपेत् ।

संहृते मैथुनीभावे पतिदासो भविष्यति”। “यानि कानि च बीजान्यङ्कोलतैलेन मेलयेत्। सफलो जायते वृक्षः सिद्धियोग उदाहृतः। शवमुखे बिन्दुमात्रं तत्तैलं निःक्षिपेद् यदि। एकयामं भवेत् जीवो नान्यथा शङ्करोदितम्। शिग्रुबीजस्थितं तैलं पारावतपुरीषकम्। वराहस्य वसायुक्तं गृहीत्वा च समं समम्। गर्दभस्य वसायुक्तं हरितालं मनःशिलाम्। एभिस्तु तिलकं कृत्वा यथा लङ्केश्वरोत्तमः। उलुविष्टां गृहीत्वा त्वेरण्डतैलेन पेषयेत्। यस्याङ्गे निक्षिपेत् बिन्दुं सक्षिप्तो जायते ध्रुवम्। सर्पदन्तं गृहीत्वा तु कृष्णवृश्चिककण्टकम्। कृकलासकसंयुक्तं सूक्ष्मचूर्णन्तु कारयेत्। यस्याङ्गे निक्षिपेच्चूर्णं सद्यो याति यमालयम्। सिन्दूरं गन्धकं तालं समं पिष्ट्वा मनःशिलाम्। तल्लिप्तवस्त्रं शिरसि अग्निवत् दृश्यते ध्रुवम्। अर्कक्षीरं वटक्षीरं क्षीरं डुम्बरसम्भवम्। गृहीत्वा पात्रके क्षिप्ते जलपूर्णं करोति च। दुग्धं तत्र भवेत् सद्यो महाकौतुककौतुकम्। अङ्कोलतैललिप्ताङ्गो दृश्यते राक्षसाकृतिः। पलायन्ते नराः सर्वे पशुपक्षिगजा हयाः। अङ्कोलस्य तु तैलेन दीपं प्रज्वालयेन्नरः। रात्रौ पश्यति भूतानि खेचराणि महीतले। बुधे वा शनिवारे वा कृकलासं ग्राह्य यत्नतः। यत्र मूत्रयते यत्र कृकलासं तत्र निःक्षिपेत्। निखनेद्भूमिमध्येषु उद्धृते च पुनः सुखी। नपुंसकं भवेत् सद्यं नान्यथा शङ्करोदितम्। गन्धकं हरितालञ्च गोमूत्रञ्च विषं तथा। सूक्ष्मचूर्णमयं कृत्वा किञ्चिद्वह्नि विनिःक्षिपेत्। विघ्नाः सर्वे पलायन्ते यथा युद्धेषु कातराः” दत्तात्रेय तन्त्रे ११प०

इन्द्रजालिक त्रि० इन्द्रजाल शिल्पतयाऽस्त्यस्य ठन्। इन्द्रजालकारके। इनि इन्द्रजालीत्यप्यत्र स्त्रियां ङीप्।

इन्द्रजित् पु० इन्द्रं जितवान् जि–भूते क्विप्। दितिवंशीये असुरभेदे चाक्षुषमन्वन्तरे “दित्याः पुत्रद्वयं जज्ञे कश्यपादिति विश्रुतम्। हिरण्यकशिपुश्चैव हिरण्याक्षश्च वीर्यवान्”। इत्युपक्रम्य तत्पुत्रपौत्रादिवर्णने “इन्द्रजित् सत्रजिच्चैव वज्रनाभस्तथैव च” हरिवं० ३अ०। २रावणपुत्रे मेघनादे च “पुत्रमिन्द्रजितं वीरं रावणः प्रत्यधावत। जहि राममित्रघ्न सुग्रीवञ्च सलक्ष्मणम्। त्वया हि मम सत्पुत्र! यशो दीप्तमुपार्ज्जितम्। जित्वा वज्रधरं संख्ये सहस्राक्षम् शचीपतिम्” भा०व० २८७। “तौ वीरौ शरबन्धेन बद्धाविन्द्रजिता रणे” भा०व० २८८ अ०।

इन्द्रजिद्धन्तृ पु० इन्द्रजितं हन्ति हन–तृच् ६त०। दशरथात्मज लक्ष्मणे। तद्धननकथा। “अविध्यदिन्द्रजित्तीक्ष्णैः सौमित्रिं मर्म्मभेदिभिः। सौमित्रिश्चानलस्पर्शैरविध्यद्रावणिं शरैः”। इत्युपक्रम्य “एकेनास्य धनुष्मन्तं बाहुं देहादपातयत्। द्वितीयेन शरेणास्य भुजं भूमौ न्यपातयत्। तृतीयेन तु बाणेन पृथुधारेण भास्वता। जहार सुनसञ्चापि शिरो भ्राजिष्णुकुण्डलम्। विनिकृत्तभुजस्कन्धं कबन्धं भीमदर्शनम्। तं हत्वा सूतमप्यस्त्रैर्जघान बलिनां वरः” भा०व०२२८अ०।

इन्द्रतापन पु० इन्द्रं तापयति तप+णिच्+ल्यु। १असुरभेदे “इन्द्रतापनवातापी केतुमान् बलदर्पितः” असुरनामोत्कीर्त्तने” हरिवं० २६अ०। २मेघनादे च। दशग्रीवश्च बाली च मेघराजो दशावरः। टिट्टिभोविटभूतश्च संह्रादश्चेन्द्रतापनः” भा०स०प००अ० वरुणसभावर्णने।

इन्द्रतूल न० इन्द्रस्येव तूलमाकाशे उड्डीयमानत्वात्। आकाशे मरुता चाल्यमाने कार्पासे सूत्रे त्रिका०।

इन्द्रतोया स्त्री इन्द्रमैश्वर्यान्वितं तोयमस्याः, इन्द्रेण पूरितं तोयमस्या वा। गन्धमादनसमीपस्थे नदीभेदे। “इन्द्रतोयां समासाद्य गन्धमादनसन्निधौ” भा० अनु० प० २४।

इन्द्रदमन पु० “बाणस्य चेन्द्रदमनो लौहित्यामुदपद्यत” हरिवं०३अ० उक्ते बाणासुरपुत्रभेदे।

इन्द्रदारु पु० इन्द्रस्य तद्ध्वजस्य साधनं दारु। देवदारुवृक्षे। इन्द्रध्वजशब्दे ९४६ पृष्ठे तस्य तद्ध्वजसाधनत्वम् दृश्यम्। इन्द्रद्रुमादयोऽप्यत्र।

इन्द्रद्युम्न इन्द्रस्येव द्युम्नं धनमस्य। भालवेये १ऋषिभेदे २असुरावतारराजभेदे ३राजभेदे च। तत्र असुररूपोन्नृपः कृष्णेन हतः यथा। “इन्द्रद्युम्नोहतः कोपाद्यवनश्च कशेरुमान्। हतः सौभपतिः शाल्वस्त्वया सौभं च पातितम्” भा० व० १२ अध्याये कृष्णं प्रति व्यासवाक्यम्। ऋषिभेदस्तु। “ततस्ते ब्राह्मणाः सर्वे बकं दाल्भ्यमपूजयन्नित्युपक्रम्य “द्वैपायनो नारदश्च जामदग्न्यः पृथुश्रवाः। इन्द्रद्युम्नोभालविश्च कृतचेताः सहस्रपात्” इति कतिचित् ब्राह्मणानभिधायाह। “एते चान्ये च बहवोब्राह्मणा संशितव्रताः। अजातशत्रुमानर्चुः पुरन्दरमिवर्षयः” भा० व० २६ अ०। राजभेदस्तु मार्कण्डेयादपि प्राचीनः तत्कथा भा०व० १९८अ०। युधिष्ठिर प्रति मार्कण्डेयवाक्यम्। “स तानुवाचास्ति खलु राजर्षिरिन्द्रद्युम्नो नाम क्षीण-

पुण्यस्त्रिदिवात् प्रच्युतः कीर्त्तिर्मे व्युच्छिन्नेति स मामुपातिष्ठद्य प्रत्यभिजानाति मां भवानिति। तमहमब्रवं न वयं वासायनिकाः कार्य्यचेष्टाकुलत्वान्न प्रत्यभिजानाम्यात्मनोऽर्थानामनुष्ठानं न शरीरोपतापेनात्मनः समारम्भामोऽर्थानामनुष्ठानं स मामुवाच अस्त्यन्यस्त्वत्तश्चिरजात इति तमहमब्रवम् अस्ति खलु हिमवति प्रावारकर्णो नामोलूकः प्रतिवसति स मत्तश्चिरजातो भवन्तं यदि जानीयादितः प्रकृष्टे चाध्वनि हिमवांस्तत्रासौ प्रतिवसतीति। ततः स मामश्वो भूत्वा तत्रावहद्यत्र बभूवोलूकः अथैनं स राजा पप्रच्छ प्रतिजानाति मां भवानिति। स मुहूर्त्तमिव ध्यात्वाऽब्रवीदेनं नाभिजानामि भवन्तमिति। स एवमुक्त इन्द्रद्युम्नः पुनस्तमुलूकमब्रवीद्राजर्षिः। अथास्ति कश्चिद्भवतः सकाशाच्चिरजात इति स एवमुक्तोऽब्रवीदस्ति खल्विन्द्रद्युम्नं नाम सरस्तस्मिन्नाडीजङ्घो नाम बकः प्रतिवसति सोऽस्मत्तश्चिरजाततरस्तं पृच्छेति। तत इन्द्रद्युम्नो माञ्चोलूकमादाय तत्सरोऽगच्छद्यत्रासौ नाडीजङ्घो नाम बको बभूव। सोऽस्माभिः पृष्टो भवानिममिन्द्रद्युम्नं राजानमभिजानाति स एनं मुहूर्त्तं ध्यात्वाऽब्रवीन्नाभिजानाम्यहमिन्द्रद्युम्नं राजानमिति ततः सोऽस्माभिः पृष्टः कश्चिद्भवतोऽन्यश्चिरजाततरोऽस्तीति स नोऽब्रवीदस्ति खल्वस्मिन्नेव सरस्यकूपारो नाम कच्छपः प्रतिवसति स मत्तश्चिरजाततरः स यदि कथञ्चिदभिजानीयादिमं राजानं तमकूपारं पृच्छध्वमिति। ततः स बकस्तमकूपारं कच्छपं विज्ञापयामास। अस्त्यस्माकमभिप्रेतं भवन्तं कञ्चिदर्थमभिप्रष्टुं साध्वागम्यतां तावदिति तच्छ्रुत्वा कच्छपस्तस्मात् सरसः उत्थायाभ्यगच्छद्यत्र तिष्ठामो वयं तस्य सरसस्तीरे आगतञ्चैनं वयमपृच्छाम भवानिममिन्द्रद्युम्नं राजानमभिजानातीति। स मुहूर्त्तं ध्यात्वा वाष्पसम्पूर्णनयन उद्विग्नहृदयो वेपमानो विसंज्ञकल्पः प्राञ्जलिरब्रवीत्। कथमहमेनं न प्रत्यभिज्ञास्यामीह ह्यनेन सहस्रकृत्वश्चितिषु यूपा आहिताः। सरश्चेदमस्य दक्षिणाभिर्द्दत्ताभिर्गोभिरतिक्रममाणाभिः कृतम्। अत्र चाहं प्रतिवसामीति। अथैतत् सकलं कच्छपेनोदाहृतं श्रुत्वा तदनन्तरं देवलोकाद्देवरथः प्रादुरासीद्वाचश्चाश्रूयन्त इन्द्रद्युम्नं प्रति प्रस्तुतस्ते स्वर्गो यथोचितं स्थानं प्रतिपद्यस्व कीर्त्तिमानस्यव्यग्रो याहीति"।

एतत्सरश्चोक्तवाक्ये वर्णितं तच्चाधिकृत्य। "इन्द्रद्युम्नसरः प्राप्य हंसकूटमतीत्य च। शतशृङ्गं महाराज तापसः समतप्यत" इत्युक्तेः शतशृङ्गपर्व्वतसमीपे हंसकूटानन्तरं तत्सरः इति गम्यते। "हंसकूटस्य यच्छृङ्गमिन्द्रद्युम्नसरः प्रति" इति हरिवं० १५७ उक्तेश्च हंसकूटसन्निकृष्टत्वमस्यावगम्यते। पुरुषोत्तममूर्त्तिप्रकाशकथापरः पुरुषोत्तमशब्दे तद्विवृतिर्वक्ष्यते।

इन्द्रद्रु पु० इन्द्रस्य इन्द्रध्वजार्थो द्रुः। १अर्ज्जुनवृक्षे। तस्य तद्ध्वजनिर्माणे प्रथमोपात्तत्वात् तथात्वम्। इन्द्रध्वजशब्दे विवृतिः। इन्द्रनामा द्रुः। २कुटजवृक्षे राजनि०।

इन्द्रद्रुम न० इन्द्रद्रुवत् विग्रहः। अर्ज्जुनवृक्षे शब्दर०।

इन्द्रधनुस् न० इन्द्रे इन्द्रस्वामिके मेघे धनुरिव। इन्द्रायुधशब्दे वक्ष्यमाणे पदार्थे "विद्युतोऽशनिमेघांश्च रोहितेन्द्रधनूंषि च" मनुः। तस्य ऋजुत्वे रोहितत्वम्। वक्रत्वे इन्द्रधनुष्ट्वमिति भेदः।

इन्द्रध्वज पु० इन्द्रस्य तत्सन्तोषार्थो ध्वजः। भाद्रशुक्लद्वादश्यां स्वराज्ये वृष्ट्यादिशस्यवृद्ध्यर्थं तत्प्रीतये राज्ञा क्रियमाणे ध्वजे तदुत्पत्तितत्करणप्रकारादि दर्शितं वृहत्संहितायां यथा

"ब्रह्माणमूचुरमरा भगवन्नशक्ताः स्म नासुरान् समरे। प्रतियोधयितुमतस्त्वां शरण्य शरणं समुपयाताः। देवानुवाच भगवान् क्षीरोदे केशवः स वः केतुम्। यं दास्यति तं दृष्ट्वा नाजौ स्थास्यन्ति वो दैत्याः। लब्धवराः क्षीरोदं गत्वा ते तुष्टुवुः सुराः सेन्द्राः। श्रीवत्साङ्कं कौस्तुभमणिकिरणोद्भासितोरस्कम्। श्रीपतिमचिन्त्यमसमं समन्ततः सर्वदेहिनां सूक्ष्मम्। परमात्मानमनादिं विष्णुमविज्ञातपर्यन्तम्। तैः संस्तुतः स देवस्तुतोष नारायणो ददौ चैषाम्। ध्वजमसुरसुरवधूमुखकमलवनतुषारतीक्ष्णांशुम्। तं विष्णुतेजोभवमष्टचक्रे रथे स्थितं भास्वति रत्नचित्रे। देदीप्यमानं शरदीव सूर्य्यं ध्वजं समासाद्य मुमोद शक्रः। सकिङ्किणीजालपरिष्कृतेन स्रक्छत्रघण्टापिटकान्वितेन। समुच्छ्रितेनामरराड् ध्वजेन निन्ये विनाशं समरेऽरिसैन्यम्। उपरिचरस्यामरपो वसोर्ददौ चेदिपस्य वैणुमयीम्। यष्टिं तां स नरेन्द्रो विधिवत्सम्पूजयामास। प्रीतो महेन मघवान् प्राहैवं ये नृपाः करिष्यन्ति। वसुवद्धेमवन्तस्ते भुवि सिद्धाज्ञा भविष्यन्ति। मुदिताः प्रजाश्च तेषां भयरोगविवर्जिताः प्रभूतान्नाः। ध्वज एव चाभिधास्यति जगति निमित्तैः फलं सदसत्। पूजा तस्य नरेन्द्रैर्बलवृद्धिजयार्थिभिर्यथा पूर्वैः। शक्राज्ञया प्रयुक्ता तामागमतः प्रवक्ष्यामि। तस्य विधानं शुभकरणदिवस-

नक्षत्रमङ्गलमुहूर्त्तैः । प्रास्थानिकैर्वनमियाद्दैवज्ञः सूत्रधारश्च । उद्यानदेवतालयपितृवनवल्मीकमार्गचितिजाताः । कुब्जोर्द्ध्वशुष्ककण्टकिवल्लीवन्दाकयुक्ताश्च । बहुविहगालयकोटरपवनानलपीड़िताश्च ये तरवः । ये च स्युः स्त्रीसंज्ञा न ते शुभाः शक्रकेत्वर्थे । श्रेष्ठोऽर्ज्जुनोऽश्वकर्णः प्रियकधवोदुम्बराश्च पञ्चैते । एतेषामन्यतमं प्रशस्तमथवाऽमरं वृक्षम् । गौरासितक्षितिभवं सम्पूज्य यथाविधि द्विजः पूर्व्वम् । विजने समेत्य रात्रौ स्पृष्ट्वा ब्रूयादिमं मन्त्रम् । 'यानीह वृक्षे भूतानि तेभ्यः स्वस्ति नमोऽस्तु वः । उपहारं गृहीत्वेमं क्रियतां वासपर्य्ययः । पार्थिवस्त्वां वरयते स्वस्ति तेऽस्तु नगोत्तम ! । ध्वजार्थं देवराजस्य पूजेयं प्रतिगृह्यताम्' । छिन्द्यात् प्रभातसमये वृक्षमुदक्प्राङ्मुखोऽपिवा भूत्वा । परशोर्जर्जरशब्दो नेष्टः स्निग्धो घनश्च हितः । नृपजयदमविध्वस्तं पतनमनाकुञ्चितं च पूर्व्वोदक् । अविलग्नं चान्यतरौ विपरीतमतस्त्यजेत्पतितम् । छित्त्वाग्रे चतुरङ्गुलमष्टौ मूले जले क्षिपेद्यष्टिम् । उद्धृत्य पुरद्वारं शकटेन नयेन्मनुष्यैर्वा । अरभङ्गे बलभेदो नेम्या नाशो बलस्य विज्ञेयः । अर्थक्षयोऽक्षभङ्गे तथाणिभङ्गे च वर्धकिनः । भाद्रपदशुक्लपक्षस्याष्टम्यां नागरैर्वृतो राजा । दैवज्ञसचिवकञ्चुकिविप्रप्रमुखैः सुवेषधरैः । अहताम्बरसंवीतां यष्टिं पौरन्दरीं पुरं पौरैः । स्रग्गन्धधूपयुक्तां प्रवेशयेच्छङ्खतूर्यरवैः । रुचिरपताकातोरणवनमालालङ्कृतं प्रहृष्टजनम् । सम्मार्जितार्चितपथं सुवेषगणिकाजनाकीर्णम् । अभ्यर्चितापणगृहं प्रभूतपुण्याहवेदनिर्घोषम् । नटनर्त्तकगेयज्ञैराकीर्णचतुष्पथं नगरम् । तत्र पताकाः श्वेता विजयाय भवन्ति रोगदाः पीताः । जयदाश्च चित्ररूपा रक्ताः शस्त्रप्रकोपाय । यष्टिं प्रवेशयन्तीं निपातयन्तो भयाय नागाद्याः । बालानां तलशब्दे सङ्ग्रामः सत्त्वयुद्धे वा । संतक्ष्य पुनस्तक्षा विधिवद्यष्टिं प्ररोपयेद्यन्त्रे । जागरमेकादश्यां नरेश्वरः कारयेद्वासाः । सितवस्त्रोष्णीषधरः पुरोहितः शाक्रवैष्णवैर्मन्त्रैः । जुहुयादग्निं सांवत्सरो निमित्तानि संगृह्णीयात् । इष्टोद्रव्याकारः सुरभिः स्निग्धो घनोऽनलोऽर्चिष्मान् । शुभकृदतोऽन्यो नेष्टो यात्रायां विस्तरोऽभिहितः । स्वाहावसानसमये स्वयमुज्ज्वलार्चिः स्निग्धः प्रदक्षिणशिखो हुतभुग् नृपस्य । गङ्गादिवाकरसुताजलचारुहारां धात्रीं समुद्ररसनां वशगां करोति । चामीकराशोककुरुण्टकाब्जवैदूर्य्यनीलोत्पलसन्निभेऽग्नौ न । विध्वान्तमन्तर्भवनेऽवकाशं करोति रत्नांशुहतं नृपस्य । येषां रथौघार्णवमेघदन्तिनां समस्वनोऽग्निर्यदि वापि दुन्दुभेः । तेषां मदान्धेभघटाविघट्टिता भवन्ति याने तिमिरोपमा दिशः । ध्वजकुम्भहयेभभूभृतामनुरूपे वशमेति भूभृताम् । उदयास्तधराधराधरा हिमवद्विन्ध्यपयोधरा धरा । द्विरदमदमहीसरोजलाजैर्घृतमधुना च हुताशने सगन्धे । प्रणतनृपशिरोमणिप्रभाभिर्भवति पुरश्छुरितेव भूर्नृपस्य । उक्तं यदुत्तिष्ठति शक्रकेतौ शुभाशुभं सप्तमरीचिरूपैः । तज्जन्मयज्ञग्रहशान्तियात्राविवाहकालेष्वपि चिन्तनीयम् । गुडपूपपायसाद्यैर्विप्रानभ्यर्च्च्य दक्षिणाभिश्च । श्रवणेन द्वादश्याम् उपोष्याऽन्यत्र वा श्रवणात् । शक्रकुमार्य्यः कार्य्याः प्राह मनुः सप्त पञ्च वा तज्ज्ञैः । नन्दोपनन्दसंज्ञे पादेनार्द्धेन चोच्छ्रायात् । षोड़शभागाभ्यधिके जयविजये द्वे वसुन्धरे चान्ये । अधिका शक्रजनित्री मध्येऽष्टांशेन चैतासाम् । प्रीतैः कृतानि विबुधैर्यानि पुरा भूषणानि सुरकेतोः । तानि क्रमेण दद्यात् पिटकानि विचित्ररूपाणि । रक्ताशोकनिकाशं चतुरस्रं विश्वकर्म्मणा प्रथमम् । रसना स्वयम्भुवा शङ्करेण चानेकवर्णधरी ! षडस्रि नीलरक्तं तृतीयमिन्द्रेण भूषणं दत्तम् । असितं यमश्चतुर्थं मसूरकं कान्तिमदयच्छत् । मञ्जिष्ठाभं वरुणः षडस्रि तत्पञ्चमं जलोर्मिनिभम् । मायूरं केयूरं षष्ठं वायुर्जलदनीलम् । स्कन्दः स्वं केयूरं सप्तममददद्ध्वजाय बहुचित्रम् । अष्टममनलज्वालासङ्काशं हव्यभुग्दत्तम् । वैदूर्य्यसदृशमिन्दुर्नवम् ग्रैवेयकं ददावन्यत् । रथचक्राभं दशमं सूर्य्यस्त्वष्टा प्रभाचयैर्युक्तम् । एकादशमुद्दिशं विश्वे देवाः सरोजसङ्काशम् । द्वादशमपि च निवशं मुनयो नीलोत्पलाभासम् । किञ्चिद्ध्वजोर्ध्वनिर्गतमुपरि विशालं त्रयोदशं केतोः । शिरसि वृहस्पतिशुक्रौ लाक्षारससन्निभं ददतुः । यद्यद्येन विनिर्मितममरेण विभूषणं ध्वजस्यार्थे । तत्तत्तद्दैवत्यं विज्ञातव्यं विपश्चिद्भिः । ध्वजपरिमाणत्र्यंशः परिधिः प्रथमस्य भवति पिटकस्य । परतः प्रथमात्प्रथमादष्टांशाष्टांशहीनानि । कुर्यादहनि चतुर्थे पूरणमिन्द्रध्वजस्य शास्त्रज्ञः । मनुना चागमगीतान् मन्त्रानेतान् पठेन्नियतः । 'हरार्कवैवस्वतशक्रसोमैर्धनेशवैश्वानरपाशभृद्भिः । महर्षिसिद्धैः सदिगप्सरोभिः शुक्राङ्गिरःस्कन्दमरुद्गणैश्च । यथा त्वमूर्जस्कर ! नैकरूपैः समर्चितस्त्वाभरणैरुदारैः । तथेह तान्याभरणानि देव ! शुभानि सम्प्रीतमना गृहाण । अजोऽव्ययः शाश्वत एकरूपो विष्णुर्वराहः पुरुषः पुराणः । त्वमन्तकः सर्व्वहरः कृशानुः सहस्रशीर्षा शतमन्युरीड्यः ।

कविं सप्तजिह्वं त्रातारं त्वाम् इन्द्रमवितारं सुरेशम् । शक्रं हुतहव्यं सुषेणम् अस्माकं वीरा उत्तरे भवन्तु"। प्रपूरणे चोच्छ्रयणे प्रवेशे स्नाने तथा माल्यविधौ विसर्गे । पठेदिमान्नृपतिः सोपवासो मन्त्रांश्छुभान् पुरुहूतस्य केतोः । छत्रध्वजादर्शफलार्धचन्द्रैर्विचित्रमालाकदलीक्षुदण्डैः । सव्यालसिंहैः पिटकैर्गवाक्षैरलङ्कृतं दिक्षु च लोकपालैः । अच्छिन्नरज्ज्वा दृढकाष्ठमातृकं विशिष्टयन्त्रार्गलपादतोरणम् । उत्थापयेल्लक्ष्म सहस्रचक्षुषः सारद्रुमाभग्नकुमारिकान्वितम् । अविरतजनरावं मङ्गलाशीःप्रणामैः पटुपटहमृदङ्गैः शङ्खभेर्यादिभिश्च । श्रुतिविहितवचोभिः पापठद्भिश्च विप्रैरशुभरहितशब्दं केतुमुत्थापयीत । फलदधिघृतलाजाक्षौद्रपुष्पाग्रहस्तैः प्रणिपतितशिरोभिस्तुष्टुवद्भिश्च पौरैः । धृतमनिमिषभर्त्तुः केतुमीशः प्रजानाम् अरिनगरनताग्रं कारयेद्विड्वधाय। नातिद्रुतं न च विलम्बितमप्रकम्पम् अध्वस्तमाल्यपिटकादिविभूषणं च । उत्थानमिष्टमशुभं यदतो ऽन्यथा स्यात् तच्छान्तिभिर्नरपतेः शमयेत्पुरोधाः । क्रव्यादकौशिककपोतककाककङ्कैः केतुस्थितैर्महदुशन्ति भयं नृपस्य । चाषेण चापि युवराजभयं वदन्ति श्येनो विलोचनभयं निपतन् करोति । छत्रभङ्गपतने नृपमृत्युस्तस्करान्मधु करोति निलीनम् । हन्ति चाथ पुरोहितमुल्का पार्थिवस्य महिषीमशनिश्च । राज्ञीविनाशं पतिता पताका करोत्यवृष्टिं पिटकस्य पातः । मध्याग्रमूलेषु च केतुभङ्गो निहन्ति मन्त्रिक्षितिपालपौरान्। धूमावृते शिखिभयं तमसा च मोहो व्यालैश्च भग्नपतितैर्न भवन्त्यमात्याः । ग्लायन्त्युदक्प्रभृति च क्रमशो द्विजाद्या भङ्गे च वर्द्धकिवधः कथितः कुमार्याः । रज्जूत्सङ्गच्छेटने बालपीडा राज्ञो मातुः पीडनं मातृकायाः । यद्यत्कुर्य्युर्बालकाश्चारणा वा तत्तत्तादृग्भावि पापं शुभं वा । दिनचतुष्टयमुत्थितमर्चितं समभिपूज्य नृपो ऽह्नि पञ्चमे । प्रकृतिभिः सह लक्ष्म विसर्जयेद् बलभिदः स्वबलाभिविवृद्धये । उपरिचरवसुप्रवर्त्तितं नृपतिभिरप्यनु सन्ततं कृतम् । विधिमिममनुमन्य पार्थिवो न रिपुकृतं भयमाप्नुयादिति" ध्वजप्रमाणादि ति° त° कालि° पु° उक्तं यथा । "अर्ज्जुनो ऽप्यश्वकर्णश्च प्रियकोधवएव च । औडुम्बरश्च पञ्चैते केत्वर्थे सत्तमाः स्मृताः । अन्ये च देवदार्वाद्याः शालाद्याश्च तरवस्तथा । तत्र वृक्षं तुदेदादौ सूत्रदा मन्त्रमिमं पठेत्" । तुदेत् छेदयेत् । "यानि वृक्षे तु भूतानि तेभ्यः स्वस्ति नमोऽस्तु वः । उपहारं गृहीत्वेमं क्रियतां वासपर्य्ययः । पार्थिवस्त्वां वरयते स्वस्ति ते ऽस्तु नगोत्तम ! । ध्वजार्थं देवराजस्य पूजेयं प्रतिगृह्यताम्" । ततो ऽपरेह्नि तं छित्वा मूलमष्टाङ्गुलं पुनः । जले क्षिपेत्तदग्रस्य छित्त्वैवं चतुरङ्गुलम् । ततो नीत्वा पुरद्वारं केतुं निर्माय तत्र वै । शुक्लाष्टम्यां भाद्रपदे केतुं वेदिं प्रवेशयेत् । द्वाविंशद्धस्तमानस्तु अधमः केतुरुच्यते । द्वात्रिंशत्तु ततो ज्यायान् द्वाचत्वारिंशदुत्तमः । कुमार्य्यः पञ्च कर्त्तव्याः शक्रस्य नृपसत्तम ! । शालमय्यस्तु ताः सर्व्वास्त्वपराः शक्रमातृकाः । केतोः पादप्रमाणेन कार्य्याः शक्रकुमारिकाः । मातृकार्द्धप्रमाणास्तु यन्त्रं हस्तद्वयं तथा । एवं कृत्वा कुमारीश्च मातृका केतुमेव च । एकादश्यां सिते पक्षे यष्टीनामधिवासनम् । अधिवास्य ततो यष्टीर्गन्धद्वारादिमन्त्रकैः । द्वादश्यां मण्डलं कृत्वा वासवं विस्तृतात्मकम् । अच्युतं पूजयित्वादौ शक्रं पश्चात् प्रपूजयेत् । शक्रस्य प्रतिमां कुर्य्यात् कानकीं दारवीं तथा" कानकीं कनकमयीम् "अन्यतैजसभूतां वा सर्व्वाभावे तु मृण्मयीम् । तां मण्डलस्य मध्ये तु पूजयित्वा विशेषतः । ततः शुभे मुहूर्त्ते तु केतुमुत्थापयेन्नृपः । "वज्रहस्त ! सुरारिघ्न ! बहुनेत्र ! पुरन्दर ! । क्षेमार्थं सर्व्वलोकानां पूजेयं प्रतिगृह्यताम् । एह्येहि सर्व्वामरसिद्धसङ्घैरभिष्टुतो वज्रधरामरेश ! । समुत्थितस्त्वं श्रवणाद्यपादे गृहाण पूजां भगवन्नमस्ते" । इति मन्त्रेण तन्त्रेण नानानैवेद्यवन्दनैः । घटेषु दश दिक्पालान् ग्रहांश्च परिपूजयेत् । साध्यादीन् सकलान् देवान् मातॄः सर्व्वास्त्वनुक्रमात् । ततः शुभे मुहूर्त्ते तु स्थानिवर्द्धकिसंयुतः । केतूत्थानभूमिन्तु यज्ञवेद्यास्तु पश्चिमे । विप्रैः पुरोहितैः सार्द्धं गच्छेद्राजा सुमङ्गलैः । रज्जुभिः पञ्चभिर्बद्धं यन्त्रश्लिष्टं समातृकम् । कुमारीभिश्च संयुक्तं दिक्पालानाञ्च पट्टकैः । यथावर्णैर्यथादेशैर्योजितैर्वस्त्रवेष्टितैः । युतं तं किङ्किणीजालैर्वृहद्घण्टाढ्यचामरैः । चित्रमाल्याम्बरैश्चापि चतुर्भिः परितोरणैः । उत्थापयेन्महाकेतुं राजामात्यैः शनैः शनैः । प्रतिमां तां नयेन्मूलं केतोः शक्रं विचिन्तयन् । यजेत्तु पूर्व्ववत्तत्र शचीं मातलिमेव च । जयन्तं तनयं तस्य वज्रमैरावतं तथा । ग्रहांश्चाप्यर्च्चयेत् दिक्पालान् सर्व्वांश्च गणदेवताः । पूजितानाञ्च देवानां शक्रहोमं समाचरेत् । होमान्ते तु बलिं दद्यात् वासवाय महात्मने । तिलं घृतं चाक्षतञ्च पुष्पं दूर्व्वां तथैव च । एतैस्तु जुहुयादेतान् स्वैः स्वैर्मन्त्रैर्नरोत्तमः । ततोहो-

मानमाने तु ब्राह्मणानपि भोजयेत्। एवं प्रपूजयेन्नित्यं सप्तरात्रं दिने दिने। त्रातारमिति मन्त्रोऽयं वासवस्य परः प्रियः। एवं कृत्वा दिवाभागे शक्रोत्थापनमादितः। श्रवणर्क्षयुतायाञ्च द्वादश्यां पार्थिवः स्वयम्। अन्त्यपादे भरण्यास्तु निशि शक्रं विसर्जयेत्। सुप्तेषु सर्वलोकेषु यथा राजा न पश्यति। "सार्द्धं सुरासुरगणैः पुरन्दर! शतक्रतो!। उपहारं गृहीत्वेमं महेन्द्रध्वज गम्यताम्"। उत्पाते सप्तरात्राणि तथोपप्लवदर्शने। व्यतीत्य शनि-भौमौ च अन्यर्क्षेऽपि विसर्जयेत्। यस्मिन्कस्मिन् दिने चैव स्नतकान्ते विसर्जयेत्। तथा रक्षेन्नृपः केतुं न पतेच्छकुनिर्यथा। शनैः शनैः पातयेत्तं यथोत्थापनमादितः। विसृष्टं शक्रकेतुं तं सालङ्कार तथा निशि। क्षिपेदनेन मन्त्रेण अगाधे सलिले नृपः। "तिष्ठ केतो! महाभाग! यावत्संवत्सरं जले। भवाय सर्वलोकानामन्तराय-विनाशक!"। उत्थापयेत्तूर्य्यरवैः सर्वलोकस्य वै पुरः। एवं यः कुरुते पूजां वासवस्य महात्मनः। न तस्य राज्ये दुर्भिक्षं नतयो नाप्यधर्मकृत्"। "इन्द्रध्वजसमुत्थान प्रमादाच्च कृतं यदि। तदा द्वादशमे वर्षे कर्त्तव्यं नान्तरा पुनः" ति०त० भविष्य०। पञ्चमाष्टमदिनयोर्विसर्जने शक्यमेक्षया व्यवस्था। इन्द्रकेतुशक्रध्वजादयोऽप्यत्र।

इन्द्रनक्षत्र न०। इन्द्रस्वामिकं नक्षत्रम्। १ज्येष्ठानक्षत्रे तस्य तत्स्वामिकत्वात् तथात्वम्। अश्लेषाशब्दे ४९९पृष्ठे नक्षत्रेश्वरा उक्ताः। इन्द्रनामकं नक्षत्रम्। २फल्गुनीनक्षत्रे च। फल्गुनीनक्षत्रस्य इन्द्रनामकत्वमाह शत०ब्रा० २,१,२,११। यथा "फल्गुनीष्वग्नी आदधीत। एता वा इन्द्र-नक्षत्रं यत्फल्गुन्योऽप्यस्य प्रतिनाम्न्योऽर्ज्जुनोह वै नामेन्द्रो-यदस्य गुह्यं नामार्ज्जुन्यो वै नामैतास्ता एतत् परोक्षमाच-क्षते फल्गुन्य इति कोऽह्येतस्य गुह्यं नाम ग्रहीतुम् इन्द्रो वै यजमानस्तत्तस्य एवैतन्नक्षत्रे अग्नी आधत्ते"

इन्द्रनेत्र न० ६त०। १शक्रनेत्रे २सहस्रसंख्यायाञ्च।

इन्द्रनील पु० इन्द्रइव नीलः श्यामः। (पान्ना) इति ख्याते मरकतमतमणौ" तल्लक्षणमुक्तं रत्नपरीक्षायाम् "क्षीरमध्ये क्षिपेन्नीलं क्षीरञ्चेन्नीलतां व्रजेत्। इन्द्रनील इति ख्यातः सर्व्वरत्नोत्तमोत्तमः"। अस्य नीलवर्णत्वं च रघौ गङ्गायमुनासंगमे यमुनासादृश्याय वर्णितम् यथा "क्वचित् प्रभालेपिभिरिन्द्रनीलैर्मुक्तामयी यष्टिरिवानुविद्धा अन्यत्र माला सितपङ्कजानामिन्दीवरैरुत्खचितान्तरेव" "प्राप्येन्द्रनीलं किमुतोन्मयूखम्" रघुः। "एकं मुक्तागुण-मिव भुवः स्थूलमध्येन्द्रनीलम्" "पेशलैरिन्द्रनीलैः"मेघदू०। अस्य सिंहलद्वीपसम्भवत्वे महानीलसंज्ञा यथा हि "महा-महानीलशिलारुचः पुरः" माघव्याख्यायां मल्लिनाथेन "सिंहलास्याकरोद्भूता महानीलास्तु ते स्मृताः" इति अग-स्त्यवाक्यं प्रमाणतयोपन्यस्तम्। "वापीष्वन्तर्महानीलद-लासु" माघः वाख्याने तेन तदेवोक्तम्।

इन्द्रपत्नी स्त्री ६त०। १पुलोमजायां शच्याम्। "उताहमस्मि-वीरिणीन्द्रपत्नी मरुत् सखा विश्वस्मादिन्द्र उत्तरः" ऋ० १०,८६,९। इन्द्रस्य पतिः पालयित्री 'सपूर्व्वाच्चेति' पा० ङीप् नुक् च। २इन्द्रपालयित्रीषु इडादिषु तिसृषु देवीषु च "होता यक्षत्तिस्रोदेवीर्न भेषजं त्रयस्त्रिधातवोऽपस इडासरस्वती भारती महीः। इन्द्रपत्नीर्हविष्मतीः" यजु० २८,८। "इन्द्रपत्नीः इन्द्रस्य पालयित्र्यः, वेददी० शची तु शुक्रग्रहस्य प्रत्यधिदेवता "शची प्रत्यधिदैवतमिति शुक्र-ध्यानम्। विवाहादौ पूजनीयषोड़शमातृकान्तर्गता च।

इन्द्रपर्णी स्त्री इन्द्र इव लीलं पर्णमस्याः जातित्वात् ङीप्। ओषधिभेदे। "कालानुसार्य्यगुरुकोचमुञ्जारास्नाशीत शिवेन्द्रपर्ण्यः" सुश्रु०।

इन्द्रपर्व्वत पु० इन्द्रनामकः पर्व्वतः। १महेन्द्रपर्व्वते इन्द्रवर्णः पर्व्वतः। २नीलवर्णे गिरिभेदे "वैदेहस्थस्तु कौन्तेय इन्द्र-पर्व्वतवासिनः। किरातानामधिपतीनजयत् सप्त पाण्डवः" भा०स० २८ अ०।

इन्द्रपुत्रा स्त्री इन्द्रः पुत्रो यस्याः। अदित्याम्। तस्या इन्द्र-जननीत्वात् तथात्वम्।

इन्द्रपुष्पी स्त्री इन्द्र इव नीलं पुष्पमस्याः जातित्वात् ङीप्। (विषलाङ्गला) लाङ्गलीवृक्षे। "अर्कालर्ककरञ्जद्वयनागदन्ती-मयूरकभार्गीरास्नेन्द्रपुष्पीक्षुद्रश्वेतेत्यादि" सुश्रुतः। वा कपि अतइत्त्वे इन्द्रपुष्पिकाप्यत्र

इन्द्रपुरोहित पु० ७त०। सुराचार्य्ये बृहस्पतौ

इन्द्रप्रमति पु० ऋग्वेदाध्ययनार्थं व्यासेन शिष्यत्वेन गृहीतस्य पैलस्य ऋषेः शिष्यभेदे। "प्रथमं व्यासशिष्यस्तु पैल ऋग्-वेदपादपम्। इन्द्रप्रमतये प्रादात् विभज्य पञ्च संहिताः" अग्नि पु०। "एकैकां संहितां ब्रह्मन् एकैकस्मै ददौ विभुः। पैलाय संहितामाद्यां वह्वृचाख्यामुवाच ह"। इत्युपक्रम्य "पैलः स्वसंहितामूचे इन्द्रप्रमतये मुनिः" भाग०१२ स्क०६अ०,

इन्द्रप्रस्थ न० इन्द्रस्य इन्द्रस्थानमेरोः प्रस्थइव (दिल्लीति) ख्याते पुरे। "इन्द्रप्रस्थगमस्तावत् कारि मा सन्तु चेदयः" माघः। "इन्द्रप्रस्थं वृकप्रस्थं माकन्दं वारणावतम्। इति

मे चतुरोग्रामान् कञ्चिदेकञ्च पञ्चमम्” वेणी० खाण्डवप्रस्थे युधिष्ठिरेण यदभिनवपुरं निर्म्मितं तदिन्द्रप्रस्थतया विख्यातम्। तदेतत् भारते आ०२०६अ० वर्णितम्। ‘प्रतिगृह्य तु तद्वाक्यं नृप सर्व्वे प्रणम्य च। प्रतस्थिरे ततो घोरं वनं तन्मनुजर्षभाः। अर्द्धं राज्यस्य सम्प्राप्य खाण्डवप्रस्थमाविशन्। ततस्ते पाण्डवास्तत्र गत्वा कृष्णपुरोगमाः। मण्डयाञ्चक्रिरे तद्वै पुरं स्वर्गवदच्युताः। ततः पुण्ये शिवे देशे शान्तिं कृत्वा महारथाः। नगरं मापयामासुर्द्वैपायनपुरोगमाः। सागरप्रतिरूपाभिः परिखाभिरलङ्कृतम्। प्राकारेण च सम्पन्नं दिवमावृत्य तिष्ठता। पाण्डुराभ्रप्रकाशेन हिमरश्मिनिभेन च। शुशुभे तत्पुरश्रेष्ठं नागैर्भोगवती यथा। द्विपक्षगरुड़प्रख्यैर्द्वारैः सौधैश्च शोभितम्। गुप्तमभ्रचयप्रख्यैर्गोपुरैर्म्मन्दरोपमैः। विविधैरपि निर्व्विद्धैः शस्त्रोपेतैः सुसंवृतैः। शक्तिभिश्चावृतं तद्धि द्विजिह्वैरिव पन्नगैः। तल्पैश्चाभ्यासिकैर्युक्तं शुशुभे योधरक्षितम्। तीक्ष्णाङ्कुशशतघ्नीभिर्यन्त्रजालैश्च शोभितम्। विरोचमानं विविधैः पाण्डरैर्भवनोत्तमैः। तत्त्रिपिष्टपसङ्काशमिन्द्रप्रस्थं व्यरोचत। मेघवृन्दमिवाकाशे विद्धं विद्युत्समावृतम्। तत्र रम्ये शिवे देशे कौरवस्य निवेशनम्। शुशुभे धनसम्पूर्णं धनाध्यक्षक्षयोपमम्” “एवं सम्प्राप्य राज्यन्तादिन्द्रप्रस्थं तपोधन!” तत्र२०७अ०।

इन्द्रप्रहरण न० ६त०। वज्रास्त्रे तच्च दधीचोमुनेरस्थिनिर्म्मितं तत्कथा अशनि शब्दे ४६४पृ० उक्ता;

इन्द्रभूति पु० हेमचन्द्रोक्ते गौतमगोत्रजे जिनभेदे।

इन्द्रभेषज न० इन्द्रेण प्रकाशितं भेषजम्। शुण्ठ्यां शब्दरत्ना०।

इन्द्रमख पु० इन्द्रस्य तत्पूजार्थोमखः। वर्षादौ शक्रतोषार्थे यज्ञभेदे। स च मखः नन्दादिभिः प्रवर्त्तितः कृष्णेन निवर्त्तितश्च तत्र तत्करणे नन्देन हेतुरुक्तः भा० १० स्क०२३अ० “पर्जन्यो भगवानिन्द्रो मेघास्तस्यात्ममूर्त्तयः तेऽभिवर्षन्ति भूतानां प्रीणनं जीवनं पयः। तं तात! वयमन्ये च वार्मुचां पतिमीश्वरम्। द्रव्यैस्तद्रेतसा सिद्धैर्यजन्ते क्रतुभिर्नराः तच्छेषेणोपजीवन्ति त्रिवर्गफलहेतवे। पुंसां पुरुषकाराणां पर्ज्जन्यः फलभावनः” इति नन्देनोक्ते कृष्णेन तन्मखनिवारणेन गोवर्द्धनमखस्य प्रवर्त्तनं कृतम् तदपि तत्रैवोक्तं यथा ‘सत्त्वं रजस्तम इति स्थित्युत्पत्त्यन्तहेतवः। रजसोत्पद्यते विश्वमन्योन्यं विविधं जगत्। रजसा नोदिता मेघा वर्षन्त्यम्बूनि सर्व्वतः प्रजास्तैरेव सिद्ध्यन्ति किं महेन्द्रः करिष्यति न नः पुरो जनपदा न ग्रामा न गृहा वयम्। वनौकसस्तात! नित्यं वनशैलनिवासिनः। तस्माद्गवां ब्राह्मणानामद्रेश्चारभ्यतां मखः। य इन्द्रमखसम्भारास्तैरयं साध्यतां मखः”। भाग० १०स्क० २४अ०। अधिकं गोवर्द्धनधरशब्दे वक्ष्यते। “मया तेऽकारि मघवन्! मखभङ्गोऽनुगृह्णता। मदनुस्मृतये नित्यं मत्तस्येन्द्रश्रिया भृशम्” इति” २७अ०।

इन्द्रमह पु० इन्द्रस्य सन्तोषार्थोमहः। इन्द्रसन्तोषार्थे वर्षादौ कर्त्तव्ये उत्सवभेदे। इन्द्रस्य महोयत्र। वर्षाशरत्कालयोः। इन्द्रोत्सव शक्रोत्सवादयोऽप्युभयत्र।

इन्द्रमहकामुक पु० इन्द्रमहे वर्षादिकाले कामुकः कामयिता। कुक्कुरे वर्षादावेव तेषां व्यवायधर्म्मोलोकप्रसिद्धः।

इन्द्रमार्ग पु० इन्द्रलोकप्राप्त्यर्थोमार्गः। बदरीपाचनसन्निकृष्टस्थे तीर्थभेदे। “बदरीपाचनं गच्छेद्वसिष्ठस्याश्रमं गतः” इत्युपक्रम्य “इन्द्रमार्गं समासाद्य तीर्थसेवी नराधिप!। अहोरात्रोपवासेन शक्रलोके महीयते” भा० व० ८३अ०। तच्च जलमयं तीर्थम् “देविकामिन्द्रमार्गञ्च स्वर्गविन्दु विगाह्य च। सप्तगङ्गे त्रिगङ्गे च इन्द्रमार्गे च तर्पयन्” भा०व०२५अ० तत्र अवगाहनतर्पणोक्तेः।

इन्द्रयव न० पु० इन्द्रस्य कुटजवृक्षस्य यवाकृतिवीजत्वात् यव इव वीजम्। कुटजवृक्षस्य यवाकारे तिक्तरसे वीजे स्वनामख्याते। ‘ऐन्द्रोयवस्त्रिदोषघ्नः संग्राही कटुशीतलः। ज्वरातिसाररक्तार्शःकृमिवीसर्पकुष्ठहृत्। दीपनो गुदकीलास्रवातास्रश्लेष्मशूलजित्” भावप्र०।

इन्द्रलाजी स्त्री इन्द्रस्य कुटजस्य लाजाइव लाजायस्याजातत्वात् ङीप्। ओषधिभेदे ततः कुर्वा०ण्य। ऐन्द्रलाज्यस्तद्भवे त्रि०

इन्द्रलुप्त न० इन्द्र इन्द्रवर्त्मानीलः केशो लुप्तोयस्मात्। केशनाशके (टाक) ख्याते रोगभेदे। तन्निदानादि “रोमकूपानुगं रक्तं पित्तेन सह मूर्च्छितम्। प्रच्यावयति रोमाणि ततः श्लेष्मा सवातः। रुणद्धि रोमकूपांस्तु ततोऽन्येषामसम्भवः। तदिन्द्रलुप्तं खालित्यं रुज्येति च विभाव्यते” निदा० उक्तम्। निदानटीकाकृता तु इन्द्रलुप्तं श्मश्रुणि भवति। खालित्यं शिरोरुहेष्वेव रुज्या सर्वेदनेति तेषां भेद उक्तः। वा कप्। इन्द्रलुप्तकं तत्रैवार्थे।

इन्द्रलोक पु० इन्द्रस्य लोकः भोगभूमिः। अमरावतीनामपुरीयुक्ते स्वर्गस्थानभेदे तत्स्थानमप्यरावतीशब्दे ३२० पृष्ठे उक्तं तत्स्वरूपप्राप्तिकारणादिकमुक्तं काशी०। “नैकेऽत्र रमते विप्र! सहस्राक्षः, पुरी त्वियम्। तपोबलेन महता विहिता विश्वकर्मणा। दिवापि कौमुदी यस्यां

शौभश्चेषोऽस्त्रियम् श्रयेत् । यदा कलानिधिः क्वापि दर्शेऽ
दृश्यत्वमावहेत् । तदा स्वश्रेयसीं ज्योत्स्नां सौधेष्वेषु-
निगूहयेत् । यदच्छभित्तौ वीक्ष्य स्वमन्ययोषिद्विशङ्किता ।
मुग्धा नाशु विवेचित्रमपि स्वां चित्रशालिकाम् । हर्म्येषु
नीलमणिभिर्निर्मितेष्वत्र निर्भयम् । स्वनीलिमानमाधाय
तमोऽहःस्वपि तिष्ठति । चन्द्रकान्तशिलाजालस्रुतमात्मा-
मलं जलम् । तत्र चादाय कलशैर्नैच्छन्त्यन्यज्जलं जनाः ।
कुविन्दा न च सन्त्यत्र न चात्र पश्यतोहराः । चेलान्यलङ्कृ-
तान्यत्र यतः कल्पद्रुमार्पणात् । गणका नात्र विद्यन्ते
चिन्ताविद्याविशारदाः । यतश्छिनत्ति सर्वेषां चिन्तां चिन्ता-
मणिर्द्रुतम् । सूपकारा न सन्त्यत्र रसपाकविचक्षणाः ।
दुग्धे सर्वरसानेका कामधेनुरतोऽनिशम् । कीर्त्तिरुच्चैःश्रवा-
यस्य सर्वतो वाजिराजिषु । रत्नमुच्चैःश्रवाः सोऽत्र ह-
यानां पौरुषाधिकः । ऐरावतो दन्तिवरश्चतुर्दन्तोऽत्र
राजते । द्वितीय इव कैलासो जङ्गमः स्फटिकोज्ज्वलः ।
तरुरत्नं पारिजातः स्त्रीरत्नं चोर्वशी त्विह । नन्दनं वन-
रत्नं च रत्नं मन्दाकिनी ह्यपाम् । त्रयस्त्रिंशत् सुराणां या
कोटिः श्रुतिसमीरिता । प्रतीक्षते सावसरं सेवार्थं प्रत्यहं
त्विह । स्वर्गेष्विन्द्रपदादन्यन्न विशिष्येत किञ्चन । यद्यत्रि
लोक्यामैश्वर्यं न च तुल्यमनेन हि । अश्वमेधसहस्रस्य
लभ्यं विनिमयेन यत् । किन्तेन तुल्यमन्यत् स्यात् पवित्र-
मथवा महत् । अर्द्धिस्ती संयमनी पुण्यवत्यनिलावती ।
गन्धवत्यलकैशी च नैतत्तुल्या महर्द्धिभिः । अयमेव सह-
स्राक्षस्त्वयमेव दिवस्पतिः । शतमन्युरयं देवोनानान्ये-
ऽमनि नामतः । सप्तापि लोकपाला ये तदेनं समुपासते ।
नारदाद्यैर्मुनिवरैरयमाशीभिरिज्यते । एतत्स्थैर्येण
सर्वेषां लोकानां स्थैर्यमिष्यते । पराजयान्महेन्द्रस्य त्रै-
लोक्यं स्यात् पराजितम् । दनुजा मनुजादैत्यास्तपस्यन्त्यु-
पसंयमाः । गन्धर्वयक्षरक्षांसि माहेन्द्रपदलिप्सवः ।
सगराद्या महीपाला वाजिमेधविधायकाः । शतवन्तो महा-
यत्नं मदैश्वर्यजिहीर्षवः । निष्प्रत्यूहं क्रतुशतं यः
कश्चित् कुरुतेऽवनौ । जितेन्द्रियोऽमरावत्यां स प्राप्नोति
पुलोमजाम् । असमाप्तक्रतुशता वसन्त्यत्र महीभुजः ।
ज्योतिष्टोमादिभिर्यागैर्ये यजन्त्यपि ते द्विजाः । तुलापुरु-
षदानादि महादानानि षोड़श । ये यच्छन्त्यमलात्मा-
नस्ते लभन्तेऽमरावतीम् । अक्लीववादिनो वीराः संग्रामेष्व-
पलायिनः । विश्रान्ता वीरशयने तेऽत्र तिष्ठन्ति भूभुजः
इत्यहे शात् समाख्याता महेन्द्रनगरीस्थितिः । यायजू-

कावसन्त्यत्र यज्ञविद्याविशारदाः" १० अ० । "अतिथि-
स्त्विन्द्रलोकेशः" इति मनुना अतिथिपरिचर्य्याभिरपि
तत्प्राप्तिरुक्ता । एवं राजसूययज्ञेनापि तत्प्राप्तिः
भा०स० उक्ता । शक्रलोकादयोऽप्यत्र

इन्द्रवंशा स्त्री 'स्यादिन्द्रवंशा ततजैरसंयुतैः" वृत्त०र०
उक्ते द्वादशाक्षरपादके वर्णवृत्तभेदे ।

इन्द्रवज्रा स्त्री "स्यादिन्द्रवज्रा यदि तौ जगौ गः" वृत्त०र०
उक्ते एकादशाक्षरपादके वर्णवृत्तभेदे ।

इन्द्रवल्ली स्त्री इन्द्रप्रिया वल्ली शाक०त० । १पारिजातलतायाम्
"सोमवल्लीमिन्द्रवल्लीं शमीं विश्वस्य कण्टकान्" सुश्रु० ।
(राखालससा) २इन्द्रवारुण्यां लतायाञ्च इन्द्रवल्लरीत्यप्यत्र ।

इन्द्रवस्ति पु०इन्द्रस्यात्मनो वस्तिरिव । २ जङ्घामध्यभागे । "इन्द्र-
वस्तिपरिणाहांशपीठकूर्परान्तरायाम षोड़शाङ्गुलः"
सक्थिमर्म्माणि ... कूर्चशिरोगुल्फेन्द्रवस्ति-
जान्वूर्वीलोहिताक्षाणि विटपञ्चेति" विभज्य "पार्ष्णिं
प्रति जङ्घामध्य इन्द्रवस्तिर्नाम तत्र शोणितक्षये मरणम्"
इति च सुश्रु० । अतोऽस्य जीववसतितुल्यत्वात्तथात्वम् ।

इन्द्रवारुणी स्त्री इन्द्रस्यात्मनोवारुणीव प्रिया (राखालससा)
तिक्तरसायां श्वेतमूलायां पीतपुष्पायां लतायाम् । स्वार्थे
कन् । इन्द्रवारुणिकापि अत्रैवार्थे ।

इन्द्रवीज न० इन्द्रस्य कुटजस्य वीजम् । इन्द्रयवे । "चव्ये-
न्द्रवीजं त्रिफलाघृतमांसरसाम्बुभिः" सुश्रु० ।

इन्द्रवृक्ष पु० ६त०देवदारुवृक्षे जटाधरः । तस्य इन्द्रध्वजकेतु-
त्वात्तथात्वम् । तस्येन्द्रध्वजसाधनत्वञ्चेन्द्रध्वजशब्दे उक्तम् ।

इन्द्रवृद्धा स्त्री "अथातः क्षुद्ररोगान् व्याख्यास्याम इत्यु-
पक्रम्य । "वल्मीकमिन्द्रवृद्धेत्यादि विभज्य" । "पद्मपुष्-
करवन्मध्ये पिडकाभिः समाचिताम् । इन्द्रवृद्धान्तु तां
विद्याद्वातपित्तोत्थितां भिषक्" सुश्रुतोक्तलक्षणे क्षुद्रो-
गभेदे । "विवृतामिन्द्रवृद्धाञ्च गर्द्दभीं जालगर्द्दभम् ।
इरिविल्लां गन्धनाम्नीं कक्षां विस्फोटकांस्तथा । पित्तजस्य
विसर्पस्य क्रियया साधयेत् भिषक्" इति सुश्रु०

इन्द्रव्रत न० इन्द्रस्येव वर्षणे व्रतम् । "वार्षिकांश्चतुरो मासान्
यथेन्द्रोऽप्यभिवर्षति । तथाभिवर्षेत् स्वं राष्ट्रं कामैरिन्द्र
व्रतं चरन्" इति स्मृत्युक्ते प्रजापालने राज्ञोव्रतभेदे ।

इन्द्रशत्रु पु०इन्द्रः शत्रुः शातयिता यस्य । वृत्रासुरे । वृत्रा-
सुरस्य तथात्वमुक्तम् यथा "स त्वष्टा चुक्रोध । कुविन्मेऽनुप-
हूतः सोममभक्षदिति स स्वयमेव यज्ञवेशस चक्रे स योद्रोण-
कलशे शुक्रः परिशिष्ट आ सतं प्रवर्त्तता चकारेन्द्रशत्रु-

वर्द्धस्वेति सोऽग्निमेव प्राप्य सम्बभूवान्तरेव सम्बभूवेत्युहैक आहुः अग्नीषोमावेवाभि सम्बभूव सर्वा विद्याः सर्वं यशः सर्वमन्नाद्यं सर्वां श्रियम् । स यद्वर्त्तमानः समभवत् । तस्माद्वृत्रोऽथ यदपात् समभवत्तस्माद्दहिस्तं दनुश्च दनायुश्च । मातेव च पितेव च परिजगृहतुस्तस्माद्दानव इत्याहुः अथ यदब्रवीदिन्द्रशत्रुर्वर्धस्वेति तस्मादु हैनमिन्द्र एव जघान । यद्ध शश्वदवक्ष्यदिन्द्रस्य शत्रुर्वर्धस्वेति शश्वदु ह स एवेन्द्रमहनिष्यत्" शत० ब्रा० १,६,३,८,९,१०, "इन्द्रशत्रुरित्र पूर्वपदोदात्ततयेन्द्रः शत्रुर्यस्येति बहुव्रीहिसमासं ज्ञात्वा तन्त्रं प्रयुक्तवन्ततस्तमिन्द्रो जघान । यद्यसौ अन्त्योदात्ततया तत्पुरुषसमासेन, इन्द्रस्य शत्रुरिति व्यस्तनिर्देशेन वा ब्रूयात्तदा निश्चितमेव स इन्द्रं हन्यात्" इति सा० भा० तथा च षष्ठीतत्पुरुषेऽन्तोदात्तः स्वरः तथात्वे इन्द्रस्य शत्रुरित्यर्थके भवेत् बहुव्रीहौ तु पूर्वपदस्वरतेति तथा तेन प्रयोगात् तमेव इन्द्रो जघान "अतएव वेदे स्वरहीनतयोच्चारणे यजमानस्यानिष्टं फलं भा०। यथोक्तं शिक्षायाम् । "मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्" । उक्तश्रुत्यनुसारिणी कथा भाग० यथा त्वष्टुः पुत्रस्य विश्वरूपस्याऽऽदिकमुपवर्ण्य "तस्यासन् विश्वरूपस्य शिरांसि त्रीणि भारत । सोमपीथं सुरापीथमन्नादमिति शुश्रुम । स वै बर्हिषि देवेभ्यो भागं प्रत्यक्षमुच्चकैः । अवदद्यस्य पितरो देवाः सप्रश्रयं नृप ! । स एव हि ददौ भागं परोक्षमसुरान् प्रति । यजमानोऽवहद्भागं मातृस्नेहवशानुगः । तद्देवहेलनं तस्य धर्मालीकं सुरेश्वरः । आलक्ष्य तरसा भीतस्तच्छीर्षाण्यच्छिनद्रुषा । सोमपीथं तु यत्तस्य शिर आसीत् कपिञ्जलः । कलविङ्कः सुरापीथमन्नादं यत् स तित्तिरिः । ब्रह्महत्यामञ्जलिना जग्राह यदपीश्वरः । संवत्सरान्ते तदघं भूतानां स विशुद्धये । भूम्यम्बुद्रुमयोषिद्भ्यश्चतुर्द्धा व्यभजद्धरिः । भूमिस्तुरीयं जग्राह खातपूरवरेण वै । ईरिणं ब्रह्महत्याया रूपं भूमौ प्रदृश्यते । तुर्यं छेदविरोहेण वरेण जगृहुर्द्रुमाः । तेषां निर्यासरूपेण ब्रह्महत्या प्रदृश्यते । शश्वत्कामवरेणांहस्तुरीयं जगृहुः स्त्रियः । रजोरूपेण तास्वंहो मासि मासि प्रदृश्यते । द्रव्यभूयोवरेणापस्तुरीयं जगृहुर्मलम् । तासु बुद्बुदफेनाभ्यां दृष्टं तद्धरति क्षिपन् । हतपुत्रस्ततस्त्वष्टा जुहावेन्द्राय शत्रवे । इन्द्रशत्रो विवर्द्धस्व मा चिरं जहि विद्विषम् । अथान्वाहार्यपचनादुत्थितो घोरदर्शनः । कृतान्त इव लोकानां युगान्तसमये यथा । विष्वग्विवर्द्धमानं तमिषुमात्रं दिने दिने । दग्धशैलप्रतीकाशं सन्ध्याभ्रानीकवर्चसम् । तप्तताम्रशिखाश्मश्रुं मध्याह्नार्कोग्रलोचनम् । देदीप्यमाने त्रिशिखे शूल आरोप्य रोदसी । नृत्यन्तमुन्नदन्तञ्च चालयन्तं पदा महीम् । दरीगम्भीरवक्त्रेण पिबता च नभस्तलम् । लिहता जिह्वयर्क्षाणि ग्रसता भुवनत्रयम् । महता रौद्रदंष्ट्रेण जृम्भमाणं मुहुर्मुहुः । वित्रस्ता दुद्रुवुर्लोका वीक्ष्य सर्वे दिशो दश । येनावृता इमे लोकास्तपसा त्वाष्ट्रमूर्त्तिना । स वै वृत्र इति प्रोक्तः पापः परमदारुणः भा० ६ स्क० ८ अ०। ततः "स इन्द्रशत्रुः कुपितोऽभ्ययं तथा महेन्द्रवाहं गदयोरुविक्रम" इति" तयोर्युद्धमभिधाय "भित्त्वा वज्रेण तत्कुक्षिं निष्क्रम्य बलभिद्विभुः । उच्चकर्त्त शिरः शत्रोर्गिरिशृङ्गमिवोन्नतम्" भाग० ६ स्क० १० अ० इन्द्रेण तस्य हननं वर्णितम् ।

इन्द्रशलभ पु० इन्द्रजातः वर्षाकालजातः शलभः । इन्द्रगोपे ।

इन्द्रसारथि पु० ६ त० । इन्द्रस्य सारथौ मातलौ ।

इन्द्रसावर्णि पु० चतुर्दशे मनौ । "मनुर्वा इन्द्रसावर्णिश्चतुर्दश एष्यति । उरुगम्भीरबुद्ध्याद्या इन्द्रसावर्णिवीर्यजाः । पवित्राश्चाक्षुषा देवाः शुचिरिन्द्रो भविष्यति । अग्निबाहुः शुचिः शुक्रो मागधाद्यास्तपस्विनः । सत्रायणस्य तनयो बृहद्भानुस्तदा हरिः । वितानायां महाराज ! क्रियातन्तून् वितायिता" भा० ८ स्क० १३ अ० । हरिवंशे तु "भूत्याश्चोत्पादितो देव्यां भौत्योनाम रुचेः सुतः" इति भौत्योत्पत्तिमुक्त्वा "चतुर्दशेऽथ पर्याये भौत्यस्यैवान्तरे मनोः । आग्नीध्रः काश्यपश्चैव पौलस्त्यो मागधस्तथा । भार्गवो ह्यग्निबाहुश्च शुचिराङ्गिरसस्तथा । युक्तश्चैव तथात्रेयः शुक्रो वासिष्ठ एव च । अजितः पौलहश्चैव मान्याः सप्तर्षयश्च ते इति" चोक्त्वा "देवतानां गणाः प्रोक्ताः पञ्च वै भरतर्षभ । तरङ्गभीरुर्वप्रश्च तरस्वानुग्र एव च । अभिमानी प्रवीणश्च स्वतः संक्रन्दनस्तथा । तेजस्वी सरयश्चैव भौत्यस्यैते मनोः सुताः । भौत्यस्यैवाधिकारे तु पूर्णे कल्पस्तु पूर्य्यते" । अग्निपु० च "मनुश्चतुर्दशो भौत्यः शुचिरिन्द्रो भविष्यति । चाक्षुषाद्याः सुरगणा अग्निबाह्वादयो द्विजाः । चतुर्दशस्य भौत्यस्य पुत्रा उरुमुखा मनोः" इत्युक्तं तेन नामभेदविरोधः कल्पभेदात् समाधेयः ।

इन्द्रसुत पु० ६ त० । १ जयन्ते, २ मध्यमपाण्डवे पार्थे, ३ अर्जुनवृक्षे, ४ वालिनामके वानरे च । इन्द्रसुतादयोऽप्यत्र

इन्द्रसुरस पु० इन्द्रः कुटजवृक्ष इव सुरसः पथ्यरसः। (निसिन्दा)

किञ्चगारे। अमरे इन्द्रसुरिसेति पाठान्तरे पु०। तत्रैव

इन्द्रसुरा स्त्री इन्द्रस्यालनःसुरेव प्रिया। (राखालसशा) इन्द्र-वारुण्याम् राजनि०"वार्त्ताकुधिवीन्द्रसुरापटोलेत्यादि" सुश्रु०। "गुडूचीन्द्रसुरा श्यामा कुक्कर्षपनागरैः। तैर्बमेभिः शनैः पक्वं सुराशादिरलाम्तम्" सुश्रु०।

इन्द्रसूक्त न० इन्द्रदेवताकं सूक्तम्। ऋग्वेदान्तर्गते सूक्त-भेदे तच्च"इन्द्रं विश्वा अवीवृधन्"इत्यादि एकादशर्च्चम्। ऋ०१म०११सूक्तम् एतच्च तत्तत्कर्मणि इन्द्रस्तुत्यर्थं प-ठनीयं तथा द्वारपालेन तुलादानादौ मण्डपस्य पूर्वदिशि पाठ्यं "श्रीसूक्तं पावमानञ्च सोमसूक्तं सुमङ्गलम्। शान्त्य-ध्यायश्चेन्द्रसूक्तं रक्षोघ्नं चेति बह्वृचौ। पूर्वं द्वारं समा-श्रित्य पठेतामिति निश्चयः" विधानपारि०पु०; तच्च सूक्तं तुलादानादिपद्धतौ ८३पृष्ठेऽस्माभिः प्रदर्शितम्।

इन्द्रसेन पु०इन्द्रस्य सेना इव सेना यस्य।१ न्टपभेदे स च परि-क्षितः पुत्रभेदः"परिक्षितोऽभवत् पुत्राः सर्वे धर्मार्थकोविदाः कक्षसेनोग्रसेनौ च चित्रसेनश्च वीर्य्यवान्। इन्द्रसेनः सुषेणश्च भीमसेनश्च नामतः" भा०आ०९४अ० अयञ्च प्रसिद्धात् परिक्षितः प्राचीनः कुरुवंश्यएव इन्द्राभयब्दे विवृतिः। युधिष्ठिरस्य २ भृत्यभेदे। "इन्द्रसेनादयश्चैव भृत्याः परि चतुर्दश। रथैरनुययुः शीघ्रैः स्त्रिय आदाय सर्वशः" भा०व०१अ०"इन्द्रसेनो विशोकश्च पुरुश्चार्ज्जुनसारथिः। अन्नाद्याहरणे युक्ताः सन्तु मत्प्रियकारिणः"भा०स०३३अ०

इन्द्रसेना स्त्री ६त०। इन्द्रस्य १सेनायाम्। २वध्र्यश्वमातरि मौद्गल्यस्य ज्येष्ठपुत्रपत्न्याम्। "मौद्गल्यस्य सुतो ज्येष्ठो ब्रह्मर्षिः सुमहायशाः। इन्द्रसेना यतोगर्भं वध्र्याश्वं प्रत्य-पद्यत" हरि०३२अ० "नारायणीन्द्रसेना बभूव वध्र्या निलं मुद्गलमाजमीढ" भा०व०११३अ०।

इन्द्रसेनानी पु० इन्द्रसेनां नयति नी—क्विप् ६त०। शक्रस्य सेनापतौ कार्त्तिकेये तत्कथा। कार्त्तिकेन पराजितेनेन्द्रेण कार्त्तिकाय इन्द्रत्वपदं दातुमीहमानेन सह तस्य उक्तिप्रत्युक्ति वर्णनेन तेन तत्सेनापत्यमङ्गीकृतमेतत् भा०व०२८अ० वर्णित यथा "शक्रउवाच भवस्वेन्द्रो महाबाहो! सर्वेषां नः सुखावहः। अभिषिच्यस्व चैवाद्य प्राप्तकालोऽसि सत्तम!। शाधि त्वमेव त्रैलोक्यमव्यग्रोविजये रतः। अहन्ते किङ्करः शक्रोनममेन्द्रत्वमीप्सितम्। बलं तवाद्भुतं वीर! त्वं देवा-नामरीन् जहि। अवज्ञास्यन्ति मां लोका वीर्य्येण तव विस्मिताः। इन्द्रत्वे तु स्थितं वीरे! बलहीनं पराजितम्। आवयोश्च मिथोभेदं प्रयतिष्यन्त्यतन्द्रिताः। भेदिते च त्वयि विभो! लोकोद्वैधमुपैष्यति। द्विधाभूतेषु लोकेषु निश्चितेषु वयोस्तदा। विग्रहः संप्रवर्त्तेत भूतभेदान्महाबल!। तत्र त्वं मां रणे तात! यथाश्रद्धं विजेष्यसि। तस्मादिन्द्रो भवानेव भविता मा विचारय। स्कन्द उवाच। त्वमेव राजा भद्रन्ते त्रैलोक्यस्य ममैव च। करोमि किन्तु ते शक्र! शासनं तद्ब्रवीहि मे। इन्द्र उवाच। अहमिन्द्रो भविष्यामि तव वाक्यान्महाबल!। यदि सत्यमिदं वाक्यं निश्चयाद्भाषितं त्वया। यदि वा शासनं स्कन्द! कर्त्तुमि-च्छसि मे शृणु। अभिषिच्यस्व देवानां सैनापत्ये महाबल!। स्कन्द उवाच। दानवानां विनाशाय सैनापत्येऽभिषिञ्च माम्"। भा०व०२२८अ० शक्रसेनापतिशक्रसेनाधि-पादयोऽप्यत्र। "शक्रसेनापतिः स्कन्दः"पु०

इन्द्रसुत् पु० इन्द्रः सूयते ऽत्र। इन्द्रस्तुत्यधिकरणे उक्थ्य यज्ञे द्वितीयाहे "इन्द्रसुदुक्थ्यो द्वितीयमहर्भवति। इन्द्रोवै सर्वे देवाः सर्वेषां देवानामाप्त्यै तस्मैन्द्राग्रहा भवन्त्यैन्द्राः पुरोरुचः सर्वमैन्द्रमसदिति"शत०,१२,७, १,४, अयमुक्थ्यसाध्यः तदुपक्रमएव कात्या०२१,१,४,। "तत्र उक्थ्या अग्निष्टुदिन्द्रस्तुत् सूर्य्यस्तुत्"इत्यभिधानात्।

इन्द्रस्तोम पु० अतिरात्राङ्गे यागभेदे स च कात्या० २४ ४,६,। अतिरात्रोपक्रमेण "इन्द्रस्तोमो विश्वजिता" विश्वजितः स्थाने इन्द्रस्तोमः कार्य्यः" कर्क०। पूर्वोक्तमुपक्रम्य तत्प्रकारादि तत्र दर्शितम्। अयञ्च राज्ञा कार्य्यः"इन्द्रस्तोमो राजयज्ञः" "सहस्रं दक्षिणा"कात्या० २२,११,१५,१६, स च उक्थसाध्यः "उक्थ्यः" कात्या० १२,११,१७ उक्तेः।

इन्द्रहू स्त्री इन्द्रः हूयतेऽनया ह्वे—क्विप् ६त०। शक्राह्वान साधने ऋग्भेदे। कर्त्तरि क्विप्। २तदाह्वानकर्त्तृमुनिभेदे च। ततो गर्गा० अपत्ये यञ्। ऐन्द्रहव्यस्तदपत्ये पुंस्त्री।

इन्द्रा स्त्री इदि-रन्। १फणिज्झकवृक्षे (काटाजगीर) मेदिनिः (राखालसशा) २इन्द्रवारुण्याम्। राजनि० ३शच्याम् शब्दर०।

इन्द्राग्नि पु० द्वि०व०। इन्द्रश्चाग्निश्च देवताद्व०। शक्राग्न्यो-र्मिलितयोर्देवयोः। "इन्द्राग्नी यत्र हूयेते" म०त० स्मृतिः "पुरोहितकामस्येन्द्राग्न्योः स्तोमः" कात्या०२२, ११,२०,२१ उक्तेः। तत्र स्तोमे पुरोहितस्य राज्ञो वा सह वाऽधिकारः तत्र ब्राह्मणस्य दक्षिणा चतुर्विंशतिर्गावः राज्ञः अष्टचत्वारिंशद्गावः"कर्क०। तौ देवते अस्य अण्। ऐन्द्राग्नं तद्देवताके हविषि शस्त्रे च। इन्द्रस्य पर्जन्य-

स्तग्निः । ३तद्भवे विद्युदग्न्यादौ पु० । २इन्द्राग्निधूमः ।

इन्द्राग्निधूम पु० इन्द्राग्नेः पर्ज्जन्याग्नेर्धूम इव । हिमे धूमस्य यथाऽग्निप्रभवत्वम् तथा जलमयहिमस्य पर्ज्जन्याग्निसम्पर्कादेव जायमानत्वात् तथात्वम् ।

इन्द्राणी स्त्री० इन्द्रस्य पत्नी–ङीप् आनुक् च । १इन्द्रपत्न्यां शच्याम् "अदित्यै रास्नासीन्द्राण्या उष्णीषः" यजु० ३८.३ "नैवेन्द्राणी न रुद्राणी न मनायी न रोहिणी" भट्टिः "यथेन्द्राणी हरिहये स्वाहा चैव विभावसौ" भा० आ० १९८ अ० । "आजगाम सहेन्द्राण्या शक्रः सुरगणैर्वृतः" भा० व० ४१अ० । इन्द्रं परमैश्वर्य्यमानयति आ+नी–बा० ड गौ० ङीष् । "ऐश्वर्य्यं परमं यस्या वशे चैव सुरा नराः । इदि च परमैश्वर्य्ये इन्द्राणी तेन सा स्मृता" इति देवीपु० उक्तनिरुक्तिर्वा । २दुर्गाशक्तिभेदे । "ब्रह्माणीन्द्राणि ! रुद्राणि ! भूतभव्ये ! यशस्विनि ! त्राहि मां सर्व्वदुःखेभ्यो नारायणि ! नमोऽस्तु ते" हरिवं० १७८अ० "सा च अष्टमातृकान्तर्गता ऐन्द्रीत्यपरपर्य्याया तस्याश्च इन्द्ररूपानुकारित्वादपि तथात्वम् । इन्द्रइव आनयति जीवयति रोगोपशमनेन आन+णिच्–अच् पूर्व्वपदा० णत्वम् । ३स्थूलैलायां राजनि० । ४स्त्रीणां करणे ५नीलसिन्दुवारवृक्षे (सोम्भाल) मेदि० । (निसिन्दा) ६वृक्षे अमरः, स्वार्थे कन् । इन्द्राणिकाप्युक्तार्थेषु ।

इन्द्रादृश पु० । इन्द्रस्येवादर्शनमस्य आ+दृश–टक् ६त० । इन्द्रगोपे कीटे ततः ताला० विकारे अञ् । ऐन्द्रादृश० । तद्विकारे त्रि० ।

इन्द्रानुज पु० ६त० । १वामने स हि अदित्यामिन्द्रजन्मोत्तरं कश्यपेनोत्पादितः तदवतारयुक्ते २नारायणे च "इन्द्रानुजानुचरभूपतयोऽप्यवापुः" माघः । इन्द्रावरजादयोऽप्यत्र ।

इन्द्राभ पु० कुरुवंश्यधृतराष्ट्रस्य पुत्रभेदे अयञ्च धृतराष्ट्रः आग्निवेश्यादन्यः तथा हि "ततः संवत्सरात् सौरी सुषुवे तनयं कुरुम्" इत्युपक्रम्य तस्य "अविक्षितमभिष्यन्तमित्यादिना" अष्टौ अविक्षिदादीन् सुतानुक्त्वा "अविक्षितः परिक्षित्तु" इत्यादिना तस्यापि परिक्षिदादीनष्टौ सुतानुक्त्वा "जनमेजयस्य तनया भुवि तत्र महाबलाः । धृतराष्ट्रः प्रथमजः पाण्डुर्वाह्लीक एव च । निषधश्च महातेजास्तथा जाम्बूनदो बली" इत्यादिना जनमेजयस्याष्टौ पुत्रानुक्त्वा धृतराष्ट्रोऽथ राजासीत् तस्य पुत्रोऽथ कुण्डिकः हस्ती वितर्कः क्राथश्च कुण्डिनश्चापि पञ्चमः । हविःश्रवास्तथेन्द्राभः भूमन्युश्चापराजितः" इति भा० आ० ९४अ० उक्तः ।

इन्द्रायुध न० ६त० । १शक्रस्यास्त्रे वज्रे "सनादं मेघनादस्य धनुश्चेन्द्रायुधप्रभम्" रघुः । इन्द्रे तदधिष्ठितमेघे आयुधमिव । सूर्य्यकिरणसंपर्कात् मेघे जायमाने २धनुराकारे पदार्थभेदे तल्लक्षणाद्युक्तं वृ० स० "सूर्यस्य विविधवर्णाः पवनेन विघट्टिताः कराः साभ्रे । वियति धनुःसंस्थाना ये दृश्यन्ते तदिन्द्रधनुः । केचिदनन्तकुलोरगनिःश्वासोद्भूतमाहुराचार्य्याः । तद्यायिनां नृपाणामभिमुखमजयावहं भवति । अच्छिन्नमवनिगाढं द्युतिमत् स्निग्धं घनं विविधवर्णम् । द्विरुदितमनुलोमं च प्रशस्तमम्भः प्रयच्छति च । विदिगुद्भूतं दिक्स्वामिनाशनं व्यभ्रजं मरककारि । पाटलपीतकनीलैः शस्त्राग्निक्षुत्कृता दोषाः । जलमध्येऽनावृष्टिर्भुवि सस्यवधस्तरौ स्थिते व्याधिः । वल्मीके शस्त्रभयं निशि सचिववधाय धनुरैन्द्रम् । वृष्टिं करोत्यवृष्ट्यां वृष्टिं वृष्ट्यां निवारयत्यैन्द्र्याम् । पश्चात् सदैव वृष्टिं कुलिशभृतश्चापमाचष्टे । चापं मघोनः कुरुते निशायाम् आखण्डलायां दिशि भूपपीडाम् । याम्यापरोदक्प्रभवं निहन्यात् सेनापतिं नायकमन्त्रिणौ च । निशि सुरचापं सितवर्णाभं जनयति पीडां द्विजपूर्व्वाणाम् । भवति च यस्यां दिशि तद्देश्यं नरपतिमुख्यं न चिराद्धन्यात्" । "न दिनेन्द्रायुधं दृष्ट्वा कस्यचिद्दर्शयेद्बुधः" मनुः "इन्द्रायुधद्योतिततोरणाङ्कम्" रघुः । ततः ताला० विकारे अञ् । ऐन्द्रायुधस्तद्विकारे त्रि० ।

इन्द्रारि पु० ६त० । असुरे ।

इन्द्रालिश पु० इन्द्रमिन्द्रधनुरालिशति लिश–तीक्ष्णे ग्र–क ; इन्द्रगोपे कीटभेदे तस्य विकारः ताला० अञ् । ऐन्द्रालिशस्तद्विकारे त्रि० ।

इन्द्रावसान पु० इन्द्रस्य पर्जन्यस्यावसानमत्र । मरुदेशे । ततः उत्सादि० भवार्थे अञ् । ऐन्द्रावसानः मरुभवे त्रि० ।

इन्द्राशन पु० इन्द्राय ऐश्वर्य्याय अश्यते भुज्यते अश–कर्म्मणि ल्युट् । (सिद्धि) १भङ्गायाम् शब्दर० । तत्सेवने हि राज्यमपि तुच्छं भवतीति तस्यास्तथात्वम् । इन्द्रः इन्द्रधनुरिव अश्नुते अर्द्धरक्तवर्णफलत्वात् । (कुँच) गुञ्जावृक्षे हारा० ।

इन्द्रासन पु० इन्द्र आत्मा अस्यते विक्षिप्यतेऽनेन अस–क्षेपे करणे ल्युट् । (सिद्धि) १संविदावृक्षे तत्सेवने हि आत्मनो विक्षिप्तत्वात्तस्य तथात्वम् । पञ्चमात्रिकस्य प्रस्तावे आदि लघुके शेषगुरुद्वयात्मके २प्रथमभेदे न० ।

इन्द्रिय न० इन्द्रस्य आत्मनो लिङ्गं इन्द्र+घ । पाण-

क्रियासाधने १ चक्षुरादौ २ हस्तादौ च । "इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा" पा० तस्या नेकाविधार्थकता दर्शिता इतिशब्दः प्रकारार्थे इन्द्रेण दुर्जयमिन्द्रियमित्यपि" सि० कौ०। अत्र स्थले इन्द्रेण परमात्मना दृष्टमित्युक्तिरपि इन्द्रियस्य अस्मदादीनां प्रत्यक्षागोचरतां निरस्यति । यद्वा इन्द्रेणात्मना दृष्टमात्मत्वेनाभिमतं काणोऽहं बधिरोऽहमित्याद्यभिमतम्। "एतस्माज्जायते प्राणोमनः सर्व्वेन्द्रियाणि चेति" श्रुतेः इन्द्रियस्य ईश्वरसृष्टत्वम् । इन्द्रदत्तमिति इन्द्र ऐश्वर्य्यं दत्तोऽस्मै स्वस्वकार्य्ये हि तेषामैश्वर्य्यमीश्वरेण दत्तम् अतएव तानि बलादिव गृहीत्वा विषयेषु प्राणिनं स्वस्वविषयग्रहणाय प्रवर्त्तयन्ति । असति ह्यैश्वर्य्ये न तद् सम्भवति । चक्षुरादीनामात्मानुमापकत्वञ्चेत्थम् । करणव्यापारः सकर्त्तृकः करणव्यापारत्वात् छिदिक्रियायां वास्यादिव्यापारवदिति करणव्यापारेण कर्त्तुरनुमानगम्यत्वे तत्साजात्यात् ज्ञानक्रियाकरणमपि सकर्त्तृकं करणत्वादिति चक्षुरादिना ज्ञानसाधनेनात्मनोऽनुमानम् । तथा इन्द्रियस्याप्रत्यक्षत्वेऽपि ज्ञानक्रिया सकरणिका क्रियात्वात् छिदिक्रियावत् इत्यनुमानम् तत्सत्त्वे प्रमाणम् । तत्तन्मतभेदेन इन्द्रियस्य भौतिकत्वाभौतिकत्वसर्वगतत्वासर्वगतत्वप्राप्यकारित्वाप्राप्यकारित्वादिकम् आत्मशब्दे ६६५ पृष्ठे प्रपञ्चेन परीक्षितम् । इन्द्रियञ्च द्विविधं ज्ञानकर्म्मेन्द्रियभेदात् तत्र श्रोत्रादीनि ज्ञानेन्द्रियाणि हस्तादीनि कर्मेन्द्रियाणि । "श्रोत्रं त्वक्चक्षुषी जिह्वा नासिका चैव पञ्चमी । पायूपस्थं हस्तपादं वाक् चैव दशमी स्मृता" मनुः । "नासिकालोचने जिह्वा त्वक् श्रोत्रं चेन्द्रियाणि च । हस्तौ पायुरुपस्थश्च वाक्पादौ च दशैव तु" शारदा०। "बुद्धीन्द्रियाणि श्रोत्रघ्राणरसनत्वगाख्यानि । वाक्पाणिपादपायूपस्थानि कर्म्मेन्द्रियाण्याहुः" सां० का० । एतानि च बाह्येन्द्रियाणि । "उभयात्मकमत्र मनः संकल्पकमिन्द्रियञ्च साधर्म्यात्" सां०का० मनस्तूभयविधकरणोपकारित्वात् करणम् । तच्च ज्ञानकर्म्मव्यापारसामान्ये कारणमपि न तत्र करणम् असाधारणकारणस्यैव करणत्वात् रूपादिज्ञाने चक्षुरादीनामिव तस्य असाधारणबाह्यग्राह्यविशेषाभावात् किन्तु सुखाद्युपलब्धौ असाधारण्यात् तत्रैवास्य करणत्वमिति नैयायिकादयः। वेदान्तिनस्तु मनसोनेन्द्रियत्वमङ्गीकुर्व्वन्ति तच्च आत्मशब्दे दर्शितम् । अतएव "पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् । अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनमिति" मनोबुद्ध्योरिन्द्रियात् पृथग्निर्द्देशः । सांख्यमते "सात्त्विक एकादशकः प्रवर्त्तते वैकृतादहङ्कारात् । भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम्" सां०का० रजोगुणोपष्टब्धसात्त्विकादेवाहङ्कारात् एकादशेन्द्रियोत्पत्तिरुक्ता तेनाहङ्कारिकाणीन्द्रियाणि । "घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः" गौ०सू० भौतिकानीति नैयायिकाः । "एतस्माज्जायते प्राणः मनः सर्वेन्द्रियाणि चेति" श्रुतेः आत्मोपादानानीति वेदान्तिनः। अत्र इन्द्रियेभ्यः मनसः पृथग्निर्देशादपि मनसोनेन्द्रियत्वम् अतएव कठोपनिषदि गीतायाञ्च "इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः" "इन्द्रियाणि हयानाहुर्मनः प्रग्रहमेव चेति" च इन्द्रियमनसोर्भेदनिर्देशः"। यथा च तदुत्पत्तिः तथा पञ्चदश्यां दर्शितम् यथा । "तमःप्रधानप्रकृतेस्तद्भोगायेश्वरेच्छया । वियत्पवनतेजोऽम्बुभुवो भूतानि जज्ञिरे । सत्त्वांशैः पञ्चभिस्तेषां क्रमाद्धीन्द्रियपञ्चकम् । श्रोत्रत्वगक्षिरसनघ्राणाख्यमुपजायते । तैरन्तःकरणं सर्वैर्वृत्तिभेदेन तत् द्विधा । मनोविमर्शरूपं स्याद्बुद्धिः स्यान्निश्चयात्मिका । रजोंऽशैः पञ्चभिस्तेषां क्रमात् कर्म्मेन्द्रियाणि तु । वाक्पाणिपादपायूपस्थाभिधानानि जज्ञिरे" १दीपे । तेषां स्थानकार्य्यादिकमुक्तं तत्रैव २दीपे "श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणं चेन्द्रियपञ्चकम्" कर्णादिगोलकस्थं तत्प्राप्य धावेत् बहिर्मुखम् । कदाचित् पिहिते कर्णे श्रूयते शब्द आन्तरः । प्राणवायौ जाठराग्नौ जलपानेऽन्नभक्षणे । व्यज्यन्ते ह्यान्तराः स्पर्शा मीलने चान्तरं तमः । उद्गारे रसगन्धौ चेत्यक्षाणामान्तरग्रहः । पञ्चोक्त्यादानगमनविसर्गानन्दकाः क्रियाः । कृषिवाणिज्यसेवाद्याः पञ्चस्वन्तर्भवन्ति हि । वाक्पाणिपादपायूपस्थं कर्मेन्द्रियपञ्चकम् । मनो दशेन्द्रियाध्यक्षं हृत्पद्मगोलकस्थितम् । तच्चान्तःकरणं बाह्येष्वस्वतन्त्रं विनेन्द्रियैः । अक्षेष्वर्थार्पितेष्वेव गुणदोषविचारकम् । सत्त्वं रजस्तमश्चास्य गुणा, विक्रियते हि तैः । वैराग्यं क्षान्तिरौदार्य्यमित्याद्याः सत्त्वसम्भवाः । कामक्रोधौ लोभमोहावित्याद्या रजउत्थिताः । आलस्यभ्रान्तितन्द्राद्या विकारास्तमउत्थिताः । सात्त्विकैः पुण्यनिष्पत्तिः पापोत्पत्तिश्च राजसैः । तामसे नोभयं किन्तु वृथायुःक्षपणं भवेत्"। तत्रेन्द्रियाणां कार्य्यभेदा अपि सां०का०दर्शिताः यथा "शब्दादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः। वचनादानविहरणोत्

सर्गानन्दाश्च पञ्चानाम्"। आदिपदात् स्पर्शरूपरसगन्धानां ग्रहणम् तथा च श्रोत्रस्य शब्दग्रहणम्, त्वचः स्पर्शग्रहणम्, चक्षुषो रूपग्रहणम् । जिह्वाया रसग्रहणम् । घ्राणस्य गन्धग्रहणमसाधारणं कार्य्यं भवति । एवं वागादीनां वचनादिकर्म्माण्युक्तानि । "अन्तःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यम् । साम्प्रतकालं बाह्यं, त्रिकालमाभ्यन्तरं करणम्" सां० का० । "अन्तःकरणं त्रिविधं बुद्धिरहङ्कारो मन इति । शरीराभ्यन्तरवर्त्तित्वादन्तःकरणम् । दशधा बाह्यमिन्द्रियं त्रयस्यान्तःकरणस्य विषयाख्यं विषयमाख्याति विषयसंकल्पाभिमानाध्यवसायेषु कर्त्तव्येषु द्वारीभवति । तत्र बुद्धीन्द्रियाण्यालोचनेन, कर्मेन्द्रियाणि तु यथास्वं व्यापारेण" सा० कौ० । "विषयाणां ग्रहीतॄणि शनैः पञ्चेन्द्रियाणि च" मनुः । "शौचमिन्द्रियनिग्रहः" मनुः । "इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ" "इन्द्रियाणि प्रमाथीनि" गीता० । पञ्च बाह्यानि ज्ञानेन्द्रियाणीति मनुष्याद्यभिप्रायम् क्वचित् जीवे अदृष्टवशात् ततो न्यूनताऽपि । यथा वृक्षाणाम् स्पर्शसाधनत्वगिन्द्रियमात्रम् शङ्खशुक्त्यादीनाम् त्वग्जिह्वे द्वे इन्द्रिये महीलतादीनां त्रीणीन्द्रियाणि । सर्पादीनां चत्वारीन्द्रियाणि तेषां श्रोत्राभावात् कुम्भीरस्य च चत्वारि तस्य जिह्वाभावात् इत्यवधेयम् । एतेषाञ्च जीवानां लिङ्गशरीरसत्त्वेऽपि तत्तद्गोलकस्थानशून्यत्वाच्च तत्तत्कार्य्यानभिव्यक्तिः । बौद्धमते गोलकान्येवेन्द्रियाणि । तन्मतं विवरणोपन्यासे दूषितं तच्च ९९६पृ० दर्शितम् । २रेतसि ३ वीर्य्ये च । "इन्द्रियकामस्य" श्रुतिः "समावदिन्द्रिया भवन्ति" ताण्ड्य० "समानसामर्थ्याः" भा०

इन्द्रियगोचर पु० इन्द्रियस्य गोचरः विषयः । शब्दादिषु विषयेषु ते हि प्रतिनियतमेकैकस्येन्द्रियस्य ग्राह्या यथा श्रोत्रस्य ग्राह्यः शब्दः, त्वगिन्द्रियस्य स्पर्शस्तद्विशिष्टद्रव्यञ्च, चक्षुषोरूपं तदाश्रयद्रव्यञ्च, रसनायाः रसः, घ्राणस्य गन्ध इत्यादि । एवमन्यान्यपि न्यायादिमते तत्तदिन्द्रियग्राह्याण्युक्तानि यथा "घ्राणस्य गोचरो गन्धो गन्धत्वादिरपि स्मृतः । तथा रसो रसज्ञायास्तथा शब्दोऽपि च श्रुतेः" । आदिपदात् सुरभिदुर्गन्धत्वयोर्ग्रहणम् । तथा रसत्वमाधुर्य्यादिसहितः । एवं शब्दत्वतारत्वमन्दत्वादिसहितः "उद्भूतरूपं नयनस्य गोचरो द्रव्याणि तद्वन्ति पृथक्त्वसंख्ये । विभागसंयोगपरापरत्वस्नेहद्रवत्वं परिमाणयुक्तम् । क्रियां जातिं योग्यवृत्तिं समवायं च तादृशम् । गृह्णाति चक्षुः, सम्बन्धादालोकोद्भूतरूपयोः । उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः । रूपान्यच्चक्षुषो योग्यं रूपमत्रापि कारणम्" भाषा० सोऽपि उद्भूतस्पर्शोऽपि चकारात् तद्वृत्तिस्पर्शत्वमृदुत्वकठिनत्वादि ग्राह्यम् । एते च बाह्येन्द्रियाणां विषयाः । तेषां मते मनस इन्द्रियत्वात् तद्ग्राह्यास्तत्रैवोक्ता यथा "मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिः" एवं सुखत्वदुःखत्वादिकमपि

इन्द्रियग्राम पु० ६त० । इन्द्रियसमुदाये "बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति" मनुः । इन्द्रियवर्गादयोऽप्यत्र । "निर्व्वार मधुनीन्द्रियवर्गः" माघः ।

इन्द्रियज त्रि० इन्द्रियाज्जायते जन–ड ५त० । इन्द्रियसन्निकर्षजाते प्रत्यक्षे । "तदिन्द्रियजतद्धर्म्मबोधसामग्र्यपेक्षते" भाषा० । इन्द्रियजातादयोऽप्यत्र इन्द्रियाणि च विषयसन्निकर्षद्वारा ज्ञाने करणानि विषयसन्निकर्षश्च तत्र व्यापारः व्यापारेणैव तेषां जनकत्वात् ज्ञानानां तज्जन्यत्वम् ।

इन्द्रियज्ञान न० इन्द्रियेण जनितं ज्ञानम् । प्रत्यक्षे ज्ञाने ।

इन्द्रियनिग्रह पु० इन्द्रियाणां निग्रहः यथेष्टं प्रवृत्तानां स्वस्वविषयेभ्यः निवर्त्तनेन निरोधः । इन्द्रियाणां यथेष्टं प्रवृत्तानां स्वस्वविषयेषु १प्रसङ्गनिवारणे । स च सर्व्ववर्णसाधारणधर्म्मः "धृतिः क्षमा दयाऽस्तेयं शौचमिन्द्रियनिग्रहः । धीर्विद्या सत्यमक्रोधो दशकं धर्म्मलक्षणम्" मनुः । इन्द्रियनिग्रहः अप्रतिषिद्धेऽपि विषयेऽनतिप्रसङ्गः" एका० त० रघु० । २योगसाधनाङ्गे श्रोत्रादीनां ज्ञानेन्द्रियाणां वागादीनां च कर्मेन्द्रियाणां स्वस्वव्यापारेषु अनियोजनरूपे रोधने च । सर्वेषामनिरोधे योगसिद्ध्यभावो भङ्ग्या गीतायामुक्तः" । "इन्द्रियाणान्तु सर्व्वेषां यद्येकं क्षरतीन्द्रियम् । तदस्य हरति प्रज्ञां दृतेः पात्रादिवोदकम्" मनसो निग्रहादेवान्येषां निग्रहो भवति नान्यथा "इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते । तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि" गीतायां तथोक्तेः । मनोनिग्रहोपायश्च "असंशयं महाबाहो ! मनो दुर्निग्रहं चलम् । अभ्यासेन तु कौन्तेय ! वैराग्येण च गृह्यते" गीतोक्तः अभ्यासवैराग्यरूपः । यथेच्छमिन्द्रियप्रसङ्गे पापमप्युक्तम् "विहितस्याननुष्ठानात् निन्दितस्य च सेवनात् । अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति" या० स्मृ० । इन्द्रियजयोऽप्यत्र इन्द्रियजये च शौचमेव हेतुः । यथाह पात० सूत्रभाष्ययोः "शौचात् स्वाङ्गजुगुप्सा परैरसंसर्गः" "सत्त्वशुद्धिसौमनस्यैकाग्र्येन्द्रियजयात्मदर्शनानि

च" सू० "शुचेः सत्त्वशुद्धिस्ततः सौमनस्यं तत ऐकाग्र्यं तत इन्द्रियजयस्ततश्चात्मदर्शनयोग्यत्वम् बुद्धिसत्त्वस्य भवतीति" भा० एष च बाह्य उपायः। आभ्यन्तर उपायस्तत्रैवोक्तः। "ग्रहणस्वरूपास्मितान्वयार्थवत्त्वसंयमादिन्द्रियजयः" पा० सू० "सामान्यविशेषात्मा शब्दादिर्ग्राह्यः तेष्विन्द्रियाणां वृत्तिर्ग्रहणं (१रूपम्) न च तत्सामान्यमात्रग्रहणाकारम् कथमनालोचितः स विषयविशेष इन्द्रियेण मनसानुव्यवसीयेतेति। स्वरूपं पुनः प्रकाशात्मनो बुद्धिसत्त्वस्य सामान्यविशेषयोरयुतसिद्धावयवभेदानुगतः समूहो द्रव्यमिन्द्रियम्। (२रूपम्) तेषां तृतीयं रूपम्। अस्मितालक्षणोऽहङ्कारः तस्य सामान्यस्येन्द्रियाणि विशेषाः। चतुर्थं रूपं व्यवसायात्मकाः प्रकाशक्रियास्थितिशीला गुणाः, येषामिन्द्रियाणि साहङ्काराणि परिणामः। पञ्चमं रूपं गुणेषु यदनुगतं पुरुषार्थवत्त्वमिति पञ्चस्वेतेषु इन्द्रियरूपेषु यथाक्रमं संयमः तत्र तत्र जयं कृत्वा पञ्चरूपजयादिन्द्रियजयः प्रादुर्भवति योगिनः" भाष्यम् तत्फलमपि तत्रोक्तम्। "ततो मनोजवित्वं विकरणभावः प्रधानजयश्च" पा० सू० "कायस्य मनोवदनुत्तमगतिलाभो मनोजवित्वम्। विदेहानाम् (देहानपेक्षाणाम्) इन्द्रियाणामभिप्रेतदेशकालविषयापेक्षो वृत्तिलाभः अतीतानागतदूरस्थबाह्यार्थविषयश्च वृत्तिलाभो विकरणभावः। सर्वप्रकृतिविकारवशित्वं प्रधानभावः इत्येतास्तिस्रः सिद्धयो मधुप्रतीका उच्यन्ते एताश्च करणपञ्चकरूपजयादधिगम्यन्ते" भा० एतासाञ्च बाह्यसिद्धीनां पारम्पर्य्येण सत्त्वपुरुषान्यताख्यातिरेव तु मुख्यं फलमिति तत्रैव प्रसिद्धम्।

इन्द्रियवध पु० इन्द्रियाणां वधः स्वस्वकार्य्येषु शक्तिविघातः। इन्द्रियाणां स्वस्वकार्य्यानुकूलशक्तिप्रतिघाते ते च एकादशधा यथाह सां० का० कौमुद्योः "एकादशेन्द्रियवधाः सह बुद्धिवधैरशक्तिरुद्दिष्टा" का० एकादशेन्द्रियवधाः स्वस्वकार्य्यवैकल्यरूपाः तच्च "बाधिर्य्यमित्यादि कौ० वाक्यम् अशक्तिशब्दे ४७२ पृष्ठे उदाहृतम्

इन्द्रियबोधन त्रि० इन्द्रियं बोधयति स्वपानसाध्यवैकल्य बुध+णिच्+ल्यु। स्वपानसाध्यवैकल्यबोधके मद्ये मद्यपाने हि इन्द्रियमात्रस्य स्वस्वकार्य्यव्यापारापाटवकरणात् आत्मवीर्य्यं तानि बोधयतीति तस्य तथात्वम्। "सर्वं पित्तकर मद्यम्" इत्युपक्रम्य "पाके लघु विदाह्युष्णं तीक्ष्णमिन्द्रियबोधनम्"। "कषायमधुरं मद्यं सुगन्धीन्द्रियबोधनम्"। "वातघ्नो मधुरप्रायो हृद्य इन्द्रियबोधनः" सुश्रु०।

इन्द्रियवत् त्रि० इन्द्रियं वश्यतया प्राशस्त्येन वास्त्यस्य मतुप् मस्य वः। १वश्येन्द्रिये २प्रशस्तेन्द्रिये च स्त्रियां ङीप्। इन्द्रियेण तुल्यम् इन्द्रियस्येव इन्द्रिये इव वा वति। इन्द्रियतुल्ये अव्य० इन्द्रियं वीर्य्यमस्त्यस्य मतुप् मस्य वः वेदे पूर्व्वपद नि० दीर्घः। वीर्य्यान्विते। "तेजः पशूनां हविरिन्द्रियावत्" वाज०। "हविष्म इन्द्रियवान् मदिन्तम" वाज०। क्वचित् वेदे दीर्घो न। "सत्रं हुतमिन्द्रियवत" यजु० १४,२,

इन्द्रियवृत्ति स्त्री ६त०। "शब्दादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः। वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानाम्" सांख्योक्ते श्रोत्रादीनां शब्दादिषु प्रकाशनार्थे १व्यापारे कर्म्मेन्द्रियाणां २वचनादानादिव्यापारे च। तत्र बुद्धीन्द्रिय वृत्तिश्च इन्द्रियजन्या बुद्धेस्तत्तदाकारेण परिणामः सा च निर्विकल्पकस्थानीया इति सा० कौ० समर्थितं तच्च ८२६ पृ० आलोचनशब्दे दर्शितम् कर्म्मेन्द्रियवृत्तिश्च वचनादानादिरूपो व्यापारः। मनोरूपेन्द्रियवृत्तिस्तु संकल्पविकल्पाध्यवसायरूपा मनोबुद्ध्योः परिणामभेदः।

इन्द्रियसंप्रयोग पु० इन्द्रियाणां संप्रयोगः स्वस्वविषयेषु प्रयोगः व्यापारणम्। विषयैरिन्द्रियसम्बन्धे असत्ख्यातिशब्दे ५२२पृष्ठे उदा०।

इन्द्रियसन्निकर्ष पु० इन्द्रियस्य स्वस्वविषयैः सह सन्निकर्षः सम्बन्धभेदः। प्रत्यक्षसाधने इन्द्रियस्य स्वस्वविषयैः सम्बन्धभेदरूपे प्रत्यक्षजनकव्यापारे। स च न्यायमते षोढा यथा "विषयेन्द्रियसंबन्धो व्यापारः सोऽपि षड्विधः। द्रव्यग्रहस्तु संयोगात् संयुक्तसमवायतः द्रव्येषु समवेतानां, तथा तत्समवायतः तत्रापि समवेतानां, शब्दस्य समवायतः। तद्वृत्तीनां समवेतसमवायेन तु ग्रहः। विशेषणतया तद्वदभावानां ग्रहो भवेत्" भाषा०। तथा च द्रव्यस्य प्रत्यक्षे इन्द्रियसंयोगः कारणम् द्रव्यसमवेतगुणकर्म्मजातीनां प्रत्यक्षे इन्द्रियसंयुक्तसमवायः। द्रव्यसमवेतसमवेतानां गुणत्वकर्म्मत्वादीनां प्रत्यक्षे इन्द्रियसंयुक्तसमवेतसमवायः। शब्दस्य प्रत्यक्षे श्रोत्रसमवायः शब्दवृत्तिशब्दत्वादेः, श्रोत्रसमवेतसमवायः कारणम्। "अभावप्रत्यक्षे समवायप्रत्यक्षे च इन्द्रियसंयुक्तस्वरूपसम्बन्धविशेषणता हेतुः। वैशेषिकमते तु समवायस्य न प्रत्यक्षम्। अत्र यद्यपि विशेषणता नानाविधा तथा हि भूतलादौ घटाभावः संयुक्तविशेषणतया घटस्थाने संख्यादौ रूपाद्यभावः संयुक्तसमवेतविशेषणतया, संख्यात्वादौ रूपाद्यभावः संयुक्तसम-

वेशतसमवेतविशेषणतया । शब्दाभावः केवलश्रोत्रावच्छिन्न-विशेषणतया । कादौ खत्वाद्यभावः श्रोत्रावच्छिन्नसमवेत-विशेषणतया । एवं कत्वावच्छिन्नाभावे खत्वाभावादिकं विशेषणविशेषणतया । एवं घटाभावादौ पटाद्यभावः संयुक्तविशेषणविशेषणतया । एवमन्यदप्यूह्यम् तथापि विशेषणतात्वरूपेणैकैव सा गण्यते अन्यथा षोढा सन्निकर्ष इति प्राचां प्रवादो व्याहन्यतेति" मुक्ता० । इन्द्रिय संयोगादयोऽप्यत्र

इन्द्रियस्वाप पु० इन्द्रियाणां स्वस्वविषयेषु स्वाप इव अप्रवृत्तिरत्र । १सुषुप्त्यवस्थायाम् तत्र हि मनःसहितसर्व्वेन्द्रियाणामुपरमः श्रुत्यादावुक्तः "सुषुप्तिकाले सकले प्रलीने" इति श्रुत्या "यत्र सुप्तोन कश्चन पश्यतीति" श्रुत्या इन्द्रियमात्रलयश्रवणात् । इन्द्रियैःस्वस्य स्वकारणभावस्वापः प्राप्तिर्यत्र । इन्द्रियाणां स्वरूपतः स्वकारणलयकाले प्रलये । मरणे तु न स्वरूपतस्तेषां लयः । "तमुत्क्रामन्त प्राणोऽनुत्क्रामति प्राणमुत्क्रामन्तं मनोऽनुक्रामतीत्यादि" श्रुतेः "पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् । अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधन" मिति स्मृतेश्च प्राणानामाप्रलयस्थायित्वावगतेः । तत्र गोलकाभावेन वृत्तिमात्र न भवति पुनर्देहान्तरे गोलकोदये वृत्तिलाभ इति भेदः "तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्त" इति शा० सू० भाष्ययोर्विवृतिः एवं सांख्यमतेऽपि किन्तु तन्मते लिङ्गदेहे प्राणपञ्चकं विहाय पञ्चभूतानां प्रवेश इत्येतावन्मात्रभेदः ।

इन्द्रियात्मन् पु० इन्द्रियमेवात्मा । १इन्द्रियस्वरूपे कर्म्मधा० । २इन्द्रियेषु ।

इन्द्रियादि पु० ६त० । सांख्यमतसिद्धे इन्द्रियकारणे अहङ्कारे "सात्त्विक एकादशः प्रवर्त्तते वैकृतादहङ्कारात्" सा० का०

इन्द्रियाधिष्ठातृ ६त० । इन्द्रियाणामचेतनानां स्वस्वकार्य्येषु व्यापारसम्पादनाय ईश्वरनियोजिते देवभेदे । तेच देवाः "दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः" । शारदा० दर्शिताः पदार्थादर्शे एतद्व्या० "एते इन्द्रियाधिष्ठातृदेवाः । यदाहुः वैकारिकादिगाद्याश्च चन्द्रश्चैकादश स्मृताः । इन्द्रियाणामधिष्ठातृदेवास्ते सात्त्विकाः मता" इति तथा च श्रोत्रस्याधिष्ठातृदेवता दिक् । त्वचः वायुः, चक्षुषः अर्कः । रसनायाः प्रचेताः, घ्राणस्याश्विनौ. वाचः अग्निः पाणेः शक्रः, पादस्य उपेन्द्रः (विष्णुः), पायोः मित्रः उपस्थस्य कः ब्रह्मा । मनसः चन्द्रमाः ।

इन्द्रियायतन ६त० । श्रोत्राद्याधारे देहे तच्च इन्द्रियाधारत्वत्ताथात्वम् । स च सूक्ष्मएव देहः । यथाह सा० का० "पूर्व्वोत्पन्नम (स) सक्तं नियतं महदादिसूक्ष्मपर्यन्तम् । संसरति निरुपभोगं भावैरधिवासितं लिङ्गम्" । "प्रधानेनादिसर्गे प्रतिपुरुषमेकैकमुत्पादितम् व्या चादिसर्गात् आ च महाप्रलयादवतिष्ठते महदादिसूक्ष्मपर्य्यन्तं महदहङ्कारैकादशेन्द्रियपञ्चतन्मात्रपर्य्यन्तम् एषां समुदायः सूक्ष्मशरीरं शान्तघोरमूढैरिन्द्रियैरन्वितत्वाद्विशेषः । नन्वस्त्वेतदेव शरीरं भोगायतनं पुरुषस्य, कृतं दृश्यमानेन षाट्कौशिकेन शरीरेणेत्यतआह संसरतीति उपात्तमुपात्तं च शरीर जहाति हायंहायं चोपादत्ते, कस्मात् ? निरुपभोगं यतः,, षाट्कौशिकं शरीरं विना सूक्ष्मं निरुपभोगं, तस्मात्संसरति । ननु धर्म्माधर्म्मनिमित्तः ससारः न च सूक्ष्मशरीरस्यास्ति तद्योगः, तत्कथं संसरतीत्यत आह भावैरधिवासितं धर्म्माधर्म्मज्ञानाज्ञानवैराग्यावैराग्यैश्वर्यानैश्वर्याणि भावास्तदन्विता बुद्धिः तदन्वितञ्च सूक्ष्मशरीरमिति तदपि भावैरधिवासितं यथा सुरभिचम्पकसम्पर्काद्वस्त्रं तदामोदवासितम्भवति तस्माद्भावैरधिवासितत्वात्संसरति । कस्मात्पुनः प्रधानमिव महाप्रलयेऽपि तच्छरीरं न तिष्ठतीत्यत आह लिङ्गम् लयं गच्छतीति लिङ्गं हेतुमत्त्वेन चास्य लिङ्गत्वमिति" भावः । सा०कौ० । "पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् । अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम्" स्मृतिः । पञ्चद० इदमेव वाक्यमुपन्यस्तम् । न्यायादिमते स्थूलदेहएव इन्द्रियायतनं तैः सूक्ष्मदेहानङ्गीकारात् इति भेदः जीवादृष्टवशादेशापूर्व्वदेह एव तत्तदिन्द्रियाण्यपि तत्तद्देहे उत्पद्यन्ते मनांसि तु अनन्तानि तानि च नित्यानि तेषाञ्च अदृष्टवशात् एकैकस्मिन् देहे एकैकस्य प्रवेश इति हि तेषां सम्मतम् । २ आत्मनि च "आत्मेन्द्रियाद्यधिष्ठतो" लिङ्गशरीरशब्दे एतेषां युक्तायुक्तत्वपरीक्षणम् करिष्यते ।

इन्द्रियाराम त्रि० इन्द्रियेषु आरमति आ+रम-घञ् । इन्द्रियार्थभोगप्रसक्ते "अघायुरिन्द्रियारामो मोघं पार्थ स जीवति" गीता० ।

इन्द्रियार्थ पु० ६त० । इन्द्रियगोचरशब्दार्थे शब्दादौ "इन्द्रियार्थेषु सर्व्वेषु न प्रसज्येत कामतः" मनुः । द्वन्द्वः । इन्द्रिये तद्विषये च द्वि०व० । "इन्द्रियार्थसन्निकर्षोत्पन्नम्" गौ०सू० । इन्द्रियेणार्थः असन्निकर्षे इत्येव तत्र विग्रहस्तु न्याय्यः ।

इन्द्रियाविन् त्रि० इन्द्रिय वश्यतया प्राशस्त्येन दास्यस्य का०

विनि वेदे पूर्व्वपददीर्घ । १वश्येन्द्रिये २प्रशस्तेन्द्रिये च । "सएवास्मिन्निन्द्रियं दधा तन्द्रियाव्येव भवति" श्रुतिः ।

इन्द्रियेश पु० ६त० । १जीवे तदधिष्ठानेनैव तेषां प्रवृत्त्युत्पत्तेस्तथात्वम् २इन्द्रियाधिष्ठातृदिगादिदेवादिषु च ।

इन्द्रेज्य पु० ६त० । वृहस्पतौ शक्रेज्येन्द्रपूज्यादयोऽप्यत्र

इन्द्रेश्वर पु० इन्द्रेण स्थापित ईश्वरः ईश्वरलिङ्गम् । महेन्द्रपर्वतस्थे वृत्रासुरवधजनितब्रह्महत्याविघातार्थं शक्रेण स्थापिते शिवलिङ्गभेदे तत्कथा प्रा० वि० कालि० पुराणम् । "वृत्रं हत्वा ततः शक्रोमाहेन्द्रे स्थाप्य शङ्करम् । लिङ्गं विमुक्तः पापौघैस्ततः स त्रिदिवं गतः । अद्यापीन्द्रेश्वरं दृष्ट्वा तथा रामेश्वरं प्रभुम् । मुच्यते ब्रह्महत्याया नरो वै नात्र संशयः" ।

इन्ध दीप्तौ रुधा० आ०अक० सेट् निष्ठायामनिट् । वर्त्तमानेचाऽतोनिष्ठा । इन्धे, इन्धाते, इन्धते, "यं त्वां जनास इन्धते ऋ० ८,४,२ इन्धीत, इन्धाम् । इन्त्स इन्धुम् । ऐन्ध ऐन्धिष्ट इन्धाम्-बभूव । आस चक्रे इन्धिष्यते ऐन्धिष्यत । इन्धितव्यम् । इन्धिता इन्धनम् । इद्धोवर्त्तते । क्विप् समित् इन्धानः "अग्निमिन्धानो मनसा धियम् सचेत मर्त्यः" ऋ० । भावे इध्यते ऐन्धि । "परो यदिध्यते दिवि छा०उ०तु पदगणव्यत्यासः ।

इन्ध पु०इन्ध+करणे-घञ् । १काष्ठे इन्ध-अच् । २दीप्तियुक्ते । ३तन्नामके ऋषिभेदे पु० ततः गोत्रे नडा०फक् । ऐन्धायनस्तद्गोत्रापत्ये पुंस्त्री । दीप्तियुक्ते दक्षिणनेत्रे विशेषेण स्थिते ४परमात्मनि पु० । तस्य तदर्थत्वञ्च समर्थितम् वृ०उ०भा० । "इन्धोह वै नामैष योऽयं दक्षिणेऽक्षन् पुरुषस्त वा एतमिन्धं सन्तमिन्द्र इत्याचक्षते परोक्षेणैव, परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः" "इन्धोह वै नाम इन्ध इत्येवं नामायं 'चक्षुर्वै ब्रह्मेति' आदित्यान्तर्गतः पुरुष एषः, योऽयं दक्षिणेऽक्षन् अक्षिणि विशेषेण व्यवस्थितः । स च सत्यनामा तं वा एतं पुरुषं दीप्तिगुणत्वात् प्रत्यक्षं नामास्य इन्ध इति तमिन्धं सन्तमिन्द्र इत्याचक्षते परोक्षेण, यस्मात् परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः प्रत्यक्षनामग्रहणं द्विषन्ति" भा० "इन्धयति दीपयति इन्ध-णिच्-अच् । ५दीपके त्रि० । एतस्मात् पूर्वस्थयो ! आग्न्याग्नेग्राः समासे मुम् । आग्नीन्ध्रः अग्निमिन्धः । "होताध्वर्युरावया अग्निमिन्धो पावपाभः" यजु० २५,२८, अग्निमिन्धस्य अग्नीत् नाम ऋत्विक् ।

इन्धन न०इध्यतेऽनेन इन्ध+करणे-ल्युट् । १काष्ठे "इन्धनौघधगप्यग्निस्त्विषा नात्येति पूषणम्" माघः । "कामिनीषु विवाहेषु गवां भक्ष्ये तथेन्धने" मनुः । इन्धने इन्धनापहारे इत्यर्थः "इन्धनार्थमशुष्काणाम्" प्रा० वि० स्मृतिः । इन्धयति इन्ध-णिच्-ल्यु । २दीपनकर्त्तरि त्रि० । भावे ल्युट् । ३प्रज्वालने न० ।

इन्धन्वन् त्रि० इन्धन+मत्वर्थीयः । वेदे वनिप् नि० वर्णलोपः । इन्धनयुक्ते । "इन्धन्वभिर्धेनुभीरप्सुद्घभिः" ऋ० २,३४,५, "इन्धन्वभिः समिन्धनवद्भिः" भा० ।

इन्व गतौ भ्वा० निरु० । इनधातौ ९२८ पृष्ठे विवृतिः ।

इन्वका स्त्री इन्वति इन्व-अक् स इव कायति कै-क । मृगशिरोनक्षत्रोपरिस्थे इल्वलाख्यतारासु अमरटीका ।

इभ पु० इण्-भ किच्च । १हस्तिनि, "वन्येभदानानिलगन्धदुर्द्धराः माघः २तत्संख्यातुल्यसंख्याके अष्टसंख्यान्विते च । गजाहि अष्टसु दिक्षु स्थिता ऐरावतादयोऽष्टौ वर्त्तन्ते इति तेषामष्टत्वम् । ते च "ऐरावतः पुण्डरीकः वामनः कुमुदोऽञ्जनः । पुष्पदन्तः सार्व्वभौमः सुप्रतीकश्च दिग्गजाः" अमरोक्तक्रमेण पूर्व्वादीशानान्तदिक्षु स्थिताः । अस्य च उत्तरपदस्थत्वे श्रेष्ठार्थद्योतकता व्याघ्रादेराकृतिगणत्वात् उपमितसमासः । स्त्रियां ङीप् । जातित्वात् पोटायुवत्येति समासेऽस्य पूर्वनिपातः पुंवद्भावश्च इभपोटा

इभलक्षणविभागादि वृ०सं० "मध्वाभदन्ताः सुविभक्तदेहा न चोपदिग्धाश्च कृशाः क्षमाश्च । गात्रैः समैश्चापसमानवंशा वराहतुल्यैर्जघनैश्च भद्राः ॥ वक्षोऽथ कक्षावलयः श्लथाश्च लम्बोदरं त्वग्बृहती गलश्च । स्थूला च कुक्षिः सह पेचकेन सैंही च दृङ्मन्दमतङ्गजस्य ॥ मृगास्तु ह्रस्वाधरवालमेढ्रास्तन्वङ्घ्रिकण्ठद्विजहस्तकर्णाः । स्थूलेक्षणाश्चेति यथोक्तचिह्नैः सङ्कीर्णनागा व्यतिमिश्रचिह्नाः ॥ पञ्चोन्नतिः सप्त मृगस्य दैर्घ्यमष्टौ च हस्ताः परिणाहमानम् । एकद्विवृद्धावथ मन्दभद्रौ सङ्कीर्णनागोऽनियतप्रमाणः ॥ भद्रस्य वर्णो हरितो मदश्च मन्दस्य हारिद्रकसन्निकाशः । कृष्णो मदश्चाभिहितो मृगस्य सङ्कीर्णनागस्य मदो विमिश्रः ॥ ताम्रौष्ठतालुवदनाः कलविङ्कनेत्राः, स्निग्धोन्नताग्रदशनाः पृथुलायतास्याः । चापोन्नतायतनिगूढनिमग्नवंशास्तन्वेकरोमचितकूर्मसमानकुम्भाः । विस्तीर्णकर्णहनुनाभिललाटगुह्याः कूर्मोन्नतैर्द्विनवविंशतिभिर्नखैश्च । रेखात्रयोपचितवृत्तकराः सुवालाः धन्याः सुगन्धिमदपुष्करमारुताश्च । दीर्घाङ्गु-

खिरक्तपुष्कराः सजलाम्भोदनिनादबृंहिणः । दृढ़ायतउन्नतकन्धरा धन्या भूमिपतेर्मतङ्गजाः । निर्मदाभ्यधिकहीननखाङ्गान् कुब्जवामनकमेषविषाणान् । दृश्यकोषफलपुष्करहीनान् श्यावनीलशवलासिततालून् । स्वल्पवक्त्रारुहमत्कुणषण्ढान् हस्तिनीं च गजलक्षणयुक्ताम् । गर्भिणीं च नृपतिः परदेशं प्रापयेदतिविरूपफलास्ते"।

हेमा०परि०ख०लक्षणसमुच्चये विष्णुध०।"नागाः प्रशस्ता धर्म्मज्ञ ! प्रमाणादधिकाश्च ये । दीर्घहस्ता महोच्छ्राया-ऽवामनाश्च विशेषतः । निगूढवंशामध्यश्च व्यूढा व्यूढोश्चमस्तकाः"(व्यूढा विपुलाः)"विंशत्यष्टादशनखाः। शीतकालमदाश्च ये । ते प्रशस्तामहानागाः ये तथा सप्तसमुच्छ्रिताः। दन्तच्छेदेषु दृश्येत येषां स्वस्तिकलक्षणम् । भृङ्गारवालव्यजना वर्द्धमानाङ्कुशास्तथा । धार्य्या नैते तथा धार्या वामना ये च मत्कुणाः । हस्तिन्योयाश्च गर्भिण्योये च मूढ़ा मतङ्गजाः । श्वपाकवाश्च कुब्जाश्च सहन्ताएव भार्गव ! । कुदन्ताश्च तथा वर्ज्या वामकूटाश्च यत्नतः । चस्तुस्थयश्च कूटाश्च ये षण्ढा विकटाश्च ये" । राम उवाच वामनाद्याश्च ये नागाः प्रोक्तानिन्दितलक्षणाः । तेषां तु श्रोतुमिच्छामि लक्षणं वरुणात्मज ! । पुष्कर उवाच । आनाहायामसंपूर्णोयोऽधिहस्तो भवेद्गजः । वामनः स समाख्यातोमत्कुणोदन्तवर्जितः।(आनाहःस्थूलता) (आयामो दैर्घ्यम्)दशां चतुर्थीं संप्राप्य वर्द्धते यस्य न द्विजो । स्थूलाघनायतौ स्यातां स मूढो हि गजोऽधमः । श्वपाकलो विशालेन दन्तेनैकेन वारणः । संक्षिप्तपश्चाज्जघन: पृष्ठमध्यसमुन्नतः । प्रमाणहीननाभिश्च स कुब्जोवारणाधमः। अनुन्नताभ्यां सहन्तः कुदन्तःस्यात्ततो बहिः । (बहिर्दन्तसीमनि) । वामदन्तोन्नतो नागो वामकूटश्च कथ्यते । दन्तावम्बुस्पृशौ यस्य सोऽम्बुस्पृगिति कीर्तितः । एकदन्तस्तथा नागः कूट इत्यभिधीयते । पादयोः सन्निकर्षैः स्यात् यस्य नागस्य गच्छतः। स षण्डोऽध्वनि युद्धे च लक्षणज्ञैर्न पूजितः । अरत्न्यभ्यधिकं यस्य विस्तरेणस्तनान्तरम्। विकट: स विनिर्दिष्टो दुर्गतिर्निन्दितोगजः । राम उवाच। श्रोतुमिच्छाम्यहम् देव! कुञ्जरं सप्तसमुच्छ्रितम्। यं प्राप्य किल राजानोजयन्ति वसुधां नृपाः । पुष्कर उवाच ।वर्त्तः सत्वबलं रूपकान्तिःसंहननञ्जवः। सप्त तानि स्फुटा यस्य स गजः सप्तसमुच्छ्रितः । ये वामदक्षिणपार्श्वभागेनास्रावकामाःपिटकोत्थयापि। ते नागमुख्या विजयाय युद्धे भवन्ति राज्ञां न हि संशयोऽत्र" तत्रैव पराशरसंहिता । "हस्तिनां जातिदेशवर्णाकृतिप्रमाणचेष्टादिलक्षणमनुव्याख्यास्यामः । तत्र जातयश्चतस्रो भवन्ति । भद्रा मन्दा मृगा मिश्राश्चेति तत्परिज्ञानमाकृतिचेष्टादिभिरुपदिश्यते । तत्र भद्रजातिश्चारुदृढ़ायतमुखोव्यूढोन्नमस्तकः उदग्रसत्वोऽनुवृत्तकरः श्रोता दीर्घपुष्कराङ्गुलिशालधिः महामन्थोरोमशग्रीवः । स्थूलमेढ्रोदरताम्रतालुजिह्वोष्ठः सुपार्श्वः स्निग्धः सवर्णमृदुरोमा कूर्म्मपादः सध्यस्थितिचितांसः पृथ्वासनः सूक्ष्मविन्दुचित्रोबहुतुरोमोपचितश्रोत्रःसुनखो धनुःपृष्ठवंशो मधुवर्णतालुयूथाभिरक्षिता सहिष्णुरन्वर्थवेदो बलवान् कामातुरोपचारमर्दी मदुनोपायेन साध्य आम्बुपदे शय्याहो च भवति"। (उदग्रो उच्चः अनुवृत्तकरः अनुक्रमेण वृत्तकरः पुष्करः कराग्रं मन्या धमनी अन्वर्थवेदी अग्रे वध्यते)। मन्दजातिः संकेताभिज्ञः सुहस्तो महोदरकरश्रोताः स्थूलदन्तस्ततपृष्ठवंशः स्थूलहस्तजिह्वांसग्रीवः, पृथुहस्तमस्तकः सुविभक्तोरःशिराःसुवृत्तहस्तश्रोत्रः स्थूलास्थिकरकशापीविलपादः सूक्ष्मनाभिस्तनुताम्रत्वक्कर्णकटः दीर्घोग्रमेढ्राङ्गुलिर्बालबालधिर्मुष्कराम्बूकचवरणोपदिग्धोह्यन्तः सुबद्धजघनः सहस्तोरस्कोगम्भीरवेदी मन्दजातिः जातमद्भोद्दण्डमन्मथश्लोकश्रसाध्योयूथानुगामी यहणगतोपि नारिभयमाविशति। (गम्भीरवेदी वध्यते उपदिग्धो लिप्तः) मृगजातीयः पुनर्हृस्वपुष्करोश्वहनुहस्तबाहुमेहनहृदन्तनखपृथुरंशग्रीवासोदरमेढ्रतनुर्विशालनेत्रलक्षणावृत्ततनुश्रोत्रः कुष्ठोष्ठो घनायतापकायः संक्षिप्तकरावोन्यस्तमस्तकोदीर्घजिह्वोविषाणोपनीतः शीघ्रोवह्नधनोभारसाहो मनस्वी दुर्दमः स्वयूथपर्य्यन्तानुचारी भिन्नपुरीषोऽतिक्रमणवेदी क्लेशासहः क्रन्दनश्चेति । मिश्रास्तु तेषां परस्परसंयोगजाः सर्वसंकुललक्षणा इति। भद्रा श्रेष्ठा भवन्त्यासां मन्द्रा मध्या कनीयसी । मृगा मिश्राऽधिकैर्ज्ञेया गुणदोषैः समाचरः । अथ वनभेदेन गजभेदाः । अथैषां प्राच्यकारुषदशार्णमार्गचेदककालिङ्गकापरान्तिकसौराष्ट्रपञ्चनदाख्यान्यष्टौ वनानि वासस्थानानि तेषां पृथक् पृथक् कर्म्मलक्षणमुपदेक्ष्यामः तत्र हिमवद्गङ्गाप्रयागलौहित्यान्तरे प्राच्यवनसमुत्पन्नाः कपिलाः अव्ययाः कुनखपार्ष्णयोसारयाश्चलपृथुपेचकवंशपिण्डकाः पृथुहस्तामन्दवेगाकृत्याश्चपलाकृतयो भवन्ति । (पेचकः पुच्छमूलम्) मेकलो मत्स्यो गङ्गावतारश्चेति कारूकाख्यवनमत्रोत्पन्नाः श्यामाश्चण्डाः उच्चरणाहस्वालात्याः

वृताः शोभोदग्रा बृहद्विरदहामैर्दन्तैर्दन्तिनो भवन्ति । महागिरिदशार्णविन्ध्याटवीरावतीनां मध्ये दशार्णं वनमभिख्यातमत्र दीर्घाङ्गुलिपुष्कराः पाण्डुभाः श्यामा वा दुर्ग्रहाः सुवृत्तजघनाग्राः सितसूक्ष्मबिन्दुचित्राश्चूतफलतुल्यमदगन्धिनो विशालोत्सङ्गदन्ताः स्थूलहस्ताः सशिरोग्रीवा मध्यगाः स्वासनाः सत्ववन्तश्च । पारिपात्रवैदिशब्रह्मावर्त्तवनानामन्तर्मार्गणेयकं वनमत्रोदग्राः शीघ्रदीर्घक्रमेणोपदिग्धाङ्गाः बलवन्तोऽभिजाताः सुप्रमाणाः मध्यमास्मृदुत्वचः कचाविलप्राया अल्पपेचका हरिश्यावाखण्डच्छवाः सुहस्ताः स्निग्धरोमाणः स्थिराः सुशरीराः करेणूनामधिपतयः स्वल्पतापाश्च । त्रिपुरसह्यदक्षिणारण्योत्कलानां मध्ये कालिङ्गकं वनमत्र कलविङ्काभाः सर्व्वश्वेताः स्थिरपदाः शीघ्राः मृदुखररोमाणस्तनुत्वगुदरा दीर्घकेशबालधयो दीर्घक्रमाः बलवन्तोऽल्पपेचकाः पद्मप्रभा यातुरुदग्रा धनुःपृष्ठवंशा रक्ततालुजिह्वोष्ठाः सुप्रयोगप्रहसुखाः वराहजघनाः नीचवृत्तनखाः स्थिरचरणाः आशुसुवेदिनो मधृदशनाः पीतह्रस्वशिरोधराः महोरगवृहत्कराः मृदुदीर्घहस्ता हस्तिनो भवन्ति । नर्म्मदोदधिसेवदेशान्तोपहारणामन्तरतोऽपरान्तिकं वनमत्र मानिनो धीराः श्यामाः सप्तप्रतिष्ठिताः हृस्वजघनशिरोधरा पीनायतविषाणाः सास्नका मृदुत्वच उदपादीर्घरक्तताल्वोष्ठजिह्वामहोत्सङ्गाः पद्ममदगन्धिनो धनुःपृष्ठवंशा विवृत्तास्याभाग्यवनविचारिणः । द्वारकार्बुदावर्त्तनर्मदान्तरतः सौराष्ट्रकं वनमत्राल्पायुषश्चण्डाः पिङ्गायताक्षाः मध्यायताङ्घ्रयोऽल्पपेचका मृदुविभक्तमात्राप्रतिलोमलोमशचररणास्तनुत्वक्कर्णनखाः सूक्ष्मदन्ताः शिशाल्यज इति । हिमवत्सिन्धुकुरुजाङ्गलकानामभ्यन्तरे वनं पञ्चनदाख्यं तत्र स्फुटितरूक्षश्वेतांशुदन्तास्तनुविन्दूपचितकराः सुगन्धयोरुदवीमहापेचकदेशाङ्गप्रमाणाः सूक्ष्मदृहत्त्वचो दुर्विनेयाध्यानशीलाः क्रयलष्टणो भवन्त्यपि । वनेषु तेषु जायन्ते प्रधानाभध्यमोत्तमाः । प्रशस्ता निन्दिताश्चापि तेषां वक्ष्यामि लक्षणम् । नभजतुकाठसङ्काशं सुसमत्स्याङ्गुष्ठपुष्करं दुर्गन्धं कर्कशत्वग्रोमाणमाततस्तब्धस्थूलविरलपर्वाणं हस्तिनो हस्तमध्यन्यविषातधन्यं पीतं मृदुरोमाणमनुपूर्व्वपतितं चारुदीर्घाङ्गुलिपीनं पृथुपुष्करं मृदुवलिमम् । सुगन्धिवृत्तं पञ्चहस्तायतं हिरक्तं बृहत्स्फीतात्योन्नतांश च । कचस्फुटिताशुसमलिनविषमवक्रखण्डसूक्ष्मदन्तावपूजितौ पूजितौ च स्निग्धलक्षणप्रदक्षिणोन्नतामलिनसममाहितौ मधुवर्णौ मुकुलिताग्रावाबाधमध्यायातावष्टादशाङ्गुलपरिणाहौ । अथ विरूपविषमे वराहनकुलध्वाङ्क्षवानराभे रूक्षविच्छिन्नवर्णे सन्निमीलिते लोचने न पूजिते पूजिते च कलविङ्काभमूर्य्यमणिवह्नितुल्ये सनुपक्ष्मिते च । प्रशस्तं समाहितमायतपृथुबाहिल्यमवस्थितरक्ततालुजिह्वोष्ठचारुसूक्ष्मसलक्षणबिन्दूपचितं सर्व्वसंपूर्णम् । मृदुमृदुनिर्याणपीडितपुष्करं विषममासनात् षडङ्गुलावाग्बन्धनाभावेन नतकुम्भलम्बेनातिरिक्तं प्रमाणं घण्टाघनपिङ्ग रूक्षास्यूलद्दन्द्वरोमोपचितमपूजितं शिरोवारणानां पूजितं महोदयस्थानसुपवितसप्तकमनिम्नखरनिर्याणं पृथुपुष्करं स्निग्धमृदुसूक्ष्मशुभ्ररोमसुविभक्तोष्णीषवितानावपाहं वा सुखोत्कृष्टोपकृष्टौ वृत्तौ स्तब्धौ तनुविषमशिराततौ पीडितान्तावतिरुद्धप्रमाणौ संहतच्छिद्रौ सान्द्रमृदुतप्रमाणसिरालावपाठितपुटसंविपुलमूलिकौ, पृष्ठच्छिद्रौ दुन्दुभिस्वनौ वा । क्लेशावहाच्छिद्रातिदीर्घातुपचितपीड़िका सुमुहती पृष्ठालम्बनात्युन्नतायतास्थानावपीडिता ग्रीवा वारणस्याप्रशस्ता शस्ता तु मस्तोपरि पिण्डिका दृढारत्नौ त्रिवलिः सान्तारत्निपरीणाहा द्वादशाङ्गुलायता सर्व्वसम्पूर्णा वा । विषममवाप्यं संक्षिप्तलम्बं संपुटमानसं विगर्हितं स्थिरं च विनतमत्युन्नतं वक्रं पृष्ठवंशसशोभनम् । शोभनमुपचितसूक्ष्मं धनुःप्रमाणमेव संस्थानं विद्यात् । अथ पूर्व्वगात्रच्छिद्रोन्नतांस विकलितहस्तयोर्वृत्तं शिरालम्भनं स्तब्धव्याधिद्वन्द्वोहनिर्लग्नं विषमकचाविलम् प्रमाणहीनमनिष्टम् दृष्टमनुपूर्णोपचितं स्थिरविभक्ताजिलसत्कोटमनुपविम्बसुखमच्छिद्ररन्ध्रोपचितमयोरक्तं वा । अथ जघनं घनसुच्छ्रितास्थि निर्मांसपेचकं कलाहीनातिरिक्तप्रमाणं बालध्यनुयायि ह्यनर्थकरम् । अर्थकरमल्पपेचकं पलोपचितमदृश्यशुष्कास्पष्टचत्वरसमायताग्नं . चारुबालधिपरिपूर्णाण्डकोषायततया नातिशिरालपल्लवाकारमेहनमजयनश्चयनं च श्यावाल्परूक्षस्फुटितनखक्लिष्टसन्धि, परुषासारतलसहा न पूजिताः पादाः अन्ये भवन्त्यपि च । विंशत्यष्टादशनखाः स्थिराः कूर्मसमाहिताः । गजानां पूजिताः पादा ये च सुविकचाविलाः । पादाः कचाविला रूक्षविवर्णाः परुषाः कृशाः । वारणानान्न शस्ताः सूर्य्ये वा स्निग्धतनूरुहाः । सूक्ष्मविन्दुचितां स्निग्धां त्वचं शंसन्ति दन्तिनाम् । आसस्पृशौ

विशालस्य विषाणौ पार्श्वउन्नतौ । उपाहतो विशालेन दन्तैकेन वारणः । अनुन्नताभ्यां संपन्नःकुदन्तः स्यान्नतावधिः । ऊर्द्धं मस्तान्तरालस्य प्रतिमानसमौ द्विजौ । सुवृस्थूलातिदीर्घेण दन्तेनैकेन वा गुणाः । वर्ज्यास्ते शुभकामेन सर्व्व एवातिगर्हिताः। अब्दद्वये नदीजानां पञ्चमेऽब्दे वनौकसाम् । दन्तमूलपरीणाहान् द्विगुणान्कल्पयेत्परे । शरशक्तिधनुश्चक्रस्थूलपङ्क्तिसलक्षणाः । दन्ताग्रराजयो यस्य स नृपं वोढुमर्हति । रोमृणां तु संश्रये यश्च पिटक स उदाहृतः । स ज्येष्ठः सप्तभागोनोमध्यमोऽसौ मतङ्गजः। अन्यः षड्भागहीनःस्यादतोऽन्योहि न पूजितः । सुखाय पेचके दैर्घ्यं पृष्ठपार्श्वोदरान्तरम्। आनाहउच्छ्रय पाटाद्विज्ञेयो यावदासनम्”। वनविशेषेण गजलक्षणं तत्रैव वार्हस्पत्यसंहिता । “वनानां मध्ये प्राच्यं कालिङ्गकमापरान्तिकं च त्रीणि वनान्यतिशोभनानि। त्रयाणामपि प्राच्यं वनं मध्यवनमपरेषामिव शोभनम् । तत्रैरावतकुलप्रसूतिसम्भवाः प्रायेण मृगमिश्रभद्रलक्षणाः महाकायाः करिणो भवन्ति । विनयसत्त्वशक्तिसम्पन्नाःपूगफलप्रभास्ताम्रत्विषः प्रविरलमदा गजा युद्धेचापसर्पणोपसर्पणनीरवा भवन्ति नातिक्रोधनाः सगुह्वेजिताः सत्वं दर्शयन्ति । ते च हृष्टैः कवलैः कायोपचयातातिशयेन मदाभिमुखाः कर्त्तव्याः । कालिङ्गके वाऽऽपरान्तिके च त्रेतायुगोत्पन्नाः मन्दा महागजान्वयजा मन्दाभिधानाः प्रायशो मृगावयवाः सङ्कीर्णगजाः समुत्पद्यन्ते । नात्युदग्रा जलदप्रभा नातिस्थिरा मन्दा युद्धप्रियाश्च गजा भवन्ति । तथा काम्बदाशार्णमार्गेयकाभिधानेषु मध्यमा गजाः समुत्पद्यन्ते मृगमन्दजातयः ते च चार्वेवयवाः मध्यमबलामध्यम प्रमाणाः स्थूलरोमाविलशरीराक्रूरदा मन्दगतयः । तथा सौराष्ट्रे पाञ्चनदाभिधाने द्वापरयुगोत्पन्ना मृगमतङ्गजान्वया मृगप्राया गजाभवन्ति भीरवः कृशिताङ्गाः नातिचण्डादुर्मदाः दुर्वृत्ताश्च एवंविधाःगजाः समुत्पद्यन्ते वनाश्च वनान्तरे गतेषु दुर्वृत्तेषु गजेषु धेनुकासम्पर्केण शुभवनेऽपि कालिङ्गकेऽपि । त्रासशीलश्च भीरुश्च ह्रस्व वामनमस्तकः । हीनाशभोगो दुःशीलस्त्वसंहृतशरीरभृत् । समुच्छ्रितस्तनायामो परीणाहविवर्जितः । मृगस्वरूपोदीनश्च मृगजातिर्गजाधमः । अतः परं प्रवक्ष्यामि संकीर्णस्य च लक्षणम् । पशुत्वाद्वारणानाञ्च गच्छतां च वियोनिषु । धेनुकासु भवन्त्येते गजा संकीर्णलक्षणाः। भद्रोमन्द्रोमृगोवाथ शुद्धजातिः प्रजायते । तस्मान्मिश्राणि रूपाणि गदतोमे निबोधत । आनन्त्यान्मिश्रजातानां निश्चयोनोपपद्यते । तथापि किञ्चिदुद्देशान्मिश्रलक्षणमुच्यते । भद्रमन्द्रो भद्रमृगो भद्रमन्द्रमृगस्तथा । इह भेदत्रयं मन्दमृगयोरपि जायते । भद्रादीनां च सर्वेषां रूपं संकीर्णसंज्ञितम् । ऊर्द्धाधःकार्य्यभेदेन तज्जानि भिद्यते द्विधा । त्रिधा च भिद्यतेभूय एकैकन्तु यथाक्रमम् । एवमष्टादशविधं कीर्त्तितं मिश्रलक्षणम् । शुभाशुभं विभागेन साम्प्रतम् निगदाम्यहम् । भद्रमन्द्रोभवेदिष्टोमृगमन्द्रस्तथाधमः । भद्रमन्द्रमृगश्चैव मध्यमः परिकीर्त्तितः। भद्रजातिर्महाकायोगजोमध्ये तु दन्तिनाम् । मन्द्रोऽवयवलेशेन स युक्तो भवति द्विपः। मृगस्यापि हि रूपेण किञ्चिन्नानुगतेन वै। अशुभत्वं न भद्रस्य जायते शोभनोहि सः । लोचनानां प्रधानत्वं यस्माच्छास्त्रेषु कीर्त्तितम् । तस्मान्मृगाक्षिसंयुक्तोभद्रोऽपि हि न शस्यते। भाद्रेणो परिकायेन मान्द्रेनाधोगतेन वा। उन्नतोहि गजानान्तु भद्रमन्द्रोभवेद्गजः । अनेनैव हि रूपेण विपर्य्यासेन यो गजः। सोऽपि शोभन एव स्यान्मन्द्रभद्रइति स्मृतः। एवं विधात् मृगे चापि लक्षणान्मिश्रलक्षणम् । महावयवत्वाङ्गत्वात् मृगरूपस्य लेशतः। भद्रावयवनिर्मुक्तोमध्यमोऽसौ गजो भवेत्” कायेन यो भवेद्भद्रो मन्द्रोवापि मतङ्गजः। मृगगात्रोऽपरश्चैव स भवेद्वेगवान् गजः। मृगरूपाधिकत्वं च दृश्यते यस्य दन्तिनः । अधमस्तु स विज्ञेयः सत्वशक्तिविवर्जितः । करदन्ताक्षिकुम्भैश्च यो मृगोजायते गजः । शेषावयवभद्रोऽपि हीन एव भवेदसौ । एवमुद्देशमात्रेण मिश्रभेदा मयोदिताः। नोदिता येऽपि तेऽत्रापि मिश्रा ज्ञेया मनीषिभिः। मिश्रलक्षणसंयोग उत्कृष्टं यस्य दृश्यते । रूपन्नामधेयोऽसौ जायते हि मतङ्गजः । अतः परम्प्रवक्ष्यामि लक्षणं गिरिचारिणाम्। तथा नदी चराणां च तथैवोभयचारिणाम्। महाबला महाकायाश्चितांसा गिरिचारिणः । सुपार्श्वोश्चारुदिग्धाङ्गादृढपादागतक्लमाः। उदग्रानिर्भयाश्चैव सल्लकीकवलप्रियाः । तटाघातविधौ भुग्नदन्तदारितभूतलाः । शार्दूलादिमहासत्वसंस्फोटातङ्कवर्जिताः । मदस्रावक्लमोत्साहादुर्दमावारिभीरवः । पांशुक्रीडारता नित्यं द्रुमोन्मूलनतत्पराः । विषाणवेष्टनाशीलाः स्वेदसन्तापनीरकाः । कराग्रस्फोटनिरता सीत्कारकरणप्रियाः । अनुदग्राघनश्यामाः सीकरोद्गिरणप्रियाः । तोयकर्म्मणि निःशङ्कामतङ्गाश्च नदीचराः। उभयेषुचर-

न्ये ते मदोपचं तथानुषु। ये गजाहृष्टमनसस्ते भवन्त्यतिशोभनाः। सर्वेषामेव नागानां छायालक्षणमुत्तमम्। यद्यया जायते यस्य तत्तयैवाभिधीयते। सत्वांशकत्वाद्भद्रस्य पाटला भवति प्रभा। नवपद्मासवच्छाया स्निग्धा तनुतनूरुहा। तथा तमोंऽशकत्वाच्च कृष्णा मन्दस्य जायते। तरुणाम्बुदसंकाशा स्थूलकृष्णकवाविला। रजोंऽशकत्वाच्च तथा मृगस्यापि हि धूसरा। मलिनाम्बुदसंकाशा रूक्षा तनुतनूरुहाः। एवं छायाविशेषाः स्युर्भद्रादीनाम्प्रयोदिताः। छाया संमिश्रभावाच्च मिश्रा भवति दन्तिनाम्। वनजातिगुणैर्भद्रः गजश्रेष्ठो नरोत्तम!। तमोऽंशकत्वं मन्दस्य यद्यदुक्तं निबोध मे। दुर्मनस्त्वं तथाऽऽलस्यं निद्रालुत्वं च मूढता। गम्भीरवेदिता चेति मन्दस्य तम उत्थितेः। एवं रजोगुणो राजन् मृगस्तेन रजोंऽशकः। धैर्य्यं स्थैर्य्यं पटुत्वं च विनीतत्वं सुकर्मता। अन्वर्थवेदिता चैव भयस्थानेष्व मूढता। सुभगत्वं च धीमत्त्वं सत्वस्यैते गुणाः स्मृताः। अतः सत्वांशकोराजन् भद्रजातिरुदाहृतः। चित्रत्वं बाहुशिरसोरन्तर्मणिगतं तथा। दन्तयोर्मधुवर्णत्वं नेत्रयोर्मधुपिङ्गता। आसनस्य पृथुत्वञ्च पूर्णता कुक्षिपार्श्वयोः। पृथुत्वं पृष्ठभागस्य घनत्वं समसन्धिता। स्निग्धच्छाया त्वयायामःपरिणाहोच्छ्रयौ तथा। सश्रीकत्वं गुरुत्वं च कायस्यैते गुणाः स्मृताः। सर्वलक्षणसंपूर्णो दृश्यते न मतङ्गजः। प्रधानावयवे लोके यत्नः कार्यो मनीषिभिः। हीनं कृष्णं च कल्माषं पुष्करं न प्रशस्यते। संपूर्णं मांसलं रक्तं सुकुमारं शुभं स्मृतम्। त्र्यङ्गुलन्तुभवेद्धीनं हीनम्पतिविनाशनम्। कृष्णं भर्तृविघातायकल्माषं भर्तृरोगदम्। संपूर्णं छिद्रिदं भर्तुः पुष्करं चतुरङ्गुलम्॥ सौभाग्यदं मांसलन्तु सुकुमारं तथार्थदम्। रक्तपद्मदलच्छायं तथा मिष्टान्नपानदम्। अतः परं शुभेत्ते श्वेतसी पाटलोदरे। पञ्चाङ्गुलप्रमाणेन वर्तुलत्वेन चार्थदे। अग्रास्वं च ताम्रं च कर्णतालं सुखप्रदम्। ह्रस्वा स्थूला च विपुला चिक्किणी श्यामलोहिता। कुञ्चिता च तथा दृष्टिः सप्तधा दन्तिनां मता। तासां तु त्र्यङ्गुलायामा सा ह्रस्वेत्यभिसंज्ञिता। ह्रस्वा करोति नृपतेर्विनाशं शीघ्रमेव हि। स्थूल दुर्भिक्षकरणी श्यामला नृपदुःखदा। करोति चिक्किणी नित्यं तस्यैव तु वसुक्षयम्। भुग्ना दृष्टिर्विनाशाय राज्ञो धनविनाशिनी। कुञ्चिताहीनयोश्चैव युद्धकाले रिपोर्जदम्। अतः परं प्रवक्ष्यामि क्रमेण करलक्षणम्। न करं दीर्घमिच्छन्ति बालधेः शास्त्रपण्डिताः। न बालधिसमं ह्रस्वं नातिदीर्घं क्रमायतम्। न तनुं नातिकायं च न रूक्षं न क्षतव्रणम्। नाक्रमेण कृतोत्सेधं न हीनं दशनान्तरम्। न ह्रस्वाङ्गुलिसंयुक्तं नातिसंकटपुष्करम्। एतल्लक्षणसंयुक्तं करं शंसन्ति कोविदाः। बालधेः सुसमो हीनः समो वा दन्तिदुःखदः। अतिदीर्घो भवेद्भर्तुरायुषः क्षयकारकः। तनुर्व्याधिकरो यात्रुरतिकायोऽर्थनाशनः। रूक्षोव्याधिव्रणङ्कुर्य्याद्यातुर्वैपक्षतां व्यथाम्। प्रतिलोमेन च स्थूलोगजस्य सुखनाशनः। असमञ्जसहीनश्च असमञ्जसवर्तुलः। दुःखशोकभयायासकर्त्ता भवति नित्यशः। दशमान्तरहीनश्च जायते दन्तिरोगकृत्। कथितं पूर्वमेवेषु पुष्कराङ्गुलिलक्षणम्। अतो मया न कथितं साम्प्रतङ्करलक्षणे। निर्वलीकोदीर्घरोमा क्रमवृत्तत्वसंयुतः। अणुबिन्दुविचित्रश्च दैर्घ्येण च शताङ्गुलः। बालधेः पुष्करं यावदायामोजात्यपेक्षया। अरत्नित्रयाऽऽनाहश्च हीनहीनतरक्रमात्। युक्तस्त्वनेन मानेन करः पूज्यतमो भवेत्॥ निर्वलीके च सौभाग्यन्दीर्घरोमार्थदः स्मृतः। क्रमवृत्तोजयं कुर्य्यादणुबिन्दुयुतोधनम्। सुप्रमाणं भवेद्राज्ञः करस्य परिवर्द्धनः। आनाहवांश्च सततं राज्यस्फीतिकरोभवेत्। करस्य कीर्त्तितं ह्येतल्लक्षणं शुभसंज्ञितम्। अतःपरं प्रवक्ष्यामि लक्षणं दन्तवेष्टयोः। कचहीनावतिस्थूलौ विषमौ शिथिलौ तथा। दन्तवेष्टौ सदा भर्तुः प्रमाणाभ्याससौख्यदौ। दन्तमूले सुसम्बद्धौ सकचौ किञ्चिदुन्नतौ। दृष्टौ सदा तथा भर्त्तुर्वृद्धिदौ परिकीर्त्तितौ। अतःपरं प्रवक्ष्यामि लक्षणन्तु विषाणयोः। व्यस्तता सङ्कटत्वं च प्रांशुता भग्नशुभ्रता। वक्रत्वं ह्रस्वता चैव धूसरत्वं च रूक्षता। मृदुताऽधोगतित्वञ्च हीनता मूलमध्ययोः। प्रान्तयोः स्थूलता चैव दीर्घता चातिमात्रता। सर्पच्छत्रककान्तित्वं दोषाह्येते चतुर्दश। दन्तयोस्तु समाख्याताः फलं तेषान्निबोध मे। व्यस्तौ च सङ्कटौ दन्तौ मदहानिकरौ तु तौ। दन्तिनस्तनुतायुक्तौ व्याधिदौ परिकीर्त्तितौ। भग्नशुभ्रौ तथा भर्त्तुर्मैहा क्लेशकरौ मतौ। वक्रौ चार्थविनाशाय ह्रस्वौ च परिकीर्त्तितौ। धूसरौ रूक्षतायुक्तौ गजस्यायुर्विनाशनौ। मृदुत्वयुक्तौ नागस्य शल्यव्रणकरौ मतौ। स्थूलाग्राधोगतित्वे च भर्तुर्यातुश्च दुःखदे। अशुभं लक्षणं ह्येतद्दन्तयोः कथितं मया। शुभं च साम्प्रतम्वक्ष्ये यथावदनुपूर्वशः। स्निग्धौ समौ सुनिष्क्रान्तौ संपूर्णौ व्रणवर्जितौ। मुकुलाग्रौ दृढौ वापि ताम्रचूडौ हलोदभौ। दक्षिणाभ्युन्नतौ किञ्चित् मृणालकुमुदप्रभौ। मधुकुन्ददलच्छायौ हेमचम्पक-

पिङ्गलौ । मधुपिङ्गौ हतच्छायौ पीयूषसदृशप्रभौ । केतकीकुसुमाभौ च मृगाङ्ककिरणप्रभौ । अध्यर्द्धारत्निमानौ च तदर्द्धनाहसंयुतौ । अमीभिर्लक्षणैर्युक्तौ दन्तौ नागस्य सम्मतौ । स्निग्धौ धनप्रदौ भर्त्तुरायुषश्च करौ मतौ । अरिघ्नौ तु सुनिष्क्रान्तौ संपूर्णौ राज्यदौ मतौ । निर्व्रणौ राज्यलाभाय सुकुटाग्रौ जयप्रदौ । दृढौ रोगविनाशाय ताम्रचूडौ हलोपमौ । अरिसंघविनाशाय कीर्त्तितौ शास्त्रपण्डितैः । दक्षिणाभ्युन्नतौ भर्त्तुः कीर्त्तितौ भाग्यकारकौ । मृणालकुमुदच्छायौ सुभिक्षारोग्यकारकौ । हेमचम्पकसङ्काशौ वस्त्राभरणदौ स्मृतौ । कुरुतो मधुपिङ्गौ च निःसपत्नं महीतले । पशुलाभकरौ ज्ञेयौ हतपीयूषसन्निभौ । केतकीकुसुमाभौ च भर्त्तुर्वंशविवर्द्धनौ । अध्यर्द्धारत्निकौ दन्तौ सुतभृत्यजयप्रदौ । आनाहमानसंयुक्तौ सदाकीर्त्तिकरौ मतौ । इदं शुभकरं राजन् ! दन्तयोर्लक्षणं मतम् । अतःपरं प्रवक्ष्यामि नेत्रयोरपि लक्षणम् । मार्जारनकुलक्रौञ्चशाखामृगनिभेक्षणान् । सर्व्वदोषकरान् राजन् ! गजान् दूरेण वर्जयेत् । स्निग्धे मधुनिभे दीप्ते कलविङ्काक्षिसन्निभे । रक्तपद्मदलच्छाये पद्मरागमणिप्रभे । निर्धूमाग्निशिखाकारे इन्द्रनीलसमप्रभे । सौम्यदृष्टिसमायुक्ते त्र्यङ्गुले लोचने शुभे । स्निग्धे वृद्धिकरे भर्त्तुर्मधुपिङ्गे जयप्रदे । दीप्ते दीप्तिकरे चैव प्रतापायतने तथा । कलविङ्काक्षिरूपे च धनधान्यविवर्द्धने । चामीकरकरे नित्यं रक्तपद्मदलप्रभे । पद्मरागनिभे चैव रत्नालङ्कारकारके । निर्धूमाग्निशिखाकारे प्रतिपक्षभयङ्करे । मानयुक्ते च सौम्ये च लोचने बलवर्द्धने । अक्षिकूटकटोद्देशनिम्नौ राज्यविनाशनौ । संपूर्णौ च बलोत्साहमदवृद्धिकरौ मतौ । दन्ताश्रयं भवेन्नित्यं तालुकं षोडशाङ्गुलम् । षडङ्गुलं पृथुत्वेन वंशमध्यगतं भवेत् । तथा शुभाशुभं चैव लक्षणज्ञैः प्रकीर्त्तितम् । खरम्परिदग्धञ्च कृष्णंकल्माषमेव वा । चतुर्विधमनिष्टं स्यादुच्यमानमभिधीयते । कृष्णं मसीसमं ज्ञेयं कल्माषं कृष्णलोहितम् । मांसलं धूम्रवर्णं च परिदग्धं प्रकीर्त्तितम् । खरञ्च तिलच्छायं कथितं शास्त्रवेदिभिः । गर्भस्थस्य यदा पित्तं पीयते तालुकं भृशम् । कृष्णतालुस्तदा नागो जायते पापलक्षणः । व्याधिभिः पीड्यते नित्यं वातपित्तकफोद्भवैः । तृतीयां वा चतुर्थीं वा दशां प्राप्य विनश्यति । संग्रामे वा पलायेत बहुशस्त्रक्षतव्रणः । यस्य सञ्जातपूर्णाङ्गः कृतान्तभवनं व्रजेत् । वातपित्तकफा यस्य कुर्व्वन्ति तालुके गदम् । गर्भस्थस्यैव कल्माषतालुकं तस्य जायते कृष्णतालुनि ये दोषा रक्ते चैव गुणाः स्मृताः । कल्माषतालुनस्ते तु भवन्ति च द्वयोरपि । रक्तच्छायं यदा वंशे पार्श्वयोस्त्वसितं भवेत् । तदा मध्यफलं ज्ञेयं गुणदोषसमाश्रयात् । यदा वंशे च कृष्णं स्यात्पार्श्वयोस्ताम्रता भवेत् । भर्त्तुरुद्वेगजनकं कल्माषं तालुकं तदा । किञ्चिद्धीनं तु यत्तालु परिदग्धं तदा भवेत् । नागस्याधोरणस्यापि बलक्षयकरं हि तत् । खरं च भवेत् तालु पित्तकोपसमुद्भवम् । महामात्रविनाशाय वारणस्योपजायते । (महामात्रो हस्तिपकः) कृष्णतालोरपि यदा दक्षिणावर्त्तनं भवेत् । दृश्यते नित्यमेवं हि तदासौ दोषवर्जितः । यथा गृह्णाति नो दोषान् कुलीनः सुसमाहितः । गुणान् करोति हृदये न तथा कथितानपि । दोषघ्नं लक्षणं यस्य यदाचार्यैरुदाहृतम् । तत्तथैवावगन्तव्यं नान्यथावापि भाषितम् । एवं जिह्वापि मन्तव्या तालुनः समलक्षणा । अरत्निमाता दैर्घ्येण विस्तारेऽष्टाङ्गुला मता । अशुभं लक्षणं ह्येतत्तालुकस्य मयोदितम् । शुभं च साम्प्रतं वच्मि लक्षणं शृणु चानघ ! । रक्तं श्वेतं कषायं च तालुकं स्यात् शुभप्रदम् । रक्तं वृद्धिकरं भर्त्तुस्तथा चायुर्विवर्द्धनम् । दन्तिनोऽयोकपुष्पाभं रिपुक्षयकरम्मतम् । श्वेतं पुष्टिकरं चापि यारणस्योपजायते । चम्पकाभं तथा भर्त्तुरारोग्यस्य विवर्द्धनम् । कषायं सर्व्वदा स्यात प्रयातुः सौख्यवर्द्धनम् । एवं जिह्वापि रक्ताभा सर्व्वसौख्यप्रदा मता । अतःपरं प्रवक्ष्यामि सृक्कण्योश्चैव लक्षणम् । दन्तिनो मानहीने च सृक्कणी मानवर्जिते । (सृक्कणी ओष्ठप्रान्तौ) सुखरोगकरे नित्यं पण्डितैः परिकीर्त्तिते । सर्व्वसौख्यप्रदे तस्य संपूर्णे द्वादशाङ्गुले । अतःपरं व प्रवक्ष्यामि लक्षणं चिवुकोष्ठयोः । अरोमशम्बलीयुक्तमाताम्रं च तथा लघु । गजस्यौष्ठं न शंसन्ति मुनयो दन्तरोगदम् । दीर्घरोमा सुसंपूर्ण ओष्ठः पद्मदलप्रभः । षोडशाङ्गुलनाहश्च हस्तार्द्धं चायतः शुभः । भर्त्तुरायुःकरोदीर्घो दीर्घरोमा च कीर्त्तितः । पूर्णः पूरयते कोषं रक्तः सौभाग्यदो भवेत् । अरोमशं तथा हीनं चिबुकं न प्रशस्यते । तद्धि वारणनाथस्य सुखरोगकरम्मतम् । चतुरङ्गुलमानन्तु स्थूलं रोमाचितं यत् तत्प्रशस्तं गजेन्द्राणां सुखालङ्कारकारकम् । निम्ने च विषमे चैव हीने चैवाशुभे मते । महाहानिकरे नित्यं सगदे कर्णरोगदे । यश्वाच्छिनादयुक्ते च समे चैव सुखप्रदे । मानं च कर्णपाल्यास्तु मूलादारभ्य गृह्यते । वाह्यित्वावधि कुम्भं च हीनं निम्नं च गर्हितम् । सुखरोगकरं नित्य

सत्त्वहानिकरं च तत् । पूर्णं चैवोन्नतं सार्द्धहस्तमात्रायतं भवेत् । तद्धि वारणनाथस्य सुखरोगकरं मतम् । चतुरङ्गुलमानं तु स्थूलम् रोमाविलञ्च यत् । तत् प्रशस्तं गजेन्द्राणां सुखालङ्कारकारकम् । अरत्निपरिणाहञ्च करिणां सत्वशक्तिदम् । वामनं हस्तहीनञ्च परिणाहविवर्जितम् । अव्यक्तञ्च न शंसन्ति वातकुम्भं विपत्करम् । द्वादशाङ्गुलविस्तारन्दैर्घ्येणाष्टादशाङ्गुलम् । व्यक्तं शुक्तिपुटाकारं तद्भर्त्तुर्लाभकारकम् । गर्त्ताकारे च निर्मांसे कठिने चातिकुत्सिते । शिरसोरोगजनने गजस्यारोहकस्य च । संपूर्णे सुकुमारे च सुप्रशस्ते प्रकीर्त्तिते । राज्यवृद्धिकरे नित्यं भर्त्तुर्विजयकारके । इदमेव हि विज्ञेयं लक्षणं कटपार्श्वयोः । अतःपरं प्रवक्ष्यामि लक्षणं कुम्भयोरपि । विषमत्वमरोमत्वं देहच्छायाविवर्णता । समता कण्ठपृष्ठाभ्यां समाधिक्यमपूर्णता । व्यक्तता वामनत्वं च परिणाहविहीनता । तनुभावः शिखरयोः कुम्भदोषा दश स्मृताः । भर्त्तुश्चापत्करौ ज्ञेयौ विषमौ रोमवर्जितौ । देहच्छायाविवर्णौ तु शत्रुलोकविवर्द्धनौ ; कण्ठपृष्ठसमौ चैव प्रयातुः प्रविनाशनौ । मानाधिकौ च हीनौ च भर्त्तुरुच्छेदकारकौ । व्याप्तौ च वामनौ चैव भर्त्तुः कीर्त्तिविनाशनौ । परिणाहविहीनौ च कोशक्षयकरौ मतौ । शिखरस्य तनुत्वेन युक्तौ कुम्भौ तु रोगदौ । अशुभं लक्षणं ह्येतत्साम्प्रतञ्च शुभं शृणु । समौ दीर्घकचाक्रान्तौ विस्तीर्णशिखरौ तथा । कर्णमूलात्समारभ्य हस्तार्द्धजमितोच्छ्रयौ । सुसंहतौ च पीनौ च कामिनीकुचसन्निभौ । समाक्रान्तललाटौ च देहच्छायासमप्रभौ । आरोहकशरीरार्द्धदर्शनावरणक्षमौ । सश्रीकौ च सुवृत्तौ च शुभौ कुम्भौ प्रकीर्त्तितौ । समौ च दीर्घरोमाणौ भर्त्तुः श्रीसौख्यकारकौ । समानौ रिपुनाशाय तथैव च समुन्नतौ । सुसंहतौ च पीनौ च वरस्त्रीलाभकारकौ । शत्रुनाशकरौ ज्ञेयौ कामिनीकुचसन्निभौ । समाक्रान्तललाटौ च सुखदौ रोगनाशनौ । आरोहिस्थगितार्द्धौ च सश्रीकौ च जयप्रदौ । वृत्तौ च हस्तिनां कुम्भौ पुण्यालङ्कारकारकौ । अतःपरं प्रवक्ष्यामि कर्णयोरपि लक्षणम् । निर्लोमशौ स्नसाकीर्णौ तनुच्छिद्रौ तनुत्वचौ । (स्नसा शिरा) सङ्कटौ विषमौ रूक्षौ त्रुटिताग्रौ च निष्ठुरौ । लम्बौ च वर्तुलौ चैव कर्णौ नागस्य निन्दितौ । फलञ्च साम्प्रतं वक्ष्ये यथावदनुपूर्वशः । निर्लोमशौ स्नसाकीर्णौ गजस्य कर्णरोगदौ । निष्ठुरौ त्रुटिताग्रौ च यातुःकोशहरौ मतौ । लम्बौ च वर्त्तुलौ चैव गजस्यायुर्विनाशनौ । अतःपरं प्रवक्ष्यामि शुभकर्णविनिश्चयम् । द्विरत्निमानसंयुक्तौ सिराजालविवर्जितौ । समत्वचौ महाच्छिद्रौ स्निग्धौ दुन्दुभिनिस्वनौ । कपोलमण्डलास्फालात्ततशब्दौ मुहुर्मुहुः । कर्णौ चामरसंकाशौ मृदुरोमलतार्च्चनौ । अजर्जरमृदुप्रान्तावीषद्गुप्तावचूलिकौ । मयूरतालवृन्ताभौ सुविस्तीर्णसमौ शुभौ । द्विरत्निमानसंयुक्तौ भर्त्तुरायुःकरौ मतौ । स्नसाजालविनिर्मुक्तौ शिरोरोगविनाशकौ । समत्वचौ महाच्छिद्रौ गजलाभकरौ मतौ । स्निग्धौ कान्तिकरौ नित्यं जयदौ दुन्दुभिस्वनौ । शत्रुनाशकरौ प्रोक्तौ मृदुरोमोल्लतार्च्चनौ । अजर्जरमृदुप्रान्तौ प्रयातुः सौख्यकारकौ । गजस्योपचयायैव ईषद्गुप्तावचूलिकौ । मयूरतालवृन्ताभौ तुरङ्गबलवर्द्धनौ । सुविस्तीर्णौ समौ भर्त्तुर्भूमिलाभकरौ मतौ । कर्णयोस्तु समाख्यातं मयैतत् शुभलक्षणम् । कण्ठस्य साम्प्रतं वक्ष्ये यथावदनुपूर्वशः । अवक्रोहीनो दीर्घश्च कण्ठश्च शुभदो भवेत् । आरोहकप्रभूणाञ्च क्रमशः कुञ्जरस्य च । अवक्रः परिणाहेन सप्तषष्ट्यधिकं शतम् । अङ्गुलानां तथायामे द्वादशैवाङ्गुलानि तु । सम्पूर्णपिण्डितोदग्रश्चान्तर्मणिविभूषितः । कण्ठो वारणनाथस्य एवं भूतः सुपूजितः । ऋजुः प्रमोदजननः सम्पूर्णः कार्य्यसिद्धिदः । अह्रस्वो जयकृद्भर्त्तुः कीर्त्तितः पूर्णपिण्डकः । उदग्रो वंशवृद्धिं च प्रतापं कुरुते तथा । अन्तर्मणिसमायुक्तो मणिरत्नप्रदो भवेत् । करालश्चातिनिम्नं च आसनं न प्रशस्यते । करालं यातुरशुभं निम्नं च भयकारकम् । दैर्घ्येण हस्तमात्रं तु विस्तीर्णञ्च शुभं स्मृतम् । विस्तीर्णं विस्तृतं राज्यं सम्पूर्णं कुरुते जयम् । वंशस्याथ प्रवक्ष्यामि लक्षणं तु शुभाशुभम् । अत्युच्छ्रितोनिम्नपारः ह्रस्वो वंशो न शस्यते । राज्ञां च पादरोगाणां कर्त्ता च स भवेत्सदा । पशुवत्स्वाङ्गुलायामासनात्पश्चिमासनम् । यावत् प्रपूर्य्यते पार्श्वं वंशोऽश्वफलकाकृतिः । शुभो ज्ञेयो गजेन्द्राणामायामः कुरुते सुखम् । पूर्णपार्श्वस्तु लाभाय धनुःपृष्ठः श्रियं नयेत् । अरत्निद्वयमानं तु पेचकात्पश्चिमासनम् । घनास्थि विषमं निम्नङ्कहितं पुच्छरोगदम् । मांसोपचयपूर्णं च विस्तीर्णञ्च शुभं मतम् । जघनोपरि रोगाणां तद्धि नाशकरं मतम् ।(पेचकात् पुच्छमूलात्)। पुच्छोगजस्य नो शस्तो बहुदीर्घोऽतिलम्बितः । करोति महतीं पीडां राज्ञश्चाधोरणस्य च । द्व्यङ्गुलस्तु पृथुत्वेन दैर्घ्येणाष्टादशाङ्गुलः । संपूज्यः पेचकोज्ञेयो गजभर्त्तुः सुखप्रदः ।

वक्रं स्थूलञ्च ह्रस्वं च पुच्छं कचविवर्जितम् । सप्तमाङ्गं च नागस्य सर्व्वदोषकरं भवेत् । अवक्र ऋजुदीर्घश्च ग्रन्थिहीनः सुपेचकः । गोपुच्छबालप्रतिमकचव्रातविभूषितः । भूमिं तु न स्पृशेत् यस्तु चतुर्भिश्चाङ्गुलैः सदा । स शुभो बालधिर्ज्ञेयो गजभर्त्तुः सुखप्रदः । अतिप्रमाणं ह्रस्वं च कर्व्वूरं विगतप्रभम् । सिरालं चाशुभं मेढ्रं राजहस्तिपदुःखदम् । यस्तं षड़ङ्गुलायामं नाहतः षोड़शाङ्गुलम् । सिराजालविनिर्मुक्तमाम्रपल्लवसप्रभम् । द्व्यङ्गुलं स्रोतसा युक्तं विन्दुमालविवर्जितम् । मेढ्रं प्रशस्तं विज्ञेयं भर्त्तुर्जीवितवर्द्धनम् । अतःपरं प्रवक्ष्यामि लक्षणं गात्रयोरपि । हीने तनूच दीर्घे च सममांसोच्छ्रये तथा । विषमे च कचाक्रान्ते गात्रे नागस्य निन्दिते । हीने तनू च कुरुतः प्रयातुर्विनिपातनम् । सममांसोच्छ्रये यातुर्विषमे च विपत्करे । कचाविले गजस्यैव गात्ररोगकरे तथा । अतःपरं प्रवक्ष्यामि मात्रयोः शुभलक्षणम् । सार्द्धद्विरत्निस्त्रिरत्निः शताङ्गुलसमानता । एवंमिते स्मृते गात्रे भर्त्तुरारोग्यसौख्यदे । समे च कचहीने च गजलाभकरे तथा । गजस्य पुष्टिदे नित्यं मांसले च घने स्मृते । मात्रे वारणनाथस्य एवंभूते शुभे मते । चिपिटे वा सफलके गात्ररोगकरे सदा । संपूर्णे राज्यदे भर्त्तुर्गजस्य वसुप्रदे । तथैव रोमनिह्निते गजस्य गलरोगदे । अतःपरं प्रवक्ष्यामि नखानाञ्च शुभाशुभम् । हीनाः कृष्णाश्च खण्डाश्च रूक्षाश्च न नखाः शुभाः । सदा च रोगदा हीनाः कृष्णा भर्त्तृविनाशनाः । खण्डा रूक्षा गजस्यैव पादव्याधिविवर्द्धनाः । स्निग्धाश्चन्द्रार्द्धसङ्काशा मानेनैव पुरो नखाः । सप्तादिपञ्चसंख्यानि चाङ्गुलानि क्रमेण हि । एवंविधा नखाः शस्ता भर्त्तुरारोग्यकारकाः । अतःपरं प्रवक्ष्यामि पादयोरपि लक्षणम् । हीनौ सुषुतलौ रूक्षौ चरणौ दन्तिदुःखदौ । हस्तप्रमाणौ दैर्घ्येण कूर्म्माकारौ सुखप्रदौ । अतःपरं प्रवक्ष्यामि लक्षणञ्चापराश्रितम् । अत्युच्छ्रिते च हीने च निन्दिते चापरे तनू । सम्पूर्णे च शुभे ज्ञेये त्र्यरत्न्यायामसंयुते । निन्दिते रोगदे ज्ञेये पूजिते प्रभुसौख्यदे । द्वादशाङ्गुल हीनं तु आसनात्पश्चिमासनम् । अपरपादयोश्चापि आयामोऽरत्निमात्रकः । नखानां च तथा मानं षड़ादिचतुरङ्गुलम् । प्रधानावयवानान्तु लक्षणं कथितं यथा । उत्सेधायामनाहानां साम्प्रतं कथयाम्यहम् । समतन्तुसमाद्युक्ततन्तुना वर्त्तितेन च । सुप्रशस्ते दिने नित्यं मानं कुर्व्वीत मानवित् । सप्तारत्नि गजेन्द्राणां प्रमाणं वनजन्मनाम् । आसनं यावदुत्सेधस्तत्सङ्ख्यस् कीर्त्तितः । पेचकात्प्रतिमानन्तु आयामोऽरत्नयो नव । मध्यदेशे तदानाहो दशरत्निः प्रकीर्त्तितः । मानमेतद्धि भद्रस्य मुनिभिः परिप्रकीर्त्तितम् । सप्तमेन तु भागेन हीनं मन्दस्य जायते । मन्दाद्धीनं मृगाख्यस्य षड्भागेन प्रकीर्त्तितम् । एवं क्रमेण वक्तव्यं मानं मानविशारदैः । किञ्चिन्न्यूनाधिके वापि न दोषः संप्रपद्यते । दोषाणां च गुणानाञ्च हृद्विरेव फलप्रदा । सत्त्वं हि वारणेन्द्राणां नित्यं तन्त्वेषु संस्थितम् । स्निग्धे मधुनिभे दीप्ते कलविङ्काक्षिसन्निभे । रक्तपद्मदलच्छाये पद्मरागमणिप्रभे । नीलच्छाये अतीक्ष्णे च गजे सत्त्वं प्रतिष्ठितम् । मार्ज्जारश्वानरादीनां सदृशे नोबलं गजे । हीनसत्त्वाश्च जायन्ते गिरिकूटोपमा अपि । अधिकं पुष्करं यस्य मांसलत्वेन जायते । प्रभया च कषायं स्यान्मानेनाङ्गुलपञ्चकम् । किञ्चिदूने च विज्ञेये स्रोतसी चतुरङ्गुले । स्थूलपञ्चाङ्गुलायामा त्र्यङ्गुला नाहमानता । हस्तोऽपि पूर्व्वमानस्य स्थूलत्वेनाधिको भवेत् । रोमशो नातिदृढश्च पृथुसः षड्भिरङ्गुलैः । आयामेनै च हीनः स्यात् पूर्व्वमानात् षड़ङ्गुलैः । नातिगोपुच्छसंस्थानः कृष्णविन्दुविभूषितः । आनाहे रत्निमानौ तु सार्द्धहस्तद्वयायतौ । पीयूषकुसुदच्छायौ किञ्चिच्चम्पकपिङ्गलौ । स्निग्धौ मुग्धतमावेव दन्तौ नागस्य कीर्त्तितौ । दन्तावेष्टावतिस्थूलौ कचाक्रान्तौ सुनिष्ठुरौ । पञ्चाङ्गुलौ कटौ ज्ञेयौ मांसोपचयपूरितौ । ज्ञेये कटोपरि तथा स्रोतसी द्व्यङ्गुलान्तरे । एकाशीत्यङ्गुलानाहे द्वाविंशत्यङ्गुलायते । किञ्चिन्नतं कचाक्रान्तं वाहित्थं परिकीर्त्तितम् । प्रतिमानं तु विज्ञेयं हस्तः सचतुरङ्गुलः । अध्यर्द्धरत्निमानं च प्रमाणान्तरभेदतः । आयामस्तु विज्ञेयस्त्वधरस्तु दशाङ्गुलः । विंशत्यङ्गुलानस्तु परिणाहोऽभिधीयते । पञ्चाङ्गुलं तु चिबुकं सृक्किणी तु नवाङ्गुले । षड्विंशदङ्गुलायामे सङ्गते परिकीर्त्तिते । अध्यर्द्धरत्निकौ कर्णौ विस्तारेण कचाचितौ । कषायपल्लवौ स्थूलौ कृष्णविन्दुर्विचित्रितौ । सषड्भागकरायामावचलौ कचाचितौ । पञ्चाङ्गुलान्तरौ पीनावुभावोष्ठौ दशाङ्गुलौ । कर्णात् कर्णान्तरं यावत् षण्णवत्यङ्गुलं शिरः । शातकुम्भं तथा ज्ञेयं स्थूलं सप्तदशाङ्गुलम् । अङ्गुलानां शतं सार्द्धमानाहि द्व्यङ्गुलाधिकम् । आयतत्वं च कण्ठस्य दशाङ्गुलमिति स्मृतम् । भद्रस्यैवासनं ज्ञेयं तरोक्तं सप्तरत्निकम् । षडङ्गुलोच्छ्रितं स्थूलं तुल्यं लाङ्गूलनवः । पुच्छमूलाद्द्विहस्तन्तु जायते पश्चिमासनम् । उच्छ्रयेण

तु हीनं स्यादासनं षड्भिरङ्गुलैः । पेचकस्त्र्यङ्गुलायामो लम्बत्वेनाङ्गुलत्रयम् । विंशत्यङ्गुलमानाख्ये भवेत् पुच्छो यथागमम् । प्रान्तपादक्रमेणैव तथायामेऽङ्गुलत्रयम् । दैर्घ्येण तु स विज्ञेयो भूमेरष्टाङ्गुलोच्छ्रितः । इदं बालधिमानं तु मन्दस्य परिकीर्त्तितम् । सार्द्धद्व्यरत्निके मूले अपरे संप्रकीर्त्तिते । उदरे चातिमात्रं स्यान्मेढ्रं हस्तद्वयायतम् । विंशत्यङ्गुलमानाख्ये कृष्णच्छायं सदा भवेत् । पञ्च चत्वारि च त्रीणि अङ्गुलानि नखाः क्रमात् । आपाण्डुविवराः कुन्दाभासाश्चापरपादयोः । अनेनैव तु मानेन गात्रपादसमाश्रयाः । नखा मन्दस्य विज्ञेयाश्चरणाश्च कचाविलाः । अतिस्थूलः पृथुत्वेन सार्द्धहस्ताधिकः करः । अरत्निकं वा, दैर्घ्येण प्रमाणं गात्रयोरपि । उरोमणिस्तथा स्त्रेयोरत्निमात्रोऽतिमांसलः । विंशत्यङ्गुलमानस्तु अन्तर्गलमणिर्भवेत् । अनेनैव हि मानेन वातकुम्भः प्रकीर्त्तितः । एते प्रशस्ता मन्दस्य भूनाथ ! कथितास्तव । नोक्ता ये तेऽपि भद्रस्य विज्ञेयाः समलक्षणाः । मृगस्य साम्प्रतं वच्मि प्रदेशान् लक्षणान्वितान् । त्र्यङ्गुलं पुष्करं तस्य त्र्यङ्गुले स्रोतसी तथा । अङ्गुलानि च चत्वारि कीर्त्तितास्तस्य चाङ्गुलाः । तनुः करः त्र्यरत्निः स्याद्दानाख्ये सार्द्धरत्निकः । बाहित्थात् पुष्करं यावन्मानं मुनिभिरुदाहृतम् । तथा तनुतरौ दन्तौ दैर्घ्ये सार्द्धद्व्यरत्निकौ । ह्रस्वौ च मस्तकौ स्यातान्तयोः सप्तदशाङ्गुलौ । प्रतिमानं तथा ज्ञेयं निम्नं पञ्चदशाङ्गुलम् । द्व्यङ्गुलं चिबुकं तस्मादधरस्तु षडङ्गुलः । अष्टादशाङ्गुलाख्ये सृक्वणी तु षडङ्गुले । स्यातामङ्गुलविंशत्यौ कपोलौ निम्नमध्यगौ । कटौ द्व्यङ्गुमानौ तु निर्याणे चतुरङ्गुले । नेत्रे चापि तथा स्यातान्निष्प्रभे स्थूलतारके । नातिव्यक्तं समांसं स्याद्वातकुम्भं दशाङ्गुलम् । गर्त्ताकारञ्च निम्नं च कटकुम्भं तथैव तु । अष्टाङ्गुलान्तरं कुम्भ आयामे षोड़शाङ्गुलः । विंशत्यङ्गुलकौ कर्णौ स्तब्धौ कृशौ च वर्त्तुलौ । पञ्चत्र्यङ्गुलानाहा आयामे षोड़शाङ्गुला । ग्रीवा मृगस्य विज्ञेया करालमासनं भवेत् । सार्द्धद्व्यरत्निकायामः कृशतन्नोऽतिमात्रया । वंशो मृगस्य विज्ञेयो निम्नतल्पनिभप्रभः । स्थूलास्थि विषमं निम्नं पुच्छमध्यर्द्धरत्निकम् । आसनेन समं चैव मृगस्य पश्चिमासनम् । पञ्चाङ्गुलस्तु विज्ञेयः पेचको गुदसंवृतः । कचाग्रन्थिसमाकीर्णः स्थूलो ह्रस्वश्च बालधिः । अपरापादपार्ष्णिभ्यां हस्तमात्रसमुच्छ्रयः । दीर्घतनुरुहच्छन्नो द्विसप्तत्यङ्गुलायतः । तत्प्रमाणे तथा गात्रे चिपिटे चापि निष्प्रभे । चरणाश्च गतच्छायैश्चतुस्त्रिद्व्यङ्गुलैर्नखैः । संयुक्ताः स्फुटिता निम्ना मानेनाष्टादशाङ्गुलाः । एतदुद्देशमात्रेण कथितं मृगलक्षणम् । अतःपरं प्रवक्ष्यामि तेषां बलपरीक्षणम् । गजा न बलहीनेन सुरूपेणापि शोभनाः । गुणेष्वपि बलं श्रेष्ठं तत् परीक्षेत पण्डितः । शरीरान्तर्गतः प्राणो बलशब्देन कीर्त्त्यते । क्रियते वारणस्याथ तस्योपायैः परीक्षणम् । जाम्बूनदस्य ताम्रस्य पलानां रजतस्य वा । अष्टादशसहस्राणि युक्त्या संगृह्य वेगवान् । दशयोजनमध्वानं गच्छति श्रमवर्जितः । यो गजो गजमध्ये तु स उत्तमबलः स्मृतः । यश्चतुर्दशसाहस्रभारमादाय गच्छति । सप्तयोजनमध्वानं स मध्यमबलो मतः । दशसाहस्रिकं भारं गृहीत्वा पञ्चयोजनम् । अध्वानं यो हि संयाति स हीनबल उच्यते । सत्रिभागद्विहस्तेन परिणाहेन संयुतम् । चतुर्हस्तनिखातं तु यो भिनत्त्युत्तमो हि सः । अथ वोत्पाटयेद्वापि बलेन महता युतः । सार्द्धत्रिहस्तखातन्तु सप्तहस्तोच्छ्रितं तथा । पञ्चाशदङ्गुलोकेन परिणाहेन संयुतम् । भिनत्ति यो गजः शीघ्रं क्षिपत्युद्धृत्य वा पुनः । स गजानान्तु सर्वेषां मध्ये मध्यबलो मतः । हस्तत्रयनिखातन्तु षड्हस्तोच्छ्रयमेव वा । युक्तं स्थूलतया चैव पूर्वसंख्यार्द्धमात्रया । भिनत्ति हेलया यस्तु उत्खातं वा करोति वा । स्तम्भं कुञ्जरमध्ये तु स हीनबल उच्यते । गुरुत्वं च यतः श्रेष्ठं गुरुत्वादधिकं बलम् । बलादभ्यधिकं सत्त्वं तस्मात्सत्त्वं निरूपयेत् । शुद्धस्फटिकसङ्काशं सत्त्वं हृदि शरीरिणाम् । दुर्लक्ष्यं विद्यते सम्यगुपायैस्तद्धि लक्षयेत् । सुप्रशस्ते दिने लग्ने गजो गैरिकमण्डितः । कर्णे चामरशङ्खादिमुखाभरणभूषितः । पादान्दोलनसंजातघण्टारवनिभस्वनः । आरोहककरास्फालकृतोत्साहोन्नताननः । अत्यन्तं ढौकयेच्छीघ्रं पार्श्वकोलाहलाकुलः । वेगोत्थानकृतास्फोटदन्तसंघट्टमर्दनैः । कृतां कामपि न हस्तस्य वेदनां यो न मन्यते । यो हि मर्दैःकृतास्फालैः स्वकटं भर्त्तुमिच्छति । नापसर्पति भीत्या नो प्रतियातं रणात् क्वचित् । कण्ठगर्जितनादेन परिपूरितदिङ्मुखः । निवर्त्त्यते च दुःखेन स भवेत् सत्त्ववान् गजः । पत्यश्वसमूहं वा गजमालातिभीषणम् । रागोत्थानसमुद्भूतगम्भीरकलहाकुलम् । उत्थाय समरे गच्छेद्रोषरञ्जितलोचनः । दन्तदारणरागेण प्रतिनागकृतेक्षणः । प्रसारितैरतिस्तब्धैर्निःशङ्कं कर्णपल्लवैः । यो गच्छत्यतिवेगेन स भवेत् सत्त्ववान्-

गजः । शार्दूलाकृतिसत्वानां त्रासवर्जितमानसः। कृतकं च तथा नागं योभिनत्त्युत्तमो हि सः । दावानलशिखिश्रेणीशब्दसंत्रासवर्जितः । वनेषु विचरत्येष स सत्वसहितो गजः । कृतशङ्कावशाद्यस्तु न पारोहिणमीयते । सङ्कुचन् मस्तकं दीनोमन्दान्मन्दतरो भवेत् । आलोकयति पार्श्वानि चीत्कारकरणप्रियः । आलोकयति सोष्मभ्यां लोचनाभ्याम्मतिद्विपम् । पदात्यश्वसमूहं वा ज्वलन्तमिव मन्यते । अधमस्तु सुविज्ञेयो गज सः श्रमवर्जितः। यस्तु संघटते मन्दं घटितश्चापसर्पति । तथापसर्प्य वेगेन दन्ताघातं प्रयोजयेत् । किञ्चित्तिर्य्यङ्मुखोभूत्वा कृतचीत्कारनिस्वनः । कुरुते दन्तसंघातम् स विज्ञेयोऽधमोगजः" ।

प्रथमादिपञ्चसुदशासु मदविकारभेदमुक्त्वाह तत्रैव । "तटतरुभवनोन्मूलनरतस्तु पश्चाद्गजो भवति । करवदनाक्षिकटस्थल गलन्मदसलिलसिक्तभूमितलः । संग्रामे रिपुभरकरविमुक्तशरनिकरशल्यसहः । करवीरपुष्पलोहितलोचनः स चारुदारुणाकारः । प्रतिनागसंघदारणप्रकृतिरंशलस्तु सप्तम्याम् । न शृणोति नैव पश्यति च न भयञ्जानाति सर्वसत्वकृतम् । यश्च घनास्फालितं मुखरितं चाननं पतति कारयन् । न सहन्ते तस्य गन्धं सङ्कोचितगात्रकुञ्चकरकटाः करिणः । मर्द्दितनिजबला विमुक्तनादाः प्रणश्यन्ति । न तथा शङ्खाभरणैर्न चामरैर्नाक्षमालाभिः । भवति यथा मदसारैर्मुखस्य शोभा गजेन्द्राणाम् । क्रमविरहिता भवति हि षष्ठी वा पञ्चमी चतुर्थी वा । दीनावस्था करिणां सत्वयतां मदविशेषेण । अतिहृष्टमदविकारे मुह्यन्ति शिशुमदेऽपि मातङ्गाः । सत्वातिरेकयुक्ताबलस्य शोभां परां प्राप्ताः" । स्थलभेदे न मदोद्गमफलं तत्रैवाह ।'कुरुते नरपतितुष्टिं दक्षिणगण्डस्थलोद्गतन्दानम् । रोमोद्गतं च यात्राविशेषसुखदं सदा भवति । उभयकटस्थलसमनिर्गतं च विषयस्य वृद्धिकरम् । शिशिरसुगन्धिपरिमलं सुखप्रदं जायते भर्त्तुः । माङ्गल्यं श्रोजननं सौभाग्यकरं सत्वजननं च । माद्यन्ति यत्र देशे दशाविपाकेन बलकृतानन्दाः । करिणस्तस्मिन् राजा वर्द्धितवंशः सुखं वसति । कतकबकुलैलापरिमलस्य सुखदोमदो भवति । मूत्रपुरीषस्वेदासृक्कफरसोत्पादितोऽशगन्धधरः । अशुभकरोऽसौ नरपतियातृणाञ्जायते मदः । जायन्ते ये भावा राजन् ! मदखण्डमण्डितमुखस्य । नागस्य मदविशेषास्तांस्तान् प्रवक्ष्यामि । चालयति दुर्गन्धमिवाघ्राय पुष्करं क्षिपति प्रेरयति । खेदिजिह्वाग्रेण सृक्कणी विघटितोष्ठपुटः । संपीड्य पुष्कराग्रेण चाङ्गुलिं निःश्वसञ्चाधोवदनः । तिर्य्यक्प्रेक्षी भवति मीलिताक्षः क्षणं स्थित्वा । तिर्य्यक् चालितवदनस्तथा पुष्करप्रकम्पेन । किञ्चित्समुन्नतास्यः कर्णकण्डूयनं कुरुते । किञ्चिच्च दर्शयित्वा मेढ्रं नाशयति कोशकन्मूलम् । हृष्टः क्रीड़ति परिवर्त्तिताननो बन्धनस्तम्भ कृतमत्सरः । प्रधावति संवेष्ट्य करं विषाणमुद्यम्य गर्जति सलिलपूरितजलधरगम्भीरनादेन । उद्भ्रामितायहस्तः स्वच्छन्दङ्गच्छतिकापि । गुरुमक्षिकश्च भवति वनतरुगहनोन्मूलनानुरतः। वागङ्कुशसुखजातं बाधनं न सहते ह्यभिन्नसत्वोयः । तिर्य्यग्विकलत्वाश्च तथा सगजो गुरुमक्षिकोज्ञेयः । रमते च पांशुविकरणकर्द्दमावगाहाद्यैः । एवंविधस्वभावो मदभेदवशाद्गजो भवति । यो यस्मिन्नेव ऋतौ गृह्णाति मदम्मतङ्गजः सुखदम् । स च तस्मिन्नेव पुनः प्रभिद्यते दानयुक्तश्च । इति मदवृद्धिविशेषाः कथितास्तव भूतलेश ! तत्त्वेन । परिवर्त्तते मदोयैर्हेतुभिरशुभैस्तु तान्वक्ष्ये । प्रतिवारणाभियानाद्दूराध्वगमनात्क्षुभोजनाच्चापि । बन्धनदोषाच्च तथा तृष्णाक्षुत्पीड़नाच्चापि । शार्दूलादित्रासाद्दावानलोल्काशनिप्रपतनाच्च । (अशनिरत्र विद्युत्) । नश्यति मदोगजानां शीघ्रं वत्स विभ्रतश्च तथा । मातापितृजैर्दोषैर्मन्दमदानन्दवर्जिताश्च तथा । जायन्ते द्विरदा यैर्यथा तथा साम्प्रतं वक्ष्यामि । मन्दमदेन हि करिणा जगतः किञ्चिन्मदोगजो भवति । मदविरहितेन तथा जनितोमदविवर्जितोऽस्त्येव । समदेन तु यो जातो गजो गजेन्द्रेण भवति तस्य मदः । एवं मदप्रकारा मातङ्गानां समुद्दिष्टाः । शृणु साम्प्रतं नरेश्वर ! मदापसरणोद्भवानि चिह्नानि । यानि भवन्ति गजानां मन्दमृदुमदविगलितसमुदयानाम् । रूक्षच्छायायुक्तोनिम्नोचितगण्डस्थलगतश्रीः। कुप्यति येभ्यः शङ्काङ्करोति तेभ्योऽपि सत्वस्थः। गण्डस्थलेन जिघ्रति करेणुकां स्पृशति नैव हस्तेन । मूत्रपुरीषाणि च नो जिघ्रति वारणकृतानि यातुर्वा शनैर्गच्छति । सततं परिमृष्टदानराजिपरीकीर्णकटोहस्तेनातीव सङ्घर्षणं कुरुते । मुहुरभिनन्दति निद्रामलसो मनसा न तुष्टिमुपयाति । लिङ्गान्येतानि करिणो मदेन मुच्यमानस्य जायन्ते । प्रतिकुञ्जरयुद्धकृतो बलहर्षदशावयोभ्यस्त्वशुभः । भवति मदोनागानां तापादिसमुद्भवश्च शुभः"। "रूपवान्मदसम्पन्नोविन्ध्यशैलसमप्रभः। जायते सत्वहीनस्तु कुञ्जरः केन हेतुना । केन वा रूपहीनोऽपि मदोच्छ्रयविवर्जितः । सत्ववान्

जायते नागो एतदाख्यातुमर्हसि" इति नहुषपृष्टो बृहस्पतिरुवाच । "यथा जातकयोगेन जन्तूनां च शुभाशुभम् । तथा बन्धनकालोत्थङ्गजानामपि जायते । सुलग्नावस्थितैः सौम्यग्रहैः पीड़ाविवर्जितैः । बन्धनं यस्य जायेत स भवेत् सत्ववान् गजः । क्षीणचन्द्रेषु गृह्यन्ते ये गजाः क्रूरदृष्टिभिः । ये चालोकितनक्षत्रास्ते भवन्ति भयाकुलाः" । उक्तञ्च शम्भुना "मृगजातयोऽपि हि शूरा भवन्ति मधुपिङ्गललोचनाः स्निग्धाः । वृषसिंहमीनवृश्चिकलग्नेषु स्वीकृताः करिणः" । पुनर्नहुषप्रश्ने गुरोः प्रत्युक्तिस्तत्रैव । "राजन् पञ्चविधं चैव गजानां विदितं मतम् । अत्यर्थं प्रथमं ज्ञेयं प्रत्यर्थं च तथापरम् । अन्वर्थं चैव गम्भीरमुत्तानं पञ्चमं भवेत् । प्रतोदाङ्कुशदण्डाद्यैर्विद्यादुद्वेजितानि यः । तीव्रसङ्कुचितस्पृष्टः स स्यादत्यर्थवेदिता । स्तोकं बहु बहु स्तोकं क्षतं मन्येत यो गजः । वागङ्कुशादिभिर्नित्यं स हि प्रत्यर्थवेदिता । जानात्यङ्कुशतोत्राद्यैर्यद्यथा तत्तथैव हि । क्षतङ्गायभयैर्युक्तोऽन्वर्थज्ञः स गजो भवेत् । अङ्कुशादिव्रणान् राजन्! यश्चिरेणावगच्छति । तीव्रानपि स गम्भीरवेदी भवति वारणः । रोमणामग्रं तृणेनापि स्पृष्टं वेत्ति तु यो गजः । उत्तानवेदिनं तन्तु गजं विद्धि महाभुज ! सर्वाणि वेदितव्यानि भद्रादीनां भवन्ति वै । प्रकृतिस्थस्य सततं भद्रस्यान्वर्थवेदिता । गम्भीरवेदिता चापि मन्दस्यैव प्रकीर्त्तिता । उत्तानवेदिता नित्यं मृगस्यैव भवेन्नृप ! । वेदित्वं गजजातीनां तिसृणामपि जायते । साम्प्रतञ्च यथाशास्त्रं कथ्यते वेगलक्षणम् । तिसृणामपि जातीनामुत्तमाधममध्यमम् । न चाल्पं न च वृद्धं द्विपञ्चपदसंस्थितम् । गजोत्थानसमुत्थानं नरं प्राप्नोति येन तु । रयाविष्टेन मनसा स वेग उत्तमो मतः । (द्विपञ्चपदसंस्थितं दशपदस्थितं गजोत्थानसमुत्थानं गजधावनसमसमयधाविनम्) येन वेगेन गृह्णाति नरं सप्तपदान्तरम् । पदानां शतमात्रन्तु स मध्यमजवो भवेत् । येन पञ्चपदस्थं हि नरं गृह्णाति नोदितः । पदानान्तु शतं सार्द्धं स हीनोजव उच्यते । शतद्वयं वा धनुषां गच्छेदुन्नमिताननः । द्वात्रिंशता च मात्राभिः स उत्तमजवो भवेत् । पञ्चाशता च मात्राभिः यायाद्यस्तु शतद्वयम् । स मध्यमोऽधमो ज्ञेयो मात्राणाञ्च शतद्वयात् । एवं परीक्ष्यते राजन् ! वेगो वीथिषु दन्तिनाम् । अतःपरं प्रवक्ष्यामि गजस्य गुणलक्षणम्" ।

तत्र कल्याणशीलः "भाराद्दितो वा तृषितः क्षीणः श्रान्तो बुभुक्षितः । रात्रौ वा दिवसे वापि निर्विकारस्तु यो भवेत् । कल्याणशीलः स ज्ञेयो समस्तगजलक्षणैः विकारं कुरुते यस्तु पीड्यमानः क्षुधादिभिः । तमकल्याणिनं राजन् गजं दुष्टं प्रकल्पयेत् । कोपोऽपि द्विविधो ज्ञेयः शिशुश्चैवाशिशुस्तथा । द्विविधस्यापि राजेन्द्र ! यथावच्छृणु लक्षणम् । उद्वेजितोऽपि कालेन कोपं बध्नाति निर्भरम् । क्षिप्रं गृह्णाति च क्रोधं दुर्निवारं मुहुः सहम् । शिशुक्रोधः स विज्ञेयो गजलक्षणकोविदैः । वार्य्यमाणोऽपि यत्नेन न शमं याति मुह्यति । स ज्ञेयस्त्वशिशुक्रोधो राजन् ! स हि रणप्रियः । साम्प्रतं चैव वक्ष्येऽहमायुर्लक्षणमुत्तमम् । आभ्यन्तरं च बाह्यञ्च लक्षणं द्विविधं स्मृतम् ! आभ्यन्तरं योगसाध्यं बाह्यं किञ्चिच्च लक्ष्यते । तेनान्तरं परित्यज्य बाह्यं लक्षणमुत्तमम् । क्षेत्रसत्वसमायोगा । भवन्ति द्वादशैव हि । एकं हस्तगतं क्षेत्रं द्वितीयं वदनाश्रितम् । तृतीयञ्च विषाणस्थञ्चतुर्थं शिरसिस्थितम् । पञ्चमं नयनस्थं च षष्ठं कर्णाश्रितं भवेत् । कण्ठस्थं सप्तमञ्चैव अष्टमङ्गात्रसंस्थितम् । नवमं चरणे ज्ञेयं शेषाङ्गस्थं द्विपञ्चमम् । एकादशञ्च कान्तिस्थं द्वादशं सत्वसंस्थितम् । एवं द्वादश क्षेत्राणि मातङ्गानां भवन्ति हि । द्वादशैव दशाज्ञेयाः शेषाङ्गेष्वभिलक्षिताः । विंशोत्तरं वर्षशतम्भद्रस्यायुः प्रकीर्त्तितम् । अब्दान्यशीतिर्मन्दस्य चत्वारिंशत् मृगस्य च । मिश्रस्य चायुषः संख्या जातिभावेन जायते । प्रदेशज्ञानतत्त्वज्ञोजातिं समुपलक्षयेत् । सर्वक्षेत्रैः सुसंपूर्णः संपूर्णायुर्गजो भवेत् । हीनैश्च हीयते चायुर्यावदभिधीयते । दशाब्दानां क्षयं कुर्य्याद्धस्तलक्षणवर्जितः । विंशत्यब्दविनाशश्च हीने क्षेत्रद्वये भवेत् । क्षेत्रत्रयावहीने च त्रिंशदब्दपरिक्षयः । चत्वारिंशत्समाहानिर्हीने क्षेत्रचतुष्टये । (समा संवत्सरः) । पञ्चाशदब्दाहीयन्ते हीने तु क्षेत्रपञ्चके । षट्क्षेत्रहीनतायान्तु षष्टिवर्षविनाशनम् । सप्तत्यब्दविनाशाय सप्तक्षेत्रविहीनता ॥ अशीतिरष्टभिः हीने वर्षाणाञ्च विनश्यति । नवतिर्नवभिर्हीनैः क्षेत्रैर्नाशं हि प्रयाति । दशभिश्च तथा हीनैर्नश्यत्यब्दशतं ध्रुवम् । दशोत्तरं चाब्दशतं हीना क्षाया विनाशयेत् । विंशोत्तरं चाब्दशतं हीने सत्वे विनश्यति । एवं दशाब्दनाशं च क्षेत्रं कुर्य्यादलक्षणम् । एवमायुःक्षयं विद्यात् गजस्य गजकोविदः । सामान्यलक्षणं ह्येतत् जीवितस्य परीक्षणे । विशेषलक्षणं यावद् ग्रहलक्षणजातितः । एवमुद्देशमात्रेण गजायुर्लक्षणं तव । कथितं साम्प्रतं राजन् ! दोषमं वक्ष्मि लक्षणम् । पादानां लक्षणं सम्यक् दन्तदोषं प्रणा

-येत् । दन्तयोर्लक्षणं हन्ति दोषान् वाहित्थसंश्रितान् । वाहित्थलक्षणैः सम्यक् नेत्रदोषक्षयो भवेत् । नेत्रयोर्लक्षणं हन्ति दोषांस्तालुसमाश्रितान् । सृक्कदोषविनाशश्च क्रियते तालुलक्षणैः । सृक्काणां लक्षणं कुर्य्यात् सगद्दोषनाशनम् । कपोलकटदोषघ्नाः सगदस्या गुणा नृप ! । निर्याणशानकुम्भानान्दोषघ्नः करयोर्गुणः । कुम्भदोषविनाशाय तयोरेव गुणो भवेत् । कर्णदोषविनाशस्तु क्रियते कुम्भलक्षणैः । कण्ठदोषविनाशाय कर्णलक्षणमेव हि । आसनस्य हि ये दोषास्तान् हरेत्कर्णजो गुणः । वंशदोषक्षयकर आसनस्य गुणो भवेत् । गुणा घ्नन्ति हि वंशस्य दोषान् तत्स्थलसंश्रितान् । पश्चिमासनदोषघ्नं लक्षणं तत्स्थलाश्रितम् । कुक्षिमेचकदोषघ्नं पश्चिमासनलक्षणम् । गुणाः मेचककुक्षिस्थाः पुच्छदोषविनाशनाः । मेढ्रदोषक्षयं कुर्य्यात् पुच्छलक्षणमेव हि । मेहनस्य गुणा हन्ति दोषांश्चापराश्रितान् । अण्डकोषगतं दोषमपरालक्षणं हरेत् । नाभिदोषक्षयं कुर्य्यादण्डकोषस्य लक्षणम् । नाभेर्गुणैश्च हन्यन्ते दोषास्तनसमाश्रिताः । उरोमणिगतान् दोषान् नाशयेत् स्तनलक्षणम् । चिबुकस्य हरेद्दोषान् उरोमणिगतो गुणः । यथा दोषक्षयो राजन् ! लक्षणैः क्रियते शुभैः । दोषातिरेकोऽपि तथा प्रदेशगुणनाशकः । प्रदेशोऽनन्तरस्यैव प्रदेशस्य गुणान्वितः । कुरुते दोषनाशं हि स दोषो गुणनाशनः । करकुम्भविषाणाक्षिकर्णलक्षणसंयुतः । सर्व्वैरेवाशुभैरन्यैर्लक्षणैश्चाशुभो गजः । मूलं चन्द्रांशुशुभ्रं स्याद्दक्षं च ज्वलनप्रभम् । वज्रं काञ्चनमञ्जाशङ्खालदण्डः सुपिङ्गलः । एतेषां च समायोगाद्दन्तानां मधुपिङ्गता । यतो गजविषाणानामतो मधुनिभाः शुभाः । भद्रजातेर्गजस्यैतन्मन्दस्य च मृगस्य च । हतपीयूषकुन्देन्दुकेतकीच्छविपञ्चकम् । एवं जातित्रयस्यापि सामान्यं शोभनं मतम् । कपोतधूमभस्मास्थिसर्पच्छत्रकसन्निभाः दन्तयोस्त्वशुभा राजन् ! छाया पञ्चविधा अपि । अध्यर्द्धारत्निकं राजन् प्रमाणं दन्तयोः शुभम् ।

अत ऊर्द्ध्वं प्रवक्ष्यामि गजानां वर्णलक्षणम् । आहारस्य विशेषेण वातपित्तकफैस्तथा । देशलक्ष्मगुणैश्चैव वीजयोनिवशेन । पश्चालोकननक्षत्रलग्नराशिवशेन च । पूर्वकर्म्मवशाच्चापि धातूनाञ्च विपर्य्ययात् । भवन्ति कारणैरेभिर्वर्णा नानाविधा नृप ! । दिव्यसत्त्वाः शुभैर्भेदैर्व्विविधास्ते भवन्ति हि । सिन्दूरशङ्खपद्मवैदूर्य्यविद्युज्जाम्बूनदप्रभाः । इन्द्रनीलसमानाभा भवन्ति शुभकान्तयः । अतिश्वेताश्च रक्ताश्च शुकवर्हिणसप्रभाः । एते देवगजाः सर्व्वे भूतले न भवन्ति हि । अतिश्वेताश्च रक्ताश्च शुकवर्हिणसप्रभाः । दैवयोगाद्वने प्राच्ये क्वचिदेव भवन्ति हि । वन्दनीयश्च पूज्योऽसौ नासौ वाह्यो नराधिपैः । भृङ्गाराङ्गारभस्मास्थिपङ्कमाञ्जिष्ठसन्निभाः । म्लानपुष्पसवर्णाश्च गजास्त्वेतेऽतिनिन्दिताः । एवं वर्णविशेषास्तु कथितास्तव सुव्रत ! । गजमेकादशगुणं वक्ष्यमाणं निबोध मे । मधुसन्निभदन्तश्च श्यामो मधुनिभेक्षणः । उदरे पाण्डुवर्णश्च वक्त्रे च कमलप्रभः । द्विरेफसमवालश्च कुन्देन्दुसदृशैर्नखैः । स्थूलतारोमयुक्तश्च शेषेष्वङ्गेषु पीतकः । विचित्रश्च मुखं यस्य रक्तैः श्वेतैश्च विन्दुभिः । स नागो गजयूथानां मध्ये राजाऽत्र जायते । तं प्राप्य नृपतिर्भुङ्क्ते सागरान्तं महीतलम् । नीलसवर्णसंस्थानः स गजो यूथनायकः । मुखे मदे च हस्ते च कर्णोदरशिरस्सु यः । केशैः शुभैश्च वलिभिर्विन्दुभिः परिमण्डलैः । सवर्णो यो भवेद्दन्ती कैलासः सोऽभिधीयते । अतःपरं प्रवक्ष्यामि निःश्वासस्य तु लक्षणम् । निःश्वासो द्विविधो ज्ञेयः शुभश्चाशुभस्तथा । शुभः सुरभिगन्धः स्यात् पूतिगन्धोऽशुभो मतः । विशेषेण तयोश्चैव लक्षणं भूप ! कीर्त्त्यते । सूक्ष्मता दीर्घता चैव समता च सुगन्धिता । सौकुमार्य्यं मृदुत्वं च निश्वासस्य तु षड्गुणाः । स्थूलता ह्रस्वता चैव दुर्गन्धत्वं तथोष्णता । पारुष्यं विषमत्वञ्च दोषाश्चापि भवन्ति षट् । दशारत्निप्रमाणं च रेणुकं पित्तलक्षणम् । यो निश्वसिति दीर्घं च स दीर्घायुर्गजो मतः । अतःपरं प्रवक्ष्यामि गजालोकितलक्षणम् । स्निग्धं स्थिरं च सौम्यं च वारिजोत्फुल्लतारकम् । सलज्जं प्रतिनागं तु प्रेक्षितं शुभकारणम् । उद्विग्नञ्चञ्चलं दीनमविकाशिततारकम् । ऊर्द्ध्वाधःपार्श्वदृष्टञ्च निर्लक्षं निन्दितं भवेत् । कचानां साम्प्रतं भेदान् वक्ष्यमाणान्निबोध मे । नेत्रयोः पुटपालिस्थाः कचाः शुभफलाः स्मृताः । संख्या तस्यैव मानन्तु रोम्णां चैव प्रकीर्त्तितम् । देहच्छायासवर्णत्वं मृदुत्वं च तथा परम् । अनाविलत्वं घनता नम्रा च स्फुटितायता । अंशुमत्ता च सूक्ष्मत्वं रोम्णां सप्त गुणाः स्मृताः । दोषाश्च सप्तसंख्याः स्युर्गुणानां च विपर्य्ययात् । शुभानि शुभकर्त्तृणि दुःखदान्यशुभानि च । अतःपरं प्रवक्ष्यामि लक्षणं पक्ष्मसंश्रयम् । बाह्योत्तानानि ह्रस्वाणि दीर्घाण्यायतनानि च । मृदूनि पिङ्गवर्णानि पक्ष्माणि करिणः सदा । स्निग्धच्छायानि सूक्ष्माणि समानि च दृढानि च । अयनानि मच्छिद्राणि पक्ष्माण्यतिशुभानि च । गजानां स्वामिनः

सौख्यं कुर्व्वन्ति रमणीयताम् । दृढाः स्निग्धाः प्रलम्बाश्च सुवृत्ताश्च ऋदप्रभाः । तालवृन्तसमाकारा बाला भर्त्तुर्जयप्रदाः । शुनःपुच्छसमा रूक्षाः कपिलाः स्फुटितास्तथा । घनत्वातिशयोपेताः सुवृत्तास्त्वतिनिन्दिताः । भर्त्तुरारोहिगजानान्तु नित्योद्वेगकरास्तु ते । अतःपरं प्रवक्ष्यामि केशानामपि लक्षणम् । अभिन्ना ऋजवः स्निग्धा घना मधुकरप्रभाः । केशा वारणनाथस्य क्षेमवृद्धिकरा मताः । रूक्षास्तु निष्ठुराः पिङ्गाः स्फुटिताश्च जुगुप्सिताः । कुर्व्वन्ति दन्तिनां नित्यं स्वस्य नाथस्य चाशुभम् । पक्ष्मनालकेशरोमृणां लक्षणं कथितं मया । फणिमार्जारमण्डूकशृगालैश्च समप्रभम् । वानरस्य समं चैव मुखं नागस्य निन्दितम् । स्निग्धान्यापूर्णगण्डानि गिरिकूटनिभानि च । आपूर्णमेघरूपाणि पूजितानि मुखानि वै । मदहीनं लघु मुखं बाहिर्य्यनिःप्रभं तथा । वराहलोचनाक्रान्तमदृष्टचिबुकं तथा । ललाटतटपर्य्यन्तगर्त्ताक्षतिभिरन्वितम् । सगदं हीनतायुक्तं मुखं नागस्य निन्दितम् । मुखस्य लक्षणं सम्यक् कथितं तव सुव्रत ! । अतःपरं प्रवक्ष्यामि मातङ्गगतिलक्षणम् । समा च लघुपादा च वेगेऽप्यतिशुभा मता । दीर्घक्रमा सुखोत्क्षिप्ता गात्रसंवरहारिणी । शुभलक्षणसंयुक्ता पुरुषस्य वकस्य च । मातङ्गवृषसिंहानां गतिस्तुल्या शुभा मता । क्लेशचालितगात्रा या विषमा सुलघुक्रमा । वेगेऽपि मन्दसञ्चाराविशेषान्दोलितासना । मृगस्य कृकलासस्य जम्बूकस्य खरस्य च । गमनेन समा या, सा शुभा नो दन्तिनाङ्गतिः। कथितं तव राजेन्द्र ! गजानां गतिलक्षणम् । स्थितानाञ्च यथायोगं साम्प्रतं लक्षणं शृणु । पञ्चस्थितसप्तस्थित नवस्थित द्वादशस्थिताश्चैव । पुण्यवतां जायन्ते राज्ञां गिरिसन्निभाः करिणः । लक्षणसहितैः स्निग्धैः करकुम्भविषाणकर्णनयनैश्च । संयुक्तो भवति गजो वसुदः पञ्चस्थितो नागः। (वसुदः धनदः) परिणाहायामोच्छ्रयबलविक्रमधैर्य्यकान्तिसम्पन्नः । भर्त्तुः प्रतापजननो ज्ञेयः सप्तस्थितो हस्ती । उत्साहवेगसाहसमदसत्वगुरुत्वदक्षतायुक्तः । करदन्तकर्मसु कुशलोनवस्थितः करी भवति । बुद्धिर्मेधा सत्वं यत्नःकुम्भौ तथाऽक्षिणी हृदयम् । रोमाणि पुच्छविपादाः तथासनं पृष्ठवंशश्च । द्वादश चैतानि सदा स्थितानि दृश्यन्ते यस्य नागस्य । स द्वादशस्थितो वै भवति गजः सर्व्वसौख्यकरः । सञ्चार स्थितभेदाः कथिता गुणसंश्रया गजेन्द्राणाम् । दिव्यासमसत्वानां लक्षणमिह साम्प्रतं वक्ष्ये । निहतद्विपदचतुष्पदकुणपाश्च स्पृशति च न यो गृह्णाति । न च जिघ्रति मूत्रादीन् स वारणोदिव्यसत्वस्तु । दत्तश्च योऽत्ति मांस सत्वानां सर्वं तु लोभेन । जिघ्रति मूत्रपुरीषाणि पिशाचसत्वः स विज्ञेयः। एवं सत्वपरीक्षा क्रियते नरनाथ ! वारणेन्द्राणाम् । स्वरलक्षणमिदानीमशुभं शुभञ्च वक्ष्यामि । स्थानान्यष्टौ नृपते ! भवन्ति शब्दस्य वारणेन्द्राणाम् । ताल्वोष्ठशिरउरःकरजिह्वामूलं गलकपोलौ च । गम्भीरसौम्यहृष्टास्तथाऽश्रमीरितास्तथा स्निग्धाः। नादाः शुभाःनराधिप ! षडेव कथिता गजेन्द्राणाम् । चत्वारस्त्वशुभा रौद्राभयशोकसङ्गमोत्पन्नाः। एवं शुभाशुभाश्च दशप्रकाराःस्वरा ज्ञेयाः । अन्येऽपि गलवल्गागमिलास्फालनोद्भवा बहवः । शब्दाभवन्ति करिणां शुभाशुभं न तैर्भवति । निम्नोचितचित्कायितविरुक्षितकूजितखरोद्गनादनिभाः। वायसजम्बूककपिकाष्ठभङ्गसदृशारवास्त्वशुभाः । ज्ञेयानि शुभानि सदा मृदङ्गजीमूतदुन्दुभिनिभानि । पातायितगर्ज्जितहसितानि बृंहितानि नागानाम् । पातायितञ्च ताल्वोष्ठसम्भवं गर्ज्जितकं चैव । जिह्वासमुद्भवं च फेनायितमित्यभिख्यातम् । हसितं कपोलजनितं पुष्करविवरोद्भवञ्च नागानाम् । भवति धनधान्यवाहनभूलाभकरं नरेन्द्रस्य । हस्तेन मृदङ्गरवं तु कर्णाभ्यां दुन्दुभिस्वनञ्चैव । दर्दुररवं तु मेचकेन करोति योऽसौ जयकरः । सर्वस्थानसमुत्था शब्दा नरनाथ ! वारणेन्द्राणाम् । आचार्य्यैः सर्वैर्बृंहितसंज्ञाश्च रवाः शुभा ज्ञेयाः । एते च जयपराजयकथनसमर्था भवन्ति भूपानाम् । गर्हितशुभप्रदेशस्थानाङ्गपरिवर्ज्जिता नादाः । शुष्कवृक्षकाष्ठकण्टकवल्मीकास्थिश्मशानदुष्टाश्च । पाषाणाङ्गारादिषु भूमिषु यदि संस्थिताः करिणः । बृंहन्ति हीनलक्षणमेतद्भर्त्तुस्तदाऽसुखं भवति । प्रभूतमृदङ्गरवं तु यदि बृंहन्त्यानन्दपूरिताः करिणः । प्रस्थानं भवति तदा नराधिपस्य विजयस्तदा राजन् ।! सभामध्ये च यदा बृंहन्ति शार्दूलवत् गजाहृष्टाः। भवति ससैन्यस्य तदाविजयः संख्ये नरेन्द्रस्य । (संख्यं संग्रामः) कलहंसनाद मधुरं किञ्चिदिशोत्क्षिप्तपुष्करस्तु यदा । बृंहति सदा च हस्ती तदापि जयोभवेद्भर्त्तुः। मुखविवरकपोलगतं बृंहत्यसकृत् गजो यदा हृष्टः । मधुरञ्जहसितञ्च जयप्रदं भवति भूपानाम् । त्रीन् वारान् क्रौञ्चरवं हंसरवं बृंहितं यदा कुरुते । एतदपि नागहसितञ्जयप्रदम्भवति भूपा नाम् । गर्जति घनवत् सततं यदि वारणः प्रहृमनाः सुखरम्भनिविष्टकरस्तदाऽरिविजयोऽभवेद्भर्त्तुः । घनदव

गृहीतसलिलं ससीत्कारं बृंहितं यदा कुरुते । भवति तदा वारणनाथस्य भवति शत्रुनाशः खल्वेव । कथितान्येतानि मया शुभानि गजबृंहितानि नरनाथ ! । अशुभानि च नागानामतःपरं प्रवक्ष्यामि । शङ्काचालितनयनोऽवराङ्मुखस्फुरितनिःस्वनं कुरुते । तत्प्रतिबलस्य नूनम् तदा जयो भवति । भूपाल ! वेष्टितभूतलहस्तो नदति यदा धरणिप्रकम्पनादसमम् । नरपतिराष्ट्रविनाशो भवति तदा शत्रुसैन्यहतः । मदघूर्णितखरतरसदृशं निःस्वनं यदि करी कुरुते । जनयति विजयविनाशात् पुरराष्ट्रपीड़नं च तदा । बलिभुग्निस्वनसदृशं यदि वा समुत्फाल्य च हस्तम् । वामान्दोलितचरणोयदा करी बृंहति सनिःश्वासम् । आलानगतः कुरुते तदा बध्नीयात्तावैरिभिःपाशैः । एवं प्रकृतिस्थायदि मतङ्गजा बृंहितानि कुर्वन्ति । आत्यन्तिकानि राज्ञां चैव भवन्ति नान्यानि" । "यदि रिपुगजाभिमुखो निवार्यमाणोऽपि याति रभसेन । विंशतिपदानि नागस्तत्रापि जयोभवत्येव । शमदोग्रह्णाति मदं दुर्गन्धमदश्च सुरभिमदम् । दुष्टगजानां प्रथमन्तुलक्षणमेवं सकलम् । ह्रस्वतनुर्मलिनरदनो हि महाशिरास्तब्धकर्णयुगलश्च । नातिस्थूलोऽसितवर्णस्तब्धानि च गात्रवदनरोमाणि । व्यालः स भवति हस्ती दुष्टात्मा दुष्टशीलश्च । स्थूलाग्निपाण्डुरूक्षो दीर्घविषाणोनामितमुखश्रीः । पृथुपादःश्यावनखो वक्रोहनुपुटदण्डेन । विहृतकुक्षिलम्बोदरश्च कृष्णोऽवराङ्गनयनश्च । ज्ञेयोऽवकीलनामा ख्यातोऽयं सर्वदोषकरः । अतिह्रस्वापरगात्रो दृहन्मुखः काककृष्णनयनश्च । स्थूलतराधोह्रस्वदन्तदीनशुष्कस्फुटितबहिर्नखपादः । स्थूलनखःस्थूलपुष्करकरश्च वामन संज्ञो गजाधमो दुष्टशीलश्च । विषाणे चातिदृढे ह्रस्वे परिमण्डलौ तथा कर्णौ । वदनञ्च मांसलं स्यादधोगतस्थूलनयनश्च । समांसलत्वयुक्तो ह्रस्वो ह्रस्वाङ्गुलिः करो यस्य । नाम्ना च विश्वरूपमुख इति ख्यातो दुष्टमातङ्गः । करकर्णशिरोबालधिविषाणगात्राणि यस्य हीनानि । आदग्धभोऽतिशमनाङ्गः पापात्मा स स्वामिनाशकरः । शयनादुत्थाय बलाद्द्वावपि पादौ कर्षति कृच्छ्रेण । प्रत्यूषसि गच्छति पुनः क्वापि समुपस्थापितमुखश्च । अनिभृतगात्रस्तिष्ठेद्विचलति तस्याननं च कर्णाभ्याम् । स ज्ञेयो घातकरः पापात्मा सर्वपापकरः । यस्य च किलाल्पं मेढ्रं ह्रस्वं ह्रस्वाङ्गुलिस्तनुर्ह्रस्वा । अतिनिम्नश्च बाहित्थं कर्णौ च मनुत्वचौ ह्रस्वौ । गात्रापरञ्च दीर्घं नखाश्च जनितान्तरास्तथा । सर्वाणि च काकाभपक्ष्मरोमाणि च विदग्धानि ।

उदरञ्चाकृष्णं स्यात् पीवा तन्वायता च पक्षा च । वंशिकनामा मतोऽसौ दुष्टगजोवर्जनीयश्च । यस्य करालौ दशनौ स्थूलौ मात्रान्तरन्तथा ह्रस्वम् । मस्तिष्कशुक्लवर्णःकपिजम्बुकलोचनोऽतिविहृततनुः । पापात्मायं हस्ती राज्ञा त्याज्यः प्रयत्नेन । दिवसमपि यत्र तिष्ठति तं देशं दहति पावकप्रख्यः । राज्ञा विन्ध्यावने वा परराष्ट्रे वा स मोक्तव्यः । अतिखरपरिषतनुर्नकुलच्छायस्तनूरुहैस्तब्धैः । यो हस्ती घातारं स घातयित्वा विनाशयति । धन्वासदृशमुखोयः कर्णकषायस्य कर्कशा रूक्षाः । तृष्णारूक्षान्वयोऽसौ भर्त्तुर्विपदेव मातङ्गः । रोमभिरधोमुखगतैः काकाक्षो दीर्घवक्त्रश्च । स्थिरह्रस्वकर्णयुगलः स राक्षसोहस्ती रूपेण । तिर्यक्प्रेक्षणनिरतोदुर्गन्धः काककुम्भवदनश्च । मूत्रपुरीषघ्राणे सतृष्णको भवति चण्डालः । कुम्भौ यस्य विशालौ विच्छिन्नस्थूलतारके च नेत्रे । तन्वायतं त्रिकं स्यात् बालधिबालास्तु बहुरूपाः । रक्तौ मेचककोशौ मेढ्रोपरिसंस्थितोदरञ्च महत् । चलपक्ष्मकस्तु हस्ती स भवति नाम्ना महादुष्टः । अङ्गं प्रसार्य्य वदनं विधूय चाधोरणं निपातयति । स जले स्थले च नागो विवर्जनीयः प्रयत्नेन । ह्रस्वकराङ्गुलिबालतनुदशनश्चाल्पायामगात्रश्च । मत्कुणजातिः स गजः सुदुष्टशीलश्च दृष्टश्च । कालनखो हरिवर्णोहर्यक्षो ह्रस्वबालधिश्चैव । बहुपक्ष्मा दुर्गन्धिर्म्मणिसन्निभतालुकैरूक्षैः । अतिपिङ्गलकर्णचूलोरोमशहस्तो वराङ्गनयनश्च । तनुनखशिरालकृष्णैर्मांसान्तरैर्दुष्टचरणैश्च । शिशुरोनाम गजोऽसौ स्याङ्गैः सर्वत्र कर्कशोजान्वोः । बहुपापकर्म्मयुक्तो व्यालानामग्रणीश्चायम् । रूक्षोबाहित्थभागो विषमौ दन्तौ च यस्य नागस्य । धूमशिखेव च्छाया स निन्दितो वर्जनीयश्च । दन्तौ चातिह्रस्वौ स्थूलौ रूक्षौ च मांसलो हस्तः । चिबुकं मांसविशुष्क स्थूलतरे तारके यस्य । स्थूलमुखो दुष्टात्मा नासौ सांग्रामिको भवेद्द्विरदः । अतिदुष्टकर्ननिरतो भयालुको वर्जनीयश्च । कृष्णा रूक्षा च्छाया वायसजङ्घा च दृश्यते यस्य । मूत्रोदनञ्च कुरुते निःशङ्कं यः करार्पेण । निःशेषं पद्धांस करोति यः सहस्तनिर्घोषम् । परिहरणीयो राज्ञायाने रणे स महता प्रयत्नेन । अतीवविरलपक्ष्मा ध्यानपरः शब्दकरणनिरतश्च । द्विगुणीकृत्य कराग्रन्तुदति च भूतलन्तु नित्यम् । वामेन च लिखति महीम्पादेन कुञ्चिताग्रेण । जर्जरविरूपकर्णः पापात्मा निन्दितो हस्ती । आनाहायामोच्छ्रयसत्वयुक्तो महाशिरावबिड़ः । ह्रस्वाङ्गुलिबालकरो ह्रस्वापरगात्रकर्णश्च ।

एषोऽपि वामनःस्याद्यद्यपि भवेद्युद्धप्रियोऽसौ द्विरदः। राज्ञा तथापि लक्षणविवर्जितो वर्जनीयश्च । स्थूलमुखहस्तकर्णोविहीनजघनापरस्तनूरुश्च: । महता मेढ्रेण युतो नष्टमदः कोषमहांश्च । मन्दालोकननिरतोमहाशिराः पृथुविषाणनयनश्च । हस्तो नपुंसकोऽसौ विवर्जनीयश्च संग्रामे । अल्पायुषो भवन्ति हि सङ्कालजिह्वोष्ठतालुका नागाः । नरपतिभिस्ते सततं विवर्जनीयाः प्रयत्नेन ! आयामपरिहीनं समनाहोच्छ्रायसुखेन नमितम् । उच्छ्रितवक्त्रं कुब्जं विषमकुम्भं कुक्कुरसमानहीनहस्तं च । एवंभूतं तु गजं राजा दूरेण वर्ज्जयेन्मतिमान् । स्वेद्यति मन्दबुद्धिर्यस्तस्य कुलक्षयो भवति । लक्षणयुक्तोऽपि गजो द्वात्रिंशत्येकविंशतिनखश्च । एकोनविंशतिनखः सप्तदशनखश्च यो भवति। षोड़श पञ्चदश वा नखान् धत्ते युक्तो वा चतुर्द्दशभिः । एकादशत्रयोदशनवदशभिर्द्विदशनखैश्च । संयुक्तस्त्वशुभकरः सप्ताष्टाभिश्च पापनखैः । द्विरदाश्चाष्टादशनखाः विंशतिनखयुक्ताश्च शुभाः । कुरुते स्वामिविनाशं द्वात्रिंशतिनखोयश्च । एकोनविंशतिनखो युवराजविनाशं कुरुते । सप्तदशनखस्तु गजो नरपतिपात्रविनाशने समर्थः । षोड़शनखमातङ्गोनायकनाशं ध्रुवं कुरुते । पञ्चदशनखश्च योऽसौ सेनापतिनिधनकृज्जो भवति । कुरुते चतुर्द्दशनखोव्याधिं पुरवासिनां हस्ती । त्रयोदशनखो राष्ट्रवित्तविनाशङ्करोति भूपस्य। द्वादशनखस्तु कुरुते पदातितुरगक्षयं संख्ये । एकादशनखयुक्तो गजहानिकरो भवेत् स गजः । पुरदाहं च दशनखः करोति हस्ती दुरालोकम् । चतुरङ्गस्य बलस्य नाशनन्तु नवनखो गजः कुरुते। अष्टनखश्च पुरोहितवंशसमुन्मूलनसमर्थः । सप्तनखः प्रतिहारं नाशयति च षड्नखोऽमात्यम् । पञ्चनखो भक्तिकरं चतुर्नखो द्वारपालञ्च। त्रिनखोविषयाक्षेपं द्विनखश्चान्तःपुरानुबन्धञ्च। एकनखोनखरहितोराष्ट्रविनाशं ध्रुवं कुरुते । एवम्भूतनखाये नरपतिना न ते गजाग्राह्याः । लाक्षमञ्जिष्ठाभोऽतिलोमशोहीनकर्णकरवालः । हस्तो विवर्जनीयो हीननखः पूतिलोमा च । ज्वलनकृतं शस्त्रकृतं दुर्भिक्षकृतं महद्भयं कुरुते । यस्मिन् देशे वसति नाशयति वन स दुष्टात्मा । यस्य न भवतोदन्तौ ज्वलनकृतं दुर्भिक्षकृतं महद्भय कुरुते । यस्मिन्देशे स वसति नाशयति वनं स दुष्टात्मा । यस्य न भवतो दन्तौ कुलरूपवतीऽपि गर्भदोषेण । स गजोमत्कुणनामा न तं रणे योजयेद्राजा ।

कुञ्जरघटागतोऽसौ हरति गजानां बलं च सत्वञ्च। अतएव समरकाले नराधिपैर्वर्जनीयश्च । तनुह्रस्वदीर्घदन्तोन्नतिसङ्कटवक्रविघटितविषाणः। एकदशनस्त्वधोमुखरदनश्च गजः प्रभं त्यजति । रदनविहीनो हस्ती निःशेषलक्षणयुतोऽपि । भवति न नृपतियोग्योमदजलसंसिक्तगण्डोऽपि । दूषितविरहितदीने सत्वरहिते विवर्णे च । निष्प्रभकुञ्जकुहरे राजा नारोहति सन्नाहरहिते च । एवम्भूतास्त्याज्याः मित्रनाशका रणे करिणः। अविच्छिन्नमश्रुजलं निपतति नागस्य यस्य नित्यं हि । नयनव्याधिवियुक्तस्य तस्य भर्त्ता रणे म्रियते। बहुनखोलाश्च नखा भर्तुः सैव संबाधनकराः । जिह्वानखमुखमेहननयनानि भवन्ति यस्य कृष्णानि। वाह्नित्यजित कृष्णः स गजोभर्तुः क्षयं कुरुते। वाह्यांसफलकपीठो राजन् ! कृशेन पृष्ठवंशेन । वदनेन च कपिवदनानुकारिणानिन्दितो हस्ती। कर्णौ दन्तौ च समौ न नतौ भवतो यस्य नरनाथ ! । स नराधिपबलविनाशकरः करी जायते समरे। चित्रौ रोमचितौ वा स्थूलौ वातिप्रलम्बितायौ वा। कोषौ कोषविनाशं स करोति नागश्च भूपानाम् । सितबिन्दुभिर्विचित्रं श्वेतं वा यस्य जायते मेढ्रम् । स गजःशक्तिविनाशङ्करोति भूपस्य संग्रामे । छागस्येव विचित्राणि यस्य देहे भवन्ति रोमाणि। स गजःप्रतिगजबलेन विह्वलो निजबलं दहति । सुप्तोत्थितस्य वदनात् यस्य गजेन्द्रस्य गलति रुधिरजालम् । ज्वलनकणं मुञ्चति यश्चदसौ भर्तृनाशकरः। इति कथितं तव नृपते ! दुष्टमातङ्गलक्षणं सम्यक् । पापकरिण्यालक्षणमतः परं संप्रवक्ष्यामि। यल्लक्षणं मयोक्तम्भद्रादीनां शुभं च दुष्टं च। तत्करिणीष्वपि योज्यं जातिविभागेन च युक्त्या । सुलक्षणेन ललितानि करेणुकानामङ्गानि भवन्ति। युवतिसदृशानि पुरुषोचितानि च तथा पीनान्यङ्गानि करेणूनाम्। गजसंस्थाना करिणी निर्म्मलटन्तरसुपीनकाया च । स्थूलायता च सततं प्रभूतदया मता च करिणीनाम् । प्राच्यवनसमुद्भूताः प्रायेण लक्षणयुता भवन्ति करिण्यः । सुलक्षणेषु च छाया लक्षणं प्रधानं तच्च पञ्चविधं भवति। पृथिव्यप्तेजोवाय्वाकाशात्मकम् । तत्र पृथिव्यप्तेज आत्मकं प्रशस्तं वाय्वाकाशात्मकमप्रशस्तम् । क्रमेण छायाभिधीयते बलोपचयवशेन समुत्पद्यते । तस्यैव देहोद्द्योतजननी, स्थिरा प्रभाऽभिधीयते । छायाफलस्य द्विगुणफलसमादानसमर्था प्रभा

भवति । छाया देहसमाश्रिताः स्थिरप्रभावाऽस्थिरा च्छाया बलोपचयवशेन समुत्पद्यते । नरेन्द्रस्यैवोद्योगकाले शुभकर्मफलसूचनार्थं गजस्य प्रभा प्रकटीभवत्येव । एवं छायागतो भेदोऽवगन्तव्यः । साम्प्रतं छायारूपमभिधीयते । स्निग्धा गम्भीररूपा पार्थिवी च्छाया भवति । स्निग्धाञ्जीभूतसन्निभा च सलिलसम्भूता, स्निग्धा रक्ता च ताम्रा च तेजसी च्छाया । त्रयं चैतल्लक्षणं शुभमशुभलक्षणानि गजस्य स्तम्भयित्वा सुखप्रदं भवति । अथाशुभा कथ्यते निःप्रभा परुषा रूक्षा भस्मनाकुलवर्णा च वायवी । कृष्णा तन्वी कृष्णादिविविधवर्णा आकाशात्मिका । इत्थं छायाद्वयमति गर्हितम् गजलक्षणानि तिरस्कृत्याशुभप्रदम्भवत्यनेन प्रकारेण च्छायालक्षणमुत्तमं भवति । विकटमुसलबालदन्तकशाकृष्टीनाङ्गेषु व्याधिपीडितविकलाङ्गेषु गजेषु नारोहति राजा भत्वार्थैतेष्वारोहन्नीति । यादृशं च समरकाले मातङ्गं राजा समारोहति तादृशस्य लक्षणमभिधीयते । बलं कण्ठे स्थितं नित्यं कुञ्जराणां नरेश्वर ! । अतःसंपूर्णकण्ठस्तु शिखिपिङ्गललोचनः । घनमांसचितांसस्तु दिर्घोऽवग्राहतत्परः । वराहजघनश्चैव सुविषाणोवराननः । सुप्रतिष्ठितपादस्तु यः स्यादगुरुमस्तकः । प्राजापत्योगजोह्येष संग्रामार्हः प्रकीर्त्तितः । मधुपिङ्गलदन्तोयः किञ्चित्पीतकच्छविः । रोमाणि चैव रूपाणि मुखं च कमलप्रभम् । रक्तोत्पलदलच्छाये सूक्ष्मे तीक्ष्णे च लोचने । ऐन्द्रोगजस्तु विज्ञेयोरिपुवृन्दविनाशनः । ताम्रतालुकजिह्वोष्ठसुजातनिबिड़ापरः । पीनोन्नतशरीरस्तु रक्तकोकनदच्छविः । आयतेन तु दन्तेन करेण सुखशोभिना । पीयूषपिङ्गदन्तो हि गजःकौवेर उच्यते । तरुणाम्बुदसंकाशोंहतस्रभविषाणभृत् । संपूर्णकण्ठपादस्तु संपूर्णसममस्तकः । मृदङ्गध्वनिगम्भीरनादपूरितदिङ्मुखः । आयतेन च हस्तेन शीकरोत्किरणप्रियः । वारुणोऽयं गजोराजन् संग्रामेषु तिपूजितः । कण्ठस्त्रिवलिसंयुक्तः संपूर्णोयस्य दृश्यते । लोचने ताम्रपिङ्गे च दन्तौ केतकसप्रभौ । पादौ च वलिनौ यस्य पीनगात्रसमांसलौ । पृथुलौ विस्तृतौ च कर्णौ वातोत्सपल्लवौ । ऐशानोऽयङ्गजो राजन्! रणकर्मणि युज्यते । तालुन्युरसि वक्त्रे च पक्षयोरुभयोरपि । आताम्रा यस्य दृश्येत च्छाया मृदुतनूरुहा । असौ सौम्यस्तु विज्ञेयः कुञ्जरः समरोचितः । अर्च्चिःपिङ्गल रोमा यः केशैश्च श्वेतपिङ्गलः । पिङ्गलाक्षिविषाणश्च रक्त पुष्करतालुकः । आग्नेयः स गजोज्ञेयस्तेजसाग्निसमप्रभः । राज्ञा बुद्धिमता नित्यं धार्य्यः समरकर्म्मणि । कृष्णवर्णं युताग्राणि मुखस्रोतांसि लोचने । निर्धूमाग्निसमच्छाये मूलग्नश्च करस्तथा । कायश्च पीनवातःस्याद्वेगे वायुसमः शुभः । राजन् ! वायव्यमिच्छन्ति तङ्गजं शास्त्रकोविदाः । संख्ये नियुक्तश्च गजोनाशयेद्रिपुवाहिनीम् । निरङ्कुशत्वं चण्डत्वं तस्य दोषद्वयं भवेत् । निरङ्कुशत्वं शमयेत् प्रयोगान्वासनादिभिः । चण्डत्वं च तथा नित्यं सुकुमारक्रियादिभिः । रोमाण्यङ्गमरूपाणि नखाः शङ्खसमप्रभाः । निस्त्रिंशविमलच्छायः स भवेद्वैष्णवोगजः । स वैरिणं जयेद् राजन् ! रिपुसैन्यविमर्दनः । कुम्भपक्षाः कटौ यस्य निस्त्रिंशघनसंनिभौ । बिन्दुभिश्चित्रितं यस्य स विचित्रश्रयो गजः । तेन संग्रामकर्माणि कुरुते यो नराधिपः ! । नित्यं चारिजयं तेन स राजा फलमश्नुते । सुदन्तो दीर्घहस्तश्च दृढदङ्गुलिपुष्करः । घनमांसशरीरश्च कूर्म्माकारोहि सत्तम ! । सांग्रामिकोगजोह्येष जीवन्नपि समागतम् । संग्रामविजयी नित्यं प्रतापजननक्षमः । महाशिरा महाकायो महामेढ्रो महाकरः । महादन्तोदरश्चैव महानागोवराननः । महानेत्रो महौष्ठश्च महाकर्णोमहामुखः । महामदो महाकण्ठो भवेत्सांग्रामिकोगजः । यद्गजलक्षणं पूर्वमुक्तं नृप ! तच्छुभमेव हि । मन्दस्यापि हि शस्तं स्यादाद्यावेतौ च महागजौ । संपूर्णलक्षणोपेतो न भवेच्च महीतले । अनयोरेव भेदास्तु नागानां समुदाहृताः । सांग्रामिका द्विधा राजन् ! शुभलक्षणलक्षिताः । कथितास्तत्र तत्त्वेन राजसौख्यकरागजाः” । आभिषेचनिकगजलक्षणं तत्रैव । “पीनमांसचितांसश्च कूर्म्माकारनखस्तथा । समवचितसांसस्तु सुदृशः कल्पनापरः । क्षामकुक्षिः सुपार्श्वश्च रोमानाहसमन्वितः । ज्वलनोज्ज्वलनेत्रस्तु सुविषाणो महाकरः । संपूर्णचिबुकश्चैव क्रमायामोरयान्वितः । बलसत्त्वसमायुक्तः स्निग्धच्छविमनोरमः । सांग्रामिको भवेद्राज्ञ आभिषेचनिको गजः” ।

तत्रैव पालकाव्ये गजहृदये । “आयुः सविंशति शतं मानं स्यात् सामजन्मनाम् । राजपुत्र ! दिशाम्येषमायुष्यादि दशादश । लक्षणानि वदे तेषां क्षेत्राण्येवं विषाणिनाम् । लक्षणालक्षणं ज्ञेयमायुष्यादिदशाफलम् । क्षेत्राणि हस्तौष्ठमुखं दन्तौ शीर्षं च चक्षुषी । कर्णौ ग्रीवा च गात्रञ्च वक्षः कार्य्यस्य भेदतः । लक्षणं सन्निकृष्टं यद्विप्रकृष्टञ्च यद्भवेत् । मतञ्चित्रबलोपेतं प्रभूतञ्च मनीषिभिः । तुल्ये कुले वने जातौ प्रचारे यत्तु लक्षणम् । दृश्यायाञ्च तदाख्यातं

प्रभूतमिति सूरिभिः। दक्षिणान्दक्षिणाङ्गं च हस्तिनः पुण्यदं मतम्। तथा वामं च वामाङ्गं हस्तिनीफलदं मतम्। लक्षणं दक्षिणाङ्गोत्थं फलं भूमिभुजां मतम्। महद्यत्रं भवेद्यच्च लक्षणं तन्महाफलम्। यदल्पमप्रकाशञ्च तदल्पफलदं मतम्। मध्यमानफलं मध्यं लक्षणं तु समादिशेत्। शुभाशुभेन मिश्रेण बहुत्वेनादिशेत् फलम्। कदाचित् शुभद चास्य गजानामप्यलक्षणम्। शुभकर्म्माणमासाद्य राजानमथ वा द्विजम्। यथा हि सर्व्वसरितः समुद्रं समुपेत्य हि। स्वरसेन वियुज्यन्ते भवन्ति लवणाम्भसः। एवमासाद्य भर्त्तारं बहुलक्षणलक्षितम्। भवन्ति बाधितानीह दुर्लक्षणफलानि च"। इत्युपक्रम्य गजदेहस्थानविभागनामभेदस्तत्रैव दर्शितः। यथा "विषाणयोर्यस्तिर्य्यक्स्थादायताग्रो मद्दोऽपि सः। किविवा च मद्दस्याधःकुम्भोपरि च बिम्बकः। अथ मद्दोपरिस्थोऽपि पुरष्करोऽपि भवेत्तथा। तथा मद्दोपरिस्थे च किविवोपरिभागके। वाहित्थोपरि केशाश्च मस्तकं च तथा मतम्। स्यातां मस्तकपिण्डौ च मस्तकस्याथ विन्दुकः। तथा विन्दूपरि स्यातां वितानौ विन्दुपार्श्वतः। ततोऽन्तरवितानं च पृष्ठं तत्र विनिर्दिशेत्। विन्दुवितानयोश्चान्तः पुरस्तात् पाक्षिलौ किल। नीचे मस्तकपिण्डाद्धि वितानविन्दुपाकलः। निर्याणं च वितानोर्द्ध्वं कर्णौ वापि ततः कटौ। कटयोः स्रोतसी वापि कटस्थायस्तयोरधः। पृष्ठतः कटिसंधी च गण्डौ च कटयोरधः। कटगण्डान्तसद्भागे घाटसन्धौ च घाटके। घाटासन्ध्युपरिष्टाच्च कर्णसन्धिसमीपगे। श्रवणे गात्रगण्डाधःकपोलौ च तदन्तरे। रोमकूर्चौ च पादौ च कपोलाधस्तथा मतौ। ततः सगदसन्धौ च सगदान्तरमत्र च। आसगदात् हन्वधः प्रदेशः शिरधोमतः। अक्षिकूटावुदूखलावुभावुपरि वै तयोः। गुण्डवाच्चाऽधरः स्यात्तु नेत्रस्रावौ तयोरधः। अपाङ्गावक्षिबाह्ये च तत्सन्धी चाक्षिपृष्ठतः। पक्ष्मणोर्मण्डले चाथ तत्सन्धी वर्त्ममण्डलौ। वर्त्ममण्डलसन्धी च ततश्च श्वेतमण्डले। श्वेतमण्डलसन्धी च ततः कृष्णे च मण्डले। तत्सन्धी च ततः कृष्णे सत्सन्धी वर्त्ममण्डले। तयोरपि तथा सन्धी प्राग्भागे चक्षुषोरपि। कनीनिके समाम्नाते सन्धी तत्र तथानयोः। इत्यक्षिगतदेशानां समुद्देशो भवेदिह। किल विस्तौ च कर्णौ च कर्णयोश्चूलिका ततः। तदधः कर्णपिप्पल्यौ वालिके द्वे प्रदेशगे। कर्णमस्तकसन्धी च पश्चात् कर्णापवर्त्तयः। तदन्तश्च समस्थानावुद्घातौ परिकीर्त्तितौ। कर्णचूलिकयोरग्रे पिङ्गलाख्यौ च भाषितौ। पुरस्तात् कर्णपिप्पल्याः कर्णसंवेशचर्म्मणी। कर्णान्तः कर्णनाड्यौ च लभ्येतां तस्य भागतः। तदावीथ्यःकवन्धश्च सशङ्खमध्यकर्णयोः। कर्णसन्ध्योरधस्ताच्च तथाधःसन्धिसंज्ञितौ। तदधः कर्णपाल्यौ च प्राक् कर्णोपरितस्तयोः। नाड़ीपार्श्वगतौ चात्र मध्यकर्णौ तयोरधः। अधःकर्णौ समाख्यातौ बहिःकर्णापवर्त्तयोः। पार्श्वकर्णौ बहिःकर्णौ कर्णयोश्च क्रमाद् बहिः। अन्तरान्तरकर्णौ च पर्य्यन्तकर्णपाशयोः। अधस्ताच्चेति भागाः स्युः कर्णयोः करिणोऽपि च। ग्रीवायाः प्राग्भवोभागो ग्रीवा सन्धिस्ततस्तथा। ग्रीवापृष्ठं ततः स्याच्च मध्ये तच्च लकाटिका। ग्रीवापृष्ठे तथाधस्ताद्गलमाङ्गद्विपस्य च। अधःकण्ठस्तयोश्चोर्द्ध्वं मन्ये ते गलकण्ठयोः। धमन्यौ कण्ठपार्श्वे च तयोश्चावलिपिण्डिका। गलस्य पार्श्वयोरूर्द्ध्वं दर्दुरौ चात्र निर्दिशेत्। गुह्ये मन्योपरि स्यातामुपरिष्टात्तयोस्तथा। किविकौ च तथा चोक्तौ पश्चादुपरि चैतयोः। पार्ष्णिघातौ च संख्यातौ पार्ष्णिघातान्तरे तथा। उत्सङ्गावुपरि स्यातां स्कन्धादूर्द्ध्वं तथानयोः। तन्मध्ये पणवश्चोर्द्ध्वमिति ग्रीवांशसंग्रहः। (हस्तिपकेन पार्ष्णिभ्यां यौ देशौ हन्येते तौ पार्ष्णिघातौ) गात्रमात्रमायतं च भवेदासनमादितः। तत्पार्श्वयोः प्रतोकाशौ तावंसौ च तयोरधः। तदधःप्रत्यगंसौ च तथैवांसफले तथा। तदधस्तात्ततोबाहू ततोबाहूत्तरं तथा। अर्वागत्र गुह्ये तत्र बाहुपृष्ठोद्भवे अपि; अपारे च तदूर्द्ध्वं च तयोस्तद्भाविकौ तथा। पाल्यावथाङ्गादूर्द्ध्वञ्च तयोरायामपृष्ठतः। पाल्यन्ताङ्गपुरस्ताच्च भुजयोरुदितौ यवौ। यवभागोपरि तथा पुरस्तात् फलकोच्छ्रितौ। पिण्डिकाधश्च वेमाख्यौ विशोषौ यवयोरधः। उत्सङ्गौ च विशोषाधः प्रह्वौ चापि तयोरधः। तत्सन्धी च ततः पर्व्वसन्धानौ तदधोमतौ। तदधः पालिपादौ वै कूर्चौ चानु तयोरधः। तदधोनखकूर्चाश्च ततो नखशिखादय। पुरःपुरोनखौ नाम्ना सनखौ चैव विस्तृतौ। तत्पश्चात् नखग्रीवा विशोषाः पार्श्वतोनताः। अन्तःपार्श्वबहिःपार्श्वे स्यातां पार्श्वनखेषु च। कवाश्च राजयश्चात्र पादनाडाविकास्तथा। तलसन्धी ततः स्यातां तले च तदनन्तरम्। तलप्रदेशपुरतस्तत्परा नखबन्धतः। तलकर्णौ ततः पश्चात् तलप्रह्नौ ततःपरौ। तलयोरन्तरं चैव हृदये च करीरके। किंविनोराजयश्चेति तलसद्भाविका अपि। पलहस्तौ ततः स्यातामन्तर्बाहू ततोऽन्तरे। बहिर्बाहू बहिश्चोर्द्ध्वं गात्र सर्व्वं ततोऽपि च। कक्षौ गात्र

प्रकोष्ठश्च कक्षयोरन्तरं ततः। इति प्रदेशा गदिता गजानां गात्रगोचराः। कण्ठस्यान्तर्मणिः पूर्वं ग्रीवापर्वसमाश्रयः। उरोमणिः समाम्नातस्ततः स्यादुरसः स्थितिः। याऽधोभा पार्श्वगा तत्र गात्रसन्धिसमाश्रिता। आवर्त्तमणिरप्यत्र विज्ञो भास्वरसङ्कुलः। ततः सन्धिकरस्तु स्यात्तस्याधः स्तनयोः पुरः। गात्रयोरन्तरं चापि चतुरस्रान्तरं भवेत्। अधःस्तनौ च स्तनयोरन्तरे चाथ चूचुके। स्तनान्तौ स्तनकूर्चौ च चोरिकौ चापि कूर्चके। चतुरस्रान्तरालं च भवेच्चूचुकयोरधः। स्तनयोरप्यधस्ताच्च पुरस्तात् स्तनयोर्भवेत्। हृदयं चास्य पार्श्वस्थावायामौ च बहिस्तयोः। स्यातामायामकाण्डौ च तदधोविवशौ ततः। ततः क्रोड़ं पदाधस्तात् पश्चाच्चायामकाण्डयोः। रन्ध्रे चापरवंशस्य स्तनयोरप्यनन्तरम्। जठरे नाभिरित्येते प्रदेशाः किल वक्षसः। आपराङ्घ्रिपरःशेफोरेतःस्थावावधिः स्मृतः। ततोऽण्डकोषसन्धिः स्यात् कोषसन्धिश्च शेफतः। क्रमान्मेहनमत्र स्यात् मेढ्रसंज्ञो भवेदपि। आनिर्गमात्तथा तस्य बाङ्कपार्श्वगतौ मतौ। अघतस्तत्र ककुदं तस्याश्री पार्श्वयोरपि। मेहनस्य पुरःस्रोतो वङ्क्षणौ कोषपार्श्वगौ। अपराश्रयिणी शुक्रे तथा वङ्क्षणमध्यगे। इत्यण्डकोषभागाः स्युः क्रमादासनमुच्यते। तदन्तश्चासनश्चोर्द्ध्वं वक्रवंशस्य पृष्ठतः। भवेदपरवंशश्च ततोन्यच्चाध आसनम्। पश्चिमासनमप्यस्य पृष्ठतः परगस्य च। अत आस्तिप्रदेशश्च ततो वंशश्च वालधिः। (आस्तिरासनम्)। आश्रयेत्यभिधानाश्च भागाः पश्चान्निपादिनः। स्यातां च तत्पक्षाधस्तात् पक्षसन्धी तथा ततः। स्यातां च पक्षपार्श्वे च गर्मूकाश्च क्रमादपि। पक्षाधोनन्तरौ चानुकुक्षौ पक्षसमाश्रितौ। निम्नाभौ मध्यगौ तत्र शङ्कू चैवोर्द्ध्वमध्यतः। कक्षाभोगौ काकपक्षौ शङ्कुच्छायाकरौ ततः। उत्कृष्टौ कुक्षिपक्षाच्च त्र्यस्थिपार्श्वगतावपि। कालकोत्कृष्टदेशानां पात्रवंशस्य पार्श्वयोः। कालके पिण्डिके चाधो त्रिधाश्चापरयोः स्थिते। उत्कृष्टपिण्डिका त्र्यस्थिस्थानमेवावलम्बनम्। जघनं पक्षतोऽस्माच्च एवं कालवका दश। भवेत् पायुश्च पायोस्तु गुदमभ्यन्तरं तथा। बहिर्गुदस्य वर्त्म स्यात् गुदान्तः कन्दरं विदुः। विलपायन्तरे कक्षौ तथा पिण्डिकयोरपि। अधस्तादन्तरे किंचिन्यन्तरे तत्र संस्थितिः। पिण्डिकावश मण्डूक्यावष्ठीलौ पिण्डिकान्तरे"। अवयवप्रमाणभेदास्तत्रैव। "पिण्डिकारत्निकामाना गुल्फरोऽपि भवेत्तथा। कर्णमध्यर्भवेच्चापि तच्चारत्निप्रमाणतः। कर्णापवर्त्तौ पार्ष्णी च स्यातां हस्तसमुच्छ्रितौ। कर्णाश्री च तथा त्रिधाद्विस्तारे द्वादशाङ्गुले। कर्णाश्रावपि हस्तौ द्वावायामपरिणाहतः। कर्णवर्त्तिं विद्धि कर्णप्रमाणेन च रत्निकाम्। शिर आसनमुद्दिष्टं मानेन त्रिकहस्तकम्। शिरसस्तु प्रमाणेन स्यात् षड़ङ्गुलमासनात्। आसनेन समं शीर्षं कल्याणकरमित्यपि। यस्यासनं च नीचेन शिरसः स्यात् षड़ङ्गुलम्। अवाप्यो नाम स प्रोक्तो गजोनिन्दितलक्षणः। शिरो यस्य भवेदुच्चमासनाद्द्वादशाङ्गुलम्। सोऽभ्युदयाभिधानेन लक्षणादासनं भवेत्। आसनं वङ्क्षणोद्देशाद्याहश्च पक्षभागतः। मञ्चसमानफलक उत्कृष्टोऽष्ठोस्थितोऽपि च। अष्टीत्येवं समाख्यातं लक्षणादासनं भवेत्। हस्तद्वयप्रमाणेन पेचकात् पश्चिमासनम्। द्वादशाङ्गुलनिम्नं स्यादासनात् पश्चिमासनम्। सार्द्धहस्तत्रयं चाधः प्रमाणमपि बालधेः। सप्ताङ्गुलप्रमाणेन पायुश्च परिमण्डलः। अरत्निपरिमाणेन विदुस्तद्द्गुणान्तरम्। अरत्नितोऽधिकं यस्य विस्तारेण स्तनान्तरम्। तिर्य्यग्लोमचयं गात्रमरिभ्यः शोकदोगजः। अरत्नित्रयमानेन नाभिदेशस्तनान्तरम्। नाभिश्च मूत्रकोषश्च गुदारत्न्यर्द्धमानतः। अण्डकोषश्च हस्तार्द्धप्रमाणेन समन्वितः। द्वे चारत्नी तथार्द्धं च कोषमार्न भवेदपि। सोऽर्द्धहस्तद्वयायामोहस्तानाह्युतोमतः। प्रौढे तु परिणाहः स्यादरत्निद्वितय तथा। हस्तयोश्चार्द्धमानं स्यात् चतुर्भागेण संयुतम्। तलस्य पार्श्वतः प्रौढावरत्निप्रमितौ मतौ। चतुर्भागयुतारत्निर्भवेद्धस्ततलोपरि। अष्टाङ्गुलप्रमाणेन स्यातां ततः पुरोनखौ। सप्ताङ्गुलश्चापनखः पार्श्वे पञ्चाङ्गुलानखाः। चतुर्विंशत्यङ्गुलश्च भवेद्गात्रापरे तथा। अपराभ्यां भवेदुपन्धिररत्न्यर्द्धेन मानतः। अरत्निश्च तलायामोभवेच्च करयोरपि। सप्ताङ्गुलास्तु शेषाः पार्ष्ण्योः पार्श्वनखास्तथा। पञ्चाङ्गुलास्त्र्यङ्गुलाश्च नखाश्चापि नखा मताः। इत्यङ्गमानं नागस्य दिङ्मात्रमिह दर्शितम्। समाङ्गा अपि मातङ्गा दृश्यन्ते दुःखदाः क्वचित्। दृश्यन्ते विषमाङ्गाश्च क्वचित् कल्याणदायिनः। तस्मात् प्रमाणं केषाञ्चिदप्रमाणतया मतम्। प्रमाणं कृतसाधार्य्यैः सर्व्वैर्लक्षणवेदिभिः। अथाङ्गसङ्गमात्तावत् मातङ्गानां गुणागुणाः। भूयोऽन्यगुणदोषाभ्यां प्रसङ्गात् कथिताः पुनः। उपरिक्रमतो दृढो नातिस्तब्धोऽम्बुदस्थितिः। दृक्स्निग्धाच्छरोमा च लोहिताङ्गुलिपुष्करः। सर्व्वव्यक्तप्रमाणश्च गजः कल्याणकारकः। भाग्यप्रदो बालहस्तस्तथायततनूरुहः। अयंद्रो हीनबिन्दुश्च गजो दुःख-

प्रदो मतः । हिपाद्दग्धकरा ह्रस्वा हीनपार्श्वाश्च दन्तिदाः । पुष्करं हीनमव्यक्तं विद्याद्भर्त्तृविनाशनम् । युक्तमाने निगाढे च निर्म्मलस्रोतसी शुभे । सुसमाहिते च स्यातान्तु पलाशसमद्युती । उन्नद्धौ क्रमवृद्धौ च स्निग्धावभ्युदितौ समम् । दक्षिणौ च समानौ च प्रहारप्रगुणच्छवी । ततः प्रदक्षिणावर्त्तावुदात्तौ दन्तिनां रदौ । करस्पृगाकृती चापि श्वेतास्थिसदृशद्युती । विषाणे च तथा स्यातां चापाग्रे वारणस्य च । यो दक्षिणैकदन्तस्य श्रिया तु रहितो गजः । वामैकदन्तो दन्ती च दुःखदः स्वामिनो मतः । दशां प्राप्य चतुर्थीं च द्वितीयां यस्य न द्विजौ । स्थूलावनायतौ स्यातां स मूढो नाम दुर्गजः । ऊर्द्ध्वसंस्थानवक्रौ च प्रतिमानगतौ न वा । युयुत्सामिव कुर्व्वाणा यस्य बालाः सदुर्द्विपः । दन्तौ हलोपमौ यस्य दीर्घौ पार्श्वेन चोन्नतौ । दक्षिणेन विषाणेन वामदन्तदरन्तथा । कारयेद्यस्तु मातङ्गो वामदारी स वै भवेत् । तथा दक्षिणदारी च दक्षिणदरणं तथा । वामेन कारयेन्नोष्टो यातुः स्वामिनएव सः । तथा हलविशालेन दन्तेनैकेन दन्तिनः स्थूलेनाखर्व्वदीर्घेण दुःस्थिताख्योऽपि वर्ज्जितः । अन्तर्नताभ्यां सहन्तः कुदन्तोऽपि नतावधः । कूपे वामोन्नतिश्चापि रदाभ्यां द्विरदः क्वचित् । दन्तदुर्वासताख्यो हि द्विरदोमध्यलक्षणः । बहिर्नतौ हस्तलम्बौ रदौ यस्य स दुर्गजः । कृष्णायतौ रदौ मूले विनिहन्ति मदागतिम् । श्यामलाकार रदनाग्रान्यिमहृशनास्तथा । दुर्जाता विषमा वक्रफलकाश्च कृशास्तथा । आतदीर्घातिह्रस्वाश्च वदनेनाघशंसिनः । त्रिरत्निमितमेढ्रस्य पञ्चरत्निमितोरदः । यष्टिदन्तोनुकथितो राजपुत्र ! मनीषिभिः । प्रपूर्णं प्रतिमानञ्च ताराभं बलिवर्जितम् । सूक्ष्मबिन्दु समानञ्च मृदुत्वक्कायरोमशम् । स्वायतं पृथुबाहित्यं सर्व्वगात्रसमाहितम् । रक्तौष्ठतालुदशनविशनसुस्वरास्थितिम् । तं राजा वर्जयेत् युद्धे शुभलक्षणवर्जितम् । बालार्कसदृशे यस्य हारिवर्णविलोचने । मनःशिलाप्रभे वापि श्यैवोऽसौ सुभिक्षदः । पद्मापाङ्गे च विपुले सुप्रसन्ने सितासिते । यस्याक्षिणी मधाक्षिभ्यां विभक्ताख्यो हितप्रदः । यस्य तुङ्गे च नयने महती दृष्टिमण्डले । स्निग्धनिर्मलवर्णे च तारकाक्षः स सम्मतः । यस्यास्तृज्ञः समाभासे वृत्ताकारे विलोचने । पारावताक्षं नागं तं प्रशंसन्ति श्रियप्रदम् । ह्रस्वे नात्यायते नेत्रे प्रसन्ने सूक्ष्मदर्शने । यस्य स्यातां मधाध्यक्षो वाग्यः शुभलक्षणः । रेषद्वैरिकसङ्काशे दृश्येते यस्य चाक्षिणी । ध्वाङ्क्षाक्षः स विनिर्दिष्टो दुर्भिक्षारिभयावहः । कृष्णापाङ्गे शुभे नेत्रे कांस्यसदृशसप्रभे । यस्य स्यातां भवेन्नाय सूकराक्षः स गर्हितः । समन्ततो नोपचिते संसृष्टे च मनागदृशौ प्रौढाक्षिकूटौ यस्यापि विश्वगक्षः स दुर्भगः । वैषम्याद्विषमप्रेक्षी नेष्टो हरितया दृशा । तथा निष्प्रभया दृष्ट्या वर्ज्जितः कालपिङ्गलः । तन्द्रीयस्यानुदृश्येत विरूपं विषमं तथा । तथैव तिर्य्यग् दृक् हस्ती तिर्य्यक्प्रेक्षी स दूषणः । अधःप्रेक्षी च यो यः स्यादूर्द्ध्वगामिविलोचनः । सदृशो बभ्रुमार्जारप्रभृत्यमतचक्षुषाम् । स स्यादनिष्टदृक् हस्ती तिर्य्यक्प्रेक्षी च दूषणः । अधःप्रेक्षी च सन्नेयो मृदूर्द्ध्वगामिदर्शनः । दृष्टिः स्निग्धा प्रफुल्ला च सुस्थितामलतारका । ऊर्द्ध्वपक्ष्म प्रसन्नस्य वारणस्य विलोक्यते । उदग्रतारको नाम्ना साम्ना पार्श्वविसर्पिणी । विस्तब्धाचलपक्ष्मा तु कुपितानेकपस्य दृक् । सर्व्वाङ्गलक्षणेभ्योऽपि चक्षुर्लक्षणमुत्तमम् । इत्येवं लक्षणज्ञानां पूर्व्वेषामनुशासनम् । प्रशस्तनेत्रे द्विरदे न्वपोभद्राणि पश्यति” मस्तकादिलक्षणन्तु प्रायेण बार्हस्पत्योक्तलक्षणसममित्यतस्तन्नोक्तं यत्र विशेषस्तदुच्यते । “एककूपप्रजातानि स्निग्धानि च मृदूनि च । रोमाणीष्टानि रोमशाश्च मेचको दक्षिणाङ्गजः । लाङ्गूलस्यैव रोमाणि दृश्यन्ते यस्य हस्तिनः । संहतानि विचित्राणि स पूज्यो वारणोरणे ।”

करिणो वामनत्वादौ कारणान्तरं तत्फलञ्चोक्तं तत्रैव “वाय्वाकाशगुणाधिष्ठपृथिवीगुणसर्ज्जनात् । जायते किल मातङ्गः कुब्जो वा वामनोऽपि च । यतो भूतगुणोऽन्योन्यमधितिष्ठति मानतः । तैर्गुणैर्जायते खर्वो दन्तीति मुनयो विदुः । हीनाङ्गोहानिकारी स्यादधिकाङ्गोऽधिकं हरेत् । राष्ट्राहितौ भवेतां च सत्त्वकुब्जाविति स्थितिः । आयामानाहसंयुक्तो ह्रस्वाकारो हि वामनः । नतोव्यन्तरनिर्याणो महास्थिसगदोऽपि च । अस्थिश्वेतौ च कृष्णौ च दन्तौ यस्याश्रितौ करम् । स श्रावयित्वा राजानं हत्वा वाथ पलायते । ह्रस्वमेढ्राङ्गुलिकरः श्रोत्राश्विश्वेतरोमयुक् । कपिकौशिककाकाहिनकुलप्रख्यलोचनः । कालापङ्कजनेत्रश्च तन्वाननहनुस्तथा । बल्या समाननिर्याणः प्रत्यक्पृथुपेचकः । मण्डूकाभरुचित्वक् च सान्द्रानलगभोऽपि च । परिमण्डलकर्णश्च स्पष्टध्वाङ्क्षशिवध्वजः । प्रौढोन्नताक्षिकूटाक्षः सकिलासाङ्घ्रिमेहनः । व्यालइत्यवगन्तव्यो निर्मदो दन्तिदूषणः । सबली यस्य सदानौ प्रौढौ चापि कषायितौ । चिबुके चायतस्थूले व्रणैश्च तनुराजिका । अधोवक्राणि रोमाणि

हनू च श्यरोमगे । सुदक्षाकृतयः पादा डिम्बद्रत्यपि विस्तृतः । चास्यौष्ठतालुरसनाः काल कल्माषकान्तयः । कर्णौ कचाचितौ न्यूनौ ताम्रवर्णश्च वालधिः । कराभिप्रेषणासक्तौ मानोनाङ्गुलिपुष्करे । स्थूले च पक्ष्मणी नेत्रप्रभे दुष्प्रेक्षणे तथा । दुर्बद्धानि तथाङ्गानि वलीमुखनिभं मुखम् । रेणुद्विरेफानुरूपा मक्षिकाभिश्चिताकृतिः । अरत्निमानौ दन्तौ च शुष्काश्यनिगूहितौ । कर्णे च कठिने यस्य नीलगोपक विद्युति । विवर्णं कठिनं रूक्षं भिन्नमिश्रतनुरुहम् । नपुंसकश्च मातङ्गो स दूरे त्यागमर्हति । मञ्जिष्ठारागभावेन यत्तनुश्चानरोपमा । स पूतनोऽग्निभयदो यूथहा परिवर्ज्जितः । तिर्य्यक्प्रेक्षी चाधःप्रेक्षी दुर्गन्धमदसंयुतः । कालपिङ्गोदरोनेष्टो मातङ्गः स्यात् मतङ्गजः । पुष्करे स्तनमध्ये च वामहस्ते मतङ्गजः । किलासैरावृतः स्याच्च तद्राष्ट्रे दुर्नयं दिशेत् । पश्चात्समुत्थिताधापो नित्यमीलितलोचनः । बाहित्थसंक्षिप्तमुखोनिबद्धाक्षो मतङ्गजः । न्यूनं विंशतिवर्षस्य दन्तौ यस्य प्रमाणतः । अतिमात्रौ न वै स्यातां नागोनागसमस्तु सः । हीनातिरिक्तदशनो यस्य वै तस्य मृत्युदः” इत्यवयवदोषाः ।

“अथ वर्णस्तथावर्त्ताः पुष्पाख्याभा स्वरोगतिः । बलं सत्वमनूकञ्च गन्धोबोधितमिङ्गितम् । स्याद्भूतगुणवैशेष्याद् वर्णवैशेष्यमेव हि । वातादिभ्योऽपि दोषेभ्योवर्णवैशेष्यमिष्यते । रौक्ष्यं परातिरेकेण सर्वं वातस्य वै भवेत् । सोष्णता शोणितात् पित्तात् रौद्रता, सौम्यतेन्दुजा” इत्युपक्रम्य “कफो गर्भशयानस्य स्निग्धतां प्रतिपद्यते । पित्तं गर्भशयानस्य स्तब्धत्वं प्रतिपद्यते । तत्करी कथितः कालस्तथैव स्निग्धदर्शनः । पित्तं कफश्च युगपद् वेविष्टि तु ततस्ततः । श्यामवर्णोऽपि मातङ्गो जायते स्निग्धएव वै । गर्भे च मांसरुहिते कफरक्ते यदा स्थिते । चिरं गर्भशयानस्य हरिस्निग्धस्ततोऽप्यसौ । रक्तपित्तकफानाञ्च सङ्करत्वगतो तथा । हरितारुणपीताद्या नानावर्णा भवन्ति हि । सर्व्वत्रानुगतः तेन मीलनाद्रूक्षता भवेत् । पारुष्यं धूमरत्वं च सुस्निग्धत्वं भवेत्तथा । क्वचिद्वर्णविभेदाश्च पूर्व्वसम्भवकारणात् । यद्वनवत्सचाराच्च पितृवीजवशात्तथा । तत्रापि श्वेतवर्णाश्च शुकबर्हिसमत्विषः । शुद्धहेमरुचश्शोभाः सुरेषु प्राचि च क्वचित् । न्द्वणान्तु करयः कृष्णाः श्यामाश्च करिणः स्मृताः । हरिर्मधुसवर्णश्च कृष्णश्चाञ्जनसन्निभः । न कालो न हरिर्नागोमधुवाभः श्याम दृश्यते । एतेषु त्रिषु वर्णेषु हरिवर्णोवरोमतः” । इति वर्णभेदकारणादिनिरूपणम् ।

“आवर्त्तः षड्विधश्चैव त्वग्जोदशनभङ्गजः । कोषजः पक्ष्मजातश्च बालजो रोमजोऽपि च । कोषरोमभवौ शस्तौ दन्तकल्पनजः शुभः । शोकानर्थप्रदाः प्रोक्तास्त्वग्जपक्ष्मजबालजाः । भूमिदोरोमजावर्त्तः कोषावर्त्तोजयप्रदः । दशनसम्भवावर्त्तः सुतदारप्रदस्तथा । कथितः पक्ष्मजावर्त्तोज्ञातिजातभयप्रदः । व्रणलक्ष्मालजावर्त्तः सामका रोमसम्भवः । प्रशस्तोदक्षिणावर्त्तोवामावर्त्तो विगर्हितः । मतो व्यक्तो मृदुस्निग्धः सवर्णः पीतरोमजः । वामाङ्गे दक्षिणावर्त्तोवामावर्त्तश्च दक्षिणे । आवर्त्तः सम्मतोऽभीष्टो द्विजराजसमप्रभः । शुभोऽप्यक्षेत्रजातोऽसौ शुभं नैव प्रयच्छति । अशुभश्चेत्रजातश्च नानिष्टफलदः शुभः । अश्वपृष्ठे पृष्ठतले स्तनयोरन्तरे तथा । ग्रीवाया मक्षिकूटोर्द्धं कुम्भयोरन्तरे तथा । उत्पले दन्तवेष्टे च कर्णमध्ये च वक्षसि । आवर्त्ता वारणानां हि सुनिश्चेयाः शुभप्रदाः । स्तनान्तरे शिरोमध्ये कुम्भान्तश्चूलिकान्तरे । वक्षस्यावर्त्तसम्पन्नः कुञ्जरः पञ्चमङ्गलः । शीर्षावर्त्तोऽभिषेकाय स्तनावर्त्तोजयाय च । सुखाय चूलिकावर्त्तः कुम्भोरोरोमजः श्रिये । वंशे प्रोहेऽथ बाहित्थे मन्यासु सगद्दे कटे । कर्णेऽक्षिकूटे नाभौ च कक्षपक्षांसकूक्षिषु । बालधौ पेचके मेढ्रे रन्ध्रेऽश्वक्षिकलासु च । आवर्त्ता न प्रशस्यन्ते कर्णभागगताश्च ये । कोणप्रमाणलघवोमर्मपर्वप्रदेशगाः । अशुभक्षेत्रजाताश्च सकिलासान्तरोत्थिताः । मनोनेत्राभिरामो हि सुस्वच्छोगदितो महान् । ऊर्द्धप्रवृत्तोदीर्घश्च रोमजोऽर्थजयावहः । मर्मभागेषु नागस्य निष्ठास्ते रोमजादयः । समभागगतावर्त्ताः सर्व्वतः सुखदा मताः” । इत्यावर्त्तः ।

“स्वस्तिकादिसुसंस्थानं पुष्पं दशनदेहजम् । स्निग्धं भवेत् शुभच्छायमच्छिन्नं वाञ्छितप्रदम् । कबन्धादिकसंस्थानं विषतन्तुसमं स्फुटम् । रूक्षं कृष्णञ्च कुसुमं तानानर्थकसंज्ञकम् । दद्यात् सुतं सितं पुष्पं स्निग्धपीतञ्च हेमदम् । नीलोत्पलाभं शीलाभ्रं स्निग्धकालञ्च दन्तिदम् । यदि स्यात् पूजिते भागे कुसुमं स्निग्धपाण्डुरम् । सुरचापसमाकारं तद्भवेद्भूभुजः शुभम् । शक्रचापनिभं पुष्पं दन्तोपरि च दन्तिनः । दिशेदिष्टं शुभिक्षं च क्षेमं च क्षितिरक्षिणः । स्तनान्तः स्निग्धरुक्षे च पुष्पे नागसमे तथा । पुष्पे श्रोत्रान्तःकाले चक्षर्निहृद्धिं विनिर्दिशेत् । श्रीवृक्षादिनिभाकारे वैजयन्तीध्वजोपमे । शैलप्रा-

सारदस्तये छत्रचामरवीजिभिः । सोमसूर्य्यसमाभासैश्चित्रिकायानमूर्त्तिभिः । दिष्टे शुभाय नृपतेर्निन्द्यमहिषमाकृति । ऋक्षव्याघ्रनिभाकारं रणापसरकारणम् । धूमाभं पुष्पमिच्छन्ति मृत्यवेऽग्निभयाय च । कृष्णं पुष्पं तथा नेष्टं द्विषद्रोगविवर्द्धनम्" । इति पुष्पम्

'भूखाग्न्यम्बुमरुज्जाता भवेच्छाया विषाणिनाम् । प्रशस्ता भूजलवह्न्युत्था न प्रशस्ता खानिलोद्भवा । छायायाः सम्भवः पूर्वं, परतः परितः प्रभा । छायायाः सम्भवः पूर्वं प्रभा तत्परमश्नुते । वर्णगात्राश्रिता च्छाया प्रभा वर्णस्य चाश्रयः । लक्षणानि तु नागानां पापानि च शुभानि च । छायावशात् फलन्त्येव छाया तेनातिलक्षणम् । यस्य स्याल्लक्षणं भद्रं छाया भद्रा भवेन्न तु । न चासौ शुभदो हस्ती छायोपहतलक्षणः । पापलक्षणयुक्तोऽपि शुभच्छायायुतो गजः । फलं लक्षणजं हित्वा छायाफलमवाप्नुयात् । नीराजनेऽभिषेके च ध्वजोच्छ्राये रणोदये । तेषु तेषु च कालेषु भवेच्छाया च शोभना । वक्षसि प्रतिमानेंऽसे कुम्भे कर्णे कटेषु च । निर्याणे मस्तकस्थाने वेदयोश्च कपोलयोः । पिण्डिकाजघनाभोगे तेषु तेषु पदेषु च । प्रदेशेषु प्रधानेषु छायाया वीक्षणं भवेत् । प्रशस्ता पार्थिवी छाया वह्निजा जलजापि च । नेष्यते व्योमजा छाया मातरिश्वभवापि च । पार्थिवी स्निग्धगम्भीरा सर्ववर्णे विभाव्यते । छाया शुभ्रा च रक्ता च स्निग्धा जाम्बूनदाग्निजा । छाया नीलाम्बुदाभासा स्निग्धा सलिलसम्भवा । अव्यक्तपरुषा तस्य छाया गगनजा मता । धूम्रा रूक्षा च वायव्या भस्माभा निष्प्रभा तथा । एताश्छायाः रोष्याः सुमातङ्गे राजपूजिते । नीलाम्बुजेन्द्रनीलाभा नीलाञ्जननिभाऽपि च । काप्युक्ता पार्थिवी च्छाया सुभिक्षक्षेमकारिणी । बालार्कपद्मकिञ्जल्कशक्रगोपकसन्निभा । ज्वालाभा तप्तहेमाभा वह्निजा विजयप्रदा । छायाम्मयी पयःशङ्खकुन्दरूप्यनिभद्युतिः । सौम्याख्यया प्रतीता च भर्त्तुरर्थप्रदा सदा । जलबुद्बुदसङ्काशा धूम्रद्युतिरतिस्थिरा । निन्द्या च व्योमजा छाया नित्योद्वेगकरी मता । सर्ववर्णैरुपेताऽपि निष्प्रभा भस्मसन्निभा । विच्छिन्ना विकृता च्छाया वायवी सा भयावहा । वैरिञ्ची वैष्णवी शैवी छाया माघवनी तथा । कौमारी राक्षसी सार्पी गान्धर्वी च तथाऽऽसुरी । पैशाची चेति याश्छायाश्छायाद्याः कश्चित् शुभाः । भूतोत्थलक्षणे तासां भेदो नेह तु कीर्त्तितः । तेजोऽतिसक्ता भद्रस्य पाटला भवति प्रभा । छाया रक्ताकला रुक्मपङ्कपूगनिभाऽपि वा । कृष्णा च मन्दकरिणश्छाया तु मृगहस्तिनः । मलिनाम्बरधूम्रेव गीर्वाणायुधदर्शना" इति छाया ।

"हस्तिनां विविधा ध्वानाश्छिद्रेभ्यः करतोऽपि च । भवन्ति शायुज्यतो गात्राणां वेष्टनेन च । प्रयाणेष्वभिषिक्तेषु ध्वजे जातिकुलेषु च । नागेषु बृंहितं ग्राह्यं मत्तस्तब्धे न जातिषु । कुपितोऽत्यस्तनिद्रान्तक्षुधितो बृंहति क्वचित् । यदि दन्ती शुभे देशे समये च यशप्रदः । दर्शयेद्बृंहितं भद्रं तत्फलं स्फीतमादिशेत् । सरोवरे तथाऽऽरामे गोष्ठे विबुधवेश्मनि । निकुञ्जे हृद्यदेशे हि विज्ञेयः शुभदो ध्वनिः । यात्रायामभिषेके च यज्ञादिसमये तथा । समये चैव पुण्ये च बृंहितं स्याच्छिवप्रदम् । श्मशानादिकाष्ठवल्मीकदुष्टस्थाने भयप्रदः । सुनीचे च प्रधूमे च प्रतिश्यायदिनेषु च । अतिशीतेऽतिघर्मे च प्रभाते चाशुभो रवः । भूतले न्यस्तहस्तो हि पर्य्यश्रुनयनो गजः । कूजन् निर्व्यथनं कुर्य्यात् यदि वा नश्यतीश्वरः । करेण बृंहितो नागो दुश्चिन्ताश्रुपरिप्लुतः । आदिशेन्मन्त्रिणो नाशमथ वा क्ष्मापतेः । व्यायतश्रमहस्तस्य शाखाधोगतचक्षुषः । जघने वामतो वालं तथा निक्षिपतोऽसकृत् । (वालं वालधिम्) । निषीदतो लङ्घयतो हृष्टरोम्णोऽविमूर्च्छतः । वामे निक्षिप्य गण्डूषं बृंहितं स्यादनर्थकृत् । खेभ्यः स्रवति नागानां धमतां यदि शोणितम् । (खेभ्यः छिद्रेभ्यः) तथा मन्यान्तदेशे च प्राणिनां क्षयमादिशेत् । यद्याग्नेयीमुखीभूत्वा प्राच्यां वाऽर्कोदयं प्रति । दन्ती तीक्ष्णरवं कुर्य्यात्तदा स्यात् पावकाद्भयम् । करेण यदि मातङ्गो बृंहमाणः स्तनं स्पृशेत् । आलाने लम्बमानस्तु संयुति क्षयमादिशेत् । (संयुति युद्धे) । आलाने लम्बमानस्तु शीत्कुर्वन् कुरुते ध्वनिम् । गात्रं प्रह्लादयन्नागस्ततः प्रस्थानमादिशेत् । क्षिप्त्वा करं विषाणस्य विषमं कूजते यदि । निरीक्षमाणो गगनं हतां दृष्टिं तदा हरेत् । यदाभ्युन्नतवक्त्रेण नभस्थानञ्च जिघ्रतः । तथा कुञ्चितहस्तेन स्वं गात्रं च जिघ्रतः । कुर्वतो दक्षिणं हस्तं शनैर्निक्षिपतोऽपि यत् । बृंहितं स्यात्तदिष्टञ्च तथान्योन्यकरस्पृशः । स्पृष्ट्वा शुभवस्तूनि कुसुमादीनि चेद्द्विपः । कुर्य्याच्छब्दं शुभं तेन फलं शुभतरं भवेत् । उच्चैरभिमुखः शान्तो यदा नदति वारणः । अच्छन्नमध्यमानेन तदा तत्र जयो ध्रुवः । सुखेन मण्डूकरवान् कर्णाभ्यां दुन्दुभिध्वनिम् । करेण मुरजारावान् कुर्वन् कल्याणकारकः । कलशादिसमाराव

विकटान समाः स्मृताः”। इति ध्वनिः । गतिसत्वे तु प्रागुक्ते एवात्र प्रायेण दर्शिते नातस्ते अत्रोदाहृते ।

“सत्वं त्रिविधमिच्छन्ति श्रेष्ठमध्याधमैर्गुणैः । सात्विकं राजसं चापि तामसञ्च विषाणिनाम् । एषामपि गुणास्त्रेया बहवस्ते न कीर्त्तिताः । सत्वस्योक्ता गुणाः शौर्यं बुद्धिर्धैर्य्यं सुहर्षता । रजसो ये गुणास्ते च क्रोधोत्साहावपि क्वचित् । गुणाश्च तमसस्तन्द्रातमोमोहप्रमादिताः । श्रीमन्तः कान्तियुक्ताश्च प्राज्ञाश्च चिरजीविनः । क्रियाक्लेशसहाः श्रान्ताः सात्विकाः सामसम्भवाः । शिष्याश्च मध्यसाध्याश्च कीर्त्तिता निर्भयाः क्वचित् । क्रियायोगसहाः किञ्चिद्राजसा मध्यमायुषः । तामसा दुःखिता मूढा विरूपा लघुजीविताः । युक्तोऽप्यन्यगुणैः सर्वैर्युतश्चेत् सात्विकैर्गुणैः । श्रेयोगुणः स समरे तथाऽध्वनि मतङ्गजः । एषां वागीशनिर्दिष्टा विषयापेक्षया स्थितिः । भद्रे सन्निहितं सत्वं, रजो मन्दे, तमो मृगे । देवगन्धर्वयक्षाणां पन्नगासुररक्षसाम् । पिशाचानां नृणां तुल्यं वेद्यं नागस्य चेष्टितम्” । इति सत्वम् ।

“यत् पूर्वसम्भवं स्पष्टं सत्वं रूपं गतिः स्वरः । तस्यानुकरणात् युक्तमनूकमिति कोविदाः । सत्वरूपजवारावैः शुभानुकारिता शुभा । देवर्षिगणगन्धर्वनागानूकाः शुभामताः । एवमेव च दुष्टानुकृतो दुष्टाः प्रकीर्त्तिताः । दैत्यरक्षःपिशाचानामनूकं परिवर्ज्जितम् । वृषसिंहतुरङ्गादिसमानूकाः मता द्विपाः। नेष्टाः खरदम्भ्रादिसमानाकृतियोगिनः” । अनूकम् ।

“घ्राणाक्षिकुम्भकर्णेषु मदनिःस्रावमायुषु । शक्तमधुमूत्रेषु गन्धं समुपलक्षयेत् । इष्टगन्धान्निषेवेत वारणान् धरणीपतिः । दुष्टगन्धान् सदा भूपो यत्नतः परिवर्ज्जयेत् । सर्पिर्मधुसुरालाजदधिक्षीरानुकारकः । शाल्यन्नोशीरमदिरापक्वकाष्ठादिसन्निभः । मालतीकेतकीजातीचन्दनाधिकसौरभः । सुरसालफलामोदो गन्धो नागस्य सम्मतः । अस्टङ्मूत्रशकृत्पूतिवसाकुणपकुत्सितः । पक्षिनीड़पलाण्ड्वादिसप्रतिमविनिर्म्मितः । खरोष्ट्रमूकरसमः श्मशानधूमसन्निभः । मीनमत्कुणतुल्यश्च गन्धो नागस्य दुःखदः” । इति गन्धः ।

“पञ्चधा विदितं स्याच्च विज्ञेयं सामजन्मनाम् । अत्यर्थोत्तानगम्भीरप्रत्यर्थान्वर्थभेदतः । यस्तूद्घातादुद्विजते दूरादंशादि संकुचेत् । अत्यर्थं सङ्कुचेत् स्पृष्टः स गजोऽत्यर्थवेदिता । योऽपि त्वक्स्पर्शमात्रेण रोमस्पर्शवशेन वा । विद्याद्दण्डाङ्कुशादींश्च स स्यादुत्तानवेदिता । त्वग्भेदात् शोणितस्रावात् तीव्रप्रव्यथनादपि । अङ्कुशादीन् विजानाति स हि गम्भीरवेदिता । शनैर्हतोऽभ्यं वेत्ति शनैर्वेत्ति भयाहतः । विपरीतमतिर्नागो ज्ञेयः प्रत्यर्थवेदिता । प्रत्येति वार्य्यमाणो यो निगृहीतश्च गच्छति । प्रतिलोमायते संज्ञां सोऽपि प्रत्यर्थवेदिता । शनैर्हतः शनैर्वेत्ति भयं वेत्ति भयाहतः । प्रत्येति प्रतिषिद्धश्च नोद्यमानश्च गच्छति । यथासंज्ञं विदध्याच्च सर्वकर्माणि योऽद्भुतम् । अन्वर्थवेदिनं प्राज्ञो जानीयात्तं शुभं गजम्” इति विदितम् ।

“मतङ्गजेङ्गितं वक्ष्ये शृणु तदवधानतः । शुभञ्चानञ्च येन स्यात् यात्रादिसमये नृप ! । अनुयात्रं गतो हन्यात् किञ्चिद्रूपं यदि द्विपः । तज्जयः, प्रतियात्रं तु नृपाहत्या पराजयः । दृष्ट्वा रिपूनभिमुखान् वार्य्यमाणोऽपि चेद्गजः । व्रजेत्तद्विजयो नूनं यदि वा प्राप्तवान् वधे । दक्षिणेनाग्रपादेन क्षितिमुत्पाटयेद्यदि । उत्तोलयेद्वामपादं तदा जयमुदीरयेत् । करेण चाग्रहस्तेन यदा पृथ्वीं प्रमार्जयेत् । क्षिपत्यनेन कर्णौ च तदा सौख्यं समादिशेत् । मेचकं कुटिलं कृत्वा करं जिघ्रति चेद् द्विपः । प्रहृष्टहृदयाङ्घ्रिश्च तदाभ्युदयमादिशेत् । दक्षिणं तु यदा दन्तं दन्ती प्रमुदितेन्द्रियः। परिमृजति हस्तेन तदा स्यात् प्रियसङ्गमः । तथैव गलसन्धिञ्च पश्करेण परामृशन् । श्रीयोगमुपयातं तु वारणो विनिवेदयेत् । सङ्कोच्य दक्षिणं पादं वामपादेन वा भुवम् । विलिखेद्वारणः स्विन्नस्तद्भर्त्तुः स्यात् पराजयः । यदा तु दुर्मना दन्तं वामं हस्तेन शोधयेत् । तदात्मनोऽवदेवायं यात्वर्थाय निषादिनः । करेण वामगात्रं च स्विन्नगात्रः प्रमार्ष्टि चेत् । तदानिष्टं भवेद्भर्त्तुरन्यथा च शुभं भवेत् । व्यथमानः पतेत् त्रस्तः कक्षबन्धे यदा द्विपः। नाभिनन्देच्च माल्यादि तदा परिभवो भवेत् । अकस्मादेव कुप्यन्ति भ्रमन्ति च पतन्ति च । करिणो यदि तद्विद्यात् विग्रहं समुपस्थितम् । यदा पश्यति मातङ्गो विद्रवञ्च पराजयम् । प्रवासं पराङ्गं वा तदा भवति दुर्मनाः । अदंशव्रणपीड़ायां करेण परिवीजनात् । गण्डूषदेशनिक्षेपात् सव्याजमुपसर्पणात् । अकस्माच्च स्खलद्गत्या धरण्यां प्रणिपातनात् । जलप्रतारवैमुख्यादहितभक्ष्यसेवनात् । स्तब्धकर्णतया गत्या पादाग्रवेशनादपि । द्रुतदन्ताद्विपीलुत्वादकल्याणकरः करी । आत्तपङ्को जलोत्तीर्णोऽरिपूर्णा पङ्क्तिं वदेत्” इङ्गितम् ।

“जायते द्विविधः कोपः संशासश्च विषाणिनाम् ।

शिष्यक्रोधोऽह्यभीष्टः स्यादनिष्टोऽशिष्यरोषणः । यः क्रुध्यति चिरेणैव मृदुक्रोधो भवेदपि । वाग्दण्डमात्रवन्यैव प्रतिषिद्धो न मुह्यति । अनुशाम्यति रोषाच्च स शिष्यक्रोधसंज्ञितः । इष्यते सर्वकार्य्येषु शुभजातिर्मतङ्गजः । यः क्रुध्यत्यचिरेणैव भृशक्रोधो भवेदपि । प्रतिषिद्धश्च वाग्दण्डतीक्ष्णप्रजनकाङ्कुशैः । मुह्यत्येव चिरेणापि रोषाद्विरतिमेति च । अशिष्यक्रोधसंज्ञोऽसौ विज्ञेयो वारणाधमः" इति कोपः । विस्तरस्तु पालकाव्यादौ दृश्यः ।

इभकणा स्त्री॰ इभोपपदा कणा शाक॰त॰ । गजपिप्पल्याम् ।

इभकेशर पु॰ इभमद इव केशरोऽस्य । नागकेशरे "श्टङ्गाटकाब्जगुप्तेभकेशरागुरुचन्दनैः" सुश्रु॰ ।

इभगन्धा स्त्री इभस्य गन्ध एकदेशोदन्त इव पुष्पमस्याः । नागदन्त्याम् सा च स्थावरविषभेदः यथा सुश्रुते "मूलं पत्रं फलं पुष्पं त्वक्क्षीरं सारएव च । निर्य्यासोधातवश्चैव कन्दश्च दशमः स्मृतः" इत्युपक्रम्य "कुमुद्वतीरेणुकाकरम्भमहाकरम्भकर्कोटकरेणुकखद्योतकचर्म्मरीभगन्धा सर्पघातिनन्दनसारपाकादीनि द्वादश फलविषाणि" इति विभज्य "शुष्कशोफः फलविषैर्दाहोऽन्नद्वेष एव चेति" तद्विकारो दर्शितः ।

इभदन्ता स्त्री इभस्य दन्तइव शुभ्रं पुष्पमस्याः । गजदन्तशुभ्रपुष्पवत्यां १नागदन्त्याम्, सा च स्थावरफलविषा ।

इभनिमीलिका स्त्री इभं हस्तिनमपि निमीलयति सेवनात् निद्रापयति । १भङ्गायाम् । इभस्येव निमीलिका । २वैदग्ध्याम्

इभपालक पु॰इभं पालयति । (माहुत) हस्तिपके ।

इभपोटा स्त्री पोटा पुंलक्षणा इभी परनिपातः पुंवद्भावश्च । पुंगजलक्षणयुक्तायां हस्तिन्याम् ।

इभभर पु॰६त॰। गजसमूहे [सिंहे ।

इभमाचल पु॰ इभमाचलयति आ+चल-णिच्–वा॰अ ।

इभया स्त्री इभैर्यायते भक्ष्यतया प्राप्यते या–कर्म्मणि घञर्थे क ३त॰। स्वर्णक्षीरीवृक्षे रत्नमाला इभयेति वा पाठः ।

इभयुवति स्त्री युवतिरिभी पूर्वनि॰ पुंवद्भावश्च । युवत्यां हस्तिन्याम् वा ङीप् ।

इभाख्य पु॰ इभस्याख्याख्या यस्य । नागकेशरे त्रिका॰।

इभानन पु॰ इभस्याननमेवाननं यस्य । गजानने गणेशे तस्य यथा तदाननत्वं तथोक्तं "स्वयं गोलकनाथश्च पुण्यकस्य प्रभावतः । पार्व्वतीगर्भजातश्च तव पुत्रो भविष्यति । स्वयं देवगणानाञ्च यस्मादीशः कृपानिधिः । गणेश इति विख्यातो भविष्यति जगत्त्रये । "शनिदृष्ट्या शिरश्छेदात् गजवक्त्रेण योजितः । गजाननः शिशुस्तेन नियतिः केन बाध्यते" ब्रह्मवै॰ पु॰ ६अ॰ । शनिदृष्ट्या तच्छिरश्छेदकथा तत्रैव १२अ॰ । "पार्व्वतीवचनं श्रुत्वा सोऽनुमेने हृदा स्वयम् । पश्यामि किं न पश्यामि पार्व्वतीसुतमित्यहो । यदि बालो मया दृष्टस्तस्य विघ्नो भवेद्ध्रुवम् । अन्यथा मे प्रत्नापस्तत्परतः श्रावरणम् । इत्यालोच्य च धर्म्मिष्ठो धर्म्मं कृत्वा स्वसाक्षिणम् । बालं द्रष्टुं मनश्चक्रे न बालमातरं शनिः । विषस्मानसः पूर्वं शुष्ककण्ठोष्ठतालुकः । सव्यलोचनकोणेन ददर्श च शिशोर्मुखम् । शनिश्च दृष्टिमात्रेण चिच्छेद मस्तकं मुने ! । चक्षुर्निवारयामास तस्थौ नम्रानन: शनिः" एवं शिरश्छेदमुक्त्वा । "तान् सर्व्वान् मूर्च्छितान् दृष्ट्वा चारुह्य गरुड़ं हरिः । जगाम पुष्पभद्रां स उत्तरस्यां दिशि स्थिताम् । पुष्पभद्रानदीतीरे ददर्श काननस्थितम् । गजेन्द्रं निद्रितं तत्र शयानं हस्तिनीयुतम् । दिश्युत्तरस्यां शिरसं मूर्च्छितं सुरतश्रमात् । परितः शावकान् कृत्वा परमानन्दमानसम् । शीघ्रं सुदर्शनेनैव चिच्छेद तच्छिरो मुदा । स्थापयामास गरुड़े रुधिराक्तं मनोहरम्" । गजशिरश्छेदमुक्त्वा तत्पत्न्या स्तुतेन हरिणा तस्य कल्पान्तजीवनं वरोदत्त इत्युपवर्ण्य । "आगत्य बालकस्थानं बालं कृत्वाऽथ वक्षसि । रुचिरं तच्छिरः कृत्वा योजयामास बालके । ब्रह्मस्वरूपी भगवान् ब्रह्मज्ञानेन लीलया । जीवनं योजयामास हुङ्कारोच्चारणेन च । पार्व्वतीं बोधयित्वा तु दत्त्वा क्रोड़े च तं शिशुम् । बोधयामास तां नाथ आध्यात्मिकविबोधनैः" "सेनाचरीभवदिभाननदानवारिवासेन यस्य जनितासुरभीरणश्रीः" नैष॰ । इभवक्त्रेभमुखगजाननादयोऽप्यत्र । "तं नमामि गजाननम्" माधवः ।

इभारि पु॰ ६त॰ । सिंहे इभाभिनादयोऽप्यत्र । [शब्दच॰ ।

इभोषणा स्त्री इभोपपदा उषणा शाक॰त॰। गजपिप्पल्यां

इभ्य त्रि॰ इभं गजमर्हति दण्डा॰ यत् । १प्रचुरगजादिधनाढ्ये २नृपे ३हस्तिपके च पु॰। "उषस्तिर्ह चाक्रायण इभ्यग्रामे प्रद्राणक उवास" छा॰उ॰ तस्य भाष्ये इभो हस्ती तमर्हतीतीभ्य ईश्वरोहस्त्यारोहोवेति । "जामिः सिन्धूनां भ्रातेव स्वस्रामिभ्यान्न राजा वनान्यत्ति" ऋ॰१, ६५,४, स्वार्थे कन् । इभ्यकस्तत्रैव स्त्रियान्तु टापि वा अत इत्त्वम् इभ्यका–इभ्यिका । इभाढ्यायां स्त्रियाम् ।

इभ्यतिल्विल त्रि॰इभ्यस्तिल्विलः पुष्टइव । गजादिभिः प्रचुरे आढ्ये । "यदि प्रतीचीयादिभ्यतिल्विल इव धान्यति-

ज्वलो भविष्यतीति विद्यात्" शत० ब्रा० ४,५,८,११,

इभ्या स्त्री इभमर्हति सेव्यत्वेन दण्डा० यत्। १हस्तिन्यां २शल्लकीवृक्षे च मेदि०।

इमथा अव्य० इदम्–इवार्थे–थाल् "प्रत्नपूर्वविश्वेमात् थाल् छन्दसि" पा० सू० निर्देशात् नि० इमादेशः। इदानीन्तनतुल्ये। "तं प्रत्नथा पूर्वथा विश्वथेमथा इव ज्येष्ठतातिं बर्हिषदं स्वर्विदम्" ऋ० ५,४४,१। "प्रत्नथा पुरातनयजमाना इव पूर्वथा अदीया पूर्वे यथा। विश्वथा विश्वे सर्वे प्राणिनो यथा। इमथा इदानीं वर्त्तमाना यजमाना इव" भा० "इयमृक्" यजु०७अ०११च पठिता।

इयक्षु त्रि० यज+सन उ वेदे नि संप्रसारणम्। यष्टुमिच्छौ "धन्वन्निव प्रपा असि त्वमग्न इयक्षवे" ऋ०१०,४,१, वेदे प्रायेण सर्वत्र नि० संप्रसा०। "इमं वां स्वरिष्टमथा-वियक्षन्" १,१५२,२, देवानां इयक्षणो यजमान इयक्षति" ऋ०८, २१,११५,

इयत् त्रि० इदं परिमाणमस्य इदम्–वतुप्। एतावदर्थे "नीतं यदि नवनीतं कियदिति यशोदया पृष्टः। इयदिति गुरुजनसविधे विस्तृतघनिभापयोधरः पायात्" उद्भटः। "इयान् वाव किल पशुर्यावती वपा" ऐत० "इयन्ति वर्षाणि तथा सहोग्रम्" रघुः "इति निक्षिपतीति विश्वमियता मन्यामहे दुःस्थितम्" सा०द०। अत्र साधनप्रकारः इदम्+परिमाणार्थे वतुप् वस्य घः इदम इश् "यस्येति" पा० प्रक्रीकारलोपे प्रत्ययमात्रस्थितिः। अतएवात्र वैयाकरणा औपनिषदाश्च पठन्ति। "उदितवति परस्मिन् प्रत्यये शास्त्रयोगो गतवति विलयञ्च प्राकृतेऽपि प्रपञ्चे। सपदि पदमुदीतं केवलं प्रत्ययो यं तदियदिति मिमीते को महापण्डितोऽपि"। स्त्रियां ङीप्।

इयत्तका स्त्री कुत्सिता इयत्ता कुत्सितार्थे कन् ह्रस्वः। कुत्सितेयत्तायाम्। ततः अर्श आ० अस्त्यर्थे अच्। कुत्सितेयत्तायुते अल्पप्रमाणे "इयत्तकं कुषुम्भकस्तकं भिनद्म्यश्मना" ऋ० १,१९१,१५,

इयत्ता स्त्री इयतो भावः तल्। १सीमायां, २परिमाणे, ३संख्यायाञ्च। "न गुणानामियत्तया" "वयः परिच्छेत्तुमियत्तयाऽलम्" "ईदृक्तया रूपमियत्तया वा" इति च रघुः।

इयस् त्रि० इ–कर्त्तरि असुन् किच्च। १गन्तरि भावे असुन्। २गतौ "तेषां हैयसेवास किमिह कर्त्तव्यम्" शत०ब्रा०२,२,२,२,

इर–ईर्षायां कण्ड्वा०यक् उभ०। इर्यति इर्यते।

इरज्–ईर्षायां कण्ड्वादि० यक् प०। इरज्यति। "इरज्यन्नग्ने प्रथयस्व जन्तुभिरस्मे रायः" ऋ० १०,१४०,४। "इरज्यन्त यच्छु रथोविशाधि" ऋ०७,२३,२, यद्देषामग्रं जगतामिरज्यसि" ऋ०१०,७५,२। "युवं विप्रस्य मन्मनामिरज्यथः" ऋ०१,१५१,६।

इरण त्रि० ईरिण+पृ०। ऊषरभूमौ अमरटीका रमा०।

इरम्मद पु० इरया जलेन अन्नेन वा माद्यति वर्द्धते इरा–मद–खच् नि० ह्रस्वः मुम् च। १वज्राग्नौ २वाड़वानले च। "इरम्मदं बृहदुक्थं यदत्त" यजु०११,७४। "इरया अन्नेन माद्यति उपं पद्येत्यादि" पा० नि० "वेददी०। "बृहते ह्यवारूढे इत्येतदिरम्मदमितीरया ह्येष मत्तः" शत०ब्रा०६,६,२,४।

इरस् इरज्वत् कण्ड्वा० इरस्यति "मात्रपूर्वाष्य इरस्यः" ऋ०७,४०,६। "यक्षा इरस्यतीदम्" ऋ०१०,८६,२।

इरा स्त्री इण्–रक् इं कामं राति रा–क वा। १भूमौ, २वाचि, ३सुरायाम्, ४जले, ५अन्ने च। "इरा विश्वस्मै भुवनाय जायते यत्पर्जन्यः पृथिवी रेतसावतिः" ऋ० ५,८३, ४। "इरामदा ओदनं पिन्वमानाः" शत०ब्रा०६,६,२२। ६कश्यपस्य पत्नीभेदे। "धर्मपत्न्यः समाख्याताः कश्यपस्य वदाम्यहम्। अदितिर्दितिर्दनुःकाला अनायुः सिंहिका मुनिः। कद्रुः प्राधा इरा क्रोधा विनता सुरभिः खशा" इत्युपक्रम्य "इरा वृक्षलतावल्लीतृणजातीश्च सर्वशः"। असूतेति शेषः। गरुडपु०:

इराक्षीर पु० इरा जलं क्षीरमिवास्य। क्षीरसमुद्रे।

इराचर न० इरायां जले भूमौ वा चरति चर–ट ६त०। १वर्षोपले त्रिका० २भूचरे ३जलचरे च त्रि० स्त्रियां ङीप्।

इराज पु० इरा सुरेव अजति क्षिपति अज–अच् न वी भावः। कन्दर्पे हला०। [त्रिका०।

इराम्बर न० इरा जलमम्बरमिव यस्य। वर्षोपले करकायाम्।

इरावत् इरा+भूम्नि मतुप् मस्य वः। समुद्रे तत्र भवः अण् ऐरावतः। अर्जुनेन नागकन्यायामुत्पादिते २वीरभेदे तदुत्पत्तिकथा" भा०भी० ९१अ०।

"अर्जुनस्यात्मजः श्रीमानिरावान्नाम वीर्य्यवान्। सुतायां नागराजस्य जातः पार्थेन धीमता। ऐरावतेन सा दत्ता ह्यनपत्या महात्मना। पत्यौ हते सुपर्णेन कृपणा दीनचेतना। भार्य्यार्थं तां च जग्राह पार्थः कामवशानुगाम्। एवमेष समुत्पन्नः परक्षेत्रेऽर्जुनात्मजः। स नागलोके संवृद्धो मात्रा च परिरक्षितः। पितृव्येण

परित्यक्तः पार्थद्वेषाद् दुरात्मना । रूपवान् बलसम्पन्नो गुणवान् सत्यविक्रमः । इन्द्रलोकं जगामाशु श्रुत्वा तत्रार्जुनं गतम् । सोऽभिगम्य महाबाहुः पितरं सत्यविक्रमः । अभ्यवादयदव्यग्रो विनयेन कृताञ्जलिः । न्यवेदयत चात्मानमर्जुनस्य महात्मनः । इरावानस्मि भद्रं ते पुत्त्रश्चाहं तव प्रभो ! । मातुः समागमो यश्च तत्सर्वं प्रत्यवेदयत् । तच्च सर्वं यथावृत्तमनुसस्मार पाण्डवः । परिष्वज्य सुतञ्चापि सोऽऽत्मनः सदृशं गुणैः । प्रीतिमानभवत् पार्थो देवराजनिवेशने । सोऽर्जुनेन समादिष्टो देवलोके तदा नृप ! । प्रीतिपूर्वं महाबाहुः स्वकार्य्यं प्रति भारत । युद्धकाले त्वयास्माकं सह्य देयमिति प्रभो । वाढमित्येवमुक्त्वा च युद्धकाल इहागतः" ।

"इरावन्तं तु निहतं दृष्ट्वा पार्था महारथाः" भा०भी० ९२अ० । 'पुत्रं विनिहतं श्रुत्वा इरावन्तं धनञ्जयः ।" ९५ अ० । ३नदीभेदे स्त्री ङीप् । भा० स०प०९अ० वरुणसभावर्णने । "इरावती वितस्ता च सिन्धुर्देवनदी तथा" "इरावत्यां हतो भोजः कार्त्तवीर्य्यसमो युधि" भा० व० १२अ० "शतद्रुकामहं तीर्त्वा तथा रम्यामिरावतीम्" । भा०क० ४४ अ० । "इरावत्यां महाभोजावग्निसूर्य्यसमौ युधि" हरिवं० ३६ । "इरावती धेनुमती हि भूतं" ऋ०७,९९,२ । ४अन्नादियुक्ते त्रि० 'यासिष्टं वर्त्तिरश्विनाविरावत्" ऋ०७,४०५ । "इरावत् हविरन्नादियुक्तम्" भा० । "सुन्दतावन्तः सुभगा इरावन्तोहतप्रमाः" अथ० ७,६०,६ ।

इरावती स्त्री इरां भूमिम् अवति अव–बा०अत ङीप् । वटपत्त्रीवृक्षे, सा हि प्राकाण्डभेदनेनापि भूमिमाच्छादनात् पालयतीति तस्यास्तथात्वम् ।

इरिकावन न० इरैव कन् अत इत्वम् इरिकाप्रधानं वनम् । क्षुभ्ना० "इरिकादीनि वनोत्तरपदानि संज्ञायाम्" पा० ग०सू० पाठात् न णत्वम् । अन्नप्रधाने वनभेदे । इरिकादीनि च "इरिका तिमिर समीर कुवेर हरि कर्मार" ।

इरिण न० ऋ–इन किच्च । १ऊषरभूमौ, २निराश्रये, ३शून्ये च । "यथा गौरो अपाकृतं तृष्यन्नेत्यवेरिणम्" ऋ०८,४,३ । "यथेरिणे बीजमुप्त्वा न वप्ता लभते फलम्" मनुः ।

इरिन् त्रि० इर–कण्ड्वा० णिनि यलोपः । १प्रेरके । "न वेधामिरी मघस्य रैष आ" ऋ०५,८७,२ । २ईश्वरे च ।

इरिमेद पु० इरी रोगादीर्य्यकः मेदोनिर्य्यासो यस्य । विट्खदिरे । "इरिमेदः कषायोष्णो मुखदन्तगदास्रजित् । हन्ति कण्डूविषश्लेष्मक्रिमिकुष्ठविषव्रणान्" भावप्र० ।

इरिविल्लिका स्त्री इरिविल्लेव कन् । "पिडकामुत्तमाङ्गस्थां वृत्तामुग्ररुजाज्वराम् । सर्व्वात्मिकां सर्व्वलिङ्गां जानीयादिरिविल्लिकामिति" निदानोक्ते मस्तकस्थे व्रणभेदे । कनभावे इरिविल्लाप्यत्र । "इरिविल्लां गन्धनाम्नीं कक्षां विस्फोटकांस्तथा । पित्तजस्य विसर्पस्य क्रियया साधयेद्भिषक्" सुश्रु० ।

इरेश पु० ६त० । १वरुणे, २वागीशे, ३भूमिपतौ, ४विष्णौ च

इर्गल न०स्त्री अर्गल+पृ० । द्वाररोधके काष्ठभेदे तस्मै हितम् अपूपादि० यत् । इर्गल्यः च इर्गलीयः । तत्साधने द्रव्ये ।

इर्य्य त्रि० इर–कण्ड्वा० अच् वेदे नि० न यलोपदीर्घौ । प्रेरके । "यूयं राजानमिर्य्यं जनाय विभ्वतिष्टम्" ऋ०५,५८,४ ।

इर्वारु स्त्री उर्व्व–आरु पृषो० । (काकुड़) १कर्कट्याम् । २हिंसके त्रि० । "सिंहव्याघ्रवृकतरक्षुऋक्षद्वीपिमार्ज्जारशृगालमृगेर्व्वारुकप्रभृतयः गुहाशयाः" सुश्रुतः । मृगेर्वारुकः मृगहिंसकः । आलु । इर्व्वालुरप्युक्तार्थे ।

इर्वारु(लु)शुक्तिका स्त्री इर्वारुः(लुः) शुक्तिकेव स्वयंस्फोटनात् । (फुटी) (स्वयं भिन्नविपक्वकर्कट्याम्) ।

इल शयने अक० गतौ क्षेपे च सक०तुदा०पर०सेट् । इलति । ऐलीत् इयेल ईलतुः इलितः इलः ।

इल क्षेपणे चुरा०उभ०सक० सेट् । एलयति ते ऐलिलत् त । ऐलयीत् ऐलिष्ट "कथं वातमेलयति कथं न रमते मनः" अथ०१०,७,३१ । "यासां देवतानां यांयां कामयते सा भूत्वेलयति" शत०ब्रा० १०,२,८,८ ।

इलविला स्त्री पुलस्त्यमुनिपत्न्याम् कुबेरजनन्याम् । एतत्सम्बन्धेनैव कुबेरस्य ऐलविल इति नाम ।

इला स्त्री इल–क । १भूमौ, २गवि, ३वाचि, ४जम्बुद्वीपस्य नववर्षमध्ये वर्षभेदे तत्सीमा चेलावृतशब्दार्थे वक्ष्यते । ५वैवस्वतमनुकन्यायां बुधपत्न्याम् । सा हि विष्णुवरात् पुंस्त्वमासाद्य पुनः शङ्करशापात् स्त्रीत्वं गता बुधस्तु तामुपगम्य पुरूरवसमुत्पादयामासेति पुराणे प्रसिद्धम् । तत्र इडाशब्दे उक्तप्रायम् ६ स्वप्रयोक्ते त्रि० ।

इ(ए)ला कण्ड्वा० यक् प० अक० सेट् । इ(ए)लायति ।

इलावृत न० इला पृथिवीवावृतं निषधादिभिः । नववर्षात्मकजम्बुद्वीपस्य वर्षभेदे तच्च वर्षम् "पश्चान्माल्यवतः, प्राच्यां गन्धमादनशैलतः । इलावृतं नीलगिरेर्याम्यतो, निषधाद्दक्' दत्युक्तं चतुःसीमावच्छिन्ने देशेऽस्ति ।"माल्यवांश्च

यमकोटिपत्तनाद्रोमकाश्च किल गन्धमादनः । नीलशैलनिषधावधी च तावन्तरालमनयोरिलावृतम् । निषधनीलकुगन्धसुमाल्यकैरलमिलावृतमावृतमाबभौ । अमरकेलिकुलायसमाकुलं रुचिरकाञ्चनचित्रमहीतलम् ॥" सि० शि० । "एतेन भारतमिलावृतवद्‌ विभाति" माघः । इलावृतस्यपर्व्वतादिवर्णनम् । भाग० ५ स्क० ६ अ० ।

"एषां मध्ये इलावृतं नामाभ्यन्तरवर्षं यस्य नाभ्यामवस्थितः सर्व्वतः सौवर्णः कुलगिरिराजो मेरुर्द्वीपायामसमुन्नाहः कर्णिकाभूतः कुवलयकमलस्य मूर्द्धनि द्वात्रिंशत्सहस्रयोजनविततो मूले षोड़शसाहस्रं तावतान्तर्भूम्यां प्रविष्टः । उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृङ्गवानिति त्रयोरम्यकहिरण्मयकुरूणां वर्षाणां मर्य्यादागिरयः प्रागायता उभयतः क्षारोदावधयो द्विसाहस्रपृथव एकैकशः पूर्व्वस्मात् पूर्व्वस्मादुत्तरोत्तरेण दशांशाधिकांशेन दैर्घ्य एव ह्रसन्ति । एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयः । अयुतयोजनोत्सेधा हरिवर्षकिंपुरुषभारतानां यथासंख्यम् । तथैवेलावृतमपरेण पूर्व्वेण च माल्यवद्गन्धमादनावानीलनिषधायतौ द्विसहस्रं पप्रथतुः । केतुमालभद्राश्वयोः सीमानं विदधाते । मन्दरो मेरुमन्दरः सुपार्श्वः कुमुद इत्ययुतयोजनविस्तारोन्नाहा मेरोश्चतुर्दिशमवष्टम्भगिरय उपक्लृप्ताः । चतुर्ष्वेतेषु चूतजम्बूकदम्बन्यग्रोधाश्चत्वारः पादपप्रवराः पर्व्वतकेतव इव द्विसहस्रयोजनोन्नाहास्तावद्विटपविततयः शतयोजनपरिणाहाः । ह्रदाश्चत्वारः पयोमध्विक्षुरसमृष्टजलाः । यदुपस्पर्शिन उपदेवगणा योगैश्वर्य्याणि स्वाभाविकानि भरतर्षभ ! धारयन्ति । देवोद्यानानि च भवन्ति चत्वारि नन्दनं चैत्ररथं वैभ्राजकं सर्व्वतोभद्रमिति । येष्वमरपरिवृढाः सहसुरललनाललामयूथपतय उपदेवगणैरुपगीयमानमहिमानः किल विहरन्ति । मन्दरोत्सङ्ग एकादशशतयोजनोत्तुङ्गदेवचूतशिरसो गिरिशिखरस्थूलानि फलान्यमृतकल्पानि पतन्ति । तेषां विशीर्य्यमाणानामतिमधुरसुरभिगन्धबहुलारुणरसोदेनारुणोदा नाम नदी मन्दरगिरिशिखरान्निपतन्ती पूर्व्वेणेलावृतमुपप्लावयति । यदुपजोषणाद्भवान्या अनुचरीणां पुण्यजनवधूनामवयवस्पर्शसुगन्धवातो दशयोजनं समन्तादनुवासयति । एवं जम्बूफलानामत्युच्चनिपातविशीर्णानामनस्थिप्रायाणामिभकायनिभानां रसेन जम्बूनदी नाम मेरुमन्दरशिखरादयुतयोजनादवनितले निपतन्ती दक्षिणेनात्मानं यावदिलावृतमुपस्यन्दति । तावदुभयोरपि रोधसोर्य्या मृत्तिका तद्रसेनानुविध्यमाना च वाय्वर्कसंयोगविपाकेन सदामरलोकाभरणं जाम्बूनदं नाम सुवर्णं भवति । यदु ह वाव विबुधादयः सह युवतिभिर्मुकुटकटककटिसूत्रकुण्डलाद्याभरणरूपेण खलु धारयन्ति । यस्तु महाकदम्बः सुपार्श्वपार्श्वनिरूढ़स्तस्य कोटरेभ्यो विनिःसृताः पञ्चायामपरिणाहाः सुमधुराः सुपार्श्वशिखरात् पतन्त्योऽपरेणात्मानमिलावृतमनुमोदयन्ति । या ह्युपयुञ्जानानां मुखनिर्वासितो वायुः समन्ताच्छतयोजनमनु वासयति । एवं कुमुदनिरूढो यः शतवल्शो नाम वटस्तस्य स्कन्धेभ्यो नीचीनाः पयोदधिमधुघृतगुड़ान्नाद्यम्बरशय्यासनाभरणादयः सर्व्व एव कामदुघा नदाः कुमुदाग्रात् पतन्तस्तमुत्तरेणेलावृतमुपयोजयन्ति । यानुपजुषाणानां न कदाचिदपि प्रजानां वलीपलितक्लमस्वेददौर्गन्ध्यजरामयापमृत्युशीतोष्णवैवर्ण्योपसर्गादयस्तापविशेषा भवन्ति । यावज्जीवं सुखं निरतिशयमेव । कुरङ्गकुररकुसुम्भवैकङ्कत्रिकूटशिशिरपतङ्गरुचकनिषधशितिवासकपिलशङ्खवैदूर्य्यजारुधिहंसर्षभनागकाञ्जरनीरदादयो गिरयो मेरोः कर्णिकाया इव केशरभूता मूलदेशे परित उपक्लृप्ताः । जठरदेवकूटौ मेरुं पूर्व्वेणाष्टादशयोजनसहस्रमुदगायतौ द्विसहस्रं पृथुतुङ्गौ भवतः । एवमपरेण पवनपारियात्रौ दक्षिणेन कैलासकरवीरौ प्रागायतौ । एवमुत्तरतस्त्रिशृङ्गमकरौ । अष्टाभिरेतैः परिसृतोऽग्निरिव परितश्चकास्ति काञ्चनगिरिः । मेरोर्मूर्द्धनि भगवत आत्मयोनेर्मध्यत उपक्लृप्तां पुरीमयुतयोजनसाहस्रीं समचतुरस्रां शातकौम्भीं वदन्ति । तामनु परितो लोकपालानामष्टानां यथादिशं यथारूपं तुरीयमानेन पुरोऽष्टावुपक्लृप्ताः"। भा० भी० ६ अ० जम्बूखण्डविभागे तु ।

"धनुःसंस्थे महाराज ! द्वे वर्षे दक्षिणोत्तरे । इलावृतं मध्यमन्तु पञ्च वर्षाणि चैव ह । उत्तरोत्तरमेतेभ्यो वर्षमुद्रिच्यते गुणैः । आयुःप्रमाणमारोग्यं धर्म्मतः कामतोऽर्थतः । समन्वितानि भूतानि तेषु वर्षेषु भारत ! । एवमेषा महाराज ! पर्व्वतैः पृथिवी चिता । हेमकूटस्तु सुमहान् कैलासो नाम पर्व्वतः । यत्र वैश्रवणो राजन् ! गुह्यकैः सह मोदते । अस्त्युत्तरेण कैलासात् मैनाकं पर्व्वतम्प्रति । हिरण्यशृङ्गः सुमहान् दिव्यो मणिमयो गिरिः । तस्य पार्श्वे महद्दिव्यं शुभं काञ्चनवालुकम् । रम्यं विन्दुसरो नाम यत्र राजा भगीरथः । दृष्ट्वा भागीरथीं गङ्गामुवास बहुलाः समाः । यूपा मणिमयास्तत्र चैत्याश्चापि हिर-

स्मशाः । तत्रैव तु गतः सिद्धिं सहस्राक्षो महायशाः । स्रष्टा भूतपतिर्यत्र सर्वलोकैः सनातनः । उपास्यते तिग्मतेजा यत्र भूतैः समन्ततः । नरनारायणौ ब्रह्मा मनुः स्थाणुश्च पञ्चमः । तत्र दिव्या त्रिपथगा प्रथमन्तु प्रतिष्ठिता । ब्रह्मलोकादपक्रान्ता सप्तधा प्रतिपद्यते । वस्वोकसारा नलिनी पावनी च सरस्वती । जम्बूनदी च सीता च गङ्गा सिन्धुश्च सप्तमी । अचिन्त्या दिव्यसङ्काशाः प्रभोरेवैष संविधिः । उपासते यत्र सत्रं सहस्रयुगपर्य्यये । दृश्यादृश्या च भवति तत्र तत्र सरस्वती । एता दिव्याः सप्त गङ्गा स्त्रिषु लोकेषु विश्रुताः" ।

इलिनी स्त्री चन्द्रवंश्यमेधातिथिनृपकन्यायाम् । "मेधातिथिः सुतस्तस्य यस्मात् कण्वोऽभवद्द्विजः । इलिनी नाम यस्यासीत् कन्या वै जनमेजय !" हरिवं० ३२अ० ।

इली स्त्री इल–गतौ क गौरा० ङीष् । करवाले (काटार)।

इलीविश पु० असुरभेदे "न्यविध्यदिलीविशस्य दृढाविभ्रज्ञिण मभिनच्छुष्णमिन्द्रः" ऋ०१,३३,१२,

इलीश पु० इलीव करवालिकेव शोभते शुभ-ड । करवालिका सदृशावयवे स्वनामख्याते मत्स्यभेदे ।

इल्लिश पु० इलीश+पृ० । इलीशमत्स्ये (इलिश) ।

इल्वल पु० इल+स्वप्ने वलच्–नि० गुणाभावः । १मत्स्यभेदे २असुरभेदे च मेदि०स च सिंहिकापुत्रभेदः "सिंहिकायां समुत्पन्ना विप्रचित्तेः सुतास्तथा । दैत्यदानवसंयोगाज्जातास्तीव्रपराक्रमाः । सैंहिकेया इति ख्यातास्त्रयोदश महाबलाः । व्यंशः शल्यश्च बलिनो नभश्चैव महाबलः । वातापिर्नमुचिश्चैव इल्वलः स्वसृमस्तथा । आञ्जिको नरकश्चैव (कालनेमि) कालनाभस्तथैव च । राहुर्ज्येष्ठस्तु तेषां वै सूर्य्यचन्द्रप्रमर्द्दनः" हरि० ३अ० । तच्चरितं यथा

"इल्वलो नाम दैतेय आसीत् कौरवनन्दन ! । मणिमत्यां पुरि पुरा वातापिस्तस्य चानुजः । स ब्राह्मणं तपोयुक्तमुवाच दितिनन्दनः । पुत्रं मे भगवानेकमिन्द्रतुल्यं प्रयच्छतु । तस्मै स ब्राह्मणो नादात् पुत्रं वासवसम्मितम् । चुक्रोध सोऽसुरस्तस्य ब्राह्मणस्य ततो भृशम् । तदाप्रभृति राजेन्द्र ! इल्वलो ब्रह्महाऽसुरः । मन्युमान् भ्रातरं छागं मायावी ह्यकरोत्ततः । मेषरूपी च वातापिः कामरूपोऽभवत् क्षणात् । संस्कृत्य च भोजयति ततो विप्रं जिघांसति । स चाह्वयति यं वाचा गतं वैवस्वतक्षयम् । स पुनर्देहमास्थाय जीवन् स्म प्रत्यदृश्यत । ततो वातापिमसुरं छागं कृत्वा सुसंस्कृतम् । तं ब्राह्मणं भोजयित्वा पुनरेव समाह्वयत् । तामिल्वलेन महता स्वरेण वाचमीरिताम् । श्रुत्वाऽतिमायो बलवान् क्षिप्रं ब्राह्मणकण्टकः । तस्य पार्श्वं विनिर्भिद्य ब्राह्मणस्य महासुरः । वातापिः प्रहसन्राजन्निश्चक्राम विनाशयन् । एवं स ब्राह्मणान्राजन् ! भोजयित्वा पुनः पुनः । हिंसयामास दैतेय इल्वलो दुष्टचेतनः" भा०व०९६अ०।

३मृगशिरोनक्षत्रशिरःस्थासु पञ्चसु तारासु स्त्रीब०व० । तत्र इन्वका इति पाठान्तरम । इन्वन्ति प्रीणयन्ति इवि-प्रीणने क्वुन् इदित्त्वात् नुम् क्षिपकादि० न अत इत्त्वम् इति भानुदीक्षितः । तेन इल्वका इति लकारमध्यपाठकल्पनं प्रामादिकमेव । [ऐन्वीत् । इन्वकाः ।

इव व्याप्तौ प्रीणने च इदित् भ्वा०पर०सक० सेट् । इन्वति

इव अव्य०इन्व–निरु० क । १सादृश्ये, २उत्प्रेक्षायाम्, ३ईषदर्थे, वाक्यालङ्कारद्योतकता चास्य तत्र उपमायाम् "इवेन नित्यसमासोविभक्त्यलोपश्चेति" वार्त्ति० उक्तेर्नित्यसमासः विभक्तेर्लोपाभावश्च स च समासस्वरार्थ एव । "वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये" रघुः । "हंसीव कृष्ण ! ते कीर्त्तिः स्वर्गङ्गामवगाहते" चन्द्रालोकः । एतत्प्रयोगे श्रौती उपमा "श्रौती यथेवत्राशब्दा इवार्थे वा वतिर्यदि" सा०द०उक्तेः । उत्प्रेक्षायाम् । "गुणा गुणानुबन्धित्वात् तस्य सप्रसवा इव" रघुः । "गङ्गाम्भसि सुरत्राण ! तपाणस्तव निःस्वनः । स्नातीवारिवधूवर्गगर्भपातनपातकी" "मुखमेणीदृशोभाति पूर्णचन्द्र इवापरः" सा०द० इवादिशब्दप्रयोगे उत्प्रेक्षाया वाच्यत्वम् । "वाच्येवादिप्रयोगे स्यादप्रयोगे परा पुनः" सा०द०उक्तेः । वाक्यालङ्कारे "सर्वदा क इव वा सहिष्यते" किरा० "किमिव हि मधुराणां मण्डनं नाकृतीनाम्" शकु० "रुजति सा कियतीमिव न व्यथाम्" नैष० ईषदर्थे "तदस्ति पर्य्युषितमिव" शत०ब्रा० "आवर्जिता किञ्चिदिव स्तनाभ्याम्" कुमा० ४अवधारणार्थे च । "श्रिये पूषन्निषुकृतेव देवाः" ऋ०१,१८४,३। "इषुकृतेव इवशब्द एवार्थे" भा० । "स्नुष्णेव तु वा ईश्वरा" शत०ब्रा०। इवशब्दोऽवधारणार्थे" भा० ।

इशीका स्त्री इषीका पृ० । इषीकाशब्दार्थे अमरटीका ।

इष गतौ सर्पणे च दिवा०पर०सक०सेट् । १इष्यति, ऐष्यत् । ऐषीत् इषितः एषित्वा । "इष्यन् वाचमुपवक्तेव होतः" ऋ० ९,९४,९ । "योऽभिवात इषितः प्रवाति" अथ० १०,८,२५ । "स तत्कर्णीपितस्तूयमन्ने" अथ० ६,२५, ५ । "हिन्वानो वाचमिष्यसि" ऋ० ९,६४,९ । इष्या-

शामपि "अप इष्य होतरित्यप इच्छ होतरित्येवैतदाह" शत॰ब्रा॰ २,९,२,१५। गतौ तुदादिरपि इषति निरु॰।

अनु+अन्वेषणे गवेषणे "अन्विष्यन्तस्ततःसीताम्" रामा॰ "यावदेनामन्वेष्यामि" शकु॰। "न रत्नमन्विष्यति मृग्यते हि तत्" कुमा॰। "तस्यान्विष्यन् वेतसगूढं प्रभवं सः" रघुः। स्वार्थे णिच्। तत्रैव "राममन्वेषयामि" सा॰द॰।

प्र+प्रेरणे। "अप्रैषीद्राजपुत्री मां दुराहारीं तवान्तिकम्" भा॰व॰१६ अ॰। "गत्वा प्रैषीश्च रावणम्" भट्टिः "अध्वर्युप्रेषितो मैत्रावरुणः प्रेष्यति" आश्व॰श्रौ॰। "शौनःशेफं च प्रेष्यति" कात्या॰१२,६,१ "अग्नीषोमाभ्यां छागस्य वपायै मेदसे प्रेष्य" शत॰ ब्रा॰ ३,८,२,२७। घञ् प्रैष्यः। ण्यत् प्रैषः। स्वार्थे णिच्। प्रेषयति प्रेषयामास। "स च मां प्रेषयामास" रामा॰। [षितः पर्य्येषणा।

परि+सत्कारपूर्व्वकनियोजने पर्य्येष्यति स्वार्थे णिच् पर्य्ये-

इष वाञ्छायाम् तुदा॰पर॰सक॰सेट् वेट् क्तः। १इच्छति, "इच्छामि संवर्द्धितमाज्ञया ते" कुमा॰। इच्छेत् "यदीच्छेद्विपुलान् भोगान्" मल॰ त॰पु॰। "राजान्तेवासियाज्येभ्यः सीदन्नोच्छेद्धन क्षुधा" या॰स्मृ॰। ऐच्छत् ऐषीत् "ऐषीः पुनर्जन्मजयाय यत्त्वम्" भट्टिः इयेष "इयेष सा कर्त्तुमवन्ध्यमात्मनः" कुमा॰ईषतुः। इच्छन् "किमिच्छन् कस्य कामाय किमर्थमनुसंज्वरेत्" श्रुतिः।

एषिता—एष्टा एषित्वा—इष्ट्वा। भावे श इच्छा "आत्मजन्या भवेदिच्छा" न्यायका॰। इष्टः "इष्टोऽसि मे सखा चेति" गीता। कर्मणि इष्यते "त्रिरात्राच्छुद्धिरिष्यते" स्मृतिः। एष्टव्यः एषितव्यः। "एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत्" पु॰।

अनु+अन्वेषणे। "तं खलन्त इवान्वीषुः" शत॰ब्रा॰। "इन्त तमात्मानमन्विच्छामो यमन्वेष्टा" छा॰उ॰। "अनुपदमन्वेष्टा" पा॰ "वयं तत्त्वान्वेषात् मधुकर! हतास्त्वं खलु कृती" शकु॰

प्रति+ प्रतिग्रहे प्रतीच्छति (प्रतिगृह्णाति)। "ततः प्रतीच्छ प्रहरेति वादिनी" नैष॰ "स्नुषां प्रतीच्छ मे कन्याम्" प्राप्तौ च "बुद्धौ शरणमन्विच्छ" गीता। स्वार्थे णिच् वेदे॰नि॰ गुणाभावः। इषयति "इच्छं सदास्त रायेष मदन्त इषयेम ज्योतिः" ऋ॰१,१८५,९। "इषयेम इच्छाम" भा॰।

परि+अन्वेषणे च परीच्छति (अन्विष्यति) "भगवन्तं वा अह मेभिरार्त्विज्यैः पर्य्यैषिषम्" छा॰उ॰।

अभि+सम्यगिच्छायाम् अभीष्टम्।

इष आभीक्ष्ण्ये क्र्यादि॰ पौनःपुन्ये पर॰अक॰ सेट् इष्णाति इष्णातु इषाण। "इष्णन्निषाणामुं म इषाण सर्व्वलोकं म इषाण" यजु॰ ३१,२२,अ॰। ऐष्णात् ऐषीत्। एषितः एषित्वा। प्रेरणे च। "भिनद्गिरिं शवसा वज्रमिष्णन्" ऋ॰ ४,१७,३। इष्णन् प्रेरयन्" भा॰। इच्छार्थेऽपि "पूर्वीरिषश्चरति मध्व इष्णन्" ऋ॰ १,१८१,६। "मध्वः मधुनः इष्णन् इच्छन" भा॰। आभीक्ष्ण्यञ्च क्रियापौनःपुन्यम्। क्रिया च धात्वर्थविशेषः स च वाञ्छागत्यादिरेव तस्यैवाभीक्ष्ण्यद्योतनेऽस्य साधुत्वम्

इष गतौ भ्वा॰ उभ॰सक॰ सेट्। एषति ते। ऐषीत् ऐषिष्ट अनु—अनुसरणे। अन्वेषति। "अन्वेषन्तोऽवमं राजन्" "देशमन्यं दुराचारमन्वैषन् वानरास्तथा" रामा॰।

इष् त्रि॰ इष—इच्छायां क्विप्। १इच्छायुक्ते। इट्चरः। "विदादूर्जं शतक्रतुं विदादिषम्" ऋ॰२,१२,४। कर्मणि क्विप्। २इष्यमाणे त्रि॰३अन्ने स्त्री "मधुमतीर्न इषस्कृधि" यजु॰ ७,२, "आश्विनायश्चरीरिषः १,३,१। "इषे त्वोर्ज्जे त्वा" यजु॰ १,१,। इष्यतेइष—अन्तर्भूतण्यर्थे कर्म्मणि क्विप्। ४एषणीये। "इषस्तुतो मह्यामहे" ऋ॰ ५,५०,५, "इषः एषणीयस्य" भा॰। इष—गतौ भावे क्विप्। ५यात्रायाम् स्त्री

इष पु॰ इष—गतौ क्विप्—इट् यात्रा तस्मिन् मासे जिगीषूणामस्ति अर्श आ॰अच्। सौरे चान्द्रे च आश्विने १मासि। "श्रावण्यें भाद्रमासे युवतिगृहगते चार्थलाभः प्रदिष्टः" राजमा॰उक्तेः "सौराश्विनस्य यात्राया अर्थलाभदत्वात्तथात्वम्"। अत एव रघौ "सरितः कुर्वती गाधाः पथश्चाश्यानकर्दमान्। यात्रायै नोदयामास तं शक्तेः प्रथमं शरत्"। शरत्कालस्य राज्ञां यात्रार्थत्वमुक्तम्। शरदृतुश्च "इषश्चोर्जश्च शरदिति" श्रुत्युक्त आश्विनकार्त्तिकमासरूपःकालः तस्य च सौरत्वस्तत्शब्दे वक्ष्यते "आमेखलं सञ्चरतां घनानां छायामिवे सानुगतां निषेव्य" कुमा॰पाठान्तरम्। "ध्वनिमिषेऽनिषेत्त्वमयत" माघः। तत्र चान्द्रे "इषे मास्यसिते गत्ते नवम्यामार्द्रयोगतः" तिथि॰ देवीपु॰अत्र चान्द्रोगौणः "यच्छरद्यूर्जश्च ओषधः पच्यन्ते तेनो हैताविषश्चोर्जश्च" शत॰ ब्रा॰ ऋ॰४,२,१,१७, "अन्तर्भूतण्यर्थे भावे घञर्थे क"। २प्रेषणे "इषवान् मम रेजति" ऋ॰१,२९,६. "इषवान् प्रेषणवान्" भा॰। इष—इच्छायां कर्मणि घञर्थे क ३अन्ने न॰निरु॰।

इषणि स्त्री इष—भावे अनि वेदे॰नि॰ गुणाभावः। प्रेषणे

"दुहाना धेनुर्वृजनेषु कारवेत्मना शतिनं पुरुरूपमिषणि" ऋ०२,२,९, इषणि एषणायाम् भा० । सप्तम्या लुक् । लोके तु एषणिः वा ङीप् । इषणिमिच्छति क्यच् । वेदे० नि० इलोपः इषण्यति "ऋतस्य बुध्न उषसामिषण्यन्" । ऋ०३,६१,७, ततः भावे अ । "इषण्या प्रेषणायाम् "इषण्यया नः पुरुरूपमाभर" ऋ०८,४९,१८।

इषव्य त्रि०इषुणा विध्यति इषौ कुशलो वा यत् । शरलक्ष्ये, १शरव्ये २शरत्यागकुशले च "आराष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी" यजु०ऋ०२२,२२ "इषुभिर्विध्यति इषव्यः यद्वा इषौ कुशलः" वेददी० [शातयः" ऋ०९,७९,१,

इषि त्रि०इष–कि । इच्छावति "विचिदश्नाना इषयोऽव्य-

इषिका स्त्री इष–गत्यादौ कुन् अत इत्त्वम् । इषीकाशब्दार्थे तूलशब्दपरे ह्रस्वः इषिकतूलम्" तदीयतूले ।

इषीका स्त्री ईष–गत्यादिषु ईकन् कित् ह्रस्वश्च । १गज-नेत्रगोलके । २काशे, ३मुञ्जामध्यवर्त्तितृणे च तदालम्ब्यैव अश्वत्थाम्ना पाण्डववधाय महास्त्रं परित्यक्तम् यथा भा० प० १४अ० "व्यथितात्माऽभवत् द्रौणिः प्राप्त-ञ्चेममन्यत । तत्र दिव्यमदीनात्मा परमास्त्रमचिन्तयत् । जग्राह च स चेषीकां द्रौणिः सव्येन पाणिना । स तामापदमासाद्य दिव्यमस्त्रमुदैरयत्" इत्युपक्रम्य "तत-स्तस्यामिषीकायां पावकः समजायत । प्रधक्ष्यन्निव लो-कांस्त्रीन् कालान्तकयमोपमः" इमामिषीकामधिकृत्य कृतोऽन्यः अण् ऐषीकं भारतान्तर्गतपर्वभेदे "मुञ्जा-वेषीका तूलमिति"शत०ब्रा० "यदि नडानां यदि वेणूनां यदि वेषीकाणाम्" शत०ब्रा० १,१,४,१९, ४शरशला-कायां ५वीरणकाण्डिकायाञ्च उज्ज्व० "तस्मिन्नास्थदिषी-कास्त्रं रामो रामावबोधितः" रघुः ।

इषिर त्रि०इष–गतौ किरच् । १गतिशीले । "स न इषिरो अभिया रातः" ऋ०७,२५,४, "इषिरः गतिशीलः"भा० २चलनशीले च "निसामनामिषिरामिन्द्र ! भूमिम्"ऋ०२, ३०,९। "इषिरां चलन्तीम्" भा० ४अग्नौ पु० उज्ज्व०

इषु पुं स्त्री ईष्यते हिंस्यतेऽनेन ईष–उ ह्रस्वश्च । १बाणे "पतिषु हरविषुम्"रघुः । "इषुमति रघुसिंहे दंदशूकान् जिघांसौ" भट्टिः । "इषुभिः प्रतियोत्स्यामि" गीता स्त्रीत्व "तस्य साध्वीरिषवो याभिरस्यति"ऋ०२,२१,४,८ । "यामिषुं गिरिशन्त ! बिभर्ष्यस्तवे" यजु० १६.३ । तत्र ब्यसंख्ये २पञ्चसंख्यान्विते च । पञ्चशरशब्दे वक्ष्यमा-णस्य कामशरस्य पञ्चसंख्याकत्वस्यानुसारेण शरशब्देन हि पञ्चसंख्या बोध्यते । "पञ्चपञ्चाष्टसप्तेषु ज्ञेयमोजःसु राशिषु" ज्योति० । ३ वृत्तक्षेत्रान्तर्गते जीवावधिप-रिधिपर्य्यन्तकृतसरलरेखायाञ्च तदानयनप्रकारः सोदा-हरणः लीला०दर्शितो यथा

"ज्याव्यासयोगान्तरघातमूलं व्यासस्तदूनोदलितः शरः स्यात् । व्यासाच्छरोनाच्छरसङ्गुणाच्च मूलं द्विनिघ्नं भवतीह जीवा । जीवार्द्धवर्गे शरभक्तयुक्ते व्यासप्रमाणं प्रवदन्ति वृत्ते" उदा० दशविस्तृतिवृत्तान्तर्यत्र ज्या षण्मिता भवेत् । तत्रेषुं वद बाणाज्ज्यां ज्याबाणाभ्याञ्च विस्तृतिम्" न्यासः । व्यासः १०, ज्या ६, अनयोर्योगः १६, अन्तरं ४ तयो-र्घातो ६४, तस्य मूलं ८, तेनोनो व्यासः २, दलितः शरः१। तेन १०हस्तव्यासके वृत्तक्षेत्रे यदि जीवमितिः ६तदा शर मानम् १ एकहस्त इति ज्ञेयम् । ज्ञातशरव्यासके वृत्त-क्षेत्रे जीवानयनं यथा व्यासः १० हस्तः, शरः १हस्तः तेनोनितः व्यासः ९, तस्य मूलम् ३ । द्वाभ्यां गुणितम् ६, जीवामानम् । ज्ञाताभ्यां ज्याबाणाभ्यां व्यासानय-नम् । यथा जीवा ६ तस्यार्द्धं ३, तस्य वर्गः ९। शर-संख्यया १ भक्ते ९ । शरसंख्यया १ योगे व्यासमानम् १० । एवमन्यसंख्यकजीवादौ अनया दिशा शराद्या-नयनम् । यद्दाणां क्रान्तिवृत्त क्षेत्रस्य शरानयनं संक्षेपेण दर्शितम् सि०शि०

"वलिराशिमहद्युज्यानिघ्नस्त्रिज्योद्धृतः शरः । स्फुटोऽसौ क्रान्तिसंस्कारे दृक्कर्मण्ययनजे तथा" मू०। "अयं संक्षिप्तो गौणप्रकारः । मुख्यस्तु पूर्वं व्याख्यात एव । तथापीह युक्तिमात्रमुच्यते । विषुवद्वृत्तात् क्रान्तिर्ध्रुवाभिमुखी । क्रान्त्यग्राच्छरः कदम्बाभिमुखः । कथं तेन तिर्य्यक्स्थेन सा संस्कार्या । अतः क्रान्त्यग्रे यद्द्युज्यावृत्तं तस्य शराग्रस्य च यदन्तरमृजु तेन संस्कृता सती स्फुटा भवति । तज्ज्या-न्तरं कोटिरूपम् । शरः कर्णरूपः । तद्वर्गान्तरपदं द्युज्या वृत्ते भुजः । एतत् त्र्यस्रं दिग्वलनजत्र्यस्रसंभवम् । तत्र वलिराशिमहक्रान्तिः कदम्बध्रुवसूत्रयोरन्तरम् । तज्ज्या भुजः । तद्द्युज्या कोटिस्त्रिज्या कर्णः । यदि त्रिज्य-येयं कोटिस्तदा शरेण केत्युपपन्नम् । कोटिरूपस्यैव शरस्य ध्रुवोन्मुखस्याद्व्ययाऽयनजं दृक्कर्म कर्त्तुं युज्यते" प्रमि० विस्तरस्त्वत्रैव "विक्षेपलिप्ताः क्षितिजादिकानां खेषा ११० द्विबाणेन्दुमिता १५२ रसाश्वाः ७६ । षट्लीन्दवः १२६, खाग्निभुवः १३० सितज्ञपातौ स्फुटौ स्वस्वल-केन्द्रयुक्तौ" मू० "क्षितिजस्य खरुद्रमिता ११० मध्यमा

विक्षेपलिप्ताः । बुधस्य द्विबाणेन्दुमिताः १५२ । गुरोः षट्सप्ततिः ७६ । शुक्रस्य षड्विश्व१२६ तुल्याः । शनेः खनेन्दु १२० मिता वेदितव्याः । तथा बुधशुक्रयोर्यौ गणितागतौ पातौ तौ स्वस्वशीघ्रकेन्द्रेण युक्तौ कार्यौ । एवं स्फुटौ स्तः । अत्रोपपत्तिः । मध्यमगतिशासनायां वेधप्रकारेण वेधवलये ग्रहविक्षेपोपपत्तिर्दर्शितैव । किंत्वन्त्यफलज्यार्धधनुषा समित्रच्छेदेण तुल्यं यदा शीघ्रकेन्द्रं भवति तदा त्रिज्यातुल्यः शीघ्रकर्णो भवति तस्मिन् दिने वेधवलये यावान् परमो विक्षेप उपलभ्यते तावान् ग्रहस्य परमो मध्यमविक्षेपः । एवमेते भौमादीनामुपलब्धाः पठिताः । अथ ज्ञशुक्रयोः पातस्य स्फुटत्वमुच्यते । भगणाध्याये ये बुधशुक्रयोः पातभगणाः पठितास्ते स्वशीघ्रकेन्द्रभगणैरधिकाः सन्तो वास्तवा भवन्ति । ये पठितास्ते स्वल्पाः कर्मलाघवेन सुखार्थम् । अतः पठितचक्रभवौ स्वशीघ्रकेन्द्रयुतौ वास्तवभगणनिष्पन्नौ स्फुटौ भवतः । तथा चोक्तं गोले ।"ये चात्र पातभगणाः पठिता ज्ञभृग्वोस्ते शीघ्रकेन्द्रभगणैरित्यादि"। इदानीं ग्रहविक्षेपानयनमाह" प्रमि०।"मन्दस्फुटात् खेचरतः स्वपातयुक्ताद्भुजज्या पठितेषुनिघ्नी। स्वशीघ्रकर्णेन हृता शरः स्यात् सपातमन्दस्फुटगोलदिक्कः" सू० । "मन्दस्फुटाद्ग्रहात् स्वपातयुक्ताद्भुजज्या साध्या। सा ग्रहस्य पठितेन शरेण गुण्या स्वशीघ्रकर्णेन भाज्या फलं स्फुटविक्षेपः स्यात् । सपातो मन्दस्फुटो ग्रहो यदि राशिषट्कादूनस्तदोत्तरो विक्षेपोऽन्यथा दक्षिणः । अत्रोपपत्तिः । मन्दस्फुटो ग्रहः स्वशीघ्रप्रतिमण्डले भ्रमति । तत्र च तस्य पातोऽपि । पातो नाम प्रतिमण्डलविमण्डलयोः संपातः । तस्मादारभ्य विक्षेपप्रवृत्तिः । इह सुसरलवंशशलाकया कक्षामण्डलं तत्प्रतिमण्डलं च छेद्यकोक्तविधिना विरचय्य तत्र शीघ्रप्रतिमण्डले मेषादेः प्रतिलोमं पातस्थानं च चिह्नयित्वा तत्र विमण्डलं निवेश्यम् । पातचिह्नाद्राशिषट्कान्तरे विमण्डलप्रतिमण्डलयोरन्यं सम्पातं कृत्वा पातात् पूर्वं त्रिभेऽन्तरे पठितविक्षेपप्रमाणेन प्रतिमण्डलादुत्तरतो विमण्डलं केनचिदाधारे स्थिरं कृत्वा मेषादेरनुलोमं मन्दस्फुटं ग्रहं प्रतिमण्डले विमण्डले च दत्त्वा विक्षेपोपपत्तिं दर्शयेत् । तत्र तयोर्ग्रहयोर्यावान् विप्रकर्षस्तावांस्तत्र प्रदेशे विक्षेपः । अथ तस्यानयनम् । पातस्थाने हि विक्षेपाभावः । ततस्त्रिभेऽन्तरे परमो विक्षेपः । अन्तरेऽनुपातेन । अतः पातग्रहचिह्नयोरन्तरं तावज्ज्ञेयम् । तच्च तयोर्योगे कृते भवति । यतो मेषादेरनुलोमं ग्रहो दत्तः । पातस्तु प्रतिलोमम् । अतस्तयोर्योगः शरार्थं किल केन्द्रम् । तस्य दोर्ज्या साध्या । यदि त्रिज्यातुल्यया दोर्ज्यया पठितविक्षेपतुल्यं प्रतिमण्डलविमण्डलयोरन्तरं लभ्यते तदाऽभीष्टया ग्रहस्थानभवया दोर्ज्यया किमिति फलं शीघ्रकर्णाग्रे विक्षेपः । अथ द्वितीयोऽनुपातः । यदि शीघ्रकर्णाग्रे एतावान् विक्षेपस्तदा त्रिज्याग्रे क इति । अत्र गुणभाजकयोस्त्रिज्यातुल्ययोस्तुल्यत्वान्नाशे कृते सति दोर्ज्यायाः पठितविक्षेपो गुणः शीघ्रकर्णो हरः । फलं कक्षाप्रदेशे विक्षेपो ज्यारूपस्तस्य चापं स्फुटविक्षेप इत्यर्थः । भूचिह्ने सूत्रस्यैकमग्रं बद्धा द्वितीयमग्रं विमण्डले ग्रहस्थाने निबद्धं सूत्रं कर्णः । सूत्रकक्षमण्डलयोरन्तरं स्फुटः शर इत्यादि सर्वं छात्राय दर्शनीयम् । इदानीं विक्षेपस्य क्रान्तिसंस्कारयोग्यतालक्षणमन्यत् स्फुटीकरणमाह" । प्रमि० "त्रिज्यावर्गादयनवलनज्याकृतिं प्रोह्य मूलं यष्टिर्यष्ट्या द्युचरविशिखस्ताडितस्त्रिज्ययाप्तः । यद्वा राशित्रययुतखगद्युज्यकाघ्नस्त्रिमौर्व्या भक्तः स्पष्टीभवति नियतं क्रान्तिसंस्कारयोग्यः" सू० । ग्रहस्य "युतायनांशोडुपकोटिशिञ्जिनीत्यादिनायनं वलनं साध्यम् । अत्र वलनशब्देन वलनज्या ग्राह्या न धनुः । तथा इतः प्रभृति दृग्ज्याभिः कर्म कर्तव्यम् । यतो दृग्ज्याभिः शरज्या शरकलातुल्यैव भवति । तस्यानयनम् । वलनस्य वर्गं त्रिज्यावर्गादपास्य यन्मूलं लभ्यते तद्यष्टिसंज्ञं ज्ञेयम् । तया यष्ट्या ग्रहविक्षेपो गुणितस्त्रिज्यया भक्तः स्फुटः क्रान्तिसंस्कारयोग्यो भवति । अथानुकल्प उच्यते । यद्वा राशित्रययुतखगद्युज्यकाघ्न इति राशित्रययुतस्य ग्रहस्य यावती द्युज्या तया वा गुण्यस्त्रिज्यया भक्तः स्फुटो भवति । अत्र भाजकस्यैकत्वाद्गुणकस्यान्यत्वात् फलं स्वल्पान्तरमित्यतोऽनुकल्पेनोक्तम् । अत्रोपपत्तिः । क्रान्त्यग्रात् किल शरो भवति । शराग्रे ग्रहः क्रान्तिः शरेण संस्कृता स्फुटा भवति । अत्र गणितागतेनैव शरेण क्रान्तिः स्फुटा क्रियते तदयुक्तम् । यतः क्रान्तिर्विषुवन्मण्डलात् तिर्यग्ध्रुवाभिमुखी । विक्षेपस्तु क्रान्तिमण्डलात् तिर्यग्रूपः कदम्बाभिमुखः यथोक्तं गोले । "सर्वतः क्रान्तिसूत्राणां ध्रुवे योगो भवेद्यतः । विषुवन्मण्डलप्राच्यां ध्रुवे याम्या तथोत्तरा" । सर्वतः क्षेपसूत्राणां ध्रुवाज्जिनलवान्तरे। योगः कदम्बसंज्ञोऽयं ज्ञेयो

वलनत्रोधकृत् । तत्रापमण्डलप्राच्या याम्या सौम्या च दिक् सदा । कदम्बभ्रमवृत्तं चेति" । अतो विक्षेपः कदम्बाभिमुखो भवति । ध्रुवाभिमुख्या क्रान्त्या सह कथं तस्य भिन्नदिकस्य योगवियोगावुचितौ । तयोर्यद्भिन्नदिक्त्वं तदायनवलनवशात् । अथ तद्गोलोपरि प्रदर्श्यते । यथोदितं गोलं विरचय्य क्रान्तिवृत्ते यद्ग्रहचिह्नं तस्मात् परितो नवतिभागान्तरेऽन्यत् त्रिज्यावृत्तं निवेश्यम् । अथ ग्रहचिह्नाद्ध्रुवोपरिगामि सूत्रं तस्मिन् वृत्ते यत्र लगति तत्कदम्बयोरन्तरस्य ज्या त्रिज्या स कर्णः । तयोर्वर्गान्तरपदं कोटिः । सा च यष्टिसंज्ञा । क्रान्त्यग्राद्विक्षेपः कदम्बाभिमुखः कर्णरूपः । तस्य कोटिरूपकरणायानुपातः । यदि त्रिज्याकर्णे यष्टिः कोटिस्तदा शरकर्णे का । फलं क्रान्तिसंस्कारयोग्यो विक्षेपो भवति । तेन संस्कृता क्रान्तिः स्फुटा । विक्षेपाग्रस्थस्य ग्रहस्य विषुवन्मण्डलस्य च यद्याम्योत्तरमन्तरं सा स्फुटा क्रान्तिरुच्यते अथानुकल्पेऽपीयमेव वासना । अत्र सत्रिराशिग्रहक्रान्तिज्या भुजस्थाने कल्पिता स भुजः । तद्द्युज्या यष्टिस्थाने कल्पिता सा कोटिः । तत्रापि त्रिज्या कर्ण इति सर्वमुपपन्नम्" प्रमि० । तत्रैव स्थानान्तरेऽप्युक्तम् ।

"नाड़िकामण्डलात् तिर्य्यगत्रापमः क्रान्तिवृत्तावधिः क्रान्तिवृत्ताच्छरः । क्षेपवृत्तावधिस्तिर्य्यगेवं स्फुटो नाड़िकावृत्तखेटान्तरालेऽपमः" सू० । "क्रान्तिवृत्ते यत् स्फुटग्रहस्थानं तस्य नाडिकावृत्तात् तिर्य्यगन्तरं सा क्रान्तिः अथ विमण्डले च यत् ग्रहस्थानं तस्य क्रान्तिवृत्ताद्यत् तिर्य्यगन्तरं स विक्षेपः । अथ विमण्डलस्थग्रहस्य नाडीवृत्ताद्यत् तिर्य्यगन्तरं सा स्फुटा क्रान्तिः" प्रमि० ।

२सामवेदविहिते यज्ञभेदे । "इषुवज्रौ सामवेदे विहितौ" सि०कौ० । इषुप्रकारः स्थूला० कन् । इषुकः शरप्रकारे

इषुकामशमी स्त्री पुरीभेदे "पूर्व्वेषुकामशमी" सि०कौ० ।

इषुकार पु० इषुं करोति कृ-अण् उप० । बाणकारके शिल्पिभेदे "पिङ्गला कुररः सर्पः सारङ्गोऽन्वेषणं विना । इषुकारः कुमारी च षडेते गुरवो मम" वौद्धेनोक्तं समर्थयितुं पिङ्गलादीनां यथोपदेशकारित्वात् गुरुत्वं तथा वर्णितम् यथा । "आशा बलवती राजन् ! नैराश्यं परमं परमं सुखम् । आशां निराशां कृत्वा तु सुखं स्वपिति पिङ्गला । सामिषं कुररं दृष्ट्वा बध्यमानं निरामिषैः । आमिषस्य परित्यागात् कुररः सुखमेधते । गृहारम्भो हि दुःखाय न सुखाय कदाचन । सर्पः परकृतं वेश्म प्रविश्य सुखमेधते । सुखं जीवन्ति मुनयो भैक्ष्यवृत्तिसमाश्रिताः । अयत्नेनैव जीवन्ति सारङ्गा इव पक्षिणः । इषुकारो नरः कश्चिदिषावासक्तमानसः । समीपेनापि गच्छन्तं राजानं नाववुद्धवान्" "बहूनां कलहो नित्यं द्वयोः सङ्कथनं ध्रुवम् । "एकाकी विचरिष्यामि कुमारीशङ्खको यथा" भा०शा० प० अ० १७८ इषुकृदादयोऽप्यत्र ।

इषुकृत त्रि० इषुरिव शीघ्रगामी ऋजुगामी वा कृतः । बाणतुल्यं शीघ्रगामितया ऋजुगामितया च कृते । "श्रिये पूषन्निषुकृतेव देवा नासत्या" ऋ०१८४,२ । इषुकृतेव इवशब्द एवार्थे । आजिधावनाय इषुवच्छीघ्रऋजुगामिनौ कृताविव सन्तौ" भा० इषुकृता इव नासत्या इत्यादौ सर्वत्र छान्दस आ । एतेन इषुकृच्छब्दस्योदाहरणतया एतस्या ऋच उपन्यासः प्रमादिक एव ।

इषुध शरधारणे कण्ड्वा प०अक०सेट् । इषुध्यति ऐषुध्यीत् इषुध्यिता-इषुधिता । याच्ञायामपि "विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसि" ऋ०६,५०,१ । पतिं वो अघ्न्यानां धेनूनामिषुध्यसि" ऋ० ८,५८,२ । भावे अ । इषुध्या प्रार्थनायां स्त्री । "दिवोदासेभ्य इरस्य वीरैरिषुध्येव मरुतो रोदस्योः" ऋ०१,१२२,१ । उण् इषध्यु प्रार्थके "इषध्यव ऋतसापः पुरन्धीः" ऋ०५,४१,६ ।

इषुधर पु० इषुं धरति धृ-अच् ६त० । बाणधरे इषुभृदादयोऽप्यत्र । "शरांसि सर्वेषुभृतां निरास्यत्" भट्टिः ।

इषुधि पुंस्त्री० इषवो धीयन्तेऽत्र धा-कि इषुध-इन् यलोपे वा । बाणाधारे बाणधारके वा तूणे । स्त्रीत्वे "धनुर्गाण्डीवमादाय तथाऽक्षय्ये महेषुधी" भा०व० । २८अ० । निषङ्गिमेन इषुधीरसक्तः" ऋ०१,३३,३ । पुंस्त्वे "बद्धाऽऽक्षय्यौ महेषुधी" रामा० । "बह्वीनां पिता बहुरस्य पुत्रश्चिश्चा कृणोति समनावगत्य" । "इषुधिः सङ्का पृतनाश्च" ऋ० ६,७५,५ । "बह्व्य इषवो धीयन्ते इषूणां निधानत्वात् "इषुधिरिषूणां निधानम्" यास्कः" भा० ।

इषुप पु० इषुं पिबति पा०पाने क उप०स० । असुरभेदे सहि अंशावतारे नग्नजिन्नामा राजासीत् यथाह भा० आ० ६७अ० "इषुपोनाम यस्तेषामसुराणां बलाधिकः । नग्नजिन्नाम राजासीत् भुवि विख्यातविक्रमः" ।

इषुपुङ्खा स्त्री इषोः पुङ्खमिव पुष्पमस्याः । शरपुङ्खावृक्षे ।

इषुपुष्पा स्त्री इषुरिव पुष्पमस्याः । शरपुष्पायाम् ।

इषुमत् पु० इषवःसन्त्यस्य प्राशस्त्येन मतुप् । प्रशस्तशरधरे । "इषुमति रघुसिंहे दन्दशूकान् जिघांसौ" भट्टिः ।

इषुमात्र न० इषुः प्रमाणमस्य इषु+मात्रच्। १शरप्रमाणे ऋग्वेदिनां २कुण्डे कुण्डशब्दे विवृतिः। ३इषुप्रमाणमात्रे त्रि० स्त्रियां ङीप्। "यद्येकः पशुः स्यात् एकप्रादेशां कुर्य्यात् अथ यदि पञ्च पशवः स्युः पञ्चप्रादेशां कुर्य्यादिषुमात्रीं वा वीर्य्यं वा इषुर्वीर्य्यसम्मितैव तद्भवति। पञ्चप्रादेशा ह्येव त्वेव पुरेषुर्भवति" शत० ब्रा० ६,५,२,१०। इदमुखामधिकृत्य प्रवृत्तम्। उखां करोतीत्युपक्रम्य "पञ्चप्रादेशामिषुमात्रीं वा तिर्य्यक् पञ्चपशौ" कात्या० १६,२,२५, उक्तेः। इषुमानं च अङ्गुल्यवधिबाहुमूलपर्य्यन्तमानं तच्च प्रादेशत्रयम् याज्ञिकसम्प्रदायप्रसिद्धम्। ४शरगतिपर्य्यन्तमाने च। "अथ यदब्रवीत् वर्द्धस्वेति। तस्माद्ध स इषुमात्रमेव तिर्य्यक् वर्द्धते इषुमात्रं प्राङ् सोऽवैवावरं समुद्रम् दधावव" शत० ब्रा० १,६,३,११ इत्यासुरवर्द्धनप्रकारः। "इषुमात्रं धनुषः सकाशात् बलात् प्रयुक्त इषुर्यावद्दूरं गच्छति तावन्मात्रं प्रतिक्षणं तिर्य्यक् उभयपार्श्वतः अवर्द्धत" भा०। शरविक्षेपप्रमाणञ्च। इषुविक्षेपशब्दे दृश्यम्।

इषुविक्षेप पु० इषोर्विक्षेपयोग्यदेशः। सार्द्धशतहस्तमिते शरविक्षेपयोग्ये देशे तन्मानमाह आ०त० पितामहः "मध्यमेन च चापेन प्रक्षिपेत्तु शरत्रयम्। हस्तानाञ्च शते सार्द्धे लक्ष्यं कृत्वा विचक्षणः। तत्प्रमाणदेशातिक्रमेणैव पुरीषोत्सर्गः कार्य्यः। "ततः कल्यं समुत्थाय कुर्य्यात् मैत्रं नरेश्वर! नैर्ऋत्यामिषुविक्षेपमतीत्याभ्यधिकं भुवः"। मैत्रं मित्रदेवताकपायुसम्बन्धात् पुरीषोत्सर्गं इषुविक्षेपमतीत्य इषुविक्षेपयोग्यदेशाद्बहिः" आ०त० रघु०।

इषेत्वक पु० इषे त्वा इतिभागोऽस्त्यत्रानुवाके अध्याये वा गोपथा० वुन्। इषेत्वा इतिशब्दयुक्ते अनुवाके अध्याये च। स च यजुर्वेदीयः प्रथमाध्यायः तत्रादौ इषे त्वोर्ज्जेत्वेति शब्दवत्त्वात् तस्य तथात्वम् एवं तदन्तर्गतोऽनुवाकोऽपि तथा।

इष्कर्त्तृ त्रि० निस्+कृ–तृच् "निसस्तपतावनासेवने" इति प्रातिशाख्यसूत्रेणोपसर्गैकदेशनकारलोपः। निष्कर्त्तरि। "इष्कर्त्तारमध्वरस्य प्रचेतसम्" ऋ० १०,१४०,५। इष्कृदादयोऽप्यत्र।

इष्कृति स्त्री निस्+कृ–क्तिन् इष्कर्त्तृवत् नलोपः। गर्भान्निष्क्रमकारिण्यां मातरि जनन्याम्। "इष्कृतिर्नाम वो माता सोयूयं स्थ निष्कृतीः" यजु० १२,८३,। "इष्कृतिर्नाम निष्कृतिनाम्नी माता जननी" वेददी०।

इष्ट त्रि० इष–कर्मणि क्त। १अभिलषिते, २प्रिये "इष्टोऽसि सखा चेति गीता० च। यज भावे क्त। ३यज्ञादौ न० कर्म्मणि, क्त। ४पूजिते ५एरण्डवृक्षे पु०। ६संस्कारे न०। "एकाग्निकर्म्म हवनं त्रेतायां यच्च हूयते। अन्तर्वेद्याञ्च यद्दानमिष्टं तदभिधीयते। अग्निहोत्रं तपः सत्यं वेदानाञ्चानुपालनम्। आतिथ्यं वैश्वदेवञ्च प्राहुरिष्टमिति स्मृतम्" जातूकर्ण्योक्ते ७धर्म्मकार्य्ये न०। इष्टञ्च इच्छाविषयः तच्च द्विविधं गौणं मुख्यञ्च। तत्र इतरेच्छानधीनेच्छाविषयो मुख्यं तत्साधनं गौणम्। तत्र मुख्यमिष्टं सुखं दुःखाभावश्च। तदिच्छाया इतरेच्छानधीनत्वात्। तत्साधनं पाकभोजनादि गौणं सुखदुःखाभावेच्छयैव तदिच्छायाः समुन्मेषात् अधिकमिच्छाशब्दे ९१२ पृष्ठे उक्तम्। तत्रेच्छाविषये "सह यज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः। अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्"। "अनिष्टमिष्टं मिश्रञ्च त्रिविधं कर्म्म चोच्यते"। "इष्टं हि वो देवा दास्यन्ते यज्ञभाविताः" इति च गीता। यज्ञे "पुरोडाशभुजामिष्टमिष्टं कर्त्तुमलन्तराम्" माघः इष्टं यागः इष्टमभीष्टं कर्त्तुमलन्तरामित्यर्थः। "इष्टं दत्तमधीतं वा विनश्यत्यनुकीर्त्तनात्" देवलः। इष्टं यजनम्" शु०त०रघु० धृते च "यज्ञैरिष्टं क्रतुशतम्" विक्रमो० स्मृतिपरिभाषिते इष्टकर्म्मणि द्विजातीनामेवाधिकारः न स्त्रीशूद्रयोः यथाह "इष्टञ्च द्विजातीनां धर्मः सामान्य उच्यते। अधिकारी भवेच्छूद्रः पूर्त्ते धर्मे न वैदिके" जातूकर्ण्यः "वैदिके वेदसाध्ये अग्निहोत्रादाविति" रत्नाकरः। "पितृव्यगुरुदौहित्रान् भर्त्तुः स्वस्रीयमातुलान्। पूजयेत् कव्यपूर्त्ताभ्याम् वृद्धानाथातिथीन् स्त्रियः" इत्यत्रिवचने स्त्रिया पूर्त्तमात्रेऽधिकारविधानात् तत्र "जलाशयोत्सर्गरूपपूर्त्ते गौरवतारणानुमन्त्रणयोर्यजमानकर्त्तृकमन्त्रपाठ विधानात् तत्र अमन्त्रकतया स्त्रीशूद्रयोरनधिकारेण तद्वति यागेऽपि तयोर्नाधिकारः विशेषोपदेशाभावात्" इति द्वैतनिर्णयानुसारिणः। वृषोत्सर्गे तदङ्गहोम इव ब्राह्मण द्वारा तन्मन्त्रपाठसम्भवात्तयोरपि तत्राधिकारः इति रघुनन्दनादयः। "अमन्त्रस्य तु शूद्रस्य विप्रो मन्त्रेण गृह्णते" वराहपु०। "नवृतमङ्गतञ्चाग्नौ न स्त्री जुहुयादनुपेतः" आप० वचनं तु स्वयंहोमविषयम्। "श्रौतस्मार्त्तक्रियाहेतोर्वृणुयादृत्विजः स्वयम्" याज्ञ० श्रौत इव स्मार्त्तेऽपि कर्मणि ऋत्विग्वरणोक्तेः। अतएव "ऋत्विग्वादे नियुक्तश्च समौ संपरिकीर्त्तितौ। यज्ञे स्वाम्याप्नु-

थात् पुण्यं हानिं वादेऽथ वा जयमिति" वृह० उक्तेः९ "श्रौते कर्म्मणि न० "उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्त्ते संसृजेथामयञ्च" यजु० १५,५४ इष्टापूर्त्ते श्रौतस्मार्त्ते कर्मणी" वेददी० । १० इच्छया कल्पिते त्रि० "इष्ट-हतिरष्टगुणिता व्येका दलिता विभाजितेष्टेन" लीला० ११यज्ञेन तोषिते परात्मनि १२विष्णौ च पु० "इष्टो-विशिष्टः शिष्टेष्टः" विष्णु स० "इष्टः परमानन्दात्मकत्वेन प्रियः यज्ञेन पूजितो वेति" भा० । यज—करणे वा० क्त, भावे क्त अस्त्यर्थे अच् वा । १३ इष्टकायां न० । "मरुतार्केण शुध्यन्ति पक्वेष्टचितानि च" विष्णु०।

इष्टकचित त्रि० इष्टकया चितः हस्तः । इष्टकाभिव्याप्ते

इष्टकर्मन् न० इष्टप्रसिद्ध्यर्थं कर्म शाक०त० । लीलावत्युक्ते गणितभेदे तत्प्रकारो यथा "अथेष्टकर्मसु करणसूत्रं वृत्तम् "उद्दिष्टकालापवदिष्टराशिः क्षुण्णो हृतोऽशैरहितो युतो वा । इष्टाहतं दृष्टमनेन भक्तं राशिर्भवेत् प्रोक्तमितीष्ट कर्म । अत्रोद्देशकः । पञ्चघ्नः स्वत्रिभागोनोदशभक्तः समन्वितः । राशित्र्यंशार्द्धपादैः, स्यात् कोराशिर्द्व्यूनसप्ततिः । न्यासः गुणः ५ । स्वत्रिभागः १/३ । हरः१० । राश्यंशाः ३/१ १/२ १/४ । दृश्यम् । ६८ । अत्र किल कल्पित-राशिः ३ । पञ्चघ्नः । १५ । स्वत्रिभागोनः । १० । दश-भक्तः । १ । कल्पित ३ राशेस्त्र्यंशार्द्धपादैः ३/३ ३/२ ३/४ समन्वितोहरोजातः १७/४ । अथ दृष्टम् ६८ इष्टेन ३ गुणितम् २०४ । हरेण १७/४ भक्तं जातोराशिः । ४८ । एवं सर्वत्रोदाहरणे राशिः केनचिद्गुणितोभक्तोवा राश्यंशेन रहितोयुतोवा दृष्टस्तत्रेष्टं राशिं प्रकल्प्य तस्मिन्नुद्देशकालापवत्कर्मणि कृते यन्निष्पद्यते तेन भजेद्दृष्टमिष्टगुणं फलं राशिः स्यात् । तत्र दृष्टजात्युदाहरणम् । यूथार्द्धं सत्रिभागं वनविवरगतं कुञ्जराणाञ्च दृष्टं षड्भागश्चैव नद्यां पिबति च सलिलं सप्तमांशेन मिश्रः । पद्मिन्या चाष्टमांशः स्वनवमसहितः क्रीड़ते सानुरागोनागेन्द्रोहस्तिनीभिस्त्रिभिरनुगतः का भवेद्यूथ-संख्या । न्यासः

१/२ १/६ १/८ दृश्यम् ४ । एषां सवर्णने

१/६ १/७ १/९ द्वाभ्यामपवर्त्तितं २/३ । ४/२१ ।

५/३६ । पुनरेषां सवर्णितानामैक्यं नवभिरपवर्त्तितं २५१/२५२ इष्टोनं १/२५२ अनेन ४ हृते इष्टगुणिते भक्ते जाता हस्तिसंख्या १००८ । अपरोदाहरणम् । अमलकमलराशेस्त्र्यंशपञ्चांशषष्ठैस्त्रिनयनहरिसूर्या येन तु-र्येण चार्या । गुरुपदमथ षड्भिः पूजितं शेषपद्मैः सकलकमलसंख्यां क्षिप्रमाख्याहि तस्य । न्यासः १ ३ १/५ १/६ १/४ दृश्यम् । ६ । अत्रेष्ट राशिम् १ प्रकल्प्य प्राग्वज्जातोराशिः । १२० । अन्यदुदाहरणम् । हारस्तारस्तरुण्यानिधुवनकलहे मौक्तिकानां विशीर्णोभूमौ यातस्त्रिभागः शयनतलगतः पञ्चमांशोऽस्य दृष्टः । प्राप्तः षष्ठः सुकेश्या गणक ! दशमकः संगृहीतः प्रियेण दृष्टं षट्कञ्च सूत्रे कथय कतिपयैर्मौक्तिकैरेष हारः । न्यासः १/३ १/५ १/६ १/१० दृश्यम् । ६ । अत्रेष्टं राशिम् १ प्रकल्प्य प्राग्वज्जातोराशिः ३० । अथ शेषजात्युदाहरणम् । स्वार्द्धं प्रादात्प्रयागे नवलवयुगलं योऽवशेषाच्च काश्यां शेषाङ्घ्रिं शुल्कहेतोः पथि दशमलवान् षट् च शेषाद्गयायाम् । शिष्टा निष्कत्रिषष्टिर्निजगृहमनया तीर्थपान्थः प्रयातस्तस्य द्रव्यप्रमाणं वद यदि भवता शेषजातिः श्रुतास्ति । न्यासः ।

१/१ दृश्यम् ६३ । अत्र रूपम् १ राशिं प्रकल्प्य

१/२ भागान् शेषान् शेषादपास्य अथवा भागा-

२/९ पवाहविधिना सवर्णिते जातम् । ७/६०

१/४ अनेन १इष्टगुणिते ६३ हृते । भक्ते जातं

६/१० द्रव्यप्रमाणम् । ५४० । इदं विलोमसूत्रे-णापि सिध्यति । अथ विश्लेषजात्युदाहरणम् । "पञ्चांशोऽलिकुलात्कदम्बमगमत्त्र्यंशः शिलीन्ध्रं तयोर्विश्लेषस्त्रिगुणोमृगाक्षि ! कुटजं दोलायमानोऽपरः । कान्ते ! केतकमालतीपरिमलप्राप्तैककालप्रियादूताहूत इतस्ततोभ्रमति खे भृङ्गोऽलिसंख्यां वद । न्यासः १/५ १/३ २/५ दृश्यम् । १ । जातमलिकुलमानम् । १५ । एवम् अन्यत्रापि" ।

इष्टका स्त्री इष-तकन् टाप् इष्टकेषीकामालानाम्" पा० निर्द्देशात् ह्रस्वम् । (इट्) मृदादिनिर्म्मिते १मृत्खण्डभेदे यज्ञिये अग्निचयनार्थे २मृदादिनिर्मिते द्रव्यभेदे च शत० ब्रा० तु निर्वचनान्तरमुक्तं यथा । "यावद्यावद्वै जुहुयात्तावत्तावत् भवतीति तद्यत्सा इष्टे कमभवत्तस्मादिष्टका" ६,१, २,२३ । "तं देवा अग्न्योराहुतिभिरभिषज्यन् ते यांयामाहुतिमजुहवुः सास्मै पक्वेष्टका भूत्वा समपद्यत तद्यदिष्टात् कमभवत्तस्मादिष्टकास्तस्मादग्निना इष्टकाः पचन्त्याहुतीरेवैनास्तत् कुर्वन्ति" इति च तत्रैव । इष्टकाकरणकाल-प्रकारादि" कात्या० श्रौ० १६,२क० दर्शितं यथा । "उखासम्भरणमष्टम्याम्" १सू० । "उखायाः सम्भरणमुखा सम्भरणम तदष्टम्यां भवति "अष्टकायामुखां सम्भरतीति

(६,२,२,२२) शत०ब्रा० वचनात् । उखा चोपलक्षणम् अषाढाद्यपत्र सम्भ्रियतएव ततश्चान्तराले तस्या अपि प्रयोक्तृत्वम् । सम्प्रदायस्तु फाल्गुनकृष्णाष्टम्याम्" कर्कः "आहवनीयस्य पुरस्तान्मत्या चतुरश्रे श्वभ्रे मृत्पिण्डमवदधाति भूमिसमम्" २सू० । "भूमिसममन्यूनानतिरिक्तम्"क०। "पिण्डमपरेण व्यध्वे वल्मीकवपां छिद्रां निदधाति"३सू०। 'पिण्डाहवनीययोर्व्यध्वे अर्धपथे"क०। "व्यध्वे पिण्डाहवनीययोर्मध्ये, वल्मीकवपाम् उपदीकाकृतस्य मृद्व्ययस्य वपामिव वपाम् अन्तःपुटां छिद्रां छिद्रसंयुक्ताम्" संप० । "आहवनीयं दक्षिणेन तिष्ठन्मुञ्जपञ्चाङ्गीबद्धास्तिष्ठन्ति प्राञ्चोऽश्वगर्दभाजाः पूर्वापरा रासभोमध्येऽश्वपूर्वाः" ४सू० । 'आहवनीयस्य दक्षिणतः तिष्ठद्भिर्मुञ्जमयीभिः पञ्चाङ्गीभिः पञ्चाङ्ग्यो मुखरिकाः ताभिर्बद्धास्तिष्ठन्ति प्राङ्मुखाः अश्वगर्दभाजाः पूर्वापररीत्या रासभोमध्येऽश्वपूर्वाः" क० । "उत्तरत आहवनीयस्यारत्निमात्र उभयतश्छोत्णा वैणवी सुषिराभ्रिः कल्माषभावेऽकल्माषी प्रादेशमात्र्यरत्निमात्री वा"५सू०। "आनन्तर्यात्मानमुत्तरतो मा भूदित्याहवनीयग्रहणम्"क० । "परिपाकवशात्कर्बुरा" संप०। "हिरण्मयीमेके" ६सू०। "एके आचार्या इच्छन्ति, अतश्च विकल्पः" क० । "अष्टगृहीतं जुहोति संततमुद्यच्छन् युञ्जान इति (११,१) ७सू० । 'अष्टगृहीतमाज्यद्रव्यं संततं जुहोति" क० । 'देवस्य त्वेति (११,९) अभ्रिमादाय "हस्त आधायेत्येनामभिमन्त्रयते" । (११,११) ८सू० । "अश्वप्रभृतींश्च प्रत्यृचं प्रतूर्तं युञ्जाथां योगे-योगऽइति (११,१२,१४) ९सू० । "अभिमन्त्रयते" क० । "अनुपस्पृशन्नुत्क्रमयत्येनान् प्राचः प्रतिमन्त्रं प्रतूर्तमन्तरिक्षं पृथिव्याः सधस्थादिति" (११,१५,१६) १० सू० । "अग्निम् च्छन्तस्तु पिण्डं गच्छन्त्यग्निं पुरीष्यमिति" (११,१६) । (६,३,२,१) शत०ब्रा० ११सू० । "दक्षिणतश्च पथो युगपत्" १२सू० । "गच्छतां च दक्षिणतः पथः, उत्तरतश्च पुरुषाः युगपद्गमनं कुर्वन्ति"क० । "अनद्धा पुरुषमीक्षते देवपितृमनुष्यानर्थकमग्निं पुरीष्यमिति" । (११,१६) १३सू० । "यो देवादीक्षावति स देवपितृमनुष्यार्थमद्धः" क० । "वल्मीकवपामादाय छिद्रेण पिण्डमीक्षतेऽन्वग्निरिति" (११,१७) १४सू०। "इहा निदधात्येनाम् । १५सू०। "वल्मीकवपाम्" क०। "आगत्येत्यभिमन्त्रयतेऽश्वम्" (११,१८) १६सू० । "आक्रम्येत्यनेन (११,१९) पिण्डमधिष्ठापयति" १७ सू० । "एनेनेत्यश्वोऽभिधीयते" क० "द्यौस्त इति (११,२०) पृष्ठस्योपरि पाणिं धारयन्ननुपस्पृशन्नुत्क्रामेत्युत्क्रामयति (११,२१) १८सू० । "अश्वम्" क० । "उदक्रमीदित्यभिमन्त्रयते (११,२२) १९ क०। "अश्वमेव" क०। "आहवनीयवत् स्थापयति पिण्डस्य" २०सू० । "पश्चून्" क० "उपविश्य मृदमभिजुहोत्या त्वा जिघर्मीति (११,२३) 'व्यतिषक्ताभ्यामृग्भ्यामाहुती (११,२२,२३) स्रुवेणाश्वपदे" २१सू० । "मृत्संस्कारत्वादुपविश्येत्युच्यते, व्यतिषङ्गश्च एकस्याः पूर्वार्धं इतरार्धः इतरयोरप्येवमेव" क० । "अभ्र्या पिण्डं त्रिः परिलिखति परि वाजपतिरिति (११,२५,२७) बहिर्बहिरुत्तरयोस्तयाभ्र्या पिण्डं खनति देवस्य त्वेति (११,२८) २२सू० । "अभ्रिग्रहणमभ्यन्तरनिवृत्त्यर्थम् तथा चाह "अत्र वा वैषव्यभिरुत्सीदतीति "(६,५,४,२ शत०ब्रा० उत्तरया परया ऋचा पूर्वलिखिताद्बहिर्बहिर्बाह्यप्रदेशे परिलिखति"। क० "कृष्णाजिनमास्तीर्योत्तरतस्तस्मिन् पुष्करपर्णमपां पृष्ठमिति" (११,२९) २३सू० । "तस्मिन्कृष्णाजिने" क० । "विभाष्ठ्यैनद्विव इति (११,२९) २४सू० । "पुष्करपर्णम्" क० "आलभत उभे शर्म च स्थइति"(११,३०-३१) २५सू०। "उभे कृष्णाजिनपुष्करपर्णे, शक्यत्वाच्च युगपदालम्भनम्" क० । "पिण्डं पुरीष्योऽसीति (११,३२) । "२६ सू० 'आलभते" क०। "पाणिभ्यां परिगृह्णात्येनं दक्षिणोत्तराभ्यां दक्षिणः साभ्रिस्त्वामग्नइति" (११,३२-३८) । षड्भिः सर्वं सकृत्त्वा" २७सू० "ग्रहणे मन्त्रः "अथैनं परिगृह्णातीति" शत०ब्रा० (६,४,२,२) वचनात्"क० इति द्वितीया कण्डिका ।

"पुष्करपर्णे निदधाति"१सू०। "अपः श्वभ्रेऽपनयत्यपो देवीरिति (११,३८)२सू० । "श्वभ्रः पिण्डावटः" क० । सं तइति (११,३९) वा तमपक्षिपति "३सू० । "श्वभ्र एव" क० । "अनामिकया संवपति पुरस्तात्पश्चाद्दक्षिणत उत्तरतश्च" ४सू० । "संवापश्चावटे पुरीषस्य" क० । "आस्तीर्णयोरन्तानुपगृह्णाति सुजात इति (११,४०) ५सू०। "अस्तीर्णयोः कृष्णाजिनपुष्करपर्णयोः" क० । "बन्धनायोभयोः प्रान्तान् सर्वत ऊर्ध्वान् करोति"४प०। 'तिष्ठता मुञ्जयोक्त्रेणोपनह्यति वासोऽग्नइति । (११,४०) ६सू० । "उद्गृहीतानन्तान्" क० । "उत्तिष्ठति पिण्डमादायोद् तिष्ठेति" (११,४१) ७सू० । "ऊर्ध्वबाहुः

माञ्च प्रष्टृषाल्पूर्ध्वं जगुण इति" (११,४२) ८सू०। "प्रसारितबाहुः पिण्डम्" क०। "अत्रहृत्योपरिनाभि धारयन्नश्वप्रभृतीनभिमन्त्रयते स जातः स्थिरो भव शिवो भवेति"। (११,४२,४५)' ९सू०। 'अत्रहृत्य पिण्डं नाभेरुपरि धारयन्" क०। "धारयत्येषामुपरि पिण्डमनुसृप्यन् प्रैतु वाजी इषाग्निमित्यश्वखरयोः" (११,४६) १० सू०। "एषां पशूनामुपरि पिण्डमनुपसृप्यन् धारयति प्रैतु वाजीत्यश्वस्य, इषाग्निमिति खरस्य" क०। "अग्न आयाहीत्याहृत्य (११,४६) खराच्छागस्य तं सत्यमित्यानिधानात्" (११,४७) ११ सू०। "धारयत्यनुपसृप्यन्नेव" क०। "आयन्त्यावृत्य पशूनजः पुरस्ताद्रासभो मध्ये" १२सू०। "स्वस्थानस्थितानामेवावृत्तिः" क०। "अनड्वा पुरुषमीक्षते पूर्ववदग्निं पुरीष्यमिति"। (११,४७) १३ सू०। "अनन्यार्थत्वात् पूर्वच्छन्देनाग्निषु प्रज्वलत्स्वित्युच्यते (२, ११)" क०। "उत्तरत आहवनीयस्योद्धताश्रोक्षिते सिकतोपकीर्णे परिवृते प्राग्द्वारे निदधात्योषधय इति" (११,४७,४८)१४ सू०। "वि पाजसेति" (११,४९) प्रमुच्यैनमजलोमान्यादाय प्रागुदीचः पशूनुत्सृजति १५ सू०। "प्रमुच्य पिण्डमजलोमानि गृहीत्वा प्रागुदीचीं दिशं प्रति पशूनुत्सृजति" क०। "आपो हि ष्ठेति (११,५०) पर्णकषायपक्वमुदकमासिञ्चति पिण्डे" १६ सू०। "पर्णकषायं पलाशकषायम्" क०। पलाशत्वग्भिःक्वथितमुदकं पलाशकषायपक्वम्" संप०। "फेनं च तूष्णीं ततः कृत्वा" १७ सू०। "तत एवोदकात् पूर्वतरं फेनं कृत्वोदकमासिञ्चति चशब्दात् फेनम्" क०। "अजलोमभिः संसृजति मित्रः संसृज्येति (११, ५३)" १८ सू०। "पिण्डम्"। "शर्करायोरसाश्मचूर्णैश्च रुद्राः संसृज्येति (११,५४)" १९सू०। "शर्करा प्रसिद्धा अयोरसो लोहसिङ्घाणः कीट इति यः प्रसिद्धः अश्मचूर्णः पाषाणचूर्णः चशब्दादेतैः पिण्डं संसृजति" क०। "शर्कराः सूक्ष्मकन्दुकाः अयोरसो लोहरसो यस्ताप्यमानाल्लोहात्पृथग्भवतीति कीट इति लोके प्रसिद्धः अश्मा दृढपाषाणः तेषां चूर्णैः संसृजति" संप०। 'संसृष्टामिति" (११, ५५,५७) संयौति" २०सू०। "पिण्डं मिश्रयति आप्लावयतीत्यर्थः" क०। 'अषाढां करोति महिषी प्रथमविन्ना तदाख्या" २१सू०। "अषाढाख्यामिष्टकां महिषी करोति। महिषीशब्दस्यान्यत्राप्रसिद्धत्वादाह प्रथमविन्ना तदाख्या" 'तद्धैव महिषीति"ब्रा० (६,५,२,१) क०। 'भार्याणां मध्ये प्रथमं लब्धा प्रथमपरिणीता या स्त्री सा तदाख्या" संप०। "यजमानपादमात्रीं त्र्यालिखिताम्"२२सू०। "महिषीपादमात्री मा भूदिति यजमानग्रहणम्" क०। "त्रिषु स्थानेषु लिखिताम्"संप०। "यजमान उखां करोति मृदमादाय मखस्य शिर इति (११,५७) २३ सू०। "मृदादाने मन्त्रः"क०। 'प्रादेशमात्रीं तिर्यगूर्ध्वां च" २४ सू०। "तिर्यगायामप्रमाणे विस्तारप्रमाणे च" क०। "पञ्चप्रादेशामिषुमात्रीं वा तिर्यक् पञ्चपक्षीं" २५ सू०। 'ऊर्ध्वं तु प्रादेशमात्र्येव पञ्चपक्षावपि" क०। "वसवस्त्वेति (११,५८) प्रथयति" २६ सू०। "आत्तं पिण्डम्" क०। "अन्तानुन्नीय सर्वतः प्रथमं धातुमादधाति रुद्रास्त्वेति" (११,५८) २७सू० "धातुशब्दानुकृतप्रक्षेप एव" क०। "प्रथितस्य तत्प्रान्तानुन्नीय ऊर्ध्वान् गमयति, धातुं प्रथमपिण्डिकाम्" संप०। "संलिप्य श्लक्ष्णां कृत्वोत्तरमादित्यास्त्वेति" (११,५८) २८सू०। "संलिप्य शिथिलया मृदा संलिप्य वारिणा संश्लक्ष्णां सुकुमारां कृत्वा" संप०। "विश्वे त्वेति (११, ५८) समीकरोति" २९सू०। (६,५,२,३) शत० ब्रा०। "वितृतीयउत्तरे वर्तिं सर्वतः करोत्यदित्यै रास्नेति (११,५९) ३०सू०। उखाया ऊर्ध्वप्रमाणस्योत्तरे वितृतीये उपरि वर्तमाने तृतीये भागे सर्वतः सर्वासु दिक्षु मृण्मयीं वर्तिं वृत्ताकारां रास्नां (काञ्चीगुणस्थानीयाम्) करोति" क०। "ऊर्ध्वास्तूष्णीं प्रतिदिशं" ३१सू०। "वर्तीः करोति चतस्रोऽपरा वर्तिं प्राप्ताः" ३२सू०। उखाशब्दस्याकृतिवचनत्वादष्टौ अनेकत्वा भवति" क०। "सर्वासु दिक्षु पार्श्वमध्ये बाह्यप्रदेश अपराश्चतस्रो वृत्तीरूर्ध्वास्तूष्णीं करोति किम्भूताः मूलत आरभ्य वृत्तिं प्राप्ताः तिरश्ची रास्नां यावदुच्चाः" संप० इति ३कण्डिका

"स्तनानिशाप्येषून्नयति" १ सू०। "ऊर्ध्ववर्तीनामेकैकस्याः" क०। "आसां चतसृणां वृत्तीनामग्रेषु तिरश्च्या वृत्तेरुपरि स्तनानिव स्तनसदृशानूर्ध्वदेशानुन्नयति" संप०। "द्विस्तनामष्टस्तनामेके" २सू०। "तां हैके द्विस्तनामष्टस्तनामिति (६,५,२, १२) श्रुतेः द्विस्तनपक्षएकस्मिन्नेव वर्त्यग्रे क्रियते अष्टस्तनपक्षे द्वौ द्वाविति क०। "बिलं गृह्णात्यदितिष्टइति"(११,५२) ३सू०। "सुखे गृह्णातीत्यर्थः" क०। "कृत्वायेति (११,५२) निदधाति उखाम्" ४सू०। "तिस्र एके" ५सू०। "उखाः

कुर्वन्ति" (६,५,२,१२) श०ब्रा०। "तया च सलिलखण्डग्रहणाद्येकैका निधानान्ता क्रियते" क०। "इष्टकास्तु तिस्रो विश्वज्योतिषः पृथग्लक्षणास्त्र्यालिखिताः" ६सू०। "तुशब्दश्चार्थे यजमान एव तिस्र इष्टकाः विश्वज्योतिःसंज्ञकाः पृथग्लक्षणाः करोति लक्षणकरणं च प्रथमाद्वितीयाप्रस्तुतप्रत्यर्थमेवोपधानं यथा स्यादिति" क०। "मृदमुपशयां निदधाति" ७सू०। "उखां क्रियमाणामुपशेत इत्युपशया तां मृदमतिरिच्यमानां निदधाति कार्यार्थम्" क०। "अवशिष्टां मृदमुपशयसंज्ञां निदधाति" संप्र०। "सप्तभिरश्वशकृद्भिरुखां धूपयति दक्षिणाग्न्यादीप्तैरेकैकेन वसवस्त्वेति (११, ६०) प्रतिमन्त्रम्" ८सू०। "शकृद्भिरश्वलेण्डैः" संप्र०। "अभ्रया श्वभ्रं चतुरस्रं खनत्यदितिष्ट्वेति (११, ६१) ९सू०। "अभ्रिश्च पूर्वोक्तैव प्रकृतत्वात् अत्र सा वैणव्यभ्रिरुत्सीदतीति (६,५,४,२) श०ब्रा०वचनात्" क०। "श्रपणमास्तीर्य यथाकृतमवदधाति" १०सू०। श्वभ्रे, येनैव क्रमेण कृता अषाढाद्याः उखायां तु विशेषः, "देवानां त्वेत्युखां (११,६१) न्युब्जाम्" ११सू०। "अवदधाति" क०। "श्रपणेनाच्छाद्य दक्षिणाग्निनादीपयति धिषणास्त्वेति (११,६१) १२सू०। "निर्मन्थ्येन वा धूपनश्रपणे" १३सू०। "कर्त्तव्ये" क०। "वरूत्रीष्ट्वेतीक्षमाणो (११,६१) जपति" १४सू०। "उखामीक्षमाणः" क०। "आचरति मित्रस्येति (११, ६२) १५सू०। "आचरणं च श्रपणप्रक्षेपः" क०। अषाढादीनामधस्तादुपरिष्टाच्च पुनः श्रपणं प्रक्षिपति" संप्र० "यावद्वाचरेत्" १६सू०। "यावद्भिः प्रकारैः श्रपणं प्रक्षिपेत्तावद्वारानेनैव मन्त्रेणाचरेत्" संप्र०। "दिवैव प्रदहनोद्धरणे" १७सू०। "कर्त्तव्ये" (६,५,४,१०) श०ब्रा०। "प्रदहनं पचनम् उद्धरणं बहिर्निष्क्रासनम्" संप्र०। "उद्वपति श्रपणम्" १८सू०। "पदार्थतया" क०। "भस्मसाद्भूतं पराकरोति" संप्र०। "देवस्त्वेत्युखाम्" १९सू० (११,६३)। "उद्वपति" क०। "उत्तानां करोत्यव्यथमानेति (११,६३) २०सू०। "उद्यच्छत्युखाम्" (११,६४) २१सू०। "ऊर्ध्वं यच्छति" क०। "परिरटस्य पात्रे करोति मित्रैतां त इति" (११, ६४, २२सू०। "अजापयसावसिञ्चति वसवस्त्वेति" (११,६५) प्रतिमन्त्रम्" २३सू०। "उखाम्। त्रिषपक्षे च उत्तानकरणाद्येकैका अजापयसावसेकान्ता कर्त्तव्या" क०। "इष्टकाक्रियातस्त्र्यालिखितानाम्" २४सू०। "अत ऊर्ध्वमिष्टकास्त्र्यालिखिताः क्रियन्ते" क०। "अपरिमितालिखिता वोत्तरयोः" २५सू०। "द्वितीयाचतुर्थ्योः कुत एतत् ते हि प्रकृत्याम्नायते "रसो ह्येते चिती अपरिमित उ वै रस इति" (८,७,२,१७), श०ब्रा०। "अतश्च विकल्पोऽयम्" क०। "पूर्ववदग्निः पाके" २६सू०। "इष्टकानां पाके भवति निर्मन्थ्यो दक्षिणाग्निर्वा" क०। फाल्गुनामावास्यायां दीक्षाशक्ता कृत्यशेषं तत्राह। "दण्डोच्छ्रयणान्तं कृत्वाध्वर्युयजमानयोरन्यतर उखामाहवनीयेऽधिश्रयति मुञ्जकुलायशणकुलायावस्तीर्णाम् अन्तरेषश्यां मा सु भित्था इति (११, ६८) तिष्ठन्नुदङ्प्राङ्" ३१सू०। दण्डोच्छ्रयणान्तमाध्वरिकं कर्म कृत्वा उखामाहवनीयेऽधिश्रयति, सा च मुञ्जकुलायावस्तीर्णा भवति अन्तरेषश्या। प्रागुदीचीं दिशमभिमुखः। अधिकारसमुपजीव्याह" क०। "रुक्मप्रतिमोचनविष्णुक्रमवात्सप्रेषु च" ३२सू०। "प्रागुदीचीं दिशमभिमुखो भवति" क०। "अग्न्यारूढे त्रयोदशास्यां प्रादेशमात्रीः समिधआदधाति" ३३सू०। "उखायामग्न्यारूढे त्रयोदश समिध आदधाति, प्रादेशमात्रीग्रहणं च शिष्टानुकरणप्रसक्त्यर्थम्" क०। "अनारोहत्यङ्गारानोप्यैके" ३४सू०। अनारोहत्यग्नावुखायाम् अङ्गारानोप्यैके समिदाधानं कुर्वन्ति" क०। ता इदानीमाह, "इतोमां कार्मुकीं द्रुव इति" (११,७०) ३५सू०। "आदधाति, क्रमुको धमनः तदीया कार्मुकी" क०। "वैकङ्कतीं परस्या इति (११,७१) ३६सू०। "औदुम्बरीं परमस्या इति" (११,७२) ३७सू०। "अपरशुवृक्णां यदग्न इति" (११,७३) ३८सू०। "या परशुना न छिन्ना" क०। "अकुठारच्छिन्नाम्" संप्र०। "अधःशयां यदत्तीति" (११,७४) ३९सू०। "भूमिसंलग्ना या सदा रूढा भवति" संप्र०। "पालाशीः प्रत्यृचमहरहरिति" (११,७५)। ४०सू०। "आदधाति अथैताः पालाश्यो भवन्तीति (६,६,२,७) श०ब्रा० वचनात्, एवं चापरशुवृक्णा अधःशया चौदुम्बर्यावेव भवतः जात्यन्तराविधानात्" क०। "उपोत्तमां क्षत्रियस्येच्छन्" ४१सू०। "उत्तमायाः समीपे उपोत्तमा द्वादशी, तां क्षत्रियस्य यजमानस्येच्छयादधाति अन्यस्य क्षत्रियपुरोहितव्यतिरिक्तस्य उभे उपोत्तमोत्तमे इच्छयाधीयेते, एवं हि श्रूयते" श०ब्रा० (६,६,२,१२) क०। "एवं च सति, उत्तमां पुरोहितस्य" ४२सू०। "इच्छयादधाति" क०। "उत्तमाम् वाहूनिति" (११,८२) संप्र०। "अन्यस्योभे" ४३सू०। "अन्यक्षत्रियस्यापुरोहितस्य च

एकादश भवन्ति त्रयोदश वा" क० । "क्षत्रियपुरोहितव्यतिरिक्तस्य द्वादशीत्रयोदशाविच्छया भवतः" संप्र० "स्वाहाकारः सर्वास्वुखायाम्" ४४सू० । "उखायामाधीयमानासु समित्सु, अतोऽन्यत्रापि स्वाहाकारो भवति सर्वास्वित्यभिधानात्" क० । "उखायां सर्वासु समित्सु स्वाहाकारो भवति" संप्र० । "औदुम्बर्यादि दण्डान्तमत्रैके" ४५सू० । "एवं सति प्रागौदुम्बरीहोमादुखाधिश्रयणादि" तान्यु हैकउखायामेवैतान्यौदुम्बराणि जुह्वतीति वचनात्" (६,६,१,२२) क० । "अत्रावसरे" संप्र० इति ४ कण्डिका ।

"यजमानः कण्ठे रुक्मं प्रतिमुञ्चते परिमण्डलमेकविंशतिपिण्डं कृष्णाजिननिष्यूतं क्षौमसूत्रे शुक्लकृष्णेषु शणसूत्रे त्रिवृत्योतसुपरिनाभि बहिष्पिण्डं हयानो रुक्म इति"(१२,१) । "रुक्मं हि प्रकृत्य सर्वमेवैतच्छ्रूयते (६,६,१,२), यजमानग्रहणाच्च स्वयमेव यजमानः प्रतिमुञ्चते, द्वादशाहे च सर्वे यजमानाः प्रतिमुञ्चेयुः अत ऊर्ध्वं पिण्ड्वाद्यन्वारम्भः एवं हि सर्वैः कृतं भवति" क० । "परिमण्डलं वर्तुलम्, एकविंशतिपिण्डम् पिण्डं निर्बाधम् निर्बाध्यन्ते उन्नताः निःकाश्यन्ते उन्नताः स्वरूपाद्बहिर्निःसृता भवन्ति, कृष्णाजिन शुक्लकृष्णेषु क्षौमसु निष्यूतं नितरां स्यूतम्, पुनः कीदृशम् त्रिगुणे त्रिवृति शणमये सूत्रे ओतं प्रोतम् तथा उपरिनाभि, पुनः बहिष्पिण्डं बहिर्निर्बाधम्" संप्र० । "दण्डौ शिक्यासन्दीषु मुञ्जरज्जवस्त्रिवृतो मृद्दिग्धाः" २सू० उखा याभ्यां गृह्यते तौ दण्डौ, शिक्यं प्रतिद्धम्, आसन्दी च । कनुरक्ता रज्जवो मृद्दिग्धा भवन्ति" क० । "मृद्दिग्धाः कर्दमलिप्ताः" संप्र० । "परिमण्डलाभ्यामिण्ड्वाभ्यामुखां परिगृह्णाति मक्षोमासेति" (१२, २) ३सू० । "हरति आवाचामेति" (१२,२) ४सू० । "तामेवोखाम्" क० । "आहवनीयस्य पुरस्तादुद्गात्रासन्दीवदासन्द्यां चतुरश्राक्त्र्यां शिक्यवत्यां निदधाति देवा अग्निमिति (१२,२) ५सू० । "उद्गात्रासन्दीवदिति प्रादेशपादी गम्यते" (१२,४,२) क० । सा च चतुरङ्गी सह पादैः, तस्यां शिक्यवत्यामासन्द्यां च, निदधाति उखाम्" क० । "शिक्यपाशं प्रतिमुञ्चते षड्द्यामं विश्वा रूपाणीति" (१२,२) ६सू० "ग्रीवायाम्" क० । "सशिक्यं प्राञ्चं प्रगृह्णाति सुपर्णोऽसीति" (१२,४) पिण्डवत् ७सू०। "सह शिक्येन प्राञ्चमग्निं प्रगृह्णाति, पिण्डवदित्यूर्ध्वबाहुः (३,९) । "धारणं च" ८सू० । "पिण्डवदेव उपरिनाभि" क० । अत्र द्वाभ्यामङ्काभ्यां शुक्लयजुर्वेदस्याध्यायादि, त्रिभिरङ्कैः कात्यायनश्रौतसूत्रस्याध्ययकण्डिकादि । चतुर्भिरङ्कैः शतपथब्राह्मणस्याध्यायादि ज्ञेयं तेन तत्तत्प्रतीकमात्रगृहीतमन्त्रसूत्रादि तत्तत्स्थाने द्रष्टव्यम् विस्तरस्तु शत० ब्रा० ६ अ० द्रष्टव्यः । लौकिकेष्टचितप्राचीरादौ इष्टकाघनफलेन इष्टकासंख्याज्ञानोपायो दर्शितो लीला० यथा "चितौ करपञ्चदैर्ध्यं सार्धहस्तम् । उच्छ्रयेण गुणितं चितेः किल क्षेत्रसम्भवफलं घनं भवेत् । इष्टकाघनहृते घने चितेरिष्टकापरिमितिश्च लभ्यते ॥ इष्टकोच्छ्रयहृदुच्छ्रितिश्चितेः स्युःस्तराश्च दृषदां चितेरपि ॥ उदाहरणम् । अष्टादशाङ्गुलं दैर्घ्यं विस्तारो द्वादशाङ्गुलः । उच्छ्रितिस्त्र्यङ्गुला यासामिष्टकास्ताश्चितौ किल ॥ यद्विस्तृतिः पञ्चकराष्टहस्तं दैर्घ्यं च यस्यां त्रिकरोच्छ्रितिश्च । तस्यां चितौ किं फलमिष्टकानां सङ्ख्या च का ब्रूहि कति स्तराश्च ॥ इष्टकायाः घनहस्तमानम् ३/१६ चितेः क्षेत्रफलम्४० । उच्छ्रयेण ३गुणितं चितेर्घनफलम् १२० । यथोक्तकरणे लब्धा इष्टका सङ्ख्या २५६० । स्तरसङ्ख्या २४ । एवं पाषाणचयेऽपि" 'व्यासात् षोडशभागः सर्वेषां सद्मनां भवति भित्तिः । पक्वेष्टकाकृतानां दारुकृतानां च स विकल्पः । इत्यहं०स० । "नेष्टकारचिते पितृन् संतर्पयेत्" शङ्खलि० । "मृण्मयात् कोटिगुणित फलं स्याद्दारुभिः कृतात् । कोटिकोटिगुणं पुण्यं फलं स्यादिष्टकामये" मठ०त० पु० । वास्तुयागे 'आकाशपदे' इष्टकारोपाचारः वास्तु यागशब्दे द्रष्टव्यः ।

इष्टकाचयन न० इष्टकयाऽग्नेश्चयनम् । इष्टकया अग्नेश्चयने तत्प्रकारः कात्या०श्रौ०सू०।"एतया त्रिकत्याभिमन्त्र्यकेऽन्यचितं चिन्वन्ति द्रोणचिद्रथचक्रचित्कङ्कचित्प्रउगचिदुभयतःप्रउगः समुह्य पुरीषः" १६,५,९ । "एते ह्यग्निविशेषाः तदाकारांश्चिन्वन्त्येके एके सुपर्णचितम् त्रिलिङ्गत्वादस्या त्रिकतेरग्न्यन्तरेष्वप्राप्तिर्मा भूदित्युच्यते एवं हि श्रूयते "तं हैकएतया विकत्याभिमन्त्र्यान्यां चितिं चिन्वन्तीति" (६,७,२,८ शत०ब्रा०) क०। "विकत्या एतया ऋचा अन्यचितं षड्विधमन्यमग्निं चिन्वन्ति तमेवाह द्रोणचिदित्यादि" संप्र०। "समुह्य पुरीषे प्रतिदिश पुरीषाहरणम्" १० सू० । प्रतिदिशं पुरीषमाहृत्याहृत्य तेनैव चयनम्" क० । "त्रिष्णुक्रमान् क्रमते विष्णो-

रिति" (१२,५ यजु०) "प्रतिमन्त्रमग्न्युद्यमनं च तस्मिं-स्तस्मिन्" ११ सू० । "तस्मिन् क्रमणे" क० । "अक्रम-स्त्वर्थे" १२ सू० । "उद्यमनं तु भवत्येव" क० । दिशो वीक्षते दिशोऽनुविक्रमस्वेति (१२,५) १३ सू० 'प्रतिदिशं मन्त्रः" क० । 'पिण्डवत्प्रागुदञ्चं प्रगृह्यात्यक्रन्ददग्नि-रिति" (१२,६) १४ सू० । पिण्डवदित्यूर्ध्वबाहुः (२,८) क० । 'अवरोहत्यग्नेऽभ्यावर्तिन्निति" (१२,७) १५ सू० "प्रत्यवरोहत्यग्निम् यावत्कृत्व ऊर्ध्वोऽवरोहतीति" (६,७,२,६) 'श्रुतेस्तद्वत्प्रत्यवरोहणम्" कर्कः । "उपरि-नाभि धारयन्ना त्वाहार्षमित्यभिमन्त्रयते"(१२,११) १६ सू० । "अग्निम्" क० । 'पाशा उन्मुच्योदुत्तममिति"(१२,१२) 'पिण्डवत्प्राग्दक्षिणा प्रगृह्णात्यपे ष्टहन्निति"(१२,१३) १७ सू० । "अदृहति हंसः शुचिषदिति" (१२,१४) । १८ सू० । "आसन्द्यां करोति ष्टहदिति" (१२,१४) १९ सू० । "उपतिष्ठते सीद त्वमिति" (१२,१५) २० सू० । "वात्सप्रेण च दिवस्परीत्येकादशभिः" (१२,१८,२८) २१ सू० । "उपतिष्ठते" क० । "अनुवाकेनैके" (१२,१८,२९) २२ सू० । "उपतिष्ठन्ते" क० । "अत्र दीक्षितोऽयमिति" २३ सू० । "अस्मिन्नवसरे दीक्षितोऽयमित्याह (७,४,११) "दण्डान्ते ह्युखाधिश्रयणाद्युक्तम् अतः प्राकृतानुवृत्त्यर्थ-मिदमुच्यते" क० । "आवृत्तिरतः संवत्सरम्" २४ सू० । "अत ऊर्ध्वं यदुच्यते तत् संवत्सरं यावदावर्तते" क० । "अत ऊर्ध्वं यत्कर्मोच्यते भस्मोद्वपनादि तस्य संवत्सरं यावदावृत्तिर्भवति" संप० । ५ कण्डिका

'उखाया भस्मोद्वपनमस्तमिते पात्रे" १ सू० । "तत्र प्राग्वाग्विसर्गात्" "भस्मोदुप्य वाचं विसृजत" इति श्रुतेः (६,७,४,१३) क० । "भस्मोद्वपनं भस्मोद्धरणम्" संप० । "वाचं विसृज्य समिदाधानं रात्रौ रात्रीमप्रयावमिति" (११,७५) २ सू० । 'एवमुदिते भस्मोद्वपनादि" ३ सू० । "कर्तव्यम् अयं तु विशेषः" क० । "अहरहरित्याधानम्" (११,३५) ४ सू० । "विष्णुक्रमवात्सप्रे चाहर्व्यत्यासमुदिते समिधमाधाय" ५ सू० । "अहर्व्यत्यासेन कर्तव्ये" क० "अस्मिन्दिने विष्णुक्रमाः उत्तरस्मिन्वात्सप्रम् एवं याव-द्दीक्षं कर्तव्यम्" संप० । "रुक्मप्रतिमोचनादि प्राग्वात्स-प्राद्विष्णुक्रमाः" ६ सू० । "तयोर्विभागमाह । साग्निके क्रतौ संवत्सरं दीक्षा आम्नाताः संवत्सरमित्युपक्रम्य चिन्वीतेति (१०,२,६,९) पवित्रे षडहो दीक्षा आम्नाताः पवित्रचतुर्दीक्ष इति (१५,१,४) तत्राग्नौ सति चित्य-ते किमग्निनिमित्ता दीक्षा भवन्तु उत सौमिक्य इति उभयं चैतच्चरितार्थम् पवित्राद्बहिराग्निक्यश्चरितार्थाः अनग्निके च पवित्रे सौमिक्य इति तेन साग्निमति प-वित्रे कथं भवत्विति नियमकारणाभावादनियमे प्राप्त आह" क० 'सोमाविरोधेन वा तत्प्रधान्यात्" ७ सू० । 'सोमस्य प्रधानभूतत्वात् तदीया एव दीक्षा भवन्ति" क० "सोमयागेनाविरोधः सोमाविरोधः तेनाविरोधेनैव दीक्षा भवति वावधारणे कुतः तत्प्रधान्यात् सोमस्य प्राधान्यात् अग्नेश्च तदङ्गत्वात् तेन द्वादशाहे वाजपेये द्वादश सप्त-दश वा भवन्ति नाग्निप्रयुक्तसंवत्सरदीक्षाः" संप० । "न्यञ्च समिधं व्रते प्रत्ते-प्रत्तेऽस्वपतइत्याधानम् । (११,८२) ८ सू० "उख्येऽग्नौ यजमानः करोति" संप० । "संव-त्सरभृतिनोऽसंवत्सरभृतेऽपि" ९ सू० । पूर्वं कस्मिं-श्चिदुक्ते साग्निके येनैकवारं संवत्सरमुख्योऽग्निर्भृतो भवति स संवत्सरभृतो तस्यासंभृतेऽप्युख्येऽग्नौ चयनं भवति (९,५,१,६५) संप० "संवत्सरं सोष्यतः" १० सू० । "संवत्सरमभिषवं करिष्यतः असंवत्सरभृतेऽपि चयनं भवति (९,५,१ ६६) क० । "संवत्सराहिताग्नेः" ११ सू० । "असंवत्सरभृतेऽपि चयनमिष्यते" (९,६,१,६७) क० । "जातस्य च" १२ सू० । "संवत्सरे जातस्य च असंवत्-सरभृतेऽपि चयनं भवति" (९,५,१,६८) क० । "गर्भाधानदिनादारभ्य संवत्सरे पूर्णेऽतीते वा यो जात-स्तस्य भवति" संप० । 'षाण्मास्यमन्त्यम्" १३ सू० । "अन्त्यं जघन्यमिदं पक्षान्तरम् षण्मासानुख्यभरणं कृत्वा-ग्निश्चीयत इति (९,५,१,६२) क० । "षाण्मास्यं षण्मासा-नुख्यमग्निं भृत्वा चयनं भवति" संप० । "अचयनं वा परस्मै" १४ सू० । चयनं वेति विकल्पः एवं हि श्रूयते (९, ५,२,१२) त्रयो ह वै" इत्युपक्रम्य परस्मै करोतीति निन्दार्थवादः प्रतिषेधार्थः तस्मादप्येवंवित् कामं परस्मा अग्निं चिनुयादिति ९,५,२,२, प्रतिप्रसवः अतः प्रतिषेधप्रतिप्रसवाभ्यां विकल्पः" संप० । "प्रागनः कृत्वो-ख्यस्योत्तरतः समिदाधानं समिधाग्निमिति (१२,६०) १५ सू० । "उख्यपुरतः प्राङ्मुखमनः कृत्वोख्यएव समिदाधा-नम्" क० । "आसन्दीकमुद्यम्योदुत्वेति (१२,६१) दक्षिण-तोऽनसि करोति" १६ सू० । "आसन्दीकमुख्यमुद्धत्य उत्-क्षिप्यानसो दक्षिणतोऽवस्थितोऽनसि करोति" कर्कः । "स्थाल्यां गार्हपत्यं पश्चात्" १७ सू० । "अनसि करोति दक्षिणाग्निं च द्वितीये करोति" क० । "अनड्वाहौ युक्त्वा

प्रेङ्ख इति (१९,२९) प्राङ् यात्वा यथार्थम्'' १८सू०। "गच्छेत्" क०। "आरोहेत् पार्श्वतो गच्छेत्"१९सू० । 'यजमानः संस्कारात्' क० । "अदे खर्जत्यक्रन्ददग्निरिति (११,३३(जपति'' २०सू० । "खर्जनं च शब्दकरणम्" क० । 'वासेऽवहरत्युद्धतावोक्षितउत्तरतः समिदाधानं प्र-प्रायमिति (१२,३४) २१सू० । "यत्र वासस्तत्रैवावहरणम् न प्रागवसतेः एवं ह्याह (६,८,१,१२) स यदि पुरावसथै विमुञ्चेतानस्यैवाग्निः स्यादिति'' वसत्यां तु उत्तरतोऽग्नेरनवतार्य समिदाधानं "प्र-प्रायमिति" । उद्धतावोक्षितग्रहणं च परिसमूहनाद्युपसंग्रहार्थमपि स्मार्तं ह्येतदनूद्यते (६,४,४,१८) उद्धते वाऽवोक्षितेऽग्निमादधातीति'' एवं च सति तदपचारे स्मार्तं प्रायश्चित्तम्''क० । "वासार्थे रथे उत्तरस्यां दिशि अग्निमवतारयति" संप० । "वनीवाहनमेतद्दीक्षासु यदेच्छेत्'' २२सू० । "वनीवाहनमिति" संज्ञास्य कर्मणः सा च संव्यवहारार्था "ऊर्ध्वं वनीवाहनादिति" (२५सू०) तच्च दीक्षासु कर्तव्यम् । यदेच्छोपजायते महावीरकरणयूपच्छेदनवनीवाहनानि दीक्षासु क्रियन्ते क्रमस्तु नैषाम् पाठाभावात्'' क० "अप्सू ध्वमश्वावपनं क्रयणीयादौ'' २३सू० । उख्यमश्वावपनमप्सु कर्तव्यम् आदौ क्रयणीयस्याह्नः''क०। "अन्यत्र चेच्छन्"२४सू०। "करोति"क०। "ऊर्ध्वं वनीवाहनात् क्रमयोगात्'' २५सू० । अन्यत्रेच्छया कुर्वन् वनीवाहनादूर्ध्वं करोति मन्त्राणां पाठक्रमयोगात्'' क० । "वनीवाहनादूर्ध्वं सोमक्रयदिने आदौ अन्यत्र दीक्षा भस्मावपनम् । कुतः क्रमयोगात् पूर्वं वनीवाहनमन्त्राः पश्चाद्भस्मापोऽभ्यवहरणस्य'' संप० 'पलाशपुटेनापो देवीरित्येकया (१२,३५) २६सू० । "पलाशपुटेन भस्म गृहीत्वाप्स्वावपति"क० । "ततो द्वाभ्याम्'' (१२,३६-३७) २७ सू० । "पुनश्चावपति द्वाभ्यामृग्भ्याम्''क० । "आद्याभ्यां (१२,३५-३६) वा पूर्वम्'' २८सू०। "पूर्वमावपनं द्वाभ्यामृग्भ्याम् तत एकयर्चा'' वाशब्दो विकल्पार्थः तुल्यश्रुतित्वात्'' क०। "अनामिकया प्रास्तादादत्ते प्रसद्येति (१२,३८-४१) २९सू० । "प्रास्ताद्भस्मनः कियदप्यनामिकयादत्ते'' (६,८,२,७) । 'प्रास्योखामुपतिष्ठते बोधा मइति'' (१२,४२) ३०सू०। 'यत्तदात्तं भस्म तत्प्रास्य'' क० । "प्रायश्चित्तिं समिधोपहत्य'' ३१सू० । ६कण्डिका ।

'आज्यं तिस्रकर्श्वइति (१२,४३) जुहोति'' १सू० । "प्रायश्चित्तिरित्यस्य होमस्य संज्ञा उपपूर्वस्य हरतिर्ग्रहणार्थो दृष्टोऽन्यत्रापि "अथ स्रुचोपहत्याज्यमिति (२,४, १,२५)'' क० । "समिधा करणभूतया स्रुक्स्थानीयया उपहत्य गृहीत्वा'' संप० । "उत्थाय दधाति समिधं पुनस्त्वेति (१२,४४) २ सू० । उत्थानग्रहणं च प्रतिपत्तित्वात् गुणार्थं चेति । नैमित्तिकान्यत्रैव प्रकरणे पठ्यन्ते तदर्थमाह'' क० "गार्हपत्येऽनुगते निर्मथ्य'' ३ सू० । "आदधाति मन्थनं प्राप्तत्वादवाच्यम् उच्यते प्रायश्चित्तार्थम्' । "प्राजहिते उपशान्ते मथित्वा प्रायश्चित्ती करोति'' संप० । "सुत्यावाहनीये सांकाशिनेन हृत्वाः'' ४सू०। "सुत्यासु वर्तमानासु आहवनीयेऽनुगते सांकाशिनेन हृत्वा तमादधाति'' सांकाशिनशब्दः प्रगुणमेव हृत्वेत्यर्थकः एतच्चोच्यते पूर्ववत्प्रणयनं मा भूदिति'' क०। "आहवनीयेऽतिप्रणीतेऽनुगते सांकाशिनेन हृत्वा ऋजुना सदोहविर्धानमध्यमार्गेणैव हृत्वा'' संप० । "आग्नीध्रीयमुत्तरेण सदः'' ५सू० । "हृत्वा निदधाति उत्तरेण सदो हृत्वेतीभ्रव्युदासार्थः'' क० । आग्नीध्रीयमग्निमनुगतं सदस उत्तरेणैव हृत्वा'' संप०। "प्रष्टञ्जरादाहृतोखेर'' ६सू०। "उख्ये चानुगते पूर्ववत्प्रष्टञ्जरात् अयं तु विशेषः आहृता आहृदुपहरणं च मन्त्रनिवृत्त्यर्थम् । "एतयैवाहृतानुपहरन् यजुरिति (६,६,४,९) श्रुतेः''क० । "उख्येऽग्नावनुगते गार्हपत्यादाहवनीयमन्वग्निरित्याहृत्य (११,१७ समितमित्युपस्थाय (१२,५७ आहृता मन्त्ररहितक्रियामात्रेण पूर्ववदुखां प्रष्टञ्जरात् उखामाहवनीयेऽधिश्रित्योख्यमग्निमुत्पादयेत्'' संप० । "अध्वरप्रायश्चित्तिं च सर्वेषु यथाकालं पूर्वां-पूर्वाम्''७सू० । "अध्वरप्रायश्चित्तिं च करोति सर्वेषु निमित्तेषु तां च पूर्वाम् पूर्वां चशब्दादाग्निकीं च । सर्वग्रहणं च भस्मापोऽभ्यवहरणार्थम् । (२२) तत्रापि हि विधीयेते (६,८,२,११) उभे प्रायश्चित्ती "करोतिये एवाग्नावनुगते इति'' यथाकालमिति चाध्वरप्रायश्चित्त्यर्थमुच्यते आग्निकी तु विश्वकर्मण इत्येव'' क० "सर्वेषु पूर्वोक्तेष्वग्न्यनुगमेषु यथाकालं परमेष्ठ्यादिकालाहुतिं (२६,६,१) पूर्वां पूर्वां जुहुयात् स्यादग्निप्रायश्चित्तिम् चकारात्'' संप० "उखाभेदने नवस्थाल्यां महामुख्यामुखाकपालमवधायावपति'' ८सू० । यद्येषोखाभिद्येतेति'' (६,६,४,८) प्रकृत्य सर्वमिदमाम्नातम् एतच्चैकोखापक्षे भवति । नित्यपक्षे तु द्वयोरेवैकस्यावपनम्''(६,५,२,२२)क०। "उखोपधाने भिद्या मृदा स-

प्रोखां करोत्यावृता" ९सू० । "उखासखण्डमेकमुखायां प्रक्षिप्तम् द्वितीयमुपशयया सह पिष्ट्वा, आवृता मन्त्रमजर्यम्, आवृच्छब्देन क्रियामात्रमुच्यते तथा चोक्तम् (६,६,४,२) एतयैवावृतानुपहरन् यजुरिति" क० । "आवृता मन्त्ररहिततेतिकर्त्तव्यतया" संप्र०।"पक्वायामावपति कपालं च १०सू०। "पक्वायामुखायाम् अग्निं कपालं च" क०। 'उखोपशये पिष्ट्वा संसृज्य निदधाति"११सू० । "उखाकपालमुपशयां च पिष्ट्वा संसृज्य स्थापयति" क० ।

इदानीं चयनप्रकारमाह । अभ्यात्मं चयनमुपदिश्य" १२सू०। "आत्मनआभिमुख्येन चयनं कर्तव्यम् न पराग्गिति, तथा च नैर्ऋतीषु वचनात्पराक्चयनमुक्तम् (७,२,१,१२) । अपरो विशेषः" "सव्यबाहुमन्तरं कृत्वोत्तरलक्षणाभिरिष्टकाभिः" १३सू०" । "चेतव्यः"क०। "नित्ये सादनसूददोहसाउपधानादुत्तरे तया देवतया ता अस्येति (१२, ५३, ५५,)१४सू० । "सर्वास्विष्टकासु एते नित्ये भवतः तया देवतयेति सादनम् ता अस्येति सूददोहसाधिवदनम्" क० । "अविशेषोपदेशात्" १५सू० । "अविशेषेण ह्यनारभ्य कञ्चिदिष्टकाविशेषमेते श्रूयेते"क० । "विशेषमनुपादाय सामान्येन तयोरुपदेशात् विधानात्" संप्र० । "अनाम्नातप्रतिषेधाच्च" १६सू० । "यत्र नैर्ऋत्यादिषु नाम्नायेते नित्ये संहितायां न पठ्येते तत्रापि प्रतिषेधः श्रूयते (७,१,१,१४)सादनसूददोहसाधिवदतीति" "अतः प्रतिषेधात् सर्वत्राप्येते भवतः" संप्र० । "एकनोदनास्वेकदेशासु तन्त्रेण" १७सू० । एकनोदना अपस्या वपस्या इत्येवमादि, एकनोदना अपि यद्येकदेशा भवन्ति, यथा तासामेव देशभेदः अपस्याः पञ्चपञ्चानूकान्तेषु'त (१७,६,२) अतश्च प्रत्यनूकं नित्ये, देशभेदे त्वसति तन्त्रेणेति"क० । "एकनोदना एकं विधिवाक्यं यासां ताः । एको देश एकमुपधानस्थानं यासां ताः तत्र तन्त्रेण नित्ये भवतः" संप्र० । "आत्मनि यजुष्मतीः" १८ सू०। "इष्टका उपदधाति न पक्षपुच्छयोः" क० (८,७,२,२) । लोकम्पृणासु दशसु दशसु मन्त्रो लोकं पृणेति (१२, ५४) । (९,९,२१२) १९सू०। "आसादनं च" २०सू०। लोकं पृणानाम्, सूददोहसाधिवदनं तु भवति अप्रतिषिद्धत्वात्" क०। 'प्रतिचिति द्वे-द्वे उपधाय" २१सू०। लोकं पृणामन्त्रवचनम्, पुनर्दशसु-दशसु । "प्रथमं द्वे-द्वे उपधाय ततो दश-दशोपदध्यात्" संप्र० । "अयुग्मगणमध्यमानूके" २२सू०। अयुग्मो य इष्टकागणो यथा वालखिल्याः सप्त तासां मध्यमानूके उपधेये" क०। "त्रिपञ्चसप्तादिगणः" संप्र० । "एका च" २३सू० । "या चैकेष्टका साप्यनूक एव, यथा विश्वज्योतिर्हि यजुश्चेत्येवमादि" क०।"अभितो युग्माः"२४सू०।"अनूकमभितोऽर्धार्धिकया युग्मा उपधीयन्ते"क० । "उदञ्चो वर्गाः पूर्वापरे" २५सू० । "यत्र पूर्वापरइति देशव्यपदेशः तत्रोदग्लक्षणा इष्टकावर्गा उपधीयन्ते" क० । "तिर्यगनूकमभितोऽर्धयावधिके पूर्वापरे देशे इष्टकानां वर्गाः समूहाः उदग्लक्षणा उपधेयाः" संप्र० । "प्राञ्चो दक्षिणोत्तरे" २६सू० । 'यत्र तु दक्षिणोत्तरव्यपदेशः तत्र प्राग्लक्षणा इति" क० । "प्रागनूकभितोऽर्धायावधिके दक्षिणोत्तरे प्राञ्चः प्राग्लक्षणाः उपधेयाः" संप्र० । "भिन्नलक्षणयोरचयनम्" (८,७,२, १६) २७ सू० । 'दीक्षाणामुत्तमेऽहनि वेद्यग्निमानम्" २८सू० । "कर्त्तव्यम्"क०। 'उरव्यस्थानेऽर्धव्यामेन गार्हपत्यस्य परिलिखति" २९सू० । "मण्डलमिति शेषः' क० । "मण्डलाद्वा प्रक्रमणमन्तःपात्यस्य"३०सू० । "पूर्वार्धाद्व्यामस्य त्रीन् प्राचः प्रक्रमान् प्रक्रामतीति वचनात् (१०,२,२,१) । 'पूर्वार्धादेव व्यामस्य प्रक्रमणम् न स्तम्भाद्धि प्रक्रमणमनग्नौ चरितार्थम" क० । "सावधारण, मण्डलादेवान्तःपात्यस्य क्रमणम् न पूर्वार्धात् स्तम्भात्" संप्र० । 'पश्चाद्यूपावट्यात्मात्रे चित्यस्य" ३१सू० । यूपावटे भवः शङ्कुर्यूपावट्यः तस्मात्पश्चात् पद्मालोकमात्रे चित्यस्याग्निक्षेत्रस्य स्थानं भवति" संप्र० । 'यजमानेनोर्ध्वबाहुप्रपदोच्छ्रितेन समस्थितेन वा" ३२सू० । (१०, २,२,६) । "प्रपदोच्छ्रितः पादाग्रे व्यवस्थितः समस्थितः प्रसिद्ध एव, तत्क्रियायानोदितत्वात्प्रक्रमणवदध्वर्युर्मा भूदिति यजमानग्रहणम्' क० । ७कण्डिका ।

"द्विपुरुषां रज्जुं मित्वा"१सू०।"द्विपुरुषां रज्जुं मित्वेति निगदे व्याख्यातम्" । "उभयतःपाशाम्" २सू०। "मध्ये लक्षणम्"३सू०। "अभितोऽर्धपुरुषयोश्च"४सू० । "मध्यमात्लक्षणात् पुरुषपञ्चमे"संप्र० "अर्धे च" ६सू०। "पुरुषपञ्चमस्यार्धे"क० । "अनुपृष्ठ्यामायम्य पाशयोः शङ्कू मध्येऽर्धपुरुषयोश्च" ७सू० । "पाशावुन्मुच्यार्धपुरुषीययोः प्रतिमुच्य दक्षिणायाम्य मध्यमे नितोदं करोति"८सू० । "गर्तम्"संप्र० "उन्मुच्य पाशावेकं मध्यमे प्रतिमुच्य दक्षिणाधिनितोदमायम्य मध्यमे शङ्कुः"९सू० । "तस्मिन् पाशं प्रतिमुच्य पूर्वार्धे च दक्षिणायम्य मध्यमे शङ्कुः"

१०सू० । "पश्चादर्धपुरुषे च" ११सू० । "उन्मुच्य पूर्वार्द्धात् पश्चार्धे प्रतिमुच्य दक्षिणायम्य मध्यमे शङ्कुः" १२सू० । "अभितोऽर्धपुरुषयोश्च" १३सू० । "एवमुत्तरोऽन्तः" १४सू० । "दक्षिणे पार्श्वे पूर्ववदायम्य पञ्चमभागीये शङ्कुः" १५सू० । "तस्मिन् पाशं प्रतिमुच्य पूर्वे चार्धपुरुषीये पञ्चमभागीयार्धपुरुषीययोः सन्निपात्य तस्मिञ्छङ्कुः" १६सू० । "एवं पश्चात्" १७सू० । "एवमुत्तरः पक्षः" १८सू० । "तथा पुच्छं वितस्त्या" १९सू० । इच्छन् पक्षपुच्छाप्ययेषु चतुरङ्गुलंचतुरङ्गुलं संकर्षति विकर्षन्त्ते" २०सू० । "यत्र पक्ष आत्मानमप्येति स पक्षाप्ययः एवं पुच्छाप्ययः । अप्ययेषु पक्षयोः पुच्छस्य च आत्मसम्बन्धिसमीपे चतुरङ्गुलं चत्वारि-चत्वार्यङ्गुलान्युभयोः पार्श्वयोः सङ्कर्षति सङ्कोचयति, तथा अन्ते पक्षपुच्छप्रान्ते उभयोः पार्श्वयोः चतुरङ्गुलं विकर्षति विस्तारयति" संप० । "पञ्चारत्निः-पुरुषो दशपदो द्वादशाङ्गुलं पदं प्रक्रमस्त्रिपदः समविभक्तस्य" २१सू० । "पञ्चारत्नयोः यस्य सः पञ्चभिररत्निभिः पुरुषः दशभिः पदैः पुरुषो द्वादशभिरङ्गुलैः पदम् इत्येवमर्थो न भवति इतः प्रागरत्न्यादीनां लक्षणस्यानुक्तत्वेनासिद्धत्वात्, अतश्चैवम् पुरुषस्य समविभक्तस्य यः पञ्चमो भागः सोऽरत्निः तस्य दशमो भागः पदम्, पदस्य द्वादशो भागोऽङ्गुलम् त्रिभिः पदैरेकः प्रक्रमः इति तु भवति पदस्य सिद्धत्वात्" क० । "परितत्य रज्ज्वा सहितं बहीरज्ज्वेकषष्टे शते परिश्रितो मिनोति" २२सू० । "रज्ज्वा परितत्य सर्वतोवेष्टयित्वा रज्ज्वाबहिर्भागे सहितं रज्जुसंलग्नं यथा भवति तथा एकषष्ट्यधिके द्वे शते परिमिनोति" क० "चतुर्णवतानि वा त्रीणि" २३सू० । चतुर्नवत्यधिकानि त्रीणि शतानि" क० । "ऊर्ध्वाः शर्कराः खाते" २४सू० । "उत्तरेषु पुरुषीयेणैकशतविधात्" २५सू० । "उत्तरेषु अष्टविधादिषु चयनेषु आ एकशतविधात् एकशतविधचयनं यावत् एकाधिकशतपुरुषात्मकं पञ्चमवतितमचयनपर्य्यन्तम् पुरुषीयेण एकैकपुरुषवृद्ध्या अग्निमान भवति तस्माद् सप्तविधमेव प्रथमं विदधीतेति" (१०,२,२,१८) क० "यथाग्निवेदीष्टकाप्रमाणम्"२६सू० । वेदिश्च इष्टकाश्च वेदीष्टकाः तासां प्रमाणं वेदीष्टकाप्रमाणम् तद्यथाग्नि भवति, अग्निमानमनतिक्रम्य यथाग्नि, यथाग्निचेतस्य प्रमाणं वर्द्धते तथा वेदिप्रमाणं वर्धते इष्टकाप्रमाणं च वर्द्धते, न हि वेदिवृद्धिं विना तन्मध्ये वर्धितस्याग्नेर्मानं सम्भवति, नापि इष्टका न वर्धिता वर्धितमग्निचेत्रं पूरयितुं शक्नुवन्ति, अतो युक्तमुभयोर्वृद्धिः" क० । "अन्तःपात्यगार्हपत्ययोरिच्छन्" २७सू० । "पूर्वार्धाद्यामस्य त्रीन् प्राचः स वेद्यन्तः प्रक्रमः प्रक्रमति" (१०,२,३,१) यः प्रक्रमत्रयपरिमितो देशः सोऽन्तःपात्य उच्यते, तस्यान्तःपात्यस्य गार्हपत्यस्य गार्हपत्यचितेश्च इच्छन् इच्छया वृद्धिं कुर्य्यात् इच्छया न कुर्य्यात् तद्वैकउत्तरा" श्रुतेः (१०२,३,६) क० । "उत्तरपक्षस्यापरस्यां स्रक्त्यां परिश्रितो मिनोति जङ्घामात्रीं नाभिमात्रीं मुखमात्रीमिति" २८सू० । "अग्नेरुत्तरपक्षस्यापरस्रक्त्यां पश्चिमकोणे एवम्प्रमाणास्तिस्रः परिश्रितो मिनोति" क० । अत्रसर्व्वत्र चतुरङ्कैः शतपथब्राह्मणाध्यायादि बोध्यम् । त्रिभिः कातीयश्रौतसूत्राध्यायादि द्वाभ्यां शुक्लयजुर्वेदाध्यायादि तेन तत्तत्स्थाने अत्रोक्तप्रतीकयुक्तमन्त्रमूलवाक्यादिकं द्रष्टव्यमिति सङ्केतज्ञापनम् । विस्तरस्तु शतपथब्राह्मणे लिखिताङ्क सूचिताध्यायादौ द्रष्टव्यः ।

इष्टकापथ न० इष्टकायामपि पन्था यस्य अच् समा० इष्टकापथं यस्याधोमुखवायुकरणात् । १वीरणमूले । इष्टकया निर्मितः पन्था अच् समा० । इष्टकानिर्मिते २पथि पु० ।

इष्टकाव त्रि० इष्टका अस्त्यर्थे व । इष्टकायुक्ते ।

इष्टकावत् त्रि० इष्टका+चतुरर्थ्यां मध्वादि० मतुप् मस्य वः । इष्टकासन्निकृष्टदेशादौ स्त्रियां ङीप् ।

इष्टगन्ध पु० कर्मधा० । १सुगन्धौ । इष्टोगन्धोऽस्य । २सुगन्धिद्रव्ये त्रि० ३वालुकायां न० मेदि० ।

इष्टतम त्रि०अतिशयेन इष्ट+तमप् । १प्रियतमे २अतिशयाभीष्टे "यद्यदिष्टतमं लोके"गीता । द्वयोर्मध्ये अतिशयेन इष्टः तरप् । इष्टतरः द्वयोर्मध्ये अतिशयेन इष्टे त्रि० ।

इष्टदेव पु० इज्यते यज-कर्मणि क्त कर्मधा० । १पूज्ये देवे तन्त्राद्युक्तविधानेन यस्य मन्त्र उपास्यतया गृहीतस्तस्मिन् २देवे च । इष्टदेवताप्ययोप्यत्र स्त्री ।

इष्टनि त्रि० यज–तनिक् संप्र० इष–तनिक् वा । १यष्टव्ये २एष्टव्ये च । "तुविम्रक्षिरप्रस्ततोषूर्दरास्तिष्टनिरार्त्तनास्तिष्टनिः" ऋ० १,१२७,६ । "इष्टनिरेष्टव्योयष्टव्यो वा"भा० । [व्याकरणोक्तसंस्कारानुसारेण प्रयोगे ।

इष्टप्रयोग पु० इष्टस्य शिष्टप्रयुक्ततया निश्चितस्य प्रयोगः ।

इष्टवत् न०यज–इष वा क्तवतु स्त्रियां ङीप् । १यजनकर्त्तरि २इच्छायुक्ते च । "इष्टं वेदाध्ययनादिः साध्यतयाऽस्त्यस्य मतुप् मस्य वः । ३इष्टकर्म्म कर्त्तरि । वेदे तु पूर्व्वपददीर्घः इष्टावान् "इष्टावन्तोरातिषाचोदधानाः" अथ० १८,३,

२० । "इष्टिभिः पशुबन्धैश्च चातुर्मास्यैस्तथैव च । अग्निष्टोमादिभिर्यज्ञैर्येन चेष्टं स इष्टवान्" व्यासोक्ते ४इष्ट्यादिकारिणि त्रि०। स्त्रियां ङीप् ।

इष्टव्रत त्रि० इष्टं व्रतं यस्य । १व्रतशीले इष्टानि कल्याणानि व्रतानि कर्म्माणि सिध्यन्ति येन। २इष्टकर्म्मसाधने अन्नादौ "इष इष्टव्रता अकः" ऋ० २,५९,९ । "इष्टानि कल्याणानि व्रतानि कर्माणि याभिः सिध्यन्ति ता इषः अन्नानि" भा० ।

इष्टसाधन न० ६त० । अभीष्टसाधने इच्छाशब्दे उदाहृतिः । ततो भावे त्व । इष्टसाधनत्व तद्भावे न० । तल् । इष्टसाधनता तद्भावे स्त्री ।

इष्टा स्त्री इज्यतेऽनया यज–करणे बा० क्त । शमीवृक्षे राजनि० तत्समिधा होज्यते इति तस्याः तथात्वम् कर्म्मणि क्त । अभिमतायां स्त्रियाम् ।

इष्टाकृत त्रि० अनिष्टमिष्टं कृतम् इष्ट+च्व्यर्थे डाच् कर्म्मणि क्त । इष्टीकृते "सतामिष्टाकृतं नाम पूर्वांवरसहस्रिकम्" रामा० ।

इष्टादि पु० "इष्टादिभ्यश्च" पा० सूत्रेण तत्कृतमनेनेत्यर्थे विहितेनिप्रत्ययनिमित्तभूतशब्दसमूहे स च गणः । "इष्ट पूर्त्त उपसादित निगदित परिगदित परिवादित निकथित निषादित निपठित संकलित परिकलित संरक्षित परिरक्षित अर्च्चित गणित अवकीर्ण आयुक्त गृहीत आम्नात श्रुत अधीत अवधान आसेवित अवधारित अवकल्पित निराकृत उपकृत उपाकृत अनुयुक्त अनुगणित अनुपठित व्याकुलित" आकृतिगणस्तेन "हठेन पठितो माल्विन् खलः स्वेतठ" नैष० ।

इष्टापत्ति स्त्री ६त० कर्म्मधा० वा । १इष्टस्यापत्तौ इष्टायामापत्तौ च वादिना दर्शितापत्तेः प्रतिवादिन इष्टत्वे हि सा भवति । "इष्टापत्तौ दोषान्तरमाह" जग० ।

इष्टापूर्त्त न० इष्टं च पूर्त्तञ्च द्वयोः समाहारः पूर्वपददीर्घः । इष्टशब्दोक्ते अग्निहोत्रादौ "वापीकूपतड़ागादि देवतायतनानि च । अन्नप्रदानमारामः पूर्त्तमित्यभिधीयते" इति मनूक्ते पूर्त्ते च । "वितयन्तु वदेयुर्थे धर्मं प्रह्लाद पृच्छते । इष्टापूर्त्तञ्च ते घ्नन्ति सप्त सप्तपरावरान्" भा० स० ६६अ० । "इष्टापूर्त्तेन च तथा वक्तव्यमनृतं न तु" भा०प०१९५अ०। "इष्टापूर्त्तफलं न स्यान्न शिष्यो न गुरुर्भवेत्" भा०व०२२अ० । कचित् इतरेतरद्वन्द्वोऽपि द्वि०व० । "इष्टापूर्त्ते संसृजेथामयञ्च" यजु० १०,५४ ।

इष्टार्थोद्युक्त त्रि० इष्टे अर्थे उद्युक्तः । उत्सुके इष्टार्थलाभाय त्वरमाणे कालासहिष्णौ ।

इष्टाश्व त्रि० इष्टोऽश्वोयस्य । १प्रियहये २राजभेदे पु० । "किमिष्टाश्व इष्टरश्मिरेतः" ऋ०१,१२२,१३ । "इष्टाश्व एतन्नामको राजा" भा० ।

इष्टि स्त्री यज–क्तिन् । १यागभेदे । स च कात्या०श्रौ०सू० दर्शितः "कर्मशब्दो द्रव्यदेवतायुक्तो यजतिः"। ४,३,१,सू० "क्रियाशब्दः आख्यातप्रत्ययान्तो निर्वपत्यादिशब्दो यजतिः प्रत्येतव्यः यागो ज्ञेय इत्यर्थः न निर्वापालम्भादिरूपसंस्कारमात्रविधायकः यजतिशब्दोऽत्र तदर्थयागपरः । एवं यागत्वे सिद्धेऽपि इदं संदिह्यते सौर्यं चरुं निर्वपेदग्निषोमीयमजमालभेतेत्यादौ किं यागमात्रं भवति उत धर्मा अपि भवन्तीति यदा च धर्मा भवन्तीति पक्षस्तदापि संदेहः किं पूर्णाहुतिसम्बन्धिनो धर्मा भवन्ति उताग्निहोत्रसम्बन्धिनः, आहोस्विद्दर्शपूर्णमासयोः, अथवा ज्योतिष्टोमस्येति, अथवा दर्शपूर्णमासयोरेवेति, । धर्माणामनाम्नानाद्यथाश्रुतं यागमात्रं कर्तव्यमिति प्राप्ते आह" क० "दर्शपूर्णमासधर्मा इष्टिपशुषु सामर्थ्यात्" २सू० । सौर्यादौ धर्मा भवन्ति न यागमात्रम् एवमेतानि विधिवाक्यानि समर्थान्यर्थवन्ति सप्रयोजनानि भवन्ति अन्यथा साकाङ्क्षत्वादर्थप्रतिपादनाभावेन निरर्थकान्येव स्युः । तथा हि सौर्येण यागेन ब्रह्मवर्चसं भावयेदित्यत्रांशत्रयवती भावना विधीयते किम्, केन, कथमिति, किमंशो ब्रह्मवर्चसम्, तत्र केनांशः सौर्येणेति, कथमंशस्तु वाक्यमध्ये नास्ति तेन कथं भावयेदिति वाक्यं कथमंशसापेक्षम् । यच्च सापेक्षं भवति तदध्याहारेणानुषङ्गेण वा पूरयित्वा निराकाङ्क्षं कर्तव्यम् । अन्यथा तस्यानर्थक्यापत्तेः न च वेदे मात्रामात्रस्य तदिष्यते तस्मादत्र निराकाङ्क्षीकरणाय विध्यन्तेतिकर्तव्यतापरपर्यायः कथमंशोऽत्र कश्चिदनुषञ्जनीय इति सिद्धे आह "दर्शपूर्णमासधर्म्मा इष्टिपशुषु सामर्थ्यादिति" सर्वासु इष्टिषु अग्नीषोमीये पशौ च दर्शपूर्णमासयोरेव धर्मा भवन्ति सामर्थ्यात् पूर्वोक्त एव हेतुरत्रापि योज्यः । दर्शपूर्णमासधर्मा एव सौर्यादिविधीनां शेषीभवितुं समर्थाः चरुपुरोडाशादयो ह्यवघातादिभिरेव सिध्यन्ति नाभिषवादिभिरिति । इष्टिपशुष्विति इष्टिषु सर्वासु अग्नीषोमीये पशौ च पश्वन्तरेषु ह्यग्नीषोमीयधर्मा भवन्ति" क० । इत्यारभ्य पञ्चविंशत्या सूत्रैस्तद्विशेष उक्तस्तत्र विस्तरेणावसेयः । तथा च दर्शपौर्णमासेतिकर्तव्यताको यागभेद इष्टिरग-

न्तव्या ।तत्करणप्रकारः आश्व॰ श्रौ॰ सूत्रे दर्शितो "यथा पौर्णमासेनेष्टिसोमा उपदिष्टाः" । २,१,१, प्रथमेऽध्याये दर्शपूर्णमासौ व्याख्यातौ विध्यन्तरसहितौ । उत्तरत्रेष्टयः पशवश्च वक्ष्यन्ते विध्यन्तरविहिताः । तेषां विध्यन्तरापेक्षास्ति" "अतोऽयमर्थः सूत्रस्य, यस्मिन्काले उपदिष्टा इष्टयः पशवश्चापि अविशेषिताज्यभागास्ते सर्वे वार्त्रघ्नाज्यभागा इति" । "पौर्णमासेनेत्यस्यायमर्थः, पौर्णमासेन व्याख्याता इति वार्त्रघ्नाज्यभागा इत्यर्थः । तेन समाम्नातानामिष्टीनां पशूनाञ्च अन्यदेवतागमनात् सिद्धो भवति । तथा चोक्तमिष्ट्ययनप्रकरणे "असमाम्नातास्तर्हि तन्त्रविकाराः" नारा॰ वृत्तिः तस्य कालस्तत्रैव दर्शितः यथा "तैरमावास्यायां पौर्णमास्यां वा यजेत" सू॰ २,१,२, "तैरिष्टिपशुसोमैरमावास्यायां पौर्णमास्यां वा यागः कर्तव्य इति इष्टिपशूनां प्रकृतिप्राप्त एवायं कालः पुनर्विधीयते द्व्यहकालतां निवर्त्य सद्यस्कालताप्राप्त्यर्थम् । किञ्च दर्शप्रकृतेरमावास्या पौर्णमासप्रकृतेः पौर्णमासीत्येवं नियमं निवर्त्य अनियमेन उभयकालताप्राप्त्यर्थम् । प्रकृत्यविरोधात् पर्वसन्धिद्व्यहोरात्रे विकृतिः कर्तव्या । यद्यह्नः पूर्वभागे पर्व स्यात् तदा प्रकृतिं कृत्वा विकृतिः कार्या । यदा परभागे रात्रौ वा तदा विकृतिं कृत्वा प्रकृतिः कार्येति सोमस्यायमप्राप्तः कालो विधीयते । इज्यादिशब्दसम्बन्धादेव यजेतेत्यपि सिद्धे यजेतेतिवचनं सोमस्य याग एवानयोः कालयोः सम्पादनीयो नान्यत् दीक्षादीति" वृत्तिः । "राजन्यस्याग्निहोत्रं जुहुयात्" ३सू॰ । "क्षत्रियस्याग्निहोत्रहोमः पर्वणोरेव कर्तव्यो नान्यस्मिन् काल इति चशब्दाद्वैश्योऽप्यनयोरेव कालयोरग्निहोत्रं जुहुयात् नान्यस्मिन्नित्यवगम्यते । अत विशेषमाह" वृत्तिः । "तपस्विने ब्राह्मणायेतरं कालं भक्तमुपहरेत्" ४सू॰ । "तपस्वी कर्मनिरतस्तस्मै ब्राह्मणाय अतपस्विनेऽपि ब्राह्मणायैव दद्यात् न जात्यन्तराय तपस्विनेऽपीति । इतरं कालमिति, इतरेषु सर्वेष्वग्निहोत्रकालेष्वित्यर्थः । भक्तमुपहरेत्, भक्तं पक्वौदनं पक्वान्नमुपहरेत्, दद्यात् । एतदुक्तं भवति । राजन्यवैश्ययोः पर्वण्यग्निहोत्रकालद्वयं वर्जयित्वा इतरेषु कालेषु ब्राह्मणायौदनो दातव्यो न होमः कर्तव्य इति । अग्निधारणन्तु क्रियत एव" वृत्तिः । ततोऽग्न्याधानं प्रसक्तादुक्तं तच्चाधानशब्दे पूर्वं दर्शितम् अग्न्याधानोत्तरं कर्त्तव्यमाह "यदि त्विष्टयस्तनुयुः" २,१,१८, सू॰ "अग्नीनेवेति वाक्यशेषः । यद्यनधिकारत्वादाधानविधेर्विनियोजकस्य प्रकरणस्य व्यापारासम्भवादाधानाङ्गमिष्टयो न स्युः, इष्टीनाञ्चानधिकारत्वादिष्ट्यङ्गमाधानं न स्यात्, तथापि न कश्चिद्दोषः, अग्न्यर्थत्वेनैवोभयोरप्यनुष्ठानसिद्धेः" । "अस्मिन्नर्थे सूत्रयोजना । यद्यप्यासामिष्टीनामाधानाङ्गता स्यात् तथापि आहवनीयाद्यग्निसम्बन्धात् तानेवाग्नीनिष्टयस्तनुयुः विस्तारयेयुः कुर्युः साधयेयुरित्यर्थः । तुशब्दस्तु साधनादिषु विशेषं दर्शयति । आधानेऽग्नीनां साध्यत्वेन सम्बद्धानामेव साध्यत्वम् । इष्टिषु साधनत्वेन सम्बद्धानामपि कल्पनागौरवभयात् साध्यत्वमिति विशेषं गृह्णीमः एवं यद्याधानेनेष्टिभिश्चाग्नय एवांशतः साध्या इत्यनधिकाराणां कथमनुष्ठानसिद्धिरिति न्यायाविदामेष उपालम्भो नास्माकम् । अस्माकं तु साध्यसाधनसम्बन्धेऽवगते तदर्थिनां कर्तृत्वेनावगतानां ब्राह्मणादीनां कथञ्चिदधिकारकल्पनयानुष्ठानसिद्धिः । अथवाऽनधिकाराणामनन्यशेषाणामपि तत्साधनसाध्यरूपेणोपकारकत्वेन कामं श्रुतिप्रयुक्त्यैवं विधानामनुष्ठानसिद्धिरित्यलमतिविस्तरेण" नारा॰ वृत्तिः । ""प्रथमायामग्निरग्निः पवमानः" १८ सू॰ । "प्रथमायामिष्टौ द्वे देवते । अग्निः प्रथमः केवलः । द्वितीयः पवमानगुणकोऽग्निः । केवलस्याग्नेर्नित्ये एव । "अग्न आयूंषि पवसेऽग्ने पवस्व स्वपाः" २०सू॰ । "एते द्वितीयस्य पवमानगुणकस्य" वृ॰ । 'स हव्यवाडमर्त्याऽग्निर्होता पुरोहित इति स्विष्टकृतः संयाज्ये इत्युक्ते सौविष्टकृती प्रतीयात्" २१सू॰ । "सौविष्टकृत्योर्याज्यानुवाक्ययोर्षघोरनेन संयाज्ये इति संज्ञा विधीयते" वृ॰ । "सर्वत्र देवतागमे नित्यानामपायः" २२ सू॰ । "सर्वत्रेति प्रकरणान्तरेऽपीति दर्शयति । देवतागम इत्यत्र समासनिर्देशस्य तुल्यत्वाद्देवताया: देवतयोर्देवतानां वा आगम इत्येवं भवति । नित्यानां प्राकृतीनामित्यर्थः । अपाय उद्धार इत्यर्थः । एतदुक्तं भवति । विकृतौ देवतायाः एकस्या आगमे द्वयोर्बह्वीनां वा अनागमेऽपि प्राकृतीनां सर्वासामुद्धार इति यां पुनर्विकृतौ इष्टिनोदनां कृत्वा देवतां न विदधाति, तत्र नोद्धारः प्राकृतीनाम् । तत्र ता एव देवता भवन्तीत्यर्थः । यथा गदितः सोमेन यक्ष्यमाण इष्ट्या वा इत्यादौ" वृ॰ । "याः स्विष्टकृतमन्तराज्यभागौ च तास्तत्स्थाने" २३सू॰ । "नित्यानामपाय उक्तः । तत्र किं सर्वा नित्या उद्धर्तव्याः उत काचिद्देवतेत्येतं संशयं निवर्तयति या आज्यभागौ स्विष्टकृतं चान्तरा देवता यष्टव्यास्ता उद्धर्तव्याः । याः पुनर्विकृतौ विहितास्तास्तत्स्थाने उ-

भूतानां प्राकृतीनां स्थाने भवन्ति” इति वचनात्, तद्धर्मिकाश्च भवन्तीति गम्यते” वृ०। “एष समानजातिधर्मः” २४सू०। “योऽयमतिदिष्टो विधिर्देवताभ्योऽन्यत्रापि स समानजातीयेषु भवति। समानजातीय एककार्यं इत्यर्थः” वृ०। “द्वितीयस्यां वृधन्वन्तौ अग्निः पावकोऽग्निः शुचिः स नः पावकदीदिवोऽग्ने पावकरोचिषाग्निः शुचिव्रततन उदग्ने शुचयस्तव” २५ सू०। “एकः पावकगुणकोऽग्निः, अपरः शुचिगुणकः। ‘साह्वान् विश्वा अभियुजोऽग्निमीले पुरोहितमिति संयाज्ये तृतीयस्यां सामिधेन्यावावपते प्रागुपोत्तमायाः पृथुपाजा अमर्त्यइति द्वे”२६सू०।“आवपते इति वचनात् अधिके एते सामिधेन्यौ भवतः। प्रथमायां द्वितीयस्यां तृतीयस्यामिति वचनात् यस्यामिष्टौ यत् तन्त्रं विहितं तस्यामेकदेवतायामपि तत् तन्त्रं भवति न यथोक्तनानादेवतायामेवेति” वृ०। “ध्याय्ये इत्युक्त एते प्रतीयात् पुष्टिमन्तावग्निना रयिमश्नवद्द्वयस्मानो अमीवहेति। अग्नीषोमाविन्द्राग्नी विष्णुरिति वैकल्पिकानि” २७सू०। “त्रयाणामेको गृह्यते” वृ०। “अदितिः” २८सू०। “अदितिश्चान्या, अस्यां द्वे देवते” वृ०। ‘उत त्वामदिते सुव्रतानामृतस्य पत्नीमवसे हुवेम तुविक्षत्रामजरन्तीमुरूचीं महि महीमूषु मातरं सुशर्माणमदितिं सुप्रणीतिम्” २९सू०। “एषा कल्पजा” वृ०। “प्रेद्धो अग्न इमो अग्न इति संयाज्ये विराजावित्युक्त एते प्रतीयादिति तिस्रः” ३०सू०। “इत्येतास्तिस्र इष्टयोऽनुक्रान्ता इत्यर्थः। उक्तानुकीर्त्तनमुत्तरार्थम्। यदाद्योत्तमे वैव स्यातामाद्या वेति पक्षस्तदापि तिसृणामिष्टीनां यावत्यो देवतास्ताः सर्वा यष्टव्या इत्येवमर्थम्। आद्योत्तमपक्षे मध्यमायां ये देवते ते आद्यायामेव प्रक्षेप्तव्ये। यदा पुनराद्यैव तदा सर्वा देवता आद्यायामेव प्रक्षेप्तव्या इत्येवमर्थम्’ वृ०। “आद्योत्तमे वैव स्याताम्”३१सू०। “इष्टी इति शेषः। ‘आद्या वा” ३२सू०। “आद्यैवेष्टिर्भवतीत्यर्थः’ वृ०। ‘तथा सति तस्यामेव धाय्ये विराजौ” ३३सू०। “यद्याद्यैव भवति तदा द्वितीयतृतीययोरपि देवतास्तत्र भवन्तीत्युक्तम्। अतस्तस्यामेव धाय्ये विराजौ भवतः। धाय्याविराजामनुप्रवेशस्य निमित्तं तृतीयस्या इष्टेर्देवतानुप्रवेश इत्येवमर्थं तथा सतीत्युक्तम्’वृ०। ‘‘इतिमात्रे विकारे वैराजतन्त्रेति प्रतीयात्” ३४सू०। “पौर्णमासतन्त्रायामिष्टौ धाय्याविराण्मात्रे विकारे सति सेष्टिर्वैराजतन्त्रेति वेदितव्या’वृ०।

‘आधानाद्वु द्वादशरात्रमजस्राः” ३५सू०। “अत्राधानमिष्टीश्चोक्त्वा आधानादूर्द्ध्वं द्वादशरात्रमजस्रा इत्युक्तम्। तस्यायमभिप्रायः, यावता कर्मसमुदायेनाग्नीनां सिद्धिर्भवति तावतः कर्मसमुदायस्याधानशब्दो वाचक इति ज्ञापयितुम्। तेनाग्न्याधेयं पुनराधेयं वेत्यत्र सेष्टिकस्याधानस्य ग्रहणं भवतीति सिद्धम्। आधानेनेष्टिभिश्च सिद्धाग्नयो द्वादशाहोरात्राणि सर्वे स्वरूपेणैव धार्यन्ते। एतदजस्रधारणमग्निहोत्रपूर्व एवाधाने भवति, अग्निहोत्रस्यैवानन्तरमुच्यमानत्वात्। अनुष्ठानक्रमेणैव कर्मणां व्याख्यानमित्युक्तत्वाच्च” वृत्तिः। एवमिष्टिसामान्यं प्रदर्श्य विशेषेष्टयस्तत्र दर्शिताः तत्रादौ नवशस्येष्टिः साचाग्रायणशब्दे दर्शिता तत्र राज्ञ एवाधिकारः त्रयाणां वर्णानामविशेषेणेतिकल्पद्वये प्राप्ते राज्ञो विशेष उच्यते “इष्टिस्तु राज्ञः” “सर्वेषां चैके एके सर्वेषामिष्टिरेवेति मन्यन्ते” २,९,६,७,। ‘श्यामाकेष्वग्रासौम्यचरुः स च वर्षर्त्तौ तत्र याज्यादिकं २,९,८,९,१०, सू०उक्तम्। अन्यनवान्नभोजने जप्यमन्त्रादिकमुक्तम् १२,१३। एतानित्या इष्टयः अथ काम्याः इष्टयः २,१०,१२, सूत्रादौ। तत्र आयुष्कामेष्टिस्तत्र अग्निगुणभेदजीवातुमद्देवता २,१०,२,३,४, सू०। स्वस्त्ययनेष्टिः रक्षितवद्देवताका तत्र याज्यादिकम् ५,६,७, पुत्रकामेष्टिः पुत्रवद्गुणकाग्निदेवताका तत्र याज्यादि ८,९, १०, वैमृधेष्टिः विमृद्गुणकेन्द्रदेवताका तत्र याज्यादिकं १३,१४,१५, सू०। आशेष्टिराशापालदेवताका तत्र याज्यादिकम् १७,१८, सू०। लोकेष्टिः पृथिव्यन्तरिक्षदेवताका तत्र याज्यादिकम् २०,२१,२२, सू० मित्रप्राप्तिकामेष्टिः अग्निसोमवरुणमित्रेन्द्रबृहस्पतिसवितृपूषन्सरस्वतीदेवताका तत्र याज्यादि ११,२,३,४,३। इयमिष्टिः महावैराजीनाम्ना। अभिचारकामेष्टिः सुपाश्वद्गुरीयनाम्नी सूरगुणकेन्द्रदेवताका तत्र याज्यादि ११,७,८,९। विमतसम्मतिकामेष्टिः संज्ञानी नाम वसुरुद्रादिगुणकाग्निसोमादिचतुष्टयदेवताका तत्र याज्यादि १०,११। भेदकामेष्टिः। इन्द्रामरुद्देवताका तत्र याज्यादि १३,१४,१५,१६,सू०। सम्पत्तिकामेष्टिः ऐन्द्रामारुती संज्ञानीवत् याज्यादिकम्। १७,सू०। शत्रभिभवनिवृत्तिकामेष्टिः ऐन्द्राबार्हस्पत्या तत्र याज्यादि १८१९ सू०। पवित्रेष्टिः। अग्न्यादिदेवताका तत्र याज्यादि २,१२,१। “वैश्वानरीं व्रातपतीं पवित्रेष्टिं तथैव च। ऋताष्टतौ प्रयुञ्जानः पुनाति दशपौरुषम्”। वृष्टिकामेष्टिः कारीरी नाम सा च अग्न्यादि-

नामादेवताका अग्निदेवताका वा तत्र याज्यादि २,१२,१,२,४,५,६,७,८,९,सू० । सर्वाश्च एता दर्शपौर्णमासेतिकर्तव्यताकाः । पशुगुणके कर्म्मणि पशोरुभयतोऽन्यतरतो वा पशुकामेष्टिः सा च आग्नेयी आग्नावैष्णवी वा आश्व० श्रौ०सू० ३,१,२,३,४ सू०। तस्यामितिकर्त्तव्यतायाज्यादि तदुत्तरसूत्रजातैरुक्तम्। विध्यपराधप्रायश्चित्तीष्टिः ३,१०,१,सू० विध्यपराधस्वरूपकारणप्रदर्शनपूर्वकं तत्करणप्रकारादि तदुत्तरसूत्रजातैर्दर्शितम् । वारुणीष्टिः तत्प्रकारादि ३,१२,५, प्रातःकालातिपत्तौ प्रातरिष्टिः तत्र देवतादि ३,१२,१२, आत्त्वाग्निपात्रे च सैवेष्टिः ३,१२,१५ निमित्तभेदेर्थ्यं प्रायश्चित्तीष्टौ देवताभेदादि ३,१२,१६, आरभ्य आध्यायात् सूत्रैरुक्तम् । उखासम्भरणीयेष्टिः तद्देवतादि ४,१,२१ २६सू०। दीक्षाप्रयोजनेष्टिः दीक्षणीया नाम तत्रदेवतादि ४,२,१,१८, सू०पर्य्यन्तेनोक्तम् । प्रायणीयेष्टिः तत्र देवतादि ४,२,१सूत्रादौ। आतिथ्येष्टिः तत्र देवतादि ४,५,१सूत्रादौ । उदयनीयेष्टिः तद्देवतादि ६,१४,१, सूत्रादौ उदवसनीयेष्टिः तद्देवतादि ६,१४,१,२३, सूत्रादौ । अन्याः पुनराधेयेष्टिप्रभृतयोऽपि इष्टयः विस्तरभयान्नोक्ताः आकरेषु द्रष्टव्याः ।

शत०ब्रा० १,६,२,१२, इष्टिकरणप्रकारविशेषो दर्शितःयथा। "स यदीष्टिं कुर्व्वीत सप्तदश सामिधेनीरनुब्रूयादुपांशु देवता यजति तद्धीष्टिरूपं, मूर्द्धन्वतौ याज्यानुवाक्ये स्यातां वार्तघ्नावाज्यभागौ, विराजौ संयाज्ये" "अग्नेरिष्टिमभिधाय अथ पृथक् प्रयोक्तव्याया आग्नेयेष्टेर्वैशेषिकमङ्गजातमाह । यदीष्टिं दर्शपूर्णमासाभ्यां पृथगेव कुर्व्वीत प्रधानदेवता उपांशु यजेत तदुपांशुत्वं काम्येष्टिरूपं खलु । मूर्द्धन्वत्यौ 'अग्निर्मूर्द्धा'' 'भुवो यज्ञस्य' इत्येते। (यजु०१३,१४,१५,) मूर्द्धन् शब्दवत्यौ प्रधानस्य याज्ये स्विष्टकृद्याज्यापुरोऽनुवाक्ये, विराजौ विराट्छन्दस्कौ 'प्रेद्धो अग्ने" 'इमो अग्न" इत्येते (यजु०१७,७६,७७,) भवतः" भा० दर्शपौर्णमासयागं कृत्वा प्रायश्चित्तेष्टिः कार्य्या तत्प्रकारः शत०ब्रा० ११,१,२,१,दर्शितो यथा।"पौर्णमासेनेष्ट्वा इन्द्राय विमृधेऽनुनिर्वपति तेन यथेष्ट्यैवं यजतआमावास्येनेष्ट्वा-अदित्यै चरुमनुनिर्वपति तेन यथेष्ट्यैवं यजते १ । स यत्पौर्णमासेनेष्ट्वा इन्द्राय विमृधेऽनुनिर्वपतीन्द्रो वै यज्ञस्य देवतायैतदग्नीषोमीयं पौर्णमासं हविर्भवति तत्र नेन्द्राय त्वेति किं चन क्रियते एतेनो हास्यैतत् ऐन्द्रं हविर्भवत्येतेन ऐन्द्रो यज्ञोऽथ यद्विमृधे त्वेति सर्वा उ हि मृधो नाष्ट्राः पौर्णमासेन हन्ति २ । अथ यदामावास्येनेष्ट्वा अदित्यै चरुमनुनिर्वपत्येष वै सोमो राजा देवानामन्नं यच्चन्द्रमाः स यत्रैष एतां रात्रिं न पुरस्तान्न पश्चाद्ददृशे तेनैतदनद्धेव हविर्भवति तेनाप्रतिष्ठितमियं वै पृथिव्यदितिः सेयमद्धा सेयं प्रतिष्ठितैतेन हास्यैतदद्धेव हविर्भवत्येतेन नाप्रतिष्ठितमेतन्नु तद्यस्मादनुनिर्वपत्यथ तस्मादनुनिर्वपेत् ३ । स यत्पौर्णमासेनेष्ट्वा इन्द्राय विमृधेऽनुनिर्वपति ऐन्द्रो मे यज्ञोऽसदिति सर्वो वै यज्ञ इन्द्रस्यैव स यत्सर्वो यज्ञ इन्द्रस्यैवैतेनो हास्यैतत् ऐन्द्रं हविर्भवत्येतेन ऐन्द्रो यज्ञः ४ । अथ यदामावास्येनेष्ट्वा अदित्यै चरुमनुनिर्वपत्यामावास्यं वा अनुनिर्वाप्यं पौर्णमासेन वा इन्द्रो वृत्रमहंस्तस्मा एतद्वृत्रं जघ्नुषे देवा एतद्धविरनुनिरवपन् यदामावास्यं किमनुनिर्वाप्येऽनुनिर्वपेदिति तस्मान्नानुनिर्वपेत् ५ । स यत् पौर्णमासेनेष्ट्वा अथान्यद्धविरनुनिर्वपत्यामावास्येनेष्ट्वाथान्यद्धविरनुनिर्वपति द्विषन्तं ह स भ्रातृव्यं प्रत्युच्छ्रयतेऽथ यः पौर्णमासेनैव पौर्णमासीं यजतआमावास्येनामावास्यामसपत्ना हैवास्यानुपबाधा श्रीर्भवति ६ । पौर्णमासेन वै देवाः पौर्णमासीं यजमाना आमावास्येनामावास्यां क्षिप्रएव पाप्मानमपाघ्नत क्षिप्रे प्राजायन्त स यो हैवं विद्वान् पौर्णमासेनैव पौर्णमासीं यजतआमावास्येनामावास्यां क्षिप्रएव पाप्मानमपहते क्षिप्रे प्रजायते स यद्यनुनिर्वपेद्द्याद्दक्षिणां नादक्षिणं हविः स्यादिति ह्याहुर्दर्शपूर्णमासयोर्ह्येवैषा दक्षिणा यदन्वाहार्य इत्यनुनिर्वाप्यस्याथाभ्युदितस्य ७" २कण्डिका ।"अद्यामावास्येति मन्यमान उपवसति । अथैष पश्चाद्ददृशे स हैष दिव्यः श्वा, स यजमानस्य पशूनभ्यवेक्षते तदपशव्यं स्यादप्रायश्चित्तिकृत एतस्मादु हैतद्भीषा वचन्द्रमसादिति' १ । छायामुपसर्पन्ति । एतेनो हैतदुपतपदाचक्षते श्वलुचितमित्येतस्मु हैवैतदाचक्षते २ । शशश्चान्द्रमस इति । चन्द्रमा वै सोमो देवानामन्नं तं पौर्णमास्यामभिषुण्वन्ति सोऽपरपक्षेऽप ओषधीः प्रविशति पशवो वा अप ओषधीरदन्ति तदेनमेतां रात्रिं पशुभ्यः संनयति ३ । सोऽद्यामावास्येति मन्यमान उपवसति । अथैष पश्चाद्ददृशे तद्यजमानो यज्ञपथादेति तदाहुः कथं कुर्यादित्या यज्ञपथाद्यजेता३ न यजेता३ इति यजेत हैव न ह्यन्यदपक्रमणं भवति श्वः-श्वः एवैष ज्यायानुदेति स आमावास्यविधिनैवेष्ट्वाथेष्टिमनुनिर्वपति तदहरेव श्वो वा ४ । तस्य त्रीणि हवींषि भवन्ति । अग्नये पथिकृतेऽष्टाकपालं पुरोडाशम्, इन्द्राय वृत्रघ्न एकादशकपा-

लम्, अग्नये वैश्वानराय द्वादशकपालं पुरोडाशम् ५। स यदग्नये पथिकृते निर्वपति। अग्निर्वै पथः कर्ता स यस्मादेवाटो यजमानो यज्ञपथादेति तमेनमग्निः पन्थानमापादयति ६। अथ यदिन्द्राय वृत्रघ्ने। पाप्मा वै वृत्रो यो भूतेर्वारयित्वा तिष्ठति कल्याणकर्मणः साधोस्तमेतदिन्द्रेणैव वृत्रघ्ना पाप्मानं वृत्रं हन्ति तस्मादिन्द्राय वृत्रघ्ने ७। अथ यदग्नये वैश्वानराय द्वादशकपालं पुरोडाशं निर्वपति यत्र वा इन्द्रो वृत्रमहंस्तमग्निना वैश्वानरेण समदहत्तदस्य सर्वं पाप्मानं समदहत्तथोएवैष एतदिन्द्रेणैव वृत्रघ्ना पाप्मानं वृत्रं हत्वा तमग्निना वैश्वानरेण संदहति तदस्य सर्वं पाप्मानं संदहति स यो हैवं विद्वानेतयेष्ट्या यजते न हास्याल्पश्चन पाप्मा परिशिष्यते ८। तस्यै सप्तदश सामिधेन्यो भवन्ति। उपांशु देवता यजति याः कामयते ता याज्यानुवाक्याः करोत्येवमाज्यभागावेवं संयाज्ये ९। तिसृधन्वं दक्षिणां ददाति। धन्वना वै श्वापं बाधन्ते तदेतमेवैतद्बाधते यत्तिसृधन्वं दक्षिणां ददाति १०। दण्डं दक्षिणां ददाति। दण्डेन वै श्वानं बाधन्ते तदेतमेवैतद्बाधते यद्दण्डं दक्षिणां ददात्येषा ऽन्वादिष्टा दक्षिणा दद्यात्त्वेवाश्वामप्यन्यद्यादृतरा दक्षिणास्तासां यत् सम्पद्येत सा सा हैषा पथव्येष्टिस्तयाऽप्यनभ्युद्दृष्टो यजेतैव" ४ क०।

"दर्शयागे पुरस्ताच्चन्द्रदर्शनप्रायश्चित्तेष्टिरुक्ता अथ पश्चात्तद्दर्शने नैमित्तिकोमिष्टिं विधित्सुराह। अथानन्तरं सायंकाले एष चन्द्रमाः पश्चात् प्रतीच्यां दिशि दृश्ये दृश्यते। अभ्येक्षते अभ्यवहर्तुं पश्यति यथा शालावृको वने संचरतो मेषादीन् पशूनभ्यवजिहीर्षति। एतस्मादेव खलु चन्द्रसम्बन्धिस्वरूपेण पूर्वोक्तवत् अकारः समासान्तः तस्माच्चन्द्रादिति भीषा उक्तरूपया भीत्या, छायारूपगच्छन्ति गवाद्याः पशवः तिरोहिता यजमानस्य भवन्तीत्यर्थः पशूनामुपतापकारि यदेतच्चन्द्रदर्शनं तत् खलु चितं शुभा रिक्तीकरणमित्याचक्षते २। एतमेव चन्द्रगतं दोषमेवमाचक्षते, चन्द्रमसः सम्बन्धी तन्मण्डलमध्यवर्ती मृग इति अत एव तस्य शशाङ्क इति प्रसिद्धिः। उपवसथकाष्ठां गतं देवावक्षं चन्द्रमसं पौर्णमासीकाले द्रवीकुर्वन्ति। पशव ओषधीर्जग्ध्वा अपश्च पीत्वात्मनि तं चान्द्रमसं कृत्स्नं रसममावास्यायां धारयन्ति तत एनं रसममावास्यासम्बन्धिन्यां रात्रौ पशुभ्यः सकाशात् संनयति सम्यक्प्रापयति। तत्संनयनं प्रतिपच्चन्द्रदर्शने सति नोपपद्यते। ३दर्शयागस्यातिक्रान्तकालत्वे दोषरूपत्वस्य तन्त्रानुष्ठानप्रकारमाह। प्रकृतो दर्शयागः शीघ्रं समापनीयः अनन्तरमेवैतद्दोषपरिहाराय प्रायश्चित्तेष्टिः कर्त्तव्या। स आमावास्यविधेनेवेति यथोदितकालेऽनुष्ठितोऽमावास्यायागस्तत्प्रकारेणैव प्रतिपदि प्रक्रान्तां दर्शेष्टिं समाप्य४। अथास्यामिष्टौ प्रकृतिवद्विकृतिः कर्त्तव्येति नोदकप्राप्तेष्वङ्गेषु विशेषं विधत्ते। प्रकृतौ पञ्चदश अत्र नोदकप्राप्तास्ताः पृथुवाजवत्यौ धाय्ये द्वे इति सप्तदश (सामिधान्यः) भवन्ति। प्रकृतौ प्रधानयागे उच्चैर्धर्मः। प्रकृतदेवतालिङ्गयुक्तायतः षष्ठ्यां दाशतय्यां समाम्नाता या ऋचताः कामयते। आज्यभागयोः स्विष्टकृद्यागे च याथाकाम्यम् ९। तिसृभिरिषुभिर्युक्तं धनुः तिसृधन्वम् पूर्ववदकारः समासान्तः। एतं चन्द्रात्मकं दिव्यं श्वानम् १०। अदृश्यमानचन्द्रेऽप्यपि" ११ भा०

"इष्टीः पार्वायणान्तीयाः केवला निर्वपेत् सदा" मनुः "प्राजापत्यां निरूप्येष्टिम्"। "हेमन्ते नवशस्येष्ट्या" मनुः "आरेभिरे जितात्मानः पुत्रीयामिष्टिमृत्विजः" रघुः। २"यागमात्रे च "कर्तुमिष्टिमभिवाञ्छता मया" माघः राजसूययागाभिप्रायमिदम्। इष–क्तिन्। ३इच्छायाम्। इष्टप्रयोगनिर्वाहाय पातञ्जलभाष्यकृतः इच्छाद्योतके ४श्लोकाद्यात्मकवाक्यभेदे च। यथा। "द्विपर्यन्तानामेवेष्टिः" सर्वनाम्नोवृत्तिमात्रे पुंवद्भाव" इत्यादि। एतयेष्ट्या "ठक्छसोश्च" वार्त्ति० "एकतद्धिते चेति" सूत्रस्य गतार्थम्" सि०कौ०। "अनुत्सूत्रपदन्यासेति" माघव्याख्यायाम् अनुत्सृष्टसूत्राक्षरा इष्ट्युपसंख्याननैरपेक्ष्येण सूत्राक्षरैरेव" इति मल्लि०।

इष्टिका स्त्री इष–तिकन्। इष्टकाशब्दार्थे "उद्घर्षणं त्विष्टिकया कण्डुकोठविनाशनम्" सुश्रु०। "इष्टिका काञ्चनी चात्र चयनार्थं कृताऽभवत्" भा० आश्व० ८८अ०।

इष्टिकापथिक न० इष्टिकायाः पथिकं तदुद्देशेनापि प्रभवत्वात्। नामञ्जकतृणे राजनि०। [कृतयागे।

इष्टिकृत् त्रि० इष्टिं यागं कृतवान् कृ–भूते क्विप् ६त०।

इष्टिन् त्रि० इष्टमनेन इष्टा० इनि। कृतयागे "अध्वरेष्विष्टिनां पाता" भट्टिः।

इष्टिपच पु० इष्टये इच्छायै अभिलाषार्थं पचति न यज्ञार्थं पच–अच्– ६त०। १ कृपणे २ दैत्ये च शब्दर०। स हि स्वेच्छापूरणार्थमेव पचति न यज्ञार्थमिति तस्य तथात्वम्।

इष्टिपशु पु० ६त०। यज्ञिये पशौ। त्रिका०।

इष्टिमुष् त्रि० इष्टिं यागं मुष्णाति मुष–क्विप् ६त०। दैत्ये

इष्टियाजुक पु० इष्ट्या यायजूकः। "काम्येष्टियजनशीले। "तस्मादिष्टियाजुकः स्यात् पशुभ्यः एकं प्रायच्छत्" श०ब्रा०।

इटियायजूकः इटियजनशीलः इष्टिशब्देन काम्या इष्टयः शातपथप्रसिद्धाः ताच्छील्ययोगात्काम्येष्टि यजनप्रधानो न स्यात्" भा० ।

इष्टीकृत त्रि० अनिष्टमिष्टं कृतम् इष्ट+च्वि-कृ-कर्मणि क्त । अनिष्टे इष्टे कृते। अनिष्टिरिष्टिः कृता । इष्टिभेदे सत्रे न०। "सत्रमिष्टीकृतं नाम समुपास्ते महातपाः" भा०व०२५८अ०

इष्टु स्त्री इष-भावे तुन् । इच्छायाम् उणादिकोषः ।

इष्व्ययन न० इष्व्यायनं गमनं यत्र । "यागविशेषाचरणभेदे" इष्व्ययनञ्च आश्व० श्री०२,१४, सूत्रादौ दर्शितं यथा "अत ऊर्द्धमिष्व्ययनानि" १।"अत ऊर्द्धं यानि वक्ष्यन्तेऽस्मिन् अध्याये तानि इष्व्ययनसंज्ञानीति विद्यात् । इष्टिभिरयनं गमनं येषु कर्मसु तानीष्व्ययनानि" नारा०वृ० । "सांवत्सरिकाणि"२सू०।"संवत्सरेण क्रियन्ते संवत्सरैश्च क्रियन्त इत्युभयथा विग्रहः कर्तव्यः,दाचायणयज्ञचातुर्मास्यानामनेकसांवत्सरिकत्वसिद्ध्यर्थम् वृ०।"तेषां फाल्गुन्यां पौर्णमास्यां चैत्र्यां वा प्रयोगः"३सू०।"फल्गुनीभिर्युक्ता पौर्णमासी फाल्गुनी, चित्रया युक्ता चैत्री । तेषां सांवत्सरिकाणां आगन्तुकानामस्मिन् काले प्रारम्भः कार्यः । दर्शपूर्णमासगुणविकाररूपाणां दाचायणयज्ञादीनामारम्भे कालनियमो नास्तीति तेषामित्युच्यते" नारा०वृ०। "तुरायणम्"४सू०।"तुरायणं नामेष्व्ययनमुच्यते"वृ०।"अग्निरिन्द्रो विश्वेदेवा इति पृथगिष्टयोऽनुसवनमहरहः"५सू० ।"अग्निदेवत्या इन्द्रदेवत्या विश्वदेवदेवत्या चैतास्तिस्र इष्टयः त्रिषु सवनेषु यथासङ्ख्येन एकैकेष्टिः कार्याऽहन्यहनि । अहरहरिति वचनं पौर्णमास्यमावास्ययोर्बाधनार्थम्" वृ०। "एका वा त्रिहविः" ६सू०"एताभिरेव देवताभिर्युक्ता एकैवेष्टिस्त्रिहविष्काऽहन्यहनि प्रातः सवन एव कर्त्तव्या वेत्यर्थः" वृ०। "इडादधोनामेष्व्ययनं तत्र देवतादि २ १४ १-१०" द्यावापृथिव्योरयनं नामेष्व्ययनं तत्र देवतादि २,१४,१२,१५" "चातुर्मस्यानि इष्व्ययनानि तद्देवतादि २,१५,१ सूत्रादौ । एवमन्यान्यपि इष्व्ययनकर्म्माणि आकरे दृश्यानि

इष्ट्वा अव्य० यज-क्त्वा । १यागं कृत्वेत्यर्थे । "अश्वमेधेन चेष्ट्वा" मृच्छकटिकम् । इष-क्त्वा । २अभिलष्येत्यर्थे च ।

इष्म पु० इष्यति इच्छत्यनेन वा इष-गतौ इष-इच्छायां मक् वा । १वसन्तकाले २कामे च भावे मक् ।३गतौ । ततः अस्त्यर्थे इनि । इष्मिन् गतियुक्ते त्रि० स्त्रियां ङीप् ।"ते वाशीमन्त इष्मिणो अभीरवः" ऋ० १,८७,६। "इष्मिणः गतिमन्तः"भा०। इष-इच्छायां कर्म्मणि मक् ।४इष्यमाणे अन्नादौ अस्त्यर्थे इनि अन्नादिमति "हिरण्ययाः स्वायुधास इष्मिणः"ऋ०५,८, ७५। इष्मिणोऽन्नवन्तः"भा० ।

इष्य पु० इष्यते इष-क्यप् । वसन्ते ऋतौ हेम० । तस्य ऋतूनां मध्ये इष्टतमत्वात्तथात्वम्"ऋतूनां कुसुमाकरः" गीतायां तस्य भगवद्रूपत्वोक्तेः इष्टत्वम् ।

इष्व पु० इष-सर्पणे वन्-गुणाभावः । आचार्य्ये उद्देशार्थमुपसृप्यमाणत्वात्तथात्वम्। उज्ज्वलदत्तस्तु ईष दाने इत्यस्यैव रूपं दीर्घादि इत्याह । उपदेशदानात्तस्य तथात्वम् ।

इष्वग्र न०६त०। बाणाग्रे । गहादिपाठात् भवादौ छ । इष्वग्रीय तद्भवादौ त्रि०। [इष्वनीकीय तद्भवादौ त्रि०।

इष्वनीक न० ६त० । बाणावयवे । गहा० भवादौ छ ।

इष्वसन पु०इषवोऽस्यन्ते क्षिप्यन्तेऽनेन अस-क्षेपे करणे ल्युट् ६त०। धनुषि ।"राममिष्वसनदर्शनोत्सुकम्" रघुः ।

इष्वास पु० इषवोऽस्यन्तेऽनेन अस-क्षेपे करणे घञ् ६त० । १धनुषि "अत्र शूरा महेष्वासा भीमार्ज्जुनसमा युधि" "काश्यश्च परमेष्वासः शिखण्डी च महारथः"गीता । अर्द्धर्चादिपाठात् क्लीवत्वमपि । इषून् अस्यति अस-अण् उप०स० । २शरक्षेपके त्रि०(तीरन्दाज) मेदि०।

इस् अव्य० इं कामम् स्यति सो-क्विप् नि० आलोपः । १सन्तापे २कोपे ३दुःखानुभवे च शब्दर०।

इह अव्य० इदम्+ह इशादेशः । अस्मिन् काले देशे दिशि वा १इत्यर्थे "एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किञ्चन" श्रुतिः "इह जन्मनि जन्मान्तरे वा" वे०सा०। "नेह नामुत्र किञ्चन" "नेहाभिक्रमनाशोऽस्ति" गीता । "तदखिलमिह भूतं भूतगत्या जगत्याः" नैष०। प्रथमार्थेऽपि । २अनुभूयमाने लोके इहामुत्रार्थफलभोग विरागः वेदा०सा० च इहकालः । इह भवः विदितोवा कथा० ठञ् । ऐहिक इहभवे इहविदिते च त्रि० । "ऐहिकब्रह्मघ्नपते-दोहादिनिषेधात्" शु०त०रघु०। [मानकाले ।

इहकाल पु०इदम्+प्रथमार्थे ह इह कर्म०। एतत्काले वर्त्त-

इहतन त्रि० इहभव ट्युल् तुट् च ।इहभवे स्त्रियां ङीप् ।

इहत्य त्रि० इह भवः इह+त्यप् । इहकालादिजाते । स्वार्थे-कन् । इहत्यक तत्रार्थे स्त्रियां नित्यमित्त्वम् । इहत्यिका

इहद्वितीया स्त्री मयू०स० । अत्रत्य द्वितीयायाम् ।

इहपञ्चमी स्त्री । मयू०स० । अत्रत्यपञ्चम्याम् ।

इहल पु० इह भवं लाति ला-क । चेदिदेशे त्रिका० तद्वासिनि ब०व० ।

इहलोक पु० इदम्-प्रथमार्थे ह कर्म० । एतल्लोके वर्त-

भूयमाने लोके इहलोके भवः ठक् अनुश० द्विपदवृद्धिः ऐहलौकिक तद्भवे त्रि० ।

इहामुत्र अव्य० इह च अमुत्र च द्व०। एतल्लोके परलोके च "इहामुत्रार्थफलभोगविरागः" वेदा०सा० ।

इति वाचस्पत्ये इकारादिवर्णशब्दार्थनिरूपणम् ।

ई

ई अव्य० ई क्विप् । १ विषादे २ दुःखभावनायाम् ३क्रोधे ४अनुकम्पायाम् ५प्रत्यक्षे ६सन्निधौ ७संबोधने च । मेदिन्यामयं सान्ततया पठितः । पृषो०साधुः ।

ई स्त्री अस्य विष्णोः पत्नी ङीष् । लक्ष्म्याम् ।

ई कान्तौ (इच्छायाम्) गतौ व्याप्तौ क्षेपे भोजने सक० गर्भग्रहणे अक० अदादि अनिट् पर० । एति ईतः इयन्ति । ऐत् । ऐषीत् । इयाय इयतुः । एता एष्यति ऐष्यत् । "ईतः । अस्यात्मनेपदित्वमपि "न हि तरणिरुदीते" दिक्पराधीनवृत्तिः" कविक० टी०दुर्गा० ।

ई याचने द्विक० आत्मने० अदादि अनिट् निरु० । ईते इयीत ईताम् । ऐत । ऐष्ट । इये । "आ वोदेवास ईमहे वामं प्रत्यध्वरे" यजु० ४,५ । "अजस्रं घर्ममीमहे" यजु० २६,६ ।

ई गतौ दिवा०सक० अनिट् आत्म० । ईयते ऐष्ट । ईतः "पद्मैरन्वीतवधूमुखद्युतः" माघः । ईङ्—गतौ मल्लि० ।

ईक्ष दर्शने पर्य्यालोचने च भ्वा० आत्म० सक० सेट् । ईक्षते ईक्षेत ईक्षताम् ऐक्षत ऐक्षिष्ट ईक्षाम्-बभूव आस-चक्रे-ईक्षिता ईक्षिषीष्ट ईक्षिष्यते ऐक्षिष्यत । ईक्षितव्यः ईक्षणीयः ईक्ष्यः ईक्षिता ईक्षितः ईक्षित्वा वीक्ष्य । ईक्षणम् ईक्षा । ईक्षमाणः । कर्म्मणि ईक्ष्यते ईक्ष्यमाणः । धातुनिर्देशे इक्षतिः ईक्षिः । "न धर्म्मवृद्धेषु वयः समीक्ष्यते" न कामवृत्तिर्वचनीयमीक्षते" कुमा० । "तदैक्षत बहु स्यां प्रजायेय" श्रुतिः । "स प्रजापतिरीक्षां चक्रे" श्रुतिः "सर्व्वभूतस्थमात्मानं सर्व्वभूतानि चात्मनि । ईक्षते योगयुक्तात्मा" गीता । "कथमीक्षामहे सर्व्वे, दुर्य्योधन! तवेङ्गितम्" भा०व०२६८श्लो० । "ऐक्षिष्ट पुंभिः प्रचिनान् स गोष्ठान्" भट्टिः वेदे पदव्यात्यासोऽपि "कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्" कठो० । दृष्टेन शुभाशुभालोचने च तद्योगे शुभाशुभसंबन्धिनि चतुर्थी । "राधीक्ष्योर्यस्य विप्रश्नः" पा० । "यदीयः विविधः प्रश्नः क्रियते तस्मिन् चतुर्थीत्यर्थः । "कृष्णाय ईक्षते गर्गः पृष्टो गर्गः शुभाशुभं पर्य्यालोचयतीत्यर्थः" सि०कौ० । "ईक्षतेर्नाशब्दम्" शा०सू० । "कारणे ईक्षितृत्वश्रवणात्" भा० ।

अधि+विवेचने अधीक्षते 'कुहकचकितोलोकः सत्येऽप्यपायमधीक्षते" हितो० ।

अनु+अनुचिन्तने । "तामन्वीक्षत इयं वै वल्मीकवपेयम्" शत०ब्रा० ६,२,२,५ । "अन्वीक्षमाणोरामस्तु विषण्णं भ्रान्तचेतनम्" रामा० ।

अप—आकाङ्क्षायामनुरोधे अवधिनियमे च । "अपेक्षते प्रत्ययमुत्तमं त्वाम्" कुमा० "अपेक्षन्ते न च स्नेहं न पात्रं न दशान्तरम् । परोपकारनिरतामणिदीपा इवोत्तमाः" उद्भटः । "किमपेक्ष्य फलम् पयोधरान् ध्वनतः प्रार्थयते मृगाधिपः" किरा० । "द्वित्वादयः परार्द्धान्ता अपेक्षाबुद्धिजामताः" "अपेक्षाबुद्धिनाशाच्च तेषां नाशः प्रकीर्त्तितः" भाषा० "शब्दोव्यञ्जकत्वेऽर्थान्तरमपेक्षते" सा०द० । "सापेक्षत्वेऽपि गमकत्वात् समासः" पा०भा० "सा प्रक्रिया या कथमित्यपेक्षा" मीमा० । "नदीशः परिपूर्णोऽपि मित्रोदयमपेक्षते" चन्द्रा० ।

वि+अप+विशेषेणापेक्षयाम् । "न व्यपैक्षत समुत्सुकाः प्रजाः" रघु० । "व्यपेक्षमाणौ सहसीतयागतौ" रामा० "समर्थः पदविधिः" पा०भा० व्यपेक्षाऽव्यपेक्षापक्षद्वयमुपन्यस्तम् । तत्र व्यपेक्षापक्षोमतान्तरेण उपन्यस्तः स च युक्तिविरुद्धत्वात् कैयटविवरणादौ दूषितः "वाक्यवत् सा व्यपेक्षाऽपि वृत्तावपि न हीयते" भर्तृ० । सा च शब्दबोधोपयोगिन्याकाङ्क्षारूपा आकाङ्क्षाशब्दे विवृतिः ।

अव+ चाक्षुषदर्शने । "योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः" गीता । "अवेक्षमाणोमहतीं मुहुर्मुहुः" माघ: सम्यक्पर्य्यालोचने च । 'यदवोचदवेक्ष्य सुन्दरी' किरा० ।

अनु+ अव+पर्य्यालोचने अनुसन्धाने च 'सूक्ष्मतां चान्ववेक्षेत योगेन परमात्मनः" मनुः ।

अभि+अव+भोजनार्थेक्षणे । "यजमानस्य पशूनभ्यवेक्षते" शत० ब्रा० ११,१,५,११, "अभ्यवेक्षते अभ्यवहर्त्तुं पश्यति" भा० ।

परि+अव+समन्ताद्दर्शने । "ततो वाचस्पतिर्जज्ञे तं मनः पर्य्यवेक्षते भा० आ:श्व०२१अ० ।

प्रति+अव+ प्रतीत्य पर्य्यालोचनया दर्शने । 'अथेमां प्रत्यवेक्षमाणो जपति" शत०ब्रा० ५,२,४,२० ।

सम्+अव+सम्यगदर्शने । "रूपोपमोऽयं समवेक्षते सभाम्" भा०वि०२१८श्लो०।"यदि दृष्टं बलं सर्व्वं वयञ्च समवेक्षिताः" भा०आ०२५अ० । सम्यक्पर्य्यालोचने च "सर्वं तु समवेक्ष्येदं निखिलं ज्ञानचक्षुषा" मनुः ।

आ+सम्यगदर्शने ।"अयन्निरीक्ष्य पाञ्चालीम्"भा०स०२३८०१

उद्+ऊर्द्ध्वदर्शने । "सहस्ररश्मिना साक्षात् सप्रणाममुदीक्षिताः" कुमा० । अपेक्षायाञ्च "त्रीणि वर्षाण्युदीक्षेत कुमार्य्यृतुमती सती" मनुः ।

उप+हेयत्वज्ञानेन परित्यागे "उपेक्षया स्वत्वहानिः" दाय-भा०टी० "ये मां विप्रकृतां क्षुद्रैरुपेक्षध्वं विशोकवत्"भा० व०११अ० प्रतिचिकीर्षाभावे"उपेक्षते यः श्लथवल्गिनीर्जटाः" कुमा० "नोपपेक्षेत क्षणमपि राजा साहसिकं नरम्" मनुः अपर्य्यालोचने अनुसन्धानाभावे च"गूढेन चरता तस्यमुपेक्षितमिदं मया"रामा० ।

सम+उप+सम्यगुपेक्षायाम् । "यत्पक्षं समाधाय लोभोहात् समुपेक्षते" भा०स०१०६० श्लो०।

निस्+निर्+निःशेषेण दर्शने निश्चयार्थं दर्शने च ।"यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान्"गीता ।

परि+तत्त्वानुसन्धाने प्रमाणाद्युपन्यासेन वस्तुतत्त्वावधारणे च "परीक्ष्य लोकान् कर्म्मचितान्"श्रुतिः। न्यायसूत्रवृत्त्यादौ प्रमाणप्रमेयादि परीक्षा बहुशो दर्शिता । सम्यक्विवेचने च ।"नैता रूपं परीक्षन्ते नासां वयसि संस्थितिः। सुरूपं वा विरूपं वा पुमानित्येव भुञ्जते" मनुः । लक्षणादिमत्त्वेन ज्ञाने च अश्वविद्याविदश्चैव सूता विप्राश्च तद्विदः । मेध्यमश्वं परीक्षन्तां तव यज्ञार्थसिद्धये" भा०आश्व०३० २७ श्लो०।"यत्नात् परीक्षितः पुंस्त्वे"या०स्मृ०। "सर्व्वस्य हि परीक्ष्यन्ते स्वभावा नेतरे गुणाः" हितो०भक्तिमत्त्वादिना ज्ञाने च ।"मायां मयोद्भाव्य परीक्षितोऽसि"रघुः । विवादे सत्यत्वासत्यत्वादिसंशयनिरासाय स्वपक्षप्रामाण्यव्यवस्थापनाय शपथकरणे तुलापरीक्षादि । परीक्षाशब्दे विवृतिः ।

प्र+प्रकर्षेण दर्शने "प्रेक्षन्ते सर्व्वभूतानि बहुशः पर्व्वसन्धिषु" भा०व०११६५७ । "यत् किञ्चिद्दशवर्षाणि सन्निधौ प्रेक्षते धनी"भा०व०मनुः। "उदायुधानापततस्तान् दृप्तान् प्रेक्ष्य राघवः"रघुः । "पुनः प्रेक्ष्य च शूलिनम्" कुमा०।

अभि+प्र+आभिमुख्येन दर्शने ।"प्राचीं दिशमभिप्रेक्ष्य महर्षिरिदमब्रवीत्" भा० व०१६३अ० । "दह्यमानमभिप्रेक्ष्य स्त्रियस्ताः संप्रदद्रुवुः" भा०व०८८अ० ।

उत्+प्र+उत्प्रेक्षायां ।कश्चिद्धर्म्मसाधर्म्येणान्यस्यान्यरूपता कल्पने उद्भावने च । "उत्प्रेक्षामोऽवयं तावन्मतिमन्तं विभीषणम्"रामा०।"तदुत्प्रेक्ष्योत्प्रेक्ष्य प्रियसखि गतांस्तांश्च दिन सान्"अमरुश०। "भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना"सा०द०।"अलङ्कारशब्दे१८५पृष्ठे विवृतिः।

सम्+प्र+सम्यगदर्शने । "संप्रेक्ष्य नासिकाग्रं स्वं" गीता "योगक्षेमं च संप्रेक्ष्य वणिजोदापयेत् करम्" मनुः ।

अभि+सम्+प्र+आभिमुख्येन सम्यगदर्शने ।"अभिसंप्रेक्ष्य भर्त्तारं क्रुद्धा वचनमब्रवीत्" भा० आदि० प०२०११ ।

प्रति+अनुरोधे अपेक्षायां पूजने च ।"प्रतीक्ष्यं तत् प्रतीक्ष्यायै पितृस्वस्रे प्रतिश्रुतम्" माघः "प्रथमं संस्थिता भार्य्या पतिं प्रेत्य प्रतीक्षते" भा०आ० ३०२३ । नाभिनन्देत मरणं नाभिनन्देत जीवितम् । कालमेव प्रतीक्षेत" मनुः ।"संवत्सरं प्रतीक्षेत द्विषन्तीं योषितं पतिः" मनुः ।

सम्+प्रति+सम्यक्प्रतीक्षायाम् "मुहूर्त्तं संप्रतीक्षस्व" भा० आ० २६०३ । "एकवेणीधरा हि त्वां नगरी संप्रतीक्षते" रामा० ।

वि+विशेषेण दर्शने ।"वीक्षन्ते त्वां विस्मिताश्चैव सर्वे"गीता । "सीमाज्ञाने नृणां वीक्ष्य नित्यं लोके विपर्य्ययम्" मनुः । "जङ्गीकृतस्त्र्यम्बकवीक्षणेन" रघुः ।

अनु+वि+सन्ततवीक्षणे पश्चाद्वीक्षणे च । "तस्मादुदिशोऽनुवीक्षमाणोजपति" शत०ब्रा० ५,२,१,२५ ।

अभि+वि+आभिमुख्येन वीक्षणे।"नचैनं भुवि शक्नोति कश्चिदप्यभिवीक्षितुम्" मनुः ।

उद्+वि+ऊर्द्ध्ववीक्षणे।"उद्वीक्षमाणा भर्त्तारं मुखेन परिशुष्यता" रामा० "पतिव्रतामिमां साध्वीं तवोद्वीक्षितुमच्युत" भा० अनु० २अ० "उद्वीक्षितं प्रकृतिभिर्भरतानुगाभिः" रघुः ।

सम्+उद्+वि+समन्तादुद्वीक्षणे "निषेदुर्भूमिपाः सर्वे समुद्वीक्ष्य परस्परम्" रामा० ।

प्रति+वि+प्रतिदर्शने यत्कर्त्तृकं स्वदर्शनं तस्य स्वेन दर्शने । "ततः सराजा प्रतिवीक्ष्य ताः स्त्रियः" रामा० ।

सम्+वि+सम्यग्वीक्षणे ।

सम्+सम्यगदर्शने पर्य्यालोच्य दर्शने । "पुरस्तादेव प्रतीचे समीक्षमाणायानुब्रूयात्" शत०ब्रा० ११,५,४,१४ । "समीक्ष्य वसुधां चरेत्" मनुः । "अग्रहस्तमुखाग्रेण शीकरेण स नागराट् । समैक्षत गुडाकेशम्"भा० आश्व०२२३१श्लो०।"तान् समीक्ष्य स कौन्तेयः सर्व्वान् बन्धूनवस्थितान्" गीता "उचितमेवैतत्समीक्ष्यकमतान्ना-

रिक्षः” हितो० “समीक्ष्य कुलधर्म्मांश्च स्वधर्म्मं प्रतिपादयेत्” मनुः ।

प्र+सम्+प्रकर्षेण सम्यगीक्षणे । “सह सर्व्वाः समुत्पन्नाः प्रसमीक्ष्यापदोऽभयम्” मनुः “कुलं ख्यातिञ्च वृत्तं च बुद्ध्या तु प्रसमीक्ष्य च” भा० आ० ४२७४ स्लो० ।

ईक्षण न० ईक्ष–भावे ल्युट् । १ दर्शने । करणे ल्युट् । २ नेत्रे । तत्र दर्शने “स्थितः कार्य्येक्षणे नृणाम्” मनुः नेत्रे । “अभिमुखे मयि संहृतमीक्षणम्” शकु० “सदा संरब्धनयनौ सदा चानिमिषेक्षणौ” भा० आ० ३२ अ० । “इत्यद्रिशोभा प्रहितेक्षणेन” रघुः ।

ईक्षणिक त्रि० ईक्षणं हस्तरेखादीक्षणेन शुभाशुभदर्शनं शिल्पमस्य ठन् । शुभाशुभफलकथनेनोपजीविनि सामुद्रिके । स्त्रियां टाप् । “मङ्गलादेशवृत्तास्च भद्राश्चेक्षणिकैः सह” मनुः”

ईक्षति पु० ईक्ष–धात्वर्थनिर्देशे श्तिप् । ईक्षणे । “ईक्षतेर्नाशब्दम्” शा० सू० ।

ईक्षा स्त्री ईक्ष–भावे अ टाप् । ईक्षणे १दर्शने २पर्य्यालोचने च “स ईक्षां चक्रे” श्रुतिः “श्रवणादनु ईक्षा अन्वीक्षा” । न्यायसू० वृत्तिः । आन्वीक्षिकीशब्दे विवृतिः ।

ईक्षेण्य त्रि० ईक्ष–बा० एन्य । ईक्षणीये दृश्ये “ईक्षेण्यासोऽह्योऽनः” ऋ० ६,७१,२ । “ईक्षेण्यासः ईक्षणीयाः” भा० ।

ईख गतौ इदित् भ्वा० पर० सक० सेट् । ईङ्खति ऐङ्खीत् । ईङ्खाम् बभूव आस चकार । ईङ्खिता ईङ्खिष्यति ऐङ्खिष्यत् । ईङ्खितः “मन्त्राश्मचितः शकः प्रेङ्खश्च क्षुभिता क्षितिः” भट्टिः “भुज्युं समुद्र आ रजसः पार ईङ्खितम्” १०,१४३,५ । णिचि ईङ्खयति । “य ईङ्खयन्ति पर्वतान्तिरः समुद्रमर्णवम्” ऋ० १,१९,७ । “इङ्खयन्तीरपस्युव इन्द्रं जातमुपासते” ऋ० १०,१५३,१ । “इङ्खयन् परिजना पविन्नया रघुः ।

ईग गतौ इदित् इगिवत् । ईङ्गति ऐङ्गीत् ईङ्गते इत्येके ।

ईज गतौ निन्दायाञ्च भ्वा० आत्म० सक० सेट् । ईजते ऐजत ऐजिष्ट ईजाम्–बभूव आस चक्रे । ईजिता ईजिष्यते ऐजिष्यत ।

ईज गतौ निन्दने च इदित् भ्वा० आत्म० सक० सेट् । ईञ्जते ऐञ्जिष्ट । ईञ्जाम्–बभूव आस चक्रे ! ईञ्जितम् । अयम् अपाणिनीयः कविकल्पद्रुमे तु पठितः ।

ईजान त्रि० यज–ताच्छील्ये कानच् द्वित्वम् । यजमाने यागशीले । “ततोमहद्भिः क्रतुभिरीजानो भरतस्तदा” भा० आ० ९४ अ० । “यः सेतुरीजानानामक्षरं ब्रह्म यत् परम्” कठो० ।

ईड स्तुतौ अदा० आत्म० सक० सेट् । ईडे ईडिषे ईडिध्वे ऐडिष्ट ईडाम्–बभूव आस चक्रे । ईडिता ईडिष्यते ऐडिष्यत । ईड्यः ईडितः ईडनम् ईडा । “अग्निमीडे पुरोहितम्” ऋ० १,१,१ । डकारं लकारतया बह्वृचाः पठन्ति । “अज्मध्यस्थडकारञ्च लकारं बह्वृचा जगुः । अज्मध्यस्थढकारञ्च ल्हकारं तु यथाक्रममिति” ऋ० भा० वाक्योक्तेः । वङ्गदेशसम्प्रदायस्तु तयोः अज्मध्यस्थयोः ड़ढ़कारतया पाठः इति भेदः । यास्कस्तु “ईडिरध्येषणकर्म्मा पूजाकर्म्मा चेत्याह” “गन्धर्वाः सुरसङ्घाश्च यक्षाश्च महर्षयः । अन्तरीक्षं गतं देवं गीर्भिरग्र्याभिरीडिरे” रामा० “नेडिषे यदि काकुत्स्थम्” भट्टिः “ईड़ानो देवा इष्टानाम्” ऋ० १०,६६,१३ । “भवन्तमीड्यं भवतः पितेव” । “प्राचीनतामव्रजदीड्यमानः” इति च रघुः । “अग्निः पूर्व्वेभिर्ऋषिभिरीड्योनूतनैरुत” ऋ० १,१,२ । णिचि ईडयति ते ऐडिडत् त ।

ईडा स्त्री ईड़–भावे अ स्त्रीत्वात् टाप् । स्तुतौ ।

ईडित त्रि० ईड–क्त । स्तुते यस्य स्तवः कृतस्तस्मिन् ।

ईडेन्य त्रि० ईड–बा० एन्य । १स्तवनीये २पूजनीये च । “ईडेन्यो नमस्यस्तिरस्तमांसि दर्शतः” ऋ० १,१४४,७ ।

ईण्मत् त्रि० ईट् अस्त्यस्य मतुप् स्त्रियां ङीप् । सनाथे ईश्वरवति । ईण्मन्तमाचष्टे णिच् मतोर्लुक् । ईययति ।

ईति पु० ईयते ई–क्तिच् । १डिम्बे, २उत्पादिते त्रि० ३प्रवासे, “अतिवृष्टिरनावृष्टिः शलभाः मूषिकाः खगाः । प्रत्यासन्नाश्च राजानः षडेता ईतयः स्मृता” इत्युक्ते ४कर्षेरुपद्रवभेदे च स्त्री । “निरीतिभावं गमितेऽतिवृष्टयः” नैष० “निरातङ्का निरीतयः” रघुः “ईतयो व्याधयस्तन्द्रीदोषाः क्रोधादयस्तथा । उपद्रवाश्च वर्त्तन्ते आधयः क्षुद्भयं तथा” भा० व० १४९ अ० ।

ईदृक्ष त्रि० अयमिव पश्यति इदम्+दृश–कर्म्मकर्त्तरि क्स इशादेशः दीर्घः । ईदृशे एतद्रूपदर्शने एवंविधे । “ईदृक्षास एतादृक्षास ऊ षु णः सदृक्षासः” वाजसने० १७,८ ।

ईदृश् त्रि० अयमिव पश्यति इदम्+दृश–कर्म्मकर्त्तरि–क्विन् इशादेशः दीर्घः । १एतादृशदर्शनवति एवंविधे “ईदृङ् चान्यादृङ् च सदृङ् च प्रति सदृङ्” यजु० १७,८१ । “इमं पुरोडाशं गृहीत्वा पश्यतीति ईदृङ् वेददी० व्याख्यानात् २तदर्थेऽपि । तस्य भावः त्व ईदृक्त्वं तद्भावे न० तल् । ईदृक्ता तस्य भावे स्त्री । “विष्णोरिवास्यानवधारणीयमीदृक्तया रूपमियत्तया वा” रघुः ।

ईदृश त्रि० अयमिव पश्यति इदम्+दृश–कर्मकर्त्तरि कञ् इशा-देशः दीर्घः। एवंविधदर्शनवति। "ईदृशैस्तैर्जाने सत्यं दोषाकरो भवान्" चन्द्रा०। "यच्चान्यत् किञ्चिदीदृशम्"। "न हीदृशमनायुष्यं लोके किञ्चन विद्यते" प्रेत्येह चेदृशा विप्रागर्ह्यन्ते ब्रह्मवादिभिः" मनुः। "तानो-म्हडान ईदृशे" ऋ० १,१७,१। "ईदृगे एवं विधे" भा०। स्त्रियां ङीप् "सर्व्वेषामीदृशो रसाभिव्यक्तिः" सा० द०। मुग्धबोधकारस्तु अयमिव दृश्यते इति विग्रहं कृषादौ चकार तच्च "कर्त्तरि क्वदिति" पा० अनुशासनविरोधादुपेक्ष्यम्।

ईप्सा स्त्री आप्तुमिच्छा आप–सन्–अ। १आप्तुमिच्छायाम् २इच्छायाञ्च। "ईर्ष्येप्सा पिशुनं शुद्धं ममत्वं परिपालनम्"। भा० आश्व० २७अ०।

ईप्सित त्रि० आप–सन् क्त। १आप्तुमिष्टे क्रियाफलेन व्याप्तुमिष्टे "कर्त्तुरीप्सिततमं कर्म्म" पा०। "निर्वर्त्त्यञ्च विकार्य्यं च प्राप्यञ्चेति त्रिधा मतम्। तच्चेप्सिततमं कर्म्म चतुर्द्धान्यत्तु कल्पितम्" भर्त्तृ०। "तमनुपहृत्य किमीप्सितमात्रे मा भूत्" सि०कौ०। २इच्छाविषये च।

ईप्सु त्रि० आप्तुमिच्छुः। आप+सन्—उ। आप्तुमिच्छौ। "मन्दःकवियशःप्रेप्सुरिति" रघुः पाठान्तरं "शौचेप्सुः सर्व्वदाचामेत्" मनुः। "धर्मेप्सवस्तु धर्म्मज्ञाः" मनुः। "सौरभ्यमीप्सुरिव ते मुखमारुतस्य" रघुः।

ईम् अव्य० ई--वा मुच्। १अथशब्दार्थे। "एमेनमद्दधमश्वता" यजु० २२,६०। "आ ईम् एतौ निपातौ अथार्थौ" वेददी०। २इदमर्थे च। "चयत ईमर्य्यमो अप्रशस्तान्" ऋ०१,१६७,८। "इह ब्रवीतु य ईमङ्ग वेदस्य" ऋ०१,१६४,७। "सोमेभिरीं पृणता भोजमिन्द्रम्" ऋ० २,१४,१०। "ईमिमम्" इति भा०।

ईय त्रि० ई–बा० क्यप्। व्याप्ये। "आयद्दा ईयचक्षसा" ऋ०५,६७,६ "ईयचक्षसा व्याप्तदर्शनौ" भा०।

ईयिवस् त्रि० इण्–क्वसु। "गतवति। क ईयिवान् सुदम्" मुग्धबो० "प्रतीयुषा पूर्दृशे जनेन" भट्टिः। "उपेयुषो मोक्षपथं मनस्विनः" माघः। "उपेयिवानित्यादि" पा० सू० उपेत्युपलक्षणात् अन्यत्रापि क्वसुः।

ईर गतौ प्रेरणे च चुरा० उभ० पक्षे भ्वा० पर०सक०सेट्। ईरयति ते-ईरति ऐरिरत्-त-ऐरीत्। ईरयाम्-ईराम् वा बभूव आस चकार। ईरयिता। ईरिता ईरयिष्यति-ईरिष्यति। ईरणम्। ईरितः ईरयन्-ईरन्। ईरः ईर्य-माणः। "आपः समुद्रमैरयन्" ऋ०८,६,१३। "अंशो-रूर्म्मिमीरय" ऋ०६,७६,१४। "यदस्य शुष्ममैरयन्" ऋ०२,१७,२ "ऐरिरच्च महाक्रमम्" भट्टिः कथने च। "अथ वाचमीरयति" शत०ब्रा० "ब्रह्मा रथन्तरं साम ईरयति भवान्तिके भा० आनु० १४अ०। विरोधवाक्यञ्च यथेर्य्यमाणम्" भा०व० १२२ अ०। "दमयन्त्या यथेरितम्" भा०व०२७४२। "हितं न गृह्णन्ति सुहृद्भिरीरितम्" रामा० "इतीरिता पत्ररथेन तेन" इतीरयित्वा विरचय्य वाङ्मयम्" नैष०।

उद् उत्क्षेपणे। "उदीरयामासुःसलीलमत्रान्" रघुः। उच्चारणे कथने च "यदशोकोऽयमुदीरयिष्यति" रघुः। "उदीरयामासुरिवोन्मदानाम्" रघुः।

अभि+उद्+आभिमुख्येनोच्चारिते। "आसीकस्तिष्ठस्तिष्ठेति वाचस्तिस्रोऽभ्युदैरयन्" भा० अ० २१७१।

सम्+उद्+सम्यगुच्चारे समुत्तोलिते च। पांशवोऽपि कुरुक्षेत्रे वायुना समुदीरिताः" भा०व० ५०७०।

प्र+प्रेरणे। प्रेरयति। "समीरणः प्रेरयिता भवेति" कुमा०। "अपः प्रेरय सागरस्य बुध्नात्" ऋ०१०,८६,४। "किमुद्दिश्य काश्यपेन मत्सकाशमृषयः प्रेरिताः स्युः" शकु० "यात्रायै प्रेरयामास तं शक्तेः प्रथमं शरत्" रघुः।

सम्+ सम्यक्प्रेरणे समुच्चारणे सम्यग्गतौ च "समीरणः। "समीरयाञ्चकाराय राक्षसस्य कपिः शिलाम्" भट्टिः। "ताभिराभरणैः शब्दस्त्रासिताभिः समीरितः" भा० व० १२१८श्लो०।

ईर अदा०आत्म०सक०सेट्। ईर्त्ते ईराते ईरते ऐर्त्त ऐरिष्ट ईराम् बभूव आस–चक्रे ईरिष्यति "द्रप्सा मधुमन्त ईरते" ऋ० ५,६२,१४ "इषदीर्त्ते पयो गोः" ऋ०६,६१,२। "अस्मे राजास ईरताम्" ऋ० ४,८,७। वायुप्रच्युतादिवोदृष्टिरीर्त्ते" तैत्ति०। अस्मात् निष्ठाया नेट्। "न हि राज्ञामुदीर्णानाम्" भा०आ० ५१२८ श्लो०। "उदीर्णरागप्रतिरोधकम् सुखः" माघः। अस्यैव पक्षे चुरादित्वं तेन न तस्य भ्वादित्वमित्येके।

ईरण न० ईर–भावे ल्युट्। १प्रेरणे २गतौ च। युच्। ईरणा तत्रैव स्त्री। नन्द्या० ल्यु। ३प्रेरके त्रि० "समीरणः प्रेरयिता भवेति" कुमा०।

ईरामा स्त्री ईर्लक्ष्मीस्तया रम्यतेऽत्र रम–आधारे घञ् ईत०। नदीभेदे। "ईरामाञ्च महानदीम्" भा०व० १८८अ०।

ईरिण त्रि० ईर–इनन्। ऊषरभूमौ। मेदि० "ततस्तदीरिणं

जातं शतसहस्राण्यर्पिकम्” भा०अनु० ७२५७श्लो० । “वशिष्ठस्याश्रमपदं शून्यमासीन्महात्मनः । मुहूर्त्तेनैव निःशब्दमासीदिरिणसन्निभम्” रामा० ।

ईरिन् त्रि० ईर–णिनि । १प्रेरके २गन्तरि च स्त्रियां ङीप् । स्वशब्दादस्य वृद्धिरेका० स्वैरी स्वैरिणी ।“रे रे स्वैरिणि ! निशाचारकविते, मास्तु प्रकाशीभव”चन्द्रा०२राजभेदे पु० । “धृतराष्ट्रावैकशतमशीतिर्जनमेजयाः । शतञ्च ब्रह्मदत्तानामीरिणाञ्च शतं तथा” भा०स०८२०श्लो०यमसभावर्णने

ईर्क्ष्य ईर्ष्यायां परवृद्ध्यसहिष्णुतायाम् भ्वा० पर० सक० सेट् । ईर्क्ष्यति ऐर्क्ष्यीत् । ईर्क्ष्याम् बभूव आस चकार । ईर्क्षिता ईर्क्ष्यात् ईर्क्षिष्यति ऐर्क्षिष्यत् । ईर्क्ष्या ।

ईर्त्सा स्त्री ऋध–सन्–अ । वृद्धीच्छायाम् ।

ईर्त्सु त्रि० ऋध–सन्–उ । वर्द्धितुमिच्छौ ।

ईर्म्म न० ईर–मक् । व्रणे । ह्रस्वादिरयमिति बहवः दृषो० ह्रस्वः । अस्य पुंस्त्वमपि । “तदाङ्गुरीर्म्म इव वा एषां होत्रा यदच्छावाकया” ता०ब्रा० ४,२,१० । “ईर्म इव वा एषा होत्राणां यदच्छावाकः” “ईर्म इव तुष्टुवानाः” इति शाखा०“तस्य प्राची दिक्शिरोऽसौ चासौ चेर्मावथास्य प्रतीची दिक् पुच्छम्”शत०ब्रा०१०,६,५०,२। तेन‘व्रणोऽस्त्रियामीर्ममरुः इत्यमरे ऽस्त्रियामिति संदंशपाठादुभयत्रान्वेतीति बोध्यम् । दक्षिणशब्दात् लुब्धयोगेन क्षतव्रणार्थे अस्मात् अनिच् दक्षिणेर्मा व्याधेन क्षतव्रणे मृगे । “मृगयुमिव मृगोऽथ दक्षिणेर्मा” भट्टिः । २प्रेरिते त्रि० “ईर्मान्तासः सिलिकमध्यमासः” ऋ० १,१६३,१० । ईर्मान्तासः ईर्मा ईरिताः प्रेरिता अन्ता येषां ते” भा० ।

ईर्य्या स्त्री ईर–ईर्ष्यायां कण्ड्वा० यक् रोपधत्वात् दीर्घःभावे च स्त्रीत्वात् टाप् । १ईर्ष्यायाम् । ईर्य्यते ज्ञायते परात्माऽनया ईर–गतौ णयत् । २भिक्षुचर्य्यायाम् सा च ध्यानमौनादिरूपा । “चर्य्या चेर्य्यापथे स्थितिः”अमरः । “कल्याणी पुनरियं प्रव्रजितस्येर्य्या” ।

ईर्य्यापथ पु०ईर्य्यारूपः पन्था कर्म्मधा०अच् समा० । ध्यानमौनादिरूपे परिव्राजकस्य ज्ञानसाधनोपायभेदे ।

ईर्वारु पुंस्त्री० ईर–भावे सम्प० क्विप् ईरमीरणं वृणोति वारयति वा उण् । कर्कट्याम् शब्दर० ।

ईर्ष्य परगुणासहने भ्वा०पर०अक० सेट् । ईर्ष्यति ऐर्ष्यीत् । ईर्ष्याम्–बभूव आस चकार । ईर्ष्यिता ईर्ष्यिष्यति ऐर्ष्यिष्यत् । णिचि ईर्ष्ययति ते त ऐर्षियत् ऐर्षिष्यत् त । सनि ईर्ष्यियिषति । ईर्ष्या ईर्ष्यितः।‘पत्युर्वाङ्कमीर्ष्यितं प्रसवनं नाशस्य हेतुः स्त्रियाः”हितो । ईर्ष्यितव्यम् ।“तस्माद्भिक्षुषु दाराणां क्रमणेषु नेर्ष्यितव्यमिति” प्रबो० ।

ईर्ष्यक त्रि० ईर्ष्य–ण्वुल् ।१ईर्ष्याकारिणि ।“दृष्ट्वा व्यवायमन्येषां व्यवाये यः प्रवर्त्तते । ईर्ष्यकः स तु विज्ञेयः” इति सुश्रुतोक्ते २क्लीवभेदे पु० । “आसेक्यश्च सुगन्धी च कुम्भीकश्चेर्ष्यकस्तथा । सरेतसस्त्वमी ज्ञेया अशुक्रः षण्डसंज्ञितः”सुश्रु० । क्लीवशब्दे विवृतिः ।

ईर्ष्या स्त्री ईर्ष्य–भावे अ स्त्रीत्वात् टाप् । अक्षमायाम् परवृद्ध्यसहिष्णुतायाम् ।“पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम् । वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः” मनुः एतेषाञ्च क्रोधप्रभवत्वात् क्रोधजत्वम् अतएव“क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः” पा० ‘द्रोहादयोऽपि कोपप्रभवा एव गृह्यन्तेऽतो विशेषणं सामान्येन यं प्रतिकोपः” सि०कौ० । “ईर्ष्याशोकक्लमापेता मोहमात्सर्य्यवर्ज्जिताः” भा० व० २६० “त्यक्तेर्ष्य त्यक्तमन्युश्च क्षममाणोऽब्रवीदिदम्” भा० अनु० २अ० । अयं शब्दोनिर्यकार इति केचित्‘ईर्ष्यतेस्तृतीयस्येति’वार्त्ति० उक्तेः कविकल्पद्रुमे, पा० गणपाठे च यान्ततया पाठात् निर्यकारपाठे मूलं मृग्यम् । तेन सयकारएव साधीयान् ।

ईर्ष्यालु त्रि० ईर्ष्यां लाति ला–बा० डु । ईर्ष्यायुक्ते ।

ईर्ष्यु त्रि० ईर्ष्य–उण् । अक्षमाशीले “ईर्ष्युर्गन्धर्वराजो वै जलक्रीडामुपागतः” भा० आ० १७० अ० । “पर्य्यशङ्कत तामीर्ष्युः सुग्रीवगतमानसाम्” भा०२७६ अ० ।

ईला स्त्री ईड–क डस्य लः । १पृथिव्यां, २वाचि, ३गवि, च । अस्य ह्रस्वादित्वमेवेति बहवोमन्यन्ते शब्दार्थचिन्तामणौ तु दीर्घपाठः । तन्मूलं मृग्यम् ।

ईलि(ली) स्त्री ईर्य्यते ईर–इन् रस्य लः वा ङीप् ।१करपालिकायाम् (काटारी)२क्षुद्रगदाकारे हस्तदण्डे च । भरतः ।

ईलित त्रि० ईड–क्त डस्य लः । स्तुते अमरः ।

ईलिन पु० ईड–इनन् डस्य लः । चन्द्रवंश्ये नृपभेदे । “ईलिनं तु सुतं तंसुर्जनयामास वीर्य्यवान्” “ईलिनोजनयामास दुष्मन्तप्रभृतीन् नृपान्” भा० आ० ९४अ० । “तंसुं सरस्वती पुत्रं मतिनारादजीजनत् । ईलिनं जनयामास कालिङ्ग्यां तंसुरात्मजम्” । ‘ईलिनस्तु रथन्तर्य्यां दुष्मन्ताद्यान् पञ्चपुत्रानजीजनत्” भा० आ०९५अ० ।

ईवत् त्रि० ई–गतौ भावे क्विप् अस्त्यर्थे मतुप् वेदे नि० मस्य वः गतिमति “य ईवते ब्रह्मणे गातुमैरत” ऋ०

४,४,६। "अस्य घावीर ईवतोऽग्नेरीशीत मर्त्यः" ऋ० ४,१५,५ "मक्षू हिष्मा गच्छथ ईवतो द्यून्" ऋ०४,४३,२"प्राय वसुभ्य ईवदानमोवः" ऋ०५,४९,५ "जनाय चिद्य ईवत उ लोकं चकार" ऋ० ६,६२,२। "उपश्रोतास ईवतोवचांसि" ऋ० ७,२३,१। लोके तु ईमानिल्येव स्त्रियां ङीप्।

ईश ऐश्वर्ये अदा०आत्म० सक०सेट्। १ईष्टे, ईशिषे ईशिध्वे ऐशिष्ट। ईशाम्-बभूव आस चक्रे। ईशिता ईशिषीष्ट ईशिष्यते ऐशिष्यत। ईशनम् ईशिता। ईशितः। ईशा। ईशित्वा।"धनानामीशते यज्ञाः"।"यदीशिषे त्वं न मयि-स्थिते च" भट्टिः।"पुरुषोवै पशूनामैन्द्रस्तस्मात् पशूना-मीष्टे" शत० ब्रा० ४,५,५,७। एतद्योगे कर्म्मणः सम्ब-न्धत्वविवक्षायां षष्ठी। वेदे तु क्वचित् शिचि न आसु। "सहस्र एषां पितरश्च नेशिरे" ऋ० १०,५६,७। ता-च्छील्ये चानश् ईशानः।

ईश् त्रि० ईश-क्विप्। ईश्वरे "ईशावास्यमिदं सर्वम्" यजु० ४०,१, "नमो देवेभ्यो नम ईश एषां कृतं चिदेनोनमसा विवासे" ऋ०६,४१,८।"स देवानामीशां पर्य्येत् स ईशा-नोऽभवत्" अथ० १५,१,५। "तद्ध एवैषामारण्यानां पशूनामवरुन्धे" शत० ब्रा०१२,७,२,८।

ईश पु०ईश-क। १ईश्वरे"वागीशं वाग्भिरर्थ्याभिः प्रणिपत्योप-तस्थिरे" कुमा०"वागीशाद्याः सुमनसः सर्व्वार्थानामुपक्र-मे" माधवः "इत्थं क्षितीशेन वसिष्ठधेनुः" रघुः १परमे-श्वरे पु०। "लोकेश ! चैतन्यमयादिदेव !" प्रातः कृत्ये पुरा०। "ईशस्यैव निवेशितः पदयुगे भृङ्गायमाणं भ्रमत्" न्यायचर्च्चेयमीशस्य मननव्यपदेशभाक्" कुसुमा०। २महादेवे। "ब्रह्माच्युतेशार्कगणस्तुतीनाम्" "समन्ततो-होमचतुष्टयं स्यात्" हेमा० मतस्यपु०। मल० त० "ब्रह्माच्युशानवनस्तुतीनामिति"पाठः। रुद्रसंख्यातुल्यसं-ख्याकत्वात् ३एकादशसंख्यायाम्। "तारोमाया वर्म्मवीज-स्त्रिहीशस्वरान्विता" तन्त्रसारे त्वरितामन्त्रोद्धारे ईशस्वर एकादशस्वर एकार. इति कृष्णा० ५तद्देवाके आर्द्रानक्षत्रे च। "नेशेज्याग्निविशाखश्राव्यहिमघायाम्यैः" राजमा०।

ईशकोण पु० ईशस्वामिकः कोणः। पूर्व्वोत्तरायां विदिशि ईशदिगाद्योऽप्यत्र। तत्कोणस्य ईशाधिदेवत्वात् तथात्वम्। "इन्द्रोवह्निः पितृपतिर्नैर्ऋतोवरुणोमरुत्। कुबेर ईशः पतयः पूर्व्वादीनां दिशां क्रमात्" इत्यमरोक्तेस्तथात्वम्। इहस्य तेस्तदोषत्वं यात्राद्यर्थतया ज्योति०उक्तम्। "दृष्टः शुक्रः समापुत्रः सैंहिकेयःशनिः शर्य्या। सौम्यस्त्रिदशमन्त्री च पूर्व्वादिकदिगीश्वरा" इति निरूप्य "दिगीशाद्दे शुभा यात्रा पृष्ठाद्दे मरणं ध्रुवमिति"तद्विपरीतदिशि यात्रा निषिद्धा।

ईशन न०ईश-भावे ल्युट्। ऐश्वर्य्ये "य ईशेऽस्य जगतोनित्य-मेव नान्योहेतुर्विद्यत ईशनाय" श्वेताश्व० उ०। ईशे ईष्टे इत्यर्थः।"सर्पिष ईशनमल न समासः" सि०कौ०।

ईशपुरी स्त्री ६त०। काश्याम् ईशनगर्य्यादयोऽप्यत्र।

ईशबल न० ईशकृतं बलम्। पाशुपतमतसिद्धे पाशुपतानां द्वितीये पाये "तासां माहेश्वरी शक्तिः सर्व्वानुग्राहिका शिवा। धर्मानुवर्तनादेव पाश इत्युपचर्य्यते" इत्युक्तेः पाशुपतशब्दे विवृतिः।

ईशसख पु० ६त० टच्समा०। कुबेरे। बहु० न टच्। ईशसखा इत्येव। ईशमित्रादयोऽप्यत्र। ईशेन यथा ऽस्यसख्यं तथा भारते वर्णितं यथा। "पिता-महो रावणस्य साक्षाद्देवः प्रजापतिः। स्वयम्भुः सर्व-लोकानां प्रभुः स्रष्टा महातपाः। पुलस्त्यो नाम तस्या-सीन्मानसोदयितः सुतः। तस्य वैश्रवणो नाम गवि पुत्रो-ऽभवत् प्रभुः। पितरं स समुत्सृज्य पितामहमुपस्थितः। तस्य कोपात् पिता राजन्! ससर्ज्जात्मानमात्मना। स जज्ञे विश्रवा नाम तस्यात्मार्द्धेन वै द्विजः। प्रतीकाराय स-क्रोधस्ततो वैश्रवणस्य वै। पितामहस्तु प्रीतात्मा ददौ वै-श्रवणस्य ह। अमरत्वं धनेशत्वं लोकपालत्वमेव च। ईशानेन तथा सख्यं पुत्रञ्च नलकूवरम्। राजधानीं नि-वेशञ्च लङ्कां रक्षोगणान्विताम्। विमानं पुष्पकं नाम कामगञ्च ददौ प्रभुः। यक्षाणामाधिपत्यञ्च राजराजत्वमेव च" भा०व० २७३अ०।

ईशा स्त्री ईश-अ।१ऐश्वर्य्ये।"ईशायै मन्युं राजानं बर्हिषि-दधुरिन्द्रियम्" यजु० २१,५७। "ईशायै ईशनमीशा" वेददी०ईष्टे ईश-क। २ऐश्वर्य्यान्वितायां स्त्रियां ३दुर्गायां च। ईशस्य पत्नीत्यर्थे तु ङीप्। ईशी ईशपत्न्यां दुर्गायाम्।

ईशान त्रि० ईश-ताच्छील्ये चानश्। १ऐश्वर्य्यशीले २रुद्रमू-र्तिभेदे पु०।"तमीशानं जगतस्तस्थुषस्पतिम्"ऋ०१,८९,५। "ईशानसंदर्शनलालसानाम्"कुमा० ३तद्देवताके आर्द्रान-क्षत्रे तत्तुल्यसंख्यायाम् ४एकादशसंख्यायाम्। शिवस्य अ-ष्टसु मूर्तिषु सूर्य्यमूर्तिरूपतया पूज्ये ५शिवमूर्तिभेदे अष्टौ मूर्त्तीरभिधाय "मूर्त्तयोऽष्टौ शिवस्यैताः पूर्व्वादि-क्रमयोगतः। आग्नेय्यन्ताः प्रपूज्यास्तु वेद्यां लिङ्गे शिवं यजेत्" ति०त० भविष्य पु०।

ईशानादिपञ्चमूर्त्ति स्त्री ब०व० ईशानादयः पञ्च मूर्त्तयः। महादेवस्य "ईशानतत्पुरुषाघोरवामदेवसद्योजातरूपेषु पञ्चसु रूपेषु तत्तन्नामप्रयोगस्तन्त्रसारे शिवप्रकरणे दृश्यः।

ईशावास्य पु० ईशा वास्यम् इति पदमस्त्यस्य अच्। "ईशावास्यमिदं सर्वमित्यादिके यजुर्वेदस्य४० अध्यायस्थे ब्रह्मविद्याप्रतिपादके उपनिषद्रूपे ग्रन्थे। "यजुर्वेदोपनिषद्गणनायाम् "ईशावास्य, बृहदारण्यक, जाबाल, हंस, परमहंसेत्यादि मुक्ति० उ०। तत्रोत्तरलोपे ईशापि। "ईशा केन कठप्रश्नः मुण्डमाण्डूक्यतित्तिरिः। ऐतरेयं च छान्दोग्यं बृहदारण्यकं तथा" मुक्ति०उ०। इयमेवेशावास्योपनिषदित्युच्यते।

ईशितृ त्रि० ईष्टे ईश–तृच् स्त्रियां ङीप्। ईश्वरे। "न तस्य कश्चित् पतिरस्ति नेशिता" श्वेता०उ०।

ईशितव्य त्रि० ईश–तव्य। १अधीने यं प्रति ऐश्वर्य्यं क्रियते तस्मिन्। भावे तव्य। २ऐश्वर्य्ये न०।

ईशिता स्त्री ईशिनो भावः तल्। अणिमाद्यष्टैश्वर्य्यमध्ये सर्वेषां स्वामित्वरूपे १ऐश्वर्य्ये। त्व ईशित्वमप्यत्र न०। "ईशित्वञ्च वशित्वञ्च तथा कामावसायिता" सां०कौ०। "ईशित्वञ्च वशित्वञ्च लघुत्वं मनसश्च ते" भा०आ०२८अ० "येन स्थावरादिसर्वभूतानि वशीभूतानि भवन्ति तादृशे योगजन्ये २धर्मभेदे च। ऐश्वर्य्यशब्दे विवृतिः।

ईशिन् त्रि० ईष्टे ईश–णिनि। १ईश्वरे २प्रभौ ३पत्यौ। "शंसेदुपासदश्चैव दशेशोविंशतीशिनम्" मनुः। स्त्रियां ङीप्। "सर्वाशौ वाणीशिनीभिः" श्वेता० उ०।

ईश्वर पु० ईश–वरच्। १महादेवे २कन्दर्पे पातञ्जलोक्ते, क्लेशकर्मविपाकाशयैरपरामृष्टे पुरुषविशेषे ३चैतन्यात्मनि, "ईश एवाहमत्यर्थं न च मामीशते परे। ददामि च सदैश्वर्य्यमीश्वरस्तेन कीर्त्त्यते" इत्युक्तलक्षणे ४परमेश्वरे, "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन! तिष्ठति" गीता प्रभवादिमध्ये ५एकादशे वत्सरे च तत्फलम्। "सुभिक्षं क्षेममारोग्यं कार्पासस्य महार्घता। लवणं मधु गव्यञ्च ईश्वरे दुर्लभं प्रिये!" ज्योति० ६आढ्ये, ७स्वामिनि च त्रि०स्त्रीत्वे गौरा०ङीष्। "ईश्वरीं सर्वभूतानामिति" श्रीसूक्तम्।

आर्हता नित्येश्वरं न मन्यन्ते तच्च अर्हच्छब्दे ३८२पृष्ठे दर्शितम् एवं सांख्यैरपि "ईश्वरासिद्धेः" सा०सू०। "नित्येश्वरो निषिद्धः ईदृशेश्वरसिद्धिः सिद्धा" "उपासासिद्धस्य प्रशंसामात्रम्" सां० सूत्राभ्यां प्रकृत्युपासकस्य जन्यैश्वर्य्यं स्वीकृतम्" सां० कौ० च नित्येश्वरस्य कर्त्तृत्वं निरासितं यथा।

"न च क्षीरप्रवृत्तेरपीश्वराधिष्ठाननिबन्धनत्वेन साध्यत्वान्न साध्येन व्यभिचार इति साम्प्रतं प्रेक्षावत्प्रवृत्तेः स्वार्थकारुण्याभ्यां व्याप्तत्वात् ते च जगत्सर्गाद्व्यावर्त्तमाने प्रेक्षावत्प्रवृत्तिपूर्ब्बकत्वमपि व्यावर्त्तयतः नह्यवाप्तसकलेप्सितस्य भगवतो जगत् सृजतः किमप्यभिलषितं भवति नापि कारुण्यादस्य सर्गे प्रवृत्तिः प्राक् सर्गाज्जीवानामिन्द्रियशरीरविषयानुत्पत्तौ दुःखाभावेन कस्य प्रहाणेच्छा कारुण्यं? सर्गोत्तरकालं दुःखिनोऽवलोक्य कारुण्याभ्युपगमे दुरुत्तरमितरेतराश्रयत्वं कारुण्येन सृष्टिः सृष्ट्या च कारुण्यमिति। अपि च करुणया प्रेरितः ईश्वरः सुखिन एव जन्तून् सृजेन्न विचित्रान्। कर्म्मवैचित्र्यादिति चेत् कृतमस्य प्रेक्षावतः कर्म्माधिष्ठानेन तदनधिष्ठानमात्रादेवाचेतनस्यापि कर्म्मणः प्रवृत्त्यनुपपत्तेस्तत्कार्य्यशरीरेन्द्रियविषयानुत्पत्तौ दुःखानुत्पत्तेरपि सुकरत्वात्। प्रकृतेस्त्वचेतनयाः प्रवृत्तेर्न स्वार्थानुषङ्गो न वा कारुण्यं प्रयोजकमिति नोक्तदोषप्रसङ्गावतारः"।

नित्येश्वरस्य यथानुमानं तथा आन्वीक्षिकीशब्दे ७२८ पृष्ठे सर्वदर्शनसंग्रहवाक्येन प्रदर्शितम् ईश्वरसाधनं तु गौ० सूत्रवृत्त्याद्युक्तं यथा "ईश्वरः कारणं पुरुषकर्म्मसाफल्यदर्शनात्" सू०। "गुणविशिष्टमात्मान्तरमीश्वरः" भा०। "गुणैर्नित्येच्छाप्रयत्नैर्विशेषगुणैः, सामान्यैः संयोगादिभिश्च विशिष्टमात्मान्तरं जीवेभ्यो भिन्न आत्मा जगदाराध्यः सृष्ट्यादिकर्त्ता वेदद्वारा हिताहितोपदेशको जगतः पितेति। अनुमानन्तु क्षित्यादिकं सकर्त्तृकं कार्य्यत्वाद्घटादिवदित्याद्यूह्यम्" वृत्तिः। वाणादसूत्रे च "संज्ञाकर्म्म त्वस्मद्विशिष्टानां लिङ्गम्" "प्रत्यक्षप्रवृत्ततया संज्ञाकर्म्मणः" सूत्राभ्यामीश्वरसाधनं दर्शितं विवृतमेतदुपस्कारे यथा।

"तुशब्दः स्पर्शादिलिङ्गव्यवच्छेदार्थः संज्ञा नाम, कर्म्म कार्य्यम्" क्षित्यादि तदुभयमस्मद्विशिष्टानाम् ईश्वरमहर्षीणां सत्त्वेऽपि लिङ्गम् कथमेतदित्यत आह। अत्रापि संज्ञा च कर्म्म चेति समाहारद्वन्द्वादेकवद्भावः संज्ञाकर्त्तुः कर्म्मकर्त्तुश्चाभेदसूचनार्थः। तथाहि यस्य स्वर्गापूर्व्वादयः प्रत्यक्षाः स एव तत्र स्वर्गापूर्व्वादिसंज्ञाः कर्त्तुमीष्टे नेतरः एवञ्च घटपटादिसंज्ञानिवेशनमपि ईश्वरसङ्केताधीनमेव यः शब्दो यत्रेश्वरेण सङ्केतितः स तत्र साधुः यथा या काचि-

दोषधिर्नकुलदंष्ट्रायसृष्टा सा सर्व्वाऽपि सर्पविषं हन्तीत्येतादृशी संज्ञा अस्मदादिविशिष्टानां लिङ्गमनुमापकं याऽपि मैत्रादिसंज्ञा पित्रा पुत्रे क्रियते साऽपि "द्वादशेऽहनि पिता नाम कुर्य्यात्" इत्यादि विधिना नूनमीश्वरप्रयुक्तैव तथाच सिद्धं संज्ञाया ईश्वरलिङ्गत्वम्। एवं कर्म्माऽपि कार्य्यमपीश्वरे लिङ्गं तथाहि क्षित्यादिकं सकर्त्तृकं कार्य्यत्वात् घटवदिति अत्र यद्यपि शरीराजन्यं जन्यं वा जन्यप्रयत्नाजन्यं जन्यं वा सकर्त्तृकत्वासकर्त्तृकत्वेन विवादाध्यासितं वा सन्दिह्यमानकर्त्तृकत्वं वा क्षित्यादित्वेन न विवक्षितम् अदृष्टद्वारा क्षित्यादेरपि जन्यप्रयत्नजन्यत्वात् विवादसन्देहयोश्चातिप्रसक्तत्वेन पक्षतानवच्छेदकत्वात् किन्तु सकर्त्तृकत्वमपि यदि कृतिमज्जन्यत्वं तदाऽस्मदादिना सिद्धसाधनम् अस्मदादिकृतेरप्यदृष्टद्वारा क्षित्यादिजनकत्वात् उपादानगोचरकृतिमज्जन्यत्वेऽपि तथा,-अस्मदादिकृतेरपि किञ्चिदुपादानगोचरत्वात्, कार्य्यत्वमपि यदि प्रागभावप्रतियोगित्वं तदा ध्वंसे व्यभिचार इति तथापि क्षितिः सकर्त्तृका कार्य्यत्वात् अत्र च सकर्त्तृकत्वमदृष्टाद्वारककृतिमज्जन्यत्वं कार्य्यत्वञ्च प्रागभावावच्छिन्नसत्ताप्रतियोगित्वं नचाङ्कुरादौ सन्दिग्धनैकान्तिकत्वं साध्याभावनिश्चये हेतुसत्त्वसन्देहे सन्दिग्धानैकान्तिकत्वस्य दोषत्वात् अन्यथा सकलानुमानोच्छेदप्रसङ्गः न च पक्षातिरिक्ते दोषोऽयमिति वाच्यं राजाज्ञापत्तेः नहि दोषस्यायं महिमा यत् पक्षं नाक्रामति तस्मादङ्कुरस्फुरणदशायां निश्चितव्याप्तिकेन हेतुना तत्र साध्यसिद्धेरप्रत्यूहत्वात् न सन्दिग्धानैकान्तिकता तदस्फुरणदशायान्तु सुतरामिति संक्षेपः"।

एवं न्यायकणादसूत्रभाष्यादिषु प्रदर्शितेश्वरानुमानप्रकारमधिकृत्य कुसुमाञ्जलिहरिदासटीकयोः दिङ्मात्रेण किञ्चित् विस्पष्टमुक्तं यथा

"तत्साधकप्रमाणाभावात् इति पञ्चमविप्रतिपत्तिः नन्वीश्वरे साधकप्रमाणमेव नास्त्यत आह"हरि०।"कार्य्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः। वाक्यात् सङ्ख्याविशेषाच्च साध्योविश्वविदव्ययः"का०"क्षित्यादि सकर्त्तृकं कार्य्यत्वात् घटवत् सकर्त्तृकत्वञ्च उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वम्। आयोजनं कर्म्म एवञ्च सर्गाद्यकालीनद्व्यणुकारम्भकपरमाणुद्वयसंयोगजनकं कर्म्म चेतनप्रयत्नपूर्व्वकं कर्म्मत्वात् अस्मदादिशरीरक्रियावत्। धृतीति ब्रह्माण्डादि पतनप्रतिबन्धकीभूतप्रयत्नवदधिष्ठितं धृतिमत्त्वात् वियति विहङ्गमधृतकाष्ठवत् धृतिश्च गुरुत्ववतां पतनाभावः। धृत्यादेरित्यादिपदात् नाशपरिग्रहः ब्रह्माण्डादि प्रयत्नवद्विनाश्यं विनाशित्वात् पाट्यमानपटवत्। पदात् पद्यतेऽनेनेति व्युत्पत्त्या पदं व्यवहारः पटादिसम्प्रदायव्यवहारः स्वतन्त्रपुरुषप्रयोज्यः व्यवहारत्वात् आधुनिकलिप्यादिव्यवहारवत्। प्रत्ययतः प्रामाण्यात् वेदजन्यज्ञानं कारणगुणजन्यं प्रमात्वात् प्रत्यक्षादिप्रमावत्। श्रुतेर्वेदात् वेदः पौरुषेयोवेदत्वात् आयुर्वेदवत्। किञ्च वेदः पौरुषेयोवाक्यत्वात् भारतवत् वेदवाक्यानि पौरुषेयाणि वाक्यत्वात् अस्मदादिवाक्यवत्। संख्याविशेषात्। द्व्यणुकपरिमाणं सङ्ख्याजन्यं परिमाणप्रचयाजन्यत्वे सति जन्यपरिमाणत्वात् तुल्यपरिमाणकपालद्वयारब्धघटपरिमाणात् प्रकृष्टताद्दशकपालसदृशकपालद्वयारब्धघटपरिमाणवत् अणुपरिमाणञ्च न परिमाणजनकं नित्यपरिमाणत्वात् अणुपरिमाणत्वाद्वा एवञ्च सर्गादौ द्व्यणुकपरिमाणहेतुपरमाणुनिष्ठद्वित्वसंख्या च नास्मदाद्यपेक्षाबुद्धिजा अतस्तदानीन्तनापेक्षाबुद्धिरीश्वरस्यैवेति। विश्वविदव्ययइति विशिष्टसाध्यत्वं तेन नित्यसर्व्वविषयकज्ञानसिद्धिः ननु शरीरविशिष्टस्य कर्त्तृतया विशेषणबाधात्मकोविशिष्टबाध इति कर्त्तृजन्यत्वव्यापकशरीरजन्यत्वाभावात् कर्त्तृजन्यत्वाभाव इति सत्प्रतिपक्षता च। यद्वा कर्त्ता शरीर्य्येव इति व्याप्तिविरोधिनी यद्वा व्याप्त्या यथादर्शनप्रवृत्तया शरीरी कर्त्ता च उपनेयः, पक्षधर्म्मतया च क्षित्यादावशरीरीति साध्याप्रसिद्धिः विशेषणविशेष्यविरोधश्च यद्वा शरीरजन्यत्वाद्युपाधिना व्याप्यत्वासिद्धिरिति कार्य्यत्वहेतौ पञ्च दोषा इत्यत आह"हरि०।"न बाधोऽस्योपजीव्यत्वात् प्रतिबन्धोन दुर्बलैः। सिद्ध्यसिद्ध्योर्विरोधोन नासिद्धिरनिबन्धना" का० "ईश्वरे धर्म्मिणि शरीरबाधात् कर्त्तृत्वबाधोन, अधिकरणज्ञानं विना अभावज्ञानासम्भवात् अस्य कार्य्यत्वस्य धर्म्मिसाधकस्याधिकरणज्ञानजनकतया अवश्यमपेक्षणीयत्वेन बलवत्त्वात्। एवञ्च न विशेषणबाधात्मकोविशिष्टबाधः प्रत्यक्षात्मकः। ईश्वरोन कर्त्ता अशरीरत्वात् इत्यनुमानबाधोऽपि नेत्यर्थः। क्षित्यादौ न सकर्त्तृकत्वं शरीराजन्यत्वात् इति न प्रतिबन्धकं सत्प्रतिपक्षहेतोः शरीरांशवैयर्थ्यात् व्याप्यत्वासिद्ध्या दुर्बलत्वात्। तृतीयेऽपि कार्य्यत्वव्याप्तेः पक्षधर्म्मत्वसहकारात् विपक्षबाधकतर्कावताराच्च बलवत्त्वम्। उपन्यस्तायाः कर्त्ता शरीर्य्येवेति व्याप्तेर्दुर्बलतया न प्रतिबन्धः। चतुर्थे च यदि पक्षधर्म्मतया अशरीरी उपस्थितस्तदा न विरोधः

कर्तृत्वस्याशरीरत्वसमानाधिकरणस्योपलम्भात् तदनुपस्थाने तु न विरोधः विरोधाश्रयस्यासिद्धेः पञ्चमे च विपक्षबाधकतर्कसत्त्वात् तदभावनिबन्धनाप्रयोजकत्वोपाधिसिद्धिर्व्याप्यत्वासिद्धिर्वा न शरीरजन्यत्वोपाधेरपि विपक्षबाधकाभावेनापास्तत्वात्। ननु यदीश्वरः कर्त्ता स्यात् शरीरी स्यादिति प्रतिकूलतर्कावतारस्तत्राह" हरि०। "तर्काभासतया तेषां तर्काशुद्धिरदूषणम्। अनुकूलस्तु तर्कोऽत्र कार्य्यलोपो विभूषणम्" का० "प्रतिकूलतर्कास्तावदीश्वरासिद्ध्या आश्रयासिद्धा इत्याभासाः। कर्त्तारं विना कार्य्यं न स्यादिति तर्कस्तु विभूषणं सहकारकः। "अहं सर्व्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते" इत्यागमस्यात्र।"आर्षं धर्म्मोपदेशञ्च वेदशास्त्राविरोधिना। यस्तर्केणानुसन्धत्ते स धर्म्मं वेद नेतर" इति तर्कानुगृहीतस्यागमस्य बलवत्त्वम्" ननु कार्यत्वं प्रयत्नजन्यत्वेऽप्रयोजकम् अत्राह" हरि०। "स्वातन्त्र्ये जडताहानिर्नादृष्टं दृष्टघातकम्। हेत्वभावे फलाभावो विशेषस्तु विशेषवान्" का० "न हि कर्त्तारं हेतुं विना कार्यं परमाणोरेव यत्नवत्त्वेऽचैतन्यानुपपत्तिः अचेतनस्य चेतनप्रेरितस्यैव जनकत्वात् अदृष्टस्य दृष्टकारणसहकारेणैव फलजनकत्वात्। न च चेष्टायामेव भोक्तृप्रयत्नो हेतुः न तु क्रियासामान्ये इति, चेष्टां प्रति विशेषप्रयत्नस्य हेतुत्वेऽपि क्रियासामान्ये प्रयत्नसामान्यस्य कारणत्वानपायात् अन्यथा बीजविशेषस्याङ्कुरविशेषे जनकत्वे नाङ्कुरसामान्यं प्रति बीजत्वेन हेतुताया अपि विलोपापत्तेः ननु धृत्यादीनां प्रयत्नजन्यत्वे किं मानमित्यत्राह" हरि०।"कार्य्यत्वान्निरुपाधित्वमेवं धृतिविनाशयोः। विच्छेदेन पदस्यापि प्रत्ययादिश्च पूर्व्ववत्"।"धृतिविनाशयोः प्रयत्नजन्यत्वान्निरुपाधित्वं विच्छेदेनान्तरा प्रलयेन आद्यवाद्यभावात् अर्व्वाग्दर्शी नाद्यव्यवहारमूलं व्यवहारानभिज्ञत्वादिति सर्गाद्यकालीन घटादिव्यवहारप्रवर्त्तकः पुरुषः सिध्यति। एवं प्रत्ययादेर्वेदजन्यधीप्रामाण्यादेरपि निरुपाधित्वम्" हरि०।

विस्तरेणेश्वरानुमानग्रन्थस्य प्रायेण लुप्तप्रायतया कुसुमाञ्जलिग्रन्थे दिङ्मात्रेण तत्प्रकारस्य सत्त्वेऽपि न्यायकन्दल्याम् अनुमानचिन्तामणिस्थेश्वरवादे च विस्तरेण वर्णितं तयोश्च प्रायेण लुप्तप्रायतया तयोः प्रचारार्थमिहोपन्यासः क्रियते तत्रादौ

न्यायकन्दली। "किं पुनरीश्वरसद्भावे प्रमाणम् आगमस्तावत् अनुमानञ्च महाभूतचतुष्टयमुपलब्धिमत्पूर्वकं कार्य्यत्वात् यत्कार्य्यं तदुपलब्धिमत्पूर्वकं यथा घटकार्य्यं, कार्य्यञ्च महाभूतचतुष्टयं तस्मादेतदप्युपलब्धिमत्पूर्वकमिति। ननु प्रमाणेन पूर्वकोऽप्यनुपलब्धेरसिद्धं पृथिव्यादिषु कार्य्यत्वमिति चेत् तदयुक्तं सावयवत्वात् तत्सिद्धेः यत् सावयवं तत्कार्य्यं यथा घटः सावयवञ्च पृथिव्यादि तस्मादेतदपि कार्य्यमेव॥ ननु व्याप्तिग्रहणादनुमानप्रवृत्तिः कार्य्यत्वबुद्धिमत्पूर्वकत्वयोश्च व्याप्तिग्रहणमशक्यं, घटादिषु कर्त्तृप्रतीतिकाले एवाङ्कुरादिषूत्पद्यमानेषु तदभावप्रतीतेः न चाङ्कुरादीनामपि पक्षत्वमिति न्याय्यं संगृहीतायां व्याप्तावनुमानप्रवृत्तिकाले प्रतिवाद्यपेक्षया पक्षादिप्रविभागः इह तु सर्व्वदैव प्रतिपक्षप्रतीत्याक्रान्तत्वाद्व्याप्तिग्रहणमेव न सिध्यति। अत्र प्रतिसमाधीयते। यदि चैवं दृष्टान्तानुपलम्भाद्व्याप्तिग्रहणाभावः तदानीं मीमांसाभाष्यकृतोऽभिमतं सामान्यतोदृष्टमादित्यगत्यनुमानमपि न सिद्ध्यति तत्रापि देवदत्तगतिपूर्वकदेशान्तरप्राप्तिग्रहणकाल एव मणलादिप्रदेशान्तरप्राप्तिमात्रोपलम्भात् अथ तेषु देशविप्रकर्षेणापि गतेरनुपलब्धौ सम्भवन्त्यां न तथा व्याप्तिग्रहणहेतोर्निरुपाधिप्रवृत्तस्य भूयोदर्शनस्य प्रतिरोधः तुल्यकक्षत्वाभावात् एवञ्चेदशरीरत्वेनाभ्युपेतस्य कर्त्तुः स्वरूपविप्रकर्षेणाप्यङ्कुरादिष्वनुपलम्भसम्भवात् न तेन निरुपाधिप्रवृत्तस्य भूयोदर्शनस्य सामर्थ्यमुपहन्यते इति समानम्। अपि च भोः किमनेन कर्त्तृमात्रं साध्यते पृथिव्यादिनिर्म्माणसमर्थो वा। कर्त्तृमात्रसाधने तावदभिप्रेतासिद्धिः नह्यस्मदादिसदृशः कर्त्ताऽभिप्रेतो भवतां न च तेनेदं पृथिव्यादिकार्य्यमर्वाग्दृशा शक्यनिर्म्माणम्, पृथिव्यादि निर्म्माणसमर्थस्तु न सिद्ध्यति अनन्वयात् अन्वयबलेन हि दृष्टान्तदृष्टकर्त्तृसदृशः सिध्यतीति नायं प्रसङ्गः। कर्त्तृविशेषस्याप्रसाधनात्। व्याप्तिसामर्थ्याद्बुद्धिमत्पूर्वकत्वसामान्ये साध्यमाने पृथिव्यादिनिर्म्माणसामर्थ्यलक्षणोऽपि विशेषः सिध्यत्येव निर्विशेषस्य सामान्यस्य सिद्ध्यभावात्। ननु मा सिध्यतु सामान्यमिति चेत् कार्य्यत्वेन सह तद्व्याप्तेः प्रतिक्षेपात्। यदि हि व्याप्तमपि न सिध्यति धूमादग्निसामान्यं न सिध्येत् अग्निविशेषस्यानन्वितस्यासिद्धेः निर्विशेषस्यानवस्थानात्। अथेदमुच्यते द्वयमनुमानस्य स्वरूपं व्याप्तिः पक्षधर्मता च तत्र व्याप्तिसामर्थ्यात् सामान्यं सिध्यति पक्षधर्म्मताबलेन चाभिप्रेतो विशेषः पर्वताद्यवच्छिन्नवह्निलक्षणात् सा सिद्धाति अन्यथा पक्षधर्म्मतायाः कोपयोगः कवानुमानस्य गृहीतप्रतिबन्धः प्रामाण्यम्। एवञ्चेत् ईश्वरानुमानेऽपि तुल्यमन्यत्राभिनिवेशात् अथ मतं सिध्य-

त्यनुमानेऽपि विशेषोऽपि यत्र प्रमाणविरोधो नास्ति। तथाहि धूमात् पर्वतनितम्बवर्त्तिवह्निविशेषसिद्धौ का नामानुपपत्तिः दृष्टो हि देशात् कालाभेदः स्वलक्षणानाम्। ईश्वरानुमाने तु विशेषेण सिद्ध्यति प्रमाणविरोधात्। तथाहि नात्र शरीरपूर्वकत्वं साधनीयं शरीरे सत्यवश्यमिन्द्रियप्राप्तावतीन्द्रियोपादानोपकरणादिकारकशक्तिपरिज्ञानाऽसम्भवे सति कर्त्तृत्वासम्भवात्। अशरीरपूर्वकत्वञ्च अशक्यसाधनम् सर्वोऽपि कर्त्ता पूर्वं कारकस्वरूपमवधारयति ततः कारणान्यधितिष्ठति तत इच्छतीदमनेन निर्वर्त्तयामीति ततः प्रवर्त्तते तदनु कायं व्यापारयति ततः करणान्यधितिष्ठति ततः करोतीति। अनवधारयन्ननिच्छन्नप्रयतमानः कायमव्यापारयन्न करोतीत्यन्वयव्यतिरेकाभ्यां बुद्धिवच्छरीरमपि कार्य्योत्पत्तावुपायभूतं निखिलोपाधिग्रहणे व्याप्तिग्राहकप्रमाणादेवावधारितं न शक्यते प्रहातुं वह्नेरिवेन्धनविकारदाहसामर्थ्यं धूमानुमाने। तत्परित्यागे च बुद्धिरपि त्यज्यतां प्रभावातिशयादशरीरवद्बुद्धिमानेवायमीश्वरः करिष्यति। उपादानोपकरणादिस्वरूपानभिज्ञो नाशक्नोतीति चेत्। कुत एतत्? तथाऽनुपलम्भादिति चेत् फलितं तर्हि ममापि मनोरथद्रुमेण, न तथा यावदिच्छाप्रयत्नाव्यवहितकार्य्योत्पत्तावुपयुज्यते यथेदमव्यवहितव्यापारं शरीरम्। एवं तर्हि का गतिरत्र, बुद्धिमत्कर्त्तृपूर्व्वकत्वसामान्यस्य, अगतिरेव उभयोरपि शरीरित्वाशरीरित्वविशेषयोरनुपपत्तेर्निर्विशेषसामान्यस्य सिद्ध्यभावात्। किमनुमानस्य दूषणं न किञ्चित्। पुरुष एवायं विशेषाभावाच्छशविषाणायमाने साधनानर्हसामान्ये साधनं प्रयुञ्जानो निगृह्यते यथा कश्चिन्निशितं कृपाणमच्छेद्यमाकाशं प्रति व्यापारयन्। अथानुमानदूषणं विना न तुष्यति भवान् तदिदमशरीरिपूर्वकत्वानुमानं व्याप्तिग्राहकप्रमाणबाधितत्वात् कालात्ययापदिष्टं व्याप्तिबलेन चाभिप्रेतमशरीरित्वविशेषम् विरुन्धत् विशेषविरुद्धं ततश्च विरुद्धावान्तरविशेष एवेति पूर्व्वपक्षसंक्षेपः"। अत्र प्रतिसमाधिः। किं शरीरित्वमेव कर्त्तृत्वमुत परिदृष्टसामर्थ्यकारकप्रयोजकत्वम् न तावच्छरीरित्वमेव कर्त्तृत्वं सुप्तस्योदासीनस्य च कर्त्तृत्वप्रसङ्गात् किन्तु परिदृष्टसामर्थ्यकारकप्रयोजकत्वं तस्मिन् सति कार्य्योत्पत्तेः। तच्चाशरीरस्यापि निर्वहति यथा स्वशरीरप्रेरणायामात्मनः। अस्ति तत्राप्यस्य स्वकर्म्मोपार्जितं तदेव शरीरमिति चेत् सत्यमस्ति परं प्रेरणोपयोगो न भवति स्वात्मनि क्रियाविरोधात्। प्रेर्य्यं तथास्तीति चेत् ईश्वरस्यापि प्रेर्य्यः परमाणुरस्ति। ननु स्वशरीरे प्रेरणायामिच्छाप्रयत्नाभ्यामुत्पत्तिरिच्छाप्रयत्नयोश्च सति शरीरे भावादसत्यभावात् अस्ति तत्र स्वप्रेरणायामिच्छाप्रयत्नजननद्वारेणोपायत्वमिति चेत् न तस्येच्छाप्रयत्नयोरुपजननं प्रत्यकारकत्वात् अलब्धात्मकयोरिच्छाप्रयत्नयोः प्रेरणाकरणकाले तु तदनुपायभूतमेव शरीरमकर्म्मत्वादिति व्यभिचारः। अनपेक्षितशरीरव्यापारेच्छाप्रयत्नमात्रसचिवस्यैव चेतनस्य कदाचिदचेतनव्यापारसामर्थ्यदर्शनात् बुद्धिमदव्यभिचरितकार्य्यत्वमितीश्वरसिद्धिः। इच्छाप्रयत्नोत्पत्तावपि शरीरमपेक्षणीयमिति चेत् अपेक्ष्यतां यत्र तयोरागन्तुकत्वं यत्र पुनरिमौ स्वाभाविकौ वर्त्तेते तत्रास्यापेक्षणं व्यर्थम्। न च बुद्धीच्छाप्रयत्नानां नित्यत्वे कश्चिद्विरोधः दृष्टा हि गुणानां रूपादीनामाश्रयभेदेन द्वयी गतिः नित्यताऽनित्यता च। तथा बुद्ध्यादीनामपि भविष्यतीति सेयमीश्वरवादे वादिप्रतिवादिनोः परा काष्ठा, अतः परं प्रपञ्चः। आत्माधिष्ठिताः परमाणवः प्रवर्त्स्यन्ते इति चेत् न तेषां स्वकर्मोपार्ज्जितेन्द्रियगणाधीनसंविदां शरीरोत्पत्तेः पूर्वं विषयावबोधविरहात्। अस्मात्मनामपि सर्व्वविषयव्यापि सहजचैतन्यमिति चेत् न सहजं शरीरसंबन्धभाजां तत् केन विलुप्तं येनेदं सर्वत्रापूर्ववदुनाभासयति। शरीरावरणतिरोधानात्तदात्मन्येव समाधीयते न बहिर्मुखं भवतीति चेत् व्यापकत्वेन तस्य विषयसंबन्धानुच्छेदेन नित्यत्वेन च विषयप्रकाशस्वभावस्यानिवृत्तौ का तिरोधानवाचोयुक्तिः? वृत्तिप्रतिबन्धश्चैतन्यतिरोधानमिति चेत् कथं तर्हि शरीरिणा विषयग्रहणम्। क्वचिदस्य वृत्तयो न निरुध्यन्ते इति चेत् कुतोऽयं विशेषः? इन्द्रियप्रत्यासत्तिविशेषात् यद्येवमिन्द्रियाधीनश्चैतन्यस्य विषयेषु वृत्तिलाभो न सन्निधिमात्रनिबन्धनः सत्यपि व्यापकत्वे सर्व्वार्थेषु वृत्त्यभावात् इन्द्रियवैयर्थ्यप्रसङ्गाच्च साधूक्तमशरीरिणामात्मनां न विषयावबोध इति। तथा चैके वदन्ति "पराञ्चि खानि व्यतृणत् स्वयम्भूस्तस्मात् पराङ् पश्यति नान्तरात्मेति"। अनवबोधे चैतन्यं नाधिष्ठानमिति तेभ्यः परः सर्वार्थदर्शी सहजज्ञानमयः कर्त्तृस्वभावः कोऽप्यधिष्ठाता कल्पनीयः चेतनमधिष्ठातारमन्तरेणाचेतनानां प्रवृत्त्यभावात्। स किमेकोऽनेको वा? एक इति वदामः बहूनामसर्वज्ञत्वेऽस्मदादिवदसामर्थ्यात् सर्वज्ञत्वे एकस्यैव सामर्थ्यादपरेषामनुपायत्वात् न च संप्रतीषाणां भूयसामैकमत्ये हेतुरस्तीति कदाचिदनुत्पत्तिरपि कार्य्यस्य स्यात् एकाभिप्रायानुरोधेन

सर्वेषां प्रवृत्तावेकस्यैवेश्वरत्वं नापरेषां सदःपरिषदामिव, कार्य्योत्पत्त्यनुरोधे प्रत्येकमनीश्वरत्वम् । तदेवं कार्यविशेषेण सिद्धस्य कर्त्तृविशेषस्य सर्वज्ञत्वान्न तत्र चिद्वस्तुनि विशेषानुपलम्भः । अतो न तन्निबन्धनं मिथ्याज्ञानं मिथ्याज्ञानाभावाच्च न तन्मूलौ रागद्वेषौ तयोरभावान्न तत्पूर्व्विका प्रवृत्तिः प्रवृत्त्यभावे च न तत्साध्यौ धर्माधर्मौ तयोरभावात्तज्जयोरपि सुखदुःखयोरभावः सर्व्वदैव चानुभवसद्भावात् स्मृतिसंस्कारावपि नासाते इत्यष्टगुणाधिकरणं भगवानीश्वर इति केचित् । अन्ये तु बुद्धिरेव तस्याव्याहता क्रियाशक्तिरित्येवं वदन्त इच्छाप्रयत्नावनङ्गीकुर्व्वाणाः षड्गुणाधिकरणमयमित्याहुः । स किं बद्धो मुक्तो वा न तावद् बद्धो बन्धनसमाख्यातस्य बन्धनहेतोः क्लेशादेरसम्भवात् मुक्तोऽपि न भवति बन्धविच्छेदपर्य्यायत्वान्मुक्तेः । नित्यमुक्तः स्यात् यदाह तत्रभवान् पातञ्जलिः "क्लेशजन्मकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषईश्वर" इति ।

अनुमानचिन्तामणौ ईश्वरवादो यथा

"एवमनुमाने निरूपिते तस्माज्जगन्निर्मातृपुरुषधौरेयसिद्धिः क्षित्यादौ कार्य्यत्वेन घटवत् सकर्तृकत्वानुमानात् । ननु क्षित्यादि प्रत्येकं न पक्षः तस्य स्वशब्देनाभिधातुमशक्यत्वात् नापि मिलितम् एकरूपाभावात् अत एव सकर्तृत्वविचारारम्भकसंशयविषयः, तथा विवादविषयो वा न पक्षः एकरूपाभावेन तयोस्तावत् पक्षीतुमशक्यत्वात् वादिनोर्निश्चितत्वेन संशयाभावात् । न च वाद्यनुमानयोस्तुल्यत्वेन मध्यस्थस्य संशयः । अनुमानाभ्यां तस्य संशयः मध्यस्थप्रश्नानन्तरञ्चानुमानमिति परस्पराश्रयात् घटेऽपि कदाचित् तयोः सम्भवात्, प्रत्येकसंशये विवादाभावत्वेनानुमानेऽर्थान्तरतापत्तेश्च । न च शरीरापेक्षा कर्त्ता यत्र कृतं शरीराजन्यं जन्यं वा पक्षः जन्यात्मविशेषगुणशब्दफुत्कारसर्गाद्यकालीनवेदघटादिलिप्यादि संप्रदायानामीश्वरमात्रकर्तृकाणामसंग्रहात् असिद्धेश्च अदृष्टद्वारा शरीरिणोऽपि क्षित्यादिकर्तृत्वात् । नापि जन्यकृत्यजन्यं जन्यम् उभयसिद्धकृतिजन्याद्यजन्यं वा पक्षः क्षित्यादीनामदृष्टद्वारा जन्यकृतिजन्यत्वात् । नाप्यदृष्टजनककृत्यजन्यं जन्यं कृतिसाक्षादजन्यं वा पक्षः ईश्वरकृतेरदृष्टजनकत्वेन क्षितौ तदभावात् घटादावप्येवं पक्षत्वेनांशतः सिद्धसाधनात् । न च क्षितिरेव पक्षः, अङ्कुरेण सन्दिग्धानैकान्तात् । न च निश्चितविपक्षे हेतुसन्देहात् स इति वाच्यं हेतौ साध्याभाववद्वृत्तित्वसंशयस्य दूषकत्वात् स च साध्याभाववति हेतुसन्देहात् हेतुमति साध्याभावसन्देहाद्वा उभयथापि दोषः । न चैवं पक्षेऽपि तत्, अनुमानमात्रोच्छेदकत्वेन तदितरत्र तस्य दूषकत्वात् । अङ्कुरे हेतोरनिश्चयेन सन्दिग्धानैकान्तिकं तन्निश्चयेन साध्यसन्देहवति साध्यानुमितिरेव पक्षवत् सामग्रीसत्त्वात् । अत एवाङ्कुरः पक्षसम इति चेन्न तस्यापक्षत्वेन हेतोः पक्षधर्मताविरहेण स्थापनानुमानाविषयत्वात् । तदा तस्यापि पक्षत्वे प्रतिज्ञानुपपत्तिः । अत्र मानान्तराधीनतत्साध्यानुमित्यनन्तरञ्च पक्षेऽनुमितावितरेतराश्रयान्नैकमप्यनुमानम् । तत्रापि क्षित्या सन्दिग्धानैकान्तात्, क्षितेर्विवादविषयत्वेऽङ्कुरे साध्यमाने अर्थान्तराच्च । किञ्चैवमेकैकोपादानाभिज्ञसिद्धावपि नेश्वरसिद्धिः नापि सर्गाद्यकालीनं द्व्यणुकं पक्षः परम्प्रति सर्गाद्यसिद्धेः इति" पक्षाक्षेपः ।

"किञ्च सकर्तृकत्वं ? न तावत् कृतिमत्सहभावः कृतिमज्जन्यत्वं वा अस्मदादिना सिद्धसाधनात् । उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वं तदिति चेत् उपादानगोचरत्वं यदि यत्किञ्चिदुपादानगोचरत्वं तदा अस्मदादिनाऽर्थान्तरत्वं ज्ञानादीनामपि जनकत्वं विवक्षितं न च घटोपादानगोचरज्ञानादीनां क्षितिजनकत्वं सम्भवति व्यभिचारादिति चेन्न क्षितिजनकादृष्टजनकज्ञानादीनाम् उपादानविषयनियमेनादृष्टद्वारा तैरेव सिद्धसाधनात् । न च साक्षात्तज्जन्यत्वं विवक्षितं तद्धि न कृतिजन्याजन्यत्वे सति कृतिजन्यत्वं स्वजनककृत्यव्यवहितोत्तरक्षणवर्त्तित्वं वा घटदृष्टान्तस्य साध्यविकलत्वापत्तेः घटादौ कुलालादिकर्तृकत्वाभावप्रसङ्गाच्च । न च शरीरक्रियादृष्टान्त इति वाच्यं घटेनानैकान्तात् चेष्टात्वस्योपाधित्वाच्च । नापि क्षित्याद्युपादानगोचरत्वं विवक्षितं अप्रसिद्धेः न चोपादानशब्दस्य सम्बन्धिशब्दत्वेन घटक्षित्यादिसमभिव्याहारे तत्तदुपादानगोचरत्वं चैत्रो मातृभक्तो मैत्रवदिति वाच्यं शाब्दे हि बोधे तथा न चात्र शब्दः प्रमाणं वादिनोऽनाप्तत्वात् । अनुमाने त्वनुगतेन व्यापकत्वपहेतेन रूपेण व्यापकसिद्धिः तच्चोपादानत्वमेवेति कथं नार्थान्तरम् । किञ्चैवं घटादावपि तदुपादानत्वेनैवोपस्थित्यासामान्येन रूपेण कुत्राप्यनुपस्थितेर्व्याप्तिरेव न गृह्येत । अपि च सामान्यलक्षणया ज्ञानलक्षणया योगजधर्मरूपया वा प्रत्यासत्त्योपादानगोचरापरोक्षज्ञानतज्जन्यचिकीर्षाकृतिमताऽस्मदादिना सिद्धसाधनम् तेषां क्षित्यव्यवहितपूर्व्वसमयासत्त्वेऽपि तद्वतः सत्त्वात् अदृष्टद्वारा

तेषामपि जनकत्वसम्भवाच्च । ज्ञानादिसाक्षाज्जन्यत्वस्य निरस्तत्वात् । अथ योगजधर्माजन्यजन्यसविकल्पकाजन्यसामान्यलक्षणाप्रत्यासत्त्यजन्योपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यमिति साध्यम् यद्वा अनागतगोचरसाक्षात्कारजनकप्रत्यासत्त्यजन्यजन्यज्ञानादिमदजन्यं जन्यम् अनागतगोचरसाक्षात्कारजनकप्रत्यासत्त्यजन्योपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यमिति साध्यम् ज्ञानाव्यवहितोत्तरसमयवर्त्तीच्छाव्यवहितोत्तरक्षणवर्त्ति कृतीनां जनकत्वं विवक्षितं न तु ज्ञानादीनां यौगपद्यं पौर्वापर्य्यं वाऽतो न साध्याप्रसिद्धिर्नश्च क्षित्यादौ बाध इति मैवं योगजधर्मसामान्यज्ञानरूपप्रत्यासत्तीनामनागतगोचरसाक्षात्कारस्य च तज्जनकप्रत्यासत्तीनाञ्च परस्याप्रसिद्धतया तदजन्यस्य साक्षात्कारस्याप्यसिद्धत्वेन पक्षसाध्ययोर्विशेषणासिद्ध्या परं प्रत्याश्रयासिद्धेः साध्याप्रसिद्धेः । तत्सिद्धौ वा पक्षे तदजन्यत्वासिद्धिः क्षितिजनकादृष्टजनककृतिचिकीर्षासाक्षात्काराणां योगजधर्माद्यजन्यानामदृष्टद्वारा क्षितिजनकत्वेन सिद्धसाधनात् न च तादृशसाक्षाज्जन्यत्वं विवक्षितं घटादिदृष्टान्ते तदसम्भवात् । दृष्टान्ते घटादौ जनकेष्टसाधनताज्ञानस्यानुमितित्वेन जन्यसविकल्पकव्याप्तिग्रहजन्यत्वेन साध्याप्रसिद्धेश्च । ननु व्याप्तिबलेन साध्यं सिध्यति व्याप्तिश्च यत्र यत्र कार्य्यत्वं तत्र तत्र तदुपादानाभिज्ञकर्तृत्वमितिरूपा न तु यद्यत् कार्य्यं तत्तत् किञ्चिदुपादानाभिज्ञजन्यमिति एवञ्च यत्र कार्य्यत्वं तत्र तदुपादानाभिज्ञजन्यत्वमिति विशिष्टव्याप्त्या क्षित्यादौ कार्य्यत्वं क्षित्याद्युपादानाभिज्ञजन्यत्वमेव साधयिष्यतो न सिद्धसाधनमिति चेन्न घटे पटे च व्याप्तिग्रहः कार्य्यत्वस्य किं प्रत्येकं घटोपादानाद्यभिज्ञजन्यत्वेन, तत्तदुपादानाभिज्ञजन्यत्वेन, उपादानाभिज्ञजन्यत्वेन वा आद्ये पटोपादानाभिज्ञजन्यत्वादौ कार्य्यत्वस्य व्यभिचार एव । द्वितीयेऽननुगमः । तत्तच्छब्दाभिधेयघटाद्युपादानगतानुगतरूपाभावात् कथं व्यापकताग्रहः । तत्तच्छब्दस्य स्वभावात् समभिव्याहृतपरतया नायं दोष इति चेत् न अनुमाने शब्दस्वभावोपन्यासस्याप्रयोजकत्वात् । अतएवेदानीं देवदत्तो बहिरस्ति विद्यमानत्वे सति गृहासत्त्वात् विद्यमानत्वे सति योयदा यत्र नास्ति स तदा तदतिरिक्तदेशेऽस्ति यथाऽहमेव बहिरसन् गृहे प्रतिभामीत्यत्र पक्षे दृष्टान्तसाधारणयत्तत्त्वयोरनुगतयोरभावान्नान्वयी किन्तु व्यतिरेक्युक्तम् । तृतीये सिद्धसाधनमेव । अथ सर्गाद्यकालीन द्व्यणुकं ज्ञानेच्छाकृतिसमानकालीनसामग्रीजन्यं कार्य्यत्वात् घटवत् । अदृष्टसामग्रीजन्यत्वेऽदृष्टत्वापत्तिरिति चेन्न परं प्रति सर्गाद्यसिद्धेः ज्ञानादीनां सिद्धावपि द्व्यणुकाजनकत्वात् तदानीमसिद्धावप्रयोजकत्वाच्च । एतेन सर्गाद्यकालीनं द्व्यणुकं द्व्यणुकासमवायिकारणसमकालीनकृतिजन्यमिति निरस्तं द्व्यणुकासमवायिकारणसमानकालीनकृतित्वेन गौरवाप्रयोजकाभ्यामजनकत्वात्” साध्याक्षेपः । “किञ्च कार्य्यत्वं ? न तावत् योगोपस्थितकृत्यर्हत्वम् असिद्धेः नापि पूर्वकालासत्त्वे सत्युत्तरकालसम्बन्धः, तत्तत्पूर्वकालस्याननुगतत्वात् सकलपूर्वकालस्याप्रसिद्धेः नापि कादाचित्कत्वं प्रागभावप्रतियोगित्वं ध्वंसेनानैकान्त्यात् । नापि सत्त्वे सति तत्त्वं सत्ताजातेः परं प्रत्यसिद्धेः स्वरूपसत्त्वस्य च ध्वंसेऽपि सत्त्वात् यत्तु अयं घटः एतद्घटजनकानित्यज्ञानचिकीर्षाकृत्यतिरिक्तज्ञानादिजन्यः कार्य्यत्वात् पटवदित्यादि तन्न विपक्षे बाधकाभावेनाप्रयोजकत्वात् अन्यथाऽयं घटः एतद्घटजनकानित्यादृष्टातिरिक्तनित्यादृष्टजन्यः कार्य्यत्वात् अपरघटवत् । एतत्सुखदुःखसाक्षात्कारौ एतज्जनकानित्यसुखदुःखसाध्यौ सुखदुःखसाक्षात्कारत्वादित्यादिना नित्यधर्मसुखदुःखाश्रयस्यापि सिद्धिप्रसङ्गात् । अयं घटः स्वजनकानित्यज्ञानाद्यतिरिक्तनित्यज्ञानाद्यजन्यः अपरघटवदित्यादिना सत्प्रतिपक्षाच्च । केचित्तु दृश्यते तावदभिमतविषयग्राहिणीन्द्रिये मनोनिवेशवतः पुंसो मनःक्रियानुकूलो यत्नः तथा च सर्गाद्यकालीनशरीरजन्यज्ञानध्वंसानाधारकालाधारज्ञानजनकात्ममनःसंयोगजनिका मनःक्रिया तन्मनोगोचरप्रयत्नानाधारतन्मनोगोचरप्रयत्नतद्व्याप्येतरसकलकारणाधारकालानन्तरकालानाधाराद्यसत्ताका तन्मनःक्रियात्वात् ममतन्मनःक्रियावत् अर्थात् प्रयत्नाधारकालानन्तरकालाधारा सा क्रिया सिद्ध्यतीत्याहुः । तत्र सर्गाद्यकाले ज्ञाने जनकमनःसंयोगजनकक्रियायां मानाभावः पूर्वक्रिययैव संयोगसंभवात् । ईश्वरवादिनां तन्मनोगोचरप्रयत्नाधारकालोऽप्रसिद्ध एव क्रियात्वस्यैव हेतुत्वे व्यर्थविशेषणत्वञ्च । किञ्चैवं प्रयत्नानाधारकालानन्तरकालाधारत्वम् अर्थात् तत्सिद्धौ मानान्तरादीश्वरासिद्धावर्थान्तरत्वमिति” हेत्वाक्षेपः ।

“अत्रोच्यते अदृष्टाद्वारकोपादानगोचरजन्यकृत्यजन्यानि समवेतानि जन्यानि, अदृष्टप्रागभावव्याप्यप्रागभावाप्रतियोग्युपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यानि, स्वजनकादृष्टोत्तरोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यानि वा अपरोक्षज्ञानचिकीर्षाप्रयत्नविषयीभूतोपादानानि

वा समवेतत्वे सति प्रागभावप्रतियोगित्वात् यदेवं तदेवं यथा घटः । तथा चैतानि तस्मात्तथा । उक्तपक्षे कस्यचिदनन्तर्भावेऽपि तदादाय निरुक्तस्य पक्षत्वनिर्द्देशे समूहालम्बनरूपैवानुमितिरुत्पत्स्यते । न च जन्यकृत्यजन्यत्वं तावत् अननुगतेष्वेकरूपाभावेन पक्षीतुमशक्यमिति वाच्यं जन्यकृत्यजन्यत्वं हि जन्यकृतिजन्यान्यत्वमित्यन्यत्वेन रूपेण सामान्यलक्षणया तावतामुपस्थितेः न च जन्यत्वविशेषणव्यावृत्त्याप्रसिद्धिः प्रमेयो घट इति वद्व्यावर्त्तकत्वेनापि तदुपरक्तबुद्धेरुद्देश्यत्वेन तस्योपरञ्जकत्वात् । उक्तान्यतमत्वमेव सकर्तृकत्वम् अतएव घटभोक्ता न तत्कर्त्ता व्यवह्रियते एवञ्च यत्फुत्कारादीनां पक्षत्वेन ज्ञानेच्छादीनामपि पक्षत्वान्न सन्दिग्धानैकान्तः उपादानस्य सिद्धत्वेऽप्युपादेयस्यासिद्धत्वात्तद्वत्त्वेन तत्रापि चिकीर्षा । यद्वा पक्षे हेतौ च समवेतत्वं न विशेषणं तेन ध्वंसोऽपि पक्षः साध्ये चोपादानपदं कारणमात्रपरमुपादेयमेव वा जन्येच्छाकृत्यजन्यत्वञ्च पक्षे विवक्षितं तेन कृतिध्वंसस्य कृतिजन्यत्वेऽपीच्छाजन्यत्वाभावात् पक्षत्वम् । क्षितिरेव वा पक्षः न चाङ्कुरे सन्दिग्धानैकान्तिकं पक्षपक्षसमनिरपेक्षस्य घटादौ निश्चितव्याप्तिकलिङ्गस्य तयोर्दर्शनेनोभयत्रानुमित्यविरोधात् । नन्वनुमित्योरन्योन्यापेक्षत्वं येनान्योन्याश्रयः स्यात् प्रतिज्ञाया अविषयत्वात्तत्र पक्षसमव्यपदेशः । न चाङ्कुरस्य पक्षत्वेनानिर्द्देशात्तत्र न पक्षधर्मताज्ञानमिति वाच्यं सिषाधयिषाविरहसहकृतसाधकप्रमाणविरहवति लिङ्गज्ञानस्यानुमितिमात्रकारणत्वात् । तच्च क्षितौ पक्षावयवेनाङ्कुरे स्वत एवेति न कश्चिद्विशेषः । यदि च क्षितौ हेतुनिश्चयदशायां हेतुमत्तयाऽङ्कुरस्य निश्चयस्तदा क्व सन्दिग्धानैकान्तिकम्? । अथ पक्षसमे साध्याभावसामानाधिकरण्यसंशयाद्धेतौ व्याप्तिग्रह एव नोत्पद्यते उत्पन्नोऽपि वा बाध्यत इति चेत्तर्हि महानसे धूमव्याप्तिग्रहो न स्यात् भूतोऽपि वा बाध्येत सन्दिग्धवह्निपर्व्वतापर्व्वतधूमवतामेकधर्माभावेनापेक्षत्वात् तस्मात्साध्यसन्देहवति हेतुनिश्चयो न दोषः किन्तु गुण एव । अन्यथानुमानमात्रमुच्छिद्येत । पक्षादन्यत्र दूषणमिति यदुक्तं तत्र पक्षान्यत्वं यदि, तदाऽनपेक्षितानुमितिर्न स्यात् । अथ सन्दिग्धसाध्यान्यत्वं साधकबाधकप्रमाणाभावविषयान्यत्वं वा विवक्षितं तदाङ्कुरेऽपि तन्नास्ति अथ प्रतिज्ञाविषयान्यत्वं तदा स्वार्थानुमित्युच्छेदः नियतविषयज्ञानाजन्यत्वेन पक्षविशेषणात् सर्व्वविषयज्ञानसिद्धिः साध्ये च ज्ञानेच्छाप्रयत्नानां विशेषणत्वेन विशिष्टस्य साधनत्वं विवक्षितं तेन न तदोपलक्षितदेहत्वेनार्थान्तरं सामान्यतोऽपि साध्यनिर्देशे पक्षधर्मताबलेनाभिमतविशेषसिद्धेः । नन्वाद्यसाध्यद्वये घटाद्युपादानगोचरापरोक्षज्ञानचिकीर्षाकृतीनामेव जनकत्वमायात्वित्यर्थान्तरम् । न च तेषां व्यभिचारात् क्षित्याद्यकारणत्वमिति वाच्यम् । अनादौ प्रवाहे कस्यचित् कदाचित् क्षितिद्व्यणुकादि पूर्व्वं घटाद्युपादानगोचरज्ञानादिसत्त्वात् । न च सर्गाद्यकालीनस्यापि पक्षत्वात्तत्रेश्वरसिद्धिः परं प्रति तदसिद्धेरिति चेत् न ज्ञानादीनां त्रयाणां स्वविषयसमवेतकार्य्यं प्रत्येव जनकत्वावधारणेनैतदनुमानस्य तद्विषयत्वात् अतएवान्योपादानगोचरापरोक्षज्ञानाद्यजन्यत्वेन पक्षविशेषणमपि न युक्तम् । तृतीयसाध्ये तु नार्थान्तरं क्षित्यादेर्घटाद्युपादानासमवेतत्वात् । ननु सामान्यलक्षणादिप्रत्यासत्त्या क्षित्याद्युपादानगोचरं यत् प्रत्यक्षं तज्जन्यमेवास्तु तथाचेश्वरे न प्रत्यक्षं नवेच्छाप्रयत्नौ तयोः समानाधिकरणज्ञानाविषयेऽसत्त्वात् । न च तादृशप्रत्यासत्त्यजन्यत्वं प्रत्यक्षे विशेषणं, परं प्रत्यसिद्धेरिति चेन्न द्रव्यत्वेन ज्ञानलक्षणया वा कपालगोचरप्रत्यक्षेऽपि घटाद्यकर्तृत्वात् क्षित्यादौ कर्तृत्वनिर्वाहकं ज्ञानं सिध्यत्तद्विलक्षणमेव सिध्यति न चावयवविभागद्वारा क्षित्यादिपुञ्जलक्षणात् समुद्रादिषु हस्तक्षेपात् परमाणुद्वयसंयोगेन द्व्यणुकेष्वस्मदादिकर्तृकत्वादिसतः सिद्धसाधनमिति वाच्यं तत्र हि क्षितिनाशे कर्तृत्वं न खण्डक्षितौ अवस्थितसंयोगेभ्य एव तदुत्पत्तेः सकलतदुपादानगोचरज्ञानेच्छाकृतीनामभावाच्च अत एव द्व्यणुकेऽपि न कर्तृत्वं जलक्षेपादधिकपरिमाणसमुद्रादेः सपक्षत्वमेव घटस्येव । ननु घटे साध्यविकलत्वम् अन्वयव्यतिरेकाभ्यां ज्ञानादेरेव जनकत्वात् न तु तदाश्रयस्य धर्मिग्राहकस्यान्वयव्यतिरेकस्य वा ग्राहकस्याभावात् । न च घट आत्मजन्य उत्पत्तिमत्त्वात् ज्ञानवदिति वाच्यम् आत्मसमवेतत्वस्योपाधित्वात् घट आकाशजन्य उत्पत्तिमत्त्वात् शब्दवदिति वत् अप्रयोजकत्वाच्चेति चेन्नैवं प्रयत्नवदात्मसंयोगश्चेष्टाद्वारा घटहेतुरतः प्रयत्नवानात्मापि हेतुः न चात्मसंयोगे सत्यपि प्रयत्नं विना न चेष्टेति प्रयत्न एव तत्कारणम् असमवायिकारणं विना कार्य्यानुत्पत्तेः न चात्मसंयोगस्य कारणत्वेऽपि संयोगपरिचायकमात्रमात्मेति वाच्यं संयोगमात्रस्याकारणत्वेन संयोगिविशेषितस्य हेतुत्वात् । आत्मसंयोगव्यतिरेकप्रयुक्तक्रियाव्यतिरेकासिद्धेर्नात्मसंयोगः कारणमिति चेन्न या क्रिया व्यधिकरणयदीयगुणजन्या सा तत्संयोगासमवायिकारणिका यथा स्पर्शवद्-

द्रव्यसंयोगजक्रियेति तत्सिद्धेः न च क्रियायामूर्त्तमात्रसमवेतासमवायिकारणत्वनियमः कार्य्यमात्राभिप्रायेण ज्ञानादौ व्यभिचारात् विशेष्याप्रयोजकत्वात् असमवायिकारणसंयोगाश्रयस्य तत्कार्य्यजनकत्वनियमाच्च । अन्ये तु अनुकूलकृतिसमवायित्वं कर्तृत्वं न तु जनकत्वे सति, गौरवात् कर्त्तरि कारकव्यवहारस्त्वाभियुक्तानां "सविशेषण" इति न्यायेन कृतिपर्य्यवसन्न एव । एवं ज्ञानेच्छाकृतिजन्यत्वमेव साध्यं तदाश्रत्वमेवेश्वरस्य कर्तृत्वम् । अथ घटे कृतिसाध्येष्टसाधनताज्ञानं चिकीर्षाद्वारा हेतुः तच्च न प्रत्यक्षं चिकीर्षाविषयेऽनागते इन्द्रियासामर्थ्यात् किन्त्वनुमितिरूपं तथा च साध्यविकलो दृष्टान्तः साध्याप्रसिद्धिर्वेति चेन्न सिद्धत्वसिद्धविषया हि कृतिः सिद्धविषयप्रत्यक्षे सति भवति न हि स्तूपौदनयवानां संस्थानविशेषे कृतिसाध्येष्टसाधनारण्यकयवस्य प्रत्यक्षेणोपस्थितिं विना प्रवृत्तिः अतएव यागे शब्दात्तदुपजीविलिङ्गाद्वा कृतिसाध्येष्टसाधनत्वेऽवगतेऽपि हविरादीनां प्रत्यक्षेणानुपस्थितौ न प्रवृत्तिः न चोपादानप्रत्यक्षं प्रवर्त्तकज्ञानोपक्षीणम् अप्रत्यक्षपरमाणौ तत्क्रियायामिष्टसाधनताज्ञानेऽप्यप्रवृत्तेः प्रवृत्तिविषयस्तदङ्कुरादेः प्रत्यक्षत्वाच्च शब्दफुतकारादिना व्यभिचारः न चाभिमतप्राहकेन्द्रियसंयोगात्मनसि प्रयत्नजन्यक्रियाप्रदर्शनाद्व्यभिचारः अदृष्टसहकृतत्वगिन्द्रियेण हि मनोवहनाडीनामुपलम्भेन तद्गोचरप्रयत्नात्तन्नाडीक्रिया ततः स्पर्शवद्वेगवन्नाड्या नोदनात्मनसि क्रिया न तु प्रयत्नात् । अतएव जलाद्यभ्यवहारमलोत्सर्गहेतुनाडीनामनाद्यभ्यासवासनावशाददृष्टसहकृतत्वगिन्द्रियेणोपलम्भात् तद्गोचरः प्रयत्नः । नन्वेवं घटादावनुमिते जन्यत्वदर्शनादीश्वरेऽनुमितिरेव न सिद्ध्येत् यथा च प्रत्यक्षस्येन्द्रियजन्यत्वेऽपि नित्यं तदीश्वरे तथानुमितेर्नित्यं जन्यत्वेऽपि सा तत्र नित्यैव अनित्येनानादिद्व्यणुकाद्यजननादिति चेन्न सुखदुःखाभावादिसाधनानुमिते तर्हि घटादौ हेतुत्वं गृहीतं न च तावता शरीराद्यदृष्टाभावेन सुखमस्य नो न क्षित्यादौ तस्यानुमितिर्यथार्था सम्भवति न च शाब्दानुमितेरनुमित्यन्तरस्य वाऽनुपस्थितित्वेन घटादौ दृष्टिविषयप्रत्यक्षत्वहेतुत्वं गृहीतमतो नेश्वरेऽनुमितिः । नन्वद्वेषजन्यकृतिसाध्ये चिकीर्षाविरहाद्व्यभिचारः तद्दृष्टान्तेन क्षित्यादौ द्वेषसाध्यत्वादीश्वरे द्वेषोऽपि स्यात् द्वेषवतः संसारित्वेन भगवतोऽपि तथा स्यादिति चेन्न न हि सर्पादिद्वेषादेव तन्नाशानुकूलव्यापारे कृतिरुत्पत्तुमर्हति प्रयोजनं विना दुःखैकफले प्रेक्षावतां कृतेरनुपपत्तेः किन्तु दुःखसाधनध्वंसं तत्साध्यदुःखानुत्पादं वा फलमुद्दिश्य तत्साधनताज्ञानात्, तथा चेष्टसाधनताज्ञानात्तदिच्छास्येवेति सैव कृतिकारणं क्लृप्तत्वात् द्वेषस्तु परम्परया तदुपक्षीणः, कुतस्तर्हि द्वेषः, यतु द्वेष्मीति अबाधितप्रत्ययात् । न चादृश्यकर्तुरनुपलब्धिबाधः, अनुपलब्धिमात्रस्य बाधकत्वेऽतीन्द्रियोच्छेदात् योग्यानुपलब्धेरसिद्धेः परात्मनोऽयोग्यत्वनियमात् शशशृङ्गप्रतिबन्द्या च नादृश्यमात्रनिरासः परमाण्वादिस्वीकारात् नाप्ययोग्यकर्तृकनिरासः चेष्टया ज्ञानादिमतः परात्मनोऽनुमानात् परं प्रति तस्य योग्यत्वात् । नापि शृङ्गे पशुत्ववद् प्रयोजकं, कर्तुः कार्य्यमात्रे कारणत्वावधारणात् प्रतिबन्दिमात्रस्यादूषणत्वात् । शशे पशुत्वं नायोग्यशृङ्गसिद्धिः कुतोनेति चेत् अर्थान्तरत्वात् विपक्षे बाधकाभावात् व्याप्त्यसिद्धेः शृङ्गत्वस्य योग्यसंस्थानविशेषव्यङ्ग्यत्वे योग्यस्य विरोधेन शङ्कितुमशक्यत्वात् शशे शृङ्गस्यात्यन्ताभाव इति सर्वेषामबाधितप्रत्यक्षबाधितत्वाच्च । अथ कृतिकार्य्यत्वयोर्नान्वयव्यतिरेकाभ्यां व्याप्तिग्रहः त्वन्मते व्यापककृतेः सत्त्वेन देशे समये वा कृतिमात्रव्यतिरेकानिरूपणात् नित्यकृतेरन्वयोऽपि गृहीतो न वह्निमात्रव्यतिरेकोऽस्ति गृह्यते च । न चैवमाकाशात्मनोरप्यसिद्धिः समवायिमात्रस्य व्यतिरेकानिरूपणेन कार्य्यं समवायिकारणजन्यमिति व्याप्तेरसिद्धेरिति वाच्यं समवायिकारणत्वपक्षे हि तत्संसर्गाभावोऽप्रयोजको निमित्तमात्रसाधारणत्वात् किन्तु यत्समवायि तत्र कार्य्यं यत्र समवायि तत्र नेत्यन्योन्याभावमादाय कार्य्यं समवायिजन्यमिति व्याप्तिग्रहसम्भवात् । समवायित्वेन तयोरन्योन्याभावोऽस्ति गृह्यते च । यद्वा भावकार्य्यं समवेतमिति व्याप्त्या तयोः सिद्धिरिति यथा हि यद्यद्वह्नेरन्वये धूमो गृहीतस्तत्तद्व्यतिरेके धूमव्यतिरेकग्रहात् वह्निधूममात्रयोर्व्याप्तेर्ग्रहः न तु पर्वतीयवह्नेः अन्वयव्यतिरेकग्रहात् । न चान्यान्वयव्यतिरेकाभ्यामन्यव्याप्तिग्रहेऽतिप्रसङ्गः यद्विशेषयोरन्वयव्यतिरेकग्रहः तत्सामान्ययोर्बाधकं विना व्याप्तिग्रहात् स च वह्निधूमव्याप्तिग्रहे उत्पद्यमानः सकलधूमगोचरो धूमत्वपुरस्कारेण प्रसिद्धधूमगोचर एव न भवति । तथेहापि कृतिविशेषकार्य्यविशेषयोरन्वयव्यतिरेकग्रहो बाधकं विना कृतिकार्य्यत्वमात्रयोर्व्याप्तिग्रह उपायः न तु पक्षधर्मताबलेन अविशेषान्वयव्यतिरेकग्रहः अनुमानमात्रो-

च्छेदप्रसङ्गात्। एतेन "कार्यत्वस्य विपक्षवृत्तिहतये सम्भाव्यतेऽतीन्द्रियः कर्त्ता चेद्व्यतिरेकसिद्धिविधुरा व्याप्तिः कथं सिध्यति। दृश्योऽथ व्यतिरेकसिद्धिमनसा कर्त्ता समाधीयते तस्याद्यापि तदा दृशादिकमिति व्यक्तं विपक्षेक्षणमिति"निरस्तम्। ननु यदि कर्तृमात्रव्यतिरेकग्रहाद्दृश्यकर्तृसिद्धिस्तदा वह्निमात्रव्याप्तधूमाद्दृश्यजठर्यसिद्धिरपि स्यात्, न स्यात् अदृश्यवह्नेर्धूमानुपपत्तेः दृश्यस्यैव तत्र हेतुत्वात्। ननु ज्ञानेच्छाप्रयत्नत्रयव्यतिरेकान्न कार्यव्यतिरेकः किन्तु एकैकव्यतिरेकात् तथा च व्यर्थविशेषणत्वे विशिष्टव्यतिरेको न हेतुव्यतिरेकव्याप्य इति न हेतोर्विशिष्टसिद्धिः साध्याभावव्यापकाभावप्रतियोगिन एव साध्यगमकत्वादिति चेन्न यत एकैकव्यतिरेकात् कार्यव्यतिरेकोऽतएव कार्यत्वादेकैकं सिध्यत्त्रयमपि सिध्यति। व्यर्थस्तु समाजः।

स्यादेतत् अशरीरसर्वज्ञनित्यज्ञानादिमान् कर्त्ता पक्षे विवक्षितः घटादौ च कार्यत्वस्य तद्विपरीतकर्तृसहचारादिदर्शनाद्विशेषविरुद्धत्वमिति न हेतोर्विवक्षितसाध्यविपरीतसहचारमात्रस्यादूषणत्वात् अन्यथानुमानोच्छेदप्रसङ्गात्। न चानित्यज्ञानासर्वज्ञशरीरकर्तृत्वेन समं कार्यत्वस्य व्याप्तिरस्ति येन तद्विपरीतसाधने विरुद्धं स्यात् तादृशव्याप्तिश्च त्वया मया वा नाङ्गीक्रियते अङ्कुरादौ योग्यानुपलम्भेन शरीरिकर्तृत्वाभावात्। अथ यथादर्शनबलप्रवृत्तव्याप्त्याऽनित्यज्ञानादिमान् कर्तोपनेयः पक्षधर्मतया च नित्यज्ञानादिमान् तथा चोपनेयविशेषयोर्विरोधेन व्याप्तिपक्षधर्मतयोर्विरोधात् परस्परसहकारिताविरहान्नानुमानविशेषविरोधादिति चेन्न अनित्यज्ञानादिकर्तृजन्यत्वेन व्याप्त्यभावात् ज्ञानादिमत्कर्तृजन्यत्वव्याप्तेः पक्षधर्मताबलेभ्यः विशेषाविरोधात् केवलाया व्याप्तेश्च पक्षधर्मतायाश्च पृथगुपनायकत्वाभावाच्च एकवैयर्थ्यप्रसङ्गाच्च तथा च निरपेक्षतायां विशेषानुपस्थापनादेव न विरोधज्ञानं सापेक्षतादशायाञ्च सहोपलम्भादेव विरोधप्रतियोगिनोः सिद्ध्यसिद्धिभ्यां विरोधभावज्ञानाभावाच्च। लिङ्गविशेषेण साध्यविशेषेण च एव विरोधे च विशेषविरोधः यथा चन्दनप्रभववह्निमानयं सुरभिधूमवत्त्वात्। ननु ज्ञानत्वनित्यत्वयोः कर्तृताशरीरित्वयोश्च परस्परविरुद्धत्वेन एकधर्म्यसमावेशात् कथं नित्यज्ञानादिकर्तृसिद्धिः, न उपसंहारस्थानाभावात्। तथाहीश्वरे तद्बुद्धौ चाशरीरित्वकर्तृबुद्धिनित्यत्वे च उपसंह्रियमाणे विरुद्धे, न तु स्वाश्रयस्थिते उभयोच्छेदप्रसङ्गात्, न चेश्वरस्तद्बुद्धिर्वोपस्थिता उपस्थितौ वा धर्मिग्राहकमानेन तयोर्विरोधापहारात् अनुपस्थिते च तयोर्विरोधज्ञानमकिञ्चित्करमेव अस्मदादिबुद्धौ व्योमादौ कुविन्दे मुक्तात्मनि च उपस्थिते विरोधोपसंहारात्, बुद्धिनित्यत्वयोः कर्तृत्वाशरीरित्वयोरनधिगमेऽपि ईश्वरेऽशरीरिकर्तृत्वनित्यज्ञानादिसिद्धिरप्रत्यूहैव। अतएव नित्यत्वावयवत्वयोर्विरोधज्ञानमकिञ्चित्करमेवेति परमाणुसिद्धिः। ईश्वरतद्बुद्ध्यादिकं तर्कितमिति चेन्न तर्कस्य प्रसञ्जनस्य संशयस्य वाऽज्ञानेऽसम्भवात्। स्यादेतत् घटादौ कृतिसाध्यता हस्तादिव्यापारादिद्वारैव न तु साक्षात्, न च पितापुत्रयोरेकघटसाधकत्वमिव प्रयत्नहस्तादिव्यापारयोः साधकत्वं वाच्यं घटार्थं हस्तव्यापारादिना व्याप्रियमाणकुलालसमीपदेशस्थस्य हस्तादिव्यापारशून्यस्य तद्घटकर्तृत्वापत्तेः न च हस्तादिव्यापारवत्ताऽशरीरस्य सम्भवति अन्यादृशी च कृतिसाध्यता न दृष्टा, शरीरतद्व्यापारौ चाङ्कुरे बाधिताविति कर्त्तुरपि बाधः। अन्यथा तदनुमानात् चेतन एव कर्त्ता क्षितौ च अनुमीयते बुद्ध्यादिमत्परात्मनोर्योग्यानुपलब्धिबाधाभावात् शरीरव्यापारद्वारैव चेतनस्य हेतुत्वात् शरीरव्यापारस्य चाङ्कुरे बाधात् बाधित इति चेत्तर्हि कर्त्तृमात्रस्यापि तद्द्वारैव चेष्टेतरकार्यकर्तृत्वदर्शनात् तत्रापि कर्तृमात्रे बाधोऽपि। एवञ्च कृतिसाध्यत्वे शरीरव्यापारजन्यत्वं प्रयोजकमिति स एवोपाधिः। एवं ज्ञानेच्छयोरपीच्छाकृतिद्वारा जनकत्वमिति कथं द्वारं विना क्षित्यादौ जनकत्वमिति। उच्यते। जन्यमात्रे हस्तादिजनककृतित्वेन न जनकत्वं चेष्टायां क्षित्यादौ च व्यभिचारात् घटादौ च तथा जनकत्वमिति जन्यमात्रे कृतिमात्रस्य जनकत्वविरोधिविशेषयोर्जन्यजनकभावे बाधकं विना सामान्ययोरपि तथाभावनियमात्। न हि विशेषे विशेषप्रयोजकत्वेन सामान्यप्रयोजकत्वविरोधः। चेष्टेतरकार्ये शरीरद्वारैव कृतेर्हेतुत्वात् तेन विना क्षित्यादौ न कृतिसाध्यत्वमिति चेत् चेष्टेतरकार्यमात्रे शरीरव्यापारकृतित्वेन जनकत्वे क्षित्यादौ व्यभिचारात्। किन्तु तद्विशेषघटादौ इत्युक्तत्वात्। न चैवमामवातजडीकृतकलेवरस्य प्रयत्नादेव घटोत्पत्तिः स्यात् हस्तादिव्यापारं विनैव कृतेर्हेतुत्वादिति वाच्यं घटे कृतौ हस्तादिव्यापारस्यापि हेतुत्वात्। यदुक्तं चेतन एव कुतो नानुमीयत इति तत्र हस्तादिव्यापारककृतिमान् यदि चेतनोऽभिमतः तदा हस्तादिव्यापारस्याङ्कुरे योग्यानुपलब्धिबाधात् अथ हस्तादिव्यापाररहितकृतिमानभिमतस्तदोमित्युच्यते स खलु

भगवानीश्वरः। अतएव सहभावनिरूपकत्वं नियतपूर्ववर्त्तित्वं कारणत्वं समवाय्यसमवायिनोस्तथात्वेन निमित्तेऽपि तथाभावात् अन्यथा प्रतिबन्धकाभावानन्तरं प्रतिबन्धकसत्त्वे कार्य्यं स्यात् प्रतिबन्धकाभावस्य पूर्वं सत्त्वात् न च कृतेः सहभावनिरूपकत्वं स्वतः कार्य्यसमयेऽभावात् तथा चैतत्परिचायितव्यापारद्वारा तस्याः सहभावनिरूपकत्वमतः शरीरव्यापारद्वारैव कृतेर्जनकत्वं न केवलाया इत्यपास्तम् समवाय्यसमवायिप्रतिबन्धकाभावानामविनश्यदवस्थत्वेन कारणत्वात् तथैवान्वयव्यतिरेकात् तेन तेषामभावे विनाशक्षणे च कार्य्यम्, अन्यथा प्रतिव्यक्ति कार्य्यसहभावनिरूपणे कार्य्योत्पत्तेः प्राक्सहभावस्य निरूपयितुमशक्यत्वात् कारणत्वानिश्चये क्वापि प्रवृत्तिर्न स्यादिति, तज्जातीयत्वस्यावश्यवाच्यत्वे विनश्यदवस्थं कथं सहभावेनापि व्यवच्छेद्यम् अतः स्वरूपयोग्यतारूपा कारणता तत्रापि, कार्य्याभावस्तु सहकारिविरहात् अन्यथा निमित्तानां प्रत्येकं कार्यसहभावनिरूपकत्वेन जनकत्वे गौरवं प्रागभावस्य प्रतियोग्यजनकत्वप्रसङ्गात् अन्यथा उत्पन्नोऽपि पुनरुत्पद्येत सामग्रीसत्त्वात्। न च स एव तत्र प्रतिबन्धकः अभावान्तरस्याकारणत्वेन तत्र कारणीभूताभावप्रतियोगित्वरूपस्य प्रतिबन्धकत्वस्य प्रागभावकारणत्व एव विश्रामात्। न चैकसामग्री एकदा एकमेव कार्य्यं जनयति स्वभावादिति वाच्यं सामग्रीतद्विरहस्य कार्य्यतदभावप्रयोजकत्वेन सामग्र्यां सत्यां कार्य्यस्य, तदभावे सामग्रीविरहस्य कार्य्याभावस्य वज्रलेपायितत्वात्। स्यादेतत् कर्त्ता शरीर्य्येव ज्ञानमनित्यमेव बुद्धिरिच्छाद्वारैव कृतिद्वारैवेच्छा हेतुरित्यादि प्राथमिकप्राप्तप्रत्यक्षविरोधात् नाशरीरनित्यज्ञानादिकर्तृसिद्धिः। अतएव शरीरमनित्यमेवेति नियमाच्च कर्तृत्वेन नित्यातीन्द्रियशरीरसिद्धिरीश्वरे। न चाप्रयोजकं निरुपाधित्वेन शङ्काकलङ्कानवतारात् कार्य्यत्वसकर्तृकत्वयोर्यदि निरुपाधिकत्वमस्ति तदापि तुल्यबलत्वेन सत्प्रतिपक्षात् तत्प्रतिबन्धोऽस्तु। न च कार्य्यत्वं पक्षधर्म्मतासत्त्वाद्बलीयः कर्त्ता शरीर्य्येवेत्यादौ तन्नास्तीति वाच्यं ज्ञानमनित्यमेवेति व्याप्तेरेव ज्ञानजन्यत्वविरोधित्वात् एवं कार्य्यं ज्ञानजन्यं ज्ञानमनित्यमेवेत्यनयोर्विरोध एव अविरोधे तु द्वयमपि स्यात् तथा च क्षित्यादौ शरीर्य्यनित्यज्ञान.पर्य्यवसाने विरोध एव स्यात्। किञ्च ज्ञानमनित्यमेवेत्यादौ नित्यज्ञानादेरप्रसिद्धेः तद्व्यावर्त्तकतया नोपाधिनिश्चयस्तत्संशयो वा कार्य्यत्वसकर्तृकत्वव्याप्तिदशायां शरीरव्यापारव्यभिचारात् उपाधेर्निश्चयः संशयो वास्तीति तन्न ज्ञानमनित्यमेवेत्यादिव्याप्तेरसिद्धेः विपक्षे बाधकाभावेनाप्रयोजकत्वात् निरुपाधिसहचारदर्शनव्यभिचारादर्शनादेव व्याप्तिग्रहः। निरुपाधित्वमेव विपक्षे बाधकमिति चेन्न अवयवोमहानेव तेज उद्भूतरूपमेवेत्यादि व्याप्तिग्रहात् परमाणुनेत्रादेरसिद्धिप्रसङ्गः। अतएव चाक्षुषत्वेऽनेकद्रव्यवत्त्वस्य, साक्षात्कारे विषयेन्द्रियसन्निकर्षस्य हेतुत्वात तन्मूलकविपक्षबाधकेन परमाण्वादिसाधकस्य बलवत्त्वात् परमाण्वादिसिद्धौ विरोधिव्याप्तेर्बाधः न तु वैपरीत्यं विपक्षे बाधकाभावेन तस्याबलवत्त्वादिति मन्यसे तर्हि ज्ञानादिकार्य्यकारणभावावधारणात् तन्मूलकविपक्षबाधकेन निष्कलङ्कव्याप्तिग्रहात् पक्षधर्म्मताग्रहसहितान्नित्यज्ञानादिसिद्धौ व्यभिचारान्न व्याप्तिः। अन्यथा साध्यं पक्षातिरिक्त एवेत्यादि निरुपाधिसहचाराद्व्याप्तिग्रहबलात् सकलानुमानोच्छेदः। वयन्तु ब्रूमः। पक्षधर्म्मताबलान्नित्यं ज्ञानं सिध्यत् बुद्धिरनित्यैवेति व्याप्तिप्रत्यक्षेण न प्रतिबध्यतेऽस्मदादिबुद्धिविषयकत्वेन भिन्नविषयकत्वात् एकविषयविरोधिज्ञानस्यैव प्रतिबन्धकत्वात् नित्यत्वानित्यत्वयोरेकजातीये द्रव्येऽविरोधात्। बुद्धिमात्रेऽनित्यत्वावगमात् कथं तद्विशेषनित्यत्वबुद्धिरिति चेन्न बुद्धिमात्रस्येश्वरानीश्वरबुद्धिपरत्वे विरोधात् व्यभिचाराच्च अस्मदादिबुद्धिपरत्वे च भिन्नविषयत्वेनाप्रतिबन्धकत्वात्। बुद्धित्वं नित्यावृत्त्येवेत्यवगतमतस्तत्र कथं नित्यवृत्तित्वावगम इति चेन्न उभयसिद्धनित्यावृत्तित्वावगतौ विरोधाभावात्। बुद्धित्वमनित्यत्वव्याप्यमवगतं नानित्यत्वाभाववति ज्ञातव्यमिति चेत् अनित्यत्वव्याप्यमनित्यमात्रवृत्तित्वं तत्र चोक्तमेव। एतेन कर्त्ता शरीर्य्येवेत्याद्यपि ज्ञानं प्रतिबन्धकमिति निरस्तम्। ननु कर्तृजन्यत्वे जन्यत्वं नावच्छेदकं किन्तु घटत्वादिकमेव तेनैव रूपेणान्वयव्यतिरेकात् आवश्यकत्वाच्च अननुगतमपि जन्यतावच्छेदकं वह्निजन्यतायां धूमत्वादिवत्। अथ घटत्वादिवज्जन्यत्वमवच्छेदकं न हि विशेषोऽस्तीति सामान्यमप्रयोजकं तथा च वह्निजन्यत्वे धूमविशेषः प्रयोज्योऽस्तीति न धूमसामान्यमग्निं गमयेत् र-स्याद्यद्विशेषयोः कार्य्यकारणभावः तत्सामान्ययोरपि बाधकं विना तथात्वनियमः। न तत्र बाधकाभावात् अत्र ज्ञानमनित्यमेवेत्यादि प्राथमिकबहुव्याप्तौ बाधात् तुल्यत्वेन व्याप्तिसंशयाधायकत्वात्। न च कार्य्यकारणभावमूलकत्वेन कार्य्यत्वव्याप्तिर्बलीयसीति वाच्यं विरोधिप्राबल्येन कारणभावस्यैवासिद्धेः। एतेन धूमादौ वह्नित्वं जन-

कतावच्छेदकमनुगतं सम्भवतीति हन्त जन्यत्वमनुगतमस्त्यतो बाधकं विना न मुच्यते इति, निरस्तम्। ज्ञानमनित्यमेवेत्यादिसहचारावसायस्य बाधकं विना पक्षधर्म्मव्याप्तिपर्य्यवसायितत्वेन बाधकत्वादिति मैवम् निरुपाधित्वेन सहचारावसायस्य साधकं बाधकं च विना साधारण्ये व्याप्तिसंशयाधायकत्वात्। अन्यथा साध्यं पक्षातिरिक्त एव सुखं दुःखसंभिन्नमेवेत्यादि व्याप्तिग्रहस्य कार्य्यकारणभावग्राहकबाधकत्वे तत्संशायकत्वे वा कारणानुमानोच्छेदनिरीहं जगज्जायेत। तस्माद्यद्विशेषयोः कार्य्यकारणभावस्तत्सामान्ययोः कार्य्यकारणभावो बलवता बाधकेनापनीयाते, न चात्र तदस्ति विरोधिव्याप्तिसाधकस्य विपक्षबाधकस्याभावात्। नव्यास्तु कार्य्यं कर्त्तृजन्यमिति व्याप्तितोऽशरीरनित्यज्ञानकर्त्तुपस्थितौ ज्ञानमनित्यमेवेत्यनेन विरोधप्रतिसन्धाने न तु तां विना प्रतियोग्यनुपस्थितौ विरोधोऽनिरूपणात् तथा चोपजीव्यबाधात् ज्ञानमनित्यमेवेति व्याप्तिज्ञानमकिञ्चित्करमेव। अतएव पक्षधर्मताविनाकृतं विरोधिव्याप्तिज्ञानं न हेत्वाभासतयोक्तं विरोधिप्रतियोगिविरहासिद्धिपराहतत्वादिति

स्यादेतत् अस्तु शरीरजन्यत्वमुपाधिः न च पक्षेतरत्वरूपविपक्षमात्रव्यावर्त्तकविशेषणत्वात् साधनविशेषितत्वात् साधनतुल्ययोगक्षेमत्वेन साध्यव्यापकत्वानिश्चयाच्च नोपाधित्वं, चेष्टेतरकार्य्येषु शरीरव्यापारद्वारैव कर्त्तुः कारणत्वात् न हि शरीरविनाकृतः कर्त्ता शरीरक्रियां घटादिकं वा जनयति। न च यत्सहकृतं यज्जनकम् तेन विना तज्जनकम् यतोऽस्माच्छरीराज्जन्यमेव कर्त्तृजन्यमिति साध्यव्यापकत्वनिश्चयात्। पक्षेतरत्वादौ च विपक्षबाधकाभावाच्च साध्यव्यापकतानिश्चय इति तेषामनुपाधित्वे बीजम्। अत एव बाधोन्नीतं पक्षेतरत्वं वह्निमत्त्वेन धूमवत्त्वे साध्ये आर्द्रेन्धनप्रभववह्निमत्त्वं रूपवत्त्वेन गन्धवत्त्वे साध्ये पृथिवीत्वमुपाधिः विपक्षबाधकैस्तेषां साध्यव्यापकत्वनिश्चयात्। न च साधनविशेषितत्वमपि, जन्यत्वं प्रागभावप्रतियोगित्वं शरीरजन्यत्वञ्च शरीरकारणकत्वमन्यादिभिरुक्तेः इतरपदसमभिव्याहारेण जन्यपदादितरकारणकस्यैव प्रतीतिस्तदर्थत्वकल्पनादिति विधौ वक्ष्यते। अतएव शरीरिकर्त्तृकत्वमुपाधिः शरीरसहकृतस्यैव कर्त्तुः कारणत्वात् व्याप्यव्यापकयोर्व्योरनिवेशयत एव प्रमाणस्य व्याप्तिग्राहकत्वात्। शरीरिकर्त्तृकत्वसकर्त्तृकत्वयोर्न व्याप्तिग्रह इति चेन्न विशिष्टाविशिष्टभेदेन व्याप्यव्यापकभावाविरोधात्। अत एव जन्यत्वे कारणजन्यत्वमनुमीयत इति, मैवं कर्त्तुर्हि शरीरसहकारिता किं घटादौ कर्त्तव्ये कार्य्यमात्रे वा स्वकार्य्ये वा आद्ये कर्त्ता शरीरं विना घटादिकं न करोतीति किमायातं कर्त्तुः कार्य्यमात्रकरणे। द्वितीये च कार्य्यमात्रं कर्त्तृजन्यमिति न त्वया स्वीक्रियते स्वीकारे वा शरीराजन्यमपि कार्य्यं कर्त्तृजन्यमिति साध्याव्यापकत्वम्। तृतीये तु न स्वजन्यत्वं स्वजन्यतावच्छेदकमात्माश्रयात्। तथापि यत्र कर्त्तृत्वमस्ति तत्र शरीरजन्यत्वमावश्यकमिति तस्य साध्यव्यापकत्वं तुल्ययोगक्षेमत्वेन हेतुव्याप्यतासंशयाधायकत्वेन सन्दिग्धोपाधित्वं वेति चेन्न लाघवेन बाधकं विना कर्त्तृजन्यत्वे सति जन्यत्वमवच्छेदकं न तु शरीरजन्यत्वं गौरवात् तथा च शरीरजन्यत्वं न सकर्त्तृकत्वव्यापकं घटादौ त्वार्थः समाजः,घटत्वेन शरीरजन्यत्वनियमात् न तु व्यापकत्वप्रयुक्तो मानाभावात्, शरीरजन्यत्वं न सकर्त्तृकत्वव्यापकं तद्व्याप्यजन्यत्वाव्यापकत्वात् नित्यत्ववदिति बाधकात् हस्तादिनापि कर्त्तृत्वनिर्वाहेण शरीरस्याप्रयोजकत्वात् साक्षात्प्रयत्नविषयजन्यत्वस्य साधनव्यापकत्वाच्च। शरीरिकर्त्तृकत्वमपि नोपाधिः जन्यमात्रे कर्त्तुः शरीरसहकारिताविरहात्। अथ यद्विशेषयोः कार्य्यकारणभावस्तत्सामान्ययोरपि बाधकं विना तथा नियम इति त्वया निरटङ्कि तथा च कर्त्तृविशेषशरीरजन्यविशेषयोः कार्य्यकारणभावनियमात् कर्त्तृमात्रशरीरजन्यमात्रयोरपि तथाभावः तथा च शरीरजन्यत्वं कर्त्तृतावच्छेदकमिति भवत्युपाधिः। नचैवं घटवच्छरीरजन्यत्वं सकर्त्तृकत्वव्याप्यं न व्यापकमपीति वाच्यं उभयसिद्धसकलसकर्त्तृत्वदृष्टत्वेन साध्यव्यापकतानिश्चयात् जन्यत्वेऽपि सकर्त्तृकत्वव्यापकत्वग्राहकमस्तीति चेत्तर्हि उभयत्र ग्राहकसाम्ये विनिगमकाभावात् व्याप्तिसंशयाधायकत्वेन सन्दिग्ध उपाधिर्व्याप्यत्वासिद्धिर्वा। हेतुव्याप्यतासंशयाधायक एव सन्दिग्धोपाधिः न च साध्यव्यापकत्वे साधनाव्यापकत्वे वा, उभयथैवासन्देहात्। न च वाच्यं शरीरजन्यत्वयोरन्वयव्यतिरेकलाभे जन्यत्वसकर्त्तृकत्वयोस्तद्ग्रह आवश्यक इति लाघवात् तयोरेव व्याप्तिग्रहो न तूपाधिसाध्ययोः हेतुसाध्ययोरन्वयव्यतिरेकलाभात् शरीरजन्यत्वमदगनेऽपि भवतीति विनिगमकमिति, यतो न कर्त्तृमात्रजन्यमात्रयोरन्वयव्यतिरेकाभ्यां व्याप्तिग्रहः कर्त्तृमात्रस्य व्यतिरेकाभावात्। किन्तु विशेषयोरन्वयव्यतिरेकेण कार्य्यकारणभावेन वा सामान्ययोस्तथाग्रहो च तत्रावे-

वेति चेदुच्यते। अस्तु तावत् घटत्ववत् जन्यत्वशरीरजन्यत्वयोरपि कर्तृजन्यतावच्छेदकत्वेन सकर्तृकत्वव्याप्यत्वं ग्राहकसमानत्वात् विनिगमनाभावाद्विरोधाभावाच्च सकर्तृकत्वव्यापकत्वन्तु शरीरजन्यत्वस्य कुतः, घटत्ववदव्यापकस्यापि जन्यतावच्छेदकत्वात्। उभयसिद्धसकर्तृकेऽन्वयव्यतिरेकाभ्यां शरीरजन्यत्वस्य व्यापकत्वग्रह इति चेन्न शरीरजन्यत्वविनिवेश्यत्वेन तुल्यन्यायेन प्रथमं कर्तृजन्यत्वे जन्यत्वमवच्छेदकं क्लृप्तमिति तद्विरोधेन शरीरजन्यत्वस्य सकर्तृकत्वव्यापकत्वानवगमात्। अतएव न संदिग्धोपाधित्वम्। ननु घटादौ शरीरजन्यत्वे कर्तृजन्यत्वमनुगतमवच्छेदकं बाधकाभावात् न च लाघवाद्घटत्वादिकमेव तथा, कर्तृजन्यत्वेऽपि जन्यत्वस्यातथात्वापत्तेः। एवं शरीरजन्यत्वस्य व्याप्यं सकर्तृकत्वं वह्नेर्धूम इवेति भवत्युपाधिः। किञ्च कर्तृजन्यत्वे जन्यत्वं शरीरजन्यत्वे वा सकर्तृकत्वमवच्छेदकमिति संशयेऽपि न हेतोः साध्यव्याप्यतानिश्चय इति चेत्तर्हि घटादौ कर्तृजन्यत्वे गृहीते तस्य शरीरावच्छेदकत्वं ग्रहीतव्यं घटे च घटत्ववज्जन्यत्वमपि बाधकं विना कर्तृजन्यतावच्छेदकं गृहीतमतो जन्यमात्रे कर्तृजन्यत्वान्न शरीरजन्यत्वे तदवच्छेदकं प्रथमगृहीतोपजीव्यविरोधात्। अतएव न तस्य हेतौ व्याप्तिसंशयाधायकत्वमपि। एतेनानणुत्वचित्रवयवद्रव्यत्वादय उपाधित्वेन निरस्ताः जन्यत्वस्य साध्यव्याप्यत्वेन तेषां साध्याव्यापकत्वात्। तथापि क्षित्यादिकं न कर्तृजन्यं शरीराजन्यत्वात् व्योमवदिति सत्प्रतिपक्षोऽस्त्विति चेत् न अस्य प्रसिद्धकर्तृजन्यत्वाभावविषयकत्वात् अप्रतीतप्रतियोगिकस्याभावस्य निरूपयितुमशक्यत्वात् स्थापनानुमानञ्च पक्षधर्मताबलात् प्रसिद्धकर्तृभिन्नकर्तृकत्वसाधकमतो भिन्नविषयकत्वान्न प्रतिबध्यप्रतिबन्धकभावः। अतएव तद्व्यापकरहितत्वादिकमभावसाधकं बाधकमपास्तं तस्य प्रसिद्धाभावविषयकत्वेनाप्रसिद्धाभावाविषयकत्वात्। व्यक्तिसाधकस्य विशेषतोऽप्रसिद्धव्यक्तिसाधकत्वनियमात् अन्यथानुमानवैयर्थ्यात्। कर्तृजन्यत्वमनुगतं घटादौ प्रसिद्धं यत् साध्यं तदभावो मया साध्यत इति चेत् कर्तृजन्यत्वमनुगतमपि पक्षधर्मताबलेन प्रसिद्धं कर्तारमादाय पर्यवस्यति तदभावस्तु प्रसिद्धस्य कर्तुरभावमादाय सिद्ध्यति नाप्रसिद्धस्य अनुगतस्यापि कर्तृजन्यत्वस्य तदभावस्य च, कर्तृव्यक्तिघटितत्वात् अन्यथा व्यक्तितदभावासिद्धिप्रसङ्गात्। नचैवं सत्प्रतिपक्षोच्छेदः तस्य गोत्वाद्येकभावाभावविषयकत्वात्। एतेन ज्ञानत्वं न नित्यवृत्ति ज्ञानमात्रवृत्तिधर्मत्वात् स्मृतित्ववत्, ज्ञानं न नित्यगुणवृत्तिगुणत्वव्याप्यजातियोगि चेतनविशेषगुणत्वात् सुखवत् "आत्मा न नित्यविशेषगुणाधारवृत्तिद्रव्यत्वापरजातिमान् विभुत्वात् गगनवदित्याद्यपास्तं, प्रसिद्धनित्ये व्योमादौ प्रसिद्धायाश्च रूपत्वजलत्वादिजातेर्व्यतिरेकविषयत्वात् अप्रयोजकत्वाच्च। किञ्च क्षित्यादौ शरीराजन्यत्वमसिद्धम् अदृष्टद्वारा तज्जन्यत्वात् नचादृष्टाद्वारकजन्यज्ञानाजन्यत्वं हेतुः ज्ञाने जन्यत्वविशेषणस्याव्यावर्त्तकतया व्यर्थत्वात्। न च स्थापनायां पक्षविशेषणेऽप्येष दोषः प्रमेयो घट इतिवत्तदुपरक्तबुद्धेरुद्देश्यत्वात् अपि च शरीराजन्यत्वे व्यर्थविशेषणत्वं लाघवेनाजन्यत्वस्यैव व्याप्यत्वात्। न च निष्प्रयोजनविशेषणमसिद्धं व्याप्तिग्रहेऽप्युक्तविशेषणवत्, पक्षधर्मतौपयिकविशेषणस्यापि सप्रयोजनत्वात् व्यभिचारवारकस्यापि सार्थकत्वेऽनुमितिप्रयोजकत्वस्यैव बीजत्वात्। व्यभिचारवारकविशेषणवत्त्वेन व्याप्तिग्रह इति चेत् न निर्विशेषणेऽपि गोत्वादौ व्याप्तिग्रहात्। तत्रापि व्यक्तिविशिष्टव्याप्तिग्रह इति चेन्न स्वतो व्यावृत्तगोत्वस्याव्यभिचारात् अन्यथान्योन्याश्रयात्। अपि च व्यभिचारवारकविशेषणवत्त्वेव व्याप्तिग्रहेऽप्रयोजकं सहचारदर्शनादिसत्त्वे तदभावेन व्याप्तिग्रहाविलम्बात्। व्यभिचारावारकविशेषणशून्य एव व्याप्तिग्रह इति चेन्न प्रमेयत्वेन ज्ञायमाने धूमे व्याप्तिग्रहात्। अथ तत्रोपात्तव्यभिचारावारकविशेषणत्वं विवक्षितं न च तत्र प्रमेयत्वं विशेषणमुपात्तमिति चेन्न विरोधात् न हि तत्रोपात्तं तेन शून्यञ्चेति संभवति। यद्विषयकत्वेन परामर्शः कारणमनुमितौ तल्लिङ्गं प्रकृते च व्यभिचारादन्यथासिद्धेश्च न विशेषणविषयकत्वेन तत्त्वमिति चेन्न धूमस्याप्यतत्त्वापत्तेः व्यभिचारासद्विषयत्वेनानुमित्यकारणत्वात्। अथैकमवच्छेदकमपरत्र व्याप्तिः यद्वा लाघवेन व्यासज्यवृत्तिरेकैव व्याप्तिरिति विशिष्टव्याप्त्यर्थो तत्र विशेष्यतावच्छेदकस्य व्याप्त्यनवच्छेदकत्वं विशेषणस्य तदवच्छेदकत्वमिति नियमात्। एकवृत्तित्वबाधे सत्येव व्यासज्यवृत्तित्वमिति व्याप्तेश्च न शरीरजन्यत्वाभावे नीलधूमादौ च व्याप्तिरिति विशेषमात्रे सा, तथा च स्वरूपासिद्धिः। तद्वारणार्थं विशेषणाभिधाने व्याप्यत्वासिद्धिरिति चेन्न अव्यभिचारस्यानौपाधिकत्वस्य वा विशिष्टे नीलधूमादौ सत्त्वेन तद्व्यतिरेकसाधने बाधात्। न च विशेष्यत्वमुपाधिः साधनव्यापकत्वात्। किञ्च गौरव-

विशेषवद्धूमरहितमिदं चन्दनप्रभववह्निरहितत्वात् शिधूमोऽयमार्द्रेन्धनप्रभववह्निरहितत्वादित्यादावपि विशेषाभावेन कार्यविशेषानुमानं न स्यात् वह्निरहितत्वादिकस्योपाधिर्भवेत् व्यतिरेकित्वादृष्टद्रव्यातिरिक्तद्रव्यानाश्रितत्वं हेत्वाभासव्याप्यं न स्यात् द्रव्यानाश्रितत्वस्यैव व्याप्यत्वात् स्वमध्ये गन्धस्यैव व्यञ्जकत्वादित्यादौ त्वयाप्यसिद्धिवारकविशेषणस्वीकारात्। अपि च गौरवेण विशिष्टस्य व्यापकतापि न स्यात् तथा च स्थापनानुमाने उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यता धूमेनार्द्रेन्धनप्रभववह्निघटितत्वेन शरीरजन्यत्वमपि नानुमीयेत। यत्तु जन्यानन्योन्याभावापेक्षया शरीरजन्यान्योन्याभावस्याल्पत्वात्तेषामेव व्याप्यत्वमिति विपरीतमेव लाघवमिति तन्न विरोधाभावेन बहूनामल्पस्य च व्याप्यत्वात् स्नेहे शीतस्पर्शवत्त्वजलत्वयोर्गन्धाभावेऽपृथिवीत्वपृथिवीत्वाभावयोरिव। अन्यथा नीलधूमस्यैव व्याप्यत्वे धूमत्वस्याव्याप्यत्वप्रसङ्गः किञ्च त्वन्नये बह्वन्योन्याभावापेक्षया जन्यत्वात्यन्ताभावस्यैव व्याप्यता स्यात् एकत्वात् प्रमेयत्वाद्यनन्तधर्मविशिष्टे व्याप्तावपि प्रयोजनाभावान्नानुमाने तदुपन्यासः। अथ लाघवेन जन्यत्वस्य शीघ्रोपस्थितिकतया जन्यत्वाभावत्वेन शीघ्रं व्याप्तिग्रहः न तु शरीरजन्यत्वाभावत्वेन विलम्बितप्रतीतिकत्वात्। यत्र विशेषणविशेष्यान्यतराभाववति साध्यं तत्र विशिष्टाभावस्यापि व्याप्तिरिति चेन्न एवं सति उत्पत्तिमत्त्वे सति सत्त्वादिकमनित्यत्वं सकर्तृकत्वव्याप्यतया न निगृह्येत शीघ्रोपस्थितिकतया घटत्वादेरेव तथात्वात्। यदि च सामान्यविशेषभावाद्विरोधाभावेन नोभयस्यापि व्याप्यत्वं तदा शरीराजन्यत्वजन्यत्वाभावयोरपि तुल्यम्॥ किञ्च शरीरं जन्यत्वं विशिंषदभावमपि विशिनष्टि न तु साक्षात्, तथा च शरीरजन्यत्वाभावोऽखण्ड एव हेतुरतो न व्यर्थविशेषणता। न चात्र विशिष्टाभावो विशेष्याभाव एव क्षित्यादावजन्यतापत्तेः। अतएव स्थापनायां शरीरजन्यत्वमुपाधिः साध्याभावव्याप्याभावप्रतियोगित्वेन साध्यव्यापकत्वनियमात्। व्यर्थविशेषणेऽधिकं निग्रहस्थानमिति चेन्न हेतुद्वयोपन्यासे ह्यधिकम्। अत्र तु विशिष्टमेव हेतुरिति विरुद्धस्थल उक्तमिति।

उच्यते। नीलधूमादौ व्याप्तिरस्त्येव अन्यथा विशेषाणामव्याप्यत्वे निराश्रया व्याप्तिः स्यात् नीलत्वमपि न व्याप्यतावच्छेदकं गौरवात् किन्तु धूमत्वमेव दण्डत्वेन कारणत्वे रूपमिव धूमत्वञ्च न नीलिम्नि किन्तु तदाश्रये धूमे इति न नीलधूमस्य हेतुत्वम् नीलधूमे नीलस्य विशेषणत्वे तद्विशिष्टे न धूमत्वम्, उपलक्षणत्वे च धूमत्वमिति। किञ्च। व्याप्यतावच्छेदकस्यैव हेतुतावच्छेदकत्वमिति न नीलधूमत्वं तथा। न चैवं धूमत्वस्यावच्छेदकत्वेऽपि सामग्रीसत्त्वात् नीलधूमादनुमित्युत्पत्तौ हेत्वाभासत्वं न स्यात् अनुमितिप्रतिबन्धकस्य तत्त्वादिति वाच्यं तदभावेऽपि नीलधूमप्रयुक्तसाध्यवत्प्रत्ययस्य भ्रमत्वेन तत्कारणत्वस्याभासत्वस्य सम्भवादितिदिक्॥ एवञ्च शरीराजन्यत्वेऽपि न शरीरमवच्छेदकं गौरवात् येन विशेषेण विना व्याप्तिर्न गृह्यते तस्यैव व्याप्यतावच्छेदकत्वनियमात्। अतएव गन्धस्यैव व्यञ्जकत्वादित्यत्राप्रसिद्धेन गन्धादिषु मध्ये इति विशेषणं विना व्याप्तिर्ग्रहीतुं न शक्यते इत्यसिद्धिवारकं विशेषणं सार्थकमेव। सुरभिधूमविशेषादौ च चन्दनप्रभवाग्न्यादेः कारणत्वात् कारणाभावस्य कार्याभावप्रयोजकतया व्याप्यत्वनिश्चयः व्यापके च न व्यर्थविशेषणता विशिष्टस्य कारणत्वेन व्यापकत्वात् विशेषव्यतिरेकिस्थले विपक्षबाधकेनानन्यगतिकतया विशिष्टस्य व्यापकत्वात् विशिष्टाभावस्य हेत्वाभावव्याप्यत्वं यत्र च विपक्षबाधकं नास्ति तत्र विशिष्टस्य व्यापकतापि न, यथा सकर्तृकत्वे। नापि शरीरजन्यत्वाभावोऽखण्डो हेतुः यदि हि शरीरजन्यत्वं सकर्तृकत्वप्रयोजकं स्यात् तदा तदभावप्रयुक्तः सकर्तृकत्वाभाव इति तस्य साध्यव्याप्यता स्यात् न चैवम्, जन्यत्वं लाघवात्तथा। तदा घाजन्यत्वमेवोपाधिः साध्यव्याप्याभावः साध्याभावव्यापक इति नियमेन तस्य साध्यव्यापकतानिश्चयात् सकर्तृकत्वशरीरजन्यत्वयोर्व्याप्यभावेन तदभावयोरपि व्याप्यभाव इति व्याप्यत्वासिद्धत्वाच्च। अतएव शरीरजन्यत्वाभावस्याकर्तृकत्वव्याप्यत्वात् तदभावयोरपि व्याप्यव्यापकभाव इति निरस्तम् शरीरजन्यत्वस्य सकर्तृकताऽप्रयोजकत्वात् न घाजन्यत्वं पूर्वसाधनव्यतिरेकत्वेन नोपाधिः सत्प्रतिपक्षोच्छेदप्रसङ्गादिति वाच्यं स्थापनायां यत्राभासत्वं तत्र विशेषादर्शनदशायां सत्प्रतिपक्षे पूर्वसाधनव्यतिरेकस्य साध्याव्यापकत्वेनानुपाधिकत्वात् यथा शब्दोऽनित्यो गुणत्वादित्यत्र शब्दो नित्यो व्योमैकगुणत्वादित्यादिना सत्प्रतिपक्षे गुणत्वाभावो नोपाधिः जलपरमाणुरूपे साध्याव्यापकत्वात्। न चैवमनैकान्तिकत्वमेव तदोद्भाव्यं सत्प्रतिपक्षमुपेक्ष्य तस्योद्भावनार्हत्वात्। किञ्च प्रागभावप्रतियोगित्वे सति समवेतत्वस्य तत्प्रतियोगित्वे सति

सत्त्वस्य, सत्त्वे सति उत्पत्तिमत्त्वस्य वा हेतुत्वे, एषामन्यतमव्यतिरेक उपाधिरिति न पूर्वसाधनव्यतिरेकः। अत एव जन्यत्वस्य नोपाधित्वं ध्वंसे साध्याव्यापकत्वादिति न दोषः। अन्ये तु यन्निश्चये यन्निरूपिता व्याप्तिर्येन विशेषणेन विना न गृह्यते तत्र विशिष्टं व्याप्यतावच्छेदकम् अकर्तृकताभावनिष्ठव्याप्तौ च शरीरं विनैव प्रतियोगितया जन्यत्वमवच्छेदकं कल्प्यमिति न शरीरजन्यत्वमवच्छेदकं धूमे नील इव अतो गौरवेण शरीरजन्यत्वं सप्रतियोगितया नावच्छेदकमिति व्याप्यतावच्छेदकाभावाच्च शरीरजन्यत्वाभावोऽकर्तृकत्वव्याप्यः। व्यभिचाराभावात्तथेति चेन्न क्षित्यादावव्यभिचारात् अन्यथा क्षित्यादिकं नादृष्टहेतुकं शरीरजन्यत्वाभावादित्यपि स्यात्। नन्वस्तु तावदशरीरनित्यज्ञानादिकर्त्रनुमितिस्तथापि सानुमितिरयथार्थैवाशरीरे कर्तृत्वज्ञानत्वात् ज्ञानेच्छायत्नेषु नित्यज्ञानत्वात् शरीराजन्ये सकर्तृकत्वज्ञानत्वात् घटः कर्त्ता घटज्ञानादिकं नित्यं व्योम सकर्तृकमितिज्ञानवदिति साध्यं, नचोपजीव्यबाधः अनुमितिर्ह्युपजीव्या न तु तद्याथार्थ्यमपीति चेन्न कर्तृकार्य्ययोर्निरुपाधिकार्य्यकारणभावेन तस्याप्रयोजकत्वात् अन्यथा पर्वते वह्न्यनुमितिरयथार्था उभयसिद्धवह्निमद्भिन्ने वह्निज्ञानत्वादित्यादिना सकलान्वयव्यतिरेक्युच्छेदः। किञ्चानुमितेरयाथार्थ्यमनेन ज्ञाप्यं, न तु कार्य्यं, तथा च दोषादुत्पन्नस्यानेन ज्ञापने तत्रायमेव दोषो दोषान्तरं वा नाद्यः अन्योन्याश्रयात् उत्पन्ने तस्मिन् ज्ञापनं ज्ञापकादेव तस्माद्दोषात्तदुत्पत्तिरिति। नान्त्योऽसिद्धेः। तर्कापरिशुद्धिस्तु न दूषणम्, यदीश्वरः कर्त्ता स्यात् शरीरी स्यात्, प्रयोजनवान् अनित्यज्ञानवान् स्यात्, क्षित्यादि सकर्तृकं स्यादिति तर्काणां विपर्य्यये आश्रयासिद्धिव्यर्थविशेषणतादिना विपर्य्ययापर्य्यवसानेनाभासत्वात्।

ननु क्षित्यादावेककर्तृसिद्धिः कुतः? एककर्तृकत्वेन व्याप्त्यभावात् न च लाघवात्, तस्याप्रमाणत्वात्। सकर्तृकत्वमानादेव तत्सिद्धिरिति चेत् न तावदनुमितिमात्रे लाघवं सहकारि, व्यभिचारात् मानाभावाच्च न हि लिङ्गपरामर्शे सति तद्विलम्बेनानुमितेर्विलम्बो येन तत् सहकारि स्यात्। नापि लघ्वनुमितौ, अन्योन्याश्रयात् नापि वस्त्वनुमितौ धूमेन वह्न्यनुमितावेकद्वित्वादिसंशयाभावापत्तेः। साधकाभावेन नानात्वासिद्धौ कर्तृसिद्धेरेवैककर्तृसिद्धिरिति चेत् न एकत्वसाधकाभावेनैकत्वासिद्धौ कर्तृसिद्धिरेव नानासिद्धिरित्यस्यापि सुवचत्वात्। अथ यमनालम्ब्यानाऽनुमितिः पक्षे न साध्यसंसर्गं विषयीकरोति स पक्षधर्मताबलात् सिद्ध्यति न त्वधिकमपि तथा च द्वितीयं कर्त्तारं न विषयीकुर्वत्यपि कर्त्तारं विषयीकरोत्येवेति न द्वितीयमवगाहते। एकस्तु कर्त्ता सिद्ध्यति तदविषयत्वेन कर्तृविषयैव न स्यात् एकविषयत्वाभावेन नानाविषयत्वाभावस्याप्यभावात् तद्घटितत्वात्तस्येति चेदेवं तर्हि कर्त्रैकत्वमपि न विषयः स्यात् एकत्वविषयत्वं विनापि कर्तृविषयत्वसम्भवात्। वस्तुगत्यैकः सिद्ध्यति नत्वेकत्वेनेति चेन्न एकत्वासिद्ध्या वस्तुगत्यैक इति ज्ञातुमशक्यात् तथा चेश्वरे एकत्वानेकत्वयोर्नित्यसंशय इति।

उच्यते। यत्र प्रमाणे लघुगुरुविषयता सम्भवति तत्र लाघवसहकारेण कार्य्यताव्याप्यताग्रहणे प्रत्यक्षे वृत्तिनिमित्तग्राहके उपमाने शब्दशक्तिग्राहकेऽनुमाने च तथाविधप्रमाणमात्रे च सकलतान्त्रिकैः सहकारित्वकल्पनात् एवं लाघवमेवं गौरवमिति ज्ञानानन्तरं बाधकं विना लघूनामेव कारणत्वकार्य्यत्वव्याप्यत्वप्रवृत्तिनिमित्तत्वशब्दशक्यत्वानां ज्ञानदर्शनात्। तत्रापि लाघवानादरे शब्दशक्यत्वादिसंशये तन्मूलकव्यवहारोच्छेदो विनिगमकाभावात्, सोऽयं विचारमारभते लाघवञ्च तदङ्गं नाङ्गीकुरुते इति महासाहसम्। नन्वेवं वस्तुगत्या नानाकर्तृकेषु घटत्वेन कुलालकर्तृकत्वानुमानेऽपि बाधकानवतारदशायां लाघवादेककर्तृसिद्धिः स्यात् न चेष्टापत्तिः अनुमित्यनन्तरं नानात्वैकत्वे संशयादिति चेन्न तत्रापि लाघवेन कर्त्रैक्यमेव सिद्ध्यति तत्सन्देहस्तु ज्ञानप्रामाण्यसंशयादिति पश्चान्नानाकर्तृकत्वसाधकप्रमाणादेवैककर्तृकताज्ञानं तत्र बाध्यते न चैवं क्षित्यादिकर्त्तर्य्यपि प्रामाण्यसंशयादेकत्वानेकत्वसंशयोदुरुच्छेदः एकत्वबाधकस्याभावेन प्रामाण्यनिश्चयात्। नचैकत्वसाधकाभाव एव बाधः, अनुमितेरेव लाघवसहकारेणैकत्वसाधनात्। अन्ये तु क्षितिकर्त्ता अङ्कुरकर्तृभिन्नः अशरीरकर्तृत्वात् अङ्कुरकर्तृवदित्यभेदानुमानादेव कर्तृसिद्धिः न च क्षितिकर्त्ता अङ्कुरकर्तृभिन्नः अङ्कुराकर्तृत्वात् कुलालवदिति सत्प्रतिपक्षः अनित्यज्ञानानामाश्रयत्वस्योपाधित्वादित्याहुः तत्राप्यप्रयोजकत्वे भेदाभेदयोर्गौरवलाघवे एव शरणम्।

तथापि कथं नित्यसर्वविषयज्ञानसिद्धिः। पक्षधर्मताबला

दिति चेत् व्यापकत्वाग्रहात् न च विनानुपपत्तिं सोऽपि विषयः व्यतिरेकविलयापत्तेः। अत्र प्राञ्चः यमर्थमनालम्बमानानुमितिः पक्षे साध्यसम्बन्धं विषयीकरोति स पक्षधर्मताबलात् सिद्ध्यतीति प्रतीत्यनुपपत्तिमूलकोऽन्वयी प्रतीत्यनुपपत्त्या च व्यतिरेकी तदिहानादिद्व्यणुकादिप्रवाहस्य पक्षत्वे तदुपादानस्यानादिज्ञानगोचरत्वं विनानोपादानगोचरज्ञानजन्यत्वमनादिकार्य्यप्रवाहस्यानुमितिरालम्बते अनादित्वे च नित्यता सर्वमुक्तावपि तत्सत्त्वमनादिभावत्वात् पक्षतदुपादानविषयतैव सर्वविषयता लाघवात्तु, तावद्विषयकमनाद्येकमेव ज्ञानं सिद्ध्यति न तु नित्यानि नानाज्ञानानीति। नव्यास्तु अनित्यज्ञानाजन्यत्वेन पक्षविशेषणात् ज्ञानं सिध्यत् नित्यमेव सिद्ध्यति अनित्ये बाधात्। वाचस्पतिमिश्रास्तु लाघवादेकज्ञानसिद्धावुत्पत्तिमतोऽनादिकार्य्यप्रवाहं प्रत्यजनकत्वात् परिशेषेण नित्यज्ञानादिसिद्धिः नियतविषयता च ज्ञानस्य कारणाधीना कारणञ्च नित्यज्ञानान्निवर्त्तमानं नियतविषयतामादाय निवर्त्तत इति सर्वविषयत्वसिद्धिरिति। षट्पदार्थीप्रतिपादकवेदकर्त्तृत्वेन ईश्वरस्य षट्पदार्थीगोचरसाक्षात्कारवत्त्वेन वा सार्वज्ञ्यं घटाकाशसंयोगं प्रतीश्वरस्य कर्त्तृत्वात् घटादिगोचरमपि ज्ञानं सिद्धमिति केचित्। ननु घटादीनां कथमीश्वरस्य कर्त्तृत्वं घट ईश्वरकर्त्तृकः कार्य्यत्वात् क्षितिवदिति चेन्न घटस्य द्विकर्त्तृकतया तद्दृष्टान्तेन क्षित्यादेरपि द्विकर्त्तृकतापत्तेः तथा च घटवत् क्षितिः क्षितिवत्तु घट इतीश्वरानन्यकार्य्यकर्त्तृत्वेन कारणता न तु द्विकर्त्तृकत्वेनेति चेत् तर्हि नेश्वरकर्त्तृकत्वेन कारणता किन्तु कर्त्तृत्वेनेति मैवं ज्ञानादीनां नित्यत्वेन सर्वविषयतया घटाद्युपादानविषयत्वमपीति कथं न तेषां घटादिकारणत्वं कुलालादिज्ञानतुल्यत्वात्। तदाहुराचार्य्याः "परमाण्वदृष्टाधिष्ठातृसिद्धौ ज्ञानादीनां नित्यत्वेन सर्वविषयत्वे वेमाद्यधिष्ठानस्यापि न्यायप्राप्तत्वात् न तु तदधिष्ठानार्थमेवेश्वरसिद्धिरिति "अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते इत्यागमान्नायमर्थो व्यवसेयः। अथेश्वरस्य सर्वज्ञत्वे सर्वविषयभ्रान्तेर्ज्ञाने ईश्वरोऽपि भ्रान्तःस्यात् भ्रमस्येव तस्यापि भ्रमविषयविषयकत्वादिति चेत् रजतत्वप्रकारकज्ञानवानयमिति ज्ञानं न भ्रमः अभ्रान्तस्य तथात्वात्। इदं रजतमिति ज्ञाने रजतत्वं प्रकारः तेन स भ्रमः ईश्वरज्ञाने च रजतत्वप्रकारकत्वं प्रकार इति न भ्रमः अतएवास्मदादेरपि भ्रान्तिज्ञो न भ्रान्त इति। स्यादेतत् प्रयोजनं विना कथमीश्वरः प्रवर्त्तते? सुखस्याभावात् अधर्म्माभावेन निर्दुःखत्वात्। करुणया प्रवर्त्तते इति चेत्तर्हि परसुखदुःखप्रहाणे प्रयोजने तथा च सुखिनमेव सृजेन्न नारकिणम्। धर्माधर्मपरतन्त्रत्वात् तदनुरूपं फलं प्रापयतीति चेत्तर्ह्यावश्यकत्वात् कर्मनिर्मितमेव जगद्वैचित्र्यमस्तु, किमीश्वरेण अनपेक्षितकीटादिज्ञानवता कर्मनिरपेक्षत्वे चैकदैव सदा च सर्गप्रलयौ स्यातां ज्ञानादीनां नित्यत्वात् किञ्च तत्प्रयत्नस्य करुणाजन्यत्वेन शरीरादिजन्यतापत्तौ संसारितापत्तिः न। ईश्वरानभ्युपगमेन विचारस्याश्रयासिद्धत्वात् तमभ्युपगम्य पृच्छसि चेत् आकर्णय जगतएव तदिच्छाविषयत्वेन स्वेष्टसाधनताज्ञानसत्त्वात्। वस्तुतस्तु क्षित्यादितत्तदसाधारणकर्मिकादृष्टादिसामग्री ईश्वरज्ञानादयो यदा यदा भवन्ति क्षित्यादिकं करोतीति व्यवहारः सर्गप्रलयासाधारणकर्मिकादृष्टादिसामग्रीसमयवर्त्तित्वमेव तदिच्छायाश्चिकीर्षासंजिहीर्षात्वे न चैवं किञ्चिज्जन्यज्ञानादिनेति वाच्यं क्षित्यादीनां कार्य्यत्वेन ज्ञानजन्यतया नित्यज्ञानादीनामपि जनकत्वं सुखादिशब्दयोरात्माकाशादिवत्। नन्वशरीरात् कथं वेदघटादिशब्दव्यवहारसंप्रदायः। उच्यते सर्गादावदृष्टोपगृहीतभूतभेदात्मीनशरीरोत्पत्तावदृष्टवदात्मसंयोगाददृष्टसहकृतप्रयत्नवदीश्वरसंयोगाद्वा सकलवेदार्थगोचरज्ञानाद्विवक्षासहितान्मीनकलेवरकण्ठताल्वादिक्रियाजन्यसंयोगाद्वेदोत्पत्तिः। एवं कुलालादिशरीरावच्छेदेनादृष्टसहकृतप्रयत्नवदीश्वरसंयोगात्तद्बुद्धीच्छासहितचेष्टोत्पत्तौ सकलघटानुकूलव्यापारो घटोत्पत्तिः। एवं प्रयोज्यप्रयोजकज्ञानाय व्यापाराभिमतशरीरावच्छेदेनापि अदृष्टसहकृतेश्वरज्ञानेच्छाप्रयत्नादेव वाग्व्यवहारः, ततस्तत्सुधीज्ञो बालो व्युत्पद्यते सोऽयं भूतावेशन्यायः। यत्तु यथा शिष्यादिना मौनिश्लोकोऽनुमाय पठ्यते तथा सर्गान्तरोत्पन्नतत्त्वज्ञानवता भोगार्थं सर्गादावुत्पन्नेन मन्वादिना सर्वज्ञेन ईश्वराभिप्रायस्य वेदः साक्षात्कृत्यानूद्यते ततोऽग्रिमसंप्रदायः स एव कायव्यूहं कृत्वा वाग्व्यवहारं करोतीति मतं तन्न प्रतिसर्गादनन्तसर्वज्ञकल्पनायां गौरवात् तेषामेव क्षित्यादिकर्त्तृत्वसम्भवेन ईश्वरानुगमाच्च। एतेन सर्गादौ सर्गान्तरसिद्धयोगिनएव क्षितिकर्त्तारः सन्त्विति निरस्तं सर्गादावनन्तसर्वज्ञसिद्धिश्च किं प्रमाणान्तरात् क्षित्यादिकर्त्तृग्राहकाद्वा नाद्यस्तदभावात् नान्त्यः अनादिद्व्यणुकादिकार्य्यप्रवाहस्य सकर्त्तृकत्वानु-

मानादुत्पादकसहकृतादेकस्यैव सर्वज्ञस्य सिद्धेः ॥ अथे-श्वरज्ञानमूलकशब्दशक्तिपक्षे प्रयोज्यव्यापारानुमितघटज्ञाने घटशब्दस्य कारणताग्रहो भ्रमः स्यात् तदीयज्ञानस्य नित्यत्वात् तथा च तज्जन्यघटशब्दशक्तिग्रहस्य भ्रमत्वे सकलशब्दज्ञानं भ्रमः स्यात् भ्रमपरम्परामूलकत्वात् अनित्यसर्वज्ञमूलकशब्दत्वपक्षे च नायं दोष इति चेन्न व्यापारानुमितमिदं घटज्ञानं घटपदजन्यमिति ज्ञानस्य शब्दशक्तिग्रहकारणस्य भ्रमत्वेऽपि घटपदं घटशक्तमिति ज्ञानस्य यथार्थत्वात् विषयाबाधात् न च भ्रममूलकत्वेन तस्य भ्रमत्वमनुमेयं तदंशे व्यधिकरणप्रकाराभावेनाबाधात् बाधितविषयत्वस्योपाधित्वाच्च । अत्र घटमानयेति शब्दानन्तरं कलसञ्चाराधिष्ठितदारुपुत्रस्य घटानयनव्यवहारदर्शनाद्बालो घटपदे व्युत्पद्यते तन्मूलकशाब्दज्ञानमपि न भ्रमः तस्यापि भ्रमत्वे प्रयोज्यव्यवहारादिदानीं व्युत्पत्तिर्न स्यात् किमयं प्रयोज्यश्चेतन व्यवहाराद् उत पश्चोऽचेतनव्यवहाराद्वेति संशयस्य वज्रलेपायमानत्वात् ॥ "विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतः पात् । सं बाहुभ्यां धमति संपतत्रैर्द्यावाभूमी जनयत्येक एवेत्यादि श्रुतयः" । "उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्त्यव्यय ईश्वरः" इत्यादयः स्मृतयश्च बहुशोमानत्वेनानुसन्धेया इति" ।

खण्डनकृता तु ईश्वरविषये प्रश्नाद्यनुपपत्त्युपन्यासेन व्यतिरेकमुखेन ईश्वरस्य प्रामाणिकत्वमुररीकृतं यथा "तथाहीश्वरसद्भावे किं प्रमाणमिति ब्रुवाणः प्रतिवक्तव्यः किंशब्दोऽयमाक्षेपार्थो वा१कुत्सितार्थो वा२वितर्कार्थो वा३प्रश्नार्थो वा४स्यात् । तत्र यदि प्रथमः पक्षः तदेश्वरसद्भावे नास्ति प्रमाणमित्युक्तं स्यात् तथा च सति न प्रतिज्ञामात्रात्साध्यसिद्धिरिति हेत्वादिकं वाच्यं भवति । तच्च भवता नाभ्यधायि तस्मान्न्यूनत्वं दोषः । अतएव न द्वितीयः, ईश्वरसद्भावे कुत्सितं प्रमाणमित्यस्यापि प्रतिज्ञामात्रत्वात् । अपि च साध्यासाधकत्वाद्वा १तत् कुत्स्यते भवता अन्यथा २वा । अन्यथा चेदलं तदुद्भावनया साध्यसिद्धेरप्रत्यूहत्वात् । नापि प्रथमः प्रमाणञ्च साध्यासाधकञ्चेति व्याघातात् । गौणोऽयं प्रमाणशब्द इति चेन्न प्रमाणत्वयोगिनि यद्ययं प्रमाणशब्दप्रयोगः तदा गौणताव्याघातः मुख्यत्वात् । अथ प्रमाणाभासे तदा, अलन्तदुद्भावनया ईश्वरसद्भावे यः प्रमाणाभावः स कुत्सित इत्यत्र परस्यापि सम्प्रतिपन्नत्वात्, ईश्वरसद्भाव इति च विशेषोपादानं व्यर्थं स्यात् अन्यत्रापि हि विषये प्रमाणाभावः कुत्सित एव साध्यासाधकत्वात् । नापि तृतीयः तथा सति हि वितर्कस्य पक्षान्तरसापेक्षत्वेन पक्षान्तरमपि वचनीयं भवति ईश्वरसद्भावे किमेतत् प्रमाणमुतान्यदिति तच्च ? भवता नाभ्यधायि अतो न्यूनत्वं दोषः । नापि चतुर्थः प्रश्नार्थात् खलु किंशब्दात्कस्यचित् पदार्थस्य जिज्ञास्यमानता प्रतीयते सा चेह प्रमाणपदसमभिव्याहारात् प्रमाणविषयिणी प्रतीयते यद्विषयश्च प्रश्नस्तदुत्तरवादिनाभिधेयं तत् । अयं प्रश्न ईश्वरसद्भावे प्रमाणसामान्यविषयस्तद्विशेषविषयो वाभिप्रेत आद्यश्चेदीश्वरसद्भावे प्रमाणमित्येवोत्तरमापद्येत यद्विषयो हि प्रश्नस्तदभिधेयं, प्रमाणसामान्यविषयश्च प्रश्नः तच्च प्रमाणशब्देनाभिधीयत एव । अथ द्वितीयः तथापीश्वरसद्भावे प्रमाणमित्येवोत्तरमापद्येत यथा प्रश्नवाक्यं प्रमाणशब्दविशेषपरस्तथोत्तरवाक्येऽपि । कोऽसौ विशेष इति चेन्न पूर्ववदुक्तोत्तरत्वात् । किञ्च अस्यापि प्रश्नस्य विशेषो विषयः किंशब्दस्य विशेषशब्देन सामानाधिकरण्यात् तथा च सति विशेषएवोत्तरं स्यात् । स्यादेतत् विशेषशब्देन न विशेषमात्रमनिर्द्धारितमत्र विवक्षितं किन्त्वसाधारणी व्यक्तिस्तत्र विशेषशब्दस्य तात्पर्यं तस्मात्कासावसाधारणी प्रमाणव्यक्तिरिति प्रश्नार्थः तत्र च तादृश्याः प्रमाणव्यक्तेरभिधानमुत्तरं युक्तं नैवंविधः प्रलापा इति नैतदेवं यतोऽत्रापि विशेषइत्येवोत्तरम् यथा प्रश्नवाक्यगतस्य विशेषशब्दस्य सर्वतोव्यावृत्तस्वरूपायां प्रमाणव्यक्तौ तात्पर्यं तथोत्तरवाक्यस्थितस्यापि । एवञ्च सति यत्र विषये भवदीयस्य प्रश्नवाक्यस्य तात्पर्यं तदेवास्माकमुत्तरवाक्येन प्रतिपादितमिति युक्तमुक्तम् । अथ मन्यसे किमिह प्रमाणमिति पृच्छतोऽयमभिप्रायः अत्रार्थेऽनुमानं प्रमाणमितरद्वेति । अत्राप्यनुमानमित्युत्तरमस्माकम् । किं तदनुमानमिति चेत् । अयमपि प्रश्नोऽनुमानमात्रविषयः उत तद्विशेषविषय इति विकल्प्य प्रमाणप्रश्नवदुत्तरं वाच्यमिति । अत्र च संग्रहश्लोकौ । "यथाविधं यं विषयं नियम्य प्रश्नस्य निर्वक्ति परो ययोक्त्या । वाच्यस्तथैवोत्तरवादिनापि तथैव वाचा स तथाविधोऽर्थः । प्रश्नस्य यः स्याद्विषयः स वाच्यो वाचा तया चैव भवेद्विरक्तः । इदं त्वयाप्यास्थितमेतयैव गिरा स्वपृच्छाविषयस्य वक्त्रा ।" प्रश्नार्थाच्च किंशब्दाज्जिज्ञासाविषयतार्थस्य प्रतीयते जिज्ञासा च ज्ञातुमिच्छा इच्छा च नाज्ञाते भवत्यतिप्रसङ्गात् तस्मादीश्वरविषयं प्रमाणं ज्ञातुमिच्छता तत्र स्वज्ञानमिच्छाकारणीभूतं वक्तव्यं तदयथार्थं

यथार्थं वा स्यात्, यथार्थञ्चेत् तर्हि तेनैव ज्ञानेन स्वकीयो विषयः प्रमाणमुपस्थाप्यते विषये प्रमाणप्रवृत्तिमन्तरेण तदीययथार्थत्वस्य वक्तुमशक्यत्वात्। तेनापि प्रमाणेन स्वगोचरेश्वरसद्भाव उपस्थाप्यतइत्यनायासेनैव सिद्धोऽस्माकमीश्वरसिद्धिमनोरथः। अथायथार्थं तत्राप्ययथार्थज्ञानविषये यद्यस्माभिरयथार्थमेव ज्ञानमुत्पादनीयमिति भवतः पृच्छतोवाञ्छितं तदा कोयं स्वाधीनेऽर्थे परापेक्षा भवानेवायथार्थज्ञानोत्पादनकुशलोयद्येकं तत्र मिथ्याज्ञानमजीजनत्तथा परमप्युत्पादयतु वयं पुनर्यथार्थज्ञानस्योत्पादयितारोमिथ्याज्ञाने सर्व्वथैवानुद्यतिनः किमिह नियुज्येमहीति। अथ मदीयस्यायथार्थज्ञानस्य योविषयः स मदीययथार्थज्ञानविषयोभवता क्रियतामिति त्वदीयं वाञ्छितं तदा व्याघातादीदृश्यर्थे भवतः प्रवृत्तिरेवानुपपन्ना शुक्तिका रजतत्वेन मम यथार्थज्ञानविषयोभवत्वित्येतदर्थं प्रेक्षावान् कथङ्कारं प्रयतेत येन रूपेणायथार्थज्ञानविषयत्वं तेनैव रूपेण यथार्थज्ञानविषयत्वे व्याघातात्। अथ मन्यसे स्वसिद्धान्तमनुरुन्धानेन त्वया यथार्थज्ञानं तत्रोत्पादनीयमतस्तदर्थं भवाननुयुज्यतइति। नैवम् यदीश्वरसद्भावविषयोभवता प्रमाणाभासः प्रमाणतया भ्रान्त्या प्रतीतः तस्य प्रमाणत्वं अस्माभिर्व्युत्पादनीयमिति नास्माकमीदृशः सिद्धान्तः प्रत्युत ईश्वरसद्भावविषयं यत्प्रमाणं भवता प्रमाणाभासत्वेन भ्रान्त्या प्रतीतमस्ति तत्प्रमापणीयमिति। साम्प्रतम् ईश्वरसद्भावविषयस्य प्रमाणस्य भवता ज्ञापनमात्रं क्रियतामित्यभिमतं पृच्छतामस्माकं, नतु प्रमाणेना प्रमाणेन वेति विशेषोऽप्यभिमतइति,न ज्ञापनमात्रस्याप्रमाणज्ञानमादायाप्युपपत्तेः तत्र स्वाधीने कोयं परापेक्षेत्याद्युक्तमनुषञ्जनीयम्। स्यादेतत् येयमीश्वरसद्भावविषया प्रमाणप्रतीतिरस्माकमुत्पन्ना सा व्यभिचारिणी सत्या वेति संशयोऽत्रास्माकं नैनैकपक्षनिर्द्धारणाधीनं यदिदं दूषणमवादि भवता तन्निरवकाशमिति नैतदस्ति एवं हि तस्यां प्रतीतौ यथार्थत्वायथार्थत्वसंशयेन तस्याः प्रतीतेर्गोचरो यत्प्रमाणं तस्यापि योऽसौ विषयईश्वरसद्भावस्तत्र सर्व्वत्रैव संशयानस्य भवतः प्रश्नोऽयं नतु विप्रतिपन्नस्येति स्यात् तथाच स्वीकुरु शिष्यभावं प्रसादय चिरं चरणशुश्रूषाभिरस्मान् छेत्स्यामस्ते संशयमिति। विप्रतिपन्नाएव वयमाचार्य्याः संशयोऽस्माकमिति चेत् तर्ह्यवधृतैककोटयएव वयं कार्थ्यनुरोधात्तु संशयमात्रमाभङ्गइत्युक्तं स्यात् एवं तर्हि सदव कास्मवधारणांवजाऽयथार्थं वेति विकल्पोक्तयुक्त्या दूषणीयम्। एतेनानध्यवसायेन तदस्माभिः प्रतिपन्नमित्यपि निरस्तं वेदितव्यं, व्यभिचारिविषयमव्यभिचारविषयं वा तदिति विकल्पाभ्यां तस्यापि ग्रस्तत्वात् "परस्परविरोधे हि न प्रकारान्तरस्थितिरिति" न्यायात्। एवमीश्वराभिसन्ध्यादावपि तत्तत्स्थाने तिष्ठत्सर्व्वनामास्मत्खण्डनमनुद्रष्टव्यम्"। तृतीयः परिच्छेदः।

"ननु तथापि भावात्मके तस्मिन्नीश्वरे विधायकं किञ्चित्प्रमाणं वक्तव्यमिति चेत् किं पुनर्भावत्वं विधित्वमिति चेन्न पर्य्यायाप्रश्नात्। स्वरूपसत्त्वमिति चेत् अभावस्यापि तथाभावात् प्रतिस्वं व्यावृत्तत्वेनाननुगतत्वापत्तेश्च। अस्तीतिप्रतीतिविषयत्वमिति चेन्न अभावोघटस्यास्तीति प्रत्ययसम्भवेनाभावस्यापि तथात्वप्रसङ्गात्। नास्तीतिप्रतीतिविषयत्वेऽपि च घटादेर्भावत्वानिवृत्तेः। अस्तीति चास्त्यर्थो वा शब्दोवा विवक्षितः नाद्यः तस्यानिरुक्तेः। सत्ता तदर्थइति चेन्न सामान्यादीनां तदभावादभावत्वापत्तेः स्वरूपसत्त्वञ्च निरस्तम्। नापि द्वितीयः अभावोऽस्तीतिप्रतीतेरुक्तत्वात् वस्तुतदन्याद्याकारेण च प्रतीयमानस्याभावत्वप्रसङ्गात्। सोऽप्यस्ति पर्य्यायइति चेन्न उभयसाधारण्यैकार्थनिर्व्वचनमन्तरेण पर्य्यायत्वस्य प्रतिपादयितुमशक्यत्वात्। यत्रैकस्यास्तिपदप्रयोगः तत्रैवापरस्य वर्त्ततइति प्रयोगात्। सामान्येन तावत् पर्य्यायत्वं शक्याधिगममिति चेन्न प्रमेयाभिधेयादिशब्दानां तथात्वेऽप्यपर्य्यायत्वात् यत्तेत्यस्य प्रवृत्तिनिमित्तार्थत्वे च तन्निर्व्वचनप्रसङ्गस्तदवस्थः सएवार्थोभावत्वमुच्यतां किं शब्दोल्लेखगवेषणया। अपरप्रतिषेधात्मकत्वं भावत्वमिति चेन्न व्यवच्छेद्यासम्भवेनापरपदवैयर्थ्यात् भावाभावयोः परस्परप्रतिषेधात्मकतास्वीकाराच्च। तथापि भावो नास्तीत्यभावप्रतिपत्तिवदभावोनास्तीति भावस्य प्रतीतिरिति चेन्न तावतापि लक्षणानिरुक्तेः। अपरप्रतिषेधमुखेन प्रतीयमानत्वमेव भावत्वमिति चेन्न चक्षुरादिभिर्भावत्वग्रहणप्रसङ्गात्। न हि प्रतीयमानत्वं चक्षुरादिग्राह्यम् अभावोनास्तीतिप्रतीतेर्निर्विषयत्वप्रसङ्गाच्च नहीयं भावविषया भवत्पक्षे परप्रतिषेधमुखेन प्रतीयमानत्वात्। नाप्यभावविषयैव तन्निषेधार्थत्वात्। नैवं प्रतीतिरेव स्यादिति चेन्न शाब्द्याः प्रतीतेः सम्भवात् आकाङ्क्षादिमद्भिः पदैः प्रतिस्वं संसर्गबोधनात् 'अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि'। प्रत्यक्षप्रतीतिस्तथा विवक्षितत्वादयमदोषइति चेन्न सर्व्वस्य भावस्य प्रत्यक्षत्वानङ्गीकारात् सेश्वरपक्षे सर्व्वं प्रत्यक्षमिति चेन्न तेन तेषामपरप्रतिषेधात्म-

तथा ग्रहणे प्रमाणाभावात्। तेषां विधिरूपतया तथैव ग्रहणमिति चेन्न विधिरूपत्वस्यानवधारणात्। यदपरप्रतिषेधात्मकतया शब्देनापि बोध्यते तत्तावत् भावरूपमिति चेन्न परपदवैयर्थ्यात् तत्त्यागेऽप्यचाक्षुषादित्यापत्तेः। सुरभि चन्दनमित्यादाविवान्योपनीतभागवत्। तत्र चाक्षुषत्वं भविष्यतीति चेन्न तथाविधेनैव विषयेण विशिष्टाया बुद्धेर्विशेषणतापत्ते स्वाश्रयोऽप्यंशतः स्यात्। तेनोपलक्षितायास्तथात्वे चाभावविशिष्टभावपदार्थस्याप्यभावस्य तथात्वापत्तेः। यदेवंविधं तद्भावरूपमिति वदतैवंविधत्वाद्भावत्वमन्यद्वाच्यम् अभेदे यदेवंविधं तद्भावरूपमिति नियमानुपपत्तेः। अस्योपलक्षणत्वे चोपलक्ष्यस्यान्यस्य वाच्यत्वात् अस्यैव भावार्थत्वे चाभावो नास्तीति कृत्वा प्रतीयमानस्य भावस्य भावत्वाप्रसङ्गात्। भिन्नञ्च भावत्वं न सम्भवति यत्पदार्थव्यतिरेकप्रसङ्गात्। यच्च किञ्चिद्भावत्वं तत्स्वात्मन्यस्ति नो वा अस्ति चेदात्मनि वृत्तिविरोधः नास्ति चेत्तस्यान्यप्रतिषेधमुखेन चाप्रतीयमानस्याभावत्वप्रसङ्ग इति"। "नन्वेवमीश्वरे प्रमाणानुपदर्शनात्तदभाव एवापद्यत इति चेत् अभावत्वं किमभिधीयते निषेधात्मकत्वमिति चेत् तद्यदि प्रतिक्षेपात्मकत्वं तदा भावेऽप्यस्ति भावाभावयोर्द्वयोरपि परस्परप्रतिक्षेपात्मकत्वस्वीकारात्। अथाभावत्वमेव तदा न निवृत्तः पर्य्यनुयोगः। एतेन निषेधमुखेन प्रतीयमानत्वमिति निरस्तम्। भावविरोधित्वमिति चेन्न सर्व्वभावविरोधित्वं तद्विशेषविरोधित्वं वा। नाद्यः असिद्धेः नहि घटाभावो भूतलादि विरुणद्धि। न द्वितीयः भावानामपि केषाञ्चित्तथाभावात्। अथासहानवस्थानं विरोधो विवक्षितः स भावानां नास्तीति चेन्न गोत्वादौ तस्यापि भावात्। एकविधावन्यनिषेधः स इति चेन्न भेदे विरोधिभावभेदयोरेव प्रसङ्गात्। एकविधिरेवापरनिषेधः स इति चेन्न निषेधस्याभावार्थत्वे भावार्थत्वे चासिद्धेः। नास्तीति प्रतीयमानत्वमिति चेन्न घटाभावो नास्तीति घटस्य तथाप्रतीयमानतया अभावत्वापत्तेः अस्तीति भावत्वनिरुक्तौ यदुक्तं दूषणं तदापत्तेश्च। प्रतियोगिनिरूपणाधीननिरूपणत्वमिति चेन्न प्रतियोगिनः परार्थत्वेऽतिप्रसङ्गात् विरोध्यर्थत्वे चैतदनिरुक्तेः अपदर्थत्वे नञर्थस्यासिद्धेः अतीतानागतज्ञानादौ विषयादिनातिप्रसङ्गात्। यच्च किञ्चिदभावस्य लक्षणमुच्यते स भावोऽभावो वा स्यात्। नाद्यः भावस्याभावानाश्रितत्वात् विषयिधर्मेण च कथमपि तथात्वे तन्निर्वाच्यं स्यात्। अन्यदेव तदिति चेन्न तद्भावस्याभावत्वे स्ववृत्तिः भावत्वे च व्याघातात्। न द्वितीयः तस्यात्मनि वृत्तौ विरोधापत्तेः अवृत्तावव्यापकत्वप्रसङ्गादिति। प्रतिक्षेप्यविशिष्टमेव यत् प्रतिभाति सोऽभाव इति चेन्न प्रतिक्षेपानिरुक्तौ प्रतिक्षेप्यानिरुक्तेः विशिष्टपदार्थश्च निर्व्वचनीयः स्यात्। तत्र विशिष्टं विशेषणविशेष्यतत्सम्बन्धेभ्यो भिन्नमभिन्नं वा। नाद्यः दण्डपुरुषसम्बन्धमन्तरेण दण्डिनोऽन्यस्याप्रतीतेः दण्डिनमानयेत्युक्ते तदानयप्रसङ्गाच्च। तत्सम्बन्धेनोपलक्षितत्वात्तथेति चेन्न अतद्गत उपलक्ष्यत्वेऽतिप्रसङ्गात्। तद्गतस्यान्यत्वात् सम्बन्धो हेतुः स च तदधिकरण एवेति चेन्न सम्बन्धात्तदधिकरणसम्बन्धान्यत्वापत्तेरित्येष न पन्थाः। तत्सम्बन्धिनि तत्र व्यवहार इति चेन्न तस्यापि विशिष्टत्वेनान्यत्वापत्तौ व्यवहारविषयगतविशेषस्य वक्तुमशक्यत्वात्। एवं परम्पराकल्पनायामप्यनवस्थाभावं मत्व व्यवहार्य्यगतो विशेषः कश्चित्। द्वितीये तु प्रत्येकं दण्डिव्यवहारप्रसङ्गो विशेषाभावात् न ते प्रत्येकं दण्डिपदार्थाः किन्तु मिलिता इति चेत् मिलिता इति किं ते च मेलकं चाभिधीयते उत तेभ्योऽन्य एव कश्चित् आद्ये प्रत्येकं स एव प्रसङ्गः मेलकोऽप्यधिकः। द्वितीयस्तु प्रतीतिव्यवहारविरोधात् पूर्व्वं निरस्तः"। इत्यादिना ४परि० विशिष्टपदार्थं निरस्य ईश्वरप्रमाणाभावस्य निर्वचनमपि निरासितम् अधिकं तत्र द्रष्टव्यम्।

तत्र निरीश्वरसांख्यमते उपासासिद्धस्य प्रकृतिलीनस्य पुरुषस्यैव सन्निधिमात्रेण प्रधानप्रवर्त्तनेन कर्तृता। सेश्वरयोगरूपसांख्यप्रवचनमते नित्येश्वरस्यैव सन्निधिमात्रेण प्रधानप्रवर्त्तनेन तथात्वम् इति भेदः। प्रदर्शितेष्वेषु मतेषु ईश्वरो निमित्तकारणम्, वेदान्तिमते तु उपादानकारणं निमित्तकारणञ्चेति भेदः तदेतत् शा०सू०भाष्ययोर्दर्शितम् यथा "जन्माद्यस्य यतः" शा० सू० प्रतिज्ञातस्य ब्रह्मणो जन्मादिकारणत्वस्य विशेषनिर्द्धारणाय प्रवृत्तम्। "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्" सू०। "यथाभ्युदयहेतुत्वाद्धर्म्मो जिज्ञास्य एवं निःश्रेयसहेतुत्वाद्ब्रह्मापि जिज्ञास्यमित्युक्तं ब्रह्म च "जन्माद्यस्य यतः" इति लक्षितं तच्च लक्षणं घटकटकादीनां मृत्सुवर्णादिवत् प्रकृतित्वे कुलालसुवर्णकारादिवन्निमित्तत्वे च समानमित्यतो भवति विमर्शः किमात्मकं पुनर्ब्रह्मणः कारणत्वं स्यादिति। तत्र निमित्तकारणमेव तावत् केवलं स्यादिति प्रतिभाति कस्मात्? ईक्षापूर्व्वककर्तृत्वश्रवणात्। ईक्षापूर्व्वकं हि ब्रह्मणः कर्तृत्वमवगम्यते "स ईक्षाञ्चक्रे स प्राण-

मसृजत” इत्यादिश्रुतिभ्यः। ईक्षापूर्ब्बकञ्च कर्त्तृत्वं निमित्तकारणेष्वेव कुलालादिषु दृष्टम् अनेककारकपूर्ब्बिका च क्रिया फलसिद्धौ लोके दृष्टा स च न्याय आदिकर्त्तर्य्यपि युक्तः संक्रामयितुम्, ईश्वरत्वप्रसिद्धेश्च ईश्वराणां हि राजवैवस्वतादीनां निमित्तकारणत्वमेव केवलं प्रतीयते तद्वत् परमेश्वरस्यापि निमित्तकारणत्वमेव युक्तं प्रतिपत्तुम्। कार्य्यञ्चेदं जगत् सावयवमचेतनमशुद्धञ्च दृश्यते कारणेनापि तस्य तादृशेनैव भवितव्यं कार्य्यकारणयोः सारूप्यदर्शनात् ब्रह्म च नैवं लक्षणमवगम्यते “निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्” इत्यादि श्रुतिभ्यः। पारिशेष्याद्ब्रह्मणोऽन्यदुपादनकारणमशुद्ध्यादिगुणकं स्मृतिप्रसिद्धमभ्युपगन्तव्यं ब्रह्मकारणत्वश्रुतेर्निमित्तमात्रे पर्य्यवसानादित्येवं प्राप्ते ब्रूमः। प्रकृतिश्चोपादानकारणञ्च ब्रह्माभ्युपगन्तव्यं निमित्तकारणञ्च न केवलं निमित्तकारणमेव कस्मात् “प्रतिज्ञादृष्टान्तानुरोधात् एवं हि प्रतिज्ञादृष्टान्तौ श्रुतौ नोपरुध्येते। प्रतिज्ञा तावत्“उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतम्भवत्यमतं मतमविज्ञातं विज्ञातमिति” तत्र चैकविज्ञानेन सर्ब्बमन्यदविज्ञातमपि विज्ञातं सम्भवतीति प्रतीयते तच्चोपादानकारणविज्ञाने सर्ब्बविज्ञानं सम्भवति उपादानकारणाव्यतिरेकात् कार्य्यस्य, निमित्तकारणाद्व्यतिरेकस्तु कार्य्यस्य नास्ति, लोके तक्षप्रासादव्यतिरेकदर्शनात्। दृष्टान्तोऽपि “यथा सोम्यैकेन मृत्पिण्डेन विज्ञातेन सर्ब्बं मृण्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्, इत्युपादानगोचर एवाम्नायते “यथैकेन लोहमणिना सर्ब्बं लोहमयं विज्ञातं स्यात्” “एकेन नखनिकृन्तनेन सर्ब्बं कार्ष्णायसं विज्ञातं स्यादिति” तथान्यत्रापि “कस्मिन्नु भगवो विज्ञाते सर्ब्बमिदं विज्ञातं भवतीति” प्रतिज्ञा “यथा पृथिव्यामोषधयः सम्भवन्तीति” दृष्टान्तः “आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्ब्बं विदितमिति” प्रतिज्ञाय “स यथा दुन्दुभेर्हन्यमानस्य न बाह्याञ्छब्दान् शक्नुयाद्ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीत इति” दृष्टान्तः एवं यथासम्भवं प्रतिवेदान्तं प्रतिज्ञादृष्टान्तौ प्रकृतित्वसाधकौ प्रत्येतव्यौ। यत इतीयमपि पञ्चमी ‘यतो वा इमानि भूतानि जायन्ते” इत्यत्र “जनिकर्त्तुः प्रकृतिरिति” पा॰ विशेषस्मरणात् प्रकृतिलक्षण एवोपादाने द्रष्टव्या। निमित्तत्वन्तु अधिष्ठात्रन्तराभावादवगन्तव्यं यथा हि लोके मृत्सुवर्णादिकमुपादानकारणं कुलालसुवर्णकारादीनधिष्ठातॄनपेक्ष्य प्रवर्त्तते नैवं ब्रह्मण उपादानकारणस्य सतोऽन्योऽधिष्ठाताऽपेक्ष्योऽस्ति प्रागुत्पत्तेः “एकमेवाद्वितीय” मित्यवधारणात् अधिष्ठात्रन्तराभावोऽपि प्रतिज्ञादृष्टान्तानुपरोधादेव नोदितो वेदितव्यः” अधिष्ठातरि ह्युपादानादन्यस्मिन्नभ्युपगम्यमाने पुनरप्येकविज्ञानेन सर्ब्बविज्ञानस्यासम्भवात् प्रतिज्ञादृष्टान्तोपरोध एव स्यात् तस्मादधिष्ठात्रन्तराभावादात्मनः कर्त्तृत्वम् उपादानान्तराभावाच्च प्रकृतित्वम्। कुतश्चात्मनः कर्त्तृत्व प्रकृतित्वे” भा॰। “अभिध्योपदेशाच्च” सू॰। “अभिध्योपदेशश्चात्मनः कर्त्तृत्वप्रकृतित्वे गमयति “सोऽकामयत बहु स्यां प्रजायेति” “तदैक्षतेति” च तत्राभिध्यानपूर्ब्बिकायाः स्वातन्त्र्यप्रवृत्तेः कर्त्तृत्वं गम्यते “बहु स्यामिति” प्रत्यगात्मविषयत्वात् बहुभवनाभिध्यानाच्च प्रकृतिरित्यपि गम्यते” भा॰। “साक्षाच्चोभयाम्नानात्” सू॰। “प्रकृतित्वस्यायमभ्युच्चयः इतश्च प्रकृतिर्ब्रह्म यत् कारणं साक्षाद्ब्रह्मैव कारणमुपादायोभौ प्रभवप्रलयावाम्नायेते “सर्ब्बाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यन्तीति” यद्धि यस्मात् प्रभवति यस्मिंश्च प्रलीयते तत् तस्योपादानं प्रसिद्धं यथा व्रीहियवादीनां पृथिवी” साक्षादिति चोपादानान्तरानुपादानं सूचयति आकाशादेवेति। प्रत्यस्तमयश्च नोपादानादन्यत्र कार्य्यस्य दृष्टः” भा॰। ‘आत्मकृतेः परिणामात्” सू॰। “इतश्च प्रकृतिर्ब्रह्म यत् कारणं ब्रह्मप्रक्रियायाम्” “तदात्मानं स्वयमकुरुतेति” आत्मनः कर्म्मत्वं कर्त्तृत्वञ्च दर्शयति आत्मानमिति कर्म्मत्वं स्वयमकुरुतेति कर्त्तृत्वम्। कथं पुनः पूर्ब्बसिद्धस्य सतः कर्त्तृत्वेन व्यवस्थितस्य क्रियमाणत्वं शक्यं सम्पादयितुम्? परिणामादिति ब्रूमः पूर्ब्बसिद्धो हि सन्नात्मा विशेषेण विकारात्मना परिणमयामासात्मानमिति विकारात्मना च परिणामो मृदाद्यासु प्रकृतिषूपलब्धः। स्वयमिति च विशेषणान्निमित्तान्तरानपेक्षत्वमपि प्रतीयते। परिणामादिति वा पृथक्सूत्रं तस्यैषोऽर्थः। इतश्च प्रकृतिर्ब्रह्म यत् कारणं ब्रह्मण एव विकारात्मनायं परिणामः सामानाधिकरण्येनाम्नायते” ‘सच्च त्यच्चाभवन्निरुक्तञ्चानिरुक्तञ्चेत्यादिनेति” भा॰। “योनिश्च हि गीयते” सू॰। “इतश्च प्रकृतिर्ब्रह्म यत् कारणं ब्रह्म योनिरित्यपि सर्ब्बत्र वेदान्तेषु “कर्त्तारमीशं पुरुषं ब्रह्मयोनिमिति” यद्भूतयोनिं परिपश्यन्ति धीराः” इति च। योनिशब्दश्च प्रकृतिवचनः समधिगतो लोके “पृथिवी योनिरोषधिवनस्पतीनामिति,। स्त्रीयोनेरप्यस्त्येवावयवद्वारा

श्रुतं प्रत्युपादानत्वम् क्वचित् स्थानवचनोऽपि योनिशब्दो दृष्टः "योनिष्ट इन्द्रनिषदे अकारीति" वाक्यशेषात्। तत्र प्रकृतिवचनता परिगृह्यते "यथोर्णनाभिः सृजते गृह्णते च" इत्येवं जातीयकात्। तदेवं प्रकृतित्वं ब्रह्मणः सिद्धम्। यत् पुनरिदमुक्तं ईक्षापूर्वकं कर्तृत्वं निमित्तकारणेष्वेव कुलालादिषु लोके दृष्टं नोपादानेष्वित्यादि तत् प्रत्युच्यते, न लोकवदिह भवितव्यं नह्ययमनुमानगम्योऽर्थः शब्दगम्यत्वात्त्वस्यार्थस्य, यथाशब्दमिह भवितव्यं शब्दश्चेक्षितुरीश्वरस्य प्रकृतित्वं प्रतिपादयतीत्यवोचाम पुनश्चैतत् सर्वं विस्तरेण प्रतिवक्ष्यामः" भा०।

तत्र चेतनकारणतावादे सांख्याक्षेपप्रदर्शनपूर्वकं ब्रह्मणोयथा कारणत्वसम्भवस्तथा व्यवस्थापितं तत्रैव "इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः" शा० सू०। "अन्यथा पुनश्चेतनकारणवाद आक्षिप्यते चेतनाद्धि जगत्प्रक्रियायामाश्रीयमाणायां हिताकरणादयो दोषाः प्रसज्यन्ते कुतः? इतरव्यपदेशात् इतरस्य शारीरस्य ब्रह्मात्मत्वं व्यपदिशति श्रुतिः "स आत्मा तत्त्वमसि श्वेतकेतो"! इति प्रतिबोधनात्। यद्वा इतरस्य ब्रह्मणः शारीरात्मत्वं व्यपदिशति" तत्सृष्ट्वा तदेवानुप्राविशदिति" स्रष्टुरेवाविकृतस्य ब्रह्मणः कार्य्यानुप्रवेशेन शारीरात्मत्वप्रदर्शनात्। "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति" पर देवताजीवमात्मशब्देन व्यपदिशन्ती न ब्रह्मणोभिन्नः शारीर इति दर्शयति। तस्माद्यद्ब्रह्मणः स्रष्टृत्वं तच्छारीरस्यैव। अतः स्वतन्त्रकर्त्ता स च हितमेवात्मनः सौमनस्यकरं कुर्य्यात् नाहितं जन्ममरणजरारोगाद्यनेकानर्थजालम्। न हि कश्चिदपरतन्त्रोबन्धनागारमात्मनः कृत्वानुप्रविशति न च स्वयमत्यन्तनिर्मलः सन्नत्यन्तं मलिनं देहमात्मत्वेनोपेयात् कृतमपि कथञ्चिद्यत् दुःखकरं तदिच्छया जह्यात् सुखकरं चोपाददीत स्मरेच्च मयेदं जगद्विविधं विचित्रं विरचितमिति सर्वो हि लोकः स्पष्टं कार्य्यं कृत्वा स्मरति मयेदं कृतमिति। यथा च मायावी स्वयं प्रसारितां मायामिच्छया अनायासेनोपसंहरति एवं शारीरोऽपीमां सृष्टिमुपसंहरेत्। स्वकीयमपि तावच्छरीरं शारीरो न शक्नोति अनायासेनोपसंहर्त्तुम्। एवं हितक्रियादर्शनादन्याय्या चेतनाज्जगत्प्रक्रियेति मन्यते" भा०। "अधिकन्तु भेदनिर्देशात्" सू०। "तुशब्दः पूर्वपक्षं व्यावर्त्तयति। यत् सर्व्वज्ञं सर्वशक्ति ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावं शारीरादधिकमन्यत् तद्वयं जगतः स्रष्टृ ब्रूमः न तस्मिन् हिताकरणादयो दोषाः प्रसज्यन्ते। न हि तस्य हितं किञ्चित् कर्त्तव्यमस्ति अहितं वा परिहर्त्तव्यं नित्यमुक्तत्वात्। न च तस्य ज्ञानप्रतिबन्धः शक्तिप्रतिबन्धो वा क्वचिदप्यस्ति सर्व्वज्ञत्वात् सर्वशक्तित्वाच्च। शारीरस्त्वनेवंविधस्तस्मिन् प्रसज्यन्ते हिताकरणादयो दोषाः न तु तं वयं जगतः स्रष्टारं ब्रूमः। कुत एतत् भेदनिर्देशात् "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" "सोऽन्वेष्टव्यः स विजिज्ञासितव्यः" "सता सौम्य! तदा संपन्नो भवति" "शारीर आत्मा प्राज्ञेनात्मना अन्वारूढ" इत्येवं जातीयकः कर्त्तृकर्मादिभेदनिर्देशो जीवादधिकं ब्रह्म दर्शयति। नन्वभेदनिर्देशोऽपि दर्शितः "तत्त्वमसी"त्येवञ्जातीयकः कथं भेदाभेदौ विरुद्धौ सम्भवेताम्?। नैष दोषः। आकाशघटाकाशन्यायेनोभयसम्भवस्य तत्र तत्र प्रतिष्ठापितत्वात्। अपि च यदा "तत्त्वमसी"त्येवञ्जातीयकेनाभेदनिर्देशेनाभेदः प्रतिबोधितो भवति, अपगतम्भवति तदा जीवस्य संसारित्वं, ब्रह्मणश्च स्रष्टृत्वं, समस्तस्य मिथ्याज्ञानविजृम्भितस्य भेदव्यवहारस्य सम्यग्ज्ञानेन बाधितत्वात् तत्र कुत एव सृष्टिः, कुतो वा हिताकरणादयो दोषाः। अविद्याप्रत्युपस्थापितनामरूपकृतकार्य्यकारणसंघातोपाध्यविवेककृता हि भ्रान्तिर्हिताहितकरणादिलक्षणः संसारो न तु परमार्थतोऽस्तीत्यसकृदवोचाम जन्ममरणच्छेदनभेदनाद्यभिमानवत्। अबाधिते तु भेदव्यवहारे "सोऽन्वेष्टव्य" इत्येवञ्जातीयकेन भेदनिर्देशेनावगम्यमानं ब्रह्मणोऽधिकत्वं हिताकरणदोषप्रसक्तिं निरुणद्धि" भा०। "अश्मादिवच्च तदनुपपत्तिः" सू० "यथा च लोके पृथिवीत्वसामान्यान्वितानामप्यश्मनां केचिन्महार्हा मणयो वज्रवैदूर्य्यादयोऽन्ये मध्यमवीर्य्याः सूर्यकान्तादयोऽन्ये प्रहीणाः श्ववायसप्रक्षेपणार्हाः पाषाणा इत्यनेकविधं वैचित्र्यं दृश्यते यथा चैकपृथिवीव्यपाश्रयाणामपि बीजानां बहुविधं पत्रपुष्पफलगन्धरसादिवैचित्र्यं चन्दनचम्पकादिषूपलभ्यते यथा चैकस्याप्यन्नरसस्य लोहितादीनि केशलोमादीनि च कार्य्याणि विचित्राणि भवन्ति एवमेकस्यापि ब्रह्मणोजीवप्राज्ञपृथक्त्वं कार्य्यवैचित्र्यं चोपपद्यत इत्यतस्तदनुपपत्तिः परपरिकल्पितदोषानुपपत्तिरित्यर्थः। श्रुतेश्च प्रामाण्याद्विकारस्य वाचारम्भणमात्रत्वात् स्वप्नदृश्यभाववैचित्र्यवच्चेत्यभ्युच्चयः" भा०। "उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि" सू०। "चेतनं ब्रह्मैकमद्वितीयं जगतः कारणमिति यदुक्तं तन्नोपपद्यते कस्मात्? उपसंहारदर्शनात्। इह हि लोके कुलालादयो-

घटपटादीनां कर्त्तारो मृद्दण्डचक्रसूत्राद्यनेककारकोपसंहारेण संगृहीतसाधनाः सन्तस्तत्तत् कार्यं कुर्वाणा दृश्यन्ते ब्रह्म चासहायं तवाभिप्रेतं तस्य साधनान्तरानुपसंग्रहे सति कथं स्रष्टृत्वमुपपद्येत तस्मान्न ब्रह्म जगत्कारणमिति चेन्नैष दोषः यतः क्षीरवत् द्रव्यस्वभावविशेषादुपपद्यते यथा हि लोके क्षीरं जलं वा स्वयमेव दधिहिमभावेन परिणमतेऽनपेक्ष्य बाह्यं साधनं, तथेहापि भविष्यति। ननु क्षीराद्यपि दध्यादिभावेन परिणममानमपेक्षत एव बाह्यं साधनम् औष्ण्यादिकं, कथमुच्यते क्षीरवद्धीति नैष दोषः। स्वयमपि हि क्षीरं यां च यावतीं च परिणाममात्रामनुभवत्येव पार्यते तां च तावतीं चौष्ण्यादिना दधिभावाय। यदि च स्वयं दधिभावशीलता न स्यान्नैवौष्ण्यादिनापि बलाद्दधिभावमापद्येत। न हि वायुराकाशो वौष्ण्यादिना बलाद्दधिभावमापद्येत। साधनसम्पत्त्या च तस्य संपूर्णता सम्पाद्यते। परिपूर्णशक्तिकं तु ब्रह्म न तस्यान्येन केनचित् पूर्णता सम्पादयितव्या। श्रुतिश्च तत्र भवति "न तस्य कार्यं करणञ्च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते। परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति" तस्मादेकस्यापि ब्रह्मणो विचित्रशक्तियोगात् क्षीरादिवद्विचित्रः परिणाम उपपद्यते" भा०। 'देवादिवदपि लोके" सू०। "स्यादेतत् उपपद्यते क्षीरादीनामचेतनानामनपेक्ष्यापि बाह्यं साधनं दध्यादिभावः दृष्टत्वात्. चेतनाः पुनः कुलालादयश्च साधनसामग्रीमपेक्ष्यैव तस्मै तस्मै कार्याय प्रवर्त्तमाना दृश्यन्ते कथं ब्रह्म चेतनं सदसहायं प्रवर्त्तेतेति? देवादिवदिति ब्रूमः। यथा लोके देवाः पितर ऋषय इत्येवमादय महाप्रभावाश्चेतना अपि सन्तोऽनपेक्ष्य किञ्चिद्बाह्यं साधनमैश्वर्यविशेषयोगादभिध्यानमात्रेण स्वत एव बहूनि नानासंस्थानानि शरीराणि प्रासादादीनि रथादीनि च निर्मिमाणा उपलभ्यन्ते मन्त्रार्थवादेतिहासपुराणप्रामाण्यात्। तन्तुनाभश्च स्वत एव तन्तून् सृजति बलाका चान्तरेणैव शुक्रं गर्भं धत्ते, पद्मिनी चानपेक्ष्य किञ्चित् प्रस्थानसाधनं सरोन्तरात् सरोन्तरं प्रतिष्ठते। एवं चेतनमपि ब्रह्मानपेक्ष्य बाह्यं साधनं स्वत एव जगत् स्रक्ष्यति स यदि ब्रूयात् य एते देवादयो ब्रह्मणो दृष्टान्ता उपात्तास्ते दार्ष्टान्तिकेन ब्रह्मणा समानस्वभावा न भवन्ति शरीरमेव ह्यचेतनं देवादीनां शरीरान्तरादिविभूत्युत्पादने उपादानं न तु चेतन आत्मा, तन्तुनाभस्य च क्षुद्रतरजन्तुभक्षणाल्लाला कठिनतामापद्यमानो तन्तुर्भवति, बलाका च स्तनयित्नुरवश्रवणाद्गर्भं धत्ते, पद्मिनी च चेतनप्रयुक्ता सत्यचेतनेनैव शरीरेण सरोन्तरात् सरोन्तरमुपसर्पति वल्लीव वृक्षं न तु स्वयमेव अचेतना सरोन्तरोपसर्पणे व्याप्रियते तस्मान्नैते ब्रह्मणो दृष्टान्ता इति, तं प्रति ब्रूयात् नायं दोषः। कुलालादिदृष्टान्तवैलक्षण्यमात्रस्य विवक्षितत्वादिति। यथा हि कुलालादीनां देवादीनाञ्च समाने चेतनत्वे कुलालादयः कार्यारम्भे बाह्यं साधनमपेक्षन्ते न देवादयस्तथा, ब्रह्म चेतनमपि न बाह्यं साधनमपेक्षिष्यते इत्येतावदुवयं देवाद्युदाहरणेन विवक्षामः। तस्माद्यथैकस्य सामर्थ्यं दृष्टं तथा सर्वेषामेव भवितुमर्हतीति नास्त्येकान्त इत्यभिप्राय" भा०। "कृत्स्नप्रसक्तिर्निरवयवत्वशब्दव्याकोपो वा" सू०। 'चेतनमेकमद्वितीयं ब्रह्म क्षीरादिवद्देवतादिवच्चानपेक्षितबाह्यसाधनं स्वयम्परिणममानं जगतः कारणमिति स्थितम्। शास्त्रार्थपरिशुद्धये तु पुनराक्षिपति कृत्स्नप्रसक्तिः कृत्स्नस्य ब्रह्मणः कार्यरूपेण परिणामः प्राप्नोति निरवयवत्वात् यदि ब्रह्म पृथिव्यादिवत् सावयवमभविष्यत्ततोऽस्यैकदेशः पर्यणंस्यत एकदेशश्चावास्थास्यत, निरवयवन्तु ब्रह्म श्रुतिभ्योऽवगम्यते "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्" "दिव्यो ह्यमूर्त्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः" "इदं महद्भूतमनन्तमपारम्" "विज्ञानघन एव स एष नेति नेत्यात्माऽस्थूलमनण्वित्याद्याभ्यः" सर्वविशेषं प्रतिषेधयित्रीभ्यः। ततश्चैकदेशपरिणामासम्भवात् कृत्स्नपरिणामप्रसक्तौ सत्यां मूलोच्छेदः प्रसज्येत द्रष्टव्यत्वोपदेशानर्थक्यञ्चापन्नम् अयत्नदृष्टत्वात् कार्यस्य। तद्व्यतिरिक्तस्य च ब्रह्मणोऽभावादजत्वादिशब्दव्याकोपश्च। अथैतद्दोषपरिजिहीर्षया सावयवमेव ब्रह्माभ्युपगम्येत तथापि ये निरवयवत्वस्य प्रतिपादकाः शब्दा उदाहृतास्ते प्रकुप्येयुः। सावयवत्वे चानित्यत्वप्रसङ्ग इति सर्वथाऽयं पक्षो न घटयितुं शक्यत इत्याक्षिपति" भा०। "श्रुतेस्तु शब्दमूलत्वात्" सू० 'तुशब्देनाक्षेपं परिहरति न खल्वस्मत्पक्षे कश्चिदपि दोषोऽस्ति न तावत् कृत्स्नप्रसक्तिरस्ति कुतः? श्रुतेः तथैव हि ब्रह्मणोऽवस्थानं श्रूयते प्रकृतिविकारयोर्भेदेन व्यपदेशात् "सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति" "तावानस्य महिमा ततो ज्यायांश्च पुरुषः पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवीति" चैवं जातीयकात् तथा हृदयायतनत्ववचनात् सत्-

सम्पत्तिवचनाच्च । यदि च कृत्स्नं ब्रह्म कार्य्यभावेनोपयुक्तं स्यात् "सता सौम्य! तदा सम्पन्नो भवतीति" सुषुप्तिगतं विशेषणमनुपपन्नं स्यात् विकृतेन ब्रह्मणा नित्यं सम्पन्नत्वात् अविकृतस्य च ब्रह्मणोऽभावात् तथेन्द्रियगोचरत्वप्रतिषेधाद्ब्रह्मणः, विकारस्य चेन्द्रियगोचरत्वोपपत्तेः । तस्मादस्ति अविकृतं ब्रह्म न च निरवयवत्वशब्दव्याकोपोऽस्ति श्रूयमाणत्वादेव निरवयवत्वस्याप्यभ्युपगम्यमानत्वात् । शब्दमूलञ्च ब्रह्म शब्दप्रमाणकं नेन्द्रियादिप्रमाणकं तद्यथाशब्दमभ्युपगन्तव्यम् । शब्दश्चोभयमपि ब्रह्मणः प्रतिपादयति अकृत्स्नप्रसक्तिं निरवयवताञ्च । लौकिकानामपि मणिमन्त्रौषधिप्रभृतीनां देशकालनिमित्तवैचित्र्यवशात् शक्तयोविरुद्धानेककार्य्यविषया दृश्यन्ते ता अपि तावन्नोपदेशमन्तरेण केवलेन तर्केणावगन्तुं शक्यन्ते अस्य वस्तुन एतावत्य एतत्सहाया एतद्विषया एतत्प्रयोजनाश्च शक्तय इति किमुताचिन्त्यप्रभावस्य ब्रह्मणोरूपं विना शब्देन न निरूप्येत । तथाचाहुः पौराणिकाः "अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत् । प्रकृतिभ्यः परं यच्च तदचिन्त्यस्य लक्षणमिति" । तस्माच्छब्दमूल एवातीन्द्रियार्थ याथात्म्याधिगमः । ननु शब्देनापि न शक्यते विरुद्धार्थः प्रत्याययितुं निरवयवञ्च ब्रह्म परिणमते न च कृत्स्नमिति यदि निरवयवं ब्रह्म स्यान्नैव परिणमेत कृत्स्नमेव वा परिणमेत अथ केनचिद्रूपेण परिणमेत केनचिद्रूपेणावतिष्ठेतेति रूपभेदकल्पनात् सावयवमेव प्रसज्येत । क्रियाविषये "अतिरात्रे षोड़शिनं गृह्णाति नातिरात्रे षोड़शिनं गृह्णातीत्येवं जातीयिकायां विरुद्धप्रतीतावपि विकल्पाश्रयणं विरोधपरिहारकारणं भवति पुरुषतन्त्रत्वादनुष्ठानस्य इह तु विकल्पाश्रयणेनापि न विरोधपरिहारः सम्भवति अपुरुषतन्त्रत्वाद्वस्तुनः तस्माद्दुर्घटमेतदिति नैष दोषः । अविद्याकल्पितरूपभेदाभ्युपगमात् । नह्यविद्याकल्पितेन रूपभेदेन सावयवं वस्तु सम्पद्यते । न हि तिमिरोपहतनयनेनानेक इव चन्द्रमा दृश्यमानोऽनेक एव भवति । अविद्याकल्पितेन च नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन तत्त्वान्यत्वाभ्यामनिर्वाच्येन ब्रह्म परिणामादिसर्व्वव्यवहारास्पदतां प्रतिपद्यते पारमार्थिकेन च रूपेण सर्व्वव्यवहारातीतमपरिणतमवतिष्ठते वाचारम्भणमात्रत्वाच्चाविद्याकल्पितस्य नामरूपभेदस्य, न निरवयवत्वं ब्रह्मणः कुप्यति । नचेयं परिणामश्रुतिः परिणामप्रतिपादनार्था तत्प्रतिपत्तौ फलानवगमात् । सर्व्वव्यवहारहीनब्रह्मात्मभावप्रतिपादनार्था त्वेषा तत्प्रतिपत्तौ फलावगमात् । "स एष नेति नेत्यात्मा" इत्युपक्रम्याह "अभयं वै जनक! प्राप्तोऽसीति" । तस्मादस्मत्पक्षे न कश्चिदपि दोषप्रसङ्गोऽस्ति' भा० । "आत्मनि चैवं विचित्राश्च हि" सू० । 'अपि च नैवात्र विवदितव्यं कथमेकस्मिन् ब्रह्मणि स्वरूपानुपमर्द्देनैवानेकाकारा सृष्टिः स्यादिति यत आत्मन्यप्येकस्मिन् स्वप्नदृशि स्वरूपानुपमर्द्दनेनैवानेकाकारा सृष्टिः पठ्यते "न तत्र रथा न रथयोगाः पन्थानो भवन्त्यथ रथान् रथयोगान् पथः सृजते" इत्यादिना । लोकेऽपि देवादिषु मायाव्यादिषु च स्वरूपानुपमर्द्दनेनैव विचित्रा हस्त्यश्वादिसृष्टयो दृश्यन्ते तथैकस्मिन्नपि ब्रह्मणि स्वरूपानुपमर्द्देनैवानेकाकारा सृष्टिर्भविष्यतीति" भा० । "स्वपक्षदोषाच्च" सू० । "परेषामप्येष समानः स्वपक्षदोषः प्रधानवादिनोऽपि हि निरवयवमपरिच्छिन्नं शब्दादिहीनं प्रधानं सावयवस्य परिच्छिन्नस्य शब्दादिमतः कार्य्यस्य कारणमिति स्वपक्षः तत्रापि कृत्स्नप्रसक्तिर्निरवयवत्वात् प्रधानस्य प्राप्नोति निरवयवत्वाभ्युपगमव्याकोपो वा । ननु नैव तैर्निरवयवं प्रधानमभ्युपगम्यते सत्त्वरजस्तमांसि हि त्रयो गुणाः तेषां साम्यावस्था प्रधानं तैरेवावयवैः तत् सावयवमिति, नैवं जातीयकेन सावयवत्वेन प्रकृतो दोषः परिहर्त्तुं पार्य्यते यतः सत्त्वरजस्तमसामप्येकैकस्य समानं निरवयवत्वम् एकैकमेवेतरद्वयानुगृहीतं सजातीयस्य प्रपञ्चस्योपादानमिति समानत्वात् स्वपक्षदोषप्रसङ्गस्य । तर्काप्रतिष्ठानात् सावयवत्वमेवेति चेत् एवमप्यनित्यत्वादिदोषप्रसङ्गः । अथ शक्तय एव कार्य्यवैचित्र्यसूचिता अवयवा इत्यभिप्रायः, तास्तु ब्रह्मवादिनोऽप्यविशिष्टाः । तथा अणुवादिनोऽप्यणुरण्वन्तरेण संयुज्यमानो निरवयवत्वाद्यदि कार्त्स्न्येन संयुज्येत ततः प्रथिमानुपपत्तेरणुमात्रत्वप्रसङ्गः । अथैकदेशेन संयुज्येत तथापि निरवयवत्वाभ्युपगमव्याकोप इति स्वपक्षेऽपि समान एष दोषः । समानत्वाच्च नान्यतरस्मिन्नेव पक्षे उपक्षेप्तव्यो भवति । परिहृतस्तु ब्रह्मवादिना स्वपक्षे दोषः" भा० । "सर्व्वोपेता च तद्दर्शनात्" सू० । "एकस्यापि ब्रह्मणो विचित्रशक्तियोगादुपपद्यते विचित्रो विकारप्रपञ्च इत्युक्तं तत् पुनः कथमवगम्यते विचित्रशक्तियुक्तं परं ब्रह्मेति ?" तदुच्यते सर्व्वोपेता च तद्दर्शनात् सर्व्वशक्तियुक्ता परा देवतेत्यवगन्तव्यं कुतः ? तद्दर्शनात् तथा हि दर्शयति श्रुतिः सर्वशक्तियोगं परस्या देवतायाः "सर्व्वकर्म्मा सर्व्वकामः सर्वगन्धः सर्व्वरसः सर्व्वमिदमभ्यात्तोऽवाक्यनादरः" "सत्य-

कामः सत्यसङ्कल्पः" "यः सर्वज्ञः सर्ववित्" "एतस्य वा
अक्षरस्य प्रशासने गार्गि! सूर्य्याचन्द्रमसौ धृतौ तिष्ठत" इत्येव-
ञ्जातीयका" भा०। "विकरणत्वान्नेति चेत्तदुक्तम्" सू०। "स्या-
देतत् विकरणां परां देवतां शास्ति शास्त्रम् "अचक्षुष्कमश्रो-
त्रमवागमनः" इत्येवञ्जातीयकम्। कथं सा सर्वशक्तियुक्तापि
सती कार्य्याय प्रभवेत्? देवादयो हि चेतनाः सर्वशक्तियुक्ता
अपि सन्त आध्यात्मिककार्य्यकरणसम्पन्ना एव तस्मै तस्मै का-
र्य्याय प्रभवन्तो विज्ञायन्ते। कथञ्च "नेति नेतीति" प्रति-
षिद्धसर्व्वविशेषाया देवतायाः सर्व्वशक्तियोगः सम्भवेदिति?
चेत् यदत्र वक्तव्यं तत् पुरस्तादेवोक्तं, श्रुत्यवगाह्यमेवेद-
मतिगम्भीरं परं ब्रह्म न तर्कावगाह्यम् न च यथैकस्य सा-
मर्थ्यं दृष्टं तथान्यस्यापि सामर्थ्येन भवितव्यमिति निय-
मोऽस्तीति। प्रतिषिद्धसर्व्वविशेषस्यापि ब्रह्मणः सर्व्व-
शक्तियोगः सम्भवतीत्येतदप्यविद्याकल्पितरूपभेदोपन्यासे-
नोक्तमेव। तथा च शास्त्रम् "अपाणिपादो जवनो ग्रहीता
पश्यत्यचक्षुः स शृणोत्यकर्णः" इत्यकरणस्यापि ब्रह्मणः सर्व्व-
सामर्थ्ययोगं दर्शयति" भा०। "न प्रयोजनवत्त्वात्" सू०।
"अन्यथा पुनश्चेतनकर्तृकत्वं जगत आक्षिपति, न खलु चेत-
नः परमात्मेदं जगद्बिम्बं विरचयितुमर्हति कुतः? प्रयो-
जनवत्त्वात् प्रवृत्तीनाम्। चेतनो हि लोके बुद्धिपूर्व्वकारी-
पुरुषः प्रवर्त्तमानो न मन्दोपक्रमामपि तावत् प्रवृत्तिमात्म-
प्रयोजनानुपयोगिनीमारभमाणो दृष्टः किमुत गुरुतरसंरम्भा-
म्, भवति च लोकप्रसिद्ध्यनुवादिनी श्रुतिः "न वा अरे
सर्व्वस्य कामाय सर्वं प्रियम्भवत्यात्मनस्तु कामाय सर्वं
प्रियम्भवतीति"। गुरुतरसंरम्भा चेयं प्रवृत्तिर्यदुच्चावच
प्रपञ्चं जगद्बिम्बं विरचयितव्यम्। यदीयमपि प्रवृत्ति-
श्चेतनस्य परमात्मन आत्मप्रयोजनोपयोगिनी परिक-
ल्प्येत परितृप्तत्वं परमात्मनः श्रूयमाणं बाध्येत प्रयो-
जनाभावे वा प्रवृत्त्यभावोऽपि स्यात्। अथ चेतनोऽपि
सन्नुन्मत्तो बुद्ध्यपराधादन्तरेणैवात्मप्रयोजनं प्रवर्त्तमानो-
दृष्टस्तथा परमात्मापि प्रवर्त्तिष्यत इत्युच्येत, तथा सति
सर्वज्ञत्वं परमात्मनः श्रूयमाणं बाध्येत तस्मादश्लिष्टा चेत-
नात् सृष्टिरिति" भा०। "लोकवत्तु लीलाकैवल्यम्" सू०
"तुशब्देनाक्षेपं परिहरति। यथा लोके कस्यचिदाप्तैषणस्य
राज्ञो राजामात्यस्य वा व्यतिरिक्तं किञ्चित्प्रयोजनमनभि
सन्धाय केवलं लीलारूपाः प्रवृत्तयः क्रीडाविहारेषु
भवन्ति यथा चोच्छ्वासप्रश्वासादयोऽनभिसन्धाय बाह्यं
किञ्चित्प्रयोजनान्तरं स्वभावादेव भवन्ति एवमीश्वरस्याप्य-
नपेक्ष्य किञ्चित्प्रयोजनान्तरं स्वभावादेव केवलं लीला-
रूपा प्रवृत्तिर्भविष्यति। नहीश्वरस्य प्रयोजनान्तरं निरू-
प्यमाणं न्यायतः श्रुतितो वा सम्भवति। न च स्वभावः
पर्य्यनुयोक्तुं शक्यते। यद्यप्यस्माकमियं जगद्बिम्बविर-
चना गुरुतरसंरम्भेवावभाति तथापि परमेश्वरस्य लो-
लैव केवलेयम् अपरिमितशक्तित्वात्। यदि नाम लोके
लीलास्वपि किञ्चित् सूक्ष्मं प्रयोजनमुत्प्रेक्ष्यत तथापि
नैवात्र किञ्चित्प्रयोजनमुत्प्रेक्षितुं शक्यते आप्तकामताश्रुतेः।
नाप्यप्रवृत्तिरुन्मत्तप्रवृत्तिर्वा सृष्टिश्रुतेः सर्वज्ञत्वश्रुतेश्च।
नचेयं परमार्थविषया सृष्टिस्थितिश्रुतिः अविद्याकल्पित
नामरूपव्यवहारगोचरत्वात् ब्रह्मात्मभावप्रतिपादनपर-
त्वाच्चेत्येतदपि न विस्मर्त्तव्यम्" भा०। "वैषम्यनैर्घृण्ये न
सापेक्षत्वात्तथाहि दर्शयति" सू०। "पुनश्च जगज्जन्मादि-
हेतुत्वमीश्वरस्याक्षिप्यते स्थूणानिखननन्यायेन प्रतिज्ञातस्या-
र्थस्य दृढीकरणाय। नेश्वरो जगतः कारणमुपपद्यते
कुतः? वैषम्यनैर्घृण्यप्रसङ्गात्। कांश्चिदत्यन्तसुखभाजः करो-
ति देवादीन्, कांश्चिदत्यन्तदुःखभाजः करोति पश्वादीन्,
कांश्चिन् मध्यमभाजो मनुष्यादीनित्येवं विषमां सृष्टिं नि-
र्मिमाणस्येश्वरस्य पृथग्जनस्येव रागद्वेषापत्तेः श्रुतिस्मृ-
त्यवधारितस्वच्छत्वादीश्वरस्वभावविप्रलोपः प्रसज्येत।
तथा खलजनैरपि जुगुप्सितं निर्घृणत्वमतिक्रूरत्वं
दुःखयोगविधानात् सर्व्वप्रजोपसंहरणाच्च प्रसज्येत।
तस्माद्वैषम्यनैर्घृण्यप्रसङ्गान्नेश्वरः कारणमित्येवं प्राप्ते
ब्रूमः वैषम्यनैर्घृण्ये नेश्वरस्य प्रसज्येते कस्मात्? सापेक्ष-
त्वात्। यदि हि निरपेक्षः केवल ईश्वरो विषमां सृष्टिं
निर्मिमीत स्यातामेतौ दोषौ वैषम्यं नैर्घृण्यञ्च। न तु
निरपेक्षस्य निर्मातृत्वमस्ति, सापेक्षो हीश्वरो विषमां सृष्टिं
निर्मिमीते। किमपेक्षत इति चेद्धर्म्माधर्म्मावपेक्षत इति
वदामः। अतः सृज्यमानप्राणिधर्म्माधर्म्मापेक्षा विषमा
सृष्टिरिति नायमीश्वरस्यापराधः। ईश्वरस्तु पर्जन्यवद्द्रष्ट-
व्यः यथा हि पर्जन्यो व्रीहियवादिसृष्टौ साधारणं
कारणम्भवति व्रीहियवादिवैषम्ये तु तत्तद्बीजगतान्येवा
साधारणानि सामर्थ्यानि कारणानि भवन्ति, एवमीश्वरो देव
मनुष्यादिसृष्टौ साधारणं कारणम्भवति देवमनुष्यादिवै-
षम्ये तु तत्तज्जीवगतान्येवासाधारणानि कर्म्माणि कार-
णानि भवन्ति। एवमीश्वरः सापेक्षत्वान्न वैषम्यनैर्घृण्याभ्यां
दुष्यति। कथं पुनरवगम्यते सापेक्ष ईश्वरो नीचमध्य-
मोत्तमसंसारं निर्मिमीते इति। तथा हि दर्शयति

श्रुतिः "एष ह्येव साधु कर्म्म कारयति तं, यमेभ्यो लोकेभ्य उन्निनीषते, एष उ एवासाधु कर्म्म कारयति तं, यमधो लोकं निनीषते" इति "पुण्यो वै पुण्येन कर्म्मणा भवति, पापः पापेनेति" च। स्मृतिरपि प्राणिकर्म्मविशेषापेक्षमेवेश्वरस्यानुग्रहीतृत्वं निग्रहीतृत्वञ्च दर्शयति "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" इत्येवञ्जातीयका" भा०। "न कर्म्माविभागादिति चेन्नानादित्वात्" सू०। "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति" प्राक्सृष्टेरविभागावधारणान्नास्ति कर्म्म, यदपेक्षा विषमा सृष्टिः स्यात्, सृष्ट्युत्तरकालं हि शरीरादिविभागापेक्षं कर्म्म। कर्म्मापेक्षं ईश्वरः प्रवर्त्ततां नाम, प्राक् विभागाद्वैचित्र्यनिमित्तस्य कर्म्मणोऽभावात्तुल्यैवाद्या सृष्टिः प्राप्नोतीति चेन्नैष दोषः, अनादित्वात् संसारस्य। भवेदेष दोषो यद्यादिमानयं संसारः स्यात् अनादौ तु संसारे बीजाङ्कुरवद्धेतुहेतुमद्भावेन कर्म्मणः, सर्गवैषम्यस्य च प्रवृत्तिर्न विरुध्यते। कथं पुनरेतदवगम्यते अनादिरेष संसार इति? अत उत्तरं पठति" भा०। "उपपद्यते चाप्युपलभ्यते च" सू०। "उपपद्यते च संसारस्यानादित्वं आदिमत्त्वे हि संसारस्याकस्मादुद्भूतेर्मुक्तानामपि पुनःसंसारोद्भूतिप्रसङ्गः अकृताभ्यागमप्रसङ्गश्च सुखदुःखादिवैषम्यस्य निर्निमित्तत्वात्। न चेश्वरो वैषम्यहेतुरित्युक्तम्। न चाविद्या केवला वैषम्यकारणम् एकरूपत्वात्। रागादिक्लेशवासनाक्षिप्तकर्म्मापेक्षा त्वविद्या वैषम्यकरी स्यात्। न च कर्म्म अन्तरेण शरीरं सम्भवति, न वा शरीरमन्तरेण कर्म्म सम्भवतीतीतरेतराश्रयदोषप्रसङ्गः अनादित्वे तु बीजाङ्कुरन्यायेनोपपत्तेर्न कश्चिद्दोषो भवति। उपलभ्यते च संसारस्यानादित्वं श्रुतिस्मृत्योः। श्रुतौ तावत् 'अनेन जीवेनात्मनेति, सर्गप्रमुखे शारीरमात्मानं जीवशब्देन प्राणधारणनिमित्तेनाभिलपन्ननादिः संसार इति दर्शयति। आदिमत्त्वे तु ततः प्रागनवधारितः प्राणः स कथं प्राणधारणनिमित्तेन जीवशब्देन सर्गप्रमुखेऽभिलप्येत। न च धारयिष्यतीत्यतोऽभिलप्येत अनागताद्धि सम्बन्धादतीतः सम्बन्धो बलीयान् भवति अभिनिष्पन्नत्वात्। "सूर्य्याचन्द्रमसौ धाता यथापूर्व्वमकल्पयदिति" च मन्त्रवर्णः पूर्व्वकल्पसद्भावं दर्शयति। स्मृतावप्यनादित्वं संसारस्योपलभ्यते। "न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च सम्प्रतिष्ठा" इति भगवद्गीता। पुराणे चातीतानामनागतानाञ्च कल्पानां न परिमाणमस्तीति स्थापितम्" शङ्करभाष्यम्।

ईश्वरस्य केवलनिमित्तकारणतापक्षोऽपि न्यायवैशेषिकाद्यभिमतः तत्रैव प्रत्याख्यातः यथा "पत्युरसामञ्जस्यात्" शा० सू०। "इदानीं केवलाधिष्ठात्रीश्वरकारणवादः प्रतिषिध्यते। तत्कथमवगम्यते?। "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्" "अभिध्योपदेशाच्च" इत्यत्र प्रकृतिभावेनाधिष्ठातृभावेन चोभयस्वभावस्येश्वरस्य स्वयमेवाचार्य्येण प्रतिष्ठापितत्वात्। यदि पुनरविशेषेणेश्वरकारणवादमात्रमिह प्रतिषिध्येत पूर्व्वोत्तरविरोधाद्व्याहताभिव्याहारः सूत्रकार इत्येतदापद्येत। तस्मादप्रकृतिरधिष्ठाता केवलं निमित्तकारणमीश्वर इत्येष पक्षो वेदान्तविहितब्रह्मैकत्वप्रतिपक्षत्वाद्यत्नेनात्र प्रतिषिध्यते। सा चेयं वेदबाह्येश्वरकल्पनानेकप्रकारा। केचित्तावत्साङ्ख्ययोगव्यपाश्रयाः कल्पयन्ति प्रधानपुरुषयोरधिष्ठाता केवलं निमित्तकारणमीश्वरः इतरेतरविलक्षणाः प्रधानपुरुषेश्वरा इति। माहेश्वरास्तु मन्यन्ते "कार्य्यकारणयोगविधिदुःखान्ताः पञ्च पदार्थाः पशुपतिनेश्वरेण पशुपाशविमोक्षायोपदिष्टाः। पशुपतिरीश्वरो निमित्तकारणमिति,। तथा वैशेषिकादयोऽपि केचित् कथञ्चित् स्वप्रक्रियानुसारेण निमित्तकारणमीश्वरं वर्णयन्ति। अत उत्तरमुच्यते। "पत्युरसामञ्जस्यादिति"। पत्युरीश्वरस्य प्रधानपुरुषयोरधिष्ठातृत्वेन जगत्कारणत्वं नोपपद्यते कस्मात्? असामञ्जस्यात्। किं पुनरसामञ्जस्यम् हीनमध्यमोत्तमभावेन हि प्राणिभेदान् विदधत ईश्वरस्य रागद्वेषादिदोषप्रसक्तेरस्मदादिवदनीश्वरत्वं प्रसज्येत। प्राणिकर्म्मापेक्षत्वाददोष इति चेन्न कर्म्मेश्वरयोः प्रवर्त्यप्रवर्त्तयितृत्वे इतरेतराश्रयदोषप्रसङ्गात्। अनादित्वादिति चेन्न वर्त्तमानकालवदतीतेष्वपि कालेष्वितरेतराश्रयदोषाविशेषादन्धपरम्परान्यायापत्तेः। अपि च प्रवर्त्तनालक्षणा दोषा इति न्यायवित्समयः। न हि कश्चिददोषप्रयुक्तः परार्थे स्वार्थे वा प्रवर्त्तमानो दृश्यते स्वार्थप्रयुक्त एव च सर्व्वो जनः परार्थेऽपि प्रवर्त्तत इत्येवमप्यसामञ्जस्यम्। स्वार्थवत्त्वादीश्वरस्यानीश्वरत्वप्रसङ्गात्। पुरुषविशेषत्वाभ्युपगमाच्चेश्वरस्य पुरुषस्य चौदासीन्याभ्युपगमादसामञ्जस्यम्" भा०। "सम्बन्धानुपपत्तेश्च" सू०। "पुनरप्यसामञ्जस्यमेव न हि प्रधानपुरुषव्यतिरिक्त ईश्वरोऽन्तरेण सम्बन्धं प्रधानपुरुषयोरीशिता। न तावत् संयोगलक्षणः सम्बन्धः सम्भवति प्रधानपुरुषेश्वराणां सर्वगतत्वात् निरवयवत्वाच्च।

नापि समवायलक्षणः, आश्रयाश्रयिभावानिरूपणात्। नाप्यन्यः कश्चित् कार्य्यगम्यः सम्बन्धः शक्यते कल्पयितुं, कार्य्यकारणभावस्यैवाद्याप्यसिद्धत्वात्। ब्रह्मवादिनः कथमिति चेत् न तस्य तादात्म्यलक्षणसम्बन्धोपपत्तेः। अपि चागमबलेन ब्रह्मवादी कारणादिस्वरूपं निरूपयति नावश्यन्तस्य यथादृष्टं सर्व्वमभ्युपगन्तव्यम्। परस्य तु दृष्टान्तबलेन कारणादिस्वरूपं निरूपयतो यथादृष्टमेव सर्व्वमभ्युपगन्तव्यमित्ययमस्त्यतिशयः। परस्यापि सर्व्वज्ञप्रणीतागमसद्भावात् समानमागमबलमिति चेन्न इतरेतराश्रयप्रसङ्गात् आगमप्रत्ययात् सर्व्वज्ञसिद्धिः सर्व्वज्ञप्रत्ययाच्चागमसिद्धिरिति। तस्मादनुपपन्ना साङ्ख्ययोगवादिनामीश्वरकल्पना। एवमन्यास्वपि वेदबाह्यास्वीश्वरकल्पनासु यथासम्भवमसामञ्जस्यं योजयितव्यम्"भा०। "अधिष्ठानानुपपत्तेश्च"सू०। "इतश्चानुपपत्तिस्तार्किकपरिकल्पितस्येश्वरस्य। स हि परिकल्प्यमानः कुम्भकार इव मृदादीनि प्रधानादीनि अधिष्ठाय प्रवर्त्तयेत् न चैवमुपपद्यते। नह्यप्रत्यक्षं रूपादिहीनञ्च प्रधानमीश्वरस्याधिष्ठेयं सम्भवति मृदादिवैलक्षण्यात्"भा०। 'करणवच्चेन्न भोगादिभ्यः"सू०।"स्यादेतत् यथा करणग्रामं चक्षुरादिकमप्रत्यक्षं रूपादिहीनञ्च पुरुषोऽधितिष्ठत्येवं प्रधानमपीश्वरोऽधिष्ठास्यतीति, तथापि नोपपद्यते भोगादिदर्शनाद्धि करणग्रामस्याधिष्ठितत्वं गम्यते न चात्र भोगादयो दृश्यन्ते। करणग्रामसाम्ये चाभ्युपगम्यमाने संसारिणामिवेश्वरस्यापि भोगादयः प्रसज्येरन्। अन्यथा वा सूत्रद्वय व्याख्यायते। "अधिष्ठानानुपपत्तेश्च"। इतश्चानुपपत्तिस्तार्किकपरिकल्पितस्येश्वरस्य साधिष्ठानो हि लोके सशरीरो राजा राष्ट्रस्येश्वरो दृश्यते न निरधिष्ठानः, अतश्च तद्दृष्टान्तवशेनादृष्टमीश्वरं कल्पयितुमिच्छत ईश्वरस्यापि किञ्चित्शरीरं करणायतनं वर्णयितव्यं स्यात् न च तद्वर्णयितुं शक्यते सृष्ट्युत्तरकालभावित्वात् शरीरस्य प्राक्सृष्टेस्तदनुपपत्तेः। निरधिष्ठानत्वे चेश्वरस्य प्रवर्त्तकत्वानुपपत्तिः एवं लोके दृष्टत्वात्।"करणवच्चेन्न भोगादिभ्यः"सू०। 'अथ लोकदर्शनानुसारेणेश्वरस्यापि किञ्चित्करणानामायतनं शरीरं कामेन कल्प्यते एवमपि नोपपद्यते सशरीरत्वे हि सति संसारिवद्भोगादिप्रसङ्गादीश्वरस्याप्यनीश्वरत्व प्रसज्येत"भा०। '·अन्तवत्त्वमसर्व्वज्ञता वा"सू०।"इतश्चानुपपत्तिस्तार्किकपरिकल्पितस्येश्वरस्य। स हि सर्व्वज्ञस्तैरभ्युपगम्यते अनन्तश्च अनन्तञ्च प्रधानं अनन्ताश्च पुरुषा मिथो भिन्ना अभ्युपगम्यन्ते। तत्र सर्व्वज्ञेनेश्वरेण प्रधानस्य पुरुषाणामात्मनश्चेयत्ता परिच्छिद्येत वा न वा परिच्छिद्येत, उभयथापि दोषोऽनुषक्त एव। कथं? पूर्व्वस्मिंस्तावद्विकल्पे इयत्तापरिच्छिन्नं वस्तु घटादिवदन्तवत् दृष्टं तथा प्रधानपुरुषेश्वरत्रयमपीयत्तापरिच्छिन्नत्वादन्तवत् स्यात्। संख्यापरिमाणं तावत् प्रधानपुरुषेश्वरत्रयरूपेण परिच्छिन्नं, स्वरूपपरिमाणमपि तद्गतमीश्वरेण परिच्छिद्येतेति। पुरुषगता च महासंख्या। ततश्चेयत्तापरिच्छिन्नानां ये संसारान्मुच्यन्ते तेषां संसारोऽन्तवान् संसारित्वञ्च तेषामन्तवत्। एवमितरेष्वपि क्रमेण मुच्यमानेषु संसारित्वस्यान्तवत्त्वं स्यात्। प्रधानञ्च सविकारं पुरुषार्थमीश्वरस्याधिष्ठेयं संसारत्वेनाभिमतं तच्छून्यतायामीश्वरः किमधितिष्ठेत? किं विषये वा सर्व्वज्ञतेश्वरते स्याताम्?। प्रधानपुरुषेश्वराणां चैवमन्तवत्त्वे सति, आदिमत्त्वप्रसङ्गः आद्यन्तवत्त्वे च शून्यवादप्रसङ्गः। अथ मा भूदेष दोष इत्युत्तरविकल्पोऽभ्युपगम्यते न प्रधानस्य पुरुषाणामात्मनो वेयत्तेश्वरेण परिच्छिद्येत इति। तत ईश्वरस्य सर्व्वज्ञत्वाभ्युपगमहानिरपरो दोषः प्रसज्येत। तस्मादप्यसङ्गतस्तार्किकपरिगृहीतईश्वरकारणवादः"।

ईश्वरकारणतादाढर्य्याय अचेतनप्रधानकारणवादखण्डनमपि शा०सू०भाष्ययोः। यथा "रचनानुपपत्तेर्नानुमानम्" सू०। 'तत्र साङ्ख्या मन्यन्ते यथा घटशरावादयो भेदा मृदात्मकतयान्वीयमाना मृदात्मकसामान्यपूर्व्वकाः लोके दृष्टाः तथा सर्व्वे एव बाह्याध्यात्मिका भेदाः सुखदुःखमोहात्मकतयाऽन्वीयमाना सुखदुःखमोहात्मकसामान्यपूर्व्वका भवितुमर्हन्ति। यत्तत् सुख दुःखमोहात्मकं सामान्यं तत् त्रिगुणं प्रधानं मृद्वदचेतनं चेतनस्य पुरुषस्यार्थं साधयितुं प्रवृत्तं स्वभावभेदेनैव विचित्रेण विकारात्मना विवर्त्तते इति। तथा परिमाणादिभिरपि लिङ्गैस्तदेव प्रधानमनुमिमते। तत्र वदामः यदि दृष्टान्तबलेनैवैतन्निरूप्यते नाचेतनं लोके चेतनानधिष्ठितं स्वतन्त्रं किञ्चिद्विशिष्टपुरुषार्थनिर्वर्त्तनसमर्थान् विकारान् विरचयत् दृष्टम्। गेहप्रासादशयनासनविहारभूम्यादयो हि लोके प्रज्ञावद्भिः शिल्पिभिर्यथाकालं सुखदुःखप्राप्तिपरिहारयोग्या रचिता दृश्यन्ते तथेदं जगदखिलं पृथिव्यादि नानाकर्म्मफलभोगयोग्यं बाह्यमाध्यात्मिकञ्च शरीरादि नानाजात्यन्वितं प्रतिनियतावयवविन्यासमनेककर्मफलानुभवा-

धिष्ठानं दृश्यमानं प्रज्ञावद्भिः सम्भावितमैः शिल्पिभिर्मनसाप्यालोचयितुमशक्यं सत् कथमचेतनं प्रधानं रचयेत् ? लोष्टपाषाणादिष्वदृष्टत्वात्। मृदादिष्वपि कुम्भकाराद्यधिष्ठितेषु विशिष्टाकाररचना दृश्यते तद्वत् प्रधानस्यापि चेतनान्तराधिष्ठितत्वप्रसङ्गः। न च मृदाद्युपादानस्वरूपव्यपाश्रयेणैव धर्मेण मूलकारणमवधारणीयं न बाह्यकुम्भकारादिव्यपाश्रयेणेति किञ्चिन्नियामकमस्ति न चैवं सति किञ्चिद्विरुध्यते प्रत्युत श्रुतिरनुगृह्यते चेतनकारणतासमर्पणात्। अतो रचनानुपपत्तेश्च हेतोर्नाचेतनं जगत्कारणमनुमातव्यम्भवति। अन्वयाद्यनुपपत्तेश्चेति चशब्देन हेतोरसिद्धिं समुच्चिनोति। नहि बाह्याध्यात्मिकानां भेदानां सुखदुःखमोहात्मकतयाऽन्वय उपपद्यते सुखादीनाञ्चान्तरत्वप्रतीतेः शब्दादीनाञ्चातद्रूपत्वप्रतीतेः तन्निमित्तत्वप्रतीतेश्च शब्दाद्यविशेषेऽपि च भावनाविशेषात् सुखादिविशेषोपलब्धेः। तथा परिमितानां भेदानां मूलाङ्कुरादीनां संसर्गपूर्व्वकत्वं दृष्ट्वा बाह्याध्यात्मिकानां भेदानां परिमितत्वात् संसर्गपूर्व्वकत्वमनुमिमानस्य सत्त्वरजस्तमसामपि संसर्गपूर्व्वकत्वप्रसङ्गः परिमितत्वाविशेषात्। कार्य्यकारणभावस्तु प्रेक्षापूर्व्वनिर्म्मितानां शयनासनादीनां दृष्ट इति न कार्य्यकारणभावाद्बाह्याध्यात्मिकानां भेदानामचेतनपूर्व्वकत्वं शक्यं कल्पयितुम्" भा०। "प्रवृत्तेश्च" सू०। "आस्तान्तावदियं रचना तत्सिद्ध्यर्था या प्रवृत्तिः साम्यावस्थानात् प्रच्युतिः सत्त्वरजस्तमसामङ्गाङ्गिरूपापत्तिर्विशिष्टकार्य्याभिमुखप्रवृत्तिर्वा सापि नाचेतनस्य प्रधानस्य स्वतन्त्रस्योपपद्यते मृदादिष्वदर्शनाद्रथादिषु च। न हि मृदादयो रथादयो वा स्वयमचेतनाः सन्तश्चेतनैः कुलालादिभिरश्वादिभिर्व्वाऽनधिष्ठिता विशिष्टकार्य्याभिमुखप्रवृत्तयो दृश्यन्ते। दृष्टाच्चादृष्टसिद्धिः। अतः प्रवृत्त्यनुपपत्तेरपि हेतोर्नाचेतनं जगत्कारणमनुमातव्यम्भवति। ननु चेतनस्यापि प्रवृत्तिः केवलस्य न दृष्टा सत्यमेतत्तथापि चेतनसंयुक्तस्य रथादेरचेतनस्य प्रवृत्तिर्दृष्टा नत्वचेतनसंयुक्तस्य चेतनस्य प्रवृत्तिर्दृष्टा। किं पुनरत्र युक्तं यस्मिन् प्रवृत्तिर्दृष्टा तस्य सेत्युत यत्संयुक्तस्य दृष्टा तस्यैव सेति। ननु यस्मिन् दृश्यते प्रवृत्तिस्तस्यैव सेति युक्तम् उभयोः प्रत्यक्षत्वात् नतु प्रवृत्त्याश्रयत्वेन केवलश्चेतनो रथादिवत् प्रत्यक्षः प्रवृत्त्याश्रयदेहादिसंयुक्तस्यैव तु चेतनस्य सद्भावसिद्धेः केवलाचेतनरथादिवैलक्षण्यं जीवद्देहस्य दृष्टमिति। अतएव प्रत्यक्षे देहे सति चैतन्यदर्शनादसति तददर्शनात् देहस्यैव चैतन्यमपीति लौकायतिकाः प्रतिपन्नाः। तस्मादचेतनस्यैव प्रवृत्तिरिति। तदभिधीयते न ब्रूमो यस्मिन्नचेतने प्रवृत्तिर्दृश्यते न तस्य सेति भवति तु तस्यैव सा सापि चेतनाद्भवतीति ब्रूमः। तद्भावे भावात्तदभावे चाभावात् यथा काष्ठादिव्यपाश्रयापि दाहप्रकाशादिलक्षणा विक्रियानुपलभ्यमानापि केवले ज्वलने ज्वलनादेव भवति तत्संयोगे दर्शनात्तद्वियोगे चादर्शनात्तद्वत्। लौकायतिकानामपि चेतन एव देहोऽचेतनानां रथादीनां प्रवर्त्तको दृष्ट इत्यविप्रतिषिद्धं चेतनस्य प्रवर्त्तकत्वम्। ननु तव देहादिसंयुक्तस्याप्यात्मनो विज्ञानस्वरूपमात्रव्यतिरेकेण प्रवृत्त्यनुपपत्तेरनुपपन्नं प्रवर्त्तकत्वमिति चेन्न अयस्कान्तवद्रूपादिवच्च प्रवृत्तिरहितस्यापि प्रवर्त्तकत्वोपपत्तेः यथाऽयस्कान्तोमणिः स्वयं प्रवृत्तिरहितोऽपि अयसः प्रवर्त्तको भवति यथा च रूपादयो विषयाः स्वयं प्रवृत्तिरहिता अपि चक्षुरादीनां प्रवर्त्तका भवन्त्येवं प्रवृत्तिरहितोऽपीश्वरः सर्व्वगतः सर्व्वात्मा सर्व्वज्ञः सर्व्वशक्तिश्च सन् सर्व्वं प्रवर्त्तयेदित्युपपन्नम्। एकत्वात् प्रवर्त्त्याभावे प्रवर्त्तकत्वानुपपत्तिरिति चेन्न अविद्याप्रत्युपस्थापितनामरूपमायावेशवशेनासकृत् प्रत्युक्तत्वात्। तस्मात् सम्भवति प्रवृत्तिः सर्व्वज्ञकारणत्वे न त्वचेतनकारणत्वे" भा०। "पयोम्बुवच्चेत्तत्रापि" सू०। "स्यादेतत् यथा क्षीरमचेतनं स्वभावेनैव वत्सविवृद्धये प्रवर्त्तते यथा च जलमचेतनं स्वभावेनैव लोकोपकाराय स्यन्दते एवं प्रधानमप्यचेतनं स्वभावेनैव पुरुषार्थसिद्धये प्रवर्त्तिष्यत इति। नैतत् साधूच्यते, यतस्तत्रापि पयोम्बुनोश्चेतनाधिष्ठितयोरेव प्रवृत्तिरित्यनुमिमीमहे उभयवादिप्रसिद्धे रथादावचेतने केवले प्रवृत्त्यदर्शनात्। शास्त्रञ्च "योऽप्सु तिष्ठन्नद्भ्योऽन्तरो योऽपोऽन्तरो यमयति" "एतस्य वा अक्षरस्य प्रशासने गार्गि! प्राच्योऽन्या नद्यः स्यन्दन्ते" इत्येवञ्जातीयकं समस्तस्य लोकपरिस्पन्दितस्येश्वराधिष्ठिततां श्रावयति। तस्मात् साध्यपक्षनिक्षिप्तत्वात् पयोऽम्बुवदित्यनुपन्यासः। चेतनायाश्च धेनोः स्नेहेनेच्छया पयसः प्रवर्त्तकत्वोपपत्तेः वत्सचूषणेन च पयस आकृष्यमाणत्वात्। नचाम्बुनोऽप्यत्यन्तमनपेक्षा निम्नभूम्याद्यपेक्षत्वात् स्यन्दनस्य। चेतनापेक्षत्वन्तु सर्व्वत्रोपदर्शितम्। "उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धीत्यत्र" तु बाह्यनिमित्तनिरपेक्षमपि स्वाश्रयं कार्य्यम्भवतीत्येतल्लोकदृष्ट्या नि

दर्शितं शास्त्रदृष्ट्या पुनः सर्वत्रैवेश्वरापेक्षत्वमापद्यमानं न पराणुद्यते"भा०। "व्यतिरेकानवस्थितेश्चानपेक्षत्वात्"सू०। "साङ्ख्यानां त्रयो गुणाः साम्येनावतिष्ठमानाः प्रधानं न तद्व्यतिरेकेण प्रधानस्य प्रवर्त्तकं निवर्त्तकं वा किञ्चिद्बाह्यमपेक्ष्यमवस्थितमस्ति पुरुषस्तूदासीनो न प्रवर्त्तको न निवर्त्तक इत्यतोऽनपेक्षं प्रधानम् अनपेक्षत्वाच्च कदाचित् प्रधानं महदाद्याकारेण परिणमते कदाचिच्च न परिणमत इत्येतदयुक्तम्। ईश्वरस्य तु सर्वज्ञत्वात् सर्वशक्तित्वान्महामायित्वाच्च प्रवृत्त्यप्रवृत्ती न विरुध्येते"भा० "अन्यत्राभावाच्च न तृणादिवत्"सू०। 'स्यादेतत् यथा तृणपल्लवोदकादि निमित्तान्तरनिरपेक्षं स्वभावादेव क्षीराद्याकारेण परिणमते एवं प्रधानमपि महदाद्याकारेण परिणंस्यत इति। कथञ्च निमित्तान्तरनिरपेक्षं तृणादीति गम्यते निमित्तान्तरानुपलम्भात्। यदि हि किञ्चिन्निमित्तान्तरमुपलभेमहि ततो यथाकामं तेन तेन निमित्तेन तृणाद्युपादाय क्षीरं सम्पादयेमहि न तु सम्पादयामहे। तस्मात् स्वाभाविकस्तृणादेः परिणामः तथा प्रधानस्यापि स्यादिति। अत्रोच्यते। भवेत्तृणादिवत् प्रधानस्य स्वाभाविकः परिणामो यदि तृणादेरपि स्वभाविकः परिणामोऽभ्युपगम्येत न त्वभ्युपगम्यते निमित्तान्तरोपलब्धेः; कथं निमित्तान्तरोपलब्धिः अन्यत्राभावात् धेन्वैव ह्युपयुक्तं तृणादि क्षीरीभवति न प्रहीणमनडुदाद्युपयुक्तं वा यदि हि निर्निमित्तमेतत् स्यात् धेनुशरीरसम्बन्धादन्यत्रापि तृणादि क्षीरीभवेत्। न च यथाकामं नरैर्न शक्यं सम्पादयितुमित्येतावता निर्निमित्तता सम्भवति, भवति किञ्चित् कार्य्यं मानुषसम्पाद्यं किञ्चिद्दैवसम्पाद्यम्। मनुष्या अपि च शक्नुवन्त्येवोचितेनोपायेन तृणाद्युपादाय क्षीरं सम्पादयितुं प्रभूतं हि क्षीरं कामयमानाः प्रभूतं घासं धेनुं चारयन्ति ततश्च प्रभूतं क्षीरं लभन्ते। तस्मान्न तृणादिवत् स्वाभाविकः प्रधानस्य परिणामः"भा०। "अभ्युपगमेऽप्यर्थाभावात्"सू०। 'स्वाभाविकी प्रधानस्य प्रवृत्तिर्न भवतीति स्थापितम्। अथापि नाम भवतः श्रद्धामनुरुध्यमानाः स्वाभाविकीमेव प्रधानस्य प्रवृत्तिमभ्युपगच्छेम तथापि दोषोऽनुषज्येतैव कुतः? अर्थाभावात् यदि तावत् स्वाभाविकी प्रधानस्य प्रवृत्तिर्न किञ्चिदन्यदपेक्षते इत्युच्येत ततो यथैव सहकारि किञ्चिन्नापेक्षते एवं प्रयोजनमपि किञ्चिन्नापेक्षिष्यत इत्यतः प्रधानं पुरुषस्यार्थं साधयितुं प्रवर्त्तते इतीयं प्रतिज्ञा हीयेत। स यदि-

ब्रूयात् सहकार्य्येव केवलं नापेक्षते न प्रयोजनमपीति तथापि प्रधानप्रवृत्तेः प्रयोजनं विवेक्तव्यं भोगो वा स्यादपवर्गो वा उभयं वेति। भोगश्चेत् कीदृशोऽनाधेयातिशयस्य भोगो भवेत् अनिर्मोक्षप्रसङ्गश्च। अपवर्गश्चेत् प्रागपि प्रवृत्तेरपवर्गस्य सिद्धत्वात् प्रवृत्तिरनर्थिका स्यात् शब्दाद्यनुपलब्धिप्रसङ्गश्च। उभयार्थताभ्युपगमेऽपि भोक्तव्यानां प्रधानमात्राणामानन्त्यादनिर्मोक्षप्रसङ्ग एव। न चौत्सुक्यनिवृत्त्यर्था प्रवृत्तिः, न हि प्रधानस्याचेतनस्यौत्सुक्यं सम्भवति न च पुरुषस्य निर्मलस्य, दृक्शक्तिसर्गशक्तिवैयर्थ्यभयाच्चेत् प्रवृत्तिस्तर्हि दृक्शक्त्यनुच्छेदवत् सर्गशक्त्यनुच्छेदात् संसारानुच्छेदादनिर्मोक्षप्रसङ्ग एव तस्मात् प्रधानस्य पुरुषार्था प्रवृत्तिरित्येतदयुक्तम्"भा०। "पुरुषाश्मवदिति चेत्तथापि"सू०। "स्यादेतत् यथा कश्चित् पुरुषो दृक्शक्तिसम्पन्नं दृक्शक्तिविहीनमन्धमधिष्ठाय प्रवर्त्तयति यथा वाऽयस्कान्तोमणिः स्वयमप्रवर्त्तमानोऽप्ययः प्रवर्त्तयत्येवं पुरुषः प्रधानं प्रवर्त्तयिष्यतीति दृष्टान्तद्वयेन पुनः प्रत्यवस्थानम्। अत्रोच्यते तथापि नैव दोषान्निर्मोक्षोऽस्ति। अभ्युपेतहानं तावद्दोष आपतति, प्रधानस्य स्वतन्त्रस्य प्रवृत्त्यभ्युपगमात् पुरुषस्य च प्रवर्त्तकत्वानभ्युपगमात्। कथञ्चोदासीनः पुरुषः प्रधानं प्रवर्त्तयेत्। पङ्गुरपि ह्यन्धं पुरुषं वागादिभिः प्रवर्त्तयति नैवं पुरुषस्य कश्चित् प्रवर्त्तनव्यापारोऽस्ति निष्क्रियत्वान्निर्गुणत्वाच्च। नाप्ययस्कान्तवत् सन्निधिमात्रेण प्रवर्त्तयेत् सन्निधिनित्यत्वेन प्रवृत्तिनित्यत्वप्रसङ्गात्। अयस्कान्तस्य चानित्यः सन्निधिरस्ति स्वव्यापारसन्निधिपरिमार्जनाद्यपेक्षा चास्यास्त्यतोऽनुपन्यासः पुरुषाश्मवदिति। तथा प्रधानस्याचैतन्यात् पुरुषे चौदासीन्यात् तृतीयस्य च तयोः सम्बन्धुरभावात् सम्बन्धानुपपत्तिः। योग्यतानिमित्ते सम्बन्धे योग्यतानुच्छेदादनिर्मोक्षप्रसङ्गः। पूर्ववच्चेहाप्यर्थाभावो विकल्पयितव्यः। परमात्मनस्तु स्वरूपव्यपाश्रयमौदासीन्यं मायाव्यपाश्रयञ्च प्रवर्त्तकत्वमित्यस्त्यतिशयः"भा०। "अङ्गित्वानुपपत्तेश्च"सू०। "इतश्च न प्रधानस्य प्रवृत्तिरवकल्पते यद्धि सत्वरजस्तमसामन्योन्यगुणप्रधानभावमुत्सृज्य साम्येन स्वरूपमात्रेणावस्थानं सा प्रधानावस्था तस्यामवस्थायामनपेक्षस्वरूपाणां स्वरूपप्रणाशभयात् परस्परं प्रत्यङ्गाङ्गिभावानुपपत्तेः। बाह्यस्य च कस्यचित् क्षोभयितुरभावाद्गुणवैषम्यनिमित्तो महदाद्युत्पादो न स्यात्" भा०। "अन्यथानुमितौ च ज्ञशक्तिवियोगात्"सू०। "अथापि

स्यात् अन्यथा वयमनुमिमीमहे यथा नायमनन्तरो दोषः प्रसज्येत । नह्यनपेक्षस्वभावाः कूटस्थाश्चास्माभिर्गुणा अभ्युपगम्यन्ते प्रमाणाभावात् । कार्य्यवशेन तु गुणानां स्वभावोऽभ्युपगम्यते यथा यथा कार्य्योत्पाद उपपद्यते तथा तथैतेषां स्वभावोऽभ्युपगन्तव्यः । चलं गुणवृत्तमिति चास्त्यभ्युपगमः । तस्मात् साम्यावस्थायामपि वैषम्योपगमयोग्या एव गुणा अवतिष्ठन्त इति । एवमपि प्रधानस्य ज्ञशक्तिवियोगात् रचनानुपपत्त्यादयः पूर्वोक्ता दोषा स्तदवस्था एव । ज्ञशक्तिमपि त्वनुमिमानः प्रतिवादित्वान्निवर्त्तेत चेतनमेकमनेकप्रपञ्चस्य जगत उपादानमिति ब्रह्मवादप्रसङ्गात् । वैषम्योपगमयोग्या अपि गुणाः साम्यावस्थायां निमित्ताभावान्नैव वैषम्यं भजेरन् भजमाना वा निमित्ताभावाविशेषात् सर्व्वदैव वैषम्यं भजेरन्निति प्रसज्येत एवायमनन्तरोऽपि दोषः” भाष्यम् ।

वेदान्तिपक्षपरिशुद्धये साङ्ख्याद्युद्भावितदोषनिराकरणमपि तत्रैव यथा “नन्वौपनिषदानामप्यसमञ्जसमेव दर्शनं तप्यतापकयोर्जात्यन्तरभावानभ्युपगमात् एकं हि ब्रह्म सर्वात्मकं सर्वस्य प्रपञ्चस्य कारणमभ्युपगच्छतामेकस्यैवात्मनो विशेषौ तप्यतापकौ न जात्यन्तरभूतावित्यभ्युपगन्तव्यं स्यात् । यदि चैतौ तप्यतापकावेकस्यात्मनो विशेषौ स्यातां स ताभ्यान्तप्यतापकाभ्यां न निर्मुच्येत इति तापोपशान्तये सम्यग्दर्शनमुपदिशच्छास्त्रमनर्थकं स्यात् । नह्यौष्ण्यप्रकाशधर्मकस्य प्रदीपस्य तदवस्थस्यैव ताभ्यां निर्मोक्ष उपपद्यते । योऽपि जलवीचितरङ्गफेनाद्युपन्यासस्तत्रापि जलात्मन एकस्य वीच्यादयो विशेषा आविर्भावतिरोभावरूपेण नित्या एवेति समानो जलात्मनो वीच्यादिभिरनिर्मोक्षः । प्रसिद्धश्चायं तप्यतापकयोर्जात्यन्तरभावो लोके । तथा हि अर्थी चार्थश्चान्योन्यभिन्नौ लक्ष्येते यद्यर्थिनः स्वतोऽन्योऽर्थो न स्यात् यस्यार्थिनो यद्विषयकमर्थित्वं स तस्यार्थो नित्यसिद्ध एवेति तस्य तद्विषयमर्थित्वं न स्यात् । यथा प्रकाशात्मनः प्रदीपस्य प्रकाशाख्योऽर्थो नित्यसिद्ध एवेति न तस्य तद्विषयमर्थित्वम्भवति अप्राप्ते ह्यर्थेऽर्थिनोऽर्थित्वं स्यादिति । तथार्थस्याप्यर्थत्वं न स्यात् यदि स्यात् स्वार्थत्वमेव स्यात् न चैतदस्ति । सम्बन्धिशब्दौ ह्येतावर्थी चार्थश्चेति द्वयोश्च सम्बन्धिनोः सम्बन्धः स्यान्नैकस्यैव । तस्माद्भिन्नावेतावर्थार्थिनौ । तथाऽनर्थार्थिनावपि । अर्थिनोऽनुकूलोऽर्थः प्रतिकूलोऽनर्थः ताभ्यामेकः पर्य्यायेणोभाभ्यां सम्बध्यते तत्रार्थस्याल्पीयस्त्वाद्भूयस्त्वाच्चानर्थस्योभावप्यर्थावनर्थ एवेति तापकः स उच्यते । तप्यस्तु पुरुषो य एकः पर्य्यायेणोभाभ्यां सम्बध्यत इति तयोस्तप्यतापकभावानुपपत्तेः । भवेदेष दोषो यद्येकात्मतायान्तप्यतापकावन्योन्यस्य विषयविषयिभावं प्रतिपद्येयातां नत्वेतदस्ति एकत्वादेव । न ह्यग्निरेकः सन् स्वात्मानन्दहति प्रकाशयति वा सत्यप्यौष्ण्यप्रकाशादिधर्मभेदे परिणामित्वे च किमु कूटस्थे ब्रह्मण्येकस्मिंस्तप्यतापकभावः सम्भवेत् क्व पुनरयन्तप्यतापकभावः स्यादिति उच्यते किं न पश्यसि ? कर्मभूतो जीवद्देहस्तप्यः तापकः सवितेति । ननु तप्तिर्नाम दुःखं सा चेतयितुर्नाचेतनस्य देहस्य यदि हि देहस्यैव तप्तिः स्याद्देहनाशे स्वयमेव नश्यतीति तन्नाशायसाधनं नैषितव्यं स्यादिति । उच्यते देहाभावे हि केवलस्य चेतनस्य तप्तिर्न दृष्टा न च त्वयापि तप्तिर्नाम विक्रिया चेतयितुः केवलस्येष्यते । नापि देहचेतनयोः संहतत्वम् अशुद्ध्यादिदोषप्रसङ्गात् । न च तप्तेरेव तप्तिमभ्युपगच्छसीति कथं तवापि तप्यतापकभावः । सत्त्वं तप्यं तापकं रज एवेति चेन्न ताभ्यां चेतनस्य संहतत्वानुपपत्तेः । सत्त्वानुरोधित्वाच्चेतनोऽपि तप्यत इवेति चेत् परमार्थतस्तर्हि नैव तप्यत इत्यापतति इवशब्दप्रयोगात् न चेत्तप्यते नेवशब्दो दोषाय । नहि डुण्डुभः सर्प इवेत्येतावता सविषो भवति, सर्पो वा डुण्डुभ इवेत्येतावता निर्विषो भवति । अतश्चाविद्याकृतोऽयन्तप्यतापकभावो न पारमार्थिक इत्यभ्युपगन्तव्यमिति । नैवं सति ममापि किञ्चिद्दुष्यति । अथ पारमार्थिकमेव चेतनस्य तप्यत्वमभ्युपगच्छसि तवैव सुतरामनिर्मोक्षः प्रसज्येत नित्यत्वाभ्युपगमाच्च तापकस्य तप्यतापकशक्त्योर्नित्यत्वेऽपि सनिमित्तसंयोगापेक्षत्वात्तप्तेः संयोगनिमित्तादर्शननिवृत्तावात्यन्तिकः संयोगोपरमः ततश्चात्यन्तिको मोक्ष उपपन्न इति चेन्न अदर्शनस्य तमसो नित्यत्वाभ्युपगमात् । गुणानाञ्चोद्भवाभिभवयोरनियतत्वादनियतः संयोगनिमित्तोपरम इति, वियोगस्याप्यनियतत्वात् साङ्ख्यस्यैवानिर्मोक्षोऽपरिहार्य्यः स्यात् । औपनिषदस्य त्वात्मैकत्वाभ्युपगमादेकस्य च विषयविषयिभावानुपपत्तेर्विकारभेदस्य च वाचारम्भणमात्रत्वश्रवणादनिर्मोक्षाशङ्का स्वप्नेऽपि नोपजायते । व्यवहारे तु यत्र यथा दृष्टस्तप्यतापकभावस्तत्र तथैव स इति न चोदयितव्यः परिहर्त्तव्यो वा भवति” ।

“प्रधानकारणवादो निराकृतः परमाणुकारणवाद इदानीं निराकर्त्तव्यः । तत्रादौ तावद्योऽणुका-

रणत्वादिना ब्रह्मवादिनि दोषउत्प्रेक्ष्यते स प्रतिसमाधीयते। तत्रायं वैशेषिकाणामभ्युगमः कारणद्रव्यसमवायिनो गुणाः कार्य्यद्रव्ये समानजातीयं गुणान्तरमारभन्ते शुक्लेभ्यस्तन्तुभ्यः शुक्लस्य पटस्य प्रसवदर्शनात्तद्विपर्य्ययाऽदर्शनाच्च। तस्माच्चेतनस्य ब्रह्मणो जगत्कारणत्वेऽभ्युपगम्यमाने कार्य्येऽपि जगति चैतन्यं समवेयात् तददर्शनात्तु न चेतनं ब्रह्म जगत्कारणम्भवितुमर्हतीति। इममभ्युपगमन्तदीययैव प्रक्रियया व्यभिचारयति" भा०। "महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम्" सू०। "एषा तेषां प्रक्रिया परमाणवः किल कञ्चित्कालमनारब्धकार्य्या यथायोगं रूपादिमन्तः पारिमाण्डल्यपरिमाणास्तिष्ठन्ति। ते च पश्चाददृष्टादिपुरःसराः संयोगसचिवाश्च सन्तो द्व्यणुकादिक्रमेण कृत्स्नं कार्य्यजातमारभन्ते कारणगुणाश्च कार्य्ये गुणान्तरम्। यदा द्वौ परमाणू द्व्यणुकमारभेते तदा परमाणुगता रूपादिगुणविशेषाः शुक्लादयो द्व्यणुके शुक्लादीनारभन्ते। परमाणुगुणविशेषस्तु पारिमाण्डल्यं न द्व्यणुके पारिमाण्डल्यमपरमारभते द्व्यणुकस्य परिमाणान्तरयोगाभ्युपगमात्। अणुत्वह्रस्वत्वे हि द्व्यणुकवर्त्तिनी परिमाणे वर्णयन्ति। यदापि द्वे द्व्यणुके चतुरणुकमारभेते तदापि समानं द्व्यणुकसमवायिनां शुक्लादीनामारम्भकत्वम्। अणुत्वह्रस्वते तु द्व्यणुकसमवायिनी अपि नैवारभेते चतुरणुकस्य महत्त्वदीर्घत्वपरिमाणयोगाभ्युपगमात्। यदापि बहवः परमाणवो बहूनि वा द्व्यणुकानि द्व्यणुकसहितो वा परमाणुः कार्य्यमारभन्ते तदापि समानैषा योजना। तदेवं यथा परमाणोः परिमण्डलात् सतोऽणु ह्रस्वञ्च द्व्यणुकञ्जायते महद्दीर्घञ्च त्र्यणुकादि न परिमण्डलम्। यथा वा द्व्यणुकादणोर्ह्रस्वाच्च सतो महद्दीर्घञ्च त्र्यणुकादि जायते नाणु नोत ह्रस्वम् एवं चेतनाद्ब्रह्मणोऽचेतनं जगज्जनिष्यत इत्यभ्युपगमे तव किं छिन्नम्। अथ मन्यसे विरोधिना परिमाणान्तरेणाक्रान्तं कार्य्यं द्रव्यं द्व्यणुकादि ततो नारम्भकाणि कारणगतानि पारिमाण्डल्यादीनि इत्यभ्युपगच्छामि न तु चेतनाविरोधिना गुणान्तरेण जगत आक्रान्तत्वमस्ति येन कारणगता चेतना कार्य्ये चेतनान्तरं नारभेत। न ह्यचेतना नाम चेतनाविरोधी कश्चिद्गुणोऽस्ति चेतनाप्रतिषेधमात्रत्वात् तस्मात् पारिमाण्डल्यादिवैषम्यात् प्राप्नोति चेतनाया आरम्भकत्वमिति। मैवं मंस्थाः यथा कारणे विद्यमानानामपि पारिमाण्डल्यादीनामनारम्भकत्वमेवं चैतन्यस्यापीत्यस्यांशस्य समानत्वात्। न च परिमाणान्तराक्रान्तत्वं पारिमाण्डल्यादीनामनारम्भकत्वे कारणं प्राक् परिमाणान्तरारम्भात् पारिमाण्डल्यादीनामारम्भकत्वापत्तेः। आरब्धमपि कार्य्यद्रव्यं प्राक् गुणारम्भात् क्षणमात्रमगुणं तिष्ठतीत्यभ्युपगमात्। न च परिमाणान्तरारम्भे व्यग्राणि पारिमाण्डल्यादीनीत्यतः स्वसमानजातीयं परिमाणान्तरं नारभन्ते परिमाणान्तरस्यान्यहेतुकत्वोभ्युपगमात्। "कारणबहुत्वात् प्रचयविशेषाच्च महत् तद्विपरीतमणु। एतेन दीर्घत्वह्रस्वत्वे व्याख्याते"। इति हि काणभुजानि सूत्राणि। न च सन्निधानविशेषात् कुतश्चित् कारणात् बहुत्वादीनि एवारभन्ते न पारिमाण्डल्यादीनीत्युच्येत द्रव्यान्तरे गुणान्तरे वारभ्यमाणे सर्वेषामेव कारणगुणानां स्वाश्रयसमवायाविशेषात्। तस्मात् स्वभावादेव पारिमाण्डल्यादीनामनारम्भकत्वं तथा चेतनाया अपि द्रष्टव्यम्। संयोगाच्च द्रव्यादीनां विलक्षणानामुत्पत्तिदर्शनात् समानजातीयोत्पत्तिव्यभिचारः। द्रव्ये प्रकृते गुणोदाहरणमयुक्तमिति चेन्न दृष्टान्तेन विलक्षणारम्भमात्रस्य विवक्षितत्वात्। न च द्रव्यस्य द्रव्यमेवोदाहर्त्तव्यं गुणस्य वा गुण एवेति कश्चिन्नियमे हेतुरस्ति। सूत्रकारोऽपि भवतां द्रव्यस्य गुणमुदाजहार "प्रत्यक्षाप्रत्यक्षाणामप्रत्यक्षत्वात् संयोगस्य पञ्चात्मकत्वं न विद्यते" इति। यथा प्रत्यक्षाप्रत्यक्षयोर्भूम्याकाशयोः समवयन् संयोगोऽप्रत्यक्षः एवं प्रत्यक्षाप्रत्यक्षेषु पञ्चसु भूतेषु समवयत् शरीरमप्रत्यक्षं स्यात् प्रत्यक्षन्तु शरीरं दृश्यते तस्मान्न पाञ्चभौतिकमिति। एतदुक्तं भवति गुणश्च संयोगः द्रव्यं शरीरम्" इति भा०।

ईश्वरस्य सर्व्वकर्त्तृत्वेऽपि न स्वाभिन्नजीवस्रष्टृत्वमिति निर्णयाय ईश्वरस्य जीवस्रष्टृत्ववादिनो वैष्णवस्य मतमुत्थाप्य तत्रैव निराकृतं यथा। "उत्पत्त्यसम्भवात्" शा० सू०। "येषामप्रकृतिरधिष्ठाता केवलं निमित्तं कारणमीश्वरोऽभिमतस्तेषां पक्षः प्रत्याख्यातः। येषां पुनः प्रकृतिश्चाधिष्ठाता चेत्युभयात्मकं कारणमीश्वरोऽभिमतस्तेषां पक्षः प्रत्याख्यायते। ननु श्रुतिसमाश्रयणेनाप्येवंरूप एवेश्वरः प्राङ्निर्द्धारितः प्रकृतिश्चाधिष्ठाता चेति। श्रुत्यनुसारिणी च स्मृतिः प्रमाणमिति स्थितिः। तत् कस्य हेतोरेष पक्षः प्रत्याचिख्यासितः? इति। उच्यते यद्यप्येवंजातीयकोंऽशः समानत्वान्न विसंवादगोचरो भवति अस्ति तु अंशान्तरं विसंवादस्थानमिति अतस्तत्प्रत्याख्यानायारम्भः। तत्र भागवता

मन्यन्ते । भगवानेवैको वासुदेवो निरञ्जनः ज्ञानस्वरूपः परमार्थतत्त्वं स चतुर्द्धात्मानं प्रविभज्य प्रतिष्ठितो वासुदेवव्यूहरूपेण, संकर्षणव्यूहरूपेण, प्रद्युम्नव्यूहरूपेण अनिरुद्धव्यूहरूपेण च । वासुदेवोनाम परमात्मोच्यते । सङ्कर्षणो नाम जीवः । प्रद्युम्नोनाम मनः । अनिरुद्धो नामाहङ्कारः । तेषां वासुदेवः परा प्रकृतिः अपरे संकर्षणादयः कार्य्यम् । तमित्थंभूतं भगवन्तमभिगमनोपादानेज्यास्वाध्याययोगैर्वर्षशतमिष्ट्वा क्षीणक्लेशोभगवन्तमेव प्रतिपद्यत इति । तत्र यत्तावदुच्यते योऽसौ नारायणः परोऽव्यक्तात् प्रसिद्धः परमात्मा सर्व्वात्मा स आत्मानमनेकधा व्यूह्य व्यवस्थित इति तन्न निराक्रियते "स एकधा भवति त्रिधा भवतीत्यादि" श्रुतिभ्यः परमात्मनोऽनेकधाभवनस्याधिगतत्वात् । यदपि तस्य भगवतोऽभिगमनादिलक्षणमाराधनमजस्रमनन्यचित्ततयाभिप्रेयते तदपि न प्रतिषिध्यते श्रुतिस्मृत्योरीश्वरप्रणिधानस्य प्रसिद्धत्वात् । यत्पुनरिदमुच्यते वासुदेवात् संकर्षण उत्पद्यते संकर्षणाच्च प्रद्युम्नः प्रद्युम्नाच्चानिरुद्ध इति अत्र ब्रूमः न वासुदेवसंज्ञकात् परमात्मनः सङ्कर्षणसंज्ञकस्य जीवस्योत्पत्तिः सम्भवति अनित्यत्वादिदोषप्रसङ्गात् । उत्पत्तिमत्त्वे हि जीवस्यानित्यत्वादयो दोषाः प्रसज्येरन् ततश्च नैवास्य भगवत्प्राप्तिर्मोक्षःस्यात् कारणप्राप्तौ कार्य्यस्य विलयप्रसङ्गात् । प्रतिषेधिष्यति चाचार्य्योजीवस्योत्पत्तिम् "नात्माऽश्रुतेर्नित्यत्वाच्च" इति । तस्मादसङ्गतैषा कल्पना" भा० ।"न च कर्त्तुः करणम्" सू० ।"इतश्चासङ्गतैषा कल्पना यस्मान्नहि लोके कर्त्तुर्देवदत्तादेः करणं परश्वाद्युत्पद्यमानं दृश्यते । वर्णयन्ति च भागवताः कर्त्तुर्जीवात् संकर्षणसंज्ञकात् करणं मनः प्रद्युम्नसंज्ञकमुत्पद्यते कर्त्तृजाच्च तस्मादनिरुद्धसंज्ञकोऽहङ्कार उत्पद्यत इति । न चैतद्दृष्टान्तमन्तरेणाध्यवसातुं शक्नुमः न चैवम्भूतां श्रुतिमुपलभामहे" भा० ।"विज्ञानादिभावे वा तदप्रतिषेधः" सू० ।"अथापि स्यात् न चैते संकर्षणादयो जीवादिभावेनाभिप्रेयन्ते किन्तर्हीश्वरा एवैते सर्व्वे ज्ञानैश्वर्य्यशक्तिबलवीर्य्यतेजोभिरैश्वर्य्यधर्म्मैरन्विता अभ्युपगम्यन्ते । वासुदेवा एवैते सर्व्वे निर्दोषा निरधिष्ठाना निराबाधाश्चेति । तस्मान्नायं यथावर्णितमुत्पत्त्यसम्भवोदोषः प्राप्नोतीति । अत्रोच्यते । एवमपि तदप्रतिषेध उत्पत्त्यसम्भवस्याप्रतिषेधः प्राप्नोत्येवायमुत्पत्त्यसम्भवोदोषः प्रकारान्तरे कथं न भवेदित्यभिप्रायः । परस्परभिन्ना एवैते वासुदेवादयः चत्वार ईश्वरास्तुल्यधर्म्माणो नैषामेकात्मत्वमस्तीति ततोह्यनेकेश्वरकल्पनानर्थक्यम् एकेनैवेश्वरेणेश्वरकार्य्यसिद्धेः । सिद्धान्तहानिश्च भगवानेवैको वासुदेवः परमार्थतत्त्वमित्यभ्युपगमात् । अथायमभिप्रायः एकस्यैव भगवतः एते चत्वारोव्यूहास्तुल्यधर्म्माण इति तथापि तदवस्थ एवोत्पत्त्यसम्भवः । न हि वासुदेवात् सङ्कर्षणस्योत्पत्तिः सम्भवति, सङ्कर्षणाच्च प्रद्युम्नस्य, प्रद्युम्नाच्चानिरुद्धस्य, अतिशयाभावात् । भवितव्यं हि कार्य्यकारणयोरतिशयेन यथा मृद्घटयोः । नह्यसत्यतिशये कार्य्यं कारणमित्यवकल्पते । न च पञ्चरात्रसिद्धान्तिभिर्वासुदेवादिषु एकैकस्मिन् सर्व्वेषु वा ज्ञानैश्वर्य्यादितारतम्यकृतः कश्चिद्भेदोऽभ्युपगम्यते । वासुदेवा एव हि सर्व्वे व्यूहा निर्विशेषा इष्यन्ते । नचैते भगवद्व्यूहाश्चतुःसंख्यायामेव व्यवतिष्ठेरन् ब्रह्मादिस्तम्बपर्य्यन्तस्य समस्तस्यैव जगतोभगवद्व्यूहत्वावगमात्" भा० । "विप्रतिषेधाच्च" सू० ।"विप्रतिषेधश्चास्मिन् शास्त्रे बहुविध उपलभ्यते गुणगुणित्वकल्पनादिलक्षणः ज्ञानैश्वर्य्यशक्तिबलवीर्य्यतेजांसि गुणाः आत्मन एवैते भगवन्तो वासुदेवा इत्यादिदर्शनात् । वेदप्रतिषेधश्च भवति । चतुर्षु वेदेषु परं श्रेयोऽलब्ध्वा शाण्डिल्य इदं शास्त्रमधिगतवानित्यादि वेदनिन्दादर्शनात् । तस्मादसङ्गतैषा कल्पनेति सिद्धम्" भा० ।

उपासनया प्राप्तैश्वर्य्यस्यानित्येश्वरस्य तु न जगत्कर्तृत्वमित्यपि तत्रैव व्यवस्थापितं यथा "जगद्व्यापारवर्ज्जं प्रकरणादसन्निहितत्वाच्च" शा० सू० । 'ये सगुणब्रह्मोपासनात् सहैव मनसेश्वरसायुज्यं व्रजन्ति किन्तेषां निरवग्रहमैश्वर्य्यं भवत्याहोस्वित् सावग्रहमिति संशयः । किन्तावत् प्राप्तं निरङ्कुशमेवैषामैश्वर्य्यं भवितुमर्हति "आप्नोति स्वाराज्यं सर्व्वेऽस्मै देवा बलिमावहन्ति" "तेषां सर्व्वेषु कामचारो भवतीत्यादि" श्रुतिभ्यः । इत्येवं प्राप्ते पठति "जगद्व्यापारवर्जमिति" । जगदुत्पत्त्यादिव्यापारं वर्जयित्वा अन्यदणिमाद्यात्मकमैश्वर्य्यं मुक्तानां भवितुमर्हति जगद्व्यापारस्तु नित्यसिद्धस्यैवेश्वरस्य । कुतः ? तस्य तत्र प्रकृतत्वात् असन्निहितत्वाच्चेतरेषाम् । पर एव हीश्वरो जगद्व्यापारेऽधिकृतः तमेव प्रकृत्योत्पत्त्याद्युपदेशान्नित्यशब्दनिबन्धनत्वाच्च । तदन्वेषणविजिज्ञासनपूर्व्वकमितरेषामादिमदैश्वर्य्यं श्रूयते तेनासन्निहितास्ते जगद्व्यापारे । समनस्कत्वादेव चैषामनैकमत्ये कस्यचित् स्थित्यभिप्रायः कस्यचिच्च संहाराभिप्राय इत्येवं विरोधोऽपि कदाचित् स्यात् । अथ कस्यचित्

सङ्कल्पमन्यस्य सङ्कल्प इत्यविरोधः समर्थ्येत ततः परमेश्वराकूततन्त्रत्वमेवेतरेषामिति व्यवतिष्ठते" भा०। "प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः" सू०। "अथ यदुक्तं आप्नोति स्वाराज्यमित्यादि प्रत्यक्षोपदेशान्निरवग्रहमैश्वर्यं विदुषां न्याय्यमिति तत्परिहर्त्तव्यम् अत्रोच्यते। नायं दोषः आधिकारिकमण्डलस्थोक्तेः आधिकारिकोयः सवितृमण्डलादिषु व्यवस्थितः परमेश्वरस्तदायत्तैवेयं स्वाराज्यप्राप्तिरुच्यते। यत्कारणमनन्तरम् "आप्नोति मनसस्पतिमित्याह। योहि सर्व्वमनसाम्पतिः पूर्व्वसिद्ध ईश्वरस्तं प्राप्नोति एतदुक्तं भवति। तदनुसारेण चानन्तरम् "वाक्पतिश्चक्षुष्पतिः श्रोत्रपतिर्विज्ञानपतिश्च भवतीत्याह। एवमन्यत्रापि यथासम्भवं नित्यसिद्धेश्वरायत्तमेवेतरेषामैश्वर्यं योजयितव्यम्" भा०। उपासासिद्धस्य यथा जगत्कर्त्तृत्वं न भवति तथानुमानचिन्तामणावगुपदं दर्शितम्। सांख्योक्तदोषनिरसनपूर्व्वकं तस्य सर्व्वविषयनित्यज्ञानत्वं तत्रैव समर्थितं यथा "यत्पुनरुक्तं ब्रह्मणोऽपि न मुख्यं सर्वज्ञत्वमुपपद्यते नित्यज्ञानक्रियत्वे ज्ञानक्रियां प्रति स्वातन्त्र्यासंभवादिति। अत्रोच्यते इदं तावद्भवान् प्रष्टव्यः कथं नित्यज्ञानत्वे सर्वज्ञत्वहानिरिति?। यस्य हि सर्व्वविषयावभासनक्षमं ज्ञानं नित्यमस्ति सोऽसर्वज्ञ इति विप्रतिषिद्धम्। अनित्यत्वे हि ज्ञानस्य कदाचिज्जानाति कदाचिन्न जानातीत्यसर्वज्ञत्वमपि स्यात्, नत्वसौ ज्ञाननित्यत्वे दोषोऽस्ति। ज्ञाननित्यत्वे ज्ञानक्रियां प्रति स्वातन्त्र्यव्यपदेशो नोपपद्यते इति चेन्न प्रततौष्ण्यप्रकाशेऽपि सवितरि दहति प्रकाशयतीति स्वातन्त्र्यव्यपदेशदर्शनात्। ननु सवितुर्दाह्यप्रकाश्यसंयोगे सति दहति प्रकाशयतीति व्यपदेशः स्यात् न तु ब्रह्मणः प्रागुत्पत्तेर्ज्ञानकर्मसंयोगोऽस्तीति विषमोदृष्टान्तः, न असत्यपि कर्मणि सविता प्रकाशत इति कर्तृत्वव्यपदेशदर्शनात्, एवमसत्यपि ज्ञानकर्मणि ब्रह्मणः "तदैक्षतेति" कर्तृत्वव्यपदेशोपपत्तेर्न वैषम्यम्। कर्मापेक्षायां तु ब्रह्मणि ईक्षितृत्वश्रुतयः सुतरामुपपन्नाः। किं पुनस्तत् कर्म? यत् प्रागुत्पत्तेरीश्वरज्ञानस्य विषयो भवतीति तत्त्वान्यत्वाभ्यामनिर्वचनीये नामरूपे अव्याकृते व्याचिकीर्षिते इति ब्रूमः। यत्प्रसादाद्धि योगिनामप्यतीतानागतविषयं प्रत्यक्षं ज्ञानमिच्छन्ति योगशास्त्रविदः किमु वक्तव्यं तस्य नित्यसिद्धस्येश्वरस्य सृष्टिस्थितिसंहृतिविषयं नित्यं ज्ञानं भवतीति। यदप्युक्तं प्रागुत्पत्तेर्ब्रह्मणः शरीरादिसंबन्धमन्तरेणेक्षितृत्वमनुपपन्नमिति न तच्चोद्यमवतरति सवितृप्रकाशवत् ब्रह्मणोज्ञानस्वरूपनित्यत्वेन ज्ञानसाधनापेक्षानुपपत्तेः। अपि च अविद्यादिमतः संसारिणः शरीराद्यपेक्षा ज्ञानोत्पत्तिः स्यात् न ज्ञानप्रतिबन्धककारणरहितस्येश्वरस्य। मन्त्रौ चेमावीश्वरस्य शरीराद्यनपेक्षतामनावरणज्ञानतां च दर्शयतः। "न तस्य कार्य्यं करणञ्च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते। परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति" "अपाणिपादोजवनोग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः। स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तमिति च"।

अस्मादेव च जीवानां तत्तत्कर्मफलसिद्धिर्यथा तथा शा०सूत्रभाष्ययोर्वर्णितम् यथा "फलमत उपपत्तेः" सू०। "तस्यैव हि ब्रह्मणो व्यावहारिक्यामीशित्रीशितव्यविभागावस्थायामयमन्यः स्वभावोवर्ण्यते। यदेतदिष्टानिष्टव्यामिश्रलक्षणं कर्म्मफलं संसारगोचरं त्रिविधं प्रसिद्धं जन्तूनां किमेतत् कर्म्मणो भवत्याहोस्विदीश्वरप्रसादादिति? भवति विचारणा। तत्र तावत् प्रतिपद्यते फलमतईश्वराद्भवितुमर्हति कुतः? उपपत्तेः सहि सर्व्वाध्यक्षः सृष्टिस्थितिसंहारान् विचित्रान् विदधद्देशकालविशेषाभिज्ञत्वात् कर्म्मिणां कर्म्मानुरूपं फलं संपादयतीत्युपपद्यते। कर्म्मणस्त्वनुक्षणं विनाशिनः कालान्तरभावि फलं भवतीत्यनुपपन्नम् अभावाद्भावानुत्पत्तेः।

स्यादेतत् कर्म्म विनश्यत् स्वकालएव स्वानुरूपं फलमर्जयित्वा विनङ्क्ष्यति तत्फलं कालान्तरितं कर्त्ता भोक्ष्यत इति तदपि न परिशुद्ध्यति प्राग्भोक्तृसम्बन्धात् फलत्वानुपपत्तेः यत्कालं हि यत् सुखं दुःखं वात्मना भुज्यते तस्यैव लोके फलत्वं प्रसिद्धम्। नह्यसम्बद्धस्यात्मना सुखस्य दुःखस्य वा फलत्वं प्रतियन्ति लौकिकाः। अथोच्येत कर्म्मकार्य्याद् पूर्व्वात् फलमुत्पत्स्यत इति तदपि नोपपद्यते अपूर्व्वस्याचेतनस्य काष्ठलोष्टसमस्य चेतनाप्रवर्त्तितस्य प्रवृत्त्यनुपपत्तेः तदस्तित्वे च प्रामाणाभावात्। अर्थापत्तिः प्रमाणमिति चेन्न ईश्वरसिद्धेरर्थापत्तिपरिक्षयात्" भा०। "श्रुतत्वाच्च" सू०। "न केवलमुपपत्तेरेवेश्वरं फलहेतुं कल्पयामः किंतर्हि श्रुतत्वादपीश्वरमेव फलहेतुं मन्यामहे तथाहि श्रुतिर्भवति "स वा एष महानज आत्माऽन्नादोवसुदान" इत्येवं जातीयका" भा०। "धर्म्मं जैमिनिरत एव" सू०। "जैमिनिस्त्वाचार्य्यो धर्म्मं फलस्य दातारं मन्यते अतएव हेतोः श्रुतेरुपपत्तेश्च, श्रूयते तावदयमर्थः स्वर्गकामोयजेतेत्येवमादिषु वा-

कल्पेत्। तत्र च विधिश्रुतेर्विषयभावोपगमाद्यागः स्वर्गस्योत्पादक इति गम्यते अन्यथा ह्यननुष्ठातृको याग आपद्येत तत्रास्योपदेशस्य वैयर्थ्यं स्यात्। नन्वनुक्षणविनाशिनः कर्मणः फलं नोपपद्यत इति परित्यक्तोऽयं पक्षः। नैष दोषः श्रुतिप्रामाण्यात्। श्रुतिश्चेत् प्रमाणं यथायं कर्म्मफलसम्बन्धः श्रुत उपपद्यते तथा कल्पयितव्यः न चानुत्पाद्य किमप्यपूर्व्वं कर्म्म विनश्यत् कालान्तरितं फलं दातुं शक्नोतीत्यतः कर्म्मणो वा सूक्ष्मा काचिदुत्तरावस्था, फलस्य वा पूर्व्वावस्थाऽपूर्व्वं नामास्तीति तर्क्यते। उपपद्यते चायमर्थः उक्तेन प्रकारेण ईश्वरस्तु फलं ददातीत्यनुपपन्नम् अविचित्रस्य कारणस्य विचित्रकार्य्यानुपपत्तेः वैषम्यनैर्घृण्यप्रसङ्गादनुष्ठानवैयर्थ्यापत्तेश्च तस्माद्धर्म्मादेव फलमिति" भा०। 'पूर्व्वन्तु वादरायणो हेतुव्यपदेशात्" सू०। "वादरायणस्त्वाचार्य्यः पूर्व्वोक्तमेवेश्वरं फलहेतुं मन्यते। केवलात् कर्म्मणोऽपूर्व्वाद्वा केवलात् फलमित्ययं पक्षस्तुशब्देन व्यावर्त्यते। कर्म्मापेक्षाद्वाऽपूर्व्वापेक्षाद्वा यथा तथास्त्वीश्वरात् फलमिति सिद्धान्तः। हेतुव्यपदेशात्। धर्म्माधर्म्मयोरपि कारयितृत्वेनेश्वरो हेतुर्व्यपदिश्यते फलस्य च दातृत्वेन 'एष ह्येव साधु कर्म कारयति तं, यमेभ्यो लोकेभ्य उन्निनीषते एष उ एवासाधु कर्म कारयति तं, यमधो लोकं निनीषत" इति। स्मर्य्यते चायमर्थो भगवद्गीतासु। 'योयो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति। तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्। स तया श्रद्धया युक्तस्तस्याराधनमीहते। लभते च ततः कामान् मयैव विहितान् हि तानिति"। सर्व्ववेदान्तेषु चेश्वरहेतुका एव सृष्टयो व्यपदिश्यन्ते तदेवेश्वरस्य फलहेतुत्वं यत् स्वकर्म्मानुरूपाः प्रजाः सृजति। विचित्रकार्य्यानुपपत्त्यादयोऽपि दोषाः कृतप्रयत्नापेक्षत्वादीश्वरस्य न प्रसज्यन्ते" भा०।

मीमांसकैस्तु ईश्वरस्याचेतनताङ्गीकारेण न फलहेतुत्वं किन्तु कर्म्मभ्य एव फलसिद्धिरित्युररीकृतं तच्च जैमिनीयमतत्वेन शा०सूत्रभाष्ययोर्दर्शितम् अविपहशब्दे चेश्वरस्याचेतनत्वं यथा तथा ४५१पृष्ठे दर्शितम्।

'कर्त्ता शास्त्रार्थवत्त्वात्" शास्त्रेण जीवानां कर्त्तृत्वेऽपि अस्यैव च कारयितृत्वं यथाह शा०सूत्रभाष्ययोः।

"परात्तु तच्छ्रुतेः" सू०। "यदिदमविद्यावस्थायामुपाधिनिबन्धनं कर्त्तृत्वं जीवस्याभिहितं तत् किमनपेक्ष्यैवेश्वरं, भवत्याहोस्विदीश्वरापेक्षमिति? भवति विचारणा। तत्र प्राप्तं तावन्नेश्वरमपेक्षते जीवः कर्तृत्व इति। कस्मात्? अपेक्षाप्रयोजनाभावात्। अयं हि जीवः स्वयमेव रागद्वेषादिदोषप्रयुक्तः कारणान्तरसामग्रीसम्पन्नः कर्तृत्वमनुभवितुं शक्नोति तस्य किमीश्वरः करिष्यति?। न च लोके प्रसिद्धिरस्ति कृष्यादिकासु क्रियास्वनडुदादिवदीश्वरोऽपरोऽपेक्षितव्य इति। क्लेशात्मकेन च कर्तृत्वेन जन्तून् संसृजत ईश्वरस्य नैर्घृण्यं प्रसज्येत, विषमफलञ्चैषां कर्तृत्वं विदधतो वैषम्यम्। ननु वैषम्यनैर्घृण्ये न सापेक्षत्वादित्युक्तम्। सत्यमुक्तं सति त्वीश्वरस्य सापेक्षत्वसम्भवे, सापेक्षत्वञ्चेश्वरस्य सम्भवति सतोर्जन्तूनां धर्माधर्मयोः, तयोश्च सद्भावः सति जीवस्य कर्तृत्वे, तदेव चेत् कर्तृत्वमीश्वरापेक्षं स्यात् किंविषयमीश्वरस्य सापेक्षत्वमुच्यते। अकृताभ्यागमश्चैवं जीवस्य प्रसज्येत। तस्मात् स्वत एव जीवस्य कर्तृत्वमिति। एतां प्राप्तिं तुशब्देन व्यावर्त्त्य प्रतिजानीते परादिति। अविद्यावस्थायां कार्य्यकरणसंघाताविवेकदर्शिनो जीवस्याविद्यातिमिरान्धस्य सतः परस्मादात्मनः कर्माध्यक्षात् सर्वभूताधिवासात् साक्षिणश्चेतयितुरीश्वरात्तदनुज्ञया कर्तृत्वभोक्तृत्वलक्षणस्य संसारस्य सिद्धिः तदनुग्रहहेतुकेन च विज्ञानेन मोक्षस्य सिद्धिः भवितुमर्हति। कुतः? तच्छ्रुतेः। यद्यपि दोषप्रयुक्तः सामग्रीसम्पन्नश्च जीवः, यद्यपि च लोके कृष्यादिषु कर्मसु नेश्वरकारणत्वं प्रसिद्धं तथापि सर्व्वास्वेव प्रवृत्तिषु ईश्वरो हेतुकर्त्तेति श्रुतेरवसीयते। तथा हि श्रुतिर्भवति 'एष ह्येव साधु कर्म कारयति तं, यमेभ्यो लोकेभ्य उन्निनीषते, एष उ एवासाधु कर्म कारयति तं, यमधो लोकं निनीषते" इति "य आत्मनि तिष्ठन्नात्मानमन्तरो यमयतीति" चैवं जातीयका। नन्वेवमीश्वरस्य कारयितृत्वे सति वैषम्यनैर्घृण्ये स्याताम् अकृताभ्यागमश्च जीवस्येति नेत्युच्यते" भा० 'कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः" सू०। "तुशब्दो नोदितदोषव्यावर्त्तनार्थः। कृतो यः प्रयत्नो जीवस्य धर्माधर्मलक्षणः तदपेक्ष एव चैनमीश्वरः कारयति ततश्चैते नोदिता दोषा न प्रसज्यन्ते। जीवकृतधर्माधर्मवैषम्यापेक्ष एव तत्फलानि विषमं विभजते पर्जन्यवदीश्वरो निमित्तमात्रेण। यथा लोके नानाविधानां यवमुद्गादीनां गुच्छगुल्मादीनां वाऽसाधारणेभ्यः स्वबीजेभ्यो जायमानानां साधारणनिमित्तं भवति पर्जन्यः, नह्यसति पर्जन्ये रसपुष्पफलपलाशादिवैषम्यं तेषां जायते नाप्यसत्सु स्वबीजेषु, एवं जीवकृतप्रयत्नापेक्ष ईश्वरस्तेषां शुभाशुभं विदध्यादिति श्लिष्यते। ननु कृतप्रयत्नत्वमेव जीवस्य

परायत्ते कर्त्तृत्वे नोपपद्यते । नैष दोषः । परायत्तेऽपि हि कर्त्तृत्वे करोत्येव जीवः कुर्व्वन्तं हि तमीश्वरः कारयति । अपि च पूर्वप्रयत्नमपेक्ष्येदानीं कारयति, पूर्वतरञ्च प्रयत्नमपेक्ष्य पूर्वमकारयदित्यनादित्वात् संसारस्यानवद्यम् । कथं पुनरवगम्यते कृतप्रयत्नापेक्ष ईश्वर इति ? विहितप्रतिषिद्धावैयर्थ्यादिभ्य इत्याह । एवं हि "स्वर्गकामो यजेत ब्राह्मणो न हन्तव्यः" इत्येवंजातीयकस्य विहितस्य प्रतिषिद्धस्य चावैयर्थ्यं भवति अन्यथा तदनर्थकं स्यात् ईश्वर एव विधिप्रतिषेधयोर्नियुज्येत अत्यन्तपरतन्त्रत्वाज्जीवस्य । तथा विहितकारिणमप्यनर्थेन संसृजेत्, प्रतिषिद्धकारिणमप्यर्थेन, ततश्च प्रामाण्यं वेदस्यास्तमियात् । ईश्वरस्य चात्यन्तानपेक्षत्वे लौकिकस्यापि पुरुषकारस्य वैयर्थ्यं तथा देशकालनिमित्तानां पूर्वोक्तदोषप्रसङ्गश्चेत्येवंजातीयकदोषजातमादिग्रहणेन दर्शयति" भा० ।

सेश्वरसांख्यमते तु ईश्वराधिष्ठितप्रधानस्य जगत्कर्त्तृत्वं तत्रेश्वरप्रसादाद्योगसिद्धितत्स्वरूपादिकं पातञ्जलसूत्रभाष्यविवरणेषु दर्शितं यथा ।

"किमेतस्मादेवासन्नतरः समाधिर्भवति अथास्य लाभे किं भवत्यन्योऽपि कश्चिदुपायो ? न वेति" भा०

"ईश्वरप्रणिधानाद्वा" सू०२३। "प्रणिधानाद्भक्तिविशेषादावर्जित ईश्वरस्तमनुगृह्णात्यभिध्यानमात्रेण तदभिध्यानमात्रादपि योगिन आसन्नतरः समाधिलाभः फलञ्च भवतीति" भा०२३। अथ प्रधानपुरुषव्यतिरिक्तः कोऽयमीश्वरो नामेति ?" भा० । "क्लेशकर्म्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः" सू० २४ । "अविद्यादयः क्लेशाः । कुशलाऽकुशलानि कर्म्माणि । तत्फलं विपाकः । तदनुगुणा वासना आशयाः । ते च मनसि वर्त्तमानाः पुरुषे व्यपदिश्यन्ते स हि तत्फलस्य भोक्तेति । यथा जयः पराजयो वा योद्धृषु वर्त्तमानः स्वामिनि व्यपदिश्यते । यो ह्यनेन भोगेनाऽपरामृष्टः स पुरुषविशेष ईश्वरः । कैवल्यं प्राप्तास्तर्हि सन्ति च बहवः केवलिनः ? ते हि त्रीणि बन्धनानि छित्त्वा कैवल्यं प्राप्ताः ईश्वरस्य च तत्सम्बन्धो न भूतो न भावी यथा मुक्तस्य पूर्व्वा बन्धकोटिः प्रज्ञायते नैवमीश्वरस्य, यथा वा प्रकृतिलीनस्योत्तरा बन्धकोटिः सम्भाव्यते नैवमीश्वरस्य, स तु सदैव मुक्तः, सदैवेश्वर इति । योऽसौ प्रकृष्टसत्त्वोपादानादीश्वरस्य शाश्वतिक उत्कर्षः स किं सनिमित्तः ? आहोस्विन्निर्निमित्तः ? इति तस्य शास्त्रं निमित्तं, शास्त्रं पुनः किंनिमित्तम् ? एतयोः शास्त्रोत्कर्षयोरीश्वरसत्त्वे वर्त्तमानयोरनादिः सम्बन्धः । एतस्मादेतद्भवति सदैवेश्वरः सदैव मुक्त इति । तच्च तस्यैश्वर्यं साम्यातिशयविनिर्मुक्तं न तावदैश्वर्यान्तरेण तदतिशय्यते यदेवातिशयि स्यात् तदेव तत् स्यात् तस्य । यत्र काष्ठाप्राप्तिरैश्वर्यस्य स ईश्वरः, न च तत्समानमैश्वर्यमस्ति । कस्मात् ? द्वयोरेकस्मिन् युगपत्कामितेऽर्थे नवमिदमस्तु पुराणमिदमस्त्विति एकस्य सिद्धावितरस्य प्राकाम्यविघातादूनत्वं प्रसक्तं, द्वयोश्च तुल्ययोर्युगपत्कामितार्थप्राप्तिर्नास्ति, अर्थस्य विरुद्धत्वात् तस्माद् यस्य साम्यातिशयविनिर्मुक्तमैश्वर्यं स ईश्वरः, स च पुरुषविशेषः इति" भा०२४ । किञ्च "तत्र निरतिशयं सर्व्वज्ञबीजम्" सू०२५ । यदिदमतीतानागतप्रत्युत्पन्नप्रत्येकसमुच्चयातीन्द्रियग्रहणमल्पं बह्विति सर्वज्ञबीजमेतद्विवर्द्धमानं यत्र निरतिशयं स सर्व्वज्ञः । अस्ति काष्ठाप्राप्तिः सर्व्वज्ञबीजस्य, सातिशयत्वात् परिमाणवदिति यत्र काष्ठाप्राप्तिर्ज्ञानस्य स सर्व्वज्ञः स च पुरुषविशेष इति । सामान्यमात्रोपसंहारे कृतोपक्षयमनुमानं न विशेषप्रतिपत्तौ समर्थमिति । तस्य संज्ञादिविशेषप्रतिपत्तिरागमतः पर्य्यन्वेष्या । तस्यात्मानुग्रहाभावेऽपि भूतानुग्रहः प्रयोजनम् । ज्ञानधर्म्मोपदेशेन कल्पप्रलयमहाप्रलयेषु संसारिणः पुरुषानुद्धरिष्यामीति । तथा चोक्तम् "आदिविद्वान्निर्म्माणचित्तमधिष्ठाय कारुण्याद्भगवान् परमर्षिरासुरये जिज्ञासमानाय तन्त्रं प्रोवाचेति" भा०२५ । स एषः "पूर्व्वेषामपि गुरुः कालेनानवच्छेदात्" सू० २६ । "पूर्व्वे हि गुरवः कालेनावच्छिद्यन्ते यत्रावच्छेदार्थेन कालो नोपावर्त्तते स एष पूर्व्वेषामपि गुरुः यथास्य सर्गस्यादौ प्रकर्षगत्या सिद्धः तथातिक्रान्तसर्गादिष्वपि प्रत्येतव्यः" व्यासभाष्यम् २६ ।

विवृतमिदं वाचस्पतिना यथा "सूत्रान्तरमवतारयितुं विमृशति किमेतस्मादेवेति । नवाशब्दः संशयनिवर्त्तकः । ईश्वरप्रणिधानाद्वा । व्याचष्टे—प्रणिधानाद्भक्तिविशेषान्मानसाद्वाचिकात्कायिकाद्वा आवर्जितोऽभिमुखीकृतस्तमनुगृह्णाति, अभिध्यानमनागतेऽर्थे इच्छा इदमस्याभिप्रेतमस्त्विति, तन्मात्रेण न व्यापारान्तरेण, शेषं सुगमम्" २३ । ननु चेतनाऽचेतनाभ्यामेव व्यूढं विश्वम्, नान्येन, ईश्वरश्चेदचेतनस्तर्हि प्रधानं, प्रधानविकाराणामपि प्रधानमध्यपातात्तथा च न तस्यावर्ज्जनमचेतनत्वात् अथ चेतनस्तथापि चितिशक्तेरौदासीन्या-

दुःखसंसारितया चाक्षितादिविरहात् कुतश्चावर्ज्जनम्? कुतश्चाभिध्यानम्? इत्याशयवानाह, अथ प्रधानेति। अत्र सूत्रेणोत्तरमाह "क्लेशकर्म्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः"। (न्यायकन्दल्यां क्लेशकर्म्मेत्यत्र जन्मेतिपदमधिकम् दृश्यते तच्च लिपिकरप्रमादकृतम्) अविद्यादयः क्लेशाः, क्लिश्नन्ति खल्वमी पुरुषं सांसारिकं विविधदुःखप्रहारेणेति। "कुशलाकुशलानीति" धर्म्माधर्म्मास्तेषाञ्च कर्म्मजत्वादुपचारात् कर्म्मत्वम्। विपाकोजात्यायुर्भोगाः विपाकानुगुणा वासनास्ताश्चित्तभूमौ आशेरत इति आशयाः नहि करभजातिनिर्वर्त्तकं कर्म्म प्राग्भवीयकरभभोगभावितां भावनां न यावदभिव्यनक्ति तावत्करभोचिताय भोगाय कल्पते, तस्माद्भवति करभजात्यनुभवजन्मा भावना करभविपाकानुगुणेति। नन्वमी क्लेशादयोबुद्धिधर्म्मा न कथञ्चिदपि पुरुषं परामृशन्ति तस्मात् पुरुषग्रहणादेव तदपरामर्शसिद्धेः कृतं क्लेशकर्म्मेत्यादिनेत्यत आह, "ते च मनसि वर्त्तमानाः सांसारिके पुरुषे व्यपदिश्यन्ते" कस्मात्? "स हि तत्फलस्य भोक्ता चेतयितेति"। तस्मात् पुरुषत्वादीश्वरस्यापि तत्सम्बन्धः प्राप्त इति तत्प्रतिषेध उपपद्यत इत्याह, योह्यनेन बुद्धिस्थेनापि पुरुषमात्रसाधारणेन भोगेनापरामृष्टः। स पुरुषविशेष ईश्वरः, विशिष्यते इति विशेषः पुरुषान्तराद्व्यवच्छिद्यते। विशेषपदव्यावर्त्त्यं दर्शयितुकामः परिनोदनापूर्ब्बं परिहरति कैवल्यं प्राप्तास्तर्हि इति। प्रकृतिलयानां प्राकृतोबन्धः, वैकारिकोविदेहानाम् दक्षिणादिबन्धोदिव्यादिव्यविषयभोगभाजाम्। तान्यमूनि त्रीणि बन्धनानि। प्रकृतिभावनासंस्कृतमनसोहि देहपातानन्तरमेव प्रकृतिलयतामापन्नाइतितेषां पूर्ब्बा बन्धकोटिः प्रज्ञायते तेनोत्तरकोटिविधानमात्रमिह तु पूर्ब्बापरकोटिनिषेध इति संक्षिप्य विशेषं दर्शयति "स तु सदैव मुक्तः सदैवेश्वरः" इति। ज्ञानक्रियाशक्तिसम्पदैश्वर्य्यं। अत्र पृच्छति "योऽसाविति" ज्ञानक्रिये हि न चिच्छक्तेरपरिणामिन्याः सम्भवत इति। रजस्तमोरहितविशुद्धचित्तसत्वाश्रये वक्तव्ये। नचेश्वरस्याविद्याप्रभवचित्तसत्वसमुत्कर्षेण सह स्वस्वामिभावसम्बन्धः सम्भवतीत्यत उक्तं, प्रकृष्टसत्वोपादानादिति। नेश्वरस्य पृथग्जनस्येवाविद्यानिबन्धनश्चित्तसत्वेन स्वस्वामिभावः, किन्तु तापत्रयपरीतान् प्रेत्यभावमहार्णवात् जन्तूनुद्धरिष्यामि ज्ञानधर्म्मोपदेशेन। नच ज्ञानक्रियासामर्थ्यातिशयसम्पत्तिमन्तरेण तदुपदेशः, नचेयमपहतरजस्तमोमलविशुद्धसत्वोपादानं विनेत्यालोच्य सत्वप्रकर्षमुपादत्ते भगवानपरामृष्टोऽप्यविद्ययाऽविद्याभिमामीषाविद्यायास्तत्त्वमविद्वान् भवति न पुनरविद्यामविद्यात्वेन सेवमानः, न खलु शैलूषोरामत्वमारोप्य तांस्तांश्चेष्टादर्शयन् भ्रान्तोभवति तदिदमाहार्यमस्य रूपम् तात्त्विकमिति। स्यादेतदुद्दिधीर्षया भगवता सत्वमुपादेयं तदुपादानेन च तदुद्दिधीर्षा अस्या अपि प्राकृतत्वात्तयाचान्योन्यसंश्रय इत्यत उक्तं, शाश्वतिक इति। भवेदेतदेवं यदीदंप्रथमता सर्गस्य भवेत्, अनादौ तु सर्गसंहारप्रबन्धे सर्गान्तरसमुत्पन्नसञ्जिहीर्षावधिसमये, पूर्णे मया सत्वप्रकर्ष उपादेय इति प्रणिधानं कृत्वा भगवान् जगत्संजहार, तदा चेश्वरचित्तसत्वं प्रणिधानवासनावासितप्रधानसाम्यमुपगतमपि परिपूर्णे महाप्रलयावधौ प्रणिधानवासनावशात्स्वैवेश्वरचित्तसत्वभावेन परिणमते यथा चैत्रः श्वः प्रातरेवोत्थातव्यं मयेति प्रणिधाय सुप्तस्तदैवोत्तिष्ठति प्रणिधानसंस्कारात्, तस्मादनादित्वादीश्वरप्रणिधानसत्वोपादानयोः शाश्वतिकत्वेन नान्योन्यसंश्रयः। नचेश्वरस्य चित्तसत्वं महाप्रलयेऽपि न प्रकृतिसाम्यमुपैतीति वाच्यं? यस्य हि न कदाचिदपि प्रधानसाम्यं न तत्प्राधानिकं नापि चितिशक्तिः अन्या तत्त्वेऽर्थान्तरमप्रामाणिकमापद्येत। तच्चायुक्तं, प्रकृतिपुरुषव्यतिरेकेणार्थान्तराभावात्। सोऽयमीदृश ईश्वरस्य शाश्वतिक उत्कर्षः किं सनिमित्तः सप्रमाणकः? आहोस्विन्निर्निमित्तः निष्प्रमाणकः? इति। उत्तरम्—तस्य शास्त्रं निमित्तं श्रुतिस्मृतीतिहासपुराणानि शास्त्रम्। नोदयति शास्त्रं पुनः किं निमित्तम्? प्रत्यक्षानुमानपूर्व्वं हि शास्त्रम्? नचेश्वरस्य सत्वप्रकर्षे कस्यचित् प्रत्यक्षमनुमानं वास्ति। नचेश्वरप्रत्यक्षप्रभवं शास्त्रमिति युक्तं, कल्पयित्वापि ह्ययं स्वयं ब्रूयादात्मैश्वर्य्यप्रकाशनायेति भावः। परिहरति प्रकृष्टसत्वनिमित्तम्। अयमभिसन्धिः मन्त्रायुर्वेदेषु तावदीश्वरप्रणीतेषु प्रवृत्तिसामर्थ्यादर्थाव्यभिचारविनिश्चयात् प्रामाण्यं सिद्धम्। मणौषधिभेदानां तत्संयोगविशेषाणाञ्च मन्त्राणाञ्च तत्तद्वर्णावापोद्धारेण सहस्रेणापि पुरुषायुषैर्लौकिकप्रमाणव्यवहारी शक्तः कर्त्तुमन्वयव्यतिरेकौ। नचागमादन्वयव्यतिरेकौ ताभ्यां चागमस्तत्सन्तानयोरनादित्वादिति प्रतिपादयितुं युक्तं, महाप्रलये तत्सन्तानयोर्विच्छेदात् न च तद्भावे प्रमाणाभावः। अभिन्नं प्रधानविकारि जगदिति हि प्रतिपादयिष्यते। सदृशपरिणामस्य पूर्व्वसदृशपरिणाममत्ता दृष्टा। यथा क्षीरेक्षुरसादेर्दधिगुडादिरूपम्।

विसदृशपरिणामस्य पूर्व्वसदृशपरिणामता च दृष्टा। तदिह प्रधानेनापि महदहङ्कारादिरूपविसदृशपरिणामेन सता भाव्यम्। कदाचित् सदृशपरिणामेन सदृशपरिणामश्चास्य साम्यावस्था स च महाप्रलयः। तस्मान्मन्त्रायुर्वेदप्रणयनात् तावद्भगवता रजस्तमोमलावरणतया परितः प्रद्योतमानं बुद्धिसत्त्वमास्थेयं तया चाभ्युदयनिःश्रेयसोपदेशपरोऽपि वेदराशिरीश्वरप्रणीतस्तद्बुद्धिसत्त्वप्रकर्षादेव भवितुमर्हति। न च सत्त्वोत्कर्षे रजस्तमःप्रभवौ विभ्रमविप्रलम्भौ सम्भवतस्तत्प्रकृष्टसत्त्वनिमित्तं शास्त्रमिति। स्यादेतत् प्रकर्षकार्य्यतया प्रकर्षं बोधयच्छास्त्रम् शेषवदनुमानं भवेन्न त्वागम इत्यत आह, एतैरिति। न कार्य्यत्वेन बोधयति अपि त्वनादिवाच्यवाचकभावसम्बन्धेन बोधयतीत्यर्थः। ईश्वरस्य हि बुद्धिसत्त्वे प्रकर्षोवर्त्तते, शास्त्रमपि तद्वाचकत्वेन तत्र वर्त्तते इति। उपसंहरति, एतस्मात् ईश्वरबुद्धिसत्त्वप्रकर्षवाचकाच्छास्त्रादेतद्भवति ज्ञायते विषयेण विषयिणोलक्षणात्। सदैवेश्वरः सदैव मुक्तः इति। तदेव पुरुषान्तराद्व्यवच्छिद्येश्वरान्तरादपि व्यवच्छिनत्ति तच्च तस्येति। अतिशयविनिर्म्मुक्तिमाह न तावदिति। कुतः? यदैवेति। कस्मात् सर्व्वातिशयविनिर्म्मुक्तं तदैश्वर्य्यम्? इत्यत आह, तस्माद्यत्रेति। अतिशयनिष्ठामप्राप्तानामौपचारिकमैश्वर्य्यमित्यर्थः। साम्यविनिर्म्मुक्तिमाह न च तत्समानमिति। प्राकाम्यमविहतेच्छता तद्विघाताद्दूनत्वम्, अनूनत्वे वा द्वयोरपि प्राकाम्यविघातः कार्य्यानुत्पत्तिर्वा विरुद्धधर्मसमाविष्टमेकदा कार्य्यमुपलभ्येतेत्याशयवानाह द्वयोश्चेति। अविरुद्धाभिप्रायत्वे वा प्रत्येकमीश्वरत्वे कृतमन्यैरेकेनैवेशनायाः कृतत्वात्, सम्भूयकारित्वे वा न कश्चिदीश्वरः परिषद्वत्, नित्यैशनायोगिनाञ्च पर्य्यायायोगात्, कल्पनागौरवप्रसङ्गाच्चेति द्रष्टव्यं तस्मात् सर्व्वमवदातम्" २४वि०। एवमस्य क्रियाज्ञानशक्तौ शास्त्रं प्रमाणमभिधाय ज्ञानशक्तावनुमानं प्रमाणयति, किञ्च "तत्र निरतिशयं सर्व्वज्ञबीजम्"। व्याचष्टे यदिदमिति। बुद्धिसत्त्वावरकतमोऽपगमतारतम्येन यदिदमतीतानागतप्रत्युत्पन्नानां प्रत्येकञ्च समुच्चयेन च वर्त्तमानानामतीन्द्रियाणां ग्रहणं तस्य विशेषणमल्पं बह्विति सर्व्वज्ञबीजं कारणम्, कश्चित् किञ्चिद्देशातीतादि गृह्णाति, कश्चिद्बहुतरं, कश्चिद्बहुतममिति ग्राह्यापेक्षया ग्रहणस्याल्पत्वं बहुत्वं कृतम् एतद्विवर्द्धमानं यत्र निष्क्रान्तमतिशयात् स सर्व्वज्ञ इति तदनेन प्रमेयमात्रं कथितम्। अत्र प्रमाणयति अस्ति काष्ठाप्राप्तिः सर्व्वज्ञबीजस्येति" साध्यनिर्देशः निरतिशयत्वं काष्ठा यतः परमतिशयवत्ता नास्तीति। तेन नावधिमात्रेण सिद्धसाधनम्, सातिशयत्वादिति हेतुः। यद्यत् सातिशयं तत्तत् सर्व्वं निरतिशयं यथा कुवलयामलकबिल्वेषु सातिशयं महत्त्वम् आत्मनि निरतिशयमिति व्याप्तिं दर्शयति परिमाणवत्। न च गरिमादिगुणैर्व्यभिचार इति साम्प्रतं न खल्वऽवयवगरिमावयविनः, किन्त्वापरमाणुभ्य अन्त्यावयविभ्यो यावन्तः केचन, तेषामप्येकवर्त्तिनो गरिमाणः समाहृत्य गरिमवर्धमानाभिमानः ज्ञानन्तु प्रतिज्ञेयं समाप्यत इत्येकद्विबहुविषयतया युक्तं सातिशयमिति न व्यभिचारः। उपसंहरति, यत्र काष्ठा इति। ननु सन्ति बहवस्तीर्थकरा बुद्धार्हत्कपिलर्षिप्रभृतयस्तत् कस्मात् ते एव सर्व्वज्ञा न भवन्त्यस्मादनुमानात्? इत्यत आह, सामान्येति। कुतस्तर्हि तद्विशेषप्रतिपत्तिः? इत्यत आह, तस्येति। बुद्धादिप्रणीत आगमाभासो नत्वागमः, सर्व्वप्रमाणबाधितक्षणिकनैरात्म्यादिमार्गोपदेशकत्वेन विप्रलम्भकत्वादिति भावः। तेन श्रुतिस्मृतीतिहासपुराणलक्षणादागमतः आगच्छन्ति बुद्धिमारोहन्ति अस्मादभ्युदयनिःश्रेयसोपाया इत्यागमः। तस्मात् संज्ञादिविशेषप्रतिपत्तिः। संज्ञाविशेषः शिवेश्वरादिश्रुत्यादिषु प्रसिद्धः। आदिपदेन षडङ्गतादयाव्ययते संगृह्यते। यथोक्तं वायुपुराणे "सर्व्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः। अनन्तशक्तिश्च विभोर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्य"। तथा "ज्ञानं वैराग्यमैश्वर्य्यं तपः सत्यं क्षमा धृतिः। स्रष्टृत्वमात्मसंबोधोह्यधिष्ठातृत्वमेव च। अव्ययानि दशैतानि नित्यं, तिष्ठन्ति शङ्करे" इति। स्यादेतन्नित्यतृप्तस्य भगवतऐश्वर्य्यातिशयसम्पन्नस्य स्वार्थे तृष्णासम्भवात्, कारुणिकस्य च सुखैकतानजनसर्ज्जनपरस्य दुःखबहुलजीवलोकजननानुपपत्तेरप्रयोजनस्य च प्रेक्षावतः प्रवृत्त्यनुपपत्तेः क्रियाशक्तिशालिनोऽपि न जगत्क्रियेत्यत आह, तस्यात्मानुग्रहाभावेऽपीति। भूतानां प्राणिनामनुग्रहः प्रयोजनं शब्दाद्युपभोगविवेकख्यातिरूपकार्यकरणात् किल, चरितार्थं चित्तं निवर्त्तते ततः पुरुषः केवलो भवति अतस्तत्प्रयोजनाय कारुणिकोविवेकख्यात्युपायं कथयति तेनाचरितार्थत्वात् चित्तस्य जन्तून्, ईश्वरः ऽन्यप्राण्यसहायः सुखदुःखे भावयन्नपि नाकारुणिकः। विवेकख्यात्युपायक-

नाय भूतानुग्रहद्वारमाह ज्ञानधर्मोपदेशेनेति । ज्ञानञ्च धर्मश्च ज्ञानधर्मौ तयोरुपदेशेन ज्ञानधर्मसमुच्चयाद्ध्यविवेकख्यातिपरिपाकात् । कल्पप्रलये-ब्रह्मणोदिनावसाने यत्र सत्यलोकवर्जं जगदस्तमेति, महाप्रलये ससत्यलोकस्य ब्रह्मणोऽपि निधने, संसारिणः स्वकारणगामिनस्तदा मरणदुःखभाजः । कल्पेत्युपलक्षणम् । अन्यदापि स्वार्जितकर्मपाकवशेन जन्ममरणादिभाजः पुरुषानुद्धरिष्यामीति कैवल्यं प्राप्य पुरुषा उद्धृता भवन्त्वित्यर्थः । एतच्च करुणाप्रयुक्तस्य ज्ञानधर्मोपदेशनं कपिलानामपि सिद्धमित्याह, "तथा चोक्तं आदिविद्वान् कपिल" इति । आदिविद्वानिति पञ्चशिखाचार्य्यवचनम् आदिमुक्तस्वसन्तानादिगुरुविषयं, नत्वनादिमुक्तपरमगुरुविषयम्, आदिमुक्तेषु कदाचिन्मुक्तेषु विद्वत्सु कपिलेषु 'अस्माकमादिविद्वान् मुक्तः स एव च गुरुरिति । कपिलस्यापि जायमानस्य महेश्वरानुग्रहादेव ज्ञानप्राप्तिः । श्रूयते हि कपिलोनाम विष्णोरवतारविशेषः प्रसिद्धः स्वयंभूस्तु हिरण्यगर्भः, तस्यापि साङ्ख्ययोगप्राप्तिर्वेदे श्रूयते इति "स एवेश्वरः आदिविद्वान् कपिलोविष्णुः स्वयम्भूरिति" स्वायम्भुवादीनामपीश्वर इति भावः २५ । "सम्प्रति भगवतो ब्रह्मादिभ्योविशेषमाह, 'स एष इति पातनिका न तु सूत्रम् "पूर्वेषामपि गुरुः कालेनानवच्छेदात्" । व्याचष्टे, पूर्वेषां हीति । कालस्तु शतवर्षादिः, अवच्छेदार्थेन अवच्छेदनप्रयोजनेनोपावर्त्तते, न वर्त्तते प्रकर्षस्य गतिः प्राप्तिः प्रत्येतव्या आगमात् । तदनेन प्रबन्धेन भगवानीश्वरोदर्शितः" २६ वाचस्पतिविवरणम् ।

तत्रेश्वरस्य लक्षणम् "जन्माद्यस्य यतः" शा०सूत्रभाष्ययोर्दर्शितम् तच्चोपादाननिमित्तकारणोभयकारणपरतया समर्थितं तच्चानुपदमुदाहृतम् । तस्य लक्षणानि नवमितानि यथाह ब्रह्मणस्तटस्थलक्षणोदाहरणे वेदा०परि० "प्रकृते च जगज्जन्मादिकारणत्वम् । अत्र जगत्पदेन कार्य्यजातं विवक्षितम् । कारणत्वञ्च कर्त्तृत्वम् अतो ऽविद्यादौ नातिव्याप्तिः । कर्त्तृत्वञ्च तत्तदुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वम् । ईश्वरस्य तावदुपादानगोचरापरोक्षज्ञानसद्भावे च "यः सर्व्वज्ञः सर्व्ववित् यस्य ज्ञानमयं तपः । तस्मादेतद्ब्रह्म नाम रूपमन्नञ्च जायते" इत्यादि श्रुतिर्म्मानम् । तादृशचिकीर्षासद्भावे च "सोऽकामयत बहु स्यां प्रजायेयेति" श्रुतिर्म्मानम् । तादृशकृतौ च "तन्मनोऽकुरुतेत्यादि" वाक्यम् । ज्ञानेच्छाकृतीनामन्यतमगर्भं लक्षणत्रितयं विवक्षितम् अन्यथा व्यर्थविशेषणापत्तेः । अतएव जन्मस्थितिध्वंसानामन्यतमस्यैव लक्षणे प्रवेशः । एवञ्च लक्षणानि नव सम्पद्यन्ते । ब्रह्मणोजगज्जन्मादिकारणत्वे च 'यतोवा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्तीत्यादि" श्रुतिर्म्मानम् । यद्वा निखिलजगदुपादानत्वं जगदाकारेण परिणम्यमानमायाधिष्ठानत्वं वा । एतादृशमेवोपादानत्वमभिप्रेत्य "इदं सर्व्वं यदयमात्मा" "सच्चासच्चाभवत्" "बहु स्यां प्रजायेय" इत्यादिश्रुतिषु ब्रह्मप्रपञ्चयोस्तादात्म्यव्यपदेशः । घटः सन् घटोभाति घटइष्ट इत्यादिलौकिकव्यपदेशोऽपि सच्चिदानन्दरूपब्रह्मैक्याध्यासात्' । अतएव "अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् । आद्यं त्रयं ब्रह्मरूपं मायारूपं ततो द्वय"मित्युक्तम् । श्रीधरस्वामिनाऽपि भाग०१स्क०टीकायाम् "विश्वसर्गविसर्गादिनवलक्षणलक्षितम्" इत्यनेन ब्रह्मणः सर्गादित्रयस्य ज्ञानचिकीर्षाकृतिमत्त्वेन नव लक्षणान्युक्तानि । "मायोपाधिरयं जीवोऽविद्योपाधिरीश्वर" इत्युक्तेः तस्याविद्योपाधित्वम् अविद्या च कार्य्यकारणभेदेन द्विविधा तत्र कार्य्यरूपा मायाशब्देन वाच्या कारणरूपा तु अविद्याशब्दवाच्या । तत्र कार्य्यरूपाभिप्रायेणैव "इन्द्रोमायाभिःपुरुरूपं ईयते" श्रुतिर्द्रष्टव्या । अविद्याभिप्रायेणैव तु "मायान्तु प्रकृतिं विद्यात् मायिनं तु महेश्वरम्" । "अजामेकां लोहितशुक्लकृष्णवर्णामित्यादि"श्रुतिश्च द्रष्टव्या । तस्या एकत्वेऽपि सत्वरजस्तमोरूपगुणभेदात् त्रैविध्येन तदुपहितचैतन्यस्यापि त्रैविध्यम् । तदभिप्रायेणैव "स च परमेश्वरः एकोऽपि स्वोपाधीभूतमायानिष्ठसत्वरजस्तमोगुणभेदेन ब्रह्मविष्णुमहेश्वरादिशब्दवाच्यतां भजते" इति वेदा० परि०। "सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते । स्थित्यादये हरिविरिञ्चिहरेतिसंज्ञाः" भागवतम् । मत्स्यावतारप्रभृतयोऽपि ब्रह्मकोटय एव । अत एव सिद्धान्तबिन्दौ "पुमाकारविष्णुप्रभृतीनां स्त्र्याकाराणाञ्च भारतीप्रभृतीनामीश्वररूपत्वमुक्तम् । तस्य नित्यतया निरवयवत्वेऽपि तत्तज्जीवादृष्टवशात् तेषामुपासासिद्ध्यर्थं श्रुतिवेदपुराणप्रसिद्धाकारग्रहणम् "चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः । उपासकानां सिद्ध्यर्थं ब्रह्मणोरूपकल्पने"त्युक्तेः "योयो यां यां तनुं भक्तः श्रद्धयार्च्चितुमिच्छति । तस्य तस्याचलां श्रद्धां तामेव विधाम्यहमिति" गीतोक्तेश्च । ईश्वरविभूतिशब्दे च दर्शयिष्यमाण

तत्तत्स्थानेषु ईश्वरस्याराध्यता । "यदा यदा हि धर्म्मस्य ग्लानिर्भवति भारत ! । अभ्युत्थानमधर्म्मस्य तदात्मानं सृजाम्यहम्" गीतोक्तेः जीवानां कार्य्यवशात् तस्य विग्रहवत्त्वेनाविर्भावः । किन्तु स्वादृष्टायत्तशरीरपरिग्रहस्यैव संसारित्वेन ईश्वरस्य शरीरपरिग्रहे जीवादृष्टस्यैव हेतुत्वेनेश्वरस्य न संसारित्वमिति भेद इति द्रष्टव्यम् । तत्र परमेश्वरे "यस्मिन्नीश्वर इत्यनन्यविषयः शब्दोयथार्थाक्षरः" विक्र० "उपर्युपरि बुद्धीनां चरन्तीश्वरबुद्धयः" पुरा० । 'जगदाङ्करनीश्वरम्" गीता "न ह्रीश्वरव्याहृतयः कदाचित् पुष्णन्ति लोके विपरीतमर्थम्" कुमा० । "क्लेशकर्म्मफलभोगवर्जितं पुंविशेषममुमीश्वरं विदुः" माघः । आढ्ये "ईश्वरोऽहमहं भोगीको-ऽन्योऽस्ति सदृशो मम" गीता स्वामिनि । "आत्मेश्वराणां न हि जातु विघ्नाः समाधिभेदप्रभवोभवन्ति" कुमा० । शिवे स्वामिनि च "प्रालेयशीतमचलेश्वरमीश्वरोऽपि" कुमा० ऐश्वर्य्यान्वितस्त्रियां टाप् । "स्वविधे शयनेऽप्यनीश्वरा सफलीकर्त्तुमहो मनोरथान्" रघु० । दुर्गायां तु ईश्वरपत्नीत्वाभिव्यक्तायां ङीषेव । "विन्यस्तमङ्गलमहौषधिरीश्वरायाः" किरा० ।

ईश्वरविभूति स्त्री ६त० । ईश्वरस्य विभूतौ संसारमध्यस्थावविशेषु तदीयांशभेदे । येषु येषु च भावेषु तस्य चिन्तनीयता तत् दर्शितं गीतायाम् । "हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतयः । प्राधान्यतः कुरुश्रेष्ठ ! नास्त्यन्तो विस्तरस्य मे । अहमात्मा गुडाकेश ! सर्व्वभूताशयस्थितः । अहमादिश्च मध्यञ्च भूतानामन्त एव च । आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान् । मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी । वेदानां सामवेदोऽस्मि देवानामस्मि वासवः । इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना । रुद्राणां शङ्करश्चास्मि वित्तेशोयक्षरक्षसाम् । वसूनां पावकश्चास्मि मेरुः शिखरिणामहम् । पुरोधसाञ्च मुख्यं मां विद्धि पार्थ ! वृहस्पतिम् । सेनानीनामहं स्कन्दः सरसामस्मि सागरः । महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम् । यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः । अश्वत्थः सर्ववृक्षाणां देवर्षीणाञ्च नारदः । गन्धर्व्वाणां चित्ररथः सिद्धानां कपिलोमुनिः । उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवम् । ऐरावतं गजेन्द्राणां नराणाञ्च नराधिपम् । आयुधानामहं वज्रं धेनूनामस्मि कामधुक् । प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः । अनन्तश्चास्मि नागानां वरुणोयादसामहम् । पितॄणामर्य्यमा चास्मि यमः संयमतामहम् । प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम् । मृगाणाञ्च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम् । पवनः पवतामस्मि रामः शस्त्रभृतामहम् । झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी । सर्गाणामादिरन्तश्च मध्यञ्चैवाहमर्जुन ! । अध्यात्मविद्या विद्यानां वादः प्रवदतामहम् । अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य च । अहमेवाक्षयः कालोधाताहं विश्वतोमुखः । मृत्युः सर्व्वहरश्चाहमुद्भवश्च भविष्यताम् । कीर्त्तिः श्रीर्वाक् च नारीणां स्मृतिर्मेधा धृतिः क्षमा । वृहत्साम तथा साम्नां गायत्री छन्दसामहम् । मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः । द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम् । जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम् । वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनञ्जयः । मुनीनामप्यहं व्यासः कवीनामुशना कविः । दण्डोदमयतामस्मि नीतिरस्मि जिगीषताम् । मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम् । यच्चापि सर्वभूतानां वीजं तदहमर्ज्जुन ! । न तदस्ति विना यत् स्यान्मया भूतं चराचरम् । नान्तोऽस्ति मम दिव्यानां विभूतीनां परन्तप ! । एष तूद्देशतः प्रोक्तोविभूतेर्विस्तरोमया । यद्यद्विभूतिमत् सत्त्वं श्रीमदूर्ज्जितमेव वा । तत्तदेवावगच्छ त्वं मम तेजोऽंशसम्भवम् । अथ वा बहुनैतेन किं ज्ञातेन धनञ्जय ! । विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितोजगत्" । दशमे च ।

ईश्वरसाक्षिन् पु० ईश्वर एव साक्षी । वेदान्तिमतसिद्धे मायोपहिते चैतन्ये स च वेदान्तपरिभाषायां दर्शितो यथा "ईश्वरसाक्षी तु मायोपहितं चैतन्यं तच्चैकं तदुपाधिभूतमायाया एकत्वात् "इन्द्रोमायाभिः पुरुरूपईयत" इत्यादिश्रुतौ मायाभिरिति बहुवचनस्य मायागतशक्तिविशेषाभिप्रायतया मायागतसत्वरजस्तमोरूपगुणाभिप्रायतया चोपपत्तिः । 'मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम् । तरत्यविद्यां विततां हृदि यस्मिन्निवेशिते । योगी मायाममेयाय तस्मै विद्यात्मने नमः" । "अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः । अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः" इत्यादिश्रुतिषु एकवचनेन लाघवादनुगृहीतेन मायाया एकत्वं निश्चीयते । ततश्च तदुपहितं चैतन्यमीश्वरसाक्षी तच्चानादि तदुपाधेर्मायाया अनादित्वात् । मायावच्छिन्नं चैतन्यञ्च परमेश्वरः मायाया विशेषणत्वे ईश्वरत्वं उपा-

धित्वे साक्षित्वम् इतीश्वरत्वसाक्षित्वयोर्भेदः न तु धर्म्मिणोरीश्वरतत्साक्षिणोः। स च परमेश्वर एकोऽपि स्वोपाधीभूतमायानिष्ठसत्त्वरजस्तमोगुणभेदेन ब्रह्मविष्णुमहेश्वरादिशब्दवाच्यतां भजते। नन्वीश्वरानादित्वे "तदैक्षत बहु स्यां प्रजायेय इत्यादौ सृष्टिपूर्व्वसमये परमेश्वरस्यागन्तुकमीक्षणमुच्यमानं कथमुपपद्यते ?। उच्यते। यथा विषयेन्द्रियसन्निकर्षादिकारणवशेन जीवोपाध्यन्तःकरणस्य वृत्तिभेदा जायन्ते तथा सृज्यमानप्राणिकर्म्मवशेन परमेश्वरोपाधीभूतमायाया वृत्तिविशेषाः इदमिदानीं स्रष्टव्यमिदमिदानीं पालयितव्यमिदमिदानीं संहर्त्तव्यमित्याकारास्तद्भेदा जायन्ते तासाञ्च वृत्तीनां तत्प्रतिबिम्बितन्यस्य च सादित्वमिति"

ईश्वरी स्त्री ईश्वरस्य शिवस्य पत्नी ङीप्। १दुर्गायाम्। "ईश्वरीमीश्वराजयाम्" दुर्गास्तवः। ईश- वनिप् ङीप् रान्तादेशश्च। २लिङ्गिनीलतायां ३वन्ध्याकर्कोट्याम्, ४रुद्रजटालतायाम्, ५नाकुलीवृक्षे च। ऐश्वर्य्यान्वितायां स्त्रियाम् च। "ईश्वरी सर्वभूतानां त्वामिहोपह्वये श्रियम्" श्रीसूक्तम्।

ईष उञ्छे (उङ्तयसञ्चेलात्,कणश आदाने) तु०प०सक० सेट्। ईषति ऐषीत्। ईषाम् बभूव आस चकार। ईषिता ईष्यात् ईषिष्यति ऐषिष्यत् "विश्वस्मादीषतो यजमानस्य परिधिः" तैत्ति०।

ईष दाने ईक्षणे, सर्पणे हिंसने च भ्वादि०आत्म०सक०सेट्। ईषते। ऐषिष्ट ईषाञ्च बभूव आस चक्रे। ईषिता ईषिषीष्ट ईष्यते ऐषिष्यत। ईषत् ईषा "भूरस्येव त्वेषयादीषतेश्यः" ऋ० १,१४१,८। "अस्मादहं तविषादीषमाणः" ऋ०१,१७१ ४७।

ईष पु० ईष-क। उत्तममनोः पुत्रभेदे। "औत्तमेयान् महाराज ! दश पुत्रान् मनोरिमान्। ईष ऊर्ज्जस्तनूर्ज्जश्च मधुर्माधव एव च। शुचिः शुक्रं सहश्चैव नभस्यो नभएव च" हरिवं०७अ०।

ईषत् अव्य०ईष-अति।१अल्पे, २किञ्चिदर्थे च। "ईषत्सहासममलं परिपूर्णचन्द्रबिम्बानुकारि" देवीमा० ईषदीषदनघोतविद्यया तातमाहस्फुटमाविवर्द्धयन्" कुसुमा०। "ईषदकृता" प्रा०समा०। ईषदुष्णः ईषत्पाण्डु। ३सूक्ष्मार्थे च "ईषद्धौतं नवं शुक्लं सदशं यन्न धारितम्" वशिष्ठः। "ईषत् सूक्ष्मतन्तुकमिति रघुनन्दनः" एतदुपपदे धातोः खल् ईषत्करः ईषद्भमः। इयादेस्तु युच् वा। ईषद्दर्शः ईषद्दर्शनः। एतत्पूर्व्वे आढ्ये उपपदे खल् ईष-दाढ्यङ्करः "ईषदाढ्यङ्करोऽप्येषः भट्टिः ईषदाढ्यम्भवम्।

ईषत्कर न० ईषत् कृ-खल्। १लेशे, २अल्पे च। ३अल्पप्रयाससाध्ये त्रि०। [वर्णे २तद्वति त्रि०

ईषत्पाण्डु पु० "ईषदकृतेति" पा०स०। १अल्पपाण्डौ धूसर-

ईषदुष्ण पु० "ईषदकृतेति" पा०स०। अल्पतप्ते १मन्दोष्णे २तद्वति त्रि० [२तद्वति त्रि०

ईषद्रक्त पु० "ईषदकृतेति" सा०स०। अल्परक्तवर्णे १अव्यक्तरागे

ईषा स्त्री ईष-क। १शकटस्य दीर्घकाष्ठे "देवानामित्युपस्तम्भनस्य पश्चादीषाम्" कात्या० २,२,१४, "शकटस्य दीर्घं काष्ठमीषा" वेददी०। २रथावयवभेदे च "ईषामन्ये हयानन्ये सूतमन्ये न्यपातयन्" भा०व०२४०अ०। "पाञ्चालस्य रथस्येषामाप्लुत्य सहसाऽपतत्" भा० आ० १३८अ०। ३हलयुगयोर्मध्यमकाष्ठे ४लाङ्गलदण्डे च।

ईषादन्त पु० ईषेव दन्तोऽस्य। १दीर्घदन्तगजे २उद्यदन्ते त्रि०

ईषिका स्त्री ईषेव "इवे प्रतिकृताविति" पा० कन्। १गजाक्षिगोलके, २तूलिकायाम, ३अस्त्रविशेषे च। "सोऽभिमन्त्र्य शरेषीकामीषिकास्त्रेण वीर्य्यवान् काकं तमभिसन्धाय ससर्ज पुरुषर्षभः" रामा०। फर्फरीकादि०नि० ईषीकापि। तूलिकायाम् तृणभेदे "सोऽभिमन्त्र्य शरेषीकामीषिकास्त्रेण वीर्य्यवान्" ईशिकेति तालव्यमध्योऽप्यत्रार्थे।

ईषिर पु० ईष हिंसने किरच्। अग्नौ उज्ज्वलदत्तः।

ईष्म पु० ईष-सर्पणे करणे मक्। १कामदेवे ईष ईक्षणे कर्म्मणि मक्। २वसन्तर्त्तौ च उज्ज्वल०।

ईह चेष्टने भ्वादि०आत्म०अक०सेट्। ईहते ऐहिष्ट ऐहिढ्वम् ऐहिध्वम्। ईहाम्-बभूव आस चक्रे ईहिता ईहिषीष्ट ईहिष्यते ऐहिष्यत। ईहनम् ईहा ईहमानः ईहितः "यत्तस्यानीहमानस्य किञ्चिद्दत्त्वा पृथक् क्रिया" स्मृतिः। "ऐहिष्ट तं कारयितुं कृतात्मा" भट्टिः। प्रियाणि वाञ्छन्त्यसुभिः समीहितुम्। "हन्तुं क्रोधवशादीहाञ्चक्राते तौ परस्परम्" इति च किरा०। अस्य इच्छापूर्व्वकचेष्टापरत्वे सक० "नेहेतार्थान् प्रसङ्गेन" मनुः। "तस्याराधनमीहते" गीता।

ईहा स्त्री ईह-अ। १चेष्टायाम्, २उद्यमे, ३वाञ्छायाञ्च। "ईहादेहार्थनाशःस्याज्जन्मर्क्षे उपतापिते। ज्योति०।

ईहामृग पु० ईहां मृगयते अण् ईहाप्रधानो वा मृगः पशुभेदः। (नेकड़ाबाघ)। १वृके ईहया ईहासाध्यो मृगः। २कृत्रिममृगे अलङ्कारशास्त्रवर्णिते ३नाटकभेदे च साहि० ६परि०। यथा "ईहामृगो मिश्रवृत्तश्चतुरङ्कः प्रकीर्त्तितः।

मुखप्रतिमुखे सन्धी तत्र निर्वहणं तथा। नरदिव्यावनियमौ नायकप्रतिनायकौ। ख्यातौ धीरोद्धताऽन्यो गूढभावादयुक्तकृत्। दिव्यस्त्रियमनिच्छन्तीमपहारादिमेच्छतः। शृङ्गाराभासमप्यस्य किञ्चित् किञ्चित् प्रदर्शयेत्। पताकानायका दिव्या मर्त्यायापि दशोद्धताः। युद्धमानीय संरम्भं परं व्याजान्निवर्त्तते। महात्मानो बधं प्राप्ता अपि बध्याः स्युरत्र नो। एकाङ्कोदेव एवात्र नेतेत्याहुः परे पुनः। दिव्यस्त्रीहेतुकं युद्धं नायकाः षडितीतरे। मिश्राणि ख्याताख्यातानि। अन्यः प्रतिनायकः पताकानायकास्तु नायकप्रतिनायकयोर्मिलिता दश। नायकौ मृगवदलभ्यां नायिकामत्र ईहते वाञ्छतीतीहामृगः यथा कुसुमशेखरविजयादि"

ईहावृक पु० ईहाप्रधानो वृकः। (नेकडियाबाघ) ईहामृगे।

ईहित त्रि० ईह क्त। १चेष्टिते २अपेक्षिते भावे क्त। ३उद्योगे ४चरिते न। "समीहितार्थसिद्धिःस्यात्"तन्त्रम्।

इति वाचस्पत्ये ईकारादिशब्द-निरूपणम्।

उ

उ-शब्दे भ्वादि०अक०आ०अनिट्। अवते औष्ट। उवे ओता ओषीष्ट ओष्यते औष्यत। अवनम् उतः। "उवे अम्ब सुलाभिके यथेवाङ्ग भविष्यति" ऋ०१०,८६,७।

उ अव्य० उ–क्विप् न तुक्। १सम्बोधने २कोपवचने, ३अनुकम्पायां, ४नियोगे (अवधारणे) "उमेति मात्रा तपसो निषिद्धा पश्चादुमाख्यां सुमुखी जगाम" कुमा०। "उदु ष्य देवः सविता स, वाय" ऋ०२,३८,१। "उपो रुरुचे युवतिर्न योषा" ऋ० ७,७७,१। "वेत्थो यथेमं लोकं पुनरापद्यन्त इति" वृह०उ०। "एष उ एवासाधु कर्म्म कारयति तम्"श्रुतिः ५अङ्गीकारे ६प्रश्ने च"हेमच०.७पादपूरणे। अतति सातत्येन तिष्ठति अत-ड्। ८शिवे पु०। स्वरूपार्थे कारः उकारोऽपि शिवे "अकारो विष्णुरुद्दिष्ट उकारस्तु महेश्वरः। मकारस्तु स्मृतो ब्रह्मा प्रणवस्तु त्रयात्मकः" इति ओमित्यस्य अवयवार्थनिरूपणे पुरा०। उशब्दात् स्वरूपार्थे कारः। उकारः। पञ्चमस्वरे। स च उदात्तानुदात्तस्वरितभेदेन प्रथमं त्रिधा पुनः अनुनासिकाननुनासिकभेदेन प्रत्येकं द्विधेति षड्विधः कारतकारानुत्तरस्तु ह्रस्वदीर्घप्लुतभेदेन त्रिविधोऽपि प्रत्येकं प्रागुक्तभेदषट्कात् अष्टादशविधः। तस्य वर्णस्य कुण्डलिनीरूपत्वादिना ध्येयत्वमुक्तम् कामधेनुतन्त्रे यथा "उकारं परमेशानि। विदुः कुण्डलिनीं स्वयम्। पीतचम्पकसङ्काशं पञ्चदेवं सदाऽमलम्। पञ्चप्राणमयं देवि! चतुर्वर्गप्रदायकम्" तन्त्रान्तरे अकारोकारमकारात्मकप्रणवस्य मध्ये द्वादशकलात्मकार्कमण्डलरूपेण अकारस्य, षोडशकलात्मकचन्द्रमण्डलरूपेण उकारस्य, दशकलात्मकवह्निमण्डलरूपेण च मकारस्य ध्येयत्वोक्त्या अभेदोपचारात् षोडशकलात्मके, ६चन्द्रमण्डले च तत्र मकारान्तस्यैव तन्नामतेति बहवः। उ, इत्यस्य एकाज् निपातत्वात् प्रगृह्यसंज्ञा नेन अचि परे न सन्धिः। उ–उमेशः" सि०कौ०। "एष उ वासाधुकर्म्म कारयति तम्" श्रुतिः। स चचादिगणीयः।

उकानह पु० पीतरक्तवर्णे कृष्णरक्तवर्णे च घोटके। हारा०

उकार पु० उ–स्वरूपार्थे कारः। १उस्वरूपे वर्णे। "अकारञ्चाप्युकारञ्च मकारञ्च प्रजापतिः। वेदत्रयात् निरदुहत् भूर्भुवःस्वरितीति च" मनुः। २महेश्वरे च उशब्दे उ०।

उक्त त्रि० वच–द्विक०गौण कर्मणि क्त। यस्य ज्ञानाय कथ्यते १तादृशे जने। "अनुक्तेनापि वक्तव्यं सुहृदा हितमिच्छता" नीतिः "तथेत्युक्ता च सा देवी" पुरा० गौणकर्मसमभिव्याहारे तु मुख्ये कर्मणि क्त। २कथिते वाक्यादौ ३शक्त्याबोधिते "उक्तानि प्रतिषिद्धानि पुनः सम्भावितानि च"। स्मृतिः "उक्तार्थानामप्रयोगः व्या०प०। भावे क्त कथने न०। "सम्प्रत्यसाम्प्रतं वक्तुमुक्ते मुसलपाणिना" माघः। ४एकाक्षरपादके छन्दोभेदे स्त्री मेदि० "उक्तात्युक्ता तथा मध्येति" वृत्त०र०केचित्तु "उक्थात्युक्थेति पठित्वा उक्थाशब्दस्तदर्थे इत्याहुः। उक्तञ्च प्रायेण अभिधाशक्त्या बोधितार्थ एव। "प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते। यथा गुणे तथा तद्वदनुक्ताऽपि प्रतीयते" भर्त्तृ०। शक्तिः कारकशक्तिरित्यर्थः।

उक्ति स्त्री वच–भावे क्तिन्। कथने। "अतिसंक्षिप्तचिरन्तनोक्तिभिः" सुश्रु०। उक्तिप्रत्युक्तिरूपं वाकोवाक्यम्" का०भा० २शब्दशक्तौ च "एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ" अमरः।

उक्थ न० वच-थक्। अप्रगीतमन्त्रसाध्ये "स्तोत्रे "इन्द्राय नन मर्मयोक्थानि च ब्रवीत नः"ऋ०१,८४,५।"उक्था-

र्णि अप्रगीतमन्त्रसाध्यानि स्तोत्राणि भा० "अथ योऽसा-
वन्तरक्षिणि पुरुषो दृश्यते सैवर्क् तत् साम तद्यजुस्तद्-
क्थं तद्ब्रह्म" छा० उ० । तथा हि स्तोत्रं द्विविधं
प्रगीतमन्त्रसाध्यमप्रगीतमन्त्रसाध्यञ्च तत्र प्रगीतमन्त्रसाध्यं
शस्त्रम् अप्रगीतमन्त्रसाध्यन्तु स्तोत्रमिति तयोर्भेदः ।
गवामयने प्रायणीयसंज्ञकाहे पाद्यपञ्चदशस्तोत्रात्मके
२चतुर्विंशस्तोमभेदे उपचारात् ३तत्साध्ये उक्थ्ययागे
च तद्विधानञ्च" ता० ब्रा० ४अ० २ख० उक्तं यथा "१प्रा-
यणीयमहर्भवति" १ इत्युपक्रम्य "चतुर्विंशं भवति" ४
क० "इदमहरुक्थसंस्थन्तत्र सर्वेषु स्तोत्रेषु चतुर्विं-
शएव स्तोमः कार्य्यः ४ । तदेतत् प्रशंसति" भा० ।
"चतुर्विंशत्यक्षरा गायत्री तेजोब्रह्मवर्चसङ्गायत्री तेज एव
ब्रह्मवर्चसमारभ्य स्वर्यन्ति" ५ । "अयञ्च स्तोमश्चतुर्विंशति-
संख्याकः गायत्री च चतुर्विंशत्यक्षरा सा च गायत्री तेजः,
प्रजापतिमुखादग्निना सहोत्पन्नत्वात् अस्यास्तेजोरूपं
ब्रह्मवर्चसं च तेजोऽवान्तरभेद इति तेजोब्रह्मवर्चसरूपा
गायत्री । एवं सति चतुर्विंशतिस्तोमं प्रथमतः प्रयुञ्जानाः
साक्षादेव प्रत्यक्षमेव संवत्सरं प्रारभन्ते अस्मिन्नहनि प्रयु-
ञ्जानाः संख्याद्वारेण तेजोब्रह्मवर्चसञ्चारभ्य अवष्टभ्य
स्वर्यन्ति स्वर्गं गच्छन्ति५ । पुनरपि विहितं स्तोमम् अनूद्य
प्रशंसति" भा० । "चतुर्विंशतिर्भवति चतुर्विंशो वै संवत्स-
रः साक्षादेव संवत्सरमारभन्ते" ६ । "चतुर्विंशत्यर्द्धमासात्मक-
त्वात् संवत्सरस्य चतुर्विंशत्वं तथा सति चतुर्विंशस्तोमं
प्रथमतः प्रयुञ्जानाः साक्षादेव प्रत्यक्षमेव संवत्सरमार-
भन्ते ६ । अथेमं स्तोमं स्तोत्रीयागतसंख्याद्वारेण प्रशं-
सति" भा० । "यावत्यश्चतुर्विंशस्योक्थस्य स्तोत्रीयास्तावत्यः
संवत्सरस्य रात्रयः स्तोत्रीयाभिरेव संवत्सरमाप्नु-
वन्ति" ७ । "पञ्चदशस्तोत्रे अस्मिन्नहनि पञ्चदशसु स्तोत्रेषु
प्रत्येकं चतुर्विंशस्तोत्रीयायुक्तेषु परिगणनायां मिलित्वा
षष्ठ्युत्तरत्रिशतस्तोत्रीया भवन्ति । तथा सति चतुर्विंश-
स्तोमस्य यावत्यः स्तोत्रीयाः संवत्सरस्यापि तावत्योरात्रयः
एवं प्रयुञ्जानाः सत्रिणस्तेन चतुर्विंशेन स्तोत्रीयाभिरेव
संवत्सरं प्राप्नुवन्ति७ । स्तोत्रसंख्ययापीदमहः प्रशंसति"
भा० । "पञ्चदश स्तोत्राणि भवन्ति पञ्चदशार्द्धमासस्य रात्रयो-
ऽर्द्धमासश एव तत्संवत्सरमाप्नुवन्ति" ८ । "स्पष्टोर्थः ८" । अथ
स्तोत्रशस्त्राणि समुच्चित्य तत्संख्ययापीदमहः प्रशंसति" भा०
"पञ्चदश स्तोत्राणि पञ्चदश शस्त्राणि समासो मासश एव
तत् संवत्सरमाप्नुवन्ति९" स्पष्टोऽर्थः ९ भा० । तत्राग्निष्टोम-
कर्त्तव्यतारूपं पूर्वपक्षमुपन्यस्योत्तरपक्षमाह "अथो खल्वा-
हुरुक्थमेव कार्य्यमङ्गः समृद्ध्यै" १२ । "अथो इति पूर्वपक्ष-
व्यावृत्त्यर्थः । उक्थसंस्थमेवेदमहः कार्य्यः किमर्थमङ्गः स-
मृद्ध्यै सम्पूर्णतायाः इति ब्रह्मवादिन आहुः । अग्नि-
ष्टोमे हि पूर्वयोः सवनयोः पञ्च पञ्च स्तोत्राणि तृतीये तु
द्वे एवेत्यह्नः समृद्धिर्न भवति, उक्थे तु तृतीयसवने
पञ्च स्तोत्राणीत्यहः समृद्धं भवति१२ । उक्थसंस्थाङ्गी-
कारे युक्त्यन्तरमाह" भा० । "सर्व्वाणि रूपाणि क्रियन्ते
सर्व्वं ह्येतेनाप्यते" १४ "उत्तरेषामह्नां सम्बन्धीनि यानि
रूपाणि स्तोमपृष्ठविभक्त्यादीनि तान्यस्मिन्नुक्थे क्रियन्ते
अतः सर्वं हि यज्ञसम्बन्धिरूपं तेनाह्ना उक्थसंस्थेन
आप्यते प्राप्यते तत उक्थसंस्थैव कार्य्येत्यर्थः । सर्वरूप-
करणञ्च सर्व्वावाप्तिश्च सम्पादानद्वारेणेति निदानकारे-
णैवमुच्यते, "अथो खल्वाहुः सर्व्वाणि रूपाणि क्रियन्त इति"
आचार्य्याः एतेष्वेव सर्व्वान् स्तोमान् सर्वाणि पृष्ठानि
सर्वा विभक्तीर्दशरात्ररूपा इति विभक्तिमात्रेण कल्प-
यन्त इति संगृह्योक्त्वा पुनस्त्रिवृत्पञ्चदशौ चतुर्विंशः स-
म्पाद्यत इत्यादिना" १४ भा० । एतान्येव स्तोमपृष्ठादीनि
प्रत्येकं क्रमेण विविच्य तत्र प्रदर्शितानि तत्सर्वं तत
एवागन्तव्यम् । तत्र च तस्मिन्नहनि यथा स्तोमादिकं
विधेयम् तदपि तत्रैव दर्शितं तत एव तदवसेयम् । अत्र
उक्थसाध्ययागे अभेदोपचार इति बोध्यम् ।
४होत्रायां स्त्री उक्थाशस्त्रशब्दे उदा० उच्यतेऽनेन
करणे थक् । ५उक्थसाधने प्राणे च "यस्य क्षणवियोगेन
लोकोऽह्यप्रियदर्शनः । उक्थेन रहितोह्येष मृतकः
प्रोच्यते यथा" भाग० ३स्क० १५अ० ।

उक्थपत्र पु० उक्थानि अप्रगीतमन्त्रसाध्यानि स्तोत्राणि
पत्रं वाहनमिव यस्य । १यज्ञे, स्तोत्रैरेव हि यज्ञोवाह्यते
इति तस्य तथात्वम् । "समिद्धे अग्नावधिमामहान उक्थ-
पत्र ईड्योगृभीतः" यजु० १७,५५ । "यजमानोवै मामहान उक्थपत्र इत्युक्थानि ह्येतस्य पत्राणि" शत० ब्रा०
९,२,३,९ इत्युक्ते २ यजमानेऽपि । [त्तथात्वम् ।

उक्थपात्र न० ६त० । यजमाने तस्य उक्थस्तावकत्वा-

उक्थभृत् पु० उक्थं बिभर्त्ति सम्यक् विभजते भृ-क्विप्
६त० । उक्थविभाजके ऋषिभेदे "उक्थभृतं सामभृतं
बिभर्त्ति ग्रावाणम्" ऋ० ७, ३३, १४ । उक्थभृतं
उक्थानां स्तोत्राणां संभर्तारम्" ।

उक्थवर्द्धन पु० उक्थैः स्तोत्रैर्वर्द्धतेऽसौ वृध-णिच् कर्मणि

ल्युट्। स्तोत्रैर्वर्द्धनीये इन्द्रदेवे । "त्वं हि स्तोमवर्द्धन इन्द्रास्युक्थवर्द्धनः" ऋ०८,१४,११। "उक्थैः शस्त्रैर्वर्द्धनीयः" भा० । इन्द्रस्य यथा उक्थवर्द्धनीयत्वं तथोक्तं "उक्थमिन्द्राय शंस्यं वर्द्धनं पुरुनिष्षिधे" ऋ० १,१०,५, "इन्द्रायेन्द्रार्थं वर्द्धनं वृद्धिसाधनम् उक्थं शस्त्रम्" भा०

उक्थवाहस् पु० उक्थानि शस्त्राणि वहति वह—असुन् णिच्च । शस्त्रपाठके विप्रे "यं विप्रा उक्थवाहसोऽभिप्रमं दुरायवः" ऋ० ८,१२,१३,। उक्थवाहसः उक्थानां शस्त्राणां वोढारः" भा० ।

उक्थशंसिन् पु० उक्थानि शस्त्राणि शंसति शन्स—णिनि । शस्त्रस्तावके ऋत्विग्भेदे "नयसीति द्विषः कृणोष्युक्थशंसिनः" ऋ० ६,४५, ६ । स वीरं धत्ते अग्न उक्थशंसिनं त्मना सहस्रपोषिणम्" ऋ० ८, १०३, ४ ।

उक्थशस् पु०उक्थं शस्त्रं शंसति क्विप् । शस्त्रस्तावके । उक्थशासशब्दे उदा०। पदकाले सर्व्वत्र तस्य ह्रस्वमध्यपाठः । स च छान्दसो ह्रस्व इति माधवः । क्विप् प्रत्ययेनैवोपपत्तौ न छान्दसत्वमित्यन्ये । "तस्मादुक्थशसं भूयिष्ठं परिचक्षते" शत०ब्रा० । १०,५,२,५ ।

उक्थशास् पु० उक्थानि शंसति शन्स—णिच् नि० नलोपः उप० स० । शस्त्रशंसके । "शुचीदयन्दीधितिमुक्थशासः" ऋ० ४,२,१६ । "अस्य पदकाले ह्रस्वश्छान्दसः" माधवः।"नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति" ऋ०१०,८२, ७। "नरः शंसन्त्युक्थशास उक्था" ऋ०७,१६,६ ।

उक्थशुष्म त्रि० उक्थं शस्त्रं शुष्मं बलं यस्य । उक्थरूपबलयुक्ते स्तवादिवाक्ये "समुद्रं न सिन्धव उक्थशुष्मा उरुव्यचसम्" ऋ० ६,३६, ३ ।"उक्थशुष्मान् वृषभरान्त्स्वप्नसस्तां" ऋ० १०,६२,३ ।

उक्थादि पु०६त०। तदधीते वेत्ति वेत्यऽर्थे विहित-ठक्प्रत्ययनिमित्ततया पाणिन्युक्ते शब्दसमूहे स च गणः "उक्थलोकायत न्याय न्यास पुनरुक्त निरुक्त निमित्त द्विपद ज्योतिष अनुपद अनुकल्प यज्ञ धर्म्म चर्च्चा क्रमेतर श्लक्ष्ण संहिता पद क्रम संघट्ट वृत्ति परिषद् संग्रह गण गुण आयुर्वेद तन्त्रायुर्वेद" । "उक्थं सामविशेषलक्षणपरोग्रन्थविशेषोलक्षणया तदधीते वेद वा औक्थिकः मुख्यादुक्थशब्दाट्ठगणौ नेष्येते" सि०कौ० ।

उक्थामद न०उक्था होत्रया माद्यति मद-अच् । उक्थासाधने स्तोमभेदे "अग्निर्यजुर्भिः सविता स्तोमैरिन्द्र उक्थामदैर्बृहस्पतिश्छन्दोभिः" कठसं० "बृहस्पतिरुक्थामदानि शंसिषम्" ऐत० ।

उक्थावी त्रि० उक्थानि अवति अव—ई । शस्त्रस्तावके "इह इते वयस्तत उक्थाव्यं गृह्णामि" यजु०७,२२ ।

उक्थाशस्त्र न०उक्था होत्रा च शस्त्राणि च द्वन्द्वः।होत्रायामृचि शस्त्रे च । "छन्दोभिरुक्थाशस्त्राणि साम्नावभृथ आप्यते" यजु० १९,२८ ।

उक्थिन् पु० उक्थं स्तुत्यतयाऽस्त्यस्य उक्थ+इनि । १शस्त्रस्तावके होत्रादौ ।"प्र वामर्चन्त्युक्थिनो नीथाविदोजरितारः" ऋ० २,१२,५, "उक्थं शस्त्रं तद्वन्तः शस्त्रिणो होत्रादयः" भा० । "तदद्याचित्त उक्थिनोऽनुष्टुवन्ति पूर्व्वथा" ऋ० ८,१५, ६,। उक्थं स्तोत्रसाधनतयाऽस्त्यस्य इनि । २शस्त्रस्तुत्ये इन्द्रादौ ।"हिरण्यपर्णमुक्थिनं रशनां बिभ्रतं वशिं भगमिन्द्रं वयोधसम्"यजु० २८,२२ उक्थं शस्त्रं संस्काराङ्गसाधनतयाऽस्त्यस्य इनि । ३शस्त्रसाध्ये संस्कारयुक्ते सोमादौ । "तुभ्येदिन्द्र ! मरुत्वते सुताः सोमासो अद्रिवः हृदा हूयन्त उक्थिनः" ऋ० ८,७६,८ । "उक्थिनोऽन्या होत्रा उक्थिनःशस्त्रवन्तः सोमाः अनुक्था अन्याः" ऐत० ।

उक्थ्य त्रि० उक्थमर्हति यत् । शस्त्रस्तुत्ये देवादौ । "इन्द्रः सहस्रदाव्नां वरुणः शंस्यानां क्रतुर्भवत्युक्थ्यः" ऋ० १,१७,५ । "उक्थ्यः स्तुत्यः" भा० "होता गृणीत उक्थ्यः" ऋ० १,७९,१२ । २उक्थसाधने शस्त्रे च । "गाय गायत्रमुक्थ्यम्" ऋ०१,३८,१४ । उक्थ्यं शस्त्रयोग्यं गायत्रमुक्थ्यम्" भा०। उक्थसम्बन्धित्वात् ३शस्त्रेऽपि । 'उक्थ्यं' वाचि सोमाय त्वेति शस्त्वा जपेत्" आश्व०श्रौ०५,९,२६ ।'उक्थ्यं' शस्त्रं शस्त्रसम्बन्धितया" नारा०वृत्तिः । 'सोमयागात् परं कर्त्तव्येषु षट्सु यागेषु मध्ये ४यज्ञभेदे स च ।'प्रथमं सोमा'इत्युपक्रम्य 'षडुत्तरे" "अत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्याम: कात्या० १०,९,२७,२८ विहितः । तत्प्रकारस्तु तत्रैव दर्शितः प्राक् । तस्य उक्थसाध्यत्वात् उक्थ्यमिति नाम ।

"उक्थ्ये तु होत्रकाणाम्" १। "तृतीयसवनइत्यनुवर्त्तते । उक्थ्ये त्वयं विशेषः। तृतीयसवने होत्रकाणामपि शस्त्राणि भवेयु: । तानीमानीत्याह"वृत्तिः।"एद्यु षु ब्रवाणि तेऽग्निरगामि भारतस्वर्णीष्टतमस्तभ्नाद्यामसुर इति तृचाविन्द्रावरुणा युवमावां राजानाविन्द्रावरुणा मधुमत्त-

महेति याज्या । वयमु त्वामपूर्व्य यो न इदमिदं पुरेति प्रगाथौ । सर्वाः ककुभः प्रमंहिष्ठायोदप्रुतोऽच्छाम इन्द्रं बृहस्पते युवमिन्द्रश्च वस्व इति याज्या । अथाहीन्द्र गिर्वण इयन्त इन्द्र गिर्वण ऋतुर्जनित्रीनू मर्त्तो भवामित्वः स वां कर्मणेन्द्राविष्णू मदपती मदानामिति याज्या"२ । "अत्र सर्वा: ककुभ इत्युक्तं किमनेनोक्तम् । काकुभेषु तावत् प्रगाथेषु तृतीयपञ्चमयोरभ्यासे सति ककुभ एव सर्वा भवन्ति । तथैव च स्तुवन्ति छन्दोगाः । अतोऽन्यत् प्रयोजनमन्वेषणीयम् । तदिदमुच्यते । होत्रकाश्च येषां प्रगाथाः स्तोत्रीयानुरूपा इतीन्द्रनिहवब्राह्मणस्त्यवच्छंसनं विहितम् । तत्र बार्हतानामेवायं विधिरित्युक्तत्वात् काकुभेष्वनुप्राप्नोति तन्निवृत्त्यर्थं ककुभ इति वचनम् । सर्वग्रहणं सर्वकाकुभप्रगाथसंग्रहार्थम् । तेन बार्हतेष्वेवासौ विधिरिति मन्तव्यम् । "इत्यन्त उक्थ्यः"३ । "एवमन्त उक्थ्यः क्रतुरित्यर्थः । इत्यन्तोऽग्निष्टोम इत्यस्यानन्तरम् एतानि शस्त्राण्युक्थ्यः इत्यन्ते उक्थ्य इत्येतावत्युच्यमाने एतानि शस्त्राण्युक्थ्य एवेति गम्यते । तत् किमर्थमुक्थे तु होत्रकाणामित्यत्रोक्थ्यग्रहणम् । अयमभिप्रायः । अथ सोमेनेति त्रिषु ध्यायेषु ज्योतिष्टोमाख्यः सोमयागोऽधिकृतः, स च संस्थाभेदान्नामभेदाच्चतुर्धा भिन्नो व्युत्पादितो भवति । तत्र सर्वत्र सोमेन यजेतेत्येतद्विधिविहित एवैको यागः केनचिदुपाधिवशेनाभ्यस्तो भिन्नो नाम प्रतीयते । अतः सर्वेषां प्रकरणित्वे प्राप्ते अग्निष्टोम एव प्रकरणी, अन्ये तस्यैव गुणा विकारा इति ज्ञापयितुमुक्थ्य इत्युच्यते । उक्थ्य एतावदेवौपदेशिकं, अन्यत् सर्वमातिदेशिकमित्यर्थ इत्येवं आश्व०श्रौ०६,१,क० तस्य प्रकारोऽभिहितः उक्थेन संस्कार्ये ग्रहरूपे ५पात्रभेदे । "उक्थ्यासुपयाम गृहीत, इति" कात्या०६,६,२१ । "उक्थ्यादि" कात्या० १४.२,१० उक्थ्यग्रहणादि प्राकृतं कर्म्म भवति उक्थ्यस्थाल्या उक्थ्यसंज्ञकं ग्रहं गृह्णाति" कर्कः । प्रागुक्थ्यान्मरुत्वतीयस्तृतपात्रेण इन्द्रमरुत्व इति" कात्या० १०,१,१४ । आग्रयणग्रहणानन्तरमुक्थ्यग्रहणात् प्रागिति" कर्कः ।

उक्ष— सेचने भ्वा० सक०प० सेट् । उक्षति औक्षीत् उक्षाम्-बभूव आस चकार । उक्षिता उक्ष्यात् उक्षिष्यति औक्षिष्यत् । उक्षितव्य: उक्षणीयः. उक्ष्यः । उक्षिता उक्षन् उक्षितः । उक्षा उक्षणम् । उक्षित्वा समुक्ष्य । कर्म्मणि उक्ष्यते औक्षि उक्ष्यमाणः "उक्षन्यस्मै मरुतो हिताइव" ऋ०१,१६६,२, "औक्षन् शोणितमम्भोदाः" भट्टिः । "उक्षां प्रचक्रुर्नगरस्य मार्गान्" भट्टिः। अव्यवधाने एवास्य प्रयोगविधानात् प्रयत्नव्यवधानाद्यास्य प्रसक्तिरतोऽत्र जयमङ्गलेन उक्षान् प्रचक्रुरिति पठितम् उक्षान् सिक्तानिति तदर्थः "घृतमुक्षता मधुवर्णमर्चते" ऋ०१,८७,२, "गङ्गाप्रवाहोक्षितदेवदारु" कुमा०। "गन्धवद्रुधिरचन्दनोक्षिता" "किञ्चिदुक्षितशिखण्डकावुभौ" रघुः । क्वचिदस्य पदव्यत्ययः । "अहमपो अपिन्वमुक्षमाणाः" ऋ० ४,४२,४ "तमुक्षमाणमव्यये वारे पुनन्ति" ऋ०६,६६,५' "प्रसव्यमात्मानमुदकैः पर्य्युक्षन्ते" आश्व०श्रौ०। उक्षणञ्च द्रव्यद्रव्येण संयोगविशेषजनकव्यापारः । (सेचा) ।

अभि+अवतानपाणिना सेचने । "उत्तानेनैव हस्तेन प्रोक्षणं परिकीर्त्तितम् । न्यञ्चताऽभ्युक्षणं प्रोक्तं तिरश्चाऽवोक्षणं स्मृतमिति" छन्दोप० उक्तः तथार्थत्वम् । अभ्युक्षणशब्दे विवृतिः "परस्पराभ्युक्षणतत्पराणाम् रघुः । "शिरसि शकुन्तलामभ्युक्ष्य" शकु०। "अथाद्भिरभ्युक्षति, एष वा अपां सम्भारो यदद्भिरभ्युक्षति" शत०ब्रा०२,१,१,२,।

अव+तिर्य्यक्पाणिना सेचने "दध्ना मधुमिश्रेणावोक्षति" तैत्ति० । "उद्धतमवोक्षितं भवति यत्रैनमुपावहरत्युद्धते वा अवोक्षितेऽग्निमादधति" शत०ब्रा०६, ४,४,१८, "उद्धत्यावोक्षति यत्रैनमुपावहरति" शत०ब्रा० ६,८,१,१२, । "तिरश्चाऽवोक्षणं स्मृतम्" छन्दोग०।

आ+समन्तात् ईषद्वा सेचने "आ नो गव्यूतिमुक्षतं घृतेन" ऋ०७,६२,५ व्यवहितार्थेति उपसर्गस्य व्यवधानम् ।

उद्+ऊर्द्ध्वदेशात् सेचने । "किं तृतीयमेतां दिशमुदौक्षीः"? शत०ब्रा० ११,५,२,४। [ब्रा०३,७,४,६' ।

उप+सामीप्येन सेचने । "अधस्तादुपोक्ष्यापोदेवी:" शत०

निस्+ निशेषेण सेचने । "यत्सुच्युप आनीय निरौक्षिषम्" शत०ब्रा०११,५,२,७ ।

परि+वेष्टनाकारेण समन्तात् सेचने "प्रसव्यमुदकैरात्मानं पर्य्युक्षन्ते" आश्व०६,१२, "प्रसव्यं वामावर्त्तनेन वेष्टयित्वेत्यर्थः ना०वृ०।"आहवनीयं पर्य्युक्ष्योदधारां निनयत्या गार्हपत्यात्"कात्या०४,१२,१६, "पर्य्युक्ष्य हस्तगृहीतेनोदकेन समन्तात् सिक्त्वा" कर्कः।"पर्य्युक्षितं समिदसि" कात्या० ४,१४,२०।

प्र+उत्तानहस्तेन सेचने "उत्तानेनैव हस्तेन प्रोक्षणं परिकी-

क्षितम्” छन्दो० उक्तेस्तथार्थता “अपिधानं प्रोक्षिताभ्याम्” कात्या० ६,१०,४,। “तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः” ऋ० १०,९०,७, “प्रोक्षिताः स्थ अग्नये त्वा जुष्टं प्रोक्षामि। अग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि” यजु० १,१३, “कृष्णोऽस्याखरेष्ठो अग्नये त्वा जुष्टं प्रोक्षामि। वेदिरसि बर्हिषे त्वा जुष्टां प्रोक्षामि। बर्हिरसि स्रुग्भ्यस्त्वा जुष्टं प्रोक्षामि” यजु० २,१, “रक्षोहणो वो वलगहनः प्रोक्षामि वैष्णवान्” यजु० ५,२५, “संस्कारः पुंस एवेष्टः प्रोक्षणाभ्युक्षणादिभिः” कुसुमा० “इत्यक्तेः पुरुषसंस्कार इति नैयायिकाः। मीमांसकमते द्रव्यसंस्कारः इति भेदः अभ्युक्षणशब्दे विवृतिः। “प्रोक्षितं भक्षयेन्मांसम्” मनुः।

सम्+प्र+ सम्यक् प्रोक्षणे। “प्राणानायम्य संप्रोक्षेत् त्र्यचेनाब्दैवतेन तु” या० स्मृतिः।

वि+विशेषेण सेचने “अयो वि रोरुवज्जठरे विश्वगुक्षते” ऋ० १०,९२,५। “व्यवहिताश्चेति” पा० उपसर्गव्यवधानम्। “केशमिश्रेव हास तां व्यौक्षदोषं धयेति” शत० ब्रा० २,२,४,५।

अभि+वि+ आभिमुख्येन विशेषेण सेचने। “तत्तस्माद् तथैव संसृज्याम् यथाग्निं नाभिव्युक्षेत्” शत० ब्रा० १,२,१,१०

सम्+सम्यक् सेचने। “समुक्षितं सुतं सोमम्” ऋ० २, ३०,५। “इदं ते अन्नं युज्यं समुक्षितम्” ऋ० ८,४,१२

उक्ष त्रि० उक्ष–अच्। १सेक्तरि “सुप्रतिष्ठा मनोष्टहृदुक्षाय नः” यजु० ७,८४, कर्मणि घञ्। २सिक्ते “उक्षान् प्रचक्रुः” भट्टिः

उक्षण न० उक्ष–ल्युट्। द्रवद्रव्येण संयोजनव्यापारे “वसिष्ठमन्त्रोक्षणजात् प्रभावात्” रघुः। [नावस्थे वृषे।

उक्षतर पु० अल्प उक्षा हुस्वत्वे तरप्। अप्राप्तवाह-

उक्षन् पु० उक्ष–कनिन्। १वृषे, २ऋषभौषधौ च। “विदलितमहाकूलास्सुक्ष्णां विषाणविघट्टनैः” माघः। “उक्षेव यूथा परियन्नरावीत्” ऋ० ९,७१,९। “उक्षा मिमाति प्रति यन्ति धेनवः” ऋ० ९,६९,४। “शरद्घनाद्दीधितिमानिवोक्ष्णः” कुमा० “न वराहं न चोक्षाणं न मृगान् विविधांस्तथा” भा० अ० १२१। “उक्षाणं पक्त्वा सह ओदनेन तस्मात् कपोतात् प्रति ते नयेद्वा” भा० व० १९६। “नीलं चोक्षाणं मेध्यमप्यालभेत” भा० आश्व० ११अ०। ३सेचनकर्त्तरि। सेचके त्रि०। “उक्षा समुद्रो अरुषः सुपर्णः” ऋ० ५,४७,३, उक्षा बिभर्त्ति भुवनानि वाजयुः” ऋ० ९,८३,३। आत्मन उक्षाणं वृषमिच्छति उक्षीयति वेदे तु न नलोपः। उक्षण्यति। “वयं हि वां हवामहे उक्षण्यन्तो व्यश्ववत्” ऋ०, ६,९। ततः कर्त्तरि उ उक्षण्यु आत्मनोऽपेक्षौ “व्यश्वस्तावस्तुविदमुक्षण्युरप्राणाद्दृपिः” ऋ० ८,२३,१८। जातवृद्धमहद्भ्यः परस्य अच् समा०। जातोक्षः वृद्धोक्षः महोक्षः “महोक्षं वा महजं वा श्रोत्रियाय प्रकल्पयेत्” स्मृतिः “विलोक्य वृद्धोक्षमधिष्ठितं त्वया” कुमा०। उक्ष्णोऽपत्यम् अण् टिलोपः। औक्ष्ण तदपत्ये तस्येदमित्यणि अनपत्ये तु नलोपः न टिलोपः। औक्ष सि० कौ० उक्ष्णां समूहः वुञ्। औक्षक वृषसंघे न०। कुरुपूर्ववंश्ये ४राजभेदे च। तस्य गोत्रापत्ये ण्य न वृद्धिः। उक्षण्यतद्गोत्रापत्ये पुंस्त्री०। तदन्तत्वात् फक् उक्षण्यायनः “ऋज्रमुक्षण्यायने रजतं हरयाणे” ऋ० ८,५,२,२२। “उक्षनामा कश्चित् कुरोः पूर्व्वजः तस्य गोत्रपत्ये उक्षन् शब्दात् ण्यः तदन्तत्वात् फक्। संज्ञापूर्व्वकविधिरनित्य इति न वृद्धिः अयञ्च छान्दसः लोकेऽस्य न प्रयोगः” भा०।

उक्षवश त्रि० उक्षा वशा वशास्थानीयो यस्य। वन्ध्याऽलाभे वशात्वेन कल्पितवृषके १यजमानभेदे। तत्र वशारूपादिकमभिधाय वृषस्य तत्प्रतिनिधित्वम्” शत० ब्रा० ४,५,१,९, उक्तं यथा “मैत्रावरुणी वशा भवति यत्र वै देवाः रेतः सिक्तं प्राजनयंस्तदग्निमारुत” मित्युपक्रम्य पश्वादीनामुत्पत्तिमभिधाय “अथ यदा न कश्चन रसः पर्य्यशिष्यत त एषा मैत्रावरुणी वशा समभवत् तस्मादेषा न प्रजायते रसाद्धि रेतसः पशवस्तद् यदन्ततः समभवत् तस्मादन्तं यज्ञस्यानुवर्त्तते तस्माद्वा एषात्र न प्रजायते मैत्रावरुणी वशाऽवक्लृप्ततमा भवति यदि वशां न विन्देदप्युक्षवश एव स्यात्”। २वृषायत्ते त्रि०। “उक्षवेहदपि वेहत्स्थानीयकल्पितवृषे यजमाने” शत० ब्रा० उद्विधिरुक्तः।

उक्षित त्रि० उक्ष–क्त। सिक्ते उक्षधातौ उदा०।

उख गतौ भ्वादि० पर० सक० सेट्। ओखति औखीत् उवोख ऊखतुः ओखिता उख्यात् ओखिष्यति औखिष्यत् उखा।

उख गतौ इदित् भ्वादि० पर० सक० सेट्। उङ्खति औङ्खीत्। उङ्खाम्—बभूव आस चकार। उङ्खिता उङ्ख्यात् उङ्खिष्यति औङ्खिष्यत्।

उखर्वल पु० उख–वलच् रुडागमः किच्च। भूरिपत्रे तृणभेदे राजनि० “बलदो रुचिकारी च पशूनां सर्वदा हितः”। अस्य गुणाः राजनि० उक्ताः।

उखल पु० उख–कलच्। भूरिपत्रे तृणभेदे उखर्वले राजनि०।

उखा स्त्री उख–क। १पाकपात्रे पिठरादौ। (हाँड़ि)।

"यन्नीक्षणं मांस्पचन्या उखाया उत पात्राणि यूष्ण आसेचनानि" ऋ० १,१६२,१३। ऋचमेतामाश्रित्यैव "मांस्पचन्या उखायाः" इति पा० भाष्यकृतोदाहृतम्। यज्ञियेष्टकासाधने २चुल्लीरूपे पदार्थे तत्करणप्रकारः कात्या० श्रौ० १६,१,१, सूत्रादौ उक्तः तच्च इष्टकाशब्दे ९९१पृष्ठे दर्शितम्। "उखास्रत्" सि०कौ०शत०ब्रा०तु स्थालीपरो-खाशब्दस्य निरुक्तिरन्यथैवोक्ता यथा। "अथैनमुखयाद्य बिभर्त्ति इमे वै लोका उखा इमे वा एते लोका यन्न-मर्हन्ति एभिरेतं लोकं देवा अबिभरुरेभिरेवैनमेतल्लोकैर्बि-भर्त्त्येषा यदुखा नाम एतद्वै देवता वैतेन कर्मणैतयाऽ-तेमाँ लोकानुदखनन् यदुखनंस्तस्मादुत्खा उत्खा वैता-मुखेत्याचक्षते परोक्षं, परोक्षकामा हि देवाः" ६,७,१,२२, २३। अस्य "न क्रोड़ादिबह्वचः" पा० क्रोड़ादिग-णपाठात् स्वाङ्गवाचिताऽपि तेन हृहदुखेत्यत्र न ङीष्। उखायां संस्कृतं यत्। उख्य तत्र संस्कृते त्रि०। भवार्थे दिगा० यत्। उख्य उखाभवे त्रि०। तस्य वर्ग्यादि० कर्म्मधारयसमासे आद्योदात्तता।

उख्य त्रि० उखायां संस्कृतं यत्। उखासंस्कृते मांसादौ "शूल्यमुख्यञ्च होमवान्" भट्टिः उखायां भवः दिगा० यत्। उखाभवे त्रि०। "उख्यान् हस्तेषु बिभ्रतः" अथ०४,१४,२। उख्यामग्नीन्। "अथ यद्येष उख्योऽग्निरनुगच्छेत्" शत०ब्रा०६,६,४,१०। "प्रागनःकृत्वोख्यस्योत्तरतः समिदाधानम्" "अपूख्यभस्मावपनं क्रयणीयादौ" कात्या० १६,६,१०,१५,२२। "संबिलां कृत्वोख्यं निरवपति समि-तमिति" १७,१, १९। स्त्रियां टाप् ततः कल्यादि० जातादौ ढकञ्। औख्येयः उख्याजाते त्रि०।

उगण त्रि० उद्गूर्णं उदायुधः गणो यस्य पृषो०। उदा-युधगणोपेते "याः सेना अभीत्वरीराव्याधिनीरुगणा उत" यजु० ११, ७७, "उगणाभ्यस्तृंहतीभ्यश्च वोनः मोनमः" यजु० १६,२४।

उग्र पु०उच—रक् गश्चान्तादेशः। १महादेवे, वायुमूर्त्तिधा-रिणि शिवे क्षत्रियात् ऊढायां शूद्रायामुत्पन्ने २संकीर्ण-वर्णे (आगुरी) उग्रगुणत्वात् ३शोभाञ्जनवृक्षे, ४केरलदेशे, क्रूरसंज्ञके "उग्रः पूर्व्वमघान्तका" इति ज्योतिषोक्ते ५नक्षत्रपञ्चके च ६वत्सनाभाख्ये विषे न०। ७उत्कटे त्रि०। ८वचायां, ९यवान्यां, १०धन्याके, ११उग्रजातेः स्त्रियां च स्त्री टाप्। तत्र "शिववाचकोग्रनामनिरुक्तिः" यथा 'त्वमग्रीदुग्रोऽसीति तद्यदस्य तन्नामाकरोत् वायुस्तद्रू-पमभवद्वायुर्वा उग्रस्तस्माद्यदा बलवद्वात्युग्रो वातीत्याहुः सोऽब्रवीत् ज्यायान् वा अतोऽस्मि" शत०ब्रा०६,१,२,१२। उक्तश्रुत्युक्तेः १२वायौ पु०। उग्ररूपत्वादेव अष्टमूर्त्तिपूजने उग्राय वायुमूर्त्तये नम इति तिथितत्त्वे उक्तम्। "शूद्रस्य विप्रकन्यायां जात उग्र इति स्मृतः" उशनसोक्ते १३चा-ण्डालरूपवर्णसंकरे च "क्षत्रियाच्छूद्रकन्यायां क्रूराचार विहारवान्। क्षत्रशूद्रवपुर्जन्तुरुग्रनामा ततोऽभवदिति मनूक्तादयं भिन्नः" "क्षत्त्रुग्रपुक्कसानान्तु बिलौकोबधबन्ध-नमिति" मनुः करणेन समा चास्य वृत्तिर्भार्गवनिर्म्मिता" स्मृतिः अस्योग्रस्य। १४उत्कृष्टे त्रि०। "उग्रं शर्म्म महि श्रवः" यजु०२६,१६। १५असुरभेदे पु० "विप्रचित्तिः शिबिः शङ्कुः" इत्युपक्रम्यासुरगणनायां "वेगवान् केतुमानुग्रः सोग्रव्यग्रोमहासुरः" हरिवं० ३६३अ०। तत्र वचायाम् "वत्साह्वयप्रियङ्गूग्रायष्ट्याह्वयरसाञ्जनैः" "उग्रा कुष्ठम्" तीक्ष्णगन्धा विड़ङ्गं श्रेष्ठं नित्यं चावपीड़े करञ्जम्"। "विड़-ङ्गभल्लातकचित्रकोग्राकटुत्रिकाम्भोदसुराह्वजाश्च" इति च सुश्रु०१६तीक्ष्णवीर्य्ये त्रि०। १७कालिकावरणभेदे स्त्री। "वि-प्रचित्ता तथोग्रोग्रप्रभा दीप्ता घनत्विषः" कालीकवचम्। १८उग्रतारायोगिनीभेदे च। "महाकाल्यथ रुद्राणी उग्रा भीमा तथैव च" कालिकापु०। १९दीर्घे च उग्रनासिकः। २०सर्व्वकार्य्येषु उद्यते "उग्रासोऽष्टण उग्रवाहवः इति" ऋ०८,२०,१२। उग्रासः उद्गूर्णाः सर्वकार्य्येषु उद्यताः" भा०उच—समवाये इति धातोर्निष्पन्नतया क्रोधतीक्ष्णरसा-दिना विशेषसम्बन्धात् एषां च सर्वेषाम् उग्रत्वम्। उग्र-प्रभोग्रदंष्ट्रादियोगिनीभेदेऽपि उत्कटाद्यर्थता ज्ञेयम्" भा०।

उग्रक त्रि०उग्र+संज्ञायाम् कन्। नागभेदे। नागनामाख्याने "आर्य्यकश्चोग्रकश्चैव नागः कनकपोतकः" भा०आ०३५ अ०। २शूरे च "उग्रपुत्रशब्दे उदा०।

उग्रकर्म्मन् त्रि०उग्रं कर्म्मास्य। १हिंस्रे पश्वादौ २प्राणिहिं-सके ३क्रूरादौ च। [वृक्षभेदे राजनि०।

उग्रकाण्ड पु० उग्रः काण्डोऽस्य। (करेला) कारवेल्ले

उग्रगन्ध पु०उग्रः गन्धः पुष्पादावस्य। १चम्पके, २कट्फले ३अ-र्जकवृक्षे ४लशुने च। ५हिङ्गुनि न०। ६उत्कटगन्धादौ त्रि०। ७यवान्याम् ८वचायाम्, ९अजमोदायाञ्च स्त्री टाप्। राजनिघण्टु मेदिनी।

उग्रचण्डा स्त्री० उग्रा चण्डा कोपना कर्म्म०। १देवीभेदे। तदाविर्भावः कालिका० पु०५९,६० अ० उक्तः "उग्र-चण्डा तु या मूर्त्तिरष्टादशभुजाऽभवत्। सा नवम्यां

पुरा कृष्णपक्षे कन्यां गते रवौ । प्रादुर्भूता महाभागा योगिनीकोटिभिः सह”। अनयैव मूर्त्त्या दक्षयज्ञो विनाशितः । यथा “आषाढस्य तु पूर्णायां सत्रं द्वादशवार्षिकम् । दक्षः कर्त्तुं समारेभे वृताः सर्व्वे दिवौकसः । ततोऽस्मिन् न वृतस्तेन दक्षेण सुमहात्मना । कपालीति सती चापि तज्जायेति च नो वृता । ततो रोषसमायुक्ता प्राणांस्तत्याज सा सती । त्यक्तदेहा सती चापि चण्डमूर्त्तिस्तदाऽभवत् । ततः प्रवृत्ते सत्रे तु तस्मिन् द्वादशवार्षिके । नवम्यां कृष्णपक्षे तु कन्यायां चण्डमूर्त्तिधृक् । योगनिद्रा महामाया योगिनीकोटिभिः सह । सतीरूपं परित्यज्य यज्ञभङ्गमथाकरोत् । शङ्करस्य गणैः सर्व्वैः सहिता शङ्करेण च । स्वयं बभञ्ज सा देवी महासत्रं महात्मनः” । “उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका” इत्युक्ते २दुर्गावरणभेदे च ।

उग्रता स्त्री उग्रस्य भावः कर्म्म वा तल् । उग्रस्य १भावे २कर्म्मणि च २अलङ्कारोक्ते व्यभिचारिगुणभेदे । तल्लक्षणं सा० द०। “शौर्य्यापराधादिभवं भवेच्चण्डत्वमुग्रता । तत्र स्वेदशिरःकम्पतर्ज्जनाताडनादयः”। त्व । उग्रत्व तद्भावकर्म्मणोः न० । ष्यञ् । औग्र्य तत्रैव न० ।

उग्रतारा स्त्री उग्रापदपि भयात् तारयति भक्तान् तॄ-णिच्-अच् ५त० । तारारूपायां देव्याम्। “तारकत्वात् सदा तारा महामोक्षप्रदायिनी। उग्रापत्तारिणी यस्मादुग्रतारा प्रकीर्त्तितेति तन्त्रोक्ताऽस्य वा निरुक्तिः । तदाविर्भावः कालिकापु० ८१अ० “विनिःसृतायां देव्यास्तु मातङ्ग्याः कायतस्तदा । भिन्नाञ्जननिभा कृष्णा साऽभूद्गौरी क्षणादपि । कालिकाख्याऽभवत् सापि हिमाचलकृताश्रया । तामुग्रतारामृषयो वदन्तीह मनीषिणः। उग्रादपि भयाद्रक्षेत् यस्मात् भक्तान् सदाम्बिका । एषैवैकजटाख्याति यस्मात्तस्या जटैकिका । शृणुतं चिन्तनं चास्याः सम्यक् वेतालभैरवौ ! । यथा ध्यात्वा महादेवीं भक्तः प्राप्नोत्यभीप्सितम् । चतुर्भुजां कृष्णवर्णां मुण्डमालाविभूषिताम् । खड्गं दक्षिणपाणिभ्यां बिभ्रतीन्दीवरं त्वधः । कर्त्रीञ्च खर्परञ्चैव क्रमाद्वामेन बिभ्रतीम् । खं लिखन्तीं जटामेकां बिभ्रतीं शिरसा स्वयम् । मुण्डमालाधरां शीर्षे ग्रीवायामपि सर्व्वदा । वक्षसा नागहारन्तु बिभ्रतीं रक्तलोचनाम् । कृष्णवस्त्रधरां कट्यां व्याघ्राजिनसमन्विताम् । वामपादं शवहृदि संस्थाप्य दक्षिणं पदम् । विन्यस्य सिंहपृष्ठे तु लेलिहानां शवं स्वयम् । साट्टहासमहाघोररावयुक्तातिभीषणा । चिन्त्योग्रतारा सततं भक्तिमद्भिः सुखेप्सुभिः” अन्यत्र च “रूपं शृणु नरश्रेष्ठ ! येन ध्येया सदा शिवा । कृष्णा लम्बोदरी दीर्घा विरला रक्तदन्तिका । चतुर्भुजा कृशाङ्गी तु दक्षे कर्त्तृकखर्परौ । खड्गं चेन्दीवरं वामे शीर्षे त्वेकजटां पुनः । वामपादं शवस्योर्व्वौ निधायोत्थाप्य दक्षिणम् । शवस्य हृदये न्यस्य साट्टहासं प्रकुर्व्वती । नागहारशिरोमालाभूषिता कामदा परा” । अस्या रूपविषये बहुविप्रतिपत्तिरस्तीत्यतस्तन्निरूपणं तावत् क्रियते

राघवकृते पञ्चकल्पतरौ मन्दारवृक्षप्रकरणे श्रीशङ्कराचार्य्यकृततदीयमूर्त्तिप्रकाशकस्तोत्रं यथा । “ज्वलत्पावकज्वालयोज्ज्वालभास्वच्चितामध्यसंस्थां सुपुष्टां सुखर्वाम् । शवं वामपादेन कण्ठे निपीड्य स्थितां दक्षिणेनाङ्घ्रिणोरू निपीड्य । वृहद्भीमलम्बोदरीं मेघवर्णां समुत्तुङ्गपीनस्तनां भोगरम्याम् । जवारागरागप्रवृत्तत्रिनेत्रां ललज्जिह्वया दंष्ट्रया भीषणास्याम् । लसद्द्वीपिचर्म्मावृताङ्गीं नितम्बे जटाजूटमध्यस्थितेन्दीवरालीम् । शिरोदेशभास्वत्पिशङ्गाभसर्पां जटाजूटमध्यस्थिताक्षोभ्यमूर्तिम् । मिथः केशबन्धात् शिरश्छिन्नसद्योगलच्छोणितां मानवीं मुण्डमालाम् । दधानां च पञ्चाशदाख्यानसंख्याम् अतश्छिन्नमुण्डालिसंनामिताङ्गीम् । समाच्छिन्नमांसोत्करामूर्द्धदक्षे स्फुरत्पाणिना धारयन्तीं महासीम् । करे वाम ईषत्स्फुरद्रक्तनालं लसन्नीलपङ्केरुहं धारयन्तीम् । करे सव्य उच्चैरधस्ताद्दधानां शितां कर्त्तृकां वामपाणौ कपालम् । जगद्वर्त्ति संसारसंजातजाड्यं स्वतः कर्त्तृकाधारया खण्डयन्तीम् । विचित्रास्थिमालं करालं कपालं ललाटे च पञ्चाञ्चितं धारयन्तीम्” । इति तत्रैव मन्त्रप्रदीपे “महाष्टसिद्धिप्रकटाहिभूषणाम् इत्यनेन अष्टनागानामष्टसिद्धिरूपत्वोक्त्या तेषां भूषणविशेषकृतया यथा स्थितिस्तथा तत्रैव दर्शितं यथा । “जटास्वनन्तः श्रवसोश्च तक्षको महादिपद्मो हृदि हारभूषणम् । तथैव कर्कोटकृतोपवीतकम् स मेखलायामथ देवि ! वासुकिः । स शङ्खपालः किल कङ्कणोद्गतः करेषु, पद्मः पदयुक्समाश्रयः । भुजेषु नागः कुलिकोऽङ्गदे मतः” इति “तेषां वर्णा अपि क्रमशोदर्शिताः सितोऽथ रक्तोधवलश्च मेचकः तथैव पीतोऽप्यसितश्च पाटलः । भुजङ्गमानामिह वर्णजातयो भवन्ति सर्व्वेषु नरेषु सन्ति ताः”। तत्रश्चायं निर्गलितार्थः। अभ्रंलिहपिशङ्गैकजटा जवाकुसुमसङ्काशतक्षकनागकृतकुण्डला शुभ्रशेषनागकृतहारा दूर्व्वा-

इलश्यामनागकृतयज्ञोपवीता नीलवर्णा लम्बोदरी खर्वा चतुर्भुजा तत्र उपरि दक्षिणे सरक्तमांसखण्डमण्डितमुष्टिनिविष्टजटाजूटसंलग्नोग्रखड्गविभूषितकरा उपरि वामे रक्तनालकिञ्चिद्विकस्वरनीलोत्पलकरा अधस्तात् दक्षिणे बीजभूषितकर्त्तृकालङ्कृतकरा अधस्तात् वामे त्रिजगज्जाड्यखण्डककपालमण्डितकरा भुजचतुष्टये धूम्राभनागकृतकेयूरा कनकाभनागकृतकङ्कणा शवारूढा प्रत्यालीढस्थानाधिष्ठिता निर्भरयन्त्रणाप्रायेण शवहृदयस्थितदक्षिणचरणा शवोरुद्वयस्थितप्रसारितवामपादा कुन्दाभनागकृतकटीसूत्रा पाटलनागकृतनुपूरालङ्कृता सद्यश्छिन्नगलद्रुधिरान्योन्यकेशग्रथितपादपद्मप्रलम्बित–पञ्चाशत्तमन्तमुण्डमाला ज्वलदनलचितामध्यस्थिता द्वीपिचर्म्मालङ्कृतकृष्णवस्त्रा योषिदखिलालङ्कारभूषिता नीलावक्षोभ्यरूपनागभूषिता पञ्चसंख्यान्वितकपालमालाभूषितललाटा ललज्जिह्वा दृढदंष्ट्रा इत्येवं रूपा। अत्र प्रमाणवाक्ययोः शवहृदयस्थत्वे वामदक्षिणपादयोर्विकल्पइत्यतोमूर्त्तिद्वयमित्यन्ये। प्रत्यालीढपदाङ्घ्रिशवहृदित्युक्तेः आलीढं दक्षिणं पादं प्रत्यालीढं तु वामकमित्युक्तेः आलीढशब्दे दर्शितवाक्याच्च प्रत्यालीढशब्दस्य आलीढविपर्य्ययरूपत्वात् वामचरणस्यैव शवहृदयस्थितिरिति तु न्याय्यम्।

उग्रधन्वन् पु० उग्रं धनुर्यस्य ब०स० अनङ् समा०। १शिवे २शत्रुभिरसह्यधनुष्के त्रि०। "स इषुहस्तैः स निषङ्गिभिर्वशी संस्रष्टा सयुध इन्द्रोगणेन। संसृष्टजित् सोमपा बाहुशर्द्ध्युग्रधन्वा प्रतिहिताभिरस्ता" ऋ०१०,१०३,३।

उग्रनासिक त्रि० उग्रा दीर्घा नासिका यस्य। दीर्घनासिके।

उग्रपुत्र पु० उग्रस्य शूरस्य पुत्रः। १शूरवंशजाते। "काश्यो वा वैदेहो वोग्रपुत्रः उज्ज्यं धनुरधिज्यं कृत्वा" शत०ब्रा०१४,६,८। "उग्रपुत्रः शूरान्वयः" भा०। "उग्रस्य शिवस्य पुत्रः। २कार्त्तिकेये। उग्र उद्गूर्णः पुत्रो यस्मिन्। ३तादृशे गभीरजलाशये "आँ उग्रपुत्रे जिघांसतः" ऋ० ८,६७,११। उग्रपुत्रे उग्राः उद्गूर्णाः पुत्रायस्मिन् तत्तस्मिन्नुदके" भा०।

उग्रम्पश्य त्रि० उग्रं पश्यति उग्र+दृश–खश् मुम्। पापाशयतया क्रूरदृष्टियुक्ते उग्रजन्तौ व्याघ्रादौ "उग्रम्पश्याकुलेऽरण्ये" भट्टिः।

उग्रव्यग्र पु० असुरभेदे उग्रशब्दे उदा०।

उग्रशेखरा स्त्री उग्रस्य शेखरं वासस्थानत्वेनास्त्यस्याः अर्श० अच्। गङ्गायाम् शब्दरत्न०। सा हि तस्य शिरसि स्थिता

उग्रश्रवस् पु० उग्रम् उत्कृष्टं श्रुतिधरं श्रवः कर्णो यस्य। १रोमहर्षणे सौतौ। "लोमहर्षण उग्रश्रवाः सौतिः पौराणिको नैमिषारण्ये" भा० आ० १अ०। २धृतराष्ट्रपुत्रभेदे च। तत्पुत्रनामाख्याने "उग्रश्रवा उग्रसेनः क्षेममूर्त्तिस्तथैव च" भा० आ० ६७अ० "उग्रश्रवा उग्रसेनः सेनानीर्दुष्पराजयः" भा०आ० ११७अ०।

उग्रसेन पु० उग्रा सेना यस्य। १धृतराष्ट्रपुत्रभेदे, उग्रश्रवशब्दे उदा०। २कुरुवंश्ये नृपभेदे। "कुरोस्तु पुत्राश्चत्वारः सुधन्वा सुधनुस्तथा। परिक्षिच्च महाबाहुः" इत्युपक्रम्य "परिक्षितस्तु दायादो धार्म्मिको जनमेजयः। जनमेजयस्य दायादास्त्रय एव महारथाः। श्रुतसेनोग्रसेनौ च भीमसेनश्च नामतः" हरि० ३२ अ०। अयञ्च जनमेजयः अभिमन्युपौत्रात् भिन्नएव। अतएव "द्वावृक्षौ तव वंशेऽस्मिन् द्वावेव च परिक्षितौ। भीमसेनास्त्रयोराजन्! द्वौ चापि जनमेजयौ" इति जनमेजयं प्रति तत्रोक्तम्। यदुवंश्ये ३नृपभेदे च। "अन्धकञ्च महाबाहुं वृष्णिञ्च यदुनन्दनम्" इत्युपक्रम्य "अन्धकात् काश्यदुहिता चतुरोऽलभतात्मजान्। कुकुरं भजमानञ्च शमं कम्बलबर्हिषम्। कुकुरस्य सुतोधृष्णुर्धृष्णोस्तु तनयस्तथा। कपोतरोमा तस्याथ तैत्तिरिस्तनयोऽभवत्। जज्ञे पुनर्वसुस्तस्मादभिजिच्च पुनर्वसोः। तथा वै पुत्रमिथुनं बभूवाभिजितः किल। आहुकश्चाहुकी चैव ख्यातौ ख्यातिमतां वरौ" इत्याहुकोत्पत्तिमभिधाय "आहुकस्य तु काश्यायां द्वौ पुत्रौ संबभूवतुः। देवकश्चोग्रसेनश्च देवगर्भसमावुभौ। नवोग्रसेनस्य सुताः तेषां कंसस्तु पूर्व्वजः" हरि०३८अ०।

उग्रसेनज पु० जायते इति जन–ड ६त०। कंसे तस्योग्रसेनक्षेत्रेऽसुरजातत्वेन तत्पुत्रत्वम्। कंसशब्दे विवृतिः

उग्रादेव पु० उग्रेणादीव्यति आ+दिव–अच् ३त०। राजर्षिभेदे "अग्निना तुर्वशं यदुं परावत उग्रादेवँ हवामहे" ऋ० १,३६,१८, उग्रादेवनामकञ्च राजर्षिम्" भा०।

उग्रायुध पु० उग्राणि आयुधान्यस्य। १पौरवे राजभेदे तस्योत्पत्तिभीष्महननकथादि हरिवं० २० अ०। "अजमीढस्य दायादः" इत्युपक्रम्य तद्वंशपरम्परा उक्त्वा "तस्य वै सन्नतेः पुत्रः कृतो नाम महाबलः" इति कृतोत्पत्तिमुक्त्वा। "कार्त्तिरुग्रायुधः सोऽथ वीरः पौरवनन्दनः। बभूव येन विक्रम्य पृषतस्य पितामहः। नीपो नाम महातेजाः पञ्चालाधिपतिर्हतः। उग्रायुधस्य दायादः क्षेम्यो नाम महायशाः। क्षेम्यात् सुवीरो नृपतिः

सुवीरात्तु नृपञ्जयः । नृपञ्जयाद्बहुरथ इत्येते पौरवाः स्मृताः । सचाप्युग्रायुधस्तात । दुर्बुद्धिरभवत्तदा । प्रवृद्ध चक्रो बलवान्नीपान्तकरणो महान् । स दर्पपूर्णो हत्वाजौ नीपानन्यांश्च पार्थिवान् । पितर्युपरते मह्यं श्रावयामास किल्विषम् । महामात्यैः परिवृतं शयानं धरणीतले । उग्रायुधस्य राजेन्द्र ! दूतोऽभ्येत्य वचोऽब्रवीत् । अद्य त्वं जननीं भीष्म ! गन्धकालीं यशस्विनीम् । स्त्रीरत्नं मम भार्य्यार्थे प्रयच्छ कुरुनन्दन ! । एवं राज्यञ्च ते स्फीतं धनानि च न संशयः । प्रदास्यामि यथाकाम महं वै रत्नभाग् भुवि । मम प्रज्वलितं चक्रं निशम्येदं सुदुर्ज्जयम् । यत्रवो विद्रवन्त्याजौ दर्शनादेव भारत ! राष्ट्रं सेच्छसि चेत् स्वस्ति प्राणानां वा कुलस्य वा । शासने मम तिष्ठस्व न हि ते शान्तिरन्यथा । अधःप्रस्तारशयने शयानस्तेन नोदितः । दूतोऽन्तर्हितमेतद्वै वाक्यमग्निशिखोपमम् । ततोऽहं तस्य दुर्बुद्धेर्विज्ञाय मतमच्युत ! । आज्ञापयं वै संग्रामे सेनाध्यक्षांश्च सर्वशः । विचित्रवीर्य्यं बालञ्च मदुपाश्रयमेव च । दृष्ट्वा क्रोधपरीतात्मा युद्धायैव मनोदधे । निगृहीतस्तदाऽहं तैः सचिवैर्मन्त्रकोविदैः । ऋत्विग्भिर्द्दैवकल्पैश्च सुहृद्भिश्चार्थदर्शिभिः । स्निग्धैश्च शास्त्रविद्भिश्च संयुगस्य निवर्त्तने कारणं श्रावितश्चास्मि युक्तरूपं तदाऽनघ !" । "प्रवृत्तन्तस्य तच्चक्रमधर्मनिरतस्य वै । परदाराभिलाषेण तस्मात निवर्त्तितः । नत्वहं तस्य जाने तन्निवृत्तं चक्रमुत्तमम् । हतं स्वकर्म्मणा तत्तु पूर्व्वं सद्भिश्च निन्दितम् । कृतशौचः शरी चापी रथी निष्क्रम्य वै पुरात् । कृतस्वस्त्ययनो विप्रैः प्रायोधयमहं रिपुम् । ततः संसर्गमागम्य बलेनास्त्रबलेन च । त्र्यहमुन्मत्तवद्युद्धं देवासुरमिवाऽभवत् । स मयाऽस्त्रप्रतापेन निर्द्दग्धोरणमूर्द्धनि । पपाताभिमुखः शूरस्त्यक्त्वा प्राणानरिन्दम ! । एतस्मिन्नन्तरे तात ! काम्पिल्यात् पृषतोऽभ्यगात् । हते नीपेश्वरे चैव हते चोग्रायुधे नृपे । अहिच्छत्रं स्वकं राज्यं पित्र्यं प्राप महाद्युतिः । द्रुपदस्य पिता राजन्ममैवानुमते तदा" भा० हरिव० २० अ० २धृतराष्ट्रपुत्रभेदे । तन्नामकीर्त्तने भा० आ० ६७अ० । "उग्रायुधोभीमशरः कनकायुर्दृढायुधः" ।

उग्रेश पु० उग्राणामुत्कटरूपाणां प्रमथानामीशः । प्रमथाधिपे शिवे । "शङ्करं भवमीशानं पिनाकिं शूलपाणिनम् । त्र्यम्बकं शिवमुग्रेशं बहुरूपमुमापतिम्" भा० व० प० १०६ अ० ।

उङ्कुण पु० उमिति शब्दं कृत्वा कुणति हिनस्ति कुण कर्म्मणि शऽर्थे क । (उकुण) उत्कुणे । शब्दमाला ।

उच समवाये दि० पर० सक० सेट् । उच्यति इरित् औचत्—औचीत् उवोच ओचिता उच्यात् ओचिष्यति औचिष्यत् उचितः उग्रः । "उवोचिथ हि मघवन् देष्णम्" ऋ० ७,३७,३ । उचतिः सेवाकर्मेति माधवः "अभि वा एष एतानुच्यति" तैत्ति० । "नियो गृभं पौरुषेयीमुवोच" ऋ० ७,४,३ । "तत्र सेदिन्युच्यतु सर्वाश्च यातुधान्यः" अथ० २,१४,३ ।

उचथ न० उच्यते स्तूयतेऽनेन वच—कथन् । स्तोत्रे "यद्वां मानास उचथमवोचन्" ऋ० १,१८२,८ । उचथम् स्तोत्रम्" भा० । "एवात इन्द्रोचथमहेम" ऋ० २,१९, ७ । "कुविन्नो अग्निरुचथस्य" ऋ० १,१४३,६ ।

उचथ्य त्रि० उचथं स्तोत्रमर्हति यत् । १स्तुत्ये २राजभेदे पु० "उचथ्ये वपुषि यः स्वराट्" ऋ० ८,४६,२८ । "उचथ्ये स्तुत्ये । यद्वा उचथ्यो वपुश्च राजानौ" भा० ।

उचित त्रि० उच—क्त वच—कितच् वा । १न्यस्ते २परिचिते, ३युक्ते । "अमात्यैरिव नीवारभागधेयोचितैर्मृगैः" "दिनानि दीनोद्धरणोचितस्य" "प्रविश्य भीमासुरशोणितोचितः" महोग्रपक्षव्यपरोपणोचितम्" रघुः "सार्द्धं कथञ्चिदुचितैः पिचुमर्द्दपत्रैः" । "स्पर्शमुष्णमुचितं दधच्छिखी" माघः । "वंशोचितत्वादभिमानवत्याः" किरा० ।

उच्च त्रि० उत्चित्य बाहू चीयते, उपर्य्युपरिनिविष्टैरवयवैश्चीयतेऽसौ वा उद्+चि—ड । १उन्नते । "पुरस्तादुच्चम्" कात्या० ७,१,२१ । "स तदुच्चकुचौ भवन् प्रभाभर-चक्रभ्रमिमातनोति यत्" नैषधम् । अस्मात् उत्कर्षे तरप् तमप् । "किंस्वित् गुरुतरं भूमेः किं स्विदुच्चतरञ्च खात्" भा० व० ३१३अ० । उच्चतमम्" कात्या० ७,१, १५ । देवयजनवर्णने "परितः समीपदेशवर्त्तिप्रदेशेभ्यो यदतिशयेनोच्चम्" कर्कः । राशिचक्रमध्ये ग्रहविशेषाणां २राशिभेदे, यथा "मेषो वृषो मृगः कन्या कर्कमीनतुलाधराः । भास्करादेर्भवन्त्युच्चाः राशयः क्रमशस्त्विमे" ज्योति० त० । स्पष्टमुक्तं तत्रैव "रविर्मेषे वृषे चन्द्रो गुरुः कर्के बुधः स्त्रियाम् । शनिर्युके (तुलायाम्) मृगे (मकरे)भौमः शुक्रो मीने च तुङ्गिनः" । तेषां राशिभागभेदे परमोच्चतामाह तत्रैव "त्रिंशद्भागे दिशो (१०) रामाः (३)अष्टविंशतिभिस्तिथिः १५ । तथेषुः (५) सप्तविंशश्च विंशतिश्चोच्चसंज्ञकाः" । तथा च रवेर्मेषस्य दशमे भागे,

परमोच्चता चन्द्रस्य वृषे ३अंशे, कुजस्य मकरे २८भागे बुधस्य कन्यायाः १५भागे, गुरोः कर्के ५भागे, भृगोः मीने २७भागे शनेस्तुला २०भागे तथात्वम् । "स्वोच्चाच्च सप्तमं नीचं प्राग्वद्भागैर्विनिर्दिशेत् । उच्चान्तः स्वस्वसंज्ञः स्यात् नीचान्ते तु सुनीचकः" परिपूर्णबलं स्वोच्चे सुनीचे दुर्बलो ग्रहः। स्वोच्चनीचयोरन्तर्भागहारात् फलं दिशेत्" ज्योति०त० राजकत्वोस्तु "उच्चं भयुग्मं षष्ठभं त्रिकोणं कन्याष्टहं शुक्रशनी च मित्रे । सूर्यः शशाङ्कोऽपरजीवतश्च राहो रिपुर्विंशतिकः परांशः । सिंहस्त्रिकोणं धनुरस्वसंज्ञं मीनोऽष्टहं शुक्रशनी विपक्षौ। सूर्यारचन्द्राः सुहृदः समानौ जीवेन्दुजौ षड्विंशिनः परांशाः" ज्यो०त०। राशिपरत्वेऽस्य पुंस्त्वं भपरत्वे क्लीवतेति भेदः । भागहारात् ग्रहबलहेतुत्वं तदानयनप्रकारः नी०ता० सूर्यादेर्मेषादीन्युच्चान्यभिधाय "तत् सप्तमं नीचमनेन हीनो ग्रहोऽधिकश्चेत् रसभाद्विशोध्यः । चक्रात्, तदंशाद्गुणतो बलं स्यात्" २तथा च ताजके स्वोच्चे २०कला बलं तेन षड्भिः राशिभिर्यदि पूर्णबलं तदा दशांशैः किमिति १८०,२०,१, लं राशिकेन प्रत्येकांशं १/९ बलमायाति । जातके तु स्वोच्चे ६०कला बलं तेन प्रत्यंशं १/३ बलम् । नी०ताजके 'त्रिंशत् स्वभे विंशतिरुच्चभे स्वे" इति उक्तम् । जातके तु श्रीपतिः ६० कला बलमाह यथा "नीचोनोच्चग्रहोऽधिको यदि भवेत् षड्भात् तदा प्रच्युतचक्रात् हृतफलः खखाष्टखकुभि (१०८००) र्भक्तो बलं तज्जम् । पादोनं तु बलं ३/४, त्रिकोणाष्टके स्वर्क्षे १/२ दलं च मित्रे ३/८ बलांशा सुविमित्रगेऽथ चरणो १/४ मित्रे समर्क्षेऽष्टमः। १/८ । शत्रुभे भवति षोडशांशकः १/१६ चाधिशत्रुभवने रदांशकः १/३२ । अत् त्रिकोणादौ पादोनादिबलकथनात् स्वोच्चे पूर्णबलमिति प्रतीयते तेन ६०कलात्मकं बलम् ।

उच्चाभिमानिनि ग्रहाणां गतिभेदकारके भगणस्थे ३जीवभेदे तेषां शाकर्षणात् ग्रहाणामुच्चादिगतिसम्भवः ।

स च द्विविधः शीघ्रोच्चः मन्दोच्चश्च ताडशोच्चतायां कारणञ्च सू०सि० रङ्गनाथाभ्यां दर्शितं यथा "अदृश्यरूपाः कालस्य मूर्त्तयो भगणाश्रिताः । शीघ्रमन्दोच्चपाताख्या ग्रहाणां गतिहेतवः" सू०सि०१। "शीघ्रोच्चमन्दोच्चपातसञ्ज्ञकाः पूर्वोक्तपदार्था जीवविशेषाः सूर्यादिग्रहाणां गतिकारणभूताः सन्ति । ननु कालेनैव ग्रहचलनं भवतीति कालो गतिहेतुरेव इत्यत आह कालस्येति । पूर्वं प्रतिपादितकालस्य स्वरूपाणि तथः तेषां कालमूर्त्तित्वेन ग्रहगतिहेतुत्वं नासम्भवीति भावः। ननु कालस्य घट्यादिमूर्त्तित्वादेषां तदात्मकत्वाभावात् कथं कालमूर्तित्वमित्यत आह भगणाश्रिता इति । भगोलस्थक्रान्तिवृत्तानुस्यूतग्रहगोलस्थक्रान्तिवृत्तप्रदेशाश्रिता इत्यर्थः । तथा च ग्रहराश्यादिभोगानां कालवशेनैवोत्पन्नत्वात् तदात्मकानां कालमूर्तित्वमिति भावः। ननु ते दृश्यन्ते कुतो नेत्यत आह अदृश्यरूपा इति । वायवीयशरीरा अव्यक्तरूपत्वादप्रत्यक्षा इति भावः । एवं च ग्रहाणामुच्चादिसम्भवात् स्पष्टक्रियोत्पन्नेति तात्पर्यम् १। अथानयोरुच्चपातयोर्मध्ये उच्चयोर्गतिहेतुत्वं प्रतिपादयति" र०ना०१ "तद्वातरश्मिभिर्बद्धास्तैः सव्येतरपाणिभिः। प्राक् पश्चादपकृष्यन्ते यथासन्नं स्वदिङ्मुखम्" २ सू०सि०। "तेषामुच्चसंज्ञकजीवानां वायुरूपा ये रश्मयो रज्जवस्ताभिर्बद्धा बिम्बात्मकग्रहास्तैरुच्चसंज्ञकजीवैः सव्यवामहस्तरूपवक्रत्वेन रज्जावाकृष्यमाणवत् हस्ताभ्यामित्यर्थः । स्वदिङ्मुखं स्वाभिमुखं यथासन्नं ग्रहबिम्बं भवति तथा प्राक् पश्चात् पूर्वपश्चिमभागाभ्यामित्यर्थः । अपकृष्यन्ते आकृष्यन्ते । अयमभिप्रायः भगणगोलस्थक्रान्तिवृत्तानुस्यूतग्रहाकाशगोलान्तर्गतक्रान्तिवृत्ते कक्षारूपे स्वस्वप्रदेशे ग्रहोच्चपाताःस्थितास्तिष्ठन्ति । तत्र बिम्बव्यासोनकक्षाकारवृत्तं प्रवहवायुनिरिक्तवायुरूपं स्वतोगतिस्थाने लभ्यमानं ग्रहबिम्बव्यासे पूर्वापरे शीतकरणीयरूपवर्त्मान्तर्गतमस्ति । अथ ग्रहबिम्बस्य स्वस्थानात् स्वगत्या गच्छदपि वामहस्तस्थितरज्ज्वा चोच्चस्थानात्, पूर्वप्रदेशे ग्रहस्थानात् पश्चिमरूपेण दक्षहस्तस्थरज्ज्वावयवात्मकेन स्वस्थानात् पश्चात् स्वाभिमुखमपकृष्यते निरन्तरमुच्चदेवतैः स्वगत्या यावत् षड्भान्तरं तयोरन्तरं तन्मार्गेणाकर्षणसम्भवात् पूर्वस्मिन् गच्छद्बिम्बं, सव्यहस्तस्थितरज्ज्वोच्चस्थानात् पूर्वस्मिन् स्वाभिमुखमाकृष्यते स्वगत्या निरन्तरं यावदन्तराभावस्तयोरिति" र०ना०। "अथात एवैकरूपां पूर्वाधिकारावगतां गतिं त्यक्त्वा कुतः प्रत्यहविलक्षणां गतिं गच्छन्ति ग्रहा इत्यत आह । "प्रवहाख्यो मरुत् तांस्तु स्वोच्चाभिमुखमीरयेत् । पूर्वापरापकृष्टास्ते गतिं यान्ति पृथग्विधाम्" सू०सि०२। "प्रवहाख्यः प्रवहसंज्ञको महावायुः पश्चिमाभिमुखं भ्रमणात् तत्कारादुच्चांनि स्वोच्चाभिमुखं स्वस्य प्रवहभ्रमणेनोच्चं भावप्रधाननिर्देशादुच्चता यस्यां दिशि तत् स्वोच्चं पूर्वदिक् पूर्वभाग इव ग्रहाणां प्रवहभ्रमे-

चोच्चगमनदर्शनात् तत्सम्मुखं पूर्व्वदिशीति तात्पर्य्यार्थः । ईरयेत् पश्चिमाभिमुखभ्रमणशीलप्रागुक्तप्रवहावलम्बनरूपेण चालयतीत्यर्थः । अतः कारणात् ते ग्रहाः पूर्वं पश्चिमदिशोराकृष्टाः पृथग्विधां प्रथमावगतैकरूपभिन्नप्रकारावगतां प्रतिक्षणविलक्षणां गतिं गमनक्रियां यान्ति प्राप्नुवन्ति । अवलम्बनाकर्षणाभ्यां प्रतिदिनं ग्रहाणां गतेरन्यादृशत्वं तदनुसारेण ग्रहचारज्ञानं युक्तमिति ग्रहाणां स्पष्टक्रियोत्पन्नेति भावः । यद्वा ननु वायुरज्जुभिः कथं ग्रहाणामाकर्षणं सम्भवति तद्रज्जूनां शिथिलतया घनीभूतत्वाभावेनाकर्षणायोग्यत्वादित्यत आह । प्रवाहाख्य इति । उच्चदेवताहस्तहृदयस्थितकक्षाकारस्थूलं वायुः प्रवहवायुसम्बन्धात् प्रवहसञ्ज्ञो न पश्चिमाभिमुखभ्रमत्प्रवहात्मकत्वात् ग्रहान् स्वोच्चाभिमुखं स्वोच्चदेवतास्थानसम्मुखमीरयेत् प्रेरयति चालयति । तुङ्गादुच्चस्थानात् पूर्वस्मिन् ग्रहे वायुः पश्चिमगत्या ग्रहं चालयति पश्चिमस्थे वायुः पूर्वगत्या ग्रहं चालयतीत्यर्थः । तथा च कक्षाकारस्थूलं तदा तदा तथा तथा भ्रमतीति दैवतैरालक्ष्यत इत्युपचारादुच्यत इति भावः । अत एव ग्रहाणां स्पष्टक्रियोत्पन्नेत्याह । पूर्वापराकृष्टा इति उच्चदैवतैः पूर्वापरदिशयोराकृष्टा ग्रहाः पृथग्विधां मध्यमातिरिक्तप्रकारां गतिं गमनक्रियां यान्ति । अतो न केवलं मध्यक्रियया निर्वाहः" २ र०ना० । अथ प्राक्पश्चादपकृष्यन्त इत्युक्तं विशदयति । "ग्रहात् प्राग्भगणार्द्धस्थः प्राङ्मुखं कर्षति ग्रहम् । उच्चसञ्ज्ञोऽपरार्द्धस्थस्तद्वत् पश्चान्मुखं ग्रहम्" ४ सू०सि० । "ग्रहस्थानात् पूर्वभागस्थराशिषट्कस्थित उच्चसञ्ज्ञो जीवो ग्रहविम्बं पूर्व्वदिगभिमुखं स्वाभिमुखं कर्षत्याकर्षति । अपरार्द्धस्थो ग्रहस्थानात् पश्चिमभागस्थराशिषट्कस्थितउच्चसञ्ज्ञो जीव इत्यर्थः । ग्रहविम्बं पश्चान्मुखं पश्चिमदिगभिमुखं स्वाभिमुखं तद्वदाकर्षतीत्यर्थः" ४ र०ना० । "अथ पूर्वोक्तसिद्धं फलितमाह । 'स्वोच्चापकृष्टा भगणैः प्राङ्मुखं यान्ति यद्ग्रहाः । तत् तेषु धनमित्युक्तमृणं पश्चान्मुखेषु तु' सू०सि० ५ । "स्वोच्चजीवाकर्षिता ग्रहाः पूर्वाभिमुखं भगणैः राशिभिर्भगोलस्थक्रान्तिवृत्तानुकृतकक्षाकाशगोलान्तर्गतक्रान्तिवृत्ते द्वादशराश्यन्तिके चक्राधिविभागैरित्यर्थः । यद् यत्संख्यामितं गच्छन्ति तत् तत्संख्यामितं भागादिकं फलरूपं तेषु पूर्वगतग्रहराश्यादिभोगेषु धनं योज्यम् । पश्चान्मुखेषु पश्चिमाकर्षितग्रहपूर्वागतराश्यादिभोगेषु तत्काराद्यत्संख्यामितं फलरूपं पश्चिमतो गच्छन्ति तदित्यर्थः । ऋणं हीनमिति एतत् पूर्वैः कथितम्" र०ना०५ । शि०शि० "सृष्ट्वा भचक्रं कमलोद्भवेन ग्रहैः सहैतद्भगणादिसंस्थैः । शश्वद्भ्रमे विश्वसृजा नियुक्तं तदन्ततारे च तथा ध्रुवत्वे । ततोऽपराशाभिमुखं भपञ्जरे सखेचरे शीघ्रतरे भ्रमत्यपि । तदल्पगत्यैन्द्रदिशं नभश्चराश्चरन्ति नीचोच्चतरात्मवर्त्मसु" । "यदेतद्भचक्रं ग्रहैः सह भ्रमदृश्यते तद्विश्वसृजा जगदुत्पादकेन कमलोद्भवेन ब्रह्मणा सृष्ट्यादौ सृष्ट्वा ततः शश्वद्भ्रमेऽनवरतभ्रमणे नियुक्तम् । एतदुक्तं भवति । भान्यश्विन्यादीन्यन्यानि विशिष्टानि ज्योतींषि तेषां समूहचक्रं ग्रहाश्च सूर्य्यादयस्तैः सह सृष्टम् । तानि भानि प्राक्संस्थया समन्तान्निवेशितानि । ग्रहांस्तु भगणादावश्विनीमुखे निवेशितास्तूपर्य्युपरि संस्थया । तत्रादौ तावदधश्चन्द्रः तदुपरि बुधः, ततः शुक्रः, ततो रविः तस्माद्भौमः, ततो गुरुः ततः शनिः । सर्वेषामुपरि दूरे भचक्रम् । एषां कक्षाप्रमाणानि कक्षाध्याये प्रतिपादयिष्यन्ते । अहो यद्यूर्ध्वोर्द्ध्वस्था ग्रहास्तदोपरि दूरतो भगणस्तत् कथं भगणादिसंस्थैर्ग्रहैरित्युच्यते ? सत्यम् । अत्र भूमध्ये सूत्रसंलग्नं कृत्वा द्वितीयाग्रं भचक्रेऽश्विनीमुखे किल नीतम् । तस्मिन् सूत्रे प्रोता मणय इव चन्द्रादयो ग्रहाः सृष्ट्यादौ ब्रह्मणा निवेशिताः । भमण्डलं द्वादशधा विभज्यैवं भूमध्यात् सूत्राणि प्रतिभागं नीत्वा किल बद्धानि तैः सूत्रैः सह ग्रहकक्षायां ये संपातास्ते तासु कक्षासु राश्यन्ताः । तद्वत्प्रकारा राशय इति संक्षिप्तमिहोक्तम् । कक्षाध्याये गोले च किञ्चिद्विस्तार्य्य वक्ष्यामः । एवंविधं भचक्रं सृष्ट्वा ब्रह्मणा गगने निवेशितम् । यत्र निवेशितं तत्र प्रवहो नाम वायुः । स च नित्यं प्रत्यग्गतिः । तेन समाहतं भचक्रं सखेचरं पश्चिमाभिमुखभ्रमे प्रवृत्तम् । यत् तस्य प्रत्यग्भ्रमणं तच्छीघ्रतरम् । यत एकेनाह्ना भमण्डलस्य परिवर्त्तः । एवं तस्मिन् भपञ्जरे सखेचरे शीघ्रतरे भ्रमत्यपि खेचरा इन्द्रदिशं चरन्ति पूर्वाभिमुखं व्रजन्ति नीचोच्चतरात्मवर्त्मसु । अनन्तरकथितेषु स्वस्वमार्गेषु तेषां प्राग्भ्रमणम् । तत् तदल्पगत्या, प्रत्यग्गतेर्बहुत्वात् प्रागल्पगत्या व्रजन्तो नोपलक्ष्यन्त इति भावः । तथा तस्य भपञ्जरस्य यौ दक्षिणोत्तरावर्त्तौ तत्र ये तारे ते ध्रुवत्वे

नियुक्ते” पमि० । तथा श्रीपतिः । “स्वव्यापारात् प्राग्गतिः खचराणामूर्ध्वाधस्ताद्याम्यसौम्यापराणि । गोलाभिज्ञैः पञ्च यातानि यानि तेषामुक्तान्यन्यहेतूनि तानि । प्रत्यग्गतिः प्रवहवायुवशेन तेषां नीचोच्चवृत्तजनितोर्ध्वमधश्च सा स्यात् । याम्योत्तरा स्वपमवृत्तविमण्डलाभ्यां षोढा गतिर्निगदितैवमिह ग्रहाणाम्” उच्चता च महत्त्वव्याप्यगुणभेदः । सा च उपर्युपरिसन्निवेशितावयवानां महत्त्वे भवति तस्य गुणत्वमत्वात् ततः भावेऽर्थे ष्यञ् । औच्चम् उच्चतायां न० । त्व । उच्चत्व तत्रार्थे न० तल् । उच्चता स्त्री । “उच्चस्थे ग्रहपञ्चके सुरगुरौ सेन्दौ नवम्यां तिथौ लग्ने कर्कटके पुनर्वसुदिने मेषं गते पूषणि । निर्दग्धुं निखिलाः पलाशसमिधः मध्यादयोध्यारणेराविर्भूतमभूदपूर्वविभवं यत्किञ्चिदेकं महः” तिथित०पु० । “ग्रहैस्ततः पञ्चभिरुच्चसंस्थितैरसूर्य्यगैः सूचितभाग्यसम्पदम्”. रघुः । ‘स्वोच्चस्थः खलहेऽपि वा स्वसुहृदां वर्गेऽपि वा”ज्योति०त० ।

उच्चकैस् अव्य० उच्चैस्+टेरकच् । १उच्चतायां २तद्विशिष्टे च । “जनितमुदस्यादुच्चकैरुच्छ्रितोरः” “स्थितोदयाद्रेरभिसायमुच्चकैः” माघः । उत्कर्षार्थे तरबादि उच्चैःशब्दवत् ।

उच्चक्षुस् त्रि० उत्क्षिप्तमुत्पाटितं वा चक्षुर्यस्य प्रा०ब० । १ऊर्ध्वोत्क्षिप्तनेत्रे २उत्पाटितनेत्रे च । ततः च्वि उच्चक्षूकरोति उच्चक्षूभवति उच्चचक्षुस्सात् ।

उच्चटा स्त्री उद्–चट–अच् । १लशुनभेदे, २ गुञ्जायां ३चूडालायाम्, ४भूम्यामलक्याम् ५नागरमुस्तायाञ्च ।

उच्चण्ड त्रि० उद्–चडि–अच् । १अत्यन्तोग्रे २अतिकोपने, ३त्वरायुक्ते अविलम्बिते । ४प्रखरस्वरे पु०५तद्वति त्रि० ।

उच्चतरु प०कर्म० । १नारिकेले वृक्षे । २उच्चवृक्षमात्रे च ।

उच्चताल न० उच्चः तालः हस्ततालः यत्र । १पानगोष्ठ्यां मत्ततया तत्र उच्चैर्हस्ततालदानात्तथात्वम् ।२उच्चततालदृक्ये च

उच्चदेव पु० उच्चः श्रेष्ठो देवः । वासुदेवे त्रिका० । तस्य “सर्वदेवमयो हरिः” इत्युक्तेः सर्वदेवमयत्वात् सत्वप्रधानत्वाच्च उत्कृष्टत्वम् अतएव भागवते ‘श्रेयांसि तत्र खलु सत्वतनोर्नृणां स्युरिति”सत्वप्रधानत्वात् तस्य श्रेयःसाधनत्वमुक्तम् ।

उच्चन्द्र पु० उच्छिष्टः स्वल्पाऽवशिष्टचन्द्रो यत्र प्रादि०ब० शिष्टशब्दलोपः । रात्रिशेषे शब्दरत्ना० ।

उच्चय पु० उत्थाप्य चयः चि–अच् । १पुष्पादेरुत्तोलने । “पुष्पोच्चयं नाटयति” शकु० । “करिष्यामि यशोच्चयैस्त्रिरःकमलोच्चयम्” रघुः । “प्रत्युपसदमेकोच्चयेन कपालान्येककपालप्रभृतीनाम्”काव्या० २२,२,२० । उत्तरेषु पुरुषोच्चयेनैवैकशतविधात् १६, ८,२५ । २नारीकट्यंशुकग्रन्थौ “नीविः स्यादुच्चयोऽप्ययम्” मार्कण्डः उत्कृष्टचयः । ३दृहत्समुदाये च अभ्युच्चयः । “वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः”सा०द० । स निर्दध्याक्रुलिं रामोऽधी मनःशिलोच्चये” रामा० । “एकतः सरितः सर्वाः गङ्गाद्याः सलिलोच्चयाः” भा०व० ८८ अ० । “नैकद्रव्योच्चयवतीं समृद्धविपणापणाम्” भा० अनु०३०अ० । शिलोच्चयोऽपि क्षितिपालमुच्चैः” रघुः । कर्म्मणि अच् । ४हस्ताभ्यामुद्धृत्यावचिते नीवारे”हारा० ।

उच्चल न० । उद्+चल–अच् । १मनसि हेमच०तस्य “असंशयं महाबाहो ! मनोदुर्निग्रहं चलम्” गीतोक्तेश्चञ्चलस्वभावत्वात्तथात्वम् ।२चलस्वभाववति त्रि० ।

उच्चलित त्रि० उद्+चल–क्त । गमनोद्यते प्रस्तुते गत्युद्युक्ते

उच्चललाटा स्त्री उच्चं ललाटं यस्याः । उन्नतललाटरूपदुर्लक्षणायां स्त्रियाम् । स्त्रीणां च दुर्लक्षणम् कन्याशब्दे वक्ष्यते

उच्चनीच त्रि० उच्चश्च नीचश्च मयू० समा० । उन्नतावनत प्रदेशादौ “द्रष्टारमुच्चनीचानां कर्म्मभिर्देहिनां गतिम्” । भा० आश्व०१६ अ० ।

उच्चा अव्य० उद्+चो–डा । १उच्चैःशब्दार्थे । “अमीय ऋक्षा निहिता स उच्चा” ऋ० १,२४,१० । “उच्चा उच्चैःप्रदेशे” भा० । “उच्चा दिवि दक्षिणावन्तोअस्थुर्ये” ऋ० १०,१०७,२ । “अस्माकं द्युम्नमधिपञ्च कृष्टिषूच्चा” २,२,१० । “उच्चा उच्चैः” भा० । “अवतमुच्चाचक्रं परिज्मानम्” ८,७२, १० । “उच्चाचक्रमुपरिस्थितचक्रम्” भा० उच्चाबुध्नं नीचादुच्चाचक्रथुः पातवे वाः” ऋ० १,११६,२२ । २उन्नतायां स्त्रियां स्त्री “उच्चारणत्पक्षिगणास्तटीस्तम्” माघः ।

उच्चाटन न० उद्–चट्–णिच्–ल्युट् । १उत्पाटने स्वस्थानात् २विश्लेषणे “उच्चाटनं स्वदेशादेर्भ्रंशनं परिकीर्त्तितम्” इति शा०ति० उक्ते ३षट्कर्म्मान्तर्गतेऽभिचारभेदे च । उच्चाट्यतेऽनेन करणे ल्युट् । तन्त्रोक्ते ४तत्साधनकर्म्मणि । तन्त्रसारे बगलाया अभिचारप्रयोगे कुण्डलक्षणमुपक्रम्य “वश्ये तु चतुरस्रं स्यादाकर्षणे तु त्रिकोणकम् । तथैवोच्चाटने प्रोक्तं षट्कोणे मारणं स्मृतम् । वश्ये मेषासनं श्रेष्ठं कर्षणं व्याघ्रचर्म्मणि । शान्तौ मृगासनं प्रोक्तं स्तम्भो गोचर्म्मणि स्मृतः । उष्ट्रासनं तथोच्चाटे विद्वेषे तुरगा-

शनम्”मारणे महिषीचर्म्म मोक्षे च गजासनम् । मधु-
लाजतिलादीनि वश्यशान्तिकराणि च । आकर्षणे तथा
होमं सतिलं मधुराप्लुतम् । निम्बपत्रैस्तु तैलाक्तैर्विद्वेष-
करणं परम् । हरितालं हरिद्रा च लवणेन च संयुता ।
स्तम्भयेत्तत् देवेशि ! प्रज्ञाश्चैव गतिं मतिम् । वाजिना-
शस्य सारेण रुधिरेण च होमयेत् । मारणे तु रिपोर्देवि !
श्मशानाग्नौ हुनेच्चिति । क्षुद्राणां काकपक्षाणां गृहधूमेन
संयुतम् । लाजांस्त्रिमधुरोपेतान् सर्वरोगप्रशान्तये”तन्त्र-
सा० उच्चाटनप्रकारा बहवो दर्शितास्तत्र सामान्यप्रकारस्त-
त्राभिधीयते निबन्धे “शान्तिवश्यस्तम्भनानि विद्वेषोच्चा-
टने ततः । मारणं तानि शंसन्ति षट् कर्माणि मनीषिणः ।
रतिर्वाणी रमा ज्येष्ठा दुर्गा काली यथाक्रमात् ।
षट्कर्म्मदेवताः प्रोक्ताः तत्रादौ ताः प्रपूजयेत् । ईश-
चन्द्रेन्दुनिर्ऋतिवाय्वग्नीनां दिशो मताः । सूर्य्योदयं समा-
रभ्य घटिकादशकं क्रमात् । ऋतवः स्युर्वसन्ताद्या अहो-
रात्रे दिने दिने । वसन्तग्रीष्मवर्षाख्यशरद्धेमन्तशिशिराः ।
अर्द्धं शान्तिविधौ शस्तं वश्ये वज्रमुदाहृतः । स्तम्भने
पृथिवी शस्ता विद्वेषे व्योम कीर्त्तितम् । उच्चाटने स्मृतो
वायुर्भौमाग्निर्मारणे मतः । तत्तद्भूतोदये सम्यक् तत्तन्मण्ड-
लसंयुतम् । तत्तत् कर्म्म प्रकर्त्तव्यं मन्त्रिणा भिन्नता-
त्मना । शीतांशुसलिलक्षोणीव्योमवायुहविर्भुजाम् । वर्णाः
स्युर्मन्त्रयोजानि षट्कर्मसु यथाक्रमम् । ग्रथनञ्च विदर्भश्च
संपुटो रोधनं तदा । योगः पल्लव इत्येते विन्यासाः
षट्सु कर्मसु । मन्त्रार्णान् विहतान् कृत्वा साध्यवर्णान्
यथाविधि । ग्रथनं तत् विजानीयात् प्रशस्तं शान्ति-
कर्मणि । मन्त्रार्णद्वयमध्यस्थं साध्यनामाक्षरं लिखेत् ।
विदर्भ एष विज्ञेयो मन्त्रिभिर्वश्यकर्मणि । आदावन्ते
च मन्त्रः स्यान्नाम्नोऽसौ सम्पुटः स्मृतः । एष स्यात् स्तम्भ-
ने शस्त इत्युक्तो मन्त्रवेदिभिः । नाम्न आद्यन्तमध्येषु
मन्त्रः स्याद्रोधनं स्मृतम् । विद्वेषणविधाने तु प्रशस्तमिद-
मुत्तमम् । मन्त्रस्यान्ते भवेन्नाम योगः प्रोच्चाटने मतः ।
अन्ते नाम्नो भवेन्मन्त्रः पल्लवो मारणे मतः” । भूतानामु-
दयः शा० ति० ।“दण्डाकारा गतिर्भूमेः,पुटयोरुभयोरधः ।
तोयस्य, पावकस्योर्द्ध्वं गतिस्तिर्य्यङ्नभस्वतः । गतिर्व्योम्नो-
भवेन्मध्ये भूतानामुदयः स्मृतः । धरणेरुदये कुर्य्यात्
स्तम्भनं वश्यमात्मवित् । शान्तिकं पौष्टिकं कर्म तोयस्य,
तेजसस्तथा । मारणादीनि मरुतो विषश्चोच्चाटनादिकम् ।
अत्र विद्वेषणं शस्तमुदये च विहायसः” । भूतमण्डला-
दिकं तत्रैवावसेयम् । षट्कर्मकरणनिमित्तमाह रुद्रया-
मले “उपस्थिते महाशत्रौ राष्ट्रपीडासु चाभये ।
भूमिवित्तमहोत्पाते भूतभीतिविपत्सु च । अतःपरतरं
कर्म्म कलौ शान्तिकरं प्रिये ! । मारणं मोहनं वश्यं विद्वेष-
णमथापि वा । वशीकरकर्म्माणि तथोच्चाटनकर्म्म च ।
सर्वत्र साधयेन्नाम्ना ततोनान्यत् शुभावहम् । विशेषतः
शत्रुसंघरोगोपद्रवनाशनम् । शत्रूणां कर्म्मनाशे च तथा
शत्रुपराजये । आत्मनो विजये चैव नातःपरतरा
क्रिया” । घञ् । उच्चाटोऽप्यत्र पु० । ‘उद्वासन’
तथोच्चाटे” तन्त्रसारः ।

उच्चार पु० उद्+चर–णिच्–घञ् । १उच्चारणे । “तस्यकार्य्योऽनु-
च्चारः” मु०बो०‘मन्त्रोच्चारपरायणः”पु० । उच्चार्य्यते
अपानवायुना उत्क्षिप्यते कर्म्मणि घञ् । २पुरीषे । वि-
ण्मूत्रोत्सर्गविधानप्रकारः आ० त० नानावचनैर्दर्शितो
यथा विष्णुधर्मोत्तरे “निद्रां जह्यादुष्टतो राम ! नित्य-
मेवारुणोदये । वेगोत्सर्गं ततः कृत्वा दन्तधावनपूर्व्वकम् ।
अरुणोदयकालमाह स्कन्दपुराणम् “उदयात् प्राक्
चतस्रस्तु नाडिका अरुणोदयः । तत्र स्नानं प्रशस्तं
स्यात्तद्धि पुण्यतमं स्मृतम्” । नाडिका दण्डः । ‘ना-
डीषष्ट्या दिवानिशम्” इत्युक्तेः । विष्णुधर्म्मोत्तरे ‘वेग-
रोधं न कर्त्तव्यमन्यत्र क्रोधवेगतः’ । “वेगरोधं न क-
र्त्तव्यमिति तु कां दिशं गन्तव्यमितिवत् भावाख्यातेतर-
त्वात् साधुत्वम् । आयुर्वेदीयेऽपि “न वेगिनोऽन्यसिद्धिः
स्यात् नाजित्वा साध्यमामयम्” । अङ्गिराः “उत्थाय
पश्चिमे रात्रे स्तत आचम्य चोदकम् । अन्तर्धाय तृणै-
र्भूमिं शिरः प्रावृत्य वाससा । वाचं नियम्य यत्नेन
ष्ठीवनोच्छासवर्जितः । कुर्य्यान्मूत्रपुरीषे तु शुचौ देशे समा-
हितः” विष्णुपुराणम् “ततः कल्यं समुत्थाय कुर्य्या-
न्मैत्रं नरेश्वर ! । नैर्ऋत्यामिषुविक्षेपमतीत्याभ्यधिकं भुवः”
तिष्ठेन्नातिचिरं तस्मिन्नैव किञ्चिदुदीरयेत्” । कल्यमुषः
कालम्, मैत्रं मित्रदेवताकपायुसम्बन्धात् पुरीषोत्सर्गम्,
नैर्ऋत्यामुत्थानदेशमारभ्य उत्थायेत्यनेनोपस्थितेः । इषु-
विक्षेपमतीत्य इषुविक्षेपयोग्यदेशाद्बहिः । तद्देशपरिमाण-
माह पितामहः “मध्यमेन तु चापेन प्रक्षिपेत्तु शर-
त्रयम् ; हस्तानान्तु शते द्वे तु लब्धं कृत्वा विचक्षणः” ।
आपस्तम्बः ‘मूत्रपुरीषे कुर्य्यात् दक्षिणां दिशं दक्षि-
णापराम्वेति” । दक्षिणापरा नैर्ऋती । मनुः “मूत्रो-
च्चारसमुत्सर्गं दिवा कुर्य्यादुदङ्मुखः । दक्षिणाभिमुखो

रात्रौ सन्ध्ययोश्च यथा दिवा"। उच्चारः पुरीषम्। यत्तु यमवचनं "प्रत्यङ्मुखस्तु पूर्वाह्णे अपराह्णे च प्राङ्मुखः। उदङ्मुखस्तु मध्याह्ने निशायां दक्षिणामुखः" इति तत् उदङ्मुखेन सहेच्छाविकल्पार्थं सूर्य्याभिमुखनिरासार्थञ्च न तु नियमार्थं देवलवचनविरोधात्। तथा च "सदैवोदङ्मुखः प्रातः सायाह्ने दक्षिणामुखः। विण्मूत्रे आचरेन्नित्यं सन्ध्यायां परिवर्जयेत्" इति। प्रातःसायाह्नशब्दौ दिवारात्रिपरौ पूर्वोक्तमनुवचनैकवाक्यत्वात्। सन्ध्यायां परिवर्जयेदिति तु पीड़ितेतरपरम्। यमः "कृत्वा यज्ञोपवीतन्तु पृष्ठतः कण्ठलम्बितम्। विण्मूत्रे च गृही कुर्य्यात् यद्वा कर्णे समाहितम्"। पृष्ठतः पृष्ठे कण्ठलम्बितं निवीतम्। अत्र लम्बितं निवीतम्। "संवीतं मानुषे कार्य्ये" इति तैत्तिरीयश्रुतेः। मानुषे सनकादिकार्य्ये। "पृष्ठलम्बितं निवीतम्" इति बौधायनवचनाच्च। तथा च हारवत् कृत्वा पृष्ठलम्बितम् स्कन्धे इत्यर्थः। अत्र व्यवस्थामाह शाङ्खायनः। "यद्येकवस्त्रो यज्ञोपवीतं कर्णे कृत्वा अवगुण्ठितः" इति कर्णे दक्षिणकर्णे। "पवित्रं दक्षिणकर्णे कृत्वा विण्मूत्रमाचरेत्" इति स्मृतौ तथा दर्शनात्। अवगुण्ठितः कृतशिरोऽवगुण्ठनः। मनुः "छायायामन्धकारे वा रात्रावहनि वा द्विजः। यथासुखमुखः कुर्य्यात् प्राणबाधाभयेषु च" महाभारते। "प्रत्यादित्यं प्रत्यनलं प्रति गाञ्च प्रतिद्विजम्। मेहन्ति ये च पथिषु ते भवन्ति गतायुषः"। प्रतिः साम्मुख्ये। मनुः "न मूत्रं पथि कुर्वीत न भस्मनि न गोव्रजे। न फालकृष्टे न जले न चित्यां न च पर्वते। न जीर्णदेवायतने न वल्मीके कदाचन। न ससत्त्वेषु गर्त्तेषु न गच्छन्नपि संस्थितः। न नदीतीरमासाद्य न च पर्वतमस्तके। वाय्वग्निविप्रानादित्यमपः पश्यंस्तथैव च। न कदाचन कुर्वीत विण्मूत्रस्य विसर्जनम्"। ससत्त्वेषु प्राणिमत्सु संस्थितः उत्थितः पर्वतमस्तकनिषेधोऽधिकदोषाय। वशिष्ठः। "आहारनिर्हारविहारयोगाः सुसम्वृता धर्मविदा तु कार्य्याः। वाग्बुद्धिकार्य्याणि तपस्तथैव धनायुषी गुप्ततमे तु कार्य्ये"। निर्हारो मूत्रपुरीषोत्सर्गः विहारः स्त्रीसम्भोगः। योगः समाधिः। वाग्गुप्तिरशुभभाषापरित्यागः। बुद्धिगुप्तिरनिष्टचिन्तात्यागः। हारीतः "आहारन्तु रहः कुर्य्यात् निर्हारञ्चैव सर्वदा। गुप्ताभ्यां लक्ष्म्युपेतः स्यात् प्रकाशे हीयते तया"। विष्णुपुराणम् "सोमाग्न्यर्काम्बुवायूनां पूज्यानाञ्च न सम्मुखे। कुर्य्यात् ष्ठीवनविण्मूत्रसमुत्सर्गञ्च पण्डितः"। आपस्तम्बः "न च सोपानत्को मूत्रपुरीषे कुर्य्यादिति"। वृहन्मनुः "करगृहीतपात्रेण कृत्वा मूत्रपुरीषके। मूत्रतुल्यन्तु पानीयं पीत्वा चान्द्रायणञ्चरेत्"। भरद्वाजः "अथ विलग्य विण्मूत्रं लोष्टकाष्ठतृणादिना। उदस्तवासा उत्तिष्ठेद्दृढं विधृतमेहनः" "उदस्तवासाः कटिदेशादुत्क्षिप्तवस्त्रः" आ० त०। "मूत्रोच्चारौ च कारयेत्"। "यस्योच्चारं विना मूत्रं सम्यग् वायुश्च गच्छति" सुश्रु०। "दाने तपसि शौर्य्ये च यस्य न प्रथितं मनः। विद्यायामर्थलाभे च मातुरुच्चार एव सः" हितो०। उच्चैश्चारो गतिः। २ ग्रहादीनां राशिनक्षत्रान्तरसञ्चारे। "ऋक्षाहतं शतेनाद्वैयानिसु चित्रमिवविज्ञेषु" "उच्चारे संहिकाकारैः" सि० रा० त०।

उच्चारण न० उच्चातेन कण्ठाद्यभिघातेन चार्य्यते निष्पाद्यते उद्+चर-णिच्-ल्युट्। कण्ठताल्वाद्यभिघातेन शब्दजनके व्यापारे तत्प्रकारस्तु "आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया। मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्। सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः। वर्णान् जनयते तेषां विभागः पञ्चधा मतः" इति शिक्षोक्तदिशाऽवसेयः। वर्णोत्पत्तिस्थानानि चाष्टौ। "अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा। जिह्वामूलञ्च दन्ताश्च नासिकोष्ठौ च तालु च" शिक्षाकदुक्तानि। विवृतिर्वर्णशब्दे द्रष्टव्या। यथा च कण्ठताल्वाद्यभिघातेनोच्चारणसम्भवस्तथा" ईश्वरशब्दे अनुमा० चिन्ता० १०२६ पृष्ठे दर्शितम्। "उच्चारणज्ञोऽथ गिरां दधानम्" माघः। "वेदोच्चारणकार्य्यार्थमयुक्तं तत्त्वया कृतम्" भा० व० २१४ अ०। "सजातीयोच्चारणानपेक्षोच्चारणविषयत्वं वेदस्यापौरुषेयत्वम्" मीमांसकाः वेदान्तिनश्च प्रतिपेदिरे।

उच्चारित त्रि० उच्चार-तारका० इतच्। १कृतविष्ठोत्सर्गे। उद्+चर-णिच्-कर्म्मणि क्त। यस्योच्चारणं कृतं तादृशे वर्णादौ "तएव शक्तिवैकल्यप्रमादालसतादिभिः। अन्यथोच्चारिताः शब्दा अपशब्दा इतीरिताः" भर्तृह०। उद्+अन्तर्भूतण्यर्थे चर-क्त। उच्चरितोऽप्युक्तार्थे "सकृदुच्चरितः शब्दः सकृदर्थं गमयतीति" तन्त्रार्थग्रन्थे न्यायः।

उच्चार्य्य अव्य० उद्+चर-णिच्+ल्यप्। १कण्ठाद्यभिघातेन उत्पाद्येत्यर्थे। कर्म्मणि यत्। २उच्चारणीये वर्णादौ त्रि०।

उच्चार्य्यमाण त्रि० उद्+चर-णिच्-कर्म्मणि शानच्। यस्योच्चारणं क्रियते तस्मिन् वर्णादौ "कश्चित् कार्य्यायोच्चार्य्यमाणो वर्ण इत्संज्ञः" मुग्धबो०।

उच्चावच त्रि० उदक् उत्कृष्टश्च अवाक् अपकृष्टश्च मयू०नि०। उत्कृष्टापकृष्टात्मके नानाभेदे "उच्चावचैरपि गतेषु सहस्रसंख्यास्" माघः "भवत्येव महाब्राह्मण उतैवोच्चावचं निगच्छति" शत०ब्रा० १४,५,१,१९। "अथ खलूच्चावचा जनपदधर्मा ग्रामधर्म्माश्च तान् विवाहे प्रतीयात्" आश्व०गृ० १,७,१। "उच्चावचेषु भूतेषु स्थितं तं व्याप्य तिष्ठतः"। "उच्चावचानि भूतानि सततं चेष्टयन्ति याः" मनुः

उच्चिङ्कट पु० १रुणगडुमत्स्ये, २कोपनपुरुषे च मेदि०।

उच्चिटङ्ग पु० विषकीटभेदे (उच्चिङ्कड़े) सुश्रुते "जङ्गमस्य विषस्योक्तान्यधिष्ठानानि षोडश" इत्युपक्रम्य "दृश्चिकविश्वम्भरराजीवमत्स्योच्चिटङ्गसमुद्रदृश्चिकालविषाः" इत्युक्ता तस्य शूकतुण्डविषत्वमप्युक्तम् "शूकतुण्डोच्चिटङ्गवरटीशतपदीशूकवलभिकाशृङ्गीभ्रमराः शूकतुण्डविषाः" तेषामुत्पत्तिस्थानमपि तत्रोक्तम् "सर्पाणां शुक्रविण्मूत्रशवपूत्यण्डसम्भवाः। वाय्वग्न्यम्बु प्रकृतयः कीटास्तु विविधाः स्मृताः" इत्युपक्रम्य "उच्चिटङ्गोऽग्निनामा तु चिच्चिटिङ्गीमयूरिका" इत्यादीन् अष्टादश कीटानभिधाय "अष्टादशेति वायव्याः कीटाः पवनकोपनाः" सुश्रु०।[वस्त्रखण्डे।

उच्चूड(ल) पु० उच्चता चूड़ा यस्य उस्य वा लत्वम्। ध्वजोर्द्धस्थे

उच्चैःशिरस् त्रि० उच्चैरुन्नतं शिरोऽस्य। उन्नतमस्तके महति "नमत्युच्चैःशिरसा सतीव" कुमा०। वा रोः सत्वम्।

उच्चैःश्रवस् त्रि० उच्चैरुन्नतं श्रवोऽस्य। १उन्नतकर्णे समुद्रजाते श्वेतवर्णे इन्द्रस्य वाहनभूते सप्तमुखे २अश्वभेदे पु०। अस्य चोत्पत्तिकथा यथा "तत उच्चैःश्रवानाम हयोऽभूच्चन्द्रपाण्डुरः" भाग० ७स्क० ७अ०। "रुहीतोऽश्वः सप्तमुखस्तया श्वप बलात् किलेति" भागवतोक्तेरस्य सप्तमुखत्वम्। "धन्वन्तरिस्तथा मद्यं श्रीर्देवी कौस्तुभोमणिः। गजाह्वो विमलश्चापि समुत्तस्थुः समन्ततः। उच्चैःश्रवा हयोरम्यः पीयूषं तदनन्तरमिति" हरिवं० २२० अ०। "उच्चैरुच्चैःश्रवास्तेन हयरत्नमहारि च" कुमा०। "उच्चैःश्रवाजलनिधेरिव जातमात्रः" "न चिलसुच्चैःश्रवसः पदक्रमम्" माघः। "उच्चैःश्रवमश्वानाम्" गीतोक्तेः भगवद्विभूतित्वमस्य। "उच्चैःश्रवःसुतानश्वान् बलादप्यानयद्दिवः" हरि०१४५अ० "दिग्गजसुताभागान् हयांश्चोच्चैःश्रवोऽन्वयान्" हरि०१५६अ० अस्य वा विसर्गस्य सत्वे उच्चैश्श्रवा अप्यत्र। अस्य टचो० अदन्तत्वमपि। "उच्चैःश्रवसं तत् प्रणिपत्य समर्पितम्" देवीमा०। उच्चैरुन्नतं शब्दं शृणोति श्रु-असुन्। २बधिरे त्रि०।

उच्चैर्घुष्ट न० घुष-भावे क्त उच्चैर्घुष्टम्। (ढेडरा) सर्वजनश्राव्यघोषणायाम्।

उच्चैर्घोष पु० घुष-घञ् उच्चैर्घोषः। १सर्वजनश्राव्यशब्दे "यदुच्चैर्घोषस्तनयित्नुरिव दहति" शत०ब्रा०।७४०। २उच्चैःशब्दान्विते क्रन्दनादौ ६त०। ३रुद्रमूर्त्तिभेदे। "उच्चैर्घोषाय क्रन्दयते" यजु०१६,१९।

उच्चैस् अव्य० उद्+चि-डैसि। १तुङ्गत्वे, २उन्नते ३महति ४उच्चदेशजाते "उच्चैरुदात्तः" पा०। "उच्चैरुच्चैःश्रवास्तेन" कुमा० "शिलोच्चयोऽपि क्षितिपालमुच्चैः" रघुः "विचकर्ष च संहितेषुरुच्चैः" किरा०। "अहत्वा हेलया पादमुच्चैर्मूर्द्धसु विद्विषाम्" माघः। "उच्चैरधःपातिपयोमुचोऽपि" "जनोऽयमुच्चैःपदलङ्घनोत्सुकः" "उच्चैर्हिरण्मयं शृङ्गम्" कुमा०। या वः काले वहति सलिलोद्गारमुच्चैर्विमाना" मेघ०। "उच्चैरस्यति मन्दतामरसताम्" चन्द्रालो०। अस्य शब्दस्य गुणवाचितया प्रकर्षे तरप् तमप् च ततः अद्रव्यप्रकर्षे आमु। उच्चैस्तराम् उच्चैस्तमाम्। कीर्त्त्यातिशये "उच्चैस्तरां वक्ष्यति शैलराजः" कुमा०। द्रव्यप्रकर्षे तु नामु। उच्चैस्तर उच्चैस्तम अत्युन्नतदेशादौ त्रि०। अप्रियस्योच्चैः कथने उच्चैस्+कृ-ण्मुल् ल्यप् च। उच्चैःकारम् उच्चैःकृत्वा उच्चैःकृत्य अप्रियमाचष्टे" सि०कौ०।

उच्छन्न त्रि० उद्-छद क्त। लुप्तप्राये आच्छन्ने। "उच्छन्नप्रच्छन्नपन्थे वेदस्याचारमूलत्वेत्यादि विधिशादे मथुरा० यथा च वेदस्य छिन्नमूलपन्थतया उच्छिन्नत्वेऽपि अविगीतशिष्टाचारादेव तदनुमानं तथा समर्थनाय शब्दचि० शब्दाप्रामाण्ये वादिपूर्व्वपक्षं निरस्य व्यवस्थापितं यथा। "स्यादेतत् स्मृत्याचारयोर्वेदमूलत्वे तत्रोच्छेदादिविवादस्यैव त्वसिद्धं तथा हि वेदसमानार्था महाजनपरिगृहीता च स्मृतिः, स्वार्थोपस्थित्यनन्तरं स्मृत्यर्थानुभावकवेदानुमानेऽपि प्रतीतिप्राथम्यात् साध्यप्रसिद्ध्यर्थमुपजीव्यत्वाच्च स्मृतेरेवापूर्व्वादियाक्यार्थज्ञानमस्तु किं वेदेन, तदर्थस्य स्मृतित एव सिद्धेः अपूर्व्वस्य शब्दैकवेद्यत्वेन स्मृतितोज्ञातस्य ज्ञापकत्वेनानुवादकतापत्तेश्च सा च स्मृत्यन्तरादित्यनादिरेव स्मृतिधारावश्यकी, अन्यथा मनुस्मृतेः पूर्वं तथापि वेदानुमानं न स्यात्। सर्व्वा च स्मृतिः स्मृतिजन्यवाक्यार्थप्रमाजन्यत्वेन महाजनपरिगृहीतत्वेन च प्रमाणमिति नान्धपरम्परा। प्रत्यक्षा च स्मृतिः स्मृतिमूलं नानुमिता अनुमितवेदवत् तस्या अनुभावकत्वात्।

वेदार्थस्मृतितासिद्धिस्तु प्रसिद्धवेदमूलस्मृतिसाहचर्य्यभ्रमात् प्रत्यक्षवेदाबोधितलोभन्यायमूलस्मृताविव तान्त्रिकाणां लिङ्गाभासजन्यवेदमूलकत्वभ्रमात् सम्भवन्मूलान्तराणां वेदमूलत्वं कल्पयति। अथ स्मृतिनिष्ठतद्वेदमूलकत्वप्रसिद्धिरपि महाजनपरिग्रहीता एवञ्च सा वेदमूलत्वनिबन्धना अविगीतमहाजनपरिगृहीतवेदमूलत्वप्रसिद्धित्वात् प्रत्यक्षवेदमूलस्मृतौ तत्प्रसिद्धिवत्। एवं वेदार्थस्मृतितासिद्धिरपि अन्यथा महाजनपरिग्रहानादरे वेदस्मृत्योरपि प्रामाण्यं न स्यादिति चेत् न शूद्रहत्यादिस्मृतेस्तत्प्रसिद्धौ व्यभिचारात् लृप्तलोभादित एव तत्सम्भवात् विचारकाणां विप्रतिपत्तेश्च। तत्र तत्प्रसिद्धौ विगान महाजनानामिति चेत् न तत्रापि मूलान्तरसम्भवाद्विप्रतिपत्तेश्च विगानमेव तेषाम्, अतएव स्मृतीनां न्यायमूलत्वे सम्भवति वेदमूलत्वप्रसिद्धावपि न वेदमूलत्वं, न च वेदमूलेयमिति ज्ञात्वा स्मृतेर्महाजनपरिग्रहात्तन्मूलत्वं वेदमूलेयमिति प्रथमं ग्रहीतुमशक्यत्वात् शक्यत्वे वा किमनुमानेन, न च वेदमूलत्वेन प्रकारेण महाजनपरिग्रहः, असिद्धेः, मन्वादिस्मृतित्वेन पूर्वं महाजनपरिग्रहेणोत्तरेषां परिग्रहादनुष्ठानाद्युपपत्तेः। एवं होलकाचारेऽपि वेदलिङ्गेनैव कर्त्तव्यतानुमानोपपत्तेः किं वेदेन, तदर्थस्य लिङ्गादेवोपपत्तेः, आनयोगात्लौकिकविषयकशिष्टाचारस्य वेदमूलत्वदर्शनात् वेदानुमाने चाविगीतशिष्टाचारत्वेन भोजनाद्याचारोऽपि वेदमूलः स्यात् वेदं विनापि तत्कर्त्तव्यताधीसम्भवाच्च तदर्थवेद इति इहापि तुल्यम्। आचारकर्त्तव्यतानुमानयोरनादित्वेनाचाराणां कर्त्तव्यतानुमानमूलकत्वाञ्चान्धपरम्परा। न च पूर्व्वानुमानसापेक्षमुत्तरामानमिति स्वतन्त्रप्रमाणमूलकत्वाभावात् साध्यव्याप्तिपक्षधर्मतासत्त्वेन पूर्वेषां स्वतन्त्रप्रमाणत्वात्। नापीतरप्रामाण्याधीनं सर्वस्य प्रामाण्यमिति न निरपेक्षत्वं, प्रत्यक्षादेरपि तथात्वापत्तेः। एतेन विवादपदमाचारो निरपेक्षप्रमाणमूलकः अविगीतमहाजनाचारत्वात् प्रत्यक्षवेदमूलाचारवदिति निरस्तम् अनुमानस्य निरपेक्षप्रमाणत्वात् प्रमाणमूलत्वेनैवबुद्धेरुपपत्तेः निरपेक्षत्वस्य गौरवेणाप्रयोजकत्वाच्च। न च सापेक्षत्वेन न प्रमाणता व्याप्त्यादिसत्त्वात् अन्यथा प्रमाणनैरपेक्ष्यस्य वैयर्थ्यात्। न चाचारे वेदमूलकत्वप्रसिद्धेस्तदनुमानम्, अर्थसिद्धेः व्यभिचाराद्न्यथोपपत्तेश्च। न च वेदमूलत्वेन महाजनपरिग्रहात्तथा। न हि वेदमूलोऽयमिति ज्ञात्वा महाजनानां तत्परिग्रहः वेदमूलत्वस्य प्रथमं ज्ञातुमशक्यत्वात् शक्यत्वे वा किमनुमानेन। न च वेदमूलत्वेन महाजनपरिगृहीतोऽयमाचारः इति ज्ञात्वा तत्र महाजनपरिग्रहः, गौरवात् असिद्धेश्च पूर्व्वमहाजनपरिग्रहादेवोत्तरेषां परिग्रहानुष्ठानोपपत्तेः। तादृशस्मृत्याचारयोर्वेदमूलत्वेन व्याप्तेर्वेदमूलत्वसिद्धिरिति चेत् न असम्भवन्मूलान्तरस्योपाधित्वात् अन्यथा लोभन्यायमूलस्मृतेस्तत्प्रसङ्गः। अस्तु स्मृत्याचारयोरनादित्वं न चाचारात् स्मृतिः स्मृत्या चाचारः इत्यन्धपरम्परा मूलीभूतप्रमाणाभावादिति वाच्यं स्मृत्याचारयोरुभयोरपि प्रमाणत्वात्। अन्यथा न ततो वेदानुमानमिति।

उच्यते प्रलये पूर्व्वस्मृत्याचारयोरुच्छेदात् सर्गादौ नित्यसर्व्वज्ञेश्वरप्रणीतवेदमूलत्वं स्मृत्याचारयोः, अन्यथा मूलाभावेनान्धपरम्पराप्रसङ्गः। न च मन्वादीनामतीन्द्रियार्थदर्शित्वं तदुपायश्रवणादेस्तदानीमसत्त्वात् पूर्व्वपूर्व्वसर्गसिद्धसर्व्वज्ञा एव त इति चेत् न प्रमाणाभावात्। स्मृत्याचारयोः प्रमाणमूलकत्वमेव तत्साधकमिति चेत् न प्रतिसर्गं तेषामन्यान्यकल्पने गौरवमित्येकस्यैव नित्यसर्व्वज्ञस्य कल्पनात्। न च स्मृतय एव तत्प्रणीताः तासां मन्वादिकर्त्तृकत्वेन स्मृतौ बोधात्, स्मृतावेव स्मृतीनां वेदमूलत्वस्मरणाच्च। एवञ्च स्मृत्याचारयोर्महाजनपरिग्रहाद्वेदमूलत्वसाधकमपि भगवति प्रमाणम्। अतएव “प्रतिमन्वन्तरं चैषा श्रुतिरन्याऽभिधीयत” इत्यागमोऽपि। एवञ्च पूर्व्वप्रत्यक्षवेदमूलावेव स्मृताचारौ अथ च कालक्रमेणायुरारोग्यबलश्रद्धाग्रहणधारणादिप्रकारहरहरपचीयमानत्वात् तदध्ययनविच्छेदात् शाखोच्छेदात् स्मृत्याचाराभ्यामेव कर्त्तव्यतामधिगत्य प्रवृत्तिः। नन्वेवं स्मृतिरस्तु वेदमूला मङ्गलाद्याचारस्तु ईश्वरादेव भविष्यति घटलिप्यादिसम्प्रदायवदिति चेत् न बहुव्यापारघटितस्य तत्तदाचारस्य गुरुत्वेन “मङ्गलमाचरेदित्यादिवाक्यस्यैव लाघवेन कल्पनात्”।

“निष्ठाचारशौचेषु परपाकोपजीविषु उच्छवृत्तिभिक्षु भिक्षांशोपभोजिषु” सुश्रुतः।

उच्छल त्रि॰ उद्–शल अच्। आधारातिक्रमेण सर्व्वतः प्लुते। शतृ। उच्छलत् तत्रैव “कटोच्छलच्छृङ्गलाङ्गुलेन” माघः “स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा” काव्यप्र॰। ल्युट्। उच्छलन परितः प्लवने न॰।

उच्छादन न॰ उद्–छद–णिच्–ल्युट्। आच्छादने

२गन्धद्रव्यद्वारा देहमार्जने च अमरटी० "स्नापनोच्छादनेन" रामा० ।

उच्छास्त्र त्रि० उद्गतं शास्त्रात् प्रा०स० । १अतिक्रान्तशास्त्रे २शास्त्रविरुद्धेऽधर्मकृत्ये च । उत्क्रान्तं शास्त्रं यत्र । शास्त्रातिक्रमयुक्ते उच्छास्त्रं यथा तथा वर्त्तते उच्छास्त्रवर्त्तिन् शास्त्रातिक्रमेण यथेष्टचारिणि स्त्रियां ङीप् । "न राज्ञः प्रतिगृह्णीयात् क्रूरस्योच्छास्त्रवर्त्तिनः । या० स्मृ० । "इमस्योच्छास्त्रवर्त्तिनः" भाग० ७स्कन्द०अ० ।

उच्छासन त्रि० उत्क्रान्तः शासनम् । शासनातिक्रान्तरि ।

उच्छिख त्रि० उद्गता शिखा यस्य प्रा०ब० । १उन्नतार्चिषि वह्नौ पु० "भास्वत्योत्सर्पितार्चिषि पुरः पावकस्योच्छिखस्य" रघुः । २तक्षकनागकुलजाते नागभेदे पु० "तक्षकस्य कुलेजातान् प्रवक्ष्यामि निबोध तान्" इत्युपक्रम्य "उच्छिखः शरभोभङ्गोविल्वतेजा विरोहणः" भा० आ०५७ अ० ।

उच्छिङ्घन न० उद्+शिघि आघ्राणे भावे ल्युट् । नासिकावायुनाऽन्तःस्थितकफादिनिःसारणे । "उच्छिङ्घनेन हर्त्तव्योऽदृष्टिसञ्जजः कफः" । "नेत्रे विवक्षिनि विधिर्विहितः पुरस्तादुच्छिङ्घनं शिरसि सार्षपसेचनञ्च" सुश्रु० ।

उच्छित्ति स्त्री उद्+छिद-भावे क्तिन् । समूलोत्पाटने अत्यन्तसंमर्दने । "यदा तदा तदुच्छित्तिः पुरुषार्थः" सा०सूत्रम् । "शङ्करः सर्वदर्शानां प्रजानोधर्मकर्मणाम्" । प्रजानामपि चोच्छित्तिर्न्नुपप्रयस्तनहेतुजा" सुश्रु० "अविनाशी वा अरे अयमात्माऽनुच्छित्तिधर्मा" ब०उ०२१ ।

उच्छिन्न त्रि० उद्+क्त । १समूलं नाशिते २छिदिते ।

उच्छिरस् त्रि० उन्नतं शिरोऽस्य । १उन्नते २माहात्म्यादिना उन्नतमस्तके महिमान्विते "शैलात्मजापि पितुरुच्छिरसोऽभिलाषम्" कुमा० शौर्य्यौदार्य्यादिना हि लोक उन्नतशिरा भवति अपकृष्टकर्मणा तु अवनतशिराः प्रसिद्धः

उच्छिलीन्ध्र त्रि०उत्थितं शिलीन्ध्रम् ।१कदलके।२विकसितशिलीन्ध्रयुक्ते त्रि०। "उच्छिलीन्ध्रामवन्ध्यामिति" मेघदू०।

उच्छिष्ट त्रि० उद्+शिष-क्त । १भुक्तावशिष्टे, २त्यक्ते च । अमा०वच् । ३अक्षतयोने भुक्तान्ने । तत्रोच्छिष्टस्याभक्ष्यता सापवादस्तभक्षप्रयणेन्दे २७६ पृष्ठे उक्ता तत्रायं भेदः वर्णविशेषस्योच्छिष्टभोजने पापतारतम्यात् प्रायश्चित्ततारतम्यं प्रायश्चित्तविवेकादावुक्तं यथा "समुच्छिष्टन्तु यो भुङ्क्ते योभुङ्क्ते त्यक्तभाजने । एवं वैवस्वतः प्राह भुक्ता चान्द्रायणञ्चरेत्" चतुर्थपिवचनम् । "तच्च ज्ञानाभ्यासविषयमिति" प्रा०वि० । "ब्राह्मणोच्छिष्टभोजने महाव्याहृतिभिरभिमन्त्र्यापः पिबेत्, क्षत्रियोच्छिष्टभोजने ब्राह्मीरसविपक्केन त्र्यहं क्षीरेण वर्त्तयेत्, वैश्योच्छिष्टभोजने त्रिरात्रोपोषितो ब्रह्मसुवर्चलां पिबेत्, शूद्रोच्छिष्टभोजने सुराभाण्डोदकपाने च षड्रात्रमभोजनं चान्द्रायणं वा अभिमन्त्रितं जलं पीत्वोपवसेत्" शङ्खलि० "व्रतरूपत्वात् एतद्ब्राह्मणस्य ब्राह्मणाद्युच्छिष्टाशनेऽज्ञानतः सकृत् एवं क्षत्रियादेः समाधमवर्णोच्छिष्टाशने समाधमवर्णोक्तमेतदेव यथायथमुन्नेयम् शूद्रोच्छिष्टाशने तु ब्राह्मणस्य ज्ञानतः सकृद्विषयम् षड्रात्राभोजनम्" प्रा०वि० । यथा यस्तम्बः । "अज्ञानाद्यस्तु भुञ्जीत शूद्रोच्छिष्टं द्विजोत्तमः । त्रिरात्रोपोषितोभूत्वा पञ्चगव्येन शुद्ध्यति" । "एतद्द्विजोत्तमपदपाठाद्ब्राह्मणविषयम् । क्षत्रियादिपरत्वे वचनमाणविष्णुवचनविरोधात् । एतदपि सकृद्विषयं अत्रं च त्रिरात्रेऽघमर्षणमपि जपनीयम्" प्रा०वि० । यथा सुमन्तुः । "शूद्रोच्छिष्टभोजने त्रिरात्रमघमर्षणञ्च जपेत्" "चान्द्रायणन्तु नयत्वेव ज्ञानाभ्यासे क्षत्रियादीनाञ्च त्रिपादपादहानिकल्पा । क्षत्रियस्य च ब्राह्मणोच्छिष्टाशने ब्राह्मणोक्तप्रायश्चित्तार्द्धं, वैश्यस्य ततोऽप्यर्द्धम् । एवं वैश्यशूद्रयोरपि स्वापेक्षया पूर्ववर्णत्वेनोन्नेयम् उशनोवचने वर्णक्रमेण ह्रसितप्रायश्चित्तदर्शनात्" प्रा०वि०। यथा "असतां भुक्तशेषन्तु भक्षितोयैर्हि जातिभिः। चान्द्रं कृच्छ्रं तदर्द्धञ्च क्रमात्तेषां विशोधनम्" । तथा विष्णुरपि न्यायप्राप्तमेवार्थमन्वाह । "आमश्राद्धाशने त्रिरात्रं, वर्त्तेत ब्राह्मणः शूद्रोच्छिष्टाशने वमनं कृत्वा सप्तरात्रं वैश्योच्छिष्टाशने पञ्चरात्रम्, राजन्योच्छिष्टाशने त्रिरात्रम्, राजन्यः शूद्रोच्छिष्टाशने पञ्चरात्रम् वैश्योच्छिष्टाशने । त्रिरात्रं वैश्यः शूद्रोच्छिष्टाशने च" "अत्र वमनं कृत्वा पयसा वर्त्तेतेति सर्व्वत्रान्वेति" प्रा०वि० ।

"चण्डालपतितादीनामुच्छिष्टान्नस्य भक्षणे । द्विजः शुध्येत् पराकेण शूद्रः कृच्छ्रेण शुद्ध्यति" अङ्गिराः "एतदज्ञानविषयं ज्ञानतो द्वैगुण्यादिकम् प्रा०वि०। मनुनापि सामान्याभ्योज्यप्रकरणे । "शुष्कं पर्य्युषितं चैव शूद्रस्योच्छिष्टमेव च "क्रूरस्योच्छिष्टभोजिन" इति चोक्तम् । शूद्रस्य तु द्विजोच्छिष्टभोजने न दोषः । द्विजोच्छिष्टन्तु भोजनमिति" तस्य मनुना तद्वृत्तित्वोक्तेः । एकपङ्क्तिस्थमध्ये

केनचिदग्रे भोजनपात्रत्यागे तत्पङ्क्तिस्थानां तदन्नमुच्छिष्टवत् यथा "अप्येकपङ्क्त्यां नाश्नीयात् संहतः स्वजनैरपि। कोहि जानाति किं कस्य प्रच्छन्नं पातकं महत्। भस्मस्तम्भजलद्वारमार्गैः पङ्क्तिञ्च भेदयेत्" व्यासः। जलादिना पङ्क्तिभेदाकरणे तु शङ्खः "एकपङ्क्त्युपविष्टानां विप्राणां भोजने क्वचित्। यद्येकोऽपि त्यजेत्पात्रं शेषमन्नं विवर्जयेत्। मोहात् भुञ्जीत यः पङ्क्त्यामुच्छिष्टसहभोजनम्। प्राजापत्यं चरेद्विप्रः सत्वः सान्तपनन्तथा"। "विड़ालादिभिरुच्छिष्टं दुष्टमन्नं विवर्जयेत्, अन्यत्र हिरण्योदकस्पर्शात्" देवलः अज्ञानादुच्छिष्टादिभोजने तदुत्तार्य्यमित्याह "अभोज्यमन्नं नात्तव्यमात्मनः शुद्धिमिच्छता। अज्ञानाद्भुक्तमुत्तार्य्यं शोध्यं वाप्याशु शोधनैः" वमनपक्षेऽपि अल्पप्रायश्चित्तं भवत्येव "आमश्राद्धाशने त्रिरात्रं पयसा वर्त्तेत ब्राह्मणः, शूद्रोच्छिष्टाशने वमनं कृत्वा सप्तरात्रमुपवसेत्" विष्णुना वमनोत्तरमपि प्रायश्चित्त विधानात् "अन्त्यानां भुक्तशेषन्तु भक्षयित्वा द्विजातयः। चान्द्रं कृच्छ्रं तदर्द्धं तु ब्रह्मक्षत्रविशां विधिः" मिता० आप० वचनन्तु ब्राह्मणस्य सकृदज्ञानविषयम् बलात्कारानुसारेऽप्यन्नेतरताम्बूलाद्युच्छिष्टपरमिति" प्रा०त० रघु०। अन्त्यजैः बलात्कारिते उच्छिष्टादेर्भोजनेऽपि दोषएव। "दासीकृतोबलान्म्लेच्छचाण्डालाद्यैश्च दस्युभिः। अशुभं कारितः कर्म्म गवादेः प्राणहिंसनम्। उच्छिष्टमार्ज्जनञ्चैव तथा तस्यैव भक्षणम्" इत्याद्यभिधाय "मासोषिते द्विजातौ तु प्राजापत्यं विशोधनम्। चान्द्रायणन्त्वाहिताग्नेः पराकमथ वा भवेत्" देवलोक्तेः। उच्छिष्टचाण्डादिस्पर्शेऽपि दोषः" प्रा० त० उक्तः यथा। "आपस्तम्बः 'भुक्तोच्छिष्टस्त्वनाचान्तश्चाण्डालैः श्वपचेन वा। प्रमादात् स्पर्शनं गच्छेत् तत्र कुर्य्याद्विशोधनम्। गायत्र्यष्टसहस्रन्तु द्रुपदां वा शतं जपेत्। त्रिरात्रोपोषितो भूत्वा पञ्चगव्येन शुद्ध्यति। भुक्तोच्छिष्टोऽन्त्यजैः स्पृष्टः प्राजापत्यं समाचरेत्। अर्द्धोच्छिष्टे स्मृतः पादः पाद आमाशने तथा"। "प्राजापत्यं स्नाने अर्द्धोच्छिष्टोयेनाद्यग्रासः आस्ये निक्षिप्तः न तु निगीर्णः" प्रा० त० रघु०। काश्यपः 'श्वसूकरान्त्यचाण्डालमद्यभाण्डरजस्वलाः। यद्युच्छिष्टः स्पृशेत्तत्र कृच्छ्रं सान्तपनं चरेत्। "एतज्ज्ञानाभ्यासे सान्तपने धेनुद्वयम्"। प्रा० त० ब्रह्मपुराणे "उच्छिष्टेन तु शूद्रेण विप्रः स्पृष्टस्तु तादृशः। उपवासेन शुद्धिः स्यात् शुना संस्पृष्टएव वा। उच्छिष्टेन तु विप्रेण विप्रःस्पृष्टस्तु तादृशः। उभौ स्नानं प्रकुरुतं सद्य एव समाहितौ"। "अनुच्छिष्टब्राह्मणस्य नक्तमिति" प्रायश्चित्तविवेकः।

"सर्वमन्नमेकत्रोद्धृत्य उच्छिष्टसमीपे दर्भेषु" श्रा०त० गोभिलः। २दत्तावशिष्टे च। 'उच्छिष्टे सतिलान् दर्भान् दक्षिणाग्रान्विधापयेत्" श्रा० त० ब्रह्मपु०। "असंस्कृतप्रमीतानां, योगिनां, कुलयोषिताम्। उच्छिष्टं भागधेयं स्यात् दर्भेषु विकिरश्च यः" श्रा०त० ब्रह्मपु०। "प्रेतश्राद्धे यदुच्छिष्टं गृहे पर्य्युषितं च यत्। दम्पत्योर्भुक्तशेषञ्च न भुञ्जीत कदाचन" श्रा०त० स्मृतिः। "उच्छिष्टं पाकपात्रेऽवशिष्टम्, गृहे उपरागे पर्य्युषितं, दम्पत्योराश्रमस्वामिनोर्भोजनानन्तरं पाकस्थाल्यामवशिष्टमिति" श्राद्धचिन्तामणिः। ४मधुनि। मक्षिकोच्छिष्टत्वात्तस्य तथात्वम्। "उच्छिष्टं शिवनिर्माल्यम्—श्राद्धे प्रशस्यते" पु०। उ शिष्टमोदनः।

उच्छिष्टगणेश पु० तन्त्रोक्ते गणपतिभेदे। तस्य मन्त्रध्यानादिकं तत्रैव दृश्यम् "भुक्तोच्छिष्टोजपेन्नित्यं गणेशस्य सदा प्रियः" "उच्छिष्टश्चाशुचिर्भूत्वा जपपूजनमाचरेत्"। अनुच्छिष्टो न सिध्येत्तु तस्मादेवं समाचरेत्"। "सदोच्छिष्टोगणेशानो यक्षराजेन धीमता" इति च तत्रैव

उच्छिष्टचाण्डालिनी स्त्री तन्त्रोक्ते मातङ्गीदेवीमूर्त्तिभेदे। तस्या मन्त्रध्यानादिकं तन्त्रसारे दृश्यम्। "भोजनानन्तरं देवि! विनैवाचमने कृते" इत्युपक्रम्य "उच्छिष्टेन बलिं दत्त्वा जपेत्तद्गतमानसः। उच्छिष्टेन च कर्त्तव्यो जपोऽस्याः सिद्धिमिच्छता। उच्छिष्टजापनस्य जायन्ते सर्वसिद्धयः" इति च तत्रैव।

उच्छिष्टभोजन पु० उच्छिष्टं पञ्चयज्ञावशिष्टं भोजनमस्य। १पञ्चयज्ञावशिष्टस्य भक्षके "यज्ञशिष्टाशिनः सन्तोमुच्यन्ते सर्वकिल्बिषैः" मनुना तथा भोजने किल्बिषतारकत्वकीर्त्तनात् तथा भोजनस्य कर्त्तव्यत्वम्। उच्छिष्टं देवनैवेद्यावशिष्टं भोजनमस्य। २देवनैवेद्यभोजके च। "तैर्दत्तमप्रदायैभ्योयो भुङ्क्ते स्तेन एव सः" गीतायां देवानिवेद्ने दोषश्रवणात् देवाय दत्त्वैव भोज्यता।

उच्छिष्टभोजिन् त्रि० उच्छिष्टं इतरस्य भुक्तावशिष्टं भुङ्क्ते भुज–णिनि। निषिद्धोच्छिष्टभोक्तरि" "क्रूरश्चोच्छिष्टभोजिनः" मनुः। [विद्धे ते मुद–ल्यु। (मोम) सिक्थके।

उच्छिष्टमोदन न० उच्छिष्टं भ्रमरोच्छिष्टं मधु तेन मोदते

उच्छिष्य त्रि० उद्+शिष–वेदे नि० क्यप्। अवशेषणीये

लोके तु खदेर । उच्छिष्यम् अवशेषणीयेऽन्नादौ त्रि० ।

उच्छीर्षक न० उत्थापितं शय्यातउत्तोल्य स्थापितं शीर्षं यस्मिन् ब०ब्री० कप् । शीर्षोपधाने (बालिश)। श०च०। २उन्नतशीर्षके धान्यादौ त्रि० हला० । ऊर्द्धं शीर्षं कायति कै-क । ३शिरःप्रदेशे "उच्छीर्षके श्रियै कुर्य्याद् भद्रकाल्यै च पादतः" मनुः उच्छीर्षके वास्तुपुरुषस्य शिरःप्रदेशे" कुल्लूकभट्टः । [शुष्के ।

उच्छुष्क त्रि० उद्गतः शुष्कम् प्रा०स० । ऊर्द्धप्रदेशात्

उच्छून त्रि० उद्-श्वि-क्त । १उन्नते २स्फीते च "दृषोच्छूनैः क्रिमेभिर्भुजैः" सा०द० । "अनरतरुदितोच्छूनताम्रदृष्टि-मद्राक्षम्" दशकु०। भावे क्त । ३स्फीततायाम् । (फोला)

उच्छृङ्खल त्रि० उद्गतं शृङ्खलातः निरा०स०। १बन्धनरहिते, २नियन्तृरहिते, ३अप्रतिबन्धे च ।"अन्यदुच्छृङ्खलं सत्वमन्यच्छास्त्रनियन्त्रितम्" "कम्पूर्व्वमुच्छृङ्खलशङ्खनिस्वनः" माघः । [पाटके २नाशके च ।

उच्छेत्तृ त्रि० उद्+छिद-तृच् स्त्रियां ङीप् । १समूलोत्-

उच्छेद पु० उद्+छिद-भावे घञ् ।१समूलोत्पाटने२विनाशने च "किमिति सर्व्वपशुच्छेदः क्रियते" हितो० "ततः सत्यवत्यचिन्तयत् मा दौष्मन्तोवंश उच्छेदं व्रजेदिति" भा०आ०६५ अ० । "सतां भवोच्छेदकरः पिता ते" रघुः । भावे ल्युट् । उच्छेदनमप्यत्र न० "यस्तु नोच्छेदनं चक्रे कुशिकानामुदारधीः" भा० प० १६२ अ० ।

उच्छेद्य त्रि० उच्छेदमर्हति उच्छेद+अर्हार्थे यत् । १उच्छेदार्हे उद्+छिद-कर्मणि ण्यत् । २समूलोत्पाटनीये च ।

उच्छेषण न०उच्छिष्यते उद्+शिष-कर्मणि ल्युट् । १उच्छिष्टे "उच्छेषणं भूमिगतमजिह्मस्याशठस्य च" उच्छेषणन्तु तत्तिष्ठेत् यावद्विप्रा विसर्ज्जिताः" मनुः"सरस्वतीमुखग्रहणोच्छेषणीकृतोदशनच्छद इव चुम्बितम्"दशकु०। भावे ल्युट् । २भुक्तावशेषणे ।

उच्छोषण त्रि० उद्+शुष-णिच्-ल्यु । १सन्तापके,२शुष्कीकारके च "यच्छोकमुच्छोषणमिन्द्रियाणाम्" गीता । भावे ल्युट् । ३सम्यक्शोषणे । "तरसा सेतुबन्धनेन सागरोच्छोषणेन च" रामा०। "उच्छोषणं समुद्रस्य पतनं चन्द्रसूर्य्ययोः" रामा० ।

उच्छोषुक त्रि० उद्+शुष-बा०उक । ऊर्द्धशोषप्राप्ते, "स यद्वैतावन्तरेणाग्नी दीक्षितोऽधीयादनेन लोकेन नानाकुर्य्यादुच्छोषुका ह स्युः" शत०ब्रा०१२,?,?,?

उच्छ्र(च्छ्रा)य पु०उद्+श्रि-करणे अच् घञ् वा । १उन्नततायाम् उन्नततया हि ऊर्द्धमाश्रीयते इति तस्यास्तथात्वम् । "दम्भो धर्म्मध्वजोच्छ्रयः" भा०व०३१२अ० । "पतनान्ताः समुच्छ्रयाः" नीति० "अपरेद्युस्ततस्तस्याः क्रियतेऽभ्युच्छ्रयोत्सवः" भा०आ०६२अ० । प्रासादैः शतशोच्छ्रायैः" भा०आ०१८५अ०।"पदाधीना नरेन्द्राणामुच्छ्रायाः पतनानि च" या०स्मृतिः ।"उच्छ्रायमदातनं धनिनां दर्शयन्निव" कटस० । "शृङ्गोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खम्" मेघदू० । "गुणार्ज्जनोच्छ्रायविरुद्धबुद्धयः" किरा० । २ उन्नतव्यासे "उच्छ्रायेण गुणितं चितेः फलम्" लीला० ।

उच्छ्रयण न० उद्+श्रि करणे ल्युट् । १औन्नत्ये उद्+श्रि-कर्त्तरि ल्यु । २उत्कृष्टे त्रि० । "सर्व्वाण्युच्छ्रयणानि" आश्व० गृ०४,८,२१ । उच्छ्रयणानि उत्कृष्टानि" नारा० वृत्तिः ।

उच्छ्रावण न० उद्+श्रु-णिच्+ल्युट् । उच्चैःश्रावणे उद्घोषे "उद्दिश्य कुपितो यस्तु तोषितः श्रावयेत् पुनः । तस्मिन् मृते न दोषोऽस्ति द्वयोरुच्छ्रावणे कृते" विष्णु० । "उच्छ्रावणसङ्घोषः" प्रा०त० रघुनन्दनः ।

उच्छ्रित त्रि० उद्+श्रि-कर्त्तरि क्त । उन्नते १ऊर्द्धदेशं प्राप्ते । "उच्चकैरुच्छ्रितोरःस्थलमविनिधनिषस्ताम्" माघः। २संजाते ३वर्द्धिते ४प्रवृद्धे च मेदि०। ५त्यक्ते हेमच०

उच्छ्रिति स्त्री उद्+श्रि-बा० करणे क्तिन् । १उच्छ्राये उन्नतायाम् २उत्कर्षे च "यत्रार्थं निधनं प्राप्ताः प्राप्नुवन्त्युच्छ्रितीः पुनः" मनुः । "चतसृष्वपि चाद्यास सर्वशिल्पोच्छ्रितीर्ददेत्" हरि०। २उन्नतसंख्यायाम् "दृष्टकोच्छ्र्यवृद्धच्छ्रितिचितेः" लीला० ।

उच्छ्वसित न० उद्+श्वस-क्त । १विकाशिते, २जीविते, ३स्फुरिते "विशदोच्छ्वसितेन मेदिनी" रघुः । ४प्राणेषु च "सः खलु भगवतः कण्वस्य कुलपतेरुच्छ्वसितम्" शकु०। कर्त्तरि क्त । ५उच्छ्वासयुक्ते ६आश्वासयुक्ते च त्रि० । "त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य संभाव्य चैवम्" मेघदू०।

उच्छ्वास पु० उद्+श्वस-घञ् । १अन्तर्मुखश्वासे, आख्यायिकायाः २परिच्छेदे, यथा दशकुमारस्य प्रथमोच्छ्वासादि प्राणवायोर्दीर्घगत्या ३बहिर्गतौ ४आश्वासे च । "दीर्घाङ्गुलीपर्वोच्छ्वासप्रेक्षणाकुलम्" काव्या० "वायोर्मार्गनिरोधाच्च न गर्भस्थः प्ररोदिति" निश्वासोच्छ्वाससंक्षोभस्वप्नान् गर्भोऽधिगच्छति" सुश्रु० । उच्छ्वासवहनाडीभेदास्तु तत्र दर्शिताः । "ऊर्द्धगाः शब्दस्पर्शरूपरसगन्धप्रश्वासोच्छ्वास-

जृम्भितक्षुतस्मितकथितरुदितादीनि विशेषानभिवहन्त्यः शरीरं धारयन्ति "पीड़यन्नुरजोगाढः सोच्छ्वासः शिथिलः स्मृतः"। "शीतपादकरोच्छ्वासश्छन्नश्वासश्च यो भवेत्। काकोच्छ्वासश्च यो मर्त्यस्तं धीरः परिवर्ज्जयेत्" सुश्रु०। "सन्ततोच्छ्वासिनं क्षीणं नरं क्षपयति ज्वरः" सुश्रु०। उच्छ्वासश्च दीर्घनिश्वासः स च यावत्कालेन श्वासरूपप्राणक्रिया भवति ततोऽल्पकालेन, दीर्घदेशपर्य्यन्तप्राणवायोर्निर्गमने भवति। "उष्णोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्त्ती" मेघदू०। "इत्युच्छ्वासोऽन्तरं प्राप आश्वस" कात्या० ४,८,२६।

उच्छ्वासिन् त्रि० उद्+श्वस-णिनि स्त्रियां ङीप्। १ऊर्द्ध्वश्वासयुक्ते २दीर्घनिश्वासयुक्ते। "समधिकतरोच्छ्वासिना" मेघ०। ४उद्गते च "उच्छ्वासिकालाञ्जनरागमक्ष्णोः" कुमा०। "समधिकतरोच्छ्वासिना" मेघ०। "५ऊर्द्ध्वश्वासयुक्ते मुमूर्षौ" "यत्रैतद्दूरोच्छ्वासी भवति" छा० उ० उत्क्रमणशब्दे दृश्यम्।

उछ उञ्छे (कणश आदाने) तुदा० इदित् पर० सक० सेट्। उञ्छति औञ्छीत्। उञ्छाम्-बभूव आस चकार। उञ्छिता उञ्छ्यात् उञ्छिष्यति औञ्छिष्यत्। उञ्छः उञ्छनम् उञ्छितः। प्र+मार्जने प्रोञ्छनं (पोछा) प्रोञ्छितः।

उछ बन्धे समापने च विवासे पा० तुदा० पर० सक० सेट्। उच्छति औच्छीत् उच्छाम् बभूव आस-चकार। उच्छिता उच्छ्यात् उच्छिष्यति औच्छिष्यत्। णिच् उच्छयति ते औतिच्छत् औचिच्छत त। सनि उतिच्छिषति उचिच्छिषति। ईदित् तेन निष्ठाया नेट्। उष्टः।

उज्जय(यि)नी स्त्री विक्रमादित्यराजधान्याम् अवन्तीपुर्य्याम् अवन्तीशब्दे विवृतिः। "सौधोत्सङ्गप्रणयविमुखो मास्म भूरुज्जयिन्याः" मेघदू०। इयञ्च लङ्कावधिमेरुपर्य्यन्तसमरेखास्थपुरीमध्येऽन्यतमा यथाह श्रीपतिः "लङ्का कुमारी नगरी च काञ्ची पानाटमद्रिश्च सितः षडास्यः। श्रीवत्सगुल्मं च पुरी ततश्च माहिष्मती चोज्जयिनी प्रसिद्धा। स्यादाश्रमोऽस्मान्नगरं सुरम्यं ततः पुरं पट्टशिवाभिधानम्। श्रीगर्गराटं च सरोहिताख्यं स्थानेश्वरं शीतगिरिः सुमेरुः। इतीव याम्योत्तरगां धराया रेखामिमां गोलविदो वदन्ति। अन्यानि रेखास्थितिभाञ्जि लोके ज्ञेयानि तज्ज्ञैः पुटभेदनानि"। सू० सि० तु सामान्येनोक्तम् यथा "राक्षसालयदेवौकःशैलयोर्मध्यसूत्रगाः। रोहीतकमवन्ती च तथा सन्निहितं सरः"। 'राक्षसालयो लङ्का देवानां गृहरूपः पर्वतो मेरुरनयोर्मध्ये ऋजुसूत्रं तत्र स्थिता देशा रेखाख्याः। लङ्कादक्षिणस्थतस्याः स्वनुपयुक्तास्तत्र मनुष्यागोचरत्वादिति नोक्ताः। ग्रामार्थमुदाहरति। रोहीतकमिति। यथा रोहीतकं नगरमवन्त्युज्जयिनी सन्निहितं सरः कुरुक्षेत्रम्। चकारस्तथेत्यव्ययपरः। तथान्यानि परस्परं सन्निहिततया ज्ञेयानि" र०मा०। "यथोज्जयिन्या कुचतुर्थभागे प्राच्यां दिशि स्याद्यमकोटिरेव" सू० सि०।

उज्जयन्त न० उद्+जि-झ। रैवतपर्वते हेम०।

उज्जानक पु० उत्तङ्कमुनेराश्रमान्तिके समुद्रसविधे मरुभूमिषु वालुकामयदेशभेदे। यत्र हि मधुसुतो धुन्धुरुत्तङ्कप्रार्थितेन कुवलाश्वेन विष्णुतेजसा बृंहितवीर्य्येण निपातितः तत्कथा यथा भा० हरिवं० ११अ०। "ममाश्रमसमीपे वै समेषु मरुधन्वसु। समुद्रो वालुकापूर्ण उज्जानक इति श्रुतः। देवानामवध्यश्च महाकायो महाबलः। अन्तर्भूमिगतस्तत्र वालुकान्तर्हितो महान्। राक्षसस्य मधोः पुत्रो धुन्धुर्नाम महासुरः। शेते लोकविनाशाय तप आस्थाय दारुणम्"। इत्युपक्रम्य तद्वधो वर्णितस्तत् कथा धुन्धुमारशब्दे दर्शयिष्यते २उत्तरदेशस्थेऽपि देशभेदे "एतदुद्दारं महाराज! मानसस्य प्रकाशते" इत्युपक्रम्य "एष उज्जानकोनाम पावकिर्यत्र शान्तवान्" भा० व० १३० अ० देशभेद उक्तः।

उज्जासन न० उद्+जस-णिच्-ल्युट्। १मारणे वधे एतद्योगे कर्म्मणः संबन्धत्वविवक्षया षष्ठी प्रतिपदविहिततया च तया षष्ठ्या न समासः "चौरस्योज्जासनम्" सि० कौ०। "प्रतिपदविहिता षष्ठी न समस्यते" वार्त्ति०। "प्रोक्ता प्रतिपदा षष्ठी समासस्य निवृत्तये" भर्तृ०। तथैवोक्तम्

उज्जिघ्र त्रि० उद्+घ्रा-श। आघ्राणकर्त्तरि।

उज्जिति स्त्री उद्+जि-क्तिन्। उत्कृष्टजये "अग्नीषोमयोरुज्जितिमनूज्जेषम्" यजु० २,२५। "उज्जितिमनु पहतविघ्नेन हविःस्वीकरणरूपमुत्कृष्टजयम्" वेददी०। "सोमस्योज्जितिमित्यग्निर्वमस्यतिः" कात्या० १०,७,१४। "उज्जितिभ्यो वोत्तरो माहेन्द्रः" कात्या० १४,५,२१। अग्नीषोमयोरुज्जितिमनूज्जेषम्। 'अग्नीषोमयोरुज्जितिमनूज्जयति" इन्द्राग्न्योरुज्जितिमनूज्जयति" शत० ब्रा० १,८,३,१,२,३,४। २उज्जयलिङ्गयुक्तमन्त्रकरणकाहुतौ च। "अथोज्जितीः" इत्युपक्रम्य "अग्निरेकाक्षरेण प्राणमुदजयत्तमुज्जेषम्" इत्यादि शत० ब्रा० २,२,१६,१७ उक्तम्।

उज्जिहान त्रि० उद्+हा-शानच्। उद्गच्छति।

उज्जीविन् त्रि० उद्+जीव-णिनि। नाशप्रायतापाप्युत्तरं पुनरुज्जीवनवति।

उज्जृम्भ पु० उद्+जृभि-घञ्। १विकाशे २स्फुटने। उद्गता जृम्भा (हाइतोला) यस्मात्” प्रा०ब० गतलोपः। ३मुखविकाशनभेदे ४कर्त्तरि अच्। ४प्रकाशान्विते ५उज्जृम्भावति त्रि० “उज्जृम्भरदनाम्भोजा भिनत्त्यङ्गानि साङ्गना” माघः

उज्जृम्भण न० उद्+जृभि-भावे ल्युट्। विकाशे मुखविकाशनभेदे व्यापारे (हाइतोला)। “उद्गारकाशनवथुष्ठीवनोज्जृम्भणानि च” सुश्रुतः। उद्+जृभि-अ। उज्जृम्भाऽप्यत्र स्त्री।

उज्जृम्भित त्रि० उद्+जृभि-क्त। विकाशिते। भावे क्त। २चेष्टायाम् (हाइतोला) ३मुखव्यापारभेदे न०।

उज्जेष पु० उदा+जिष-गत्याम् भावे घञ्। १उत्कर्षप्राप्तौ उज्जित शब्दे उदा०। अच्। २उत्कृष्टे त्रि०।

उज्जेषिन् त्रि० उद्+जिष-गत्यां णिनि स्त्रियां ङीप्। उत्कर्षप्राप्ते “क्रीडी च शाकी चोज्जेषी” यजु०१७, ८५ “उज्जेषी उत्कृष्टजयनशीलः” वेददी०।

उज्ज्य न० उद्गता ज्या यस्य प्रा० वा गतलोपः। “आरोपितमौर्वीके धनुषि। उज्ज्यधन्वाः” कात्या०२२,३, १७। “उज्ज्यधन्वा आरोपितज्यधनुष्काः” कर्क०। उत्क्रान्ता अवतारिता ज्या यतः प्रा० ५ब० वा क्रान्तलोपः। अवतारितमौर्वीके धनुषि “काशग्रोवा वैदहोशोप्यपुत्र उज्ज्यं धनुरधिज्यं कृत्वा” छा०उ०।

उज्ज्वल त्रि० उद्+ज्वल-अच्। १दीप्ते, २विशदे, ३विकाशिनि च। ४शृङ्गाररसे पु०। “स राशिरासीन्महसां महोज्ज्वलः “शृङ्गारभङ्ग्या महाकाव्ये चास्थि नैषधीयचरिते सर्गोनिसर्गोज्ज्वलः” नैष०। “स्नातन्त्वग्रुज्ज्वलमवाप करेणुराजः” अविरतमुद्गतिमुज्ज्वलां दधानैः” माघः। ‘अस्माकं सखि! वाससी न रुचिरे ग्रैवेयकं नोज्ज्वलम्” सा०द०। “विचित्रोज्ज्वलवेशा तु वलन्नूपुरनिस्वनाः” सा०द०“सुमुखाः पल्लवोज्ज्वलाः” सुश्रु०। अस्य च रसान्तरत्वं गोस्वामिग्रन्थे स्थितम्। ५स्वर्णे न० राजनि० धातुमध्ये तस्योद्दीप्तोत्पात्तथात्वम्। तस्य भावः ष्यञ् औज्ज्वल्य त्व। उज्ज्वलत्व तद्भावे न०। तल्। उज्ज्वलता स्त्री तत्रैव।

उज्ज्वलदत्त पु० उणादिवृत्तिकारके विद्वद्भेदे। तस्येदम्। छ। उज्ज्वदत्तीय तत्कृतग्रन्थे पु० तत्कृतवृत्तौ तु स्त्री।

उज्ज्वलन न०उद्+ज्वल-भावे ल्युट्। १उद्दीप्तौ २वैशद्ये च।

उज्झ त्यागे तुदा० पर० सक० सेट्। उज्झति ‘औज्झीत् उज्झाम्—बभूव आस चकार। उज्झिता उज्झ्यात् उज्झिष्यति औज्झिष्यत्। उज्झितः। त्वमङ्ग यस्याः पतिरुज्झितक्रमः” नैष०। “अद्यापि नोज्झति हरः किल कालकूटम्” चौरपञ्चाशिका। “प्राणानौज्झीच्च खड्गेन छिन्नस्तेनैव मूर्द्धनि” भट्टिः। “सपदिविगतनिद्रस्तल्पमुज्झाञ्चकार”। “अविरतोज्झितवारिविपाण्डुभिः” “एरम्बराचिसाडश्यमदूरोज्झितवर्त्मसु स्तगद्रव्येषु” सेकान्ते मुनिकन्याभिस्तत्क्षणोज्झितवृक्षकम्” “उदग्रे मदशाच्यमुज्झता” इति च रघुः। अतः ‘भिद्योद्ध्यौ नदे” पा० नि०क्यप् नदे कर्त्तरि झस्य धत्वम्। “उदकमुज्झति उद्ध्योनद”: सि०कौ०।

प्र+प्रकर्षेण त्यागे। “स्वाटहिणी प्रेयस्यपि प्रोज्झिता” प्र०बो०। “लिखितमपि ललाटे प्रोज्झितुं कः समर्थः” हितो०। सम्+ सम्यक्त्यागे।

उज्झ त्रि०उज्झति उज्झ-अच्। त्यागिनि। “ब्रह्मोज्झता वेदनिन्दा कौटसाक्ष्यं सुहृद्वधः। गर्हितान्नाद्ययोर्जग्धिः सुरापाणसमानि षट्” मनुः।

उञ्छ पु० उछि-घञ्। “अबाधितस्यानेषु पथि क्षेत्रेषु च अप्रतिहतावकाशेषु यत्र कुत्रौषधयो विद्यन्ते तत्राङ्गुलीभ्यामेकैकं कणं समुच्चिनोतीति” बौधा०स्मृत्युक्ते कणश आदाने। “शिलोञ्छमप्याददीत विप्रोऽजीवन् यतस्ततः” मनुः। “एवं वृत्तस्य नृपतेरुञ्छेनापि च जीवतः” मनुः। “तानुञ्छषष्ठाङ्कितसैकतानि” रघुः। “निराहारस्तु स मुनिरुञ्छं मार्गयते पुनः” ‘तयामुमुञ्छधर्म्माणं दुर्वासा मुनिसत्तमः” शिलोञ्छवृत्तिधर्म्मात्मा मुद्गल संयतेन्द्रियः” भा०व० १५८अ०। “प्रतिग्रहाच्छिलः श्रेयांस्ततोऽप्युञ्छः प्रशस्यते” मनुः। “व्यालग्राहानुञ्छवृत्तीनन्यांश्च वनचारिणः” मनुः। अस्य क्लीवताऽपि “उञ्छं भैक्ष्यं यदन्यच्च तत्परिग्रहणम् ऋतम्” निगमोक्तेः ‘प्रतिग्रहात् शिलं श्रेयस्ततोऽप्युञ्छं प्रशस्यते” स्मृत्यन्तरे चोक्तम्। उञ्छशिलमिति समस्तमपि शब्दान्तरं केचिदिच्छन्ति। उञ्छेन पश्चिमसूत्रकृत्कृतेन शिल्यते संचीयते इति तद्व्युत्पत्तेः “ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम्। मृतन्तु याचितं भैक्ष्यं प्रमृतं कर्षणं स्मृतम्” मनुः।

उञ्छन न० उछि-भावे ल्युट्। आपणक्षेत्रादिपतितस्य क्षेत्रस्वामिगृहीतविक्रीतावशिष्टस्य धान्यादेः कणश आदाने

उञ्छशिल न० शिल-अपहारे क स०त०। क्षेत्रस्वामिना गृहीतशस्यात् क्षेत्रात्कणशः समुच्चयरूपे आहरणे। अस्य

दन्त्यमकारमध्यतामपि केचित् पृषोदरादि० कल्पयन्ति ।

उट न० उ+टक् नेत्त्वम् । १तृणे, २पर्णे च ।

उटज पुंन० उटेभ्यो जायते जन+ड । पत्रादिनिर्म्मितशालायां मुन्यादिगृहे । "उटजद्वाररोधिभिः" "मृगैर्वर्त्तितरोमन्थमुटजाङ्गनभूमिषु" रघुः "नवोटजाभ्यन्तरसंभृतानलम्" कुमा०

उठ गतौ भ्वा०पर०सक०सेट् । ओठति औठीत् । उवोठ ऊठतुः ओठिता उठ्यात् ओठिष्यति औठिष्यत् ।

उड संहतौ सौत्र० पर०अक० सेट् । ओडति औडीत् । उवोड ऊडतुः । ओडिता उड्यात् ओडिष्यति औडिष्यत् । उडु

उडु स्त्री न० उड-बा० कु । १नक्षत्रे, २जले च स्त्रीत्वे वा ऊङ् । "इन्दुप्रकाशक्षपितोडुतुल्याः" । "उत्तम्भितोडुभिरतीवतरां शिरोभिः" माघः ।

उडुचक्र न० उडूनां चक्रमिव मण्डलम् । १नक्षत्रमण्डले भचक्रे तस्य संस्थितिश्च" सि०शि० उक्ता उडुशब्दे तत्र दर्शितम् । उडुचक्रस्वरूपादि सू० सि० उक्तम् यथा "ब्रह्माण्डमध्ये परिधिर्व्योमकक्षाभिधीयते । तन्मध्ये भ्रमणं भानामधोऽधः क्रमशस्तथा । मन्दामरेज्यभूपुत्रसूर्य्यशुक्रेन्दुजेन्दवः । परिभ्रमन्त्यधोऽधस्थाः सिद्धविद्याधरा घनाः" । "ब्रह्माण्डान्तःपरिधिस्तत्तुल्यमानं वृत्तं व्योमकक्षा वक्ष्यमाणाकाशकक्षोच्यते । तन्मध्ये ब्रह्माण्डमध्य आकाशे भानां नक्षत्राणां सर्वेषां सर्वतस्तुल्योर्ध्वान्तरितानां भ्रमणं भवति । तथा तुल्योर्ध्वान्तरेणाधोधोनक्षत्रेभ्यः शनिबृहस्पतिभौमार्कशुक्रबुधचन्द्राश्चघस्तात् परिभ्रमन्ति । सिद्धा विद्याधराघनाश्चाधस्ताश्चन्द्रादधःस्थिता अधोऽधः क्रमेणाकाशे स्थिताः । प्रवहवायाववस्थानाभावाच्चन्द्रवन्न तेषां परिभ्रमः" र०ना० । तस्योत्पत्तिविभागस्तत्रैव । "पुनर्द्वादशधात्मानं व्यभजद्राशिसञ्ज्ञकम् । नक्षत्ररूपिणं भूयः सप्तविंशात्मकं वशी" सू० सि० । "पुनरनन्तरमात्मानं द्वादशधा द्वादशस्थानेषु राशिसंज्ञकं व्यभजत् मनःकल्पितं वृत्तं द्वादशविभागं राशिवृत्तमकरोदित्यर्थः । भूयो द्वितीयवारमात्मानं नक्षत्ररूपिणं सप्तविंशात्मकं व्यभजत् । मनःकल्पितं तदेव वृत्तं सप्तविंशतिविभागं चाकरोदित्यर्थः । ननु न्यूनाधिकविभागाः कथं न कृताः ? उक्तसङ्ख्यायां नियामकाभावादित्यत आह वशीति । इच्छाविषयं वशं विद्यते यस्येति वशी स्वतन्त्रस्यास्य नियोगानर्हत्वात् । स्वेच्छया तत्सङ्ख्याका विभागाः कृता इति भावः । सप्तविंशतिविभागव्यञ्जकानि नक्षत्राणि तारात्मकानि निर्मितानीत्यर्थसिद्धम्" र०ना० । तत्र राशिनक्षत्रनामानि ज्योति०त०उक्तानि यथा "मेषवृषमिथुनकर्कटसिंहाःकन्यातुलाधरवृश्चिकभम् । धनुरथ मकरः कुम्भोमीन इति च राशयः कथिताः" । "अश्विन्या सह भरणी कृत्तिकापादः कीर्त्तितोमेषः । वृषभः कृत्तिकाशेषं रौहिण्यर्द्धञ्च मृगशिरसः । मृगशिरसोऽर्द्धं चार्द्रा पुनर्वसोस्त्रिपादं मिथुनम् । पादः पुनर्वसोरन्त्यः पुष्योऽश्लेषा च कर्कटः कथितः । सिंहोऽथ मघा पूर्वफल्गुनीपाद उत्तरायाः । तच्छेषं हस्ता च चित्रार्द्धं कन्यकाख्यः स्यात् । तौलिनि चित्रार्द्धं स्वातिविशाखायाश्च पादत्रयम् । अलिनि विशाखापादस्तथानुराधान्विता ज्येष्ठा । मूलं पूर्व्वाषाढा प्रथमश्चाप्युत्तरांशको धन्वी । मकरस्तत्परिशेषं श्रवणा चार्द्धं धनिष्ठायाः । कुम्भोऽथ धनिष्ठार्द्धं शतभिषापौर्व्वभाद्रपदत्रयम् । भाद्रपदायाः शेषस्तथोत्तरा रेवती मीनः" अश्विन्यादिनक्षत्राणां तारासंख्यातत्सन्निवेशस्वरूपं च श्रीपतिनोक्तम् । "वह्नित्रिऋत्विषुगुणेन्दुकृताग्नि भूतबाणाश्विनेत्रशरभूकुयुगाग्निरामाः । रुद्राब्धिरामगुणवेदशतद्वियुग्मदन्ता बुधैर्निगदिताः क्रमशो भताराः । तुरगमुखसदृक्षं योनिरूपं क्षुराभं शकटनिभमथैणस्योत्तमाङ्गेन तुल्यम् । मणिगृहशरचक्राभानि शालोपमं च शयनसदृशमन्यच्चात्र पर्य्यङ्करूपम् । हस्ताकारमजस्रमौक्तिकसमं चान्यत् प्रवालोपमं धिष्ण्यं तोरणवत् स्थितं बलिनिभं स्यात् कुण्डलाभं परम् । क्रुध्यत्केसरिविक्रमेण सदृशं शय्यासमानं परं चान्यद्दन्तिविलासवत् स्थितमतः शृङ्गाटकव्यक्ति च । त्रिविक्रमाभं च मृदङ्गरूपं वृत्तं ततोऽन्यद्यमलद्वयाभम् । पर्य्यङ्कतुल्यं मुरजानुकारमित्येवमश्व्यादिभचक्ररूपम्" ।

भचक्रपरिधिमानम् सि०शि०उक्तम् "अभ्रेभ्विभाङ्गगजशङ्करगोऽश्वपक्षाः" (२५९८८९८५०योजनानि) कक्षां वदन्ति गणका भगणस्य चेमाम्" । तस्य भूमध्यात् उच्छ्रितियोजनानि तु तत्रोक्तानि यथा "नागाश्वषड्द्वयरसाग्निकृवेदसंख्यो" (४१२६३६५८) नक्षत्रमण्डलभवः श्रवणो निरुक्तः" । अस्य च द्वादशधा विभक्तस्य प्रवहवायुना भ्राम्यमाणस्य दिने क्षणाद्दयः रात्रौ च क्षणामिति भेदः । "स्यादुद्गमो निजनिजोदयभानुतुल्ये सूर्य्येऽस्तभास्करसमोऽस्तमयश्च भानाम्" सि०शि० उक्तेः । २ताराणां समूहे च "वप्रेण पर्य्यन्तचरोडुचक्रः" माघः ।

उडु(डू)प पु० उडुनि जले पाति पा—क । १प्लवे भेलायाम् ।

'उडुपप्लवसन्तारोयत्न नित्यं भविष्यति" भा०आ० ८१अ० । "वह्नलोशारविक्षुब्धं फेनोडुपपरिप्लुतम् । भा०व०१४६ । "तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्" रघुः । उडुरूपजलसन्तारहेतुत्वादस्य उडुपत्वम् । चर्मावनद्धयानपात्रे न० तच्छ्लोकव्याख्याने मल्लिनाथेन "उडुपेन चर्मावनद्धयानपात्रेणेत्यभिधाय "चर्मावनद्धमुडुपं प्लवकाष्ठं करण्डवदिति" सज्जनोक्तिरुदाहृता । पृषो० । उडुपोऽपि प्लवे अमरटी० । उडूनि उडूर्षि नक्षत्राणि पाति पा—क । २चन्द्रे स हि ताराणां पतिरतस्तद्रक्षकः । उडूनां दिवा हि सूर्य्यकिरणैरभिभवादप्रकाशत्वेन रात्रौ च प्रकाशवत्त्वेन निशाधीशचन्द्रस्य ततपतित्वम् । एवम् "नक्षत्राणामधीशत्वमोषधीनां तथैव चेति" का०ख० प्रजापतिना तदधीशत्वदानमुक्तम्" । गीतायामपि "नक्षत्राणामहं शशी" इत्युक्तेः तन्मध्ये तस्य श्रेष्ठत्वादपि तत्पतिता "सलिलमये शशिनि" बृह०सं० तस्य जलमयत्वोक्तेः उडुमयत्वात् जलमयत्वात् तस्य उडुपतित्वं वा बोध्यम् दक्षकन्याश्विन्यादितारापतित्वाद्वा तथात्वम् ।

उडु(डू)पति पु० उडूनां पतिः । १चन्द्रे २जलेशे वरुणे च । "परिमुग्धतां वणिगिवोडुपतेः" माघः । 'रक्षात्मकस्योडुपतेश्च रश्मयः" कुमा० ।

उडुपथ पु० उडूनां पन्थाः । आकाशे । तत्र हि उडूनां प्रत्यहं प्रवहवायुना भ्रमणात् तथात्वम् ।

उ(दु)डुम्बर पु० उं शम्भुं वृणोति स उम्बरः उत्कृष्टः उम्बरः प्रा०स० पृषो० दस्य वा डत्वम् । (यज्ञ डुमुर) १यज्ञाङ्गे वृक्षे २ताम्रे च, महाबलपक्षण्याम् ३देहल्याम् ४कुष्ठभेदे च न० । "उ(दु)डुम्बरो यज्ञफलो यज्ञाङ्गो हेमदुग्धकः । उदुडुम्बरोहितोरूक्षो गुरुपित्तकफास्रजित् । मधुरस्तुवरोव्रण्योविशोधनरोपणः" इति भा० व० उक्तगुणकः । तस्य विकारः अण् । औ(दु)डुम्बर तद्विकारे पात्रादौ त्रि० । स्त्रियां ङीप् । "गृहीत्वौडुम्बरं पात्रं जानुभ्यां धरणिं गतः" स्मृतिः । "औडुम्बरीं स्पृष्ट्वा गायेत" श्रुतिः । [ङीष् । दन्तीवृक्षे शब्दच० ।

उडुम्बरपर्णी स्त्री उडुम्बरस्य पर्णमिव पर्णमस्याः गौरा०

उडुराज् पु०उडुषु राजते राज–क्विप् । चन्द्रे । अच्, उडूनां राजा टच् समः० वा । उडुराजोऽप्यत्र "तदोडुराजः ककुभः करैर्मुखं प्राच्याविलिम्पन्" भाग०१०, २९अ० ।

उडुलोमन् पु० उडुरिव लोमास्य । ऋषिभेदे । तस्यापत्यम् बाह्वा०इञ् । औडुलोमि तदपत्ये पुंस्त्री० । बहुषु अकारः । उडुलोमाः । [विरुत्वेडुडयने निराशताम्" नैष० ।

उड्डयन न० उद्+डी–ल्युट् । पक्षिणामूर्द्ध्वगतौ 'गतो

उड्डामर त्रि० उत्कृष्टो डामरः प्रा०स० । १उद्भटे २श्रेष्ठे च ३तन्त्रभेदे पु० । [तिभेदे ।

उड्डीन न० उद्+डी–भावे क्त । ऊर्द्ध्वोत्पतनरूपे खगग-

उड्डीयन न० उद्+डी–उ उड्डुः स इवाचरति क्यङ् उड्डीय–भावे ल्युट् । । उत्पतने । "कथमुड्डीयनेऽशक्तान् पतने च ममात्मजान्" भा० आ० २३२अ० । उड्डीय–कर्त्तरि ताच्छील्ये वा चानश् । उड्डीयमान उड्डयन कर्त्तरि तच्छीले च त्रि० ।

उड्डीश पु० उद्+डी–क्विप् तस्य ईशः । उत्पतन कर्त्तॄणामीश्वरे १महादेवे २तन्त्रभेदे च मेदि० । योगिनां हि उत्पतनं योगशास्त्रप्रसिद्धम् महादेवस्य च तदीशत्वात् तथात्वम् । उड्डीशतन्त्रस्य तु उत्पतनसाधनोपायविधायकत्वात् तथात्वम् ।

उ(ओ)ड्र पु०उड–सौ० धा० रक् र वा उ–र–रक् वा डुगागमोवा । कूर्मविभागस्थप्राच्यदेशभेदे "सवङ्गाङ्गान् सपौण्ड्रोड्रान् सचोलान् द्रविडान्धकान्" भा० व० ५१ अ० । ओ(उ)ड्रदेशश्च कूर्म्मविभागे बृ०सं० प्राच्यतयोक्तः यथा "प्राच्यामित्युपक्रम्य मिथिलसमतटोड्राश्ववदनदन्तुरकाः" इति । स च उत्कलात् भिन्नएव तत्रैवानन्तरम् "पौण्ड्रोत्कलकाशिमेकलाम्बष्ठाः" इत्युक्तेः । भारते च सहदेवदक्षिणदिग्विजये "पाण्ड्यांश्च द्रविडांश्चैव सहितांश्चोड्रकेरलैः स०३० अ० उक्तेस्तस्य इन्द्रप्रस्थनगरीतः दक्षिणत्वात् तथात्वम् कूर्म्मविभागे प्राच्यत्वमिति न विरोधः । सर्वत्र उड्रशब्दश्रवणात् उकारादित्वम् रघुनन्दनेन तु ओड्रादिदेशव्यवस्थितमित्युक्तत्वात् ओकारादित्वमपि । अस्य देशवाचित्वात् तस्य राजा तदस्याभिजन इत्यर्थे च अण् । ओड्र तद्राजे तद्वासिनि च बहुषु तस्य लुक् । उड्राः तद्राजेषु तन्निवासिषु च ।

उणक त्रि०ओण–अपसारणे ण्वुल् गौरा०उणक इति पाठात् नि० ह्रस्वः । अपसारके । स्त्रियां गौरा०ङीष् । उणकी ।

उणादि पु०उण्प्रत्यय आदिर्येषाम् । शाकटायनोक्ते उण्प्रभृतौ प्रत्ययसमुदाये । "उणादयो बहुलम्" "ताभ्यामन्यत्रोणादयः" पा० । "उणादयोऽव्युत्पन्नाः प्रातिपदिकानीति" पा०भा० । व्युत्पन्ना इति पाठान्तरम् । व्युत्पत्तिपक्षाभिप्रायेणैव "राघवस्य ततः कार्य्यं कारुर्वानरपुङ्गवः" इति भट्टौ कार्य्यमित्यत्र द्वितीया अव्युत्पन्नत्वे

सा न स्यादिति बोध्यम् उणादिवृत्तिश्च उज्ज्वलदत्तकृता प्रसिद्धा ।

उण्डुक पु० "गर्भस्य यकृत्प्लीहानौ शोणितजौ । शोणितफेनजः फुप्फुसः शोणितकिट्टप्रभव उण्डुकः" इति सुश्रुतोक्ते रुधिरकिट्टजाते देहस्थमलाशये कोष्ठभेदे तन्मलविभाजकत्वं कलाभेदस्य तत्रोक्तं यथा "यकृत् समन्तात् कोष्ठञ्च तथान्त्राणि समाश्रिता । उण्डुकस्थं विभजते मलं मलधरा कला" सुश्रु० देहप्रत्यङ्गविभागमुक्ता सुश्रु० 'तस्य पुनः संख्यानम् त्वचः कला धातवो मला दोषा यकृत्प्लीहानौ फुप्फुस उण्डुको हृदयमाशय" इत्युक्तम् । 'स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च । हृदुण्डुकः फुप्फुसश्च कोष्ठ इत्यभिधीयते इति तस्य आमाशयपक्वमूत्राद्याधारत्वमुक्तम् । शल्योद्धारे च तत्रैव । "अस्थिशल्यमन्यद्वा तिर्य्यक् कण्ठासक्तमवेक्ष्य केशोण्डुकं दृढैकसूत्रबद्धम् द्रवभक्तोपहितं पाययेत् ।

उत् अव्य० उ-क्विप् । १प्रश्ने २वितर्के ३संशये ४अत्यर्थे ५ऊर्द्धे च । ६उदिते त्रि० । "तस्य उदितिनाम" छा० उ० । उद् इति वा छेदः ।

उत अव्य० उ-क्त । १विकल्पे, २समुच्चये, ३वितर्के, ४प्रश्ने, ५अत्यर्थे च । "यदक्रन्दः प्रथमं जायमान उद्यन् समुद्रादुत वा पुरीषात्" यजु० २९,१२ । "मानाग्निहोत्रमुत मानसौमम्" भा० आ० ३६२अ० । "एतावन्ति च दासानां सहस्राण्युत सन्ति मे" भा० स० २२१अ० । "तत् किमयमातपदोषः स्यादुत यथा मे मनसि वर्त्तते" शकु० । 'वीरोरसः किमयमित्युत दर्पएषः" वीरच० 'प्रभुः प्रहर्त्तुं किमुतान्यहिंस्राः" रघुः । "सारतोन विरोधी न स्वाभासो भरवानुत" किरा० । "धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत" ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत" गीता । [प्रोतश्च" स्मृतिः

उत त्रि० वेञ्-क्त । स्यूते ग्रथिते अमरः "यच्चिदोतञ्च ।

उतङ्क पु० आयोदधौम्यशिष्यवेदनामकस्य मुनेः शिष्यभेदे तदुपाख्यानञ्च" भा० आ० ३अ० । वेदमुनिं प्रक्रम्य "स कदाचित् याज्यकार्य्येणाभिप्रस्थित उतङ्कनामानं शिष्यम् नियोजयामास" इत्युपक्रम्य "तत्सौम्य ! गम्यतामनुजाने भवन्तं श्रेयोऽवाप्स्यसीति स उपाध्यायेनानुज्ञातो भगवानुतङ्कः क्रुद्धस्तक्षकं प्रतिचिकीर्षुर्हास्तिनपुरं प्रतस्थे" इत्यन्तेन विस्तरेण तच्चरितमुपवर्णितम् । तस्यायं संक्षेपः । गुरुदक्षिणादानार्थं गुरवे उतङ्केन निवेदिते गुरुपत्नीवचनात् पौष्यनृपधृतकुण्डलद्वयमेव गुरुदक्षिणात्वेन कल्पितम् तच्च पौष्यनृपपत्नीदत्तं कुण्डलद्वयं प्राप्य आनयतस्तस्य प्रमादतस्तक्षकेणापहृतम् अथ वञ्चितो वज्रधरप्रसादात् नागलोकं गत्वा धूमप्राचुर्य्येण नागलोकावरणे तद्भयात्तत्कुण्डलद्वयं नागैर्दत्तमानीय गुरुपत्न्यै दत्तमिति

२भार्गवे गौतमस्य शिष्यभेदे च तत्कथा भारते "उतङ्को महता युक्तस्तपसा जनमेजय ! । गुरुभक्तः स तेजस्वी नान्यत् किञ्चिदपूजयत् । सर्वेषामृषिपुत्राणामेष आसीन्मनोरथः । औतङ्कीं गुरुवृत्तिं वै प्राप्नुयामेति भारत ! । गौतमस्य तु शिष्याणां बहूनां जनमेजय । उतङ्केऽभ्यधिका प्रीतिः स्नेहश्चैवाभवत्तदा । स तस्य दमशौचाभ्यां विक्रान्तेन च कर्मणा । सम्यक् सेवोपचारेण गौतमः प्रीतिमानभूत् । अथ शिष्यसहस्राणि समनुज्ञातवानृषिः । उतङ्कं परया प्रीत्या नाभ्यनुज्ञातुमैच्छत । तं क्रमेण जरा तात ! प्रतिपेदे महामुनिम् । न चान्वबुध्यत तदा स मुनिर्गुरुवत्सलः । ततः कदाचिद्राजेन्द्र ! काष्ठान्यानयितुं ययौ । उतङ्कः काष्ठभारञ्च महान्तं समुपानयत् । स तद्भाराभिभूतात्मा काष्ठभारमरिन्दम ! । निष्पपेष क्षितौ राजन् ! परिश्रान्तो बुभुक्षितः । तस्य काष्ठे विलग्नाऽभूज्जटा रूप्यसमप्रभा । ततः काष्ठैः सह तदा पपात धरणीतले । ततः स भारनिष्पिष्टः क्षुधाविष्टश्च भारत ! । दृष्ट्वा तां वयसोऽवस्थां रुरोदार्त्तस्वरस्तदा । ततो गुरुसुता तस्य पद्मपत्रनिभानना । जग्राहाश्रूणि सुश्रोणी करेण पृथुलोचना । पितुर्नियोगाद्धर्मज्ञा शिरसाऽवनता तदा । तस्या निपेततुर्दग्धौ करौ तैरश्रुबिन्दुभिः । न हि तानश्रुपातांस्तु शक्ता धारयितुं मही । गौतमस्त्वब्रवीद्विप्रमुतङ्कं प्रीतमानसः । कस्मात्तात ! तवाद्येह शोकोत्तरमिदं मनः । सस्वैरं ब्रूहि विप्रर्षे ! श्रोतुमिच्छामि तत्त्वतः । उतङ्क उवाच । एवङ्गतेन मनसा भवत्प्रियचिकीर्षया । भवद्भक्तिगतेनेह भवद्भावानुगेन च । जरेयं नावबुद्धा मे नाभिज्ञातं सुखञ्च मे । शतवर्षोषितं मां हि न त्वमभ्यनुजानीयाः । भवता त्वभ्यनुज्ञाताः शिष्याः प्रत्यवरा मम । उपपन्ना द्विजश्रेष्ठाः शतशोऽथ सहस्रशः । गौतम उवाच । त्वत्प्रीतियुक्तेन मया गुरुशुश्रूषया तव । व्यतिक्रामन्महान् कालो नावबुद्धो द्विजर्षभ ! । किन्त्वद्य यदि ते श्रद्धा गमनं प्रति भार्गव ! । अनुज्ञां प्रतिगृह्य त्वं स्वगृहान् गच्छ मा चिरम् । उतङ्क उवाच । गुर्वर्थं कं प्रयच्छामि ब्रूहि

त्वं द्विजसत्तम। तमुपाहृत्य गच्छेयमनुज्ञातस्त्वया विभो!। गौतम उवाच। दक्षिणा परितोषो वै गुरूणां सद्भिरुच्यते। तव ह्याचरतो ब्रह्मंस्तुष्टोऽहं वै न संशयः। इत्थञ्च परितुष्टं मां विजानीहि भृगूद्वह!। युवा षोड़शवर्षो हि यदद्य भविता भवान्। ददानि पत्नीं कन्याञ्च स्वां ते दुहितरं द्विज!। एतामृतेऽङ्गना नान्या त्वत्तेजोऽर्हति सेवितुम्। ततस्तां प्रतिजग्राह युवा भूत्वा यशस्विनीम्। गुरुणा चाभ्यनुज्ञातो गुरुपत्नीमथाब्रवीत्। किं भवत्यै प्रयच्छामि गुर्वर्थं विनियुङ्क्ष्व माम्। प्रियं हितञ्च काङ्क्षामि प्राणैरपि धनैरपि। यद्दुर्लभं हि लोकेऽस्मिन् रत्नमत्यद्भुतं महत्। तदानयेयं तपसा न हि मेऽत्रास्ति संशयः। अहल्योवाच। परितुष्टाऽस्मि ते विप्र! नित्यं भक्त्याऽनयाऽनघ!। पर्य्याप्तमेतद्भद्रन्ते गच्छ तात! यथेप्सितम्। वैशम्पायन उवाच। उतङ्कस्तु महाराज पुनरेवाब्रवीद्वचः। आज्ञापयस्व मां मातः! कर्त्तव्यञ्च तव प्रियम्। अहल्योवाच। सौदासपत्नीविधृते दिव्ये ये मणिकुण्डले। ते समानय भद्रन्ते गुर्व्वर्थः सुकृतो भवेत्। स तथेति प्रतिश्रुत्य जगाम जनमेजय!। गुरुपत्नीप्रियार्थं वै ते समानयितुं तदा। स जगाम ततः शीघ्रमुतङ्को ब्राह्मणर्षभः। सौदासं पुरुषादं वै भिक्षितुं मणिकुण्डले। गौतमस्त्वब्रवीत् पत्नीमुतङ्को नाद्य दृश्यते। इति पृष्टा तमाचष्ट कुण्डलार्थं गतञ्च सा। ततः प्रोवाच पत्नीं स न ते सम्यगिदं कृतम्। शप्तः स पार्थिवो नूनं ब्राह्मणं तं वधिष्यति। अहल्योवाच। अजानन्त्या नियुक्तः स भगवन्! ब्राह्मणोमया। भवत्प्रसादान्न भयं किञ्चित्तस्य भविष्यति। इत्युक्तः प्राह तां पत्नीमेवमस्त्विति गौतमः। उतङ्कोऽपि वने शून्ये राजानं तं ददर्श ह"। आश्व० ५६ अ०। इतःपरं तत्कुण्डलानयनादिकं मागतत्वकविप्नसुपश्रण्य वह्निप्रसादात्तत् नागलोकादानीय गुरुपत्न्यै तद्दानमुक्तमित्ययं संक्षेपो विस्तरस्तत्र दृश्यः। अस्यैव तोयाभिलाषपूरणार्थमीश्वरेण उतङ्कमेघः प्रवर्त्तितः तत्कथा उतङ्कमेघशब्दे दृश्या।

उतङ्कमेघ पु० उतङ्कार्थमीश्वरेण प्रवर्त्तितोमेघः। मरुदेशस्थोतङ्कतोयाकाङ्क्षापूरणार्थमीश्वरेण कृष्णेन नियोजिते मेघे। तत्कथा भा० आश्व०५५अ०। "उतङ्क उवाच। अवश्यकरणीयञ्च यद्येतन्मन्यसे विभो!। तोयमिच्छामि यत्रेष्टं मरुष्वेतद्धि दुर्लभम्। ततः संहृत्य तत्तेज प्रोवाचोतङ्कमीश्वरः। एष्टव्ये सति चिन्त्योऽहमित्युक्त्वा द्वारकां ययौ। ततः कदाचिद्भगवानुतङ्कस्तोयकाङ्क्षया। तृषितः परिचक्राम मरौ सस्मार चाच्युतम्। ततो दिग्वाससं धीमान्मातङ्गं मलपङ्किनम्। अपश्यत मरौ तस्मिन् श्वयूथपरिवारितम्। भीषणं बद्धनिस्त्रिंशं वाणकार्मुकधारिणम्। तस्याधः स्रोतसोऽपश्यत् वारि भूरि द्विजोत्तमः। स्मरन्नेव च तं प्राह मातङ्गः प्रहसन्निव। एह्युतङ्क! प्रतीच्छस्व मत्तो वारि भृगूद्वह!। कृपा हि मे सुमहती त्वां दृष्ट्वा तृट्समाश्रितम्। इत्युक्तस्तेन स मुनिस्तत्तोयं नाभ्यनन्दत। चिक्षेप च स तं धीमान् वाग्भिरुग्राभिरच्युतम्। पुनः पुनश्च मातङ्गः पिबस्वेति तमब्रवीत्। न चापिबत् स सक्रोधः क्षुभितेनान्तरात्मना। स तथा निश्चयात्तेन प्रत्याख्यातो महात्मना। श्वभिः सह महाराज! तत्रैवान्तरधीयत। उतङ्कस्तं तथा दृष्ट्वा ततो व्रीडितमानसः। मेने प्रलब्धमात्मानं कृष्णेनामित्रघातिना। अथ तेनैव मार्गेण शङ्खचक्रगदाधरः। आजगाम महाबुद्धिरुतङ्कश्चैनमब्रवीत्। न युक्तं तादृशं दातुं त्वया पुरुषसत्तम। सलिलं विप्रमुख्येभ्यो मातङ्गस्रोतसा विभो। इत्युक्तवचनं तन्तु महाबुद्धिर्जनार्द्दनः!। उतङ्कं श्लक्ष्णया वाचा सान्त्वयन्निदमब्रवीत्। यादृशेनेह रूपेण योग्यं दातुं धृतेन वै। तादृशं खलु ते दत्तं तच्च त्वं नावबुध्यथाः। मया त्वदर्थमुक्तो वै वज्रपाणिः पुरन्दरः। उतङ्कायामृतं देहि तोयरूपमिति प्रभुः। स मामुवाच देवेन्द्रो न मर्त्त्योऽमर्त्यतां व्रजेत्। अन्यमस्मै वरं देहीत्यसकृद्भृगुनन्दन। अमृतं देयमित्येव मयैवोक्तः शचीपतिः। स मां प्रसाद्य देवेन्द्रः पुनरेवेदमब्रवीत्। यदि देयमवश्यं वै मातङ्गो हि महामते!। भूत्वाऽमृतं प्रदास्यामि भार्गवाय महात्मने। यद्येवं प्रतिगृह्णाति भार्गवोऽमृतमद्य वै। प्रदातुमेष गच्छामि भार्गवस्यामृतं विभो!। प्रत्याख्यातस्त्वहं तेन दास्यामि न कथञ्चन। स तथा समयं कृत्वा तेन रूपेण वासवः। उपस्थितस्त्वया चापि प्रत्याख्यातोऽमृतं ददत्। चाण्डालरूपी भगवन्! सुमहांस्ते व्यतिक्रमः। यत्तु शक्यं मया कर्त्तुं भूय एव तवेप्सितम्। तोयेप्सां तव दुर्द्धर्षां करिष्ये सफलामहम्। येष्वहःसु च ते ब्रह्मन्! सलिलेप्सा भविष्यति। तदा मरौ भविष्यन्ति जलपूर्णाः पयोधराः। रसवच्च प्रदास्यन्ति तोयं ते भृगुनन्दन!। उतङ्कमेघा इत्युक्ताः ख्यातिं यास्यन्ति चापि ते। इत्युक्तः प्रीति-

मान् विप्रः कश्चन स बभूव ह । अद्याप्युतङ्कमेघाश्च मरौ वर्षन्ति भारत” ।

उतथ्य पु० अङ्गिरसः श्रद्धायां पत्न्यामुत्पन्ने गुरोर्ज्येष्ठभ्रातरि । “तयोश्चाङ्गिरसः पुत्रा एते सर्व्वत्र विश्रुताः । बृहस्पतिरुतथ्यश्च संवर्त्तश्च धृतव्रतः” भा०आ० ६६अ० । तस्यापत्यम् अण् औतथ्यः स च उतथ्येन ममतायामुत्पन्नः बृहस्पतिशापात् जात्यन्धतां प्राप्तस्तत्कथा यथा “अथोतथ्य इति ख्यात आसीद्धीमानृषिः पुरा । ममता नाम तस्यासीद्भार्य्या परमसम्मता । उतथ्यस्य यवीयांस्तु पुरोधास्त्रिदिवौकसाम् । बृहस्पतिर्बृहत्तेजा ममतामन्वपद्यत । उवाच ममता तन्तु देवरं वदतांवरम् । अन्तर्व्वत्नी त्वहं भ्रात्रा ज्येष्ठेनारम्यतामिति । अयञ्च मे महाभाग ! कुक्षावेव बृहस्पते ! । औतथ्यो वेदमत्रापि षडङ्गं प्रत्यधीयत । अमोघरेतास्त्वञ्चापि द्वयोर्नास्त्यत्र सम्भवः । तस्मादेवङ्गते त्वद्य उपारमितुमर्हसि । एवमुक्तस्तदा सम्यग्बृहस्पतिरधीरधीः । कामात्मानं तदात्मानं न शशाक नियच्छितुम् । स बभूव ततः कामी तया सार्द्धमकामया । उत्सृजन्तन्तु तं रेतः स गर्भस्थोऽभ्यभाषत । भोस्तात ! मा गमः कामं द्वयोर्नास्तीह सम्भवः । अल्पावकाशो भगवन् ! पूर्व्वं चाहमिहागतः । अमोघरेताश्च भवान्न पीडां कर्त्तुमर्हसि । अश्रुत्वैव तु तद्वाक्यं गर्भस्थस्य बृहस्पतिः । जगाम मैथुनायैव ममतां चारुलोचनाम् । शुक्रोत्सर्गं ततो बुद्ध्वा तस्या गर्भगतो मुनिः । पद्भ्यामारोधयन्मार्गं शुक्रस्य च बृहस्पतेः । स्थानमप्राप्तमपतद्रेतः प्रतिहतं तदा । पपात सहसा भूमौ ततः क्रुद्धो बृहस्पतिः । तद्दृष्ट्वा पतितं शुक्रं शशाप स रुषाऽन्वितः । उतथ्यपुत्त्रं गर्भस्थं निर्भर्त्स्य भगवानृषिः । यन्मां त्वमीदृशे काले सर्व्वभूतेप्सिते सति । एवमात्थ वचस्तस्मात्तमो दीर्घं प्रवेक्ष्यसि । स वै दीर्घतमा नाम शापादृषिरजायत । बृहस्पतेर्बृहत्कीर्त्तेर्बृहस्पतिरिवौजसा । जात्यन्धो वेदवित्प्राज्ञः पत्नीं लेभे स विद्यया । तरुणीं रूपसम्पन्नां प्रद्वेषीं नाम ब्राह्मणीम् । स पुत्राञ्जनयामास गौतमादीन् महायशाः । ऋषेरुतथ्यस्य तदा सन्तानकुलवृद्धये । धर्म्मात्मा च महात्मा च वेदवेदाङ्गपारगः । गोधर्म्मं सौरभेयाच्च सोऽधीत्य निखिलं मुनिः । प्रावर्त्तत तदा कर्त्तुं श्रद्धावांस्तमशङ्कया” । भा०आ० १०४अ० । “शूद्रावेदी पतत्यत्रेरुतथ्यतनयस्य च” मनुः । “उतथ्यतनयस्य गौतमस्येति” कुल्लू० । तस्य उतथ्यपौत्रत्वेऽपि तत्कुलवर्द्धनात्तथात्वं तस्य जात्यन्धतया स्मृतिकर्त्तृत्वाभावेन तत्पौत्रस्यैव गौतमस्य स्मृतिकर्त्तृत्वात् तस्यैव सम्मतिकथनं युक्तमिति” “तथ्यमुतथ्यानुजवज्जगादाग्रे गदाग्रजः” माघः । अयञ्च आङ्गिरसगोत्रप्रवरमध्यस्थ ऋषिभेदः ८१७पृ० विवृतः ।

उतथ्यानुज पु० ६त० । बृहस्पतौ उतथ्यावरजादयोऽप्यत्र । “तथ्यमुतथ्यानुजवज्जगादाग्रे गदाग्रजः” । [वारे च

उताहो अव्य० उत च आहो च द्व० । १विकल्पे, २प्रश्ने ३वि-

उत्क त्रि० उद्गतं मनोऽस्य उद्+नि०–क । १उन्मनस्के २अन्यमनस्के । “अगमयदद्रिसुतासमागमोत्कः” कुमा० । “तच्छ्रुत्वा च श्रवणसुभगं गर्ज्जितं मानसोत्काः” मेघ०” । “उत्कं धरं द्रष्टुमवेक्ष्य शौरिमुत्कन्धरं दारुक इत्युवाच” माघः ।

उत्कच त्रि० उद्गताः उन्नता-कचोऽस्य । १विकचे केशशून्ये २उन्नतकेशे च “प्रशस्य विकचः पादावस्पृक्षात् स पितुस्तदा । मातुश्च परमेष्वासस्तौ च नामास्य चक्रतुः । घटोह्यास्योत्कच इति माता तं प्रत्यभाषत । अब्रवीत्तेन नामास्य घटोत्कच इति स्म सा” भा०आ० १५६ ।

उत्कट पु० अतीव कटति उद्+कट–अच् । १रक्तेक्षौ, २शरे च ३त्वक्पत्रे । (तेजपात) ४गुडत्वचि (दारचिनि) च न० । ४अविसंवादिविषये त्रि० । उत्कटकोटिसम्भवना तत्तौत्कट्यं विषयताविशेषः स च अविसंवादिप्रवृत्तिप्रयोजकताप्रयोज्य इति नव्यनैयायिकाः । उद्गतः कटः आवरणं यस्य प्रादि०ब० । ५तीव्रे त्रि० । ६भिन्नकटे गजे पु० । “चन्द्रांशुनिकराभासाहाराः काश्चिदुत्कटाः” रामा० । मदोत्कटः । ‘शुक्रशोणितसंयोगे यो भवेद्दोष उत्कटः” सुश्रु० ‘कितवा यानि दीव्यन्तः प्रलपन्त्युत्कटा इव’ भा० स० ६२अ० । ६विषमे त्रि० उत्कटाशनम् “कांश्चित्त कुटजानान्तु विटपेषूत्कटानिव” भा०व० १५६अ० । ७सैंहीलतायाम् स्त्री ।

उत्कण्ठ पु० उन्नतः कण्ठः पादो यत्र । ‘नारीपादौ च हस्तेन धारयेदलके पुनः । स्तनार्पितकरः कामी बन्धश्चोत्कण्ठसंज्ञित’ इति रत्यङ्गे बन्धभेदे उन्नतःकण्ठो यस्य । २उद्ग्रीवे त्रि० । ‘रथस्वनोत्कण्ठमृगः’ रघुः ।

उत्कण्ठा स्त्री० उद्+कठि–अ । इष्टलाभाय कालासहनरूपे १औत्सुक्ये २चिन्तयाञ्च । “यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया” शकु० । “उत्कण्ठायां हृदि न कुरुते कारणानां सहस्रम्” पदाङ्कदू० “त्वामुत्कण्ठा विरचित-

पदम्” केकोत्कण्ठा भवनशिखिनः” मेघदू०।

उत्कण्ठित त्रि० उत्कण्ठा जाताऽस्य तारकादि० इतच्। १उत्कण्ठायुक्ते २नायिकाभेदे स्त्री। “सास्रेणास्रुद्रुत-मविरतोत्कण्ठमुत्कण्ठितेन” मेघदू०। नायिकाभेदस्तु “आगन्तुं कृतचित्तोऽपि दैवान्नायाति यत्प्रियः। तद-नागमदुःखेन विरहोत्कण्ठिता तु सा” सा०द० उक्तः। “उत्कण्ठिताऽसि तरले! न हि नहि सखि! पिच्छिलः पन्थाः सा०द०।

उत्कता स्त्री उत्कं तनोति तन—ड। गजपिप्पल्याम् शब्दच०। उत्कस्य भावः तल्। २ उत्सुकतायाम्।

उत्कन्धर त्रि० उन्नतः कन्धरोऽस्य प्रा०ब० वा गतलोपः। उन्नतग्रीवे “उत्कन्धरं दारुक इत्युवाच” माघः।

उत्कम्प पु० उत्कृष्टः कम्पः प्रा०त०। १ कासादिजनिते कम्पने। “सोत्कम्पानि प्रियसहचरीसम्भ्रमालिङ्गितानि” माघ:। भावे ल्युट्। उत्कम्पनमप्यत्र न०। व्याधिर्जरा-“दिर्वातादेर्भूमेश्चोत्कम्पनादिकृत्” शैत्यभवस्योत्कम्पनादयः” इति च सा०द०। उत्कम्पते अच्। २उत्कम्पान्विते त्रि०। “विस्मयोत्कम्पहृदया नाम चक्रुर्महर्षयः” आ०प० २० अ०। णिनि। उत्कम्पिन् स्त्रियां ङीप्। उत्कम्पान्विते, उत्कम्पयति णिजन्तात् णिनि उत्कम्पकारके च “किमिदं हृदयोत्कम्पि मनोमम विषीदति” रामा०।

उत्कर पु० उद्+कॄ-अप्। १धान्यादीनां राशीकरणे ९ प्रसा-रणे, ३ तृणापसारणे ४ हस्तपदादिविक्षेपे ५ समूहे च। “तृणपर्णोत्करयुतं कलुषं विषसंयुतम्” सुश्रु०। “केश-रोत्करसंमिश्रमशोकानामिवोत्करम्” भा०व० ११९५०। कर्मणि अप्। ६ उत्कीर्य्यमाणे धूल्यादौ “अथ खनति प्राञ्चमुत्करमित्किरति” शत०ब्रा० ३,६,१,६,। उत्की-र्य्यतेऽत्र आधारे अप्। पांश्वादेरुत्क्षेपाधारे गर्त्तादौ, “चत्वालोत्करावन्तरेण सञ्चरः” कात्या० १,२,४२, सञ्च-रोमार्गः चत्वालोगर्त्तः उत्करस्तत्क्षेपणगर्त्तस्तयोरन्त-रालेन विहितकार्य्यार्थं सञ्चारमार्गः। “प्रणीतोत्करावपि-ष्टेषु” कात्या० १,२,४२,।

उत्करादि पु० चतुरर्थ्याम् “उत्करादिभ्यश्छ” पा० विहितछप्र-त्ययनिमित्ते शब्दगणे स च गणः “उत्कर संफल शफर पिप्पल पिप्पलीमूल अश्मन् सुवर्ण खलाजिन तिक कितव अणक त्रैवण पिचुक अश्वत्थ काश क्षुद्र भस्त्रा शाल जन्या अजिर चर्मन् उत्क्रोश क्षान्त खदिर शूर्पणाय श्यावनाय नैवाकव तृण वृक्ष शाक पलाश विजिगीषा अनेक आतप फल सम्पर अर्क गर्त्त अग्नि वैराणक इडा अरण्य निशान्त पर्ण नीचायक शंकर अवरोहित क्षार विशाल वेत्र अरीहण खण्ड वातागर मन्त्रणार्ह इन्द्र-वृक्ष नितान्तावृक्ष आर्द्रवृक्ष”। छ उत्करीय तत्सन्नि-हितदेशादौ त्रि०।

उत्कर्ण त्रि० उन्नतःकर्णो यस्य यस्मिन् वा प्रा०ब० वा गत-लोपः। कृतकर्णोत्तोलने “उत्कर्णमुद्राहितकन्धरेण” माघः।

उत्कर्त्तन न० उत्+कृत—ल्युट्। १ छेदने २ उत्पाटने “दंश-स्योत्कर्त्तनं कुर्य्यादलम्बयुषकस्य च” सुश्रु० उत्कर्त्तनञ्च मूढगर्भचिकित्सोपायः। सुश्रुते दर्शितः यथा। “उ-त्कर्षणापकर्षणस्थानापवर्त्तनोत्कर्त्तनभेदनच्छेदनपीडन-र्जूकरणदारणानि”। उत्कर्त्तनकर्म्मयोग्यता च पुष्प-फलालाबुकालिन्दकत्रपुसैर्वारुककर्कारुकप्रभृतिषु च्छेद्य-विशेषान् दर्शयेदुत्कर्त्तनपरिकर्त्तनानि चोपदिशेत्” सुश्रु० उक्तवस्तुषु उपरिवस्त्रचालने तदीयोपरिस्थ सूक्ष्मत्वखण्डनं न त्वक्खण्डनं यथाभवति एवं गर्भ-रक्षणेन उपरितनवस्तुमात्रच्छेदनं यत्तदुत्कर्त्तनमिति शिक्षार्थमुक्तमिति तात्पर्य्यम्। २ उत्पाटच्छेदने च।

उत्कर्ष पु० उद्+कृष—घञ्। १प्राधान्ये २आतिशय्ये ३स्वकालात् परकालकर्त्तव्यतायाम्। यथा पतितमासिकानां स्व-काले दैवादकरणे मृतसजातीयपरमासीयतिथौ करणम् “एकोद्दिष्टे तु संप्राप्ते यदि विघ्नं प्रजायते। मासेऽन्य-स्मिन् तिथौ तस्मिन् तदा दद्यात् विचक्षणः” इति स्मृतौ-तथा विधानात्तस्य तथात्वम्। “पञ्चानामपि भूतानामुत्कर्षं पुपुषुर्गुणाः” रघुः। स्त्रीणाञ्च उत्कर्षः भर्त्तृगुणेनैव “यादृ-ग्गुणेन भर्त्रा स्त्री संयुज्येत यथाविधि। तादृग्गुणा सा भवति समुद्रेणेव निम्नगा। अक्षमाला वशिष्ठेन संयुक्ताऽ-धमयोनिजा। शारङ्गी मन्दपालेन जगामाभ्यर्हणीय-ताम्। एताश्चान्याश्च लोकेऽस्मिन्नपकृष्टप्रसूतयः। उत्कर्षं योषितः प्राप्ताः स्वैः स्वैर्भर्त्तृगुणैः शुभैः” मनुः। “उत्तमैरुत्तमैर्नित्यं संबन्धानाचरेत् सह। निनीषुः कुल-मुत्कर्षमधमानधमांस्त्यजेत्” मनुः।

उत्कर्षः निमित्ततयाऽस्त्यस्य अच्। ४उत्कर्षनिमित्ते त्रि० “निषिद्धभक्षणं जैह्म्यमुत्कर्षे च वचोऽनृतम्। रजस्वलामुखास्वादः सुरापाणसमानि तु” या०स्मृ०। उत्क-र्षमुत्कर्षनिमित्तं राजकुलादावचतुर्वेद एव चतुर्वेदो-ऽहम्” इत्यनृतभाषणम्” मिता०। उत्कृष्यते अपकृष्टे भ्योगुणविशेषेण विभज्यत इति व्युत्पत्त्या गुणविशेषद्वारैव

अपकृष्टात् विभजनम् । स च स्वस्वजातिषु उत्तमगुणेनैव । तत्र विप्राणां विनयविद्यादिना, राज्ञां शौर्य्यवीर्य्यादिना, वैश्यानां धनादिना, शूद्राणां नम्रतादिना । एवमन्यवस्तुन्यपि यथायथमूह्यम् । द्वयोर्मध्ये एकस्योत्कर्षेऽर्थे तरप् विद्वत्तरः शूरतरः बहूनां मध्ये तु तमप् । विद्वत्तमः शूरतमः इत्यादि । "उत्कर्षहेतवः प्रोक्ता गुणालङ्काररीतयः" सा० द० । "उत्तरोत्तरमुत्कर्षो वस्तुनः सार उच्यते" सा० द० । "यथा वर्णानामुत्कर्षापकर्षकृतेन संयोगविशेषेण" सुश्रु० भावे ल्युट् । उत्कर्षणमप्यत्र न० । उत्कृष्यते कर्म्मणि घञ् । ५उत्कर्षान्विते । उद्धृत्य कर्षः । ६उत्पाट्याकर्षणे उद्धरणे पु० "सन्धानमुत्कर्षमिव व्युदस्य" माघः । ल्युट् । उत्कर्षणमप्यत्र न० । "स्फाटिकं स्थलमासाद्य जलमित्यभिशङ्कया । वस्त्रस्योत्कर्षणं राजा कृतवान् बुद्धिमोहितः" भा० स० ४६अ० ।

उत्कर्षक त्रि० उत्कर्षयति उत्+कृष–णिच् ण्वुल् । १उत्कर्षाधायके "काव्यस्योत्कर्षका उच्यन्ते" सा० द० उद्+कृष–ण्वुल् । उत्पाट्य २कर्षणकारिणि । [त्कर्षे ।

उत्कर्षित त्रि० उत्कर्षो जातोऽस्य तारका० इतच् । जातो-

उत्कर्षिन् त्रि० उत्कर्षति उत्तोल्य कर्षति । १उत्तोल्यकर्षके उद्धारके "अयं स रशनोत्कर्षी पीनस्तनविमर्दनः" सा० द० धृतम् । २उत्कर्षान्विते च । स्त्रियामुभयतो ङीप् ।

उत्कल पु० "जगन्नाथप्रान्तदेश उत्कलः परिकीर्त्तित" इत्युक्ते १उड्रदेशस्थे (उड़िसा) इति ख्याते देशभेदे । स च देशः कूर्म्मविभागे प्राच्यतया वृ० स० उक्तः तच्च उड्रशब्दे उक्तम् । अस्मद्देशापेक्षया च तस्य दाक्षिणात्यत्वमिति भेदः "उत्कलादेशितपथः कलिङ्गाभिमुखं ययौ" रघुः । ४सुद्युम्नपुत्रे राजभेदे । "मनोर्वंशकरः पुत्रस्त्वमेव च भविष्यसि । सुद्युम्न इति विख्यातस्त्रिषु लोकेषु विश्रुतः" इत्युपक्रम्य "सुद्युम्नस्य च दायादास्त्रयः परमधार्म्मिकाः । उत्कलश्च गयश्चैव विनताश्वश्च भारत ! । उत्कलस्योत्कला राजन् ! विनताश्वस्य पश्चिमा । दिक् पूर्व्वा भरतश्रेष्ठ गयस्य तु गया पुरी" हरिवं० १० अ० इत्युक्तेश्च तस्य उत्कलाख्या पुरी आसीत् तत्संबन्धित्वाच्च तद्देशस्योत्कलत्वम् । उत्कलोऽभिजनोऽस्य अण् । औत्कल तद्वासिजने तद्देशानां राजा अण् । औत्कल तद्देशानां राजनि । उभयत्र बहुषु अणो लुक् । "उत्कला मेकलाः पौण्ड्राः कलिङ्गान्ध्राश्च संयुगे" भा० द्रौ० ४अ० । उत्कः सन् लाति ला+क । २व्याधे, ३भारवाहके च शब्दमा० । ४ध्रुवपुत्रभेदे पु० । "प्रजापतेर्दुहितरं शिशुमारस्य वै ध्रुवः । उपयेमे भ्रमिं नाम तत्सुतौ कल्पवत्सरौ । इडायामपि भार्य्यायां वायोः पुत्र्यां महाबलः ! । पुत्रमुत्कलनामानं योषिद्रत्नमजीजनत्" भाग० ४स्क० १०अ० । पञ्चगौडमध्ये ५विप्रभेदे च । "सारस्वताः कान्यकुब्जाः गौडमैथिलकोत्कलाः" ।

उत्कलिका स्त्री उद्–कल–वुन् । १उत्कण्ठायाम्, कामादिजातायां २स्मृतौ च । ३तरङ्गे हला० "वनान्तलोलोत्कलिकासहस्रप्रतिक्षणोत्कूलितशैवलाभाः" माघः । ४कलिकायां कोरके ५हेलायाञ्च हेमच० ।

उत्कलिकाप्राय न० "भवेदुत्कलिकाप्रायं समासाढ्यदृढाक्षरम्" । छ० म० उक्ते गद्यभेदे

उत्कलित त्रि० क्त उद्+कल–क्त । उद्ग्रथिते

उत्कषण न० उद्+कष–ल्युट् । कर्षणे । "सद्यःसीरोत्कषणसुरभिक्षेत्रमारुह्य मालम्" मेघदू० ।

उत्काका स्त्री उत्क्रेशाकति अक–अच् । प्रतिवर्षप्रसूतायां गवि शब्दचि० तु उत्कारेति शब्दमाह ।

उत्काकुद् त्रि० उन्नतं काकुदमस्य "उद्विभ्यां काकुदस्य" पा० अन्त्यलोपः समा० । उन्नततालुके ।

उत्कार पु० उद्+कॄ–"कॄ धान्ये" पा० घञ् । धान्यादेः विक्षेपे "उत्कारेषु च धान्यानमनभीष्टपरिग्रहाः" भट्टिः ।

उत्कारिका स्त्री उद्+कॄ–ण्वुल् । सुश्रुतोक्ते शोफादिनिवारके पाचनभेदे यथा "व्रणस्य षष्टिरुपक्रमा भवन्ति । अपतर्पणमालेप" इत्युपक्रम्य "निर्वापणमुत्कारिका कषाय" इत्यादीनि विभज्य उत्कारिकाविषयपाचनप्रकारो दर्शितः । "निवर्त्तते न यः शोफो विरेकान्तैरुपक्रमैः । तस्य संपाचनं कुर्य्यात् समाहृत्यौषधानि तु । दधितक्रसुरायुक्तं धान्याम्लं यौजितानि तु । स्निग्धानि लवणीकृत्य पचेदुत्कारिकां शुभाम्" । "स्नैहिकेषु च बीजेषु पचेदुत्कारिकां शुभाम्" । "स्नैहिकफलसारोत्कारिका वा" । "स्नुहीभावितामुत्कारिकां दापयेत्" इति च सुश्रु० ।

उत्कास पु० उत्कमस्यति अस–अण् उप० स० । ऋषिभेदे तस्य गोत्रापत्यम् इञ् । औत्कासि तद्गोत्रापत्ये बहुषु तु अस्त्रियां तस्य लुक् । उत्कासाः । अस्यते क्षिप्यतेऽनेन अस करणे घञ् आसः ऊर्द्ध्वस्य कस्य सुखजलस्य आसः । २ऊर्द्ध्वगतश्लेष्मोत्क्षेपकरोगभेदे च । स च अन्तःस्थितकफादेरूर्द्ध्ववायुना उत्क्षेपसाधनं रोगःखनामख्यातः ।

उत्कासिका उत्कमूर्द्ध्वमस्यति अस–ण्वुल्। ऊर्द्ध्वश्लेष्मक्षेपके रोगभेदे।

उत्कासन न० उत् ऊर्द्ध्वस्य कफस्य आसनं क्षेपणम् अस+णिच्–ल्युट्। अन्तःस्थकफरूपस्य कफस्य ऊर्द्ध्वदेशेन निस्सारणरूपे व्यापारे। "आहारशेषस्लेष्महीनाङ्गुलाग्राणि श्वसनोत्कासनप्रधमनैर्निर्हरेत्"। "शल्यिगतः पीड्यमानो न प्रवर्त्तेत आकुञ्चनप्रसारणोन्नमनविनमनप्रधावनोत्कासनप्रवाहणैश्च सरति" सुश्रु०। (कासीकरान)

उत्किर त्रि० उद्+कॄ कर्त्तरि श। उत्क्षेपके। "पुष्परेणूत्किरैर्वातैः" रघुः "गिनाय सात्यन्तहिमोत्किरानिलाः"। "आसु तालीरमन्दार कुसुमोत्किरवीचिषु" कुमा० "शाखिभिः कुसुमोत्किरैः" भट्टिः

उत्कीर्ण त्रि० उद्+कॄ–क्त। १उल्लिखिते, २क्षतवेधे च "मणौ वज्रसमुत्कीर्णे" रघुः। ३ऊर्द्ध्वं क्षिप्ते च "रजोभिस्तुरगोत्कीर्णैः" रघुः। ४लिखिते "उत्कीर्णापि विप्रलभते" काद०।

उत्कीर्त्तन न० उच्चैः कीर्त्तनम्। देवनामादेः उच्चैः कथने।

उत्कीर्त्तित त्रि० उद्+कीर्त्त–क्त। उच्चैः कथिते। [हारा०।

उत्कुट न० कुट–सङ्कोचे क उन्नतं कुटो यत्र। उत्तानशयने

उत्कुण त्रि० उत्तोल्य कुणयते हिंस्यते कुण–हिंसने अद० चुरा० कर्मणि अच्। उत्तोल्य हिंस्ये (उकुण) ख्याते केशकीटे हेमच०।

उत्कूट पु० उन्नतं कूटमस्य। छत्रे हारा०।

उत्कूल त्रि० उत्क्रान्तः कूलात् निरा० स०। १उत्क्रान्तकूले नद्यादौ। कूलमुत्क्रान्तः अत्या० स०। २कूलप्राप्ते। तत्करोतीत्यर्थे णिचि कर्मणि क्त। उत्कूलित। कूल प्रापिते त्रि०। "प्रतिक्षणोत्कूलितशैवलाम्भसः" माघः।

उत्कृति स्त्री षड्विंशत्यक्षरपादके छन्दोभेदे। "उक्तात्युक्ते" त्युपक्रम्य "विकृतिः सङ्कृतिश्चैव तथातिकृतिरुत्कृतिः" वृ०र०

उत्कृत्य अव्य० उद्+कृत–ल्यप्। १उत्कर्त्तनं कृत्वेत्यर्थे। "उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूत्सेधभूयांसि मांसान्" मालती०। ऋदुपधत्वात् कर्मणि क्यप्। २उत्कर्त्तनीये छेदनीये त्रि०

उत्कृष्ट त्रि० उद्+कृष–क्त। १प्रशस्ते २उत्तमे ३उत्कर्षान्विते "सहासनमभिप्रेप्सुरुत्कृष्टस्यापकृष्टजः" "वसनस्य दशा ग्राह्या गृह्ययोरुत्कृष्टवेदने" "कन्यां भजन्तीमुत्कृष्टं न किञ्चिदपि दापयेत्" "बीजस्य चैव योन्याश्च बीजमुत्कृष्टमुच्यते" इति च मनुः। ४कर्षणयुक्ते क्षेत्रादौ च। अतः अतिशये तरप् तमप् च उत्कृष्टतरः उत्कृष्टतमः।

उत्कृष्टभूम पु० उत्कृष्टा भूमिर्यत्र ब० अच् समा०। प्रशस्तभूमौ देशे जटा० अभिधानात् पुंस्त्वम्।

उत्कोच पुंस्त्री उद्गतः कोचः सङ्कोचः कार्य्यप्रतिबन्धो येन। अन्याय्यकर्म्मकरणार्थं स्वार्थप्रतिबन्धनिरासाय वादिप्रतिवादिभ्यां दाने (घुस्) इति ख्याते। "तथोत्कोचपरीहासव्यत्यासच्छलयोगतः" अदत्तगणनायां नारदः। "उत्कोचजीविनो द्रव्यहीनान् कृत्वा प्रवासयेत्" या० स्मृ०। उत्कोचदत्तस्यादत्तत्वं यथा "दत्तं सप्तविधं प्रोक्तमदत्तं षोड़शात्मकमिति" सामान्यतोऽभिधाय "अदत्तं तु भयक्रोधेत्यादिना षोडशविधादत्तपदार्था नारदेन दर्शिताः अदत्तशब्दे तच्चोदाहृतम् ११२पृष्ठे द्रष्टव्यम् "उत्कोचेन कार्य्यप्रतिबन्धनिरासार्थमधिकृतेभ्यो दत्तम्" मिता०

उत्कोचक पु० उत्कोचे उत्कोचद्रव्यग्रहणे प्रसृतः बा० कन्। १उत्कोचग्राहिणि "उत्कोचकाश्चौपधिका वञ्चकाः कितवास्तथा" इत्युपक्रम्य "एवमादीन् विजानीयात् प्रकाशाँल्लोककण्टकान्" मनुः। २धौम्याश्रमान्तिके तीर्थभेदे "यवीयान् देवलस्यैष वने भ्राता तपस्यति। धौम्य उत्कोचके तीर्थे तं वृणुध्वं यदीच्छथ"। "तत्र उत्कोचकं तीर्थं गत्वा धौम्याश्रमं ततः" भा०आ०१८३अ०।

उत्क्रम पु० उद्+क्रम–घञ् अवृद्धिः। व्युत्क्रमे, विपरीतक्रमे "क्रमोत्क्रमान्मेषतुलादिमानम्" ज्यो०त०। "अथोत्क्रमायानुपक्रमाय यतमानं भवति" शत०ब्रा० १२, ४,२,१०। उद्+क्रम–घञ्। २उत्क्रान्तौ ऊर्द्ध्वगतौ।

उत्क्रमण न० उद्+क्रम–ल्युट्। १अपसरणे "सोमवदुत्क्रमणमपगमनञ्च" कात्या०१६,५,१७। २देहात् जीवादेरपसरणे "शतं चैका च हृदयस्य नाड्यस्तासां मूर्द्धानमभिनिःसृतैका। तयोर्द्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति" कठोप० अस्य भाष्यं यथा "तत्र शतञ्च शतसङ्ख्याका एका च सुषुम्ना नाम पुरुषस्य हृदयाद्विनिःसृता नाड्यः शिरास्तासां मध्ये मूर्द्धानं भित्त्वाऽभिनिःसृता निर्गता एका सुषुम्णा नाम तयाऽन्तकाले हृदये आत्मानं वशीकृत्य योजयेत्। तया नाड्योर्द्ध्वमुपरि आयन् गच्छन्नादित्यद्वारेणामृतत्वममरणधर्म्मत्वमापेक्षिकम्। "आभूसंप्लवं स्थानममृतत्वं हि भाष्यते" इति स्मृतेः। ब्रह्मणा वा सह कालान्तरेण मुख्यममृतत्वमेति भुक्त्वा भोगाननुपमान् ब्रह्मलोकगतान्, विष्वङ् नानाविधगतयोऽन्या नाड्य उत्क्रमणे निमित्तं भवन्ति संसारप्रतिपत्त्यर्था एव भवन्ती-

भयैः"। तत्रोत्क्रमणप्रकारः वृ॰उ॰६,३,४,ब्रा॰ दर्शितो यथा "तद्यथाऽनः सुसमाहितमुत्सर्ज्जद्यायादेवमेवायं शारीर आत्मा प्राज्ञेनात्मनान्वारूढ उत्सर्ज्जन्याति यत्रैतदूर्द्ध्वोच्छ्वासी भवति"३५क॰। स यत्रायमणिमानं न्येति जरया वोपतपता वाणिमानं निगच्छति तद्यथाम्रं वोदुम्बरं वा पिप्पलं वा बन्धनात्प्रमुच्यत एवमेवायं पुरुष एभ्योऽङ्गेभ्यः संप्रमुच्य पुनः प्रतिन्यायं प्रतियोन्याद्रवति प्राणायैव"३६क॰। "तद्यथा राजानं प्रयियासन्तमुग्राः प्रत्येनसः सूतग्रामण्योऽभिसमायन्त्येवमेवेममात्मानमन्तकाले सर्व्वे प्राणा अभिसमायन्ति यत्रैतदूर्द्ध्वोच्छ्वासी भवति" ३८क॰ ।"स यत्रायमात्माऽबल्यं न्येत्य सम्मोहमिव न्येत्यथैनमेते प्राणा अभिसमायन्ति स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति स यत्रैष चाक्षुषः पुरुषः पराङ् पर्य्यावर्त्तते तथा रूपज्ञो भवति १ । एकीभवति न पश्यतीत्याहुरेकीभवति न जिघ्रतीत्याहुरेकीभवति न रसयत इत्याहुरेकीभवति न वदतीत्याहुरेकीभवति न शृणोतीत्याहुरेकीभवति न मनुत इत्याहुरेकीभवति न स्पृशतीत्याहुरेकीभवति न विजानातीत्याहुस्तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति, चक्षुष्टो वा मूर्द्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्यस्तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्व्वे प्राणा अनूत्क्रामन्ति सविज्ञानो भवति सविज्ञानमेवान्ववक्रामति । तं विद्याकर्म्मणी समन्वारभेते पूर्व्वप्रज्ञा च" ४ब्रा॰१क॰ ।

अत्र शाङ्क॰भाष्यं यथा । "इत आरभ्यास्य संसारोवर्ण्यते । यथायमात्मा स्वप्नान्ताद्बुद्धान्तमागत एवमयमस्माद्देहाद्देहान्तरं प्रतिपत्स्यत इत्याहात्र दृष्टान्तः। तत्तत्र यथा लोके अनः शकटं सुसमाहितं सुष्ठु भृशं वा समाहितं भाण्डोपस्करणेनोलूखलमुसलशूर्पपिठरादिनान्नाद्येन च सम्पन्नं सम्भारेणाक्रान्तमित्यर्थः । तथा भाराक्रान्तं सदुत्सर्ज्जच्छब्दं कुर्व्वद्यथा यायाद्गच्छेत् शाकटिकेनाधिष्ठितं सत् । एवमेव यथोक्तदृष्टान्तोऽयं शारीरः शरीरे भवः । कोऽसौ आत्मा लिङ्गोपाधिर्यः स्वप्नबुद्धान्ताविव जन्ममरणाभ्यां पाप्मसंसर्गवियोगलक्षणाभ्यामिहलोकपरलोकावनुसञ्चरति यस्योत्क्रमणमनु प्राणाद्युत्क्रमणम् । स प्राज्ञेन परेणात्मना स्वयंज्योतिःस्वभावेनान्वारूढो ऽवभास्यमानस्तथा चोक्तम्" "आत्मनैवायं ज्योतिषाऽऽस्ते पल्ययते" इति । उत्सर्ज्जन् याति तत्र चैतन्यात्मज्योतिषा भास्ये लिङ्गे प्राणप्रधाने गच्छति सति तदुपाधिरप्यात्मा गच्छतीव । तथा च श्रुत्यन्तरम् "कस्मिन्नहमित्यादि" "ध्यायतीवेति" च । अत एवोक्तं प्राज्ञेनात्मनान्वारूढ इत्यन्यथा प्राज्ञेनैकीभूतः शकटवत्कथमुत्सर्ज्जन याति तेन लिङ्गोपाधिरात्मा उत्सर्ज्जन्मर्म्मसु निःकृत्यमानेषु दुःखवेदनयार्त्तः शब्दं कुर्व्वन् याति गच्छति । तत्कस्मिन्काले? इत्युच्यते । यत्रैतद्भवत्येतदिति क्रियाविशेषणमूर्द्ध्वोच्छ्वासी यत्रोर्द्ध्वोच्छ्वासित्वमस्य भवतीत्यर्थः । दृश्यमानस्याप्यनुवदनं वैराग्यहेतोः। ईदृशः कष्टः खल्वयं संसारो येनोत्क्रान्तिकाले मर्म्मसूत्कृत्यमानेषु स्मृतिलोपो दुःखवेदनार्त्तस्य पुरुषार्थसाधनप्रतिपत्तौ चासामर्थ्यं परवशीकृतचित्तस्य । तस्माद्यावदियमवस्था नागमिष्यति तावदेव पुरुषार्थसाधनकर्त्तव्यतायामप्रमत्ता भवतेत्याह कारुण्याच्छ्रुतिः ३५क॰ । तत्तस्योर्द्ध्वोच्छ्वासित्वं कस्मिन्काले ? किं निमित्तं ? कथं ? किमर्थं ? वा स्यादित्येतदुच्यते । सोऽयं प्राकृतः शिरःपाण्यादिमान् पिण्डो यत्र यस्मिन् कालेऽयमणिमानमणोर्भावमणुत्वं कार्श्यमित्यर्थः नि एति निगच्छति । किं निमित्तं जरया वा स्वयमेव कालपक्वफलवज्जीर्णः कार्श्यं गच्छति उपतपतीत्युपतपत् ज्वरादिरोगस्तेनोपतपता वा उपतप्यमानो हि रोगेण विषमाग्नितयान्नं भुक्तं न जरयति ततोऽन्नरसेनानुपचीयमानः पिण्डः कार्श्यमापद्यते तदुच्यते उपतपता वेति अणिमानं निगच्छति । यदात्यन्तकार्श्यं प्रतिपन्नो ज्वरादिनिमित्तैस्तदोर्द्ध्वोच्छ्वासी भवति । यदोर्द्ध्वोच्छ्वासी तदा भृशाहितसम्भारशकटवदुत्सर्ज्जन् याति जराभिभवो रोगादिपीडनं कार्श्योपत्तिश्च शरीरवतोऽवश्यं भाविन एतेऽनर्था इति वैराग्यायेदमुच्यते । यदाऽसावुत्सर्ज्जन् याति तदा कथं शरीरं विमुञ्चतीति दृष्टान्त उच्यते । तत्तत्र यथाम्रं वा फलमुदुम्बरं वा फलं पिप्पलं वा फलं विषमानेकदृष्टान्तोपादानं मरणस्यानियतनिमित्तताख्यापनार्थम् । अनियतानि हि मरणस्य निमित्तान्यसङ्ख्यातानि च । एतदपि वैराग्यार्थमेव । यस्मादयमनेकमरणनिमित्तवांस्तस्मात्सर्वदा मृत्योरास्ये वर्त्तत इति । बन्धनाद्बध्यते येन वृन्तेन स बन्धनकारणो रसो यस्मिन् वा बध्यत इति वृन्तमेवोच्यते बन्धनम् । तस्माद्रसाद्वृन्ताद्वा बन्धनात्प्रमुच्यते वाताद्यनेकनिमित्तम्, एवमेवायं पुरुषो लिङ्गात्मा लिङ्गोपाधिःएभ्योऽङ्गेभ्यश्चक्षुरादिदेहावयवेभ्यः सम्प्रमुच्यते सम्यङ्निर्लेपेन प्रमुच्यते न सुषुप्तगमनकाल इव प्राणेन रक्षन् । किन्तर्हि सह वायुनोपसंहृत्य, पुनः प्रति-

न्यायं पुनःशब्दात् पूर्वमप्ययं देहाद्देहान्तरमसकृद्गतवान् यथा स्वप्नबुद्धान्तौ पुनः पुनर्गच्छति तथा पुनः प्रतिन्यायं प्रतिगमनं यथागतमित्यर्थः। प्रतियोनि योनिं योनिं प्रति कर्म्मश्रुतादिवशादाद्रवति। किमर्थम्? प्राणायैव प्राणव्यूहायैवेत्यर्थः। सप्राण एव हि गच्छति ततः प्राणायैवेति विशेषणमनर्थकं प्रीणिव्यूहाय हि गमनं देहाद्देहान्तरं प्रति। तेन ह्यस्य कर्मफलभोगार्थसिद्धिः। न प्राणसत्तामात्रेण तस्मात्तादर्थ्यार्थं युक्तं विशेषणं प्राणव्यूहायेति" २६। "तमेवं जिगमिषुं के सह गच्छन्ति? ये वा गच्छन्ति ते किं तत्क्रियाप्रयुक्ता? आहोस्वित्तत्कर्मवशात्स्वयमेव गच्छन्ति पारलौकिकशरीरकर्तृणीव भूतानीत्यत्रोच्यते दृष्टान्तः। तद्यथा राजानं प्रयियासन्तं प्रकर्षेण यातुमिच्छन्तमुग्राः प्रत्येनसः सूतग्रामण्यस्त एवाभिसमायन्त्याभिमुख्येन समायान्त्येकीभावेन तमभिमुखा आयान्त्यनाहूता एव राज्ञा केवलतज्जिगमिषाभिज्ञाः। एवमेवेममात्मानं भोक्तारमन्तकाले मरणकाले सर्वे प्राणा वागादयोऽभिसमायन्ति यत्रैतदूर्ध्वोच्छ्वासी भवतीति व्याख्यातम्" २८।

"स यत्रायमात्मेति संसारोपवर्णनं प्रस्तुतम्। तत्रायं पुरुषः एभ्योऽङ्गेभ्यः सम्प्रमुच्येत्युक्तम्। तत् सम्प्रमोक्षणं कस्मिन् काले कथं वेति? सविस्तरं संसरणं वर्णयितव्यमित्यारभ्यते। सोऽयमात्मा प्रस्तुतो यत्र यस्मिन् काले अबल्यमबलभावं नि एत्य गत्वा यद्देहस्य दौर्बल्यं तदात्मन एव दौर्बल्यमित्युपचर्यते अबल्यं न्येत्येति। न ह्यसौ स्वतोऽमूर्त्तत्वादबलभावं गच्छति तथा सम्मोहमिव संमूढता संमोहोऽविवेकाभावः संमोहमिव नि एति निगच्छति न चास्य स्वतः संमोहोऽसंमोहो वास्ति नित्यचैतन्यज्योतिःस्वभावत्वात् तेनेवशब्दः संमोहमिव न्येतीति। उत्क्रान्तिकाले हि करणोपसंहारनिमित्तो व्याकुलीभाव आत्मन इव लक्ष्यते लौकिकैः तथा च वक्तारो भवन्ति संमूढः संमूढोऽयमिति। अथ वोभयत्रेवशब्दप्रयोगो योज्योऽबल्यमिव न्येतीत्यसम्मोहमिव न्येतीति। उभयस्य परोपाधिनिमित्तत्वाविशेषात् समानकर्त्तृकनिर्देशाच्च। अथास्मिन् काल एते प्राणा वागादय एनमात्मानमभिसमायन्ति तदास्य शारीरस्यात्मनो ऽङ्गेभ्यः सम्प्रमोक्षणम्। कथं पुनः सम्प्रमोक्षणं, केन वा प्रकारेणात्मानमभिसमायन्ति? इत्युच्यते। स आत्मा एतास्तेजोमात्रास्तेजसो मात्रास्तेजोमात्रास्तेजोऽवयवा रूपादिप्रकाशकत्वाच्चक्षुरादीनि करणानीत्यर्थः। ता एताः समभ्याददानः सम्यङ्निर्लेपेनाभ्याददानः आभिमुख्येनाददानः संहरमाणस्तत्स्वप्नापेक्षया विशेषणं समिति न तु स्वप्ने निर्लेपेन समभ्यादानमस्ति त्वादानमात्रम्। "गृहीता वाक् गृहीतञ्चक्षुरस्य लोकस्य सर्वावतो मात्रामुपादाय शुक्रमादायेत्यादि" वाक्येभ्यः हृदयमेव पुण्डरीकाकाशमन्ववक्रामत्यन्वागच्छति हृदयेऽभिव्यक्तविज्ञानो भवतीत्यर्थो बुद्ध्यादिविक्षेपोपसंहारे सति। न हि तस्य स्वतश्चलनं विक्षेपोपसंहारादिविक्रिया वा "ध्यायतीव लेलायतीव" इत्युक्तत्वात्। बुद्ध्याद्युपाधिद्वारैव हि सर्वविक्रियाध्यारोप्यते तस्मिन्। कदा पुनस्तस्य तेजोमात्राभ्यादानमित्युच्यते। स यत्रैष चक्षुषि भवश्चाक्षुषः आदित्यांशो भोक्तुः कर्म्मणा प्रयुक्तो यावद्देहधारणं तावच्चक्षुषोऽनुग्रहं कुर्वन् वर्त्तते। मरणकाले त्वस्य चक्षुषोऽनुग्रहं परित्यजति स्वमादित्यात्मानं प्रतिपद्यते। तदेतदुक्तम् 'यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति, वातं प्राणश्चक्षुरादित्यमित्यादि'। पुनर्देहग्रहणकाले संश्रयिष्यति तथा स्वप्स्यतः प्रबुध्यतश्च। तदेतदाह। चाक्षुषः पुरुषो यत्र यस्मिन् काले पराङ् पर्य्यावर्त्तते परि समन्तात् पराङ् व्यावर्त्तत इति यथाऽत्रास्मिन् कालेऽरूपज्ञो भवति मुमूर्षुर्हि रूपं न जानाति। तदायमात्मा चक्षुरादितेजोमात्राः समभ्याददानो भवति स्वप्नक इव। स एकीभवति करणजातं स्वेन लिङ्गात्मना। पार्श्वस्था आहुर्न पश्यतीति। तथा घ्राणदेवतानिवृत्तौ घ्राणमेकीभवति लिङ्गात्मना। तदा न जिघ्रतीत्याहुः। समानमन्यत्। जिह्वायां सोमो वरुणो वा देवता तन्निवृत्त्यपेक्षया न रसयत इत्याहुः। तथा न वदति न शृणोति न मनुते न स्पृशति न विजानातीत्याहुस्तदोपलक्ष्यते देवतानिवृत्तिः करणानाञ्च हृदय एकीभावः तत्र हृदय उपसंहृत्य तेषु योऽन्तर्व्यापारः स कथ्यते। तस्य ह एतस्य प्रकृतस्य हृदयस्य हृदयच्छिद्रस्येत्येतत्। अग्रं नाडीमुखं निर्गमनद्वारं प्रद्योतते स्वप्नकाल इव स्वेन भासा तेजोमात्रादानकृतेन स्वेनैव ज्योतिषाऽऽत्मनैव च तेनात्मज्योतिःप्रद्योतेन हृदयाग्रेण एष आत्मा विज्ञानमयो लिङ्गोपाधिर्निर्गच्छति निष्क्रामति। तथाऽऽथर्वणे 'कस्मिन्न्वहमुत्क्रान्त उत्क्रान्तो भविष्यामि? कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति? स प्राणमसृजतेति' तत्र चात्मचैतन्यज्योतिः सर्वदाभिव्यक्ततरं तदुपाधिद्वारा ह्यात्मनि जन्ममरणगमनागमनादिसर्वविक्रियालक्षणः संव्यवहारस्तदात्मकं हि द्वादशविधं करणम्। बुद्ध्यादि

तत्सूत्रं तज्जीवनं सोऽन्तरात्मा जगतस्तस्थुषश्च। तेन प्रद्योतेन हृदयाग्रप्रकाशेन निःक्रममाणः। केन मार्गेण निष्क्रामतीत्युच्यते। चक्षुषो वाऽऽदित्यलोकप्राप्तिनिमित्तं ज्ञानं कर्म वा यदि स्यात्। मूर्द्ध्नो वा ब्रह्मलोकप्राप्तिनिमित्तं चेत्। अन्येभ्यो वा शरीरदेशेभ्यः शरीरावयवेभ्यो यथाकर्म्म यथाश्रुतमिति तं विज्ञानात्मानमुत्क्रामन्तं परलोकाय प्रस्थितं परलोकायोद्भूताकूतमित्यर्थः। सर्व्वाधिकारस्थानीयोराज्ञ इवानूत्क्रामति तञ्च प्राणमनूत्क्रामन्तं वागादयः सर्व्वे प्राणा अनूत्क्रामन्ति। यथाप्रधानान्वाचिख्यासेयम् न तु क्रमेण सार्थवद्गमनमिह विवक्षितम्। एष आत्मा सविज्ञानो भवति स्वप्न इव विशेषविज्ञानवान् भवति कर्म्मवशादस्वतन्त्रः स्वातन्त्र्येण हि सविज्ञानत्वे सर्व्वः कृतकृत्यः स्यात् नैव तु तल्लभ्यते अतएवाह व्यासः "सदा तद्भावभावितः" इति कर्म्मणानुद्भाव्यमानेनान्तःकरणवृत्तिविशेषाश्रितवासनात्मकविशेषविज्ञानेन सर्व्वोलोक एतस्मिन् काले सविज्ञानोभवति सविज्ञानमेव च गन्तव्यमन्ववक्रामत्यनुगच्छति विशेषविज्ञानोद्भासितमेवेत्यर्थः। तस्मात्तत्काले स्वातन्त्र्यार्थं योगधर्म्मानुसेवनं परिसंख्यानाभ्यासश्च विशिष्ट पुण्योपचयश्च श्रद्दधानैः परलोकार्थिभिरप्रमत्तैः कर्त्तव्य इति सर्व्वशास्त्राणां यत्नतोविधेयोऽर्थो दुश्चरिताच्चोपरमणम् न हि तत्काले शक्यते किञ्चित् संपादयितुम् कर्म्मणानीयमानस्य स्वातन्त्र्याभावात् "पुण्योवै पुण्येन कर्म्मणा भवति पापः पापेन" इत्युक्तेः एतस्य ह्यनर्थस्योपशमोपायविधानाय सर्व्वशाखोपनिषदः प्रवृत्ताः नहि तद्विहितोपायानुसेवनं मुक्त्वात्यन्तिकस्यानर्थस्योपशमोपायोऽस्ति तस्मादत्रैवोपनिषद्विहितोपाये यत्नपरैर्भवितव्यमित्येष प्रकरणार्थः शकटवत् सम्भृतसम्भार उपसर्ज्जद्यातीत्युक्तं किंपुनस्तस्य परलोकाय प्रस्थितस्य पथ्यदनं शाकटिकसम्भारस्थानीयं गत्वा वा परलोकं यद्भुङ्क्ते शरीराद्यारम्भकञ्च यत्तत् किम्? इत्युच्यते। तं परलोकाय गच्छन्तमात्मानं विद्याकर्म्मणी विद्या च कर्म्म च विद्याकर्म्मणी विद्या सर्व्वप्रकारा विहिता प्रतिषिद्धा अविहिताऽप्रतिषिद्धा च तथा कर्म्म विहितं प्रतिषिद्धं चाविहितमप्रतिषिद्धञ्च समन्वारभेते सम्यगन्वारभेते अन्वालभेते अनुगच्छतः पूर्व्वप्रज्ञा च पूर्व्वानुभूतविषया प्रज्ञा पूर्व्वप्रज्ञातीतकर्म्मफलानुभववासनेत्यर्थः। सा च वासनाऽपूर्व्वकर्म्मारम्भे कर्म्मविपाके चाङ्गं भवति। तेनासावप्यन्वारभते नहि तया वासनया विना केनचित् कर्म्म कर्त्तुं फलं चोपभोक्तुं शक्यते नह्यनभ्यस्ते विषये कौशलमिन्द्रियाणां भवति, पूर्व्वानुभववासनाप्रवृत्तानां त्विन्द्रियाणामिहाभ्यासमन्तरेण कौशलमुपपद्यते, दृश्यते च केषाञ्चित् कासुचित् क्रियासु चित्रकर्म्मादिलक्षणासु विनैवेहाभ्यासेन जन्मत एव कौशलम् कासुचिदत्यन्तसौकर्य्ययुक्तास्वप्यकौशलम् केषाञ्चित्, तथा विषयोपभोगेषु स्वभावत एव केषाञ्चित्कौशलाकौशले दृश्येते तच्चैतत् सर्व्वं पूर्व्वप्रज्ञोद्भवानुद्भवनिमित्तं, तेन पूर्व्वप्रज्ञया विना कर्म्मणि वा फलोपभोगे वा न कस्यचित् प्रवृत्तिरुपपद्यते, तस्मादेतत्त्रयं शाकटिकभारस्थानीयं परलोकपथ्यदनं विद्याकर्म्मपूर्व्वप्रज्ञाख्यम्। यस्माद्विद्याकर्म्मणी पूर्व्वप्रज्ञा च देहान्तरप्रतिपत्त्युपभोगसाधनं तस्माद्विद्याकर्म्मादि शुभमेव समाचरेत्। यथा इष्टदेहसंयोगभोगोपभोगौ स्यातामिति प्रकरणार्थः" ४ब्रा॰ १क॰।

शा॰सू॰ भाष्ययोश्च उत्क्रमणप्रकारः प्रपञ्चितो यथा "वाङ्मनसि दर्शनाच्छब्दाच्च" सू॰। "अथापरासु विद्यासु फलप्राप्तये देवयानं पन्थानमवतारयिष्यन् प्रथमं तावद्यथाशास्त्रमुत्क्रान्तिक्रममाचष्टे समाना हि विद्वदविदुषोरुत्क्रान्तिरिति वक्ष्यति। अस्ति प्रायणविषया श्रुतिः "अस्य सोम्य! पुरुषस्य प्रयतोवाङ्मनसि सम्पद्यते, मनः प्राणे, प्राणस्तेजसि, तेजः परस्यान्देवतायामिति" किमिह वाच एव वृत्तिमत्याः मनसि सम्पत्तिरुच्यते उत वाग्वृत्तेरिति? विशयः। तत्र वागेव तावन्मनसि सम्पद्यत इति प्राप्तं तथा हि श्रुतिरनुगृहीता भवति। इतरथा लक्षणा स्यात् श्रुतिलक्षणाविषये च श्रुतिर्न्याय्या न लक्षणा तस्माद्वाच एवायं मनसि प्रविलय इत्येवं प्राप्ते ब्रूमः। वाग्वृत्तिर्मनसि सम्पद्यत इति। कथं वाग्वृत्तिरिति व्याख्यायते यावता वाङ्मनसीत्येवाचार्य्यः पठति। सत्यमेतत् पठिष्यति तु "परस्मात् अविभागोवचनादिति"। तस्मादत्र वृत्त्युपशममात्रं विवक्षितमिति गम्यते। तत्त्वप्रलयविवक्षायान्तु सर्व्वत्रैवाविभागसाम्यात् किं परत्रैव विशिंष्यादविभाग इति। तस्मादत्र वृत्त्युपसंहारविवक्षायां वाग्वृत्तिः पूर्व्वमुपसंह्रियते मनोवृत्ताववस्थितायामित्यर्थः। कस्मात्? दर्शनात् दृश्यते हि वाग्वृत्तेः पूर्व्वोपसंहारोमनोवृत्तौ विद्यमानायाम्। न तु वाच एव वृत्तिमत्यामनस्युपसंहारः केनचिदपि द्रष्टुं शक्यते। ननु श्रुतिसामर्थ्याद्वाच एवायं मनस्यप्यय इत्युक्तं नेत्याह अतत्प्रकृतित्वात् यस्य हि यत उत्पत्तिस्तस्य

तत्र तयोनाप्योम्ऽदीव शरावस्य। न च मनसो वागुत्पद्यत इति किञ्चन प्रमाणमस्ति। वृत्त्युद्भवाभिभवौ त्वप्रकृतिसमाश्रयावपि दृश्येते। पार्थिवेभ्यो हीन्धनेभ्यस्तैजसस्याग्नेर्वृत्तिरुद्भवति अप्सु चोपशाम्यति। कथं तर्ह्यस्मिन् पक्षे वाङ्मनसि सम्पद्यत इति शब्दः, इत्यत आह शब्दाच्चेति। शब्दोऽप्यस्मिन् पक्षेऽवकल्पते वृत्तिवृत्तिमतोरभेदोपचारादित्यर्थः" भा०। "अतएव च सर्व्वाण्यनु" सू०। "तस्मादुपशान्ततेजाः पुनर्भवमिन्द्रियैर्मनसि सम्पद्यमानैः" इत्यत्राविशेषेण सर्वेषामेवेन्द्रियाणां मनसि सम्पत्तिः श्रूयते तत्राप्यत एव वाच इव चक्षुरादीनामपि सवृत्तिके मनस्यवस्थिते वृत्तिलोपदर्शनात्तत्त्वप्रलयासम्भवाच्छब्दोपपत्तेश्च वृत्तिद्वारेणैव सर्वाणीन्द्रियाणि मनोऽनुवर्त्तन्ते। सर्वेषां करणानां मनस्युपसंहाराविशेषे सति वाचः पृथग्ग्रहणं वाङ्मनसि सम्पद्यत इत्युदाहरणानुरोधेन" भा०। "तन्मनः प्राण उत्तरात्" सू०। "समधिगतमेतत् वाङ्मनसि सम्पद्यत इत्यत्र वृत्तिसम्पत्तिर्विवक्षितेति। अथ यदुत्तरं वाक्यम् "मनः प्राण इति" किमत्रापि वृत्तिसम्पत्तिरेव विवक्षिता उत वृत्तिमत्सम्पत्तिरिति? विचिकित्सायां वृत्तिमत्सम्पत्तिरेवेति श्रुत्यनुग्रहात्तत्प्रकृतितोपपत्तेश्च तथा हि "अन्नमयं हि सौम्य मन" आपोमयः प्राण" इत्यत्र अन्नयोनि मन आमनन्ति अब्योनिञ्च प्राणम्। आपश्चान्नमसृजन्तेति श्रुतेः" "अतश्च यन्मनः प्राणे प्रलीयते अन्नमेव तदप्सु प्रलीयते अन्नं हि मनः, आपश्च प्राणः, प्रकृतिविकाराभेदादित्येवं प्राप्ते ब्रूमः तदप्यात्मगृहीतबाह्येन्द्रियवृत्तिमनोवृत्तिद्वारेणैव प्राणे प्रलीयत इत्युत्तराद्वाक्यादवगन्तव्यम्। तथा हि सुषुप्सोर्मुमूर्षोश्च प्राणवृत्तौ परिस्पन्दात्मिकायामवस्थितायां मनोवृत्तीनामुपशमो दृश्यते। न च मनसः स्वरूपाप्ययः प्राणे सम्भवति अतत्प्रकृतित्वात्। ननु दर्शितं मनसः प्राणप्रकृतित्वम्। नैतत्सारं न हीदृशेन प्राणालिकेन तत्प्रकृतित्वेन मनः प्राणे सम्पत्तुमर्हति। एवमपि ह्यन्ने मनः सम्पद्येत अप्सु चान्नं अप्स्वेव च प्राणः। नह्येतस्मिन्नपि पक्षे प्राणभावपरिणताभ्योऽद्भ्यो मनो जायत इति किञ्चन प्रमाणमस्ति। तस्मान्न मनसः प्राणे स्वरूपाप्ययः। वृत्त्यप्यये तु शब्दोऽवकल्पते वृत्तिवृत्तिमतोरभेदोपचारादिति दर्शितम्" भा०। "सोऽध्यक्षे तदुपगमादिभ्यः" सू०। "स्थितमेतद्यस्य यतो नोत्पत्तिस्तस्य तस्मिन् वृत्तिलयो न स्वरूपलय इति। इदमिदानीं प्राणस्तेजसीत्यत्र चिन्त्यते किं यथाश्रुति प्राणस्य तेजस्येव वृत्त्युपसंहारः किं वा देहेन्द्रियपञ्जराध्यक्षे जीवे? इति। तत्र श्रुतेरनतिशङ्क्यत्वात् प्राणस्य तेजस्येव सम्पत्तिः स्यात् अश्रुतकल्पनाया अन्याय्यत्वादित्येवं प्राप्ते प्रतिपद्यते सोऽध्यक्ष इति। स प्रकृतः प्राणोऽध्यक्षेऽविद्याकर्म्मपूर्व्वप्रज्ञोपाधिके विज्ञानात्मन्यवतिष्ठते तत्प्रधाना प्राणवृत्तिर्भवतीत्यर्थः। कुतः? तदुपगमादिभ्यः। "एवमेवेममात्मानमन्तकाले सर्व्वे प्राणा अभिसमायन्ति यत्रैतदूर्द्ध्वोच्छ्वासी भवतीति" हि श्रुत्यन्तरम् अध्यक्षोपगामिनः सर्व्वान् प्राणानविशेषेण दर्शयति। विशेषेणैव "तमुत्क्रामन्तं प्राणोऽनूत्क्रामतीति" पञ्चवृत्तेः प्राणस्याध्यक्षानुगामितां दर्शयति तदनुवृत्तिताञ्चेतरेषाम्, "प्राणमनूत्क्रामन्तं सर्व्वे प्राणा अनूत्क्रामन्तीति"। "सविज्ञानो भवतीति" चाध्यक्षस्यान्तर्विज्ञानवत्त्वप्रदर्शनेन तस्मिन्नपीतकरणग्रामस्य प्राणस्यावस्थानं गमयति! ननु "प्राणस्तेजसीति" श्रूयते कथं प्राणोऽध्यक्ष इत्यधिकावापः क्रियते। नैष दोषः अध्यक्षप्रधानत्वादुत्क्रमणादिव्यवहारस्य श्रुत्यन्तरगतस्यापि च विशेषस्यापेक्षणीयत्वात्। कथं तर्हि "प्राणस्तेजसीति" श्रुतिरित्यत आह" भा०। "भूतेषु तच्छ्रुतेः" सू०। "स प्राणसंयुक्तोऽध्यक्षः तेजःसहचरितेषु भूतेषु देहबीजभूतेषु सूक्ष्मेष्ववतिष्ठत इत्यवगन्तव्यम् 'प्राणस्तेजसि' इत्यतः श्रुतेः। ननु चेयं श्रुतिः प्राणस्य तेजसि स्थितिं दर्शयति न प्राणसंयुक्तस्याध्यक्षस्य। नैषः दोषः "सोऽध्यक्षः" इत्यध्यक्षस्याप्यन्तराल उपसंख्यातत्वात्। योऽपि हि स्रुघ्नान्मथुरां गत्वा मथुरायाः पाटलिपुत्रं व्रजति सोऽपि स्रुघ्नात् पाटलिपुत्रं यातीति शक्यते वदितुम्। तस्मात् प्राणस्तेजसीति प्राणसंयुक्तस्याध्यक्षस्यैव तेजःसहचरितेषु भूतेष्ववस्थानम्। कथं तेजःसहचरितेषु भूतेष्वित्युच्यते यावता तेजः श्रूयते 'प्राणस्तेजसि' इत्यत आह" भा०। "नैकस्मिन् दर्शयतो हि" सू०। "नैकस्मिन्नेव तेजसि शरीरान्तरप्रेप्सावेलायां जीवोऽवतिष्ठते कार्य्यस्य शरीरस्यानेकात्मकत्वदर्शनात्। दर्शयतश्चैतमर्थं प्रश्नप्रतिवचने "आपः पुरुषवचस" इति। तद्व्याख्यातं "त्र्यात्मकत्वात्तु भूयस्त्वात्" इत्यत्र। श्रुतिस्मृती चैतमर्थं दर्शयतः। श्रुतिः "पृथिवीमय आपोमयस्तेजोमयो वायुमय आकाशमय" इत्याद्या। स्मृतिरपि "अण्व्यो मात्रा विनाशिन्यो दशार्द्धानान्तु याः स्मृताः। ताभिः सार्द्धमिदं सर्व्वं सम्भवत्यनुपूर्व्वशः" इत्याद्या। ननु चोपसं-

सूक्ष्मेषु करणेषु शरीरान्तरप्रेप्सावेलायां क्वायन्तदा पुरुषो भवतीत्युपक्रम्य श्रुत्यन्तरं कर्म्माश्रयतां निरूपयति "तौ ह यदूचतुः कर्म्म हैव तदूचतुः अथ ह यत् प्रशशंसतुः कर्म्म हैव तत् प्रशशंसतुरिति"। तत्रोच्यते। तत्र कर्म्मप्रयुक्तस्य ग्रहातिग्रहसंज्ञकस्येन्द्रियविषयात्मकस्य बन्धनस्य प्रवृत्तिरिति कर्म्माश्रयतोक्ता इह पुनर्भूतोपादानाद्देहान्तरोत्पत्तिरिति भूताश्रयत्वमुक्तम्। प्रशंसाशब्दादपि तत्र प्राधान्यमात्रं कर्म्मणः प्रदर्शितं न त्वाश्रयान्तरं निवारितम् तस्मादविरोधः" भा०। "समाना चा सृत्युपक्रमादमृतत्वञ्चानुपोष्य" सू० "सेयमुत्क्रान्तिः किं विद्वदविदुषोः समाना ? किं वा विशेषवतीति ? विशेषाभावात् विशेषवतीति तावत् प्राप्तम्। भूताश्रयविशिष्टा ह्येषा पुनर्भवाय भूतान्याश्रीयन्ते न च विदुषः पुनर्भवः सम्भवति" "अमृतत्वं हि विद्वानश्नुते" इति श्रुतेः। तस्मादविदुष एवैषोत्क्रान्तिः। ननु विद्याप्रकरणे समाम्नानाद्विदुष एवैषा भवेत्, न स्वापादिवद्यथाप्राप्तानुकीर्त्तनात्। तथा हि "यत्रैतत्पुरुषः स्वपिति नाम अशिशिषति नाम पिपासति नामेति" च सर्व्वप्राणिसाधारणा एव स्वापादयोऽनुकीर्त्यन्ते विद्याप्रकरणेऽपि प्रतिपिपादयिषितवस्तुप्रतिपादनानुगुण्येन, न तु विदुषो विशेषवन्तो विधित्स्यन्ते एवमियमप्युत्क्रान्तिर्महाजनगतैवानुकीर्त्यते यस्यां परस्यां देवतायां पुरुषस्य प्रयतस्तेजः सम्पद्यते, "स आत्मा तत्त्वमसीति" प्रतिपादयितुम्। प्रतिषिद्धा चैषा विदुषः। तस्मादविदुष एवैषेत्येवं प्राप्ते ब्रूमः। समानैषोत्क्रान्तिः वाङ्मनसीत्याद्या विद्वदविदुषोरा सृत्युपक्रमाद्भवितुमर्हति अविशेषश्रवणात्। अविद्वान् देहबीजभूतानि भूतसूक्ष्माण्याश्रित्य कर्म्मप्रयुक्तो देहग्रहणमनुभवितुं संसरति विद्वांस्तु ज्ञानप्रकाशितं मोक्षं नाडीद्वारमाश्रयते तदेतदा सृत्युपक्रमादित्युक्तम्। नन्वात्मतत्त्वं विदुषा प्राप्तव्यं न च तद्देशान्तरायत्तं तत्र कुतो भूताश्रयत्वं सृत्युपक्रमो वेति"। अत्रोच्यते। अनुपोष्य चेदम् अदग्ध्वाऽत्यन्तमविद्यादीन् क्लेशानपरविद्यासामर्थ्यादापेक्षिकममृतत्वं प्राप्यते। सम्भवति तत्र सृत्युपक्रमो भूताश्रयत्वञ्च। न हि निराश्रयाणां प्राणानां गतिरुपपद्यते। तस्माददोषः" भा०। "तदाऽपीतेः संसारव्यपदेशात्" सू०। "तेजः परस्यां देवतायामित्यत्र प्रकरणसामर्थ्यात्तद्यथा प्रकृतं तेजः साध्यक्षं सप्राणं सकरणग्रामं भूतान्तरसहितं प्रयतः पुंसः परस्यां देवतायां सम्पद्यत इत्येतदुक्तं भवति। कीदृशी पुनरियं सम्पत्तिः स्यादिति चिन्त्यते। तत्रात्यन्तिक एव तावत् स्वरूपप्रविलय इति प्राप्तं तत्प्रकृतित्वोपपत्तेः। सर्व्वस्य हि जनिमतो वस्तुजातस्य प्रकृतिः परा देवतेति प्रतिष्ठापितम्। तस्मादात्यन्तिकोऽयमविभागापत्तिः इत्येवं प्राप्ते ब्रूमः। तत्तेज आदि भूतसूक्ष्मं श्रोत्रादिकरणाश्रयभूतमाऽपीतेरा संसारमोक्षात् सम्यग्ज्ञाननिमित्तादवतिष्ठते। "योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः। स्थाणुमन्येऽनुसंयान्ति यथाकर्म यथाश्रुतम्" इत्यादिसंसारव्यपदेशात्। अन्यथा हि सर्वः प्रायणसमय एवोपाधिप्रत्यस्तमयादत्यन्तं ब्रह्म सम्पद्येत तत्र विधिशास्त्रं चानर्थकं स्याद्विद्याशास्त्रञ्च। मिथ्याज्ञाननिमित्तश्च बन्धो न सम्यग्ज्ञानादृते विस्रंसितुमर्हति। तस्मात्तत्प्रकृतित्वेऽपि सुषुप्तिप्रलयवद्बीजभावावशेषैवैषा सत्सम्पत्तिः" भा०। "सूक्ष्मं प्रमाणतश्च तथोपलब्धेः" सू०। "तच्चेतरभूतसहितं तेजोजीवस्यास्माच्छरीरात् प्रवसत आश्रयभूतं स्वरूपतः परिमाणतश्च सूक्ष्मं भवितुमर्हति। तथा हि नाडीनिष्क्रमणश्रवणादिभ्योऽस्य सौक्ष्म्यमुपलभ्यते। तत्र तनुत्वात् सञ्चारोपपत्तिः स्वच्छत्वाच्चाप्रतीघातोपपत्तिः अतएव च देहान्निर्गच्छत् पार्श्वस्थैर्नोपलभ्यते" भा०। "नोपमर्द्देनातः" सू०। "अतएव च सूक्ष्मत्वान्नास्य स्थूलशरीरस्योपमर्द्देन दाहादिनिमित्तेनेतरत् सूक्ष्मशरीरमुपमृद्यते" भा०। "अस्यैव चोपपत्तेरेष ऊष्मा" सू०। "अस्यैव च सूक्ष्मशरीरस्यैष ऊष्मायमेतस्मिन् जीवच्छरीरे संस्पर्शेनोष्णिमानं विजानाति। तथा हि मृतावस्थायामवस्थितेऽपि देहे विद्यमानेष्वपि च रूपादिषु देहगुणेषु नोष्मोपलभ्यते जीवदवस्थायामेव तूपलभ्यते इत्यत उपपद्यते प्रसिद्धशरीरव्यतिरिक्तरूपाश्रय एवैष ऊष्मेति। तथा च श्रुतिः "उष्ण एव जीविष्यञ्छीतो मरिष्यन्निति" भा०। "प्रतिषेधादिति चेन्न शारीरात्" सू०। "अमृतत्वञ्चानुपोष्येत्यतो विशेषणादात्यन्तिकेऽमृतत्वे गत्युत्क्रान्त्योरभावोऽभ्युपगतः तत्रापि केनचित् कारणेनोत्क्रान्तिमाशङ्क्य प्रतिषेधति। "अथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येतीति"। अतः परविद्याविषयात् प्रतिषेधात् न परब्रह्मविदो देहात् प्राणानामुत्क्रान्तिरस्तीति चेन्नेत्युच्यते। यतः शारीरादात्मन एष उत्क्रान्तिप्रतिषेधः प्राणानां, न शरीरात्। कथमवगम्यते। "न

तस्मात् प्राणा उत्क्रामन्तीति” शाखान्तरे पञ्चमीप्रयोगात्। सम्बन्धसामान्यविषया हि षष्ठी शाखान्तरगतया पञ्चम्या सम्बन्धविशेषे व्यवस्थाप्यते। तस्मादिति च प्राधान्यादभ्युदयनिःश्रेयसाधिकृतो देही सम्बध्यते न देहः। न तस्मादुच्चिक्रमिषोर्जीवात् प्राणा उत्क्रामन्ति सहैव तेन भवन्तीत्यर्थः। सप्राणस्य प्रवसतो भवत्युत्क्रान्तिर्देहादित्येवं प्राप्ते प्रत्युच्यते” भा०। “स्पष्टो ह्येकेषाम्” सू०। “नैतदस्ति यदुक्तं परब्रह्मविदोऽपि देहादस्त्युत्क्रान्तिः प्रतिषेधस्य देहापादानत्वादिति। यतो देहापादान एवोत्क्रान्तिप्रतिषेध एकेषां समाम्नातृणां स्पष्ट उपलभ्यते। तथाह्यार्त्तभागप्रश्ने ‘यत्रायं पुरुषो म्रियते तदस्मात् प्राणाः उत्क्रामन्त्याहो स्विन्न?” इत्यत्र “नेति होवाच याज्ञवल्क्य” इत्यनुत्क्रान्तिपक्षं परिगृह्य न तर्ह्ययमनुत्क्रान्तेषु प्राणेषु मृत इत्यस्यामाशङ्कायाम्” “अत्रैव समवलीयन्त” इति प्रविलयं प्राणानां प्रतिज्ञाय तत्सिद्धये ‘स उच्छ्वयत्याध्मायत्याध्मातो मृतः शेते” इति सशब्दपरामृष्टस्य प्रकृतस्योत्क्रान्त्यवधेरुच्छ्वयनादीनि समामनति “देहस्य चैतानि स्युर्न देहिनः”। तत्सामान्यात् “न तस्मात् प्राणा उत्क्रामन्त्यत्रैव समवलीयन्त” इत्यत्राप्यभेदोपचारेण देहापादानस्यैवोत्क्रमणस्य प्रतिषेधः यद्यपि प्राधान्यं देहिन इति व्याख्येयम्। येषां पञ्चमीपाठः येषान्तु षष्ठीपाठस्तेषां विद्वत्सम्बन्धिन्युत्क्रान्तिः प्रतिषिध्यत इति प्राप्तोत्क्रान्तिप्रतिषेधार्थत्वादस्य वाक्यस्य देहापादानैव सा प्रतिषिद्धा भवति देहादुत्क्रान्तिः प्राप्ता न देहिनः। अपि च “चक्षुष्टो वा मूर्ध्नो वान्येभ्यो वा शरीरदेशेभ्यस्तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्व्वे प्राणा अनूत्क्रामन्ति” इत्येवमविद्वद्विषये सप्रपञ्चमुत्क्रमणं संसारगमनञ्च दर्शयित्वा “इति तु कामयमान” इत्युपसंहृत्याविद्वत्कथाम् “अथाकामयमान” इति व्यपदिश्य विद्वांसं, यदि तद्विषयेऽप्युत्क्रान्तिमेव प्रापयेदसमञ्जस एव व्यपदेशः स्यात्। तस्मादविद्वद्विषये प्राप्तयोर्गत्युत्क्रान्त्योर्विद्वद्विषये प्रतिषेध इत्येवमेव व्याख्येयं व्यपदेशार्थवत्त्वाय। न च ब्रह्मविदः सर्व्वगतब्रह्मात्मभूतस्य प्रक्षीणकामकर्म्मण उत्क्रान्तिर्गतिर्वोपपद्यते निमित्ताभावात्। “अत्र ब्रह्म समश्नुत” इति चैवं जातीयकाः श्रुतयो गत्युत्क्रान्त्योरभावं सूचयन्ति” भा०। “स्मर्य्यते च” सू०। स्मर्य्यतेऽपि च महाभारते गत्युत्क्रान्त्योरभावः। “सर्व्वभूतात्मभूतस्य सम्यग्भूतानि पश्यतः। देवा अपि च मार्गेषु मुह्यन्तेऽस्य पदैषिण” इति। ननु गतिरपि ब्रह्मविदः स्मर्य्यते ‘शुकः किल वैयासकिर्मुमुक्षुरादित्यमण्डलमभिप्रतस्थे पित्रा त्वनुगम्याहूतो भो इति प्रतिशुश्रावेति”। न सशरीरस्यैवायं योगबलेन विशिष्टदेशप्राप्तिपूर्ब्बकः शरीरोत्सर्ग इति द्रष्टव्यं सर्व्वभूतदृश्यत्वाद्युपन्यासात्। नह्यशरीरं गच्छन्तं सर्व्वभूतानि द्रष्टुं शक्नुयुः। तथा च तत्रैवोपसंहृतम्। “शुकस्तु मारुताच्छीघ्रां गतिं कृत्वान्तरिक्षगः। दर्शयित्वा प्रभावं स्वं सर्व्वभूतगतोऽभवदिति। तस्मादभावः परब्रह्मविदो गत्युत्क्रान्त्योः। गतिश्रुतीनान्तु विषयमुपरिष्टाद्व्याख्यास्यामः” भा० “तानि परे तथा ह्याह” सू०। “तानि पुनः प्राणशब्दोदितानीन्द्रियाणि भूतानि च परब्रह्मविदस्तस्मिन्नेव परस्मिन्नात्मनि प्रलीयन्ते। कस्मात्? तथा ह्याह श्रुतिः “एवमेवास्य परिद्रष्टुरिमाः षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्तीति”। ननु “गताः कलाः पञ्चदश प्रतिष्ठा” इति विद्वद्विषयैवापरा श्रुतिः परस्मादात्मनोऽन्यत्रापि कलानां प्रलयमाह स्म। न सा खलु व्यवहारापेक्षा पार्थिवाद्याः कलाः पृथीव्यादीरेव स्वप्रकृतीरपियन्तीति। इतरा तु विद्वत्प्रतिपत्त्यपेक्षा कृत्स्नं कलाजातं परब्रह्मविदो ब्रह्मैव सम्पद्यत इति तस्माददोषः” भा० “अविभागो वचनात्” सू०। “स पुनर्विदुषः कलाप्रलयः किमितरेषामिव सावशेषो भवत्याहोस्विन्निरवशेष? इति। तत्र प्रलयसामान्याच्छक्त्यवशेषताप्रसक्तौ ब्रवीति अविभागापत्तिरिति। कुतः? वचनात्। तथाहि कलाप्रलयमुक्त्वा वक्ति “भिद्येते चासां नामरूपे पुरुष इत्येवं प्रोच्यते स एषोऽकलोऽमृतो भवतीति”। अविद्यानिमित्तानाञ्च कलानां न विद्यानिमित्ते प्रलये सावशेषतोपपत्तिः। तस्मादविभाग एवेति” भा०। “तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया” सू०। “समाप्ता प्रासङ्गिकी परविद्यागता चिन्ता। संप्रति त्वपराविद्याविषयामेव चिन्तामनुवर्त्तयति। समाना ऽऽसृत्युपक्रमाद्विद्वदविदुषोरुत्क्रान्तिरित्युक्तं तमिदानीं सृत्युपक्रमं दर्शयति। तस्योपसंहृतवागादिकलापस्योच्चिक्रमिषतो विज्ञानात्मन ओक आयतनं हृदयम्। “स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामतीति” श्रुतेः। तदग्रज्वलनम्। तत्पूर्व्विका चक्षुरादिस्थानापादाना चोत्क्रान्तिः श्रूयते “तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति “चक्षुष्टो वा मूर्ध्नो वान्येभ्यो वा शरीरदेशेभ्य” इति। सा किमविशेषेणैव विद्वदविदुषोर्भवति? अथास्ति कश्चिद्-

दुषो विशेषनियमः ? इति विचिकित्सायां श्रुत्यविशेषाद्नियमप्राप्तावाचष्टे । समाने ऽपि हि विद्वदविदुषोर्हृदयाग्रप्रद्योतने तत्प्रकाशितद्वारत्वे च मूर्द्धस्थानादेव विद्वान्निष्क्रामति स्थानान्तरेभ्यस्त्वितरे । कुतः ? विद्यासामर्थ्यात् । यदि विद्वानपीतरवत् यतः कुतश्चिद्देहदेशादुत्क्रामेन्नैवोत्कृष्टं लोकं लभेत तत्रानर्थिकैव विद्या स्यात् । तच्छेषगत्यनुस्मृतियोगाच्च विद्याशेषभूता च मूर्द्धन्यनाडीसम्बन्धा गतिरनुशीलयितव्या विद्याविशेषेषु विहिता तामभ्यस्यन् स तयैव प्रतिष्ठत इति युक्तम् । तस्माद्धृदयालयेन ब्रह्मणा सूपासितेनानुगृहीतस्तद्भावमापन्नो विद्वान् मूर्द्धन्ययैव शताधिकया शतादतिरिक्तया एकशततमया नाड्या निष्क्रामति, इतराभिरितरे । तथा हि हार्दविद्यां प्रकृत्य समामनन्ति "शतञ्चैका च हृदयस्य नाड्यस्तासां मूर्द्धानमभिनिःसृतैका । तयोर्द्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्तीति" भा० । "रश्म्यनुसारी" सू० । "अस्ति दहरोऽस्मिन्नन्तराकाश" इति हार्दविद्या "अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म" इत्युपक्रम्य विहिता । तत्प्रक्रियायाम् अथ एता हृदयस्य नाड्य इत्युपक्रम्य सप्रपञ्चं नाडीरश्मिसम्बन्धमुक्त्वोक्तम् । "अथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्द्ध्वमाक्रमत" इति । पुनश्चोक्तम् "तयोर्द्ध्वमायन्नमृतत्वमेतीति" । तस्माच्छताधिकया नाड्या निष्क्रमन् रश्म्यनुसारी निष्क्रामतीति गम्यते । तत्किमविशेषेणैवाहनि रात्रौ वा म्रियमाणस्य रश्म्यनुसारित्वमाहोस्विदह्न्येवेति संशये सति अविशेषश्रवणादविशेषेणैव तावद्रश्म्यनुसारीति प्रतिज्ञायते" भा० । 'निशि नेति चेन्न सम्बन्धस्य यावद्देहभावित्वाद्दर्शयति' च" सू० । 'अस्त्यहनि नाडीरश्मिसम्बन्ध इत्यहनि मृतस्य स्याद्रश्म्यनुसारित्वं रात्रौ तु प्रेतस्य न स्यात् नाडीरश्मिसम्बन्धविच्छेदादिति चेन्न । नाडीरश्मिसम्बन्धस्य यावद्देहभावित्वात् यावद्देहभावी हि शिराकिरणसम्पर्कः । दर्शयति चैतमर्थं श्रुतिः "अमुष्मादादित्यात् प्रतायन्ते ता आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायन्ते ता अमुष्मिन्नादित्ये सृप्ताः" इति । निदाघसमये च निशास्वपि किरणानुवृत्तिरुपलभ्यते प्रतापादिकार्य्यदर्शनात् । स्तोकानुवृत्तेस्तु दुर्लक्ष्यत्वमृत्वन्तररजनीषु शैशिरेष्विव दिनेषु । "अहरेवैतद्रात्रौ विदधातीति" चैतदेव दर्शयति । यदि च रात्रौ प्रेतो विनैव रश्म्यनुसारेणोर्द्ध्वमाक्रमेत रश्म्यनुसारानर्थक्यं भवेत् । न ह्येतद्विशिष्याभिधीयते योदिवा प्रैति स रश्मीनपेक्ष्योर्द्ध्वमाक्रमते यस्तु रात्रौ सोऽनपेक्ष्यैवेति" । अथ तु विद्वानपि रात्रिप्रायणापराधमात्रेण नोर्द्ध्वमाक्रमेत पाक्षिकफला विद्येति अप्रवृत्तिरेव तस्यां स्यात् मृत्युकालानियमात् । अथापि रात्रावुपरतोऽहरागममुदीक्षेत । अहरागमेऽप्यस्य कदाचिदरश्मिसम्बन्धार्हं शरीरं स्यात् पावकादिसम्पर्कात् । "स यावत् क्षिप्येन्मनस्तावदादित्यं गच्छतीति" च श्रुतिरनुदीक्षां दर्शयति । तस्मादविशेषेणैवेदं रात्रिन्दिवं रश्म्यनुसारित्वम्" भा० । "अतश्चायनेऽपि दक्षिणे" सू० । "अतएवोदीक्षानुपपत्तेः अपाक्षिकफलत्वाच्च विद्याया अनियतकालत्वाच्च मृत्योर्दक्षिणायनेऽपि म्रियमाणो विद्वान् प्राप्नोत्येव विद्याफलम् । उत्तरायणमरणप्राशस्त्यप्रसिद्धेर्भीष्मस्य च प्रतीक्षादर्शनात् "आपूर्य्यमाणपक्षाद्यान् षडुदङ्ङेति मासान् तानिति" च श्रुतेरपेक्षितव्यमुत्तरायणमितीमामाशङ्कामनेन सूत्रेणापनुदति । प्राशस्त्यप्रसिद्धिरविद्वद्विषया । भीष्मस्य प्रतिपालनमाचारपरिपालनार्थं पितृप्रसादलब्धस्वच्छन्दमृत्युताख्यापनार्थञ्च । श्रुतेस्त्वर्थं वक्ष्यति "आतिवाहिकस्तल्लिङ्गात्" इति । ननु च "यत्र काले त्वनावृत्तिमावृत्तिञ्चैव योगिनः । प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभेति" कालप्राधान्येनोपक्रमस्याहरादिकालविशेषः स्मृतावपावृत्तये नियतः कथं रात्रौ दक्षिणायने वा प्रयातोऽनावृत्तिं यायादिति । अत्रोच्यते भा० । "योगिनः प्रति च स्मर्य्यते स्मार्त्ते चैते" सू० । 'योगिनः प्रति चायमहरादिकालविनियोगोऽनावृत्तये स्मर्य्यते स्मार्त्ते चैते योगसाङ्ख्ये न श्रौते । अतोविषयभेदात् प्रमाणविशेषाच्च नास्य स्मार्त्तस्य कालविनियोगस्य श्रौतेषु विज्ञानेष्ववतारः । "ननु अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्" । "धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनमिति" श्रौतावेव देवपितृयाणौ प्रत्यभिज्ञायेते स्मृतावपीति । उच्यते । "तं कालं वक्ष्यामीति स्मृतौ कालप्रतिज्ञानाद्विरोधमाशङ्क्य परिहार उक्तः । यदा पुनः स्मृतावपि अग्न्याद्यादेवा एवातिवाहिका गृह्यन्ते तदा न कश्चिद्विरोध इति भा०"

उत्क्रमणीय त्रि० उद्+क्रम-कर्मणि अनीयर् । अतिक्रमणीये "न वेदवचनात्तात न लोकवचनादपि । गतिरुत्क्रमणीया ते प्रयाणमरणं प्रति" भा०व०८५अ० । उत्क्रमणस्येदम् छ । उत्क्रमणसम्बन्धिनि त्रि० ।

उत्क्रान्त त्रि० उद्+क्रम—कर्त्तरि क्त । १अतिक्रान्ते देहाद्देहान्तरप्राप्ते २अपसृते मृते च । “उत्क्रान्तानामभिषायोपरिष्टात्” माघः “उत्क्रान्तानां मृतानाम्” मल्लि० ।

उत्क्रान्ति स्त्री उत्+क्रम—क्तिन् । देहादुत्क्रमणे अपसरणे च उत्क्रमणशब्दे विवृतिः ।

उत्क्रोश पु० उद्+क्रुश—अच् । १कुररीपक्षिणि । अयञ्च पक्षी सुश्रु० जलचरमध्ये प्लवत्वेन संघचारित्वेनोक्तः । ‘हंससारसक्रौञ्चेत्याद्युपक्रमे ‘मद्गूत्क्रोशकाचाक्षेत्यागमोनुक्ता “प्लवाः संघचारिणः” इत्यन्तेन । “उत्क्रोशरससंसिद्धामनल्पस्नेहां यवागूं पाययेत्” सुश्रु० । २उच्चैःक्रन्दिनि त्रि० । ततः चतुरर्थ्याम् उत्करा० छ । उत्क्रोशीय तत्सन्निहिते देशादौ ।

उत्क्लेदिन् त्रि० उद्+क्लिद—णिच्—णिनि । ऊर्द्ध्वतः क्लेदकारके आर्द्रीकारके “लघु तीक्ष्णोष्णमुत्क्लेदि रूक्षं वातानुलोमनम्” सुश्रु० । स्त्रियां ङीप् ।

उत्क्लेश पु० उद्+क्लिश—घञ् । ऊर्द्ध्वगत्यायुक्तते क्लेशे स च “उत्क्लिश्यान्नं न निर्गच्छेत् प्रसेकष्ठीवनेरितम् । हृदयं पीड्यते चास्य तमुत्क्लेशं विनिर्द्दिशेत्” इत्युक्तलक्षणः रोगभेदः । ‘गुरुपाकहृदविस्मृततया कफोत्क्लेशेन च” ‘क्लिन्नमुत्क्लेशजननम्” ‘तृष्णाम्लकफोत्क्लेशच्छर्द्दिश्वासनिशारणम्” सुश्रु० ल्युट् । उत्क्लेशनमप्यत्र न० “दद्यादुत्क्लेशनं पूर्व्वम्” सुश्रु० ।

उत्क्लेशक त्रि० उद्+क्लिश—णिच्—ण्वुल् । १उत्क्लेशकारके “कौण्डिल्यकः करभक इत्युपक्रमे“क्लीतः कृमिःशरारी च यश्चाप्युत्क्लेशकः स्मृतः”। एते ह्यग्निप्रकृतयश्चतुर्विंशतिरेव च” सुश्रुतोक्ते २अग्निप्रकृतिके कीटभेदे । उत्क्लिश्नाति उद्+क्लिश—णिनि । २ऊर्द्ध्वगत्यायुक्तेत्क्लेशकारके त्रि० स्त्रियां ङीप् । “अम्लीभूतं कफोत्क्लेशि न हितं तत् पिपासवे”सुश्रु० ।

उत्क्षिप्त त्रि० उद्+क्षिप्—क्त । १ऊर्द्ध्वं क्षिप्ते “क्षणं क्षणोत्क्षिप्तगजेन्द्रकृत्तिना” “उत्क्षिप्तमुच्छ्रितसितांशुकरावलम्बैः” माघः-२उच्चाटिते च । (रश्मिभिः) उत्क्षिप्तगुल्मैश्च तथा हयैश्च सपताकिभिः” भा०व० १५ अ० “गुल्मो यत्र स्थितेन योधसंघेन चतुर्दिगवस्थितारिपशोद्दृष्ट बाणादिना प्रहन्तुं शक्यन्ते तादृशगुल्मस्थानमुत्क्षिप्तगुल्मैः परकीयगुल्मोच्चाटनकरैः”नीलक० । धुस्तूरे पु०शब्दच० । तस्य फलसेवने उन्मत्ततापादकत्वात्तथात्वम् ।

उत्क्षिप्तिका स्त्री धस्तत्क्षिप्तः धुस्तूरस्य कन् स्त्रीत्वात् टापि अत इत्त्वम् । धुस्तूराकारे कर्णभूषणभेदे हेमचन्द्रः ।

उत्क्षेप पु० उद्+क्षिप—घञ् । १ऊर्द्ध्वक्षेपणे “पद्मोत्क्षेपादुपरिविलसत्कृष्णसारप्रभाणाम्” मेघ० । “पक्षोत्क्षेपात् समोदितः” सुश्रु० । कर्त्तरि अच् । २उत्क्षेपकारके त्रि० ।

उत्क्षेपक त्रि०उद्+क्षिप—ण्वुल् ।१ऊर्द्ध्वं प्रक्षेपके २उत्क्षिप्यापहारके चौरे च । “उत्क्षेपकग्रन्थिभेदौ करसंदंशहीनकौ । कार्य्यौ द्वितीयापराधे करपादैकहीनकौ”या० स्मृ० वस्त्राद्युत्क्षिप्यापहरतीत्युत्क्षेपकः । यस्त्वादिबद्धं स्वर्णादि विस्रस्योत्कृत्य वा योपहरत्यसौ ग्रन्थिभेदः तौ यथाक्रमङ्गुरेण सन्दंशसदृशेन तर्ज्जन्यङ्गुष्ठेन हीनकौ कार्य्यौ द्वितीयापराधे पुनः करस्य पादस्य करपादञ्च तदेकञ्च करपादैकन्तद्धीनं ययोस्तत्करपादैकहीनकौ कार्य्यौ । उत्क्षेपकग्रन्थिभेदकयोरेकमेकं करम्पादञ्च छिन्द्यादित्यर्थः । एतदप्युत्तमसाहसप्राप्तियोग्यद्रव्यविषयम् । “तदङ्गच्छेद इत्युक्तोदण्ड उत्तमसाहस” इति नारदवचनात् । तृतीयापराधे तु बध एव । तथा च मनुः “अङ्गुलीं ग्रन्थिभेदस्य छेदयेत् प्रथमे ग्रहे । द्वितीये हस्तचरणौ तृतीये बधमर्हतीति” मिता० ।

उत्क्षेपण न० उद्+क्षिप—ल्युट् । १ऊर्द्ध्वक्षेपणे । “उत्क्षेपणं तथावक्षेपणमाकुञ्चनं तथा । प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च” भाषा० “उत्क्षेपणमवक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्म्माणि” कणा० सू० “इतिरवधारणार्थः भ्रमणादेरपि गमनान्तर्गतत्वात् । अत्र च उत्क्षेपणत्वावक्षेपणत्वाकुञ्चनत्वप्रसारणत्वगमनत्वानि कर्म्मत्वसाक्षाद्व्याप्याः पञ्च जातयः । नन्वेतदनुपपन्नं गमनस्य कर्म्मपर्य्यायत्वात् सर्व्वत्र गच्छतीतिबुद्धेरुत्पादुत्क्षेपणत्वादीनां चतसृणां जातीनां परस्परात्यन्ताभावसमानाधिकरणानां सामानाधिकरण्यानुभवात् चतस्र एव कर्म्मत्वव्याप्या जातय इति चेत् सत्यं कर्म्मपर्य्याय एव गमनं पृथगभिधानन्तु भ्रमणरेचनस्पन्दनोर्द्ध्वज्वलनगमनोन्नमनादीनां भिन्नभिन्नबुद्धिव्यपदेशभाजामेकेन शब्देन सङ्ग्रहार्थं यद्वा गमनत्वमपि कर्म्मत्वव्याप्या पञ्चमी जातिरेव तेन भ्रमणरेचनादिष्वेव गमनप्रयोगो मुख्यः उत्क्षेपणावक्षेपणादिषु यदि गमनप्रयोगस्तदा भाक्तः स्वाश्रयसंयोगविभागासमवायिकारणत्वमेव गौणमुख्यसाधारणो धर्म्मः गमनत्वजातेस्त्वनियतदिग्देशसंयोगविभागासमवायिकारणत्वमेव व्यञ्जकं तच्च भ्रमणादिषु सर्व्वत्रेति गमनग्रहणेनैव तेषां ग्रहणमिति । निष्क्र-

मण्डलप्रवेशनत्वादिका तु न जातिः एकस्मिन्नेव कर्म्मणि गृहाद् गृहान्तरं गच्छति पुरुषे कस्यचित् द्रष्टुः प्रविशतीति प्रत्ययः कस्यचित्तु निष्क्रामतीति तत्र जातिसङ्करः स्यात् तथा भ्रमणादेरेकस्या जलप्रणाल्या निष्क्रम्यापरां प्रविशति निष्क्रामति प्रविशतीति प्रत्ययद्वयदर्शनादुपाधिसामान्यमेवैतदध्यवसेयम्। उत्क्षेपणादौ तु मुसलमुत्क्षिपामीतीच्छाजनितेन प्रयत्नेन प्रयत्नवदात्मसंयोगादसमवायिकारणाद्धस्ते तावदुत्क्षेपणं तत उत्क्षेपणविशिष्टहस्तनोदनादसमवायिकारणात् मुसलेऽप्युत्क्षेपणाख्यं कर्म्म युगपद्वा तत ऊर्द्ध मुत्क्षिप्तयोर्हस्तमुसलयोरवक्षेपणेच्छाजनितप्रयत्नवदात्मसंयोगाद्धस्तनोदनाच्च युगपदेव हस्ते मुसले चावक्षेपणम् उलूखलपातानुकूलं संजायते ततो दृढतरद्रव्यसंयोगाद् यदकस्मान्मुसलस्योर्द्ध गमनं भवति तत्र नेच्छा न वा प्रयत्नः कारणं किन्तु संस्कारमात्रादेव मुसलस्योत्पतनं तच्च गमनमात्रं नतूत्क्षेपणं, भाक्तस्त्वोत्क्षेपणव्यवहारः एवमनुलोमप्रतिलोमवायुद्वयसङ्घट्टवशाद्वाव्योस्तत्प्रेरिततृणतूलकादौ चोत्क्षेपणव्यवहारो भाक्तः। एवं स्रोतोद्वयसङ्घट्टवशाज्जलोर्द्ध गमनेऽपि। एवमुत्क्षेपणावक्षेपणव्यवहारः शरीरतदवयवतत्संयुक्तमुसलतोमरादिष्वेव मुख्यः। भवति हि हस्तमुत्क्षिपति तोमरमुत्क्षिपतीति एवमवक्षिपतीत्यपि” उपस्कारः।

उत्क्षेपणञ्च श्रौते कर्म्मणि गोघ्राणायोग्यदेशक्षेपणे भवति तथा हि। “भूतयोः कृत्वा वेणुयष्ट्यां वा कुम्भे वाऽऽसज्योभयतः स्थाणुष्टवंशवल्मीकानामन्यतमस्मिन्नुत्क्षेपणवदासजत्येतत्ते” कात्या०५,१०,२१। “उत्क्षेपणवदिति गोरघ्राणदेशम्” कर्कः यजु० ३,६१ मन्त्रव्या० “गोभिराघ्रातुमशक्यत्वादिति” वेददी० तत्पदं व्याख्यात्। “अतिमात्रलोहिततलौ बाहू घटोत्क्षेपणात्” शकु०। करणे ल्युट्। २धान्यमर्द्दनकाष्ठादौ मेदि० ३उदञ्चने ४षोडशपणे च हेमच०। कर्म्मणि ल्युट्।५व्यजने न०।

उत्खचित त्रि० उद्+खच-बन्धे क्त। १उद्ग्रथिते २रचिते च। ‘कुसुमोत्खचितान् वलीभृतः” रघुः। [शब्दच०।

उत्खला स्त्री उद्+खल—चलने—अच्। मुरानामगन्धद्रव्ये

उत्खात त्रि० उद्+खन—क्त। १उन्मूलिते २उत्पाटिते “फलैः संवर्द्धयामासुरुत्खातप्रतिरोपिताः” रघुः। “रथेनानुत्खातस्तिमितगतिना शकु० भावे क्त। ३उत्खनने न०। उत्खातकेलिः।

उत्खातकेलि पु० उत्खातमुत्खननमेव केलि। ‘‘उत्खातकेलिः शृङ्गाद्यैर्वप्रक्रीडा निगद्यते’’ इत्युक्तलक्षणे वृषगजादेः शृङ्गादिना मृत्तिकाखननरूपक्रीडायाम्।

उत्खाय अव्य० उद्+खन—ल्यप्। उत्पाट्येत्यर्थे। ‘वङ्गानुत्खाय तरसा’’ रघुः पक्षे उत्खन्येत्यप्यत्र। [अमरः।

उत्खेद पु० उद्+खिद—भावे घञ्। छेदने उद्+खदधातौ उदा०।

उत्त त्रि० उन्द—क्लेदने क्त वा तस्य नः। क्लिन्ने आर्द्रवस्तुनि

उत्तंस पु० उद्+तसि—अच्। १कर्णाभरणे, २शिरोभूषणे च। ‘नोत्तंसं क्षिपति क्षितौ श्रवणतः सा मे स्फुटेऽप्यागसि’’ सा०द०। अस्य कर्णभूषणवाचकत्वेऽपि कर्णपदसमभिव्याहारे भूषणमात्रपरता तत्काले कर्णस्थितत्वद्योतनार्थं वा कर्णादिशब्दप्रयोगः।

उत्तट त्रि० उत्क्रान्तं तटम् अत्या० त०। तटपर्य्यन्ताप्लावके “उत्तटा इव नदीरयाः स्थलीम्” रघुः।

उत्तप्त त्रि०उद्+तप—क्त। १संतप्ते २शुष्कमांसे न०भावे क्त। ३उत्तापे न०। उद्गतं तप्तं तापो यस्य।४स्नाते त्रि०मेदि०

उत्तब्ध त्रि० उद्+स्तन्भ—क्त। १ऊर्द्धस्तब्धे २ऊर्द्धावस्थिते।

उत्तम त्रि०उद्+तमप्। १उत्कृष्टे। “ज्योतिषामुत्तमोदेव। दीपोऽयं प्रतिगृह्यताम्” दीपमन्त्रः “यदसुना हृतमनुत्तमं तमः” माघः “उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः” “यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः” गीता। द्विजोत्तमः नरोत्तमः नृपोत्तम। ‘‘धर्मोऽधर्मविदुत्तमः” विष्णुसह०। उत्-उद्गतः अतिशये तमप्। २विष्णौ पु०। “अनादिनिधनो धाता विधाता धातुरुत्तमः” विष्णुसह०। “धातुरुत्तम इति नामैकं सविशेषणं सामानाधिकरण्येन। सर्वधातुभ्यः पृथिव्यादिभ्य उत्कृष्टश्चिद्धातुरित्यर्थः धातुर्विरिञ्चेरुत्कृष्ट इति वा। नामद्वयं वा कार्य्यकारणप्रपञ्चधारणात् धातुश्चिद्धातुः उत्तमः सर्व्वेषामुद्गतानामुद्गतत्वादुत्तमः” भा०। ३अन्त्ये। “उत्तमैकाभ्याञ्च” पा०। “उत्तमशब्दोऽन्त्यार्थः” सि० कौ०। उत्तानपादस्य पुत्रभेदे ४ध्रुवसपत्नभ्रातरि पु०स च उत्तानपादस्य सुरुचौ भार्य्यायामुत्पन्नः। “जाये उत्तानपदस्य सुनीतिः सुरुचिस्तया।सुरुचिः प्रेयसी पत्युर्नेतरा यत् सुतोध्रुवः। एकदा सुरुचेः पुत्रमङ्कमारोप्य लालयन्। उत्तमं नारुरुक्षन्तं ध्रुवं राजाभ्यनन्दत” भा०४स्क० ८अ०। “उत्तमस्त्वकृतोद्वाहो मृगयायां बलीयसा। हतः पुण्यजनेनाजौ तन्मातास्य गतिं

गता” भा० ४,स्क० १०अ० । प्रियव्रतस्य ५पुत्रभेदे स एव तृतीयमनुः यथोक्तं भाग० ८स्क० १अ० । “तृतीय उत्तमो नाम प्रियव्रतसुतोमनुः । पवनः सृञ्जयो यज्ञहोत्राद्यास्तत्सुता नृप ! । वशिष्ठतनयाः सप्त ऋषयः प्रमदादयः । सत्यावेदश्रुता भद्रादेवा इन्द्रस्तु सत्यजित् । धर्म्मस्य सूनृतायान्तु भगवान् पुरुषोत्तमः । सत्यसेन इति ख्यातः जातः सत्यव्रतैः सह” । हरिवं० ७अ० तु औत्तमित्येनायं पठितः यथा । “स्वायम्भुवोमनुस्तात ! मनुः स्वारोचिषस्तथा । औत्तमिस्तामसश्चैव रैवतश्चाक्षुषस्तथा । वैवस्वतश्च कौरव्य ! साम्प्रतोमनुरुच्यते” इति सप्तमनूनुद्दिश्य । “इदं तृतीयं वक्ष्यामि तन्निबोध नराधिप ! । वशिष्ठपुत्राः सप्तासन् वाशिष्ठा इति विश्रुताः । हिरण्यगर्भस्य सुता ऊर्जा नाम सुतेजसः । ऋषयोऽत्र मया प्रोक्ताः कीर्त्त्यमानान् निबोध तान् । औत्तमेयान् महाराज ! दश पुत्रान् मनोरमान् । ईष ऊर्जस्तनूर्जश्च मधुर्माधव एव च । शुचिः शुक्रः सहश्चैव नभस्यो नभएव च । भानवस्तत्र देवाश्च मन्वन्तरमुदाहृतम्” । तत्र स्वार्थे इञ् औत्तमिः । ऋषिपुत्रादिनामभेदस्तु कल्पभेदादविरुद्धः” । [रत्नमा० ।

उत्तमफलिनी कर्म्म० नित्यस० । (क्षीरार्द्र) । दुग्धिकावृक्षे

उत्तमर्ण पु० उत्तममृणमस्य । ऋणप्रयोजके (महाजन) । उत्तमर्णस्य वृद्ध्यादिग्रहणधर्मो विष्णुना दर्शितो यथा “अथोत्तमर्णोऽधमर्णाद्वित्तमर्थं गृह्णीयात् द्विकं त्रिकं चतुष्कं पञ्चकञ्च शतं वर्णानुक्रमेण प्रतिमासम् । सर्वे वर्णा वा स्वप्रतिपन्नां वृद्धिं दद्युः । अकृतामपि वत्सरातिक्रमेण यथाविहिताम् । आध्युपभोगे वृद्ध्यभावः । दैवराजोपघाताहते विनष्टमाधिमुत्तमर्णो दद्यात् । अन्तर्द्धौ प्रविष्टायामपि । न स्थावरमाधिमृते वचनात् । गृहीतधनप्रवेशार्थमेव यत् स्थावरं दत्तं तद्गृहीतधनप्रवेशे दद्यात् । दीयमानं प्रयुक्तमर्थमुत्तमर्णस्याग्रहणतस्ततः परं न वर्द्धते । हिरण्यस्य परा वृद्धिर्द्विगुणा, धान्यस्य त्रिगुणा, वस्त्रस्य चतुर्गुणा, सन्ततिः स्त्रीपशूनाम् । किण्वकार्पासस्त्रचर्म्मायुधेष्टकाङ्गाराणामक्षया, अनुक्तानां द्विगुणा । प्रयुक्तमर्थं यथा कथञ्चित् साधयन् राज्ञोवाच्यः स्यात् । साध्यमानश्चेद्राजानमभिगच्छेत्तत्समं दण्ड्यः । उत्तमर्णश्चेद्राजानमियात्तद्विभावितोऽधमर्णोराज्ञे धनदशभागसम्मितं दण्डं दद्यात् । प्राप्तार्थश्चोत्तमर्णो विंशतितमंमंशम् । सर्व्वापलाप्येकदेशविभावितोऽपि सर्वं दद्यात् । तस्य च भावनास्तिस्रोभवन्ति लिखितं साक्षिणः समयक्रिया च । ससाक्षिकमाप्तं ससाक्षिकमेव दद्यात् । लिखितार्थप्रविष्टे लिखितं पाटयेत् । असमग्रदाने लेख्यासन्निधाने चोत्तमर्णो लिखितं दद्यात्” । अधिकमृणग्रन्थे वक्ष्यते । उत्तमं देयत्वेनास्त्यस्य ठन् । उत्तमर्णिकोऽप्यत्र । “पञ्च पञ्चशतम् दाप्यः प्राप्तार्थो ह्युत्तमर्णिकः” या०स्मृ० । “यैर्यैरुपायैरर्थं स्वं प्राप्नुयादुत्तमर्णिकः । तैस्तैरुपायैः संगृह्य दापयेदधमर्णिकम्” मनुः “ते च उपाया वृहस्पतिना दर्शिताः यथा । “छद्मना याचितञ्चार्थमानीय ऋणिकाद्बलैः । अन्याहृतादि वाऽऽहृत्य दाप्यते तत्र सोपधिः । दारपुत्रपशून् हृत्वा कृत्वा द्वारोपवेशनम् । यत्रार्थी दाप्यतेऽर्थं स्वं तदाचरितमुच्यते । बद्ध्वा स्वगृहमानीय ताडनाद्यैरुपक्रमैः । ऋणिको दाप्यते यत्र बलात्कारः स कीर्त्तितः” ।

उत्तमशाख पु० उत्तमा उत्कृष्टा शाखाऽस्य । उत्कृष्टशाखे द्रुमे गहा० चतुरर्थ्यां छ । उत्तमशाखीय तत्सन्निहितादौ त्रि० ।

उत्तमश्लोक त्रि० उत्तमः श्लोकः चरितं यस्य । १पुण्यकीर्त्तौ कम्म० । २उत्तमे काव्ये पु० । स च ध्वनिरूपः “इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्यात् ध्वनिर्बुधैः कथितः” काव्यप्र० उक्तलक्षणः ।

उत्तमस् त्रि० उत्क्रान्तं तमो येन प्रा०ब० वा सकारलोपः । १उत्क्रान्ततमस्के २तमोऽतीते च । “क उत्तमःश्लोकगुणानुवादात् पुमान् विरज्येत विना पशुघ्नात्” भाग० १०स्क०१अ०

उत्तमसाहस पु० साहसमधिकृततयाऽस्त्यस्य अर्श० अच् + कर्म्म० । स्मृत्युक्ते साहसाधिकारेण विहिते १उत्कृष्टे दण्डे । “पणानां द्वे शते सार्द्धे प्रथमः साहसः स्मृतः । मध्यमः पञ्च विज्ञेयः सहस्रं त्वेष चोत्तमः” मनुः “अनाख्याय ददद्दोषं दण्ड्य उत्तमसाहसम्” या०स्मृ० नानास्थाने उत्तमदण्डविषयमाह विष्णुः यथा दण्ड्य इत्युपक्रमे “परस्य पतनीयाक्षेपे कृते तूत्तमसाहसम्” । “व्यङ्गतायुक्ताक्षेपे कार्षापणशतम्” “मातृयुक्ते तूत्तमम्” “पारजायी सवर्णागमने तूत्तमसाहसं दण्ड्यः” । “अदुष्टां (कन्याम्) दुष्टामिति ब्रुवन्नुत्तमसाहसम्” “फलोपगद्रुमोच्छेदी कीटोपघाती तूत्तमसाहसं दण्ड्यः” (अवगोर्य्यिता) शस्त्रेणोत्तमसाहसं दण्ड्यः” नेत्रकन्धराबाहुसक्थ्यंसभङ्गे चोत्तमम्” (साहसं दण्ड्यः) “रत्नान्यपहार्य्युत्तमसाहसम्” । “पत्न्योः (पितापुत्रयोर्विवादे) पान्तरः

स्यात्तस्योत्तमसाहसः "तुलामानकूटकर्त्तुश्च तदकूटे कूटवादिनश्च द्रव्याणां प्रतिरूपविक्रयिकस्य च"। "सम्भूय वणिजां पण्यमनर्घेणावरुन्धताम्" प्रत्येकं "विक्रीणताञ्च"। "यस्तूत्तमवर्णान् दास्ये नियोजतिसोत्तमसाहसदण्डः"। "सीमाभेत्तारमुत्तमसाहसेन दण्डयित्वा पुनः सीमां कारयेत्" "अभक्ष्यस्याविक्रेयस्य च विक्रयी देवप्रतिमाभेदकश्चोत्तमसाहसम् दण्डनीयः। "भिषङ्मिथ्याचरन्नुत्तमेषु पुरुषेषु"। २ प्राणिहिंसादिरूपे बलकृते कर्म्मभेदे न०। तत्रोत्तमसाहसादिस्वरूपलक्षणविभागादि मिता० दर्शितं यथा। "सामान्यद्रव्यप्रसभहरणात् साहसं स्मृतम्" या० स्मृ०। "सामान्यस्य साधारणस्य यथेष्टं विनियोगानर्हत्वाविशेषेण परकीयस्य वा द्रव्यस्यापहरणं साहसम्। कुतः प्रसभहरणात् प्रसह्याहरणाद्बलावष्टम्भेन हरणादिति यावत्। एतदुक्तं भवति। राजदण्डञ्जनाक्रोशं चोल्लङ्घ्य राजपुरुषेतरजनसमक्षं यत्किञ्चिद्धरणमारणपरदारप्रधर्षणादिकं क्रियते तत् सर्वं साहसमिति साहसलक्षणम्। अतः साधारणधनपरधनयोर्हरणस्यापि बलावष्टम्भेन क्रियमाणत्वात्साहसत्वमिति। नारदेनापि साहसस्य स्वरूपं विवृतम्। "सहसा क्रियते कर्म यत् किञ्चिद्बलदर्पितैः। तत्साहसमिति प्रोक्तं सहो बलमिहोच्यते"। तदिदं साहसञ्चौर्यवाग्दण्डपारुष्यस्त्रीसंग्रहेषु व्यासक्तमपि बलदर्पावष्टम्भोपाधितोभिद्यत इति दण्डातिरेकार्थं पृथगभिधानस्य दण्डवैचित्र्यप्रतिपादनार्थं प्रथमादिभेदेन त्रैविध्यमभिधाय तल्लक्षणन्नैव विवृतम्। "तत् पुनस्त्रिविधं ज्ञेयं प्रथमं मध्यमन्तथा। उत्तमञ्चेति शास्त्रेषु तस्योक्तं लक्षणं पृथक्। फलमूलोदकादीनां क्षेत्रोपकरणस्य च। भङ्गाक्षेपोपमर्दाद्यैः प्रथमं साहसं स्मृतम्। वासःपश्वन्नपानानां गृहोपकरणस्य च। एतेनैव प्रकारेण मध्यमं साहसं स्मृतम्। व्यापादोविषशस्त्राद्यैः परदाराभिमर्शनम्। प्राणोपरोधि यच्चान्यदुक्तमुत्तमसाहसम्। तस्य दण्डः क्रियाक्षेपः प्रथमस्य शतावरः। मध्यमस्य तु शास्त्रज्ञैर्दृष्टः पञ्चशतावरः। उत्तमे साहसे दण्डः सहस्रावर इष्यते। वधः सर्वस्वहरणं पुरान्निर्वासनाङ्कने। तदङ्गच्छेद इत्युक्तो दण्ड उत्तमसाहसे" इति। वधादयश्चापराधतारतम्यादुत्तमसाहसे समस्ता व्यस्ता वा योज्याः"। तत्र परद्रव्यापहरणरूपे साहसे दण्डमाह" मिता०। "तन्मूल्याद्द्विगुणोदण्डोनिह्नवे तु चतुर्गुणः" या० स्मृ०। "तस्यापहृतद्रव्यस्य मूल्याद्द्विगुणोदण्डः यः पुनः साहसं कृत्वा नाहमकार्षमिति निह्नुते तस्य मूल्याच्चतुर्गुणो दण्डो भवति। एतस्मादेव विशेषदण्डविधानात् प्रथमसाहसादिसामान्यदण्डविधानमपहारव्यतिरिक्तविषयम्" मिता०

उत्तमस्त्रीसंग्रहण न० परस्त्रियाः संग्रहणं कर्म्म०। स्मृत्युक्ते परस्त्रियामुत्तमे मिथुनाभावाय प्रवृत्तिरूपव्यापारभेदे तत्स्वरूपविभागादि मिता० दर्शितं यथा

"प्रथम साहसादिदण्डप्राप्त्यर्थं त्रेधा तत्स्वरूपं व्यासेन विवृतम्। "त्रिविधन्तत्समाख्यातमधमं मध्यमोत्तमम्। अदेशकालभाषाभिर्निर्जने च परस्त्रियाः। कटाक्षावेक्षणं हास्यम्प्रथमं साहसं स्मृतम्। प्रेषणं गन्धमाल्यानां धूपभूषणवाससाम्। प्रलोभनञ्चान्नपानैर्मध्यमं समुदाहृतम्। सहासनं विविक्तेषु परस्परमपाश्रयः। केशाकेशि ग्रहश्चैव सम्यक् संग्रहणं स्मृतम्"। स्त्रीपुंसयोर्मिथुनीभावः संग्रहणं संग्रहणज्ञानपूर्वकत्वात्तत्कर्तुर्दण्डविधानस्य तज्ज्ञानोपायन्तावदाह। "पुमान् संग्रहणे ग्राह्यः केशाकेशि परस्त्रियाः। सद्यो वा कामजैश्चिह्नैः प्रतिपत्तौ द्वयोस्तथा" या० स्मृ०। संग्रहणे प्रवृत्तः पुमान्, केशाकेश्यादिभिर्लिङ्गैर्ज्ञात्वा ग्रहीतव्यः। परस्परकेशग्रहणपूर्विका क्रीडा केशाकेशि "तत्र तेनेदमिति सरूपे" इति पा० बहुव्रीहौ सति "इच् कर्म्मव्यतिहारे" पा० इति समासान्त इच् प्रत्ययः अव्ययत्वाच्च लुप्ततृतीयाविभक्तिः। ततश्चायमर्थः। परभार्य्यया सह केशाकेशिक्रीडनेनाभिनवैः करजदशनादिकृतव्रणैः रागकृतैर्लिङ्गैर्द्वयोः सम्प्रतिपत्त्या वा ज्ञात्वा संग्रहणे प्रवृत्तो ग्रहीतव्यः। परस्त्रीग्रहणं नियुक्तावरुद्धादिव्युदासार्थम्। किञ्च। "नीवीस्तनप्रावरणसक्थिकेशावमर्शनम्। अदेशकालसम्भाषं सहैकस्थानमेव च" या० स्मृ०। यःपुनः परदारपरिधानग्रन्थिप्रदेशकुचप्रावरणजघनमूर्द्धरुहादिस्पर्शनं साभिलाषश्चाचरति। तथा अदेशे निर्जने जनताकीर्णे वान्धकाराकुलेऽकाले संलापनञ्च करोति। परभार्यया वा सहैकमञ्चकादौ रिरंसयेवावतिष्ठते। सोऽपि संग्रहणे प्रवृत्तो ग्राह्यः। एतच्चाग्रहणान दोषपुरुषविषयमितरस्य न दोषः। यथाह मनुः। "यस्त्वनाचारितः पूर्वमभिभाषेत कारणात्। न दोषम्प्राप्नुयात्किञ्चिन्न हि तस्य व्यतिक्रमः" इति यः परस्त्रिया स्पृष्टः क्षमतेऽसावपि ग्राह्य इति तेनैवोक्तम्। "स्त्रियं स्पृशेददेशे यः स्पृष्टोवा मर्षयेत्तथा। परस्परस्यानुमते सर्वं संग्रहणं स्मृतमिति" यच्च मयेयं विदग्धाऽसकृत्प्रसि-

नेति श्लाघया भुजङ्गजनसमक्षङ्ग्राम्यवत्यसावपि पाद्य इति तेनैवोक्तम् ।"दर्पाद्वा यदि वा मोहात् श्लाघया वा स्वयं वदेत् । पूर्व्वं मयेयम्भुक्तेति तत्र संग्रहणं स्मृतम्"

उत्तमा स्त्री उत्कृष्टसौन्दर्य्यान्वितायाम् स्त्रियाम् अमरः ।

उत्तमाङ्ग न० कर्म्म० । मस्तके । "बभौ पतद्गङ्ग इवोत्तमाङ्गे" कुमा० । "कश्चिद् द्विषत्खड्गहृतोत्तमाङ्गः" रघुः । "पृष्ठतस्तु शरीरस्य नोत्तमाङ्गे कथञ्चन" मनुः । मस्तकस्य अङ्गेषूत्तमत्वं चक्षुरादीन्द्रियाधारत्वात् प्राणवायुसञ्चारस्थानत्वात् सर्व्वेषामङ्गानामुपरिवर्त्तमानत्वाच्च । अतएव "गर्भस्य हि सम्भवतः प्रथमं शिरः सम्भवतीत्याह शौनकः शिरोमूलत्वाद्देहेन्द्रियाणाम्" सुश्रु० शौनकीयमते इन्द्रियमूलत्वमस्योक्तम् "तत्र शरीरम् षडङ्गं शाखाश्चतस्रो मध्यं पञ्चमं षष्ठं शिर" इति सुश्रु० षड्ङ्गविभागे हस्तपादानां चतसृणां शाखात्वेन मध्यमस्य मध्यत्वेन उपवर्णयं सर्वशेषे शिरसः कथनं पूर्व्वोक्तहेतोः प्राधान्यात्तस्येति बोध्यम् । प्रत्यङ्गविभागेऽपि "मस्तकोदरेत्यादिना सुश्रु० मस्तकस्य प्रथमनिर्देशः प्राधान्यादेव लोकेऽपि मस्तकच्छेदनेऽवशिष्टाङ्गैः न प्रत्यभिज्ञा छिन्नमस्तकमात्रेण तु प्रत्यभिज्ञा इत्यतो मस्तकस्य प्रत्यभिज्ञासाधनत्वादपि उत्तमत्वम्" कथमन्यथा देवदत्तादिदेहस्य हस्तादिषु च अङ्गेषु मध्ये हस्तादिना न प्रत्यभिज्ञा इत्यतः मस्तकस्य उत्कृष्टत्वम् । हस्तादिच्छेदनेऽपि जीवनसम्भवात् मस्तकस्य छेदने तदभावादपि मस्तकस्य प्राधान्यमित्यपि मन्तव्यम् ।

उत्तमाम्भस् न० सांख्यशास्त्रप्रसिद्धे नवविधतुष्टिमध्ये तुष्टिभेदे "नापहत्य भूतानि विषयोपभोगः सम्भवतीति हिंसादोषदर्शनात् विषयोपरमे या तुष्टिः सा पञ्चमी उत्तमाम्भ उच्यते" सा०कौ० । अस्यास्तुष्टेः अम्भसोऽङ्कुरं प्रतीव विवेकख्यातिं प्रति हेतुत्वात्तथात्वम् ।

उत्तमाय्य त्रि० उत्तमं क्रियते उत्तम-णिच्-कर्म्मणि बा० आय्य णि० णिलोपः । उत्तमीकृते । "उतेदमुत्तमाय्यम्" ऋ० ९,२२,६, "उत्तमाय्यमुत्तमीकृतम्" भा० ।

उत्तमारणी स्त्री उत्तममृच्छति ऋ-अनि ङीप् । इन्दीवर्य्याम्

उत्तमौजस् त्रि० उत्तममोजो यस्य ।१उत्कृष्टतेजस्के दशमन्वन्तराधिपमनोः २पुत्रभेदे पु० हरिवं० "दशमे त्वथ पर्य्याय" इत्युपक्रम्य "मनोः सुतोत्तमौजाश्च दाक्षिः स्वञ्चश्च वीर्य्यवान् । शतानीको निरामित्रो वृषसेनो जयद्रथः । भूरिद्युम्नः सुवर्चाश्च दश त्वेते मनोः सुताः" ७अ० । सुतोत्तमौजा इत्यत्र सन्धिरार्षः । द्वापरयुगीये ३युधामन्युभ्रातरि नृपे पु० । "नेह पश्यामि विबुधा ! राधेयममितौजसम् । भ्रातरौ च महात्मानौ युधामन्यूत्तमौजसौ" भा०स्वर्गा०२अ० । "युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्य्यवान्" गीता "उत्तमौजाश्च शल्यश्च कौरवाः कैकयास्तथा" हरिवं०९२ अ० । "उत्तमौजास्तथा शाल्वः कैरलेयश्च कौशिकः" हरिवं० ९९अ० ।

उत्तम्भ पु० उद्+स्तम्भ-घञ् । १प्रवृत्तिरोधिकायामनिष्टसाधनतोनिवृत्तौ । (थामा) २अवलम्बे च ।

उत्तम्भन न० उ+स्तम्भ-ल्युट् । १अवलम्बने । करणे ल्युट् २तत्साधने । "वरुणस्योत्तम्भनमसि" यजु० १४, २२ । "समीपेऽन उपस्थाप्योत्तम्भनेन स्तभ्नाति" कात्या० ७, ९,२२ ।

उत्तर न० उत्तीर्य्यते प्रकृताभियोगोऽनेन उद्+तृ-अप्, उद्-तरप् वा । राजसमीपे वादिकृताभियोगापनोदके उत्तराख्ये १व्यवहाराङ्गे द्वितीयपादे "प्रश्नशोद्यधिया पृच्छा तस्य खण्डनमुत्तरमित्युक्तं" २दोषभङ्गनवाक्ये । ३जिज्ञासितविषयावेदके वाक्ये । ४उदीच्यां दिशि स्त्री । अनन्तरे ५देशे, ६काले च पु० । ७अनन्तरोत्तरदिग्देशकालवृत्तौ त्रि० अश्विन्यादिषु १२,२१,२६ः संख्यकेषु नक्षत्रेषु न० स्त्री । "उत्तरात्रयशाम्यरोहिणीरौद्रसार्पपितृभेषु चाग्निभे" "रेवत्युत्तररोहिणी मृगशिरो मूलानुराधा मघा" "त्रीण्युत्तराणि स्वभूः" ज्यो०त० । तत्र वादे उत्तरतदाभासादिलक्षणादि मिता० दर्शितं यथा । "श्रुतार्थस्योत्तरं लेख्यं पूर्व्वावेदकसन्निधौ" या० । "श्रुतो भाषार्थोयेन प्रत्यर्थिनाऽसौ श्रुतार्थस्तस्योत्तरं पूर्व्वपक्षादुत्तरत्व भवतीति उत्तरं लेख्यं लेखनीयम् । पूर्व्वावेदकस्यार्थिनः समीपे उत्तरञ्च यत्पूर्व्वोक्तस्य निराकरणन्तदुच्यते । यथाह । "पक्षस्य व्यापकं सारमसन्दिग्धमनाकुलम् । अव्याख्यागम्यमित्येतदुत्तरन्तद्विदोविदुरिति" । पक्षस्य व्यापकन्निराकरणसमर्थम् सारं न्याय्यं न्यायादनपेतम्, असन्दिग्धं सन्देहरहितम्, अनाकुलं पूर्व्वापराविरुद्धम्, अव्याख्यागम्यं चाप्रसिद्धपदयोगेन दुःश्लिष्टविभक्तिसमासाध्याहाराभिधानेन वा अन्यदेशभाषाभिधानेन वा यद्व्याख्येयार्थन्न भवति तत्तदुत्तरम् । तच्चतुर्व्विधम् । सम्प्रतिपत्तिर्मिथ्या प्रत्यवस्कन्दनं पूर्व्वन्यायश्चेति । यथाह

कात्यायनः । "सत्यं मिथ्योत्तरञ्चैव प्रत्यवस्कन्दनं तथा । पूर्व्वन्यायविधिश्चैवमुत्तरं स्याच्चतुर्विधमिति" । तत्र सत्योत्तरं यथा रूपकशतमहमन्धारयतीत्युक्ते सत्यन्धारयामीति । यथाह । "साध्यस्य सत्यवचनं प्रतिपत्तिरुदाहृता" । मिथ्योत्तरन्तु नाहन्धारयामीति । तथा च कात्यायनः । "अभियुक्तोऽभियोगस्य यदि कुर्य्यादपह्नवम् । मिथ्या तत्तु विजानीयादुत्तरं व्यवहारतः" इति । तच्च मिथ्योत्तरञ्चतुर्विधम् । "मिथ्यैतन्नाभिजानामि तदा तत्र न सन्निधिः । अजातश्चास्मि तत्काल इति मिथ्या चतुर्विधमिति" । प्रत्यवस्कन्दनन्नाम सत्यं गृहीतं प्रतिदत्तं प्रतिग्रहलब्धमिति वा । यथाह नारदः "अर्थिना लेखितो योऽर्थः प्रत्यर्थी यदि तत्तथा । प्रपद्य कारणं ब्रूयात् प्रत्यवस्कन्दनं स्मृतमिति" । प्राङ्न्यायोत्तरन्तु यत्राभियुक्त एवं ब्रूयादस्मिन्नर्थे अनेनाहमभियुक्तस्तत्र चायं व्यवहारमार्गेण पराजित इति । उक्तञ्च कात्यायनेन "आचारेणावसन्नोऽपि पुनर्लेखयते यदि । सोऽभिधेयो जितः पूर्व्वं प्राङ्न्यायस्तु स उच्यते" इति । एवमुत्तरलक्षणे स्थिते उत्तरलक्षणरहितानाम् उत्तरवदवभासमानानामुत्तराभासत्वमर्थसिद्धं स्पष्टोक्तञ्च स्मृत्यन्तरे । "सन्दिग्धमन्यत् प्रकृतादत्यल्पमतिभूरि च । पक्षैकदेशव्याप्यन्यत्तथा नैवोत्तरम्भवेत् । यद्व्यस्तपदमव्यापि निगूढार्थन्तथाकुलम् । व्याख्यागम्यमसारञ्च नोत्तरं स्वार्थसिद्धये" इति । तत्र सन्दिग्धम् सुवर्णशतमनेन गृहीतमिति उक्ते सत्यं गृहीतम्, सुवर्णशतम्माषशतं वेति । प्रकृतादन्यत् यथा सुवर्णशताद्यभियोगे पणशतन्धारयामीति । अत्यल्पं सुवर्णशताभियोगे पञ्च धारयामीति । अतिभूरि सुवर्णशताभियोगे द्विशतन्धारयामीति । पक्षैकदेशव्यापि हिरण्यवस्त्राद्यभियोगे हिरण्यं गृहीतन्नान्यदिति । व्यस्तपदम् । ऋणादानाभियोगे पदान्तरेणोत्तरम् । यथा सुवर्णशताभियोगे अनेनाहन्ताड़ित इति । अव्यापि देशस्थानादिविशेषणाव्यापि । यथा मध्यदेशे वाराणस्यां पूर्व्वस्यां दिशि क्षेत्रमनेनापहृतमिति पूर्व्वपक्षे लिखिते क्षेत्रमपहृतमिति । निगूढार्थं यथा सुवर्णशताभियोगे किमहमेवास्मै धारयामीत्यत्र ध्वनिना प्राड्विवाकः सभ्यो वार्थी वान्यस्मै धारयतीति निगूढार्थम् आकुलं पूर्व्वापरविरुद्धम् । यथा सुवर्णशताभियोगे हते सत्यं गृहीतन्न धारयामीति । व्याख्यागम्यम् दुःश्लिष्टविभक्तिसमासाध्याहाराभिधानेन अन्यदेशभाषाभिधानेन वा । यथा सुवर्णशतविषये पितॄणामभियोगे गृहीतं शतं वचनात् सुवर्णानां पितॄणं जानामीति । अत्र पितृवचनात् सुवर्णानां शतं गृहीतमिति न जानामीति । अन्याय्यं न्यायविरुद्धम् । यथा सुवर्णशतमनेन वृद्ध्या गृहीतं वृद्धिरेव दत्ता न मूलमिति अभियोगे सत्यं वृद्धिर्दत्ता न मूलं गृहीतमिति । उत्तरमित्येकवचननिर्द्देशादुत्तराणां सङ्करोनिरस्तः । यथाह कात्यायनः । "पक्षैकदेशे यत्सत्यमेकदेशे च कारणम् । मिथ्या चैवैकदेशे च सङ्करात्तदनुत्तरमिति" । अनुत्तरत्वे कारणन्तु नैवोक्तम् । "नचैकस्मिन् विवादे तु क्रिया स्याद्वादिनोर्द्वयोः । नचार्थसिद्धिरुभयोर्न चैकत्र क्रियाद्वयमिति" । मिथ्याकारणोत्तरयोः सङ्करेऽर्थिप्रत्यर्थिनोर्द्वयोः क्रिया- प्राप्नोति । "मिथ्या क्रिया पूर्व्ववादे कारणे प्रतिवादिनीति स्मरणात् । तदुभयमेकस्मिन् व्यवहारे विरुद्धम् । यथा सुवर्णशतं रूपकशतं चानेन गृहीतमित्यभियोगे सुवर्णं न गृहीतं रूपकशतं गृहीतं प्रतिदत्तञ्चेति । कारण प्राङ्न्यायसङ्करे तु प्रत्यर्थिन एव क्रियाद्वयम् । "प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिशेत् क्रियामिति" । यथा सुवर्णं गृहीतं प्रतिदत्तं रूपके व्यवहारमार्गेण पराजित इति । अत्र च प्राङ्न्याये जयपत्रेण वा प्राङ्न्यायदर्शिभिर्वा भावयितव्यम् । कारणोत्तरे तु साक्षिलेख्यादिभिर्भावयितव्यमिति विशेषः । एवमुत्तरत्रय सङ्करेऽपि द्रष्टव्यम् । यथाऽनेन सुवर्णं रूपकशतं वस्त्राणि च गृहीतानीत्यभियोगे सत्यं सुवर्णं गृहीतं प्रतिदत्तञ्च रूपशतं तु न गृहीतं वस्त्रविषये पूर्व्वन्यायेन पराजित इति । एवञ्चतुःसङ्करेऽपि । एतेषाञ्चानुत्तरत्वं यौगपद्येन । तस्य तस्यांशस्य तेन तेन विनाऽसिद्धेः क्रमेणोत्तरत्वमेव । क्रमश्चार्थिनः प्रत्यर्थिनः सभ्यानामिच्छया भवति यत्र पुनरुभयोः सङ्करे यस्य प्रभूतार्थविषयत्वन्तत्क्रियोपादानेन पूर्व्वं व्यवहारः प्रवर्त्तयितव्यः पश्चादल्पविषयोत्तरोपादानेन व्यवहारो द्रष्टव्यः । यत्र च सम्प्रतिपत्त्युत्तरान्तरस्य सङ्करस्तत्रोत्तरान्तरोपादानेन व्यवहारो द्रष्टव्यः । सम्प्रतिपत्तौ क्रियाभावात् । यथाहारीतेन "मिथ्योत्तरङ्कारणञ्च स्यातामेकत्र चेदुभे । सत्यं चापि सहान्येन तत्र ग्राह्यं किमुत्तरम्" इत्युक्त्वोक्तम् । "यत् प्रभूतार्थविषयं यत्र वा स्यात् क्रियाफलम् । उत्तरन्तत्र तज्ज्ञेयमसङ्कीर्णमतोऽन्यथा" । सङ्कीर्णम्भवतीति शेषः शेषायेच्छया ऐच्छिकः क्रमो भवतीत्यर्थः । तत्र प्रभूतार्थे यथाऽनेन सुवर्णं

रूपकशतं वस्त्राणि च गृहीतानि इत्यभियोगे सत्यं सुवर्णं गृहीतं रूपकशतञ्च न गृहीतं वस्त्राणि तु गृहीतानि प्रतिदत्तानि चेति अत्र मिथ्योत्तरस्य प्रभूतविषयत्वादर्थिनः क्रियामादाय प्रथमं व्यवहारः प्रवर्त्तयितव्यः। पश्चाद्वस्त्रविषयो व्यवहारः। एवं मिथ्याप्राङ्न्यायसङ्करे कारणप्राङ्न्यायसङ्करे च योजनीयम्। तथा तस्मिन्नेवाभियोगे सत्यं सुवर्णं रूपकशतञ्च गृहीतं दास्यामि वस्त्राणि तु न गृहीतानि गृहीतानि प्रतिदत्तानीति वा। वस्त्रविषये पूर्व्वं पराजित इति वोत्तरे सम्प्रतिपत्तेर्भूरिविषयत्वेऽपि तत्र क्रियाभावान्मिथ्याद्युत्तरक्रियामादावेव व्यवहारः प्रवर्त्तयितव्यः। यत्र तु मिथ्याकारणोत्तरयोः कृत्स्नपक्षव्यापित्वम्। यथा शृङ्खलाहितया कश्चिद्वदति इयङ्गौर्मदीया अमुकस्मिन् काले नष्टा अद्यास्य गृहे दृष्टेति। अन्यस्तु मिथ्यैतदेतत्प्रदर्शितकालात् पूर्व्वमेवास्मद्गृहे स्थिता मम गृहे जाता चेति वदति। इदन्तावत् पक्षनिराकरणसमर्थत्वादनुत्तरम्। नापि मिथ्यैव कारणोपन्यासात्। नापि कारणम्। एकदेशस्याभ्युपगमाभावात्। तस्मात् सकारणं मिथ्योत्तरमिदम्"। अत्र कश्चिद्विशेषो व्य०त०दर्शितः यथा "कात्यायनः। "सद्यः कृतेषु कार्य्येषु सद्यएव विवादयेत्। कालातीतेषु वा कालं दद्यात् प्रत्यर्थिने प्रभुः"। वादिनोक्तस्य साध्यस्य प्रतीपमर्थयते इति प्रत्यर्थी। नारदः "गहनत्वाद्धि वादानामसामर्थ्यात् स्मृतेरपि। ऋणादिषु हरेत् कालं कामन्तत्त्वबुभुत्सया" दा०। बृहस्पतिः। "यदा त्वेवंविधः पक्षः कल्पितः पूर्व्ववादिना। दद्यात् तत्पक्षसम्बन्धं प्रतिवादी तदोत्तरम्"। सम्बन्धसंयुक्तम् अन्यथा अन्यवादित्वेन भङ्गप्रसङ्गात्। "अन्यवादी क्रियाद्वेषी नोपस्थायी निरुत्तरः। आहूतः प्रपलायी च हीनः पञ्चविधः स्मृतः"। प्रपलायी त्रिपक्षेण मौनकृत् सप्तभिर्दिनैः। क्रियाद्वेषी तु मासेन साक्षिभिस्तु तत्क्षणात्" इति नारदोक्तेः क्रिया लेख्यादिका, साक्षिभिः पराजितः। वादिनोक्तस्य साध्यस्य प्रतीपं वदतीति प्रतिवादी उत्तीर्य्यते निस्तीर्य्यते प्रकृताभियोगोऽनेनेति उत्तरम्।

उत्तरस्वरूपं तद्भेदांश्चाह नारदः। "पक्षस्य व्यापकं सारमसन्दिग्धमनाकुलम्। अव्याख्यागम्यमित्येवमुत्तरं तद्विदोविदुः। मिथ्यासंप्रतिपत्तिश्च प्रत्यवस्कन्दनन्तथा। प्राङ्न्यायश्चोत्तराः प्रोक्ताश्चत्वारः शास्त्रवेदिभिः। अभियुक्तोऽभियोगस्य यदि कुर्य्यादपह्नवम्। मिथ्या तत्तु विजानीयादुत्तरं व्यवहारतः"। पक्षस्य भाषार्थस्य व्यापकम् आच्छादम् अभियोगप्रतिकूलमिति यावत्। अतएव "पूर्व्वपक्षार्थसम्बन्धं प्रतिपक्षं निवेदयेदि"त्युक्तम्। न च विप्रतिपत्त्या न्यायोऽर्थमागतस्य धारयसीत्यभियुक्तस्य धारयामीति संप्रतिपत्तेः कथमुत्तरत्वम् अभियोगाप्रतिकूलत्वादिति वाच्यम् भाषावादिनोमूर्खत्वेनापटुकरणतया वा कदाचिद्भाषातिवादादेवायं हीयते इति भाषाविमर्शपर्य्यन्तं विप्रतिपन्नस्याप्युत्तरवादिनोभाषार्थं सम्यगवगम्य तन्निषेधार्थं सम्यगुत्तरासम्भवात् विद्वत्सभायां चासत्यवचनमत्यन्ताधर्म्मकारकम्। परोक्तिपराजये च दण्डग्रत्वं वादिना च वैरमित्यादि प्रतिसन्दधतः सम्प्रतिपत्तेरुत्तरत्वं सम्भवत्येव। एवम् एतेभ्य एवानिस्तारात् साध्यत्वेनोपदिष्टस्य पक्षस्य सिद्धत्वेनोपन्यासेन साध्यत्वनिवारणात् सिद्धसाधनेनापि वादिनः प्रत्यवस्थानान्नोत्तरत्वं सम्प्रतिपत्तेः सिद्धमिति सारं प्रकृतोपयोगि अनाकुलं पूर्व्वापरविरोधशून्यं अव्याख्यागम्यमध्याहारादिकं विनैव प्रतीतम्. अभियोगस्य अभियुज्यते इत्यभियोगः सहेतुकं साध्यं तस्यापह्नवमित्यर्थः"। "उत्तराभासमाह कात्यायनः। "प्रकृतेन त्वसम्बन्धमत्यल्पमतिभूरि च। पक्षैकदेशव्याप्येवं तच्च नैवोत्तरं भवेत्। अव्यक्तपदव्यापि निगूढार्थं तथाकुलम्। व्याख्यागम्यमसारञ्च नोत्तरं शस्यते बुधैः"। अस्तव्यस्तपदव्यापि अनन्वितार्थपदव्याप्तमिति व्यवहारतिलके भवदेवभट्टाः। मिथ्योत्तरभेदमाह पुनर्व्यासनारदौ। "मिथ्यैतन्नाभिजानामि मम तत्र न सन्निधिः। अजातश्चास्मि तत्काले इति मिथ्या चतुर्विधम्"। मिथ्यैतदितिशब्दतोनाभिजानामीत्यादिकमर्थतोऽपह्नवः। तथा च कात्यायनः। "श्रुत्वा भाषार्थमन्यस्तु यदि तं प्रतिषेधति। अर्थतः शब्दतोवापि मिथ्या तज्ज्ञेयमुत्तरम्"। त्वं मह्यं धारयसीति प्रतिज्ञायां न गृहीतमिति शब्दतः। कालविशेषगर्भायां तस्यां सत्यां तदानाहं जात इति अर्थतः। देशकालविशेषगर्भायां तदा तत्र नाहमासम् इत्यप्यर्थतः। देशादिमत्यां तच्छून्यायां वा न जानामीत्यर्थतएव योग्याकरणेनार्थतस्तदग्रहणप्रतिपादनात्। अत्र चरमत्रयं ग्रहणावस्कन्दनमुखेन ग्रहणाभावप्रतिपादकं सापदेशमिथ्योत्तरमात्रम् आद्यं मिथ्योत्तरमात्रम्। तच्च कारणोत्तरं त्रिविधं बलवत्तुल्यबलं दुर्बलञ्च तत्र बलवदुत्तरं यथा त्वत्तः गृहीत-

मिति सत्यं किन्तु परिशोधितमिति अत्रोत्तरवादिन एव क्रियानिर्देशः। तथा च नारदः। "साधर्म्यं पूर्वपक्षस्य यस्मिन्नर्थवशाद्भवेत्। विवादे साक्षिणस्तत्र प्रष्टव्याः प्रतिवादिनः"। साधर्म्यं दुर्बलत्वं पूर्वपक्षस्य। ततश्च स्थापकसाध्यस्य धार्य्यमाणत्वस्य ध्वंसकारणं निर्य्यातनादि तद्रूपमुत्तरं कारणोत्तरम्। अतएव मिथ्योत्तरादस्य भेदः तद्धि धार्य्यमाणत्वस्यात्यन्ताभावप्रयोजकमपह्नवरूपं न तु ध्वंसरूपम्। तत्र बलवत्कारणोत्तरं यथा मदीयेयं भूमिः क्रमागतत्वादिति वाद्युक्ते मदीयेयं भूमिः क्रमागतत्वादिति प्रतिवादिना यथोत्तरमिति तत्र पूर्ववादिनः साक्ष्युपन्यासः। तदसामर्थ्ये प्रतिवादिनः। तथा च याज्ञवल्क्यः। "साक्षिषूभयतः सत्सु साक्षिणः पूर्ववादिनः। पूर्वपक्षेऽधरीभूते भवन्त्युत्तरवादिनः"। दुर्बलकारणोत्तरं यथा ममेयं भूः क्रमागतत्वादिति वाद्युक्ते ममेयं भूर्दशवर्षभुज्यमानत्वादिति प्रत्युत्तरम्" व्य०त०रघु०।

"शोधयेत् पूर्ववादं तु यावन्नोत्तरदर्शनम्। अवष्टब्धस्योत्तरेण निवृत्तं शोधनं भवेत्" नार०। ९न्यायावयवभेदे न०। "विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम्। निर्णयश्चेति सिद्धान्तः शास्त्रेऽधिकरणं स्मृतम्" मीमांसा। तच्च सिद्धान्तानुकूलतर्कोपन्यासरूपम्। १०प्रतिवचने न० "प्रचक्रमे च प्रतिवक्तुमुत्तरम्" रघु०। ११उपरिस्थे, "समे देशे प्रतिष्ठाप्य चैलाजिनकुशोत्तरम्" गीता। "मृदुप्रवालोत्तरपुष्पशय्याम्" रघुः १२ऊर्द्ध्वभागे "तद्वाहनादवनतोत्तरकायमीषत्" रघुः "दूर्वाङ्कुरयवप्रकाण्डमभिरष्टोत्तरः" इति रघुः। १३वामभागे। "पितृपात्रे निधायार्घं न्युब्जमुत्तरतोन्यसेत्" मत्स्यपु०। "न्यसेदित्यत्रोक्तस्थापितकर्त्तुर्वामपार्श्वे न्यासः कर्त्तव्यः" श्रा०त०रघु०। तस्य तदर्थत्वे उदा० तत्रैव यथा "तस्माद्यस्य दक्षिणतो लक्ष्म भवति तं पुण्यलक्ष्मीकमित्याचक्षते उत्तरतः स्त्रियाः उत्तरायशा हि स्त्रीति" शतपथश्रुतिः। "उत्तरे चास्य सौवर्णं लक्ष्म पार्श्वे भविष्यति" भारतम् दिशि "अस्त्युत्तरस्यां दिशि देवतात्मा" कुमा०। "सर्वेषामेव वर्षाणां मेरुत्तरतः स्थितः" सू० अत्र वृत्तौ पुंवद्भावः। दिग्देशकालवर्त्तिपरत्वेऽपि अस्य स्वाभिधेयावधिनियमरूपव्यवस्थावाचित्वात् सर्वनामतया तत्कार्य्यम् उत्तरे ग्रामाः उत्तरस्यै नगर्य्यैः उत्तरस्मिन् दिने, संज्ञायां तु न सर्वनामकार्य्यम् उत्तराः कुरवः। तत्रोत्तरकालवृत्तौ "ऊर्द्ध्वमन्तमधिकर्द्धिरुत्तरः पूर्वमुत्सवमपोहदुत्सवः" रघुः "सखीभिरस्रोत्तरमीक्षितामिमाम्" कुमा०। अवधिश्च द्विविधः दैशिकः कालिकश्च तत्र दैशिकः "समुद्रस्योत्तरे तीरे जम्भला नाम राक्षसी" गर्भप्रसवमन्त्रः। अत्र दिग्देशावधिवाचित्वे उद्+ऊर्द्ध्वार्थे तरप्। तथा हि लङ्कावधिमेरुपर्य्यन्तदेशानाम् भूवलये क्रमश उन्नतत्वात् तत्सन्निहितदेशस्य उन्नत्वादुत्तरत्वम् "स्वापेक्षया मेरुसन्निहितत्वमेव उत्तरत्वमिति" मुक्ता०। अतएव तद्देशस्योन्नत्वादेव च क्रमशस्तत्र उत्तरध्रुवस्योन्नत्वम्" सि०शि० उक्तम् "निरक्षदेशे क्षितिमण्डलोपगौ ध्रुवौ नरः पश्यति दक्षिणोत्तरौ। तदाश्रितं खे जलयन्त्रवत्तथा भ्रमद्भचक्रं निजमस्तकोपरि। उदग्दिशं याति नरो यथा यथा तथा तथा नन्नतमृक्षमण्डलम्। उदक् ध्रुवं पश्यति चोन्नतं क्षितेस्तदन्तरे योजनजाः पलांशकाः" तद्दिशः क्रमशः उन्नत्वाच्च दक्षिणस्या अधस्त्वम्। अतएव तद्दिशोऽवाचीत्वम्। तद्दिक्स्थदेशस्यापि उत्तरदिक्स्थत्वेनोत्तरत्वम्। कालिकस्य उत्तरत्वं तु स्वापेक्षया परत्वम् तच्च स्वापेक्षया ऽल्पसूर्य्यक्रियासामानाधिकरण्यम्। सूर्य्यक्रिययैव खण्डकालव्यवहारात् तत्र प्राग्वर्त्तिनावहत्तेः बहुसूर्य्यक्रियासामानाधिकरण्यात् तथात्वम्। तथा च एतादृशार्थपरत्वे उदः उत्क्रान्तिप्रकर्षे तरप्। उत्तरकालवाचित्वेऽपि अव्यवहिते एवास्य वृत्तिरौत्सर्गिकी लक्षणया अधिककालोत्तरत्वमपि प्रतीयते। तेन स्वाव्यवहितोत्तरक्षणवृत्तिकत्वमित्यादिप्रयोगो द्रष्टव्यः। अधिकार्थे तु उदः उत्कर्षार्थत्वमिति विवेकः। १४प्रधाने "धर्मोत्तरं मध्यममाश्रयन्ते" रघुः "कन्यान्तात तवाद्येह शोकोत्तरमिदं मनः" भा० अनु० १६२ अ०। १५अधिके "देवीं तु मनसा ध्यात्वा शतमष्टोत्तरं जपेत्" तन्त्रम्। "सप्तोत्तरं मर्मशतं द्वे च सन्धिशते तथा" या० स्मृ०। उत्तीर्य्यतेऽस्मात् संसारः अपादाने अप्। १६विष्णौ पु०। "उत्तरो गोपतिर्गोप्ता" विष्णुस०। "जन्मसंसारबन्धनादुत्तरन्त्यत उत्तरः विश्वस्मात् वा उत्कृष्टः-भा०। १७शिवे पु० तस्यापि तथात्वात्। भावे अप्। १८उत्तरणे उल्लङ्घने। १९विराटनृपस्य पुत्रे पु० स च भूमिञ्जयापरनामा। २० तत्कन्यायां स्त्री तत्कथा यथा भा०विरा० प०३५।१२६अ०। "दृष्ट्वा भूमिञ्जयं नाम पुत्रं मत्स्यस्य मानिनम्" इत्युपक्रम्य "उवाच रहसि प्रीतः कृष्णां सर्वार्थकोविदः। उत्तरं ब्रूहि कल्याणि! क्षिप्रं मद्वचनादपि"। "उत्तरायाः प्रमुखतः सर्वं जान-

अरिन्दमः" "अथोत्तरा च कन्यास्य सख्यसममनुँ सदा" "यद्युत्तरोऽयं संग्रामे विजेष्यति महारथान्" इति च । उत्तरा च अभिमन्योः पत्नी तत्कथापि तत्रैव ७१,अ० । "उत्तरां प्रतिगृह्णातु सव्यसाची धनञ्जयः" इति विराटेनोक्ते "प्रतिगृह्णाम्यहं राजन् ! स्नुषां दुहितरं तव" "स्नुषार्थे उत्तरां राजन् ! प्रतिगृह्णामि ते सुताम्" "तां प्रत्यगृह्णात् कौन्तेयः सुतस्यार्थे धनञ्जयः। सौभद्रस्यानवद्याङ्गी विराटतनयां तदा । तत्रातिष्ठन् महाराजो रूपमिन्द्रस्य धारयन् । स्नुषां तां प्रतिजग्राह कुन्तीपुत्रो युधिष्ठिरः । प्रतिगृह्य च तां पार्थः पुरस्कृत्य जनार्द्दनम् । विवाहं कारयामास सौभद्रस्य महात्मनः" ७२अ० । २१ अपृष्टकथने "हताश देवी वचनाधिकारिणी त्वदुत्तरं दास्ति ! ददासि का सती" नैष० । उत्तरकालभावित्वादुत्तरत्वाच्चास्य तथात्वमजिज्ञासिताधानतया चास्य निग्रहस्थानत्वं तदभिप्रायेण उक्तश्लोकेन निग्रहार्थकाक्षेपः कृतः।

उत्तरकाण्ड न० वाल्मीकि रामायणान्तर्गते सप्तमे काण्डे ।

उत्तरकाल पु० कर्म्म० । भविष्यत्काले क्रमिकर्म्मणां तस्य गौणकालत्वमाह "एवमागामियागीयमुख्यकालादधस्तनः । स्वकालादुत्तरो गौणः कालः पूर्वस्य कर्म्मणः" हरिहरः।

उत्तरकुरु पु० नववर्षात्मकस्य जम्बुद्वीपस्य वर्षभेदे । वर्षाणां संस्थितिः सि० शि० उक्ता

"लङ्कादेशाद्धिमगिरिरुदग्घेमकूटोऽथ तस्मात् तस्मादन्यो निषध इति ते सिन्धुपर्य्यन्तदैर्घ्याः । एवं सिद्धादुदगपि पुराच्छृङ्गवच्छुक्लनीला वर्षाण्येषां जगुरिह बुधा अन्तरे क्षोणिदेशान् । भारतवर्षमिदं ह्युदगस्मात् किन्नरवर्षमतो हरिवर्षम् । सिद्धपुराच्च तथा कुरु, तस्माद्विद्धि हिरण्मयरम्यकवर्षे । माल्यवांश्च यमकोटिपत्तनाद्रोमकाच्च किल गन्धमादनः । नीलशैलनिषधावधी च तावन्तरालमनयोरिलावृतम् । माल्यवज्जलधिमध्यवर्ति यत् तत्तु भद्रतुरगं जगुर्बुधाः । गन्धशैलजलराशिमध्यगं केतुमालकमिलाकलाविदः । निषधनीलसुगन्धसुमाल्यकैरलमिलावृतमावृतमावभौ । अमरकेलिकुलायसमाकुलं रुचिरकाञ्चनचित्रमहीतलम्" "अत्र भूगोलस्यार्धमुत्तरं जम्बूद्वीपम् । तस्य क्षाराब्धेय सन्धिनिरन्तरदेशः । तत्र लङ्का रोमकं सिद्धपुरं यमकोटिरिति पुरचतुष्टयं भूपरिधिचतुर्थांशान्तरं किल कथितम् । तेभ्यः पुरेभ्यो यस्यां दिशि मेरुः सोत्तरा । अतो लङ्काया उत्तरतो हिमवान् नाम गिरिः पूर्व्वापरसिन्धुपर्य्यन्तदैर्घ्योऽस्ति । तस्योत्तरे हेमकूटः । सोऽपि समुद्रपर्य्यन्तदैर्घ्यः । तथा तदुत्तरे निषधः। तेषामन्तरे यथोत्तरम् भारतकिन्नरहरिवर्षाणि । एवं सिद्धपुरादुत्तरतः शृङ्गवान् नाम गिरिः। ततः श्वेतगिरिः। ततो नीलगिरिरिति । तेऽपि सिन्धुपर्य्यन्तदैर्घ्याः । तेषामन्तरे च वर्षाणि । तत्रादौ कुरुवर्षम् । तदुत्तरे हिरण्मयम् । ततो रम्यकमिति । अथ यमकोटेरुत्तरतो माल्यवान् नाम गिरिः । स तु निषधनीलपर्य्यन्तदैर्घ्यः । तस्य जलधेश्च मध्ये भद्राश्वं वर्षम् । एवं रोमकादुत्तरतो गन्धमादनः तस्य जलधेश्च मध्ये केतुमालम् । एवं निषधनीलमाल्यवद्गन्धमादनैरावृतमिलावृतं नाम नवमखण्डम् । सा स्वर्गभूमिः । अतस्तत्र देवक्रीडागृहाणि" प्रमि० । तत्र प्रधाना नदी भद्राख्या "चक्षुश्च केतुमालञ्च भद्राख्या चोत्तरान् कुरून्" । सि० शि० । भा० उ० प० ७अ० तद्वर्षं वर्णितं यथा "दक्षिणेन तु नीलस्य मेरोः पार्श्वे तथोत्तरे । उत्तराः कुरवो राजन् पुण्याः सिद्धनिषेविताः । तत्र वृक्षा मधुफला नित्यपुष्पफलोपमाः । पुष्पाणि च सुगन्धीनि रसवन्ति फलानि च । सर्व्वकामफलास्तत्र केचिद् वृक्षा जनाधिप ! । अपरे क्षीरिणो नाम वृक्षास्तत्र नराधिप । ये क्षरन्ति सदा क्षीरं षड्रसञ्चामृतोपमम् । वस्त्राणि च प्रसूयन्ते फलेष्वाभरणानि च । सर्व्वा मणिमयी भूमिः सूक्ष्मकाञ्चनवालुका । मणिरत्ननिभं रम्यं वज्रवैदूर्य्यसन्निभम् । भूभागं दृश्यते तत्र पद्मरागसमप्रभम् । सर्व्वर्त्तुसुखसंस्पर्शा निष्पङ्का च जनाधिप । पुष्करिण्यः शुभास्तत्र सुखस्पर्शा मनोहराः । देवलोकच्युताः सर्व्वे जायन्ते तत्र मानवाः । शुक्लाभिजनसम्पन्नाः सर्व्वे सुप्रियदर्शनाः । मिथुनानि च जायन्ते स्त्रियश्चाप्सरसोपमाः । तेषान्ते क्षीरिणां क्षीरं पिबन्त्यमृतसन्निभम् । मिथुनं जायते काले समन्तत्र प्रवर्द्धते । तुल्यरूपगुणोपेतं समवेशं तथैव च । एवमेवानुरूपञ्च चक्रवाकसमं प्रभो ! । निरामयाश्च ते लोका नित्यं मुदितमानसाः । दशवर्षसहस्राणि दशवर्षशतानि च । जीवन्ति ते महाराज ! न चान्योऽन्यं जहत्युत । भारुण्डा नाम शकुनास्तीक्ष्णतुण्डा भयानकाः । तान्निर्हरन्तीह मृतान् दरीषु प्रक्षिपन्ति च । उत्तराः कुरवो राजन् ! व्याख्यातास्ते समासतः" । तेनास्य पुंस्त्वं क्लीवात्वञ्च उक्तवाक्येभ्यः । भा० स० २७२अ० अर्ज्जुनोत्तरदिग्विजये "इदं पुरं यः प्रविशेद्ध्रुवं न स भवेन्नरः । प्रीयामहे त्वया वीर ! पर्य्याप्तो विजयस्तव । न चात्र किञ्चिज्जेतव्यम-

ल्लेमात्र प्रदृश्यते । उत्तराः कुरवोह्येते नात्र युद्धं प्रवर्त्तते । प्रविष्टोऽपि हि कौन्तेय ! नेह द्रक्ष्यसि किञ्चन । नहि मानुषदेहेन शक्यमत्राभिवीक्षितुम् । अथेह पुरुषव्याघ्र ! किञ्चिदन्यच्चिकीर्षसि । तद्ब्रूहि च करिष्यामो वचनात्तव भारत! । ततस्तानब्रवीद्राजन्नर्ज्जुनः प्रहसन्निव । पार्थिवत्वं चिकीर्षामि धर्म्मराजस्य धीमतः । न प्रवेक्ष्यामि वो देशं विरुद्धं यदि मानुषैः । युधिष्ठिराय यत् किञ्चित् करपण्यं प्रदीयताम्" । "ततोदिव्यानि वस्त्राणि दिव्यान्याभरणानि च । क्षौमाजिनानि दिव्यानि तस्य ते प्रददुः करम्" । "तेऽवतीर्य्य बहून् देशानुत्तरांश्च कुरूनपि" । भा० व० १४५ अ० । "विजित्य यः प्राज्यमयच्छदुत्तरान् कुरूनकुप्यं वसु वासवोपमः" किरा० ।

उत्तरकोशला स्त्री कर्म्म० । अयोध्यानाम्न्यां नगर्य्याम् । 'यदुपतेः क्व गता मथुरा पुरी रघुपतेः क्व गतोत्तरकोशला । इति विचिन्त्य कुरुष्व मनः स्थिरं न सदिदं जगदित्यवधारय" उद्भटः ।

उत्तरक्रिया स्त्री कर्म्म० । उत्तरकालकर्त्तव्ये कर्म्मणि "सर्व्वेष्वर्थविवादेषु बलवत्युत्तरा क्रिया । आधौ प्रतिग्रहे क्रीते पूर्व्वा तु बलवत्तरा" या० स्मृ० । "एकमेव क्षेत्रमेकस्याधिं कृत्वा किमपि गृहीत्वा पुनरन्यस्याप्याधाय किमपि गृह्णाति तत्र पूर्व्वस्यैव तद्भवति नोत्तरस्य एवं प्रतिग्रहे क्रये च"मिता० । २वार्षिके पितृकृत्ये च । "प्रेते पितृत्वमापन्ने सपिण्डीकरणादनु । क्रियन्ते याः क्रिया पित्र्याः प्रोच्यन्ते ता नृपोत्तराः" । विष्णु पु० । ३अन्तिमक्रियायाञ्च ।

उत्तरङ्ग न० उत्तरमङ्गम् कर्म्म० शकन्ध्वा० । १द्वारोर्द्ध्वस्यदारुणि । २प्रा०ब० । उद्गततरङ्गे त्रि० । "भागीरथीं शोणदश्चोत्तरङ्गः" रघुः "अपामिवाधारमनुत्तरङ्गम्" कुमा० ।

उत्तरच्छद पु० कर्म्म० । शय्याया उपर्य्यास्तरणवस्त्रे । "शय्योत्तरच्छदविमर्द्दकृशाङ्गरागम्" । "सोत्तरच्छदमध्यास्त नेपथ्यग्रहणाय सः" रघुः ।

उत्तरज्योतिष पु० प्रतीचीस्थदेशभेदे भारते स० ३१ अ० नकुलप्रतीची विजये । "कृत्स्नं पञ्चनदञ्चैव तथैवामरपर्व्वतम् । उत्तरज्योतिषञ्चैव तथा दिव्यकटं पुरम् । द्वारपालञ्च तरसा वशे चक्रे महाद्युतिः । रामठान् हारहूणांश्च प्रतीच्याश्चैव ये नृपाः" ।

उत्तरतन्त्र न० सुश्रुतान्तर्गते ग्रन्थभेदे । "इदानीन्तु प्रवक्ष्यामि तन्त्रमुत्तरमुत्तममिति" सुश्रु० ।

उत्तरतस् अव्य० उत्तर+प्रथमापञ्चमीसप्तम्यर्थेषु तसिल् । उत्तरस्मिन् उत्तरस्मात् उत्तर इत्यर्थे । त्रल् उत्तरत्राप्यत्र अव्य० ताभ्यां भवार्थे त्यप् । उत्तरतस्त्य उत्तरत्रत्य तद्भवे त्रि० ।

उत्तरदायक त्रि० उत्तरं ददाति दा+ण्वुल् । १प्रत्युत्तरदायिनि । उत्तरेण वाक्येन दायति शोधयति निजदोषम् दैप्–शोधे–ण्वुल् । स्वामिना स्वकार्य्यप्रमादकथनेतद्दोषस्यादोषत्वख्यापनेन निजदोषशोधके भृत्यादौ । "परपुंसि रता नारी भृत्यश्चोत्तरदायकः । ससर्पे च गृहे वासः मृत्युरेव न संशयः" चाण० ।

उत्तरदिक्काल पु० ७त० । "रवावुत्तरतः कालः सोमे वायव्यभागके । भौमे तु पश्चिमे भागे बुधे नैर्ऋतकोणके । जीवे च याम्यदिग्भागे शुक्रे आग्नेयकोणके । शनौ तु पूर्व्वदिग्भागे कालचक्रं प्रकीर्त्तितम्" रत्नसारोक्ते रविवारे उत्तरदिग्वर्त्तिकालचक्रे । रात्रौ तु वैपरीत्यम् उत्तरदिक्पाशशब्दे दृश्यम् अन्यदिक्कालोऽप्युक्तदिशाज्ञेयः

उत्तरदिक्पाश पु० ७त० । "रवौ तु दक्षिणे पाशः सोमे आग्नेयकोणके । भौमे तु पूर्व्वदिग्भागे बुधे ईशानकोणके । जीवे चोत्तरदिग्भागे शुक्रे वायव्यकोणके । शनौ तु पश्चिमे भागे पाशचक्रं प्रकीर्त्तितम् । रात्रावेतौ वैपरीत्यात् पाशकालौ यथोदितौ" रत्नसा० उक्ते वृहस्पतिवारे उत्तरदिशि यात्रायुद्धादिनिषेधोपयोगिनि पाशचक्रे । एवमन्यदिक्ष्वप्युक्तदिशा पाशोबोध्यः ।

उत्तरदिक्शूल त्रि० उत्तरदिशि शूलमिवास्त्यस्य अच् "ज्येष्ठा पूर्व्वा भाद्रपदा रोहिण्युत्तरफाल्गुनी । पूर्व्वादिषु क्रमाच्छूलाः यात्रादौ मरणप्रदाः । शूलाख्यानि च धिष्ण्यानि शूलसंज्ञाश्च वासराः । यायिनां मृत्युदाः शीघ्रमथ वा चार्थनाशकाः" भरद्वाजोक्ते उत्तरदिशि यात्रादौ वर्ज्ये १उत्तरफल्गुनीनक्षत्रे २बुधवारे च दिक्शूलवारस्तु वृहद्दिगीशवारः दिगीशाश्च उत्तरदिगीशशब्दे वक्ष्यन्ते । शूला इत्यत्र स्त्रीत्वं ताराविशेषणत्वात् ।

उत्तरदिगीश पु० ६त० । "इन्द्रोवह्निपितृपतिनैर्ऋतोवरुणोमरुत् । कुबेर ईशः पतयः पूर्व्वादीनां दिशां क्रमात्" इत्युक्ते १कुबेरे उत्तरदिक्पालादयोऽप्यत्र । "कुबेरगुप्तां दिशमुष्णरश्मौ" कुमारे "कौवेरदिग्भागमपास्य मार्गम्" माघे च उत्तरदिशः कुवेरसम्बन्धित्वमुक्तम् "सूर्य्यः शुक्रः क्षमापुत्रः सैंहिकेयः शनिःशशी । सौम्यस्त्रिदशमन्त्री च प्राच्यादिकदिगीश्वराः" इत्युक्ते २बुधे

एतञ्च “दिग्गीशाद्ये शुभा यात्रा पृष्ठाद्ये मरणं ध्रुवम्” इत्युक्तेः उत्तरदिशः पृष्ठीभतदक्षिणस्यां बुधवारे यात्रानिषेधाय“प्राच्यादिककुभां नाथाः यथासंख्यं प्रदक्षिणम्। मेषाद्याः राशयो ज्ञेया स्थिराद्युत्तपरिभ्रमात् इत्युक्तेषु २कर्कटवृश्चिकमीनेषु राशिषु च तेषु लग्नेषु तत्स्थे चन्द्रे च उत्तरदिग्गमनं प्रशस्तमित्यपि बोध्यम्।

उत्तरदिग्द्वार न० उत्तरदिशि द्वारं यस्य। “प्राच्यादिषु चतुर्दिक्षु सप्तसप्तानलर्क्षतः” ज्यो० उक्तेषु अभिजित्काष्टाविंशतिनक्षत्रमध्ये २३,२४,२५,२६,२७,१,२। नक्षत्रेषु तानि च यात्रादिषु तत्र दिशि प्रशस्तानि।

उत्तरदिग्बलिन् पु० उत्तरस्यां दिशि बली। “प्राच्यां सौम्यसुराचार्य्यौ याम्यां भास्करभूमिजौ। प्रत्यक् सौरिरुदीच्यान्तु सितेन्दू दिग्बलान्वितौ” ज्यो० त० उक्ते १शुक्रे २चन्द्रे च।

उत्तरपक्ष पु० कर्म्म०। वादे पूर्व्वपक्षस्य मर्दनक्षमे सिद्धान्तपक्षे। “प्रापयन् पवनव्याधेर्गिरमुत्तरपक्षताम्” माघः। २उत्तरविकल्पे ३कृष्णपक्षे च शुक्लपक्षस्यैव मासारम्भकत्वात् कृष्णपक्षस्योत्तरत्वात् तथात्वम्।

उत्तरपट पु० कर्म्म०। १उत्तरीये। ततः स्वस्योत्तरपटः सप्रस्वेदः सवेपथुः” भा० १२६अ०। २शय्योत्तरच्छदे च

उत्तरपथ पु० उत्तरः पन्थाः अच् समा०। १उत्तरस्थिते २अव्यवहिते च पथि। उत्तरः उत्तरायणचिह्नितः पन्थाः। ३देवयाने पथि येन हि अर्च्चिरादिमार्गेण विद्यावन्तो ब्रह्मलोकं गच्छन्ति तादृशे मार्गे। तत्र मार्गे च ये तदभिमानिनो देवास्ते अर्च्चिरादिशब्दे २६४ पृष्ठे उक्ताः तेषाञ्च यथा आतिवाहिकत्वम् तथा आतिवाहिकशब्दे ६५१ पृष्ठे उक्तम्। “उत्तरपथेनाहृतञ्च” पा०। ठञ्। औत्तरपथिक तत्पथेनाहृते त्रि०।

उत्तरपथिक त्रि० पन्थानं गच्छति“पथः ष्कन्” पा० पथिकः उत्तरः तद्देशभवः पथिकः। उत्तरदेशभवे १पथिके स्त्रियां ङीष्।

उत्तरपद न० उत्तरमुत्तरवर्त्ति पदम्। १समासचरमावयवपदे २स्वोत्तरवर्त्तिपदे च। “एकाजुत्तरपदे णः” पा०। ३समासयोग्ये पदे च। “प्राधान्यं हि विधेयत्र प्रतिषेधेऽप्रधानता। पर्य्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्” मीमांसा। भवति च “यजतिषु येयजामहं कुर्य्यात् नानुयाजेषु”इत्यत्र नञः समासयोग्यानुयाजेन साहित्यात् पर्य्युदासपरता तथा रात्रौ श्राद्धं न कुर्वीतेत्यादौ नञो रात्र्या समासयोग्यत्वात्तथात्वम् “अष्टम्यां मांसं नाश्नीयादित्यत्र तु क्रियापदयोगेन तस्य समासयोग्यत्वाभावेन न तत्रोत्तरपदयोग इति न पर्य्युदासपरता किन्तु प्रसज्यप्रतिषेधार्थकता “अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता। प्रसज्यप्रतिषेधोऽत्र क्रियया सह यत्र नञ्” इति मीमांसकोक्तेः। “पदोत्तरपदात्” वार्त्ति० उत्तरपदमधीते वेत्ति वेत्यर्थे ष्ठन्। उत्तरपदिक तदध्येतरि तद्वेत्तरि च त्रि०।

उत्तरपश्चिमा स्त्री उत्तरस्याः पश्चिमाया अन्तराला दिक् दिक्स०। १उत्तरपश्चिमयोरन्तरालदिशि नैर्ऋतकोणे। सा विद्यतेऽस्य अच्। २नैर्ऋतदिक्सम्बन्धिनि देशे पु० “उत्तरपश्चिमे गार्हपत्यम्” आश्व० ऋ० ४,२,१२। ३तद्वर्त्तिनि त्रि०।

उत्तरपाद पु० कर्म्म०। चतुष्पादात्मकस्य व्यवहारस्य द्वितीये पादे “पूर्व्वपक्षः स्मृतः पादो द्वितीयश्चोत्तरः स्मृतः। क्रियापादस्तृतीयः स्यात्तुर्य्यो निर्णयः स्मृतः। मिथ्योक्तौ तु चतुष्पात् स्यात् प्रत्यवस्कन्दने तथा। प्राङ्न्याये च स विज्ञेयो द्विपात् संप्रतिपत्तिषु” बृहस्पतिः।

उत्तरपुरस्तात् अव्य० उत्तरस्याः पूर्व्वस्या अन्तराला दिक् उत्तरपूर्व्वा ततः प्रथमापञ्चमीसप्तम्यर्थे अस्ताति पुंवद्भावः पूर्व्वस्य पुरादेशः। ईशानकोणे “उत्तरपुरस्तादाहवनीयस्य आतुमात्रं मर्त्तं खात्वा”आश्व० ऋ० ४,४,८।

उत्तरपूर्व्वा स्त्री उत्तरस्याः पूर्व्वस्या दिशोऽन्तराला दिक् पुंवद्भावः दिक्स०। ईशानकोणे “आग्नेय्युत्तरपूर्व्वायाम्” कात्या० ३,३,२०। दिङ्नामसमासे वा इत्यस्य सर्व्वनामकार्य्यम् योत्तरा सा पूर्व्वा यस्य मुग्धस्य एवं बहुव्रीहौ तु न सर्व्वनामकार्य्यमिति भेदः। तेन तादृशार्थेऽपि अस्य वृत्तित्वे त्रि०। “योत्तरा सा पूर्व्वा यस्य उन्मुग्धाय तस्मै उत्तरपूर्व्वायै” सि०कौ०।

उत्तरफल्गुनी स्त्री फलति फल–निष्पत्तौ “फलेर्गुक् च” उणा० उनन् गुक् च गौरा० ङीष् कर्म्म०। अश्विन्यादिषु द्वादशे नक्षत्रे तस्याः स्वरूपम् उडुचक्रशब्दे १०७१ पृ० अश्लेषाशब्दे ४९७ पृष्ठे च तदधिदेवादि उक्तम्। फल्गुनशब्दात् स्वार्थे अण् ङीप्। फाल्गुनी कर्म्म०। तत्रैवार्थे। इयं प्रवगणान्तर्गता “प्रुवगणस्त्र्युत्तरास्त्रिस्त्रभूः” इत्युक्तेः यथा चास्य फाल्गुनत्वं तथा समर्थितम्” शत० ब्रा०। “फल्गुनीष्वग्नी आदधीत एता वा इन्द्रनक्षत्रम् यत् फल्गुन्योऽप्यस्य प्रतिनाम्न्योऽर्जुनो ह वै नामेन्द्रो यदस्य गुह्यं नामार्जुन्यो वै नाम ताश्च एतत्परोक्षमाचक्षते फाल्गुन्य इति कोह्येतस्यार्हति गुह्यं

नाम पठीतम्"२,१,२,११ अस्याः प्रथमपादः सिंहराशिः उत्तरपादत्रयं कन्याराशिः प्रमाणं उडुचक्रशब्दे दृश्यम् ।

उत्तरभाद्रपद् स्त्री भद्राय हितः भाद्रः पत् पादश्चतुर्थांशो यस्याः ब० ततः कर्म० । अश्विन्यादिनक्षत्रेषु षड्विंशे नक्षत्रे । पदशब्देन समासे टाप् । उत्तरभाद्रपदाप्यत्र । स्वरूपादिकमुडुचक्रशब्दे १०७१पृष्ठे उक्तम् । अधिपत्यादिकमश्लेषाशब्दे चोक्तम् । इयं ध्रुवगणः "ध्रुवगणस्थीण्युत्तराणि स्वभूः"इत्युक्तेः मीनराशिघटिका ।

उत्तरमानस न० उत्तरस्तदुत्तरस्य मानसम् । १तीर्थभेदे "कालोदकं नन्दिकुण्डं तथाचोत्तरमानसम् । अभ्येत्य योजनशताद्भ्रूणहा विप्रमुच्यते"भा० अनु० २५अ० । २गयामध्ये उत्तरदिक्स्थे तीर्थभेदे "उत्तरे मानसे, स्नानं करोम्यात्मविशुद्धये" इति गयाश्राद्धपद्धतिः । दक्षिणमानसमपि तत्रत्यतीर्थभेदः 'दिवाकर! करोमीह स्नानं दक्षिणमानसे" इति तत्रैव ।

उत्तरमीमांसा स्त्री उत्तरस्य वेदशेषभागस्य उपनिषद्रूपस्य मीमांसा पञ्चाङ्गन्यायोपेतवाक्यसमुदायात्मकोविचारः । "अथातो ब्रह्मजिज्ञासा" इत्यादौ 'अनावृत्तिः शब्दात्"इत्यन्ते चतुरध्यायीरूपे षोडशपादात्मके शारीरस्य ब्रह्मात्मत्वप्रतिपादके वेदव्यासरचिते शारीरकसूत्राख्ये ग्रन्थे । तत्र प्रतिपाद्यविषयादि संक्षेपतः वैयासिकमालायां भारतीतीर्थमुनिना दर्शितं यथा 'शास्त्रं ब्रह्मविचाराख्यमध्यायाः स्युश्चतुर्विधाः । समन्वयाविरोधौ द्वौ साधनं च फलं तथा' ४ । समन्वये स्पष्टलिङ्गमस्पष्टत्वमुपास्यगम् । ज्ञेयगं पदमात्रं च चिन्त्यं पादेष्वदः क्रमात्" ५ । द्वितीये स्मृतितर्काभ्यामविरोधोऽन्यदुष्टता । भूतभोक्तृश्रुतेर्लिङ्गश्रुतेरप्यविरुद्धता" ६ । तृतीये विरतिस्तत्त्वंपदार्थपरिशोधनम् । गुणोपसंहृतिर्ज्ञानबहिरङ्गादिसाधनम् ७ । चतुर्थे जीवतोमुक्तिरुत्क्रान्तिर्गतिरुत्तरा । ब्रह्मप्राप्तिब्रह्मलोकावाप्तीः पादार्थसंग्रहः" ८ । "अध्यायचतुष्टयात्मकस्य शास्त्रस्य ब्रह्मविचारोऽर्थः सर्वेषां वेदान्तवाक्यानां ब्रह्मणि तात्पर्येण पर्यवसानं प्रथमाध्यायेन प्रतिपाद्यते । द्वितीयेन सम्भावितविरोधः परिह्रियते । तृतीयेन विद्यासाधननिर्णयः । चतुर्थेन विद्याफलनिर्णयः इत्येते अध्यायार्थाः ४। तत्र प्रथमाध्यायगतपादार्थान् विभजते । समन्वयेति । स्पष्टब्रह्मलिङ्गयुक्तं वाक्यजातं प्रथमे पादे चिन्त्यम् ।"अन्तस्तद्धर्मोपदेशात्" इत्यत्र सार्वज्ञ्यसार्वात्म्य-सर्वपापविरहादिकं च ब्रह्मणोऽसाधारणतया स्पष्टब्रह्मलिङ्गम् । अस्पष्टब्रह्मलिङ्गत्वे सत्युपास्यविषयं वाक्यजातं द्वितीयपादे चिन्त्यम् । तद्यथा प्रथमाधिकरणविषये शाण्डिल्योपास्तिवाक्ये मनोमयत्वप्राणशरीरत्वादिकं सोपाधिकब्रह्मणो जीवस्य च साधारणत्वादस्पष्टब्रह्मलिङ्गम् । तृतीयपादे त्वस्पष्टब्रह्मलिङ्गत्वे सति ज्ञेयब्रह्मविषयं वाक्यजातं चिन्त्यं तद्यथा प्रथमाधिकरणे मुण्डकगतब्रह्मतत्त्ववाक्ये द्युभूम्यन्तरिक्षाद्योतत्वं सूत्रात्मनः परब्रह्मणश्च साधारणत्वादस्पष्टं ब्रह्मलिङ्गम् । यद्यपि द्वितीयपादे कठवल्ल्यादिगतब्रह्मतत्त्ववाक्यानि विचारितानि । तृतीयपादे दहरोपासनावाक्यं विचारितं तथाप्यवान्तरसंगतिलोभेन तद्विचारस्य प्रासङ्गिकत्वान्न पादार्थयोः साङ्कर्यापत्तिः इत्येवं पादत्रयेण वाक्यविचारः समापितः । चतुर्थपादे त्वव्यक्तपदमजापदं चेत्येवमादिसन्दिग्धपदं चिन्त्यम्५। द्वितीयाध्यायगतपादार्थान्विभजते द्वितीये इति । प्रथमपादे सांख्ययोगकाणादादिस्मृतिभिः सांख्यादिप्रयुक्ततर्कैश्च विरोधे वेदान्तसमन्वयस्य परिहृतः । द्वितीयपादे सांख्यादिमतानां दुष्टत्वं प्रदर्शितम् । तृतीयपादे पूर्वभागेण पञ्चमहाभूतश्रुतीनां परस्परविरोधः परिहृतः उत्तरभागेण जीवश्रुतीनाम् चतुर्थपादे लिङ्गशरीरश्रुतीनां विरोधः परिहृतः ६। तृतीयाध्यायगतपादार्थान्विभजते तृतीये इति । प्रथमपादे जीवस्य परलोकगमनागमने विचार्य वैराग्यं निरूपितम् । द्वितीयपादे पूर्वभागेण त्वंपदार्थः शोधितः । उत्तरभागेण तत्पदार्थः । तृतीयपादेन सगुणविद्यायां गुणोपसंहारो निरूपितः निर्गुणे ब्रह्मणि च पुनरुक्तपदोपसंहारश्च । चतुर्थपादे निर्गुणज्ञानस्य बहिरङ्गभूतान्याश्रमयज्ञादीन्यन्तरङ्गभूतशमदमनिदिध्यासनादीनि च निरूपितानि ७ । चतुर्थाध्यायगतपादार्थान्विभजते चतुर्थे इति । प्रथमपादे श्रवणाद्यावृत्त्या निर्गुणमुपासनया सगुणं वा ब्रह्म साक्षात्कृत्य जीवतः पापपुण्यलेपविनाशलक्षणा मुक्तिरभिहिता । द्वितीये पादे म्रियमाणस्योत्क्रान्तिप्रकारोनिरूपितः । तृतीयपादे सगुणविदो मृतस्योत्तरमार्गोऽभिहितः । चतुर्थपादे पूर्वभागेण निर्गुणब्रह्मविदो विदेहकैवल्यप्राप्तिरभिहिता, उत्तरभागेण सगुणब्रह्मविदो ब्रह्मलोकप्राप्तिर्निरूपिता"तद्व्या० । मीमांसा हि वेदतात्पर्यनिर्णयार्थः न्यायपञ्चकात्मकविचारः । सा च द्विविधा पूर्वमीमांसा उत्तरमीमांसा च तत्र पूर्वमीमांसा जैमिनिप्रणीता"अथातोधर्मजिज्ञासा"इत्यादिका, उत्तरमी-

मांसा दर्शिता । इयमेव च ब्रह्ममीमांसात्वेन प्रसिद्धा

उत्तररामचरित न० उत्तरं रामस्य चरितं यत्र । भवभूतिप्रणीते नाटकभेदे ।

उत्तरवयस त्रि० उत्तरं वयः नि०वेदे अच् समा० । वृद्धावस्थायाम् "तस्मादुत्तरवयसे पुत्रान् पितोपजीवति" शत० ब्रा० १२,२,३,४ । लोके तु उत्तरवयस् इत्येव ।

उत्तरवस्ति पु० सुश्रुतोक्ते चिकित्साङ्गे यन्त्रभेदे । तत्स्वरूपप्रयोगप्रकारादि यथा तत्रैव

"वस्तेरुत्तरसंज्ञस्य विधिं वक्ष्याम्यतःपरम् । चतुर्दशाङ्गुलं नेत्रमातुराङ्गुलिसम्मितम् । मालतीपुष्पवृन्ताग्रं छिद्रं सर्षपनिर्गमम् ; मेढ्रायामसमं केचिदिच्छन्ति खलु तद्विदः । स्नेहप्रमाणं परमं कुञ्चश्चात्र प्रकीर्त्तितः । पञ्चविंशादधोमात्रां छिद्यादृद्धिकल्पिताम् । निविष्टकर्णिकं मध्ये नारीणां चतुरङ्गुलम् । मूत्रस्रोतःपरीणाहमुद्गच्छिद्रयाङ्गुलम् । तासामपत्यमार्गे तु निदध्याच्चतुरङ्गुलम् । द्व्यङ्गुलं मूत्रमार्गे तु कन्यानान्त्वेकमङ्गुलम् । विधेयं चाङ्गुलं तासां विधिवद्वक्ष्यते यथा । स्नेहस्य प्रसृतञ्चात्र स्वाङ्गुलीमूलसंमितम् । देयं प्रमाणं परममर्वागतु द्विविकल्पितम् । औरभ्रः शौकरो वापि वस्तिराजश्च पूजितः । तदलाभे प्रयुञ्जीत गलचर्म्म तु पक्षिणाम् । असालाभे दृतेः पादो मृदुचर्म ततोऽपि वा । अथातुरमुपस्निग्धं सुस्विन्नं प्रथिताशयम् । यवागूं सघृतक्षीरां पीतवन्तं यथाबलम् । निषण्णमाजानुसमे पीठे स्थानाश्रये समे । स्वभ्यक्तवस्तिमूर्द्धानं तैलेनोष्णेन मानवम् । ततः समं स्थापयित्वा नालमस्य प्रहर्षितम् । पूर्वं शलाकयाऽन्विष्य ततो नेत्रमनन्तरम् । शनैःशनैर्घृताभ्यक्तं विदध्यादङ्गुलानि षट् । ततोऽवपीडयेद्वस्तिं शनैर्नेत्रं च निर्हरेत् । ततः प्रत्यागते स्नेहमपराह्णे विचक्षणः । भोजयेत् पयसो मात्रां यूषेणाथ रसेन वा । अनेन विधिना दद्याद्वस्तींस्त्रींश्चतुरोऽपि वा । ऊर्द्ध्वजान्वै स्त्रियै दद्यादुत्तानायै विचक्षणः । कल्पेतरस्मै कन्यायै दद्यात्तु मृदु पीडितम् । त्रिकर्णिकेन नेत्रेण दद्याद्योनिमुखं प्रति । गर्भाशयविशुद्ध्यर्थं स्नेहेन द्विगुणेन तु । अप्रत्यागच्छति भिषक् वस्तावुत्तरसंज्ञिते । भूयोवस्तिं निदध्यात्तु संयुक्तं शोधनैर्गणैः । गुदे वर्त्तिं निदध्याद्वा शोधनद्रव्यसंभृताम् । प्रवेशयेद्वा मतिमांस्त्विद्वारमसंपणीम् । पीडयेद्वाप्यधोनाभेर्बलेनोत्तरमुष्टिना । आरग्वधस्य पत्रेषु निर्गुण्ड्याः सुरसेषु च । कुर्य्याद्गोमूत्रपिष्टेषु वर्त्तीर्वापि ससैन्धवाः । सूक्ष्मैश्चासर्षपसमाः प्रविभज्य वयांसि तु । वस्तेरागमनार्थाय ता निदध्याच्छलाकया । आगारधूमबृहतीपिप्पलीफलसैन्धवैः । कृता वा शुक्तगोमूत्रसुरापिष्टैः सनागरैः । अनुवासनसिद्धिश्च शीघ्रं कर्म प्रयोजयेत् । शर्करामधुमिश्रेण शीतेन मधुकाम्बुना । दह्यमाने तदा वस्तौ दद्याद्वस्तिं विचक्षणः । क्षीरवृक्षकषायेण पयसा शीतलेन च । शुक्रं दुष्टं शोणितं चाङ्गनानां पुष्पोद्रेकं तस्य नाशश्च कष्टम् । मूत्राघातान्मूत्रदोषान् प्रवृद्धान् योनिव्याधिं संस्थितिं चापरायाः । शुक्रोत्सेकं शर्कराश्मरीञ्च शूलं वस्तौ वङ्क्षणे मेहने च । घोरानन्यान् वस्तिजांश्चापि रोगान् हित्वा मेहानुत्तरो हन्ति वस्तिः । सम्यग्दत्तस्य लिङ्गानि व्यापदः क्रम एव च । वस्तेरुत्तरसंज्ञस्य समानं स्नेहवस्तिना" ।

उत्तरवादिन् त्रि० उत्तरमुत्तरपक्षं वदति वद–णिनि । वादे प्रतिवादिनि (आसामी) "साक्षिषूभयतः सत्सु भवन्ति पूर्व्ववादिनः । पूर्वपक्षेऽधरीभूते भवन्त्युत्तरवादिनः" या० स्मृ० ।

उत्तरवेदि स्त्री कर्म० वा ङीप् । 'तरन्तुकारन्तुकयोर्यदन्तरं रामह्रदानाञ्च मचक्रुकस्य च । एतत् कुरुक्षेत्रसमन्तपञ्चकं पितामहस्योत्तरवेदिरुच्यते" भा० व० ८३अ० उक्ते कुरुक्षेत्रान्तर्गते १समन्तपञ्चकरूपे तीर्थे । कुरुक्षेत्रञ्च 'उत्तरेण दृषद्वत्या दक्षिणेन सरस्वतीम् । ये वसन्ति कुरुक्षेत्रे ते वसन्ति त्रिपिष्टपे" इत्युक्तस्थले तीर्थभेदः । इयमेव ब्रह्मवेदीत्युच्यते 'ब्रह्मवेदी कुरुक्षेत्रं पुण्यं ब्रह्मर्षिसेवितम्" तत्रैवोक्तेः । यज्ञेऽग्निस्थानपार्थं २वेदिभेदे तत्स्वरूपादि दामपा० दर्शितं यथा । "तत्र महावेदिपश्चिमरेखामध्यात् पूर्व्वतः, समिच्चयमितां, प्राचीरेखामध्यात् पश्चिमतः समिन्मात्रां, दक्षिणरेखामध्यात् उत्तरस्यामुत्तररेखामध्यात् दक्षिणस्यां तथैव समिन्मात्रां भूमिं त्यक्त्वा कुण्डादिमध्ये समिद्द्वयमितदीर्घविस्तारां समचतुरस्रामुत्तरवेदिमग्निस्थापनाय वेदिमध्ये कल्पयेत्" । "उत्तरवेद्यग्निप्रणयनमन्थनपृषदाज्यं वरुणप्रघासादधः" कात्या० ५,७,१५ । 'दक्षिणेन निर्हृत्य दक्षिणस्यामुत्तरवेदिश्रेणौ निदधाति ८,९,१८ । ७अथात आहृदेव नोपकिरन्त्युत्तरवेदिम्" शत० ब्रा० २,५,१,१८ । "तद्वै द्वे वेदी द्वावग्नी भवतः । तद्यद् द्वे वेदी द्वावग्नी भवतस्तदुभयतस्तदुभयत एवैतत् वरुणपाशात् प्रजाः प्रमुञ्चन्तीतश्चोर्द्ध्वा इतश्चावाचीस्तस्माद् द्वे वेदी द्वावग्नी भवतः । स उत्तरस्यामेव वेदौ उत्तरवेदिम् उप-

"किरति न दक्षिणस्याम्" शत० ब्रा० २,५,२,५,६ ।

उत्तरगलङ्कट पुंस्त्री ब० ब० उत्तरश्च गालङ्कटश्च द्व०। ततः गोत्रप्रत्ययस्य लुक्। उत्तरगालङ्कटगोत्रापत्ये ।

उत्तरसक्थ न० उत्तरः सक्थ्नः एकदे० त० टच् समा०। सक्थ्न उत्तरभागे

उत्तरसाक्षिन् त्रि० "साक्षिणामपि यः साक्ष्यं स्वयं परिभाषताम्। श्रवणाच्छ्रावणाद्वापि स साक्ष्युत्तरसंज्ञक" इति नारदोक्ते साक्षिभेदे ।

उत्तरसाधक त्रि० उत्तरः सन् साधयति सिध–णिच् साधादेशः ण्वुल्। सहाये सहकारिणि। स हि इतरकार्यमप्येवं तदुत्तरवर्त्ती सन् कार्यं साधयति ।

उत्तरा अव्य० उत्तर+प्रथमापञ्चमीसप्तम्यर्थे आच्। उत्तरस्यां दिशि काले देशे चेत्याद्यर्थे। १प्रययावुत्तराद्भवः" भा०व० २८अ०। २उत्तरस्यां दिशि ३विराटकन्यायां स्त्री। "प्रेते पितृत्वमापन्ने सपिण्डीकरणादनु। क्रियन्ते याः क्रियाः पित्र्याः प्रोच्यन्ते उत्तरा हि ता" इत्युक्तासु सपिण्डीकरणोत्तरासु वार्षिकश्राद्धक्रियासु च स्त्री ।

उत्तरात् अव्य० उत्तर+दिग्देशकालविषये आति। उत्तरस्मादुत्तरस्मिन्नित्यर्थे। "पश्चादोत्तरादधरादापुरस्तात्" ऋ० ६,१९,९। "त्वं नः पश्चादधरादुत्तरात् पुरः" ऋ० ८,६१,१६ ।

उत्तरात्तात् अव्य० उत्तरात्+स्वा० वेदे० नि० तातिल्। उत्तरादित्यर्थे। "स्म वीरासोऽधरादुदायन्नष्टोत्तरात्तात् समजग्मिरन्" ऋ० १०,२७,१५। "पुरस्तात् सवितोत्तरात्तात् सविताऽधरात्तात्" १०,३६,१४ ।

उत्तराधर त्रि० कर्म० उत्तरश्च अधरश्च। "अश्मेव उत्तराधरा इव भवन्त्योष्ठौ" शत० ब्रा० ५,१,४,२१। उपरितनोष्ठे पु० "पुनर्विघ्नुः स्फुरितोत्तराधर" कुमा० ।

उत्तराधिकारिन् त्रि० उत्तरं पूर्व्वस्वामिस्वत्वोपरमानन्तरमधिकरोति तद्धने स्वाम्यमाप्नोति अधि+कृ–णिनि। पूर्व्वस्वामिस्वत्वोपरमे तद्धने स्वामित्वप्राप्ते पूर्व्वस्वामिसम्बन्धिपुत्रादौ स्त्रियां ङीप्। तत्र कस्य धने कस्याधिकारः। तत्र तावत् गौडदेशप्रचलितदायभागमतानुसारिक्रमोऽभिधीयते तत्र तद्ग्रा० श्रीकृष्णेनोक्तम् यथा। "अथाय्य धनपुत्रस्याधिकारिक्रमः। तत्र प्रथमं पुत्रः तदभावे पौत्रः तदभावे प्रपौत्रः, मृतपितृकपौत्र-मृतपितृपितामहकप्रपौत्रयोस्तु पुत्रेण सह युगपदधिकारः। प्रपौत्रपर्य्यन्ताभावे पत्नी सा च प्राप्तभर्तृदाया भर्तृकुलं

तदभावे पितृकुलं वा समाश्रिता सती शरीररक्षार्थं भर्तृदायं भुञ्जीत तथा भर्त्तुरुपकारार्थं यथाकथञ्चिद्दानादिकमपि कुर्व्वीत न तु स्त्रीधनवत् स्वच्छन्दं विनियुञ्जीत। तदभावे दुहिता तत्र प्रथमं कुमारी तदभावे वाग्दत्ता, तदभावे ऊढा सा च पुत्रवती सम्भावितपुत्रा च ते द्वे युगपदेवाधिकारिण्यौ, वन्ध्या पुत्रहीना विधवा च नाधिकारिण्यौ। ऊढायाश्चाभावे दौहित्रः। तदभावे पिता। तदभावे माता, तदभावे भ्राता, तत्रापि प्रथमं सोदरः तदभावे वैमात्रेयः, मृतस्य भ्रातृसंसृष्टत्वे तु सोदरमात्रविषये प्रथमं संसृष्टसोदर एवाधिकारी तदभावे चासंसृष्टसोदरः, एवं वैमात्रेयमात्रविषये प्रथमं संसृष्टवैमात्रेयः तदभावे चासंसृष्टवैमात्रेयः, यदा तु संसृष्टो वैमात्रेयः सोदरश्चासंसृष्टः तदा तावुभौ तुल्यवदधिकारिणौ। भ्रातॄणामभावे भ्रातृपुत्रः, तत्रापि प्रथमं सोदरभ्रातृपुत्रः तदभावे वैमात्रेयभ्रातृपुत्रः, संसर्गे तु सोदरभ्रातृपुत्रमात्रविषये प्रथमं संसृष्टसोदरभ्रातृपुत्रः तदभावे चासंसृष्टसोदरभ्रातृपुत्रः, वैमात्रेयभ्रातृपुत्रमात्रविषये प्रथमं संसृष्टवैमात्रेयभ्रातृपुत्रः तदभावे चासंसृष्टवैमात्रेयभ्रातृपुत्रः, यदा तु सोदरभ्रातृपुत्रोऽसंसृष्टो वैमात्रेयभ्रातृपुत्रस्तु संसृष्टः तदा द्वौ भ्रातृवत् स्याधिकारिणौ। भ्रातृपुत्राभावे भ्रातृपौत्रः तत्रापि भ्रातुः सोदरासोदरक्रमः संसर्गासंसर्गक्रमश्च बोध्यः। तदभावे पितृदौहित्रः स च सोदरभगिनीपुत्रः वैमात्रेयभगिनीपुत्रश्च, तदभावे पितामहः, तदभावे पितामही, तदभावे पितुः सहोदरः तदभावे पितुर्वैमात्रेयः। तदभावे पितृसोदरपुत्रपितृवैमात्रेयपुत्रपितृसोदरपौत्रपितृवैमात्रेयपौत्राणां क्रमेणाधिकारः। तदभावे पितामहदौहित्रः तत्रापि पितृसोदरभगिनीपुत्रः पितृवैमात्रेयभगिनीपुत्रश्च, अयञ्चाप्रपितामहदौहित्राधिकारेऽप्येवम्, तदभावे प्रपितामहः तदभावे प्रपितामही तदभावे पितामहसहोदरभ्रातृतद्वैमात्रेयभ्रातृतत्पुत्रपौत्रप्रपितामहदौहित्राः क्रमेणाधिकारिणः। एतावत्पर्य्यन्तानां धनिभोग्यपिण्डदातॄणामभावे धनिदेयपिण्डदातॄणां मातामहमातुलादीनामधिकारः तत्रापि प्रथमं मातामहस्तदभावे मातुलतत्पुत्रपौत्राणां क्रमेणाधिकारः तदभावे चाधस्तनसकुल्यानां धनिभोग्यलेपदातॄणां प्रतिप्रणप्तृप्रभृतिपुरुषत्रयाणां क्रमेणाधिकारः, तदभावे पुरुषत्रयोर्द्ध्वतनसकुल्यानां धनिदेयलेपभुग्वृद्धप्रपिता-

सहादितसृभन्तीनामासन्निक्रमेणाधिकारः, तदभावे समानोदकानामधिकारः। तेषामभावे आचार्य्यस्य तदभावे शिष्यस्य तदभावे समानब्रह्मचारिणोऽधिकारः, तदभावे चैकग्रामस्थसगोत्रसमानप्रवरयोः क्रमेणाधिकारः। उक्तपर्य्यन्तानां सर्वेषां सम्बन्धिनामभावे ब्राह्मणधनवर्ज्जं राजा गृह्णीयात्, ब्राह्मणधनन्तु त्रैविद्यादिगुणयुक्ता ब्राह्मणा गृह्णीयुः। एवं वानप्रस्थधनं भ्रातृत्वेनानुमतोऽपरवानप्रस्थ एकतीर्थी गृह्णीयात्। तथा यतिधनं सच्छिष्यः। नैष्ठिकब्रह्मचारिणोधनमाचार्य्यः उपकुर्व्वाणस्य तु ब्रह्मचारिणोधनं पित्रादिर्गृह्णीयादिति सङ्क्षेपः"।

दायक्रमसंग्रहे भ्रातृदौहित्रपितृव्यदौहित्रपितामहसोदरदौहित्राणामप्यधिकारोऽभिहितः। विवादभङ्गार्णवमते पुत्रपौत्रदौहित्रयोरप्यधिकारः। इदन्तु बोध्यं पितृधनविभागे जनन्याः पुत्रतुल्यांशेऽधिकारः। पितामहधनविभागे च पितुर्जनन्याः पौत्रतुल्यांशेऽधिकारः। जीवद्विभागे तु पित्रा पितामहेन वा भागद्वयं ग्राह्यम् अप्राप्तस्त्रीधनानां सर्वासां स्वसपत्नीनां पुत्रस्य मृतपितृपौत्रस्य चैकैकोऽंशो देयः, अन्येषां पितृभार्य्यां तु पितृतोभागकल्पना एवं मातृधने पितामहीधनेऽपि पितृतोभागकल्पना इति। स्थावरे तु विशेषः "अविभक्तं स्थावरं यत् सर्वेषामेव तद्भवेत्" इति स्मृतिवचनात् तत्स्वरूपायां सोदरासोदरायां समाधिकारः। स्त्रीधने विशेषस्तत्रैव। "अथायं स्त्रीधनाधिकारिक्रमनिर्णयः। तत्र कन्याधने प्रथमं सोदरभ्रातुस्तदभावे मातुस्तदभावे पितुरधिकारः। वरदत्तातिरिक्तवाग्दत्ताधनेष्वेवं, वरदत्तधने तु वरस्याधिकार इति। अढाया यौतकधने प्रथमं कुमारी, तदभावे वाग्दत्ताऽधिकारिणी, एतयोरभावे ऊढयोः पुत्रवतीसम्भावितपुत्रयोर्युगपदधिकारः। एकस्या अभावेऽपरायाः, एतयोरभावे बन्ध्याविधवयोस्तुल्याधिकारः, एकाभावे चापरायाः। ततः पुत्रदौहित्रपौत्रप्रपौत्रसपत्नीपुत्रपौत्रप्रपौत्राणां क्रमेणाधिकारः। धम्म्यलग्ने तु सपत्नीपुत्रानन्तरं दौहित्रस्याधिकार इति विशेषः। ततो ब्राह्मादिविवाहत्रयलब्धयौतकधने भर्त्ता, भ्राता माता पिता चेति क्रमः, आसुरादिविवाहत्रयलब्धयौतकधने माता पिता भ्राता भर्त्ता चेति क्रमः। ततो देवरः भर्त्तृदेवरपुत्रभ्रातृश्वशुरपुत्रौ, भर्त्तृभगिनीपुत्रः, ततोभर्त्तृभागिनेयः, ततोभ्रातृपुत्रः ततो जामाता, ततः श्वशुरः, भ्रातृश्वशुरः। ततश्चासन्नत्वक्रमेण सपिण्डाः ततः सकुल्याः, ततः समानोदका इति। यौतकातिरिक्तेऽपि पितृदत्ते प्रथमं कुमारी, ततः पुत्रः, ततः पुत्रवतीसम्भावितपुत्रे, ततः पौत्रदौहित्रप्रपौत्रसपत्नीपुत्रपौत्रप्रपौत्राः। ततो बन्ध्या विधवा च युगपदधिकारिण्यौ, ततोब्राह्मादिक्रमेणैव पूर्व्ववत् क्रमः। पितृदत्तातिरिक्ते अयौतकधने तु पुत्रकुमार्य्योर्युगपदधिकारः, तयोरभावे पुत्रवतीसम्भावितपुत्रयोः, ततः पौत्रदौहित्रप्रपौत्रसपत्नीपुत्रपौत्रप्रपौत्राः क्रमेणाधिकारिणः। ततो बन्ध्या विधवा च युगपदधिकारिण्यौ ततः पूर्व्ववत् ब्राह्मादिक्रमः"। अत्र सर्व्वत्र प्रमाणं दायभागेऽनुसन्धेयम्।

चिन्तामणिमते पुत्रकृतकपौत्रकृतपितापितामहकृतप्रपौत्राधिकारं दायभागमतवत् सप्रपञ्चं निरूप्य अपुत्रधने विशेषोऽभिहितो यथा।

"अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं भवेत्" मनुः। "आपस्तम्बः अपुत्रधनाधिकारी आसन्नसपिण्डस्तदभावे व्यवहितस्तदभावे आचार्य्यस्तदभावेऽन्तेवासी"। याज्ञवल्क्यः "पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा। तत्सुतोगोत्रजोबन्धुः शिष्यसब्रह्मचारिणः। एषामभावे पूर्व्वस्य धनभागुत्तरोत्तरः। स्वर्य्यातस्य ह्यपुत्रस्य सर्व्ववर्णेष्वयं विधिः"। पितरावित्यत्र क्रमाकाङ्क्षायामादौ माता तदभावे पिता विष्णुवाक्यैकमूलत्वात्। तत्सुतो भ्रातृपुत्रः अपुत्रस्य पुत्रपौत्रप्रपौत्रशून्यस्य। कात्यायनः "विभक्ते संस्थिते द्रव्यं पुत्राभावे पिता हरेत्। भ्राता वा जननी वापि माता वा तत्पितुः क्रमात्"। पितृर्ज्जितं पिता, भ्रात्राद्यर्ज्जितं भ्रात्रादिरिति व्यवस्थितोविकल्पः। पैठीनसिः "अपुत्रस्य स्वर्य्यातस्य भ्रातृगामि धनं तदभावे पितरौ लभेताम्"। देवलः "ततोदायमपुत्रस्य विभजेरन् सहोदराः। तुल्यादुहितरोवापि ध्रियमाणः पितापि वा। सवर्णाभ्रातरोमाता भार्य्या चेति यथाक्रमम्। एषामभावे गृह्णीयुः सकुल्याः सहवासिनः"। तुल्याः सहोदरा एव सवर्णाभ्रातरोऽत्र वैमात्रेयाः। अत्र च देवलोक्तक्रमेण सह विष्णुयाज्ञवल्क्योक्तक्रमयोर्विरोधमाशङ्क्य यथाक्रममिति पदं देवलीयं याज्ञवल्क्योक्तक्रमानतिक्रमेणेति हलायुधेन व्याख्यातम्। देवलवचनलिखनानन्तरं विष्णुयाज्ञवल्क्योक्तवचने लिखितवतः कल्पतरुकृतोऽप्ययमेवाशयः। एतच्च न मनोरमं न हि श्लोकक्रममात्रम् परोक्तक्रमोद्घाटकमिति श्लोकस्यार्थे भवितुमर्हतीति उपस्थितविष्णयानुपस्थितपरित्यागगौरवात् एवमपि पैठीनसिवचनविरोधापरीहाराच्च। तस्मात् पूर्व्वं पुत्रसमार्ज्जितधने विष्णु-

याज्ञवल्क्योक्तक्रमस्तदन्यधने तु पैठीनस्याद्युक्तक्रम इति रत्नाकरः। बौधायनः "सपिण्डाभावे सकुल्यः तदभावे आचार्य्यः अन्तेवासी ऋत्विग्वा हरेत् तदभावे राजा"। सगोत्रजाभावे बन्धुः याज्ञवल्क्यवचनात् स च स्वबन्धुः पितृबन्धुः मातृबन्धुश्च। "आत्मपितुःष्वसुः पुत्रा आत्ममातुःष्वसुः सुताः। आत्ममातुलपुत्राश्च विज्ञेया आत्मबान्धवाः। पितुः पितुःष्वसुः पुत्राः पितुर्मातुःष्वसुः सुताः। पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः। मातुः पितुःष्वसुः पुत्रा मातुर्मातुःष्वसुः सुताः। मातुर्मातुलपुत्राश्च विज्ञेया मातृबान्धवाः"। एतेषां क्रमेणाधिकारः। तदयं संक्षेपः। आदौ पुत्रस्तदभावे पौत्रस्तदभावे प्रपौत्रस्तदभावे साध्वी भार्य्या तदभावे दुहिता तदभावे माता तदभावे पिता तदभावे दौहित्रस्तदभावे भ्राता तदभावे तत्पुत्रस्तदभावे आसन्नसपिण्डस्तदभावे यथाक्रमं व्यवहितसपिण्डस्तदभावे आसन्नसकुल्यस्तदभावे व्यवहितसकुल्यस्तदभावे मातुलपुत्रादिः सर्वाभावे ब्राह्मणधनवर्ज्जं राजगामि ब्राह्मणधने तु ब्राह्मणान्तरमेव धनग्रहणाधिकारीति। याज्ञवल्क्यः "वानप्रस्थयतिब्रह्मचारिणामृक्थभागिनः। क्रमेणाचार्य्यसच्छिष्यधर्म्मभ्रात्रेकतीर्थिनः"। क्रमेण प्रतिलोमक्रमेण तेन ब्रह्मचारिणो गुरुकुलस्थस्याचार्य्यः, यतेः सच्छिष्यः, वानप्रस्थस्य भ्रातृत्वेनानुमतोऽपरो वानप्रस्थ एव"।

अधिकारिक्रमे पितृदौहित्रादेरकीर्त्तनात् तस्य नाधिकार इति विशेषः।

स्त्रीधने विशेषः "तत्र मनुः जनन्यां संस्थितायान्तु समं सर्वे सहोदराः। भजेरन्मातृकं रिक्थं भगिन्यश्च सनाभयः। यास्तासां स्युर्दुहितरस्तासामपि यथार्हतः। मातामह्या धनात् किञ्चित् प्रदेयं प्रीतिपूर्वकम्"। समम् अविषमांशम्, सनाभयः सहोदराः, भगिन्यः कुमार्य्य एव समांशास्तदाह बृहस्पतिः "स्त्रीधनं स्यादपत्यानां दुहिता च तदंशिनी। अप्रत्ता चेत्समूढा तु लभते मानमात्रकम्"। अपत्यानां पुत्राणां तदंशिनीति विशेषात्तुल्या समत्वलाभः समूढा विवाहिता मानमात्रकं द्रव्यानुसारेण किञ्चित्। गौतमः "स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानाञ्च"। "अप्रतिष्ठिता अनपत्या निर्धनभर्त्तृका दुर्भगा" चेति रत्नाकरादयः। एता अपुत्रा अपि पुत्रवन्मातृधनभाजः। मनुः "मातुश्च यौतकं यत्स्यात् कुमारीभाग एव सः"। यौतकं विवाहकाले पित्रादितो लब्धम्। वशिष्ठः "मातुः पारिणाय्यं स्त्रियो विभजेरन्"। पारिणाय्यं परिच्छदादर्पणकङ्कतिकादि। याज्ञवल्क्यः "मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेऽन्वयः"। मातृधनं तदृणाच्छेषं ऋणशोधनावशेषं दुहितरो भजेरन्, ताभ्य ऋते दुहितॄणामभावेऽन्वयः दौहित्रीदौहित्रौ मनुवचनानुरोधात्। ब्राह्म्यादिवैवाहिकं परिच्छदादिकञ्च यत् मातृधनं तद्विषयमेतत्। कात्यायनः "दुहितॄणामभावे तु रिक्थं पुत्रेषु तद्भवेत्। बन्धूनामप्यभावे तु भर्त्तृगामि तत् स्मृतम्। भगिन्यो बान्धवैः सार्द्धं विभजेयुः सभर्त्तृकाः। स्त्रीधनस्येति धर्म्मोऽयं विभागस्तु प्रकल्पितः"। दुहितॄणामिति पारिणाय्यं विवाहकाले यौतकलब्धं पितृदत्तञ्च यन्मातृधनं तत्तासां पुत्रभावे पुत्रगामि भवतीत्यर्थः तदतिरिक्तन्तु स्त्रीधनं तस्या अभावे पुत्रीपुत्रोभयगामि इत्युक्तमेव प्राक्। बन्धुदत्तमिति पितृव्यतिरिक्तेन दत्तं यत्तदुभ्रातृभगिन्यौ किन्तु कन्या तत्समांशा विवाहिता तु किञ्चिद्भागभागिनीति भगिन्य इत्यादेरर्थः। अभावे पुत्रीपुत्राद्यभावे स्त्रियाधनं पतिगामीत्यर्थः मनुः "ब्राह्मदैवार्षगान्धर्व्वप्राजापत्येषु यद्धनम्। अतीतायामप्रजायां भर्त्तुरेव तदिष्यते। यत्त्वस्याः स्याद्धनं किञ्चिद्विवाहेष्वासुरादिषु। अतीतायामप्रजायां मातापित्रोस्तदिष्यते"। अप्रजायामनपत्यायाम्। गौतमः "भगिनीशुल्कं सोदर्य्याणामूर्द्ध्वं मातुः पूर्व्वं चेत्येके"। आसुरादिविवाहलब्धविषयमेतत्। बौधायनः "रिक्थं मृतायाः कन्याया गृह्णीयुः सोदराः स्वयम्। तदभावे भवेन्मातुस्तदभावे भवेत्पितुः" वि॰चि॰। अत्र यस्य भर्त्तृगामित्वमुक्तं तदभावे तत्सपिण्डानामासत्तिक्रमेणाधिकारः। यस्य तु पितृगामितोक्ता तत्र तदभावे तत्प्रत्यासन्नसपिण्डा अधिकारिण इति बोध्यम्।

मिताक्षरामते तु जन्माधीनस्वत्वाङ्गीकारेण पैतामहे पित्र्ये च धने पितापुत्रयोः पितामहपौत्रयोश्च तुल्याधिकारः। पितुः पितामहस्य चोपरमे पुत्रस्य, पौत्राणाञ्च स्वपितृयोग्येंऽशेऽधिकारः। जीवद्विभागे तु स्वार्ज्जिते पितुर्द्व्यंशहारिता पैतामहे तुल्यांशिता। धनिकृतविभागे तदुपरमे पुत्रादिकृतविभागे च धनिपत्नीनामेकैकांशेऽधिकारः। दुहितॄणान्तु प्रत्येकं स्वजातीयकल्पितभागचतुर्थांशभागिता। सामुदयिकस्वत्वाङ्गीकारेण च भ्रात्रादीनामपुत्रादीनामविभक्तत्वे संसृष्टत्वे च एकस्य मरणे इतरस्य स्वत्वस्थितेः तत्र पत्न्यादीनां न स्वत्वमुत्पद्यते तथा च विभक्तासंसृष्टधनएव पत्न्यादीनामधिकारः। पत्नीदुहितरश्चेत्यादि या॰वचनात्

तच्च वचनं चिन्तामणिमते ११००पृष्ठे दर्शितम् तस्य वचनस्य व्याख्यायाम् मिता० तत्क्रमो दर्शितो यथा

"तस्मादपुत्रस्य स्वर्यातस्य विभक्तस्यासंसृष्टिनः परिणीता स्त्री संयता सकलमेव धनं गृह्णातीति स्थितम्। तदभावे दुहितरः। दुहितर इति बहुवचनं समानजातीयानामसमानजातीयानाञ्च समविषमांशप्राप्त्यर्थम्। तथा कात्यायनः। "पत्नी भर्त्तुर्धनहरी या स्यादव्यभिचारिणी। तदभावे तु दुहिता यद्यनूढा भवेत्तदेति" वृहस्पतिरपि "भर्त्तुर्धनहरी पत्नी तां विना दुहिता स्मृता" अङ्गादङ्गात्सम्भवति पुत्रवद्दुहिता नृणाम्। तस्मात्पितृधनं त्वन्यः कथं गृह्णाति मानवः" इति। तत्र चोढानूढासमवायेऽनूढैव गृह्णाति। 'तदभावे तु दुहिता यद्यनूढा भवेत्तदेति" विशेषस्मरणात्। तथा प्रतिष्ठिताऽप्रतिष्ठितासमवायेऽप्रतिष्ठिता तदभावे प्रतिष्ठिता "स्त्रीधनं दुहितॄणाम् अप्रत्तानामप्रतिष्ठितानाञ्चेति" गौतमवचनस्य पितृधनेऽपि समानत्वात् नचैतत्पुत्रिकाविषयमिति मन्तव्यम्। "तत्समः पुत्रिकासुतः" इति पुत्रिकायास्तत्सुतस्य चौरससमत्वेन पुत्रप्रकरणेऽभिधानात्। चशब्दाद्दुहित्रभावे दौहित्रो धनभाक् यथाह विष्णुः। "अपुत्रपौत्रसन्ताने दौहित्रा धनमाप्नुयुः। पूर्व्वेषां तु स्वधाकारे पौत्रा दौहित्रकाः समा" इति मनुरपि। "अकृता वा कृता वापि यं विन्देत्सदृशात्सुतम्। पौत्री मातामहस्तेन दद्यात्पिण्डं हरेद्धनमिति"। तदभावे पितरौ मातापितरौ धनभाजौ। यद्यपि युगपदधिकरणवचनतायां द्वन्द्वस्मरणात् तदपवादत्वादेकशेषस्य धनग्रहणे पित्रोः क्रमो न प्रतीयते। तथापि विग्रहवाक्ये मातृशब्दस्य पूर्व्वनिपातादेकशेषाभावपक्षे च मातापितराविति मातृशब्दस्य पूर्व्वश्रवणात्पाठक्रमावगमाद्धनसम्बन्धेऽपि क्रमापेक्षायां प्रतीतक्रमानुरोधेनैव प्रथमं माता धनभाक्, तदभावे पितेति गम्यते। किञ्च पिता पुत्रान्तरेष्वपि साधारणो माता तु न साधारणीति प्रत्यासत्त्यतिशयात् "अनन्तरः सपिण्डाद्यस्तस्य तस्य धनम्भवेदिति" वचनान्मातुरेव प्रथमन्धनग्रहणं युक्तं न च सपिण्डेष्वेव प्रत्यासत्तिर्नियामिका अपि तु समानोदकादिष्वपि विशेषेण धनग्रहणे प्राप्ते प्रत्यासत्तिरेव नियामिकेत्यादेव वचनादवगम्यत इति। मातापित्रोर्मातुरेव प्रत्यासत्त्यतिशयात् धनग्रहणं युक्ततरम्। तदभावे पिता धनभाक्। पित्रभावे भ्रातरो धनभाजः। तथा च मनुः।

"पिता हरेदपुत्रस्य रिक्थं भ्रातर एव वेति अनपत्यस्य पुत्रस्य माता दायमवाप्नुयात्। मातर्य्यपि च वृत्तायां पितुर्माता हरेद्धनमिति" मनुवचनाज्जीवत्यपि पितरि मातरि वृत्तयां पितुर्माता पितामही धनं हरेन्न पिता। यतः पितृगृहीतन्धनं विजातीयेष्वपि पुत्रेषु गच्छति। पितामही गृहीतं तु सजातीयेष्वेव गच्छतीति पितामह्येव गृह्णातीति। एतदप्याचार्य्यैर्नानुमन्यते। विजातीयपुत्राणामपि धनग्रहणस्योक्तत्वात् "चतुस्त्रिद्व्येकभागिनः" इत्यादिनेति। यत्पुनः "अहार्य्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिः" इतिमनुस्मरणम् तन्नृपाभिप्रायं न पुत्राभिप्रायम्। भ्रातृष्वपि सोदराः प्रथमं गृह्णीयुर्भिन्नोदराणां मातृविप्रकर्षात्। "अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं भवेदिति" स्मरणात्। सोदराणामभावे भिन्नोदरा धनभाजः। भ्रातॄणामप्यभावे तत्पुत्राः पितृक्रमेण धनभाजः। भ्रातृभ्रातृपुत्रसमवाये भ्रातृपुत्राणामनधिकारः भ्रात्रभावे भ्रातृपुत्राणामधिकारवचनात्। यदा त्वपुत्रे भ्रातरि स्वर्याते तद्भ्रातॄणामविशेषेण धनसम्बन्धे जाते भ्रातृधनविभागात्प्रागेव यदि कश्चिद्भ्राता मृतस्तदा तत्पुत्राणाम्पितृतोऽधिकारे प्राप्ते तेषां भ्रातृणाञ्च विभज्य ग्रहणे पितृतोभागकल्पनेति युक्तम्। भ्रातृपुत्राणामप्यभावे गोत्रजा धनभाजः गोत्रजाः पितामह्यादयः सपिण्डाः समानोदकाश्च तत्र पितामही प्रथमन्धनभाक्। "मातर्य्यपि च वृत्तायाम्पितुर्माता धनं हरेदिति" मात्रनन्तरं पितामह्या धनग्रहणे प्राप्ते पित्रादीनां भ्रातृसुतपर्य्यन्तानां बद्धक्रमत्वेन मध्येऽनुप्रवेशाभावात्पितुर्माता धनं हरेदित्यस्य धनग्रहणाधिकारप्राप्तिमात्रपरत्वादुत्कर्षे तत्सुतानन्तरम् पितामही गृह्णातीत्यविरोधः। पितामह्याश्चाभावे समानगोत्रजाः सपिण्डाः पितामहादयो धनभाजः भिन्नगोत्राणां सपिण्डानां बन्धुशब्देन ग्रहणात्। तत्र च पितृसन्तानाभावे पितामही पितामहः पितृव्यास्तत्पुत्राश्च क्रमेण धनभाजः पितामहसन्तानाभावे प्रपितामही प्रपितामहस्तत्पुत्रास्तत्सूनवश्चेत्येवमासप्तमात्समानगोत्राणां सपिण्डानां धनग्रहणं वेदितव्यं तेषामभावे समानोदकानां धनसम्बन्धः। ते च सपिण्डानामुपरि सप्त वेदितव्या जन्मनामज्ञानावधिका वा। यथाह बृहन्मनुः। "सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते। समानोदकभावस्तु निवर्त्तेताचतुर्दशात्। जन्मनाम्नोः स्मृतेरेके तत्परं गोत्रमुच्यते" इति।

गोत्रजाभावे बन्धवो धनभाजः। बन्धवश्च त्रिविधा आत्मबन्धवः पितृबन्धवो मातृबन्धवश्चेति। यथोक्तम्। आत्मपितृष्वसुः पुत्रा इत्यादि चिन्तामणिमते ११०१ पृ० दर्शितम् तत्र चान्तरङ्गत्वात् प्रथममात्मबन्धवो धनभाजस्तदभावे पितृबन्धवस्तदभावे मातृबन्धव इति क्रमो वेदितव्यः। बन्धूनामभावे आचार्य्यस्तदभावे शिष्यः "पुत्राभावे यः प्रत्यासन्नः सपिण्डस्तदभावे आचार्य्यः आचार्य्याभावेऽन्तेवासी" इत्यापस्तम्बस्मरणात्। शिष्याभावे सब्रह्मचारी धनभाक् येन सहैकस्मादाचार्य्यादुपनयनाध्ययनतदर्थज्ञानप्राप्तिः स सब्रह्मचारी तदभावे ब्राह्मणद्रव्यं यः कश्चिच्छ्रोत्रियो गृह्णीयात् "श्रोत्रिया ब्राह्मणस्यानपत्यस्य रिक्थं भजेरन्निति" गौतमस्मरणात्। तदभावे ब्राह्मणमात्रम् यथाह मनुः "सर्वेषामप्यभावे तु ब्राह्मणा रिक्थभागिनः। त्रैविद्याः शुचयो दान्तास्तथा धर्म्मो न हीयते" इति। न कदाचिदपि ब्राह्मणद्रव्यं राजा गृह्णीयात् "अहार्य्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिरिति" मनुवचनात्। नारदेनाप्युक्तम् "ब्राह्मणार्थस्य तन्नाशे दायादश्चेन्न कश्चन। ब्राह्मणायैव दातव्यमेनस्वी स्यान्नृपोऽन्यथेति"। क्षत्रियादिधनं सब्रह्मचारिपर्य्यन्तानामभावे राजा हरेन्न ब्राह्मणः। यथाह मनुः। "इतरेषान्तु वर्णानां सर्वाभावे हरेन्नृपः" इति। "पुत्राः पौत्राश्च दायं गृह्णन्ति। तदभावे पत्न्यादय इत्युक्तमिदानीन्तदुभयापवादमाह। "वानप्रस्थयतिब्रह्मचारिणां रिक्थभागिनः। क्रमेणाचार्य्यसच्छिष्यधर्म्मभ्रात्रेकतीर्थिनः" याज्ञ०। "वानप्रस्थस्य यतेर्ब्रह्मचारिणश्च क्रमेण प्रतिलोमक्रमेणाचार्य्यः सच्छिष्यो धर्मभ्रात्रेकतीर्थी च रिक्थस्य धनस्य भागिनः। ब्रह्मचारी नैष्ठिकः उपकुर्वाणस्य धनं मात्रादयएव गृह्णन्ति। नैष्ठिकस्य धनन्तदपवादत्वेनाचार्य्यो गृह्णाति इत्युच्यते। यतेस्तु धनं सच्छिष्यो गृह्णाति। सच्छिष्यः पुनरध्यात्मशास्त्रश्रवणधारणतदर्थानुष्ठानक्षमः दुर्वृत्तस्याचार्य्यादेरपि भागानर्हत्वात्। वानप्रस्थधनन्त्वधर्म्मभ्रात्रेकतीर्थी गृह्णाति धर्मभ्राता एकतीर्थ्येकाश्रमी धर्मभ्रातासौ एकतीर्थी च धर्म्मभ्रात्रेकतीर्थी। एतेषामाचार्य्यादीनामभावे पुत्रादिषु सत्स्वप्येकतीर्थ्येव गृह्णाति" मिता०। "सोदरस्य च संसृष्टत्वे वैमात्रेयस्य च संसृष्टत्वे तुल्याधिकारः। अत्रेदं बोध्यं "अपुत्रपौत्रसन्ताने" इति वदता विष्णुना प्रपौत्रस्याप्यधिकारः सूचितः तस्यापि तत्सन्तानत्वात् सपिण्डत्वाच्च अन्यथा अधिकारिष्विह ज्ञातयःसु उपरितनानामेव कीर्त्तनात् तस्यानधिकारत्वापत्तेः। अतएव श्राद्धदानप्रकरणे तत्सुतः पौत्रसुतः प्रपौत्र अगृहीतवित्तः प्रपितामहस्तत्स्वर्णं न दद्यादिति वदता मिताक्षराकृता प्रपौत्रस्याधिकारः सूचितः। तदधस्तनसन्तानस्य च प्रपितामहपौत्रपर्य्यन्ताभावेऽधिकारः तेषामसपिण्डत्वेऽपि गोत्रजसमानोदकत्वाविशेषात् सपिण्डाधिकारे अधस्तनानामेव प्रथमग्रहणवत् गोत्रजाधिकारेऽप्यधस्तनानामेव ऊर्द्धतनापेक्षया प्रथमं ग्रहणौचित्यादिति एतन्मते च असगोत्रसपिण्डमध्ये, दौहित्रस्यैव ग्रहणात् पितामहदौहित्रादेर्नाधिकारः। बन्धुशब्दस्य असगोत्रसपिण्डपरत्वेऽपि बन्धुशब्दस्य पारिभाषिकपरत्वेन तेन कीर्त्तनादिति बहवः। वीरमित्रोदये तु विशेषविदर्भिया मातुलादीनामधिकारो व्यवस्थापितः तन्मते तेषां बन्धुपदेन ग्रहणात् इति भेदः। तथा दायलब्धधने पत्न्याश्चेष्टं दानभोगाद्यधिकारः इति मिता० वीर० मते तु स्वामिन उपकाराभावे नटादौ दानेऽनधिकार इति भेदः। "आधिवेदनिकाद्यञ्चेति" याज्ञवल्क्यवचनेन स्त्रिया रिक्थविभागक्रयादिलब्धधनमात्रस्य स्त्रीधनत्वं व्यवस्थाप्य तद्विभागः मिता० दर्शितो यथा "अतीतायामप्रजसि बान्धवास्तदवाप्नुयुः" या०। तत्पूर्व्वोक्तं स्त्रीधनमप्रजस्यनपत्यायां दुहितृदौहित्रपुत्रपौत्ररहितायां स्त्रियामतीतायां बान्धवा भर्त्रादयो वक्ष्यमाणा गृह्णीयुः। सामान्येन बान्धवा धनग्रहणेऽधिकारिणो दर्शिताः। इदानीं विवाहभेदेनाधिकारिभेदमाह। "अप्रजःस्त्रीधनं भर्त्तुर्ब्राह्मादिषु चतुर्ष्वपि। दुहितॄणां प्रसूता चेच्छेषेषु पितृगामि तत्" या०। अप्रजःस्त्रियाः पूर्वोक्तायाम्ब्राह्मदैवार्षप्राजापत्येषु चतुर्षु विवाहेषु भार्य्यात्वं प्राप्ताया अतीतायाः पूर्वोक्तन्धनं प्रथमं भर्त्तुर्भवति। तदभावे तत्प्रत्यासन्नानां सपिण्डानां भवति। शेषेष्वासुरगान्धर्वराक्षसपैशाचेषु विवाहेषु तदप्रजःस्त्रीधनं पितृगामि। माता च पिता च पितरौ तौ गच्छतीति पितृगामि एकशेषनिर्द्दिष्टाया अपि मातुः प्रथमं धनग्रहणं पूर्व्वमेवोक्तम्। तदभावे तत्प्रत्यासन्नानां धनग्रहणम्। सर्व्वेष्वेव विवाहेषु प्रसूताऽपत्यवती चेत् दुहितॄणां तद्धनं भवति। अत्र दुहितृशब्देन दुहितृदुहितर उच्यन्ते। साक्षाद्दुहितॄणाम् "मातुर्दुहितरःशेषम्" इत्यत्रोक्तत्वात्। अतश्च मातृधनं मातरि वृत्तायां प्रथमं दुहितरो गृह्णन्ति। तत्र चोढानूढासमवायेऽनूढा गृह्णाति। तदभावे परिणीता तत्रापि प्रतिष्ठिताऽप्रतिष्ठितासमवायेऽप्रतिष्ठिता गृह्णाति तदभावे प्रतिष्ठिता। यथाह गौतमः "स्त्रीधनं

दुहितॄणामप्रत्तानामप्रतिष्ठितानां चेति"। तत्र चशब्दात् प्रतिष्ठितानाञ्च। अप्रतिष्ठिता अनपत्या निर्द्धना वा। एतच्च शुल्कव्यतिरेकेण। शुल्कन्तु सोदर्य्याणामेव "भगिनीशुल्कं सोदर्य्याणामूर्द्ध्वं मातुरिति" गौतमवचनात्। सर्वासां "दुहितॄणां प्रसूता चेत्" इत्यस्माद्वचनात् तासां भिन्नमातृकाणां समवाये दौहित्रीणां किञ्चिदेव दातव्यम्। यथाह मनुः "यास्तासां स्युर्दुहितरस्तासामपि यथार्हतः। मातामह्या धनात् किञ्चित् प्रदेयं प्रीतिपूर्वकमिति"। दुहितॄणामप्यभावे दौहित्रा धनहारिणः। यथाह नारदः। "मातुर्दुहितरोऽभावे दुहितॄणां तदन्वयः" इति तदन्वयशब्देन सन्निहितदुहितृपरामर्शात्। दौहित्राणामभावे पुत्रा गृह्णन्ति। "ताभ्य ऋते अन्वयः" इत्युक्तत्वात् मनुरपि दुहितॄणां पुत्राणाञ्च मातृधनसम्बन्धं दर्शयति। "जनन्यां संस्थितायां तु समं सर्वे सहोदराः। भजेरन्मातृकं रिक्थं भगिन्यश्च सनाभयः" इति मातृकं रिक्थं सर्वे सहोदराः समं भजेरन् सनाभयो भगिन्यश्च समं भजेरन् इति सम्बन्धः न पुनः सहोदरा भगिन्यश्च संभूय भजेरन् इति इतरेतरयोगस्य द्वन्द्वैकशेषाभावाद्प्रतीतेर्विभागकर्तृत्वान्वयेनापि चशब्दोपपत्तेर्यथा देवदत्तः कृषिं कुर्य्याद्यज्ञदत्तश्चेति। समपदमुद्धारविभागनिवृत्त्यर्थम्। सोदरपदं भिन्नोदरनिवृत्त्यर्थम्। अनपत्यहीनजातिस्त्रीधनन्तु भिन्नोदराप्युत्तमजातीयसपत्नीदुहिता गृह्णाति तदभावे तदपत्यं तथा च मनुः "स्त्रियास्तु यद्भवेद्वित्तं पित्रा दत्तं कथञ्चन। ब्राह्मणी तद्धरेत् कन्या तदपत्यस्य वा भवेदिति"। ब्राह्मणीपदमुत्तमजात्युपलक्षणम्। क्षत्रियानपत्यवैश्याधनं क्षत्रियाकन्या गृह्णाति। पुत्राणामभावे पौत्राः पितामहीधनहारिणः। "ऋक्थभाज ऋणं प्रतिकुर्य्युरिति" गौतमवचनात् "पुत्रपौत्रैर्ऋणं देयमिति" पौत्राणामपि पितामह्यृणापाकरणेऽधिकारात्। पौत्राणामप्यभावे पूर्वोक्ताभर्त्रादयो बान्धवा धनहारिणः"। अत्रापि पुंधनवत् स्त्रीधनेऽपि प्रपौत्राधिकारो वेदितव्यः अगृहीतवित्तस्य प्रपौत्रस्य ऋणापाकरणनिषेधेन पुंधन इव स्त्रीधनेऽपि तदधिकारस्य सूचितत्वात् इति वक्तव्यम्।

उत्तरापथ पु० उत्तरा उत्तरस्यां पन्थाः अच् समा०। १उत्तरस्यां दिशि स्थिते पथि २देशभेदे च। "उत्तरपथजन्मानः कीर्त्तयिष्यामि तानपि। यौनकाम्बोजगान्धाराः किरातवर्वरैः सह"। चतुर्थचि० पुरा०।

उत्तरापरा स्त्री उत्तरस्याः अपरस्याश्च दिशोऽन्तरालं दिक् दिङ्नाम ब०। वायुकोणे "उत्तरापराभिमुखोऽभ्यष्टमदिग्भागमवदर्शनात्" आ०त०सांख्या०२८०। "उत्तरापराभिमुखः वायुकोणाभिमुखः" रघु०।

उत्तराभास पु० उत्तरमिवाभासते आ+भास–अच्। दुष्टोत्तरे उत्तरशब्दे १०६० पृष्ठे तल्लक्षणादि।

उत्तराम् अव्य० उद्+उत्कर्षे तरप् आमु। अतिशयेनोत्कर्षे "उदेनमुत्तरां नयाग्ने घृतेनाहुतः" यजु०१७।५०। "अतिशयेन उत् उत्तराम्" वेददी०। एवम् तमप् आमु। उत्तमामप्यत्र अव्य०।

उत्तरायण न० उत्तरा उत्तरस्यामयनं सूर्य्यादेः "पूर्वपदात् संज्ञायाम्" पा० णत्वम्। सूर्य्यादेः १उत्तरदिग्गमने अभेदोपचारात् ७व० दा। वर्षसार्द्धे सूर्य्यस्य दक्षिणत उत्तरदिग्गमनसम्पादके २षण्मासात्मके काले सूर्य्यादेः दक्षिणोत्तरयोरयनञ्च अयनसंक्रान्तिशब्दे ११२८ पृ० उक्तम् तथा च सूर्य्यस्योत्तरायणसंक्रमावधि षण्मासाः उत्तरायणकालः। "कर्कटादिस्थिते भानौ दक्षिणायनमुच्यते। उत्तरायणमप्युक्तं मकरस्थे दिवाकरे" म०त० विष्णुपु०। "एतन्मकरकर्कटादिसंक्रमेणायननिरूपणम् श्रौतस्मार्त्तकर्म्मार्थं मन्वादौ सूर्य्यसिद्धान्ताभिहितोदगयनादिनिरूपणन्तु रविगतिवशाद्दिनमानादिज्ञानार्थम्, इत्यनयोर्न विरोधः" म० त० रघु०। "ततश्च मकरस्थिरसंक्रान्त्यवधिषण्मासाः स्थूलमुत्तरायणं चलमकरसंक्रान्त्यवधि तु सूक्ष्ममिति भेदः। अस्य प्रशंसाऽपि "स यत्रोदगावर्त्तते देवेषु तर्हि भवति देवान्हि गोपायन्ति" शत०ब्रा०२,१,३,२। "यदुत्तरायणं तदहर्देवानाम् दक्षिणायनं रात्रिः संवत्सरोऽहोरात्रः" विष्णुः "अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्" गीता। यथा चास्य सौरत्वं तथाऽयनशब्दे २२५ पृ० कालमाधवीयधृतप्रमाणादिना व्यवस्थापितम्। उपचारात् ३तदारम्भसंक्रान्तौ "मृगकर्कटसंक्रान्ती द्वे तूदग्दक्षिणायने" सूर्य्य०सि०। तत्र पुण्यकालताविधये "यावद्दिंशकला भुक्ता तत्पुण्यं चोत्तरायणे" "मिथुने भास्करे दृष्टे दिनान्तं दक्षिणायने" म०त०भवि०पु० "भविष्यत्ययने पुण्यमतीते चोत्तरायणे" इति ति०त० देवीपु०। राशिसंक्रान्त्यभिप्रायमिदं वचनम् इति रघुनन्दनादयः। माधवादयस्तु चल संक्रान्तिपरत्वं तत्र विशेषपुण्यकालत्वं चाङ्गीचक्रुः। तत्र

अयनसंक्रान्तिशब्दे ३२८दर्शितम्। उत्तरायणकालाभिमानिनि कृतविद्यप्राणिनां ब्रह्मादिलोकप्रापणाय अतिवाहनायेश्वरनियुक्ते चेतने ४पुरुषभेदे "आतिवाहिकास्तल्लिङ्गात्" शा० सू० भाष्ययोस्तथा व्यवस्थापितं तच्च आतिवाहिकशब्दे ६५१ पृ० दर्शितम्। तन्मूलमेव अग्निर्ज्योतिरित्यादिगीताव्याख्याने "अग्न्यादयस्तदभिमानिन्यो देवाः" इति श्रीधरोक्तम्।

उत्तरार्क पु० काशीस्थे उत्तरस्यां दिशि अर्ककुण्डसन्निधौ सूर्यमूर्त्तिभेदे। तदुत्पत्तिर्यथा "इति काशीप्रभावज्ञो जगच्चक्षुस्तमोपहा। कृत्वा द्वादशधात्मानं काशीपुर्यां व्यवस्थितः। लोलार्क उत्तरार्कश्च साम्बादित्यस्तथैव च। चतुर्थो द्रुपदादित्यो मयूखादित्य एव च। खखोल्कश्चारुणादित्यो वृद्धकेशवसंज्ञकौ। दशमो विमलादित्यो गङ्गादित्यस्तथैव च। द्वादशश्च यमादित्यः काशीपुर्यां घटोद्भव!"। ४६ अ० इति द्वादशसूर्यभेदानभिधाय तत्स्थानानि तत्र क्रमशोऽभिहितानि। "अथोत्तरस्यामाशायां कुण्डमर्काख्यमुत्तरा। तत्र नाम्नोत्तरार्केण रश्मिमाली व्यवस्थितः" ४७ अ०।

उत्तरार्द्ध न० उत्कृष्टमर्द्धम् उत्तरमर्द्धस्य एकदे०त० वा। देहपूर्व्वार्द्धे। तस्योत्कृष्टत्वात्तथात्वम् "व्यूह्य स्थितः किञ्चिदिवोत्तरार्द्धम्" रघुः। कर्म्म०। २शेषार्द्धे च "अथ मध्येनैवोत्तरार्द्धेनाज्यमवेक्षते" शत०ब्रा० १,२,१,१२

उत्तराशा स्त्री कर्म्म०। उत्तरस्यां दिशि। उत्तराशाधीशादयः उत्तरदिगीशशब्दे पृ०१०८२ द्रष्टव्याः।

उत्तराश्मन् पु० कर्म्म०। उत्तरप्रसिद्धप्रस्तरभेदे ततः कृशा० चतुरर्थ्याम् क। उत्तराश्मक तत्सन्निहितदेशादौ त्रि०।

उत्तराषाढा स्त्री कर्म्म०। अश्विन्यादिनक्षत्रेषु एकविंशतितमे नक्षत्रे "उग्रः पूर्व्वमघान्तकाम्बुवगणस्त्रीशयुत्तराणि स्मृः" ज्यो०उक्तेरियं ध्रुवगणः। तस्याः स्वरूपादि उडुचक्रशब्दे १०७१ पृष्ठे उक्तम् इयं विश्वदेवताका अस्रेषाशब्दे ४८७पृ० उक्ता।

उत्तरासङ्ग पु० उत्तरे ऊर्द्धभागे आसज्यते आ+सन्ज-कर्म्मणि घञ्। उत्तरीयवस्त्रे "शुक्लोत्तरासङ्गभृतो वितस्तान्" भट्टिः "त्वगुत्तरासङ्गवतीमधीतिनीम्" कुमा०। "कृष्णोत्तरासङ्गरुचम् विदधच्चौतपल्लवीम्" माघः। उत्तरस्यां दिशि २आसङ्गे च। "शिशिरसमयसूर्य्यमिव कृतोत्तरासङ्गम्" काद०। रवेश्च यथा शिशिरसमये माघादौ उत्तरस्यां दिशि गतिस्तथोत्तरायणशब्दे ११०४ पृष्ठे उक्तम्।

उत्तरासद् पु०उत्तरा उत्तरस्यां दिशि सीदति सद-क्विप्। उत्तरदिशि भागार्हेषु १मित्रावरुणप्रधानेषु २मरुत्प्रधानेषु च देवेषु "देवा मित्रावरुणनेत्रा मरुन्नेत्रा वोत्तरासदस्तेभ्यः स्वाहा" मित्रावरुणनेत्रेभ्यो मरुन्नेत्रेभ्यो वा देवेभ्य उत्तरासद्भ्यः स्वाहा" यजु० ९,२६,२७।

उत्तराह पु० उत्तरमनन्तरमहः टच् समा०। अनन्तरदिने।

उत्तराहि अव्य० उत्तर+प्रथमाद्यर्थे दिग्देशकालविषये आहि। उत्तरस्मिन् उत्तरस्मात् उत्तर इत्यर्थे। "आहि च दूरे" पा० उक्तेः दूर एवास्य प्रवृत्तिः। "उदीचीमेव दिशम् प्राजनंस्तस्मादुत्तराहि वाग्वदति" शत०ब्रा० ३,२,३, १५। "अव्ययात्त्यप्" पा० "क्वतसित्रेभ्य एव" इति वार्त्तिके नियमात् अतो भवार्थे अणेव। औत्तराहिक तद्भवे त्रि०।

उत्तरिक त्रि० उत्तर उत्क्रमणमस्त्यस्याः ठन्। १उत्तार्य्यनद्यादौ २नदीभेदे स्त्री। "अनुयातश्च भरतो वाहिनीः चतुरङ्गिणीः। ततः शीघ्रतरं प्रायादुत्तीर्य्योत्तरिकां नदीम्" रामा०।

उत्तरीय न० उत्तरस्मिन् देहभागे भवः गहा० छ। ऊर्द्धदेहधार्य्ये वस्त्रे "धौतोत्तरीयप्रतिमच्छवीनि" माघः "तमोत्तरीयाणि भवन्ति सङ्गात्" "अथास्य रत्नग्रथितोत्तरीयम्" रघुः। प्रतिनिधिपर्य्यन्तोत्तरीयधारणावश्यकतोक्ता आ० त० यथा। "विकच्छोऽनुत्तरीयश्च नग्नश्चावस्त्र एव च। श्रौतं स्मार्त्तं तथा कर्म्म न नग्नश्चिन्तयेदपि" भृगु०तद्धारणप्रकारश्च "यथा यज्ञोपवीतञ्च धार्य्यते च द्विजोत्तमैः। तथा संधार्य्यते यत्नादुत्तराच्छादनं शुभम्" स्मृतिः। "स्नायाद्धे वाससी धौते अक्लिन्ने परिधाय च। अभावे धौतवस्त्राणां शाणक्षौमाविकानि च। कुतपो योगपट्टं वा द्विवासा येन वा भवेत्" या०स्मृ०। "येन वेति उपवीतेन तत्प्रतिनिधीभूतेन कुशरज्ज्वादिना" आ०त० रघु०। "यज्ञोपवीते द्वे धार्य्ये श्रौतस्मार्त्तेषु कर्म्मसु। तृतीयञ्चोत्तरीयार्थे वस्त्राभावेऽतिदिश्यते" स्मृतिः। वर्ज्यान्याह "न स्यूतेन न दग्धेन पारक्येण विशेषतः। मूषिकोत्कीर्णजीर्णेन कर्म्म कुर्य्याद्विचक्षणः" आ० त० भारतम्। "न रक्तमुल्वणं वासो न नीलञ्च प्रशस्यते। मलाक्तं च दशाहीनं वर्जयेदर्शने बुधः" नरसिं० पु०। "दशाहीनेन वस्त्रेण कुर्य्यात् कर्म्माण्यभावतः" उश०। "वस्त्रं नान्यधृतं धार्य्यं न रक्तं मलिनं तथा। जीर्णं नाऽपदशञ्चैव श्वेतं धार्य्यं प्रयत्नतः" विष्णुध०पु०।

उत्तरेण अव्य० उत्तर+एनप् । आसन्नदिग्देशकालानां प्रथमापञ्चमीसप्तम्यन्तानामर्थेषु “तत्रागारं धनपतिगृहानुत्तरेणास्मदीयम्” मेघ० । एतद्योगे द्वितीया । “किञ्चित् पश्चात् व्रज लघुगतिर्भूय एवोत्तरेण” मेघ० । “हृदयदेशमालभेतोत्तरेण” आश्व०गृ० १,२०,६, “एतस्मिन् काले प्रपद्याच्छावाक उत्तरेणाग्नीध्रीयम्” आश्व० श्रौ० ५,७,२ ।

उत्तरेद्युस् अव्य० उत्तरस्मिन् दिने उत्तर+एद्युस् । अनन्तरदिवसे इत्यर्थे ।

उत्तरोत्तर उत्तरस्मादुत्तरः । अनन्तरोदितानन्तरे । “पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा । तत्सुतो गोत्रजो बन्धुः शिष्यः सब्रह्मचारिणः । एषामभावे पूर्व्वस्य धनभागुत्तरोत्तरः” या०स्मृ० । २क्रमेण उत्तरे । “उत्तरोत्तरमुत्कर्षो वस्तुनः सार उच्यते सा० द० ।

उत्त(रो)रौष्ठ पु० उत्तरः उपरितनः ओष्ठः वा वृद्धिः । उपरितने ओष्ठे । “अधरो(रौ)ष्ठं दशति उत्तरो(रौ)ष्ठं वा लेढि” “उत्तरौष्ठञ्च योविद्यादुच्चारांश्च करोति च” सुश्रु०

उत्तर्जन न० उद्+तर्ज्जनम् प्रा० स० । उच्चैर्भर्त्सने । तच्च क्रोधकार्य्यं यथाह सा० द० । “निन्दाक्षेपापमानादेरमर्षोऽभिनिविष्टता । नेत्ररागशिरःकम्पभ्रूभङ्गोत्तर्ज्जनादिकृत्”

उत्तलित त्रि० उद्+तल-क्त । १उत्क्षिप्ते ।

उत्तान त्रि० उद्गतस्तानो विस्तारो यस्य । (चित) भूमिलग्नपृष्ठतया ऊर्द्ध्वभावेन १स्थिते २ऊर्द्ध्वमुखे च । “उत्तानपाणिद्वयसन्निवेशात् प्रफुल्लराजीवमिवाङ्कमध्ये” कुमा० । “उरःस्थोत्तानचरणः सव्ये न्यस्येतरं करम्” “उत्तानं किञ्चिदुन्नाम्य मुखं विष्टभ्य चोरसा” या० स्मृ० । “पितृपात्रं तदुत्तानं कृत्वा विप्रान् विसर्ज्जयेत् या० स्मृतिः “प्रत्येत्य प्रस्तरे निह्नुवत उत्तानहस्ता दक्षिणोत्ताना वा” कात्या० ८,२,६ । “उत्तानार्थे विचक्षणः” सुश्रु०

उत्तानक पु० उद्-तन-ण्वुल् । उच्चटाख्ये तृणभे० [राजनि०

उत्तानपत्रक पु० उत्तानमूर्द्ध्वमुखं पत्रमस्य कप् । रक्ते एरण्डे

उत्तानपाद पु० स्वायम्भुवमनोः पुत्रे ध्रुवपितरि १नृपभेदे । “वैराजात् पुरुषात् वीरं शतरूपा व्यजायत । प्रियव्रतोत्तानपादौ वीरात् काम्या व्यजायत” हरि० २अ० । “स्वायम्भुवस्यापि मनोर्हरेरंशांशजन्मनः । प्रियव्रतोत्तानपादौ शतरूपापतेः सुतौ । वासुदेवस्य कलया रक्षायां जगतः स्थितौ । जाये उत्तानपादस्य सुनीतिः सुरुचिस्तयोः । सुरुचिः प्रेयसी पत्युर्नेतरा यत्सुतोध्रुवः” भाग० ४स्क० ८अ० इत्युपक्रमे तच्चरितं तत्र वर्णितम् । उत्तानउत्तानस्थितः पादोऽस्य । १परमेश्वरे पु० “पादोऽस्य सर्व्वाभूतानि त्रिपादस्यामृतं दिवीति” श्रुतेस्तस्य सार्व्वोपरिस्थपादत्वात् तथात्वम् । अस्य समासे वा अन्तलोपे उत्तानपादपि तत्रैव “भूर्जज्ञ उत्तानपदोभुव आशा अजायन्त” । “तदुत्तान पदस्परि” ऋ० १०,७२,३,४, अत्र भत्वे पादः पदादेशः । २उत्तानपादयुक्ते शिशुप्रभृतौ त्रि० ।

उत्तानपादज पु० उत्तानपादात् जाते जन-ड । ध्रुवे तच्चरितं भागवते ४स्क० ८अध्यायादौ वर्णितम् ।

उत्तानशय त्रि० उत्तानः ऊर्द्ध्वमुखः सन्नेव शेते शी-अच् । अतिशिशौ तदानीमवताने सामर्थ्याभावादस्य तथात्वम् ।

उत्तानशीवन् त्रि० उत्तानः सन् शेते शी-क्वनिप् । अति शिशौ २उत्तानस्थिते च । स्त्रियां ङीप् वनोरश्च । उत्तानशीवरी “ये पर्व्वताः सोमपृष्ठा आप उत्तानशीवरीः” अथ० ३,२१,१० ।

उत्ताप पु० उद्+तप-घञ् । १उष्णतायाम्, २सन्तापे च ।

उत्तार पु० उद्+तॄ-णिच् अच् । १उद्गमने २ उल्लङ्घने ३पारनयने च । “संसारसागरोत्तारतरणिः” प्रबोध० “स घोरामापदं प्राप्य नोत्तारमधिगच्छति” भा० उ० १२६अ० । उच्चैस्तारः प्रा० स० । ४अत्यन्तोच्चशब्दादौ त्रि० ।

उत्तारक त्रि० उद्+तॄ-णिच् ण्वुल् । पारप्रापके ।

उत्तारण न० उद्+तॄ-णिच्-ल्युट् । पारप्रापणे । कर्त्तरि ल्यु । २पारप्रापके त्रि० ३विष्णौ पु० “उत्तारणोदुष्कृतिहा” विष्णुस० “संसारसागरादुत्तारयतीत्युत्तारणः” भा०

उत्तार्य्य त्रि० उद्+तॄ-णिच्-कर्म्मणि यत् । १उद्गमनीये । “अमात्यभुक्तं तूत्तार्य्यं शोध्यं वाप्याशु शोधनैः” सुश्रुः । ल्यप् । २उद्गमनं कृत्वेत्यर्थे अव्य० । उद्+तॄ-कर्म्मणि ण्यत् । ४उल्लङ्घनीये त्रि० ।

उत्ताल त्रि० उद्+चुरा० तल-प्रतिष्ठायाम् अच् । प्रतिष्ठिते महति । “उत्तालतालीवनसंप्रवृत्तः” माघः ।

उत्तिष्ठद्धोम पु० उत्तिष्ठतोऽनुपविष्टस्य होमो यत्र । अनुपविष्टकर्त्तृकहोमे यजतिरूपे यागभेदे । तत्र कृतोपविष्टे न कर्त्तरा उत्तिष्ठता होमः करणीय इति शिक्षयितुम् यावां यजतिजुहोत्योर्भेदप्रदर्शनेन तन्निर्णीतं कात्या० १,२,५,६,७, सूत्रेषु “यजतिजुहोतीनां कोविशेषः” सू० “यजतीनां यागानां जुहोतीनां होमानाञ्च को विशेषः कोभेदः इति प्रश्नः” कर्कः । तिष्ठद्धोमाः वषट्कारप्रदानाः याज्यापुरोनुवाक्यावन्तश्च यजतयः” सू० । उपविष्टहोमाः स्वाहाकारप्रदाना जुहोतयः” सू० । अस्यान्ते इति शेषः । तिष्ठता होम

येषु ते तिष्ठद्धोमाः वषट्कारेण प्रदानं येषु ते वषट्कार प्रदानाः तथा याज्यावन्तः पुरोनुवाक्यावन्तश्च ये ते यजतय उच्यन्ते" कर्कः। "उपविष्टहोमाः स्वाहाकारप्रदाना जुहोतयः" सू०।"उपविष्टेन कर्त्रा होमो येषु ते उपविष्टहोमाः स्वाहाकारेण प्रदानं येषु ते जुहोतय उच्यन्ते" कर्कः तिष्ठत्पदञ्च उत्तिष्ठत्परम्

उत्तिष्ठमान पु० उद्+स्था–शानच्। वर्त्तमाने "उत्तिष्ठमानस्तु परैर्नोपेक्ष्यः पथ्यमिच्छता" माघः। ऊर्द्ध्वचेष्टायां तु यत्न। उत्तिष्ठत् अनुपविष्टे दण्डायमाने त्रि०स्त्रियाम् ङीप् नुम्"। उत्तिष्ठन्ती [क्त। १ज्ञतोत्तरणे नद्यादौ त्रि०।

उत्तीर्ण त्रि०उद्+तॄ–कर्त्तरि क्त।१मुक्ते, २पारङ्गते कर्म्मणि

उत्तुङ्ग त्रि० उत्कृष्टं तुङ्गं प्रा०स०। अत्युन्नते। "उत्तुङ्गशैलशिखरस्थितपादपानां काकः क्षणोऽपि फलमालभते सपक्षः। सिंहो बली द्विरदकुम्भविदारणोऽपि सीदत्यहो तरुतले खलु पक्षहीनः" उद्भटः "स्वर्गादुत्तुङ्गममलं विषाणं यत्र शूलिनः" भा०व०८८अ०। "करप्रचेयामुत्तुङ्गां प्रभुशक्तिं प्रथीयसीम्" "यच्चालमुत्तुङ्गतया विजेतुम्" 'उत्तुङ्गमातङ्गमिताल्पपूरम्" माघः।

उत्तुष पु० उद्गतः कण्डनाभावेऽपि तुषोऽस्मात्। प्रा०ब० वा गतशब्दलोपः। लाजाख्ये (खइ) भृष्टधान्ये

उत्तेजना स्त्री उद्+तिज–णिच् युच्। १प्रेरणायाम्, २व्यग्रताकरणे, ३उद्दीपने, ४तीक्ष्णीकरणे च। "व्याधकृतोत्तेजनया शुनीनाम्" माघः ल्युट्। तत्रैव न०।

उत्तेजित त्रि० उद्+तिज–णिच्–क्त। १प्रेरिते, २उद्दीपिते च। भावे क्त। ३प्रेरणायाम् ४उद्दीपने च न०। "उत्तेजितं मध्यवेगं योजनं स्वयवस्थाया" इत्युक्ते ५अश्वगतिभेदे न०।

उत्तेरित न० उद्–ईर् भावे इतच् गुणे नि० एत्वम्। १अश्वगतिभेदे। अर्श आद्यच्। "उत्तेरितोऽतिवेगाढ्यो न शृणोति न पश्यति"-इत्यश्वगतिगुक्ते २अश्वे पु०।

उत्तोरण त्रि०उच्चतं तोरणमत्र प्रा०ब०वा मतलोपः। १उच्चपुरद्वारयुक्ते नगरादौ। "उत्तोरणामन्वयराजधानीम्" रघुः। "उत्तोरणं राजपथं प्रपेदे" कुमा० उच्चतं तोरणम् प्रा०स०। २उच्चे तोरणे पुंन०।

उत्तोलन न० उद्+तुल–उन्माने भावे ल्युट्। ऊर्द्ध्वं नीत्वा तोलने। [क्षतोलने च

उत्तोलित त्रि० उद्+तु०तुल–क्त। १उत्क्षिप्ते, २उत्क्षिप्य

उत्त्यक्त त्रि० उद्+त्यज–क्त। १ऊर्द्ध्वक्षिप्ते, २परित्यक्ते च।

उत्त्रास पु० उद्+त्रस–घञ्। अतिभये।

उत्थ त्रि० उद्–स्था–क। १उद्गते २समुद्भूते च। "रजांसि समरोत्थानि तच्छोणितनदीष्विव" रघुः। "भवत्सम्भावनोत्थाय परितोषाय मूर्च्छते" कुमा०। "निद्रालस्यप्रमादोत्थं तत् तामसमुदाहृतम्" गीता "तपनं प्रियविच्छेदकराशेषोत्थचेष्टितम्" सा०द०।

उत्थान न०उद्+स्था ल्युट्।१ऊर्द्ध्वपतने, २उद्यमे, ३ऊर्द्ध्वभवनचेष्टायाम्,४उद्भवे च। करणे ल्युट्।५उत्साहे,६पौरुषे, ७हर्षे च। अधिकरणे ल्युट्। ८रणे,९राज्यधिष्ठानरूपे १०तन्त्रे,११प्राङ्गणे,१२चैत्ये च। "इन्दुं नवोत्थानमिवेन्दुमत्यै" रघुः "भ्रातॄणामविभक्तानां यद्युत्थानं भवेत् सह" मनुः। "मम धर्म्मार्थमुत्थानं न कामक्रोधसंश्रितम्" रामा० "उत्थानमभिजानन्ति सर्वभूतानि भारत!। प्रत्यक्षं फलमश्नन्ति कर्म्मणां लोकसाक्षिकम्" भा०व० ३२अ०। मेदश्छेदकृशोदरं लघु भवत्युत्थानयोग्यं वपुः" शकु० "पञ्च वा सप्त चाष्टौ च षैरुत्थानं न गच्छति" सुश्रु०।१३प्रबोधे च "मच्छयने मदुत्थाने मत्पार्श्वपरिवर्त्तने" ति०त०पु०।

उत्थानैकादशी स्त्री उत्थानस्य हरेः निद्रातःप्रबोधनस्य कालः एकादशी। चान्द्रकार्त्तिकशुक्लैकादश्याम्। तत्र काल व्यवस्था–ति०त० रघुनन्दनेन दर्शिता यथा मात्स्ये "शेते विष्णुः सदाषाढे भाद्रे च परिवर्त्तते। कार्त्तिके परिबुध्येत शुक्लपक्षे हरेर्दिने" भविष्यनारदीययोः "मैत्राद्यपादे स्वपितीह विष्णुर्वैष्णव्यमध्ये परिवर्त्तते च। पौष्णावसाने च सुरारिहन्ता प्रबुध्यते मासचतुष्टयेन" भविष्ये "निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्त्तनम्। अन्यत्र पादयोगेऽपि द्वादश्यामेव कारयेत्"। अन्यत्र स्वापादिविहितरात्र्यादीतरकाले दशमीप्रतिपदोश्च। "किन्त्वैत्राद्यपादेन? दशम्यंशेन यो दिवा। पौष्णशेषेण किन्तेन? प्रतिपद्यश यो निशि"। दशम्यंशेन दशम्या अंशोयत्र पादे तेन। यः प्रतिपदि वा प्राप्तस्तेन वा किम्?। अत्र दशमीप्रतिपदोर्वर्ज्जनात् तदितरैकादश्यादिपञ्चतिथिषु मैत्रादिनक्षत्रपादविशेषलाभे द्वादशीं विनापि शयनादिरिति प्रतीयते। वचनान्तरम् "रेवत्यन्तो यदा रात्रौ द्वादश्यां च सङ्गमः। तदा विबुध्यते विष्णुर्दिनान्ते प्राप्य रेवतीम्" दिनान्ते त्रिधाविभक्तदिन तृतीयभागे दिवोत्थानमित्यनुरोधात्। विष्णुधर्मोत्तरे "विष्णुर्दिवा न स्वपिति न च रात्रौ प्रबुध्यते। द्वादश्यामृक्षसंयोगे पादयोगो न कारणम्। अप्राप्ते द्वादशीऋक्षे उत्थानशयने हरेः। पादयोगेन कर्त्तव्ये नाहोरात्रं

विचिन्तयेत् वराहपुराणम् । "द्वादश्यां सन्धिसमये न-क्षत्राणामसम्भवे । आभाकादिषु पक्षेषु शयनावर्त्तना-दिकम्" आभाकानाम् आषाढभाद्रकार्त्तिकानाम् । ततश्च द्वादश्यां निशादौ नक्षत्रमात्रयोगात् द्वादश्यामन्त्याभावे तिथ्यन्तरे निशाद्यनादरेण पादविशेषयोगात्, तदभावे द्वादश्यां सन्ध्यायामेव शयनादिकं बोधनन्तु द्वादश्यां रात्रौ रेवत्यन्तपादयोगे दिनतृतीयभाग इति विशेषः" ।

उत्थापन न० उद्+स्था–णिच्–ल्युट् । १उत्तोलने उन्नती करणे २चालने ३प्रबोधने ४उद्गमने च । "एवं यत्नोपायान् ध्यांश शिरोत्थापनहेतवे शुश्रावेच्य" सुश्रु० ।

उत्थाप्य त्रि० उद्+स्था–णिच् कर्म्मणि यत् । १उत्तोलनीये २चालनीये । ल्यप् । ३उत्तोल्येत्यर्थे ४मिश्रीकृत्ये त्यर्थे "आहूय प्रणवेनैव उत्थाप्य प्रणवेन च" उत्थाप्य मिश्रीकृत्य प्रा०त० रघु० । ५उत्ताप्येत्यर्थे च अव्य० ।

उत्थित त्रि० उद्+स्था–क्त । १वृद्धियुक्ते, २उत्थानयुते, अनुप्रविष्टे । "अर्द्धाचिता सत्वरमुत्थितायाः" कुमा० रघुश्च "न यावदेतावुदपश्यदुत्थितौ" "भित्त्वोत्थितं भूमिमिवो-रगाणाम्" माघः । ३उत्पन्ने ४उद्युक्ते च ।

उत्थिताङ्गुलि पु० उत्थिता उद्युता अङ्गुलयो यत्र । (चापड़) विसृताङ्गुलिके करतले चपेटे शब्दच० ।

उत्पचनिपचा स्त्री उत्पच निपचेत्युच्यते यस्यां क्रिया-याम् मयू० । उत्कृष्य पाकादिनिर्देशार्थक्रियायाम् ।

उत्पचिष्णु त्रि० उद्+पच–इष्णुच् । १उत्कृष्य पचन शीले । पचः विक्लित्तिरूपपाकपरत्वे । ऊर्द्धतः पाकशीले २हव्यादौ ।

उत्पट पु० उत्पटति उद्+पट–गतौ अच् । वृक्षादीनां त्वचमुद्भिद्य जाते निर्यासे । "त्वच एवास्य रुधिरं प्रस्य-न्दि त्वच उत्पटः" शत० १४,६,९,२१, "उत्पटः क्षननिर्यासः" भा० । [त्रिका० २उत्पतनकर्त्तृकाले त्रि० ।

उत्पत पु० उत्पतति ऊर्द्धं गच्छति उद्+पत–अच् । १पक्षिणि

उत्पतन न० उद्+पत–ल्युट् । १ऊर्द्धगमने, २उत्क्षेपणे च । उत्क्षेपणशब्दे उदा० ।

उत्पतनिपता स्त्री उत्पत निपतेत्युच्यते यस्यां क्रियायाम् मयू० । उत्पतनादिनिर्देशार्थक्रियायाम् ।

उत्पताक त्रि० उत्तोलिता पताका यत्र प्रा० ब० वा तो-लितशब्दलोपः । उत्तोलितपताके पुरादौ । "पुरन्दरश्रीः पुरउत्पताकम्" रघुः

उत्पतित त्रि० उद्+पत–क्त । ऊर्द्धगते ।

उत्पतिष्णु उद्+पत–इष्णुच् । उत्पतनशीले । "सधूद्गु र-मनुष्यानगेन्द्रानागानुत्पतिष्णवः" रघुः "उत्पतिष्णू सहि-ष्णू च चेरतुः खरदूषणौ" भट्टिः ।

उत्पत्ति स्त्री उद्+पत+क्तिन् । १ऊर्द्धपतने ऊर्द्धगतौ । उत्प-द्यते प्रथमतो ज्ञायतेऽनेन उद्+पद–करणे क्तिन् । प्राथ-मिकप्रतीतिविषयप्रवृत्तिसाधनेष्टसाधनताबोधके कर्मस्वरूप-ज्ञापके २विधिवाक्ये यथा "स्वर्गकामोऽश्वमेधेन यजे-तेत्यादि"वाक्यम् प्रथमं यागादौ इष्टसाधनत्वं बोध-यत् तत्र प्रवर्त्तयतीति तस्य तथात्वम् विधिशब्दे वि-वृतिः । 'योगसिद्धिर्वा अर्थस्योत्पत्त्यसंयोगित्वात्' जैमि०सू० । उद्+पद०क्तिन् । आद्यक्षणसम्बन्धरूपे ३ज-न्मनि । उत्पत्तौ वादिविप्रतिपत्तयः सन्ति तथाहि असतः सदुत्-पद्यते इति बौद्धाः । प्रागुत्पत्तेरसत् कारणव्यापारा-दुत्पद्यते इति नैयायिकादयः । प्रागुत्पत्तेः सदपि कारणव्यापारादभिव्यज्यते इति सांख्या वेदान्तिनश्च प्रतिपे-दिरे तयोरवान्तरभेदः सतो विवर्त्त इति वेदान्तिनः परि-णामः इति सांख्याः । तदेतत् सांख्य०कौ० । प्रदर्शितं यथा केचिदाहुरसतः "सज्जायत इति, एकस्य सतो विवर्त्तः कार्य्यजातं न वस्तु सदित्यपरे । अन्ये तु सतो-ऽसज्जायत इति । सतः सज्जायते इति वृद्धाः । तत्र पूर्व-स्मिन् कल्पत्रये प्रधानं न सिध्यति । सुखदुःखमोहभेदव-त्शब्दादिपरिणामप्रपञ्चात्मकत्वं हि जगत्कारणस्य प्रधा-नस्य सत्त्वरजस्तमःस्वभावत्वम् । यदि पुनरसतः सज्जायेत असन्निरूपाख्यं कारणं कथं सुखादिरूपशब्दाद्यात्मकं स्यात् सदसतोस्तादात्म्यानुपपत्तेः । अथैकस्य सतो विवर्त्तः शब्दादिप्रपञ्चस्तथापि सतः सज्जायत इति न स्यात् । अद्वयस्य प्रपञ्चात्मकत्वमपि त्वप्रपञ्चस्य प्रपञ्चात्मक-तया प्रतीतिर्भ्रम एव । येषामपि कणभक्षाक्षचरणा-दीनां सत एव कारणादसतो जन्म तेषामपि सदसतोरेकत्वा-नुपपत्तेर्न कार्य्यात्मकं कारणमिति न प्रधानसिद्धिः । अतः प्रधानसिद्ध्यर्थं प्रथमं तावत्सत्कार्य्यं प्रतिजानीते" कौ० । "असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात् । शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्य्यम्" का० "सत्कार्य्यं कारण-व्यापारात् प्रागपीति शेषः । तथा च न सिद्धसाधनं नैया-यिकनयैरुद्भावनीयम् । यद्यपि बीजमृत्पिण्डादिप्रध्वंसा-नन्तरमङ्कुरघटाद्युत्पत्तिरुपलभ्यते तथापि न प्रध्वंसस्य कारणत्वमपि तु भावस्यैव बीजाद्यवयवस्य । अभावात्तु भावोत्पत्तौ तस्य सर्वत्र सुलभत्वात्सर्वत्र सर्वकार्य्योत्पाद

प्रसङ्ग इत्यादि न्यायवार्त्तिकतात्पर्य्यटीकायामभिहितमस्माभिः। अपचमत्ययसाधति बाधके न शक्योमिथ्येति वक्तुमिति कथमत्राप्युपचरणमतमवगम्यते। तत्रेदं प्रतिज्ञातं सत्कार्य्यमिति। अत्र हेतुमाह असदकरणात्। असच्चेत्कारणव्यापारात् पूर्वं कार्य्यं नास्य सत्त्वं केनापि कर्त्तुं शक्यं न हि नीलं शिल्पिसहस्रेणापि शक्यं पीतं कर्त्तुम्। सदसत्त्वे घटस्य धर्माविति चेत् तथाप्यसति धर्म्मिणि न तस्य धर्म इति सत्त्वं तदवस्थमेव तथा च नासत्त्वम् असम्बद्धेनातदात्मना वाऽसत्त्वेन कथमसन् घटः। तस्मात्कारणव्यापारादूर्द्ध्वमिव ततः प्रागपि सदेव कार्य्यमिति। कारणाच्चास्य सतोऽभिव्यक्तिरेवावशिष्यते। सतश्चाभिव्यक्तिरुपपन्ना। यथा पीडनेन तिलेषु तैलस्य, अवघातेन धान्येषु तण्डुलानां, दोहनेन सौरभेयीषु पयसः। असतः करणे तु न निदर्शनं किञ्चिदस्ति। न खल्वभिव्यज्यमानं वोत्पद्यमानं वा क्वचिदसद्दृष्टम्। इतश्च कारणव्यापारात् प्राक् सदेव कार्य्यमित्याह उपादानग्रहणात् उपादानानि कारणानि तेषां ग्रहणं कार्य्येण सम्बन्धः उपादानैः कार्य्यस्य सम्बन्धादिति यावत्। एतदुक्तं भवति कार्य्येण सम्बद्धं कारणं कार्य्यस्य जनकं सम्बन्धश्च कार्य्यस्यासतो न सम्भवति तस्मात् सदिति। स्यादेतत् असम्बद्धमेव कारणैः कस्मात् कार्य्यं न जन्यते? तथा चासदेवोत्पत्स्यतेऽत आह सर्वसम्भवाभावात्। असम्बद्धस्य जन्यत्वे असम्बद्धत्वाविशेषेण सर्वं कार्य्यजातं सर्वस्माद्भवेत् न चैतदस्ति तस्मान्नासम्बद्धमसम्बद्धेन जन्यते अपि तु सम्बद्धं सम्बद्धेन जन्यते इति। यथाहुःसांख्यवृद्धाः "असत्त्वे नास्ति सम्बन्धः कारणैः सत्त्वसङ्गिभिः। असम्बद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिरिति"। स्यादेतत् असम्बद्धमपि तदेव तत् करोति यत्र यत्कारणं शक्तं शक्तिश्च कार्य्यदर्शनादवगम्यते अतो नाव्यवस्थेति अत आह शक्तस्य शक्यकरणात्। सा शक्तिः शक्तकारणाश्रया सर्वत्र वा स्याच्छक्ये वा। सर्वत्र चेत्तदवस्थैवाव्यवस्था शक्ये चेत् कथमसति शक्ये तदिति वक्तव्यम्। शक्तिभेद एव स तादृशो यतः किञ्चिदेव कार्य्यं जनयेन्न सर्वमिति चेत् हन्त भोः शक्तिविशेषः कार्य्यसम्बद्धो वा स्यादसम्बद्धो वा, सम्बद्धत्वे नासता सम्बन्ध इति सत् कार्य्यम्। असम्बद्धत्वे सैवाव्यवस्थेति सुष्ठूक्तं शक्तस्य शक्यकरणादिति। इतश्च सत्कार्य्यमित्याह कारणभावाच्च कार्य्यस्य कारणात्मकत्वात् न हि कारणाद्भिन्नं कार्य्यं कारणञ्च सदिति कथं तदभिन्नं कार्य्यमसद्भवेत्" सा० कौ०। उत्पत्तेश्च यथा विभाविरूपता तथाविर्भावशब्दे ८१० उक्तम्।

व्याख्यातं चेदमस्माभिष्टीकायां यथा असतः—सत्त्वेन वक्तुमशक्यात् निरुपाख्यात् अभावात् सत्-भावरूपं वस्तु, जायते जाततया व्यवह्रियते तथा हि अङ्कुरादिकं बीजनाशानन्तरमेव, दध्यादि दुग्धनाशानन्तरमेव, उत्पद्यमानं दृश्यते अतोऽनुमीयते कार्य्यभावा अभावकारणकाः कार्य्यत्वात् बीजनाशोत्तरजाताङ्कुरादिवत्। यत्रापि च तन्त्वादिषु पटकारणेषु स्वरूपेण नाशो न दृश्यते तत्राप्यनुमानेनैव तन्नाशं जननीयम्। युक्तं चैतत् उत्पन्ने पटे यदि तन्तवो न नष्टास्तदा तन्तव इमे इति व्यवहारविषयतामापद्येरन् न च तथा, अतस्तत्र तन्तुव्यवहाराभावात् पटरूपेण व्यवहाराच्च तन्तवो नष्टा इत्यनुमातव्यम्। न च कारणनाशे दग्धतन्तुषु पटदाहवत् पटनाशापत्तिरिति वाच्यम्, तन्तूनां पटकारणत्वस्याद्यापि असिद्धत्वात्, ये हि भावकारणका इति वदेयुस्तान् प्रत्येतद्दूषणमवतरेत् नाभावकारणतावादिनं प्रतीति सुस्थितमभावकारणवादिबौद्धाभिमतम्। सतः त्रैकालिकबाधरहितात् कूटस्थस्यापरिणामिनः विवर्त्तः स्वाज्ञानकल्पितः स्वज्ञाननिवर्त्त्यः परिणामविलक्षणः अन्यथाभावापत्तिः उपचारात् तथा उत्पद्यमानं कार्य्यजातमपि विवर्त्तः न वस्तु सदिति वस्तुतः पारमार्थिकेन सत्त्वेन नान्वितं किन्तु व्यवहारयोग्यसत्त्वयान्वितम्। तथा हि शुक्तिकादौ रजतादिज्ञानं सर्वानुभवसिद्धं तत्र प्रत्यक्षमेव रजतं साक्षात्करोमीत्याद्यनुभवात् प्रत्यक्षे च विषयेन्द्रियसन्निकर्षस्य कारणत्वात् देशान्तरस्थितरजतस्य च चक्षुरसन्निकृष्टतया न प्रत्यक्षविषयता। न च पूर्वज्ञातस्य रजतस्य ज्ञानेन उपनीतस्य शुक्तिकायां भ्रम इति वाच्यम् ज्ञानोपनीतस्य ज्ञानस्वीकारे साक्षात्कारानुभवापलापापत्तेः। अतएव न पूर्वानुभूतरजतस्मरणमात्रमनुभवविरोधात्। अतोऽगत्या तत्र शुक्तिकायामसद्रजतमुत्पद्यते इत्येव कल्पनीयम्। तदुत्पत्तौ च शुक्तिकादिविषयकमज्ञानं कारणं रजतविषयसंस्कारश्च सहकारितया कल्पनीयः। तदेव अध्यस्तम् यदुत्पन्नस्य तस्यासतो रजतस्य शुक्तिकातादात्म्येन तत्प्रत्यक्षविषयता। तत्रोत्पन्नेऽपि रजते शुक्तिकाया नाशमपि व्यावहारिकसत्त्वस्य बाधातो न भवतीति यथा, एवं कूटस्थे अपरिणामिनि ब्रह्मणि स्वाज्ञानेनाध्यते वियदादिकमध्यस्त-

ूत्पद्यते तत्र च तदज्ञानं हेतुः तत्संस्कारश्च सहकारीति तथा च विवादाध्यासिता घटादयः सति अध्यस्तास्तज्ज्ञाननाश्यत्वे सति सत्तादात्म्येन प्रतीयमानत्वात् शुक्तितादात्म्येन प्रतीयमानशुक्तिज्ञाननाश्यरजतवदित्यनुमानात् अध्यस्तत्वं घटादीनां सिद्धम् । अध्यस्तत्वं च साक्षात्कारिप्रत्यक्षविषयत्वं प्रागुक्तं तच्च तस्यासतोऽप्युत्पत्तौ प्रत्यक्षविषयता न स्यादिति अध्यस्तत्वरक्षार्थं तस्मिन्नुत्पत्तिरप्यङ्गीकार्य्या । ज्ञाननाश्यत्वं च तेषां मिथ्यात्वात् शुक्तिज्ञाननाश्यासद्रजतवदित्यनुमातव्यमित्याशयं विस्तरेण इति वेदान्तिमतम् । सतो भावात् विद्यमानादेवेत्यर्थः। असत् उत्पत्तेः, कारणव्यापाराद्धि पूर्व्वमविद्यमानं, कारणव्यापारादुत्तरन्तु जायते सद्भवतीति काणादनैयायिकादयः । सतः सत्त्वाश्रयात् भावादेव सत्, कारणव्यापारात् प्रागपि, कारणात्मस्वांशरूपसूक्ष्मरूपेण विद्यमानं जायते कारणव्यापारात्तु अभिव्यज्यते व्यवहारयोग्यतामापाद्यते इति यावदिति वृद्धाः साङ्ख्यादयः । एवमुत्पत्तिविषये चतुर्षु पक्षेषु स्थितेषु आद्यपक्षत्रये अनुमित्सितकार्य्यात्मककारणरूपप्रधानासिद्धिं क्रमशः प्रदर्शयितुं क्रमप्राप्तं बौद्धपक्षमाह यदि पुनरित्यादि । निरुपाख्यमनिर्वचनीयमिदन्तया वक्तुमशक्यमिति यावत् सति हि लक्षणे वस्तु तल्लक्षणवत्त्वेन वक्तुं शक्यम् अभावस्य च लक्षणाभावात् कथङ्कारं वक्तव्यता । यद्यपि भावभिन्नत्वं, सत्त्वेन प्रतीत्यनर्हत्वम्, असत्त्वेन प्रतीत्यर्हत्वं वा तल्लक्षणं कैश्चिदुच्यते तानि च सर्वाण्यपि अभावज्ञानसापेक्षतया दुर्ज्ञेयत्वादन्योन्याश्रयदोषग्रस्तत्वादलक्षणान्येव । सुखदुःखमोहात्मककार्यदर्शनात् कारणस्यापि तथाभूतात्मकत्वमनुमित्सितं तच्च भावस्यैव कारणतापक्षे सेत्स्यति नाभावस्य भावाभावयोस्तादात्म्यानुपपत्तेरिति भावः । विवर्त्तवादे च कार्य्यजातस्याध्यासेन तादात्म्यभानेऽपि वस्तुतोऽसत्त्वेन सदसतोस्तादात्म्यानुपपत्त्या पूर्ववदनुमित्सितप्रधानसिद्धिरित्याह न चैकस्येत्यादि । सतोऽसज्जायते इति पक्षेऽपि सदसतोस्तादात्म्यानुपपत्त्यैव न प्रधानसिद्धिरित्याह सदसतोरैकत्वेत्यादि । एवमाद्यपक्षत्रये प्रधानासिद्धिमुक्त्वा सत्कार्य्यपक्षे तत् साधयितुं सत्कार्य्यपक्षसमर्थनाय कारिकामवतारयति सत्कार्यं प्रतिजानीते अस्मादि । कार्य्यं सत् कारणव्यापारात् प्रागपि विद्यमानमित्यर्थः तेन कारणव्यापारोत्तरं सत्त्वस्य नैयायिकादिवादिभिः सिद्धत्वेन न सिद्धसाधनमिति दर्शयितुं विशिनष्टि कारणव्यापारादित्यादि । सतस्त्रिषु वादिविप्रतिपत्तिषु दर्शितासु असत्कार्यपक्षनिराकरणेऽपि इतरयोः पक्षयोरनिराकरणात् तत्पक्षयोः प्रधानासिद्धिरित्याशङ्क्य मूले तन्निराकरणाभावेऽपि अयुक्तत्वादेव तयोः पक्षयोर्न ग्राह्यतेति कथयितुमादौ बौद्धपक्षं दूषयितुमुपस्थापयति यद्यपीत्यादि । दूषयति तथापीत्यादि । अयमाशयः सम्बद्धं सम्बन्धिनमेव जनयतीति नियमेन कार्यकारणयोः सम्बन्धोऽपेक्षितः बीजनाशाङ्कुरयोश्च केनापि सम्बन्धेन न सम्बन्धिता घटते येन तयोः कार्य्यकारणभावः स्यात् । असम्बद्धस्य कार्य्यजनकत्वे सर्व्वस्मात् सर्वकार्यौत्पत्तिरित्यव्यवस्था स्यात् । न च बीजध्वंसाङ्कुरप्रागभावः न तन्तुमृत्पिण्डस्वभाव एव कारणं तथा च अङ्कुरप्रागभाव एव नियामको भविष्यतीति वाच्यम् प्रागभावस्य सूक्ष्मावस्थातिरिक्तत्वे अङ्कुरतत्प्रागभावयोश्च विभिन्नकालिकतया केनापि सम्बन्धेन सम्बन्धित्वाभावेन नियामकत्वाभावात् असम्बद्धस्य नियामकत्वे पूर्व्वदोषतादवस्थ्यात् । न च प्रतियोगितासम्बन्धेन तयोः सम्बन्धितेति वाच्यम् अभावसम्बन्धिताया एव प्रतियोगितापदार्थतया तस्या अद्याप्युत्पत्तेरसिद्धत्वात् न च बीजस्य भावात् कथं तस्य अङ्कुरकारणत्वमिति, तस्य नाशेऽपि तदवयवस्थाभावात् तस्यैव कारणत्वं वाच्यमिति सर्वं सुस्थम् । विवर्त्तवादे च यद्यपि तदनन्यत्वमारम्भणशब्दादिभ्य इति शा० २, १,१४ सूत्रेण कार्यकारणयोरभिन्नत्वमेव स्वीकृतं तथापि घटपटादिज्ञानानामध्यस्तविषयकतया विषयाणां मिथ्यात्वं तैरङ्गीक्रियते तथा हि विवादाध्यासितानि घटादिज्ञानानि अध्यस्तविषयकाणि सत्याविषयकज्ञानत्वात् शुक्तिकायां रजतज्ञानवदित्यनुमानेन घटादिज्ञानानामध्यस्तविषयकत्वे सिद्धे अध्यस्तस्य च ज्ञाननाश्यतया मिथ्यात्वमित्यसत्त्वमेव तथा च सदसतोस्तादात्म्यानुपपत्तिदोषेण नैतत्पक्षाश्रयणम् । किञ्च मिथ्यात्वं ज्ञाननिवर्त्त्यत्वं तच्च नेदं रजतमिति बाधबुद्ध्या यथा रजतस्य मिथ्यात्वं प्रसिद्धमेवं घटादेर्मिथ्यात्वज्ञापकस्य बाधस्यादर्शनात् तस्य मिथ्यात्वमेवञ्च हेत्वसिद्धेः कथं घटादिज्ञानादावध्यस्तविषयकत्वसिद्धिः । एतदर्थमेव असति बाधक इत्युक्तम् । तथा च शुक्तिरजतबाधवदत्र बाधकाभावान्न तस्य मिथ्यात्वम् । न चाद्वैतश्रुतिरेव बाधिका, तस्याः अन्यार्थपरतया द्वैताभावनिषेधपरत्वाभावात् अतएव "नाद्वैतश्रुतिविरोधो जातिपरत्वात्" इत्यनेन शाण्डिल्यसूत्रेण श्रुतेः प्रधानकातीदबङ्गजीवपरत्वं समर्थितम् । एवं पक्षद्वय-

नयुक्तिकतया निरस्य दृढयुक्तिकस्य काणादादिपक्षस्य निरसनीयतयाऽवशेषतां दर्शयति कणभक्षेत्यादि कणमन्नकणं भक्षयतीति कणभक्षः कणादः। अक्षं चक्षुश्चरणे यस्येति अक्षचरणो गौतमस्तदनुसारिमतमित्यर्थः

ननु भावस्य सत्त्वमसत्त्वं च कादाचित्को धर्मो न तु स्वाभाविकः तथा च उत्पत्तेः प्राक् असत्त्वं परतस्तु सत्त्वम् यथा घटे पाकात् पूर्वं श्यामता, पाकोत्तरं रक्तता, तद्वत् कालविशेषे धर्मविशेषो भविष्यतीति असत्कार्यपक्षेऽपि न काचित् क्षतिरिति शङ्कते सदसत्त्वे इति। परिहरति तथाप्यसतीति। अयमाशयः असत्त्वस्य भावधर्मत्वे उत्पत्तेः प्रागपि तस्य धर्मिणः सत्त्वं स्वीकर्त्तव्यं तथा हि धर्मसत्त्वं धर्मिसत्त्वं विनानुपपद्यमानं धर्मिसत्त्वमपि तदाक्षिपति तथा चापादकेन असत्त्वरूपधर्मसत्त्वेन आपाद्यस्य धर्मिसत्त्वस्य सिद्धिः इति। सत्त्वं कार्यसत्त्वं तदवस्थं उत्पत्तेः प्रागपि स्थितमिति न तदानीं धर्म्यसत्त्वासिद्धिरित्याह तथा च नासत्त्वमिति असत्त्वधर्मिणस्तदानीमपि सिद्धत्वात् धर्म्यसत्त्वमित्यर्थः। तदेवोपपादयति असम्बद्धेनेत्यादि। असम्बद्धेन धर्मिणा सहेति शेषः असत्त्वेनेत्यत्रास्यान्वयः। अतदात्मना अतत्स्वरूपेण वा असत्त्वेन कथमसत् स्यात् असत्त्वाश्रयः स्यादित्यर्थः धर्मिणा सह सम्बद्धेनैव धर्मेण तदाश्रयत्वनियमात् असम्बद्धस्य च तादात्म्येनैव तथात्वनियमाच्च प्रकृते असत्त्वस्य घटेन सह सम्बन्धाभावात् तत्तादात्म्याभावाच्च न तदाश्रयत्वमिति भावः। सत्कार्यपक्षमुपसंहरति तस्मादिति। तैलस्य, तण्डुलानां, पयसश्चाभिव्यक्तिरित्यत्रानुकृष्याऽन्वयः। असत्त्वे कार्यस्य उत्पत्तेः प्रागसत्त्वे सत्त्वशक्तिभिः सत्त्वाश्रयैः कारणैः सह सम्बन्धोनास्ति। असम्बद्धस्य चोत्पत्तौ प्रागुक्ता अव्यवस्थितिः सर्वस्मात् सर्वोत्पत्तिरित्येवं रूपा अव्यवस्था। प्रथमं तत्पदं द्वितीयान्तं कार्यपरम्, द्वितीयं तु कारणपरं प्रथमान्तम्। कार्य्यानुकूला कारणनिष्ठैव शक्तिः कार्यजननियामिकेत्यवसेयम् तथा च कार्यस्यासत्त्वे कथं तदनुकूलत्वं तस्याः स्यादिति समर्थयितुं शक्तेरितरभिन्नत्वं विकल्प्य दूषयति सा शक्तिरिति"।

यथा च असतो न सदुत्पत्तिः सतश्चाभिव्यक्तिस्तथा छा॰उ॰भाष्ययोः समर्थितं यथा "सदेव सौम्येदमग्र आसीदेकमेवाऽद्वितीयम्। तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयं तस्मादसतःसज्जायते। कुतस्तु खलु सौम्यैवं स्यादिति? होवाच कथमसतः सज्जायेतेति?। सत्त्वेव सौम्येदमग्र आसीत् एकमेवाद्वितीयम्। तदैक्षत बहु स्यां प्रजायेयेति"छा॰उ॰ "सदेव सदित्यस्तितामात्रं वस्तु सूक्ष्मं निर्विशेषं सर्व्वगतम्। एकं निरञ्जनं निरवयवं विज्ञानं यदवगम्यते सर्व्ववेदान्तेभ्यः। एवशब्दोऽवधारणार्थः। किन्तदवध्रियते? इत्याह। इदं जगन्नामरूपक्रियावद्विकृतमुपलभ्यते यत्तत्सदेवासीदित्यासीच्छब्देन सम्बध्यते। कदा सदेवेदमासीदित्युच्यते अग्रे जगतः प्रागुत्पत्तेः। किं नेदानीमिदं सद् येनाग्र आसीदिति विशेष्यते, न, कथं तर्हि विशेषणम्? इदानीमपीदं सदेव किन्तु नामरूपविशेषणवदिदंशब्दबुद्धिविषयं चेतीदञ्च भवति। प्रागुत्पत्तेस्त्वग्रे केवलसच्छब्दबुद्धिमात्रगम्यमेवेति सदेवेदमग्र आसीदित्यवधार्य्यते। न हि प्रागुत्पत्तेर्नामवद्रूपवद्वेदमिति ग्रहीतुं शक्यं वस्तु सुषुप्तकाल इव। यथा सुषुप्तादुत्थितः सत्त्वमात्रमवगच्छति सुषुप्ते सन्मात्रमेव केवलं वस्त्विति तथा प्रागुत्पत्तेरित्यभिप्रायः। यथेदमुच्यते लोके पूर्व्वाह्णे घटादिसिसृक्षुणा कुलालेन मृत्पिण्डं प्रसारितमुपलभ्य ग्रामान्तरं गत्वा प्रत्यागतोऽपराह्णे तत्रैव घटशरावाद्यनेकभेदभिन्नं कार्य्यमुपलभ्य मृदेवेदं घटशरावादि केवलं पूर्व्वाह्णे आसीदिति, तथेहोच्यते सदेवेदमग्र आसीदिति। एकमेवेति। स्वकार्य्यपतितमन्यन्नास्तीत्येकमेवेत्युच्यते। अद्वितीयमिति। मृद्व्यतिरेकेण मृदो यथाऽन्यद्घटाद्याकारेण परिणमयितृ कुलालादिनिमित्तकारणं दृष्टं तथा सद्व्यतिरेकेण सतः सहकारिकारणं द्वितीयं वस्त्वन्तरं प्राप्तं प्रतिषिध्यते। अद्वितीयमिति नास्य द्वितीयं वस्त्वन्तरं विद्यत इत्यद्वितीयम्। ननु वैशेषिकपक्षेऽपि सत्सामानाधिकरण्यं सर्व्वस्योपपद्यते। द्रव्यगुणादिषु सच्छब्दबुद्ध्यनुवृत्तेः। सद्द्रव्यं सन् गुणः सत् कर्म्मेत्यादिदर्शनात्, सत्यमेवं स्यादिदानीम्, प्रागुत्पत्तेस्तु नैवेदं कार्य्यं सदेवासीदित्यभ्युपगम्यते वैशेषिकैः प्रागुत्पत्तेः कार्य्यस्यासत्त्वाभ्युपगमात्। न चैकमेव सदद्वितीयं प्रागुत्पत्तेरिच्छन्ति। तस्माद्वैशेषिकपरिकल्पितात् सतोऽन्यत्कारणमिदं सदुच्यते मृदादिदृष्टान्तेभ्यः। तत् तत्र हैतस्मिन् प्रागुत्पत्तेर्वस्तुनिरूपणे एके वैनाशिका आहुर्वस्तु निरूपयन्तोऽसदभावमात्रं प्रागुत्पत्तेरिदं जगदेकमेवाद्वितीयमासीदिति। सदभावमात्रं हि प्रागुत्पत्तेस्तत्त्वं कल्पयन्ति बौद्धाः। न तु सत्प्रतिद्वन्द्विवस्त्वन्तर-

मिच्छन्ति। यथा सच्चासदिति गृह्यमाणं यथाभूतं तद्विपरीतं तत्त्वं भवतीति नैयायिकाः। ननु सदभावमात्रं प्रागुत्पत्तेश्चेदभिप्रेतं वैनाशिकैः कथं प्रागुत्पत्तेरिदमासीदसदेकमेवाद्वितीयञ्चेति कालसम्बन्धः सङ्ख्यासम्बन्धोऽद्वितीयत्वं चोच्यते तैः। बाढम्। न युक्तं तेषां भावाभावमात्रमभ्युपगच्छताम्। असत्त्वमात्राभ्युपगमोऽप्ययुक्त एवाभ्युपगन्तुरनभ्युपगमानुपपत्तेः। इदानीमभ्युपगन्ताभ्युपगम्यते न प्रागुत्पत्तेरिति न प्रागुत्पत्तेः सदभावस्य प्रमाणाभावात्। प्रागुत्पत्तेरसदेवेति कल्पनानुपपत्तिः। ननु कथं वस्त्वाकृतेः शब्दार्थत्वेऽसदेवमेवाद्वितीयमिति पदार्थवाक्यार्थोपपत्तिस्तदनुपपत्तौ चेदं वाक्यमप्रमाणं प्रसज्येतेति चेत् नैष दोषः सद्ग्रहणनिवृत्तिपरत्वाद्वाक्यस्य। सदित्ययं तावच्छब्दः सदाकृतिवाचकः। एकमेवाद्वितीयमित्येतौ च समानाधिकरणौ। तथेदमासीदिति च। तत्र नञ् सद्वाक्ये प्रयुक्तः सद्वाक्यमेवावलम्ब्य सद्वाक्यार्थविषयां बुद्धिं सदेकमेवाद्वितीयमिदमासीदित्येवंलक्षणां ततः सद्वाक्यार्थान्निवर्त्तयति। अश्वारूढ इवाश्वाभिमुखोऽश्वं तदभिमुखविषयान्निवर्त्तयति तद्वत्। न तु पुनः सदभावमेवाभिधत्तेऽतः पुरुषस्य विपरीतग्रहणनिवृत्त्यर्थपरमिदमसदेवेत्यादि वाक्यं प्रयुज्यते। दर्शयित्वा हि विपरीतग्रहणं ततो निवर्त्तयितुं शक्यत इत्यर्थवत्त्वादसदादिवाक्यस्य श्रौतत्वं प्रामाण्यञ्च सिद्धमित्यदोषः। तस्मादसतः सर्वाभावरूपात् सद्विद्यमानमजायत समुत्पन्नम्। अडभावश्छान्दसः। तदेतद्विपरीतग्रहणं महावैनाशिकपक्षं दर्शयित्वा प्रतिषेधति। कुतस्तु? प्रमाणात् खलु हे सोम्य! एवं स्यादसतः सज्जायेतेत्येवं कुतो भवेत् न कुतश्चित्प्रमाणादेवं सम्भवतीत्यर्थः। यदपि बीजोपमर्देऽङ्कुरो जायमानो दृष्टोऽभावादेवेति तदप्यभ्युपगमविरुद्धं तेषाम्। कथं? ये तावद्बीजावयवा बीजसंस्थानविशिष्टास्तेऽङ्कुरेऽप्यनुवर्त्तन्त एव न तेषामुपमर्दोऽङ्कुरजन्मनि। यत्पुनर्बीजाकारसंस्थानं तद्बीजावयवव्यतिरेकेण वस्तुभूतं न वैनाशिकैरभ्युपगम्यते यदङ्कुरजन्मन्युपमृद्येताथ तदस्त्यवयवव्यतिरिक्तं वस्तुभूतं तथा च सत्यभ्युपगमविरोधः। अथ संवृत्याभ्युपगतं बीजसंस्थानरूपमुपमृद्यत इति चेत्। केयं संवृत्तिर्नाम किमसावभाव उत भाव इति। यद्यभावो दृष्टान्ताभावः। अथ भावस्तथापि नाभावादङ्कुरोत्पत्तिः बीजावयवेभ्यो ह्यङ्कुरोत्पत्तेः। अवयवा अप्युपमृद्यन्त इति चेत्।

न तदवयवेषु तुल्यत्वात्। यथा वैनाशिकानां बीजसंस्थानरूपोऽवयवी नास्ति। तथावयवा अपीति तेषामप्युपमर्दानुपपत्तिः। बीजावयवानामपि सूक्ष्मावयवास्तदवयवानामप्यन्ये सूक्ष्मास्तदवयवा इत्येवं प्रसङ्गस्याऽनिवृत्तेः सर्वत्रोपमर्दानुपपत्तिः। सद्बुद्ध्यनुवृत्तेः सत्त्वानिवृत्तिश्चेति सद्वादिनां सत एव सदुत्पत्तिः सिध्यति। न त्वसद्वादिनां दृष्टान्तोऽस्त्यसतः सदुत्पत्तेः। मृत्पिण्डाद्घटोत्पत्तिर्दृश्यते सद्वादिनां, तद्भावे च भावात्तदभावे चाभावात्। यद्यभावादेव घट उत्पद्येत घटार्थिना मृत्पिण्डो नोपादीयेत। अभावशब्दबुद्ध्यनुवृत्तिश्च घटादौ प्रसज्येत न त्वेतदस्त्यतो नासतः सदुत्पत्तिः। यदप्याहुर्मृद्बुद्धिर्घटबुद्धेर्निमित्तमिति मृद्बुद्धिर्घटबुद्धेः कारणमुच्यते न तु परमार्थत एव मृद्घटौ वास्तीति तदपि मृद्बुद्धिर्विद्यमाना विद्यमानाया एव घटबुद्धेः कारणमिति नासतः सदुत्पत्तिः। मृद्बुद्धिघटबुद्ध्योर्निमित्तनैमित्तिकतयानन्तर्यमात्रं न तु कार्यकारणत्वमिति चेत् न बुद्धीनां नैरन्तर्ये गम्यमाने वैनाशिकानां बहिर्दृष्टान्ताभावात्। अतः कुतस्तु खलु सोम्यैवं स्यादिति होवाच कथं केन प्रकारेणासतः सज्जायेतेति? असतः सदुत्पत्तौ न कश्चिदपि दृष्टान्तप्रकारोऽस्तीत्यभिप्रायः। एवमसद्वादिपक्षमुन्मथ्योपसंहरति सत्त्वेव सोम्येदमग्र आसीदिति स्वपक्षसिद्धिः। ननु सद्वादिनोऽपि सतः सदुत्पद्यत इति नैव दृष्टान्तोऽस्ति। घटाद्घटान्तरोत्पत्त्यदर्शनात्। सत्यमेवं न सतः सदन्तरमुत्पद्यते किं तर्हि सदेव संस्थानान्तरेणावतिष्ठते। यथा सर्पः कुण्डली भवति। यथा च मृच्चूर्णं पिण्डघटकपालादिप्रभेदैः। यद्येवं सदेव सर्वप्रकारावस्थं कथं प्रागुत्पत्तेरिदमासीदित्युच्यते। ननु न श्रुतं त्वया सदेवेत्यवधारणमिदंशब्दवाच्यस्य कार्यस्य। प्राप्तं तर्हि प्रागुत्पत्तेरसदेवासीन्नेदंशब्दवाच्यमिदानीमिदं जातमिति, न सत एवेदंशब्दबुद्धिविषयतयावस्थानात् यथा मृदेव पिण्डघटादिशब्दबुद्धिविषयत्वेनावतिष्ठते तद्वत्। ननु यथा मृद्वस्त्वेवं पिण्डघटाद्यपि तद्वन्मृद्बुद्धेरन्यबुद्धिविषयत्वात्कार्यस्य सतोऽन्यद्वस्त्वन्तरं स्यात्कार्यजातं यथाऽश्वाद्गौः, न पिण्डघटादीनामितरेतरव्यभिचारेऽपि मृत्त्वाव्यभिचारात्। यद्यपि घटः पिण्डं व्यभिचरति पिण्डश्च घटं तथापि पिण्डघटौ मृत्त्वं न व्यभिचरतस्तस्मान्मृन्मात्रं पिण्डघटौ, व्यभिचरत्यश्वं गौरश्वो वा गाम्, तस्मान्मृदादिसंस्थानमात्रं घटादयः। एवं सत्संस्थानमात्रमिदं सर्व-

मिति युक्तं प्रागुत्पत्तेः सदेवेति वाचारम्भणमात्र-
त्वाद्विकारसंस्थानमात्रस्य । ननु निरवयवं सत् "निष्कलं
निष्क्रियं शान्तं निरवद्यं निरञ्जनम्" "दिव्यो ह्यमूर्त्तः
पुरुषः स बाह्याभ्यन्तरो ह्यजः"इत्यादिश्रुतिभ्यो, निरवय-
वस्य सतः कथं विकारसंस्थानमुपपद्यते । नैष दोषो रज्ज्वा-
द्यवयवेभ्यः सर्पादिसंस्थानवद्बुद्धिपरिकल्पितेभ्यः सदवय-
वेभ्यो विकारसंस्थानोपपत्तेः । "वाचारम्भणं विकारो नाम-
धेयं मृत्तिकेत्येव सत्यम्" "एवं सदेव सत्यमिति" श्रुतेः ।
एकमेवाद्वितीयं परमार्थत इदंबुद्धिकालेऽपि तत्सत् ऐक्षतेक्षां
दर्शनं कृतवत् । अतश्च न प्रधानं साङ्ख्यपरिकल्पितं
जगत्कारणम् प्रधानस्याचेतनत्वाभ्युपगमात् । इदन्तु
सच्चेतनमीक्षितृत्वात्तत्कथमैक्षतेत्याह बहु प्रभूतं स्यां भवेयं
प्रजायेय प्रकर्षेणोत्पद्येय । यथा मृद् घटाद्या-
कारेण यथा वा रज्ज्वादि सर्पाद्याकारेण बुद्धि-
कल्पितेन । असदेव तर्हि सर्वं यद्गृह्यते रज्जुरिव
सर्पाद्याकारेण, न, सत एव द्वैतभेदेनान्यथागृह्यमाण-
त्वान्नासत्त्वं कस्यचित्क्वचिदिति ब्रूमः । यथा सतोऽन्य-
द्वस्त्वन्तरं परिकल्प्य पुनस्तस्यैव प्रागुत्पत्तेः प्रध्वंसाच्चो-
र्द्ध्वमसत्त्वं ब्रुवते तार्किका न तथाऽस्माभिः कदाचित्-
क्वचिदपि सतोऽन्यदभिधानमभिधेयं वा वस्तु परिकल्प्यते
सदेव तु सर्वमभिधानमभिधीयते च यदन्यबुद्ध्या यथा
रज्जुरेव सर्पबुद्ध्या सर्प इत्यभिधीयते यथा, वा पिण्ड-
घटादिर्मृदोऽन्यबुद्ध्या पिण्डघटादिशब्देनाभिधीयते लोके ।
रज्जुविवेकदर्शिनां तु सर्पाभिधानबुद्धी निवर्त्तेते यथा च
मृद्विवेकदर्शिनां घटादिशब्दबुद्धी तद्वत्सद्विवेकदर्शिनामन्य-
विकारशब्दबुद्धी निवर्त्तेते । 'यतो वाचो निवर्त्तन्तेऽप्राप्य म-
नसा सहेति" "अनिरुक्तेऽनिलयने"इत्यादिश्रुतिभ्यः" भा॰
छा॰उ॰ भाष्ये अभावादिकारणवादनिराकरणेन उत्-
पत्तेः प्रागपि सत्कार्य्यं कारणव्यापाराद्भिव्यज्यते इति
स्थिरीकृतम् यथा । "नैवेह किञ्चनाग्र आसीत् मृत्यु-
नैवेदमावृतमासीत् वृ॰उ॰ । 'नैवेह किञ्चनाग्र आसीत् ।
इह संसारमण्डले किञ्चन किञ्चिदपि नामरूपप्रविभक्त वि-
शेषं नैवासीत् न बभूव । प्रागुत्पत्तेर्मनआदेः किं शून्य-
मेव स्यात्, नैवेह किञ्चनेति श्रुतेः; न, कार्य्यं कारणं चासी-
दुत्पत्तेश्च । उत्पद्यते हि घटः । अतः प्रागुत्पत्तेर्घटस्य
नास्तित्वम् न तु कारणस्य नास्तित्वं मृत्पिण्डादि-
दर्शनात् । यन्नोपलभ्यते तस्यैव नास्तिता । अस्तु कार्य्यस्य,
न तु कारणस्य, उपलभ्यमानत्वात् न प्रागुत्पत्तेः सर्वा-
नुपलम्भात्, अनुपलब्धिश्चेदभावो हेतुः सर्वस्य जगतः
प्रागुत्पत्तेर्न कारणं कार्य्यं चोपलभ्यते । तस्मात्सर्वस्यैवा-
भावोऽस्तु, न मृत्युनैवेदमावृतमासीदिति श्रुतेः ।
यदि हि किञ्चिदपि नासीत् येनाव्रियते यच्चाव्रियते
तदा नावक्ष्यत् मृत्युनैवेदमावृतमिति । न हि भवति गग-
नकुसुमच्छन्नो वन्ध्यापुत्र इति । ब्रवीति च मृत्युनैवेदमा-
वृतमासीदिति । तस्माद्येनावृतं कारणेन यच्चावृतं कार्य्यं
प्रागुत्पत्तेस्तदुभयमासीच्छ्रुतेः प्रामाण्यात् अनुमेय-
त्वाच्च । अनुमीयते च प्रागुत्पत्तेः कार्य्यकारणयोर-
स्तित्वम् कार्य्यस्य हि सतो जायमानस्य कारणे सत्युत्पत्ति-
दर्शनात् असति चादर्शनात् । जगतोऽपि प्रागुत्पत्तेः
कारणास्तित्वमनुमीयते घटादिकारणास्तित्ववत् । घटा-
दिकारणस्याप्यसत्त्वमेवानुपमृद्य मृत्पिण्डादिकं घटाद्य-
नुत्पत्तेरिति चेन्न मृदादेः, कारणत्वात् । मृत्सुवर्णादि
हि तत्र कारणं घटरुचकादेः, न पिण्डाद्याकारविशेषः;
तदभावे तद्भावात् । असत्यपि पिण्डाकारविशेषे मृत्सुव-
र्णादिकारणद्रव्यमात्रादेव घटरुचकादिकार्य्योत्पत्तिर्दृश्यते ।
तस्मान्न पिण्डाकारविशेषो घटरुचकादिकारणम् । अ-
सति तु मृत्सुवर्णादिद्रव्ये घटरुचकादिर्न जायत इति
मृत्सुवर्णादिद्रव्यमेव कारणं न तु पिण्डाकारविशेषः ।
सर्वं हि कारणं कार्य्यमुत्पादयत् पूर्वोत्पन्नस्यात्मकार्य्यस्य
तिरोधानं कुर्व्वत् कार्य्यान्तरमुत्पादयति । एकस्मिन्
कारणे युगपदनेककार्य्यविरोधात् । न च पूर्व्वकार्य्योपमर्दे
कारणस्यात्मोपमर्दो भवति । तस्मात् पिण्डाद्युपमर्दे
कार्य्योत्पत्तिदर्शनमहेतुः । प्रागुत्पत्तेः कारणासत्त्वे पि-
ण्डादिव्यतिरेकेण मृदादेरसत्त्वादयुक्तमिति चेत् पिण्डादि-
पूर्व्वकार्य्योपमर्दे मृदादिकारणं नोपमृद्यते । घटादिका-
र्य्यान्तरेऽप्यनुवर्त्तत इत्येतदयुक्तम् । पिण्डघटादिव्यतिरेकेण
मृदादिकारणस्यानुपलम्भादिति चेत् न मृदादिकारणानां
घटाद्युत्पत्तौ पिण्डादिनिवृत्तावनुवृत्तिदर्शनात् । सादृ-
श्यादन्वयदर्शनं कारणानुवृत्तेरिति चेन्न पिण्डादि-
गतानां मृदाद्यवयवानामेव घटादौ प्रत्यक्षत्वेऽनुमानाभा-
सात्सादृश्यादिकल्पनानुपपत्तेः । न च प्रत्यक्षानुमान-
योर्विरुद्धा व्यभिचारिता प्रत्यक्षपूर्व्वकत्वादनुमानस्य
सर्वत्रैवानाश्वासप्रसङ्गात् । यदि च क्षणिकं सर्वं, तदे-
वेदमिति गम्यमानं तद्बुद्धेरपि अन्यतद्बुद्ध्यपेक्षत्वे
तस्या अप्यन्यबुद्ध्यपेक्षत्वमित्यनवस्थायां तत्सदृशमिदमित्यस्या
अपि बुद्धेर्मृषात्वात् सर्वत्रानाश्वासतैव । तदिदम्बुद्ध्योरपि

कर्त्त्रभावे सम्बन्धानुपपत्तिः। साद्दश्यात्सम्बन्ध इति चेन्न। तदिदमुद्धेरितरेतरविषयत्वानुपपत्तेः। असति चेतरेतरविषये सादृश्यप्रत्ययानुपपत्तिः। असत्येव सादृश्ये तद्बुद्धिरिति चेन्न। तदिदमुद्धेरपि सादृश्यबुद्धिवदसद्विषयत्वप्रसङ्गात्। असद्विषयत्वमेव सर्व्वबुद्धीनामस्त्विति चेन्न बुद्धिबुद्धेरप्यसद्विषयत्वप्रसङ्गात्। तदप्यस्त्विति चेन्न। सर्व्वबुद्धीनां मृषात्वेऽसत्यबुद्ध्यनुपपत्तेः। तस्मादसदेतत् सादृश्यात्तु तद्बुद्धिरित्यतः सिद्धः प्राक्कार्य्योत्पत्तेः कारणसद्भावः। कार्य्यस्य चाभिव्यक्तिलिङ्गत्वात्। कार्य्यस्य च सद्भावः प्रागुत्पत्तेः सिद्धः कथम्? अभिव्यक्तिलिङ्गत्वात्। अभिव्यक्तिर्लिङ्गमस्येत्यभिव्यक्तिः साक्षाद्विज्ञानालम्बनत्वप्राप्तिः। यद्धि लोके प्रावृतं तम आदिना घटादि वस्तु तत् आलोकादिना प्रावरणतिरस्कारेण विज्ञानविषयत्वं प्राप्नुवत् प्राक्सद्भावं न व्यभिचरति। तथेदमपि जगत् प्रागुत्पत्तेरित्यवगच्छामः। न ह्यविद्यमानो घट उदितेऽप्यादित्य उपलभ्यते। ननु तेऽविद्यमानत्वाभावादुपलभ्येतैवेति चेत्। न हि तव घटादिकार्य्यं कदाचिदप्यविद्यमानमित्युदितेऽप्यादित्य उपलभ्येतैव। मृत्पिण्डेऽसन्निहिते तम आद्यावरणे चासति विद्यमानत्वादिति चेत् न द्विविधत्वादावरणस्य। घटादिकार्य्यस्य द्विविधं ह्यावरणं मृदादेरभिव्यक्तस्य तमःकुड्यादि प्राङ्मृदोऽभिव्यक्तेर्मृदाद्यवयवानां पिण्डादिकार्य्यान्तररूपेण संस्थानम्। तस्मात् प्रागुत्पत्तेर्विद्यमानस्यैव घटादिकार्य्यस्यावृतत्वादनुपलब्धिः। नष्टोत्पन्नभावाभावशब्दप्रत्ययभेदस्त्वभिव्यक्तितिरोभावयोर्द्विविधत्वापेक्षः। पिण्डकपालादेरावरणवैलक्षण्यादयुक्तमिति चेत् तमःकुड्यादि हि घटाद्यावरणं घटादिभिन्नदेशं दृष्टं न तथा घटादिभिन्नदेशे दृष्टे पिण्डकपाले तस्मात्पिण्डकपालसंस्थानयोर्विद्यमानस्यैव घटस्यावृतत्वादनुपलब्धिरित्ययुक्तमावरणधर्म्मवैलक्षण्यादिति चेत् न क्षीरोदकादेः क्षीराद्यावरणेनैकदेशत्वदर्शनात्। घटादिकार्य्ये कपालचूर्णाद्यवयवानामन्तर्भावादनावरणत्वमिति चेत् न विभक्तानां कार्य्यान्तरत्वादावरणत्वोपपत्तेः। आवरणाभाव एव यत्नः कर्त्तव्य इति चेत् पिण्डकपालावस्थयोर्विद्यमानमेव घटादिकार्य्यमावृतत्वान्नोपलभ्यत इति घटादिकार्य्यार्थिना तदावरणविनाश एव यत्नः कर्त्तव्यो न घटाद्युत्पत्तौ। न चैतदस्ति तस्मादयुक्तं विद्यमानस्यैवावृतत्वादनुपलब्धिरिति चेत् न अनियमात्। न हि विनाशमात्रप्रयत्नादेव घटाद्यभिव्यक्तिर्नियता तम आद्यावृते घटादौ प्रदीपाद्युत्पत्तौ प्रयत्नदर्शनात्। सोऽपि तमोनाशायैवेति चेत् दीपाद्युत्पत्तावपि यः प्रयत्नः सोऽपि तमस्तिरस्करणाय। तस्मिन्नष्टे घटः स्वयमेवोपलभ्यते न हि घटे किञ्चिदाधीयत इति चेत् न प्रकाशवतो घटस्योपलभ्यमानत्वात्। यथा प्रकाशविशिष्टो घट उपलभ्यते प्रदीपकरणे, न तथा प्राक् प्रदीपकरणात्। तस्मात् न तमस्तिरस्कारायैव प्रदीपकरणम् किन्तर्हि प्रकाशवत्त्वाय। प्रकाशवत्त्वेनैवोपलभ्यमानत्वात्। क्वचिदावरणविनाशेऽपि यत्नः स्यात् यथा कुड्यादिविनाशे। तस्मान्न नियमोऽस्ति अभिव्यक्त्यर्थिनावरणविनाश एव यत्नः कार्य्य इति। नियमार्थवत्त्वाच्च। कारणे वर्त्तमानं कार्य्यं कार्य्यान्तराणामावरणमित्यवोचाम। तत्र यदि पूर्व्वाभिव्यक्तस्य कार्य्यस्य पिण्डस्य व्यवहितस्य वा कपालस्य विनाश एव यत्नः क्रियेत तदा विदलचूर्णाद्यपि कार्य्यं जायेत। तेनाप्यावृतो घटो नोपलभ्यत इति पुनः प्रयत्नान्तरापेक्षैव। तस्माद्घटाद्यभिव्यक्त्यर्थिनो नियत एव कारकव्यापारोऽर्थवान्। तस्मात् प्रागुत्पत्तेरपि सदेव कार्य्यम्। अतीतानागतप्रत्ययभेदाच्च। अतीतो घटोऽनागतो घट इत्येतयोश्च प्रत्यययोर्वर्त्तमानघटप्रत्ययवन्न निर्विषयत्वं युक्तम्। अनागतार्थिप्रवृत्तेश्च। न ह्यसत्यर्थितया प्रवृत्तिर्लोके दृष्टा। योगिनां चातीतानागतज्ञानस्य सत्यत्वात्। असंश्चेद्भविष्यद्घट ऐश्वरम्भविष्यद्घटविषयं प्रत्यक्षज्ञानं मिथ्या स्यात्। न च प्रत्यक्षमुपचर्य्यते। घटसद्भावे ह्यनुमानमवोचाम विप्रतिषेधाच्च। यदि घटो भविष्यतीति कुलालादिषु व्याप्रियमाणेषु घटार्थं, प्रमाणेन निश्चितम्। येन च कालेन घटस्य सम्बन्धो भविष्यतीत्युच्यते तस्मिन्नेव काले घटोऽसन्निति प्रतिषिद्धमभिधीयते भविष्यद्घटोऽसन्निति न भविष्यतीत्यर्थः अयं घटो न वर्त्तत इति यद्वत्। अथ प्रागुत्पत्तेर्घटोऽसन्नित्युच्यते घटार्थं प्रवृत्तेषु कुलालादिषु तत्र यथा व्यापाररूपेण वर्त्तमानास्तावत् कुलालादयस्तथा घटो न वर्त्तत इत्यसच्छब्दस्यार्थश्चेन्न विरुध्यते कस्मात् स्वेन हि भविष्यद्रूपेण घटो वर्त्तते। न हि पिण्डस्य वर्त्तमानता कपालस्य वा घटस्य भवति। न च तयोर्भविष्यत्ता घटस्य। तस्मात् कुलालादिव्यापारवर्त्तमानतायां प्रागुत्पत्तेर्घटोऽसन्निति न विरुध्यते। यदि घटस्य यत्स्वभविष्यत्ताकार्य्यरूपं तत् प्रतिषिध्येत। तत्प्रतिषेधे विरोधः स्यात्। न तु तद्वान् प्रतिषेधति। न च सर्व्वेषां

क्रियावतामेकैव वर्त्तमानता भविष्यत्त्वं वा । अपि च चतुर्विधानामभावानां घटस्येतरेतराभावो घटादन्यो दृष्टो यथा घटाभावः पटादिरेव न घटस्वरूपमेव । न च घटाभावः सन् पटोऽभावात्मकः किन्तर्हि भावरूप एव घटस्य प्राक्प्रध्वंसात्यन्ताभावानामपि घटेन व्यपदिश्यमानत्वात् घटस्येतरेतराभाववत् तथैव भावात्मकता अभावानाम् । एवञ्च सति घटस्य प्रागभाव इति न घटस्वरूपमेव प्रागुत्पत्तेर्नास्ति । अथ घटस्य प्रागभाव इति घटस्य यत् स्वरूपं तदेवोच्यते, घटस्येति व्यपदेशानुपपत्तिः। अथ कल्पयित्वा व्यपदिश्येत शिलापुत्त्रकस्य शरीरमिति यद्वत् । तथापि घटस्य प्रागभाव इति कल्पितस्यैवाभावस्य घटेन व्यपदेशो न घटस्वरूपस्यैव । अथार्थान्तरं घटाद्घटस्याभाव इति उक्तोत्तरमेतत् । किञ्चान्यत्प्रागुत्पत्तेः शशविषाणवदभावभूतस्य घटस्य स्वकारणसत्तासम्बन्धानुपपत्तिः द्विनिष्ठत्वात् सम्बन्धस्य । अयुतसिद्धानामदोष इति चेत् न भावाभावयोरयुतसिद्धत्वानुपपत्तेः । भावभूतयोर्हि युतसिद्धताऽयुतसिद्धता वा स्यान्न तु भावाभावयोरभावयोर्वा । तस्मात् सदेव कार्य्यं प्रागुत्पत्तेरिति सिद्धम्" एतदभिप्रेत्य गीतायामुक्तम् "नासतो विद्यते भावो नाभावो विद्यते सतः" इति

अथ भूतोत्पत्तिप्रकारः काणादभाष्यन्यायकन्दल्योर्दर्शितो यथा "ततः पुनः प्राणिनां भोगभूतये महेश्वरस्य सिसृक्षानन्तरं सर्व्वात्मगतवृत्तिलब्धादृष्टापेक्षेभ्यस्तत्संयोगेभ्यः पवनपरमाणुषु कर्म्मोत्पत्तौ तेषां परस्परसंयोगेभ्यो द्व्यणुकादिप्रक्रमेण महान् वायुः समुत्पन्नो दोधूयमानस्तिष्ठति" भा० "यद्यपि तदाऽऽत्मनां प्राणसम्बन्धो नास्ति तथापि प्राणिन इत्युक्तं योग्यत्वात्। तेषां भोगभूतये सुखदुःखानुभवोत्पत्तये महेश्वरस्य सिसृक्षा सर्जनेच्छा जायते तदनन्तरं सर्व्वात्मसु गतान्यदृष्टानि वृत्तिं लभन्ते । यद्यपि युगपदुत्पद्यमानासंख्येयकार्य्योत्पत्तौ व्याप्रियमाणा दिगादिवन्नित्यत्वादेकैवेश्वरेच्छा क्रियाशक्तिरूपा तथाप्येषा तत्तत्कालविशेषसहकारिप्राप्तौ कदाचित् संहारार्थी भवति कदाचित् सृष्ट्यर्थी भवति यदा संहारार्थी तदा तदनुरोधाददृष्टानां वृत्तिनिरोध औदासीन्यलक्षणो जायते यदा त्वसौ सृष्ट्यर्थी भवेत्तदा वृत्तिलाभः स्वकार्य्यजननं प्रति व्यापारो भवति । वृत्तिर्लब्धा यैस्तानि वृत्तिलब्धानि आहिताग्न्यादित्वात् निष्ठायाः पूर्व्वनिपातोऽन्तजात इति यथा । सर्वात्मगतानि वृत्तिलब्धानि अदृष्टानि तान्यपेक्षन्ते ये तत्संयोगा आत्माणुसंयोगास्तेभ्यः पवनपरमाणुषु कर्म्माण्युत्पद्यन्ते पवनपरमाणवः समवायिकारणं अदृष्टवदात्माणुसंयोगोऽसमवायिकारणमदृष्टं निमित्तकारणमेवं कर्म्मोत्पत्तौ तेषां पवनपरमाणूनां परस्परसंयोगा जायन्ते तत्संयोगेभ्यश्च द्व्यणुकान्युत्पद्यन्ते तदनु त्र्यणुकानीति अनेन क्रमेण महान् वायुः समुत्पद्यमानो नभस्याकाशे दोधूयमानः क्वचिदप्रतिहतत्वाद्वेगातिशययुक्तस्तिष्ठति" क०। 'तदनन्तरं तस्मिन्नाप्येभ्यः परमाणुभ्यस्तेनैव क्रमेण महान् सलिलनिधिरुत्पन्नः पोप्लूयमानः" भा० "प्रतिरोधकाभावात् सर्वत्र प्लवमानस्तिष्ठति" क०। "ततस्तस्मिन्नेव पार्थिवेभ्यः परमाणुभ्यो द्व्यणुकादिक्रमेण समुत्पन्ना महापृथिवी स्थिरस्वभावा तिष्ठति । ततस्तैजसेभ्यः परमाणुभ्यः समुत्पन्नो महांस्तेजोराशिर्देदीप्यमानस्तिष्ठति" भा० । "तदनन्तरं सलिलनिधेरुत्पत्त्यनन्तरं तस्मिन्नेव जलनिधौ पार्थिवेभ्यः परमाणुभ्यो महापृथिवी संहता स्थिरस्वभावाऽवतिष्ठते तदनन्तरं तस्मिन्नेव महोदधौ तैजसेभ्योऽणुभ्यो द्व्यणुकादिक्रमेणोत्पन्नो महांस्तेजोराशिः केनचिदनभिभूतत्वाद्देदीप्यमानस्तिष्ठति यद्यपि पयःपावकयोः स्वाभाविको विरोधोऽस्ति तथाप्यदृष्टवशादाधाराधेयभावो नानुपपन्नः" क०। "एवं समुत्पन्नेषु चतुर्षु महाभूतेषु महेश्वरस्याभिध्यानमात्रात्तैजसेभ्योऽणुभ्यः पार्थिवपरमाणुसहितेभ्यो महदण्डमारभ्यते । तस्मिंश्चतुर्वदनकमलं सर्वलोकपितामहं ब्रह्माणं सकलभुवनसहितमुत्पाद्य प्रजासर्गे नियुङ्क्ते" भा० । "एवमनन्तरोक्तेन क्रमेणोत्पन्नेषु महाभूतेषु महेश्वरस्याभिध्यानमात्रात् सङ्कल्पमात्रात् तैजसेभ्यः परमाणुभ्यः पार्थिवपरमाणुसहितेभ्यो महदण्डं महत्कुम्भमारभ्यते डिम्बारम्भे पार्थिवा अवयवा उपष्टम्भकास्तेनेदं वह्निपुञ्जप्रायं मा भूत् । तस्मिन्नण्डे चत्वारि वदनकमलानि यस्य तं ब्रह्माणं सर्वलोकपितामहं सर्वेषामेव लोकानामाद्यं पुरुषं समस्तैर्भुवनैः सहोत्पाद्य प्रजानां सर्गे जनने विनियुङ्क्ते "त्वमिदं कुर्व्विति" क०। "स च महेश्वरेण विनियुक्तो ब्रह्मातिशयज्ञानवैराग्यैश्वर्य्यसम्पन्नः प्राणिनां कर्म्मविपाकं विदित्वा कर्म्मानुरूपज्ञानभोगायुषः सुतान् प्रजापतीन् मानसान् मनुदेवर्षिपितृगणान् मुखबाहूरुपादतश्चतुरो वर्णान् यानि चोच्चावचानि भूतानि तानि दृष्ट्वाऽऽशयानुरूपैर्धर्म्मज्ञानवैराग्यैश्वर्य्यैः संयोजयतीति" भा०। ज्ञानञ्च वैराग्यञ्चैश्वर्य्यञ्च ज्ञानवैराग्यैश्वर्य्याणि अतिशयेन ज्ञानादीनि तैः सम्पन्न उपचितः ज्ञानातिशयात् प्राणिनां धर्मा-

धर्मौ यथावत् प्रत्येति। वैराग्यादपक्षपातेन प्रवर्त्तते। ऐश्वर्य्यात् कर्म्मफलं भोजयति। प्राणिनां कर्मविपाकं विदित्वेति विविधेन प्रकारेण पाकोविपाकः कर्मणां विपाकः कर्मविपाकस्तं विदित्वा एतावदस्य कर्मफलं भविष्यतीति ज्ञात्वा कर्म्मानुरूपाणि ज्ञानभोगायूंषि तेषां तान् प्रजापतीन् दक्षाद्यान् मानसान् मनःसंकल्पप्रभवान् मनुदेवर्षिपितृगणान् मनून् देवान्ऋषीन् पितृगणान् मुखबाहूरुपादतश्चतुरोवर्णान् मुखात् ब्राह्मणान्, बाहुभ्यां क्षत्रियान्, ऊरुभ्यां वैश्यान्. पद्भ्यां शूद्रान्, अन्यानि चोच्चावचानि क्षुद्रक्षुद्रतराणि भूतानि सृष्ट्वा आशयानुरूपैराशेते फलोपभोगकालं यावत् आत्मन्यवतिष्ठत इत्याशयः कर्म तदनुरूपैर्ज्ञानधर्मवैराग्यैश्वर्य्यैः संयोजयतीति मात्रयाप्यन्यथा न योजयतीत्यर्थः"। यत् तत्र केचिदेवमाचचक्षिरे प्रेक्षावत्प्रवृत्तिरिष्टार्था वा स्यादनिष्टपरिहारार्था वा नचेष्टानिष्टप्राप्तिपरिहारार्था, न चेष्टानिष्टप्राप्तिपरिहारावीश्वरे समस्तावाप्तकामे सम्भवतः तेनास्य जगन्निर्माणे प्रवृत्तिरनुपपन्ना तत्रोत्तरं प्राणिनां भोगभूतये इति परार्था चिकीर्षायां प्रवृत्तिर्न स्वार्थनिबन्धनेत्यभिप्रायः। नन्वेवं तर्हि सुखमयीमेव सृष्टिं कुर्य्यात् न दुःखशबलां करुणया प्रवृत्तत्वादित्यत्र पपरिहारः प्राणिनां कर्मविपाकं विदित्वेति। परार्थं प्रवृत्तत्वेऽपि न सुखमयीमेव करोति विचित्रकर्म्माशयसहायस्य कर्तृत्वादित्यर्थः नचैवं सति करुणाविरोधोदुःखोत्पादस्य वैराग्यजननद्वारेण परमपुरुषार्थहेतुत्वात्. यदि धर्म्माधर्मावपेक्ष्य करोति नास्य स्वाधीनं कर्त्तृत्वमिति अनीश्वरतादोष इत्यस्यायं प्रतिसमाधिः। आशयानुरूपैः धर्मज्ञानवैराग्यैश्वर्य्यैः संयोजयति स हि सर्वप्राणिनां कर्मानुरूपं फलं प्रयच्छन् कथमनीश्वरः स्यादिति भावः न हि योग्यतानुरूपेण भृत्यानां फलविशेषप्रदः प्रभुरप्रभुर्भवति। कल्पादावुत्पन्नानां प्राणिनां सर्वशब्दार्थेष्वव्युत्पन्नानां सङ्केतस्याशक्यकरणाच्छब्दव्यवहारानुपपत्तिरिति चोदनायां प्रत्यवस्थानबीजमिदं मानसानिति। योनिजशरीरं हि महता गर्भवासादिदुःखप्रबन्धेन विलुप्तसंस्कारं जन्मान्तरानुभूतस्य सर्वस्य न स्मरति। महर्षयः प्रजापतयो मनवस्तु मानसा अयोनिजशरीरविशिष्टा इहसंनिकर्षौ दृढसंस्काराः जन्मान्तरानुभूतं सर्वमेव शब्दार्थव्यवहारं सुप्रतिबुद्धवत् प्रतिसन्दधते प्रतिसन्धानाच्च परस्परं बहुशो व्यवहरन्ति। तेषां व्यवहाराच्च तत्कालवर्त्तिनां प्राणिनामुत्पत्तिः तद्व्यवहाराच्चापरेषामित्युत्पद्यते व्यवहारपरम्परया शब्दार्थव्युत्पत्तिरित्यर्थः" क०।

वेदान्तिमते भूतोत्पत्तिप्रकारो वेदा०प०दर्शितो यथा। "तत्र सर्गाद्यकाले परमेश्वरः सृज्यमानप्रपञ्चवैचित्र्यहेतुप्राणिकर्म्मसहकृतापरिमितानिरूपितशक्तिविशेषविशिष्टमायासहितः नामरूपात्मकं निखिलप्रपञ्चं प्रथमं बुद्धावाकलय्य इदं करिष्यामीति सङ्कल्पयति 'तदैक्षत बहु स्यां प्रजायेयेति" श्रुतेः। तत आत्मन आकाशादीनि पञ्चभूतानि अपञ्चीकृतानि तन्मात्रपदप्रतिपाद्यानि उत्पद्यन्ते तत्राकाशस्य शब्दोगुणो, वायोस्तु शब्दस्पर्शौ तेजसस्तु शब्दस्पर्शरूपाणि, अपान्तु शब्दस्पर्शरूपरसाः, पृथिव्यास्तु शब्दस्पर्शरूपरसगन्धाः। न तु शब्दस्याकाशमात्रगुणत्वं वाय्वादावपि तदुपलम्भात्। नासौ भ्रमः बाधकाभावात्। इमानि भूतानि त्रिगुणमायाकार्याणि अतस्त्रिगुणात्मकानि। एतैश्च सत्वगुणोपेतैः पञ्चभूतैः श्रोत्रत्वक्चक्षूरसनघ्राणानि पञ्चेन्द्रियाणि मनोबुद्ध्यहङ्कारचित्तानि च जायन्ते। श्रोत्रादीनां पञ्चानां क्रमेणैव दिग्वातार्कवरुणाश्विना अधिष्ठातृदेवताः. मनआदीनां चतुर्णां क्रमेण चन्द्रचतुर्मुखशङ्कराच्युताः अधिष्ठातृदेवताः। एतैरेव रजोगुणोपेतैः पञ्चभूतैर्यथाक्रमेण वाक्पाणिपादपायूपस्थाख्यानि कर्म्मेन्द्रियाणि जायन्ते। तेषाञ्च क्रमेण वह्नीन्द्रोपेन्द्रमृत्युप्रजापतयोऽधिष्ठातृदेवताः। रजोगुणोपेतैः पञ्चभूतैरेव पञ्च वायवः प्राणापानव्यानोदानसमानाख्याजायन्ते। तत्र प्रागमनवान् वायुः प्राणोनासाग्रस्थानवर्त्ती। अवागमनवानपानः पाय्वादिस्थानवर्त्ती। विष्वग्गमनवान् व्यानः अखिलशरीरवर्त्ती। ऊर्द्ध्वगमनवानुदानः कण्ठस्थानवर्त्ती। अशितपीताद्यन्नादिसमीकरणः समानः नाभिस्थानवर्त्ती। तैरेव तमोगुणोपेतैरपञ्चीकृतभूतैः पञ्चीकृतभूतानि जायन्ते 'तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति" त्रिवृत्करणश्रुतेः पञ्चीकरणोपलक्षणार्थत्वात्। पञ्चीकरणप्रकारश्चेत्थम्। आकाशमादौ द्विधा विभज्य तयोरेकं भागं पुनश्चतुर्धा विभज्य तेषां चतुर्णामंशानां वाय्वादिषु चतुर्भूतेषु संयोजनम्। एवं वायुं द्वेधा विभज्य तयोरेकं भागं पुनश्चतुर्द्धा विभज्य तेषां चतुर्णां आकाशादिषु संयोजनम्। एवं तेजोऽप्पृथिवीनामपि। तदेवमेकैकभूतस्यार्द्धं स्वांशात्मकम् अर्द्धान्तरञ्च चतुर्विधभूतमयमिति पृथिव्यादौ

स्यांशाधिक्यात् पृथिव्यादिव्यवहारः । तदुक्तम् "वैशेष्यात्तद्वादस्तद्वादः" (शा० सू०) इति । पूर्वोक्तैरपञ्चीकृतभूतैर्लिङ्गशरीरं परलोकयात्रानिर्वाहकं मोक्षपर्य्यन्तस्थायि मनोबुद्धिभ्यामुपेतं ज्ञानेन्द्रियपञ्चककर्म्मेन्द्रियपञ्चकप्राणादिपञ्चकसंयुक्तं जायते । तदुक्तम् । "पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् । अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनमिति" । तच्च द्विविधं परमपरञ्च । परं हिरण्यगर्भलिङ्गशरीरं महत्तत्त्वरूपम्, अपरमस्मदादिलिङ्गशरीरञ्चाहङ्कारतत्त्वमित्याख्यायते । एवं तमोगुणयुक्तेभ्यः पञ्चीकृतभूतेभ्योभूरन्तरिक्षस्वर्गमहर्जनतपःसत्यात्मकस्योर्द्ध्वलोकसप्तकस्य अतलपातालवितलसुतलतलातलरसातलमहातलाख्यस्याधोलोकसप्तकस्य ब्रह्माण्डस्य जरायुजाण्डजस्वेदजोद्भिज्जाख्यचतुर्विधस्थूलशरीराणाञ्चोत्पत्तिः । तत्र जरायुजानि जरायुभ्योजातानि मनुष्यपश्वादिशरीराणि । अण्डजानि अण्डेभ्यो जातानि पक्षिपन्नगादिशरीराणि । स्वेदजानि स्वेदाज्जातानि यूकमशकादिशरीराणि । उद्भिज्जानि भूमिमुद्भिद्य जातानि वृक्षादिशरीराणि । वृक्षादीनामपि पापफलभोगायतनत्वेन शरीरित्वम् । तत्र परमेश्वरस्य पञ्चतन्मात्राद्युत्पत्तौ सप्तदशावयवोपेतलिङ्गशरीरोत्पत्तौ हिरण्यगर्भस्थूलशरीरोत्पत्तौ च साक्षात्कर्त्तृत्वम् । इतरनिखिलप्रपञ्चोत्पत्तौ च हिरण्यगर्भद्वारा "हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति" श्रुतेः हिरण्यगर्भोनाम मूर्त्तिस्तयादन्यः प्रथमोजीवः "स वै शरीरी प्रथमः स वै पुरुष उच्यते । आदिकर्त्ता स भूतानां ब्रह्माग्रे समवर्त्तत" । "हिरण्यगर्भः समवर्त्तताग्रे" इत्यादि "श्रुतेः" ।

सांख्यमते प्रकृतिरेका नित्या अचेतना साम्यावस्थापन्नसत्त्वरजस्तमआत्मिका, पुरुषास्तु बहवश्चिन्मात्रा अपरिणामिनः कूटस्था नित्याः । पूर्व्वकल्पे प्रकृतिपर्य्यन्तसाक्षात्कारिणा प्रकृतिलीनोपाधिकेन आदिविदुषा ईश्वरपदाभिधेयेन स्वस्वामिभावरूपसंयोगवती स्वलीनानमन्तबुद्धितत्त्वनिष्ठपूर्व्वकल्पार्ज्जितादृष्टसचिवा प्रकृतिः सर्गाद्यकाले सत्त्वादिगुणक्षोभमापन्ना महदाद्याकारेण परिणमते । यथा च परिणमते तथा दर्शितम् सां० सू० प्र० भाष्ययोः यथा । "सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः प्रकृतेर्महान् महतोऽहङ्कारोऽहङ्कारात् पञ्च तन्मात्राण्युभयमिन्द्रियं तन्मात्रेभ्यः स्थूलभूतानि पुरुष इति पञ्चविंशतिर्गणः" सू० । "सत्त्वादीनि द्रव्याणि न वैशेषिकादिवद्गुणाः संयोगविभागवत्त्वात् लघुत्वचलत्वगुरुत्वादिधर्मकत्वाच्च । तेष्वत्र शास्त्रे श्रुत्यादौ च गुणशब्दः पुरुषोपकरणत्वात् पुरुषपशुबन्धकत्रिगुणात्मकमहदादिरज्जुनिर्म्मातृत्वाच्च प्रयुज्यते । तेषां सत्त्वादिद्रव्याणां या साम्यावस्थान्यूनानतिरिक्तावस्था न्यूनाधिकाभावेनासंहतावस्थेति यावत् अकार्य्यावस्थेति निष्कर्षः । अकार्यावस्थोपलक्षितं गुणसामान्यं प्रकृतिरित्यर्थः । यथाश्रुते वैषम्यावस्थायां प्रकृतिनाशप्रसङ्गात् । "सत्त्वं रजस्तम इति एषैव प्रकृतिः सदा । एषैव संसृतिर्जन्तोरस्याः पारे परं पदम्" इत्यादिस्मृतिभिर्गुणमात्रस्यैव प्रकृतित्ववचनाच्च । सत्त्वादीनामनुगमाय सामान्येति । पुरुषव्यावर्त्तनाय गुणेति । महदादिव्यावर्त्तनाय चोपलक्षितान्तमिति । महदादयोऽपि हि कार्य्यसत्त्वादिरूपाः पुरुषोपकरणतया गुणाश्च भवन्तीति । तदत्र प्रकृतेः स्वरूपमेवोक्तम् । अस्या विशेषस्तु पश्चाद्वक्ष्यते । प्रकृतेः कार्य्यो महान् महत्तत्त्वम् । महदादीनां स्वरूपं विशेषश्च वक्ष्यते । महतश्च कार्य्योऽहङ्कारः । अहङ्कारस्य कार्यद्वयं तन्मात्राण्युभयमिन्द्रियं च । तत्रोभयमिन्द्रियं बाह्याभ्यन्तरभेदेनैकादशविधम् । तन्मात्राणां कार्य्याणि पञ्च स्थूलभूतानि । स्थूलशब्दात् तन्मात्राणां सूक्ष्मभूतत्वमभ्युपेयम् । पुरुषस्तु कार्य्यकारणविलक्षणः इति इत्येवं पञ्चविंशतिर्गणः पदार्थव्यूह एतदतिरिक्तपदार्थो नास्तीत्यर्थः । अथ वा सत्त्वादीनां प्रत्येकव्यक्त्यानन्त्यं गणशब्दो वक्ति । अयं च पञ्चविंशतिको गणोद्रव्यरूप एव । धर्म्मधर्म्म्यभेदात् तु गुणकर्म्मसामान्यादीनामत्रैवान्तर्भावः । एतदतिरिक्तपदार्थसत्त्वे हि ततोऽपि पुरुषस्य विवेक्तव्यतया तदसंग्रहे न्यूनतापद्येत" ।

प्रकृतेरचेतनत्वेऽपि पुरुषभोगापवर्गार्थं वत्सविवृद्ध्यर्थमचेतनक्षीरवत् प्रवृत्तिः । यथोक्तं सां० का० कौ० । "पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य । पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः" का० "प्रधानस्येति कर्म्मणि षष्ठी प्रधानस्य सर्व्वकारणस्य यद्दर्शनं पुरुषेण तदर्थं, तदनेन भोग्यता प्रधानस्य दर्शिता ततश्च भोग्यं प्रधानं भोक्तारमन्तरेण न सम्भवतीति युक्तास्य भोक्तुमपेक्षा । पुरुषस्यापेक्षां दर्शयति पुरुषस्य कैवल्यार्थम् । तथा हि प्रधानेनासम्भिन्नः पुरुषस्तद्गतं दुःखत्रयं स्वात्मन्यभिमन्यमानः कैवल्यं प्रार्थयते तच्च सत्त्वपुरुषान्यताख्यातिनिबन्धनम् । न च सत्त्वपुरुषान्यताख्यातिः प्रधानमन्तरेणेति कैवल्यार्थं पुरुषः प्रधानमपेक्षते । अनादित्वाच्च संयोगपरम्परायाः

भोगाय संयुक्तोऽपि कैवल्याय पुनः संयुज्यते इति युक्तम्। ननु भवत्वनयोः संयोगो महदादिसर्गस्तु कुतस्त्य इत्यत आह तत्कृतः सर्गः संयोगो हि न महदादिसर्गमन्तरेण भोगाय पर्य्याप्त इति संयोगएव भोगापवर्गार्थं सर्गं करोतीत्यर्थः” कौ० तथाऽचेतनायाः प्रवृत्तौ दृष्टान्तस्तत्रैवोक्तः “वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य। पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य” सां० का०।

पातञ्जले तु प्रतिकल्पमनेकेषां प्रकृतिलीनानां सर्गहेतुत्वकल्पने गौरवात् एकस्यैव ईश्वरस्य तदधिष्ठातृत्वाङ्गीकारेण प्रकृतेस्तथा परिणाम इत्यङ्गीकृतं यथा च एकस्यैव सर्व्वोत्कर्षशालित्वं तथा ईश्वरशब्दे १०५२ पृष्ठे सूत्रभाष्यविवरणेषु दर्शितम्। ४ अभिव्यक्तौ च अभिव्यक्तेर्यथा उत्पत्तिरूपता तथा अभिव्यक्तिशब्दे ३०० पृष्ठे दर्शितम्। एवं भूतभौतिकोत्पत्तिप्रकारः मतभेदेन निरूपितः। अथ विशेषभौतिकोत्पत्तौ कारणविशेषस्तावदभिधीयते तत्र जन्यमात्रोत्पत्तौ ईश्वरः अदृष्टं कालश्च निमित्तकारणमिति नैयायिकादयः। वेदान्तिमते ब्रह्मणोऽविद्याद्वारा निमित्तोपादानरूपोभयकारणता। सांख्यमते प्रकृतेरुपादानता। जन्यभावोत्पत्तौ द्रव्यमुपादानकारणं यथा घटे कपालम् पटे तन्तवः, कुण्डले, सुवर्णम् समवायिकारणम्। तत्तदवयवसंयोगश्चासमवायिकारणम्। गुणोत्पत्तौ द्रव्यं समवायिकारणम् अवयवगुणोवस्त्रादिसंयोगो वा असमवायिकारणं यथा घटरूपे कपालरूपं, पटरूपे तन्तुरूपम्, श्यामघटे रक्तोत्पत्तौ अग्निसंयोगः। एवमात्मनि ज्ञानाद्युत्पत्तौ मनःसंयोगादि असमवायिकारणम्। संयोगविभागोत्पत्तौ क्रिया असमवायिकारणम्, इत्याद्यूह्यम्। ध्वंसरूपाभावोत्पत्तौ प्रतियोगी निमित्तकारणम्। वाय्वादौ रूपाद्यभावस्यैवात्यन्ताभावतया नित्यत्वम् घटाभावस्य नाशे तु भूतले घटापसरणं तदानयनं च तदुत्पत्तौ निमित्तकारणं तेनायमुत्पत्तिविनाशशाली चतुर्थः संसर्गाभावः इति न्यायैकदेशिनः।

देहोत्पत्तिप्रकारः कायशब्दे, गर्भोत्पत्तिप्रकारश्च गर्भशब्दे वक्ष्यते। “उत्पत्तिमात्रे कर्त्तृत्वं सर्वत्रैवास्ति कारके। व्यापारभेदापेक्षायां करणत्वादिसम्भवः” भर्त्तृ० ह०। “उत्पत्तिश्च वा चाहृदोषः” सां० सू०। “न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः। न मुमुक्षुर्न वा मुक्त इत्येषा परमार्थता” अभियुक्तोक्तिः। जीवोत्पत्तिस्तु देहाद्देहान्तरसम्बन्ध एव तन्निमित्तप्रकारादि। इ० उ० भा० दर्शितं यथा “तद्यथा राजानमायान्तमुग्राः प्रत्येनसः सूतग्रामण्योऽन्नैः पानैरावसथैः प्रतिकल्पन्तेऽयमायात्ययमागच्छतीत्येवं हैवंविदं ब्रह्मायातीदमागच्छतीति” “तत्रास्येदं शरीरं परित्यज्य गच्छतो नास्य देहान्तरस्योपादाने सामर्थ्यमस्ति देहेन्द्रियवियोगात्। न चान्येऽस्य भृत्यस्थानीया गृहमिव राज्ञे शरीरान्तरं कृत्वा प्रतीक्षमाणा विद्यन्ते। अथैवं सति कथमस्य शरीरान्तरोपादानमित्युच्यते। सर्वं ह्यस्य जगत्स्वकर्म्मफलोपभोगायतनं कर्म्मफलोपभोगाय चायं प्रवृत्तो देहाद्देहान्तरं प्रतिपित्सुः। तस्मात्सर्वमेव जगत्स्वकर्म्मप्रयुक्तं तत्कर्मफलोपभोगयोग्यं साधनं कृत्वा प्रतीक्षत एव। “कृतं लोकं पुरुषोऽभिजायत इति” श्रुतेः। यथा स्वप्नजागरितं प्रतिपित्सोः। तत् कथमिति? लोकप्रसिद्धो दृष्टान्त उच्यते। तत्र यथा राजानं राज्याभिषिक्तमायान्तं स्वराष्ट्रे उग्रा जातिविशेषाः क्रूरकर्म्माणो वा प्रत्येनसः प्रति प्रत्येनसि पापकर्म्मणि नियुक्ताः प्रत्येनस्तस्करादिदण्डनादौ नियुक्ताः सूताश्च ग्रामण्यश्च सूतग्रामण्यः सूता वर्णसङ्करजा जातिविशेषा ग्रामण्यो ग्रामनेतारस्ते पूर्व्वमेव राज्ञ आगमनं बुद्ध्वाऽन्नैर्भोज्यभक्ष्यादिप्रकारैः पानैर्मदिरादिभिरावसथैश्च प्रासादादिभिः प्रतिकल्पन्ते निष्पन्नैरेव प्रतीक्षन्तेऽयं राजा आयात्ययमागच्छतीत्येवं वदन्तः। एवं ह एवंविदं कर्म्मफलस्य वेदितारं संसारिणमित्यर्थः। कर्म्मफलं हि प्रस्तुतं तदेवंशब्देन परामृश्यते। सर्व्वाणि भूतानि शरीरकर्त्तॄणि करणानुग्राहीतॄणि आदित्यादीनि तत्कर्म्मप्रयुक्तानि कृतैरेव कर्म्मफलोपभोगसाधनैः प्रतीक्षन्ते। इदं ब्रह्म भोक्तृ कर्त्तृ चास्माकमायाति। तथेदमागच्छत्येवमेवं कृत्वा प्रतीक्षन्त इत्यर्थः भाष्यम्। तत्र विस्तरस्तत्रैवोक्तो यथा।

“तद्यथा तृणजलायुका तृणस्यान्तं गत्वाऽन्यमाक्रममाक्रम्यात्मानमुपसंहरत्येवमेवायमात्मेदं शरीरं निहत्याऽविद्यां गमयित्वाऽन्यमाक्रममाक्रम्यात्मानमुपसंहरति। तद्यथा पेशस्कारी पेशसो मात्रामुपादायान्यन्नवतरं कल्याणतरं रूपं तनुत एवमेवायमात्मेदं शरीरं निहत्याऽविद्यां गमयित्वाऽन्यन्नवतरं कल्याणतरं रूपं कुरुते पित्र्यं वा गान्धर्वं वा दैवं वा प्राजापत्यं वा ब्राह्मं वाऽन्येषां वा भूतानाम्। स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः पृथिवीमय आपोमयो वायुमय आकाशमयस्तेजोमयोऽतेजोमयः काममयोऽकाममयः क्रोधमयोऽक्रोधमयो धर्म्ममयोऽधर्ममयः सर्व्वमयस-

यदेतदिदम्मयोऽदोमय इति यथाकारी यथाचारी तथा भवति साधुकारी साधुर्भवति पापकारी पापो भवति पुण्यः पुण्येन कर्मणा भवति पापः पापेन । अथो खल्वाहुः काममय एवायं पुरुष इति स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसम्पद्यते" वृ० उ० ।

"एवं विद्यादिसम्भारसम्भृतो देहान्तरं प्रतिपद्यमानो मुक्त्वा पूर्वं देहं पक्षीव वृक्षान्तरं प्रतिपद्यते, अथ वाऽऽतिवाहिकेन शरीरान्तरेण कर्मफलजन्मदेशं नीयते किं वात्मस्वस्यैव सर्वगतानां करणानां वृत्तिलाभो भवत्याहोस्विच्छरीरस्थस्य सङ्कुचितानि करणानि स्वतस्य भिन्नघटप्रदीपप्रकाशवत्सर्वतो व्याप्य पुनर्देहान्तरारम्भे सङ्कोचमृच्छन्ति किं वा मनोमात्रं वैशेषिकसमय इव देहान्तरारम्भदेशं प्रतिगच्छति किं वा कल्पनान्तरमेव वेदान्तसमय इत्युच्यते । "त एते सर्व एव समाः सर्वेऽनन्ता" इति श्रुतेः । सर्वात्मकानि तावत् करणानि सर्वात्मकप्राणसंश्रयाच्च तेषामाध्यात्मिकाधिभौतिकपरिच्छेदः प्राणिकर्मज्ञानभावनानिमित्तः । अतस्तद्वशात् स्वभावतः सर्वगतानामनन्तानामपि प्राणानां कर्मज्ञानवासनानुरूप्येणैव देहान्तरारम्भवशात् प्राणानां वृत्तिः सङ्कुचति विकसति च । तथा चोक्तम् । "समः प्लुषिणा समो मशकेन समो नागेन सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेणेति" । तथा चेदं वचनमनुकूलम् "स यो हैतानन्तानुपास्त" इत्यादि "तं यथा यथोपासत" इति च । तत्र वासनापूर्वप्रज्ञाख्या विद्या कर्मतन्त्रा जलूकावत्सन्ततैव स्वप्नकाल इव कर्मकृतं देहाद्देहान्तरमारभते हृदयस्थैव पुनर्देहान्तरं पूर्वाश्रयं विमुञ्चतीत्येतस्मिन्नर्थे दृष्टान्त उपादीयते तत्तत्र देहान्तरसञ्चार इदं निदर्शनम् । यथा येन प्रकारेण तृणजलायुका तृणजलौका तृणस्यान्तमवसानं गत्वा प्राप्यान्यत्तृणं तृणान्तरमाक्रममाक्रम्यत इत्याक्रमस्तमाक्रममाक्रम्याश्रित्यात्मानमात्मनः पूर्वावयवमुपसंहरत्यन्त्यावयवस्थाने । एवमेवायमात्मा यः प्रकृतो यः संसारी इदं शरीरं पूर्वोपात्तं निहत्य स्वप्नं प्रतिपित्सुरिव पातयित्वा विद्यां गमयित्वा चेतनं कृत्वा स्वात्मोपसंहारेणान्यमाक्रमं तृणान्तरमिव तृणजलौका इव शरीरान्तरं गृहीत्वा प्रसारितया वासनयाऽऽत्मानमुपसंहरति । तत्रात्मभावमारभते । यथा स्वप्ने देहान्तरमारभते । स्वप्नदेहान्तरस्य इव शरीरारम्भदेशे आरभ्यमाणे देहे जङ्गमे स्थावरे वा । तत्र च कर्मवशात्करणानि लब्धवृत्तीनि संहन्यन्ते बाह्यञ्च कुशमृत्तिकास्थानीयं शरीरमारभ्यते । तत्र च करणव्यूहमपेक्ष्य वागाद्यनुग्रहः । या अग्न्यादिदेवताः संश्रयन्त एष देहान्तरारम्भविधिः" ।

तत्र देहान्तरारम्भे नित्योपात्तमेवोपादानमुपमृद्योपमृद्य देहान्तरमारभते आहोस्वित्पूर्व्वमेव पुनः पुनरादत्त इत्यत्रोच्यते दृष्टान्तः । तत्रैतस्मिन्नर्थे यथा पेशस्कारी पेशः सुवर्णं तत्करोतीति पेशस्कारी सुवर्णकारः पेशसः सुवर्णस्य मात्रामुपादायापच्छिद्य गृहीत्वाऽन्यत् पूर्व्वस्माद्रचनाविशेषादन्यन्नवतरमभिनवतरं कल्याणात् कल्याणतरं रूपं तनुते निर्म्मिमीते एवमेवायमात्मेत्यादि पूर्व्ववत् । नित्योपात्तान्येव पृथिव्यादीन्याकाशान्तानि पञ्चभूतानि यानि "द्वे वाव ब्रह्मणो रूपे" इति चतुर्थे व्याख्यातानि पेशःस्थानीयानि । तान्येवोपमृद्योपमृद्यान्यदन्यच्च देहान्तरं नवतरं कल्याणतरं रूपं संस्थानविशेषं देहान्तरमित्यर्थः । कुरुते पित्र्यं वा पितृभ्यो हितं पितृलोकोपभोगयोग्यमित्यर्थः । गान्धर्वं गन्धर्वाणामुपभोगयोग्यम् । तथा देवानां दैवम्, प्रजापतेः प्राजापत्यम्, ब्रह्मण इदं ब्राह्मं वा, यथाकर्म्म यथाश्रुतमन्येषां वा भूतानां सम्बन्धि शरीरान्तरं कुरुत इत्यभिसम्बध्यते । यस्य बन्धनसङ्ग्रहका उपाधिभूता यैः संयुक्तस्तन्मयोऽयमिति विभाव्यते ते पदार्थाः पुञ्जीकृत्येहैकत्र प्रतिनिर्दिश्यन्ते । स वा अयं य एवं संसार्यात्मा ब्रह्मैव पर एव योऽशनायाद्यतीतो विज्ञानमयो विज्ञानं बुद्धिस्तेनोपलक्षणमात्रप्रायस्तन्मयः । कतम आत्मेति । योऽयं विज्ञानमयः । प्राणेष्विति ह्युक्तं विज्ञानमयो विज्ञानप्रायो यस्मात्तद्धर्मत्वमस्य विभाव्यते "ध्यायतीव लेलायतीवेति" । तथा मनोमयो मनःसन्निकर्षान्मनोमयः । तथा प्राणमयः प्राणः पञ्चवृत्तिस्तन्मयो येन चेतनश्चलतीव लक्ष्यते । तथा चक्षुर्म्मयो रूपदर्शनकाले । एवं श्रोत्रमयः शब्दश्रवणकाले । एवं तस्य तस्येन्द्रियस्य व्यापारोद्भवे तत्तन्मयो भवति । एवं बुद्धिप्राणद्वारेण चक्षुरादिकरणमयः सन् शरीरारम्भकपृथिव्यादिभूतमयो भवति । तत्र पार्थिवादिशरीरारम्भे पृथिवीमयो भवति तथा वरुणादिलोकेष्वाप्यशरीरारम्भे आपोमयो भवति । तथा वायव्यशरीरारम्भे वायुमयो भवति । तथाकाशशरीरारम्भे आकाशमयो भवति । एवमेतानि तैजसानि देवशरीराणि । तेष्वारभ्यमाणेषु तत्तन्मयस्तेजोमयो भवति । अतो व्यतिरिक्तानि पश्वादिशरीराणि नरकप्रेतादिशरीराणि चातेजोमयानि ;

तान्यपेक्ष्याह्यातेजोमय इति एवं कार्य्यकरणसङ्घातमयः सन्नात्मा प्राप्तं वस्त्वन्तरं पश्यन्निदम्मयः, अदोमय इत्यप्राप्तव्यमिति। एवं विपरीतप्रत्ययस्तदभिलाषः काममयो भवति। तस्मिन् कामे दोषं पश्यतस्तद्विषयाभिलाषोपशमे चित्तं प्रसन्नमकलुषं शान्तं भवति तन्मयोऽकाममयः। एवं तस्मिन्विहते कामे केनचित्स कामः क्रोधत्वेन परिणमते तेन तन्मयो भवन् क्रोधमयः। स क्रोधः केनचिदुपायेन निवर्त्तितो यदा भवति तदा प्रसन्नमनाकुलं चित्तं सदक्रोध उच्यते। एवं तेन तन्मयः एवं कामक्रोधाभ्यामकामक्रोधाभ्याञ्च तन्मयो भूत्वा धर्म्ममयोऽधर्म्ममयश्च भवति। न हि कामक्रोधादिभिर्विना धर्मादिप्रवृत्तिरुपपद्यते। "यद्यद्धि कुरुते कर्म्म तत्तत्कामस्य चेष्टितमिति" स्मरणात्। धर्म्ममयोऽधर्म्ममयश्च भूत्वा सर्वमयो भवति। समस्तं धर्माधर्मयोः कार्यं यावत्किञ्चिद्व्याकृतं तत्सर्वं धर्माधर्मयोः फलम्। तत्प्रतिपद्यमानस्तन्मयो भवति किं बहुना तदेतत् सिद्धमस्य यदयमिदम्मयो गृह्यमाणविषयादिमयस्तस्मादयमदोमयः अद इति परोक्षं कार्य्येण गृह्यमाणेन निर्द्दिश्यते। अनन्ता ह्यन्तःकरणे भावनाविशेषाः। नैव ते विशेषतो निर्द्देष्टुं शक्यन्ते। तस्मिंस्तस्मिन् क्षणे कार्यतोऽवगम्यन्ते। इदमस्य हृदि वर्त्ततेऽदोऽस्येति। तेन गृह्यमाणकार्य्येणेदम्मयतया निर्दिश्यते। परोक्षोऽन्तःस्थो व्यवहारोऽयमिदानीमदोमय इति। सङ्क्षेपतस्तु यथा कर्त्तुं यथा वाऽऽचरितुं शीलमस्य सोऽयं यथाकारी यथाचारी स तथा भवति। करणं नाम नियता क्रिया विधिप्रतिषेधादिगम्या, आचरणं नाम अनियतमिति विशेषः। साधुकारी साधुर्भवति। यथाकारीत्यस्य विशेषणम्। पापकारी पापो भवति च। यथाचारीत्यस्य ताच्छील्यप्रत्ययोपादानात् अत्यन्ततात्पर्य्यतैव तन्मयत्वं न तु तत्कर्म्ममात्रेणेत्याशङ्क्याह। पुण्यः पुण्येन कर्म्मणा भवति पापः पापेनेति। पुण्यपापकर्म्ममात्रेणैव तन्मयता स्यान्न तु ताच्छील्यमपेक्षते। ताच्छील्ये तु तन्मयत्वातिशय इत्ययं विशेषः। तत्र कामक्रोधादिपूर्व्वकपुण्यापुण्यकारिता सर्व्वमयत्वे हेतुः संसारस्य कारणं देहाद्देहान्तरसञ्चारस्य च। एतत्प्रयुक्तो ह्यन्यदन्यद्देहान्तरमुपादत्ते। तस्मात् पुण्यापुण्ये संसारस्य कारणमेतत्। विषयो हि विधिप्रतिषेधावत्र शास्त्रस्य साफल्यमिति। अथो अप्यन्ये बन्धनमोक्षकुशलाः स्त्वाहुः सत्यं कामादिपूर्व्वके पुण्यापुण्ये शरीरग्रहणकारणम्। तथापि कामप्रयुक्तो हि पुरुषः पुण्यापुण्यकर्म्मणोपचिनोति। कामप्रहाणे तु कर्म्म विद्यमानमपि पुण्यापुण्योपचयकरं न भवति। उपचिते अपि पुण्यापुण्ये कर्म्मणी कामशून्ये फलारम्भके न भवतः। तस्मात्काम एव संसारस्य मूलम्। तथाचोक्तमाथर्वणे "कामान् यः कामयते मन्यमानः स कर्म्मभिर्जायते तत्र तत्रेति"। तस्मात्काममय एवायं पुरुषो यदन्यमयत्वं तदकारणं विद्यमानमपीत्यतोऽवधारयति काममय एवेति। स च काममयः सन् यादृशेन कामेन यथाकामो भवति तत्क्रतुर्भवति सकाम ईषदभिलाषमात्रेणाभिव्यक्तो यस्मिन्विषये भवति स विहन्यमानः स्फुटीभवन् क्रतुत्वमापद्यते। क्रतुर्नामाध्यवसायो निश्चयो यदनन्तरा क्रिया प्रवर्त्तते यत्क्रतुर्भवति यादृक्कामकार्य्येण क्रतुना यथास्वरूपः क्रतुरस्य सोऽयं यत्क्रतुर्भवति तत्कर्म्म कुरुते। यद्विषयः क्रतुस्तत्फलनिर्वृत्तये यद्योग्यं कर्म्म तत्कुरुते निर्वर्त्तयति। यत्कर्म्म कुरुते तदभिसम्पद्यते तदीयं फलमभिसम्पद्यते" भा०।

उत्पत्तिक्रम पु० उत्पत्तौ क्रमः। जगतामुत्पत्तिपरिपाट्याम्। स च क्रमः "ब्रह्मेति प्रकृत्य तैत्ति० उ० भाष्ययोर्दर्शितो यथा।

"तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः ओषधिभ्योऽन्नम् अन्नाद्रेतः रेतसः पुरुषः। स वा एष पुरुषोऽन्नरसमयः" उप०। "तस्मादिति मूलवाक्यसूत्रितं ब्रह्म परामृश्यते। एतस्मादिति। मन्त्रवाक्येन, अनन्तरं यथा लक्षितं यद्ब्रह्मैव ब्राह्मणवाक्येन सूत्रितम् यच्च सत्यं ज्ञानमनन्तं ब्रह्मेत्यनन्तरमेव लक्षितम् तस्मादेतस्माद्ब्रह्मण आत्मन आत्मशब्दवाच्यत्वात्। आत्मा हि तत्सर्वस्य "तत् सत्यं स आत्मेति" श्रुत्यन्तरादतो ब्रह्मात्मा। तस्मादेतस्माद्ब्रह्मण आत्मस्वरूपादाकाशः सम्भूतः समुत्पन्नः। आकाशो नाम शब्दगुणोऽवकाशकरो मूर्त्तद्रव्याणां, तस्मादाकाशात् स्वेन स्पर्शगुणेन पूर्व्वेण च कारणगुणेन शब्देन द्विगुणो वायुः, सम्भूत इत्यनुवर्त्तते। वायोश्च स्वेन रूपगुणेन पूर्वाभ्याञ्च त्रिगुणोऽग्निः सम्भूतः। अग्नेः स्वेन रसगुणेन पूर्वैश्च त्रिभिश्चतुर्गुणा आपः सम्भूताः। अद्भ्यः स्वेन गन्धगुणेन पूर्वैश्चतुर्भिः पञ्चगुणा पृथिवी सम्भूता। पृथिव्या ओषधयः। ओषधीभ्योऽन्नम्। अन्नाद्रेतोरूपेण परिणतात्पुरुषः शिरःपाण्याद्याकृतिमान्। स वा एष पुरुषोऽन्नरसमयोऽन्नरसविकारः। पुरुषाकृतिभावितं हि सर्व्वेभ्योऽङ्गेभ्यस्तेजः

सम्भूतं रेतो वीजं तस्माद्यो जायते सोऽपि तथा पुरुषाकृतिरेव स्यात् सर्वजातिषु जायमानानां जनकाकृतिनियमदर्शनात् सर्व्वेषामप्यवरत्वविकारत्वे ब्रह्मवंश्यत्वे चाविशिष्टे । कस्मात् ? पुरुष एव गृह्यते प्राधान्यात् । किं पुनः प्राधान्यं कर्म्मज्ञानाधिकारः पुरुष एव हि शक्तत्वादर्थित्वाच्च अर्थी विद्वान् समर्थः कर्म्मज्ञानयोरधिक्रियते । "पुरुषत्वे वा विस्तरात्मा स हि विज्ञानेन सम्पन्नतमो विज्ञातं वदति विज्ञातं पश्यति वेद श्वस्तनं वेद लोकालोकौ मर्त्त्येनामृतमीप्सतीत्येवं सम्पन्नोऽथेतरेषां पशूनामशनापिपासे एवाभिज्ञानमित्यादिश्रुत्यन्तरदर्शनात्" भा० ।

एतेषाञ्च ब्रह्माधिष्ठितानामेव तत्तत्कार्य्यरूपेणाविर्भावः शा०सू०भाष्ययोर्निरूपितो यथा ।

"तदभिध्यानादेव तु तल्लिङ्गात् सः" सू० ।"किमिमानि वियदादीनि भूतानि स्वयमेव स्वविकारान् सृजन्त्याहोस्वित् परमेश्वर एव तेन तेनात्मनावतिष्ठमानोऽभिध्यायन् तं तं विकारं सृजतीति सन्देहे सति प्राप्तं तावत् स्वयमेव सृजन्तीति कुतः "आकाशाद्वायुर्वायोरग्निरित्यादि" स्वातन्त्र्यश्रवणात् । नन्वचेतनानां स्वतन्त्राणां प्रवृत्तिः प्रतिषिद्धा, नैष दोषः । "तत्तेज ऐक्षत ता आप ऐक्षन्तेति च भूतानामपि चेतनत्वश्रवणादित्येवं प्राप्तेऽभिधीयते । स एव परमेश्वरस्तेन तेनात्मनावतिष्ठमानोऽभिध्यायंस्तं तं विकारं सृजतीति कुतः ? तल्लिङ्गात् । तथा हि शास्त्रम् "यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयतीत्येवंजातीयकं, साध्यक्षाणामेव भूतानां प्रवृत्तिं दर्शयति । तथा "सोऽकामयत बहु स्यां प्रजायेयेति" प्रस्तुत्य "सच्च त्यच्चाभवत् तदात्मानं स्वयमकुरुतेति" च तस्यैव सर्वात्मभावं दर्शयति । यत्तु ईक्षणश्रवणमप्तेजसोः, तत् परमेश्वरावेशवशादेव द्रष्टव्यं "नान्योऽतोऽस्ति द्रष्टा" इतीक्षित्रन्तरप्रतिषेधात् प्रकृतत्वाच्च सत ईक्षितुः "तदैक्षत बहु स्यां प्रजायेयेत्यत्र" । "भूतानामुत्पत्तिक्रमश्चिन्तितः" शा०भा० ।

उत्पत्तिमत् त्रि० उत्पत्तिर्विद्यतेऽस्य मतुप् स्त्रियां ङीप् । उत्पत्तिविशिष्टे "विपदुत्पत्तिमतामुपस्थिता" रघुः ।

उत्पत्तिविधि पु० उत्पत्तिः कर्मस्वरूपज्ञापको विधिः । "स्वर्गकामोऽश्वमेधेन यजेतेत्यादौ कर्म्मस्वरूपज्ञापके विधौ । विधिशब्दे विवृतिः । उत्पत्तिवाक्यमप्यत्र न० ।

उत्पत्तिव्युत्क्रम पु० उत्पत्तितो व्युत्क्रमः । उत्पत्तिक्रमाद् विपरीते क्रमे । स च शा०सू० भाष्ययोर्दर्शितः यथा "भूतानामुत्पत्तिक्रमश्चिन्तितोऽथेदानीमप्ययक्रमश्चिन्त्यते "विपर्य्ययेण तु क्रमोऽतउपपद्यते च" शा०सू० । "किमनियतेन क्रमेणाप्ययः, उतोत्पत्तिक्रमेणाथ वा तद्विपरीतेनेति? । त्रयोऽपि चोत्पत्तिस्थितिप्रलया भूतानां ब्रह्मायत्ताः श्रूयन्ते "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्तीति" । तत्रानियमोऽविशेषादिति प्राप्तम् । अथ वोत्पत्तेः क्रमस्य श्रुतत्वात् प्रलयस्यापि क्रमाकाङ्क्षिणः स एव क्रमः स्यादित्येवं प्राप्ते ततो ब्रूमः विपर्य्ययेण तु प्रलयक्रमोऽत उत्पत्तिक्रमाद्भवितुमर्हति । तथा हि लोके दृश्यते येन क्रमेण सोपानमारूढस्ततो विपरीतेन क्रमेणावरोहतीति । अपि च दृश्यते मृदो जातं घटाद्यप्ययकाले मृद्भावमप्येति अद्भ्यश्च जातं हिमकरकादि अब्भावमप्येतीत्यतश्चोपपद्यते एतत्, यत् पृथिव्यद्भ्यो जाता सती स्थितिकालव्यतिक्रान्तावपोऽपीयात्, आपश्च तेजसो जाताः सत्यस्तेजोऽपीयुः, एवं क्रमेण सूक्ष्मं सूक्ष्मतरञ्चानन्तरमनन्तरं कारणमपीत्य सर्वं कार्य्यजातं परमकारणं परमसूक्ष्मं ब्रह्माप्येतीति वेदितव्यम् । न हि स्वकारणव्यतिक्रमेण कारणकारणे कार्य्याप्ययो न्याय्यः । स्मृतावप्युत्पत्तिक्रमविपर्य्ययेणैवाप्ययक्रमस्तत्र तत्र प्रदर्शितः । "जगत्प्रतिष्ठा देवर्षे ! पृथिव्यप्सु प्रलीयते । ज्योतिःष्वापः प्रलीयन्ते ज्योतिर्वायौ प्रलीयते" इत्येवमादौ । उत्पत्तिक्रमस्तूत्पत्तावेव श्रुतत्वान्नाप्यये भवितुमर्हति न चासावयोग्यत्वादप्ययेनाकाङ्क्ष्यते । न हि कार्य्ये ध्रियमाणे कारणस्याप्ययो युक्तः कारणाप्यये कार्य्यस्यावस्थानानुपपत्तेः । कार्य्याप्यये तु कारणस्यावस्थानं युक्तं मृदादिष्वेवं दृष्टत्वात्" भा० ।तदेतत् वेदा०प०स्पष्टमुक्तम् यथा ।"भूतानां भौतिकानाञ्च न कारणलयक्रमेण लयः कारणलयसमये कार्य्याणामाश्रयमन्तरेणावस्थानानुपपत्तेः किन्तु सृष्टिक्रमविपरीतक्रमेण तत्तत्कार्य्यनाशे तत्तज्जनकादृष्टनाशस्यैव प्रयोजकतया उपादाननाशस्याप्रयोजकत्वात् अन्यथा न्यायमतेऽपि महाप्रलये पृथिवीपरमाणुगतरूपरसादेरविनाशापत्तेः। तथा च पृथिव्या अप्सु, अपां तेजसि, तेजसो वायौ, वायोराकाशे, आकाशस्य जीवाहङ्कारे, तस्य हिरण्यगर्भाहङ्कारे, तस्य चाविद्यायामित्येवंरूप एव प्रलयः । तदुक्तम् विष्णुपुराणे "जगत्प्रतिष्ठा देवर्षे ! पृथिव्यप्सु प्रलीयते । तेजस्यापः प्रलीयन्ते तेजो वायौ प्रलीयते । वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते । अव्यक्तं पुरुषे ब्रह्मन्! निष्कले सम्प्रलीयते । पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः" ।

उत्पत्य अव्य० उत्+पत–ल्यप्। ऊर्द्ध्वं पतित्वेत्यर्थे उत्पत्यपाकला मयू०। जन्मप्रभृत्युत्पन्ने

उत्पथ पु० उत्क्रान्तः पन्थानम् अत्या० समा० अच्। गम्यपथातिक्रान्ते २न्याय्यरीत्यतिक्रान्ते च। भिन्नपर्य्यादतया अपकृष्टः पन्थाः उद्भावे प्रा०स० अच् समा० कदर्य्ये पथि "गुरोरप्यवलिप्तस्य कार्य्याकार्य्यमजानतः। उत्पथप्रतिपन्नस्य न्याय्यं भवति शासनम्" भा० आ० १४०अ०। "प्रमदाह्युत्पथं नेतुं कामक्रोधवशानुगम्" मनुः।"चिप्रावरोधाङ्गनमुत्पथेन गाम्" माघः

उत्पन्न त्रि० उद्+पद–क्त। उद्भूते। "औरसे पुत्र उत्पन्ने तृतीयांशहराः सुताः" स्मृ० "उत्पन्नस्य पुनरुत्पादः" न्यायप्र० उत्पन्नेन हरति उत्सङ्गा० ठञ्। औत्पन्निक तेन हारके त्रि०।

उत्पल न० उद्+पल–अच् ।१नीलपद्मे, २कुमुदादौ, ३कुष्ठौषधौ च। उत्क्रान्तं पलं मांसम् अत्या० समा०। ४मांसशून्ये त्रि०। "गवाक्षसेदापनयनव्याजाक्लान्तकर्णोत्पलानाम्" मेघ०। "यत्रोत्पलदलक्लैव्यमक्ष्याप्यापुः सुरद्विषाम्" "मुहूर्त्तकर्णोत्पलतां प्रपेदे" "नवावतारं कमलादिवोत्पलम्" रघुः "अन्योन्यमुत्पीडयदुत्पलाक्ष्याः" कुमा०। तच्च त्रिविधं नीलं रक्तं श्वेतञ्च "ध्रुवंस नीलोत्पलपत्रधारया" शकु०।

उत्पलगन्धिक न० उत्पलस्य गन्धइव गन्धोऽस्य इत् समा० संज्ञायां कन्। गोशीर्षाख्ये चन्दने।।

उत्पलपत्र न० उत्पलस्य पत्रमिव। १तिलकभेदे स्त्रीणां स्तनादौ २नखक्षते च। हेम०। इन्दीवरस्य दले।

उत्पलपत्रक न० उत्पलपत्रमिव कन्। उत्पलपत्राकारे सुश्रुतोक्ते शस्त्रभेदे। अर्द्धधारशब्दे २७५ पृष्ठे तत्स्थानादि दर्शितम्।"वृद्धिपत्रनखशस्त्रमुद्रिकोत्पलपत्रकार्द्धधाराणि छेदने भेदने च" सुश्रु०॥

उत्पलभेद्यक पु०सुश्रुतोक्ते कर्णबन्धाकृतिभेदे। स च पञ्चदशविधः। तद्विभागलक्षणादि सुश्रु०दर्शितं यथा।

"तत्र समासेन पञ्चदशकर्णबन्धनाकृतयः। तद्यथा नेमिसन्धानक उत्पलभेद्यको वल्लूरक आसङ्गिमो गण्डकर्ण आहार्य्यो निर्वेधिमो व्यायोजिमः कपाटसन्धिकोऽर्द्धकपाटसन्धिकः संक्षिप्तो हीनकर्णो वल्लीकर्णो यष्टिकर्णः काकौष्ठक इति। तेषु पृथुलायतसमोभयपालिर्नेमिसन्धानकः। वृत्तायतसमोभयपालिरुत्पलभेद्यकः। ह्रस्ववृत्तसमोभयपालिर्वल्लूरकः। अभ्यन्तरदीर्घैकपालिरासङ्गिमः। बाह्यदीर्घैकपालिर्गण्डकर्णः। अपालिरुभयतोऽप्याहार्य्यः। पीठोपमपालिरुभयतः, क्षीणपुत्रिकाश्रितो निर्वेधिमः। स्थूलाणुसमविषमपालिर्व्यायोजिमः। अभ्यन्तरदीर्घैकपालिरितराल्पपालिः कपाटसन्धिकः। बाह्यदीर्घैकपालिरितराल्पपालिरर्द्धकपाटसन्धिकः। तत्र दशैते कर्णबन्धविकल्पाः साध्यास्तेषां स्वनामभिरेवाकृतयः प्रायेण व्याख्याताः। संक्षिप्तादयः पञ्चासाध्यास्तत्र शुष्कशष्कुलिरुत्सन्नपालिरितराल्पपालिः संक्षिप्तः। अनधिष्ठानपालिः पर्य्यन्तयोः क्षीणमांसो हीनकर्णः। तनुविषमाल्पपालिर्वल्लीकर्णः। ग्रथितमांसस्तब्धशिरायतसूक्ष्मपालिर्यष्टिकर्णः। निर्मांससंक्षिप्ताग्राल्पशोणितपालिः काकौष्ठकपालिरिति"। "बद्धेष्वपि तु शोफदाहरागपाकपिडकास्रावयुक्ता न सिद्धिमुपयान्ति"।

उत्पलशा(सा)रिवा स्त्री० उत्पलं तदाकारपुष्पमस्त्यस्याः अर्श० अच् कर्म०। अनन्तमूलायां श्यामालतायाम्। "दृष्टादनी पयस्या च लता चोत्पलशा(सा)रिवा" सुश्रु०।

उत्पलषट्क न० ज्वरातीसारचिकित्सोक्ते चक्र० उक्ते औषधभेदे। यथा "ज्वरातीसारे पेयादिक्रमः स्याल्लङ्घिते हितः। ज्वरातिसारी पेयां वा पिबेत् साम्लां शृतां नरः। पृश्निपर्णीबलाबिल्वनागरोत्पलधान्यकैः"।

उत्पलावती स्त्री उत्पलमुत्पलाकारं नेत्रमस्त्यस्याः मतुप् मस्य वः संज्ञायां दीर्घः। अप्सरोभेदे"काशीख०९अ०अप्सरोलोकवर्णने। "निर्मथ्यमानात् क्षीरोदात् पूर्व्वमप्सरसस्त्वमूः। निःसृता त्रिजगज्जैत्रमोहनास्त्रं मनोभुवः। "उर्व्वशी मेनका रम्भा चन्द्रलेखा तिलोत्तमा। वपुष्मती कान्तिमती लीलावत्युत्पलावती। अलम्बुषा गुणवती स्थूलकेशी कलावती। कलानिधिर्गुणनिधिः कर्पूरतिलकोर्व्वरा। अनङ्गलतिका चापि तथा मदनमोहिनी। चकोराक्षी चन्द्रकला तथा मुनिमनोहरा। ग्रावद्रावा तपोद्वेष्ट्री चारुनासा सुकर्णिका। दारुसंजीवनी सुश्रीः क्रतुशुल्का शुभानना। तपःशुल्का तीर्थशुल्का दानशुल्का हिमावती। पञ्चाश्वमेधिका चैव राजसूयार्थिनी तथा। अष्टाग्निष्टोमिका तद्वद्वाजपेयशताङ्गना। कार्य्यविकारयित्री च हरिद्रावा हुकलिनी। इत्याद्यप्सरसां श्रेष्ठं सहस्रं षष्टिसंयुतम्। एतत्त्विसृष्टरो लोके वसन्त्यन्या अपि स्त्रियः"।

उत्पलिनी स्त्री उत्पलानि सन्त्यस्मिन् देशे तेषां समूहो वा इनि। १उत्पलयुक्तलतायां,२उत्पलसमुदाये च। "उत्पले

सा महाराज बिभ्रती रूपमुत्तमम्। अभिवीतप्रभिनी दीप्रमग्नेरिव शिखा शुभा" भा०व०८६अ०। २उत्पव-युक्ते त्रि०।

उत्पवन न०उद्+पू–ल्युट्। यज्ञियपात्रादिषु संस्कारभेदे स च आश्व० गृ० १,३,२,३ सूत्रयोर्दर्शितो यथा।
"पवित्राभ्यामाज्यस्योत्पवनम्" २सू०। "अप्रच्छिन्नाग्रावनन्तर्गर्भौ प्रादेशमात्रौ कुशौ नानान्तयोर्गृहीत्वाङ्गुष्ठोपकनिष्ठिकाभ्यामुत्तानाभ्यां पाणिभ्यां "सवितुष्ट्वा प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरिति" प्रागुत्पुनाति सकृन्मन्त्रेण, द्विस्तूष्णीम्" ३सू०। "कार्यमिति शेषः। अथ किंलक्षणे? पवित्रे कथं वा उत्पवनं? कार्यमित्येतद्द्वयं निर्वक्तुमाह। प्रयत्नः सूक्ष्माच्छिन्नाग्रयोरनिवृत्त्यर्थः। न विद्यते अन्तर्मध्ये गर्भौ ययोस्तौ तथोक्तौ प्रादेशमात्रौ कुशौ। एवंलक्षणयुक्तौ कुशौ पवित्रसंज्ञौ। नानेत्यस्य सर्गार्थम्। पवित्रे अन्तयोरसंस्पृष्टे अङ्गुष्ठोपकनिष्ठिकाभ्यामुत्तानाभ्यां पाणिभ्यां गृहीत्वा प्रागुत्पुनाति सकृन्मन्त्रेण, द्विस्तूष्णीम्" ना०वृ०। तत्र समन्त्रकामन्त्रकव्यवस्था नारा०वृत्तौ दर्शिता पूर्वेषामन्त्रकमुत्पवनं विधीयते। अनेन तु समन्त्रकम्। तत्र वैतानिके अमन्त्रकं गृह्ये कर्मणि समन्त्रकमित्येवं विनिवेशः" इति। "उत्पवनप्रकारः" शत० ब्रा०। "प्रोक्षणीषु पवित्रे भवतः। ते तत आदत्ते, ताभ्यामाज्यमुत्पुनात्येको वाऽउत्पवनस्य बन्धुर्मेध्यमेवैतत्करोति। स उत्पुनाति "सवितुष्टा प्रसवऽउत्पुनाम्यच्छिद्रेण सूर्यस्य रश्मिभिरिति" सोऽसावेव बन्धुः"। "अथाज्यलिप्ताभ्यां पवित्राभ्याम् प्रोक्षणीरुत्पुनाति "सवितुर्वः प्रसवऽउत्पुनाति" एको वा उत्पवनस्य बन्धुः" २२,२२,२४,१,३,१, "द्रव्याणाञ्चैव सर्वेषां शुद्धिरुत्पवनं स्मृतम्" मनुः "प्रादेशप्रमाण कुशद्वयाभ्यामुत्पवनेन शुद्धिः" कुल्लू०।

उत्पश्य त्रि० उद्+दृश–कर्त्तरि श।१ऊर्ध्वं प्रेक्षके।२उन्मुखे ३ऊर्द्ध्वदृष्टौ हेम०।

उत्पाटन न० उद्+–पट-णिच्+ल्युट्। १उन्मूलने सुश्रुतोक्ते २व्रणवेदनाभेदे च। यथा 'अत ऊर्द्ध्वं' सर्वव्रणवेदना वक्ष्यामः तोदनभेदनताडनच्छेदनायमनमन्थनविक्षेपणचुमुचुमायननिर्दहनावभञ्जनस्फोटनविदारणोत्पाटनकम्पन विविधशूलविश्लेषणविकिरणपूरणस्तम्भनस्वप्नाकुञ्चनाङ्कुशिकाः सम्भवन्ति"।

उत्पाटक पु० उद्+पट-भेदने णिच्–ण्वुल्। १उन्मूलके सुश्रुतोक्ते २पाल्यामुपद्रवभेदे उत्पुटशब्दे विवृतिः।

उत्पाटिका स्त्री ईद्+पट–णिच् ण्वुल् टाप् अत इत्। वृक्षस्य नीरसायां त्वचि "तस्य लोमानि पर्णानि त्वगस्योत्पाटिका बहिः। त्वच एवास्य रुधिरं प्रस्यन्दि त्वच उत्पटः" बृ०उ०। उत्पाटनकर्त्र्यां स्त्रियां च।

उत्पात पु० उद्+पत–घञ्। १ऊर्द्ध्वपतने। उद्+पत–ण। अकस्मादागते प्राणिनां शुभाशुभसूचके दैवनिमित्ते २भूकम्पादौ ३सुश्रुतोक्ते विंशत्यपाल्यामयभेदे च।
"पाल्यामयास्तु विंशत्या इत्युक्ताः प्राग्निबोध तान्। परिपोटस्तथोत्पात उन्मन्थो दुःखवर्द्धनः। पञ्चमः परिलेही च कर्णपाल्या गदाः स्मृताः। सौकुमार्याच्चिरोत्सृष्टः सहसाभिप्रवर्द्धिते। कर्णशोफो भवेत् पाल्यां सरुजः परिपोटवान्। कृष्णारुणनिभः स्तब्धः स वातात् परिपोटकः। गुर्वाभरणसंयोगात्ताडनाद्घर्षणादपि। शोफः पाल्यां भवेच्छ्यावो दाहपाकरुजान्वितः। रक्तो वा रक्तपित्ताभ्यामुत्पातः स गदो मतः। बलाद्वर्द्धयतः कर्णं पाल्यां वायुः प्रकुप्यति। गृहीत्वा सकफं कुर्याच्छोफं तद्वर्णवेदनम्। उन्मन्थकः सकण्डूको विकारः कफवातजः। वर्द्धमाने यदा कर्णे कण्डूदाहरुगन्वितः। शोफो भवति पाकश्च त्वक्स्थोऽसौ दुःखवर्द्धनः। कफासृक्कृमयः कुर्युः सर्षपाभा विसारिणीः। स्राविणीः पीड़काः पाल्यां कण्डूदाहरुगन्विताः। कफासृक्कृमिसम्भूतः सविसर्पान्वितक्षतः। लिह्यात्सशष्कुलीं पालीं परिलेहीति स स्मृतः"।

शुभाशुभसूचकोत्पातश्च दिव्यान्तरीक्षभौमभेदात् त्रिविधः। स च बृ०सं० दर्शितो यथा "यानत्रेरुत्पातान् गर्गः प्रोवाच तानहं वक्ष्ये। तेषां सङ्क्षेपोऽयं प्रकृतेरन्यत्वमुत्पातः। अपचारेण नराणामुपसर्गः पापसञ्चयाद्भवति। संसूचयन्ति दिव्यान्तरिक्षभौमास्तदुत्पाताः। मनुजानामपचारादपरक्ता देवताः सृजन्त्येतान्। तत्प्रतिघाताय नृपः शान्तिं राष्ट्रे प्रयुञ्जीत। दिव्यं ग्रहर्क्षवैकृतम् उल्कानिर्घातपवनपरिवेषाः। गन्धर्वपुरपुरन्दरचापादि यदान्तरिक्षं तत्। भौमं चरस्थिरभवं तच्छान्तिभिराहतं शममुपैति। नाभसमुपैति मृदुतां शाम्यति नो दिव्यमित्येके। दिव्यमपि शममुपैति प्रभूतकनककाञ्चनगोमहीदानैः। रुद्रायतने भूमौ गोदोहात् कोटिहोमाच्च। आत्मसुतकोशवाहनपुरदारपुरोहितेषु लोकेषु। पाकमुपयाति दैवं परिकल्पितमष्टधा नृपतेः। अनिमित्तभङ्गचलनस्वेदाश्रुनिपातजल्पनादीनि। लिङ्गा-

र्चायतनानां नाशाय नरेशदेशानाम् । दैवतयात्राशकटा-
क्षचक्रयुगकेतुभङ्गपतनानि । सम्पर्य्यासनसादनसङ्गाश्च न
देशनृपशुभदाः । ऋषिधर्म्मपितृब्रह्मप्रोद्भूतं द्विजाती-
नाम् । यद्रुद्रलोकपालोद्भवं पशूनामनिष्टं तत् । गुरु
सितशनैश्चरोत्थं पुरोधसां, विष्णुजं च लोकानाम् । स्कन्द-
विशाखसमुत्थं माण्डलिकानां नरेन्द्राणाम् । वेदव्यासे
मन्त्रिणि विनायके वैकृतं चमूनाथे । धातरि सविश्व-
कर्म्मणि लोकाभावाय निर्द्दिष्टम् । देवकुमारकुमारीवनिता-
प्रेष्येषु वैकृतं यत् स्यात् । तन्नरपतेः कुमारककुमारि
कास्त्रीपरिजनानाम् । रक्षःपिशाचगुह्यकनागानामेत-
देव निर्देश्यम् । मासैश्चाप्यष्टाभिः सर्व्वेषामेव फलपाकः ।
दृष्ट्वा देवविकारं शुचिः पुरोधास्त्र्यहोषितः स्नातः ।
स्नानकुसुमानुलेपनवस्त्रैरभ्यर्च्चयेत् प्रतिमाम् । मधुपर्केण
पुरोधा भक्ष्यैर्बलिभिश्च विधिवदुपतिष्ठेत् । स्थालीपाकं
जुहुयाद्विधिवन्मन्त्रैश्च तल्लिङ्गैः । इति विबुधविकारे
शान्तयः सप्तरात्रं द्विजविबुधगणार्च्चा गीतनृत्योत्सवाश्च ।
विधिवदवनिपालैर्य्यैः प्रयुक्ता न तेषां भवति दुरितपाको
दक्षिणाभिश्च सद्यः” देवप्रतिमावैकृतम् । “राष्ट्रे यस्या-
नग्निः प्रदीप्यते दीप्यते च नेन्धनवान् । मनुजेश्वरस्य
पीडा तस्य च राष्ट्रस्य विज्ञेया । जलमांसार्द्रज्वलने
नृपतिवधः प्रहरणे रणो रौद्रः । सैन्यग्रामपुरेषु च
नाशो वह्नेर्भयं कुरुते । प्रासादभवनतोरणकेत्वादिष्व-
नलेन दग्धेषु । तडिता वा षण्मासात् परचक्रस्यागमो
नियमात् । धूमोऽनग्निसमुत्थो रजस्तमश्चाह्निजं महा-
भयदम् । व्यभ्रे निशि उडुनाशो दर्शनमपि चाह्नि दोष-
करम् । नगरचतुष्पादाण्डजमनुजानां भयकरं ज्वलन-
माहुः । धूमाग्निविस्फुलिङ्गैः शय्याम्बरकेशगैर्मृत्युः । आयु-
धज्वलनसर्पणकम्पाः कोषनिर्गमनवेपनानि वा । वैकृ-
तानि यदि वायुधेऽपराण्याशु रौद्ररणसङ्कुलं वदेत् ।
मन्त्रैराग्नेयैः क्षीरवृक्षात्समिद्भिर्होतव्योऽग्निः सर्षपैः
सर्पिषा च । अग्न्यादीनां वैकृते शान्तिरेवं देयं चास्मिन्
काञ्चनं ब्राह्मणेभ्यः” । इत्यग्निवैकृतम् । “शाखाभङ्गे
ऽकस्माद् वृक्षाणां निर्द्दिशेद्रणोद्योगम् । हसने देशभ्रंशं
रुदिते च व्याधिबाहुल्यम् । राष्ट्रविभेदस्त्वृतौ बाल-
वधोऽतीव कुसुमिते बाले । वृक्षात् क्षीरस्रावे सर्व्वद्रव्य-
क्षयो भवति । मद्ये वाहननाशः संग्रामः शोणिते
मधुनि रोगः । स्नेहे दुर्भिक्षभयं महद्भयं निःसृते
सलिले । शुष्कविरोहे वीर्य्यान्नसङ्क्षयः शोषणे च विरु-

ढाणाम् । पतितानामुत्थाने स्वयं भयं दैवजनितं च ।
पूजितवृक्षे ह्यनृतौ कुसुमफलं नृपवधाय निर्द्दिष्टम् । धूम-
स्तस्मिन् ज्वाला वाथवा भवेन्नृपवधायैव । सर्पत्सु तरुषु चापि
जनसङ्क्षयो विनिर्द्दिष्टः । वृक्षाणां वैकृत्ये दशभिर्मासैः
फलविपाकः । स्रग्गन्धधूपाम्बरपूजितस्य छत्रं निधायो-
परि पादपस्य । कृत्वा शिवं रुद्रजपोऽत्र कार्य्यो रुद्रेभ्य
इत्यत्र षडङ्गहोमः । पायसेन मधुना च भोजयेद्
ब्राह्मणान् घृतयुतेन भूपतिः । मेदिनी निगदितात्र दक्षि-
णा वैकृते तरुकृते महर्षिभिः” । इति वृक्षवैकृतम् । “नाले
ऽब्जयवादीनामेकस्मिन् द्वित्रिसम्भवो मरणम् । कथयति
तदधिपतीनां यमलं जातं च कुसुमफलम् । अतिवृद्धिः
शस्यानां नानाफलकुसुमभवो वृक्षे । भवति हि यद्येक-
स्मिन् परचक्रस्यागमो नियमात् । अर्द्धेन यदा तैलं
भवति तिलानामतैलता वा स्यात् । अन्नस्य च वैरस्यं तदा
च विन्द्याद्भयं सुमहत् । विकृतकुसुमं फलं वा ग्रामा-
दथवा पुराद्बहिः कार्य्यम् । सौम्योऽत्र चरुः कार्य्यो
निर्व्वाप्यो वा पशुः शान्त्यै । शस्ये च दृष्ट्वा विकृतिं प्रदेयं
तत् क्षेत्रमेव प्रथमं द्विजेभ्यः । तस्यैव मध्ये चरुमत्र भौमं
हुत्वा न दोषान् समुपैति तज्जान्” । इति शस्यवैकृतम् ।
“दुर्भिक्षमनावृष्ट्यामतिवृष्ट्यां क्षुद्भयं सपरचक्रम् । रोगो
ह्यनृतुभवायां नृपवधोऽनभ्रजातायाम् । शीतोष्णविप-
र्य्यासे नो सम्यगृतुषु च सम्यगस्तेषु । षण्मासाद्राष्ट्रभयं
रोगभयं दैवजनितं च । अन्यर्त्तौ सप्ताहं प्रकृत्यवर्षे
प्रधाननृपमरणम् । रक्ते शस्त्रोद्योगो मांसास्थिवसा-
दिभिर्मरकः । धान्यहिरण्यत्वक्फलकुसुमाद्यैर्वर्षितैर्भयं
विन्द्यात् । अङ्गारपांशुवर्षे विनाशमायाति तन्नगरम् ।
उपला विना जलधरैर्विकृता वा प्राणिनो यदा दृष्टाः ।
छिद्रं वाप्यतिवृष्टौ शस्यानामीतिसञ्जननम् । क्षीरघृत-
क्षौद्राणां दध्नो रुधिरोष्णवारिणां वर्षे । देशविनाशो
ज्ञेयोऽसृग्वर्षे चापि नृपयुद्धम् । यद्यमलेऽर्के छाया न
दृश्यते दृश्यते प्रतीपा वा । देशस्य तदा सुमहद्भयमायातं
विनिर्द्देश्यम् । व्यभ्रे नभसीन्द्रधनुर्दिवा यदा दृश्यते
ऽथवा रात्रौ । प्राच्यामपरस्यां वा तदा भवेत् क्षुद्भयं
सुमहत् । सूर्य्येन्दुपर्ज्जन्यसमीरणानां योगः स्मृतो वृष्टि-
विकारकाले । धान्यान्नगोकाञ्चनदक्षिणाश्च देयास्ततः
शान्तिमुपैति पापम्” । इति वृष्टिवैकृतम् । “अपसर्पणं
नदीनां नगरादचिरेण शून्यतां कुरुते । शोषश्चाशो-
ष्याणामन्येषां वा ह्रदादीनाम् । स्नेहासृङ्मांसवहाः

शङ्खजलजुषः प्रतीपगाश्चापि । परचक्रस्यागमनं नद्यः कथयन्ति षण्मासात् । ज्वालाधूमक्वाथा रुदितोत्क्रुष्टानि चैव कूपानाम् । गीतप्रजल्पितानि च जनमरकाय प्रदिष्टानि । तोयोत्पत्तिरखाते गन्धरसविपर्यये च तोयानाम् । सलिलाशयविकृतौ वा महद्भयं तत्र शान्तिरियम् । सलिलविकारे कुर्य्यात् पूजां वरुणस्य वारुणैर्मन्त्रैः । तैरेव च जपहोमं शुभमेवं पापमुपयाति" । इति जलवैकृतम् ।"प्रसवविकारे स्त्रीणां द्वित्रिचतुःप्रभृतिसम्प्रसूतौ वा । हीनातिरिक्तकाले च देशकुलसङ्क्षयो भवति । वडवोष्ट्रमहिषगोहस्तिनीषु यमलोद्भवे मरणमेषाम् । षण्मासात् सूतिफलं शान्तौ श्लोकौ च गर्गोक्तौ । नार्य्यः परस्य विषये त्यक्तव्यास्ता हितार्थिना । तर्पयेच्च द्विजान् कामैः शान्तिं चैवात्र कारयेत् । चतुष्पदाः स्वयूथेभ्यस्त्यक्तव्याः परभूमिषु । नगरं स्वामिनं यूथमन्यथा हि विनाशयेत्"। इति प्रसववैकृतम् । "परयोनावभिगमनं भवति तिरश्चामसाधु धेनूनाम् । उक्षाणा वान्योऽन्यं पिबति श्वा वा सुरभिसुतम् । मासत्रयेण विन्द्यात् तस्मिन्निःसंशयं परागमनम् । तत्प्रतिघातायैतौ श्लोकौ गर्गेण निर्दिष्टौ । त्यागो विवासनं दानं तस्य तस्याशु शुभं भवेत् । तर्पयेद्ब्राह्मणांश्चात्र जपहोमांश्च कारयेत् । स्थालीपाकेन धातारं पशुना च पुरोहितः । प्राजापत्येन मन्त्रेण यजेद्बहुसुदक्षिणम्" । इति चतुष्पादवैकृतम् । "यानं वाहवियुक्तं यदि गच्छेन्न व्रजेच्च वाहयुतम् । राष्ट्रभयं भवति तदा चक्राणां सादभङ्गे च । अनभिहततूर्य्यनादः शब्दो वा तेषां ताड़ितेषु यदि नास्यात् । व्युत्पत्तौ वा परागमो नृपतिमरणं वा । गीतरवतूर्य्यनादा नभसि यदा वा चरस्थिरान्यत्वम् । मृत्युस्तदा गदा वा विस्वरतूर्य्ये पराभिभवः। गोलाङ्गलयोः सङ्गे दर्वीशूर्पाद्युपस्करविकारे । क्रोष्टुकनादे च तथा शस्त्रभयं मुनिवचश्चेदम् । वायव्येष्वेषु नृपतिर्वायुं सक्तुभिरर्च्चयेत् । आ वायोरिति पञ्चर्चो जप्याश्च प्रयतैर्द्विजैः । ब्राह्मणान् परमान्नेन दक्षिणाभिश्च तर्पयेत् । बहुसदक्षिणा होमाः कर्त्तव्याश्च प्रयत्नतः" । इति वायव्यवैकृतम् ।"पुरपक्षिणो वनचरा वन्या वा निर्भया विशन्ति पुरम् । नक्तं वा दिवसचराः क्षपाचरा वा चरन्त्यहनि । सन्ध्याद्वयेऽपि मण्डलमाबध्नन्तो मृगा विहङ्गा वा । दीप्तायां दिश्यथवा क्रोशन्तः संहता भयदाः । श्वानः प्ररुद्य इव द्वारे वाशन्ति जम्बुका दीप्ताः। प्रविशेन्नरेन्द्रभवने कपोतकः कौशिको यदि वा । कुक्कुटरुतं प्रदोषे हेमन्तादौ च कोकिलालापाः । प्रतिलोममण्डलचराः श्येनाद्याश्चाम्बरे भयदाः। गृहचैत्यतोरणेषु द्वारेषु च पक्षिसङ्घसम्पाताः । मधुवल्मीकाम्भोरुहसमुद्भवाश्चापि नाशाय । श्वभिरस्थिशवावयवप्रवेशनं मन्दिरेषु मरकाय । पशुशस्त्रव्याहारे नृपमृत्युर्मुनिवचश्चेदम् । मृगपक्षिविकारेषु कुर्य्याद्धोमान् सदक्षिणान् । देवाः कपोत इति च जप्तव्याः पञ्चभिर्द्विजैः । सुदेवा इति चैकेन देया गावश्च दक्षिणा । जपेच्छाकुनसूक्तं वा मनोवेदशिरांसि च" । इति मृगपक्ष्यादिवैकृतम् ।"शक्रध्वजेन्द्रकीलस्तम्भद्वारप्रपातभङ्गेषु । तद्वत्कपाटतोरणकेतूनां नरपतेर्मरणम् । सन्ध्याद्वयस्य दीप्तिर्धूमोत्पत्तिश्च कानने ऽनग्नौ । छिद्राभावे भूमेर्दरणं कम्पश्च भयकारी । पाषण्डानां नास्तिकानां च भक्तः साध्वाचारप्रोज्झितः क्रोधशीलः । ईर्ष्युः क्रूरो विग्रहासक्तचेता यस्मिन् राजा तस्य देशस्य नाशः। प्रहर हर छिन्धि भिन्धीत्यायुधकोशाश्मपांशवो बालाः। निगदन्तः प्रहरन्ते तत्रापि भयं भवत्याशु । अङ्गारगैरिकाद्यैर्विकृतप्रेताभिलेखनं यस्मिन् । नायकचिह्नितमथ वा क्षये क्षयं याति न चिरेण । लूतापटाङ्कमथ न सन्ध्ययोः पूजितं कलहयुतम् । नित्योच्छिष्टस्त्रीकं च यद्गृहं तत्क्षयं याति । दृष्टेषु यातुधानेषु निर्दिशेन्मरकमाशु सम्प्राप्तम् । प्रतिघातायैतेषां गर्गः शान्तिं चकारेमाम् । महाशान्त्योऽथ बलयो भोज्यानि सुमहान्ति च । कारयेत महेन्द्रं च माहेन्द्रीभिः समर्च्चयेत्"। इति शक्रध्वजेन्द्रकीलादिवैकृतम् । "नरपतिदेशविनाशे केतोरुदयेऽथ वा ग्रहेऽर्केन्द्वोः । उत्पातानां प्रभवः स्वर्त्तुभवश्चाप्यदोषाय । ये च न दोषान् जनयन्त्युत्पातास्तानृतुस्वभावकृतान् । ऋषिपुत्रकृतैः श्लोकैर्विद्यादेतैः समासोक्तैः । वज्राशनिमहीकम्पसन्ध्यानिर्घातनिःस्वनाः । परिवेषरजोधूमरक्तार्कास्तमनोदयाः । द्रुमेभ्योऽन्नरसस्नेहबहुपुष्पफलोद्गमाः। गोपक्षिमदवृद्धिश्च शिवाय मधुमाधवे । तारोल्कापातकलुषं कपिलार्केन्दुमण्डलम् । अनग्निज्वलनस्फोटधूमरेण्वनिलाहतम् । रक्तपद्मारुणं सान्ध्यं नभः क्षुब्धार्णवोपमम् । सरितां चाम्बुसंशोषं दृष्ट्वा ग्रीष्मे शुभं वदेत् । शक्रायुधपरीवेषविद्युच्छुष्कविरोहणम् । कम्पोद्वर्त्तनवैकृत्यं रसनं दरणं क्षितेः । सरोनद्युदपानानां वृद्ध्यूर्द्ध्वतरणप्लवाः । सरणं चाद्रिगेहानां वर्षासु न भयावहम् । दिव्यस्त्रीभूतगन्धर्वविमानाद्भुतदर्शनम् । नक्षत्रताराणां दर्शन

दर्शनं च दिशाम्बरे। गीतवादित्रनिर्घोषा वनपर्वतसानुषु । शस्यवृद्धिरपां हानिरपापाः शरदि स्मृताः । शीतानीलतुषारत्वं नर्दनं मृगपक्षिणाम् । रक्षोयक्षादिसत्त्वानां दर्शनं वागमानुषी । दिशो धूमान्धकाराश्च सनभोवनपर्वताः । उच्चैः सूर्योदयास्तौ च हेमन्ते शोभनाः स्मृताः । हिमपातानिलोत्पाता विरूपाद्भुतदर्शनम् । कृष्णाञ्जनाभमाकाशं तारोल्कापातपिञ्जरम् । चित्रगर्भोद्भवाः स्त्रीषु गोऽजाश्वमृगपक्षिषु । पत्राङ्कुरलतानां च विकाराः शिशिरे शुभाः । ऋतुस्वभावजा ह्येते दृष्टाः स्वर्तौ शुभप्रदाः । ऋतोरन्यत्र चोत्पाता दृष्टास्ते भृशदारुणाः । उन्मत्तानां च या गाथाः शिशूनां भाषितं च यत् । स्त्रियो यच्च प्रभाषन्ते तस्य नास्ति व्यतिक्रमः । पूर्वं चरति देवेषु पश्चाद्गच्छति मानुषान् । नाचोदिता वाग्वदति सत्या ह्येषा सरस्वती । उत्पातान् गणितविवर्जितोऽपि बुद्ध्वा विख्यातो भवति नरेन्द्रवल्लभश्च । एतन्मुनिवचनं रहस्यमुक्तं यज्ज्ञात्वा भवति नरस्त्रिकालदर्शी" ४६अ० । "दिव्यान्तरिक्षाश्रयमुक्तमादौ मया फलं शस्तमशोभनं च । प्रायेण चारेषु समागमेषु युद्धेषु मार्गादिषु विस्तरेण । भूयो वराहमिहिरस्य न युक्तमेतत् कर्तुं समासकृदसाविति तस्य दोषः । तज्जैर्न वाच्यमिदमेव फलानुगीतिर्बार्हस्पतिर्न कृतमिति प्रथितं वराहम् । स्वल्पमेव तस्य तत् प्रकीर्तितानुकीर्तनम् । ब्रवीम्यहं न चेदिदं तथापि मेऽत्र वाच्यता । उत्तरवीथिगता द्युतिमन्तः क्षेमसुभिक्षशिवाय समस्ताः । दक्षिणमार्गगता द्युतिहीनाः क्षुद्भयतस्करमृत्युकरास्ते । कोशागारगते भृगुपुत्रे ऽश्वस्थे च गिराम्प्रभविष्णौ । निर्वैराः क्षितिपाः सुखभाजः संहृष्टाश्च जना गतरोगाः । पीडयन्ति यदि कृत्तिकां मघां रोहिणीं श्रवणमैन्द्रमेव वा । मोजभाग्य सूर्यमपरे पश्चात्तदा पश्चिमा दिगन्वयेन पीड्यते । प्राच्यां चेद्भुजवदवस्थिता दिगन्ते प्राच्यानां भवति हि विपन्नृपाणाम् । मध्ये चेद्भवति हि मध्यदेशपीडा रूक्षैस्तैर्न तु रुचिरैर्मयूखवद्भिः । दक्षिणां ककुभमाश्रितैस्तु तैर्दक्षिणापथपयोमुचां क्षयः । हीनरूपतनुभिश्च विग्रहैः स्थूलदेहकिरणान्वितैः शुभम् । उत्तरमार्गे कृष्णमयूखाः शान्तिकरास्ते तत्र नृपाणाम् । अन्यगतेरा भववर्णा दोषकराः क्षुद्दैन्यनृपाणाम् । नक्षत्राणां तारकाः सग्रहाणां धूमज्वालाविस्फुलिङ्गान्विताश्चेत् । आलोका वा निर्निमित्तं न यान्ति याति ध्वंसं सर्वलोकः सभूपः । दिवि भाति यदा तुहिनांशुयुगं द्विजदृष्टिरतीव तदाशु शुभा । तदनन्तरवर्द्धरणो ऽर्कयुगे जगतः प्रलयस्त्रिपदः प्रभवति । श्रवणमभिजितं ध्रुवं मघवतश्च भं संस्पृशन् शिखी जनविनाशकृत् कुशलकर्महा शोकदः । भुजगभमथ स्पृशेद्यदि वृष्टिनाशो ध्रुवं क्षयं व्रजति विद्रुतो जनपदश्च बालाकुलः । प्राग्द्वारेषु चरन् रविपुत्रो नक्षत्रेषु करोति च वक्रम् । दुर्भिक्षं कुरुते भयतुल्यं मित्राणां च विरोधमवृष्टिम् । रोहिणीशकटमर्कनन्दनो यदि भिनत्ति रुधिरोऽथवा शिखी । किं वदामि यदनिष्टसागरे जगदशेषमुपयाति सङ्क्षयम् । उदयति सततं यदा शिखी चरति भचक्रमशेषमेव वा । अनुभवति पुराकृतं तदा फलमशुभं सचराचरं जगत् । धनुःस्थायी रूक्षो रुधिरसदृशः क्षुद्भयकरो बलोद्योगं चेन्दुः कथयति जयं ज्यास्य च यतः । अवाक्शृङ्गो गोघ्नो निधनमपि सस्यस्य कुरुते ज्वलन्धूमायन् वा नृपतिमरणायैव भवति । स्निग्धः स्थूलः समशृङ्गो विशालस्तुङ्गश्चोदग्विचरन्नागवीथ्याम् । दृष्टः सौम्यैरशुभैर्विप्रयुक्तो लोकानन्दं कुरुतेऽतीव चन्द्रः । पितृमैत्रपुरुहूतविशाखात्वाष्ट्रमेत्य च युनक्ति शशाङ्कः । दक्षिणेन न शुभो हितकृत्स्याद् यद्युदक् चरति मध्यगतो वा । परिघ इति मेघरेखा या तिर्यग्भास्करोदयेऽस्ते वा । परिधिस्तु प्रतिसूर्यो दण्डस्त्वृजुरिन्द्रचापनिभः । उदयेऽस्ते वा भानोर्ये दीर्घा रश्मयस्तमोघास्ते । सुरचापखण्डमृजु यद् रोहितमैरावतं दीर्घम् । अर्द्धास्तमयात्सन्ध्या व्यक्तीभूता न तारका यावत् । तेजःपरिहानिमुखाद् भानोरर्द्धोदयं यावत् । तस्मिन् सन्ध्याकाले चिह्नैरेतैः शुभाशुभं वाच्यम् । सर्वैरेतैः स्निग्धैः सद्योवर्षं भयं रूक्षैः । अच्छिन्नः परिघो वियच्च विमलं श्यामा मयूखा रवेः स्निग्धादीधितयः सितं सुरधनुर्विद्युच्च पूर्वोत्तरा । स्निग्धो मेघतरुर्दिवाकरकरैरालिङ्गितो वा यदा वृष्टिः स्यात्तदि चार्कमस्तसमये मेघो महांश्छादयेत् । खण्डो वक्रः कृशो ह्रस्वः काकाद्यैर्वा चिह्नैर्विद्धः । यस्मिन्देशे रूक्षश्चार्कस्तत्रभावः प्रायो राज्ञः । माहिषी समुपयाति पृष्ठतो मांसभुक् खगगणो युयुत्सतः । यस्य तस्य बलविद्रवो महान् अपरैस्तु विजयो विपर्ययैः । भानोरुदये यदि वास्तमये गन्धर्वपुरप्रतिमा ध्वजिनी । विम्बं निरुणद्धि तदा नृपतेः प्राप्तं समरं सभयं प्रवदेत् । शस्ता शान्तद्विजखगघुष्टा सन्ध्या स्निग्धा मृदुपवना च । पांशुध्वस्ता

जनपदनाशं वत्ते कृष्णा रुधिरनिभा वा। यद्विस्तरेण कथितं मुनिभिस्तद्स्मिन् सर्वं मया निगदितं पुनरुक्तवर्जम्। श्रुत्वापि कोकिलरुतं बलिभुग्विरौति यत्तत्स्वभावकृतमस्य पिकं न जेतुम्” ४७अ०। एवमन्येऽप्युत्पाताः सन्ति विस्तरभयान्नोक्ता आकरे दृश्याः उत्पात विशेषे मङ्गलकर्मवर्ज्जनकालव्यवस्था रघुनन्दनेन दर्शिता यथा “गर्गः। दाहे दिशाञ्चैव धराप्रकम्पे वज्रप्रपातेऽथ विदारणे वा। धूमे तथा पांशुकरप्रपाते न कारयेन्माङ्गलिकादि कार्य्यम्। उल्कापाते च निर्घाते तथैवाकालवर्षणे। छिद्रे सूर्य्ये विनिर्दिष्टे न कुर्य्यान्मङ्गलक्रियाम्। धूमकेतौ समुत्पन्ने ग्रहणे चन्द्रसूर्य्ययोः। ग्रहाणां सङ्गरे चैव न कुर्यान्मङ्गलक्रियाम्। द्विसूर्य्यं वा त्रिसूर्य्यं वा दृष्ट्वा गगनमण्डले। रात्रौ शक्रधनुश्चैव मङ्गलानि विवर्जयेत्। दिग्दाहे दिनमेकञ्च ग्रहे सप्त दिनानि च। भूमिकम्पे च सम्भूते त्र्यहाणि परिवर्जयेत्। उल्कापाते च त्रितयं धूमे पञ्च दिनानि च। वज्रपाते दिनमेकं वर्जयेत् सर्वकर्मसु”। भोजराजः “ग्रहे रवीन्द्वोरवनिप्रकम्पे केतूद्गमोल्कापतनादिदोषे। अतो दशाहानि वदन्ति तज्ज्ञास्त्रयोदशाहानि वदन्ति केचित्”। “ग्रहणकाले भूकम्पोल्कापातवज्रपातादिदोषसमाहारे त्रयोदशाहं अशुभम्। किञ्चिदूनतत्समाहारेऽपि दशाहम्। ग्रहणाद्येकैकदोषे त्र्यहमिति” वाचस्पतिमिश्राः। अत्र स्मृतिसागरधृतसारसंग्रहे। “राज्यादिममहासिद्धौ यज्ञदानतपःसु च। होमस्वाध्याययोश्चैव वर्जयेत्त्र्यहरात्रकम्। लक्षहोमे महादाने वर्जयेत् सोमके मखे। तपःस्वाध्याययोश्चैव चिरारम्भे त्रयोदश” इति व्यवस्था अन्यत्र। “उल्कापाते भुवः कम्पे अकालवर्षगर्जिते। मत्स्यकेतूद्गमोत्पाते ग्रहणे चन्द्रसूर्य्ययोः। प्रयाणन्तु त्यजेत् अतः सप्तरात्रमतः परम्। ब्राह्मणः क्षत्रियो वैश्यस्त्यजेत् कर्म त्रिरात्रकम्। शूद्रस्त्यक्त्वा चैकरात्रं सर्वं कर्म समाचरेत्”। पराशरः। “प्रयाणे सप्तरात्रं स्यात् त्रिरात्रं व्रतबन्धने। एकरात्रं परित्यज्य कुर्यात् पाणिग्रहं ग्रहे”। भृगुः। “राजन्यानां तु सप्ताहं ब्राह्मणानां त्र्यहन्तथा। शूद्रस्यार्द्धदिनं प्रोक्तं सर्वकार्य्येषु वै भृगुः”। शूद्रस्यापि द्विपयम्। कम्प इत्युपलक्षणम्। ग्रहणादावप्येवमेवान्यत्रैकत्र पठितत्वात्” मल०त०। पीयूषधारायां तु विशेष उक्तः। नारदः “अनिष्टे त्रिविधोत्पाते सिंहिकासुतदर्शने सप्तरात्रं न कुर्वीत यात्रोद्वाहादि मङ्गलम्” वशिष्ठः सर्व्वग्रासे दिनान्यष्टौ सर्व्वकार्य्येषु वर्जयेत्। षट्दिनानि त्रिभागोने अर्द्धग्रासे चतुर्द्दिनम्। चतुर्थांशे त्रिरात्रं स्यात् ग्रहणे चन्द्रसूर्य्ययोः” नारदः “उत्पातग्रहणादूर्द्ध्वं सप्ताहं निखिले त्यजेत्”। अङ्गिराः “सर्व्वग्रासे तु सप्ताहमर्द्धग्रासे दिनत्रयम्। त्रिद्व्यङ्गुलतोग्रासे दिनमेकं तु वर्जयेत्” “अनयोर्विषयव्यवस्था देशभेदेनाचारभेदेन चावगन्तव्या” पी०धा०। अत्यावश्यककार्य्ये परिहारस्तत्रोक्तः ज्योतिर्निबन्धे “दिनानि पञ्च वशिष्ठस्त्रिदिनं गर्गस्तु कौशिकस्त्वेकम्। यवनाचार्य्यस्य मते पञ्च मुहूर्त्तांश्च दूषयति”। प्रागुक्तवराहप्रदर्शित शुभोत्पातैदुष्टमेव दिनं वर्ज्यम्। “शुभदोत्पातैश्च दुष्टं दिनम्” मुहू०चि० उक्तेः। एवञ्च स्मार्त्तादिव्यवस्थापितं विवाहे ग्रहणे एकदिनवर्ज्जनम् अल्पग्रासविषयमापद्विषयं वा उक्तवचनजातसामञ्जस्यात्। यात्रादिविषये विशेषः ग्रहणशब्दे वक्ष्यते “एकतालइवोत्पातपवनप्रेरितोगिरिः” रघुः। “ओषामासैमत्सरोत्पातवातः” माघः। “उत्पातेन ज्ञापिते च” पा०। “उत्पातग्रहदुष्टञ्च” ज्यो०।

उत्पातक त्रि० उत्पातयति उत्पातं जनयति उद्+पत-णिच् ण्वुल् १उत्पातजनके उद्+पत-ण्वुल्। २ऊर्द्ध्वपतनशीले च। “दंशोत्पातकभल्लूकमक्षिकामशकाहतम्”। भा० स्वर्गा० २अ०।

उत्पाद पु० उत्+पद-भावे घञ्। १उत्पत्तौ ‘दुःखे च शोणितोत्पादे शाखाङ्गच्छेदने तथा” या० उत्पत्तिशब्दे विवृतिः उत्क्षिप्तःपादोऽनेन। “उत्क्षिप्तपादे त्रि०।

उत्पादक पु० ऊर्द्ध्वस्थिताः पादा अस्य कप्। अष्टपदे शरभाख्ये गजारातौ १पशुभेदे तस्य पृष्ठस्थचतुश्चरणत्वादूर्द्ध्वपादत्वम्। उत्-पद-णिच्-ण्वुल्। २पितरि पु०। ३उत्पादनकर्त्तरि त्रि०। “उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता” ‘आहुरुत्पादकं केचिदपरे क्षेत्रिणं विदुः” “नोत्पादकः प्रजाभागी तथैवान्याङ्गनास्वपि” मनुः। स्त्रियां टापि अत इत्त्वम्। उत्पादिका ४उत्पादकस्त्रियां ५हिममोचिकायां शब्दचि० ६पूतिकायां भरतः ७देहिकानामकीटे च स्त्री त्रिका०।

उत्पादन न० उद्+पद-णिच्-ल्युट्। जनने उत्पत्तिकरणे “उत्पादनमपत्यस्य जातस्य पालनम् तथा” मनुः

उत्पादशय पु० उत्पादः ऊर्द्ध्वक्षिप्तपादः सन् शेते शी-अच्। (टिटिर) १टिट्टिभपर्य्यायेऽपि हेमच०। २शिशौ च। तयोः

उत्तानपादतया शयनात्तथात्वम् । उत्पादं शयनमस्य उत्पादशयनोऽप्यत्र ।

उत्पादित त्रि० उद्+पद–णिच्–कर्मणि क्त । जनिते । "अप्यनारभमाणस्य विभोरुत्पादिताः परैः" माघः ।

उत्पादिन् त्रि० उद्+पद–णिनि । १उत्पत्तिमति ।"सर्व्व-मुत्पादि भङ्गुरम्" हितो०। उत्पादयति णिच् णिनि । २उत्पादके । "दुःखोत्पादि गृहे द्रव्यं क्षिपन् प्राणहर-स्तथा" या०स्मृ०उभयतः स्त्रियां ङीप् ।

उत्पाद्य अव्य०उद्+पद–णिच्–ल्यप् । १जनयित्वेत्यर्थे "क्री-त्वा स्वयं वाप्युत्पाद्य" मनुः । "पुत्रानुत्पाद्य संस्कृत्य-वृत्तिं चैषां प्रकल्पयेत्" स्मृतिः । कर्म्मणि यत् । जननीये त्रि० । "लावण्य उत्पाद्य इवास यत्नः" कुमा०

उत्पाली स्त्री उन्नतिं पालयति पाल–अण् गौरा०ङीष् । आरोग्ये शब्दच० ।

उत्पाव पु० उद्+पु "उदि श्रयतियौतिपूद्रुवः" पा०अप् बाधित्वा घञ् । उत्पवने यज्ञियपात्रादेः संस्कारभेदे

उत्पिञ्जर(ल) त्रि०उद्+पिजि-कलन् वा लस्य रः। अत्यर्था-कुले । "कुर्व्वाणमुत्पिञ्जरजातपत्त्रैः" माघः । उत्-पिञ्जरीभूतदलैरित्यर्थः रलयोरभेदः" मल्लि० । "उद्गुत् पिञ्जलकं युद्धमासीद्देवासुरोपमम्" भा०द्रो०२५अ० ।

उत्पिब त्रि० उद्+पा–श । ऊर्द्ध्व पायिनि ।

उत्पिष्ट त्रि० ऊर्द्ध्वतः पिष्टं उद्+पिष–क्त । ऊर्द्ध्वतः क्षत-मेदके १उन्मथिते । "सन्धिमुक्तमुत्पिष्टं विश्लिष्टं विव-र्त्तितमवक्षिप्तमतिक्षिप्तं तिर्य्यक्क्षिप्तमिति षड्विधम्" सुश्रुतोक्ते षड्विधसन्धिमुक्तरूपेऽस्थिभङ्गे तत् कार्य्यं तत्रोक्तं "विशेषेणोत्पिष्टे सन्धावुभयतः शोफावेदनाप्रादुर्भावो-विशेषतश्चात्र नानाप्रकारा वेदना रात्रौ प्रादुर्भवन्ति" ।

उत्पीड त्रि० उद्–पीड–अच् । संमर्द्दयेन १पीडके २संबा-धके च । भावे घञ् । २उन्मथने । "स तु वाणवरोत्-पीडांश्चिक्षत्यस्त्रगुरुलाघवम्" भा०व०२१अ० "ब्राबाक्रन्तौ नयनसलिलोत्पीडरुद्धावकाशाम्" मेघ० । ल्युट् । उत्-पीडन तत्र न०। अ । तत्रैव स्त्री । यङ् उत्पीडयत् उत्पीडाकारके । "अन्योन्यमुत्पीडयदुत्पलाक्ष्याः" कुमा०। स्त्रियां ङीप् [पुच्छयते ।

उत्पुच्छ नामधातुः पुच्छमुदस्यति उद+पुच्छ+णिङ् उत्-

उत्पुच्छ पु० उत्क्षिप्तः पुच्छोयेन प्रा०ब० वा क्षिप्तलोपः । ऊर्द्ध्वक्षिप्त पुच्छे पशौ ।

उत्पुट त्रि० उद्घाटितं पुटमस्य प्रा०ब० वा घाटितलोपः । पुटन्यून्ये प्रफुल्ले । तेन निर्वृत्तम् सङ्कलादि०अण् । औत्-पुट तेन निष्पाद्ये त्रि० । तेन हरति उत्सङ्गादि० ठञ् औत्पुटिक तेन हारके त्रि० स्त्रियां ङीप् ।

उत्पुटक पु० उद्+पुट–क्वुन । सुश्रुतोक्ते पाल्यामुपद्रवभेदे । "अतऊर्द्ध्वं नामलिङ्गे वक्ष्ये पाल्यामुपद्रवान् । उत्पाटक-श्चोत्पुटकः श्यावः कण्डूयुतोभृशम् । अवमन्थः सक-ण्डूको ग्रन्थिको जम्बुलस्तथा । स्रावी च दाहवांश्चैव इत्येषां क्रमशः क्रियाम्" । लेपमुत्पुटके दद्यात् तैल मेभिश्च साधितम्" सुश्रु० ।

उत्पुत त्रि० उद्+पु–क्त । पवित्रादिना कृतोत्पवनसंस्कारे पात्रादौ । क्तवत्पक्षे उत्पवितोऽप्यत्र त्रि०। तेन हरति उत्सङ्गा० अण् । औत्पुत तेन हारके त्रि० ।

उत्पेय त्रि० ऊर्द्ध्व पेयम् । ऊर्द्ध्वपेये जलादौ ।

उत्प्रभ त्रि० उद्गता प्रभाऽस्य प्रा०ब० गतलोपः । १उद्गत प्रभान्विते २उद्दीप्तार्चिषि वह्नौ पु०हेम० ।

उत्प्राशन न० ऊर्द्ध्व प्राशनम् । उत्तोलय भोजने

उत्प्रास पु० उद्+प्र+अस–दीप्त्यादिषु घञ् । उपहासे । "प्रिय-श्चोत्प्रासवक्रोक्त्या मध्याधीरा दहेद्रुषा" सा०द० ।

उत्प्रेक्षण न० उद्+प्र–ईक्ष–भावे ल्युट् । १उन्नयने २विकल्पादिना कस्यचित् पदार्थस्य सम्भावने । ३ऊर्द्ध्व-दृष्टौ च । णिनि । उत् प्रेक्षिन् तत्कारके त्रि०स्त्रियां ङीप् ।

उत्प्रेक्षा स्त्री उद्+प्र+ईक्ष–अ । उन्नयने अर्थालङ्कारभेदे अलङ्कारशब्दे पृष्ठे ३८५ विवृतिः । [मज्जने ।

उत्प्लवन न० उद्+प्लु–ल्युट् । उपरि प्लवने (लाफा) जलेः

उत्प्लवा स्त्री उत्प्लवति उद्+प्लु–अच् । नौकायां शब्दच०

उत्फाल पु०उद्+फल–घञ् । १उल्लम्फे २ऊर्द्ध्वतोविसरणे च

उत्फुल्ल त्रि० उद्+फल–क्त नि० । १विकसिते दलानाम-न्योन्यविश्लेषेण प्रकाशिते "उत्फुल्लनीलनलिनोदर तुल्यभासः" माघः । २उत्ताने त्रि० ३स्त्रीणां गुप्तेन्द्रिये न० मेदि० ।

उत्स पु०उनत्ति जलेन उन्द–स किच्च नलोपः । पर्व्वतादेः १अवज्जलस्य पातस्थाने । २जलप्रवाहे च "आसिञ्चन्नुत्सम् गौतमाय तृष्णजे" ऋ०१,५४,५. "विष्णोः पदे परमे मध्व उत्सः" ऋ० १,५४,५ मधु वाबं सिषिचुरुत्स-मद्रियम्" २,२४.४. "उत्सो वा तत्र जायतां ह्रदो वा पुण्डरीकवान्" अथ०६,१०६,१, उत्से भवः उत्सा० अञ् । औत्स तद्भवे त्रि० ३ऋषिभेदे ततः गोत्रे अश्वादि०फञ् औत्सायन तद्गोत्रे पुंस्त्री० स्त्रियां ङीप्

उत्सक्थ त्रि॰ऊर्द्ध्वं गते सक्थिनी यस्य ब॰ समा॰स्त्रियां ङीप्। अङ्गीरके "उत्सक्थ्या अवगुदं धेहि समञ्जिं चारया वृषन्" यजु॰ २३,२१।

उत्सङ्ग पु॰ उत्पन्न सजतेऽत्र उद्+सन्ज आधारे घञ्। १मध्यभागे "दरीगृहोत्सङ्गनिषक्तभासः" कुमा॰ "दृषदो-वासितोत्सङ्गाः" रघुः। "तत्संकतोत्सङ्गबलिक्रियाभिः" रघुः "यस्योत्सङ्गे निहितमसकृद्दुःखदुःखेन गात्रम्" मेघ॰। २क्रोडे "तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुकूलाम्" "उत्सङ्गे वा मलिनवसने सौम्य! निक्षिप्य वीणाम्" मेघ॰अत्र तया सजतेऽत्राधारे घञ्। ३उपरिभागे "सौधोत्सङ्गप्रणयविमुखो मास्म भूरुज्जयिन्याः" मेघ॰ उत्क्रान्तः सङ्गम् अत्या॰ स॰। ४सन्यासिनि सङ्गरहिते तत्त्वज्ञे शब्द॰। ५ऊर्द्ध्वतः संसर्गे च।

उत्सङ्गादि हरतीत्यर्थे ठञ्निमित्ते "हरत्युत्सङ्गादिभ्यः" पा॰ उक्ते शब्दसमूहे स च गण उत्सङ्ग उडुप उत्प्लुत उत्सव उत्पुट पिटक पिटाक" औत्सङ्गिक: सि॰कौ॰।

उत्सङ्गिन् त्रि॰उत्सङ्ग ऊर्द्ध्वसंसर्गः अस्त्यस्य इनि स्त्रियां ङीप्। ऊर्द्ध्वसंसर्गयुक्ते।

उत्सङ्गित त्रि॰ उत्सङ्गिनः उत्संसृष्टाः कृताः उत्सङ्गिन्+तत्करोतीत्यर्थे णिच्–कर्मणि क्त। संसर्गयुक्तीकृते। "उत्सङ्गितोत्तुङ्गतरङ्गबाहुः" माघः।

उत्सञ्जन न॰ उद्+सन्ज–णिच् ल्युट्। १ऊर्द्ध्वतः संयोजने उत्क्षेपणे। "सम्माननोत्सञ्जनाचार्य्यकरणेत्यादि" पा॰ तत्र उत्सञ्जने "दण्डमुत्सञ्जयति उत्क्षिपतीत्यर्थः" सि–कौ॰।

उत्सत्ति स्त्री उद्+सद–क्तिन्। उच्छेदे।

उत्सधि पु॰ उत्सः जलप्रवाहो धीयतेऽस्मिन् धा–कि उप॰ स॰। जलप्रवाहवति कूपादौ "अर्कैरूर्द्ध्वं नुनुद्र उत्सधिं पिबध्यै" ऋ॰१,८८,४,

उत्सन्न त्रि॰उद्–सद–क्त।१उच्छिन्ने समूलमुच्छिन्ने २नष्टे च "मकरध्वजहतोत्सन्नविग्रहः" काद॰ ३अल्पायाससाध्ये च "उत्सन्नयज्ञ इव वा एष यच्चातुर्मास्यानि" शत॰ब्रा॰२,५,२,४८, दर्शपौर्णमासवच्चातुर्मास्यानामनुष्ठानबाहुल्याभावादुत्सन्नयज्ञत्वम्" भा॰ तेन हरति उत्सङ्गा॰ ठञ्। औत्सन्निक तेन हारके त्रि॰।

उत्सर्ग पु॰उद्+सृज–कर्मणि घञ्। १सामान्यविधाने, तस्य सति बाधके सर्व्वतः प्रवृत्तत्वात्तथात्वम्। "क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते" पात॰भा॰। "अपवादैरिवोत्सर्गाः-कृतव्यावृत्तयः परैः" कुमा॰ २त्यागे। भावे घञ्। ३अपानवायोर्व्यापारे विष्ठोत्सर्गः ४त्यागे ५दाने "तस्योत्सर्गेण शुध्यन्ति जप्येन तपसैव च" मनुः "श्रीलक्षणोत्सर्गविनीतवेषाः" कुमा॰ ६समाप्तौ व्रतोत्सर्गः। "उत्सर्गमेके तुल्योपगुणत्वात्" आश्व॰श्रौ॰१,४, २१,॰ "स्तोमोत्सर्गौ वैकस्याङ्गः" काव्या॰२४,७,२५, ७आर्षि-कवेदपाठसमाप्तौ। वेदाध्ययनोत्सर्गकालश्च मिता॰ दर्शितो यथा "पौषमासस्य रोहिण्यामष्टकायामथापि वा। जलान्ते छन्दसां कुर्य्यादुत्सर्गं विधिवद्बहिः" या॰ "पौषमासस्य रोहिण्यामष्टकायां ग्रामाद्बहिर्जलसमीपे छन्दसां वेदानां स्वगृह्योक्तविधिना उत्सर्गं कुर्य्यात्। यदा पुनर्भाद्रमासे उपाकर्म तदा माघशुक्लस्य प्रथमदिवसे उत्सर्गं कुर्यात्। यथोक्तं मनुना "पौषे तु छन्दसां कुर्य्याद्बहिरुत्सर्जनम्बुधः। माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेऽहनीति"। तदनन्तरम्पक्षिणीमहोरात्रं वा विरम्य शुक्लपक्षेषु वेदान् कृष्णेष्वङ्गान्यधीयीत। यथाह मनुः "यथाशास्त्रन्तु कृत्वैवमुत्सर्गं छन्दसां बहिः। विरमेत्पक्षिणीं रात्रिं यद्वाप्येकमहर्निशम्। अत ऊर्द्ध्वं तु छन्दांसि शुक्लेषु नियतः पठेत्। वेदाङ्गानि तु सर्वाणि कृष्णपक्षेषु सम्पठेदिति"। अत्रानध्यायमाह या॰ "त्र्यहं प्रेतेष्वनध्यायः शिष्यर्त्विग्गुरुबन्धुषु। उपाकर्म्मणि चोत्सर्गे स्वशाखश्रोत्रिये तथा" "उत्सर्गे मनूक्तपक्षिण्यहोरात्राभ्यां सहास्य विकल्प" इति मिता॰ "ओंपूर्वा व्याहृतीः सावित्रीञ्च त्रिरभ्यस्य वेदादिमारभेत्" "तयोत्सर्गे" आश्व॰गृ॰३.५,१२,१३,उत्सर्जनशब्दे विवृतिः।

उत्सर्गिन् त्रि॰ उत्सर्गोऽस्त्यस्य इनि। उत्सर्गयुक्ते। "अयनमुत्सर्गिणाम्" २४,४,२२, त्रिषुभिन्नविकेषु एकस्याहेऽग्निष्टोमस्योत्सर्गेणास्योत्सर्गित्वम्" कर्कः। अयनं गवामयनम्।

उत्सर्जन न॰ उद्+सृज–ल्युट्। १दाने, २त्यागे, च। वेदोत्सर्गरूपे षण्मासकर्त्तव्ये वैदिकानां ३क्रियाभेदे स च आश्व॰ गृ॰ उक्तो यथा "मध्यमाष्टकायामेताभ्यो देवताभ्योऽन्नेन हुत्वाऽपोऽभ्यवयन्ति" २॰सू॰। "मध्यमाष्टकाग्रहणं षण्मासान्तोपलक्षणार्थम्"। तेन तस्याः समीपे माघ्यां पौर्णमास्यामित्यर्थः शाखान्तरे चैवं दृश्यते। "एताभ्यो देवताभ्यो हुत्वा सावित्र्यादिभ्य आज्यम्, इत्युक्तम्। अग्निमीड इत्यादिभ्योऽन्नेन हुत्वा स्थालीपाकग्रहणमकृत्वाऽन्नेनेति वचनेन ब्रुवन् गृहसिद्धमन्नं ग्राह्यमिति दर्शयति, ततः स्विष्टकृत्, ततो वेदारम्भ-

णम्। ततो होमशेषं समाप्यापोऽवगाहन्त इत्यर्थः नारा० "एता एव तद्देवतास्तर्पयन्ति" २१ सू०। "कृत्वा सावित्राद्या नव अग्निमीड़ इत्याद्याश्च विंशतिं तर्पयन्तीत्यर्थः। ऋग्देवता आदिश्य तर्पयेयुः। द्वितीयान्तं कृत्वा तर्पयामीत्येकाञ्जलिं शद्वाक्यानि कृत्वा तावत्कृत्वस्तर्पयेयुः" ना० वृ०। "आचार्यान् ऋषीन् पितॄंश्च" २२सू०। यच्च ब्रह्मयज्ञाङ्गं तर्पणमुक्तं तदेतद्रूपत्वेनेदानीमपि कार्यमित्यर्थः। चशब्दो देवतातर्पण समुच्चयार्थः। तेन प्रजापत्याद्या अपि तर्प्याः। देवतास्तर्पयन्तीत्यत्र देवताग्रहणमत्रापि समुच्चयार्थम् क्रमश्च तत्रोक्त एव" ना० वृ०। "एतदुत्सर्जनम्" २३सू०। "अस्येयं संज्ञा। ततः षण्मासान् षड़ङ्गान्यधीयीत। षण्मासानधीयीतेत्यारभ्य एवमन्ता धर्मा ग्रहणाध्ययन एवेत्याहुरेके। अन्ये त्वविशेषेणेत्याहुः" ना० वृ०। उत्सर्गशब्दे दर्शितेन कालेनास्य विकल्पः शाखिभेदेन व्यवस्थाप्यः "पौषे तु छन्दसां कुर्याद्बहिरुत्सर्जनं बुधः" मनुः। [हूने च

उत्सर्पण न० उद्+सृप्–ल्युट्। १उत्क्रम्य पुरतोगतौ, २उन्न-

उत्सर्पिन् त्रि० उत्सर्पति णिनि। उत्पतिष्णौ "पयोधरोत्सर्पिषु शीर्य्यमाणः" रघुः। "उत्सर्पिभिः प्रांशुमिवांशुजालैः" किरा० २अतिशयिते स्त्रियां ङीप्। "उत्सर्पिणी खलु महतां प्रार्थना" शकु० सा च हेमचन्द्रोक्ते कालचक्रान्तर्गते ३कालगतिभेदे "सागर कोटिकोटीनां विंशत्या स समाप्यते। अवसर्पिण्यां षड़रा उत्सर्पिण्यां तएव विपरीताः। एवं द्वादशभिररैर्विवर्त्तते कालचक्रमिदम्" हेम०। [पन्नायां गवि जटा०

उत्सर्य्या स्त्री उत्+सृ-यत्। १ऋतुमत्यां गर्भयोग्यावस्था-

उत्सव पु० उद्+सू–अप्। आनन्दजनकव्यापारे विवाहादौ। "ऋद्धिमन्तमधिकर्द्धिरुत्सवः पूर्व्वमुत्सवमपोहदुत्तरः" "स कृत्वा विरतोत्सवान्" रघुः। "धर्मसेतुसमाकीर्णां यशोत्सववतीं शुभाम्" "हृष्टपुष्टजनाकीर्णां नित्योत्सवसमाकुलाम्" भा० व० २०६ अ०

उत्सवसङ्केत पु० उत्सव आनन्दजनकः सङ्केतः स्त्रीपुंसयोः रत्यर्थमनुरागादाह्वानम् यस्य। यस्येयं स्त्रीत्येवं दाम्पत्यनियमशून्ये स्त्रीपुंसयोरनुरागमात्रहेतुकस्वैरविहारशालिनि पार्वतीये जातिभेदे। भा० स० अर्ज्जुनस्योत्तरदिग्विजये "पौरवं युधि निर्ज्जित्य दस्यून् पर्व्वतवासिनः। गणानुत्सवसङ्केतानजयत् सप्त पाण्डवः," २६अ० अत्र नीलक० दर्शितरीत्यैव व्याख्या। तद्धर्मके प्रतीचीस्थेऽपि जातिभेदे "गणानुत्सवसङ्केतान् व्यजयत् पुरुषर्षभः" नकुलस्य प्रतीचीविजये ३१अ० "शरैरुत्सवसङ्केतान् स कृत्वा विरतोत्सवान्" रघुः।

उत्सादन उद्+सद–णिच्–ल्युट्। १उत्सारणे, २उद्वर्त्तने कषाय द्रव्येण स्नेहाद्यपसारणे ३उच्छेदकरणे "उत्सादनार्थं लोकानां रात्रौ घ्नन्ति ऋषीनिह" भा० व० १०२ अ०। "उत्सादनार्थं लोकानां धुन्धुर्नाम महासुरः" भा० व० १०० अ०। "न हि द्वैतवने किञ्चित् विद्यतेऽन्यत् प्रयोजनम्। उत्सादनमृते तेषां वनस्थानां महाद्युते!" भा० व० २३७ अ०। स्थानान्तरनयने "क्रयणवेद्यारम्भण प्रवर्ग्योत्सादनेत्या०" कात्या० १४, १, १२, "उपसदन्ते प्रवर्ग्योत्सादनम्" कात्या० १८, २, १०। उत्साद्यतेऽत्र उद्+सद–णिच् आधारे ल्युट्। महावीरादिपरित्यागदेशे। "उत्सादनदेशं गच्छन्ति सामगानामन्तरम्" कात्या० २६, ७, ६०, उत्सादनदेशं प्रति आगच्छन्ति उत्सादनं महावीराणां परित्यागः स यत्र देशे विहितः सूत्रे" कर्क०

उत्सादनीय त्रि० उद्+सद–णिच्-कर्म्मणि अनीयर्। १उच्छेद्ये २उन्मूलनीये उद्वर्त्तनीये कषादिद्रव्ये। "कुष्ठोत्सादनीयानि सर्पींष्या लेपनानि" च सुश्रु०।

उत्सादि पु० भवाद्यर्थे "उत्सादिभ्योऽञ् पा० अञ् प्रत्ययप्रकृतिशब्दगणे। स च उत्स उदपान विकर विनद महानद महानस महाप्राण तरुण तलुन (वष्कयाऽसे) पृथिवी धेनु पङ्क्ति जगती त्रिष्टुप् अनुष्टुप् जनपद भरत उशीनर ग्रीष्म पीलुकुण(उदः स्थानदेशे) पृषदंश भल्लकीय रथन्तर मध्यन्दिन बृहत् महत् सत्वत् कुरु पञ्चाल इन्द्रावसान उष्णिह् ककुभ् सुवर्ण देव (ग्रीष्मादच्छन्दसि) औत्स तद्भवे त्रि०।

उत्सादित त्रि० उद्+सद–णिच्–क्त। उन्मूलिते उद्वर्त्तिते च "भद्रासनेषूपविष्टः परिधायाम्बरं लघुः। सक्तौ चन्दनसंयुक्तैः पानीयैरभिमन्त्रितैः। उत्सादितः कषायेण बलवद्भिः सुशिक्षितैः" भा० द्रो० ८२अ०।

उत्सारक पु० उद्+सृ–णिच्–ण्वुल्। द्वारपाले हेमच० तेन हि प्रभुद्वारतो जना दूरीक्रियन्ते इति तस्य तथा अपसारके त्रि०। [२चालने, ३स्थानान्तरकरणे च।

उत्सारण न० उद्+सृ–णिच्-ल्युट्। १दूरीकरणे

उत्सारित त्रि० उद्+सृ–णिच्-क्त। दूरीकृते चालिते "गुणान्त्यमङ्कं गुणकेन हन्यादुत्सारितेनैवमुपान्तिमादीन्" लीला०

उत्साह पु० उद्+सह–घञ्। १उद्यमे, २अध्यवसाये, कर्म्म

कार्य्येषु २स्थिरतरे प्रयत्ने "उत्साहो मन्त्रमूलं स्यादिति नीतिविदां मतम्। प्रभुशक्तिर्मन्त्रमूला तस्मादुत्साहवान् भवेत्" इत्युक्ते राज्ञां ४गुणविशेषे, "चारेणोत्साहयोगेन क्रिययैव च कर्मणाम्" मनुः। "श्रोताविशोत्साहगुणेन सम्पत्" कुमा०।५कल्याणे, शब्दरत्नावली ६सूत्रे, मेदिनी "कार्य्यारम्भेषु संरम्भः स्थेयानुत्साह उच्यते" सा०द० उक्तलक्षणके वीररसस्य ७स्थायिभावे। स च वीररसस्य स्थायी भावः "रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा। जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ताः शमस्तथा" स्थायिनो विभज्यास्य "उत्तमप्रकृतिर्वीरः उत्साहस्थायिभावकः" तत्रोक्तेः। तत्र उद्यममात्रे "मन्दोत्साहः कृतोऽस्मि मृगयापवादिना माधव्येन" शकु० "मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः" गीता "महोत्साहः स्थूललक्षः कृतज्ञोऽवृद्धसेवकः" या०स्मृ० अस्त्यर्थे बहु०मतुप् इनि वा उत्साहिन् उत्साहवत् तद्विशिष्टे त्रि० स्त्रियां ङीप्।

उत्साहक त्रि० उद्+सह–ण्वुल्। उत्साहान्विते "तृजकाभ्यामिति" पा० षष्ठीनिषेधेऽपि बाहुल० षष्ठी समासः। कार्य्योत्साहकः।

उत्साहन न० उद्+सह–णिच्-ल्युट्। उत्साहजनने

उत्साहवर्द्धन पु० उत्साहं वर्द्धयति वृध-णिच्-ल्यु। वीररसे। वृध-ल्युट् ६त०। उत्साहस्य वृद्धौ न०।

उत्साहशक्ति स्त्री उत्साहरूपशक्तिर्बलम्। राज्ञां विक्रमहेतौ बले। "षड्गुणाः शक्तयस्तिस्रः प्रभावोत्साहमन्त्रजाः" अमरः। "कर्त्तव्येषु कार्य्येषु स्थेयान् प्रयत्न उत्साहः" मल्लि०।

उत्सिक्त त्रि० उद्+सिच–क्त। १उद्रिक्ते अतिशयिते २वृद्धियुक्ते ३उद्धते गर्व्विते च। "जात्मीयादस्थिरां वाचमुत्सिक्तमनसां तथा" मनुः।

उत्सुक त्रि० उत्सुवति षु प्रेरणे मितद्र्वादि० डु कर्त्तृ। १इष्टार्थप्रयत्ने कालक्षेपासहिष्णौ २इष्टार्थोद्युक्ते च "दिनावसानोत्सुकबालवत्सा" "श्रुत्वा रामः प्रियोदन्तं मेने तत्सङ्गमोत्सुकः" "वत्सोत्सुकापि स्तिमिता सपर्य्याम्" "आशङ्क्योत्सुकसारङ्गां चित्रकूटस्थलीं जहौ" रघुः। उत्सुकस्य भावः ष्यञ्। औत्सुक्य तद्भावे न०। "इष्टानवाप्तेरौत्सुक्यं कालक्षेपासहिष्णुता। चित्ततापत्वरास्वेददीर्घनिश्वसितादिकृत्" सा० द०। "औत्सुक्येन कृतत्वरा सहभुवा व्यावर्त्तमाना ह्रिया" रत्ना०। भ्वा०

अभूततद्भावार्थे क्यङ्। उत्सुकायते उत्सुकायमाना "यस्योत्सुकायमाना त्वं न प्रतीपायसेऽन्तिके" भट्टिः

उत्सूत्र त्रि० उत्क्रान्तः सूत्रम् अत्या० स०। विधानसूत्रातीते "अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबन्धना" माघः।

उत्सूर पु० उत्क्रान्तः अतिक्रान्तः सूरं सूर्य्यम् अत्या० स०। दिनात्यये हेमच०उत्सूर्य्यादयोऽप्यत्र। "ओत् सूर्य्यमन्यानुत्स्वापयाव्युषम्"। अथ०४,५,७, "उत्सूर्य्यशायिनश्चासन् सर्व्वे चासन् प्रगे निशा" भा०शा०२२८अ०

उत्सृज्य अ० उद्+सृज-ल्यप्। १त्यक्त्वेत्यर्थे "ऋदुपधात् कर्म्मणि क्यप्। २त्यक्तव्ये त्रि०

उत्सृष्ट त्रि०उद्+सृज-क्त। १त्यक्ते २दत्ते च। "ब्राह्मणानाह यत्किञ्चित् मयोत्सृष्टं तु निर्ज्जने। तत् कश्चिदन्यो न नयेत् विभाज्यत्वं यथाक्रमम्। न वाह्यं न च तत्क्षीरं पातव्यं केनचित् क्वचित्"। ब्रह्म पु०। "महोक्षोत्सृष्टपशवः सूतिकागन्तुकादयः" या०स्मृ०।

उत्सेक पु० उद्+सिच–घञ्। १गर्व्वे, "उपदा विविशुः शश्वत् नोत्सेकाः कोशलेश्वरम्" रघुः। "नोत्सेकमगमच्चेदं कदाचिदिह नः कुलम्" भा० आ० ११०अ०। २उद्रेके "पातव्यं श्वासकासघ्नं श्लेष्मोत्सेके गलग्रहे" सुश्रु०। ३उद्धृत्य वहिः सेचने च।

उत्सेकिन् त्रि० उत्सेक+अस्त्यर्थे इनि। १अतिशयिते २गर्व्वयुक्ते च स्त्रियां ङीप्। "भाग्येष्वनुत्सेकिनी" शकु०

उत्सेचन न०उत्क्रम्य आधारमतिक्रम्य सेचनम्। आधारातिक्रमेण प्लवने (उपचान)

उत्सेध पु० उत्सेधति कारणमतिक्रम्य वर्द्धते उद्+सिध–गत्याम् अच। १देहे तस्य शुक्रशोणितरूपसूक्ष्मकारणातिक्रमेण वर्द्धनात्तथात्वम्। भावे घञ्। २उन्नतौ तस्य कृदभिहितभावत्वात् "पुत्रवित्तार्ज्जनात् पितेत्यादौ, पुत्रार्जितवित्त इव उन्नत्याश्रयेऽपि वृत्तिः तथात्वेऽपि विशेषणसमासे ब्राह्मणश्रमणादिवत् परनिपातः हिमनिष्यन्दपाण्डर इत्यादिवदिति भेदः। यथा "पयोधरोत्सेधनिपातचूर्णिताः इति कुमा० "तस्य प्रमाणमात्रं माहिषचर्म्मोत्सेधमुपदिशन्ति" सुश्रु०। "उत्सेधनिर्ज्जितमहीरुहां ध्वजैः" माघः "तच्छाखाचमसा दीर्घाः प्रादेशाश्चतुरङ्गुलाः। तथैवोत्सेधतोज्ञेयाश्चतुरस्रास्तु इत्यपि" छन्दोगप० "पयोधरोत्सेधविशीर्णसंहति" कुमा०। कर्त्तरि अच्। ३उच्चे त्रि०। "वायव्यं श्वेतं पुच्छ उत्सेधमेव तं 'कुरुते तस्मादुत्सेधं प्रजाभयेऽभि संप्र-

यान्ति” शत० ब्रा० १२, २, २, ६, “उत्सेधश्च पर्व्वतादिकं प्रासादं वा” भा० ।

उत्स्वन पु० उच्चैः स्वनः । १उच्चशब्दे । च० । २तद्वति त्रि० ।

उत्स्वप्न त्रि० उत्क्रान्तः अतिक्रान्तः स्वप्नं तन्मर्य्यादाम् अत्या० स० । निद्रायां बाह्येन्द्रियाणां विलीनत्वेन मनसैव सर्व्व-व्यवहारनियमेन तदतिक्रमेण जाग्रदवस्थावत् स्पष्टवच-नादिव्यवहारे । उत्स्वप्नमिव चरति क्यङ् उत्स्वप्नायते यथा मृच्छकटिके “विदूषक उत्स्वप्नायते” स्वप्नदृष्ट-पदार्थस्य स्पष्टवाचा व्यवहरतीत्यर्थः । एवमुत्तररामः चरितेऽपि “अयि एष अञ्जउत्त” इत्यादिना सीताया उत्स्वप्नो वर्णितः ।

उद् अव्य० उ-क्विप् तुक् ‘उदोऽनूर्द्ध्वचेष्टायाम्’ पा० नि० दृष्टो०द-त्वम् । १प्रकाशे, २विभागे, ३लाभे, ४ऊर्द्ध्वे, ५उत्कर्षे, ६प्राबल्ये, ७आश्चर्य्ये, ८शक्तौ, ९प्राधान्ये, १०बन्धने, ११अभावे, १२मोक्षे, “तस्य उदिति नामेति” श्रुतेः १३ब्रह्मणि च । गणरत्ने उदः अर्थानभिधाय उदाहृतं यथा ‘उत् प्राबल्यवियोगोर्द्ध्वकर्म्मलाभप्रकाशनाश्चर्य्य-मोक्षणाभावदलप्राधान्यशक्तिषु” तत्र प्राबल्ये उद्धवः वियोगे उद्गच्छति । ऊर्द्ध्वचेष्टायाम् उत्तिष्ठति । लाभे प्राणात् शतमुत्पन्नम् । प्रकाशने उच्चरति आश्चर्य्ये उत्पुच्छः । मोक्षणे उद्गतः । अभावे उत्पथः । दलने उत्फुल्लः । प्राधान्ये उद्दिष्टः शक्तौ उत्साहः”

उदक न० उन्द-ण्वुल् नि० नलोपश्च । जले ‘अनीत्वा प-ङ्कतां धूलिमुदकं नावतिष्ठति” माघः । “सकृत् प्रसिञ्च-न्त्युदकं नामगोत्रेण वाग्यतः । प्रोषिते कालशेषः स्यात् पूर्णे दत्तोदकः शुचिः” । या० स्मृ० “यावानर्थ उदपाने सर्व्वतः संप्लुतोदके” गीता । ‘उदकस्योदः संज्ञायाम्’ पा० समासे संज्ञायामुदकस्योदादेश उदपानः उदधिः उदमेघः । क्षीरोदः । “पेषंवासवाहनधिषु” पा० । पूर्व्वपदस्थस्य उदादेशः । उदपेषं पिनष्टि उदवासः ‘सहस्रदालोदवासतत्परा” कुमा० उदवाहनः उद-धिर्घटः पूरयितव्ये उदकहलादौ परे वा । उदकुम्भ उदककुम्भः । “शान्त्युदकुम्भहस्ताः” भट्टिः पूर्व-यितव्य इत्याद्युक्तेः उदकपर्वत उदकस्थाली इत्यादौ न । ‘मन्थौदनसक्तुविन्दुवज्रभारहारवीवधगाहेषु च” पा० । उदमन्थः उदकमन्थः (जलविलोडनम्) । उदौदनः उदकौदनः (उदकेन सिद्धः ओदनः) । “उदौदनं प्राशयित्वा सर्पिष्मन्तमश्नीयात्” शत० ब्रा० १३, ८, ४, १५ । उदसक्तवः (उदकमिश्रितसक्तवः) । उदबिन्दुः उदवज्रः उदभारः उदहारः (जलहारकः) उदवीवधः उदगाहः (जलावगाहः) पक्षे न । २उदकसाध्ये तर्पणे च । ‘ऊनद्विवर्षं निखनेत् न कुर्य्यादुदकं ततः” । “कृतोदकान् समु-त्तीर्णान्” ‘कामोदकं सखिप्रत्तास्वस्रीयश्वशुरर्त्त्वि-जाम्’ “न ब्रह्मचारिणः कुर्य्युरुदकं पतिताश्च ये । “नाशौचोदकभाजनम्” इति च या० स्मृ० ।

उदकलक्ष्म पु० “उदकसक्तुभ्यां माषाभ्यवहारेणोदक-लक्ष्मः” इति विष्णूक्ते व्रतभेदे ।

उदकक्रिया स्त्री उदकेन क्रिया तर्पणम् । शास्त्रविहिते जलादितर्पणे “एवं मातामहाचार्य्यप्रेतानामुदकक्रिया” या० स्मृ० । “अपुत्रेणैव कर्त्तव्यः पुत्रप्रतिनिधिः सदा । “पिण्डोदकक्रियाहेतोः” स्मृति ‘उदककर्म्मोदककार्य्या-दयोऽप्यत्र न० । उदकदानमप्यत्र न० । ‘तेनकर्म्मणि-चारक्षे राज्ञामुदकदायिके” भा० आ० १अ० ।

उदकपरीक्षा स्त्री विवादादौ लौकिकप्रमाणालाभे कार्य्ये दिव्ययपणभेदे तत्प्रकारश्च मिता० व्य० । “सत्येन माभिरक्ष त्वं वरुणेत्यभिशाप्य कम् । नाभिदघ्नोदकस्थस्य गृहीत्वोरू जलं विशेत्” या० स्मृ० । प्रपञ्चस्तु मिता० व्य० । दि० तत्वे च अनुसन्धेयः ।

उदकम् अव्य० उन्द-अकमु किञ्च । क्लेदे गणर० । शाखा० कञ्जि वा नतिलम् । उदकंलभ्य उदकंलत्वा क्लेदं लब्ध्वेत्यर्थः ।

उदकमेह पु० उदकमिव मेहः । सुश्रुतोक्ते मेहभेदे । तल्लक्षणं तत्रैव ‘तत्र श्वेतमवेदनमुदकसदृशमुदकमेही मेहति” । इक्षुमेहशब्दे ९१० पृष्ठे विवृतिः ततः अस्त्यर्थे इनि । उदकमेहिन् तद्युक्ते त्रि० स्त्रियां ङीप् ।

उदकल त्रि० उदकमस्त्यस्य सिध्मा० वा लच् । उदकयुक्ते वजभावे मतुप् मस्य वः । उदकवत् तत्रार्थे स्त्रियां ङीप् । पिच्छा० इलच् । उदकिल तत्रार्थे त्रि० ।

उदकशुद्ध त्रि० उदकेन शुद्धः । १स्नाते २उदकस्पर्शेन शुद्धे च । ततः भवादौ अण् अनुशति० द्विपदवृद्धिः । औदकशौद्ध तद्भवे त्रि० ।

उदकषट्पल न० ‘शुण्ठ्यैः पञ्चकोलैस्तु पलिकैस्त्रि गुणोदकैः । समक्षीरं घृतप्रस्थं जुराश्चःप्लीहकासनुत्” चक्रदत्तोक्ते घृतभेदे ।

उदकान्त पु० उदकमेवान्तः सीमा । उदकपर्य्यन्ते । ‘सर-स्वत्याः पश्चिमे उदकान्ते दीक्षेरन्” आश्व० श्रौ० १२, ६, २, “आोदकान्तात्प्रियं प्रोषितमनुव्रजेदिति श्रुतेः” मनुः ।

उदकीय पु० नामधातु आत्मन उदकमिच्छति उदक+क्यच्। उदकीयति अतितर्षायान्तु उदन्यति।

उदकीर्य(र्य्य) पु० उदकेन कीर्यः(र्य्यः) संज्ञायाम् उदाहेय: । महाकरञ्जे राजनिर्घ० र्य्यान्तः रत्नमा०।

उदकेचर पु० उदके जले चरति अच् वा सप्तम्या अलुक्। जलचरे मत्स्यादौ। "अध्वर्युर्मत्स्य सामदोराजेत्याह तस्योदकेचरा विशस्त इव आसत इति मत्स्याच" शत०ब्रा० १३,४,३,१२ जलचरे १पक्षिकूर्मादौ च ते च सुश्रुते विभाजिताः ते च आनूपशब्दे ७३१ पृष्ठे दर्शिताः। साप्तम्यालुकि उदकचरोऽप्यत्र, णिनि, उदकचारिन् अप्यत्र स्त्रियां ङीप्।

उदकोदर न० सुश्रुतोक्ते उदररूपविकाररूपरोगे। उदरशब्दे विवृतिः "उदकोदरिणस्तु वातहरतैलाभ्यामित्यादि" सुश्रु०

उदक्त त्रि० उद्+अन्च—क्त। कूपादित उत्तोलिते। "उदक्तमुदकं कूपात्" सि०कौ०।

उदक्प्रवण त्रि० उदक् उत्तरा प्रवणं निम्नम्। क्रमशोदक्षिणत उत्तरनिम्ने। "ऊषर उदक्प्रवणे समे वा" कात्या० २,२,४। २उत्तरमार्गगतिहेतौ च "एष वा उदक्प्रवणोवशो यत्रैवं विदु ब्रह्मा भवति" छा०उ०। "उदक्प्रवणः उत्तरमार्गं प्रति हेतुरित्यर्थः" भा०। "प्राची हि देवानां दिगथो उदक्प्रवणोदीची हि मनुष्याणां, दिग्दक्षिणत: पुरीषं प्रत्युदूहत्येषा वै दिक् पितॄणां सा यद् दक्षिणा प्रवणा स्यात्" शत०ब्रा०। १,२,५,१७।

उदक्य त्रि० उदकमर्हति दण्डा० यत्। १जलार्हे ब्रीह्यादौ। २तत्स्नानार्हेऽशुचौ ३ऋतुमत्यां स्त्री। तस्याश्च स्नानदिवसपर्य्यन्तमशुचेः ततः शुद्ध्यर्थमुदकार्हत्वात् तथात्वम्। "उदक्या सूतिका वापि अन्त्यजं संस्पृशेद्यदि। त्रिरात्रेणैव शुध्येत इति शातातपोऽब्रवीत्" शु०त० शवपरा०। "उदक्यया च संभाषां न कुर्वीत कदाचन" भा०अ०प० १०४ अ०। "उदक्ययासते ये च द्विजाः केचिदनग्नयः" भा० शान्ति०१६५ अ०। अथ प्रसङ्गात् प्रथमरजोदर्शनतिथ्यादिकतदीयधर्मभेदा उच्यन्ते ते च विधानपारिजाते दर्शिता यथा। "प्रथमर्त्तौ द्वितीये वा शुभाशुभ निरीक्षणम्। कर्त्तव्यं ज्ञातिभिः सम्यग् धर्मशास्त्रविधानतः"। तत्र वस्त्रफलम्। वराहसंहितायाम् "सुभगा श्वेतवस्त्राढ्या रोगिणी रक्तवाससा। नीलाम्बरधरा नारी विधवा जायते ध्रुवम्। भोगिनी पीतवस्त्रा स्यात् चित्रवस्त्रा पतिव्रता। दुर्भगा जीर्णवस्त्रा च सुभगा क्षौमवासिनी"। रजोवर्णफलम्। "आलोहिते भवेद्बन्ध्या श्वेतवर्णे च पुत्रिणी। कृष्णे च विधवा नारी रजस्येतत्तु लक्षणम्" विवाहोत्तरकालभेदफलम् "ऊढानां वत्सरार्धेन मासे पक्षे तथा खलु। रजसोदर्शनं स्त्रीणां सर्वदैवाशुभावहम्"। अथ तिथिफलम् "आद्यर्त्तौ विधवा नारी प्रतिपद्याहृताऽसृजा। वैधव्यदा प्रतिपदा द्वितीया पुत्रवर्द्धिनी। सौभाग्यदा तृतीया च चतुर्थी सुखनाशिनी। पञ्चमी सुभगा चैव षष्ठी सम्पत्तिनाशिनी। सप्तमी धननाशाय, पुत्रदा सौख्यदाष्टमी। नवमी क्लेशदा स्त्रीणां दशमी च सुखप्रदा। एकादश्यर्थनाशाय द्वादशी रतिवर्द्धिनी। त्रयोदशी शुभाज्ञेया दुर्भगा च चतुर्दशी। पौर्णमासी त्वमावास्या दुःखरोगविवर्द्धिनी"। अथ मासफलम् तत्रैव "चैत्रे मासि विशेषेण वैधव्यं लभते ध्रुवम्। वैशाखे बहुपुत्राढ्या ज्यैष्ठे रोगावृता भवेत्। आषाढो मृत्युदः प्रोक्तः श्रावणोधनदा भवेत्। भाद्रे तु दुर्भगा क्लीवा ह्याश्विने च तपस्विनी। कार्त्तिके निर्द्धना बाला मार्गशीर्षे बहुप्रजा। पौषे स्यात् पुंश्चली नारी माघे पुत्रसुखान्विता। फाल्गुने सर्वसम्पत्ता प्रथमर्त्तौ फलं स्मृतम्"। अथवारफलम्। "आदित्ये विधवा नारी सोमे दैन्यमवाप्नुयात्। मङ्गले ह्यात्मघाताय बुधे च धनिनी भवेत्। गुरौ च भर्त्तृसुखदा कन्यापुत्रपरूर्भृगौ। पौंश्चल्यकारिणी मन्दे म्रियते भर्त्तुरग्रतः"। अन्यत्राप्यथापि "सुगुणा पतिव्रता दुःखपुत्रिणी भोगभागिनी। पतिव्रता क्लेशभोगा सूर्य्यवारादिषु क्रमात्" अथ वेलाफलम्। "प्रातःकाले रजः स्त्रीणां प्रथमं शोकवर्द्धनम्। सङ्गवे सुखसन्तत्यै मध्याह्ने धनसन्ततिः। अपराह्णे धनावाप्तिः सायाह्ने मध्यमं फलम्। पूर्व्वरात्रे सुखायालं मध्यरात्रे धनक्षयः। पररात्रेऽर्थनाशाय प्रथमर्त्तु फलं स्मृतम्"। अथ स्थानफलम्। "गृहमध्ये सुखावाप्तिर्बहिर्द्वारे वियोगिनी। शय्यायां सुखदा भूमावनेकापत्यसन्ततिः"। द्रष्टृफलम्। "पुरन्ध्र्या दृश्यते यत्तु रजः स्त्रीणां सुखाय तत्। विधवया तु यद्दृष्टं रजो वैधव्यदं स्मृतम्। रजः पश्यति चेत्कन्या पुमान्वा तत्सुखं भवेत्। स्वयं दृष्टं तथा स्त्रीणां मात्मघाताय कल्पते"। अथावासफलम्। "पितृगृहे रजो दैन्यं विदधाति पितुः कुले। देवस्थाने पितृस्थाने धनस्थानेऽप्यवेश्मनि। मार्गे भर्त्तृवियोगे च पश्चाद्वाढेन्मृतप्रजा"। अथ नक्षत्र फलम्। "अश्विनी सुखदा स्त्रीणां भरणी कामवर्द्धिनी। कृत्तिका दैन्यदा ज्ञेया रोहिणी

सुखदा भवेत् । मृगस्तु कामभोगाय सुखदं रुद्रदैवतम् । अदितिस्तु सुखं दद्यात् पुष्यं सुखवर्द्धनम् । अश्लेषा शुभनाशाय शोकायाथ मघा मता । वैधव्यं फल्गुनीहस्ते हस्तः पुत्रविवर्द्धनः । चित्रा चित्रतरं नारीं कुरुते नात्र संशयः । स्वातौ शुभाय नारीणां विशाखा सुखनाशिनी । अनुराधार्थभोगाय ज्येष्ठा भर्त्तृवियोगदा । शुभहाप्यशुभं मूलं पूर्व्वाषाढार्थनाशिनी । सुखदा चोत्तराषाढा श्रवणः सुखवर्द्धनः । धनिष्ठापञ्चकं स्त्रीणां प्रथमर्त्तौ सुखप्रदम् । तिथिरेकगुणा प्रोक्ता नक्षत्रं च चतुर्गुणम् । वारः षड्गुणको ज्ञेयो मासश्चाष्टगुणः स्मृतः । वर्षं दशगुणं विद्याद्दर्शनं च ततोऽधिकम् । अशुभं चेद्रजः स्त्रीणां प्रथमर्त्तौ हि दृश्यते । विधानं तत्र कर्त्तव्यमरिष्टघ्नं विशेषतः" इति । अथ योगादिफलम् । परिघस्य तु पूर्व्वार्द्धे व्यतीपाते च वैधृतौ । व्याघातशूलयोर्विष्ट्यामशुभं प्रथमार्त्तवम्"। विष्टिर्विष्टि भद्रेत्यर्थः । अन्यत्रापि । "अमा संक्रान्तिविष्ट्यादौ व्यतीपाते च वैधृतौ । परिघस्य तु पूर्व्वार्द्धे षट् च गण्डातिगण्डयोः । व्याघाते नव, शूले तु नाद्याः पञ्चदशैव तु । वैधव्यमर्थहानिश्च सुतनाशं महद्भयम् । वैधव्यं यत्नतश्चैव दारिद्र्यं क्षीणजीवनम् । तेजोहानिं समायाति एषु पुष्पवती क्रमात् । अथ राशिफलम् । "मेषे सव्यभिचारा स्याद्वृषभे परभोगिनी । मिथुने धनभोगाढ्या कर्कटे व्यभिचारिणी । पुत्रपाढ्या सिंहराशौ तु कन्यायां श्रीमती तथा । विलक्षणा तुलायां तु वृश्चिके तु पतिव्रता । दुश्चारिणी धनुःपूर्व्वे त्वपरे च पतिव्रता । मकरे मानहीना च कुम्भे निर्द्धनबन्ध्यता । मीने विलक्षणा लग्ने षड्संस्था विशाखवत्"। अथ लग्नफलम् नारसिंहीये। "लग्नस्य सप्तमस्थाने सूर्य्यो वैधव्यकारकः । पुत्रहानिकरश्चारो बुधः सत्पुत्रदो भवेत् । वृहस्पतिर्धनायुष्यं शुक्रः सापत्न्यकारकः । शनैश्चरे च बन्ध्या स्याद्राहौ तु मरणं ध्रुवम्" । अथ गुरुशुक्रोदयफलम् ।"आयुः श्रीः प्रीतिरारोग्यमुदिते गुरुभार्गवे। मन्दोदये विरोधः स्यात् क्लेशः स्यात्तामसोदये । तामसो राहुः । अन्यत्र । "संमार्जनीकाष्ठतृणाग्निशूर्पान् हस्ते दधाना कुलटा तदा स्यात् । तल्पोपयोगे तमसि स्थिता चेदृष्टं रजो भाग्यवती तदा स्यात्"इत्यादि सर्व्वं ज्योतिःशास्त्रतोऽवगन्तव्यम् ।

अथ ऋतुस्वरूपम् । "नाभिमूले स्थितं पुष्पचक्रं दलसमन्वितम् । तावत् सर्व्वाश्च दधते गर्भसम्भवकारणम् । अधोमुखं स्थितं स्त्रीणां तद्वच्च मुकुलाकृति । बाल्यात्परवयः प्राप्तौ मुकुलं विकसद्भवेत् । उत्फुल्लं कुसुमं स्त्रीणां स्वभावात् प्रस्रवेद्रजः । तदा प्रभृति सर्व्वासां मासि मासि ऋतुर्भवेदिति" । अथ प्रथमर्त्तौ मङ्गलाचारः प्रयोगपारिजाते स्मृतिचन्द्रिकायाम् ।"प्रथमर्त्तौ तु प्रथमदृष्टाः पतिपुत्रवती स्त्रियः । अवतैरासनं कुर्य्युस्तस्मिंस्तामुपवेशयेत्। हरिद्रागन्धपुष्पादीन् दद्यात्ताम्बूलकस्रजः । आशिषोवाचयेयुस्ताः पतिपुत्रवती भव । दापयेन्नीराजनं कुर्यात्सदीपे वासयेद्गृहे । ताः सर्व्वाः पूजयेत्पश्चाद्गन्धपुष्पाक्षतादिभिः । लवणापूपमुद्गादि दद्यात्ताभ्यः स्वशक्तितः"। अन्यश्चाह दक्षः । "आर्त्तवाभिप्लुता नारी नैका वेश्मनि संविशेत् । न संसर्गं व्रजेदद्भिः स्नात्वा पापात् प्रमुच्यते । अञ्जनाभ्यञ्जने स्नानं प्रवासं दन्तधावनम् । न कुर्य्यादार्त्तवा नारी ग्रहाणामीक्षणं तथा । नखानां कृन्तनं रज्जुनावपत्रादिबन्धनम्"। नेत्यनुवृत्तौ स एव "दग्धे शरावे भुञ्जीत पेयं चाञ्जलिना पिबेत्" । अथ रजस्वला स्पर्शशुद्धिविधानम् स्मृतिरत्नावल्यां दक्षः "उदक्ये द्वे सगोत्रे वा सवर्णे वाऽथवा पुनः । तयोः स्नानं मिथः स्पर्शे पञ्चगव्यं ततः पिबेत् । सवर्णे योनिसम्बन्धे सगोत्रे च रजस्वले । मिथः संस्पृशतोऽमत्या स्नानमात्रेण शुद्ध्यतः । मत्यैकरात्रं नाश्नीतः पञ्चगव्यं पिबेत्ततः । उदक्ययोर्यदान्योन्यमसम्बन्धः सवर्णयोः । स्पृशेदमत्या स्नात्वा च तस्मिन्नाद्यात् शुचिर्भवेत्" । तस्मिन् स्पर्शदिने ।"मत्या तु नाऽऽद्यादाशुद्धेर्भुङ्क्ता चेत् प्रतिवासरम् । उपोषणं तदा केचिदाहुस्तद्दिनसंख्यया । उपवासेष्वशक्ता चेत्तत्समं दानमाचरेत् । सम्भाषेतां स्पृशेतां वा ब्राह्मण्यौ च रजस्वले । आस्नानकालान्नाश्नीतो ह्युभे मत्या मिथः क्वचित् । स्नात्वोपवासं कुर्य्यातां पञ्चगव्येन शुध्यतः । एवमभ्यसतश्चाब्दप्रायश्चित्तं समाचरेत् । मत्या रजस्वलान्योन्यं वृषलीं ब्राह्मणी स्पृशेत् । आस्नानकालान्नाश्नीयादतिकृच्छ्रं समाचरेत् । चाण्डालं सार्त्तवा नारी संस्पृशेत् भोजनान्तरे । वाग्यता बहिरासीनाऽऽस्नानकालादुपोषणम्। प्राजापत्यञ्चरेत् पश्चात् पञ्चगव्यं ततः पिबेत् । विप्रान् द्वादशसंख्याकान् भोजयित्वा विशुध्यति । पुष्पिणी संस्पृशेन्मोहाद्दण्डं वा नरं स्त्रियम् । स्नानादर्वाङ् न भुञ्जीत भुक्त्वा कृच्छ्रं समाचरेत् । स्पृष्टोदक्या पञ्चनखान् द्विशफैकशफान् पशून् । अन्त्यजानि च सर्व्वाणि नाद्यादा स्नानमाचरात्" । परा-

परः । "रजस्वला यदा दष्टा शुना जम्बूकरासभैः । पञ्चरात्रं निराहारा पञ्चगव्येन शुद्ध्यति । ऊर्द्ध्वं तु द्विगुणं नाभेर्वक्त्रे तु त्रिगुणं तथा । चतुर्गुणं स्मृतं मूर्द्ध्नि दंशेऽन्यत्राप्यता भवेदिति" ।

तत्र नैमित्तिकस्नानशुद्धिस्नानप्रकारस्तत्रैव दर्शितः यथा । तत्र नैमित्तिकस्नानप्रकारस्तु स्मृत्यर्थसारे । "स्नाने नैमित्तिके प्राप्ते रजोदर्शने पात्रान्तरिततोयेन स्नात्वाद्भिः सिक्तगात्रा साङ्गोपाङ्गं वस्त्रं संनिष्पीड्यान्यवस्त्रधारणं कृत्वा प्रतक्षरेदिति" । अथ शुद्धिस्नानं स्मृत्यर्थसार एव । "रजस्वला षष्टिमृत्तिकाभिः शौचं कृत्वा मलं प्रक्षाल्य दन्तधावनपूर्व्वकं संगवे स्नायात्" इति । अथ स्नानान्तरमपि रजःस्रावे विशेषोऽभिधीयते । कात्यायनेन "रजस्वला यदा नारी त्रिरात्रमशुचिर्भवेत् । प्रथमेऽहनि चाण्डाली द्वितीये ब्रह्मघातिनी । तृतीये रजकी प्रोक्ता चतुर्थेऽहनि शुद्ध्यति । भर्त्तुः शुद्धा चतुर्थेऽह्नि स्नाता नारी रजस्वला । दैवे कर्म्मणि पित्र्ये च पञ्चमेऽहनि शुद्ध्यतीत्युक्ताधिष्ठितम् । "रागजं रोगजञ्चैव द्रव्यजं कालजं तथा । यद्रागरोगद्रव्योत्थं तदुक्तं प्राह भार्गवः । कालजं तु रजःसंज्ञं तस्मात् तत्रैव चाऽशुचिः"। एषां लक्षणानि । "अर्व्वाक् प्रसूतेरुत्पन्नं भेदोऽवध्यान्तरात्तु यत् । तद्रागजमिति प्रोक्तं मनोद्रेकसमुद्भवम् । रोगेण यद्रजः स्त्रीणामन्वहं संप्रवर्त्तते । नाऽशुचिः स्त्री ततस्तेन यतो वैकारिकं मलम् । व्याध्यादिदोषवैषम्यादस्तकं प्रवर्त्तते । रोगजं तत्समुद्दिष्टमथ द्रव्यजमुच्यते । द्रव्यजं धातुवैषम्यद्रव्योपभोगजमिति" । "आरभ्य चार्त्तवदिनादेकविंशतिवासरे । मासादूर्द्ध्वं रजोयत् स्यात्तत्कालजमुदाहृतम् । रजस्वला यदा नारी पुनरेव रजस्वला । सा विंशतिदिनादूर्द्ध्वं त्रिरात्रमशुचिर्भवेत्" । ततः पूर्व्वं तु "रजस्वला यदि स्नाता पुनरेव रजस्वला । अष्टादशदिनादर्व्वागशुचित्वं न विद्यते । एकोनविंशतेर्वागेकाहं स्यात् ततोद्व्यहम् । विंशत्प्रभृत्युत्तरेषु त्रिरात्रमशुचिर्भवेदिति" । कश्यपस्तु । "रजस्वला सती नारी पुनरेव रजस्वला । अष्टादशाहात् प्राग्यापि अशुचिः स्यात्त्रिरात्रकम् । त्रयोदशदिनादूर्द्ध्वं रजसा दृश्यते यदा । अष्टादशाहात् प्राग्वाऽपि त्रिरात्रमिति निश्चयः । एकादशेऽह्न्यहोरात्रं त्रिरात्रं द्वादशेऽहनि । ऊर्द्ध्वं त्रिरात्रं विज्ञेयमिति कुक्कुषिणोदितमित्यादि? परस्परविरुद्धवचनम्" जातिगुणयोऽस्वादेशभेदेन व्यवस्थापनीयम्"। स्नानकालोऽपरात्तृत्तरत्वेन व्यवस्थेति रघु०। रजःकालाज्ञाने प्रजापतिराह "अविज्ञाते मते वा च मलवद्वसना यदि । हतं गेहेषु जुष्टं स्यात्कुत्सिता; त्रिरात्रतः । रजः प्राप्तकालसंदेहेऽपि सएवाह । "निःसंदेहे परिज्ञाने स्नातं वै शुद्धिकारणम् । संदेहमात्रे स्नानं स्यादित्युवाच प्रजापतिरिति" । अथ रात्रौ रजोदर्शने विशेषः । "अर्द्धरात्रपर्य्यन्तं पूर्व्वदिनमित्यपरे परदिनगणना वा त्रिभागाया रात्रेर्भागद्वयं पूर्व्वदिनान्तर्गतमित्यन्ये । सूर्य्योदयावधि पूर्व्वदिनमित्यपरे । तदाह काश्यपः । "उदिते तु यदा सूर्य्ये नारीणां दृश्यते रजः । जननं वा विपत्तिर्वा यस्याहस्तस्य शर्व्वरी । अर्द्धरात्रावधिः कालः सूतकादौ विधीयते । रात्रिं कुर्य्यात्त्रिभागां तु द्वौ भागौ पूर्व्वगामिनौ । उत्तमोऽंशः प्रभातेन युज्यते ऋतुसूतके । रात्रावेव समुत्पन्ने मृते रजसि सूतके । पूर्व्वमेव दिनं ग्राह्यं यावन्नाभ्युदितो रविरिति"। अत्रापि देशाचारादिना व्यवस्था द्रष्टव्या । अथ रजस्वलाया ज्वराद्रिरोगसंभवे शुद्धिविधानं स्मृत्यर्थसारे । "रजस्वलां ज्वरितां चतुर्थेऽहनि सचेलनद्याद्याप्लाव्य दशकृत्वोद्वादशकृत्वो वान्या तां स्पृष्ट्वाचमेदिति" । उशनापि "ज्वराभिभूता या नारी रजसापि परिप्लुता । कथं तस्या भवेच्छौचं शुद्धिः स्यात् केन कर्म्मणा ? । चतुर्थेऽहनि संप्राप्ते स्पृशेदन्या तु तां स्त्रियम् । सा सचेलावगाह्यापः स्नात्वा स्नात्वा पुनः स्पृशेत् । दशद्वादशकृत्वो वा आचामेच्च पुनः पुनः । अन्ते च वाससां त्यागस्ततः शुद्धा भवेत्तु सा । दद्याच्छक्त्या ततो दानं पुण्याहेन विशुध्यति । आतुराणां तु सर्व्वेषामेवं शुद्धिर्विधीयत" इति । अथोदक्यास्पृष्टानां चेतनानां सचेलं स्नानम् अचेतनपीठादीनां प्रक्षालनं, तत्रोदक्यादिस्पृष्टचेतनस्पर्शे आचमनम् "उदक्याऽशुचिभिः स्नायात्संस्पृष्टस्तैरुपस्पृशेदिति" याज्ञवल्क्यवचनात् उदक्यादिस्पृष्टचेतनस्पर्शे तु द्वितीयस्यापि स्नानमेव यथाह मनुः "दिवाकीर्त्तिमुदक्याञ्च पतितं सूतिकां तथा । शवं तत्स्पर्शिनं चैव स्पृष्ट्वा स्नानेन शुद्ध्यति" तृतीयस्य त्वाचमनं यथाह संवर्त्तः "तत्स्पर्शिनं स्पृशेद्यस्तु स्नानं तस्य विधीयते । ऊर्द्ध्वमाचमनं प्रोक्तं द्रष्टव्यानां प्रोक्षणं तथा" एतदमतिविषयं बुद्धिपूर्व्वस्पर्शे तु तृतीयस्यापि स्नानमेव "पतितचण्डालसूतिकोदक्याशवस्पृष्टितत्स्पृष्ट्युपस्पर्शने सचेलमुपस्पर्शनाच्छुद्धिरिति" गौतमवचनात् । चतुर्थस्याचमनं यथाह देवलः "उप-

स्पृश्याशुचिस्पृष्टं तृतीयं चापि मानवः। हस्तौ पादौ च तोयेन प्रक्षाल्याचम्य शुद्ध्यति” अशुद्धस्योदक्यादिस्पर्शे तु देवलः “अशुद्धान् स्वयमप्येतानशुद्धस्तु यदि स्पृशेत्। स शुध्यत्युपवासेन तथा कृच्छ्रेण वा पुनः। श्वादिस्पर्शे तूपवासःकृच्छ्रस्तु श्वपचादिके” इति। अधिकमार्त्तवशब्दे ८०८पृष्ठे उक्तम्। [ज्यत।

उदगद्रि उदगुत्तरस्यामद्रिः। हिमाचले। उदक्पर्वतोदयो-

उदगयन न० उदक् उदीच्यामयनम्। १उत्तरायणे। ७व०। माघादिके मासषट्के “उदगयने आपूर्य्यमाणे पक्षे कल्याणे नक्षत्रे चौलकर्म्मोपनयनगोदानविवाहाः” आश्व० गृ० १,४,१, “अहस्तत्रोदगयनं रात्रिः स्याद्दक्षिणायनम्” मनुः। उत्तरायणशब्दे ११०४पृ० विवृतिः।

उदग्दश न० उदक् उत्तरा दशा यस्य। उत्तराग्रे वस्त्रे “उत्तीर्य्यान्यानि वासांसि परिधाय सकृदेवाप्यापीड्योदग्दशानि विसृज्यासत आनक्षत्रदर्शनात्” आ०गृ० ४,४,१०, “उदग्दशानि उदगग्राणि” नारा०वृ०। “अथ वासो द्विगुणं वा चतुर्गुणं वा प्राग्दशं वोदग्दशं वोपस्तृणाति” शत०ब्रा० ३,३,२,६, [ह्नष्टभूमिके देशे जटा०

उदग्भूम त्रि० उदक् उद्गता भूमिर्यत्र अच् समा०। उत्-

उदग्र त्रि० उद्गतमग्रं यस्य। १उच्चे उन्नते २वृद्धे “हरिन्मणिश्यामसुदग्रविग्रहः” किरा० “नयन् मधुलिहः श्वैत्यमुदग्रदशनांशुभिः” “आक्रम्य संस्थितमुदग्रविशालशृङ्गम्” माघः “अवनिनाथोऽयमुदग्रनाभः” “संदधे दृशमुदग्रतारकाम्” “क्षतात् किल त्रायत इत्युदग्रः” रघुः। “प्रोच्चैरुदग्रे राजशब्दे क्रमे च” “सप्तकुलोदग्रतरप्रभावः” “आविष्कृतोदग्रतरप्रभावम्” रघुः। २उद्धते च। “मदोदग्राः ककुद्मन्तः” रघुः। [उन्नतदन्ते

उदग्रदत् त्रि० उदग्रा दन्ता यस्य दत्रादेशः स्त्रियां ङीप्।

उदग्राभ पु० उदकं गृह्णाति ग्रह–अण् उप० स० संज्ञाया उदादेशः वेदे हस्य भः। १मेघे “एषा पवस्व मदिरो मदायोदग्राभस्य नमयन् वधस्नैः” ऋ०९,९७,१५, “उदग्राभमुदकग्राहिणं मेघम्” भा०। लोके तु उदग्राह इत्येव। उदग्रा उन्नता आभा यस्य। २महाप्रभे त्रि०।

उदङ्क पु० उदच्यते उद्ध्रियतेऽत्र उद्+अन्च–घञ्। “उदङ्कोऽनुदके” पा०नि०कुः १चर्ममये घृतादिपात्रे (कुपो) तैलोदङ्कः घृतोदङ्कः। उदच्यते आकृष्यतेऽनेन करणे घञ्। आकर्षणसाधने २संदंशे “हृदयोदङ्कसंस्थानं क्षतान्तानायसान्विभम्” भट्टिः। ३ऋषिभेदे पु० “अथ नीम उदङ्कः शौल्वायनः” शत० ब्रा० १४,६,१०,४, अस्य इञ् अञन्ते च उपका० बहुत्वे गोत्रप्रत्ययस्य वा लुक्। औदङ्कायनाः उदङ्काः।

उदङ्मुख त्रि० उदक् उत्तरा मुखमस्य। उत्तरमुखे “मण्डपं कारयेत्तत्र प्राङ्मुखं वाप्युदङ्मुखम्” अश्वाचलमण्डपे पुरा० “अन्नं भुञ्जीत ह्युदङ्मुखः”। “यथाशास्त्रमुदङ्मुखः”। “मूत्रोच्चारसमुत्सर्गं दिवा कुर्य्यादुदङ्मुखः” मनुः। “उदङ्मुखान् प्राङ्मुखान् वा पूर्वाह्णे वै शुचिः शुचीन्” मनुः। “उदङ्मुखः सोऽस्त्रविदस्त्रमन्त्रम्” रघुः। “स्थानादस्मात् सरसनिचुलादुत्पतोदङ्मुखः खम्” मेघ०।

उदचमस पु० उदकस्य उदकधारणार्थश्चमसः संज्ञाया उदादेशः। उदकस्थापनार्थे चमसरूपे पात्रभेदे “अथान्तरेणोदचमसं निनयति” शत०ब्रा०७,२,१,१७। “चतसृषु चतसृषु स्रौक्षीनुदचमसान्निनयति” कात्या० १७,२,४,

उदच् त्रि० उद्+अन्च–क्विप्। १ऊर्द्ध्वं गते उत्तरे २देशे ३अनन्तरे ४काले उत्तरदिग्देशकालवृत्तौ च। ५उत्तरदिशि स्त्री ङीप् अचोऽल्लोपे उदीआदेशे दीर्घः उदीची “तेनोदीचीं दिशमनु रवेः” मेघ०। ततः अस्ताति तस्य लुक्। प्रथमापञ्चमीसप्तम्यन्तार्थे वर्त्तमाने दिग्देशकाले अव्य० “अयने द्वे गतिरुदग् दक्षिणार्कस्य वत्सरः” अमरः “उपवीणयितुं ययौ रवेरुदगावृत्तिपथेन नारदः” रघुः “संपूतोत्पुनात्युदगग्राभ्याम् पवित्राभ्याम्” “उदगग्ने रवृतस्य कुशस्य धारयन्ति” सं०त०गोभि०। “प्रागुदग् वा धौतं वस्त्रं प्रसारयेत्” वि०पा०स्मृ०। “आचम्योदक्पराहृत्य” मनुः। “वारविम्बोदकृत्तम्” शि०शि०।

उदज पु० उद्+अज–अप् अभावः। पशुप्रेरणे।

उदजिन पु० उत्क्रान्तमजिनम् अत्या० स०। अकर्मातीते निरुदकादि० अन्तान्तोदात्तता।

उदज्ञ पु० उदकं जानाति ज्ञा–क संज्ञायाम् उदादेशः ऋषिभेदे तस्यापत्यम् तिका० फिञ्। औदज्ञायनि तदपत्ये पुंस्त्री०।

उदञ्च् त्रि० उद्+अन्च–क्विन्। उदक्शब्दार्थे। भत्वे उदचः उदचा इति भेदः। ततः प्रथमान्ताद्यर्थे अस्ताति तस्य लुक्। उदक् प्रथमान्ताद्यर्थे दिग्देशादौ अव्य० “यान् मडुदङ्ङेति तान् मावान्” शा०ङ०। उदङ् उत्तरस्याम्।

उदञ्चन न० उद्+अन्च–णिच् करणे ल्युट्। १पिधानार्थे पात्रे (ढाकना)। “प्रतिप्रस्थाता संस्रावानवस्नुवन्नेता चमसेन वोदञ्चनेन वा” शत०ब्रा०४, ३,५, २१,

"प्रतिप्रस्थाता च संस्रावशाधवनीयादुद्धृत्य तोदञ्चनेन चमसेन वा" कात्या०१०,५,१। भावे ल्युट्। २ऊर्द्ध्वक्षेपणे। कर्त्तरि ल्यु। ३उत्क्षेपके त्रि०। "सतृपतिर्विश्वासामूधः स धियामुदञ्चनः" ऋ०५,४४,१२। "उदञ्चन ऊर्द्ध्वमुन्नमयिता" भा०।

उदञ्चित त्रि० उद्–अन्च–पूजायां क्त। १पूजिते। णिच्–क्त। २ऊर्द्ध्वंगमिते ३उत्क्षिप्ते। हेम०। "उदञ्चितावोरसि तदङ्घ्रियोरुः" भट्टिः।

उदञ्चु त्रि० उद्+अन्च–उन्। उद्गतिशीले। बाह्वा० अपत्ये इञ्। औदञ्चवि तदपत्ये पुंस्त्री०।

उदण्डपाल पु० उद्गतमण्डं पलति गच्छति कारणतया पल-गतौ अण् उप०स०। १मत्स्ये २सर्पे च मेदि० तयोरण्डोद्भेदेन जातत्वात्तथात्वम्। [शब्दचि०।

उदद्या स्त्री उद्+अद–बा० यत्। तैलपिपीलिकायां शब्दा-

उदधान पु० उदकं धीयतेऽत्र आधारे ल्युट्। उदादेशः। १कुम्भे २मेघे च।

उदधि पु० उदकानि धीयन्तेऽस्मिन् धा-आधारे कि उदादेशः। १समुद्रे,२घटे च। "उदधेरिव निम्नगाशतैः" "चन्द्रोदय इवोदधेः"रघुः।"सैः कृतः सर्व्वभक्षोऽग्निरपेयश्च महोदधिः" मनुः। समुद्रसामान्यस्येयं संज्ञा तत्तत्पदसमभिव्याहारे तु विशेषस्य बोधः। यथा क्षारोदधिः क्षीरोदधिः सुरोदधिः। ३मेघे च। "हृदय मप्स्वायुरपो दत्तोदधिं भिन्त" यजु० १८,५४। ४उदकधानकर्त्तृ सूर्य्ये च "संसर्पेण दिव्यतुदधिर्निधिः" यजु०३८,२२ सूर्य्यस्य च जलपूर्णाभिर्नाडीभिर्जलाकर्षणेन तद्धारकत्वात्तथात्वं यथा च तस्य जलाधायकत्वम्" तथा-ऽऽदित्यशब्दे २२२ पृष्ठे उक्तम्।

उदधिक्रा त्रि० उदधिं क्रामति क्रम–वि डोप्। समुद्रक्रामके।

उदधिमल पु० उदधेर्मल इव। समुद्रफेने राजनि०।

उदधिमेखला स्त्री उदधिर्मेखलेव यस्याः। मध्यस्थाने समुद्रवेष्टितायां पृथिव्याम्। भूगोले 'भूमेरर्द्धं क्षारसिन्धोरुदकस्थं जम्बूद्वीपं प्राहुराचार्य्यवर्य्याः। अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये क्षारक्षीराद्यम्बुधीनां निवेशः" सि०शि० उक्तेः याम्यार्द्धे एवाम्बुधीनां निवेशात् तेषां पृथिवीमध्यवेष्टकतया मेखलातुल्यत्वम्।

उदधिसुता स्त्री ६त०। १लक्ष्म्याम् तस्या उदधिजातत्वात् तथात्वम्। उदधितनयादयोऽप्यत्र २चन्द्रे पु०।

उदन् न० उन्द+कनिन्। उदके। "उदकशब्दादेशोऽयमित्यन्ये अन्यएवायं शब्द इत्यपरे। "धारावरैर्मरुतोदभिर्वृन्दन्ति भूम" ऋ०,१,८५,५ "अध त्मना भरते फेनमुदन्" ऋ०१,१०४,३,। उदन् उदनीत्यर्थः परमे व्योमन् इति वत् सप्तम्या लुक् नलोपाभावश्च

उदन्त पु० उद्गतोऽन्तोनिर्णयो यस्मात्। १वार्त्तायाम् वृत्तान्ते कुशलादिकथने,। "श्रुत्वा रामः प्रियोदन्तम्" रघुः "कान्तोदन्तः सुहृदुपनतः सङ्गमात् किञ्चिदूनः" मेघ० "एवंप्रायेण वाच्योदन्तेन" काद०। २साधौ,मे स्वार्थे कन्। तत्रैव उद्गतोऽन्तोऽस्य पाकवशात् प्रा०ब०गतलोपः। ३पाकवशात् प्राप्तान्ते त्रि० "स्त तमसदिति तदाहुर्यद्युदन्तं तर्हि जुहुयादिति तद्वैनोदन्तं कुर्य्यादिप ह दृष्टेन्दुदन्तं कुर्य्यादप्रजज्ञि वै रेत उपदध्यं तस्मान्नोदन्तं कुर्यात्" शत०ब्रा०२,३,१,१४, "अधिश्रितं वारुणमुदन्तं पौष्णम्" कात्या० २५,२,३,

उदन्तिका स्त्री उदन्तमुद्गतान्तं करोति उदन्त+णिच्+ण्वुल् टाप् अत इत्। तृप्तौ हारा०।

उदन्य नामधातु अतिगार्द्ध्येनोदकमिच्छति क्यच् निपा०उदन्यति औदन्यीत् उदन्याम्–बभूव आस चकार। उदनिता- उदन्यिता उदन्या।

उदन्या स्त्री अतिगार्द्ध्येन उदकमिच्छति क्यजन्तात् अ। १पिपासायाम्।"व्यसनुदन्यां शिशिरैः पयोभिः" भट्टिः वेदे० बा०नयनार्थेऽपि क्यच्। २उदकनयने च "अथ यत्रैतत्पुरुषः पिपासतिनाम तेज एव तत्पीतं नयते तद्यथा गोनायोऽश्वनायः पुरुषनाय इत्येव तत्तेज आचष्ट उदन्येति" छा०उ० यथा च पुरुषस्य पिपासा भवति तद्भाष्ये समर्थितं यथा

"यत्र यस्मिन् काले एतन्नाम पिपासति पातुमिच्छतीति पुरुषो भवति। अशिशिषतीतिवदिदमपि गौणमेव नाम भवति। द्रवीकृतस्याशितस्यान्नस्य नेतृ आपोऽसृङ्ग देहं क्लेदयन्त्यःशिथिलीकुर्य्युरब्बाहुल्याद्यदि तेजसा न शोष्यन्ते। नितराञ्च तेजसा शोष्यमाणास्वप्सु देहभावेन परिणममानासु पातुमिच्छा पुरुषस्य जायते तदा पुरुषः पिपासति नाम तदेतदाह। तेजएव तत्तदा पीतमबादि शोषयेद्देहगतलोहितप्राणभावेन नयते परिणमयति। तद्यथा गोनाय इत्यादि समानमेव। तत्तेज आचष्टे लोकः। उदन्येति उदकं नयतीत्युदन्या उदन्येतीति छान्दसम्"। पिपासा च प्राणस्य धर्मः यथाह

शा॰ति॰ "बुभुक्षा च पिपासा च प्राणस्य, मनसः स्मृतौ। शोकमोहौ, शरीरस्य जरामृत्यू, षडूर्मयः"। उद्न: क्यच् उदन्य उदकसम्बन्धिनि त्रि॰ "शिवा उदन्यवा वर्षधारा उदन्या इव" ऋ॰२,७,२, "उदन्या उदकसम्बन्धिनी" भा॰

उदन्यु त्रि॰ उदन्य—नामधातोः उन्। पिपासौ "ऋण्वाने न दिव उत्सा उदन्यवे" ५,५७,१, "इरिं भर्वते ऽव ता उदन्युवः" ऋ॰९,८६,२७, उदन्युवः उदकेच्छवन्तः" भा॰ उवङ् छान्दसः।

उदन्वत् पु॰ उदकानि सन्त्यस्मिन् मतुप् उदन्भावः मस्य वः। १समुद्रे "उदन्वदम्भःपरिवीतमूर्त्तिः" माघः। "यशोभिरुदन्वानिव चन्द्रपादैः" कुमा॰ "अवकाशं किलोदन्वान्" ते च प्रादुदन्वन्तं बुबुधे चादिपूरुषः" रघुः। वेदे नि॰। २उदकयुक्तमात्रे त्रि॰" स्त्रियां ङीप्। "उदन्वता परिदीया रथेन" ऋ॰५,८३,७, "उदन्वता उदकयुक्तेन रथेन" भा॰ "उदन्वतीरुदकाश्च याः" ऋ॰७,५४,४, [औदापीत्।

उदप आघाते सौत्रः पर॰ सक॰ सेट्। उदपति। औदपीत्

उदपात्र न॰ उदकपूर्णं पात्रम् उदादेशः। जलपूर्णे पात्रे "भिक्षामप्युदपात्रं वा सत्कृत्य विधिपूर्वकम्" मनुः।

उदपान पु॰न॰ उदकं पीयतेऽस्मिन् पा-ल्युट् उदादेशः। कूपसमीपस्थे खाते क्षुद्रजलाधारे। "तडागान्युदपानानि वाप्यः प्रस्रवणानि च" निर्जलेषु च देशेषु खानयामासुरुत्तमान्। उदपानान्" रामा॰। "अल्पवर्षप्रस्रवणोदपानोदकप्रायः" सुश्रु॰। ७त॰। उदपानमण्डूकः। पात्रेसमितादि॰ ७स॰ लुक् अरोह्या॰। आद्युदात्तता।

उदमान पु॰ "कुल्या ह्यादशभिर्द्रोणैर्न्यपादैश्च कथ्यते। तस्मात् पतितो भाग उदमान उदाहृत" इत्युक्ते मानभेदे।

उदय पु॰ उद्+इ—अच्। ज्योतिषोक्ते राशेरुदयरूपे १लग्ने। आधारे अच्। "येषां न दृश्यते साक्षात् स तेषामुदयः स्मृतः" इत्युक्तलक्षणे रवेर्दृष्टियोग्यस्थाने २उदयाचले पूर्वपर्वते। "उदयाचलव्यवहितेन्दुवपुः" माघः "उदयगिरिवनालीबालमन्दारपुष्पम्" उद्भटः। भावे अच्। ३प्रथमदर्शनयोग्यभवने, ४वृद्धौ, ६उद्भवे ७उद्गमे "अस्तोदयः परग्लानिः" माघः "प्रभातसमयमिव पूर्वदिग्भागरागानुमेयमित्रोदयम्" काद॰। "गतोदयं मायमिवौषधीनाम्" "निवातस्तिमितां वेलां चन्द्रोदय इवोदधेः" "उदयमस्तमयञ्च रघूद्वहात्" रघुः। "अपसेधोदयं वर्षमहद्दकुसुमं फलम्"। "यौ तु स्वभावबोधौ तौ भूतानां प्रभवोदयौ"। कुमा॰ "उदये मदवाच्यमुज्झता"। "आत्मनः सदृशारम्भ आरम्भसदृशोदयः"। "प्रसूतानुदयापवर्गयोः" रघुः। "बीजाङ्कुरः प्रागुदयादिवाम्भः" कुमा॰ ८उत्कर्षे। "विजितजगत्त्रयोदयम्" माघः। पञ्चाशीमुदयस्य स्वाधिष्ठितराशीनामुदयात् "निजनिजोदयसम्बसमुद्गमे समुदयोऽपि भवेद्गमभःसदाम्" सि॰ शि॰। राशीनां देशभेदेनोदयकालविशेषः सि॰ शि॰। तत्रादौ निरक्षदेशलङ्कादौ तन्मानसाधनं यथा "एकस्य राशेर्बृहती ज्यका या द्वयोस्त्रिभस्यापि कवीलताभाम्। स्वस्वापमज्याकृतिवर्जितानां मूलानि तासां त्रिगुणा १४३८ हृतानि। स्वस्वद्युमौर्व्या विभजेत् फलानां चापान्यधोऽधः परिशोधितानि। क्रमोत्क्रमस्थानि निरक्षदेशे मेषादिकानामुदयासवः स्युः" शि॰। "एकस्य राशेर्बृहती ज्येत्यष्टमी ज्या। द्वयोरिति षोडशी ज्या। त्रिभस्येति त्रिज्या। आसां येर्गितानां स्वकीयस्वकीयक्रान्तिज्यावर्गैर्वर्जितानां मूलानि त्रिज्यागुणितानि स्वस्वद्युज्यया विभजेत्। फलानां चापान्यधोऽधः परिशोधितानीति, तृतीयात् द्वितीयं द्वितीयात् प्रथमं शोध्यम्। प्रथमं तथाविधमेव। एवं लङ्कोदयासवः स्युः। अत्रोपपत्तिः। अत्रोदयक्रान्तिवृत्तस्य तिर्यक्स्थितत्वात् त्र्यस्राणि क्षेत्राण्युत्पद्यन्ते। तद्यथा। मेषान्तस्य ज्या क्रान्तिवृत्ते कर्णः। तत्क्रान्तिज्या-[illegible] भुजः। तद्वर्गान्तरपदं मेषान्तेऽहोरात्रवृत्ते कोटिः। एवं राशिद्वयस्य ज्या कर्णः। तत्क्रान्तिज्या भुजः। तद्वर्गान्तरपदं वृषभान्तेऽहोरात्रवृत्ते कोटिः। एवं त्रिराशिज्या कर्णः परमक्रान्तिज्या भुजः। परमाल्पद्युज्या कोटिः। एताः कोटयश्चापकरणार्थं त्रिज्यावृत्ते परिणामिता त्रिज्यागुणाः स्वस्वद्युज्यया भक्तास्तासां चापानि। प्रथमं मेषोदयस्य कालः। द्वितीयं राशिद्वयस्य। तृतीयं राशित्रयस्य। अतो विश्लेषितानीत्युपपन्नम्। इदानीं प्रकारान्तरेणाह" प्रमि॰। "कीटादिराश्यन्तजकोटिजीवास्त्रिज्या ३४३८ गुणाः स्वस्वदिनव्यासाप्ताः। चापीकृताः प्राग्वदधो विशुद्धाः कीटादिकानामुदयासवो वा" शि॰। "कीटादिराश्यन्तजकोटिजीवास्ता एकद्वित्रिराशिज्या भवन्ति १७१९।२९७७।३४३८। एतास्त्रिज्यया गुणिताः स्वस्वदिनज्यया भक्ता इति। यैव वृषभान्ते द्युज्या सैव कीटान्तेऽपि ३२१८। यैव मेषान्ते द्युज्या सैव सिंहान्तेऽपि ३३६६। कन्यान्ते द्युज्या त्रि-

ज्यैव २१२८। आभिस्ता भाज्याः। फलानां चापान्यधोऽधः शुद्धानि कीटादीनामुदयासवः स्युर्निरक्षे वा। त एव मिथुनवृषभमेषाणामित्यर्थः। अत्रोपपत्तिः। क्रान्तिवृत्ते वृषभान्ते सूत्रसंक्रमपं बद्ध्वा द्वितीयमपं कीटान्ते निबध्यते तस्य सूत्रस्यार्द्धमेकराशेर्ज्या भवति। एवं सूत्रसंक्रमपं मेषान्ते बद्ध्वा द्वितीयं सिंहान्ते तस्य सूत्रस्यार्धं राशिद्वयस्य ज्या भवति। एवं मेषतुलादौ बद्धसूत्रस्यार्धं त्रिज्या। एता एव वृषभान्तमेषान्तमीनान्ताहोरात्रवृत्तानां ज्या भवन्ति यतस्तत्सम्पातेषु क्रान्तिवृत्ते सूत्राणि बद्धानि। अतस्तासां त्रिज्यावृत्तपरिणतानां चापान्तराणि कीटादिकानामुदया भवन्तीति गोले प्रदर्शयेत्। इदानीं पुनः प्रकारान्तरेणाह प्रमि०। "मेषादिजीवास्त्रिकुजैर्घ्नुमौर्व्या २१४१ युक्ता हृताः स्वस्वदिनज्यया वा। चापीकृताः प्राग्वदधो विशुद्धा मेषादिकानामुदयासवो वा" शि०। स्पष्टार्थमिदम्, अस्योपपत्तिर्गोले कथितैव सुगमा च अथ निष्पन्नांस्तानन्तराह" प्रमि०। "तेऽश्वाद्रिभूपा १६७० गुणगोऽद्रिचन्द्राः १७९३ सप्ताब्धिनन्देन्दुमिता १९२७ श्रयैते। क्रमोत्क्रमस्थाश्चरखण्डकैः स्वैः क्रमोत्क्रमस्थैश्च विहीनयुक्ताः। मेषादिषण्णामुदयाः स्वदेशे तुलादितोऽमी च विलोमसंस्थाः। उदेति राशिः समयेन येन तस्मप्तमोऽस्तं समुपैति तेन" शि०। "अत्र चतुःकरणे जीवानां स्थूलत्वाद्द्वितीयतृतीयावुदयौ नाच्यैः सम्यक्पठितौ। अत्र प्रथमप्रकारेण प्रथम उदयो स्पष्टते। द्वितीयादिप्रकारेण द्वितीयतृतीयौ। शेषं स्पष्टार्थम्। अस्योपपत्तिः। निरक्षस्वदेशार्कोदययोरन्तरं चरम्। निरक्षे स्वदेशे च मेषादिः सममुदेति। मेषान्त आदौ क्षितिजे, तत उन्मण्डले सगति। अतश्चरखण्डोनो मेषोदयः स्वदेशोदयो भवति। एवं वृषमिथुनयोरपि। कर्क्यादौ तु चरखण्डानामुपचीयमानत्वाद्धनं तानि परिणमन्ति। तुलादौ तून्मण्डलस्याधःस्थितत्वाच्चरखण्डानि धनं भवन्ति। मकरादौ तु चरखण्डानामपचीयमानत्वादृणं परिणमन्ति। इत्यादि गोले सम्यग्विलोक्यते" प्रमि०। "चरखण्डानि तत्रैवोक्ता यथा 'स्वदेशजैरक्षचरखण्डकैर्वा लघुज्यकाचक्रविदोस्त्रिभागात्। मेषादिराशित्रितयस्य यानि चराण्यधोऽधः परिशोधितानि। तानि स्वदेशे चरखण्डकानि दिङ्नागसत्र्यंशगुणै १०।८।३/२० र्विनिघ्नी। पलप्रभा तोयपलात्मकानि स्थूलानि वा सूक्ष्मचरखण्डकानि। स्थूलं चरं चापपलात्मकं तैस्तत्प्राणचापं यदि वापि सूक्ष्मम्" शि०। "अथ वा चरार्धं मध्यमार्कद्विभिः खण्डकैः स्वदेशजैर्लघुज्याप्रकारेणाथ सिद्ध्याप्रमित्यादिना साध्यम्। कस्मादित्याह। रविदोस्त्रिभागात्। अर्कस्य सायनांशस्य यो भुजस्तस्य यस्त्र्यंशस्तस्मादंशसिद्ध्याप्रमित्यादिना। अथ खण्डकानि। मेषादिराशिलवक्षेत्यादि सुगमम्। अथ स्थूलखण्डकैर्यच्चरं तत् स्थूलं पानीयपलात्मकं भवति। तत् षड्गुणं प्राणात्मकम्। तस्माद्यदि चतुः क्रियते तदा सूक्ष्मं चरार्धं स्यात्। अत्रोपपत्तिः। एकमङ्गुलं पलभा प्रकल्प्य एकद्वित्रिराशीनां पृथक् चराण्यानीय तानि षड्भिर्विभज्य पानीयपलात्मकानि कृत्वा यावदधोऽधो विशोध्यन्ते तावद्दिङ्नागसत्र्यंशगुणा उत्पद्यन्ते। अतोऽनुपातः। यद्येकाङ्गुलया पलभया एतानि चरखण्डानि तदेष्टया किमिति। एवं चरखण्डानि स्युः। परं तानि ज्यात्मकानि यतः पूर्वं सत्यत्वात् स्थूलमोत्पन्नम्। अत एव तस्माच्चापं यदि वापि सूक्ष्ममित्युक्तम्। खण्डकैश्चरकरणे लघुज्यासाधनवद्वासना। तत्र लघुज्याखण्डकानि नव चरखण्डकानि त्रीणि परमे राशित्रये भुजे यथा त्रीणि लभ्यन्ते। तदर्थं रविदोस्त्रिभागादित्युक्तम्" प्रमि०।

गोलाध्याये च उदयान्तरकर्मोपपत्तियुक्तं देशान्तर सहितं स्पष्टतया तत्साधनमुक्तं यथा "अर्कगणो मध्यमसावनेन कृतश्चलत्वात् स्फुटसावनस्य। तदुत्थखेटा उदयान्तराख्यकर्मोद्भवेनोनयुताः फलेन। लङ्कोदये स्युर्न कृताश्च यद्यैर्यतोऽन्तरन्तच्च भवल्पकं स्युः" शि०। योऽयमहर्गण आनीतः स मध्यमसावनेनैव कुतः? स्फुटसावनस्य चलत्वात् तथाविधेनाहर्गणेन स्फुटो ज्ञायतेत्यर्थः। युगादेरारभ्य वर्तमानरविवर्षादेः प्राक् यावान् मध्यमसावनस्तावानेव स्फुटसावनः स्यात् किन्तु रविवर्षादेरूर्ध्वं यावान् मध्यमसावनस्तावान्न स्फुटः अतस्तदुत्थखेटा उदयान्तराख्यकर्मोद्भवेन फलेनोनयुताः सन्तो लङ्कोदये स्युर्नान्यथा लङ्कायां भास्करोदये मध्या इति यदन्यैरुक्तं तदसत्। अथोदयान्तरकर्माह" प्रमि० "मध्यार्कभुक्ताच्छवोनि रवौ ये ये च मध्यार्ककलासमानाः। तदन्तरं यत् स्फुटमध्ययोस्तत् द्युपिण्डयोः खार्द्धिशरं गतिघ्नम्। हृतं द्युरात्रासुखिराग्निबिम्बा हीनापहारादसवोऽल्पकाः स्युः। तदन्यथात्वात्तु निजोदयैश्चेद्वलात्तु पूर्वं विहितं तदानीम्। कृतं तथा स्पष्टवरकर्मभिन्नं कर्म ग्रहाणामुदयान्तराख्यम्" शि०। "सायनांशेन रविणा मेषादेरारभ्य ये भुक्तारम्भयत्तदवन्विनौ ये निरक्षोदयासवो गगनमूधरषट्क-

चन्द्राः १६७०। इत्याद्यस्तेषामैक्यं कृत्वा भुज्यमानराशेर्यैर्भुक्तभागाद्यास्तदुदयासुभिः सङ्गुण्य त्रिंशता ३० विभज्य लब्धासवोऽपि तत्र क्षेप्याः एवं मध्यार्कभुक्तासवः स्युः। भदिनान्तादूर्ध्वं तावत्यस्वात्मके काले लङ्कायां मध्यमसार्कस्योदयः। तत्काले हि ग्रहाः साध्याः अथ चाहर्गणेन ये सिद्धाः मध्यमसार्ककलामितेऽस्वात्मके काले भदिनान्तादूर्ध्वं जाताः, अतोऽसूनां कलानां च यदन्तरं तेनार्कोदयोऽन्तरितः। अतस्तदुदयान्तराख्यं कर्मोच्यते तैरन्तरासुभिर्ग्रहगतिं सङ्गुण्यार्कसावनाहोरात्रासुभि २१६५९ विभज्य लब्धकला ग्रहे धनं कार्याः यदि कलाभ्योऽसवोऽल्पकाः स्युः, अन्यथा ऋणं, यदि तु स्वदेशोदये मध्यमार्कभुक्तासूनानीयेदं कर्म कृतं तदौदयिकानां ग्रहाणां चरकर्मापि कृतं स्यात् यदि तु स्फुटार्कभुक्तासून् स्वोदयासुभिरानीयेदं कर्म कृतं तदोदयान्तरभुजान्तरचरकर्माणि त्रीण्यपि कृतानि स्युः तर्हि कथमिदमुदयान्तराख्यं कर्माचार्यैर्न कृतं तदाह यतोऽन्तरं तत्स्वल्पकञ्च अर्कचरखान्तेषु चतुर्ष्वपि अन्तराभावः तन्मध्येष्वन्तरस्य वृद्धिक्षयौ। इदानीं देशान्तरस्वरूपमाह" प्रमि० "येऽनेन लङ्कोदयकालिकास्ते देशान्तरेण स्वपुरोदये स्युः। देशान्तरं प्रागपरं तथान्यद्याम्योत्तरं तच्चरसंज्ञकम्" शि०। "ये उदयान्तरकर्मणा लङ्कायामौदयिका ग्रहा जातास्ते देशान्तरकर्मणा स्वपुरौदयिकाः स्युः। तच्च देशान्तरं द्विविधमेकं पूर्वापरमन्यद्याम्योत्तरं तच्चरसंज्ञकं तत्र तावत् पूर्वापरमाह" प्रमि०। "यल्लङ्कोज्जयिनीपुरोपरिकुरुक्षेत्रादिदेशान् स्पृशत् सूत्रं मेरुगतं बुधैर्निगदिता सा मध्यरेखा भुवः। आदौ प्रागुदयोऽपरत्र विषये पश्चाच्च रेखोदयात् स्यात्तस्मात् क्रियते तदन्तरभवं खेटेष्वृणं स्वं फलम्" शि०। "लङ्काया मेरुपर्यन्तं नीयमाना या रेखा उज्जयिनीकुरुक्षेत्रादिदेशान् स्पृशन्ती याति सा मध्यरेखेत्युच्यते। रेखायां यदार्कोदयस्तत्कालात् पूर्वमेव पूर्वदेशे भवति रेखोदयकालादनन्तरं पश्चिमदेशेऽर्कोदयः। तदन्तरकालस्तदन्तरयोजनैः स्वदेशभूपरिध्यनुपातेन ज्ञायते यदि स्फुटपरिधियोजनैः षष्टि ६० घटिका लभ्यन्ते तदा देशान्तरयोजनैः किमितीति त्रैराशिकेन देशान्तरघटिका लभ्यन्ते मध्यमस्याऽथ चालिता नाडीभिरनुपातः यदि घटीषष्ट्या ग्रहस्य गतिकला लभ्यन्ते तदा देशान्तरघटीभिः किमिति अथ योजनैरेवाऽनुपातः। यदि स्फुटपरिधियोजनैर्गतिः प्राप्यते तदा देशान्तरयोजनैः किमिति फलं कलाः प्राग्वत्, यतस्तत्रार्कोदयः पश्चादुक्तं यतस्तत्र रेखोदयादनन्तरमर्कोदय इत्युपपन्नम्। इदानीं भूगोले स्फुटपरिधिप्रदेशं स्फुटतानुपातं चाह" प्रमि० "स्वदेशमेर्वन्तरयोजनैर्यैर्लम्बांशजैर्मेरुगिरेः समन्तात्। वृत्तं स्फुटो भूपरिधिर्यतः स्यात्त्रिज्याहृतो लम्बगुणाहतोऽस्मात्" शि० "स्वपुरस्य मेरुगर्भस्य चान्तरे यावन्ति योजनानि तावन्ति लम्बांशजानि यतो निरक्षदेशस्वपुरान्तरयोजनान्यक्षांशजानि, भागेभ्यो योजनानि च व्यस्तमित्युपपद्यत इत्यर्थः तैर्लम्बांशजैर्योजनैर्मेरुगिरेः समन्ताद्यद्वृत्तमुत्पद्यते स स्फुटं भूपरिधिः यो मध्यपरिधिः पठितः स निरक्षदेशोपरि। अयन्तु स्वपुरोपरि, अतः किञ्चिन्न्यूनो भवति अथ तदानयनं मध्यपरिधेरभीष्टत्रिज्यातुल्यं व्यासार्धं प्रकल्प्य तस्मिन् व्यासार्धे स्वपुरे यावती लम्बज्या तावत् स्फुटपरिधेर्व्यासार्धं भवितुमर्हतीति अतस्तेन त्रैराशिकं यदि त्रिज्याव्यासार्धे मध्यमः परिधिर्लभ्यते तदा लम्बज्यामिते कः इति फलं स्फुटपरिधिरित्युपपन्नम्" प्रमिताक्षरा।

इष्टकाले लग्नाद्यानयनम् अष्टमखण्डे ५।१८५४ लग्नोदयप्रमाणदर्शनपूर्वकमुक्तप्रायम् विशेषस्तु शि० शि०। "तात्कालिकार्केण युतस्य राशेर्भुक्तभागैर्गुणितोदयात् स्यात्। भोग्यासवः खाग्निहृतादथाप्ता भुक्तासवो भुक्तलवैः स्युरेवम्। इष्टासुवृन्दादपनीय भोग्यांस्तदग्रतो राश्युदयांश्च शेषम्। अशुद्धहृत् खाग्निगुणं लवाद्यमशुद्धपूर्वैर्भवनैरजाद्यैः। युक्तं तनुः स्यादयनांशहीनमिष्टासवोऽल्पा यदि भोग्यकेभ्यः। त्रिंशद्गुणाः स्वोदयभाजितास्ते लब्धांशयुक्तो रविरेव लग्नम्" शि०। "यस्मिन् काले लग्नं ज्ञेयं तस्मिन् काले तात्कालिकोऽर्कः सायनांशः कार्यः। तेनार्केण युतस्य राशेर्ये भोग्यांशास्तैस्तदुदयासवो गुण्यास्त्रिंशता भाज्याः। ये लब्धास्ते भोग्यासवः स्युः। अथेष्टासुभ्यो भोग्यासून् विशोध्य तदग्रतो यावन्त उदयाः शुध्यन्ति तावन्तः शोध्याः। ततः शेषात् खरामगुणादशुद्धोदयेन भक्तादाप्तमंशाद्यं तदशुद्धोदयात् पूर्वं यावन्तो मेषाद्या उदयास्तावद्भी राशिभिर्युतमयनांशैश्च रहितं तल्लग्नं स्यात्। अथ यदीष्टासवो भोग्येभ्योऽल्पः तदेष्टासवस्त्रिंशद्गुणास्तदुदयासुभिर्भाज्याः। फलेनांशाद्येन युतो रविर्लग्नं स्यात्" प्रमि०। लग्नांशादिना कालानयनं तत्रैव दर्शितं यथा "अर्कस्य भोग्यस्तनुभुक्तयुक्तो मध्योदयाढ्यः समयो विलग्नात्। यद्येकभे लग्नरवी तदा तद्भागान्तरघ्नः स्वोदयः खाग्निभक्तः। लग्नेऽल्पके तु द्युनिशात् स शोध्यस्तात्कालि-

कालोदयलग्नं कालः । चेत् सावनाः प्रष्टुरभीष्टास्तदैव तात्कालिकतिग्मरश्मेः ॥ भाग्यैर्यदेष्टाघटिका विलग्नं कालश्च तस्मौदयिकात् प्रलग्न” शि० ।“अर्कस्य प्रागुक्तो भोग्यकालः साध्यः । लग्नस्य सायनांशस्य भुक्तकालः साध्यः तयोरैक्यमर्कादग्रतो लग्नपर्य्यन्तं ये मध्ये राशयस्तेषामुदयाश्च क्षेप्यास्तत्रैव । एवं लग्नात् कालो भवति । अत्र यद्येकराशौ लग्नार्कौ भवतस्तदा तयोरन्तरांशैः स्वोदयं सङ्गुण्य त्रिंशता भजेत् फलमिष्टकालः स्यात् । परं यद्यर्काल्लग्नमधिकम् । यद्यल्पं तदा स कालोऽहोरात्राच्छोध्यः । शेषमिष्टकालः स्यात् । अत्रेष्टकालसाधनेऽर्कस्य भोग्यमौदयिकादेव क्रियते । यतः कालज्ञानात् तात्कालिकस्पष्टार्कस्य कार्य्यम् । अतः स्थूलः काल आयाति । अनेन कालेन तात्कालिकमर्कं कृत्वा मुहुः कालः साधयितुं युज्यते । परं यदि प्रष्टुः सावनघटिका इष्टाः । एतदुक्तं भवति । उदयानन्तरमेतावतीष्वर्कसावनघटिकासु कीदृग् लग्नं भवतीत्येतदभीष्टं तदैव तात्कालिकार्काल्लग्नं साध्यते तदैव च लग्नादसकृत् कालः । यदा पुनरिष्टघटिका आर्क्षास्तदौदयिकादेवार्काल्लग्नं लग्नात् कालः सकृत् । अत्रोपपत्तिः सुगमा । तात्कालिकीकरणकारणता गोले कथिता व्याख्याता च । इदानीं विलोमेन लग्नसाधनमाह” प्रमि० ।“भुक्तासु शुद्धैर्विपरीतलग्नं भुक्तांशगेष्टाप्तलवोनितोऽर्कः” शि० “यदोदयात् पूर्वघटीषु लग्नमिष्टं तदा शेषासुभ्यो विशोध्य तात्कालिकमर्कं कृत्वा तस्य भुक्तासवः साध्यास्तानिष्टासुभ्यो यावन्त उदया विशुध्यन्ति तावतो विलोमेन विशोधयेत् । शेषात् खरामगुणितादविशुद्धोदयभक्तात् ये अंशा अंशाद्यैस्तथार्कभुक्तांशैश्च तथा विशुद्धोदयलग्नराशिभिश्चोनीकृतो रविर्विलग्नं भवति” प्रमि० । होराद्रेक्काणोदयसाधनमपि तत्रैव यथा “क्षेत्राणां स्थूलत्वात् स्थूला उदया भवन्ति राशीनाम् । सूक्ष्मार्थी होराणां कुर्य्याद्द्रेक्काणकानां वा” शि० “यथा राश्युदयाः साधितास्तथा होरोदया अपि साध्याः । तद्यथा पञ्चदशादिपञ्चदशभागोत्तरभागानां ज्या होराज्याः षड् भवन्ति । ताभिर्मिथुनान्तद्युज्या २१४१ पृथक् पृथग्गुण्या स्वस्वद्युज्यया भाज्या । फलानां धनूंष्यधोऽधः शुद्धानि । पश्चात् पञ्चमं पञ्चमाच्चतुर्थमित्यादि । शेषाणि होरोदयासवो भवन्ति । एवं दशादिदशोत्तरभागैर्द्रेक्काणोदया भवन्ति । ते च नव । तथा होरांशाश्च षट् चराणि । यान्यधोऽधः शुद्धानि तानि तेषां चरखण्डानि तैः क्रमोत्क्रमस्थैः क्रमोत्क्रमस्था ऊनयुताः सन्तः स्वदेशे होरोदया भवन्ति । मेषादीनां द्वादश, ते च व्यस्तास्तुलादीनाम् । एवं चतुर्विंशतिः २४ । एवमेव द्रेक्काणोदयाः षट्त्रिंशत् । तथा चार्कस्य सायनांशस्य भागाः पञ्चदश १५ हृता गता होराः स्युः । शेषांशास्ते भुक्तास्ते पञ्चदशच्युताः शुद्धा भोग्यांशाः स्युः । भोग्यांशघ्नः स्वदेशहोरोदयः पञ्चदशहृतः फलं भोग्यासवः स्युस्तानिष्टासुभ्यो विशोध्य तदग्रतो होरोदयांश्च शोधयेत् ॥ शेषं पञ्चदशगुणमशुद्धहोरोदयेन भजेत् फलं लवाः । अशुद्धपूर्व्वाणां होरोदयानां संख्यया गुणितैः पञ्चदशभिर्युताः सन्तो लग्नस्यांशा भवन्ति । एवं लग्नात् कालसाधनेऽपि । एवमेव द्रेक्काणोदयैरपि लग्नसाधनम् । तत्र पञ्चदशस्थाने दश १० गुणने भजने च कल्प्याः । एवं होरोदयैर्द्रेक्काणोदयैर्वा साधितं लग्नादिकमुदयान्तराख्यं कर्म्म च सूक्ष्मं भवति अन्यथा स्थूलम्” प्रमि० ।

पलभाभ्यामुदयान्तरकर्म्म तत्रोक्तम् “भानोः फलं गुणितमर्कयुतस्य राशेर्व्यस्तोदयेन खखनागमही १८०० विभक्तम् । गत्या ग्रहस्य गुणितं द्युनिशासुभक्तं स्वर्णं ग्रहेऽर्कवदिदं तु भुजान्तराख्यम्” शि० ।“अर्कस्य यद्भुजफलं यस्मिन् राशौ रविर्वर्त्तते तस्य राशेः सम्बन्धी यो निरक्षोदयस्तेन तद्गुणितराशिकलाभिः १८०० भक्तं पुनर्ग्रहगत्या गुणितमहोरात्रासुभि २१६५९ भक्तं यत् फलं तद्ग्रहेऽर्कवत् धनर्णं कार्य्यम् । यद्यर्कस्य भुजफलम् धनं, तदा सर्व्वेषामन्येषां च धनम् । यदि ऋणं तदा ऋणमित्यर्थः । अत्रोपपत्तिः । ये मध्यमार्कौदयिकास्ते स्फुटार्कौदयिकाः क्रियन्ते । तत्रार्कफलस्यासुकरणायानुपातः । यदि राशिकला १८०० निरक्षोदयासुभिर्लभ्यन्ते तदा फलकलाः कतिभिरिति । लब्धं भास्करफलोत्था असवो भवन्ति । अथान्योऽनुपातः । यदि द्युनिशासुभिर्गतिकला लभ्यन्ते तदेभिः किमिति । ताः कला ऋणं धनं च यतो मध्यमार्कोदयात् प्राक् स्फुटार्कोदयः स्यादृणे तत् फले स्वं यतोऽनन्तरमित्युपपन्नम् । इदानीमुदयान्तरमाह” प्रमि० ।“युक्तायनांशस्य तु मध्यमस्य भुक्तासवोऽर्कस्य निरक्षदेशे । मेषादिभुक्तोदयसंयुता ये यसायनांशान्वितमध्यभानोः । लिप्तागणस्तद्विवरेण निघ्नी गतिर्ग्रहस्य द्युनिशासुभक्ता । स्वर्णं ग्रहे चेदसवोऽधिकोना इदं महाप्राणउदयान्तराख्यम्” शि० “मध्यमार्कस्य सायनांशस्य ये राशेर्भुक्तभागास्तैस्तदुदयं

निरक्षदेशीयं संगुणलिप्तता विभजेत् फलं तस्य राशेर्भुक्तासवः । अथ मेषाद्या येऽर्केण भुक्ता राशयस्तेषां च निरक्षोदयासवस्तत्र योज्यास्ते मेषादिभुक्तोदयासवः स्युः । अथ मध्यमार्कस्य सायनांशस्य कलाः कार्याः । तासां कलानां तेषामसूनां च यदन्तरं तेन स्पष्टगतिर्गुण्या द्युनिशासुभिर्भाज्या लब्धाः कलाः पक्षे धनं कार्याः यदि कलाभ्योऽसवोऽधिकाः स्युः, यदि न्यूनास्तदा ऋणम् । अत्रोपपत्तिः । इह यः पूर्व्वमहर्गणः कृतः समध्यमसावनमानेन स्फुटसावनस्य चलत्वात् । रविमध्यगतिकलातुल्यासुभिः सहिता नाक्षत्राः षष्टिघटिकाः ६०,५९,८ । इदं मध्यमसावनम् । ता गतिकला यैरसुभिरुद्गच्छन्ति तद्युताः षष्टिघटिकाः स्फुटसावनम् । तच्चलम् । प्रत्यहं गत्यन्यत्वात् प्रतिमासं राश्युदयान्यत्वाच्च । तादृशोऽहर्गणः कर्त्तुं नायातीति मध्यमः कृतः ; तेन मध्यमार्कोदये पक्षा न भवन्ति कदाचिदर्कोदयात् प्राक् कदाचिदनन्तरम् । अत एव प्रागुक्तम् । "दशशिरःपुरि मध्यमभास्करे क्षितिजसन्निहिते सति मध्यमः" शि० इति । अथ स्फुटमध्याहर्गणयोरन्तरानयनम् । मेषादेरारभ्य येऽर्कभुक्ता राशयस्ते यैरसुभिरुद्गच्छन्ति त एकीकृताः । तावत्यसावनके काले मदिनान्तादूर्द्ध्वमहर्गणेन भवितव्यम् । अथ च मेषादिभुक्तकलातुल्येऽन्तरे कृतः । अतोऽसूनां कलानां च यदन्तरं तावद्भिरसुभिरहर्गणोऽन्तरितः । यद्युदयासुभिर्गतिर्लभ्यते तदेभिरन्तरासुभिः किमिति । फलं पक्षेषु स्वं यद्यसवोऽधिकाः । अन्यथा ऋणमित्येतदुक्तं युक्तमेव" । इदानीं येऽस्योदयान्तरस्य वासनां न बुध्यन्ति तेषां प्रतीत्यर्थमन्यदप्याह" प्रमि० । "चेत् स्वोदयैः स्फुटरवेरसवः कृतास्ते विश्लेषिताश्च यदि मध्यरवेः कलाभिः । बाहन्तराख्यमुदयान्तरकं चराख्यं कर्मत्रयं विहितमौदयिके तदा स्यात्" शि० । "यदि स्फुटरवेः स्वोदयेन भुक्तासवः कृता मेषादिस्वोदयैश्च युतास्तेषामसूनां मध्यमार्ककलानां च यदन्तरं तेन भुक्तिर्गुणिता द्युनिशासुभिर्भक्ता यद्यसवोऽधिकास्तदा फलं पक्षे स्वम् । अन्यथा ऋणम् । एवं कृते सति भुजान्तरमुदयान्तरं चराख्यं च कर्मत्रयमपि कृतं स्यादौदयिके पक्षे । इदानीं प्रकारान्तरेणौदयिककर्माह" प्रमि० । "मध्याद्रवेरयनभागयुताद्द्विनिघ्नाद्दोर्ज्या लघुर्गतिगुणा खनगाश्वि २७० भक्ता । स्वर्णं पक्षे युगयुजोः पदयोर्विलिप्तास्तेवं स्फुटं खलु भवेदुदयान्तरं वा" शि० । "मध्यमार्कस्य सायनांशस्य द्विगुणितस्य या लघुसवर्णर्कदोर्ज्या तया गुणिता स्पष्टगतिः खनगदस्रैः २७० हृता फलं विकलादि पक्षे धनम् । एवं युग्मपदस्थितेऽर्के । अयुग्मपदस्थिते त्वृणम् । अत्रोपपत्तिः । क्रान्तिवृत्तस्य चत्वार्यपि पदानि पृथक् पृथक् पञ्चदशभिः पञ्चदशभिर्घटिकाभिरुद्गच्छन्ति । परं नैकैको राशिः पञ्चभिरत उदयान्तरकर्म पदमध्ये यावदुपचीयते ततोऽपचीयते । अत एव पदान्तरेषु तस्याभावः । पदमध्येषु परमता । यदत्र निरक्षोदयैः कर्म दर्शितं तद्बालावबोधार्थम् । तत् स्थूलम् उदयानां स्थूलत्वात् । अत एवाचार्य्यैः लल्लादिभिः सूक्ष्मत्वार्थं हकारोदयाः पठिताः" । इदमुदयान्तरं कर्म यथा सम्भवति तथोच्यते । मध्यमार्कस्य सायनांशस्य दोर्ज्यां द्युज्यां च कृत्वा तया द्युज्यया सा दोर्ज्या भाज्या त्रिगुणान्त्यद्युज्यया गुणनीया । तस्या धनुषो येऽसवस्तैर्मध्यमार्कस्य सायनांशस्य भुजकला ऊनाः सत्यः स्फुटा अन्तरासवो भवन्ति । तैरुदयोऽन्तरित इत्यर्थः । एवं पदमध्ये षड्विंशतिः पलानि किञ्चिदधिकानि भवन्ति । तानि ज्याप्रकारेण साधयितुमर्को द्विगुणितः । द्विगुणितस्यार्कस्य यावद्भुजः क्रियते तावत् पदमध्ये राशित्रयं भवति । तद्दोर्ज्यया लब्ध्या षड्विंशत्या चानुपातः । यदि स्वार्कमितया दोर्ज्यया षड्विंशतिर्लभ्यते तदाभीष्टया किमिति । अत्र षड्विंशत्या स्वार्का अपवर्त्तिता गुणकस्थाने रूपम् १ । हरस्थाने सार्धाश्चत्वारः । फलं पानीयपलानि । पुनरन्योऽनुपातः । यदि पानीयपलषष्ट्या गतिकलातुल्या विकला लभ्यन्ते तदेभिः किमिति । पूर्वं लब्धौ दोर्ज्या गुणः सार्धचत्वारो हरः । इदानीं षष्टिर्हरः अतो स्पष्टगतेर्दोर्ज्या गुणः । हरयोर्घातो हरः खनगाश्विनः २७० इत्युपपन्नम् । ओजपदेऽसवः कलाभ्य ऊना एव भवन्त्यतस्तत्र ऋणम् । युग्मपदे त्वधिका अतस्तत्र धनम्" प्रमि० ।

ग्रहाणां दृश्यादृश्ययोः चन्द्रे विशेषस्य च निरूपणं तत्रैव "निशीष्टलग्नादुदयास्तलग्ने न्यूनाधिके यस्य खगः स दृश्यः । दिनेऽपि चन्द्रो रविसन्निधानाद्दूरं गतश्चेत् सति दर्शने भा" शि० । "दिनकरेऽस्तंगते यदिष्टकाले लग्नं तदिष्टलग्नम् । तस्माद्ग्रहस्योदयाख्यलग्नं न्यूनमस्ताख्यं चाधिकं यदि भवति तदा ग्रहो दृश्यः इतोऽन्यथा चेददृश्यः । एवं लक्षणे सति चन्द्रो दिवसेऽपि दृश्यः । यदि ग्रहो दृश्यस्तदा ग्रहस्य छाया साध्या" प्रमि० ।

ताराग्रहाणामुदयास्तमययोर्ज्ञापनं यथा सू० सि० रङ्गना० । "अथोदयास्तमययोः परिज्ञानं प्रकीर्त्त्यते । दिवा-

करकराक्रान्तमूर्त्तीनामल्पतेजसाम्" सू० । "अथ नक्षत्रग्रहयुत्यधिकारानन्तरम् । सूर्यकिरणाभिभूता मूर्त्तिर्बिम्बं येषां तेषां चन्द्रादिषड्ग्रहाणां नक्षत्राणां च । अतएवाल्पतेजसां न्यूनप्रभावतामुदयास्तमययोः अग्रिमकाले सूर्यादधिकासन्निहितसन्निहितत्वसम्भावनया क्रमेणोदयास्तयोः सूर्याद्बहिःस्थितस्य यस्मिन् काले यदन्तरेण प्रथमदर्शनं सम्भावितं स उदयः । सूर्यादूरस्थितस्य यस्मिन् काले यदन्तरेण प्रथमादर्शनं सम्भावितं सोऽस्तः । अनेन नित्योदयास्तव्यवच्छेदस्तयोरित्यर्थः । परिज्ञानं सूक्ष्मज्ञानप्रकारः प्रकीर्त्त्यते अतिसूक्ष्मत्वेन मयोच्यत इत्यर्थः । तथा च ग्रह इत्युदयेऽस्तमनमुद्दिष्टमपि तस्य पूर्व्वमेव सूर्यासन्नत्व एव सम्भवात् तद्विलक्षणतया ग्रहयुतिप्रसङ्गे नोक्तम् । नक्षत्रग्रहयुतिस्तु ग्रहयुतिवदिति तदनन्तरमुक्ता । अतः प्रतिबन्धकजिज्ञासापगमेऽवश्यवक्तव्यत्वादस्यावसरसङ्गतित्वात् तत्सङ्गत्या नक्षत्रग्रहयुत्यधिकारानन्तरं प्रागुद्दिष्टमस्तमनं तत्प्रसङ्गादुदयश्च प्रतिपाद्यत इति भावः । तत्र प्रथमं पञ्चताराणां पश्चिमास्तपूर्वोदयावाह" र०ना० । "सूर्यादभ्यधिकाः पश्चादस्तं जीवकुजार्कजाः । ऊनाः प्रागुदयं यान्ति शुक्रज्ञौ वक्रिणौ तथा" सू० "वक्रगती शुक्रबुधौ तथा सूर्यादधिकौ पश्चिमास्तं गच्छतः । सूर्यादल्पौ पूर्वोदयं प्राप्नुतः । शेषं स्पष्टम् । अथ चन्द्रबुधशुक्राणां पूर्वास्तपश्चिमोदयावाह र०ना० । "ऊना विवस्वतः प्राच्यामस्तं चन्द्रज्ञभार्गवाः । व्रजन्त्यभ्यधिकाः पश्चादुदयं शीघ्रयायिनः" सू० । "शीघ्रयायिनः सूर्यगत्यधिकगतय इत्यर्थः । एतेन बुधशुक्रावर्कगत्यल्पगती सूर्यादल्पौ पूर्वास्तमधिकौ च पश्चिमोदयं न प्राप्नुत इत्युक्तम् । शेषं स्पष्टम् । अत्रोपपत्तिः । रविगतितोऽल्पगतिर्ग्रहोऽर्कादूनश्चेत् प्राच्यां दर्शनयोग्यो भवितुमर्हति । यतः सूर्यस्याधिकत्वेन बहुगतित्वाच्चोत्तरोत्तरमधिकविप्रकर्षात् प्रवहवशेन न्यूनस्य पूर्वमुदयादधिकस्यानन्तरमुदयनियमात् । ग्रहस्य क्रान्तिजसंलग्नताकालानन्तरं यावत् सूर्यस्य तादृशः कालस्तावत्पर्यन्तं विप्रकर्षे दर्शनसम्भवात् । एवं यदाल्पगतिः सूर्यादधिकस्तदा प्रवहवशेनार्कस्य पूर्वमुदयादनन्तरमुदितग्रहस्य दर्शनासम्भवात् प्रवहवशेनादौ न्यूनार्कस्यास्तसम्भवादनन्तरमधिकग्रहस्यास्तसम्भवात् सूर्यास्तानन्तरं पश्चिमभागे ग्रहदर्शनसम्भवेऽप्यधिकगतिसूर्यस्य पृष्ठस्थितत्वेनोत्तरोत्तरमधिकसन्निकर्षात् पश्चिमायामदर्शनं सम्भवत्येव । ते तु भौमगुरुशनयः । वक्रत्वे न्यूनगतित्वाद्बुधशुक्रौ चेति । अथार्कगतितोऽधिकगतिग्रहः । सूर्यादूनस्तदोत्तरोत्तरमधिकसन्निकर्षात् पूर्वस्मिन्नदर्शनं याति । यदा सूर्यादधिकस्तदोत्तरोत्तरमधिकविप्रकर्षात् पश्चिमायामुदयः । ते तु शीघ्राश्चन्द्रबुधशुक्रा इत्युपपन्नमुक्तम् । अथाभीष्टदिन आसन्ने सूर्योदयास्तकालिकौ सूर्यदृग्ग्रहौ तत्कालज्ञानार्थं कार्यावित्याह" र०ना० । "सूर्यास्तकालिकौ पश्चात् प्राच्यामुदयकालिकौ । दिवाकरग्रहौ कुर्याद्दृक्कर्माथ ग्रहस्य तु" सू० । "पश्चात् पश्चिमास्तोदयसाधनेऽभीष्टदिन आसन्ने सूर्यग्रहौ सूर्यास्तकालिकौ कुर्याद्गणकः । पूर्व्वास्तोदयसाधने सूर्योदयकालिकौ कुर्यात् दिनेऽभीष्टकाले कुर्यात् । चकारो विकल्पार्थकः । अनन्तरं ग्रहस्य दृक्कर्म्म आयनाक्षदृक्कर्मद्वयं कुर्यात् । तुकार आक्षदृक्कर्मस्तोत्रपूर्व्वोक्तमिति विशेषार्थकः । अत्रोपपत्तिः । पश्चादस्तोदयसाधने पश्चिमायां तद्दर्शनमिति सूर्यास्तकालिकौ सूर्यग्रहावभीष्टकालांशसाधनार्थं सूक्ष्मौ । पूर्वोदयास्तसाधने पूर्वदिशि तद्दर्शनमिति सूर्योदयकालिकौ सूर्यग्रहावभीष्टकालांशसाधनार्थं सूक्ष्मावन्यकाले तु किञ्चित्स्थूलावपि कृतौ दृक्कर्मसंस्कृतग्रहस्य सूर्यवत् क्षितिजसंलग्नतायोग्यत्वाद्दृक्कर्मसंस्कृतो ग्रहः कार्य इति । अथेष्टकालांशानयनमाह" र०ना० । "ततो लग्नान्तरप्राणाः कालांशाः षष्टिभाजिताः । प्रतीच्यां षड्भयुतयोस्तद्वल्लग्नान्तरासवः" सू० । "ततस्ताभ्यां सूर्यदृग्ग्रहाभ्यां लग्नान्तरप्राणाः "भोग्यासूनूनकस्याथ" इत्युक्तप्रकारेणान्तरकालासवः षष्टिभक्ता इष्टाः कालांशा भवन्ति । प्रागुदयास्तसाधने प्रतीच्यां, पश्चिमोदयास्तसाधने षड्भयुतयोः षड्राशियुक्तयोः सूर्यदृग्ग्रहयोर्लग्नान्तरासवः । अनन्तरासवस्तद्वत् षष्टिभक्ता इष्टकालांशा भवन्तीत्यर्थः । अत्रोपपत्तिः । दृग्ग्रहसूर्ययोरुदयान्तरकालो ग्रहस्य सूर्योदयकाले दिनगतं पूर्वोदयास्तनिमित्तमुपयुक्तम् । एवं पश्चिमोदयास्तनिमित्तं सूर्यदृग्ग्रहाभ्यामस्तकालासुभिरन्तरकालः सूर्यास्तकाले ग्रहस्य दिनशेषकाल उपयुक्तः तत्रास्तकालानामनुक्तेरुदयासुभिः साधनार्थं सषड्भौ सूर्यदृग्ग्रहौ कृतौ स कालोऽस्तात्मकः । यदि अहोरात्रासुभिश्चक्रकलातुल्यैश्चक्रांशा लभ्यन्ते तदेष्टासुभिः क इत्यनुपाते प्रमाणफलयोः फलापवर्त्तनेन हरस्थाने षष्टिः । अतोऽस्तात्मकान्तरकालः षष्टिभक्त इष्टकालांशा इत्युपपन्नमुक्तम् । अत्रेदमवधेयम् । सूर्योदयकालि-

काभ्यामर्कदृग्ग्रहाभ्यामानीतेन दिनगतेन पूर्वं चास्तो-दृग्ग्रहः। सूर्य्यास्तकालिकाभ्यां सषड्भाभ्यामर्कदृग्ग्रहा-भ्यामानीतेन दिनशेषेणापि चास्तः सषड्भो दृग्ग्रहः। क्रमेण पश्चोदयास्तकाले प्राक्पश्चिमदृग्ग्रहौ भवतः। ताभ्यां सूर्य्यसषड्भसूर्य्याभ्यां च क्रमेण पूर्व्वरीत्यान्तर-कालो ग्रहस्य सूर्य्योदयास्तकाले क्रमेण दिनगतशेषौ नाधनौ षष्टिभक्तौ कालांशाविष्टौ सूक्ष्मौ। अथेष्टकालि-काभ्यामानीतकालेन पूर्व्वरुद्धाविताभ्यां प्राक्पश्चिमदृग्-ग्रहाभ्यां सूर्य्यसषड्भसूर्य्याभ्यां चानीतकालो नाधनोऽपि सूक्ष्मासन्नः। सूर्य्योदयास्तसम्बन्धाभावात् तदुत्पन्नाः का-लांशा अपि तथा। अथ सूर्य्योदयास्तकालिकाभ्यामानी-तैकशरं कालात् कालांशाः स्थूला इष्टकालिकाभ्यामा-नीतैकशरकालात् कालांशा अतिस्थूलाः उभयत्र कालस्य सावनत्वात्। न हि सावनषष्टिघटीभिश्चक्रपरिपूर्त्तिर्येन सूक्ष्माः सिध्यन्तीति। अथ यैः कालांशैरुदयोऽस्तो वा भवति तान् विवक्षुः प्रथमं गुरुशनिभौमानां कालांशानाह" र०ना०। "एकादशामरेज्यस्य तिथिसङ्ख्यार्कजस्य च। अंशाः भूमिपुत्रस्य दशसप्ताधिकास्ततः" सू०। "तत इष्टकालां-शावगमानन्तरमस्तांशाः। अस्तो यैरंशैर्भवति तेंऽशा अ-स्तोपलक्षणादुदयांशा ज्ञेयाः। अमरेज्यस्य गुरोरेकादश कालांशाः। शनेः पञ्चदश सङ्ख्या कालांशानाम्। चः सम-च्चये। भौमस्य सप्ताधिका दश सप्तदश कालांशा इत्यर्थः। अथ शुक्रस्याह" र०ना०। "पश्चादस्तमयोऽष्टाभिरुदयः प्राङ्-महत्तया। प्रागस्तमुदयः पश्चादल्पत्वादृशभिर्भृगोः" सू०। "शुक्रस्य महत्तया वक्रत्वेन नीचासन्नत्वात् स्थूलबिम्बतया पश्चिमायामस्तोऽष्टाभिः कालांशैः प्राच्यामुदयश्च तैः। नाधिकैः। प्राच्यां शुक्रस्याल्पत्वादणुबिम्बत्वादृशभिः कालांशैरस्तं गमनं कुर्य्यात् नाल्पैः। पश्चिमायामु-दयस्तस्याणुबिम्बस्य दशभिः कालांशैरेव ज्ञेयः। अथ बुध-स्याह" र०ना० "एवं बुधो द्वादशभिश्चतुर्दशभिरंशकैः। वक्री शीघ्रगतिश्चार्कात् करोत्यस्तमयोदयौ" सू०। "वक्री शीघ्रगतिः। चः समुच्चये। बुधः सूर्य्याद्द्वादशभिश्चतुर्दशभिश्च कालांशै-रस्तोदयौ एवं शुक्ररीत्या करोति। पश्चादस्तं प्रागुदयं च द्वादशभिः कालांशैर्महाबिम्बतया बुधः करोति। प्रागस्तं पश्चादुदयं च चतुर्दशभिः काला-शैरणुबिम्बत्वाद्बुधः करोतीत्यर्थः। अथ प्रोक्ते-ष्टकालांशाभ्यामस्तोदयस्य वा गतैष्यत्वज्ञानमाह" र० ना०। "एभ्योऽधिकैः कालभागैर्दृश्या न्यूनैरदर्शनाः।

भवन्ति लोके खचरा भानुभाग्रस्तमूर्त्तयः" सू०। "एभ्य एकादशामरेज्यस्येति श्लोकद्वयोक्तेभ्योऽधिकैरिष्टकालांशै-र्दृश्या दर्शनयोग्या अभीष्टकाले ग्रहा भवन्ति। तथा चास्तसाधने दृश्यत्वे अस्त एष्यः। उदयसाधने दृश्यत्व उदयो गत इति भावः। अल्पैरिष्टकालांशैर्ग्रहा लोके भूलोके अदर्शना न विद्यते दर्शनं दृष्टिगोचरता येषां ते अदृश्या अभीष्टकाले भवन्ति। नन्वदृश्याः कुतो भवन्तीत्यत आह। भानुभाग्रस्तमूर्त्तय इति। सूर्य्यासन्न-त्वेन सूर्य्यकिरणदीप्त्या ग्रस्ता अभिभूता सूर्य्यकिरणप्रति-हतलोकनयनाविषयो मूर्त्तिर्बिम्बस्वरूपं येषां त इत्यर्थः। तथा चास्तसाधने अदृश्यत्वेऽस्तो गतः। उदयसाधनेऽदृ-श्यत्व उदय एष्य इति भावः। अत एव। "उक्तेभ्य ऊना-भ्यधिका यदीष्टाः खेटोदयो गम्यगतस्तदा स्यात्। अतोऽन्यथा चास्तमयोऽवगम्यः" इति भास्कराचार्य्योक्तं स-ङ्गच्छते। अत्रोपपत्तिः उक्तकालांशतुल्येष्टकालांशे यत्काले ग्रहौ साधितौ तत्काल एव ग्रहस्योदयोऽस्तो वार्कतः। उक्तकालांशानां सूर्य्यसान्निध्यजनिताद्यन्तग्रहादर्शने हेतु-त्वप्रतिपादनात्। तथा चेष्टकालांशा उक्तेभ्योऽल्पास्तदा ग्रहस्यास्तङ्गतत्वमेवेत्युदयसाधन इष्टकालांशा उक्तेभ्योऽल्पा-स्तदेष्टकालादग्रे ग्रहस्योदयः। यदीष्टकालांशा उक्तेभ्यो-ऽधिकास्तदेष्टकालाद्ग्रहस्योदयः पूर्वं जातः। एवमस्तसा-धन इष्टकालांशा अधिकास्तदेष्टकालादग्रे ग्रहास्तः। यदीष्टकालांशा न्यूनास्तदेष्टकालात् पूर्वं ग्रहास्तो जात इत्युपपन्नमुक्तम्। अथोदयास्तयोर्गतैष्यदिनाद्यानयनमाह" र०ना०। "तत्कालांशान्तरकला भुक्त्यन्तरविभाजिताः। दि-नादि तत्फलं लब्धं भुक्तियोगेन वक्रिणः" सू०। "उक्तेष्ट-कालांशयोरन्तरस्य कलाः सूर्य्यग्रहयोर्गत्योः कलात्मकान्तरेण भक्ताः। दिनादिकमुदयास्तयोः फलमुदयास्तयोर्गतैष्यदिनाद्यं भवतीत्यर्थः। वक्रगतिग्रहस्य विशेषमाह। लब्धमिति। वक्रिणो वक्रग्रहस्य भुक्तियोगेन सूर्य्यग्रहयोः कलात्मक-गतियोगेन भक्ताः फलं गतैष्यदिनाद्यं ज्ञेयम्। अत्रो-पपत्तिः। यदा सूर्य्यग्रहयोर्गत्यन्तरकलाभिरेकं दिनं तदे-ष्टप्रोक्तकालांशयोरन्तकलाभिः किमित्यनुपातेनोदयास्तयो-रभीष्टकालाद्गतैष्यदिनाद्यवगमः। वक्रग्रहे तु सूर्य्यग्रहयोर्ग-तियोगेन प्रत्यहमन्तरवृद्धेर्गतियोगादनुपात उपपन्न इत्यु-पपन्नमुक्तम्। अथ ग्रहगतिकलयोः क्रान्तिवृत्तस्थत्वात् कालांशान्तरस्याहोरात्रवृत्तस्थत्वाच्चानुपातः प्रमाणेच्छयो-र्वैजात्यान्नायुक्त इति मनसि धृत्वा तयोरेकजातित्वसम्पा-

दृनार्थं ग्रहगत्योरिच्छाजातीयत्वं यद् तदन्तरेणानुपातस्तु युक्त एवेत्याह" र० ना०। "तल्लग्नासुहृते भुक्ती अष्टादशशतोद्धृते। स्यातां कालगती ताभ्यां दिनादि गतगम्ययोः" सू०। 'भुक्ती रविग्रहयोर्गती कलात्मिके तल्लग्नासुहृते कालसाधनार्थं ग्रहस्य यो राश्युदयो व्यूहीतस्तेनात्मकालोदयेन गुणिते अष्टादशशतेन भक्ते फले सूर्यग्रहयोः कालांशवत् कालगती स्याताम्। ताभ्यां गतिभ्यां गतगम्ययोरुदयास्तयोर्दिनादि पूर्वोक्तप्रकारेण साध्यम्। न तु पूर्वोक्तप्रकारेण, यथास्थितगतिभ्यां स्थूलत्वापत्तेः। अत्रोपपत्तिः। यदि एकराशिकलाभी राश्युदयासवस्तदा गतिकलाभिः क इत्यनुपातेनाहोरात्रवृत्ते गत्यसवः कलात्मका इत्युपपन्नमुक्तम्। अथ नक्षत्राणां सूर्यसान्निध्यवशादस्तोदयज्ञानार्थं कालांशान् शिष्यः प्रथममेषामाह" र०ना०। "स्वात्यगस्त्यमृगव्याधचित्राज्येष्ठाः पुनर्वसुः। अभिजिद्ब्रह्महृदयं त्रयोदशभिरंशकैः" सू०। "मृगव्याधो लुब्धकः। त्रयोदशभिः कालांशैर्दृश्यादृश्यानि नक्षत्राणि भवन्ति। शेषं स्पष्टम्। अथान्येषामाह" र०ना०। "हस्तश्रवणफाल्गुन्यः श्रविष्ठारोहिणीमघाः। चतुर्दशांशकैर्दृश्या विशाखाश्विनदैवतम्" सू०। फाल्गुन्यः पूर्वोत्तराफाल्गुनीद्वयम्। अश्विनदैवतमश्विनीकुमारौ दैवतं स्वामी यस्येत्यश्विनीनक्षत्रम्। दृश्या उपलक्षणाददृश्या अपि भिन्नपरिणामस्य यथायोग्यं बोध्यः। शेषं स्पष्टम्। अथान्येषामाह" र०ना०। "कृत्तिकामैत्रमूलानि सार्पं रौद्रर्क्षमेव च। दृश्यन्ते पञ्चदशभिराषाढाद्वितयं तथा" सू०। "कृत्तिकानुराधामूलनक्षत्राणि पञ्चदशभिः कालांशैर्दृश्यन्ते। उपलक्षणाददृश्यन्तेऽपि। एवकारो न्यूनाधिकव्यवच्छेदार्थः। रौद्रमार्द्रा। चः समुच्चये। आषाढाद्वितयं पूर्वोत्तराषाढाद्वयं तथा पञ्चदशकालांशैर्दृश्यन्त इत्यर्थः। अथान्येषामवशिष्टानामाह" र०ना०। "भरणीतिष्यसौम्यानि सौक्ष्म्यात् त्रिःसप्तकांशकैः। शेषाणि सप्तदशभिर्दृश्यादृश्यानि भानि तु" सू०। "तिष्यः पुष्यः सोमदैवतं मृगशिरो नक्षत्रमेतानि नक्षत्राणि सौक्ष्म्यादणुबिम्बत्वात् त्रिःसप्तांशकैरेकविंशतिकालांशैर्दृश्यादृश्यानि। उदितान्यस्तङ्गतानि च भवन्तीत्यर्थः। शेषाणि पूर्वाधिकारोक्तनक्षत्रेभ्य उक्तातिरिक्तानि शततारापूर्वोत्तराभाद्रपदारेवतीसंज्ञानि ब्रह्मापांवत्सापसञ्ज्ञानि च सप्तदशभिः कालांशैर्दृश्यादृश्यानि भवन्ति। तुकारो दृश्यादृश्यानीत्यत्र समुच्चयार्थकः। अथ दिनाद्यानयनार्थमिच्छाया एव प्रमाणजातीयत्वकरणमाह" र० ना०। "अष्टादशशताभ्यस्ता दृश्यांशाः स्वोदयासुभिः। विभज्य लब्धाः क्षेत्रांशास्तैर्दृश्यादृश्यता च वा" सू०। 'दृश्यांशाः कालांशा अष्टादशशतगुणितास्तान् स्वोदयासुभिर्ग्रहराश्युदयासुभिर्भक्ता लब्धाः क्षेत्रांशाः क्रान्तिवृत्तसंबन्धिनस्तैरंशैर्दृश्यादृश्यता उदयास्तौ प्रकारान्तरेणोक्तरीत्या ज्ञेयौ। कालांशाभ्यां क्षेत्रांशावानीय तदन्तरकला यथास्थितगत्योरन्तरेण योगेन वा भक्ताः फलमुदयास्तयोर्गतैष्यदिनाद्यं पूर्वागतमेव स्यादित्यर्थः। अत्रोपपत्तिः। यदि राश्युदयासुभिरेकराशिकलास्तदा कालांशकलातुल्यासुभिः का इति क्रान्तिवृत्ते कलास्ताः षष्टिभक्ता अंशा इति पूर्वमेवेच्छास्थाने कालांशा एव धृता लाघवात्। इत्युक्तमुपपन्नम्। ग्रहाणाममुकदिनेऽस्तोऽमुकदिनउदय इत्युक्तम्। तथा नक्षत्राणां नोक्तम् गत्यभावाद्वियोगयोगासम्भवेन गतैष्यदिनाद्यानयनासम्भवश्चेत्यत आह" र०ना०। "प्रागेषामुदयः पश्चादस्तो दृक्कर्म पूर्ववत्। गतैष्यदिवसप्राप्तिर्भानुभुक्त्या सदैव हि" सू०। "एषां नक्षत्राणां प्राच्यामुदयः प्रतीच्यामस्तो गत्यभावादल्पगतिग्रहवत्। एषां नक्षत्राणां दृक्कर्माक्षदृक्कर्म पूर्ववत् पूर्वप्रकारेण कार्यम्। परन्तु श्लोकपूर्वार्धोक्तमिति ध्येयम्। सदा नित्यम्। एवकारात् कदाचिदप्यन्यथा नेत्यर्थः। हि निश्चयेन। रविगत्या गतैष्यदिवसानां लब्धिः स्यात्। नक्षत्रगत्यसम्भवात् योगे ग्रहगतिवत्। अथ कतिपयानां नक्षत्राणां सूर्यसान्निध्यवशादस्तो नास्तीत्याह। "अभिजिद्ब्रह्महृदयं स्वातीवैष्णववासवाः। अहिर्बुध्न्यमुदक्स्थत्वान्न लुप्यन्तेऽर्करश्मिभिः" सू०। अभिजित्। ब्रह्महृदयम्। अनेनैकदेशस्य ब्रह्मणोऽपि ग्रहणम्। स्वातीश्रवणधनिष्ठाः। अहिर्बुध्न्यमुत्तराभाद्रपदा एतानि नक्षत्राण्युत्तरदिक्स्थत्वादुत्तरविक्षेपाधिक्यादित्यर्थः। सूर्यकिरणैर्न लुप्यन्ते अस्तं न यान्तीत्यर्थः। अत्रोपपत्तिः "यस्योदयार्कादधिकोऽस्तभानुः प्रजायते सौम्यशरातिदैर्घ्यात्। तिग्मांशुसान्निध्यवशेन नास्ति धिष्ण्यस्य तस्यास्तमयः कथञ्चित्"। इति भास्कराचार्योक्ता। परमिदमुक्तमष्टाक्षभायाम्। अन्यथा पूर्वभाद्रपदाया अपि तथात्वापत्तेरिति दिक्" र०ना०। "यथा भौमादीनां सूर्यसान्निध्योदयास्तासन्ने दोषा सकलबिम्बदर्शनं तथा चन्द्रस्य स्वोदयास्तकाले सकलबिम्बदर्शनं शुक्लत्वेन न भवति। किन्तु बिम्बैकदेश एव शुक्लत्वेन दृश्यत इति भौमादिविलक्षणत्वं चन्द्रस्य कुत इत्याशङ्का-

याः पूर्व्वाधिकारे समुपस्थितेस्तदुत्तरभूतश्चन्द्रोद्गमनाधिकारोऽवश्यमुपस्थित आरब्धो व्याख्यायते। तत्र चन्द्रोऽस्तेरुदयकालात् पूर्वकालेऽस्तकालानन्तरकाले चासन्नकतिपयदिवसेषु दर्शनात् पूर्वाधिकारे चन्द्रस्य कालांशानुक्त्या तदुदयास्तानुक्तेश्च प्रथममुपस्थितचन्द्रोदयास्तयोः साधनमतिदिशति" र॰ ना॰। "उदयास्तविधिः प्राग्वत् कर्त्तव्यः शीतगोरपि। भागैर्द्वादशभिः पश्चाद्दृश्यः प्राग्यात्यदृश्यताम्" सू॰। "चन्द्रस्य अपिशब्दः पूर्वाधिकारोक्तैर्ग्रहनक्षत्रैः समुच्चयार्थकः। उदयास्तविधिरुदयास्तयोः साधनप्रकारः प्राग्वत् पूर्वाधिकारोक्तरीत्या गणकेन कार्यः। ननु कालांशानां पूर्वमनुक्तेः कथं तत्सिद्धिरत आह। भागैरिति। द्वादशभिरंशैश्चन्द्रः पश्चिमायां दृश्य उदितो भवति। प्राच्यामदृश्यतामस्तं प्राप्नोति। अत्र पश्चात् प्रागिति पुनरुक्तमपि पूर्वं बुधशुक्रयोः साहचर्य्येण चन्द्रोदयास्तदिगुक्ता तत्साहचर्य्येण चन्द्रस्य पश्चिमास्तपूर्वोदयौ वर्त्तेते इति कस्यचिन्मन्दबुद्धेर्भ्रमस्य वारणायेति ध्येयम्"।

सूर्य्योदये विशेषः मु॰त॰ज्यो॰सं॰। "रेखामात्रं तु दृश्येत रश्मिभिश्च समन्वितम्। उदयं तं विजानीयाद्धोमं कुर्य्यात् विचक्षणः" "उदयादोदयाद्भानोर्भौमसावन वासरः" सू॰ सि॰। "सावनः स्यादहोरात्रमुदयादोदयाद्रवेः" काल॰मा॰ ब्रह्म॰ सि॰। गुरुशुक्रोदये च सर्व्वमङ्गलकार्य्याणि कर्त्तव्यानि। अगस्त्योदयः अगस्त्यशब्दे उक्तः। "प्रससादोदयादम्भः कुम्भयोनेर्महौजसः" रघुः।

उदयगामिनी स्त्री उदयं सूर्य्योदयं गच्छति मुहूर्त्तादिना व्याप्नोति गम-णिनि ङीप्। "सूर्य्योदयावधिमुहूर्त्तादिकालव्यापिन्यां तिथौ। कर्मानुष्ठाने उदयकाले क्रियमाणस्य ग्राह्यता तन्निर्णीतम्" का॰मा॰। "व्रतोपवासनियमे घटिकैका यदा भवेत्। उदये सा तिथिर्ग्राह्या विपरीता तु पैतृके" म॰पु॰। "व्रतोपवासस्नानादौ घटिकैका यदा भवेत्। उदये सा तिथिर्ग्राह्या श्राद्धादावस्तगामिनी" विष्णु॰ध॰पु॰। "आदित्योदयवेलायां याऽल्पापि च तिथिर्भवेत्। पूर्णा इत्येव सा ज्ञेया प्रभूता नोदयं विना" देवलः। "यां तिथिं स मनुप्राप्य उदयं याति भास्करः। सा तिथिः सकला ज्ञेया स्नानदानजपादिषु" देवलः। "उदयन्नेव सविता यां तिथिं प्रतिपद्यते। सा तिथिः सकला ज्ञेया दानाध्ययनकर्म्मसु" व्यासः। "पक्षद्वयेऽपि तिथयस्तिथिं पूर्व्वां तथोत्तराम्। त्रिभिर्मुहूर्त्तैर्विध्यन्ति सामान्योऽयं विधिः स्मृतः" पैठी॰। "उदिते दैवतं भानौ पैत्रं चास्तमिते रवौ। द्विमुहूर्त्तं त्रिरह्नश्च सा तिथिर्हव्यकव्ययोः" बौधा॰। "भानावुदिते सत्युत्तरकालेऽह्नो मुहूर्त्तद्वयं दैवत्यम्। तस्मिंश्चास्तमिते ततः पूर्वकालीनमह्नो मुहूर्त्तत्रयं पितृदैवत्यमतस्तावत्कालव्यापिनी या तिथिर्भवति सैव क्रमेण हव्यकव्ययोर्ग्राह्या" इत्याशङ्कापूर्वकं माधवेन समाहितम्। नन्वस्त्वेवं तत्तद्दिवसाभ्यनुज्ञा तथाप्युत्तरविद्धयास्तिथेर्ग्रहणे कियत्परिमाणमुदयेऽपेक्षणीयमिति विवेचनीयम्। तत्र बौधायनेन अल्पापीत्यभिधानात् निमेषमात्रं प्रतिभाति, व्यासेन उदयन्नेवेत्यभिधानात् तथैव प्रतिभाति। भविष्यत्पुराणे तु घटिकामात्रं बौधायनवचनान्तरे द्विमुहूर्त्तमित्येवं विरोधमाशङ्क्य "अत्रोच्यते "पौर्वाह्णिकास्तु तिथयस्त्रिमुहूर्त्ताः फलप्रदाः" हे॰ या॰ वचनेन दैवे पूर्वाह्णव्याप्तायास्त्रिमुहूर्त्तमितायास्तिथेर्ग्रहणम्। त्रिमुहूर्त्तन्यूनायास्तिथेः पूर्वाह्णव्याप्त्यभावात् पूर्वाह्णस्य च पञ्चधा विभक्तस्य मुख्यत्वात् उदिते भानौ त्रिमुहूर्त्तातिथिर्ग्राह्या। यत्तु "त्रिमुहूर्त्ता न कर्त्तव्या या तिथ्युदयगामिनीति" न तत् त्रिमुहूर्त्तव्याप्तेर्बाधकं प्रत्युतोद्बोधकमेव। तथा हि प्रतिषेधः सर्वत्र प्रसक्तिपूर्व्वकः, प्रसक्तिश्चात्र यथोक्तरीत्या पौर्व्वाह्णिकवाक्यात् त्रिमुहूर्त्तवेधविधायिपैठीनसिवाक्याद्वा भवति तस्य प्रसक्तं त्रिमुहूर्त्तत्वं समतिथौ बाधकाभावात्तथैव तिथिक्षये त्वधिकव्याप्तिविधित्सया प्रतिषिध्यते अतश्च तत्र चतुर्थमुहूर्त्तस्पर्शिनी तिथिर्ग्राह्या तिथिसाम्यात्। तिथिवृद्धावपि मुहूर्त्तत्रयमेव मुख्यं मुहूर्त्तद्वयं त्वनुकल्पः। एतदेव सूचयितुं द्विमुहूर्त्तापीत्यत्र अपिशब्दः पठ्यते"। ततः प्रासङ्गिकमन्यत् समाधाय उपसंहृतम् यथा "प्रकृते तु सूर्य्योदये मुहूर्त्तत्रयव्यापिनी प्रतिपद्दानव्रतयोर्ग्रहीतव्या एवं सत्युदयमात्रव्याप्तिशास्त्रं घटिकामात्रव्याप्तिशास्त्रं च वैश्वानराधिकरणन्यायेनावधृत्यानुवादरूपतया त्रिमुहूर्त्तव्याप्तिं प्रशंसति। अथवा यदा पूर्वेद्युरुदयकालं परित्यज्योपरि सर्वत्र व्याप्नोति परेद्युरुदयकालमात्रं व्याप्नोति तदानीमुदयानन्तरभाविन्यामुख्यायास्त्रिमुहूर्त्तव्याप्तेर्दिनद्वयेऽप्यभावेन द्वयोरपि दिनयोर्गौणकालत्वे सति किं ग्राह्यमिति वीक्षायां पूर्व्वदिने गौणकर्मकालव्याप्तेर्भूयस्त्वात्तस्यैव ग्रहणं न्यायतः प्राप्तं केनापि निमित्तेन तत्प्रत्यूहे सति परेद्युः कर्मकालव्याप्तिसम्पादनाय पूर्णत्वमभिधायोदयविहीनस्य

ष्टाप्तिवाहुल्यस्य हेयत्वोक्तिव्याजेन तदेव प्रशस्यते। "आदित्योदयवेलायां यात्मापि च तिथिर्भवेत्। पूर्णा इत्येव मन्तव्या प्रभूता नोदयं विनेति"। यदा पूर्व्वेद्युः सङ्गवमारभ्य परेद्युरुदयात्प्रागेव तिथिक्षयवशात्प्रतिपत्स-माप्ता तदा यद्यपि दिनद्वये सोदयमुहूर्त्तत्रयस्पर्शो नास्ति तथापि पूर्व्वेद्युरेवानुष्ठेयम्। "सा तिथिः सकला ज्ञेया यस्यामस्तमितो रविः इतिवचनेन सम्पाद्यायाः सोदयत्रि-मुहूर्त्तीया व्याप्तेर्विद्यमानत्वात्। यदा न परेद्युरुदय-मुहूर्त्तव्याप्तिरस्ति तदा पूर्व्वेद्युरेवानुष्ठानम्। अस्तमयव्या-प्तेरधिकत्वात्। अतएव पद्मपुराणेऽभिहितम्। "व्रते स्नाने तथा नक्ते पितृकार्य्ये विशेषतः। यस्यामस्तङ्गतो-भानुः सा तिथिः पुण्यभाग्भवेदिति"। तत्रैव द्वितीयाप्रकरणे च दैवं षड्विधम् उपवासैकभक्तनक्तायाचितदानव्रतभेदेन, तीर्थस्नानजपहोमादयस्तु अत्रशब्दे-नैव संगृहीताः। पित्र्यं द्विविधम् एकोद्दिष्टं पार्व्वणं चेति। तत्र सर्व्वत्र कर्म्मकालव्याप्तिर्मुख्या। अव-शिष्टा गौणः। तिथिव्याप्तिश्च द्विविधा स्वाभाविक तिथिव्याप्तिः साकल्यापादिततिथिव्याप्तिश्चेति। तद्यथा यदा सङ्गवपर्य्यन्तामावास्या तदानीमुपरि[illegible]मध्याह्नो मुख्यैव प्रतिपदा व्याप्ता भवति। यदा मध्याह्नादिमारभ्य तिथिक्षयवशात् परेद्युः सङ्गवान्ता प्रतिपद्भवति तदा पूर्व्वेद्युर्गौणकालव्याप्तिमुपजीव्यैकभक्तानुष्ठानाय तत्स्वीकारे सति मध्याह्नेऽवश्यानुष्ठेयत्वात् तत्र च स्वाभाविकप्रति-पद्व्याप्त्यभावेऽपि साकल्यवचनापादितप्रतिपद्व्याप्तिः स्वीकृता एवञ्च सति कर्म्मकालव्याप्तौ सर्व्वस्मृतीनामत्यन्त निर्ब्बन्धदर्शनात् कर्म्मकालव्याप्तिशास्त्रमितरेभ्यः प्रबल मिति निश्चीयते। तदनुसारेण द्वितीयाद्यास्वपि तिथयउप वासादौ दैवे; एकोद्दिष्टादौ पित्र्ये च कर्म्मकालव्याप्ति युक्ताः स्वीकर्त्तव्याः। उपवासस्तु सर्व्वतिथिषु नारदीये दर्शितः। "शुक्ला वा यदि वा कृष्णा प्रतिपत्प्रभृतीन् तिथीन्। उपोष्यैव बलिन्दत्त्वा विधिना त्वपरे दिने। ब्राह्मणान् भोजयित्वा तु सर्व्वपापैः प्रमुच्यत" इति। उपवासस्या होरात्रः कर्म्मकालः। तस्मात्तद्व्यापिनी तिथिर्ग्राह्या तदसम्भवे खण्डतिथिरपि। तत्र का ग्राह्येति निरूप्यते। तत्र सूर्य्योदये त्रिमुहूर्त्ता ततोऽधिका वा प्रतिपद्भवति उत्तर-दिनेऽस्तमयादर्व्वाक् त्रिमुहूर्त्ता ततोऽधिका वा तृतीया भवति सैषमुभयविद्धा द्वितीया। तत्र वेधकतिथेरुदयेऽस्तमये वा त्रिमुहूर्त्तत्वं वेधप्रयोजकं न तु ततोन्यूनत्वं। तदेव पैठिनसिवाक्येन पूर्व्वमुदाहृतम्। वेध्यतिथेश्च त्रिमूहूर्त्त सद्भावोऽपेक्षित इति "द्विमुहूर्त्तं त्रिरह्नश्च" इत्यनेन सुमन्तु वचनेन दर्शितम्। "उदयास्तमययोरेव वेध" इत्यस्यायमर्थः "उदये सा तिथिर्ग्राह्या विपरीता तु पैतृके" इत्यादिभिः कात्यायनवचनैरवगन्तव्यः। एवं सति उदाहृतविषये द्वितीया उभयवेधेऽपि उत्तरविद्धैवोपास्या युग्मादिवाक्ये-नान्वयव्यतिरेकाभ्यामुत्तरवेधस्य प्राशस्त्याभिधानात्" इति। पाद्मन्तूपवासरूपदैवविषयं तदप्युक्तं तेनैव। "यद्यप्युपो-ष्यत्वं साक्षान्नाभिहितं तथापि कर्म्मान्तरविशेषानुपा-दानादुपवासविषयत्वं परिशेष्यते तथा हि न तावत् पि-त्र्यविषयत्वं सम्भवति "द्वितीयादिकयुग्मानां पूज्यता नियमादिषु। एकोद्दिष्टादिश्राद्धादौ ह्रासवृद्ध्यादिदेशनेति" व्यासेन युग्मादिशास्त्रस्य खर्व्वादिशास्त्रस्य च दैवपि-त्र्यविषयकत्वेन व्यवस्थापनात् इति"। एवञ्चोपवासे-तरदैवकर्म्मणि उदयगामिन्या ग्राह्यता तदपवादकं युग्मशास्त्रम्। तत्र च पैठीनसिवचनेन त्रिमुहूर्त्त तिथेरेव वेधप्रयोजकताऽभिधानेन ततो न्यूनकालि-कतिथ्या वेधाभावात् गौड़देशीया यत् स्पर्शमात्रेण वेधं कल्पयन्ति तत्माहसमात्रम् रघुनन्दनेन कुत्रापि तथा वेधानुक्तेः कालमा० हेमाद्रिप्रभृतिषु द्विमुहूर्त्तादिव्याप्तावेव वेधकत्वव्यवस्थापनात्, युग्मशास्त्रस्य सामान्यशास्त्रतया वेधसामान्यप्रतिपादनेऽपि पैठीनसिना तस्य विशेषाभिधा-नात्तथैव ग्रहणस्य युक्तत्वमित्युपश्याम:। युग्मा-दिशास्त्रस्य बाधकन्तु "युगाद्या वर्षवृद्धिश्च सप्तमी पार्व्वती प्रिया। रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता" ति० त० देवी० पु० "भगवत्याः प्रवेशादिविसर्गान्ताश्च याः क्रियाः। तिथावुदयगामिन्यां सर्व्वास्ताः कारयेद्बुधः" दुर्गो० त० नन्दि० पु० "शरत्काले महापूजा क्रियते या च वार्षिकी। सा कार्य्योदयगामिन्यां न तत्र तिथियुग्मता" तत्रैव पुरा० "पूर्व्वाह्णे तु सदा कार्य्याः शुक्ला मनुयुगादयः। दैवे कर्म्मणि पित्र्ये च कृष्णा चैवापराह्णिके। हेमा० नार-दीयम् "युगादिमन्वादिश्राद्धादिषु शुक्लपक्षे उदयव्या-पिनी तिथिर्ग्राह्या कृष्णपक्षेऽपराह्णव्यापिनी ग्राह्या। स्मृत्यर्थसारश्च दिनद्वये तु तथा लाभे परैवेति हेमाद्रिः। विधानपारिजातादयोऽप्येवम्। निर्ण० सि० "सर्व्वेष्ट-तिर्व्यतीपातो युगमन्वादयस्तथा। सम्मुखा उपवासेषु दानादावन्तिमा स्मृता" अनन्तभट्टधृतवचने आदि-पादात् श्राद्धसंग्रह इत्याह। इदन्त्ववधेयम्। "कर्मणो-

यस्य यः कालस्तत्कालव्यापिनी तिथिः । तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणम्” कर्म्मणोविहितकालव्यापिन्या एव ग्राह्यत्वाभिधानेन यत् तिथिद्वयवशात् उभयदिने स्वल्पकृतिवाविभक्तदिनतृतीयांशरूपपूर्व्वाह्णाव्याप्तिस्तत् प्रतियोगिवैयधिकरण्यघटितव्याप्तेः प्रवेशनेन मुहूर्त्तकालव्याप्तावपि पूर्व्वाह्णव्यापकतया ग्रहणमित्येव रघुनन्दनस्याशयः। तथा च“आरभ्य तस्यां दशमी च यावत्” इत्यादौ यथा पूजायास्तिथीनां प्रतियोगिवैयधिकरण्यघटितव्यापकताप्रवेश एवमत्रापि मुहूर्त्तव्यापकतानातोन्यूनदण्डादिव्यापने ग्राह्यता । भवति च द्वित्रमुहूर्त्तव्यापिन्या अपि मुहूर्त्तव्यापितेति सर्व्वं सुस्थम् । तेन मुहूर्त्तन्यूनतायां न ग्राह्यता द्विमुहूर्त्तादिव्याप्तिस्तु मुख्येति । एवञ्च युग्मादिशास्त्रविषये कृष्णप्रतिपदादौ उभयदिने पूर्व्वाह्णमुहूर्त्तव्यापित्वेऽपि त्रिमुहूर्त्ताया एव ग्राह्यतेति विवेकः । एवमस्तगामिन्यामपि अस्तादर्वाक् त्रिमुहूर्त्तायास्तिथेः पित्र्ये ग्राह्यतेत्यपि बोध्यम् ।

उदयगिरि पु० उदय उदयस्थानं गिरिरिव । सूर्य्यादेरुदयस्थाने पर्व्वतवदाच्छादके भूवृत्तपादे “उदयगिरिवनालीबालमन्दारपुष्पम्”उद्भटः उदयगिरिशिखरसंस्थिते प्रतप्तकनकनिकरपीतलोहिते सवितरि”कुम्भ० उदयाचलादयोऽप्यत्र । “श्रितोदयाद्रेरभिसायमुच्चकैः”माघः। भूगोलपादस्यैव यथा सूर्य्याद्याच्छादकत्वम् तथा सिद्धान्तग्रन्थे स्थितम् । यद्यपि सूर्य्योदयस्य देशविशेषे विशेषस्थाने एव सम्भवः तथापि निरक्षदेशावधिकएव देशे मुख्यत्वम् “लङ्कापुरेऽर्कस्य यदोदयः स्यात् तदा दिनार्धं यमकोटिपुर्य्याम् । अधस्तदा सिद्धपुरेऽस्तकालः स्याद्रोमके रात्रिदलं तदैव । यत्रोदितोऽर्कः किल तत्र पूर्वा तत्रापरा यत्र गतः प्रतिष्ठाम् तद्याम्यतोऽन्ये च ततोऽखिलानामुदक्स्थितोमेरुरिति प्रसिद्धम्” सिद्धान्तशिरोमणौ तथैव व्यवस्थापितम् ।

तथा च लङ्कादिपुरीचतुष्टयस्य भूवृत्तपादान्तरस्थितत्वेन द्वितीयपुर्य्युपरिस्थे सूर्य्यादौ प्रथमं दृश्यता तत्पूर्व्वादिस्थदेशे तु ततः पूर्व्वम् । पश्चात् स्थितदेशेषु च अतः पश्चात् दृश्यता एवञ्च भूवृत्तपादेनाच्छादने तदतिक्रमे दर्शनयोग्यत्वादुदयः । ततश्च यत्र देशे यदा दर्शनं तत्र तदा तद्देशापेक्षया सूर्य्यादेर्भूबिम्बपादोपरिस्थितत्वेन तत्स्थानस्य उदयगिरित्वम् यत्र चादर्शनं तद्देशवासिनामस्तगिरित्वं शास्त्रेषु कल्पितम् । एवञ्च निरक्षदेशावधि भूवृत्तपादान्तरेषु स्थितलङ्कापुरवासिनां यमकोटिरेवोदयस्थानमेवमन्यत्र कल्प्यम् । लिङ्गपुराणे तु अन्याः पुरीरुक्त्वा तत्रोदयादिव्यवस्थामाह “मानसोपरि माहेन्द्री प्राच्यां मेरोः स्थिता पुरी । दक्षिणे भानुपुत्रस्य वरुणस्य तु वारुणे । सौम्ये सोमस्य विपुला तासु दिग्देवताः स्थिताः । अमरावती संयमिनी सुखा चैव विभा क्रमात् । लोकपालोपरिष्टात्तु सर्व्वतो दक्षिणायने । काष्ठाङ्गतस्य सूर्य्यस्य गतिर्या तां निबोधत । दक्षिणां प्रक्रमेद्भानुः क्षिप्तेषुरिव धावति । पुरान्तगो यदा भानुः शक्रस्य भवति प्रभुः । सर्व्वैः सांयमनैः सौरो ह्युदयो दृश्यते द्विजाः! । स एव सुखवत्यान्तु निशान्तस्थः प्रदृश्यते । अस्तमेति तदा सूर्य्यो विभायां विश्वदृग्विभुः । मया प्रोक्तोऽमरावत्यां यथाऽसौ याति भास्करः । तथा संयमिनीं प्राप्य सुखाञ्चैव विभां खगः । यदा पराह्णस्त्वाग्नेय्यां पूर्व्वाह्णोनैरृते द्विजाः! । तदा त्वपररात्रश्च वायुभागे सुदारुणः । ऐशान्यां पूर्व्वरात्रस्तु गतिरेषास्य सर्व्वत”इति। व्याख्यातञ्च का० उ० आनन्दगिरिणा “तथा चोपरिष्टादमरावत्यास्तिष्ठन्मध्याह्नं तत्रत्यकोणस्थानां तृतीययाममाग्नेयकोणस्थानामाद्ययामं संयमिन्यामुदयं च करोति सविता । एवं यदा याम्ये मध्याह्ने तिष्ठति तदैन्द्रे अस्तमयः, आग्नेये तृतीययामः, नैरृतिकोणे प्रथमो यामः, वारुणे उदयः । यदा च वारुणे मध्याह्नस्तदायाम्येऽस्तमयः, निरृतिकोणे तृतीयो यामः, वायव्ये प्रथमयामः, सौम्ये उदयः । यदा च सौम्ये मध्याह्नस्तदा वारुणेऽस्तमयः, वायव्ये तृतीययामः, ऐशानकोणे प्रथमो यामः, ऐन्द्रे उदयः । तथाग्नेयकोणे वर्त्तमानस्तत्रस्थानां मध्यं दिनम्, यमेन्द्रपुर्य्योराद्यतृतीययामौ, नैरृतेशानकोणयोरुदयास्तमयौ च करोति”एतच्च मानसापेक्षयैवोदयास्तमयकीर्त्तनान्न पूर्वोक्तेन विरुद्धम्“अथ यदादित्यः पुरस्तादुदेता पश्चादस्तमेता द्विस्तावद्दूर्द्ध्व उदेताऽर्वागस्तमेता इत्यादि”का० उ० भाष्ये“पश्चादुत्तरत ऊर्द्ध्वमुदेता विपर्य्ययेणास्तमेता । पूर्व्वस्मात्पूर्वस्माद्द्विगुणोत्तरोत्तरेण कालेनेत्यपौराणं दर्शनम् । सवितुश्चतुर्दिशमिन्द्रयमवरुणसोमपुरीषूदयास्तमयकालस्य तुल्यत्वं हि पौराणिकैरुक्तम् । मानसोत्तरस्य मूर्द्धनि मेरोः प्रदक्षिणावृत्तेस्तुल्यत्वादिति”इत्याशङ्क्य अत्रोक्तः परिहार आचार्य्यैरमरावत्यादीनां पुरीणां द्विगुणोत्तरोत्तरेण कालेनोद्भासः स्यात् । उदयश्च नाम सवितुस्तन्निवासिनां प्राणिनां चक्षुर्गोचरतापत्तिस्तदत्ययश्चास्तमयं न परमार्थत उदयास्तमयौ स्तः । तन्निवासिनाञ्च प्राणिनामभावे तान् प्रति तेनैव

मार्गेण गच्छन्नपि नैवोदेता नास्तमेतेति चक्षुर्गोचरतापत्तेस्तदत्ययस्य चाभावात्। तथाऽमरावत्याः सकाशाद्द्विगुणकालं सांयमिनीं पुरीं वसन्त्यतस्तन्निवासिनः प्राणिनः प्रति दक्षिणतः इवोदेत्युत्तरतोऽस्तमेतीत्युच्यतेऽस्मद्बुद्धिस्थमपेक्ष्य तथोत्तरास्वपि पुरीषु योजना। सर्वेषाञ्च मेरुरुत्तरो भवति। यदाऽमरावत्यां मध्याह्नगतः सविता तदा सांयमिन्यामुद्यन् दृश्यते तत्र मध्याह्नगोचरो वारुण्यामुद्यन्दृश्यते। तथोत्तरस्यां प्रदक्षिणावृत्तेस्तुल्यत्वात्। इलावृतवासिनां सर्वतः पर्व्वतप्राकारनिवारितादित्यरश्मीनां सवितोर्द्ध्व इवोदेताऽर्वागस्तमेता दृश्यते पर्वतोर्द्ध्वच्छिद्रप्रवेशात्सवितृप्रकाशस्य। तद्वर्गोद्यमृतोपजीविनामस्मृतानाञ्च द्विगुणोत्तरोत्तरवीर्य्यवत्त्वमनुमीयते भोगकालद्वैगुण्यलिङ्गेन" छा॰उ॰भाष्यम्।

उदयन पु॰ उद्+इ-ल्यु। १अगस्त्ये मुनौ, कुसुमाञ्जलिप्रभृतिग्रन्थकारके २उदयनाचार्य्ये च। "व्यातेने किरणावलीमुदयनः" द्रव्यकिरणावली। अयञ्च आत्मतत्त्वविवेकादिनानाग्रन्थकर्ता। ३वृषभराजे "उदयनमिवानन्दितवत्सकुलम्" काद॰ ४वत्सराजे च। वत्सराजचरितञ्च बृहत्कथायां विस्तरेण वर्णितम्। "प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्" मेघ॰ उद्+इ—भावे ल्युट्। ५उदये न॰ "पूर्वतः सागरस्येव चन्द्रस्योदयनं प्रति" भा॰भी॰५८अ॰ "एषा युक्ता परावतः सूर्य्यस्योदयनादधि" ऋ॰ १,४८,५, "सप्तर्षीणाञ्चोदयनमादित्यस्य" शत॰ब्रा॰ १२,८,१९। ६समाप्तौ च "सैषा त्रिष्टुप्प्रायणा त्रिष्टुदुदयना" ता॰ब्रा॰ २,१५,२ त्रिष्टुत् स्तवकम् उदयने समाप्तौ यस्याः" भा॰।

उदयनीया स्त्री उदयने समाप्तौ विहिता तन्निमित्तत्वेन तत्सम्बन्धिनी वा छ। समाप्तिनिमित्ते १इष्टिभेदे "गार्हपत्य उदनीयामाचरति" आश्व॰श्रौ॰ ६,४,१,१, नेदमादिषु मार्जनमर्वागुदयनीयायाः" ४,२,६,। "चरुमेक्षणबर्हिर्निधानादुदयनीयायै" कात्या॰ ७,५,१६,। अवभृथादुत्थाननिमित्ते २अतिरात्रे पु॰ "हस्तानेवोदयनीयोऽतिरात्रः" शत॰ब्रा॰ १२,१,२,२, "अवभृथादुदेत्योदयनीयेन चरित्वानुबन्ध्यस्य पशुपुरोडाशमनु दैविकानां हवींषि निर्वपति" ९,५,१,२४। "प्रायणीय एवातिरात्रे युञ्जन्त्युदयनीये विमुञ्चन्ति"। "अथो यथा प्रायणीयेऽतिरात्रे समिधेनीरनूच्य ब्रूयादुदनीयएवातोऽनुवक्ताऽस्मीति" ९,४,४,१५,१६

उदयवेला स्त्री सूर्य्यस्य तत्किरणस्य वा उदयस्य वेला समयः। १सूर्य्योदयकाले २अरुणोदयकाले च "माघेमासि सिते पक्षे रटन्त्याख्यचतुर्दशी। तस्यामुदयवेलायां स्नात्वा नावेक्षते यमम्" म॰त॰यमः। "उदयवेलायाम् अरुणोदयवेलायामिति" म॰त॰रघु॰। शा॰ति॰ उक्ते ३भूतानामुदयसमये च भूतोदयशब्दे विवृतिः।

उदयान्तर न॰ उदयस्योदयज्ञानार्थम् अन्तरं यत्र। सि॰शि॰ उक्ते ग्रहाणामुदयज्ञानार्थं संस्कारभेदे उदयशब्दे विवृतिः।

उदयास्तसूत्र न॰ "क्ष्माजे द्युरात्रसममण्डलमध्यभागजीवाग्रका भवति पूर्वपराशयोः सा। अग्राग्रयोः प्रगुणमत्र निबद्धसूत्रं यत्तद्वदन्ति गणका उदयास्तसूत्रम्" सि॰ शि॰उक्ते क्षितिजाहोरात्रवृत्तसम्पातयोर्बद्धे सूत्रे

उदर न॰ उद्+दृ—अप्। १जठरे नाभिस्तनयोर्मध्यभागे। "दश स्थानानि दण्डस्येत्युपक्रम्य "उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमौ। चक्षुर्नासा च कर्णौ च धनं देहस्तथैव च" मनुः। "मस्तकोदरपृष्ठनाभिललाटनासाचिबुकवस्तिग्रीवा इत्येता एकैकाः" शरीरविभागे सुश्रुतः। "उदरञ्च गुदौ कोष्ठ्यौ विस्तारोऽयमुदाहृतः" या॰स्मृ॰। "उदरेऽन्नपक्तिः" शत॰ ब्रा॰ ८,६,२१,२। "उदरं पारिमाति मुष्टिना" "सदसत्संशयगोचरोदरी" नैष॰ आधारे अप्। २युद्धे। ३मध्यभागमात्रे च "ताम्रोदरेषु तरुपल्लवेषु" रघुः "लतादिविहितोदरे" अम॰ "कुसुममिव पिनद्धं पाण्डुपत्रोदरेण" शकु॰ उद्+इ—अप् पृषो॰ दलोपश्च, उदरस्थत्वाद्वाह्यस्योदरशब्दवाच्यता "तात्स्थ्यात्तद्धर्म्मताभ्याञ्च तत्समीपतयाऽपि च। तत्साहचर्य्यात् शब्दानां वृत्तिरुक्ता चतुर्विधा" भा॰प्र॰उक्तेः। ४उदररोगे। उदररोगनिदानादि सुश्रुते उक्तं यथा "अथात उदराणां निदानं व्याख्यास्यामः। धन्वन्तरिर्धर्म्मभृतां वरिष्ठो राजर्षिरिन्द्रप्रतिमो बभूव। ब्रह्मर्षिपुत्रं विनयोपपन्नं शिष्यं शुभं सुश्रुतमन्वशात्सः। पृथक् समस्तैरपि चेह दोषैः प्लीहोदरं बद्धगुदं तथैव। आगन्तुकं सप्तममष्टमञ्च दकोदरं चेति वदन्ति तानि। सुदुर्बलाग्नेरहिताशनस्य संशुष्कपूत्यन्ननिषेवणाद्वा। स्नेहादिमिथ्याचरणाच्च जन्तोर्वृद्धिं गताः कोष्ठमभिप्रपन्नाः। गुल्माकृतिव्यञ्जितलक्षणानि कुर्वन्ति घोराण्युदराणि दोषाः। कोष्ठादुपस्नेहवदम्बुसारो निःसृत्य दुष्टोऽनिलवेगनुन्नः। त्वचः समुन्नम्य शनैः समन्ताद्विवर्द्धमानो जठरं करोति। तत्पूर्व्वरूपं बलवर्णकाङ्क्षावलीविनाशो जठरे हि राज्यः। जीर्णापरिज्ञानविदाहवत्यो वस्तौ रुजः पादगतश्च शोफः। सङ्गृह्य पार्श्वोदरपृष्ठनाभीर्यद्वर्द्धते कृष्णसिरावनद्धम्।

सम्भूलमानाञ्च दुपशब्दं सतोदभेदं पवनात्मकं तत् १। यच्चोषतृष्णाज्वरदाहयुक्तं पैत्तं सिरा यत्र भवन्ति पीताः। पीताक्षिविण्मूत्रनखाननस्य पित्तोदरम् २ तत्त्वचिराभिवृद्धि। यच्छीतलं शुक्लसिरावनद्धं गुरु स्थिरं शुक्लनखाननस्य। स्निग्धं महच्छोफयुतं ससादं कफोदरम् ३ तच्च चिराभिवृद्धि। स्त्रियोऽन्नपानं नखरोममूत्रविडार्त्तवैर्युक्तमसाधुवृत्ताः। यस्मै प्रयच्छन्त्यरयो गरांश्च दुष्टाम्बुदूषीविषसेवनाद्वा। तेनाशु रक्तं कुपिताश्च दोषाः कुर्वन्ति घोरं जठरं त्रिलिङ्गम्४। तच्छीतवाताभ्रसमुद्भवेषु विशेषतः कुप्यति दह्यते च। स चातुरो मूर्च्छति सम्प्रसक्तं पाण्डुः कृशः शुष्यति तृष्णया च। प्रकीर्त्तितं दूष्युदरन्तु घोरं प्लीहोदरम् कीर्त्तयतो निबोध। विदाह्यभिष्यन्दिरतस्य जन्तोः प्रदुष्टमत्यर्थमसृक् कफश्च। प्लीहाभिवृद्धिं सततं करोति प्लीहोदरम् ५ तत्प्रवदन्ति तज्ज्ञाः। वामे च पार्श्वे परिवृद्धिमेति विशेषतः सीदति चातुरोऽत्र। मन्दज्वराग्निः कफपित्तलिङ्गैरुपद्रुतः क्षीणबलोऽतिपाण्डुः। सव्येतरस्मिन् यकृति प्रदुष्टे ज्ञेयं यकृद्दाल्युदरं तदेव। तस्यान्त्रमन्नैरुपलेपिभिर्वा बालाश्मभिर्वा सहितैः पृथग्वा। सञ्चीयते तत्र मलः सदोषः क्रमेण नाड्यामिव सङ्करो हि। निरुध्यते चास्य गुदे पुरीषं निरेति कृच्छ्रादपि चाल्पमल्पम्। हृन्नाभिमध्ये परिवृद्धिमेति यच्चोदरं विट्समगन्धिकञ्च। प्रच्छर्दयत् बद्धगुदं ६ विभाव्यं ततः परिस्राव्युदरं निबोध। शल्यं यदन्नोपहितं तदन्त्रं भिनत्ति यस्यागतमन्यथा वा। तस्मात् स्रुतान्त्रात्सलिलप्रकाशः स्रावः स्रवेद्वै गुदतस्तु भूयः। नाभेरधश्चोदरमेति वृद्धिं निस्तुद्यतेऽतीव विदह्यते च। एतत्परिस्राव्युदरं ७ प्रदिष्टं दकोदरं कीर्त्तयतो निबोध। यः स्नेहपीतोऽप्यनुवासितो वा वान्तो विरिक्तोऽप्यथ वा निरूढः। पिबेज्जलं शीतलमाशु तस्य स्रोतांसि दुष्यन्ति हि तद्वहानि। स्नेहोपलिप्तेष्वथ वापि तेषु दकोदरम्पूर्ववदभ्युपैति। स्निग्धं महत्सम्परिवृत्तनाभि भृशोन्नतं पूर्णमिवाम्बुना च। यथा दृतिः क्षुभ्यति कम्पते च शब्दायते चापि दकोदरं ८ तत्। आध्मानं गमनेऽशक्तिर्दौर्बल्यं दुर्बलाग्निता। शोफः सदनमङ्गानां सङ्गो वातपुरीषयोः। दाहस्तृष्णा च सर्वेषु जठरेषु भवन्ति हि। अन्ते सलिलभावन्तु भजन्ते जठराणि तु। सर्वाण्येव परीपाकात्तदा तानि विवर्ज्जयेत्"। विस्तरस्तु भा॰प्र॰ दृश्यः। गर्भपातनजा रोगा यकृत्प्लीहजलोदराः इत्युक्तेः पुंस्त्वमपि। ५अले त्रि॰ "उदरमन्तरं कुरुते" श्रुतिः

उदरग्रन्थि पु॰ उदरे ग्रन्थिरिव। गुल्मरोगे हेम॰। गुल्मशब्दे विवृतिः उदरगुल्मोऽप्यत्र पु॰ "इक्षोर्विकारहारी च भवेदुदरगुल्मवान्" शाता॰स्मृतिः। [उदरबन्धयन्त्रे हेम॰

उदरत्राण न॰ उदरं त्रायतेऽनेन त्रै–ल्युट्। (कमरबन्ध)

उदरथि पु॰ उद्+ऋ–अथिन्। समुद्रे उज्ज्वलदत्तः।

उदरपिशाच त्रि॰ उदरे तत्पूर्त्तौ पिशाच इव। सर्वान्नभक्षके हेमच॰। [त्वेन पूरयित्वेत्यर्थे।

उदरपूरम् अव्य॰ उदर+पूर–साकल्ये णमुल्। उदरं साक-

उदरम्भरि त्रि॰ उदरं बिभर्त्ति भृ–खि मुम् च। पञ्चयज्ञाद्यकरणेनात्मोदरमात्रपोषके।

उदररोग पु॰ ६त॰। (उदरी) इति ख्याते रोगे। उदरशब्दे विवृतिः। उदरव्याधिरप्यत्र "कदलीयक्षारन्तु पानीयेन प्रसाधितम्। तदास्वादेन नश्यन्ति उदरव्याधयोऽखिलाः" गरु॰ पु॰।

उदरवत् त्रि॰ वृद्धमुदरमस्त्यस्य तुन्दादि॰ वृद्धतायाम् मतुप् मस्य वः। वृद्धोदरयुक्ते। पक्षे–ठन्। उदरिक इनि। उदरिन् पिच्छा॰ इलच्। उदरिल उक्तार्थे त्रि॰ इनौ मतौ च स्त्रियां ङीप्।

उदरशय पु॰ उदरे शेते शी–पार्श्वा॰ अच्। गर्भस्थे

उदरशाण्डिल्य पु॰ ऋषिभेदे "हर्यश्वोदरशाण्डिल्यः पाराशर्य्यः कृषीबलः" भा॰स॰ ७अ॰। "तं हैतमतिधन्वा शौनक उदरशाण्डिल्यायोक्तोवाच" छा॰ उ॰।

उदराध्मान न॰ ६त॰। (पेटफाँपा) रोगभेदे। तत्कारणमुक्तं सुश्रु॰ "कषायः संग्राहको रोपणः स्तम्भनः शोधनो लेखनः शोषणः पीडनः क्लेदोपशोषणश्चेति स एवं गुणोऽप्येकएवात्यर्थमुपसेव्यमानो हृत्पीडास्यशोषोदराध्मानवाक्यग्रहमन्यास्तम्भगात्रस्फुरणचुमचुमायनाकुञ्चनाक्षेपणप्रभृतीन् जनयति"। तच्चाजीर्णस्य लिङ्गं तदप्युक्तं सुश्रुते तच्च उद्गिरणशब्दे वक्ष्यते।

उदरामय पु॰ उदरस्यामं रोगं याति नयति या–क। स्वनामख्याते रोगे अतिसारशब्दे दृ॰ विवृतिः। "शीतं मधुयुतं कृत्वा पाययेतोदरामये" "शर्करोपहितं शीतं पाययेच्चोदरामये" सुश्रु॰।

उदरावर्त्त पु॰ उदरे आवर्त्त इव गभीरत्वात्। नाभौ।

उदरिणी स्त्री॰ उदरं तत्स्थगर्भोऽस्त्यस्याः इनि ङीप्। गर्भिण्याम्।

उदर्क पु॰ उद्+अर्क–अर्च–वा घञ्। १उत्तरकाले २भाविफलके शुभाशुभकर्मणि च। "तद्भवत्यसुखोदर्कं जीवतश्च मृतस्य च"

"सोऽनुभूयासुखोदर्कान्" प्रेत्येह च सुखोदर्कान् प्रजाधर्मान् निबोधत" मनुः। "नन्वयमुदर्कः प्राक्तनस्य दुष्कृतस्य" दयकु०। "नानाप्रभृतयः समानोदर्का ऋतवो वा अस्टज्यन्त" शत०ब्रा० ८,७,१,२।

उदर्चिस् पु० उद् ऊर्द्धमर्चिः शिखाऽस्य। १उच्छिखे वह्नौ। उत्कृष्टकान्तित्वात् २कन्दर्पे ऊर्द्धरेतस्त्वात् ३शिवे च। ४उन्नतशिखान्विते त्रि० "प्रदक्षिणप्रक्रमणात् कृशानोरुदर्चिषस्तन्मिथुनं चकाशे" "कुचेरोदर्चिषं सूर्य्यम्" रघुः। "स्फुरन्नुदर्चिः सहसा तृतीयादक्ष्णः कृशानुःकिल निष्पपात" कुमा०। प्रा०स०। ५उन्नतायां शिखायां न०स्त्री०।

उदर्द पु० उद्+अर्द्द-अच्। "वरटादष्टसंस्थानः शोथः संजायते बहिः। सकण्डूस्तोदबहुलश्छर्दिज्वरविदाहवान्। उदर्दमिति तं विद्याच्छीतपित्तमथापरे। वाताधिकं शीतपित्तमुदर्दन्तु कफाधिकम्" इति निदानोक्ते रोगभेदे।

उदर्य्य त्रि० उदरे भवः उदर+यत्। जठरभवे "यदुदर्य्यस्य मेदसः परिशिष्येत" शत०ब्रा० ३,८,४,५, "पुरीतता नभ, उदर्य्येण चक्रवाकौ" यजु० २५,८।

उदलावणिक त्रि० उदकीभूतं लवणमुदलवणम् उदादेशः। तेन पक्वम् ठञ् उत्तरपदवृद्धिः उदकीभूतलवणपक्वे व्यञ्जनादौ हलायु०।

उदवसित न० उद्+अव+सि-सो-वा क्त। गृहे अमरः।

उदवाप पु० उदकं वपति पिण्डस्थानीयतया वप-अण् उदादेशः उप०स०। जलमात्रेण १श्राद्धकर्त्तरि २तर्पणकारिणि च। तस्यापत्यम् इञ्। औदवापि तदपत्ये पुंस्त्री ततः तस्येदमित्यर्थे रैवति० छ। औदवापीय तत्सम्बन्धिनि त्रि०।

उदवास पु० उदके व्रतार्थं वास उदादेशः। व्रतार्थे जलवासे। "अशक्तशिरास्तु योऽवस्येत् उदवासं च योवसेत्। सततं चैकशायी यः स लभेतेप्सितां गतिम्" भा०अनु० १७अ० "सहस्ररात्रीरुदवासतत्परा" कुमा०।

उदवाह पु० उद उदकं वहति वह-अण् उप०स०। जलवाहके १मेघे। "दिवा चित्तम कृण्वन्ति पर्जन्येनोदवाहेन" ऋ० १, ३८,९, २उदकवाहकमात्रे त्रि० "आ वोयन्तूदवाहासो अद्य वृष्टिं ये विश्वे मरुतो जुनन्ति" ऋ० ५,५८, "उक्ष्वा वहन्तु मरुत उदवाहा उदप्रुतः" अथ० १८,२,२२,

उदशराव पु० उदकपूर्णः शरावः शा०त० पूरयितव्ये एकहलादौ उदादेशः। जलपूर्णे शरावे "उदशरावे आत्मानमवेक्ष्य यदात्मनो न विजानीयस्तन्मे प्रब्रूतमिति तौ होदशरावेऽवेक्षाञ्चक्राते" छा०उ० ६प्र०।

उदशुद्धि त्रि० उदा उदकेन शुद्धिः। स्नाते तस्यापत्यम् इञ्। औदशुद्धि तदपत्ये पुंस्त्री ततः यूनि इञन्तत्वात् फिञ् तस्य पैला० लुक।

उदश्रु त्रि० उद्गतमश्रु यस्य प्रा०ब० गतलोपः। उद्गतनेत्रजले "तस्य पश्यन् स सौमित्रिरुदश्रुर्वसतिद्रुमान्" रघुः।

उदश्वित् न० उदकेन जलेन श्वयति वर्द्धते श्वि-क्विप् संज्ञायाम् उदादेशः। अर्द्धजलेन मथिते तक्रे अमरः। "पाने मूत्रमुदश्विच्च दधि शुक्तञ्च भोजने"। "मर्द्दनं दध्युदश्विद्भ्यामथ वा तण्डुलाम्बुना" सुश्रु०।

उदसन न० उद्+अस-ल्युट्। १निरसने २उत्क्षेपणे च।

उदस्थान न० उदा प्लावितं स्थानं शाक० त०। १उदकप्लाविते स्थाने। ततः भवार्थे उत्सा० अञ्। औदस्थान तद्भवे त्रि०। उदनि स्थानं वासः। २जलवासे। तत् शीलमस्य छत्रा० ण। औदस्थान जलवासशीले त्रि०।

उदहरण पु० उदकं ह्रियतेऽनेन हृ-करणे ल्युट् उदादेशः। कुम्भे। "प्रत्यगेकधनानयुग्मानुदहरणांस्त्रिप्रभृत्या पञ्चदशभ्यः" कात्या० ९,२,२१। "उदहरणाः कलसाः" इति कर्कः। "निधायोदहरणे त्रिर्विपल्ययते" "अथैतमश्मानमुदहरणेऽवधाय" शत०ब्रा० ९,१,२,५,६,९।

उदहार त्रि० उदकं हरति हृ-अण् उप०स० उदादेशः। १जलहारके "प्रविविक्तां नदीं रात्रावुदहारोऽहमागतः" दत्तक० स्त्रियां ङीप्। "उतेन गोपा अदृश्रन्नदृश्रन्नुदहार्य्यः स दृष्टो मृडयाति" यजु० १६,७। तेन सि०कौ० "टिड्ढाणञियादि" सूत्रे तद्धितान्तस्यैव ग्रहणोक्तिश्चिन्त्या अतएव मुग्धबो० "कर्म्मण्यण्" पा० सूत्रपरिवर्त्तनेन "ढात् मण्" इति सूत्रे ङीबर्थं णित्त्वं कृतम्। तथा च कुम्भकारीत्येव साधु न तु कुम्भकारा। प्रयुज्यते च नाटकादौ प्रतिहारीत्येव तत्र च प्रतिशब्दस्य प्रत्येकार्थत्वात् कर्म्मोपपदत्वं सुलभम्। भावे घञ् ईत०। २जलहरणे च।

उदाज पु० उद्+अज-घञ् न कुत्वं व्यभावः। पशुप्रेरणे

उदात्त पु० उद्+आ+दा-क्त। वर्णोत्पत्तिस्थानेषु उच्चैरुच्चारिते १स्वरे २तद्युक्ते त्रि०। "उच्चैरुदात्तः" पा०। "ताल्वादिषु सभागेषु स्थानेषूर्द्ध्वभागे निष्पन्नोऽजुदात्तः" सि०कौ०। "उदात्तश्चानुदात्तश्च स्वरितश्च स्वरा स्त्रयः" इति शिक्षोक्तेः अचामेव तेषामैस्वर्य्यम्। अनेकाच्कपदे "अनुदात्तं

पदमेकवर्ज्जम्" पा० एकस्यैवोदात्तता अन्यस्य चानुदात्ततोक्ता। तत्रादौ सामान्यत उदात्तविधायकं सूत्रं दर्श्यते।

"अञ्चेश्छन्दस्यसर्व्वनामस्थानम्" पा०। अञ्चेः परा विभक्तिरुदात्ता। प्रतीचोबाहून्। "ऊडिदम्पदाद्यप्पुम्रैद्युभ्यः" पा० ऊट् इदम् पदादि अप् पुम् रै दिव् इत्येभ्योऽसर्व्वनामस्थानविभक्तिरुदात्ता। प्रष्ठौहः। एभिर्न्रुभिः। पद्दन्नोमास् हृन्निश इति षट् पदादयः। पद्भ्याम्। दद्भिः। नसा मासि। हृदा निशा। पुंसः। राया। दिवः। "अष्टनो दीर्घात्" पा०। दीर्घान्तादष्टनः परः शसादिरुदात्तः। अष्टभिः। "शतुरनुमोनद्यजादी" पा० अनुम् यः शतृप्रत्ययस्तदन्तादन्तोदात्तात् परा नदी अजादिश्च शसादिर्विभक्तिरुदात्ता। जानती जानतः। दधती दधत इत्यादौ तु अभ्यस्तानामादिरित्याद्युदात्तत्वविधानेन अन्तोदात्तत्वाभावात् न तथा। सनुमस्तु तुदन्तीत्यादौ न। "उदात्तयणोहल्पूर्व्वात्" पा० उदात्तस्थाने यो यण् हल्पूर्व्वस्तस्मात् परा नदी शसादिर्विभक्तिश्च उदात्ता। नेत्री, नेत्रा, लवित्रा सवित्रा। "नोङ्धात्वोः" पा० अनयोर्यणः परे शसादय उदात्ता न स्युः। ब्रह्मबन्ध्वा सुभ्वा। "ह्रस्वनुड्भ्यां मतुप्" पा० ह्रस्वान्तादन्तोदात्तान्नुटश्च परो मतुप् उदात्तः। अग्निमान् उदधिमान्। नुट् अक्षण्वन्तः। "रैशब्दाच्च" वा० रैमान्। "नामन्यतरस्याम्" पा०। मतुपि यो ह्रस्वस्तदन्तादन्तोदात्तात् परो नाम् उदात्तो वा। सुमतीनाम्। "ङ्याश्छन्दसि" पा० ङ्याः परो नाम् उदात्तो वा। अभिभञ्जतीनाम्। "षट्त्रिचतुर्भ्यो हलादिः" पा० एभ्यो हलादिर्विभक्तिरुदात्ता। षड्भिः त्रिभिः। "न गोश्वन्साववर्णराडङ्क्रुङ्कृद्भ्यः" पा० एभ्यः परं प्रागुक्तं सावेकाचस्तृतीया विभक्तिरिति न कार्य्यम्। "दिवोझल्" पा० दिवः परा झलादिर्नोदात्ता। "नृ चान्यतरस्याम्" पा०। नुः परा झलादिर्वोदात्ता। नृभिः। "उपोत्तमं रिति" पा० रित्प्रत्ययान्तस्योपोत्तममुदात्तम्। आहवनीयः। "मतोः पूर्व्वमात् संज्ञायां स्त्रियाम्" मतोः पूर्वमाकारः उदात्तः संज्ञायां स्त्रियाम्। उदुम्बरावती शरावती अमरावती "एकादेशउदात्तेनोदात्तः" पा०। उदात्तेन सहैकादेश उदात्तःस्यात्। क्व वोऽश्वाः। "स्वरितोवानुदात्ते पदादौ" पा० अनुदात्ते पदादौ परे उदात्तेन सहैकादेशः स्वरितो वा पक्षे उदात्तः। "वीदंज्योतिर्हृदये"। "उच्चैस्तरां वा वषट्कारः" पा० यज्ञकर्म्मणि वषट्शब्द उच्चैस्तराम् अत्यन्तोदात्तः एकश्रुतिर्वा "सुब्रह्मण्यायां स्वरितस्योदात्तः" पा०। सुब्रह्मण्याख्ये निगदे एकश्रुतिर्न स्यात् स्वरितस्य उदात्तः स्यात्। "झल्युपोत्तमम्" पा० षट्त्रिचतुर्भ्यो या झलादिर्विभक्तिस्तदन्ते पदे उपोत्तममुदात्तम्। पञ्चभिः दशभिः। "विभाषा भाषायाम्" पा०। उक्तविषये लोके वोदात्तः। "अन्तश्च तवै युगपत्" पा० तवै प्रत्ययान्तस्याद्यन्तौ युगपदुदात्तौ। दातवै। "अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः" पा०। दध्यादेर्योऽनङ् उदात्तः "चतुरनडुहोरामुदात्तः" पा० इत्यादीनि उदात्तविधायकानि। तत्र कस्मिंश्चित् पदे कस्योदात्ततेति निर्णयाय आद्यन्तोदात्तादिभेदेन" पा० त्रैविध्ययुक्तं तथा च केचिदाद्युदात्ताः केचिदन्तोदात्ताः केचित् मध्योदात्ताः। तत्राद्युदात्तताविधायकसूत्राणि आद्युदात्तशब्दे ७०६ पृ० उक्तानि अन्तोदात्तविधायकानि अन्तोदात्तशब्दे २०६ पृ० दिङ्मात्रमुदाहृतानीत्यतः प्रसक्तान्यत्र प्रदर्श्यन्ते "उञ्छादीनाञ्च" पा० अन्त उदात्तः स्यात् उञ्छादयश्च। उञ्छ म्लेच्छ जञ्ज जल्प जप वध युग (गरोद्दृष्ये) (वेदवेष्टनबन्धाः करणे) (स्तुयुद्रुवश्छन्दसि) (वर्त्तनिःस्तोत्रे) (दरःश्वभ्रे) (साम्बतापौ भावगर्हायाम्) (उत्तमशश्वत्तमौ सर्व्वत्र) भक्ष गन्ध-भोग मन्थ। अत्रैव निपातनात् युगवधयोर्घञन्तत्वेऽपि न गुणः"। "चतुरः शसि" पा०। चतुरोऽन्तउदात्तः शसि परे। चतुरः। चतेरुरन्निति नित्त्वादाद्युदात्तत्वेऽपि शसि अन्तोदात्ततैव। "अन्तोऽवत्याः" पा० अवतीशब्दस्यान्त उदात्तः। वेत्रवती। "ईवत्याः" पा० ईवत्यन्तस्यापि अन्त उदात्तः। अहीवती मुनीवती। "चितः" पा० चित्प्रत्ययान्तस्यान्त उदात्तः स्यात्"। "चितः सप्रकृतेर्बह्वकजर्थम्" वार्त्ति०। चिति प्रत्यये सति प्रकृतिप्रत्ययसमुदायस्यान्त उदात्तः। "ममन्नामस्यके सभे "यके सरस्वति" तकत् कुरुते "तद्धितस्य" पा० चितस्तद्धितस्यान्त उदात्तः पूर्व्वेण सिद्धे ञित्स्वरबाधनाय। चफञ् कौञ्जायनाः। "कितः" पा० कितस्तद्धितस्यान्त उदात्तः। ठक् आग्नेयः। "तिसृभ्योजसः" पा० अन्त उदात्तः। तिस्रः। "अन्तोदात्तादुत्तरपदादन्यतरस्याम्" पा० नित्याधिकारसमासादन्यत्र यदुत्तरपदमन्तोदात्तमेकाच् ततः परा तृतीया विभक्तिरन्तोदात्ता वा। परमवाचा। "थलि च सेटीडन्तो वा" पा० सेटि थलि परे इडुदात्तः इडन्तोवाद्यादिर्वा। लुलविथ चत्वारोऽपि पर्यायेणोदात्ताः।

फिट्सूत्रेषु १मपादे केचित् शब्दा अन्तोदात्ताः दर्शिता यथा। "फिषोऽन्तउदात्तः" १। प्रातिपदिकं फिट् तस्यान्त-उदात्तः स्यात्। उच्चैः। "पाटलापालङ्काम्बासागरार्थानाम्" २। एदर्थानामन्तउदात्तः। पाटला फलेरुहा सुरूपा पाकलेति पर्य्यायाः। लघावन्त इति प्राप्तः। पालङ्कोव्याधिघातआरेवतआरग्वध इति पर्य्यायाः। अम्बार्थः माता। उनर्वन्नन्तानामाद्युदात्ते प्राप्ते। सागरः। समुद्रः। "गेहार्थानामस्त्रियाम्" ३। गेहम्। नब्विषयस्येति प्राप्ते। अस्त्रियां किम् शाला आद्युदात्तोऽयम् इहैव पर्य्युदासाज्ज्ञापकात्। "गुदस्य च" ४। अन्तउदात्तःस्यान्न तु स्त्रियाम्। गुदम्। अस्त्रियां किम् "आन्त्रेभ्यस्ते गुदाभ्यः"। स्वाङ्गशिटामदन्तानामित्यन्तरङ्गमाद्युदात्तत्वम् ततष्टाप्। "ध्यपूर्व्वस्य स्त्रीविषयस्य" ५। धकारयकारपूर्वयोऽन्त्योऽच् स उदात्तः। अन्तर्धा। स्त्रीविषयवर्णेति प्राप्ते। छाया। माया। जाया। यान्तस्यान्त्यात् पूर्व्वमित्याद्युदात्तत्वे प्राप्ते। स्त्रीति किम् बाह्यम् यञन्तत्वादाद्युदात्तम्। विषयग्रहणं किम् इभ्या। क्षत्रिया। यतोऽनाव इत्याद्युदात्त इभ्यशब्दः। क्षत्रियशब्दस्तु यान्तस्यान्त्यात्पूर्व्वमिति मध्योदात्तः। "खान्तस्याश्मादेः" ६। नखम्। उखा। सुखम्। दुःखम्। नखस्य स्वाङ्गशिटामित्याद्युदात्ते प्राप्ते। उखा नाम भाण्डविशेषस्तस्य कृत्रिमत्वात् खय्युवर्णं कृत्रिमाख्या चेदिस्युवर्णस्योदात्तत्वे प्राप्ते। अश्मादेः किम् शिखा। मुखम्। मुखस्य स्वाङ्गशिटामिति नब्विषयस्येति वा आद्युदात्तत्वम्। शिखायास्तु शीङः खो निद्ध्रस्वश्चेति उणादिषु नित्त्वोक्तेः अन्तरङ्गत्वाट्टापः प्रागेव स्वाङ्गशिटामिति वा बोध्यम्। "बंहिष्ठसंवत्सरतिशत्यान्तानाम्" ७। एषामन्त उदात्तः स्यात्। अतिशयेन बहुलो बंहिष्ठः। नित्त्वादाद्युदात्ते प्राप्ते। "बंहिष्ठैरश्वैः सुवृता रथेन"। "यद्बंहिष्ठन्नाति विधे" इत्यादौ व्यत्ययादाद्युदात्तः। संवत्सरः। अव्ययपूर्व्वपदप्रकृतिस्वरोऽत्र बाध्यते इत्याहुः। सप्ततिः। अशीतिः। लघावन्त इति प्राप्ते। चत्वारिंशत्। इहापि प्राग्वत्। अभ्युत्था। "नावभृथस्य" ८। अव्ययपूर्वपदप्रकृतिस्वरोऽत्र बाध्यते इत्याहुः। थाथादिसूत्रेण गतार्थमेतत्। "दक्षिणस्य साधौ" ९। अन्त उदात्तः स्यात्। साधुवाचित्वाभावे तु व्यवस्थायां सर्वनामतया स्वाङ्गशिटामित्याद्युदात्तः। अर्थान्तरे तु लघावन्त इति गुरुरुदात्तः। दक्षिणः सरलोदारपरच्छन्दानुवर्त्तिष्विति कोशः। "स्वाङ्गाख्यायामादिर्वा" १०। इह दक्षिणस्याद्यन्तावुदात्तौ। दक्षिणो बाहुः आख्याग्रहणं किम्। प्रत्यङ्मुखस्यासीनस्य वामपाणिर्दक्षिणो भवति। "छन्दसि च" ११। अस्वाङ्गार्थमिदम्। दक्षिणः। इह पर्य्यायेणाद्यन्तावुदात्तौ। "कृष्णस्यामृगाख्या चेत्" १२। अन्तउदात्तः। वर्णानान्तणेत्याद्युदात्ते प्राप्ते अन्तोदात्तो विधीयते। कृष्णानां व्रीहीणाम्। "कृष्णो नो नाव वृषभः"। मृगाख्यायान्तु 'कृष्णो रात्र्यै'। "वा नामधेयस्य" १३। "कृष्णस्येत्येव। 'अयं वा कृष्णोऽश्विना"। कृष्णऋषिः। "शुक्लगौरयोरादिः" १४। नित्यमुदात्तः स्यादित्येके। वेत्यनुवर्त्तत इति तु युक्तम्। 'सरो गौरो यथापि वेत्यत्रान्तोदात्तदर्शनात्"। "अङ्गुष्ठोदकवकवशानां छन्दस्यन्तः" १५। अङ्गुष्ठस्य स्वाङ्गानामकुर्व्वादीनामिति द्वितीयस्योदात्तत्वे प्राप्तेऽन्तोदात्तार्थ आरम्भः। वशाग्रहणं नियमार्थं छन्दस्येवेति। तेन लोके आद्युदात्ततेत्याहुः। 'पृष्ठस्य च" १६। छन्दस्यन्तउदात्तः स्यात् भाषायाम् वा। पृष्ठम्। "अर्ज्जुनस्य तृणाख्या चेत्" १७। उनर्वन्नन्तानामित्याद्युदात्तस्यापवादः। "अर्यस्य स्वाम्याख्या चेत्" १८। यान्तस्यान्त्यात् पूर्व्वमिति यतोऽनाव इति वाद्युदात्ते प्राप्ते वचनम्। "आशाया अदिगाख्या चेत्" १९। दिगाख्याव्यावृत्त्यर्थमिदम्। अतएव ज्ञापकाद्दिक्पर्य्यायस्याद्युदात्तता। 'इन्द्र आशाभ्यस्परि"। "नक्षत्राणामाब्विषयाणाम्" २०। अन्तउदात्तः स्यात्। अश्लेषाऽनुराधादीनां लघावन्त इति प्राप्ते। ज्येष्ठाश्रविष्ठाधनिष्ठानामिष्ठन्नन्तत्वेनाद्युदात्ते प्राप्ते वचनम् "न कुपूर्वः कृत्तिकाख्या चेत्" २१। अन्तउदात्ता न। कृत्तिका नक्षत्रम्। केचित्तु कुपूर्वो य आप् तद्विषयाणामिति व्याख्याय आर्य्यिका बहुलिका इत्यत्राप्यन्तोदात्तो नेत्याहुः। "घृतादीनाञ्च" २२। "घृतं मिमिक्षे" आकृतिगणः। 'ज्येष्ठकनिष्ठयोर्वयसि' उदात्तः स्यात्। 'ज्येष्ठ आह चमसा"। 'कनिष्ठ आह चतुरः"। वयसि किम् ज्येष्ठः श्रेष्ठः, कनिष्ठोऽल्पिष्ठः। इह नित्त्वादाद्युदात्त एव। "बिल्वतिष्ययोः स्वरितो वा" २४। अनयोरन्तः स्वरितो वा स्यात्। पक्षे उदात्तः। सि० कौ०। फिट्सूत्रे २पादे येषां द्वितीयाद्यचामुदात्तताऽभिहिता तत् प्रदर्श्यते "अथ द्वितीयं प्रागीषात्" १। ईषान्तस्य हलादेरित्यतः प्राक् द्वितीयाधिकारः। "त्र्यचां प्राङ्मकरात्"। मकरवरूढेत्यतः प्राक् त्र्यचामित्यधिकारः। "स्वाङ्गानाम-

कुर्य्यादीनाम्" ३ । कवर्गरेफवकारादीनि वर्ज्जयित्वा त्र्यचां स्वाङ्गानां द्वितीयमुदात्तम् । ललाटम् । कुर्य्यादीनान्तु कपोलः । रसना । वदनम् । "मादीनाञ्च" ४ । मलयः । मकरः । "शादीनां शाकानाम्"५ । शीतन्या शतपुष्पा । "पान्तानां गुर्व्वादीनाम्" ६ । पादपः आतपः । लघ्वादीनान्तु अनूपम् । 'युताऽन्यण्यन्तानाम्' ७ । युत अयुतम् । अनि धमनिः । अणि विपणिः । "मकरवरूडपारेवतवितस्तेक्षाजिह्राष्ठाकलोमाकाष्ठापुतष्ठाकाशीनामादिर्वा" ८ । एषामादिर्द्वितीयो वोदात्तः । मकरः । वरूड इत्यादि । "छन्दसि च" ९ । अमकराद्यर्थ आरम्भः । लव्यात्तुषारादादिर्द्वितीयं वोदात्तं ज्ञेयम् । 'कर्द्दमादीनाञ्च'१० । आदिर्द्वितीयं वोदात्तम् । "सुगन्धितेजनस्य ते वा"११ । आदिर्द्वितीयन्तेशब्दश्चेति त्रयः पर्य्यायेणोदात्ताः । सुगन्धितेजनाः । 'नपः फलान्तानाम्'१२ । आदिर्द्वितीयञ्चोदात्तम् । राजादनफलम् । "यान्तस्यान्त्यात् पूर्व्वम्" १३ । कुलायः । "थान्तस्य च नालघुनी"१४ । नाशब्दो लघु च उदात्ते स्तः । सनाथा सभा । सरथा सेना "शिशुमारोदुम्बरबलीवर्दोष्ट्रारपुरूरवसाञ्च" १५ । अन्त्यात् पूर्व्वमुदात्तं द्वितीयं वा । "साङ्काश्यकाम्पिल्यनासिक्यदार्व्वाघाटानाम्" १६ । द्वितीयमुदात्तं वा । "ईषान्तस्य हलादेरादिर्वा"१७ । हलीषा । लाङ्गलीषा । ४पादे "शकटिशकट्योरक्षरमक्षरं पर्य्यायेण"१ । उदात्तम् । शकटिः । शकटी । "गोष्ठजस्य ब्राह्मणनामधेयस्य" २ । अक्षरमक्षरं पर्य्यायेणोदात्तम् । गोष्ठजः ब्राह्मणः अन्यत्र गोष्ठजः पशुः । कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः । "पारावतस्योपोत्तमवर्जम्" २ । शेषं क्रमेणोदात्तम् । पारावतः । "धूम्रजानुमुञ्जकेशकालवालस्थालीपाकानामधूजलस्थानाम्" ४ । एषाञ्चतुर्णां धूप्रभृतींश्चतुरो वर्जयित्वा शिष्टानि क्रमेणोदात्तानि । धूम्रजानुः मुञ्जकेशः कालवालः स्थालीपाकः । "कपिकेशहरिकेशयोश्छन्दसि" १५ । कपिकेशः हरिकेशः ।

समासस्य बहुपदघटिततया कस्योदात्ततेति निर्णयाय केचित् पूर्व्वपदप्रकृतिस्वराः केचित् उत्तरपदप्रकृतिस्वराः केचित् पूर्व्वपदे आद्युदात्ताः केचिच्च तत्रान्तोदात्ताः केचित् उत्तरपदे आद्युदात्ताः केचिच्च तत्रान्तोदात्ताः इति विभागं मनसि निधाय पाणिनिना ६अध्याये समासस्वरप्रकरणमारब्धं यथा 'समासस्य" पा० अन्त उदात्तः । यज्ञश्रियम् । इति सामान्यतोविधाय विशेषमाह ।

तत्रादौ पूर्व्वपदप्रकृतिस्वरः । "बहुव्रीहौ प्रकृत्या पूर्व्वपदम्" पा० । उदात्तस्वरितयोगिपूर्व्वपदं प्रकृत्या स्यात् ब० व्री० । अन्तोदात्ततापवादः । "सत्यश्वितस्वस्तमः" । सर्वानुदात्ते पूर्वपदे तु अन्तोदात्त एव । समपादः । "तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाऽव्ययद्वितीयाकृत्याः" । पा० । सप्तैते पूर्व्वपदभूतास्तत्पुरुषे प्रकृतिस्वराः । तुल्यश्वेतः समश्वेतः । किरिणा काणः किरिकाणः । मदयत्सखः । मदयति मादके इन्द्रे सखा । शस्त्रीश्यामः घनश्यामः । "अव्यये नञ्कुनिपातानामिति वाच्यम्" वार्त्ति० । अयज्ञः । नञित्याद्युक्तेः प्रोष्यपापीयानित्यादौ न । द्वितीया चणसुखम् । कृत्या भोज्योष्णम् । "वर्णो वर्णेष्वनेते" पा० वर्णवाचिन्युत्तरपदे एतवर्ज्जिते वर्णवाचि पूर्व्वपदं प्रकृत्या तत्पुरुषे । कृष्णसारङ्गः । वर्णः किं परमकृष्णः इत्यादौ, वर्णेषु किं कृष्णतिला इत्यादौ च न, एवं कृष्णैत इत्यत्रापि । "गाधलवणयोः प्रमाणे" पा० एतयोरुत्तरपदयोः प्रमाणवाचिनि तत्पुरुषे पूर्व्वपदं प्रकृत्या । अरित्रगाधम् तत्प्रमाणमित्यर्थः । गोलवणम् यावद्गवे दीयते तावदित्यर्थः । "दायाद्यं दायादे" पा० धनदायादः । "प्रतिबन्धि चिरकृच्छ्रयोः" पा० । प्रतिबन्धिवाचि पूर्व्वपदं प्रकृत्या एतयोः परयोः । गमनचिरम् । कथनकृच्छ्रम् । गमनादिकारणविकलतया चिरकालभाविकृच्छ्रयोगितया चात्र प्रतिबन्धः । अन्यत्र मूत्रकृच्छ्रमित्यादौ न । "पदेऽपदेशे" पा० व्याजवाचिनि उत्तरपदे प्रागुक्तम् । मूत्रपदेन प्रस्थितः । अनपदेशे तु विष्णुपदम् अत्र न "निवाते वातत्राणे" पा० पार्श्ववाचिनिवाते परे वातत्राणवाचिनि तत्पुरुषे प्रागुक्तम् । कुटीनिवातम् । वातत्राणाभावे तु राजनिवाते वसतीत्यत्र न "शारदेऽनार्त्तवे" पा० आर्त्तवभिन्नवाचिनि शारदे परे प्रागुक्तम् । रज्जुशारदमुदकम् । रज्ज्वाः सद्य उद्धृतमित्यर्थः । आर्त्तवार्थत्वे तु उत्तमशारदमित्यादौ न । "अध्वर्य्युकषाययोर्जातौ" पा० एतयोः परयोर्जातिवाचकस्य प्रागुक्तम् । कठाध्वर्य्युः दौवारिककषायम् । अजातेस्तु परमाध्वर्य्युरित्यादौ न "सदृशप्रतिरूपयोः सादृश्ये" पा० पितृसदृशः पितृप्रतिरूपः । असादृश्ये तु परमसदृश इत्यादौ न । सादृश्यमत्र पूज्यता न तु सादृश्यमात्रम् सि० कौ० । "द्विगौ प्रमाणे" पा० द्विगौ प्रमाणवाचिनि परे पूर्व्वपदं प्रकृतिस्वरम् । प्राच्यसप्तसमः ।

सप्त समाः प्रमाणमस्य सप्तसम; ततः कर्म०“गन्तव्यपण्यं वाणिजे” पा०वाणिजशब्दे परे एतदर्थकौ प्राग्वत् तत्पुरुषे। मद्रवाणिज: गोवाणिजः। अगन्तव्यादौ तु परमवाणिज इत्यादौ न। “मात्रोपज्ञोपक्रमच्छाये नपुंसके” पा० “मात्रादिषु परतः नपुंसकवाचिनि तत्पुरुषे प्रकृत्या। भिक्षामात्रम्। पाणिन्युपज्ञम्। नन्दोपक्रमम्। इक्षुच्छायम्। नपुंसके किम् इक्षुच्छाया इत्यादौ न।“सुखप्रिययोर्हिते” पा०। गमनसुखं गमनप्रियम्। “प्रीतौ च” पा० प्रीतौ गम्यायां प्रागुक्तम्। ब्राह्मणसुखं पयःपानम्। छात्रप्रियोऽनध्यायः। “स्वं स्वामिनि” पा०। गोस्वामी। अन्यत्र परमस्वामीत्यादौ न।“पत्यावैश्वर्ये”पा०। गृहपतिः। “न भूवाक्चिद्दिधिषु”पा०“प्रागुक्तं न। भूपतिः वाक्पतिः चित्पतिः दिधिषुपतिः। “वा भुवनम्”पा०। प्रागुक्तं वा। भुवनपतिः। “आशङ्काबाधनेदीयस्सु सम्भावने” पा०। गमनाशङ्कमस्ति गमनाबाधम् गमननेदीय:। गमनमाशङ्क्यते आबाध्यते निकटतरमिति सम्भाव्यते इत्यर्थः। असम्भावने तु परमनेदीय इत्यादौ न। “पूर्वे भूतपूर्वे” पा० भूतपूर्वार्थे पूर्वशब्दे परे पूर्वपदं प्रकृत्या। आढ्यपूर्वः। “सविधसनीडसमर्य्यादसवेशसदेशेषु सामीप्ये” पा०। मद्रसविधम्। एवं सनीडादिषु। असामीप्ये तु सह मर्य्यादया समर्य्यादं क्षेत्रम् चैत्रसमर्यादमित्यादौ न। “विस्पष्टादीनि गुणवचनेषु” पा०। विस्पष्टकटुकम्। विस्पष्ट विचित्र व्यक्त सम्पन्न पण्डित कुशल चपल निपुण” एते विस्पष्टादयः। अगुणवचने तु विस्पष्टब्राह्मण इत्यादौ न। “श्रज्यावमकन्पापवत्सु भावः कर्मधारये”पा०। श्र,ज्य, अवम,कन् इत्यादेशवति पापिवाचिनि च परे भाववाचि पूर्वपदं प्रकृत्या। गमनश्रेष्ठं गमनज्यायः गमनावमम् गमनकनिष्ठम्। गमनपापिष्ठम्। “कुमारश्च” पा०। कर्मधारये पूर्वपदं प्रकृत्या। कुमारश्रमणः। “आदिः प्रत्येनसि” पा० कुमारस्यादिरुदात्तः प्रत्येनसि परे कर्म०। कुमारप्रत्येना:। “पूगेष्वन्यतरस्याम्” पा० कुमारचातकाः कुमारजीमूताः। “इगन्तकालकपालभगालशरीरेषु द्विगौ” पा०। इगन्ते पञ्चारत्निः। काले पञ्चमास्यः दशमास्यः। पञ्चकपालः पञ्चभगालः।(भगालः पात्रभेदः)। पञ्चशरीरः। “बह्वन्यतरस्याम्”पा०। प्रकृत्या वा। बह्वरत्निः बहुमास्यः। “दिष्टिवितस्त्योश्च” पा०। प्रकृत्या वा। पञ्चदिष्टिः पञ्चवितस्तिः। “सप्तमी सिद्धशुष्कपक्वबन्धेष्वकालात्”पा०। अकालवाचि सप्तम्यन्तम् एषु परेषु प्रकृत्या। साङ्काश्यसिद्धः आतपशुष्कः भ्राष्ट्रपक्वः चक्रबन्धः। काले तु पूर्वाह्णसिद्ध इत्यादौ न। परिप्रत्युपापा वर्ज्यमानाहोरात्रावयवेषु” पा०। एते प्रकृत्या वर्ज्यमानाहोरात्रावयववाचिनि परे। परित्रिगर्त्तं वृष्टो देवः। प्रतिपूर्वाह्णम्। प्रत्यपररात्रम्। उपपूर्वरात्रम्। अपत्रिगर्त्तम्। “उपसर्गा आद्युदात्ताः अभिवर्ज्जम्” इति बहुव्रीहितत्पुरुषयोः सिद्धत्वादव्ययीभावार्थमिदम्”सि०कौ०।“राजन्यबहुवचनद्वन्द्वेऽन्धकवृष्णिषु” पा०। बहुवचनान्तानां राजन्यानामन्धकवृष्णिषु वर्त्तमाने द्वन्द्वे पूर्वपदं प्रकृत्या। शिनिवासुदेवाः। “संख्या”पा०। द्वन्द्वे संख्यावाचि पूर्वपदं प्रकृत्या “द्वादश त्रयोदश। “आचार्य्योपसर्जनश्चान्तेवासी” पा०। द्वन्द्वे प्रागुक्तम्। पाणिनीयरौढीयाः “कार्त्तकौजपादयश्च”पा०। द्वन्द्वे एषां पूर्वपदं प्रकृत्या। ते च कार्त्तकौजपौ सावर्णिमाण्डूकेयौ अवन्त्यश्मकाः पैलश्यापर्णेयाः कपिश्यापर्णेयाः शैतिकाक्षपाञ्चालेया: कटुकवार्चलेयाः शाकलशुनकाः शाकलशणकाः शणकबाभ्रवाः आर्चाभिमौद्गलाः कुन्तिसुराष्ट्राः चिन्तिसुराष्ट्राः तण्डवतण्डाः अविमत्तकामविद्धाः बाभ्रवशालङ्कायनाः बाभ्रवदानच्युताः कठकालापाः कठकौथुमा: कौथुमलौगाक्षाः स्त्रीकुमारम् मौदपैप्पलादाः। वत्सजरन्तः सौश्रुतपार्थवाः जरामृत्यू याज्यानुवाक्ये। “महान् व्रीह्यपराह्णगृष्टीष्वासजाबालभारभारतहैलिहिलरौरवप्रवृद्धेषु” पा०। एषु परेषु महच्छब्दः प्रकृत्या। महाव्रीहिः “सन्महदिति प्रतिपदोक्तसमास एवायं स्वरः न षष्ठीसमासे” सि०कौ०। “क्षुल्लकश्च वैश्वदेवे” पा०। क्षुल्लकवैश्वदेवम् महावैश्वदेवम्। क्षुधं लाति क्षुल्लः ततः कन्। “उष्ट्रः सादिवाम्योः” पा० उष्ट्रसादिः उष्ट्रवामिः। “गौःसादसादिसारथिषु” पा०। गोसादः गोसादि: गोसारथिः। “कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपापारेवडवातैतिलकद्रूः पण्यकम्बलोदासीभाराणाञ्च”पा०। एषां सप्तानां समासानां दासीभारादेश्च पूर्वपदं प्रकृत्या। ष०त०। कुरुगार्हपतम्। “वृजेरिति वाच्यम्” वार्त्ति०वृजिगार्हपतम्। कर्म०रिक्तगुरुः। कर्म०असूतजरती। क०अश्लीलदृढरूपा। पारेवडवेव इवार्थे क० विभक्त्यलोपश्च नि०। क० तैतिलकद्रुः। क० पण्यकम्बलाः। ष०त०। दासीभारः देवहूतिः देवभीतिः देवलातिः वसुनीतिः ओषधिचन्द्रमाः आकृतिगणः। “यस्य ततपुरुषस्य पूर्वपदप्रकृतिस्वर इष्यते न विशिष्य विधानं स सर्वोऽपि दासीभारादिषु द्रष्टव्यः”सि०कौ०“चतुर्थी तदर्थे” पा०। चतु-

र्थन्तार्थाय यत् तद्वाचिनि परे पूर्वपदं प्रकृत्या । ४त०। यूपदारु।"अर्थे"पा०। अर्थे परे चतुर्थ्यन्तं प्रकृत्या । देवार्थम् ।"क्ते च"पा०। क्तान्ते परे चतुर्थ्यन्तं प्रकृत्या ।४त० गोहितम् । "कर्मधारयेऽनिष्ठा" पा०। क्तान्ते परे पूर्वमनिष्ठान्तं प्रकृत्या । श्रेणिकृताः पूगकृताः श्रेण्या कृतमित्यादौ न । निष्ठान्तस्यापि न, कृताकृतम् । "अहीने द्वितीया" पा० । अहीनवाचिनि समासे क्तान्ते परे द्वितीयान्तं प्रकृत्या। कष्टं श्रितः कष्टश्रितः। ग्रामगतः "अनुपसर्ग इति वक्तव्यम्"वार्त्ति०। नेह सुखप्राप्तःकष्टाश्रितः । "तृतीया कर्मणि" पा०। कर्मवाचकक्तान्ते परे तृतीयान्तं प्रकृत्या । रुद्रहतः महाराजहतः । कर्मणि किं रथेनायातः रथायात इत्यादौ न । "गतिरनन्तरः" पा०। कर्मार्थक्तान्ते परेऽव्यवहितोगतिः प्रकृत्या । पुरोहितम् । व्यवधाने तु न अभ्युद्धृतः । "तादौ च निति कृत्यतौ" पा० । तकारादौ निति तुवर्ज्जभिन्ने कृति परे गतिरनन्तरः प्रकृत्या । "प्रभृतौ सङ्कृतिः गौः" कृत्स्वरापवादः । तौ तु न, आगन्तुः। "तवै चान्तश्च युगपत्"पा० तवै प्रत्ययान्तस्यान्त उदात्तः गतिश्चानन्तरः प्रकृत्या तच्च युगपत् । अन्वेतवै । "अनिगन्तोऽञ्चतौ वप्रत्यये पा० । अनिगन्तगतिर्वप्रत्ययान्ताञ्चतौ पर प्रकृत्या । "येपराञ्चस्ताम्" "न्यधी"पा०। तस्मिन् परे न्यधी गती प्रकृत्या । न्यङ् अध्यङ् । "ईषदन्यतरस्याम्"पा०। ईषत्कडारः । ईषद्भेद इत्यादौ तु कृत्स्वरएव ।"हिरण्यपरिमाणं धने" पा० । वा प्रकृत्या । द्विसुवर्णधनं कर्मधारयः ।"प्रथमोऽचिरोपसम्पत्तौ" पा०। प्रथमः प्रकृत्या नूतनत्वे । प्रथमवैयाकरणः । सम्प्रति व्याकरणमध्येतुं प्रवृत्त इत्यर्थः । मुख्यार्थत्वे तु न । "कतरकतमौ कर्मधारये" पा०। वा प्रकृत्या । कतरकठः । "आर्य्यो ब्राह्मणकुमारयोः" पा० । कर्म० प्रकृत्या। आर्य्यब्राह्मणः आर्यकुमारः ।"राजा च" पा०। राजब्राह्मणः राजकुमारः।"षष्ठी प्रत्येनसि" पा० षष्ठ्यन्तोराजा प्रत्येनसि परे वा प्रकृत्या । राजप्रत्येनाः । कर्म० न । "क्ते नित्यार्थे" पा० । क्तान्ते परे नित्यार्थे समासे पूर्वं प्रकृत्या । नित्यहसितः "ग्रामः शिल्पिनि" पा०। वा प्रकृत्या । ग्रामनापितः । अशिल्पिनि न, ग्रामरथ्या । "राजा च प्रशंसायाम्" पा०। शिल्पिवाचिनि परे प्रशंसार्थं राजपदं वा प्रकृत्या । राजनापितः राजकुलालः। अशिल्पिनि तु राजहस्तीत्यादौ न ।

एवम् अन्तोदात्ततापवादं पूर्वपदप्रकृतिस्वरमभिधाय आद्युदात्तस्वरमपि तदपवादतयाऽभिदधे ।

"आदिरुदात्तः"पा०।अधिकारोऽयम् ।"सप्तमीहारिणौ धर्म्येऽहरणे"पा० सप्तम्यन्तं हारिवाचि च आद्युदात्तं स्यात् धर्म्ये परे अहरणे । देयं यः स्वीकरोति स हारीत्युच्यते धर्म्यमित्याचारनियतं देयम् । मुकुटेकार्षापणम् । हलेद्विपदिका । संज्ञायामिति सप्तमीसमासः कारनाम्नि चेत्यलुक् । याज्ञिकाश्वः वैयाकरणहस्ती । कश्चिदयमाचारः मुकुटादिषु कार्षापणादि भर्तृत्वेन देयम् याज्ञिकादीनां त्वश्वादिरिति तत्र याज्ञिकादीनां धर्म्यरूपदेयस्य स्वीकारित्वात् याज्ञिकादिपदस्योदात्तत्वम् । बीजनिषेकादुत्तरकालं देहपुष्ट्यर्थं यद्दीयते तद्धरणं तस्मिन् परे न । वाडवहरणम् । वडवाया अयं वाडवः तस्मिन् हरणमित्यर्थः । परोऽपि कृत्स्वरो हारिस्वरेण बाध्यते इत्यहरणनिषेधेन ज्ञापितम् । "युक्ते च" पा०। युक्तवाचिनि समासे पूर्वमाद्युदात्तम् । गोवल्लवः । कर्त्तव्ये तत्परत्वेह युक्तः । "विभाषाध्यक्षे" पा० । अध्यक्षे परे प्रागुक्तं वा । गवाध्यक्ष. । "पापञ्च शिल्पिनि" पा०। पापनापितः । पापाणके इति प्रतिपदोक्तस्यैव ग्रहणात् षष्ठीसमासे न । "गोत्रान्तेवासिमाणवब्राह्मणेषु क्षेपे" पा० । क्षेपे गम्ये एषु पूर्वपदमाद्युदात्तं स्यात् । तत्र गोत्रे भार्य्यासौश्रुतः । सुश्रुतापत्यस्य भार्य्याप्रधानतयेह क्षेपः । अन्तेवासिनि । कुमारीदाक्षाः ओदनपाणिनीयाः । कुमार्य्यादिलाभकामनयैव दाक्षादिप्रोक्तशास्त्राध्यायिनां क्षेपः । भिक्षामाणवः भिक्षां लप्स्येऽहमिति माणवः इति क्षेपः । भयब्राह्मणः भयेन ब्राह्मणः सम्पद्यते इति क्षेपः । "अङ्गानि मैरेये" पा० मधुमैरेयः मधुनो मद्याङ्गत्वात् तत्परे तथात्वम् । "भक्ताख्यास्तदर्थेषु" पा०। भिक्षादयोऽन्नविशेषाः कंसादिरूपपात्रस्य तदर्थत्वात् तत्परे भिक्षादीनां प्रागुक्तम् । भिक्षाकंसः भाजीकंसः । "गोबिडालसिंहसैन्धवेषूपमाने" पा० । उपमानवाचिषु एषु पूर्वपदमाद्युदात्तम् । धान्यगवः धान्यं गौरिवेति वाक्ये गवाकृत्या सन्निवेशितं धान्यं धान्यगवः । गोबिडालः । तृणसिंहः सक्तुसैन्धवः ।"अके जीविकार्थे" पा०। अकान्ते परे जीविकार्थवाचिनि समासे पूर्वपदमाद्युदात्तम् । दन्तलेखकः । दन्तलेखनेन जीविकावान् । "प्राचां क्रीडायाम्" पा०। प्राच्यानां क्रीडावाचिनि समासे अकान्ते परे प्रागुक्तम् । उद्दालकपुष्पभञ्जिका ।

"अषि नियुक्ते" पा०। अखन्ते परे नियुक्तवाचिनि समासे प्रागुक्तम्। छत्रधारः। "शिल्पिनि चाकृञः" पा०। शिल्पिवाचिनि अकृञः परागन्ते परे प्रागुक्तम्। तन्तुवायः। अशिल्पिनि तु न, कुण्डवायः। कृञोऽपि न, कुम्भकारः। "संज्ञायाञ्च" पा०। अखन्ते प्रागुक्तम्। तन्तुवायो नाम लूताकृमिः। अकृञ इत्येव रथकारो नाम ब्राह्मण इत्यत्र न। "गोतन्तियवं पाले" पा०। गोपालः तन्तिपालः यवपालः। अनियुक्तार्थोऽयमारम्भः नियुक्ते तु पूर्व्वेण सिद्धः। "णिनि" पा०। णिन्यन्ते परे प्रागुक्तम्। पुष्पहारी। "उपमानं शब्दार्थप्रकृतावेव" पा०। उपमानवाचि पूर्व्वपदं णिन्यन्ते परे आद्युदात्तम्। उष्ट्रक्रोशी ध्वाङ्क्षरावी। अशब्दार्थे तु वृकवञ्चीत्यादौ न। प्रकृतिग्रहणेन उपसर्गेण शब्दार्थत्वे गर्द्दभोच्चारीत्यादौ न। "युक्तारोह्यादयश्च" पा०। एते आद्युदात्ताः। युक्तारोही आगतरोही आगतयोधी आगतवञ्ची आगतनन्दी आगतप्रहारी आगतमत्स्यः क्षीरहोता भगिनीभर्त्ता ग्रामगोधुक् अश्वत्रिरात्रः गर्गत्रिरात्रः व्युष्टत्रिरात्रः गणपादः एकशितिपात् पात्रेसम्मितादयश्च युक्तारोह्यादिः। "दीर्घकाशतुषभ्राष्ट्रवटं जे" पा०। जे परे एतानि आद्युदात्तानि। दीर्घजः काशज इत्यादि। "अन्त्यात् पूर्व्वं बह्वचः" पा०। बह्वचः पूर्व्वस्यान्त्यात् पूर्व्वपदं जे परे आद्युदात्तम्। उपसरजः। आमलकीजः। "ग्रामेऽनिवसन्तः" पा०। ग्रामे परे अनिवसद्वाचि पूर्व्वपदमाद्युदात्तम्। मल्लग्रामः, (मल्लसमूहः) देवग्रामः (देवस्वामिकः ग्रामः)। निवसतस्तु दाक्षिग्राम इत्यादौ न। "घोषादिषु च" पा० घोष इत्येवमादिषु चोत्तरपदेषु पूर्व्वपदमाद्युदात्तं स्यात्। घोष कट वल्लभ ह्रद वदरी पिङ्गल पिशङ्ग माला रक्षा शाला कूट शाल्मली अश्वत्थ तृण शिल्पी मुनि प्रेक्षा घोषादि। दाक्षिघोषः। "छात्र्यादयः शालायाम्" पा०। छात्रिशाला व्याड़िशाला। ते च छात्रि पेलि भाण्डि व्याडि आखण्डि आटि गोमि। "प्रस्थेऽवृद्धमकर्क्यादीनाम्" पा०। प्रस्थपरे अवृद्धं (यस्याद्यचः वृद्धिर्न) तादृशपूर्व्वपदमाद्युदात्तं न तु कर्क्यादीनाम्। इन्द्रप्रस्थः। वृद्धस्य तु दाक्षिप्रस्थ इत्यादौ न। कर्क्यादयश्च कर्की मघी मकरी कर्कन्धु शमी करीर कन्दुक कवल वदरी। "मालादीनाञ्च" पा०। वृद्धार्थमिदम्। मालाप्रस्थम्। मालादयश्च। माला शाला शोणा द्राक्षा क्षाक्षा क्षामा काञ्ची एक काम। "अमहन्नवं नगरेऽनुदीचाम्" पा०। मद्रनगरम्। महन्नवयोस्तु महानगरं नवनगरमित्यादौ न। उदीचान्तु कार्त्तिनगरमित्यादौ न। "अर्म्मे चावर्णं द्व्यच् त्र्यच्" पा०। अर्म्मे परे द्व्यच्कं त्र्यच्कं वाऽवर्णान्तं पूर्व्वपदमाद्युदात्तं स्यात्। गुप्तार्म्मम्। कुक्कुटार्म्मम्। अनवर्णान्तस्य बृहदर्म्ममित्यादौ न। अधिकाच्केऽपि कपिञ्जलार्म्ममित्यादौ न। अमहन्नवमित्येव तेन महार्म्मम् नवार्म्ममित्यादौ न। "न भूताधिकसञ्जीवमद्राश्मकज्जलम्" पा०। अर्म्मे एतानि नाद्युदात्तानि। भूतार्म्मम्।

एवं समासे पूर्व्वपदस्य आद्युदात्ततामभिधाय तस्यैव अन्तोदात्ततापि तत्र उक्ता यथा "अन्तः" पा० अधिकारोऽयं प्रागुत्तरपदादिग्रहणात्। "सर्व्वं गुणकार्त्स्न्ये" पा०। सर्व्वशब्दरूपं पूर्व्वपदमन्तोदात्तं स्यात् गुणसाकल्ये गम्ये। सर्व्वश्वेतः सर्व्वमहान्। श्वेतत्वमहत्त्वगुणाभ्यां कृत्स्नव्यापकताद्योतनादस्य तथात्वम्। सर्व्वसौवर्ण इत्यादौ तु गुणेन व्याप्त्यभावान्न। असाकल्ये तु सर्व्वेषां श्वेततरः सर्व्वश्वेत इत्यादौ तरलोपे न। "संज्ञायां गिरिनिकाययोः" पा०। एतयोः पूर्व्वमन्तोदात्तम्। अञ्जनागिरिः मौण्डिनिकायः। असंज्ञायान्तु परमगिरिः ब्राह्मणनिकाय इत्यादौ न। "कुमार्य्यां वयसि" पा०। कुमारीपरे पूर्व्वपदमन्तोदात्तम् वयसि। वृद्धकुमारी जरत्कुमारी। कुमारीशब्दः पुंसा सह सङ्गमाभाववतीपरः वृद्धादिसामानाधिकरण्यात् वयोवाचित्वमत्र। अवयसि तु परमकुमारीत्यादौ न। "उदकेऽकेवले" पा० अकेवलं मिश्रं तद्वाचिनि समासे उदके परे पूर्व्वपदमन्तोदात्तम्। गुडोदकम्। गुडमिश्रितमुदकमित्यर्थः स्वरे कृतेऽत्र एकादेशे स्वरितो वानुदात्ते पदादाविति पक्षे स्वरितः। अमिश्रे तु शीतोदकम् इत्यादौ न। "द्विगौ क्रतौ" पा० द्विगावुत्तरपदे क्रतुवाचिनि समासे प्रागुक्तम्। गार्ग्यत्रिरात्रः। अद्विगौ तु अतिरात्र इत्यादौ न "सभायां नपुंसके" पा० क्लीवान्त सभापरे प्रागुक्तम्। गोपालसभम्। अक्लीवे राजसभेत्यादौ न। तत्पुरुषस्यैव ग्रहणं तेन रमणीयसभं ब्राह्मणकुलमित्यादौ न। "पुरे प्राचाम्" पा०। देवदत्तपुरम्। नान्दीपुरम्। अप्राचि तु शिवपुरमित्यादौ न। "अरिष्टगौडपूर्व्वे च" पा०। अरिष्टपुरम्। गौडपुरम्। पूर्व्वग्रहणात् अरिष्टाश्रितपुरं गौडभृत्यपुरमित्यत्रापि स्यात्। "न हास्तिनफलकमार्द्देयाः" पा०। पुरे परे एतानि नान्तोदात्तानि। हास्तिनपुरम्। फलकपुरम्। मार्द्देयपुरम्।

“कुसूलकूपकुम्भशालं बिले” पा० कुसूलबिलम् । कूपबिलमित्यादि “दिक्शब्दा ग्रामजनपदाख्यानचानराटेषु” पा० । एषु परेषु दिग्वाचकशब्दाः अन्तोदात्ताः । पूर्व्वेषुकामशमी । अपरकृष्णमृत्तिका । पूर्वपञ्चालाः पूर्व्वचानराटम् । इह पूर्वकालशब्दित्वेऽपि पूर्वादेः दिशि दृष्टत्वाद्दिक्शब्दत्वम् “आचार्य्योपसर्जनश्चान्तेवासिनि” पा० आचार्य्योपसर्जने अन्तेवासिनि परे दिक्शब्दाः अन्तोदात्ताः । पूर्वपाणिनीयाः आचार्य्येत्युक्तेः पूर्व्वान्तेवास्यित्यादौ न । “उत्तरपदवृद्धौ सर्व्वञ्च” पा० । उत्तरपदस्येत्यधिकृत्य या वृद्धिर्विहिता तद्वत्युत्तरपदे परे सर्व्वशब्दः दिक्शब्दश्चान्तोदात्तः । सर्वपाञ्चालः पूर्वपाञ्चालः । “बहुव्रीहौ विश्वं संज्ञायाम्” पा० । ब०व्री० विश्वशब्दः पूर्व्वपदमन्तोदात्तं संज्ञायाम् । पूर्वपदप्रकृतिस्वरेण प्राप्तस्याद्युदात्तस्यापवादः । विश्वकर्म्मा विश्वदेवः । कर्म० विश्वे देवा इत्यादौ न । अव्ययीभावात् बहुव्रीहावित्यधिकारः । “उदराश्वेषुषु” पा० । एषु परेषु पूर्वपदमन्तोदात्तं स्यात् बहुव्रीहौ । वृकोदरः हर्य्यश्वः महेषुः । “क्षेपे” पा० । निन्दने गम्ये प्रागुक्तम् । घटोदरः कटुकाश्वः चलाचलेषुः । अनुदर इत्यत्र नञ्सुभ्यामिति पूर्वप्रतिषेधेन भवति” सि०कौ० । “नदी बन्धुनि” पा० । गार्गीबन्धुः । “निष्ठोपसर्गपूर्वान्यतरस्याम्” पा० । निष्ठान्तमुपसर्ग पूर्व्वपदमन्तोदात्तं वा । प्रधौतपादः ।

एवं समासे आदिपदस्याद्यन्तोदात्ततां विधाय उत्तरपदस्याद्युदात्ततामाह यथा । “उत्तरपदादिः” पा० । उत्तपदाधिकारः आपादान्तम् । आद्यधिकारस्तु प्रकृत्या भगालमित्यवधिकः । “कर्णो वर्णलक्षणात्” पा० । वर्णवाचिनः लक्षणवाचिनश्च परः कर्णशब्दः आद्युदात्तो बहुव्रीहौ । शुक्लकर्णः शङ्कुकर्णः । अन्यस्मात्तु शोभनकर्ण इत्यादौ न । “संज्ञौपम्ययोश्च” पा० । उत्तरपदस्थः कर्ण आद्युदात्तः । मणिकर्णः गोकर्णः । “कण्ठपृष्ठग्रीवाजङ्घञ्च” पा० । संज्ञौपम्ययोर्बहुव्रीहौ । संज्ञायाम् शितिकण्ठः काण्डपृष्ठः सुग्रीवः नाडीजङ्घः । औपम्ये खरकण्ठः गोपृष्ठः अश्वग्रीवः गोजङ्घः । “शृङ्गमवस्थायाञ्च” पा० । अवस्थायाम् उद्गतशृङ्गः द्व्यङ्गुलशृङ्गः अत्र शृङ्गोद्गमनादिना वयो ज्ञाप्यते । संज्ञायाम् ऋष्यशृङ्गः । औपम्ये मेषशृङ्गः । “नञो जरमरमित्रमृताः” पा० । नञः पराएते आद्युदात्ता बहु० । अजरम् । अमरम् । अमित्रम् अमृतम् । “सोर्मनसी अलोमोषसी” पा० । सोः परे लोमोषसी त्यक्त्वा मन्नन्तमसन्तं चाद्युदात्त बहु० । सुकर्माणः सुयुजः । सुमनाः सुब्रह्मा सुवर्च्चाः सुपेषः । लोमोषसोस्तु सुलोमा सूषा इत्यादौ न । “क्रत्वादयश्च” पा० । सोः परे एते आद्युदात्ताः । सुक्रतुः सुप्रतीकः । क्रतु दृशीक प्रतीक प्रतूर्त्ति हव्य भग । “आद्युदात्तं द्व्यच छन्दसि” पा० । यदाद्युदात्तं द्व्यच् तत् सोरुत्तरं बहुव्रीहौ तथैव स्यात् वेदे लोके तु न । स्वश्वाः सुरथाः । आद्युदात्तं किम् सुबाहुः । द्व्यच् किं सुगुः सुहिरण्य इत्यादौ न । ‘वीरवीर्य्यौ च” पा० । वेदे सुवीरः सुवीर्य्यः लोके तु न । अत्र वीर्य्यग्रहणादन्यत्र वीर्य्यशब्दस्य यदन्तत्वेऽपि यतोनाव इत्याद्युदात्तं नेति ज्ञापितम् । “कूलतीरतूलमूलशालाक्षसममव्ययीभावे” पा० । बहुव्रीह्यधिकारोनिवृत्तः । अव्ययीभावे कूलादीन्याद्युदात्तानि स्युः । उपकूलम् उपतीरम् उपशालम् । उपाक्षं सुषमम् निःषमम् । तिष्ठद्ग्वादि० स० । ‘कंसमन्थशूर्पपाय्यकाण्डं द्विगौ” पा० । द्विगौ एतानि आद्युदात्तानि । द्विकंसः द्विमन्थः द्विशूर्पः द्विपाय्यम् द्विकाण्डम् । “तत्पुरुषे शालायां नपुंसके” पा० । क्लीवशालान्ते तत्पुरुषे उत्तरपदमाद्युदात्तम् । ब्राह्मणशालम् । “कन्या च” पा० । क्लीवलिङ्ग कन्यान्तस्तत्पुरुषः प्राग्वत् । सौशमिककन्यम् । “आदिश्चिहणादीनाम्” पा० । कन्यान्ते तत्पुरुषे क्लीवलिङ्गे चिहणादीनामादिरुदात्तः । न तु कन्याशब्दरूपस्योत्तरपदस्य पूर्व्वापवादः । चिहणकन्यम् । चिहणादिश्च चिहण मडर मद्रुमर वैतुल पटत्क वैडालिकर्णक वैडालिकर्णि कुक्कुट चिक्कण चित्कण । “चेलखेटकटुककाण्डं गर्हायाम्” पा० । निन्दायां चेलादीन्युत्तरपदान्याद्युदात्तानि । पुत्रचेलम् । नगरखेटं दधिकटुकम् । प्रजाकाण्डम् । चेलादिसादृश्येन पुत्रादीनां निन्दा व्याघ्रा० स० । “चीरमुपमानम्” पा० । उत्तरपदस्थमुपमानं चीरम् आद्युदात्तम् । वस्त्रं चीरमिव वस्त्रचीरम् । अनौपम्ये तु परमचीरम् इत्यादौ न ; “पललसूपशाकं मिश्रे” पा० मिश्रार्थे समासे उत्तरपदस्थानामेषां प्राग्वत् । घृतपललं घृतसूपः घृतशाकः । भक्ष्येण मिश्रीकरणमिति समासः । अमिश्रे तु परमपललमित्यादौ न । “कूलसूदस्थलकर्षाः संज्ञायाम्” पा० । उत्तरपदस्थानामेषामादिरुदात्तः संज्ञायाम् । दाक्षिकूलम् । शाण्डिसूदम् । दाण्डायनस्थली । दाक्षिकर्षः ग्रामभेदस्य एताःसंज्ञाः । असंज्ञायां तु परमकूलमित्यादौ न । “अकर्म्मधारये रा-

ष्ठ्यम्" पा०। ब्राह्मणराज्यम् कर्म्मधारये तु परमराज्यमित्यादौ न। "वर्ग्यादयः" पा०। अकर्म्मधारय इत्येव। अर्जुनवर्ग्यः वासुदेवपक्षः कर्म्मधा० परमवर्ग्य इत्यादौ न। वर्ग्यादिश्च दिगाद्यन्तर्गणः तच्छब्दे दृश्यः। "पुत्रः पुम्भ्यः" पा०। पुंशब्देभ्यः परः पुत्र आद्युदात्तस्तत्पुरुषे। दासकिपुत्रः माहिषपुत्रः। स्त्रीभ्यस्तु दासीपुत्र इत्यादौ न। "नाचार्य्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः" पा०। एभ्यः पुत्रो नाद्युदात्तः। आचार्य्यपुत्रः उपाध्यायपुत्रः। राजपुत्रः ईश्वरपुत्रः नन्दपुत्रः। ऋत्विक्पुत्रः याजकपुत्रः। संयुक्ताः सम्बन्धिनः। श्यालपुत्रः। ज्ञातिपुत्रः भ्रातुष्पुत्रः। "चूर्णादीन्यप्राणिषष्ठ्याः" पा०। एतानि प्राणिभिन्नषष्ठ्यन्तात् पराण्याद्युदात्तानि तत्पुरुषे। मुद्गचूर्णम्। प्राणिनस्तु मत्स्यचूर्णमित्यादौ न। चूर्णादयश्च। चूर्ण करिव करिष शाकिन शाकट द्राक्षा तूल कुन्दम दलप चमसी चक्कन चौल। "षट् च काण्डादीनि" पा०। काण्ड चीर पलल सूप शाक कूल इत्येतानि षट् अप्राणिषष्ठ्यन्तात् आद्युदात्तानि। दूर्वाकाण्डं दर्भचीरम् तिलपललम् मुद्गसूपः मूलकशाकम् नदीकूलम्। "कुण्डं वनम्" पा०। वनवाचिनि तत्पुरुषे कुण्डमाद्युदात्तम्। दर्भकुण्डम् कुण्डशब्दोऽत्र सादृश्ये।

अथ उत्तरपदे प्रकृतिस्वरविधानसूत्राणि। "प्रकृत्या भगालम्" पा०। भगालवाच्युत्तरपदं तत्पुरुषे प्रकृत्या। कुम्भीभगालम्। कुम्भीनदालम् कुम्भीदापालम्। मध्योदात्तान्येते। प्रकृत्येत्यधिकारः अन्त इति यावत्। "शितेर्नित्याबह्वज्बहुव्रीहावभसत्" पा०। शितेः परं नित्याबह्वच्कं प्रकृत्या बहुव्रीहौ। शितिपादः। शितंसः। पादः वृषा० आद्युदात्तः अंसशब्दः नित्स्वरवान्। शितेराद्युदात्तत्वात् बहुव्रीहौ पूर्व्वपदप्रकृतिस्वरापवादेन उत्तरस्य प्रकृतिस्वरविधानात्तस्य बाधः। "गतिकारकोपपदात् कृत्" पा०। एभ्यः कृदन्तं प्रकृतिस्वरं स्यात्तत्पुरुषे। गतेः, प्रकारकः प्रहरणम्। कारकात् इध्मप्रव्रश्चनः। उपपदात् उच्चैःकारम्। ईषत्करः। शेषषष्ठीस० तु देवस्य कारकः देवकारक इत्यादौ न। "उभे वनस्पत्यादिषु युगपत्" पा०। एषु पूर्व्वोत्तरपदे युगपत् प्रकृत्या। वनस्पतिः बृहस्पतिः। ते च वनस्पति बृहस्पति शचीपति तनूनपात् नराशंस शुनःशेफ शण्डामार्कौ तृष्णावरूत्री लम्बाविश्ववयसौ मर्मृत्यू। "देवताद्वन्द्वे" पा०। उभे युगपत् प्रकृत्या स्तः। इन्द्रावरुणौ।

"नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थिषु" पा०। पृथिव्यादिवर्ज्जितेऽनुदात्तादावुत्तरपदे प्रागुक्तन्न। "इन्द्राग्निभ्यां कं वृषणः" पृथिव्यादौ तु द्यावापृथिव्यौ इत्यादौ स्यादेव। तत्र नि० आद्युदात्तः द्यावा, पृथिवीत्यन्तोदात्तः। एवं रुद्रसोमौ इन्द्रापूषणौ इत्यादौ।

अथोत्तरपदे अन्तोदात्तताविधायकसूत्राणि यथा "अन्तः" पा०। अधिकारोऽयम्। "थाथघञ्क्ताजबित्रकाणाम्" पा० थ, अथ, घञ्, क्त, अच्, अप् इत्र, क, एतदन्तानाम् उत्तरपदस्थानां गतिकारकोपपदात् परेषामन्त उदात्तः। तत्र थ अपभृथः। अथ आवसथः। घञ् प्रभेदः। क्त पुरुष्टुतः। अच् प्रक्षयः। अप् प्रलवः प्रस्तवः। इत्र प्रलवित्रम्। क गोवृषः मूल० क। गतिकारकोपदभिन्ने तु सुस्तुतमित्यादौ न सोः पूजार्थत्वेन गतित्वाभावात्। "सूपमानात् क्तः" पा०। सोरुपमानाच्च परं क्तान्तमन्तोदात्तम्। सुकृतम् शशप्लुतः। "संज्ञायामनाचितादीनाम्" पा०। गतिकारकोपपदात् क्तान्तमन्तोदात्तं न तु आचितादौ। "उपहूतः शाकल्यः" आचितादौ न। आचितादयश्च ६२८ पृ० दर्शिताः। "प्रवृद्धादीनाञ्च" असंज्ञार्थमारम्भः। प्रवृद्धं यानं प्रवृद्धो वृषलः। प्रयुतास्तूष्णवः। आकर्षे अवहितः (अवहितो भोगेषु)। खट्वारूढः कविशस्तः आकृतिगणोऽयम्। प्रवृद्धयानम्। अप्रवृद्धो वृषकृतो रथः। "कारकाद्दत्तश्रुतयोरेवाशिषि" पा०। कारकपदादुत्तरपदस्थयोर्दत्तश्रुतशब्दयोरेव संज्ञायामन्तोदात्तः आशीर्वादे गम्ये। देवदत्तः विष्णुश्रुतः। अनयोरेवेति नियमात् देवपालित इत्यादौ न। "इत्थम्भूतेन कृतमिति च" पा०। इत्थम्भूतेन कृतमित्यस्मिन्नर्थे यः समासः कृतः ततः क्तान्तमुत्तरपदमन्तोदात्तम्। सुप्तप्रलपितम्। अत्र कृतमिति सामान्यक्रियावाचि। तृतीया कर्मणीत्यस्यापवादः। "अनो भावकर्मवचनः" पा०। कारकात् परमनप्रत्ययान्तं भाववचनं कर्मवचनञ्चान्तोदात्तम्। भावे पयःपानम्। कर्मणि राजभोजनाः शालयः। "मन्क्तिन्व्याख्यानशयनासनस्थानयाजकादिक्रीताः" पा०। कारकात् पराण्येतानि तत्पुरुषेऽन्तोदात्तानि। कृत्स्वरापवादः। मन् रथवर्त्म। क्तिन् पाणिनिकृतिः। करणे ल्युट् छन्दोव्याख्यानम्। तेन न पूर्व्वेण गतार्थः। राजशयनम् राजासनम् अश्वस्थानम् एषु आधारे ल्युट्। ब्राह्मणयाजकः। याजकादिश्च याजकादिशब्दे वक्ष्यते

गोक्रीताः। कर्कभिन्नात्तु प्रभृतिः सङ्कृतिः इत्यादौ तादौ नितीति स्वरः। "सप्तम्याः पुण्यम्" पा०। अन्तोदात्तम्। अध्ययनपुण्यम्। तृतीयातत्पुरुषे तु वेदपुण्यमित्यादौ न। "ऊनार्थकलहं तृतीयायाः" पा०। तृतीयायाः परावेतौ अन्तोदात्तौ तत्पुरुषे। माषोनम् माषविकलम्। वाक्कलहः। तृतीयापूर्वपदप्रकृतिस्वरापवादः। अर्थेति स्वरूपग्रहणं तेन धान्यार्थ इत्यत्रापि अर्थशब्दस्य तथात्वम्। ऊनशब्देन तदर्थग्रहणमिति केचित्। "मिश्रञ्चानुपसर्गमसन्धौ" पा०। तृतीयायाः परम् अनुपसर्गं मिश्रं प्राग्वत्। तिलमिश्रम् सर्पिर्मिश्रम्। मिश्रग्रहणेऽन्यत्र सोपसर्गस्य ग्रहणमिति अनुपसर्ग विशेषणात् ज्ञापितम्। सन्धौ तु ब्राह्मणमिश्रो राजा इत्यादौ न, ब्राह्मणैः सह ऐकार्थ्यमापन्न इत्यर्थः। "नञोगुणप्रतिषेधे सम्पाद्यर्हहितालमर्थास्तद्धिताः" पा०। सम्पाद्याद्यर्थतद्धितान्ता गुणनिषेधार्थकनञः परेऽन्तोदात्ताः। न कर्णवेष्टनाभ्यां सम्पादितं मुखं भवति अकार्णवेष्टनिकम्। न च्छेदमर्हति अच्छेदिकः। न वत्सेभ्योहितः अवत्सीयः। न सन्तापाय प्रभवति असन्तापीयः। "ययतोश्चातदर्थे" पा०। तदर्थार्थभिन्नौ ययतौ यौ तद्धितौ तदन्तस्योत्तरपदस्य गुणनिषेधार्थात् नञः परस्यान्त उदात्तः। पाशानां समूहः पाश्या न पाश्या अपाश्या। अदन्त्यम्। तदर्थार्थान्ते तु अपाद्यमित्यादौ न। यतः सानुबन्धस्य ग्रहणात् इतरानुबन्धस्य यस्य अवामदेव्यमित्यादौ न। अत्र वामदेव ड्यड्याविति स्यात् च वा। "अच्कावशक्तौ" पा०। अजन्तं कान्तञ्च नञः परमन्तोदात्तमसामर्थ्ये गम्ये। अपचः पक्तुं न शक्तः। अविलिखः। सामर्थ्ये तु अपचोदीक्षित इत्यादौ न। दीक्षितस्य न पाकासामर्थ्यं किन्तु निषेधादपचत्वम्। "आक्रोशे च" पा०। नञः परावच्कान्तावन्तोदात्तौ क्षेपे। अपचोजाल्मःपक्तुं न शक्नोतीत्येवमाक्षिप्यते। अक्षिपः। "संज्ञायाम्" पा०। नञः परमन्तोदात्तं संज्ञायाम् क्षेपे। अदेवदत्तः "कृत्योकेष्णुच्चार्वादयश्च" पा०। नञः परे एतेऽन्तोदात्ताः स्युः। कृत्य अकर्त्तव्यः। उक अनागामुकः। इष्णुच् अनलङ्करिष्णुः। क्षिष्णुचोऽपि। अनाढ्यम्भविष्णुः। अचारुः। चार्वादयश्च चारु साधु यौधकि अमङ्गमेजय वदान्य अकस्मात् (वर्त्तमानवर्द्धमानत्वरमाणध्रियमाणक्रियमाणरोचमानशोभमानाःसंज्ञायाम्) (विकारसदृशे व्यस्तसमस्ते) गृहपति गृहपतिक (राजाह्नोश्छन्दसि) अराजा अनहः। भाषायां तु अव्ययस्वरः। "विभाषा तृन्नन्नतीक्ष्णशुचिषु" पा०। तृन् अकर्त्ता। अनन्नम्। अतीक्ष्णम् अशुचिः। पक्षे अव्ययस्वरः। "बहुव्रीहाविदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने" पा०। एभ्य एतयोरन्त उदात्तः बहुव्रीहौ। इदं प्रथमं यस्य इदं प्रथमः। एवम् एतद्द्वितीयं तत्पञ्चमम। द्रव्यगणने तु अयं प्रथमः प्रधानं येषां ते इदंप्रथमा इत्यादौ न। बहुव्रीहावित्यधिकारः। "संख्यायाः स्तनः" पा०। द्विस्तना चतुःस्तना। "विभाषा छन्दसि" पा०। "द्विस्तनां करोति वामदेव्यः"। पक्षे न "संज्ञायां मित्राजिनयोः" पा०। देवमित्रः कृष्णाजिनम्। असंज्ञायां प्रियमित्रः इत्यादौ न। "ऋषिप्रतिषेधोमित्रे" वार्त्ति०। विश्वामित्र ऋषिः अत्र न। "व्यवायिनोऽन्तरम्" पा०। व्यवधायकात् परमन्तरमन्तोदात्तम्। वस्त्रान्तरः। "मुखं स्वाङ्गम्" पा०। गौरमुखः। अस्वाङ्गे तु दीर्घमुखा शाला इत्यादौ न। "नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः" पा०। एभ्यः परं मुखं नान्तोदात्तम् तेन पूर्वपदप्रकृतिस्वरः। उच्चैर्मुखः। प्राङ्मुखः गोमुखः। गोमहद्वत्सपूर्वपदस्योपमानलक्षणोऽपि विकल्पोबाध्यते पुरस्तादपवादन्यायात्। "निष्ठोपमानादन्यतरस्याम्" पा०। निष्ठान्तादुपमानवाचिनश्च परं स्वाङ्गं मुखं वान्तोदात्तम्। प्रक्षालितमुखः पक्षे निष्ठोपसर्गेति पूर्वपदान्तोदात्तत्वम्। पूर्वपदप्रकृतिस्वरत्वेन गतिस्वरोऽपि भवति। सिंहमुखः। पक्षे पूर्वपदप्रकृतिस्वरः। "जातिकालसुखादिभ्योऽनाच्छादनात् क्तोऽकृतमितप्रतिपन्नाः" पा०। सारङ्गजग्धः मासभूतः सुखभूतः। सुख दुःख तृप्र कृच्छ्र अस्र आस्र अलीक प्रतीप करुण सोढ इत्येतानि सुखादीनि। आच्छादनात्तु वस्त्रच्छन्न इत्यादौ न। कुण्डकृतः कुण्डमितः कुण्डप्रतिपन्न इत्यादौ च न। "वा जाते" पा०। एभ्यो जातिशब्दोऽन्तोदात्तः। दन्तजातः मासजातः। पक्षे पूर्वपदप्रकृतिस्वरः "नञ् सुभ्याम्" पा०। आभ्यां परमन्तोदात्तं बहुव्रीहौ। अव्रीहिः सुमाषः। "कपि पूर्वम्" पा०। नञ् सुभ्यां परमुत्तरपदस्य पूर्वमुदात्तं कपि परे। अब्रह्मबन्धुकः। सुकुमारीकः। "ह्रस्वान्तेऽन्त्यात्पूर्वम्" पा०। ह्रस्वान्ते उत्तरपदे समासे अन्त्यात् पूर्वपदमुदात्तं नञ्सुभ्यां बहुव्रीहौ। अव्रीहिकः सुमाषकः। "बहोर्नञ्वदुत्तरपदभूम्नि" पा०। उत्तरपदार्थे बहुत्ववाचिनोबहोः परस्य पदस्य नञः परस्येव स्वरःस्यात्। बहुव्रीहिकः बहुमित्रः। अबहुत्वे तु बहुषु मानोऽस्य बहुमान इत्यादौ न। "न गुणादयोऽवयवाः" पा०। अवयव-

वाचिनो बहोः परे गुणादयोनान्तोदात्ताः ब०ब्री०। बहुगुणा रज्जुः। बह्वक्षरं पदम्। गुणादयश्च गुण अक्षर अध्याय सूक्त छन्दः मान। गुणादिराकृतिगणः। अनवयवे तु अध्ययनश्रुतसदाचारादिगुणपरत्वे बहुगुणोद्विज इत्यादौ न। "उपसर्गात् स्वाङ्गं ध्रुवमपर्शु" पा०। प्रपृष्ठः। अध्रुवे तु उद्बाहुरित्यादौ विपर्शुरित्यादौ च न। "वनं समासे" पा०। समासमात्रे उपसर्गात् परं वनमन्तोदात्तं स्यात्। प्रवणम्। "अन्तः" पा०। अन्तर् शब्दात् परं वनमन्तोदात्तम् समासमात्रे। अन्तर्वणोदेशः। "अन्तश्च" पा०। उपसर्गादन्तशब्दोऽन्तोदात्तः। पर्य्यन्तः समन्तः। "न निविभ्याम्" पा०। न्यन्तः व्यन्त इत्यादौ न। पूर्व्वपदप्रकृतिस्वरे यणि च कृते उदात्तस्वरितयोर्यण इति स्वरितः। "परेरभितोभावि मण्डलम्" पा०। परेः परम् अभितउभयतो भावि कूलादि, मण्डलं चान्तोदात्तम्। परिकूलम् परिमण्डलम्। "प्रादस्वाङ्गं संज्ञायाम्" पा०। प्रगृहम्। स्वाङ्गे तु प्रपदमित्यादौ न "निरुदकादीनि च" पा०। निरुदक निरुपल निर्म्मक्षिक निर्म्मशक निष्कालक निष्कालिक निष्पेष दुस्तरीप निस्तरीक निरजिन उदजिन उपाजिन (परेर्हस्तपादकेशकर्षाः) निरुदकादिराकृतिगणः। एतानि अन्तोदात्तानि। निरुदकम्। "अभेर्मुखम्" पा०। अबहुव्रीह्यर्थमध्रुवार्थमस्वाङ्गार्थमारम्भः। अभिमुखा शाला। "अपाच्च" पा०। अपमुखम् अत्रापि पूर्व्ववदारम्भः। अपमुखा शाला "स्फिगपूतवीणाञ्जोऽध्वकुक्षिसीरनामनाम च" पा०। अपादिमान्यन्तोदात्तानि। अपस्फिगम् अपपूतम्। अपाञ्जः। अपाध्वा समासान्तविधेरनित्यत्वात् नेह समा०। अपकुक्षि। अपसीरम् अपहलम्। अपनाम। स्फिगादिग्रहणमबहुव्रीह्यर्थम् अध्रुवार्थमस्वाङ्गार्थञ्च। "अधेरुपरिस्थम्" पा०। अध्यारूढोदन्तोऽधिदन्तः दन्तस्योपरिजातोदन्त इत्यर्थः। अनुपरिस्थे त्वधिकरणमित्यादौ न। "अनोरप्रधानकनीयसी" पा०। अनोः परमप्रधानवाचि कनीयश्चान्तोदात्तम्। अनुगतोज्येष्ठम् अनुज्येष्ठइत्यादि। अत्र पूर्व्वपदार्थप्राधान्यात् ज्येष्ठशब्दस्याप्रधानत्वम्। अनुगतः कनीयान् प्रा०स०। अनुकनीयान्। अत्र उत्तरपदार्थप्राधान्यम्। प्राधान्यार्थमेव कनीयसः पृथग्ग्रहणम्। "पुरुषश्चान्वादिष्टः" पा०। अनोः परः अन्वादिष्टवाची पुरुषः अन्तोदात्तः। अन्वादिष्टः पुरुषः प्रा० स०। अनुपुरुषः। "अतेरकृत्पदे" पा०। अतेः परमकृदन्तं पदे पदशब्दश्चान्तोदात्तः। अत्यङ्कुशो-नागः। अतिपदा गायत्री। कृत्पदे तु अतिचार इत्यादौ न। "अतेर्धातुलोप इति वाच्यम्" वार्त्ति०। "प्रादिभ्यो धातुजस्य वा चोत्तरपदलोप इति अत्यादयः क्रान्त्याद्यर्थे द्वितीययेति यत्र धातुलोपस्तत्रैवायं स्वरः। तेन शोभनोगार्ग्यः प्रा०स०। अतिगार्ग्यः अत्र न। अतिक्रान्तः कारकम्। अतिकारक इत्यत्रापि स्यात् कारकशब्दस्य कृदन्तत्वेऽपि धातुलोपएव कृदन्त नियमनात् अतिकार इत्यादौ तु धातुलोपभावाच्चेति भेदः। "नेरनिधाने" पा०। निधानमप्रकाशः तद्भिन्ने प्रकाशार्थे नेरुत्तरपदमन्तोदात्तम्। निमूलम् न्यक्षम्। निधाने तु निहितो दण्डः निदण्ड इत्यादौ अप्रकाशितः गुप्तोदण्ड इत्यर्थके न। "प्रतेरंश्वादयस्तत्पुरुषे" पा०। प्रतिगतोऽंशुः प्रत्यंशुः प्रतिजनः प्रतिराजा समासान्तविधेरनित्यत्वान्न टच्। बहुव्रीहौ तु न। अंश्वादयश्च ३७८० दर्शिताः। "उपाद्द्व्यजजिनमगौरादयः" पा०। उपात् परं द्व्यच्कमजिनञ्चान्तोदात्तम् न तु गौरादयः। ते च गौर तैष तैल लेट लोट जिह्वा कृष्णा कन्या गुध कल्प पाद। उपदेवः उपेन्द्रः उपाजिनम्। गौरादौ उपगौर इत्यादौ न; "सोरवक्षेपणे" पा०। आक्षेपे गम्ये सोःपरमन्तोदात्तम्। सुप्रत्यवसितः सुरत्नपूजार्थः वाक्यार्थस्तु निन्दा असूयया तथाऽभिधानात्। "विभाषोत्पुच्छे" पा०। उत्पुच्छे शब्दे वान्तोदात्तः। उत्क्रान्तः पुच्छात्, पुच्छमुदस्यति उत्पुच्छयतेर्वा एरच्। उभयस्याप्यत्र ग्रहणम्। उत्पुच्छः। "द्वित्रिभ्यां पद्दन्मूर्द्धसु बहुव्रीहौ" पा०। आभ्यां परेष्वेषु अन्तोदात्तो वा बहुव्रीहौ। द्विपाद् त्रिपाद्। त्रिमूर्द्धा। समासान्तविधेरनित्यत्वज्ञापकमिदम्। तत्पुरुषे तु द्वयोर्मूर्द्धा द्विमूर्द्धेत्यादौ न। "सक्थञ्चाक्रान्तात्" पा०। कृतसमासान्तसक्थस्य अक्रान्तात् परस्य वान्तोदात्तः। गौरसक्थः श्लक्ष्णसक्थः। क्रान्तात्तु चक्रसक्थ इत्यादौ न किन्तु षच्समासान्तस्य चित्त्वात् नित्यमन्तोदात्तता। "परादिश्छन्दसि बहुलम्" पा०। वेदे उत्तरपदस्यस्य शब्दस्यादि रुदात्तो बहुलम्। "अङ्गिसक्थमालभेत" बहुलग्रहणात् "परादिश्च परान्तश्च पूर्व्वान्तश्चापि दृश्यते। पूर्व्वादयश्च दृश्यन्ते व्यत्ययो बहुलं ततः" वार्त्ति०। इति समासस्वराः। एवमुदात्ते विहिते क्वचित्तस्य निघातेनानुदात्तता स्यात् तच्च निघातशब्दे सापवादं वक्ष्यते।

"निहन्त्यरीनेकपदे य उदात्तः स्वरानिव" माघः। "अवि-

कत्थनः क्षमावानतिगम्भीरो महासत्त्वः । स्थेयान् निगूढमानो धीरोदात्तो दृढव्रतः कथितः” सा॰द॰ २उक्ते (पूर्वपदलोपेन) नायकभेदे । भावे क्त । ३दाने ४वाद्यभेदे शब्द्र॰५अलङ्कारभेदे पु॰। स च अलङ्कारशब्दे ३८६पृष्ठे दर्शितः । कर्त्तरि क्त ६महति ७समर्थे ८दातरि च त्रि॰ ।

उदात्तराघव न॰ नाटकभेदे ।

उदान पु॰ अन–घञ् ऊर्द्ध्वमानोऽस्य । ऊर्द्ध्वगतिशीले कण्ठादिदेशवर्त्तिनि प्राणवृत्तिभेदे वायौ । “अथ योऽस्योर्द्ध्वसुषिः सउदानः स वायुः सआकाशः” छा॰उ॰ । “आपादतलादारभ्योर्द्ध्वमुत्क्रमात् उत्कर्षार्थञ्च कर्म्म कुर्वन्निति उदानः” छा॰उप॰भा॰। पदार्थादर्शे योगार्णवे तत्स्थानाद्युक्तम् “स्पन्दयत्यधरं वक्त्रं गात्रनेत्रप्रकोपनः । उद्वेजयति मर्म्माणि उदानो नाम मारुतः । विद्युत्पावकवर्ण्णः स्यादुत्थानाशनकारकः । पादयोर्हस्तयोश्चापि सर्वसन्धिषु वर्त्तते”। सुश्रुते च“यथाग्निः पञ्चधा भिन्नो नामस्थानात्मकर्म्मभिः । भिन्नोऽनिलस्तथा ह्येको नामस्थानक्रियामयैः। प्राणोदानौ समानश्च व्यानश्चापान एव च । स्थानस्था मारुताः पञ्च यापयन्ति शरीरिणम् । वायुर्यो वक्त्रसञ्चारी स प्राणो नाम देहधृक्। सोऽन्नं प्रवेशयत्यन्तः प्राणांश्चाप्यवलम्बते । प्रायशः कुरुते दुष्टो हिक्काश्वासादिकान् गदान् । उदानो नाम यस्तूर्द्ध्वमुपैति पवनोत्तमः । तेन भाषितगीतादिविशेषोऽभिप्रवर्त्तते । ऊर्द्ध्वजत्रुगतान् रोगान् करोति च विशेषतः । आमपक्वाशयचरः समानो वह्निसङ्गतः । सोऽन्नं पचति तज्जांश्च विशेषान्विविनक्ति हि । गुल्माग्निसङ्गातीसारप्रभृतीन् कुरुते गदान् । कृत्स्नदेहचरो व्यानो रससंवहनोद्यतः । स्वेदासृक्स्रावणो वापि पञ्चधा चेष्टयत्यपि । क्रुद्धश्च कुरुते रोगान् प्रायशः सर्वदेहगान् । पक्वाधानालयो ऽपानः काले कर्षति चाप्ययम् । समीरणः शकृन्मूत्रशुक्रगर्भार्त्तवान्यधः । क्रुद्धश्च कुरुते रोगान् घोरान् वस्तिगुदाश्रयान् । शुक्रदोषप्रमेहास्तु व्यानापानप्रकोपजाः । युगपत्कुपिताश्चापि देहं भिन्द्युरसंशयम्” छान्दोग्ये च भोजनस्याग्निहोत्रस्थानीयतया सम्पादनेन प्राणादिपञ्चकाहुतेर्नित्यं कर्त्तव्यता तत्फलञ्चोक्तम् यथा । “उरएव वेदिर्लोमानि वर्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्य्यपचन आस्यमाहवनीय इत्युपक्रम्य” । (तद्भाष्ये च आस्यस्य हूयते ऽस्मिन्नन्नमित्याहवनीयत्वमुक्तम्) आहुतिप्रकारः फलसहितो दर्शितो यथा ।

“तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयं स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात् प्राणाय स्वाहेति प्राणस्तृप्यति, प्राणे तृप्यति चक्षुस्तृप्यति चक्षुषि तृप्यत्यादित्यस्तृप्यत्यादित्ये तृप्यति द्यौस्तृप्यति दिवि तृप्यन्त्यां यत्किञ्च द्यौश्चादित्यश्चाधितिष्ठतस्तत्तृप्यति तस्यानुतृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति१। अथ यां द्वितीयां जुहुयात्तां जुहुयाद्व्यानाय स्वाहेति व्यानस्तृप्यति, व्याने तृप्यति श्रोत्रं तृप्यति श्रोत्रे तृप्यति चन्द्रमास्तृप्यति चन्द्रमसि तृप्यति दिशस्तृप्यन्ति दिक्षु तृप्यन्तीषु यत्किञ्च दिशश्च चन्द्रमाश्चाधितिष्ठन्ति तत्तृप्यति तस्यानुतृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसः ब्रह्मवर्चसेनेति२ । अथ यां तृतीयां जुहुयात्तां जुहुयादपानाय स्वाहेत्यपानस्तृप्यति, अपाने तृप्यति वाक्तृप्यति वाचि तृप्यन्त्यामग्निस्तृप्यत्यग्नौ तृप्यति पृथिवी तृप्यति पृथिव्यां तृप्यन्त्यां यत्किञ्च पृथिवी चाग्निश्चाधितिष्ठतस्तत्तृप्यति तस्यानुतृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति३ । अथ यां चतुर्थीं जुहुयात्तां जुहुयात् समानाय स्वाहेति समानस्तृप्यति, समाने तृप्यति मनस्तृप्यति मनसि तृप्यति पर्जन्यस्तृप्यति पर्जन्ये तृप्यति विद्युत्तृप्यति विद्युति तृप्यन्त्यां यत्किञ्च विद्युच्च पर्जन्यश्चाधितिष्ठतस्तत्तृप्यति तस्यानुतृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति४ । अथ यां पञ्चमीं जुहुयात्तां जुहुयादुदानाय स्वाहेत्युदानस्तृप्यति, उदाने तृप्यति वायुस्तृप्यति वायौ तृप्यत्याकाशस्तृप्यत्याकाशे तृप्यति यत्किञ्च वायुश्चाकाशश्चाधितिष्ठतस्तत्तृप्यति तस्यानुतृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति५ । स य इदमविद्वानग्निहोत्रं जुहोति यथाङ्गारानपोह्य भस्मनि जुहुयात्तादृक् तत्स्यात् । अथ य एतदेवं विद्वानग्निहोत्रं जुहोति तस्य सर्व्वेषु लोकेषु सर्व्वेषु भूतेषु सर्व्वेष्वात्मसु हुतं भवति । तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्व्वे पाप्मानः प्रदूयन्ते य एतदेवं विद्वानग्निहोत्रं जुहोति । तस्मादु हैवंविद्यद्यपि चण्डालायोच्छिष्टं प्रयच्छेदात्मनि हैवास्य तद्वैश्वानरे हुतं स्यादिति तदेष श्लोकः । यथेह क्षुधिता बाला मातरं पर्य्युपासते । एवं सर्व्वाणि भूतान्यग्निहोत्रमुपासत इत्यग्निहोत्रमुपासत इति” ।

उदापु पु॰ उद्+आप–उन् । जरासन्धपौत्रे क्षत्रियभेदे । “जरासन्धस्य पुत्रोवै सहदेवः प्रतापवान् । सहदेवात्मजः

श्रीमानुदायुः स महायशाः । उदायुर्जनयामास पुत्रं परमधार्म्मिकम्" । हरिव० ३२अ० ।

उदार त्रि० उद्+आ+रा-क । १दातरि, २महति, ३सरले, ४दक्षिणे, ५गम्भीरे, ६असाधारणे च । "महार्थ्युदारा युयुभेऽर्ज्जुनस्य" "स तथेति विनेतुरुदारमतेः" साकेतोपवनमुदारमध्युवास" "रघुः उदारमन्ते कलभाविकस्वरैः" माघः । "इङ्गितार्थक्रियोदारं तेऽभिनन्द्य गिरेर्वचः" "तथा हि ते शीलमुदारदर्शने !" कुमा० । ततो भावे ष्यञ् औदार्य्य न० तल् उदारता स्त्री त्व उदारत्व न० तद्भावे ।

उदारथि उद्+आ+ऋ-थिन् । ऊर्द्ध्वमागन्तरि । "अरम्भ ओषधे भव पीवो दृढ उदारथिः" ऋ०१,१८७,१०, "अरसं कृत्वा तिर्यं पीवस्फाकमुदारथिम्" अथ० ४,७,२ ।

उदारधी स्त्री उदारा धीः । १उत्कृष्टबुद्धौ उदारा धीर्य्यस्य । २उत्कृष्टबुद्धिमति त्रि० "धियः समग्रैः स गुणैरुदारधीः" । रघुः । उदारा महती सर्वार्थविषयत्वात् धीर्य्यस्य । ३विष्णौ पु० । "निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः" विष्णुस० "यः सर्वज्ञः सर्वविदिति" श्रुतेस्तस्य सर्वार्थविषयबुद्धिमत्त्वात्तथात्वम् ।

उदावर्त्त पु० उद्+आ+वृत-घञ् । रोगभेदे तल्लक्षणादि सुश्रुते दर्शितं यथा

"अथात उदावर्त्तप्रतिषेधमध्यायं व्याख्यास्यामः । अधर्म्मोक्तस्य भावानां प्रवृत्तानां स्वभावतः । न वेगान् धारयेत्तान्वै वातादीनां जिजीविषुः । वातविण्मूत्रजृम्भाश्रुक्षवोद्गारवमीन्द्रियैः । व्याहन्यमानैरुदितैरुदावर्त्तो निरुच्यते । क्षुत्तृष्णाश्वासनिद्राणामुदावर्त्तो विधारणात् । तत्राभिघातो व्यासेन लक्षणञ्च चिकित्सितम् । तयोर्द्वयविभक्ताशी भिन्न एतैस्तु कारणैः । अपथ्यभोजनाच्चापि वध्यते च तथापरः । आध्मानशूलौ हृदयोपरोधं शिरोरुजं श्वासमतीव हिक्काम् । कासप्रतिश्यायगलग्रहांश्च बलासपित्तप्रसरञ्च घोरम् । कुर्यादपानोऽभिहतः स्वमार्गं हन्यात्पुरीषं मुखतः क्षिपेद्वा । आटोपशूलौ परिकर्त्तनञ्च सङ्गः पुरीषस्य तथोर्ध्ववातः १। पुरीषमास्यादपि वा निरेति पुरीषवेगेऽभिहते २नरस्य । मूत्रस्य वेगेऽभिहते ३नरस्तु कृच्छ्रेण मूत्रं कुरुतेऽल्पमल्पम् । मेढ्रे गुदे वङ्क्षणवस्तिमुष्कनाभिप्रदेशेष्वथ वापि मूर्द्ध्नि । आनद्धवस्तिश्च भवन्ति तीव्राः शूलाश्च शूलैरिव भिन्नमूर्त्तेः । मन्यागलस्तम्भशिरोविकारा जृम्भोपघातात् ४पवनात्मकाः स्युः । श्रोत्राननघ्राणविलोचनोत्था भवन्ति तीव्राश्च तथा विकाराः । आनन्दजं शोकसमुद्भवं वा नेत्रोदकं ५प्राप्तमुदत्ततो हि । शिरोगुरुत्वं नयनामयाश्च भवन्ति तीव्राः सह पीनसेन । भवन्ति गाढं क्षवथोर्व्विघातात् ६शिरोऽक्षिनासाश्रवणेषु रोगाः । कण्ठास्यपूर्णत्वमतीव तोदः कूजश्च वायोरथ वा प्रवृत्तिः । उद्गारवेगेऽभिहते ७भवन्ति जन्तोर्व्विकाराः पवनप्रसूताः । छर्द्देर्व्विघातेन ८भवेच्च कुष्ठं तेनैव दोषेण विदग्धमन्नम् । मूत्राशये वा गुदमुष्कयोश्च शोफो रुजा मूत्रविनिग्रहश्च । शुक्राश्मरी तत्स्रवणं भवेद्वा ते ते विकारा विहते तु शुक्रे ९ । तन्द्राङ्गमर्दावरुचिः श्रमश्च क्षुधोऽभिघातात् १०कृशता च दृष्टेः । कण्ठास्यशोषः श्रवणावरोधस्तृष्णाभिघातात् ११हृदये व्यथा च । श्रान्तस्य निश्वासविनिग्रहेण १२हृद्रोगमोहावथ वापि गुल्मः । जृम्भाङ्गमर्दौ ह्यशिरोऽक्षिजाड्यं निद्राभिघातादथ १३वापि तन्द्रा । तृणार्दितं परिक्लिष्टं क्षीणं शूलैरभिद्रुतम् । शब्दमन्तं मतिमानुदावर्त्तिनमुत्सृजेत् । सर्वेष्वेतेषु ह्युदावर्त्तेषु तत्त्वज्ञः । वायोः क्रिया विधातव्या स्वमार्गप्रतिपत्तये" । उद्र उदकस्यावर्त्तः । २जलस्य स्वतोभ्रमणे । ३स्त्रीचिह्नरोगभेदे स्त्री सा च सुश्रुते दर्शिता यथा "विंशतिर्व्यापदो योनेर्निर्द्दिष्टा रोगसङ्ग्रहे । मिथ्याचारेण ताः स्त्रीणां प्रदुष्टेनार्त्तवेन च । जायन्ते बीजदोषाच्च दैवाच्च शृणु ताः पृथक् । उदावर्त्ता तथा बन्ध्या विप्लुता च परिप्लुता । वातला चेति वातोत्था पित्तोत्था रुधिरक्षरा । वामिनी स्रंसिनी चापि पुत्रघ्नी पित्तला च या । अत्यानन्दा च या योनिः कर्णिनी चरणाद्वयम् । श्लेष्मिका सकफा ज्ञेया षण्ढी च फलिनी तथा । महती सूचिवक्त्रा च सर्वजेति त्रिदोषजा" । "सफेनिलमुदावर्त्ता रजः कृच्छ्रेण मुञ्चति" ।

उदावसु पु० निमिवंश्ये नृपभेदे । "निमिः परमधर्म्मात्मा सर्वसत्त्ववतां वरः । तस्य पुत्रो मिथिर्नाम बभूवानुपमद्युतिः । तस्यापि जनकोनाम जनकस्याप्युदावसुः" रामा० निमिवंशवर्णने । अयञ्च जनकः प्रसिद्धजनकाद्भिन्न एव तत्रैवान्ते "स्वर्णरोमणोऽभवच्चापि ह्रस्वरोमा सुतो बली । तस्य पुत्रद्वयं जज्ञे धर्म्मज्ञस्य महात्मनः । ज्येष्ठोऽहमनुजश्चायं भ्राता मम कुशध्वज इति" दशरथं प्रति स्वकुलकीर्त्तने जनकोक्तौ अहंशब्देनात्मनः कीर्त्तनेन ततो भेदप्रतीतेः । [यास्क ।

उदास पु० उद्+अस-घञ् । १उत्क्षेपणे २निरसने ३उपेक्षा-

उदासीन त्रि० उद्+आस-शानच् । १मध्यस्थे, २विवदमानयोरेकतरपक्षानवलम्बके, जिगीषोर्नृपतेः शत्रुमित्रभूमितो व्यवहिते परतरे, अरिषड्के १५५पृ० दर्शिते "मण्डला-

हृहितेतथादुदासीनो बलाधिकः'' इत्युक्त लक्षणे ३राजभेदे। ४उपेक्षके च ''उदासीनवदासीनः'' गीता० ।

उदास्थित पु० उद्+आ+स्था–क्त । १द्वारपाले २चरे ३अध्यक्षे च हेम० प्रव्रज्यारूढपतिते ४प्रव्रज्यावसिते चरे च स च पञ्चविधचरान्तर्गतः । 'प्रव्रज्यावसितः प्रव्रज्यारूढपतित एव । तत्रस्मादि ''कृत्स्नं चाष्टविधं कर्म पञ्चवर्गञ्च तत्त्वतः'' इति मनुवचनस्य कुल्लू० व्याख्यायाम्

''कापटिकोदास्थितगृहपतिवैदेहिकतापसव्यञ्जनात्मकं पञ्चविधं चारवर्गं पञ्चवर्गशब्दवाच्यं तत्त्वतश्चिन्तयेत्'' इति संक्षेपेणोक्ता । तत्र परमर्मज्ञः प्रगल्भच्छात्रः कपटव्यवहारित्वात्कापटिकस्तं वृत्त्यर्थिनमर्थमानाभ्यामुपगृह्य रहसि राजा ब्रूयात् 'यस्य दुष्टं तत्पश्यसि तत्तदानीमेव मयि वक्तव्यमिति' । प्रव्रज्यारूढपतित उदास्थितः तं लोकेषु विदितदोषं प्रज्ञाशौचयुक्तं वृत्त्यर्थिनं ज्ञात्वा रहसि राजा पूर्ववद्ब्रूयात् बहूत्पत्तिकमठे स्थापयेत् प्रचुरशस्योत्पत्तिकभूम्यन्तरञ्च तद्वृत्त्यर्थमुपकल्पयेत् सधान्येषामपि प्रव्रजितानां राजचारकर्मकारिणां ग्रासाच्छादनादिकं दद्यात् । कर्षकः क्षीणवृत्तिः प्रज्ञाशौचयुक्तो गृहपतिव्यञ्जनस्तमपि पूर्ववदुक्त्वा स्वभूमौ कृषिकर्म कारयेत् । वणिजकः क्षीणवृत्तिः वैदेहिकव्यञ्जनस्तम्पूर्ववदुक्त्वा धनमानाभ्यामात्मीकृत्य वाणिज्यं कारयेत् । मुण्डोजटिलो वा वृत्तिकामस्तापसव्यञ्जनः सोऽपि कश्चिद्ग्रामे वसन् बहुमुण्डजटिलान्तरकपटशिष्यगणवृतो गुप्तराजोपकल्पितवृत्तिः तपस्यां कुर्यात् मासद्विमासान्तरितं प्रकाशं बदरादिमुष्टिमश्नीयात् रहसि च राजोपकल्पितं यथेष्टमाहारं कल्पयेत् । शिष्याश्चास्यातीतानागतज्ञानादिकं ख्यापयेयुः तेन बहुलोकवेष्टनमासाद्य सर्वेषां विश्वसनीयत्वात् सर्वे कार्यमकार्यञ्च पृच्छन्ति। एवंरूपं पञ्चवर्गं यथावच्चिन्तयेत्'' विशेषेणोक्तम् ।

उदाहरण न० उद्+आ–हृ-भावे ल्युट् । एकदेशप्रदर्शनात् सकलविज्ञानार्थं १कथने । कर्मणि ल्युट् । दृष्टविज्ञानार्थमुच्यमाने २दृष्टान्ते, 'त्वदुदाहरणाकृतौ गुणा इति सामुद्रिकसारमुद्रया'' नैष० प्रकृतविज्ञानार्थं निदर्शनरूपे ३उपोद्घाते च । उदाह्रियते व्याप्तपक्षधर्मता येन करणे ल्युट् न्यायमते प्रतिवादिपराजयार्थं वादिना प्रयुक्तप्रतिज्ञादिपञ्चकान्तर्गते व्याप्तिपक्षधर्मताप्रदर्शके ४वाक्यभेदे प्रतिज्ञादय गौ० सू० इत्योर्दर्शिता यथा

''प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः''। अनेन विभागेन प्रतिज्ञाद्यन्यतमत्वमिति लक्षणं सूचितम् अत्र च प्रतिज्ञादीनां पञ्चानामवयवत्वकथनाद्दशावयववादो व्युदस्त इति मन्तव्यं ते च भाष्ये दर्शिता यथा ''जिज्ञासा संशयः शक्यप्राप्तिः प्रयोजनं संशयव्युदासश्चेति'' एते प्रतिज्ञादिसहिता दश'' व्याख्यातं चेदं तात्पर्यटीकायाम् ''प्रयोजनं हानादिबुद्धयः तत्प्रवर्त्तिका जिज्ञासा, तज्जनकः संशयः, शक्यप्राप्तिः प्रमाणानां ज्ञानजननसामर्थ्यं, संशयव्युदासस्तर्कः, अयमेवार्थोऽनिरूप्य निष्टङ्कितः । जिज्ञासा विप्रतिपत्तिरिति कश्चित् एतेषाञ्च न न्यायावयवत्वं न्यायाघटकत्वात् । न न्यायजन्यबोधानुकूलत्वेनावयवत्वं एकदेशस्यापि तत्त्वप्रसङ्गात् प्रयोजनेऽतिव्याप्तेश्च'' वृत्तिः । तत्र उदाहरणलक्षणविभागौ तत्रैव दर्शितौ यथा

''साध्यसाधर्म्यात्तद्धर्मभावी दृष्टान्त उदाहरणम्'' सू० । ''दृष्टान्त उदाहरणमिति लक्षणं दृष्टान्तवचनं दृष्टान्तकथनयोग्यावयव इत्यर्थः तेन दृष्टान्तस्य सामयिकत्वेनासार्वत्रिकत्वेऽपि न क्षतिः । योग्यतावच्छेदकन्तु अवयवान्तराघटितार्थकावयवत्वं तच्च द्विविधं अन्वयिव्यतिरेकिभेदात्तत्रान्वय्युदाहरणं लक्षयति साध्यसाधर्म्यात्तद्धर्मभावीति अन्वय्युदाहरणमिति शेषः परे तु सम्पूर्णसूत्रमन्वय्युदाहरणलक्षणमेव सामान्यलक्षणं तूक्तमित्याहुः साध्यसाधर्म्यात् साध्यसहचरितधर्मात् प्रकृतसाधनादित्यर्थः तं साध्यरूपं धर्मं भावयति तथा च साधनवत्ताप्रयुक्तसाध्यवत्तानुभावकोऽवयवः साध्यसाधनव्याप्त्युपदर्शक उदाहरणमिति यावत् । व्यतिरेक्युदाहरणं लक्षयति'' वृ०। ''तद्विपर्ययाद्वा विपरीतं व्यतिरेक्युदाहरणम्'' सू०। तद्विपर्ययात् साध्यसाधनव्यतिरेकव्याप्तिप्रदर्शनात्तथा च साध्यसाधनव्यतिरेकव्याप्त्युपदर्शकोदाहरणं व्यतिरेक्युदाहरणं यथा जीवच्छरीरं सात्मकं प्राणादिमत्त्वात् यन्नैवं तन्नैवं यथा घट इति । वाकारः प्रयोगमपेक्ष्य तथा चान्वय्युदाहरणं व्यतिरेक्युदाहरणं वा प्रयोक्तव्यमित्यर्थः'' वृ०। चिन्तामणिकृता तु तल्लक्षणादिकमुक्तं यथा

''हेतावुक्ते कथमस्य गमकत्वमित्याकाङ्क्षायां व्याप्तिपक्षधर्मतयोः प्रदर्शनप्राप्तौ व्याप्तेः प्राथम्यात् तत्प्रदर्शनायोदाहरणं तत्रानुमितिहेतुलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकव्याप्यत्वाभिमतधर्मिनियतव्यापकत्वाभिमतसम्बन्धबोधजनकशब्दत्वमुदाहरणत्वं सामान्यलक्षणम् साध्यसाधनसम्बन्धबोधकत्वं, साध्यसाधनाभावसम्बन्धबोधकत्वञ्च विशेषलक्षणद्वयम् । न्यायावयवदृष्टान्तवचनमुदाहरणमिति तु

न दृष्टान्तप्रयोगस्य सामयिकत्वेनासार्व्वत्रिकत्वात्, योयो धूमवान् सोऽग्निमानित्येव व्याप्तिप्रतीतेः। नापि प्रकृतानुमितिहेतुलिङ्गपरामर्शपरवाक्यजन्यज्ञानविषयव्याप्त्युपनायकं वचनं तत्, उपनयातिव्याप्तेः। उपनयाभिधानप्रयोजकजिज्ञासाजनकवाक्यमुदाहरणम् एतदेवान्वयव्यतिरेकिव्याप्तिविषयत्वविशेषित विशेषलक्षणद्वयमित्यन्ये, अत्र च व्यभिचारवारणाय वीप्सामाहुः यत्र च सामानाधिकरण्यादेव व्याप्तिस्तत्र न वीप्सा केवलान्वयिन्यभेदानुमाने च वीप्सायामपि व्यभिचारतादवस्थ्यप्रसिति तु वयं, वीप्सा च यत्पदे, न तत्पदेऽपि विरुद्धरूपोपस्थितयोरपि तत्पदेन परामर्शाद्वुद्धस्यशाब्दकत्वादिति न व्युत्पत्तिविरोधः यथा "अद्यतु पापं प्रतिजहि जगन्नाथ! नमस्य तन्म इत्यादौ"।

दीधितिकृता तु निष्कृष्योक्तम्। इतरार्थान्वितस्वार्थाबोधकन्यायावयवत्वमुदाहरणत्वम् अन्वयव्याप्तिबोधकत्वं व्यतिरेकव्याप्तिबोधकत्वञ्च विशेषलक्षणद्वयमिति"। ४कथाप्रसङ्गे च। "अथाङ्गिरसमग्रण्यमुदाहरणवस्तुषु" कुमा०"उदाहरणानि कथाप्रसङ्गाः तान्येव वस्तूनि"मल्लि०। भावे ल्युट्। ५कथनमात्रे। ६लक्षणसम्बद्धतया प्रामाणिकवाक्योपन्यासे च। [उदाहृति तत्रार्थे उक्तौ च स्त्री।

उदाहार पु० उद्+आ+हृ-घञ्। उदाहरणार्थे। त्रिका०।

उदाहृत त्रि०उद्+आ+हृ-क्त। १दृष्टान्ततयोपन्यस्ते, २कथिते च "सुतान्वितो दशरथ इत्युदाहृतः" भट्टिः। प्रामाणिकप्रयुक्ततया ३उपन्यस्ते च।

उदित त्रि०वद-क्त। १कथिते। "श्रुतिस्मृत्युदितं धर्मम्"मनुः भावे क्त। २कथने न०। "प्रियः कियद्दूरमिति त्वयोदिते" नैष०उद्-इण्-क्त। ३उत्थिते, "तद्वुदितः स हि यो यदनन्तरः" नैष०। ४उदयं प्राप्ते"उदिते जुहोति अनुदिते जुहोति"श्रुतिः "उदितेऽनुदिते चैव समयाध्युषिते तथा" मनुः। "उदिते जगतीनाथे यः कुर्य्याद्दन्तधावनम्" स्मृतिः। "उदितं सोमनक्षत्रं हया यदाः प्रविर्भवेत्"। पारस्क० उदयप्राप्तिश्च प्रहादौ भूम्यपादान्तरितदेशोपरिस्थे.एव भवति सा च दिवा न भवति सहस्रांशुकराभिभूतत्वेन दर्शनयोग्यताभावात्। तथा च दर्शनयोग्ये ग्रहादौ तच्छब्दस्य वृत्तिः।"उदिते नक्षत्रदर्शने" नीलक०। "चतुर्थ्यामुदितश्चन्द्रो नेक्षितव्यः कदाचन" इति व्याख्याने "उदितः कथितः"इति चतुर्थ्यादितव्याख्यानपरं चेति ति०त० उक्तं ५सम्पूर्णोदिते च त्रि० भावे क्तः। ६रात्रीभावउदयगमने। कर्त्तरि क्त। उदयं प्राप्ते ७राशौ च। "लग्नमेकन्तु दोषाणां हन्याच्चैवोदिते गुरुः" ज्योति०८नरपतिजयचर्य्योक्ते स्वरभेदे स च भुक्तावशिष्टः स्वरः यथा। "द्वादशाब्दादिनाद्यन्ताः स्वस्थानाच्चैव कालतः। उदयन्ते पुनस्तत्रान्तरे एकादशोदयैः। वर्षमासदिवानाडीपलानि च क्रमादिकम्। कालमानं मया प्रोक्तं पञ्चधा च स्वरोदये। यत् भुक्तं स्वस्वभोगेन लब्धं शेषोदितं भवेत्। लब्धे भुक्ताः स्वरा ज्ञेयाः शेषाङ्के तूदितस्वराः। आसन् षष्ठ्या विभक्ते तु भुक्तं स्यादुदितस्वरे। उदितस्य स्वरस्य पुनर्भिस्वरवशेन तत्"। अधिकं चक्रशब्दे बालादिचक्रे वक्ष्यते। पञ्चस्वरोक्ते ९ स्वरभेदे च। तच्चोदितं प्रकारश्च बालादिचक्रवत् ज्ञेयः। तदप्युक्तं तत्रैव। "तिथिः प्रतिपदादिश्च कुजादिर्वारनिर्णयः। नन्दा भद्रा जयारिक्ता पूर्णा चापि यथाक्रमम्। क्रमेणाङ्काः प्रदातव्या ग्राह्यश्चाङ्कसमुच्चयः। चन्द्राग्नी ८१ प्रथमे देया नगनागं ८७द्वितीयके। तृतीये चाग्निनवकं ९३ चतुर्थे तु ग्रहग्रहाः ९९। पञ्चोत्तरशतं १०५देयम् क्रमेण पञ्चकोष्ठतः। अङ्कग्रहणन्तु "वयोराशिं स्वराङ्कञ्च एकीकृत्य विभापयेत्"। इत्यादि सप्तादिशून्यगणनार्थं, सप्तशून्यशब्दे विवृतिः। एतेषां पञ्चकोष्ठस्थवर्णादीनां संज्ञा तत्रैवोक्ता यथा "उदितं भ्रमितं भ्रान्तं सन्ध्यास्थं तदनन्तरम्" संज्ञान्तरमपि तत्रैव "जन्म कर्म च आधानं विनाशं क्षिरं तथैव चेति "उदिते विजयो नित्यं भ्रमिते लाभ एव च। भ्रान्ते तु सिद्धिमाप्नोति सन्ध्यास्ते मरणं स्मृतम्। यत्र मामाक्षरं प्राप्तं तत्रैव उदितस्वरः। १०सन्तते। "पुरोक्तितश्च कुर्व्वीत दैवमुदितोदितम्" या०स्मृ०। विद्याभिजनाभिमानादिभिरुदितैः शास्त्रोक्तैरुदितं सन्ततम्" मिता०।११ज्ञातनामगन्धद्रव्ये ह्रीवेरे(बाला) न०अमरः।

उदिति स्त्री उद्+इ-क्तिन्। उदये उद्गमने "यस्य वा निमिति वोदिति वा" ऋ०६,१५,११।

उदीक्षण न० उद्+ईक्ष-ल्युट्। १अर्द्धदर्शने २उद्भावने च।

उदीक्ष्य अव्य०उद्+ईक्ष-ल्यप्। १अर्द्धं दृष्ट्वेत्यर्थे २उद्भाव्येत्यर्थे च। कर्मणि यत्। ३उद्भावनीये ४उदीक्षणीये च त्रि०

उदीचीन त्रि० उदीचि उदीच्यां वा भवः खः उदादेशे अल्लोपे पूर्व्वदीर्घः। उत्तरदिग्देशकालभवे। "उदीचीनप्रवणे करोत्युदीची वै मनुष्याणां दिक्" शत० ब्रा०१२८,१,६। "उदीचीनदशं वै तत्पवित्रं भवति" शत०ब्रा० १,७,१,१२।

उदीच्य त्रि० उदच्+भवार्थे यत् उदादेशः अल्लोपे दीर्घः

उत्तरदिग्देशकालभवे । "यशैरनैरिवोदीच्यानुद्धरिष्यन् रसानिव" रघुः । २कर्म्मसमाप्तौ कर्त्तव्ये दक्षिणादिदानादिरूपे कर्म्मादौ च । "अश्वतरीरथानुदीच्येषु" कात्या॰ २२,२,२५ । "अश्वतरीयुक्तान् रथानुदीच्येषु ददाति" कर्कः । यथा होमादौ प्रकृतहोमानन्तरं कर्त्तव्योदकाञ्जलिसेकादि । यथाह सं॰त॰ "अथोदीच्यकर्म्म, तत्र गोभिलः । "समिधमाधायानुपर्य्युक्ष्य तथैवोदकाञ्जलीन् सिञ्चेत् अन्वमंस्थाः" इति यथायथमूह्यम् । उदीच्यदेशाश्च शरावत्याः पश्चिमोत्तरस्था देशभेदास्ते च मत्स्यपुराणे दर्शिताः यथा "वाह्लीका वाटधानाश्च आभीराः कालतोयकाः । परन्ध्राश्चैव शूद्राश्च पल्लवाश्चात्तखण्डिकाः । गान्धारा यवनाश्चैव सिन्धुसौवीरमद्रकाः । शका द्रुह्याः पुलिन्दाश्च पारदा हारमूर्त्तिकाः । रामठाः कण्टकाराश्च कैकया दशमानिकाः । क्षत्रियोपनिवेशाश्च वैश्यशूद्रकुलानि च । आत्रेयोऽथ भरद्वाजः प्रस्थलाः सदशेरकाः । लम्पकास्तलगानाश्च सैनिकाः सहजाङ्गलैः एते देशा उदीच्यास्तु पुराणैः परिकीर्त्तिताः" । इत्युक्त॰ कूर्म्मविभागे तु अन्य एव ते उक्ता यथा "उत्तरतः कैलासो हिमवांश्च वसुमान् गिरिर्धनुष्मांश्च । क्रौञ्चो मेरुः कुरवस्तथोत्तराः क्षुद्रमीनाश्च । कैकयवसातियामुनभोगप्रस्थार्ज्जुनायनाग्नीध्राः । आदर्शान्तर्द्वीपित्रिगर्त्ततुरगाननाश्वमुखाः । केशधरचिपिटनासिकदासेरकशाटधानशरधानाः । तक्षशिलापुष्कलावतकैलावतकण्ठधानाश्च । अम्बरमद्रकमालवपौरवकच्छारदण्डपिङ्गलकाः । माणहलहूणकोहलशीतकमाण्डव्यभूतपुराः । गान्धारयशोवतिहेमतालराजन्यखचरगव्याश्च । यौधेयदासमेयाःश्यामाकाः क्षेमधूर्त्ताश्च" अनयोर्विरोधपरिहारः कल्पभेदात् नामान्तरात्तल्लेखाच्च बोध्यः ।

उदीच्यवृत्ति स्त्री "षड्विषमेऽष्टौ समे कलास्ताश्च समे स्युर्नो निरन्तराः । न समात्र पराश्रिता कला वैतालीयेऽन्ते रलौ गुरुः" इत्युपक्रम्य "उदीच्यवृत्तिर्द्वितीयलः सक्तोऽन्येन भवेद्युग्मयोः" वृ॰र॰उक्ते वैतालीयभेदे छन्दसि । [देशे ।

उदीप त्रि॰ उद्गता आपो यतः अच् समा॰ ईत्वम् । उद्गतजले

उदीरण न॰ उद्+ईर–ल्युट् । १उच्चारणे "उद्घातः प्रणवो यासां न्यायैस्त्रिभिरुदीरणम्" कुमा॰ । युच् तत्रैव स्त्री ।

उदीरित त्रि॰ उद्+ईर–क्त । १कथिते २उत्क्षिप्ते ३प्रेरिते च । "अभिवाममुदीरितेन्द्रियः" कुमा॰ । भावे क्त । ४कथने न॰ ।

उदीर्ण त्रि॰ उद्–ॠ–क्त । १उदिते २महति ३उत्क्षिप्ते च । "उदीर्णरागप्रतिरोधकं जुगुः" माघः । "भवल्लब्धवरोदीर्णस्तारकाख्यो महासुरः" कुमा॰ । ४विष्णौ पु॰ । "उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतःस्थिरः" विष्णु॰स॰ ।

उदुत्य न॰ उदुत्यमितिपदयुक्तम् । सूर्य्योपस्थानार्थे मन्त्रे स च सन्ध्याप्रयोगे दृश्यः "उद्वयन्तमुदुत्यञ्च चित्रं देवेति तत्परम् । तच्चक्षुरित्युपस्थानं मन्त्रा ज्ञेयस्य सिद्धिदाः । काशीख॰ ।

उदुम्बर पु॰ उडुम्बरवत् । (यज्ञडुमुर) १वृक्षे । २देहल्यां ३नपुंसके ४कुष्ठभेदे च ५ताम्रे न॰ । ६अशीतिरक्तिकापरिमिते कर्षे पु॰ । उडुम्बरशब्दे उदा॰ । "यदुदुम्बरवर्णानां घटीनां मण्डलं महत् । पीतं न गमयेत् स्वर्गं किन्तत् क्रतुगतं नयेत्" । सौत्रामणीयागे सुरापानदुष्टत्वबोधकम् । "ह्रीवेरचक्रमञ्जिष्ठोदुम्बरत्वक्सु साधितम्" । कच्छुरामूलकल्कं वा उदुम्बरफलोपमम्" सुश्रुतः । ७शाल्वजनपदावयवे च । "शाल्वावयवेत्यादि" पा॰ ततोभवाद्यर्थे इञ् । औदुम्बरि तद्भवे त्रि॰ "शाल्वावयवा उदुम्बरादयः" सि॰कौ॰ उदुम्बर एव स्वार्थे अण् तस्मिन् ग्रामे । "औदुम्बरकापित्थगजाह्वयश्चेति मध्यमिदम्" बृ॰सं॰ । उदुम्बरे कृमिः पात्रेसमि॰ स॰ । उदुम्बरकृमिः तन्मध्यस्थकृमौ । उदुम्बर इव मशकः पात्रेसमिता॰ स । स्थूलमशके पु॰

उदुम्बरदला स्त्री उदुम्बरस्येव दलमस्याः । दन्तीवृक्षे राजनि॰

उदुम्बरपर्णी स्त्री उदुम्बरपर्णीव पर्णम् न हत्वम् । तदर्थे

उदुम्बरावती स्त्री उदुम्बफलानि बाहुल्येन सन्त्यस्यां मतुप् संज्ञायां दीर्घः । नदीभेदे ।

उदुम्बल पु॰ उडुम्बरशब्दे रस्य वा लः । उडुम्बरे "अवेमन्नमुदुम्बलम् सुषड्वनस्तनयानुदम्" अथ॰८,६,१७, । उरुबलमस्य पृषो॰ । २विस्तीर्णबलयुक्ते त्रि॰ "उरुणसावसुतृपा उदुम्बलौ यमस्य दूतौ चरतो जनाँ अनु" ऋ॰१०,१४, १२, "उदुम्बलौ उरुबलौ विस्तीर्णबलौ" भा॰ ।

उदूखल न॰ ऊर्द्ध्वं खं लाति ला–क पृषो॰ नि॰ । तण्डुलादिकण्डनार्थं काष्ठादिरचिते १द्रव्ये, २गुग्गुलौ च । "अथाप्युदूखलं मुषलेनाभिहन्यात्" सुश्रु॰ । उद्धतोक्ते यातीरे २सन्धिभेदे पु॰ सन्धयश्च सुश्रु॰ दर्शिताः "कोरोदूखलसामुद्गप्रतरतुन्नसेवनी वायसतुण्डमण्डल शङ्खावर्त्ताः" इत्यष्टविधान् सन्धीनुक्त्वा "कक्षावङ्क्षणदशनेषूदूखलाः" इति उदूखलाकृतित्वाच्च तदस्थिकृतस्य तथात्वम् ।

उदूढ त्रि॰ उद्+वह–क्त । १ऊढे, २स्थूले, ३धृते च । "उदूढलोकत्रितयेमेति" माघः । "उदूढवक्षःस्थगितैकदिङ्मुखो" किरा॰ ४विवाहितस्त्रियां स्त्री ।

उद्दृच् स्त्री उत्कृष्टा ऋक् समासान्तविधेरनित्यत्वात् न समा० । उत्कृष्टायामृचि । "मा पातमास्य यज्ञस्योदृचः मा पाह्यं इव चाऽस्य यज्ञस्योदृचः" यजु० ४,९,१० "उदृचः उत्तमाया ऋचः पर्यन्तम्" वेददी०। यजुर्भिर्यज्ञस्योदृचं गच्छन्ति यज्ञस्योदृचं गच्छामीति" शत०ब्रा० ३,१,१.१२ उद्+ऋच–स्तुतौ क्विप् । २उदये "सत्याः सन्तु यजमानस्य कामाः इत्याह स वै कामो यजमानस्य यदनार्त्त उदृचं गच्छति" तैत्ति० "स्वस्ति ते देव सोम सुत्यामुदृचमशीय" इति०

उदेजय त्रि० उद्+एज–णिच्–खश् । उद्वेगकारके "उदेजयान् भूतगणान् न्यषेधीत्" भट्टिः । [उदकशब्दे उदा० ।

उदौदन पु० उदकेन सिद्ध ओदनः उदादेशः । जलमात्रसिद्धे

उद्गत त्रि० उद्+गम–क्त । १उदिते, २उत्पन्ने, "वयोऽतिपातोद्गतवातवेपिते" नैष० । ३ऊर्द्ध्वं गते, ४उद्वान्ते च ।

उद्गतशृङ्ग पु० उद्गतमुत्थितं शृङ्गमस्य । जातशृङ्गावस्थपशौ

उद्गति स्त्री उद्+गम–क्तिन् ।१उदये २ऊर्द्ध्वं गतौ ३उत्पत्तौ च ।

उद्गन्धि त्रि० उत्कृष्टो गन्धोऽस्य प्रा० ब० इत्कोप इत्समा०। १उत्कृष्टगन्धादौ २उत्कटगन्धयुक्ते च । "विजृम्भणोद्गन्धिषु कुड्मलेषु" रघुः ।

उद्गम पु० उद्–गम–घञ् अमन्तत्वात् न वृद्धिः । १उदये २ऊर्द्ध्वगतौ ३उद्भवे ४उन्नतौ च । "रोमोद्गमः प्रादुरभूदुमायाः" कुमा० "फलेन सहकारस्य पुष्पोद्गम इव प्रजाः" रघुः । "हरितत्पणोद्गमशङ्कया मृगीभिः" किरा० भावे ल्युट् । उद्गमनमप्यत्र न० "आङ उद्गमने" पा०

उद्गता स्त्री "सजसादिमे सलघुके च नसजगुरुकेष्वथोद्गता । अङ्घ्रिगतभनजलगागयुताः सजसा जगौ च चरणमेकतः पठेत्" छ०र० उक्ते विषमवृत्ते छन्दोभेदे ।

उद्गमनीय न० उद्+गम–अनीयर् । धौतवस्त्रद्वये "स्नपितस्तोद्गमनीयवस्त्रेति" कुमारः । "तत् स्यादुद्गमनीयं यद् धौतयोर्वस्त्रयोर्युगम्" इत्यमरव्याख्यायां युगमित्यविवक्षितम् इति मायवः वस्त्रमपि तदेवेति व्याख्याय क्षीरस्वामी इममेव श्लोकमुदाजहार । "गृहीतं पतिं प्रति उद्गमनीयं वस्त्रं यथेति मल्लि०। स्त्रीणां धौतवस्त्रधारित्वं लोकप्रसिद्धं वैदिके कर्म्मणि एवं हितवस्तां अतएव पतिं प्रतीतीत्यध्याहृत्य व्याख्यातम् । "धौतोद्गमनीयवाससी" दशकुमा० ।

उद्गाढ न० उद्+गाह–क्त । १अतिशये २आधिक्ये । ३अतिशययुक्ते त्रि० । "प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदयाः" सा०द० ।

उद्गातृ पु० उच्चैर्गायति साम उद्+गै–तृच् । १सामवेदगायके । अस्य च उद्गीथरूपसामावयवस्योच्चैर्गानादुद्गातृत्वम् । यथा चास्य तथात्वं तथा उद्गीथशब्दे वक्ष्यते । षोडशसु ऋत्विक्षु मध्ये २ऋत्विग्भेदे । ते च ऋत्विजः अच्छावाकशब्दे ५४पृ० दर्शिताः । "एवं हरेदथाध्वर्युर्मन्त्राधाने च वाजिनम् । होता चापि हरेदश्वमुद्गाता चाप्यनः क्रये" मनुः । राजसूये तस्य च दक्षिणाभेद उक्तः "सौवर्णीं स्रगुद्गातुः" आश्व० ९,४,६ । उद्गातृप्रशंसनपूर्व्वं तत्कर्म्म च शत०ब्रा० दर्शितं यथा । "गृणाति ह वा एतद्धोता यच्छंसति । तस्मा एतद्गृणते प्रत्येवाध्वर्युरागृणाति तस्मात् प्रतिगरो नाम । तं वै प्राङ्मासीनमाह्वयते सर्वे वा अन्य उद्गातुः प्राञ्च आर्त्विज्यं कुर्वन्ति तथो हास्यैतत् प्रागेवार्त्विज्यं कृतं भवति । प्रजापतिर्वा उद्गाता । योषाऽग्‌र्होता स एतत् प्रजापतिरुद्गाता योषायामृचि होतरि रेतः सिञ्चति यत् स्तुते तद्धोता शस्त्रेण प्रजनयति तच्छ्रात यथायं पुरुषः पितरञ्चदेनच्छ्रति तस्माच्छस्त्रं नाम" ४,२,१,१,२,३, । उद्गीथगानकर्त्तृत्वाच्च यथाऽस्योद्गातृत्वं तथोक्तं छा० उ०।"तस्यर्क् च साम च गेष्णौ तस्मादुद्गीथस्तस्मात्त्वेवोद्गातैतस्य हि गाता" "एवमेवोद्गातारमुवाचोद्गातः ! या देवतोद्गीथमन्वायत्ता तां चेदविद्वान् उद्गास्यसि मूर्द्धा ते विपतिष्यतीति" च । तथासामपूर्व्वकोद्गानस्य फलमपि तत्रोक्तं यथा "य एवदेवं विद्वान् साम गायति उभौ स गायति सोऽमुनैव स एव ये चामुष्मात् पराञ्चो लोकास्तांश्चाप्नोति देवकामांश्च अथानेनैवमेवैतस्मादर्वाञ्चो लोकास्तांश्चाप्नोति मनुष्यकामांश्च । तस्मादुहैवं विदुद्गाता ब्रूयात् कं ते काममागायानीति एष ह्येव कामागानस्येष्टे य एतदेवं विद्वान् साम गायति" छा० उ० ।

उद्गार पु० उद्+गॄ+ऋदोरप् बाधित्वा उन्न्योर्ग्रः" पा० घञ् । उद्वमने । "स्वर्जुरोत्सन्ननवनानां मदोद्गारसुगन्धिषु" रघुः । "सलिलोद्गारमुच्चैर्विमानाः" "धूमोद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति" मेघ०। "सनिर्भरोद्गार इवाद्रिराजः" रघुः । (ढेकुर) इति २कण्ठशब्दभेदे च । "धूमोद्गारे तथा वान्ते क्षुरकर्म्मणि मैथुने । स्नातके स्नातको चैवं नित्यं नैमित्तिकं त्यजेत्" आ०त० स्मृतिः । वमनप्रकारः निदानादिसहितः सुश्रुते दर्शितो यथा

"अथातो वमनविरेचनव्यापच्चिकित्सितं व्याख्यास्यामः । वैद्यातुरनिमित्तं वमनं विरेचनं च पञ्चदशधा व्यापद्यते तत्र वमनस्याधोगतिरूर्द्धं विरेचनस्येति पृथक् । समान-

रुभयोः सावशेषौषधत्वं जीर्णौषधत्वं हीनाधिकदोषापहृतत्वं वातशूलमयोगातियोगौ जीवादानमाध्मानं परिकर्त्तिका परिस्रावप्रवाहिका हृदयोपसरणं विबन्धः इति । तत्र बुभुक्षापीडितस्यातितीक्ष्णाग्नेर्मृदुकोष्ठस्य चानतिमात्रं दुर्ब्बलस्य वा गुणसामान्यभावाद्वमनमधोगच्छति । तत्रेप्सितानवाप्तिर्दोषोत्कर्षश्च तमाशु स्नेहयित्वा भूयस्तीक्ष्णतरैर्वामयेत् । अपरिशुद्धामाशयस्योत्क्लिष्टश्लेष्मणः सशेषान्नस्य वाऽहृद्यमतिप्रभूतविरेचनं पीतमूर्द्ध्वं गच्छति तत्राशुद्धामाशयस्तत्क्षणे श्लेष्माणमाशु वामयित्वा भूयस्तीक्ष्णतरैर्विरेचयेत् । आमान्वये त्वामवत्सु विधानम् । अहृद्येऽतिप्रभूते च हृद्यं प्रमाणं युक्तञ्च । अतऊर्द्ध्वमुत्तिष्ठत्यौषधे न तृतीयं पाययेत् । ततस्तेन मधुघृतफाणितयुक्तैर्लेहैर्विरेचयेत् । दोषविग्रथितमल्पमौषधमवस्थितमूर्द्धभागिकमधोभागिकं वा न स्रंसयति दोषान् । तत्र तृष्णापार्श्वशूलं छर्द्दिर्मूर्च्छापर्व्वभेदो हृल्लासारत्युद्गाराविशुद्धिश्च भवति । तमुष्णाभिरद्भिराशु वामयेत् । सावशेषौषधमतिप्रधावितदोषमतिबलमसम्यग्विरिक्तमप्येवं वामयेत् । क्रूरकोष्ठस्यातितीक्ष्णाग्नेरल्पमौषधमल्पगुणं वा भक्तवत्पाकमुपैति तत्र समुदीर्णा दोषा यथाकालमनिर्ह्रियमाणा व्याधिं बलविभ्रमञ्चापादयन्ति । तमनल्पममन्दमौषधञ्च पाययेत् । अस्निग्धस्विन्नेनाल्पगुणं वा भेषजमुपयुक्तमल्पान्दोषान् हन्ति । तत्र वमने दोषशेषः गौरवमुत्क्लेशं हृदयाविशुद्धिं व्याधिवृद्धिं करोति तत्र यथायोगं पाययित्वा वामयेद्दृढतरम् । विरेचनं गुदपरिकर्त्तनमाध्मानं शिरोगौरवमनिःसरणं वा वायोर्व्याधिवृद्धिं करोति । तमुपपाद्य भूयः स्नेहस्वेदाभ्यां विरेचयेद्दृढतरम् । दृढं बहुप्रचलितदोषं वा तृतीये दिवसेऽल्पगुणं चेति । अस्निग्धस्विन्नेन रूक्षमौषधमुपयुक्तमवचारिणा वा वायुं कोपयति । तत्र वायुः प्रकुपितः पार्श्वपृष्ठश्रोणिमन्यामर्म्मशूलं मूर्च्छां भ्रमं संज्ञानाशञ्च करोति । तमभ्यज्य धान्यस्वेदेन स्वेदयित्वा यष्टीमधुकविपक्वेन तैलेनानुवासयेत् । स्नेहस्वेदाभ्यामविभावितशरीरेणाल्पमौषधमल्पगुणं वा पीतमूर्द्ध्वमधो वा नाभ्येति दोषांश्चोत्क्लिश्य तैः सह बलक्षयमापादयति । तत्राध्मानं हृदयग्रहस्तृष्णा मूर्च्छा दाहश्च भवति तमयोगमित्याचक्षते तमाशु वामयेन्मदनफलकषायाम्बुभिर्विरेचयेत्तीक्ष्णतरैः यथावैव । दुर्वान्तस्य तु समुत्क्लिष्टा दोषा व्याप्य शरीरं कण्डूश्वयथुकुष्ठपिडकाज्वराङ्गमर्द्दनिस्तोदनानि कुर्व्वन्ति । ततस्तानवशेषान्महौषधेनापहरेत् । अस्निग्धस्विन्नस्य मृदुविरिक्तस्याधोनाभेः स्तब्धपूर्णोदरता शूलं वातपुरीषसङ्गः कण्डूमण्डलप्रादुर्भावो भवति तमास्थाप्य पुनः संस्नेह्य विरेचयेत्तीक्ष्णेन । नातिप्रवर्त्तमाने तिष्ठति वा दुष्टसंशोधने तत्रान्तेऽजमार्गमुष्णोदकं पाययेत् पाणितापैश्च पार्श्वोदरमुपस्वेदयेत् । ततः प्रवर्त्तन्ते दोषाः । अनुप्रवृत्ते चाल्पदोषे जीर्णौषधं बहुदोषमहःशेषं बलञ्चावेक्ष्य भूयोमात्रां विदध्यात् । अप्रवृत्तदोषं दशरात्रादूर्द्ध्वमुपसंस्कृतदेहं स्नेहस्वेदाभ्यां भूयः शोधयेत् । दुर्विरेच्यमास्थाप्य पुनः संस्नेह्य विरेचयेत् । ह्रीभयलोभैर्वेगाघातशीलाः प्रायशः स्त्रियो राजसमीपस्था वणिजः श्रोत्रियाश्च भवन्ति । तस्मादेते दुर्विरेच्या बहुवातत्वाद् अत एव तानतिस्निग्धान् स्वेदोपपन्नान् शोधयेत् । स्निग्धस्विन्नस्यातिमात्रमतिमृदुकोष्ठस्य वा तीक्ष्णाधिकदत्तमौषधमतियोगं कुर्य्यात् । तत्र वमनातियोगे पित्तातिप्रवृत्तिर्बलविस्रंसो वातकोपश्च बलवान् भवति तं घृतेनाभ्यज्यावगाह्यावगाह्य शीताम्बुशर्करामधुभिर्लेहैरुपचरेद्यथास्वम् । विरेचनातियोगे कफस्यातिप्रवृत्तिरुत्तरकालञ्च रक्तस्य तत्रापि बलविस्रंसो वातकोपश्च बलवान् भवति तमतिशीताम्बुभिः परिषिच्यावगाह्य वा शीतैस्तण्डुलाम्बुभिर्मधुमिश्रैश्छर्द्दयेत् । पिच्छावस्तिं चास्मै दद्यात् क्षीरसर्पिषा चैनमनुवासयेत् प्रियङ्ग्वादिं चास्मै तण्डुलाम्बुना पातुं प्रयच्छेत् । क्षीररसयोश्चान्यतरेण भोजयेत् । तस्मिन्नेव वमनातियोगे प्रवृत्ते शोणिते ष्ठीवति छर्द्दयति वा तत्र जिह्वानिःसरणमक्ष्णोर्व्यावृत्तिर्हनुसंहननं तृष्णा हिक्काज्वरौ वैसंज्ञमित्युपद्रवा भवन्ति तमजासृक्चन्दनोशीराञ्जनलाजचूर्णैः सशर्करोदकैर्मन्थं पाययेत् । फलरसैर्वा सघृतक्षौद्रशर्करैः शुङ्गाभिर्वा वटादीनां पेयां सिद्धां सक्षौद्रां वर्चोग्राहिभिर्वा पयसा जाङ्गलरसेन वा भोजयेत् अतिस्रुतशोणितविधानेनोपचरेत् । जिह्वामतिसर्पितां त्रिकटुकलवणचूर्णप्रघृष्टां तिलद्राक्षाप्रलिप्तां वा पीडयेत् प्रविष्टायामम्लमन्ये तस्य पुरस्तात् खादेयुः । व्यावृत्ते चाक्षिणी घृताभ्यक्ते पीडयेत् । हनुसंहनने वातश्लेष्महरं नस्यं स्वेदाश्च विदध्यात् । तृष्णादिषु च यथास्वं प्रतिकुर्वीत । विसंज्ञे वेणुवीणागीतस्वनं श्रावयेत्’’।

उद्गारस्याजीर्णरोगालक्षणमजीर्णशब्दे वक्ष्यते । अपथ्यादिभोजनहेतुकारणघटिताजीर्णं स्वरूपादि उच्यते उक्तम् । “प्रागभुक्ते त्वविविक्तेऽग्नौ द्विरन्नं न समाचरेत् । पूर्व्वभुक्ते विदग्धेऽन्ने भुञ्जानो हन्ति पावकम् । मात्रागुरुं परिहरे-

द्वाहारं द्रव्यतश्च यः । पिष्टान्नं नैव भुञ्जीत मात्रया वा बुभुक्षितः । द्विगुणञ्च पिबेत्तोयं सुखं सम्यक् प्रजीर्य्यति । पेयलेह्याद्यभक्ष्याणां गुरु विद्याद्यथोत्तरम् । गुरूणामर्द्धसौहित्यं लघूनां तृप्तिरिष्यते । द्रवोत्तरो द्रवश्चापि न मात्रागुरुरिष्यते । द्रवाढ्यमपि शुष्कन्तु सम्यगेवोपपद्यते । विशुष्कमन्नमभ्यस्तं न पाकं साधु गच्छति । पिण्डीकृतमसंक्लिन्नं विदाहमुपगच्छति । स्रोतस्यवबद्धे पित्तं पक्तौ वा यस्य तिष्ठति । विदाहि भुक्तमन्यद्वा तस्याप्यन्नं विदह्यते । शुष्कं विरुद्धं विष्टम्भि वह्निव्यापदमावहेत् । आमं विदग्धं विष्टब्धं कफपित्तानिलैस्त्रिभिः । अजीर्णं केचिदिच्छन्ति चतुर्थं रसशेषतः । अत्यम्बुपानाद्विषमाशनाद्वा सन्धारणात्स्वप्नविपर्य्ययाच्च । कालेऽपि सात्म्यं लघु चापि भुक्तमन्नं न पाकं भजते नरस्य । ईर्ष्याभयक्रोधपरिक्षतेन लुब्धेन रुग्दैन्यनिपीडितेन । प्रद्वेषयुक्तेन च सेव्यमानमन्नं न सम्यक् परिणाममेति । माधुर्य्यमन्नं गतमामसंज्ञं विदग्धसंज्ञं गतमम्लभावम् । किञ्चिद्विपक्वं भृशतोदशूलं विष्टब्धमाबद्धविरुद्धवातम् । उद्गारशुद्धावपि भक्तकाङ्क्षा न जायते हृद्गुरुता च यस्य । रसावशेषेण तु सप्रसेकं चतुर्थमेतत्प्रवदन्त्यजीर्णम् । मूर्च्छाप्रलापो वमथुः प्रसेकः सदनं भ्रमः । उपद्रवा भवन्त्येते मरणं चाप्यजीर्णतः। तत्रामे लङ्घनं कार्य्यं विदग्धे वमनं हितम् । विष्टब्धे स्वेदनं पथ्यं रसशेषे शयीत च । वामयेदाशु तं तस्मादुष्णेन लवणाम्बुना । कार्य्यं चानशनं तावद्यावन्न प्रकृतिं भजेत् । लघुकायमतश्चैनं लङ्घनैः समुपाचरेत् । यावन्न प्रकृतिस्थः स्याद्दोषतः प्राणतस्तथा । हिताहितोपसंयुक्तमन्नं समशनं स्मृतम् । बहु स्तोकमकाले वा विज्ञेयं विषमाशनम् । अजीर्णे भुज्यते यत्तु तदध्यशनमुच्यते । त्रयमेतन्निहन्त्याशु बहून् व्याधीन् करोति वा । अन्नं विदग्धं हि नरस्य शीघ्रं शीताम्बुना वै परिपाकमेति । तद्ध्यस्य शैत्येन निहन्ति पित्तमाक्लेदिभावाच्च नयत्यधस्तात् । विदह्यते यस्य तु भुक्तमात्रे दह्येत कृत्कण्ठगलञ्च यस्य । द्राक्षाऽभयां माक्षिकसम्प्रयुक्तां लीढ्वाऽभयां वा स सुखं लभेत । भवेदजीर्णं प्रति यस्य शङ्का स्निग्धस्य जन्तोर्बलिनोऽन्नकाले । प्रातः स शुण्ठीमभयामशङ्को भुञ्जीत सम्प्राश्य हितं हितार्थी । स्वल्पं यदा दोषविबद्धमामं लीनं न तेजःपथमावृणोति । भवत्यजीर्णेऽपि तदा बुभुक्षा सा मन्दबुद्धिं विषवन्निहन्ति ।

इत्यमजीर्णताकारणप्रदर्शनपूर्वमुद्गारशुद्धेः प्रकारस्तत्रैव दर्शितः यथा “या मात्रा परिजीर्य्येत चतुर्भागगतेऽहनि । सा मात्रा दीपयत्यग्निमल्पदोषे च पूजिता । या मात्रा परिजीर्य्येत तथार्द्धदिवसे गते । सा वृष्या बृंहणी चैव मध्यदोषे च पूजिता । या मात्रा परिजीर्य्येत चतुर्भागावशेषिते । स्नेहनीया च सा मात्रा बहुदोषे च पूजिता ॥ या मात्रा परिजीर्य्येत तथा परिणतेऽहनि । ग्लानिमूर्च्छामदान् हित्वा सा मात्रा पूजिता भवेत् । अहोरात्रादसन्दुष्टा या मात्रा परिजीर्यति । सा तु कुष्ठविषोन्मादग्रहापस्मारनाशिनी । यथाग्नि प्रथमां मात्रां पाययेत विचक्षणः । पीतो ह्यतिबहुस्नेहो जनयेत्प्राणसंशयम् । मिथ्याचाराद्बहुत्वाद्वा यस्य स्नेहो न जीर्यति । विष्टभ्य चापि जीर्यन्तं वारिणोष्णेन वामयेत् । जीर्णाजीर्णविशङ्कायां स्नेहस्योष्णोदकं पिबेत् । तेनोद्गारो भवेच्छुद्धो भक्तं प्रति रुचिस्तथा । स्नेहः पच्यमाने तृड्दाहभ्रमसादारतिक्लमाः । परिषिच्याक्षिरुण्णाभिर्जीर्णस्नेहं ततो नरम् । यवागूं पाययच्चोष्णां कामं स्निग्धाल्पतण्डुलाम् । देयौ यूषरसौ वापि सुगन्धी स्नेहवर्जितौ । अतो वात्यल्पसर्पिष्कौ यवागूर्वा विधीयते । पिबेत्त्र्यहं चतुरहं पञ्चाहं षडहं तथा । सप्तरात्रात्परं स्नेहः सात्मीभवति सेवितः” ।

उद्गारश्च नागवायुकार्य्यम् यथोक्तं पदार्था० योगार्णवे “उद्गारे नाग इत्युक्तो नीलजीमूतसन्निभः । उन्मीलने स्थितः कूर्म्मो भिन्नाञ्जनसमप्रभः । कृकरस्तु क्षुते चैव जवाकुसुमसन्निभः । जृम्भणे देवदत्तः स्यात् शुद्धस्फटिकसन्निभः । धनञ्जयस्तथा घोषे महारजतसप्रभः । ललाटे चोरसि स्कन्धे हृदि नाभौ त्वगस्थिषु । नागाद्या वायवः पञ्च देहे तु परिवेष्टिताः” । [जिरके शब्दचि० ।

उद्गारशोधन पु० उद्गारं शोधयति शुध–णिच्–ल्यु । कृष्ण-

उद्गारिन् त्रि० उद्+गॄ–णिनि स्त्रियां ङीप् । उद्गारयुक्ते । “यत्ते मौलौ कनककपिशं सौरभोद्गारि वासः” उद्भवदू० । “धारास्वनोद्गारिदरीमुखोऽसौ” रघुः । “यः पण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणाम्” मेघ० ।

उद्गिरण न० उद्+गॄ–ल्युट् नि० इत्वम् । १उद्वमने । उद्गारे (ढेकुर) २कण्ठस्वरभेदे च । “आध्मानमुद्गिरणमरसो विदाहोऽजीर्णस्य पानजनितस्य भवन्ति लिङ्गम्” सुश्रु० । उद्गारशब्दे विवृतिः ।

उद्गीति स्त्री उद्+गै-भावे क्तिन् । १उच्चैर्गाने कर्मणि क्तिन् । “आर्य्याशकलद्वितयं व्यत्ययरचितं भवेद्यस्याः । सोद्गीतिः किल गदिता तद्वद्युक्त्यंशभेदसंयुक्ता” वृ०र०उक्ते मात्रा-

छन्दोभेदे। उद्+गै–भावे क्त। उद्गीत उच्चैर्गाने न०।

उद्गीथ पु० उद्+गै–थक्। सामगानावयवभेदे।

"उद्गीथरम्यपदपाठरताश्च साम्नाम्" देवीम०। साम्नोहि पञ्चविधाः सप्तविधा वा अवयवाः। "प्रस्तावस्तत उद्गीथः प्रतिहार उपद्रवः। निधनं पञ्चधेत्याहुर्हिङ्कारः प्रणवस्तथा" माघ०भाष्यधृतवाक्यात्। तत्र साम्न आद्योभागः प्रस्तोत्रा गेयः प्रस्तावनामा। द्वितीयोभाग उद्गात्रा गेय उद्गीथनामा। तृतीयोभागः प्रतिहर्त्रा गेयः प्रतिहारनामा। चतुर्थोभागः पुनरुद्गात्रा गेय उपद्रवनामा। पञ्चभिर्युगपत् गेयः निधननामा इति पञ्चविधः। गानारम्भकाले सर्व्वैर्ऋत्विग्भिर्मिलित्वा हुङ्कारकरणरूपो हिङ्कारः, ओङ्कारपूर्व्वकत्वात् सर्व्वेषां वेदानां प्रणवरूपः प्रथमावयवः इति सप्तावयवत्वं तदेतत् छा०उप०दर्शितम् यथा "समस्तस्य खलु साम्न उपासनं साधु" इति साधुत्वोपन्यासेन "अग्निः प्रस्तावोऽन्तरिक्षमुद्गीथ आदित्यः प्रतिहारो द्यौर्निधनमित्यूर्द्ध्वेषु अथावृत्तेषु द्यौर्हिङ्कार आदित्यः प्रस्तावोऽन्तरिक्षमुद्गीथोऽग्निः प्रतिहारः पृथिवी निधनम्, । कल्पन्ते हास्मै लोका ऊर्द्ध्वाश्चावृत्ताश्च य एतदेवं विद्वाँल्लोकेषु पञ्चविधं सामोपास्ते" इत्यौ पञ्चविधस्योपासनमुक्तं तत्रैव

"वृष्टौ पञ्चविधं सामोपासीत पुरोवातो हिङ्कारो, मेघो जायते स प्रस्तावो, वर्षति स उद्गीथो, विद्योतते स्तनयति स प्रतिहारः, उद्गृह्णाति तन्निधनं, वर्षति हास्मै वर्षयति ह य एतदेवंविद्वान् वृष्टौ पञ्चविधं सामोपास्ते। सर्व्वास्वप्सु पञ्चविधं सामोपासीत मेघो यत् सम्प्लवते स हिङ्कारो, यद्वर्षति स प्रस्तावो, याः प्राच्यः स्यन्दन्ते स उद्गीथो, याः प्रतीच्यः स प्रतिहारः समुद्रो निधनम्। न हाप्सु प्रैत्यप्सुमान् भवति य एतदेवं विद्वान् सर्व्वास्वप्सु पञ्चविधं सामोपास्ते"।

ऋत्वादिषु पञ्चविधस्योपासनं तत्रैवोक्तम्

"ऋतुषु पञ्चविधं सामोपासीत वसन्तो हिङ्कारो, ग्रीष्मः प्रस्तावो, वर्षा उद्गीथः, शरत्प्रतिहारो, हेमन्तो निधनम्। कल्पन्ते हास्मा ऋतव ऋतुमान् भवति य एतदेवं विद्वानृतुषु पञ्चविधं सामोपास्ते"।

"पशुषु पञ्चविधं सामोपासीताजा हिङ्कारो,ऽवयः प्रस्तावो, गाव उद्गीथोऽश्वाः प्रतिहारः पुरुषो निधनम्। भवन्ति हास्य पशवः, पशुमान् भवति य एतदेवं विद्वान् पशुषु पञ्चविधं सामोपास्ते"

"प्राणेषु पञ्चविधं परोवरीयः सामोपासीत प्राणो हिङ्कारो, वाक् प्रस्ताव,श्चक्षुरुद्गीथः, श्रोत्रं प्रतिहारो, मनो निधनं, परोवरीयांसि वैतानि। परोवरीयो हास्य भवति परोवरीयसो ह लोकाञ्जयति य एतदेवं विद्वान् प्राणेषु पञ्चविधं परोवरीयः सामोपास्त इति तु पञ्चविधस्य"। वाचि सप्तविधस्य साम्न उपासनं तत्रैवोक्तम्

"अथ सप्तविधस्य वाचि सप्तविधं सामोपासीत यत्किञ्च वाचो हुं इति स हिङ्कारो, यत्प्रेति स प्रस्तावो, यदेति स आदिः, (प्रणवः)। यदुदिति स उद्गीथो, यत्प्रतीति स प्रतिहारो, यदुपेति स उपद्रवो, यन्नीति तन्निधनम्। दुग्धेऽस्मै वाग्दोहं यो वाचो दोहोऽन्नवानन्नादो भवति य एतदेवं विद्वान्वाचि सप्तविधं सामोपास्ते"।

आदित्ये सप्तविधस्योपासनं तत्रैवोक्तम्

"अथ खल्वमुमादित्यं सप्तविधं सामोपासीत सर्व्वदा समस्तेन साम। मां प्रति मां प्रतीति सर्व्वेण समः तेन साम। तस्मिन्निमानि सर्व्वाणि भूतान्यन्वायत्तानीति विद्यात्तस्य यत्पुरोदयात्स हिङ्कार,स्तदस्य पशवोऽन्वायत्तास्तस्मात्ते हिङ्कुर्व्वन्ति हिङ्कारभाजिनो ह्येतस्य साम्नः। अथ यत्प्रथमोदिते स प्रस्ताव,स्तदस्य मनुष्या अन्वायत्तास्तस्मात्ते प्रस्तुतिकामाः प्रशंसाकामाः प्रस्तावभाजिनो ह्येतस्य साम्नः। अथ यत्सङ्गववेलायां स आदिः (ओङ्कारः) तदस्य वयांस्यन्वायत्तानि तस्मात्तान्यन्तरिक्षेऽनारम्बणान्यादायात्मानं परिपतन्त्यादिभाजीनि ह्येतस्य साम्नः। अथ यत्सम्प्रति मध्यन्दिने स उद्गीथ,स्तदस्य देवा अन्वायत्तास्तस्मात्ते सत्तमाः प्राजापत्यानामुद्गीथभाजिनो ह्येतस्य साम्नः। अथ यदूर्द्ध्वं मध्यन्दिनात् प्रागपराह्णात्स प्रतिहार,स्तदस्य गर्भा अन्वायत्तास्तस्मात्ते प्रतिहृता नावपद्यन्ते प्रतिहारभाजिनो ह्येतस्य साम्नः। अथ यदूर्द्ध्वमपराह्णात् प्रागस्तमयात्स उपद्रव,स्तदस्यारण्या अन्वायत्तास्तस्मात्ते पुरुषं दृष्ट्वा कक्षं श्वभ्रमित्युपद्रवन्त्युपद्रवभाजिनो ह्येतस्य साम्नः। अथ यत्प्रथमास्तमिते तन्निधनं तदस्य पितरोऽन्वायत्तास्तस्मात्तान्निदधति निधनभाजिनो ह्येतस्य साम्नः। एवं खल्वमुमादित्यं सप्तविधं सामोपास्ते"।

अतिमृत्युफलाय सप्तविधसामोपासनं तत्रैवोक्तम्

"अथ खल्वात्मसम्मितमतिमृत्यु सप्तविधं सामोपासीत हिङ्कार इति त्र्यक्षरं प्रस्ताव इति त्र्यक्षरं तत्समम्। आदिरिति द्व्यक्षरं प्रतिहार इति चतुरक्षरं तत इहैकं तत्समम्। उद्गीथ इति त्र्यक्षरमुपद्रव इति चतु-

क्षरं त्रिभिस्त्रिभिः समं भवत्यक्षरमतिशिष्यते त्र्यक्षरं तत्समम् । निधनमिति त्र्यक्षरं तत्सममेव भवति, तानि ह वा एतानि द्वाविंशतिरक्षराणि । एकविंशत्यादित्यमाप्नोत्येकविंशो वा इतोऽसावादित्यो द्वाविंशेन परमादित्याज्जयति तन्नाकं तद्विशोकम् । आप्नोति हादित्यस्य जयं परो हास्यादित्यजयाज्जयो भवति य एतदेवं विद्वानात्मसम्मितमतिमृत्यु सप्तविधं सामोपास्ते सामोपास्ते" ।

पुनः पञ्चविधस्य मनआदिनाम्ना उपासनं तत्रोक्तं यथा "मनो हिङ्कारो वाक्प्रस्तावश्चक्षुरुद्गीथः श्रोत्रं प्रतिहारः प्राणो निधनमेतद्गायत्रं प्राणेषु प्रोतम् । स य एवमेतद्गायत्रं प्राणेषु प्रोतं वेद प्राणी भवति सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या, महामनाः स्यात्तद्व्रतम् । अभिमन्थति स हिङ्कारो धूमो जायते स प्रस्तावो ज्वलति स उद्गीथो ऽङ्गारा भवन्ति स प्रतिहार उपशाम्यति तन्निधनं संशाम्यति तन्निधनमेतद्रथन्तरमग्नौ प्रोतम् । स य एवमेतद्रथन्तरमग्नौ प्रोतं वेद ब्रह्मवर्चस्यन्नादो भवति सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या, न प्रत्यङ्ङग्निमाचामेन्न निष्ठीवेत्तद्व्रतम् । उपमन्त्रयते स हिङ्कारो ज्ञपयते स प्रस्तावः स्त्रिया सह शेते स उद्गीथः प्रतिस्त्री सह शेते स प्रतिहारः कालं गच्छति तन्निधनं पारं गच्छति तन्निधनमेतद्वामदेव्यं मिथुने प्रोतम् । स य एवमेतद्वामदेव्यं मिथुने प्रोतं वेद मिथुनीभवति मिथुनान्मिथुनात् प्रजायते सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या, न काञ्चन परिहरेत्तद्व्रतम् । उद्यन् हिङ्कारः उदितः प्रस्तावो मध्यन्दिन उद्गीथोऽपराह्णः प्रतिहारोऽस्तं यन्निधनमेतद्बृहदादित्ये प्रोतम् । स य एवमेतद्बृहदादित्ये प्रोतं वेद तेजस्व्यन्नादो भवति सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या, तपन्तं न निन्देत्तद्व्रतम् । अभ्राणि सम्प्लवन्ते स हिङ्कारो मेघो जायते स प्रस्तावो वर्षति स उद्गीथो विद्योतते स्तनयति स प्रतिहार उद्गृह्णाति तन्निधनमेतद्वैरूपं पर्जन्ये प्रोतम् । स य एवमेतद्वैरूपं पर्जन्ये प्रोतं वेद विरूपांश्च सुरूपांश्च पशूनवरुन्धे सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या वर्षन्तं न निन्देत्तद्व्रतम् । वसन्तो हिङ्कारो ग्रीष्मः प्रस्तावो वर्षा उद्गीथः शरत् प्रतिहारो हेमन्तो निधनमेतद्वैराजमृतुषु प्रोतम् । स य एवमेतद्वैराजमृतुषु प्रोतं वेद विराजति प्रजया पशुभिर्ब्रह्मवर्चसेन, सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या, ऋतून्न निन्देत्तद्व्रतम् । पृथिवी हिङ्कारोऽन्तरिक्षं प्रस्तावो द्यौरुद्गीथो दिशः प्रतिहारः समुद्रो निधनमेताः शक्वर्यो लोकेषु प्रोताः । स य एवमेताः शक्वर्यो लोकेषु प्रोता वेद लोकी भवति सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या, लोकान्न निन्देत्तद्व्रतम् । अजा हिङ्कारोऽवयः प्रस्तावो गाव उद्गीथोऽश्वाः प्रतिहारः पुरुषो निधनमेता रेवत्यः पशुषु प्रोताः । स य एवमेता रेवत्यः पशुषु प्रोता वेद, पशुमान् भवति सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या, पशून्न निन्देत्तद्व्रतम् । लोम हिङ्कारः त्वक् प्रस्तावो मांसमुद्गीथोऽस्थि प्रतिहारो मज्जा निधनमेतद्यज्ञायज्ञीयमङ्गेषु प्रोतम् । स य एवमेतद्यज्ञायज्ञीयमङ्गेषु प्रोतं वेदाङ्गी भवति नाङ्गेन विहूर्छति सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या, संवत्सरं मज्ज्ञो नाश्नीयात्तद्व्रतं मज्ज्ञो नाश्नीयादिति वा । अग्निर्हिङ्कारो वायुः प्रस्ताव आदित्य उद्गीथो नक्षत्राणि प्रतिहारश्चन्द्रमा निधनमेतद्राजनं देवतासु प्रोतम् । स य एवमेतद्राजनं देवतासु प्रोतं वेदैतासामेव देवतानां सलोकतां सार्ष्टितां सायुज्यं गच्छति सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या, ब्राह्मणान्न निन्देत्तद्व्रतम् । त्रयी विद्या हिङ्कारस्त्रय इमे लोकाः स प्रस्तावोऽग्निर्वायुरादित्यः स उद्गीथो नक्षत्राणि वयांसि मरीचयः स प्रतिहारः सर्पा गन्धर्वाः पितरस्तन्निधनमेतत्साम सर्वस्मिन् प्रोतम् । स य एवमेतत्साम सर्वस्मिन् प्रोतं वेद सर्वं ह भवति । तदेष श्लोको भवति 'यानि पञ्चधा त्रीणि तेभ्यो न ज्यायः परमन्यदस्ति । यस्तद्वेद स वेद सर्वं सर्वा दिशो बलिमस्मै हरन्ति' सर्वमस्मीत्युपासीत तद्व्रतम्" ।

एवं सामावयवानां तत्तद्दृष्ट्योपासनमुक्त्वा उद्गीथरूपावयवस्य ओङ्कारादिदृष्ट्योपासनमुक्तं तत्रैव यथा "ओमित्येतदक्षरमुद्गीथः तद्वा एतन्मिथुनं यद्वाक् च प्राणश्चर्क् च साम च । तदेतन्मिथुनमोमित्येतस्मिन्नक्षरे संसृज्यते यदा वै मिथुनौ समागच्छत आपयतो वै तावन्योन्यस्य कामम् । आपयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते । तद्वा एतदनुज्ञाक्षरं यद्धि किञ्चा-

वृजानात्योमित्येव तदाह एषो एव समृद्धिर्यदनुज्ञा समर्द्धयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते । तेनेयं त्रयी विद्या वर्त्तते ओमित्याश्रावयत्योमिति शंसत्योमित्युद्गायत्येतस्यैवाक्षरस्यापचित्यै महिम्ना रसेन । तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद । नाना तु विद्या चाविद्या च । यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्य्यवत्तरं भवतीति खल्वेतस्यैवाक्षरस्योपव्याख्यानं भवति"। तस्य प्राणदृष्ट्या उपासनमुक्तं तत्रैव "देवासुरा ह वै यत्र संयेतिरे उभये प्राजापत्यास्तद्ध देवा उद्गीथमाजह्रुरनेनैनानभिभविष्याम इति । ते ह नासिक्यं प्राणमुद्गीथमुपासाञ्चक्रिरे तं हासुराः पाप्मना विविधुः तस्मात्तेनोभयं जिघ्रति सुरभि च दुर्गन्धि च पाप्मना ह्येष विद्धः । अथ ह वाचमुद्गीथमुपासाञ्चक्रिरे तां हासुराः पाप्मना विविधुस्तस्मात्तयोभयं वदति सत्यञ्चानृतं च पाप्मना ह्येषा विद्धा । अथ ह चक्षुरुद्गीथमुपासाञ्चक्रिरे तद्धासुराः पाप्मना विविधुस्तस्मात्तेनोभयं पश्यति दर्शनीयं चादर्शनीयं च पाप्मना ह्येतद्विद्धम् । अथ ह श्रोत्रमुद्गीथमुपासाञ्चक्रिरे तद्धासुराः पाप्मना विविधुस्तस्मात्तेनोभयं शृणोति श्रवणीयञ्चाश्रवणीयञ्च पाप्मना ह्येतद्विद्धम् । अथ ह मन उद्गीथमुपासाञ्चक्रिरे तद्धासुराः पाप्मना विविधुस्तस्मात्तेनोभयं सङ्कल्पते सङ्कल्पनीयञ्चासङ्कल्पनीयञ्च पाप्मना ह्येतद्विद्धम् । अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासाञ्चक्रिरे तं हासुरा ऋत्वा विदध्वंसुर्यथाश्मानमाखणमृत्वा विध्वंसेत । एवं यथाश्मानमाखणमृत्वा विध्वंसत एवं हैव स विध्वंसते य एवंविदि पापं कामयते यश्चैनमभिदासति स एषोऽश्माखणः । नैवैतेन सुरभि न दुर्गन्धि विजानात्यपहतपाप्मा ह्येष तेन यदश्नाति यत्पिबति तेनेतरान् प्राणानवति । एतमु एवान्ततोऽवित्त्वोत्क्रामति व्याददात्येवान्तत इति"। अङ्गिरस्त्वेन तस्योपासनं तत्रैवोक्तम् यथा ।
"तं हाङ्गिरा उद्गीथमुपासाञ्चक्र एतमु एवाङ्गिरसं मन्यन्ते ऽङ्गानां यद्रसः । तेन तं ह बृहस्पतिरुद्गीथमुपासाञ्चक्र एतमु एव बृहस्पतिं मन्यन्ते वाग्घि बृहती तस्या एष पतिः । तेन तं हायास्यमुद्गीथमुपासाञ्चक्र एतमु एवायास्यं मन्यन्त आस्याद्यदयते । तेन तं ह बको दाल्भ्यो विदाञ्चकार । स ह नैमिषीयाणामुद्गाता बभूव स ह स्मैभ्यः कामानागायति । आगाता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते इत्यध्यात्मम्

अथाधिदैवतं य एवासौ तपति तमुद्गीथमुपासीतोद्यन् वा एष प्रजाभ्य उद्गायति । उद्यंस्तमो भयमपहन्त्यपहन्ता ह वै भयस्य तमसो भवति य एवं वेद । समान उ एवायञ्चासौ चोष्णोऽयमुष्णोऽसौ स्वर इतीममाचक्षते स्वर इति प्रत्यास्वर इत्यमुं तस्माद्वा एतमिमममुञ्चोद्गीथमुपासीत"।

तस्य व्यानत्वेनोपासनं तत्रैव यथा

"अथ खलु व्यानमेवोद्गीथमुपासीत यद्वै प्राणिति स प्राणो यदपानिति सोऽपानः । अथ यः प्राणापानयोः सन्धिः स व्यानो यो व्यानः सा वाक् । तस्मादप्राणन्ननपानन्वाचमभिव्याहरति । या वाक् सर्क् तस्मादप्राणन्ननपानन्नृचमभिव्याहरति यर्क् तत्साम तस्मादप्राणन्ननपानन् साम गायति यत्साम स उद्गीथस्तस्मादप्राणन्ननपानन्नुद्गायति । अतो यान्यन्यानि वीर्य्यवन्ति कर्म्माणि यथाग्नेर्मन्थनमाजेः सरणं दृढस्य धनुष आयमनमप्राणन्ननपानंस्तानि करोत्येतस्य हेतोर्व्यानमेवोद्गीथमुपासीत"।

उद्गीथाक्षराणां प्राणादित्वेनोपासनं तत्रोक्तम् ।

"अथ खलूद्गीथाक्षराण्युपासीत उद्, गी थ इति प्राण एवोत्, प्राणेन ह्युत्तिष्ठति वाग्गी, र्वाचो ह गिर इत्याचक्षतेऽन्नं थम्,अन्ने हीदं सर्वं स्थितम् । द्यौरेवोत्, अन्तरिक्षं गीः, पृथिवी थम्, आदित्य एवोत्, वायुर्गीरग्निस्थम्, सामवेद एवोत्, यजुर्वेदो गीः, ऋग्वेदस्थं, दुग्धेऽस्मै वाग्दोहं यो वाचो दोहः अन्नवानन्नादो भवति य एतान्येवं विद्वानुद्गीथाक्षराण्युपास्त उद् गी थ इति"।तस्य प्रणवत्वेनोपासनं तत्रैव "अथ खलु य उद्गीथः स प्रणवः स उद्गीथ इति होतृषदनाद्धैवापि दुरुद्गीतमनुसमाहरतीत्यनुसमाहरतीति"। तस्य परोवरीयस्त्वेनोपासनं तत्रोक्तं यथा

"त्रयो होद्गीथे कुशला बभूवुः शिलकः शालावत्यश्चैकितायनो दाल्भ्यः प्रवाहणो जैवलिरिति ते होचुरुद्गीथे वै कुशलाः स्मो हन्तोद्गीथे कथां वदाम इति । तथेति ह समुपविविशुः स ह प्रवाहणो जैवलिरुवाच भगवन्तावग्रे वदतां ब्राह्मणयोर्वदतोर्वाचं श्रोष्यामीति । स ह शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाच हन्त त्वा पृच्छानीति पृच्छेति होवाच । का साम्नो गतिरिति स्वर इति होवाच स्वरस्य का गतिरिति प्राण इति होवाच प्राणस्य का गतिरित्यन्नमिति होवाचान्नस्य का गतिरित्याप इति होवाच । अपां का गतिरित्यसौ लोक इति होवाच अमुष्य लोकस्य का गतिरिति न स्वर्गं लोक

मतिनयेदिति होवाच स्वर्गं वयं लोकं सामाभिसंस्थापयामः स्वर्गसंस्तावं हि सामेति । तं ह शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाचाप्रतिष्ठितं वै किल ते दाल्भ्य ! साम यस्त्वेतर्हि ब्रूयान्मूर्द्धा ते विपतिष्यतीति मूर्द्धा ते विपतेदिति । हन्ताहमेतद्भगवत्तो वेदानीति विद्धीति होवाच अमुष्य लोकस्य का गतिरित्ययं लोक इति होवाच अस्य लोकस्य का गतिरिति न प्रतिष्ठां लोकमतिनयेदिति होवाच प्रतिष्ठां वयं लोकं सामाभिसंस्थापयामः प्रतिष्ठासंस्तावं हि सामेति । तं ह प्रवाहणो जैवलिरुवाचान्तवद्वै किल ते शालावत्य ! साम, यस्त्वेतर्हि ब्रूयान्मूर्द्धा ते विपतिष्यतीति मूर्द्धा ते विपतेदिति हन्ताहमेतद्भगवत्तो वेदानीति विद्धीति होवाच । अस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यन्त्याकाशो ह्येवैभ्यो ज्यायानाकाशः परायणम् । स एष परो वरीयानुद्गीथः स एषोऽनन्तः परोवरीयो हास्य भवति परोवरीयसोह लोकान् जयति य एतदेवं विद्वान् परोवरीयांसमुद्गीथमुपास्ते । तं हैतमतिधन्वा शौनक उदरशाण्डिल्यायोक्त्वोवाच यावत्त एनं प्रजायामुद्गीथं वेदिष्यन्ते परोवरीयो हैभ्यस्तावदस्मिँल्लोके जीवनं भविष्यति । तथामुष्मिँल्लोके लोक इति स य एतमेवंविद्वानुपास्ते परोवरीय एव हास्यास्मिँल्लोके जीवनं भवति तथाऽमुष्मिँल्लोके लोक इति लोके लोक इति” उद्गीथस्य देवताऽपि तत्रोक्ता “अथ हैनमुद्गातोपससादोद्गातः या देवतोद्गीथमन्वायत्ता तां चेदविद्वानुद्गास्यसि मूर्द्धा ते विपतिष्यतीति मा भगवानवोचत् कतमा सा देवतेति । आदित्य इति होवाच सर्वाणि ह वा इमानि भूतान्यादित्यमुच्चैः सन्तं गायन्ति सैषा देवतोद्गीथमन्वायत्ता तां चेदविद्वानुदगास्यो मूर्द्धा ते व्यपतिष्यत्तथोक्तस्य मयेति”। अत्राकाशादित्यशब्दौ ब्रह्मपरौ आकाशस्तल्लिङ्गादित्यादि” शा० स्तू० भा० व्यवस्थापितम् ।

उद्गीर्ण त्रि० उद्+गॄ–क्त । १उद्वान्ते २उद्गमिते । “..दयमादर्शियामेतदनुद्गीर्णसुरायुधम्” कुमा० “वलयकुलिशोद्घट्टनोद्गीर्णतोयम्” मेघ०। [गुडाश्मभिः”स्तुतिः

उद्गूर्ण त्रि० उद्+गुरी–क्त । उद्यते उत्तोलिते “उद्गूर्णल

उद्ग्रथित त्रि० उद्+ग्रन्थ–क्त । उत्तोल्य ग्रथिते

उद्ग्रन्थ त्रि० उद्गतो ग्रन्थात् निरा०स० । १उन्मुक्ते २बन्धनोन्मुक्ते । उद्+ग्रन्थ–घञ् । ३उन्मोचने पु० ।

उद्ग्रभण न० उद्+ग्रह–ल्युट् वेदे हस्य वा भः । १उद्धृत्य ग्रहणे २ऊर्द्ध्वं विस्टहा दाने च “प्रतिमन्त्रञ्चोद्ग्रभणं तस्मिंस्तस्मिन्” कात्या० १६,५,११, भत्वाभावे उद्ग्रहणमप्यत्र । “तस्योद्ग्रहणायेव स्यात्” शत० ब्रा० १४,५,४,१२

उद्ग्राभ पु० उद्+ग्रह–घञ् वा वेदे हस्य भः । १उद्धृत्य ग्रहणे २ऊर्द्ध्वं विस्टहादाने च । “वाजस्य माप्रसव उद्ग्राभेणोदग्रभीत्” यजु० १७,६३, “उद्ग्राभेण ऊर्द्ध्वं विस्टहा दीयते इदग्रभणम् दानम्” वेददी०। भत्वाभावे उद्ग्राहोऽप्युक्तार्थे २वादभेदे च । उद्ग्राहमल्लः ।

उद्ग्राहिणी स्त्री उद्+ग्रह–णिनि ङीप् । पाशाख्यरज्जौ स्वार्थे कन् अतद्रूस्वम् । उद्ग्राहणिकाप्यत्र ।

उद्ग्राहित त्रि० उद्+ग्रह–णिच्–क्त । १उपन्यस्ते, २बद्धे ३उद्दीर्णे, ४प्रत्यायिते, ५ग्राहिते च मेदि०।

उद्घ पु० उद्+हन–अप् नि० । १हस्तपुटे, २वह्नौ, देहवायौ, ३प्रशंसायां ४प्रशस्ते च “पिप्रायाद्रिगुहोपघ्नानुद्घान् संघसमागताम्” भट्टिः । अस्य च प्रशंसावचनतया जातिवाचकेन “प्रशंसावचनैश्च” पा० समासे जातिवाचकस्य पूर्व्वनिपाते गवोद्घः अजोद्घ इत्यादि “उद्घादयश्च नियतलिङ्गा न तु विशेष्यलिङ्गाः” सि० कौ० ।

उद्घट्टन न० उद्+घट्ट–ल्युट् । उद्घर्षणेन चालने । युच् । उद्घट्टनापि तत्रैवार्थे स्त्री । “तत्रावश्यं वलयकुलिशोद्घट्टनोद्गीर्णतोयम्” मेघ० ।

उद्घन पु० ऊर्द्ध्वं निवेश्य हन्यतेऽत्र उद्+हन–आधारे अप् नि० । काष्ठादितक्षणसाधनेऽधःस्थकाष्ठादौ यदुपरि निधाय काष्ठादिकं हन्यते तत्र । “लौहोद्घनघनस्कन्धा ललितापघनां स्त्रियम्” भट्टिः ।

उद्घर्षण न० उद्+घृष–ल्युट् । इष्टकादिकठिनादिद्रव्यैः गात्रादिमार्ज्जने । “उद्घर्षणं तु विज्ञेयं कण्डूकोटमलापहम्” सुश्रु० “शिरामुखविविक्तत्वं त्वक्स्थस्याग्नेश्च तेजनम् । उद्घर्षणोत्सादनाभ्यां जायेयातामसंशयम्” सुश्रु० । घञ् उद्घर्षोऽप्यत्र पु० ।

उद्घस न० उद्+घस कर्म्मणि अच् । मांसे हारा० ।

उद्घाट पु० उद्घाट्यते प्रच्छादितवस्तु दर्शनार्थमत्र उद्+घट–णिच्–आधारे अच् । प्रच्छादितस्य पण्यादिद्रव्यस्य दर्शनार्थोद्घाटनाधारे राजस्थापिते गृहभेदे (चौकीघर)

उद्घाटक पुं न० ०द्+घट–णिच्–ण्वुल् । कूपात् जलोद्धारणार्थे (अरघट्) (घुरना) इति ख्याते यन्त्रभेदे । उद्घाटनकारिणि त्रि० णिनि तत्रैव स्त्रियां ङीप् । “उद्

घाटिनी कुञ्चिका” शब्दरत्ना० करणे ल्युट् । उद्घाटन तत्साधने न० । भावे ल्युट् । उद्घाटन प्रतिबन्धनिरासे, कृतबन्धस्य बन्धापकरणे च न० (खोला)।

उद्घाटित त्रि० उद्+घट–णिच्–क्त । १अपावृते आच्छादन-रहिते प्रकाशिते आवरणरहिते कृतोद्घाटने ।

उद्घाटितज्ञ पु० उद्घाटितं प्रकाशितं यथा तथा जानाति ज्ञा–क । विज्ञे ।

उद्घात पु० उद्+हन–घञ् । (ठोकरलागा) १प्रतिघाते । “यथावदुद्घातसुखेन मार्गम्” रघुः । “यथावदुद्घातसुखेन सोऽध्वना” माघः । “उद्घातिनो भूमिरिति रश्मिसंयमनात्” शकु० । “प्राणेन प्रेर्यमाणेन अपानः पीड्यते यदि । गत्वा चोर्द्ध्वं निवर्त्तेत एतदुद्घातलक्षणम्” इत्युक्ते २प्राण-वायुनाऽपानाभिघाते । नाभिमूलात् प्रेरितस्य वायोः शिरस्यभिहननमुद्घात इत्युच्यते ।३आरम्भे “उद्घातः प्रणवो याषाम्” कुमा० “आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः” रघुः । ४उत्तुङ्गे ५मुद्गरे ६शास्त्र-ग्रन्थपरिच्छेदे ।

उद्घुषित त्रि० उद्+घुष–रवे क्त । १कृतोद्घोषे २प्रकटिता-भिप्राये वाक्ये न० अशब्दे तु उद्घुष्ट । उद्घट्टे मेदि० ।

उद्घोष पु० उद्+घुष–घञ् । उच्चशब्दकरणे “दोषोद्घोष भ्रूविभेदावज्ञाक्रोधेङ्गितादिकृत्” सा०द० ।

उद्दंश पु० उद्दशति उद्+दन्श–अच् । मत्कुणदंशके (उकुण) कीटभेदे ।

उद्दण्ड त्रि० दण्डोद्गमनम् नियमनम् उत्क्रान्तोदण्डम् अत्या०स० । १प्रचण्डे । उन्नतो दण्डो यस्य । २उन्नत-दण्डयुक्ते त्रि० “उद्दण्डपद्म गृहदीर्घिकाणाम्” रघु० । “उद्दण्डधवलच्छत्रः” हितो० । प्रा०स० । ३उन्नतदण्डे पु०

उद्दण्डपाल पु० उन्नतदण्ड उद्दण्डः सदव पाल्यते पाल-कर्मणि घञ् । उन्नतदण्डाकारे १सर्पभेदे २मत्स्यभेदे च मेदि०

उद्दन्तुर त्रि० उत्तुङ्गे । १उन्नते २उच्चदन्तान्विते च ।

उद्दान न० उद्+दो–भावे ल्युट् । १बन्धने अमरः “उद्दाने क्रियमाणे तु मत्स्यानां तत्र रज्जुभिः” भा०शा०१२७अ० २उद्यमे ३चुल्ल्यां ४वाडवानले ५मध्ये ६लग्ने च पु०विश्वः

उद्दान्त त्रि० उद्+दम–क्त । अतिदमिते ।

उद्दाम त्रि० उद्गतं दाम्नः अच् समा० । १बन्धनरहिते, “गन्ध-मुद्धतमुद्दामो वने मत्त इव द्विपः” भा०व०१४६अ० । अप्रतिनियमे २स्वतन्त्रे ३अत्युग्रे च । “उद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि” मेघ० “नदत्याकाश गङ्गायाः स्रोतस्युद्दामदिग्गजे” रघुः उत्कृष्टं श्रेष्ठं दाम पाशाख्य-मस्त्रं यस्य ।४वरुणे पु०४गम्भीरे त्रि० “उद्दामभाव-पिशुनामलवद्गुणाख्यामित्यादि” भाग०३स्क० । ६दण्डकभेदे छन्दोभेदे पु० “यदि न युगलं ततः सप्तरेफास्तदा दण्डवृद्धिं प्रयातो भवेद्दण्डकः । प्रतिचरणविवृद्धरेफाः स्युरर्णार्णव व्यालजीमूतलीलाकरोद्दामशङ्खादयः” इति वृत्तर० ।

उद्दाल पु० उद्+दल+णिच्–अच् । १बहुवारकवृक्षे, २वनको-द्रवे “भोज्याः पुराणश्यामाककोद्रवोद्दालशालयः” सुश्रु०

उद्दालक पु० उद्दलयति भूमिमुद्भिनत्ति+उद्+दल–णिच्-ण्वुल् । १वनकोद्रवे सुश्रु० तु शिलाजत्वित्याद्युपक्रम्य “मधुकोरदूषकश्यामाकोद्दालकादीनां विरूक्षणच्छेदनीया-नाञ्च द्रव्याणां विधिवदुपयोगः” “अथ सर्वेषां प्राणिनामन्न-माहारार्थं वर्गं उपदिश्यते । तद्यथा रक्तशालिषष्टि-कगङ्गुकुन्दकपाण्डुकपीतकप्रमोदककालकाशनकपुष्पक-कर्द्दमकशकुनाहृतसुगन्धकलमनीवारककोद्रवोद्दालकश्यामाक-गोधूमवेणुयवादयः” इति च सुश्रुतः । आयोदधौ-म्यशिष्ये आरुणौ २ऋषिभेदे । तस्य तन्नामकत्व-प्राप्तिः भा० आ० ३अ० उक्ता “यथा एत-स्मिन्नन्तरे कश्चिदृषिर्धौम्यो नामायोदधौम्यस्तस्य शिष्यास्त्रयो बभूवुः उपमन्युरारुणिर्वेदश्चेति । स एकं शिष्यमारुणिं पाञ्चाल्यं प्रेषयामास गच्छ केदारखण्डं बधानेति । स उपाध्यायेन संदिष्ट आरुणिः पाञ्चाल्यस्तत्र गत्वा तत् केदारखण्डं बद्धुं नाशकत् । स तत्र क्लिश्यमानोऽप-श्यदुपायं भवत्वेवं करिष्यामीति । स तत्र संविवेश । के-दारखण्डे शयाने च तथा तस्मिंस्तदुदकं तस्थौ । ततः कदाचिदुपाध्याय आयोदो धौम्यः शिष्यानपृच्छत् क्व आरुणिः पाञ्चाल्यो गत? इति । ते तं प्रत्यूचुर्भगवन् ! प्रेषितो गच्छ केदारखण्डं बधानेति । स एवमुक्तस्तान् शिष्यान् प्रत्युवाच तस्मात् तत्र सर्वे गच्छामो यत्र स गत इति । स तत्र गत्वा तस्याह्वानाय शब्दञ्चकार । भो आरुणे! पाञ्चाल्य क्वासि वत्स ! एहीति । स तच्छ्रु-त्वारुणिरुपाध्यायवाक्यं तस्मात् केदारखण्डात् सहसा उत्थाय तमुपाध्यायमुपतस्थे । प्रोवाच चैनमयमस्म्यत्र केदारखण्डे निःसरमाणमुदकमवारणीयं संरोद्धुं संविष्टो भगवच्छब्दं श्रुत्वैव सहसा विदार्य्य केदारखण्डं भवन्तमुप-स्थितः । तदभिवादये भगवन्तमाज्ञापयतु भवान् कमर्थम् करवाणीति । स एवमुक्त उपाध्यायः प्रत्युवाच यस्मात् भवान् केदारखण्डं विदार्योत्थितः तस्मादुद्दालक एव

नाम्ना भवान् भविष्यतीति उपाध्यायेनानुगृहीतः"। "उद्दालकोहारुणिः श्वेतकेतुं पुत्रमुवाच" छा॰उ॰ "उद्दालकाद्युद्दालकोऽरुणादरुण" इति छ॰उ॰।

उद्दालकपुष्पभञ्जिका स्त्री उद्दालकानां पुष्पाणि भज्यन्ते यत्र क्रीड़ायाम् ण्वुल्। क्रीड़ाविशेषे यत्र उद्दालकपुष्पभञ्जनं क्रियते तस्यां क्रीड़ायाम्।

उद्दालकव्रत न॰ उद्दालकं पापनाशकं व्रतम्। पतितसावित्रीकस्य कार्य्ये वशिष्ठोक्ते व्रतभेदे "पतितसावित्रीक उद्दालकव्रतं चरेत्। द्वौ मासौ यावकेन वर्त्तयेन्मासं माक्षिकेणाष्टरात्रं घृतेन षड्रात्रमयाचितं त्रिरात्रमब्भक्षोऽहोरात्रमुपवसेत् इति" वशिष्ठः। मिता॰प्रा॰वि॰ उद्दालव्रतमित्येव पाठः संहितायान्तु उद्दालकेति पाठः प्रामादिकः।

उद्दालकायन पु॰ उद्दालकस्य गोत्रापत्यं फक्। ऋषिभेदे श्वेतकेतौ। तस्य तत्पुत्रत्वमुद्दालकशब्दे उक्तम्।

उद्दालवत् पु॰ उद्दालो मूकेदारभेदः प्रकाशस्थानतया विद्यतेऽस्य मतुप्। उद्दालके ऋषौ। "यत्रमान् कश्चिदुद्दालवान् धानान्तर्वान्" शत॰ब्रा॰ ११,२२,९।

उद्दास पु॰ उद्+दास-घञ्। उत्पीड़ने ततः बला॰ अस्त्यर्थे मतुप् इनिर्वा। उद्दासवत् उद्दासिन् तद्वति त्रि॰ स्त्रियां ङीप्।

उद्दित त्रि॰ उद्+दो–क्त। बद्धे भरतः

उद्दिष्ट त्रि॰ उद्+दिश–क्त। १उपदिष्टे, २अभिलषिते "तत् समुद्दिष्टं कर्म" संक्षिप्तसारः छन्दःशास्त्रोक्ते निर्द्धारितगुर्व्वादिस्थितिकभेदस्य प्रस्तारे कतमसंख्यकत्वज्ञानार्थे ३उपायभेदे न॰। तत्प्रकारो यथा "उद्दिष्टं द्विगुणानाद्यादुपर्य्यङ्कान् समालिखेत्। लघुस्था ये तु तत्राङ्कास्तैः सैकैर्मिश्रितैर्भवेत्" वृत्तर॰। आद्यात् आद्यवर्णमारभ्य उपरि यथोत्तरं द्विगुणान् द्विगुणान् अङ्कान् समालिखेत् तत्र लघुवर्णोपरिस्थाङ्कैर्मिलितैः एकेन युक्तैः उद्दिष्टं स्यात्। यथा त्र्यक्षरप्रस्तारे मध्यगुरुको भेदः प्रस्तारे कियत्संख्यक इति प्रश्ने यथोत्तरं द्विगुणान् द्विगुणान् अक्षरसंख्यया अङ्कान् दद्यात् तत्र आद्यलघूपरिस्थेनैकाङ्केन तृतीय लघूपरिस्थचतुरङ्केण योगे पञ्चाङ्कः एकेन युक्तः षड़ङ्कः संपद्यते एवञ्च षष्ठोऽयं भेदइत्युत्तरम्। एवमन्यत्र कल्प्यम्। सर्वगुरुकभेदे तु लघुवर्णाभावात् योजकाङ्काभावेन एकमात्रेण योज्याङ्केन प्रथमोभेद इत्यूह्यम्। मात्रावृत्ते उद्दिष्टं विस्तरभयान्नोक्तमाकरे द्रष्टव्यम्।

उद्दीपक त्रि॰ उद्+दीप–णिच् ण्वुल्। उद्भासके प्रकाशके।

उद्दीपन न॰ उद्+दीप–णिच्–ल्युट्। १प्रकाशने, २उत्तेजने च। ल्यु। अलङ्कारोक्ते रसाद्युद्दीपके "उद्दीपनविभावास्ते रसमुद्दीपयन्ति ये" "रत्याद्युद्बोधकालोके विभावाः काव्यनाट्ययोः। आलम्बनोद्दीपनाख्यौ तस्य भेदावुभौ स्मृतौ" आलम्बनस्य चेष्टाद्या देशकालादयस्तथा" सा॰द॰ उक्ते आलम्बनस्य ३चेष्टादौ विभावे यथा शृङ्गारे रसे "चन्द्रचन्दनरोलम्बरुताद्युद्दीपनं मतम्" हासे "विकृताकारवाक्चेष्टं यदालोक्य हसेज्जनः। तदत्रालम्बनं प्राहुस्तच्चेष्टोद्दीपनं मतम्"। करुणे "शोकोऽत्र स्थायिभावः स्याच्छोच्यमालम्बनं मतम्। तस्य दाहादिकावस्था भवेदुद्दीपनं पुनः"। वीरे "आलम्बनविभावास्तु विजेतव्यादयोमताः। विजेतव्यादिचेष्टाद्यास्तस्योद्दीपनरूपिणः"। भयानके "यस्मादुत्पद्यते भीतिस्तदत्रालम्बनं मतम्। चेष्टा घोरतरास्तस्य भवेदुद्दीपनं पुनः"। जुगुप्सायाम् "दुर्गन्धमांसपिशितमेदांस्यालम्बनं मतम्। तत्रैव कृमिपाताद्यमुद्दीपनमुदाहृतम्"। अद्भुते "पीतवर्णो, वस्तु लोकातिगमालम्बनं मतम्। गुणानां तस्य महिमा भवेदुद्दीपनं पुनः"। शान्ते "परमात्मस्वरूप वा तस्यालम्बनमिष्यते। पुण्याश्रमहरिक्षेत्रतीर्थरम्यवनादयः। महापुरुषसङ्गाद्यास्तस्योद्दीपनरूपिणः" सा॰द॰।

उद्दीप्त त्रि॰ उद्+दीप–क्त। प्रकाशान्विते।

उद्दीप्र पु॰ उद्+दीप्-रन्। १गुग्गुलौ वाच २उद्दीप्ते त्रि॰।

उद्दृप्त त्रि॰ उद्+दृप–क्त। उद्धते गर्व्वान्विते

उद्देश पु॰ उद्+दिश+घञ्। १अनुसन्धाने, २अन्वेषणे, ३अभिलाषे ४उपदेशे च। आधारे घञ्। ५उपदेशदेशे "यथोद्देशं संज्ञापरिभाषम्" व्या॰परिभाषा। व्याख्यातैषा नागेशेन "उद्देशमनतिक्रम्य यथोद्देशम्। उद्देश उपदेशदेशः। अधिकरणसाधनश्चायम्। यत्र देशे उपदिश्यते तद्देश एव वाक्यार्थबोधेन गृहीतसत्तया गृहीतपरिभाषार्थेन च सर्वत्र शास्त्रे व्यवहारः। देशश्चोच्चारणकाल एवात्र शास्त्रे व्यवह्रियते। तत्तद्वाक्यार्थबोधे जाते भविष्यति किञ्चिदनेन प्रयोजनमिति ज्ञानमात्रेण सन्तुष्यद्यथान्वयप्राहिप्रतिपत्त्यपेक्षोऽयम्" इति "इदित्"पा॰१,१,११ सूत्रे कैयटः। केचित्तु परिभाषाविषये "तस्मिन्"पा॰१,१,६६ इत्यादिवाक्यार्थबोधे अप्रमोनिर्द्देशादिकेति पर्य्यालोचनायां सकलतद्विध्युपस्थितौ सकलतत्संस्काराय गुणभेदं परिकल्प्य कशाक्यतयैव नियमः। कार्य्यकालपक्षे तु त्रिपाद्यामप्युपस्थितिरिति विशेषः। एतद्देशाभिप्रेत्य "अधिकारो नाम त्रिप्रकारः कश्चिदेकदेशस्थः सर्वशास्त्रमभिज्वलयति यथा प्र-

दीपः सुप्रज्वलितः सर्वं वेश्माभिज्वलयतीति" "षष्ठी स्थाने" [१,१,४९ इति पा० सूत्रे भाष्य उक्तम्। अधिकारशब्देन पारार्थ्यात् परिभाषाप्युच्यते।"कश्चित्परिभाषारूप" इति कैयटः। दीपो यथा प्रभाद्वारा सर्वगृहप्रकाशक एवमेतत्त्वबुद्धिजननद्वारा सर्वशास्त्रोपकारकमिति तत्तात्पर्यम्। एतच्च पक्षद्वयसाधारणं भाष्यं, पक्षद्वयेऽपि प्रदेशैकवाक्यताया इतः प्रतीतेः। तत्रैतावान्विशेषः। यथोद्देशे परिभाषादेशे सर्वविधिस्थलानुद्भाव्य भेदं परिकल्प्य तैरेकवाक्यतापरिभाषणम्। तदुक्तं "क्ङिति च" १,१,५ पा० इति सूत्रे कैयटेन। "यथोद्देशे प्रधानान्यात्मसंस्काराय संनिधीयमानानि गुणभेदं प्रयुञ्जत इति"। कार्य्यकाले तु तत्तद्विधिप्रदेशे परिभाषावुद्धेरुपकतेति। अत्रैकदेशस्य इत्यनेन तत्र तत्र तत्तद्बुद्धावपि तत्तद्देशस्थत्वं वारयति यथा व्यवहर्तॄणां कार्य्यार्थमनेकदेशगमनेऽपि न तत्तद्देशीयत्वव्यवहारः किं त्वभिजनदेशीयत्वव्यवहार एव तद्वत्"।

६संक्षेपे "एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया" गीता "समासकथनमुद्देशः इति सुश्रुतोक्ते ७तन्त्राधिकरणभेदे। उत्कृष्टोदेशः प्रा०स०। ७उत्कृष्टदेशे च "नवने नन्दनोद्देशे न चैत्ररथसंश्रये" रामा०।"अस्ति कश्चिद्वनोद्देशे" हितो०भूरिप्रयोगः ततस्तसिल्।उद्देशादित्याद्यर्थे अव्य०।

उद्देशक पु० उद्+दिश-ण्वुल्। १उपदेशके २उदाहरणवाक्ये च। "अत्रोद्देशक इति" लीला० भूरिप्रयोग०। ३प्रश्नके "उद्देशकालापर्वादिद्वाराणि" लीला० इष्टकर्म्म शब्दे ९९१पृ० दृश्यम्। 'उद्देशेन पूजाभिसन्धिना दीपितः कन्। पूजाद्यभिसन्धिना दीपिते इत्यादौ "चैत्यमायतने बहुविप्रोद्देशकहस्तयोः" त्रिका० इति केचित् उद्देशशब्देन बहुव्रीहौ कप् इति तु न्याय्यम्।

उद्देश्य त्रि०उद्+दिश-ण्यत्। १अभिसन्धेये यमुद्दिश्य विधेयप्रवृत्तिस्तस्मिन् २अनुवाद्ये। उद्देश्यविधेयभावस्थले "अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेत्" इति नियमात् उद्देश्यवाचकस्य प्राक् प्रयोगः यथा पर्वतो वह्निमान्। वह्निः पर्वते इत्यादौ तु वह्नेरेवोद्देश्यत्वं पर्वतवृत्तित्वं तत्र विधेयम्।अतएव "न्यक्कारोह्ययमेव मे यदरयः" इत्यादौ अयंपदस्य उद्देश्यवाचितयादौ प्रयोगौचित्येन परतः प्रयोगात् वाक्यगतविधेयाविमर्षदोष इति समर्थितमालङ्कारिकैः। 'वृद्धिरादैच् इति" पा० सूत्रेऽपि तथैव भाष्यकृताङ्गीकृत्य मङ्गलार्थमेव तथाप्रयोग इत्युक्तम् यथा 'एतदेकमाचार्य्यस्य मङ्गलार्थं मृष्यताम्। माङ्गलिक आचार्य्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते। मङ्गलादीनि च शास्त्राणि प्रथन्ते वीरपुरुषकाणि भवन्त्यायुष्मत्पुरुषाणि च अध्येतारश्च वृद्धियुक्ता यथा स्युरिति। सर्व्वत्रैव हि व्याकरणे पूर्व्वोच्चरितः संज्ञी परोच्चारितः संज्ञेति "अदेङ् गुणः" इति यथेत्यन्तेन। उद्देश्यविधेयभावेनान्वयस्थले विवक्षया उभयलिङ्गवचनानुसारेण प्रयोगः यथा वेदाः प्रमाणं भवति भवन्ति वा।"अमानि तत्तेन निजायशोयुगं द्विफालबद्धाश्चिकुराः शिरःस्थिताः" "मखदगोष्ठमपीप मनोभुवा तदुपमाः कुसुमान्यखिलाः शराः" इति नैषधे उभयथैव प्रयोगः। व्युत्पत्तिवादे तु गदाधरेण उद्देश्यवचनानुसारेणैव वचनादिप्रयोग इति महतायासेन व्यवस्थापितं तच्च तत एवावसेयम्। "उद्देश्यप्रतिनिर्देश्यव्यतिरिक्तविषयत्वात्"सा०द०। उद्देश्यमेव प्रतिनिर्देश्यम् प्राग् विधेयस्योद्देश्यतया पुनर्निर्देशकर्म्म इत्यर्थः यथा 'उदेति सविता ताम्रस्ताम्र एवास्तमेति च" इत्युदाहृतौ प्राक् विधेयस्य ताम्रस्य अस्ततागुणविधानार्थं पुनः प्रतिनिर्देशात् कथितपदत्वं न दोषायेति तदाशयः। तदन्यत्रैव तस्य दोष इति बोध्यम्।

अनुवाद्यता च प्रमाणान्तरसिद्धस्य किञ्चिद्धर्म्मविधानार्थम् पुनरुपन्यास्यता यथा पर्व्वतोवह्निमान् इत्यादौ पर्वतरूपोद्देश्यस्य सिद्धत्वेऽपि वह्निमत्त्वरूपधर्मविधानार्थमुपन्यासः। ततो भावे तल्। उद्देश्यता स्त्री त्व। उद्देश्यत्व न०। विषयताविशेषे सा च अनुमितौ शाब्दबोधे च विशेष्यतारूपा प्रवृत्तौ तु स्वजनकेच्छाविषयत्वरूपा "स्वर्गकामो यजेतेत्यादि" वाक्यजनितेष्टसाधनताज्ञानतः स्वर्गफलोद्देशेनैव यागे प्रवृत्तेः इति स्वर्गस्य तत्रोद्देश्यता एवमन्यत्राप्यूह्यम्। इच्छाविषयत्वे च "अवच्छेदावच्छेदन साध्यसिद्धेरुद्देश्यत्वे" गदा०। [मितिदोषभेदे

उद्देश्यासिद्धि स्त्री ६त०। अनुमितृशितस्वाश्रितरूपे अनु-

उद्देहिका स्त्री उद्गतो देहोऽस्य कप् अत इत्वम्। कीटभेदे हारा०।

उ(द्यो)द्योत पु० उद्+द्युत-घञ् वा दलोपः। विशिष्टप्रकाशे "त्रिभिर्नेत्रैः कृतोद्द्योतं त्रिभिः सूर्य्यैरिवोदितैः" भा० अनु० १४ अ०। "निरवद्यविद्योद्द्योतेन द्योतितस्वान्तोऽयमर्थः" दायभा० उद्+द्युत-णिच्-अच्। २किरणावलीव्याख्याने ३नागेशकृते काव्यप्रदीपव्याख्याने

४महाभाष्यप्रदीपव्याख्याने च ग्रन्थे पु० ५उद्द्योतके त्रि०

उद्द्राव पु० उद्-द्रु-घञ्। १पलायने अमरः। उत्कृष्टो द्रावोऽस्य प्रा०ब०। २उत्कृष्टगतियुक्ते। "यते स्वाहा धावते स्वाहोद्द्रावाय स्वाहोद्द्रुताय स्वाहा" यजु० २२,८, "उद् अधिकोद्रावोऽस्य स उद्द्रावः" वेददी० "उदि श्रयतियौति प्रुद्रुवः" पा० उत्पूर्व्वकादेव घञ् विधानात् केवलात्तु "ऋदोरप्" पा० अवेव। तेन तथाविग्रहकल्पनं निर्मूलमेव। तत्र संज्ञायां कर्त्तरि घञ् इत्येवोचितम्।

उद्धत पु० उद्+हन-क्त। १राजमल्ले। २वाक्यादिचञ्चले, ३अविनीते, ४प्रगल्भे ५उद्गते च त्रि०। "परिगतोच्चलदुद्धतबालधिः" भट्टिः "मदोद्धताः प्रत्यनिलं विचेरुः" कुमा० "सहजचापलदोषसमुद्धतः" "जनावरुद्धोद्धतसिन्धुरंहसाम्" प्रचुरोद्धतध्वजविलम्बिवाससः "अथानुद्धतमुद्धवः" माघः। ५कृतोल्लेखने च। "उत्तरत आहवनीयस्योद्धतावोक्षिते सिकतोपकीर्णे परिश्रुते प्राग्द्वारे पिण्डं निदधात्योषधय इति" कात्या० १६.२,१४, "परिश्रुते उद्धते कृतोल्लेखने अवोक्षिते सिक्ते" यजु० ११,४७मन्त्रे वेददी०। ततो भावे ष्यञ्। औद्धत्य न०। तल्। उद्धता स्त्री, त्व, उद्धतत्व न०, तद्भावे चाञ्चल्यादौ।

उद्धतमनस्कत्व न० उद्धतं मनोऽस्य कप् तस्य भावः त्व। अभिमाने गर्व्वे शब्दचन्द्रिका।

उद्धति स्त्री उद्+हन-गतौ-क्तिन्। १उद्गतौ २उन्नतौ। हन-आघाते क्तिन्। ३पाषाणादिनाऽऽघाते(ठोकरलागा) "अभूतलस्पर्शितया निरुद्धतिस्तवावतीर्णोऽपि न लक्ष्यते रथः" शकु०।

उद्धम त्रि० उद्+ध्मा-. धमादेशः। कृतशब्दे "ध्वनीनामुद्धमैरेभिः" भट्टिः।

उद्धमचूड़ा स्त्री उद्धम-चूड़े! इत्युच्यते यस्यां क्रियायाम् मयू०स०। चूड़ां प्रति उद्ध्मानार्थनिर्देशक्रियायाम्। एवं उद्धरचूड़ा उद्धमविधमा अपि मयू० स०। तत्तत्क्रियार्थं निर्देशक्रियायाम्।

उद्धय त्रि० उद्+धेट-श। उद्धृत्य पानकर्त्तरि। "मधूनामुद्धयैर्भृशम्" भट्टिः।

उद्धरण न० उद्+हृ-भावे-ल्युट्। १मुक्तौ, २वमने, ३ऋणशुद्धौ, ४उन्मूलने ५उत्तारणे। "दिनानि दीनोद्धरणोचितस्य" रघुः। "तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्" वायुपु०। "कण्टकोद्धरणे नित्यमातिष्ठेत् यत्नमुत्तमम्" मनुः। ६उत्थापने। "प्रतिकर्मोद्धरणसंप्रसङ्गे" कात्या० १,२,२६ "आहवनीयदक्षिणाग्न्यो गार्हपत्यादुद्धरणं कर्त्तव्यम्" कर्कः। ७उद्धृत्य हरणे परिवेषणे च। "सव्येनोद्धरणं सामयर्यात्" कात्या० ४,१,१०, "उद्धरणं परिवेषणम्" कर्कः। ८बहिर्निष्कासने। "दिवैव प्रदहनोद्धरणे" कात्या० ०१६,४, उद्धरणं बहिर्निष्कासनम्" कर्कः। ९उत्पादने। "आहवनःयजागरणे सत एवोद्धरणम्" कात्या० २५, २,५, "तत्र चाहवनीयोद्धरणम्" कर्कः। अग्न्युद्धारशब्दे तत्प्रकारः ६२ पृ० उक्तः। कर्मणि ल्युट्। १०वान्तेऽन्नादौ।

उद्धरणीय त्रि० उद+हृ-कर्मणि अनीयर्। १उन्मूलनीये २उत्थापनीये ३आहरणीये च। तव्य उद्धर्त्तव्योऽप्यत्र त्रि०।

उद्धरावसृजा स्त्री उद्धर अवसृज इत्युच्यते यस्यां क्रियायाम् मयू०स०। उद्धरणावसर्जनार्थनिर्देशक्रियायाम्।

उद्धर्त्तृ त्रि० उत्+हृ-तृच् स्त्रियां ङीप्। १उद्धारकारके २उन्मूलके ३तारणकारके च। "विवीतभर्त्तुस्तु पथि चौरोद्धर्त्तुरवीतके" या०स्मृ० स्त्रियां ङीप्। ण्वुल्। उद्धारक उक्तार्थे त्रि०

उद्धर्ष पु० उत्कृष्ट उद्भूतो वा हर्षः प्रा०स०। १उत्कृष्टे २हर्षे उद्भूतहर्षे च। उद्भूतो हर्षो यस्य प्रा०ब०। ३जातहर्षे त्रि० "उद्धर्षय मघवन्नायुधानि" यजु० ७।९२ "उद्धर्षय उद्भूतहर्षयुक्तं कुरु" वेददी० नामधातुरूपम्। तत्र हेतुणिजन्तरूपमित्येव न्याय्यम्।

उद्धर्षण न० उद्+हृष-णिच-ल्युट्। १हर्षयुक्तकरणे २प्रोत्साहने च "हितमुद्धर्षणं चैव उवाच प्रथितं वचः" रामा० "एवमेतन्महाबाहो! यथा वदसि पाण्डव!। कृतमुद्धर्षणं पूर्वम्" इत्यादिषु भा० आश्व० १७ अ० बहुशस्तः प्रयोगः। आधारे ल्युट्। २रोमाञ्चे हेम०।

उद्धर्षिन् त्रि० उद+हृष-णिच्-णिनि। उद्धर्षकारके स्त्रियां ङीप्। सा च वसन्ततिलकाख्ये वर्णवृत्तभेदे। "उक्ता वसन्ततिलका तभजा जगौगः। सिंहोन्नतेयमुदिता मुनिकश्यपेन। उद्धर्षिणीयमुदिता मुनिसैतवेन" वृ०र०।

उद्धव पु० उद्+हु-आधारे अप्। १यज्ञाग्नौ, २उत्सवे अमरः। ३कृष्णदयिते यादवविशेषे च। उद्धवश्च यादवविशेषः। वृष्णिवंशवर्णने। "उद्धवो देवभागस्य, महाभाग! सुतोऽभवत्। पण्डितानां परं प्राहुर्देवश्रवसमुद्धवम्" हरिवं० ३५अ०। "भारतीमाहितभरामथानुद्धतमुद्धवः" माघः। भाग०११स्क० एनं प्रत्येव भगवतोत्तमोपदेशो वर्णितः स एव उद्धवसंवादत्वेन प्रसिद्धः पारायणे च षष्ठदिने तत्पर्यन्ताध्येयता "यावदुद्धवसंवादं षष्ठेऽह्नि परिकीर्त्तयेत्" इत्युक्तेः

उद्धवदूत न० उद्धवोदूतोयत्र। दूतत्वेन उद्धवं परिकल्प्य गो-

च् क्तिरूपे काव्यभेदे उद्भवसन्देशोऽपि काव्यभेदे पु० ।

उद्धस्त त्रि० उत्क्षिप्तौ हस्तौ येन प्रा०ब० । उत्क्षिप्तहस्ते उद्बाहौ "उद्धस्तः क्षयपरुषविरमतापी दुर्गन्धो भृशमशुचिस्तथाऽतिलोलः । बद्धाशो विजनहिमाम्बुरात्रिसेवी व्यावेष्टन् भ्रमति रुदन् पिशाचजुष्टः" सुश्रु० ।

उद्धान न० उद्धीयतेऽस्मिन्नग्निः धाञ्-आधारे ल्युट् । १चूल्लाम् । कर्मणि ल्युट् । २वमिते, ३उद्गते च । [२वमिते रमा०

उद्धान्त पु० उद्+धा बा०क्त । मदम्नुत्ये १हस्तिनि अमरः

उद्धार पु० उद्ध्रियते उद्+हृ भावे—घञ् । १मुक्तौ, २ऋणशुद्धौ ३उद्धारणे । कर्मणि घञ् । सर्वधनादुद्धृत्य ज्येष्ठादिभ्योदेये ४अंशभेदे यथा चोद्धारस्तथा मनुना दर्शितः यथा "ज्येष्ठस्य विंशउद्धारः सर्वद्रव्याच्च यद्वरम् । ततोऽर्द्धं मध्यमस्य स्यात्तुरीयन्तु यवीयसः ।" "ज्येष्ठश्चैव कनिष्ठश्च संहरेतां यथोदितम् । येऽन्ये ज्येष्ठकनिष्ठाभ्यां तेषां स्यान्मध्यमन्धनम् । सर्वेषाम्धनजातानामाददीताग्र्यमग्रजः । यच्च सातिशयं किञ्चिद्दशतश्चाप्नुयाद्वरम् । उद्धारो न दशस्वस्ति सम्पन्नानां स्वकर्मसु । यत्किञ्चिदेव देयन्तु ज्यायसे मानवर्द्धनम् । एवं समुद्धृतोद्धारे समानंशान् प्रकल्पयेत् । उद्धारेऽनुद्धृते त्वेषामियं स्यादंशकल्पना ।" अन्योऽपि विशेषः स्मृत्यन्तरे उक्तः किन्तु "तयोद्धारविभागस्तु नैव संप्रति वर्त्तते" मिता० स्मृत्युक्तेः इदानीमुद्धारो नास्तीति सर्वनिबन्धकर्त्तृणामैकमत्यान्नोक्तम् "स्वान्वययोग्यपदान्तराक्षेपेण श्रुतपदस्य५परित्यागे यथा गां बधान अश्वमानयेत्यादौ आवापोद्धाराभ्यां गोशब्दस्य सास्नादिमानर्थः" सा०द० । अन्वयव्यतिरेकावेवावापोद्धारावित्ति तु तत्त्वम् । "जगद्धातस्त्राय सुरधुनि ! समुद्धारसमयः" गङ्गालहरी । ६वर्ज्जने च "परस्य समुद्धृतोद्धारं विक्रेयं वित्तवर्द्धनम्" मनुः "उद्धृतोद्धारमित्यस्य "वर्जनीयवर्जितम्" कुल्लू०क० व्याख्या । ७उत्कर्षे च "सगुणानामेव कर्मणामुद्धार उपजने" आश्व०श्रौ० १२,४,१४ "यस्मात् प्रधानकर्म्मणामुद्धारे उपजने उत्कर्षे च सगुणानामेव सर्व्वोद्धरणम्" ना०वृ०

उद्धारण न० उद्+हृ+णिच्-ल्युट् । १उत्थापने "लाङ्गूलोद्धारणोद्धुरः" भा०व० १४७अ० । हृ–णिच् ल्युट् । २उद्धारसम्पादने ।

उद्धि पु०उद्+धा–कि । ऊर्द्धधारके । "पुरोडाशाः शफा अन्तरिक्षमुद्धिः" अथ०८,६,२२, "उद्धारको दशरात ऊर्द्धिः पृष्ठाभिप्लवौ चक्रे" शत०ब्रा०१२,२,२,२ ।

उद्धुर त्रि० उद्गता धूरस्मात् प्रा०ब० अच् समा० । १निरस्ते २भारसून्ये २६टे । "प्रसकालक्रुवलभुरोद्धुरोरः" माघः । "जघनमंसबन्धोद्धुरम्" मालतीमा० । "यत्नवानपि तु श्रीमाल्लाङ्गूलोद्धारणोद्धुरः" भा०व० १४७ अ० । ४ उच्चे च "प्रयादुवह्नभुजं पितरमथ्य्यूरुधमिमहाजगानुयातमानीय" दश्कु० ।

उद्धूत त्रि०उद्+धू–क्त । उत्कम्पिते "उद्धूतमूर्ध्वं जिनीभिरंशुभिः" माघः । "पुमानं पवमोद्धूतैः" रघुः । [२उत्कम्पने च ।

उद्धूनन न० उद्+धू–णिच्-नुक् भावे ल्युट् । १उत्क्षेपणे

उद्धूपन न० उद्+धूप–आयाभावपक्षे भावे ल्युट् । १द्रव्यविशेषेण ऊर्द्धसन्तापनरूपे व्यापारे (भावरादेश्वोया) "ग्टध्रोलूकपुरीषाणि केशा हस्तिनखाहतम् । वृषभस्य च रोमाणि योज्यान्युद्धूपनेऽपि च" सुश्रु० । (करणे ल्युट्) २तत्साधने द्रव्ये । "सर्पपाः सर्पनिर्म्मोको वचाकाकादनीहतम् । उष्ट्राजाविगवाञ्चैव रोमाण्युद्धूपनं शिशोः । ग्टध्रोलूकपुरीषाणि यवा यवफलो हतम् । सन्ध्ययोरुभयोः कार्य्यमेतदुद्धूपनं शिशोः" सुश्रु० ।

उद्धूलन न०धूलिवदुन्मर्दयति उद्+धूलि–णिच् । उद्धूलयति ततः भावे ल्युट् । १धूलिवन्मर्दने २पाकार्थोपकरणभेदे च । (मयादाचूर्ण) "चूर्णस्योद्धूलनं देयं भोज्ये क्षीरेक्षुसम्भवे । व्यञ्जनेषु च सर्व्वेषु शाकजेष्वन्नजेषु च । मांसमत्स्यभवेष्वेवं प्रलेहतलनादिषु । आदावेव पचेत् स्नेहे ततोहिङ्गूदकं क्षिपेत् । वेसवारं सलवणं क्षिप्त्वा तत् पिषितं पचेत् । अर्द्धसिद्धे क्षिपेत्तक्रमथ वा दाडिमीरसम् । सिद्धे पाके च दातव्यं चूर्णमुद्धूलनस्य तत्" पाकशास्त्रम् ।

उद्धूषण न० उद्+धूष-ल्युट् । रोमाञ्चे हला०

उद्धृत त्रि०उद्+हृ–क्त । १उत्क्षिप्ते, २भक्तोज्झिते, ३उत्तोलिते, ४पृथक्कृते, ५उच्छेदिते च । "इतीव वाहैर्निजवेग दर्पितैः पयोधिरोधक्षममुद्धृतं रजः" नैष० "उद्धृतासि पिनाकिना" क्षुरिकाखीमन्त्रः । "पयोऽनुद्धृतसारञ्च" "दृष्टेऽप्युद्धृतत्त्वलैः" आ०त०धृ० "उद्दर्भूमैच्छत् प्रभोद्धृतारिः" रघुः ।

उद्धृतपाणि त्रि० उत्तरीयात् उद्धृतः बहिष्कृतः पाणिर्येन । उत्तरीयबहिष्कृतहस्ते । "स्वाध्याये भोजने चैव दक्षिणं पाणिमुद्धरेत्" मनूक्तकर्म्मस्वेव तथा भवनम् ।

उद्धृति स्त्री उद्+हृ–क्तिन् । १उद्धरणे २उत्तोलने च । "सत्योद्धृतिर्यत्राण दुतसर्पनिदर्शनम्" सुश्रु० ।

उद्ध्मान न० उद्धमति वह्निरत्र उद्+ध्मा–ल्युट् ।१ चुल्ल्याम्
उद्ध्य पु० उज्झ–क्यप् "भिद्योद्ध्यौ नदे" पा०नि० । नदभेदे "कूलं भिद्योद्ध्यसन्निभौ" भट्टिः "तोयदागमइवोद्ध्यभिद्ययोः" रघुः ।

उद्बन्धक पु० । (धोपा)वर्णसङ्करभेदे । "आयोगवेन विप्रायां जातास्ताम्रोपजीविनः । तस्यैव नृपकन्यायां जातः सूनिक उच्यते । सूनिकस्य नृपायान्तु जाता उद्बन्धकाः स्मृताः। निर्णेजयेयुर्वस्त्राणि अस्पृश्याश्च भवन्त्यतः" उशना ।

उद्बन्धन न० उद्+बन्ध–भावे ल्युट्। ऊर्द्ध्वतः पाशादिना गलादिबन्धने ।"उद्बन्धनमृता ये च गतिर्येषां न विद्यते। तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्" वायु पु० गयामाहात्म्ये "विषमुद्बन्धनं चैव शस्त्रमग्निप्रवेशनम् । करिष्येन हि तान्सर्वान् पुनर्दृष्टुमिहोत्सहे" भा०व० ७४० । "जलाग्न्युद्बन्धनभ्रष्टाः प्रव्रज्यानशनच्युताः । विषप्रपतनप्रायशस्त्रघातच्युताश्च ये । सर्व्वे ते प्रत्यवसिताः सर्व्वधर्म्मबहिष्कृताः । चान्द्रायणेन शुद्ध्यन्ति तप्तकृच्छ्रद्वयेन वा" प्रा०वि०यमः । भावे घञ् उद्बन्धोऽप्यत्र पु०।

उद्बा(द्वा)हु त्रि०उत्तोलितो(वा)बाहुर्येन प्रा०ब०। उत्तोलितबाहौ "प्रांशुलभ्ये फले लोभादुद्वाहुरिव वामनः" रघुः ।

उद्बुद्ध त्रि० उद्+बुध–क्त । १विकसिते न्यायादिमते ज्ञातवस्तुनः संबन्धिज्ञानादिना २कृतोद्दीपने संस्कारे च । यथा हस्तिदर्शनात् अनुभूतहस्तिपकसंस्कारस्य उद्बोधरूपे उद्दीपने कृते हस्तिपकः स्मर्य्यते इति । ३प्रबुद्धे ४जागरिते च "उद्बुद्धां च जगद्धात्रीं पूजयेद्दीपमालया" ति०त०पु० येन येन वस्तुना संस्कार उद्बुध्यते तथा उद्बोधकमुच्यते।"उद्बुद्धं कारणैः स्वैःस्वैर्बहिर्भावं प्रकाशयेत्"सा०द०

उद्बोध पु० उद्+बुध घञ् । १किञ्चिद्बोधे न्यायादिमते स्मृतिजननाय २संस्कारोद्दीपने च।"उत्साहादिसमुद्बोधः साधारण्याभिमानतः"ननु कथं रामादिरत्याद्युद्बोधकारणैः सीतादिभिः सामाजिकानां रत्युद्बोधः"इति "रत्याद्युद्बोधका लोके विभावाःकाव्यनाट्ययोः"इति च सा०द०।

उद्बोधक त्रि० उद्बोधयति उद्+बुध–णिच्–ण्वुल् । १उद्दीपके २उद्बोधकारके ३सूर्य्ये पु० उदयेन सर्वेषां प्रबोधकत्वात्तस्य तथात्वम्। उद्बोधकानि च न्यायसूत्रवृत्त्योर्दर्शितानि यथा "प्रणिधाननिबन्धाभ्यासलिङ्गलक्षणसादृश्यपरिग्रहाश्रयाश्रितसम्बन्धानन्तर्य्यवियोगैककार्य्यविरोधातिशयप्राप्तिव्यवधानसुखदुःखेच्छाद्वेषभयार्थित्वक्रियारागधर्म्माधर्म्मनिमित्तेभ्यः"सू० "स्मरणमित्यनुवर्त्तते निमित्तपदस्य द्वन्द्वात्परं श्रुतस्य प्रत्येकमभेदेनान्वयः। प्रणिधानं मनसोविषयान्तरसञ्चारवारणम् । निबन्ध एकग्रन्थोपनिबन्धनं यथा प्रमाणेन प्रमेयादिस्मरणम्। अभ्यासः संस्कारबाहुल्यम् एतस्य यद्यपि नोद्बोधकत्व तथापि तादृशे शीघ्रमुद्बोधकसमवधानं स्यादित्याशयेन तदुपन्यासः । अभ्यासोदृढतरसंस्कारः उद्बोधकत्वेनोक्तइति केचित् । लिङ्गं व्याप्यं व्यापकस्य स्मारकम्। लक्षणं यथा कपिध्वजादि अर्ज्जुनादेः । सादृश्यं देहादेः । परिग्रहः स्वीकारस्तस्य स्वस्वामिभावोऽर्थः तदेकतरेणान्यतरस्मरणम् । आश्रयाश्रितौ राजादितत्परिजनौ परस्परस्मारकौ । सम्बन्धोगुरुशिष्यभावादिः गोवृषन्यायात् पृथगुक्तः । आनन्तर्य्यं प्रोक्षणावघातादेः । वियोगोयथा दारादेः । एककार्य्यान्तेवासिप्रभृतयः परस्परस्मारकाः । विरोधादहिनकुलादेरन्यतरेणापरस्मरणम् । अतिशयः संस्कारउपनयनादिराचार्य्यादिस्मारकः । प्राप्तिर्धनादेर्दातारं स्मारयति । व्यवधानमावरणं यथा खड्गादेः कोषादि । सुखदुःखयोरन्यतरेणापरस्य ताभ्यां तत्प्रयोजकस्य वा स्मरणम् । इच्छाद्वेषौ यद्विषयकतया गृहीतौ तस्य स्मारकौ । भयं मरणादेर्भयहेतोर्व्वा स्मारकम् । अर्थित्वं दातुः । याच्ञादेः क्रिया वाय्वादेः, रागात्प्रीतेः पुत्रादेःस्मरणं, धर्म्माधर्म्माभ्यां जन्मान्तरानुभूतसुखदुःखसाधनयोः प्रागनुभूतसुखादेश्च स्मरणमिति उक्तेषु च किञ्चित्स्वरूपसत्किञ्चिच्च ज्ञातमुद्बोधकं शिष्यव्युत्पादनाय चायं प्रपञ्चः" वृ० ।

उद्भट पु० उद्+भट–करणे–अप् । तण्डुलादेः प्रस्फोटनहेतौ १सूर्पे, तदाकारत्वात् २कच्छपे, ३श्रेष्ठाशये महाशये, ४प्रवरे, च "पदेपदे सन्ति भटारणोद्भटाः" नैष० उद्गतो भटात् पन्थात्"निरा०त०। पन्थबहिर्भूते लोकप्रसिद्धेऽज्ञातवक्तृके श्लोके ।

उद्भव पु० उद्+भू–भावे अप्। १उत्पत्तौ । "स्वैर्य्यं चतुर्णां वर्णानां पञ्चमे योषितोद्भवः" या०स्मृ०। कर्त्तरि अच् । २उत्पत्तिमति ।"दिलीपसूनुर्मणिराकरोद्भवः" "सोमोद्भवायाः सरितो नृसोमः"रघुः ।"लुप्तावुदरोमोऽर्लिमतेन मध्ये सोमोद्भवायाः सुरनिम्नगायाः" लक्षः। "विष्णुपादोद्भवा गङ्गा" पुरा० "सत्यमात्मोद्भवत्वात्ते भिन्ना अप्यनुभावतः" सा०द०। अपादाने अप् । ३उत्पत्त्यपादाने । "अहमन्तश्च भूतानामुद्भवश्च भविष्यताम्"गीता । उद्गतो भवात् निरा० स०। ४संसारातीते ५विष्णौ पु०। "उद्भवः क्षोभणोदेवः" विष्णुस० "प्रपञ्चोत्पत्त्युपादनकारणत्वात् उद्भवः, उद्गतः संसारादिति वा"भा० उभयथा वाक्यम् ।

६रहूतत्वे विशेषगुणगते जातिभेदे उद्भूतशब्दे विवृतिः ।

उद्भावन न० उद्+भू–णिच्-ल्युट् । १कल्पने, २उत्पादने च उद्+चु०भू०ल्युट् । ३चिन्तने ४उत्प्रेक्षणे च "उद्भावनमकुर्व्वन्तौ विदुरस्य मते स्थिताः" भा०आ०१४१अ०

उद्भास पु० उद्+भास–भावे घञ् । उद्दीप्तौ । ततः अस्त्यर्थे "नैकाचारात् अतो जातेः सप्तम्याश्च न तौ स्मृतौ" वार्त्ति० घञ्रूपकाचरात् इनेरप्राप्तौ बाला० पाठात् मतुप् इनि वा । उद्भासवत् उद्भासिन्–तद्युक्ते त्रि० । "विभूषणोद्भासि पिनद्धभोगि वा" कुमा० स्त्रियां ङीप् ।

उद्भिज्ज पु० उद्भिनत्ति क्विप् उद्भित् तथा सन् जायते जन–ड कर्म्म०। भूमिमुद्भिद्य जाते १तरुगुल्मादौ "उद्भिज्जाः स्थावराः सर्वे वीजकाण्डप्ररोहिणः" इति मनुः । पदा० योगार्णवे । "देहश्चतुर्विधो जन्तोर्ज्ञेय उत्पत्तिभेदतः । उद्भिज्जः स्वेदजोऽण्डोत्थश्चतुर्थश्च जरायुजः । उद्भिद्य भूमिं निर्गच्छन्नुद्भिदः स्थावरश्च यः" इति विभज्य तदुत्पत्तिप्रकारस्तत्र दर्शितः "उद्भिज्जाः स्थावरा ज्ञेयास्तृणगुल्मादिरूपिणः । तत्र सिक्ता जलैर्भूमेरूष्मभिश्च विपाचिताः । वायुना व्यूह्यमानास्तु वीजत्वं प्रतियन्ति ते । तथाचोप्तानि वीजानि संसिक्तान्यम्भसा पुनः । उच्छूनतां मृदुत्वं च मूलभावं प्रयान्ति च । तन्मूलादङ्कुरोत्पत्तिरङ्कुरात् पर्णसम्भवः । पर्णात्मकस्ततःकाण्डः काण्डाच्च प्रसवः पुनः" । एतेषां च यथा पापभोगायतनवत्त्वात् देहवत्त्वं तथाऽयोनिजशब्दे २४७पृष्ठे उक्तम् "शरीरजैः कर्मदोषैर्याति स्थावरतां नरः" या० स्मृतौ शारीरपापेन तेषां देहोत्पत्तिश्रवणात् भोगायतनदेहवत्त्वमवसेयम् । अतएव शङ्करावल्याम् चेष्टाश्रयत्वं शरीरलक्षणमुक्त्वा "वृक्षादीनामपि चेष्टावत्त्वान्नाव्याप्तिः । न च वृक्षादीनां शरीरित्वे किं मानम् ? इति वाच्यम् आध्यात्मिकवायुसम्बन्धस्य प्रमाणत्वात् तत्रैव किं मानम् ? इति चेत् भग्नक्षतसंरोहणादिना तदनुमानात्" इत्युक्तम् । यथा च स्थावराणां स्वस्वकर्मोत्पन्नदेहवत्त्वं तथाऽवरोहशब्दे ४४० पृष्ठे शा०सू०भाष्ये दर्शितम् । तेषां विभागो न्यायकन्दल्याम् दर्शितो यथा "स्थावरास्तृणौषधिलतावतानवनस्पतय इति" भा० । "तृणमूलपादिः ओषधयःफलपाकान्ता गोधूमादयः, ये न पुष्पफलास्ते वृक्षाः कोविदारप्रभृतयः लता [illegible] । अवतन्वन्ति अवतानाः विटपाद्यन्तः केतकीपाटलादयः ये विना पुष्पं फलन्ति ते वनस्पतय औदुम्बरादयः" । न्या०क० । २भूमिमुद्भिद्यजातमात्रे त्रि० स्थाव-

रादिविभागे सुश्रुतः "द्रव्याणि पुनरोषधयस्ता द्विविधाः स्थावरा जङ्गमाश्च । तासां स्थावराश्चतुर्विधाः । वनस्पतयो वृक्षा वीरुध ओषधय इति । तास्वपुष्पाः फलवन्तो वनस्पतयः पुष्पफलवन्तो वृक्षाः । प्रतानवत्यः स्तम्भिन्यश्च वीरुधः । फलपाकनिष्ठा ओषधय इति । जङ्गमा अपि चतुर्विधा जरायुजाण्डजस्वेदजोद्भिज्जाः । तत्र पशुमनुष्यव्यालादयो जरायुजाः । खगसर्पसरीसृपप्रभृतयोऽण्डजाः । कृमिकीटपिपीलिकाप्रभृतयः स्वेदजाः । इन्द्रगोपमण्डूकप्रभृतय उद्भिज्जाः" ।

उद्भिद् पु० भूमिमुद्भिनत्ति उद्+भिद्–क्विप् । १वृक्षक्षुपगुल्मवल्लीलतारूपे पञ्चविधे स्थावरभेदे उद्भिज्जशब्दे उदा० । उद्भिनत्ति पशून् । २यागभेदे "उद्भिदा यजेत" श्रुतिः उद्भिदादिशब्दानां यथा कर्म्मनामधेयता व्युत्पत्तिसहितं जै०सू०भाष्ययोस्तथा दर्शितं यथा

'उक्तं समाम्नायैदमर्थ्यं तस्मात् सर्व्वं तदर्थं स्यात्' १,४,१, सू० । 'उद्भिदा यजेत' 'बलभिदा यजेत' 'अभिजिता यजेत' 'विश्वजिता यजेत' इति समामनन्ति, तत्र सन्देहः, किमुद्भिदादयो गुणविधयः, आहोस्वित् कर्मनामधेयानि इति । कुतः संशयः ? उभयथाऽपि प्रतिभाति वाक्यात्, उद्भिदा इत्येष शब्दो यजेतइत्यनेन संबध्यते, स किं वैयधिकरण्येन संबन्धमुपैति, उद्भिदा द्रव्येण यागमभिनिर्वर्त्तयेदिति, उत सामानाधिकरण्येन, उद्भिदा यागेन यजेत इति द्वेधाऽपि एतस्मिन् प्रतिभाति वाक्ये, सम्भवति संशयः ।

किं तावत् प्राप्तम्? उक्तमस्माभिः, समाम्नायस्यैदमर्थ्यं, कश्चिदस्य भागो विधिः, योऽविदितमर्थं वेदयति, यथा 'सोमेन यजेत' इति कश्चिदर्थवादः, यः प्ररोचयन् विधिं स्तौति, यथा 'वायुर्वै क्षेपिष्ठा देवता' इति, कश्चित् मन्त्रः, योऽभिहितमर्थं प्रयोगकाले प्रकाशयति, यथा 'बर्हिर्देवसदनं दामि' इत्येवमादि, तस्मादुद्भिदादयोऽमीषां प्रयोजनानामन्यतमस्य प्रयोजनाय भवेयुः, तत्र तावन्नार्थवादः, वाक्यशेषो हि स भवति विधातव्यस्य, न च मन्त्रः, एवंजातीयकस्य प्रकाशयितव्यस्याभावात्, पारिशेष्यात् गुणविधिः, उद्भिद्गुणता यागस्य विधीयते प्रसिद्धेरनुग्रहात्, गुणविधेरर्थवत्त्वात्, प्रवृत्तिविशेषकरत्वाच्च । न च, एषां यागार्थता लोकेऽवगम्यते ! न च, वेदेन परिभाष्यते ! अतोगुणविधयः । 'यदि गुणविधिः, न तर्हि कर्म विधीयते. अविहिते च कर्मणि

तत्र गुणविधानमनर्थकम् । न इति ब्रूमः, प्रकृतौ ज्योतिष्टोमे गुणविधानमर्थवद्भविष्यति,यदि नामधेयं स्यात्, यावदेव यजेत इति, तावदेव उद्भिदा यजेत इति, न प्रवृत्तौ कश्चित् गुणविशेषः स्यात् । गुणविधौ च गुणसंयोगात् अभ्यधिकमर्थं विदधत उद्भिदादयः शब्दा अर्थवन्तो भविष्यन्ति तस्मात् गुणविधय इत्येवं प्राप्तम्”भा० “अपि वा नामधेयं स्यात् यदुत्पत्तावपूर्व्वमविधायकत्वात्” १,४,२,सू०“अपि वा इति पक्षो विपरिवर्त्त्यते । नामधेयं स्यात् इति प्रतिजानीमहे, एवमविहितमर्थं विधास्यति ज्योतिष्टोमात् यागान्तरं, श्रुतिश्चैवं यागमभिधास्यति, इतरथा श्रुतिरुद्भिदादीन् वच्यन्तो उद्भिदादिमतो लक्षयेत् ! उद्भिद्वता यागेन कुर्य्यादिति । यागेन कुर्य्यात् इति यजेतेत्यस्यार्थः करणं हि यागः । उद्भिदाद्यपि तृतीयानिर्द्देशात् करणं, तत्र उद्भिदा यागेन इति कर्मनामधेयत्वेन सामानाधिकरण्यसामञ्जस्यं, द्रव्यवचनत्वे मत्वर्थलक्षणया सामानाधिकरण्यं स्यात् । श्रुतिलक्षणाविषये च श्रुतिर्ज्यायसी । तस्मात् कर्मनामधेयम् । ‘ननु प्रसिद्धं द्रव्यवचनत्वनपह्नूयेत, अप्रसिद्धं कर्मवचनत्वं प्रतिज्ञायेत' उच्यते, तृतीयानिर्द्देशात् कर्मवचनता । कुतः ? करणवाचिनो हि प्रातिपदिकात् तृतीया भवति, करणं च यागः, तेन यागवचनमिममनुमास्यामहे ।

“नैतद्युक्तं,यदि तृतीयानिर्द्देशे सति उद्भिदादिभ्यः शब्देभ्यो यागे बुद्धिरुत्पद्येत, स्यादेतदेवं, न हि सो बुद्धिरुत्पद्यते, तस्मात् अयुक्तम् । तृतीयावचनम् अन्यथा नोपपद्यते” इति चेत् । कामं नोपपादि, न जातुचित् अनवगम्यमानेऽपि यागवचनो भविष्यति, तस्मात् गुणविधयः । लक्षणेति चेत्, वरं लक्षणा कल्पिता, न यागाभिधानं, लौकिकी हि लक्षणा, दृष्टोऽप्रसिद्धकल्पनेति । अपि च यदि नामधेयं विधीयते, न यागः,अथ यागः, न नामधेयम्, उभयविधाने वाक्यभेदः” इति । उच्यते, न नामधेयं विधायिष्यते, अनुवादा हि उद्भिदादयः । कुतः प्राप्तिः ? इति चेत् । ततोऽभिधीयते, उच्छब्दसामर्थ्यात् भिच्छब्दसामर्थ्याच्च उद्भिच्छब्दः क्रियावचनः, उद्भेदनं प्रकाशनं पशूनामनेन क्रियते इत्युद्भित् यागः, एवमाभिमुख्येन जयात् अभिजित्, विश्वजयात विश्वजित्, एवं सर्वत्र । अतः कर्मनामधेयम् । यच्चाप्रवृत्तिविशेषकरोऽनर्थकः इति, नामधेयेऽपि गुणफलोपबन्धेनार्थवत्, तस्मात् कर्मनामधेयान्येवंजातीयकानि—इति सिद्धम्”भा०

गवामयने यज्ञे सप्तममासिकोत्तमाभिप्लविकस्थाने २एकादशे दिने । “सप्तमस्य मासस्योत्तमयोरभिप्लवयोः स्थाने त्रिवृद्व्यूहोदशरात्र उद्भिद्वलभिदौ” आश्व०श्रौ० १२, १,५,“सप्तमस्य मासस्य ये त्रयोऽभिप्लवाः तेषां यौ उत्तमाभिप्लवौ तयोः स्थाने त्रिवृत्स्तोमको व्यूढोदशरात्रः उद्भिद्वलभिदौ च द्वे अहनी इत्येतानि द्वादशाहानि” नारा०वृ० । गवामयनशब्दे विवृतिः ।

उद्भिद पु० उद्+भिद–क । १वृक्षादौ पञ्चविधे स्थावरे । २उद्भेदके त्रि० “होता यक्षत्तनूनपातमुद्भिदम्” यजु० २८,२५ “उद्भिदं यज्ञफलानामुद्भेत्तारम्” वेददी० ।

उद्भिन्न त्रि० उद्+भिद–क्त । १उत्पन्ने कर्मणि क्त । २द्विधाकृते दलिते च । “यौवनोद्भिन्नशैशवा” ।

उद्भूत त्रि० उद्+भू–क्त । १उत्पन्ने “शिवलिङ्गतयोद्भूतः कोटिसूर्य्यसमप्रभः” ति०त० पु० “समुद्रमथनोद्भूतः” कलसमन्त्रः न्यायमते २प्रत्यक्षयोग्ये “उद्भूतरूपं नयनस्य गोचरः” उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः” भाषा० । उद्भूतत्वञ्च उद्भवापरपर्य्यायो रूपादिविशेषगुणगतो जातिभेदः कणा० सूत्रवृत्तौ उक्तः यथा “अनेकद्रव्यसमवायात् रूपविशेषाच्च रूपोपलब्धिः”क०सू०। “तेन रसगन्धस्पर्शेषु ज्ञानं व्याख्यातम्”सू०।“रूपगतो विशेषोरूपविशेषः तच्चोद्भूतमनभिभूतत्वं रूपत्वञ्च तस्माद्रूपस्योपलब्धिः । नन्वेवं परमाणोर्द्व्यणुकस्य च रूपं गृह्येतेत्यत उक्तमनेकद्रव्यसमवायादिति अनेकपदं भूयस्त्वपरं तेनानेकानि भूयांसि द्रव्याणि आश्रयतया यस्य तदनेकद्रव्यं त्रसरेणुप्रभृति तत्समवायात्, घटादयोऽप्यवयवद्वयारब्धाः परम्परयाऽनेकद्रव्याश्रया एव, रसस्पर्शादौ रूपत्वविरहात् चाक्षुषत्वाभावः चाक्षुषे तेजसि च उद्भूतत्वविरहात्, । उद्भवः रूपादिविशेषगुणगतो जातिविशेष एव रूपत्वादिव्याप्यः । नन्वेवं शुक्लत्वसुरभित्वकटुत्वादिभिरपि परस्परभावानुपपत्तिरेव तत्तद्व्याप्यतत्तन्नानात्वकल्पने तु कल्पनागौरवम् उद्भवपदस्य नानार्थत्वञ्चेति चेन्न बाह्यैकैकेन्द्रियग्रहणयोग्यगुणत्वस्यैवोपाधेरुद्भवत्वात् तदुपाधिविरहस्यैवानुद्भवत्वात्, । अनुद्भवाभाव एव उद्भव इति केचित् । तद्विन्त्यम् अनुद्भवस्याप्येवं व्यवस्थापयितुमशक्यत्वात् । अतीन्द्रियविशेषगुणत्वमनुद्भूतत्वमिति चेत् एवं तर्हि ऐन्द्रियकविशेषगुणत्वस्यैवोद्भवत्वापत्तेः । ऐन्द्रियकत्वावच्छेदकं किमिति चेत् तुल्यम्, विशेषगुणेष्वेकैवोद्भूतत्वं जातिः गुणगतजातौ परस्पर-

भावानुपपत्तिर्न्न दोषायेत्यपि वदन्ति । तेनेति रूपप्रत्यक्षमानेनेत्यर्थः यथा रूपविशेषात् रूपत्वानभिभूतत्वोद्भूतत्वलक्षणात्, रूपोपलब्धिस्तथा रसविशेषात् रसत्वानभिभूतत्वोद्भूतत्वलक्षणात् रसोपलब्धिः एवमितरत्रापि योज्यम् । अनेकद्रव्यसमवायश्चातिदेश्यः । घ्राणरसनत्वगिन्द्रियाणामनुद्भवाद्गन्धरसस्पर्शानामप्रत्यक्षम् पाषाणादावनुद्भवाद्गन्धरसयोः। तद्भस्मनि तयोरुपलम्भात् तयोः पाषाणादावनुपलम्भ एव न तु सत्त्व इत्येके । विभक्तावयवाप्यद्रव्यरूपानुद्भवात्तदप्रत्यक्षम् एवं रसस्यापि । उष्णजले तेजोरूपस्यानुद्भवात् स्पर्शस्य चाभिभवात् विततकर्पूरचम्पकादौ रूपरसस्पर्शानामनुद्भवादनुपलम्भः । कनकादौ रूपमुद्भूतमेव शुक्लत्वभास्वरत्वे परमभिभूते । रूपमप्यभिभूतमित्येके कनकप्रत्यक्षन्तु रूपान्तरसाहचर्य्यात् । अभिभवश्च बलवत्सजातीयप्रत्यक्षकृतमप्रत्यक्षं न तु बलवत्सजातीयसम्बन्धमात्रम्, बलवत्सजातीयसम्बन्धस्याप्यप्रत्यक्षनिरूप्यतया अप्रत्यक्षस्यैवोपजीव्यत्वात् तथाप्रत्यक्षप्रयोजकत्वेन बलवत्सजातीय एवोपजीव्यः, अप्रत्यक्षस्य प्रत्यक्षप्रागभावस्य तदत्यन्ताभावस्य वा तद्प्रयोज्यत्वात् प्रत्यक्षध्वंसस्य च तन्नाभावात् । तथापि तर्हि बलवत्सजातीयप्रत्यक्षकृतमप्रत्यक्षमनुपपन्नमेवेति चेत् अस्त्वेवं तथापि सजातीयस्य बलवत्त्वे दुर्बलत्वे वा तादृशसम्बन्धसत्त्वे वा प्रत्यक्षाप्रत्यक्षे एव प्रयोजके एवेति स एवाभिभवपदार्थः"।

उद्भूति स्त्री० उद्+भू–क्तिन् । १उत्पत्तौ । उत्कृष्टा भूतिः । २उत्तमविभूतौ ३वृद्धौ च । "उमा वधूर्भवान् दाता याचितार इमे वयम् । वरः शम्भुरलं ह्येष त्वत्कुलोद्भूतये विधिः" कुमा० ।

उद्भेद पु० उद्+भिद–घञ् । १रोमाञ्चे । भावे घञ् । २उद्भिद्योत्पत्तौ ३प्रकाशे च । "उमास्तनोद्भेदमनु प्रवृद्धः" कुमा० । "तं यौवनोद्भेदविशेषकान्तम्" रघुः । "पुष्पोद्भेदं सह किसलयैर्भूषणानां विशेषात्" मेघ० । "कन्दोद्भेदा वेद्रुमा वारिधीव" माघः । "हसितं तु हथाहासो यौवनोद्भेदसम्भवः" "घ्रातोऽपि मलयोद्भेदसदागमनहेतवः" सा०द० । ४भेदने च "गण्डोद्भेदं समासाद्य त्रिरात्रोपोषितो नरः" भा०व०८४अ० । ल्युट् । उद्भेदनमप्यत्र न० । "चमसोद्भेदनं विप्रास्तत्रापि कथयन्त्युत" भा० व०८८अ० । "उद्भेदनं प्रकाशनम्" उद्भिद्यन्ते भरतभा० ।

उद्भ्रम पु० उद्+भ्रम–करणे घञ् न वृद्धिः । १उद्वेगे भावे घञ् । २ऊर्द्ध्वात् भ्रमणे । भावे ल्युट् । उद्भ्रमणमप्यत्र न० ।

उद्भ्रान्त न० उद्+भ्रम–भावे क्त । १उद्भ्रमणे अम० स्वार्थे कन् । मूर्च्छितगतौ यकु० । अन्तर्भूतण्यर्थे भावे क्त । २खड्गमुद्यम्य खड्गभ्रामणे । उद्+भ्रम-कर्त्तरि क्त । ३भ्रान्तियुक्ते ४ऊर्द्ध्वं भ्रमणकर्त्तरि च त्रि० । "मारीचोद्भ्रान्तहारीताः" रघु० ।

उद्य त्रि० वद्–क्यप् । कथनीये "अन्ततोद्यं न तत्रास्ति" भट्टिः सुप्युपपद एवास्य साधुत्वम् न पृथक्प्रयोग इति ।

उद्यत् त्रि० उद्+या–शतृ । उद्गच्छति "उद्यता जयिनि कामिनीमुखे तेन साहसमनुष्ठितं पुनः" का०प्र० "उद्यन् समुद्रादुत वा पुरीषात्" यजु०२९,१२ । "नेक्षेतोद्यन्तमादित्यम्" मनुः । स्त्रियां ङीप् । सा च २विष्टुतिभेदे च सा च ताण्ड्य०ब्रा० दर्शिता

"तिसृभ्यो हिङ्करोति स प्रथमया, तिसृभ्यो हिङ्करोति स मध्यमया, तिसृभ्यो हिङ्करोति स उत्तमयोद्यती त्रिवृतो विष्टुतिः" । "एकैकस्य साम्नः पञ्च विभक्तयः प्रस्तावोद्गीथप्रतिहारोपद्रवनिधनाख्याः, तत्र हिङ्कारस्त्रिभिरुद्गातृभिः सर्व्वत्र कर्त्तव्यः अतएव सूत्रकृतोच्यते "साम्ने साम्ने हिङ्कुर्युरिति" तिसृभ्य इति "क्रियार्थोपपदस्य च कर्म्मणि स्थानिनः" पा० कर्म्मणि चतुर्थी तिस्र ऋचो गातुं हिङ्कुर्यात् एकवचनमतन्त्रम् उक्तादेव हेतोः" अतस्त्रयोऽप्युद्गातारो हिङ्कुर्युरित्यर्थः । एवमुत्तरत्रापि हिङ्कारविधायकेषु वाक्येषु योजना । स हिङ्करोति स हिंकर्त्ता प्रथमया त्रिरुक्तया गायेत् अयं प्रथमः पर्य्यायः । तिसृभ्यो हिङ्करोति स हिङ्कर्त्ता मध्यमया त्रिरुक्तया गायेत् अयं द्वितीयः पर्य्यायः, पुनरपि तिसृभ्यो हिङ्करोति स हिङ्कर्त्ता तृचस्योत्तमा अन्त्या तया त्रिरुक्तया गायेत् एषः तृतीयः पर्य्यायः । अनेन पर्य्यायेण त्रिवृत्स्तोमः सम्पद्यते उक्तप्रकारेण त्रिधा वर्त्तत इति त्रिवृत् स्तोमः तस्य विष्टुतिरेषा उद्यती ऊर्द्ध्वं गच्छन्ती उक्तेषु पर्य्यायेषु प्रथममध्यमोत्तमक्रमेण ऊर्द्ध्वगमनादन्वर्थसंज्ञेयमेषा त्रिवृतः प्रथमा विष्टुतिः" भा० सामसं०भाष्ये माधवेन उद्यतीनामकविष्टुतेः प्रकारः स्पष्टं दर्शितो यथा "पठितानां नवानामृचां गानं त्रिभिः पर्य्यायैः कर्त्तव्यम् तत्र प्रथमपर्य्याये त्रिषु सूक्तेषु आद्यास्तिस्र ऋचः, द्वितीये पर्य्याये मध्यमाः, तृतीये पर्य्याये चोत्तमाः । तिसृभ्य इति तृतीयार्थे पञ्चमी, हिङ्करोति गायतीत्यर्थः । सेयं यथोक्तप्रकारोपेता गीतिस्त्रिवृत्स्तोमस्य विष्टुतिः (स्तुति-प्रकार-विशेषः), अस्याः विष्टुतेरुद्यती नामेति, ता० पञ्चदशस्तोमेऽपरा उद्यती विष्टुतिः ता०ब्रा०दर्शिता यथा

"तिसृभ्यो हिङ्करोति स पराचीभिः, पञ्चभ्यो हिङ्करोति स एकया स तिसृभिस्स एकया, सप्तभ्यो हिङ्करोति स तिसृभिस्स एकया स तिसृभिरुद्यती पञ्चदशस्य विष्टुतिः" ब्रा० "त्रिषु पर्यायेषूत्तरोत्तरसंख्योत्कर्षमेत्युद्यती पञ्चदशस्य विष्टुतिरिति। त्रिषु पर्यायेषूत्तरोत्तरसंख्योत्कर्षमेतोत्युद्यतीत्युच्यते" भा०।

सप्तदशस्तोमस्यापराप्युद्यती तत्रैव दर्शिता "अथोद्यत्याख्यां सप्तदशस्तोमस्यापरां विष्टुतिमाह" भा०। "तिसृभ्यो हिङ्करोति स पराचीभिः, पञ्चभ्यो हिङ्करोति स एकया स तिसृभिस्स एकया, नवभ्योहिङ्करोति स तिसृभिस्सतिसृभिस्स तिसृभिरुद्यती सप्तदशस्य विष्टुतिः" ब्रा०। "तिसृभ्यः पञ्चभ्यो नवभ्य इति क्रमेण सङ्ख्याया ऊर्द्ध्वगमनादुद्यती ऊर्द्ध्वं गच्छन्ती एतन्नाम्ना एषा सप्तदशस्तोमस्य विष्टुतिः" भा०।

अयं संक्षेपः गवामयने त्रिवृदादयः स्तोमाः विहिताः तेषां त्रिवृदादिस्तोमानां तिस्रोविष्टुतयः (सन्निवेशविशेषरूपेण स्तवनानि) तत्र बहिष्पवमानसाधनस्य त्रिवृत्स्तोमस्य तिस्रो विष्टुतयः उद्यती कुलायिनी परिवर्त्तिनी चेति तत्राद्या दर्शिता अन्ये तत्तच्छब्दे वक्ष्येते।

उद्यत त्रि० उद्+यम–कर्त्तरि–क्त। १उद्यमयुक्ते कृतोद्यमे "आततायी वधोद्यतः" अमरः। भावे क्त। २उद्यमे न०। यमेर्नियमनार्थत्वे कर्मणि क्त। ३उत्तोलिते ४उद्यमिते "प्रहृतस्तेज उद्यत आश्विनः" यजु०२९.५। "उद्यम्यते इत्युद्यतः" वेददी०। "पर्य्यायोद्यतकार्म्मुकौ" रघुः।

उद्यति स्त्री उद्+यम–भावे क्तिन्। उद्यमे। "वैश्वदेवानि जुहोत्यश्वमेधस्योद्यत्यै" शत०ब्रा० १२,१,८,१।

उद्यम पु० उद्+यम–घञ् न वृद्धिः। १प्रयासे प्रयत्नभेदे २उद्योगे। "निशम्य चैनां तपसे कृतोद्यमाम्" "शशाक मेना न नियन्तुमुद्यमात्" कुमा०। ३उत्तोलने च "विप्रदण्डोद्यमे कृच्छ्रमतिकृच्छ्रं निपातने" या०स्मृ०।

उद्यमन न० उद्+यम–णिच्–ल्युट्।१उत्क्षेपणे २उत्तोलने।

उद्यमित त्रि० उद्+यम–णिच्–क्त। १उत्तोलिते २उद्यमाय प्रेरिते। "आत्मनोमधमदोद्यमितानाम्" किरा०।

उद्यान पुंन० उद्यायतेऽत्र उद्+या–आधारे ल्युट् अर्द्धर्चादि। आरामे। तत्करणप्रकारादि आरामशब्दे ८०१पृ०उक्तम्। "बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या" "उद्यानानां नवजलकणैर्यूथिकाजालकानि" मेघ०

उद्यानपाल त्रि० उद्यानं पालयति पाल–अण् उप०स०। (माली) उद्यानरक्षके "उद्यानपालसामान्यमृतवस्तमुपासते" कुमा०। ण्वुल्। उद्यानपालकोऽप्यत्र। स्त्रियां टाप् अतइत्त्वम्। "ततः प्रविशति उद्यानपालिका" मालविकाग्निमित्रनाटकम्।

उद्यापन पुंन० उद्+या–णिच्–ल्युट् अर्द्धर्चादि। व्रतादिसमापने व्रतप्रतिष्ठायाम्। हेमाद्रौ व्रतखण्डे "उद्यापनं प्रवक्ष्यामि" इत्यसकृत् व्रतभेदे प्रयोगः। प्रतिष्ठा च कर्म्मान्तरं न तदङ्गमिति" रघु०। अस्येतिकर्त्तव्यतासामान्यप्रकारः व्रततत्त्वादौ अनुसन्धेयः। विशेषतस्तु तत्तद्व्रतोक्तविधायकवाक्येभ्योऽवसेयः विस्तरस्तु हेमाद्रौ व्रतखण्डे दृश्यः। तत्र तिथि० त० व्रतारम्भप्रतिष्ठयोर्वर्ज्यकालमाह ज्योतिषे "गुरोर्भृगोरस्तवाल्ये वार्धके सिंहके गुरौ। वक्रिजीवाष्टविंशेऽह्नि गुर्वादित्ये दशाहिके। पूर्वराशावनायातातिचारिगुरुवत्सरे। प्राप्याशिगन्तृजीवस्य चातिचारे त्रिपक्षके। कम्पाद्यद्भुत सप्ताहे नोक्तस्येज्ये मलिम्लुचे। भानुलङ्घितके मासि क्षये राहुयुते गुरौ। पौषादिकचतुर्मासे वरवाञ्छित वर्षणे। एकेनाह्ना चैकदिने द्वितीयेन दिनत्रये। तृतीयेन तु सप्ताहे माङ्गल्यानि शुभान्विताः। विद्यारम्भकर्णवेधौ चूडोपनयनोद्वहान्। तीर्थस्नानमनाप्तं तथानादिसुरेक्षणम्। परीक्षाऽऽरामयज्ञांश्च पुरश्चरणदीक्षणे। व्रतारम्भप्रतिष्ठा च गृहारम्भप्रवेशने। प्रतिष्ठारम्भणे देवकूपादेर्वर्जयन्ति च। द्वात्रिंशद्दिवसावास्ते जीवस्य भार्गवस्य च। ह्रासप्रतिमहत्यस्ते पादाश्ते द्वादश क्रमात्। अस्तात् प्राक् परयोः पक्षं गुरोर्बाल्यवार्धके। पक्षं दशोमहास्ते तु भृगुर्बालोदशाह्निकः। पादास्ते तु दशाहानि दश शुक्रो दिनत्रयम्"। एवं व्रतारम्भप्रतिष्ठयोर्वर्ज्यकालोक्तेः सिंहस्थगुरौ तत्कर्त्तव्यताकल्पनं साहसमेव हरितालिकादिव्रते तद्वर्जनस्यासम्भवात् तस्य सिंहस्थरविकत्वेनैव निमित्तत्वात् तच्च हरितालिकाशब्दे वक्ष्यते। सिंहस्थरविककालस्याशुद्धिबोधकवाक्यस्य व्रतारम्भप्रतिष्ठाव्यतिरिक्तविषयकत्वेनाप्युपपत्तेः। "पूर्वे काले व्रतानां तु प्रतिष्ठां विधिवच्चरेत्। न तत्र कालनियमस्तत्र विघ्ने पराविदके इति" वचनात् पूर्वकाले न समयाशुद्धिर्बाधिकेति केचित्। एतद्वचनस्यामूलकत्वमाहुरन्ये।

उद्याम पु० उद्यम्यतेऽनेन उद्+यम–करणे घञ् वा वृद्धिः। ऊर्द्ध्वनियमनसाधने रज्ज्वादौ। "शिक्यपाशं प्रतिमुञ्चते

षड्द्याम' श्विवारूपाणीति” कात्या० १६,५,६, उद्गृह्य यम्यते नियम्यते यैस्ते उद्यामाः षड्द्यामारज्जवः ऊर्द्धाकर्षणहेतवोयस्य” यजु० १२,१०२मन्त्रव्या० वेददी० “षड्द्यामं भवति षड्ढि दिशो मौञ्ज' त्रिवृत्' “संवत्सर एषोऽग्निर्ऋतवः शिक्यमृतुभिर्हि संवत्सरः शक्नोति स्थातुं यच्छक्नोति तस्माच्छिक्यमृतुभिरेवैनमेतद्बिभर्त्ति षड्द्यामं भवति षड्ढ्यृतवः” शत० ब्रा० ६,७,१,१६,१८,

उद्याव पु० उद्+यु– अप' बाधित्वा “उदि श्रयतियौतिपूद्रुवः” पा० घञ्। ऊर्द्धतोमिश्रणे अनुदि तु अवेव।

उद्यास पु० उद्+यस–घञ्। १उद्यमे कर्त्तरि संज्ञायां घञ्। २देवभेदे पु०। “आयासाय स्वाहा प्रयासाय स्वाहा संयासाय स्वाहा वियासाय स्वाहोद्यासाय स्वाहा” यजु० २९,११, ‘आयासादयो देवविशेषाः’ वेददी०।

उद्योग पु०न० उद्+युज–घञ् अर्द्धर्चादि। १उद्यमे कर्म्मकरणार्थं प्रयासभेदे “उद्योगादनिवृत्तस्य सुसहायस्य धीमतः। छायेवानुगता तस्य नित्यं श्रीः सहचारिणी” नीति०। “शल्यादिविषयोद्योगकर्म्मणा मनसा गिरा” या० स्मृतिः। “उद्योगं सर्व्वसैन्यानां दैत्यानामादिदेश ह” देवीमा०। भोजसेनवत् उत्तरपदलोपे २उद्योगपर्व्वणि च। “उद्योगः सैन्यनिर्याणं श्वेतोपाख्यानमेव च” भा० आ० १अ० “उद्योगे भरतश्रेष्ठः सर्व्वकामगुणान्वितम्। भोजनं भोजयेद्विप्रान् गन्धमाल्यैरलङ्कृतान्” भा० स्वर्गा० ६अ०

उद्योगपर्वन् न० उद्योगस्य प्रतिपादकं पर्व्व। व्यासरचितभारतान्तर्गते पञ्चमे पर्वणि। “उद्योगपर्व्व विज्ञेयमतऊर्द्धं महाद्भुतम्”। “उद्योगपर्व्व विज्ञेयं पञ्चमं शृण्वतः परम्” तत्रत्यवृत्तान्तमुपवर्ण्य। “उद्योग पर्व्व निर्द्दिष्टं सन्धिविग्रहसम्मितम्” भा० आ० १अ०।

उद्योगिन् त्रि० उद्+युज–घिणुन्। उद्योगयुक्ते। “उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीर्दैवेन देयमिति कापुरुषा वदन्ति। दैवं निहत्य कुरु पौरुषमात्मशक्त्या यत्ने कृते यदि न सिध्यति कोऽत्र दोषः” हितो०।

उद्योजक त्रि० उद्+युज–ण्वुल्। प्रवर्त्तके।

उद्र पु० उनत्ति क्लिद्यति उन्द्–रक्। जलविड़ाले। (उद्बिराल)

उद्रङ्क(ङ्ग) पु० सौभपुरे व्योमचारिपुरभेदे जटाधरः।

उद्रथ पु० उद्गतोरथो यस्मात्। १रथकीले। उद्गतरथतुल्यः पक्षो यस्य। ताम्रचूड़विहगे। मेदिनिः।

उद्रपारक पु० “धृतराष्ट्रकुले जातान् शृणु नागान् यथातथम्” इत्युपक्रम्य “भैरवोमुण्डवेदाङ्गः पिशङ्गश्चोद्रपारकः” भा० आ० ५७अ० सर्पसत्रे हतनागभक्ताः। [च

उद्रिक्त त्रि० उद्+रिच–क्त। १अतिशयिते, २अधिके, ३स्फुटे

उद्रेक पु० उद्+रिच–घञ्। १वृद्धौ, २अतिशये, ३उपक्रमे च। “गतोभक्त्युद्रेकः परिणतिमसौ चक्रवपुषा” पुष्पदन्तः। “प्रक्षीयते धनोद्रेको जनानामविजानताम्” भा० व० १९२ अ०। “स्नेहोरागश्च तन्द्रा च मोहोद्रेकश्च केवलः” भा० अनु० २अ०। ४महानिम्बे स्त्री राजनि०।

उद्वंशीय न० सामभेदे। “तदाङ्गिरसो वा एषा होत्रा यदच्छावाकया यदच्छावाकमनुसन्तिष्ठत ईश्वरैर्सा भवितोरिति यद्युक्थं स्यात्त्रैककुभञ्चोद्वंशीयञ्चान्ततः प्रतिष्ठाप्ये वीर्य्यं वा एते सामनी वीर्य्यएवान्ततः प्रतितिष्ठन्ति”। ब्रा० “अतो यदीयमुक्थम् उक्थसंस्थं स्यात् उक्तदोषपरिहाराय त्रैककुभं चोद्वंशीयं चोभे सामनी अन्ततस्तृतीयसवनस्यान्ते प्रतिष्ठाप्ये त्रैककुभं ब्रह्मसाम उद्वंशीयमच्छावाकसामेत्येवं कर्त्तव्ये इत्यर्थः” ता० ब्रा० भा०।

उद्वत् त्रि० उद् उत्कर्षितस्वभावोऽस्त्यस्य वा मतुप् मस्य वः। १उत्कृष्टे २उन्नते च। “स उद्वतोनिवतोयाति वेविषत्” ऋ० ३,२,१०। “उद्वतः उच्छ्रायवतः” भा० “उद्वत्स्वस्मा अकृणोतना” १,१६१,११। “उद्वत्सून्नतेषु” भा०।

उद्वत्सर पु० उत्क्रान्तोरविसंक्रान्तिं चान्द्रोमासोयत्र प्रा० ब०। वत्सरपञ्चकान्तर्गते वत्सरभेदे इदावत्सरशब्दे विवृतिः उदावत्सरोऽप्यत्र।

उद्वपन न० उद्+वप–ल्युट्। १दाने २उत्तोलने (तोला)। “उखायामस्योद्वपनमस्तमिते पात्रे” “अनुदिते भस्मोद्वपनादि” कात्या० १६,६,१,२। उत्क्रान्तोवपनम् अत्या० स०। ३उत्पाटने च।

उद्वमन न० उद्+वम–ल्युट् उदुपसर्गस्य धात्वर्थानुगममात्रमत्र। वमने। उद्गारशब्दे विवृतिः।

उद्वयस् त्रि० उद्गतं वयोऽन्नं यस्मात् प्रा० ब०। अन्नोत्पादके वायौ “अपां रसमुद्वयसं सूर्य्ये सन्तं समाहितम्” यजु० ९,३, “उद्गतं वयोऽन्नं यस्मात् वायोः स उद्वया वायुः वायुनैव हि धान्यानि निष्पद्यन्ते” वेददी०। उत्क्रान्तो वयः कालिकावस्थाम् अत्या० स०। अतिक्रान्तवयसि वृद्धे त्रि०।

उद्वर्त्त पु० उद्+वृत–घञ्। १अतिशये २आधिक्ये च। (उपचान) णिच्–घञ्। चूर्णविशेषैः २देहस्थमलाद्यपसारणव्यापारे।

उद्वर्त्तन न० उद्वर्त्त्यतेऽनेन उद्+वृत–णिच् करणे–ल्युट्।

१शरीरनिर्म्मलीकरणद्रव्यादौ। चूर्णैरुद्वर्त्तनैः पालीं तैला-क्तामवचूर्णयेत्” सुश्रु०। “नाकमेद्रक्तविण्मूत्रश्लेष्मोद्वर्त्तनादि च”या०स्मृतिः। भावे ल्युट्। २द्रव्यभेदैः स्नेहाद्यपहारार्थे व्यापारे च। ‘उद्वर्त्तनं वातहरं कफमेदोविनाशनम्। स्थिरीकरणमङ्गानां त्वक्प्रसादकरं परम्’ “यवाश्वगन्धायष्ट्याह्वैस्तिलैश्चोद्वर्त्तनं हितम्। शतावर्य्यश्वगन्धाभ्यां पयस्यैरण्डजीवनैः” “ततोऽस्य बलातैलमभ्यङ्गार्थेऽवचार्य्यम् यवपिष्टमुद्वर्त्तनार्थे” सुश्रु०। ३विलेपने, ४घर्षणे च। उद्+वृत-ल्युट्। ५उत्पतने ६उन्मुखने च ‘गात्रस्योत्तनश्चैव हितं संवाहनानि च” सुश्रु० “चटुलशफरोद्वर्त्तनप्रेक्षितानि” मेघ०।

उद्वर्त्तनीय त्रि०उद्वर्त्तनाय हितम् छ। उद्वर्त्तनसाधने द्रव्ये ‘इदमुद्वर्त्तनीयं गोधूमधचूर्णमिति” दुर्गार्चापद्धतिः।

उद्वर्द्धन न० उद्+वृध–ल्युट्। १अन्तर्हासे त्रिका०। णिच्–ल्युट्। २वृद्धतासम्पादने। ल्यु। ३वृद्धिसम्पादके त्रि०।

उद्वर्हण न०उद्+वर्ह–ल्युट्। १उन्मूलने २उत्पाटने ३उद्धरणे। क्त। उद्वर्हित उन्मूलिते त्रि०

उद्वह पु०उद्वहति ऊर्द्ध्वं नयति उद्+वह–अच्। पुत्रे “पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः” स्मृतेस्तस्य नरकत्राणकर्त्तृत्वात् तथात्वम् २वंशकारके‘उदयमस्तमतश्च रघूद्वहात्” “पार्थिवोद्वहद्रघूद्वहः”रघुः ३कन्यायां स्त्री ऊर्द्ध्वं प्रवहश्रायोरुपरिवहति अच्। वायुसप्तमार्गते ४तृतीयस्कन्धस्थे वायौ पु०। आवहशब्दे विवृतिः“आवहः प्रवहश्चैव विवहश समीरणः। परावहः संवहश्च उद्वहश्च महाबलः। तथा परिवहः श्रीमानुत्पातभयशंसिनः। इत्येते क्षुभिताः सप्त मारुता गगनेचराः” हरि०२२६अ०। वा० भावे अप। ५विवाहे “चूड़ोपनयनोद्वहान्” राजमा०।

उद्वहन न० उत्तोल्य वहनम्। उत्तोल्य स्कन्धादिना वहने। “कृष्णेन देहोद्वहनाय शेषः” कुमा० “कैलासनाथोद्वहनाय भूयः” “आपीनभारोद्वहनप्रयत्नात्” रघु० २विवाहे च ‘भुवः प्रयुक्तोद्वहनक्रियायाः” रघुः। “अपितृभ्यः पितादद्यात् सुतसंस्कारकर्म्मसु। पिण्डानोद्वहनात्तेषां तदभावेऽपि तत्क्रमात्” स्मृतिः।

उद्वादन न० उद्+वद–णिच्-ल्युट्। १उच्चैरावेदने। “उपदीची स्वेष्वग्निषु नखनिकृन्तनाद्युद्वादनान्तं साद्विपातिकम” कात्या०२५,१४,२, “उपदीच्यो नेदिष्ठः स्वानग्नीन् इत्विा नखनिकृन्तनाद्युद्वादनान्तं साद्विपातिकं कर्म्म कुर्य्यात्’ कर्कः। उद्वादनप्रकारश्च शत०ब्रा० ३,२,१,२६, दर्शितोयथा ‘अथैक उद्वदति दीक्षितोऽयं ब्राह्मणोदीक्षितोऽयं ब्राह्मण इति निवेदितमेवैनमेतत्सन्तं देवेभ्यो निवेदयत्ययं महावीर्य्योयोयज्ञं प्रापदित्ययं युष्माकैकोऽभूत्तं गोपायतेत्येवैतदाह त्रिष्कृत्वाह”। “उद्वदति उच्चैरावेदयति” भा० २उच्चैर्वाद्यकरणे च उद्+वच-णिच् ल्युट्। उद्वावचनमप्यत्र न० ‘यथेन्द्र उद्वाचनं लब्ध्वा चक्रे अधस्पदम्” अथ० ५,८,८,

उद्वान पु० उद्+वन–संभक्तौ घञ्। १उद्वमने णिच्-कर्म्मणि अच्। २उद्वमिते त्रि० रायमुकुटः।

उद्वान्त न० उद्+वम–क्त। कृतोद्वमने उद्भोसे अमरः।

उद्वाप पु० उद्+वप–भावे घञ्। १उन्मूलने २उद्धरणे। ३श्रूयमाण परिपरित्यागे पश्चात् ‘आवापोद्वापाभ्याम्” मुक्ता०। कर्म्मणि घञ्। उद्वाप्य सञ्चीयमाने ४भस्मादौ। “कपालानि भस्मोद्वापे कुर्य्यात्” कात्या० ५,२,६, भस्मोद्वापशब्देन प्रत्यहं गार्हपत्यादिखरेभ्यो भस्मोद्धृत्य यो राशिः क्रियते सउच्यते कर्कः”। णिच्-भावे अच्। ५मुण्डने।

उद्वाय पु० उद्+वा–घञ्। १उद्वासने २उपशमे। तत आचारे क्विप्। उद्वायति। “वायुर्वाव संवर्गोयदा वा अग्निरुद्वायति वायुमेवाप्येति” छा०उ०। ‘उद्वायति उद्वासनं प्राप्नोत्युपशाम्यति” भा०। गणव्यत्ययोवात्र।

उद्वास पु० उद्+वास–घञ्। स्वस्थानातिक्रमेण अस्तप्राप्तौ “अमरावत्यादीनां पुरीणां द्विगुणोत्तरोत्तरेण कालेनोद्वासः” छा०उ०भा०। ततः बलादि०इनि मतुप् वा। उद्वासिन् उद्वासवत् तद्वति त्रि० स्त्रियां ङीप्।

उद्वासन न० उद्+वस–ल्युट्। १मारणे उद्+वस+णिच्-ल्युट्। २विसर्जने। स्रुगादीनाम् उद्धोत्तलनेनान्यत्र स्थापनरूपे अग्न्याधानाङ्गे ३संस्कारभेदे ‘अप उपस्पृश्य शालाद्वार्य्ये परिस्तरणपात्रसंसादनप्रोक्षणाज्यनिर्वपणाधिश्रयणस्रुक्संमार्जनोद्वासनावेक्षणानि कृत्वाग्नीश्च उत्प्य पश्चादाज्यग्रहणम्”कात्या०६,१,२, “धृतोद्वासनमाहवनीय आयिणः २,७,८, “आज्याधिश्रयणस्रुक्संमार्जनोद्वासनावेक्षणानि” कात्या० ८,६,२१, ४स्थानान्तरनयने च “दक्षिणतोऽधिश्रयणोद्वासने”२५,८,६,भस्मानि अधिश्रयणमुद्वासनं च गार्हपत्याद्दक्षिणस्यां दिशि कुर्यात्”कर्कः।

उद्वास्य अव्य० उद्+वस–णिच्–ल्यप्। विसृज्येत्यर्थे “उद्वास्य देवं स्वेधाम्नि” तन्त्रम्। २स्थानान्तरं नीत्वेत्यर्थे च कर्मणि यत्। ३उत्तोलनीये ४उद्धरणीये च त्रि०।

उद्वाह पु० उद्+वह घञ्। विवाहे स च स्नानविशेष इति रघु० येन स्नानेन ममेयं भार्य्या, ममायं पतिरिति व्यवहारो भवति तादृशं स्नानम्। तच्च सम्बन्धभेदेनोभयनिष्ठम्। चरमसंस्कार इति नव्यनैयायिकाः। चरमत्वञ्च संस्कारप्रागभावासहचरितत्वम्। द्वितीयविवाहस्य संस्कारत्वाभावात् तत्प्रागभावसत्त्वेऽपि आद्यविवाहे चरमत्वाक्षतिः। तत्र च स्त्रियाः संस्काररूपतया विवाहत्वव्यवहारः। यस्य पुरुषस्य विवाहात् प्रागेव चूड़ादिषु जातेषु मरणम् तत्र पुरुषे चूड़ादौ संस्कारप्रागभावासहचरितत्वात् अतिव्याप्ते नैतत् साध्यम्। किन्तु शास्त्रविहितसंस्कारान्तिमत्वमेव चरमत्वमिति युक्तम्। शास्त्रेषु च संस्कारेषु विवाहस्यैवान्तिमतया विधानादितरेषामुपान्तिमत्वादिनेति नातिप्रसङ्गः। यूपाहवनीयादौ यथा संस्कारादेव तत्तच्छब्दप्रवृत्तिः एवं शास्त्रविधिना कृतसंस्कारयोरेव दम्पत्योस्तच्छब्दप्रवृत्तिः। संस्कारस्यालौकिकत्वात् तत्तत्कर्मकलापसाध्य इति न आदानमात्रेण तत्सिद्धिः। अतएव "अविप्लुतब्रह्मचर्य्यो लक्षण्यां स्त्रियमुद्वहेदिति" या० स्मृतौ "उद्वहेत द्विजोभार्य्याम्" इत्यादौ च विधिश्रवणम्, आदानमात्रस्य प्रमाणान्तरप्राप्ततया तदंशे विधित्वासम्भवात् अप्राप्तप्रापकस्यैव विधित्वात् अतएव "पाणिग्रहणिकामन्त्रा नियतं दारलक्षणम्। तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे" इति मनुना मन्त्रविशेषाणामेव भार्य्यात्वरूपसंस्कारप्रयोजकत्वमभिहितम्। आदानमात्रस्य विवाहत्वे तस्य च लौकिकत्वात् गृहीतेतरद्रव्यवत् तद्दानविक्रयापत्तिःस्यात् "न निष्क्रयविसर्गाभ्यां भर्त्तुर्भार्य्या विमुच्यते" इति कात्यायनेन दानविक्रयाभ्यां भार्य्यात्वविगमाभावं वदता च विवाहस्य लौकिकत्वं निराकृतम्। किञ्च विवाहसंस्कारस्य वैधत्वे यथाविधानमेव तत्र प्रवर्त्तितव्यम्। विधानातिक्रमे च कर्त्तुः प्रत्यवायोऽनिष्टं च फलं भवतीति गम्यते। तद्विधानप्रकारश्च आश्व० गृ० १,४, कण्डिकादौ दर्शितः अन्योऽपि प्रकारस्तत्तद्गृह्यकारैरुक्तः। स च ततोऽवसेयः। उद्वाहे वर्ज्जनीयकन्याः स्मृतिषु दर्शिता यथा। "असपिण्डा च या मातुरसगोत्रा च या पितुः सा प्रशस्ता द्विजातीनां दारकर्म्मणि मैथुने" मनुः। असपिण्डाश्च असपिण्डशब्दे ५४१पृ० मतभेदेनोक्ताः। "अनन्यपूर्व्विकां कान्तामसपिण्डां यवीयसीम्। अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम्" याज्ञ०। अन्यपूर्व्वाश्च। "सप्त पौनर्भवाः कन्या वर्ज्जनीयाः कुलाधमाः। वाचा दत्ता मनोदत्ता कृतकौतुकमङ्गला। उदकस्पर्शिता या च या च पाणिगृहीतिका। अग्निं परिगता या च पुनर्भूप्रभवा च या। इत्येताः काश्यपेनोक्ता दहन्ति कुलमग्निवत्" काश्य०। "तत्र सपिण्डासगोत्रासमानप्रवरासु भार्य्यात्वमेव नोत्पद्यते रोगिण्यादिषु भार्य्यात्वे उत्पन्नेऽपि दृष्टदोष एव" मिता० एवमेव रघुनन्दनादयः। समानार्षाश्च आर्षशब्दे ८१२ पृष्ठे दर्शिताः। "सगोत्रां मातुरप्येके नेच्छन्त्युद्वाहकर्म्मणि। जन्मनाम्नोरविज्ञाने उद्वहेदविशङ्कितः" इति उ०त० व्यासः। "मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च। समानप्रवरां चैव गत्वा चान्द्रायणं चरेत्" मिता० स्मृ०। "आ सप्तमात् पञ्चमाच्च बन्धुभ्यः पितृमातृतः। अविवाह्या सगोत्रा च समानप्रवरा तथा। पञ्चमे सप्तमे वापि येषां वैवाहिकी क्रिया। ते च सन्तानिनः सर्व्वे पतिताः शूद्रतां गताः" नारदः। वक्तव्यञ्च उत्तराधिकारशब्दे १०६६पृ० दर्शिताः। "सगोत्राञ्चेदमत्योपयच्छेन्मातृवदेनाम् बिभृयात् समानार्षेयां विवाह्य चान्द्रायणं चरेत्" सुमन्तुः "समानगोत्रप्रवरां समुद्वाह्योपगम्य च। तस्यामुत्पाद्य चाण्डालं ब्राह्मण्यादेव हीयते।" आप०। "सर्व्वाः पितृपत्न्यो मातरस्तद्भ्रातरो मातुलास्तदपत्यानि भगिन्यस्तदपत्यानि भागिनेयानि ता धर्म्मतोऽविवाह्याः अन्यथा सङ्करकारिणस्तथाध्यापयितुरिति" सुमन्तुः। "अध्यापयितुरेतद्विवाहमन्त्रपाठयितुरेतत् सङ्करकारित्वमिति" रत्नाकरादयः। अध्यापयितुर्गुरोः कन्या अविवाह्येति रघुनन्दनेनोक्तम् "समानप्रवरा वाऽपि शिष्यसन्ततिरेव च। प्रज्ञादातुर्गुरोश्चैव सन्ततिः प्रतिषिध्यते" मत्स्यपु०। "मातुर्यन्नाम गुह्यं स्यात् सुप्रसिद्धमथापि वा। तन्नाम्नी या भवेत् कन्या मातृनाम्नीं प्रचक्षते। प्रमादात् यदि गृह्णीयात् प्रायश्चित्तं समाचरेत्। ततश्चान्द्रायणं कृत्वा तां कन्यां परिवर्ज्जयेत्" मत्स्य पु०। तथा श्यालिकापुत्र्या अपि पुत्रस्थानिकतया अविवाह्यत्वमुक्तं दत्तकमी० दृश्यम्। अत्र सपिण्डविषयेऽपवादः "सन्निकर्षेऽपि कर्त्तव्यं त्रिगोत्रात् परतो यदि"। मत्स्य पु०। "असम्बन्धा भवेद्भातुः पिण्डेनैवोदकेन वा। सा विवाह्या द्विजातीनां त्रिगोत्रान्तरिता च या"। मनुः। शूद्राणान्तु अतिदिष्टादिष्टगोत्रभागित्वेन सगोत्राविवाहो न निषिद्धः इति रघुनन्दनादयः। "द्विजानामसवर्णासु कन्यासूपयमस्तथा" वृह०ना० उक्तेः कलौ असवर्णाविवाहनिषेधात्तद्विशेषोनाभिहितः। द

विरुद्धां मातुलकन्योद्वाहस्तु शिष्टैरपि क्रियते तस्य स्मृतिविरुद्धत्वेऽपि किञ्चित् श्रौतं लिङ्गमास्थाय तेषांतथाचरणमिति बहवः। तस्य श्रौतलिङ्गस्यान्यार्थपरता पराशर भाष्यादौ दर्शिता। अतएव द्वारकास्थपदच्छिन्नदेशवासिनां तथाचरणे भाग०१०स्कन्धे। "यद्यप्यनुस्मरन् वैरं रुक्मी कृष्णावमानतः। व्यतरत् भागिनेयाय सुतां कुर्वन् स्वसुः प्रियम्"। "दौहित्रायानिरुद्धाय पौत्रीं रुक्म्याददद्धरेः। रोचनां बद्धवैरोऽपि स्वसुः प्रियचिकीर्षया जानन्नधर्म्मं तद्यौनं स्नेहपाशवशानुगः"। अधर्मं जानन्नित्युक्तं तेन तस्याधर्मत्वम्। "मातुलस्य सुतामूढ्वेति" प्रागुक्तवचनाच्च तस्याधर्मत्वम् सुव्यक्तमेव। स च विवाहोऽष्टविधः "ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथाऽऽसुरः। गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः" मनुः एतेषां लक्षणं तत्तच्छब्दे दृश्यम्। "येन भार्य्या कृता पूर्वं कृतोद्वाहा परस्य वै" हरिवं०।

उद्वाहन न० उद्+वह–णिच्–ल्युट्। १पुत्रादेरुद्वाहसम्पादने २उन्नयने ३स्थानान्तरनयने। उद्वाह्यते स्थानान्तरं नीयतेऽनेन उद्+वह–णिच्–करणे ल्युट्। ४उद्धारणसाधने "उद्घाटनं घटीयन्त्रं सलिलोद्वाहने प्रहेः" अमरः। उद्+वह–स्वार्थे णिच्–भावे ल्युट्। ५विवाहे। वाहनस्य हलाकर्षणस्योपरि वाहनं कर्षणं यत्र। ६द्विहल्ये क्षेत्रे यत्र प्रथममेकवारं कृष्ट्वा पुनः कर्षणं क्रियते तादृशे क्षेत्रे हेम०। [टके (कड़ि) हेम०।

उद्वाहनी स्त्री उद्वाह्यते स्वार्थे णिच्–कर्मणि ल्युट्। वरा-

उद्वाहिक त्रि० उद्वाहः प्रयोजनमस्य ठक् संज्ञापूर्वकविधेरनित्यत्वात् न वृद्धिः। विवाहसाधने मन्त्रादौ "नोद्वाहिकेषु मन्त्रेषु विधवावेदनं क्वचित्" मनुः। वृद्धौ औद्वाहिकोऽप्यत्र त्रि०।

उद्वाहित पु०स्त्री उद्वाहोजातोऽस्य तारका० इतच्। जातविवाहे "बाले वृद्धे तथैवार्त्तं गते च दैत्यमन्त्रिणि। उद्वाहितायां कन्यायां दम्पत्योरेकनाशनम्" राजमा०।

उद्वाहिनी स्त्री उद्वाह्यः उद्धरणं साध्यतयाऽस्त्यस्याः इनि ङीप्। रज्जौ मेदिनिः।

उद्विग्न त्रि० उद्+विज–कर्त्तरि क्त। उद्वेगयुक्ते, "निमग्नोद्विग्नसंक्षोभैः पपे दीनैव मेदिनी" भट्टिः। दुःखपरिहारासमर्थतया २व्याकुलचित्ते, ३क्षुभिते च।

उद्वीक्षण न०उद्+वि+ईक्ष–भावे ल्युट्। १ऊर्द्ध्वदृष्टौ। करणे ल्युट्। २तत्साधने नेत्रे "सरोजनोद्वीक्षणकौतुकोद्दीप्तम्" रघुः।

उद्वीत त्रि० उद्+वि+इ–क्त। विशेषेणोद्गते। (छयला-मिड्योया) समन्तात् प्लाविते "ततोयुधिष्ठिरानीकमुद्वीतार्णवनिस्वनम्" भा० द्रो० १६अ०।

उद्वृत्त त्रि०उद्गतो वृत्तात् निरा०स०। १दुर्वृत्ते। उद्+वृत–क्त। २उत्क्षिप्ते ३भुक्तोज्झिते। ४अधिके। "उद्वृत्तोहि यन्त्र्यः समधिकफलमाचष्टे" व्या० न्यायः। "कलशयोरुद्वृत्तामिवासर्वाम्भः" भा० आ० प०७। ५क्षुभिते च "उद्वृत्तनक्रात् सहसोन्ममज्ज" रघुः।

उद्वेग पु० उद्+विज–घञ्। १व्याकुलचित्ततायाम् २विरहजन्ये दुःखोद्गमे, "मनोभिः सोद्वेगैः प्रणयविहतिध्वस्तरुचयः" किरा०। "सहसोद्वेगमियं व्रजेदिति" रघुः। "शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्याः" मेघ०। "योऽजिह्मः श्वाध्यं बाधते उद्वेगं जनयति शिरोरुङ्क्लीते नासिकाश्च स्रावयति स कटुकः" सुश्रु०। "वक्तोर्भेष्वप्युद्वेगो माधुर्यं परिकीर्त्तितम्" सा०द०। ३भये च। ४गुवाकफले न०। उद्गतो वेगोऽस्मात्। ५निश्चले ६स्तिमिते ७शीघ्रगामिनि च त्रि०।

उद्वेजन त्रि० उद्+विज–भावे ल्युट्। १उद्वेगे अमरः "परदाराभिमर्षेषु प्रवृत्तान् नॄन् महीपतिः। उद्वेजनकरैर्दण्डैश्छिन्नयित्वा प्रवासयेत्" मनुः तत्र साधु छ। उद्वेजनीय उद्वेजके त्रि० "परिहरेदुद्वेजनीयाश्च कथाः" सुश्रु०।

उद्वेजित त्रि० उद्+विज–णिच्–क्त। कृतोद्वेगे "उद्वेजिता वृष्टिभिराश्रयन्ते" कुमा०।

उद्वेदि त्रि०उन्नता वेदिर्यत्र प्रा० ब० नलोपः। उन्नतवेदिके। "विमानं नवमुद्वेदि चतुःस्तम्भप्रतिष्ठितम्" रघुः

उद्वेप पु०उद्+वेप–भावे घञ्। १उत्कम्पने। कर्त्तरि अच्। २तद्युक्ते त्रि०। ततः तेन निर्वृत्तमित्यर्थे संकाशा० ण्य औद्वेप तन्निर्वृत्ते त्रि०। स्त्रियां ङीप्।

उद्वेल त्रि० उत्क्रान्तो वेलाम् अत्या० स०। १वेलातिक्रान्ते २मर्य्यादातिक्रान्ते "भयमप्रलयोद्वेलादाचख्युर्नैर्ऋतोदधेः" रघु.

उद्वेष्टन न० उद्+वेष्ट–ल्युट्। १हस्तपादयोर्बन्धने, २उपवेष्टने च। "वक्रे मधुरता तन्द्रा हृदयोद्वेष्टनं भ्रमः" "हृदयोद्वेष्टनं तन्द्रा वाचाञ्चतिरोचकः" सुश्रु०। उद्गतं वेष्टनात् निरा०त०। ।२उन्मुक्तबन्धने त्रि०। "कयाचिदुद्वेष्टनवान्तमाल्यया" रघुः कुमारश्च

उद्वोढृ पु० उद्+वह–तृच्। परिणेतरि। "उद्वोढापि भवेत् पापी संसर्गात् कुलनाशिके!। येषामागमनं पापं तस्य पुंसोदिनेदिने" महानि०त०।

उध्रस उञ्छे क्र्या० पर० सक० सेट्। उध्रस्नाति औध्रसीत्

उभ्रसाम्-बभूव आस चकार । [ज्झति ते । औद्भिष्टत्-त

उभ्रस उञ्छे उम्भे च (कणशआदाने) तु॰ सक॰ सेट् । उभ्र-

उन्द् क्लेदने रुधा॰ पर॰ सक॰ सेट् । उनत्ति उन्त्तः उन्दन्ति उ-

न्द्यात् उनत्तु । औनत् औन्ताम् औन्दन् औनः—औ-नत् । औन्दीत् । उन्दाम्—बभूव आस चकार । उन्दिता उन्दिष्यति औन्दिष्यत् । उन्दन् उन्दनम् उत्तिः उत्तः—उन्नः । "घृतप्रुषा मनसा हव्यमुन्दन्" ऋ॰ २,३,२ । "यत्र क्वाप उन्दन्त्यस्तिष्ठन्ति तदोषधयोजायन्ते" शत॰ ७,५,२,२ । भ्वादित्वमपि । "शिरश्चिदन्दति श्रद्धिति: केशान् वपत्याप उन्दन्तु वर्चस: इति" आश्व॰ गृ॰ १,१७, ७ । णिच् उन्दयति-ते औन्दिदत्-त सन् उन्दिदिषति ।

उन्दुर(रु) पु॰ उन्द-उर-उरु वा । मूषिके मूषिक-भेदास्तद्दंशोपद्रवाश्च चिकित्साः सुश्रु॰ दर्शिता यथा । "अथातो मूषिककल्पं व्याख्यास्यामः । पूर्वमुक्ताः शुक्र-विषा मूषिका ये समासतः । नामलक्षणभैषज्यैरष्टादश निबोध तान् । लालनः पुत्रकः कृष्णो हंसिरश्चिक्किर-स्तथा । छुछुन्दरोऽलसश्चैव कषायदशनोऽपि च । कुलि-ङ्गश्चाजितश्चैव चपलः कपिलस्तथा । कोकिलोऽरुणसंज्ञश्च महाकृष्णस्तथोन्दुरः । श्वेतेन महता सार्द्धं कपिलेनाखुना तथा । मूषिकश्च कपोताभस्तथैवाष्टादश स्मृताः । शुक्रं पतति यत्रैषां शुक्रदिग्धैः स्पृशन्ति वा । नखदन्तादिभि-स्तस्मिन् गात्रे रक्तं प्रदुष्यति । जायन्ते ग्रन्थयः शोफाः कर्णिका मण्डलानि च । पिडकोपचयश्चोग्रो विसर्पाः किटिभानि च । पर्वभेदोरुजस्तीव्रा ज्वरो मूर्च्छा च दारु-णा । दौर्बल्यमरुचिः श्वासो वमथुर्लोमहर्षणम् । दष्ट-रूपं समासेनैतच्च व्यासतः शृणु । लालाखावो लालनेन हिक्काच्छर्दिश्च जायते । तण्डुलीयककल्कन्तु शिष्यात्तत्र समाक्षिकम् । पुत्रकेणाङ्गसादश्च पाण्डुवर्णश्च जायते । चीयते चाग्निभिश्चाङ्गमाखुशावकसन्निभैः । शिरीषेङ्गुदकल्कन्तु शिष्यात्तत्र समाक्षिकम् । कृष्णेना-सृक् छर्दयति दुर्दिनेषु विशेषतः । शिरीषफलकिण्वन्तु पिबेत् किंशुकभस्मना । हंसिरेणान्नविद्वेषो जृम्भा लोमहर्षणम् । पिबेदारग्वधादिन्तु वमनस्तत्र चाग-दः । चिक्किरेण शिरोदुःखं शोफो हिक्का वमी तथा । जालिनीमदनाङ्कोटकषायैर्वामयेत्तु तम् । छुछुन्दरेण तृट्-छर्दिर्ज्वरोऽ दौर्बल्यमेव च । ग्रीवायाश्च: पृष्ठशोफो गन्धा-ऽख्यश्च विसूचिका । वचां हरीतकीं शुण्ठीं पिष्ट्वा पि-प्पलीं मधु । वमनार्थं प्रयुञ्जीत इदमाशु दापयेत् । ग्रीवाऽ-स्तम्भोऽलसेनोर्ध्वं वायुर्दंशे रुजा ज्वरः । महागदं सपिर्दद्यात् शिष्यात्तत्र समाक्षिकम् । निम्बा कषायदन्तेन हृल्लासः काश्यंमेव च । कौद्रोपेताः शिरीषस्य शिष्यात् सार-फलत्वचः । कुलिङ्गेन रुजः शोफो राज्यश्च दंशम-ण्डले । कक्षे सिन्धुवारे च शिष्यात्तत्र समाक्षिके । अजितेन वमी मूर्च्छा हृद्ग्रहः कृष्णनेत्रता । तत्र स्नु-हीक्षीरपिष्टां कालिन्दीं मधुना लिहेत् । चपलेन भवे-च्छर्दिर्मूर्च्छा च सह तृष्णया । तभद्रकाष्ठां जटां क्षौ-द्रेण त्रिफलां लिहेत् । कपिलेन व्रणे कोथो ज्वरो ग्रन्थ्युद्गमस्तथा । क्षौद्रेण शिग्रुत्रिफलां खेतां-चापि पुनर्नवाम् । ग्रन्थयः कोकिलेनोग्रो ज्वरो दाहश्च दारुणः । वर्षाभूनीलिनीक्वाथसिद्धं तत्र घृतं पिबेत् । अरुणेनानिलः क्रुद्धो वातजान् कुरुते गदान् । महा-कृष्णेन पित्तञ्च श्वेतेन कफ एव च । महता कपिलेना-सृक् कपोतेन चतुष्टयम् । भवन्ति चैषां दंशेषु ग्रन्थि-मण्डलकर्णिकाः । पिडकोपचयाश्चोग्राः शोफश्च भृश-दारुणः" ।

उन्दुर(रु)कर्णी स्त्री उन्दुरस्य कर्ण इव पर्णमस्याः गौ॰ ङीष् । आखुकर्ण्याम् । (उन्दुरकानी) ख्याते वृक्ष तत्रैव

उन्दूरु पु॰ उन्द–ऊरु । मूषिके । [पक्षे उन्न आर्द्रे त्रि॰ ।

उन्न त्रि॰ उन्द–क्त । क्लिन्ने १आर्द्रे (भिजे) २दयापरे च ।

उन्नत त्रि॰ उद्+नम–क्त । १उच्चे, २महति च । "उन्नतेन स्थितिमता धुरमुद्वहता भुवः" कुमा॰ "स्थितः सर्वो-न्नतेनोर्वीम्" रघुः । "वन्धुरं तून्नतानतम्" अमरः । "मधुरोन्नतमुन्नतिमन्नत्वोः" माघः ।

सि॰ शि॰ उक्ते दिनमानज्ञानसाधने ३उपायभेदे न॰ । "छाया प्रभाभिमतदिक्क्रियमेन तावत् तासेव कालनियमेन च वच्मि भूयः । स्यादुन्नतं द्युगतशेषकयोर्यदल्पं तेनोनितं दिनदलं नतसंज्ञकं च । अथोन्नतादूनयुताच्चरेण क्रमाद्दुद-ग्दक्षिणगोलयोश्च । स्यात् सूत्रमेतद्गुणितं द्युमौर्व्या व्यासार्धभक्तं च कलाभिधानम्" सि॰ । "दिवसस्य यद्गतं यच्च शेषं तयोर्यदल्पं तदुन्नतसंज्ञं ज्ञेयम् । तेनोन्नतेनोनोनितं दिन-दलमानं नतसंज्ञं भवति । अथोन्नतादुन्नतकालादुत्त-रगोले च तेनोनिता दक्षिणे युताद्या ज्या तत्सूत्रम् । सा सूत्रसंज्ञेत्यर्थः । तत् सूत्रं द्युज्यया गुणितं त्रि-ज्यया भक्तं कलासंज्ञं भवति । अत्रोपपत्तिः । उन्नतम् काले छाया ज्ञाध्या तस्मिन् काले स्वाहोरात्रवृत्ते यावतो-भिर्घटिकाभिः क्षितिजादुन्नतो रविस्तावदुन्नतसंज्ञा । येषु

कालेन मध्याह्नोन्नतकालस्य नतसंज्ञा । अथ परेष्टोन्नतस्यो-न्नतकालस्य विल ज्या साध्या । सा च ज्या मध्याह्नविभि-र्भवति । स च मध्यप्रदेशोऽहोरात्रवृत्तस्योन्मण्डलसंपाते भवति । यत उन्मण्डलसंपाताभ्यामूर्ध्वमहोरात्रवृत्तस्यार्धम-धोऽर्धम् । अत उन्मण्डलावधेर्जीवा साध्या । क्षितिजो-न्मण्डलयोरन्तरं चरार्धम् । अतश्चरार्धेन वर्जितादुन्नता-दुत्तरगोले, दक्षिणे तु युतात् । यत उत्तरगोले क्षितिजादु-पर्युन्मण्डलं, दक्षिणेऽधः । तस्मात् कालाद्या ज्या सा-धिता सा त्रिज्यावृत्तपरिणता । सा च सूत्रसंज्ञा । अथ यदि त्रिज्यावृत्त एतावती तदा द्युज्यावृत्ते कियतीत्यनुपा-तेन द्युज्यावृत्तपरिणता । सा च कालासंज्ञा" प्रमि० ।

सि० शि० उक्ते महाशङ्कानयनप्रकाराभावे ४उपायभेदे च । "यन्त्रवेधविधिना युगोन्नतिर्या नतिश्च भवतोऽथवाञ्चकौ । तौ क्रमाद्विगुणवृत्तखण्डयोर्वेध्य वा नतमथोन्नता लवाः" सि० 'चक्रयन्त्रेण पट्टवेधवद् ध्रुवं विध्येत् । तत्र यन्त्रनेम्यां च उन्नतांशास्तेऽक्षांशाः । ये नतास्ते लम्बांशाः । अथ वा विषुवद्दिनार्द्धे वेधेऽस्य नतोन्नतांशास्तेऽक्षलम्बांशा इति युक्तियुक्तम्" प्रमि० । "उन्नतं द्युनिशमण्डले कुजात् पावनं द्युतिविधौ हि तज्ज्यका । तिर्यगन्तरयतोऽपक्रमवृत्तच्छेदको न तु नरः स लम्बवत्" सि० । "दृङ्मण्डले क्षितिजादुपरि यष्टिपर्यन्तं येऽंशास्त उन्नताः खमध्यादधस्ते नताः । उन्नतांशानां ज्या शङ्कुः । नतांशज्या दृग्ज्या शङ्कुः कक्षाविप्राभिहनः कार्य्यः । दृङ्कुदवेनोक्तिनत्वात् । अयमर्थो पट्ट्छायाधिकारे व्याख्यात एव" प्रमि० । "उदग्दिशं याति यथा यथा नरस्तथा तथा स्यान्नत-मक्षमण्डलम् । उदग्दिशं पश्यति चोन्नतं क्षितेरन्तरे योजनजाः पलांशकाः" सि० शि० ।

ततः भावे ष्यञ् औन्नत्य न० । तल् उन्नता स्त्री । त्व उन्नतत्व न०, तद्भावे "तदेव नैसर्गिकमुन्नतत्वम्" रघुः

उन्नतकाल पु० सि० शि० उक्ते छायातः कालज्ञानसाधने प्रक्रियाभेदे "पलश्रुतिघ्नस्त्रिगुणस्य वर्गो द्युज्येष्टकर्णाहति-हृद्भवेद्वा । इष्टान्त्यका तद्रहितान्त्यका या भवन्ति या उत्क्रमचापलिप्ताः । नताश्च तत् खरहृद्दलं तैरूनोन्नत-श्चोन्नतकाल एवम्" सि० । "त्रिज्यावर्गः पलकर्णेन गुण्यः द्युज्यया इष्टकर्णस्य च घातेन भाज्यः यत्फलं लभ्यते सेष्टान्त्यका । तयेष्टान्त्यया रहितया अन्त्याया यच्छेषं त-स्योत्क्रमेण धनुः कार्य्यं तस्य धनुषो यावत्यः कलास्ताव-त्यः किल कालेन नताश्चरोपेयाः तैर्नतासुभिरूनोन्नता-दिनदलासव उन्नतासवः स्युः । प्रकारान्तरेण त्रैरा-शिकमनेनोपपत्तिः । यदीष्टच्छायाकर्णेन द्वादशाङ्गुलशङ्कु-र्लभ्यते तदा त्रिज्याकर्णेन क इति । अत त्रिज्याया द्वा-दश गुण इष्टकर्णो हरः । फलं महाशङ्कुः । अथ तस्य हृतिकरणार्थमनुपातः । यदि द्वादशाङ्गुलशङ्कोर्विषुवत्कर्णः कर्णस्तदास्य महाशङ्कोः क इति । पूर्वं त्रिज्याया द्वादश गुण इदानीं हरः । अतस्तुल्यत्वाद्द्वादशाङ्कयोर्गुणहरयो-र्नाशे कृते सति त्रिज्यायाः पलकर्णो गुण इष्टच्छायाकर्णो हरः फलमिष्टहृतिः । अथेष्टान्त्याकरणायानुपातः । यदि द्युज्यया त्रिज्या लभ्यते तदिष्टहृत्या किमिति । इदानीं त्रिज्या गुणो द्युज्या हरः । हरयोर्घातो हर इति द्युज्येष्टकर्णाहतिर्भवति । गुणयोर्घाते त्रिज्यावर्गः पल-कर्णगुणितो भवति । एवं फलमिष्टान्त्यका । तया वर्जि-ताया अन्त्याया यच्छेषं सा नतज्योत्क्रमज्या शरसंज्ञा । अतस्तस्या धनुरुत्क्रमेण स नतकालः स्यात् । नतकालो दिनार्धात् पतित उन्नतकालः स्यादित्युपपन्नम्" प्रमि०

उन्नतानत न० उन्नतं च तदानतञ्च । उन्नतनीचस्थानादौ । "बन्धुरं तून्नतानतम्" अमरः ।

उन्नति स्त्री उद्+नम-क्तिन् । १वृद्धौ, २उदये, ३गरुडभा-र्यायाञ्च तत्र चन्द्रस्य शृङ्गोन्नतिः सि० शि० उक्ता यथा "मासान्तपादे प्रथमेऽथ चेन्दोः शृङ्गोन्नतिर्यद्दिवसेऽवगम्या । तदोदयेऽस्ते निशि वा प्रसाध्यः शङ्कुर्विधोः स्वोदित-नाडिकाद्यैः" सि० । 'कृष्णाष्टम्या उपरि प्रथमेऽ-थ वा शुक्लाष्टम्याः प्रागेव यस्मिन्नभीष्टदिने शशि-शृङ्गोन्नतिर्ज्ञातुमभीष्टा तस्मिन् दिने मासान्तपाद औद-यिकौ चन्द्रार्कौ स्पष्टौ कार्यौ । प्रथमचरणे त्वस्तकालिकौ ततः शृङ्गोन्नतिर्ज्ञेया । निशि वा । एतदुक्तं भवति । मासान्तपाद उदयकाले शशिशृङ्गोन्नतिः साध्या । प्रथम-चरणे त्वस्तकाले । अथ वा निशुदयास्तनियमेन । चन्द्रोदये तस्योदयात् प्रागिष्टघटीतुल्यकाले वा चन्द्रास्ते तस्मादु-परीष्टासु घटीषु वा शृङ्गोन्नतिः साध्या । तत्र तात्का-लिकौ चन्द्रार्कौ कृत्वा चन्द्रस्य कुङ्कुमाद्यम्बुदयाद्वास्तादुन्नत-घटिकादिभिस्तदुपकरणैः शङ्कुः साध्यः । अत्रोपपत्तिः । चन्द्रस्यार्धादूने शुक्ले तस्योदौ शृङ्गाकारे भवतः । तस्मे-ष्टकाले कतरा शृङ्गोन्नतिर्भविष्यतीति ज्ञातव्यम् । तत्र प-क्षस्य शृङ्गाकारतार्धादूने शुक्ले । तथार्धादूनत्वं मासान्त-पादे प्रथमे च संभवति । द्वितीयतृतीययोरपि चरणयो-र्ग्रहणशृङ्गादिभिः कृष्णशृङ्गोन्नतिरानीता वा यत्र न चन्द्र-

ता। नहि नरैः शण्यशृङ्गोन्नतिः सदोपलभ्यते। प्रसिद्धा तु शुक्लशृङ्गोन्नतिः। अत उक्तं माषान्तपादे प्रथमेऽथ वेति। "वर्गोजो करिकुम्भ विम्बकरोमत्युन्नतिं, गच्छतः"। लोके-नोन्नतिमायाति" इति च सा॰द॰

उन्नतीश पु॰ ६त॰। गरुड़े त्रिका॰।

उन्नद्ध त्रि॰ उद्+नह–क्त। १उद्धते। उत्कटे च। "जन्म-स्नतेज उन्नद्धमस्तम्भोऽस्तमतेजसा" भा॰१स्क॰। उन्नद्धं उ-त्कटम्"। श्रीधरः।

उन्नमन न॰ उद्+नम–ल्युट्।१उन्नतौ। णिच्–ल्युट् न दीर्घः। २उत्तोलने सुश्रुतोक्ते ३यन्त्रकर्मभेदे च। तानि चतुर्विंशतिः यथोक्तं तत्रैव। "यन्त्रकर्माणि तु निर्घातनपूरणबन्धन-व्यूहनवर्त्तनचालनविवर्त्तनविवरणपीडनमार्गविशोधनविक-र्षणाहरणाकुञ्चनोन्नमनविनमनभञ्जनोन्मथनाचूषणैषणदार-णर्जूकरणप्रक्षालनप्रधमनप्रमार्जनानि चतुर्विंशतिः"। उन्नमनञ्च प्रवाहधिरस्रावसाधनं यथोक्तं तत्रैव "सन्धि-गतः पीड्यमानो न प्रवर्त्तेत आकुञ्चनप्रसारणोन्नमन विनमनप्रधावनात् कासनप्रवाहैश्च सुवति"।

उन्नमित त्रि॰उद्+नम–णिच्-क्त। १उत्तोलिते, २अर्ज्जीकृते च"अथ प्रयत्नोन्नमितानमत्फणैः" कुमा॰ "क्वचिदुन्नमिता-ननौ" रघुः। [मण्डितं तत्" माघः

उन्नम्र त्रि॰ उद्+नम–रन्। उन्नते "उन्नम्रताम्रपटमण्डप

उन्नय पु॰ उद्+नी–"क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिवि-शते"इत्युक्तेः अच्। कूपादितो जलादेरुत्तोलने अमरः।

उन्नयन न॰ उद्+नी–ल्युट्। १वितर्के, २अर्द्ध प्रापणे च। "अनादिष्टांश्चेदोन्नयनश्रुतेः कात्या॰" ८,५,२४ उन्नयन श्रुतिश्च। "अतोहिदेवेभ्य उन्नयन्त्यतोमनुष्येभ्यः" शत॰ब्रा॰ ४,५,६,२, "चमसोन्नयनकाले नाभूत्व दभ्नो-न्मृद्य तत्रमसेनोन्नयेत्" कात्या॰ १०,८,२१, "तेभ्यश्चोन्नय-नमभ्यभि सोमानुन्नयन्तीति श्रुतेः" कात्या॰२२,१०, ५, "उन्नयन्त्यस्मात् अपादाने ल्युट्"। ३पूतभृत्पात्रे। "उन्नयने च" कात्या॰२५,१२,१४, तदेव भवति उन्नय-नमादित्युन्नयनम् पूतभृदुच्यते" कर्कः। उन्नमित नयनं येन प्रा॰ब॰। उन्नमितनेत्रे त्रि॰।

उन्नस त्रि॰उन्नता नासा यस्य अच् समा॰ नसादेशः। उन्न-तनासिके। "उन्नसं दधतो वक्त्रम्" भट्टिः।

उन्नाद पु॰ उद्+नद–घञ्। उच्चशब्दे "शरभोन्नादसंजुष्टम् नानामृगनिषेवितम्" भा॰व॰१५८अ॰।

उन्नाभ पु॰ उन्नता नाभिर्यस्य अच् समा॰। सूर्य्यवंश्ये नृपभेदे "उन्नाभ इत्युद्गतनामधेयः"रघुः अससंज्ञायान्तु न अच्। उन्नाभिरित्येव त्रि॰। उन्नता नाभिः प्रा॰स॰। उन्नत-नाभौ पुंस्त्री॰।

उन्नाय पु॰ उद्+नी–"अवोदोर्नियः" पा॰घञ्। १ऊर्द्ध्वनयने २वितर्के ३उच्छ्रये च "उन्नायानधिगच्छन्तः प्रज्ञावैकल्यधा-म्नताम्" भट्टिः। [हेमच॰।

उन्नाह पु॰ उद्+नह–घञ्। १उत्तोल्यबन्धने २काञ्जिके न॰

उन्निद्र त्रि॰उद्गता निद्रा मुद्रा यस्य। १विकसिते निद्रायाश्च मुकुलीभावरूपनेत्रनिमीलनार्थकत्वेन तथात्वम्। "उन्नि-द्रपुष्पचणचम्पकपुष्पभासा" माघः। २निद्रारहिते च। "तामुन्निद्रामवनिशयनां सौधवातायनस्थाम्" मेघ॰। "शय्याप्रान्तविवर्त्तनैर्विगमयत्युन्निद्र एव क्षपाः" शकु॰। उन्निद्रता च जागरणं तच्च विप्रलम्भशृङ्गारे कामकृत-दशविधावस्थाभेदः तासावस्थाः ४४७पृ॰ उक्ताः।

उन्नीत त्रि॰ उद्+नी–क्त। १ऊर्द्ध्वं नीते २वितर्किते च।

उन्नेतृ त्रि॰ उद्+नी–तृच् स्त्रियां ङीप्। १ऊर्द्ध्वनायिनि २उद्भावके च षोडशसु ऋत्विक्षु ३ऋत्विग्भेदे पु॰ स च अध्वरशब्दे ८५पृ॰ दर्शितः। तस्य च गीते स्तुतास्मादनादुदकादुत्तारणाद्योन्नेतृत्वम् "उन्नेतैनानु-न्नयति" "उन्नेतरुन्नयोन्नयोन्नेतर्वसो अभ्युन्नयान इत्युन्नीयमानाजपन्ति" आश्व॰ श्रौ॰ ६,१२,१२,१४। "उन्नेता सयाखोक्तविधिना सर्वानुदकादुत्तारयति" "उन्नेत-रित्येतं मन्त्रं जपन्ति" ना॰इ॰ "आहृतमुन्नेता द्रोणकलशमिडामिव प्रतिगृह्योपहूयमिडाऽवेक्षेत" आश्व॰ श्रौ॰ ६,१२,१। "अथोन्नेत उपांशुसवनं प्रयच्छ-त्यथाहोन्नेतारमाहरन् याचस्व" इति संप्रेष्यति प्रति-प्रस्थाता संस्रवानुन्नेता चमसेनोदञ्चनेन वा" शत॰ब्रा॰ ४,२,५,१८,२१। ततः उन्नेत्रा॰ अण् न वृद्धिः। उन्नेत्र उन्नेतृसम्बन्धिनि त्रि॰। "प्रतिप्रस्थाताग्नीध्रोन्नेत्रै" कात्या॰ २४,४,४६। इत्यौन्नेत्रमित्यपि तत्रैव त्रि॰।

उन्नेय त्रि॰ उद्–नी–यत्। १ऊर्द्ध्वनयनीये २उद्भावनीये च।

उन्मज्जक पु॰उद्+मस्ज–ण्वुल्। "कण्ठदघ्ने जले स्थित्वा" तपः कुर्वन् प्रवर्त्तते। उन्मज्जकः स विज्ञेयस्तापसो लोक पूजितः" इत्युक्तलक्षणे १तापसे। जलादेरुपरि २उत्-प्लावके त्रि॰। [(भाषा) प्लवने।

उन्मज्जन न॰ उद्+मस्ज–ल्युट्। मज्जनविपरीतव्यापारे

उन्मण्डल न॰ उन्मग्नं मण्डलम्। सि॰ शि॰ उक्ते दिन रात्र्योः क्षयवृद्धिसाधने मण्डलभेदे। यथाह तत्रैव।

"पूर्वापरक्षितिजसंगमयोर्विलग्नं याम्ये ध्रुवे पललवैः क्षितिजादधःस्थे। सौम्ये कुजादुपरि चाक्षलवैर्ध्रुवे तदुन्मण्डलं दिननिशोः क्षयवृद्धिकारि" शि०। "समवृत्तक्षितिजयोर्यौ पूर्वापरौ संपातौ तयोर्ध्रुवचिह्नयोश्च लग्नं यन्निबध्यते तदुन्मण्डलसंज्ञम्। दिनरात्र्योर्वृद्धिक्षयौ तद्वशेन भवतः" प्रमि०। सूर्य्यसिद्धान्ते रङ्गनाथेन च स्पष्टमुक्तं यथा "प्राक्पश्चिमाश्रिता रेखा प्रोच्यते सममण्डलम्। उन्मण्डलं च विषुवन्मण्डलं परिकीर्त्यते" सू०। "प्राक्पश्चिमाश्रिता पूर्व्वपश्चिमवस्त्रता साधिता रेखा समवृत्तमुच्यते। सैव रेखोन्मण्डलं विषुवन्मण्डलम्। चः समुच्चये। उभयसंज्ञं कथ्यते। अत्रोपपत्तिः। क्षितिजपूर्वापरवृत्तसंयोगौ पूर्वापरे तन्मूलं पूर्वापरस्थलमिति। पूर्वापरवृत्तस्य भूमावूर्ध्वाधरानुकारिवृत्तत्वेनादर्शनाद्रेखाकारतयैव दर्शनाच्च पूर्वापरवृत्तमपि तन्मूलम्। पूर्वापरवृत्तस्य सममण्डलत्वेनाभिधानात् तद्रेखा सममण्डलसञ्ज्ञोक्ता। अथ स्वनिरक्षदेशक्षितिजवृत्तस्योन्मण्डलाख्यस्य तत्संयोगयोः संलग्नत्वात् तन्मध्यस्थलत्वेन पूर्वापरस्थलस्यापि सत्वात् पूर्वापरस्थलमुन्मण्डलसञ्ज्ञम्। एतेनान्यदेशक्षितिजसञ्ज्ञया स्वदेशक्षितिजसञ्ज्ञा सुतरां सिद्धेति पूर्वापरस्थलस्य क्षितिजवृत्तसञ्ज्ञा द्योतिता। पूर्वापरस्थानयोः क्षितिजवृत्तस्य संलग्नत्वादुन्मण्डलवृत्तस्य क्षितिजानुकारित्वाच्च" रङ्ग०। "उन्मण्डलं दिनक्षयवृद्धिकारि" ... "उदृत्तादयोऽप्यत्र। परोऽथ योदृत्तगते रवौ श्रुतिः" सि० शि०। प्रा०स०। २उन्मण्डले त्रि०।

उन्मण्डलकर्ण पु० सि०शि० उक्ते छायया दिनमानार्थे उन्मण्डलस्यार्कस्य छायाकर्णे। तदानयनं तत्रैव यथा "युतायनांशार्कभुजज्यया स्वरामतिथ्यभ्रभुवो" (१०१५३०) हृताः परः। पलश्रुतिघ्नः पलभाविभाजितः परोऽथ योदृत्तगते रवौ श्रुतिः" सि०। "अर्कस्य सायनांशस्य भुजज्या साध्या। न तच्चनुसण्डज्यलघः। तया ज्यया पूर्णाग्नितिथिस्त्रन्यषमितो (१०१५३०) भाज्याः। यल्लब्धमसौ पराख्यः। स परः पलकर्णेन गुण्यः पलभया भाज्यः। फलमुन्मण्डलगतस्यार्कस्य छायाकर्णो वा भवति" प्रमि०।

उन्मण्डलशङ्कु पु० सि०शि० उक्ते अवच्छेदप्रदर्शनार्थे उन्मण्डलशङ्कौ। "अपादिखण्डं कथिता च कोटिरदृत्तना दोः श्रवणोऽपमज्या। उदृत्तना कोटिरथापमज्यायत्खण्डं भुजस्तच्छ्रवणः क्षितिज्या। खण्डं यदूर्ध्वं समवृत्तशङ्कोयत् तद्धृतेस्तावथ कोटिकर्णौ। अपादिखण्डं भुज एवमष्टौ क्षेत्राण्यमून्यक्षभवानि तावत्" सि०। "अत्र किल निरक्षदेशे यदेव विषुवन्मण्डलं तदेव सममण्डलम्। तथा क्षितिजादन्यदुन्मण्डलं नाम वलयं नास्ति। तत्र ध्रुवौ च क्षितिजावलग्नौ। अथ निरक्षदेशादुदृष्टा यथा यथोत्तरतो गच्छति तथा तथोदग्ध्रुवमुन्नतं पश्यति। तथा यैर्भागैर्ध्रुव उन्नतस्तैरेव भागैरक्षसंज्ञैः खस्वस्तिकाद्दक्षिणतो विषुवन्मण्डलं नतं पश्यति। विषुवन्मण्डलस्य तिर्यक्स्थितत्वात् तदाश्रिताश्च होरात्रवृत्तानि स्वस्थाने तिरश्चीनानि भवन्ति। अतः साक्षे देशे खगोलवलयानां तिरश्चीनखगोलवलयानां च संपातात् त्र्यस्राणि क्षेत्राण्युत्पद्यन्ते। तान्यक्षक्षेत्राणि प्राग्वदुपयोगित्वात् कथ्यन्ते। अक्षभा नाम पलप्रभिन्ना सा भुजः। द्वादशाङ्गुलः शङ्कुः कोटिः। अक्षकर्णस्तत्र कर्णः" प्रमि० उदृत्तानयनम्। एवमुन्मण्डलादिशङ्कुरप्यत्र।

उन्मत्त पु० उद्+मद–करणे क्त। १धूस्तूरे "विल्वैरण्डार्कसर्वाभूदधिस्योन्मत्तयिप्पुभिः" सुश्रु०। २मुचकुन्दवृक्षे च। कर्त्तरि क्त। ३उन्मादवति, ४पद्माविष्टवति च त्रि०। "बालवृद्धातुरार्त्तमत्तोन्मत्तापवर्ज्जितम्" नारदः। "उन्मत्तेन वातिकाद्युन्मादयुक्तेन" मिता०। "उन्मत्तानाञ्च या गाथा शिशूनां चेष्टितं च यत्। स्त्रियो यच्च प्रभाषन्ते नास्ति तत्र व्यतिक्रमः" म०त० मत्स्यपु०। ४उद्धते च उन्मत्तगङ्गम्। अतिशयेन मत्तः। ५अतिमत्ते "मदोन्मत्तस्य भूपस्य कुञ्जरस्य च गच्छतः" पञ्चतन्त्रम्।

उन्मत्तक पु० उन्मत्त इव कन्। १तापसभेदे। अवधूतशब्दे ४२८ पृष्ठे विवृतिः। स्वार्थे कन्। २उन्मत्तार्थे। "क्लीबोऽथ पतितस्तज्जः पङ्गुरुन्मत्तको जडः" याज्ञवल्क्यः।

उन्मत्तगङ्ग अव्य० उन्मत्ता उद्धता गङ्गा यत्र संज्ञायाम् अन्यपदार्थत्वे अव्ययी०। देशभेदे। "उन्मत्तगङ्गं नाम देशः" सि०कौ०।

उन्मत्तगीत त्रि० उन्मत्तेन गीतम् "इत्यद्भुतेन कृतमिति" पा० ३त०। उन्मत्तेन गीते एवम् उन्मत्तप्रलपितादयोऽपि उन्मत्तेन प्रलपिताद्यर्थे त्रि०।

उन्मथन न० उद्+मथ–भावे ल्युट्। १उन्मर्द्दने २हिंसने। "अन्योन्यसूतोन्मथनादभूताम्" रघुः "वायुनोन्मथनं चापि भ्रमश्च क्रमतस्तथा" सुश्रु०। सुश्रुतोक्ते ३यन्त्रकर्मभेदे च उन्मथनशब्दे ११९०पृ० दृश्यम्। कर्त्तरि ल्यु। ४उन्मर्द्दनकारके त्रि०। "विपक्षचित्तोन्मथना नखव्रणाः" किरा०

उन्मथित त्रि० उद्+मथ-क्त। उद्धृष्टे मर्द्दिते।

उन्मद पु० उद्गतो मदो मत्तताऽस्य प्रा० ब० गतलोपः।

२उद्धतमदे। "उन्मदमृगमदरभसवशंवदमवदलमालतमाले" जयदेवः "उदीरयामासुरिवोन्मदानाम्" रघुः "क्रीडोर्मिलोलोन्मदराजहंसे" रघुः। १४०। २उद्धतमदसाधने "मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे" माघः।

उन्मदन त्रि० उद्भूतो मदनोऽस्य प्रा० ब० भूतकोपः। उद्भूतकामे। "तदाप्रभृत्युन्मदना बभूव" कुमा०।

उन्मदिष्णु त्रि० उद्+मद-ताच्छील्ये इष्णुच्। उन्मादशीले।

उन्मनस् त्रि० उद्भ्रान्तं मनोऽस्य। १उत्कण्ठायुक्ते, २अन्यमनस्के च। "पयोधरेणोरसि काचिदुन्मनाः" माघः। "उन्मनाः प्रथमजन्मचेष्टितान्यस्मरन्नपि बभूव राघवः" रघुः वा कप्। उन्मनस्कोऽप्यत्र। भ्वा० अभूततद्भावे क्यङ् सलोपश्च उन्मनायते उन्मनायमानः "अयमनुन्मनायितम्" । च्वि-कृभ्वस्तिषु सलोपश्च उन्मनीकरोति उन्मनीभवति उन्मनीस्यात्"।

उन्मनी स्त्री उन्मनस्+पृषो०। योगिनामवस्थाभेदे। "उन्मन्यवस्थाधिगमाय विद्वन्नुपायमेकं तव निर्दिशामि। पश्यन्नुदासीनतया प्रपञ्चं सङ्कल्पमुन्मूलय सावधानः" आचार्य्यः।

उन्मन्थ पु० उद्+मन्थ-भावे घञ्। वधे २हिंसने ३उन्मर्द्दने च।

उन्मन्थन न० न० उद्+मन्थ-ल्युट्। ऊर्द्ध्वतो दण्डादिना विलोडने। करणे ल्युट्। तत्साधने २दण्डादौ।

उन्मर्द्दन न० उद्+मर्द-ल्युट्। १उद्वर्त्तने सुश्रुतोक्ते वायुप्रसादनार्थे २व्यापारभेदे। वायौ इत्युपक्रम्य सुश्रु० "त्वङ्मांसासृक्शिरां प्राप्ते कुर्य्याच्चासृग्विमोक्षणम्। स्नेहोपनाहाग्निकर्म्म बन्धनोन्मर्द्दनानि च" मूत्रोपद्रवनिवारणार्थे सुश्रुतोक्ते ३व्यापारभेदे च "उन्मर्द्दनस्वेदवहनबन्धक्रियाः"। करणे ल्युट्। ४उन्मर्द्दनसाधने द्रव्यादौ। "अर्चेताम्युपकल्पयीत समावर्त्तमाने मणिं कुण्डले वस्त्रयुगं छत्रमुपानद्युगं दण्डं स्रजमुन्मर्द्दनमनुलेपनमाञ्जनमुष्णीषमित्यात्मने चाचार्य्याय च" आ०गृ० ३,८,१, "उन्मर्द्दनमभिषेकोऽवनीयैके" कात्या० १९,४,८। "उन्मर्द्दनचन्दनादि" कर्कः।

उन्मा स्त्री उद्+मा-अ। ऊर्द्ध्वमाने। "सहस्रस्योन्मासि साहस्रोऽसि" यजु० १५,६५; "उन्मा" उन्मानं तुलादि वेददी०।

उन्माथ पु० उन्मथ्यतेऽनेन उद्+मथ-करणे घञ्। १आमिषदानेन मृगादिबन्धनार्थं निवेशिते कूटयन्त्रे (फांद) इति ख्याते। भावे घञ्। २विलोडोत्थापने, ३हिंसने च। तमथागत्य चाण्डालोऽवज्ञरूपे हतकेतनः। प्रयोजयति चोन्माथं निक्षमसं गते रवौ" भा०शा० १३८ अ०।

उन्माद पु० उद्+मद-आधारे घञ्। रोगभेदे स च सुश्रुते दर्शितो यथा "अथात उन्मादप्रतिषेधमध्यायं व्याख्यास्यामः॥ मदयन्त्युद्धता दोषा यस्मादुन्मार्गमाश्रिताः। मानसोऽयमतो व्याधिरुन्माद इति कीर्त्तितः॥ एकैकशः समस्तैश्च दोषैरत्यर्थमूर्च्छितैः। मानसेन च दुःखेन स पञ्चविध उच्यते॥ विषाद्भवति षष्ठश्च यथास्वन्तत्र भेषजम्। स चाप्रवृद्धस्तरुणो मदसंज्ञां बिभर्त्ति च॥ मोहोद्वेगौ स्वनः श्रोत्रे गात्राणामपकर्षणम्। अत्युत्साहोऽरुचिश्चान्ने स्वप्ने कलुषभोजनम्॥ वायुनोन्मथनञ्चापि भ्रमश्च क्रमतस्तथा। यस्य स्यादचिरेणैव सुन्माद' सोऽधिगच्छति॥ रूक्षच्छविः परुषवाक् धमनी ततोऽशा श्वासाहरः कृशतनुः स्फुरिताङ्गसन्धिः। आस्फोटयन् पठति गायति नृत्यशीलो विक्रोशति भ्रमति चाप्यनिलप्रकोपात्॥ तृट्स्वेददाहबहुलो बहुभुग्विनिद्रश्छायाहिमानिलजलान्तविहारसेवी। तीक्ष्णो हिमाम्बुनिचयेऽपि स वह्निशङ्की पित्ताद्दिवा नभसि पश्यति तारकाश्च॥ छर्द्यग्निसादसदनारुचिकासयुक्तो योषिद्विविक्तरतिरल्पमतिप्रचारः। निद्रापरोऽल्पकथनोऽल्पभुगुष्णसेवी रात्रौ भृशं भवति चापि कफप्रकोपात्॥ सर्वात्मके त्रिभिरपि व्यतिमिश्रितानि रूपाणि वातकफपित्तकृतानि विद्यात्। सम्पूर्णलक्षणमसाध्यमुदाहरन्ति सर्वात्मकं कश्चिदपि प्रवदन्ति साध्यम्॥ चौरैर्नरेन्द्रपुरुषैररिभिस्तथान्यैर्वित्रासितस्य धनबान्धवसंक्षयाद्वा। गाढं क्षते मनसि च प्रियया रिरंसोर्जायेत चोत्कटतरो मनसो विकारः॥ चित्रं स जल्पति मनोऽनुगतं विसंज्ञो गायत्यथो हसति रोदिति चापि मूढः। रक्तेक्षणो हतबलेन्द्रियभाः सुदीनः श्यावाननो विषकृतेन भवेत् परासुः॥ स्निग्धं स्विन्नं मनुजमुन्मादार्त्तं विबोधयेत्"। एतद्व्याख्यायामकालेन तत्तत्त्वविभागादि चोक्तं भावप्रकाशे "तत्र उन्मादस्य निरुक्तिमाह। "मदयन्त्युद्धता इत्यादि" सुश्रुतवाक्यम् यस्मादेतोरुद्धताः प्रवृद्धा दोषा उन्मार्गमाश्रिताः मदयन्ति चित्तं विक्षिपन्त्यस्मिन्। अतोऽयमुन्माद इति कीर्त्तितः। स उन्मादः मानसोव्याधिः मनोवैकल्यकरणात्। तस्यैवावस्थाभेदेन लक्षणान्तरमाह। "स चाप्रवृद्धस्तरुणइत्यादि" सुश्रु० "उन्मादस्य विप्रकृष्टनिदानमाह। "विरुद्धदुष्टाशुचिभोजनानि प्रधर्षणं देवगुरुद्विजानाम्। उन्मादहेतुर्भयहर्षपूर्वो मनोऽभिघातो विषमाश्च चेष्टाः"। दुष्टं अत्रूरवौ जादिदूषितम्। अशुचि रजस्वलादिस्पृष्टम्। प्रधर्षणमभिभवः।

विषमाश्च चेष्टाः बलवद्विग्रहादयः। सन्निकृष्टं निदानमाह। “एकैकशः इत्यादि” सुश्रु॰ तस्य सम्प्राप्तिमाह। “तैरल्पसत्त्वस्य मलाः प्रदुष्टा बुद्धेर्निवासं हृदयं प्रदूष्य। स्रोतांस्यधिष्ठाय मनोवहानि प्रमोहयन्त्याशु नरस्य चेतः”। अल्पसत्त्वस्य अल्पसत्त्वगुणस्य। मलाः वातादयः। बुद्धेर्निवासं हृदयं प्रदूष्येति। एतेनात्मनस्य दुष्ट्या तदाश्रिताया बुद्धेरपि दुष्टिरुक्ता। मनोवहानि स्रोतांसि हृदयाश्रितानि इव एतानि विशेषतो बोद्धव्यानि। यतश्चरकेण सकलशरीरस्रोतांस्येव मनोधिष्ठानत्वेनोक्तानि। प्रमोहयन्ति विहतं कुर्वन्ति। उन्मादस्य सामान्यं रूपमाह। “धीविभ्रमः सत्त्वपरिप्लवश्च पर्याकुला दृष्टिरधीरता च। अबद्धवाक्त्वं हृदयस्य शून्यं सामान्यमुन्मादगदस्य लिङ्गम्”। धीविभ्रमः शुक्तिकायां रजतज्ञानम्। सत्त्वपरिप्लवः सत्त्वं मनस्तस्य चाञ्चल्यम्। अबद्धवाक्त्वम् असम्बद्धभाषित्वम्। शून्यं स्मृतिशून्यम्। वातिकोन्मादस्य निदानपूर्विकां सम्प्राप्तिमाह। “रूक्षाल्पशीतान्नविरेकधातुक्षयोपवासैरनिलोऽतिवृद्धः। चिन्तादिदुष्टं हृदयं प्रदूष्य बुद्धिं स्मृतिं चाप्युपहन्ति शीघ्रम्”। प्रदूष्य प्रकर्षेण दूषयित्वा। तस्यैव रूपमाह। “अस्थानहास्यस्मितनृत्यगीतवागङ्गविक्षेपणरोदनानि। पारुष्यकार्श्यारुणवर्णताश्च जीर्णे बलञ्चानिलजस्य रूपम्”। अस्थाने अनवसरे हास्यादीनि रोदनान्तानि। जीर्णे आहारे। बलं व्याधेः। पैत्तिकस्य निदानपूर्विकां सम्प्राप्तिमाह। “अजीर्णकट्वम्लविदाह्यशीतैर्भोज्यैश्चितं पित्तमुदीर्णवेगम्। उन्मादमत्युग्रमनात्मकस्य हृदिस्थितं पूर्ववदाशु कुर्यात्”। हृदि स्थितं पित्तं चितं सञ्चितम् पुनः अजीर्णकट्वम्लविदाह्यशीतैर्भोज्यैरुदीर्णवेगं सत् उन्मादं कुर्यात् पूर्ववत् हृदयं प्रदूष्य इत्यर्थः। तस्य रूपमाह “। अमर्षसंरम्भविनग्नभावाः सन्तर्जनाभिद्रवणौष्ण्यरोषाः। प्रच्छायशीतान्नजलाभिलाषः पीता च भा पित्तकृतस्य लिङ्गम्”। अमर्षोऽसहिष्णुता। संरम्भः आरभटी आडम्बर इति यावत्। सन्तर्जनं परत्रासनम्। अभिद्रवणं पलायनम्। औष्ण्यं गात्रे। रोषो दाहविशेषः। प्रच्छायेत्यादि छायायां, शीतयोरन्नजलयोरभिलाषः। श्लैष्मिकस्य निदानपूर्विकां संप्राप्तिमाह। “सम्पूरणैर्मन्दविचेष्टितस्य सोष्मा कफो मर्म्मणि संप्रवृद्धः। बुद्धिं स्मृतिं चाप्युपहत्य चित्तं प्रमोहयन् सञ्जनयेद्विकारम्”। संपूरणैः भोजनादिभिः। मन्दविचेष्टितस्य व्यायामरहितस्य।

सोष्मा कफ इति कफोऽप्युन्मादं करिष्यन् पित्तं सहाय मपेक्षते व्याधिस्वभावात्। मर्म्मणि अत्र मर्म्मशब्देन हृदयमुच्यते। विकारमुन्मादरूपम्। तस्य रूपमाह। “वाक्चेष्टितं मन्दमरोचकश्च नारीविविक्तप्रियता च निद्रा। छर्दिश्च लाला च बलञ्च भुक्ते नखादिशौक्ल्यञ्च कफात्मके स्यात्”। वाक्चेष्टितं मन्दं वचनमल्पम्। नारीविविक्तप्रियता नारीप्रियता विजनप्रियता च। भुक्ते बलं व्याधेः। सान्निपातिकस्य निदानपूर्वकं लक्षणमाह। “यः सन्निपातप्रभवोऽतिघोरः सर्वैः समस्तैः स तु हेतुभिः स्यात्। सर्वाणि रूपाणि बिभर्त्ति तादृग्विरुद्धभैषज्यविधिर्विवर्ज्यः” स सान्निपातिक उन्मादः। सन्निपातप्रभवेनैव सर्वात्मकत्वं लब्धम्। पुनः सर्वैरिति यत्कृतं तद्रजःतमःप्रापणार्थम्। तेन रजस्तमोमिलितैरित्यर्थः। तेन वातादयो रजस्तमोभिर्मनोदोषैर्मिलिताः समस्ताश्च निदानैः कुपिता उन्मादं जनयन्ति। सर्वैर्हेतुभिः समस्तैर्मिलितैः स्यात्। यतोऽन्यो व्याधिः सर्वैर्हेतुभिर्मिलितैरेव भवतीति नियमो नास्ति। अयन्तु व्याधिस्वभावात् सर्वैर्हेतुभिर्मिलितैः स्यात्। तादृगुन्मादः विरुद्धभैषज्यविधिः विरुद्धभैषज्यविधिरिति कोऽर्थः। त्रिदोषजे प्रत्येकं वातादिप्रत्यनीका कार्य्या। सा च परस्परविरोधिनी त्रिदोषं हन्ति किञ्चिदेव द्रव्यमामलकादि तच्चात्यल्पयौगिकम्। अत एव विवर्ज्यः न चिकित्स्य इत्यर्थः”। मनोदुःखजस्य विप्रकृष्टं निदानमाह।‘चौरैर्नरेन्द्रपुरुषैररित्यादि” सुश्रु॰। अन्यैर्हिंस्रादिभिः। गाढमतिभयेन। हते अभिहते प्रियया प्राप्तुमशक्यया रिरंसोः पुरुषस्य विकारः उन्मादरूपः। तस्य रूपमाह।“चित्रं प्रजल्पतीत्यादि” सुश्रु॰ चित्रमाश्चर्य्यम्। मनोऽनुगतं गोप्यमपि। विसंज्ञो विरुद्धज्ञानः। अतीव मूढः अतीवज्ञानशून्यः। अत्र विकल्पो बोद्धव्यः। विषजस्य रूपमाह। ‘रक्तेक्षण इत्यादि” सुश्रु॰ परासुः हतः। अरिष्टमाह। “अवाङ्मुखस्तून्मुखो वा क्षीणमांसबलो नरः। जागरूको ह्यसन्देहमुन्मादेन विनश्यति”। अथ देवादिकृतस्योन्मादस्य सामान्यं लक्षणमाह। “अमर्त्त्यवाग्विक्रमवीर्य्यचेष्टो ज्ञानादिविज्ञानबलादियुक्तः। प्रकोपकालो नियतश्च यस्य देवादिजन्मा स मनोविकारः”। अमर्त्त्यवाग्विक्रमवीर्य्यचेष्टः न मर्त्यस्येव मनुष्यस्येव वागादयो यस्य सः। विक्रमः पराक्रमः। वीर्य्यं शौर्य्यम्। ज्ञानादिविज्ञानबलादियुक्तः। ज्ञानं बुद्धिः। आदिपदेन तर्केहा मेधाविचारणास्मरणादयो गृह्यन्ते। विज्ञानं शि-

त्वादिविषयकं ज्ञानम् । चेष्टा पाटवम् । आदिपदेनाभिमानादि गृह्यते । नियतः वक्ष्यमाणतिथ्यादिभिः । मनोविकारः उन्मादः । तत्र देवाविष्टस्य लक्षणमाह । "सन्तुष्टःशुचिरतिदिव्यमाल्यगन्धो निस्तन्द्रीऽवितथसंस्कृतप्रभाषी । तेजस्वी स्थिरनयनो वरप्रदाता ब्रह्मण्यो भवति नरः स देवजुष्टः"। अतिदिव्यमाल्यगन्धः अतिशयो दिव्यमाल्यस्येव गन्धो यस्य सः । निस्तन्द्रः निद्रारहितः । अवितथं सत्यम् । ब्रह्मण्यः ब्राह्मणभक्तः। दैत्याविष्टस्याह । "संस्वेदी द्विजगुरुदेवदोषवक्ता जिह्माक्षो विगतभयो विमार्गदृष्टिः । सन्तुष्टो भवति न चान्नपानजातैर्दुष्टात्मा भवति स देवशत्रुजुष्टः"। विमार्गदृष्टिः कुमार्गरतः । दुष्टात्मा दुष्टस्वभावः । गन्धर्वाविष्टस्याह । "हृष्टात्मा पुलिनवनान्तरोपसेवी स्वाचारः प्रियपरिगीतगन्धमाल्यः । नृत्यन् वै प्रहसति चारु चाल्पशब्दं गन्धर्वग्रहपरिपीडितो मनुष्यः"। हृष्टात्मा हृष्टजीवात्मा । पुलिनं तोयोत्थितं तटम् वनान्तरं वनमध्यम् तयोः सेवी । स्वाचारः अनिन्दिताचारः । प्रियाणि परि समन्ततोभावेन गीत गन्धमाल्यानि यस्य स तथा । चारु चाल्पशब्दमिति नृत्यक्रियायाविशेषणम् । यक्षाविष्टस्याह । "ताम्राक्षः प्रियतनुरक्तवस्त्रधारी गम्भीरोऽद्रुतगतिरल्पवाक् सहिष्णुः। तेजस्वी वदति च किं ददामि कस्मै यो यक्षग्रहपरिपीडितो मनुष्यः" । पित्राविष्टस्याह । "प्रेतानां स दिशति संस्तरेषु पिण्डान् शान्तात्मा जलमपि चापसव्यवस्त्रः । मांसेप्सुस्तिलगुडपायसाभिकामस्तद्भक्तो भवति पितृग्रहाभिजुष्टः"। प्रेतानां मृतानां पितॄणाम्। दिशति ददाति । अपसव्यवस्त्रः दक्षिणस्कन्धस्थितोत्तरीयः । नागाविष्टस्याह ।"यस्तूर्व्यां प्रसरति सर्पवत् कदाचित् सृक्किण्यौ पुनरपि जिह्वयावलेढि । क्रोधालुर्घृतमधुदुग्धपायसेप्सुर्विज्ञेयः स खलु भुजङ्गमेन जुष्टः" । प्रसरति सर्पवत् उरसा चलति । सृक्किण्यौ ओष्ठप्रान्तौ । राक्षसाविष्टस्याह ।"मांसासृग्विविधसुराविकारलिप्सुर्निर्लज्जो भृशमतिनिष्ठुरोऽतिशूरः । क्रोधालुर्विपुलबलो निशाविहारी शौचद्विड् भवति स राक्षसैर्गृहीतः" । अतिनिष्ठुरोऽतिनिर्दयः । ब्रह्मराक्षसाविष्टस्याह । 'देवविप्रगुरुद्वेषी वेदवेदाङ्गविच्छुचिः । आत्मपीडाकरोऽहिंस्रो ब्रह्मराक्षससेवितः । अहिंस्रः अहिंसाशीलः । पिशाचाविष्टस्याह । 'उद्वस्त्रः कृशपरुषो विरुद्धभाषी दुर्गन्धो भृशमशुचिस्तथातिलोलः । बह्वाशी विजनवनान्तरोपसेवी व्याचेष्टन् भ्रमति रुदन् पिशाचजुष्टः" । उद्वस्त्रः नग्नः । दिगम्बर इति विशेषवचनात् । (सु०सु० उद्ध्वस्त इति पाठः) कृशो निर्मांसः । परुषो रूक्षः । अतिलोलः सर्वस्मिन् अन्नपाने लोलुपः । व्याचेष्टन् विरुद्धमाचेष्टन् । एते हिंसाक्रीडापूजार्थं गृह्णन्ति । अतएवोक्तम् । "अशुचिं भिन्नमर्य्यादं क्षतं वा यदि वाऽक्षतम् । हिंस्युर्हिंसाविहारार्थं सत्कारार्थमथापि वा । तत्र हिंसार्थं गृहीतस्य लक्षणमाह । 'स्थूलाक्षो द्रुतमटनः सफेनवामी निद्रालुः पतति च कम्पते च योऽति । यश्चाद्रिद्विरदनगादिविच्युतः स्यात् सोऽसाध्यो भवति तथा त्रयोदशेऽब्दे । यश्चाद्रीत्यादि यः पर्वतादिपतितः सन् ग्रहैर्गृह्यत इत्यर्थः । आदिपदेन भित्तिप्रासादादयो गृह्यन्ते त्रयोदशेऽब्दे सर्व एव देवादिगृहीतोऽसाध्यः । देवादीनामावेशसमयमाह ।"देवग्रहाः पौर्णमास्यामसुराः सन्ध्ययोरपि । गन्धर्वाः प्रायशोऽष्टम्यां यक्षाश्च प्रतिपद्यपि । पितरः कृष्णपक्षे च पञ्चम्यामपि चोरगाः । रक्षःपिशाचा रात्रौ च चतुर्दश्यां विशन्ति हि" । कृष्णपक्षे अमावास्याम् । प्रायशःपदादन्यत्रापि । तिथ्यभिधानप्रयोजनं रक्षार्थं तत्र तिथौ बलिदानार्थञ्च । ननु यदि देवादयो विशन्ति तदा विशन्तस्ते दृश्यन्ते कथं नेत्यत आह । "दर्पणादीन् यथा छाया शीतोष्णं प्राणिनो यथा । स्वमणिं भास्कराश्चिश्च यथा देहञ्च देहधृक् । विशन्ति न च दृश्यन्ते ग्रहास्तद्वच्छरीरिणम्" । दर्पणादीत्यादिशब्देनान्यदपि निर्मलद्रवद्रव्यं गृह्यते । छाया प्रतिबिम्बम् । स्वमणिं सूर्य्यमणिम् । देहधृक् जीवात्मा" । भा०प्र० । एतानि च वाक्यानि सुश्रुतोत्तरतन्त्रस्थानि । तत्र हि "गुह्यानागतविज्ञानमनवस्था सहिष्णुता । क्रिया वाऽमानुषी यस्मिन् स ग्रहः परिकीर्त्यते" इति ग्रहशब्दं परिभाष्य "असंख्येया ग्रहगणा ग्रहाधिपतयश्च ये । व्यस्यन्ते विविधाकाराभिद्यन्ते ते तथाष्टधा देवास्तथा शत्रुगणाश्च तेषां गन्धर्वयक्षाः पितरो भुजङ्गाः । रक्षांसि वा चापि पिशाचजातिरेषोऽष्टधा देवगणो ग्रहाख्यः" इति विभज्य "संतुष्टः शुचिरित्यादिना तज्जुष्टानां लक्षणान्याह । तानि भा०प्र० सङ्कलय्योदाहृत्य व्याख्यातानीति द्रष्टव्यम् । अन्ते च प्रकृतदेवादीनां न कश्चित् प्रवेशः किन्तु तत्परिचारकाणामेव देवाद्याचरवतां प्रवेश इत्युक्तं यथा सुश्रु० उत्त० ।"तपांसि तीव्राणि दया च दानं व्रतानि धर्मो नियमश्च सत्यम् । गुणास्तथाष्टावपि तेषु नित्या व्यस्ताः समस्ताश्च

यथाप्रभावम् । न ते मनुष्यैः सह संविशन्ति न वा मनुष्यान् क्वचिदाविशन्ति । ये वा विशन्तीति वदन्ति मोहात्ते भूतविद्याविषयादपोह्याः । तेषां ग्रहाणां परिचारका ये कोटीसहस्रायुतपद्मसंख्याः । असृग्वसामांसभुजः सुभीमा निशाविहाराश्च समाविशन्ति । निशाचराणां तेषां हि ये देवगणसंस्मृताः । ते तु तत्सत्त्वसंसर्गाद्विज्ञेयास्तु तदङ्गनाः । देवग्रहा इति पुनः प्रोच्यन्ते शुचयश्च ये । देववच्च नमस्यन्ते प्रत्यर्च्यन्ते च देववत् । स्वामिशीलक्रियाचाराः क्रमएव सुरादिषु । नैर्ऋतेया दुहितरस्तासां स प्रसवः स्मृतः । सत्यचादपष्टत्तेषु इत्तिस्तेषां गणैः कृता । हिंसाविहारा ये केचिद्दिव्य भावमुपाश्रिताः । भूतानीति कृता संज्ञा तेषां संज्ञा प्रवक्तृभिः । ग्रहसंज्ञाभिभूतानि यस्माद्धेत्यनया भिषक् । विद्यया भूतविद्यात्वमतएव निरुच्यते”।

अथोन्मादस्य सामान्यचिकित्सा

‘वातिके स्नेहपानं प्राक् विरेकः पित्तसम्भवे । कफजे वमनं कार्य्यं परे वस्त्यादिकक्रमः । यच्चोपदेक्ष्यते किञ्चिदपस्मारे चिकित्सितम् । उन्मादे तच्च कर्त्तव्यं सामान्याद्दोषदूष्ययोः । जलादिद्रुमशैलेभ्यो विषमेभ्यश्च तं सदा । रक्षेदुन्मादिनं यत्नात् सद्यः प्राणहरा हि ते । ते जलादयः” । विशेषचिकित्सा भा०प्र०आदौ दृश्या । सचायं रोगः । महापातककर्म्मविपाकजः । “उन्मादस्त्वगद्दोषो राजयक्ष्मेत्यादि” शु० त० नारदोक्तेः “चित्तसंमोह उन्मादः कामशोकभयादिभिः” । सा०द० उक्ते २व्यभिचारिभावभेदे ।

उन्मादक पु० उद्+मद-णिच्-ण्वुल् । उन्मादजनके धुस्तूरादौ । [उन्मादकारके त्रि० ।

उन्मादन पु०उद्+मद-णिच्-ल्यु । १कन्दर्पबाणभेदे त्रिका०।

उन्मादवत् त्रि० उन्मादोऽस्त्यस्य मतुप् मस्य वः । उन्मादयुक्ते स्त्रियां ङीप् । [न्मादिनं यत्नात्”सुश्रु० ।

उन्मादिन् त्रि० उद्+णिनि स्त्रियां ङीप् । उन्मत्ते “रक्षेदु-

उन्मान न०उद्+मा–भावे ल्युट् । ऊर्द्ध्वमाने तच्च प्रथितगुरुत्वेन पलादिमितपाषाणादिना तुलाधारफलके एकपार्श्वे स्थितेन अन्यपार्श्वस्थसुवर्णादेरुन्नमनादिना गुरुत्वविशेषज्ञापनव्यापारः (ओजनकरा) “ऊर्द्ध्वमानं किलोन्मानम्” वार्त्तिकोक्ते २ऊर्द्ध्वतः प्रमाणे च । अस्मिन्नेवार्थे “प्रमाणे द्वयसज्दघ्नज्मात्रचः” पा० “प्रथमश्च द्वितीयश्च ऊर्द्ध्वमाने मतौ मम” वार्त्तिकोक्तेः द्वयसच् दघ्नच् । ऊरुद्वयसः ऊरुदघ्नः “गजपतिद्वयसीरिति” माघः । सामान्यप्रमाणे तु मात्रजेव । ऊरुमात्रं प्रस्थमात्रम् । ४करणे ल्युट् । २तुलादौ । ३द्रोणपरिमाणे पु० वैद्यकम् ।

उन्मार्ग त्रि०उत्क्रान्तः मार्गात् निरा०स० । मार्गातिक्रान्ते मार्गस्य पन्थाः रीतिश्च” “नाशयति च दिङ्मोहमिवोन्मार्गः” काद० । २विरुद्धपथे च “मदोन्मत्तस्य भूपस्य कुञ्जरस्य च गच्छतः । उन्मार्गं वाच्यतां यान्ति महामात्राः समीपगाः” पञ्चतन्त्रम् । उन्मादशब्दे उदा० ।

उन्मिति स्त्री० उद्+मद-क्तिन् । ऊर्द्ध्वमाने ।

उन्मिष त्रि०उद्+मिष–क । १प्रफुल्ले २किञ्चित्प्रकाशयुक्ते च

उन्मिषित त्रि० उद्+मिष-क्त । १प्रफुल्ले, विकसिते २किञ्चित् प्रकाशिते च । “व्यलोकयदुन्मिषितैस्तडिन्मयैः” कुमा० ।

उन्मीलन न०उद्+मील–ल्युट् । १विकाशे २चक्षुरादेः पुटविभेदे (ताकान) “ज्ञानाञ्जनशलाकाभिर्नेत्रोन्मीलनकारकः” भा०आ०८४अ० । “सम्मीलनोन्मीलनके तथैव” सि० शि० । भावे घञ् उन्मीलोऽप्यत्र पु० ।

उन्मीलित त्रि० उद्+मील–क्त । १विकसिते “ते चोन्मीलित मालतीसुरभयः प्रौढाः कदम्बानिलाः” सा०द० । २अनुद्रिते च णिच्–कर्मणि क्त । ३प्रकाशिते “उन्मीलितं तूलिकयेव चित्रम्” कुमा० । ४भेदितमुद्रणे नेत्रादौ “अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया । चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः” गुरुनतिमन्त्रः ।

उन्मुक्त त्रि० उद्+मुच–क्त । बन्धनरहिते

उन्मुख त्रि० उद्+ऊर्द्ध्वं मुखमस्य । १ऊर्द्ध्वास्ये,२उद्युक्ते च । “उन्मुखद्वाःस्थवीक्षिताः” कुमा० । “तस्मिन् संयमिनामाद्ये जाते परिणयोन्मुखे” कुमा० । “विपुलतरोन्मुखलोचनावलग्नम्” “दन्ताग्रनिर्भिन्नपयोदमुन्मुखाः” माघः । “असौ शरण्यः शरणोन्मुखानाम्” “या नीतपौरा स्वपदोन्मुखेन” । “मनोऽभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः” रघुः स्त्रियां ङीप् । “चूतयष्टिरिवाभ्यासे मधौ परभृतोन्मुखी” कुमा० “प्रतिषिद्धापि कैकेय्या लक्ष्मीरिव गुणोन्मुखी” “पतिः प्रतीतः प्रसवोन्मुखीं प्रियाम्” “अद्रेः शृङ्गं हरति पवनः किंस्विदित्युन्मुखीभिः” “इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा” मेघ० ।

उन्मुद्र त्रि०उद्गता मुद्रा यस्मात् प्रा०ब०।१त्यक्तमुद्रे,२विकसिते च

उन्मूल नामधा०मूलत उत्पाटयति उद्+मूल-णिच्। उन्मूलयति ते “उन्मूलयन् महावृक्षान्” भा०व०१४६अ०

उन्मूलन न० उन्मूल+णिच्-ल्युट् । उत्पाटने उद्धृतमूलकरणे । “न पादपोन्मूलनशक्ति रंहः” रघुः !

उन्मूलित त्रि० उन्मूलि–नामधा० क्त । उत्पाटिते "उन्मूलिता हलधरेण पदावघातैः" उद्भटः "दूरे फलानि हन्त भवता तन्मूलमुन्मूलितम्" उद्भटः ।

उन्मृजावमृजा स्त्री उन्मृज अवमृज इत्युच्यते यस्यां क्रियायां मयू० स० । उन्मार्जनावमार्जनार्थनिर्देशक्रियायाम् ।

उन्मृश्य त्रि० उद्+मृश–क्यप् । "हस्तमुत्तोलय स्पृश्ये । "इत्युन्मृश्या हैव द्यौरास" शत०ब्रा० १,४,१,२२, ल्यप् । २उद्धृतः स्पृष्ट्वेत्यर्थे अव्य० ।

उन्मेय त्रि० उद्+मा–यत् । १परिमेये "आचितः शकटोन्मेये" त्रिका० । २उन्मानमेये सुवर्णादौ च ।

उन्मेष पु० उद्+मिष–घञ् । १चक्षुरादेरुन्मीलने, किञ्चित्प्रकाशे च । "स्वकिरणपरिवेषोन्मेषशून्याः प्रदीपाः" रघुः । "दीर्घिकाकमलोन्मेषो यावन्मात्रेण साध्यते" कुमा० "विद्युदुन्मेषदृष्टिम" मेघ० । भावे ल्युट् । उन्मेषणमप्यत्र न० "मन्मथोन्मेषणातिविस्तीर्णा शोभैव कान्तिः" सा० द० ।

उन्मोचन न० उद्+मुच–ल्युट् । बन्धनात् उद्धृत्य विश्लेषणे । "उन्मोचनप्रमोचने उभे वाची वदामि" अ० ५,२०,१,

उप अव्य० वप–क । १अधिकार्थे, २हीने, ३आसन्ने, ४सामीप्ये, ५सादृश्ये, ६प्रतियत्ने सतो गुणान्तराधाने, ७व्याप्तौ, ८पूजायाम् ९शक्तौ, १०आरम्भे, ११दाने, १२दोषाख्याने, १३आचार्यकरणे १४अत्यये, १५निदर्शने च । गणरत्ने "उप सामीप्यसामर्थ्यव्याप्त्याचार्यकृतिस्तुतिदोषदानक्रियावीप्सारम्भाध्ययनपूजनेषु" इति उपार्थानुक्त्वा क्रमेणोदाजहार तत्र सामीप्ये उपकूपम् । सामर्थ्ये उपकरोति । व्याप्तौ उपकीर्णम् । आचार्यकृतौ उपदिशति । स्तुतौ उपरतः, दोषे उपघातः (इन्द्रियाणां स्वग्राह्यग्रहणासामर्थ्यम्) दाने उपहरति । क्रियाभेदे उपचरति । वीप्सायां देवं देवमुपचरति । आरम्भे उपक्रमते भोक्तुम् । अध्ययने उपाध्यायः । पूजने उपचरितः पिता पुत्रेण" इति । प्रतियत्ने (संस्कारे) "उप त्वा नेष्ये समिधमाहरेति" छा० उ० सामीप्ये "उपोपविश्य प्राणान् संस्पृशन्" स० त० गो० । सादृश्ये उपदेवः उपधातुः । "उपोऽधिके च" पा० "१६आधिक्ये "उप च त्रयोदश मासः" शत० ब्रा० ६,२,२, अस्य हीनेऽऽधिक्ये च कर्मप्रवचनीयता तत्र हीनार्थयोगे तत्सम्बन्धिनि द्वितीया । उप हरिं सुराः–हरेर्हीना इत्यर्थः । अधिकार्थयोगे सप्तमी । उप परार्द्धे हरेर्गुणाः–परार्द्धादधिका इत्यर्थः । सामीप्येऽव्ययीभावः उपकुम्भम् उपकूलम् । "उपसर्गाः क्रियायोगे" पा० क्रियायोगे उपसर्गता अन्यत्र गतिता ततः भवार्थे त्यकन् उपत्यका ।

उपक पु० उप+संज्ञायां कन् । १ऋषिभेदे ततः नडा० फक् । औपकायनः तस्य अद्वन्द्वे द्वन्द्वे च बहुत्वे वा लुक् । अद्वन्द्वे औपकाः औपकायनाः । द्वन्द्वे उपकलमकाः औपकायनलामकायनाः । अनुकम्पितः उपेन्द्रदत्तादिः "प्राचामुपादेरडज्वुचौ" पा० वुच् "ठाजादावूर्द्ध्वं द्वितीयादचः" पा० इन्द्रदत्तलोपे । उपक २अनुकम्पिते उपेन्द्रदत्तके पु० । पक्षे अडच् उपडः । चात् ठच् घन् इलच् च । तत्र ठचि उपिकः घनि उपियः इलचि उपिलः । तत्रार्थे पु० अजादावित्युक्तेः कनि न लुक् । उपेन्द्रदत्तकः । एवमन्यस्यापि उपपूर्वकस्य संज्ञाशब्दस्य रूपं बोध्यम् । तेन तत्रापि उपकादिशब्दव्युत्पत्तिः ।

उपकण्ठ त्रि० उपगतः कण्ठम् अत्या० स० । १निकटे, २कण्ठासन्ने च "तस्योपकण्ठे घननीलकण्ठः" कुमा० । "आकृष्य चापं श्रवणोपकण्ठे" "उपकण्ठं महोदधेः" रघुः ३ग्रामान्ते ४अश्वानामास्कन्दितगतौ च न० । विभक्त्यर्थे सामीप्ये वा अव्ययी० । ५कण्ठ इत्यर्थे "रथाङ्गभर्त्रेऽभिनववरस्य यस्याः पितेव प्रतिपादितायाः । प्रेम्णोपकण्ठं मुहुरङ्कभाजो रत्नावलीरम्बुधिराबबन्ध" माघः । उपकण्ठम्–कण्ठे पक्षेऽन्तिके इत्यर्थः ६कण्ठसामीप्ये च अव्य०

उपकनिष्ठिका स्त्री उपगता कनिष्ठिकाम् अत्या० स० । अनामाङ्गुली "अप्रच्छिन्नाग्रावनन्तर्गर्भौ प्रादेशमात्रौ कुशानामान्तयोर्गृहीत्वाङ्गुष्ठोपकनिष्ठिकाभ्याम्" आ० श्र० सू० १,३,२ "अङ्गुष्ठोपकनिष्ठिकाभ्यामेकैकमस्याप्रसंह्लादयन्तः" ४,५,४ ।

उपकन्या स्त्री उपगता कन्याम् अत्या० स० । कन्यासख्यादौ अस्य गौरा० पाठात् उपादृद्व्यच्त्वेऽपि नान्तोदात्तता ।

उपकरण न० उपक्रियतेऽनेन उप–कृ–ल्युट् । १प्रधानसाधकेऽङ्गे यथान्नभोजनादौ व्यञ्जनादि, शयने खट्वादि, स्नानेऽनुलेपनादि, पूजायां पुष्पादि यागे पश्वादि । "यश्च वेश्म शुभं दद्यात् सर्वोपकरणान्वितम्" शु० त० नन्दिपु० । "भक्तावकाशाग्न्युदकमन्त्रोपकरणव्ययान्" या० स्मृ० । २नृपादीनां छत्रचामरादिपरिच्छदे च । उपगतः करणम् अत्या० स० । ३इन्द्रियानुगते त्रि० विभक्त्यर्थे सामीप्ये वाऽव्ययी० । ३करणे इत्यर्थे ४इन्द्रियसामीप्ये च अव्य० ।

उपकर्ण अव्य० विभक्त्यर्थे सामीप्ये वा अव्ययी० । १कर्णे इत्यर्थे २श्रोत्रसामीप्ये च । तत्र प्रायभवः ठक् औपकर्णिकः तत्र प्रायशवे त्रि० "यःस्वामी मम कान्ताशानौपकर्णिकलोचनः" भट्टिः ।

उपकर्त्तृ त्रि० उप-कृ-तृच् स्त्रियां ङीप्। उपकारके आनुगुण्यकारके "उपकर्त्त्रारिणा सन्धिर्न मित्रेणापकारिणा" माघः। "हीनान्यनुपकर्त्तृणि प्रवृद्धानि विकुर्वते" रघुः।

उपकलाप अव्य० विभक्त्यर्थे सामीप्ये वाऽव्ययी०। १कलापे इत्यर्थे २तत्सामीप्ये च ततो भवार्थे परिमुखा० ञ्य। औपकलाप्य तद्भवे त्रि०।

उपकल्प त्रि०उपगतः कल्पम् अत्या०स। कल्पोपगते। गौरा० पाठात् उपात् द्व्यच्कत्वेऽपि नान्तोदात्तता।

उपकल्पन न० उप+कृप-णिच्-ल्युट्। १सम्पादने २आयोजने च "वक्ष्यास्यतः परं सम्यगाहारस्योपकल्पनम्" सुश्रु० युच्। तत्रैव स्त्री। "एवं विज्ञाय मतिमान् भोजनस्योपकल्पनाम्" सुश्रु०।

उपकादि पु० द्वन्द्वेऽद्वन्द्वे च बहुत्वे गोत्रप्रत्ययलुग्निमित्ते पाणिन्युक्ते शब्दसमूहे। स च उपक लमक भ्रष्टक कपिष्ठल कृष्णाजिन कृष्णसुन्दर चूड़ारक आड़ारक गड्क उदङ्क सुधायुक अबन्धक पिङ्गलक पिष्ट सुपिष्ट मयूरकर्ण खरीजङ्घ शलाथल पतञ्जल पदञ्जल कठेरणि कुषीतक काशकृत्स्न निदाघ कलशीकण्ठ दामकण्ठ कृष्णपिङ्गल कर्णक पर्णक जटिलक बधिरक जन्तुक अनुलोम अनुपद प्रतिलोम अपजग्ध प्रतान अनभिहित कमक वटारक लेखाभ्र कमन्दक पिञ्जलक वर्णक मस्तरकर्ण मदाघ कबन्तक कमन्तक कदामत्त।

उपकार पु० उप+कृ-भावे घञ्। प्रधानस्यानुगुण्यसंपादने, उपकृतौ "उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः" माघः। "कृतोपकारेव रतिर्बभूव" कुमा० "उपकारो महांस्तात कृतोऽयं मम खेचरैः" भा०व०१५०अ०। तस्योपकार्य्यारचितोपका(चा)रा" रघुः। उपकारश्च सहकारिभिः कारणस्य कार्य्योत्पादनार्थमानुगुण्यभेदः यथा दर्शादियागस्य प्रधानापूर्व्वसाधनेऽङ्गादीनां प्रयाजादीनां कलिकापूर्व्वसाधनद्वारा तदानुगुण्यम्। स च बौद्धैः कुर्व्वद्रूपतारूपस्य वीजादेरच्छुनत्वस्य सम्पादनरूपातिशयाधानमुच्यते सर्व्व० दर्श०। "तथाहि सहकारिभिः सलिलपवनादिभिः पदार्थसार्थैराधीयमाने बीजस्यातिशये वीजमत्पादकमभ्युपेयम् अपरथा तदभावेऽप्यतिशयः प्रादुर्भवेत्। वीजञ्चातिशयमादधानं सहकारिसापेक्षमेवाधत्ते अन्यथा सर्व्वदोपकारापत्तौ अङ्कुरस्यापि सदोदयः प्रसज्येत; तस्मादतिशयार्थमपेक्षमाणैः सहकारिभिरतिशयान्तरमाधेयं बीजे, तस्मिन्नप्युपकारे पूर्व्वन्यायेन सहकारिसापेक्षस्य वीजस्य जनकत्वे सहकारिसम्पाद्यबीजगतातिशयानवस्था प्रथमा व्यवस्थिता। अथोपकारः कार्य्यार्थमपेक्ष्यमाणोऽपि वीजादिनिरपेक्षं कार्य्यं जनयति तत्सापेक्षो वा। प्रथमे वीजादेरहेतुत्वमापतेत्। द्वितीये अपेक्ष्यमाणेन वीजादिना उपकारे अतिशय आधेयः एवं तत्र तत्रापीति वीजादिजन्यातिशयनिष्ठातिशयपरम्परापात इति द्वितीयानवस्था स्थिरा भवेत्। एवमपेक्ष्यमाणेनोपकारेण वीजादौ धर्म्मिण्युपकारान्तरमाधेयमित्युपकाराधेयबीजातिशयाश्रयातिशयपरम्परापात इति तृतीयानवस्था दुरवस्था स्यात्। अथ भावादभिन्नोऽतिशयः सहकारिभिराधीयत इत्यभ्युपगम्यते तर्हि प्राचीनो भावो ऽनतिशयात्मा निवृत्तः अन्यश्चातिशयात्मा कुर्व्वद्रूपादिपदवेदनीयो जायत इति फलितम्।

उपकारक त्रि०उप+कृ-ण्वुल्। १उपकारकर्त्तरि। "आगन्तवोऽपि कदाचिदुपकारका दृश्यन्ते" हितो०। स्त्रीत्वे टापि अतइत्त्वे उपकारिका। सा च २न्दपालये,३पटनिर्म्मिते गृहे च। ४कारणमात्रे त्रि०।"स्पर्शस्त्वगिन्द्रियग्राह्यस्त्वचः स्यादुपकारकः"भाषा० णिनि। उपकारिन् उपकारके त्रि०। "तदुपकारीणि शारीरकस्यत्वादीनि" वेदा० सा०।"दातव्यमिति यद्दानं दीयतेऽनुपकारिणे" गीता "मातापित्रोर्गुरौ मित्रे विनीते चोपकारिणि" दत्तः। स्त्रियां ङीप्।

उपकार्य्य त्रि०उप+कृ-ण्यत्। १उपकारयोग्ये। २राजालये, ३पटनिर्म्मितराजसदने च स्त्री टाप्।"तस्योपकार्य्या रचितोपका(चा)रा" रघुः। "तीरोपकार्य्यां गतमात्र एव" शत्रुघ्नप्रतिविहितोपकार्य्यमार्य्यः" रघुः राजभवने "रम्यां रघुप्रतिनिधिः स नवोपकार्य्याम्"। "उपकार्य्या राजसद्मन्युपचारचितेऽन्यवत्" इति विश्वोक्तेः ५उपचारव्याप्ते त्रि०

उपकिरण न० उप+कृ-ल्युट् नि० इत्त्वम्। १व्याप्तौ २समन्तात् विक्षेपे च "आसूत्करोत्किरणं वा" कात्या० २५,१०,२४। समीप्यादौ अव्ययी०। ३किरणसामीप्यादौ अव्य०।

उपकीचक पु० उपगतः कीचकम् अत्या०स०। विराटनृपश्यालककीचकानुजे विराटसैन्यभेदे "समवेतेषु सर्व्वेषु तामूचुरुपकीचकाः। हन्यतां शीघ्रमसती यत्कृते कीचकोहतः"। ते च पञ्चाधिकशतमिताः कीचकत्वेनापि प्रसिद्धाः "एवं ते निहता राजन्! शतं पञ्च च कीचकाः। स च सेनापतिः पूर्वमित्येतत् सूतषट्शतम्" भा०वि०२२,२३अ०।

उपकुञ्चि स्त्री उप+कुन्च-इ। कृष्णजीरके।

उपकुञ्चिका स्त्री उप+कुञ्च-ण्वुल् अतइत्त्वम्। १तुल्यायां

(द्रुते) २स्थूलजीरकायाञ्च । स्वार्थे कन् । ३कृष्णजीरके ।

उपकुर्व्वाण पु० उपकुरुते गुरोर्दक्षिणादानादिना उप+कृ-शानच् । समावर्त्तनयोग्ये स्वाध्यायग्रहणावधिकब्रह्मचर्य्यवति १ब्रह्मचारिणि "न पूर्व्वं गुरवे किञ्चिदुपकुर्वीत धर्म्मवित् । स्नास्यंस्तु गुरुणाऽऽज्ञप्तः शक्त्या गुर्व्वर्थमाहरेत्" मनुना स्नास्यतएव गुरूपकारविधानेन ततः पूर्व्वमुपाकारकर्त्तृत्वनिषेधेन चास्यैवोपकर्त्तृत्वात्तथात्वम् । ब्रह्मचारी हि द्विविधः नैष्ठिक उपकुर्वाणश्च । यो निरवधि मरणान्तम् उपनयनादूर्द्ध्व गुरौ वसति स नैष्ठिकः । यस्तु स्वाध्यायग्रहणान्तं गुरौवसन् गुरुणानुज्ञातः गुरोरुपकारं कृत्वा स्नानगार्हस्थ्यं करोति स उपकुर्व्वाणः । स्नास्यतो दक्षिणा च मनुनोक्ता यथा "क्षेत्रं हिरण्यं गामश्वं छत्रोपानहमासनम् । धान्यं शाकञ्च वासांसि गुरवे प्रीतिमावहेत्" । आश्व० गृ० ३,८,१,२ तु "अथैतान्युपकल्पयीत समावर्त्तमाने मणिं कुण्डले वस्त्रयुगं छत्रमुपानद्युगं दण्डं स्रजमुन्मर्द्दनमनुलेपनमाञ्जनमुष्णीषमित्यात्मने चाचार्य्याय च" "यद्युभयोर्न विन्देताचार्य्यायैव"। एकादश द्रव्याण्युक्तानि एतच्चोपलक्षणं गुरोरभिलषितं दद्यादित्यत्रैव तात्पर्य्यम् अत एव या०स्मृ० "गुरवे तु वरं दत्त्वा स्नायीत तदनुज्ञया" तद्वरदानमेवोक्तम् "गुरवे पूर्वोक्ताय वरमभिलषितं यथाशक्ति दत्त्वा स्नायात् तदशक्तौ तदनुज्ञयाऽदत्तवरोऽपि"मिता० । संज्ञायां कन् तत्रैव । "उपकुर्वाणकास्तु स्वाध्यायग्रहणार्थाः" छां०उ०भा० । ताच्छील्ये चानश् । २उपकारशीले त्रि० ।

उपकुल्या स्त्री उप+कुल-अन्न्रा० नि० । १पिप्पल्याम् (पिपुल) अम० "हरिद्रोपकुल्याविशालेत्यादि" सुश्रु० तत्पर्य्यायगुणादि भा०प्र० दर्शितं यथा

"पिप्ली मागधी कृष्णा वैदेही चपला कणा । उपकुल्योषणा शौण्डी कोला स्यात् तीक्ष्णतण्डुला । पिप्पली दीपनी वृष्या स्वादुपाका रसायनी । अनुष्णा कटुका स्निग्धा वातश्लेष्महरा लघुः । पित्तला रेचनी हन्ति श्वासकासोदरज्वरान् । कुष्ठप्रमेहगुल्मार्शःप्लीहशूलाममारुतान् । आर्द्रा कफप्रदा स्निग्धा शीतला मधुरा गुरुः । पित्तप्रशमनी सा तु शुष्का पित्तप्रकोपिनी । पिप्पली मधुसंयुक्ता मेदःकफविनाशिनी । श्वासकासज्वरहरी वृष्या मेधाग्निवर्द्धिनी । जीर्णज्वरेऽग्निमान्द्ये च शस्यते गुड़पिप्पली । कासाजीर्णारुचिश्वासहृत्पाण्डुकृमिरोगनुत् । द्विगुणः पिप्पलीचूर्णाद्गुडोऽत्र भिषजां मते" ॥ उपगतः कुल्याम् कृत्तिमसरः अत्या०स० । कुल्योपगते त्रि० । २सामीप्यादौ अव्ययी० । ३कुल्यासामीप्यादौ अव्य० ।

उपकुश पु० सुश्रुतोक्ते १मुखरोगभेदे । "मुखरोगाः सप्तस्वायतनेषु" इत्युपक्रम्य ओष्ठादीनि सप्तायतनानि उक्त्वा "दन्तमूलगतास्तु शीतादो दन्तपुप्पुटको दन्तवेष्टकः शौषिरो महाशौषिरः परिदर उपकुशोदन्तवैदर्भो वर्द्धनोऽधिमांसो नाड्यः पञ्चेति" दन्तमूलगतानुक्त्वा "वेष्टेषु दाहः पाकश्च तेभ्योदन्ताश्चलन्ति च । आघट्टिताः प्रस्रवन्ति शोणितं मन्दवेदनाः । आध्मायन्ते स्रुते रक्ते मुखं पूति च जायते । यस्मिन्नुपकुशः स स्यात् पित्तरक्तकृतागदः"। लक्षितः । "शस्त्रोध्वोभयतः कार्य्यं शिरश्चोपकुशे तथा" सुश्रु० । सामीप्यादौ अव्ययी०। २कुश इत्यर्थे ३कुशसामीप्ये च अव्य० । उपगतः कुशम् अत्या०स० । ४कुशोपगते त्रि० ।

उपकूप त्रि० उपगतः कूपं अत्या०स० । १कूपोपगते देशे सामीप्यादौ अव्ययी०। २कूपसामीप्ये ३कूप इत्यर्थे च अव्य० ।

उपकूल न० कूले कूलस्य समीपं वा अव्य० । १कूलेइत्यर्थे । २तीरसामीप्ये च अव्य० । "उपकूल स कालिन्द्याः पुरीं पौरुषभूषणः" रघुः ततो भवाद्यौ अण् "अव्ययीभावाच्चेति" पा० "परिमुखादिभ्य एवेति" वार्त्तिके नियमनान्न ञ्य । औपकूलः तद्भवादौ त्रि० ।

उपकृत त्रि० उप+कृ-क्त । १कृतोपकारे यस्योपकारः कृत स्तस्मिन् । भावे क्त । २उपकारे न० "उपकृत बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम्" सा०द० । उपकृतमनेन इष्टा० इनि । उपकृतिन् येनोपकारः कृतस्तस्मिन् त्रि० स्त्रियां ङीप् ।

उपकृष्ण त्रि० उपगतः कृष्णम् अत्या०स० । १कृष्णोपगते उपादुद्वाच्कत्वेऽपि गौरा०पाठात् नान्तोदात्तता । सामीप्यादौ अव्ययी० । २कृष्णसामीप्यादौ अव्य० । [समर्थे च ।

उपकॢप्त त्रि०उप-कॢप-क्त । १नियते २विन्यस्ते ३उपभोगाय-

उपकोसल पु० कमलापत्ये ऋषिभेदे । "उपकोसलोह कामलायनः सत्यकामे जाबाले ब्रह्मचर्य्यमुवास" छा०उ० "उपकोसलोनामतः कमलस्यापत्यं कामलायनः" भा० ।

उपक्रम पु० उप-क्रम-घञ् न वृद्धिः । १उपायज्ञानपूर्वकारम्भे, २प्रथमारम्भे "ज्योतिरुपक्रमात्तु तथाह्यधीयत एके" "हमानाञ्चास्त्युपक्रमादस्ततत्वं चानुपोष्य" शा०सू० । "तत्र च प्रतिकुर्व्वन्ति यदि पश्यन्त्युपक्रमात्" भा०व०२३५ अ० । "उपक्रमोपसंहारौ—हेतु-

तात्पर्य्यनिर्णये" वेदान्तिमते तात्पर्य्यनिर्णायके २हेतुभेदे तत्र उपक्रमोपसंहाराभ्यां द्वाभ्यामेव तात्पर्य्यं निश्चीयते नत्वेकैकेनेति बोध्यम् । करणे घञ् । ३सामाद्युपाये "सामादिभिरुपक्रमैः" मनुः । "उपक्रमैरस्खलितैश्चतुर्भिः" रघुः । कर्म्मणि घञ् । ४आरभ्यमाणे पु० तदादित्वविवक्षायाम् तदन्ततत्पुरुषस्य क्लीवता "नन्दोपक्रमं द्रोणः" शा० भा० "रामोपक्रममाचख्यौ रक्षःपरिभवं नवम्" रघुः। करणे घञ् । ५चिकित्सायाम् सुश्रुते भूरिप्रयोगः ।

उपक्रमण न० उप+क्रम–भावे ल्युट् । १आरम्भे करणे ल्युट् । २तत्साधने सुश्रुतोक्ते दीर्घायुष्यादिज्ञानपूर्व्वकचिकित्सायाम् ३भूमिकायां स्त्री ङीप् । स्वार्थे कन् अत इत्त्वम् । उपक्रमणिका । ग्रन्थप्रस्तावने मुखबन्धे ।

उपक्रमणीय त्रि० उप+क्रम–अनीयर् । १आरम्भणीये । उपक्रमणे साधु–छ । २चिकित्साङ्गे दीर्घायुष्यादिज्ञानसाधने लक्षणभेदे । आतुरचिकित्सार्थं यथोपक्रमणं कर्त्तव्यं तदावेदके ३ग्रन्थे च । तत्प्रकारादि सुश्रुते दर्शितं यथा । "अथात आतुरोपक्रमणीयमध्यायं व्याख्यास्यामः । आतुरमुपक्रममाणेन भिषजायुरेवादौ परीक्षेत । सत्यायुषि व्याध्यृत्वग्निवयोदेहबलसत्वसात्म्यप्रकृतिभेषजदेशान् परीक्षेत । तत्र महापाणिपादपार्श्वपृष्ठस्तनाग्रदशनवदनस्कन्धललाटं दीर्घाङ्गुलिपर्व्वोच्छ्वासप्रेक्षणबाहुं विस्तीर्णभ्रूस्तनान्तरोरस्कं ह्रस्वजङ्घामेढ्रग्रीवं गम्भीरसत्वस्वरनाभिमनुच्चैर्बद्धस्तनमुपचितमहारोमशकर्णं पश्चान्मस्तिष्कं स्नातानुलिप्तं मूर्द्धानुपूर्व्व्या विशुष्यमाणशरीरं पश्चाच्च विशुष्यमाणहृदयं पुरुषं जानीयाद्दीर्घायुः खल्वयमिति । तमेकान्तेनोपक्रमेत् । एभिर्लक्षणैर्विपरीतैरल्पायुर्मिश्रैर्मध्यमायुरिति । गूढसन्धिशिरास्नायुः संहताङ्गः स्थिरेन्द्रियः । उत्तरोत्तरसुक्षेत्रो यः स दीर्घायुरुच्यते । गर्भात् प्रभृत्यरोगो यः शनैः समुपचीयते । शरीरज्ञानविज्ञानैः स दीर्घायुः समासतः । मध्यमस्यायुषो ज्ञानमत ऊर्द्ध्वं निबोध मे । अधस्तादूर्द्ध्वयोर्यस्य लेखाः सुव्यक्तमायताः । द्वे वा तिस्रोऽधिका वापि पादौ कर्णौ च मांसलौ । नासाग्रमूर्द्ध्वञ्च भवेदूर्द्ध्वं लेखाश्च पृष्ठतः । यस्य स्युस्तस्य परममायुर्भवति सप्ततिः । जघन्यस्यायुषो ज्ञानमत ऊर्द्ध्वं निबोध मे । ह्रस्वानि यस्य पर्व्वाणि सुमहच्चापि मेहनम् । तथोरस्यवलीढानि न च स्यात् पृष्ठमायतम् । ऊर्द्ध्वञ्च श्रवणौ स्थानान्नासा चोच्चा शरीरिणः । हसतो जल्पतो वापि दन्तमांसं प्रदृश्यते । प्रेक्षते यश्च विभ्रान्तं स जीवेत्पञ्चविंशतिम् । अथ पुनरायुषो विज्ञानार्थमङ्गप्रत्यङ्गप्रमाणसारानुपदेक्ष्यामः । तत्राङ्गान्यन्तराधिसक्थिबाहुशिरांसि तदवयवाः प्रत्यङ्गानीति । तत्र स्वैरङ्गुलैः पादाङ्गुष्ठप्रदेशिन्यौ द्व्यङ्गुलायते । प्रदेशिन्यास्तु मध्यमाऽनामिका कनिष्ठिका यथोत्तरं पञ्चमभागहीना । चतुरङ्गुलायते पञ्चाङ्गुलविस्तृते प्रपदपादतले । पञ्चचतुरङ्गुलायतविस्तृता पार्ष्णिः । चतुर्दशाङ्गुलायतः पादः । चतुर्दशाङ्गुलपरिणाहानि पादगुल्फजङ्घाजानुमध्यानि । अष्टादशाङ्गुला जङ्घा जानूपरिष्टाद्द्वात्रिंशदङ्गुलमेवं पञ्चाशत् । जङ्घायामसमावूरू । द्व्यङ्गुलानि वृषणचिबुकदशननासापुटभागकर्णमूलनयनान्तराणि । चतुरङ्गुलानि मेहनवदनान्तरनासाकर्णललाटग्रीवोच्छ्रायदृष्ट्यन्तराणि । द्वादशाङ्गुलानि भगविस्तारमेहननाभिहृदयग्रीवास्तनान्तरमुखायाममणिबन्धप्रकोष्ठस्थौल्यानि । इन्द्रवस्तिपरिणाहांसपीठकूर्परान्तरायामः षोड़शाङ्गुलः । चतुर्विंशत्यङ्गुलो हस्तः । द्वात्रिंशदङ्गुलपरिमाणौ भुजौ । द्वात्रिंशदङ्गुलपरिणाहावूरू । मणिबन्धकूर्परान्तरं षोड़शाङ्गुलम् । तलं षट्चतुरङ्गुलायामविस्तारम् । अङ्गुष्ठमूलप्रदेशिनीश्रवणापाङ्गान्तरमध्यमाङ्गुल्यौ पञ्चाङ्गुले । अर्द्धपञ्चाङ्गुले प्रदेशिन्यनामिके । सार्द्धत्र्यङ्गुलौ कनिष्ठाङ्गुष्ठौ । चतुर्विंशतिविस्तारपरिणाहं मुखग्रीवम् । त्रिभागाङ्गुलविस्तारा नासापुटमर्य्यादा । नयनत्रिभागपरिणाहा तारका । नवमस्तारकांशो दृष्टिः । केशान्तमस्तकान्तरमेकादशाङ्गुलम् । मस्तकादवटुकेशान्तो दशाङ्गुलः । कर्णावट्वन्तरं चतुर्दशाङ्गुलम् । पुरुषोरःप्रमाणविस्तीर्णा स्त्रीश्रोणिः । अष्टादशाङ्गुलविस्तीर्णमुरः । तत्प्रमाणा पुरुषस्य कटी । सविंशमङ्गुलशतं पुरुषायाम इति भवन्ति चात्र पञ्चविंशे ततो वर्षे पुमान् नारी तु षोडशे । समत्वागतवीर्य्यौ तौ जानीयात् कुशलो भिषक् । देहः स्वैरङ्गुलैरेव यथावदनुकीर्त्तितः । युक्तः प्रमाणेनानेन पुमान् वा यदि वाऽङ्गना । दीर्घमायुरवाप्नोति वित्तञ्च महदृच्छति । मध्यमं मध्यमैरायुर्वित्तं हीनैस्तथाऽवरम् । अथ सारान् वक्ष्यामि । स्मृतिभक्तिप्रज्ञाशौर्यशौचोपेतं कल्याणाभिनिवेशं सत्वसारं विद्यात् । स्निग्धसंहतश्वेतास्थिदन्तनखं बहुलकामप्रजं शुक्रेण । अकृशमुत्तमबलं स्निग्धगम्भीरस्वरं सौभाग्योपपन्नं महानेत्रञ्च मज्ज्ञा । महाशिरःस्कन्धदृढदन्तहन्वस्थिनखमस्थिभिः । स्निग्धमूत्रस्वेदस्वरं बृहच्छरीरमायाससहिष्णुं मेदसा । अच्छिद्रगात्रं गूढास्थिसन्धिं मांसोप-

चितञ्च मांसेन । स्निग्धताम्रनखनयनतालुजिह्वौष्ठपाणिपादतलं रक्तेन । सुप्रसन्नमृदुत्वग्रोमाणं त्वक्सारं विद्यादित्येषां पूर्वं पूर्वं प्रधानमायुःसौभाग्ययोरपि । भवति चात्र सामान्यतोऽङ्गप्रत्यङ्गप्रमाणादथ सारतः। परीक्ष्यायुः सुनिपुणो भिषक् सिध्यति कर्मसु ।

व्याधिविशेषास्तु प्रागभिहिताः सर्व एवैते त्रिविधाः साध्या याप्याः प्रत्याख्येयाश्च तत्रैतान् भूयस्त्रिधा परीक्षेत किमयमौपसर्गिकः प्राक्केवलोऽन्यलक्षण इति । तत्रौपसर्गिको यः पूर्वोत्पन्नं व्याधिं जघन्यकालजातो व्याधिरुपसृजति स तन्मूल एवोपद्रवसंज्ञः । प्राक्केवलो यः प्रागेवोत्पन्नो व्याधिरपूर्वरूपोऽनुपद्रवश्च । अन्यलक्षणो यो भविष्यद्व्याधिख्यापकः स पूर्वरूपसंज्ञः । तत्र सोपद्रवमन्योन्याविरोधेनोपक्रमेत बलवन्तमुपद्रवं वा प्राक्केवलं यथास्वं प्रतिकुर्वीत । अन्यलक्षणे त्वादिव्याधौ प्रयतेत । भवति चात्र । नास्ति रोगो विना दोषैर्यस्मात्तस्माद्विचक्षणः । अनुक्तमपि दोषाणां लिङ्गैर्व्याधिमुपाचरेत् ।

प्रागभिहिता ऋतवः । शीते शीतप्रतीकारमुष्णे चोष्णनिवारणम् । कृत्वा कुर्य्यात् क्रियां प्राप्तां क्रियाकालं न हापयेत् । अप्राप्ते वा क्रियाकाले प्राप्ते वा न कृता क्रिया । क्रियाहीनाऽतिरिक्ता वा साध्येष्वपि न सिध्यति । या ह्युदीर्णं शमयति नान्यं व्याधिं करोति च । सा क्रिया न तु या व्याधिं हरत्यन्यमुदीरयेत् ।

प्रागभिहितोऽग्निरन्नस्य पाचकः (अत्र प्रश्ने) स चतुर्व्विधो भवति दोषानभिपन्न एको विक्रियामापन्नस्त्रिविधो भवति विषमो वातेन, तीक्ष्णः पित्तेन, मन्दः श्लेष्मणा, चतुर्थः समः सर्व्वसाम्यादिति तत्र यो यथाकालमन्नमुपयुक्तं सम्यक् पचति स समः, समैर्दोषैः । यः कदाचित्सम्यक्पचति कदाचिदाध्मानशूलोदावर्त्तातिसारजठरगौरवान्त्रकूजनप्रवाहणानि कृत्वा स विषमः । यः प्रभूतमप्युपयुक्तमन्नमाशु पचति स तीक्ष्णः, स एवाभिवर्द्धमानोऽत्यग्निरित्याभाष्यते स मुहुर्मुहुः प्रभूतमप्युपयुक्तमाशुतरं पचति पाकान्ते च गलताल्वोष्ठशोषदाहसन्तापान् जनयति । यः स्वल्पमप्युपयुक्तमुदरशिरोगौरवकासश्वासप्रसेकच्छर्द्दिगात्रसदनानि कृत्वा महता कालेन पचति स मन्दः । विषमो वातजान् रोगान् तीक्ष्णः पित्तनिमित्तजान् । करोत्यग्निस्तथा मन्दो विकारान् कफसम्भवान् । तत्र समे परिरक्षणं कुर्व्वीत विषमे स्निग्धाम्ललवणैः क्रियाविशेषैः प्रतिकुर्व्वीत तीक्ष्णे मधुरस्निग्धशीतैर्व्विरेकैश्च । एवमेवात्यग्नौ विशेषेण माहिषैश्च क्षीरदधिसर्पिर्भिर्मन्दे कटुतिक्तकषायैर्वमनैश्च । जाठरो भगवानग्निरीश्वरोऽन्नस्य पाचकः । सौक्ष्म्याद्रसानाददानो विवेक्तुं नैव शक्यते । प्राणापानसमानैस्तु सर्व्वतः पवनैस्त्रिभिः। ध्मायते पाल्यते चापि स्वे स्वे स्थाने व्यवस्थितैः।

वयस्तु त्रिविधं बालं मध्यं वृद्धमिति । तत्रोनषोडशवर्षा बालास्तेऽपि त्रिविधाः क्षीरपाः क्षीरान्नादा अन्नादा इति तेषु संवत्सरपराः क्षीरपा द्विसंवत्सरपराः क्षीरान्नादाः परतोऽन्नादा इति । षोड़शसप्तत्योरन्तरे मध्यं वयस्तस्य विकल्पो वृद्धिर्यौवनं संपूर्णता हानिरिति । तत्रा विंशतेर्वृद्धिरात्रिंशतो यौवनमा चत्वारिंशतः सर्व्वधात्विन्द्रियबलवीर्य्यसम्पूर्णता । अत ऊर्द्ध्वमीषत् परिहाणिर्य्यावत्सप्ततिरिति । सप्ततेरूर्द्ध्वं क्षीयमाणधात्विन्द्रियबलवीर्य्योत्साहमहन्यहनि वलीपलितखालित्यजुष्टं कासश्वासप्रभृतिभिरुपद्रवैरभिभूयमानं सर्व्वक्रियास्वसमर्थं जीर्णागारमिवाभिवृष्टमवसीदन्तं वृद्धमाचक्षते । तत्रोत्तरोत्तरासु वयोऽवस्थासूत्तरोत्तरा भेषजमात्राविशेषा भवन्त्यृते च परिहाणेस्तत्राद्यापेक्षया प्रतिकुर्वीत । भवन्ति चात्र । बाले विवर्द्धते श्लेष्मा मध्यमे पित्तमेव तु । भूयिष्ठं वर्द्धते वायुर्वृद्धे तद्वीक्ष्य योजयेत् । अग्निक्षारविरेकैस्तु बालवृद्धौ विवर्जयेत् । तत्साध्येषु विकारेषु मृद्वीं कुर्य्यात् क्रियां शनैः ।

देहः स्थूलः कृशो मध्य इति प्रागुपदिष्टः । कर्शयेद्बृंहयेच्चापि सदा स्थूलकृशौ नरौ । रक्षणञ्चैव मध्यस्य कुर्व्वीत सततं भिषक् ।

बलमभिहितगुणं दौर्ब्बल्यञ्च स्वभावदोषजरादिभिरवेक्षितव्यम् । यस्माद्बलवतः सर्व्वक्रिया प्रवृत्तिस्तस्माद्बलमेव प्रधानमधिकरणानाम् । केचित् कृशाः प्राणवन्तः स्थूलाश्चाल्पबला नराः। तस्मात् स्थिरत्वव्यायामैर्ब्बलं वैद्यः प्रतर्कयेत् ।

सत्वन्तु व्यसनाभ्युदयक्रियादिस्थानेष्वविक्लवकरम् । सत्ववान् सहते सर्व्वं संस्तभ्यात्मानमात्मना । राजसः स्तभ्यमानोऽन्यैः सहते नैव तामसः ।

प्रकृतिं भेषजं चोपरिष्टाद्वक्ष्यामः (प्रकृतिं शारीरस्थाने, भेषजं तत्तत्प्रकरणे)।

सात्म्यानि तु देशकालजात्यृतुरोगव्यायामोदकदिवास्वप्नरसप्रभृतीनि प्रकृतिविरुद्धान्यपि यान्यबाधकराणि भवन्ति । यो रसः कल्पते यस्य सुखायैव निषेवितः । व्यायामजातमन्यद्वा तत् सात्म्यमिति निर्दिशेत् ।

देशस्त्वानूपो जाङ्गलः साधारण इति । तत्र बहूदकनि-

म्नोन्नतनदीवर्षगहनो मृदुशीतानिलो बहुमहापर्व्वतवृक्षो मृदुसुकुमारोपचितशरीरमनुष्यप्राय: कफवातरोगभूयिष्ठश्चानूप: । आकाशसम: प्रविरलाल्पकण्टकिवृक्षप्रायोऽल्पवर्षप्रस्रवणोदपानोदकप्राय उष्णदारुणवात: प्रविरलाल्पशैल: स्थिरकृशशरीरमनुष्यप्रायो वातपित्तरोगभूयिष्ठश्च जाङ्गल: । उभयदेशलक्षण: साधारण इति । भवन्ति चात्र । समा: साधारणे यस्माच्छीतवर्षोष्ममारुता: । दोषाणां समता जन्तोस्तस्मात्साधारणो मत: । न तथा बलवन्त: स्युर्जलजा वा स्थलाहृता: । स्वदेशे निचिता दोषा अन्यस्मिन् कोपमागता: । उचिते वर्त्तमानस्य नास्ति देशकृतं भयम् । आहारस्वप्नचेष्टादौ तद्देशस्य गुणे सति देशप्रकृतिसात्म्यर्त्तुविपरीतोऽचिरोत्थित: । सम्पत्तौ भिषगादीनां बलसत्वायुषा तथा । केवल: समदेहाग्ने: सुखसाध्यतमो गद: । अतोऽन्यथा त्वसाध्य: स्यात् कृच्छ्रो व्यामिश्रलक्षण: । क्रियायास्तु गुणालाभे क्रियामन्यां प्रयोजयेत् । पूर्वस्यां शान्तवेगायां न क्रियासङ्करो हित: । गुणालाभेऽपि सपदि यदि सैव क्रिया हिता । कर्त्तव्यैव तदा व्याधि: कृच्छ्रसाध्यतमो यदि । यएवमेनं विधिमेकरूपं विभर्त्ति कालादिवशेन धीमान् । स मृत्युपाशान् जगतोगदौघान्छिनत्ति भैषज्यपरश्वधेन" ।

उपक्रान्त त्रि०उप+क्रम–क्त ।१आरब्धे २विस्तृते शब्दार्थचि०

उपक्रिया स्त्री उप+कृ-भावे श । उपकारे "तमपीह गुरुं विद्यात् श्रुतोपक्रियया तया" मनु: ।

उपक्रोश पु० उप–क्रुश–घञ् । निन्दायाम् । "नायं बिभेत्युपक्रोशादधर्म्माद्वा पुररोचन:" भा० आ० १४५ अ० 'राज्येन किं तद्विपरीतवृत्ते: प्राणैरुपक्रोशमलीमसैर्वा"रघु: अत्या०स०। २उपगतक्रोशे आसन्नक्रोशे त्रि०।अव्ययी०। ३क्रोशसमीपे अव्य० । भावे ल्युट् उपक्रोशनमप्यत्र । "वाग्दन्तनखैर्लोकोपक्रोशनै:" दशकु०।"कुलोपक्रोशनकरी कुलाङ्गारी निराश्रया"हरि०१७६ अ०। [स्त्रियां ङीप् ।

उपक्रोष्टृ पु० उप+क्रुश-तृच् । १गर्द्दभे । २निन्दके त्रि०।

उपक्लेश पु० उपक्लिश्नाति अनेन उप+क्लिश–करणे घञ् । मदादिषु । [घञ्पक्षे अप् । वीणानिनादे ।

उपक्व(क्वा)ण पु० उप+क्वण-शब्दे "क्वणोवीणायाञ्च"पा०वा

उपक्षय पु० उप+क्षि-अच् । १अपचये हानौ । सामीप्यादौ अव्ययी० ।२निवाससमीपादौ, अव्य० । ३उपगत: क्षयम् अत्या०स० । ३क्षयं प्राप्ते त्रि० । तत्पुरुषे उपाद्द्व्यच्कत्वादन्तोदात्तता ।

उपक्षित् त्रि० उप+क्षि-क्विप् । समीपनिवासिनि । "यस्य ते अग्ने अन्ये अग्नय उपक्षितो वया इव" ऋ० ८, १९,३३ । [२सकार्य्योद्यसामर्थ्यं प्राप्ते च ।

उपक्षीण त्रि० उप+क्षि–क्त तस्य न, दीर्घश्च । १अपचयप्राप्ते

उपक्षेप पु० उप+क्षिप–भावे घञ् । १आक्षेपे, "कर्णनासाच्छेदोपक्षेपभीषिताभ्याम्"दशकु०। २समीपे निक्षेपणे च ।

उपक्षेपण न०उप+क्षिप–ल्युट् । शूद्रस्वामिकान्नस्य विप्रगृहे पाकार्थं समर्पणे ।"उपक्षेपणधर्मेण यत्तु पाचयते द्विजै:। अभोज्यं तद्भवेदन्नम्" शाम्ब०पु०।"उपक्षेपणधर्मेण शूद्रस्वामिकान्नस्य पाकार्थं ब्राह्मणगृहे समर्पणरूपेणेति" कल्पतरु: । २समर्पणमात्रे च ।

उपखात अव्य० सामीप्यादौ अव्ययी० १खातसामीप्ये २ख्याते इत्यर्थे च । उपगत: खातम् अत्या०स० । ३खातानुगते । उपाद्द्व्यच्कत्वेन तत्पुरुषपक्षे अन्तोदात्ततेतिभेद:

उपग त्रि० उप+गम–ड । उपगन्तरि "ओषध्य: फलपाकान्ताबहुपुष्पफलोपगा:" मनु: । "त्रेतायां भावसंकल्पा: क्रियादानफलोपगा:" भा०व० १४९अ० । 'केन्द्रोपगा नवमपञ्चमगाश्च सर्वे"ज्यो०त०।

उपगण त्रि० उपगतो गणो येन प्रा०ब० संख्यावचनत्वेऽपि "अबहुगणादिति" पा० निषेधात् न डच् । प्राप्तसमुदाये डचि तु चित्त्वात् अन्तोदात्तता स्यात् । अतस्तस्य पूर्वपदप्रकृतिस्वरार्थं डचोनिषध: । "रूपातिप्रसङ्गाभावेऽपि स्वरभेदार्थमेव पर्य्युदास:" सि० कौ० स्थितम् ।

उपगत त्रि० उप+गम–क्त । १स्वीकृते, २उपस्थिते, ३ज्ञाते ४प्राप्ते च "सर्व्वैर्हि नोपगतमप्यपचीयमानं वर्द्धिष्णुमाश्रयमनागतमभ्युपैति"माघ: भावे क्त । ५प्राप्त्यादौ न० उपगतं प्राप्ति: सूच्यत्वेनात्यस्य अच् । ६प्राप्तिसूचके पत्रे च (रसिद) । "धनी वोपगतं दद्यात् स्वहस्तपरिचिह्नितम्" या० स्मृ० । "उपगतं प्राप्तमिति यद्वा उपगतम् प्रवेशपत्रं स्वहस्तलिखितचिह्नितमधमर्णायोत्तमर्णोदद्यात्" मिता० ।

उपगति स्त्री उप+गम–क्तिन् । १प्राप्तौ २ज्ञाने ३स्वीकारे च

उपगन्तृ त्रि० उप+गम–तृच् । १प्राप्तरि २स्वीकर्त्तरि ३ज्ञातरि च ।

उपगम पुं० उप+गम-भावे घञ् अवृद्धि: । १समीपगमने, २अङ्गीकारे ३ज्ञाने, च"सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम्"मेघ० । 'व्याव न्योपगमात् कुमारी' मृगवनोपगमक्षमवेशभृत्" । भावे ल्युट् । उपगमन

मय्यत। "यथा कर्म्म गुरु कृत्वा स्वर्गोपगमनं ध्रुवम्" भा० आ० १०२अ०।

उपगम्य(त्य) अव्य०उप+गम–ल्यप् वा मलोपे तुक्। १समीपं गत्वेत्यर्थे। कर्म्मणि यत् उपगम्य।२सामीप्येन गम्ये त्रि०।

उपगहन पु० ऋषिभेदे "महार्न्वषिश्च कपिलस्तथर्षिस्ताड़कायनः। तथैव चोपगहनस्तथर्षिश्चासुरायणिः" भा० आ० ४अ०।

उपगा पु० उप+गै–क्विप्। यज्ञे १उपगातरि ऋत्विग्भेदे। भावे अङ्। २उपगाने स्त्री "उपगादर्शनाच्च" कात्या० ६,७,२, "उपगानदर्शनाच्चैवमवसीयते कर्कः।

उपगातृ पु० उपगायति उप+गै–तृच्। यज्ञे उद्गातुः समीपे १गातरि ऋत्विग्भेदे "इहस्पतिरुद्गाता विश्वेदेवा उपगातारः" तैत्ति०। "ऋत्विग्व्यतिरिक्तानामुपगातॄणामनुपक्लृप्तत्वादृत्विज एवोपगातारः" कात्या० ६,७,२, कर्कः। "स वडवा उपरुन्धन्ति संयिङ्क्ते यथोपगातार उपगायन्ति" शत०ब्रा०१३,२,२,२। समीपगानकर्त्तरि त्रि० (दोयार) स्त्रियां ङीप्।[गन्तरि २स्त्रीकर्त्तरि ३ज्ञातरि च

उपगामिन् त्रि० उप+गम–णिनि स्त्रियां ङीप्। १समीप-

उपगिर (रि) अव्य०सामीप्यादौ अव्ययी० वा अच्समा०। १पर्व्वतसामीप्ये २पर्व्वते इत्यर्थे च। गिरिमुपगतः अत्या०स०। उत्तरदिक्स्थे गिरिसन्निकृष्टे देशभेदे पु० "प्रययावुत्तरां तस्माद्दिशं धनदपालिताम्। अन्तर्गिरिञ्च कौन्तेयस्तथैव च बहिर्गिरिम्। तथैवोपगिरिञ्चैव विजिग्ये पुरुषर्षभः" भा०स०२६ अ०। अन्तोदात्तोऽयम्।

उपगीति स्त्री "आर्य्याद्वितीयकार्द्धे यद्गदितं लक्षणं तत् स्यात्। यद्युभयोरपि दलयोरुपगीतिं तां मुनिर्ब्रूते" वृ०र० उक्ते मात्रावृत्तभेदे।

उपगु त्रि०उपगतो गौरस्य ह्रस्वः गोस्त्रियोरिति। १प्राप्तकिरणादौ २गोपाले च "उपगोरिदम् अण्। औपगव तत्सम्बन्धिनि त्रि०। "सामीप्येऽव्ययी०। ३गोः सामीप्ये अव्य०। [स्त्रियां गौ० ङीष्।

उपगुध त्रि० उप+गुध–रोधने क। सामीप्येन रोधके।

उपगुरु पु०उपगतः सादृश्येन गुरुम् अत्या०स०अन्तोदात्तः। तन्त्रोक्ते गुरुसदृशे उपदेशादिकारके। सामीप्यादौ अव्ययी०। २गुरोः सामीप्ये ३गुरावित्यर्थे च अव्य०।

उपगूढ न०उप+गुह–भावे क्त। १आलिङ्गने "उपगूढानि सवेपथूनि च"कुमा०। "विभ्रमार्थमुपगूढमजस्रम्" माघः। कर्म्मणि क्त। २आलिङ्गिते त्रि०। ततः ऋश्या० चतुरर्थ्यां क। उपगूढक तत्सन्निकृष्टदेशादौ त्रि०।

उपगूहन न० उप+गुह–ल्युट् ओत्वत्। आलिङ्गने "स्मरन्मुकुन्दाङ्घ्र्युपगूहनं पुनः" भा०स्क०५अ०।

उपगोह्य त्रि०उप+गुह–ण्यत् जत्त्वविधौ अच एव ग्रहणान्न जत्त्वम्। १आलिङ्ग्ये, २आह्ये च। भावे ण्यत्। ३आलिङ्गने। पक्षे क्यप् उपगुह्यमप्यत्र।

उपगौर त्रि० उपगतो गौरम् अत्या०स०। गौरवर्णोपगते उपात् द्व्यच्कत्वेऽपि गौरादिपर्युदासात् नान्तोदात्तता

उपग्रह पु० उप+ग्रह–अप्। १कारावन्धने, २वन्दीकरणे, ३उपयोगे, ४आनुकूल्ये च। कर्म्मणि घञ्। ५कारारुद्धवन्द्याम्। उपगतोग्रहं सादृश्येन अत्या०स०। ज्योतिषोक्ते ६ग्रहतुल्ये ज्योतिः पदार्थे राहुकेत्वादौ "ग्रहाः सोपग्रहाश्चैव इग्राः परिषदां गणाः। एते चान्ये च बहवो घोराश्चिदिववासिनः। परिवार्य्य महासेनं स्थिता मातृगणैः सह" भा०व०२२६अ० "उपग्रहाः राहुप्रभृतयः नीलक० "स्र्य्यभात् पञ्चमं धिष्ण्यं ज्ञेयं विद्युन्मुखाभिधम्। शून्यन्त्वाष्टमगं प्रोक्तं सन्निपातं चतुर्दशम्। केतुरष्टादशं प्रोक्तमुल्का स्यादेकविंशतिः। द्वाविंशतितमं कम्पस्त्रयोविंशश्च वज्रकम्। निर्घातश्चतुर्विंशमुक्ता अष्टावुपग्रहाः"ज्यो० त० उक्ते सूर्य्याक्रान्तनक्षत्रात् पञ्चमादिषु विद्युन्मुखादिसमाह्वयेषु ७नक्षत्रेषु। तत्फलञ्च "प्रस्थाने विघ्नदा प्रोक्ताः सर्वकार्य्येषु सर्वदा क्रूरवेधसमायोगे यस्योपग्रहसम्भवः। तस्य मृत्युर्न सन्देहो रोगाद्वाऽथ रणादपि ज्यो० त०। ८उपग्रहणशब्दार्थे च।

उपग्रहण न०उप+ग्रह–ल्युट्।१सामीप्येन ग्रहणे २स्वीकारे "वेदोपग्रहणार्थाय तावग्राहयत प्रभुः" रामा०कात्यायनोक्ते आज्याधारकरणभेदे।"एकद्रव्ये साज्ये वेदेनोपग्रहणम्" कात्या० १,१०,६, "दक्षिणहस्तस्थस्य साज्यस्यैकद्रव्यस्य हस्तकम्पनादिनास्कन्दनावरणार्थं सव्यहस्तगृहीतवेदेनाधारकरणमुपग्रहणमुच्यते" कर्कः। अप् उपग्रहोऽप्यत्र। "न सव्येन वेदोपग्रहः" तत्रैव कर्कः।

उपग्राह पु० उप+ग्रह–णिच्–अच्। १उपढौकने उपहारे (भेटदेओया) कर्म्मणि घञ्।२उपहारद्रव्ये देये "उच्चावचानुपग्राहान् राजभिः प्रापितान् बहून्"भा०स०५१अ० "उपग्राहान् उपहारान्" नीलक०।

उपग्राह्य त्रि० उप+ग्रह–णिच्–यत्। समीपे ग्राहयितुमुपस्थाप्ये १उपढौकनीयद्रव्ये(भेटी)भावे यत्। २उपहारे न०

उपघात पु०उप+हन–घञ्। १नाशने, २कर्म्मायोग्यतासम्पादने

"काकेभ्यो रक्ष्यतामन्नमिति बालोऽपि चोदितः। उपघातप्रधानत्वात् न श्वादिभ्योऽपि रक्षति" मीमां०का०। "बीजदोषोपघातेन पण्ये दोषमुपागते" या०स्मृ०। ३अपकारे। "स्त्रीणाञ्च प्रेक्षणालम्भमुपघातं परस्य च" मनुः। ४इन्द्रियाणां स्वस्वकार्य्यजननासामर्थ्ये च "तथात्वञ्चेदिन्द्रियाणामुपघाते कथं स्मृतिः" भाषा०। इन्द्रियाणामुपघातश्च एकादशेन्द्रियभेदेन बाधिर्य्यादिभेदात् एकादशविधः। अशक्तिशब्दे ४७२पृ० विवृतिः। करणे घञ्। ५रोगे ६पापसमूहे च "रेतोरक्तगर्भोपघातः पञ्चगुणोजातकर्मणा प्रथममपोहति" अष्टाभिःसंस्कारैः गर्भोपघातात् पूतो भवति" हारीतः "उपघातः पापसङ्घः पञ्चगुणः पञ्चप्रकारः उपपातकजातिभ्रंशीकरसङ्करीकरणापात्रीकरणमलिनीकरणरूपपापपञ्चकसंघः" सं०त० रघु० "पाणिना मेक्षणेनाथ स्रुवेणैव तु यद्धविः। हूयते चानुपस्तीर्य उपघातः स उच्यते" गृह्यसंग्रहोक्ते ७होमभेदे। "अनुपस्तीर्य्येत्यनेन स्रुचि अञ्चतरावर्त्तं पञ्चावर्त्तं वा घृतोपस्तरणादिकं तदत्र नास्ति मेक्षणादिना सकृद् गृहीत्वा होमः" अ०त० रघु०। "चरौ तु बहुदैवत्यो होमः, स्यादुपाघतवत्" छन्दोग०।

उपघातक त्रि० उप+हन–ण्वुल्। १नाशके २पीड़के च काकशब्दस्य दध्युपघातकत्वेन काकाकाकोभयवृत्तिः, आलङ्कारिकाः "पुंसा सह समायोगो न स धर्मोपघातकः" भा०आ० ७२अ० "कथं सक्तून् ग्रहीष्यामि भूत्वा धर्मोपघातकः" भा०आश्व० ६० अ०।

उपघातिन् त्रि० उप+हन–णिनि स्त्रियां ङीप् १नाशके २पीड़के च "शस्त्रं पातयेन्मर्म्मशिरास्नायुसन्धीनां चानुपघाति" सुश्रु०।

उपघ्न पु० उप+हन–घञर्थे–क। आसन्ने आश्रये "छेदादिवोपघ्नतरोर्व्रतत्यौ" रघुः "पिप्रायाद्रिगुहोपघ्नान्" भट्टिः।

उपच(ज) त्रि० उपचिनोति उपजायते वा उप+चि–जन–वा ड। चान्तपाठे वृद्धिकारके जान्तः अनन्तरजाते। "व्रीहियवयोर्वा एतदुपचं (जं) यच्छमीधान्यं तद्व्रीहियवावेतेन भूयांसौ करोति" शत०ब्रा० १,१,१,१०। भाष्यकृता तु अत्र उपचमिति पठित्वा शमीधान्यम् तिलमाषादि उपचिनोति उपचम् अल्पमाषपिष्टेन मिश्रितं व्रीहिपिष्टं विचतुरमासाम् आरोपितम् उपचितं बहु भवतीति" व्याख्यातम्

उपचक्र पु० उपगतः सादृश्येन चक्रं चक्रवाकम् अत्या०स०। चक्रवाकसदृशे पक्षिभेदे "भृङ्गराजोपचक्राश्च लोहपृष्ठाः पतत्त्रिणः" भा०व० १५८अ०। "चकोरैरुपचक्रैश्च पक्षिभिर्जीवजीवकैः" भा० १७८अ०। तत्पुरुषे उपादृदन्तकत्वादन्तोदात्तः। सामीप्यादौ अव्ययी०। २चक्रस्य सामीप्ये ३चक्रे इत्यर्थे च अत्र चक्रशब्दो नानार्थः।

उपचक्षुस् न० उपगतञ्चक्षुर्दर्शनानुगुण्यार्थम् अत्या०स०। उपनेत्रे (चशमा) काचादिनिर्म्मिते दर्शनसाधने द्रव्यभेदे"

उपचतुर त्रि० उपगताश्चत्वारो यस्य प्रा०ब० गतलोपः डचोबाधकोऽच्। १चतुर्णां समीपवर्त्तिनि। चतुरस्य सामीप्यादौ अव्ययी०। २दक्षसामीप्यादौ अव्य०।

उपचय पु० उप+चि–भावे अच्। १वृद्धौ २उन्नतौ "स्वशक्त्युपचये केचित् परस्य व्यसने परे" माघः। "तदेतेषामन्नत्पुत्राणां ज्ञानोपचये भवन्तः प्रमाणम्" हितो० "षडृतवो भवन्ति दोषोपचयप्रकोपोपशमननिमित्तम्" सुश्रु०। "षष्ठत्रिदशलाभाश्च लग्नादुपचयाः स्मृताः" इति ज्योतिषोक्ते ३लग्नात् षष्ठादिस्थानेषु च। [च।

उपचरित त्रि० उप+चर–क्त। १उपासिते २लक्षणया बोधिते

उपचर्म्म(न्) अव्य० चर्मणः सामीप्यादौ अव्ययी० वा अच्समा०। १चर्मसमीपे २चर्मणोत्यर्थे च उगतश्चर्म अत्या०स०। नान्तः। चर्मोपगते त्रि० स्त्रियां वा डाप् मनन्तत्वान्न ङीप्।

उपचर्य्य त्रि० उप+चर–कर्मणि यत् ततः उपशब्देन अवतरेत्यादिवत् सुप्सुपेति समासः सोपसर्गात्तु ण्यदेव स्यात्। १सेवनीये "ये च यैरुपचर्य्याः स्युर्नियमैस्तान्निबोधत"। उपचर्य्यः स्त्रिया साध्व्या सततं देववत् पतिः" मनुः "अग्निवच्चोपचर्य्या वै ब्राह्मणाः कुरुसत्तम!" भा०आनु० ८अ०। २चिकित्सनीये च। भावे यत् तथा समासः। ३चिकित्सायाम् ४सेवने च न० [हला०

उपचर्य्या स्त्री उप+चर–भावे क्यप्। १सेवने २चिकित्सायां

उपचाकु त्रि० उप+चक प्रतीघाततृप्त्योः उण्। १प्रतिघातके २प्रीते च ततः बाह्वादि० अपत्यार्थे इञ्। औपचाकवि तदपत्ये पुंस्त्री०।

उपचायिन् त्रि० उपचिनोति उप+चि–णिनि स्त्रियां ङीप्। उपचयकारके वृद्धिकारके। "इतो वृद्धोपचायित्वात् शिशुं मामद्य योधय" भा०आश्व० ७६अ०।

उपचाय्य पु० उपचीयतेऽग्निरत्र उप+चि–आधारे ण्यत्। यज्ञे इष्टकादिनिर्मिते अग्निधारणार्थे स्थलविशेषे "कथाभीरमसे नितरामुपचाय्यवतां शुभे!" भट्टिः।

उपचार पु० उप+चर–घञ्। १चिकित्सायां, २सेवायां, "स मे चिरायास्खलितोपचाराम्"। "उपचाराञ्जलिखिन्न-

हस्तया” रघुः। २व्यवहारे, “स्तुतेः उपचारात् अन्यार्थदर्शनाच्च” शब्द० भा० भूरिप्रयोगः अविग्रहशब्दे ४५१ पृष्ठे दर्शितः। ४उत्कोचे ५लक्षणया शक्यार्थत्यागेनान्यार्थबोधने ६अयथार्थवाक्येन सन्तोषकरणे च “उपचारपदं न चेदिदमिति” कुमारः ७धर्म्मानुष्ठानमात्रे “वैश्यशूद्रोपचारञ्च” “व्रतचर्य्योपचारञ्च” मनुः। “प्रयुक्तपाणिग्रहणोपचारौ” कुमा०। करणे घञ्। ८पूजासाधने द्रव्यभेदे “सन्मङ्गलोपचाराणां सैवादिरचनाऽभवत्” रघुः पूजाङ्गोपचाराश्च नानाविधाः तत्र सर्वोपचारमन्त्रास्तु श्रीतारपूर्व्वाः, कल्पयामि नमः इत्यन्ताः कार्य्याः। “सिद्धजामले “श्रीतारञ्च मुखे कृत्वा देयस्य भुवनेश्वरि! कल्पयामि नमः पश्चादुपचारेष्वयम् विधिरिति” इत्युपक्रम्य तन्त्रसारे “चतुःषष्ट्युपचाराः दर्शिताः यथा आसनारोपणम् १। सुगन्धितैलाभ्यङ्गः २। मज्जनशालाप्रवेशनम् ३। मज्जनमणिपीठोपरिवेशनम्४। दिव्यस्नानीयमुद्वर्त्तनम् ५। उष्णोदकस्नानम् ६। कनककलसस्थितसकलतीर्थाभिषेचनम्७। धौतवस्त्रपरिमार्ज्जनम् ८। अरुणदुकूलपरिधानम्९ अरुणदुकूलोत्तरीयम्१०। आलेपमण्डपप्रवेशनम्११। आलेपमणिपीठोपवेशनम्१२। चन्दनागुरुकुङ्कुमकर्पूरकस्तूरीरोचनादिव्यगन्धसर्वाङ्गानुलेपनम् १३। केशभारस्य कालागुरुधूपमल्लिकामालतीजातीचम्पकाशोकशतपत्रपूगकुहरीपुन्नागकह्लारयूथीसर्वर्त्तुकुसुममालाभूषणम् १४। भूषणमण्डपप्रवेशनम् १५। भूषणमणिपीठोपवेशनम् १६। नवमणिमुकुटम् १७। चन्द्रशकलम्१८। सीमन्तसिन्दूरम् १९। तिलकरत्नम् २०। कालाञ्जनम् २१। कर्णपालियुगलम्२२। नासाभरणम् २३। अधरयावकम् २४। प्रपदभूषणम् २५। कनकचित्रपादुका २६। महापादका२७। मुक्तावलिः२८ एकावलिः २९। देवच्छन्दकः ३०। केयूरयुगलचतुष्टयम्३१। वलयावलिः ३२। ऊर्मिकावलिः ३३। काञ्चिदाम३४ कटीसूत्रम्३५। शोभाख्याभरणम्३६। पादकटकम् ३७। रत्ननूपुरम् ३८। पादाङ्गुलीयकम् ३९। एककरे पाशः ४०। अन्यकरे अङ्कुशः ४१। पूर्णेक्षुचापम् ४२। अपरकरे पुष्पवाणाः ४३। श्रीमन्माणिक्यपादुका ४४। स्वसमानवेशाभिरावरणदेवताभिः सह सिंहासनारोहणम् ४५। कामेश्वरपर्य्यङ्कोपवेशनम् ४६। अमृतासवचषकम् ४७। आचमनीयम् ४८। कर्पूरवटिका४९। आनन्दोल्लासः५०। सविलासहासः५१।

मङ्गलारात्रिकम् ५२। श्वेतच्छत्रम् ५३। चामरयुगलम् ५४। दर्पणः ५५। तालवृन्तम् ५६। गन्धः५७। पुष्पम् ५८। धूपः ५९। दीपः ६०। नैवेद्यञ्च ६१। एतानि कल्पयेत् एषामुपचाराणामभावे तन्मन्त्राजप्याः। “तदुक्तं नवरत्नेश्वरे। “चतुःषष्ट्युपचाराणामभावे तन्मनुं जपेत्। तत्तदेव फलं विन्देत् साधकः स्थिरमानसः”।“आचमनीयं प्रदातव्यमुपचारान्तरान्तरे” तन्त्रसा० तानि च त्रीणि“स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनीयकम्” नरसिंहपु० तेन चतुःषष्टिपूरणम्। एतच्च श्रीविद्याप्रकरणीयत्वात्तद्विषयम्। अन्यत्र यथागमं कल्पनीयम्। शङ्कराचार्य्येण तु स्तोत्रच्छलेन अन्यविधाः चतुःषष्ट्युपचाराः दर्शिता विस्तरभयान्न ते दर्शितास्तत्स्तोत्रेऽवसेयाः। अथाष्टादशोपचाराः। “आसनम् १स्वागतम् २ पाद्यम्३ अर्घ्यम् ४ आचमनीयकम् ५। स्नानम् ६ वस्त्रोपवीतञ्च७ भूषणानि च सर्वशः ८। गन्धम् ९ पुष्पम् १० तथा धूपम् ११ दीपम् १२ अन्नञ्च १३ तर्पणम्१४ माल्यानुलेपने चैव १५ १६ नमस्कारविसर्ज्जने १७ १८। अष्टादशोपचारैस्तु मन्त्री पूजां समाचरेत्”। अथ षोड़शोपचाराः। “पाद्यमर्घ्यं तथाचामं स्नानं वसनभूषणे। गन्धं पुष्पधूपदीपं नैवेद्याचमनन्ततः। ताम्बूलमर्च्चने स्तोत्रं तर्पणञ्च नमस्क्रियाम्। प्रयोजयेत् प्रपूजायामुपचारांस्तु षोड़श”अथ दशोपचाराः। “पाद्यमर्घ्यं तथाचामो मधुपर्काचमौ तथा। गन्धादयोनिवेद्यान्ता उपचारा दश क्रमात्। अथ पञ्चोपचाराः। “गन्धपुष्पं तथा धूपं दीपं नैवेद्यमेव च। अखण्डं फलमासाद्य कैवल्यं लभते ध्रुवम्” तन्त्रसा० विधानपा० विष्णुविषये अन्यविधा षोडशोपचारा दर्शिताः ते च तत्तन्मन्त्रसहिता मत्कृततुलादानादिपद्धतौ २२८पृष्ठे दर्शिताः। आ० त० “आसन स्वागतं पाद्यमर्घ्यमाचनीयकम्। मधुपर्काचमं स्नानवसनाभरणानि च। गन्धपुष्पे धूपदीपौ नैवद्यं वन्दनं तथा” एवं षोड़शोपचाराः पठिता शक्तिभेदात् भेद उन्नेयः। तत्रासनादिकं यथा देयं तथोक्तं कालि० पु० “आसनं प्रथमं दद्यात् पौष्पं दारवमेव वा”। (वाकारात् रजताद्यासनम्)।“पाद्यार्थमुदकं पाद्यं केवलं तोयमेव तत्। तत्तैजसेन पात्रेण शङ्खेनाथ प्रदापयेत्”। (अर्घ्यमर्घ्यशब्दे उक्तम्)। ‘उदकं दीयते यत्तु प्रसन्नं फेनवर्जितम्। आचमनाय देवेभ्यस्तदाचमनमिष्यते। तत्तैजसेन पात्रेण शङ्खेनापि प्रदापयेत्। स्वर्णरत्नोदके स्नानं कर्पूराद्य

धिवासितम् । तैजसैः कांस्यपात्रैर्वा यज्ञेनाथ प्रदापयेत् । यद्दीयते देवताभ्यो गन्धपुष्पादिकं तथा । अर्घपात्रस्थितैस्तोयैरभिषिच्य समुत्सृजेत् । नैवेद्यं दक्षिणे वामे पुरतो वा न पृष्ठतः । दीपं दक्षिणतो दद्यात् पुरतो वा न वामतः । वामतस्तु तथा धूपमग्रे वा न तु दक्षिणे । निवेदयेत् पुरोभागे गन्धपुष्पञ्च भूषणम्" नरसिं०पु० । "कार्पासं सर्वतोभद्रं दद्यात सर्वेभ्य एव हि । नैकान्तरक्तं दद्यात्तु वासुदेवस्य चेलकम् । तत् पूर्व्वं पूजयित्वैव मन्त्रैर्देवाय चोत्सृजेत् । निर्दशं मलिनं जीर्णं छिद्रं गात्रावलिङ्गितम् । परकीयं चाखुदष्टं सूचीविद्धं तथोषितम् । उपकेशं विधूतञ्च श्लेष्ममूत्रादिदूषितम् । वर्जयेत् स्वोपयोगे च यत्नादादुपयोजने" । (उपकेशं केशेन सह वापितम्) । "पताकाध्वजवस्त्रादौ सूत्रं वस्त्रं नियोजयेत् । ग्रैवेयकादि संसक्तं सौवर्णं राजतञ्च वा । निवेदयेत्तु देवेभ्यो नान्यत्तैजससम्भवम् । भावदः पानपात्रञ्च गण्डको गृहमेव च । पर्य्यङ्कादि यदन्यच्च सर्व्वं तदुपभूषणम्" । गन्धविशेषो गन्धशब्दे वक्ष्यते ।

उपचारच्छल न० शब्दयुक्तवाक्यस्य तत्तात्पर्य्याविषयार्थान्तरपरत्वकल्पनेन छलात्मकासदुत्तररूपे दूषणभेदे ।छलस्य सामान्यलक्षणविभागोपचारलक्षणोदाहरणानि गौ०सू०वृत्त्योर्दर्शितानि यथा । "वचनविघातोऽर्थविकल्पोपपत्त्या छलम्" सू०।"अर्थस्य वाद्यभिमतस्य योविकल्पोविरुद्धः कल्पो अर्थान्तरकल्पनेति यावत् तदुपपत्त्या युक्तिविशेषेण योवचनस्य वाद्युक्तस्य विघातोदूषणं तच्छलमित्यर्थः वक्तृतात्पर्य्याविषयार्थकल्पनेन दूषणाभिधानमिति फलितं तात्पर्य्याविषयत्वं विशेष्ये विशेषणे संसर्गे वा यथा नेपालादागतोऽयं नवकम्बलवत्त्वादित्यत्र नवसंख्यापरत्वकल्पनयाऽसिद्ध्यभिधानं, प्रमेयं धर्म्मत्वादित्यत्र पुण्यत्वार्थकल्पनया भागासिद्ध्यभिधानं, वह्निमान् धूमादित्यत्र धूमावयवे व्यभिचाराभिधानम्"वृ०।"तत्त्रिविधं वाक्छलं सामान्यच्छलमुपचारच्छलञ्च"सू०। "धर्मविकल्पनिर्देशेऽर्थसद्भावप्रतिषेध उपचारच्छलम्"सू०।"धर्मशब्दस्यार्थेन सम्बन्धस्तस्य विकल्पो द्विविधः कल्पः शक्तिलक्षणान्यतररूपस्तथा च शक्तिलक्षणयोरेकतररूपया प्रयुक्ते शब्दे तदपररूपया यः प्रतिषेधः स उपचारच्छलं यथा मञ्चाः क्रोशन्ति नीलोघट इत्यादौ मञ्चस्था एव क्रोशन्ति न तु मञ्चाः, एवं घटस्य कथं नीलरूपाभेदः, एवं अहं नित्य इति शक्त्या प्रयुक्ते अमुकस्मादुत्पन्नस्त्वं कथं नित्य इति प्रतिषेधोऽप्युपचारच्छलम् । वाद्यभिप्रेतार्थस्यादूषणेन छलस्यासदुत्तरत्वम् । न च श्लिष्टलाक्षणिकप्रयोगाद्वादिन एवापराधः स्यादिति वाच्यं तत्तदर्थबोधकतया प्रसिद्धस्य शब्दस्य प्रयोगे वादिनोऽनपराधात् अन्यथा पर्वतोवह्निमानित्युक्ते पर्वतोऽयं कथमवह्निमानित्याद्दिदूषणेनानुमानाद्युच्छेदः स्यात्" ।

उपचार्य्य त्रि० उप+चर–कर्मणि ण्यत् ।१सेवनीये २चिकित्सनीये च भावे ण्यत् ।३चिकित्सायां हेम० ४सेवायाञ्च न०।

उपचित् त्रि० उपचिनोति देहम् उप+चि–क्विप्। देहवर्द्धके श्लीपदादौ "नाशयित्री बलासस्यार्शस उपचितामसि" यजु० १२,९७। "उपचितः अयुग्गण्डश्लीपदादयः" वेददी० ।

उपचित उप+चि-क्त। १समृद्धे "स्मरयोगवशोपचितं वनम्" रघुः । २दिग्धे च मेदि० ३लेपनादिना वर्द्धिते निदिग्धे अमरः ४समाहिते हेम० ५सञ्चिते च "प्रयतत्वाद्ध्युपचितमशुभं नाशयतीति प्रायश्चित्तम्" हारीतः । "उपचितं सञ्चितम्"प्रा०त०रघुनन्दनः । [६उन्नतौ च ।

उपचिति स्त्री उप+चि–चाय-चिभावो वा भावे क्तिन् । १वृद्धौ

उपचित्र न० "उपचित्रमिदं समसालगौ" वृ० र०, उक्ते १समवृत्तवर्णवृत्तभेदे ।"विषमे यदि सौ सलगा दले भौ युजि भाद्गुरुकावुपचित्रम्" तत्रोक्ते अर्द्धसमे २वर्णवृत्तभेदे च । ३धृतराष्ट्रपुत्रभेदे "चित्रोपचित्रौ चित्राक्षश्चारुचित्राङ्गदश्च ह" धृतराष्ट्रपुत्रनामकथने । भा० आ० ६७ अ० ।

उपचित्रा स्त्री उपगता चित्रं वर्णम् चित्रां वा । मूषिकपर्ण्याम् (उन्दुरकानि) अमरः चित्रातारासमीपस्थायां २स्वातौ ३हस्तायाञ्च । राशिचक्रे तयोश्चित्रानुगतत्वात्तथात्वम् । ४दन्तीवृक्षे राजनि० "द्विगुणितवसुलघुरचलधृतिरिह" इत्युपक्रम्य "वाणाष्टनवसु यदि लघिता उपचित्रा नवमे परयुक्ते" वृ०र०उक्ते षोडशमात्रात्मके ५मात्रावृत्तभेदे च ।

उपचेय त्रि० उप+चि–कर्मणि यत् । अङ्कुशादिना विनाश्य चयनीये पुष्पादौ ।

उपच्छन्दन न० उप+छदि–णिच् भावे ल्युट्। सान्त्वेन प्रार्थने (फुसलान) "तथा निवेदितश्च नरपतिरसुभिर्मामवियोज्य उपच्छन्दनैरेव स्वं ते दापयितुं प्रयतिष्यते" दशकु०। २उपमन्त्रणे च "उपमन्त्रणमुपच्छन्दनमिति" सि० कौ० ।

उपच्यव पु० उप+च्युङ्–गतौ भावे अप् । गृहात् निर्गमे । "यत्र नार्य्यपच्यवमुपच्यवञ्च शिक्षते" ऋ०१,२८,३ । "शालाया निर्गमनमुपच्यवम्" भा० ।

उपजन न० उपजायते जन—अच्। स्त्रीपुंसयोगेन जायमाने १देहे। "नोपजनं स्मरन्निदं शरीरं स यथा प्रयोग्य आचरणे युक्तः" छा०उ०। "मनसैव नोपजनं स्मरन् स्त्रीपुंसयोरन्योन्योपगमेन जायते इत्युपजनम् आत्मभावेन वात्मसामीप्येन वा जायते इत्युजनमिदं तन्न स्मरन्" भा०। भावे घञ् अवृद्धिः। २स्तोमादिवृद्धौ पु०। "तत्रोपजनमस्तार्क्ष्यवर्ज्जमग्ने सूक्तानाम्" आश्व०श्रौ०९,१,१५ "तत्र स्तोमवृद्धावुपजनस्थानमुच्यते नारा वृ० "सोमातिरेके स्तुतशस्त्रोपजनः ६,७,१ "तदा स्तुतशस्त्रयोरुपजनोभवति" नारा०वृ०। ३उत्पत्तिमात्रे च "योगोहि प्रभवाप्ययौ" कठोप० भाष्ये योगोहि प्रभवाप्ययौ उपजनापायधर्म्मकौ" इति उक्तम्।

उपजप्य त्रि० उप+जप—कर्म्मणि अर्हार्थे यत्। भेदनीये उपपूर्व्वकाज्जपतेर्भेदार्थकत्वात्तथात्वम्। "उपजप्यानुपजपेद्बुध्येतैव च तत्कृतम्" मनुः। [जरासामीप्ये।

उपजरस अव्य० जरायाः समीपम् अच् समा० जरसादेशश्च।

उपजला स्त्री उपगतो जलम् अत्या०स०। यमुनापार्श्वस्थे नदीभेदे "जलाञ्चोपजलाञ्चैव यमुनामभितो नदीम्" भा०व०१३०अ०।

उपजल्पिन् त्रि० उप+जल्प—णिनि। उपदेशके। "अनाहूतोपदिष्टानामनाहूतोपजल्पिनाम्। ये लोकास्तान् हतः कर्ण! मया त्वं प्रतिपत्स्यसे" भा०आ०१३६अ०।

उपजाति स्त्री "अनन्तरोदितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः। इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातिष्विदमेव नाम" वृ०र० उक्ते वर्णवृत्ते विभिन्नजातिद्वयपादद्वययोगात् चतुर्द्दशप्रकारभिन्ने छन्दोभेदे। यथा उपेन्द्रवज्रेन्द्रवज्रयोः पादद्वयादियोगे १४ भेदाः। तत्र चतुश्चरणप्रस्तारे १६भेदा भवन्ति तत्र शुद्धा एकैका तत्तन्नामभाक् शिष्टा चतुर्दश उपजातिसंज्ञाः। दिङ्मात्रं दर्श्यते। उ उ उ उ। इ उ उ उ। उ इ उ उ। इ इ उ उ। उ उ इ उ। इ उ इ उ। उ इ इ उ। इ इ इ उ। उ उ उ इ। इ उ उ इ। उ इ उ इ। इ इ उ इ। उ उ इ इ। इ उ इ इ। उ इ इ इ इ इ इ इ। अत्राद्यन्तयोः इन्द्रवज्रोपेन्द्रवज्रयोः शुद्धतया तद्भिन्नानां चतुर्द्दशानां भिन्नजातीयचरणद्वयलक्षणयोगात् उपजातित्वम्। यथा "अथ प्रजानामधिपः प्रभाते जायाप्रतिग्राहितगन्धमाल्यामित्यादि" रघुः। एवं वंशस्थेन्द्रवंशयोरपि। यथा "इत्थं रथाश्वेभनिषादिनां प्रगे गणो नृपाणामथ तोरणाद्बहिः" माघः तुल्यसंख्यकवर्णपादयोरेवोपजातित्वमिति न नियमः किन्तु भिन्नसंख्यकवर्णपादयोरपि। "रामं लक्ष्मणपूर्व्वजं रघुवरं सीतापतिं सुन्दरं काकुत्स्थं करुणामयं गुणनिधिं विप्रप्रियं धार्म्मिकम्। राजेन्द्रं सत्यसन्धं दशरथतनयं श्यामलं शान्तमूर्त्तिम्। वन्दे लोकाभिरामं रघुकुलतिलकं राघवं रावणारिम्" इति पद्ये शार्दूलविक्रीड़ितेन १९ ऊनविंशत्यक्षरपादकेन सह २१ एकविंशत्यक्षरपादक स्रग्धरायाः पादद्वयेन मिश्रणात् उपजातित्वम्। एवं "महिषेऽसुराणामधिपे देवानाञ्च पुरन्दरे" इति देवीमा० अनुष्टुब्बृहत्योः सङ्करादुपजातित्वम्।

उपजानु अव्य० जानुनः समीपम् अव्ययी०। जानुसमीपे। "भीष्मोधनुष्पाणुपाजान्वरत्निः" भट्टिः। तत्र प्रायभवेऽर्थे ततः ठक् उगन्तत्वात् ठस्य कः। औपजानुक तत्रप्रायभवे त्रि० "पाणी यस्योपजानुकौ" भट्टिः।

उपजाप पु० उप+जप—घञ्। १भेदे, अनैक्यसम्पादके व्यापारे। "उपजापः कृतस्तेन तानाकोपवतस्त्वयि" माघः "तेषु तेषु चाकल्येषु प्रासरन् परोपजापाः" दशकु०। २उपांशुजपे च।

उपजापक त्रि० उप+जप—ण्वुल्। १भेदके "घातयेद्विविधैर्दण्डैररीणाञ्चोपजापकान्" मनुः। [भेद्ये।

उपजापसह त्रि० उपजापं भेदं सहते सह—अच्। भेदार्हे

उपजिह्वा स्त्री उपगता ऊर्द्ध्वमुखो जिह्वा यस्याः। १काकीभेदे। प्रा०स०। २उपरिस्थायां जिह्वायाञ्च (आलजिभ्) "उपजिह्वास्फिचौ बाहू" कायविभागे या०स्मृ०। सुश्रुतोक्ते मांसदोषजे ३रोगभेदे "अधिमांसार्ब्बुदार्शोऽधिजिह्वोपजिह्वोपकुशगलशुण्डिकालजीमांससङ्घातौष्ठप्रकोपगलगण्ड गण्डमालाप्रभृतयोमांसदोषजाः" स च सप्तसु मुखरोगेषूपजिह्वाधिजिह्वोपकुशदन्तवैदर्भप्रभृतिषु जिह्वागतमुखरोगभेदः। मुखरोगविभागे" सुश्रु०। "जिह्वागताश्च कण्टकास्त्रिविधास्त्रिभिर्दोषैरलासउपजिह्विकेति पञ्चधा विभज्य "जिह्वाग्ररूपः श्वयथुर्हि जिह्वामुन्नाम्य जातः कफरक्तयोनिः। प्रसेककण्डूपरिदाहयुक्ता प्रकथ्यतेऽसावुपजिह्विकेति" लक्षितः। अत्र स्वार्थे कन्। "उपजिह्विकां तु संलिख्य क्षारेण प्रतिसारयेत्" सुश्रु०। उपजिह्वेव इवार्थे कन्। ४कीटभेदे स्त्रा०कण्टकाद्यततनुत्वात्तथात्वम्

उपजीक त्रि० उ+जीव-क्विप् स्वार्थे कन् वलोपः। उपजीवके "उद्भवन्ति उपजीका समुद्रादधिभेषजम्" अथ०२,३,४,

"उपजीका आसिञ्चन् धन्वन्युदकम्" । ६,१००,२,

उपजीव त्रि० उपगतो जीवं जीवनम् अत्या० स०। जीवनोपगते । "उपजीवाःस्थो जीव्यासम्" अथ० १९,६९,२, उपाद् द्व्यच्कत्वेन तत्पुरुषेऽन्तोदात्तोऽयम् ।

उपजीवक त्रि० उप+जीव–ण्वुल् ।१उपजीवनोपायवति "सूचकाः सेतुभेत्तारः परवृत्त्युपजीवकाः । अक्षतज्ञाश्च मित्राणां ते वै निरयगामिनः" भा० अा० २२ अ०। उपजीव्यतया २इतरालम्बके ३प्रयोज्ये "उपजीव्योपजीवकभावः" न्यायप्र० उपजीव्यशब्दे विवृतिः ।

उपजीवन न० उप+जीव–करणे ल्युट् । १जीविकायाम् । "क्षत्रियस्तैतदेवाहुर्धर्मं कृष्णोपजीवनम्" भा० व० २१ अ० । "उपजीवनञ्च पर्जन्योदानमस्य परायणम्" भा० व० ३१ अ०। भावे ल्युट् । २वृत्त्याद्यर्थमाश्रये "स्त्रीशूद्रविट्क्षत्रवधोनिन्दितार्थोपजीवनम्" या० स्मृ० "आत्मप्रदानं सौम्यं त्वमद्यप्रभृत्यैवोपजीवनम्" भा० स० ७६ अ०।

उपजीवनीय त्रि० उप+जीव–कर्मणि अनीयर् । वृत्त्याद्यर्थमालम्बनीये "यत्र वा अस्यै बहुलतया ओषधयस्तदस्या उपजीवनीयतमम्" शत० ब्रा० १,२,२,१०, "एवतोमुपजीवनीयामकुर्वत" १,२,५.११,

उपजीविका स्त्री उपजीवयति उप+जीव–करणे कर्तृत्वोपचारात् ण्वुल् अत इत्त्वम् । जीवनोपायभूतायां वृत्तौ ।

उपजीविन् त्रि० उप+जीव–णिनि । १आश्रिते २वृत्त्याद्यर्थमालम्बके च "भीमकान्तैर्नृपगुणैः स बभूवोपजीविनाम्" रघुः। "अव्रतानाममन्त्राणां जातिमात्रोपजीविनाम् । नैषां प्रतिग्रहोदेयोन शिलाम् तारयेच्छिलाम्" "जातिमात्रोपजीवी वा कामं स्यात् ब्राह्मणब्रुवः" मनुः । स्त्रियां ङीप्

उपजीव्य त्रि० उप+जीव–ण्यत् । १आश्रये । २ज्ञानसत्ताद्यर्थम् अवलम्बनीये "अलमुपजीव्यानां मान्यानांवाक्ये कटाक्षनिक्षेपेण" सा० द०। "उपजीव्यद्रुमाणाञ्च विंशतेर्द्विगुणोदमः" या० स्मृ० । "उपजीव्यबाधात्" शब्दशि०। उपजीव्यत्वञ्च स्वसत्ताप्रयोजकत्वम् स्वज्ञानप्रयोजकत्वञ्च । उपजीव्योपजीवकभावश्च ज्ञानसत्त्वयोः प्रयोज्यप्रयोजकभावः । यथा एकस्यान्यसत्ताप्रयोजकत्वमपरस्य च तत्प्रयोज्यसत्ताकत्वम् । एवम् अन्यज्ञानप्रयोजकत्वम् अन्याधीनज्ञानविषयत्वं च यथायथं प्रयोगानुसारे बोध्यम् । [उपजोषणमप्यत्र न० ।

उपजोष पु० उप+जुष–प्रीतौ घञ् ।१प्रीतौ२सेवने च । ल्युट् ।

उपजोषम् अव्य० उप+जुष–प्रीतौ वा० अम् । १प्रीतौ १कल्याणे३यथाकर्म्मभोगमित्यर्थे च । तत्र प्रीतौ "यथोपजोषं सर्व्वश्च जनश्चिक्रीड भारत" ! भा० आ० ११२ अ०। "यथोपजोषं विहितैर्हि कृष्णा" भा० आ० १९९ अ० अत्र सर्व्वत्र उपजोषशब्देनापि यथाशब्दस्याव्ययीभावोऽपि भवितुमर्हति । उप–सामीप्ये जोषम् मौनम् । ४सामीप्येन मौने च "किमिदमुपजोषमास्यते" शकु० ।

उपज्ञा स्त्री उप+ज्ञा-कर्म्मणि अङ् । विनोपदेशेन स्वयमुद्भाव्ये १प्रथमं ज्ञायमाने । उपज्ञाशब्दस्य तु तदादित्वविवक्षायाम् उत्तरपदस्थस्य तत्पुरुषे क्लीवता । "पाणिन्युपज्ञं व्याकरणम्" सि० कौ० । "अथ प्राचेतसोपज्ञं रामायणमितस्ततः" रघुः । "कैकय्युपज्ञं बत बह्वनर्थम्" । भट्टिः भावे अङ् । २आद्यज्ञाने तत्पुरुषे स्त्री न क्लीवता

उपज्ञात त्रि० उप+ज्ञा–क्त । विनोपदेशेन ज्ञातेऽर्थे ।

उपज्योतिष न० उपगतं सादृश्येन ज्योतिषम् अत्या० स० । ज्योतिषशास्त्रानुकारिणि गणितादिशास्त्रे ।

उपढौकन न० उप+ढौक-भावे ल्युट् । १उपहारे राजादेः संतोषार्थं द्रव्यादिप्रापणे (भेटदेओया) कर्म्मणि ल्युट् । २उपह्रियमाणे उपायनद्रव्ये ।

उपतन्त्र न० उपगतं तन्त्रम् अत्या० स०। शिवोक्ततन्त्रसदृशे सिद्धर्षिकृते तन्त्रभेदे तच्च वाराहीतन्त्रे दर्शितं यथा "शैवोक्तान्युपतन्त्राणि कपिलोक्तानि यानि च । अद्भुतानि च तन्त्राणि जैमिन्युक्तानि यानि च । वशिष्ठः कपिलश्चैव नारदो गर्ग एव च । पुलस्त्यो भार्गवः सिद्धो याज्ञवल्क्यो भृगुस्तथा । शुक्रो बृहस्पतिश्चैव अन्ये ये मुनिसत्तमाः । एभिः प्रणीतान्यन्यानि उपतन्त्राणि यानि च । न संख्यातानि तान्यत्र धर्म्मविद्भिर्महात्मभिः । सारात् सारतराण्येव सङ्गृहीतानि निबोधतेति" ।

उपतप्त त्रि० उप–आधिक्ये–तप–क्त । सन्तप्ते । "नारोपतप्तोऽपि भृशं न स प्रभुः" नैष० ।

उपतप्तृ त्रि० उप+तप–बा० भावे तृच् ।१सन्तापे। अमरे भावप्रकरणे "स्वारः स्पर्शःस्तृष्टोपतप्तेति" पाठात् भावे एव तृच् इति क्षीरस्वामी । तेन शब्दकल्पद्रुमे तापकपर्य्यायताकथनं प्रामादिकमेव । कर्त्तरि तृच् स्त्रियां ङीप् । २तापके ३रोगादौ च ।

उपताप पु० उप+आधिक्ये तप–आधारे घञ् । १त्वरायां भावे घञ् ।२सन्तापे शब्दतपेरच् ३रोगे मेदि० । करणे घञ् ४अशुभे५पीडने च रत्नावली । "दीक्षितानुपतापे" आश्व० श्रौ० ६,९,१,पुंस्त्वोपघातेन्द्रियोपतापान् तथा सुखा-

क्षिपाकरक्तपित्तवातशोणिताम्लोकाप्रभृतीनापादयति" सुश्रु०। "मानसागन्तुभिर्म्मातुरुपतापैः प्रपीड़ितः "बन्धोपतापैश्च भवेद्विशेषशिरोऽभितापः ससमीरणेन" सुश्रु०। [जनके।

उपतापक त्रि० उप+आधिक्ये तप-णिच्-ण्वुल्। सन्ताप

उपतापन त्रि० उप+आधिक्ये तप+णिच् ल्यु। सन्तापके।

उपतापिन् त्रि०उप+आधिक्ये तप+णिनि। १सन्तप्ते २रोगिणि च। "गुर्वर्थं पितृमात्रर्थं स्वाध्यायार्थ्युपतापिनः" मनुः "उपतापी रोगी" कुल्लू०। णिच्-णिनि। ३सन्तापकारके। "दातापरेभ्यो न परोपतापी" भा० आ० ११अ०। उभयतः स्त्रियां ङीप्।

उपतारक त्रि०उप+तॄ णिच्-ण्वुल्। सन्तारके।

उपतिष्य न०उपगतं तिष्यम् अत्या०स०। पुष्यसमीपगे १पुनर्वसुतारके २अश्लेषानक्षत्रे च तयोः नक्षत्रचक्रे पुष्योपगतत्वात् तथात्वम्। उपाद् द्व्यच्कत्वादन्तोदात्तोऽयम्।

उपतीर अव्य०सामीप्यादौ अव्ययी०। तीरसामीप्यादौ आद्युदात्तता एवम् उपतूल उपमूल उपशाल उपाक्ष इत्यादि तत्तत्सामीप्यादौ अव्य०। अव्ययीभावे आद्युदात्तश्च

उपतैल त्रि०उपगतस्तैलम् अत्या०स०। अभ्यक्ततैले उपाद् द्व्यच्कत्वादन्तोदात्तता स्त्रियां गौरा०ङीष्

उपत्यका स्त्री उप+भवार्थे त्यकन् त्यकनो निषेधात् नातइत्त्वम्। पर्वतस्यासन्नायां भूमौ। "मलयाद्रेरुपत्यका" रघुः। प्राप्यागतापतददिद्रेदमुपत्यकासु" माघः। "कान्ततरेयं गन्धपाषाणवत्युपत्यका" दशकु०।

उपदंश पु०उप+दन्श—कर्मणि घञ्। १मद्यपानरोचके (चाटनी) भक्ष्यद्रव्ये, २भक्ष्यद्रव्योपकरणमात्रे, च। "तथानुष्ठिते च तया द्वित्रानुपदंशानुपपाद्य" दशकुमा०। भावे घञ्। संदशने (कामडान) "दिदङ्क्षौ उपदंशेच्छावतीति" माघ टीकायां मल्लि०। कर्मणि घञ्। ४समष्ठिलवृक्षे ५शिग्रुवृक्षे च पु० राजनि०। ६उपस्थरोगभेदे (बाघी) (गरमि) तन्निदानिनादि सुश्रुते उक्तं यथा।

"तत्रातिमैथुनादतिब्रह्मचर्य्याद्वा तथा ब्रह्मचारिणीं चिरोत्सृष्टां रजस्वलां दीर्घरोमां कर्कशरोमां सङ्कीर्णरोमां निगूढरोमामल्पद्वारां महाद्वारामप्रियामकामामचौक्ष्यसलिलप्रक्षालितयोनिमक्षालितयोनिं योनिरोगोपसृष्टां स्वभावतो वा दुष्टयोनिं वियोनिं वा नारीमत्यर्थमुपसेवमानस्य तथा करजदशनविषमूकनिपातनादर्द्दनाद्धस्ताभिघातात्ततुष्पदीगमनादचौक्ष्यसलिलप्रक्षालनादवपीड़नाच्छुक्रमूत्रवेगविधारणान्मैथुनान्ते वाऽप्रक्षालनादिभिर्मेढ्रमागस्य प्रकुपिता दोषाः क्षतेऽक्षते वा श्वयथुमुपजनयन्ति तमुपदंशमित्याचक्षते। स पञ्चविधस्त्रिभिर्द्दोषैः पृथक् समस्तैरसृजा चैकः। तत्र वातिके पारुष्यं त्वक्परिपुटनं स्तब्धमेढ्रता परुषशोफता विविधाश्च वातवेदनाः। पैत्तिके ज्वरःश्वयथुः पक्वोडुम्बरसङ्काशस्तीव्रदाहः क्षिप्रपाकः पित्तवेदनाश्च। श्लैष्मिके श्वयथुः कण्डूमान् कठिनः स्निग्धः श्लेष्मवेदनाश्च। रक्तजे कृष्णस्फोटप्रादुर्भावोऽत्यर्थमसृक्प्रवृत्तिः पित्तलिङ्गान्यत्यर्थं ज्वरदाहौ शोषश्च याप्यश्चैव कदाचित्। सर्व्वजे सर्व्वलिङ्गदर्शनमवदरणं शेफसः क्रिमिप्रादुर्भावो मरणं चेति"। एतद्व्याख्याच्छलेन भावप्र० उक्तं यथा "तत्रोपदंशस्य विप्रकृष्टनिदानमाह"। हस्ताभिघातान्नखदन्तघातादाधारणादत्युपसेवनाद्वा। योनिप्रदोषाच्च भवन्ति शिश्ने पञ्चोपदंशा विविधापचारैः"। हस्ताभिघातात् हस्तेन मैथुनात्। नखदन्तघातात् नखदन्तयोर्घातः स्थानत्वेनानुक्तोऽपि मेहने नखदन्तघातो बलवदनुरागोदयात्। उक्तञ्च कामशास्त्रे। "शास्त्रस्य विषयस्तावद्यावन्मन्दतरो रसः। रतिचक्रे प्रवृत्ते तु न शास्त्रं नापि च क्रमः"। कलहे दुष्टस्त्रीकृतो वा मेहने नखदन्तघातः। उत्कलादौ स्त्रियो मुखयोनयो भवन्ति। ताभिर्वा मेहने, नखदन्तघातः। योनिप्रदोषात् दीर्घकर्कशयोनिलोमयोगात्। योनिच्छिद्रस्यातिसूक्ष्मत्वाद्वा वातादिकृताद्वा योनिदोषात्। विविधापचारैः। दुष्टजलप्रक्षालनब्रह्मचारिणीगमनादिभिः पञ्चोपदंशाः। वातिकः पैत्तिकः श्लैष्मिकः सान्निपातिकः आगन्तुजश्चेति। तत्र वातिकस्य पैत्तिकस्य चोपदंशस्य लक्षणमाह। "सतोदभेदस्फुरणैस्तु कृष्णैः स्फोटैर्व्यवस्येन्मरुतोपदंशम्। पीतैर्व्बहुक्लेदयुतैः सदाहैः पित्तेन रक्तैः पिशितावभासैः"। व्यवस्येत् जानीयात्। पीतैः रक्तैर्वेति विकल्पः। श्लैष्मिकं सान्निपातिकञ्चाह। "सकण्डुरैः शोफयुतैर्महद्भिः शुक्लैर्घनैः स्रावयुतैः कफेन। नानाविधस्रावरुजोपपन्नमसाध्यमाहुस्त्रिमलोपदंशम्"। असाध्यमाह। "विशीर्णमांसं क्रिमिभिः प्रजग्धं मुष्कावशेषं परिवर्ज्जयेत्तम्"। विशीर्णमांसं गलितमांसं प्रजग्धं खादितं मुष्कावशेषं विशीर्णसमस्तमेहनमांसत्वेनावशिष्टफलकोषमात्रम्। उत्पन्नमात्रस्य चिकित्सायाअकरणे दोषमाह "सञ्जातमात्रे न करोति मूढ़ः क्रियां नरो यो विषये प्रसक्तः। कालेन शोफक्रिमिदाहपाकैः प्रशीर्णशिश्नोम्रियते स तेन"। विषये प्रसक्तः अतिस्त्रीरतः। लिङ्गार्शसमाह "अङ्कुरैरिव संजातैरुपर्य्युपरि संस्थितैः। क्रमेण

जायते वर्त्तिस्ताम्रचूड़शिखोपमा । कोषस्याभ्यन्तरे सन्धौ पर्वसन्धिगतापि च । सवेदनः पिच्छिला च दुश्चिकित्स्या त्रिदोषजा । लिङ्गवर्त्तिरिति ख्याता लिङ्गार्श इति चापरे"। लिङ्गं वर्त्तेः स्थानम्। कोषाभ्यन्तरे अण्डकोषाभ्यन्तरे । सन्धौ लिङ्गरन्ध्रसन्धौ पर्वसन्धिगता मणिपर्वणोः सन्धिगता"। तच्चिकित्सादि सुश्रु० चिकि० १९अ०। "उपदंशेषु साध्येषु स्निग्धस्विन्नस्य देहिनः" इत्यादि उक्तम्

उपदर्शक पु० उप+दृश-णिच्-ण्वुल् । १द्वारपाले । २दर्शयितरि त्रि० उप सामीप्ये दृश-ण्वुल् । समीपस्थतया द्रष्टरि ३साक्षिणि । तस्य कार्य्यानुषङ्गित्वाभावादुपद्रष्टृत्वम् ।

उपदश त्रि० ब०व० दशानां समीपवर्त्तिनः ब०व्री० डच् समा० । दशसंख्यासमीपवर्त्तिषु नवैकादशसंख्याकेषु ।

उपदा स्त्री उप-दा-भावे अङ् । १उत्कोचे, २उपढौकने च । "तदस्मिन् इह न्यायलाभशुल्कोपदा दीयते" पा० स्वदभिहितो भावो द्रव्यवत् प्रकाशते इत्युक्तेः" ३उपायनीयमाने द्रव्ये च। "उपदा विविशुः शश्वन्नोत्सेकाः कोशलेश्वरम्" "अन्यैस्तथा जानपदोपदाभिः" "प्रत्यर्प्य पूजामुपदाच्छलेन" रघुः । भावे ल्युट् उपदानमप्यत्र न० । स्वार्थे कन् । तत्रैव उत्कोचे च । उपदा+अभूततद्भावे भूादौ च्वि । उपदीभूतः उपदीकृतः "तस्य रत्नमुपदीकृतं नृपाः" माघः । उपददाति उप+दा—कर्त्तरि क्विप्। उपदाद्रव्यदातरि त्रि० "वर्णायानुरुधं वनायोपदाम्" यजु० ३०,९, "उपदाम् उपदानदातारम्" वेददी०

उपदानवी स्त्री स्वर्भानुदानवस्य प्रभानामकन्याजे पुलोम्नः कन्याभेदे । "स्वर्भानोस्तु प्रभा कन्या पुलोम्नस्तु सुतात्रयम् । उपदानवी हयशिरा शर्म्मिष्ठा वार्षपर्व्वणी" । हरि० ३अ० "उपदानवी सुतान् लेभे चतुरस्त्वैलिकात्मजान् । दुष्मन्तमथ सुष्मन्तं प्रवीरमनघं तथा" हरि० ३२अ०।

उपदि(श)श् अव्य० दिशि, दिशोः समीपं वा वा अच् समा०। १दिशीत्यर्थे २दिशोः सामीप्ये च० उपगता दिशौ अत्या० समा० हलन्तत्वाद्वा टाप् । दिशोर्मध्यवर्त्तिन्यां विदिशि कोणे स्त्री "आदृणुन् सर्व्वतोव्योम दिशश्चोपदिशस्तथा" भा० व० १७१ अ०।

उपदिश पु० "भगिन्यां वसुदेवस्य श्रुतश्रवसि जज्ञिरे । शिशुपालो दशग्रीवोरैभ्योऽथोपदिशो बली" हरिव० ११७अ० उक्ते शिशुपालभ्रातरि वसुदेवस्य भागिनेये नृपभेदे

उपदिश्य अ० उप+दिश-ल्यप् । १उपदेशं कृत्वेत्यर्थे । उपदिशि भवः दिगा० यत् । २विदिग्भवे त्रि० ।

उपदिष्ट त्रि० उप+दिश-कर्म्मणि क्त । यस्य जनस्य उपदेशः कृतस्तस्मिन् १जने उपदेशेन २ज्ञापिते च । "उपदिष्टातिदिष्ट गोत्रस्यैव निषेधः" उद्वा० त० रघुनन्दनः ।

उपदी स्त्री उपेतत्र दीयते खण्ड्यते उप+दो-घञर्थे क गौरा० ङीष् । (परगाछा) वन्दायां राजनि० स्वार्थे कन् । वा ह्रस्वः । उपदिका उपदीकाप्यत्र हेमचन्द्रः । "इमा वम्रो यदुपदीका" शत० ब्रा० १४,१,१,८, अत्र वम्रीशब्दस्यैव वन्दापर्य्यायत्वश्रवणात् हेमचन्द्रे वम्रोतिपाठकल्पनेन शब्दकल्पद्रुमे तत्पर्य्यायताकथनं प्रामादिकमेव २कीटभेदे च मेदिनिः ।

उपदीक्षिन् पु० उपगतोदीक्षिणं सामीप्येन अत्या० स० । यत्र दीक्षितस्य निकटस्थे "उपदीक्षी स्त्रेष्वग्निषु नखनिकृन्तनाद्युद्वादनान्तं सन्निपातिकम्" कात्या० २५,१४,२, "उपदीक्षी नेदिष्ठः" कर्कः ।

उपद्रष्टृ त्रि० उपरिस्थः सन् पश्यति उप+दृश-तृच् । उपरिस्थतया द्रष्टरि साक्षिणि सूर्य्यचन्द्रादौ । "अयं सूर्य इवोपदृगयं सरांसि धावति" ऋ० ९,५४,२, "अयं सोमः सूर्य्य इव यथा सूर्य्यः सर्वस्य लोकस्योपद्रष्टा तत्तत्कर्म्मणामुपदृगुपद्रष्टा" भा० । "भद्रा सूर्य्य इवोपदृक्"। ८,१०२,१५।

उपदृषद(दु) अव्य० सामीप्यादौ अव्ययी० वा अच् समा० । दृषदः पाषाणस्य सामाप्यादौ

उपदेव पु० उपगतोदेवम् सादृश्येन अत्या० स० । "देवकस्य भवन् पुत्राश्चत्वारस्त्रिदशोपमाः । देववानुपदेवश्च सदेवो देवरक्षितः" हरिवं० ३८अ० उक्ते १देवकनृपपुत्रभेदे । "अक्रूरेणोपसेनायां सुताबुत्रौ कुरुनन्दन" । प्रसेनश्चोपदेवश्च जज्ञाते देववर्च्चसौ" हरि० ३४अ० उक्ते २अक्रूरपुत्रभेदे च। देवतुल्यतेजस्कत्वाज्ञानयोस्तथात्वम् । देवसदृशालौकिकसामर्थ्ययुक्ते ३पिशाचादौ । अन्तोदात्तोऽयम्, उपदेवाश्च दश "विद्याधरोऽप्सरोयक्षोरक्षो गन्धर्वकिन्नरौ । पिशाचो गुह्यकः सिद्धोभूतोऽमी देवयोनयः" इत्यमरोक्ताः बोध्या एषाञ्चालौकिकशक्तिकत्वात्तथात्वम् । उपदेवतादयोऽप्यत्र ।

उपदेवी स्त्री "याः पत्न्यो वसुदेवस्य चतुर्द्दश वराङ्गनाः । पौरवी रोहिणी१नाम मदिराऽपि२ तथा धरा३ । वैशाखी च तथा भद्रा४ सुनाम्नी५ चैव पञ्चमी । सहदेवा१ शान्तिदेवा२ सुदेवा३ देवरक्षिता४ । वृकदेव्युपदेवी५,६,च देवकी चैव सप्तमी७। १२ । सुतनुर्वडवा चेति द्वे एते परिचारिके"१४। हरि० ३७ उक्ते वसुदेवस्य पत्नीभेदे । जातौ ङीष् २विद्याधरादिजातिस्त्रियाम् ।

उपदेश पु० उप+दिश-घञ्। १अनुशासने, २हितकथने, प्रवर्त्तकवाक्ये च। "चन्द्रसूर्य्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये। मन्त्रमात्रप्रकथनमुपदेशः स उच्यते" म० त० रामार्च्चनचन्द्रिकोक्ते ३दीक्षाभेदे। तद्विस्तारस्तु तन्त्रसारे कलावत्यादिदीक्षाप्रकरणे दृश्यः। तदशक्तौ तु "तत्राप्यशक्तः कश्चिच्चेद्गणमभ्यर्च्च्य शाश्वतम्। तदम्बु नाभिषिच्याष्टवारं मूलेन के करम्। निधायाष्टौ जपेत् कर्णे उपदेशे त्वयं विधिः"। विश्वसारतन्त्रोक्तः प्रकारोऽनुज्ञेयः। अजस्र मन्त्रं के मस्तके।"यथासंख्यमुपदेशः समानाम्" पा०। "बधनिर्धूतशापस्य कबन्धस्योपदेशतः" रघुः। "स्थिरोपदेशामुपदेशकाले" "तपस्विनामप्युपदेशतां गतम्" कुमा०। "आर्षं धर्म्मोपदेशञ्च वेदशास्त्राविरोधिना। यस्तर्केणानुसंधत्ते स धर्म्मं वेद नेतरः"। "धर्म्मोपदेशं दर्पेण विप्राणामस्य कुर्व्वतः" मनुः। प्रायश्चित्तोपदेशप्रकारस्तु मिता०दर्शितो यथा। "विख्यातदोषः कुर्व्वीत पर्षदोऽनुमतं व्रतम्" या०स्मृ०। "योदोषो यावत्कर्त्तृसम्पाद्यस्ततोऽन्यैर्विख्यातो विज्ञातो दोषो यस्यासौ पर्षदुपदिष्टं व्रतं कुर्य्यात्। यद्यपि स्वयं सकलशास्त्रार्थविचारचतुरस्तथापि पर्षत्समीपमुपगम्य तया सह विचार्य्य तदनुमतमेव कुर्य्यात्। तदुपगमने चाङ्गिरसा विशेष उक्तः। "कृते निःसंशये पापे न भुञ्जीतानुपस्थितः। भुञ्जानो वर्द्धयेत् पापं यावन्नाख्याति पर्षदि। सचेलं वाग्यतः स्नात्वा क्लिन्नवासाः समाहितः। पर्षदोऽनुमतस्तच्च सर्व्वं विख्यापयेन्नरः। व्रतमाधाय भूयोऽपि तथा स्नात्वा व्रतञ्चरेदिति"। विख्यापनञ्च पर्षद्दक्षिणादानानन्तरं कार्य्यम्। यथाह पराशरः। "पापम्प्रख्यापयेत्पापी दत्त्वा धेनुन्तथा वृषमिति"। एतच्चोपपातकविषयम्। महापातकादिषु धिकृत्यम्। यत्तूक्तम्। "तस्माद्द्विजः प्राप्तपापः सकृदाप्लुत्य वारिणि। विख्याप्य पापं वक्तृभ्यः किञ्चिद्दत्त्वा व्रतञ्चरेदिति"। तत्प्रकीर्णकविषयम्। पर्षत्स्वरूपञ्च मनुना दर्शितम्। "त्रैविद्योहैतुकस्तर्की निरुक्तो धर्म्मपाठकः। त्रयश्चाश्रमिणः पूर्व्वे पर्षदेषा दशावरा"। हैतुकोमीमांसार्थतत्त्वज्ञः। तर्की न्यायशास्त्रकुशलः। तथान्यदपि पर्षद्द्वयन्तेनैव दर्शितम्। "ऋग्वेदविद्यजुर्वेदी सामवेदविदेव च। त्र्यवरा पर्षद्विज्ञेया धर्म्मसंशयनिर्णये" इति। तथा। "एकोऽपि वेदविद्धर्म्मं यं व्यवस्येत्समाहितः। स ज्ञेयः परमोधर्म्मो नाज्ञानामुदितोऽयुतैरिति"। आसाञ्च पर्षदां सम्भवापेक्षया व्यवस्था। महापातकाद्यपेक्षया वा। यत्तु स्मृत्यन्तरेऽभिहितम्। "पातकेषु शतम्पर्षत्सहस्रं महदादिषु। उपपापेषु पञ्चाशत्स्वल्पे स्वल्पा तथा भवेदिति"। तदपि महापातकादिदोषानुसारेण पर्षदो गुरुलघुभावप्रतिपादनपरं न पुनः संख्यानियमार्थं मन्वादिमहास्मृतिविरोधप्रसङ्गात्। तथा देवलेन चात्र विशेषो दर्शितः। "स्वयन्तु ब्राह्मणा ब्रूयुरल्पदोषेषु निष्कृतिम्। राजा च ब्राह्मणाश्चैव महत्सु सुपरिक्षितमिति"। तया च पर्षदा अवश्यं व्रतमुपदेष्टव्यम्। "आर्त्तानां मार्गमाणानाम्प्रायश्चित्तानि ये द्विजाः। जानन्तो न प्रयच्छन्ति ते यान्ति समतां तु तैः" इत्यङ्गिरःस्मरणात्। तथा तया पर्षदा ज्ञात्वैव व्रतमुपदेष्टव्यम्। "अज्ञात्वा धर्म्मशास्त्राणि प्रायश्चित्तन्ददाति यः। प्रायश्चित्ती भवेत् पूतः किल्बिषम्पर्षदं व्रजेदिति" वशिष्ठस्मरणात्। क्षत्रियादीनान्तु कृतैनसां धर्मोपदेशे विशेषोऽङ्गिरसा दर्शितः। "न्यायतो ब्राह्मणः क्षिप्रं क्षत्रियादेः कृतैनसः। अन्तरा ब्राह्मणं कृत्वा व्रतं सर्व्वं समादिशेत्। तथा शूद्रं समासाद्य सदा विप्रपुरस्सरम्। प्रायश्चित्तम्प्रदातव्यं जपहोमविवर्जितमिति"। तत्र च यागाद्यनुष्ठानशीलानाञ्जपादिकं वाच्यमितरेषान्तु तपः। "कर्म्मनिष्ठास्तपोनिष्ठाः कदाचित् पापमागताः। जपहोमादिकन्तेभ्यो विशेषेण प्रदीयते। ये नामधारका विप्रा मूर्खा धनविवर्ज्जिताः। कृच्छ्रचान्द्रायणादीनि तेभ्योदद्याद्विशेषतः" तत्र च सत्येशपूजनप्रदक्षिणे कर्त्तव्ये इति विधानपारिजातादयः तन्मूलं तत्र दृश्यम्। मतृकृततुलादानादिपद्धतौ च प्रायश्चित्तप्रकरणे तत्प्रकारोदृश्यः। प्रा०त० "तोषयित्वा द्विजोत्तमान्" देवलवचने तोषयित्वेति श्रवणात् तस्यानतिकरत्वेन तद्ग्रहणे न दोषः प्रायश्चित्तद्रव्यग्रहणे च दोष इति" व्यवस्थापितम्। प्रा०वि०तत्प्रपञ्चितं यथा "नन्वेतद्द्रव्यग्रहणस्य पापजनकत्वे प्रमाणं नास्ति। न च पापक्षयार्थत्वात् पापजनकत्वं, प्रमाणाभावात् तुलापुरुषप्रतिग्रहस्यापि गर्हितत्वापत्तेः। तत्र च "अथातः संप्रवक्ष्यामि महापातकनाशनम्" इत्यनेन पापक्षयश्रवणात्। अथ प्रायश्चित्तश्रवणात् पापजनकत्वं यथा याज्ञवल्क्यः। "पात्रे धनं वा पर्य्याप्तं दत्त्वा शुद्धिमवाप्नुयात्" आदातुश्च विशुद्ध्यर्थमिष्टिर्वैश्वानरी स्मृता"। एतस्य महापातकविषयत्वादन्यस्य गर्हितत्वं न स्यात्। अत एव "नाददीत नृपः साधुर्म्महापातकिनोधनमिति" राज्ञोधनग्रहणनिषेधो महापातक एव मनुनोक्तः। पतितद्रव्यग्रहणस्यैव

पापजनकत्वम् “पतितानां गृहं गत्वा भुक्त्वा च प्रतिगृह्य चेति” बृहस्पतिवचनादिति चेन्न पातकेतरप्रायश्चित्तद्रव्यस्य ग्राह्यत्वापत्तेः, उच्यते। “आदातुर्विशुद्ध्यर्थमिति” महापातकेष्वपि लाघवात् सामान्यश्रुतिरेव कल्पनीया पापक्षयमात्रसाधनत्वेन यदुत्सृष्टं तत् प्रायश्चित्तद्रव्यं न ग्राह्यमिति, होलाकाधिकरणन्यायात्। अत एव न तुलापुरुषादावतिव्याप्तिस्तस्य पापक्षयमात्रफलत्वाभावात् स्वर्गादिफलस्यापि तस्य श्रुतत्वात् अत उक्तयाज्ञवल्क्यवचनान्महापातकिप्रायश्चित्तद्रव्यपरं सकृत्कृते वैश्वानरीष्टिः। अत्यन्ताहृत्त्या द्रव्यत्यागश्च जले क्षेपणीयः ब्रह्मचारिणे वा देयः। यद्यपि प्रायश्चित्तेतरपतितद्रव्यग्रहणे बृहस्पतिना चान्द्रायणमासोपवासौ विहितौ तथापि तावभ्यासविषयौ ज्ञेयौ लघुपापप्रायश्चित्तद्रव्यग्रहणे तु “यद्गर्हितेनार्जयन्ति कर्म्मणा ब्राह्मणा धनम्। तस्योत्सर्गेण शुद्ध्यन्ति जप्येन तपसैव चेति” मनूक्तगायत्रीसहस्रजपमासैकगोष्ठवासपयःपानव्रतमाचरणीयम्। लघुतरपापप्रायश्चित्तग्रहणे तु “प्रतिगृह्याप्रतिग्राह्यं भुक्त्वा चान्नं विगर्हितम्। जपंस्तरत्समन्दीयं मुच्यते मानवस्त्र्यहादिति” मनूक्तं दिनत्रयं तरत्समन्दीयजपशतं कुर्य्यादिति”। तरत्समन्दीयञ्च पावमानसूक्तान्तर्गतं सूक्तं तच्च मत्कृततुलादानादिपद्धतौ १८०।१ पृष्ठे दृश्यम्।

उपदेशक त्रि० उप+दिश–ण्वुल्। उपदेशकर्त्तरि। “उपदेशकमाहात्म्यादार्षज्ञानाच्च पाणिनेः” मञ्जा०र०।

उपदेशसाहस्री स्त्री वेदान्तप्रकरणभेदे तत्र हि उपदेशाः सहस्रं सन्तीति तस्यास्तथात्वम्।

उपदेशिन् त्रि० उपदिशति उप+दिश–णिनि। उपदेशकर्त्तरि स्त्रियां ङीप्। “गतानुगतिकोलोकः कुट्टनीमुपदेशिनीम्। प्रमाणयति नो धर्म्मं यथा गोघ्नमपि द्विजम्” हितो०।

उपदेश्य त्रि० उप+दिश–कर्म्मणि ण्यत्। १अनुशासनीये। यस्य प्रवर्त्तनार्थमुपदेशः क्रियते तस्मिन् २उपदेशार्हे कर्म्मादौ च “विद्याश्च वा अविद्याश्च यच्चान्यदुपदेश्यम्” अथ० ११, ८, २३

उपदेष्टृ पु० उप+दिश–तृच्। १गुरौ कर्म्मोपदेशके २आचार्य्ये “चत्वारोवयमृत्विजः स भगवान् कर्म्मोपदेष्टा हरिः” वेणी०। “तस्योपदेष्टारमपि पूजयेच्च ततोगुरुम्। न पूज्यते गुरुर्यत्र सर्व्वास्तत्राफलाः क्रियाः” ति०त०बृह०। “उपदेष्टानुमन्ता च लोके तुल्यफलौ स्मृतौ” ब्रा०त०पु०। ३उपदेशदायके त्रि० स्त्रियां ङीप्।

उपदेह पु० उपदिह्यते उपचीयतेऽनेन उप+दिह–घञ्। देहादिवृद्धौ गण्डमालाश्लीपदादिभिर्देहस्फीततायाम्। “कण्डूर्गुरुत्वं सुप्तत्वमुपदेहोऽल्पवेदनं स्तम्भः शैत्यञ्च यत्र तं श्लैष्मिकमिति विद्यात्” व्रणविभागे सुश्रु० “गुदोपदेहशोफौ तु स्नेहोऽपकः करोति हि” तद्वीर्गन्ध्योपदेहौ तु श्लेष्माणञ्चापकर्षति” सुश्रु०। [हेम०।

उपदेहिका स्त्री उपदेहोविद्यतेऽस्याः ठन्। कीटभेदे (दीमक)

उपदोह पु० उपदुह्यतेऽत्र उप+दुह–आधारे घञ्। दोहनपात्रे “ददाति यो वै कपिलां सचेलां कांस्योपदोहां द्रविणैरुत्तरीयैः” भा० व० १८६ अ०। “सदक्षिणां काञ्चनचारुशृङ्गीं कांस्योपदोहाम्”। “गाः कांस्योपदोहाश्च कन्याश्च वस्त्रालङ्कृताः” इति च हरि० ६अ०।

उपद्रव पु० उप+द्रु–भावे घञ्। १उत्पाते। रोगारम्भके धातुवैषम्यजनिते २विकारभेदे च। (उपसर्ग) तल्लक्षणमुक्तं वैद्यके। “यो व्याधि स्तस्य यो हेतुर्दोषस्तस्य प्रकोपतः। योऽन्योविकारो भवति स उपद्रव उच्यते” सुश्रुते चोक्तं “साध्ययाप्यासाध्यरोगभेदमुपक्रम्य। “तत्रौपसर्गिको यः पूर्व्वोत्पन्नव्याधिं जघन्यकालजातो व्याधिरुपसृजति स तन्मूल एवोपद्रवसंज्ञकः”। तेन उपसर्जकत्वात्तस्य तथात्वं अत्रार्थे कर्त्तरि अच् इति” विवेकः। स च व्याधिभेदेन नानाविधः। रोगभेदे तद्भेदाश्च तत्रैवोक्ता बहुशः। तत्र व्रणभेदे “अतिदग्धे मांसालम्बनंगात्रविश्लेषशिरास्नायुसन्ध्यस्थिव्यापादनमतिमात्रं ज्वरदाहपिपासामूर्च्छाश्चोपद्रवा भवन्ति” पालीरोगे च “अत ऊर्द्ध्वं नामलिङ्गैर्वक्ष्ये पाल्यामुपद्रवान्। उत्पाटकश्चोत्पुटकः श्यावः कण्डूयुतो भृशम्। अवमन्थः सकण्डूको ग्रन्थिको जम्बुलस्तथा। स्रावी च दाहवांश्चैव शृणुष्वेषां क्रमशः क्रियाम्” इति, विभज्य, तल्लक्षणचिकित्से उक्ते। वातव्याध्यादौ प्राणमांसक्षयादय उपद्रवाः। यथा “उपद्रवैस्तु ये जुष्टाव्याधयो यान्त्यसाध्यताम्। रसायनादिना वत्स! तान् शृणुष्वैकमना मम। वातव्याधिः प्रमेहश्च कुष्ठमर्शोभगन्दरः। अश्मरी मूढगर्भश्च तथैवोदरमष्टमम्। अष्टावेते प्रकृत्यैव दुश्चिकित्स्या महागदाः। प्राणमांसक्षयश्वासतृष्णाशोषवमीज्वरैः। मूर्च्छातिसारहिक्काभिः पुनश्चैतउपद्रुताः। वर्ज्जनीयाविशेषेण भिषजा सिद्धिमिच्छता” सुश्रु०। एवमन्येऽपि रोगभेदे उपद्रवा स्तत्रोक्ता ग्रन्थविस्तरभयान्नोक्ताः।

उपद्रष्टृ त्रि० उप+दृश–तृच्–अम्। उपदर्शके साक्षिणि

"अग्निर्वा उपद्रष्टा वायुरुपश्रोतादित्योऽनुख्याता" तैत्ति० "उपद्रष्टाऽनुमन्ता च भर्त्ता भोक्ता महेश्वरः"। गीता "उपद्रष्टा पृथग्भूत एव समीपे द्रष्टा साक्षीत्यर्थः श्रीधरः "नमः प्रवक्त्रे नम उपद्रष्ट्रे" आश्व० श्रौ०१,२,१ सोऽयं प्रजानामुपद्रष्टा प्रविष्टः" शत०ब्रा०१,२,४,२,५ "उपद्रष्टा साक्षी" भा० [सुश्रु०।

उपद्रुत त्रि० उप+द्रु–क्त। जातोपद्रवे "पुनर्यंत उपद्रुताः"

उपधर्म्म पु० उप+हीने हीनोधर्म्मः प्रा०स०। अप्रधानधर्म्मे "वेदमेवाभ्यसेन्नित्यं यथाकालमतन्द्रितः। तं ह्यस्याहुः परं धर्म्ममुपधर्म्मोऽन्य उच्यते" "एष धर्म्मः परः साक्षादुपधर्म्मोऽन्य उच्यते" मनुः "उपधर्म्मो जघन्यधर्म्मः" कुल्लू०।

उपधा स्त्री उप+धा–अङ्। १उपधाने स्यन्दे "धर्म्मार्थकाममोक्षैश्च प्रत्येकं परिशोधने। उपेत्य धीयते यस्मादुपधा तेन कीर्त्तिता" इत्युक्ते धर्म्मार्थाद्युपन्यासेन मन्त्रिणां २परीक्षणे "चिन्तावन्तः कथां चक्रुरुपधाभेदभीरवः" भट्टिः "अर्थकामोपधिभ्यां तु भार्य्यां पुत्रांश्च शोधयेत्। धर्म्मोपधाभिर्विप्रांश्च सर्व्वाभिः सचिवान् पुनः" कालिका पु०। ३छले च। "उपधाभिश्च यः कश्चित् परद्रव्यं हरेन्नरः" मनुः "तत्रापि श्रुत्वा भूयोभूय उपधाभिः" दशकु०।४उपाये च। "अयशोभिदुरालोके कोपधा मरणादृते" माघः। "अलोऽन्त्यात् पूर्व्व उपधा" पाणिन्युक्ते अन्त्यवर्णात् ५पूर्व्ववर्णे च। "अनुपधात्वोपिनोऽन्यतरस्याम्" "कोपधाच्च" पा०। लिङ्गानुशासनसूत्रे कोपधात् खोपधादित्यादि भूरिप्रयोगः ६उपाधौ च। उपधाभृतः।

उपधातु पु० उप सादृश्ये प्रा०स०। स्वर्णादिप्रधानधातुसदृशेषु "सप्तोपधातवः स्वर्णमाक्षिकं तारमाक्षिकम्। तुत्थं कांस्यञ्च रीतिश्च सिन्दूरञ्च शिलाजतु" भावप्र०उक्तेषु सप्तसु १द्रव्येषु। "उपधातुषु सर्व्वेषु तत्तद्धातुगुणा अपि। सन्ति किन्त्वेषु ते गौणास्तत्तदंशाल्पभावतः" भावप्र०। तत्र कतमस्य द्रव्यस्य कतमोपधातुत्वं तन्निर्णीतं तत्रैव। "किञ्चित् सुवर्णसाहित्यात् स्वर्णमाक्षिकमीरितम्। उपधातुः सुवर्णस्य किञ्चित् स्वर्णगुणान्वितम्"। तारमाक्षिकमन्यत्तु तद्भवेद्रजतोपमम्। किञ्चिद्रजतसाहित्यात् तारमाक्षिकमीरितम्" २ "तुत्थं (तुँते) ताम्रोपधातुर्हि किञ्चित्ताम्रेण तद्भवेत्। किञ्चित्ताम्रगुणं तस्माद्वक्ष्यमाणगुणञ्च तत्" ३। उपधातुर्भवेत् कांस्यं द्वयोस्तरणिरङ्गयोः। कांस्यस्य तु गुणा ज्ञेयाः स्वयोनिसदृशा जनैः" ४। रीतिरप्युपधातुः स्यात्ताम्रस्य यशदस्य च। पित्तलस्य गुणा ज्ञेयाः स्वयोनिसदृशा गुणैः" ५। सीसोपधातुः सिन्दूरं गुणैस्तत् सीसवन्मतम्। संयोगजप्रभावेन तस्यान्ये गुणाः स्मृताः" ६। निदाघे धर्म्मसन्तप्ता धातुसारं धराधराः। निर्य्यासवत् प्रमुञ्चन्ति तच्छिलाजतु कीर्त्तितम्। सौवर्णं राजतं ताम्रमायसं तच्चतुर्विधम्" ७। इति चतुर्णां स्वर्णादीनामुपधातुत्वात् शिलाजतुनश्चतुर्द्धा भेदः। एतेषामन्यान्यगुणास्तत्तच्छब्दे वक्ष्यन्ते। भावप्र० एत एवोपधातुत्वेन गणिताः शब्द-कल्प० स्वर्णमाक्षिकतुत्थकर्पूरकालाञ्जनमनःशिलाहरितालरसाञ्जनरूपा उपधातव इत्युक्तं तन्मूलं मृग्यम्। शरीरस्थेषु रसादिजन्येषु २स्तनदुग्धादिषु च। देहस्थाः रसादयः सप्त धातवः तेभ्यो जाताश्च षडुपधातवः। तत्र रसात् स्तनदुग्धम्। रक्तात् स्त्रीरजः २ मांसात् वसा३। मेदसो घर्म्मः४। अस्थ्नोदन्तः५। मज्जतः केशः ६। शुक्रात् ओजः७। यथोक्तं शार्ङ्गधरः। "स्तन्यं रजोवसास्वेदो दन्ताः केशास्तथैव च। औजस्यं सप्तधातूनां क्रमात् सप्तोपधातवः"। तत्र भावप्र० स्तन्यादिस्वरूपमुक्तं यथा "वनितानां प्रसूतानां धमनीभ्यां स्तनौगतात्। रसादेव हि जायेत स्तन्यं स्तनयुगाश्रयम्। शुद्धमांसस्य यः स्नेहः सा वसा परिकीर्त्तिता। मेदसस्ताप्यमानस्य स्नेहो वा कथिता वसा"।

उपधान न० उपधीयते शिरोऽत्र उप+धा आधारे ल्युट्। (वालिश) १शिरोधाने। करणे कर्मणि वा ल्युट्। २प्रणये, ३व्रतभेदे, हेम०। ३विशेषे ४प्रणये च विश्वः "सोपधानां धियं धीराः स्थेयसीं खट्वयन्ति ये" माघः। "सोपधानां सविशेषां, पक्षे सगेन्दुकामिति" मल्लि० "पट्टोपधानाध्यासितशिरोभागेण" काद०। "आसन्दी सोपधाना दक्षिणानड्वान् यवाश्च" कात्या०२१,४,२०। ५विषे मेदि० भावे ल्युट्। ६समीपस्थापने न०। करणे ल्युट्। ७उपधानसाधने मन्त्रे पु० "तद्वानासामुपधानोमन्त्रः" पा०

उपधानीय न० उपधीयते शिरस उपरि उप+धा–कर्मणि अनीयर्। १उपधाने (वालिश) २समीपे स्थापनीये त्रि०।

उपधाभृत त्रि० उपधया उपाधिना भृतः। "जातशस्त्रिभागस्तु गृहीतस्योपधाभृतः" वृह० उक्ते करभेदे।

उपधायिन् त्रि० उपदधाति शीर्षभागे उप+धा–णिनि स्त्रियां ङीप्। शीर्षभागे उपधानत्वेन धारिणि। "अशेत सा बाहुलतोपधायिनी" कुमा०।

उपधारण न० उप+धृ–णिच्–ल्युट्। उपरिस्थितस्य वस्तुनः

अङ्कुशादिना १आकर्षणे । "अङ्कुशं शौचमित्याकरशीनामुपधारणे। आनाम्य फलितां शाखां पक्वं पक्वं प्रशातयेत्"१४०। २सम्यक्चिन्तने च । युच्। उपधारणा योगाङ्गे चित्तस्य एकविषये स्थापनार्थव्यापारभेदे स्त्री ।

उपधावन न० उप+धाव–ल्युट्। १उपसरणे २अनुचिन्तने

उपधि पु०उप+धा–भावे कि। अन्यथास्थितस्य वस्तुनोऽन्यथा प्रकाशनरूपे व्यापारे।"योगाधमनविक्रीतं योगदानप्रतिग्रहम् । यत्र वाप्युपधिं पश्येत् तत्सर्वं विनिवर्त्तयेत्"मनुः२छले अमरः"अरिषु हि विजयार्थिनः क्षितीशाः विदधति सोपधि सन्धिदूषणानि" किरा० । "बलोपधिविनिर्वृत्तान् व्यवहारान् निवर्त्तयेत्" या० स्मृतौ दीपकलिकायां पाठः । उपधिश्छलमिति शूलपा०बलोपाधीति" मिता०पाठः उपाधिर्भयादिरिति व्याख्यातञ्च । "बलोपधिकृतम्" या० स्मृ० । "यथा वितथमास्थाय सर्वैरुपधिना कृतम्"भा०अ०२७अ०। "स्मृत्वा चैवोपधिकृतं मातुर्दास्यं निमित्ततः"२४अ० । आधारे कि ।२रथचक्रे हेम० । उपधिना छलेन जीवन्ति ठक् । औपधिक भयादिदर्शनेन धनोपजीविनि "उत्कोचकाश्चौपधिका वञ्चकाः कितवास्तथा" मनुः औपधिका ये भयादिदर्शनादिनाधनमुपजीवन्तीति कुल्लू०।उपधिका इति पाठोऽनाकरः

उपधूपित पु० उप+धूप–क्त । १मृत्यौ २सन्तापयुते त्रि० ।

उपधूमित त्रि०धूमोजातोऽस्य तारका० इतच् दाहकायोगात् अल्पं धूमितं प्रा०स०। १जातधूमे (धोंओयान) यात्रादौ वर्ज्जनीये ज्योतिषोक्ते सूर्य्यगन्तव्यदिग्भागे स्त्री "दग्धा दिगैन्द्री ज्वलिता दिगैश्युपधूमिता चानलदिक् प्रभाते प्रत्येकमेवं प्रहराष्टकेन क्रमादुदिशोऽष्टौ सविता क्रमेत । दग्धा दिगुक्ता दिननाथयुक्ता विवस्वदाप्ता भवति प्रदीप्ता । संधूमिता यां सविता प्रयाता शेषा दिगन्ताः खलु पञ्चशान्ताः" पीयू० वसन्तराजः । तन्निदर्शनचक्रं यथा ।

	दग्धा	दीप्ता	उपधूमिता	५शान्ताः
१यामे	ऐन्द्री	पूर्व्वा	आग्नेयी	याम्यादिसौम्यान्ताः
२यामे	पूर्वा	आग्नेयी	याम्या	नैर्ऋत्यादीशानान्ताः
३यामे	आग्नेयी	याम्या	नैर्ऋती	पश्चिमादिपूर्वान्ताः
४यामे	याम्या	नैर्ऋती	वारुणी	वायव्यादिवह्निदिगन्ताः
५यामे	नैर्ऋती	पश्चिमा	वायवी	सौम्यादियाम्यान्ताः
६यामे	पश्चिमा	वायवी	उत्तरा	ऐशादिनैर्ऋत्यन्ताः
७यामे	वायवी	उत्तरा	ऐशी	पूर्वादिपश्चिमान्ताः
८यामे	उत्तरा	ऐशी	पूर्वा	आग्नेय्यादिवायव्यन्ताः

तत्र प्रहरभेदेन दग्धादित्रिके न गच्छेत् शान्तासु पञ्चसु गच्छेत् । एवं प्रधूमिता संधूमितादयोऽप्यत्र ।

उपधृति स्त्री उप+धृ–क्तिन् । १धारणे २किरणे हेम० ।

उपधेय त्रि० उप+धा–यत् । मन्त्रभेदेन स्थापनीये इष्टकादौ "वयःशब्दवन्मन्त्रोपधेयास्विष्टकासु" सि०कौ० ।

उपध्मान पु० उ,उवर्ण्णः पश्च ध्मायतेऽनेन उप+ध्मा–करणे ल्युट् ।ओष्ठे "तालव्या ओष्ठजावपू" "उपूपध्मानीयानामोष्ठौ" सि० कौ० उक्तेः तस्य उवर्णपयोरुच्चारस्थानत्वात्तथात्वम् । उपध्मान इति केचिदाहुः ।

उपध्मानीय पु० उपाध्माने ओष्ठे भवः छ । पफपरे विसर्गस्थानिके गजकुम्भाकृतितया लेखनीये वर्णभेदे उपध्मानशब्दे उदा० । उपाध्मानीय इति केचिदाहुः ।

उपध्वस्त त्रि०उप+ध्वन्स–क्त । १नष्टे २मिश्रिते च।"कृष्णग्रीवा आग्नेया बभ्रवः सौम्याः उपध्वस्ताः साविता वत्सतर्य्यः" यजु०२४,२४ उपध्वंसनमधःपतनम्"वेददी०"एतद्वास्यै रूपतममिवेति रोहिणी ह त्वेवोपध्वस्ता"शत०ब्रा० ४,५,८,२ । "सहस्रदक्षिणे त्रिरात्रे प्रतिविभज्य नयन् रोहिणीमुपध्वस्ताम्" कात्या० १२,४,१५। "उपध्वस्तां मिश्रिताम्"संग्रहवृत्तिः ।

उपनक्षत्र न० उपगतं नक्षत्रम् अत्या०स० । अश्विन्यादिसप्तविंशतिनक्षत्राणां प्रत्येकं सप्तविंशत्यानुगतेषु ७२९ संख्यातेषु राशिचक्रस्थेषु तारकभेदेषु । "तानि वा एतानि सप्तविंशतिः, नक्षत्राणि सप्तविंशतिः, सप्तविंशतिर्ह्येव नक्षत्राण्येकैकं नक्षत्रमनूपतिष्ठन्ते तानि च सप्त शतानि विंशतिश्चाधि" शत०ब्रा० १०,५,४,५ । अत्राधीत्यनेन न्यूनाधिकत्वं गम्यते सप्तविंशत्या सप्तविंशतिगुणने ७२९ संख्यासम्भवात् श्रुतौ स्पष्टाक्षरेण तथानुक्तिस्तु इष्टकानां ७२० संख्यकत्वात्तत्संख्यासाम्यसम्पादनार्थेति बोध्यम्

उपनख न० उपगतमधिष्ठानतया नखं नखमांसम् अत्या० स० । सुश्रुतोक्तेषु चतुश्चत्वारिंशत्क्षुद्ररोगेषु चिप्पाख्ये रोगभेदे । तल्लक्षणं तु तत्रोक्तं "नखमांसमधिष्ठाय पित्तं वातश्च वेदनाम् । करोति दाहपाकौ च तं व्याधिं चिप्पमादिशेत् । तदेव क्षतरोगाख्यं तथोपनखमित्यपि"।

उपनत त्रि० उप–नम–क्त । १नम्रे "शौरेः प्रतापोपनतैरितस्ततः" माघः २उपगते च "अचिरोपनतां स मेदिनीम्" रघुः । ३उपस्थिते च हेम० ।

उपनति स्त्री उप+नम–भावे क्तिन् । १नमने २उपगमे ३उपस्थितौ आधारे क्तिन् ।उपनत्याधारे"मांसं न उप-

नतिर्वस्स्वि, मज्जा म आनतिः" यजु० २०,१२ । "उपनमन्ति भूतानि यत्र" उपनतिः वेददी०। [सामीप्ये ।

उपनद(दि) अव्य० नद्याः सामीप्यम् वा अव्ययी० । नद्याः

उपनन्द पु० उपगतोऽनुगतोनन्दम् अत्या०स० । गोकुलाधिपनन्दभ्रातरि ।

उपनन्दक त्रि० उप+नन्द–णिच्–ण्वुल् । आनन्दजनके धृतराष्ट्रपुत्रभेदे पु० । "ऊर्णनाभः पद्मनाभस्तथानन्दोपनन्दकौ" धृतराष्ट्रपुत्रनामोक्तौ भा० आ० ६७अ० ।

उपनय पु० उप+नी–करणे अच् । उपनयने "गृह्योक्तकर्मणा येन समीपं नीयते गुरोः । बालो वेदाय तद्योगाद्बालस्योपनयं विदु"रिति स्मृत्युक्ते १संस्कारजनककर्मविशेषे । "नीचस्थितेऽरिगृहगेऽथ पराजिते वा जीवे भृगावुपनयः स्मृतिकर्महीनः" ज्योति० । न्यायमते यो यो धूमवान् स वह्निमान् अयमपि तथेत्यादिवाक्यरूपे २न्यायावयवभेदे, परार्थानुमानसाधकपञ्चावयवान्तर्गतावयवविशेषोपनयलक्षणभेदौ न्यायसूत्रवृत्त्योर्दर्शितौ यथा

"उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः" सू० "साध्यस्य पक्षस्य उदाहरणापेक्ष उदाहरणानुसारी य उपसंहार उपन्यासः प्रकृतोदाहरणोपदर्शितव्याप्तिविशिष्टहेतुविशिष्टपक्षविशिष्टबोधजनकोन्यायावयव इत्यर्थः निगमनं हेतुविशिष्टत्वेन न पक्षबोधकं किन्तु पक्षवृत्तिहेतुबोधकमिति तद्व्युदासः । अत्र चान्वयव्यतिरेकव्याप्त्योरन्यतरत्वादिनानुगमः कार्य्य उदाहरणोपदर्शितेति तु परिचायकमात्रमिति तु न वाच्यम् उदाहरणविपरीतव्याप्त्युपदर्शकोपनयवारकत्वात् वस्तुतोऽवयवपदेनैव तद्व्युदासः । स चोपनयो द्विविधोऽन्वयिव्यतिरेकिभेदात् । तथेति साध्यस्योपसंहारोऽन्वय्युपनयः न तथेति साध्यस्योपसंहारो व्यतिरेक्युपनयः अत्र च तथापदप्रयोगावश्यकत्वे न तात्पर्य्यं किन्तु व्याप्तिविशिष्टवत्त्वबोधे, तथाच वह्निव्याप्यधूमवांश्चायमिति वा तथाचायमिति वोपन्यासः एवं व्यतिरेकिण्यपि वह्न्यभावव्यापकीभूताभावप्रतियोगिधूमवांश्चायमिति वा न तथेति वोपन्यासः" वृत्तिः

उपनीयते उपस्थाप्यते ज्ञानविषयतामापाद्यतेऽनेन करणे अच् । न्यायमतसिद्धे ज्ञानलक्षणारूपे ३अलौकिकप्रत्यक्षसाधने सन्निकर्षभेदे । तया हि सन्निकर्षरूपया पूर्व्वज्ञातवस्तुनोऽलौकिकप्रत्यक्षं जन्यते । यथा सुरभि चन्दनमिति चाक्षुषे चन्दनस्य चक्षुर्ग्राह्यत्वेऽपि सौरभस्य तदग्राह्यत्वात् पूर्व्वज्ञातस्य सौरभस्यालौकिकं प्रत्यक्षं जन्यते तथा च सुरभि चन्दनमित्यत्र सौरभांशेऽलौकिकत्वं चन्दनांशे तु लौकिकत्वमिति भेदः ।

ज्ञानलक्षणाकार्य्यकारणभावश्चेत्थं दीधितिकृतोक्तम् । "इयञ्च धर्म्मिविषयकं ज्ञानं धर्म्मिणां प्रत्यासत्तिरितरा तु यद्विषयकं तस्य प्रत्यासत्तिः । अतएव सुरभि चन्दनमित्यादौ सौरभत्वादेरपि भानमिति" व्याख्यातञ्चैतत् जगदीशेन । "ननु सामान्यं यदि न प्रत्यासत्तिः किन्तु तज्ज्ञानं तदा ज्ञानलक्षणया सह तस्याः कोभेद इत्यत आह इयञ्चेति सामान्यलक्षणा चेत्यर्थः । इतरा ज्ञानलक्षणा तस्येति प्रत्यासत्तिरित्यनुषज्यते तथा च कार्य्यकारणभावभेदादेव प्रत्यासत्त्योः भेद इति भावः । अतएव ज्ञानलक्षणात एवेत्यर्थः अन्यथा यत्र सौरभत्वजात्युपस्थित्यनन्तरं सुरभिगन्ध इति वत् सुरभिचन्दनमित्याकारकं सौरभत्वप्रकारेण चन्दनस्य भ्रमात्मकं चाक्षुषं तत्र सौरभत्वजातेर्भानं न स्यात् न हि तत्र सुरभिगन्धस्य भानसम्भवो येन सामान्यलक्षणायास्तद्धर्म्मप्रकारकतदाश्रयप्रत्यक्षं प्रत्येव हेतुतया सौरभत्वप्रत्यासत्तेः कार्य्यतावच्छेदकतयैव सौरभत्वजातेर्भानं भविष्यतीति सम्भावनीयम् चक्षुषो बहिरिन्द्रियत्वेन स्वायोग्यगुणविशेष्यकज्ञानाजनकत्वनियमात् पूर्व्वाऽनुपस्थितस्य सुरभिगन्धस्य तत्र भानासम्भवेनोक्तरीत्या तद्गतजातेरपि तत्र भानासम्भवादिति भावः । इत्यादावित्यादिपदेन भ्रमान्तरस्य तदनुव्यवसायस्य च परिग्रहः । यत्तु ज्ञानस्य तदिन्द्रियजन्यत्वं नियामकमिति पूर्व्वमतेनायं ग्रन्थः । तथा च सौरभत्वेन सौरभस्मृत्यनन्तरं जायमानायां सुरभिचन्दनमित्याकारकचाक्षुषप्रमायां सामान्यप्रत्यासत्त्या न सौरभत्वस्य भानसम्भवः कारणस्य सौरभत्वचाक्षुषस्यासम्भवादतो ज्ञानलक्षणा पृथक् प्रत्यासत्तिरिति मतं तन्मन्दं ज्ञानस्य तदिन्द्रियजन्यत्वापेक्षायां सुरभिगन्धस्यापि तत्र भानासम्भवे सौरभत्वजातिपर्य्यन्तानुसरणस्य सन्दर्भविरोधापत्तेः सौरभत्वादेरित्यादिपदात् सौरभस्य परिग्रहः तेन न सन्दर्भविरोधदोष इति विभावनीयम् । अत्रेदं तत्त्वं यद्यपि घटत्वादिप्रत्यक्षे तदलौकिकप्रत्यक्षे वा तद्गोचरज्ञानत्वेन ज्ञानलक्षणाया न हेतुत्वं घटत्वादिनिर्व्विकल्पके प्रमेयत्वादिसामान्यलक्षणाजन्यघटत्वादिप्रत्यक्षे च व्यभिचारात् तथापि लौकिकसाधारणं घटत्वादिप्रकारकप्रत्यक्षमात्रं प्रत्येव घटत्वादिगोचरज्ञानत्वेन हेतुत्वमतएव प्राथमिकघटत्वचैत्रत्वादिप्रकारकप्रत्यक्षस्य घटत्वचैत्रत्वादिनिर्व्विकल्पकं

विनानुपपत्तेः तत्सिद्धिरप्यावश्यकी पूर्वानुभूतवस्तुमात्रस्यैव तथात्वेन घटत्वाद्यात्मकतत्ताप्रत्यभिज्ञानानुरोधेनैव परैरप्युक्तकार्यकारणस्याभ्युपेयत्वात् । न चैवं जन्यस्वविषयकसविकल्पकस्यैव प्रत्यासत्तित्वमिति प्राचीनगाथाविरोधः तस्या अकिञ्चित्करत्वात् सखण्डघटादेरुपनीतभानस्थाने एव तथा नियमसम्भवाच्च द्रव्यत्वादिप्रकारेण घटादेरुपनयसत्त्वेऽपि घटत्वप्रकारेण तस्योपनीतप्रत्यक्षानुदयेन घटत्वादिना तद्घटादिप्रकारकप्रत्यक्षं प्रति घटत्वादिप्रकारेणैव तद्घटाद्युपनयस्य हेतुत्वादतएव घटघटत्वयोर्निर्विकल्पकानन्तरं घटे घटत्वस्यैव घटत्वेऽपि घटस्य न वैशिष्ट्यावगाहि प्रत्यक्षं घटत्वद्रव्यत्वादिप्रकारेणैव घटादीनां विशिष्टबुद्धेः पारमार्थिकतया तद्धेतुभूतस्य घटत्वादिप्रकारेण घटादिज्ञानस्य तदानीमसत्त्वात् न चैवं निर्विकल्पकोत्तरं विशेष्ये विशेषणमित्यादिक्रमेणापि घटवदित्याकारप्रत्यक्षं न स्यात्, इष्टत्वात् जातीतरनिष्ठप्रकारतायां किञ्चिदवच्छिन्नत्वनियमात् द्रव्यगुणकर्म्मणां निरवच्छिन्नप्रकारतानभ्युपगमात् । न च निर्विकल्पकस्य प्रत्यासत्तित्वे स्वविषयीभूतघटत्वाद्युपधानेन तस्य प्रत्यक्षापत्तिः विषयानुपधानेन ज्ञानादिप्रत्यक्षस्यालीकतया विषयोपनायकविरहादेव तस्यातीन्द्रियत्वोपगमादिति वाच्यम् सत्यपि सन्निकर्षे प्रत्यक्षसामान्यं प्रत्येवादृष्टत्वादिनेव निर्व्विकल्पकत्वेनापि तादात्म्यसम्बन्धेन विरोधित्वकल्पनादेव निर्विकल्पकस्याप्रत्यक्षत्वादन्यथा सुखत्वादिनिर्व्विकल्पकस्य स्वविषयीभूतसुखत्वाद्युपधानेन साक्षात्कारस्य दुर्व्वारत्वापत्तेः सुखत्वस्य निर्विकल्पक इव सुखत्वेऽपि लौकिकस्यैव मनःसन्निकर्षस्य सत्त्वात् तदुपधाने तन्निर्व्विकल्पकस्य प्रत्यक्षे बाधकाभावादिति । यत्तु घटादिप्रकारकप्रत्यक्षं प्रत्येव घटादिज्ञानत्वेन हेतुत्वे घटादिविशेष्यक घटोद्रव्यमित्याकारमानसोपनीतभानं न स्यादिति तन्न घटादिधर्म्मिकद्रव्यत्वाद्यसंसर्गाग्रहादिदशायामेव मानसधियो घटादिविशेष्यकत्वसम्भवात् घट इत्येतन्मात्राकारस्य बाधनिर्णयाप्रतिबध्यमानसप्रत्यक्षस्यासत्त्वेऽपि क्षत्यभावात् । न चैवं घटादेरनुपस्थितिदशायामपि तद्विशेष्यकं मानसप्रत्यक्षं स्यात् तद्धर्म्मिकासंसर्गाग्रहस्य तदानीमपि सत्त्वादिति वाच्यं घटत्वप्रकारकप्रत्यक्षत्वस्य घटनिष्ठालौकिकविशेष्यताकप्रत्यक्षत्वव्यापकतया तदवच्छिन्नं प्रति हेतुभूतस्य घटत्वज्ञानस्य विरहादेवानुपस्थितघटादेर्विशेष्यविधया मानसप्रत्यक्षासम्भवात् घटोद्रव्यमित्यादिमानसस्य घटप्रकारकत्वनियमात् अतएव "उपनीतं विशेषणतयैव भासते" इत्यभिधाय "मानसे तु नायं नियम" इति प्राचीनैरप्युक्तमित्यलं पल्लवितेन"। भाषा० मुक्तावल्योश्च "विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणा" "ननु ज्ञानलक्षणा प्रत्यासत्तिर्यदि ज्ञानरूपा सामान्यलक्षणापि ज्ञानरूपा यदा तयोर्भेदो न स्यादत आह । विषयी यस्येति सामान्यलक्षणा प्रत्यासत्तिर्हि तदाश्रयस्य ज्ञानं जनयति । ज्ञानलक्षणा प्रत्यासत्तिस्तु यद्विषयकं ज्ञानं तस्यैव प्रत्यासत्तिरिति"। "एवं ज्ञानलक्षणाया अस्वीकारे सुरभि चन्दनमिति ज्ञाने सौरभस्य भानं कथं स्यात्? । यद्यपि सामान्यलक्षणयापि सौरभमानं सम्भवति तथापि सौरभत्वस्य भानं ज्ञानलक्षणया । एवं यत्र धूमत्वेन धूलीपटलं ज्ञातं तत्र धूलीपटलस्यानुव्यवसाये भानं ज्ञानलक्षणया"। अत्र दिनकरः । "ज्ञानलक्षणास्वीकारे बीजमाह । एवमित्यादिना कथं स्यादिति । चन्दनखण्डस्य चाक्षुषे जायमाने उपस्थितसौरभमानं न स्यात् सौरभांशे चक्षुःसन्निकर्षाभावादित्यर्थः । सौरभत्वप्रकारकलौकिकप्रत्यक्षसामग्र्याः सहकारिण्याविरहेण सौरभत्वसामान्यलक्षणयापि सौरभभानं न सम्भवतीति भावः । सुरभि चन्दनमित्यादौ सौरभादेर्भानं सौरभत्वादिसामान्यलक्षणयैव सम्भवति । सौरभत्वप्रकारकलौकिकप्रत्यक्षसौरभत्वावच्छिन्नप्रकारकप्रत्यक्षान्यतरसामग्रीसहकारेणैव तस्याः फलजनकत्वाङ्गीकारात् प्रकृते च द्वितीयसामग्र्याः सहकारिण्याः सत्त्वादित्यभिप्रायेणाह यद्यपीति सौरभत्वस्य भानमिति स्वरूपतः सौरभत्वस्य भानमित्यर्थः । ज्ञानलक्षणया ज्ञानलक्षणयैव । तदानीं सौरभत्वांशे धर्मान्तरस्याग्रहीततया सामान्यलक्षणया तज्ज्ञानाऽनिर्वाहादिति भावः । ननु धर्मान्तरस्य सौरभांशेऽग्रहेऽपि सौरभत्वसामान्यलक्षणयैव सौरभत्वादेर्भानमस्तु सौरभत्वप्रकारकसौरभविशेष्यकत्वस्यैव तत्कार्यतावच्छेदकत्वादिति चेन्न सौरभत्वादिविषयताप्रयोजिकायाः सामान्यलक्षणायाः स्वविषयसौरभत्वादिमत्त्वरूपस्य सम्बन्धस्य सौरभत्वेऽभावेन सामान्यलक्षणया तज्ज्ञानानिर्वाहात् सौरभत्वसामान्यलक्षणायाः कार्य्यतावच्छेदके सौरभत्वप्रकारत्वनिवेशे प्रयोजनाभावाच्च । न च ज्ञानलक्षणायाः कारणत्वान्तरकल्पने गौरवभियैव सामान्यप्रकारत्वस्य कार्य्यतावच्छेदके प्रवेश इति वक्तव्यम् विशेषणज्ञानहेतुतयैव निर्वाहे ज्ञानलक्षणायाः कारणत्वान्तरकल्पनाविरहादिति । ननु विशेषणज्ञानजन्यतावच्छेदक

विशिष्टबुद्धित्वं ज्ञानलक्षणायास्तु विशिष्टप्रत्यक्षत्वमिति न कृप्तेन निर्वाहः, एवं यत्र ज्ञानलक्षणया स्वविषयकव्यवसायस्य मानसं तत्र विशेषणज्ञानकारणतया न निर्वाह इत्यत आह एवमिति ज्ञानलक्षणया ज्ञानलक्षणयैव । तत्र धूमत्वज्ञानरूपसामान्यलक्षणायाः स्वविषयधूमत्वाश्रयत्वसम्बन्धेन धूलीपटलेऽभावेन सामान्यलक्षणयानुव्यवसाये धूलीपटलभानासम्भवादिति भावः" । उपनयेन निर्वृत्तः ठक् । औपनयिक ज्ञानलक्षणाजन्ये अलौकिके प्रत्यक्षे "अथ साध्यं यदि भवेत्तर्हि प्रत्यक्ष एवौपनयिके" शब्दश०

उपनयन न० उप+नी–ल्युट् । स्मृत्युक्ते संस्कारभेदे १उपनयार्थे २समीपप्रापणे च । तत्रोपनयसंस्कारविभागकालादिर्दर्श्यते । स च संस्कारः त्रिविधः नित्यःकाम्योनैमित्तिकश्च । तत्र द्विजातीनामधिकारः । तत्र नित्यः अष्टमवर्षादिकाले विहितः, ब्रह्मवर्चसादिकामस्य पञ्चमादिवर्षविहितः काम्यः, नैमित्तिकस्तु पुनःसंस्कारप्रयोजकपापापनोदनार्थं प्रायश्चित्तात्मकः । तत्र नित्यस्य कालोऽपि द्विविधः मुख्योगौणश्च । तेषु मुख्यकालः "गर्भाष्टमेऽष्टमे वाब्दे ब्राह्मणस्योपनायनम् । राज्ञामेकादशे सैके विशामेके यथाकुलम्" मनुः । "गर्भादित्वस्य सर्वत्रानुषङ्गः यथाह आपस्तम्बः "गर्भाष्टमेषु ब्राह्मणमुपनयेत् गर्भैकादशे राजन्यम् गर्भद्वादशे वैश्यम्" । अत एव "अष्टमे वर्षे ब्राह्मणमुपनयेत् १गर्भाष्टमे वा२ । एकादशे क्षत्रियम्३ । द्वादशे वैश्यम्४ । आश्व० सूत्रवृत्तौ "जन्मप्रभृत्यष्टमे वर्षे ब्राह्मणमुपनयेत्१ । गर्भप्रभृत्यष्टमे वा२ । जन्मप्रभृति गर्भप्रभृति वा एकादशवर्षे क्षत्रियमुपनयेत्३ । जन्मप्रभृति गर्भप्रभृति वा द्वादशे वर्षे वैश्यम्४इति नारायणोपाध्यायः । शङ्खोऽप्याह । "गर्भाष्टमाब्दे कर्त्तव्यं ब्राह्मणस्योपनायनम् । गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः" । तत्रापि गर्भाष्टमादिरेव मुख्यःकालः अत एव मनुना यथाकुलमित्यनेन जन्मतोऽष्टमादीनां कुलानुसारेण व्याहृतामात्रमुक्तम् । तेनास्य कुलानुसारेण उभयोरपि मुख्यतेत्यपरे आहुः । अतएवानयोः प्रशंसापि दृश्यते । "प्राप्ते गर्भाष्टमे वर्षे शुद्धिर्यस्य न विद्यते । तस्योपनयनं कार्य्यं चैत्रे मीनगते रवौ" व्यवहारचमत्कारः । "शुचिर्नैव गुरुर्यस्य वर्षे प्राप्तेऽष्टमे यदि । चैत्रे मीनगते भानौ तस्योपनयनं शुभम्" नि०सि० स्मृ० । अत्र शुद्धिश्च "रविगुरुशुद्धौ व्रतोद्वाहौ" इत्युक्ता रविगुर्वोर्गोचरशुद्धिः । किञ्च "अष्टमैकादशे चैव द्वादशाब्दे व्रतस्य च । मुख्यं कालं विजानीयाद् ब्रह्मक्षत्रविशां क्रमात्" वचने अष्टमादिवर्षाणां वर्णभेदेन मुख्यत्वमाह । "गर्भाष्टमेषु ब्राह्मणमुपनयेत गर्भैकादशेषु क्षत्रियस्य गर्भद्वादशेषु वैश्यम्" गोभिलः "व्यक्तमाह माण्डव्यः "व्रतबन्धविवाहे च वत्सरपरिगणनमाहुराचार्य्याः । आधानपूर्व्वमेके प्रसूतिपूर्वं सदान्ये तु" । काम्यकालः । "ब्रह्मवर्चसकामस्य कुर्याद्विप्रस्य पञ्चमे । राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे" मनुः । "षष्ठे तु बलकामस्य विद्याकामस्य सप्तमे । अष्टमे सर्वकामस्य, नवमे कान्तिमिच्छतः" नि०सि० विष्णुः । अथ काम्यानि, सप्तमे ब्रह्मवर्चसकामम्, अष्टमे आयुष्कामं नवमे तेजस्कामं दशमेऽन्नाद्यकामम्, एकादशे इन्द्रियकामम्, द्वादशे पशुकामम् उपनयेत्" पैठी० । गौणकालोऽपि द्विविधः मध्यमोऽधमश्च स्वल्पाधिकप्रायश्चित्तनिमित्ततभेदात् । ब्रह्मक्षत्रियविशामुपक्रमे "द्वादश षोड़श विंशतिश्चेदतीता अवरतुकालाभवन्ति" पैठी० । ब्राह्मणस्य द्वादशवर्षात् क्षत्रस्य षोड़शाब्दात् वैश्यस्य विंशत्यब्दात् उत्तरं अवरतुकालतादोषश्रवणात् तत्र महाव्याहृतिहोमरूपं प्रायश्चित्तं विप्रादेः षोड़शाद्यतीतत्वे चान्द्रायणादि गुरु प्रायश्चित्तमिति भेदः एवमेव सं० त० रघु० । तथा च गौणकालमध्ये द्वादशाब्दादयो मध्याः तदुत्तरमधम इति भेदः तत्राधमगौणस्तु । "आषोड़शाद् ब्राह्मणस्य सावित्री नातिवर्त्तते । आ द्वाविंशात् क्षत्रबन्धोरा चतुर्विंशतेर्विशः" मनुः "आ षोड़शाव्हात् द्वाविंशाच्चतुर्विंशाच्च वत्सरात् । ब्रह्मक्षत्रविशां काल औपनायनिकः परः" या० स्मृ० । तत्र आ इत्यस्य सर्वत्रान्वयः आङ् चात्राभिविधौ न मर्यादायाम् "षोड़शाब्दो हि विप्रस्य राजन्यस्य द्विविंशतिः । विंशतिः सचतुर्थी च वैश्यस्य परिकीर्त्तिता" विष्णु ध० उक्तेः । अतः षोड़शाद्यब्दानामुपनयकालता । "अत ऊर्द्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः । सावित्रीपतिताः व्रात्या भवन्त्यार्य्यविगर्हिताः" मनुः । अत्र सर्वत्र गर्भावधिषोड़शाद्यब्दाद्याह्या: "सावित्री पतिता यस्य दश वर्षाणि पञ्च च । ब्राह्मणस्य विशेषेणेति" यमवचने पञ्चदशवर्षातिक्रमे गुरुप्रायश्चित्तविधानात्" एतच्च जन्मावधिपरं तेन षोड़शाब्दादिभिः सममविरुद्धम् एवमेव सं०त०रघु० । पञ्चदशपदञ्च द्विमासाधिकपञ्चदशपरमिति कल्प्यते सर्वसामञ्जस्यात् अतएव "पञ्चदशवर्षादूर्द्ध्वमपि कियत्कालातिक्रमे तुद्दालकव्रतमिति" वदता मिताक्षराकृता तथैव सूचितम् । एवं तत्तद्वर्णभेदेन सामान्यकाले निरूपिते इदानीं शुभसूचक

विशेषकालोऽभिधीयते। तत्रादौ वर्णभेदेन ऋतुभेदस्य मुख्यता यथा ह प्रमि० काश्यपः। "ऋतौ वसन्ते विप्राणां ग्रीष्मे राज्ञां शरद्यथो। विशां मुख्यञ्च सर्वेषां द्विजानाञ्चोपनायनम्"। नारदः "शरद्ग्रीष्मवसन्तेषु व्युत्क्रमाच्च द्विजन्मनाम्। मुख्यं साधारणं तेषां व्रतं माघादिपञ्चसु"। नि० सि० गर्गः। "विप्रं वसन्ते क्षितिपं निदाघे वैश्यं घनान्ते व्रतिनं विदध्यात्। माघादिशुक्रान्तकपञ्चमासाः साधारणं वा सकलद्विजानाम्"। शुक्रो ज्यैष्ठः। माघादिमासप्राशस्त्यमाह हेमाद्रौ ज्योतिषे"। "माघादिषु च मासेषु मौञ्जी पञ्चसु शस्यते"। अन्यत्रापि। "ब्राह्मणक्षत्रवैश्यानां माघादिष्वपि पञ्चसु। साधारणं तु सर्वेषां व्रतोपनयनं विदुः"। तत्र मासभेदे फलभेदः यथाह व्य० च० सुरेश्वरः"। "माघे मासि महागुणो धनपतिः प्राज्ञो धनी फाल्गुने मेधावी भवति व्रतोपनयने चैत्रे च वेदान्वितः। वैशाखे सुभगः सुखी पटुमतिर्ज्यैष्ठे वरिष्ठो बुधोऽप्याषाढेऽपि महाविपक्षविजयी ख्यातो महापण्डितः"। कृत्यचि० "माघे द्रविणशीलाढ्यः फाल्गुने च दृढव्रतः। चैत्रे भवति मेधावी वैशाखे कोविदो भवेत्। ज्यैष्ठे गहननीतिज्ञ आषाढे क्रतुभाजनम्। शेषेष्वन्येषु रात्रिः स्यान्निषिद्धं निशि च व्रतम्"। निषिद्धमिति विप्रक्षत्रियविषयं न वैश्यपरं तस्य "शरदि वैश्यमिति" स्मृत्या प्रागुक्तकाश्यपेन च शरद्युपनयनविधानात्। यत्तु "विप्रस्य क्षत्रियस्यापि व्रतं स्यादुत्तरायणे। दक्षिणे च विशां कार्यं नानध्याये न संक्रमे" इति गर्गवचने चकारात् विप्रक्षत्रयोर्दक्षिणायने उपनयविधानं तत् प्रायश्चित्तोपनयनपरमिति सं० त० रघु०। वस्तुतः चस्त्वर्थे दक्षिणायने तु वैश्यस्य मुख्योपनयनपरम् "उदगयने आपूर्य्यमाणपक्षे कल्याणे नक्षत्रे चूडोपनयनगोदानविवाहाः" आश्व० सूत्रं तु विप्रक्षत्रविषयम्। प्रायश्चित्तोपनयनपरत्वे "नानध्याये न संक्रमे" इति पर्य्युदासानुपपत्तिः अग्रे प्रदर्शयिष्यमाणगर्गवचनेन प्रायश्चित्तोपनयनस्यानध्यायेऽपि कर्त्तव्यतावगमात्। "जन्मलग्ननक्षत्रमासराशिषु उपनयनप्राशस्त्यमाह" कृत्यचि० वृद्धः। "जन्मोदये जन्मसु तारकासु मासेऽथवा जन्मनि जन्मभे वा। व्रतेन विप्रो न बहुश्रुतोऽपि विद्याविशेषैः प्रथितः पृथिव्याम्"। "विवाहे मेखलाबन्धे जन्ममासं विवर्ज्जयेत्। विशेषाज्जन्मपक्षन्तु वशिष्ठाद्यैरुदाहृतम्" गर्गवाक्यं तु क्षत्रियवैश्यपरम् न तु ब्राह्मणविषयं तद्वाक्यविरोधात्"। अथ पक्षनिर्णयः व्य० च०। "श्रेष्ठं पक्षमुशन्ति शुक्लमसितस्याद्यं त्रिभागं तथा रिक्तां प्रोज्झ्य तिथिं तथा त्वयनयोः सन्धिञ्च शेषाः शुभाः" इति आपूर्य्यमाणे पक्षे इत्यादिप्रागुक्ताश्वलायनसूत्रम् "पक्षे च कृष्णेतरे:" भुजबलभीमः। तिथिनिर्णयः। निर्णया० "तृतीयैकादशी ग्राह्या पञ्चमी द्वादशी तथा"। "द्वितीषु रुद्ररविदिक्प्रमिते तिथौ च कृष्णादिमत्रिलवकेऽपि न चापराह्णे" मु० चि०। निर्णया० व्य० सम०। "न च षष्ठ्यामथाष्टम्यां पञ्चदश्यां न पर्व्वणि। रिक्तासु च न कर्त्तव्यं त्र्यहस्पृग्दिवसे तथा"। अष्टमीपञ्चदश्योरनध्य। यत्वेऽपि पृथगुपादानं नैमित्तिकविषयमेवमप्येऽपि। "षष्ठ्यामशुचिर भार्य्यो रिक्तासु बहुदोषभाक्" सं० त०। "रिक्तायामर्थहानि स्यात् पौर्णमास्यान्तथैव च। प्रतिपद्यपि चाष्टम्यां कुलबुद्धिविनाशनमिति"। अन्यत्रापि "सप्तम्यामष्टम्याम्मृति यदि रिक्तात्रयोदश्याम्। आयुर्विद्यानाशो व्रतबन्धे पञ्चदश्याञ्च"। "द्वितीया पञ्चमी षष्ठी सप्तमी दशमी तथा। त्रयोदशी तृतीया च शुक्ले श्रेष्ठाः प्रकीर्त्तिता" इत्यत्र सप्तमीत्रयोदश्योर्यत् प्राशस्त्यमुक्तं तद्वसन्ताभिप्रायेण। नि० सि० नारदेन व्यतिरेकमुखेन वसन्ते गलग्रहादिप्रतिप्रसवोक्तेः। यथा "विनर्त्तुना वसन्तेन कृष्णपक्षे गलग्रहे। अपराह्णे चोपनीतः पुनः संस्कारमर्हति"। गलग्रहमाह मदनरत्ने नारदः। "कृष्णपक्षे चतुर्थी च सप्तम्यादिदिनत्रयम्। त्रयोदशी चतुष्कञ्च अष्टावेते गलग्रहाः"। रा० मा० "आरम्भानन्तरं यत्र प्रत्यारम्भो न विद्यते। गर्गादिमुनयः सर्वे तमेवाहुः गलग्रहम्"। दैवज्ञमनोहरे। "प्रदोषे निश्यनध्याये सन्ध्यागर्ज्जे गलग्रहे। मधुं विनोपनीतस्तु पुनः संस्कारमर्हति"। एवं दिवाचतुर्द्दीगस्त्रयोदश्यां यदा भवेत्। द्वादशी तत्र वर्ज्जा स्यात् गलग्रहतया मतेति ज्यो० वचनात् तादृशद्वादश्या वर्ज्यता। वृद्धगर्गः। "स्मृतिषूक्तानध्यायान् सप्तमीञ्च त्रयोदशीम्" वर्जयेदित्यनुषङ्गः। तत्रानध्यायप्रदोषकालौ अनध्यायशब्दे १४५ पृ० दर्शितौ "अनध्यायवेऽपि कर्त्तव्यं यस्य नैमित्तिकं भवेत्" वृद्धगर्गवचनात्। "प्रायश्चित्तोपनयनेऽनध्यायस्य न दूषकताऽपिकारात् कृष्णपक्षगलग्रहयोः समुच्चयः। "नो जीवास्तातिचारे सितगुरुदिवसे कालशुद्धौ व्रतं सत्" दीपिकोक्तेः समयाशुद्धिमात्रं वर्ज्जनीयम्। गुरुशुक्रास्तादिषूपनयने दोष-

माह तत्रैव। "अस्तङ्गते दैत्यगुरौ गुरौ वा कृष्णेऽपि वा पापयुतेऽप्यनुक्ते। व्रतोपनीतो द्विवसैः प्रणाशं प्रयाति वेदैरपि-रक्षितोयः"। नक्षत्रनिर्णयः सं०त०भुजब० "स्वातीशक्रधनाश्विमित्रकरभे पौष्णे ज्यचित्राहरिब्रिन्दौ तोयपतौ भगे दितिसुते भाद्रद्वये सागरे" १५,१८,२२, १,१७,१२,२७,८,१४,२२,५,२४,११,१२, २५,२६,२० एतत्संख्यकेषु सप्तदशसु नक्षत्रेषु उपनयनं सत्। मु०चि० प्रमि० विशेषः "क्षिप्रध्रुवाहिचरमूलमृदुत्रिपूर्वारौद्रेऽर्कविद्गुरुसितेन्दुदिने व्रतं सत्" अस्य व्याख्या प्रमि० "प्राजापत्यादि षड्क्षे भगवर्गादिषु पञ्चसु। मूलादिदशके चैव समैवं व्रतबन्धनम्"। तेन २२ द्वाविंशतिर्नक्षत्राणि विहितानि। अत्र पुनर्वसुपदस्थं क्षत्रियवैश्यविषयं न तु ब्राह्मणविषयम् "पुनर्वसौ कृतोविप्रः पुनः संस्कारमर्हतीति राजमा०। "ब्रह्मस्पृषि मखे मासि शूद्रत्वमधिगच्छति। पुनर्वसौ कृतोविप्रः पुनः संस्कारमर्हतीति" सारसंग्रहे" च विप्रोपनयननिषेधात्। तथा च "भरणीकृत्तिकामघाविशाखाज्येष्ठासूपनयनं न कार्य्यम् एतानि नक्षत्राणि च सर्वशाखामलयप्रायाणि यथोक्तं तत्रैव 'भरणी कृत्तिकापित्र्यविशाखाशक्रभानि च। सर्वशाखामलं प्रोक्तं व्रतं तत्र विवर्ज्जयेत्"। वेदिभेदे नक्षत्रभेदो यथा ज्योतिर्निबन्धे व्य०च०च। "मूलहस्तात्रये सार्पे शैवे पूर्वात्रये तथा। "ऋग्वेदाध्यायिनां कार्यं मेखलाबन्धनं बुधैः" १९, १३, १४, १५, ९, ६, ११, २०, २५, एतन्मितानि ऋग्वेदिविषयाणि "पुष्ये पुनर्वसौ पौष्णे २७हस्ते मैत्रे१७ शशाङ्कभे। ध्रुवेषु १२, २१, २६, ४ च प्रशस्तं स्याद्यजुषां मौञ्जीबन्धनम्"। पुष्यवासव २२हस्ताश्विशिवर्द्ध कर्णोत्तरात्रयम् २२,१२,२१,२६। प्रशस्तं मेखलाबन्धे वटूनां सामगायिनाम्"। भगो ११मैत्रा१७ श्विनीहस्तारेवत्यदिति ७वासवम् २३। अथर्वपाठिनां शस्तोभगणोऽयं व्रतार्पणे"। नि०सि०। "पूर्वा ११,२०,२५, हस्तात्रये१३,१४,१५, सार्पे ९श्रुतिमूले"च २२,१९,बह्वृचाम्। यजुषां पौष्णमैत्रार्कादित्यपुष्यस्तद्ध्रुवैः। सामगानां हरीशार्कवसुपुष्योत्तराश्विनी। धनिष्ठादितिमैत्रार्काश्वेन्द्रपौष्णेष्वथर्वणाम्"५,२७,। अन्यत्रापि। "पूर्वाहस्तत्रयाश्लेषाशिवमूलानि भानि च। ऋग्वेदाध्यायिनां शस्तभान्याहुर्व्रतबन्धने। उत्तरारोहिणीयुग्मपुष्यापौष्णकरादितौ। मैत्रे यजुर्विदाञ्चोपनयनन्तु प्रशस्यते। उत्तराश्रवणार्द्राश्विपुष्याहस्ताधनेषु च। सामगानां व्रतं शस्त

मिति वेदविदोविदुः। अश्विनी रेवती हस्ता भगमैत्रधनादितौ। अथर्ववेदिनाञ्चोपनयनन्तु शुभावहमिति" प्रमि०धृतप्रागुक्तवचने ज्येष्ठायामलत्वेनोक्तावपि प्रागुक्तभुजबलादिवचने "अश्विनीमृगचित्रासु हस्ते स्वात्याञ्च शक्रभे। पुष्ये च पूर्वफल्गुन्यां श्रवणे पौष्णभे तथा। वासवे शततारासु व्रतबन्धः प्रशस्यते" श्रीपतिवचने च ज्येष्ठायाग्रहणमत्यन्तापद्विषयम्। वेदभेदेन विहित नक्षत्रेषु तस्याः अकीर्त्तनेऽपि वेदभेदेन प्राशस्त्यमात्रस्य प्रतीतेस्तदलाभेऽन्यवेदिविहितनक्षत्रस्यापि ग्रहणार्थं मुहू० चि०द्वाविंशतिनक्षत्राणां सामान्यतो ग्रहणवदत्रापि तथेति बोध्यम्। ज्येष्ठायास्त्वत्यन्तापद्विषय एव ग्राह्यता केष्वपि वेदिषु तदनुक्तेः व्य०च०गुरुः। "त्रिपूत्तरेषु रोहिण्यां हस्ते मैत्रे च वासवे। त्वाष्ट्रे सौम्यपुनर्वस्वोरुत्तमं ह्यौपनायनम्। वारुणे वैष्णवे पुष्ये वायव्ये पौष्णभे तथा। आश्विन्यां षट्सु भेषूक्तं मध्यमं तु चतुर्मुखैः। शेषेषु वर्जयेद्धीमान् द्विजानामौपनायनम्" अत्रान्येषां वर्ज्यत्वोक्तिरपि अनापद्विषया" एतदतिरिक्तनक्षत्राणां प्रागुक्तवचनैर्विहितत्वात्। ज्योतिर्निबन्धे नारदः। "श्लेषान्यर्कत्रयान्त्येज्यचन्द्रादित्युत्तरात्रयम्। विष्णुत्रयाश्विमित्राजयोनिभान्युपनायने"। वर्जनीययोगानाह व्य०च०गुरुः। "व्याघातं परिघं वज्रं व्यतीपातञ्च वैधृतिम्। गण्डातिगण्डौ शूलञ्च विष्कुम्भञ्च विवर्ज्जयेत्" अन्यत्रापि। "विषकुम्भशूलपरिघव्यतिपातगण्डव्याघातवैधृतियुतं त्वतिगण्डवज्रम्। योगं विहाय कुजमन्दपराह्णसन्ध्यां हित्वा निरंशमशुभञ्च व्रतं प्रशस्तम्" प्रमिता०। "क्षीणचन्द्रेऽस्तगे शुक्रे निरंशे चैव भास्करे। कर्त्तव्यं नोपनयनं नानध्याये गलग्रहे"। निरंशसूर्यमाह तत्रैव। "राशेः प्रथमभागस्थो निरंशः सूर्य उच्यते"। तेन रघुनन्दनेन निरंशशब्दस्य संक्रान्तिपरत्वस्य कल्पनं चिन्त्यम्। वारनिर्णयमाह नारदः। 'आचार्य्यसौम्यकाव्यानां वाराः शस्ताः शशीनयोः। वारौ मध्यफलौ प्रोक्ताविवरौ निन्दितौ व्रते" तत्राप्यस्तमितस्य बुधस्य वारोवर्जनीयः। "अस्तं गतस्य सौम्यस्य वारो वर्ज्योद्विजन्मनामिति" नारदोक्तेः। अन्यत्र तु। "शुभो बुधोनास्तमितः पापग्रहयुतो न चेति"। चन्द्रवारस्तु कृष्णे वर्ज्जनीयः। 'पापग्रहाणां वाराः स्युर्न शुभाश्चन्द्रवासरः। सितपक्षे प्रशस्तः स्यात् कृष्णे वारोविधोर्नहीति" व्य०च० उक्तेः। सामगानां कुजवारेऽप्युपनयनमुक्तं श्रीपतिना। "शाखाधिपे बलिनि

केन्द्रगतेऽथवास्मिन् धारेऽस्य चोपनयनं कथितं द्विजानाम् । नीचस्थितेऽरिगृहगेऽथ पराजिते वा जीवे-भृगावुपनयः स्मृतिकर्म्महीनः" । ज्योतिर्निबन्धे नारदः "सर्वेषां जीवशुक्रशनिवाराः प्रोक्ता व्रते शुभाः । चन्द्रार्कौ मध्यमौ ज्ञेयौ सामवच्छन्दयोः कुजः । शाखाधिपतिवाराश्च शाखाधिपबलं तथा । शाखाधिपतिलग्नञ्च दुर्लभं त्रितयं व्रते" । मु० चि० "शाखेशवारतनुवीर्य्यमतीव शस्तं शाखेशसूर्य्यशशिजीवबले व्रतं सत् । जीवे भृगौ रिपुगृहे विजितेऽथ नीचे स्याद्वेदशास्त्रविधिना रहितो-व्रतेन" । वशिष्ठः "शाखेशगुरुशुक्राणां मौढ्ये बाल्ये च वार्द्धके । नैवोपनयनं कार्य्यं वर्णेशे दुर्बले सति" । तेन भौमबुधयोरस्तादिषु सामगाथर्वणशाखिनोरुपनयनादि न भवतीति गम्यते । तत्र नीचाद्यवस्थितत्वे स्वनवांशस्वोच्चांशस्थितत्वे न शाखेशादेरपवादमाह वशिष्ठः "शत्रुनीचांशगतस्थे स्वांशे वा स्वोच्चभागगे । शाखेशे वा गुरौ शुक्रे न नीचफलमश्नुते" । शाखेशवर्णेशास्तु । "विप्राधीशौ भार्गवेज्यौ कुजार्कौ राजन्यानामोषधीशोविशाञ्च । शूद्राणां चान्त्यजानां शनिः स्याच्छाखेशाः स्युर्जीवशुक्रारसौम्याः" मु० चि० "ऋग्वेदोऽथ यजुर्वेदः सामवेदोह्यथर्वणः । वेदानामधिपोजीवशुक्रभौमबुधाः क्रमात्" गुरुः । "ऋग्वेदाधिपतिर्जीवोयजुर्वेदाधिपो भृगुः । सामवेदाधिपो भौमः शशिजोऽथर्व्ववेदराट्" दीपिका । लग्नभेदे फलमाह व्य० ध० वशिष्ठः । "मेषे भवति वाक्कुण्ठो वित्तविद्यार्ज्जितो वृषे । युग्मे वेदार्थदर्शी च कुलीरे च षडङ्गवित् । शिल्पकर्म्मकरः सिंहे षष्ठे भवति पण्डितः । तुलायां विनयप्राप्तः काण्डस्पृष्टोऽथ वृश्चिके । सर्व्वत्र पूजितश्चापे शूद्रवृत्तिर्मृगे तथा । राजप्रेष्यान्वितः कुम्भे मीने वेदान्तपारगः" । लग्नकेन्द्रस्थरव्यादि ग्रहफलमाह मु० चि० "राजसेवी वैश्यवृत्तिः शस्त्रवृत्तिश्च पाठकः प्राज्ञोऽर्थवान् म्लेच्छसेवी केन्द्रे सूर्य्यादिखेचरे" व्य० ध० गुरुः । "रवौ लग्नादिकेन्द्रस्थे दोषः स्फुरितसंज्ञकः । तत्रोपनीतस्य शिशोः कुलनाशो भवेत् तदा, कुजे लग्नादिकेन्द्रस्थे दोषः कूजितसंज्ञकः । तत्रोपनीतं बटुकं हन्ति वर्षान्न संशयः । शनौ लग्नादिकेन्द्रस्थे दोषोरुदितसंज्ञकः । करोति महतीं पीड़ां व्रतिनो वा गुरोस्तथा । राहौ लग्नादिकेन्द्रस्थे दोषोरन्ध्राह्वयोभवेत् । व्रतिनोजननीं हन्ति चाथवा जनकं स्वयम् । केतौ लग्नादिकेन्द्रस्थे दोषश्च पातसंज्ञकः । पमप्यं व्रतिनोवृत्ति-

वित्तविद्याविनाशनम्" । लग्नषष्ठाष्टमान्त्यस्थः करोत्येव निशाकरः । व्रतिनोदेहमथनं निधनं दुःखसञ्चयम्" । वशिष्ठः "विशेषान्निधनस्थाने ग्रहान्नेच्छन्ति सर्व्वदा । आचार्य्यास्त्वशुभा घ्नन्ति शिष्यं घ्नन्त्यशुभेतराः" । "केन्द्रत्रिकोणगे जीवे भानौ शुक्रेऽथवा व्यये । द्वितीये च शुभोयोगो द्विजानामौपनायने" । लग्नावधिकस्थानभेदे ग्रहविशेषस्थितौ फलभेदमाह काश्यपः "षष्ठाष्टमं विना जीवः सर्व्वत्र शुभकृत् सदा । सर्व्वत्र शुभकृच्छुक्रः षष्ठसप्ताष्टमं विना । भास्करोलग्नगः कुर्य्याद्वटुं भूपतिसेवकम् । वसुस्थः स्वर्णरहितं भ्रातृस्थः सुखिनं सदा । बन्धुगोदुःखिनं नित्यं सुतगोमतिवर्ज्जितम् । शत्रुगोरोगरहितं सप्तमे मार्गवर्ज्जितम् । अष्टमे दृष्टिरहितं नवमे धर्म्महारिणम् । व्यापारगोभिषग्वृत्तिं दीर्घायुष्यं तथाऽऽयगः । रिप्फगोहानियुक्तञ्च फलमेतद्गुरावपि । सिते चन्द्रे लग्नसंस्थे शुभं स्यादसितेऽशुभम् । वसुगे स्याद्धनप्राप्तिस्तृतीये सुखसंस्थितिः । चतुर्थे बुद्धिवृद्धिं च पञ्चमे सौख्यमुत्तमम् । षष्ठे तु व्याधिपीड़ा स्यात् सप्तमे सुखसन्ततिः । अष्टमे निर्धनः प्राणी नवमे धर्मसञ्चयः । दशमे स्यात् सदाचारो लाभे स्याद्धनसञ्चयः । दारिद्र्यं रिप्फगे विद्याच्चन्द्रे फलमुदाहृतम् । मृतिर्नाशः सुखं कार्य्यहानिर्वृद्धिर्मतिर्गदः । अधर्मोद्गमतिर्वृद्धिर्नाशो लग्नात् कुजे फलम् । बुद्धिर्वृद्धिर्वित्तनाशो लाभः पुत्रोन्नतिः सुखम् । आयुःक्षयो धर्मसौख्ये कोषलाभः व्ययः क्रमात् सौम्ये लग्नादिराशीनां फलमेतदुदाहृतम् । निन्दां हानिं सुखं रोगं द्यूतञ्चाम जड़ं मतिम् । विपत्क्लेशं सुखं स्वल्पमुदयात् कुरुते शनिः । चन्द्रे विशेषमाह लल्लः :- "पापात् सप्तमगश्चन्द्रं पापग्रहेण वा युतम् । व्रते विवर्ज्जयेद् यत्नाद्दोषमाहुर्मनीषिणः । तत्फलं तत्रैव "पापग्रहात् सप्तमगं शशाङ्कं पापग्रहेणापि युतञ्च हित्वा । व्रतं प्रशस्तं मुनयोवदन्ति नोचेत्तदा मृत्युमुपैति शीघ्रम्" । गुरुस्तु । "पापग्रहेक्षिते लग्ने जीवितार्थी न कारयेत् । चन्द्रो वा क्रूरवर्गयुक्तो मूढ़त्वं संप्रयच्छति" । वर्ज्ययोगमाह मु० चि० "कवीज्यचन्द्रलग्नपारिपौ मृतौ व्रतेऽधमाः । व्ययेऽब्जभार्गवौ तथा तनौ मृतौ सुते खलाः" । अन्यत्रापि । "लग्नाधिनाथसितजीवनिशाधिनाथान् षष्ठाष्टमे व्ययगतावपि चन्द्रशुक्रौ । लग्नाष्टपञ्चमगताशुभग्रहांश्च यत्नात् त्यजेद्व्रतविधौ मुनयोवदन्ति" । शाखाभेदे । "मेखलाबन्धकाले तु सर्व्वदा

पञ्चमगृहम् । शुभयुक्तं प्रशंसन्ति तदालोकितमेव वा" । योगान्तरमाह प्रमि० महेश्वरः । "जीवे लग्नगर्भाधिपतिते भृगुसुते धर्मात्मजस्थे विधौ शुक्रांशेऽखिलवेदविद्द्विजसुतस्तांशे कृतघ्नोऽधमः" । तत्रैव स एव । "विधौ सितांशगे गुरौ तनौ त्रिकोणगे भृगौ । समस्तवेदविद्व्रती यमांशकेऽतिनिर्घृणः" । नवांशफलमाह व्य०व० गुरुः । "गुरुशशुक्रांशकगे च चन्द्रे विद्याधनायुःसुखवान् द्विजन्मा । माहेयमन्दार्कनवांशकस्थे हिंस्रो जड़ो मूर्खतरोऽतिनिःस्वः" मु०चि० । "क्रूरो जड़ो भवेत् पापः पटुः षट्कर्मकृद्वटुः । यज्ञार्थभाक् तथा मूर्खोरव्याद्यंशे तनौ क्रमात् । विद्यानिरतः शुभराशिलवे पापांशगते हि दरिद्रतरः । चन्द्रे स्वलवे बहुदुःखयुतः कर्णादितिभे धनवान् स्वलवे" । प्रमि० नारदः "श्रवणादितिनक्षत्रे कर्कांशस्थे निशाकरे । तदा व्रती वेदशास्त्रधनधान्यसमृद्धिमान्" । एतच्छुक्लपक्षविषयम् "शुक्ले स्वांशे निशानाथे वित्तवान् यत्नवान्भवेत् । कृष्णे स्वांशगतश्चन्द्रोऽजातिभ्रंशं करोति हि" वशिष्ठोक्तेः "रविगुरुशुद्धौ व्रतोद्वाहौ" इत्युक्तेर्व्रते गुरुशुद्धिरावश्यकी । तत्र गुरुशुद्धौ विशेषमाह" मु० चि० "वटुकन्याजन्मराशेस्त्रिकोणायद्विसप्तगः । श्रेष्ठोगुरुः खषट्त्र्याद्ये पूजयाऽन्यत्र निन्दितः" । "स्वोच्चे स्वभे स्वमैत्रे वा स्वांशे वर्गोत्तमे गुरुः । रिष्फाष्टतुर्य्यगोऽपीष्टो नीचारिस्थः शुभोऽप्यसन्" अत्र जीवस्य नीचस्थत्व इव अरिष्टस्थत्वेऽपि वर्ज्यता प्रतीयते अतएव "जन्मभादष्टमे सिंहे नीचे वा शत्रुभे गुरौ । मौञ्जीबन्धः शुभः प्रोक्तश्चैत्रे मीनगते रवाविति" निर्णयसिन्धुधृतवचने मीनगतरविकालएव प्रतिप्रसवसार्थक्यम् । एतेन "शाखाधिपे बलिनि" इत्यादिवाक्ये उपक्रमे शाखाधिपश्रवणात् गुरोररिष्टस्थत्वे तस्य ऋग्वेदाधिपतया तद्वेदिनामेवोपनयननिषेधकल्पनमपि निरस्तम् "शाखेशसूर्य्यशशिजीवबले" इत्यादिप्रागुक्तवचने शाखेशात् पृथक्त्वेन जीवस्य ग्रहणेनारिष्टस्थत्वेऽपि सर्ववेदिनां दोषस्यावश्यकत्वात् । एतेन "नीचस्थितेऽरिष्टगेऽथ पराजिते वा जीवे भृगौ" इत्यादिवचने क्रमान्वयं वदन् परास्तः तथात्वे प्रतिप्रसवानर्थक्यापत्तेः । अस्मदाकरे द्रष्टव्यमिति दिक् । तत्तद्विद्याग्रहणार्थे २कर्म्मभेदे तत्र चिकित्साविद्याङ्गोपनयनप्रकारो दर्शितः सुश्रुतेन यथा ।

"अथातः शिष्योपनयनीयमध्यायं व्याख्यास्यामः । ब्राह्मणक्षत्रियवैश्यानामन्यतममन्वयवयःशीलशौर्य्यशौचाचारविनयशक्तिबलमेधाधृतिस्मृतिमतिप्रतिपत्तियुक्तं तनुजिह्वौष्ठदन्ताग्रमृजुवक्त्राक्षिनासं प्रसन्नचित्तवाक्चेष्टं क्लेशसहञ्च भिषक् शिष्यमुपनयेत् । अतो विपरीतगुणं नोपनयेत् उपनयनीयस्तु ब्राह्मणः प्रशस्तेषु तिथिकरणमुहूर्त्तनक्षत्रेषु प्रशस्तायां दिशि शुचौ समे देशे चतुर्हस्तं चतुरस्रं स्थण्डिलमुपलिप्य गोमयेन दर्भैः संस्तीर्य पुष्पैर्लाजभक्तै रत्नैश्च देवताः पूजयित्वा विप्रान् भिषजश्च, तत्रोल्लिख्याभ्युक्ष्य च दक्षिणतो ब्रह्माणं स्थापयित्वाग्निमुपसमाधाय खदिरपलाशदेवदारुविल्वानां समिद्भिश्चतुर्णां वा क्षीरवृक्षाणां न्यग्रोधोडुम्बराश्वत्थमधूकानां दधिमधुघृताक्ताभिः, दार्व्वीहोमिकेन विधिना स्रुवेणाज्याहुतीर्जुहुयात् । सप्रणवाभिर्महाव्याहृतिभिस्ततः प्रतिदैवतमृषींश्च स्वाहाकारञ्च कुर्यात् शिष्यमपि कारयेत् । ब्राह्मणस्त्रयाणां वर्णानामुपनयनं कर्त्तुमर्हति राजन्यो द्वयस्य, वैश्यो वैश्यस्यैवेति । शूद्रमपि कुलगुणसम्पन्नं मन्त्रवर्ज्जमनुपनीतमध्यापयेदित्येके । ततोऽग्निं त्रिःपरिणीयाग्निसाक्षिकं शिष्यं ब्रूयात् । कामक्रोधलोभमोहमानाहङ्कारेर्ष्यापारुष्यपैशुन्यानृतालस्यायशस्यानि हित्वा नीचनखरोम्णा शुचिना कषायवाससा सत्यव्रतब्रह्मचर्य्याभिवादनतत्परेणाऽवश्यं भवितव्यं मदनुमतस्थानगमनशयनासनभोजनाध्ययनपरेण भूत्वा मत्प्रियहितेषु वर्त्तितव्यमतोऽन्यथा ते वर्त्तमानस्याधर्म्मो भवत्यफला च विद्या न च प्राकाश्यं प्राप्नोति । अहं वा त्वयि सम्यग्वर्त्तमाने यद्यन्यथादर्शी स्यामेनोभाग्भवेयमफलविद्यश्च । द्विजगुरुदरिद्रमित्रप्रव्रजितोपनतसाध्वनाथाभ्युपगतानां चात्मबान्धवानामिव स्वभेषजैः प्रतिकर्त्तव्यमेवं साधु भवति । व्याधशाकुनिकपतितपापकारिणां न च प्रतिकर्त्तव्यमेवं विद्या प्रकाशते मित्रयशोधर्म्मार्थकामांश्च प्राप्नोति" एवं अन्यविद्याग्रहणाङ्गमप्युपनयनं द्रष्टव्यम् ।

उपनयनाय हितम् छ । उपनयनीय उपनयनावेदके शास्त्रे त्रि० तत्र साधु छ । उपनयनीय उपनयनकारके गुरौ पु० । उभयस्य उदा० उक्त सुश्रुतवाक्ये दर्शितम् ।

उपनहन न० उप+नह–बन्धने भावे ल्युट् । १बन्धने करणे ल्युट् । २बन्धनसाधने वस्त्रादौ । "प्रेष्यति च सोमोपनहनमाहर" कात्या०७,७,१ । सोम उपनह्यते बध्यते येन तत् सोमोपनहनं वासः" कर्कः । "आसन्द्यैनमवभृतं कृत्वाभ्युत्त्र सोमोपनहनेन" कात्या०२२,६,१२ । "अथ संप्रेष्यति सोमोपनहनमाहर" यजमानो वा सोमोपनहनमादत्ते" शत०ब्रा० ३,३,२,२४ ।

उपनागरिका स्त्री "माधुर्य्यव्यञ्जकैर्वर्णैरुपनागरिकेष्यते" इत्युक्तलक्षणे वृत्त्यनुप्रासवृत्तिभेदे। यथा "अपसारय घनसारं कुरु हारं दूर एव किं कमलैः। अलमालि! मृणालैरिति वदति दिवानिशं बाला"।

उपनासुक त्रि० उप+नम—बा० उकञ्। १सन्नमनशीले २फला-नुगुण्याय प्रह्वे "यदिष्टिभिर्यजेतोपनासुक एनं यज्ञः स्यात् प्रमाप्नोत्युपनासुक एनम्" शत० ब्रा० १२, २,६,६,७।

उपनाय पु० उपनाययति उप+नी—णिच् करणस्य कर्त्तृत्व-विवक्षायाम् कर्त्तरि अच्। उपनयसंस्कारे हेम० तस्य आचार्य्यसमीपनयनसम्पादनकरणत्वात्तथात्वम्।

उपनायक पु० उपगतो नायकम् अत्या० स०। १नायकसहाये उपपतौ "नायकस्य गुणोत्कर्षकथका उपनायकाः" संगी-तोक्ते २नायकसहायभेदे उप+नी—ण्वुल्। ३उपस्थापके त्रि० ज्ञानलक्षणाख्ये प्रत्यासत्तिविशेषे पु०। उपनयशब्दे उदा०।

उपनायन न० उप+नी—स्वार्थे—णिच्—ल्युट् करणे कर्त्तृत्व-विवक्षायां कर्त्तरि नन्द्या० ल्यु वा। उपनयसंस्कारे। उपनयनशब्दे बहुप्रयोगो दृश्यः। "ब्राह्मणस्योपनायनम्" मनुः। उपनायनं प्रयोजनमस्य ठक्। औपनायनिक उपनयनप्रयोजने विधाने त्रि०। "एष प्रोक्तो द्विजातीना-मौपनायनिको विधिः" मनुः औपनायनिक इत्यत्र कुल्लू० अनुशतिकादित्वकल्पनमनादरमेव उपनायनशब्देनैव तद्रूपसिद्धेस्तथाकल्पनानौचित्यात्।

उपनाह पु० उप+नह—घञ्। १वीणायास्तन्त्रीबन्धनस्थाने, २व्रणाद्युपशमार्थं लेपनद्रव्ये च। "आदौ विम्लापनं कुर्य्यात् द्वितीयमवसेचनम्। तृतीयमुपनाहञ्च चतुर्थीं पाटनक्रि-याम्" "शोफयोरुपनाहन्तु कुर्य्यादामविदग्धयोः" "ति-लोपनाहं कुर्य्याच्च सर्वदा वातरोगिणाम्" "शाल्वणमुप-नाहार्थे बलातैलमनुवासनार्थे" इति च सुश्रुतः।

उपनाहन न० उप+नह—स्वार्थे णिच्—भावे ल्युट्। प्रले-पादिबन्धने "प्रशमयेत् स्नेहस्वेदोपनाहनैः"। "वेशवारैः सलवणैः स्निग्धैः स्यादुपनाहनम्" सुश्रुतः।

उपनिक्षेप पु० उप+नि—क्षिप—कर्मणि घञ्। १रूपसंख्या-प्रदर्शनेन रक्षणार्थं परस्य हस्ते निहिते द्रव्ये "आधिसीमो-पनिक्षेपजड़बालधनैर्विना। तथोपनिधिराजस्त्रीश्रोत्रि-याणां धनैरपि" या० स्मृ०। "उपनिक्षेपो नाम रूपसंख्या-प्रदर्शनेन रक्षणार्थं निहितमिति" मिता० भावे घञ्। २तथाऽर्पणे।

उपनिधातृ त्रि० उप+नि+धा—तृच्। उपनिधित्वेनान्य-समीपे १स्वद्रव्यस्थापके २स्थापकमात्रे च। "पाणिभ्या-मुपनिधाता स्रुत्यं देवाः" शत० ब्रा० १,१,२,१७। उप+नि+धा—ण्वुल्। उपनिधायकोऽप्यत्र।

उपनिधान न० उप+नि+धा—भावे ल्युट्। उपनिधित्वेन १स्थापने "उपनिधानमुपनिधिः" मिता०। २समीपे स्थापने "हृदभिहितो भाव" इत्याद्युक्तेः उपनिधीयमाने ३द्रव्ये च।

उपनिधि पु० उप+नि+धा—भावे कि। रूपसंख्ये अप्रदर्श्य परस्यान्तिके रक्षणार्थं १स्वधनस्थापने "हृदभिहितो भावो द्रव्य-वत् प्रकाशत" इत्युक्तेः तथा निधीयमाने २द्रव्ये च। उप-निधिस्वरूपतत्त्यकर्त्तव्यविशेषौ मिता० दर्शितौ यथा "वासनस्थमनाख्याय हस्तेऽन्यस्य यदर्प्यते। द्रव्यन्तदौप-निधिकं प्रतिदेयं तथैव तत्" स्मा० स्मृ०। "निक्षेप-द्रव्यस्याधारभूतन्द्रव्यान्तरं वासनं करण्डादि तत्स्थं यद्द्रव्यं रूपसंख्यादिविशेषमनाख्यायाकथयित्वा मुद्रितम-न्यस्य हस्ते रक्षणार्थं विश्रम्भादर्प्यते तद्द्रव्यमौपनिधिक-मुच्यते यथाह नारदः। "असंख्यातमविज्ञातं समुद्रं यन्नि-धीयते। तज्जानीयादुपनिधिं निक्षेपं गणितं विदुरिति" प्रतिदेयन्तथैव तत् यस्मिन् स्थापितन्तेनैव पूर्वमुद्रादि चिह्नितमर्पितन्तथैव स्थापकाय प्रतिदेयं प्रत्यर्पणीयम्। प्रति-देयमित्यस्यापवादमाह" मिता०। "न दाप्योऽपहृतन्तु राज-दैविकतस्करैः" या० स्मृ० "तमुपनिधिं राज्ञा दैवेनोदकादिना तस्करैर्वापहृतं नष्टं न दाप्योऽसौ राज्ञा तदुपनिहितधनि-न एव तद्द्रव्यम् नष्टं यदि जिह्मकारितं न भवति यथाह नारदः। "ग्रहीतुः सह योऽर्थेन नष्टो नष्टः स दायिनः। दैवराजकृते तद्वन्न चेत्तज्जिह्मकारितमिति" मिता०। अस्याप-वादमाह। "भ्रेषश्चेन्मार्गितेऽदत्ते दाप्यो दण्डञ्च तत्समम्" या० स्मृ०। "स्वामिना मार्गिते याचिते यदि न ददाति तदा तदुत्तरकालं यद्यपि राजादिभिर्भ्रेषो नाशः सञ्जातस्तथापि तद्द्रव्यं मूल्यकल्पनया धनिने ग्रहीता दाप्यो राज्ञे च त-त्समन्दण्डम्। भोक्तारम्प्रति दण्डमाह" मिता०। "आजीवन् स्वेच्छया दण्ड्यो दाप्यस्तं वापि सोदयम्" या०। "यः स्वेच्छया स्वामिननुज्ञाप्य उपनिहितन्द्रव्यमाजीवत्युपभुङ्क्ते व्यवह-रति वा प्रयोगादिना लाभार्थं मणावुपभोगानुसारेण द-ण्ड्यस्तञ्चोपनिधिं सोदयमुपभोगे सवृद्धिकं व्यवहारे स लाभन्धनिने दाप्यः। वृद्धिप्रमाणञ्च कात्यायनेनोक्तम्। "निक्षेपं वृद्धिशेषञ्च क्रयं विक्रयमेव च। याच्यमानो न चेद्दद्याद्वर्द्धते पञ्चकं शतमिति"। एतच्च भक्षिते द्रष्टव्यम्। उपेक्षाऽज्ञाननष्टे तेनैव विशेषो दर्शितः "भक्षितं सोदयं

दाप्यः समन्वाप्य उपेक्षितम् । किञ्चिदूनं प्रदाप्यः स्याद्व्यमत्ताननाशितमिति” । किञ्चिदूनमिति चतुर्थांशहीनम्” मिता० । “एष एव विधिर्दृष्टो याचितान्वाहितादिषु । शिल्पिषूपनिधौ न्यासे प्रतिन्यासे तथैव च” नारदः । “स जातमात्रान् पुत्रांश्च दारांश्च भवतामिह । प्रदायोपनिधिं राजा पाण्डुः स्वर्गमितोगतः” भा० आ० १२६ अ० । उपनिधिमधिकृत्य प्रवृत्तम् तदस्य प्रयोजन मिति वा ठक् । औपनिधिक तदधिकारेण प्रवृत्ते व्यवहारे तत्साधनद्रव्ये च ।

उपनिपात पु० उप+नि–पत+घञ् । १समीपे आगतौ २हठादागमने “क्षततार्क्ष्योपनिपातवेगशङ्कः” किरा० ।

उपनिपातिन् त्रि० उप+नि–पत–णिनि । १हठादागते अतर्कितोपगतियुक्ते “रन्ध्रोपनिपातिनोऽनर्थाः” ।

उपनिबन्धन न० उप+नि+बन्ध–करणे ल्युट् । १सम्पादनसाधने । “प्रत्ययोपनिबन्धनः” सर्व्वद० भावे ल्युट् । २ग्रथने

उपनिमन्त्रण न० उप+नि+मन्त्र–ल्युट् । उपेत्य आवश्यके कर्म्मणि प्रवर्त्तनाव्यापाररूपे निमन्त्रणे ।

उपनिवपन न० उप+नि+वप–ल्युट् । अग्निप्रणयनकर्म्माङ्गभूते इध्माभ्याधानादिव्यापारे” ओपनिवपनात् कृत्वा हविर्धाने स्थापयति” ८,३, २१ । “ओपनिवपनात् “इध्माभ्याधानादि उपयमन्युपनिवपनान्तमग्निप्रणयनाख्यं कर्म्म कृत्वा” कर्कः ।

उपनिवेशित त्रि० उप+नि+विश–णिच्–क्त । १निशामिते २वसतिविशेषरूपेण स्थापिते च । “स्वर्गाभिष्यन्दवमनं कृत्वेवोपनिवेशिता” कुमा० । ३निवेशितमात्रे च ।

उपनिषद् स्त्री उपनिषीदति प्राप्नोति ब्रह्मात्मभावोऽनया उप+नि–सद–क्विप् । १ब्रह्मविद्यायां, २तत्प्रतिपादके वेदशिरोभागे वेदान्ते च । वृ० भा० उपनिषच्छब्दार्थव्युत्पत्तिर्दर्शिता यथा । “सेयं ब्रह्मविद्योपनिषच्छब्दवाच्या तत्पराणां सहेतोः संसारस्यात्यन्तावसादनम् उपनिपूर्व्वस्य सदेस्तदर्थत्वात् तादर्थ्याद्ग्रन्थोऽप्युपनिषदुच्यते । मुण्ड० भा० “यथा य इमां ब्रह्मविद्यामुपयन्त्यात्मभावेन श्रद्धाभक्तिपुरःसराः सन्तस्तेषां गर्भजन्मजरारोगाद्यनर्थपूगं निशातयति परं वा ब्रह्म गमयति अविद्यादिसंसारकारणञ्चात्यन्तमवसादयति विनाशयतीत्युपनिषद् उपनिपूर्व्वस्य सदेरेवमर्थस्मरणात् ।” “अत्र चोपनिषच्छब्दो ब्रह्मविद्यैकगोचरः । तच्छब्दावयवार्थस्य विद्यायामेव सम्भवात् । उपोपसर्गः सामीप्ये तत्प्रतीचि समाप्यते । सामीप्यतारतम्यस्य विश्रान्तेः स्वात्मनीरणात् । त्रिविधस्य सदर्थस्य निशब्दोऽपि विशेषणम् । उपनीय तमात्मानं ब्रह्मापास्तद्वयं यतः । निहन्त्यविद्यां तज्जञ्च तस्मादुपनिषद्भवेत् । निहत्यानर्थमूलं स्वाऽविद्यां प्रत्यक्तया परम् । नयत्यपास्तसम्भेदमतोवोपनिषद्भवेत् । प्रवृत्तिहेतून्निःशेषांस्तन्मूलोच्छेदकत्वतः । यतोऽवसादयेद्विद्या तस्मादुपनिषद्भवेत् । यथोक्तविद्याहेतुत्वाद्ग्रन्थोपि तदभेदतः । भवेदुपनिषन्नामा लाङ्गलं जीवनं यथेति” तस्या निखिलष्टार्थ आचार्य्यैर्दर्शितः । उपनिषद्भेदाश्च मुक्तिकोपनिषदि दर्शिता यथा । “१ईशा २केन ३कठ ४प्रश्न ५मुण्ड ६माण्डूक्य ७तित्तिरिः । ८ऐतरेयञ्च ९छान्दोग्यं १०बृहदारण्यकं तथा । ११ब्रह्म १२कैवल्य १३जाबाल १४श्वेताश्वो १५हंस १६आरुणिः । १७गर्भो १८नारायणो १९हंसो २०विन्दुर २१नादर २२शिरः श २३शिखा । २४मैत्रायणी २५कौषितकी २६बृहज्जाबाल २७तापनी । २८कालाग्निरुद्र २९मैत्रेयी ३०सुबाल ३१क्षुरि ३२मन्त्रिका । ३३सर्व्वसारं ३४निरालम्बं ३५रहस्यं ३६वज्रसूचिकम् । ३७तेजो ३८नादो ३९ध्यान ४०विद्या ४१,४२योगतत्त्वात्मबोधकम् । ४३परिव्राट् ४४त्रिशिखी ४५सीता ४६चूड़ा ४७निर्वाण ४८मण्डलम् । ४९दक्षिणा ५०शरभं ५१स्कान्दं ५२महानारायणाह्वयम् । ५३रहस्यं ५४रामतपनं ५५वासुदेवञ्च ५६मुद्गलम् । ५७शाण्डिल्यं ५८पैङ्गलं ५९भिक्षु ६०६१महच्छारीरकं शिखा६२ । ६३तुरीयातीत ६४संन्यास ६५ परिव्राजा ६६ऽक्षमालिका । ६७अव्यक्तै ६८काक्षरं ६९पूर्णा७० ७१सूर्य्याक्ष्य७२ऽध्यात्म७४कुण्डिका । ७५सावित्र्या ७६ऽऽत्मा ७७पाशुपतं ७८परब्रह्मा ७९ऽवधूतकम् । ८०त्रिपुरातापनं ८१देवी ८२त्रिपुरा ८३काठ ८भावना । ८५हृदयं ८६कुण्डली ८७भस्म ८८रुद्राक्ष ८९गण ९०दर्शनम् । ९१तारसार९२महावाक्य ९३पञ्चब्रह्मा ९४ऽग्निहोत्रकम् । ९५गोपालतापनं ९६कृष्णं ९७याज्ञवल्क्यं ९८वराहकम् । ९९शाट्यायनी १००हयग्रीवं १०१दत्तात्रेयं च १०२गारुड़म् । १०३कालि७ १०४जाबालि १०५सौभाग्य १०६रहस्य८१०७ऋच १०८मुक्तिका”

तासाञ्च मध्ये यासां यद्वेदगतत्वं तदपि शान्तिपाठमन्त्रसहितं तत्रैव दर्शितं यथा ।

“१ऐतरेय२कौषकी३।४नादविन्द्वात्मप्रबोध५निर्वाण ६मुद्गला ऽ. ७क्षमालिका ८त्रिपुरा ९सौभाग्यं १०बह्वृचा

ऋग्वेदगतानां दशसङ्ख्यकानामुपनिषदां "वाङ् मे मनसीति" शान्तिः । १ईशावास्य २बृहदारण्यक ३जावाल ४हंस ५परमहंस ६सुवाल ७मन्त्रिका ८निरालम्ब ६त्रिशिखी" १०ब्राह्मणमण्डल ११ब्राह्मणाद्वयतारक १२पैङ्गल १३भिक्षु १४।१५तुरीयातीताध्यात्म १६तारसार १७याज्ञवल्क्य १८शाट्यायनी १६मुक्तिकानां शुक्लयजुर्वेदगतानामेकोनविंशतिसङ्ख्यकानामुपनिषदां "पूर्णमदः" इति शान्तिः । १कठवल्ली २तैत्तिरीयक ३ ब्रह्म ४कैवल्य ५श्वेताश्वतर ६गर्भ ७।८नारायणामृतबिन्दु ६ ऽमृतनाद १०कालाग्निरुद्र ११क्षुरिका १२ सर्वसार १३शुकरहस्य १४तेजोबिन्दु १५ध्यानबिन्दु १६ब्रह्मविद्या १७योगतत्त्व १८दक्षिणामूर्त्ति १६स्कन्द २०शारीरका २१योगशिखै २२,२३काक्षराख्य २४ऽवधूत २५कठरुद्र २६हृदय २७योगकुण्डलिनी २८पञ्चब्रह्म २६प्राणाग्निहोत्र ३०वराह ३१कलिसन्तरण ३२सरस्वतीरहस्यानां कृष्णयजुर्वेदगतानां द्वात्रिंशत्सङ्ख्यकानामुपनिषदां "सह नाववत्विति" शान्तिः । १केन २।३छान्दोग्यारुणि ४मैत्रायणी ५मैत्रेयी ६वज्रसूचिक ७योगचूड़ामणि ८वासुदेव ६महत् १०संन्यासाऽ ११व्यक्त १२कुण्डिका १३सावित्री ६४रुद्राक्ष १५जाबालदर्शन १६ जाबालीनां सामवेदगतानां षोड़शसङ्ख्यकानामुपनिषदाम् "आप्यायन्त्विति" शान्तिः । १प्रश्न २मुण्डक ३माण्डूक्याऽ४ थर्वशिरोऽ५थर्वशिखा ६बृहज्जाबाल ७नृसिंहतापनी ८नारदपरिव्राजक ६सीता १०शरभ ११महानारायण १२रामरहस्य १३रामतापनी १४शाण्डिल्य १५परमहंस १६परिव्राजकाऽऽत्मपूर्णा १७सूर्य्यात्म १८पाशुपत १६परब्रह्म २०त्रिपुरातपन २१देवी २२भावना २३भस्म २४जाबाल २५गणपति २६महावाक्य २७गोपालतपन २८कृष्ण २६हयग्रीव ३०दत्तात्रेय ३१गारुडानामथर्ववेदगतानामेकत्रिंशत्संख्याकानामुपनिषदां "भद्रं कर्णेभिरिति" शान्तिः" । पूर्वोत्तरवाक्ये नामभेदः नामान्तरपरतया समाधेयः । २योगे च । "यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्य्यवत्तरम्" छा०उ० "उपनिषदा योगेन युक्तश्चेतय्र्थः" भा० "योगो देवतादिविषयमुपासनम्" आनन्दगि० ४धर्मे ५ निर्ज्जनस्थाने मेदि० ६ समीपसदने त्रिका० । ७द्विजातिकर्त्तव्ये चत्वारिंशत्संस्कारमध्ये वेदव्रतभेदे तच्च व्रतं गोदानाख्यकेशान्तकर्म्मणः प्राक् कर्त्तव्यं यथाह आश्वलायनगृह्यकारिका "प्रथमं स्यान्महानाम्नी द्वितीयञ्च महाव्रतम् । तृतीयं स्यादुपनिषद्गोदानं च ततः परम्" ततश्च विप्रस्य जन्मतस्त्रयोदशे वर्षे महानाम्नीव्रतं, चतुर्द्दशे महाव्रतं, पञ्चदशे उपनिषद्व्रतं, षोड़शे वर्षे गोदानम्, क्षत्रस्य ऊनविंशादिवर्षचतुष्के, वैश्यस्य एकविंशादिचतुष्के यथाक्रमं महानाम्न्यादिवेदव्रताख्यकर्म्मचतुष्टयं कर्त्तव्यम् । तत्र चूड़ादिनक्षत्रादिकमेव ग्राह्यम्" यथाह पी०धा० श्रीधरः । "तिथिनक्षत्रवाराश्च वर्णोदयनिरीक्षणम् । चौलवत् सर्वमाख्यातं सगोदानव्रतेषु च" यदा तु दैवादतीतकालानि महानाम्न्यादिव्रतानि स्युस्तदा समावर्त्तनेन सह कार्य्याणि "यद्यागामिक्रियामुख्यकालस्याप्यन्तरालवत् । गौणकालत्वमिच्छन्तीत्याद्युक्तेः । उपनिषत्सु व्यज्यते अण् । औपनिषद वेदान्तमात्रवेद्ये परब्रह्मणि । "तन्त्वौपनिषदं पुरुषं वेद" छा०उ० । उपनिषदं वेत्ति अण् । वेदान्ताभिज्ञे "शुकवद्दक्षभाव इत्यौपनिषदाः" कुसु० ।

उपनिषादिन् त्रि० उप+नि+सद्–णिनि स्त्रियां ङीप् । समीपे स्थायिनि "तद्विशमधस्तादुपनिषादिनीं करोति" शत० ब्रा० ६,४,३,६ ।

उपनिष्कर न० उप+निस्+कृ–करणे संज्ञायां घ । महति राजमार्गे अमरः । तत्र हि महतामपि सैन्यानामसंवादेन निष्क्रमणात्तथात्वम् । [अमरः ।

उपनिष्क्रमण न० उप+निस्–क्रम करणे ल्युट् । राजपथे ।

उपनिहित त्रि० उप+नि–धा–क्त । १उपनिधित्वेन स्थापिते द्रव्ये उपनिधिशब्दे मिता० उदा० २स्थापिते च ।

उपनीत त्रि० उप+नी–क्त । १कृतोपनयनसंस्कारे "अथोपनीतं विधिवद्विपश्चितः" रघुः । २ज्ञानलक्षणासन्निकर्षेण ज्ञाते च "उपनीतं विशेषणतयैव भासते मानसे तु नायं नियमः" प्राचीनगाथा उपनयशब्दे दृश्या ३समीपे प्रापिते ४उपस्थापिते च ।

उपनेतृ पु० उप+नी–तृच् । १उपनयकर्त्तरि गुरौ २उपढौकयितरि त्रि० स्त्रियां ङीप् । "नियमविधिजलानां बर्हिषां चोपनेत्री" कुमा० ।

उपनेत्र न० उपगतं नेत्रम् अत्या०स० । नेत्रसमीपे धार्य्ये काचादिनिर्मिते नेत्रतिमिरोपकारके द्रव्यभेदे (चसमा)

उपन्यास पु० उप+नि+अस–घञ् । १वाक्योपक्रमे २वाक्यप्रयोगे उपचारच्छलशब्दे उदा० । "तस्माद्ब्रह्मजिज्ञासोपन्यासमुखेन" शारी०भा० । "मालविकायामयमुपन्यासः शङ्कयति" मालवि० । ३विचारे "श्रुण्वमुपन्यासं निबोधत" मनुः । "उपन्यासं विचारम्" कुल्लू० ।

४विश्वासेनान्यसमीपे स्वद्रव्यन्यासे उपनिधौ च ।

उपपति पु० उपमितः पत्या अवा०स०। जारे । "उपपतिरिव नीचैः पश्चिमान्तेन चन्द्रः" माघः । तस्य पतिवत् स्त्रिया रतिहेतुत्वात्तत्समत्वम् । "यस्य चोपपतिर्गृहे" "स्तेयन्ति ये चोपपपतिम्" मनुः "सन्धये जारं गेहायोपपतिम्" यजु०३०,६ । गुप्तव्यभिचारमात्रे जारत्वम् पतिसमीपे तस्य गेहस्थित्या व्यभिचारे उपपतित्वमित्यनयोर्भेदः ।

उपपत्ति स्त्री उप+पद-क्तिन् । १युक्तौ, २सङ्गतौ ३हेतौ च "श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः" "उपपत्तिभिर्हेतुभिरिति" मथुरानाथः । "उपपत्तिमदूर्जितं वचः" "प्रियेषु यैः पार्थ ! विनोपपत्तेः" किरा० । "लक्षणा शक्यसम्बन्धस्तात्पर्य्यानुपपत्तितः" भाषा० । "विवक्षितगुणोपपत्तेः" शा० सू० । "उपक्रमोपसंहारावभ्यासोऽपूर्व्वता फलम् । अर्थवादोपपत्ती च हेतुस्तात्पर्य्यनिर्णये" इत्युक्तेस्तस्याः प्रकरणप्रतिपाद्यार्थनिर्णायकत्वं यथा । छान्दोग्ये ६प्र० "यथा सौम्यैकेन मृत्पिण्डेन विज्ञातेन सर्वं मृण्मयं विज्ञातं भवति वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इत्यादिना विकारमात्रस्य वाचारम्भणकथनरूपा युक्तिः । ४उपाये च "कथोपपत्तिं छलनापरोऽपराम्" माघः । "अपेक्षितान्योन्यबलोपपत्तिभिः" माघः । ५प्राप्तौ ६सिद्धौ च "स्वार्थोपपत्तिं प्रति दुर्बलाशः" "असंशयं प्राक् तनयोपपत्तेः" रघुः । युक्तयश्च नानाविधाः सुश्रुते दर्शिताः ताश्च तन्त्रयुक्तिशब्दे दर्शयिष्यन्ते । "असद्वाक्यप्रयुक्तानां वाक्यानां प्रतिषेधनम् । स्ववाक्यसिद्धिरिति च क्रियते तन्त्रयुक्तिभिः" सुश्रुते तत्फलमुक्तम् ।

उपपद न० उपोच्चारितं पदम् प्रा०स० । समीपोच्चारिते पूर्व्वमुच्चार्य्ये शब्दे "तस्याः सराजोपपदं निशान्तम्" रघुः । "फलन्ति कल्पोपपदास्तदेव" माघः । राजनिशान्तं कल्पद्रुमा इत्यर्थः । २नामोत्तरमुच्चारिते शर्म्मवर्म्मादिरूपे शब्दे, (उपाधि) व्याकरणे प्रत्ययादिविधायकसूत्रे ३सप्तम्यन्तपदेन निर्द्दिश्यमाने पदे च । यथा कर्म्मण्यण् इत्यादौ कर्म्मणीतिसप्तम्यन्तं पदम् अण्प्रत्ययविधाने उपपदम् । "उपपदमतिङ्" पा० । "गतिकारकोपपदानां कृद्भिः समासवचनं प्राक् सुबुत्पत्तेः" वार्त्ति०उक्तेः कुम्भकार इत्यादौ सुबुत्पत्तेः प्राक् समासे उपपदसमासः । उपपदेन समीपस्थपदेन योगे विभक्तिरुपपदविभक्तिः "उपपदविभक्तेः कारकविभक्तिर्बलीयसीति" व्या०प०

उपपन्न त्रि० उप+पद-क्त । १युक्तियुक्ते, "उपपन्नं ननु शिवमिति" रघुः । २प्राप्ते च "अतीन्द्रियेष्वप्युपपन्नदर्शनः" रघु. ३सतोगुणान्तराधानरूपसंस्कारयुक्ते "अयञ्च नितुरः पितृद्रोही नात्युपपन्नसंस्थानः" दशकुमा० ४उत्पन्ने च ।

उपपात पु० उप+पत-घञ् । १हठादागतौ २फलोन्मुखत्वे ३नाशे च । "कर्म्मोपपाते प्रायश्चित्तं तत्कालम्" कात्या० २५,१,१। "उपपातो विनाशोऽभ्येष इत्यनर्थान्तरम्" कर्कः

उपपातक न० पातयति नरके पत-णिच्-ण्वुल् उप अल्पार्थे प्रादिस० वा प्रा०स० । पातकसदृशे ततोन्यूनफलके पापभेदे । "महापातकतुल्यानि पापान्युक्तानि यानि तु । तानि पातकसंज्ञानि तन्न्यूनमुपपातकमिति" पैठीनसिः । पतनञ्च "द्विजातिकर्म्मभ्योहानिः पतनं परलोकासिद्धिस्तमेके नरकम्" गौतमोक्तम् । तस्य न्यूनत्वञ्चाल्पफलदातृत्वेन तस्याल्पफलदातृत्वमाहाङ्गिराः "पातके तु सहस्रं स्यात् महत्सु द्विगुणं तथा । उपपापे तुरीयं स्यात् नरकं वर्षसंख्यया" ।

येन येन कर्म्मणा च तज्जन्यते तन्निरूपितं प्रा०वि० । तत्र मनुः । "गोवधोऽयाज्यसंयाज्यपारदार्य्यात्मविक्रयः । पितृमातृगुरुत्यागः स्वाध्यायाग्न्योः सुतस्य च । परिवित्तिता नुजेन परिवेदनमेव च । तयोर्दानञ्च कन्यायास्तयोरेव च याजनम् । कन्याया दूषणञ्चैव वार्द्धुषित्वं व्रतच्युतिः । तड़ागारामदाराणामपत्यस्य च विक्रयः । व्रात्यता बान्धवत्यागो भृताध्यापनन्तथा । भृताच्चाध्ययनादानमपण्यानाञ्च विक्रयः । सर्व्वाकरेष्वधीकारो महायन्त्रप्रवर्त्तनम् । हिंसौषधीनां स्त्र्याजीवोऽभिचारो मूलकर्म्म च । इन्धनार्थमशुष्काणां द्रुमाणामवपातनम् । आत्मार्थञ्च क्रियारम्भो निन्दितान्नादनन्तथा । अनाहिताग्निता स्तेयमृणानाञ्चानपक्रिया । असच्छास्त्राधिगमनं कौशीलव्यस्य च क्रिया । धान्यकुप्यपशुस्तेयं मद्यपस्त्रीनिषेवणम् । स्त्रीशूद्रविट्क्षत्रवधो नास्तिक्यञ्चोपपातकम्" । "अस्यार्थः । अयाज्यसंयाज्यमिति प्रतिपदाध्यापनञ्च यजति । त्यागो योगक्षेमाकरणम् । अनिमित्तं स्वाध्यायत्यागोऽधीतवेदविस्मरणम् । अग्नित्याग आलस्यादिना । सुतत्यागः पोषणविनयाधानाद्यकरणेन चकाराद्भार्य्यात्यागोऽपि । परिवित्तिता कनिष्ठस्य भ्रातुर्दाराग्निहोत्रसंयोगे सति ज्येष्ठस्य भ्रातुर्दाराग्निहोत्रसंयोगप्रागभावः । कनिष्ठस्य परिवेदनं, चकारात् कन्याया अपि तथाभूतायाः परिवेदनीयत्वम् । परिवित्तिपरिवेदयोर्वरत्वेन कन्यादानम् । तयोरेव विवाहादौ ऋत्विक्कार्य्यमिति । कन्याया दूषणमकन्येत्युक्तिः अङ्गुल्या योनिविदारणं वा

वार्द्धुषिकत्वं ब्राह्मणक्षत्रिययोः । व्रतच्युतिरवकीर्णित्वम् । दाराणामपि परिणीतानामपि विक्रयः । अपत्यस्यानेकविधस्य । व्रात्यता यथाकालमनुपनयनमसोमयाजित्वञ्च । बान्धवत्यागो बान्धवस्य सपिण्डादेरनिमित्तत्यागः । भृतकाध्यापनम् मूल्येन वेतनादिना विद्यार्पणम् । भृताच्च वेतनपरिगृहीताद्वेदादि विद्याग्रहणम् । अपण्यानां लाक्षादीनां सक्कत्, गोरसादीनां चासकृत्, ब्राह्मणेन विक्रयः । सर्वाकरेषु सुवर्णाद्युत्पत्तिस्थानेषु नियोगः । तैलादियन्त्रस्य शस्त्रतेजनादियन्त्रस्य च प्रवर्त्तनम् । धान्यादीनां यथा कथञ्चित्ग्राहणं स्त्रियार्ज्जितधनजीवनम् । अभिचारः परहिंसार्थं जपादिकर्म, मूलकर्म वशीकरणं मूलादिक्रिया । इन्धनार्थम् द्रुमाणामशुष्काणां छेदनम् । आत्मार्थं पाकक्रिया न वैश्वदेवाद्यर्था । गणदेवलकृतस्कारादाद्यन्नभक्षणम् । सामार्थ्येऽपि श्रौतस्मार्त्ताग्न्यपरिग्रहः । स्तेयं हेमनराश्वरजतभूमिमणिनिक्षेपेतरद्रव्यहरणम् । देवर्षिपितृसम्बन्धिन ऋणस्यानपयोधनम् । असच्छास्त्राभिगमनम् पाषण्डशास्त्राभ्यासः । कुशीलवस्य कर्म तौर्य्यत्रिकं तस्य सततानुष्ठानम् । कुप्यस्यासारद्रव्यस्य ताम्रकांस्यादेः स्तेयम् मद्यपस्त्रिया मद्यपायाश्च स्त्रिया निषेवणम् ब्राह्मणेन । स्त्रियाः शूद्रवैश्यक्षत्रियाणाञ्च वधः । नास्तिक्यं नास्ति परलोक इति व्यवसितिः । उपपातकमेकैकम् “एकैकमुपपातकमिति” याज्ञवल्क्यवचनात् । एवञ्च गोवधादिनास्तिक्यान्तानि पञ्चाशदुपपातकानि । विष्णुना “अनृतवचनमुत्कर्षे राजगामि च पैशुन्यम् । गुरोश्चालीकनिर्बन्धः वेदनिन्दाऽधीतस्य च त्यागः” अन्यानि च मनूक्तानि उक्त्वा “उपपातकिनश्चैते कुर्य्युश्चान्द्रायणं नराः” इति उपपातके दर्शितम् । तत्र सभादिसभासु परापकारव्यतिरेकेणात्मन उत्कर्षख्यापनं तथा राज्ञः पुरतः परापकारव्यतिरेकेण परदोषकीर्त्तनम् । श्रुतमात्रोपकारकगुरोर्मिथ्याभिशंसनम् । तथा परिहासादिना वेदनिन्दा तथाऽसच्छास्त्राभियोगेनाधीतवेदविस्मरणञ्च यद्यपि तदुपपातकं गुरूणां पुनरेतेषां मनुनाऽनुपातके दर्शितत्वात् । अन्यानि चोपपातकानि स्मृत्यन्तरेऽनुसन्धेयानि” ।

“गोवधो व्रात्यता स्तेयमृणानाञ्चानपक्रिया । अनाहिताग्निताऽपण्यविक्रयः परिवेदनम् । भृताद्ध्ययनादानं भृतकाध्यापनन्तथा । पारदार्य्यं पारिवित्त्यं वार्द्धुष्यं लवणक्रिया । स्त्रीशूद्रविट्क्षत्रवधो निन्दितार्थोपजीवनम् । नास्तिक्यं व्रतलोपश्च सुतानाञ्चैव विक्रयः । धान्यकुप्यपशुस्तेयमयाज्यानाञ्च याजनम् । पितृमातृसुतत्यागः तडागारामविक्रयः । कन्यासन्दूषणञ्चैव परिवेदकयाजनम् । कन्याप्रदानन्तस्यैव कौटिल्यं व्रतलोपनम् । आत्मनोऽर्थे क्रियारम्भो मद्यपस्त्रीनिषेवणम् । स्वाध्यायाग्निसुतत्यागो बान्धवत्याग एव च । इन्धनार्थं द्रुमच्छेदः स्त्रीहिंसौषधजीवनम् । हिंस्रयन्त्रविधानञ्च व्यसनान्यात्मविक्रयः । शूद्रप्रेष्यं हीनसख्यं हीनयोनिनिषेवणम् । तथैवानाश्रमे वासः परान्नपरिपुष्टता । असच्छास्त्राधिगमनमाकरेष्वधिकारिता । भार्य्याया विक्रयश्चैषामेकैकमुपपातकम्” या० । “गोवधो गोपिण्डव्यापादनम् । कालेऽनुपनीतत्वं व्रात्यता । ब्राह्मणसुवर्णेतरमव्यतिरिक्तपरद्रव्यापहरणं स्तेयम् । गृहीतस्य सुवर्णादेरप्रदानमृणानामनपाकरणम् तथा देवर्षिपितॄणां सम्बन्धिऋणस्यानापाकरणञ्च । सत्यधिकारे अनाहितानग्नित्वम् । ननु ज्योतिष्टोमादिकामस्तुतयः स्वाङ्गभूताग्निनिष्पत्त्यर्थमाधानमनुतिष्ठन्त इति मीमांसकप्रसिद्धिरतश्च यस्याग्निभिः प्रयोजनन्तस्य तदुपायभूताधाने प्रवृत्तिर्व्रीह्याद्यर्थिन इव धनार्जने यस्य पुनरग्निभिः प्रयोजनं नास्ति तस्याप्रवृत्तिरिति कथमनाहिताग्नितादोषः उच्यते । अस्मादेवाधानस्यावश्यकत्ववचनादनित्यस्तुतयोऽपि साधिकारत्वाविशेषादाधानस्य प्रयोजिका इति स्मृतिकाराणामभिप्रायो लक्ष्यत इत्यदोषः । तथा अपण्यस्य लवणादेर्विक्रयः । सहोदरस्य ज्येष्ठस्य तिष्ठतः कनीयसोऽग्निदारान्निसंयोगः परिवेदनम् । पणपूर्व्वाध्यापकादध्ययनग्रहणम् । पणपूर्व्वाध्यापनम् । परदारसेवनञ्च स्वदारतल्पमव्यतिरेकेण । पारिवित्त्यं कनीयसि कृतविवाहे ज्येष्ठस्य विवाहराहित्यम् । वार्द्धुष्यम् प्रतिषिद्धवृद्ध्युपजीवित्वम् । लवणक्रिया लवणस्योत्पादनम् । स्त्रियावधो ब्राह्मण्या अपि आत्रेयीव्यतिरेकेण । शूद्रवधः । अदीक्षितविट्क्षत्रवधः निन्दितार्थोपजीवनम् अराजन्यादर्जितार्थोपजीवनम् । नास्तिक्यं नास्ति परलोक इत्याद्यभिनिवेशः । व्रतलोपो ब्रह्मचारिणः स्त्रीप्रसङ्गः । सुतानामपत्यानां विक्रयः धान्यं व्रीह्यादि कुप्यमसारद्रव्यन्त्रपुसीसादि पशवो गवादयस्तेषामपहरणम् । “गोवधो व्रात्यतास्तेयम्” इत्यनेन स्तेयग्रहणेनैव सिद्धे पुनर्धान्यकुप्यादिस्तेयग्रहणं निन्दार्थमतो धान्यादिव्यतिरिक्तद्रव्यस्तेये नावश्यमेतदेव प्रायश्चित्तमपि तु ततोऽधूनमपि भवतीत्र । एतेन बान्धवत्यागपक्षे-

नैव शिष्टे पुनः पित्रादित्यागग्रहणं व्याख्यातम्। अयाज्यानाञ्जातिकर्मदुष्टानां शूद्रव्रात्यादीनां याजनम्। पितृमातृसुतानामपतितानां त्यागो गृह्याग्निष्काशनम्। तडागस्यारामस्य चोद्यानोपवनादेर्विक्रयः। कन्याया दूषणमङ्गुल्यादिना योनिविदारणं न तु सम्भोगस्तस्य "सखिभार्य्या कुमारीष्विति" गुरुतल्पसमत्वस्योक्तत्वात्। परिविन्दकयाजनन्तस्य च कन्याप्रदानम्। कौटिल्यङ्गुरोरन्यत्र गुरुविषयस्य तु कौटिल्यस्य सुरापाणसमत्वमुक्तम्। पुनर्व्रतलोपग्रहणं शिष्टाप्रतिषिद्धेष्वपि हरिचरणकमलप्रेक्षणात्मकाम्बूलादिकन्न भक्षयामीत्येवंरूपेषु प्राप्त्यर्थं न तु स्नातकव्रतप्राप्त्यर्थन्तत्र "स्नातकव्रतलोपे च प्रायश्चित्तमभोजनमिति" मनुना लघुप्रायश्चित्तस्य प्रतिपादितत्वात्त यात्मार्थञ्च पाकलक्षणक्रियारम्भः "अघं स केवलम्भुङ्क्ते यः पचत्यात्मकारणादिति" तस्यैव प्रतिषिद्धत्वात्। क्रियामात्रविषयत्वे तु प्रतिषेधकल्पनागौरवं स्यात्। मद्यपायाः स्त्रियोजायाया अपि निषेवणमुपभोगः। स्वाध्यायत्यागो व्याख्यातः अग्नीनाञ्च श्रौतस्मार्त्तानान्त्यागः सुतत्यागः संस्काराद्यकरणम्। बान्धवानाम्पितृव्यमातुलादीनान्त्यागः सति विभवे अपरिरक्षणम्। पाकादिदृष्टप्रयोजनसिद्ध्यर्थमार्द्रद्रुमच्छेदोन त्वाहवनीयपरिरक्षणार्थमपि। स्त्रिया हिंसया औषधेन च जीवनं वर्त्तनं स्त्रीहिंसौषधजीवनम्। तत्र स्त्रीजीवनं नाम भार्य्याम्पण्यभावेन प्रयोज्य तल्लब्धोपजीवनम् स्त्रीधनोपजीवनं वा। हिंसया जीवनम्प्राणिवधेन जीवनम्। औषधजीवनं वशीकरणेन। हिंस्रयन्त्रस्य तिलेक्षुपीडनकरस्य प्रवर्त्तनम्। व्यसनानि मृगयादीन्यष्टादश। आत्मविक्रयोद्रव्यग्रहणेन परदास्यकरणम्। शूद्रसेवनं हीनेषु मैत्रीकरणम्। अनूढसवर्णदारस्य केवलहीनवर्णदारोपयमनम्, साधारणस्त्रीसम्भोगश्च। अनाश्रमे वासः अग्निहोत्राश्रमित्वम्। परपाकरतित्वम्। असच्छास्त्रस्य चार्वाकादिग्रन्थस्याधिगमः। सर्वाकरेषु सुवर्णाद्युत्पत्तिस्थानेषु राजाज्ञयाधिकारित्वम्। भार्य्याया विक्रयः। चशब्दात्मन्त्राद्युक्ताभिचाराऽमतिपूर्व्वलशुनादिभक्षणादेर्ग्रहणम्। एषां गोवधादीनाम्प्रत्येकमुपपातकसंज्ञा वेदितव्या" मिता०। उपपापमप्यत्र। "जलोदरं यकृत्प्लीहाशूलरोगव्रणानि च। श्वासजीर्णज्वरच्छर्द्दि भ्रममोहगलग्रहाः। रक्तार्बुदविसर्पाद्या उपपापोद्भवा गदाः" शाता०।

उपपातिन् त्रि० उप+पत–णिनि स्त्रियां ङीप्। १हठादागते। २अतर्कितोपस्थिते च। "रक्षेयुपपातिनोऽनर्थाः" हितो०

उपपाद पु० उप+पद–घञ्। १उपपत्तौ। उपगतः पादम् अत्या०समा०। २पादोपगते त्रि०। स्त्रियां गौरा०ङीष्।

उपपादक त्रि० उपपादयति उप+पद–णिच्–ण्वुल्। उपपत्तियुक्तकारके पद–ण्वुल्। उपपत्तियुक्ते २युक्तियुक्ते च।

उपपादन न०उप+पद+णिच् ल्युट्। १युक्त्या समर्थने २सम्यक्प्रतिपादने ३प्राप्तियुक्तकरणे च। "लोहपिण्डं यथा वह्निः प्रविश्य ह्यतिपादयेत्। तथात्वमपि जानीहि गर्भे जीवोपपादनम्" भा० आश्व०१८अ०।

उपपादित त्रि० उप+पद–णिच्–क्त। १युक्त्या समर्थिते, "उपपादितश्चैतत् पुरस्तात्" जग०२सम्यक् प्रतिपादिते च

उपपादुक त्रि० उपपद्यते उप+पद–उकञ्। दृष्टकारणनिरपेक्षतया अदृष्टमात्रसहकृतेभ्योऽणुभ्यो जायमाने देवदेहे नारकिदेहे च" हेम०टि "ओपपादुका देवाः" अमरः।

उपपाद्य त्रि०उप+पद–णिच्–यत्। १युक्त्या समर्थनीये २प्रतिपाद्ये च। ल्यप्। २उपपत्तियुक्तं कृत्वेत्यर्थे अव्य०।

उपपुर न०समीपस्थं पुरं प्रा०स०। पुरसमीपस्थे शाखानगरे। उपपुरे भवः अण् उत्तरपदवृद्धिः। उपपौर तद्भवे त्रि०।

उपपुराण न० उपगतमनुगतं पुराणम् अत्या०स०। व्यासोक्तादष्टादशपुराणसदृशेषु नानामुनिप्रणीतेषु नानाविधेषु पुराणेषु। तानि यथा। आद्यं सनत्कुमारोक्तं नारसिंहमतः परम्२। तृतीयं वायवीयञ्च ३कुमारेणानुभाषितम्। चतुर्थं शिवधर्माख्यं ४ साक्षान्नन्दीश भाषितम्। दुर्वासोक्तमाश्चर्य्यं ५नारदीयमतः परम्६। नन्दिकेश्वरयुग्मञ्च७, ८तथैवोशनसेरितम्९, कापिलं वारुणं१० शाम्बं ११ कालिकाह्वयमेव च १२। माहेश्वरं १३ तथा पाद्मं १४ दैवं १५ सर्व्वार्थसाधकम् पराशरोक्तमपरं १६ मारीचं १७ भास्कराह्वयम् १८। मत्स्य०कूर्मपु०। हेमाद्रौ तु एतद्वचनमन्यथा पठितम् यथा "अन्यान्युपपुराणानि मुनिभिः कथितानि तु। आद्यं सनत्कुमारोक्तं नारसिंहमतःपरम्। तृतीयं नारदप्रोक्तं कुमारेण तु भाषितम्। चतुर्थं शिवधर्माख्यं साक्षान्नन्दीशभाषितम्। दुर्वाससोक्तमाश्चर्य्यं नारदोक्तमतःपरम्। कापिलं मानवं चैव तथैवोशनसेरितम्। ब्रह्माण्डं वारुणं चाथ कालिकाह्वयमेव च। माहेश्वरं तथा शाम्बं सौरं सर्वार्थसञ्चयम् पराशरोक्तमपरं तथा भागवताह्वयम्। इदमष्टादशं प्रोक्तं पुराणं कौर्मसंज्ञितम्। चतुर्द्धा संस्थितं पुण्यं संहितानां प्रभेदतः"। अत्र मुद्रितपुस्तके भागवत

द्वयमिति पाठोऽसङ्गत उपपुराणेषु भागवतद्वयाप्रसिद्धेः। तच्चाग्रे व्यक्तीभविष्यति। पुराणोपपुराणलक्षणं च १२स्क० भागवते सामान्यत उक्तं यथा “सर्गोऽस्थाथ विसर्गश्च वृत्तीरक्षान्तराणि च। वंशोवंशानुचरितं संस्था हेतुरपाश्रयः। दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः। केचित् पञ्चविधं ब्रह्मन्। महदल्पव्यवस्थया”। “अव्याकृतगुणक्षोभान्महतस्त्रिवृतोऽहमः। भूतसूक्ष्मेन्द्रियार्थानां सम्भवः सर्ग१ उच्यते। पुरुषानुगृहीतानामेतेषां वासनामयः। विसर्गोऽयं २समाहारोवीजाद्वीजं चराचरम्। वृत्तिर्भूतानि भूतानां चराणामचराणि च। कृता तेन नृणां स्वत्र कामाच्चोदनयापि वा। रक्षा४ऽच्युतावतारेहा विश्वस्यानुयुगे युगे। तिर्य्यङ्मर्त्त्यर्षिदेवेषु हन्यन्ते यैस्त्रयीद्विषः। मन्वन्तरं ५मनुर्देवा मनुपुत्राः सुरेश्वराः। ऋषयोऽंशावताराश्च हरेः षड्विधमुच्यते। राज्ञां ब्रह्मप्रसूतानां वंशस्त्रैकालिकोऽन्वयः६। वंशानुचरितं ७तेषां वृत्तं वंशधराश्च ये। नैमित्तिकः प्राकृतिकोनित्य आत्यन्तिकोलयः। संस्थेति ८कविभिः प्रोक्तश्चतुर्द्धास्य स्वभावतः। हेतु९र्जीवोऽस्य सर्गादेरविद्याकर्म्मकारकः। यं चानुशयिनं प्राहुरव्याकृतमुतापरे। व्यतिरेकान्वयौ यस्य जाग्रत्स्वप्नसुषुप्तिषु। मायामयेषु तद्ब्रह्म जीववृत्तिष्वपाश्रयः १०। पदार्थेषु तथा द्रव्यं तन्मात्रं रूपनामसु। वीजादिपञ्चतान्तासु ह्यवस्थासु युतायुतम्। विरमेत यदा चित्तं हित्वा वृत्तित्रयं स्वयम्। योगेन वा तदात्मानं विदेहा त्मा निवर्त्तते। एवंलक्षणलक्ष्याणि पुराणानि पुराविदः। मुनयोऽष्टादश प्राहुः क्षुल्लकानि महान्ति च”। अत्र क्षुल्लकानीत्युक्तेः उपपुराणस्यापि उक्तदशलक्षणवत्त्वं पञ्चलक्षणादिमत्त्वं बोध्यम्। तेषाञ्च संख्यादिनिरूपणम् पञ्चलक्षणवत्त्वञ्च मत्स्यपुराणे उक्तं यथा। “पाद्मे पुराणे या प्रोक्ता नरसिंहोपवर्णना। तत्राष्टादशसाहस्रं नारसिंहमिहोच्यते। नन्दाया यत्र माहात्म्यं कार्त्तिकेयेन वर्ण्यते। नन्दीपुराणं तल्लोके व्याख्यातमिति कीर्त्त्यते। यत्र साम्बं पुरस्कृत्य भविष्यति कथानकम्। प्रोच्यते तत्पुनर्लोके साम्बमेव मुनिव्रताः!। एवमादित्यसंज्ञश्च तत्रैव परिपद्यते” इत्युपक्रम्य अष्टादशभ्यस्तु पृथक् पुराणं यत् प्रदृश्यते। विजानीध्वं द्विजश्रेष्ठास्तदेतेभ्यो विनिर्गतम्। पञ्चाङ्गवत् पुराणं स्यादाख्यानमितरत् स्मृतम्। सर्गश्च प्रतिसर्गश्च वंशोमन्वन्तराणि च। वंशानुचरितञ्चेति पुराणं पञ्चलक्षणम्। ब्रह्मविष्ण्वर्करुद्राणां माहात्म्यं भुवनस्य च। ससंहार प्रदृश्येत पुराणे पञ्चवर्णिता। धर्म्मश्चार्थश्च कामश्च मोक्षश्चपरिकीर्त्त्यते। सर्व्वेष्वपि पुराणेषु तद्विरुद्धे च यत्फलम्। सात्त्विकेषु च कल्पेषु माहात्म्यमधिकं हरेः। राजसेषु कल्पेषु च माहात्म्यं ब्रह्मणो विदुः। तद्वदग्नेश्च माहात्म्यं तामसेषु शिवस्य च। सङ्कीर्णेषु सरस्वत्याः पितृणाञ्च निगद्यते”। “हेमाद्रौ कालिकापुरा० कस्य किंमूलकत्वमिति कथनप्रस्तावे नारसिंहस्य पाद्ममूलकत्वमुक्त्वा “इदम् यत् कालिकाख्यन्तु मूलं भागवतन्तु तत्” इत्युक्तं तत्र भागवतं तत्तस्य कालिकाख्यस्य मूलमित्यर्थः। भागवतशब्देनात्र देवीभागवतं ग्राह्यं तयोरुभयोरपि कालिकादेवीमाहात्म्यकीर्त्तनेन एकदेवताप्रतिपादकत्वेन एकमूलत्वौचित्यात्। न तु वैष्णवभागवतं तस्य विष्णुदेवताकत्वेनैकदेवताकत्वाभावेन तन्मूलत्वासम्भवात्। एवञ्च देवीभागवतमेव महापुराणमिति केचित्। विष्णुभागवतमेव महापुराणमिति तु वहवः। तत्र हेमाद्रौ मत्स्यपुरा० “वृत्रासुरवधोपेतं तद्भागवतमुच्यते। सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः। तद्वृत्तान्तोद्भवं लोके तद्भागवतमुच्यते। लिखित्वा तच्च यो दद्याद्धेमसिंहसमन्वितम्। पौर्णमास्यां प्रोष्ठपद्याम् स याति परमं पदम्। अष्टादश सहस्राणि पुराणं तत् प्रकीर्त्तितम्” इति महापुराणान्तर्गतभागवतलक्षणमुक्तं वैष्णवे भागवते तु सारस्वतकल्पोद्भवनरादिकथाऽभावात् तल्लक्षणाऽभावेन नैतत् महापुराणं किन्तु उपपुराणम्। देवीभागवतं तु सारस्वतकल्पोद्भवनरादिकथावर्णनेन उक्तलक्षणवत्त्वेन महापुराणमिति पूर्वेषामाशयः। देवीभागवतं विष्णुभागवतञ्चोभयमपि अष्टादशसाहस्रं द्वादशस्कन्धयुक्तञ्चेति द्वयोर्महापुराणत्वसंशये विष्णुभागवतस्य तथात्वे वहूनां विवादात् तन्निर्णयाय देवीभागवतटीकायां यथा व्यवस्थापितं तत् प्रदर्श्यते “तत्र तावत् पुराणेषु भागवतद्वयं प्रसिद्धमेकं महापुराणान्तर्गतमपरमुपपुराणान्तर्गतं लोकेऽप्युपलम्भोद्वयोर्देवीभागवतनाम्ना विष्णुभागवतनाम्ना चास्त्येव तत्रैकं महापुराणान्तर्गतमन्यदुपपुराणान्तर्गतमित्यपि निर्विवादमेव। तथापि किन्देवीभागवतं महापुराणमन्यदुपपुराणमथ वा विष्णुभागवतं महापुराणमन्यदुपपुराणमिति संशये केचिद्विष्णुभागवतमेव महापुराणमिति वदन्ति केचिद्देवीभागवतमेव महापुराणमिति वदन्ति। तत्र प्रथमपक्षैकदेशिनः केचिदुपपुराणेषु द्वितीयभागवतं नास्त्येव महापुराणेष्वेवैकं भागवतं प्रसिद्धं तच्च विष्णु

भागवतमेव न देवीभागवतं देवीभागवतं तु निर्मूलमेवेति वदन्ति। द्वितीयपक्षैकदेशिनोऽपि विष्णुभागवतं वोपदेवकृतमिति वदन्ति। वस्तुतस्तूभयोरपि पुराणयोः पुराणमतभेदेन महापुराणत्वमुपपुराणत्वञ्च। ननु पुराणेष्वेकस्य भागवतं प्रसिद्धं न तूपपुराणेषु द्वितीयमस्तीति चेन्न कूर्म्मगरुडपाद्मादिषु द्वितीयस्य स्पष्टपरिगणनात्। तथा हि हेमाद्रौ दानप्रस्तावे कूर्म्मपुराणे' अष्टादश पुराणान्युक्त्वा "अन्यान्युपपुराणानि मुनिभिः कथितानि तु। आद्यं सनत्कुमारोक्तं नारसिंहमतः परमित्यादि" पराशरोक्तं प्रवरन्तथा भागवतद्वयमिति" तथा गारुडे तत्त्वरहस्ये द्वितीयांशेऽष्टमकाण्डे प्रथमाध्याये प्रथमतो महापुराणानां सात्त्विकादिभेदेन विभागमुक्त्वा लघुपुराणानां सात्त्विकादिभेदेन विभागप्रदर्शनपरे ग्रन्थेऽप्युक्तं "पुराणम्भागवतन्दौर्गं नन्दीप्रोक्तं तथैव च। पाशुपत्यं रैणुकञ्च भैरवं च तथैव चेति"। तथा तत्पूर्व्वमपि "विष्णुधर्म्मोत्तरं चैव तत् भागवतन्तथेति"। तन्त्रम्भागवतन्तथेति पाठेऽपि तन्त्रं शास्त्रमित्यर्थः तद्विशेषणेन चोत्तमत्वं सूचितं तथा पाद्मे शकुनपरीक्षायां "ब्राह्मम्पाद्मं वैष्णवञ्च मार्तण्डं नारदेरितमित्यादि"। तथैव गदितं राम पुराणाद्यापिलन्तथा। वाराहं ब्रह्मवैवर्त्तं शकुनेषु प्रशस्यते। शैवम्भागवतन्दौर्गम्भविष्योत्तरमेव चेति"। तथा पाद्मे भागवतमाहात्म्ये एकोनविंशेऽध्याये उपपुराणेषु "शैवमादिपुराणञ्च देवी भागवतन्तथेति" तथा मधूसूदनसरस्वतीकृतसर्व्वशास्त्रार्थसंग्रहेऽप्युपपुराणमध्ये भागवतम्परिगणितं नागोजीभट्टादिभिश्च, धर्म्मशास्त्रग्रन्थेषु एवमन्यैरपि निबन्धकारैरिति। ननु देवीभागवतस्य "तत्र भागवतम्पुण्यं पञ्चमं वेदसम्मितम्" इति प्रथमाध्यायस्थस्ववचनेनाष्टादश महापुराणेषु पञ्चममिदं पुराणमिति स्वस्य महापुराणत्वं बोधयतस्तस्य कथमन्यपुराणवचनमुपपुराणत्वं बोधयेत्तस्मादेवं कचित् इष्टपरमिति चेन्न नारदीयशिववायव्यादित्य पुराणानां स्वस्वेनान्यमुखेन वा महापुराणत्वेन प्राय मानानामन्यपुराणेषूपपुराणत्वस्य व्यवस्थापनात् पुराणमतभेदेनैकस्यापि पुराणस्य महापुराणत्वोपपुराणत्वसिद्ध्या तद्विरोधाभावात्। पुराणभेदेन मतभेदस्तु बहुशः प्रसिद्धः। वैष्णवपुराणेषु सात्त्विकत्वं शैवपुराणेषु तामसत्वं, वैष्णवपुराणमतेन, शैवपुराणेषु सात्त्विकत्वं, वैष्णवपुराणेषु तामसत्वं 'दश शैवपुराणानि सात्त्विकानि विदुर्बुधाः। तामसानि च चत्वारि वैष्णवानि प्रचक्षते"। इति स्कान्दे शैवपुराणमतेनेत्येवंप्रकारेणेति"।

ततः प्रसङ्गागतमन्यदुक्त्वा वृत्रासुरवधोपेतमित्यनेन पुराणे प्रतिपाद्यदेवकर्त्तृकवध एवाभिप्रेत इति व्यवस्थाप्य तत्रैवोक्तं यथा "देवीभागवतातिरिक्तसर्वपुराणेषु देवीकृतो वृत्रासुरवधो न कचिदप्यस्ति इन्द्रकृतस्यैव तस्य सत्त्वात् केवलं देवीभागवत एव देवीकृतः सोऽस्ति तदुपग्रहणेन तु देवीभागवते स्वसम्मतिर्दर्शितेति युक्तमेव, अनन्तरं च तत्रैव पुराणदानप्रस्तावे "ददाति सूर्य्यभक्ताय यस्तु भागवतं द्विजाः। सर्वपापविनिर्मुक्तः सर्वव्याधिविवर्ज्जितः। जीवेद्वर्षशतं साग्रमन्ते वैवस्वतं पदमिति" पठितम्। अत्र च स्वसम्मतं भागवतमेव ग्रहीतुमुचितम्। किञ्चेदं वचनं देवीभागवतपक्षे एव स्वरसतः संगच्छते प्रथमश्लोके, एकादशद्वादशस्कन्धयोश्च सविस्तरं गायत्रीविधानसहस्रनामादेः कथनात् सूर्य्यस्य च गायत्रीदेवतात्वात्। श्रीभागवतपक्षे तु वैकुण्ठं गच्छेदित्येव वदेदिति किञ्च "यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः"। इत्यादिमात्स्यवचनमपि देवीभागवतस्यैव महापुराणत्वं बोधयति वेदे "त्रिपदा गायत्रीति" गायत्रीलक्षणं श्रूयते तेन च त्रिपाच्छन्दोधिकृत्य यत्र धर्मविस्तरो वर्ण्यते यद्भागवतमिति तदर्थः। त्रिपाच्छन्दश्च देवीभागवते प्रथमश्लोके "सर्वचैतन्यरूपान्तामाद्यां विद्यां च धीमहि। बुद्धिं या नः प्रचोदयादिति" श्रूयते। न च विष्णुभागवते तच्छन्दोऽस्ति मुख्यार्थसम्भवे गायत्रीपदस्य लक्षणया धीमहीत्यर्थकरणेन विष्णुभागवतपरत्वकल्पनमस्य वचनस्य तु साहसमेव। कचित् पुराणेषु यदि तादृशान्येव विष्णुभागवतपराणि वचनानि सन्ति तत्र गत्यन्तराभावादस्तु लक्षणा उदासीने मात्स्यवाक्ये तु मुख्यविषयत्वसम्भवे साऽनुचिता। यत्तु गायत्र्यर्थस्य विष्णुध्यानं न तु शिवशक्तिसूर्य्यादिध्यानमित्युक्तं तत्तु नास्तिकत्वमूलकमेव मैत्रायणीयानां "भर्गो वै रुद्र" इति श्रुतौ प्रपञ्चसारादिसर्वतन्त्रेषु पुराणादिषु च शिवसूर्य्यशक्त्यादिरूपार्थस्योक्तत्वाच्च। किञ्च "हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा। गायत्र्या च समारम्भस्तद्वै भागवतं विदुरिति" पुराणान्तरवाक्यमपि देवीभागवतस्यैव महापुराणत्वबोधकं तथा हि हयग्रीवनामासुरो देवीभागवते प्रथमस्कन्धे निबद्धस्तेनोपासिता ब्रह्मप्रतिपादिका विद्या स्त्रीदेवत्यो मन्त्रः सा विद्या यत्र वर्त्तते तद्भागवतमित्यर्थः। स दैत्यस्तदुपासिता विद्या चेत्युभयमपि तत्रैव प्रथमस्कन्धे दर्शितम् "जपन्नेकाक्षरं मन्त्रं मायाबीजात्मकं ममेत्यादिना"। ननु विष्णुभागवते पञ्चमस्कन्धेऽपि हय-

योवमन्त्रस्य सत्त्वादिदं वचनमुभयभागवतसाधारणमिति चेन्न नारदीये शारदातिकादिनिबन्धेषु च “मन्त्राः पुंदेवताः प्रोक्ता विद्याः स्त्रीदेवताः स्मृताः” इत्यादिवचनैः स्त्रीदैवत्यमन्त्रेष्वेव विद्यापदप्रयोगो न पुंदैवत्यमन्त्रेष्विति प्रतिपादनात्”क्वचित् पुंदैवत्यमन्त्रे तथा प्रयोगस्तु गौणः न च गौणार्थमादाय तद्वचनस्य विष्णुभागवतपरत्वं कल्पयितुमुचितं लक्षणारूपदोषापत्तेः तस्माच्च तद्वचनमुभयसाधारणमिति देवीभागवतस्यैव महापुराणत्वं बोधयति किञ्च“सारस्वतस्य कल्पस्येति” मात्स्यवचनादपि देवीभागवतमेव महापुराणं अत्र हेत्वं प्रकरणयुक्तिः प्रदर्शय जुः।“पुराणसंख्यामाचक्ष्व सूत! विस्तरतः क्रमादिति” मुनिप्रश्नोत्तरं “ब्रह्मणाभिहितं पूर्वं यत्तद्ब्राह्मं, पद्मकल्पवृत्तान्ताश्रयं पाद्मं, वराहकल्पवृत्तान्ताश्रयं वैष्णवं श्वेतकल्पवृत्तान्ताश्रयं वायवीयमित्येवं तत्तत्कल्पवृत्तान्ताश्रयाणि पुराणान्युक्त्वा तदुत्तरं “यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तर इत्युपक्रम्य “सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः। तद्वृत्तान्तोद्भवं लोके तद्भागवतमिष्यते”इत्युक्त्वा ततोऽन्यान्यपि महापुराणान्येव तत्तत्कल्पवृत्तान्ताश्रयाणि दर्शितानि पश्चादुपपुराणकथनार्थम् “उपभेदान् प्रवक्ष्यामीति” प्रतिज्ञाय पद्मपुराणान्नारसिंहं निर्गतमेवं नन्दिशाम्बादित्यसंज्ञकान्युक्त्वा अन्योपपुराणान्यपि महापुराणेभ्य एव निर्गतानीति “अष्टादशभ्यस्तु पृथक्पुराणं यत् प्रदृश्यते। विजानीध्वं द्विजश्रेष्ठास्तदा तेभ्यो विनिर्गतमिति वचनेन” सूत ऋषिरुक्तवान्। ततः“सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च”इत्यादिना पुराणलक्षणमुक्त्वा “सात्त्विकेषु च कल्पेषु माहात्म्यमधिकं हरेः। राजसेषु च कल्पेषु माहात्म्यं ब्रह्मणो विदुः। तद्वदग्नेश्च माहात्म्यं तामसेषु शिवस्य च। सङ्कीर्णेषु सरस्वत्याः पितॄणाञ्च निगद्यते”इति वचनेन पुराणप्रतिपाद्यहरिब्रह्माग्निहरसरस्वतीपितॄणां माहात्म्यसम्बन्धात् कल्पानां सात्त्विकराजसतामससङ्कीर्णत्वभेदैश्चातुर्विध्यत्वमुक्तवानिति तत्र कल्पानां तत्तद्देवतासम्बन्धमात्रं तु तत्तत्कल्पाश्रिततत्तत्पुराणप्रतिपाद्यमुख्यदेवताज्ञानेनैव बोध्यम् अन्यप्रकारस्य क्वचिदपि पुराणेषु अनुपलम्भात्। तत्रैवं सति“सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः इत्यादि वचनं भागवतस्य लक्षणप्रतिपादकं प्रतिपादितम्। तदर्थस्तु “यथा गारुड़कल्प इत्यत्र गरुड़स्यायं गारुड़ः यथा च वाराहकल्प इत्यत्र वराहस्यायं वाराह इति व्युत्पत्तिः प्रसिद्धा

तद्वदेव ‘सरस्वत्यास्तथा कल्पो गौरीकल्पस्तथैव चेति” कल्पनामसु सरस्वतीकल्पत्वेनैव कथितत्वात्, मत्स्यपुराणे उपान्त्याध्याये “सङ्कीर्णेषु सरस्वत्याः पितॄणां कल्प उच्यते” वचनेन तथैवोक्तत्वाच्च ब्रह्मविष्णुरुद्राणां कल्पवद्गौरीलक्ष्म्योः कल्पवच्च सरस्वतीकल्पस्यार्थतः प्राप्तत्वाच्च तादृशसारस्वतकल्पसम्बन्धिनो ये देवमनुष्यास्तद्वृत्तान्तस्योद्भव उत्पत्तिर्यस्मात् तत्पुराणं भागवतं विदुः तद्वृत्तान्तप्रदर्शकं यत्पुराणं तद्भागवतसंज्ञकमिति यावत्। अत्र च तत्तद्देवतानामाविर्भावाश्रया ये ये कल्पास्ते तत्तन्नाम्ना व्यवह्रियन्ते एतच्च तत्तन्नामककल्पाश्रितेषु पुराणेषु तत्तद्देवताया एव मुख्यत्वेनोत्पत्तिप्रदर्शकवाक्यैर्लक्ष्मीकल्पादिकल्पाश्रितकूर्मपुराणादिषु सर्वत्र प्रसिद्धमेव तथा च मुख्यत्वेन सरस्वत्या आविर्भावप्रतिपादकं पुराणं यत्तद्भागवतमित्यतिरहस्यार्थः। तत्र सारस्वतकल्प इति पदेनैव कल्पस्य सरस्वतीसम्बन्धे बोधिते तस्य सङ्कीर्णत्वं “सङ्कीर्णेषु सरस्वत्याः” इति वचनेन ईश्वरप्रेरणां विनापि स्वहागतमेव। अस्मिंश्च वचने भागवतपदेन विष्णुभागवतस्य ग्रहणं वन्ध्यापुत्रोपममेव तत्र मुख्यत्वेन सरस्वत्याविर्भावस्याभावात् विष्णुभागवते द्वितीयस्कन्धे “पाद्मं कल्पमथो शृणु” इति वचनेन स्वमुखेनैव स्वस्य पाद्मकल्पकथाश्रयत्वस्योक्तत्वात् तद्विरोधाच्च। न च पाद्मकल्प एव सारस्वतः सरस्वान् समुद्रस्तस्माज्जातं कमलं सारस्वतं तस्य कल्प इति व्युत्पत्त्येति वाच्यं “पद्मकल्पस्य वृत्तान्तं तत्र यस्मादुदाहृतम्। तस्मात् पाद्मं समाख्यातं इति” पूर्वोदाहृतशिवपुराणवचनेन “एतदेव यदा पद्ममभूद्धैरण्मयं जगत्। तद्वृत्तान्ताश्रयं तद्वत् पाद्ममित्युच्यते बुधैः। पाद्मं तत्पञ्चपञ्चाशत्सहस्राणीह कथ्यते” इति मत्स्यपुराणवचनेन “सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः”. इति वचनेन च पाद्मकल्पसारस्वतकल्पयोः पृथक्कथनात् किञ्च सारस्वतकल्पपाद्मकल्पयोरेकत्वे पद्मकल्पप्रतिपादकं पुराणद्वयं पाद्मं भागवतं चेत्येव वदेत् किञ्च पद्मकल्पस्य वृत्तान्तमित्यत्र“अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुता” इति न्यायेन पूर्वं बुद्ध्यारूढं प्रसिद्धं पद्मशब्दं विहायाप्रसिद्धं सारस्वतशब्दं पद्मशब्दस्य वाचकं कृत्वा सारस्वतपदघटितकल्पने प्रयोजनाभावः। किञ्च “सरस्वत्यास्तथा कल्प इत्यादेः”पूर्वोक्तस्य सारस्वतपदनिरुक्त्यर्थकस्य वचनसमूहस्य विरोधश्च। न च पाद्मकल्पसारस्वतकल्पयोः पृथक्त्वे, त्रिंशत्कल्पेषु मत्स्यपुराणान्तिमाध्याये कीर्त्ति-

तेषु सारस्वतपदेन पाद्मस्य ग्रहणं न स्यादिति वाच्यम् प्रभासखण्डे त्रिंशत्कल्पेषु विष्णुजकल्पार्चिषकल्पसुपुङ्कल्पानां ग्रहणेऽपि तेषां कल्पानां यथा मात्स्याग्निमाध्याये न ग्रहणं तथा पाद्मस्यापि न ग्रहणमित्यस्य तुल्यत्वात्। यदि तेषां पर्य्यायत्वेन कुत्रचिदन्तर्भावः क्रियते तर्हि तस्यापि कुत्रचिदन्तर्भावोऽस्तु अतएव विष्णुभागवतस्य प्रबन्धटीकाकारेण "पितृकल्पे एव पूर्वार्धान्ते पद्मस्योद्भवात् पितृकल्पपदेन पाद्मत्वग्रहो वेदितव्यः" इत्युक्तम् पुराणकथनप्रस्तावे सारस्वतकल्पपाद्मकल्पयोः पृथक्करणेन सारस्वतपदेन पाद्मस्य सर्वथा न ग्रहणम्। वस्तुतस्तु त्रिंशत्कल्पाब्रह्मणस्त्रिंशत्तिथ्यात्मकाः त्रिंशत्तिथिषु प्रतिपदादिषूत्पद्यन्ते "भवः धुवः सुवः भूर्भुवः सुव इत्यादयस्त्रिंशत्कल्पाः "पाद्मादयश्च पुराणोक्ता दिनकल्पा ब्रह्मणः प्रतिदिवसेषूत्पद्यन्ते इति दिनकल्पतिथिकल्पानां सुतरां भेदात् तिथिकल्पेषु दिनकल्पानां पाद्मादीनां न ग्रहणमिति सिद्धान्तः। यत्तु विष्णुभागवतस्यारम्भतः पाद्मकल्पकथाश्रयत्वेऽपि कृष्णजन्मखण्डस्यैव सारस्वतकल्पभवत्वेन तस्य च दशमस्कन्धे सत्त्वात् "सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः इति" वचनस्य विष्णुभागवतं विषयोऽस्त्वित्याहुस्तदसत् कृष्णजन्मखण्डस्य सारस्वतकल्पभवत्वप्रतिपादकानां वचनानां निर्मूलत्वात् समूलत्वेऽपि यस्मिन् पुराणे यस्य कल्पस्य प्रथमतः प्रतिपादनं तत्कल्पप्रतिपादकमेव तत्पुराणमिति नियमः। सर्वपुराणे तथा दृष्टत्वात् तथा च कृष्णजन्मखण्डस्य दशमस्कन्धे विद्यमानत्वेऽपि प्रथमतस्तत्कथाया अभावात् पाद्मकल्पकथायाः प्रथमतो विद्यमानत्वस्य स्वेनैवोक्तत्वाच्च न "सारस्वतस्य कल्पस्येति" वचनस्य विष्णुभागवतं विषयः। किं च कृष्णजन्मखण्डस्य यथा दशमस्कन्धे कथनं तथा सर्वपुराणेषु तत्कथनं वर्त्तत एवेति सर्वपुराणानां तद्वचनविषयत्वं स्यात्तया च सर्वपुराणानि भागवतपदवाच्यानि स्युस्तस्मात् सारस्वतकल्पस्य यत्र प्रथमतः प्रतिपादनं स एव तद्वचनस्य विषयो वक्तव्यस्तादृशं च देवीभागवतमेवास्तीति देवीभागवतमेव तद्विषयो वक्तव्य इति। किं च शिवपुराणे उमासंहितायाम् "ब्रह्मणा संस्तुता सेयं मधुकैटभनाशने। महाविद्या जगद्धात्री सर्वविद्याधिदेवता। द्वादश्यां फाल्गुनस्यैव शुक्लायां समभून्नृपेति" वचनात् फाल्गुनशुक्लद्वादश्यां देव्या उद्भवस्तद्दिन एव च सारस्वतकल्पोद्भवस्तदुक्तं हेमाद्रौ" कल्पस्यादिप्रकरणे नागरखण्डे "सारस्वतस्तु द्वादश्यां शुक्लायां फाल्गुनस्य चेति" तथा च सरस्वत्याः कल्प इत्यर्थकस्य "सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः" इति वचनस्य सर्वथा देवीभागवतमेव विषयो न विष्णुभागवतमिति बोध्यं किं च तस्य ग्रहणे तस्य हरिमाहात्म्यप्रतिपादकत्वात् तदाश्रितकल्पस्य सात्त्विकत्वमेव यास्यति "सात्त्विकेष्वथ कल्पेषु माहात्म्यमधिकं हरेरिति" वचनात्। ततश्च "संकीर्णेषु सरस्वत्या" इति वचनेन सारस्वतकल्प इति नाम्ना च परमहंससाम्यैव कर्त्तव्या स्यात् अतो विष्णुभागवतं विहाय देवीभागवतमेवास्य वचनस्य विषयोऽनिच्छतापि वक्तव्यस्तस्मात् सारस्वतस्य कल्पस्येति वचनात् देवीभागवतमेव महापुराणम् अस्ति चात्र सरस्वत्याविर्भावप्रतिपादकं वचनं तदुक्तं देवीभागवते प्रथमस्कन्धे "तस्यास्तु सात्त्विकी शक्ती राजसी तामसी तथा। महालक्ष्मीः सरस्वती महाकालीति ताः स्त्रियः। तासां तिसृणां शक्तीनां देहाङ्गीकारलक्षणः। सृष्ट्यर्थश्च समाख्यातः सर्गः शास्त्रविशारदैरिति" "अम्बरीष शुकप्रोक्तं नित्यं भागवतं शृणु" इति वचनमपि शुकाय प्रोक्तमिति व्युत्पत्त्या देवीभागवतपरमपि संगच्छते। भवति हि देवीभावतं शुकायैव प्रोक्तं व्यासेनेति। किं च अष्टादशपुराणानि कृत्वा सत्यवतीसुतः। भारताख्यानमखिलं चक्रे तदुपबृंहणमिति" मात्स्यवचनमपि देवीभागवतस्यैव महापुराणत्वं बोधयति अष्टादशपुराणोत्तरं भारतस्य जातत्वात् भारतोत्तरं च विष्णुभागवतस्य जातत्वात् भारतोत्तरकालं निर्विण्णो व्यासश्चकारेति विष्णुभागवते १स्क०एवोक्तत्वात्। ननु "वेदशाखाः पुराणानि वेदान्तभारतं तथा। कृत्वा संमोह संमूढोऽभवं राजन्मनस्यपीति" देवीभागवते तृतीयस्कन्धे एवोक्तत्वात् तत्रापि स विरोधस्तदवस्थ एवेति चेन्न मन्मते तदानीं ग्रन्थोनैव जातः किन्तु जनमेजयं प्रति एवं वक्ष्यामीति ज्ञानचक्षुषा ज्ञात्वा भारतात् पूर्व्वमेव देवीभागवतं कृतमित्यर्थस्य कल्पनात्। त्वन्मते तु तथा कल्पयितुं न शक्यते चतुःश्लोक्या भागवतोपदेशस्य जायमानत्वात् उपदेशात् पूर्व्वं तज्ज्ञानाभावस्यावश्यं कल्पनीयत्वात् यदि तत्रापि पूर्व्वं व्यासस्य ज्ञानमस्तीति स्वीक्रियते तदा वक्ष्यमाणः सर्वोऽप्यर्थवादः स्यात् ततश्च ग्रन्थस्यारम्भभङ्गप्रसङ्ग इत्यास्तां तावत्। वस्तुतस्तु वेदशाखाः पुराणानीति पाठोऽसङ्गत इति वक्ष्यते तृतीयस्कन्धे तदा न कोऽपि विरोधः। यत्तु पाद्मे भागवतमाहात्म्ये श्रीमद्भागवतकथाश्रवणाय समागतानां परिगणनप्रसङ्गे "वेदान्तानि च वेदाश्च मन्त्रास्तन्त्राणि संहिताः। दश सप्त पुराणानि षट् शास्त्राणि समाय

शुः" इत्युक्तं तत्र व्यासकृतपुराणानामष्टादशत्वादष्टादशेति वक्तव्ये सप्तदशत्वोक्तिः श्रीमद्भागवतस्याष्टादशत्वङ्गमयति तस्याष्टादशानन्तर्गतत्वे देवीभागवतस्याष्टादशान्तर्गतत्वे वा अष्टादशानां श्रोतुमागतानां पुराणानां अष्टादशत्वानुक्तेर्निर्बीजत्वप्रसङ्गात् एवं पाद्मे "दश सप्त पुराणानि कृत्वा सत्यवतीसुतः । नाप्तवान्मनसा तोषं भारतेनापि भामिनि" । चकार संहितामेतां श्रीमद्भागवतीं परामिति" सप्तदशत्वोक्तिः श्रीमद्भागवतस्यैव एतां संहितामिति निर्द्दिष्टस्याष्टादशत्वङ्गमयति देवीभागवतस्याष्टादशत्वेऽष्टादशपुराणानीत्यनुक्तेर्निर्बीजत्वप्रसङ्गादित्याहुस्तदसत् तेषामेव वचनैर्विष्णुभागवतस्याष्टादशपुराणान्तर्गतत्वं न सिद्ध्यति किन्तु देवीभागवतस्यैवेति वार्धुषिकत्वं कुर्वाणो मूलमेव विनाशितवानिति न्याय आगतः । तथा हि भारतं व्यासमुखाच्छ्रुत्वा तत्र संहितानः क्रोष्टुकिर्मार्कण्डेयं प्रत्यागत्य सन्देहं पृष्टवान् तस्मै मार्कण्डेयो मार्कण्डेयपुराणमुक्तवान् तदुक्तं मार्कण्डेयपुराणे "तदिदं भारताख्यानं बह्वर्थं श्रुतिविस्तरम् । तत्त्वतो ज्ञातुकामोऽहं भगवन्तमुपस्थितः" इति तथा च भारतोत्तरं मार्कण्डेयपुराणमभवत् तथैव त्वदुक्तरीत्यैव विष्णुभागवतमपि तथा च भारतात् पूर्व्वं षोडश पुराणान्येव सिद्धानि तथा च पूर्व्वोक्तवचनमध्ये षोडशेत्येव वक्तव्ये सप्तदशेत्युक्तत्वात् देवीभागवतमेव महापुराणमन्यथा सप्तदशत्वपूर्त्तिर्न स्यात् तस्मात् तद्वचनप्रामाण्याद्देवीभागवतमेव महापुराणमिति सिद्ध्यति न तु विष्णुभागवतं, भारतात् पूर्व्वं सप्तदश मदीयभागवतसंहितानि मार्कण्डेयमष्टादशमुभयमतसिद्धमेव विष्णुभागवतस्य भारतोत्तरं जायमानत्वेन तन्मध्ये तस्यावस्थानस्यलाभाभावादित्येवं स्थापनेनापि दोषाभावादिति सुधियो विभावयन्तु । यत्तु पाद्मे "वैष्णवं नारदीयञ्च तथा भागवतं शुभम् । गारुडञ्च तथा पाद्मं वाराहं शुभदर्शने ! । सात्त्विकानि पुराणानि विज्ञेयानि शुभानि वै" इत्युक्त्वा भागवतस्य सात्त्विकत्वमुक्तं सात्त्विकेषु पुराणेष्विति कौर्म्मोक्त्या च सात्त्विकपुराणानां विष्णुपरत्वमुक्तम् अतो विष्णुपरमेव भागवतमष्टादशपुराणान्तर्गतं न तु देवीभागवतमिति अपि च स्कान्दे प्रभासखण्डे "चतुर्भिर्भगवान् विष्णुर्द्वाभ्यां ब्रह्मा तथा रविः । अष्टादशपुराणेषु शेषेषु भगवान् भवः" इत्युक्तं स्कान्दे सौरसंहितायां च "कथ्यते दशभिर्विप्राः ! पुराणैः परमेश्वरः । चतुर्भिर्भगवान् विष्णुर्द्वाभ्यां ब्रह्मा प्रकीर्त्तितः । एकेनाग्निस्तथैकेन भगवांश्चण्डभास्करः" इत्युक्तमतोऽपि विष्णुभागवतमष्टादशान्तर्गतन्तत्त्वन्यदित्याहुस्तदसत् त्वन्मते मात्स्योक्तसात्त्विकराजसतामससंकीर्णपुराणेषु मध्ये त्रयाणां व्यवस्था पूर्व्ववचनैस्त्वयोक्ता संकीर्णपुराणानान्तु नोक्ता तेषाङ्केषु पुराणेष्वन्तर्भाव इति वद करिष्यामि कुत्रचिदिति चेत् मन्मतेऽपि श्रीभगवत्या विष्णुशक्तित्वाभिमानेन "विष्णुमन्त्राधिष्ठात्रीं देवतां वेदमातरं दुर्गां दुर्बोधध्वान्तभानुं गुरुं चेति श्रीमद्दीपिकोक्तप्रकारेण विष्णुमन्त्राणां दुर्गाया अधिष्ठातृत्वेन तयोरैक्याद्वा तत्प्रतिपादकभागवतस्य वैष्णवेष्वेवान्तर्भावात् अतएव "हरिर्द्वाभ्यां रविर्द्वाभ्यां द्वाभ्यां चण्डीविनायकौ । द्वाभ्यां ब्रह्मा समाख्यातः शेषेषु भगवान् शिवः इति वचनं सङ्गच्छते" वस्तुतस्तु द्वयोरपि भागवतयोरस्मन्मते प्रमाणत्वात् विष्णुभागवतपक्षपातिनां वचनानामस्माकं विरोधाभावेन तत्स्थापने प्रयोजनाभावएव । तथा च नारदीयादिपुराणमते श्रीविष्णुभागवतं महापुराणन्तद्वचनानि प्रसिद्धान्येवेति न लिखितानि देवीभागवतं तु तन्मते उपपुराणम् । शैवमात्स्यपुराणादिमते तु देवीभागवतं महापुराणं विष्णुभागवतमर्थादुपपुराणमिति सिद्धम्" ।

बृहद्धा० ९६ अ० महापुराणप्रतिपाद्यविषयवर्णने "श्रीब्रह्मोवाच, मारीचे ! शृणु वक्ष्यामि वेदव्यासेन यत् कृतम् । श्रीमद्भागवतं नाम पुराणं ब्रह्मसम्मितम् । तदष्टादशसाहस्रं कीर्त्तितं पापनाशनम् । सुरपादपरूपोऽयं स्कन्धैर्द्वादशभिर्युतः । भगवानेव विप्रेन्द्र ! विश्वरूपी समीरितः । तत्र तु प्रथमे स्कन्धे सूतर्षीणां समागमः । व्यासस्य चरितं पुण्यं पाण्डवानां तथैव च । पारीक्षितमुपाख्यानमितीदं समुदाहृतम् । परीक्षिच्छुकसंवादे सृतिद्वयनिरूपणम् । ब्रह्मनारदसंवादेऽवतारचरितामृतम् । पुराणलक्षणञ्चैव सृष्टिकारणसम्भवः । द्वितीयोऽयं समुदितः स्कन्धो व्यासेन धीमता । चरितं विदुरस्याथ मैत्रेयेणास्य सङ्गमः । सृष्टिप्रकरणं पश्चाद्ब्रह्मणः परमात्मनः । कापिलं साङ्ख्यमप्यत्र तृतीयोऽयमुदाहृतः । सत्याचरितमादौ तु ध्रुवस्य चरितं ततः । पृथोः पुण्यसमाख्यानं ततः प्राचीनबर्हिषः । इत्येष तुर्य्यो गदितो विसर्गे स्कन्ध उत्तमः । प्रियव्रतस्य चरितं तद्वंश्यानाञ्च पुण्यदम् । ब्रह्माण्डान्तर्गतानाञ्च लोकानां वर्णनन्ततः । नरकस्थितिरित्येव संस्थाने पञ्चमो मतः । अजामिलस्य चरितं दक्षसृष्टिनिरूपणम् । वृत्राख्यानं ततः पश्चान्मरुतां जन्म पुण्यदम् । षष्ठोऽयमुदितः स्कन्धो व्यासेन परिपोषणे । प्रह्लादचरितं पुण्यं

वर्णाश्रमनिरूपणम् । सप्तमो गदितो वत्स ! वासनाकर्मकीर्त्तने । गजेन्द्रमोक्षणाख्यानं मन्वन्तरनिरूपणम् । समुद्रमथनञ्चैव बलिवैभवबन्धनम् । मत्स्यावतारचरितमष्टमोऽयं प्रकीर्त्तितः । सूर्यवंशसमाख्यानं सोमवंशनिरूपणम् । वंश्यानुचरिते प्रोक्तो नवमोऽयं महामते !। कृष्णस्य बालचरितं कौमारञ्च व्रजस्थितिः । कैशोरं मथुरास्थानं यौवनं द्वारकास्थितिः । भूभारहरणञ्चात्र निरोधे दशमः स्मृतः । नारदेन तु संवादो वसुदेवस्य कीर्त्तितः । यदोश्च दत्तात्रेयेण श्रीकृष्णेनोद्धवस्य च । यादवानां मिथोऽन्तश्च मुक्तावेकादशः स्मृतः । भविष्यकलिनिर्द्देशो मोक्षो राज्ञः परीक्षितः । वेदशाखाप्रणयनं मार्कण्डेयतपः स्मृतम् । सौरी विभूतिरुदिता सात्वती च ततः परम्" । इत्युक्तेः विष्णुभागवत एव तेषां पदार्थानां सत्त्वात् महापुराणत्वं देवीभागवते तदभावात् न महापुराणत्वम् । एवञ्च मतभेदेन कस्यचित् पुराणत्वं कस्यचिदुपपुराणत्वं तच्च कल्पभेदादविरुद्धम् । एतेन विष्णुभागवतस्य वोपदेवकृतत्वशङ्का निर्मूलैव । वोपदेवेन "चतुर्वर्गचिन्तामणि कर्त्तुरिच्छया हेमाद्रिर्वोपदेवेन मुक्ताफलमचीकरत्" इति मुक्ताफलग्रन्थे स्वयं लिखितत्वेन तस्य हेमाद्रिसभासदत्वप्रतीतेः हेमाद्रौ च नानास्थानेषु विष्णुभागवतवचनस्य प्रमाणत्वेन धृतत्वेन न तत्कृतत्वमिति प्रतिभाति ।

उपपुष्पिका स्त्री उपगता पुष्पमिव विकाशभावम् अत्या० स० संज्ञायां कन् टापि अत इत्वम् । जृम्भायाम् (हाइतोला) हारा० तत्र हि मुखस्य पुष्पस्येव विकाशभावात् तथात्वम् ।

उपपृच् त्रि० उप+पृच्–क्विप् । उपरि सामीप्येन संपृक्ते "विहृक्णाहिः शयत उपपृक् पृथिव्याः" ऋ० १,३२,५,

उपपौर्णमास(सि) अव्य०सामीप्ये अव्ययी० वा अच् समा० । पौर्णमास्याः समीपे ।

उपप्रदान न० उप उपाधौ तेन प्रदानम् । १उत्कोचे स्वकार्यसाधनार्थं तत्प्रतिबन्धकेभ्योराजभृत्यादिभ्योदाने (घुसदेओया) २सम्यग्वं भूम्यादेर्दाने च हेम० "तस्योपप्रदानेन सन्धिरेव युक्तः" हितो० "उपप्रदानं लिप्सूनामेकं ह्याकर्षणौषधम्" कठस० "साम चोपप्रदानं च भेदोदण्डश्च तत्त्वतः" रामा० । प्रलोभनार्थं ३द्रव्यदाने "उपप्रदानैर्मार्जारोऽहितकृत् प्रार्थ्यते नरैः" पञ्चत० । समीपे दाने च ।

उपप्रलोभन न०उप+प्र+लुभ–ल्युट् । १सम्यक्प्रलोभने "अस्य चोपप्रलोभनाय" दशकु० । करणे ल्युट् । २सम्यक्प्रलोभनसाधने द्रव्ये "उच्चावचानुपप्रलोभनानि" दशकु० ।

उपप्लव पु० उप+प्लु–अप् । गगनाद्युल्कापातादिरूपे १उपद्रवे, "उपप्लवाय लोकानां धूमकेतुरिवोत्थितः" कुमा० । "हदभिहित" इत्याद्युक्तेः २उत्पातसूचके वाय्वादौ "त्वामासारप्रशमितवनोपप्लवं साधु मूर्द्ध्ना" मेघ० । "कच्चिन्न वाय्वादिरुपप्लवोवः" रघुः ३भये "त्वया रक्षोपप्लविनः परेभ्यः" रघुः "उपप्लविनो भयवन्तः" मल्लि० । ४विघ्ने "जीवन् पुनः शश्वदुपप्लवेभ्यः" रघुः । उपप्लवेभ्यः विघ्नेभ्यः" मल्लि० । ५औपसर्गिकात्यन्तमरकपीड़ने ६राजविप्लवे "दुर्भिक्षे चाप्युपप्लवे" कूर्म्मपु० । "उपप्लवे राजविप्लवे औपसर्गिकात्यन्तमरकपीड़ने" शु०त०रघु० । ७उपरोधे वेष्टने "अमेघोपप्लवे यत्र शक्रचापतडिद्गुणान्" सुश्रु० । ८चन्द्रसूर्ययोर्ग्रहणे "उपप्लवे चन्द्रमसोरवेश्च" स्मृतिः । ९विपत्तौ "अथ मदनवधूरुपप्लवान्तम्" कुमा० । १०समीपे प्लवने गतौ च । "तत्रीमन्तुसार्यजनं सुखमासीदुपप्लवे" भा०स० २२अ० । "कल्पनापोढ़मभ्रान्तं प्रत्यक्षं निर्विकल्पकम् । विकल्पो वस्तुनिर्भासादसंवादादुपप्लवः इति बौद्धमतसिद्धे ११विकल्पे स च संसारिणां सविकल्पज्ञानमात्रेऽस्ति ईश्वरज्ञानं तु निरुपप्लवम् । उपप्लवति लोकानुपद्रवति उप-प्लु-कर्त्तरि अच् ।१२राहौ मेदि० । "केतूपप्लवभौमसन्दगतयः षष्ठे तृतीये शुभाः" ज्यो०त० ।

उपप्लव्य न० उप+प्लु–आधारे बा० यत् ।१विराटनगरसमीपस्थे पुरभेदे । "उपप्लव्ये निविष्टेषु पाण्डवेषु जिगीषया" "आगम्य हास्तिनपुरादुपप्लव्यमरिन्दम" भा०आ०१अ० "ततस्त्रयोदशे वर्षे निवृत्ते पञ्च पाण्डवाः ॥ उपप्लव्यं विराटस्य समपद्यन्त सर्वशः" भा०वि०७२अ० । "विराटनगरसमीपस्थं नगरान्तरम्" नील० । "राज्ञस्तु वचनं श्रुत्वा धृतराष्ट्रस्य सञ्जयः । उपप्लव्यं ययौ द्रष्टुं पाण्डवानमितौजसः" भा०उ०२२अ० । कर्मणि यत् ।२उपप्लवनीये त्रि० । आवश्यके तु ण्यत् । उपप्लाव्य अवश्यमुपप्लवनीये त्रि० ।

उपप्लुत त्रि० उप+प्लु–क्त । उपद्रवयुक्ते "उपप्लुतं पातुमदो मदोद्धतैः" माघः ।

उपबन्ध पु० उप+बन्ध–घञ् । १बन्धनदार्ढ्यं तत्समीपे बन्धनान्तरबन्धने । उपमितः बन्धेन अत्रा०स० । २पद्मासनरूपबन्धसदृशे अवान्तरासनभेदे ३संख्याविशेषेण संबन्धप्रतिपादने च "नोदनागुणेषु च प्रकृतुप्रवन्धाभ्याम्" कात्या०१,८,२२, "सोमस्य प्रकृतेः उपबन्धाच्च" कर्कः अत उपबन्धश्च संख्याविशेषेण सम्बन्धप्रतिपादनं तत्संख्या च श्रत०ब्रा०३,१,२,१८, दर्शिता यथा "अथ यदपामन्ते

क्रीणाति रसो वा आप: स रसमेवैतत् क्रीणात्यथ यद्धिरण्यं भवति स शुक्रमेवैतत् क्रीणात्यथ यद्वासो भवति सत्वचमेवैतत् क्रीणात्यथ यदजा भवति स तपसमेवैतत् क्रीणात्यथ यद्धेनुर्भवति सा चिरमेवैतत् क्रीणात्यथ यन्मिथुनौ भवत: स मिथुनमेवैतत् क्रीणाति तं वै दशभिरेव क्रीणीयाद्दशभिर्दशाक्षरा वै विराड्वैराजः सोमस्तस्माद्दशभिरेव क्रीणीयाद्दशभिः" ।

उपबर्ह पु० उपबर्ह्यते आस्तीर्य्यते उप+बर्ह-स्तृतौ कर्मणि घञ् । (बालिश) १उपधाने बर्ह-हिंसायाम् भावे घञ् । २उपपीड़ने च ।

उपबर्हण न० उपबर्ह्यतेकर्मणि ल्युट् । १उपधाने "पुराणा यथाः पुराण्यासन्दी सोपबर्हणैषान्वादिष्टा दक्षिणा" शत० ब्रा० १२,८४,१०,बर्ह हिंसायां भावे ल्युट् ।२उपपीड़ने च

उपबहु त्रि० उपगता बहवो यस्य संख्यात्वेऽपि पर्य्युदासात् न डच् । बहुसंख्यासमीपवर्त्तिनि ।

उपबाधा स्त्री उप+बाध-अ । संपीडने ।

उपबाहु पु०उपगतो बाहुम् अत्या० । १बाह्वोः समीपवर्त्तिन्यङ्गभेदे ततः इदमर्थे बाह्वादि० इञ् । औपबाहवि तत्सम्बन्धिनि त्रि० । सामीप्यादौ अव्ययो० । २बाहुसामीप्यादौ अव्य० ।

उपब्द पु०उपगतःशब्दः प्रा०स० पृषो० । "सोमाभिषवशब्दे "ग्रावाणो घ्नन्तु रक्षस उपब्दैः"ऋ०७,१०४,१७, "उपब्दैः अभिषवशब्दैः" भा०

उपब्दि पु०उप+शब्द-इन् पृषो० । श्रोतृमर्थे शब्दे "न योरुपब्दिरश्व्यः" ऋ०१,७४,७, "उपब्दिः शब्दार्हः" भा० "मरुतां श्टण्व आयतामुपब्दिः" ऋ०१,१६९,७, ततोऽस्त्यर्थे मतुप् । उपब्दिमत् श्रोतु योग्य शब्दयुक्ते "सगद्गमब्दिमत्" तैत्ति० "उच्चैर्घोष उपब्दिमान् बलस रूपम्"ऐत०ब्रा० । [सम्यग् भञ्जने २हैधीभावे च ।

उपभङ्ग पु० उप+भनज घञ् कुत्वम् । १युद्धादितः पलायने

उपभुक्त त्रि० उप+भुंज-क्त । कृतोपभोगे वस्तुनि

उपभुक्ति स्त्री उप+भुज क्तिन् । उपभोगे

उपभूषण न० उपमितं भूषणेन अत्या०स० । घण्टाचामरादौ "घण्टाचामरकुम्भादिपात्रोपकरणादिकम् । तद्भूषणान्तरे दद्यादुपयुक्तात्तदुपभूषणम्"पु०। उपचारशब्दे१२०२९०दृश्यम्।

उपभृत् स्त्री उप+भृ-आधारे क्विप् । आश्वत्थे यज्ञाङ्गपात्रभेदे स्रुचि "आश्वत्थ्युपभृत्"कात्या०१,३,३५,उपभृत्संज्ञका स्रुक् आश्वत्थी"कर्कः"पाणिभ्यां जुहूं परिगृह्योपभृत्या बध्नम्" ११०,९"सव्यउपभृत्" आश्व०श्रौ० ४,३,१ ।

उपभोग पु० उप+भुज-घञ् कुत्वम् । विषयसेवाजन्ये सुखभेदे "स्त्रीणां स्वपतिदायस्तु भोगफलः स्मृतः" दा०भा०स्मृ० । "न जातु कामः कामानामुपभोगेन शाम्यति" मनुः भारतञ्च । "आगमेनोपभोगेन नष्टं भाव्यमतोऽन्यथा" । "इह कर्मोपभोगाय तैः संसरति सोऽवशः" या०स्मृ० । "प्रियोपभोगचिह्नेषु पौरोभाग्यमिवाचरत्" कृत्वोपभोगोत्सुकयेव लक्ष्म्या" रघुः भोगश्च विषयसंसर्गजन्यसुखभेदः । अधिकं भोगशब्दे वक्ष्यते । ततः अस्त्यर्थे इनि । उपभोगिन् तद्युति त्रि० "ब्राह्मणांश्च हनिष्यन्ति ब्राह्मणस्वोपभोगिनः । भा० व० १९० अ० । स्त्रियां ङीप् ।।

उपभोग्य उप+भुज-ण्यत् अनन्नार्थत्वे कुत्वम् । उपभोगयोग्ये वस्तुनि अन्ने तु न कुत्वम् । उपभोज्यमित्येव । "असूत सा नागवधूपभोग्यम्" कुमा०। "किञ्चित्कालोपभोग्यानि यौवनानि धनानि च" पञ्चत० ।"विविधान्यन्नपानानि पुरुषा येऽसूयाविनः । ते वै न्टपोपभोज्यानि ब्राह्मणानां ददत्य ह" भा० आन्नु० ८५अ० ।

उपभोजिन् त्रि० उ+भुज-णिनि । उपभोगकारके ।"निहन्तारस्तस्करांस्तथैव परदारोपभोजिषु" "उच्छिन्नशिखिभिन्नेषु भिन्नकांस्योपभोजिषु" सुश्रु० ।

उपम त्रि० उपमीयते उप+मा-घञर्थे क । १उपमेये । पदं यद्विष्णोरुपमं निधायि"ऋ०५,३,३ ।"उपमसुपमेयमिव" भा०। उपमीयते समीपे क्षिप्यते मि-अा० ड । २अन्तिके निरु० "यत् केतुमुपमं समत्सु"ऋ०७,३०,३।"उपममन्तिकम्"भा०।३अन्तिकस्थे त्रि०। दिवश्चिदन्ता उपमा"ऋ० १०,८,१ । "उपमान् समीपस्थान्"भा०"राजामि कृष्टेरुपमस्य वव्रेः" ऋ०४, ४२, १ ।

उपमद्गु पु० "अक्रूरःसुषुवे तस्मात् श्वफल्काद्भूरिदक्षिणः। उपमद्गुस्तथा मद्गुर्मुदरश्चारिमेजयः" हरिवं० २५ अ० इत्युक्ते श्वफल्कपुत्रे अक्रूरानुजे यदुवंश्ये क्षत्रियभेदे ।

उपमन्त्रण न० उप+मन्त्र-ल्युट् । आमन्त्रणे कर्त्तव्यकरणाय प्रार्थनापूर्व्वकप्रवर्त्तनारूपे व्यापारभेदे । "भासनोपसम्भाषणज्ञानयत्नविमत्युपमन्त्रणेषु वदः" पा० । "उपमन्त्रणमुपच्छन्दनम्" सि० कौ० । २उपच्छन्दने । (खोसामदी) ततः अस्त्यर्थे इनि उपमन्त्रिन् । (खोसामुदिया) उपच्छन्दनकारके नर्म्मसचिवे ।"इसनामुपमन्त्रिणः" ऋ० ८,११२,४ ।'उपमन्त्रिणःउपमन्त्र-

कान्तो नर्म्मसचिवा हसनामुपहासयुक्तां वाचमिच्छन्ति" भा०

उपमन्थनी स्त्री उपमथ्यतेऽनया उप+मन्थ–करणे ल्युट् ङीप्। अग्निमन्थनसाधनद्रव्ये "चतुरौदुम्बरो भवति औदुम्बरश्चमस औदुम्बर, स्रुव औदुम्बर इध्म औदुम्बर्य्यौ उपमन्थन्यौ" शत० ब्रा० १४, ८, २, २१।

उपमन्यु पु० आयोदधौम्यशिष्ये ऋषिभेदे। "धौम्योनामायोदस्तस्य त्रयः शिष्या बभूवुरुपमन्युरारुणिर्वेदश्चेति" भा० आ० तच्चरितञ्च तत्र वर्णितं यथा।

"अथापरः शिष्यस्तस्यैवायोदधौम्यस्योपमन्युर्नाम। तं चोपाध्यायः प्रेषयामास वत्सोपमन्यो! गा रक्षस्वेति। स उपाध्यायवचनादरक्षद्गाः स चाहनि गा रक्षित्वा दिवसक्षये गुरुगृहमागम्योपाध्यायस्याग्रतः स्थित्वा नमश्चक्रे। तमुपाध्यायः पीवानमपश्यदुवाच चैनं वत्सोपमन्यो! केन वृत्तिं कल्पयसि पीवानसि दृढमिति। स उपाध्यायं प्रत्युवाच भो भैक्ष्येण वृत्तिं कल्पयामीति तमुपाध्यायः प्रत्युवाच। मय्यनिवेद्य भैक्ष्यं नोपयोक्तव्यमिति। स तथेत्युक्तो भैक्ष्यं चरित्वोपाध्यायाय न्यवेदयत्। स तस्मादुपाध्यायः सर्व्वमेव भैक्ष्यमगृह्णात्। स तथेत्युक्तः पुनररक्षद्गाः अहनि रक्षित्वा निशामुखे गुरुकुलमागम्य गुरोरग्रतः स्थित्वा नमश्चक्रे। तमुपाध्यायस्तथापि पीवानमेव दृष्ट्वोवाच वत्सोपमन्यो! सर्व्वमशेषतस्ते भैक्ष्यं गृह्णामि केनेदानीं वृत्तिं कल्पयसीति। स एवमुक्त उपाध्यायं प्रत्युवाच भगवते निवेद्य पूर्व्वमपरं चरामि तेन वृत्तिं कल्पयामीति तमुपाध्यायः प्रत्युवाच। नैषा न्याय्या गुरुवृत्तिरन्येषामपि भैक्ष्योपजीविनां वृत्त्युपरोधं करोषि इत्येवं वर्त्तमानो लुब्धोऽसीति। स तथेत्युक्त्वा गा अरक्षत् रक्षित्वा च पुनरुपाध्यायगृहमागम्योपाध्यायस्याग्रतः स्थित्वा नमश्चक्रे। तमुपाध्यायस्तथापि पीवानमेव दृष्ट्वा पुनरुवाच वत्सोपमन्यो! अहं ते सर्व्वं भैक्ष्यं गृह्णामि न चान्यच्चरसि पीवानसि भृशं केन वृत्तिं कल्पयसीति। स एवमुक्तस्तमुपाध्यायं प्रत्युवाच भो एतासां गवां पयसा वृत्तिं कल्पयामीति तमुवाचोपाध्यायो नैतन्न्याय्यं पय उपयोक्तुं भवतो मया नाभ्यनुज्ञातमिति। स तथेति प्रतिज्ञाय गा रक्षित्वा पुनरुपाध्यायगृहमेत्य गुरोरग्रतः स्थित्वा नमश्चक्रे। तमुपाध्यायः पीवानमेव दृष्ट्वोवाच वत्सोपमन्यो! भैक्ष्यं नाश्नासि न चान्यच्चरसि पयो न पिबसि पीवानसि भृशं केनेदानीं वृत्तिं कल्पयसीति। स एवमुक्त उपाध्यायं प्रत्युवाच भो फेनं पिबामि यमिमे वत्सा मातॄणां स्तनात् पिबन्त उद्गिरन्ति। तमुपाध्यायः प्रत्युवाच एते त्वदनुकम्पया गुणवन्तो वत्साः प्रभूततरं फेनमुद्गिरन्ति तदेषामपि वत्सानां वृत्त्युपरोधं करोष्येवं वर्त्तमानः फेनमपि भवान्न पातुमर्हतीति स तथेति प्रतिश्रुत्य पुनररक्षद्गाः। तथा प्रतिषिद्धो भैक्ष्यं नाश्नाति न चान्यच्चरति पयो न पिबति फेनं नोपयुङ्क्ते स कदाचिदरण्ये क्षुधार्त्तोऽर्कपत्राण्यभक्षयत्। स तैरर्कपत्रैर्भक्षितैः क्षारतिक्तकटुरूक्षैस्तीक्ष्णविपाकैश्चक्षुष्युपहतोऽन्धो बभूव ततः सोऽन्धोऽपि चङ्क्रम्यमाणः कूपे पपात। अथ तस्मिन्ननागच्छति सूर्य्ये चास्ताचलावलम्बिनि उपाध्यायः शिष्यानवोचत् नायात्युपमन्युः त ऊचुर्वनङ्गतो गा रक्षितुमिति तानाह उपाध्यायः। मयोपमन्युः सर्व्वतः प्रतिषिद्धः स नियतं कुपितस्ततो नागच्छति चिरं ततोऽन्वेष्य इत्येवमुक्त्वा शिष्यैः सार्द्धमरण्यं गत्वा तस्याह्वानाय शब्दं चकार, भो उपमन्यो! क्वासि वत्सैहीति। स उपाध्यायवचनं श्रुत्वा प्रत्युवाचोच्चैरयमस्मिन् कूपे पतितोऽहमिति तमुपाध्यायः प्रत्युवाच कथं त्वमस्मिन् कूपे पतित इति। स उपाध्यायं प्रत्युवाच अर्कपत्राणि भक्षयित्वाऽन्धीभूतोऽस्म्यतः कूपे पतित इति। तमुपाध्यायः प्रत्युवाच। अश्विनौ स्तुहि तौ देवभिषजौ त्वां चक्षुष्मन्तं कर्त्ताराविति स एवमुक्त उपाध्यायेनोपमन्युरश्विनौ स्तोतुमुपचक्रमे देवावश्विनौ वाग्भिरृग्भिः"। अश्विस्तुतिमुपवर्ण्य कथां समापयामास यथा "इत्येवं तेनाभिष्टुतावश्विनावाजग्मतुराहतुश्चैनं प्रीतौ स्व एष तेऽपूपोऽशानैनमिति। स एवमुक्तः प्रत्युवाच नानृतमूचतुर्भगवन्तौ। न त्वहमेतमपूपमुपयोक्तुमुत्सहे गुरवेऽनिवेद्येति। ततस्तमश्विनावूचतुः आवाभ्यां पुरस्ताद्भवत उपाध्यायेनैवमेवाभिष्टुताभ्यामपूपो दत्त उपयुक्तः स तेनानिवेद्य गुरवे, त्वमपि तथैव कुरुष्व यथा कृतमुपाध्यायेनेति। स एवमुक्तः प्रत्युवाच एतत् प्रत्यनुनये भवन्तावश्विनौ नोत्सहेऽहमनिवेद्य गुरवेऽपूपमेनमुपयोक्तुमिति। तमाश्विनावाहतुः प्रीतौ स्वस्तवानया गुरुभक्त्या उपाध्यायस्य ते कार्ष्णायसा दन्ता भवतोऽपि हिरण्मया भविष्यन्ति चक्षुष्मांश्च भविष्यसि श्रेयश्चावाप्स्यसीति। स एवमुक्तोऽश्विभ्यां लब्धचक्षुरुपाध्यायसकाशमागम्योपाध्यायमभ्यवादयत आचचक्षे च स चास्य प्रीतिमान् बभूव आह चैनं यथाश्विनावाहतुस्तथा त्वं श्रेयोऽवाप्स्यसीति। सर्व्वे च ते वेदाः प्रतिभास्यन्ति सर्व्वाणि च धर्म्मशास्त्रा-

श्चोति एषा तत्रापि परीक्षोपमन्योः”। उपमन्योरपत्यम् विदा॰ अञ्। औपमन्यव तदपत्ये बहुत्वे तु तस्य लुक्। उपमन्यवः “उपमन्यु पराशरकुण्डिनेभ्यः” “उपमन्यूनां वाशिष्ठाभरद्वसिन्द्रप्रमदेति” आश्व॰श्रौ॰सू॰ १२ १५ १,२,

उपमर्द पु॰ उप+मृद–घञ् ।१आलोडने,२हिंसने, पूर्व्वधर्म्मिविनाशनेन ३धर्म्मान्तरोत्पादने। यथा अस्तेर्भूः वचिक्शो वचिः स्था–तिष्ठ इत्याद्यादेशे। ३निष्पीडने “अन्यांस्तु तावदुपमर्द्द सहास्व भद्र” सा॰द॰। धान्यादेः ४निस्तुषीकरणे च। (धानमाडा) भावे ल्युट्। उपमर्द्दनमप्यत्रार्थे न॰। कर्त्तरि ण्वुल्। उपमर्द्दक तत्कारके त्रि॰।

उपमा स्त्री उप+मि–अ। १सादृश्ये, “अतुलोपमाभ्याम्” पा॰ उक्तेः तद्योगे उपमानवाचकात् षष्ठी नतु तृतीया। ‘स्फटोपमं भूतिसितेन शम्भुना” माघे तु षष्ठ्यर्थे तृतीया मल्लि॰। २अर्थालङ्कारभेदे च अर्थालङ्कारभेदस्य ३८६ पृ॰ विवृतिर्दृश्या। न्यायमतसिद्धे उपमानजन्ये ३गवयादिशब्दशक्तिज्ञानरूपे, वेदान्तिमतसिद्धे ४गवादिसादृश्यज्ञानरूपे अनुभवभेदे च उपमानशब्दे विवृतिः। करणे वा॰ अ। ५उपमाने च। “अपि लाङ्गूतमव्याजं बुबुधे न बुधोपमः” रघुः। “यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता” गीता “यजते सोपमा दिवः” ऋ॰ १,३१,१५, स्वार्थे घञ्। औपम्य उपमाने न॰।

उपमात् स्त्री उपमीयते प्रक्षिप्यते उप+मिञ–क्षेपे–बा॰ऋति। स्थूणायाम् वत्सबन्धनसाधने स्तम्भे “सानुमुपमाद्दिव द्योः” ऋ॰६,६७,६,।“उपमीयते प्रक्षिप्यते इत्युपमात् स्थूणा” सा यथा वत्सं धारयति तद्वदित्यर्थः” भा॰।

उपमाति स्त्री उप+मि–क्तिन् वेदे नि॰ आत् ।१उपमायाम्। “पूर्वीष्ट इन्द्रोपमातयः” ऋ॰८,४०,९, लोके तु उपमितिरित्येव उक्तार्थे। उप+मीङ–वधे–क्तिन् बा॰ आत्। २हिंसने उपमातिवनिः। “रिपे धादस्माकं भूदुपमातिवनिः” ऋ॰५,४१,१६, उपमातये वनति वनु व्याप्तौ इन्। हिंसव्याप्तत इत्यर्थः उपमातिर्वनिर्हन्ता” भा॰।

उपमातृ स्त्री उपमिता माता अवा॰स॰। १धात्र्याम् अमरः। सा हि मातृतुल्यं प्रतिपालयतीति तस्यास्तथात्वम् २मातृतुल्यासु मातृष्वस्त्रादिषु च। ताश्च “मातृष्वसा मातुलानी पितृव्यस्त्री पितृष्वसा। श्वश्रूः पूर्व्वजपत्नी च मातृतुल्याः प्रकीर्त्तिता” दायभा॰ वृह॰ स्मृ॰ उक्ताः। स्वस्रादिपर्य्युदासात् ऋदन्तत्वेऽपि स्त्रियां न ङीप्। उप+मा–तृच्। २उपमानकर्त्तरि त्रि॰। स्त्रियां ङीप्।

उपमाद त्रि॰ उपमादयति उप+मद–णिच् अच्। उपमादके हर्षजनके “देवानामुपमादमृष्वः” ऋ॰२,५,५, “उपमादमुपमादकं यज्ञम्” भा॰।

उपमान न॰ उपमीयतेऽनेन उप+मा–भावे ल्युट्। १सादृश्यज्ञाने। करणे ल्युट्। २सादृश्यज्ञानसाधने सादृश्यप्रतियोगिनि, येन सादृश्यं भवति तस्मिन्, यथा चन्द्र इव मुखमित्यादौ चन्द्र उपमानम्। प्रसिद्धस्यैवोपमानत्वम् प्रसिद्धस्योपमेयत्वम्। उपमानमभूद्विलासिनाम्” कुमा॰ “उपमानमनुज्ञानहोरुद्धाणाम्” माघः। ३उपमितिप्रमाकरणे उपमानलक्षणञ्च न्या॰सू॰ वृत्त्योर्दर्शितं यथा “प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्” सू॰। “प्रसिद्धस्य पूर्व्वप्रमितस्य गवादेः साधर्म्यात् सादृश्यात् तज्ज्ञानात् साध्यस्य गवयादिपदवाच्यत्वस्य साधनं सिद्धिरुपमानमुपमितिर्यतइत्यध्याहारेण करणलक्षणम् अथ वा साध्यसाधनमिति करणल्युटा करणलक्षणमेवेदम् अत्र च वैधर्म्योपमितिं मन्यन्ते टीकाकृतः यथा अतिदीर्घग्रीवत्वादिपश्वन्तरवैधर्म्यज्ञानादुष्ट्रे करभपदवाच्यतामहः। एवमन्योऽप्युपमानस्य विषयइति भाष्यं यथा मुद्गपर्णीसदृशी ओषधी विषं हन्तीत्यतिदेशवाक्यार्थे ज्ञाते मुद्गपर्णीसादृश्यज्ञाने जाते इयमोषधी विषहरणीत्युपमित्या विषयीक्रियतइत्यादि”।

उपमानचि॰ सादृश्यपदार्थनिरुक्तिपूर्व्वकमुपमानस्य प्रमाणान्तरत्वं व्यवस्थापितं यथा। “तत्र सादृश्यप्रमाकरणमुपमानमिति केचित्। सादृश्यञ्च पदार्थान्तरम्। तथा हि। सदृशव्यवहारादबाधितादस्ति सादृश्यं तच्च न प्रतिपदार्थमेकं सर्वस्य सर्वसदृशत्वापत्तेः स्वसदृशत्वापत्तेश्च सुसदृशमन्दसदृशव्यवहारस्य तदेकत्वेऽनुपपत्तेश्च। न च व्यञ्जकभूयःसामान्याल्पत्वभूयस्त्वाभ्यां तद्धीरिति वाच्यं बहुभिरल्पैश्च व्यज्यमानघटादौ ह्रासवृद्धोरदर्शनात् व्यञ्जकाभिमतादेव व्यवहारसिद्धौ अतिरिक्तासिद्धेश्च। नापि संयोगवत् व्यासज्यवृत्त्यनेकम्, गोत्वोपलक्षितसादृश्याश्रयत्वात् गवयवत्, गोरपि स्वसदृशत्वप्रसङ्गात् गोरसन्निकर्षे संयोगवदप्रत्यक्षत्वप्रसङ्गाच्च। प्रत्यक्षत्वे वा गवयनिरूपितस्यैकवित्तिवेद्यत्वेन गोनिष्ठतया चाक्षुषत्वप्रसङ्गः। किन्तु प्रत्याश्रयं भिन्नम्। नचैकैकव्यभिचादनुगतरूपाभावाच्चानुगतप्रत्ययः सादृश्यपदव्युत्पत्तिश्च न स्यादिति वाच्यम् अनुगतवित्तिवेद्यसादृश्यत्वसामान्यात् सप्तपदार्थातिरिक्तत्वाद्वा जातिवदन्त्यविशेषवच्च स्वस्वलक्षणत्वात्तयोरुपपत्तेः। तच्च द्रव्ये न गुणः कर्म वा, गुणकर्मवृत्तित्वात् न च सदृशाश्रय-

वृत्तित्वादेव तत्र व्यवहारः स्वाश्रयवैसादृश्येऽपि तत्र तत्प्रतीतेः। अतएव नाश्रयसादृश्यात्तत्, सामग्रीग्रहात्तत्, बाधकाभावाद्विशेषेण वैपरीत्यसम्भवाच्च। नापि सामान्यं तद्धि न सर्व्ववृत्त्येकमनभ्युपगमात् सुसदृशमन्दसदृशव्यवहारानुपपत्तेश्च। अथ विजातीयत्वे सत्यवयवगुणकर्म्मवृत्तिभूयःसामान्यं तत्, अतएव दूरस्थे प्रतियोगिनि भूयःसामान्यज्ञानाच्च तत्र सादृश्यप्रत्ययः सर्व्वं, प्रासादतिवत् बहुत्वस्य समुदायस्यैकत्वादेकं सामान्यमिति धीप्रयोगौ अन्यथा वनाद्यपि अर्थान्तरं स्यात् सामान्यबहुत्वाल्पत्वाभ्यां सुसदृशमन्दसदृशव्यवहारः। यदुच्यते। "सामान्यान्येव भूयांसि तुल्यावयवकर्म्मणाम्। भिन्नं प्रधानसामान्यव्यक्तं सादृश्यमिष्यते" इति साजात्येऽप्यरविन्दद्वयवत् यमजयोरवयवादिभूम्ने गुणादौ जातौ च सदृशप्रत्ययात् विसदृशयोः करभरासभयोरुष्ट्रत्वाच्च। नापि धर्म्म्यन्तरे धर्म्यन्तरवृत्तिधर्म्मबाहुल्यम् असाधारणधर्म्मशून्यत्वे सति तद्गतभूयोधर्म्मवत्त्वं वा स्वनिष्ठात्यन्ताभावप्रतियोगिधर्म्मसमानाधिकरणभूयोधर्म्मवत्त्वं वा त्रितयतः पक्षादिभेदेन भूयस्त्वस्याननुगतत्वात्। नापि कपिञ्जलवत्त्रित्वपर्य्यवसन्नं विसदृशयोरपि हस्तिमशकयोः सादृश्यप्रसङ्गात्। तदुक्तं "एवं जातिगुणद्रव्यक्रियायत्किञ्चु धर्मतः। एकैकद्वित्रिसामस्त्यभेदादेकत्र चित्रतेति"। अथ व्यावर्त्तकधर्म्मापेक्षया तद्गतधर्म्मबाहुल्यं सादृश्यं बाहुल्यञ्च त्रिचतुरादिष्वनुगतं हस्तिमशकयोस्तु बहुव्यावर्त्तकं साधारणन्त्वल्पमतएव भेदाधिष्ठानमुच्यते इति चेन्न व्यावर्त्तकसमसङ्ख्यत्वमात्रेणागणितेनापि सादृश्यव्यवहारात्। किञ्च सामान्यान्याश्रयभेदेनाभिन्नानि सादृश्यन्तु भिन्नम्। सामान्यं निःप्रतियोगिकं तदनिरूप्यञ्च। सादृश्यन्तु सप्रतियोगिकं तन्निरूप्यञ्च। अथ भेदे सति तद्गतभूयःसामान्यवत्त्वं सादृश्यं भेदश्च प्रत्याश्रयमन्यः सप्रतियोगिकश्चेति चेत्तर्हि सादृश्यस्य भेदघटितत्वेन तस्मात् सदृश इति स्यात् न तु तेन तस्य वा सदृश इति स्यात्। न च सादृश्यस्यापि सप्रतियोगिकत्वेन तस्मात् सदृश इति स्यात्, अवधौ हि तथाप्रतीतिप्रयोगौ न तु प्रतियोगिनि, अभावेऽपि घटास्येति प्रतीतिप्रसङ्गात्। अपि च तद्धर्म्मवत्त्वं यदि सादृश्यं तदा तत्तातद्वत्त्वयोः सङ्करप्रसङ्गात्। तद्धर्म्मवत्ता हि तत्ता तदन्या च तद्वत्ता यदि च तत्तैव तद्वत्ता तदा तदेव तद्वदिति स्यात्। तथा च तद्धर्म्मवत्ताज्ञाने प्रत्यभिज्ञानवत् सोऽयमिति स्यात् न तु तद्वदिति। एवं तत्त्वैव हि तत्तेति गवयेऽपि गोबुद्धिव्यपदेशौ स्याताम् गोगतसामान्ययोगित्वेन गोवत्तत्ताश्रयत्वात्। नापि विशेषः प्रत्यक्षत्वात्। न समवायः, वृत्तिमत्त्वात् इत्यतिरिक्तं सादृश्यम् यत्तु सादृश्यं भावोऽभावो वा भावोऽपि सगुणं निर्गुणं वा, निर्गुणमप्याश्रितमनाश्रितं वा। आश्रितमपि सामान्यवन्निःसामान्यं वा सामान्यवत्त्वे स्पन्दोऽस्पन्दो वा निर्गुणं निःसामान्यमाश्रितमनाश्रितमनेकाश्रितम् वा। इति यथायथं सप्तपदार्थान्तर्गतमिति तत्र व्यवहारानुपपत्त्या तद्बहिर्भावात् अन्यथैतादृशविकल्पेन सामान्यविशेषसमवायानामपि द्रव्यादित्रयधर्म्मात्तदन्तर्गतत्वं स्यादिति। उच्यते। असाधारणान्यतद्गतबहुधर्म्मवत्त्वं तत्सादृश्यं यमजादिसाधारणं भेदाघटिततया च निरवधि, तद्गतबहुधर्म्मवत्त्वं तन्निरूप्यमिति तन्निरूप्यत्वमेव तस्य सप्रतियोगिकत्वं तथापि सादृश्ये तदेव सप्रतियोगिकत्वं न तु भेददीर्घादिवत्सावधित्वं तस्मात् सदृश इति प्रत्ययापत्तेः। बहुत्वञ्च त्रिचतुरादिसाधारणमिति नाननुगमः। न चातिप्रसङ्गः हस्तिमशकयोरपि प्राणित्वसुखित्वदुःखित्वादिना सादृश्यात्। अतएव वैसादृश्येऽपि आह्लादकत्वादिना चन्द्र इव मुखं, बहुक्षीरत्वादिना महिषीव गौरिति। बहुत्वतद्गतधर्म्मवत्त्वेन सुसदृशमन्दसदृशत्वम्। अतएव गवये गोसादृश्यं मन्दतद्धर्म्मवत्त्वमेव विवेचयति। वराहं गावोऽनुधावन्तीत्यत्र गोसादृश्यं वराहेऽप्युक्तम्। तत्तद्धर्म्मवत्त्वेनोपमेयव्यवहारः काव्यादौ, साध्यसाधनवत्त्वमात्रेण दृष्टान्ते पक्षसादृश्यवाचकवति प्रयोगः परीक्षकाणाम्। न चैते गौणा मुख्ये बाधकाभावात्। तस्मात् केनचित् कस्यचित् कश्चित् सादृश्यं नत्वनुगतमस्ति॥ किञ्च सादृश्यबहुतद्धर्म्मवत्त्वज्ञानं सादृश्यव्यञ्जकं तदेव तद्व्यवहारनियामकमस्तु किमधिकेन। अन्यथा त्रिचतुरादित्वेन व्यञ्जकमपि बहुधर्म्मवत्त्वमननुगतं स्यात्। व्यञ्जकमननुगतमपि वह्नौ प्रत्यक्षादिवदिति चेन्न तत्र व्यक्तीनां वैजात्यात् धूमालोकादौ वह्निव्याप्यत्वमेवानुगतम्। अत्रापि तद्व्याप्यत्वमस्तीति चेत् यादृशं तद्व्याप्यं तदेव तद्व्यवहारनिमित्तं न तु तद्गतबहुधर्म्मवत्त्वज्ञानं, न व्यञ्जकमेवानुभवविरोधात् तद्गतभूयोधर्म्मस्य बहुत्वज्ञानं विना सुसदृश-मन्दसदृशत्वज्ञानाभावाच्च। अथ तद्गतबहुधर्म्मवत्त्वं न सप्रतियोगिकं, सादृश्यं तु तथेति व्यवहर्त्तव्यमधिकमिति चेन्न सादृश्यवत्तस्यापि सप्रतियोगिकत्वात् यत्तु तत्तातद्वत्तयोः सङ्करः स्यादिति तन्न तत्त्वैव

तद्धर्म्मवत्ता तदभेदो वा तत्ता सा च सोऽयमिति प्रत्यभिज्ञाने भासते। भेदे भासमाने तदन्यस्मिन् तद्धर्म्मवत्ता तद्वत्ता यतो भवति तद्वदयं न तु स इति तयोर्भेदात्। नन्वेवं व्यक्त्यन्तरे गोत्वपक्षे तद्धीयदयमिति स्यात्तथापि गौरिति चेन्न गोत्वमात्रस्य तदन्यव्यक्तिवृत्तित्वपक्षे समन्वयः, एकत्र नानासम्बन्धावगमात्। तद्वीवृत्तिबहुधर्म्मज्ञाने भवत्येव यवत्तावद्वत्तेति। तथाप्ययमपि खड्गादिमानिति वस्तुत्वधीः स्यात् न तु गोसदृश इति चेन्न एकत्रोभयसम्बन्धः सदृश्योऽन्यगतभूयोधर्म्मवत्त्वमन्यत्र सादृश्यमिति विवेकात्

नवीनास्तु। विलक्षणसुखद्वये इतरसकलव्यावृत्तसादृश्यमनुभूयते न तु तद्द्वयमात्रवृत्तिजातिरस्ति तद्द्वयाभावे जातेरनाश्रयत्वेनानित्यत्वप्रसङ्गात्। नापि जन्यं धर्म्मान्तरमस्त्यधिकं सादृश्यमुपेयं तथापि समानधर्म्मवत्त्वव्यञ्जकं विना कथं तत्र सादृश्याभिव्यक्तिरिति चेन्न प्रतीतिबलात् द्रव्ये तथा, गुणादौ तु व्यभिचारात् अतएव न व्यञ्जकेनान्यथासिद्धिस्तदभावेऽपि सादृश्यानुभवादित्याहुः। तत्तुच्छं विलक्षणं सुखद्वयं न सुखमात्रहेतुजन्यं सुखान्तरस्यापि सदृशत्वापत्तेः किन्तु विलक्षणादृष्टजन्यं तच्चादृष्टं विहिततत्तत्क्रियाविशेषानुष्ठानादन्येषामप्यस्तीति तेषामपि तादृशानि सुखानि भवन्तीति तेषु कारणविशेषप्रयोज्या विलक्षणतास्ति तस्मादात्मनामानन्त्यात् अनादिनिधनत्वाद्भूतपूर्व्वानागतविजातीयं न सुखमस्ति एवं दुःखान्तरकार्य्येष्वपि नह्यनुत्पन्नमनुत्पत्स्यमानजातीयं कार्य्यमस्ति। यच्च व्यक्तिनाशे जातेरनित्यत्वमापादितं तदपि न विनाशकाभावात् अतएव प्रलयेऽपि तदवस्थानम्। अपि चैकत्र प्रतियोगिभेदेन सादृश्यं भिन्नं नत्वेकम्, सुखदृशमन्दसदृशव्यवहारात् तथा च योग्यत्वादेकपक्षे सर्व्वग्रहप्रसङ्गात्। प्रतियोगिगतभूयोधर्म्मज्ञानस्य व्यञ्जकस्य क्रमाक्रमे तदेव व्यवहारनिमित्तमित्युक्तम्। किञ्चैवं वैसादृश्यमपि स्यात्। न च सादृश्याभावस्तत्, वैपरीत्यस्यापि सम्भवात् सादृश्याभावत्वेनैव प्रतीतिर्विशब्दस्य निषेधार्थत्वादिति चेत्तर्हि गौरिव महिषोऽत्र पावनत्वक्षीरवत्त्वादिना विवक्षितसादृश्याभावे .भवेद् वैसादृश्यं न स्यात् न हि तत्र गोसादृश्यं तदभावश्च। तस्मात् साधर्म्यवैधर्म्ये सादृश्यवैसादृश्ये। यत्तु तद्वृत्त्यनेकधर्म्मवत्त्वं सादृश्यं तेनाभेदेऽपि "गगनं गगनाकारं सागरः सागरोपमः। रामरावणयोर्युद्धं रामरावणयोरिव" इत्यादौ सादृश्यं, न चैवं गोरपि गोसदृशत्वे गवयपदाभिधेयत्वापत्तिः तत्र सदृशपदस्य विशेषे तात्पर्य्यात्। अन्यथा महिषेऽतिप्रसङ्ग इति तन्न तस्य तेन वा सदृश इति प्रतीतिप्रयोगात् न चाभेदे सम्बन्धः सदृशार्थो वा सम्भवति। गगनं गगनाकारमित्यादौ तु गगनाद्यैवैतादृशधर्म्मवन्नान्यदित्यत्र तात्पर्य्यम्। यद्वा सर्गान्तरीयगगनसागरयोरुपमानत्वं तयोर्युद्धविशेषे तयोरेव युद्धान्तरमुपमानमिति। नन्वयं देवदत्तस्तद्भ्रो वा भवतु तत्सदृशस्तावदयमिति भेदाभेदसंशयेऽपि सादृश्यनिश्चयात् अतिरिक्तं सादृश्यमिति चेत् न देवदत्ताभिप्रायेणैकदेशे सादृश्यपदप्रयोगात् कथमन्यथा स एवायं न तु तत्सदृश इति, सदृशोऽयं न तु स इति प्रतीतिप्रयोगौ। न चात्र सदृशपदं भेदमात्रपरमिति युक्तं तस्य सम्भवति लक्षणाया अयोगात्। तस्मान्न पदार्थान्तरं सादृश्यमिति। स्यादेतत्। मा भूत् पदार्थान्तरं तथापि प्रत्यक्षाच्छब्दाद्वा गवये गोसादृश्यज्ञानात् गवयसदृशो गौरिति ज्ञानमुपमितिः। न चैतत्प्रत्यक्षं विशेष्यासन्निकर्षात् नानुमानं लिङ्गाभावात्। न च गवयगतं सादृश्यं लिङ्गम् अपक्षधर्म्मत्वात्। अथ सदृशद्वयान्तरदर्शने यो यद्गतसादृश्यप्रतियोगी स तत्सदृश इति प्रत्यक्षेण व्याप्तिग्रहे सति गवयगतसादृश्यप्रतियोगित्वात् गौर्गवयसदृश इत्यनुमितिरिति चेत् व्याप्तिग्रहं विनैव प्रथममपि प्रत्यक्षाच्छब्दाद्वा गोसदृशं गवयं ज्ञात्वा गवि गवयसादृश्यज्ञानोदयात्। किञ्च गवि गवयसादृश्यं न साध्यं प्रथमतस्तदप्रतीतेः गवयगतसादृश्यप्रतियोगित्वञ्च गवि न प्रत्यक्षं विशेष्यासन्निकर्षादिति नानुमितिगम्यं तल्लिङ्गस्यापि तद्वत्त्वेनाप्रत्यक्षस्य लिङ्गान्तरगम्यत्वेऽनवस्थानात्। न च गौरेतद्गवयसदृशः गवयगतभूयोऽवयवादिसामान्यवत्त्वात् गवयान्तरवदिति गवयान्तरज्ञानेऽपि गवि गवयसादृश्यं विनानुपपद्यमानं तत्कल्पयति। न हि गोसदृशो गवय एतद्गवयसदृशो गौरिति वाच्यम्। गवयनिरूपितगोसादृश्याप्रसिद्धौ तेन विनानुपपत्तिज्ञानाभावात्। किञ्च तवार्थापत्तिर्व्यतिरेक्यनुमानं न च गवयगतसादृश्यप्रतियोगित्वं गवि प्रत्यक्षादिना ज्ञातं शक्यमित्युक्तम्। नन्वेवं करभे गोवैधर्म्यज्ञानात् गवि करभवैधर्म्यज्ञानमपि मानान्तरं स्यादिति चेत् गवि करभवैधर्म्यं यदि करभवृत्तिधर्म्माभावत्वं तदाऽस्तु ते गवि प्राङ्ज्ञात तावदनुपलब्धिगम्यमेव अथ करभव्यावृत्तधर्म्मवत्त्वं तदा गोधर्म्मा गविगता एव इदानीं स्मृतगोधर्म्माणां करभेऽभावमात्रमधिकं गम्यं तच्च प्रत्यक्षादेव। अथ तत्प्रतियो-

गिकैतन्निष्ठसादृश्ये भासमाने समानसंवित्संवेद्यतया एतत्प्रतियोगिकतन्निष्ठसादृश्ये वैधर्म्यं च ज्ञातमिति चेन्न विषयविशेष्यप्रतियोगिभेदेन समानसंवित्संवेद्यत्वासिद्धेः। एतत्सदृश एतद्विधर्मा च इत्येतद्विशेष्यकप्रत्ययानुदयाच्च तद्विशेष्यकप्रत्यक्षे तत्सन्निकर्षस्य हेतुत्वात्। ननु प्रत्यक्षे विशेष्यसन्निकर्षो हेतुर्न तु यावद्विशेष्यसन्निकर्षो गौरवात् अन्यथातीतानागतव्याप्यविशेष्यकव्याप्तिप्रत्यक्षं न स्यादिति चेन्न अतीतानागतविशेष्ये सामान्यलक्षणायाः सत्त्वात्। अथ गवयसादृश्यं गवि गवयगतशृङ्गादिमत्त्वं तच्च गवये गोसदृशे भासमाने गवि भातमेव यद्वा गोगतशृङ्गित्वादेर्गवयगतत्वं गवये गोसादृश्यम् एवं तथैव गवयगतस्य गोगतत्वं गवि गोसादृश्यं तच्चेन्द्रियेणैव ज्ञातं सामान्यस्यैवाक्षत्वेनेन्द्रियसन्निकृष्टत्वात् अयं न स इति विपरीतप्रत्यभिज्ञायामिवेति चेत् सत्यम् गोविशेष्यकगवयगतशृङ्गित्वादिज्ञानं नेन्द्रियजन्यं गोरसन्निकर्षात् तस्मादेतत्सदृश एतद्विधर्मा एतस्माद्दीर्घः स इति ज्ञानं नानुमानात् विशेष्यासन्निकर्षे तद्गतलिङ्गाज्ञानात्। एवञ्च सप्रतियोगिकपदार्थज्ञानेन तत्प्रतियोगिकपदार्थज्ञानमुपमानं प्रत्यक्षादिकं विनार्थापत्तौ पूर्वेषामुपमानतेति वार्त्तमेतत् तथा हि। परस्परसदृशं हस्त्यादिकं प्रत्यक्षयतो यो यत्सादृश्यप्रतियोगी स तत्सदृश इति सामान्यतो व्याप्तिज्ञाने सति गोगवययोः तत्सादृश्यप्रतियोगित्वात् यथा भ्राता भगिनी। गवयगतसादृश्यप्रतियोगित्वञ्च गोगवयगतसादृश्यवित्तिवेद्यमेव सादृश्ये गोः प्रतियोगित्वेनैव ज्ञानात् अन्यथा सादृश्ये गोरनन्वयापत्तिः यत्तद्भ्यां सामान्यतोव्याप्तिग्रहं विना एतत्सदृशः स इति फलासिद्धेः यत्तद्भ्यां व्याप्तिग्रहेऽस्माकं व्यतिरेकी परेषामर्थापत्तिरित्यन्यदेतत्। सादृश्यस्योभयवृत्तिधर्मस्य किञ्चिद्विशेष्यसन्निकर्षात् प्रत्यक्षे भानं यावद्विशेष्यसन्निकर्षस्याप्रयोजकत्वात्। अन्यथाऽयं स इति भ्रान्तविपरीतप्रत्यभिज्ञायां का गतिः। मनसैव वैतन्निष्ठसादृश्यप्रतियोगित्वस्य च प्रत्यक्षविशेष्यकत्वं परामर्शे न प्रयोजकमित्युक्तम्। कीदृशो गवय इति जिज्ञासया यथा गौस्तद्वद्गवय इति श्रुतोत्तरवाक्यस्य तथाभूते पिण्डे दृष्टे तथा गवय इत्यतिदेशवाक्यार्थानुसन्धानेऽयं गवयशब्दवाच्य इति मतिरुपमानफलम्। न चेयं वाक्यमानात्, अप्रत्यक्षीकृतपिण्डस्यापि प्रसङ्गात्। नापि प्रत्यक्षमानात् अश्रुतवाक्यस्यापि प्रसङ्गात्। नापि तयोः समाहारात् स हि प्रमाणसमाहारो वा फलसमाहारो वा आद्ये प्रमाणत्वे सति समाहारः समाहृतयोर्वा प्रमाणत्वं, फलानेकत्वे समाहारानुपपत्तेः तस्य परस्परसहकारिरूपत्वात्। नान्त्यः वाक्यप्रत्यक्षयोर्भिन्नकालत्वात् वाक्यतदर्थयोः स्मृतिद्वारोपनयेऽपि गवयपिण्डसम्बन्धे नापि इन्द्रियादिना तद्गतसादृश्यानुपनये समयपरिच्छेदासिद्धेः। फलसमाहारे च तदन्तर्भावे शब्दानुमानयोरपि प्रत्यक्षत्वप्रसङ्गः। तत् किं तत्फलस्य प्रमाणबहिर्भाव एव अन्तर्भावे वा कियती सीमा। तत्तदसाधारणेन्द्रियादिसाहित्यम् अस्ति तर्हि सादृश्यज्ञानेऽपि विस्फारितस्य चक्षुषो व्यापारः। न तस्मिन् सति तस्यानुपयोगात् उपलब्धगोसादृश्यविशिष्टगवयपिण्डस्य वाक्यार्थस्मृतिमतः कालान्तरेऽप्यनुसन्धानबलात् समयपरिच्छेदोपपत्तेः। तस्मादागमप्रत्यक्षाभ्यामन्यदेवेदमागमस्मृतिसहितं सादृश्यज्ञानमुपमानप्रमाणमिति जरन्नैयायिकजयन्तप्रभृतयः। तत्र वैधर्म्येऽनुपपत्तेः। यदोदीच्येन क्रमेलकं निन्दतोक्तं धिक् करभमतिदीर्घग्रीवं प्रलम्बचपलौष्ठं कठोरतीक्ष्णकण्टकाशिनं कुत्सितावयवसन्निवेशमपसदं पशूनामिति, तदुपश्रुत्य दाक्षिणात्य उत्तरापथं गतस्तादृशं वस्तूपलभ्य नूनमसौ करभ इति प्रत्येति। तत्र किं मानं न तावदुपमानं सादृश्याभावात् न च प्रमाणान्तरं सम्भवति। उच्यते। न तावदनुगतं प्रवृत्तिनिमित्तमुपलक्षणं विना, प्राग्भिज्ञामतः शरीरैकत्ववादिनां शरीरविशेषे चैत्रादिपदवदेकैकशृङ्ग्राहिकया गवयपदशक्तिग्रहे गवयान्तरेऽपि सम्भवात्। नाप्यनभ्यस्ते पदान्तरोपस्थिते परिभाषाऽऽकाशादिपदवत्, अतएवानभ्यस्तत्वाच्च उपलक्षणस्य च शक्तौ बहिर्भावात् तद्वदेव। नापि योगनिर्वचनात् पाठकादिवत् सोपलक्षणे, अन्यथा पठिक्रियानुपहिते पठतिप्रयोगः स्यात्। अतस्तद्गुणज्ञानादियोगिनि शक्तिः। अवच्छेदकतया तूपलक्षणेऽपीति योगाभावात्। नाप्युपस्थितनिमित्तसङ्कोचनात् स्वर्गादिपदवत् तदभावात्। अतो गन्धाद्युपलक्षिते पृथिवीत्वेन निमित्तेन पृथिव्यादिपदवत् सादृश्याद्युपलक्षिते गवयत्वादौ गवयादिपदानां शक्तिरिति परमार्थतः। अन्यथा फलस्याभासत्वे मानत्वविरोधात् न च पूर्वं गवयत्वमुपस्थितमुपस्थापकाभावात् न च गवयपदादेव तदुपस्थितिरन्योन्याश्रयात् अथ वाक्यादेवानेन समयः परिच्छिन्नः केवलमयं प्रत्यभिजानाति यो गोसदृशो गवयपदवाच्यत्वेन मयावगतः सोऽयमिति नोपमानस्य विषय इति चेन्न हि सादृश्यमेव निमित्तमसम्प्रतीतगूनामव्यवहारप्रसङ्गात् गोर-

वाच्यं नापि गवयत्वं तदनुपस्थितेः। अतएव गोभयं स्वयं प्रतीतसमयसंक्रान्तयेऽतिदेशवाक्यप्रयोगानुपपत्तेश्च। गवयत्वे ह्ययं व्युत्पन्नो न गोसादृश्ये निमित्तस्य गवयत्वस्य प्रतीतेः। नच यदा यद्वाक्यं समयपरिच्छेदं पूर्वं नाजीजनत् तदा तदेव वाक्यं स्मृतं तत्प्रवृत्तिनिमित्तं च्छेत्स्यति अध्ययनसमयगृहीत एव वेदराशिरङ्गोपाङ्गपर्य्यवदातस्य कालान्तरे नववाक्यस्येवास्य प्रागेव बोधितत्वात् पर्य्यवसित इति वाच्यं गोः सादृश्योपलक्षणत्वनिमित्तत्वयोः सन्देहात् पश्चाद्गवयत्वेऽवगते तर्कपुरस्कारात्। सादृश्यस्योपलक्षणत्वे गङ्गायां घोषः इत्यत्रैवान्वयो भविष्यतीति चेत् न उपलक्षणनिमित्तत्वसन्देहेऽपि यो गोसदृशः स गवयपदवाच्य इति सामानाधिकरण्यमात्रेणान्वयोपपत्तौ मानान्तरोपनीतानपेक्षणात् इकारादिसन्देहेऽपि घटो भवतीति वाक्यवत् अन्यथा पर्य्यवसितेऽपि वाक्ये मानान्तरसहकारात् तत्तदन्वयबुद्धौ वाक्यभेदापत्तेः। गङ्गायां घोष इत्यत्र तु पदार्थ एवान्वयायोग्य इति युक्तं तत्र मानान्तरापेक्षणम्। यदि च प्रतीतसंसर्गबलायातोऽर्थो वाक्यस्यैव तदा वाक्यभेदापत्तिः। अथ तात्पर्य्यानुपपत्त्या यष्टीः प्रवेशयेतिवल्लक्षणास्तु गवयपदाव्युत्पन्नं प्रति तद्व्युत्पत्तये वाक्यमाप्तेनोक्तं तच्च न प्रवृत्तिनिमित्तोपादानं विना। न च गोसादृश्यं तदिति तात्पर्यतो गोसादृश्यपदेन गोसमानाधिकरणं गवयत्वमुपलक्षितं कल्प्यते। न तु यथा धूमोऽस्तीत्यत्र वह्नौ तात्पर्यमनुमानेन निर्वहतीति न लक्षणा न चात्र प्रमाणान्तरमस्तीति येन तन्निर्वाहः अनुमानस्यासिद्धेः। अन्यथान्योन्याश्रयात् न च वाक्ये न लक्षणा, तस्याः पदधर्मत्वादिति वाच्यं एकपद एव लक्षणा पदान्तरन्तु नियामकमित्यस्य वक्तव्यत्वात्। अथ गवयत्वेन लक्षणया तदुपस्थितावपि व्यक्तिवाच्यता न ज्ञायेत शब्दादिति विशिष्टवाच्यता ग्राहकमानान्तरमवश्यं स्वीकरणीयम्। न च यद्विशो धर्मी यत्पदवाच्यः सोऽपि तद्वाच्य इति नियमः। जातिपदे व्यभिचारादिति चेत् न प्रवृत्तिवद्वाच्यत्वबोधतात्पर्यकत्वेन जातीति देशवाक्ये गवयत्वविशिष्टव्यक्तेरेव लक्षणात्। अथ यदा गवयत्वे साक्षात् तात्पर्यं गोसादृश्यशब्दस्य स्पृश्यते, तदा लक्षणा न च साक्षात् तात्पर्यमवष्टतम् अन्यथा धूमोऽस्तीत्यत्रापि साम्यादिति चेत् न उपस्थापकान्तराभावे तात्पर्यस्यैव साक्षात् तात्पर्यरूपत्वात् नचोपमानमेव तथा, अन्योन्याश्रयत्वात्। नैवं यत्र प्रवृत्तिनिमित्तविषयबोधने न तात्पर्यं यो गोसदृशः स गवयशब्दवाच्य इति स्वरूपाख्यानमात्रं तत्राप्युक्तसामग्रीतः समयपरिच्छित्तिर्भवत्येव न च व्युत्पित्सुव्युत्पत्तये प्रवृत्तिनिमित्तविशेषे तात्पर्यं यदनुपपत्तिर्लक्षणावीजं स्यात्। अपि च धिक करभमतिदीर्घग्रीवमित्यादिवाक्यस्य करभनिन्दातात्पर्यकस्य प्रवृत्तिनिमित्तपरत्वाभावेऽपि तादृशपिण्डमनुभवतः स्मरतश्च वाक्यार्थम् अयं करभशब्दवाच्य इति भवति मतिः। न च तत्र प्रवृत्तिनिमित्तविशेषे तात्पर्यमस्ति लक्षणाया वीजं, निन्दापरत्वात्। किञ्च सर्वत्रान्वयानुपपत्तिरेव लक्षणावीजं यष्टीः प्रवेशयेत्यादावपि प्रकरणादिना पुरस्कारादिप्रयोजनकत्वं प्रवेशनस्यावगतं तादृशे च प्रवेशनादौ यष्ट्यादेरनन्वयात् तात्पर्यानुपपत्तेरपि तात्पर्यमज्ञात्वा ज्ञातुमशक्यत्वात्। अथ प्रकरणादेरननुगमः तात्पर्यव्याप्यत्वेन तदनुगमे तात्पर्यानुपपत्तिरेव तद्वीजमस्तु लाघवादिति चेत् न धूमादिवदननुगतस्यापि व्याप्यत्वाविरोधात्। तस्मात् गवयशब्दः कस्यचिद्वाचकः शिष्टप्रयुक्तत्वादिति सामान्यतो निश्चितेऽपि गवयत्वविशिष्टो धर्मी गवयपदवाच्य इति लाघवान्निर्णेयम्। तच्च प्रमाणसहकारि न च तस्यां दशायां प्रमाणान्तरमस्त्यतो यत् प्रमाणसहकारि तत्प्रमाणान्तरमास्थेयम्। अस्त्वनुमानं तथा हि गवयशब्दो गवयत्वविशिष्टवाचकः असति वृत्त्यन्तरेऽभियुक्तैः प्रयुज्यमानत्वात् गवि गोशब्दवदिति चेत् न गवयत्वविशिष्टो यो धर्मी तस्य वाचकत्वग्रहेऽपि गवयत्वप्रवृत्तिनिमित्तत्वासिद्धेः। न च शक्तिमज्ञात्वा वृत्त्यन्तरं क्वापि अवधारयितुं शक्यते सामानाधिकरण्यमात्रस्य निमित्तोपलक्षणतासाधारणत्वात्। अथ गोसादृश्यनिमित्ततागौरवस्यानवतारेणोपमानस्याप्यनवतारः। तथा च तर्केण तस्य प्रवृत्तिनिमित्तकत्वेऽवगते गवयपदं गवयत्वप्रवृत्तिनिमित्तकम् इतराप्रवृत्तिनिमित्तकत्वे सति सप्रवृत्तिनिमित्तकत्वात् यन्नैवं तन्नैवमिति चेन्न तर्कस्यानिशायकत्वात् न चायं तर्को व्याप्तिग्रहमूलको येन विपर्ययानुमानादर्थसिद्धिः। अथ गवयपदं सप्रवृत्तिनिमित्तकमिति सामान्यतो दृष्टमेव तर्कसहकृतं गवयपदस्येतराप्रवृत्तिनिमित्तकत्वं परिच्छिनत्ति न तु मानान्तरं कल्पयित्वा तर्कः सहकारी कल्प्यते इति चेन्न इदं सप्रवृत्तिनिमित्तकमन्यच्च न प्रवृत्तिनिमित्तमिति बुद्धावपि गवयत्वप्रवृत्तिनिमित्तकं गवयपदमिति मानान्तरं विना प्रतीतेः अनुमितेर्व्यापकतावच्छेदकत्वप्रकारताकत्वनियमात्। अथ यथेच्छायां

सामान्यतो दृष्टेन विशेषबाधसहकृतेनान्यद्रव्यानाश्रितत्वं प्रतीयते अन्यथा विशेषणपदस्य तद्विपर्य्ययस्य वा प्रमाणत्वात् बाधकानां पृथिव्याद्यष्टकमात्रव्यतिरेकविषयकत्वं जन्यद्रव्यानाश्रितत्वं केन ग्राह्यम्, तथात्रापि गौरवाख्य तर्कसहकृतसामान्यतो दृष्टादिना प्रवृत्तिनिमित्तकत्वं ज्ञायते पश्चाद्व्यतिरेकी स्यात् क्वाप्यप्रमाणान्तरापेक्षयो पक्षप्रमसहकारित्वस्य युक्तत्वादिति चेन्न इच्छायामेकैकबाधसहकृतपरापरबाधकैरेव तादृग्रूपविशिष्टवैशिष्ट्याद्न्यद्रव्यानाश्रितत्वपरिच्छेदात् न तु सामान्यतोदृष्टेन, विशेषणतयोपस्थितेनैव विशिष्टवैशिष्ट्यबोधनिर्वाहात् तर्कानवतारदशायां तस्य तदपरिच्छेदकत्वाच्च । न च व्याप्तिपरमिदं वाक्यं यो गोसदृशः स गवयपदार्थ इति वाक्यादवगतव्याप्तिरनुमिनुयादयं गवयपदवाच्यो गोसदृशत्वात् अतिदेशकालावगतपिण्डवदिति वाच्यं न हि गोसदृशं ज्ञात्वाऽनेन पृष्टः स किंशब्दवाच्य इति किन्तु सामान्यतो गवयपदार्थमवगम्य कीदृगिति तथा च यद्योगप्रायमाख्यानं तस्यैवार्थत्वं ततः,किं तेन । अथ लक्षणपरमिदं वाक्यं किंलक्षणकोऽसाविति प्रश्नार्थः एवञ्च प्रयोक्तव्यम् अयमसौ गवय इति व्यवहर्त्तव्यो गोसदृशत्वात् यस्तु न तथा नासौ गोसदृशः यथा हस्तीति चेन्न न हि हस्त्यादीनां विपक्षत्वे प्रमाणमस्ति सर्वप्रयोगस्य दुर्ज्ञानत्वात् कतिपयव्यवहारस्यैकान्तिकत्वात् अथ कीदृक् किंलिङ्गः इति प्रश्नार्थो नह्यनेन लिङ्गमज्ञात्वा गवयपदस्य वाचकत्वं कस्यचिद्वाच्यत्वमवगतं येन तदर्थः प्रश्नः । अथ प्रवृत्तिनिमित्तविशेषे लिङ्गप्रश्नो गवयपदं येन निमित्तेन वर्त्तते तस्य किं लिङ्गमित्यर्थ इति चेत्न हि तदनुमेयमेवेत्यनेन निश्चितं येन तथा स्यात् ज्ञानहेतुमात्रप्रश्ने तद्विशेषेणोत्तरमिति चेन्न अविशेषादिन्द्रियसन्निकर्षमप्युत्तरयेत् वनं गतो द्रक्ष्यसीति तस्मान्निमित्तभेदे एवायं प्रश्नः कीदृग् गवयः केन निमित्तेन गवयपदं प्रवर्त्तते, गवयत्वस्य साक्षादुपदर्शयितुमशक्यत्वात् पृष्ट उपलक्षणं सादृश्यमाचष्टे पश्चाद्दृष्टेऽपि पिण्डेऽतिदेशवाक्यं स्मरतस्तर्कसहकारेण गवयत्वविशिष्टो धर्मी गवयशब्दवाच्य इति प्रवृत्तिनिमित्तविशेषः परिच्छित्तिरुपमानफलम्” इत्यन्तेन

वेदान्तपरिभाषायाम् “सादृश्यप्रमाकरणमुपमानम् । तथाहि नगरेषु दृष्टगोपिण्डस्य पुरुषस्य वनं गतस्य गवयेन्द्रियसन्निकर्षे सति भवति प्रतीतिरयं पिण्डो गोसदृश इति तदनन्तरं च भवति निश्चयोऽनेन सदृशी मदीया गौरिति । तत्रान्वयव्यतिरेकाभ्यां गवयनिष्ठगोसादृश्यज्ञानं करणं गोनिष्ठगवयसादृश्यज्ञानं फलम् । नचेदं प्रत्यक्षेण सम्भवति गोपिण्डस्य तदेन्द्रियासन्निकर्षात् नाप्यनुमानेन गवयनिष्ठगोसादृश्यस्यातल्लिङ्गत्वात् । नापि मदीया गौरेतद्गवयसदृशी एतन्निष्ठसादृश्यप्रतियोगित्वात् योयत्सादृश्यप्रतियोगी स तत्सदृशः यथा मैत्रनिष्ठसादृश्यप्रतियोगी चैत्रो मैत्रसदृश इत्यनुमानात् तत्सम्भव इति वाच्यम् एवंविधानुमानानवतारेऽप्यनेन सदृशी मदीया गौरिति प्रतीतेरनुभवसिद्धत्वादुपमिनोमीत्यनुव्यवसायाच्च । तस्मादुपमानं मानान्तरम्” ।

सां॰त॰कौ॰ तस्य प्रमाणान्तरत्वं निराकृतं यथा “उपमानं तावत् यथा गौस्तथा गवय इति वाक्यं तज्जनिता धीरागम एव योऽप्ययं गवयशब्दो गोसादृश्यस्य वाचक इति प्रत्ययः सोऽप्यनुमानमेव, यो हि शब्दो यत्र वृद्धैः प्रयुज्यते सोऽसति वृत्त्यन्तरे तस्य वाचको यथा गोशब्दो गोत्वे, प्रयुज्यते चैवं गवयशब्दो गोसदृशे इति तस्यैव वाचक इति ज्ञानमनुमानमेव । यत्तु गवयस्य चक्षुःसन्निकृष्टस्य गोसादृश्यज्ञानं तत् प्रत्यक्षम् । अतएव स्मर्यमाणायां गवि गवयसादृश्यज्ञानं प्रत्यक्षम् नह्यन्यत् गवि सादृश्यमन्यच्च गवये, भूयोऽवयवसामान्ययोगो हि जात्यन्तरवर्त्तीं जात्यन्तरे सादृश्यमुच्यते सामान्ययोगश्चैकः स चेद्गवये प्रत्यक्षो गव्यपि तथेति नोपमानस्य प्रमेयान्तरमस्ति यत्र प्रमाणमुपमानं भवेदिति न प्रमाणान्तरमुपमानम्” ।

एतन्मतं च मणिकृता विस्तरेण निराकृत्य तस्य प्रमाणान्तरत्वं समर्थितम् । तदेतत् संक्षिप्य भाषा॰उक्तं यथा “ग्रामीणस्य प्रथमतः पश्यतो गवयादिकम् । सादृश्यधीर्गवादीनां या स्यात् सा करणं मतम् । वाक्यार्थस्यातिदेशस्य स्मृतिर्व्यापार उच्यते । गवयादिपदानान्तु शक्तिधीरुपमाफलम्” । अतएव प्राचीनैरपि उपमानस्य शक्तिग्राहकता स्वीकृता यथा “शक्तिग्रहं व्याकरणोपमानात् कोषाप्तवाक्याद्व्यवहारतश्च । वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः” ।

उपमानचिन्तामणि पु॰ गङ्गेशोपाध्यायकृते उपमानप्रामाण्यव्यवस्थापके ग्रन्थभेदे उपमानशब्दे प्रायेण स ग्रन्थ उपन्यस्तः स एव ग्रन्थ उपमानखण्डत्वेन प्रसिद्धः ।

उपमारण न॰ उप–मृ–णिच्–ल्युट् । वरुणप्रघासे यज्ञेऽवभृथोदकसमीपं गत्वा हविषोऽप्सु प्रक्षेपे “उपमारणप्रकारश्च शत॰ब्रा॰ २,५,२,४६ उक्तः “तूष्णीमेव प्रतिप्रस्थाता स्रुचं

प्रत्यङ्गाति तद्ये वैश्वदेवेन यजमानयोर्वाससी परिहिते स्यातां ते एतत्रापि स्यातामथास्मै वारुण्यै पयस्यायै त्वामकर्षमिश्रमादायावभृथं यन्ति वरुणं वा एतन्निर्वरुणतायै तत्र न साम गीयते न ह्यत्र साम्ना किञ्चन क्रियते तूष्णीमेवेत्याभ्यवेत्योपमारयति” “यजमानयोर्यजमानतत्पत्न्योः। त्वामकर्षमिश्रं त्वामोऽतिपाकेन दग्धः पात्रे संसक्तः कष विलेखने कष्यत इति कषः त्वामश्चासौ कषश्चेति त्वामकर्षस्तेन मिश्रं हविरादाय अवभृथमुदकं प्रति यन्ति एतत् त्वामकर्षमिश्रं हविः वरुणम्। सौमिकावभृथवत् प्रसक्तं सामगानं निषेधति तत्र न सामेति न ह्यत्रवरुणप्रघासे साम्ना किमपि प्रयोजनं क्रियते अवभृथ समीपमभ्यवेत्य हविरुपमारयति अप्सु प्रक्षिपति” भा०। एतादृशोपमारणाभिप्रायेण कात्या० २०,८,२१, सूत्रेऽस्मौ “अतः कुम्भोपमारणान्तमेव पूर्वयोरन्त्योः कर्त्तव्यमित्युक्तम्” कर्कः।

उपमास्य न० उपमासं प्रतिमासं भवं यत्। प्रतिमासभवे पितृणां श्राद्धे “विराड् वा इदमग्र आसीत्” इत्युपक्रम्य “सोऽत्क्रामत् सा पितॄनागच्छत्तां पितरोऽघ्नत सा मासि समभवत् तस्मात् पितृभ्योमास्युपमास्यं ददति प्र पितृयाणं पन्थां जानाति य एवं वेद” अथ० ८,१०,१९।

उपमित् त्रि० उपसमीपे मीयते क्षिप्यते उप+मि-क्विप्। १उपनिखाते २उपस्थापयितरि च “स्थूणेव जनाँ उपमिद्ययन्थ” ऋ० १,५९,१,“उपमित् उपस्थापयिता यद्वा उपमिदुपनिखाता स्थूणेव” भा० ३स्थूणायाम् “सभायद्दुपमिव रोधः” ऋ० ४,५,१, “उपमित् स्थूणा”भा० “उपमितां प्रतिमितामथोपरिमितामुत शालाया विश्ववाराया नद्धानि वि चृतामसि” शालाभिमन्त्रणे, अथ० ९,३,१। कर्त्तरि क्विप्। ४उपमाकर्त्तरि।

उपमित त्रि० उप+मि-क्त। १सादृश्यप्रतियोगिनि। यथा चन्द्र इव मुखमित्यादौ मुखं, तस्य चन्द्रसादृश्यप्रतियोगित्वात् “उपमितं व्याघ्रादिभिः सामान्याप्रयोगे” पा० नरव्याघ्रः नरो व्याघ्र इव वाक्ये व्याघ्र उपमानं नर उपमितः। अत्र समासे व्याघ्रशब्दस्य व्याघ्रसदृशे लक्षणा व्याघ्रसदृशोनर इति बोधः उपमितस्य विशेष्यत्वेऽपि समासविधिशास्त्रे प्रथमान्ततया निर्द्देशात् पूर्व्वनिपातः। अनेन सूत्रेण विहितसमास उपमितसमास इत्युच्यते।

उपमिति स्त्री उप+मि-क्तिन्। १उपमालङ्कारे सादृश्यज्ञानजन्ये गवयादिशब्दशक्तिबोधरूपे २उपमानफले बोधभेदे “प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे” भाषा० करणे क्तिन्। ३सादृश्ये च “पद्मवोपमितिसाम्यसपक्षम्” सा० द०। “तदाननस्योपमितौ दरिद्रता” नैष०।

उपमेत त्रि० उपमामुपमानभावं सर्व्ववृक्षेभ्योदीर्घत्वात् इतः २त०। शालवृक्षे वृक्षाणां मध्ये तस्य सर्व्वोन्नतत्वात् अन्यस्योपमानतां प्राप्तत्वात्तथात्वम्। “शालप्रांशुर्महाभुजः” रघौ तस्योन्नतायामुपमानत्वं वर्णितम्।

उपमेय त्रि० उपमीयतेऽसौ उप+मि-यत्। सादृश्यानुयोगिनि यथा चन्द्र इव मुखमित्यादौ मुखम्। “अनन्तपुरन्ध्रैक कुलोपमेयम्” कुमा० “भूयिष्ठमासोदुपमेयकान्तिः। “नवेन्दुना तन्नभसोपमेयम्” रघुः “सा पूर्णा यदि सामान्यधर्म्म औपम्यवाचि च। उपमेयं चोपमानं भवेद्वाच्यमियं पुनः” सा० द०।

उपमेयोपमा स्त्री अर्थालङ्कार भेदे। १९८पृष्ठे विवृतिः।

उपयज् पु० उप-यज-भावे वेदे क्विप् लोके तु क्विन्। पशुयागाङ्गे यागभेदे “त्रीणि ह वै पशोरेकादशानि एकादश प्रयाजाः एकादशानुयाजा एकादशोपयजः” शत० ब्रा० ३,८,४,४, इत्युपक्रमे “अथ यद्यजन्तमुपयजति तस्मादुपयजोनाम” इति तन्नामनिरुक्तिं प्रदर्श्य एकादश उपयजः क्रमेण दर्शिताः।

उपयन्तृ पु० उप+यम-तृच्। विवाहकर्त्तरि पत्यौ। “अथोपयन्तारमलं समाधिना” कुमा० “अथोपयन्त्रा सदृशेन युक्तम्” रघुः।२संयमनकर्त्तरि त्रि०स्त्रियां ङीप्।

उपयन्त्र न० उपगतं यन्त्रम् अत्या०स०। सुश्रुतोक्ते शल्योद्धारणोपाययन्त्रभेदे। यथा “तत्र मनःशरीराबाधकराणि शल्यानि तेषामाहरणोपायो यन्त्राणि तानि च षट्प्रकाराणि तद्यथा स्वस्तिकयन्त्राणि, संदंशयन्त्राणि, तालयन्त्राणि, नाडीयन्त्राणि, शलाकायन्त्राणि, उपयन्त्राणि चेति” विभज्य। “उपयन्त्राण्यपि रज्जुवेणिका पट्टचर्म्मान्तवल्कलतावस्त्राष्ठीलाश्ममुद्गरपाणिपादतलाङ्गुलिजिह्वादन्तनखमुखवालाश्वकटकशाखाष्ठीवनप्रवाहणहर्षायस्कान्तमयानि क्षाराग्निभेषजानि चेति” तानि दर्शितानि। “एतानि देहे सर्व्वस्मिन् देहस्यावयवे तथा। सन्धौ कोष्ठे धमन्याञ्च यथायोगं नियोजयेत्” सुश्रु०।

उपयम पु० उप+यम-अप्। विवाहे। “कन्या त्वजातोपयमा सलज्जा नवयौवना” सा०द०। उपयमस्य भेदादिकमुद्वाहशब्दे ११८६पृ०उक्तं तत्काल वरकन्यामेलकादि विशेषेणिरूप्यते। तत्र द्विजातीनां समावर्त्तनानन्तरं

विवाहकालः मनुना "चतुर्थमायुषोभागमुषित्वाद्यं गुरौ द्विजः। द्वितीयमायुषोभागं कृतदारो गृहे वसेत्" आयुर्द्वितीयभागे विवाहकाल उक्तः" कुल्लूकभट्टेन तु पूर्व्वापरविरोधमाशङ्क्य ब्रह्मचर्य्यकालोत्तरत्वमस्य समर्थितं यथा "चतुर्थं भागमिति ब्रह्मचर्य्यकालोपलक्षणार्थम् अनियतपरिमाणत्वादायुषश्चतुर्थभागस्य दुर्ज्ञानत्वात् न च "शतायुर्वै पुरुष" इति श्रुतेः पञ्चविंशतिवर्षपर्य्यन्तपरत्वम्, "षट्त्रिंशदाब्दिकं चर्य्यमित्यादिना विरोधात्। आश्रमसमुच्चयपक्षमाश्रितो ब्राह्मण उक्तं ब्रह्मचर्य्यकालं जन्मापेक्षयाद्यं यथाशक्ति गुरौ स्थित्वा द्वितीयमायुषश्चतुर्थभागं कृतदारो गृहस्थाश्रममनुतिष्ठेत् "गृहस्थस्तु यदा पश्येत् बलिपलितमात्मनः। पुत्रेषु दारान् निक्षिप्य वनं गच्छेत् सहैव वा" (मनुः) इत्यनियतकालत्वात् द्वितीयमायुषोभागमित्यपि गार्हस्थ्यकालमेव। "गुरुणानुमतः स्नात्वा समावृत्तो यथाविधि। उद्वहेत द्विजोभार्य्यां सवर्णां लक्षणान्विताम्" मनुना समावर्त्तनोत्तरमेव विवाहकालोविहितः। समावर्त्तनकालश्च "षट्त्रिंशदाब्दिकं चर्य्यं गुरौ त्रैवेदिकं व्रतम्। तदर्द्धिकं पादिकं वा ग्रहणान्तिकमेव वा" मनुना षट्त्रिंशद्वर्षाद्युत्तरकालः उक्तः। स च शक्त्यपेक्षया युगभेदेन वा व्यवस्थाप्यः तथा च सत्ययुगे,३६वर्षाः त्रेतायामष्टादश वर्षाणि द्वापरे नव वर्षाणि कलियुगे वेदग्रहणकालपर्य्यन्तं ब्रह्मचर्य्यं कार्य्यं ततःसमावर्त्तनम्। युक्तञ्चैतत् मनुनासत्ये नराणां चतुःशतायुष्कत्वेन त्रेतायां त्रिशतायुष्कत्वेन द्वापरे द्विशतायुष्कत्वेन कलौ शतायुष्कत्वेन चोक्तेः आयुरुत्तमत्वादिभेदेन व्रतकालाधिक्यादि। अतएव "दीर्घकालं ब्रह्मचर्य्यं धारणञ्च कमण्डलोः"इत्यादिपुराणे कलौ आयुषोहीनत्वाभिप्रायेणैव दीर्घकालब्रह्मचर्य्यनिषेधः। तत्रायं भेदः। "केशान्तः षोड़शे वर्षे ब्राह्मणस्य विधीयते। राजन्यबन्धोर्द्वाविंशे वैश्यस्य ह्यधिके ततः" मनुना स्वस्वोपनयनद्विगुणितकालएव गोदानाख्यस्य केशान्तसंस्कारस्य विधानात् वेदव्रतरूपस्य वक्ष्यमाणस्य महानाम्न्यादिकेशान्तरूपस्यानन्तरं विवाहस्य कर्त्तव्यतायाःसर्वनिबन्धृभिर्व्यवस्थापितत्वेन स्वस्वोपनयनद्विगुणकालोत्तरं विवाहस्य कर्त्तव्यता नार्वाक्। तथा च ब्राह्मणस्य १६वर्षात् क्षत्रियस्य द्वाविंशतेः वैश्यस्य चतुर्विंशतेरुत्तरं विवाहकालः। अतएव रघौ वर्णितम् "अथास्य गोदानविधेरनन्तरं विवाहदीक्षां निरवर्त्तयत् पिता"

शूद्राणान्तु "वैश्यवच्छौचकल्पश्चेत्युक्तेर्वैश्यधर्मातिदेशात् चतुर्विंशतिवर्षोत्तरमेव विवाहकालः "त्रिंशद्वर्षोवहेद्भार्य्यां हृद्यां द्वादशवार्षिकीम्। त्र्यष्टवर्षोऽष्टवर्षीयां धर्मे सीदति सत्वर' इति मनुना ब्रह्मचर्य्यरक्षणाशक्तौ सत्वरतोक्तेः अशक्तौ ततोऽर्वागपि कर्त्तुं शक्यते इति भेदः। स तु न श्रेयानिति बोध्यम्। अतएव शु० त० रघुनन्दनेन। "अनूढभार्य्यः शूद्रस्तु षोड़शाद्वत्सरात् परमिति" ब्रह्मवचनार्थमीमांसायां "तद्विशेषणेन न्यायवर्त्तिनां शूद्राणां षोड़शवर्षोपरि विवाहकालः कल्प्यते" इति व्यवस्थाप्य तत्समर्थनाय वैश्यवच्छौचकल्पश्चेति चकाराद्वैश्यधर्म्ममात्रस्यातिदेशमुक्त्वा अतिदेशेन शूद्रस्याप्युपनयनप्राप्तौ "विवाहमात्रं संस्कारं शूद्रोऽपि लभते सदेति" ब्रह्मपु० तस्य विवाहस्यैवोपनयनस्थानीयतामुक्त्वा तत्कालाकाङ्क्षायां "गर्भाष्टमेऽष्टमे वाब्दे ब्राह्मणस्योपनायनम्। राज्ञामेकादशे सैके विशामेके यथाकुलम्" या० स्मृतौ। उत्तरोत्तरमधिककालस्योक्त्या वैश्योपनयनकालापेक्षयाऽधिकालत्वं शूद्रविवाहस्योक्तम्। तत्रापि यथाकुलमित्यतिदेशेन षोड़शाद्वर्षात् प्रागपि विवाहो दृश्यते स तु न प्रशस्त इत्यन्तेन उक्तरीत्यैव व्यवस्थापितम्। द्विजातिस्त्रीणान्तु यद्यपि हारीतेन "द्विविधाः तत्र ब्रह्मवादिनीनामुपनयनं वेदाध्ययनं भिक्षाचर्य्या च, सद्योवधूनां तु उपस्थिते विवाहे स्त्रियो ब्रह्मवादिन्यः सद्योवधूश्च यथा कथञ्चिदुपनयनं विधाय विवाहः कार्य्यः" सद्योवधूनामप्युपनयनं विहितम्। तथापि तथा विधीयमान उपनयनेन वर्णभेदेनोक्तकालापेक्षा उपस्थिते विवाहे इति कथनात् विवाहकालस्यैव तत्कालता। वस्तुतः स्त्रीणामुपनयनं कल्पान्तरविषयम् यथाह यमः "पुराकल्पे हि नारीणां मौञ्जीबन्धनमिष्यते। अध्यापनञ्च वेदानां सावित्रीग्रहणन्तथा। पिता पितृव्यो भ्राता वा नैनामध्यापयेत्परः। स्वगृहे चैव कन्याया भैक्ष्यचर्या विधीयते" इति। ननु यद्यपि कलौ मुख्यमुपनयनं स्त्रीणां नास्ति तथापि आतिदेशिकमस्ति यदाह मनुः "वैवाहिकोविधिः स्त्रीणामौपनायनिकः परः। पतिसेवा गुरौ वासोगृहार्थोऽग्निपरिक्रियेति" तेन कालभेदः सेत्स्यतीति सत्यम् अतिदेशोयमुपनयनधर्म्मप्राप्त्यर्थः यथा ब्राह्मणादीनामुपनयनात् प्राक् कामचारकामवादकामभक्षणाद्याचाराणामदोषतास्ति तदनन्तरन्तूपनयनधर्माणां सन्ध्यास्नानादीनां प्राग्धर्मनिरसनपूर्व्वकमनुष्ठानपूर्वकं यथास्ति तथा स्त्रीणा-

मपि विवाहात् प्राक् कामचारादिधर्मा न दोषं कुर्वन्ति विवाहस्य तु द्विजत्वसिद्धिकरत्वादनुष्ठिते विवाहे कामचारादिधर्मनिरासपूर्वकं पतिसेवा गुरौ वास इत्यादिकमनुष्ठानं भवेदिति। सर्वत्रस्त्रीणां षड्वर्षोत्तरं विवाहकालः वक्ष्यमाणवचनात्। एवं वरकन्ययोः सामान्यकाले निरूपिते इदानीं विशेषकालोऽभिधीयते। तत्र तयोः रव्यादिशुद्धेरावश्यकता यथाह "गुरुशुद्धिवशेन कन्यकानां समवर्षेषु षडब्दकोपरिष्टात्। रविशुद्धिवशाच्छुभोवराणामुभयोश्चन्द्रविशुद्धितोविवाहः" मु० चि० पी०धा० व्या० "कन्यकानां विवाहः षड्वर्षातिक्रमानन्तरं समवर्षेषु युग्मवर्षेषु सत्सु गुरुशुद्धौ सत्यां विवाहः शुभः। अर्थात् पुरुषाणां विषमवर्षेषु रविशुद्धौ विवाहः शुभः। तदाह च्यवनः। "षडब्दमध्ये नोद्वाह्या कन्या, वर्षद्वयं यतः। सोमोभुङ्क्तेऽथ गन्धर्वस्ततः पश्चाद्धुताशन" इति जन्मानन्तरं वर्षद्वयं सोमः कन्यां भुङ्क्ते। तदनन्तरं द्वे वर्षे गन्धर्वस्तदनन्तरमग्निस्ततो मनुष्याधिकारःषडब्दतः प्राग्विवाहो न कार्य्यः। तत्र षड्वर्षानन्तरं समवर्षे विवाहः शुभः। यदाह नारदः। "युग्मेऽब्दे जन्मतः स्त्रीणां शुभदं पाणिपीडनम्। एतत्पुंसामयुग्मेऽब्दे व्यत्ययेनाशुभन्तयोरिति"। कश्यपः "विवाहो जन्मतः स्त्रीणां युग्मेऽब्दे पुत्रपौत्रदः। अयुग्मे श्रीप्रदः पुंसां विपरीते तु मृत्युदः" इति। एवं च सति स्त्रीणां विवाहोऽष्टमदशमवर्षयोर्भवतीत्यर्थः। यथाह व्यासः "अष्टवर्षा भवेद्गौरी नववर्षा च रोहिणी। दशवर्षा भवेत् कन्या द्वादशे वृषली स्मृतेति"। अस्य फलभेदमाह वात्स्यः 'गौरीं ददद्ब्रह्मलोकं सावित्रं रोहिणीं ददत्। कन्यां ददत् स्वर्गलोकमतःपरमसद्गतिम्"। प्राप्नोतीति शेषः। "गौरी विवाहिता सौख्यसम्पन्ना स्यात् पतिव्रता। रोहिणी धनधान्यादिपुत्राढ्या सुभगा भवेत्। कन्या विवाहिता सम्पत्समृद्धा स्वामिपूजितेति"। ननु नववर्षीया रोहिण्या अयुग्मवर्षत्वाद्विवाहः कथं सम्भवति गर्भतोनवर्षग्रहणे अयुग्मवर्षत्वापरिहारात् स दोषस्तदवस्थ एव ये तु "अयुग्मे दुर्भगा नारी युग्मे च विधवा भवेदिति" चण्डेश्वरवाक्यमभ्यसन्ति तन्मते सुतरां विवाहाभावः। उच्यते। "युग्मेऽब्दे सम्पदः सौख्यं विद्याधर्मायुषः सदा। भर्त्तुर्दृष्टा भवन्तीह निषेकान्नात्र संशय" इति पराशरवाक्याद्गर्भग्रहणं यथाऽवसीयते नारदादिवाक्ये तथा जन्मत इत्यपि। तत्र षड्वर्षानन्तरं जन्मतोविषमवर्षीयमासत्रयानन्तरं नव मासाः शुभाः। समवर्षीयमासत्रयञ्च। इदमेव च मासत्रयं नारदादिमते गृह्यते इति युक्ता व्यवस्थेति युक्तमुत्पश्यामः। एतदेवाभिप्रेत्योक्तं श्रीपतिनिबन्धे। "मासत्रयादूर्द्ध्वमयुग्मवर्षे युग्मे तु मासत्रयमेव यावत्। विवाहशुद्धिं प्रवदन्ति सन्तोशात्मजाद्यो गर्गवराहमुख्याः" इति। "अयुग्मे दुर्भगा नारी युग्मे तु विधवा भवेत्। तस्माद्गर्भान्विते युग्मे विवाहे सा पतिव्रतेति" चण्डेश्वरोक्तिश्च सार्थिका। एवं नवमवर्षस्या युग्मत्वप्रयुक्तनिषेधोऽष्टमवर्षानन्तरं मासत्रयमेव। एवं विहितवर्षे यस्मिन् काले गुरुशुद्धिर्भवेत् तद्वशेन विवाहः कार्य्यः गुरुशुद्धिस्तु 'वटुकन्याजन्मराशेस्त्रिकोणायद्विसप्तगः। श्रेष्ठोगुरुः खषट्त्र्याद्ये पूजयान्यत्र निन्दित" मु० चि० अभिहिता। यदाह गुरुः "स्त्रीणां गुरुबलेनैव विवाहः शोभनः स्मृतः। वरस्यार्कबलं ग्राह्यमैन्दवन्तूभयोरपीति" 'सुरगुरुबलमबलानां पुरुषाणां तीक्ष्णरश्मिबलमेव। चन्द्रबलं दम्पत्योरवलोक्य विशोधयेल्लग्नमिति"। क्षराहोक्तेश्च। एतच्चावश्यकत्वार्थमभिहितम्। यदा द्वयोरपि गुरुबलमिष्टं भवेत् तदा पाणिग्रहः शुभदः। द्वयोरन्यतरस्य गुर्वर्कशुद्ध्या विवाह्यकालान्तरासम्भवे च तत्पित्रादिना पूजाङ्कारयेत् "रविशुद्धौ गृहकरणं रविगुरुशुद्धौ व्रतोद्वाहौ। चौरन्तारशुद्धौ शेषं चन्द्राश्रितं कर्मेति" राजमार्त्तण्डोक्तेः। वराणां विवाह्यानां पुंसां रविशुद्धिवशेन विवाहः शुभः। उभयोः स्त्रीपुंसयोश्चन्द्रविशुद्धितोविवाहः शुभः स्मृतः अत्र सम्मतिः प्रागुक्ता। यदा तु कन्या कालातिक्रान्ता भवति तदा गुरुबलमनावश्यकमित्याह व्यासः 'दशवर्षव्यतिक्रान्ता कन्या शुद्धिविवर्ज्जिता। तस्यास्तारेन्दुलग्नानां शुद्धौ पाणिग्रहोमतः" इति। 'ग्रहशुद्धिमब्दशुद्धिं शुद्धिं मासायनर्त्तुदिवसानाम्। अर्वाक् दशवर्षेभ्यो मुनयः कथयन्ति कन्यकानाम्" भुजबलः सा च गुरुरविचन्द्रशुद्धिर्गोचरप्रकरणेऽभिधास्यते। "गोचरबलाभावेऽष्टकवर्गादिबलं ग्राह्यमित्याह नारदः "गोचरं वेधजं चाष्टवर्गजं रूपजं बलम्। यथोत्तरं बलाधिक्यं स्थूलं गोचरमार्गजमिति" पी०धा०।

तत्रादौ अयननिरूपणम्। विवाहोपक्रमे "हरौ प्रसुप्ते न च दक्षिणायने तिथौ च रिक्ते शशिनि क्षयङ्गते" राजमा०। 'उदगयन आपूर्य्यमाणे पक्षे कल्याणे नक्षत्रे चूड़ोपनयनगोदानविवाहाः, विवाहः सर्व्वकालिक इत्येके" आश्व० गृ० १,४,१, सू०। सार्व्वकालिक इति दक्षिणायन-

कृष्णपक्षविषयः न तु अशुद्धकालपरस्तस्यानुपस्थितेः अयनपक्षयोरेव प्रक्रान्तत्वात्तद्विषयता सर्व्वशब्देन तयैव परामर्शयोग्यतया अन्यस्य चाप्रक्रान्ततया तेन परामर्शायोगात्। अत एव भुजबलभी० ग्रहशुद्धिमित्यादिकं प्रागुक्तमभिधाय "एतत्परन्तु विशेषमङ्गिरोवचनं यथा। कालात्यये च कन्यायाः कालदोषो न विद्यते। मलमासादिकालानां विवाहाद्ये प्रयत्नतः। पुंसः प्रति सदा दोषात् सर्व्वदैव हि वर्ज्यता" इत्युक्तम्। ततश्च वरकन्ययोर्मध्ये कन्याया दशवर्षातीतत्वे ग्रहशुद्ध्यादिर्नापेक्ष्यः समयाशुद्धिश्च उभयसाधारणत्वादपेक्ष्यैव। एतदेव भङ्ग्यन्तरेणोक्तं ज्यो०त० "राजभ्रंशे तथा युद्धे पितॄणां प्राणसंशये। अतिप्रौढा च या कन्या नानुकूलं प्रतीक्षते। अतिप्रौढा च या कन्या कालधर्मविरोधिनी। अविशुद्धापि सा देया चन्द्रलग्नबलेन तु"। "एतत्परमेव दशमासाः प्रशस्यन्ते चैत्रपौषविवर्ज्जिताः" राजमा० वाक्यम् "सार्व्वकालिकमिच्छन्ति विवाहं गौतमादय इति मिहिरवचनमप्येतत्परम्। वस्तुतः सार्व्वकालिक इत्यत्र तदासुराद्यधर्म्यविवाहविषयम्। प्रमि० "प्राजापत्यब्राह्मदैवार्षसंज्ञाः कालेषूक्तेष्वेव कार्य्याः विवाहाः। गान्धर्वाख्यश्चासुरो राक्षसश्च पैशाचो वा सर्व्वकाले विधेयः" श्रीपत्युक्तिः "धर्म्येष्वेव विवाहेषु कालस्यैव परीक्षणम्। नाधर्म्म्येषु विवाहेषु" इत्यपरिशिष्टोक्तेश्च। तत्र सौरादिमासनिरूपणम् "मिथुनकुम्भमृगालिवृषाजगे मिथुनगेऽपि रवौ त्रिलवे शुचेः। अलिमृगाजगते करपीडनम्भवति कार्त्तिकपौषमधुष्वपि" मु०चि०। "मिथुनकुम्भौ प्रसिद्धौ। मृगोमकरः अलिर्वृश्चिकः वृषः प्रसिद्धः अजोमेषः। एतद्राशिगते रवौ सति तत्रापि मिथुनस्थिते सूर्य्येऽपि शुचेराषाढस्य त्रिलवे तृतीयांशे आषाढशुक्लप्रतिपदमारभ्य दशमीपर्य्यन्तं करपीडनं विवाहो भवति। अर्थादितरराशिगते सूर्य्ये सति आषाढशुक्लदशम्यनन्तरं हरिशयने च सति विवाहो न स्यात् यदाह कश्यपः। "उत्तरायणगते सूर्य्ये मीनं चैत्रञ्च वर्जयेत्। अजगोद्वन्द्वकुम्भालिमृगराशिगते रवौ। मुख्यं करग्रहं त्वन्यराशिगे न कदाचनेति" वशिष्ठः। "दिनाधिपे मेषवृषालिकुम्भयुग्मनक्राख्यघटत्वसंस्थे। माघद्वये माधवशुक्रयोश्च मुख्योऽथ वा कार्त्तिकसौम्ययोश्चेति। घटस्तुला। शुक्रोज्येष्ठः सौम्यो मार्गशीर्षः मुख्यो विवाह इति शेषः। "आर्द्रोदयादूर्द्ध्वमिनस्य कार्य्यं नक्षत्रवृन्दे दशके कदाचित्। मासोक्तकर्म्मेतरमङ्गलाद्यं कुर्य्यान्न सुप्तेऽपि तथा मुरारौ"। एतेन हरिशयनात्प्राक्कालः साधीयानित्यभिहितं भवति। अत्र सामान्यतोमासशब्देन चान्द्र एव मासो गृह्यते "इन्द्राग्नी यत्र हूयेते" इत्याद्युक्तेः। अत्र तु सौरचान्द्रमासद्वयोपादानादुभयोरैक्ये विवाहफलमविकलं भवति। तदुक्तं केशवार्केण। "प्रायःसौरं मानमिष्टं विवाहे केचिच्चान्द्रं मानमाहुः फलेन। तस्मात् सम्यक् तत्फलाप्तिस्तदैक्ये सौरो मासः केवलः किञ्चिदूनः" इति। अस्यार्थः। कश्यपादिभिः सौरा एव मासाः उक्ताः तेषां च प्राशस्त्यम्। "विवाहादौ स्मृतः सौरो यज्ञादौ सावनो मत" इति वृद्धगर्गकरणात्। नारदादिभिस्तु "माघफाल्गुनवैशाखज्यैष्ठमासाः शुभप्रदाः। मध्यमाः कार्त्तिकोमार्गशीर्षौ वै निन्दिताः परे" इति चान्द्रा एवोक्ताः। एतत्प्राशस्त्यं च वशिष्ठेनोक्तम्। "उद्वाहयज्ञोपनयप्रतिष्ठातिथिव्रतक्षौरमहोत्सवाद्यम्। पर्व्वक्रियावास्तुगृहप्रवेशः सर्व्वं हि चान्द्रेण हि गृह्यते तदिति"। अतोद्वयोः सौरचान्द्रमासयोरैक्ये विवाहादि शुभमेकतरपक्षाश्रयणे मध्यममिति निष्कृष्टोऽर्थः। एवं च मकरसंक्रान्तौ माघः, कुम्भे फाल्गुनोमेषे वैशाखः वृषे ज्येष्ठः, मिथुने आषाढतृतीयांशः, तुलायां कार्त्तिको देवोत्थानादुत्तरः, वृश्चिके मार्गशीर्षः, शुभ इत्यर्थः। केचित्तु चान्द्रमासं मुख्यमाहुस्तेनायमर्थः। फाल्गुनो विहित इति मीनसंक्रमणसद्भावेऽपि शुभः, चैत्रो निषिद्ध इति मेषसंक्रान्तिसद्भावेऽप्यशुभः। तदुक्तं विवाहवृन्दावने। "झषेण निन्द्यो यदि फाल्गुने स्यादजस्तु वैशाखगतो न निन्द्यः। मध्वाश्रितौ द्वावपि वर्जनीयाविव्यादिवाचामियमेव युक्तिरिति" "अजस्तु वैशाखगतो न निन्द्य इति तु निर्मूलमेव। न हि मेषसंक्रमः क्वचित् निषिद्धोऽस्ति। तदेतदविचारितरमणीयं कुतः? यतोयन्मते सौरमासस्यैव मुख्यत्वं तन्मते मेषः प्रशस्त इति चैत्रेऽपि विवाहप्रसङ्ग इति विपरीतं तस्यापि वक्तुमशक्यत्वात्। उक्तञ्च चूड़ारत्ने। "पौषेऽपि मकरस्थेऽर्के चैत्रे मेषगते रवौ। आषाढे मिथुनादित्ये केऽप्याहुः करपीडनमिति"। किञ्च वशिष्ठवाक्ये "दिनाधिपे मेषवृषेत्यादौ, सौरचान्द्रमासयोरुपादानस्य वैयर्थ्यापातात्। तस्मात् द्वयोरैक्ये विवाहः प्रशस्तः। तत्र माघफाल्गुनवैशाखज्येष्ठामुख्याः। यत्र तु निषेधानन्तरं प्रतिप्रसवो यथा दक्षिणायने विवाहं निषिध्य कार्त्तिकमार्गशीर्षौ विहितौ तत्र मध्यमत्वम् अतएव कार्त्तिकसौम्ययोश्च वशिष्ठेन पृथगुक्तं

नारदवाक्ये स्पष्टमेव मध्यमत्वम् अतो विवाहपटले गर्गः "पुत्रोपेता तु कार्त्तिके धनधान्यसुतोपेता सौम्ये भर्त्तृपरायणा" इत्युक्तवान् तदपि धनुःसंक्रान्तिव्यतिरिक्तविषयं द्रष्टव्यम्। हरिशयनात्प्रागाषाढ़तृतीयांशश्च मध्यमः हरिस्वापान्तर्गताः आषाढश्रावणभाद्रपदाश्विनकार्त्तिका पौषश्चैते निषिद्धाः। धनुषि पौषस्त्वत्यन्तं निषिद्धः। 'भानौ धनुषि सिंहे च स्थिते सप्ततुरङ्गमे। चौरमन्नं न कुर्वीत विवाहं गृहकर्म चेति" गार्ग्योक्तेः। अन्नमन्नप्राशनं विहितकालातिक्रान्तम्, चौरं चौलञ्च स्वतन्त्रम्'यत्तूपनयनाङ्गं चौरं तस्य न निषेधः "चैत्रे मीनगते रवाविति" विहितोपनयनस्य विषयालाभात्। अथोत्तरार्द्धं व्याख्यायते। अलीति। अलिमृगाजाः प्राग्व्याख्याताः। एतद्राशिगते सूर्य्ये सति कार्त्तिकपौषमधुष्वपि करपीड़नं भवति यथा वृश्चिके कार्त्तिकः मकरे पौषः मेषे चैत्रोऽपीत्यर्थः इदं तु सौरमासपक्षिलानां मतम्। अतएवाधुनोक्तचूड़ारत्नस्थवाक्ये "केप्याहुः करपीड़न"मित्युक्तिः। श्रीधरोऽपि। "पौषे च कुर्य्यान्मकरस्थितेऽर्के चैत्रे भवेन्मेषगतो यदा स्यात्। प्रशस्तमाषाढकृतं विवाहं वदन्ति गर्गा मिथुनस्थितेऽर्के इति तदेतत्प्रागभिहितन्यायादुपेक्ष्यम् अथवा केशवमताङ्गीकारेण मध्यमत्वमङ्गीकृत्य कालान्तरानपेक्ष्यवश्यदेयकन्याविषयम्"। पी॰धा॰। प्रमिता॰ तु देशभेदात् मासभेदस्य ग्राह्यतोक्ता 'तपतीकृष्णयोर्मध्ये चान्द्रोमासः प्रशस्यते। अन्येषु सर्वदेशेषु सौरो व्रतविवाहयोः। विन्ध्याद्रेर्दक्षिणे भागे चान्द्रोमासः प्रशस्यते। उदग्भागे तु विन्ध्यस्य सौरमानं विधीयते। अन्येषु सर्वदेशेषु मिश्रमानं प्रकल्पयेत्"। मासभेदे फलभेदमाह ज्यो॰त॰ भुजबलः "आषाढे धनधान्यभोगरहिता नष्टप्रजाः श्रावणे वेश्या भाद्रपदे इषे च मरणं रोगान्विता कार्त्तिके। पौषे प्रेतवती वियोगबहुला चैत्रे मदोन्मादिनी" निर्ण॰सि॰ व्यासः। "माघफाल्गुनवैशाखे यद्यूढा मार्गशीर्षके। ज्यैष्ठे वाषाढमासे वा सुभगा वित्तसंयुता। श्रावणे वापि पौषे वा कन्या भाद्रपदे तथा चैत्राश्वयुक्कार्त्तिकेषु याति वैधव्यतां लघु" अत्राषाढस्य शुभता दशदिनात् प्राक्, तदुत्तरमशुभत्वम् अत्र प्रतिप्रसवः प्रागुक्तः। अत्र जन्ममासादिनिषेधः "आद्यगर्भसुतकन्ययोर्द्वयोर्जन्ममासभतिथौ करग्रहः। नोचितोऽथ विबुधैः प्रशस्यते चेद्द्वितीयजनुषोः सुतप्रदः" मु॰चि॰ "यस्मिन् चान्द्रे मासे जन्म स जन्ममासः जन्मतिथिमारभ्य त्रिंशत्तिथ्यात्मको मासो जन्ममासोवेत्युच्यते। इयमप्याद्यप्रकरणे "जन्मर्क्षमासतिथय" इति पद्यव्याख्यावसरे विविच्य व्याकृतमस्माभिः, यस्मिन्नृक्षे जन्म तज्जन्मभं यस्यां तिथौ जन्म सा जन्मतिथिः। समाहारद्वन्द्वः आगमशासनस्यानित्यत्वात् नुमभावः। उपलक्षणत्वात्तन्मुहूर्त्तोऽपि। तत्राद्यगर्भसुतकन्ययोर्द्वयोः करग्रहो विवाहो नोचितो निषिद्ध इत्यर्थः। यदाह वशिष्ठः। "स्वजन्ममासर्क्षतिथिक्षणेषु वैनाशिकाद्यृक्षगणेषु चैवम्। नोद्वाहमात्माभ्युदयाभिकाङ्क्षी नैवाद्यगर्भद्वितये कदाचित्"। क्षणोमुहूर्त्तः नारदोऽपि "न जन्ममासे जन्मर्क्षे न जन्मदिवसेऽपि वा। आद्यगर्भसुतस्याथ दुहितुर्वा करग्रहः" इति। जन्मदिवसे जन्मतिथौ। आवश्यकत्वेऽपवादो जगन्मोहने "जातं दिनं दूषयते वशिष्ठः पञ्चैव गर्गस्त्रिदिनं तथात्रिः। तज्जन्मपक्षं किल भागुरिश्च व्रते विवाहे गमने क्षुरे चेति" पी॰धा॰। ज्यो॰त॰ तु "चाष्टौ च गर्गश्च्यवनोदशाहम्। जन्माख्य मासं किल भागुरिश्च व्रते विवाहे क्षुरकर्णवेधे" तृतीयपादादि पाठः "अथेति द्वितीयजनुषोरनाद्यगर्भयोश्चेद्विवाहः तर्हि सुतप्रदो विबुधैः पण्डितैः प्रशस्यते। एतच्च तृतीयगर्भादावपि द्रष्टव्यम्। सर्वथाद्यगर्भराहित्यं विवक्षितम्। केचित् "चेदनाद्यजनुषोरिति" पठन्ति। यदाह च्यवनः "जन्मर्क्षे जन्ममासे वा तारायामथ जन्मनि। जन्मलग्ने भवेदूढा पुत्राढ्या पतिवल्लभेति"। चण्डेश्वरः "जन्ममासे तु पुत्राढ्या धनाढ्या जन्मभोदये। जन्मलग्ने भवेदूढा दृढा सन्ततिसौख्यभागिति" एतच्चानाद्यगर्भविषयम्। "आद्यगर्भे साक्षान्निषेधाभिधानात्" पी॰धा॰। ज्यो॰त॰तु कन्याविषयमिदं न वरविषयम्। "उद्वाहश्च कन्याया जन्ममासे प्रशस्यते" इति श्रीपतिवचनात् इति समर्थितम्। अथ ज्येष्ठादिमासे विवाहे विशेषः। 'ज्येष्ठद्वन्द्वं मध्यमं संप्रदिष्टं त्रिज्येष्ठञ्चैव युक्तं कदापि। केचित्सूर्यं वह्निगं प्रोह्य चाहुर्नैवान्योन्यञ्ज्येष्ठयोः स्याद्विवाहः" मु॰चि॰ 'पुत्रोज्येष्ठः कन्या च ज्येष्ठा मासोऽपि ज्येष्ठः इत्येतत्त्रिज्येष्ठम्। इदं ज्येष्ठत्रयमुच्यते। तत् कदापि नैव युक्तं नैव प्रशस्तम्। ज्यैष्ठे मासे ज्येष्ठवधूवरयोर्नैव विवाहःकार्य इत्यर्थः। यदात्वेकतरज्येष्ठत्वं तदा ज्येष्ठमासेऽपि भवति। यदाह गुरुः "न ज्यैष्ठे ज्येष्ठयोः कार्यं नृनार्य्योः पाणिपीड़नम्। तयोरन्यतरे ज्येष्ठे ज्येष्ठमास्यपि कारयेत्" इति। एतच्चान्यतरज्येष्ठत्वं द्विविधं ज्येष्ठमासो ज्येष्ठोवरश्च, ज्येष्ठोमासः कन्या च ज्येष्ठा एतज्ज्येष्ठद्वन्द्वं मध्यमं संप्रदिष्टमगतिविषयकमित्यर्थः। एकोज्येष्ठोऽन्यद्द्वयमज्येष्ठमुत्तममेव यदाह वराहः 'द्वौ ज्येष्ठौ मध्य-

मौ प्रोक्तावेक ज्येष्ठः शुभावहः। ज्येष्ठत्रयं न कुर्वीत विवाहे सर्वसम्मतमिति"। पराशरोऽपि "अज्येष्ठा कन्यका यत्र ज्येष्ठःपुत्रोवरो यदि। व्यत्ययोवा तयोस्तत्र ज्येष्ठमासः शुभप्रदः" इति। केचित्तु ज्येष्ठमासाभावेऽपि वरकन्ययोर्ज्येष्ठत्वमपि मध्यमाहुस्तदसत्। वधूवरान्यतरज्येष्ठताराहित्यं विवक्षितम्। तद्वाक्यं प्रागुक्त। किन्तु जन्ममासज्येष्ठमासयोरभावेऽपि ज्येष्ठयोर्वधूवरयोः सर्वथा निषिद्धो विवाहः। यदाह गर्गः "ज्येष्ठायाः कन्यकायाश्च ज्येष्ठपुत्रस्य वै मिथः। विवाहो नैव कर्त्तव्यो यदि स्यान्निधनं तयोरिति"। तदेतदुक्तं पन्थकृता "नैवान्योन्यं ज्येष्ठयोः स्याद्विवाहः" इति। ज्येष्ठत्रयनिषेधस्त्वतिदोषाधिक्यसूचनार्थः। (अतःपरं ज्येष्ठशब्दस्य ज्यैष्ठवाचकत्वं समर्थितम्) अथास्यापवाद उच्यते केचिदिति। सत्यावश्यकत्वे सूर्यं वह्निगङ्कृत्तिकास्थं प्रोह्य त्यक्त्वा ज्यैष्ठमासेऽपि ज्येष्ठस्य वरस्य कन्याया वा विवाहः शुभः इति केचिदूचुः एतच्च तुल्यन्यायत्वाज्ज्येष्ठापत्यस्य न ज्येष्ठे इति सामान्यतो मङ्गलकृत्यनिषेधेऽपि द्रष्टव्यं यदाह भरद्वाजः "ज्यैष्ठे ज्येष्ठस्य कुर्वीत भास्करे पावकस्थिते। नोत्सवादीनि कार्य्याणि दिग्दिनानि च वर्जयेत्"। विशेषमाह स एव। "दशाहञ्चैव गर्गस्तु त्रिदशाहं वृहस्पतिः। अर्कभोग्यानग्निभतो मुनिः त्र्याहं पराशर" इति। तन्त्रान्तरेपि। "कृत्तिकास्थं रविन्त्यक्त्वा ज्यैष्ठे ज्येष्ठस्य कारयेत्। उत्सवादीनि कार्य्याणि दिनानि दश वर्जयेत्। व्रतबन्धविवाहश्च चूडां कर्णस्य वेधनम्। ज्यैष्ठमासि न कुर्वीत कल्याणञ्ज्येष्ठपुत्रगमिति"। अत्र ज्येष्ठपुत्रदुहित्रोर्ज्यैष्ठमासवन्मार्गशीर्षेऽपि मङ्गलकृत्यनिषेधमाह वात्स्यः। "मार्गशीर्षे तथा ज्यैष्ठे विवाहश्चौलमेव च। ज्येष्ठपुत्रदुहित्रोश्च न कुर्वीत प्रतन्त्रया"। भरद्वाजोऽपि "मार्गशीर्षे तथा ज्यैष्ठे-क्षौरं परिणयं व्रतम्। आद्यपुत्रदुहित्रोश्च यत्नतः परिवर्जयेत्" इति। (ज्यो॰त॰। "आद्यगर्भभवपुत्रकन्ययोः ज्येष्ठमासि न च जातु मङ्गलम्" इत्युक्तम्) स्वयं च "पन्थकर्त्रा ज्येष्ठे कैश्चिन्मार्गेऽपि नेष्यते इत्युक्तं प्राक्, कैश्चिद्ग्रहणं शिष्टाचाराभावं सूचयितुमुक्तम्" पी॰धा॰। "सुतपरिणयात् षण्मासान्तः सुताकरपीडनं न च निजकुले तद्वद्वा मण्डनादपि मुण्डनम्। न च सहजयोर्द्देये भ्रात्रोः सहोदरकन्यके न सहजसुतोद्वाहोऽब्दार्द्धे शुभे न पितृक्रिया" मु॰चि॰। "देहलीदीपन्यायेनात्रापि निजकुल इति सम्बध्यते निजकुले स्ववंशे सुतस्य परिणयाद्विवाहात् परतः सौरमासषट्कमध्ये सुतायाः कन्याया विवाहो न स्यात्। उक्तञ्च वसिष्ठेन। "पुत्रोद्वाहाच्चैव पुत्र्याः कदाचिद्वा षण्मासात्कार्य्यमुद्वाहकर्मेति"। नारदोऽपि। "पुत्रोद्वाहात्परं पुत्रीविवाहो न ऋतुत्रये। कुर्य्यान्न व्रतमुद्वाहं मङ्गलाच्चापि मङ्गलमिति" (ऋतूनां सौरत्वात् सौरषण्मासवर्ज्जनमुक्तम्)अयञ्च निषेधः कुलपरोद्रष्टव्यः। यदाह वात्स्यः। "स्त्रीविवाहः कुले निर्गमः कथ्यते पुंविवाहः प्रवेशो वसिष्ठादिभिश्च। निर्गमादादितो भ प्रवेशोहितस्तत्र संवत्सरान्तोऽवधिः कीर्त्तितश्च" इति। निजकुल इति। स्ववंशे पुत्रस्य कन्याया वा मण्डनाद्विवाहान्मुण्डनञ्चौलमुपनयनं महानाम्न्यादिव्रतचतुष्टयं समावर्त्तनं वा तद्वत् षण्मासान्तर्न्न कार्य्यम्। यदाहात्रिः "कुले ऋतुत्रयादर्वाक् मण्डनान्न तु मुण्डनमिति"। तस्मान्मुण्डनान्मुण्डनं कार्य्यं तथा कन्याविवाहादनन्तरं पुत्रस्य विवाहः कार्य्य इत्यर्थः। यदाह नारदः। "मुण्डनान्मण्डनं कार्य्यं मण्डनान्नैव मुण्डनमिति"। वसिष्ठः "पुत्रीविवाहात् परतः सदैव शुभप्रदं पुत्रविवाहकर्मेति" नचेति, सहजयोः सोदरयोर्भ्रात्रोस्सहोदरकन्यके न देये नोद्वाह्ये। उक्तं च नारदेन "नचैकजन्मनोः पुंसोरेकजन्ये तु कन्यके। नूनङ्कदाचिदुद्वाह्ये नैकदा मुण्डनद्वय मिति" "एकजन्ये तु कन्ये द्वे पुत्रयोर्नैकजन्ययोरिति" वसिष्ठोक्तेश्च। अत्र चकारोऽनुक्तसमुच्चयार्थः। तेनैकस्मै वराय सहोदरकन्याद्वयमपि न देयमित्यर्थः। "न पुत्रीद्वयमेकस्मै प्रदद्यात्तु कदाचनेति" वसिष्ठोक्तेः नारदोपि। "प्रत्युद्वाहोनैव कार्य्योनैकस्मै दुहितृद्वयमिति"। प्रत्युद्वाहोविनिमयविवाहः मत्पुत्राय चेत्त्वया कन्या दीयते तदा मयापि त्वत्पुत्राय कन्या देयेत्येवं पणबन्धरूपः। (परिवर्त्त) एतादृशः पणबन्धोभगिन्यादिदानेऽपि द्रष्टव्यः। सुतश्च सुतश्च सुतौ सरूपाणामित्येकशेषः। सुता च सुता च सुते पूर्ब्बवदेकशेषः। सुता च सुतश्च सुतौपुमान् स्त्रियेत्येकशेषः। सुतौ च सुते च इति कृतैकशेषाणां द्वन्द्वः अत्रापि पुमान् स्त्रियेत्येकशेषः। सहजाश्च ते सुताश्चेति कर्मधारयः। तेषां सोदरभ्रातॄणां विवाहः अब्दार्द्धे वर्षार्द्धे सौरषण्मासमध्ये न कार्य्यः। यदाहनारदः "विवाहस्त्वेकजन्यानां षण्मासाभ्यन्तरे यदि। असंशयं त्रिभिर्वर्षैस्तत्रैका विधवा भवेत्"। विवाह इत्युपलक्षणम्। तेन समानसंस्कार एकमातृजयोः पुत्रयोः कन्ययोर्वा पुत्रकन्ययोर्वा न कार्य्य

इत्यर्थः । तथा च वृद्धमनुः "एकमातृजयोरेकवत्सरे पुरुषस्त्रियोः । न समानक्रियाङ्कुर्य्यान्मातृभेदे विधीयते" इति । समानक्रिया चूडाकरणादिका एकवर्षमध्ये निषिद्धेत्यर्थः । एकवत्सर इति सावकाशकालद्योतनाय । षण्मासमध्ये तु सर्वथैव न कार्य्या । "विवाहस्त्वेकजन्यानां षण्मासाभ्यन्तरे यदीति" नारदवाक्यस्वरसात् । पराशरोऽपि "एकोदरप्रसूतानामेकस्मिन् वत्सरे यदि । पाणिग्रहोभवेन्नूनं तत्रैका विधवा भवेदिति" तुल्यन्यायत्वाद्यज्ञोपवीतसंस्कार्य्यत्वात् तयोरन्यतरस्य नाश इत्यर्थः "नैकदा मुण्डनद्वयमिति" वशिष्ठोक्तेः । एकदा एकस्मिन्वर्षे मुण्डनञ्चौलमुपनयनं वा" "पुत्रीपरिणयादूर्ध्वं यावद्दिनचतुष्टयम् । पुत्रान्तरस्य कुर्वीत नोद्वाहमिति सूरय इति" गर्गवाक्यन्तु भिन्नमातृविषयपूर्वोक्तपराशरवाक्यस्वरसात् । "समानापि क्रिया कार्य्या मातृभेदे तथैव च । विवाहे दुहितुः कार्य्यो न विवाहश्चतुर्द्दिनमिति" नारदोक्तेश्च । वशिष्ठेन तु विशेषोऽभिहितः । "एकोदरप्रसूतानां नात्र कार्य्यत्रयं भवेत् । भिन्नोदरप्रसूतानां नेति शातातपोऽब्रवीदिति" । चौलोपनयनविवाहरूपं कार्यत्रयम् । तदुक्तं च्यवनेन । "आदौ चौलं ततो मौञ्जी विवाहश्च शुभप्रदः । मातृभेदे बुधैरुक्तो मातुरैक्ये न कर्हिचिदिति" । एवं स्थिते भिन्नोदरमङ्गलं सत्यावश्यकत्वे एकस्मिन् मण्डपे न कार्य्यम् । किन्तु गृहभेदादाचार्य्यभेदाद्वा कार्य्यं यदाह वशिष्ठः । "द्विशोभनं त्वेकगृहेऽपि नेष्टं शुभं तु पश्चान्नवभिर्दिनैश्च । आवश्यकं शोभनमुत्सवो वा द्वारेऽथवाचार्य्यविभेदतोऽपि" इति । द्वारे द्वारभेदे ।

यमलजातयोस्त्वपत्ययोर्नियतकालानां जातकर्मादिकर्मणामेकक्रियानिषेधाभावो वर्षभेदेन तदसम्भवात् । अतो यमलजातयोरुक्तनिषेधो नास्ति । "एकस्मिन् वत्सरे प्राप्ते कुर्याद्यमलजातयोः । चौरञ्चैव विवाहञ्च मौञ्जीबन्धनमेव चेति" पराशरोक्तेः । चौरञ्चौलम् । भट्टकारिकायां च "एकस्मिन् वत्सरे चैव वासरे मण्डपे तथा । कर्त्तव्यं मङ्गलं स्वस्रोर्भ्रात्रोर्यमलजातयोरिति" । तत्रापि ज्येष्ठानुक्रमेण । "जन्मज्येष्ठेन चाह्वानं सुब्राह्मण्यास्वपि स्मृतम् । यमयोश्चैव गर्भेषु जन्मतोज्येष्ठता मतेति" मनूक्तेराद्योत्पन्नस्य ज्येष्ठत्वम् । "यस्य जातस्य यमयोः पश्यति प्रथमं मुखम् । सन्तानः प्रथमश्चैव तस्मिन् ज्यैष्ठ्यं प्रतिष्ठितमिति" । सन्तानोवंशः । शुभे इति शुभे विवाहादिमङ्गलकृत्ये पितृक्रिया श्राद्धक्रिया न कार्य्या विशेषेणानभिधानात् कुलेऽयं निषेधः मङ्गले नाप्यमङ्गलमिति" नारदोक्तेः । अमङ्गलं श्राद्धम् । तु किन्तु समाप्ते एव मङ्गले कार्य्यमित्यर्थः । अथवा श्राद्धदिने समीपस्थिते तदनन्तरं लग्नमवधार्य्य विवाहादिमङ्गलं कृत्यं कार्य्यमित्यर्थः" पी०धा० । "बध्वा वरस्यापि कुले त्रिपूरुषे नाशं व्रजेत्कश्चन निश्चयोत्तरम् । मासोत्तरं तत्र विवाह इष्यते शान्त्याऽथ वा सूतकनिर्गमे परैः" मु०चि० "निश्चयोत्तरं वाग्दानानन्तरं यदि बध्वाः कन्यायास्तथा वरस्यापि कुले वंशे तत्रापि त्रिपूरुषमध्ये कश्चन सपिण्डो नाशं व्रजेत् प्राप्नुयात् तत्र मासोत्तरं मरणदिनादारभ्य त्रिंशद्दिनं प्रतिकूलं ततः शान्त्या स्वनुष्ठितया विवाहः सुखेनेष्यते । उक्तञ्च स्मृतिचन्द्रिकायाम् । "कृते वाङ्निश्चये पश्चान्मृत्युर्भवति गोत्रिणः । तदा न मङ्गलं कार्य्यं नारीवैधव्यदं ध्रुवमिति" । विशेषमाह मेधातिथिः । "पुरुषत्रयपर्य्यन्तं प्रतिकूलं सगोत्रिणाम् । प्रवेशनिर्गमौ तद्वत् तथा मुण्डनमण्डने" । इदं तु पित्रादिभिन्नविषयं यथोक्तं माण्डव्येन "अन्येषां तु सपिण्डानामाशौचं माससम्मितम् । तदन्ते शान्तिकं कृत्वा ततो लग्नं विधीयते" इति । पित्रादिमरणे तु विशेषमाह शौनकः । "वरबध्वोः पिता माता पितृव्यश्च सहोदरः । एतेषां प्रतिकूलञ्च महाविघ्नप्रदं भवेत् । पिता पितामहश्चैव माता वापि पितामही । पितृव्यः स्त्रीसुतो भ्राता भगिनी वा विवाहिता । एभिरेव विपन्नैश्च प्रतिकूलं बुधैः स्मृतमिति । अन्यैरपि विपन्नैश्च केचिदूचुर्न तद्भवेत्" । अन्यैः उक्तेभ्योऽन्यैः । प्रतिकूलस्य नियतं कालमाह माण्डव्यः "वाग्दानानन्तरं यत्र कुलयोः कस्यचिन्मृतिः । तदा संवत्सरादूर्द्ध्वं विवाहः शुभदो भवेत् । पितुराशौचमब्दं स्यात् तदर्द्धं मातुरेव हि । मासत्रयञ्च भार्य्यायास्तदर्द्धं भ्रातृपुत्रयोः" । दैवज्ञमनोहरे विशेषः "प्रतिकूले सपिण्डस्य मासमेकं विवर्ज्जयेत् । विवाहस्तु ततः पश्चात् तयोरेव विधीयते । दुर्भिक्षे राष्ट्रभङ्गे च पित्रोर्वा प्राणसंशये । प्रौढायामपि कन्यायां प्रतिकूलं न दुष्यतीति" मेधातिथिः । "दीर्घरोगाभिभूतस्य दूरदेशस्थितस्य च । उदासवर्त्तिनश्चैव प्रतिकूलं न विद्यते । सङ्कटे समनुप्राप्ते याज्ञवल्क्येन योगिना । शान्तिरुक्ता गणेशस्य कृत्वा तां शुभमाचरेत् । अकृत्वा शान्तिकं यस्तु निषेधे सति दारुणे । यः करोति शुभं तावद्विघ्नं तस्य पदे पदे" इति । अथावश्यकत्वेऽपवादमाहाथर्वेति । "स्ववर्णगुरुस्कारेणाशौचनि-

गमे मरणाशौचनिर्गमे सति शान्त्या च सन्तुष्टितया विवाहः कार्य्य इति परैराचार्य्यैरिष्यते । यदाह मेधातिथिः । "प्रेतकार्य्याण्यनिर्वर्त्य चरेन्नाभ्युदयक्रियामिति" ज्योतिःप्रकाशेऽपि । "प्रतिकूलेऽपि कर्त्तव्योविवाहोमाषमन्ततरा । शान्तिं विधाय गां दत्त्वा वाग्दानादि चरेद्बुधः' इति । सत्यावश्यकत्वे स्वस्वाशौचादनन्तरं माषमध्येऽपि शान्तिं विधाय विवाहः कार्य्य इत्यर्थः पी०धा० "चूडा व्रतञ्चापि विवाहतोव्रताच्चूडा नेष्टा पुरुषत्रयान्तरे । वधूप्रवेशाच्च सुताविनिर्गमः षण्मासतोवाऽब्दविभेदतः शुभः सु०चि० "चूड़ा चौलं व्रतमुपनयनञ्च अपिशब्दात् महानाम्न्यादिसमावर्त्तनञ्च विवाहात् परतः पुरुषत्रयान्तरएव नेष्टम् । तथा व्रतादुपनयनाच्चूड़ा पुरुषत्रयपर्य्यन्तं नेष्टा । तथा वध्वाः स्नुषायाः कन्यायाः विनिर्गमोऽपि पुरुषत्रयपर्य्यन्ते नेष्टः एतन्मूलवाक्यं "पुरुषत्रयपर्य्यन्तमित्यादि""आदौ चौलं ततो मौञ्जीत्यादि"च प्राग्लिखितम् । तस्मान्मूलपुरुषस्य चतुर्थ्यादौ नायं दोषः । स चायं दोषः पुरुषत्रये षण्मासपर्य्यन्तमेव अतः षण्मासत इति मासषट्कानन्तरमयं व्यस्तोऽपि विवाहादिः सर्व्वोविधिः शुभः । एतन्मूलवाक्यम् "कुले ऋतुत्रयदर्व्वाक्" इत्यादि प्रागुक्तम् । अस्यापवाद उच्यते वेति अथवाऽब्दभेदात् वर्षभेदात् षण्मासमध्येऽपि शुभः । यथा माघे माघि विवाहो वैशाखे चौलं यज्ञोपवीतं वा भवत्वेवेत्यर्थः । तदुक्तं संहितासारावल्याम् "फाल्गुने चैत्रमासे तु पुत्रोद्वाहोपनायने । भेदादब्दस्य कुर्व्वीत नर्त्तुत्रयविलङ्घनमिति" अत्र फाल्गुनपदं प्रागब्दगतमासान्तरस्याप्युपलक्षणं चैत्रपदं चोत्तरवर्षगतवैशाखाद्युपलक्षणं तत्र कैमुतिकन्यायेन यत्र स्वल्पकालान्तरं तत्रापि निषेधाभावस्तदोऽधिकव्यवधाने किं वाच्यम्, अब्दभेदस्यैव प्रयोजकत्वात्" पी०धा०। अथ प्रसङ्गान्मूलादि जूत्पन्नयोर्वधूवरयोः श्वशुरादिपीडकत्वमाह "श्वश्रूविनाशमहिजौ सुतरां विधत्तः कन्यासुतौ निर्ऋतिजौश्वशुरं हतश्च । ज्येष्ठाभजाततनया स्वधवाग्रजस्य शक्राग्निजा भवति देवरनाशकर्त्री" सु०चि० । "अहिजायामश्लेषोत्पन्नौ कन्यासुतौ श्वश्र्वाः साक्षाद्भर्त्तुर्मातुर्विनाशं विधत्तः कुरुतः तथा निर्ऋतिजौ मूलोत्पन्नौ कन्यासुतौ श्वशुरं हतोमारयतः । उक्तञ्च वसिष्ठेन "नैर्ऋत्यभोद्भूतसुतः सुता वा माक्षादवश्यं श्वशुरं निहन्ति । तदन्त्यपादे जनितो निहन्ति नैवोत्क्रमेणाहिभवः कलत्रमिति" अहिभव इति पुंस्त्वमविवक्षितम् । सुतः सुता वेति पूर्व्वोक्तेः 'मूलजा श्वशुरं हन्ति व्यालजा च तदङ्गनामिति'नारदोक्तेश्च तस्य श्वशुरस्याङ्गनां पत्नीम् । वरस्य कन्याया वा साक्षान्मातरं न तु सापत्नमातरं हन्तीत्यर्थः । तदेव स्पष्टमुक्तं वसिष्ठेन । 'जनकं जननीं हन्ति भर्त्तुर्मूलाद्विभिण्यजा" । तुल्यन्यायत्वात् कन्याया अपि साक्षान्मातरम् । ज्येष्ठेति ज्येष्ठानक्षत्रोत्पन्नकन्या स्वधवाग्रजं भर्त्तुर्ज्येष्ठभ्रातरं हन्ति । शक्राग्निजा विशाखानक्षत्रोत्पन्नकन्या देवरस्य भर्त्तुः कनिष्ठभ्रातुर्नाशकर्त्री भवति" । यदाह वसिष्ठः । "सुरेशताराजनिता धवाग्रजं द्विदैवताराजनिता तु देवरमिति"। हन्तीत्यनुवर्त्तते । नारदोऽपि । "ऐन्द्री पत्यग्रजं हन्ति देवरन्तु द्विदैवजेति"पी०धा०अत्र विशेषः"द्वीशाद्यपादत्रयजा कन्या देवरसौख्यदा । मूलान्त्यपादसार्पाद्यपादजातौ तयोः शुभौ" । सु०चि० 'द्वीशं' विशाखा । यदाह च्यवनः । "विशाखा तुलयायुक्ता देवरस्य शुभावहा । विशाखा वृश्चिकोद्भूता देवरं हन्त्यसंशयमिति"। बृहन्नारदोऽपि "न हन्ति देवरं कन्या तुलामिश्रद्विदैवजा । चतुर्थपादजा त्वाद्या दुष्टा वृश्चिकपुच्छवत्" । तस्माद्विशाखाचतुर्थपादे निषेधः फलित" इत्यर्थः । मूलेति । तयोः श्वशुरश्वश्र्वोः मूलचतुर्थचरणोत्पन्नौ तौ कन्यासुतौ श्वशुरसौख्यदौ । आश्लेषाद्यचरणोत्पन्नौ कन्यासुतौ तयोः सौख्यदौ तदुक्तं नारदेन ।"सुतः सुता वा नियतं श्वशुरं हन्ति मूलजः । तदन्त्यपादजोनैव तथाऽश्लेषाद्यपादजः" अत्र पुंस्त्वमविवक्षितं चेत् स एव"पी०धा०। इति वधूवरयोः सामान्यतोगुणदोषविचारः

अथ वधूवरयोर्मेलकम् । तत्र कूटान्यनेकविधानि तत्र केचिद्दश कूटान्याहुः । तदाह नारदः । "दिनं गणश्च माहेन्द्रं स्त्रीदीर्घं योनिरेव च । राशिराशिपती रज्जुर्वश्यं वेधो दश स्मृताः" । "पुनश्च वर्णकूटञ्च माहेन्द्रं वा ततः परम् । एते द्वादश योगाश्च प्रीतिभेदाः प्रकीर्त्तिताः" । अन्येऽष्टादशकूटान्याहुः । यदाह गर्गः 'माहेन्द्रं गणकूटञ्च दिनकूटञ्च योनिजम् । स्त्रीदीर्घं रज्जुकूटञ्च वश्यं वर्णाख्यकूटकम् । राशिराश्यधिपाख्ये च वेधौ नाड्याख्यकूटकम् । भूतलिङ्गाख्यकूटञ्च जात्याख्यं पक्षिकूटकम् । योगिनीगोत्रकूटन्तु कूटान्यष्टादशैव तु । दम्पत्योर्वृद्धिकारीणि यत्नाच्चिन्त्यानि शास्त्रतः"इति । तत्र दशादिकूटानां तत्तद्देशविशेषप्रसिद्धत्वात् तानि विहाय

सर्वदेशप्रसिद्धान्यष्टकूटानि सलक्षणानि व्याह पी॰धा॰

“वर्णोवश्यं तथा तारा योनिश्च ग्रहमैत्रकम्। गणमैत्रम्भकूटञ्च नाडी चैते गुणाधिकाः” मु॰चि॰।

“एते राशिकूटभेदवर्णादिमैत्र्यां सत्यां गुणाधिका एकादिगुणाधिकाः स्युः। वर्णमैत्र्यामेकगुणः, वश्ये द्वौ गुणौ, तारायां त्रयोगुणाः, योनिमैत्र्यां चत्वारः, ग्रहमैत्र्यां पञ्च, गणमैत्र्यां षट्, भकूटे सप्त, नाडीभेदेऽष्टौ इत्यर्थः। तदुक्तम् ‘वर्णोवश्यं तारा योनिग्रहभकूटनाडिकाश्चेति। ज्ञेया यथोत्तरं ते बलिनः स्त्रीपुंसयोर्घटन”इति। दैवज्ञमनोहरेऽपि। “नाड़ीभेदे गुणा अष्टौ सप्त सद्राशिकूटके। षट् गुणा गणमैत्र्याञ्च सौहार्दे पञ्चकं तयोः। योनिमैत्र्यान्तु चत्वारस्त्रयस्तारावले गुणाः। वश्यत्वे द्वौ गुणौ प्रोक्तौ वर्णएकः प्रकीर्त्तितः इति”पी॰धा॰। तत्रादौ वर्णकूटमाह

“द्विजाझषालिकर्कटास्ततो नृपा विशोऽङ्घ्रिजाः। वरस्य वर्णतोऽधिका वधूर्न शस्यते बुधैः” मु॰चि॰।

“मीनवृश्चिककर्कराश्योर्द्विजाः ब्राह्मणाः। ततोऽनन्तरमन्ये मेषसिंहधनूराश्योर्नृपाः क्षत्रियाः। वृषकन्यामकराविशो वैश्याः। मिथुनतुलाकुम्भा अङ्घ्रिजाः शूद्राः। ततश्च वधूवरराश्योर्वर्णौ ज्ञात्वा वरस्य वर्णतः ब्राह्मणादिकाद्वधूरधिका ज्येष्ठवर्णा बुधैर्न शस्यते। किन्तु समा हीना वा शस्यत इत्यर्थः। यदाह नारदः। “झषालिकर्कटाविप्रास्तदूर्ध्वाः क्षत्रियादयः। पुंवर्णराशेः स्त्रीराशौ समेहीने तथा शुभम्। वर्णज्येष्ठा तु या नारी वर्णहीनस्तु यः पुमान्। विवाहं यदि कुर्वीत तस्या भर्त्ता विनश्यति”। अत्रैको गुणो वर्णाधिके वरे वर्णसमे वा वर्णहीने तु गुणाभावः तदुक्तं दैवज्ञमनोहरे। “एकोगुणः सदृग्वर्णे तथा वर्णोत्तमे वरे। हीनवर्णे वरे शून्यं केऽप्याहुः सदृशे दलमिति। दलमर्द्धम्। पी॰ धा॰। अथ वश्यकूटम्।

“हित्वा मृगेन्द्रं नरराशिवश्याः सर्वे तथैषां जलजाश्च भक्ष्याः। सर्वेऽपि सिंहस्य वशे विनालिं ज्ञेयं नराणां व्यवहारतोऽन्यत्” मु॰ चि॰। “नरराशयो मिथुनकन्यातुलाः एषां सर्वेऽपि मेषादयः सिंहं त्यक्त्वा वश्याः ननु मनुष्याणां जलचराः कथं वश्याः यत उभयोः सहावस्थानाभाव इत्यत आह तथेति। एषां नरराशीनां जलजाः कर्कमकरकुम्भमीनास्तु भक्ष्याः किं पुनर्वश्या इति सूचयितुं तुशब्दः। सिंहस्य वशे अलिं वृश्चिकं विना सर्वे राशयोवश्याः अन्यदनुक्तं चतुष्पदानां स्थलचराणां चतुःपदजलचराणां वा परस्परं वश्यावश्यं, नराणां मनुष्याणां व्यवहारतो ज्ञेयं यदाह वशिष्ठः ‘वश्यास्त्यक्त्वा राशयोऽन्ये नृभानां सिंहस्तस्याऽप्येवमन्ये विधेयाः। कीटन्त्यक्त्वा लोकतोन्यत्प्रसिद्धम् वश्यावश्यं नैव तोयालयाख्योः” तोयाश्रया जलचराः अलिश्च ते परस्परं वश्या नैव स्युरित्यर्थः। अत्र गुणविभागो दैवज्ञम॰ “सख्यं वैरं च भक्ष्यं च वश्यमाहुस्त्रिधा बुधाः। वैरे भक्ष्ये गुणाभावोद्वयोः सख्ये गुणद्वयम्। वश्यवैरे गुणस्त्वेको वश्यभक्ष्ये गुणोऽर्द्धक इति” यद्यपीदं वधूवरयोः परस्परं तुल्यमेवोक्तं तथापि सख्यावश्यकत्वे वरं प्रति भक्ष्यत्वं वश्यत्वं वा स्त्रियोऽपेक्ष्यं न तु विपरीतं “वर्णज्येष्ठा तु या नारीत्यनेन” समानन्यायत्वात् “अन्योन्यवश्यत्वे तूत्तममेव”पी॰धा॰। अथ ताराकूटम्।

“कन्यर्क्षाद्वरभं यावत् कन्याभं वरभादपि। गणयेन्नवहृच्छेषे त्रीष्वद्रिभमसत् स्मृतम्”मु॰चि॰ ‘कन्याजन्मनक्षत्रात् वरनक्षत्रं यावद्गणयेत्तथा वरनक्षत्रादपि कन्यानक्षत्रं गणयेत्ततोऽवगतेऽङ्के नवभिर्भक्ते यदवशिष्टं तच्चेत् त्रिपञ्चसप्तमितम्भवेत्तदाऽसत् अशुभदं स्मृतमन्यथा द्विचतुःषडष्टनवमितञ्चेत्स्यात्तदा शुभमित्यर्थादुक्तम्भवति यदाह नारदः ‘स्त्रीभमारभ्य गणने नवपर्यायतः क्रमात्। जन्मत्रिपञ्चसप्तस्थम्पुम्भं स्याद्दस्नाशनम्। पुम्भमारभ्य गणने स्त्रीभञ्जन्मादिके स्थले। स्त्रीविनाशो भवेत्तस्माद्दिनकूटं विवर्जयेत्” दिनकूटं ताराकूटम्। शार्ङ्गीयेऽपि ‘नरर्क्षाद्गणयेद्यावत्कन्यर्क्षं कन्यभादपि। वरभं नवहृच्छेषास्ताराः सन्ति परस्परम्। त्यक्त्वा त्रिपञ्चसप्ताख्याः शेषोद्वाहे मिथः शुभाः”इति यत्तु कश्यपेन” “गणयेत्कन्यकाधिष्ण्याद्यावद्वरजन्मभम्। जन्मत्रिपञ्चसप्तर्क्षं हित्वाऽन्यर्क्षं शुभप्रदमिति”। कन्यानक्षत्रादेव गणनोक्ता। अत एव “भीरुभादचलपञ्चतृतीयाः शोकवैरविपदेव च तारा”इति केशवार्केणाप्युक्ता सा त्वावश्यकद्योतनार्था। तथाहि। द्वयोरपि परस्परनक्षत्रगणने शुभञ्चेच्छुभमेवाशुभञ्चेदशुभमेव तत्रैकस्मादन्यतरनक्षत्रगणनयाऽशुभत्वेऽपि स्त्रीनक्षत्राद्वरनक्षत्रं त्वशुभं नापेक्षितव्यमेवेति भावः। अत्र गुणविभागो दैवज्ञम॰। “एकतोलभ्यते तारा शुभा वैत्राशुभाऽन्यतः। तदा सार्द्धो गुणश्चैव ताराशुद्ध्या मिथस्त्रयः। उभयोर्न शुभा तारा तदा शून्यं समादिशेदिति” अत्र यद्यपि नारदादिभिर्जन्मतारा निषिद्धेत्युक्तम्। तदुपन्यस्तता एकनक्षत्रे तावत् “राश्यैक्ये चेद्भिन्नमृक्षन्द्वयोः

स्यान्नत्वैक्ये राशियुग्मन्तथैवेति” वक्ष्यमाणत्वान्नोक्तम्। दशमैकोनविंशतितारयोस्तु निषेधो दुष्टभकूटे ज्ञेयः। सद्भकूटे तु दोषाभावएव”। पी०धा०योनिकूटमाह“अश्विन्यम्बुपयोर्हयोनिगदितः स्वात्यर्कयोः कासरः, सिंहोवस्वजपाङ्घयोः समुदितोयाम्यान्त्ययोः कुञ्जरः। मेषोदेवपुरोहितानलभयोः कर्णाम्बुनोर्वानरः,स्याद्वैश्वाभिजितोस्तथैव नकुलश्चान्द्राब्जयोन्योरहिः। ज्येष्ठामैत्रभयोः कुरङ्ग उदितो मूलार्द्रयोःश्वा तथा, मार्जारोऽदितिसार्पयोरथ मघायोन्योस्तथैवोन्दुरुः। व्याघ्रोद्वीशभचित्रयोरपि च गौरार्य्यमणबुध्नर्क्षयोर्योनिः पादगयोः परस्परमहावैरं भयोन्योस्त्यजेत्” मु०चि० “अश्विनीशततारयोर्हयः अश्वयोनिरुक्तः१ स्वातीहस्तयोः कासारोमहिषः२। वस्वजपाङ्घयोर्धनिष्ठापूर्व्वाभाद्रपदयोः सिंहः३। याम्यान्त्ययोर्भरणीरेवत्योः कुञ्जरोहस्ती४। पुष्यकृत्तिकयोः मेषः५ कर्णाम्बुनोः श्रवणपूर्व्वाषाढयोर्वानरःस्यात्६। उत्तराषाढाभिजितोर्नकुलः ७। चान्द्रं मृगः अब्जयोनिर्ब्रह्मा तद्भं रोहिणी तयोरहिः सर्पः८। ज्येष्ठानुराधयोः कुरङ्गो हरिणउदितः९। मूलार्द्रयोःश्वा कुक्कुरः१०। तथा पुनर्वस्वश्लेषयोर्मार्जारः ११। मघापूर्व्वाफल्गुन्योरुन्दुरुर्मूषिकः१२। द्वीशं विशाखा चित्रा तयोर्व्याघ्रः१३। आर्य्यमणम् उत्तरफल्गुनी बुध्नर्क्षमुत्तरभाद्रपदा तयोर्गौः१४। तत्फलमाह पादगयोरिति। एकस्मिन् पादे श्लोकचरणे उक्तनक्षत्रयोन्योः परस्परं महावैरंभवेदन्यथा नेत्यर्थः। यथा। “अश्विन्यम्बुपयोर्हयोनिगदितः स्वात्यर्कयोः कासरः” इतिपादस्थोक्तयोन्योरश्वमहिषयोर्महावैरं भवेत्। एवं सिंहहस्तिनोरित्यादिष्वपि द्रष्टव्यम्। यदाह वसिष्ठः।“अश्वेभमेषभुजगद्वयकुक्कुरौतुमेषौतुमूषकमयोन्दुरुगोलुलापाः। शार्दूलमाहिषगवारिमृगद्वयं श्वा कीशोऽथ बभ्रुयुगकीशगवाश्वसिंहाः। गौःकुञ्जराविति यथाक्रममाश्विनादिभानाम्भवन्ति खलु कल्पितयोनिरूपाः”। लुलापो महिषः, गवारिर्व्याघ्रः कीशोवानरः बभ्रुर्नकुलः।‘बभ्रूरगंश्वैणमिभेन्द्रसिंहमोत्वाखुसंज्ञम्प्लवगवानरौ च। गोव्याघ्रमश्वोत्तरमाहिषञ्च वैरं च्वमायैर्नृपम्लयोश्चेति” एतत्फलं सापवादमाहात्रिः। “एकयोनिषु सम्पत्त्यै दम्पत्योः सङ्गमः सदा। भिन्नयोनिषु मध्यःस्यादरिभावो न चेत्तयोः। योनेरभावे नोद्वाहः स तु कार्य्यो वियोगदः। राशिवश्यञ्च यद्यस्ति कारयेन्न तु दोषभाक्”। अत्र गुणविभागोदैवज्ञम० “अष्टाविंशतितारायां योनयस्तु चतुर्दश। मैत्रं वैरातिमैत्रञ्च विवाहे नरयोषितोः। महावैरे च वैरे च स्वभावे च यथाक्रमम्। मैत्रे चैवातिमैत्रे च खेन्दुद्वित्रिचतुर्गुणाः” पी०धा०। अथ ग्रहमैत्री “मित्राणि द्युमणेः कुजेज्यशशिनः शुक्रार्कजौ वैरिणौ, सौम्यश्चास्य समो, विधोर्बुधरवी मित्रे, न चास्य द्विषत्। शेषाश्चास्य समाः, कुजस्य सुहृदश्चन्द्रेज्यसूर्य्या, बुधः शत्रुः, शुक्रशनी समौ च, स्मृतस्तुनोः सिताहस्करौ। मित्रे, चास्य रिपुः शशी, भौमस्माजाः समा, गोष्पतेर्मित्राण्यर्ककुजेन्दवोबुधसितौ शत्रू, समः सूर्य्यजः। मित्रे सौम्यशनी, कवेःशशिरवी शत्रू, कुजेज्यौ समौ। मित्रे शुक्रबुधौ,शनेः शशिरविक्ष्माजा द्विषोऽन्यः समः”मु०चि०

एतत्फलं सापवादमाह जगन्मोहने वसिष्ठः “अन्योन्यमित्रं यत्तं स्यात् समित्रं तु मध्यमम्। उदासीनं कनिष्ठं स्यान्मृतिदं शात्रवं स्मृतम्। शत्रुमित्रञ्च विज्ञेयं दम्पत्योः कलहप्रदम् अन्योन्यसमशत्रुत्वं दम्पत्योर्विरहप्रदम्’ अस्यापवादस्तत्रैव “राशिनाथे विरुद्धेऽपि सबलांशकाधिपौ, तन्मैत्रेऽपि च कर्त्तव्यं दम्पत्योः शुभमिच्छता। अत्र गुणभेदो दैवज्ञम०। “ग्रहमैत्रं सप्तविधं गुणाः पञ्च प्रकीर्त्तिताः। तत्रैकाधिपतित्वे च मित्रत्वे गुणपञ्चकम्। चत्वारः सममित्रत्वे द्वयोः साम्ये त्रयो गुणाः। मित्रवैरे गुणश्चैकः समवैरे गुणार्द्धकम्। परस्परखेटवैरे गुणशून्यं विनिर्द्दिशेद्। असद्भे सममित्रादौ व्येका ग्राह्या यथोदिताः”पी०धा०। अथ गणकूटम्। “रक्षोनरामरगणाः क्रमतोमघाहिवस्विन्द्रमूलवरुणानलतक्षराधाः। पूर्वोत्तरात्रयविधातृयमेशभानि मैत्रादितीन्दुहरिपौष्णमरुल्लघूनि” मु० चि०।

“क्रमतः रक्षोनरामरगणाः वाक्यत्रयेणोच्यन्ते। मघा प्रसिद्धा अहिरश्लेषा वसुर्धनिष्ठा इन्द्रोज्येष्ठा मूलं प्रसिद्धं वरुणः शततारका अनलः कृत्तिका तक्षा चित्रा राधा विशाखा एतानि भानि रक्षोगणः। पूर्वात्रयम् उत्तरात्रयं चेत्येवं षड्भानि विधाता रोहिणी यमोभरणी ईशः आर्द्रा एतानि भानि नरगणोमनुष्यगणः। मैत्रमनुराधा अदितिः पुनर्वसुः इन्दुर्मृगः हरिः श्रवणः पौष्णं रेवती मरुत् स्वातिः लघूनि अश्विनीहस्तपुष्याणि एतानि भान्यमरगणो देवगण इति। यदाह नारदः। “रक्षोगणः पितृत्वाष्ट्रद्विदैवत्येन्द्रतारकाः। वसुवारीशमूलाहिकृत्तिकाभियुतास्ततः। तिस्रः पूर्वोत्तराधातृयमसाहेशतारकाः। इति मर्त्यगणोज्ञेयः स्याद-

मर्त्यगणः परे। इत्यादित्यार्कवायुन्त्यमित्राश्वीज्येन्दुतारकाः” पी०धा०। फलमाह। “निजनिजगणमध्ये प्रीतिरत्युत्तमा स्यादमरमनुजयोः सा मध्यमा संप्रदिष्टा। असुरमनुजयोश्चेन्मृत्युरेव प्रदिष्टो दनुजविबुधयोः स्याद्वैरमेकान्ततोऽत्र” मु०चि०। “असुरमनुजयोः राक्षसमनुष्यगणयोः स्त्रीपुंसयोः मृत्युरेव प्रदिष्ट उक्तः द्वयोर्वान्यतरस्य वेत्याकाङ्क्षायां प्रबलेन दुर्बलं बाध्यते इति न्यायेन मनुष्यगणस्यैव नाशः, यदाह नारदः। “दम्पत्योर्जन्मभे चैकगणे प्रीतिरनेकधा। मध्यमा देवमर्त्यानां रक्षोनृणां तयोर्मृतिः” कश्यपः “स्वगणे चोत्तमा प्रीतिर्मध्यमाऽमरमर्त्ययोः। मर्त्यराक्षसयोर्वैरमसुराखुरयोरपीति” अयमर्थः पुरुषोरक्षोगणः स्त्री मनुष्यगणा तदा वैरं, यदि वैपरीत्यन्तदा मृत्युः। तथा पुरुषोरक्षोगणः स्त्री देवगणा तदा वैरं वैपरीत्ये मृतिः। उक्तं च। “राक्षसी यदि वा नारी नरो भवति मानुषः। मृत्युस्तत्र न सन्देहो विपरीतः शुभावहः”। शार्ङ्गीये। “रक्षोगणः पुमान् स्याच्चेत्कन्या भवति मानवी। केऽपीच्छन्ति तदोद्वाहं व्यस्तञ्चोऽपीह नेच्छतीति”। एतत्तुल्यन्यायत्वाद्देवराक्षसयोरपि द्रष्टव्यम्। अत्र गुणविभागो दैवज्ञम०। “षड्गुणा गणसादृश्ये पञ्च स्युः सुरमानुषे। नार्या देवोनरः पुंसश्चत्वारोवा गुणास्त्रयः। देवराक्षसयोः शून्यं तथैव नररक्षसोः। पुंसी रक्षोगणो यत्र नार्यादेवोऽथ वा नरः। गुणौ द्वौ क्रमतश्चैको गुणोग्राह्योऽन्यथा न हीति”। अस्यापवादमाह गर्गः। “ग्रहमैत्री च राशीशोर्विद्यते नियतं यदि। न गणाभाव जनितं दूषणं स्याद्विरोधनम्”। अत्रिरपि : “राशीशयोः सुहृद्भावे मित्रत्वे वांशनाथयोः। गणादिदोषेऽप्युद्वाहः पुत्रपौत्रप्रवर्द्धनः”। अमुं परिहारं ग्रन्थकृदग्रे वक्ष्यति। मनुरपि। “ग्रहमैत्री च रज्जुश्च यदि नाड़ी पृथक् तयोः। विवाहः शुभदः कन्या राक्षसी वा नरोनरः” इति पी०धा०। रज्जुकूटमन्यत्र दृश्यम्। अथ भकूटम् “मृत्युः षट्काष्टके ज्ञेयोऽपत्यहानिर्नवात्मजे। द्विद्वादशे निधनत्वं द्वयोरन्यत्र सौख्यकृत्”मु०चि०। “स्त्रीपुंसराश्योः परस्परं षडष्टमराशित्वे सति मृत्युर्ज्ञेयः। यथा मेषकन्ययोः वृषधनुषोः। एवं नवात्मजे नवपञ्चमेऽपत्यानां बालानां हानिर्नाशः स्यात्। यथा सिंहधनुषोः एवं द्विद्वादशे सति निर्द्धनत्वं दारिद्र्यं स्यात्। यथा मेषवृषयोः अन्यत्र तृतीयैकादशे चतुर्थदशमे समसप्तमे वा सति सौख्यकृत्प्राणिपीडनं स्यात्। यदाह नारदः ‘षट्काष्टके मृतिर्नन्दनवमे त्वनपत्यता। नैस्वं द्विद्वादशेऽन्येषु दम्पत्योः प्रीतिरुत्तमेति”। अत्र विशेषोज्योतिःप्रकाशे। “पुंसो मृत्युहात् सुतगृहे सुतहा च कन्या धर्मे स्थिता धनवती पतिवल्लभा च। द्विद्वादशे धनगृहे धनहा च कन्या रिप्फे स्थिता धनवती पतिवल्लभा चेति”। अन्यच्च। ‘मृगः कुलीरेण घटेन सिंहोवैरप्रदः स्यात् समसप्तकोयम्। तुला मृगेणाथ वृषेण सिंहो मेषेण कर्कोमिथुनेन मीनः। चापेन कन्या घटभेन चालिर्दौर्भाग्यदैन्ये दशतुर्यकेऽस्मिनिति” पी०धा० अस्यापवादः ‘प्रोक्ते दुष्टभकूटके परिणयस्त्वेकाधिपत्ये शुभोऽथो राशीश्वरसौहृदेऽपि गदितो नाड्यृक्षशुद्धिर्यदि। अन्यर्क्षांशपयोर्बलित्वसखिते नाड्यृक्षशुद्धौ तथा ताराशुद्धिवशेन राशिवशताभावे निरुक्तो बुधैः” मु०चि०। “प्रोक्ते दुष्टराशिकूटे सत्यपि द्वयोःस्त्रीपुरुषराश्योरेकाधिपत्ये एकस्वामित्वे परिणयो विवाहः शुभोगदितः। यथा षट्काष्टके मेषवृश्चिकयोस्तुलावृषयोर्वा। नवमपञ्चमे त्वेकाधिपत्याभावः। द्विद्वादशे मकरकुम्भयोः। अथवा राशीश्वरयोः राशिस्वामिनोः सौहृदे मैत्रे परिणयः शुभोगदितः। यथा षट्काष्टके मीनसिंहयोरित्यादौ, नवपञ्चमे मेषधनुषोरित्यादौ। द्विद्वादशे मीनमेषयोरित्यादौ। यदाह वसिष्ठः ‘द्विद्वादशे वा नवपञ्चमे वा षट्काष्टके राक्षसयोषितोर्वा। एकाधिपत्ये भवनेशमैत्रे शुभाय पाणिग्रहणं विधेयमिति” राजमा० “भवेत्त्रिकोणे बहुपुत्रवित्तं द्विद्वादशे नाशमुपैति कन्या। षट्काष्टके सौख्यफलं विधत्ते स्त्रीणां विवाहे ग्रहमैत्रीभावे” इति एकाधिपत्येपीति शेषः। अतएव ग्रहमैत्र्यैकाधिपत्याभावे वैरषट्काष्टकमित्यादि वदन्ति। यदाह नारदः “वैरषट्काष्टकं मेषकन्ययोर्घटमीनयोः। चापोक्षयोर्नृयुक्कीटभयोः कुम्भकुलीरयोः। पञ्चास्यमृगयोर्जन्मराशेः प्रोक्तोऽशुभप्रदः” इति। उक्षा वृषः चापोक्षयोरित्यकारान्तनिर्देशश्छान्दसः। एतद्भिन्नं मित्रषट्काष्टकमित्याहुः। तदुक्तं जगन्मोहने “मित्रषट्काष्टकं कीटमेषयोर्वृषजूकयोः। कर्किचापभयोर्मीनसिंहयोर्मृगयुग्मयोः। कन्यकाकुम्भयोरन्यत् प्रयत्नादेव वर्जयेदिति”। एवञ्च ग्रहमैत्र्यभावे वैरनवपञ्चममित्याहुः। तथा च शार्ङ्गधरीये-शुक्रः। “मीनालिभ्यां युते कीटे कुम्भे मिथुनसंयुते। मकरे कन्यकायुक्ते न कुर्यान्नवपञ्चमे” इति। एतादृशस्य नवपञ्चमस्य फलान्तरमुक्तं कैश्चित् यथा ज्योतिर्निबन्धे शार्ङ्गधरः। “वरबध्वोर्मात्यपित्रोर्जीवतो-

स्तद्विनाशकृत् । त्रिकोणमीनकीटाढ्यं न स्यादन्यत्र दोषदमिति"। एतत्फलमनार्षत्वादुपेक्ष्यम् । इतोऽन्यच्च मेषसिंहादिकं नवपञ्चमं षड्मैत्रीसत्त्वान्मित्रनवपञ्चममिति ननु मीनकर्कादिकमपि त्रिकोणं षड्मैत्रीसत्त्वान्मित्रनवपञ्चममिव, कथं ? गुरोश्चन्द्रो मित्रमेव चन्द्रस्य तु गुरुः समोऽपि मित्रमिव "अपदोषतैव विगुणस्य गुणः" इति न्यायात्तथा सति त्रिकोणदोषोच्छेदापत्तिः स्यादिति चेत् उच्यते यत्र ह्येकस्य मित्रत्वमपरस्य समत्वन्तत् दुष्टनवपञ्चममिति व्यवहारः । तादृशं मीनकर्कादिकं त्रिकोणचतुष्टयमेव सम्भवति । यत्र तूभयोरपि षड्मैत्री तत्रैव मेषसिंहादिके मित्रनवपञ्चममिति व्यवहृतिः । अयञ्च परिहारो वरवध्वोर्मातृपित्रोरित्यादि दोषान्तरस्य सत्त्वसति वा समूलत्वे नायको भवति तुल्यन्यायत्वात् । मृतमातापितृकयोस्तु वरवध्वोर्नायं दोषोन्मेषः एवं द्विद्वादशेऽपि । तथा जगन्मोहने वशिष्ठकश्यपौ । "द्विद्वादशं शुभं प्रोक्तं मीनादौ युग्मराशिषु । मेषाद्ययुग्मराशौ तु निर्धनत्वं न संशयः । "आयुष्यसम्पत्तु तनोगसम्पत्पुत्रार्थसम्पत्पतिसौख्यसम्पत् । सौभाग्यसम्पद्धनधान्यसम्पत् झषादियुग्मे क्रमतः फलानि । अजादियुग्मे क्रमतः फलानि वै वैधव्यमृत्युर्वधबन्धनानि । वियोगसन्तापमतीव दुःखं वशिष्ठगर्गप्रमुखैः स्मृतानि" इति । अथैवंविधेऽपि प्रीतिषट्काष्टकादिविषये नाड़ीदोषः सर्वथा त्याज्य एवेत्याह नाड्यशुद्धिर्यदीति । वक्ष्यमाणानां त्रिविधनाड़ीनक्षत्राणां शुद्धिः स्त्रीपुरुषनक्षत्रस्थितिरेकस्यां कस्यामपि नाड्यां यदि न भवति तदा प्रीतिषट्काष्टकादि भवति तदा विवाहः कार्यः। यद्येकस्यां नाड्यां स्त्रीपुरुषनक्षत्रस्थितिस्तदा तु नैव विवाहः। उक्तञ्च रत्नमालायाम् "भवनपतिसुहृत्त्वं स्यात्तथैकाधिपत्यं यदि भवनवशित्वञ्चैव षट्काष्टकेऽपि । शुभकृदिह विवाहोऽन्योन्यताराविशुद्धौ यदि खलु फणिचक्रे स्यान्न नाड़ीसमाज"इति । अपिशब्दान्नवमपञ्चमद्विद्वादशयोरपि । अत्र केचित् षड़ष्टकस्यैव मरणरूपानिष्टफलश्रवणात्तस्यापवादकः षट्काष्टकेपीति परिहारः, किन्तु निन्दां प्रतिपादयतोऽपिषड्शान्तस्य वाक्यस्याधिपतिमैत्र्यादिगुणप्रशंसाद्वारा नवपञ्चमद्विद्वादशयोरेव दुष्टभकूटयोर्विधानपर्यवसानात्तयोरेवापवादक इति यथा "ब्रह्महापि नरः पूज्यो यदि स्याद्विपुलं धनमिति" अत्र वाक्ये धनस्तुतिर्धनवन्नरपूजापरा न तु धनवद्ब्रह्मघ्ननरपूजापरापीति नैवं बोधः "द्विद्वादशे वा नवपञ्चमे वा षट्काष्टके" इत्यादि वशिष्ठादिवाक्यानि दुष्टभकूटापवादभूतान्यधिपतिमैत्र्यादिविशिष्टं षडष्टकादि विदधते । षट्काष्टके मृत्युरित्यादीनि निन्दार्थवादवाक्यानि षड्ष्टकादिविषयाणि अन्यथा दुष्टफलषडष्टकनिराकरणस्य नवपञ्चमस्य द्विद्वादशयोरपि तुल्यत्वेनापवादकवाक्यानां विषयाभावात् । दृष्टान्ते तु ब्रह्मघ्नप्रायश्चित्तविधानस्य वैयर्थ्यापातात् धनस्तुतिर्धनवत्प्रशंसापरैवेति युक्तमुत्पश्यामः । अथ नाड़ीसमाजपदस्यायमर्थः । अश्विन्यादित्रिक्रगणनया त्रिविधानां नाड़ीनक्षत्राणां वेधो नाड़ीसमाजः । यदाह श्रीपतिः "नाड्यस्तिस्रोऽन्यस्तनिःशेषधिष्ण्यास्तिस्भ्यश्चाश्वादिभ्य एव प्रसूताः । सर्पाकारास्तत्र नाड़ीसमाजो नक्षत्राणामेकनाड़ीस्पृशां स्यादिति"। एवञ्च यत्र भकूटादयः सप्रभेदाः शुभा भवन्ति । तत्र नाड़ीदोषश्चेत्तदा विवाहो न विधेयः । उक्तञ्च सप्तर्षिमते विवाहपटले । "यदा नाशयत्येक नाड़ीसमाजो भकूटादिकान् सप्रभेदान् प्रशस्तानिति"। अत्र केचित् । नाडीसमाजशब्दोपादानात् समाजशब्दस्य समुदायवाचित्वात् यदा त्रिचतुःपञ्चपर्वनाड़ीत्रयसमुदाये स्त्रीपुरुषनक्षत्रयोरेकनाड्यां पातस्तदा समस्तवश्यादिगुणसत्त्वे विवाहो नैव भवेत् । यदा त्रिचतुःपञ्चपर्वनाडीष्वेकैव नाडी स्त्रीपुरुषयोःस्यात्तदा भवत्येव विवाहः । अतएव "भकूटादिकान् सप्रभेदांश्च ते तामिति" वैपरीत्यं वचनमनुकूलम् । अस्यायमाशयः" ते इति बहुत्वात्सप्रभकूटादयः शुभास्तामित्येकवचनानुरोधादेकामेव नाडीं परिहरेयुः न तु नाडीसमाजमिति । तच्चिन्त्यम् । यतश्चतुस्त्रिद्व्यङ्घ्रिभोत्थायाः" इति वाक्याच्चतुश्चरणनक्षत्रोत्पन्नायाः कन्यायास्त्रिपर्वैव, त्रिचरणनक्षत्रोत्पन्नायाः कन्यायाःद्विपर्वैव द्विचरणनक्षत्रोत्पन्नायाः कन्यायाः पञ्चपर्वैव नाडी गणनीयेति नियमाद्युगपन्नाडीत्रयविचारासम्भव एव । किञ्च रत्नमालादिवाक्येषु पार्थक्येन नाडीत्रयाभिधानात्तत्रत्यसमाजपदं नाडीसंस्थनक्षत्रसमुदायपरं तथाहि "अश्वादिभ्यस्तिभ्य एव नक्षत्रेभ्यः प्रसूता न्यस्तनिःशेषधिष्ण्यास्सर्पाकारास्तिस्रो नाड्यःस्युः तत्रैकनाड़ीस्पृशां नक्षत्राणां समाजो नाडी स्यात् इति । ननु "यस्मादनर्थकलहागममृत्यवः स्युः पाणिग्रहादनु तयोः खलु नाडीयोगे । तस्माच्चतुस्त्रियमलाङ्घ्रिषु भेषु नूनं नाडीसमाजइति चिन्त्यमनुक्रमेणेति" इहगर्गवचनान्नाडीसमाजएव स्थिते दोषः नै-

कस्यां नाड्यामिति चेत् उच्यते । स्वयमेव चतुस्त्रिय मस्याङ्घ्रिभेषु इति परिगणितविषयत्वेनाभिधानाद्यंस्यनक्षत्रसमुदायविषयकमिति । किञ्च पञ्च पर्व्वसु पर्व्वनाड्यादेर्देशविशेषविषयत्वेन त्रिनाड्यास्तु सर्व्वदेशविषयत्वादेतस्या एव निषेधोयुक्तः । तानि च देशविशेषवाक्यान्यग्रेऽभिधास्ये । अतः "भकूटकान् सप्तभेदांश्च ते तामित्यत्रपाठे प्रशस्तानिति पठन्ति अभियुक्ताः शार्ङ्गधरीयज्योतिर्निबन्धकारादयः । तस्मान्नाडीसमाजपदस्य प्राग्वदेव व्याख्यानं न्याय्यम् । ननु यत्र नाडीनक्षत्रशुद्धिरस्ति । यथा भरणीहस्तयोः षट्काष्टकञ्च वर्त्तते षड्मैत्रमपि नास्ति तत्र किं कार्य्यमत आह । अन्यर्क्षेऽंशपयोरिति । अन्यर्क्षे प्रोक्तषट्काष्टकादिभ्योऽन्यराशौ, कोर्थः? राशिस्वामिनोः परस्परं शत्रुत्वे वा समत्वे वा षट्काष्टकादौ च सति अंशपयोस्तद्राशिनवांशस्वामिनोर्व्वलित्वसखित्वे चेत् स्याताम् । बलित्वं स्वत्वतुङ्गादिस्थितत्वेन, सखिता परस्परमैत्री ते उभे चेद्भवतः सखितायाः उपलक्षणत्वादेकाधिपत्यमपि तदा विवाहः शुभोनिरुक्तः । उक्तञ्च जगन्मोहने वसिष्ठेन । "राशिनाथे विरुद्धेऽपि सबलांशकाधिपौ । तन्मैत्रेऽपि च कर्त्तव्यं दम्पत्योः सुखमिच्छतेति" नन्वयम्परिहारो राशिनाथे विरुद्धेऽपीत्यनुवादात्केवलषड्दोषापवादको न तु दुष्टभकूटषड्वैरस्य । उच्यते "खेटारित्वं नाशयेत् सद्भकूटम्" अग्रे वक्ष्यति । तत्र च "नभोगारिभावं हरेत् सद्भकूटमिति" सप्तर्षिमतविवाहपटलीयवाक्यं सम्मतित्वेनास्माभिरभिधास्यते । तदेव केवलषड्वैरापवादकमस्ति न त्विदमपि । ननु द्वयोर्वाक्ययोर्यथाश्रुतशब्दस्वरसेनार्थे जिज्ञासिते एकस्मिन्नेव षड्दोषरूपे परिहारद्वयं दृश्यते । अथैकस्मिन्नेव दुष्टभकूटके भवनपतिसुहृत्त्वमित्यादिनानेकपरिहाराभिधानमित्यतोऽत्र वचने न किञ्चित्तादृशं विषयं पश्यामः सत्यम् । "नभोगारिभावं हरेत्सद्भकूटमिति तु निःसन्देहं षड्वैरस्यापवादकम् परन्तु "राशिनाथे विरुद्धेऽपि मैत्रत्वे चांशनाथयोः । विवाहङ्कारयेद्धीमान्दम्पत्योः सौख्यवर्द्धनमिति" जगन्मोहनस्थवसिष्ठवाक्येन प्रागुक्तवसिष्ठवचः समानार्थकं दुष्टभकूटषष्ठषड्वैरापवादकम् । तथाहि । न्यूनार्थ एकस्मिन्वाक्ये राशिनाथयोः परस्परविरोधे सति तद्राशिनवांशस्वामिनोः परस्परमैत्री चेच्छुभो विवाह इत्यर्थः । अत्रांशनाथयोः सबलत्वविचारोनास्ति । यत्र त्वंशनाथयोस्तुङ्गादिस्थितत्वेन सबलत्वं परस्परमैत्री चेति द्वयमस्ति तद्दुष्टभकूटषष्ठषड्वैरापवादकमित्यधिकार्थवचनस्यार्थः । एवञ्च "नभोगारिभावं हरेत्सद्भकूटमित्यपि" वाक्यं षड्वैरापवादकन्तुल्यबलत्वाद्व्रीहियववत् । अंशनाथसबलत्वाभिधायकं तु "राशिनाथे विरुद्धेऽपीत्येतद्वाक्यमुभयविरोधपरिहारार्थकम् । तथाहि । राशी च नाथौ च एतेषां समाहारो राशिनाथन्तस्मिन् राशिनाथे इत्येवं यदि समाहारद्वन्द्व आश्रीयेत तथा सत्ययमर्थः । राशी विरुद्धौ षट्काष्टकादिना, नाथौ विरुद्धौ कयोर्नाथावित्याकाङ्क्षायां ययोः षट्काष्टकादिविचारस्तयोरेव सन्निहितत्वाद्ग्रहणमिति तयोः राश्योर्नाथौ विरुद्धौ "मित्राणि द्युमणेरित्यादिना परस्परं शत्रू स्यातां तद्राशिनवांशस्वामिनोः सबलत्वे मित्रत्वे च समुचिते सति विवाहः शुभदः । नन्वतिक्लिष्टे समाहारद्वन्द्वे किं प्रयोजनम्? उच्यते । अंशनाथस्य सबलत्वस्याधिककरणमेव । तच्च युगपदुत्पन्नस्य दोषद्वैविध्यस्य राशिविरोधषड्विरोधरूपस्य परिहारोऽतएव ज्योतिःशास्त्राभियुक्ताः एवंविध उभयविरोधे एवंविधं समाधिमाश्रित्य विवाहङ्कारयन्तीत्यास्तां प्रसक्तानुप्रसक्तम् । अस्मिन्नपि पक्षे नाडीशुद्धिरपेक्षितैवेत्याह । नाड्यशुद्धौ तथेति प्रागुक्तप्रकारेण नाडीनक्षत्रेषु स्त्रीपुरुषनक्षत्रयोरेकस्यां नाड्यामवस्थित्यभावश्चेत्तदा विवाहः शुभः । यथा भरणीहस्तयोःसत्युभयविधविरोधे राशिनवांशयोः क्रमेण पञ्चमचतुर्थयोर्यौ स्वामिनौ सूर्य्यभौमौ तयोर्मैत्र्यमस्ति स्वनवांशस्थितत्वात्सबलत्वमपि तत्र विवाहः शुभफलदोनिगदितः । यतोऽत्र स्त्रीपुंसनक्षत्रयोरेकनाड्यामवस्थित्यभावः । यदात्वश्विनीहस्ताख्ये एव द्वयोर्नक्षत्रे स्यातां तदा नाडीनक्षत्रशुद्ध्यभावात् सकलगुणवत्त्वेऽपि विवाहो न भवति । किं पुनरेवंविधविषये इति "सदा नाथयश्चैकनाडीसमाजोभकूटादिकान् सप्तभेदान् प्रशस्तान्" इत्युक्तेः । अथैतत्परिहारासम्भवे परिहारान्तरमाह । ताराशुद्धिवशे इति । अन्यर्क्षे इत्यनुवर्त्तते । प्राग्वदेव व्याख्येयमिदम् । एवंविधे विषये षट्काष्टकादौ च सति यदि स्त्रीपुंसनक्षत्रयोः परस्परन्ताराशुद्धिवशे कन्याक्षाद्वरभं यावदित्यादिना ताराशुद्धिरूपे वशे वक्ष्यमाणे द्वितीयचतुर्थषष्ठाष्टमनवमताराख्ये सति बुधैर्विवाहः शुभोनिगदितः । अत्रोदाहरणानि बुधैर्ध्येयानि । अत्र संमतिः "अन्योन्यताराविशुद्धौ" इत्युक्ता । राजमार्त्तण्डेनायमर्थः स्पष्टमभिहितः । "मैत्री चेत्खपयोर्द्वयोरपि तयोरेकाधिपत्येऽपि चेत्तारा

मित्रसुमित्रजन्मशुभदा क्षेमा च संपत्करी। षष्ठाष्टे नवपञ्चमे व्ययभवे योगेषु पुंयोषितोः प्रीत्यायुःसुतवृद्धिवित्तजनकः कार्य्यो विवाहस्तदेति"। चकारात् षष्ठी च। जन्मतारा यद्युत्पत्तितारा तदा राशिभेदे, चरणभेदे वा शुभा ध्येया। दशमैकोनविंशतितारे शुभे एव। अत्रापि पक्षे नाडीशुद्धिरपेक्षितैव। नाडीशुद्ध्यभावे विवाहोनैव भवेत्। उक्तञ्चात्र संमतिः"। अयं तस्यापि परिहारस्यासम्भवे परिहारान्तरमाह। अथ राशिवश्यताभाव इति। अत्रापि द्वयोः स्त्रीपुंसयोः राशिनाथविरोधादिके विषये षट्काष्टकादौ सति "हित्वा मृगेन्द्रं नरराशिवश्या" इत्यादिना पुरुषराशेः स्त्रीराशिवश्यताभावे सति विवाहः शुभोनिगदितः। "यदि भवनवशित्वमिति श्रीपत्युक्तेश्च अस्मिन्नपि पक्षे नाडीशुद्धिरपेक्षितैवोक्तादेवहेतोः। तदयमत्र निष्कृष्टोऽर्थः। षट्काष्टकनवमपञ्चमद्विद्वादशाख्येषु दुष्टभकूटेषु सत्सु परस्परं ग्रहमैत्र्ये. एकः परिहारः। एकाधिपत्ये द्वितीयः। ग्रहवैरेऽप्यंशपयोः सबलत्वे मैत्रे च तृतीयः। ताराशुद्धौ चतुर्थः। राशिवश्यत्वे पञ्चमः। सर्व्वेष्वपि परिहारेषु नाडीशुद्धिरपेक्षितैव। नाडीविरोधग्रस्ते तु विवाहोनैव स्यादिति। एवञ्च ग्रन्थकर्त्रा "भवनपतिसुहृत्त्वमित्यस्य" श्रीपतिश्लोकस्य वाक्यचतुष्टयमङ्गीकृत्य तत्परिहाराभिधानङ्कृतम्। तट्टीकाकृन्महादेवोऽप्येवमेव व्याख्यत्। यत्र हि प्रत्येकं परिहारकम् तत्र गुणसमुदायः परिहारकः स्यादिति किं वाच्यम्। वस्तुतस्तु। "मैत्री चेत्खपयोर्द्वयोरपि तयोरेकाधिपत्येऽपि चेत्तारामित्रसुमित्रजन्मशुभदा क्षेमा च सम्पत्करीत्यादि प्राग्लिखितेन राजमार्त्तण्डवाक्येन दुष्टभकूटे ग्रहमैत्र्या सह तथैकाधिपत्येन सह ताराशुद्धिरेव परिहारिका समुचिता। अर्थादेकस्य मित्रत्वेऽपरस्य समत्वे वश्यत्वापेक्षा अतएतद्वाक्यं ज्योतिःसारसागरे विवृतम् "तत्रान्योन्यमित्रत्वे तुल्याधिपतित्वे वा ताराशुद्धिरेव चिन्त्या। एकमित्रतायान्तु वशित्वादि गुणान्तरापेक्षा। शत्रुत्वे तु सर्व्वथा त्याग इति"। अत एवैतस्मिन् पक्षे चेत्पदाभिधानादेकवाक्यतावसायः। एवं श्रीपतिवाक्यमपि व्याकर्त्तव्यमेकवाक्यताबलात्। तत्र षट्काष्टके पुनर्भवनपतिसुहृत्त्वमिति सकलगुणसत्त्वेनैव परिहारकम्। अनयोर्दुष्टभकूटयोर्द्वयमेव। यदाह ज्योतिर्निबन्धे गर्गः "पञ्चमैत्रा शुभा तारा राशिवश्यैस्त्रिभिः शुभम्। षडष्टकम्बुधाः प्राहुर्द्वाभ्यां द्व्यर्कन्त्रिकोणक मिति"। "द्विर्केन्द्वादशम्। "द्विद्वादशे वा नवपञ्चमे वेत्यादीनि" वशिष्ठवादीनि तूपलक्षणपरतया व्याख्येयानि। अत्र यथासम्प्रदायं व्यवस्था ध्येयेत्यलमियता" पी०धा०

अत्रापवादः। "मैत्र्यां राशिस्वामिनोरंशनाथद्वन्द्वस्यापि स्याद्गणानां न दोषः। खेटारित्वं नाशयेत् सद्भकूटं खेटप्रीतिश्चापि दुष्टं भकूटम्"। मु०चि० "स्त्रीपुंसराशिस्वामिनोर्मैत्र्यां सत्यां तथा राशिनवांशयोर्द्वन्द्वं युग्मं तस्यापि मैत्र्यां सत्यां गणानां दुष्टगणानां दोषो न स्यात्, स्त्री रक्षोगणा पुमान् मनुष्यगणोदेवगणो वा तदा गणदोषो न स्यादित्यर्थः"। यदाहात्रिः "राशीशयोः सुहृद्भावे मित्रत्वे वांशनाथयोः। गणादिदोषेऽप्युद्वाहः पुत्रपौत्रप्रवर्द्धनः"। अथ सद्भकूटं शुभफलदम्भकूटं राशिकूटं तृतीयैकादशादिकं खेटारित्वं ग्रहयोः शत्रुतासम्बन्धिनं दोषं नाशयेत्। एवमेव खेटप्रीतिर्ग्रहमैत्री चापि दुष्टं भकूटं षडष्टकादिसम्बन्धिनं दोषं नाशयेदित्यर्थः" तदुक्तं सप्तर्षिमते विवाहपटले। "नभोगारिभावं हरेत् सद्भकूटं विरुद्धं भकूटं हरेत् खेटमैत्री। सदा नाशयत्येकनाडीसमाजोभकूटादिकान् सप्तभेदांश्च ते ताम्"। (मु०चि०) चतुर्थचरणः "प्रोक्ते दुष्टभकूटक इत्यादिना पुनरुक्तोऽपि स्मरणाविच्छेदार्थं पठितः"। यत्तूक्तं नारदेन "एकाधीशे मित्रभावे शुभदं पाणिपीडनम्। द्विद्वादशे त्रिकोणे च न कदाचित् षडष्टके" इति। एतन्नाडीदोषे सत्येव द्रष्टव्यम्। अधुनोदितवाक्यस्वरसात्। "भवनपतिसुहृत्त्वं स्यात् तथैकाधिपत्यं यदि भवनवशित्वं चैव षष्ठाष्टकेऽपि। शुभकृदिह विवाहोऽन्योऽन्यताराविशुद्धौ यदि खलु फणिचक्रे स्याच्च नाडीसमाजः" इति श्रीपत्युक्तेश्च "अन्यथा प्रागभिहितवसिष्ठादिवाक्यान्यनर्थकान्यापद्येरन्निति"। पी०धा०। अथ नाडीकूटमाह। "ज्येष्ठार्यम्णेशनीराधिपभयुगयुगन्दास्रभञ्चैकनाडी पुष्येन्दुत्वाष्ट्रमित्रान्तकवसुजलभं योनिबुध्ने च मध्या। वाय्वग्निव्यालविश्वोडुयुगयुगमथोपौष्णभञ्चापरा स्याद्दम्पत्योरेकनाड्यां परिणयनमसन्मध्यनाड्यां हि मृत्युः" मु०चि० ज्येष्ठा प्रसिद्धा। अर्यम्णमुत्तराफल्गुनी। ईश आर्द्रा। नीराधीपोवरुणस्तद्भं शततारका एभ्यो नक्षत्रेभ्यो युगयुगं द्वयं द्वयम्। ज्येष्ठामूलं उत्तराफल्गुनीहस्ता च। आर्द्रा पुनर्वसुश्च। शततारकापूर्वभाद्रा चेत्यर्थः। दास्रभमश्विनी च एतन्नक्षत्रनवकं परस्परमेकनाडीत्युच्यते। अथ पुष्यः प्रसिद्धः इन्दुर्मृगः त्वाष्ट्रं चित्रा मित्रोऽनुराधा अन्तकं भरणी व-

धनिष्ठा, जलभं पूर्व्वाषाढ़ा, योनिः पूर्व्वफाल्गुनी, बुध्नोऽहिर्बुध्न्य उत्तरभाद्रपदा, एतन्नक्षत्रनवकं परस्परं मध्यनाड्युच्यते । अथ वायुः स्वाती, अग्निः कृत्तिका, व्यालोऽश्लेषा, विश्वोत्तराषाढ़ा, एभ्यो युग्मयुग्मं स्वाती विशाखा च, कृत्तिका रोहिणी च अश्लेषा मघा च उत्तराषाढ़ाश्रवणश्चेत्यर्थः । अथ पौष्णभं रेवती च, एतन्नक्षत्रनवकमपरा तृतीयनाड्युच्यते । एतत्फलमाह । दम्पत्योः स्त्रीपुंसयोरेकनाड्यां परिणयनमशुभदुष्टफलं स्यात् । मध्यनाड्यां हि निश्चयेन मृत्युर्द्वयोरपि स्यात् । "मूलेन्द्रार्कभपाशजैकचरणादित्यार्य्यमेशाश्विभैर्याम्येन्द्वीज्यभमित्रभाग्यवसुभत्वाष्ट्राम्बुपाहिर्बुध्न्यभैः । अन्यैर्नाड्यत्र हैकनाडिनवके स्यातां द्विभे चेन्मृतिर्गोदादक्षिणतः कश्चिन्नृपस्थे पार्श्वैकनाडी स्थिता" । गोदादक्षिणतः सर्व्वदेशेषु पार्श्वैकनाडी स्थिता, क्षत्रियादौ कश्चित्, अन्यकन्याया अलाभे पार्श्वैकनाडी स्थितेत्यर्थः" । यदाह गर्गः । 'नाड़ीकूटं तु संग्राह्यं कूटानां तु शिरोमणिः । ब्रह्मणा कन्यकाकण्ठसूत्रत्वेन विनिर्मितमिति" । वराहः "आद्यैकनाडी कुरुते वियोगं मध्याख्यनाड्यामुभयोर्विनाशम् । अन्त्या च वैधव्यमतीव दुःखं तस्माच्च तिस्रः परिवर्ज्जनीयाः" इति । अत्र चक्रन्यासो वसिष्ठेनोक्तः । "आवृत्तिभिर्भैस्त्रिभिरश्विभाद्यं क्रमोत्क्रमात् संगणयेदुडूनि । यद्येकपर्व्वण्युभयोश्च धिष्ण्ये नेष्टा त्वनार्य्यैर्भृशमेकनाडी" । फलेऽपि विशेषमाह वसिष्ठः "सा मध्यनाड़ी पुरुषं निहन्ति तत्पार्श्वनाडी खलु कन्यकां तु । आसन्नपर्य्यायसमागताश्चेद्वर्षेण साप्यन्तरिता त्रिवर्षैः" । उत्तरार्द्धस्यायमर्थः । आसन्ने समीपस्थिते पर्य्याये आवृत्तौ चेदेकनाडी समागता । यथाऽश्विन्यार्द्रयोर्भरणीमृगशिरोरोहिण्याश्लेषयोर्वा सा नाड़ी वर्षेणैकेन स्त्रीपुंसयोरुक्ताऽशुभफलदात्री स्यात् । यदा त्वश्विन्युत्तरफाल्गुन्योरितरक्षत्रव्यवधाना सा नाड़ी त्रिभिर्वर्षैरुक्ताऽशुभफलदात्री स्यात् । इयञ्चाश्विन्यादित्रिकगणना कन्यायाश्चतुश्चरणे जन्मनक्षत्रे सति यदा तु त्रिचरणं नक्षत्रं तदा कृत्तिकामारभ्य साभिजिच्चतुःपर्व्वगणना द्विचरणे कन्यानक्षत्रस्य मृगशीर्षतः पञ्चपर्व्वगणना । यदाह नारदः । चतुस्त्रिद्व्यङ्घ्रिभोत्पन्नायाः कन्यायाः क्रमशोऽश्विभात् । वह्निभादिन्दुभान्नाड़ी त्रिचतुःपञ्चपर्व्वसु । गणयेत् संख्यया चैकनाड्यां मृत्युर्न संशयः" । अमुमर्थं स्पष्टमाह गर्गः । "चतुःपात् कन्यकाऋक्षं गणयेदश्विभादिकम् । त्रिभं सव्यापसव्येन भिन्नं पर्व्व सुखावहम् । कन्यकर्क्षं त्रिपाच्चेत् स्याद्गणयेत् कृत्तिकादिकम् । चतुर्भिः पर्व्वभिस्तद्वदभिजित्तारकान्वितम् । कन्यकर्क्षं द्विपाच्चेत् स्याद्गणयेत् सौम्यभादिकम् । पञ्चभिस्त्वथ रोहे तु पञ्चमात् त्रिकवर्जिते" एतत्फलमप्याह गर्गः । "संश्लिष्टा मध्यनाड़ी तु पुरुषं हन्ति वेगतः । संश्लिष्टा पार्श्वनाड़ी तु कन्यकां हन्त्यसंशयम् । आसन्ना त्वेकनाड़ी स्यादाशसन्ततिदायिनी । दूरस्था चैकनाड़ी स्याद्दूरानिष्टस्य कारिणीति" । जगन्मोहने नारदः । "एकनाड़ीविवाहश्च गुणैः सर्व्वैः समन्वितः । वर्ज्जनीयः प्रयत्नेन दम्पत्योर्निधनं यतः" । आसां नाड़ीनां देशभेदेन व्यवस्थामाह जगन्मोहने नारदः । 'चतुर्नाड़ी त्वहिच्छत्रायां पाञ्चाले पञ्चनाड़िका । त्रिनाड़ी सर्व्वदेशेषु वर्ज्जनीया प्रयत्नतः" इति । अहिच्छत्रापाञ्चालौ देशविशेषौ । तस्माद्वशिष्ठादिभिर्देशभेदेन नक्षत्रभेदेन चानित्यप्रवृत्तिके चतुःपञ्चनाड्यावुपेक्ष्य सकलदेशव्यापित्वात् सकलनक्षत्रव्यापित्वाच्च त्रिनाड्येवोक्ता । नचैतावता चतुःपञ्चनाड्यौ स्वस्वदेशव्यतिरिक्तदेशेषु नैवावलोक्ये किन्तु सर्व्वेष्वपि देशेषु विचार्य्ये तत्र स्वदेशे दोषमहत्त्वमन्यदेशे दोषाल्पता त्रिनाड़ी तु सर्व्वत्रैव समानदोषा" यदाह मनुः । "अहिच्छत्रायां चतुर्नाड़ीसंयोगः कालमृत्युदः । एष योगोऽन्यदेशेषु ह्यपमृत्युफलप्रदः । पञ्चनाड़ीसमायोगः पाञ्चाले कालदण्डदः । इतरत्र समायोगो दुःखदारिद्र्यदोषकृत् । त्रिनाड्यां तु समायोगः सर्व्वत्रानिष्टकारकः" इति । यत्तु ज्योतिर्निबन्धे ज्योतिःप्रकाशे अश्विन्यादित्रिनाड़ीं प्रकृत्याभिहितम् "निधनं मध्यमनाड्यां दम्पत्योर्नैव पार्श्वयोर्नाड्योः" अत्र पार्श्वनाड्यां मृत्युरूपमहादोषाभावं मत्वा विवाहादिकरणं शुभायेत्यर्थः । तत् क्षत्रियादिविषयं गोदावरीतोदक्षिणदेशवासिविषयं वा । तदप्युक्तं तत्रैव । "करग्रहे पृष्ठनाड्यौ न निन्द्ये इति यद्वचः । तत्क्षत्रियादिविषयं गौतम्यायाम्यतस्तथेति" । गौतमी गोदावरी । अत्रार्थे आर्षं मूलं मृग्यम् । "इयं चाश्विन्यादित्रिनाड़ी गुरुमन्त्रादिष्वप्यनिष्टा प्रभुपत्तनादौ तु शुभैव" । उक्तञ्च स्वरोदये "एकनाड़ीस्थिता यत्र गुरुमन्त्राश्च देवताः । तत्र द्वेषं रुजं मृत्युं क्रमेण फलमादिशेत् । प्रभुः पत्तना मित्रं देशो ग्रामः पुरं गृहम् । एकनाड़ीस्थितं भव्यं विरुद्धं वेधवर्जितमिति" । अत्र नाड़ीवेधे चरणवेधेऽधिकदोषः, आवश्यके स एव त्याज्यः" एतदप्युक्तं तत्रैव । "आद्यांशेन चतुर्थांशं चतुर्थांशेन चादिमम् । द्वितीयेन तृतीयस्य तृतीयेन द्वितीयकम् ।

एवं भांशव्यधो यदा जायते वरकन्ययोः । तेषां मृत्युर्न सन्देहः शेषांशाः स्वल्पदोषदा इति" तत्राप्यावश्यकत्वे गुरुः "दोषापनुत्तये नाड्या मृत्युञ्जयजपादिकम् । विधाय ब्राह्मणांश्चैव तर्पयेत् काञ्चनादिना । हिरण्मयीं दक्षिणाञ्च दद्याद्वर्णादिकूटके । गावोऽन्नं वसनं देयं सर्व्वदोषापहारकमिति" । एवं सर्व्वसम्मतत्वादष्टौ कूटभेदा अभिहिता नान्ये । "माहेन्द्रं गौड़देशे च मालवे रज्जुसंज्ञकमित्यादिना वादरायणवाक्येनान्यकूटानां तत्तद्देशविषयतापाठनात् । ते च कूटभेदा वशिष्ठसंहितायां तोडलानन्दे च सामान्यविशेषभावसहिता द्रष्टव्याः" पी० धा० । अथ नाडीदोषापवादः "राश्यैक्ये चेद्भिन्नमृक्षं द्वयोः स्यान्नक्षत्रैक्ये राशियुग्मं तथैव । नाड़ीदोषोनो गणानां च दोषो नक्षत्रैक्ये पादभेदे शुभं स्यात्" मु० चि० । "द्वयोः स्त्रीपुंसयोरेकराशित्वे सति यदि भिन्नमृक्षं स्यात् तदा नाड़ीदोषोगणानाञ्च राक्षसमनुष्यगणानाञ्च दोषो नास्ति । यथा एकस्मिन्नपि कुम्भराशौ शततारकापूर्व्वभाद्रपदापादत्रयं च श्रेवं रूपो नक्षत्रभेदः । तथैव नक्षत्रैक्ये राशियुग्मं राशिद्वयं चेत् स्यात् तदापि प्रागुक्तो दोषो न स्यात् । उपलक्षणत्वात् तारादोषोऽपि न भवेत् । यथा । एकस्मिन्नेव नक्षत्रे पूर्व्वभाद्रपदाख्ये पूर्व्वभाद्रपदायाः प्रथमपादत्रयं कुम्भे चतुर्थचरणश्च मीने इत्येवंरूपो राशिभेदः" । यदाह नारदः । "एकराशौ पृथग् धिष्ण्ये दम्पत्योः पाणिपीड़नम् । उत्तमं मध्यमं भिन्नराश्येकर्क्षगयोस्तयोः । एकर्क्षे चैकराशौ च विवाहः प्राणहानिदः" । वशिष्ठः । "दम्पत्योर्जन्मभे चैक्ये राशौ च निधनं तयोः । एकस्य च तयोद्वाहे किञ्चिद्भेदे पि शानया" । किञ्चिद्भेदे नक्षत्रभेदे राशिभेदे च । गर्गः "एकराशिं विना नाड़ीयोगमादौ विवर्जयेत् । न दोषस्त्वेकराशिस्थे भकूटेऽन्येषु मृत्युदेति" । भृगुरपि "दम्पत्योरेकराशिश्चेत् पृथगृक्षं यदा भवेत्" । वह्निप्रोक्तो विवाहः स्याद्गणनाड्यौ न योजयेदिति । "अतएवाह केशवार्कः "नक्षत्रमेकं यदि भिन्नराश्योरभिन्नराश्योर्यदि भिन्नमृक्षम् । प्रीतिस्तदानीं निविड़ा नृनार्य्योश्चेत् कृत्तिकारोहिणिवन्न नाड़ीति" । चतुर्थचरणस्यायमर्थः चेद्यदि कृत्तिकारोहिणीवत् स्यात् तदापि नाड़ीदोषो न स्यात् । उपलक्षणत्वाद्गणदोषोऽपि । यथा कृत्तिकारोहिण्योरेकनाड़ीस्थत्वेऽपि गणदोषेऽपि तत्र दूषिताऽशुभफलं नैव स्यात् । अत्रापि प्रथमतः पुंतारापेक्षिता द्वितीयतः स्त्रीतारेत्यपि विशेषोऽध्येयः । यदाह गर्गः "एकराशौ पृथक् धिष्ण्ये पुंतारा प्रथमा भवेत् । अतीव शोभना प्रोक्ता स्त्रीतारा चेन्नशोभनेति" । तदेवं कैमुतिकन्यायेन यत्र नाड़ीगणदोषाद्यभावो यथा रोहिणीमृगयोर्हस्तचित्रयोर्वा तत्र पाणिपीड़नं शुभं स्यादिति किं वाच्यमित्यर्थः । अथैकराशिनक्षत्रत्वेऽपवादमाह । नक्षत्रैक्ये इति । स्त्रीपुंसयोः राश्यैक्ये नक्षत्रैक्ये च यदि चरणभेदो यथा भरण्याः प्रथमपादे पुंसोजन्म द्वितीयपादे स्त्रियास्तदापि शुभं कल्याणं स्यात् । तदुक्तं केशवार्केण । "पराशरः प्राह नवांशभेदादेकर्क्षराश्योरपि सौमनस्यमिति" । सौमनस्यं प्रीतिः । वशिष्ठेनापि "एकर्क्षजातानां भवति विवाहः सुतार्थसम्पत्त्यै । यद्युभयोरेकर्क्षं भवति यदा चांशको भिन्न" इति । एतच्च सङ्कोचविषयं वेदितव्यम् । तथा च जगन्मोहने । "एकर्क्षे चैकराशौ च विवाहस्त्वशुभः स्मृतः । सङ्कोचे तु तदा कार्य्योभिन्नपादोयदा तयोरिति" । अत्रापि विशेषो ज्योतिर्निबन्धे विधिरत्ने । "रोहिण्यार्द्रा मघेन्द्राग्नी तिष्यश्रवणपौष्णभम् । उत्तराप्रोष्ठपाच्चैव नक्षत्रैक्येऽपि शोभना" इति । इन्द्राग्नी विशाखा तदेतत् स्पष्टमुक्तं तत्रैव विधिरत्ने । "विशाखिकार्द्राश्रवणप्रजेशतिष्यान्त्यतत्पूर्व्वमघाः प्रशस्ताः । स्त्रीपुंसतारैक्यपरिग्रहे तु शेषाविवर्ज्या इति सङ्गिरन्त" इति । शेषास्तारा इत्यर्थः । अत्र द्वयोरन्यतरस्य वा जन्मराशिनक्षत्राद्यज्ञाने उपायमाह । वशिष्ठः । "अज्ञातजन्मनां नृणां नामभे परिकल्पना । तेनैव चिन्तयेत् सर्व्वं राशिकूटादि जन्मवत् । जन्मभं जन्मधिष्ण्येन नामधिष्ण्येन नामभम् । व्यत्ययेन सदा योज्यं दम्पत्योर्निधनप्रदम् । कुर्य्यात् षोड़श कर्म्माणि जन्मराशौ बलान्विते । सर्व्वाण्यन्यानि कर्म्माणि नामराशौ बलान्विते" इति । बृहस्पतिरपि । "व्यवहारराजसेवासंग्रामग्राममैत्रेषु । ज्ञातेऽपि जन्मराशौ फलमुक्तं नामराशिवशादिति" । नाम्नः सकाशाज्जन्मनक्षत्रज्ञानं स्वरोदयाभिहितशतपदचक्रान्तर्गतस्वीयनामादिवर्णवशात् ज्ञेयमिति । यस्तु अकारादिवर्णे वृषभादिनामस्य दृश्यते तत्र यथासम्प्रदायं व्यवस्था" पी० धा० । नाड़ीभेदेऽष्टौ गुणाः प्रागुक्ताः ।

ज्यो० त० नाड़ीचक्रलेखनतद्विशेषौ दर्शितौ यथा स्वरोदये । "अश्विन्यादि लिखेच्चक्रं सर्पाकारं त्रिनाड़िकम् । तत्र वेधवशात् ज्ञेयं विवाहादौ शुभाशुभम् । त्रिनाड़ीवेधनक्षत्रमश्विन्यार्द्राशुगोत्तराः । हस्तेन्द्रमूलवा-

रुण्यः पूर्वभाद्रपदादिमा। याम्यः सौम्योगुरुर्योनिश्चित्रमित्रजलाह्वयम्। धनिष्ठा चोत्तरा भद्रा मध्यनाड़ी व्यवस्थिता। कृत्तिका रोहिणी सर्पोमघा स्वातीविशाखके। उत्तराश्रवणापौष्णं पृष्ठनाड़ी व्यवस्थिता। अश्व्यादिनाड़ीवेधर्क्षं षष्ठं द्वितीयकं क्रमात्। याम्यादित्रिकतुर्यं च कृत्तिकादिद्विषट्ककम्। एवं निरीक्षयेद्वेधं कन्यामन्त्रे वरे गुरौ। पत्यस्त्रीस्वामिमित्रेषु देशे ग्रामे पुरे गृहे। एकनाड़ीस्थधिष्ण्यानि यदि स्युर्वरकन्ययोः। तदा वेधं विजानीयात् गुर्वादिषु तथैव च। प्रकटं यस्य जन्मर्क्षं तस्य जन्मर्क्षतोव्यधः। प्रणष्टं जन्मभं यस्य तस्य नामर्क्षतोवदेत्। द्वयोर्जन्मभयोर्वेधे द्वयोर्नामभयोस्तथा। नामजन्मर्क्षयोर्वेधे न कर्त्तव्यं कदाचन। एकनाड़ीस्थिता चेत् स्यात् भर्त्तुर्नाशाय चाङ्गना। तस्मान्नाड़ीव्यधोवीक्ष्यो विवाहे शुभमिच्छता। प्राङ्नाड़्या वेधतोभर्त्ता मध्यनाड्योभयं तथा। पृष्ठनाड़ीव्यधे कन्या म्रियते नात्र संशयः। एकनाड़ीस्थिता यत्र गुरुर्मन्त्रश्च देवता। तत्र द्वेषं रुजं मृत्युं क्रमेण फलमादिशेत्। प्रभुः पत्यङ्गनामित्रं देशोग्रामः पुरं गृहम्। एकनाड़ीगता भव्या अभव्या वेधवर्जिताः"। अस्यापवादः ज्यो०त०। 'एकराश्यादियोगे तु नाड़ीदोषो न विद्यते" एकराश्यादिश्च "एकराशौ च दम्पत्योः शुभं स्यात् समसप्तके। चतुर्थे दशमे चैव तृतीयैकादशे तथा"इत्युक्तः। समग्रहणात् विषमसप्तके दोषः। तथा च "घोटके सप्तके मेषतुले युग्महयो तथा। सिंहघटौ सदा वर्ज्यौ मृतिं तत्राब्रवीच्छिवः"। श्रीपतिव्यवहारनिर्णये। "सुहृदेकाधिपयोगे ताराबले वश्यराशौ वा। अपि नाड्यादिवेधे भवति विवाहोहितार्थाय, राजमार्त्तण्डे च।"न राजयोगे ग्रहवैरिता च न तारशुद्धिर्न गणत्रयं स्यात्। न नाड़ीदोषो न च वर्णदुष्टिर्गर्गादयस्ते मुनयोवदन्ति" अत्र देशभेदात् व्यवस्था। अन्यत्रोक्तम्।"लग्ने व्यये च पाताले जामित्रे चाष्टमे कुजे। भर्त्ता कन्याविनाशाय कन्याभर्त्तृविनाशकृत्"। अस्यापवादः। "अथ वा गुणबाहुल्ये कुजे वा तादृशे द्वयोः" प्रागुक्तरीत्या अष्टानां कूटानां गुणाङ्कानां सङ्कलने अष्टादशतोऽधिकत्वे उभयोर्वरकन्ययोस्तत्तल्लग्नादिस्थाने मङ्गलस्य स्थितौ च न दोषः एवमन्योऽपि वैधव्ययोगोनिन्दनीयः स च जातकशब्दे वक्ष्यते। एवं विवाहे वर्णादिशुद्धिं दम्पत्योरानुकूल्याङ्गं चोक्त्वेदानीं निर्दोषदिनलग्नादि निरूप्यते।

"तत्रैकविंशतिः सर्वसम्मता दोषा नारदेन परिगणिताः। "एकविंशतिदोषाणां नामरूपफलानि च। पितामहोक्तं संवीक्ष्य तानि वक्ष्ये समासतः। पञ्चाङ्गशुद्धिरहितोदोषस्त्वाद्यः प्रकीर्त्तितः। उदयास्तशुद्धिरहितो द्वितीयः सूर्य्यसंक्रमः। तृतीयः पापषड्वर्गो भृगुषष्ठः कुजाष्टमः। गण्डान्तं कर्त्तरी रिप्फषड़ष्टेन्दुश्च संग्रहः। दम्पत्योरष्टमं लग्नं राशिर्विषघटी तथा। दुर्मुहूर्त्तौ वारदोषः खार्ज्जूरिकसमङ्घ्रिभम्। ग्रहणोत्पातभं क्रूरविद्धर्क्षं क्रूरसंयुतम्। कुनवांशो महापातो वैधृतिश्चैकविंशतिरिति" अन्यैस्तु दश दोषा उक्ताः "वेधश्च १लत्ता२च तथा च पातः,३खार्ज्जूरयोगो४दशयोगचक्रम्५। युतिश्च६जामित्र७सुपग्रहाश्च८बाणाख्यवज्रौ९दश चैव दोषा इति व्यवहारोच्चयेऽभिधानात्। तत्र "दुर्मुहूर्त्तौ रवावर्यमेत्यादिः। वारदोषः कुलिकादिः, क्रूरसंयुतमित्यस्योपलक्षणत्वादकालवृष्टिनामकोऽपि दोषो गृह्यते। यदाह वशिष्ठः। "पञ्चाङ्गशुद्धिरहिताश्चोत्पाताऽकालवृष्टिजाः" इति। एषं दोषाणां कर्मविशेषे फलमाह वशिष्ठः "एकविंशन्महादोषास्त्वेते ब्रह्ममुखोदिताः। कदाचिन्नैव सीदन्ति गुणानां कोटिकोटिभिः। तस्मादेतेषु दोषेषु कदाचिन्नाचरेच्छुभम्। विवाहे विधवा नारी मरणं व्रतबन्धने। ग्रामनाशः प्रतिष्ठायां सीमन्ते गर्भनाशनम्। नवान्नभोजने मृत्युः कृषौ तत्फलनाशनम्। कर्त्तुर्नाशो गृहारम्भे प्रवेशे पतिनाशनम्। यात्रायां कर्त्तृनाशः स्याद्युद्धयाने विशेषतः। लभ्यते सुमहत्पुण्यमेषु श्राद्धादिकर्मभिरिति" पी०धा०।

तत्र सर्वकर्मोपयोगिषड्वर्गे वक्तव्ये आदौ क्षेत्रनवांशपानाह "कुजशुक्रसौम्यशशिसूर्य्यचन्द्रजाः कविभौमजीवशनिसौरयोगुरुः। इह राशिपाः, क्रियमृगास्यतौलिकेन्दुभतो नवांशविधिरुच्यते बुधैः" मु०चि०।

"अत्र लग्नादीनां लक्षणं नारदोक्तम्।"त्रिंशद्भागात्मकं लग्नं होरा तस्यार्द्धमुच्यते। लग्नत्रिभागो द्रेष्काणो नवमांशो नवांशकः। द्वादशांशोद्वादशांशस्त्रिंशांशस्त्रिंशदंशकः। षड्वर्गाः कथितास्त्वेते- तेषामीशा इमे स्मृताः" इति। तत्रैते भौमशुक्रबुधचन्द्रसूर्य्यबुधशुक्रभौमगुरुशनिगुरवः, क्रमेणेह षड्वर्गे राशिपा मेषादिराशीनां स्वामिनः। क्रियेति। क्रियो मेषः मृगास्यो मकरः तौलिकं तुला इन्दुभं कर्कः एभ्यो राशिभ्यो द्वादशस्वपि राशिषु नवांशकं बुधैरुच्यते। मेषे मेषादेव, वृषे मकरादेव मिथुने तुलातः कर्के कर्कादेव, एवं सिंहेऽपि मे-

-शादेव एवं कन्यादिषु अपि राशिषु मकरादित एव । एवमेव धनुरादिष्वपि इत्यर्थः । यदाह नारदः । "सिंहस्याधिपतिर्भानुश्चन्द्रः कर्कटकेश्वरः । मेषवृश्चिकयोर्भौमः कन्यामिथुनयोर्बुधः । धनुर्मीनयोर्देवेज्यः शुक्रोवृषतुलेश्वरः । शनिर्मकरकुम्भेश इत्येते राशिनायकाः" । "नवमांशा मेषसिंहधापे, मेषादयः क्रमात् । क्षमाङ्गोमृगकन्यासु ज्ञेयाः सुर्मकरादयः । तुलामिथुनकुम्भेषु स्युः क्रमेण तुलादयः । अलिकर्कटमीनेषु क्रमात् स्युः कर्कटादयः" इति पी० धा० । अथ होरेशकथनम्

'समभेशमध्ये शशिरविहोरा विषमभमध्ये रविशशिनोः सा" मु० चि० । "पञ्चदशभागात्मकैका होरा समराशिमध्ये प्रथमा चन्द्रस्यापरा सूर्य्यस्य । विषमराशिमध्ये प्रथमा रवेः परा चन्द्रस्येत्यर्थः । "होरार्केन्द्वोरोजराशौ समभे चन्द्रसूर्य्ययोरिति नारदोक्तेः" पी० धा० । अथ त्रिंशांशद्रेक्काणेशाः । 'शुक्रज्ञजीवशनिभूतनयस्य बाणशैलाष्टपञ्चविशिखाः समराशिमध्ये । त्रिंशांशकोविषमभे विपरीतमस्मादुद्रेक्काणकाः प्रथमपञ्चनवाधिपानाम्" मु० चि० । समराशिमध्ये क्रमेण प्रथमतः पञ्चानामंशानां शुक्रः स्वामी ततः शैलानां सप्तानां ज्ञोबुधः । ततोऽष्टानां जीवो गुरुः । ततः पञ्चानां शनिः । ततो विशिखाबाणाः पञ्च तेषां भूतनयो भौमः । शुक्रज्ञेत्यादिसमाहारद्वन्द्वः । विषमभे तु अस्मात्समराशेर्विपरीतं ज्ञेयम् । यथा प्रथमतः पञ्चानां भौमः ततः पञ्चानां शनिः ततोऽष्टानां गुरुः । ततः सप्तानां बुधः ततः पञ्चानां शुक्रः इत्यर्थः । अयमेव त्रिंशांशकसंज्ञ इति । यथाह नारदः । 'कुजार्कीज्यज्ञशुक्राणां बाणेषुष्टाद्रिमार्गणाः भागाः स्युर्विषमे ते तु समराशौ विपर्य्ययात्"इति । द्रेक्काणा राशिदशांशाः द्वादशसु राशिषु प्रथमोद्रेष्काणः प्रथमस्य स्वराश्यधीशस्य, द्वितीयोद्रेष्काणः पञ्चमराशीश्वरस्य, तृतीयः स्वराशितो नवमराशीश्वरस्य । यथा वृषे प्रथमो द्रेष्काणो वृषाधीशशुक्रस्य, स्वापेक्षपञ्चमकन्याधीशबुधस्य द्वितीयः, तृतीयः स्वापेक्षनवममकराधीशशनेरित्यर्थः । "स्युर्द्रेक्काणा लग्नपञ्चमनवराशीश्वराः क्रमादिति" नारदोक्तेः पी० धा० । द्वादशांशेशानाह ।

"स्याद्द्वादशांश इह राशित एव गेहं होराथ दृक्कनवमांशकत्र्यंशभागाः । त्रिंशांशकश्च षडिमे कथितास्तु वर्गाः सौम्यैः शुभं भवति चाशुभमेव पापैः" मु० चि० । 'इह षड्वर्गे द्वादशांशः सार्द्धसंशद्वयं तत् स्वराशित एवै-शांशान्तं गणितं सद् यस्तद्राशिस्वामी स द्वादशांशेश्वरः "आरभ्य लग्नराशेस्तु द्वादशांशेश्वराः क्रमादिति"नारदोक्तेः । अन्यच्चरणत्रयं स्पष्टतरम् । तदुक्तं वशिष्ठेन । "लग्नं तदर्द्धञ्च ततस्त्रिभागो नवांशकश्च द्विदशांशकश्च । त्रिंशांशकश्चेति हि वर्गषट्कं शुभं शुभव्योमचराधिपत्यात् । यः पापषड्वर्गभवो हि दोषः पञ्चाङ्गसौम्यग्रहलग्नजातम् । गुणौघमम्भोधिमशोषयाश्च शुष्यत्यशेषं खलु राघवस्येति" । तस्मात् सौम्यपापग्रहषड्वर्गसाङ्कर्य्ये सति सौम्यषड्वर्गस्त्रिभ्योऽधिकश्चेच्छुभः त्रिभ्योहीनश्चेदशुभ इत्यर्थः" पी० धा० । अथ गण्डान्तदोषः । "ज्येष्ठापौष्णभसार्पभान्त्यघटिकायुग्मं च मूलाश्विनीपित्र्यादौ घटिकाद्वयं निगदितं तद्भस्य गण्डान्तकम् । कर्क्यालिझषभान्ततोऽर्धघटिका सिंहाश्च मेषादिगा पूर्णान्ते घटिकात्मकं त्वशुभदं नन्दातिथेश्चादिमम्" मु० चि० ।

"गण्डान्तं नाम सन्धिविशेषः स चानेकविधः नक्षत्रसन्धिस्तिथिसन्धिर्लग्नसन्धिश्च तथा योगसन्धिः करणसन्धिर्वर्षसन्धिरयनसन्धिर्ऋतुसन्धिर्मासलन्धिः पक्षसन्धिर्दिनसन्धी-रात्रिसन्धिर्मध्याह्नसन्धिः प्रातःसायंसन्धिर्निशीथसन्धिश्च । तत्र तिथिनक्षत्रलग्नविशेषाणां यः सन्धिर्नियतकालः स गण्डान्तसंज्ञः । अन्येषां तु सन्धिर्नियतकालः सन्धिशब्दवाच्य एव । तत्रादौ नक्षत्रगण्डान्तमुच्यते । ज्येष्ठा प्रसिद्धा पौष्णभं रेवती सार्पभमश्लेषा एषामन्ते घटिकाद्वयम् (४दण्डाः) । तथा मूलाश्विन्यौ प्रसिद्धे पित्र्यं मघा । एषामादौ घटिकाद्वयं च गण्डान्तन्नाम । तथा च रेवत्यश्विन्योरश्लेषामघयोर्ज्येष्ठामूलयोरन्तरालवर्त्ति घटीचतुष्टयं नक्षत्रगण्डान्तमशुभदम् तदुक्तं रत्नमालायाम् । "पौष्णाश्विन्योः सार्पपित्र्याख्ययोश्च यच्च ज्येष्ठामूलयोरन्तरालम् । तद्गण्डान्तं स्याच्चतुर्नाडिकं हि यात्राजन्मोद्वाहकालेष्वनिष्टमिति" । यत्तु वशिष्ठेनोक्तम् "यदन्तरालं पितृसार्पयोश्च मूलेन्द्रयोराश्विनपौष्णयोश्च । ससन्धि गण्डान्तमिति त्रयं तद्यामप्रमाणं शुभकर्महन्तृ इति" । यामः प्रहरो नक्षत्रभोगस्येति शेषः । नारदोऽपि 'सार्पेन्द्र पौष्णधिष्ण्यान्ते षोड़शांशा भसन्धयः । तदग्रभेष्वाद्यजाताः पापा गण्डान्तसंज्ञकाः । उग्रं सन्धित्रितयजं गण्डान्तत्रितयं महत् । त्यजेद् जन्मयात्रादिविवाहस्थापनादिषु" । षोड़शांशो नक्षत्रभोगस्यार्द्धप्रहर इति यावत् । आद्यजाताः षोड़शांशाः । तदेतद्दोषमहत्त्वात्सत्यस्त्रच-

नार्थम् । तथा हि । चतुर्घटिके नक्षत्रगण्डान्ते महान् दोषः, तदधिके त्वष्टघटिकात्मके मध्यमदोषः। ततोऽधिके चरणावधिके त्वल्पदोषः । अतएवोक्तं सूर्य्यसिद्धान्ते “सार्पेन्द्रपौष्णधिष्ण्यानामन्त्याः पादा भसन्धयः । तदग्रभेषु सार्द्धांशो गण्डान्तं नाम कीर्त्त्यते । व्यतीपातत्रयं घोरं गण्डान्तत्रितयं तथा । एतद्भसन्धित्रितयं सर्व्वकर्म्मसु वर्जयेदिति” । अर्द्धांशश्चरणार्द्धं प्रहर इत्यर्थः । दीपिकायाञ्च । “आद्ये मघाचतुर्भागे मूलपादाद्य एव च । रेवत्यन्त्यचतुर्भागे विवाहः प्राणनाशकः” इति । अथ लग्नगण्डान्तमुच्यते । कर्कीति कर्कः प्रसिद्धः अलिर्वृश्चिकः अण्डजो मीनः एषाम्भानां लग्नानामन्तेऽर्द्धघटिका, तथा सिंहमेषौ प्रसिद्धौ अश्वोधनुः एषां लग्नानामादिभूतार्द्धघटिका गण्डान्तं नाम । तथा च कर्कसिंहयोर्वृश्चिकधनुषोर्मीनमेषयोर्वा लग्नयोरन्तरालवर्त्तिन्येका घटिका लग्नगण्डान्तमशुभदमित्यर्थः । यदाह कश्यपः “सिंहकर्कटयोश्चापकीटयोर्मीनमेषयोः । गण्डान्तमन्तरालं तन्नाडिका निधनप्रदेति” । यत्तु नारदेनोक्तम् “कुलीरसिंहयोः कीटचापयोर्मीनमेषयोः । गण्डान्तमन्तरालं स्यात् घटिकार्द्धं मृतिप्रदमिति” । वसिष्ठेनापि । “लग्नान्तरालं घटिकार्द्धमेतत्कुलीरहर्य्योरलिचापगोश्च । मीनाजयोःसर्व्वगुणान्निहन्ति लोभो यथा सर्व्वगुणान्नरस्येति”। तद्दोषाधिक्यसूचनार्थम् । अथ तिथिगण्डान्तमुच्यते । पूर्णान्त इति । पूर्णाः पञ्चमीदशमीपञ्चदश्यस्तासामन्ते घटिकैका, तथा नन्दाः प्रतिपत्षष्ठ्येकादश्यस्तासामादिभूतैका घटिका तिथिगण्डान्तं नाम । तथा च पञ्चमीषष्ठ्योर्दशम्येकादश्योः, पञ्चदशीप्रतिपदोर्वा तिथ्योरन्तरालवर्त्तिघटीद्वयं तिथिगण्डान्तमशुभमित्यर्थः । यदाह नारदः “पूर्णानन्दाख्ययोस्तिथ्योः सन्धिर्नाड़ीद्वयं सदा । गण्डान्तं मृत्युदं जन्मयात्रोद्वाहव्रतादिषु” इति । यत्तु कश्यपेनोक्तम् “पूर्णानन्दाख्ययोस्तिथ्योः सन्धिर्नाडीचतुष्टयम् । उद्वाहजन्मयानेषु गण्डान्तं निधनप्रदमिति” । तद्दोषतारतम्यसूचनार्थम् । एवं गण्डान्तसंज्ञः सन्धिरुक्तः । तत्र तिथिलग्नगण्डान्तपरिहारः शाकल्यसंहितायाम् । “तथैव तिथिगण्डान्तं नास्तीन्दौ बलशालिनि । तथैव लग्नगण्डान्तं नास्ति जीवे बलान्विते” इति । अथात्र प्रसङ्गादन्येषामपि सन्धिरुच्यतेऽस्माभिः । यदाह गुरुः “घटिकाद्वयमृक्षान्ते मासान्ते तु दिनत्रयम् । वर्षान्ते वर्जयेत्पक्षं ग्रहणाद्दिनसप्तकमिति” । तिथ्यादिसन्धिमप्याह वसिष्ठः “पक्षोऽब्दसन्धिस्त्रिदिनञ्च माससन्धिस्त्रिनाड्यः खलु सन्ध्ययोश्च । नाड्यश्चतस्रस्तिथिकृष्णयोगसन्धिस्तदर्द्धं करणस्य सन्धिः” । वर्षेषु विशेषमाह स एव “सौराब्दान्ते त्यजेत्पक्षं चान्द्रे तु नवभन्त्यजेत् । सावनान्तेऽष्टभन्त्याज्यं नाक्षत्रे पौष्णभात् त्र्यहमिति” । अत्रापि विशेषमाह स एव । “अब्दाः स्युस्त्रिविधा जीवसौरचान्द्राह्वयाः सदा । तेषामादौ तथा चान्ते त्रिदिनं वर्जयेच्छुभे” इति । अयञ्च सर्व्वकार्य्यसाधारणो निषेधः अन्यथा मीनादित्ये विवाहप्रसङ्गाभावादेव वर्षान्तनिषेधस्य वैयर्थ्यापातात् । गुरुः “ऋक्षान्ते पुत्त्रनाशः स्यान्मासान्ते तु धनक्षयः । वर्षान्ते वर्गनाशः स्याद्ग्रहणात् सर्व्वनाशनमिति” । आवश्यकत्वे तु “नक्षत्रयोगतिथिसन्धिषु नाड़िकैका तिथ्यष्टविंशतिपलैः सहितोभयत्र । कर्कालिमीनतनुसन्धिषु दिक्पलानि त्याज्यानि शेषविवरेषु च पञ्च पञ्चेति” वासनासिद्धं केशवार्कवाक्यमनुसर्त्तव्यम् । वासना च सिद्धान्तशिरोमणावभिहिता । “शशितनुविकलाभ्यश्चन्द्रभुक्त्येन्दुभान्वोर्गतिविवरकलाभिर्भूय एवाभिरेव । पृथगथ गतिगुण्या नाड़िकाः सन्धिराप्ता भतिथिकरणयोगानां फलं तत्र मिश्रमिति” । सन्धिफलमप्याह केशवार्कः ।“सन्धौ पुरन्ध्री शुचमेति वन्ध्या मृतप्रजा वा यदि सन्धिसन्धिः । वदन्ति वात्स्या ऋतुनाविमूढां निशीथमध्यंदिनसन्धिमूढाम्”तत्रार्द्धरात्रमध्यन्दिनसन्धिः “मध्ये निशाह्नोर्घटीत्रयम्”मु॰चि॰। इत्याद्ये प्रकरणेऽभिहितः । सन्धिसन्धिस्तु केशवार्केणोक्तः।“रवेर्भवेदेकघटाधिकस्य यदंशषष्टं खलु सायनस्य । तदत्र राशिद्वयभागतष्टं स्पष्टं वसन्तादृतवो भवन्ति । तत्सन्धियोगाङ्कघटीसमाः स्युर्द्विसङ्गुणास्ते द्विगुवायनीयाः । स सन्धिसन्धिः खलु यत्र शेषं शून्यं भवेदेष विशेषपुण्यः” इति मीनसंक्रान्तिमारभ्य वसन्तर्त्तुगणनेति पक्षमङ्गीकृत्यैकघटाधिकस्येत्युक्तम् । गण्डान्तदोषपरिहारमाह वसिष्ठः “गण्डान्तदोषमखिलं मुहूर्त्तोऽभिजिदाह्वयः। हन्ति यद्वन्मृगव्याधः पक्षिसङ्घमिवाखिलम्” । तदेतद्दोषापवादाख्यस्य प्रकारस्य नियामकत्वाद्विवाहविषयं न जातकादौ”पी॰धा॰। अथ कर्त्तरीदोषः। “लग्नात् पापावृज्वनृजू व्ययार्थस्थौ यदा तदा। कर्त्तरी नाम सा ज्ञेया मृत्युदारिद्र्यशोकदा”। मु॰चि॰“यदा पापग्रहौ लग्नाद्व्ययार्थस्थावृज्वनृजू द्वादशस्थः पापग्रहोमार्गी, द्वितीयस्थः पापग्रहो वक्री स्यात्तदा कर्त्तरी नाम दोषः

छन्तति स्त्रीपुंसयोः प्राणांश्छेदयतीति छतो च्छेदन इति धात्वर्थानुसारादन्वर्था सम्मुखकर्त्तरीयं मृत्युदारिद्र्यशोकदा भवेत् । यदाह नारदः "लग्नाभिमुखयोः पापग्रहयोर्ऋजुवक्रयोः । सा कर्त्तरीति विज्ञेया दम्पत्योर्गलकर्त्तरी । कर्त्तरीदोषसंयुक्तं यल्लग्नं तत् परित्यजेत् । अपि सौम्यग्रहैर्युक्तं गुणैः सर्वैः समन्वितमिति"। गर्गोऽपि ।"व्यये मार्गगतिः क्रूरो वक्री क्रूरो धने यदि । तौ च लग्नांशतुल्यौ च तदा घोराख्यकर्त्तरी" । यदा तु द्वितीये मार्गी द्वादशे च वक्री अथ द्वावपि क्रूरौ व्ययार्थस्थौ सन्तौ शीघ्रिणौ वा स्यातां तदा कर्त्तरी नास्त्येव । यदाह वशिष्ठः "लग्नस्य पृष्ठाग्रगयोरसाध्वोः सा कर्त्तरी स्यादृजुवक्रगत्योः। तावेव शीघ्रौ यदि वक्रचारौ न कर्त्तरी चेति पितामहोक्तिरिति" । इयं कर्त्तरी चन्द्रस्यापि द्रष्टव्या । यदाह कश्यपः "चन्द्रस्य कर्त्तरी तद्वच्छुभदृष्टा न दोषदेति"। परन्तु लग्नस्य चन्द्रस्य वा क्रूरग्रहमध्यगतत्वदोषोऽस्त्येव कर्त्तरीतोऽल्पफलः कन्यानाशकरत्वात् । यदाह वसिष्ठः ।"क्रूरग्रहमध्यगते लग्ने चन्द्रेऽथ वा करग्रहणम् । ते यमसदनाभिमुखं गमनञ्चेच्छन्ति कन्यायाः" इति कर्त्तरीदोषेऽन्यदप्यपवादान्तरं 'पापौ कर्त्तरिकारकावित्यादिना स्वयं वक्ष्यति । अत्र लग्नादित्युपलक्षणात् सर्वेषामपि भावानां कर्त्तरीदोषोऽध्यवसेयः "यो यो भावः स्वामिदृष्टोयुतोवेत्यादिना" तुल्यन्यायत्वात् । तत्र लग्ने कर्त्तरी महादोषकरी लग्नभङ्गाधायकत्वात्तस्या अन्यत्र तादृशदोषाभाव इति तु तत्त्वम्"पी॰धा॰। अतःपरं राहुकेत्वोः पापग्रहत्वं व्यवस्थापितं तच्च केतुशब्दे विस्तरेण वक्ष्यते । अथ युतयोगापरपर्य्यायसंग्रहदोषः।"चन्द्रे सूर्य्यादिसंयुक्ते दारिद्र्यं मरणं शुभम् । सौख्यसापत्न्यवैराग्यं पापद्वययुते मृतिः"मु॰चि॰"सूर्य्ययुक्ते चन्द्रे दारिद्र्यं स्यात् । भौमादियोगे मरणादि फलं क्रमेण स्यादित्यर्थः पापग्रहसाहित्येऽप्यशुभफलं राहुकेत्वोरपि द्रष्टव्यम् । यथाह नारदः 'शशाङ्के ग्रहसंयुक्ते दोषःसंग्रहसंज्ञकः । सूर्य्येण संयुते चन्द्रे दारिद्र्यम्भवति ध्रुवम् । कुजेन मरणं व्याधिः सौम्येन त्वनपत्यता । दौर्भाग्यङ्गुरुणा युक्ते सापत्न्यम्भार्गवेण तु । प्रव्रज्या सूर्य्यपुत्रेण राहुणा कलहः सदा । केतुना सयुते चन्द्रे नित्यं कष्टं दरिद्रता । तस्मिन् संग्रहदोषे तु विवाहं नैव कारयेत्" । सापत्न्यं भर्त्तुरन्या भार्य्या स्यात् । अत्र गुरुबुधसाहित्यफलमशुभमुक्तम् ग्रन्थकर्त्रा तु वसिष्ठवाक्ये कस्यचिन्मताभिप्रायेण शुभफलमुक्तम् । यथोक्तं वसिष्ठेन 'दारिद्र्यं रविणा कुजेन मरणं सौम्येन न स्युः प्रजा दौर्भाग्यं गुरुणा सितेन सहिते चन्द्रे ससापत्नकम् । प्रव्रज्याऽर्कसुतेन सेन्दुजगुरौ वाञ्छन्ति केचिच्छुभं द्व्याद्यैर्मृत्युरसद्ग्रहैः शशियुतैर्दोषैः प्रवासः शुभैरिति" । अत एव श्रीपतिनोक्तम् । "शुभञ्च दम्भोलिभृदीज्यविद्भ्यामिति" दम्भोलिभृदीज्यो जीवः । पापेति । पापद्वयेन युते उपलक्षणत्वात्पापत्रयादियुते मृतिरेव स्यात् । "पापद्वययुते चन्द्रे दम्पत्योर्मरणं ध्रुवमिति" नारदोक्तेः । बहुसौम्यग्रहयोगे तु बहुकालं पत्युर्देशान्तरेऽवस्थानं स्यात् तद्वाक्यमधुनैवाभिहितम् । अथास्य परिहारो नारदोक्तः । "स्वक्षेत्रगः स्वोच्चगोवा मित्रक्षेत्रगतो विधुः । युतिदोषाय न भवेद्दम्पत्योः श्रेयसे तदेति" । क्वचिद्वर्गोत्तम इति पठ्यते । कश्यपेनापि । "तुङ्गमित्रस्वराशिस्थः शुभयुक्तः शुभप्रदः । एवंविधः क्रूरयुतः सम्पूर्णफलदः शशीति" पी॰ धा॰ ।

अथ जन्मराशिलग्नयोरष्टमलग्नदोषं सापवादमाह ।

"जन्मलग्नभयोर्मृत्युराशौ नेष्टः करग्रहः । एकाधिपत्ये राशीशे मैत्रे वा नैव दोषकृत्" मु॰चि॰ ।

'जन्मलग्नजन्मराश्योः सम्बन्धिनि मृत्युराशावष्टमलग्ने करग्रहोनेष्टः । यदाह नारदः 'दम्पत्योरष्टमं लग्नं त्वष्टमोराशिरेव च । यदि लग्नगतः सोऽपि दम्पत्योर्निधनप्रदः । स राशिः शुभयुक्तोऽपि लग्नं वा शुभसंयुतम् । लग्नं विवर्ज्जयेत् यत्नात् तदंशांश्च तदीश्वरान्"इति । अत्र जन्मलग्ने जन्मराशौ च विशेषमाह कश्यपः । "इष्टं स्वजन्मलग्नं तज्जन्मराशिरनिष्टदः ।लग्नगस्तु तयोः स्थानाच्छुभान्युपचयानि वै" इति। नारदोऽपि "जन्मराश्युद्गमोनैव जन्मलग्नोदयः शुभः । तयोरुपचयस्थानं यदि लग्नगतं शुभमिति" । अथाष्टमलग्नदोषपरिहारमाह । एकेति जन्मराशिजन्मलग्नयोरन्यतरस्य विवाहलग्नस्य च स्वाम्यैक्ये सति यथा मेषवृश्चिकयोः, तथा तयोराशीश्वरयोः मैत्रे यथा सिंहमीनयोः । अत्र हि सूर्य्यगुर्वोरन्योन्यप्रीतिरस्ति । एतादृशविषये विवाहो लग्नाष्टमदोषकृत् न स्यात् । यदाह कश्यपः 'जन्मेशाष्टमलग्नेशौ मिथो मित्रे व्यवस्थितौ । जन्मराश्यष्टमर्क्षोत्थदोषो नश्यति भावतः"इति पी॰धा॰। परिहारान्तरमाह "मीनोक्षकर्कालिमृगस्त्रियोऽष्टमं लग्नं यदा नाष्टमगेहदोषकृत् । अन्योन्यमित्रत्ववशेन सा वधूर्भवेत्सुतायुर्गृहसौख्यभागिनी" । 'उक्षा वृषः स्त्री कन्या अन्ये प्रसि-

ङ्गाः एते राशयो यद्यष्टमलग्नं स्युः यथा सिंहान्मीनः तुलातोवृषः धनुषः कर्कः मेषात् वृश्चिकः मिथुनान्मकरः कुम्भात्कन्याऽष्टमलग्नम् । तदाष्टमगेहदोषश्च भवेत् । कुत इत्यत आह । अन्योन्येति । प्रागुक्तपरस्परप्रीतिवशे । इदञ्चोपलक्षणम् । मेषवृश्चिकयोस्तुलावृषयोरेकाधिपत्यात् । एवं सति सा वधूः परिणीता कन्या सुतायुर्गृहसौख्यभागिनी स्यात् । उक्तञ्च ‘‘झषकुलीरवृषालिमृगाङ्गना जननराशिविलग्नगृहाष्टमाः । शुभफला भृगुणा कथितास्तयोरधिपती सुहृदौ हि परस्परमिति" । परिहारान्तरमप्याह गुरुः ।"लग्नादष्टमराशीशः केन्द्रगः शुभवीक्षितः । यद्यष्टमगतस्योक्तदोषमाशु व्यपोहति । रन्ध्रेशः स्वशुभांशस्थस्तुङ्गः स्वक्षेत्रमित्रगः । अष्टमस्थानदोषोहि विनश्यति न संशय"इति ।

अथ लग्नेऽष्टमेशादियोगफलम् ।"मृतिभवनांशोयदि च विलग्ने तदधिपतिर्वा न शुभकरःस्यात् ।व्ययभवनं वा भवति तदंशस्तदधिपतिर्वा कलहकरः स्यात्"मु०चि०। "अष्टमभवननवांशोयदि विलग्ने स्यादथ वाष्टमभवनस्वामी विलग्ने स्यात्तदा शुभकरो न स्यात् । यदाह कश्यपः ।"दम्पत्योरष्टमे लग्ने राशौ वापि तदंशके । तदीशे वा लग्नगते तयोर्मृत्युर्न संशय" इति । अथ व्ययभवनञ्जन्मलग्नजन्मराशिभ्यान्द्वादशम्भवनम् अथवा व्ययांशो व्ययस्वामी यदि लग्ने स्यात्तदा कलहकृत् स्यात् । उक्तञ्च कश्यपेन "तथैव द्वादशे लग्ने तदंशे वा तदीश्वरे । विवाहे लग्नगे नैस्वं नित्यं स्यात् कलहोद्वयोरिति" । नारदेनापि "दम्पत्योर्द्वादशं लग्नं राशिर्वा यदि लग्नगः । अर्थहानिस्तयोस्तस्मात्तदंशस्वामिनन्त्यजेदिति" ।

अथ विषघटीदोषः।"खरामतो३०ऽन्त्यादितिवह्निपित्र्यभे खवेदतः४०के, रदत ३२श्च सार्पभे।खबाणतो ५०ऽश्वे, धृतितो१८र्यमाम्बुपे, कृते२०र्भगत्वाष्ट्र भविश्वजीवभे । मनो१४र्द्विदैवानिलसौम्यशाक्रभे कुपक्षतः२१ शैवकरेऽष्टि१६तोऽजभे । युगाश्वितो२४बुध्न्यभतोययाम्यभे, खचन्द्रतो१० मित्रभवासवश्रुतौ । मूलेऽङ्कशाणाद् ५६ विषनाडिकाः कृता४ वर्ज्याः शुभेऽथोविषनाड़िकाध्रुवाः। निघ्ना भभोगेन खतर्क६०भाजिताः स्फुटाभवेयुर्विषनाडिकास्तथा" मु०चि०। "रेवतीपुनर्वसुकृत्तिकामघानक्षत्रेषु खरामतः त्रिंशत्घटिकोत्तरं कृताश्चतस्रो घटिकाविषनाडिकाः शुभकार्य्ये वर्ज्याः स्युरिति"तृतीयश्लोकेनान्वयः । एवं सर्व्वत्र व्याख्येयं के रोहिण्यां कृतैर्विंशतेः । अजभे पूर्व्वभाद्रपदायाम् अन्यानि पदानि स्पष्टानि । तदेवं षष्टिघटीरूपे नक्षत्रभोगे ध्रुवकाश्चतस्रो विषनाड़िकाः प्रोक्ताः न्यूनाधिकत्वे तु स्पष्टीकरणमुच्यते । अथो इति । विषनाडीनां ध्रुवाः खरामतः इत्येवमादायो नक्षत्रभोगेनेष्टेन निघ्नाः खतर्कैः षष्ट्या भाजितास्तताविषनाडिका ध्रुवाः स्पष्टा भवेयुरित्यर्थः । अत्रोपपत्तिस्त्रैराशिकेन । यदि घटीषष्ट्यात्मकभभोगेनेमे ध्रुवका इमाश्चतस्रो विषनाडिकाश्च लभ्यन्ते । तदेष्टभभोगेन किमपि, ध्रुवाविषनाडिकाश्चेष्टभभोगेन गुण्याः षष्ट्या भाज्या फलितम् । यदाह कश्यपः ‘‘वियद्बाणा५० वेददस्राः२४ खरामा३०व्योमसागराः४० । वेदचन्द्रा१४ चन्द्रदस्राः१२ खरामा३० व्योमबाहवः२० । नेत्राग्नयो३२ व्योमगुणाः३० शून्यदस्रा२० गजेन्दवः१८ । क्ष्माबाहवो२१ वियद्दस्राः२० शक्रा१४ श्चेन्द्राः१४ खभूमयः१० । वेदचन्द्रा १४ स्तर्कबाणा५६ वेददस्राः२४ खबाहवः२० । व्योमेन्दवो१० व्योमचन्द्रा१० धृतयः१८ स्तर्कभूमयः१६ वेदाश्विनः२४ खरामाः ३० स्युर्दस्रर्क्षात् घटिकाःक्रमात् । आभ्यः परस्तत्क्रमशश्चतस्रो विषनाडिकाः। ऋक्षाद्यन्तघटीनिघ्नाः षष्टिभक्ताः स्फुटाः स्मृताः । विषनाडीदोषदुष्टं लग्नं सर्व्वगुणान्वितम् । शुभैः सर्व्वैश्च संयुक्तमपि पञ्चेष्टकं त्यजेदिति" । वसिष्ठः कुर्व्वन्त्युद्वाहितां कन्यां विधवां वत्सरत्रयात् । अन्यस्मिन् मङ्गले ताश्च निधनं वाथ निर्द्धनमिति" । ताः विषनाडिकाः ।

अथ प्रसङ्गात् ग्रन्थान्तरोक्तास्तिथिवारविषनाडिकाः प्रोच्यन्तेऽस्माभिः दैवज्ञम०। "तिथीः५षु५नागाऽ८द्रि७-गिरी७षु५ वारिधि४र्गजा८ऽद्रि७दिक्१०पावक३ विश्व१२ वासवाः१४। सुनोभ७,८संख्याप्रथमा तिथेः क्रमात्परं विष स्यात् घटिकाचतुष्टयम् ।नखा२०द्वयं२द्वादश१२दिक्१० च शैला७बाणाश्च ५तत्त्वानि २५यथाक्रमेण । सूर्य्यादिवारेषु परं चतस्रो नाड्योविषं स्यात् खलु वर्जनीयम्"। ज्योतिः सागरे ।"विवाहव्रतचूडासु गृहारम्भप्रवेशयोः। यात्रादिशुभकार्य्येषु विघ्नदा विषनाड़िकेति"। अस्य परिहारमाह दैवज्ञम० गुरुः"चन्द्रोविषघटीदोषं हन्ति केन्द्रत्रिकोणगः। लग्नं विना शुभैर्दृष्टः केन्द्रे वा लग्नपस्तथेति" फलप्रदीपे "विषनाड्युत्थितं दोषं हन्ति सौम्यर्क्षगः शशी । मित्रदृष्टोऽथ वा स्वीयवर्गस्थो लग्नपो भवेत्"पी०धा०। अथ मुहूर्त्तेशाः।

‘‘गिरिशभुजगमित्राः पित्र्यवस्वम्बुविश्वेऽभिजिदथ च विधाताऽपीन्द्र इन्द्रानलौ च '। निर्ऋतिरुदकनाथोऽप्यर्यमाऽथो भगः स्युः क्रमश इह मुहूर्त्ता वासरे बाणचन्द्राः"मु०चि०।

"अत्र बालचन्द्रा इत्युक्तेः मुहूर्त्तस्य पार्थक्येनात्र लक्षणं नोक्तम्। गिरिशो महादेवः भुजगः सर्पः मित्रः सूर्यविशेषः पितरवसवस्तु विश्वे प्रसिद्धाः अष्टमोऽभिजित् ततो विधाता ब्रह्मा, इन्द्रः इन्द्रानलौ अत्र समुदितयोर्व्यासज्यवृत्तिदेवतात्वम् अत्र तुर्य्यमुहूर्त्तस्वामिनः पितर इत्यपेक्षितम् पितरमिति नक्षत्रतदीशयोरभेदोपचारात् तस्य स्वामिनि वृत्तिः। निर्ऋतीराक्षसः उदकनाथो वरुणः अर्य्यमा भगश्चेमौ सूर्यविशेषौ। इत्येतदीशा वाणचन्द्राः पञ्चदश वासरे मुहूर्त्ताः स्युः यदाह नारदः "दिवामुहूर्त्ता रुद्राहिमित्राः पितृवसूदकम्। विश्वे विधातृब्रह्मेन्द्रा इन्द्राग्न्यसुरतोयपाः। अर्यमाभगसंज्ञश्च विज्ञेयाः दश पञ्च चेति" पी॰ धा॰।

"शिवोऽजपादादष्टौ स्युर्भेशा अदितिजीवकौ। विष्णुर्कत्वष्टृमरुतो मुहूर्त्ता निशि कीर्त्तिताः" मु॰चि॰।

"प्रथममुहूर्त्तस्वामी शिवः ततोऽजपादात् पूर्व्वाभाद्रपदादष्टौ भेशानक्षत्रस्वामिनोमुहूर्त्तेशाः स्युः। यथा"अजपादः अहिर्बुध्न्यः पूषा अश्विनौ यमः अग्निर्ब्रह्मा सोम इत्यष्टौ भेशाः। ततोदशमेशोऽदितिः जीवको गुरुः। विष्णुर्कत्वष्टृमरुतः प्रसिद्धाः एतदीशा निशि मुहूर्त्ता प्रकीर्त्तिताः यदाह नारदः "ईशाजपादहिर्बुध्न्यपूषाश्वियमवह्नयः। धातृचन्द्रादितीज्याख्यविष्णुर्कत्वष्टृवायवः"इति। मुहूर्त्तलक्षणं कश्यपेनोक्तम्। "अह्नः पञ्चदशोभागोमुहूर्त्तोऽथ तथा निशः" इति। प्रयोजनमाह नारदः। "यस्मिन्नृक्षे हि यत्कर्म कथितं निखिलञ्च यत्। तद्दैवत्ये तन्मुहूर्त्ते कार्य्यं यात्रादिकं सदेति"यात्रेत्युपलक्षणं देवस्थापनाद्यपि कार्य्यम्। पी॰धा॰। एवं मुहूर्त्तेशे निरूपिते तद्दोषमाह।

"रवावर्य्यमा ब्रह्मरक्षश्च सोमे कुजे वह्निपित्र्ये बुधे चाभिजित् स्यात्। गुरौ तोयरक्षो भृगौ ब्रह्मपित्र्ये शनावीशसार्पौ मुहूर्त्ता निषिद्धाः" मु॰चि॰।

"रवेर्वारेऽर्यमा लक्षणया अर्यमस्वामिकचतुर्दशसंख्याकोमुहूर्त्तोनिषिद्धः। एवं सोमवारे ब्रह्मरक्षः द्वन्द्वैकवद्भावः। ब्रह्मरक्षःस्वामिकौ मुहूर्त्तौ निषिद्धौ एवं सर्वत्र व्याख्येयम्। ईशो महादेवः। यदाह नारदः। "अर्य्यमा राक्षसब्राह्मौ पित्र्याग्नेयौ तथाभिजित्। रक्षःसार्पौ ब्राह्मपित्र्यौ भौजङ्गेशाविनादिषु। वारेषु वर्जनीयास्ते मुहूर्त्ताः शुभकर्म्मणि" पी॰ धा॰।

"अथ वेधदोषं विवाहे विहितनक्षत्रादिकमभिजिन्मानञ्चाह

"निर्व्वेधैः शशिकरमूलमैत्रपित्र्यब्राह्मान्त्योत्तरपवनैः शुभोविवाहः। रिक्तामारहिततिथौ शुभेऽह्नि वैश्वप्रान्त्याङ्घ्रिश्रुतितिथिभागतोऽभिजित् स्यात्"मु॰चि॰।

"मृगशिराहस्तमूलानुराधा मघारोहिण्युत्तराफाल्गुन्युत्तराषाढोत्तराभाद्रपदास्वातीनक्षत्रैः निर्वेधैः वेधाख्यदोषरहितैः विवाहः शुभः शुभफलप्रदः यदाह वसिष्ठः। "स्वातीमघायां निर्ऋतौ ध्रुवान्त्यमित्रेन्दुहस्तेषु च कन्यकानाम्। पाणिग्रहस्त्विष्टफलप्रदः स्यादविद्धभेष्वेव गुणान्वितानामिति"। नारदोऽपि "पौष्णधात्रुत्तरामैत्रमरुच्चन्द्रार्कपितृभैः। समूलभैरविद्धैस्तैः स्त्रीकरग्रह इष्यते" अर्कोहस्तः पी॰धा॰। वसिष्ठवाक्ये इष्टफलदइत्युक्तेः अन्येषामपि ग्रहणमापद्विषये सूचितम् तेन "कुमार्याः पाणिं गृह्णीयात्त्रिषूत्तरादिषु"पारस्करसूत्रे चित्राश्रवणाधनिष्ठाश्विनीनां ग्रहणं तच्च तस्य यजुर्वेदीयगृह्यसूत्रकरत्वेन तद्वेदिविषयमापद्विषयं वेति ज्यो॰रघु॰अतएव भीमपराक्रमे अन्यान्यनक्षत्रेऽनिष्टमुक्तं यथा

"पूर्वात्रये विशाखायां शिवाद्ये भचतुष्टये। ऊढा चाशुभवेत् कन्या विधवाऽतो विवर्जयेत्। विष्णुभात्तु त्रिके चित्रे ज्येष्ठायां ज्वलने यमे। एभिर्विवाहिता कन्या भवत्येव सुदुःखिता"।अत्र चित्रादिवर्जनात् यजुर्वेदिनामप्यत्यन्तापद्येव ग्राह्यता। तिथिनिर्णयमाह रिक्तेति। रिक्तामाः प्रसिद्धाः आभिर्वर्जिततिथिषु शुभेऽह्नि शुभग्रहवासरेऽपि विवाहः शुभः। यदाह वसिष्ठः। "शुक्लद्वितीयादित एव कृष्णे पक्षे दशम्यन्तगताः प्रशस्ताः। तास्वष्टमीस्कन्दगणेशदुर्गाचतुर्दशी चापि तिथिर्विवर्ज्या। वाराः प्रशस्ताः शुभखेचराणां सूर्य्यार्किवारौ खलु मध्यमौ तु। त्याज्यः सदा भूमिसुतस्य वारः कामार्कतिथ्योरपि तौ प्रदोषाविति" तौ सूर्य्यार्किवारौ तृयोदशीद्वादश्योः प्रदोषौ प्रकृष्टदोषावित्यर्थः। गणेशश्चतुर्थी दुर्गा नवमी। अत्र यदि विचारितविवाहदिनमारभ्य चतुर्थीकर्मपर्य्यन्तं पित्राद्यावश्यकश्राद्धदिनममावास्या वा भवति तदा विवाहो न कार्य्यः। उक्तञ्च "विवाहमारभ्य चतुर्थिमध्ये श्राद्धं दिनं दर्शदिनं यदि स्यात्। वैधव्यमाप्नोति तदाशु कन्या जीवेत् पतिश्चेदनपत्यता स्यादिति। अन्यच्च।"विवाहमध्ये यदि तत्क्षयाहस्तत्रास्तुख्याः पितरो न यान्ति। वृत्ते विवाहे परतस्तु कुर्यात् श्राद्धं स्वधाभिर्न तु दूषयेत् तमिति। पी॰धा॰। तेन कृष्णपक्षे द्वादश्यादिदिनचतुष्टये आपद्यपि विवाहो न कार्यः। रिक्ताया वर्ज्यत्वेऽपि शनिवारयुक्तायास्तस्याः ग्राह्यता इति गौड़ा अनार्षमूलत्वात्तच्चिन्त्यम्"न

वारदोषाः प्रभवन्ति रात्रौ सूर्यावनीसूनुशनैश्चराणामिति"। गौड़ावदन्ति तन्मूलमपि मृग्यम्"। अथाभिजित्प्रमाणम्। वैश्वेति पी०धा० 'अभिजिच्छब्दे २२७पृ० तद्दर्शितः।

अथ पञ्चशलाकचक्रे विद्धनक्षत्राणि। "वेधोऽन्योन्यमसौ विरिञ्च्यभिजितोर्याम्यानुराधर्क्षयोर्विश्वेन्द्वोर्हरिपित्र्ययोर्ग्रहकृतोहस्तोत्तराभाद्रयोः। स्वातीवारुणयोर्भवेन्निरृतिभादित्योस्तथोफान्त्ययोः खेटे तत्र गते तुरीयचरणाद्योर्वा तृतीयद्वयोः" मु०चि०।

"विरिञ्चिः रोहिणी रोहिण्यभिजितोर्ग्रहैः क्रूराक्रूरैः कृतोवेधोऽन्योन्यं परस्परं भवेत्। रोहिणीस्थे ग्रहे अभिजिद्विद्धः अभिजित्स्थे रोहिणी विद्धेत्यर्थः। एवं सर्व्वत्र उफा उत्तरफल्गुनी। तच्न्यासप्रकारमाह नारदः। "तिर्य्यक् पञ्चोर्द्ध्वगाः पञ्च रेखे द्वे द्वे च कोणयोः। शम्भुकोणे द्वितीयेऽग्निधिष्ण्यं चक्रे च विन्यसेत्। भान्यतः साभिजिन्त्येकरेखाकोणे च विद्धभमिति"। चक्रे तस्मिन्नेकरेखास्थितेन तद्विद्धं खेचरेण प्रदिष्टम्। क्रूरैर्विद्धं सर्व्वधिष्ण्यं विवर्ज्यं सौम्यैर्विद्धं नाखिलं पाद एवेति"। नन्वष्टाविंशतिर्नक्षत्राणि चक्रे तत्र द्वयोर्द्वयोः परस्परवेधे चतुर्दश युग्मानि वक्तव्यानि स्युः कथमष्टावेवाभिहितानि उच्यते विवाहे ह्येकादशनक्षत्राणामेव प्राशस्त्याभिधानात् तद्वेधोपयोगीन्येतावन्त्येव युग्मानि सम्भवन्तीति तावतामेवाभिधानम्। अतएव दैवज्ञम० "रोहिण्यभिजितोर्मूलादित्ययोर्मृगवैश्वयोः। रेवत्युत्तरफाल्गुन्योर्मघाश्रवणयोर्भवेत्। हस्तोत्तराभाद्रपदोः स्वातीवारुणयोर्मिथः। अनुराधाभरण्योश्च वेधोऽयं पञ्चरेखजः" इति तथैवोक्तम्। वाराहविवाहपटले प्रत्येकवेधफलानि "रविवेधे वैधव्यं पुत्रनाशं करोति कुजवेधे। बन्ध्या पण्डितवेधे दीक्षाकरणं करोति गुरुवेधः। भृगुसुतवेधेऽपुत्रा दासी रविजातराहुसम्भूते" इति। पण्डितो बुधः दीक्षाकरणं प्रव्रज्याम् चरणवेधमाह खेट इति। तत्र तस्मिन् नक्षत्रे विद्यमाने ग्रहे सति यदि चतुर्थपादेऽस्ति तदा विद्धनक्षत्रस्य प्रथमपादे वेधः। यदि तृतीयपादे तदा द्वितीयचरणस्य वेधः एवं यदि द्वितीयपादस्थः तदा तृतीयपादे वेधः यदि प्रथमपादे तदा चतुर्थपादस्य वेध इत्यर्थः। यदाह वशिष्ठः "अतोऽन्त्यपादमादिगो द्वितीयगस्तृतीयकम्। तृतीयगो द्वितीयकञ्चतुर्थगस्तु चादिमम्। भिनत्ति वेधकृद्ग्रहोनचान्यपादमादिशेत"। एतद्यद्यपि शुभाशुभग्रहसाधारणं प्रतीयते तथापि सौम्यग्रहपरन्द्रष्टव्यम्। यतोवसिष्ठेनैव खार्जूरदोषाभिधानावसरे "विषप्रदिग्धेन हतस्य पत्रिणा मृगस्य मांसं शुभदं नताहते। तथैव पादो न शुभोऽवशिष्टपादाः शुभाश्चेति पितामहेन" इत्याशङ्क्य समाहितम् 'पादएव न शुभः शुभग्रहैर्विद्ध इत्यखिलशास्त्रसंमतम्। क्रूरविद्धमयुतं न शोभनं शोभनेषु गदितं न पादतः इति। नारदः। "पादमेव शुभैर्विद्धमशुभैश्चैव तत्सकलम्" इति। कश्यपोऽपि। "क्रूरविद्धं युतन्धिष्ण्यं क्रूराक्रान्तञ्च तत्समम्। मणिहेममयं हर्म्यम्भूताक्रान्तमिव त्यजेत्" इति तत्समभं सकलनक्षत्रम्। तस्मात्क्रूरग्रहविद्धे संपूर्णनक्षत्रत्यागः शुभविद्धे चरणत्याग इति सिद्धान्तः। तत्र विवाहे पञ्चशलाकावेध एव यदाह वसिष्ठ "पञ्चशलाकाचक्रे पाणिग्रहणे भवेधविधिरुक्तः। शस्तः शुभमित्रकृतः सप्तशलाकाजइतरत्रेति"। श्रीपतिः "बधूप्रवेशने दाने वरणे पाणिपीडने। वेधः पञ्चशलकाख्योऽन्यत्र सप्तशलाकक" इति पी०धा०। अत्र केचित् सप्तशलाकाचक्रवेधमाहुः। तत्र विद्धनक्षत्राणि यथा "शाक्रेज्ये, शतभानिले, जलशिवे, पौष्णार्य्यमर्क्षे, वसुद्वीशे, वैश्वसुधांशुभे, हयभगे, सार्पानुराधे, तथा। हस्तोपान्तिमभे, विधातृविधिभे, मूलादिती त्वाष्ट्रभाऽजाङ्घ्री, याम्यमघे, कृशानुहरिभे, विद्धे कुभ्रद्रेखके" मु०चि० "कुभ्रद्रेखके सप्तशलाके चक्रे शाक्रेज्ये ज्येष्ठापुष्यनक्षत्रे मिथः क्रूराधिष्ठितत्वेन विद्धे ज्ञेये। एवं जलशिवे पूर्व्वषाढार्द्रे विद्धे ज्ञेये एवं सर्व्वत्र। वैश्वसुधांशुभे उत्तरषाढामृगशिरसी, हयभगे अश्विनीपूर्व्वफाल्गुन्यौ, उपान्तिमभं उत्तराभाद्रपदा, अत्र मूलवाक्यं स्वरोदयस्थं यज्ञोपवीतप्रकरणेऽभिहितम्। चक्रोद्धारो व्यवहारसमुच्चये "सप्त सप्त विनिपात्य रेखिकास्तिर्य्यगूर्ध्वमथ कृत्तिकादिकम्। लेखयेदभिजिता समन्वितञ्चैकरेखखगमेन विध्यते" दीपिका। "यस्याः शशी सप्तशलाकभिन्नः पापैरपापैरथवा विवाहे। उद्वाहवस्त्रेण तु संवृताङ्गी श्मशानभूमिं रुदती प्रयाति"। तथा च भोजः। "विद्धे सप्तशलाकाख्ये विधवा लग्नवाससा। पुनर्यात्यचिराद्नारी सुखाग्नौ सुखचन्द्रिकाम्"। वैधव्यञ्च नक्षत्रसंख्यातुल्याब्दैर्भवति तदुक्तं वराहेण "नक्षत्रजमुद्वाहे फलमब्दैस्तारकामितैः सदसदिति"। अत्रापि तुल्यन्यायत्वात् क्रूरवेधे पूर्णं नक्षत्रन्त्याज्यम्, शुभग्रहवेधे पादस्त्याज्यः इति ध्येयम्। पी० धा०। "सप्तशलाकाजइतरत्रेति" प्रागुक्तवचनात्

"भुक्तम्भोग्यन्तथाक्रान्तं विद्धं पापग्रहेण च। शुभाशुभेषु कार्य्येषु वर्जनीयं प्रयत्नतः" स्वरोदयवाक्याच्च अस्य कर्मकार्येषु वर्ज्यतया चतुर्दशयुग्मानामिहोक्तिः" अत्रापवादः "ऋक्षाणि क्रूरविद्धानि क्रूरमुक्तादिकानि च। भुक्त्वा चन्द्रेण मुक्तानि शुभार्हाणि प्रचक्षते"। मु॰चि॰ "क्रूरग्रहैर्विद्धानि ऋक्षाणि तथा क्रूरैर्मुक्तानि त्यक्तानि। आदिशब्दात् क्रूरैराक्रान्तानि क्रूरैर्गन्तव्यानि च त्रिविधोत्पातैर्दूषितानि ज्ञेयानि तानि यदि चन्द्रेण भुक्त्वा मुक्तानि तदा शुभार्हाणि प्रचक्षते वदन्ति मुनय इति शेषः। यदाह वात्स्यः "भुक्तम्भोग्यन्तथाक्रान्तं विद्धं पापग्रहेण भम्। मङ्गलेषु च कार्य्येषु यत्नतः परिवर्जयेदिति"। वशिष्ठोऽपि "उत्पातभङ्ग्रहणभं क्रूरविद्धस्थितञ्च यत्। दहत्येव शुभं कर्म्म राघवाग्निशरोम्बुधिमिति"। शार्ङ्गीये "क्रूराश्रितक्रूरविभुक्तविद्धगन्तव्यधिष्ण्येषु कुमारिकाणाम्। वदन्ति पाणिग्रहणे मुनीन्द्रा वैधव्यमब्दैस्त्रिभिरेवमाहुरिति"। अस्यापवादमाह केशवार्कः। "उत्पातपापग्रहदूषितं भं यदेन्दुराक्रम्य पुनर्भुनक्ति। तदा तदर्हं किल मङ्गलेषु त्यजेत्समाक्रान्तधनूरवीन्द्वोरिति"। अयमवधिराक्रान्तनक्षत्रभिन्नविषयो वेदितव्यस्तत्र हि चाण्डालधृतहस्तस्नानवच्चन्द्रभोगस्यानिर्णेजकत्वात्। तदुक्तं शार्ङ्गीये "यद्धिष्ण्यन्दोषसंयुक्तं स्यात्तथापीन्दुसंयुतम्। शुभकार्य्येषु तत्त्याज्यमन्यकर्म्मसु सिद्धिदम्। यथा हि चाण्डालधृतैकहस्तो मज्जन्नगाधेऽपि सरित्प्रवाहे। भवेन्न पूतः शशिभोगतोऽपि तथा न शुध्येदुडु पापयुक्तम्। स्पृष्ट्वा गते तु चाण्डाले शुद्धिः स्नानाद्यथा। तथा भुक्त्वा गते क्रूरे चन्द्रभोगाद्विशोधनमिति। अतएवोक्तं वसिष्ठेन "गन्तव्यधिष्ण्यञ्च तु भुक्तभं यत् क्रूरैर्ग्रहोत्पातविदूषितञ्च। चन्द्रोपभोगादमलन्तदानीं शुभेषु कार्येषु शुभप्रदं चेति। एतच्च सामान्यन्यायत्वात् क्रूरविद्धे भे चन्द्रभोगादपि शुद्धिर्नास्तीत्युक्तम्। यत्तु नारदेनोक्तम् "ग्रहणोत्पातभन्त्याज्यं मङ्गलेषु ऋतुत्रयम्। यावच्च रविणा भुक्त्वा मुक्तन्दग्धकाष्ठवदिति" "तद्यावद्वचनं वाचनिकमिति" न्यायेन ग्रहणोत्पातभयोः षण्मासपर्य्यन्तं निषेधस्ततोऽपि यावद्रविणा भुक्त्वा न त्यक्तन्तावत्त्यजेत् तत्रापि चन्द्रग्रहण एव सूर्य्यग्रहणीयनक्षत्रस्य तु षण्मासानन्तरं सूर्य्यभोगासम्भव एव अतो न क्रूरमुक्तादौ रविभोगापेक्षा उत्पातभस्य चन्द्रोपभोगोऽप्यावश्यको वसिष्ठवाक्यालोचनात्। अत्र क्रूरवेधे निखिलभं त्याज्य न चरण एव। तदुक्तं कश्यपेन "क्रूरविद्धयुतन्धिष्ण्यं निखिलं नैव पादतः। अन्यैरपि गुणैर्युक्तं सर्व्वदोषविवर्जितम्। त्यजेदनर्घमाणिक्यं कलङ्कोपहतं यथेति" अयञ्च क्रूराधिष्ठितत्वे दोषः क्रूरग्रहचन्द्रयोरेकराशिस्थत्वे वेदितव्यः। यदा तु चन्द्रः प्रथमपादे क्रूरग्रहश्च तृतीयपादे एवं सति राशिभेदोऽपि जायते तदा क्रूरग्रहाधिष्ठितत्वदोषो नास्तीति ध्येयम्। उक्तञ्च ज्योतिर्निबन्धे। "एकस्मिन्नपि धिष्ण्ये भिन्ने राशौ खलग्रहे शशिनि। तच्चन्द्रर्क्षं कुर्य्याद्विवाहयात्रादिकं सर्वमिति" यथा मृगशिरसि प्रथमे पादे चन्द्रः तृतीये क्रूरग्रहः तत्र सत्यप्येकनक्षत्रत्वे राशिभेदो द्वयोरिति पी॰ धा॰।

अथ लत्तादोषः। "शराङ्गपूर्णेन्दुसिताः स्वपृष्ठे भं सप्तगोजातिशरैर्मितं हि। संलत्तयन्तेऽर्कशनीज्यभौमाः सूर्य्याष्टतर्काग्निमितं पुरस्तात्" मु॰चि॰।

"सप्त प्रसिद्धाः गावोनव जातयोद्वाविंशतिः शराः पञ्च एतैर्मितम्भम् स्वाक्रान्तनक्षत्रात् शराङ्गपूर्णेन्दुसिताः स्वपृष्ठे संलत्तयन्ते यथा बुधः सप्तमं, राहुर्नवमं, पूर्णेन्दुः पूर्णिमान्तचन्द्रो द्वाविंशम्, तच्च गतकृष्णपक्षे पञ्चमीषष्ठीसप्तमीनामन्यतमायां सम्भवति। शुक्रः पञ्चमं स्वपृष्ठे लत्तयतीत्यर्थः अर्कशनीज्यभौमाः क्रमेण पुरस्ताद्यं सूर्य्याष्टतर्काग्निमितं संलत्तयन्ते यथा सूर्य्यः स्वाक्रान्तनक्षत्राद्द्वादशं, शनिरष्टमम्, गुरुः षष्ठम्, भौमस्तृतीयमम् अग्रतो लत्तयतीत्यर्थः। यदाह नारदः "पुरतः पृष्ठतोऽर्काद्या दिनर्क्षं लत्तितञ्च यत्। अर्कात्कृतिगुणाङ्गर्त्तुवाणाष्टनवषड्भमिति, सूर्य्यः पुरतः, चन्द्रः पृष्ठतः एवं क्रमेण भौमादयोपि पुरतः पृष्ठतश्च लत्तयन्तीत्यर्थः। वराहोऽपि "सूर्य्यो द्वादशमृक्षं षड् गुरुरवनिजस्तृतीयन्तु। संलत्तयति दिवाकरपुत्रोऽष्टममग्रतः पादैः। पश्चाद्द्वाविंशतिमम्पौर्णिमचन्द्रस्तु पञ्चमं शुक्रः। स्वर्भानुरपि नवमं सप्तमसृक्षं शशाङ्कसुत" इति प्रत्येकं वेधफलमाह स एव। "रविलत्ता वित्तहरी मित्यङ्गौजी विनिर्दिशेन्मरणम्। चान्द्री नाशङ्कर्याद्बौधी नाशं वदत्येव। सौरी मरणं कथयति बन्धुविनाशं बृहस्पतेर्लत्ता। मरणं लत्ता राहोः कार्य्यविनाशम्भृगोर्ददातीति" नन्वग्रलत्ता वा पृष्ठलत्ता वा वक्तव्या किमिति न द्वैरूप्यकथनम्। अत्र समाधत्ते केशवार्कः "इति सति द्युसदामभिलत्तने यदनुलत्तनमुक्तमृषिव्रजैः। तदुडुपश्चिमपूर्व्वविभागयोरनधिकाधिकदोषविवक्षयेति"। अत्र राहोः सदा वक्रित्वान्नक्षत्रगणना क्रमेणैव ग्राह्या यथाश्विन्यां राहुः तदा श्लेषां लत्तयति। सम्मुखलत्ता

श्वादिमतेऽपि वक्रगामिना राहुणा सम्मुखमश्विनीरेवतीत्यादिगणनया विंशतिभमृक्षं पैत्र नत्वन्यथाश्रयितव्यमिति साम्प्रदायिकाः” पी०धा० ।

अथ पातदोषः । “हर्षणवैधृतिः साध्यव्यतिपातकगण्डशूलयोग नाम् । अन्ते यन्नक्षत्रं पातेन निपातितन्तत् स्यात्” । मु०चि० । “हर्षणेत्यादि षड्योगानां अन्ते यच्चन्द्रनक्षत्रं भवेत् तत्पातेन चण्डीशचण्डायुधाख्येन निपातितं स्यात् यदाह त्रिविक्रमः “साध्यहर्षणशूलानि वैधृतिव्यतिपातयोः । षड्भङ्गण्डस्य चान्ते स्यात्तत् पातेन निपातितमिति” । नारदेन प्रकारान्तरेणैतत्प्रकारसम्पादकः पातोऽभिहितः । “सूर्यभात्सार्पपित्र्यान्त्यत्वाष्ट्रमित्रोडुविष्णुभे । सङ्ख्यया दिनभे तावदाश्विभात्पातदुष्टभम्” । वशिष्ठेनापि “रविभाद्धिपित्र्यमित्रत्वाष्ट्रभहरिपौष्णभेषु गणितेषु । आश्विनभादिन्दुयुतौ तावति वै पतति गणनया पातः । अयमपि पातोदोषश्चण्डीशचण्डायुधाख्ययोर्ज्ञेयः । अखिलेषु मङ्गलेष्वपि वर्ज्यो यस्माद्विनाशदः कर्त्तुरिति” यद्यप्यत्र हर्षणादीनामुपादानं नास्ति तथाप्यभिहितास्रेषादिनक्षत्रसाहित्येन पाताभिधानात्तत्तुल्यसङ्ख्याकेष्वेव योगेषु पातसम्भवो जायते इति मत्वा हर्षणादीनामनुक्तिः । एवञ्च प्रागुक्तेषु दशसु विरुद्धयोगेषु लत्तापातयोः पृथक् कीर्त्तनम्’ । ज्यो०त० रघुनन्दनेन “ऋक्षं द्वादशपुष्परश्मिरवनीसूनुस्तृतीयं गुरुः षष्ठ चाष्टयमर्कजस्तु पुरतोहन्ति स्फुटं लत्तया” इत्यादि रत्नमालावाक्य मुक्त्वा “लत्तापातोऽयमिति,यदुक्तं तच्चिन्त्यमूलम् तयोर्विभिन्नदोषत्वात् अन्यथा प्रागुक्तव्यवहारोच्चयवाक्ये-वर्ज्यदशसंख्यानुपपत्तेः तद्वाक्ये पातशब्दस्याश्रवणाच्च ।

अथ क्रान्तिसाम्यम् “पञ्चास्याजौ गोमृगौ तौलिकुम्भौ कन्यामीनौ कर्क्यली चापयुग्मे । तत्रान्योन्यञ्चन्द्रभान्वोर्निरुक्तं क्रान्तेः साम्यं नो शुभं मङ्गलेषु” मु०चि० । “पञ्चास्याजौ सिंहमेषौ अन्ये प्रसिद्धाः । एषु राशियुग्मेषु चन्द्रभान्वोः पाठक्रमेण व्युत्क्रमेण वा स्थितयोः क्रान्तिसाम्यं निरुक्तन्मङ्गलेषु नो शुभं स्यात् । अत्र पञ्चास्याजावित्येवमादीनामुपलक्षणमुदाहरणादिकप्रदर्शनार्थत्वात्सर्वथा सूर्याचन्द्रमसोः सायनयोर्योगः षड्राशिमितो द्वादशराशिमितो वा विवर्जितस्तदैव क्रान्तिसाम्यस्य सम्भवात् । अतः सम्प्रतिवाक्यस्यानवसरः नन्वेतावन्त एव षड्राशियोगा द्वादशराशियोगा वा सम्भवन्तीति चेन्न राश्यन्तावच्छेदस्थित्याधिकाराणामपि सम्भवात् प्रत्यंशकलाविकलान्तस्थितत्वेनानन्तभेदसम्भवाच्चातः प्रागुक्तं व्याख्यानं ज्यायः । क्रान्तिसाम्यस्य च महापात इति नाम । एतस्य निन्द्यतामाह वसिष्ठः “दोषो महापात इति प्रसिद्धः सर्वैष्टतोहन्ति वधूं नरं च । तं रचितं लग्नगुणास्त्वशक्ताः स्वबान्धवा नाऽशनितोऽपघातम्” । अशनिवज्रम् । नारदोऽपि “यस्मिन् दिने महापातस्तद्दिनं वर्जयेत् शुभे” इति अतएव पतननात्पातः सकलशुभकर्मणामित्यन्वर्थतापि । सा च स्पष्टा सोमसिद्धान्ते । “यच्छुभानां विनाशाय नदन्निव पतत्ययम् । व्यतीपातः प्रसिद्धोऽत्र संज्ञाभेदेन वैधृतिः” इति । महापातशब्दस्य रूढिस्तु रवीन्दुक्रान्तिसाम्य एव नत्वन्येषां ग्रहाणां क्रान्तिसाम्ये । यथा जलजशब्दस्य रूढिः कमले न तु भेकादौ । क्रान्तिर्नाम ग्रहाणां दक्षिणोत्तरवृत्ते गमनम् । या च सूर्यस्य क्रान्तिः सा यदा चन्द्रक्रान्त्या तुल्या स्यात्स पातमध्यकालः । तत्रोत्सर्गतोरवीन्दुक्रान्त्योः समानत्वं भुजसाम्ये सति भवति । भुजोनाम ‘त्र्यूनं भुजः स्यात् त्र्यधिकेन हीनं भार्द्धञ्च भार्द्धादधिकं विभार्द्धम् । नवाधिकेनोनितमर्क्षभं चेति” लक्षणलक्षितः तत्साम्यं तु सूर्याचन्द्रमसोर्योगे षड्राशितुल्ये द्वादशराशितुल्ये वा सति भवति । अतएव ग्रन्थकृता तादृशायोगा एव पठिताः । “त्रिनाशपातेन्दुमिहायनांशकैर्युतोरविः शीतकरश्च दृश्यते । समापमत्वे व्यतिपातवैधृताह्वयास्तदैक्ये रसभेऽर्कभे क्रमात्” इति भास्कराचार्य्योक्तिमङ्गीकृत्य सामान्यतः क्रान्तिसाम्यदिवसस्य शीघ्रोपस्थित्यर्थं भुजसाम्यप्रतिपादनम् । तदुक्तं वसिष्ठेन स्वसिद्धान्ते ‘चक्रे चक्रार्द्धतुल्ये वा कियद्भागाधिकोनके । सायनार्केन्दुयोगे चेत्तदा पातस्य सम्भवः । शुभमङ्गलकर्माणि लोकानां च विनाशयेत् । स्नानदानादिकं तत्र जपश्राद्धादिकाः क्रियाः । कदापि कुरुते मर्त्यः सुमहत् फलमश्नुते । सूर्यग्रहे कुरुक्षेत्रे कोटिस्वर्णार्पणे फलम् । तत् फलं लभते पाते स्नानश्राद्धजपादिना । उत्पत्तौ लक्षगुणितं भ्रमणे कोटिसङ्गुणम् । पातेऽर्बुदसङ्गुणं पतिते इत्तमक्षयमिति’ । तथा सूर्यसिद्धान्तेऽपि । “एकायनगतौ स्यातां सूर्याचन्द्रमसौ यदा । तद्युतौ मण्डले क्रान्त्योस्तुल्यत्वे वैधृताभिधः । विपरीतायनगतौ चन्द्रार्कौ क्रान्तिलिप्तिकाः । समास्तदा व्यतीपातोभगणार्द्धान्तयोर्युतौ । तुल्यांशुजालसम्पर्कात्तयोस्तु प्रवहाहतः । तादृक् क्रोधोद्भवोवह्निर्लोकाभावाय जायते,” इति । अतएवानन्तरोक्तक्रान्तिसाम्ये महापातदोषो

नास्त्येव । तदुक्तं गणेशदैवज्ञैः "पूर्वं तत् स्यात् पातमध्यं द्वितीयं पूर्वेणोक्तं तद्यतोनातिदुष्टमिति" । अनेनैवाशयेन वसिष्ठेन स्वसंहितायामुक्तम् । "शास्त्रात् समानीत महातिपातः सर्वैष्टतो हन्ति वधूं वरं च । त्रिःसप्तवारानिव जामदग्न्यक्रोधोऽचिरात् क्षत्रकुलं समस्तमिति" । शास्त्राद्गणितशास्त्रोक्तान्महापाताधिकारादित्यर्थः । तत्र हि योगादेव महापातस्यानित्यत्वात्तस्यैव दोषत्वं नान्यस्येत्यर्थादुक्तं भवति । किन्तु पञ्चाङ्गीयोऽपि योगः सूर्याचन्द्रमसोर्योगादेव साधितः स्पष्टाधिकारेऽतस्तस्मादेव महापातोऽपि साधयितुमुचित एव "पी॰धा॰ ।

अथ खार्जूरापरपर्यायैकार्गलदोषः

"व्याघातगण्डव्यतिपातपूर्वे शूलान्त्यवज्रे परिघातिगण्डे एकार्गलाख्योह्यभिजित्समेतोदोषः शशी चेद्विषमर्क्षगोऽर्कात्" मु॰चि॰ । "अन्त्योवैधृतिः । अन्ये प्रसिद्धाः । यस्मिन्दिने व्याघातादिके विरुद्धे दुष्टयोगे सति अर्कादर्कनक्षत्राच्छशी चन्द्रोऽभिजित्समेतोविषमे विषमसंख्याके ऋक्षे नक्षत्रे स्यात्तदा खार्जूरचक्रोत्पन्न एकार्गलाख्योदोषः स्यात् । यदा समे स्यात्तदा न दोषः इत्यर्थः । यदाह त्रिविक्रमः 'विरुद्धनामयोगेषु साभिजिद्विषमर्क्षगः । अर्कादिन्दुस्तदा योगोनिन्द्य एकार्गलाभिधः" इति वसिष्ठेन तच्चक्रमभिहितम् । 'अन्त्यातिगण्डपरिघव्यतिपातपूर्वव्याघातगण्डशरशूलमहाशनीषु । चित्रानुराधपितृपन्नगदस्रभेषु साहित्यमूनशशिसूरिषु मूर्द्धभेषु । "रेखामेकामूर्द्धगां षट् च सप्त तिर्यक् कृत्वाप्यत्र खार्जूरचक्रे । तिर्यग्रेखासंस्थयोश्चन्द्रभान्वोर्दृक्सम्पातोदोष एकार्गलाख्यः । "खरकरतुहिनांश्वोर्दृष्टिसम्पातजातस्वनलमयशरीरस्तूर्जिरग्नि संस्थान् । भुवि पतति जनानां मङ्गलध्वंसनाय शुभगणगतसङ्घैरप्यशार्योऽग्निकोपः" इति अत्र वसिष्ठवाक्येऽभिजित्साहित्यमास्ते न वेति सन्देहः नारदस्त्वभिजिद्वर्जितं चक्रमाह "व्याघातशूलपरिघपातपूर्वेषु सत्स्वपि । गण्डातिगण्डकुलिशवैधृत्या सहितेषु च । अदितीन्दुमघाहस्ताद्यमूलमैत्रेजभानि च । ज्ञेयानि सहचित्राभिर्मूर्ध्नि भानि यथाक्रमम् । लिखेदूर्ध्वगतामेकां तिर्यग्रेखास्त्रयोदश । तत्र खार्जूरिके चक्रे कथितं मूर्ध्नि भं न्यसेत् । भान्येकरेखागतयोः सूर्याचन्द्रमसोर्मिथः । एकार्गलो दृष्टिपातश्चाभिजिद्वर्जितानि वै । लाङ्गले कमठे चक्रे फणिचक्रे त्रिनाडिके । अभिजिद्गणना नास्ति चक्रे खार्जूरिके तथेति" । कश्यपेनापि एकार्गलेदृष्टिपातश्चाभिजिद्रहितानि वै" इति । तत्र त्रिविक्रमकेशवार्कवाक्ययोः समूलत्वस्य शिष्टसम्मतत्वान्नारदादिवाक्यैः सह विकल्पः ततोऽनयोः पक्षयोर्यथादेशाचाराद्व्यवस्थेति युक्तं प्रतीमः" पी॰धा॰ । खार्जूरवेधे ज्यो॰ति॰

"एकामूर्द्ध्वगतां त्रयोदश तथा तिर्यग्गताः स्थापयेत् । रेखाश्चक्रमिदं बुधैरभिहितं खार्जूरिकं तत्र तु । व्याघातादि तु मूर्ध्नि भन्तु कथितं तत्रैकरेखास्थयोः सूर्याचन्द्रमसोर्मिथोनिगदितो दृक्पात एकार्गलः" 'व्याघातादीति व्याघातयोगसंख्याङ्कस्त्रयोदशाङ्कः । तथा च हस्तादीनि नक्षत्राणि देयानीत्यर्थः" इति यद्व्याख्यातं तच्चिन्त्यमुक्तवाक्यैः व्याघातादिदुष्टयोगयुक्तदिवसे एव खार्जूरवेधप्रतिपादनात् तत्र लेख्यनक्षत्रादीनां च नारदेन विशेषाभिधानाच्च ।

अथोपग्रहदोषः स च उपग्रहशब्दे १२०२ पृ॰ उक्तप्रायः विशेषार्थं पुनरुच्यते ।

"शराष्टदिक्शक्रनगातिधृत्यस्तिथिर्धृतिश्च प्रकृतेश्च पञ्च । उपग्रहाः सूर्यभतोऽब्जताराः शुभा न देशे कुरुवाह्लिकानाम्" । 'सूर्यभतः सूर्याक्रान्तनक्षत्रादब्जताराः चन्द्रनक्षत्राणि पञ्चाष्टदशचतुर्दशसप्तकोनविंशतिपञ्चदशाष्टादशैकविंशतिद्वाविंशतित्रयोविंशतिचतुर्विंशतिपञ्चविंशतिसंख्याकाश्चेत्स्युस्तदोपग्रहनामकादोषाः स्युः प्रकृतिरेकविंशतिः ततः पञ्च । यदाह नारदः "भूकम्पः सूर्यभात्सप्तमर्क्षे विद्युच्च पञ्चमे । शूलोऽष्टमे च नवमेऽशनिरष्टादशे ततः । केतुः पञ्चदशे दण्डोल्का एकोनविंशतौ । निर्घातपातसंज्ञश्च ज्ञेयः स नवपञ्चमे । मोहनिर्घातकम्पाश्च कुलिशं परिवेषकम् । विज्ञेयाश्चैकविंशाख्यादारभ्य च यथाक्रमम् । चन्द्रयुक्तेषु भेष्वेषु शुभकर्म न कारयेदिति" । वराहः "उपग्रहर्क्षेषु विवाहिता स्त्री सूर्यर्क्षतो दुर्भगतामुपैति" । अन्यत्रापि । "गृहप्रवेशे दारिद्र्यं विवाहे मरणं भवेत् । प्रस्थाने विपदः प्रोक्ता उपग्रहदिने यदीति" । एवं सामान्यतो निषेधमभिधाय देशभेदेन परिहारमाह । शुभा इति । "वाह्लिके कुरुदेशे च वर्जयेद्दुपग्रहमिति" कश्यपोक्तेः" पी॰धा॰ । अत्रापवादः ।

"पातोपग्रहलत्तासु नेष्टोऽङ्घ्रिः खेटपत्समः" मु॰चि॰ ।

"पातश्चण्डीशचण्डायुधाख्योदोषः उपग्रहः प्रागुक्त एव । लत्ता शराङ्कपूर्णेन्दुसिताः" इत्यादिनोक्ता, तत्र खेटपत्समः ग्रहचरणतुल्यो नक्षत्रचरणोऽनिष्टः अस्यार्थः

पाते उपग्रहे च रविर्यस्मिन् स्यात्तत्संख्यचरणस्तस्य नक्षत्रस्य वर्ज्यो नान्यः लत्तायान्तु लत्ताकारिणोग्रहायच्चरणे स्युस्तत्संख्य एव पादो वर्ज्योनान्यः। उक्तं च मुहूर्त्तदीपिकायाम् "उपग्रहेषु लत्तायां तथा चण्डायुधाह्वये यद्दोऽस्ति यत्प्रमाणांशे विद्धांशस्तत्प्रमाणकः" इति उपग्रहचण्डायुधयोः सूर्यकृतोऽङ्घ्रिपरिहारस्तस्यैव सम्भवात्। अयञ्च परिहारस्तुल्यन्यायत्वात् खार्जूरकेऽपि द्रष्टव्यः। सूर्यो यस्मिन् पादे भवेत्तत्समसंख्यचरण एकरेखावस्थितचन्द्रनक्षत्रस्य वर्ज्य इत्यर्थः "खार्जूरिकसमाङ्घ्रिभमिति" नारदोक्तेः ज्योतिर्निबन्धे गर्गः "पूर्वाह्णे दण्डदोषः स्यादपराह्णे तु मोहजः। उल्का चैवार्द्धराते तु कम्पोऽहोरात्रदूषकः"। तत्रापि "कम्पोल्कादण्डमोहानामङ्घ्रिभमिति" नारदोक्तेः कालभेद एव वर्ज्यः "खरमासद्वयत्त्वेव ७,१२,१०,६, आदितो घटिकास्तेषु वर्जनीयाः पराः शुभा" पी० धा०।

अथ वारदोषः। स च अर्द्धयामकुलिकयमघण्टभेदात् त्रिविधः। ते च कश्यपेनोक्ताः यथा "शैलाब्धयस्त्रयः सूर्ये चन्द्रे षड्वेदपर्वताः। भौमे बाणाग्निनेत्राणि सौम्ये वेदाक्षिशायवः। गुरुवारेऽग्निचन्द्रेभाः शुक्रे नेत्राद्रिवह्नयः। शनौ चन्द्रेभतर्काः स्युः कुलिकोयमघण्टकः। अर्द्धप्रहरसंज्ञश्च मङ्गलेषु विवर्जयेत्। वारदोषेण दुष्टन्तल्लग्नं सर्वगुणान्वितम्। त्यजेद्यथा पुरोडाशं वायसोपहतन्तयेति"। फलमाह वसिष्ठः "निधनं प्रहरार्द्धे तु निस्वत्वं यमघण्टके। कुलिके सर्वनाशः स्याद्रात्रावेते न दोषदाः" पी० धा०। दिवसाष्टमभागात्मकाश्चैते। तत्र अर्द्धयामशब्दे २७६ पृ० अर्द्धयामविशेष उक्तः। मुहूर्त्तात्मककुलिकस्तु कुलिकशब्दे वक्ष्यते तत्र कुलिकमुहूर्त्तमुपक्रम्य श्रीपतिना "यात्रायां मरणं काले वैधव्यं पाणिपीड़ने। व्रते ब्रह्मवधः प्रोक्तः सर्वं कर्म ततस्त्यजेत्" उक्तम्।

अथ जामित्रदोषः। "लग्नाच्चन्द्रान्मदनभवनगे खेटे न स्यादिह परिणयनम्। किंवा बाणाशुगमितलवगे जामित्रं स्यादशुभकरमिदम्" मु० चि०। "विवाहलग्नाच्चन्द्राद्वा सप्तमं भवनं गृहं जामित्रं तत्र गते खेटे परिणयनं न स्यात्। उक्तञ्च 'जामित्रं द्विविधं प्रोक्तं गर्गगालवगौतमैः। तस्माल्लग्नाच्च चन्द्राच्च जामित्रं परिवर्ज्जयेदिति"। तत्स्वरूपमाह महेश्वरः 'लग्नाच्छीतकराद्युपहा द्युनगता नेष्टा विवाहे स्मृताः" इति। वसिष्ठः लग्नप्रकरणे "सर्वे जामित्रसंस्थाविदधति मरणम्" इत्याह स्म। लल्लः "पापात् सप्तमगः शशी यदि भवेत् पापेन युक्तोऽथवा यत्नेनापि विवर्जयेन्मुनिमते दोषोऽपि संकथ्यते। उद्वाहे विधवा, व्रते तु मरणं, मूलञ्च पुंस्कर्मणि, यात्राय विपदो, गृहेषु दहनः, क्षौरेऽपि रोगो महान्"। भुजबलः "चन्द्रात् सप्तमराशिगे दिनकरे त्यक्ता धवैः कन्यका, भौमे च प्रमदा प्रयाति विलयं, सौरे च बन्ध्या सरुक्। जीवः शुक्रशशाङ्कजौ शुभकराः केचिद्वदन्ति क्रमात् भर्तृप्रेक्षितदीक्षितास्तभवने नित्यं प्रवासान्वितेति"। अस्यापवादमाह। किंवाशब्दोविकल्पे पूर्णग्रहाधिष्ठितराशेः सप्तमराशिस्थितत्रिंशद्भागात्मके लग्नेऽपि चन्द्रोनिषिद्ध इत्युक्तमिदानीन्तदधिष्ठितराशिनवांशमारभ्य बाणाशुगाः पञ्च पञ्चाशत् तन्मितनवांशगे लग्ने चन्द्रे सति जामित्रं स्यात्। यथा मेषराशौ पञ्चमनवांशे भौमोऽस्ति तस्मात् तुलायां पञ्चमनवांशस्थं लग्नं तत्र चन्द्रो वा निषिद्धोऽन्येऽष्टौ नवांशाः शुभाः। एवंविधं सूक्ष्मं जामित्रमिदमशुभकरं स्यात्। यदाह महेश्वरः "कैश्चित् कामनवांशकादिषु शरैस्तुल्ये नवांशे स्थिताः" इति। केशवार्कस्तु चन्द्रनवांशादेशाह। "हिमरश्मिनवांशकात् खलो यदि खेटः शरसायकांशके। अयमन्यगुणैर्न हन्यते निबिड़ैरप्युपसर्गडम्बरः" अपवादान्तरमाह राजमार्त्तण्डः "तुङ्गत्रिकोणभवने भवने निजे वा सौम्याधिमित्रगृहगोऽपि तदीक्षितो वा। जामित्रवेधजनितानपहृत्य दोषान् दोषाकरः सुखमनेकविधं विधत्ते" इति। व्यवहारसमुच्चयेऽपि। "स्वोच्चेऽथवा स्वभवने स्फुरदंशुजालः सौम्यालये हितगृहे शुभवर्गगो वा। जामित्रकारिपरिसञ्चितदोषराशिं हृत्वा ददाति बहुशः सुखमेव चन्द्रः"। कालखण्डे वात्स्यायनः "गुरुश्चन्द्रस्य जामित्रे तिष्ठेद्यदि बलान्वितः। धनसौभाग्यपुत्रांश्च लभते नात्र संशयः। मणिमुक्ताप्रवालैश्च सुवर्णाभरणैः शुभैः। शोभिता तु सदा तिष्ठेद्गुरुणापि निरीक्षिते। सा तु भर्त्तुः प्रिया नित्यं बुधे चन्द्रस्य सप्तमे" पी० धा०।

"एकार्गलोपग्रहपातलत्ताजामित्रकर्त्तर्युदयास्तदोषाः। नश्यन्ति चन्द्रार्कबलोपपन्ने लग्ने यथार्काभ्युदये तु दोषा" मु० चि०। "एकार्गलः खार्जूरचक्रोक्तः उपग्रहः शराष्टेत्यादिनोक्तः पातश्चण्डीशचण्डायुधम् लत्ता ज्ञराहित्यादिनोक्ता, जामित्रमधुनोक्तम्। कर्त्तरी, लग्नात् पापादित्याद्युक्ता उदयास्तदोषा वक्ष्यन्ते। एवंविधादोषा नश्यन्ति। कदा विवाहलग्ने चन्द्रार्कयोर्बलं स्वोच्चमित्रादिराशि-

स्थितत्वरूपं विहितस्थानस्थितत्वञ्च तेनोपपन्ने सहिते सति । अर्कस्य सूर्य्यस्याभ्युदये दोषा रात्रिर्यथा नश्यतीत्यर्थः । गाढ़ान्धकारयुक्तापि रात्रिरेकाकिना सूर्य्यस्योदयेन स्वयमेव नश्यतीति यथा” पी० धा० ।

प्रसङ्गाद्न्यान्यदोषस्य देशान्तरविषयत्वमाह “उपग्रहर्चं कुरुवाह्लिकेषु कलिङ्गवङ्गेषु च पातितमम्भम् । सौराष्ट्रशाल्वेषु च लत्तितमं त्यजेत् तु विद्धं किल सर्वदेशे” मु० चि० ।

“कुरवोवाह्लिकाश्च पश्चिमदेशास्तेषूपग्रहदोषाक्रान्तम्भं त्यजेन्न तदतिरिक्तसर्वदेशेषु तेषु शुभमेवेत्यर्थः । कलिङ्गोवङ्गश्च प्राग्देशौ बहुवचनान्मगधाङ्गादयोऽपि । तेषु चण्डीशचण्डायुधापरपर्यायं पातं त्यजेत् । न तु क्रान्तिसाम्यरूपं पातं तस्य महापातत्वव्यवहारात् । सौराष्ट्रः शाल्वदेशः पश्चिमदेशविशेषः बहुवचनाद्ग्रामबाहुल्यं तेषु लत्तितं लत्तासंजातास्य तन्नं परित्यजेत् । विद्धं क्रूरेण शुभेन वा पञ्चशलाकादिचक्रद्वारा भिन्नम्भं भूतवर्त्तिसर्वदेशेषु त्यजेत् । किल निश्चयेन नत्वस्य देशभेदेन परिहारः एतदपि वाक्यं सम्मत्यन्तरं नार्हति । विवाहपटलेऽपि “लत्तामालवके देशे पातः कोशलके तथा । एकार्गलन्तु काश्मीरे वेधं सर्वत्र वर्जयेदिति” । वराहः । “युतिदोषस्तु विन्ध्याख्ये देशे नान्येषु केषु चेति” । दशयोगो भवेद्गौडे जामित्रस्य च यामुने । वेधदोषश्च शेषेषु” इत्यादि वाक्यानां यथादेशाचारात् व्यवस्था” पी० धा० ।

अथ दशयोगः “शशाङ्कसूर्य्यर्चयुतेर्भशेषे खं भूयुगाङ्गानि दशेशतिथ्यः नागेन्दुवोऽङ्केन्दुमिता नखाश्चेद् भवन्ति चैते दशयोगसंज्ञाः” मु० चि० । ‘चेद्यदि चन्द्रसूर्य्यनक्षत्रयोर्युतेर्योगाङ्कैः सप्तविंशत्याभक्ताद्यच्छेषस्तस्मिन् शून्येकचतुःषड्द्व्येकादशपञ्चदशाष्टादशैकोनविंशतिविंशतिसंख्याके सति एते अङ्काः दशयोगसंज्ञा भवन्ति नान्ये इत्यर्थः । शिष्टानां दशानामङ्कानामभिहितत्वाद्दशयोग इत्यन्वर्थसंज्ञा तदुक्तं दीपिकायाम् “तिथ्यङ्कवेदैकादिगनविंशभैकादशाष्टादशविंशसंख्याः । इष्टोडुना सूर्य्ययुतोडुना वा योगाद्गतो चेद्दशयोगदोषः” । लल्लोऽपि ‘यस्मिन्नृक्षे रविस्तिष्ठेद् यस्मिन्नृक्षे शशी तथा । धिष्ण्ये द्वयोर्योगहृते शेषः स्यात् वादितोदश । शून्यवेदर्तुरूपाणि दिग्रुद्रतिथयोधृतिः । अत्तविंशा नखाश्चेति दश योगाः प्रकीर्त्तिताः’ इति पी० धा० तत्फलम् “वाताभ्राग्निमहीपचोरमरणं रुग्वज्रवादाः क्षतिर्योगाङ्के दशिते घने मनुयुतेऽब्जे तु सैकेऽङ्किते । भन्दास्नादथ सम्मितास्तु मनुभीरेखाः क्रमात् संलिखेद्धिष्ण्येऽस्मिन् ग्रहचन्द्रयोर्न शुभदः स्यादेकरेखास्थयोः” मु० चि० ।

‘शून्यशेषे वातदोषः स्यात् एकशेषेऽभ्रान्मेघात्, चतुश्शेषेऽग्नेः, षट्सु महीपाद्राज्ञः, दशसु चौरात्, एकादशसु मरणं द्वयोरन्यतरस्य वा, पञ्चदशसु रुक्, अष्टादशसु वज्रस् एकोनविंशतिशेषे वादः कलहः, विंशतिशेषे क्षतिः द्रव्यनाशः स्यात् । यदाह लल्लः “मरुन्मेघाग्निभूपालचौरमृत्युरुजोऽशनिः । कलिर्हानिर्दशोद्वाहे दोषास्त्याज्याः सदा बुधैः” । विवाहादौ प्रतिष्ठायां व्रते पुंसवने तथा । कर्णवेधे च चूड़ायां दशयोगं विवर्जयेदिति” । अथार्थपशाद उच्यते । योगाङ्क इति । योगाङ्के समे युग्मसंख्याके सति दलिते अर्द्धीकृते मनुभिश्च चतुर्दशभिर्युते योगाङ्के तदा दास्राद्श्विनीतोभं नक्षत्रं स्यात् । यथा समाङ्के अङ्कयोगः दशाङ्कः १० अर्द्धितः ५ मनुयुतः १९ मूलनक्षत्रं जातम् । अथ योगाङ्के अयुग्मसंख्याके सति सैके एकयुक्ते ततोऽर्द्धिते अश्विनीतोभं स्यात् । यथा विषमाङ्को योगःपञ्चदश सैकः १६ अर्द्धितः ८ पुष्यनक्षत्रं जातम् । तच्चक्रं यथा अथ मनुभिः सम्मिताश्चतुर्दश रेखास्तिर्यक् क्रमात् संलिखेत् । अनेन प्रकारेण यन्नक्षत्रमागतं तत आरभ्य साभिजिन्नक्षत्रचन्द्रमस्मिंश्चक्रे लेख्यं तत्र स्वाक्रान्तनक्षत्रे स्थाप्याः । दिननक्षत्रे च चन्द्र एवं सति यदि ग्रहचन्द्रावेकरेखास्थौ स्यातां तयोस्तादृशयोः परस्परावलोकनरूपोवेधोन शुभदः । उक्तञ्च ज्योतिःसागरे ‘योगाङ्के विषमे सैके समे सत्तुलोचने२८ । दलीकृतेऽश्विनीपूर्वं दशयोगमुदाहृतम् । दशयोगे महाचक्रे प्रमादाद्यदि विध्यते । क्रूरैः सौम्यग्रहैर्वापि दम्पत्योरेकनाशनमिति” दशयोगापवादान्तरमाह भरद्वाजः । “गुरौ लग्नाधिपे शुक्रे सवीर्य्ये लग्नकेन्द्रगे । दश दोषा विनश्यन्ति यथाग्नौ तूलराशयः” । व्यासोऽपि “शुक्रेण गुरुणा वापि संयुतं दृष्टमेव च । दशयोगसमायुक्तमपि लग्नं शुभावहमिति” पी० धा० । अपवादान्तरं ज्यो० त० । “आद्यपादस्थिते सूर्य्ये तुरीयांशः प्रदुष्यति । द्वितीयस्थे तृतीयस्थो विपरीतमतोऽन्यथा” । विपरीतं चतुर्थस्थे आद्यः तृतीयस्थे द्वितीयो दुष्यति नान्यस्थे नान्यपादो दुष्यतीत्यर्थः ।

अथ वाणदोषः “लग्नेनाढ्यायाततिथ्योऽङ्कतष्टाः शेषे नागद्व्यब्धितर्केन्दुसंख्ये रोगोवह्नीराजचौरौ च मृत्युर्वाणश्चायं दाक्षिणात्यप्रसिद्धः” मु० चि० । “शुक्लपक्षप्रतिप-

दमारभ्य गततिथ्योऽङ्कैर्नवभिस्तष्टाः शेषे नागसंख्येऽष्टसंख्ये रोगाख्योवाणः । एवं द्विसंख्ये शेषे वह्न्याख्यः चतुःसंख्ये शेषे राजा । तर्काः षट् तत्संख्ये शेषे चौराख्यः एकसंख्ये शेषे मृत्युसंज्ञोवाणः । अयं च दाक्षिणात्येषु महाराष्ट्रदेशीयेषु प्रसिद्धः तेन देशाचारात् व्यवस्थया वाणस्य त्यागः । न तु प्राच्योदीच्यपाश्चात्यानाम् । तदुक्तं सप्तर्षिमते विवाहपटले । "गततिथियुतलग्नं पञ्चधा स्थापनीयं तिथि १५रवि १२दश१०नागै८र्वेद ४युक्तं क्रमेण । नव९हृतशर५शेषे वाणसंज्ञाः क्रमेण रुगनलनृपचौराः पञ्चमोमृत्युसंज्ञ इति" पी०धा० अथ प्राच्याख्यवाणापवादौ

"रसगुणशशिनागाब्ध्याढ्यसंक्रान्तियातांशकमितिरथ तष्टाङ्कैर्यदा पञ्चशेषाः । रुगनलनृपचौरा मृत्युसंज्ञश्च वाणो नवहृतशरशेषे शेषकैक्ये सशल्यः" मु०चि० । "रसगुणशशिनागाब्धिभिराढ्याचासौ संक्रान्तियातांशकमितिश्चेति स्पष्टनिरयनांशसूर्यसंक्रान्तिभुक्तांशानाम्मितिः संख्या पञ्चधा स्थाप्या कलादिकमुपेक्ष्यम् । सा क्रमेण षट्त्र्येकाष्टचतुर्भिराढ्या संयोज्याङ्कैर्नवभिस्तष्टा सती यदा पञ्चशेषा यस्मिन् स्थले पञ्चावशिष्यन्ते तत्र क्रमेण रुगादिवाणोज्ञेयः । यथा चादौ पञ्चशेषे रोगवाणः द्वितीये पञ्चशेषेऽग्निवाणः तृतीये पञ्चशेषे राजवाणः चतुर्थे पञ्चशेषे चौरवाणः पञ्चमे पञ्चशेषे मृत्युवाणः तत्तात्तत्ताङ्कयं भवतीत्यर्थः । यदाह कश्यपः "संक्रान्तियातांशकनन्दशेषस्तर्काग्निरूपाष्टयुगैः समेतः । तष्टाप्तरै रोगहुताशभूपस्तेना मृतिश्चेति च पञ्च वाणाः । इति पञ्चेति पृथक् पृथक् पदं शिष्यन्ते तदा वाणाः स्युरित्यर्थः । तत्र वाणोद्विविधः एकः काष्ठशल्योऽपरोलोहशल्यः तत्राभिहितो वाणः काष्ठशल्य उच्यते । अस्य नाम प्राच्याख्यो वाण इत्याहुः । तेन तादृशे वाणे लग्ने तथा पीडा न भवेत्तदर्थं तदपवादकृतो लोहशल्यसहितो वाण उच्यते न वेति । यानि प्रागागतानि शेषाणि तेषामैक्ये नवहृते पञ्चाक्षरशेषे सति सशल्यः लोहसहितोवाणः स्यात् । पञ्चव्यतिरिक्ते शेषे शल्यसहितो दुष्टवाणः । अयं तुल्यन्यायत्वात् प्राक् पद्योक्तेऽपि वाणे सशल्यो वाणोज्ञेयः ज्योतिश्चिन्तामणावन्यथा वाणोऽभिहितः । "तिथिवारभलग्नाङ्कोरसाग्न्यङ्गाष्टवेदयुक् ६,३,१,८,४, नन्दाप्त पञ्चशेषे रुग्वह्निराट्चौरमृत्युकृदिति" पी०धा० । अथ समयादिभेदेन वाणापवादः "रात्रौ चौररुजौ दिवाऽग्निनृपती त्याज्यौ सदा सन्ध्ययोर्मृत्युश्चाथ शनौ नृपोविदि मृतिर्भौमेऽग्निचौरौ रवौ । रोगोऽथ व्रतगेहगोपनृपसेवायानपाणिग्रहे वर्ज्याश्च क्रमतो बुधैरुगनलक्ष्मापालचौरा मृतिः" मु०चि० ।

"रात्रौ चौररुजौ वाणौ त्याज्यौ,दिवा दिवसेऽग्निनृपती वह्निराजवाणौ त्याज्यौ सन्ध्ययोः प्रातःसायंसन्ध्ययोः सदा मृत्युर्वाणस्त्याज्यः । ज्योतिःप्रकाशे "रोगञ्चौरन्त्यजेद्रात्रौ दिवा राजाग्निपञ्चकम् । उभयोः सन्ध्ययोर्मृत्युमन्यकाले न निन्दितः" । अथ शनौ शनिवारे नृपवाणः, विदि बुधवारे मृतिवाणः, भौमेऽग्निचौरवाणौ रवौ रोगवाणः त्याज्यः । उक्तञ्च दैवज्ञम० "रवौ रोगं, कुजे वह्निं, शनौ च नृपपञ्चकम् । वर्जयेच्च कुजे चौरं, बुधवारे च मृत्युदमिति" । एतेषु शुभकर्मसु एते वाणा वर्ज्याः यथा व्रते यज्ञोपवीते रुक्, गेहं गृहं तस्य गोप आच्छादनं तत्रानलोऽग्निः, नृपसेवायां क्ष्मापालोराजा, याने यात्रायां चौरः पाणिग्रहे मृतिर्वाणो वर्ज्य इत्यर्थः । तदुक्तं ज्योतिःप्रकाशे "नृपाख्यं राजसेवायां गृहगोपेऽग्निपञ्चकम् । याने चौरं, व्रते रोगन्त्यजेन्मृत्युं करग्रहे इति" । केचिदेवं पाठमाहुः । व्रते विवर्जयेद्रोगं गृहगोपेऽग्निपञ्चकम् । यात्रायां राजचौराख्यौ विवाहे मृतिपञ्चकमिति" पी०धा०।

अथ लग्नसप्तमयोः शुद्धावुपयोगिग्रहदृष्टिभेदः 'त्र्याश' त्रिकोणं चतुरस्रमस्तं पश्यन्ति खेटाश्चरणाभिवृद्ध्या । मन्दोगुरुर्भूमिसुतः परे च क्रमेण संपूर्णदृशो भवन्ति"मु०चि०। "खेटाग्रहायस्मिन् स्थाने तिष्ठन्ति तस्मात् कथ्यमानानि स्थानानि चरणाभिवृद्ध्या पादवृद्ध्या पश्यन्ति तद्यथा त्र्याशं तृतीयं दशमञ्चैकचरणदृष्ट्या पश्यन्ति त्रिकोणं नवपञ्चमं द्विचरणदृष्ट्या पश्यन्ति । चतुरस्रं चतुर्थम् अष्टमं च त्रिचरणदृष्ट्या पश्यन्ति । अस्तं सप्तमस्थानं चतुश्चरणदृष्ट्या पश्यन्ति । अनेन तत्तद्ग्रहोद्भवशुभफलं चरणाभिवृद्ध्यैव भवतीत्यपि सूचितम् । तदुक्तं वराहेण "दशमतृतीये नवपञ्चमे चतुर्थाष्टमे कलत्रं च । पश्यन्ति पादवृद्ध्या फलानि चैवं प्रयच्छन्तीति"। मन्द इति । मन्दः शनैश्चरः स्वस्थानात् त्र्याशं संपूर्णदृक् चतुश्चरणदृष्टिः। एवं गुरुस्त्रिकोणं, भूमिसुतः चतुरस्रं, परे चन्द्रबुधसूर्यशुक्राः क्रमेण सप्तमे संपूर्णदृश इत्यर्थः यदाह गार्गिः । "दुश्चिक्यदशमान्, सौरिस्त्रिकोणस्थान् बृहस्पतिः । चतुर्थाष्टमगान् भौमः शेषाः सप्तमसंस्थितान् । भवन्ति वीक्षणे नित्यमेवाधिकफला ग्रहाः" इति । वराहोऽपि "पूर्णं पश्यति

रविजस्तृतीयदशमे त्रिकोणमपि जीवः । चतुरस्रं भूमिसुतः सितार्कबुधहिमकराः कलत्रं चेति” पी० धा० । अत्रापि शब्दात् सप्तमस्थानेऽपि पूर्णदृष्टिः एवं शनिकुजयोः । अत एव मु० चि० परे चेत्युक्तम् तत्प्रमाणञ्च पश्यदृष्टिशब्दे वक्ष्यते ।

अथ लग्ननिरूपणम् । दीपिका “कन्यातुलाभ्यां मिथुनेषु साध्वी शेषेष्वसाध्वी धनवर्जिता च । निन्द्येऽपि लग्ने द्विपदांश दृष्टः कन्यादिलग्नेष्वपि नान्यभागः” । कन्यादिलग्नेष्वपि द्विपदांशएव दृष्टोनान्य इत्यर्थः । वक्ष्यमाणवचने चरे चरांशवर्ज्जनात् चरलग्नेऽपि तुलातिरिक्तद्विपदांशस्य ग्राह्यता “धनुषि कुलटा तत्पूर्व्वार्द्धे सतीत्यपरे जगुः” विवाहपटले धनुरुत्तरार्द्धनिषेधात् पूर्व्वार्द्धस्य ग्राह्यतैव । मासभेदे लग्नभेदानां शून्यत्वात् तत्तन्मासे शून्यलग्ने विवाहो नेष्टः यदाह व्य० च० “घटमृगधनुषा युग्ममेषकन्यालयस्तुला । चापः कर्की मृगः सिंहश्चैत्रादौ शून्यराशयः” पङ्ग्वादिलग्नानि यानि वक्ष्यन्ते तान्यपि तत्तत्काले वर्ज्यानि ।

अथ लग्नसप्तमशुद्धी “यदा लग्नांशेशोलवमथ तनुं पश्यति युतोभवेद्वाऽयं वोढुः शुभफलमनल्पं रचयति । लवद्यूनस्वामो लवमदनभं लग्नमदनं प्रपश्येद्वा वध्वाः शुभमितरथा ज्ञेयमशुभम्” मु० चि० । “यदा लग्नांशेशोलग्नांशस्तस्येशः स्वामी लवं नवांशं पश्यति । अथ वाऽयं नवांशेन सह युतो वा भवेत्तदा वोढुर्वरस्यानल्पं बहुशुभफलं रचयति । यथा मेषलग्ने मिथुनांशस्तदीशो बुधः तुलायां मिथुनं पश्यति तत्र तिष्ठति वा अयमुदयशुद्धेः प्रथमः कल्पः । तदलाभे तु लग्नांशेशस्तनुं लग्नं पश्यति लग्नेन सह युतो वा भवेत्तदापि वोढुः शुभफलमनल्पं स्यात् यथा मेषलग्न एव मिथुननवांशस्वामी बुधोमकरे स्वनवांशं न पश्यति किन्तु लग्नं पश्यति अथवा मेष एव तिष्ठति । अयं लग्नशुद्धेः द्वितीयः प्रकारः । लवेति । लवद्यूनस्वामी लवान्नवांशात् द्यूनं सप्तमनवांशस्तत्स्वामी लवमदनभं लवान्मदनभं सप्तमनवांशं पश्यति तेन सह युतो वा भवेत् तदा वध्वा अनल्पं शुभं रचयति । यथा मिथुननवांशात् सप्तमोधनुरंशस्तदधीशोगुरुर्मेषे धनुः पश्यति तत्र तिष्ठति वा अयमस्तशुद्धेः प्रथमः प्रकारः । तदलाभे तु लवद्यूनस्वामी लग्नमदनं सप्तमभवनं पश्यति सप्तमभवनेन सहयुतो वा भवेत्तदा वध्वाः शुभं यथा मेषलग्ने गुरुः कर्के सप्तमतुलागतं स्वनवांशं धनूरूपं न पश्यति किन्तु सप्तमभवनं तुलां पश्यति अथवा तुलायामेवास्ति । अयमस्तशुद्धेर्द्वितीयः प्रकारः । इतरथेति इतरथा यदा लग्नांशेशोलवन्तनुं वा न पश्यति तत्र युतो वा न स्यात्तदा वरस्याशुभं मृत्युः स्यात् । यदा त्वस्तांशेशोऽस्तांशमस्तभवनं वा न पश्यति तत्र युतो वा न स्यात्तदा कन्याया अशुभं मृत्युरित्यर्थः । यदाह कश्यपः “स्वस्वेशेनोदयास्तांशौ वीक्षितौ वाथ संयुतौ । लग्नं वास्तगृहं तत्तदंशेशेनेक्षितं युतमिति” तदाऽशुभमित्यनुषङ्गः । वशिष्ठः “दृष्टोदयांशे निजपत्यदृष्टे वरस्य मृत्युस्तनुसंयुते च । अस्तांशकेऽप्येवमदृष्टयुक्ते स्वस्वामिना नाशमुपैति कन्येति” । तुल्यन्यायत्वाल्लग्नेऽप्यस्तलग्नेऽपि उदयलवांशास्तांशस्वामिनोर्दृष्ट्यभावेऽप्येतदेव फलं ध्येयम् । “लवेशोलवं लग्नपोलग्नगेहं प्रपश्येन्मिथो वा शुभं स्याद्वरस्य । लवद्यूनपोऽशं द्युनं लग्नपोऽस्तं मिथोवेक्षते स्याच्छुभं कन्यकायाः” मु० चि० । “नवांशस्वामी नवांशं प्रपश्येल्लग्नस्वामी लग्नं प्रपश्येत्तदा वरस्य शुभं स्यात् । अथ वा मिथः परस्परं लवस्वामी लग्नं लग्नेशोलवकं प्रपश्येत् तदाऽपि वरस्य शुभम् एवं लवद्यूनपोनवांशात्सप्तमनवांशस्वामो अंशं द्यूनमंशं सप्तमराशिमीक्षते लग्नपः लग्नस्वामी अस्तं लग्नात्सप्तमभवनमीक्षते तदा कन्यायाः शुभं स्यात् । वा अथवा मिथः सप्तमाधीशोलग्नसप्तमं पीक्षते लग्नात्सप्तमाधीशस्वांशसप्तममीक्षते तदापि कन्यायाः शुभं स्यात् । अत्रान्यथात्वे दम्पत्योरशुभमित्यर्थः । यदाह नारदः “लग्ननवांशकौ स्वस्वपतिना वीक्षितौ युतौ । न चेद्वान्योऽन्यपतिना शुभमित्रेण वा यदा । वरस्य मृत्युः स्यात्ताभ्यां सप्तसप्तोदयांशकौ । एवन्तौ वीक्षितौ युक्तौ मृत्युर्वध्वाः करग्रहे” । वसिष्ठोऽपि “उदयांशः स्वस्वनाथो मित्रसौम्येन वा युतः । प्रेक्षितो वा तथास्तांशो दम्पत्योः पुत्रपौत्रदः” इति । परस्परवीक्षणेऽप्येतदेव फलं ध्येयं नारदवाक्यस्वरसात् पी० धा० ।

“लवपतिशुभमित्रं वीक्षतेऽंशन्तनुं वा परिणयनकरस्य स्याच्छुभं शास्त्रदृष्टम् । मदनलवपमित्रं सौम्यमंशद्युनं वा तनुमदनगृहं चेद्वीक्षते शर्म वध्वाः” मु० चि० । “अथ पूर्वोक्तप्रकारेणोदयास्तशुद्धेरभावेऽपि तृतीयप्रकार उच्यते । लवपतीति शुभमित्रं शुभश्च तन्मित्रं चेति कर्मधारयः । लवपतेर्लग्ननवांशेशस्य शुभग्रहः सोमबुधगुरुशुक्राणामन्यतमो मित्रं स्यात् चेदंशं स्वनवांशन्तनुं लग्नं वा वीक्षते तदा परिणयनकरस्य वरस्य

भास्करेऽष्टे वसिष्ठोक्तपुत्रपौत्रादिप्राप्तिरूपं शुभं फलं स्यात् अथ वा एवं मदनलवस्यास्तांशेशस्य मित्रं सौम्यं चेत् स्यात्तन्नांशात् द्यूनं सप्तमनवांशं चेद्वीक्षते वा अथ वा तनुमदनगृहं लग्नात्सप्तमभवनञ्चेद्वीक्षते तदा बध्वाः शास्वदृष्टं शर्म्म स्यात्। यद्युभयत्रापि नवांशस्वामिनो मित्रं पापग्रहश्चेत्तस्य दृष्टिरशुभैवेति फलितार्थः। यदाह वराहः "शुद्धस्त्विह स्याच्च यदोदयांशोलग्ने नवांशांस्तांशमुपैति शुद्धिम्। तदा सुहृत्सौम्यनिरीक्षितोयः शुभाय स स्यात्प्रवदन्ति सन्तः" इति। कश्यपः "राश्यंशौ मित्रसौम्येन वीक्षितौ वाथ संयुतौ। उदयास्तांशयोः शुद्धिस्त्रिविधा मङ्गलप्रदेति"। वसिष्ठः "लग्नास्तशुद्धा रहितः सदोषः करोति मृत्युं वरकन्ययोश्च। त्रातुं तदा लग्नगुणास्त्वशक्तास्तं बन्धुवर्गा इव सर्पदष्टमिति"। केचित्तु विवाहादौ वज्रयोगं निषिद्धमाहुस्तल्लक्षणम्। "तिथिवारं च नक्षत्रं नवभिश्च समन्वितम्। सप्तभिस्तु हरेद्भागं शेषाङ्के फलमादिशेत्। त्रिशेषे तु जलं विद्यात् पञ्चशेषे प्रभञ्जनः। सप्तशेषे वज्रपातोऽत्र ज्ञेयं वज्रस्य लक्षणमिति टोडरानन्दे" पी॰धा॰

अथ सूर्य्यसंक्रान्तिदोषः "विषुवायनेषु परपूर्व्वमध्यमान्द्विवसांस्त्यजेदितरसंक्रमेषु हि। घटिकास्तु षोड़श शुभक्रियाविधौ परतोऽपि पूर्व्वमपि सन्त्यजेद्बुधः" मु॰चि॰। "विषुवन्तुलामेषसंक्रान्ती अयनं कर्कमकरसंक्रान्ती एतत्सु विषुवायनाख्यासु संक्रान्तिषु परपूर्व्वमध्यमान् दिवसान् बुधः शुभक्रियाविधौ विवाहयज्ञोपवीतादि शुभकार्य्येषु त्यजेत्। इतरास्वष्टसंक्रान्तिषु संक्रमकालात्परतोऽग्रेऽपि पूर्व्वं प्रागपि षोड़श घटिकाः मिलित्वा द्वात्रिंशद्घटिकास्त्यजेत्। यदाह वसिष्ठः "विषुवतोरयनयोर्द्दिवसत्रयं हरिपदे षड़शीतिमुखेषु च। पूर्व्वतोऽपि परतोऽपि संक्रमान्नाडिकाश्च खलु षोड़श त्यजेत्। संक्रान्तिदोषे त्वचिरात् कृतं यदुद्वाहपूर्व्वाखिलमङ्गलाद्यम्। लाक्षासमूहज्वलिताग्निमध्ये विलीयते तद्वदशेषमेतदिति" उद्वाहादिग्रहणात्स्नानादावनिषेधः। तद्वाक्यानि संक्रान्तिप्रकरणेऽस्माभिरुक्तानि। किन्तु दिनत्रयं त्याज्यं किं संक्रान्तिकालात् प्राग्दिनत्रयमुत तदनन्तरमुत मध्यमं वेति पक्षत्रयसम्भवे निर्णयमाह गुरुः। "अयने विषुवे पूर्व्वम्परं मध्यन्दिनन्त्यजेत्। अन्यसंक्रमणे पूर्व्वाः पराः षोड़श नाडिका इति"। अयञ्च निषेधः सायनसंक्रान्तिष्वपि ध्येयः। यदाह वसिष्ठः 'यदाऽयनप्रवेशः स्यात्तदा तद्राशिसंक्रमः। तस्मिन्नपि दिने त्याज्या नाड्यः षोड़श षोड़शेति"। शौनकः "अयनद्वये समूढा भर्त्तारं नाभिनन्दते नारी। विषुवद्वयेऽपि विधवा षड़शीतिमुखेषु सा म्रियते। विष्णुपदेषु विगीता कन्या विकलेन्द्रिया व्यतीपाते। वैधृतिविष्कुम्भेष्टा सुभगा शेषेषु करणेष्विति" पी॰ धा॰।

अथ पङ्ग्वन्धादिलग्नदोषः 'घस्रे तुलाली बधिरौ मृगाश्वौ रात्रौ च सिंहाजवृषा-दिवान्धाः। कन्यानृयुक्कर्कटका निशान्धा दिने घटोऽन्त्यो निशि पङ्गुसंज्ञः' मु॰ चि॰। 'घस्रे दिवसे तुलावृश्चिकौ बधिरौ स्मृतौ, मृगाश्वौ मकरधनुषी रात्रौ न तु दिवसे, सिंहाजवृषा दिवान्धा दिवसे बधिरा न तु रात्रौ। कन्या नृयुक्कर्कटा निशान्धा रात्रावन्धा न तु दिवान्धाः। घटः कुम्भो दिने पङ्गुसंज्ञो न तु रात्रौ। अन्त्यो मीनो निशि पङ्गुसंज्ञो न तु दिने। यदाह वसिष्ठः "मेषादिचान्धकं षट्कं चत्वारो बधिराः स्मृताः। द्वौ पङ्गू चैव विज्ञेयावित्येतद्राशिलक्षणम्। मेषो वृषो मृगेन्द्रश्च दिवसेऽन्धाः प्रकीर्त्तिताः। नृयुक्कर्कटकन्याश्च रात्रावन्धाः प्रकीर्त्तिताः। तुला च वृश्चिकश्चैव दिवसे बधिरौ तथा। धनुश्च मकरश्चैव बधिरौ निशि कीर्त्तितौ। कुम्भमीनौ च पङ्गू द्वौ दिवारात्रौ यथाक्रममिति"। कुम्भो दिवा पङ्गुः मीनो रात्रौ पङ्गुः, अनेन यस्मिन्काले लग्नस्य योऽन्धपङ्ग्वादिदोषः उक्तस्तस्मिन्नेव काले तल्लग्नन्दोषावहं न कालान्तरे" पी॰धा॰। तत्फलम्। "दारिद्र्यम्बधिरतनौ दिवान्धलग्ने वैधव्यं शिशुमरणं निशान्धलग्ने पङ्गुके निखिलधनानि नाशमीयुः सर्व्वत्राधिपगुरुदृष्टिभिर्न दोषः" मु॰चि॰।
"वसिष्ठः "अन्धे वैधव्यमाप्नोति दारिद्र्यं बधिरे तथा। अथ नाशो भवेत् पङ्गाविति धात्रा विनिर्म्मितम्"। व्यासः "मासशून्याह्वयास्ताराः राशयो बधिरादयः। गौड़मालवयोस्त्याज्यास्त्वन्यदेशे न गर्हिता इति पी॰धा॰।

अथ नवांशशुद्धिः। "कार्म्मुकतौलिककन्याद्युग्मलवे झषगे वा। यर्हि भवेदुपयामस्तर्हि सती खलु कन्या" मु॰चि॰। 'कार्म्मुकं धनुस्तौलिकं तुला द्युग्मं मिथुनम् एषामंशे नवांशे झषगे मीनगते वाशब्दश्चकारीयसूचनार्थः धनुरादिनवांशाः सर्व्वमुनिसम्मता इत्यर्थः तेष्वंशेषु यर्हि यदा उपयामो विवाहो भवेत्तर्हि कन्या विवाहोत्तरं सती पतिव्रता खलु यदाह वसिष्ठः "लग्ने हि सर्व्वे शुभराशयश्च शुभेक्षिता वाथ युताः शुभाः स्युः। नवांशकस्तौलिनृयुग्मकन्याचापाद्य-

भाग: शुभदो न चान्ये । द्विभर्त्तृका मेषनवांशके स्यात् भषांशके सा पशुशीलयुक्ता । धनान्विता पुत्रवती तृतीये कुलीरकांशे कुलटाप्यजस्रम् । सिंहांशके सा पितृमन्दिरस्था कन्यांशके वित्तयुता सुशीला । तुलांशके सर्व्वगुणास्पदा सा, कीटांशके निःस्वतरा विशीला । चापांशकाद्ये धनिनी द्वितीये भागेऽन्यसक्ता मलिना गदाढ्या१ निःस्वा मृगांशे विगुणा घटांशे विभर्त्तृका योगरता विशीर्णा । मीनांशके भर्त्तृसुतार्थहीना शुभग्रहै र्युक्तनिरीक्षिते वा । तस्मात्त्वदैवोक्तनवांशकेषु कुर्याद्विवाहं शुभसंघट्टैः । नवांशदोषः सकलं क्षिणोति लग्नोत्थसौम्यग्रहसम्भवश्च । ध्रुवं निहन्त्येव हकोऽजसङ्गं षड्वर्गजं सौम्यवियच्चराणाम्" । पशुशीलयुक्ता पशुचारपरा गदोरोगः एते एव च नवांशाः सकलमुनिभिरुक्ताः "तुलामिथुनकन्यांशाधनुराद्यार्द्धसंयुताः । एते नवांशाः शुभदा यदि नान्त्यांशकाः खल्विति" नारदोक्तेः शौनकस्तु मीनांशकमपि शुभमाह "सुदती सौभाग्यवती प्रहसितवदना च मीनांशे" इति । तत्र निषेधस्य तुल्यबलत्वात् षोड़शीग्रहणाग्रहणवद्विकल्प इत्याहुः तन्न एकबाधेनोपपत्तावनेकबाधोनन्याय्य इति बहुमुनिवचनप्रामाण्यात् मीनांशत्याग एवोचितोन त्वेकमुनिवचनानुरोधात्पाक्षिकोविकल्पविधिस्तस्याष्टदोषग्रस्तत्वात् । का तर्हि शौनकवाक्यस्य गतिरिति चेत् गुणबहुदोषलब्धौ लग्नान्तरासम्भवे मीनांशको निषिद्धोऽपिप्रशस्त इत्येवं विषया गतिर्युक्ता" पी०धा० ।

"अन्त्यनवांशे न च परिणेया काचन वर्गोत्तममिह हित्वा । नो चरलग्ने चरलवयोगे तौलिमृगस्थे शशभृति कुर्यात्" मु०चि० ।" विहितनवांशेष्वपि यथा मेषलग्ने धनुर्नवांशोऽन्तिम इत्येवं विधिविषये लग्नान्तिमनवांशे काचन कन्या न परिणेया न विवाह्या । परन्तु वर्गोत्तमं नवांशं हित्वा तत्र विवाह उचित एव । यथा मिथुनलग्ने मिथुनांशोऽन्तिमोऽपि वर्गोत्तमः । यदाह कश्यपः "अन्त्यांशका अपि श्रेष्ठा यदिवर्गोत्तमाह्वयाः । अनुक्तांशास्तु न ग्राह्या यतस्ते कुनवांशकाः" इति । वशिष्ठोऽपि "वर्गोत्तमं विनान्त्यांशे विवाहो न शुभप्रदः । वर्गोत्तमश्चेदन्त्यांशः पुत्रपौत्रादिवृद्धिदः" इति । अन्यच्च नो चरलग्ने इति । तौलिमृगस्थे तुलामकरस्थे शशभृति चन्द्रे सति चरलग्ने विहितचरलवयोगे नो कुर्यात् । यथा मेषलग्ने तुलांशे उक्तञ्च केशवार्केण "चरलवं चरवेश्मगसतृष्ट जेत्मृगतुलाभगे मृगलग्नेऽपि । युवतिरत्र भवेत् कृतकौतुका मदनवत्यनवत्वजनोनृसुखीति" । अनवो जीर्णोभर्त्ता तस्य त्यजने त्यागे उन्मुखी परपुरुषरता स्यादित्यर्थः" पी०धा० ।

अथ लग्नादिस्थ ग्रहदोषः 'व्यये शनिः खेऽवनिजस्तृतीये भृगुस्तनौ चन्द्रखला न शस्ताः । लग्नेट् कविग्लौश्च रिपौ मृतौ ग्लौर्लग्नेट्शुभाराश्च मदे च सर्वे' मु०चि० ।

"व्यये द्वादशस्थाने स्थितः शनिः न शस्तः "सोमपकुलेऽपि हि जातां द्वादशगे मद्यपां कुरुते" इति शौनकोक्तेः । अत्र रविसुते इत्यनुवर्त्तते । "खे दशमेऽवनिजो मङ्गलो न शस्तः । "शाकिनो व्योम्नि वक्रे" इति केशवार्कोक्तेः । तृतीयो भृगुः शुक्रः न शस्तः "धन्या धनगे शुक्रे क्लपणत्वं प्राप्नुयान्नारी । दुश्चिक्यगते तु कन्या त्वाव्हाद्भर्तुः कनीयसा-स्वजते" इति शौनजोक्तेः । तनौ लग्ने चन्द्रः खलाः पापग्रहाश्च न शस्ताः । "लग्नस्थेऽर्के कन्या विधवा संवत्सरेऽष्टमे भवति । लग्नस्थो हिमरश्मिर्मृत्यु कुर्य्यात् त्रयोदशे मासे । भौमः सद्यो विधवां लग्नस्थोऽव्दाच्च सौम्यदृग्योगात् । कामयति नीचवर्णांल्लग्नस्थे रविसुते बहून् पुरुषान् । शनिवद्विधुन्तुदस्य तु चिन्तेयं सदसदिति विज्ञैरिति" शौनकोक्तेः । लग्नेट् लग्नस्वामी, कविः शुक्रः ग्लौश्चन्द्रश्च रिपौ षष्ठस्थाने न शस्ताः । "रन्ध्रे कुजे सौम्यखगे च मृत्युः षष्ठाष्टगे लग्नपतौ च मृत्युरिति" ज्योतिर्निबन्धोक्तेः । "भृगुषट्काह्वयो दोषोलग्नात् षष्ठगते सिते । उच्चगे शुभसंयुक्ते तल्लग्नं सर्वदा त्यजेदिति" नारदोक्तेः । "अष्टचतुष्कान् मृत्युर्दम्पत्योः षष्ठगे चन्द्रे" इति शौनकोक्तेः । ग्लौश्चन्द्रः लग्नेट् शुभाश्चन्द्रबुधगुरुशुक्राः आरोभौमः एते मृतावष्टमस्थाने न शस्ताः "मासत्रयेण विधवां निधनगश्चन्द्रमाः कुरुते" । मासत्रयेण कन्या निधनस्थे याति पञ्चत्वम्" । बुधइत्यनुवर्त्तते । "दम्पत्योर्निधनस्थः सप्तदशाब्दाद्वियोगदो जीवः । पञ्चत्वं नयति भृगुर्निधनस्थः सप्तभिर्वर्षैरिति" शौनकोक्तेः । नारदः 'कुजाष्टमो महादोषो लग्नादष्टमगे कुजे । शुभत्रययुतं लग्नं त्यजेत् तत्तुङ्गो यदि" । अत्र सम्मतिः प्रागुक्ता । लग्नेट् च पुनः सर्व्वे सूर्य्यादयोग्रहा मदे सप्तमस्थाने न शस्ताः निषिद्धाः । "सर्वे जामित्रसंस्थाविदधति मरणमिति" वसिष्ठोक्तेः । कश्यपोऽपि "सप्तस्थानगाः सर्वे ग्रहाः कुर्व्वन्ति शोभनः । दम्पत्योर्मरणं यत्नं स्यादेकस्य च न संशयः" इति अर्थादन्येषु स्थानेषु ग्रहाः समोचीनास्तत्र केषुचित् स्थानेषु शुभा एव केषुचिन्मध्यमा

एवेत्येतदपि वक्ष्यति। अतोऽमुमर्थमतिसंधाय त्रिविकमेण निषिद्धस्थानान्येवोक्तानि। “त्याज्या लग्नेऽब्धयो मन्दात्, षष्ठे शुक्रेन्दुलग्नपाः। रन्ध्रे चन्द्रादयः पञ्च सर्व्वेऽस्ते ऽब्जगुरू समाविति”। (मन्दाद्ब्धयः चत्वारो मन्दरविचन्द्रकुजा इत्यर्थः)। अब्जगुर्वोः समत्वं शौनकमतेन तादृशविरुद्धफलाभावात्। यदाह “कन्यास्तिस्रो जनयति सापत्न्यं चैव सप्तमे शशिनि”। “शीलचरित्रोपेताङ्करोति पत्युः कलत्रगो द्वेष्यामिति”। गुरुरित्यनुवर्त्तते अत्र वचनद्वयप्रामाण्याद्विकल्पः। यत्त्वत्रिणोक्तं “जामित्रगो यदि भवेदुशना बुधो वा गीर्वाणनाथसचिवः सितचन्द्रपक्षे। कन्याविवाहसमये परिहृत्य दोषान् सौभाग्यपुत्रसहितां वनितां करोतीति” तच्चन्द्रजामित्रविषयम्। तथा च भुजबलः “स्त्रीणां विवाहे तु बलैरुपेताः पत्युः प्रणाशं विहगा विदध्युः। त्यक्त्वा बुधं दैत्यगुरुं गुरुं च निशाकरादस्तगृहप्रपन्नाः” इति। अतएव दीपिका “रविमन्दकुजाक्रान्तं मृगाङ्कात् सप्तमं त्यजेत्। विवाहयात्राचूड़ासु गृहकर्म्मप्रवेशने” इति पी० धा०

अथ लग्नतःस्थानविशेषे ग्रहभेदानां शस्तता “त्र्यायाष्टषट्सु रविकेतुतमोऽर्कपुत्रास्त्र्यायारिगः क्षितिसुतो द्विगुणायगोऽब्जः। सप्तव्ययाष्टरहितौ ज्ञगुरू सितोऽष्टत्रिद्यूनषड्व्ययगृहान् परिहृत्य शस्तः” मु० चि०।

“तृतीयैकादशाष्टमषष्ठस्थानेषु रविकेतुतमोऽर्कपुत्राः शस्ताः शुभफलदातारः। यदाह शौनकः “बन्धुजनेभ्यः पूजां त्रिंशद्वर्षाणि सहजगे त्वर्के। प्राप्नोति धनं षष्ठे त्र्यब्दादूर्द्ध्वं सुतांश्चैव। दम्पत्योः सह मरणं निधनस्थेऽर्केऽष्टसप्तत्या। कारयति धनविवृद्धिं त्र्यब्दादूर्द्ध्वं तथायगः सवितेति” (रवेः) धनधान्यपुत्रयुक्तां पञ्चमसंवत्सरात्तृतीयस्थः। षष्ठः षड्भिर्मासैरसपत्नीं कन्यकां कुरुते। निधनगतार्किः कुर्य्यादामरणादामयवियुक्ताम्। आयगतार्किः कन्यां त्रिवर्गयोग्यां करोति षण्मासादिति” (शनेः) अत्र राहुकेत्वोश्च फलं शनिवदेवेति “स्वर्भानौ वाप्यथ शिखिनि वा लग्नभावादिसंस्थे” इति वसिष्ठोक्तेः त्र्यायारिगः तृतीयैकादशषष्ठस्थानस्थितः क्षितिसुतो भौमः शस्तः। “सहजस्थो भूमिसुतः सौभाग्यकरस्तु यावदायुष्यम्। संवत्सरेण विपुलं धनागमं शत्रुसंस्थस्तु। मणिकाञ्चनरत्नाढ्यामेकादशगः कुजोऽब्दषट्केन” इति शौनकोक्तेः। अब्जश्चन्द्रो द्विगुणायगो द्वितीयतृतीयैकादशस्थः शस्तः। “अब्दाद्धनसंयुक्तां करोति चन्द्रो धने नार्य्याः। चन्द्रस्तृतीयराशौ सौभाग्यकरस्तु यावदायुष्यम्। लग्नादेकादशगः कन्यामिन्दुर्धनान्वितां कुरुते” इति शौनकोक्तेः। ज्ञगुरू बुधबृहस्पती सप्तमद्वादशाष्टमातिरिक्तस्थानस्थितौ शस्तौ। उक्तस्थानानाम् अशुभत्वादन्येषां शुभदातृत्वात्। यदाह वसिष्ठः। “प्रीतिर्वृद्धिः सगुणनिरतिर्बन्धुपूजा सुताप्तिः सद्वैपक्ष्यं तनयरहितं त्वन्यथा भर्त्तृनाशः। धर्मे बुद्धिर्भवति धरणीलब्धिरत्येव वृद्धिर्हानिः स्त्रीणां हिमकरसुते लग्नभावादिसंस्थे” इति। “लक्ष्मीप्राप्तिर्भवति सुयशाः प्रीतिरन्योन्यवृद्धिरिष्टप्राप्तिर्बहुविधमयं चाश्रमाणां विरक्तिः। पापासक्तिः सुकृतविरतिर्भूरिलाभः सुरेज्ये स्त्रीणां सौख्यं रिपुकृतभयं लग्नभावादिसंस्थे” इति अयं शुभदैवं अयः शुभावहो विधिरित्यमरः। क्लीवत्वं त्वार्षम् केचिद्बहुविधभयमिति” पठन्ति तन्मकारे भकारभ्रान्तेः “उभयकुलानन्दकरीं करोति न चिराद्गुरुः षष्ठे” इति षष्ठस्थानस्थितगुरोः शौनकेनापि सम्यक्फलाभिधानात्। सित इति अष्टमतृतीयसप्तषड्द्वादशस्थानानि परिहृत्य त्यक्तान्येषु स्थानेषु सितः शुक्रः शस्तः। तदुक्तं वसिष्ठेन “भोगप्राप्तिर्विविधविभवं स्वैरवृत्तिर्महत्त्वं द्युम्नाधिक्यं भवति निधनं सर्व्वनाशोऽवसुत्वम्। तथ्यप्रीतिर्बहुविधगुणाः सर्वसम्पत्समृद्धिरस्तं स्त्रीणामुशनसि तथा लग्नभावादिसंस्थे” इति द्युम्नं द्रविणम्। अवसुत्वं दरिद्रता। अस्वं दारिद्र्यम्। वसिष्ठः “मृत्युर्नैःस्वं बहुविधधनं भ्रातृहानिः प्रजानां व्याधिः सौख्यं बहुविधमतोभर्त्तृहानिश्चिरायुः। श्रेयोहानिर्भवति हृदयव्याधिरर्थागमश्च भानौ स्त्रीणामतिशयरुजा लग्नभावादिसंस्थे। (रवेः) नाशः सम्पद्बहुविधयशोबन्धुवृद्धिः प्रजाप्तिः शस्त्रान्मृत्युर्भवति न चिराद्दुदीर्घसापत्यबाधा। प्रव्रज्यात्वं दुहितृजननं वर्द्धनं भोगभाक्त्वं दास्यं स्त्रीणां तुहिनकिरणे लग्नभावादिसंस्थे (इन्दोः)। अत्र चतुर्थचन्द्रस्य प्रजाप्तिः फलमभिहितम् श्रीपतिनापि “सुखे तु कथितो बन्धुत्रयः कैश्चनेत्येकीयमतमनुसृत्योक्तमिति पन्थकृता चतुर्थस्थानस्य मध्यमत्वमङ्गीकृतम्। “वधूं श्वशुरवियुक्तां चतुर्थस्थः शशी त्वाब्दादिति” शौनकः। विरुद्धार्थयोः का गतिरिति चेत्। बालचन्द्रविषयमशुभफलम् तद्भिन्नचन्द्रविषयं शुभफलम्। उक्तञ्च केशवार्केण “बालोऽब्जः प्रियविरहं शनिःस्तनाम्भःशून्यत्वं सृजति सुखे सुवासिनीनामिति” वसिष्ठः “मृत्युः शोको बहुविधधनं भ्रातृवैरं कुबुद्धिर्लक्ष्मीप्राप्तिर्भवति मरणञ्चोभयोर्वंशनाशः। स्त्रीणां द्वेषो व्यसननि

रतिः पुत्रपौत्रादिषिद्धिर्भीतिर्भूमेर्बलिनि तनये लग्नभावादिसंस्थे"(कुजस्य)। स्वच्छन्दत्वं कदशनरतिर्वल्लभत्वं शिरोत्थं व्याधिः सुस्त्रीर्मृतिरथ सुखं गर्भपातप्रवृत्तिः द्यूतासक्तिर्भवति रविजे वैभवं वक्त्ररोगं स्वर्भानौ शाम्यथ शिखिनि वा लग्नभावादिसंस्थे" पी॰धा॰ बुधादीनामनुपदमुक्तम् ।

अथ लग्नादिभङ्गकर्त्तर्य्यादिदोषापवादः

'पापौ कर्त्तरिकारकौ रिपुगृहे नीचास्तगौ कर्त्तरीदोषो नैव सितेऽरिनीचगृहगे तत्षष्ठदोषोऽपि न । भौमेऽस्ते रिपुनीचगे न हि भवेद्भौमोऽष्टमो दोषकृन्नीचे नीचनवांशके शशिनि रिष्फाष्टारिदोषोऽपि न" मु॰चि॰ ।

"तत्र कर्त्तरीयोगलक्षणं लग्नात् पापावित्यादिनोक्तं यौ क्रूरौ ग्रहौ कर्त्तरिकारकौ रिपुगृहे शत्रुगेहे स्थितौ नीचेऽस्तगौ स्वनीचराशिस्थितौ अस्तं गतौ वा तदा कर्त्तरी नैव स्यात् यदाहुः कश्यपनारदवशिष्ठाः "पापयोः कर्त्तरीकर्त्रोः शत्रुनीचगृहस्थयोः । यदा चास्तगयोर्वापि कर्त्तरी नैव दोषदा" इति इदं विशेषणं शत्रुगृहस्थत्वादिकं समुच्चितं व्यस्तं समस्तं वा ध्येयम्, अपवादान्तरमुक्तं दैवज्ञम॰ गर्गेण । "क्रूरकर्त्तरिसंयुक्तं लग्नं चन्द्रं च न त्यजेत् । केन्द्रत्रिकोणसंस्थेषु गुरुभार्गववित्सु च" । 'विधौ धनोपगे शुभग्रहेऽथवान्त्यगे गुरौ । न कर्त्तरी भवत्यहो जगाद बादरायणः । क्रूरद्वयस्यान्तरगं विलग्नं मृतिप्रदं चन्द्रमसश्च रोगदम् । शुभैर्धनस्थैरथ वाऽन्त्यगे गुरौ न कर्त्तरी स्यादिह भार्गवाविदुरिति"।

अथ षष्ठशुक्रापवाद उच्यते ।"सिते शुक्रेऽरिगृहगे नीचगृहगे वा सति तत्षष्ठदोषो भृगुषट्कदोषोऽपि न स्यात् यदाह कश्यपः "नीचराशिगते शुक्रे शत्रुक्षेत्रगतेऽपि वा । भृगुषट्कोत्थितो दोषो नास्ति तत्र न संशयः" अथाष्टमभौमदोषापवाद उच्यते । भौमेऽस्ते अस्तं गते रिपुनीचगे शत्रुगृहे वा स्वनीचगृहगे वा सत्यष्टमो भौमो न दोषकृत् स्यात् । उक्तं च कश्यपेन "अस्तगे नीचगे भौमे शत्रुक्षेत्रगतेऽपि वा । कुजाष्टमोद्भवो दोषो न किञ्चिदपि विद्यते" इति । अथ षडष्टद्वादशस्थान चन्द्रापवाद उच्यते । शशिनि चन्द्रे नीचनवांशके वा सति रिष्फाष्टारिदोषोऽपि द्वादशाष्टमशत्रुस्थानस्थित चन्द्रदोषोऽपि न स्यात् । "नीचराशिगते चन्द्रे नीचांशकगतेऽपि वा । चन्द्रे षष्ठाष्टरिष्फस्थे दोषो नास्ति न संशयः इति" कश्यपोक्तेः पी॰धा॰ ।

अथाब्दाद्यादिदोषापवादः "अब्दायनर्तुतिथिमासभपक्षदग्धतिथ्यन्धकाणबधिराङ्गमुखाश्च दोषाः । नश्यन्ति विद्गुरुसितेष्विह केन्द्रकोणे तद्वच्च पापविधुयुक्तनवांशदोषाः" मु॰चि॰ ।

"अब्ददोषः१ अयनदोषः२ ऋतुदोषः३ तिथिदोषो रिक्तादिः४ मासदोषः५ नक्षत्रदोषः क्रूरगृहितादिः ६ । पक्षदोषस्त्रयोदशदिनात्मकादि ७ दग्धा तिथिः प्रसिद्धा चापान्त्यगेत्यादिनोक्ता८ । अन्धकाणबधिराख्योलग्नदोषः९ तन्मुखास्तदादयोऽन्ये अकालवृष्ट्याद्या दोषा विद्गुरुसितेषु केन्द्रकोणे केन्द्रं सप्तमस्थानरहितं विवक्षितं जामित्रदोषस्य सत्त्वात् । अतएवोक्तमग्रे "त्रिकोणे केन्द्रे वा मदनरहिते" इति कोणे नवपञ्चमे सत्सु नश्यन्ति । उक्तञ्च कश्यपेन "अब्दायनर्तुमासोत्थाः पक्षतिथ्यृक्षसम्भवाः । ते सर्वे नाशमायान्ति केन्द्रसंस्थे शुभग्रहे । काणान्धबधिरोद्भूता दग्धलग्नतिथेर्भवाः । ते दोषानाशमायान्ति केन्द्रसंस्थे शुभग्रहे" इति । 'अकालजाश्च नीहारविद्युत्तांश्वभ्रसम्भवाः । परिवेषप्रतिसूर्यशक्रचापध्वजादयः । दोषप्रदा मङ्गलेषु कालजाश्चेन्न दोषदाः । गुरुरेकोऽपि केन्द्रस्थः शुक्रो वा यदि वा बुधः । हरेः स्मृतिर्यथा हन्ति तद्वद्दोषानकालजान् । लत्तोपग्रहचण्डीशचन्द्रजामित्रसम्भवान् । तत् केन्द्रगो गुरुर्हन्ति सुपर्णः पन्नगानिवेति" । तद्वच्चेति तथा यदि पापः क्रूरो विधुयुक्तराशेर्नवांशे स्यात्तथा सचन्द्रे मेषे सूर्यनवांशस्तद्दोषोऽभिहितो यज्ञोपवीतप्रकरणे. तदा तत्कृतदोषो नश्यति । उक्तञ्च संहिताप्रदीपे "सचन्द्रराशेरशुभो नवांशः प्रोक्तः सपापोऽपि विलग्नसंस्थः । त्रिकोणकेन्द्रेषु गुरुः सितो वा यदा तदाऽसावशुभोऽपि शस्तः पी॰धा॰ ।

अथ बहुविधदोषापवादः "केन्द्रे कोणे जीव आये रवौ वा लग्ने चन्द्रे वापि वर्गोत्तमे वा । सर्वे दोषा नाशमायान्ति चन्द्रे लाभे तद्वद्दुर्मुहूर्तांशदोषाः" मु॰चि॰। "केन्द्रं प्रसिद्धं कोणं नवपञ्चमं तत्र च जीवो गुरुः स्यात्तदा सर्वे दोषानाशमायन्ति उपलक्षणत्वाद्बुधशुक्रावपि । यदाह नारदः 'उक्तानुक्ताश्च ये दोषास्तान्निहन्ति बली गुरुः केन्द्रसंस्थः सितोवापि पन्नगान् गरुड़ो यथेति' सितो बुधस्याप्युपलक्षकः । उक्तञ्च कश्यपेन "काव्ये गुरौ वा सौम्ये वा यदा केन्द्रत्रिकोणगे । नाशं यान्त्यखिलादोषाः पापानीव हरिस्मृतेरिति" तत्रापि लग्नाख्यकेन्द्रस्यातिबलत्वात्तत्र स्थितो जीवः सर्वारिष्टहरः तदुक्तं वशिष्ठेन "कुनवांश

दोषाः ये लग्नदोषाः पापैः कृता दृष्टिनिपातदोषाः। लग्ने गुरुस्तान्निखिलान्करोति फलं यथाम्भः शतधा नयेति"। अथवा आये एकादशे रवौ सति दोषनाशः। "सर्वेकादशगे सूर्ये दोषा नाशं ययुस्तदा। अरण्यादेव दृष्टस्य पापं जन्मशतोद्भवमिति"। अथवा लग्ने वर्गोत्तमे स्वनवांशयुक्ते यथा मिथुने मिथुनांशः तदा दोषनाशः। अथवा चन्द्रे वर्गोत्तमे स्वनवांशस्थिते वा सति दोषनाशः। द्वितीयवशाच्चन्द्रस्यात्युत्कटत्वसयार्थत्वाच्चन्द्रो लग्नादुपचय३,१०,११ स्थाने चेत् स्यात्तदापि सर्वदोषनाशः। एवं क्रमेण परिहारत्रयमुक्तं यदाह कश्यपः "वर्गोत्तमगते लग्ने सर्गदोषा लयं ययुः। चन्द्रे चोपचये वापि यथैव कुसरितो यथेति"। चन्द्रे इति तद्वक्त्रेव प्रकारेण दुर्मुहूर्ता रवार्धमेत्यादयः, खंडदोषाः पापग्रहनवांशास्तेऽपि सर्वे चन्द्रे लाभे एकादशस्थानस्थिते सति नाशमायान्ति। "मुहूर्तलग्नषड्वर्गकुनवांशग्रहोद्भवाः। ये दोषास्तान्निहन्त्येव सर्वेकादशगः शशीति"। अन्यदप्याह कश्यपः "लग्नाद्व्ययाङ्गव्योमचरोत्थं दोषसञ्चयम्। शुभः केन्द्रगतो हन्ति दावाग्निर्विपिनं यथेति" पी॰धा॰।

"त्रिकोणे केन्द्रे वा मदनरहिते दोषशतकं हरेत् सौम्यः शुक्रो द्विगुणमपि लक्षं सुरगुरुः। भवेदाये केन्द्रेऽङ्गप उत लवेशो यदि तदा समूहं दोषाणां दहन इव तूलं शमयति" मु॰चि॰। "त्रिकोणे ५,९ केन्द्रे सप्तरहिते १,४,१०, यदि सौम्यो बुधस्तिष्ठेत्तदा दोषशतकं हरेत्। उक्तस्थानस्थितः शुक्रोऽपि द्विगुणं दोषशतकं दोषद्विशतीं हरेत्। तथोक्तस्थानस्थितो गुरुरपि लक्षं दोषान् हरेत्। यदाह नारदः "दोषाणां हि शतं हन्ति बलवान् केन्द्रगो बुधः। अपहाय द्युनं शुक्रो द्विगुणं चाङ्गिराः"। अत्र शतशब्देनानेकसंख्यात्वं विवक्षितम्। अतएवाह कश्यपः 'बलवान् केन्द्रगः सौम्यो हन्ति दोषशतत्रयम्। द्यूनं विहाय दैत्येज्यः शतं लक्षमङ्गिराः" इति। भवेदिति अङ्गपो लग्नस्वामी उत यस्तोशार्थे लवेशो लग्नगतांशनाथो वा आये ११केन्द्रे १,४,१० यदि भवेत्तदा स दोषाणां समूहं शमयति तत्र दृष्टान्तः दहनोऽग्निस्तूलं कार्पासमिव शमयति। तदुक्तं नारदेन "लग्नेट् लग्नांशनाथो वा चावमः केन्द्रगोऽपि वा। राशिं निहन्ति दोषाणामिन्धनानीव पावकः"

अथ प्रसङ्गेन श्वशुरादिशुभाशुभनिरूपणम् "श्वश्रूः सितोऽर्कः श्वशुरस्तनुस्तु, जामित्रपः स्याद्दयितो, मनः शशी। एतच्चतुष्कं संप्रतिभाव्य तान्त्रिकस्तेषां सुखं संप्रवदेद्विवाहतः" मु॰चि॰। "शुक्रः श्वश्रूः, सूर्यः श्वशुरः, अत्र कन्यानिमित्तशुभाशुभस्य विचार्यत्वात्तस्याः कन्यायाः श्वश्रूर्वरमाता श्वशुरो वरपिता, तनुर्लग्नं तनुः स्वशरीरं, जामित्रपः सप्तमाधीशो दयितो भर्त्ता ज्ञेयः, शशी मनो ज्ञेयम् एतच्चतुष्कम् एतेषां शुक्रादीनां बलं विचार्य तान्त्रिकः तन्त्रसिद्धान्तवित् विवाहतो विवाहादनन्तरं तेषां श्वश्र्वादीनां सुखं स्यादिति प्रवदेत्। यदाह शौनकः "श्वशुरः सहस्रकिरणः श्वश्रूर्भृगुनन्दनो विनिर्दिष्टः। होरागमार्थकुशलैर्जामित्रपतिः पतिः स्त्रीणाम्। शरीरं लग्नवशात् सुखदुःखं मानसं शशाङ्कवशादिति"। शार्ङ्गीयेऽपि "श्वशुरोऽर्कः, सितः श्वश्रूः, स्त्रीणामस्तपतिः पतिः। एभिरङ्गोपगैरेषां शुभं नीचादिगैरसदिति" विशेषान्तरमप्युक्तं शार्ङ्गीये "सूर्यात् पतिः, स्त्री च विधो, स्तथाराद्वित्तं, सुतो ज्ञाच्छ्वशुरं गुरोश्च। धर्मः सितादर्कसुताच्च वेश्म, सूयात्सुहृद्राहुविधौ स्वयुक्त्या, एतैर्नीचस्थितैः शत्रुगतैर्वाहादिकं न सत्। स्वष्टहोश त्रिकोणस्थैः शुभमेषां यथोदितमिति"।

अथ संकीर्णजातीनां विवाहे नियतकालविशेषः "कृष्णपक्षे सौरिकुजार्केऽपि च वारे वर्ज्ये नक्षत्रे यदि वा स्यात्करपीड़ा। संकीर्णानां तर्हि सुतायुर्धनलाभप्रीतिप्राप्त्यै सा भवतीह स्थितिरेषा" मु॰चि॰ "कृष्णपक्षे शनिभौमार्कवारे विवाहोक्तनक्षत्रादिभिन्नक्षत्रेषु चकाराद्व्याघातशूलेत्यादिदुष्टयोगेष्वपि यदि संकीर्णानाम् अनुलोमप्रतिलोमजानां करपीड़ा विवाहः स्यात्। तर्हि सा करपीड़ा सुतायुर्धनलाभप्रीतिप्राप्त्यै भवति। एषा स्थितिराचारोऽस्ति, अनुलोमजा मूर्द्धावसिक्तादयः प्रतिलोमजाश्चाण्डालादयः। चकारपठनमेतदभावे विवाहाद्यपेक्षकत्वे च प्रागुक्तदिनेऽपि स्यादिति सूचनार्थम्। तदुक्तं शार्ङ्गीये "कृष्णपक्षे भानुभौमार्कजानां वारे योगे चापि विष्ण्ये निषिद्धे। संकीर्णानां दारकर्म प्रशस्तं प्रीत्यर्थायुःप्राप्तये शौनकाद्याः" इति। केशवार्कः "प्रायेण सङ्करभुवामशुभर्क्षपक्षक्रूरवारेषु शुभकृत् करपीडनं स्यात्" इति

अथ लग्ने संकष्टे तदलाभे गोधूलिनिरूपणप्रशंसे "नास्मिन्नृक्षं न तिथिकरणं नैव लग्नस्य चिन्ता नो वा वारो न च लवविधिर्नो मुहूर्त्तस्य चर्चा। नो वा योगो न मृतिभवनं नैव जामित्रदोषो गोधूलिः सा मुनिभिरुदिता सर्वकार्येषु शस्ता" मु॰चि॰।

"यद्यं न लग्नमित्यादिः स स्तुत्यर्थवादः तेन गोधूल्याः प्रशंसायां तात्पर्यं न तु विधिरन्यथा निषिद्धेषु अमावास्याभद्राभरण्यादिष्वपि गोधूलिलग्नं भवितुं युक्तं स्यात्। सामान्यविशेषयोरपि दोषापत्तिरपि वक्तुमशक्या। तस्मादभिहिततिथ्यादिष्वेव यावच्छक्याखिलदोषपरिहारपूर्वकघटीलग्नं कार्यं तदभावे गोधूलिलग्नं कार्यम्। यदाह लल्लः "लग्नं यदा नास्ति विशुद्धमन्यद्गोधूलिकां साधु तदा वदन्ति। लग्ने विशुद्धे सति वीर्ययुक्ते गोधूलिका नैव फलं विधत्ते। शुभाशुभयुतं सर्वं राशेर्दोषन्तु निन्दितम्। विवाहलग्नस्य च गोधूलौ प्राह भागुरिरिति" किञ्च "कुलिकं क्रान्तिसाम्यं च मूर्तौ षष्ठाष्टमः शशी। पञ्च गोधूलिके त्याज्या अन्ये दोषाः शुभावहाः" इति दैवज्ञमनोहरीयवाक्यमपि सार्थकम्। गोधूल्यधिकारे आह नारदः "प्राच्यानां च कलिङ्गानां मुख्यं गोधूलिकं स्मृतम्। गान्धर्वादिविवाहेषु वैश्योद्वाहे च योजयेत्। चतुर्थमभिजिल्लग्नमुदयर्क्षात्तु सप्तमम्। गोधूलिकं हि भवति सम्पत्पुत्रादिसौख्यदमिति"। दैवज्ञम० "घटीलग्नं यदा नास्ति तदा गोधूलिकं शुभम्। शूद्रादीनां बुधाः प्राहुर्न द्विजानां कदाचन। महादोषान् परित्यज्य प्रोक्तधिष्ण्यादिकेषु च। कारयेद्गोरजोयायत्तावल्लग्नं शुभावहमिति। लग्नशुद्धिर्यदा नास्ति कन्या यौवनशालिनी। तदा वै सर्ववर्णानां लग्नं गोधूलिकं शुभमिति"। अतएव भूपालवल्लभे "विप्रेषु घटिकाऽलाभे दातव्यं गोरजो बुधैः। संकीर्णे गोरजः शस्तं परेषु द्वितयं शुभमिति" तत्र गोधूलिलग्नकालसमयः केशवार्केणोक्तः "अस्तोभयत्र घटिकादलमिष्टमाहुर्गोधूलिकं तदमरमखेऽपि चार्धबिम्बादिति" केचित्तु यावद्दिनान्ते दिशि पश्चिमायां पश्येत्तृतीयं रविबिम्बभागम्। तस्मात्परं नाडीकयुग्ममेके गोधूलिकाख्यं मुनयो वदन्तीति, तदेतयोः पक्षयोर्देशाचारं व्यवस्था पी०धा०।

"पिण्डीभूते दिनकृति हेमन्तर्तौ स्यादर्द्धास्ते तपसमये गोधूलिः। संपूर्णास्ते जलधरमालाकाले त्रेधा योज्या सकलशुभे कार्यादौ" मु०चि०। "हेमन्ताख्ये ऋतौ हेमन्तशब्देन शीतकाल उपलक्ष्यते मार्गशीर्षादिमासचतुष्टये इत्यर्थः तत्र दिनकृति सूर्ये पिण्डीभूते व्योदनगोलकवद्दृश्ये सन्ध्यायां नीहाराच्छादितत्वेन निःप्रभे इत्यर्थः। तस्मिन् समये गोधूलिर्वा तथा तपसमये उष्णकाले चैत्रादिमासचतुष्टये सूर्येऽर्द्धास्ते अर्द्धबिम्बस्य दृश्यत्वे च सति गोधूलिः। जलधरमेघास्तेषां मालासमूहस्तस्योत्पादके काले वर्षाकाले श्रावणादिमासचतुष्टये सूर्ये संपूर्णास्तेऽदर्शनं गते सति गोधूलिः। केवलमियं न विवाहे एव किन्तु सकलशुभे समस्तशुभकार्यादिष्वपि ज्ञेया। यदाह वराहः "गोधूलिं त्रिविधां वदन्ति मुनयो नारीविवाहादिके हेमन्ते शिशिरे प्रयाति मृदुतां पिण्डीकृते भास्करे। ग्रीष्मेऽर्द्धास्तमिते वसन्तसमये भानौ गते दृश्यतां सूर्ये चास्तमुपागते भगवति प्रावृट्शरत्कालयोरिति"। पी०धा०।

अथ गोधूलिसमयेऽवश्यवर्ज्यदोषाः "अस्तं याते गुरुदिवसे सौरे सार्के लग्नान्मृत्यौ रिपुभवने लग्ने चन्द्रे। कन्यानाशस्तनुमदमृत्युस्थे भौमे वोढुर्लाभे धनसहजे चन्द्रे सौख्यम्" मु०चि०।

"गोधूलिरित्यनुवर्त्तते गुरुदिवसे बृहस्पतिवारे, सूर्येऽस्तं याते सूर्यास्तादनन्तरं गोधूलिः शुभा स्यात् न तु सूर्यास्तात्पूर्वमर्द्धघटिकागोधूलिलग्नं कार्यमर्यामसद्भावात्। तथा सौरे शनिवारे सार्के सूर्यदर्शनसहिते गोधूलिः शुभा। न तु सूर्यास्तादनन्तरं कुलिकसद्भावात्। उपलक्षणत्वात् क्रान्तिसाम्यमपि त्याज्यम् तथा लग्नात्तात्कालीनलग्नान्मृत्यावष्टमे रिपुभवने षष्ठे वा लग्न एव वा चन्द्रे सति कन्यानाशः स्यात्। तदुक्तं दैवज्ञ० "कुलिकक्रान्तिसाम्यञ्च मूर्त्तौ षष्ठाष्टमः शशी। पञ्च गोधूलिके त्याज्या अन्ये दोषाः शुभावहाः"। अत्र कुलिकशब्देन तत्कालसम्भाव्यार्द्धयामाख्यो वारदोषो गृह्यते अन्येषामसम्भव एव। लग्नस्थे मदनस्थे मृत्युस्थे वा भौमे सति वोढुर्वरस्य नाशो भवति तदुक्तं ज्योतिःसंहितासारे "षष्ठेऽष्टमे मूर्त्तिगते शशाङ्के गोधूलिके मृत्युमुपैति कन्या"। कुजेऽष्टमे मूर्त्तिगतेऽथवास्ते वरस्य नाशं प्रवदन्ति गर्गाः" अन्योऽपि विशेषस्तत्रैव "षष्ठाष्टमे चन्द्रजचन्द्रजीवे क्षीणोडुते वा भृगुनन्दने वा। मूर्तौ च चन्द्रे नियमेन मृत्युर्गोधूलिकं स्यादिह वर्जनीयमिति"। "धिष्ण्याङ्करयुतन्त्याज्यं मूर्त्तौ षष्ठाष्टमः शशी। गोरजस्तत्प्रशंसन्ति सन्तः शनिदिनं विनेति"। उक्तञ्च "केशवार्केण गोधूलिकेऽपि विधुरष्टमषष्ठमूर्त्तौ शस्तोचयन्ति तदघो स्वरुचिप्रपन्नाः। पक्षाग्रशुद्धिमयमेव विवाहधिष्ण्यैर्यथादिदं सततमस्तगते पतङ्गे। नांशो न लग्नमिह दृष्टयुतं स्वभर्त्ता नार्कीरवीरितमृणामपि सङ्गभङ्गः। किञ्चन्द्रवारभयमेकमिहास्तु किञ्च नात्र प्रमाणवचनद्वितमपि श्रुतं नः"। सार्के शनौ विदविचित

शिखण्डिसूनौतत्केशलाङ्गुलिकयामदलोपलम्भादिति"। चन्द्रे लाभस्थे वित्ते द्वितीयस्थे सहजस्थे वा सति स्त्रीपुंसयोः सौख्यं स्यात्। तदुक्तं संहितासारे "यत्रैकादशगश्चन्द्रो द्वितीयो वा तृतीयगः। गोधूलिका स विज्ञेया शेषा धूलिरिति स्मृतेति" पी॰धा॰

ज्यो॰त॰मासभेदे फलभेदः। "मार्गे गोधूलियोगे प्रभवति विधवा, माघमासे तथैव,पुत्रायुर्धनयौवनेन सहिता कुम्भे स्थिते भास्करे। वैशाखे शुभदा, प्रजावलवती, ज्यैष्ठे पतेर्मानदा आषाढे धनधान्यपुत्रबहुला, पाणिग्रहे कन्यका।

अथ विवाहादौ वर्ज्यदोषसमष्टिः "उत्पातान् सह पातदग्धतिथिभिर्दुष्टांश्च योगांस्तथा चन्द्रेज्योशनसामथास्तमयनं तिथ्याः क्षयर्द्धी तथा। गण्डान्तञ्च सविष्टि संक्रमदिनं तन्वंशपास्तं तथा तन्वंशेशविधूनथाष्टरिपुगान् पापस्य वर्गांस्तथा। सेन्दुक्रूरखगोदयांशमुदयास्ताशुद्धिचण्डायुधम्। खार्जूरं दशयोगयोगसहितं जामित्रलत्ताव्यधम्। बाणोपग्रहपापकर्तरि तथा तिथ्यृक्षयोगोत्थितं दुष्टं योगमथार्द्धयामकुलिकाद्यान् वारदोषानपि। क्रूराक्रान्तविमुक्तभं ग्रहणभं यत् क्रूरगन्तव्यभं त्रेधोत्पातहतञ्च केतुहतभं सन्ध्योदितम्भं तथा। तद्वच्च ग्रहभिन्नयुद्धगतभं सर्वानिमान् सन्त्यजेदुद्वाहे शुभकर्मसु ग्रहकृतान् लग्नस्य दोषानपि" मु॰चि॰। "उत्पातादीन्दोषान् उद्वाहे यज्ञोपवीतादिशुभकर्मसु च सन्त्यजेदिति तृतीयश्लोकेनान्वयः। उद्वाहग्रहणं गोबलीवर्द्दन्यायेन मुख्यत्वसूचनार्थम्। उत्पातान् त्रिविधान् दिव्यान्तरिक्षभौमान् लक्षणया तत्सम्बन्धिनः सप्त वर्ज्यदिवसांस्त्यजेत्। यदाह गुरुः "दिग्दाहे वा महादारुपतने चाम्बुवर्षणे। उल्कापाते महावाते महाशनिनिपातने। अनभ्राशनिपाते च भूकम्पे परिवेषयोः। ग्रामोत्पाते शिवाशब्दे दुर्निमित्ते नभोभने। केतवो यत्र दृश्यन्ते स धूमा वा पृथग्विधाः। चन्द्रसूर्य्यग्रहे चैव वर्जयेद्दिनसप्तकमिति"। पातो महापातः क्रान्तिसाम्यमिति यावत् तद्गणितप्रसिद्धम्। दग्धतिथयः "चापान्त्यगे गोघटगे इत्यादिनोक्ताः एतैः सह त्यजेदिति सम्बन्धः तथा दुष्टान् योगान् व्यतीपातवैधृतिपरिघार्द्धादीन्। अथ चन्द्रेज्योशनसां चन्द्रगुरुशुक्राणाम् अस्तमयनमस्तं च तिथ्याः क्षयर्द्धी तिथिक्षयं तिथिवृद्धिं च पुनर्गण्डान्तं नक्षत्रतिथिलग्नैः त्रिविधं विष्टिर्भद्रा संक्रमदिनं तद्दिवसे वर्ज्या घटिकाः, अयनेषु विषुवेषु च पूर्वापरं त्रिदिनमिति विशेषोऽध्येयः। ताभ्यां सहितमिति पूर्वेण सम्बन्धः। तन्वंशपास्तम् अंशो लग्नगतस्थितनवांशः तौ पातः तन्वंशपौ तयोरस्तं लग्नाधीशास्तं लग्नगतनवांशाधीशास्तं चेत्यर्थः तथा तन्वंशेशविधून् लग्ननवांशेशचन्द्रान् अष्टरिपुगान् अष्टमगतान् षष्ठस्थान् इन्दुश्च क्रूरखगश्चेन्दुक्रूरखगौ उदयो लग्नञ्च अंशो नवांशश्च उदयांशमिति समाहारद्वन्द्वैकवचनं इन्दुक्रूरखगाभ्यां सहितमुदयांशम्। इन्दुसहितं लग्नं लग्नांशं च क्रूरग्रहेण सहितं लग्नं लग्नांशं चेत्यर्थः। पापस्येत्येकत्वमविवक्षितं पापानां वर्गानित्यर्थः उदयाशुद्धिरस्ताशुद्धिश्च उदयास्ताशुद्धिः चण्डायुधम् "चण्डायुधं हर्षणवैधृतिसाध्येत्यादिनोक्तम्। खार्जूरं व्याघातगण्डेत्यादिनोक्तं दशयोगः "सूर्यर्क्षचन्द्रर्क्षयुतेरित्यादिनोक्तः, योगो ग्रहयुतिश्च तत्सहितं जामित्रलत्ताव्यधम् समाहारद्वन्द्वैकवचन जामित्र द्विविधं लग्नजामित्रं चन्द्रजामित्रञ्च लग्नाच्चन्द्रेत्यादिनोक्तं लत्ता "शराङ्कपूर्णेन्दुमिता" इत्युक्ता व्यधम् वेधं सप्तशलाकोक्तं पञ्चशलाकोक्तञ्च। बाणाः पञ्चकम् उपग्रहः प्रसिद्धः शराष्टदिक् शक्रेत्यादिः पापकर्त्तरी क्रूरग्रहकर्त्तरी समाहारद्वन्द्वैकवचनं तिथ्यृक्षवारोत्थितं दुष्टं योगं तिथिनक्षत्रवारैरुत्थितं उत्पन्नं दुष्टयोगम्। तथा तिथिनक्षत्रोद्भवं वैश्वमादिमे इत्यादि। तिथिवारोद्भवं सूर्ये शरश्चेत्यादिनक्षत्रवारोद्भवं याम्यत्वाष्ट्रमित्यादि अनेकं दुष्टयोगम् अथार्द्धयामकुलिकाद्यान् वारदोषानपि अष्टार्धम् आदिशब्देन दुर्मुहूर्त्तादिकान्। क्रूराक्रान्तविमुक्तभं क्रूराक्रान्तं क्रूरविमुक्तञ्च भं ग्रहणभं यस्मिन् भे सूर्य्यचन्द्रोपरागो जातस्तद्भं यत् क्रूरगन्तव्यभं क्रूरेण जिगमिषितं यद्भं नक्षत्रं त्रेधोत्पातहतञ्च भम्। त्रिविधोत्पातैर्दिव्यभौमान्तरिक्षैर्हतं तन्मासषट्कं त्याज्यमेवं ग्रहणनक्षत्रमपि। केतुहतभञ्च केतुना हतम्भञ्च। सन्ध्योदितम्भम् अत्र सन्ध्याशब्देन सायंसन्ध्या गृह्यते। तत्रोदितं तत्काले यन्नक्षत्रस्य क्षितिजे उदयस्तत् सूर्य्यर्क्षाच्चतुर्दशं नक्षत्रमित्यर्थः। न तु प्रातःसन्ध्यायामत्र हि सूर्य्येणाक्रान्तभुक्तान्यतरत्वसम्भवात्। यदुक्तं केशवार्केण "तदर्कितारकतोऽपि चतुर्दशं तदखिलेऽपि खिलं शुभकर्मणीति"। तारकशब्दः क्लीबेऽपि। ननूपग्रहत्वादेव निषेधे सिद्धे पुनर्दोषाभिधानं किमर्थम् उच्यते उपग्रहर्क्षदोषस्य सत्यावश्यकत्वे कुरुबाह्लिकदेशविषयत्वाच्चतुर्दशस्य च दोषाधिक्यसूचनादावश्यकेऽपि सर्वदेशविषयत्वेन निषेधो यथा स्यादिति। ग्रहभिन्नयुद्धगतभं ग्रहेण भेदितं ग्रहयुद्धगतञ्च यस्मात्

निषिद्धं तथा षड्दशतान् लग्नस्य दोषान्। "व्यये शनिः खेऽवनिजस्त्वित्यादिकान् लग्नसम्बन्धिदोषान् सन्त्यजेत्"। पी॰धा॰। ज्यो॰त॰ ज्योतिःसारसंग्रहवाक्यम् "विवाहे तु दिवाभागे कन्या स्यात् पुत्रवर्जिता। विवाहानलदग्धा सा नियतं स्वामिघातिनी" एतद्वचनस्यार्षमूलानुपलम्भात् पाश्चात्यादिभिरप्रामाणिकत्वमुररीकृत्य दिवाऽपि विवाह आचर्यते। कन्यादानं च रात्रावपि कर्त्तुं शक्यते यथाह ज्यो॰त॰ भारतम् "रात्रौ दानं न शंसन्ति विना चाभयदक्षिणाम्। विद्यां कन्यां द्विजश्रेष्ठाः दीपमन्नं प्रतिश्रयम्"। तत्रैव व्यासः "रिक्तासु विधवा कन्या दर्शेऽपि स्याद्विवाहिता। शनैश्चरदिने चैव यदा रिक्ता तिथिर्भवेत्। तस्यां विवाहिता कन्या पतिसन्तानवर्द्धिनी" इत्युक्तेः शनिवारे रिक्तायामपि विवाह इति गौडाः। पाश्चात्यादिभिरेतद्वचनममूलकमेवेति मत्वा शनियुक्तरिक्तायां न तदाचर्य्यते। अथ विवाह्यस्त्रीशुभाशुभलक्षणान्युच्यन्ते। वृह॰ ७०अ॰ "स्निग्धोन्नताग्रतनुताम्रनखौ कुमार्य्याः पादौ समोपचितचारुनिगूढगुल्फौ। श्लिष्टाङ्गुली कमलकान्तितलौ च यस्यास्तामुद्वहेद्यदि भुवोऽधिपतित्वमिच्छेत्। मत्स्याङ्कुशाब्जयववज्रहलासिचिह्नावस्वेदनौ मृदुतलौ चरणौ प्रशस्तौ। जङ्घे च रोमरहिते विशिरे सुवृत्ते जानुद्वयं सममनुल्बणसन्धिदेशम्। ऊरू घनौ करिकरप्रतिमावरोमावश्वत्थपत्रसदृशं विपुलं च गुह्यम्। श्रोणीललाटमुरुकूर्म्मसमुन्नतं च गूढो मणिश्च विपुलां श्रियमादधाति। विस्तीर्णमांसोपचितो नितम्बो गुरुश्च धत्ते रशनाकलापम्। नाभिर्गभीरा विपुलाङ्गनानां प्रदक्षिणावर्त्तगता प्रशस्ता। मध्यं स्त्रियास्त्रिवलिनाथमरोमशं च वृत्तौ घनावविषमौ कठिनावुरस्यौ। रोमापवर्जितमुरो मृदु चाङ्गनानां ग्रीवा च कम्बुनिचितार्थसुखानि धत्ते। बन्धुजीवकुसुमोपमोऽधरो मांसलो रुचिरबिम्बरूपभृत्। कुन्दकुड्मलनिभाः समा द्विजा योषितां पतिसुखामितार्थदाः। दाक्षिण्ययुक्तमशठं परपुष्टहंसवल्गु प्रभाषितमदीनमनल्पसौख्यम्। नासा समा समपुटा रुचिरा प्रशस्ता दृग्नीलनीरजदलद्युतिहारिणी च। नो सङ्गते नातिपृथू न लम्बे शस्ते भ्रुवौ बालशशाङ्कवक्रे। अर्द्धेन्दुसंस्थानमरोमशं च शस्तं ललाटं न नतं न तुङ्गम्। कर्णयुग्ममपि युक्तमांसलं शस्यते मृदु समं समाहितम्। स्निग्धनीलमृदुकुञ्चितैकजा मूर्द्धजाः सुखकराः समं शिरः। भृङ्गारासनवाजिकुञ्जररथश्रीवृक्षयूपेषुभिर्मालाकुण्डलचामराङ्कुशयवैः शैलैर्ध्वजैस्तोरणैः। मत्स्यस्वस्तिकवेदिकाव्यजनकैः शङ्खातपत्राम्बुजैः पादे पाणितलेऽपि वा युवतयो गच्छन्ति राज्ञीपदम्। निगूढमणिबन्धनौ तरुणपद्मगर्भोपमौ करौ नृपतियोषितां तनुविकृष्टपर्वाङ्गुली। न निम्नमति नोन्नतं करतलं सुरेखान्वितं करोत्यविधवां चिरं सुतसुखार्थसम्भोगिनीम्। मध्याङ्गुलिं या मणिबन्धनोत्था रेखा गता पाणितलेऽङ्गनायाः। ऊर्ध्वस्थिता पादतलेऽथवा या पुंसोऽथवा राज्यसुखाय सा स्यात्। कनिष्ठिकामूलभवा गता या प्रदेशिनीमध्यमिकान्तरालम्। करोति रेखा परमायुषः सा प्रमाणमूना तु तदूनमायुः। अङ्गुष्ठमूले प्रसवस्य रेखाः पुत्रा बृहत्यः प्रमदास्तु तन्व्यः। अच्छिन्नदीर्घा बृहदायुषां ताः स्वल्पायुषां छिन्नलघुप्रमाणाः। इतीदमुक्तं शुभमङ्गनानामतो विपर्य्यस्तमनिष्टमुक्तम्। विशेषतोऽनिष्टफलानि यानि समासतस्तान्यनुकीर्त्तयामि। कनिष्ठिका वा तदनन्तरा वा महीं न यस्याः स्पृशती स्त्रियाः स्यात्। गताऽथवाङ्गुष्ठमतीत्य यस्याः प्रदेशिनी सा कुलटातिपापा। उद्बद्धाभ्यां पिण्डिकाभ्यां शिराले शुष्के जङ्घे रोमशे चातिमांसे। वामावर्त्तं निम्नमल्पं च गुह्यं कुम्भाकारं चोदरं दुःखितानाम्। ह्रस्वयाऽतिनिःस्वता दीर्घया कुलक्षयः। ग्रीवया पृथूत्थया योषितः प्रचण्डता। नेत्रे यस्याः केकरे पिङ्गले वा सा दुःशीला श्यावलोलेक्षणा च। कूपौ यस्या गण्डयोश्च स्मितेषु निःसन्दिग्धं बन्धकीं तां वदन्ति। प्रविलम्बिनि देवरं ललाटे श्वशुरं हन्त्युदरे स्फिचोः पतिं च। अतिरोमचयान्वितोत्तरोष्ठी न शुभा भर्त्तुरतीव या च दीर्घा। स्तनौ सरोमौ मलिनोल्बणौ च क्लेशं दधाते विषमौ च कर्णौ। स्थूलाः करालाः विषमाश्च दन्ताः क्लेशाय चौर्य्याय च कृष्णमांसाः। क्रव्यादरूपैर्वृककाककङ्कसरीसृपोलूकसमानचिह्नैः। शुष्कैः शिरालैर्विषमैश्च हस्तैर्भवन्ति नार्य्यः सुखवित्तहीनाः। या तूत्तरोष्ठेन समुन्नतेन रूक्षाग्रकेशी कलहप्रिया सा। प्रायो विरूपासु भवन्ति दोषा यत्राकृतिस्तत्र गुणा वसन्ति। पादौ सगुल्फौ प्रथमं प्रदिष्टौ जङ्घे द्वितीयं च सजानुचक्रे। मेढ्रोरुमुष्कं च ततस्तृतीयं नाभिः कटिश्चेति चतुर्थमाहुः। उदरं कथयन्ति पञ्चमं हृदयं षष्ठमतः स्तनान्वितम्। अथ सप्तममंसजत्रुणी कथयन्त्यष्टममोष्ठकन्धरे। नवमं नयने च सभ्रुणी सललाटं दशमं शिरस्तथा। अशुभेष्वशुभं दशाफलं चरणाद्येषु शुभेषु शोभनम्"।

काशीखण्डे २७ अध्याये स्त्रीणां शुभाशुभलक्षणान्युक्तानि यथा“सदा स्वह्नो सुखं भुङ्क्ते स्त्री लक्षणवती यदि । अतः सुलक्षणद्रव्यर्थमादौ लक्षणमोक्षयेत् । वपुरावर्त्तो गन्धश्च छाया सत्त्वं स्वरो गतिः । वर्णश्चेत्यष्टधा प्रोक्ता बुधैर्लक्षणभूमिका । आपादतलमारभ्य यावन्मौलिरुहं क्रमात् । शुभाशुभानि वक्ष्यामि लक्षणानि मुने! शृणु । आदौ पादतले रेखा ततोऽङ्गुष्ठाङ्गुलीनखाः । पृष्ठं गुल्फद्वयं पार्ष्णी जङ्घे रोमाणि जानुनी । ऊरू कटिर्नितम्बः स्फिग् भगो जघनवस्तिके । नाभिः कुक्षिद्वयं पार्श्वोदरमध्यवलित्रयम् । रोमाणि हृदयं वक्षो वक्षोजद्वयचूचुकम् । जत्रु स्कन्धांसकक्षादोर्मणिबन्धकरद्वयम् । पाणिपृष्ठं पाणितलं रेखाङ्गुष्ठाङ्गुलीनखाः । पृष्ठं कृकाटिकाकण्ठे चिबुकञ्च हनुद्वयम् । कपोलवक्त्रमधरोत्तरौष्ठद्विजजिह्विकाः । घण्टिकातालुहसितं नासिका क्षुतमक्षिणी । पक्ष्मभ्रूकर्णभालानि मौलिसीमन्तमौलिजाः । षष्टिः षडुत्तरा योषिद् ज्ञेया लक्षणसत्खनिः । स्त्रीणां पादतलं स्निग्धं मांसलं मृदुलं समम् । अस्वेदमुष्णमरुणं बहुभोगोचितं स्मृतम् । रूक्षं विवर्णं परुषं खण्डितप्रतिबिम्बकम् । शूर्पाकारं विशुष्कं च दुःखदौर्भाग्यसूचकम् । चक्रस्वस्तिकशङ्खाब्जध्वजमीनातपत्रवत् । यस्याः पादतले रेखा सा भवेत् क्षितिपाङ्गना । भवेदखण्डभोगाढ्या या-मध्याङ्गुलिसङ्गता । रेखाखुसर्पकाकाभा दुःखदारिद्र्यसूचिका । उन्नतो मांसलोऽङ्गुष्ठो वर्त्तुलोऽतुलभोगदः । वक्रो ह्रस्वश्च चिपिटः सुखसौभाग्यभञ्जकः । विधवा विपुलेन स्याद्दीर्घाङ्गुष्ठेन दुर्भगा । मृदवोऽङ्गुलयः शस्ता घनावृत्ताः समुन्नताः । दीर्घाङ्गुलीभिः कुलटा कृशाभिरति निर्धना । ह्रस्वायुष्या च ह्रस्वाभिर्भुग्नाभिर्भुग्नवर्त्तिनी । चिपिटाभिर्भवेद्दासी विरलाभिर्दरिद्रिणी । परस्परं समारूढा यदाङ्गुल्यो भवन्ति हि । हत्वा बहूनपि पतीन् परप्रेष्या तदा भवेत् । यस्याः पथि समायान्त्या रजोभूमेः समुच्छलेत् । सा पांशुला प्रजायेत कुलत्रयविनाशिनी । यस्याः कनिष्ठिका भूमिं न गच्छन्त्याः परिस्पृशेत् । सा निहत्य पतिं पापा द्वितीयं कुरुते पतिम् । अनामिका च मध्या च यस्या भूमिं न संस्पृशेत् । पतिद्वयं निहन्त्याद्या द्वितीया च पतित्रयम् । पतिहीनत्वकारिण्यौ हीने ते-द्वे इमे यदि । प्रदेशिनी भवेद्यस्या अङ्गुष्ठव्यतिरेकिणी । कन्यैव कुलटा सा स्यादेषएव विनिश्चयः । स्निग्धाः समुन्नतास्ताम्रा वृत्ताः पादनखाः शुभाः । राज्ञीत्वसूचकं स्त्रीणां पादपृष्ठं समुन्नतम् । अस्वेदमशिराढ्यं च मसृणं मृदुमांसलम् । दरिद्रा मध्यनम्रेण शिरालेन सदाऽध्वगा । रोमाढ्येन भवेद्दासी निर्मांसेन च दुर्भगा । गूढौ गुल्फौ शुभायोक्ताविशिरालौ सुवर्त्तुलौ । श्लथौ विपिनौ हस्वौ स्यातां दौर्भाग्यसूचकौ । समपार्ष्णिः शुभा-नारी पृथुपार्ष्णिश्च दुर्भगा । कुलटोन्नतपार्ष्णिश्च दीर्घपार्ष्णिश्च दुःखभाक् । रोमहीने समे स्निग्धे यज्जङ्घे क्रमवर्त्तुले । सा राजपत्नी भवति विशिरे सुमनोहरे । एकरोमा राजपत्नी द्विरोमापि सुखास्पदम् । त्रिरोमा रोमकूपेषु भवेद्वैधव्यदुःखभाक् । वृत्तं पिशितसंलग्नं जानुयुग्मं प्रशस्यते । निर्मांसं स्वैरचारिण्या दरिद्राया विश्लथम् । विशिरैः करभाकारैरूरुभिर्मसृणैः घनैः । सुवृत्तै रोमरहितैर्भवेयुर्भूपवल्लभाः । वैधव्यं रोमशैरुक्तं दौर्भाग्यं चिपिटैरपि । मध्यच्छिद्रैर्महादुःखं दारिद्र्यं कठिनत्वचैः । चतुर्विंशत्यङ्गुलैः शस्ता कटिर्विंशति संयुतैः । समुन्नतनितम्बाढ्या चतुरस्रा मृगीदृशाम् । विनता चिपिटा दीर्घा निर्मांसा सङ्कटा कटिः । ह्रस्वरोमयुता नार्य्या दुःखवैधव्यसूचिका । नितम्बबिम्बो नारीणामुन्नतो मांसलः पृथुः । महाभोगाय संप्रोक्तस्तदन्योऽसुखाय च मतः । कपित्थफलवद्वृत्तौ मृदुलौ मांसलौ घनौ । स्फिचौ वलिविनिर्मुक्तौ रतिसौख्यप्रवर्द्धनौ । शुभः कमठपृष्ठाभो गजस्कन्धोपमो भगः । वामोन्नतस्तु कन्याजः पुत्रजो दक्षिणोन्नतः । आखुरोमा गूढमांसः सुश्लिष्टः संहतः पृथुः । तुङ्गः कमलवर्णाभः शुभोऽश्वत्थदलाकृतिः । कुरङ्गखुररूपोऽयं चुल्लीकोदरसन्निभः । रोमशो विवृतास्यश्च दृश्यनासोऽतिदुर्भगः । शङ्खावर्त्तो भगो यस्याः सा गर्भमिह नेच्छति । चिपिटः कर्पराकारः किङ्करीपददो भगः । वंशवेतसपत्राभो गजरोमोपमासिकः । विकटः कुटिलाकारो लम्बगल्लस्तथा शुभः । भगस्य भाले जघनं विस्तीर्णं तुङ्गमांसलम् । मृदुलं मृदुलोमाढ्यं दक्षिणावर्त्तमीक्षितम् । वामावर्त्तं च निर्मांसं भुग्नं वैधव्यसूचकम् । सङ्कटस्फुटं रूक्षं जघनं दुःखदं सदा । वस्तिः प्रशस्ता विपुला मृद्वी स्तोकसमुन्नता । रोमशा च शिराला च रेखाङ्का नैव शोभना । गम्भीरा दक्षिणावर्त्ता नाभी स्यात् सुखसम्पदे । वामावर्त्ता समुत्ताना व्यक्तग्रन्थिर्न शोभना । सूते सुतान् बहून्नारी पृथुकुक्षिः सुखास्पदम् । क्षितीशं जनयेत् पुत्रं मण्डूकाभेन कुक्षिणा । उन्नतेन वलीभाजा सावर्त्तेनापि कुक्षिणा । वन्ध्या प्रव्रजिता दासी

कूर्माद्योषा भवेदिह । समैः समांसैर्मृदुभिर्योषिन्मग्नास्थिभिः शुभैः । पार्श्वैः सौभाग्यसुखयोर्निधानं स्यादसंशयम् । यस्या दृश्यशिरे पार्श्वे उन्नते रोमसंयुते । निरपत्या च दुःशीला सा भवेद्दुःखशेवधिः । उदरेणातितुच्छेन विशिरेण मृदुत्वचा । योषिद्भवति भोग्याढ्या नित्यमिष्टान्नसेविनी । कुम्भाकारं दरिद्राया जठरं च मृदङ्गवत् । कुष्माण्डाभं यवाभं च दुःपूरं जायते स्त्रियाः । सुविशालोदरी नारी निरपत्या च दुर्भगा । प्रलम्बजठरा हन्ति श्वशुरं चापि देवरम् । मध्यक्षामा च सुभगा भोगाढ्या सबलित्रया । ऋज्वी तन्वी च रोमाली यस्याः सा नर्मशर्मभूः । कपिला जटिला स्थूला व्युच्छिन्ना रोमराजिका । वैरवैधव्यदौर्भाग्यं विदध्यादिह योषिताम् । निर्लोम हृदयं यस्याः समं निम्नत्ववर्जितम् । ऐश्वर्यं चाप्यवैधव्यं प्रियप्रेम च सा लभेत् । विस्तीर्णहृदया योषा पुंश्चली निर्दया तथा । उद्भिन्नरोमहृदया पतिं हन्ति विनिश्चितम् । अष्टादशाङ्गुलततमुरः पीवरमुन्नतम् । सुखाय, दुःखाय भवेद्रोमशं विषमं पृथु । घनौ वृत्तौ दृढौ पीनौ समौ शस्तौ पयोधरौ । स्थूलाग्रौ विरलौ शुष्कौ वामोरूणां न शर्मदौ । दक्षिणोन्नतवक्षोजा पुत्रिणीष्वग्रणीर्मता । वामोन्नतकुचा सूते कन्यां सौभाग्यसुन्दरीम् । अरघट्टघटीतुल्यौ कुचौ दौःशील्यसूचकौ । पीवरास्यौ सान्तरालौ पृथूपान्तौ न शोभनौ । मूले स्थूलौ क्रमकृशावग्रे तीक्ष्णौ पयोधरौ । सुखदौ पूर्वकाले तु पश्चादत्यन्तदुःखदौ । सुभगं चूचुकयुगं यस्तं श्यामं सुवर्त्तुलम् । अन्तर्मग्नं च दीर्घं च कृशं क्लेशाय जायते । पीवराभ्यां च बाहुभ्यां धनधान्यनिधिर्वधूः । स्फुटास्थिभ्यां च निम्नाभ्यां विषमाभ्यां दरिद्रिणी । अबन्धावनतौ स्कन्धावदीर्घावकृशौ शुभौ । वक्रौ स्थूलौ च रोमाढ्यौ प्रेष्यवैधव्यसूचकौ । निगूढसन्धी सस्ताग्रौ शुभावंसौ सुसंहतौ । वैधव्यदौ समुन्नाथौ निर्मांसावतिदुःखदौ । कक्षे सुसूक्ष्मरोमे च तुङ्गे स्निग्धे च मांसले । शस्ते, न शस्ते गम्भीरे शिराले स्वेदमेदुरे । बाला दोषौ सुनिर्दोषौ गूढास्थिग्रन्थिकोमलौ । विशिरौ च विरोमाणौ सरलौ हरिणीदृशाम् । वैधव्यं स्थूलरोमाणौ ह्रस्वौ दौर्भाग्यसूचकौ । परिक्लेशाय नारीणां परिदृश्यशिरौ भुजौ । अम्भोजमुकुलाकारमङ्गुष्ठाङ्गुलिसम्मुखम् । हस्तद्वयं मृगाक्षीणां बहुभोगाय जायते । मृदु मध्योन्नतं रक्तं तलं पाण्योररन्ध्रकम् । प्रशस्तं शस्तरेखाढ्यमल्परेखं शुभाश्रयम् । विधवा बहुरेखेण विरेखेण दरिद्रिणी । भिक्षुकी शुषिराढ्येन नारी करतलेन वै । विरोम विशिरं यस्याः पाणिपृष्ठं समुन्नतम् । वैधव्यहेतु रोमाढ्यं निम्नाँसं स्नायुमत् त्यजेत् । व्यक्ताव्यक्ता गभीरा च स्निग्धा पूर्णा च वर्त्तुला । कररेखाङ्गनायाः स्याच्छुभा भाग्यानुसारतः । मत्स्येन सुभगा नारी स्वस्तिकेन च सुप्रजाः । पद्मेन भूपतेः पत्नी जनयेद्भूपतिं सुतम् । चक्रवर्त्तिस्त्रियाः पाणौ नन्द्यावर्त्तः प्रदक्षिणः । शङ्खातपत्रकमठा देवमातृत्वसूचकाः । तुलामानाकृती रेखा वणिक्पत्नीत्वहेतुका । गजवाजिवृषाकाराः करे वामे मृगीदृशाम् । रेखाः प्रासादवज्राभा सूयुस्तीर्थकराः शुभम् । कृषीवलस्य पत्नी स्याच्छकटेन युगेन वा । तोमराङ्कुशकोदण्डै राजपत्नी भवेद् ध्रुवम् । अङ्गुष्ठमूलान्निर्गत्य रेखा याति कनिष्ठिकाम् । यदि सा पतिहन्त्री स्याद्दूरतस्तां त्यजेत् सुधीः । त्रिशूलासिगदाशक्तिदुन्दुभ्याकृतिरेखया । नितम्बिनी कीर्त्तिमती त्यागेन पृथिवीतले । कङ्कजम्बूकमण्डूकवृकवृश्चिकभोगिनः । रासभोष्ट्रबिडालाः स्युः करस्था दुःखदाः स्त्रियाः । शुभदः सरलाङ्गुष्ठो वृत्तो वृत्तनखो मृदुः । अङ्गुल्यश्च सुपर्वाणो दीर्घा वृत्ताः क्रमात् कृशाः । चिपिटाश्चिपुटा रूक्षाः पृष्ठरोमयुजोऽशुभाः । अतिह्रस्वाः कृशा वक्रा विरला रोगहेतवः । दुःखायाङ्गुलयः स्त्रीणां बहुपर्व्वसमन्विताः । अरुणाः सशिखास्तुङ्गाः करजाः सुदृशां शुभाः । निम्ना विवर्णाः शुक्त्याभाः पीता दारिद्र्यदायकाः । नखेषु बिन्दवः श्वेताः प्रायः स्युः स्वैरिणीस्त्रियाः । पुरुषा अपि जायन्ते दुःखिनः पुष्पितैर्नखैः । अन्तर्निमग्नवंशास्थिः पृष्ठिः स्यान्मांसला शुभा । पृष्ठेन रोमयुक्तेन वैधव्यं लभते ध्रुवम् । भुग्नेन विनतेनापि सशिरैः नापि दुःखिता । ऋज्वी कृकाटिका श्रेष्ठा समांसा च समुन्नता । शुष्का शिराला लोमाढ्या विशाला कुटिलाऽशुभा । मांसलो वर्त्तुलः कण्ठः प्रशस्तश्चतुरङ्गुलः । यस्या ग्रीवा त्रिरेखाढ्या त्वव्यक्तास्थिसुसंहता । निर्मांसा चिपिटा दीर्घा स्फुटा न शुभप्रदा । स्थूलग्रीवा च विधवा वक्रग्रीवा च किङ्करी । वन्ध्या हि चिपिटग्रीवा ह्रस्वग्रीवा च निःसुता । चिबुकं द्व्यङ्गुलं यस्याः वृत्तं पीनं सुकोमलम् । स्थूलं द्विधा संविभक्तमायतं रोमशं त्यजेत् । हनुश्चिबुकसंलग्ना निर्लोमा सुघना शुभा । वक्रा स्थूला कृशा दीर्घा रोमशा न शुभप्रदा । यस्यौ कपोलौ वामाक्ष्याः पीनौ वृत्तौ समुन्नतौ । रोमशौ परुषौ

निम्नौ निर्मांसौ परिवर्ज्जयेत् । समं समांसं सुस्निग्धं स्वामोदं वर्त्तुलं सुखम् । अनेनैवदनच्छायं धन्यानामिह जायते । पाटलो वर्त्तुलः स्निग्धो रेखाभूषितमध्यभूः । सीमन्तिनीनामधरो धरानाथप्रिया भवेत् । कृशः प्रलम्बः स्फुटितो रूक्षो दौर्भाग्यसूचकः । श्यावः स्थूलोऽधरोष्ठः स्याद्वैधव्यकलहप्रदः । मसृणोमत्तकाशिन्याश्चोत्तरोष्ठः सुभोगदः । किञ्चिन्मध्योन्नतोऽ रोमा विपरीतो विरुद्धकृत् । गोक्षीरसन्निभाः स्निग्धा द्वात्रिंशद्दशनाः शुभाः । अधस्तादुपरिष्टाच्च समस्तोकसमन्विताः । पीताः श्यावाश्च दशनाः स्थूला दीर्घा द्विपङ्क्तयः । शुक्त्याकाराश्च विरला दुःखदौर्भाग्यकारिणः । अधस्तादधिकैर्दन्तैर्भर्त्तारं भक्षयेत् स्फुटम् । पतिहीना च विकटैः कुलटा विरलैर्भवेत् । जिह्वेष्टमिष्टभोक्त्री स्याच्छोणामृद्वी तथा सिता । दुःखाय मध्यसंकीर्णा पुरोभागसविस्तरा । सितया तोयमरणं श्यामया कलहप्रिया । दरिद्रिणी मांसलया लम्बयाऽभक्ष्यभक्षिणी । विशालया रसनया प्रमदातिप्रमादभाक् । स्निग्धं कोकनदाभासं प्रशस्तं तालु कोमलम् । सिते तालुनि वैधव्यं पीते प्रव्रजिता भवेत् । कृष्णेऽपत्यवियोगार्त्ता रूक्षे भूरिकुटुम्बिनी । कण्ठे स्थूला सुवृत्ता च क्रमतीक्ष्णा च लोहिता । अप्रलम्बाशुभा घण्टा स्थूला कृष्णा च दुःखदा । अलक्षितद्विजं किञ्चित् किञ्चित्फुल्लकपोलकम् । स्मितं प्रशस्तं सुदृशामनिमीलितलोचनम् । समवृत्तपुटा नासा लघुच्छिद्रा शुभावहा । स्थूलाग्रा मध्यनम्रा च न प्रशस्ता समुन्नता । आकुञ्चितारुणाग्रा च वैधव्यक्लेशदायिनी । परप्रेष्या च चिपिटा ह्रस्वा दीर्घा कलिप्रिया । दीर्घं सकृत् क्षुतं दीर्घं युगपद्द्वित्रिपिण्डितम् । ललनालोचने शस्ते रक्तान्ते कृष्णतारके । गोक्षीरवर्णविशदे सुस्निग्धे कृष्णपक्ष्मणी । उन्नताक्षी न दीर्घायुर्वृत्ताक्षी कुलटा भवेत् । मेषाक्षी महिषाक्षी च केकराक्षी न शोभना । कामप्रदिग्धा नितरां गोपिङ्गाक्षी सुदुर्वृता । पारावताक्षी दुःशीला रक्ताक्षी भर्त्तृघातिनी । कोटराक्षयना दुष्टा गजनेत्रा न शोभना । पुंश्चली वामकाणाक्षी वन्ध्या दक्षिणकाणिका । मधुपिङ्गाक्षी रमणी धनधान्यसमृद्धिभाक् । पक्ष्मभिः सुघनैः स्निग्धैः कृष्णैः सूक्ष्मैः सुपुण्यभाक् । कपिलैर्विरलैः स्थूलैर्निन्द्या भवति भाविनी । भ्रुवौ सुवर्त्तुले तन्व्यौ स्निग्धे कृष्णे सुसंहते । प्रशस्ते मृदुरोमाणौ सुभ्रुवः कार्मुकाकृती । खररोमा च पृथुला विकीर्णा सरला स्त्रियाः ।

न भ्रूः प्रशस्ता मिलिता दीर्घलोमा च पिङ्गला । लम्बकर्णौ शुभावर्त्तौ सुखदौ च शुभप्रदौ । शष्कुलीरहितौ निन्द्यौ शिरालौ कुटिलौ कृशौ । भालः शिराविरहितो निर्लोमार्द्धेन्दुसन्निभः । अनिम्नस्त्र्यङ्गुलो नार्य्याः सौभाग्यारोग्यकारणम् । व्यक्तस्वस्तिकरेखञ्च ललाटं राज्यसम्पदे । प्रलम्बमलिकं यस्या देवरं हन्ति सा ध्रुवम् । रोमशेन शिरालेन प्रांशुना रोगिणी मता । सीमन्तः सरलः शस्तोमौलिः शस्तः समुन्नतः । गजकुम्भनिभो वृत्तः सौभाग्यैश्वर्य्यसूचकः । स्थूलमूर्द्धा च विधवा दीर्घशीर्षा च बन्धकी । विशालेनापि शिरसा भवेद्दौर्भाग्यभाजनम् । केशा अलिकुलच्छायाः सूक्ष्माः स्निग्धाः सुकोमलाः । किञ्चिदाकुञ्चिताग्राश्च कुटिला अतिशोभनाः । परुषाः स्फुटिताग्राश्च विरलाश्च शिरोरुहाः । पिङ्गलालघवोरूक्षा दुःखदारिद्र्यबन्धदाः । तिलकं लाञ्छनं वापि हृदि सौभाग्यकारणम् । यस्या दक्षिणवक्षोजे शोणे तिलकलाञ्छने । कन्याचतुष्टयं सूते सूते सा च सुतत्रयम् । भ्रुवोरन्तर्ललाटे वा मसकोराज्यसूचकः । वामे कपोले मसकः शोणोमिष्टान्नदः स्त्रियाः । तिलकं लाञ्छनं शोणं यस्या वामकुचे भवेत् । एकं पुत्रं प्रसूयादौ ततः सा विधवा भवेत् । गुह्यस्य दक्षिणे भागे तिलकं यदि योषितः । तदा क्षितिपतेः पत्नी सूते वा क्षितिपं सुतम् । नासाग्रे मसकः शोणो महिष्या एव जायते । कृष्णः स एव भर्त्तृघ्न्याः पुंश्चल्याश्च प्रकीर्त्तितः । नाभेरधस्तात् तिलकं मसको लाञ्छनं शुभम् । मसकस्तिलकश्चिह्नं गुल्फदेशे दरिद्रकृत् । करे-कर्णे कपोले वा कण्ठे वामे भवेद् यदि । एषां मध्यामेकन्तु प्राग्गर्भे पुत्रदं भवेत् । भालगेन त्रिशूलेन निर्म्मितेन स्वयम्भुवा । नितम्बिनी सहस्राणां स्वामित्वं योषिदाप्नुयात् । सुप्ता परस्परं या तु दन्तान् कटकटायते । सुलक्षणापि न सा शस्ता यत् किञ्चित् प्रलपेत् तथा । पाणौ प्रदक्षिणावर्त्तौ धन्यौ वामो न शोभनः । नाभौ श्रुतावुरसि वा दक्षिणावर्त्त ईरितः । सुखाय दक्षिणावर्त्तः पृष्ठवंशस्य दक्षिणे । अन्तःपृष्ठे नाभिसमो ह्रस्वायुःपुत्रवर्द्धनः । राजपत्न्याः प्रशस्तेन भगमौलौ प्रदक्षिणः । स चेत् कटिभागे स्याद्बहुपत्यप्रदः । कटितोगुह्यवेधेन पत्यपत्यनिपातनः । स्यातामुदरवेधेन पृष्ठावर्त्तौ न शोभनौ । एकेन हन्ति भर्त्तारं भवेदन्येन पुंश्चली । कण्ठगोदक्षिणावर्त्तौ दुःखवैधव्यहेतुकः । सीमन्तेऽथ

कपाटे वा स्याब्जौ दूरात् मवलतः । या पतिं हन्ति वर्षेण कन्या मध्ये ललाटिकम् । प्रदक्षिणो वा वामो वा रोमावर्त्तकः स्त्रियाः । एको वा मूर्द्धनि द्वौ वा वामे वामगतौ अपि । आद्याहं पतिघ्नौ तौ स्याब्जौ दूरात् सुवृत्तिना । कट्यावर्त्ता च कुलटा नाभ्यावर्त्ता पतिव्रता । पृष्ठावर्त्ता च भर्त्तृघ्नी कुलटा वाऽथ जायते" ।

अथ कन्यायाः समयविशेषे जन्मवशात् विषकन्यात्व दोषः यथाह जातकाभरणे । "भौजङ्गे ९ कृत्तिकायां शतभिषजि तथा सूर्य्यमन्दारवारे भद्राख्ये तिथौ वा यदि जननमियात् सा कुमारी विषाख्या । लग्नस्थौ सौम्यखेटावशुभगगनगश्चैकस्तले ततो द्वौ वैरिक्षेत्रानुयातौ यदि जनुषि तदा सा हि कन्या विषाख्या । मन्दाश्लेषाद्वितीया यदि तदनु कुजे सप्तमी वारुणर्क्षे २४ द्वादश्यां वा द्विदैवे १६ दिनमणिदिवसे यज्जनिः सा विषाख्या । धर्म्मस्थो भूमिसूनुस्तनुसदनगतः सूर्य्यसूनुस्तदानीं मार्त्तण्डः सूनुयातो यदि जनिसमये सा कुमारी विषाख्या । लग्नादिन्दोः शुभो वा मदनगृहपतिर्द्यूनयायी विषाख्यं दोषं चैवानपत्यं तदनु च नियतं हन्ति वैधव्यदोषम्" । अन्योऽपि वैधव्यादियोगोऽन्यत्रोक्तः यथा होरागमरत्ने "लग्ना धवेनोष्णकरेऽस्तसंस्थे बाल्येऽपि भौमे विधवा प्रदिष्टा । पापग्रहालोकनवर्गयाते कन्यैव कन्या भवतीति सूतौ । वैधव्यं क्रूरखेटैर्मदनगृहगतैर्मिश्रितैः स्यात् पुनर्भूः पापैस्तैर्वीर्य्ययुक्तैर्भवति परिहृता प्रेक्षया सौम्यदृष्टे । अन्योन्यांशस्थयोश्च क्षितिसुतसितयोर्बन्धकी योषिदुक्ता चन्द्रोर्व्वीसूनुयुक्ता यदि मदनगृहे प्रेयसोऽनुज्ञया सेति" "लग्ने व्यये च पाताले इत्यादि" प्रागुक्तम् । एवमन्येऽपि वैधव्यादियोगा आकरे द्रष्टव्याः । मु० चि० तत्परिहाराय विधिरुक्तः यथा "जन्मोत्थं च विलोक्य बालविधवायोगं विधाय व्रतं सावित्र्या उत पैप्पलं हि सुतया दद्यादिमां वा रहः । सल्लग्नेऽच्युतमूर्त्तिपिप्पलघटैः कृत्वा विवाहं, स्फुटं दद्यात्तां चिरजीविनेऽत्र न भवेद्दोषः पुनर्भूभवः" संहितासारे "अत्रैवैधव्यकरैर्योगैर्विवाहपटलोदितैः । वरायायुष्मते देया कन्या वैधव्ययोगजा" ज्ञानभास्करे "बालवैधव्ययोगे बाल्ये सति कन्यकानाम् । पिता रहसि कुर्वीत तद्दोषं शास्त्रसम्मतम्" मार्क० पु० "बालवैधव्ययोगेऽपि कुम्भद्रुप्रतिमादिभिः । कृत्वा लग्नं रहः पश्चात् कन्योद्वाह्येति चापरे" । तत्र सावित्रीपिप्पलादिव्रतविष्णुप्रतिमादिविवाहप्रयोगादयश्च पी० धा० विधानपारिजातादौ च द्रष्टव्याः ।

उपयमन न० उप+यम–ल्युट् । १विवाहे २संयमने ३वह्नेरधःस्थापने च । करणे ल्युट् । ४बन्धनसाधने कुशादौ ।

उपयमनी उपयम्यते कर्म्मणि ल्युट् । अग्न्याधानाङ्गे सिकतादौ "उभयमनीरुपकल्पयन्ति" शत० ब्रा० २,५,२,१ । "उप अग्नेरधस्तात् यम्यन्त इत्युपयमन्यः सिकताः" भा० । "उपयमनीरुपनिवपति" कात्या० ५,४,२० । "आहवनीयस्योपयमनीष्वाग्नीध्रीयस्याञ्चोपाञ्जने च" ८,६,२,

उपयष्टृ पु० उप–यज–तृच् । षोडशसु ऋत्विक्षु मध्ये प्रतिप्रस्थाताख्ये ऋत्विग्भेदे । "मनोमे हार्दि यच्छेति ततोहोपयष्टात्मानं मानुप्रयच्छति" शत० ब्रा० ३,८,५,५ ।

उपयाचक त्रि० उपगम्य याचकः उप+याच–ण्वुल् । समीपे आगम्य याच्ञाकर्त्तरि । [दिप्रार्थने ।

उपयाचन न० उपगम्य याचनम् । देवादिसमीपे अभीष्टा-

उपयाचित त्रि० उपयाच्यतेऽनेन या० करणे इतच् । अभीष्टसिद्धये देवेभ्योदेये पश्वादौ । "उपयाचितदानेन यतो देवा अभीष्टदाः" पञ्चत० । कर्म्मणि क्त । २उपगम्य प्रार्थिते च । भावे क्त । ३उपगम्ययाचने न० "उपयाचिताय हितम् कन् । स्वेष्टसिद्ध्यर्थं देवेभ्योदीयमाने पश्वादौ । "सिद्धायतनानि कृतविविधदेवतोपयाचितकानि" काद० ।

उपयाज पु० उप+यज–घञ् यज्ञाङ्गत्वात् प्रयाजादिवत् न कुत्वम् । उपयजि एकादशप्रभेदे, यागाङ्गे यागभेदे । २काश्यपगोत्रे ऋषिभेदे । "तथैव च महाभागः सोऽपश्यच्छंसितव्रतौ । याजोपयाजौ ब्रह्मर्षी शाम्यन्तौ परमेष्ठिनौ । संहिताध्ययने युक्तौ गोत्रतश्चापि काश्यपौ । तारणेयौ वीर्य्ययुक्तौ ब्राह्मणावृषिसत्तमौ" भा० आ० १६७ अ० । "ताभ्यामेव याजनेन द्रुपदेन पुत्रयोः प्राप्तिः "पुत्रार्थमयजद्राजा वधाय मम भारत! । याजोपयाजतपसा पुत्रं लेभे स पावकात् । धृष्टद्युम्नं द्रौपदीञ्च वेदिमध्यादनिन्दिताम्" भा० शा० ७८ अ० ।

उपयात पु० त्रि० उप+या–कर्त्तरि क्त । समीपागते । "उपयातायार्घमिति कोहनीया" गोभि० । "उपयातायाचार्य्यसमीपमागताय" स० त० रघुनन्दनः

उपयान न० उप+या–ल्युट् । उपसर्पं
त्वरिता बभूव" कुमा० ।

उपयाम पु० उपयाम्यत्यनेन उप+यम–णिच्

पात्ररूपे पात्रभेदे। "उपयामगृहीतोऽसि" यजु० ७,४,११,२०। उपचारात् २तद्वेदे च। "वातं प्राणेनापानेन नासिके, उपयाममधरेण" यजु० २५,२। उप+यम–घञ् वा वृद्धिः। २विवाहे। "यर्हि भवेदुपयामस्तर्हि सती खलु कन्या" मु०चि०। बला० अस्त्यर्थे वा मतुप्। उपयामवत् तद्विशिष्टे त्रि०। पक्षे इनि उपयामिन् तत्रैव उभयत्र स्त्रियां ङीप्।

उपयुक्त त्रि० उप+युज–क्त। १न्याय्ये, २उचिते, ३भुक्ते च।

उपयोग पु०उप+युज–घञ्। १आचरणे २भोजने, "पर्यागते मदनफलमज्जवदुपयोगः" सुश्रुतः। ३इष्टसिद्धिसाधने व्यापारे आनुकूल्ये च। "अथवा कार्य्यनिर्वृत्तेरुपयोगो यथाक्रमम्" सुश्रु० "अनङ्गलेखक्रिययोपयोगम्" कुमा०।

उपयोगिन् त्रि० उप+युज–घिणुन्। १इष्टसाधनायानुकूले २उपयुक्ते च। "तदुपयोगीनि शारीरकसूत्रादीनि" वेदा० सा०। स्त्रियां ङीप्। तस्य भावः तल् उपयोगिता स्त्री त्व उपयोगित्व न० आनुकूल्ये।

उपर त्रि० वप–करन्। १उप्ते स्थापिते "दिवरज उपरमस्तभायः, "उपह्वरे यदुपराः अपिन्वन्" ऋ० १,६२,५,६। "उपरा उप्ताःस्थापिताः" भा०। "त्रिंशो भूमीरुपरा षड्विधानाः" ऋ० ७,८७,५। उप+रम–बा० आधारे ड। २उपरमाधारे। "ते नः पूर्व्वास उपरास इन्दवः" ऋ० ६,७७,३, "उपरासः उपराः उपरता यत्रेत्युपराः" भा०। कर्त्तरि ड। ३उपरते "पुरः सतोरुपरा एतशे कः" ऋ०५,२६,५ "उपरा उपरताः" भा०। उपरि जन्मसमयत्वेनास्त्यस्य अर्श आ० अच्। उपरिकालोत्पन्ने। "ये पूर्व्वासोय उपरास ईयुः" १०,१५,२, "उपरासः यजमानजन्मन उपर्य्युत्पन्नाः" भा०। उभयोरैक्यात्। ४उपले प्रस्तरे च।

उपरक्त पु० उप+रन्ज–क्त। १राहुग्रस्ते चन्द्रे सूर्य्ये च। २व्यसनेष्वासक्ते, ३रञ्जनद्रव्येण रक्ते ४उपाधिसन्निधाद्-उपाधिगुणवत्तया प्रतीते च।

उपरक्ष पु० उप+रक्ष–ण्वुल्। समीपस्थित्वा रक्षके सैन्यादौ (गाड़िगार्ड)। [(पहारा)।

उपरक्षण न० उप+रक्ष–ल्युट्। रक्षार्थं सैन्यादिस्थापने

उपरत त्रि० उप+रम–क्त। १विरते, २निवृत्ते, ३मृते, "पितर्य्युपरते पुत्राविभजेयुर्धनं पितुः" दा० स्मृ०। "पितर्य्युपरतस्पृहे" या० स्मृ०। "सत्यपि जीवने निवृत्तसकलकामे इत्यर्थः। ४उपरतियुक्ते "शान्तोदान्त उपरतस्तितिक्षुः श्रद्धावान् समाहितो भूत्वात्मन्यात्मानमवलोकयेत्" श्रुतिः।

उपरताति स्त्री ताय–कर्मणि क्तिन्। ३त० लस्य वा रः। १युद्धे "अयं उपरताति वन्वन्" ऋ०७,४८,३। "उपरैरुपलैः पाषाणतुल्यैः शरैस्तायते विस्तीर्य्यते उपरताति युद्धम्" भा० सप्तम्या लुक्। २उपलरूपकरकैराच्छाद्ये अन्तरिक्षे च। "क्षरन्ति ता उपरताति" ऋ०१०,५१,५। उपरताति मेघकरकाच्छाद्ये अन्तरिक्षे सप्तम्या लुक्।

उपरति स्त्री उप+रम–क्तिन्। १विरतौ, २मृतौ ३लब्धप्राप्तावौदासीन्ये विषयेभ्य इन्द्रियाणां ४निवारणे, ५विहितकर्मणाम् विधानतस्त्यागरूपे संन्यासे "पुमर्द्धः कर्मणा नेति धीर्या सोपरतिर्भवेत्" इत्युक्तरूपायां ६बुद्धौ च। सेयमुपरतिर्ब्रह्मविचाराङ्गसाधनचतुष्टयान्तर्गतसाधनविशेषः तानि च साधनानि विवेकचूडामणौ सलक्षणमाचार्य्येण दर्शितानि यथा "साधनान्यत्र चत्वारि कथितानि मनीषिभिः। येषु सत्स्वेव सन्निष्ठा यदभावे न सिद्ध्यति। आदौ नित्यानित्यवस्तुविवेकः परिगण्यते। इहामुत्र फलभोगविरागस्तदनन्तरम्। शमादिषट्कसम्पत्तिर्मुमुक्षुत्वमिति स्फुटम्। ब्रह्म सत्यं जगन्मिथ्येत्येवंरूपो विनिश्चयः। सोऽयं नित्यानित्यवस्तुविवेकः समुदाहृतः। तद्वैराग्यं जिहासा या दर्शनश्रवणादिभिः। देहादिब्रह्मपर्य्यन्ते ह्यनित्ये भोग्यवस्तुनि। स्वलक्ष्ये नियतावस्था मनसः शम उच्यते। विषयेभ्यः परावर्त्य स्थापनं स्वस्वगोलके। उभयेषामिन्द्रियाणां स दमः परिकीर्त्तितः। बाह्यानालम्बनं वृत्तेरेषोपरतिरुत्तमा। सहनं सर्वदुःखानामप्रतीकारपूर्व्वकम्। चिन्ताविलापरहितं सा तितिक्षा निगद्यते। शास्त्रस्य गुरुवाक्यस्य सत्यबुद्ध्यवधारणम्। सा श्रद्धा कथिता सद्भिर्यया वस्तूपलभ्यते। सर्व्वदा स्थापनं बुद्धेः शुद्धे ब्रह्मणि सर्व्वदा। तत्समाधानमित्युक्तं न तु चित्तस्य लालनम्। अहङ्कारादिदेहान्तान् बन्धानज्ञानकल्पितान्। स्वस्वरूपावबोधेन मोक्तुमिच्छा मुमुक्षुता। मन्दमध्यमरूपापि वैराग्येण, शमादिना,। प्रसादेन गुरोः, सेयं प्रवृद्धा सूयते फलम्। वैराग्यञ्च मुमुक्षुत्वं तीव्रं यस्य तु विद्यते। तस्मिन्नेवार्थवन्तः स्युः फलवन्तः शमादयः। एतयोर्मन्दता यत्र विरक्तत्वमुमुक्षयोः। मरौ सलिलवत् तत्र शमादेर्भानमात्रता। मोक्षकारणसामग्र्यां भक्तिरेव गरीयसी। स्वस्वरूपानुसन्धानं भक्तिरित्यभिधीयते। स्वात्मतत्त्वानुसन्धानं भक्तिरित्यपरे जगुः। उक्तसाधनसम्प-

स्तत्त्वजिज्ञासुरात्मनः । उपसीदेत् गुरुं प्राज्ञं यतो बन्धविमोक्षणम्”

उपरञ्जक त्रि० उप+रन्ज-णिच्-ण्वुल् । १उपरागकारके । “न बाह्यान्तरयोरुपरञ्ज्योपरञ्जकभावोऽपि देशव्यवधानात्” सां०सू० । [रागाश्रयतया करणीये ।

उपरञ्ज्य त्रि० उप+रन्ज-णिच्-यत् । उपरञ्जनीये उप०

उपरत्न न० उपमितं रत्नेन अवा०त० । मणिसदृशेषु काचादिषु ‘उपरत्नानि काचश्च कर्पूरोऽश्मा तथैव च । मुक्ताशुक्तिस्तथा शङ्ख इत्यादीनि बहून्यपि । गुणा यथैव रत्नानामुपरत्नेषु ते तथा । किन्तु किञ्चित्ततो हीना विशेषोऽयमुदाहृतः” भा०प्र० ।

उपरम पु० उप+रम-घञ् अवृद्धिः । १विषयवैराग्ये, २निवृत्तौ च । “तथैव फेनोपरमे कल्कद्रव्यं नियोजयेत्” वैद्य० “रुग्विगतेऽस्थिवच्चेष्टोपरमश्च” सुश्रु० । “हिमात्ययोपरमे काले व्यतीते प्लवगास्ततः” भा०व० २८१अ० । भावे ल्युट् उपरमण । उपरतौ न० ।

उपरव पु० उप+रु-आधारे घञ् । सोमाभिषवाङ्गे गर्त्ताकारे देशभेदे । तत्करणप्रकारश्च” शत० ब्रा० ३,५,४,१-१२ उक्तः यथा “इयं वा अभ्युपरवाः खायन्ते । शिरो वै यज्ञस्य हविर्धानं तस्य इमे शीर्षंश्चत्वारः कूपा इमावह द्वाविमौ द्वौ तानेवैतत् करोति तस्मादुपरवान् खनति । देवाश्च वा असुराश्च उभये प्राजापत्याः पस्पृधिरे । ततोऽसुरा एषु लोकेषु कृत्यां वलगान्निचखुरेतयैव चिद्देवानभिभवेमेति । तद्वै देवा अस्पृण्वत । त एतैः कृत्यां वलगानुदखनन् यदा वै कृत्यामुत्खनन्त्यथ सालसा मोघा भवति तथो एवैष एतद्यद्यस्मा अत्र कश्चिद्द्विषन् भ्रातृव्यः कृत्यां वलगान्निखनति तानेवैतदुदुपकिरति तस्मादुपरवान् खनति सदक्षिणस्य हविर्धानस्याधोऽधः प्रउगं खनति । सोऽभ्रिमादत्ते “देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे नार्य्यसीति” समान एतस्य यजुषो बन्धुर्योषो वा एषा यदभ्रिस्तस्मादाह नार्यसीति । तान् प्रादेशमात्रं विना परिलिखति । इदमहं रक्षसां ग्रीवा अपिकृन्तामीति वज्रो वा अभ्रिर्वज्रेणैवैतन्नाष्ट्राणां रक्षसां ग्रीवा अपिकृन्तति । तद्यावेतौ पूर्वौ तयोर्दक्षिणमेवाग्रे परिलिखेदथापरयोरुत्तरमथापरयोर्दक्षिणमथ पूर्वयोरुत्तरम् । अथो इतरथाहुः अपरयोरेवाग्र उत्तरं परिलिखेदथ पूर्वयोर्दक्षिणमथापरयोर्दक्षिणमथ पूर्वयोरुत्तरमित्यथो अपि समीच एव परिलिखेदेतं त्वेवोत्तमं परिलिखेद्य एष पूर्वयोरुत्तरो भवति तान् यथापरिलिखितमेव यथापूर्वं खनति । बृहन्नसि बृहद्ग्रवा इत्युपस्तौत्येवैनानेतन्महयत्येव यदाह बृहन्नसि बृहद्ग्रवा इति बृहतीमिन्द्राय वाचं वदेतीन्द्रो वै यज्ञस्य देवता वैष्णवं हविर्धानं तत् सेन्द्रं करोति तस्मादाह बृहतीमिन्द्राय वाचं वदेति रक्षोहणं वलगहनमिति रक्षसां ह्येते वलगानां वधाय खायन्ते वैष्णवीमिति वैष्णवो हि हविर्धाने वाक्, तान् यथाखातमेवोत्किरति । इदमहं तं वलगमुत्किरामि यं मे निष्ट्यो यममात्यो निचखानेति निष्ट्यो वा अमात्यो वा कृत्यां वलगान्निखनति तानेवैतदुत्किरति इदमहं तं वलगमुत्किरामि । यं मे समानो यमसमानो निचखानेति समानो वा असमानो वा कृत्यां वलगान्निखनति तानेवैतदुत्किरति । इदमहं तं वलगमुत्किरामि । यं मे सबन्धुर्यमसबन्धुर्निचखानेति सबन्धुर्वा असबन्धुर्वा कृत्यां वलगान्निखनति तानेवैतदुत्किरति । इदमहं तं वलगमुत्किरामि यं मे सजातो यमसजातो निचखानेति सजातो वा असजातो वा कृत्यां वलगान्निखनति तानेवैतदुत्किरत्युत्कृत्यां किरामीत्यन्तत उद्वपति तत्कृत्यामुत्किरति तान्बाहुमात्रान् खनेत् । अन्तो वा एषोऽन्तेनैवैतत् कृत्यां मोहयति तानन्नया संतृन्दन्ति यद्यन्नया न शक्नुयादपि समीचस्तस्मादिमे प्राणाः परः संतृण्णाः तान् यथाखातमेवावमर्शयति” “सोमाभिषवायोपरवाणां खननं विवक्षुः खननस्योभयार्थतामाह इयमिति । कर्णच्छिद्रे द्वे नासिकाच्छिद्रे द्वे । द्वेष्यवधार्थं भूमौ स्थापिताः कृत्याविशेषा वलगाः । अस्पृणुतः हिंसितवन्तः । मध्ये मध्ये प्रादेशमात्रान्तरालं विहाय समचतुरस्रे खननप्रदेशे चतुरोऽवटान् प्रादेशमात्रान् परिलिखेत् खननमपि परिलेखनक्रमेण कर्त्तव्यम् । खातायामुद उद्वपनेऽपि खननक्रम एव । अङ्गुलिप्रादेशाद्यपेक्षया बाहुप्रमाणस्यान्तत्वम् ततोऽधिकात् प्रदेशात् रुद्रुद्धरणस्याशक्यत्वाद्बाहुमात्रस्यान्तत्वम् तानन्नया संतृन्दन्ति पूर्वयोर्दक्षिणस्यापरयोरुत्तरस्य चान्तरालदेशम् । अन्तःप्रदेशनिम्नोन्नतत्वपरिहाराय संमृशेत् संमृशेते परस्परहस्तसंस्पर्शं कुर्य्याताम्” । भा० “उत्तरपूर्व्वे जुहोत्युपरवे” कात्या० २५,१२,१०, “उपरवदेशात् स्तम्बयजुर्हरति” ८,२,१२,

उपरस पु० उपमितो रसेन अवा०त० । पारदतुल्येषु गन्धकादिषु ।

"गन्धोहिङ्गुलमभ्रतालकशिलास्रोतोऽञ्जनं टङ्कणं राजावर्त्तकचुम्बकौ स्फटिकः शङ्खः खटी गैरिकम्। कासीसं रसकं कपर्द्दसिकताबोलाश्च कङ्कुष्ठकं सौराष्ट्री च मता अमी उपरसाः सूतस्य किञ्चिद्गुणैः" भा०प्र०। अथैषां शोधनविधिः "सूर्य्यावर्त्तो वज्रकन्दः कदली देवदालिका। शिग्रुः कोषातकी वन्ध्या ककमाची च वारुकम्। एषामेकरसेनैव त्रिक्षारैर्लवणैः सह। भावयेदम्लवर्गैश्च दिनमेकं प्रयत्नतः। ततः पचेच्च तद्द्रावैर्दोलायन्त्रे दिनं सुधीः। एवं शुद्ध्यन्ति ते सर्वे प्रोक्ता उपरसा हि ये"। विशेषश्च। "कङ्कुष्ठं गैरिकं शङ्खः कासीसं टङ्कणं तथा। नीलाञ्जनं शुक्तिभेदाः क्षुल्लकाः सवराटिकाः। जम्बीरवारिणा स्विन्नाः क्षालिताः कोष्णवारिणा। नित्यमायान्त्यमी योज्याभिषग्भिर्योगसिद्धये" भावप्रकाशः।

उपराग पु० उप+रन्ज–घञ्। १समीपस्थितस्य स्वनिष्ठगुणादेरन्यत्रारोपे, यथा स्फटिकस्यान्तिकस्थितजवादिगतलौहित्यं स्फटिके आरोप्यते" स चारोप उपाधिकृतत्वादौपाधिकः अमुमुपरागमाश्रित्यैव सांख्यादयः वेदान्तिनश्च बुद्धिगतकर्त्तृत्वादेः पुरुषे, पुरुषगतचैतन्यस्य च बुद्धौ औपाधिकत्वं कल्पयन्ति "उपरागात् कर्त्तृत्वं चित्सान्निध्यात्" सां०सू० "पुरुषस्य यत् कर्त्तृत्वं तद्बुद्ध्युपरागात् बुद्धेश्च या चित्ता सा पुरुषसान्निध्यात् एतदुभयं न वास्तवं यथाऽग्न्ययसोः परस्परसंयोगविशेषात् परस्परधर्मव्यवहार औपाधिकः यथा च जलसूर्य्ययोः संयोगात् परस्परधर्मारोपस्तथैव बुद्धिपुरुषयोः" प्र० भा० "तद्गुणसारत्वात्" शा०सू० "बुद्धेर्गुणैरेव आत्मनोगुणवत्त्वारोप इति समर्थितम्"। बौद्धा अपि बाह्योपरागात् ज्ञानस्य तत्तदाकारता भवतीति मन्यन्ते तत्सर्वं तत्तन्नामपदे वक्ष्यते अनेनैवोपरागेण बाह्यान्तरयोरुपरञ्ज्योपरञ्जकभावः। २सतोगुणान्तराधानरूपे वासनारूपे संस्कारे "नानादिविषयोपरागनिमित्ततोऽप्यस्य" सां०सू० "अस्यात्मनः प्रवाहरूपेणानादिर्या विषयवासना न ततो बन्धः" प्र०भा०। ३रविचन्द्रयोर्ग्रहणे तत्रापि छादकसान्निध्यात् चन्द्रार्कयोस्तद्रूपारोप एवेति तस्य तथात्वम्। ग्रहणञ्च राह्वधिष्ठितभूमिच्छायया चन्द्रस्य, तदधिष्ठितचन्द्रमण्डलेन च रवेर्मण्डलस्य छादनमिति सिद्धान्ते स्थितम्। तत्र सि०शि० ग्रहणं कथं? भवेदित्येतन्निरूपितं यथा "पश्चाद्भागाज्जलदवदधः संस्थितोऽभ्येत्य चन्द्रो भानोर्बिम्बं स्फुरदसिततया छादयत्यात्ममूर्त्या। पश्चात् स्पर्शो हरिदिशि ततो मुक्तिरस्यात एव क्वापि च्छन्नः क्वचिदपिहितो नैष कक्षान्तरत्वात्" शि०। "अर्कादधश्चन्द्रकक्षा। यथा मेघोऽधःस्थः पश्चाद्भागादागत्य रविं छादयति एवं चन्द्रोऽपि शीघ्रत्वात् पश्चाद्भागादागत्य रविं छादयति। अतः पश्चात् स्पर्शः। निःसरति चन्द्रे पूर्वतो मोक्षो रवेः। अत एव कक्षाभेदात् क्वचिदर्कश्छन्नो दृश्यते क्वचिदेव न छन्नः। यथाधःस्थे मेघे कैश्चिद्रविर्न दृश्यते कैश्चिद्दृश्यते प्रदेशान्तरस्थैः। इदानीं नतिलम्बयोः कारणमाह" प्रमि०। "पर्वान्तेऽर्कं नतमुडुपतिच्छन्नमेव प्रपश्येत् भूमध्यस्थो न तु वसुमतीपृष्ठनिष्ठस्तदानीम्। तद्दृक्सूत्राद्धिमरुचिरधोलम्बितोऽर्कग्रहेऽतः कक्षाभेदादिह खलु नतिर्लम्बनं चोपपन्नम्। समकलकाले भूभा लगति मृगाङ्के नतस्तया म्लानम्। सर्वे पश्यन्ति समं समकक्षत्वान्न लम्बनावनती। पूर्वाभिमुखो गच्छन् कुच्छायान्तर्यतः शशी विशति। तेन प्राक् प्रग्रहणं पश्चान्मोक्षोऽस्य निःसरतः। भानोर्बिम्बपृथुत्वादपृथुपृथिव्याः प्रभा हि सूच्यग्रा। दीर्घतया शशिकक्षामतीत्य दूरं बहिर्याता। अनुपातात् तद्दैर्घ्यं शशिकक्षायां च तद्बिम्बम्। भूमेन्दोरन्यदिशि व्यस्तः क्षेपः शशिग्रहे तस्मात्" शि०। "दर्शान्तकाले रविं पूर्वतः पश्चिमतो वा नतं चन्द्रेण च्छन्नमेव पश्यति भूमध्यस्थो द्रष्टा, यतो दर्शान्ते समौ भवतः। यो भूपृष्ठस्थो द्रष्टा स तदार्कं छन्नं न पश्यति। यतस्तद्दृष्टिसूत्राच्चन्द्रोऽधो लम्बितो भवति। अतः कक्षाभेदाल्लम्बनं नतिश्चोपपद्यते। चन्द्रग्रहे तु लम्बननत्योरभावः। यतः समकलकाले भूभा चन्द्रे लगति। तया छन्नं सर्वे विदेशान्तरस्था अपि नतमपि तं चन्द्रं समं पश्यन्ति। यतस्तत्र छाद्यच्छादकयोरेकैव कक्षा जाता। तथा भूभा तावत् पूर्वाभिमुखमर्कगत्या गच्छति। चन्द्रश्च स्वगत्या। स शीघ्रत्वात् पूर्वाभिमुखो गच्छन् भूभां प्रविशति। तेन तत्र प्राक् स्पर्शः। भूभाया निःसरतः पश्चान्मुक्तिः। भानोर्बिम्बं विपुलं पृथ्वी लघुः। अतो भूभा सूच्यग्रा भवति। दीर्घत्वेन चन्द्रकक्षामतीत्य दूरं गता। तद्दैर्घ्यमनुपातात् साध्यते। चन्द्रकक्षाप्रदेशे भूभा चन्द्रबिम्बं चेति सर्वं ग्रहणे प्रतिपादितमेव। (अग्रे स च ग्रन्थो दर्शयिष्यते) इदानीं छादकनिर्णयमाह" प्रमि०। "छादकः पृथुतरस्ततो विधोरर्द्धखण्डिततनोर्विषाणयोः। कुण्ठता च महती स्थितिर्यतो लक्ष्यते हरिणलक्षणग्रहे। अर्धखण्डिततनोर्विषाणयोस्तीक्ष्णता भवति तीक्ष्णदीधितेः। स्यात् स्थितिर्लघुरतो

लघुः पृथक् छादको दिनकृतोऽवगम्यते । दिग्देशकालावरणादिभेदाच्च छादको राहुरिति ब्रुवन्ति । यन्मानिनः केवलगोलविद्यास्तत् संहितावेदपुराणबाह्यम् । राहुः कुभामण्डलगः शशाङ्कं, शशाङ्कगश्छादयतीनबिम्बम् । तमोमयः शम्भुवरप्रदानात् सर्वागमानामविरुद्धमेतत्" शि०।

"अर्कच्छादकाच्चन्द्रच्छादकः पृथुतरोऽवगम्यते । कुतः यतोऽर्धखण्डितस्येन्दोर्विषाणयोः कुण्ठता दृश्यते स्थितिश्च महती । अर्कस्य पुनरर्धखण्डितस्य तीक्ष्णता विषाणयोः । स्थितिश्च लघ्वी । एतत्कारणद्वयान्यथानुपपत्त्यार्कस्य छादकोऽल्पः । स च लघुकालः । एवं रवीन्द्वोर्न छादको राहुरिति वदन्ति । कुतः दिग्देशकालावरणादिभेदात् । एकस्य प्राक् स्पर्शः इतरस्य पश्चात्, रवेः क्वापि ग्रहणमस्ति क्वापि नास्ति । क्वापि दर्शान्तादग्रतः क्वापि पृष्ठतः । अतो राहुकृतं न ग्रहणम् । नहि बहवो राहवः एवं केचन वदन्ति । केवलगोलविद्यास्तदभिमानिनश्च । इदं संहितावेदपुराणबाह्यम् । यतः संहितासु "राहुरष्टमो ग्रहः"। "स्वर्भानुर्ह वा असुरः सूर्याचन्द्रमसौ विव्याधेति" माध्यन्दिनी श्रुतिः । "सर्वं गङ्गासमं तोयं सर्वे ब्रह्मसमा द्विजाः । सर्वं भूमिसमं दानं राहुग्रस्ते दिवाकरे" इत्यादिपुराणवाक्यानि । अतोऽविरुद्धमुच्यते । राहुरनियतगतिस्तमोमयो ब्रह्मवरप्रदानाद्भूभां प्रविश्य चन्द्रं, चन्द्रं प्रविश्य रविं, छादयतीति सर्वागमानामविरुद्धम्" प्रमि० । अत्र लल्लः । "ग्रहणे कमलासनानुभावाद्ध्रु तद्दत्तांशभुजोऽस्य सन्निधानम् । यदतः स्मृतिवेदसंहितासु ग्रहणं राहुकृतं गतं प्रसिद्धिम्" । श्रीपतिः "भूच्छायायां प्रविष्टः स्थगयति शशिनं शुक्लपक्षावसाने राहुर्ब्रह्मप्रसादात् समधिगततरस्तत्तमोव्याप्ततुल्यः । ऊर्ध्वस्थं भानुबिम्बं सलिलमयतनोरप्यधोवर्ति बिम्बं संस्थैवं च मासव्युपरतिसमये स्वस्य साहित्यहेतोः" ।

ग्रहणप्रकारस्तज्ज्ञानोपायश्च सू० सि० रङ्गनाथेन दर्शितो यथा "सार्धानि षट्सहस्राणि ६५००योजनानि विवस्वतः । विष्कम्भो मण्डलस्येन्दोः सहाशीत्या चतुःशती ४८०। स्फुटस्वभुक्त्या गुणितौ मध्यभुक्त्योद्धृतौ स्फुटौ । रवेः स्वभगणाभ्यस्तः शशाङ्कभगणोद्धृतः" सू०सि० । "सूर्यस्य मण्डलस्य गोलरूपबिम्बस्य विष्कम्भो व्यासः। ६५००योजनानि, चन्द्रस्य गोलाकारबिम्बस्य ४८० योजनानि व्यासः" "व्यासस्यैव गणिते बिम्बत्वव्यवहार" र०ना०

"शशाङ्ककक्षागुणितो भाजितो वार्ककक्षया । विष्कम्भश्चन्द्रकक्षायां तिथ्याप्ता मानलिप्तिकाः" सू०सि० ।

"सूर्यस्य विष्कम्भः ६५००प्रागुक्तः स्फुटो व्यासः स्वभगणैः सूर्यभगणैरुक्तैर्गुणितश्चन्द्रभगणैर्भक्तो वाथवा चन्द्रकक्षया वक्ष्यमाणया गुणितः सूर्यकक्षया वक्ष्यमाणया भक्तश्चन्द्रकक्षायां चन्द्राधिष्ठिताकाशगोले सूर्यव्यासः स्पष्टो भवति । ततो व्यासयोजनसङ्ख्या पञ्चदशभक्ता सूर्यचन्द्रयोर्बिम्बव्यासप्रमाणकला भवन्ति । अत्रोपपत्तिः । यदा चक्रकलाभिश्चन्द्रकक्षायोजनानि तदैककलया कानीति चन्द्रकक्षास्थितैककलायां पञ्चदश योजनानि । अतश्चन्द्रस्य स्वकक्षायां स्थितत्वात् स्पष्टचन्द्रबिम्बव्यासयोजनानि पञ्चदशभक्तानि चन्द्रबिम्बव्यासकला भवन्ति । एवं सूर्यकक्षायामेका कला सार्धशतद्वययोजनैरिति स्पष्टसूर्यव्यासस्तैर्भक्तो व्यासकला भवन्ति । तत्र सूर्यस्य लोकैर्दूरान्तराच्चन्द्राकाश इव दर्शनात् प्रत्यक्षतो विभिन्नान्तरेण दर्शनाभावाच्च चन्द्रकक्षाप्रमाणेन सूर्यबिम्बव्यासः यदि सूर्यकक्षयाऽयं तदा चन्द्रकक्षया कः? इत्यनुपातेन गणितार्थमवस्तुभूतः साधितः । न तु वस्तुतश्चन्द्रकक्षायां सूर्यमण्डलावस्थानं सूर्यग्रहणे चन्द्रस्य छादकत्वानुक्तिप्रसङ्गात् अथ सूर्यस्पष्टव्यासश्चन्द्रभगणभक्तस्वकक्षारूपचन्द्रकक्षया भक्त इति स्वकक्षारूपगुणहरयोर्नाशात् सूर्यभगणगुणितश्चन्द्रभगणभक्त इति पूर्वं कक्षयोरनुक्तेरयं प्रकारो मुख्यत्वात् प्रथममुक्तस्ततश्चन्द्रकक्षासिद्धसूर्यबिम्बव्यासः पञ्चदशभक्तः सूर्यबिम्बव्यासकलाः सिद्धा इत्युपपन्नम्" रङ्ग०

"स्फुटेन्दुभुक्तिर्भूव्यासगुणिता मध्ययोद्धृता । लब्धं सूची महीव्यासस्फुटार्कश्रवणान्तरम् मध्येन्दुव्यासगुणितं मध्यार्कव्यासभाजितम् । विशोध्य लब्धं सूच्यां तु तमोलिप्तास्तु पूर्ववत्" सू०सि०।

"स्पष्टा चन्द्रस्य गतिर्भूव्यासेन गुणिता मध्यया चन्द्रगत्या भक्ता फलं सूचीसंज्ञं स्यात् । भूव्यासस्पष्टसूर्यबिम्बव्यासयोरन्तरं मध्येन चन्द्रबिम्बव्यासेन ४८० योजनेन गुणितं मध्येन सूर्यबिम्बव्यासेन ६५०० योजनेन भक्तं फलं सूच्यां प्राक्सिद्धायां न्यूनीकृत्य तुकाराच्छेषं तमः भूच्छायारूपं योजनात्मकं भाभावस्तम इति छायायास्तमस्त्वात् । अस्य कलात्मकं मानमाह । लिप्ता इति । पूर्ववत् तिथ्याप्ता मानलिप्तिका इति पूर्वोक्तेन भूच्छायायाः कलाः कार्याः । अत्रोपपत्तिः । "भूव्यासहीनं रविबिम्बमिन्दुकर्णाहतं भास्करकर्णभक्तम् । भूविस्तृतिर्लब्धफलेन हीना

भवेत् कुभाविस्तृतिरिन्दुमार्गे” इति सि० शि० उक्ता तत्र ४६०० भूव्यासोनस्य रविबिम्बस्य ६५०० स्वल्पान्तराङ्गीकारेण स्पष्टगतिभक्तमध्यगतिगुणितचन्द्रमध्ययोजनकर्णरूपस्पष्टेन्दुयोजनकर्णो गुणः। तादृशसूर्यकर्णो हरः। तत्रैतत्खण्डस्य कलाकरणार्थं त्रिज्यागुणश्चन्द्रकर्णस्तादृशो हर इति चन्द्रस्पष्टमध्यगत्योस्तुल्यगुणहरत्वेन नाशात् त्रिज्यामध्येन्दुयोजनकर्णयोस्त्रिज्यापवर्तनेन हरः पञ्चदश पृथगुक्तः। अथेऽवशिष्टौ भूव्यासहीनमध्यार्कबिम्बयोजनानां रविस्पष्टगतिमध्यमगती गुणहरौ। चन्द्रसूर्ययोजनकर्णावपि क्रमेण गुणहरौ। तत्र कर्णस्थाने लाघवात् तयोर्बिम्बयोजनानि गृहीतानि। यद्यपि सूर्यचन्द्रयोर्मध्ययोजनकर्णानुसारित्वाभावाद्बिम्बयोजनग्रहणमनुचितं तथाप्यल्पान्तराङ्गीकारेण तद्दोषः। इन्दुव्यासार्कव्यासयोर्भूगोलाध्यायोक्तकक्षा भूकर्णगुणिता महीमण्डलभाजिता तत्कर्ण इति। तत्कक्षाव्यासार्धत्वे तु सुतराम्। तत्रापि स्पष्टार्कबिम्बयोजनग्रहणे मध्यार्कयोजनबिम्बं सूर्यस्पष्टगतिगुणितं सूर्यमध्यगतिभक्तमिति सिद्धम्। न चोक्तरीत्या सूर्यस्पष्टमध्यगती गुणहरौ भूव्यासमध्यार्कबिम्बयोजनान्तरस्योत्पन्नौ न केवलं बिम्बस्येति भूव्यासस्तादृशो महीव्यास इत्यनेन कथं सिद्ध इति वाच्यम् भगवता स्वल्पान्तरेण महीव्यासस्य यथास्थितस्यैवाङ्गीकारात्। महीव्यासस्फुटार्कश्रवणान्तरमित्युक्त्या मध्यस्फुटपदस्योभयत्रान्वयेनार्कश्रवणसन्निधानेन च सूर्यबिम्बस्फुटरीत्यैव महीव्यासस्य स्फुटत्वसिद्धेश्च। अथैतत्खण्डसिद्धं फलं भूव्यासाद्धीनं भूभायोजनानि। तत्र कलाकरणार्थं भूव्यासस्यापरखण्डस्य त्रिज्या गुणः स्पष्टचन्द्रगतिभक्तमध्यगतिगुणितचन्द्रमध्ययोजनकर्णरूपस्पष्टयोजनकर्णो हरः। तत्र त्रिज्यामध्ययोजनकर्णौ गुणहरौ गुणेनापवर्त्य हरस्थाने पञ्चदश चन्द्रस्पष्टमध्यगती गुणहराविति सूच्युक्तोपपन्ना। भूभायाः सूच्यनुकारत्वात् प्रथमखण्डं द्वितीयखण्डे हीनं भूभायोजनात्मिका सा पञ्चदशभक्ता कलादिकेत्युक्तमुपपन्नम्। यदि तु भूव्यासहीनं रविबिम्बमित्यादौ मध्यबिम्बानुक्तेः प्रथममेव स्पष्टार्कबिम्बग्रहणं तदा महीव्यासस्य स्पष्टत्वाप्रसिद्ध्या महीव्यासस्फुटार्कश्रवणान्तरमित्येव यथाश्रुतं सम्यक्। परन्तु तदा भूव्यासोनार्कबिम्बस्य सूर्यमध्यस्पष्टगती हरगुणाववशिष्टौ वाच्यावपि भगवता स्वल्पान्तरत्वादनुक्तौ। न चानुपाते सूर्यचन्द्रयोर्मध्ययोजनकर्णावेव गृहीतौ न स्फुटाविति मध्यस्फुटगती हरगुणावनुत्पन्नौ नोक्ताविति वाच्यम्। चन्द्रस्पष्टयोजनकर्णस्वरूपग्रहणेनोत्पन्नसूच्या अनुक्तत्वापत्तेः। न च चन्द्रकर्णस्य मध्यत्वेन गृहीते बह्वन्तरमतः स्पष्टत्वेन तस्य ग्रहे सूच्युपपन्ना सूर्यकर्णस्य मध्यत्वेन गृहीतेत्यल्पान्तरमिति वाच्यम्। मध्यार्कबिम्बयोजनग्रहणेन स्फुटार्कश्रवणानुपपत्तेः। न चोभयत्रागृहीते प्रत्येकमल्पान्तरमपि बह्वन्तरमत एकत्र सूर्यगतिग्रहणमुचितमिति वाच्यम् विनिगमनाविरहात् पूर्वं सूर्यबिम्बस्यैव सूर्यस्पष्टगती गुणहरौ न महीव्यासस्य प्राप्त्ये तूभयोरिति स्थूलसूक्ष्मविनिगमके तु प्राप्त्ये सूर्यगतिग्रहणस्यौचित्याच्च। अथ महीव्यासस्य प्रथमखण्डस्य चन्द्रगतिग्रहणेन सूच्युक्तावेव द्वितीयखण्डस्य भूव्यासोनस्फुटरविबिम्बस्यार्थात् सूर्यगतिग्रहणं सूचितमिति न क्षतिरिति चेन्न व्याख्याप्रसङ्गे सूर्यगतिग्रहणे मानाभावात् उपपत्तेरप्रसङ्गाच्च। अन्यथात्रापि चन्द्रगतिग्रहणापत्तेरिति। एतेन यदा चन्द्रमध्यगत्या भूव्यासस्तदा चन्द्रस्पष्टगत्या क? इति भूव्यासरूपं खण्डं स्पष्टं सूचीसंज्ञं यदा सूर्यबिम्बप्रमाणेनापरं भूव्यासोनस्फुटरविबिम्बखण्डं तदा चन्द्रबिम्बप्रमाणेन किमिति स्पष्टं द्वितीयं खण्डं तयोः, स्पष्टयोरन्तरं स्पष्टा भूभेति सर्वमुपपन्नमिति निरस्तम्। उक्तानुपाताभ्यां तयोः स्पष्टत्वसिद्धौ मानाभावात् स्पष्टत्वस्याप्रसङ्गाच्च चन्द्रसूर्ययोर्मध्यबिम्बानुपपत्तेश्च” र० ना०।

अथ चन्द्रार्कग्रहणद्वयसम्भवमाह।

‘भानोर्भार्धे महीच्छाया तत्तुल्येऽर्कसमेऽपि वा। शशाङ्कपाते ग्रहणं कियद्भागाधिकोनके” सू० सि०।
“सूर्यात् सकाशात् षड्भान्तरे भूच्छाया सूर्यापरदिक्स्था। तत्तुल्ये सषड्भार्करूपच्छायाचिह्नादिना समे चन्द्रपाते अपि वाऽथवा सूर्यतुल्ये चन्द्रपाते सूर्यचन्द्रयोः प्रत्येकं ग्रहणम्। ननु समत्वाभावेऽपि ग्रहणमिष्यत एवेत्यत आह कियद्भागेत्यादि। सषड्भार्कादर्काद्वा कतिपयैर्भागैरधिके ऊनेऽपि चन्द्रपाते ग्रहणम्। तथा च न क्षतिः। भागाश्चन्द्रग्रहणे द्वादश, सूर्यग्रहणे तु नतांशषड्शसंस्कारात् सप्तेत्यापाततः। अत्रोपपत्तिः। सषड्भार्ककेवलार्कान्यतरतुल्ये चन्द्रपाते शराभावश्चन्द्रस्य तत्तुल्यत्वात्। तदा चन्द्रो भूच्छायायां भवतीति ग्रहणम्। एवं शरसत्त्वेऽपि मानैक्यखण्डादल्पे भूच्छायायां मण्डलैकदेशस्य सत्त्वेन ग्रहणम्। एवं शराभावे मानैक्यखण्डान्न्यूनशरे च चन्द्रमण्डलं सूर्यमण्डलस्याच्छादकं भवति परन्तु तत्र शरो नति-

संस्कृतोऽतः सम्यगुक्तमुपपन्नम्” र॰ना॰। तत्र ग्रहणकालः “तुल्यौ राश्यादिभिः स्यातामभावास्यान्तकालिकौ”। सूर्य्येन्दू पौर्णमास्यन्ते भार्द्धे भागादिकैः समौ” सू॰सि॰। “अमावास्यान्तकालोत्पन्नौ सूर्य्यचन्द्रौ राश्याद्यवयवैः समौ भवतः। पौर्णमास्यन्ते भागादिकैः तुल्यौ सूर्य्यचन्द्रौ षड्भान्तरे स्याताम्। तथा चामान्ते सूर्य्यचन्द्रयोरेकत्वोर्ध्वाधरान्तरेण सत्त्वात् सूर्य्यग्रहणम्। पौर्णमास्यन्ते चन्द्रभूभयोरेकत्वायस्थानाच्चन्द्रग्रहणम्। एतेन पूर्व्वश्लोके ग्रहाङ्कपातइत्यत्र चन्द्रचन्द्रपातौ द्वौ न ग्राह्याविति सूचितम् एतच्छ्लोकस्य वैयर्थ्यापत्तेः। अत्रोपपत्तिः। अमान्ते सूर्य्यचन्द्रयोः पूर्व्वापरान्तराभावेन योगात् तुल्यौ सूर्य्यचन्द्रौ, पूर्णिमान्ते भचक्रार्धान्तरत्वात् षड्राश्यन्तरौ भागादिसमाविति” र॰ना॰।

“गतैष्यपर्वनाड़ीनां स्वफलेनोनसंयुतौ। समलिप्तौ भवेतां तौ पातस्तात्कालिकोऽन्यथा” सू॰सि॰।

अथ पर्वान्ते सूर्य्यचन्द्रचन्द्रपातानां साधनमाह। “तौ सूर्य्यचन्द्रौ गतैष्यपर्वनाड़ीनां यत्कालिकौ सूर्य्यचन्द्रौ तत्कालाद्गता एष्या वा दर्शान्तपूर्णिमान्तान्यतरघटिकास्तासां स्वफलेन स्वगतिसम्बन्धेन यत् फलम्। “इष्टनाड़ीगुणा भुक्तिः षष्ठ्या भक्ता कलादिकम्” इति मध्याधिकारोक्तेनानीतम्। तेन गतैष्यक्रमेणोनयुतौ तत्र समकलौ स्तः। यद्यपि समांशाविति वक्तुं युक्तं तथाप्यन्यतिथ्यन्तीयसाधितौ समकलावितिि द्योतनार्थं समकलावित्युक्तम्। पातः स्वगत्युत्पन्नफलेनान्यथा गतैष्यक्रमेण युतोनस्तात्कालिकः पर्वान्तकालिकः स्यात्” र॰ना॰।

अथ प्रागुक्तानां बिम्बानां प्रयोजनमाह “छादको भास्करस्येन्दुरधःस्थो घनवद्भवेत्। भूच्छायां प्राङ्मुखश्चन्द्रो विशत्यस्य भवेदसौ” सू॰सि॰ ‘सूर्य्यमण्डलस्याच्छादकश्चन्द्रः स्यात्। नन्वाकाशे द्वयोः सत्त्वेन सूर्य्य एव चन्द्रस्य छादकः कथं? न स्यादित्यत आह अधःस्थ इति। वक्ष्यमाणकक्षाध्याये सूर्य्यकक्षतोऽधःकक्षास्थत्वाच्चन्द्रस्यैवाच्छादकत्वम्। न तूर्द्ध्वस्थश्छादको येन सूर्य्यश्चन्द्रस्य छादकः’। ननु विनैकत्वाय स्थानं छादनं न भवत्यत आह। घनवदिति। यथाऽधःस्थो मेघः सूर्य्यस्याच्छादको भवति तथा चन्द्रो भवतीत्यर्थः। प्राङ्मुखः पूर्व्वाभिमुखो गच्छंश्चन्द्रो भूच्छायां प्रति प्रविशति। अतः कारणादस्य चन्द्रस्यासौ भूभा छादिका भवेत्। तथा च सूर्य्यग्रहणं सूर्य्यचन्द्रबिम्बयोः प्रयोजनं चन्द्रग्रहणे चन्द्रभूभाबिम्बयोः प्रयोजनमिति भावः। अत्रोपपत्तिः। चन्द्रो दर्शान्ते सूर्य्यादधो भवतीति चन्द्रः सूर्य्यस्याच्छादकः। बुधशुक्रयोस्तु मण्डलाल्पत्वान्नाच्छादकत्वम्। चन्द्रस्याधो ग्रहाभावात् षड्भान्तरे भूम्या प्रतिबद्धाः सूर्य्यकिरणाश्चन्द्रगोले न पतन्ति। अतो निष्प्रभस्य चन्द्रस्य भूभायां प्रवेश इति चन्द्रस्य भूभाच्छादिका” र॰ना॰। अथ ग्रासानयनमाह “तात्कालिकेन्दुविक्षेपं छाद्यच्छादकमानयोः। योगार्धात् प्रोज्झ्य यच्छेषं तावच्छन्नं तदुच्यते” सू॰सि॰। “यश्छाद्यते स छाद्यः सूर्य्यग्रहणे सूर्य्यश्चन्द्रग्रहणे चन्द्रः। यश्छादयति स छादकः। सूर्य्यचन्द्रग्रहणयोः क्रमेण चन्द्रभूभे। तयोः पूर्व्वानीतमानान्तयोरैक्यस्यार्धात् तात्कालिकचन्द्रात् पूर्व्वोक्तप्रकारेण साधितं विक्षेपं कलादिकं विशोध्य यदवशिष्टं तत्प्रमाणकम् छन्नं छादकेन छाद्यस्य यावान्मण्डलप्रदेश आच्छादितस्तावत्प्रदेशात्मकं ग्रासरूपं ग्रहणतत्त्वज्ञैः कथ्यते। अत्रोपपत्तिः। छाद्यच्छादकमण्डलनेमियोगे ग्रहणाद्यन्तरूपे मण्डलकेन्द्रयोरन्तरं स्वबिम्बखण्डयोगरूपम् बिम्बस्य व्यासमानात्मकत्वात्। तत् तु समत्वाल्लाघवाच्च योगार्द्धरूपं धृतम्। ततो यथा प्रवेशस्तथा ग्रासो भवतीति पर्वान्ते छाद्यच्छादकयोर्विक्षेपान्तरितत्वात् तदूने विक्षेपे मण्डलयोगस्तदन्तरमितः स एव ग्रासः” र॰ना॰

अथ सम्पूर्णन्यूनग्रहणज्ञानं ग्रहणाभावज्ञानं चाह “यद्ग्राह्यमधिके तस्मिन् सकलं न्यूनमन्यथा। योगार्द्धादधिके न स्याद्विक्षेपे ग्राससम्भवः” सू॰सि॰।
“तस्मिन् छन्नमानेऽधिके ग्राह्यमानाधिके यद्यस्मात् कारणाद्ग्राह्यमानमस्ति। अतः कारणात् सकलं सम्पूर्णं ग्रहणं भवति। अन्यथा ग्राह्यमानान्न्यूने ग्रासे न्यूनं ग्राह्यमानान्तर्गतं ग्रहणं स्यात्। मानैक्यखण्डाद्विक्षेपेऽधिके सति न ग्राससम्भवः ग्रहणं न स्यात्। अत्रोपपत्तिः। ग्राह्यमानादधिके ग्रासे सम्पूर्णग्रहणं न्यूने न्यूनं मानैक्यखण्डादधिके विक्षेपे मण्डलसंयोगाभावाद्ग्रहणाभावः” र॰ना॰।

अथ स्थित्यर्धविमर्दार्धे आह। ‘ग्राह्यग्राहकसंयोगवियोगौ दलितौ पृथक्। विक्षेपवर्गहीनाभ्यां तद्वर्गाभ्यामुभे पदे। षष्ट्या सङ्गुण्य सूर्य्येन्द्वोर्भुक्त्यन्तरविभाजिते। स्यातां स्थितिविमर्दार्धे नाड़िकादिफले तयोः” सू॰सि॰।

“ग्राह्यग्राहकमानयोर्योगान्तरे अर्धिते पृथक् स्थानान्तरे स्थाप्ये। अग्रिमक्रियायां कदाचिदशुद्धत्वसम्भवे पुनः क्रियार्थमेतयोरावश्यकत्वात्। तद्वर्गाभ्यां योगार्द्धा-

न्तरार्धयोर्वर्गाभ्यां विक्षेपवर्गेण वर्जिताभ्यामुभे द्वे मूले षष्ट्या गुणयित्वा सूर्यचन्द्रयोर्गत्यन्तरकलाभिर्भक्ते तयोर्वेगविर्योगयोः स्थाने षष्ट्यादिभक्ते क्रमेण स्थित्यर्धविमर्दार्धे भवतः। अत्रोपपत्तिः। ग्रहणारम्भाद्ग्रहणान्तपर्यन्तः यः कालः स स्थितिसञ्ज्ञः। तस्य द्वे खण्डे, एकं ग्रहणारम्भान्मध्यग्रहणपर्यन्तमपरं मध्यग्रहणाद्ग्रहणान्तपर्यन्तम्। तत्र बिम्बनेमिस्पर्शकाले मानैक्यखण्डं कर्णः स्पर्शमोक्षकालिकशरो भुजः स्पर्शमोक्षान्यतरकालिकशराग्रमध्यकालिकशराग्रयोरन्तरं पूर्वापरं कोटिरिति तत्खण्डसाधकं क्षेत्रम्। एवं सम्पूर्णग्रहणे सम्मीलनोन्मीलनकालयोरन्तरकालो विमर्दस्तत्र मध्यग्रहणात् सम्मीलनोन्मीलनकालावधिखण्डे तत्साधकं छाद्यच्छादकमण्डलकेन्द्रयोरन्तरं विक्षेपवृत्ते पूर्वापरं कोटिरिति क्षेत्रम्। सम्मीलनं छाद्यमण्डलस्याच्छादनसमाप्तिः। उन्मीलनं तु छादकमण्डलादाच्छादितसम्पूर्णच्छाद्यमण्डलस्य निःसरणारम्भः। तत्र स्पर्शमोक्षसम्मीलनोन्मीलनकालानामसत्त्वान्मध्यकालिकविक्षेपग्रहणम्। भुजकर्णवर्गान्तरपदं कोटिरिति पूर्वश्लोकोक्तमुपपन्नम्। छाद्यच्छादकमण्डलकेन्द्रयोः पूर्वापरान्तराभावे मध्यग्रहणसम्भवाच्छाद्यच्छादकयुतिर्गत्यन्तरकलाभिर्यदि षष्टिघटिकास्तदानीतकोटिकलाभिः का इत्यनुपातेन स्थिति विमर्दखण्डे। तत्र चन्द्रग्रहणे भूभागतेः सूर्यगत्यनुरोधात् सूर्यगतित्वमित्युपपन्नं द्वितीयश्लोकोक्तम्" र॰ना॰।

अथ स्थित्यर्धविमर्दार्धे असकृत् साध्ये इत्याह। "स्थित्यर्धनाडिकाभ्यस्ता गतयः षष्टिभाजिताः। लिप्तादि प्रग्रहे शोध्यं मोक्षे देयं पुनः पुनः। तद्विक्षेपैः स्थितिदलं विमर्दार्धं तथाऽसकृत्। संसाध्यमन्यथा पाते तल्लिप्तादि फलं स्वकम्" सू॰सि॰।

"सूर्यचन्द्रपातानां गतयः स्थित्यर्धघटीभिर्गुणिताः षष्ट्या भक्ताः फलं कलादि प्रग्रहे स्पर्शस्थित्यर्धनिमित्तं सूर्यचन्द्रयोर्हीनं मोक्षे मोक्षस्थित्यर्धनिमित्तं सूर्यचन्द्रयोर्देयं योज्यम्। चन्द्रपाते तल्लिप्तादि फलं स्थित्यर्धघट्यानीतं कलादिपूर्वं फलं स्वकं स्वगत्युत्पन्नमन्यथा विपरीतं प्रग्रहस्थित्यर्धनिमित्तं योज्यं मोक्षस्थित्यर्धनिमित्तं हीनमित्यर्थः। तद्विक्षेपैस्तात्कालिकचन्द्रपाताभ्यामानीतशरकलाभिः कलानां बहुत्वाद्विक्षेपैरिति बहुवचनम्। विक्षेपाभ्यामित्यर्थः। पुनः पुनः स्थितिदलं कार्यम् प्रत्येकं पुनः पदं स्पर्शस्थित्यर्धसम्बद्धं, द्वितीयं मोक्षस्थित्यर्धसम्बद्धं पुनः पदम्। तेन स्पर्शस्थित्यर्धार्थसाधितचन्द्रपाताभ्यामानीतशरेण प्रागुक्तप्रकारेण स्पर्शस्थित्यर्धं संसाध्यम्। मोक्षस्थित्यर्धार्थसाधितचन्द्रपाताभ्यामानीतशरेण पूर्वोक्तरीत्या मोक्षस्थित्यर्धं साध्यमित्यर्थः। तच्चोभयमसकृद्वारंवारं स्पर्शस्थित्यर्धानीतचालनेन मध्यकालिकौ चन्द्रपातावुक्तरीत्या प्रचाल्य तच्छरेण पूर्वोक्तरीत्या स्पर्शस्थित्यर्धमस्मादप्युक्तरीत्या स्पर्शस्थित्यर्धमेवं यावदविशेषः। एवं मोक्षस्थित्यर्धानीतचालनेन मध्यकालिकौ चन्द्रपातावुक्तरीत्या प्रचाल्य तच्छरेण पूर्वोक्तरीत्या मोक्षस्थित्यर्धमस्मादप्युक्तरीत्या मोक्षस्थित्यर्धमेवं यावदविशेष इत्यर्थः। ननु स्थित्यर्धविमर्दार्धयोरेकरीत्युक्तेः कथं विमर्दार्धमसकृत् साध्यमिति नोक्तमित्यत आह विमर्दार्धमिति। तथा च स्पर्शमोक्षस्थित्यर्धसाधनरीत्याऽसकृद्यावदविशेषस्तावत् स्पर्शमर्दार्धं मोक्षमर्दार्धं च संसाध्यम्। तथा हि स्थित्यर्धनाडिकाभ्यस्ता इत्यत्र विमर्दार्धनाडिकाग्रहात् स्पर्शमर्दार्धमोक्षमर्दार्धे साध्ये। आभ्यां प्रत्येकमसकृत् स्पर्शमर्दार्धमोक्षमर्दार्धे स्फुटे स्तः। अत्रोपपत्तिः। प्रागुक्तं क्षेत्रं स्पर्शमोक्षसम्मीलनोन्मीलनकालिकशरवशादिति तदज्ञानान्मध्यकालिशरग्रहणेन स्थूलं स्थित्यर्धं मर्दार्धं चातो मध्यकालात् तदन्तरेण पूर्वाग्रिमकालिकयोस्तेषां सम्भवात् तत्कालचालितचन्द्रपाताभ्यां विक्षेपस्तात्कालिको भवति परं स्थूलः स्थूलस्थित्यर्धाद्यानीतत्वात्। अतोऽस्मादानीतं स्थित्यर्धादि पूर्वापेक्षया सूक्ष्ममपि स्थूलमित्यसकृत् सूक्ष्ममिति। तत्र सम्मीलनोन्मीलनकालयोराकाशस्पर्शमोक्षसम्भवात् स्पर्शमोक्षमर्दार्धमिति ध्येयम्" र॰ना॰।

अथ मध्यग्रहणस्पर्शमोक्षकालानाह। "स्फुटतिथ्यवसाने तु मध्यग्रहणमादिशेत्। स्थित्यर्धनाडिकाहीने ग्रासो मोक्षस्तु संयुते" सू॰सि॰।

"स्पष्टतिथ्यन्तकाले तुकारात् तत्पूर्वापरकालनिरासः। मध्यग्रहणं ग्रासोपचयसमाप्तिं कथयेत्। मध्यग्रहणसम्बन्धेन मध्यसूर्यचन्द्रानीतमध्यतिथ्यन्ते तत्सम्भव इति कस्यचिद्भ्रमस्तद्वारणार्थं स्फुटेति स्थित्यर्धघटिकाभिर्हीने तिथ्यन्तकाले ग्रासः स्पर्शः। संयुते स्थित्यर्धघटीभिर्युते तिथ्यन्तकाले मोक्षः। तुकारः स्पर्शमोक्षस्थित्यर्धाभ्यां स्पर्शमोक्षकालाविति विषयव्यवस्थार्थकः। अत्रोपपत्तिः। तिथ्यन्तकाले छाद्यच्छादकयोः पूर्वापरान्तराभावाद्योगे मण्डलस्पर्शो यावान् भवति ततः पूर्वाग्रिमकालयोर्न्यून एवातोऽत्र मध्यग्रहणकालः। मध्यग्रहणकालात् [illegible]

घटीभिः स्पर्शः । अग्रिमकाले मोक्षस्थित्यर्धघटीभिर्मोक्षः । स्थित्यर्धयोस्तदन्तररूपत्वेन सिद्धेः” र०ना० ।

अथ सम्पूर्णग्रहणे निमीलनोन्मीलनकालावप्याह “तद्वदेव विमर्दार्धनाड़िकाहीनसंयुते । निमीलनोन्मीलनाख्ये भवेतां सकलग्रहे” सू०सि० ।

“सम्पूर्णग्रहणे तद्वत् यथा स्थित्यर्धेनाधिके तिथ्यन्ते स्पर्शमोक्षौ तथेत्यर्थः । एवकारात् तद्भिन्नरीतिव्युदासः । स्पर्शविमर्दार्धमोक्षविमर्दार्धघटीभ्यां क्रमेणोनयुते तिथ्यन्ते क्रमेण निमीलनोन्मीलनसञ्ज्ञे स्याताम् । अत्रोपपत्तिः । मर्दार्धस्य मध्यकालात् तदन्तररूपत्वेन तदूनाधिके तस्मिन् क्रमेण निमीलनोन्मीलने सम्पूर्णग्रहण एव भवतः । न्यूनग्रहणे तत्स्वरूपव्याघातात् तदभावः” र०ना० ।

अथेष्टकाले इष्टग्रासज्ञानार्थं कोटिकलानयनमाह । “इष्टनाड़ीविहीनेन स्थित्यर्धेनार्कचन्द्रयोः । भुक्त्यन्तरं समाहन्यात् षष्ट्याप्ताः कोटिलिप्तिकाः” सू०सि० । “सूर्यचन्द्रयोर्गत्यन्तरं कलात्मकं ग्रहणारम्भाद्या इष्टघटिकाः स्पर्शस्थित्यर्धघट्यनधिकास्ताभिरूनेन स्पर्शस्थित्यर्धेन गुणयेत् । अस्मात् षष्टिविभक्तप्राप्ताः कोटिकला भवन्ति । अत्रोपपत्तिः । इष्टकाले छाद्यच्छादकमण्डलकेन्द्रयोरन्तरं विक्षेपवृत्ते कोटिरिति ज्ञेयं इष्टघटयूनस्पर्शस्थित्यर्धघटिकानां कलाः कोटिः सिद्धाः । पूर्वं स्पर्शकालिककोट्याः स्थित्यर्धघटिकानां सिद्धत्वात्” र०ना० ।

“भानोर्ग्रहे कोटिलिप्ता मध्यस्थित्यर्धसङ्गुणाः । स्फुटस्थित्यर्धसम्भक्ताः स्फुटाः कोटिकलाः स्मृताः” सू०सि० ।

“अथात्र सूर्यग्रहणे विशेषमाह । सूर्यस्य ग्रहणे उक्तप्रकारेण याः कोटिकलाः सूर्यग्रहणोक्तस्पष्टस्थित्यर्धानीतस्थित्यर्धेन सङ्गुणिताः स्फुटस्थित्यर्धेन सूर्यग्रहणाधिकारोक्तेन भक्ताः सत्यः स्पष्टाः कोटिकलाः सूर्यग्रहणतत्त्वज्ञैरुक्ताः । अत्रोपपत्तिः । सूर्यग्रहणे स्पर्शमोक्षान्यतरमध्यकालयोरन्तरस्य स्थित्यर्धत्वात् तस्य च स्पष्टशरोद्भूतस्थित्यर्धलम्बनान्तरैक्यसंस्कारमितत्वात् स्पष्टस्थित्यर्धानुरुद्धा उक्तरीत्यानीताः कोटिकलाः । अपेक्षिताश्च स्पष्टशरोद्भूतस्थित्यर्धानुरुद्धाः । एतत् कोटिसम्बद्धं क्षेत्रम् स्थित्यर्धक्षेत्रान्तर्गतत्वात् । स्पष्टस्थित्यर्धस्य लम्बनान्तरैक्यसंस्कारानुक्तिमसक्तः । अतः स्पष्टस्थित्यर्धेनैता आगताः कोटिकलास्तदा स्पष्टशरोद्भूतक्षेत्रजमध्यमरूपस्थितर्धेन का ? इति स्फुटाः कलाः सिद्धाः” र०ना० । “क्षेपो भुजस्तद्दोर्वर्गयुतेर्मूलं श्रवस्तु तत् । मानयोगार्धतः प्रोज्झ्य ग्रासंस्तात्कालिको भवेत्” । सू०सि०

“अथेष्टग्रासानयनमाह । क्षेपो विक्षेपो भुजः कोटिभुजयोः कर्णसापेक्षत्वादाह तयोरिति । कर्णस्तु तयोः कोटिभुजयोर्वर्गयोगान्मूलं सिद्ध एव । तत् कर्णश्रवणात्मकं मूलं ग्राह्यग्राहकमानैक्यार्धाद्विशोध्य शेषं तात्कालिकः कल्पितेष्टकालसम्बन्धी ग्रासोऽवान्तरग्रासः स्यात् । अत्रोपपत्तिः क्षेत्रं पूर्वं प्रतिपादितम् । स्पर्शकाले मानैक्यखण्डस्य कर्णत्वात् क्षेत्रयोरुभयोर्मध्यकालावधित्वादिष्टकर्णोनं मानैक्यखण्डमिष्टग्रास एव” र०ना० । “मध्यग्रहणतश्चोर्ध्वमिष्टनाड़ीर्विशोधयेत् । स्थित्यर्धान्मौक्षिकाच्छेषं प्राग्वच्छेषं तु मौक्षिके” सू०सि० । “अथ मध्यग्रहणानन्तरमिष्टग्रासानयनमाह । ‘मध्यग्रहणकालादूर्ध्वमनन्तरम् । चकारो विशेषार्थकस्तुकारपरः । इष्टघटिकाः कर्म । मौक्षिकान्मोक्षकालसम्बद्धात् स्थित्यर्धात् । न स्पर्शस्थित्यर्धात् । विशोधयेत् गणक इति कर्त्राक्षेपः । शेषं कोटिलिप्तादिग्रासानयनान्तं गणितकर्म प्राग्वद्भुक्त्यन्तरं समाहन्यादित्युक्तप्रकारेण कुर्यात् । मौक्षिके मोक्षस्थित्यर्धान्तर्गतेष्टकाले तु विशेषे ग्रासः शेषतुर्यरितो ग्रासोऽवान्तरग्रासो भवति । न पूर्ववद्गतः । अत्रोपपत्तिः । मध्यग्रहणात् पूर्वमिष्टकालस्य ग्रहणारम्भावधिकस्य स्पर्शस्थित्यर्धसम्बद्धत्वादागतो ग्रास उपचयात्मकः । नावशिष्टः । अवशिष्टमण्डलस्य शुद्धत्वेन ग्रस्तत्वासम्भवात् । एवं मध्यग्रहणानन्तरमिष्टकालस्य मोक्षस्थित्यर्धान्तर्गतत्वादुक्तरीत्यानीतो ग्रासोऽपचयात्मकः । न शुद्धबिम्बदर्शनात्मकः । ग्रस्तत्वाभावात्” रङ्ग० । “ग्राह्यग्राहकयोगार्धाच्छोध्याः स्वच्छन्नलिप्तिकाः । तद्वर्गात् प्रोज्झ्य तत्कालविक्षेपस्य कृतिं पदम् । कोटिलिप्ता रवेः स्पष्टस्थित्यर्धेनाहता हृताः । मध्येन लिप्तास्तत्राद्यः स्थितिवद्ग्रासनाड़िकाः” सू०सि० । “अथाभीष्टग्रासादिष्टकालानयनमाह छाद्यच्छादकमानैक्यखण्डादभीष्टग्रासकलाः शोध्याः शेषस्य वर्गादभीष्टग्रासकालिकविक्षेपस्य वर्गं विशोध्य शेषस्य मूलं कोटिकलाः । सूर्यग्रहणे विशेषमाह रवेरिति सूर्यस्य ग्रहणे इति शेषः भानोर्ग्रह इति पूर्वमुक्तेः । उक्तप्रकारेण याः कलास्ता मध्यग्रहणकालस्पर्शमोक्षान्यतरकालयोरन्तररूपेण स्पष्टस्थित्यर्धेन गुण्याः । स्पष्टशरोत्पन्नस्थित्यर्धेन मध्यमेन भक्ताः फलं कोटिकला भवन्ति । स्थितिवत् स्थित्यर्धसाधनरीत्या । “षष्ट्या सङ्गुण्य सूर्येन्द्वोर्भुक्त्यन्तरविभाजिताः” इत्युक्तेन

तासां कोटिफलानां घटिका याता अभीष्टग्रासस्वल्पघटिकाः स्पर्शमोक्षान्यतरस्थित्यर्धान्तर्गताः क्रमेण मध्यग्रहणाच्छेषा गता वा भवन्ति । अत्रोपपत्तिः पूर्वोक्तव्यत्यासात् सुगमतरा । परन्तु स्वाभीष्टग्रासकालिकशरज्ञाने सूक्ष्मम् । तच्छराज्ञाने मध्यकालिकशरग्रहणेन स्थूलम् । अतएव भास्कराचार्यैः “कालसाधने तत्कालबाणेन मुहुः स्फुट इत्युक्तमिति” रङ्ग० ।

अथ वक्ष्यमाणग्रहणपरिलेखोपयुक्तवलनानयनमाह ।

“नतज्याक्षज्ययाभ्यस्ता त्रिज्याप्ता तस्य कार्मुकम् । वलनांशाः सौम्ययाम्याः पूर्वापरकपालयोः । राशित्रययुताद्ग्राह्यात् क्रान्त्यंशैर्दिक्समैर्युताः । भेदेऽन्तराज्ज्या वलना सप्तत्यङ्गुलभाजिता” सू० सि० ।

“यत्कालिकं वलनं कर्तुमिष्टं तात्कालिकं नतं, चन्द्रग्रहणे चन्द्रस्य, सूर्यग्रहणे सूर्यस्य साध्यम् । तद्यथा स्वोदयात् स्वास्ताद्गतशेषघटिकाः स्वदिनार्धान्तर्गताः स्वदिनार्धादूनाः क्रमेण पूर्वापरनतघटिका भवन्ति । तद्गतं नवतिगुणं स्वदिनार्धभक्तं नतांशास्तेषां ज्या नतज्येत्यर्थः । स्वदेशाक्षांशज्यया गुणिता त्रिज्यया भक्ता फलं धनुः कलात्मकं षष्टिभक्तं पूर्वापरकपालयोः पूर्वापरनतयोः क्रमेणोत्तरदक्षिणा वलनांशा भवन्ति । यत्कालिकं वलनं तात्कालिकाद्ग्राह्याद्राशित्रययुतात् सायनांशाद्ये क्रान्त्यंशास्तैर्दिक्तुल्यैर्युतास्तेषां ज्या, भेदे भिन्नदिक्त्वेऽन्तरात् क्रान्त्यंशवलनांशयोरन्तराज्ज्या सप्तत्यङ्गुलैर्भक्ता शेषदिका । अङ्गुलात्मकत्वेन हरलेखोद्देशादङ्गुलादिका वलना भवति । अत्रोपपत्तिः । समवृत्तपूर्वापरादिदिग्भ्यः क्रान्तिवृत्तपूर्वापरादिदिशो यावतान्तरेण चलिता उत्तरस्यां दक्षिणस्यां वा वलनांशाः । तदानयनार्थं प्रथमतः समवृत्तानुरूपदिग्भ्यो विषुवद्वृत्तदिशो यावतान्तरेण चलिता दक्षिणोत्तरयोस्तदाक्षवलनम् । तथा हि समप्रोतवलयवृत्तं ग्रहचिह्नस्थं समविषुवद्वृत्तयोर्यत्र लग्नं तत्प्रदेशान्नवत्यंशान्तरे प्राच्योरन्तरं वलनं तत्तुल्यमेवेतरदिशामन्तरं पूर्वकपालस्थे ग्रहे समवृत्तप्राचीतो विषुवद्वृत्तप्राच्या उत्तरादुत्तरम् । पश्चिमकपालस्थे तु समवृत्तप्राचीतो विषुवद्वृत्तप्राच्या दक्षिणत्वाद्दक्षिणम् । तत्र क्षितिजस्थे ग्रहे तदन्तरमक्षांशतुल्यम् । याम्योत्तरवृत्तस्थे ग्रहे तदन्तराभावः । अतो यदि त्रिज्यातुल्यया नतकालज्ययाऽक्षज्यातुल्याक्षवलनज्या तदेष्टनतज्यया केत्यनुपातागताक्षज्याया धनुराक्षं वलनमुत्पन्नम् । द्वितीयं तु विषुवद्वृत्तदिग्भ्यः क्रान्तिवृत्तदिशो यावतान्तरेण चलिता दक्षिणोत्तरयोस्तदायनं वलनम् । तथा हि ध्रुवप्रोतवृत्तं ग्रहचिह्नस्थं विषुवद्वृत्ते यत्रावयं लगति तत्स्थानान्नवत्यंशान्तरे यत् स्थानं तद्विषुवत्प्राची । तस्मात् ग्रहचिह्नात् त्रिभान्तरितक्रान्तिवृत्तप्राची यदन्तरेण तदायनं वलनम् । तत्तुल्यमेवेतरदिशामन्तरम् । उत्तरायणस्थे ग्रहे उत्तरं दक्षिणायनस्थे ग्रहे दक्षिणम् । तत्तु अयनसन्ध्याद्यभावात्मकगोलसन्धौ परमक्रान्तितुल्यमतः एव त्रिभक्रान्तितुल्यं सत्रिभग्रहगोलदिकमित्युपपन्नं राशित्रययुताद्ग्राह्यात् क्रान्त्यंशैरिति । द्वयोर्वलनयोरेकदिक्त्वे समवृत्तप्राचीतः क्रान्तिवृत्तप्राची तद्योगरूपस्फुटवलनान्तरेण वलनदिशि भवति । भिन्नदिक्त्वे तु वलनान्तररूपस्फुटवलनान्तरेण शेषदिशि भवति । तज्ज्या स्फुटवलनज्या त्रिज्यावृत्ते अस्मे परिलेखे एकोनपञ्चाशन्मितव्यासार्धवृत्ते दानार्थं त्रिज्यावृत्ते यदीयम्, तदेकोनपञ्चाशन्मितज्या केत्यनुपाते प्रमाणेच्छयोरिच्छापवर्तनाद्धरस्थानेऽधोऽवयवत्यागात् सप्ततिः । अतो दिक्समैर्युता इत्याद्युपपन्नम्” रङ्ग० ।

अथ कलात्मकबिम्बविक्षेपादीनामङ्गुलीकरणमाह ।

“सोन्नतं दिनमध्यर्धं दिनार्धाप्तं फलेन तु । छिन्द्याद्विक्षेपमानानि तान्येषामङ्गुलानि तु” सू० सि० ।

“दिनमानमर्द्धेनाधिकम् इत्यध्यर्धं सार्धयुक्तमित्यर्थः । अभीष्टकालिकोन्नतघटीभिः सहितं दिनार्द्धेन भक्तं फलेन । तुकारो यद्ग्रहणं तस्य दिनमानोन्नते ग्राह्ये इत्यर्थकः । विक्षेपग्राह्यग्राहकबिम्बमानानि । तानि पूर्वोक्तानि कलात्मकानि । ग्रासादिकमपि ध्येयम् । भजेत् । तुकारात् फलमेषां कलात्मकानामङ्गुलानि भवन्ति । अत्रोपपत्तिः । उदयास्तकाले बिम्बकिरणानां भूमिगोलावरुद्धत्वेनाल्पोर्द्ध्वकिरणानां नयनप्रतिहननानर्हत्वाद्बिम्बं व्यक्तत्वान्महद्भासते । तत्राङ्गुलात्मकं बिम्बं कलात्रयात्मकैकाङ्गुलप्रमाणेन भवति । खमध्यस्थे ग्रहे तु बिम्बस्य सर्वकिरणानवरुद्धत्वान्नयनप्रतिघाताच्च सूक्ष्मं बिम्बं भासते । तत्राङ्गुलात्मकं बिम्बं कलाचतुष्टयात्मकैकाङ्गुलप्रमाणेन भवति । तत्रोदयास्तकाले शङ्कोरभावात् खमध्यस्थे तस्य त्रिज्यातुल्यत्वात् त्रिज्यातुल्यशङ्क्वुदयकालिकैकाङ्गुलमानस्य कलात्रयस्यैकाङ्गुलमुपचयो लभ्यते तदेष्टशङ्कौ क? इत्यनुपातेनाभीष्टकाले फलं त्रयमेकाङ्गुलस्य कलात्मकं मानं भवति । अत एव

भास्कराचार्यैश्चन्द्रग्रहणवासनायां धार्द्वयं कलाप्रमाणमङ्गीकृत्य "त्रिज्योद्धृतशङ्कुहृतोऽथवाङ्कः सार्द्धत्रिपञ्चोऽङ्गुलिलिप्तिकाः स्युः" इत्युक्तम्। तत्र भगवता चोक्तानुकम्पया स्वल्पान्तरत्वाच्च मध्याह्नेऽपि कलाचतुष्टयात्मकाङ्गुलमङ्गीकृत्य दिनार्द्धतत्परमोन्नतकाल एवोपचयपक्षेऽपचयकाले च इत्यनुपातागतफलस्यार्द्धं तयं कला एकाङ्गुलमानमभीष्टकाले। तत्र दिनार्द्धभक्तोन्नतकालस्य फलस्वरूपत्वात् लयानां समच्छेदतया योजने त्रिगुणितं दिनार्द्धं सार्द्धैकगुणदिनमानरूपप्रवतकालयुक्तं दिनार्द्धभक्तमिति सिद्धम्। तत एतत्कलाभिरेकाङ्गुलं यदा तदेष्टकलाभिः किमित्यनुपातेन कलात्मकानामङ्गुलीकरणमुक्तमुपपन्नम्" रङ्ग०। इति चन्द्रग्रहणाधिकारः

अथ सूर्य्यग्रहणाधिकारस्तत्र विशेषः।

"मध्यलग्नसमे भानौ हरिजस्य न सम्भवः। अक्षोदङ्मध्यभक्रान्तिसाम्ये नावनतेरपि" सू०सि०। "सूर्य्येऽमावास्यान्तकालिके मध्यलग्नसमे सति दिनमध्यस्थाने अर्द्धयाम्योत्तरवृत्ते लग्नः क्रान्तिवृत्तप्रदेशो मध्यलग्नं त्रिप्रश्नाधिकारोक्तम्। तत्तुल्ये सति मध्याह्न इति फलितम्। हरिजस्य लम्बनस्य भूपृष्ठक्षितिजवशाल्लम्बनोत्पत्तेर्लम्बनस्यापि क्षितिजवाचकहरिजशब्देनाभिधानात् सम्भव उत्पत्तिर्न। तत्र लम्बनाभावः इत्यर्थः। लग्नयोरुदयक्षितिजास्तक्षितिजप्रदेशयोः संलग्नक्रान्तिवृत्तप्रदेशयोर्मध्यम् अर्द्धमध्यप्रदेशयोस्त्रिभोनलग्नमित्यर्थः। प्रयोगस्तु मध्याह्न इतिवत्। तत्तुल्येऽर्के लम्बनस्याभाव इति। नत्यभावस्थानमाह।

अक्षेत्यादि। अक्षांशा उत्तरा ये मध्यभस्य मध्यलग्नस्य क्रान्त्यंशाः। अत्र मध्यलग्नशब्देन दशमभावस्त्रिभोनलग्नं वा ग्राह्यमुभयपक्षेऽप्यदोषः। अनयोस्तुल्यत्वेऽवनतेर्नतेः। अपिशब्दात् सम्भवः नाभाव इत्यर्थः। न त्वपिशब्दाल्लम्बनस्यापि तत्राभावः। उत्तरक्रान्त्यक्षयोस्तुल्यत्वे मध्यलग्नतुल्यार्कत्वाभावेऽपि तदभावापत्तेः। अत्रोपपत्तिः। अमावास्यान्तकाले समौ सूर्य्यचन्द्रौ। तत्र चन्द्रशराभावे भूगर्भाल्लोक्यमानं सूत्रमर्कस्यानावधि चन्द्रं स्पृशत्येवेति भूगर्भे छादकत्वं चन्द्रस्य सूर्यस्य छाद्यत्वं सम्भवति। तत्र मनुष्याणामसत्त्वाद्भूपृष्ठे तेषां सत्त्वाच्च भूपृष्ठाल्लोक्यमानार्कोपरि सूत्रं चन्द्रे न लगत्येव। किन्तु चन्द्राधिष्ठानगोले। चन्द्रचिह्नादूर्द्ध्वं लगति। तत्र यदा चन्द्र आयाति तदा भूपृष्ठे सूर्य्यस्य चन्द्रश्छादको भवति। यदा तु खमध्ये सूर्य्यस्तदा भूगर्भसूत्रं भूपृष्ठसूत्रं च सूर्य्योपरिगमेकमेव चन्द्रे लगतीति भूपृष्ठेऽमान्तकाले चन्द्रश्छादको भवति। अत एव भूगर्भपृष्ठसूत्रान्तरं लम्बनम्। भूपृष्ठसूत्रात् सूर्य्योपरिगाच्चन्द्राधिष्ठानाकाशगोले चन्द्रस्य शरसत्त्वे चन्द्रचिह्नस्य या लम्बितत्वात्। अत एव भास्कराचार्य्यैरुक्तम् "दृग्गर्भसूत्रयोरैक्यात् खमध्ये नास्ति लम्बनम्" इति। अथ चन्द्राधिष्ठानगोले भूपृष्ठसूत्रमर्कोपरिगतं चन्द्राच्चिह्नादूर्द्ध्वं चन्द्रदृग्वृत्ते यत्रैव लगति तल्लम्बनं दृग्वृत्ताकारक्रान्तिवृत्ते भवति। यदा तु दृग्वृत्ताद्भिन्नं क्रान्तिवृत्तं तदा भूपृष्ठसूत्रं चन्द्राधिष्ठानगोले चन्द्रदृग्वृत्ते चन्द्रादूर्द्ध्वं यत्र लग्नं तत्र चन्द्रगोलस्थक्रान्तिवृत्तयाम्योत्तररूपकदम्बप्रोतवृत्तमानीय चन्द्रगोलस्थक्रान्तिवृत्ते यत्र लग्नं तच्चन्द्रचिह्नयोरन्तरं क्रान्तिवृत्ते पूर्वापरं स्फुटलम्बनकलाः कोटिः चन्द्रस्य क्रान्तिवृत्तानुसारेण गमनात् प्रोतवृत्ते क्रान्तिवृत्तदृग्वृत्तयोरन्तरं याम्योत्तरं कलात्मकं नतिर्भुजः। भूगर्भपृष्ठसूत्रान्तरं दृग्वृत्ते कलात्मकं दृग्लम्बनं कर्णः। दृग्वृत्तस्य कदम्बप्रोतवृत्ताकारत्वे क्रान्तिवृत्ते तयोरन्तराभावाल्लम्बनाभावः। याम्योत्तरमन्तरं दृग्लम्बनं नतिरेवोत्पद्यते। दृग्वृत्ताकारक्रान्तिवृत्ते तु दृग्लम्बनमेव क्रान्तिवृत्ते तयोरन्तरमिति लम्बनमुत्पन्नं नत्यभावश्च। तथा च दृग्वृत्तस्य कदम्बप्रोतवृत्ताकारत्वे त्रिभोनलग्नस्थानेऽर्को भवति। तद्वृत्तस्य क्रान्तिवृत्तयाम्योत्तरत्वेनोदयास्तलग्नमध्यवर्त्तित्वेन लग्नस्थानात् त्रिभान्तरितत्वात्। न हि क्रान्तिवृत्ताद्याम्योत्तरान्तरज्ञानार्थं समप्रोतवृत्तमङ्गीकार्य्यम्। येन दशमभावतुल्यार्के लम्बनाभाव उपपन्नः स्यात् क्रान्तिवृत्तस्य गोलवृत्तत्वेन समप्रोतवृत्तस्य देशवृत्तत्वेन सम्बन्धाभावात्। अत एव भगवता सर्वज्ञेन नतिसाधनार्थमप्ये दृक्क्षेपः कदम्बप्रोतवृत्ते त्रिभोनलग्नस्यैव साधितः। दृक्क्षेपाभावे त्रिभोनलग्नस्य खमध्यस्थत्वेन तदा तस्य दशमभावतुल्यत्वेन दशमभावनतांशाभावाद्दृक्क्षेपाभावः। तदा त्रिभोनलग्नस्य नतांशाभावश्च। नतांशाभावस्त्वक्षांशतुल्योत्तरक्रान्तौ सुखार्थं स्थूलाङ्गीकारे तु दशमभावस्यैव नतांशोन्नतज्ज्योः दृक्क्षेपदृग्गती नतिलम्बनयोः साधनार्थं समनन्तरमेव भगवतोक्ते न तु वस्तुरूपे। व्याख्यातेन दृक्क्षेपसाधनस्योक्तस्य वैयर्थ्यापत्तेः" रङ्ग०।

"देशकालविशेषेण यथावनतिसम्भवः। लम्बनस्यापि पूर्वान्यदिग्वशाच्च तथोच्यते" सू०सि०। "देशविशेषेण काल-

विशेषेणावनतिसम्भवो नतिकालोत्पत्तिर्गौरवञ्चेति यथा भवति । लम्बनस्यापि स्थानद्वये । त्रिभोनलग्नस्थानात् पूर्वापरदिगनुरोधात् । चकारात् सम्भवो देशकालविशेषेण यथा भवतीत्यर्थः । तथा तत्त्वेन नतिलम्बने आनयनद्वारा मया कथ्येते" रङ्ग० । तत्रोपयुक्तासुदयाभिधानमाह । "लग्नं पर्वविनाड्योनां कुर्य्यात् स्वैरुदयासुभिः । तज्ज्यान्त्यापक्रमज्याघ्नी लम्बज्याप्तोदयाभिधा" सू० सि० । "स्वैः स्वदेशीयैरुदयासुभी राश्युदयासुभिः पर्वघटिकाणां लग्नं गणकः कुर्य्यात् । पर्वान्तकालिकं लग्नं साध्यमित्यर्थः । यद्यपि पूर्वं लग्नसाधनं स्वोदयैर्देशोक्तमिति स्वैरुदयासुभिरिति व्यर्थं तथापि समनन्तरमेव दृक्कर्मतावसाधनोक्त्या कस्यचिल्लग्नं व्यस्तोदयैर्देशाव साध्यमिति भ्रमस्य वारणाय पुनरुक्तिः । तस्य लग्नस्य सायनांशसंस्कृतस्य ज्या भुजज्या परमक्रान्तिगुण्या स्वदेशीयलम्बज्यया भक्ता फलमुदयसञ्ज्ञं स्यात् । अत्रोपपत्तिः । लग्नक्रान्तिज्यासाधनार्थं लग्नभुजज्यायाः परमक्रान्तिज्या गुणस्त्रिज्या हरस्ततो लम्बज्या कोटी त्रिज्या कर्णस्तदा लग्नक्रान्तिज्याकोटौ कः कर्ण इत्यनुपाते त्रिज्ययोर्नाशाल्लग्नभुजज्या परमक्रान्तिज्यागुणा लम्बज्यया भक्ता फलं लग्नस्याग्रा । इयं भगवतोदयसञ्ज्ञोक्ता लग्नस्योदयसञ्ज्ञत्वात् उदयसम्बन्धाद्वेत्युक्तमुपपन्नम्" रङ्ग० । "तदा लङ्कोदयैर्लग्नं मध्यसञ्ज्ञं यथोदितम् । तत्क्रान्त्यक्षांशसंयोगो दिक्साम्येऽन्तरमन्यथा । शेषं नतांशास्तन्मौर्वी मध्यज्या साभिधीयते" सू० सि० । "अत्रोपयुक्तां मध्यज्यामाह । तदा पर्वान्तकाले लङ्कोदयैर्निरक्षदेशीयराश्युदयैर्यथोदितं पूर्वोक्तप्रकारेण जातकपद्धत्युक्तनतघटीभिर्दशमलग्नं यथायोग्यं मध्यसञ्ज्ञं लग्नं दशमभावात्मकं साध्यम् । अत्र लग्नशब्देन स्वदेशराश्युदयासुयोग्यत्वशङ्कावारणाय लङ्कोदयैरित्युक्तम् । तस्य दशमभावस्य सायनांशस्य क्रान्तिः स्वदेशाक्षांशाः । अनयोर्योग एकदिक्त्वे कार्यः । अन्यथा भिन्नदिक्त्वेऽन्तरं तयोरेव शेषं संस्कारदिक्का नतांशास्तेषां ज्या कार्या सा मध्यलग्ननतांशज्या मध्यज्योच्यते तत्सम्बन्धात्" रङ्ग० । "अथाग्रामुपयुक्तं दृक्क्षेपं लम्बनोपयुक्तां दृग्गतिं चाह ।

"मध्योदयज्ययाभ्यस्ता त्रिज्याप्ता वर्गितं फलम् । मध्यज्यावर्गविश्लिष्टं दृक्क्षेपः शेषतः पदम् । तत्त्रिज्यावर्गविश्लेषान्मूलं शङ्कुः स दृग्गतिः" सू० सि० ।

"पूर्वोक्तमध्यज्या पूर्वानीतोदयाभिधयोदयज्यया अस्ता ज्याहतपत्यानेनोक्तम् । गुणिता त्रिज्यया भक्ता फलं वर्गितं वर्गः सञ्जातो यस्य तत् । फलस्य वर्गः कार्य इत्यर्थः । मध्यज्याया वर्गे विश्लिष्टं हीनं वर्गितं फलं कार्यम् । शेषान्मूलं दृक्क्षेपः स्यात् । दृक्क्षेपत्रिज्ययोर्यौ वर्गौ तयोरन्तरान्मूलं शङ्कुः । स आनीतः शङ्कुर्दृग्गतिसञ्ज्ञो भवति न तु शङ्कुमात्रम् । अत्रोपपत्तिः । त्रिभोनलग्नस्य दृग्ज्यानयनार्थं चेत्रम् । मध्यलग्नदृग्ज्याकर्णस्त्रिभोनलग्नस्य याम्योत्तरवृत्तात् प्रागपरस्थितत्वेन तत्स्वस्तिकान्तरस्थिततदीयदृग्वृत्तप्रदेशांशज्या कोटिः । मध्यलग्नत्रिभोनलग्नान्तरांशज्या क्रान्तिवृत्तस्थो भुजः । अत्र भुजानयनं चोदयलग्नस्य क्रान्तिवृत्तप्रदेशः प्राक्स्वस्तिकात् तदग्रान्तरेणोत्तरदक्षिणो भवति । एवमस्तलग्नप्रदेशः परस्वस्तिकाद्दक्षिणोत्तरः । तदनुरोधेन च त्रिभोनलग्नप्रदेशक्रान्तिवृत्तीययाम्योत्तरवृत्तस्थपतद्दृग्वृत्तं क्षितिजे याम्योत्तरवृत्तात् क्षितिजज्यातात् तदग्रान्तरेण लग्नमवश्यं भवति । अतस्त्रिज्यातुल्यमध्यलग्नदृग्ज्यया लग्नाग्रातुल्यो भुजस्तदाभीष्टतद्दृग्ज्यया क इत्यनुपातेन च फलसञ्ज्ञः । तद्वर्गोनान्मध्यलग्नदृग्ज्यावर्गान्मूलं त्रिभोनलग्नस्य दृग्ज्या दृक्क्षेपाख्या । एतद्वर्गोनात् त्रिज्यावर्गान्मूलं त्रिभोनलग्नशङ्कुर्दृग्गतिसञ्ज्ञः । अत्रेदमवधेयम् । त्रिप्रश्नाधिकारोक्तप्रकारेण त्रिभोनलग्नस्य शङ्कुदृग्ज्ये दृग्गतिदृक्क्षेपसञ्ज्ञे न भवतः । किन्तु दृग्गतिदृक्क्षेपाभ्यां क्रमेण न्यूनाधिके भवतः सर्वदा सूक्ष्मकर्मणानुभवात् । अत आनीतोऽयं दृक्क्षेपस्त्रिभोनलग्नाच्छङ्कुस्थितेऽपि न त्रिज्यातुल्यः । किन्तु फलवर्गोनत्रिज्यावर्गपदस्वरूपविकलस्वरूपलक्ष्यार्थप्रसाधेन सिद्ध इति गम्यते । अतो दृग्ज्यायास्त्रिज्यातुल्यत्वेन त्रिज्यावृत्तपरिणतौ दृक्क्षेपस्त्रिभोनलग्नस्य दृग्ज्या स्फुटदृक्क्षेपरूपा । अस्मात्त्रिज्यावर्गेत्यादिना दृग्गतिः स्फुटा त्रिभोनलग्नशङ्कुरूपा । एतदुक्तिः सत्त्वान्तरस्यास्फुटत्वार्थं भगवता कृता । त्रिप्रश्नक्रियागौरवभियैतन्मार्गान्तरं लाघवादुक्तमिति" रङ्ग० ।

अथ लाघवाद्दृक्क्षेपदृग्गती गणितसुखार्थमाह ।

"नतांशबाहुकोटिभ्यां स्फुटे दृक्क्षेपदृग्गती" सू० सि० ।

"दशमभावनतांशानां भुजकोट्योर्नतांशतद्भुजमवतिरूपयोरनयोर्ज्ये क्रमेण दृक्क्षेपदृग्गती अस्फुटे स्थूले । यद्वा स्फुटे प्रागुक्ते दृक्क्षेपदृग्गती विहाय गणितलाघ-

वार्थं दशमभावनतांशभुजकोट्योर्ज्ये तत्स्थानापन्ने ग्राह्ये । अत्रोपपत्तिः त्रिभोनलग्नस्य दशमभावासन्नत्वेन दशमभावस्य याम्योत्तरवृत्तस्थत्वेन लाघवार्थं दशमभावमेव त्रिभोनलग्नं प्रकल्प्य तन्नतांशज्या मध्यज्यारूपा त्रिभोनलग्नशङ्कुक्षेपः । उन्नतज्याशङ्कुर्दृग्गतिः । इदमतिस्थूलम् । यैस्तु भगवतोक्तं मध्यलग्नं दशमभावपरतया व्याख्यातं तेषां मत एतद्युक्तमिति । प्रयाससाधितदृक्क्षेपदृग्गती प्रागुक्ते सूक्ष्मे अन्यतिस्थूले इति ध्येयम् । भास्कराचार्यैस्तु "त्रिभोनलग्नस्य दिनार्धजाते नतांशकज्ये यदि वा सुखार्थम्" इति यदुक्तं तदस्मात् सूक्ष्ममिति ध्येयम्" रङ्ग० ।

अथ लम्बनोपयुक्तच्छेदसाधनपूर्वकं लम्बनानयनमाह ।

"एकज्यावर्गतश्छेदो लब्धं दृग्गतिजीवया । मध्यलग्नार्कविश्लेषज्या छेदेन विभाजिता । रवीन्द्वोर्लम्बनं ज्ञेयं प्राक् पश्चाद्घटिकादिकम्" सू० सि० ।

"एकराशिज्याया वर्गात् दृग्गतिजीवया प्रागुक्तदृग्गत्या दृग्गतेस्त्रिज्यातुल्यत्वेन ज्यारूपत्वाज्जीवयेति स्वरूपप्रतिपादनम् । भागहरणेन लब्धं छेदसंज्ञं स्यात् । अथ मध्यलग्नम् त्रिभोनलग्नं दर्शान्तकालिकं न तु दशमभावः तात्कालिकः सूर्यः अनयोरन्तरस्य त्रिभानधिकस्य ज्या छेदेन प्राक्साधितेन भक्ता फलं घटिकादिकं प्राक् पश्चात् त्रिभोनलग्नरूपमध्यलग्नस्थानात् पूर्वापरविभागयोः सूर्यचन्द्रयोस्तुल्यं लम्बनं ज्ञेयम् । अत्रोपपत्तिः "त्रिभोनलग्नार्कवियोगशिञ्जिनी शताहता व्यासदलेन भाजिता । हतात् फलाद्विभवलग्नशङ्कुना त्रिजीवयाप्तं घटिकादि लम्बनम्" सि० शि० सूक्ष्मं लम्बनानयनमुक्तम् । मध्यलग्नस्य त्रिभोनपरत्वेन व्याख्यानान्मध्यलग्नार्कविश्लेषज्या त्रिभोनलग्नार्कविश्लेषशिञ्जिनीरूपा जाता । इयं शतगुणा त्रिभोनलग्नशङ्कुरूपदृग्गत्या च गुणया त्रिज्यावर्गेण भाज्येति लम्बनानयनप्रकारेण सिद्धम् । तत्र शतत्रिज्यावर्गयोर्गुणहरयोर्गुणापवर्तनेन हरस्थाने एकराशिज्यावर्गः सिद्धः । अत्रापि दृग्गत्येकराशिज्यावर्गौ गुणहरौ गुणेनापवर्त्य हरस्थाने एकज्यावर्ग इत्यादिना छेद उपपन्नः हरस्य छेदाभिधानात् । अतो मध्यलग्नार्केत्याद्युक्तमुपपन्नम् । लम्बनघटीभिरुभयोस्तुल्यं वक्ष्यमाणगणित आवश्यकमिति सूचनार्थं रवीन्द्वोर्लम्बनमित्युक्तम् । अन्यथा दर्शान्तकाले सूर्यगतभूपृष्ठसूत्राच्चन्द्रच्छायां चन्द्रबिम्बस्य तद्घटीभिर्लम्बितत्वादसम्भवोऽत्यनुपपत्तिः । त्रिभोनलग्नसमेऽर्के लम्बनाभावात् पूर्वापरविभागे सूर्ये सति लम्बनं भवतीति प्राक् पश्चादित्युक्तम् । अत्रेदमवधेयम् । लम्बनानयने मध्यलग्नस्य त्रिभोनलग्नस्वेत्यर्थे छेदः पूर्वसाधितसूक्ष्मदृग्गत्या सूक्ष्मो नतांशेत्यादिग्रहीतस्थूलदृग्गत्या स्थूल इति । एवं मध्यलग्नेत्यस्य दशमभावार्थे तु विपरीतमिति" रङ्ग० ।

अथ मध्यग्रहणकालज्ञानार्थं तिथौ लम्बनसंस्कारं तदसकृत् साध्यमिति चाह ।

"मध्यलग्नाधिके भानौ तिथ्यन्तात् प्रविशोधयेत् । धनमूनेऽसकृत् कर्म यावत् सर्वं स्थिरीभवेत्" सू० सि० ।

"सूर्ये मध्यलग्नं त्रिभोनलग्नं तस्मादधिके सति तिथ्यन्तात् दर्शतिथ्यन्तकालादागतं लम्बनं शोधयेत् । सूर्ये त्रिभोनलग्नादूने सति तिथ्यन्तकाले लम्बनं धनं युतं कार्यम् । एवं कर्म गणितमसकृन्मुहुः कार्यम् । अयमर्थः । तिथ्यन्तकालिकः सूर्यो लम्बनघटीभिः क्रमेण पूर्वापरकाले चाल्यो लम्बनसंस्कृततिथ्यन्तेऽर्के भवति तस्माल्लम्बनसंस्कृततिथ्यन्तकाले लग्नदशमभावौ प्रसाध्य पूर्वोक्तरीत्या लम्बनं साध्यम् । इदमपि केवलतिथ्यन्ते संस्कार्यंरीत्या लम्बनं केवलं तिथ्यन्ते संस्कार्यम् । अस्मादपि लम्बनं तिथ्यन्ते संस्कार्यमित्यसकृदिति । गणितावधिमाह । यावदिति । सर्वं गणितं लम्बनादि यावद्यत्परिवर्तोऽवधि स्थिरीभवेत् । अविलक्षणं यावदविशेष इत्यर्थः । अत्रोपपत्तिः दर्शान्तकाले रविगतभूपृष्ठसूत्राच्चन्द्रस्याधो लम्बितत्वेन त्रिभोनलग्नादूने रवौ क्रान्तिवृत्ते पूर्वापरान्तराभावेनैकसूत्रस्थितत्वरूपयुतिदर्शान्तकालाल्लम्बनकालेनाग्रे भवति शीघ्रगचन्द्रस्य मन्दगरवितः पृष्ठे स्थितत्वात् । अधिके रवौ चन्द्रस्य पुरः स्थितत्वेन दर्शान्तकालाल्लम्बनकालेन पूर्वं युतिर्भवति । अतो दर्शान्तकालो लम्बनसंस्कृतो मध्यग्रहणकालः स्यात् । युतिकालस्य मध्यग्रहणकालत्वात् । परन्तु तावता लम्बनकालेन सूर्यस्यापि क्रान्तिवृत्ते चलनाल्लम्बनसंस्कृतदर्शान्तकाले रविगतभूपृष्ठसूत्राच्चन्द्रस्य लम्बितत्वं स्यादेवेति मध्यग्रहणकालस्त्वसिद्धः । न हि सूर्यो धनलम्बन ऋणलम्बने चन्द्रश्च लम्बनकाले स्थिरो येन तयोर्युतिः सङ्गता स्यात् । अतस्तात्कालिकात् पुनस्तात्कालिकं लम्बनं प्रसाध्य दर्शान्ते पुनः संस्कार्यम् मध्यकालः स्यात् । एवं तादृशलम्बनसंस्कृतदर्शान्तेऽपि तयोर्भूपृष्ठसूत्रैक्याभावात् पुनर्लम्बनं साध्यम् । तत्संस्कृतो दर्शान्तो मध्यग्रह इत्य-

सङ्क्षिधिनः यदा लम्बनं पूर्वलम्बनतुल्यं सिध्यति तदावश्यं तादृशलम्बनसंस्कृतदर्शान्तरूपमध्यग्रहणकाले भूपृष्ठसूत्रे तयोः सन्निवेशः यतस्तदा सूर्यगतभूपृष्ठसूत्रचन्द्रयोरन्तराभावेन पूर्वागतलम्बनतुल्यलम्बनस्य पुनः सिद्धिः अन्यथा तुल्यलम्बनानुपपत्तेः। तस्मान्मध्यकालोऽसकृदावदविशेषः साध्य इत्युपपन्नं मध्यलग्नेत्यादि" रङ्ग० ।

अथ नतिसाधनम्। "दृक्क्षेपः शीततिग्मांश्वोर्मध्यभुक्त्यन्तराहतः। तिथिघ्नत्रिज्यया भक्तो लब्धं साऽवनतिर्भवेत्" सू० सि०। "दृक्क्षेपः प्रागानीतः शीततिग्मांश्वोश्चन्द्रार्कयोर्मध्यगतीः कलात्मिके तयोरन्तरेण गुणितया त्रिज्यया भक्तः फलं सा देशकालविशेषाभ्यां या शोधिसिद्धा भवति संज्ञात गणिते नतिर्भवेत् । अत्रोपपत्तिः यदा क्रान्तिवृत्तं दृग्वृत्ताकारं तदा नत्यभाव इति प्रागुक्तम् । तत्र त्रिभोनलग्नस्य खमध्यस्थत्वेन दृक्क्षेपाभावः । यत्र च षष्ट्यंशास्तत्र देशे त्रिभोनलग्नस्य क्षितिस्थत्वेन परमा नतिः । परमास्तु नतिकला भूगर्भक्षितिजाद्भूपृष्ठक्षितिजस्य भूव्यासार्धान्तरेणोच्छ्रितत्वात्, गतियोजनैर्यदि गत्यन्तरकला लभ्यन्ते तदा भूव्यासार्धयोजनैः का इत्यनुपातेन तत्र मध्यगतियोजनानां भूव्यासार्धस्य च नियतत्वाद्भूव्यासार्धेनापवर्त्तः कृतः। तेन मध्यगत्यन्तरकलानां स्वल्पान्तरेण पञ्चदशांशः परमा नतिकलाः । अतएव षष्टिघटिकानां पञ्चदशांशो घटिकाचतुष्टयं परमं लम्बनं सिद्धम् । आभिस्त्रिज्यातुल्यदृक्क्षेपे सूर्यगतभूपृष्ठसूत्राच्चन्द्रस्य दक्षिणोत्तरेणावलम्बनं भवति । अतस्त्रिज्यातुल्यदृक्क्षेपेण यदि मध्यगत्यन्तरपञ्चदशांशो नतिस्तदेष्टदृक्क्षेपेण केत्यनुपातेन गत्यन्तरगुणो दृक्क्षेपो हरघातेन पञ्चदशगुणितत्रिज्यात्मकेन भक्तो नतिकला इत्युपपन्नम्" रङ्ग० ।

अथ प्रकारान्तराभ्यां नतिसाधनं लाघवादाह।

"दृक्क्षेपात् सप्ततिहृताद्भवेद्वाऽवनतिः फलम् । अथवा त्रिज्यया भक्तात् सप्तसप्तकसङ्गुणात्" सू० सि० ।

"सप्तत्या भक्ताद्दृक्क्षेपात् फलं कलादिका नतिः प्रकारान्तरेण भवेत् ! अथवा प्रकारान्तरेण सप्तसप्तकसङ्गुणात् सप्तानां सप्तकं सप्तवारमाष्टत्त्विर्वर्ग एकोनपञ्चाशदित्यर्थः तेन गुणिताद्दृक्क्षेपात् त्रिजयया भक्ता कलादिका नतिः । अत्रोपपत्तिः दृक्क्षेपस्य गत्यन्तरकलामित ७३।२७ गुणकपञ्चदशगुणितत्रिज्यामितहरौ ५।१५ ७० प्रथमप्रकारे गत्यन्तरापवर्त्तितौ हरस्थाने सप्ततिः । द्वितीयप्रकारे पञ्चदशभिरपवर्त्य गुणस्थाने स्वल्पान्तरादेकोनपञ्चाशद्धरस्थाने त्रिज्येत्युपपन्नम्" रङ्ग० ।

अथ नतेर्दिग्ज्ञानं स्पष्टविक्षेपं चाह ।

"मध्यज्या दिग्वशात् सा च विज्ञेया दक्षिणोत्तरा ।
सेन्दुविक्षेपदिक्साम्ये युक्ता विश्लेषिताऽन्यथा" सू० सि० ।

"साऽवनतिर्मध्यज्याया दिगनुरोधाद्दक्षिणोत्तरा मध्यज्या चेद्दक्षिणा तदा नतिरपि दक्षिणा चेदुत्तरा तदोत्तरा ज्ञेया । चः समुच्चये । तेन मध्यज्या नतांशदिक्केति । सा दक्षिणोत्तरा नतिश्चन्द्रविक्षेपदिक्साम्ये तयोरेकदिक्त्वे इत्यर्थः । युक्ता विक्षेपेण युतेत्यर्थः । अन्यथा तयोर्भिन्नदिक्त्वे विक्षेपेणान्तरिता शेषदिक्का विक्षेपसंस्कृता नतिः स्पष्टशररूपा स्यात् । चन्द्रविक्षेपो मध्यग्रहणकालिक इति ध्येयम्। अत्रोपपत्तिः नतांशदिक्कमध्यज्यावशाद्दृक्क्षेपस्योत्पन्नत्वात् तदुत्पन्ननतेस्तद्दिक्त्वं युक्तमेव । अथ रविगतभूपृष्ठसूत्राच्चन्द्राकाशगोले क्रान्तिवृत्तावधियाम्योत्तरान्तरस्य नतित्वात् क्रान्तिमण्डलाच्चन्द्रबिम्बावधि विक्षेपत्वाद्रविगतभूपृष्ठसूत्राच्चन्द्रबिम्बावधियाम्योत्तरान्तरस्य सूर्यग्रहणोपयुक्तनतिसंस्कृतविक्षेपरूपस्पष्टविक्षेपत्वादुभयोरेकदिशि योगो भिन्नदिश्यन्तरमित्युपपन्नम्" रङ्ग० ।

अत्र चन्द्रग्रहातिदेशः "तया स्थितिविमर्दार्धग्रासाद्यं तु यथोदितम् । प्रमाणं वलनाभीष्टग्रासादि हिमरश्मिवत्" सू० सि०। "अथ चन्द्रग्रहणाधिकारोक्तया विक्षेपसंस्कृतया नत्या स्पष्टविक्षेपरूपयेत्यर्थः । स्थित्यर्धविमर्दार्धग्रासाः आद्यशब्दात् स्पर्शमोक्षसम्मीलनोन्मीलनं यथोदितं चन्द्रग्रहणे यथोक्तं तथा । तुकारस्तदतिरिक्तरीतिव्यवच्छेदार्थकैवकारपरः । प्रमाणं मतमित्यर्थः । अवशिष्टमप्याह वलनेत्यादि । वलनाभीष्टग्रासौ । आदिशब्दादिष्टग्रासादिष्टकालानयनम् । हिमरश्मिवत् चन्द्रग्रहणोक्तरीत्या कार्यमित्यर्थः । अत्रोपपत्तिरविशेष एव" रङ्ग० ।

अथ स्थित्यर्धे विमर्दार्धे च विशेषः ।

"स्थित्यर्धोनाधिकात् प्राग्वत् तिथ्यन्ताल्लम्बनं पुनः ।
ग्रासमोक्षोद्भवं साध्यं तन्मध्यहरिजान्तरम् । प्राक्कपालेऽधिकं मध्याद्भवेत् प्राग् ग्रहणं यदि । मौक्षिकं लम्बनं हीनं पश्चार्धे तु विपर्ययः । तदा मोक्षस्थितिदले देयं प्रग्रहणे तथा । हरिजान्तरकं शोध्यं यत्रैतत् स्याद्विपर्ययः। एतदुक्तं कपालैक्ये तद्भेदे लम्बनैकता । स्वे स्वे स्थितिदले योज्या विमर्दार्धेऽपि चोक्तवत्" सू० सि० ।

"चन्द्रग्रहणाधिकारोक्तप्रकारेणासकृत् साधितं स्पर्श-स्थित्यर्धं मोक्षस्थित्यर्धं च । तद्यथा मध्यग्रहणकालिकस्पष्ट-शराद्युक्तरीत्या स्थित्यर्धघटिकास्ताभिस्तिथ्यन्तकालिकग्रहाः । स्पर्शस्थित्यर्धनिमित्तं पूर्वं चाल्याः । मोक्षस्थित्यर्धनि-मित्तमग्रे चाल्याः । तत्कालयोः प्रत्येकं नतिशरौ प्र-साध्य स्पष्टशरः साध्यः । ततः प्रथमकालिकस्पष्टशरात् स्थित्यर्धमनेन पूर्वं तिथ्यन्तकालिकग्रहात् प्रचाल्यो-क्तरीत्या स्पष्टशरं प्रसाध्य स्थित्यर्धं साध्यम् । एवमस-कृत् स्पर्शस्थित्यर्धम् । एवमेव द्वितीयकालिकस्पष्टशरात् स्थित्यर्धमनेनाग्रे तिथ्यन्तकालिकग्रहात् प्रचाल्योक्तरीत्या स्पष्टशरं प्रसाध्य स्थित्यर्धं साध्यम् । एवमसकृन्मो-क्षस्थित्यर्धमिति । अथाभ्यां स्पर्शमोक्षस्थित्यर्धाभ्यां क्रमेण हीनयुताद्दर्शान्तकालात् प्राग्वदुक्तरीत्या लम्बनं पुनरस-कृदुपायमोक्षोक्तं स्पर्शमोक्षकालिकं कार्यम् । तथाहि स्पर्शस्थित्यर्धहीनात् तिथ्यन्तात् तात्कालिकसूर्याल्लग्नद-शमभागौ प्रसाध्योक्तरीत्या लम्बनं साध्यम् । तेन स्पर्श-स्थित्यर्धोनतिथ्यन्तं संस्कृत्यासकृल्लम्बनमनेनापि स्पर्शस्थि-त्यर्धोनतिथ्यन्तं संस्कृत्यासकृल्लम्बनमेवमसकृत् स्पर्शकालिकं लम्बनम् । एवमेव मोक्षस्थित्यर्धयुतात् तात्कालिकसूर्या-ल्लग्नदशमभागौ प्रसाध्योक्तरीत्या लम्बनं साध्यम् । तेन मोक्षस्थित्यर्धयुततिथ्यन्तं संस्कृत्यासकृल्लम्बनमनेनापि मोक्षस्थित्यर्धयुततिथ्यन्तं संस्कृत्यासकृल्लम्बनमेवमसकृन्मोक्ष-कालिकं लम्बनमिति । प्राक्कपाले त्रिभोनलग्नात् पूर्व-भागे त्रिभोनलग्नाधिके रवौ मध्यान्मध्यकालिकात् । अपोक्तलम्बनस्य विभक्तिविपरिणामादन्वयेन लम्बनात् प्राग्-ग्रहणं प्रग्रहणं स्पर्शः स्पर्शकालिकम् । अत्रापि लम्बन-मित्यस्यान्वयः । लम्बनं चेदधिकं स्यात् । मौक्षिकं मो-क्षकालसम्बन्धि लम्बनं न्यूनं स्यात् । पश्चार्धे त्रिभोनल-ग्नात् पश्चिमभागे त्रिभोनलग्नाद्धीने रवौ । तुकारः समुच्चयार्थचकारपरः । विपर्यय उक्तवैपरीत्यम् । मध्य-कालिकलम्बनात् स्पर्शकालिकं लम्बनं न्यूनं मोक्षका-लिकं लम्बनमधिकमित्यर्थः । तदा तर्हि तन्मध्यहरिजान्त-रम् । तयोः स्पर्शमोक्षकालिकलम्बनेन प्रत्येकमन्तरं मोक्ष-स्थित्यर्धे योज्यम् । प्राग्ग्रहणे स्पर्शस्थित्यर्धे तथा देयम् । मोक्षमध्यकालिकलम्बनयोरन्तरं मोक्षस्थित्यर्धे योज्यम् । स्पर्शमध्यकालिकलम्बनयोरन्तरं स्पर्शस्थित्यर्धे योज्यमित्यर्थः । अत्र दक्षिणे काले विपर्यय उक्तवैपरीत्यं प्राक्कपाले मध्य-कालिकलम्बनात् स्पर्शकालिकलम्बनं न्यूनं मोक्षकालिकल-म्बनमधिकं पश्चिमकपाले तु मध्यकालिकलम्बनात् स्पर्श-कालिकलम्बनमधिकं मोक्षकालिकलम्बनं न्यूनं भवती-त्यर्थः । तत्र तन्मोक्षस्पर्शमध्यकालिकं हरिजान्तरकं ल-म्बनान्तरं मोक्षस्थित्यर्धे, मध्यमोक्षकालिकलम्बनयोरन्तरं स्पर्शस्थित्यर्धे मध्यस्पर्शकालिकलम्बनयोरन्तरमित्यर्थः । शोध्यं हीनं कुर्यात् एतल्लम्बनान्तरं योज्यं शोध्यं वा कपालैक्ये द्वयोः स्पर्शमध्ययोर्मध्यमोक्षयोर्वैककपाले स्वस्वकालिकत्रिभोनलग्नात् स्वस्वकालिकसूर्यस्योभयत्राधिके न्यूने चेत्यर्थः । उक्तं कथितम् । तद्भेदे तयोः स्पर्श-मध्ययोर्मध्यमोक्षयोश्च भेदे कपालभेदे स्पर्शकालिक-त्रिभोनलग्नात् तात्कालिकसूर्यस्याधिक्ये मध्य-कालिकत्रिभोनलग्नात् तात्कालिकार्कस्य न्यूनत्वे मध्य-कालिकत्रिभोनलग्नात् तात्कालिकार्कस्याधिकत्वे मोक्ष-कालिकत्रिभोनलग्नात् तात्कालिकार्कस्य न्यूनत्वे इत्यर्थः । लम्बनैकता लम्बनैक्यम् । स्पर्शमध्ययोर्भेदे तात्कालिकलम्बनयोर्योगः मध्यमोक्षयोर्भेदात् तात्कालिक-लम्बनयोर्योग इत्यर्थः । स्वकीये स्वकीये स्थित्यर्धे संयुता कार्या । स्पर्शस्थित्यर्धे स्पर्शमध्यकालिकलम्बनयोर्योगो योज्यः मोक्षस्थित्यर्धे मोक्षमध्यकालिकलम्बनयोर्योगो योज्य इत्यर्थः । स्पर्शस्थित्यर्धं मोक्षस्थित्यर्धं च स्फुटं भवति । आभ्यां चन्द्रग्रहणोक्तदिशा मध्यग्रहणका-लात् पूर्वमपरत्र क्रमेण स्पर्शमोक्षकालौ स्त इत्यर्धधि-कम् । अनेनोक्तरीत्या विमर्दार्धेऽपि स्फुटत्वमतिदिशति । विमर्दार्धे इति । स्पर्शमर्दार्धमोक्षमर्दार्धे चन्द्रग्रहणाधि-कारोक्तरीत्या स्पष्टशरेण सकृत् साधिते उक्तवत् "स्थित्य-र्धोनाधिकात् प्राग्वत् तिथ्यन्ताल्लम्बनं पुनः" इत्याद्यु-क्तरीत्या स्थित्यर्धस्थाने मर्दार्धग्रहणेन यावन्मोक्षोक्तमित्यत्र सम्मीलनोन्मीलनोक्तमिति ग्रहणेन प्राग्ग्रहणमित्यत्र सम्मीलनग्रहणेन मौक्षिकमित्यत्रोन्मीलनग्रहणेन स्फुटे साध्ये । अपिः समुच्चये । चकारात् ताभ्यां सम्मीलनो-न्मीलनकालौ मध्यग्रहणकालात् पूर्ववत् साध्यावित्यर्थः । अत्रोपपत्तिः स्थित्यर्धोनयुतो मध्यग्रहणकालः स्पर्शमो-क्षकालः मध्यकालिकलम्बनसंस्कारात् स्पर्शमोक्षका-लिकलम्बनसंस्कारस्यापेक्षितत्वाच्च । न हि यः कालो लम्बनसंस्कृतः स्फुटः स तद्भिन्नकालिकलम्बनसंस्कृतः स्फुटः स्यात् सम्बन्धाभावात् पूर्वं स्पर्शमोक्षकालयोरज्ञानात् तात्कालिकलम्बनज्ञानाभावाच्च । अतो स्पर्शमोक्षज्ञानार्थं यथा तिथ्यन्तादसकृल्लम्बनं प्रसाध्य तिथ्यन्ते संस्कृत्य

मध्यकालस्तथा स्पर्शमोक्षस्थित्यर्धहीनयुक्ततिथ्यन्तकालाभ्यां स्पर्शमोक्षतिथ्यन्तरूपाभ्यां प्रत्येकं लम्बनमसकृत् प्रसाध्य स्वस्वतिथ्यन्ते संस्कृत्य स्पर्शमोक्षकालौ स्फुटौ तन्मध्यकालयोरन्तरं स्फुटं स्थित्यर्धम्। तत्रर्णलम्बनेन स्पर्शमध्यमोक्षोत्पत्तौ यदा मध्यलम्बनादधिकं स्पर्शलम्बनं मोक्षलम्बनं च न्यूनं तदा स्पर्शस्थित्यर्धोनतिथ्यन्तस्याधिकलम्बनोनितस्य स्पर्शकालत्वान्न्यूनलम्बनोनितस्य तिथ्यन्तस्य मध्यकालत्वात् तयोरन्तरे तिथेः समत्वेन नाशात् स्पर्शस्थित्यर्धं स्पर्शकालिकलम्बनेन युतं मध्यकालिकलम्बनेन हीनमिति लम्बनयोरन्तरं तत्र धनं योज्यम्। एवं मोक्षस्थित्यर्धयुततिथ्यन्तस्य न्यूनलम्बनोनितस्य मोक्षकालत्वान्मध्यमोक्षकालयोरन्तरे पूर्वरीत्या मध्यमोक्षकालिकयोर्लम्बनयोरन्तरं धनं मोक्षस्थित्यर्धे योज्यम्। यदा तु मध्यलम्बनाद्धीनं स्पर्शलम्बनं मोक्षलम्बनं चाधिकं तदा न्यूनलम्बनहीनस्य स्पर्शकालत्वादधिकलम्बनम्। हीनस्य मध्यकालत्वादुक्तरीत्या तदन्तरे स्पर्शस्थित्यर्धे लम्बनान्तरं हीनम्। एवमधिकलम्बनहीनस्य मोक्षकालत्वान्मध्यमोक्षयोरन्तरे मोक्षस्थित्यर्धे लम्बनान्तरं हीनम्। धनलम्बनेन स्पर्शमध्यमोक्षोत्पत्तौ तु यदा मध्यलम्बनान्न्यूनं स्पर्शलम्बनं मोक्षलम्बनं चाधिकं तदा स्पर्शस्थित्यर्धोनतिथ्यन्तस्य न्यूनलम्बनाधिकस्य स्पर्शकालत्वादधिकलम्बनाधिकस्य तिथ्यन्तस्य मध्यकालत्वात् तयोरन्तरे लम्बनान्तरं स्पर्शस्थित्यर्धे योज्यम्। एवं मोक्षस्थित्यर्धयुततिथ्यन्तस्याधिकलम्बनाधिकस्य मोक्षकालत्वान्मध्यमोक्षयोरन्तरं मोक्षस्थित्यर्धे पूर्वरीत्या योज्यम्। यदा तु मध्यलम्बनादधिकं स्पर्शलम्बनं मोक्षलम्बनं च न्यूनं तदाऽधिकलम्बनाधिकस्य स्पर्शकालत्वाद्धीनलम्बनाधिकस्य मध्यकालत्वात् तयोरन्तरे उक्तरीत्या स्पर्शस्थित्यर्द्धे लम्बनान्तरं हीनम्। एवं न्यूनलम्बनाधिकस्य मोक्षकालत्वात् तन्मध्यकालान्तरे मोक्षस्थित्यर्द्धे लम्बनान्तरं हीनमिति सिद्धम्। नन्वयं लम्बनान्तरहीनपक्षो न युक्तः बाधात् तथाहि ऋणलम्बनस्य क्रमेणापचयात् स्पर्शमोक्षकालानां यथोत्तरं सम्भवाच्च मध्यकालिकलम्बनात् स्पर्शमोक्षकालिकलम्बनयोः क्रमेण न्यूनाधिकत्वमसिद्धम् एवं धनलम्बनस्य क्रमेणोपचयान्मध्यलम्बनात् स्पर्शमोक्षकालिकलम्बनयोः क्रमेणाधिकन्यूनत्वमसिद्धम्। न हि कदाचिन्मध्यकालात् स्पर्शमोक्षकालौ क्रमेणापरपूर्वकालयोः सम्भवतो येनोक्तं युक्तम् बाधात् तथा च लम्बनान्तरं योज्यमित्यस्यैवोपपन्नत्वे मन्दतेतावता प्रपञ्चेन "हरिजान्तरकं योध्यं यत्नैतत् स्याद्विपर्ययः" इति सर्वस्वभगवदुक्तं कथं निर्वहतीति चेत् मैवम् लम्बनसंस्कृतस्पर्शमोक्षकालयोः स्फुटयोरवस्तुभूतयोः सर्वदा मध्यकालात् क्रमेण पूर्वोत्तरावश्यंभावित्वेऽपि लम्बनासंस्कृतयोः स्थित्यर्द्धोनयुततिथ्यन्तरूपस्पर्शमोक्षकालयोः पारिभाषिकत्वेनावास्तवयोः कदाचिन्मध्यकालर्णधनलम्बनाभ्यां स्पर्शस्थित्यर्द्धमोक्षस्थित्यर्द्धयोः क्रमेण न्यूनत्वे मध्यकालादग्रिमपूर्वकालयोः क्रमेण सम्भवात् स्फुटो निर्वाहः। परन्त्वृणलम्बने धनलम्बने च मध्यलम्बनात् क्रमेण मोक्षस्पर्शलम्बनयोरधिकत्वासम्भवः। मध्यकालात् पूर्वापिमकालयोर्मोक्षस्पर्शयोः पारिभाषिकयोः क्रमेणासम्भवात्। अतः साक्षात् कण्ठोक्तेरभावाद्विपर्यय इत्यनेन विपर्ययविशेषस्यैव विवक्षितत्वात्। पूर्वं तु साधारण्याच्छन्दस्य साधारण्येन व्याख्यानं कृतमितग्दोषः"।

'वस्तुतस्तु सूर्योदयाद्यत्र प्राक् स्पर्शोऽनन्तरं मध्यकालस्तदा मध्यलम्बनात् स्पर्शलम्बनं षत्रिभलग्नचतुर्थभावसाधितं कदाचिन्न्यूनं भवति। यत्र चोदयात् पूर्वं मध्यः परतो मोक्षस्तत्र कदाचित् षत्रिभलग्नचतुर्भावसाधितमध्यकाललम्बनान्मोक्षकाललम्बनमधिकं भवति। यत्र चास्तात् पूर्वं स्पर्शः परतो मध्यस्तदा मध्यकाललम्बनात्त्रिभसम्बन्धात् स्पर्शकाललम्बनं कदाचिदधिकं भवति। यत्र चास्तात् पूर्वं मध्यकालः परतो मोक्षस्तदापि मध्यकाललम्बनान्मोक्षकाललम्बनं त्रिभसम्बद्धं न्यूनं न भवति। कदाचिदिति। पश्चोदयपश्चास्तयोः कदाचित्स्यादीदृशसम्भवाद्धरिजान्तरकं योध्यमित्यस्य नाप्रसिद्धिः विपर्ययोऽप्युक्तरीतिस्तुल्येति सर्वमुपपन्नम्। भास्कराचार्यैस्तु। "तिथ्यन्ताद्गणितागतात् स्थितिदलेनोनाधिकाल्लम्बनं तत्कालोत्थनतीषु संस्कृतिभवस्थित्यर्द्धहीनाधिके। दर्शान्ते गणितागते धनमृणं यद्वा विधायासकृत् ज्ञेयौ प्रग्रहमोक्षसंज्ञसमयावेवं क्रमात् प्रस्फुटौ। तन्मध्यकालान्तरयोः समाने स्पष्टे भवेतां स्थितिखण्डके च। दर्शान्ततो मर्दलेनयुक्तात् सम्मीलनोन्मीलनकाल एवम्" इत्यनेन भगवदुक्तादविरुद्धमुक्तमित्यलं पल्लवितेन" रङ्ग०। इतः परं परिलेखवलनाद्यानयनं तच्च सि० ग्रहणविधिः तत्राग्रे वक्ष्यते इतीह नोक्तम्।

सिद्धान्तशिरोमणौ मन्दग्रहणसम्भवनिर्णयार्थमाह यथा "कर्कमेनान्त्या रवि १२भिर्विनिमान्त्यादिमासैः संहिताः इ-

यक्त्वा। द्विघ्नाः खनागाङ्कगजांश ८९८ हीनाः पञ्चाङ्ग ६५ भक्ताः मयमान्विताः स्युः। मासाः पृथक् ते द्विगुणास्त्रिपूर्णवाणाऽ ५०२धिकाः खाङ्कन्टपांश १६९ युक्ताः। त्रिभि ३र्विभक्ताः फलमंशपूर्वं मासौघतुल्यैश्च गृहैर्युतं स्यात्। सपातसूर्योऽस्य भुजांशका यदा मनू १४नकाः स्याद्ग्रहणस्य सम्भवः"शि०। "कलिहखादेरारभ्य गताब्दा द्वादशगुणाश्चैत्रादिगतमासयुताः पृथक्स्था द्विघ्नाः स्वकीयेन गजाङ्काष्ट ८९८ भागेनोनाः पञ्चषष्ट्या ६५ भक्ताः फलमधिमासाः। तैः पृथक्स्था युताश्चान्द्रा मासा भवन्ति। अत्रोपपत्तिस्त्रैराशिकेन। यदि युगरविमासैः ५१८४०००० युगाधिमासा १५९३-३००लभ्यन्ते तदैभिः कलिगतैः किमिति। अत्राधिकासानामर्धेनानेन ७९६६५०गुणकभाजकावपवर्तितौ जातं गुणकस्थाने द्वयम् भागहारस्थाने पञ्चषष्टिः किञ्चिदभ्यधिका ६५।४।२१। अतः पञ्चषष्टिगुणानामधिमासानां १०३५६४५००द्विगुणानां रविमासानां च १०३६८०००० यदन्तरं ११५५००। तेन द्विगुणा रविमासा भक्ता लब्धमष्टाङ्कगजाः ८९८। तैर्द्विगुणाः कलिगतमासा भाज्याः। यल्लभ्यते तेन तान् वर्जितान् कृत्वा पञ्चषष्ट्या ६५ भागे हृतेऽधिमासा जायन्त इत्युपपन्नम्। तैरधिमासैः पृथक्स्था युताश्चान्द्रमासाः स्युः। ते चान्द्रमासाः पृथग्द्विनिघ्नास्त्रिपूर्णबाणैः ५०२ सहिताः स्वकीयेनाङ्कनृपांशेन १६९ युक्तास्त्रिभिर्भाज्याः। फलमंशाद्यं ग्राह्यम्। तानंशांस्त्रिंशता ३०विभज्य फलं राशयस्तदुपरि स्थाप्याः। राशिस्थाने मासौघतुल्या राशयश्च क्षेप्याः। एवमसौ सपातसूर्यो भवति। तस्य भुजांशा यदि चतुर्दशभ्य १४ ऊना भवन्ति तदा चन्द्रग्रहणस्य सम्भवो वेदितव्यः। अत्रोपपत्तिः। ग्रहणं हि मानैक्यार्धादूने विक्षेपे भवति। चन्द्रपक्षे मध्यमं मानैक्यार्धं षट्पञ्चाशत् कलाः ६५। सूर्यपक्षे द्वात्रिंशत् ३२। षट्पञ्चाशत् कलाः शरो द्वादशभिर्भुजभागैर्भवति (चन्द्रपक्षे)। द्वात्रिंशत्मिताः षड्भिर्भुजभागैर्भवति (रविपक्षे)। अतः स विक्षेपः सपातेन्दोः साध्यते। दर्शान्ते यावान् विधुस्तावानेव रविर्भवति। पौर्णमास्यन्ते तु षड्भाधिकस्यापि भुजस्तुल्य एव। अतः सपातार्काद्विक्षेपः कृतः। अतः सपातसूर्यसाधनेऽनुपातः। तत्रार्कपातयोः कल्पभगणानामैक्यं द्वादशभिः १२ संगुण्य राश्यात्मकं कार्यम्। यदि कल्पचान्द्रमासैरेभिः ५३४४३३३०००० एते राशयो ५४६२-७७२४०१६लभ्यन्ते तदैकेन किमिति लब्धमेको राशिः १। शेषं त्रिंशता ३०संगुण्य तेनैव हारेण भागे त्रियमाग्ने लब्धं पूर्णम्०। शेषं भागांशा अधश्छेदश्च ३५८२०२० ४८०/५३४४३३३०००० छेदलवं शेन१७८११३०००० छेदेऽपवर्तिते जातं त्रयम्३। तेनैव छेदलवांशेन भाज्यराशावपवर्तिते जातं द्वयम् २। शेषार्धेन शेषे ३१०८२ ०४८०ऽपवर्त्तिते जातं द्वयम् २। पूर्वच्छेदस्य लवांशे च शेषार्धेनापवर्तिते जाता अङ्कनृपाः १६९। अतो द्विगुणान्मासगणात् स्वाङ्कनृपांश, १६९ भाधिकात् त्रिभिर्विभक्तात् फलं भागादि मासगणतुल्या राशयश्च तत्र क्षेप्याः एवं सपातसूर्यो भवतीत्युपपन्नम्। यदुक्तं त्रिपूर्णवाणा ५०२ धिका इति। अयं कलियुगादौ पातस्य क्षेपस्तथा सपातसूर्यमासार्धक्षेपश्चात्र योजितः। तथात्र मध्यमः सूर्यः सपात आगच्छति। तेन स्फुटेन भवितव्यम्। स्फुटमध्ययोरन्तरं स्थूलं किल भागद्वयम्। अत उक्तं मनूनका इति अन्यथा द्वादशभिरेव भुजभागैर्मानैक्यार्धतुल्यः शर उत्पद्यते। तथा गूढक्रियया फलमानीय सपातसूर्य इति नामनिर्देशः कृतः। तेन तयोर्बीजकर्म सूचितम्। तदभाव सपातार्कैं कार्यम्"प्रमि०। अथ सूर्यग्रहार्थं विशेषः। "स्वहार्धयुक्तस्य सपातभास्वतो भुजांशकान् गोलदिशोऽयनस्य च। क्षेयोऽर्कौरविसंक्रमाद्गतदिनैर्दशान्तिनाडीनताद्दोर्४येन स्वहादिनोनघटितः प्राक् पश्चिमेऽस्यापमः। अत्रांशैः खलु संस्कृतो रथलवेनास्याथ ते संस्कृताः पाताढ्यार्कभुजांशका यदि नगो७नाः स्युस्तदार्कग्रहः। रूपं १ वियत्०पूर्णकृतान् ४०सपादान् १५ क्षिप्त्वा सपाते गतिमासगर्कें। तत्सम्भवं प्रागवलोक्य धीमान् पश्चात् ग्रहार्थं विदधीत तत्र"शि०।

अत्रोक्तवत् यः सपातसूर्यो ज्ञातः। असौ पञ्चदशभि १५र्भागैरधिकः कार्यः। यदि सूर्यग्रहणसम्भवो ज्ञातव्यः। ततस्तस्य भुजांशा यदि सपातः सूर्य उत्तरगोले तदोत्तरा यदि दक्षिणे तदा दक्षिणाः, तादृक्चिह्निता अनष्टाः स्थाप्याः। रविसंक्रमात् पूर्वो ज्ञेयः। रविसंक्रमाद्यावन्तो दिवसा गतास्तावन्तो भागा कल्प्याः। गतसंक्रान्तितुल्या राशयश्च। ततोऽमायास्यान्तकालस्य स्थूलस्य नतघटिकाः कार्याः। तासां चतुर्भि ४ र्भागे हृते यल्लभ्यते तद्राश्यादिकं फलं ग्राह्यम्। तेन राश्यादिना फलेन पूर्वाह्णे रविरूनः कार्योऽपराह्णे युतः तस्य सायनांशस्य क्रान्तिः साध्या। क्रान्त्यंशानां च

तुल्यदिशां योगोऽन्यदिशामन्तरमेवं ते नतांशा भवन्ति। तेषां रसांशे नष्टे तेऽनष्टाः स्थापिता भागाः संस्कृता कार्याः। समदिशां योगोभिन्नदिशामन्तरमित्यर्थः। एवं ते भागा यदि सप्तभ्य ७ ऊना भवन्ति तदा सूर्यग्रहणसम्भवो वेदितव्यः। अथ सपातसूर्यस्य प्रतिमासक्षेपः। यदि तस्मिन् मासे नार्कग्रहस्तदा सपातसूर्ये राशिस्थाने रूपम् १। भागस्थाने पूर्णम्० सपादाश्चत्वारिंशत् कलाश्च ४०। १५। प्रतिमासं प्रक्षिप्य सम्भवो ज्ञेयः। ज्ञाते सम्भवे स्फुटार्थं तत्र गृहाः कार्याः। अत्रोपपत्तिः। ये सपातसूर्यस्य भुजांशास्ते शरार्थं पृथक् स्थापिताः। अथ च सूर्यग्रहे शरो नत्या संस्कृतः कार्यः। तदर्थं दर्शान्ते या नतघटिकास्ता लम्बनेनोनाधिकाः कार्याः नतघटीनां चतुर्थांशः स्थूलं लम्बनम्। पञ्चभिः पञ्चभिर्घटिकाभिरेकैकः किल राशिः। याः किल नतघटिकास्ताश्चतुर्थांशेन लम्बनेनाधिकाः कार्याः। ततः पञ्चभिर्भाज्याः। एवं कृते पूर्वघटिकाश्चतुर्भिर्भक्ता भवन्ति। अतस्तेन राश्यादिनोनो रविः पूर्वाह्णे त्रिभोनलग्नं भवति। पश्चिमकपाले तु युतः सन्। अतस्तत्कालोदयतो वित्रिभं वर्त्तते। एवं वित्रिभलग्नस्य क्रान्तिरक्षांशैः संस्कृता नतांशा जाताः। ते यदा नतांशाः पञ्चचत्वारिंशद्भ ४५ भवन्ति तदा। यदि त्रिजयया परमावनति ४८। ४६ लभ्यते तदा पञ्चचत्वारिंशदंशानां जयया। २४२१ किमिति। फलं नतिः सार्धाश्चतुस्त्रिंशत् कलाः ३४। २० एतावांश्छरो यैर्भुजभागैरुत्पद्यते ते ज्ञेयाः। यदि सप्तत्या कलानां पञ्चदश १५ भागा लभ्यन्ते तदाभिर्नतिकलाभिः ३४।२०किमिति लब्धा अंशाः सप्त७,२४ चतुर्विंशति कलाश्च। एते तु नतलवानां षडंशेनोत्पद्यन्ते। अत उक्तं रसलवेनाढ्यास्ते संस्कृता इत्युपपन्नम्” प्रमि०।

एवं सिद्धान्तोक्ते ग्रहणसम्भवनियमे स्थिते”ज्यो०त०। “भत्रिपादान्तरे राहोः केतोर्वा संस्थितो रविः। चतुष्पादान्तरे चन्द्रस्तदा सम्भाव्यते ग्रहः। यस्मिन्वृक्षे रविस्तस्माच्चतुर्दशगतः शशी। पूर्णिमाप्रतिपत्सन्धौ राहुणा ग्रस्यते शशी। कृष्णपक्षे तृतीयायां मासर्क्षं यदि जायते। ततस्तयोदये सूर्य्ये राहुणा ग्रस्यते रविः” इत्युक्तिर्निर्मूला, समूलत्वे अतिस्थूलदृष्ट्या तयोक्तिः कथञ्चित्समर्थनीया। सिद्धान्तशिरोमणौ ग्रासाद्यानयने विशेष उक्तो यथा “समरहांशकलाविकलौ स्फुटौ रविविधू विदधीत रविग्रहम्। समलवावयवौ तु विधुग्रहं समवगन्तुमगुं च तदोक्तवत्” शि०।“सति संभवे रविग्रहं ज्ञातुममावास्यायां रविविधू तमश्च स्फुटं कृत्वा ततोऽर्केन्दू देशान्तरादिस्पष्टीकरणैः स्फुटौ विधाय तिथिं च कृत्वा यथोक्तं नतकर्म च। तथा कृते सति तिथ्यन्तकालिकौ तौ कार्य्यौ तमश्च एवं चन्द्रग्रहणं ज्ञातुं पौर्णमास्यां च। यतस्ततो ग्रहणक्रिया” शमि०।

इदानीमर्केन्द्वोः कक्षाव्यासार्द्धे आह। “नगनगाग्निनवाष्टरसा ६८९३७७ रवे रसरसेषुमहीषु ५१५६६ मिता विधोः। निगदिताऽवनिमध्यत उच्छ्रितिः श्रुतिरियं किल योजनसंख्यया” शि०। “स्पष्टार्थम्। अत्रोपपत्तिः कक्षाध्याये चन्द्रार्कयोः किल (४३३१४९७,२० रवेः,३२४०००इन्द्रोः,) कक्षे कथिते। किन्तु व्यासौ न कथितौ। तावदिदानीं त्रैराशिकेन। यदि भनन्दाग्निमित ३९२७ परिधेः खवाणसूर्य्यै १२५० र्मितो व्यासस्तदा सार्धाद्रिगोमनुसुराब्धिमिता ४३३१४९७। २० ऽर्ककक्षायास्तथा सहस्रगुणितजिनरामसंख्याया ३२४००० चन्द्रकक्षायाः क इति। फलं क्रमेण तयोः (१३७८७१,४ र० १०३१३२ च०) व्यासौ। तयोरर्धे एते (श्लोकोक्ते) श्रुती। इयं भूमध्यात् कक्षाया उच्छ्रितिः” प्रमि०।

इदानीमस्य योजनात्मककर्णस्य स्फुटीकरणार्थमाह। “मन्दश्रुतिर्द्राक्श्रुतिवत् प्रसाध्या तया त्रिभज्या द्विगुणा विहीना। त्रिज्याकृतिः शेषहृता स्फुटा स्यात्क्षिप्ता श्रुतिस्तिग्मरुचेर्विधोश्च”शि०।“यथा ग्रहस्य शीघ्रकर्म्मणि कर्णः साधितस्तथार्कस्य विधोश्च पृथक् पृथक् मन्दकर्णः साध्यः। तं कर्णं द्विगुणायास्त्रिज्याया विशोध्य शेषेण त्रिज्याकृतिर्भाज्या। फलं स्फुटः कलाकर्णो भवति। एवं विधोश्च। अत्रोपपत्तिः। इह स्पष्टीकरणे ये मन्दनीचोच्चवृत्तपरिधिभागाः पठितास्ते त्रिज्यातुल्ये कक्षाव्यासार्धे, यदा ग्रहस्य कर्ण उत्पन्नस्तदा कर्णो व्यासार्धं ग्रहकक्षायाः। अतस्त्रैराशिकेन तत्परिणतास्ते कार्याः। यदि त्रिज्याव्यासार्धे एते मन्दपरिधिभागास्तदा कर्णव्यासार्धे क इति। एवं परिधेः स्फुटत्वं विधायासकृत् कर्णः कार्य्यः। स कलाकर्णः स्फुटो भवति। एतदसकृत्कर्मोपसंहृत्य सकृत्कर्मणा कर्णस्य स्फुटत्वं कृतम्। प्रथमं यः कर्ण आगतस्तमेव त्रिज्यारूपं प्रकल्प्य स्फुटः कर्णोऽत्र साध्यते। यदा किल कर्णस्त्रिजयातो न्यूनो भवति यावता न्यूनस्तत् त्रिजयया संयोज्य यद्यधिको वर्त्तते या-

वताधिकस्तत् त्रिज्यया विशोध्य शेषेणानुपातः । यद्यनेन त्रिज्या लभ्यते तदा त्रिज्यया किमिति । अनेनानुपातेन स्फुटः कर्णः सहजो भवति । अत्र धूलीकर्मणा प्रत्यक्षप्रतीतिः” प्रमि० ।

“इदानीं योजनात्मककर्णस्य स्फुटत्वमाह । “त्रिज्याश्रुतिघ्नस्त्रिगुणेन भक्तः स्फुटो भवेद्योजनकर्ण एवम्” शि०। “स्पष्टार्थम् । अत्रोपपत्तिस्त्रैराशिकेन यदि त्रिज्याव्यासार्धे एतावान् स्फुटः कर्णस्तदा योजनात्मकव्यासार्धे किमिति । फलं भूमध्याद्ग्रहोच्छ्रितियोजनानि” प्रमि० ।

इदानीं योजनबिम्बान्याह । “बिम्बं रवेर्द्विद्विशरर्तु ६५२२ संख्यानीन्दोः खनागाम्बुधि ४८० योजनानि । भूव्यासहीनं रविबिम्बमिन्दुकर्णाहतं भास्करकर्णभक्तम् । भूविस्तृतिर्लब्धफलेन हीना भवेत् कुभाविस्तृतिरिन्दुमार्गे” शि०। “रवेर्योजनात्मकं बिम्बं मध्यमं द्वियमबाणषट्कतुल्यानि ६५२२योजनानि (सौरागमे६५००मितबिम्बोक्तिः किञ्चिदधिकपरत्वपरतया सङ्गमनीया) । इन्दोस्तु शून्यवसुवेद४८० मितानि । अथ राहोरुच्यते । रविबिम्बं भूव्यासेन हीनं ४६४१ कृत्वेन्दुकर्णेन स्फुटेन योजनात्मकेन संगुण्य स्फुटेन रविकर्णेन भजेत् । फलेन भूव्यासो वर्जितश्चन्द्रकक्षायां भूभाव्यासो भवति । एतानि योजनबिम्बानि । अत्रोपपत्तिः । यस्मिन् दिनेऽर्कस्य मध्यैव स्फुटा गतिः स्यात् तस्मिन् दिने उदयकाले चक्रकलाव्यासार्धमितेन यष्टिद्वितयेन मूलमिलितेन तत्रस्थदृष्ट्या तदग्राभ्यां बिम्बप्रान्तौ विध्येत् । या यष्ट्यग्रयोरन्तरकलास्ता रविबिम्बकला भवन्ति मध्यमाः । ताश्च द्वात्रिंशत् किंचिदधिकैकत्रिंशदिकलाधिकाः ३२ । ३१ । ३२ । एवं विधोरपि पौर्णमास्यां यदा मध्यैव गतिः स्यात् तदा विध्येत् तस्यैवं द्वात्रिंशत् कलाः ३१ । ० । ६ उत्पद्यन्ते । बिम्बकलानां योजनीकरणायानुपातः । यदि त्रिज्याव्यासार्धे एतावत्प्रमाणं बिम्बं तदा पठितश्रुतियोजनैः किमित्येवमुत्पद्यन्ते द्विद्विशरर्तु६५२२ संख्यानि योजनानि । विधोस्तु खनागाम्बुधि ४८० मितानीति । अथ भूभाबिम्बस्योपपत्तिरुच्यते । अर्कबिम्बव्यासाद्भूव्यासो यतोऽल्पोऽतो भूभा सूच्यग्रा भवति दीर्घतया चन्द्रकक्षामतीत्य दूरं बहिर्गच्छति । अतो भूविस्तृतेः कियत्यपचये जाते चन्द्रकक्षायां भूभाविस्तृतिर्भवतीति ज्ञानायानुपातः । यदि रविकर्णेन सूर्यबिम्बभूव्यासान्तरयोजनानि४६४१ लभ्यन्ते तदा चन्द्रकर्णेन किमिति । फलं भूव्यासस्यापचययोजनानि भवन्ति । अतस्तैर्भूव्यास ऊनीकृतश्चन्द्रकक्षायां भूभाव्यासो भवतीत्युपपन्नम्” प्रमि०।

इदानीं योजनानां कलाकरणार्थमाह । “सूर्येन्दुभूभातनुयोजनानि त्रिज्याहतान्यर्कशशाङ्ककर्णैः । भक्तानि तत्कार्मुकलिप्तिकास्तास्तेषां क्रमान्मानकला भवन्ति” शि० । स्पष्टार्थम् । अत्रोपपत्तिस्त्रैराशिकेन यदि योजनात्मकव्यासार्धे एतावन्ति बिम्बमानानि तदा त्रिज्याव्यासार्धे कियन्तीति फलानां चापानि लघुज्याभिप्रायेणोक्तानि” प्रमि० ।

इदानीं प्रकारान्तरेण बिम्बकलानयनमाह “भानोर्गतिः खदश १० भागयुताधिता वा बिम्बं विधोस्त्रिशगुणिता युगशैल ७४ भक्ता । तिथ्यद्रि ७१५ हीनशशिभुक्तिरिषुद्वि २५ भक्ता नन्दाक्षि २९ युग् भवति वा विधुबिम्बमेवम्” शि०“रवेर्गतिः खदशांशेन१०युताऽर्धिता च रवेः कलाबिम्बं भवति । अथ चन्द्रगतिस्त्रिगुणिता युगशैल७४भक्ता तद्विधुबिम्बं भवति । अथ वा चन्द्रभुक्तिस्तिथ्यद्रिभि ७१५ र्हीना पञ्चविंशत्या २५ भक्ता फलमेकोनत्रिंशता २९युतं चन्द्रबिम्बं भवति । अत्रोपपत्तिः त्रिज्यातो महति कर्णे ग्रहबिम्बं लघु भवति तथा गतिश्च लघ्वी भूमध्याद्दूरगतत्वाद्ग्रहस्य । अथाल्पे कर्णे बिम्बं पृथु गतिश्च महती तत्रासन्नत्वात् । बिम्बगत्योरुपचयापचययोस्तुल्यकालत्वाद्गतेरपि बिम्बं साधयितुमुचितं भवति । तद्यथा तत्र त्रैराशिकम् यदि योजनात्मिकया गत्या पादोनगोऽत्यष्टिभूमितया ११८५८।४५द्विद्विशरर्तु ६५२२संख्यं बिम्बं लभ्यते तदा कलागत्या किमिति । अत्र गुणकस्य द्विद्विशरर्तुसंख्यस्यैकादशभागेन ५९२ । ५५ गुणकभाजकावपवर्तितौ जातौ गुणकस्थाने एकादश ११ । भाजके विंशतिः २०। अतो रविगतिः सुखार्थं दशगुणा विंशत्या ह्रियते तावदर्धिता भवति यत एकादशभिर्गुण्यातो दशांशेनाधिका कृतेत्युपपन्नम् । एवं चन्द्रस्य खनागाम्बुधि ४८० मितो गुणो भागहारो योजनगतिरेव ११८५८।४५ । एतौ खनवैः१६०रपवर्तितौ जातं गुणकस्थाने त्रयं भागहारस्थाने चतुःसप्तति: ७४ अत्र परमं विकलात्रितयं यदन्तरं तत् सुखार्थमङ्गीकृतम् । अथ चन्द्रबिम्बानयने क्रियोपसंहारः सुखोपायार्थं कृतः । तत्र तिथ्यद्रि ७१५ तुल्यस्य गतिखण्डस्यैकोनत्रिंश २९ न्मितं बिम्बखण्डं लभ्यते । गतिशेषस्य पञ्चविंशत्या २५ भागे हृते बिम्बशेषं कलात्रयं ३ लभ्यते । अतस्त-

दैक्ये द्वात्रिंश ३२ न्मध्यमं चन्द्रबिम्बम् । गतेरुपचयापचयवशात् स्फुटत्वे बिम्बस्यापि स्फुटत्वमुपपन्नम्” प्रमि०।

इदानीं राहोः प्रकारान्तरेण कलाबिम्बमाह ।“भानोर्गतिः शर५हृता रविभि१२र्विभक्ता चन्द्रस्य लोचन२गुणा तिथि१५भाजिता च । लब्धान्तरं भवति वाऽवनिभाप्रमाणं भूभा विधुं, विधुरिनं ग्रहणे पिधत्ते” शि० । “रविगतिः पञ्चगुणा द्वादशभक्ता फलं कलात्मकमनष्टं स्याप्यम् । अथ शशिगतिर्द्विगुणिता पञ्चदशभाजिता इदमपि कलात्मकं फलम् । अनयोः फलयोरन्तरं भूभाबिम्बप्रमाणं भवति । इदानीं ग्रहणे छाद्यच्छादकमुच्यते भूभा विधुग्रहणे विधुं छादयति रविग्रहणे तु रविं विधुश्छादयति । अत्रोपपत्तिः । अत्र कर्णव्यासान्तरमितानां योजनानां रविकक्षायां कलाकरणायानुपातः । यदि गतियोजनैः ११८५९ गतिकला लभ्यन्ते तदा कर्णव्यासान्तरयोजनैः ४९४१ किमिति । अत्र रविगतेः कर्णव्यासान्तर गुणः ४९४१ । गतियोजनानि हरः । एतौ वसुवसुनवभि ९८८ रपवर्तितौ जातौ गुणस्थाने पञ्च ५ । हरस्थाने द्वादश १२ । फलं रविगतिसम्बन्धिन्योऽपचयलिप्ताः । अथ भूव्यासस्य चन्द्रकक्षायां लिप्ताकरणार्थमनुपातः । यदि गतियोजनैः ११८५९चन्द्रगतिकला लभ्यन्ते तदा भूव्यासयोजनैः १५८१ किमिति । अत्र गुणकार्धेन गुणकभाजकावपवर्तितौ जातं गुणकस्थाने द्वयम् २। भागहारस्थाने पञ्चदश १५। फलं भूव्यासकलाः । एताभ्यः पूर्वकलाः शोध्याः । यत उपर्युपरि गच्छन्त्या भूभाया विस्तृतिरपचयिनी भवति” प्र०।

इदानीं चन्द्रविक्षेपानयनमाह । “सपाततात्कालिकचन्द्रदोर्ज्या खभै२७० र्हता व्यासदलेन भक्ता । सपातशीतद्युतिगोलदिक् स्याद्विक्षेप इन्दोः स च बाणसंज्ञः” शि० । “यस्मिन् काले विक्षेपः साध्यस्तस्मिन् काले तात्कालिकयोश्चन्द्रपातयोर्योगः कर्त्तव्य इति वाक्यशेषोक्तम् । इह चन्द्रग्रहणावगमे समकलस्य चन्द्रस्य तात्कालिकपातस्य च योगः कर्त्तव्यः । तस्य दोर्ज्या खभै २७० र्गुणया त्रिज्यया भाज्या फलं कलात्मकचन्द्रविक्षेपः । स च बाणसंज्ञः । यदि षड्भाद्रून: सपातचन्द्रस्तदोत्तरो ज्ञेयो यदा षड्भाधिकस्तदा दक्षिणो ज्ञेयः । अत्रोपपत्तिः । चन्द्रो हि विमण्डले भ्रमति क्रान्तिमण्डलस्य विमण्डलस्य च यः संपातस्तस्य पातसंज्ञा । स पातो मीनान्ताद्विलोमं गच्छति । तस्मात् पातादग्रतस्त्रिभेऽन्तरे तद्विमण्डलं

सार्द्धैश्चतुर्भि ४,२० र्भागैः क्रान्तिवृत्तादुत्तरतो भवति । पातात् पृष्ठतस्त्रिभेऽन्तरे तैरेव भागै ४,२० र्दक्षिणतो भवति । अथ विमण्डलगतस्य चन्द्रस्य क्रान्तिमण्डलेन सह यदन्तरं स याम्योत्तरो विक्षेपः । तज्ज्ञानार्थं चन्द्रपातयोरन्तरं ज्ञेयम् । तच्च चन्द्रपातयोर्योगे कृते भवति पातस्य विलोमगत्वात् । तस्य सपातचन्द्रस्य दोर्ज्ययानुपातः । यदि त्रिज्यातुल्यया दोर्ज्यया परमः खमुनियम २७० कलातुल्यो विक्षेपस्तदानया कियानिति । फलमिन्दुविक्षेपः । यतः पातादग्रतः षड्भं क्रान्तिवृत्तादुत्तरतोऽन्यद्दक्षिणतोऽतः सपातशीतद्युतिगोलदिक् इत्युपपन्नम्” प्रमि०। इदानीं ग्रहणे ग्रासप्रमाणमाह । “यच्छाद्यसंछादकमण्डलैक्यखण्डं शरोनं स्थगितप्रमाणम् । तच्छाद्यबिम्बादधिकं यदा स्यात्ज्ञेयं च सर्वग्रहणं तदानीम्” शि०।“स्पष्टार्थम् अत्रोपपत्तिः । रवेरग्रतो भार्धान्तरे क्रान्तिवृत्ते भूभा भ्रमति । अतः पौर्णमास्यन्ते भूभाचन्द्रौ समौ भवतः । किन्तु याम्योत्तरमन्तरं विक्षेपतुल्यं भवति स विक्षेपश्छाद्यच्छादकबिम्बमध्ययोरन्तरम् । तद्यदा बिम्बार्धैक्यसमं तदा बिम्बप्रान्तयोर्योगमात्रं स्यात् । यदा यावता मानैक्यार्द्धादूनं तावच्छाद्यबिम्बे छादकबिम्बं प्रविशति । अत उक्तं तत्स्थगितप्रमाणमिति । तत् स्थगितं छाद्यबिम्बादधिकं यदा भवति तदा सर्वग्रहणमित्यपि सुगमम्” प्रमिताक्षरा ।

इदानीं स्थितिमर्दार्धयोरानयनमाह । “मानार्धयोगान्तरयोः कृतिभ्यां शरस्य वर्गेण विवर्जिताभ्याम् । मूले खषट् ६० संगुणिते विभक्ते भुक्त्यन्तरेण स्थितिमर्द्दखण्डे” शि० । स्पष्टार्थम् । “अत्रोपपत्तिः । स्पर्शकाले तु बिम्बगर्भयोरन्तरं मानैक्यार्धम् । तच्च कर्णरूपं भवति । तत्र यः शरः सा कोटिः । कर्णकोट्योर्वर्गान्तरपदं भुजः । तच्च प्राङ्कमार्गखण्डम् । तत्क्रमणकालायानुपातः । तच्चन्द्रार्कयोः प्राग्गमनात् भुक्त्यन्तरेण यदि भुक्त्यन्तरतुल्यकलाभिः षष्टि ६० घटीरर्केन्दू क्रामतस्तदा लब्धाभिर्भुजकलाभिः कियत्य इति । फलं स्थित्यर्धघटिकाः । परं स्पर्शकालशराज्ज्ञानान्मध्यग्रहणशरेण तत् कर्म कृतमतः स्थूलं स्थित्यर्धं जातम् । अथ मर्दार्धमुच्यते । यदा छादकेन छाद्यो समये सर्वे संमीलमानं तदा बिम्बगर्भयोरन्तरे बिम्बार्धान्तरतुल्याः कला भवन्ति । ताश्च कर्णरूपाः । तस्मिन् काले याशाम् विक्षेपस्तावती कोटिस्तयोर्वर्गान्तरपदं प्राङ्कवर्त्मखण्डं भव-

ति। तत्रापि पूर्व्ववदनुपातेन घटिकात्मकः कालो मर्द-खण्डं भवति। सोऽपि स्थूलः" प्रमिताक्षरा।

इदानीं घटीकरणमाह। "स्थित्यर्धनाडीगुणिता स्वभुक्तिः षष्ट्या ६० हृता तद्रहितौ युतौ च। कृत्वे-न्दुपाताग्रसकृच्छराभ्यां स्थित्यर्धमाद्यं स्फुटमन्तिमं च"। "स्पष्टार्थम्। अत्र स्पर्शकालभवशरेण कोटिरूपेण कर्म कार्य्यम्। एवं स्थित्यर्द्धमसकृत् स्फुटं भवतीति सुगमा वासना" प्रमिताक्षरा।

"इदानीमेवं विमर्दार्धमपीत्यतिदिशति। "एवं विम-र्दार्द्धफलोनयुक्तरवपातचन्द्रोद्भवसायकाभ्याम्। पृथक् पृथक् पूर्ववदेव सिद्धे स्फुटे स्त आद्यान्त्यविमर्दखण्डे" शि० स्पष्टार्थम्। इदानीमिष्टकाले भुजानयनमाह।

"स्पर्शापतः स्पार्शिकमिष्टमुक्तं प्राङ्मोक्षतो मौक्षिकमत्र पूर्वौ। षीष्टेन निघ्नाः स्थितिखण्डकेन भुक्त्यन्तरांशा भुज इष्टकाले। एवं विमर्दार्द्धहृताः पृथक् ते संमीलनोन्मीलन-योर्भुजौ स्तः" शि०। पूर्वार्द्धं स्पष्टार्थम्। इष्टोनेन स्थिति-खण्डेन गुणिता भुक्त्यन्तरभागाः कलात्मको भुजो भवति। एवं त एव भुक्त्यन्तरांशाः प्रथमविमर्दार्द्धगुणाः संमी-लनभुजो भवति। द्वितीयगुणास्तदोन्मीलनम्। अत्रो-पपत्तिः। इष्टकाले यत्र ग्राहकविम्बमध्यचिह्नं यत्र च मध्यग्रासचिह्नं तयोरन्तरं ग्राहकमार्गखण्डं भुज इत्युच्यते। तस्यानयनं त्रैराशिकेन। यदि घटीषष्ट्या भुक्त्यन्तरकला लभ्यन्ते तदेष्टोनस्थितिदलेन किमिति। अत्र गुणकभाजकयोः षष्ट्यापवर्त्तने कृते जाता भुक्त्य-न्तरांशा गुणकस्थाने। हरस्थाने रूपम्१। एवं विमर्दा-र्धाभ्यां विमर्दभुजौ" प्रमि०

इदानीं कर्णार्थमाह। "कोटिश्च तत्कालशरोऽथ कोटीदोर्वर्गयोगस्य पदं श्रुतिः स्यात्। मानैक्यखण्डं श्रुतिवर्जितं स्याद्ग्रासप्रमाणं भवतीष्टकाले" शि०। "इष्टकाले यावान् शरः स तत्र कोटिः। कोटिभुजवर्ग-योगपदं कर्णः। कर्णोनं मानैक्यार्धमिष्टकाले ग्रासप्रमाणं भवति। अत्रोपपत्तिः। भुजोऽत्र क्रान्तिवृत्ते प्राच्यपरस्त-स्माद्याम्योत्तरः शरोऽतः कोटिः। तद्वर्गयोगपदं कर्ण इत्युचितम्। कर्णो नाम विम्बमध्ययोरन्तरम्। स या-वता मानैक्यार्धादूनो भवति तावद्ग्राहकविम्बं ग्राह्ये प्रविष्टम्। अतस्तावानिष्टकाले ग्रास इत्युपपन्नम्" प्रमि०।

इदानीं ग्रासात् तत्कालज्ञानमाह। "ग्रासोनमानैक्यद-लस्य वर्गाद्विक्षेपकृत्या रहितात् पदं यत्। गत्यन्तरांशैर्वि-हृतं फलोनं स्थित्यर्धकं स्वं भवतीष्टकालः। तत्कालशरेण मुहुः स्फुटोऽग्रे वक्ष्येऽन्यथा वा परिलेखतोऽमुम्" शि०। इष्टग्रासेनोनस्य मानैक्यार्धस्य वर्गात् तत्कालविक्षेपवर्गेणो-नान्मूलं गत्यन्तरांशैर्विभजेत्। फलेन स्पर्शस्थित्यर्धं हीनं यदि स्पार्शिको ग्रासः। यदि मौक्षिकस्तदा मौक्षिकं हीनम्। शेषमिष्टकालो भवति। स च स्थूलः। अथ तत्कालश-रेण य आनीयते स सूक्ष्मासन्नः। एवमसकृत् स्फुटः स्यात्। अथवामिष्टकालमग्रे परिलेखादेव वक्ष्ये। अत्रोपपत्तिर्विलोमगणितेन, ग्रासोनमानैक्यार्द्धं कर्णस्तत्का-लशरः कोटिस्तद्वर्गान्तरपदं भुजः। स गत्यन्तरांशैर्विहृतः फलमिष्टकालस्य मध्यग्रहस्य च सावनान्तरमतः स्वस्थित्य-र्द्धाच्छोधितमित्युपपन्नम्" प्रमि०।

इदानीं स्पर्शादिव्यवस्थितिमाह। "मध्यग्रहः पर्वविरामकाले प्राक् प्रग्रहोऽस्मात् परतश्च मुक्तिः। स्थित्यर्द्धनाड़ीष्वथ मर्दजासु संमीलनोन्मीलनके तथैव" शि०। स्पष्टार्थम्। इदानीं वलनानयनमाह। "खाङ्का ९० हतं स्वद्युदलेन भक्तं स्पर्शादिकालोत्थनतं लवाः स्युः। तेषां क्रमज्या पलशिञ्जिनीघ्नी भक्ता द्यु-मौर्व्या यदवाप्तचापम्। प्रजायते प्रागपरे नते क्रमादुदग्-यमाशं वलनं पलोद्भवम्" शि०। "यस्मिन् काले वलनं साध्यं तस्मिन् काले या नतघटिकास्ताः खाङ्का ९०हताश्चन्द्रग्रहे रात्र्यर्द्धेन भक्ता अर्कग्रहे दिनार्द्धेन, फलमंशाः स्युः। तेषां क्रमज्याऽक्षज्यया गुण्या द्युजीवया भक्ता लब्धस्य चापं पलोद्भवं वलनं जायते। प्राङ्नते सौम्यं, पश्चि-मनते याम्यम्। वलनानयनमुत्क्रमज्यया कैश्चित् कृतं तन्निरासार्थमत्र क्रमज्येति विशेषणम्। न पुनरेतद्विशेष-णबलादन्यत्र सर्वत्रोत्क्रमज्याः प्राप्नुवन्ति" प्रमि०।

इदानीमायनं वलनमाह। "युतायनांशोडुप-कोटिशिञ्जिनी जिनांशमौर्व्या १३९७ गुणिता विभा-जिता। द्युजीवया लब्धफलस्य कार्मुकं भवेच्छशाङ्कायना-नदिक्कमायनम्" शि०। "ग्रहस्य सायनांशस्य कोटिज्या जिनांशज्यया १३९७गुण्या द्युज्यया भक्ता फलस्य चाप-मायनं वलनं भवति। तच्च यस्मिन्नयने ग्रहो वर्त्तते तद्दिक् भवति। अत्रोपपत्तिर्गोले" प्रमि०।

इदानीं स्फुटवलनार्थमाह। "तयोः पलोत्थायनयोः समाशयोर्युतेर्वियुक्तेस्तु विभिन्नकाष्ठयोः। या शिञ्जिनी मानदलैक्यनिघ्नी त्रिज्योद्धृता तद्वलनं स्फुटं स्यात्। येदत्क्रमज्याविधिनैतदुक्तं सम्यक् ते गोलगतं विदन्ति" शि०।

"तयोः पलोद्भवायनयोर्वलनचापयोः समाशयोर्योगो भिन्नाशयोरन्तरं तस्य ज्या मानैक्यार्द्धगुणा त्रिज्यया भक्ता फलं स्फुटा वलनज्या भवति। यैरिदं वलनद्वयमुत्क्रमज्याविधिनोक्तं सम्यङ् न ते गोलगतिं विदन्तीति गोलं परिभाव्य दिशां वलनस्योत्क्रमज्ययोपचयः क्रमज्यया वेति तैः सम्यक् क्वापि नावलोकितमित्यर्थः। अत्रोपपत्तिर्गोले सविस्तरा। इह सममण्डलं द्रष्टुः प्राची सममण्डलादिष्टे नते काले विषुवन्मण्डप्राची यावता यतश्चलिता तावत् तद्दिक् पलोद्भवं वलनं ज्ञेयम्। अथ विषुवन्मण्डलात् क्रान्तिवृत्तप्राची यावता यतश्चलिता तदायनं तद्दिक् ज्ञेयम्। तयोर्योगवियोगात् स्फुटमिति। सममण्डलात् क्रान्तिमण्डलप्राची यावता यतश्चलिता तत् स्फुटमित्यर्थः। एवं त्रिज्यापरिणतं तदत्रानुपातेन मानैक्यार्द्धपरिणतं कृतम्। यतोऽत्र मानैक्यार्द्धवृत्ते वलनं देयम्" प्रमि०। इदानीमङ्गुलिप्तार्थमाह।

"त्रिज्योद्धृतस्तत्समयोत्थशङ्कुः सार्द्धद्वि२,२० युक्तोऽङ्गुलिप्तिकाः स्युः। स्थूलाः खखार्थं द्युदलेन भक्तं सद्युनतं सार्धयमा२,३०न्वितं वा" शि०। "मध्यग्रहणकाले ग्रहस्य त्रिप्रश्नोक्त्या शङ्कुः साध्यः। स शङ्कुस्त्रिज्यया भक्तः। फलं सार्धद्वियुक्तमङ्गुलिप्तिका भवन्ति। अथवोन्नतघटिका ग्रहस्य दिनार्द्धघटीभिर्भक्ताः फलं सार्धद्वियुक्तं खखार्थं स्थूला अङ्गुलिप्तिका भवन्ति। अत्रोपपत्तिः। गगनमध्यस्थं यद्ग्रहबिम्बं तस्य निखिलकरनिकरपिहितपरिधित्वात् किञ्चित् सूक्ष्मं दृश्यते। अथोदये क्षितिजस्थं भूव्यवहिततत्करनिकरविशालमिव प्रतिभाति। तत् सूक्ष्मत्वं विशालत्वं चोपलब्ध्या बुद्धिमद्भिः कल्पितम्। तत्र गगनमध्ये सार्धत्रिकलं २,२०। उदये सार्द्धद्विकलं २,३० अङ्गुलं कल्पितम्। अथान्तरेऽनुपातेन। यदि त्रिज्यातुल्ये शङ्कावङ्गुलिप्तान्तरं रूपं १ लभ्यते तदेष्टेन किमिति फलं सार्धद्वियुक्तमङ्गुलिप्तिकाः स्युरित्युपपन्नम्। अथवा स्थूलोऽनुपातः। यदा दिनार्धतुल्याभिरुन्नतघटिकाभी रूपं १ लभ्यते तदेष्टाभिः किमिति" प्रमि०।

इदानीं वलनादीनामङ्गुलीकरणमाह "आभिर्विभक्ता वलनेषुबिम्बदोर्म्मुक्तलिप्ताः स्युरथाङ्गुलानि। शरा यथाशा ग्रहणे खरांशोश्चन्द्रग्रहे व्यस्तदिशस्तु वेद्याः" शि०। आभिरङ्गुलकलाभिर्वलनविक्षेपबिम्बच्छन्नभुजकोटिकर्णा भाज्याः। फलान्यङ्गुलानि भवन्ति। इह रविग्रहणे शरा यथागतदिश एव। चन्द्रग्रहणे तु व्यस्तदिशो ज्ञातव्याः। अत्रोपपत्तिः अङ्गुलकरणे तु कथितैव। शराग्रे हि चन्द्रः, शरमूले भूभाऽतश्चन्द्रविक्षेपादन्यदिशि भूभा वर्त्तते। तत्स्थानज्ञानार्थं चन्द्रग्रहणे व्यस्तदिशः शरा वेद्या इत्युपपन्नम्" प्रमि०। इदानीं परिलेखमाह।

"ग्राह्यार्धसूत्रेण विधाय वृत्तं मानैक्यखण्डेन च साधिताशम्। बाह्येऽत्र वृत्ते वलनं ज्यकावत् प्राक्चिह्नतः स्पर्शभवं हिमांशोः। सव्यापसव्यं खलु याम्यसौम्यं मौक्षं तथा पश्चिमतश्च देयम्। परिग्रहे पश्चिमपूर्वतस्तो विक्षेपदिक्चिह्नित एव साध्यम्। सूत्राणि केन्द्राद्वलनाग्रसक्तान्यग्राण्यतः स्पर्शविमुक्तिबाणौ। ज्यावन्निजाभ्यां वलनाग्रकाभ्यां देयौ यथाशावथ मध्यबाणः। केन्द्रात् प्रदेयो वलनस्य सूत्रे तेभ्यः पृथग्ग्राहकखण्डकेन। वृत्तैः कृतैः स्पर्शविमुक्तिमध्यग्रासाः क्रमेणैवमिहावगम्याः" शि०। "समायामवनौ ग्राह्यार्धप्रमाणेन सूत्रेणेष्टस्थानकल्पितविन्दोर्वृत्तं लिखित्वा तस्मादेव विन्दोर्मानैक्यखण्डप्रमाणेन सूत्रेणान्यद्वृत्तं कृत्वा तस्य विन्दोरुपरि प्राच्यपरं याम्योत्तरं च सूत्रं खटिकाया रजसोच्छाद्य रेखे कार्य्ये। अथ मानैक्यार्धवृत्ते वलनं देयम्। तत्र चन्द्रस्य स्पार्शिकं प्राचीचिह्नतो मौक्षिकं प्रतीचीचिह्नतः। रवेस्तु स्पार्शिकं प्रतीचीचिह्नतो मौक्षिकं प्राचीचिह्नतः। अथ मध्यवलनं यदि विक्षेपो दक्षिणतो देयस्तदा दक्षिणचिह्नाद्यदोत्तरस्तदोत्तरचिह्नात्। तत् कथं देयमित्याह। सव्यापसव्यं याम्यसौम्यमिति। यदि याम्यवलनं तदा सव्यक्रमेण प्राचीचिह्नाद्याम्यं, दक्षिणचिह्नात् पश्चिमं, पश्चिमचिह्नादुत्तरमुत्तरचिह्नात् पूर्व्वमिति सव्यम्। इतोऽन्यथापसव्यम्। तच्च वलनं ज्यावद्देयं न धनुर्वत्। एवं वलनानि दत्त्वा केन्द्राद्वलनाग्रगतानि सूत्राण्यङ्ग्यानि। अथ स्पर्शवलनाग्रात् स्पार्शिको मोक्षवलनाग्रान्मौक्षिको विक्षेपो देयः। स च ज्यावत्। अथ मध्ये विक्षेपः केन्द्राद्वलनसूत्रे देयः। तेभ्यः शराग्रचिह्नेभ्यो ग्राहकार्धप्रमाणेन सूत्रेण वृत्तान्युत्पाद्य स्पर्शमुक्तिमध्यग्रासाः वेदितव्याः अत्र वासना। मानैक्यार्धवृत्ते ग्राहकवृत्तस्य मध्यं यदा भवति तदा ग्राह्यग्राहकयोर्बिम्बप्रान्तौ संलग्नौ भवतोऽतो मानैक्यार्धवृत्तं बहिर्लिखितं तच्च दिगङ्कितं तत्र या प्राची सा सममण्डलप्राची ततस्तस्या वलने दत्ते या केन्द्राद्वलनाग्रगा रेखा सा क्रान्तिवृत्तप्राची। एवं सर्वदिशां वलनम्। अथ वलनसूत्राज्ज्यावद्विक्षेपः। यतः क्रान्तिवृत्तप्राच्या विक्षेपो याम्योत्तरः। एवं स्पर्शमोक्षयोः किल। अथ

मध्यग्रहः केन्द्राद्वलनसूत्रेऽतो दत्तो यतो मध्यवलनं नाम तत्कालक्रान्तिवृत्तप्राच्या याम्योत्तरा दिक्। विक्षेपाग्रे ग्राहकवृत्तमध्यमतस्तत्र कृतैर्वृत्तैः स्पर्शमोक्षमध्या भवन्तीत्युपपन्नम्” प्रमि०।

इदानीं निमीलनोन्मीलनेष्टग्रासपरिलेखमाह। “केन्द्राद्भुजं खे वलनस्य सूत्रे शरं भुजाग्राच्छ्रवणं च केन्द्रात्। प्रसार्य्य कोटिश्रुतियोगचिह्नाद्वृत्ते कृते ग्राहकखण्डकेन। संमीलनोन्मीलनकेष्टकालग्रासाश्च वेद्या यदि वान्यथाऽमी” शि०। “संमीलनकाले वलनमानीय तत् प्राक्चिह्नतः प्राग्वद्दत्त्वा केन्द्राद्वलनाग्रगां रेखां कृत्वा तस्यां रेखायां केन्द्रात् पूर्वतो भुजो देयः। भुजाग्रात् तत्कालशरप्रमाणां शलाकां तथा केन्द्रात् कर्णमितां च प्रसार्य शलाकाग्रयोर्युतिचिह्नाद्ग्राहकार्द्धेन वृत्तं विलिख्य संमीलनस्थानं ज्ञेयम्। एवमुन्मीलनवलनं पश्चिमतो दत्त्वोन्मीलनस्थानं ज्ञेयम्। एवमेव तत्कालवलनमिष्टवशेन प्राक् पश्चिमतो वा दत्त्वोक्तवदिष्टग्रासो ज्ञेयः। यदि वान्यथामी इत्यस्याग्रे सम्बन्धः। अत्रोपपत्तिः। भुजो हि ग्राहकमार्गखण्डम् तत्र शरः कोटिस्तद्वर्गयोगपदं कर्णः। कर्णाद्ग्राहकबिम्बे लिखिते संमीलनादिकं भवतीति युक्तमुक्तम्। ननु ग्राह्यबिम्बमध्याद्वलनसूत्रे भुजो दत्तस्तत् कथं भुजो ग्राहकमार्गखण्डमित्युच्यते सत्यम् यत्र कुत्रचिद्भुजकोटिकर्णैस्त्र्यस्रमुत्पद्यते तदवश्यमायतचतुरस्रार्द्धं स्यात्। तदत्र भुजाग्राद्विक्षेपः कोटिः। एवं भुजमूलादपि। विक्षेपमूलयोरन्तरे यावान् भुजस्तावान् विक्षेपाग्रयोरपि। अतो ग्राहकमार्गखण्डं भुज इत्युच्यते तददुष्टम्” प्रमि०।

इदानीमन्यथा सम्मीलनादिपरिलेखमाह। “ये स्पर्शमुक्त्योर्विषयाग्रचिह्ने ताभ्यां पृथङ्मध्यशराग्रयाते। रेखे किल प्रग्रहमोक्षमार्गौ तयोश्च माने विगणय्य वेद्ये। बिम्बान्तरार्द्धेन विधाय वृत्तं केन्द्रेऽथ तन्मार्गयुतिद्वयेऽपि। भूभार्द्धसूत्रेण विधाय वृत्ते संमीलनोन्मीलनके च वेद्ये” शि०। स्पर्शशराग्रान्मध्यशराग्रयाता रेखा कार्य्या। स प्रग्रहमार्गो ज्ञेयः। अथ मध्यशराग्रान्मुक्तिशराग्रगा पृथगन्या रेखा कार्य्या। स मुक्तिमार्गो ज्ञेयः। तयोर्मार्गयोः प्रमाणे अङ्गुलशलाकया मित्वा पृथगन्यत्र स्थाप्ये। अथ बिम्बान्तरार्धप्रमाणेन सूत्रेण केन्द्रे वृत्तमुत्पाद्य तस्य वृत्तस्य मार्गद्वयेन यौ योगौ तस्माद्योगद्वयचिह्नात् भूभार्धसूत्रेण वृत्ते विधाय संमीलनोन्मीलने ज्ञातव्ये। अत्रोपपत्तिः। स्वमार्गेणागच्छतो ग्राहकमध्यस्य यत्र मानान्तरार्धतुल्यः कर्णो भवति तत्रस्थे तस्मिन् ग्राहके संमीलनमुन्मीलनं च यत उत्पद्यते ततो बिम्बान्तरार्धेन वृत्तं विलिख्य ते स्थाने ज्ञातव्ये” प्रमि०।

इदानीमिष्टग्रासार्थमाह। “मार्गाङ्गुलघ्नं स्थितिखण्डभक्तमिष्टं स्युरिष्टाङ्गुलसंज्ञकानि। इष्टाङ्गुलानीष्टवशात् स्वमार्गे दत्त्वात्र च ग्राहकखण्डवृत्तम्। कृत्वेष्टखण्डं यदि वाऽवगम्यं स्थूलः सुखार्थं परिलेख एवम्” शि०। “इष्टमितोष्टकालो घटिकादिरनष्टस्यापितैर्मार्गाङ्गुलैर्गुण्यः स्वस्थित्यर्द्धघटीभिर्भाज्यः फलमिष्टाङ्गुलानि भवन्ति। तानीष्टाङ्गुलानि स्वमार्गे दत्त्वा। कथमिति चेत् इष्टवशात्। यदि स्पर्शादग्रत इष्टं कल्पितं तदा स्पर्शशराग्रादग्रत इष्टाङ्गुलानि देयानि यदि मध्यात् पूर्वत इष्टं तदा मध्यशराग्रात् पूर्वतो देयानि। एवं मुक्तिमार्गेऽपोष्टवशादिष्टाङ्गुलाग्रे ग्राहकबिम्बार्द्धेन वृत्तं विलिखेदिष्टग्रासो ज्ञेयः। एवं वा स्थूलः सुखार्थं परिलेखः। अत्रोपपत्तिस्त्रैराशिकेन। यदि स्थित्यर्द्धघटीभिर्मार्गाङ्गुलानि लभ्यन्ते तदेष्टघटीभिः किमिति फलमिष्टाङ्गुलानि। तदग्रे ग्राहकबिम्बमध्यमित्यर्थः। तत्र ग्राहकार्द्धेन वृत्ते कृते इष्टग्रासो भवतीति किं चित्रम्” प्रमि०। इदानीं ग्रासात् कालानयनं परिलेखेनैवाह॥ “ग्रासोनमानैक्यदलेन केन्द्रे वृत्तात् कृतान्मार्गदले बहिर्ये। ते संगुणे स्वस्थितिखण्डकेन मार्गाङ्गुलाप्ते पृथगिष्टकालौ” शि०। “मानैक्यार्द्धेन ग्रासोनेन केन्द्रे वृत्तं लिखेत्। तस्माद्वृत्ताद्बहिर्ये मार्गखण्डे भवतस्ते स्वस्थितिखण्डकेन गुणिते स्वमार्गाङ्गुलैर्भाज्ये। फलं स्पर्शादग्रत इष्टकालो भवति। मोक्षात् पृष्ठतश्च। अत्रोपपत्तिः। ग्रासोनमानैक्यदलमिष्टकाले ग्राह्यग्राहकबिम्बमध्ययोरन्तरं कर्ण इत्यर्थः। इदं पूर्व्वमेव कथितम्। तेन कर्णेन केन्द्रे वृत्तात् कृताद्द्वये मार्गखण्डे बहिर्भवतस्ताभ्यामिष्टालपातः। यदि मार्गाङ्गुलैः स्थित्यर्द्धघटिका लभ्यन्ते तदा बहिर्भूतखण्डाङ्गुलैः किमिति फलमिष्टकाल इति” प्रमि०।

इदानीं ग्रहणे वर्णमाह। “स्वल्पे छन्ने धूम्रवर्णः सुधांशोरर्द्धे कृष्णः कृष्णरक्तोऽधिकोऽर्धात्। सर्वच्छन्ने वर्ण उक्तः पिशङ्गो भानोश्छन्ने सर्वदा कृष्ण एव” शि०।

इदानीमादेश्यानादेश्यानाह।

“इन्दोर्भागः षोडशः खण्डितोऽपि तेजःपुञ्जच्छन्नभावान्न लक्ष्यः। तेजस्तैक्ष्ण्यात् तीक्ष्णगोर्द्वादशांशो नादेश्योऽतोऽल्पो

ग्रहो बुद्धिमद्भिः" शि०स्पष्टार्थम् इति चन्द्रग्रहणाधिकारः।

अथ सूर्यग्रहणाधिकारः तत्रादौ नतिप्रयोजनोक्तिः। "दर्शान्तकालेऽपि समौ रवीन्दू द्रष्टा नतौ येन विभिन्नकक्षौ। कर्णोच्छ्रितः पश्यति नैकसूत्रे तल्लम्बनं तेन नतिं च वच्मि" शि०। "अमावास्यान्तकाले समकलावपि चन्द्रार्कौ नतौ स्वाधोऽन्यत्र यतस्ततोऽपि वा स्थितौ भूम्यर्द्धेनोच्छ्रितौ द्रष्टैकसूत्रे न पश्यति। येन कारणेन तौ विभिन्नकक्षौ। चन्द्रस्य कक्षा लघ्वी अर्कस्य महती। यथा चन्द्रग्रहणे यैव चन्द्रस्य कक्षा सैव भूभाया अपि तत्र तिथ्यन्ते समौ भूभेन्दू नतावपि कुदलोच्छ्रितोऽपि द्रष्टैकसूत्रे पश्यति तथार्कग्रहणेऽर्केन्दू न पश्यति भिन्नकक्षत्वात्। तेन कारणेन तल्लम्बनाख्यमन्तरं नत्याख्यं च वच्मि" प्रमि०।

इदानीं लम्बनस्य भावाभावं धनर्णत्वं च कथयति। "दर्शान्तलग्नं प्रथमं विधाय न लम्बनं वित्रिभलग्नतुल्ये। रवौ तदूनेऽभ्यधिके च तत् स्यादेवं धनर्णं क्रमतश्च वेद्यम्" शि० "अत्र लम्बनं ज्ञातुं दर्शान्तकाले लग्नं विधाय तत् त्रिभोनं कार्य्यम्। तेन त्रिभोनेन लग्नेन समे रवौ लम्बनं नास्ति। ऊनेऽभ्यधिके च स्यादिति वेदितव्यम्। तथा वित्रिभलग्नादूने रवौ यल्लम्बनमुत्पद्यते तद्धनसंज्ञं वेदितव्यम्। तिथ्यन्तघटिकासु योज्यमित्यर्थः। यदधिके तदृणं तिथ्यन्तघटिकाभ्यः शोध्यमित्यर्थः। अथ लम्बनस्योपपत्तिस्तावदुच्यते। इह किल समभण्डलयाम्योत्तरकोणवृत्तानामर्द्धच्छेदेन परिकरवद्यद्वृत्तं निबध्यते तत् क्षितिजम्। तत्रस्थं ग्रहं भूगर्भस्थो द्रष्टा पश्यति। भूपृष्ठगस्तु भूच्छन्नं तत् क्षितिजमपि न पश्यति। किन्तु भूम्यर्द्धयोजनैस्तस्मात् क्षितिजादुपरि समगादन्यत् क्षितिजं स मन्यते। यतस्तस्मादूर्ध्वं स पश्यति। तदधः क्षितिजं दृक्सूत्राल्लम्बितं न पश्यति अतो ग्रहकक्षायां दृङ्मण्डले तेषां योजनानां संबन्धिन्यो या लिप्तास्ताः कुच्छन्नलिप्तास्ता एव परमलम्बनलिप्ताः परमावनतिलिप्ताश्च। तास्तु ग्रहभुक्तिपञ्चदशांशतुल्या भवन्ति। यतो गतियोजनानां पञ्चदशांशो भूव्यासार्द्धम्। यदा किल क्षितिजस्थस्तदा कुच्छन्नलिप्ताभिर्नतत्वं गतः। अथ यदा खमध्यस्थो रविस्तदा तं भूगर्भस्थो द्रष्टा भूपृष्ठस्थोऽपि खमध्यस्थमेव पश्यति। न कुतोऽपि नतमतस्तत्र लम्बनाभावः। क्षितिजे तु कुच्छन्नलिप्तातुल्यं परमं लम्बनम् अतो ज्ञातं स्वाधोगते ग्रहे लम्बनदुत्पद्यते। एवं चन्द्रस्यापि। दर्शान्ते चन्द्रलम्बनलिप्ताभ्योऽर्कलम्बनलिप्तास्तु शुद्धास्तु शेषं रविदृक्सूत्राधश्चन्द्रस्य परमा लम्बलिप्ताः। अथ यदा दृङ्मण्डलाकारं क्रान्तिवृत्तं भवति तदा परमलम्बनलिप्तानां घटीकरणायानुपातः। यदि गत्यन्तरकलाभिर्घटीषष्टिर्लभ्यते तदा गत्यन्तरपञ्चदशांशतुल्याभिः किमिति। फलं घटिकाचतुष्टयं परमं लम्बनम्। अतो घटिकाचतुष्टयानुपातेन लम्बनं साधयितुं युज्यते परं यदि दृङ्मण्डलाकारं क्रान्तिवृत्तम्। यदा तदपि तिरश्चीनं तदानुपातद्वयेन। लम्बनं हि दृङ्मण्डलसूत्रेणोत्पद्यते तच्च मध्यमं लम्बनम्। तत् किल कर्णरूपम्। तत् क्रान्तिवृत्तप्राचीपरिणतं कोटिरूपं स्फुटं भवति। यदा दृङ्मण्डलमेव क्रान्तिवृत्तं तदा तदेव स्फुटम्। यतः क्रान्तिवृत्तप्राच्यपरया लम्बनस्य स्फुटत्वम्। अतः क्रान्तिवृत्तस्य परमनीचस्थाने लम्बनस्य परमत्वम्। परमोच्चस्थाने लम्बनाभावः। तच्च तस्य परमोच्चत्वं वित्रिभलग्ने भवति। यदा वित्रिभं खमध्ये भवति तदा तच्छङ्कुस्त्रिज्यातुल्यः स्यात्। तदा मध्यममेव स्फुटं लम्बनम्। यदा तद्वित्रिभं खमध्यान्नतं भवति तदा तच्छङ्कुस्त्रिज्यातो न्यूनो भवति तदा मध्यमलम्बनात् स्फुटं लम्बनं कोटिरूपकरणेन तदल्पतां याति। अतो वित्रिभलग्नशङ्कोरपचयवशेन लम्बनस्यापचयः। अतो वित्रिभलग्नशङ्कुना मध्यमलम्बनस्य स्फुटत्वकरणेऽनुपातः कर्त्तुं युज्यते" प्र०मि०।

अमुमेवार्थं संप्रधार्यानुपातद्वयेन लम्बनमाह। "त्रिभोनलग्नं तरणिं प्रकल्प्य तल्लग्नयोर्यः समयोऽन्तरेऽसौ। त्रिभोनलग्नस्य भवेद्द्युयातः शङ्क्वाद्यतस्तस्य चरान्तकाद्यैः। त्रिभोनलग्नार्कविशेषशिञ्जिनी हताहता व्यासदलेन भाजिता। हतात् फलाद्वित्रिभलग्नशङ्कुना त्रिजीवयाप्तं घटिकादि लम्बनम्" सि०शि०। "दर्शान्तकाले लग्नं विधाय तदनष्टं वित्रिभं च कृत्वा तयोर्वित्रिभस्य भोग्यं लग्नस्य भुक्तमन्तरोदययुतं वित्रिभस्योदितः कालो भवति। तेन कालेन वित्रिभलग्नजनितकुज्याद्युज्याग्रान्त्यादिभिश्च त्रिप्रश्नोक्त्या शङ्कुः साध्यः। शङ्कोश्च दृग्ज्या तच्छायाकर्णश्च साध्यः। अथ त्रिभोनलग्नार्कयोरन्तरस्य ज्या साध्या। अथ तया लम्बनार्थमनुपातः। यदि त्रिज्यातुल्यया वित्रिभलग्नार्कान्तरज्यया चतस्रो घटिका लम्बनं तदानयाभीष्टया किमिति फलं मध्यमलम्बनम्। अतस्तत्स्फुटीकरणार्थं द्वितीयोऽनुपातः। यदि त्रिज्यातुल्यवित्रिभलग्नशङ्कावेतावल्लम्बनं लभ्यते तदा

ऽस्त्विनन्तरामीति किमित्येवं लम्बनं स्फुटं भवति" प्रमि० ।

इदानीं प्रकारान्तरेण स्फुटीकरणमाह । "फला-द्रवि १२ घ्नात् त्रिभहीनलग्नकर्णेन लब्धं खलु लम्बनं वा" सि० शि० । "मध्यलम्बनात् द्वादशगुणाद्वित्रि-भलग्नसंभूतच्छायाकर्णेन भक्ताद्यल्लब्धं तद्वा स्फुटं लम्बनं भवति । अत्रोपपत्तिस्त्रैराशिकेन । तत्र वित्रि-भलग्नशङ्कोर्द्वादशांशेन वित्रिभलग्नशङ्कुस्त्रिज्या चाप-वर्जिता जाता गुणकस्थाने द्वादश १२ हरस्थाने वित्रि-भलग्नकर्ण इत्युपपन्नम्" प्रमि० ।

इदानीं प्रकारान्तरेण लम्बनमाह । "त्रिभोनलग्नस्य रवेश्च शङ्क्वोर्वा दृग्ज्ययोर्वर्गवियोगमूलम् । स्याद्-दृङ्नतिर्वेद ४ गुणा त्रिमौर्व्या भक्ताथवा लम्बननाडिकाः स्युः" सि० शि० । "त्रिभोनलग्नस्य यः शङ्कुः साधित-स्तथा दर्शान्तकाले रवेः स्वोपकरणैर्यः शङ्कुरुत्पद्यते तावन्तौ स्थापयित्वा तयोः दृग्ज्ये साध्ये । अथ तयोः शङ्क्वोर्यद्वर्गान्तरपदं तद्दृङ्नतिसंज्ञं भवति । प्रथमप्र-कारोऽयम् । अथ दृङ्नतेर्द्वितीयः प्रकारः । तयोर्दृग्-ज्ययोर्वर्गान्तरपदं दृङ्नतिसंज्ञं भवति । अथ दृङ्नते-र्लम्बनमुच्यते । दृङ्नतिश्चतुर्गुणा त्रिज्यया भक्ता फलं लम्बननाडिकाः स्युः अत्रोपपत्तिः सैव । यदा वित्रिभलग्नं खमध्ये भवति तदा दृङ्मण्डलमेव क्रान्तिवृत्तम् । त्रिभो-नलग्नार्कयोर्यान्तरज्या सैव तदार्कस्य दृग्ज्या । सा चतु-र्गुणा त्रिज्ययाप्ता मध्यमं किल लम्बनं भवति । तदेव स्फुटम् ऊर्ध्वस्थितत्वात् क्रान्तिवृत्तस्य । अथ यदा वित्रिभलग्नं खाधोनतम् तिर्यक्स्थितत्वात् क्रान्तिवृत्तस्य तदा तत् प्राच्यपरया स्फुटं लम्बनं कोटिरूपं भवति । तच्च वित्रिभलग्नशङ्क्वनुपातेन तथा स्फुटं कोटिरूपं कृ-तम् । तत् कथमिति चेत् तदर्थमुच्यते । मध्यलम्बनान-यने त्रिज्यैव वित्रिभलग्नशङ्कुः ततः स्फुटत्वार्थं यः साधितो वित्रिभलग्नशङ्कुः स दृक्क्षेपमण्डले स्फुटस्तद्दृग्-ज्या भुजास्त्रिज्या कर्णः । वित्रिभलग्नस्य यद्दृङ्मण्डल-मिति गोले कथितम् । अतस्त्रिज्यापरिणतया नतज्यया यदानीतं तज्जातं कर्णरूपं तत् कोटिरूपस्य वित्रिभ-लग्नशङ्कोरनुपातेन कोटित्वं नीतमित्युपपन्नम् । यदेव स्फुटलम्बनस्य कोटिरूपत्वमुपपन्नं तदेव प्रकारान्तरेणोप-पादितम् । रवेर्दृङ्मण्डले दृग्ज्या सा कर्णरूपिणी । वित्रिभलग्नस्य या दृग्ज्या स एव दृक्क्षेपः स भुज-रूपः । यतः क्रान्तिमण्डलप्राच्याः सम्यग्दक्षिणोत्तरं खार्द्धाद्वित्रिभलग्नोपरिगतं दृक्क्षेपमण्डलम् । तत्र वित्रिभलग्नस्य या दृग्ज्या स दृक्क्षेपः । तज्जनिता न-तिकक्षाचन्द्रार्ककक्षयोर्याम्योत्तरमन्तरं सर्वत्र तुल्यमेव द्रष्टा पश्यति । यथोक्तं गोले । "कक्षयोरन्तरं यत् स्याद्वि-त्रिभे सर्वतोऽपि तत् । नतिलिप्ता भुजः कर्णौ दृग्लम्बन-कलास्तयोः । कृत्यन्तरपदं कोटिः स्फुटलम्बनलिप्तिकाः" शि० । यत् इदं लम्बनक्षेत्रमतो दृक्क्षेपार्कदृग्ज्य-योर्वर्गान्तरपदतुल्या दृङ्नतिर्भवितुमर्हति । परं यथा स्थिते गोले क्षेत्रोपरीयं न दृश्यते । यतो वित्रिभल-ग्नार्कयोरन्तरज्या वित्रिभलग्नशङ्कुव्यासार्द्धपरिणता सती दृङ्नतिर्भवति । अत एवानेनापि प्रकारेण क्षितिजस्थे-ऽर्के परमा दृङ्नतिर्वित्रिभलग्नशङ्कुतुल्या भवति । अतोऽयमपि प्रकारः पूर्वतुल्य एव । किन्तु दृक्क्षेपार्क-दृग्ज्ययोस्तुल्ये शलाके भुजकर्णरूपे समायां भूमौ वि-न्यस्य तदन्तरे कोटिरूपां दृङ्नतिं दर्शयेत् । एवमने-कविधान्युपपत्त्यनुसारेण क्षेत्राणि परिकल्प्य श्लोकमो-पसंहारमार्याः कुर्वते । अथ प्रस्तुतमुच्यते । अत्र किल वित्रिभलग्नस्य रवेश्च दृग्ज्ययोर्यद्वर्गान्तरपदं तावदेव तच्छ-ङ्क्वोरपि भवति । तत् कथमिति चेत् तदुच्यते । अत्र स्वस्वशङ्कुवर्गोनौ त्रिज्यावर्गौ दृग्ज्यावर्गौ भवतः । तयोरन्तरे कृते त्रिज्यावर्गयोस्तुल्यत्वात्तयोः शङ्कुवर्गा-न्तरमेवावशिष्यते । एवं यत्र कुत्रचिद्व्यासार्द्धेऽपि भुज-ज्ययोर्वर्गान्तरतुल्यं तत्कोटिज्ययोर्वर्गान्तरं भवतीति । अत उक्तं त्रिभोनलग्नस्य रवेश्च शङ्क्वोर्वा दृग्ज्ययो-रिति" । दृङ्नतितस्त्रिज्यानुपातेन लम्बनस्य घटीक-रणम्" प्रमि० ।

इदानीं प्रकारान्तरेण लम्बनमाह । "शङ्क्वोस्तयोर्दृग्गुण-योस्तयोर्वा त्रिज्याचतुर्थांशविभक्तयोः स्यात् । यद्वर्गविश्ले-षपदं द्विधैवं विलम्बनं तद्घटिकादिकं वा" सि० शि० ।

"तयोरनन्तरकथितयोर्वित्रिभलग्नार्कशङ्क्वोस्त्रिज्याचतु-र्थांशेनापवर्त्तितयोर्यद्वर्गान्तरपदं तल्लम्बनं वा भवति । अथ तयोः शङ्क्वोर्या दृग्ज्ये तयोस्त्रिज्याचतुर्थांशभक्त-वर्गान्तरपदं वा लम्बनं भवति । अत्रोपपत्तिः । अत्र निष्पन्नाया दृङ्नतेः कोटिरूपाया घटीचतुष्टयेन त्रिज्यया चानुपातः । य तदुपकरणभूतयोः शङ्क्वो-स्तद्दृग्ज्ययोर्वा क्रियालाघवार्थं यदि क्रियते तदा घ-टिकात्मिकैव दृङ्नतिरुत्पद्यते । तदेव लम्बनम् । अतस्तथा कृते जातमन्यत् प्रकारद्वयम्" प्रमि० ।

लम्बनप्रयोजनमाह । "तत्संस्कृतः पर्वविराम एवं स्फुटोऽसकृत् स प्रग्रहमध्यकालः" सि॰शि॰ । "एवं यद्दर्शान्तकाले लम्बनमुत्पन्नं तद्वित्रिभलग्नादूनेऽर्के धनमतो दर्शान्तघटिकासु क्षेप्यम् । यदि वित्रिभादधिकेऽर्के जातं तदृणं दर्शान्तघटीभ्यः शोध्यम् । एवमसकृल्लम्बनसंस्कृताद्दर्शान्तकालाल्लग्नमानीय वित्रिभं च कृत्वोक्तप्रकारेण लम्बनं साध्यम् । तेन गणितागतो दर्शान्तः पुनः संस्कार्यः । एवं सकृद्यावदविशेषः । एवं संस्कृतो दर्शान्तो ग्रहणमध्यकालो भवति । अत्रोपपत्तिः । अत्र चन्द्रकक्षाया आसन्नत्वाद्रविकक्षाया दूरत्वात् कुपृष्ठोच्छ्रिताद्द्रष्टू रविमण्डलगामि यत् सूत्रं तस्मादधश्चन्द्रोऽवलम्बितो दृश्यते तल्लम्बनम् । क्रान्तिवृत्ते परमोच्चस्थाने किल वित्रिभम् । तस्मादूनो यदा रविस्तदार्कादवलम्बितश्चन्द्रः पृष्ठतो भवति । चन्द्रो हि शीघ्रगतिः । शीघ्रे पृष्ठगते युतिरेष्या । अतो लम्बनं तिथौ धनम् । यदा वित्रिभलग्नादधिकोऽर्कस्तदा चन्द्रोऽवलम्बितोऽर्कादग्रतो भवति । शीघ्रेऽग्रगे युतिर्जाता लम्बनतुल्येन कालेनातस्तस्य लम्बनमृणम् । एवं लम्बनसंस्कृतो दर्शान्तो ग्रहणमध्यकालः स्यादित्युपपन्नम् । यदि त्रिज्यातुल्यया वार्कोदग्ज्यया परमा भुक्त्यन्तरपञ्चदशांशतुल्या लम्बनलिप्ता ४८ । ४६ लभ्यन्ते तदेष्टयार्कोदग्ज्यया किमिति । फलं दृग्लम्बनकलाः । एवमनेनैवानुपातेन दृक्क्षेपाद्या लम्बनलिप्ता उत्पद्यन्ते ता अवनतिलिप्ताः ता भुजरूपाः । दृग्लम्बनकलाः कर्णः तयोर्वर्गान्तरपदं स्फुटलम्बनलिप्ताः । यतो दृङ्नत्यानयनेऽर्कदृग्ज्या कर्णो दृक्क्षेपो भुजः । अतो दृक्क्षेपाज्जनिताऽवनतिर्भुजः । स्फुटलम्बनलिप्ताः कोटिः । इदमखिलं गोले लम्बनोपपत्तौ कथितम् । तद्यथा । "यतः कुपृष्ठोच्छ्रितो द्रष्टा चन्द्रं पश्यति लम्बितम् । साध्यते कुदलेनातो लम्बनं च नतिस्तथा । इष्टापवर्तितां पृथ्वीं कक्षे च शशिसूर्ययोः । भित्तौ विलिख्य तन्मध्ये तिर्यग्रेखां तयोर्ध्वगाम् । तिर्यग्रेखायुतौ कल्प्यं कक्षायां क्षितिजं तथा । ऊर्ध्वरेखायुतौ खार्धं दृग्ज्याचापांशकैर्नतौ । कृत्वार्केन्दू समुत्पत्तिं लम्बनस्य प्रदर्शयेत् । एकं भूमध्यतः सूत्रं नयेच्चण्डांशुमण्डलम् । द्रष्टुर्भूपृष्ठगादन्यद् दृक्सूत्रं तदुच्यते । कक्षायां सूत्रयोर्मध्ये यास्ता लम्बनलिप्तिकाः । गर्भसूत्रे यदा स्यातां चन्द्रार्कौ समलिप्तिकौ । दृक्सूत्राल्लम्बितश्चन्द्रस्तेन तल्लम्बनं स्मृतम् । दृग्गर्भसूत्रयोरैक्यात् खमध्ये नास्ति लम्बनम् । अथ याम्योत्तरायां तु भित्तौ पूर्वैः क्रमाल्लिखेत् । ये कक्षे मण्डले ते तु ज्ञेये विक्षेपमण्डले । त्रिभोनलग्नदृग्ज्या या स दृक्क्षेपो द्वयोरपि । तच्चापांशैर्नतौ चिन्ह्यं कृत्वा वित्रिभसंज्ञकौ । प्राग्वद्दृक्सूत्रतश्चन्द्रवित्रिभस्य नतिर्मितिः । कक्षयोरन्तरं यत् स्याद्वित्रिभे सर्वतोऽपि तत् । याम्योत्तरं नतिः साऽत्र दृक्क्षेपात् साध्यते ततः । यत्र तत्र नतादर्कादधश्चन्द्रावलम्बनम् । तद्दृग्वृत्तेऽन्तरं चन्द्रभान्वोः पूर्वापरं तु तत् । पूर्वापरं च याम्योदग्जातं तेनान्तरद्वयम् । अत्रापमण्डलं प्राची तत्तिर्यग्दक्षिणोत्तरा । यत् पूर्वापरभावेन लम्बनाख्यं तदन्तरम् । याम्योत्तरभावेन नतिसंज्ञं तदुच्यते । नतिलिप्ता भुजः कर्णो दिग्लम्बनकलास्तयोः । कृत्यन्तरपदं कोटिः स्फुटलम्बनलिप्तिकाः । परलम्बनलिप्ता ४८/४६ घ्नी त्रिज्या ३४३८ ह्रा रविदृग्ज्यका । दृग्लम्बनकलास्ताः स्युरेवं दृक्क्षेपयोर्नतिः । गत्यन्तरस्य ७३१/२७ विंश्यंशः ४८/४६ परलम्बनलिप्तिकाः गतियोजन ११८५८/४५ तिथ्यंश ७९०/२५ कुदलस्य यतो मितिः । स्युर्लम्बनकलानाड्यो गत्यन्तरलवोद्धृताः । प्राग्गतो रवेश्चन्द्रः पश्चात् पृष्ठेऽवलम्बितः । शीघ्रेऽग्रगे युतिर्जाता यस्मात् पृष्ठगते यतः । प्राग्धनं तद्वनं पश्चात् क्रियते लम्बनं तिथौ । याम्योत्तरं यदस्तावदन्तरं शशिसूर्ययोः । नतिस्तथा तया तस्मात् संस्कृतः स्यात् स्फुटः शरः" प्रमि॰ ।

इदानीं प्रकारान्तरेण लम्बनमाह । "त्रिभोनलग्नस्य शरत्रिभू १३ घ्नो दन्तै ३२ र्विभक्तः परसंज्ञकः स्यात् । लग्नार्कयोरन्तरकोटिदोर्ज्ये विधाय दोर्ज्यापरयोर्वियोगात् । तन्निघ्नयुतात् कोटिगुणस्य कृत्या मूलं श्रुतिः कोटिगुणात् परघ्नात् । श्रुत्या हृताल्लब्धधनुःकलाया वाऽसवो लम्बनजाः सकृत् स्युः" सि॰शि॰ । "त्रिभोनलग्नस्य यः शङ्कुः स त्रयोदशगुणो द्वात्रिंशद्भक्तः फलं परसंज्ञं भवति । दर्शान्तकाले यल्लग्नं तस्मादर्कोनाद्भुजकोटिज्ये साध्ये तत्र दोर्ज्याया अनन्तरानीतस्य च परस्य यो वियोगस्तस्माद्वर्गीकृतात् कोटिज्यावर्गेण युताद्यत् पदं स कर्णः । कोटिज्यापरयोर्घातात् तेन कर्णेन भक्ताद्यत् फलं तस्य चापे यावत्यः कलास्तावन्तो लम्बनासवः सकृदेव भवेयुः । अत्रोपपत्तिः । यदि त्रिज्यातुल्ये १२० वित्रिभलग्नशङ्कौ परमलम्बनज्यातुल्यगुणकेन त्रिज्या हरस्तदा त्रयोदशगुणकेन कः । फलं द्वात्रिंशत् । तस्य परसंज्ञा कृता । अधोऽधःस्थयोरपि चन्द्रार्कयोः क्रियोपसंहारार्थमन्यथा कल्पितं लम्बनचेतम् । तत्र

तावत् परमं लम्बनमुच्यते । चतस्रो घटिकाः किल परमं लम्बनम् । तत् तु त्रिज्यातुल्ये वित्रिभोनलग्नशङ्कौ । तासां घटीनां यावन्तोऽवयवास्तावन्त एव षष्टिविंशतिभागानां कला भवन्ति । अनस्त्रिज्यासंभूतक्रान्तेः कलानां तुल्यास्तदा परमलम्बनासवो भवन्ति । यदा पुनर्वित्रिभलग्नशङ्कुस्त्रिज्यातोऽल्पो भवति तदा तज्जनितक्रान्तेः कलानां तुल्या भवन्ति । अतो वित्रिभलग्नशङ्कुजनिता क्रान्तिज्या तदा परमलम्बनासूनां ज्या भवतीत्यवगन्तव्यम् । अथ पूर्वापरायताया भित्तेरुत्तरपार्श्वे त्रिज्यामिताङ्गुलकर्कटेन वृत्तमालिख्य तन्मध्ये तिर्यग्रेखामूर्ध्वरेखां च कुर्यात् । तत् किल चन्द्रकक्षावृत्तं कल्प्यम् । तन्मध्यादुपरि परमलम्बनाङ्गुलान्तरे भूसंज्ञितं विन्दुं कृत्वा तत्र तेनैव कर्कटेनान्यद्वृत्तं विलिखेत् । तन्मध्येऽप्यन्या तिर्यग्रेखा कार्या । ऊर्ध्वरेखा सर्वोपरितो नेया । तत् किलार्ककक्षावृत्तम् । ते वृत्ते चक्रांशैर्घटिकाषष्ट्या चाङ्क्ये । ऊर्ध्वरेखायुतौ द्वयोरपि वित्रिभलग्नसंज्ञौ विन्दू कार्यौ ततो वित्रिभलग्नार्कान्तरभागै रविकक्षायां वित्रिभलग्नाङ्कतं रविसंज्ञकं विन्दुं कुर्यात् । एवं चन्द्रवित्रिभाच्चन्द्रकक्षायां तैरेव भागैर्गतं चन्द्रविन्दुं च । ततो भूविन्दोः सकाशाच्चन्द्रविन्दुपरिगतं सूत्रं प्रसार्यम् । तत् सूत्रं रविकक्षायां लगति तत्सूर्यविन्द्वोरन्तरे यावत्यो घटिकास्तावत्यस्तस्मिन् काले लम्बनघटिका ज्ञेयाः । एवंविधे क्षेत्रेऽस्य लम्बनस्य साधनोपपत्तिर्ग्रहणेऽप्रफलवदुत्पद्यते । तत्र रविकक्षां कक्षामण्डलं, चन्द्रकक्षां प्रतिमण्डलं, परमलम्बनाङ्गुलज्यामन्त्यफलज्यां वित्रिभलग्नं सषड्भं शीघ्रोच्चं प्रकल्प्य शेषा क्रियोह्या । एतदानयनं किञ्चित् स्थूलम्" प्रमि० ।

अथ नत्यर्थमर्केन्द्वोर्दृक्क्षेपावाह । "दृग्ज्यैव या वित्रिभलग्नशङ्कोः स एव दृक्क्षेप इनस्य तावत् । सौम्येऽपमे वित्रिभजेऽधिकेऽस्मात् सौम्योऽन्यथा दक्षिणएव वेद्यः । चापीकृतस्यास्य तु संस्कृतस्य त्रिभोनलग्नोद्भवशरेण जीवा" शि० । "पूर्वार्द्धं सुगमं प्रागेव व्याख्यातम् । सोऽर्कदृक्क्षेपः सौम्यो याम्यो वेति सामान्येनोच्यते । तत्र वित्रिभलग्नस्यापमे सौम्येऽक्षांशेभ्योऽधिके सति सौम्यो ज्ञेयः । इतोऽन्यथा याम्यः । अथ तस्य दृक्क्षेपस्य धनुः कार्यम् । वित्रिभलग्नं चन्द्रं प्रकल्प्य सपाततात्कालिकचन्द्रदोर्ज्ययेत्येवं विक्षेपः साध्यः । तेन वित्रिभलग्नविक्षेपेण तद्दृक्क्षेपधनुः संस्कार्य्यम् । एकदिशोर्योगो भिन्नदिशोरन्तरमित्यर्थः । संस्कृतिवशाच्चन्द्रदृक्क्षेपस्य दिक् । तस्य जीवा दृक्क्षेप इन्दोरित्यग्रे सम्बन्धः । अत्रोपपत्तिः । वित्रिभलग्नं क्रान्तिवृत्ते तद्भ्रमवशात् कदाचिद्दक्षिणोत्तरवृत्तात् पूर्वतः कदाचित् पश्चिमतो भवति । यद्युदयलग्नमुत्तरगोले तदा पूर्वतो भवति । तदन्यथा पश्चिमत इत्यर्थः । खार्धाद्वित्रिभलग्नोपरिगतं दृक्क्षेपमण्डलं यत्र वित्रिभे लगति तत्खार्धान्तरेऽर्कदृक्क्षेपचापांशाः । यत्र विमण्डले लगति तत्खार्धान्तरे चन्द्रदृक्क्षेपचापांशाः । तज्ज्ये तयोर्दृक्क्षेपौ" । "यदा कक्षामण्डलं खमध्ये भवति तदा तस्य दृङ्मण्डलाकारत्वादत्र कुत्र स्थितोऽपि चन्द्रो लम्बितोऽपि कक्षामण्डलं न त्यजति । अतोऽत्रावनतेरभावः । यदा खार्धात् वित्रिभलग्नं दक्षिणतः । तदा तिरश्चीनत्वात् क्रान्तिवृत्तस्य तत्रस्थो रविर्दृङ्मण्डलगत्यावलम्बितः क्रान्तिवृत्ताद्दक्षिणतो यावतान्तरेण दृश्यते तावती तस्य नतिः । एवं वित्रिभलग्नं यदि खार्धादुत्तरतस्तदोत्तरा नतिः । एवं चन्द्रस्यापि नतिः । किन्तु चन्द्रकक्षामण्डलं विमण्डलमेव कल्प्यम् । यतश्चन्द्रो विमण्डले भ्रमति । अतः खार्धाद्विमण्डलं यावता नतं तावच्चन्द्रदृक्क्षेपस्य चापम् । तज्ज्या तद्दृक्क्षेपः । एवं दृक्क्षेपवशात् तिरश्चीने स्थिते विमण्डले सति दृङ्मण्डलगत्याऽवलम्बितस्य चन्द्रस्य विमण्डलेन सह यदन्तरं दक्षिणोत्तरं सा चन्द्रनतिस्तस्य दृक्क्षेपादागच्छति" प्रमि० ।

"दृक्क्षेपान्नतिसाधनमाह । "दृक्क्षेप इन्दोर्निजमध्यभुक्तितिथ्यंशनिघ्नौ त्रिगुणोद्धृतौ तौ । नती रवीन्द्वोः समभिन्नदिक्कं तदन्तरैक्यं तु नतिः स्फुटाऽत्र" शि० । "तौ चन्द्रार्कयोर्दृक्क्षेपौ स्वस्वमध्यभुक्तिपञ्चदशांशेन गुणितौ त्रिज्याभक्तौ फले तयोर्नती भवतः । तयोर्नत्योः समदिशोरन्तरं भिन्नदिशोर्योगो रविग्रहे स्फुटा नतिर्भवति । अत्रोपपत्तिस्त्रैराशिकेन । यदि त्रिज्यातुल्येन दृक्क्षेपेण परमा भुक्तिपञ्चदशांशतुल्या नतिर्लभ्यते तदेष्टेन किम् । फलं नतिकलाः । अथ तयोर्नत्योर्योगवियोगकारणमुच्यते । यस्यां दिशि चन्द्रो नतस्तस्यां दिशि यदि रविस्तदा नत्योरन्तरेण चन्द्रार्कयोरन्तरं ज्ञातं भवति यदा भिन्नदिशौ नतौ तदा तयोर्योगेन चन्द्रार्कयोरन्तरमुच्यते" प्रमि० । इदानीं स्फुटनतेरेवानयनमाह ।

"दृक्क्षेप इन्दोर्द्विगुणो विभक्तः किन्द्रैः १४१स्फुटैवावनतिर्भवेद्वा । लघुज्यकोत्थो द्विगुणोऽशभक्तः षड्भंशयुक्तोऽवनतिः स्फुटा वा" शि० । 'चन्द्रस्य दृक्क्षेपो द्विगुणो भूपक्षैः १४१ भाजितः फलं स्फुटैवावनतिः । यदि लघु-

जय्कोत्थो विधुदृक्क्षेपस्तदा द्विगुणः पञ्चभक्तः स इति फलं खषड्यमयुक्तं स्फुटैवावनतिर्भवेत् । अत्रोपपत्तिः । तत्र स्वल्पान्तरत्वाच्छशिदृक्क्षेपतुल्यमर्कदृक्क्षेपं परिकल्प्य भुक्त्यन्तरपञ्चदशांशेनानुपातः । यदि त्रिज्यातुल्ये दृक्क्षेपे भुक्त्यन्तरपञ्चदशांशमिता स्फुटा नतिर्लभ्यते तदाऽभीष्टेऽस्मिन् किमिति । अत्र भुक्त्यन्तरपञ्चदशांशो गुणस्त्रिज्या हरः । गुणकहरौ गुणकाङ्केनापवर्तितौ । जातं गुणकस्थाने द्वयं २ हरस्थाने क्रिन्द्राः १४१ । एवं द्वहज्ज्याकाभिः । लघुज्याकाभिस्तु गुणकस्थाने द्वयं २ हरस्थाने किंचिदूना: पञ्च ४ । ५५ । ते सुखार्थं पञ्च कृताः ५। अतस्तत् फलं खषड्यमयुतं कृतम्" प्रमि०

इदानीं स्थूले लम्बनावनती सुखार्थमाह । "त्रिभोनलग्नस्य दिनार्धजाते नतोन्नतज्ये यदि वा सुखार्थम् । दृक्क्षेपशङ्कू परिकल्प्य साध्यं स्वल्पान्तरं लम्बनकं नतिश्च" शि० । "त्रिभोनलग्नं चन्द्रं प्रकल्प्य तस्य क्रान्तिः शरश्च साध्यः । तेन शरेण क्रान्तिः संस्कार्या । सा तस्य स्फुटा क्रान्तिः । पलावलम्बावपमेन संस्कृतावित्यादिना नतांशा उन्नतांशाश्च कार्याः । तज्ज्ये त्रिभोनलग्नस्य दिनार्धजाते नतोन्नतज्ये । अत्रोन्नतज्यां त्रिभोनलग्नशङ्कुं नतज्यां चन्द्रदृक्क्षेपं च परिकल्प्योक्तवल्लम्बनं स्वल्पान्तरमवनतिश्च सुखार्थं साध्या । अत्रोपपत्तिः । त्रिभोनलग्नमहोरात्रवृत्त एव दिनार्धशङ्कुस्तद्दृग्ज्यावत्तो दृक्क्षेपः" प्रमि०।

इदानीं नतेः प्रयोजनमाह ।

"स्पष्टोऽत्र बाणो नतिसंस्कृतोऽस्मात् प्राग्वत् प्रसाध्ये स्थितिमर्दखण्डे" शि० । "अत्र सूर्यग्रहणे यः पूर्ववच्छर आगच्छति । असौ नत्या संस्कृतः सन् स्फुटो भवति । अत्रैतदुक्तं भवति । गणितागतो दर्शान्तकालो लम्बनेनासकृत् स्फुटीकृतः स किल ग्रहमध्यकालः । तत्र तात्कालिकं सपातं चन्द्रं कृत्वा विक्षेपः साध्यः । अथ स्थिरलम्बनकाले यद्वित्रिभलग्नं तस्मादवनतिः साध्या । तया स विक्षेपः संस्कृतः । स मध्यग्रहणविक्षेपः स्फुटो भवतीत्यवगन्तव्यम् । ततो 'मानार्धयोगान्तरयोः कृतिभ्याम्" इत्यादिना स्थितिमर्दखण्डे साध्ये । अत्रोपपत्तिः । चन्द्रस्थाने क्रान्तिमण्डलविमण्डलयोरन्तरालं विक्षेपः । चन्द्रो विमण्डले, रविः क्रान्तिमण्डलेऽतस्तयोर्विक्षेपो याम्योत्तरमन्तरम् । परं यदि भूगर्भस्थो द्रष्टा । यदा तु कर्णगोच्छ्रितो भूपृष्ठस्थस्तदा रविकक्षामण्डलाच्चन्द्रकक्षामण्डलमधो दृक्क्षेपवशाल्लम्बितं भवति । तद्याम्योत्तरभागेन यावता लम्बितं तावती नतिस्तदग्राच्छरोऽतस्तया शरे संस्कृते स्फुटमर्केन्द्वोरन्तरं भवति स एव स्फुटशरः । यथोक्तं गोले 'याम्योत्तरं शरस्तावदन्तरं शशिसूर्ययोः । नतिस्तथा तया तस्मात् संस्कृतः स्यात् स्फुटः शरः" शि०।

इदानीं स्पर्शमुक्तिसम्मीलनादिकालार्थमाह । "तिथ्यन्ताद्गणितागतात् स्थितिदलेनोनाधिकाल्लम्बनं तत्कालोत्थमतीष्टसंस्कृतिभवस्थित्यर्धहीनाधिके । दर्शान्ते गणितागते धनमृणं वा तद्विधायासकृज्ज्ञेयौ प्रग्रहमोक्षसंज्ञसमयावेवं क्रमात् प्रस्फुटौ । तन्मध्यकालान्तरयोः समाने स्तः भवेतां स्थितिखण्डके च । दर्शान्ततो मर्ददलोनयुक्तात् सम्मीलनोन्मीलनकालः एवम् । सकृत्प्रकारेण विलम्बनं चेत् सकृत् स्फुटौ प्रग्रहमोक्षकालौ । किंत्वत्र बाणावनती पुनश्च तात्कालिकाभ्यां विधुवित्रिभाभ्याम्" शि०। "प्रथमं यो गणितागतस्तिथ्यन्तस्तस्मात् स्थितिदलेनोनाधिकाल्लम्बनं साध्यम् । स्पर्शस्थितिदलेनोनात्,मोक्षेऽधिकादित्यर्थः । अत्र किल स्पर्शकालः साध्यते । तत्र गणितागततिथ्यन्तात् स्थित्यर्द्धेनोनात् प्राग्वल्लम्बनमानीय तद्नष्टं स्थापयित्वा तद्गणितागते तिथ्यन्ते स्थितिदलेनोने धनमृणं वा कार्यम् । स स्थूलः स्पर्शकालः । तन्मध्यकालयोरन्तरं स्थूलं स्थित्यर्द्धम् । तज्जनितफलोनात् समकलेन्दोः शरस्तत्कालवित्रिभकालजनितया नत्या संस्कृतः स्यात् । स्फुटविक्षेपात् पुनः स्थित्यर्धम् । तेन स्थित्यर्धेन गणितागते दर्शान्ते ऊने तल्लम्बनं धनमृणं वा कार्यम् । एवं कृते सति यावान् कालस्तावान् स्पर्शकालः । एवमसकृदिति । स्पर्शमध्यग्रहकालयोरन्तरं स्पार्शिकं स्थित्यर्धं ज्ञेयम् । स्पर्शकालात् पुनर्लम्बनमानीयानष्टं स्थाप्यम् । अथ स्पार्शिकस्थित्यर्धघटीफलेन चन्द्रमूनीकृत्य शरः साध्यः । अनन्तरातीतवित्रिभलग्नान्नतिश्च । तया स्फुटीकृताच्छरात् पुनः स्थित्यर्द्धम् । तेनोनिते गणितागते दर्शान्ते तल्लम्बनं धनमृणं वा कार्यम् । एवं स्फुटः स्पर्शकालः । असकृदिति यावदविशेषः । मौक्षिकार्थं मध्यग्रहकालोत्थस्थितिः पूर्वकालोत्थतिथ्यन्ते योज्या । तत्राप्यसकृल्लम्बनान्तरमेवस्थित्या गणितागततिथ्यन्तो युतः सा मोक्षस्थितिरस्पष्टा । तल्लम्बनान्तरशरोत्थस्थित्या वारं वारं पूर्वदर्शान्तोयोज्यः । एवं स्थिरलम्बनान्तरशरोत्थस्थितिर्मौक्षस्थितिर्या । सैव मौक्षिकम् । एवं स्थितिदलेनाढ्याद्गणितागतान्मोक्षकालोऽपि । तत्र चन्द्रपाततात्कालिकीकरणे फलं धनम् । एवं मोक्षमध्यग्रहकालयो-

रन्तरं मौलिकं स्थित्यर्द्धम् । एवं मर्द्दर्द्धेनोनाद्गणितागतात् सम्मीलनकालः । मर्द्दलेन युक्तादुन्मीलनकालः । सम्मीलनमध्यग्रहकालयोरन्तरं प्रथमं स्फुटं मर्द्धार्द्धम् । उन्मीलनमध्यग्रहकालयोरन्तरं द्वितीयम् । यद्यसकृद्विधिना लम्बनं क्रियते तदैवम् । यदा पुनः सकृद्विधिना लम्बनं तदा स्पर्शकालो मोक्षकालोऽपि सकृदेव स्फुटो भवति । किन्तु तत्रायं विशेषः । स्पर्शकाले मोक्षकाले वा पुनर्वित्रिभलग्नं कृत्वा तस्मान्नतिः साध्या । तया तत्कालभवो विक्षेपः संस्कृतः सन् स्फुटः स्पार्शिकः । मौक्षिको वा स्फुटो भवति । नचेदेवं तदा स्थूलः । अत्रोपपत्तिः स्थित्यर्धानयने पूर्वोक्तैव । तत्स्फुटीकरणे प्रोच्यते । गणितागतो हि दर्शान्तकालो मध्यग्रहकालो भवितुमर्हति चन्द्रार्कयोस्तत्र तुल्यत्वात् । स्थित्यर्द्धेनोनो दर्शान्तकालः स्पर्शकालो भवति । युतो मोक्षकालः । अथ च द्रष्टुः कक्षोच्छ्रितत्वाल्लम्बनमुत्पन्नम् । अतस्तेन संस्कृतो दर्शान्तो मध्यग्रहकालः स्फुटो भवति । एवं स्पर्शकालोऽपि तत्कालजनितलम्बनेन संस्कृतः स्फुटो भवितुमर्हति । या युक्तिर्मध्यग्रहणकालस्य लम्बनसंस्कारे सैव स्पर्शमोक्षसम्मीलनोन्मीलनकालानां, किन्तु स्पर्शमोक्षकालस्य लम्बनसंस्कारे क्रियमाणे कालान्यत्वाच्छरः किञ्चिदन्यथा भवति । नतिश्च किञ्चिदन्यादृशी । तत्संस्कृतिभवं स्थित्यर्द्धमपि किञ्चिदन्यादृशम् । अतस्तेनोने गणितागते दर्शान्ते तल्लम्बनं धनमृणं वा कर्त्तुं युज्यते । अत उक्तं तत्कालोत्थनतीषुसंस्कृतिभवस्थित्यर्द्धहीनाधिक इत्यादि । यद्यसकृद्विधिना लम्बनं तदा पुनः पुनर्लम्बनं नतिश्च । तया तत्कालशरः स्फुटः स्थित्यर्धार्थं किल क्रियते । तदा स्थित्यर्धं स्फुटं भवति । तदा तत्कालशरोऽपि स्फुटो भवति । स एव स्पार्शिकः शर इति वेदितव्यम् । यदा पुनः सकृद्विधिना लम्बनं तदा पुनःपुनः शरस्य नतेश्चाकरणात् स्पार्शिकः शरः पुनः कर्त्तुं न युज्यते । अत उक्तं किन्त्वत्र शाणाश्मतो पुनश्च तात्कालिकाभ्यां विधुविक्षिभाभ्यामिति" प्रमिताक्षरा ।

इदानीं विशेषमाह ।

"शेषं शशाङ्कग्रहणोक्तमत्र स्फुटेषुजेन स्थितिखण्डकेन । हृतोऽथ तेनैव हतः स्फुटेन बाहुः स्फुटः स्याद्ग्रहणेऽत्र भानोः । ग्रासाच्च कालानयने फलं यत् स्फुटेन निघ्नं स्थितिखण्डकेन । स्फुटेषुजेनाप्तमसद्दृतं तत् स्थित्यर्द्धशुद्धं भवतीष्टकालः" इति सिद्धान्तशिरोमणिः ।

"अत्र रविग्रहणे बिम्बवलनभुजकोट्यादीनामानयनं शशाङ्कग्रहणोक्तवत् वेदितव्यम् । किं त्वत्र भुजसाधने विशेषः अत्र पूर्वानयनेन यो भुज आगच्छति । असौ तत्कालस्फुटशरजनितेन स्थित्यर्धेन गुण्यः स्फुटेन स्थितिखण्डकेन भाज्यः । स्पर्शमध्यकालयोरन्तरेण भाज्यः इत्यर्थः । फलं स्फुटो भुजो भवति"।"ग्रासोनमानैक्यदलस्य वर्गाद्विक्षेपकृत्या रहितात् पदं यत् । गत्यन्तरांशैर्विहृतमिति" यत् फलं लभ्यते तस्य स्फुटीकरणम् । तत् फलं स्फुटेन स्थित्यर्धेन स्पर्शमध्यकालयोरन्तरेण गुणितं तत्कालस्फुटशरजनितेन स्थित्यर्धेन भक्तं स्फुटं भवति । तत् स्वस्थित्यर्द्धशुद्धमिष्टकालो भवति । स च स्पर्शादग्रतो मोक्षात् पृष्ठतः । तस्मिन् काले नतिसंस्कृतं शरं पुनः कृत्वा ग्रासोनमानैक्यदलस्य वर्गाद्विक्षेपकृत्येत्यादिना फलं साध्यम् तत् फलं पुनः स्फुटं कर्त्तव्यम् । एवं यावदिष्टकालःस्फुटो भवति तावदसकृत्कर्म । अत्रोपपत्तिः । भुजानयने पूर्वोक्तैव । तत्स्फुटीकरणे प्रोच्यते । यथा चन्द्रग्रहणे स्थित्यर्धं शरमानैक्यार्द्धयोर्वर्गान्तरादुद्भूतं तथेहानीतम् । तदस्फुटम् । लम्बनसंस्कारे कृते स्पर्शमध्यग्रहकालयोरन्तरं तत् स्फुटं स्थित्यर्द्धम् । लम्बनान्तरसंस्कृतमित्यर्थः । भुजो हि स्थित्यर्द्धसम्बन्धेनागच्छति । यथा चन्द्रग्रहे मध्यममेव स्थित्यर्द्धम् । तत्सम्बन्धेन यादृशो भुजस्तत्रागच्छति तादृशेनेहापि भवितव्यम् । वासनायास्तुल्यत्वात् । अथ च 'वीष्टेन निघ्नाः स्थितिखण्डकेनेत्येवम्' यदानीयते तदा स्फुटस्थित्यर्धं वीष्टं कृत्वा गुणक आनीयते तदा स्फुटस्थित्यर्धसम्बन्धी भुजः स्यात् । असावसम्यक् । अतस्तस्य तत्कालस्फुटशरजनितस्थित्यर्द्धसम्बन्धीकरणायानुपातः । यदि स्फुटस्थित्यर्धेनैतावान् भुजस्तदा तत्कालजनितस्फुटशरभवस्थित्यर्द्धेन किमिति । फलं स्फुटो भुजो भवति । एतदेव विपरीतं कर्म ग्रासात् कालानयने । "ग्रासोनमानैक्यदलस्य वर्गात्"इत्यादिना यत् फलमागच्छति तन्मध्यमं स्थित्यर्धं वीष्टम् । तत् स्फुटस्थित्यर्धाद्यावद्विशोध्यते तावदस्यागष्टं भवति । अतस्तस्य फलस्य स्फुटस्थित्यर्द्धपरिणामायानुपातः । यदि मध्यमस्थित्यर्धेनैतावत् फलं तदा स्फुटस्थित्यर्द्धेन किमिति । अत्र य ल्लभ्यते स्फुटं फलं तस्मिन् स्फुटस्थित्यर्धाच्छोधिते स्फुटमिष्टमवशिष्यत :" इति प्रमिताक्षरा ।

बृहत्संहितायां ग्रासप्रकारस्तद्भेदास्तत्फलानि चोक्तानि यथा

"अमृतास्वादविशेषाच्छिन्नमपि शिरः किलासुरस्येदम्। प्राणैरपरित्यक्तं ग्रहतां यातं वदन्त्येके। इन्द्वर्कमण्डलाकृतिरसितत्वात् किल न दृश्यते गगने। अन्यत्र पर्व्वकालाद्वरप्रदानात् कमलयोनेः। मुखपुच्छविभक्ताङ्गं भुजङ्गमाकारमुपदिशन्त्यन्ये। कथयन्त्यमूर्त्तमपरे तमोमयं सैंहिकेयाख्यम्। यदि मूर्त्तो भविचारी शिरोऽथवा भवति मण्डली राहुः। भगणार्द्धेनान्तरितो गृह्णाति कथं नियतचारः। अनियतचारः खलु चेदुपलब्धिः सङ्ख्यया कथं तस्य। पुच्छाननाभिधानोऽन्तरेण कस्मान्न गृह्णाति। अथ तु भुजगेन्द्ररूपः पुच्छेन मुखेन वा न गृह्णाति। मुखपुच्छान्तरसंस्थं स्थगयति कस्मान्न भगणस्यार्द्धम्। राहुद्वयं यदि स्यादग्रस्तेऽस्तमितेऽथवोदिते चन्द्रे। तत्समगतिनान्येन ग्रस्तः सूर्य्योऽपि दृश्येत। भूच्छायां स्वग्रहणे भास्करमर्कग्रहे प्रविशतीन्दुः। प्रग्रहणमतः पश्चान्नेन्दोर्भानोश्च पूर्व्वार्द्धात्। वृक्षस्य स्वच्छाया यथैकपार्श्वेन भवति दीर्घा च। निशि निशि तद्वद्भूमेरावरणवशाद्दिनेशस्य। सूर्य्यात् सप्तमराशौ यदि चोदग्दक्षिणेन नातिगतः। चन्द्रः पूर्व्वाभिमुखश्छायामौर्वीं तदा विशति। चन्द्रोऽधःस्थः स्थगयति रविमम्बुदवत् समागतः पश्चात्। प्रतिदेशमतश्चित्रं दृष्टिवशाद्भास्करग्रहणम्। आवरणं महदिन्दोः, कुण्ठविषाणस्ततोऽर्द्धसंछन्नः। स्वल्पं रवेर्यतोऽतस्तीक्ष्णविषाणो रविर्भवति। एवमुपरागकारणमुक्तमिदं दिव्यदृग्भिराचार्य्यैः। राहुरकारणमस्मिन्नित्युक्तः शास्त्रसद्भावः। योऽसावसुरो राहुस्तस्य वरो ब्रह्मणायमाज्ञप्तः। आप्यायनमुपरागे दत्तहुतांशेन ते भविता। तस्मिन् काले सान्निध्यमस्य तेनोपचर्य्यते राहुः। याम्योत्तरा शशिगतिर्गणितेऽप्युपचर्य्यते तेन। न कथञ्चिदपि निमित्तैर्ग्रहणं विज्ञायते विनातैस्तु। अन्यस्मिन्नपि काले भवन्त्यथोत्पातरूपाणि। पञ्चग्रहसंयोगान्न किल ग्रहणस्य सम्भवो भवति। तैर्न च विनाऽष्टम्यां न विचिन्त्यमिदं विपश्चिद्भिः। अवनत्यार्कग्रासो दिग्ज्ञेया वलनयावनत्या च" अथ वेलाभेदे फलम्। "तिथ्यवसानाद्वेलाकरणे कथितानि तानि मया। षण्मासोत्तरवृद्ध्या पर्व्वेशाः सप्त देवताः क्रमशः। ब्रह्मशशीन्द्रकुबेरा वरुणाग्नियमाश्च विज्ञेयाः। ब्राह्मे द्विजपशुवृद्धिक्षेमारोग्याणि शस्यसम्पच्च। तद्वत् सौम्ये तस्मिन् पीड़ा विदुषामवृष्टिश्च। ऐन्द्रे भूपविरोधः शारदशस्यक्षयो न च क्षेमम्। कौवेरेऽर्थपतीनामर्थविनाशः सुभिक्षं च। वारुणमवनीशाशुभमन्येषां क्षेमशस्यवृद्धिकरम्। आग्नेयं मित्राख्यं शस्यारोग्याभयाम्बुकरम्। याम्यं करोत्यवृष्टिं दुर्भिक्षं सङ्क्षयं च शस्यानाम्। यदतः परं तदशुभं क्षुन्मारावृष्टिदं पर्व्व। वेलाहीने पर्व्वणि गर्भविपत्तिश्च शस्त्रकोपश्च। अतिवेले कुसुमफलक्षयो भयं शस्यनाशश्च। हीनातिरिक्तकाले फलमुक्तं पूर्व्वशास्त्रदृष्टत्वात्"।

अथ एकमासे ग्रासद्वयस्य ग्रासभेदस्य च फलम्। "स्फुटगणितविदः कालः कथञ्चिदपि नान्यथा भवति। यद्येकस्मिन् मासे ग्रहणं रविसोमयोस्तदा क्षितिपाः। स्वबलक्षोभैः सङ्क्षयमायान्त्यतिशस्त्रकोपैश्च। ग्रस्तावुदितास्तमितौ शारदधान्यावनीश्वरक्षयदौ। सर्व्वग्रस्तौ दुर्भिक्षमरकदौ पापसंदृष्टौ" अथ दिनाद्यंशभेदे ग्रासफलम्।

"अर्द्धोदितोपरक्तो नैकृतिकान् हन्ति सर्व्वयज्ञांश्च। अग्न्युपजीविगुणाधिपविप्राश्रमिणोऽयुगाभ्युदितः। कर्षकपाषण्डिवणिक्क्षत्रियबलनायकान् द्वितीयेऽंशे। कारुकशूद्रम्लेच्छान् खतृतीयांशे समन्त्रिजनान्। मध्याह्ने नरपतिमध्यदेशहा शोभनश्च धान्यार्घः। तृणभुगमात्यान्तःपुरवैश्यघ्नः पञ्चमे खांशे। स्त्रीशूद्रान् षष्ठेंऽशे दस्युप्रत्यन्तहाऽस्तमयकाले। यस्मिन् खांशे मोक्षस्तत्प्रोक्तानां शिवं भवति"।

अथायनादिभेदे फलम् "द्विजनृपतीनुदगयने विट्शूद्रान् दक्षिणायने हन्ति। राहुरुदगादिदृष्टः प्रदक्षिणं हन्ति विप्रादीन्। म्लेच्छान् विदिक्स्थितोऽध्वयायिनश्च हन्याद्धुताशभक्तांश्च। सलिलचरदन्तिघाती याम्येनोद्गमशामशुभः। पूर्व्वेण सलिलपूर्णां करोति वसुधां समागतो दैत्यः। पश्चात्कर्षकसेवकबीजविनाशाय निर्द्दिष्टः। पाञ्चालकलिङ्गशूरसेनाः काम्बोजोड्रकिरातशस्त्रवार्त्ताः"

अथ मेषादिराशौ ग्रासफलम्। "जीवन्ति च ये हुताशवृत्त्या ते पीड़ामुपयान्ति मेषसंस्थे। गोपाः पशवोऽथ मानिनो मनुजा ये च महत्त्वमागताः। पीड़ामुपयान्ति भास्करे ग्रस्ते शीतकरेऽथवा वृषे। मिथुने प्रवराङ्गना नृपा नृपमात्या बलिनः कलाविदः। यमुनातटजाः सबाह्लिका भषगाः सुह्मजनैः समन्विताः। आभीरान्शबरान् सपह्लवान् सह मल्लान् मत्स्यकुरुक्षकानपि। पाञ्चालान्विकलांश्च पीड़यत्यन्नं चापि निहन्ति कर्कटे। सिंहे पुलिन्दगणमेकलसत्त्वयुक्तान् राजोपमाश्चरपतीन् वनगोचरांश्च। षष्ठे तु सस्यकविलेखकगेयसक्तान् हन्त्यश्मकत्रिपुरशालियुतांश्च देशान्। तुलाधरेऽवन्त्यपरा-

न्तमाधून् वणिगद्याराणि महदन्त्यपांश्च। अलिन्ययोदुम्बरमद्रचोलान् द्रुमान् सयौधेयविषायुधीयान्। धन्विन्यमात्यवरवाजिविदेहमल्लान् पाञ्चालवैद्यवणिजो विषमायुधज्ञान्। हन्यान्मृगे तु झषमन्त्रिकुलानि नीचान् मन्त्रौषधिषु कुशलान् स्थविरायुधीयान्। कुम्भेऽन्तर्गिरिजान् स पश्चिमजनान् भारोद्वहांस्तस्करान् आभीरान्दरदार्य्यसिंहपुरकान् हन्यात्तथा वर्ब्बरान्। मीने सागरकूलसागरजलद्रव्याणि मान्यान् जनान् प्राज्ञान् वार्य्युपजीविनश्च भफलं कूर्म्मोपदेशाद्वदेत्" ताराफलं कूर्म्मविभागशब्दे वक्ष्यते।

अथ ग्रासभेदनामतत्फले "सव्यापसव्यलेहग्रसननिरोधावमर्द्दनारोहाः। आघ्रातं मध्यतमस्तमोऽन्त्य इति ते दश ग्रासाः। सव्यगते तमसि जगज्जलप्लुतं भवति मुदितमभयं च। अपसव्ये नरपतितस्करावमर्द्दैः प्रजानाशः। जिह्वेव लेढि परितस्तिमिरनुदो मण्डलं यदि स लेहः। प्रमुदितसमस्तभूता प्रभूततोया च तत्र मही। ग्रसनमिति यदा त्र्यंशः पादो वा गृह्यतेऽथवाप्यर्द्धम्। स्फीतनृपवित्तहानिः पीड़ा च स्फीतदेशानाम्। पर्य्यन्तेषु गृहीत्वा मध्ये पिण्डीकृतं तमस्तिष्ठेत्। स निरोधो विज्ञेयः प्रमोदकृत् सर्व्वभूतानाम्। अवमर्द्दनमिति निःशेषमेव संछाद्य यदि चिरं तिष्ठेत्। हन्यात् प्रधानदेशान् प्रधानभूपांश्च तिमिरमयः। वृत्ते ग्रहे यदि तमस्तत्क्षणमावृत्य दृश्यते भूयः। आरोहणमित्यन्योऽन्यमर्द्दनैर्भयकरं राज्ञाम्। दर्पण इवैकदेशे सवाष्पनिःश्वासमारुतोपहतः। दृश्ये ताघ्रातं तत् सुवृष्टिवृद्ध्यावहं जगतः। मध्ये तमः प्रविष्टं वितमस्कं मण्डलं च यदि परितः। तन्मध्यदेशनाशं करोति कुक्ष्यामयभयं च। पर्य्यन्तेष्वतिबहुलं स्वल्पं मध्ये तमस्तमोऽन्त्याख्यम्। सस्यानामीतिभयं भयमस्मिंस्तस्कराणां च"।

अथौत्पातिकराहुवर्णभेदे फलम्। "श्वेते क्षेमसुभिक्षं ब्राह्मणपीड़ां च निर्द्दिशेद्राहौ। अग्निभयमनलवर्णे पीड़ा च हुताशवृत्तीनाम्। हरिते रोगोल्वणता सस्यानामीतिभिश्च विध्वंसः। कपिले शीघ्रगसत्त्वम्लेच्छध्वंसोऽथ दुर्भिक्षम्। अरुणकिरणानुरूपे दुर्भिक्षावृष्टयो विहगपीड़ा। आधूम्रे क्षेमसुभिक्षमादिशेन्मन्दवृष्टिं च। कापोतारुणकपिलश्यावाभे क्षुद्भयं विनिर्द्देश्यम्। कापोतः शूद्राणां व्याधिकरः कृष्णवर्णश्च। विमलकमणिपीताभो वैश्यध्वंसी भवेत् सुभिक्षाय। सार्च्चिष्मत्यग्निभयं गौरिकरूपे तु युद्धानि। दूर्व्वाकाण्डश्यामे हारिद्रे वापि निर्द्दिशेन्मरकम्। अशनिभयसम्प्रदायी पाटलकुसुमोपमो राहुः। पांशुविलोहितरूपः क्षत्रध्वंसाय भवति वृष्टेश्च। बालरविकमलसुरचापरूपभृत् शस्त्रकोपाय। पिरोमस्य ग्रासभेदे ग्रासवर्णभेदस्तु स्वाभाविक इन्द्रविरोधः।

अथ ग्रहभेददर्शने फलभेदः। "पश्यन् ग्रस्तं सौम्यो हवनघृतैलक्षयाय राज्ञां च। भौमः समरविमर्द्दं शिखिकोपं तस्करभयं च। शुक्रः सस्यविमर्द्दं नानाक्लेशांश्च जनयति धरित्र्याम्। रविजः करोत्यवृष्टिं दुर्भिक्षं तस्करभयं च। यदशुभमवलोकनाभिरुक्तं ग्रहजनितं ग्रहणे प्रमोक्षणे वा। सुरपतिगुरुणावलोकितं तच्छममुपयाति जलैरिवाग्निरिद्धः"।

अथ ग्रासोत्तरषण्मासाभ्यन्तरे पुनर्ग्रासे भूकम्पादौ उपातेन्दुना सूर्यस्येव भौमादिपञ्चकस्याप्याच्छादनसम्भवेन तथात्वे औत्पातिकं ग्रहणं तेषामनिष्टफलानि चोक्तानि यथा "ग्रस्ते क्रमान्निमित्तैः पुनर्ग्रहो मासषट्कपरिवृद्ध्या पवनोल्कापातरजःक्षितिकम्पतमोऽशनिनिपातैः। आवन्तिका जनपदाः कावेरीनर्म्मदातटाश्रयिणः। दृप्ताश्च मनुजपतयः पीड्यन्ते क्षितिसुते ग्रस्ते। अन्तर्वेदीं सरयूं नेपालं पूर्व्वसागरं शोणम्। स्त्रीनृपयोधकुमारान् सह विद्वद्भिर्बुधो हन्ति। ग्रहणोपगते जीवे विद्वन्नृपमन्त्रिगजहयध्वंसः। सिन्धुतटवासिनामप्युदग्दिशं संश्रितानां च। भृगुतनये राहुगते दशेरकाः कैकयाः सयौधेयाः। आर्य्यावर्त्ताः शिबयः स्त्रीसचिवगणाश्च पीड्यन्ते। सौरे मरुभवपुष्करसौराष्ट्रा धावतोऽर्व्वुदान्त्यजनाः। गोमन्तपारियात्राश्रिताश्च नाशं व्रजन्त्याशु"।

अथ मासभेदे ग्रासफलम्। "कार्त्तिक्यामनलोपजीविमगधान् प्राच्याधिपान् कोशलान् कल्माषानथ शूरसेनसहितान् काशींश्च सन्तापयेत्। हन्यादाशु कलिङ्गदेशनृपतिं सामात्यभृत्यं तमो दृष्टं क्षत्रियतापदं जनयति क्षेमं सुभिक्षान्वितम्। काश्मीरकान् कौशलकान् सपुण्ड्रान् मृगांश्च हन्यादपरान्तकांश्च। ये सोमपास्तांश्च निहन्ति सौम्ये (मार्गे) सुवृष्टिकृत् क्षेमसुभिक्षकृच्च। पौषे द्विजक्षत्रजनोपरोधः ससैन्धवाख्याः कुकुरा विदेहाः। ध्वंसं व्रजन्त्यत्र च मन्दवृष्टिं भयं च विन्द्यादसुभिक्षयुक्तम्। माघे तु मातृपितृभक्तवसिष्ठगोत्रान् स्वाध्यायधर्म्मनिरतान् करिणस्तुरङ्गान्। वङ्गाङ्गकाशिमनुजांश्च दुनोति राहुर्वृष्टिं च कर्षकजनानुमतां करोति। पीड़ाकरं फाल्गुनमासि पर्व वङ्गाश्मकावन्तकमेकलानाम्। नृत्यज्ञसस्यप्रवराङ्गनानां ध

तुषकरज्वलनप्राणिनां च । षष्ठे तु चित्रकरलेखकगेयसक्तान् रूपोपजीविनिगमज्ञहिरण्यपण्यान् । पौण्ड्रौड्रकैकयजनानथ चाश्मकांश्च तापः स्पृशत्यमरपोऽत्र शिवत्रवर्षी । वैशाखमासि ग्रहणे विनाशमायान्ति कर्पासतिलाः समुद्गाः । इक्ष्वाकुयौधेयशकाः कलिङ्गाः सोपद्रवाः किन्तु सुभिक्षमस्मिन् । ज्यैष्ठे नरेन्द्रद्विजराजपत्न्यः सस्यानि वृष्टिश्च महागणाश्च । प्रध्वंसमायान्ति नराश्च सौम्याः शाल्वैः समेताश्च निषादसङ्घाः । आषाढपर्व्वण्युदपानवप्रनदीप्रवाहान् फलमूलवार्त्तान् । गान्धारकाश्मीरपुलिन्दचीनान् हतान् वदेन्मण्डलवर्षमस्मिन् । काश्मीरान् सपुलिन्दचीनयवनान् हन्यात् कुरुक्षेत्रकान् गान्धारानपि मध्यदेशसहितान् दृष्टो ग्रहः श्रावणे । काम्बोजैकशफांश्च शारदमपि त्यक्त्वा यथोक्तानिमान् अन्यत्र प्रचुरान्नहृष्टमनुजैर्धात्रीं करोत्याहताम् । कलिङ्गवङ्गान् मगधान् सुराष्ट्रान् म्लेच्छान् सुवीरान् दरदाश्मकांश्च । स्त्रीणां च गर्भानसुरो निहन्ति सुभिक्षकृद्भाद्रपदेऽभ्युपेतः । काम्बोजचीनयवनान् सह शल्यहृद्भिर्बाह्लीकसिन्धुतटवासिजनांश्च हन्यात् । आनर्त्तपौण्ड्रभिषजश्च तथा किरातान् दृष्टोऽसुरोऽश्वयुजि भूरिसुभिक्षकृच्च" ।

अथ मोक्षभेदनामतत्फलानि "हनुकुक्षिपायुभेदा द्विर्द्विः सञ्छर्दनं च जरणं च । मध्यान्तयोश्च विदरणमिति दश शशिसूर्ययोर्मोक्षाः । आग्नेय्यामपगमनं दक्षिणहनुभेदसंज्ञितं शशिनः । सस्यविमर्दो मुखरुग् नृपपीड़ा स्यात् सुवृष्टिश्च । पूर्वोत्तरेण वामो हनुभेदो नृपकुमारभयदायी । मुखरोगं शस्त्रभयं तस्मिन् विन्द्यात् सुभिक्षञ्च । दक्षिणकुक्षिविभेदो दक्षिणपार्श्वेन यदि भवेन्मोक्षः । पीड़ा नृपपुत्राणामभियोज्या दक्षिणा रिपवः । वामस्तु कुक्षिभेदो यद्युत्तरमार्गसंस्थितो राहुः । स्त्रीणां गर्भविपत्तिः सस्यानि च तत्र मध्यानि । नैर्ऋतवायव्यस्थौ दक्षिणवामौ तु पायुभेदौ द्वौ । गुह्यरुगल्पा वृष्टिर्द्वयोस्तु राज्ञीक्षयो वामे । पूर्व्वेण ग्रहणं कृत्वा प्रागेव चापसर्पेत । सञ्छर्दनमिति तत् क्षेमसस्यहार्दिप्रदं जगतः । प्राक्प्रग्रहणं यस्मिन् पश्चादपसर्पणं तु तज्जरणम् । क्षुच्छस्त्रभयोद्विग्नाः क्व शरणमुपयान्ति तत्र जनाः । मध्ये यदि प्रकाशः प्रथमं तन्मध्यविदरणं नाम । अन्तःकोपकरं स्यात् सुभिक्षदं नातिवृष्टिकरम् । पर्य्यन्तेषु विमलता बहुलं मध्ये तमोऽन्तदरणाख्यम् । मध्याख्यदेशनाशः शारदसस्यक्षयश्चास्मिन् । एते सर्वे मोक्षा वक्तव्या भास्करेऽपि किन्त्वत्र । पूर्वा दिक् शशिनि यथा तथा रवौ पश्चिमा कल्प्या" ।

अथ ग्रासोत्तरं सप्तदिनमध्ये पांशुपातादौ फलम् । "मुक्ते सप्ताहान्तः पांशुनिपातोऽन्नसंक्षयं कुरुते । नीहारो रोगभयं भूकम्पः प्रवरनृपमृत्युम् । उल्का मन्त्रिविनाशं नानावर्णा घनाश्च भयमतुलम् । स्तनितं गर्भविनाशं विद्युन्नृपदंष्ट्रिपरिपीड़ाम् । परिवेषो रुक्पीड़ां दिग्दाहो नृपभयं च साग्निभयम् । रूक्षो वायुः प्रबलश्चौरसमुत्थं भयं धत्ते । निर्घातः सुरचापं दण्डश्च क्षुद्भयं सपरचक्रम् । ग्रहयुद्धं नृपयुद्धं केतुश्च तदेव संदृष्टः । अविकृतसलिलनिपाते सप्ताहान्तः सुभिक्षमादेश्यम् । यच्चाशुभं ग्रहणजं तत् सर्वं नाशमुपयाति । सोमग्रहे निवृत्ते पक्षान्ते यदि भवेद्ग्रहोऽर्कस्य । तत्रानयः प्रजानां दम्पत्योर्वैरमन्योऽन्यम् । अर्कग्रहात्तु शशिनो ग्रहणं यदि दृश्यते ततो विप्राः । नैकक्रतुफलभाजो भवन्ति मुदिताः प्रजाश्चैव" वृ०स० ।

ज्यो०त० "रविभौमशनांशे तु निरभ्रं ग्रासमादिशेत् बुधसौरिनवांशे तु मलिनं धूम्रवर्णकम् । गुरोरंशवशाद्य दृश्यते सबलाहकः । शशिशुक्रनवांशे तु प्रावृट्काले महज्जलम् । अन्यत्राव्यक्तभूतौ तौ दृश्येते आदिताम्बरौ"। "अन्यत्र वर्षेतरत्र तौ चन्द्रार्कौ ।

एवं ग्रहणस्य कालभेदेन शुभाशुभसूचकत्वे सामान्यतः स्थिते इदानीं व्यक्तिभेदेन जन्मादिराशिभेदेन ग्रहणस्य दर्शननिषेधस्तत्फलञ्चोच्यते । राजमा० "सप्ताष्टजन्मराशिषु (१२) चतुर्थे दशमे तथा । नवमे च तथा चन्द्रे न कुर्याद्राहुदर्शनम् । श्रीपतिव्यवहारनिर्णये वशिष्ठः । "जन्मभे जन्मराशौ च षष्ठाष्टमगते तयोः । चतुर्थे द्वादशे चन्द्रे न कुर्याद्राहुदर्शनम् । ग्रासदर्शनमात्रेण चार्थहानिर्महद्भयम् । जायते नात्र सन्देहस्तस्मात्तत्परिवर्जयेत्" । "जन्मनक्षत्रापेक्षया षष्ठे सप्तमे अर्थात् निधनतारायाम्" ज्यो०रघु० । "जन्मसप्ताष्टरिष्फाङ्कदशमस्थे निशाकरे । दृष्टोऽरिष्टप्रदो राहुर्जन्मर्क्षे निधनेऽपि च" । 'वैनाशिके ऋक्षे दृष्टं ग्रहणं सुधांशुभास्करयोः । जनयति रोगं बहुधा क्लेशं वित्तक्षयं चाशु" वराहः । तच्छान्तिरप्युक्ता ज्यो०त० तत्रैव 'जन्माष्टजायान्त्यखधर्मसंस्थे निशाकरे जन्मसु तारकासु । दृष्ट्वा तमश्चन्द्रमसं प्रयत्नादभ्यर्च्य दद्यात् कनकं द्विजाय" चन्द्रमसमित्युपलक्षणं चन्द्रग्रहे चन्द्रं सूर्यग्रहे सूर्यमभ्यर्च्येत्यर्थः" ज्यो०रघुनन्दनः ।

ग्रहणं च खराशेः स्थानभेदेन शुभादिसूचकं यथाह ज्योतिषे। "त्रिषडृशायोपगतं नराणां शुभप्रदं स्याद्ग्रहणं रवीन्द्वोः। द्विसप्तनन्देषु च मध्यमं स्याच्छेषेष्वनिष्टं कथितं मुनीन्द्रैरिति"। पृथ्वीचन्द्रोदये विष्णुधर्मे "यन्नक्षत्रगतो राहुर्ग्रसते शशिभास्करौ तज्जातानां भवेत्पीड़ा ये नराः शान्तिवर्ज्जिताः" तत्रैव पुरा॰ "सूर्य्यस्य संक्रमो वापि ग्रहणं चन्द्रसूर्य्ययोः। यस्य त्रिजन्मनक्षत्रे तस्य रोगोऽथवा क्षतिः। तस्य दानं च होमं च देवार्चनजपौ तथा। उपरागाभिषेकं च कुर्य्याच्छान्तिर्भविष्यति। स्वर्णेन वाथ पिष्टेन कृत्वा सर्पस्य चाकृतिम्। ब्राह्मणाय दद्देत्तस्य न रोगादिश्च तत्कृतः"। त्रिजन्मनक्षत्रम् जन्माद्दशमैकोनविंशति तारा इति। सर्पस्य तदाकारस्य राहोरित्यर्थः। अद्भुतसागरे भार्गवः। "यस्य राज्यस्य नक्षत्रे स्वर्भानुरुपरज्यते। राज्यभङ्गं सुहृन्नाशं मरणं चात्र निर्दिशेत्" तच्छान्तिश्च निर्णयसिन्धौ दर्शिता तत एवावगम्या

चन्द्रार्कयोर्ग्रहणे यस्य पुंसो दर्शनं न पर्य्युदस्तं तस्यैव स्नानाद्यधिकार इति ति॰त॰ रघुनन्दनेन समर्थितं यथा "ननु ज्योतिःशास्त्राद्युक्तनिषेधो हिंसावद्दुरितजनकपरोऽस्तु न तु वैधपरः नैवम् "राहुदर्शनसंक्रान्तिविवाहात्ययवृद्धिषु। स्नानदानादिकं कुर्युर्निशि काम्यव्रतेषु च" इति देवलवचने दर्शनपदश्रवणाद्दर्शने सति स्नानादेर्महाभ्युदयहेतुत्वाद्दर्शनमपि विधेयम्। तथा च संवत्सरप्रदीपे मार्कण्डेयः। "एकरात्रमुपोष्यैव राहुं दृष्ट्वाऽव्ययं नरः। पुण्यमाप्नोति कृत्वा च दानं श्राद्धं विधानतः"। ततश्च तस्यैव प्रकृतत्वेनोपस्थितस्य वैधदर्शनस्य पर्य्युदासो न तु रागप्राप्तदर्शनस्य निषेधोऽप्रकृतत्वेनानुपस्थितेः। एवञ्च पदार्थान्तरसाकाङ्क्षविशेषविधिमपहाय तदितरत्र सामान्यमन्वेतीति सर्वत्र पदाहवनीयादौ सामान्यस्य विशेषेतरपरत्वे बीजम्। यथा "अहरहर्दद्यात्" इति "दीक्षितो न ददातीति" प्रतिषेधात् दीक्षितेतरपरं न रागप्राप्तनिषेधकम्। तदुक्तं "त्रिधैव ज्ञायते कर्त्ता विशेषेण प्रतिक्रियम्। योग्यत्वं प्रतिषिद्धत्वं विशेषणपदान्वयैः" "यजमानः पठतीति श्रुत्वा तद्योग्योविद्वान्, दीक्षितो न ददातीति प्रतिषेधाद्दीक्षितेतरः, "स्वर्गकामोऽग्निष्टोमेन यजेत" इत्यत्र विशेषणात् स्वर्गकामः कर्त्तेति तेन सप्तमचन्द्रादीतरो राहुं दृष्ट्वा स्नायादिति लभ्यते। एवं वैधदर्शनपर्य्युदासेऽपि निन्दाप्रायश्चित्तयोः श्रवणाद्रागप्राप्तदर्शनस्य प्रसज्यप्रतिषेधः ऋत्वभिगमननियमे पर्य्युदस्तत्वेऽपि तत्र रागप्राप्तगमनस्य प्रसज्यप्रतिषेधवदिति" तदेतन्निर्णयसिन्धुकृता निराकृतं यथा "केचिद्गौड़ास्तु राहुग्रहणस्य निमित्तत्वेन तन्निश्चयस्य प्रयोजकत्वात् ज्योतिःशास्त्रादिना ज्ञातस्य स्नानस्य निमित्तत्वे प्राप्तेऽपि "स्नानं दानं तपः श्राद्धमनन्तं राहुदर्शने। चन्द्रसूर्योपरागे तु यावद्दर्शनगोचरं इति जाबाल्यादिवचनेषु दृशिप्रयोगाच्चाक्षुषज्ञानस्यैवोपसंहारन्यायेन निमित्तत्वम्। अन्यथा दृशौ लक्षणा स्यात्। तेन मेघाच्छादनेऽन्धादीनां, जन्मसप्ताष्टेत्यादिनिषिद्धदर्शनानां च स्नानश्राद्धादौ नाधिकार" इति। कल्पतरुरप्याह। "दर्शनशब्देन चाक्षुषज्ञानं गृह्यते। न ज्ञानमात्रम् अज्ञातस्य निमित्तत्वासम्भवान्निमित्तमहिम्नैव ज्ञानलाभेन दर्शनपदवैयर्थ्यापत्तेः। तेन चाक्षुषधीयोग्यः कालः पुण्यः। योग्यत्वं च प्रयत्नानपनेयचाक्षुषज्ञानप्रतिबन्धकराहित्यं तेन मेघच्छन्ने योग्यताभावान्न स्नानादीति" निर्णयामृतेऽप्येवम्। तदेतत्तुच्छम्। यदि चाक्षुषज्ञानं निमित्तं स्यात्तदा "सूर्यग्रहो यदा रात्रौ दिवा चन्द्रग्रहस्तथा तत्र स्नानं न कुर्वीत दद्याद्दानं न च क्वचिदिति" वाक्यं व्यर्थं स्यात्। चाक्षुषज्ञानाभावेन प्राप्त्यभावात् तत्पूर्वकत्वाच्च निषेधस्य। न चेदं ग्रस्तास्तपरम् रविचन्द्रयोरस्तानन्तरं रात्रिदिवापदत्वादिति वाच्यम् तत्रपदस्य ग्रहपरत्वेऽधिकरणत्वायोगान्निमित्तपरत्वे च तद्ग्रहनिमित्तकस्नानादेरस्तात्प्रागप्यभावापत्तेः। अथ तत्रेति रात्रिदिने उच्येते वैश्वदेवीतिवद्गुणभूते अपि तत्र ताडशमन्त्रलिङ्गाभावात्। तयोर्निमित्तत्वेऽधिकरणत्वे वाऽन्यप्रयुक्तस्नानाद्यभावापत्तेश्च। किञ्च "नैक्षेतोद्यन्तमादित्यं नास्तं यन्तं कदाचन। नोपरक्तं न वारिस्थं न मध्यं नभसोगतमिति" मनुवचनं बाध्येत "दृष्टोऽरिष्टप्रदो राहुरित्यादि" च। न चात्र विहिते दर्शने निषेधाप्रवृत्तिवत्पर्युदसनीयतापि न युक्तेति वाच्यम् दर्शनस्यानुवादेन विधेयत्वाभावात्। एतच्चाग्रे वक्ष्यामः। तत्त्वे वा विरुद्धत्रिकद्वयापत्तेः अस्तु सकृद्दर्शनविधानेन सङ्कोच इति चेत् न "मुक्तिं दृष्ट्वा ततः स्नायादिति" मुक्तिस्नानेऽपि चाक्षुषज्ञानस्य निमित्तत्वापत्तेः अस्तु किं नश्छिन्नमिति चेत् न ग्रस्तास्ते "तयोः परेद्युरुदये दृष्ट्वाभ्यवहरेच्छुचिरिति" दर्शनोत्तरं भोजनविधानादन्धस्य पूर्ववेधकाल इव यावद्दर्शनं भोजननिषेधापत्तिः मध्येऽन्धीभूतस्य सुतरां यावच्चक्षुःप्राप्त्युपवासप्रसङ्गश्च।

अथाऽन्नलोलुपतया तत्र स्नानमात्रं विवक्ष्येत तत् तत्पूर्वमपि निर्लज्जेन स्वीक्रियताम्। एतेन यत्तु कैश्चिदुक्तं स्पर्शस्नाने मुक्तिस्नाने च यस्य दर्शनं विहितं तेनैव कार्यं नान्येन क्त्वाप्रत्ययेन समानकर्त्तृत्वावगतेरिति तन्निरस्तम्। का तर्हि तस्य गतिः उद्देश्यविशेषणत्वाद्ग्रहैकत्ववदविवक्षयार्थतः सिद्धस्नानमात्रानुवादत्वे सर्वं सुस्थम्। अङ्गुल्याद्यनादेश्यग्रहव्यावृत्त्यै वा दर्शनस्यार्थवत्त्वम्। न चोक्तयोग्यतापि साध्वी दर्शनोत्तरं मेघच्छन्ने योग्यताभावापत्त्या दानाद्यभावापत्तेः। तेन तत्तद्देशावच्छेदेन ज्योतिःशास्त्रावेद्यत्वमेव योग्यता। किञ्च “रजसोदर्शने नारी त्रिरात्रमशुचिर्भवेत्” इत्यत्राप्यन्धस्त्रीणामाशौचाभावप्रसङ्गः। यत्तु वर्द्धमानेनोक्तम् “चानोत्तरं ह्यधिकारो न स्नानकाले, स्नानकाले स्नानाभावात्। एवं दर्शनोत्तरं मुक्तिपर्य्यन्तमस्त्येव योग्यतेति” तदपि प्रतिज्ञामात्रम्। किञ्च ग्रस्तास्ते “तयोः परेद्युरुदये स्नात्वाऽभ्यवहरेत्सुचिरित्यादि” वाक्यवैयर्थ्यापत्तिः। चाक्षुषज्ञानान्यथानुपपत्त्यैवार्थादुदये स्नानसिद्धेः नतु मुक्तिस्नाने शास्त्रीयमेव स्नानं निमित्तं न चाक्षुषम् “चन्द्रसूर्यग्रहे नाद्यात् तस्मिन्नहनि पूर्वतः। राहोर्विमुक्तिं विज्ञाय स्नात्वा कुर्वीत भोजनमिति” वृद्धगौतमेन विज्ञायेति ज्ञानमात्रोक्तेः। यत्तु “मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततःपरमिति” तदपि ज्ञानमात्रपरम्। “मेघमालादिदोषेण यदि मुक्तिर्न दृश्यते। आकलय्य तु तं कालं स्नात्वा भुञ्जीत वाग्यतः”। इति गौड़निबन्धे दर्शनात्” नैवम् अज्ञानस्य निमित्तत्वाभावेन निमित्तमहिम्नैव ज्ञानलाभे वाक्यवैयर्थ्यात्। ग्रस्तास्तेऽपि तदापत्तेश्च। किञ्च, दर्शनं पुंसोविशेषणमुपलक्षणं वा, नाद्यः दर्शनावच्छिन्ने काले स्नानतलादेर्बाधात्। दर्शनविच्छेदे कृतमपि स्नानादि न ग्रहणनिमित्तं स्यात्। नान्त्यः, “यावद्दर्शनगोचर”इति यावत्पदवैयर्थ्यप्रसङ्गात् दृष्टग्रहणोत्तरमपि स्नानाद्यापत्तेश्च। ज्ञानपक्षेऽप्येष दोषस्तुल्य इति चेत्। मूर्खोऽसि। यदि ज्ञानवाचकं पदं श्रूयेत ततस्तस्यान्वयो विचार्य्येत। दर्शिस्तु श्रूयत इति वैषम्यात् कथं तर्हि स्नानं लभ्यते। संक्रान्तौ स्नायादिति वदर्थादित्यवेहि। अश्रुतत्वादेवनोद्देश्यविशेषणविवक्षाकृतो वाक्यभेदोऽपि। अस्तु तर्हि दृष्टग्रहणं निमित्तमिति चेत्। ग्रस्तास्तेऽस्तोत्तरं स्नानापत्तेः। विशिष्टोद्देशे वाक्यभेदाच्च तथाप्येतत्तुल्यमिति चेत् ‘यावद्दर्शनगोचर” इति वचनेन तन्निषेधात्। तत्र त्वन्यपक्ष इव ग्रस्तास्तेऽपि स्यात्। किञ्च, दर्शनस्य विधिरनुवादो वा। आद्ये ग्रहणोद्देशेन दर्शनविधिरुत दर्शनविशिष्टस्नानविधिः। नाद्यः, ग्रहोद्देशेन स्नानविधाने दर्शनविधाने च वाक्यभेदात्। एतेन द्वितीयोऽपि परास्तः दर्शनस्य निमित्तत्वेनाविधेयत्वात् स्नानस्याप्राप्तेः। अन्यथा सोमवमनादौ प्रसज्जनविधिः केन वार्य्येत। अथ नानावाक्येषु क्वचिद्दर्शनविशिष्टस्नानविधिः। क्वचिच्च प्राप्तदर्शननिमित्तोक्तस्य स्नानमात्रविधिः। तन्न, स्नानस्य प्रधानस्य प्राप्तौ तदङ्गदर्शनप्राप्तिः, तस्यां च निमित्ते सति स्नानमित्यन्योन्याश्रयात्। एवं दर्शनविधौ सति तन्निमित्तकस्नानविधिः सति च प्रधानस्नानविधौ तदङ्गदर्शनविधिः। एवमधिकारे प्रयोजकत्वे च योज्यम्। क्त्वार्थपूर्वकालत्वविधौ चास्ते च वाक्यभेदः। अन्यथा स्नानोत्तरमपि दर्शनमङ्गं स्यात्। न द्वितीयः। तत्रापि दर्शनग्रहणयोर्निमित्तत्वे स्नानद्वयापत्तेः दर्शनावृत्तौ नैमित्तिकावृत्तिप्रसङ्गात्। दर्शनविशिष्टग्रहस्य विशिष्टस्यानुवादे वाक्यभेदापत्तेः। न च छविरार्त्तिवद्विशिष्टं निमित्तमिति वाच्यं आर्त्तिमात्रस्य हि निमित्तत्वे निमेषाद्यार्त्तेरपि तत्त्वापत्तेर्नैमित्तिकत्वभङ्गाद्युक्तं विशिष्टोद्देश्यत्वम्। इह तु ग्रहणमात्रस्य निमित्तत्वे न काचित् क्षतिः। तस्माद्दर्शनवाक्यानां ग्रस्तास्तविषयत्वात् अनादेश्यग्रहपरत्वाद्वा स्नानस्य चार्थतः प्राप्तेस्तदेव निमित्तम्। तेन मेघाच्छादनेऽप्यादेश्ये स्नानादि भवत्येवेत्यलं वेदबाह्यैः संलापेन”।

“प्रागुक्तमनुवचनेनोपरक्त दिवाकरदर्शननिषेधः साक्षाद्दर्शनपरः। अतएव ब्रह्मसिद्धान्ते “सर्वैः पटस्थितं वीक्ष्यं स्वच्छतैलाम्बुदर्पणैः। ग्रहणं गुर्विणी जातु न पश्येत्तु पटं विना”पटादिस्थतयैव ग्रहणदर्शनमुक्तम्।

अत्र पूर्वापरवेधः हेमाद्रौ दर्शितो यथा “त्रयोदश्यादितो वर्ज्ये दिनानां नवकं ध्रुवम्। माङ्गल्येषु समस्तेषु ग्रहणे चन्द्रसूर्ययोः”। प्रकारान्तरं तत्रैवोक्तम्। “द्वादश्यादितृतीयान्तो वेध इन्दुग्रहे स्मृतः। एकादश्यादिकः सौरे चतुर्थ्यन्तः प्रकीर्त्तितः” इदं च पूर्णग्रासे,“त्र्यहं खण्डग्रहे तयोरिति”तत्रैवोक्तेः. इदञ्च “ग्रस्तास्ते त्रिदिनं पूर्वमिति नारदेन ग्रस्तास्ते विशेषोक्तेर्ग्रस्तास्तभिन्नग्रहणपरम्। ज्योतिर्निबन्धे च्यवनः ग्रहणोत्पातभं त्याज्यं मङ्गलेषु ऋतुत्रयम्। यावच्च रविणा भुक्ता मुक्तं भं दग्धकाष्ठवत्”

चन्द्रार्कग्रहणस्य भूच्छायाचन्द्राभ्यामावरणरूपस्यापि अमावास्यासंक्रान्तिकालवत् तत्र स्नानदानादौ बहुपुण्यसाधनत्वं स्मृत्यादिषु प्रसिद्धम् तत्रादौ कालमाधवीये यथा निर्णीतं तत् प्रदर्श्यते वृद्धगार्ग्यः "पूर्णिमाप्रतिपत्सन्धौ राहुः सम्पूर्णमण्डलम् । ग्रसते चन्द्रमर्कञ्च दर्शप्रतिपदन्तरे" इति तत्र पर्वणोऽन्तिमोभागः स्पर्शकालः प्रतिपद आद्योभागोमोक्षकालः तदुक्तं ब्रह्मसिद्धान्ते "यावत्कालः पर्वणोऽन्ते तावान्प्रतिपदादिमः । रवीन्दुग्रहणानेहाः स पुण्योमिश्रणाद्भवेदिति" ग्रहणानेहाः राहुगृहणकालः तत्र कर्त्तव्यमाह वृद्धवसिष्ठः "गङ्गातोये च संप्राप्ते इन्द्रोःकोटी रवेर्दश । गवाङ्कोटिप्रदानेन सम्यग्दत्तेन यत् फलम् । गङ्गास्नाने तत् फलं स्याद्राहुग्रस्ते निशाकरे । दिवाकरे पुनस्तत्र दशसंख्यमुदाहृतमिति" अस्य श्लोकद्वयस्य प्रथमार्द्धमपेक्षितपदाध्याहारेण योजनीयं इन्द्रोर्ग्रहणे संप्राप्ते सति गङ्गातोये अवगाहनं गोकोटिदानसमं भवति रवेर्ग्रहणे ततो दशगुणं फलम् अयमेवार्थ उपरितनेनार्द्धत्रयेण स्पष्टीकृतः । व्यासोऽपि "इन्दोर्लक्षगुणं पुण्यं रवेर्दशगुणं ततः । गङ्गातोये तु संप्राप्ते इन्दोः कोटीरवेर्दश । गवांकोटिसहस्रस्य यत् फलं लभते नरः । तत् फलं जाह्नवीस्नाने राहुग्रस्ते निशाकरे । दिवाकरे तु स्नानस्य दशसंख्यमुदाहृतम् चन्द्रसूर्यग्रहे चैव योऽवगाहेत जाह्नवीम् । स स्नातः सर्वतीर्थेषु किमर्थमटते महीमिति" गङ्गाव्यतिरिक्तमहानदीतोये लक्षगुणदशलक्षगुणत्वं गङ्गातोये तु कोटिगुणदशकोटिगुणत्वम्। ब्रह्मपुराणेऽपि "तिस्रोनद्यो महापुण्या वेणा गोदा च जाह्नवी। गां हरीशाङ्घ्रिकात् प्राप्ता गङ्गा इति हि कीर्त्तिताः" हरेः पादादीश्वरस्य शिरसश्च गाम्भूमिं प्राप्ता गङ्गा । यद्यपि जाह्नव्येव तादृशी न तु वेणागोदे तथापि छत्रिणो गच्छन्तीति न्यायेन जाह्नव्या सह निर्दिष्टयोस्तयोरपि गङ्गात्वमविरुद्धं यद्वा जाह्नवीजलमेव केनचिन्निमित्तेन ब्रह्मगिरिवायुगिर्योरुद्भूतमिति कृत्वा तयोरपि मुख्यमेव गङ्गात्वन्तासु गङ्गासु स्नानं मुख्यं तदसम्भवे नद्यन्तरेषु स्नायात् तदुक्तं महाभारते "गङ्गास्नानं तु कुर्वीत ग्रहणे चन्द्रसूर्ययोः महानदीषु चान्यासु स्नानं कुर्याद्यथाविधीति" महानद्यो ब्रह्मपुराणे दर्शिताः "गोदावरी भीमरथी तुङ्गभद्रा च वेणिका । तापी पयोष्णी विन्ध्यस्य दक्षिणे तु प्रकीर्त्तिताः । भागीरथी नर्मदा च यमुना च सरस्वती । विशोका च वितस्ता च विन्ध्यस्योत्तरतस्तथेति" महानद्यसम्भवे जलान्तराण्याह शङ्खः "वापीकूपतडागेषु गिरिप्रस्रवणेऽपि च । नद्यां नदे देवखाते सरसीषूद्धृताम्बुनि । उष्णोदकेन वा स्नायात् ग्रहणे चन्द्रसूर्ययोरिति" एतत् सर्वमभिप्रेत्याह व्यासः "सर्वं गङ्गासमन्तोयं सर्वे ब्रह्मसमा द्विजाः। सर्वं भूमिसमं दानं ग्रहणे चन्द्रसूर्ययोरिति" उष्णोदकस्यातुरविषयत्वमाह व्यासः "आदित्यकिरणैः पूतं पुनः पूतं च वह्निना । अतोव्याध्यातुरः स्नायाद्ग्रहणेऽप्युष्णवारिणेति" गङ्गातोयमारभ्योष्णोदकान्तं पूत्तरोत्तरस्यानुकल्पत्वमुक्तम् । एतदेवाभिप्रेत्योष्णोदकादिषु समुद्रजलान्तेषूत्तरोत्तरस्य प्राशस्त्यमाह मार्कण्डेयः "शीतमुष्णोदकात् पुण्यमपारक्यं परोदकात् । भूमिष्ठमुद्धृतात् पुण्यं ततः प्रस्रवणोदकम् । ततोऽपि सारसं पुण्यं ततः पुण्यं नदीजलम् । तीर्थतोयं ततः पुण्यं महानद्यम्बु पावनम् । ततस्ततोऽपि गङ्गाम्बु पुण्यं पुण्यस्ततोऽम्बुधिरिति" मासविशेषेण ग्रहणे नदीविशेषो देवीपुराणेऽभिहितः "कार्त्तिके ग्रहणं श्रेष्ठं गङ्गायमुनसङ्गमे । मार्गे तु ग्रहणं प्रोक्तं देविकायां महामुने । पौषे तु नर्मदा पुण्या माघे सन्निहिता शुभा। फाल्गुने वरुणा पुण्या चैत्रे पुण्या सरस्वती। वैशाखे तु महापुण्या चन्द्रभागा सरिद्वरा। ज्यैष्ठे तु कौशिकी पुण्या आषाढे तापिका नदी । श्रावणे सिन्धुनामा तु तथा भाद्रे तु चन्द्रिका । आश्विने सरयूः श्वेता तथा पुण्या तु नर्मदेति" ग्रहणविशेषे नदीविशेषस्तत्रैवाभिहितः। "गोदावरी महापुण्या चन्द्रे राहुसमन्विते। सूर्ये च राहुणा ग्रस्ते तमोभूते महामुने ! । नर्मदातोयसंस्पर्शे कृतकृत्या भवन्ति हीति" स्नानवत् स्मरणादिष्वपि पुण्यमाह "स्मृत्वा शतक्रतुफलं दृष्ट्वा सर्वाघनाशनम् । स्पृष्ट्वा गोमेधपुण्यं तु पीत्वा सौत्रामणेर्लभेत्। स्नात्वा वाजिमखे पुण्यं प्राप्नुयादविचारतः रविचन्द्रोपरागे च अयने चोत्तरे तथेति" । क्षेत्रविशेषमाह । "गङ्गा कनखलं पुण्यं प्रयागः पुष्करं तथा । कुरुक्षेत्रं महापुण्यं राहुग्रस्ते दिवाकरे" इति ग्रहणे श्राद्धं विहितं लिङ्गपुराणे "व्यतीपातक्षणो यावांश्चन्द्रसूर्यग्रहक्षणः । गजच्छाया तु सा प्रोक्ता पितॄणां दत्तमक्षयम्" इति महाभारतेऽपि "सर्वस्वेनापि कर्त्तव्यं श्राद्धं वै राहुदर्शने । अकुर्वाणस्तु नास्तिक्यात्पङ्के गौरिव सीदतीति" । ऋष्यशृङ्गोऽपि "चन्द्रसूर्यग्रहे यस्तु श्राद्धं विधिवदाचरेत् । तेनैव सकला पृथ्वी दत्ता विप्रस्य वै करे" इति । विष्णुरपि "राहुदर्शनदत्तं हि श्राद्धमाचन्द्रतारकम् । गुणवत् सर्वकामीयं पितॄणा

मुपतिष्ठते" इति ग्रहणे रात्रावपि स्नानादेर्न निषेधः। तथा च शातातपः "स्नानं दानं तपः श्राद्धमनन्तं राहुदर्शने। आसुरी रात्रिरन्यत्र तस्मात्तां परिवर्ज्जयेदिति" देवलः "यथा स्नानं च दानं च सूर्य्यस्य ग्रहणे दिवा। सोमस्यापि तथा रात्रौ स्नानं दानं विधीयते" श्राद्धं प्रकृत्य कूर्म्मपुराणे "नैमित्तिकं तु कर्त्तव्यं ग्रहणे चन्द्रसूर्य्ययोः। बान्धवानां तु मरणे नारकी स्यादतोऽन्यथा। काम्यानि चैव श्राद्धानि शस्यन्ते ग्रहणादिषु" इति वारविशेषे योगफलातिशयमाह व्यासः "रविग्रहः सूर्य्यवारे सोमे सोमग्रहस्तथा। चूड़ामणिरिति ख्यातस्तत्र दत्तमनन्तकम्। वारेष्वन्येषु यत् पुण्यं ग्रहणे चन्द्रसूर्य्ययोः। तत्पुण्यं कोटिगुणितं ग्रासे चूड़ामणौ स्मृतमिति" अतिथिप्राप्त्यादिवद्ग्रहणस्यापि श्राद्धकालत्वमाह मार्कण्डेयः "विशिष्टे ब्राह्मणे प्राप्ते सूर्य्येन्दुग्रहणे दिने। जन्मर्क्षग्रहपीडासु श्राद्धं कुर्य्यात् तथेच्छयेति"। अत्र च श्राद्धं नान्नेन किन्तु हेमादिना तदाह बौधायनः "अन्नाभावे द्विजाभावे प्रवासे पुत्रजन्मनि। हेमश्राद्धं संग्रहे च कुर्य्याच्छूद्रः सदैव हीति" शातातपोऽपि "आपद्यनग्नौ तीर्थे च चन्द्रसूर्य्यग्रहे तथा। आमश्राद्धं प्रकुर्व्वीत हेमश्राद्धमथापि वेति" अशौचिनोऽपि ग्रहणे स्नानादि न निषिद्धं तथा च वृद्धवशिष्ठः "सूतके मृतके चैव न दोषो राहुदर्शने। तावदेव भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यते" इति इयञ्च शुद्धिः सर्व्वस्मार्त्तकर्मविषया अविशेषोक्तेः एतदेवाभिप्रेत्य व्याघ्रपादाह "स्मार्त्तकर्म्मपरित्यागो राहोरन्यत्र सूतके। श्रौते कर्म्मणि तत्कालस्नातः शुद्धिमवाप्नुयादिति" यत्तु ग्रहणनिमित्तमाशौचं तत्स्नानेन निवर्त्त्यं तदुक्तं ब्रह्मपुराणे "आशौचं जायते नॄणां ग्रहणे चन्द्रसूर्य्ययोः। राहुस्पर्शे तयोः स्नात्वा दानादौ कल्पते नरः" इति षट्त्रिंशन्मतेऽपि "सर्व्वेषामेव वर्णानां सूतकं राहुदर्शने। स्नात्वा कर्म्माणि कुर्वीत शृतमन्नं विवर्ज्जयेदिति" ग्रहणस्य आद्यन्तयोः स्नानं विहितं स्मृत्यन्तरे "गृह्यमाणे भवेत् स्नानं ग्रस्ते होमो विधीयते। मुच्यमाने भवेद्दानं मुक्ते स्नानं विधीयते" होमदानवद्देवार्चनमपि स्नानद्वयमध्ये कार्य्यं तदुक्तं ब्रह्मवैवर्त्ते "स्नानं स्यादुपरागादौ मध्ये होमः सुरार्चनमिति" तत्काले स्वापादिकं न कुर्य्यात् तदुक्तं शिवरहस्ये "सूर्य्येन्दुग्रहणं यावत् तावत् कुर्य्याज्जपादिकम्। न स्वपेन्न च भुञ्जीत स्नात्वा भुञ्जीत मुक्तयोरिति" मोक्षानन्तरभावि यत् स्नानं तस्य शुद्ध्यर्थतया तत् सचेलं विधेयं तदाह वृद्धवशिष्ठः "सर्व्वेषामेव वर्णानां सूतकं राहुदर्शने। सचेलं तु भवेत् स्नानं सूतकान्नञ्च वर्ज्जयेदिति" ग्रहणकाले ततः पूर्व्वं वा यावत् पक्वं तत्सूतकान्नं तत्तु पश्चादपि न भुञ्जीत"। अत्र विशेषोऽभक्ष्यशब्दे २८० पृ० उक्तस्तत्रावसेयः "आदिमध्यावसानेषु यद्यद्विहितं तस्य फलातिशय उक्तो ब्रह्मपुराणे "उपमर्द्दे लक्षगुणं ग्रहणे चन्द्रसूर्य्ययोः। पुण्यं कोटिगुणं मध्ये मुक्तिकाले त्वनन्तकमिति" अत्र ग्रहणे यद्दानं तत् सत्पात्रे कर्त्तव्यं तदुक्तं महाभारते। "अयने विषुवे चैव ग्रहणे चन्द्रसूर्य्ययोः। पात्रभूताय विप्राय भूमिं दद्यात् सदक्षिणामिति" पात्रलक्षणमाह याज्ञवल्क्यः। "न विद्यया केवलया तपसा वापि पात्रता। यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्त्तितमिति" पात्रे मुख्यानुकल्पावाह बौधायनः "श्रोत्रियोऽश्रोत्रियो वापि पात्रं वाऽपात्रमेव वा। विप्रब्रुवोऽपि वा विप्रो ग्रहणे दानमर्हतीति"। अह्नि सूर्य्यग्रहणं निशि चन्द्रग्रहणमिति हि प्रसिद्धिः सर्व्वजनीना, तादृशे ग्रहणे यत्कर्त्तव्यं तदुक्तं यत्तु कालविपर्य्यासेन चाक्षुषमानं ज्योतिःशास्त्रमात्रप्रसिद्धं ग्रहणं तत्र स्नानादिकं न कर्त्तव्यं तदुक्तं निगमे "सूर्य्यग्रहो यदा रात्रौ दिवा चन्द्रग्रहस्तथा। तत्र स्नानं न कुर्वीत दद्याद्दानं न च क्वचिदिति" ग्रस्तास्तमये जावालिराह "संक्रान्तौ पुण्यकालस्तु षोड़शोभयतः कलाः। चन्द्रसूर्य्योपरागे तु तु यावद्दर्शनगोचर" इति ग्रस्तस्यास्तमनपर्य्यन्तं दर्शनगोचरत्वात् तावत् पुण्यकालो भवति ग्रहणे भोजनव्यवस्थामाह मनुः। चन्द्रसूर्य्यग्रहे नाद्यादद्यात् स्नात्वा विमुक्तयोः। अमुक्तयोरस्तगयोर्दृष्ट्वा स्नात्वा परेऽहनीति" ग्रहे ग्रहणकाले स्पर्शमारभ्य मोक्षपर्य्यन्तो ग्रहणकालः तस्मिन् काले न भुञ्जीत किन्तु राहुणा चन्द्रसूर्य्ययोर्मुक्तयोः सतोः पश्चात् स्नात्वा भुञ्जीत यदा तु ग्रस्तास्तमयस्तदा परेद्युस्तौ विमुक्तौ दृष्ट्वा स्नात्वा भुञ्जीत। न केवलं ग्रहणकाल एव भोजनाभावः किन्तु ग्रहणात्प्रागपि तदाह व्यासः "नाद्यात् सूर्य्यग्रहात् पूर्व्वमह्नि सायं शशिग्रहात्। ग्रहकाले च नाश्नीयात् स्नात्वाश्नीयाद्विमुक्तयोः। मुक्ते शशिनि भुञ्जीत यदि न स्यान्महानिशा। अमुक्तयोरस्तगयोरद्यात् दृष्ट्वा परेऽहनीति"। पूर्व्वकाले भोजननिषेधे विशेषः अभक्ष्यशब्दे २८० पृ० उक्तस्तत्रावसेयः। "समर्थस्य भोजने प्रायश्चित्तमुक्तं कात्यायनेन" चन्द्रसूर्य्य-

ह्रे भुक्त्वा प्राजापत्येन शुध्यति"। ग्रस्तास्तसमये विशेषमाह भृगुः "ग्रस्तावेवास्तमानं तु रवीन्दू प्राप्नुतोयदि। परेद्युरुदये दृष्ट्वा स्नात्वाभ्यवहरेन्नरः" इति वृद्धगार्ग्योऽपि "सन्ध्याकाले यदा राहुर्ग्रसते शशिभास्करौ। तदहर्नैव भुञ्जीत रात्रावपि कदाचनेति"। विष्णुधर्मोत्तरेऽपि "अहोरात्रं न भोक्तव्यं चन्द्रसूर्यग्रहो यदा। मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततः परमिति" ननु मेघाद्यन्तर्धाने चाक्षुषदर्शनं न सम्भवतीति न दर्शनशब्देन शास्त्रीयज्ञानस्य विवक्षितत्वात् तदाह वृद्ध गौतमः "चन्द्रसूर्य्यग्रहे नाद्यात्तस्मिन्नहनि पूर्वतः। तयोर्विमुक्तिं विज्ञाय स्नात्वा कुर्वीत भोजनमिति" एवं तर्हि परेद्युरुदयात् प्रागपि शास्त्रीयविज्ञानसम्भवात्तदैव भोजनं प्रसज्येतेति चेन्न "परेद्युरुदये दृष्ट्वा स्नात्वाभ्यवहरेन्नरः" "अहोरात्रं न भोक्तव्यमिति" वचनद्वयेन तदप्रसक्तेः यत्तु "स्कन्दपुराणे "यदा चन्द्रग्रहस्तात निशीथात्परतो भवेत्। भोक्तव्यं तत्र पूर्वाह्णे नापराह्णे कथञ्चन। पूर्वं निशीथाद्ग्रहणं यदा चन्द्रस्य वै भवेत्। तदा दिवि न कर्त्तव्यं भोजनं शिखिवाहनेति" तदिदं यामत्रयाभिप्रायं "चन्द्रग्रहे तु यामांस्त्रीनिति" विशेषस्य वृद्धगौतमेनाभिधानात्। पापक्षयकामोग्रहणदिने उपवसेत् तदाह दक्षः "अयने विषुवे चैव ग्रहणे चन्द्रसूर्य्ययोः। अहोरात्रोषितः स्नात्वा सर्व्वपापैः प्रमुच्यत" इति पुत्री तु नोपवसेत् तदाह नारदः "संक्रान्त्यामुपवासञ्च कृष्णैकादशिकादिने। चन्द्रसूर्य्यग्रहे चैव न कुर्यात् पुत्रवान् गृहीति" ग्रस्तास्तमये तु पुत्रिणोऽप्युपवास एव "अहोरात्रं न भोक्तव्यमिति, भोजनप्रतिषेधात्"। कालमा०।

ग्रहणश्राद्धे विशेषः नि०सि० "सैंहिकेयो यदा सूर्यं ग्रसते पर्वसन्धिषु। गजच्छाया तु सा प्रोक्ता तस्यां श्राद्धं प्रकल्पयेत्। घृतेन भोजयेद्विप्रान् घृतं भूमौ समुत्सृजेत्" इति वायुपु० विज्ञानेश्वरोप्याह "ग्रहणश्राद्धे भोक्तुर्दोषो दातुस्त्वभ्युदय इति। "सूतके मृतके भुक्ते गृहीते शशिभास्करे। छायायां हस्तिनश्चैव न भूयः पुरुषो भवेत्" इत्यापस्तम्बेन भोजननिषेधात् अयं च निषेधः श्राद्धभोक्तुः। अत्र ग्रहणनिमित्तकश्राद्धे मेवामासंक्रान्त्यादिनिमित्तकानां सिद्धिः"। प्रागुक्तवचनैरशौचाभ्यन्तरेऽपि स्नानादिकर्म्मविधानात् "स्नानमात्रं प्रकुर्वीत दानश्राद्धविवर्जितमिति" निर्मूलं वदन्तो गौडाः परास्ताः नि०सि०। अशौचिनां ग्रहणकाले शुद्धिरविशेषान्मन्त्रदीक्षापुरश्चरणादिसर्व्वस्मार्त्तकर्मविषया मदनरत्नेऽप्येवम्। रजस्वलायास्तु भार्गवार्चनदीपिकायाम् भेदः। "न सूतकादिदोषोऽस्ति ग्रहे होमजपादिषु। ग्रस्ते स्नायादुदक्यापि तीर्थादुद्धृतवारिणेति" अत्र "स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला। पात्रान्तरिततोयेन स्नानं कृत्वा व्रतं चरेत्"। इत्यादि मिताक्षरोक्तो विधिर्ज्ञेयः" नि०सि०।

ग्रहणदिने वार्षिकं श्राद्धं हेमादिना कार्य्यम् यथाह प्रयोगपारिजाते गोभिलः। "दर्शे रविग्रहे पित्रोः प्रत्याब्दिकमुपस्थितम्। अन्नेनासम्भवे हेम्ना कुर्यादामेन वा सुतः" इति। अत्र दर्शरविपितृसुतशब्दाः प्रदर्शनार्थाः न्यायसाम्यात्। तेन चन्द्रग्रहेऽपि सपिण्डादि वार्षिकमन्नादिना तद्दिन एव कार्य्यमिति" मदनपारिजाते व्याख्यातम्। पृथ्वीचन्द्रोदयेऽप्येवं तेन यानि "आमश्राद्धं तु कुर्वीत माससंवत्सरादृत" इति। "अन्ने नैवाब्दिकं कुर्याद्धेम्ना वाऽऽमेन न क्वचिदिति" मरीचिलौगाक्ष्यादिवचनानि तानि ग्रहणदिनातिरिक्तविषयाणि निर्णयामृतेऽप्येवम्। यानि तु "ग्रहणात्तु द्वितीयेऽह्नि रजोदोषात्तु पञ्चमे"। तथा "ग्रस्तावेवास्तमानन्तु रवीन्दू प्राप्नुतोयदि। प्रत्यब्दं तु तदा कार्य्यं परेऽहन्येव सर्व्वदा"। "चन्द्रसूर्य्योपरागे च तथा श्राद्धं परेऽहनि" इत्यादीनि वचनानि तानि महानिबन्धेषु क्वाप्यनुपलम्भान्निर्मूलानि। प्रत्युत पूर्वोक्तवचनेऽप्येतत्तद्दिन एव श्राद्धमुक्तमित्यलम्" नि० सि०।

"ग्रहणादिसप्तदिनपर्य्यन्तमागमे दीक्षोक्ता शिवार्चनचन्द्रिकायां ज्ञानार्णवे। "मन्त्राद्यारम्भणं कुर्याद्ग्रहणे चन्द्रसूर्य्ययोः। ग्रहणाद्दापि देवेशि कालः सप्तदिनावधीति"। रत्नसागरे "सत्तीर्थेऽर्कविधुग्रासे तन्तुदामनपर्व्वणि। मन्त्रदीक्षां प्रकुर्वाणोमासर्क्षादीन्न शोधयेत्"। अत्र सूर्य्यग्रहणमेव मुख्यम्। "सूर्य्यग्रहणकाले तु नान्यदन्वेषितम्भवेत्। सूर्य्यग्रहणकालेन समो नान्यः कदाचन। न मासतिथिवारादिशोधनं सूर्य्यपर्व्वणीति" तत्रैव कालोत्तरवचनात्। "चन्द्रग्रहे तु या दीक्षा या दीक्षा व्रतचारिणाम्। वनस्थस्य च या दीक्षा दारिद्र्यं सप्तजन्मसु" इति तत्रैव योगिनीतन्त्रे निषेधाच्च" नि०सि०

"पुरश्चरणचन्द्रिकायाम्। "चन्द्रसूर्य्योपरागे च स्नात्वा प्रयतमानसः। स्पर्शादिमोक्षपर्य्यन्तं जपेन्मन्त्रं समाहितः। जपाद्दशांशतो होमस्तथा होमात्तु तर्पणम्। तर्पणस्य दशांशेन मार्ज्जनं कथितं किल। मार्ज्जनस्य दशांशेन ब्राह्मणानपि भोजयेत्। जपार्चापूर्व्वकोहोमस्तर्पणञ्चाभिषेचनम्। भूदेवपूजनं पञ्चप्रकारोक्ता पुरस्क्रिया। होमाशक्तौ जपं कुर्याद्धोमसंख्याचतुर्गुणम्"। ४ विशेषणतया सम्बन्धमात्रे च।

४निन्दायाम् हेम० ५राहुग्रहे ६व्यसने ७दुष्टनीतौ च मेदि० उपरज्यते मिथ्याऽसम्बन्धेन सम्बध्यते ऽनेन करणे घञ्। आध्यासिकसम्बन्धेन सम्बद्धे ८विशेषणभेदे। यथा घटत्वोपरागेण पटभानम्। घटत्वं हि पटस्य आध्यासिकसम्बन्धेन सम्बद्धं विशेषणम्।

उपराज अव्य० सामीप्येऽव्ययी० अच् समा०। १राज्ञः सामीप्ये उपगतो राजानं सादृश्येन अत्या०स०टच् समा०। २राजतुल्ये त्रि० स्त्रियां ङीप्। ततः काश्या० भवार्थे ठञ् (औपराजिकः तद्भवे त्रि० स्त्रियां ङीप्। तदर्थे ञिठोऽपि रूपमेकं स्त्रियां तु टाप् इति भेदः

उपराधय त्रि० उप+राध-णिच्–बा० श। उपसेवके। ततः ब्राह्मणा० भावे कर्म्मणि च ष्यञ्। औपराधय्य तद्भावे तत्कर्म्मणि च न०।

उपराम पु० उप+रम-घञ् वा वृद्धिः। १उपरतौ २मृत्यौ ३निवृत्तौ ४संन्यासे च। अव्ययी०। ५रामसामीप्ये अव्य०

उपराव पु० उप+रु-घञ्। समीपोच्चारितशब्दे

उपरि अव्य० ऊर्द्ध+रिल् उपादेशश्च। प्रथमापञ्चमीसप्तम्यन्तार्थवृत्तेः ऊर्द्धशब्दस्यार्थे। ऊर्द्धं पुरम् ऊर्द्धा वा वसतिः ऊर्द्धात् पुरात् ऊर्द्धायावा वसतेरागतः ऊर्द्धे पुरे ऊर्द्धायां वा वसतौ वसति इत्याद्यर्थे सर्व्वत्र उपरीत्येव। "तदुपर्य्यपि बादरायणः" शा०सू०। "नीचावाः स्युरुपरि बुध्न एषामस्मे" ऋ० १,२४,७, "अधः स्विदासीदुपरि स्विदासीत्। १०,१२६,५, "तत्पाणिमात्रोपरिपातुकन्तं" नैष०। "त्वय्यासन्ने नयनमुपरिस्पन्दि शङ्के मृगाक्ष्याः" मेघ०। "अवाङ्मुखस्योपरि पुष्पवृष्टिः" "परस्परस्योपरि पर्य्यचीयत" रघुः। "छित्त्वा मांसानि शस्त्रेण यदित्वोपरिजोभवेत्" सुश्रु०। "उपरिजतरुजानि याचमानाम्" किरा०। "मिथ्या तत्सत्यादुपरिप्रुता भङ्गेन" यजु० ७,२, अस्य सामीप्ये द्वित्वं उपर्य्युपरि समीपोर्द्धे अव्य०"उपर्य्युपर्य्यम्बुमुचां वितानैः" माघः। "अभिसर्व्वतसोःकार्य्या धिगुपर्य्यादिषु त्रिषु। द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते" इत्युक्तेः तद्योगे सम्बन्धिनि द्वितीया। "उपर्य्युपरि लोकं हरिः" सि०कौ०। उपर्य्युपरि गच्छन्तः शैलराजमुदङ्मुखाः" भा० आ० ४२४ अ०। बाहुलकात् क्वचिन्न। "उपर्य्युपरि बुद्धीनां चरन्तीश्वरबुद्धयः"।

उपरिचर त्रि० उपरि+चर-ट। १ऊर्द्धचरे विहगादौ। २राजभेदे पु०। स च वसुनामा चेदिदेशपतिः शक्रध्वजपूजाप्रवर्त्तकः। तस्येतिवृत्तं च भा० आ० ६३ अ०। "राजोपरिचरोनाम धर्म्मनित्योमहीपतिः" इत्युपक्रम्य तुष्टेन शक्रेण तस्मै आकाशगं विमानं दत्तं तत्र चरणादुपरिचरनामेत्युक्तं यथा "देवोपभोग्यं दिव्यञ्च आकाशे स्फाटिकं महत्। आकाशगं त्वां मद्दत्तं विमानमुपपत्स्यते। त्वमेकः सर्व्वमर्त्त्येषु विमानवरमास्थितः। चरिष्यस्युपरिष्ठो हि देवो विग्रहवानिव। ददामि ते वैजयन्तीं मालामम्लानपङ्कजाम्। धारयिष्यति संग्रामे या त्वां शस्त्रैरविक्षतम्। लक्षणं चैतदेवेह भविता ते नराधिप। इन्द्रमालेति विख्यातं धन्यमप्रतिमं महत्। वैशम्पायन उवाच। यष्टिञ्च वैणवीं तस्मै ददौ वृत्रनिसूदनः। इष्टप्रदानमुद्दिश्य शिष्टानां प्रतिपालनीम्। तस्याः शक्रस्य पूजार्थं भूमौ भूमिपतिस्तदा। प्रवेशं कारयामास गते संवत्सरे तदा। ततः प्रभृति चाद्यापि यष्टेः क्षितिपसत्तमैः। प्रवेशः क्रियते राजन्! यथा तेन प्रवर्त्तितः। अपरेद्युस्ततस्तस्याः क्रियतेऽत्युच्छ्रयो नृपैः। अलङ्कृतायाः पिटकैर्गन्धैर्म्माल्यैश्च भूषणैः। माल्यदामपरिक्षिप्ता विधिवत् क्रियतेऽपि च। भगवान् पूज्यते चात्र हंसरूपेण शङ्करः। स्वयमेव गृहीतेन वसोः प्रीत्या महात्मनः। स तां पूजां महेन्द्रस्तु दृष्ट्वा देवः कृतां शुभाम्। वसुना राजमुख्येन प्रीतिमानब्रवीत् प्रभुः। ये पूजयिष्यन्ति नरा राजानश्च महं मम। कारयिष्यन्ति च मुदा यथा चेदिपतिर्नृपः। तेषां श्रीर्विजयश्चैव सराष्ट्राणां भविष्यति। तेषां स्फीतो जनपदो मुदितश्च भविष्यति। एवं महात्मना तेन महेन्द्रेण नराधिपः। वसुः प्रीत्या मघवता महाराजोऽभिसत्कृतः। उत्सवं कारयिष्यन्ति सदा शक्रस्य ये नराः। भूमिरत्नादिभिर्द्दानैस्तथा पूज्या भवन्ति ते। वरदानमहायज्ञैस्तथा शक्रोत्सवेन च। संपूजितो मघवता वसुश्चेदीश्वरो नृपः। पालयामास धर्म्मेण चेदिस्थः पृथिवीमिमाम्। इन्द्रप्रीत्या चेदिपतिश्चकारेन्द्रमहं वसुः। पुत्राश्चास्य महावीर्य्याः पञ्चासन्नमितौजसः। नानाराज्येषु तान् पुत्रान् स सम्राडभ्यषेचयत्। महारथो मागधानां विश्रुतो यो वृहद्रथः। प्रत्यग्रहः कुशाम्बश्च यमाहुर्म्मणिवाहनम्। मावेल्लश्च यदुश्चैव राजन्यश्चापराजितः। एते तस्य सुता राजन् राजर्षेर्भूरितेजसः। न्यवेशयन्नामभिः स्वैस्ते देशांश्च पुराणि च। वासवाः पञ्च राजानः पृथग्वंशाश्च शाश्वताः। वसन्तमिन्द्रप्रासादे आकाशे स्फाटिके च तम्। उपतस्थु-

महात्मानं गन्धर्वाप्सरसोत्तमम्। राजोपरिचरेत्येवं नाम तस्याथ विश्रुतम्। पुरोपवाहिनीं तस्य नदीं शुक्तिमतीं गिरिः। अरौत्सीच्चेतनायुक्तः कामात् कोलाहलः किल। गिरिं कोलाहलं तन्तु पदा वसुरताडयत्। निश्चक्राम ततस्तेन प्रहारविवरेण सा। तस्यां नद्यामजनयन्मिथुनं पर्वतः स्वयम्। तस्माद्विमोक्षणात् प्रीता नदी राज्ञे न्यवेदयत्। यः पुमानभवत्तत्र तं स राजर्षिसत्तमः। वसुर्वसुप्रदश्चक्रे सेनापतिमरिन्दमः। चकार पत्नीं कन्यान्तु तथा तां गिरिकां नृपः"। [ऊर्द्धभवे।

उपरितन त्रि० उपरि भवः ट्युल् तुट् च स्त्रियां ङीप्।

उपरिमर्त्य अव्य० वेदे बा० अव्ययी०। मर्त्यस्योपरीत्यर्थे "अवोदेवमुपरिमर्त्यं कृधि" ऋ० ८,१९,१२, "उपरिमर्त्य मर्त्यानामुपरि" इति भा०। लोके तु वा द्वैत०। मर्त्योपरीत्येव। अतएव "तदुपर्य्यपि बादरायणः" शा० सू०। "आत्मोपरिपातुकन्तु" नै० कृत्वादौ वा षष्ठीसमासप्रयोगः।

उपरिमेखल पु० उपरि ऊर्द्धा मेखला यस्य। गोत्रप्रवर्त्तके ऋषिभेदे ततः गोत्रार्थे इञ् औपरिमेखलि तद्गोत्रे पुंस्त्री बहुषु तु अस्त्रियाम् यस्कादि० तस्य लुक्। उपरिमेखलाः

उपरिष्टाद्बृहती स्त्री वैदिके बृहतीच्छन्दोभेदे "चतुर्थं बृहती तृतीयो द्वादशकः। आद्यश्चेत् पुरस्ताद्बृहती द्वितीयश्चेन्न्यङ्कुसारिणी उपरिबृहती स्कन्धग्रीवा वा अन्त्यश्चेदुपरिष्टाद्बृहती" सर्वानुक्रमणिका० ५अ०। एवमुपरिष्टाद्बृहतीत्यपि वैदिके बृहतीच्छन्दोभेदे।

उपरिष्टात् अव्य० ऊर्द्ध+नि० रिष्टातिल् उपादेशश्च। उपरिशब्दस्यार्थे "उपरिष्टादाज्यस्याभिघारयति" शत० ब्रा० १, ६,१,२१, "पुरुष उपरिष्टात् पशूनतितिष्ठति" १२,२,६,४, "तस्योपरिष्टाद्बृहस्य बलाका संन्यलीयत" भा० व० २०५अ० "छिन्नस्योपरिष्टादुभयतः कूर्चः" सुश्रु०।

उपरिसद् पु० उपरि सीदति सद–क्विप्। राजसूययज्ञे सोमनेत्रके दुवस्वन्नामके १देवभेदे। "सोमनेत्रेभ्यो देवेभ्य उपरिसद्भ्यो दुवस्वद्भ्यः स्वाहा" "ये देवा सोमनेत्रा उपरिसदो दुवस्वन्तस्तेभ्यः स्वाहा" यजु० ९,३५,३६। २ऊर्द्धस्थे त्रि०

उपरिसद्य न० उपरि सद्यं सदनमुपवेशनम् सद–भावे बा० यत्। ऊर्द्धोपवेशने अन्तरिक्षोपवेशने "उपरिसद्यं वा एष जयति योऽजयन्तरिक्षसद्यम्" शत० ब्रा० २,१, २२, उपरिसद्यम् अन्तरिक्षसद्यमाकाशे उपवेशनम्" भा०।

उपरीतक पु० "एकपादमूरौ कृत्वा द्वितीयं स्कन्धसंस्थितम्। नारीं कामयते कामी बन्धः स्यादुपरीतकः" रतिम० उक्ते शृङ्गारबन्धभेदे

उपरुद्ध त्रि० उप+रुध+क्त। १निरुद्धे २आवृते च "अलघुविलम्बिपयोधरोपरुद्धाः" माघः "उपरुद्धाः निरुद्धा आवृताश्च" मल्लि० ३प्रतिरुद्धे च। "वृत्तं हि राज्ञामुपरुद्धवृत्तम्" रघुः ४मूत्रादिवेगयुक्ते च।

उपरूपक न० उपगतं रूपकं दृश्यकाव्यम् सादृश्येन अत्या० स०। नाटकभेदे तद्भेदाश्च अष्टादश यथाह सा० द० "नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम्। प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा। संलापकं श्रीगदितं शिल्पकञ्च विलासिका। दुर्मल्लिका प्रकरणी हल्लीशो भाणिकेति च" अष्टादश प्राहुरुपरूपकाणि मनीषिणः। विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतम्" तल्लक्षणानि तत्तच्छब्दे वक्ष्यन्ते

उपरोध पु० उप+रुध–घञ्। १आवरणे "शरत्प्रमृष्टाम्बुधरोपरोधम्" रघुः। २प्रतिबन्धे च "अन्येषामपि भैक्षोपजीविनां करोष्युपरोधं करोषि" भा० आ० ३अ०। "तपोधननिवासिनामुपरोधो मा भूत्" शकु० ३अनुरोधे च। भावे ल्युट् उपरोधनमप्युक्तार्थेषु न०।

उपरोधक न० उप+रुध–ण्वुल्। १वासगृहे शब्दरत्ना०। २उपरोधकर्त्तरि ३आवरके ४प्रतिबन्धके ५अनुरोधकर्त्तरि च त्रि० स्त्रियां टाप् अत इत्त्वम्।

उपल पु० उप+ला–आदाने क उपलीयते गिरिरस्मिन् वा ङी वा० ड, पल–गतौ अच् पलः अः शिवस्य पलः बोधक इत्यपरे। १पाषाणे "रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णाम्" मेघ० "परिगृह्य शतघ्नीश्च सचक्राः सगुडोपलाः" भा० व० २८३अ० २बालुकायाम् "भिषगुपलप्रक्षिणो नमा" ऋ० ९,११२,३। "उपलेषु बालुकासु प्रक्षिणन्ति" भा० ३रत्नमात्रे मेदि० "वलयार्पितासितमहोपलप्रभाः" "शुकाङ्कनीलोपलनिर्म्मितानाम्" "नीलोपलस्यूतविचित्रधातुः" माघः "मध्यमोपलनिभे लसदंशौ" किरा०। ४शर्करायां स्त्री। उपराति वारि रा–दाने क वा रस्य लः। ५मेघे निरु०। लत्वाभावे उपरोऽपि मेघे

उपलक्षक त्रि० उप+लक्ष–ण्वुल्। १उन्नायके "मेधावी वाक्पटुः प्राज्ञः परचित्तोपलक्षकः। धीरो यथोक्तवादी च एष दूतो विधीयते" नीतिः उपादानलक्षणया स्वस्वेतरबोधके २शब्दे च यथा काकेभ्योरक्ष्यतामन्नमित्यादौ काकशब्दः उपघातकत्वेन काकतदितरबोधकत्वात् उपलक्षकः।

उपलक्षण न० उपलक्ष्यते स्वं स्वेतरञ्चानेन उप+लक्ष–करणे

ल्युट्। स्वस्य स्वान्यस्य च अजहत्स्वार्थया लक्षणया बोधके शब्दे यथा काकेभ्योदधि रक्ष्यतामित्यत्र काकपदं स्वस्य स्वान्यस्य चादेश बोधकम्। तल्लक्षणञ्च स्वप्रतिपादकत्वे सति स्वेतरप्रतिपादकत्वम्। भवति चोक्तोदाहरणे उपघातकत्वेन काकाकाकोभयवृत्तित्वं काकशब्दस्येति तथात्वम् ततश्च शक्यतावच्छेदकधर्मपरित्यागेन इतरधर्मरूपेण स्वस्वेतरबोधकं हि पदमुपलक्षणं भवति "मन्त्रपदग्रहणं ब्राह्मणस्याप्युपलक्षणम्" सि०कौ०। उप+लक्ष-भावे ल्युट्। २ताडशज्ञाने। "कृष्णपदग्रहणं नियोगोपलक्षणार्थम्" सि०कौ०। स्तृणभेदे राजनि०।

उपलधिप्रिय पु० बालधिः प्रियोऽस्य इषो०। चमरनामे-

उपलब्ध त्रि० उप+लभ-क्त। १प्राप्ते, २ज्ञाते च। "आख्यायिकोपलब्धार्था" अमरः। क्तवतु। उपलब्धवत् प्राप्तरि ज्ञातरि च स्त्रियां ङीप् "उपलब्धवती दिवच्युतम्" रघुः।

उपलब्धि स्त्री उप+लभ-क्तिन्। १प्राप्तौ "इयाहि मे स्यात् स्वपदोपलब्धिः" रघुः। २प्रत्यक्षादिज्ञाने च। "नाभाव उपलब्धेः" शा०सू०। योग्यानुपलब्धिः "अनपायिपदोपलब्धये" रघुः।

उपलब्धृ त्रि०उप+लभ-तृच् स्त्रियां ङीप्। १प्राप्तरि २ज्ञातरि ज्ञानाश्रये २आत्मनि पु०। [शाखभेदे इति राजनि०।

उपलभेदिन् पु० उपलं भिनत्ति भिद-णिनि ६त०। पा-

उपलभ्य त्रि०उप+लभ-कर्मणि यत्। १प्राप्ये "आरम्भसिद्धौ समयोपलभ्यम्" रघुः। २ज्ञेये च प्रशंसायां नुम् उपलम्भ्यः

उपलम्भ पु० उप+लभ-घञ् नुम् च। १लाभे, २ज्ञाने च। "कर्त्तृता तदुपलम्भतोऽभवत्" माघः। "ज्ञातौ सुतस्पर्शसुखोपलम्भात्" रघुः।

उपलिङ्ग न० उपमितं लिङ्गेन अत्या०स०। लोकनिष्ठसाधनभावेन लिङ्गेनानुमापकेन सदृशे अलौकिकसाधनभावके अरिष्टसूचके भूकम्पादौ उपद्रवे।

उपलेप पु०उप+लिप-घञ्। १गोमयादिना आलेपने "गात्रेषु सर्वेन्द्रियाणामुपलेपोऽवसादनमिति" सुश्रुतोक्ते २सर्वेन्द्रियावसादने च। "कासोपलेपस्वरभेदनिद्रातन्द्रास्यदौर्गन्ध्यविषोपसर्गाः" सादोपलेपबलकृत् सुश्रु०। भावे ल्युट् उपलेपन गोमयादिना आलेपने न० "मण्डलालेपनादिकं कर्म समाचारयति" पञ्चत०।

उपवक्तृ पु० उपवक्ति उपदिशति उपपश्यति वा उप+वच तृच्। यज्ञे कृताकृतावेक्षके ऋत्विग्भेदे १ब्रह्मणि २सदस्ये च "वेषि ह्यध्वरीयतामुपवक्ता जनानाम्" ऋ०४,९,५,

"उपवक्ताऽध्वर्युप्रभृतीनां सर्वेषां कर्मणामनुज्ञार्थं मित्यं प्रणयेत्यादिरूपस्य वाक्यस्य वक्ता सन् ब्रह्मासि, सर्वेषां कर्मणामवेक्षणार्थमुपद्रष्टा सदस्यो वासि" भा०

उपवङ्ग पु०उपगतोवङ्गम् अत्या०स०। वङ्गदेशसमीपस्थे देशभेदे देशशब्दे विवृतिः। [इक्षौ राजनि०

उपवट पु०उपमितो वटेन अत्या०स०। वटवृक्षसदृशे प्रियालवृक्षे

उपवन न०उपमितं वनेन अत्या०स०। वनतुल्ये कृत्रिमे आरोपितवृक्षसमूहे १उद्याने। "पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नैः" मेघ० "साकेतमाक्रोपवना इवन्ति" रघुः आरामशब्दे पृ० ८०१ विवृतिः वनस्य सामीप्यम् वने वा अव्ययी०। २वनसामीप्ये ३वने इत्यर्थे च अव्य० "कुसुमयन् फलिनीरलिनीरवैर्मदविकारशिभिराहितहुङ्कृतिः। उपवनं निरभर्त्सयत प्रियान्" माघः।

उपवर्णन न० उप+वर्ण-ल्युट्। सम्यक्कीर्त्तने स्वरूपलक्षणगुणादिभिः प्रतिपादने "अतिशयोपवर्णनं व्याख्यानम्" सुश्रु०

उपवर्त्तन न०उमेत्य वर्त्तन्तेऽत्र उप+वृत-आधारे ल्युट्। जनपदे १विषये "तस्योपवर्त्तनेऽप्येको न श्रुतो गोत्रभित् क्वचित्" काशी०। तदेकदेशे २सजलस्थले भरतः।

उपवर्ष पु० पाणिनिकात्यायनव्याडिप्रभृतीनामध्यापके ऋषिभेदे तत्कथा बृहत्कथायाम् द्रष्टव्या "वर्णा एव तु भगवानुपवर्षः" शा०सू०

उपवर्ह पु० उप+वृह-उद्यमने करणे घञ्। शिरोधाने (वालिस) हेम०तत्र हि स्थापयित्वा शिर उद्यम्यते इति तस्य तथात्वम्। ल्युट्। उपवर्हणमप्यत्र न०[राजनि०।

उपवल्लिका स्त्री उप उत्कर्षे प्रादिस०। अमृतस्रवलतायाम्

उपवल्ह पु० उप+वल्ह-प्राधान्ये घञ्। प्राधान्ये उत्कर्षे "तत् एषां इतानां धारयतामेव धनमुपाहितं भवत्युपवल्हाय बिभ्यताम्" शत०ब्रा०१,४,२,१,

उपवसथ पु० उमेत्य वसन्त्यत्र उप+वस-आधारे अथ। १ग्रामे हेमच०। "यद्याहिताग्निरुपवसथे म्रियते कथमस्य यज्ञः स्यात्" ऐत० "यजमानस्य समीपे वसन्ति देवा अस्मिन्निति आधारे अथ। २यागपूर्व्वदिवसे। तन्निर्वचनादिकं शत० ब्रा० १,११,१,७,२, दर्शितं यथा "अथातोऽशनानशनस्यैव। तदुहाषाढः सावयसोऽनशनमेव व्रतं मेने मनोहवै देवा मनुष्यस्याजानन्ति तत एनमेतद्व्रतमुपयन्तं विदुः प्रातर्नो यक्ष्यत इति तेऽस्य विश्वे देवा गृहानागच्छन्ति तेऽस्य गृहेषूपवसन्ति स उपवसथः। तत्त्वेवानवक्लृप्तम्। यो मनुष्येष्वनश्नत्सु पूर्व्वोऽ

श्नीयादथ किमु यो देवेष्वनश्नत्सु पूर्व्वोऽश्नीयात्तस्मादु नैवाश्नीयात् । तदुहोवाच याज्ञवल्क्यः । यदि नाश्नाति पितृदेवत्योभवति यद्यु अश्नाति देवानत्यश्नातीति स यदेवाशितमनशितं तदश्नीयादिति यस्य वै हविर्न गृह्णन्ति तदशितमनशितं स यदश्नाति तेनापितृदेवत्यो भवति यद्यु तदश्नाति यस्य हविर्न गृह्णन्ति तेनो देवानात्यश्नाति । स वा आरण्यमेवाश्नीयात्” “व्रतप्रसङ्गादागतं तद्विसर्जनं समाप्य पूर्व्वेद्युर्यजमानेन व्रतानन्तरं यत् कर्त्तव्यं तद्वक्तव्यं प्रतिजानीते अथेति । यतो व्रतानन्तरमशनानशनापरनामकमारण्याद्यशनमेव यजमानेन कर्त्तव्यम् अतस्तदनन्तरमेव तस्य निरूपणं क्रियत इत्यर्थः । प्रतिज्ञा तस्याशनानशनपक्षस्य प्रशंसार्थम् । केवलानशनपक्षं निरसितुमुपन्यस्यति तदु हेति । तत्तस्मिन्नशनाशनविषये अनशनं सर्व्वात्मना अशनत्यागम् । उपवसथनामनिर्वचनेन देवानामागमनं द्रढयति तेऽस्येति उपसमीपे यजमानस्य वसन्ति देवा अस्मिन्निति पूर्वं दिवस उपवसथनामक इत्यर्थः । गृहे मनुष्येष्वागतेष्वनश्नत्सु पूर्व्वोऽश्नीयादिति यत्तस्यानवक्लृप्तिः किमु वक्तव्या ? आषाढेन चेन्मुनिना निर्णीतोऽनशनपक्षः तर्हि स एव परमार्थः । कथमशनानशनपक्षः ? इति चेत् अनेन मुनिनैव स्वमतसमर्थनाय प्रत्येकपक्षौ दूषयित्वा याज्ञवल्क्येन सोपपत्तिना नोभयावित्युक्तम् । यदीति अशनानशनलक्षणं यदीति । दैविके हि कर्म्मणि देवान् प्रत्युद्दिष्टस्यैव हविषः प्रथममनुपयोगः काममन्यस्य, पित्र्ये पुनरनियमात्तथोऽन्यदपि अनुपयोग्यमिति पितृदैवत्यतामापादयतीति याज्ञवल्क्यस्याशयः । तत् किं दैविके कर्म्मणि प्रागपि भोक्तव्यमिति यजमानाशयमजानानः शङ्कते तमाह यद्यु इति यदि तु अश्नाति तदा अशिशिषतो देवानतिक्रम्य स्वयं भुक्तवान् स्यात् । अशनानशनपक्षयोरुभयोरपि दोषश्चेत् का गतिरिति यद्द्रव्यमशितमप्यनशितवद्भवति तदश्नीयात् । यस्य द्रव्यस्य संबन्धि न हविष्टेन देवा न गृह्णन्ति तदशितमपि सदनशितवद्भवति । तथात्वे यथोदीरितदोषद्वयाभावमाह स यदिति । आरण्यग्रहणं प्राकृतदर्शपूर्णमासहविर्व्यतिरिक्तोपलक्षणम्” भा० । तत्र विहितः ठञ् भावे अथ । वैदिके कर्मभेदे तच्च कर्म कात्या० ८,८,८, दर्शितम् । ववमाध्यायादौ “एकमौपवसथ्यं कर्मेति” कर्कः । [उपवासे अमरः ।

उपवस्त न० उप+वस स्यन्दे उपवस्त्यादभोजने भावे क्त ।

उपवस्ति स्त्री उप+वस–स्तम्भे भावे क्तिन् । उपष्टम्भे आलम्बने तेन जीवति वेतना० ठञ् । औपवस्तिक तदुपजीविनि त्रि० ।

उपवाक पु० उप+वच–घञ् कुत्वम् । उपेतस्य वचने १परस्परालापे “नमस्यन्त इदुपवाकमीयुः” ऋ० १,१६४,८, “उपवाकमुपेतस्य वचनं परस्परवचनम्” भा० । उपवाति उप+वा–भावे क्विप् तस्यै कं जलं यत्र । २यवे पु० “सक्तूनां रूपं बदरमुपवाकः करम्भस्य” यजु० १९०,२२, “सरस्वत्युपवाकैर्व्यानम्”१९,९०, “उपवाका यवाः” वेददी० “अथ नासिकयोर्लोमानि तान्युपवाकसक्तवश्च बदरसक्तवश्च श्रोत्रे एवास्येन्द्रौ यज्ञौ” शत०ब्रा० १२,९,१,५, भ्रष्टयवैर्हि जलस्य शोषणात् तथात्वम् । ३इन्द्रयवे स्त्री ङीप् “बदरैरुपवाकीभिर्भेषजं तोक्मभिः” यजु०२१, ३०, तस्मिन् स्थितः यत् । उपवाक्य तत्साधने वज्रौ उप+वच–कर्मणि ण्यत् कुत्वम् । सम्भाषणीये “अयमग्निर्भरस्य वृत्रहा सनकात् प्रेद्धो नमसोपवाक्यः” ऋ० १०,६९,१२, कुत्वाभावे उपवाच्य स्तुते प्रशस्ये च “अहन्विस्त्रो यथा विदे शीर्ष्णांशीर्ष्णोपवाच्यः” ऋ० २,१,१२२,

उपवाद पु० उप+वद–घञ् । अपवादे निन्दायाम् “पश्वपवादाश्च” कात्या० “पश्वपवादः पशुदाननिन्दा” कर्कः णिनि उपवादिन् । तत्कारिणि “तस्मान्नोपवादी स्यादुत ह्येवंवित्परो भवति” ऐत० “येऽल्पाः कलहिनः पिशुना उपवादिनः” छा०उ० ।

उपवास पु० उप+वस–घञ् । भोजनाभावे भोजननिवृत्तौ स च वैधः अवैधश्चेति भेदात् द्विविधः । तत्र वैधस्य व्रतरूपत्वम् । तस्य संकल्परूपत्वं निरस्य एका०त० संकल्पजन्यत्वमुक्तम् यथा “दीर्घकालानुपालनीयः सङ्कल्पोव्रतमिति नारायणोपाध्यायानां स्वरसः । स्वकर्त्तव्यविषयोनियतः सङ्कल्पोव्रतमिति श्रीदत्तहरिनाथवर्द्धमानप्रभृतयः । सङ्कल्पस्य भावे सत्येतत् कर्त्तव्यमेव, निषेधे न कर्त्तव्यमिति स्नानविशेषः अतएव सङ्कल्पः कर्म्म मानसमित्याभिधानिकाः । वस्तुतस्तु पूर्व्वोक्तवराहपुराणवचनेनैकादश्युपवासस्य व्रतत्वाभिधानात् “एकभक्तेन नक्तेन तथैवायाचितेन च । उपवासेन चैकेन पादकृच्छ्र उदाहृतः” इत्यादियाज्ञवल्क्याद्युक्तेषु एकभक्तनक्तायाचितभोजनोपवासादिषु पादकृच्छ्रादित्वाभिधानाच्च न सङ्कल्पोव्रतं किन्तु सङ्कल्पविषयतत्तत्कर्म्मैव व्रतमिति । अतएव व्रतानां सङ्कल्पसम्भवत्वमाह मनुः “सङ्कल्पमूलः

कामोपै यथाः सङ्कल्पसम्भवा'। व्रतनियमधर्म्माश्च सर्व्वे सङ्कल्पजाः स्मृताः"। अनेन कर्म्मणा इदमिष्टं फलं साध्यते इत्येवंविषया बुद्धिः सङ्कल्पस्तदनन्तरमिष्टसाधनतया अवगते तस्मिन् इच्छा जायते ततस्तदर्थं प्रयत्नं कुर्वीत इत्येवं यज्ञाः सङ्कल्पसम्भवाः। व्रतनियमस्वरूपाध्यायश्चतुर्थाध्याये वक्ष्यमाणाः। सर्व्वे इत्यनेन अन्येऽपि शास्त्रार्थाः सङ्कल्पादेव जायन्त इति कुल्लूकभट्टः। सङ्कल्पं चाह वराहपुराणम्। "प्रातःसङ्कल्पयेद्विद्वानुपवासव्रतादिकम्। नापराह्णे न मध्याह्ने पित्र्यौ कालौ हि तौ स्मृतौ" अत्र संकल्पोऽग्रतारब्धः'। तत्र भोजनाभावश्च अहोरात्रकालावच्छिन्नः। यथोक्तं स्मृतौ "तपनोदयमारभ्य यामाष्टकमभोजनम्। उपवासः सविज्ञेयः प्रायश्चित्ते विधीयते" प्रायश्चित्ते इत्युपलक्षणम्। प्राजापत्यादौ त्रिरात्राद्युपोषणमप्येवावस्था बोध्यम्। उपवासस्य नित्यत्वमन्यत्र भवि० पु० दर्शितं यथा "उपावृत्तस्य पापेभ्योयस्तु वासोगुणैः सह। उपवासः स विज्ञेयः सर्वभोगविवर्जितः" वैधोपवासस्य यथा निवृत्तिरूप यत्नपरतया भावरूपत्वं तथा एका० त० समर्थितम् यथा एवञ्च सङ्कल्पविषयस्य अनन्तं पूजयेद्धरिमित्यादौ भावत्वं, नैवैतोद्यन्तमादित्यमित्यादौ चाभावरूपत्वम्। ननु तर्हि व्रतस्य कस्यचिदभावरूपत्वात् "निषेधः कालमात्रकः" इत्यस्यैव विषयत्वं स्यादिति चेन्न तस्य केवलनिषेधविषयकत्वात् अस्य तु सङ्कल्पादीतिकर्त्तव्यतायोगित्वेन भावघटितत्वात् "तत्र पूज्य विधेर्वृत्तिः" इत्यस्यैव विषयत्वमिति। जीमूतवाहनेनापि "एकादश्यां भोजने दोषं दर्शयन्नुपवासं नियमयति। न चायं निषेधः इतिकर्त्तव्यताविधानात् निषेधे चेतिकर्त्तव्यताविरहात् तत्पदाप्रयोगाच्च" इत्युक्तम्। यत्तु निषेधप्रकरणस्थदेवलवचने 'न शङ्खेन पिबेत्तोयं न खादेत् कूर्म्मशूकरौ। एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि" इत्यत्र नञो निषेधे मुख्यत्वाद्भोजनाभावः प्रतीयते नत्वभोजनसङ्कल्परूपं व्रतं लक्षणाप्रसङ्गात्। मत्स्यपुराणे "दशम्यां नियताहारो मांसमैथुनवर्ज्जितः। एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि" इति दशमीनियमपूर्वकं व्रतमभिधाय "रटन्तीह पुराणानि भूयोभूयो वरानने!। न भोक्तव्यं न भोक्तव्यं सम्प्राप्ते हरिवासरे" इत्यादिविधेरनन्यगतिकतया निषेधकत्वमवश्यं वाच्यम्। तथा च निषिद्धे भोजने दोषश्रवणं निषेधातिक्रमजन्यतयैवोपपद्यमानं न फलश्रुत्या काम्यतया निरूढस्य व्रतस्य नित्यत्वे प्रमाणमिति तच्चिन्त्यं न खलु "न शङ्खेन पिबत्तोयमित्यादिभिः" प्रतिपन्ननिषेधभावैः साहचर्य्येणैकादशीभोजननिषेधकमात्रस्वरसात्वं किन्तु "एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि। वनस्थयतिधर्म्मोऽयं शुक्लामेव सदा गृही" इति गोभिलवचने धर्म्मशब्दसमभिव्याहारेणैकादश्यामुपवसेदित्यनेनैकवाक्यतया चोपवासविधायकमपि नहि निषिद्धानां ब्रह्महत्यादीनां त्यागेन कश्चिद्धर्म्मो जायते किन्तु भावरूपाक्रान्तगृहीतोनिषिद्धोधर्म्मोभवेदिति, वैधोपवासे च "उपावृत्तस्य पापेभ्योयस्तु वासोगुणैः सह। उपवासः स विज्ञेयः सर्वभोगविवर्ज्जितः" इति भविष्यपुराणवचनेन भोगमात्रस्यैव वर्जने प्राप्ते वचनान्तरादहोरात्राभोजनस्यैव पापनिवृत्तगुणवासयुक्तस्य प्राधान्यमन्यभोगवर्जनस्याङ्गत्वम्। तथा च "स्नातके स्नातकै चैव प्रणम्य मनसा हरिम्। एकादश्यां न भुञ्जीत व्रतमेतद्धि वैष्णवम्"। अत्र एकादश्यामुपवासमात्रस्य व्रतत्वमुक्तम् एकादश्यां न भुञ्जीतेत्यस्य व्रतपरत्वेन नाभोजनपरता तस्याच पूर्वं दूषितत्वात्। ततश्च यथा एकादश्यां न भुञ्जीत इत्यत्र वचनान्तरादुपवासरूपव्रतपरत्वं तथा न भोक्तव्यमित्यत्रापि। वस्तुतस्तु वराहपुराणे एकादशीव्रतसन्दर्भमध्ये "न शङ्खेन पिबेत्तोयमिति" न भोक्तव्यं न भोक्तव्यमिति वचनद्वयमभिधाय व्रताकरणे प्रत्यवाय उक्तः। नच मौनरक्षाभिया तस्य निषेधकत्वमिति वाच्यम् तथात्वे एतद्वचन एव न भोक्तव्यमिति पुनरुपादानं व्यर्थं स्यात् किन्तु वीप्सया तस्यैव व्रतस्य नित्यत्वख्यापनमिति। अन्यथा "निषेधः कालमात्रकः" इत्यनेनैव एकादशीक्षण एव भोजननिषेधः स्यात्'। "एकादश्यां प्रकुर्वन्ति उपवासं मनीषिणः" इति भविष्यपुराणे उपवासपदान्निराहारपदं नैकादशीकालमात्राभोजनपरम् किन्तु तद्युक्ताहोरात्राभोजनपरम्। तत्रैवोपवासपदव्यवहारात्। नच वैपरीत्यम् उपवासपदस्याहाराभावमात्रपरत्वे लक्षणाप्रसङ्गात्। निराहारपदस्योपवासपरत्वे तु न लक्षणा सामान्यशास्त्रस्य विशेषतात्पर्य्यकत्वात्। तथा च कात्यायनः "नित्योपवासी योमर्त्यः सायं प्रातर्भुजिक्रियाम्। सन्त्यजेन्मतिमान् विप्रः संप्राप्ते हरिवासरे"। सायं प्रातरिति रात्रिदिनोपलक्षणम् "मुनिभिर्द्दिरशनमुक्तं विप्राणां मर्त्यवासिनां नित्यम्। अहनि च तथा तमस्विन्यां सार्द्धप्रहरयामान्तः" इति छन्दोगपरिशिष्टकवाक्यत्वात्। अतएव स्मृतिषेऽहोरात्रत्वकीर्त्तनम् अहोरात्रसाध्यकर्म्माङ्गत्वार्थम्। तथाच

विष्णुधर्मोत्तरे। "सा तिथिस्तदहोरात्रं यस्यामभ्युदितो रविः। तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणम्। सा तिथिस्तदहोरात्रं यस्यामस्तमितो रविः। तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणम्। शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः। कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविः"। तच्च तिथ्यन्तरसहायभावं विना प्रायेण सम्भवति अतएव गृह्यपरिशिष्टे युग्माग्न्यत्याद्यभिधाय "तिथ्योर्युग्मं महाफलम्" इत्युक्तं अस्य प्रयोजनन्तु तिथेः स्वरूपविशेषनियमनम्, स्वतिथ्या कर्मनिर्वाहे सहायभावेनान्यतिथ्यनुप्रवेशेनाहोरात्रसाध्योपवासाद्याचरणञ्च। एवञ्च प्रातःकाले तत्तिथ्यलाभे तिथ्यन्तरेऽप्युपवाससङ्कल्पः अहोरात्राभोजनरूपस्य तस्य प्रातरारभ्यार्हत्वात्। संवत्सरप्रदीपेऽपि "प्रातःसन्ध्यां ततः कृत्वा सङ्कल्पं बुध आचरेत्" इत्युक्तम्। अत्र च कर्मणस्तावदपूर्व्वजनकत्वेन विधेयत्वेन प्राधान्यम् तिथ्यादेर्गुणत्वेन कथञ्चिदुपलक्षणत्वमाह गर्गः। "तिथिनक्षत्रवारादि साधनं पुण्यपापयोः। प्रधानगुणभावेन स्वातन्त्र्येण न ते क्षमाः" इति प्रधानस्य कर्म्मणो गुणभावेनाङ्गत्वेन। एवञ्च निराहारपदस्योपवासपरत्वे न कलञ्जाधिकरणन्यायाद्यैकादशीक्षणमतिवाह्य भोजनम्। किन्त्वेकादश्यामिति विहितैकादशीयुक्ताहोरात्रपरम्। अथ कलञ्जाधिकरणम्। तत्र श्रुतिः "न कलञ्जं भक्षयेत्" इति कलञ्जभक्षणाभावविषयकं कार्य्यमित्यर्थः। तत्र कालविशेषानुपादानान्निषिध्यमानक्रियायां प्रवृत्तिमतो निषेधविधावधिकाराद्यावत्कालमेव तस्यां तस्य निवृत्तिः। न हि कलञ्जभक्षणाद्यतः कुतश्चित् कारणान्निवृत्तस्य निषेधानुपालनं सकृद्वृत्तमिति कलञ्जभक्षणनिषेधो न पुनस्तं निवर्त्तयति किन्तु भक्षणप्रवृत्तिमत्तामात्रमधिकारिविशेषणं यदा यदा भवति तदा तदा एव निषेधविधिरपि तं निवर्त्तयति। न हि कलञ्जभक्षणमुपक्रम्य यावत्कालं तल्लङ्घयति। अतस्तदितरकाले निवृत्तिः सिद्धैवेति भवति विफलोविधिः। ननु नासौ निवृत्तिरप्रवृत्तस्य निवृत्त्यनुपपत्तेः, सत्यं प्रवृत्त्युपाधिना विनाशं प्राप्नुवन् प्रागभाव एव प्रवृत्तिनिराकरणात् साध्यमानो निवृत्तिरुच्यते न तु प्रवृत्तिरपि साध्यतयोपदिश्यते किन्तु रागप्राप्तप्रवृत्तिमत एव निषेधविधावधिकारः। यत्तु "मनसा तु प्रवृत्तस्य भूतचेष्टावतोऽपि वा। यदनागतभावस्य वर्ज्जनं तन्निवर्त्तनम्" इति तत्रापि पक्षेनाप्रवृत्तमात्रसङ्ग्रहान्न विरोधः भूतचेष्टावत इति। "भूतं क्ष्मादौ पिशाचादौ जन्तौ क्लीवं त्रिषूचिते। प्राप्ते वृत्ते समे सत्ये देवयोन्यन्तरे तु ना" इति मेदिन्युक्तेः भूते प्राप्ते निषेध्ये चेष्टावत इत्यर्थः। तच्च प्रागभाव एव कालान्तरसम्बन्धितया साध्यत्वेनोपदिश्यते। प्रागभावश्चानादिसंसर्गाभावमात्रपरः सचाप्रवृत्तस्य भक्षणकारणमननुतिष्ठतः सिध्यत्येव। तस्मात् यत्क्रियापर्य्यवसायित्वे विफलोविधिः कादाचित्ककारणस्य निषेधमन्तरेणापि प्राप्तेः। न च स्वर्गकामादिवत् साध्यतया प्रवृत्तिमत्कर्त्तृकत्वमप्यङ्गं विषयमात्रानुष्ठानाधीनसिद्धत्वाद्विधेर्नियोगानामितिकर्त्तव्यताऽऽकाङ्क्षाविरहात् अतएव शुचित्वमपि तत्र नाङ्गम्। तस्मान्निषेधविधिषु काकवन्तो देवदत्तगृह इत्यादिवत्तटस्थत्वेनाधिकारिविशेषणीभूतायाः प्रवृत्तेर्यावत्कालमनुवृत्तिस्तावत्कालमेव निवृत्तौ साफल्यं पुनर्निमित्तान्तरवत्तदनुष्ठानेनैव शास्त्रार्थसिद्धिः"। गदाधरस्तु विधिस्वरूपे उपवासादिव्रतादेर्निषेधविधिबोध्यतया वैधत्वं कलञ्जभक्षणादेः निषेधविषयतया निषिद्धत्वमङ्गीचकार। तस्यायमाशयः। विधिप्रत्ययार्थस्येष्टसाधनत्वादेर्धात्वर्थे एवान्वयव्युत्पत्तेः एकादश्यामुपवसेदित्यादिवाक्येन उपवासे विध्यर्थेष्टसाधनत्वस्यान्वयबोधनात् भोजनाभावरूपोपवासस्य निषेधरूपतया तत्र च विध्यर्थान्वयात् निषेधविधित्वम् तदेकवाक्यतया च एकादश्यां न भुञ्जीतेत्यादौ भुजधातोरुपवासपरत्वकल्पनं नञ् तु तत्र तादृशलक्षणायाः द्योतकः एवञ्च तत्र निषेधरूपभोजनाभावे इष्टसाधनत्वबोधनान्निषेधविधित्वम्। प्रकृत्यर्थे एव प्रत्ययार्थान्वयनियमेन तथान्वयस्यैवौचित्यम्। न कलञ्जं भक्षयेदित्यादौ तु नञा कलञ्जभक्षण एव विध्यर्थेष्टसाधनत्वस्याभावबोधनात् निषेधरूपत्वम्। नञ्समभिव्याहृतस्थले यत्र यस्यान्वयः तत्समभिव्याहारे तु तत्र तस्याभावान्वयनियमात् चैत्रः पचतीत्यादौ चैत्रे पाककर्त्तृत्वान्वयेन चैत्रो न पचतीत्यादौ तत्रैव कर्त्तृत्वाभावान्वयदर्शनात्। ननु एकादश्यां न भुञ्जीतेत्यत्रापि कुतो न तथान्वय इति चेत् तत्र तथान्वयसम्भवेऽपि एकादश्यामुपवसेदित्यादौ तथान्वयासम्भवात् तत्र धातुनैव भोजनाभावस्योपस्थापनात् तत्रैव विध्यर्थान्वयौचित्यात् न च तत्र स्वातन्त्र्येणाभावबोधकपदमस्ति येन विध्यर्थान्वयस्तत्र स्यात्। तदेकवाक्यतया च न भुञ्जीतेत्यादौ [illegible] विधित्वमुचितमिति। निषेधविधेश्च इष्टसाधनताज्ञानद्वारा प्रवर्त्तकत्वम् निषेधस्य तु उदीच्यानिष्टसाधनताज्ञापनेन-

त्वात् निवर्त्तकत्वमिति भेदः विस्तरस्तु विधिस्वरूपे दृश्यः। प्रागुक्त भवि० पु० वाक्यव्याख्यायाम् एका०त० रघु० “उपावृत्तस्य निवृत्तस्य पापेभ्यः पापकर्म्मभ्यः । मैथिलास्तु दोषेभ्य इति पठित्वा दोषेभ्योरागद्वेषमात्सर्य्यादिनिषिद्धात्मधर्म्मेभ्य इत्यर्थमाहुः । गुणानाह गोतमः । “दया सर्व्वभूतेषु क्षान्तिरनसूया शौचमनायासोमङ्गलमकार्पण्यमस्पृहा चेति” । दयादिलक्षणान्याह बृहस्पतिः । “परे वा बन्धुवर्गे वा मित्रे द्वेष्टरि वा सदा । आत्मवद्वर्त्तितव्यं हि दयैषा प्रकीर्त्तिता”। परे उदासीने । आत्मवदित्यत्र आपत्सु रक्षितव्यमिति कल्पतरौ पाठः । अनसूयामाह दक्षः । “यथैवात्मा परस्तद्वद्द्रष्टव्यः सुखमिच्छता । सुखदुःखानि तुल्यानि यथात्मनि तथा परे”। बृहस्पतिः ।“बाह्ये चाध्यात्मिके चैव दुःखे चोत्पादिते क्वचित् । न कुप्यति न वा हन्ति सा क्षमा परिकीर्त्तिता । न गुणान् गुणिनो हन्ति स्तौति मन्दगुणानपि । नान्यदोषेषु रमते साऽनसूया प्रकीर्त्तिता । अभक्ष्यपरिहारस्तु संसर्गश्चाप्यनिन्दितैः । स्वधर्म्मे च व्यवस्थानं शौचमेतत् प्रकीर्त्तितम् । शरीरं पीड्यते येन सुशुभेनापि कर्म्मणा । अत्यन्तं तन्न कुर्वीत अनायासः स उच्यते । प्रशस्ताचरणं नित्यमप्रशस्तविवर्जनम् । एतद्धि मङ्गलं प्रोक्तमृषिभिस्तत्त्वदर्शिभिः । स्तोकादपि च दातव्यमदीनेनैव चात्मना । अहन्यहनि यत् किञ्चिदकार्पण्यं हि तत् स्मृतम् । यथोत्पन्नेन सन्तोषः कर्त्तव्योऽप्यल्पवस्तुना । परस्याचिन्तयित्वार्थं साऽस्पृहा परिकीर्त्तिता” । देवीपुराणम् । “वह्राम' तज्जपः स्नानं तत्कथाश्रवणादिकम् । उपवासकृतो ह्येते गुणाः प्रोक्ता मनीषिभिः” सर्वभोगविवर्जितः शास्त्रानुमतनृत्यगीतादिकमपरिहृतः” अत्र दन्तधावने मैथिलमतमुत्थाप्य दूषितं तत्त्वे च । “अत्र मैथिलाः वृद्धशातातपोभोगविशेषान् प्रतिप्रसूते । “गन्धालङ्कारवस्त्राणि पुष्पमाल्यानुलेपनम् । उपवासे न दुष्येत दन्तधावनमञ्जनम्” । गौडीयस्मृतिः “उपवासे तथा श्राद्धे न खादेद्दन्तधावनम् । दन्तानां काष्ठसंयोगोदहत्यासप्तमं कुलम्” तत्र योगीश्वरः “तस्मात् सर्वप्रयत्नेन भक्षयेद्दन्तधावनम्” इत्यभिधाय दन्तकाष्ठसंयोगं निषिध्य मृल्लोष्ठादिना दन्तधावनमिति विरोधं परिजह्रारेति वदन्तोऽनर्थं व्याचक्षुः तच्च वृद्धशातातपेन “दुग्धे पर्युषिते नित्यं भवत्यप्रयतो नरः । तस्मात् सर्वप्रयत्नेन भक्षयेद्दन्तधावनम्” इत्यभिधाय तद्वचनाभिधानेन दन्तधावने दोषस्योक्तेः । अन्यथा पौनरुक्त्यापत्तेः “अञ्जनं रोचनञ्चापि गन्धान् सुमनसस्तथा । पुराणके चोपवासे च नियमेन विवर्जयेत्” इति हरिवंशात् मिताक्षरायाम् । “गात्राभ्यङ्गं शिरोभ्यङ्गं ताम्बूलं चानुलेपनम् । व्रतस्थो वर्जयेत् सर्वं यच्चान्यद्बलरागकृत्” इत्यनेनानुलेपनरागकृन्निषेधाच्च । अतएव प्रायश्चित्तविवेककृद्भिः सुष्ठूक्तमुपवासेन हेतुनेति” ।

जीमूतवाहनेनापि उपवासे चेति पठित्वा चकारादनुकल्पेष्वपीति व्याख्यातम् । तस्मात्स्नेहादि सर्व्वभोगस्यैव प्रदर्शकं तेन विलासार्थगन्धादिवर्ज्जनं कार्य्यम् । देवलः “उपवासः प्रणश्येत दिवास्वापाच्च मैथुनैः । अत्यये चाम्बुपाने च नोपवासः प्रणश्यति” । उपवासोऽपि नश्येतेति कल्पतरुपाठे अपिनान्यदृतं सङ्गृह्णीयत इति विशेषः । अचैर्दूरतः । अत्यये नाशे सम्भाव्यमाने । मैथुने विशेषमाह देवलः । “उपवासे तथा यौनं हन्ति दुष्कृतानि वै । स्त्रीणां संप्रेक्षणात् स्पर्शात्ताभिः सङ्कथनादपि । ब्रह्मचर्य्यं विपद्येत न दारेष्वृतुसङ्गमात्” संप्रेक्षणात् संकथनादित्यत्र सरागत्वं संशब्दस्यार्थः सहचर्य्यात् स्पर्शोऽपि तथेति प्रायश्चित्तविवेकः । कात्यायनोऽपि “रेतःसेकात्मकं भोगकृतेऽप्यस्य क्षयः स्मृतः । तथाच दक्षः । “स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम् । सङ्कल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च । एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः । अनुरागात् कृतञ्चैव ब्रह्मचर्य्यविरोधकम्” ।

अनुकल्पपक्षप्रधानपक्षयोर्यथायोगम् अन्यान्यपि वर्ज्ज्यानि कालमा०उक्तानि यथा “कांस्यं मांसं मसूरांश्च चणकान् कोरदूषकान् । शाकं मधु परान्नञ्च त्यजेदुपवसन् स्त्रियम्” कूर्म्मपु०। “असकृज्जलपानञ्च दिवास्वापञ्च मैथुनम् । ताम्बूलचर्वणं मांसं वर्ज्जयेद्व्रतवासरे” विष्णुध० । “पतितपाषण्डनास्तिकसम्भाषणानृताश्लीलादिकमुपवासादिषु वर्ज्जयेत्” हारीतः । “वहिर्ग्रामान्त्यजान् सूतिं पतितं च रजस्वलाम् । न स्पृशेन्नाभिभाषेत नेक्षेत व्रतवासरे” कूर्म्म पु० “स्मृत्यालोकनगन्धादिसेवनं परिकीर्त्तनम् । अन्नस्य वर्जयेत् सर्वं ग्रासानाञ्चाभिकाङ्क्षणम् । गात्राभ्यङ्गं शिरोभ्यङ्गं ताम्बूलं चानुलेपनम् । व्रतस्थो वर्ज्जयेत् सर्वं यच्चान्यत्र निराकृतम्” विष्णुर० । तत्रैकादश्युपवासे “यानि कानि च पापानि ब्रह्महत्यादिकानि च । अन्नमाश्रित्य तिष्ठन्ति संप्राप्ते हरिवासरे” इति भवि०पु० अन्नपानस्य निषेधेऽपि माषमसूरादिनिषेधोऽ-

नुकल्पपक्षेऽधिकदोषाय । अतएव “अन्नं तु धान्यसंभूतं गिरिजे! भुवि जायते । धान्यानि विविधानीह जगत्यां शृणु यत्नतः । श्यामाकाश्च मसूराश्च धान्यकोद्रवसर्षपाः यवगोधूममुद्गाश्च तिलकल्ककुलत्थकाः” इत्यादीन्यष्टादश धान्यान्युक्त्वा “एतैरेव समुद्भूतमन्नं भवति शोभने! । अन्नत्यागे व्रते भक्ष्येष्वेतान्येव विवर्जयेदिति” शाम्बोत्तरखण्डे धान्यमात्रसंभूतान्नस्य निषेधात् । अतएव नक्तं हविष्यान्नमनोदनं वेत्यनेन अनोदनपदेन सिद्धान्नमात्रभिन्नस्यानुकल्पतोक्ता ।

एकादश्युपवासेऽधिकारिण एकादशीशब्दे वक्ष्यते । सभर्तृकायास्तु भर्त्तुरनुमतिं विनोपवासे नाधिकारः । “नास्ति स्त्रीणां पृथग् यज्ञो न व्रतं नाप्युपोषणम् । पतिं शुश्रूषते यत्तु तेन स्वर्गे महीयते” मनूक्तेः सावित्रीव्रतादौ विशेषविधानात् भर्त्रनुज्ञयाऽधिकारः । अतएव शङ्खेन सामान्यत उक्तम् “कामं भर्त्रनुज्ञया व्रतोपवासनियमेज्यादीनामभ्यासः स्त्रीधर्म्मः” “पत्यौ जीवति या नारी उपोष्य व्रतमाचरेत् । आयुः संहरते पत्युः सा नारी नरकं व्रजेत्” इति विष्णुवाक्यन्तु अनुमत्यभावविषयकम् ।

स च उपवासः नित्यः काम्यः नैमित्तिकश्चेति त्रिधा तत्रैकादशीशिवरात्र्याद्युपवासो नित्यः । एकादशीशब्दे शिवरात्र्यादि शब्दे च तत्प्रमाणं द्रष्टव्यम् । काम्यस्तु “अमावस्या द्वादशी च संक्रान्तिश्च विशेषतः । एताः प्रशस्तास्तिथयो भानुवारस्तथैव च । अत्र स्नानं जपो होमो देवतानाञ्च पूजनम् । उपवासस्तथा दानमेकैकं पावनं स्मृतम्” संव० “सप्त वारानुपोष्यैव सप्तधा संयतेन्द्रियः । सप्तजन्मकृतं पापं तत्क्षणादेव नाशयेत्” सं०प्रदी० “नित्यं द्वयोरयनयोर्नित्यं विषुवतोर्द्वयोः । चन्द्रार्कयोर्ग्रहणयोर्व्यतीपातेषु पर्व्वसु । अहोरात्रोषितः स्नानं दानं होमं तथा जपम् । यः करोति प्रसन्नात्मा तस्य स्यादक्षयन्तु तत्” ब्रह्मपु० इत्यादौ विहितः तत्रायनविषवत्सु नित्य इति भेदः । नैमित्तिकः प्रायश्चित्तरूपः “त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितम् । त्र्यहं परञ्च नाश्नीयात् प्राजापत्यं चरन् द्विजः” मन्वादिविहितः एवमन्यान्यपि प्रायश्चित्तविधायकानि वाक्यानि स्मृतितोज्ञेयानि

तत्र काम्ये सर्व्वशक्तिमानधिकारी भवतीत्युक्तेः सर्व्वाङ्गोपेतस्यैवाधिकारः । नित्ये तु यथाकथञ्चिदनुष्ठानमिति समर्थितम् एका०त० “एवञ्चैकादशीव्रतस्य नित्यत्वात् किञ्चिदङ्गवैकल्येऽपि प्रधानोपवासादेराचरणं यावज्जीवाधिकरणन्यायात् । स च न्यायो यथा ‘यावज्जीवमग्निहोत्रं जुहुयादिति’ श्रूयते तत्र किं सर्व्वाङ्गोपसंहारेणैवाधिकारः उत यावज्जीवपदेन यावन्ति शक्नोतीत्युपसंहर्त्तुं यदा तदा तावद्भिरङ्गैरुपेतं प्रधानं कुर्व्वन्नधिकरोतीति संशयः । तत्राद्ये सर्व्वाङ्गोपेतस्य प्रधानस्य फलसाधनत्वादङ्गवैकल्ये फलानुदयात् सर्व्वाङ्गोपसंहार इति पूर्व्वपक्षः तत्र सिद्धान्तः ‘सायं प्रातर्जुहोतीति” श्रुतेः सायंप्रातःकालावच्छिन्नं जीवनमग्निहोत्रस्य निमित्ततया श्रूयते नत्वङ्गानां, सति निमित्ते नैमित्तिकमवश्यंभावि अन्यथा निमित्तत्वासम्भवात् । अतोऽशक्याङ्गपरित्यागेन प्रधानं कर्त्तव्यम् तावतैव शास्त्रवशात् फलसिद्धिरिति अतएव नैमित्तिकाधिकारे श्रीधरस्वामिधृता श्रुतिः “यथा शक्नुयात्तथा कुर्य्यादिति” । बौधायनोऽपि स्मरति । “यथा कथञ्चिन्नित्यानि शक्यवस्तुनिरूपतः । येन केनापि कार्य्याणि नैव नित्यानि लोपयेत्” ।

असमर्थस्यानुकल्पेनाप्याचरणम् अनुकल्पश्च कर्त्तृद्रव्यादिषु प्रतिनिधिरूपः तत्राह मनुः । “विश्वैश्च देवैः साध्यैश्च ब्राह्मणैश्च महर्षिभिः । आपत्सु मरणाद्भीतैर्विधिः प्रतिनिधिः कृतः । प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्त्तते । न साम्परायिकं तस्य दुर्म्मतेर्विद्यते फलम्” । अत्रापत्प्रतिनिध्यनुकल्पानां पर्य्यायता । कालविवेकधृतवराहपुराणे “उपवासासमर्थस्तु किञ्चिद्भक्ष्यं प्रयोजयेत्” तथा एकादशीमधिकृत्य स्मृतिः “एकभक्तेन नक्तेन भक्षन् वृद्धातुरः क्षिपेत्” नारदीये “अनुकल्पोऽन्यथा प्रोक्तः क्षीणानां वरवर्णिनि! । मूलं फलं पयस्तोयमुपभोज्यं भवेच्छुभम् । नत्वेवं भोजनं कैश्चिदेकादश्यां प्रकीर्त्तितम्” । एवमनुकल्पासामर्थ्ये ब्रह्मवैवर्त्तः । “उपवासासमर्थश्चेदेकं विप्रन्तु भोजयेत । तावद्धनानि वा दद्यात् यद्भक्ताद्द्विगुणं भवेत् । सहस्रसम्मितां देवीं जपेद्वा प्राणसंयमान् । कुर्य्याद्द्वादशसंख्याकान् यथाशक्ति व्रते नरः” । देवीं गायत्रीम् । वायुपुराणे “उपवासनिषेधे तु किञ्चिद्भक्ष्यं प्रकल्पयेत् । न दुष्यत्युपवासेन उपवासफलं भवेत् । नक्तं हविष्यान्नमनोदनं वा फलं तिलाः क्षीरमथाम्बु चाज्यम् । यत् पञ्चगव्यं यदि वाथ वायुः प्रशस्तमत्रोत्तरमुत्तरञ्च” । उपवासनिषेधे तु असामर्थ्यरूप हविष्यादिरनुकल्पः । तानि च “अष्टौ तान्यव्रतघ्नानि आपोमूलं फलं पयः । हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम्” बौधायनः । एकादश्यतिरिक्तोपवासे अनुकल्पपक्षे विशेषः नि०सि० । “नित्य-

स्नायी मिताहारो गुरुदेवद्विजार्चकः । क्षारं क्षौद्रञ्च लवणम् मधुमांसानि वर्जयेत्" इत्युक्त्वा अग्निपु० । क्षाराश्च तत्रोक्ताः "तिलमुद्गादृते शिम्बाः गोधूमकोद्रवौ । धान्यकं देवधान्यञ्च शमीधान्यं तथैव च । शिम्बधान्यं तथा पण्यं मूलं क्षारगणाः स्मृताः" गोधूमस्य क्षारत्वेऽपि उपवासानुकल्पे प्रतिप्रसवस्तत्रैव "व्रीहिषष्टिकमुद्गाश्च कलायाः सतिलं पयः । श्यामाकाश्चैव नीवारा गोधूमाद्या व्रते हिताः" । कूष्माण्डालाबुवार्त्ताकुपालङ्कीज्योत्स्निकास्त्यजेत् । चतुर्भिश्च सक्तुकणाः शाकं दधि घृतं मधु । श्यामाकशालिनीवारा यावकं मूलतण्डुलम् । हविष्यं व्रतनक्तादावग्निकार्यादिके हितम् । मधुमांसं विहायान्यव्रते वा हितमीरितम्" । "चतुर्भिश्च सक्तुकणाशाकपयोदधिघृतमूलफलोदकानि हवींष्युत्तरोत्तरं प्रशस्तानि" मिता० गौत० । निर्णया० संग्र० । स्तेनहिंसकयोः सत्त्वम् कृत्वा चैन्यस्य हिंसनम् । प्रायश्चित्तं व्रती कुर्यात् जपहोममतन्द्रितम् । मिथ्यावादे दिवास्वापे बहुशोऽम्बुनिषेवणे । अष्टाक्षरं व्रती जप्त्वा शतमष्टोत्तरं शुचिः" । अतएव असमर्थस्य किञ्चिद्भक्षणमपि भक्त्या निषिद्धम् । "उपवासो यदा राम ! श्राद्धं नैमित्तिकं भवेत् । उपवासं तदा कुर्यादाघ्राय पितृसेवित मिति" काला० ।

अथ तत्र प्रतिनिधिः स्वयमशक्तौ प्रतिनिधिनाऽपि उपवासादिव्रतं कार्यमित्याह स्कन्दपु० । "पुत्रञ्च विनयोपेतं भगिनीं भ्रातरन्तथा । एषामभाव एवान्यं ब्राह्मणं विनियोजयेत्" गरुडपुरा० । "भार्या भर्त्तुर्व्रतं कुर्याद्भार्यायाश्च पतिस्तथा । असामर्थ्ये द्वयोस्ताभ्यां व्रतभङ्गो न जायते" । वराहपुराणे "पितृमातृपतिभ्रातृश्वसृगुर्वादिभूभुजाम् । अदृष्टार्थमुपोष्यैव स्वयञ्च फलभाग्भवेत्" । अत्र नि० सि० त्रिकाण्डमण्डने विशेषः "काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्तिके च सः । काम्येऽप्युपक्रमादूर्द्ध्वं केचित् प्रतिनिधिं विदुः । न स्यात् प्रतिनिधिर्मन्त्रस्वामिदेवाग्निकर्मसु । न देशकालयोर्नास्ति नारणेरग्निरेव सा । नापि प्रतिनिधातव्यं निषिद्धं वस्तु कुत्रचित्" । ततश्च अशक्तौ उपोषणादिकमनुकल्पादिना कार्यं पूजादिकं तु स्ववसामार्थ्ये अन्येन कारयेदिति एका० त० रघु० ।

नित्यकाम्ययोरुपवासयोरयं भेदः "उपवासफलं प्रेप्सुस्त्यजेत् भक्तचतुष्टयमिति" कालमा० भारतम् "अहोरात्रद्वयं नित्ये काम्ये भक्तचतुष्टयम् । सायमाद्यन्तयोर्भक्तमेकैकं मध्यमे द्वयम्" एका० त० स्मृतिः । अत्र सायमित्यस्य एकभोजनमात्रपरत्वम् तेन देशात् पूर्व्वदिने दिवाऽभोजने रात्रिभोजनेऽपि न फलाप्राप्तिः "अहोरात्राद्यन्तयोर्भक्तमेकैकं मध्यतो द्वयम् । उपवासफलप्रेप्सोर्वर्ज्ज्यं भक्तचतुष्टयमिति" वाराहात् ।

उपवासव्रतस्य वैधतया तत्सिद्धेः पूर्व्वखण्ड एव कर्त्तव्यता तन्निरूपणाय प्रतिपदमारभ्य खण्डविशेषनियमनं कालमा० दर्शितं तत्रादौ प्रतिपत्प्रकरणे यथोक्तं तदुच्यते ततो "मार्गशिरे मासि प्रतिपद्यपरेऽहनि । रक्षा गुरुश्चोपवसेन्महादेवं चरन्तु रिति" । ननु पूर्वविद्धायां शुक्लप्रतिपदि योऽयमुपवासो विहितस्तस्य संकल्पः किं प्रातः कार्यः किं वा परत्र, नाद्यः प्रातस्तदभावेन संकल्पायोगात् । अतएव बौधायनः "योयस्य विहितः कालः कर्मणस्तमुपक्रमे । तिथिर्याऽभिमता सा तु कार्या नोपक्रमोज्झितेति" स्कन्दपुराणेऽपि "योयस्य विहितः कालः कर्मणस्तदुपक्रमे । विद्यमानो भवेदङ्गं नोज्झितोपक्रमेण तु" (सन्निपार्थः) । न द्वितीयः प्रातःकालस्यैव संकल्पाङ्गत्वात् तथा च स्मर्यते "प्रातः संकल्पयेद्विद्वानुपवासव्रतादिकमिति" । तथा "प्रातरारभ्य मतिमान् कुर्यान्नक्तव्रतादिकम् । नापराह्णे न मध्याह्ने पित्र्यौ कालौ हि तौ स्मृताविति" । अत्रोच्यते यथोक्तवचनबलात् प्रातरेव संकल्पः कार्यः तदानीं ज्योतिःशास्त्रप्रसिद्धप्रतिपदभावेऽपि स्मृतिभिरापादितायाः प्रतिपदः सत्त्वात् अतएव देवलः "यान्तिथिं समनुप्राप्य अस्तं याति दिवाकरः । तिथिः सा सकला ज्ञेया दानाध्ययनकर्मस्विति" अत्र दानाध्ययनयोरुपवासादिनिखिलदैवोपलक्षणार्थत्वविवक्षया कर्मस्विति बहुवचनं निर्दिष्टम् । अत्रास्तमयात् पूर्व्वं मुहूर्त्तत्रयव्यापिनीं तिथिं समनुप्राप्येति व्याख्येयम् । न तु ततोऽल्पव्याप्तिर्विवक्षिता तथा सति पूर्वोत्तरवेधाभावेनोत्तरतिथेरेव ग्राह्यत्वप्रसङ्गात् तथा च त्रिमुहूर्त्तव्याप्तिः स्कन्दपुराणे दर्शिता । "यान्तिथिं समनुप्राप्य यात्यस्तं पद्मिनीप्रियः । सा तिथिस्तद्दिने प्रोक्ता त्रिमुहूर्त्ता यदा भवेदिति" । शिवरहस्यसौरपुराणयोरपि "यां प्राप्यास्तमुपैत्यर्कः सा चेत् स्यात्त्रिमुहूर्त्तिका । धर्म्मकृत्येषु सर्वेषु संपूर्णां तां विदुर्बुधाः" इति । वृद्धवशिष्ठोऽपि "यस्यान्तिथावस्तमियात् सूर्य्यस्तु त्रिमुहूर्त्तकः । यागदानजपादिभ्यस्तामेवोपक्रमेत् तिथिमिति" । ननु सायन्तनत्रिमुहूर्त्तशुक्लप्रतिपदुपेतायां तिथौ प्रातरेव संकल्प्य प्रतिपदुपवासः कार्य इति युष्मादिवचनमाश्रित्य निर्णीतं तत्तिथिक्षये तथाऽस्तु ह्रासवृद्ध्योस्तु सर्वादि

वाक्यात्परेद्युरुपवासः प्राप्नोतीति चेत् नैवं खर्वादिवाक्यस्यैकोद्दिष्टादिविषयत्वात् तथा च व्यासः "द्वितीयादिकयुग्मानां पूज्यता नियमादिषु। एकोद्दिष्टादि वृद्ध्यादौ ज्ञेयाः वृद्ध्यादि नोदनेति" नियमादिष्वित्यादिशब्देन पितृकर्मव्यतिरिक्तव्रतोपवासादिसकलकर्मणोपग्रहणम्, एकोद्दिष्टादीत्यादिशब्देन विवाहादिमङ्गलाङ्गभूतश्राद्धव्यतिरिक्तपार्वणश्राद्धस्य, वृद्ध्यादावित्यादिशब्देन माङ्गलिकश्राद्धस्य, ज्ञेयावृद्ध्यादीत्यादिशब्देन यथास्तमित्यादिशास्त्रस्य"। पूर्वोक्तवाक्यस्य सामान्यरूपत्वेन परविद्धोपवासविषयतया संकोचनीयत्वादिति तत्रोक्तेर्न पूर्वोक्तादिशास्त्रवैयर्थ्यम्। एतदेवाभिप्रेत्य निगमे श्रूयते। "पूर्वविद्धासु तिथिषु भेषु च श्रवणं विना। उपोष्य विधिवत् कुर्यात्तदन्ते चैव पारणमिति"। भेषु नक्षत्रेषु स्कन्दपुराणेऽपि। "तिथीनामेव सर्वासामुपवासव्रतादिषु। तिथ्यन्ते पारणं कुर्याद्विना शिवचतुर्दशीम्"। अत्रोपवासव्रतादिष्वित्यादिशब्दैकभक्तानक्तायाचितानि गृह्यन्ते। यान्तिथिमुद्दिश्यैतानि पूर्वेद्युर्विहितानि परेद्युस्तत्तिथिभागे समाप्ते पश्चाद्भोजनं कार्यम् अन्यथा पूर्वदिनानुष्ठितैकभक्तादिव्रतानां वैकल्यं स्यादित्यभिप्रायः। अस्य च तिथिभान्तपारणस्यापवादः क्वचित् स्मर्यते। "तिथ्यन्ते चैव भान्ते च पारणं यत्र नोद्यते। यामत्रयोर्द्ध्वगामिन्यां प्रातरेव हि पारणमिति"। तदलाभे उदयगामिन्याः पूज्यता यथाह तत्रैव देवलः। "यां तिथिं समनुप्राप्य उदयं याति भास्करः। सा तिथिः सकला ज्ञेया स्नानदानजपादिषु" इति व्यासोऽपि "उदयन्नेव सविता यां तिथिं प्रतिपद्यते। सा तिथिः सकला ज्ञेया दानाध्ययनकर्मसु" इति। भविष्योत्तरपुराणेऽपि। "व्रतोपवासनियमे घटिकैका यदोदये। सा तिथिः सकला ज्ञेया पित्र्ये चापराह्णिकीति"। पद्मपुराणेऽपि "व्रतोपवासनियमे घटिकैका यदा भवेत्। उदये सा तिथिस्तत्र विपरीता तु पैतृके" इति। स्कान्दपुराणेऽपि "व्रतोपवासस्नानादौ घटिकैका यदा भवेत्। उदये सा तिथिर्ग्राह्या विपरीता तु पैतृके" इति। विष्णुधर्मोत्तरेऽपि व्रतोपवासस्नानादौ घटिकैका यदा भवेत्। उदये सा तिथिर्ग्राह्या श्राद्धादावस्तगामिनी"। बौधायनोऽपि "आदित्योदयवेलायां याऽल्पापि च तिथिर्भवेत् पूर्णा इत्येव सा ज्ञेया प्रभूता नोदयं विनेति" अत्रमा०। "नन्वस्त्वेवं तत्स्नाद्दिवसाभ्यनुज्ञा। तथाप्युदयविद्धायास्तिथेर्ग्रहणे कियत्परिमाणमुदयेऽपेक्षणीयमिति विवेचनीयम्। तत्र बौधायनेनाल्पापीत्यभिधानात् निमेषमात्रं प्रतिभाति। तथा व्यासवाक्येऽपि प्रतिभाति उदयन्नेवेत्यभिधानात्। भविष्यपुराणादिवचनेषु घटिकामात्रं प्रतीयते। वचनान्तरे तु विष्णुधर्मोत्तरबौधायनप्रोक्तं घटिकाचतुष्टयं प्रतिभासते। तथा च पठ्यते। "उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ" द्विमुहूर्त्ता त्रिमुहूर्त्ता सा तिथिर्हव्यकव्ययोरिति"। अस्यार्थः। भानावुदिते सत्युत्तरकालेऽह्नो मुहूर्त्तद्वयं दैवत्यं तस्मिंश्चास्तमिते ततः पूर्वकालीनमह्नो मुहूर्त्तत्रयं पितृदैवत्यम् अतस्तावत्कालव्यापिनी या तिथिर्भवति सैव क्रमेण हव्यकव्ययोर्ग्राह्या भवतीति"। तत्रैवान्यत्र "पौर्वाह्णिकादिवचनेन दैवे पूर्वाह्णव्याप्तायास्त्रिमुहूर्त्तपरिमितायास्तिथेर्ग्रहणं त्रिमुहूर्त्तन्यूनायास्तिथेः पूर्वाह्णव्याप्त्यभावात् पूर्वाह्णस्य पञ्चधा विभक्तस्य मुख्यत्वादुदिते भानौ त्रिमुहूर्त्ता तिथिर्ग्रहीतव्या। यत्तु दक्षेणोक्तं "त्रिमुहूर्त्तापि नोकार्या यात्रिष्युदयगामिनीति" न तत् त्रिमुहूर्त्तव्याप्तेर्बाधकं प्रत्युतोपोद्बलकमेव। तथा हि प्रतिषेधः सर्वत्र प्रसक्तिपूर्वकः प्रसक्तिश्च यथोक्तरीत्या पौर्वाह्णिकवाक्याद्वा त्रिमुहूर्त्तवेधविधायिपैठीनसिवाक्याद्वा भवति तच्च प्रसक्तं त्रिमुहूर्त्तत्वं समतिथौ बाधकाभावात्तथैव व्यवतिष्ठते तिथिक्षये त्वधिकव्याप्तिविवक्षया प्रतिषिध्यते। अतश्च तत्र चतुर्थमुहूर्त्तस्पर्शिनी तिथिर्ग्राह्या तिथिसाम्यवृद्धिद्वावपि मुहूर्त्तत्रयमेव मुख्यं मुहूर्त्तद्वयं त्वनुकल्पः। एतदेव सूचयितुं त्रिमुहूर्त्तापीत्यपिशब्दः पठ्यते। तत्रैव स्थलान्तरे स्मृत्यन्तरे "एकादशी तथा षष्ठी अमावास्या चतुर्थिका। उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुताः"। शिवगीतायाम् दक्षहरिणश्च "द्वितीया पञ्चमी वेधाद्दशमी च त्रयोदशी। चतुर्दशी चोपवासे हन्युः पूर्वोत्तरे तिथी" द्वितीयादयः स्ववेधेन पूर्वामुत्तरां च हन्युरित्याह। तेन प्रतिपद् द्वितीयायुक्ता उपवासे निषिद्धा। "प्रतिपत् सद्वितीया स्याद् -द्वितीया प्रतिपद्युतेति" आपस्तम्बवाक्यं कृष्णप्रतिपद्विषयम् उपवासातिरिक्तदैवकर्मपरं चेति माधवः। उपवासस्याहोरात्रसाध्यत्वेन खण्डतिथौ संपूर्णकालव्याप्त्यसम्भवेन व्याप्तिबाहुल्यं पूर्वविद्धायामेव सम्भवति अह्नोऽपरभागे सकलरात्रौ च तद्व्याप्तेः। "उदये सा तिथिर्ग्राह्येति सामान्यशास्त्रस्य विशेषशास्त्राद्दुर्बलत्वम् ततश्च अपराह्णादित्रिमुहूर्त्तव्यापिन्येव पूर्वविद्धा उपोष्येति माधवमते स्थितम्। रघुनन्दनमते तु "पञ्चमी सप्तमी चैव दशमी च त्रयोदशी।

प्रतिपद्दर्शी चैव कर्त्तव्या सम्मुखी तिथिः”। पैठी० उक्ते: “सम्मुखं नाम सायाह्नव्यापिनी दृश्यते यदा” इतिस्कन्दपुराणोक्तसम्मुख्ययुक्ताया: प्रतिपदोग्राह्यता सायाह्नव्याप्तिश्च मुहूर्त्तान्यूनत्वेन ग्राह्यमिति। उभयदिने तत्प्राप्तौ त्रिसन्ध्यव्यापित्वे तु परैवोपोष्या “त्रिसन्ध्यव्यापिनी या तु सैव पूज्या सदा तिथिः। न तत्र युग्मादरणमन्यत्र हरिवासरादि”ति” पराशरवाक्येन तदपवादः एतच्च जयन्तीशिवरात्र्यादि विशेषेतरपरमिति ति० त० तेनोक्तम्। अत्र प्रागुक्तविशेषवचनानुसारिमाधवमतमेव न्याय्यः। गौड़ादृतमपि रघुनन्दनमतन्तु सामान्यशास्त्रानुसारित्वाद् दुर्बलमिति सुधीभिरपक्षपातिभिर्विवेच्यम्।

अन्यासु तिथिषु व्यवस्था तु तत एवावगन्तव्या दिङ्मात्रमिह दर्शितम् तिथिशब्दे विवृतिः। उपवासे दीयते कार्यं वा व्युष्टा० अण्। औपवास तत्र देये तत्र कार्ये च त्रि०। तस्मै प्रभवति विभुक्ता० ठञ्। औपवासिक तस्मै पर्याप्ते त्रि०।

उपवासक त्रि० उप+वस–ण्वुल्। १अनाहारकारिणि। उपवासे हितम् कन्। २व्रतभेदे त्रि० “नैव यज्ञक्रियाः काश्चिन्न श्राद्धं नोपवासकम्” भा० २०४ अ०।

उपवासन न० उप+वास–उपसेवायाम् भावे ल्युट्। उपसेवने। “यदा तन्ध्याग्न्याधाने यद्दोपवासने कृतम्” अथ० १४,२,६२।

उपवासिन् त्रि० उप+वस–णिनि। अनाहारकर्त्तरि “दिनोपवासी तु निशामिषाशी जटाधरः सन् कुलटाभिलाषी” हास्यार्णवः “त्रिमासैर्हंससंयुक्तैर्यान्ति मासोपवासिनः” भा० व० १९९ अ०।

उपवाहन न० उप+वह–णिच्–भावे ल्युट्। समीपनयने।

उपवाह्य पु० उप उत्कर्षे प्रा० स०। राजवाह्यहस्तिनि हेम०

उपविद् स्त्री उप+विन्दते: वेत्तेर्वा सम्प० क्विप्। १उपक्रमे प्राप्तौ २ज्ञाने च “उपविदा वह्निर्विन्दते वसु” ऋ० ८,२३,३। “उपविदा उपवेदनेनैते हवींषि देवार्थं न प्रयच्छन्तीत्येतज्ज्ञानेन” भा०। कर्त्तरि क्विप्। ३प्रापरि ४बोद्धरि च त्रि०।

उपविन्दु पु० उपगतो विन्दुम् अत्या० स०। राजभेदे तस्यापत्यम् बाह्वा० इञ्। औपविन्दवि तदपत्ये पुंस्त्री०।

उपविष पु० उपमितं विषेण व्या० स०। “अर्कक्षीरं स्नुहीक्षीरं तथैव कलिहारिका। धत्तूर: करवीरश्च पञ्च चोपविषाः स्मृता:” इत्युक्तेषु १अर्कक्षीरादिषु २कृत्रिमविष न० हेम०। ३अतिविषायां (आतइच्) स्त्री।

उपविष्ट त्रि० उप+विश–कर्त्तरि क्त। कृतोपवेशने “उपविष्टहोमाः स्वाहाकारप्रदाना जुहोतयः” कात्या० १,२,७,।

उपवीणि वीणया उपगायति उप+वीणा+णिच् नामधातुः सक० उभ० सेट्। उपवीणयति ते उपाविवीणत् त। उपवीणयाम् बभूव आस चकार चक्रे उपवीणित: “श्रितगोकर्णनिकेतमीश्वरम् उपवीणयितुं ययौ रवेरुदयावृत्तिपथेन नारदः” रघुः।

उपवीत न० उप+व्ये–क्त स० प्र०। वहिर्भूतदक्षिणहस्ततया वामांसस्थापिते कार्पासादि १यज्ञसूत्रे। तच्च त्रिगुणीकृतस्य सूत्रस्य पुनस्त्रैगुण्ये भवति यथाह छन्दो०-प० “ऊर्द्ध्वं तु त्रिवृतं कार्य्यं तन्तुत्रयमधोवृतम्। त्रिवृतञ्चोपवीतं स्यात् तस्यैकोग्रन्थिरिष्यते”। तथा च प्रथमं ऊर्द्ध्वावर्त्तनेन सूत्रत्रयमेकीकृत्य पुनस्तथाभूतसूत्रत्रयस्याधआवर्त्तनेन नवसूत्रात्मकमेकत्र पिण्डीकृतं भवति तच्च पुनस्त्रिवृतमसंहृतरूपेण पिण्डीकृतमेकग्रन्थियुक्तमेकमुपवीतं भवति। व्यक्तमाह देवल: “यज्ञोपवीतकं कुर्य्यात् सूत्राणि नव तन्तवः” इति। यद्द्वयमेव सर्व्वदा धार्य्यमुत्तरीयवस्त्राभावे तु तन्त्रितयं धार्य्यम् “यज्ञोपवीते द्वे धार्य्ये श्रौते स्मार्त्ते च कर्म्मणि। तृतीयमुत्तरीयार्थं वस्त्राभावेऽतिदिश्यते” आ० त० स्मृतेः। तद्ग्रन्थिश्च सावित्रीमन्त्रेण कार्य्यः “सावित्रीग्रन्थिसंयुक्तमुपवीतं तवाच्युत” विष्णुपूजने ब्रह्मपुराणात् “लौकिकास्तु सावित्रीग्रन्थिःप्रवरसंख्यावेष्टितग्रन्थिरित्याहुः” आ० त० रघु० अत्र सावित्रीग्रन्थिरित्युक्तेः देवपूजादौ सावित्रीग्रन्थिः देवान्यत्र सावित्रीग्रन्थि ब्रह्मग्रन्थिर्वेति शाखाभेदाद्व्यवस्था। तत्सूत्रभेदश्च मनुना वर्णभेदेन उक्तः “कार्पासमुपवीतं स्यात् विप्रस्योर्द्ध्ववृतं त्रिवृत्। शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम्”। “ऊर्द्ध्ववृतं दक्षिणावर्त्तितम्” कुल्लू०। इदञ्चोपनयनकाले उत्तरकाले तु सर्वेषामेव कार्पासमयमिति भेदः। स्त्रीणान्तु यथेच्छसूत्रमयम् अत एव माघे “विहङ्गराजाङ्गरुहैरिवायतैर्हिरण्मयोर्वीरुहवल्लितन्तुभिः। कृतोपवीतं हिमशुभ्रमुच्चकै:” “मुक्तायज्ञोपवीतानि बिभ्रतो हैमवल्कलाः” कुमारे च वर्णितम्।

यद्यप्युपनयनप्रकरणे उपवीतधारणं गृह्यसूत्रादौ न विहितं तथापि प्रागुक्तमद्वचने “मेखलामजिनं दण्डमुपवीतं कमण्डलुम्। अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मन्त्रवत्” इति मनुवचने समन्त्रकधारणविधानात् “सदोपवीतिना भाव्य

मिति श्रुतेः “दण्डाजिनोपवीतञ्च मेखलाञ्चैव धारयेत्” वाम० वाक्यात् “पवित्रं चार्थे प्रयच्छतीति” जातूकर्ण्यवाक्यात् तद्धारणमवश्यं कार्य्यमिति गम्यते। किञ्च स्मृतिसूत्रकारैश्चापि कर्मविशेषे यज्ञोपवीतधारणनियमोऽभिहितः “यज्ञोपवीतशौचे च” आश्व० गृ० १,१,१० “मातुपर्कदव्यतिरिक्ते कर्ममात्रे उपवीतधारणनियमः” ना० वृ०। “यज्ञोपवीतिना आचान्तेन कर्म्मेति” गोभिलसूत्रे च तथा नियम्यते। “यज्ञोपवीतमसि यज्ञस्य त्वोपवीतेनोपनह्यामि” मन्त्रभाषाश्रुतमन्त्रलिङ्गात् “यज्ञोपवीतिनं कुर्यादिति” कात्यायनसूत्राच्च “वैणवीं धारयेद्यष्टिं सोदकञ्च कमण्डलुम्। यज्ञोपवीतं वेदञ्च शुभे रौक्मे च कुण्डले” इति मानवाच्च तद्धारणविधिः। “यज्ञोपवीतं परमं पवित्रम् बृहस्पतेर्यत् सहजं पुरस्तात्। आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः” इति मन्त्रोक्तफलमेव तद्धारणे ज्ञेयम्। तथाभूते २वस्त्रे च

न केवलं यज्ञसूत्रस्यैव तथात्वं तथाविवेशितस्य वस्त्रस्यापि तथात्वम् “दक्षिणं बाहुमुद्धृत्य शिरोऽवधाय सव्येऽंसे प्रतिष्ठापयति दक्षिणं कक्षमवलम्बनं भवति एवं यज्ञोपवीती भवति सव्यं बाहुमुद्धृत्य शिरोऽवधाय दक्षिणेऽंसे प्रतिष्ठापयति सव्यं कक्षमवलम्बनं भवत्येवं प्राचीनावीती भवति, निवीती कण्ठसज्जन इति” गोभिलेन सामान्यतोऽभिधानात् “शिरोऽवधाय दक्षिणादिपाणावधृते कण्ठादेव सज्जने ऋजुप्रालम्बे यज्ञसूत्रे वस्त्रे च निवीती भवति” कुल्लू०उक्तेः मनुना “उद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः। सव्ये तु प्राचीनावीती निवीती कण्ठसज्जने” इति सामान्यतोऽभिधानाच्च। उपवीतमस्यास्ति इनि। उपवीतिन् तथाविधविवेशितसूत्रवस्त्रधारिणि। उपवीतस्य वस्त्रादिसंनिवेशविशेषरूपस्य प्राकरणिकाङ्गता मीमांसायां ३अ० १पादे निर्णीता यथा “दर्शपौर्णमासयोः ७। इमाङ्गत्वाहुवाक्ययोः सामधेन्य उक्ता नवमे निविदः दशमे याज्याः सामधेनीकल्पाः, एकादशे यज्ञोपवीतमाम्नातम्। ‘उपव्ययते देवलक्ष्मैव तत् कुरुते’ इति श्रुतिवाक्यार्थस्य उपवीतं सामधेनीनां प्रकरणे निहतेऽनिहते वा इति सन्देहे सामधेनीप्रकरणमनिहतं तत्र उपवीतं समाम्नातमिति कुतः? याज्यानां सामधेनीवत्सामान्यार्थवचनात् सूदयनस्तुविपरिवर्त्तमानाश्च सामधेनीषु उपवीतमाम्नातमस्ति कर्त्तुं च वाचो विप्रावहानं गुणो भवति उपवीतं नाम, किं कुर्वता तत्कर्त्तव्यमिति?

भवति तत्र पदार्थाकाङ्क्षा तत्र शुश्रौ सन्निहितेनाविप्रकृष्टेन सामधेनीवाक्येन एकवाक्यतामुपगम्य सामधेनीषु उपवीतम् उपव्ययते इति मन्त्रोविदधाति इति गम्यते इति पूर्वपक्षः। सिद्धान्ते तु निविदा व्यवधानात् दूरत्वात् विप्रकृष्टत्वाच्च वाक्यभेदभिया च न सामधेनीभिः सहैकवाक्यतोपवीतस्य, तस्मात् दर्शादिप्रकरणे यदनुष्ठेयं तदुपवीतिना कार्य्यम् इति”। श्रुतौ उपव्ययते इति श्रवणात् उपपूर्वकात् व्येञ एव रूपमुपवीतमिति तु न्याय्यमित्यनुसन्धेयम्। यजधातुरूपोक्तिः श्रुत्यदर्शनात् प्रामादिकी।

उपबृंहित त्रि० उप+बृन्ह–णिच्–कर्म्मणि क्त। १वर्द्धिते बहुलं करोति बहुल+णिच्–बृंहादेशे क्त। २बहुलीकृते बलार्थे बर्म्हादिरयमिति भेदः।

उपवेणा स्त्री उपगता वेणाम् अत्या०स०। नदीभेदे “वेणोपवेणा भीमा च वडवा चैव भारत” भा०व०२२१ अ०।

उपवेद पु० उपमितः वेदेन अत्या०स०। वेदतुल्ये आयुर्वेदादौ। स च वेदभेदेन चतुर्धा “तत्रर्ग्वेदस्यायुर्वेद उपवेदः, यजुर्वेदस्य धनुर्वेदः, सामवेदस्य गान्धर्ववेदः, अथर्ववेदस्य शस्त्रशास्त्राणीति” शौनकोक्तचरणव्यूहोक्तदिशावसेयः। भावप्रकाशमते तु “विधाताथर्वसर्वस्वमायुर्वेदं प्रकाशयन्” इत्युक्तेः अथर्ववेदोपवेदत्वमायुर्वेदस्येति भेदः। अतएव सुश्रुते “इह खल्वायुर्वेदोनाम यदुपाङ्गमथर्ववेदस्येत्युक्तम्”

उपवेश पु० उप+विश–भावे घञ्। (वसा) १स्थितौ “प्रातः सवने जुहोति संवेशायोपवेशाय गायत्र्यै छन्दसेऽभिभूत्यै स्वाहा” कात्या०२५,४ १६, उपमितोवेशेन अत्या०स०। आहार्यरूपवेशतुल्ये २वेशे। तेन जीवति वेतनादि०ठञ्। औपवेशिक तेनोपजीविनि त्रि०स्त्रियां ङीप्।

उपवेशन न० उप+विश–भावे ल्युट्। (वसा) १आसने “प्रायोपवेशनमतिर्न्नृपतिर्बभूव” रघुः। “अभ्यासितमरुज्वला” रघुव्या० “पश्चादुपवेशनेनोपसेवितम्” मल्लि०। “प्रादेशोपवेशने” आश्व०श्रौ०४,८,२, “ब्रह्मोपवेशने विनियोगः” भवदेवः णिच्–भावे ल्युट्। निवेशने २स्थापने च

उपवेशि पु० उप+विश–इन्। यजुर्वेदसम्प्रदायप्रवर्त्तके ऋषिभेदे “अरुणादरुण उपवेशेरुपवेशिः” शत०ब्रा०१४,९,४,३३, वंशवर्णने उक्तम्। [प्रविष्टे।

उपवेशिन् त्रि० उप+विश–णिनि। उपवेशनकर्त्तरि उ-

उपवेष पु० उप+विष–करणे घञ्। अङ्गारविभजनार्थे काष्ठे “स उपवेषमादत्ते धृष्टिरसीति” शत०ब्रा० १,२,१२, अङ्गारविभजनार्थे काष्ठविशेष उपवेषः” भा० अङ्गारविभजनार्थः प्रा-

देशमात्रो वा तत्करणप्रकार: "मूलादुपवेशं करोति" का० ४,१,१२, दर्शित: "प्रथमं तूष्णीं शाखामूलमरत्निप्रमाणा-धिकप्रमाणं छित्त्वा पृथक् कार्यं ततस्तस्मादुपवेशं क-रोति उपवेशश्चारत्निमात्र: प्रादेशमात्रो वा पराशरोक्त:" कर्क: । स च हस्ताकृति: "धृष्टिरसीत्युपवेशमादायापाम्न इत्यङ्गारान् प्राच: करोति" कात्या० २,४,२६, व्या० उप-वेशोऽङ्गारापोहनसमर्थं हस्ताकृति काष्ठम्" कर्कोक्ते: "हृता-वभिवासयति भस्मना वेदेनोपवेशेन वा" कात्या० २,५,२५,

उपवैणव न० उपवेणु—अण् उत्तरपदवृद्धि: । त्रिसन्ध्ये हेम०

उपव्याख्यान न० उप+वि+आ+ख्या—ल्युट् । फलमाहात्म्यो-पासनप्रकारादिकथने । "ओमित्युद्गायति तस्योपव्या-ख्यानम्" छा० उ० "तस्याक्षरस्योपव्याख्यानम् एवमुपास-नम्, एवं विभूति, एवं फलमित्यादिकथनम्" शा० भा० । "आदित्यो ब्रह्मेत्यादेशस्तस्योपव्याख्यानम्" "ओमित्ये तदक्षरं सर्वं तस्योपव्याख्यानम्" इति च छा० उ० ।

उपव्याघ्र पु० उपमितो व्याघ्रेण अवा० स० । १व्याघ्रतुल्ये मृगा-न्तके (चिताबाघ) चित्रकाख्ये पशुभेदे । सामीप्ये अव्ययी० । २व्याघ्रसमीपे अव्य० ।

उपव्युषस अव्य० विगता उषा: व्युषा: प्रा० स० तत: विभक्त्यर्थे सामीप्ये वा अव्ययी० अच् समा० । विगतायामुष-सीत्यर्थे "उपव्युषसं सशरीरा दक्षिणा गच्छन्ति" कात्या० २१,३,१२, "उषसि विगच्छन्त्याम्" कर्क: । २विगच्छन्त्या उषस: समीपे च ।

उपशम पु० उप+शम—घञ् अवृद्धि: । १इन्द्रियाणां निग्रहे २तृष्णानाशे, ३रोगोपद्रवशान्तौ च । "तेषां पैत्तिका-नां व्याधीनामुपशमो हेमन्ते, श्लैष्मिकाणां, निदाघे वाति-कानां घनात्यये स्वभावत एव त एते सञ्चयप्रकोपोप शमा:" "तत्कालमेव शतोषण: प्रकृतस्योपशमार्थम्" इति च सुश्रु० । ४निवृत्तौ "जगत्युपशमं याते नष्टशत्रौ-स्वराकुले" भा० व० २० अ० ।

उपशमन न० उप+शम—भावे ल्युट् । उपशमार्थे "व्याधीना मुपशमनार्थम्" सुश्रु० । उप+शम—णिच्—ल्युट् । अवृ-द्धि: २निवारणे । तस्मै हितम् छ । उपशमनीय रोग-शान्तिहेतौ आयुर्वेदे । कर्म्मणि अनीयर् । निवारणीये । "कटुकौषधिशमनीयस्य" सा० द० ।

उपशय पु० उप+शी—अच् । १समीपशयने । "हेतुव्याधिविप-र्य्यासविपर्य्यस्तार्थकारिणाम् । औषधान्नविहाराणा मुपयोगं सुखावहम् । विद्यादुपशयं व्याधे: स हि सात्म्य-मिति स्मृत:" इति निदानोक्ते व्याधिहेतुविपरीतौषधा-दित: २सुखावहोपयोगे । शय: हस्त: तस्मिन् तत्सामीप्ये वा अव्ययी० । ३हस्ते इत्यर्थे ४हस्तसमीपे च अव्य० ।

उपशरद् अव्य० विभक्त्यर्थे सामीप्ये वा अव्ययी० अच् समा० । १शरदि इत्यर्थे २शरत्समीपे च

उपशल्य न० उपगतं शल्यम् अस्थिस्थानं (भागाड़) अत्या० स० । ग्रामान्ते "क्रमेण विशालोपशल्ये कमप्याक्रीडमासाद्य" दशकुमा० । "उपशल्यनिविष्टैस्तै:" "अथोपशल्ये रिपुमग्नशल्य:" रघु: । उपचारात् २प्रान्तभागे च । "शै-लोपशल्यनिपतद्रथनेमिधारा" इति माघ: ।

उपशान्ति स्त्री उप+शम—क्तिन् । निवृत्तौ उपशमे । "बल-मार्त्तभयोपशान्तये" रघु: "वेदनोपशान्तिररुक्प्रसादो-मार्द्दवञ्च" सुश्रु० । ["निशोपशाय: कर्त्तव्य:" भट्टि: ।

उपशाय पु० उप+शी—घञ् । यामिकभटानां पर्य्यायेण शयने ।

उपशायिन् त्रि० उप+शी—णिनि । समीपशयनशीले "ब्र-ह्मचार्य्यग्निनित्यधारी क्षीरहोम्यग्निमुपशायी द्वादशरात्रं षड्रात्रं त्रिरात्रमन्तत:" कात्या० ४,१०,१६, अग्निमुपशायी अग्निसमीप एव भूमिशय:" कर्क: । शीलार्थत्वात् नात्र कर्म्मणि षष्ठी । "आहूताध्यायी गुरुकर्म्मस्वचोद्य: पूर्व्वोत्थायी चरमं चोपशायी । मृदुर्दान्तो धृतिमानप्रमत्त: स्वाध्यायशील: सिध्यति ब्रह्मचारी" भा० आ० ९१ अ०

उपशिक्षा स्त्री उप+शिक्ष—अ । सम्यक्शिक्षणे "उपशिक्षाया अभिप्रश्निनम्" यजु० ३०,१०, ल्युट् । उपशिक्षण तत्रार्थे न०

उपशिङ्घन न० उप+शिघि—आघ्राणे ल्युट् । १आघ्राणे । णिच्—ल्युट् । २आघ्रापणव्यापारे च । (शोंखान) "तीक्ष्णा-ञ्जनावपीडाभ्यां तीक्ष्णगन्धोपशिङ्घनै: । वर्त्तिप्रयोगैरथ वा अवशक्तिं प्रवर्त्तयेत्" सुश्रु० । तत्र सिङ्घनै: शिंघनैरिति वा पाठ: प्रामादिक: गणपाठे शिघिधातोरेव पाठात् सिघिधातोर्दन्त्यशिङ्घधातोश्चाभावात्‌ ।

उपशिष्य पु० उपगत: शिष्यम् अत्या० स० । शिष्यशिष्ये "स्वत:प्रमाणं परत:प्रमाणं शुकाङ्गना यत्र समुद्गिरन्ति । शिष्योपशिष्यैरुपगीयमानमवेहि तन्मण्डनमिश्रधाम" उद्भ०

उपशुन अव्य० शुनि, तस्य समीपे वा अव्ययी० अच् समा० । १कुक्कुर इत्यर्थे २कुक्कुरस्य सामीप्ये वा ।

उपशोभ स्त्री उपगता शोभां सादृश्येन अत्या० स० । आरो-पितशोभायाम् "विहितोपशोभमुपयाति माधवे" माघ: ।

उपशोषण न० उप+शुष—णिच्—ल्युट् । १शोषणसाधने व्या-पारे । उपशोषयति कर्त्तरि ल्यु । २तत्कारके त्रि०

(कटुकः) "विष्ठ लक्रोद्मेदोऽश्वापथ्योपशोषणश्चेति" (कषायः) "क्लेदोपशोषणश्चेति सुश्रु०। शोषणश्चान्तः-स्थितजलादेर्वातोष्मादिना नाशनम्।

उपश्रुत् पु० श्रूयते श्रु+कर्म० क्विप् श्रुत् स्तुतिः उपगता स्तुद् य सात्। यज्ञे "आ नायातमुपश्रुत्यश्विना ऋ० ८, ८, ५, "उपश्रुति यज्ञे" भा०

उपश्रुति स्त्री उप+श्रु—क्तिन्। १समीपश्रवणे "सुश्रुतिश्च मोपश्रुतिश्च मा हासिष्टाम्" अथ० १६,२,५, "सोमपा गिरामुपश्रुतिः" ऋ०१,१०,३, "उपश्रुतिः समीपे श्रवणम्" भा० श्रुतिः श्रवणम् समीपे अव्ययी०। २श्रवणसमीपे "आ नोयाहुपश्रुत्युक्थेषु" ऋ० ८,३४,११, उपश्रुति श्रवणसमीपमायाहि" भा० "नक्तं निर्गत्य यत्किञ्चित् शुभाशुभकरं वचः। श्रूयते तद्विदुर्धीरा देवप्रश्नमुपश्रुतिम्" हारावल्युक्ते ३देवं प्रति कृतशुभाशुभप्रश्नस्य तदाविष्टबाला-दिभिरुदाहृते उत्तरवाक्ये च "परिजनोऽपि चास्याः सतत-मुपश्रुत्यै निर्जगाम" काद०। उपश्रुतिश्रवणप्रकारश्च विधा-नपा०यात्राकाण्डे दर्शितो यथा "उपश्रुतौ विधानं तु यथा कार्यं फलार्थिना। स्नातव्या यत्नकर्मान्ते सा पौरमुखजा ह्रदैः। अन्त्यजानां गृहे वाक्यं पूर्वरात्रे यदुच्यते। स्त्रिया वा बालकैर्वापि तथा सुप्तैः परस्परम्। विचार्य तद्वच-स्तस्मादेष्टव्यं फलं बुधैः। निर्णेजकालये पश्येत् प्रतिपद्येव बुद्धिमान्। मद्यकृत्सदने पश्येत् द्वितीयायां न संशयः। तैलविक्रयिणो गेहे पुक्कसस्य तथालये। लौहकृत्सदने चैव किंशुकानां गृहे तथा। मद्यकारिगृहे चैव तथा वैश्य-गृहेऽपि च। योगिजातिकुले पश्येत्तथा पौष्कसगेहके। चिन्दोलकगृहे पश्येत् कुम्भकारगृहे तथा। स्वर्णकारालये चैव कापालिकद्विजन्मनोः। तृतीयादितिथौ ज्ञेया क्रमे-णोपश्रुतिर्भवेत्। अमायां शूद्रजातीनां गृहे पश्येदुपश्रु-तिम्"। पश्येत् शुभाशुभमालोचयेत्। तत्र क्रमश्च। "उपास्य पश्चिमां सन्ध्यां चरत्वात्महितं सुधीः। स्वस्तिवाच्य द्विजान् गच्छेद्वहुधान्यैर्मुदान्वितः। चन्द-नेनानुलिप्ताङ्गः श्वेतमाल्यधरः शुचिः। श्वेतवस्त्रसमायुक्तो घृतश्वेतविभूषणः। अक्षतानञ्जलौ धृत्वा मन्त्रे-णानेन मान्त्रितान्। ओं ऐँ ह्रीँ श्रीँ महादेवि! महादेवस्य वल्लभे!। विमोहय जनान् सर्वान् ममात्र वश-गान् कुरु। वस्त्रेण वहनेत्रः समीपतेऽन्येन तद्गृहम्। गृहोपरि परिक्षिप्य मुक्तनेत्रः श्रुतिर्भवेत्"। "तद्गृहे म-नुष्यशब्दान् यदि शृणुयात्। तच्छुभमशुभं वा विचार्यादे-श्यम्। तेषु शब्देषु कतरान्वर्जयित्वान्यशब्दादिवर्णाः श्रेष्ठाः। प्रयाहि गृहाण गच्छ भवति अत्रार्जनार्थी दाना-र्थी लाभार्थी; साधुशब्दाः प्रशस्ताः तेष्वपि काकर्था दुष्टाः न याहि न गच्छ नास्ति भवत्यर्थी अयानशब्दाश्च गमने दुष्टाः तच्छब्दान् शृण्वन् यात्रां निवर्त्तयेत्। अत्युत्कटकार्ये तु द्विराचम्य कुलदेवतां संस्मृत्य मुहूर्त्तं तिष्ठन् गच्छेत्। वैन्यं पृथुं हैहयमित्यादि पठन् पुनरपि निषिद्धप्रयाण-श्चेत् भूतादिभिस्तदा सिद्धिविनायकव्रतोपयाचितं संकल्प्य गच्छेत्। तत्रापि निषिद्धश्चेन्न गच्छेदेव" वि०पा०।

उपश्लेष पु० उप ईषदर्थे एकदेशेन श्लेषः संबन्धः। आधारा-धेययोरेकदेशसंबन्धे। यथा गृहघटयोः। उपश्लेषे साधु० ठक्। औपश्लेषिक आधारभेदे "औपश्लेषिको वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा" सि०कौ०। भावे ल्युट्। उपश्लेषण तत्रैव न० "कृत्याधानमुपश्लेषणम्" सि०कौ०।

उपश्लोकि श्लोकैरुपस्तौति उप+श्लोक+णिच् नामधातुः उभ०सक० सेट्। उपश्लोकयति-ते उपाशुश्लोकत्-त उ-पश्लोकयाम्-बभूव-आस-चकार चक्रे उपश्लोकयन् उपश्लो-कितः उपश्लोकयितुम् उपश्लोकनम्।

उपष्टम्भ पु० उप+स्तम्भ-घञ् वा०षत्वम्। १पतनप्रतिरोधे (थामान) २आलम्बने ३आडम्बरे च स्वार्थे कन्। तत्रार्थे ४आधिक्ये च। उपस्तम्भादि त्वुक्तम्। उपष्टम्भक पतन प्रतिरोधके, स्त्रियां न० "सर्व एव हिमवारोऽन्तःप्राणः उपष्टम्भकः" छ०उ० "उपष्टम्भकः गृहस्येव स्तम्भादि-लक्षणः" भा०।

उपष्टुत् त्रि० उप+स्तु-कर्मणि क्विप् वा०षत्वम्। उपस्तूयमाने "यचोव स्तश्वा उपष्टुत्" ऋ० ८,८७,८,

उपसं(सङ्)क्रमण न० उप+सम्+क्रम-भावे ल्युट् वा कः। १सन्निवेशे कस्यचित् वस्तुनः पूर्वाधारत्यागेन समीपस्थित-वस्तुनि संक्रमणे "सविशेषणे हि विधिनिषेधौ विशेषण-मुपसंक्रामतः सति विशेष्ये बाधे" इत्यादौ विशिष्टे विधि-निषेधबाधे तद्धर्मविशेषणे उपसंक्रमणं भवतीत्युक्तं यथा शिखी विनष्टः पुरुषो न नष्ट इत्यत्र विशेषणाभूतशिखा-यामेव नाशस्योपसंक्रमणम्। उपसंक्रमणे दीयते कार्यं वा व्युष्टा०अण्। औपसंक्रमण तत्र देये कार्ये त्रि०। स्त्रियां ङीप्।

उपसं(सङ्)ग्रह पु० उपसंगृह्यते पादावत्र उप+सम्-ग्रह-आधारे अप् वा कः। १पादग्रहणपूर्वकमभिवादने उपसं-गृह्यतेऽनेन करणे अप्। २उपकरणे "उपातिष्ठत मेघाः

पर्य्यङ्के सोपसंग्रहे" भा० वि० १७अ०। भावे अच्। २सम्यक् संग्रहे "बलानामुपसंग्रहः" रामा०

उपसं(सङ्ग्र)ग्रहण न० उप+सम्+ग्रह–आधारे ल्युट् वा ङः। पादग्रहणपूर्वकप्रणामे "उपसंग्रहणं कृत्वा द्रोणाय स विशांपते।" भा० द्रो० ७४अ० "व्यत्यस्तपाणिना कार्य्यमुपसंग्रहणं गुरोः" मनुः। २सम्यक् संग्रहणे च।

उपसं(सङ्ग्रा)ग्राह्य त्रि० उप+सम्+ग्रह–कर्मणि ण्यत् वा ङः। पादग्रहणेन अभिवाद्ये "भ्रातुर्भार्य्योपसंग्राह्या सवर्णाऽहन्यहन्यपि। विप्रोष्य तूपसंग्राह्या ज्ञातिसम्बन्धियोषितः" मनुः। [२सम्यग्नियमे ३बन्धने च।

उपसंयम पु० उप+सम्+यम–घञ् अवृद्धिः। १उपसंहारे।

उपसंयमन न० उप+सम्+यम-णिच् ल्युट्। १सम्यग्बन्धने करणे ल्युट्। २तत्साधने।

उपसंयोग पु० सामीप्येन संयोगः। समीपसंबन्धे। "नामाख्यातयोस्तु कर्म्मोपसंयोगद्योतका भवन्ति उपसर्गाः" व्या०

उपसंरोह पु० उपगतः संरोहः प्रा०स०। समीपप्ररोहे "मध्यमार्गानुपसंरोहः" सुश्रु०।

उपसंवाद पु० उपेत्य अङ्गीकृत्य संवादो वदनम्। पणबन्धे नाङ्गीकारपूर्ब्बककथने "उपसंवादाशङ्कयोश्च" पा०। "उपसंवादः पणबन्धः" सि०कौ०। स च "यदि भवानिदं कुर्य्यात् तर्हि इदमहं ते दास्यामीत्येवं वाक्यरूपः।

उपसंव्यान न० उपसंवीयतेऽनेन उप+सम्+व्येञ्–संवृतौ करणे ल्युट्। परिधानवस्त्रे "अन्तरं बहिर्योगोपसंव्यानयोः" पा०।

उपसंहार पु० उप+सम्+हृ–घञ्। १समाप्तौ, स च ग्रन्थतात्पर्य्यावधारकलिङ्गभेदः "उपक्रमोपसंहारौ–हेतुस्तात्पर्य्यनिर्णये, इत्युक्तेः। तत्रोभयोरेव तद्धेतुत्वं न तु प्रत्येकमेतत्युक्तमुपक्रमपदे। २संग्रहे च। ३सम्यग्हरणे ४प्रक्रान्तार्थस्यान्यत्रान्यथार्थत्वप्रक्षेपे यथा गुणोपसंहारः। तच्छब्दे विवृतिः। ५साकल्येन सम्बन्धे "सर्वोपसंहारवत्या व्याप्तेर्दुर्ज्ञानत्वात्" सर्व०स०।

उपसंहारिन् त्रि० उप+सम्+हृ–णिनि। १उपसंहारके साकल्येन सम्बन्धेन व्याप्ते अनुपसंहारिशब्दे उदा०।

उपसङ्ख्यान न० उपरि सूत्रोक्तादतिरिक्तार्थः संख्यायते अनेन उप+सम्+ख्या–करणे–ल्युट्। सूत्रानुक्तस्यार्थस्य वार्त्तिकादिभिः कथने वाक्यभेदे। "प्रकृत्यादिभ्य उपसंख्यानमित्यादि" वार्त्तिके भूरिप्रयोगः। "इष्टुप्रपसंख्याननैरपेक्ष्येण" २,११२, माघव्या० मल्लिनाथः।

उपसत्ति स्त्री उप+सद–भावे क्तिन्। १नैकट्येन सम्बन्धे २आनुगत्ये ३सम्बन्धमात्रे च। करणे क्तिन्। ४सेवायाम् मेदि०।

उपसत्तृ त्रि० उप+सद–तृच्। १आसन्ने निकटस्थिते २अनुगते ३सेवके च। "मा च रिषदुपसत्ता ते अग्ने!" "वयमग्ने तवमस्तु तुभ्यमुपसत्ता" यजु० २७.२.४, उपसत्ता सेवकः वेददी०।

उपसद् त्रि० उपसीदति उप+सद–क्विप्। १समीपस्थिते। "प्रजाभ्यो वायोपसदम्" यजु० २०,९, करणे क्विप्। २इष्टिभेदे स्त्री। सा चेष्टिः "अथोपसद्" आश्व०श्रौ० ४,८,१, आरभ्य "पाञ्चोपसदः" इत्यन्तेषु ११सूत्रेषु उक्ता द्रष्टव्या। "अथोपसद्भिः प्रचरति" "यदोपसद्भिः प्रचरति अथैतानि हवींषि निर्वपति आग्नेयमष्टाकपालं पुरोडाशं सौम्यं चरुं वैष्णवं त्रिकपालं वा पुरोडाशं चरुं वा तेन यथेष्ट्यैवं यजते। तदु तथा न कुर्य्यात् ह्वलति वा एष यो यज्ञपथादेत्येति वा एष यज्ञपथाद्य उपसत्पथादेति तस्मादुपसत्पथादेव नेयात्" शत० ५,४,५,१६, "अथ दशमेऽह्नि तं मध्यन्दिने स्थापितं सोममाहृत्यासन्द्यामासाद्यातिथ्यया प्रचरेयुः तदनन्तरमुपसद्यागः तत्राग्निसोमविष्णुदेवताकोपसत्प्रतिनिधित्वेन संसृष्टयागसम्बन्धिनामुक्तानां त्रयाणामाग्नेयसौम्यवैष्णवानामेव निर्वापं पूर्वपक्षयति यदोपसद्भिरिति। तेन यथेष्टीति एकैकोपसत्स्थाने तेन एकेन हविषा यथेष्टि इष्टितन्त्रेण कुर्य्यात् उपसत्त्वयार्थमेतद्धविस्त्रयं कर्त्तव्यमिति शाखान्तरीयः पक्षः तमिमं निराकरोति तदु तथेति। नेयात् न प्रच्युतो भवेत् तत उपसदः पृथक् कुर्य्यात् तदन्त एतानि संसृष्टानि हवींषि चेष्टितन्त्रेण पृथक् कुर्य्यात् स एव दशमेवः ऋतः सप्तदशस्तोमसाध्योऽग्निष्टोमसंस्थो भवति" भा०। "उपसद्भिश्चरित्वा मासमेकमग्निहोत्रं जुहोति" श्रुतिः। "रूपमुपसदामेतत्तिस्रो रात्रीः" यजु० १९,१४, "उपसत्सु रौहिणौ कुर्य्यात्" कात्या० ४,६,४४, "उपांशूपसदः" ७,२,२२,। ज्योतिष्टोमे ३प्रवर्ग्याङ्गप्रविशायामिष्टौ ४गार्हपत्यादिभिन्नेऽग्नौ च। "गार्हपत्योदक्षिणाग्निस्तथैवाहवनीयकः। एतेऽग्नयस्त्रयो मुख्याः शेषाश्चोपसदस्त्रयः" अग्नि पु० गणभेदनामाध्याये। उपसद् तन्नामकोऽस्त्यस्मिन् विधक्षा० अण्। औपसद तच्छब्दयुक्ते अध्याये अनुवाके च पु०।

उपसद पु० उपसीदत्यस्मिन् उप+सद–घ वा० घञर्थे क। उपसद्यागे "अथ यदश्नाति यत् पिबति यद्रमते तदुपसदैः

रेति" छा॰उ॰। "यद्रमते रतिञ्चानुभवति इष्टादिसंयोगात्तदुपसदैः समानतामेति उपसदाञ्च पयोव्रतनिमित्तं सुखमस्ति अल्पभोजनीयानि चाहानि आसन्नानीति प्रश्वासोऽशनादीनामुपसदाञ्च सामान्यम्" शा॰भा॰। "पयोव्रतत्वं पयोभक्षणमुक्तत्वम् यस्ते यान्यहान्यभोजनीयानि तानि प्रसिद्धानि उपसत्सु क्रियमाणासु प्रश्वासः स्वास्थ्यविशेषः अशनादिषु सोऽस्तीति प्रसिद्धमिष्टसुखनिमित्तत्वं क्षोभहेतुत्वञ्च सामान्यम्" आ॰गि॰

उपसदन न॰ उप+सद–ल्युट्। १सेवायामुपसेवने २आनुगत्यादिना प्राप्तौ "तत्रोपसदनं चक्रे द्रोणस्येषुस्त्रकर्म्मणि" भा॰ व॰ २०८ अ॰ 'प्रतिगृह्य च तान् सर्वान् द्रोणस्यैवं समब्रवीत्। रहस्येकः प्रतीतात्मा कृतोपसदनांस्तथा' आ॰ १२२अ॰सामीप्ये अव्ययी॰। ३गृहसमीपे अव्य॰। "अन्योऽस्त्यनुगृहीतोऽसि यस्य मे मुनिपुङ्गव!। यस्योपसदनं ब्रह्मन् प्राप्तोऽसि मुनिभिः सह" रामा॰। अत्राव्ययीभावस्यापि यत्नेन समासः आर्षः।

उपसदी स्त्री उप+सद–घञर्थे क गौ॰ ङीष्। सन्ततौ धारायाम्। 'स्वगृहेऽस्योपसद्यां मा च्छैत्सीत् प्रजाता च पशुभिश्चायितम् शत॰१४,९,४,२२। अस्य यजमानस्य उपसद्यां सन्ततौ" भा॰। सन्ततिश्च द्वेधा कालिकी दैशिकी च। तत्र समानानेककालिककार्य्यमात्रधर्मत्वं कालिकसन्ततित्वम्। विभिन्नकालीनघटपटादिकार्य्यमात्रवृत्तिधर्मघटत्वादौ सन्ततित्ववारणाय समानेति सामान्यञ्चान्वयितावच्छेदकधर्मेण। तेन सत्त्वद्रव्यत्वादिना घटपटयोः समत्वेऽपि न क्षतिः। सत्त्वद्रव्यत्वादिकमादाय तद्वारणाय कार्य्यमात्रेति। एककालोत्पन्नेषु बहुषु घटेषु तद्वारणाय अनेककालिकेति। दैशिकसन्ततित्वञ्च समानानेकवृत्तिकार्य्यमात्रधर्मत्वमितिभेदः। तत्र कालिकसन्ततेः प्रवाहादिपदेन व्यपदेशः यथा ज्ञानप्रवाहः, दुःखप्रवाहः इत्यादि दैशिकसन्ततौ तु श्रेणिप्रभृतिशब्दव्यवहारः यथा वृक्षश्रेणी वृक्षपङ्क्तिरित्यादि। उभयसन्ततौ तु सन्ततिधारादिशब्दप्रयोगः यथा ज्ञानधारा सुखधारा दुःखसन्ततिरित्यादि एवं जलधारा तैलधारा तैलसन्ततिरित्यादि। तादृशधर्मश्च सुखत्वदुःखत्वज्ञानत्वादिकं वृक्षत्वतैलत्वादिकञ्च। उभयविधापि सन्ततिःपुनर्द्विविधा अविच्छिन्ना विच्छिन्ना च देशकालयोरव्यवधानेऽविच्छिन्ना यथा धारावाहिक स्थले ज्ञानादिधारा। तयोर्व्यवधाने विच्छिन्ना यथा विच्छिद्य विच्छिद्य जायमानदुःखानाम्। विच्छिन्नसन्ततिमादायैव वृक्षप्रवाहः। सुखदुःखसन्ततिरित्यादिर्व्यवहारः।

उपसद्य त्रि॰उपसदं सेवामर्हति यत् उप+सद–कर्म्मणि वा॰ यत् वा। १सेवनीये २नैकट्येन प्राप्ये च"भरेषु हव्यो नमसोपसद्योगन्ता" ऋ॰ २,२३,१३। "उपसद्याय मीढुष आस्ये जुहुता हविः" ऋ॰ ७,१५,१।

उपसद्वन् त्रि॰ उप+सद–ङ्वनिप् स्त्रियां ङीप् वनान्तादेशः। १उपसन्ने २सेवके च। कर्म्मणि ङ्वनिप्। ३सेव्ये च। "नमस्ते अस्तु मीढुषे नमस्त उपसद्वने" आ॰श्रौ॰२,५,९।

उपसद्व्रत न॰ उपसद्भ्यः विहित व्रतम्। उपसद्विहिते पयोव्रते। "आपूर्य्यमाणपक्षस्य द्वादशाहमुपसद्व्रती भूत्वा" छ॰उ॰। 'उपसत्सु व्रतमुपसद्व्रतमुपसदः प्रसिद्धाः ज्योतिष्टोमे। तत्र स्तनोपचयापचयद्वारेण पयोभक्षणं व्रतं तत्र च तत्कर्मानुपसंहारात् केवलमिति कर्त्तव्यताशून्यं पयोभक्षणमात्रमुपादीयते। उपसद्व्रती पयोव्रती सन्नित्यर्थः" शा॰भा॰।

उपसन्न त्रि॰ उप+सद–क्त। १उपस्थिते, २निकटागते ३उपसेवके च ४आनुषङ्गुण्येन नैकट्यप्राप्ते "ब्रवीतु भगवांस्तन्मे उपसन्नोऽस्म्यधीहि भोः" भा॰शा॰२८९ अ॰। "भगवन्नुदधौ मृतिजन्मजले सुखदुःखझषे पतितं व्यथितम्। कृपया शरणागतमुद्धर मामनुशाध्युपसन्नमनन्यगतिम्" "तस्मै स विद्वानुपसन्नाय–प्रोवाच तत्त्वतो ब्रह्मविद्याम्" श्रुतिः।

उपसमाधान न॰ उप+सम–आ–धा–ल्युट्। राशीकरणे, "निवासचितिशरीरोपसमाधानेत्यादि" पा॰। "उपसमाधानं राशीकरणम्" सि॰कौ॰। २समिधः प्रक्षिप्य ज्वालने। "विवाहाग्निमुपसमाधाय पश्चादस्याः" आश्व॰गृ॰१,८,९, "उपसमाधाय समिधःप्रक्षिप्य प्रज्वाल्य" ना॰वृत्तौ। "अग्निमुपसमाधाय" गो॰सू॰ "उपसमाधाय ज्वालयित्वेति सं तत्त्वे च समापूर्व्वधाञ्धातोस्तथार्थदर्शनात् तथार्थत्वम्।

उपसमिध(ध्) अव्य॰ समिधः समीपे अव्ययी॰वा अच्समा॰। समिधः समीपे।

उपसम्पत्ति स्त्री उप+सम्+पद–क्तिन्। अभिनवत्वेन सम्पत्तौ। "प्रथमोऽचिरोपसम्पत्तौ" पा॰ "अभिसम्पत्तौ अभिनवत्वे" सि॰कौ॰। सम्पत्तिशब्दानुकृष्यात्मभावः सि॰कौ॰

उपसम्पन्न त्रि॰उप+सम्–पद+क्त। १प्राप्ते २मृते च हेम॰। 'श्रोत्रिये तूपसम्पन्ने त्रिरात्रमशुचिर्भवेत्" मनुः।

उपसम्भाषा स्त्री उप+सम्+भाष–भावे अ। उपसान्त्वने। 'भाषणोपसंभाषाज्ञानयत्नेत्यादि" पा॰ "उपसम्भाषा उपसान्त्वनम्" सि॰कौ॰।

उपसर पु॰ उप+सृ "प्रजनने सर्त्तेः" पा॰ अच्। गर्भग्रहणार्थं स्त्रीपशुषु पुम्पशुगमने। "प्रजननं प्रथमगर्भग्रहणम्। गवामुपसरः" सि॰ कौ॰। उपचारात् २नैरन्तर्य्येणनिगमने "वीनामुपसरं दृष्ट्वा" भट्टिः "वीनामुपसरं नैरन्तर्य्येण निर्गमनम् दृष्ट्वा उपसर इव उपसरः नैरन्तर्य्यमात्रेणोपलक्षितत्वात् उपसरो हि स्त्रीगवीषु पुङ्गवानामभिगमनमुच्यते स च नैरन्तर्य्येण भवति" जय मङ्गलः।

उपसरण न॰ उप+सृ—ल्युट्। १उपसरार्थे २समीपगमने च। "यस्तूर्द्ध्वमधो वा भेषजवेगं प्रवृत्तमज्ञत्वाद्विनिहन्ति तस्योपसरणं हृदि कुर्व्वन्ति दोषाः" "परिस्रावः प्रवाहिका हृदयोपसरणं विबन्धः" सुश्रु॰ कर्म्मणि ल्युट्। २उपसर्त्तव्ये उपगम्ये च। "अथ खल्वाशोःसम्वद्भिरुपसरणानीत्युपासीत" छा॰ उ॰। "उपसरणानि उपसर्त्तव्यानि उपगन्तव्यानि ध्येयानि" भा॰।

उपसर्ग पु॰ उप+सृज—घञ्। १रोगविकारे २उपद्रवे, शुभाशुभसूचके ३दिव्यादिविकाररूपे उत्पाते, व्याकरणोक्तेषु "निपाताश्चादयोज्ञेयाः प्रादयस्तूपसर्गकाः। द्योतकत्वात् क्रियायोगे लोकादवगता इमे" इत्युक्तलक्षणेषु क्रियायोगे ४प्रादिषु च। "उपसर्गाः क्रियायोगे" पा॰। "यत्र प्रादीनामन्वयस्तं प्रत्येवोपसर्गतेतिद्योतनाय योगग्रहणम्। तेन निर्गतः सेचको यस्मादिति वाक्ये निःसेचक इत्यादौ न षत्वम्" शब्देन्दु॰। ते च द्वाविंशतिविधा यथा, प्र, परा अप, सम्, अनु, अव, निस्, निर् दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप एते प्रादयः। निस् दुस् इति सान्तौ "निसस्तपतावनासेवने" पा॰ सूत्रे निस इति निर्द्देशात्। निष्टप्तं दुष्कृतमित्युदाहृत्य इदुदुपधस्य रो विसर्जनीयः" इति भाष्योक्तेश्च 'निरःकुष इति' "सुदुरोरधिकरणे" इति च पा॰ निर्द्देशात् रान्तावपि" मनो॰। निर्दुरोरभेदारोपेण कश्चिद्विंशतिधाकथनं द्रष्टव्यम्। "तस्य त्रिधा प्रवृत्तिः "धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्त्तते। तमेव विशिनष्टन्य उपसर्गगतिस्त्रिधा। क्रमेणोदाहरणानि यथा। आदत्ते प्रस्तुते प्रणमतीति। अपि च। "उपसर्गेण धात्वर्थो बलादन्यत्र नीयते। प्रहाराहारसंहारविहारपरिहारवत्"। "विभाषोपसर्गे" "द्व्यन्तरुपसर्गेभ्योऽपईत्" पा॰।

प्रादयस्तूपसर्गा न सार्थकाः, सार्थकाश्च चादयो निपाता वाचकत्वात् उपसर्गास्तु न तथा किन्तु द्योतका इति नैयायिकाः। वैयाकरणास्तु उभयेऽपि द्योतका इति मेनिरे तदेतत् वै॰भू॰ दर्शितम् "प्रादयोद्योतकाश्चादयोवाचका इति नैयायिकमतमयुक्तम् वैषम्ये बीजाभावादिति ध्वनयन्निपातानां द्योतकत्वं समर्थयते। 'द्योतकाः प्रादयो येन निपाताश्चादयस्तथा। उपास्येते हरिहरौ लकारोदृश्यते यथा" येन हेतुना प्रादयोद्योतकास्तेनैव हेतुना चादयोनिपातास्तथा द्योतका इत्यर्थः। अयं भावः। ईश्वरमनुभवतीत्यादावनुभवादि प्रतीयमानो न धात्वर्थः भवतीत्यत्राप्यापत्तेः। नोपसर्गार्थः तथा सत्यप्रकृत्यर्थतया तत्राख्यातार्थानन्वयापत्तेः प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः अनुगच्छतीत्यादौ अनुभवादिप्रत्ययापत्तेश्च। न विशिष्टार्थः गौरवात्। तथा च धातोरेव विद्यमानत्वादिवाचकस्य तस्यथा उपसर्गस्तात्पर्य्यग्राहक इत्यस्तु। तथा च तात्पर्य्यग्राहकत्वमेव द्योतकत्वमिति। तच्च चादिष्वपि तुल्यम् चैत्रमिव पश्यतीत्यादौ सादृश्यविशिष्टं चैत्रपदलक्ष्यम् इवशब्दस्तात्पर्य्यग्राहक इत्यस्य सुवचत्वादिति। एवं युक्त्यन्तरमाह। उपास्येते इति। अत्र ह्युपासना किमुपसर्गार्थः? विशिष्टस्य? धातुमात्रस्य? वा। नाद्यः तथा सति स्वार्थफलव्यधिकरणव्यापारवाचकत्वरूपसकर्मकत्वस्याऽऽसधातोरुपासनारूपफलवाचकत्वेनाभावादकर्मकत्वापत्तेस्ततः कर्म्मणि लकारोन स्यात्। न द्वितीयः गौरवात्। तृतीये त्वागतं द्योतकत्वं तात्पर्य्यग्राहकत्वलाभात् इति भावः। दृश्यते इत्यत्र कर्मणीति शेषः। तच्चादिष्वपि तुल्यमित्याह। "तथान्यत्र निपातेऽपि लकारः कर्म्मवाचकः। विशेषणाद्ययोगोऽपि प्रादिवच्चादिके समः"। (अन्यत्र) साक्षात्क्रियते अलङ्क्रियते उरीक्रियते शिव इत्यादौ। अत्रापि धातोस्तत्तदर्थे कर्म्मणि लकारसिद्ध्यर्थं तत्तदर्थवाचकत्वं वाच्यमित्युपसर्गवद्द्योतकत्वममीषामपीत्यर्थः। यद्यपि कृधातोः सकर्मकत्वमस्त्येव तथाप्येष्वर्थेषु सकर्मकता न स्यात्। अन्यथर वायुर्विकुरुते सैन्धवा विकुर्वत इत्यत्रापि स्यादिति भावः। अथोपासनासाक्षात्कारादि निपातार्थोऽस्तु "साक्षात्प्रत्यक्षतुल्ययोरिति" कोषस्मरणात् तदनुकूलोव्यापार एव धात्वर्थोऽस्तु स्वस्वयुक्तनिपातान्यतरार्थफलव्यधिकरणव्यापारवत्त्वं सकर्मकत्वमपि सुवचमिति दृष्टान्तदार्ष्टान्तिकावयुक्ताविति नेदं साधकमिति चेन्न नामार्थधात्वर्थयोर्भेदेन साक्षादन्वयासम्भवेन निपातधात्वर्थयोरन्वयासम्भवात्। अन्यथा तण्डुलः पचतीत्यत्रापि कर्म्मतया तण्डुलानां धात्वर्थेऽन्वयापत्तेरिति। किञ्च प्रादीनां वाचकत्वे भूयान् प्रकर्षः कोदृशोनिश्चय इतिवद्-

यात् प्र. कीदृशोऽनिरित्यपि स्यात्। अकमते प्रादेरनर्थकत्वान्न तदन्वय इत्यत एव द्योतकता तेषां स्यादिति। बाधकान्तरमभिप्रेत्याह। विशेषणेति। शोभन: समुच्चयो द्रष्टव्य इति चच्छोभनस्य द्रष्टव्य इत्यस्यान्वयापत्तेस्तुल्यसमाधेयत्वादिति भाव:। अपि च निपातानां वाचकत्वे प्रातिपदिकार्थयोर्विना षष्ठ्यादिकं भेदेनान्वयासम्भव:। अन्यथा राजा पुरुष इत्यस्य राजसम्बन्धी पुरुष इत्यापत्तेरित्यभिप्रेत्याह आदौति। धवखदिरयो: समुच्चय इति धवस्य च खदिरस्य चेत्येव स्यादिति भाव:। ननु प्रातिपदिकार्थयोरभेदान्वयबोधे विभक्तिजन्योपस्थितिर्हेतुरिति कार्य्यकारणभावो निपातातिरिक्तविषय एवेति नोक्तदोष इत्याशङ्क्याह।"पदार्थ: सदृशान्वेति विभागेन कदाचन। निपातेतरसङ्कोचे प्रमाणं किं विभावय"। (सदृशा) सदृशेन समानाधिकरणेनेति यावत्। (अन्वेति)अभेदेनेति शेष:। (विभागेन) असदृशेन असमानाधिकरणेनेति यावत्। अयमर्थ: समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तिर्निपातातिरिक्तविषयेति कल्पने मानाभावो गौरवञ्च। अस्माकं निपातानां द्योतकत्वादन्वय एव नास्तीति नायं दोष: अतएव घटो नास्तीत्यादौ घटपदं तत्प्रतियोगिके लाक्षणिकमिति नैयायिका:। अपि च निपातानां वाचकत्वे वाय्वादावन्वयोन स्यादिति बाधकान्तरमाह। "शरैरुशैरिवोदीच्यान् उद्धरिष्यन् रसानिव। इत्यादावन्वयोन स्यात् पाश्चत्यवस्य तत:"। अतोऽस्य सदृशै: शरै: रससदृशानुदीच्यानुद्धरिष्यन्नित्यर्थ:। अतस्तोबादिशब्दानां तत्सदृशपरत्वे इवशब्दस्य द्योतकत्वे च सङ्गच्छते। अन्यथा प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिविरोध:। तथाहि। उशैरिति करणे तृतीया। न चोशोऽलङ्करणम् इवार्थस्य करणत्वेऽपि तस्य करणत्वं नानेन बोधयितुं शक्यम् अप्रकृत्यर्थत्वात्। इवशब्दस्य चासत्वार्थकतया तदुत्तरतृतीयाया असम्भवात्। सम्भवे वा ल्यप्प्रसङ्गात्। उक्तपदोत्तरतृतीयानन्वयप्रसङ्गाच्चेत्याह। सुपां चेति। सुपां न्यवस्थेत्यर्थ:। चकारादुक्तपदोत्तरतृतीयानन्वय: समुच्चीयते इत्यादावित्यादिपदात् "वागर्थाविव सम्पृक्तौ वन्दे पार्वतीपरमेश्वरौ" इत्यत्र वागर्थयोर्वन्दिकर्मत्वाभावात्तदुत्तरद्वितीयाया अनन्वय: इवार्थस्य कर्मत्वान्वयबोधासम्भवश्च संगृह्यते। यदि च विशेषणविभक्तिरभेदार्था साधुत्वमात्रार्था वा तदापि इवशब्दस्य वाचकत्वेऽनन्वय एव उक्तशब्दशरराणां समानाधिकरणपदोपस्थाप्यतया भेदेनान्वयायोगात्। बाधादभेदेनापि न स:। नह्युश्राभिन्नसदृशाभिन्न: शर इत्यर्थ: द्रष्टव्य:"।

उत्पातरूप उपसर्गश्च त्रिविध: "अतिलोभादसत्याद्वा नास्तिक्याद्वाऽप्यधर्मत:। नरापचारान्नियतमुपसर्ग: प्रवर्त्तते। अतोऽपचारान्नियतमपवर्ज्जन्ति देवता:। ता: सृजन्त्यद्भुतास्तास्तु दिव्यनाभसभूमिजान्। तएव त्रिविधा लोके उत्पाता देवनिर्म्मिता:। विचरन्ति विनाशाय रूपै: सम्भावयन्ति च" गर्ग:। "उपसर्गस्तते चैव सद्य: शोषं विशोषते" पराश०। उपद्रवरोगकृताश्चोपसर्गा सुश्रु० उक्ता: "देवबलप्रवृत्ता ये देवद्रोहादभिशस्तका अथर्वकृता उपसर्गकृताश्च तेऽपि द्विविधा विद्युदशनिकृता: पिशाचादिकृताश्च पुनश्च द्विविधा: संसर्गजा आकस्मिकाश्च" "उपसर्गाद्वयोरोगा ये चाप्यागन्तव: स्मृता:" "शोषं कृत्यश्चोपसर्गा: प्रसूता:" सुश्रुत: उपद्रवशब्दे विवृति:। "उपसर्गानशेषांस्तु महामारीसमुद्भवान्। तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम" देवीमा०। तत्र प्रभवति सन्तापा० तेन निर्वृत्तम् वा ठञ्। औपसर्गिक तत्र पर्य्याप्ते तेन निर्वृत्ते च त्रि०। औपसर्गिकात्यन्तमरकपीडायाम् सु०त०।

उपसर्ज्जन त्रि० उप+सृज-ल्युट्। १दैवाद्युपद्रवे "निर्गते भूमिचलने ज्योतिषाञ्चोपसर्ज्जने" मनु:। २अप्रधाने गौणे विशेषणे "वोपसर्ज्जनस्य" "गोस्त्रियोरुपसर्ज्जनस्य"पा०। "उपसर्ज्जनं प्रधानस्य धर्मतो नोपपद्यते" मनु: "उपसर्ज्जनमप्रधानम्" कुल्लू०। "अनुपसर्ज्जनात्" "आचार्य्योपसर्ज्जनश्चान्तेवासी" पा० उपसृज्यतेऽनेन करणे ल्युट्। ३संमार्गसाधने त्रि० स्त्रियां ङीप्। "अथैक उपसर्ज्जनीभिरेभि:" शत० १,२,२,२, "पिष्टसमार्जनार्थास्तु अपस्तु पिष्टसम्मार्ज्जनार्थश्चोपसर्ग साधनानि उपसर्जन्य:" भा० "प्रथमानिर्दिष्टमुपसर्ज्जनम्"पा० उक्ते। समासविधायकशास्त्रे ४प्रथमान्तपदनिर्द्दिष्टे। "एकविभक्ति चापूर्वनिपाते" विग्रहवाक्ये नियतविभक्तिकं तदुपसर्जनसंज्ञम् इत्यर्थक पाणिनिसूत्रोक्ते ५शब्दभेदे च "उपसर्ज्जनं पूर्व्वम्"पा० समासे उपसर्ज्जनस्य पूर्व्वप्रयोग: यथा "द्वितीया श्रितेत्यादि" पा० सूत्रे द्वितीयेति प्रथमान्तम् पदं तदेव प्राक्प्रयोज्यम् यथा कष्टं श्रित इत्यादि वाक्ये कष्टश्रित इत्यादि

उपसर्पण न० उप+सृप–भावे ल्युट्। समीपगमने "न तावदयमुपसर्पणकाल:" विक्र०। "मक्षिकोपसर्पणमात्मनमित्यादि" सुश्रु०।

उपसर्पिन् त्रि० उप+सृप–गतौ णिनि। समीपगन्तरि

"एकमेव दहत्यग्निर्नरं दुरुपसर्पिणम्" मनुः। "युक्तं मालाकृतं तेषां परपीड़ोपसर्पिणाम्" भा०व०२०अ०।

उपसर्य्या स्त्री उपसृज्यतेऽसौ सृ-कर्म्मणि यत्। गर्भग्रहणयोग्यायाम् ऋतुमत्यां स्त्रीगव्यादौ। अप्रजनार्थे तु ण्यत् उपसार्य्यं प्राप्ये त्रि०।

उपसि अव्य० उप+सो बा० कि। समीपस्थाने "आसीन ऊर्ध्वामुपसि क्षिणाति" ऋ०१०,२७,२,। "उपसि समीपस्थाने" भा० "पि नैं पुत्र उपसि प्रेष्ठः" ऋ०५,४२,७।

उपसीर अव्य० सीरे हले तत्सामीप्यं वा अव्य०। १हले इत्यर्थे २हलसमीपे वा। ततो भवार्थे परिमुखा० ञ्य। उपसीर्य्यं तत्भवे त्रि० अप्रा०स०। हलोपगते त्रि० ततोभवार्थेऽणेव। औपसीर तद्भवे त्रि०

उपसुन्द पु० दैत्यभेदे तत्कथा भा० आ० "महासुरस्यान्वये हिरण्यकशिपोः पुरा। निकुम्भो नाम दैत्येन्द्रस्तेजस्वी बलवानभूत्। तस्य पुत्रौ महावीर्य्यौ जातौ भीमपराक्रमौ। सुन्दोपसुन्दौ दैत्येन्द्रौ दारुणौ क्रूरमानसौ। तावेकनिश्चयौ दैत्यावेककार्य्यार्थसम्मतौ। निरन्तरम वर्त्तेतां समदुःखसुखावुभौ। विनान्योन्यं न भुञ्जाते विनान्योन्यं न गच्छतः। अन्योन्यस्य प्रियकरावन्योन्यस्य प्रियंवदौ। एकशीलसमाचारौ द्विधैवैकं यथा कृतौ। तौ विवृद्धौ महावीर्य्यौ कार्य्येष्वप्येकनिश्चयौ। त्रैलोक्यविजयार्थाय समाधायैकनिश्चयौ। दीक्षां कृत्वा गतौ विन्ध्यं तावुग्रं तेपतुस्तपः। तौ तु दीर्घेण कालेन तपोयुक्तौ बभूवतुः। क्षुत्पिपासापरिश्रान्तौ जटावल्कलधारिणौ। मलोपचितसर्वाङ्गौ वायुभक्षौ बभूवतुः। आत्ममांसानि जुह्वन्तौ पादाङ्गुष्ठाग्रधिष्ठितौ। ऊर्द्ध्वबाहू चानिमिषौ दीर्घकालं धृतव्रतौ। तयोस्तपःप्रभावेण दीर्घकालं प्रतापितः। धूमं प्रमुमुचे विन्ध्यस्तदद्भुतमिवाभवत्। ततो देवा भयं जग्मुरुग्रं दृष्ट्वा तयोस्तपः। तपोविघातार्थमथो देवा विघ्नानि चक्रिरे। रत्नैः प्रलोभयामासुः स्त्रीभिश्चोभौ पुनः पुनः। न च तौ चक्रतुर्भङ्गं व्रतस्य सुमहाव्रतौ। अथ मायां पुनर्देवास्तयोश्चक्रुर्महात्मनोः। भगिन्यो मातरो भार्य्यास्तयोश्चात्मजनस्तथा। प्रपात्यमाना विस्रस्ताः शूलहस्तेन रक्षसा। स्रस्ताभरणकेशान्ता स्रस्ताभरणवाससः। अभिभाष्य ततः सर्वास्तौ त्राहीति विचुक्रुशुः। न च तौ चक्रतुर्भङ्गं व्रतस्य सुमहाव्रतौ। यदा क्षोभं नोपयाति नार्त्तिमन्यतरस्तयोः। ततः स्त्रियस्ता भूतञ्च सर्वमन्तरधीयत। ततः पितामहः साक्षादभिगम्य महासुरौ। वरेणच्छन्दयामास सर्वलोकहितः प्रभुः। ततः सुन्दोपसुन्दौ तौ भ्रातरौ दृढ़विक्रमौ। दृष्ट्वा पितामहं देवं तस्थतुः प्राञ्जली तदा। ऊचतुश्च प्रभुं देवं ततस्तौ सहितौ तदा। आवयोस्तपसाऽनेन यदि प्रीतः पितामहः। मायाविदावस्त्रविदौ बलिनौ कामरूपिणौ। उभावप्यमरौ स्याव प्रसन्नो यदि नौ प्रभुः। ब्रह्मोवाच। ऋतेऽमरत्वं युवयोः सर्वमुक्तं भविष्यति। अन्यद्वृणीतं मृत्योश्च विधानममरैः समम्। प्रभविष्याव इति यन्महदभ्युद्यतं तपः। युवयोर्हेतुनानेन नामरत्वं विधीयते। त्रैलोक्यविजयार्थाय भवद्भ्यामास्थितं तपः। हेतुनानेन दैत्येन्द्रौ न वां कामं करोम्यहम्। सुन्दोपसुन्दावूचतुः। त्रिषु लोकेषु यद्भूतं किञ्चित् स्थावरजङ्गमम्। सर्वस्मान्नौ भयं न स्यादृतेऽन्योन्यं पितामह!। पितामह उवाच। यत्प्रार्थितं यथोक्तञ्च काममेतं ददानि वाम्। मृत्योर्विधानमेतच्च यथावद्वां भविष्यति। नारद उवाच। ततः पितामहो दत्त्वा वरमेतत्तदा तयोः। निवर्त्य तपसस्तौ च ब्रह्मलोकं जगाम ह। लब्ध्वा वराणि दैत्येन्द्रावथ तौ भ्रातरावुभौ। अवध्यौ सर्वलोकस्य स्वमेव भवनं गतौ" २११ अ० "तावन्तरोत्सवमुत्सृज्य दैत्यौ कामगमावुभौ। देवानामेव भवनं जग्मतुर्युद्धदुर्मदौ। तयोरागमनं ज्ञात्वा वरदानञ्च तत् प्रभोः। हित्वा त्रिपिष्टपं जग्मुर्ब्रह्मलोकं ततः सुराः। ताविन्द्रलोकं निर्ज्जित्य यक्षरक्षोगणांस्तथा। खेचराण्यपि भूतानि जग्मतुस्तीव्रविक्रमौ। अन्तर्भूमिगतान् नागान् जित्वा तौ च महारथौ। समुद्रवासिनीः सर्वा म्लेच्छजातीर्विजिग्यतुः। ततः सर्वां महीं जेतुमारब्धावुग्रशासनौ। सैनिकांश्च समाहूय सुतीक्ष्णं वाक्यमूचतुः। राजर्षयो महायज्ञैर्हव्यकव्यैर्द्विजातयः। तेजो बलञ्च देवानां वर्द्धयन्ति श्रियं तथा। तेषामेवं प्रवृत्तानां सर्वेषामसुरद्विषाम्। सम्भूय सर्वैरस्माभिः कार्य्यः सर्वात्मना वधः। एवं सर्वान् समादिश्य पूर्वतीरे महोदधेः। क्रूरां मतिं समास्थाय जग्मतुः सर्वतोमुखौ। यज्ञैर्यजन्ति ये केचिद्याजयन्ति च ये द्विजाः। तान् सर्वान् प्रसभं हत्वा बलिनौ जग्मतुस्ततः। आश्रमेष्वग्निहोत्राणि मुनीनां भावितात्मनाम्। गृहीत्वा प्रक्षिपन्त्यप्सु विश्रब्धं सैनिकास्तयोः। तपोधनैश्च ये क्रुद्धैः शापा उक्ता महात्मभिः। नाक्रामन्त तयोस्तेऽपि वरदाननिराकृताः। नाक्रामन्त यदा शापा बाणा मुक्ताः शिलास्विव। नियमान् सम्परित्यज्य व्यद्रवन्त द्विजातयः। पृथिव्यां ये

तपःसिद्धा दान्ताः शमपरायणाः। तयोर्भयाद्द्रुवुस्ते वैनतेयादिवोरगाः। मथितैराश्रमैर्भग्नैर्विकीर्णकलशस्रुवैः। शून्यमासीत् जगत् सर्वं कालेनेव हतं तदा। ततो राजन्नदृश्यद्भिर्विभिन्न महासुरौ। उभौ विनिश्चयं कृत्वा विकुर्वाते वधैषिणौ। प्रभिन्नकरटौ मत्तौ भूत्वा कुञ्जररूपिणौ। संलीनमपि दुर्गेषु निन्यतुर्यमसादनम्। सिंहौ भूत्वा पुनर्व्याघ्रौ पुनश्चान्तर्हिताबुभौ। तैस्तैरुपायैस्तौ क्रूरावृषीन् दृष्ट्वा निजघ्नतुः। निवृत्तयज्ञस्वाध्याया प्रनष्टनृपतिद्विजा। उत्सन्नोत्सवयज्ञा च बभूव वसुधा तदा। हाहाभूता भयार्त्ता च निवृत्तविपणापणा। निवृत्तदेवकार्य्या च पुण्योद्वाहविवर्ज्जिता। निवृत्तकृषिगोरक्षा विध्वस्तनगराश्रमा। अस्थिकङ्कालसङ्कीर्णा भूर्बभूवोग्रदर्शना। निवृत्तपितृकार्य्यञ्च निर्वषट्कारमङ्गलम्। जगत् प्रतिभयाकारं दुष्प्रेक्ष्यमभवत्तदा। चन्द्रादित्यौ ग्रहास्तारा नक्षत्राणि दिवौकसः। जग्मुर्विषादं तत् कर्म दृष्ट्वा सुन्दोपसुन्दयोः। एवं सर्वा दिशो दैत्यौ जित्वा क्रूरेण कर्मणा। निःसपत्नौ कुरुक्षेत्रे निवेशमभिचक्रतुः" २११अ०। तत स्तिलोत्तमासृष्टिमुपवर्ण्य तस्यास्तत्समीपयानं तयोस्तदासक्तत्वमुक्त्वा तत्रान्योन्ययुद्धेनान्योन्यवधः २१२अ० उक्तः यथा "ततस्तिलोत्तमा तत्र वने पुष्पाणि चिन्वती। वेषमाक्षिप्तमाधाय रक्तेनैकेन वाससा। नदीतीरेषु जातान् सा कर्णिकारान् प्रचिन्वती। शनैर्जगाम तं देशं यत्रास्तां तौ महासुरौ। तौ तु पीत्वा परं पानं मदरक्तान्तलोचनौ। दृष्ट्वैव तां वरारोहां व्यथितौ सम्बभूवतुः। तावुत्पत्यासनं हित्वा जग्मतुर्यत्र सा स्थिता। उभौ च कामसम्मत्तावुभौ प्रार्थयतश्च ताम्। दक्षिणे तां करे सुभ्रूं सुन्दो जग्राह पाणिना। उपसुन्दोऽपि जग्राह वामे पाणौ तिलोत्तमाम्। वरप्रदानमत्तौ तावौरसेन बलेन च। धनरत्नमदाभ्याञ्च सुरापानमदेन च। सर्वैरेतैर्मदैर्मत्तावन्योन्यं भ्रुकुटीकृतौ। मदकामसमाविष्टौ परस्परमथोचतुः। मम भार्य्या तव गुरुरिति सुन्दोऽभ्यभाषत। मम भार्य्या तव वधूरुपसुन्दोऽभ्यभाषत। नैषा तव ममैषेति ततस्तौ मन्युराविशत्। तस्या रूपेण संमत्तौ विगतस्नेहसौहृदौ। तस्या हेतोर्गदे भीमे संगृह्णीतामुभौ तदा। प्रगृह्य च गदे भीमे तस्यां तौ काममोहितौ। अहंपूर्वमहंपूर्वमित्यन्योन्यं निजघ्नतुः। तौ गदाभिहतौ भीमौ पेततुर्धरणीतले। रुधिरेणावलिप्ताङ्गौ द्वाविवार्कौ नभश्च्युतौ"। सुन्दोपसुन्दन्यायः।

उपसूर्यक न० उपगतं सूर्यं चन्द्रं वा संज्ञायां कन्। चन्द्रार्कसमीपे मण्डलाकारे परिधौ।

उपसृष्ट न० उप+सृज–क्त। १मैथुने। २व्याकरणोक्ते प्राद्युपसर्गयुक्ते, "कृभ्वद्भ्योरुपसृष्टयोः" पा०। ३विसृष्टे ४उपद्रुते च त्रि०। ५राहूपरक्ते चन्द्रेऽर्के पु० "नेक्षेतोद्यन्तमादित्यं नास्तं यान्तं कदाचन। नोपसृष्टं न वारिस्थं न मध्यं नभसोगतम्" मनुः ६कामुके "उपसृष्टा इव क्षुद्राधिष्ठितभवना" काद०। ७व्याप्ते च "रोगोपसृष्टतनुदुर्वसतिं मुमुक्षुः" रघुः। [करणे।

उपसेक पु० उप+सिच–भावे घञ्। जलादिसेचनेन मृदू-

उपसेचन त्रि० उप+सिच–ल्यु। उपसेककर्त्तरि "त्वयः कोशास उपसेचनासः" ऋ०७,१०१,४,तृच्। उपसेक्तृ तत्रार्थे त्रि० "लोकेभ्य उपसेक्तारमवकृत्यै" यजु०३०,१२,स्त्रियां ङीप्। भावे ल्युट्। २उपसेके न० "दुहन्त्यूधरुपसेचनाय कम्" ऋ०१०,७६,७, "पर्य्यूहणाद्योपसेचनात् कृत्वा" कात्या०८,५,२६, वा० कर्त्तरि ल्युट्। ३उपसेचके त्रि० स्त्रियां ङीप् "वेति त्वामुपसेचनी" ऋ०१०,२१,२, उपसेचनी उपरिक्षरणशीला आहुतिः भा०। करणे ल्युट्। ४तत्साधने

उपसेवक त्रि० उप+सेव–ण्वुल्। उपभोगादिना १सेवनासक्ते २भोगप्रसक्ते। "अदत्तादाननिरतः परदारोपसेवकः" याज्ञ० ३उपेत्य सेवके च।

उपसेवन न० उप+सेव–भावे ल्युट्। १उपभोगप्रसक्तौ। "नहीदृशमनायुष्यं लोके किञ्चन विद्यते। यादृशं पुरुषस्येह परदारोपसेवनम्" मनुः २समीपस्थित्या सेवने च। "निरताहं सदा सत्ये! भर्तॄणामुपसेवने" भा०व०२३२अ० ३तत्तत्कर्म्मणि अत्यन्तासक्तौ "अजीर्णाध्यशनासविरुद्धान्नोपसेवनात्" "एवंविधानां द्रव्याणामन्येषाञ्चोपसेवनात्" सुश्रु०। भावे अ उपसेवा। तत्रैवार्थे स्त्री। "गोभिरश्वैश्च यानैश्च कृष्या राजोपसेवया"। "परदारोपसेवा च शारीरं त्रिविधं स्मृतम्" "विषयोपसेवा चाऽजस्रम्" मनुः।

उपसेविन् त्रि० उप+सेव–णिनि। उपसेवके "अभिवादनशीलस्य नित्यं वृद्धोपसेविनः। तेषां सततमज्ञानां विषयान्नुपसेविनाम्" मनुः। "ये हितं वाक्यमुत्सृज्य विपरीतोपसेविनः" पञ्चत०। "दुष्टात्मा पुलिनयनान्तरोपसेवी" सुश्रु०। स्त्रियां ङीप्।

उपसोम पु० उपगतः सोमम् अत्या०स०। सोमोपगते सोमयाजिनि। अत्र तत्पुरुषत्वात् द्व्यच्कत्वादन्तोदा-

त्तता । उपगतः सीमोऽनेन प्रा० ब० । तत्रार्थे सामीप्ये अव्ययी० । ३सीमसामीप्ये अव्य० एतयोरन्तोदात्ततेति भेदः

उपस्कर पु० उप+कृ-भावे अप् हिंसने सुट् । १हिंसने उपस्करोति उप+कृ-अच् भूषणे समवाये प्रतियत्ने विकारे अध्याहारे च सुट् । २भूषके कटककुण्डलादौ ३समुदिते संहते । ४व्यञ्जनसंस्कारकपिष्टधन्याकादिद्रव्ये (बाटना) । गृहसंस्कारके ५सम्मार्ज्जन्यादौ । ६विकृते अध्याहारेण ७कथके च "पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः" । "वक्रो भवति हृत्वाग्निं यहकारी ह्युपस्करम्" मनुः ।

उपस्करण न० उप+कृ-भावे ल्युट् हिंसने सुट् । १हिंसने । उप+कृ-भावे ल्युट् उपस्करशब्दोक्तभूषणादौ सुट् । २भूषणे ३संघाते ४सतोगुणान्तराधानरूपसंस्कारे ५विकारे ६वाक्याध्याहारे च । उभाभ्यां करणे ल्युट् । उक्ततत्तदर्थेषु सुट् । ७हिंसासाधने ८भूषणादिसाधने कटकादौ च न० ।

उपस्कार पु० उप+कृ-भावे घञ् उपस्करशब्दोक्त भूषणादौ सुट् । १भूषणे २संङ्घाते ३प्रतियत्नरूपसंस्कारे ४विकारे ५अध्याहारे च । "साकाङ्क्षमनुपस्कारं विष्वग्गति निराकुलम्" किरा० ।

उपस्कीर्ण त्रि० उप+कॄ-क्त हिंसने सुट् । हिंसिते

उपस्कृत त्रि० उप+कृ-क्त उपस्करशब्दोक्तभूषणादौ सुट् । १भूषिते २संहते ३संस्कृते ४विकृते ५अध्याहृते च । भावे क्तिन् उक्तार्थेषु सुट् । उपस्कृति उपस्कारशब्दार्थे स्त्री । उप+कॄ-भावे क्तिन् हिंसने सुट् । उपस्कीर्णि हिंसने स्त्री ।

उप(ष्ट)स्तम्भ पु० उप+स्तन्भ घञ् । पतनप्रतिरोधने अवलम्बने "मूषिकस्योपस्त(ष्ट)म्भे केनापि कारणेनात्र भवितव्यम्" हितो० । नि० षत्वम् । उपष्टम्भ १उपस्तम्भशब्दार्थे २आलम्बने ३स्थितौ ४उद्रेके च "स्थानात् वीजादुपष्टम्भात् प्रस्यन्दात् निधनादपि" पात० भा० गाथा । भावे ल्युट् । उपस्तम्भन तत्रैवार्थे न० । करणे ल्युट् । तत्साधने शकटाद्याधारकाष्ठे च "बहणस्योत्तम्भनमसीत्युपस्तम्भनेनोपस्तम्नाति" शत० ब्रा० १,२,४,२५, "उपस्तयते प्रतिरुध्यते हृत्युपस्तम्भनं शकटाद्याधारकाष्ठम्" भा० "देवानामित्युपस्तम्भनस्य पश्चादीषाम्" कात्या० २,२,१४, "शकटस्य काष्ठमीषा तदग्रस्य भूमिस्पर्शो मा भूदिति तदाधारत्वेन स्थापितं काष्ठमुपस्तम्भनम्" वेददी० । ततो ण्वुल् । उपस्त(ष्ट)म्भक वा नि० षत्वम् । उपस्त(ष्ट)म्भकर्त्तरि आधिक्याधायके त्रि० ।

उपस्तरण न० उप+स्तॄ-ल्युट् । १आस्तरणे (बिछान) २भूमेः सम करणे च । "पुनर्नवीकृत्य लेपनोपस्तरणैः" आ० गृ० २, २, आधारे ल्युट् । १आस्तरणाधारे "अमृतोपस्तरणमसि" भोजनस्यादौ जलपानमन्त्रः 'अथाचमनीयमाचामति अमृतोपस्तरणमसीति" आ० गृ० १,२४,११, । "स्तरणमाच्छादनम् उपस्तरणं भूमेः समीकरणम्" ना० वृत्तिः

उपस्ति पु० उप+स्त्यै-इन् नि० । वृत्ते । "उपस्तिरस्तु सोऽस्माकम्" यजु० १२,१०१, "उपास्त्यायन्ति उपकारायोपद्रव निराकरणाय च समीपे संहतास्तिष्ठन्तीत्युपस्तयः वृत्ताः वेददी० ।

उपस्तिर् त्रि० उप+स्तॄ-कर्म्मणि क्विप् । आस्तीर्य्यमाणे आस्तरणीये । "अभि शुक्रमुपस्तिरम्" ऋ० ९,६२,२८,

उपस्तुत त्रि० उप+स्तु-क्त । समीपस्तुते श्रवणयोग्यस्तवेन स्तुते "चोदद्राध उपस्तुतश्चिदर्वाक्" ऋ० ७,२७,३, "त्वं त्वमहयथा उपस्तुतः पूर्व्वेभिरिन्द्रः" ऋ० १०,९६,५ ।

उपस्तुति स्त्री उप+स्तु-क्तिन् । समीपस्तवे श्रवणयोग्यस्तुतिवाक्ये 'कर्मोपस्तुतिं भरमाणस्य' ऋ० १,१४८,२,

उपस्तुत्य त्रि० उप+स्तु-क्यप् । समीपे स्तवनीये । "उपस्तुत्यं महिजातं ते अर्व्वन्" ऋ० १,१६२,१,

उपस्थ पु० न० अर्द्धर्चादि । उप+स्था-क । १स्त्रीपुंसयोरिन्द्रियविशेषे तत्र पुमिन्द्रिये "स्नानमौनोपवासेज्यास्वाध्यायोपस्थनिग्रहाः" याज्ञ० । स्त्रीन्द्रिये "दक्षिणेन पाणिना उपस्थमभिमृशेत् विष्णुर्योनिं कल्पयत्वित्येतयर्चा" गोभि० । "वितिष्ठन्तां मातुरस्या उपस्थान्नानारूपाः पशवो जायमानाः" अथ० १४,२, २५ । "मुखदघ्नं ब्राह्मणस्योपस्थदघ्नं स्त्रियाः" शत० १२,८,३,११ । उभयेन्द्रिये "हस्तौ पायुरुपस्थश्च वाक् पादौ चेति पञ्च वै । कर्मेन्द्रियाणि जानीयात्" याज्ञ० । "उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमम्" मनुः "सर्व्वेषामानन्दानामुपस्थ एकायनम्" शत० ब्रा० १४.५,४,११ । उपस्थश्च न तयोश्चिह्नस्थानमात्रं किन्तु तत्स्थानाधिष्ठितः प्रजापतिदेवतानियमितशक्तिक आनन्दनव्यापारकारकः कर्म्मेन्द्रियभेदः । तत्र "ब्रह्मेन्द्रोपेन्द्रमित्रकाः" इति शा० ति० तस्य कशब्दवाच्यप्रजापतिदेवताकत्वमुक्तम् शत० ब्रा० उक्तवाक्ये चानन्दन व्यापारसाधनत्वमुक्तम् तस्यैवापाटवे क्लैव्यम् । इन्द्रियाणां भौतिकत्वमते तस्य पृथिवीरजोगुणोपादानकता आहङ्कारिकत्वमते गन्धतन्मात्रसहिताहङ्कारोपादानकता । स च सूक्ष्म

लिङ्गदेहान्तर्गत इति वेदान्तिनः सांख्याश्चाहुः। तेन जीवति चेतना॰ ठञ्। औपस्थिक जारकर्मोपजीविनि जारभेदे पु॰। वेश्यायां स्त्री। २उत्सङ्गे क्रोडे ३अन्तराले "आत्मनुपस्थेन इकस्य लोम" यजु॰ १९,९२। "वरीयश्रोभा पृणन्तो पित्रोरुपस्था" ऋ॰१,१२४,५। "उपस्था उपस्थे उत्सङ्गेऽन्तरालदेशे वा" भा॰ "तस्याः कुमारमुपस्थ आदधुः" गोभि॰ "उपस्थे उत्सङ्गे" सं॰त॰ "भूम्या उपस्थेऽरपज्जवन्यान्" ऋ॰२,१४,७। "रथोपस्थ उपाविशत्" गीता। उप+स्था घञर्थे भावे क।सर्वाङ्गुलीभिः भूमिमाश्रित्य ४स्थितौ "समस्तजङ्घोदराङ्गुलिभ्यां जानुभ्यां चोपस्थं कृत्वा" आश्व॰श्रौ॰ ६,५,५। "उपस्थं कृत्वा भूमिमाश्रित्येत्यर्थः पादाङ्गुलीभिश्च भूमिमाश्रित्योपविशेत्" नारा॰वृ॰। "प्राङ्मुख उपविश्योपस्थं कृत्वा" आश्व॰गृ॰ २,२,२,। उप+तिष्ठति स्था– क। "उपस्थकृतस्तेशाग्निं यंसेत्" आ॰श्रौ॰६,५,५। ५समीपस्थिते त्रि॰।

उपस्थपत्र पु॰ उपस्थं स्त्रीचिह्नमिव पत्रमस्य। अश्वत्थे वृक्षे तत्पत्रस्य तदाकारत्वात्तथात्वम् अतएव नैष॰दमयन्त्यास्तदङ्गवर्णने।अश्वत्थस्य चलपत्र नामता कारणत्वेनोत्प्रेक्षितम्। "अङ्गेन केनापि विजेतुमस्या गवेष्यते किं? चलपत्रपत्रम्। नो चेद्विशेषादितरच्छदेभ्यस्तस्यास्तु कम्पस्तु कुतोभयेन" उपस्थदलादयोऽप्यत्र। उपयमशब्दे स्त्रीलक्षणे च तदङ्गस्य अश्वत्थदलाकारतोक्ता।

उपस्थातृ त्रि॰उप+स्था–तृच्।१उपासके,२उपनते, च ३यथोक्तकाले उपगते "अन्यथावादी क्रियाद्वेषी नोपस्थाता निरुत्तरः। आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः" मिता॰स्मृतिः। ४ऋत्विग्भेदे पु॰।

उपस्थान न॰ उप+स्था–ल्युट्। १उपेत्य स्थितौ, २अनुसन्धाने स्मरणे "तत्त्वस्मृतेरुपस्थानात् मनोयोगात् परिच्चयात्। कर्मणां सन्निकर्षाच्च सतां योगः प्रवर्त्तते" याज्ञ॰। "कर्मात्मविहितं नैव बुद्धौ विपरिवर्त्तते। यत्नात्तु तदुपस्थानमुपादेये गुणो भवेत्" भट्टका॰। ३उपसेवने उपासने "सूर्य्योपस्थाने विनियोगः" सन्ध्याप्रयोगः "तूष्णीं वोपस्थानम्" कात्या॰४,१२,२०, ४उपसर्पणे। "तस्योक्तमुपस्थानम्" आश्व॰श्रौ॰५,१२,२, "उपस्थानं प्रसर्पणम्" नारा॰वृ॰। ५आनतीकरणायोपगतौ "सुरद्विषश्चैव जगच्च सर्व्वमुपस्थाने सन्नमन्ति प्रभावात्" भा॰आ॰ ७६। ६समीपस्थाने "कुर्यात् यथांशासनोपस्थानेषु मोक्षेत्" पार॰सू॰। उपस्थीयतेऽत्र आधारे ल्युट्। ७उपासनाधारे गृहादौ। "पार्थिवैर्म्मङ्गुभिः कोऽस्य उपस्थानं दिदृक्षुभिः" भा॰स॰४७ अ॰ "उपस्थानगृहैर्भद्रैर्बलभीभिश्च शोभितम्" भा॰आ॰१२८ अ॰ अनुसन्धानञ्च स्मरणम् तस्य च चित्तेऽनुभवाहितसंस्कारेणोपस्थितत्वात् तथात्वम्।

उपस्थानीय त्रि॰ उप+स्था–"भव्येत्यादि" पा॰नि॰ कर्त्तरि अनीयर्। १उपासके। कर्मणि अनीयर्। २उपास्ये त्रि॰

उपस्थापक त्रि॰ उप+स्था–णिच्–ण्वुल्। १स्मारके अनुभवजन्यसंस्कारेण चित्तेऽनुसन्धानसम्पादके। उपस्थितौ च समानविषयत्वं तन्त्रम् यद्विषयकोऽनुभवस्तद्विषयकः संस्कारस्तद्विषयिकैव स्मृतिरिति कार्यकारणभावः स च समवायेनैव, तेनान्यानुभवसंस्काराभ्यां नान्यस्य स्मरणम्। तत्र च सादृश्यादिज्ञानादि सहकारि कारणम् तत्समवहितसंस्कारस्यैव स्मृतौ हेतुत्वात्। उपेक्षात्मकज्ञानेन च संस्कारो न जन्यते। संस्कारश्च चरमफलनाश्यः तेन स्मृतधारायां न संस्कारान्तरकल्पनमिति वेदा॰प॰। क्वचिच्च दीर्घकालरोगादिना जन्मान्तरेण वा तन्नाशः। जन्मान्तरन्तु कर्मविशेषाभावसहकृतमेव तन्नाशकम् तेन "जातिं स्मरति पौर्व्विकीम्" इत्यादिमन्वाद्युक्तकर्मविशेषसत्त्वे न तन्नाशः। उपस्थापकञ्च यथा पदज्ञानं पदार्थस्य हस्तिज्ञानं हस्तिपकस्येत्यादि एकसंबन्धिज्ञानस्यापरसम्बन्धिस्मारकत्वनियमात् पदपदार्थयोश्च शक्तिसम्बन्धेन सम्बन्धितेति तथात्वम्।

भावे ल्युट्। उपस्थापन–उपस्थिति साधन व्यापारे उद्बोधकसमवधाने तत्सहकारे। उपस्थापनं प्रयोजनमस्य प्रपञ्चना॰छ। उपस्थापनीय उपस्थापनसाधने उद्बोधकादौ त्रि॰ उप+स्थापि–कर्म्मणि अनीयर्। स्मार्य्ये त्रि॰।

उपस्थावरा स्त्री उप+स्था–बा॰कर्मणि वरच्। उपसेवनीये पुरुषमेधयज्ञाङ्गे देवताभेदे "सरोभ्यो धैवरमुपस्थावराभ्यो दाशम्" यजु॰ ३०,१६,

उपस्थित त्रि॰ उप+स्था–क्त। १समीपस्थिते, २समीपागते "तदनुपस्थितमग्निहोत्रं तस्मादनुपस्थितमन्वनुपस्थिता इमाः प्रजाः प्रजायन्तेऽनुपस्थितो ह वै श्रिया प्रजाया प्रजायते" शत॰ब्रा॰ २,३,१, १२, "उपस्थितेयं कल्याणी" रघुः। "हैयङ्गवीनमादाय घोषवृद्धानुपस्थितान्" भट्टिः। ३प्राप्ते, उपस्थितपरित्यागे प्रमाणाभावात्" न्यायवाक्यम् "अनुपस्थितकल्पनाऽ

न्याय्या” इति मीमां० ४वेदाप्रयुक्ते अनार्षे च। “अ-स्तु तवदुपस्थिते” पा०। “उपस्थितोऽनार्षः” सि० कौ० “उद्बुद्धस्य स्मारेण चित्ते उपगते ५स्मृते “तौ जौ गुरु-णेयमुपस्थिता” वृ० र० उक्ते दशाक्षरपादके ६छन्दोभेदे स्त्री “उपस्थितमिदं जसौ तसौ यदि गुरुः स्यात्” इति वृ० र० उक्ते त्रयोदशाक्षरपादके ७छन्दोभेदे न०। ८सेविते त्रि०। भावे क्त सेवने ९उपस्थाने न०। तेन जीवति वेतना० ठक्। औपस्थितिक सेवनोपजीविनि त्रि०

उपस्थिति स्त्री उप+स्था–क्तिन्। १उपसेवने २उपगतौ ३स्मृतौ च “आसत्तिरव्यवधानेन पदजन्यपदार्थोपस्थितिः सा० द० आसत्तिशब्दे उपसर्गशब्दे च उदा०।

उपस्थूण अव्य० स्थूणायां तत्समीपं वा अव्ययी०। १स्थूणायामित्यर्थे २तत्समीपे च तत्र भवः परिमुखा० ञ्य। औपस्थूण्य तद्भवे त्रि०। उपगता स्थूणाम् अत्या० स०। ३गृह-स्तम्भोपगते त्रि० ततो भवार्थे अण्, न ञ्य इति भेदः

उपस्थेय त्रि० उप+स्था–सेवार्थत्वात् कर्मणि यत्। उपसेव्ये “वात्सप्रं कृत्वोपस्थेयं चेत्” कात्या० १७,१,२, “यदीदृशै-रहं विप्रैरुपस्थेयैरुपस्थितः” रामा०।

उपस्नेह पु० उप+स्निह–घञ्। स्निग्धस्य मैकत्र्यसम्बन्धेन क्लेदे “मूत्रयुक्त उपस्नेहात् प्रविश्य कुरुतेऽश्मरीम्”। “गर्भस्य मातुराहाररसवीर्यमभिवहन्ति तेनोपस्नेहेनास्या भिवृद्धिर्भवति”। “सर्वशरीरावयवानुसारिणीनां रसवहानां तिर्य्यग्गतानां धमनीनामुपस्नेहो जीवयति” सुश्रु०।

उपस्पर्श पु० उप+स्पृश–घञ्। १स्पर्शे, २स्नाने च। उपस्पृश्यन्ते इन्द्रियाण्यत्र आधारे घञ्। विधिना जलपानपूर्वके मुखादिस्पर्शयुक्ते ३वैधाचमने तत्र हि “त्रिःप्राश्यापो द्विरुन्मृज्य मुखमेतानुपस्पृशेत्। आस्यनासाक्षि कर्णांश्च नाभिवक्षःशिरोंऽसकान्” छन्दो० आस्यनासिकादिस्पर्शो विहित इति तस्य तथात्वम्। “तथेत्युपस्पृश्य पयः पवित्रम्” रघौ आचमनार्थे उपात्स्पृशतेः प्रयोगात्। भावे ल्युट्। उपस्पर्शनम् तत्रार्थे न० “अथात उपस्पर्शनम्” कात्या० ५,१०, २०

उपस्रवण न० उप+स्रु–भावे ल्युट्। सम्यक्क्षरणे उपरतं स्रवणम् प्रा० स०। १विरतस्रवणे क्षरणनिवृत्तौ “पत्न्युदक्या दीक्षारूपाणि निधाय सिकतास्वासीतोपस्रवणात्” का० २५,११,१२, “ज्योतिष्टोमादौ दीक्षितस्य पत्नी रजस्वला दीक्षारूपाणि शङ्खादीनि निधाय सिकतासु आसीत आ रक्तस्रावविरमणात्” कर्कः।

उपस्वत्व न० उपगतमुत्पत्तिक एव प्राप्तं स्वत्वं यत्र। स्वत्वा-स्पदीभूतभूम्यादिभ्य उत्पन्नशस्यादिद्रव्ये। लोकव्यवहारः। अन्यस्य द्रव्यस्य प्रतिग्रहार्जनाधीनं स्वत्वं न तु उत्पत्तिकालात्, अस्य तु तत्काले एव स्वत्ववत्त्वेन तथात्वम्।

उपस्वावत् पु० सत्राजितो नृपस्य पुत्रभेदे। “सत्राजितो-दश त्वासन् भार्यास्तासां शतं सुताः। ख्यातिमन्तस्त्रयस्तेषां भङ्कारस्तु पूर्वजः। वीरोवातपतिश्चैव उपस्वावांस्तथैव च” हरिवं० ३८ अ०

उपस्वेद पु० उप+स्विद–करणे घञ्। १वह्न्यादिसमीपस्थानात् जाते ऊष्मणि “तयोरण्डानि निदधुः प्रहृष्टाः परिचारिकाः। सोपस्वेदेषु भाण्डेषु पञ्च वर्षशतानि च” भा० आ० १६ अ० “सोपस्वेदेषु ऊष्मयुक्तेषु तत्र ह्यण्डान्तर्जलमूष्मणा शाम्यं घनीभवतीति” नी० क० “अलाबुमध्यान्निष्कृत्य बीजं यत्नेन गोप्यताम्। सोपस्वेदेषु पात्रेषु घृतपूर्णेषु भागशः” भा० व० १०६ अ०। भावे घञ्। २उपतापे

उपहत त्रि० उप+हन–क्त। १तिरस्कृते “करोत्यवज्ञोपहतं पृथग्जनम्” किरा०। “उपहतं तिरस्कृतम्” मल्लि०। २दूषिते “क्लिमेभिराशोपहतात्मवृत्तिभिः” कुमा० “आशया उपहता दूषिता” मल्लि०। ३विनाशिते ४उत्पातग्रस्ते अशुद्धद्रव्यसंयोगेन ५अशुद्धे च “शारीरैर्मलैः सुराभिर्मद्यैर्वा यदुपहतं तदत्यन्तोपहतम्” विष्णुः। ६अभिभूते “शमनुपहदम्यः सहसा” किरा०।

उपहति स्त्री उप+हन–क्तिन्। १उपघाते। २कार्यासामर्थ्ये प्रयोजकापाटवे ३प्रतिहनने च।

उपहत्नु त्रि० उप+हन–क्त्नु। उपहन्तरि “मृगं न भीममुपहत्नुमुग्रम्” ऋ० २,३३,११,

उपहन्तृ त्रि० उप+हन–तृच् स्त्रियां ङीप्। उपघातके (कटुकः) “स्तन्यशुक्रमेदसामुपहन्ता चेति” सुश्रु०।

उपहरण न० उप+हृ–ल्युट्। १परिवेषणे २उपायनदाने च

उपहर्तृ त्रि० उप+हृ–तृच् स्त्रियां ङीप्। १परिवेषण-कर्त्तरि “अनुमन्ता विशसिता नियन्ता क्रयविक्रयी। संस्कर्त्ता चोपहर्त्ता च खादकश्चेति घातकाः” मनुः। २उपायनदातरि च।

उपहव पु० उप+ह्वे–अप् संप्र० गुणः। आह्वाने, “वीनामुपसरं दृष्ट्वा तेऽन्योन्योपहवाः गुहाम्” भट्टिः। “अध्वर्युर्होतर्युपहवं काङ्क्षते” आ० श्रौ० ५,७,४, “प्रतिगृह्योपहवमिष्टाऽवेक्षेत” ६,१२,१,

उपहव्य पु० उपहूयतेऽत्र उप+ह्वे–बा० आधारे यत्। सप्त-

दशस्तोमकेषु पञ्चसु क्रतुषु मध्ये क्रतुभेदे। ते च क्रतवः कात्या० २२, दर्शिताः यथा। "सप्तदशाः पञ्च" ६, "वक्ष्यमाणाः पञ्च क्रतवः सप्तदशस्तोमका भवन्तीत्यर्थः" कर्कः। "उपहव्योऽनिरुक्तो पाप्मकामस्य" ७ "उपहव्य इति विशेषसंज्ञा स पाप्मकामस्य भवति अनिरुक्तश्च" कर्कः। "अनृतेनाभिशस्यमानस्य" ८ "अलीकेनाभिशस्यमानस्याप्युपहव्यो भवति" कर्कः "श्यावोऽश्वो दक्षिणा तं ब्रह्मणे ददाति" ९, इत्युपक्रम्याये चत्वारस्तत्र दर्शिताः।

उपहसित न० उप+हस–भावे क्त। उपहासे (ठाट्टाकरा) निन्दासूचके हासभेदे। कर्मणि क्त। २हासेन सूचितनिन्दे त्रि०।

उपहस्त पु० उपहस्ति–भावे अच्। हस्तेन ग्रहणे प्रतिग्रहे तेन जीवति वेतना० ठञ्। औपहस्तिक तदुपजीविनि त्रि०।

उपहस्ति हस्तेन उपगृह्णाति उप+हस्त–णिच् नामधातुः उभ० सक० सेट्। उपहस्तयति ते उपा(ज)जीहस्तत् त।

उपहस्तिका स्त्री उपगता हस्तम् अत्या० स० संज्ञायां कन् अत इत्वम्। (वेट्या) वस्त्रादिनिर्म्मिते ताम्बूलाद्याधार पात्रभेदे। "उपहस्तिकायास्ताम्बूलं कर्पूरसहितमुद्धृत्य मह्यं दत्त्वा" दशकु०।

उपहार पु० उप+हृ–घञ्। (भेट) १उपढौकने उपायने "ततः सपर्य्यां सपशूपहाराम्" "रत्नपुष्पोपहारेण छायामानर्च्च पादयोः" रघुः कर्म्मणि घञ्। २उपढौकनीये उपायनद्रव्ये "बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्योपहारः" मेघ० उपगतः हारम् अत्या० स०। ३हारसमीपस्थे तदुपशोभके द्रव्ये। अव्ययी०। ४हारसमीपे अव्य०। उभयत्र "उरोभुवा कुम्भयुगेन जृम्भितं नवोपहारेण वयस्कृतेन किम्" नै०। "ज्योतिषां प्रतिबिम्बानि प्राप्नुवन्त्युपहारताम्" कुमा०। [प्रशक्तोयत्र। कुन्तलदेशे हेम०।

उपहालक पु० हले प्रसृतः वा० वुण् उपगतोहालको हल-

उपहास पु० उप+हस–भावे घञ्। निन्दासूचके हास्ये (ठाट्टा) "फलमस्योपहासस्य सद्यःप्राप्स्यसि पश्य माम्" रघुः

उपहास्य त्रि० उप+हस–कर्म्मणि ण्यत्। उपहासेन निन्दनीये "गमिष्याम्युपहास्यताम्" रघुः।

उपहित त्रि० उप+धा–क्त। १निहिते २अर्पिते ३समीपस्थापिते ४आरोपिते च। "बलमुपहितशोभां तूर्णमायाद्योध्याम्" भट्टिः। "पुष्पं प्रवालोपहितं यदि स्यात्" कुमा०। ५उपाधिसङ्गते उपलक्षिते "अन्तःकरणोपहितं चैतन्यं जीवः मायोपहितचैतन्यमीश्वरः" वेदान्तप०।

उपहूत त्रि० उप+ह्वे–क्त संप्रसारणे दीर्घः। समाहूते आचितादित्वाद्गतिपूर्व्वकत्वेऽपि नान्तोदात्तता।

उपहूति स्त्री उप+ह्वे–क्तिन् संप्रसारणे दीर्घः। आह्वाने "पटहप्रणादविहितोपहूतयः" माघः।

उपहृत त्रि० उप+हृ–क्त। १उपढौकिते उपहाररूपेण दत्ते "उपहृतपशुरुद्रः" सि० कौ०।

उपहोम पु० उपगतः होमं प्रधानहोमम् अत्या० स०। प्रधानयागसमीपे स्विष्टकृतः पूर्व्वं होतव्ये अग्निसोमादिदशदेवताके प्रत्येकं दशाहुतिके दशदक्षिणाके होमभेदे। स च शत० ब्रा० ११, ४, ३, ८, अवधि १७ पर्य्यन्तेषु दर्शितः। "सैतानुपहोमानपश्यत्" इत्युपक्रम्य "अग्निरन्नाद इत्यादि१" "सोमोराजेत्यादि२" "वरुणः सम्राड़िति३ "मित्रः क्षत्रमिति४ "इन्द्रोबलमिति ५" बृहस्पतिर्ब्रह्मेति ६ "सविता राष्ट्रमिति७ "पूषा भगमिति८" "सरस्वती पुष्टिमिति९" "त्वष्टा रूपाणामिति १०" इत्येतैर्दश देवता उक्ता "तावा एता दश देवता, हवींषि दशाहुतयोदश, दश दक्षिणाः" इति यथोक्तविशेषणतया दर्शितः।

उपह्वर उप+ह्वृ–आधारे घ। निर्जने रहस्योपगमाधारे "उपह्वरे पुनरित्यशिक्षयं धनमित्रम्" दशकु०। "यत्सोमुपह्वरे पिबत्" ऋ० ८, ६९, ६, "चरन्तमुपह्वरे नद्यः" ऋ० ८, ९६ १४, "उपह्वरे अत्यन्तगुह्यस्थाने" भा०। २अन्तिकस्थाने "अम्मीतरङ्गैर्जाह्नव्याः समानीतामुपह्वरम्" भा० व० ३०८ अ० ३भूप्रदेशमात्रे च "उपह्वरे यदुपरा अपिन्वन्" ऋ० १, ६२, ६, "कौटिल्यलक्षणगतिवाचिनात्र गतिमात्रं लक्ष्यते उपह्वरन्ति गच्छन्त्यस्मिन् घः इत्युपह्वरोभूप्रदेशः" भा०। कर्म्मणि घ। ४गन्तव्ये "उपह्वरेषु यदचिध्वम्" १, ८७, २। "उपह्वरेषु गन्तव्येषु" भा० ५प्रान्तभागे। उपह्वरे गिरीणां संगथे च" ऋ० ८, ६, २८ "उपह्वरे प्रान्तभागे" भा०।

उपह्वान न० उप+ह्वे–ल्युट्। १आह्वाने २मन्त्रोच्चारणेनाह्वाने च "द्यावापृथिव्योरुपह्वाने षडवत्तम्" कात्या० २, ४, १९, "आग्नीध्रे भक्षणं वषट्कारोपह्वानाभ्याम्" १०, ६, २२,

उपांशु अव्य० उप+अन्श–उ। १निर्जने "परिचेतुमुपांशु धारणाम्" रघुः। "उपांशु विजने" मल्लि०। २अप्रकाशे च। "जिह्वोष्ठौ चालयेत् किञ्चित् देवतागतमानसः। निजश्रवणयोग्यः स्यादुपांशुः स जपः स्मृतः इत्युक्तलक्षणे ३मन्त्रादेर्जपभेदे पु०। जपोहि त्रिविधः नरसिंह पु० उक्तः।

“त्रिविधो जपयज्ञः स्यात् तस्य भेदान् निबोधत । वाचिकश्च उपांशुश्च मानसश्च त्रिधा मतः । त्रयाणां जपयज्ञानां श्रेयान् स्यादुत्तरोत्तरः । यदुच्चनीचस्वरितैः स्पष्टशब्दवदक्षरैः । मन्त्रमुच्चारयेद्वाक्यं जपः प्रोक्तः स वाचिकः । शनैरुच्चारयेन्मन्त्रमीषदोष्ठौ प्रचालयेत् । किञ्चिच्छब्दं स्वयं विद्यादुपांशुः स जपः स्मृतः । धिया यदक्षरश्रेण्या वर्णाद्वर्णं पदात् पदम् । शब्दार्थमानसाभ्यासः स उक्तो मानसो जपः” । तेन स्वरादिस्पष्टव्यक्तवर्णोच्चारणवान् वाचिकः स्वयंग्रहणयोग्यः किञ्चिच्छब्दवान् उपांशुः । जिह्वोष्ठचालनमन्तरेण वर्णार्थानुसन्धानवान् मानसः” आ०त० । हारीतः “यदुच्चनीचस्वरितैः शब्दैः स्पष्टं पदाक्षरैः । मन्त्रमुच्चारयेत् वाचा जपयज्ञस्तु वाचिकः । शनैरुच्चारयेन्मन्त्रं किञ्चिदोष्ठौ प्रचालयेत् । किञ्चिच्छ्रवणयोग्य स्यात् स उपांशुर्जपः स्मृतः । धिया पदाक्षरश्रेण्या अवर्णमपदाक्षरम् । शब्दार्थचिन्तनाभ्यासं तदुक्तं मानसं स्मृतम्” “तेषामुत्तरोत्तरफलतारतम्यमाह” मनुः “विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः । उपांशुः स्याच्छतगुणः साहस्रो मानसः स्मृतः” “उपांशुदेवतां यजत्यनिरुक्तं वा उपांशु इति शत० ब्रा० २,३,५,२, उक्ते ४ अनिरुक्तमात्रे ५मौने । “उपांशु वै रेतः सिच्यते” शत० ६,२,२,२, मैथुनकाले मौनविधानात् तस्योपांशुत्वम् । ६निगूढे च “अस्य त्वेकमुपांशु व्रतम्” भा० आ० २अ० । परग्रहणायोग्यतया निगूढमित्यर्थः नील०क०

उपांशुयाज पु० यज–घञ् यज्ञाङ्गत्वात् प्रयाजादिवत् न कुत्वम् । उपांशु अनुच्चैर्योयाजः । यज्ञभेदे तच्च शत० ब्रा०१,६,२,११ दर्शयित्वा “एतेन वै देवा उपांशुयाजेन यं यमसुराणामकामयन्त तमुपत्सृत्य वज्रेण वषट्कारेणाघ्नन्त एवैष एतेनोपांशुयाजेन पाप्मानं द्विषन्तं भ्रातृव्यमुपत्सृत्य वज्रेण वषट्कारेण हन्ति तस्मादुपांशुयाजं यजते” तत्फलमुक्तम् । “उपांशुयाजमन्तरा यजति” प्रयाजादियागेतिकर्त्तव्यतायां श्रुतिः ।

उपाक पु० उप+अक–अच् । १परस्परं समीपगते सन्निहिते “आसुष्वयन्ती यजते उपाके” यजु० २९,११, उपाके परस्परसमीपगते” वेददी० । “आ भन्दमाने उषसा उपाके” ऋ० २,४,६, “आभन्दमाने उपाके” १,१४२,७, २अन्तिके च । “सूर उपाकचक्षसम्” ऋ० ८,६,२५, “उपाक इत्यन्तिकनाम” भा० ।

उपाकरण न० उप+आ+कृ–ल्युट् । १उपावर्त्तध्वमित्येवं स्तोत्रप्रैषे “नापव्याहरेदोपाकरणादुपावर्तध्वमित्येवाध्वर्युरुद्गातृभ्यः” शत० ब्रा० ४,५,२,१२, “यदा उद्गातारः स्तोत्रं प्रारभेरन् तावदध्वर्युप्रहणादनन्तरं नापव्याहरेत्” भा० “प्राग्वा च प्रवदितोः प्रातरनुवाकोपाकरणम्” कात्या० ९,१,१०, । “सोमे च ग्रहं गृहीत्वोपाकरणात्” २,२,१७, उपावर्त्तध्वमित्ययं स्तोत्रप्रैषः उपाकरणशब्देनोच्यते” कर्कः । तथा प्रैषणे हि स्तोत्रस्यारम्भणात्तस्य तथात्वम् । २यज्ञियपशुसंस्कारविशेषे च “गोतमस्तोमः प्रथमं द्वितीयस्याङ्ग पशोरुपाकरणकालेऽश्वमानीय बहिर्वेद्यास्तावेवास्थापयेयुः” आश्व० श्रौ० १०,८,२ । “तमवस्थितमुपाकरणाय यदक्रन्दइत्येकादशभिः स्तौत्य प्रणुवन्” ५ “पशुकल्पेन पशुं संज्ञप्य प्रोक्षणोपाकरणवर्ज्जं वपामुत्खिद्य जुहुयात्” आश्व० गृ० २,४,१५, ३आरम्भे च । “अथातोऽध्यायोपाकरणम्” आश्व० गृ० ३,२,२, “उपाकरणमारम्भः” ना०द० । उपाकर्म्मशब्दार्थे च तत्प्रकारकालादिकं वक्ष्यते

उपाकर्म्मन् न० उप+आ+कृ-करणे मनिन् । येन कर्मविशेषेण वर्षान्ते पुनर्वेदः पठितुमारभ्यते तादृशे, कर्मभेदे तच्च “अथातोऽध्यायोपाकरणम्” इत्युपक्रम्य आश्व० सू० दर्शितम् तत्कालकर्त्तव्यतादि च तत्रैवोक्तः विशेषस्तु नि० सि० उक्तो यथा “तत्र बह्वृचानां प्रयोगपारिजाते शौनकः । “अथातः श्रावणे मासे श्रवणर्क्षयुते दिने । श्रावण्यां श्रावणे मासि पञ्चम्यां हस्तसंयुते । दिवसे विदधीतैतदुपाकर्म यथोदितम् । स्वाध्यायोपाकृतिं कुर्य्यात्तत्रोपासनवह्निना” अत्र पौर्णमासी उपसंहारन्यायेन यजुर्वेदपरेति हेमाद्रिः । अत्र हस्तयुक्ता पञ्चम्युक्ता कारिकयाऽपि “तन्मासे हस्तयुक्तायां पञ्चम्यां वा तदिष्यते” इति । केवलपञ्चम्यां हस्तयुतेऽन्यस्मिन् वा दिन इति तु हेमाद्रिः । उपासनवह्निनेति तु “कर्मद्वयमिदं केचिल्लौकिकाग्नौ प्रकुर्वते” इति कारिकोक्तलौकिकाग्निना विकल्प्यते । तत्र “अध्याय्यैरन्वारब्धः” इति सूत्रात् शिष्यत्वेन तदधिकारित्वात् नाचार्य्याग्नौ “नान्यस्याग्नावन्यो जुहुयादिति” निषेधाल्लौकिक एव । तदभावे स्मार्त्त इति निर्णयः । यद्यपि दीपिकायाम् । “वेदोपाकृतिरोषधिप्रजनने पक्षे सिते श्रावणे” इति शुक्लपक्षोऽपि सर्वेषां मुख्यकालत्वेनोक्तः । वक्ष्यमाणगार्ग्यवचनेन छन्दोगान् प्रति विहितस्य तस्याविरोधिता सर्वान् प्रति निवृत्तिश्च । तथापि श्रावणमाससंबन्धस्य सत्त्वोक्तत्वात् कृष्णपक्षेऽपि कार्य्यमिति वृद्धाः । तथा च आश्व०

सूत्राणि "अथातोऽध्यायोपाकरणम्" "ओषधीनां प्रादुर्भावे" "श्रवणेन श्रावण्यां पञ्चम्यां हस्तेन वा"। अत्र श्रवणो मुख्योऽन्यो गौणः। तस्याहर्द्वययोगे हेमाद्रौ व्यासः। "धनिष्ठासंयुतं कुर्य्याच्छ्रावणं कर्म यद्भवेत्। तत्कर्म सकलं ज्ञेयमुपाकरणसंज्ञितम्। श्रवणेन तु यत् कर्म उत्तराषाढसंयुतम्। संवत्सरकृतोऽध्यायस्तत्क्षणादेव नश्यतीति"। प्रयोगपारिजाते गार्ग्योऽपि। "उदयव्यापिनी त्वेव विष्ण्वृक्षे घटिकाद्वयम्। तत्कर्म सकलं ज्ञेयं तस्य पुण्यमनन्तकमिति" पूर्वेद्युरुत्तराषाढायोगे परेद्युः श्रवणाभावे घटिकाद्वयन्यूने वा पञ्चम्यादौ कार्यम्। न तु पूर्वविद्धायां सङ्गवेऽपि, अपवादाभावात्। किञ्च परेद्युः सङ्गवास्पर्शे निषिद्धपूर्वपक्षे किं मानम्। सङ्गववाक्यं श्रवणवाक्यं वेति चेत् तर्हि व्रीहिवाक्यादश्वशफवाक्याच्च माषभिन्नानामप्युपादानं स्यादिति महत्पाण्डित्यम्। एतेन पर्याप्यौदयिकं व्याख्यातम् निषेधप्रवेशस्योभयत्र साम्यात्। श्रवणयुतदिने संक्रान्त्यादौ तु "उपाकर्म न कुर्वन्ति क्रमात्सामर्ग्यजुर्विदः। ग्रहसंक्रान्तियुक्तेषु हस्तश्रवणपर्वसु" इति हेमाद्रौ निषेधात् पञ्चम्यादयो ग्राह्याः। अत्र ग्रहसंक्रान्तिदिने येषां प्राप्तिः सर्वैरुपाकर्म न कार्यम् इत्येको वाक्यार्थः। तेनाथर्ववेदिनामपि निषेधः। अन्यथा हस्तादित्रये प्रत्येकं ग्रहसंक्रान्त्योः षड्वाक्यकल्पनापत्तेः। मदनरत्नेऽपि "यदि स्यात् श्रावणं पर्व ग्रहसंक्रान्तिदूषितम्। स्यादुपाकरणं शुक्लपञ्चम्यां श्रावणस्य तु" स्मृतिः, स्मृतिमहार्णवे "संक्रान्तिर्ग्रहणं वापि यदि पर्वणि जायते। तन्मासे हस्तयुक्तायां पञ्चम्यां वा तदिष्यते"। तत्रापि प्रयोगपारिजाते वृद्धमनुकात्यायनौ। "अर्द्धरात्रादधस्ताच्चेत् संक्रान्तिर्ग्रहणं यदा। उपाकर्म न कुर्वीत परतश्चेन्न दोषकृदिति"। मदनरत्ने गार्ग्योऽपि। "यद्यर्द्धरात्रादर्वाक् तु ग्रहः संक्रमणं वा। नोपाकर्म तदा कुर्य्याच्छ्रावण्यां श्रवणेऽपि वा"। एतेन ग्रहणकाले श्रवणसत्त्वे एव निषेधो नार्वागिति मूर्खप्रलापः परास्तः, ग्रहविशिष्टानां हस्तश्रवणपर्वणां प्रत्येकं निषेधे तद्युक्तोपाकर्मनिषेधे च विशिष्टोद्देशे वाक्यभेदात् पञ्चम्यां संक्रान्तौ निषेधाभावापत्तेश्च। तेनार्द्धरात्रात् पूर्वं ग्रहसत्त्वमात्रे उपाकर्मनिषेधो न तद्योगे। यत्तु "प्रतिपन्मिश्रिते नैव नोत्तराषाढसंयुते। श्रवणे श्रावणं कुर्युर्ग्रहसंक्रान्तिवर्जिते" इति प्रतिपन्मिश्रितनिषेधकं 'वचनं' तन्निर्मूलम्। हेमाद्रौ निगमः। "ग्रहयोगो गुरुं हन्ति संक्रान्तिः शिष्यघातिनी। तपो हन्त्युत्तराषाढा उपाकर्मणि वैष्णवे" अत्र च "वेदोपाकरणे प्राप्ते कुलीरे संस्थिते रवौ। उपाकर्म न कर्त्तव्यं कर्त्तव्यं सिंहयुक्तके" इति वचनं देशान्तरविषयम्। "नर्मदोत्तरभागे तु कर्त्तव्यं सिंहयुक्तके। कर्कटे संस्थिते भानावुपाकुर्य्यात्तु दक्षिणा" इत्या॰ वचनात् इति प्रयो॰पा॰ उक्तम्। परापरमाधवीयेऽप्येवम्। सामगानां सिंहस्थरवावुक्तत्वाद्विषयमेवेदं, पुरोडाशचतुर्द्धाकरणवदुपसंह्रियत इति। न तु बह्वृचादिपरम्। तेषां सूत्रे चान्द्रश्रावणोक्तेः सौरे पञ्चम्ययोगात् सामान्येन सौरविशेषस्य बाधायोगादिति तु वयं पश्यामः। यत्तु कालादर्शे "अध्यायानामुपाकर्म श्रावण्यां तैत्तिरीयकाः। बह्वृचाः श्रवणे कुर्युः सिंहस्थोऽर्को भवेद्यदि। सहस्तशुक्लपञ्चम्यां तद्वद्ग्रहणसंक्रमे। असिंहार्कप्रौष्ठपद्यां श्रवणेन व्यवस्थयेति" तन्मूलालिखनात् सूत्रविरोधाच्च चिन्त्यम्। सूत्रे हि श्रवणेन श्रावणस्येति चान्द्रमास एवोक्तो न सौरः तस्य पञ्चम्यभावात् श्रुतिलक्षणाभ्यामुभयपरत्वे ईक्षितद्वयविरोधाच्च। तेन सिंहस्थोऽर्को भवेद्यदि तदा कर्केऽपि ग्रहणसंक्रमे सति असिंहार्के शुक्लपञ्चम्यां श्रवणे वा बह्वृचाः, प्रौष्ठपद्यान्तैत्तिरीया इति व्याख्येयम् तेषां सौरमासाभावात्। श्रावणे मलानुक्रमादौ बह्वृचपरिशिष्टे "यद्यप्योषधयस्तस्मिन् मासे तु न भवन्ति चेत्। तदा भाद्रपदे मासि श्रवणेन तदिष्यत इति"। "तत्राप्यनुक्रमे तु "कुर्यादेव तद्वार्षिकमित्याचक्षते" इति सूत्रात्। वर्षन्तौ भवं वार्षिकम्। एतच्च शुक्रास्तादावपि कार्यम्। "उपाकर्मोत्सर्जनं च पवित्रदमनार्पणमिति" दमनारोपणे लिखितवचनात् "नित्ये नैमित्तिके जप्ये होमयज्ञक्रियासु च। उपाकर्मणि चोत्सर्गे ग्रहवेधो न विद्यते" इति प्रयोगपारिजाते हेमाद्रौ च संग्रहोक्तेः। पर्वणि ग्रहणे सति पूर्वं त्रिरात्रादिवेधाभावं वक्तुमिदम्। तेन पर्वणि ग्रहणेऽपि चतुर्दश्यां श्रवणे कार्यमिति हेमाद्रिः। प्रथमारम्भस्तु न भवति "गुरुभार्गवयोर्मौढ्ये बाल्ये वा वार्द्धकेऽपि वा। तथाधिमाससंसर्गे मलमासादिषु द्विज! प्रथमोपाकृतिर्न स्यात् कृता कर्मविनाशकृदिति" तत्रैव काश्यपोक्तेः। अत्र प्रथमारम्भे वृद्धिश्राद्धं कुर्यादिति। नारायणवृत्तौ एतच्चाधिमासे न कार्यम् "उपाकर्म तथोत्सर्गः प्रसवाहोत्सवाष्टकाः। मास-

द्धौ पराःकार्य्या वर्जयित्वा तु पैतृकमिति" ज्योतिःपराशरोक्तेः "उत्कर्षः कालवृद्धौ स्यादुपाकर्म्मादिकर्म्मणि। अभिषेकादिवृद्धीनां न तूत्कर्षो युगादिष्विति" कात्यायनोक्तेश्च। यत्तु "उपाकर्म्मणि चोत्सर्गे ह्येतदिष्टं वृषादित" इति चण्डेश्वरवचस्तत्सामगविषयम् तेषां सिंहार्के एवोक्तेः। एतच्चापराह्णे कार्य्यम्। "उपाकर्मापराह्णे स्यादुत्सर्गः प्रातरेव त्विति" "अध्यायानामुपाकर्म्म कुर्य्यात्कालेऽपराह्णके। पूर्व्वाह्णे तु विसर्गः स्यादिति वेदविदो विदुरिति" हेमाद्रौ गोभिलोक्तेः। वस्तुतस्तु 'भवेदुपाकृतिः पौर्णमास्यां पूर्व्वाह्ण एव त्विति" प्रचेतोवचनात् पूर्व्वं वाक्यं सामगविषयम्। तेषामपराह्णे एवोक्तेरित्यनुपदं वक्ष्यते। दीपिकापि। "अस्य तु विधिः पूर्व्वाह्णकालः स्मृत" इति। याजुषास्तु पर्व्वणि कुर्युः। तच्चापस्तम्बैरौदयिकं ग्राह्यम्। अन्यैस्तु पूर्व्वम्। "पर्व्वण्यौदयिके कुर्युः श्रावणं तैत्तिरीयकाः। बह्वृचाः श्रवणे कुर्युर्ग्रहसंक्रान्तिवर्जिते" इति गर्गोक्तेः "संप्राप्नवान् स्तुतीर्ब्रह्मा पर्व्वण्यौदयिके पुनः। अतो भूतदिने तस्मिन्नोपाकरणमिष्यते" इति कालिकापुराणात्। "अथ चेद्दोषसंयुक्ते पर्व्वणि स्यादुपाक्रिया। दुःखशोकामयग्रस्ता राष्ट्रे तस्मिन् द्विजातयः" इति मदनरत्ने गर्गोक्तेः। अत्र सिद्धाभट्टीये विशेषः। "श्रवणः श्रावणं पर्व्व सङ्गवस्पृग्यदा भवेत्। तदैवौदयिकं कार्य्यं नान्यदौदयिकं भवेत्"। पराशरमाधवीयेऽपि गार्ग्यः "श्रावणी पौर्णमासी तु सङ्गवात्परतो यदि। तदैवौदयिकी ग्राह्या नान्यदौदयिकी भवेत्"। कर्म्मकालमाह कालादर्शे निगमः। "श्रावण्यां प्रौष्ठपद्यां वा प्रतिपत् षण्मुहूर्त्तकैः। विद्धा स्याच्छन्दसां तत्रोपाकर्म्मोत्सर्जनं भवेत्"। अत्र पौर्णमासी श्रवणहस्तयोरुपलक्षणं तेन तावपि सङ्गवस्पृशौ ग्राह्यौ। "उदये षड्घटीस्पर्शिन्यिते पर्व्वणि वार्कभे। कुर्युर्भस्युपाकर्म ऋग्यजुःसामगाः क्रमात्" इति पृथ्वीचन्द्रः। "विष्णूक्ते घटिकाद्वयमिति" पूर्वोक्तविरोधात् सामान्यवाक्यादौदयिकी कर्म्मपर्य्याप्ता ग्राह्या न पूर्व्वा। सङ्क्रान्तिनिमित्तपूर्व्वविद्धापवादाभावात् भाद्रादौ कालान्तरे वास्तु न तु निषिद्धम्। न हि व्रीह्यलाभे निषिद्धमाषग्रहणं युक्तम्। अतएव परेद्युः सङ्गवव्याप्तौ पूर्व्वनिषेधः। तदभावे तु नेति मूर्खव्यवस्थाप्यपास्ता विधिवैयर्थ्यात् माषनिषेधे तथापत्तेश्च। पूर्व्वविद्धावचनसत्त्वे हि सा युज्यते। एवं श्रवणेऽपि ज्ञेयम्। एतच्छुद्धाधिक्यपरं तेन यथाग्निहोत्रादौ सायं प्रातः काल-

बाधे सामान्यस्य जीवनार्थकालान्तरकाले रनुष्ठानम्। यथा व्रीह्यश्वयवाद्यभावे यागार्थिप्रतिनिध्याकारादेर्येत्र तथात्र सङ्गवाभावेऽनिषिद्धावर्ज्यकर्म्मपर्य्याप्तौदयिके कालान्तरे वानुष्ठानं न तु कदापि निषिद्धे अपवादाभावे उत्सर्गस्यैव प्राप्तेः। कात्यायनादीनान्तु दिनद्वये पूर्व्वाह्णव्याप्तौ एकदेशस्पर्शे वा पूर्व्वैवेति हेमाद्रिः। घटिकाद्वयमिति पूर्वोक्तविरोधात् तेन प्राशस्त्यमात्रपरमिदम्। यदपि "श्रावणी दौर्गनवमी दूर्वा चैव हुताशनी। पूर्व्वविद्धा प्रकर्त्तव्या शिवरात्रिर्बलेर्दिनमिति" ब्रह्मवैवर्त्तम् तद्ब्रह्मपवित्रविषयमिति हेमाद्रिः। मदनपारिजातेऽपि पूर्व्वविद्धायां श्रावण्यां वाजसनेयिनामुपाकर्मेत्युक्तम्। मदनरत्नेऽपि "पर्व्वण्यौदयिके कुर्युः श्रावणं तैत्तिरीयकाः" इति बह्वृचपरिशिष्टाद्बह्वृचान् प्रति कर्म्मविधानार्थं प्रवृत्ते तत्र तैत्तिरीयककर्म्मविध्ययोगात् पूर्वोक्तकालिकापुराणादौ सामान्यत औदयिकपर्व्वप्राप्तेस्तन्निषेधेन बह्वृचानां श्रवणविधानात्तैत्तिरीयकपदम् अनुवादत्वात्तस्य च प्राप्त्यधीनत्वात् प्राप्तेश्च यजुर्वेदमात्रपरत्वात् सर्वयजुर्वेद्युपलक्षणार्थम्। अवयुत्यनुवादो वा। न तु विधायकम्। तेन विशेषविधिना उपसंहारः स्यात्। अनुवादत्वाल्लक्षणा न दोषः। अन्यथौदयिकपर्व्वविशिष्टोपाकर्म्मोद्देशेन कर्त्तृविधौ कर्त्तृविशिष्टे वौदयिकपर्व्वविधौ वाक्यभेदापत्तेः। तस्मात्तैत्तिरीयकपदाविवक्षया सर्व्वयजुर्वेदिनामौदयिकमेव पर्व्वेत्युक्तम्। तन्न न तावत्परिशिष्टे बह्वृचान् प्रत्येव विधिः। धनिष्ठाप्रतिपद्युक्तत्वात् 'त्वाष्ट्रऋक्षसमन्वितमित्यादि तदुदाहृते एव परिशिष्टे वेदान्तरधर्म्मविधीनां दर्शनात्। नाप्यनुवादोऽयम् कालिकापुराणाद्बह्वृचादीनामपि तदापत्तेः कुर्युरित्यस्य विधित्वेन तस्यैवार्थवादत्वेनैतत्प्राप्त्यनुवादित्वाच्च। न च तैत्तिरीयकाणां गृह्ये तद्विधिरस्ति येनानुवादः स्यात्। न च वाक्यभेदः। तैत्तिरीयकपदमात्रस्य कर्म्ममात्रस्य वा उद्देश्यत्वायोगेन हविरार्त्तिवदष्टवर्षं ब्राह्मणमुपनयीतेतिवच्चागत्या विशिष्टोद्देश्यत्वात्। अन्यथोत्तरार्द्धे बह्वृचपदस्याऽप्यविवक्षापत्त्या श्रावणस्य सर्वसाधारण्यापत्तेः। तस्मात् हेमाद्रिमतमेव युक्तमिति दिक्। इदं च। शिष्यानध्यापयत आवसथ्येऽग्नौ अनध्यापयतोऽनधिकार इति कर्कः। श्रावण्यामपि ग्रहणादिदुष्टायां कातीयभिन्नैः प्रौष्ठपद्यां कार्यं तैस्तु श्रावणपञ्चम्याम्। "संक्रान्तिर्ग्रहणं वापि पौर्णमास्यां यदा भवेत्। उपा-

कृतिस्तु पञ्चम्यां कार्या वाजसनेयिभिरिति” स्मृतिमहार्णवे वाजसनेयिपक्षेणादिति हेमाद्रिः। इदं स्वसूत्रोक्तकालपरत्वात् बह्वृचपरमपि। याज्ञायनैस्तु हस्ते कार्यम्। आपस्तम्बैराथर्वणैश्च प्रौष्ठपद्याम्। यत्तु बौधायनः “श्रावण्यां पौर्णमास्यामाषाढ्यां वोपाकृत्येत्यूचे। तत् प्रौष्ठपद्यामपि दोषे आषाढ्यां कार्यमित्येवमर्थम्। तच्छाखीयविषयं वा। सामगास्तु श्रावणे हस्ते कुर्युः। “बह्वृचाः श्रावणे चैव हस्तर्क्षे सामवेदिन” इति निर्णयामृते गोभिलोक्तेः। सोऽप्युत्तरः ‘धनिष्ठाप्रतिपद्युक्तं त्वाष्ट्रऋक्षसमन्वितम्। श्रावणं कर्म कुर्वीरन्नृग्यजुःसामपाठकाः” इति मदनरत्ने परिशिष्टोक्तेः। गर्गोऽपि “सिंहे रवौ तु पुष्यर्क्षे पूर्वाह्णेऽविवरे बहिः। छन्दोगामिलिताः कुर्युरुत्सर्गं स्वस्वच्छन्दसाम्। शुक्लपक्षे तु हस्तेन उपाकर्मापराह्णिकमिति”। पुष्यर्क्षे पूर्वाह्णे उत्सर्गः आपराह्णिकमुपाकर्मेत्यन्वयः। अविवरे ग्रहादिदोषरहिते। अन्योविशेषः पूर्वमुक्तः। प्रयोगपारिजाते गोभिलः “उपाकर्मोत्सर्जनं च वनस्थानामपीष्यते। धारणाध्ययनाङ्गत्वाद्गृहस्थिनां ब्रह्मचारिणाम्। उत्सर्जनं च वेदानामुपाकरणकर्म च। अकृत्वा वेदजप्येन फलं नाप्नोति मानवः”। सर्वथा लोपे तु कृच्छ्र उपवासश्च “वेदोदितानां नित्यानामिति” मनुनाऽभोजनोक्तेः। एवमुत्सर्गेऽपि।

अथ प्रसङ्गादत्रैवोत्सर्जनमुच्यते। तच्च पौषमासे रोहिण्यां तत्कृष्णाष्टम्यां वा कार्यम्। “पौषमासस्य रोहिण्यामष्टकायामथापि वा। जलान्ते छन्दसां कुर्यादुत्सर्गं विधिवद्बहिरिति” याज्ञ० उक्तेः। श्रावण्यां प्रौष्ठपद्यां चोपाकृतौ क्रमेण पौषशुक्लप्रतिपदि, माघशुक्लप्रतिपदि च कार्यम् “अर्द्धपञ्चमासानधीयीतेति” तेनैवोक्तेः। यत्तु हारीतः “अर्धपञ्चमान्मासानधीत्योर्ध्वमुत्सृजेत् पञ्चार्धषष्ठान्वेति”। तदाषाढ्युपाकर्मविषयम्। बौधायनास्तु पौष्यां माघ्यां वा कुर्युः। ‘पौष्यां माघ्यां वोत्सृजेदिति” तत्सूत्रात्। तैत्तिरीयैस्तु तैष्यां कार्यं “तैष्यां पौर्णमास्यां रोहिण्यां वा विरमेदिति” तत्सूत्रात्। बह्वृचैस्तु माघ्यां कार्यम् “अध्यायोत्सर्जनं माघ्यां पौर्णमास्यां विधीयते” इति कारिकोक्तेः। कातीयास्तु भाद्रपदे कुर्युः। “उत्सर्गश्च तदा तिष्यतिथ्यां प्रौष्ठपदेऽपि वेति” कात्यायनोक्तेः। सामगास्तु सिंहार्के पुष्ये कुर्युः। तथा च सिंहे रवौ चेति गार्ग्यवचनं पूर्वमुक्तम्। सर्वैरुपाकर्मदिने वा कार्यम्। ‘पुष्ये तूत्सर्जनं कुर्यादुपाकर्मदिनेऽथवेति” हेमाद्रौ खादिरगृह्योक्तेः। यदा सिंहस्थे सूर्ये सति तन्मध्यस्थहस्तनक्षत्रात्प्राक् पुष्यः कर्कस्थो भवति तदा तस्मिन् पुष्ये उत्सर्गं कृत्वा तदुत्तरहस्ते उपाकर्म सामगाः कुर्युः। “मासि प्रोष्ठपदे हस्तात् पुष्यः पूर्वो भवेद्यदि। तदा तु श्रावणं कुर्यादुत्सर्गं छन्दसां द्विजः” इति तत्रैव परिशिष्टोक्तेः। अत्र द्वावपि सौरौ मासौ ज्ञेयौ तेषां सौरस्यैवोक्तेः। अत्र विशेषमाह कार्ष्णाजिनिः। ‘उपाकर्मणि चोत्सर्गे यथाकालं समेत्य च। ऋषीन्दर्भमयान् कृत्वा पूजयेत्तर्पयेत्ततः। संप्राप्ते श्रावणस्यान्ते पौर्णमास्यां दिनोदये। स्नानं कुर्वीत मतिमान् श्रुतिस्मृतिविधानतः। उपाकर्मादिकं प्रोक्तमृषीणाञ्चैव तर्पणम्। शूद्राणां मन्त्ररहितं स्नानं दानं प्रशस्यते”। ‘उपाकर्मण्युत्सर्गे च त्रिरात्रं पक्षिणीमहोरात्रं वानध्याय” इति मिताक्षरायामुक्तम्। अत्र नदीनां रजोदोषो नास्ति। ‘उपाकर्मणि चोत्सर्गे रजो दोषो न विद्यते इति” गर्गोक्तेः। ‘उपाकर्मणि चोत्सर्गे प्रेतस्नाने तथैव च। चन्द्रसूर्यग्रहे चैव रजोदोषो न विद्यते” छन्दो० उक्तेश्च उपाकर्मणि चोत्सर्गे युगादौ मृतवासरे। निषेधेऽपि दिने कुर्यात्तर्पणं तिलमिश्रितम्” स्मृतिः। “त्रयोदशादितो वर्ज्यं दिनानां नवकं ध्रुवम्। मङ्गल्येषु समस्तेषु ग्रहणे चन्द्रसूर्ययोरिति” सामान्यतो ग्रहणे दिननवकनिषेधस्तु अनियतकालीनकर्मपरः न तु नियत-कालीनकर्मपरः। “नित्ये नैमित्तिके जप्ये होमे यज्ञक्रियासु च। उपाकर्मणि चोत्सर्गे ग्रहदोषो न विद्यते इति नि० सि० स्मृत्युक्तेनोपाकर्मणि ग्रहणनिषेधदोषः। आषाढ्यामपि उपाकर्मविधानात् आषाढीप्रयोजनकत्वात् दण्डस्याषाढनामता वेदग्रहणस्य दण्डपूर्वकत्वात् तथात्वमिति बोध्यम्। करणे क्तिन् उपाकृतिरप्यत्र स्त्री कर्मकरणयोरभेदोपचारात् उपाक्रियाप्यत्र स्त्री।

उपाकृत त्रि० उप+आ+कृ–क्त। यज्ञे हननार्थं १कृतसंस्कारे पशौ, “अनुपाकृतमांसानि देवान्नानि हवींषि च” अभक्ष्ये मनुः। “पशुयागादौ मन्त्रबलेन पशोः स्वर्गाद्युपाकरणं तद्रहितपशुरनुपाकृतः” कुल्लू०। “पशुश्चेदुपाकृतः पलायेत वायवे तमनुद्दिश्य तद्वर्णं तद्वयसमालभेत” कात्या० २५,८,१ २स्तोत्रप्रैषेण प्रेषिते च “उपाकृत उद्गातार आहोत्रप्रैषात्” कात्या० २,२,१८। ४आरब्धे च। भावे क्त। ५उपाकरणे ६यज्ञियपशुसंस्कारे ७आरम्भे च न०। ततः इष्टा० कर्त्तरि इनि। उपाकृतिन् उपा-

करणकर्त्तरि त्रि० स्त्रियां ङीप् उपाकृतिनी ।

उपाक्ष अव्य० अक्ष्णः समीपम् अव्ययी० नि० टच्समा० । नेत्रसमीपे "कूलतीरतूलमूलशालाक्षसममव्ययीभावे" पा० अन्तोदात्तता अत्र अक्षेर्निर्देशात् नि० टच्समा०

उपाख्या स्त्री उप+आ+ख्या—भावे अ । १प्रत्यक्षे "द्वितीयऽचानुपाख्ये" पा० । उप ख्या प्रत्यक्षं तच्छून्ये ऽनुमानगम्ये इत्यर्थः । २शब्दादिभिर्निर्वचने च । "ज्ञानविज्ञानयुक्तानां निरुपाख्या निरञ्जना । कैवल्या या गतिर्देव परमो स गतिर्भवेत्" भा० अनु० २६अ० । निरुपाख्योऽभावः । तस्य च भावभिन्नत्वादिना यथा निर्वक्तुमशक्यत्वं तथाऽभावशब्दे उक्तम् "प्रतिसंख्याऽप्रतिसंख्यानिरोधावाकाशञ्चेति" शा०सू० भाष्ये "तदवस्तु अभावमात्रं निरुपाख्यम्" "न हि भावानां निरन्वयो निरुपाख्यो विनाशः सम्भवति" "निरोधद्वयमाकाशञ्चेति निरुपाख्यम्" । "तत्र निरोधद्वयस्य निरुपाख्यत्वम् पुरस्तान्निराकृतमाकाशस्येदानीं निराक्रियते" "आकाशे च न युक्तो निरुपाख्यत्वाभ्युपगमः" इत्येवम् सौगतमतनिराकरणे अभावपरतयाऽसकृदुक्तम् ।

उपाख्यान न० उप+आ+ख्या—ल्युट् । १पूर्ववृत्तकथने "रामोपाख्यानमत्रैवेति" भा०आ०१अ० । एवं नलोपाख्यानाद्योपाख्यानानि बहून्युपाख्यानानि तत्र सन्ति । "चतुर्विंशतिसाहस्रीं चक्रे भारतसंहिताम् । उपाख्यानैर्विना तावत् भारतं प्रोच्यते बुधैः" भा०आ० १अ० । २विशेषकथने । "सर्वाख्यानं श्रुतं ब्रह्मन् अतीव परमाद्भुतम् । अधुना श्रोतुमिच्छामि दुर्गोपाख्यानमद्भुतम्" "शृणु नारद वक्ष्यामि तवोपाख्यानमद्भुतम्" इति च ब्रह्मवै० । तत्र साधु कन् । उपाख्यानक तत्प्रतिपादके ग्रन्थभेदे स्वार्थे कन् । कथनमात्रे च । [गते च ।

उपागत त्रि० उप+आ+गम—क्त । १स्वयमुपस्थिते २अभ्युप-

उपागम पु० उप+आ+गम "ग्रहवृदृनिश्चिगमश्च" पा० अप् । १स्वीकारे २समीपगमने च ।

उपाग्रहण न० उप+आ+ग्रह—ल्युट् । संस्कारपूर्वकवेदग्रारम्भे अमरटीकायां रायमु० ।

उपाग्रहायण(णि) अव्य० आग्रहायण्याः समीपं अव्ययी० वा० टच्समा० । आग्रहायणीसमीपे

उपाङ्ग न० उपमितमङ्गेन अवा०स० । १प्रधानस्याङ्गोपयोगिनि "साङ्गोपाङ्गैरहो रदम्" इत्यमरः । २वेदाङ्गस्येव शास्त्रभेदे उपाङ्गानि शास्त्राणि च "पुराणन्यायमीमांसाधर्मशास्त्राणि । चत्वार्युपाङ्गानि" इत्यङ्गानि तेषां अङ्गवत् वेदार्थस्य बहुल करणादुपाङ्गत्वम् । "साङ्गोपाङ्गोपनिषदः" हरि० २५अ० "साङ्गोपाङ्गाः चतुर्वेदाः सरहस्याः क्रमेण तु" विक्रमो० । "यद्वेदशास्त्रं तत्रापि कृतस्नमस्मिन् प्रतिष्ठितम् । तव पुत्रे महाबाहौ साङ्गोपाङ्गं महात्मनि" भा०अ०१००अ० । अङ्गं देहस्तदुपयोगिनि ३प्रत्यङ्गे प्रत्यङ्गानि च अङ्गशब्दे ७२ पृ० दर्शितानि ४तिलके पु० जटाधरः ।

उपाजिन त्रि० उपगतोऽजिनम् अत्या०स० । चर्मोपगते उपात् आजिनान्ततत्पुरुषत्वात् अन्तोदात्तता । आजिनस्य समीपम् अव्ययी० । २चर्मसमीपे अव्य० । निरुदकादित्वात् अन्तोदात्तता । उपगतमजिनं येन प्रा०ब० । ३उपगतचर्मके त्रि० अत्र प्रकृतिस्वरः इति भेदः

उपाजे अव्य० उप+अज—बा० के शोभावभावः । दुर्बलस्य बलाधाने "उपाजेऽन्वाजे" पा० कृञि परे तस्य गतित्वम् तेन समासे उपाजेकृत्य असमासे तु उपाजे कृत्वेति "दुर्बलस्य बलमाधायेत्यर्थः" सि०कौ० । एतौ च विभक्तिप्रतिरूपकाव्यये इत्यन्ये

उपाञ्जन न० उप+अन्ज—ल्युट् । १लेपने "मार्ज्जनोपाञ्जनैर्वेश्म पुनःपाकेन मृण्मयम्" मनु २गोमयादिनानुलेपने च "सम्मार्जनोपाञ्जनेन सेकेनोल्लेखनेन च । गवाञ्च परिवासेन भूमिः शुध्यति पञ्चभिः" "ज्ञानं तपोऽग्निराहारो मृण्मनो वार्य्युपाञ्जनम् । वायुः कर्मार्ककालौ च शुद्धेः कर्त्तॄणि देहिनाम्" मनुः "उपाञ्जनमनुलेपनम्" कुल्लू० । आधारे ल्युट् । ३अञ्जनाधारे हस्तादौ च । "चतुर्थैक आहवनीयस्योपयमनीष्वाग्नीध्रीयस्याज्योपाञ्जने च" कात्या०८,६,२४, "तृतीयं चतुर्भागमज्योपाञ्जने अवधुरावनक्त्यञ्जनार्थाज्यशेषे पत्नीपाणाविर्त्यर्थः" कर्कः । अवधुराञ्जनप्रकारस्तत्रैव "दक्षिणया द्वाराऽनीता पत्नी पाणिभ्यां शेषं प्रतिगृह्याऽवधुरावनक्ति "पराग् देवस्तुतिरिति" "प्रतिप्रस्थात्रा समानीता पत्नी होमशेषेणाज्येनाव्याज्यस्यभागाश्यन्त्यादिति सूत्रार्थः" वेददी० ।

उपात्त त्रि० उप+आ—दा—क्त । १गृहीते, २प्राप्ते च "अयं केचिदुपात्तस्य दुरितस्य प्रपद्यते" जावालिः । ३अन्तर्गतमदे गजे पु० हलायुधः ।

उपात्यय पु० उप+अति—इण्—अच् । १लोकशास्त्राचारातिक्रमे, २व्यतिक्रमे, क्रमोल्लङ्घने, ३नाशे च । "परावनुपात्यय इणः" पा० "क्रमप्राप्तस्यानतिपातोऽनुपात्ययः" सि०कौ० ।

उपादान न० उप+आ+दा—ल्युट् । १ग्रहणे "विसर्ज्जं मा-

ग्रामः स्वद्रात् द्रव्योपादानमाचरेत्" मनुः । "स्यादात्मनोऽप्युपादानात्" सा० द० । स्वस्वविषयेभ्य इन्द्रियाणां निवारणरूपे २प्रत्याहारे, कर्म्मणि ल्युट् । कार्यजननार्थमुपादीयमाने कार्यान्विते ३कारणे, यथा मृदादि घटादेः स्वर्णादि अलङ्कारादेः जननार्थं स्वद्यते । तच्च सर्वदा कार्येषु गतम् । "असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात् । शक्तस्य शक्यकरणात् कारणभावाच्च सत् कार्य्यम्" सां० का० "उपादानानि कारणानि तेषां ग्रहणं कार्येण सह सम्बन्धः उपादानैः कार्यस्य सम्बन्धादिति यावत् एतदुक्तं भवति कार्येण संबन्धि कारणं कार्यस्य जनकं सम्बन्धश्च कार्यस्यासतो न सम्भवति तस्मात् सत् कार्यमिति" सा० कौ० "उपादाननियमात्" "नकर्म्मण उपादानत्वयोगात्" सां० सू० उपादानकारणञ्च कार्य्याभिन्नकारणमिति सांख्या वेदान्तिनश्च मन्यन्ते यथा मृत्तिकादयः घटादिकं प्रति, सुवर्णं कुण्डलादिकं प्रति, तन्तवः पटं प्रति, तत्तत्कार्य्याभिन्नत्वादुपादानकारणम् । नैयायिकास्तु उपादानकारणं समवायिकारणतया व्यवह्रियते । "यत्समवेतं कार्य्यं भवति ज्ञेयन्तु समवायि जनकं तत्" भाषा० तेषांमते उपादानशब्देनापि तस्य व्यवहारोऽस्त्येव "उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत्" भाषोक्तेः । तत्तदुपादानगोचरचिकीर्षाकृतिमत्त्वेन तैः ईश्वरस्य सर्वकर्तृत्वाभ्युपगमात् तच्च ईश्वरशब्दे चिन्तामणिग्रन्थे विवृतम् सांख्यमतसिद्धे ४आध्यात्मिकतुष्टिभेदे च यथाह सा० का० । "आध्यात्मिक्यश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः । बाह्या विषयोपरमात् पञ्च नव तुष्टयोऽभिमताः" । "या तु प्रकृतिविवेकख्यातिः सा प्रकृतिमात्रात् मा भूत् सर्वस्य सर्वदा तस्मात्सा सर्वान् प्रत्यविशेषात् प्रव्रज्यातस्तु सा भवति तस्मात् प्रव्रज्यामुपाददीथाः कृतं ते ध्यानाभ्यासेनायुष्मन् ! इति उपदेशे या तुष्टिः सोपादानाख्या नामाम्भ इत्युच्यते" सां० कौ० । सलिलस्येव अङ्कुरं प्रति प्रव्रज्यायाः साक्षात्कारं प्रति सहकारिकारणत्वेन संवर्धकत्वात् सलिलत्वम् । आत्मसाक्षात्काराय च फलार्थिभिः उपादीयमानतया तस्या उपादानत्वमिति बोध्यम् । तेन निर्वृत्तम् ठक् । औपदानिक स्वीकारमात्रजन्ये स्वत्वादौ यथा निक्षादौ द्रव्ये ग्रहणमात्रादेव स्वत्वमुत्पद्यते । उपादानोपादेयभावः

उपादानलक्षणा स्त्री उपादानात् स्वार्थस्य ग्रहणात् लक्षणा । "मुख्यार्थस्येतराक्षेपो वाक्यार्थेऽन्वयसिद्धये । स्यादात्मनोऽप्युपादानादेषोपादानलक्षणा" सा० द० उक्ते अजहत्स्वार्थारूपे लक्षणाभेदे । यथा कुन्ताः प्रविशन्तीत्यादौ कुन्तशब्दस्य कुन्तधारिणि लक्षणाभ्युपगमेऽपि तत्र कुन्तरूपमुख्यार्थस्यापि विशेषणविधयाऽन्वयात्तथात्वम् ।

उपादिक पु० उप+अद–इन् संज्ञायां कन् । कीटभेदे । उपोदिकायां स्त्री

उपादेय त्रि० उप+आ+दा–कर्म्मणि यत् । १ग्राह्ये ग्रहीतुं योग्ये विषये "उपादेयतारतम्यमेव" सा० द० । "भवे सौख्यं हित्वा यमसुखमुपादेयमनघम्" शान्तिश० उपादानकारणसम्बद्धे २तद्भवे कार्य्ये । ३विधेयत्वादिना उत्कृष्टे च "कर्म्मासन्निहितं नैव बुद्धौ विपरिवर्त्तते । शब्दात्तु तदुपस्थानमुपादेये गुणोभवेत्" भट्टपा० । "उपादेये विधेये" ति० त० रघुनन्दनः ।

उपादेयं ग्रहणयोग्यं तच्चानुकूलवेदनीयं सुखं तत्साधनञ्च "हेयोपादेयरहिते परिनिष्ठिते" शा० भा० वाक्ये "स यथा मत्स्यार्थी सशल्कान् सकण्टकान् मत्स्यानुपादत्ते स यावदुपादेयं तावदादाय निवर्त्तते" सर्व० दर्शने च प्रयुक्तम् ।

उपाधि पु० उप+आ–धा–कि । अन्यथास्थितस्य वस्तुनोऽन्यथा प्रकाशनरूपे १कपटे, उपधिशब्दे उदा० । उपाधीयते स्वधर्म्मोऽनेन करणे वा० कि । स्वसामीप्यादिना अन्यस्मिन् स्वधर्म्मारोपसाधने विशेषणभेदे । २उपाधिभेदेऽप्येकस्य नानायोगः आकाशस्येव घटादिना" गतिश्रुतिरप्युपाधियोगादाकाशवत्" सा० सू० "उपाधिना क्रियते भिन्नरूपः" इति श्रुतिः "कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः" पञ्चद० कार्यमन्तःकरणं कारणमज्ञानमिति वक्ष्यमाणोपाधिवादे उदा० ३उपलक्षणरूपे विशेषणे च । स च जात्यादिस्तद्भिन्नश्च पदार्थवृत्तिधर्म्मः । "पदार्थविभाजकोपाधिमत्त्वम्" मुक्ता० । पदार्थविभाजकाश्च द्रव्यत्वगुणत्वकर्म्मत्वसामान्यत्वविशेषत्वसमवायत्वभावत्वरूपाः तत्र द्रव्यत्वादयो जातिरूपाः सामान्यत्वादयस्तद्भिन्नाः तत्र नित्यत्वे सति समवेतत्वम् जातित्वम् परमसीमावृत्तित्वे सति नित्यद्रव्यमात्रवृत्तित्वं विशेषत्वम् । नित्यत्वे सति सम्बन्धत्वम् समवायत्वम् । भावभिन्नत्वमभावत्वमन्योन्याश्रयभावात् अखण्डोपाधिरभावत्वमिति नव्याः । एवं प्रतियोगित्वादयोऽपि अखण्डोपाधयः तैः कल्प्यन्ते । "उपाधिभेदादेकापि प्राच्यादिव्यपदेशभाक्" भाषा० ४कुटुम्बव्यापृते । उपाधीयते नामसमीपे कर्म्मणि कि । ५उपनामनि यथा भट्टाचार्य्यमिश्रादयः उपाधीयतेऽमनोऽत्र

आधारे कि। ६धर्मचिन्तायाम् ७व्यभिचारोन्नायके न्यायमतसिद्धे पदार्थभेदे च। "सर्वे साध्यसमानाधिकरणाः सदुपाधयः हेतोरेकाश्रये येषां स्वसाध्यव्यभिचारिता भाषा०। उपाधिपदार्थनिरूपणग्रन्थस्य प्रायेण वङ्गदेशादौ पठनपाठनाभावेन लुप्तप्रायतया प्रचारो नास्तीति अनुमानचिन्तामणिकृता यथा उपाधिवादे तन्निरूपितं यथा च तस्य दूषकतायां बीजं निरूपितं तदत्र प्रदर्श्यते।

"तत्रोपाधिः साध्यत्वाभिमतव्यापकत्वे सति साधनत्वाभिमताव्यापकः। अनौपाधिकत्वज्ञानस्य न व्याप्तिज्ञाने हेतुतो व्यापकत्वादिज्ञानेन नान्योऽन्याश्रयः। यद्वा व्यापकत्वं तन्निष्ठात्यन्ताभावाप्रतियोगित्वं तत्प्रतियोगित्वञ्चाव्यापकत्वं प्रतियोगित्वञ्च तदधिकरणानधिकरणत्वमिति वदन्ति तत्र साधनपक्षधर्मावच्छिन्नसाध्यव्यापकोपाध्यव्याप्तेः न च तयोरनुपाधित्वं दूषकताबीजसाम्यात् मित्रातनयत्वेन श्यामत्वसाधने शाकपाकजत्वस्य, प्रत्यक्षस्पर्शाश्रयत्वेन वायोः प्रत्यक्षत्वे साध्ये उद्भूतरूपवत्त्वस्य च साध्ये ऽप्रयोजकत्वेनोपाधित्वस्वीकारात् पक्षेतरेऽतिव्याप्तेश्च। न च व्यतिरेके पर्वतेतरान्यत्वादिव्यत्र इतरान्यत्वस्यासिद्धिवारणार्थं पर्वतपदं विशेषणमिति व्यतिरेके व्यर्थविशेषणत्वान्न स उपाधिः, बाधोन्नीतस्याप्यनुपाधितापत्तेः। न चेष्टापत्तिः इतरान्यत्वस्याप्रसिद्धा विशेषणं विना व्याप्त्यग्रहेण तत्सार्थकत्वात्। वस्तुगत्या साध्यव्यापकः पक्षेतर उपाधिरिति चेत् अस्तु तथा, तथापि पक्षातिरिक्ते साध्यव्यापकताग्रहादुपाधेर्दूषकत्वं तच्च तत्रास्ति, अन्यथा पक्षे साध्यसन्देहादनुपाधित्वे उपाधिमात्रमुच्छिद्येत विपक्षाव्यावर्त्तकविशेषणशून्यत्वं विशेषणं तेन बाधोन्नीतपक्षेतरस्य परिग्रहः तत्र पक्षस्यैव विपक्षत्वात् न तु पर्वतेतरत्वादेरिति चेन्न न हि वस्तु विपक्षव्यावर्तकविशेषणशून्यं सर्वत्र प्रमेयत्वादेः सत्त्वात्तत्रोपात्तेति विशेषणे सिद्धसिद्धव्याघातः तथापि च साध्यव्यापकत्वसाधनाव्यापकत्वे तत्र स्त इति तद्वृत्त्या पक्षे साध्यव्यावृत्तितो हेतोर्व्यभिचार एव व्यभिचारे चावश्यमुपाधिरिति पक्षेतरएव तत्रोपाधिः स्यात् तावन्मात्रस्यैव दूषकत्वाच्च व्यर्थं विशेषणम्। अतएवानुमानमात्रोच्छेदकतया जातित्वान्न पक्षेतर उपाधिरित्यपास्तम् दूषणसमर्थत्वेन जातित्वाभावात्। एतेन पक्षेतरव्यावृत्त्यर्थं प्रकारान्तरमपि निरस्तम्, उपाधित्वाभावेऽपि दूषणसमर्थत्वात्। अथोपाधिः स्वव्यतिरेकेण सत्प्रतिपक्षोत्थापकतया दूषणं, पक्षेतरत्वव्यतिरेकश्च न साध्याभावसाधकोऽसाधारणत्वात् न तु व्यभिचारोन्नायकतया दूषणं यथा हि साध्यव्यापकोपाध्यव्याप्यतया हेतोः साध्याव्याप्यत्वं तथा साध्यव्याप्यहेतुव्यापकतयोपाधेर्साध्यव्यापकत्वमपि सिध्येत् व्याप्तिग्राहकस्योभयत्रापि साम्येन विनिगमकविरहात्। तथा यथा साध्यव्याप्येन हेतुना साध्यं साधनीयं तथा साध्यव्यापकोपाधिव्यावृत्त्या साध्याभावोऽपि साधनीयो व्याप्तिपक्षधर्मतौल्यादिति दूषकताबीजं सोऽयं सत्प्रतिपक्ष एवेति मैवम् एवं हि सत्प्रतिपक्ष उपाध्युद्भावनं न स्यात् सत्प्रतिपक्षान्तरवत्। किञ्चैवं बाधोन्नीतोऽपि पक्षेतरो नोपाधिः स्यात् व्यतिरेकेऽसाधारण्यात्। ननु बाधे नोपाधिनियमः धूमेन ह्रदे वह्निसाधने तदभावात्। न च हेतुमति पक्षे बाधे पक्षेतरोपाधिनियमः प्रत्यक्षे वह्नौ कृतकत्वेनानुष्णत्वे साध्येऽतेजस्त्वादेरुपाधित्वसम्भवादिति चेत् न तेजोमात्रपक्षत्वेऽतेजस्त्वं विनान्यस्य उपाधेरभावात्। किञ्च पर्वताश्रयवृत्त्यन्यत्वं पर्वतेतरद्रव्यत्वं ह्रदपर्वतसंयोगानाधारत्वं ह्रदपर्वतान्यत्वादिकमुपाधिः स्यादेव व्यतिरेकेऽसाधारण्याभावात् व्यतिरेकिणा सत्प्रतिपक्षसम्भवाच्च। न चासाधारण्यं, तस्यापि सत्प्रतिपक्षोत्थापकतया दोषत्वात् तथाहुभयोरपि व्याप्तिग्राहकसाम्ये विरोधान्न व्याप्तिनिश्चयः किन्तूभयत्र व्यभिचारसंशयः तथा च व्यभिचारसंशयाधायकत्वेनोपाधेर्दूषकत्वं तच्च पक्षेतरेऽप्यस्ति तदुक्तमुपाधेरेव व्यभिचारशङ्केति। भवतु वोक्तन्यायेन सकलानुमानभङ्गभिया पक्षेतरोऽनुपाधिः तथापि लक्षणमतिव्यापकम्। नापि साध्यसमव्याप्तत्वे सति साधनाव्यापकत्वमुपाधित्वं दूषकताबीजस्य व्यभिचारोन्नयनस्य सत्प्रतिपक्षस्य वा साम्येन विषमव्याप्तस्याप्युपाधित्वात् तथा दूषकतायां साध्यव्याप्यत्वस्याप्रयोजकत्वाच्च। अथ साध्यप्रयोजकोधर्म उपाधिः प्रयोजकत्वञ्च न्यूनाधिकदेशवृत्तेः तस्मिन् सत्यभवतस्तेन विनापि भवतस्तदप्रयोजकत्वात् अन्यथा पक्षेतरस्याप्युपाधित्वप्रसङ्ग इति चेत् न दूषणौपयिकं हि प्रयोजकत्वमिह विवक्षितं तच्च साध्यव्यापकत्वे सति साधनाव्यापकत्वमेवेति तदेव प्रयोजकं न त्वधिकं व्यर्थत्वात्।

अथोपाधिः स उच्यते यद्धर्मोऽन्यत्र प्रतिबिम्बते यथा जवाकुसुमं स्फटिकलौहित्ये उपाधिः तथा चोपाधिवृत्तिव्यापकत्वं हेतुत्वाभिमते चकास्ति तेनासावुपाधिः न च व्याप्यत्वमात्रेण दूषकत्वमिति साध्यव्यापकतापीष्यते तथा च समव्याप्त एवोपाधिरिति चेत् तत् किं विषमव्याप्तस्य

दूषकताबीजाभावाच्चोपाधिशब्दवाच्यत्वं तथात्वेऽप्युपाधिपदप्रवृत्तिनिमित्ताभावाद्वा नाद्यः तस्यापि व्यभिचारोन्नायकत्वात् । नापरः न हि लोके समव्याप्तस्यैवान्यत्र स्वधर्मप्रतिबिम्बजनक एवोपाधिपदप्रयोगः स्वाभाव्युपाधिना कृतमित्यादौ स्वाभादावुपाधिपदप्रयोगात् । किञ्च न शास्त्रे लौकिकव्यवहारार्थमुपाधिव्युत्पादनं किन्त्वनुमानदूषणार्थं तत्र साध्यव्यापकत्वे सति साधनाव्यापकत्वमात्रमिति शास्त्रे तत्रैवोपाधिपदप्रयोगात् । अन्ये तु यदभावो व्यभिचारविरोधी स उपाधिः न च विषमव्याप्तस्याभावो व्यभिचारं विरुणद्धि तस्याभावेऽपि व्यभिचारात् अस्ति ह्यनित्यत्वव्यापकं प्रमेयत्वं तच्च व्यस्तु गुणत्वं न चानित्यत्वगुणत्वयोर्व्याप्तिरस्ति समव्याप्तिकस्य च व्यतिरेकस्तथा, न हि साध्यव्यापकव्याप्यीभूतस्य व्याप्यं यत्तत् साध्यं व्यभिचरति व्यभिचारे वान्ततः साध्यमेवोपाधिः अभेदेऽपि व्याप्यव्यापकत्वात् साधनव्यापकत्वादिति स्वीचक्रुस्तन्न तथापि ह्यव्यभिचारे साध्यव्याप्यव्याप्यत्वं तन्मात्रस्यकत्वात्तावताञ्च न साध्यव्यापकव्याप्यत्वमपि भवतीव व्यभिचारस्य दर्शितत्वात् । न च साध्यव्याप्यव्याप्यत्वमेवानौपाधिकत्वं साध्यव्याप्यमित्यत्रापि ह्यनौपाधिकत्वं तदेव वाच्यं तथा चानवस्थेति । अनौपाधिकत्वे च व्याप्तिलक्षणे यावदिति पदं साध्यव्यापके विशेषणं दत्तमेव किञ्च यस्मिन् सत्यनुमितिर्न भवति तदेव तत्र दूषणं न तु यद्व्यतिरेके न भवत्येवेत्येतद्गर्भं विरुद्धत्वादेरप्यदोषत्वापत्तेः नापि पक्षधर्मावच्छिन्नसाध्यव्यापकत्वे सति साधनव्यापकत्वमुपाधित्वं साधनावच्छिन्नसाध्यव्यापकोपाध्यव्यापनात् । शब्दोऽभिधेयः प्रमेयत्वादित्यत्र श्रावणत्वस्योपाधित्वापत्तेश्च शब्दधर्मगुणत्वावच्छिन्नाभिधेयत्वं यत्र रूपादौ तत्र श्रावणत्वं व्यापकं पक्षे प्रमेयत्वस्य साधनस्याव्यापकं हि तत् । आर्द्रेन्धनवत्त्वादावुपाधौ पक्षनियततादृशधर्माभावाच्च । अथ साधनावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापक उपाधि तत्र ध्वंसस्य जन्यत्वेन ध्वंसप्रतियोगित्वे साध्ये साधनावच्छिन्नसाध्यव्यापकं भावत्वमुपाधिः । श्यामत्वे शाकपाकजत्वमुपाधिरिति तत्र पक्षधर्मावच्छिन्नसाध्यव्यापकत्वविरहादनुपाधित्वप्रसङ्गात् सोपाधित्वादसाधकमित्यत्र साधनावच्छिन्नसाध्यव्यापकव्यभिचारित्वे साधनावच्छिन्नस्य व्यर्थत्वप्रसङ्गाच्च । किञ्च पक्षद्वयेऽपि विशिष्टसाध्यव्यभिचारं विशिष्टसाध्यव्यतिरेकं वा प्रसाध्य पश्चात् केवलसाध्यव्यभिचारः केवलसाध्यव्यतिरेको वा साधनीयस्तथा चार्थान्तरं केवलसाध्ये हि विवादो न तु विशिष्टे । अथ प्रकृतसाध्यव्यभिचारसिद्ध्यर्थं विशिष्टसाध्यव्यभिचारः साध्य इति चेन्न अप्रयोजकत्वात् प्रथमं साधनव्यभिचार एवोन्नायकस्तत्रासिद्धावुपाधिरिति चेत् तर्हि प्रकृतानुमाने नोपाधिर्दूषणं स्यात् । किञ्च साध्यव्यभिचारहेतुत्वेन पक्षधर्मावच्छिन्नसाध्यव्यापकव्यभिचार एवोपन्यसनीयो नोपाधिः । स्यादेतत् पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापक उपाधिः पर्यवसितं साध्यं च पक्षधर्मताबललभ्यं यथा शब्दोऽनित्यत्वातिरिक्तशब्दधर्मातिरिक्तधर्मवान् प्रमेयत्वादित्यत्र पर्यवसितं यत्साध्यम् अनित्यत्वं तस्य व्यापकं कृतकत्वमुपाधिः यदि च तथैव कृतकत्वमपि शब्दे साध्यते तदा अनित्यत्वमुपाधिः तदुक्तं वाद्युक्तसाध्यनियमच्युतोऽपि कथकैरुपाधिरुद्भाव्यः पर्यवसितं नियमयन् दूषकताबीजसाम्यादिति । अनेन पक्षधर्मतावच्छिन्नसाध्यव्यापकोपाधिः सङ्गृह्यते तादृशसाध्यस्य पर्यवसितत्वादिति तन्न एवं हि द्व्यणुकस्य सावयवत्वे सिद्धे द्व्यणुकमनित्यद्रव्यासमवेतं जन्यमहत्त्वानधिकरणद्रव्यत्वादित्यत्र निरवयवद्रव्यसमवेतत्वमुपाधिः स्यात् । भवति हि नित्यद्रव्यसमवेतत्वं पर्यवसितं साध्यं तस्य व्यापकं साधनाव्यापकञ्च । किञ्च पक्षधर्मताबललभ्यसाध्यसिद्धौ निष्फल उपाधिः तदसिद्धौ च कस्य व्यापकः न हि सोपाधौ पक्षधर्मताबलात् साध्यं सिध्यति यस्य व्यापक उपाधिः स्यादिति । अत्रोच्यते यद्व्यभिचारित्वेन साधनस्य साध्यव्यभिचारित्वं स उपाधिः लक्षणन्तु पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापकत्वं यद्धर्मावच्छेदेन साध्यं स च धर्मः । क्वचित् साधनमेव क्वचिद्द्रव्यत्वादि क्वचिन्महानसत्वादि । तथा हि समव्याप्तस्य विषमव्याप्तस्य वा साध्यव्यापकस्य व्यभिचारेण साधनस्य साध्यव्यभिचारः स्फुट एव व्यापकव्यभिचारिणस्तद्व्याप्यव्यभिचारनियमात् साधनावच्छिन्नपक्षधर्मावच्छिन्नसाध्यव्यापकयोर्व्यभिचारित्वेन साधनस्य साध्यव्यभिचारित्वमेव यथा ध्वंसस्यानित्यत्वे साध्ये भावत्वस्य, वायोः प्रत्यक्षत्वे साध्ये उद्भूतरूपवत्त्वस्य च विशेषणाव्यभिचारित्वेऽपि साधने विशिष्टव्यभिचारस्य विशेष्यव्यभिचारित्वनियमात् । अतएव नार्थान्तरं, विशेषणाव्यभिचारित्वेन ज्ञाते साधने विशिष्टव्यभिचारः सिध्यन् विशेष्यसाध्यव्यभिचारमादायैव सिध्यति पक्षधर्मताबलात् । अन्यथा प्रतीतेरपर्यवसानात् । न च पक्षधर्मताबलात् प्रकृतसिद्धावर्थान्तरम् । यद्वा प-

त्वक्स्पर्शाश्रयत्वं प्रत्यक्षत्वव्यभिचारि द्रव्यत्वाव्यभिचारित्वे सति द्रव्यप्रत्यक्षत्वव्यापकव्यभिचारित्वान्महत्त्ववत् तथा मित्रातनयत्वं श्यामत्वव्यभिचारि मित्रातनयत्वाव्यभिचारित्वे सति श्याममित्रातनयत्वव्यापकव्यभिचारित्वात् अघटत्ववत्। अव्यभिचारश्च तत्समानाधिकरणात्यन्ताभावाप्रतियोगित्वं तच्चाभेदेऽपि। यद्वा यः साधनव्यभिचारी साध्यव्यभिचारोन्नायकः स उपाधिः तच्च साक्षात् परम्परया वेति नार्थान्तरम्। किञ्च अर्थान्तरस्य पुरुषदोषत्वादाभासान्तरस्य तत्राभावादुपाधिरेव भावत्वादिकं दोषः न चैवं शब्दोऽभिधेयः प्रमेयत्वादित्यत्राश्रावणत्वं, जलं प्रमेयं रसवत्त्वादित्यत्र पृथिवीत्वमुपाधिः स्यात् केवलान्वयित्वसाधकप्रमाणेन तत्र साध्यसिद्धेरुपाधेर्विशिष्टाव्यापकत्वात् न च पक्षेतरे स्वव्याघातकत्वेनानुपाधावतिव्याप्तिः तत्रानुकूलतर्काभावेन साध्यव्यापकत्वानिश्चयात् सहचारदर्शनादेस्तेन विना संशायकत्वादित्युक्तं बाधोन्नीते चानुकूलतर्कोऽस्त्येवेति। एवं पर्वतावयववृत्त्यन्यत्वादेरपि नोपाधित्वं पक्षमात्रव्यावर्त्तकविशेषणवत्त्वात् अतएव धूमे आर्द्रेन्धनप्रभववह्निमत्त्वं बहिरिन्द्रियप्रत्यक्षत्वे उद्भूतरूपवत्त्वं मित्रातनयश्यामत्वे शाकपाकजत्वं जन्यानित्यत्वे भावत्वमुपाधिः तदुत्कर्षेण साध्योत्कर्षात् अनन्यथासिद्धान्वयव्यतिरेकतो वैद्यकात् कारणतावगमेन घटोन्मज्जनप्रसङ्गेन साध्यव्यापकतानिश्चयात्। ननु किं कार्यकारणयोरेव व्याप्तिः तथा च बहुधा व्याकुलो स्यादिति चेन्न तदुपजीव्यान्येषामप्यनुकूलतर्केण व्याप्तिग्रहात् यत्र साध्योपाध्योर्हेतुसाध्ययोर्वा व्याप्तिग्राहकसाम्यान्नैकत्र व्याप्तिनिश्चयस्तत्र सन्दिग्धोपाधित्वं व्यभिचारसंशयोपाधायकत्वात्। यदा च तादृश्येकत्रानुकूलतर्कावतारस्तदा हेतुत्वमुपाधित्वं वा निश्चितं पक्षेतरस्य स्वव्याघातकत्वेन न हेतुव्यभिचारसंशायकत्वमतो न सन्दिग्धोपाधिरपि सः। यत्तु पक्षेतरस्य यथा साध्यव्यापकत्वं तथा साध्याभावव्यापकत्वमपि ग्राहकसाम्यात् तथा चोभयव्यापकनिवृत्त्या साध्यतदभावाभ्यां पक्षे निवर्त्तितव्यम् न चैवम्। तथा च पक्षेतरः साध्यव्यापकतासंशयेन सन्दिग्धः कथं परं दूषयेदिति तन्न तथापि हि साध्यव्यापकता पक्षमालम्ब्य हेतुव्यभिचारसंशयाधायकत्वेन दूषणं स्यादेव। ननु यत्रोपाधिस्तत्रानुकूलतर्को यदि नास्ति तदा तदभावेनैव व्याप्तेरग्रहः अथास्ति तदा साध्यव्याप्यव्यापकत्वेनोपाधिः साध्यव्यापकत्वनिश्चयान्नोपाधिरित्युभयथापि नोपाधिर्दूषणं न च व्याप्यतदभावव्याप्यमुभयमत उपाधिरपि तदभावोन्नयनेन दोष इति वाच्यं उपाधेरात्मलाभार्थमनुकूलतर्काभावोपजीवकत्वेन तस्यैव दोषत्वादिति चेन्न सोपाधावेकत्र साध्यतदभावसम्बन्धस्य विरुद्धत्वादवच्छेदभेदेन तदुभयसम्बन्धो वाच्यः तथा च साधने साध्यसम्बन्धितावच्छेदकरूपमनुकूलतर्काभावोपजीवनमन्तरेणोपाधिरावश्यकस्तथानुकूलतर्काभावोऽप्यावश्यक इति उभयोरपि विनिगमकाभावाद्दूषकत्वम्। अन्ये तु यद्व्यावृत्त्या यस्य साधनस्य साध्यं निवर्त्तते स धर्मस्तत्र हेतावुपाधिः स च धर्मो यस्याभावात् पक्षे साध्यसाधनसम्बन्धाभावः यथा आर्द्रेन्धनवत्त्वं, व्यावर्त्तते हि तद्व्यावृत्त्या धूमवत्त्वमयोगोलके। अतएव तत्र साध्यसाधनसम्बन्धाभावः पक्षे। एवं भावत्वव्यावृत्त्या ध्वंसे जन्यत्वनित्यत्वयोः सम्बन्धो निवर्त्तमानः पक्षधर्मताबलादनित्यत्वाभावमादाय सिध्यति। तथा वायावुद्भूतरूपवत्त्वं निवर्त्तमानं बहिर्द्रव्यत्वे सति प्रत्यक्षत्वं निवर्त्तयत् प्रत्यक्षत्वाभावमादाय सिध्यति तथा चोभयत्रापि पक्षे साध्याभावसिद्ध्या साध्यसाधनसम्बन्धाभावोऽस्तीति अतएव बाधानुन्नीतपक्षेतरस्यानुपाधित्वं स्वव्याघातकत्वेन तद्व्यतिरेकस्य साध्याव्यावर्त्तकत्वादिति। यत्तूपाधिमात्रस्य लक्षणं व्यतिरेकिधर्मत्वं पक्षेतरोऽपि क्वचिदुपाधिः तत्तदुपाधेस्तु तत्तत्साध्यव्यापकत्वे सति तत्तत्साधनाव्यापकत्वं न च धूमवह्निसम्बन्धोपाधिः पक्षेतरत्वं स्यादिति वाच्यम् आपाद्याप्रसिद्धेरिति तन्न अनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकमुपाधित्वमिह निरूप्यं तच्च न व्यतिरेकित्वमतिप्रसङ्गात् विशेषलक्षणे वह्निधूमसम्बन्धे पक्षेतरत्वस्योपाधित्वप्रसङ्गाच्च। केचित्तु साधनव्यापकोऽप्युपाधिः क्वचिद्यत्र पक्षावृत्तिर्हेतुः यथा करका पृथिवी कठिनसंयोगात् इत्यत्रानुष्णाशीतस्पर्शवत्त्वं न च तत्र स्वरूपासिद्धिरेव दोषः सर्वत्रोपाधेर्दूषणान्तरसङ्करादित्याहुः। साध्यञ्च नोपाधिः व्यभिचारसाधने साध्याविशिष्टत्वात् अनुमितिमात्रोच्छेदप्रसङ्गाच्च।

स चायं द्विविधः निश्चितः सन्दिग्धश्च साध्यव्यापकत्वेन साधनाव्यापकत्वेन च निश्चितो व्यभिचारनिश्चयाधायकत्वेन निश्चितोपाधिः यथा वह्निमत्त्वेन धूमवत्त्वे साध्ये आर्द्रेन्धनप्रभववह्निमत्त्वम्। यत्र साधनव्यापकत्वसन्देहः साध्यव्यापकत्वसंशयो वा तदुभयसन्देहो वा तत्र हेतुव्यभिचारसंशायकत्वेन सन्दिग्धोपाधिः यथा मित्रातनयत्वेन श्यामत्वे साध्ये

शाकाद्याहारपरिणतिजत्वं न च तेन हेतुना शाकपाकजत्वमपि साध्यं तत्र श्यामत्वस्योपाधित्वादुभयस्यापि साधने अर्थान्तरं श्यामत्वमात्रे विवादो नतूभयत्र । न चैवं धूमाद्वह्न्यनुमानेऽपि वह्निसामग्र्युपाधिः स्यात् तत्र वह्निनेव तत्सामग्र्यापि समं धूमस्यानौपाधिकत्वनिश्चयात् । अत्र तु मित्रातनयत्वव्याप्यश्यामसामग्र्या स्यातव्यभियत्र कार्यकारणभावादीनां व्याप्तिग्राहकाणामभावात् । अतएव साध्यसामग्र्या सह हेतोरपि यत्र व्याप्तिग्राहकमस्ति तत्र सामग्री नोपाधिः यत्र तु तन्नास्ति तत्र साप्युपाधिरित्यभिसन्धाय सामग्री च क्वचिन्नोपाधिर्न तु सर्वत्र इत्युक्तं यथा तुल्ययोगक्षेमयोरुपाधेर्व्यापकतासन्देहे ईश्वरानुमाने शरीरजन्यत्वाणुत्वादिः यथा च शाकपाकजत्वस्य साध्यव्यापकतासन्देहे मित्रातनयत्वे । यत्तु उपाधिसन्देहो नोपाधिर्न वा हेत्वाभासान्तरमिति तदुद्भावने निरनुयोज्यानुयोग इति तन्न सन्दिग्धानैकान्तिकव्यभिचारसंशयाधायकत्वेन दूषणत्वादुपाधेरेव व्यभिचारनिश्चयाधायकतया ।

इदानीमुपाधेर्दूषकतावीजं निरूप्यते । नाप्यस्य व्यतिरेकद्वारा सत्प्रतिपक्षत्वेन दूषकत्वं तदा हि सत्प्रतिपक्षे सत्प्रतिपक्षान्तरवदुपाधेरुद्भावनं न स्यात् न च प्रतिपक्षबाहुल्येनाधिकचार्थमुद्भावनं शतमप्यन्धा न पश्यन्तीति न्यायात् एकेनापि बहूनां प्रतिबन्धाच्च व्याप्तिपक्षधर्मतेति बलं तच्च तुल्यमेव न तु भूयस्त्वमपि एकस्मादनुमितेरदर्शनात् । सन्दिग्धोपाधेरदूषकतापाताच्च तद्व्यतिरेकस्य पक्षे सन्दिग्धत्वात् अपि चैवं बाधोन्नीतपक्षेतरस्योपाधित्वं न स्यात् व्यतिरेकेऽसाधारण्यात् पक्षधर्मस्योपाधिर्न स्यात् यथा घटोऽनित्यो द्रव्यत्वादित्यत्र कार्यत्वं, गन्धाधरो द्रव्यं स्यातत्वेन प्रतीयमानत्वादित्यत्राश्रावणत्वं, तद्व्यतिरेकस्य पक्षावृत्तित्वात् । न च नायमुपाधिः, तल्लक्षणसत्त्वात् अन्यथा दूषकत्वसम्भवाच्च । किञ्च साध्यव्यापकव्याप्यत्वेनोपाधेः साध्याव्यापकत्वे तद्व्यतिरेकेण कथं सत्प्रतिपक्षः, न ह्यव्यापकव्यतिरेकादव्याप्यव्यतिरेकः । नापि व्याप्तिविरहरूपतया असिद्धत्वेनानौपाधिकत्वस्य व्याप्तित्वनिरासात् । नाप्यनौपाधित्वज्ञानस्य व्याप्तिधीहेतुत्वस्य तत्त्वेन व्याप्तिज्ञानकारणविघटकतया व्याप्यत्वासिद्धावन्तर्भावात् । नह्यन्यस्य साध्यव्यापकत्वसाधनाव्यापकत्वज्ञानमन्यव्याप्तिज्ञानं प्रति प्रतिबन्धकमित्युक्तम् । न च साध्यव्यापकत्वसाध्यव्याप्यत्वज्ञाने विद्यमाने साधनस्य साध्यव्यापकत्वज्ञानं नोत्पत्तुमर्हतीति वाच्यं न हि साध्यव्यापकव्याप्यत्वज्ञानं व्याप्तिज्ञानकारणं येन तत् प्रतिबन्धकं स्यात् किन्तु साध्यव्यापकव्यभिचारित्वेन साध्यव्यभिचारित्वज्ञानद्वारा, नापि व्यभिचारोन्नायकत्वेन । यथा हि साध्यव्यापकव्यभिचारितया साधनस्य साध्यव्यभिचारित्वमनुमेयं तथा साध्यव्याप्यव्यभिचारित्वेन साध्यव्यभिचारित्वमुपाधेरप्यनुमेयं व्याप्तिग्राहकसाम्यात् । नापि साध्यव्यापकाव्याप्यत्वेन व्याप्तिविरहोन्नायकतया, साध्यव्याप्याव्यापकत्वेनोपाधेरेव साध्याव्यापकत्वसाधनात् तस्मादुपाधिर्हेत्वाभासान्तरमिति । उच्यते आर्द्रेन्धनवत्त्वादेस्तर्कादिना साध्यव्यापकत्वसाधने व्यापकत्वे निश्चिते दूषकतावीजचिन्तनं यदि हि साध्यसाधनसहचारदर्शनेनोपाधौ साध्यव्यापकतानिश्चय एव नास्ति तदोपाधित्वनिश्चयाभावात् दूषकतैव नास्तीति क्व बहिर्भावान्तर्भावचिन्ता । किञ्च सत्प्रतिपक्षतया व्याप्यत्वासिद्धतया स्वातन्त्र्येण वा यदि दोषत्वं सर्वथा साध्यव्यापकतानिश्चयोवाच्यः तेन विना तेषामभावात् । तस्मादुपाधिनिश्चयाद्व्यभिचारनिश्चयः तत्संशयात् संशय इति व्यभिचारज्ञानद्वारा साध्यव्यापकाव्याप्यत्वेन व्याप्तिविरहोन्नायकतया वोपाधेर्दूषकत्वम् । यद्वा साध्यव्यापकाभाववद्वृत्तितया साध्यव्यभिचारित्वमुन्नेयं न च साधनाभाववद्वृत्तित्वमुपाधेरिति वाच्यम् उपाधिमात्रोच्छेदप्रसङ्गात् सत्प्रतिपक्षे पूर्वसाधनव्यतिरेकवत् अवृत्तिगगनादौ साध्याव्यापकत्वात् संयोगादौ हेतौ साधनव्यापकत्वाच्च । अथोपाध्याभासाः । असाधारणविपर्ययो यथान्वयव्यतिरेकिणि साध्ये बाधोन्नीतान्यपक्षेतरत्वम् । अप्रसिद्धसाध्यविपर्ययो यथा केवलान्वयिनि साध्ये पक्षेतरत्वादिः । बाधितसाधकविपर्ययो यथा वह्निरनुष्णस्तेजस्त्वादित्यत्राकृतकत्वम् । पक्षाविपर्ययो यथा क्षित्यादिकं सकर्तृकं कार्य्यत्वादित्यत्राणुव्यतिरिक्तत्वम् अत्राणुव्यतिरेकव्यतिरेकस्य क्षित्यादेरेकदेशवृत्त्या भागासिद्धेः । पूर्वसाधनव्यतिरेको यथा शर्करारसोऽनित्योऽनित्यवृत्तिगुणत्वात्, रसोऽनित्यो रसनेन्द्रियजन्यनिर्विकल्पकविषयत्वात् रसत्ववदित्यादौ पूर्वसाधनतायाः प्रयोगान्तरोधित्वेनाव्यवस्थितत्वात् कदाचिन्नित्यत्वसाधनव्यतिरेकस्योपाधित्वं कदाचिदनित्यत्वसाधनव्यतिरेकित्वस्येति वस्तुव्यवस्था न स्यात् उपाधेर्नित्यदोषत्वाच्च । न हि यद्येन

सोपाधिसम्बद्धं तत्त्वेनानुपाधित्वसम्बद्धं सम्भवति न तु सत्प्रतिपक्षोच्छेदः पूर्ब्बसाधनव्यतिरेकस्यानुपाधित्वे बीजं स्थापनाया यत्राभासत्वं तत्र पूर्ब्बसाधनव्यतिरेकस्य साध्याव्यापकत्वेनानुपाधित्वात् न च पूर्व्वहेतोस्तत एवासाधकत्वात् सत्प्रतिपक्षवैयर्थ्यं तत्रेति वाच्यम् अगृह्यमाणविशेषदशायां सत्प्रतिपक्षसम्भवात्। पूर्वसाधनव्याप्यव्यतिरेको यथा अकर्त्तृत्वानुमाने नित्यत्वादिः। पक्षविपक्षान्यतरान्यो यथा प्रसिद्धानुमाने पर्वतजलह्रदान्यतरान्यत्वम्। पक्षेतरसाध्याभावो यथात्रैव पर्वतेतराग्निमत्त्वं न चात्र व्यर्थविशेषणत्वं दूषणं सत्त्वेऽप्युपाधेराभासत्वात्। तत्तुल्यश्च यथात्रैव पर्व्वतेतरेन्धनवत्त्वम्। एवं वह्निसामग्र्यादिकमूह्यम्" विवरणं दीधित्यादौ द्रष्टव्यं विस्तरभयान्नोक्तम्। उपाधिना निर्मितः ठञ् स्त्रियां ङीप्। औपाधिक उपाधिजनिते मिथ्याभूते आरोपिते स्फटिकलौहित्यादौ जवासन्निकर्षात् स्फटिके च मिथ्याभूतं लौहित्यमुत्पद्यते इति वेदान्तिनः। नैयायिकादयस्तु तत्र लौहित्यस्य भ्रान्तिरित्युररीचक्रुः। प्रमेयवि०संग्रहे तयोः पक्षयोर्युक्तायुक्तत्वं यथावस्थितं तदत्र दर्श्यते।

"यस्तु लौहित्यमिथ्यात्वं न सहते स वक्तव्यः किं स्फटिकप्रवृत्ता नयनरश्मयः स्फटिकप्रतिफलितजवाकुसुममुपसर्पेयुः? किंवा कुसुमगतरूपमात्रं स्फटिके प्रतिविम्बितं स्फटिकात्मना भासते? उत पद्मरागादिमणीप्रभयेव कुसुमप्रभया व्याप्तत्वात् स्फटिको लोहितद्रवावभासते?। अथ वा तत्र व्याप्तवती प्रभैव लोहिता भाति? आहोस्वित्तया प्रभया स्फटिके नूतनं लौहित्यमुत्पादितम्! आद्ये नेत्राभिमुखं कुसुममपि प्रतीयेत। यदि च दोषवशान्न कुसुमेन संयोगः तर्हि लौहित्यमपि न भासेत तद्युक्तसमवायस्य तत्राभावात्। न द्वितीयः क्वचिदपि द्रव्यं परित्यज्य रूपमात्रस्य प्रतिविम्बादर्शनात्। तृतीये तु स्फटिकलौहित्ययोः सम्बन्धो मिथ्येति त्वयाभ्युपगतमेव स्यात् द्रववद्प्रयोगात्। चतुर्थे स्फटिकशौक्ल्यमपि प्रतीयेत अप्रतीतिकारणाभावात् न च जवाप्रभया विरोधिगुणयुक्तया शौक्ल्यमपसारितं तथासति नीरूपस्य स्फटिकस्याचाक्षुषत्वप्रसङ्गात् न हि रूपं विहाय द्रव्यमात्रस्य चाक्षुषत्वं सम्भवति वायोरपि तत्प्रसङ्गात्। पञ्चमेऽपि प्रभा निमित्तकारणं चेत्तदा प्रभापगमेऽपि स्फटिके लौहित्यमवतिष्ठेत्। उपादानं प्रभेति चेत् न मणाविव कुसुमे प्रभाया एवादर्शनात् पूर्वोक्तविकल्पदूषणानामङ्गीकारवादत्वात् तदेवं स्फटिके मिथ्या लौहित्यं कुसुमनिमित्तमित्यङ्गीकर्त्तव्यम्। एवमात्मन्यहङ्कारनिमित्तं कर्त्तृत्वादिकमारोप्यते"। प्रतिविम्बपक्षेऽपि प्रतिम्बपदार्थस्य यथा मिथ्यात्वं तदपि तत्रैव निर्णीतं यथा ननु जीवस्याहङ्कारस्यप्रतिविम्बत्वे दर्पणस्यमुखप्रतिविम्बवद्विम्बाद्भेदः स्यात्। तत्र हि ग्रीवास्यदर्पणस्ययोरन्योन्याभिमुखत्वेन भेदोऽनुभूयते। नैवं मदीयमिदं मुखमित्यैक्यप्रत्यभिज्ञयाभेदानुभवस्य बाधात्। न च प्रत्यभिज्ञैवेतरेण बाध्येति वाच्यम् सति भेदे प्रतिविम्बासम्भवात्। किं प्रतिविम्बोनाम मुखलाञ्छितमुद्रा उत दर्पणावयवा एव विम्बस्य सन्निधिवशात्तथा परिणमन्ते। नाद्यः दर्पणस्यमुखस्येतरस्मादल्पत्वात्। यत्र तु प्रौढ दर्पणे प्रौढं मुखमुपलभ्यते तत्रापि तस्य न मुद्रात्वम् दर्पणमुखयोः संयोगाभावात्। न द्वितीयः निमित्तकारणस्य विम्बस्यापायेऽपि तस्यावस्थानप्रसङ्गात् न हि तथावतिष्ठते। तेनैव पुरुषेण दर्पणे तिर्य्यङ्नीरीक्षिते पुरुषान्तरेण सम्यगवलोकिते वा तन्मुखानुपलम्भात्। न चैवं मन्तव्यम् क्वचिन्निमित्तापाये कार्यमप्यपैति हस्तसंयोगजन्यस्य कटप्रसारणस्य हस्तसंयोगापायेऽपायदर्शनादिति। न तत्र निमित्तापायात् कार्यापायः किन्तु चिरकालसंवेष्टनाहितेन संस्कारेण संवेष्टनलक्षणविरुद्धकार्योत्पादनात्। अन्यथा चिरकालप्रसारणेन संवेष्टनसंस्कारे विनाशितेऽपि हस्तापाये प्रसारणमपैयात्। न चैवमपैति। इह तु चिरकालविम्बसन्निधावप्यन्ते विम्बापाये प्रतिविम्बोऽपि गच्छत्येवेति न विम्बं परिणामस्य निमित्तम्। अथ मन्यसे चिरकालावस्थितोऽपि कमलविकासः सवितृकिरणस्य निमित्तस्यापायेऽपगच्छतीति। तन्न तत्रापि प्राथमिकमुकुलत्वे हेतुभिः पार्थिवैराप्यैश्च कमलावयवैः पुनरपि रात्रौ मुकुलत्वे विरुद्धकार्ये जनिते विकासापायात्। अन्यथा तादृगवयवरहिते म्लाने कमलेऽपि रात्रौ विकासोऽपगच्छेत्। आदर्शे तु मुखाकारपरिणते पुनः केन हेतुना समतलाकारपरिणामः तदवयवानां कारुकर्मव्यतिरेकेण अकिञ्चित्करत्वात्। अतएव विम्बासन्निधिमात्रेण नादर्शावयवा मुखाकारेण परिणमेरन्। अन्यथा दर्पणद्रव्ये प्रतिमाहस्ते कर्त्तव्ये सति लौकिका विम्बमेव सन्निधापयेयुर्नतद्धेतुमपेक्षेरन्। दर्पणद्रव्यस्याम्याकार परिणामे कारुकर्मापेक्षायामपि प्रतिविम्बपरिणामे पुनः स्वरूपपरिणामे वा न तदपेक्षेति चेत् एवमपि न मुख-

प्रतिबिम्बाकारपरिणामो युक्तिसहः चक्षुर्नासिकादि निम्नोन्नतभावस्य स्पर्शेनानुपलम्भात्। समतलमेव हि पाणिना स्पृश्यते। समतलेन व्यवहितं मुखमिति चेत्। तर्हि चाक्षुषमपि न स्यात्। तत्र एतत्सिद्धम्। विमत आदर्शमुखव्यक्त्यन्तररहितः तज्जन्मकारणशून्यत्वात्। यथा विषाणजन्मकारणशून्यं विषाणरहितं शशमस्तकमिति। ननु तर्हि शुक्तिरजतवन्मिथ्यात्वापत्तेर्न बिम्बैकत्वसिद्धिः प्रत्यभिज्ञा तु व्यभिचारिणी मिथ्यारजतेऽपि मदीयमिदं रजतमिति तद्दर्शनादिति चेत्। विषमोदृष्टान्तः नेदं रजतमिति हि तत्र रजतस्वरूपबाधया रजताभिज्ञाया भ्रमत्वे तत्प्रत्यभिज्ञाया अपि भ्रमत्वमुचितम् इह तु न तथा नेदं मुखमिति स्वरूपबाधः किन्तु नात्र मुखमिति देशसम्बन्धमात्रबाधे सत्युपत्तदा मदीयमेव मुखमिति प्रत्यभिज्ञा कथं भ्रमःस्यात्। न च स्वमुखावयवानामचाक्षुषत्वात् कथं प्रत्यभिज्ञानमिति वाच्यम् नासाग्रादिकतिपयावयवदर्शनादपि घटादिवदवयविनश्चाक्षुषत्वोपपत्तेः। यः पुनर्दर्पणापगमे प्रतिबिम्बापगमः नासौ स्वरूपबाधः दर्पणेऽपि तत्प्रसङ्गात्। ननु तत्त्वमसिवाक्येन जीवरूपः प्रतिबिम्बो बाध्यते यः स्थाणुरसौ पुरुष इति वद्बाधायां सामानाधिकरण्यात् संसार्य्यविनाशे च मोक्षानुपपत्तेः। मैवम् सोऽयं देवदत्त इति वदैक्यपरत्वेनापि सामाधिकरण्यसम्भवात् विरुद्धांशबाधमात्रेण मोक्षोपपत्तेः। तत्पक्षस्य जीवस्य बाधे मोक्षस्यापुरुषार्थत्वात्। यस्तु मन्यते प्रतिबिम्ब एव नास्ति, दर्पणप्रतिस्फालिता नेत्ररश्मयः परावृत्य बिम्बमेव दर्पणादविविक्तं गृह्णन्तीति, स्पष्टप्रत्यङ्मुखत्वाद्यनुभवेनैवासौ निराकरणीयः। कथं तर्हि मूर्त्तद्रव्यस्य मुखस्यैकस्य विच्छिन्नदेशद्वये युगपत् कार्त्स्न्येन वृत्तिः। दर्पणदेशवृत्तेर्मायाकृतत्वादिति ब्रूमः। न हि मायायामसम्भावनीयं नाम स्वशिरश्छेदादिकमपि स्वप्ने माया दर्शयति। नन्वेवमेव जलमध्येऽधोमुखस्य वृक्षप्रतिबिम्बस्य तीरस्थवृक्षेणैक्ये सति तीरस्थवृक्षोऽधिष्ठानं तत्र च मायया जलगतत्वमधोमुखत्वं चाध्यस्तमिति वक्तव्यम्। न चात्राध्यासहेतुरस्ति। अधिष्ठानस्य साकल्येन प्रतीतेस्तत्कथमसावध्यासः। उच्यते। किमत्र स्वावरणाभावादध्यासाभावः? किं वा दोषाभावात्। उतोपादानाभावात्? आहोस्विदध्यासविरोधिनोऽधिष्ठानतत्त्वज्ञानस्य सद्भावात्?। नाद्यः। चैतन्यावरणस्यैवाध्यासोपादानतया जडे पृथगावरणानुपयोगात्। एतेन तृतीयोऽपि निरस्तः। न द्वितीयः। सोपाधिकभ्रमेषूपाधेरेव दोषत्वात्। न चतुर्थः। निरुपाधिकभ्रमस्यैवाधिष्ठानतत्त्वज्ञानविरोधित्वात्। तर्हि सोपाधिकभ्रमस्य कर्तृत्वादेर्नात्मतत्त्वज्ञानान्निवृत्तिः किन्तु अहङ्कारोपाध्यपगमादिति चेत्। बाढम्। पारमार्थिकदर्पणाद्युपाधेस्तत्कृतभ्रमस्य च ज्ञानादनिवृत्तावप्यज्ञानजन्योपाधेरहङ्कारस्य निरुपाधिकभ्रमरूपस्यात्मतत्त्वज्ञानान्निवृत्तौ कर्तृत्वादेर्ज्ञानान्निवृत्तिरर्थात् सिध्यति"।

परिभाषायां तु उपाधिसन्निकर्षस्थले भ्रममेवाङ्गीचकार न तु तत्र मिथ्यात्वमिति भेदः। "तत्र सङ्केतवन्नाम सैव संज्ञेति कीर्त्त्यते। नैमित्तिकी पारिभाषिक्यौपाधिक्यपि तद्भिदा" इति संज्ञां त्रिधा विभज्य। "उभयावृत्तिधर्म्मेण संज्ञा स्यात् पारिभाषिकी। औपाधिकी त्वनुगतोपाधिना या प्रवर्त्तते" इति "यद्वाधुनिकसङ्केतशालित्वात् पारिभाषिकम्। जात्या नैमित्तिकं शक्तमौपाधिकमुपाधिना"। "यदुपाध्यवच्छिन्नशक्तिमन्नाम तदौपाधिकं यथाकाशपश्वादि" इति च शब्दप्र०। अत्र उपाधिना शक्तेरवच्छेदकत्वात् तत्त्वतत्वम् इति बोध्यम्।

उपाधेय त्रि० उप+आ+धा–कर्मणि यत्। १अभिनिवेशनीये २आरोप्ये ३उपाधिना विशेष्ये च। "उपाधेयसङ्करेऽपि उपाधेरसङ्करात्" जगदी०।

उपाध्याय पु० उपेत्याधीयतेऽस्मात् उप+अधि+इङ्–घञ्। "एकदेशन्तु वेदस्य वेदाङ्गान्यपि वा पुनः। योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते" इति मनूक्तलक्षणे वेदैकदेशतदङ्गाध्यापके। स्त्रियां ङीपि उपाध्याया उपाध्यायीतिरूपद्वयम्। उपाध्यायस्य पत्न्यर्थे ङीष् आनुक् च उपाध्यायानी "उपाध्यायानी स्फुतमतो" मा० आ० ३अ०. उपाध्यायी च। "उपाध्यायान् दशाचार्य्य आचार्य्याणां शतं पिता"। "आचार्यं स्वमुपाध्यायं पितरं मातरं गुरुम्" मनुः। तन्मरणे एकरात्राशौचम् "आचार्य्यपत्नीपुत्रोपाध्यायमातुलश्वशुरश्वशुर्य्यसहाध्यायिशिष्येष्वेकरात्रेण" विष्णूक्तेः।

उपानस् त्रि० उपगतमनः शकटं पितरं वा अत्या० समा०। १शकटसदृशे २पितृसदृशे पितृव्यादौ च। जातौ अच् समा०। उपानस शकटशब्दे मृण्मयादौ शकटे आकरेव्यङ्ग्यतयाऽस्य जातित्वम्। वेदे तु पुंस्त्वमपि "सचायोरिन्द्रश्चकृष उपानसः" ऋ० १०,१०५,४,

उपानह् स्त्री उप+नह–क्विप उपसर्गदीर्घः। चर्म्मपादुकायाम् । "कृतावरोहस्य हयादुपानहौ नियोक्तुकामे किल मद्यवर्म्मणी" इति नैध०। अत्रोपानहोः चर्म्मत्वेनोत्प्रेक्षणात् तस्याः चर्म्माङ्गावरकत्वं गम्यते तेन जोड़े (मोजा) इत्यादिप्रसिद्धाया एव तथात्वम् एकदेशमात्रावरकत्वे तु पादुकाशब्दप्रयोगः । "अभ्यङ्गमञ्जनं चाक्ष्णोरुपानच्छत्रधारणम्" "श्वेतं हिरण्यं गामश्वं छत्रोपानहमासनम्" मनुः छत्रोपानहमित्यत्र समा० द्व०अच् समा०। एवमन्यशब्देन द्वन्द्वेऽपि । दण्डोपानहमित्यादि "उपानहौ च वासश्च धृतमन्यैर्न धारयेत्" "स्वयं नोपानहौ हरेत्" "सोपानत्कश्च यद्भुङ्क्ते तद्वै रक्षांसि भुञ्जते" मनुः।[वैदिके वाक्यभेदे

उपानुवाक्य न०उपगतमनुवाक्याम् अत्या०स०। अनुवाक्या-

उपान्त पु०उपमितमन्तेन अवा०स०। १निकटे, २प्रान्ते च। "हिमाद्रुपान्तेषु ससर्ज दृष्टिम्" "नयनोपान्तविलोकितञ्च यत्" "उपान्तभागेषु च रोचनाङ्कः" कुमा० । "मेरोरुपान्तेष्वपि वर्त्तमानः" "उपान्तवानीरगृहाणि दृष्ट्वा" रघुः। "मध्योपान्तनिविष्टसिंहतलशौ" सा०द०"तिरोहितोपान्तनभोदिगन्तरा" किरा०। अन्तश्च सीमाभेदः स च दैशिकः कालिकः बुद्धिकल्पितश्च। "उपान्त्यतो निवर्त्तेत" इ०र०। अन्तस्य समीपम् अव्ययी०। ३अन्तसमीपे अव्य०।

उपान्तिक न०उप आधिक्ये प्रा०स०। १अत्यन्तान्तिके अतिनिकटे "यदुपान्तिकेषु ददतोमहीरुहः" माघः "प्रभवादुपान्तिकमीपरेणुकीर्णम्" किरा०। २तद्वति त्रि० अस्मादर्शआद्यच्त्वात् ततः प्रातिपदिकार्थे पञ्चमी "यस्य वीरं न पश्यामि धनञ्जयमुपान्तिकात्" भा०व० अ०

उपान्तिम त्रि० उपगतमन्तिमम् अत्या०स० उपान्तशब्दात् न डिमच् प्रत्ययविधौ तदन्तविध्यभावात् ।१अन्तिमोपगते "गुरुस्थानमङ्गं गुणाग्रेण कृष्णादुपान्तिमादीन्" लीला०। सामीप्ये अव्ययी०।२अन्तिमसमीपे अव्य०

उपान्त्य त्रि० उपान्ते भवः दिगा० यत् । अन्तसमीपवर्त्तिनि "अन्त्योपान्त्यौ त्रिभौ ज्ञेयौ कालानस्त्रिभो मतः" म०त० "छन्दःपदस्योपान्त्यस्योपधासंज्ञा" सि०कौ० ।

उपाप्ति स्त्री उप+आप–क्तिन् । प्राप्तौ, "यदेतानि सर्व्वाणि०र इत्युपापानि कैतेषामुपाप्तिरिति" शत०ब्रा० १०,१,२,६

उपाभृत स्त्री उप+आ-भृ–क्विप् तुक् । उपाहरणे, "स न जन्त्वोरुपाभृत्या क्षपा न तूर्व्वति" ऋ० १,१०८,२ । "उपाभृति उपाहरणे" भा० ।

उपाय पु० उप+अय–भावे घञ् । १उपगमे । उपायतेऽर्थोऽनेन करणे घञ् । २साधने, स च द्विविधः लौकिकोऽलौकिकश्च तत्र घटादिकं प्रति दण्डादिर्लौकिक उपायः स्वर्गं प्रति यागादिरलौकिक उपायः ।"उपायेन च यच्छक्यं तच्छक्यं न पराक्रमैः" हितो० । "पुंसो-नेष्टाभ्युपायत्वात्" कुसु०। ३राज्ञां रिपुनिराकरणहेतुषु सामादिषु च । "चतुर्थोपायसाध्ये तु रिपौ सान्त्वमपक्रिया" । "उपायमास्थितस्यापि नश्यन्त्यर्थाः प्रमाद्यतः" माघः । "सर्व्वोपायैस्तथा कुर्य्यान्नीतिज्ञः पृथिवीपतिः" मनुः । राज्ञां विजयोपायाश्च सामादयश्चत्वारः "साम भेदश्च दण्डश्च दानञ्चैव चतुष्टयम् । उपायाः कथितास्तासां स्वार्थसम्पत्तये भुवम्" इत्युक्ताः एतेषां लक्षणानि तत्तच्छब्दे वक्ष्यन्ते । क्वचित् सप्तोपायाः पठ्यन्ते ।"साम दानञ्च भेदश्च दण्डश्चेति चतुष्टयम् । मायोपेक्षेन्द्रजालञ्च सप्तोपायाः प्रकीर्त्तिताः" शृङ्गारोपायौ च द्वौ "शृङ्गारे तु पुराविद्भिरुपायौ द्वौ प्रकीर्त्तितौ । उपायौ द्वौ प्रयोक्तव्यौ कान्तायाः सुविचक्षणैः। सामदाने इति प्राहुः शृङ्गाररसकोविदाः । भेदे प्रयुज्यमाने हि रसाभासस्तु जायते । निग्रहे रसभङ्गः स्यात्तस्मात्तौ दूषितौ बुधैः" इत्यालङ्कारिकोक्तेः । ४प्रयुक्तधनप्राप्तिसाधने उत्तमर्णव्यापारभेदे च "यैर्यैरुपायैरर्थं स्वं प्राप्नुयादुत्तमर्णिकः । तैस्तैरुपायैः संगृह्य दापयेदधमर्णिकम्" मनुः । ते चोपायाः मनुना दर्शिता यथा "धर्म्मेण व्यवहारेण, छलेनाचरितेन च । प्रयुक्तं साधयेदर्थं पञ्चमेन बलेन च" । तत्र धर्म्म उक्तो बृहस्पतिना "सुहृत्सम्बन्धिसन्दिष्टैः साम्ना चानुगमेन च । प्रायेण वा ऋणी दाप्योधर्म एष उदाहृतः" छलादीनि तेनैवोक्तानि तेनैव "छद्मना याचितञ्चार्थमानीय ऋणिकाद्धनी । अन्याहृतानि वाऽऽहृत्य दाप्यते यत्र सोपधिः । दारपुत्रपशून् हृत्वा कृत्वा द्वारोपवेशनम् । यत्रार्थी दाप्यतेऽस्वार्थं तदाचरितमुच्यते । बद्ध्वा स्ववेश्मानीय ताडनाद्यैरुपक्रमैः । ऋणिकोदाप्यते यत्र बलात्कारः स कीर्त्तितः" व्यवहारस्तु मनुना स्वयं दर्शितः । "अर्थेऽपव्ययमानं तु कारणेन विभावितम् । दापयेद्धनिकस्यार्थं दण्डलेशञ्च शक्तितः" । तेन राजावेदनरूपोव्यवहारः" कुल्लू० (मालिम) । मेधातिथिस्तु निःस्वो व्यवहारेण दापयितव्यः अन्यत् कर्म्मोपकरणं धनं दत्त्वा, कृषिवाणिज्यादि तेन कारयित्वा तदुत्पन्न धन तस्माद्गृह्णीयादित्याह" । ५उपक्रमे च।

उपायन न० उपायते समीपे उपह्रियते उप+अय-ल्युट् । १उपढौकने (भेटदेओया)“तस्योपायनयोग्यानि रत्नानि सरितां पतिः” कुमा० कर्म्मणि ल्युट् । २उपढौकनीये “परस्परेण विज्ञातस्तेषूपायनपाणिषु” रघुः “साधिवेश्म निहितैरुपायनैः” माघः “प्रतीच्छन्नुपायनानि” काद० । भावे ल्युट् । ३उपगमने “उपायन उषसा गोमतीनाम्” ऋ० २,२८,२, “उपायने उपगमने” भा० । “सद्योपायनकीर्त्या उवास” छा०उ०“उपायनकीर्त्या उपगमनकीर्त्तनमात्रेण” शा०भा० ।

उपायिन् त्रि० उपायोऽस्त्यस्य इनि । १साधनयुक्ते । उप+इण-णिनि । २उपगन्तरि । “सर्व्वान् वोत्तमेनोपायित्वात्” कात्या०१,३,८, “पञ्चमत्तृतीयं सर्वे उपयन्ति उपगच्छन्ति” कर्कः । “स्वस्यामान्त्येन वोपायित्वात्” कात्या०२,५,१६,एकोऽधः प्राक्पायो मध्वाग्नतजायोपायी कात्या० ५,२,२,१, “ऋतुकालएव सवर्णोपायी” कात्या० १८,६,२७, । उभयतः स्त्रियां ङीप् ।

उपायु त्रि०उप+इण्-उण् । उपगन्तरि । “तस्मादाहु वायवः स्येति उपायवःस्येत्युहैक आहुरुप हि द्वितीयोऽयतीति” शत० ब्रा०१,७,१,२,

उपार पु० उप+ऋ-गतौ कर्म्मणि घञ् । उपागते १समीपे । “अस्ति ज्यायान् कनीयस उपारे” ऋ० ७,८६,६, “उपारे उपागते समीपे” भा० ।

उपारण पु०उपेत्य न रमणं यत्र पृषो० । उपेतस्यारतिस्थाने “सुषु मा समुपारणे” ऋ०८,३२,२१, उपारणे ब्राह्मणा उपेत्य यस्मिन् देशे न रमन्ते सउपारणः” भा० ।

उपारत त्रि० उप+आ+रम-क्त । १प्रतिनिवृत्ते “उपारताः पश्चिमरात्रगोचरात्” किरा० ।

उपारम्भ उप+आ+रभ-घञ् मुम् । प्रारम्भे “सर्व्वकर्म्मोपारम्भे विनियोगः” सन्ध्यापद्धतिः

उपार्ज्जन न० उप+अर्ज्ज-ल्युट् । स्वत्वसम्पादकव्यापार भेदे स च अर्ज्जनशब्दे ३६५ पृ० दर्शितः “शस्त्राणां मरणान्तात्तु लब्धा सम्यगुपार्ज्जनम्” रामा० । ण्वुल् । उपार्ज्जक तत्कर्त्तरि त्रि० ।

उपालब्ध त्रि० उप+आ+लभ-क्त । तिरस्कारेण निन्दिते

उपालम्भ पु०उप+आ-लभ-घञ् मुम् च । निन्दापूर्व्वकतिरस्कारे । ल्युट् । उपालम्भन तत्रार्थे न० । कर्म्मणि ण्यत् । उपालम्भ्य हिंसनीये . “चौर्यः पशुरुपालम्भ्यः सवनीयश्च” वाद्य्रा०सू० । तिरस्कार्य्ये तु न मुम् ; उपलभ्य इत्येव ।

उपावर्त्तन न० उप+आ+वृत-ल्युट् । १पुनरागमने प्रत्यावृत्तौ । “तदुपावर्त्तनशङ्कि मे मनः” रघुः ।२भूमौ लुठने च ।

उपावृत्त त्रि० उप+आ+वृत-क्त ।१श्रमापनयनाय पुनःपुनःभूमिलुठितेऽश्वे, २प्रतिनिवृत्ते च ।“उपावृत्तस्य पापेभ्यो-यस्य वासो गुणैः सह”ए०त० भविष्यपुराणम् ।

उपावृत् स्त्री उप+आ-वृत-क्विप् । १आवर्त्तिनां समीपे आवृत्तौ ।“शतं ते सन्त्वावृतः सहस्रं त उपावृतः”यजु० १२,८ । “सस्यैवावर्त्तनमावृत् तत्समीपवर्त्तिनामावर्त्तनमुपावृत्” वेददी० । २निवृत्तौ च । उप+आ+वृत-क्तिन् । उपावृत्तिरप्युभयत्र स्त्री

उपाश्रम पु० उपमितमाश्रमेण अत्रा०स० । १आश्रमसदृशे पाशुपतादिदीक्षादौ ।“उपाश्रमानप्यपरान् पाषण्डान् विविधानपि” भा०शा० ३५अ० । “उपाश्रमान् पाशुपतपाञ्चरात्राद्युक्त दीक्षायोगान्” नीलक० । सामीप्ये अव्य० । २आश्रमसमीपे अव्य० ।

उपाश्रय पु०उप+आ+श्रि-पचाद्यच् । १ आश्रयकर्त्तरि “ब्राह्मणोपाश्रयोनित्यमुत्कृष्टां जातिमश्नुते”मनुः कर्म्मणि अच् । २आश्रणीये “राजर्षीणां हि सर्वेषामन्ते वनमुपाश्रयः” भा०आश्र०४अ० । “त्वं हि नस्तात ! सर्वेषां दुःखितानामुपाश्रयः” भा०व० ६११ अ० । भावे अच् । ३आश्रये ।

उपाश्रित त्रि० उप+आ+श्रि-कर्म्मणि क्त । यस्याश्रयो गृहीतस्तस्मिन् “तथैवोपाश्रिता देवी बुद्धिर्बुद्धिमतांवर !” भा०शा०४५अ० उपश्रितेति पाठान्तरम् । कर्त्तरि क्त । २कृताश्रये त्रि० ।

उपासक त्रि०उप+आस-ण्वुल् । १सेवके २उपासनाकर्त्तरि “चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः । उपासकानां सिद्ध्यर्थं ब्रह्मणोरूपकल्पना”वेदा० । ३शूद्रे पुंस्त्री तस्य द्विजसेवकत्वात् तथात्वम् स्त्रियां जातित्वात् ङीष् । हेमचन्द्रोक्ते ४वाक्यदशाभेदे यथा वाक्यमुपक्रम्य“आचाराङ्गं सूत्रकृतं स्थानाङ्गं समवाययुक् । पञ्चमं भगवत्यङ्गं ज्ञाता धर्म्मकथापि च । उपासकान्तकृदनुत्तरोपपातिका दशाः । प्रश्नव्याकरणञ्चैव विपाकश्रुतमेव च । इत्येकादश सोपाङ्गान्यङ्गानि द्वादश पुनः” इति । उपासनञ्च चिन्तनापरपर्य्यायमननात्मिका मानसी क्रिया । सा च क्वचिद्गुणादिकमारोप्य प्रवर्त्तते यथा निर्गुणे ब्रह्मणि सगुणत्वाद्यारोपेण शास्त्रवचने निर्गुणस्य ब्रह्मणोरूपारोपेणैव उपासनोक्तेः अतएव“सर्वं खल्विदं ब्रह्म तज्जलान् इति

यान्त उपासीत यथाक्रतुरस्मिन् लोके भवति तथेतः प्रेत्य भवति स क्रतुं कुर्व्वीत" इत्युपक्रम्य "मनोमयः प्राणशरीरः" इत्यादिना छा० उ०। "उपासनायां तत्तद्गुणोपाधयोऽभिहिता निर्गुणे प्रथमं चित्तप्रवेशासम्भवेन सगुण एव मनोऽभिनिवेश्यम् ततो निविष्टमनसः चित्तैकाग्र्यम् ततः उपासितेश्वरानुग्रहादेव समाधियोगसिद्धिः इति पात० सू०भाष्ययोर्दर्शितम्। "ईश्वरप्रणिधानाद्वा" सू० "प्रणिधानाद्भक्तिविशेषादावर्जित ईश्वरस्तमनुगृह्णाति अभिध्यानमात्रेण" व्यास भा० "प्रणिधानाद्भक्तिविशेषात् मानसाद्वाचिकात् कायिकाद्वा आवर्जित अभिमुखीभूतस्तमनुगृह्णाति अभिध्यानमनागतेऽर्थे इच्छा, इदमस्याभिप्रेतमस्त्विति, तावन्मात्रेण न व्यापारान्तरेण" विव०। साक्षदीश्वरोपासनाऽसमर्थस्य तु प्रथमं स्थूलादिभ्यो विविच्यात्मन इन्द्रियाद्यात्मकतया चिन्तनं कार्य्यं तच्चिन्तने च फलमुक्तं वायुपु०। "दश मन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः। बौद्धाः दश सहस्राणि तिष्ठन्ति विगतज्वराः। पूर्णं शतसहस्रं तु तिष्ठन्त्यव्यक्तचिन्तकाः" विवृतञ्च तत् पात० भाष्यविवृतौ वाचस्पतिना "अव्यक्तमहदहङ्कारपञ्चतन्मात्रेष्वन्यतमात्मत्वेन प्रतिपन्नाः तदुपासनागततद्वासनावासितान्तःकरणाः पिण्डपातानन्तरमव्यक्तादीनामन्यतमे लीनाः" उक्ततत्तत्कालपर्य्यन्तं तिष्ठन्तीत्यर्थः। उपासनशब्दे ऽधिकं वक्ष्यते। तन्त्रोक्ता उपासकाश्च पञ्चविधाः पञ्चदेवतोपासकत्वात्। "शाक्तः शैवो गाणपत्यः सौरश्च वैष्णवः क्रमात्। उपासकाः पञ्चविधास्तन्त्रशास्त्रविधानतः"। पुनस्ते त्रिविधाः। "सात्त्विको राजसश्चैव तामसश्चेति ते त्रिधा"। प्रकारान्तरेणापि यथासम्भवं त्रिधा। "पशुर्वीरस्तथा दिव्य आचारभेदतस्त्रिधा"

उपासङ्ग पु० उपासज्यन्ते शरा अत्र उप+आ+सन्ज—आधारे घञ्। १तूणे। "इमे च कस्य नाराचाः सहस्रा लोमवाहिनः। समन्तात्कलधौताग्रा उपासङ्गे हिरण्मये" भा० वि० ४२अ०। "एतान् सर्व्वानुपासङ्गान् क्षिप्रं सन्नीहि मे रथे" वि० ४५अ०। भावे घञ्। २समीपासङ्गे च।

उपासन न० उपास्यन्ते भूयः क्षिप्यन्ते शरा अत्र उप+अस—क्षेपे आधारे ल्युट्। १शरक्षेपणशिक्षार्थे शराभ्यासे अमरः। उप+आस—भावे ल्युट्। २चिन्तने मनने ३सेवने च "नित्यनैमित्तिकप्रायश्चित्तोपासनेन" "उपासनानि शाण्डिल्यविद्यादीनि" "उपासनस्य चित्तैकाग्र्यं परं प्रयोजनम् अर्चिरादिमार्गेण ब्रह्मलोकप्राप्तिरवान्तरफलम्" इति वेदान्तसा०। "आचार्य्योपासनं शौचं स्थैर्य्यमात्मविनिग्रहः" इत्युपक्रम्य "एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा" गीतायाम् आचार्य्योपासनस्य ज्ञानसाधनत्वेन ज्ञानत्वमुक्तम् आचार्य्योपदेशं विना हि ज्ञानानुत्पत्तिः "आचार्य्योपासनं वेदशास्त्रार्थेषु विवेकिता" इत्युपक्रम्य "एतैरुपायैः संशुद्धः सत्त्वयुक्तोऽमृती भवेत्" याज्ञ० तद्धेतुत्वमुक्तम्। "आचार्य्यमग्निकार्य्यञ्च सन्ध्योपासनमेव च" मनुः। ब्रह्मण उपासनानि च वेदे नानाविधान्युक्तानि तत्र प्रतीकोपासनेतरेषामवान्तरफलमर्चिरादिमार्गेण ब्रह्मलोकप्राप्तिः। प्राप्तब्रह्मलोकस्य तत्र श्रवणमननादिसम्भवेन क्रममुक्तिः "न स पुनरावर्त्तते" इति श्रुतेः तत्र प्राप्तविवेकस्यैवानावृत्तिर्नान्तरापतने "तत्र प्राप्तविवेकस्यानावृत्तिश्रुतिः" सां० सू० उक्तेः। अतएव "इमं मानवं नावर्त्तन्ते" इति श्रुतौ इममिति इदमा विशेषणात् मानवान्तरे आवृत्तिरिति सूचितम्। कार्य्यब्रह्मणोऽधिकारसमाप्तिपर्य्यन्तं तत्रस्थायिनस्तु तेन सहैव मोक्षः। "कार्य्यात्यये तदध्यक्षेण सहातः परमभिधानात्" शा० सू० उक्तेः "ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे। परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्" स्मृतेः। प्रतीकोपासनायां तु नार्चिरादिना ब्रह्मलोकप्राप्त्यादि फलम् किन्तु तत्तच्छास्त्रोक्तं फलं तत्र तावत् प्रतीकोपासनं तत्फलञ्च शा० सू० भाष्ययोः दर्शितं यथा "न प्रतीकेन हि सः" "मनो ब्रह्मेत्युपासीतेत्यध्यात्मम्" "अथाधिदैवतमाकाशो ब्रह्मेति" तथा "आदित्यो ब्रह्मेत्यादेशः", "स यो नाम ब्रह्मेत्युपास्ते" इत्येवमादिषु प्रतीकोपासनेषु संशयः किमेष्वात्मग्रहः कर्त्तव्यो न वेति। किन्तावत् प्राप्तं तेष्वात्मग्रह एव युक्तः कस्मात्? ब्रह्मणः श्रुतिष्वात्मत्वेन प्रसिद्धत्वात् प्रतीकानामपि ब्रह्मविकारत्वात् ब्रह्मत्वे सत्यात्मत्वोपपत्तेरित्येवं प्राप्ते ब्रूमः। न प्रतीकेष्वात्ममतिं बध्नीयात् न हि स उपासकः प्रतीकानि तान्यात्मत्वेनाकलयेत्। यत्पुनर्ब्रह्मविकारत्वात् प्रतीकानां ब्रह्मत्वं ततश्चात्मत्वमिति, तदसत् प्रतीकाभावप्रसङ्गात् विकारस्वरूपोपमर्देन हि नामादिजातस्य ब्रह्मत्वमेवाश्रितं भवति स्वरूपोपमर्दे च नामादीनां कुतः प्रतीकत्वमात्मग्रहो वा। न च ब्रह्मण आत्मत्वाद्ब्रह्मदृष्ट्युपदेशेष्वात्मदृष्टिः कल्प्या कर्तृत्वाद्यनिराकरणात् कर्तृत्वादिसर्व्वसंसारधर्म्मनिराकरणेन हि ब्रह्मण आत्मत्वोपदेशनिराकरणेन चोपासनविधानं

ततश्चोपासकस्य प्रतीकैः समत्वादात्मग्रहो नोपपद्यते । न हि रुचकस्वस्तिकयोरितरेतरात्मत्वमस्ति किन्तु सुवर्णात्मत्वमेव । ब्रह्मात्मत्वेनैकत्वे प्रतीकाभावप्रसङ्गमवोचाम । अतो न प्रतीकेष्वात्मदृष्टिः क्रियते” भा० । “ब्रह्मदृष्टिरुत्कर्षात्” भा० । “तेष्वेवोदाहरणेषु संशयः किमादित्यादिदृष्टयो ब्रह्मण्यध्यसितव्याः ? किं वा ब्रह्मदृष्टिरादित्यादिष्विति ? । कुतः संशयः ? सामानाधिकरण्ये कारणानवधारणात् अत्र हि ब्रह्मशब्दस्यादित्यादिशब्दैः सामानाधिकरण्यमुपलभ्यते “आदित्यो ब्रह्म” प्राणो ब्रह्म” “विद्युद्ब्रह्म” इत्यादिसमानविभक्तिनिर्देशात् । न चात्राञ्जसं समानाधिकरण्यमवकल्पते अर्थान्तरवचनत्वाद्ब्रह्मादित्यादिशब्दानां न हि भवति गौरश्व इति सामानाधिकरण्यम् । ननु प्रकृतिविकारभावाद्ब्रह्मादित्यादीनां मृच्छरावादिवत् सामानाधिकरण्यं स्यात् नेत्युच्यते विकारप्रविलयो ह्येवं प्रकृतिसामानाधिकरण्यात् स्यात् ततश्च प्रतीकाभावप्रसङ्गमवोचाम । परमात्मवाक्यञ्चेदमिदानीं स्यात् ततश्चोपासनाधिकारो बाध्येत परिमितविकारोपादानञ्च व्यर्थम् । तस्माद्ब्राह्मणः “अग्निर्वैश्वानरः” इत्यादिवदन्यतरस्मिन्नन्यतरदृष्ट्यध्यासे सति क्वदृष्टिरध्यस्यतामिति संशयः । तस्मादनियमः नियमकारिणः शास्त्रस्याभावादित्येवं प्राप्तम् । अथवा आदित्यादिदृष्टय एव ब्रह्मणि कर्त्तव्या इत्येवं प्राप्तम् एवं ह्यादित्यादिदृष्टिभिर्ब्रह्मोपासनस्य फलवदिति शास्त्रमर्यादा । तस्माच्च ब्रह्मदृष्टिरादित्यादिष्वित्येवं प्राप्ते ब्रूमः । ब्रह्मदृष्टिरेवादित्यादिषु स्यादिति । कस्मात् ? उत्कर्षात् एवमुत्कर्षेणादित्यादयो दृष्टा भवन्ति उत्कृष्टदृष्टेस्तेष्वध्यासात् । तथा च लौकिको न्यायोऽनुगतो भवति । उत्कृष्टदृष्टिर्हि निकृष्टेऽध्यसितव्येति लौकिको न्यायः यथा राजदृष्टिः क्षत्तरि, सचानुगन्तव्यः विपर्यये प्रत्यवायप्रसङ्गात् । न हि क्षत्तृदृष्टिपरिगृहीतो राजा निकर्षं नीयमानः श्रेयसे स्यात् । ननु शास्त्रप्रामाण्यादनाशङ्कनीयोऽत्र प्रत्यवायप्रसङ्गः न च लौकिकेन न्यायेन शास्त्रीया दृष्टिर्नियन्तुं युक्तेति । अत्रोच्यते निर्द्धारिते शास्त्रार्थे एतदेवं स्यात् सन्दिग्धे तु तस्मिंस्तन्निर्णयं प्रति लौकिकोऽपि न्याय आश्रीयमाणो न विरुध्यते । तेन चोत्कृष्टदृष्ट्यध्यासे शास्त्रार्थेऽवधार्यमाणे निकृष्टदृष्टिमध्यस्य प्रत्यवेयादिति श्लिष्यते । प्राथम्याच्चादित्यादिशब्दानां मुख्यार्थत्वमविरोधादुपग्रहीतव्यम् ।

तैः स्वार्थवृत्तिभिरवरुद्धायां बुद्धौ पश्चादवतरतो ब्रह्मशब्दस्य मुख्यया सामानाधिकरण्यासम्भवाद्ब्रह्मदृष्टिविधानार्थतैवावतिष्ठते । इतिपरत्वादपि ब्रह्मशब्दस्यैव एषोऽर्थोन्याय्यः । तथा हि ब्रह्मेत्यादेशः ब्रह्मेत्युपासीत, ब्रह्मेत्युपास्ते इति च सर्व्वत्रेतिपरं ब्रह्मशब्दमुच्चारयति शुद्धांस्त्वादित्यादिशब्दान् । ततश्च यथा शुक्तिकां रजतमिति प्रत्येतीत्यत्र शुक्तिवचन एव शुक्तिकाशब्दः रजतशब्दस्तु रजतप्रतीतिलक्षणार्थः प्रतीत्यैव हि केवलं रजतमिति न तु तत्र रजतमस्ति, एवमत्राप्यादित्यादीन् ब्रह्मेति प्रतीयादिति गम्यते । वाक्यशेषोऽपि च द्वितीयानिर्देशेनादित्यादीनेवोपास्तिक्रियया व्याप्यमानान् दर्शयति “स य एतदेवं विद्वानादित्यं ब्रह्मेत्युपास्ते” “यो वाचं ब्रह्मेत्युपास्ते” “यः सङ्कल्पं ब्रह्मेत्युपास्ते” इति । यत्तूक्तं ब्रह्मोपासनमेवात्रादरणीयं फलवत्त्वायेति तदयुक्तं उक्तेन न्यायेनादित्यादीनामेवोपास्यत्वस्यावगमात् । फलन्त्वतिथ्याद्युपासन इवादित्याद्युपासनेऽपि ब्रह्मैव दास्यति सर्वाध्यक्षत्वात् । वर्णितञ्चैतत् “फलमत उपपत्तेरित्यत्र” । ईदृशञ्चात्र ब्रह्मण उपास्यत्वं यत्प्रतीकेषु तद्दृष्ट्यध्यारोपणं प्रतिमादिष्विव विष्णवादीनाम्” भा० । एवं प्रतीकोपासनं निरूप्य तत्फलसत्त्वम् तत्रैव ४अ० ३पादे “अप्रतीकालम्बनान्नयतीति बादरायण उभयथाऽदोषात्तत्क्रतुश्च” सू० । “स्थितमेतत् कार्य्यविषया गतिर्न परविषयेति । इदमिदानीं सन्दिह्यते किं सर्व्वान् विकारालम्बनानविशेषेणैवामानवः पुरुषः प्रापयति ब्रह्मलोकम् ? उत कांश्चिदेवेति ? । किं तावत् प्राप्तं सर्वेषामेवैषां विदुषामन्यत्र परस्माद्ब्रह्मणो गतिः स्यात् । तथा हि नियमः सर्व्वस्वामीत्यत्राविशेषणैवैषा विद्यान्तरेष्ववतारितेत्येवं प्राप्ते प्रत्याह । अप्रतीकालम्बनानिति । प्रतीकालम्बनान् वर्जयित्वा सर्व्वानन्यान् विकारालम्बनान्नयति ब्रह्मलोकमिति बादरायण आचार्यो मन्यते । न ह्येवमुभयथाभावाभ्युपगमे कश्चिद्दोषोऽस्ति । अनियमन्यायस्य प्रतीकव्यतिरिक्तेष्वप्युपासनेषूपपत्तेः । तत्क्रतुश्चास्योभयथाभावस्य समर्थको हेतुर्द्रष्टव्यः । यो हि ब्रह्मक्रतुः स ब्राह्ममैश्वर्य्यमाप्नुयादिति श्लिष्टतरं “यथा यथोपासते तदेव भवतीति” श्रुतेः । न तु प्रतीकेषु ब्रह्मक्रतुत्वमस्ति प्रतीकप्रधानत्वादुपासनस्य । ननु अब्रह्मक्रतुमपि ब्रह्म गच्छतीति श्रूयते यथा पञ्चाग्निविद्यायां स एनान् ब्रह्म गमयतीति” । भवतु यत्रैवमाहत्य वाद उपलभ्यते, तदभावे-

ब्रौत्सर्गिकेण तत्क्रतुन्यायेन ब्रह्मक्रतूनामेव तत्प्राप्तिर्नेतरेषामिति मन्यते" भा० । "विशेषञ्च दर्शयति" सू० । "नामादिषु च प्रतीकोपासनादिषु पूर्व्वस्मात् पूर्व्वस्मात् फलविशेषमुत्तरस्मिन्नुत्तरस्मिन्नुपासने दर्शयति 'यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवति" "वाग्वाव नाम्नो भूयसी" "यावद्वाचो गतं तत्रास्य यथाकामचारो भवति "मनो वाव वाचो भूयः" इत्यादिना । स चायं फलविशेषः प्रतीकतन्त्रत्वादुपासनानामुपपद्यते, ब्रह्मतन्त्रत्वे तु ब्रह्मणोऽविशिष्टत्वात् कथं फलविशेषः स्यात्? । तस्मान्न प्रतीकालम्बनानामितरैस्तुल्यफलत्वमिति" भा० ।

उपासनञ्च मानसव्यापारो यद्यपि देहव्यापाराभेदस्तथापि आसीनस्यैव तद्भवति नान्यस्य यथाह शा० सू० भाष्ययोः" "आसीनः सम्भवात्" सू० । "कर्माङ्गसम्बन्धिषु कर्मतन्त्रत्वादासनादिचिन्तनेऽपि सम्यग्दर्शने वस्तुतन्त्रत्वात् ज्ञानस्य, इतरेषूपासनेषु किमनियमेन तिष्ठन्नासीनः शयानो वा प्रवर्त्तेतोत नियमेन आसीन एवेति । तत्र मानसत्वादुपासनस्यानियमः शरीरस्थितेरित्येवं प्राप्ते ब्रवीति आसीन एवोपासीतेति कुतः? सम्भवात् । उपासनं नाम समानप्रत्ययप्रवाहकरणं न च तद्गच्छतो धावतो वा सम्भवति गत्यादीनां चित्तविक्षेपकरत्वात् । तिष्ठतोऽपि देहधारणे व्यापृतं मनो न सूक्ष्मवस्तुनिरीक्षणक्षमम्भवति । शयानस्याप्यकस्मादेव निद्रयाऽभिभूयते । आसीनस्य त्वेवंजातीयको भूयान्दोषः सुपरिहर इति सम्भवति तस्योपासनम्" भा० । "ध्यानाच्च" सू० "अपि च ध्यायत्यर्थ एषः यत्समानप्रत्ययप्रवाहकरणं, ध्यायतिश्च प्रशिथिलाङ्गचेष्टेषु प्रतिष्ठितदृष्टिष्वेकविषयाक्षिप्तचित्तेषूपचर्यमाणो दृश्यते ध्यायति बको ध्यायति प्रोषितबन्धुरिति । आसीनश्चानायासो भवति । तस्मादप्यासीनकर्म उपासनम्" भा० । "अचलत्वापेक्ष्य" सू० । "अपि च ध्यायतीव पृथिवीत्यत्र पृथिव्यादिष्वचलत्वमपेक्ष्य ध्यायतिवादो भवति तच्च लिङ्गमुपासनस्यासीनकर्मत्वे" भा० । "स्मरन्ति च" सू० "स्मरन्त्यपि च शिष्टा उपासनाङ्गत्वेनासनम्" "शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः" इत्यादिना अतएव च पद्मकादीनामासनविशेषाणामुपदेशो योगशास्त्रे" भा० । उपासनञ्चामरणात् भूयः कर्त्तव्यमित्यपि तत्रैवोक्तम् ।

"आ प्रायणात् तत्रापि हि दृष्टम्" सू० । "आवृत्तिः सर्व्वोपासनेष्वादर्त्तव्येति स्थितमाद्येऽधिकरणे । तत्र यानि तावत् सम्यग्दर्शनार्थान्युपासनानि तान्यवघातादिवत् कार्यपर्य्यवसानानीति ज्ञातमेवैषामावृत्तिपरिमाणं न हि सम्यग्दर्शने कार्ये निष्पन्ने यत्नान्तरं किञ्चिच्छासितुं शक्यम् अनियोज्यब्रह्मात्मत्वप्रतीतेः शास्त्रस्य विषयत्वात् । यानि पुनरभ्युदयफलानि तेष्वेषा चिन्ता किं कियन्तञ्चित्कालं प्रत्ययमावर्त्त्योपरमेत् उत यावज्जीवमावर्त्तयेदिति । किन्तावत् प्राप्तं कियन्तञ्चित्कालं प्रत्ययमभ्यस्योत्सृजेत् आवृत्तिविशिष्टस्योपासनशब्दार्थस्य कृतत्वादित्येवं प्राप्ते ब्रूमः । आ प्रायणादेवावर्त्तयेत् प्रत्ययम्, अन्त्यप्रत्ययवशाददृष्टफलप्राप्तेः । कर्माण्यपि हि जन्मान्तरोपभोग्यं फलमारभमाणानि तदनुरूपं भावनाविज्ञानं प्रायणकाले आक्षिपन्ति । "सविज्ञानो भवति" "सविज्ञानमेवान्ववक्रामति" "यच्चित्तस्तेनैष प्राणमायाति प्राणस्तेजसा युक्तः सहात्मना यथा सङ्कल्पितं लोकं नयतीति" चैवमादिश्रुतिभ्यः तृणजलायूकानिदर्शनाच्च । प्रत्ययास्त्वेते स्वरूपानुवृत्तिं मुक्त्वा किमन्यत् प्रायणकाले भावनाविज्ञानमपेक्षेरन् । तस्माद्ये प्रतिपत्तव्यफलभावनात्मकाः प्रत्ययास्तेष्वा प्रायणादावृत्तिः । तथा च श्रुतिः "स यावत्क्रतुरयमस्माल्लोकात् प्रैतीति" प्रायणकालेऽपि प्रत्ययानुवृत्तिं दर्शयति । स्मृतिरपि "यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम् । तं तमेवैति कौन्तेय! सदा तद्भावभावितः" इति "प्रयाणकाले मनसाऽचलेनेति" च । सोऽन्तवेलायामेतत् त्रयं प्रतिपद्येतेति" च मरणवेलायां कर्त्तव्यशेषं श्रावयति" भा० । प्रतीकभिन्नेषु उपासनेषु अर्चिरादिमार्गेण ब्रह्मलोकावाप्तिः फलम् । "अर्चिरादिना तत्प्रथितेः" शा० सू० भाष्ययोरुक्तम् तच्च अर्चिरादिमार्गशब्दे आतिवाहिकशब्दे च उक्तम् । युच् उपासनाप्यत्र स्त्री । "न्यायचर्च्चेयमीशस्य मननव्यपदेशभाक् । उपासनैव क्रियते श्रवणानन्तरागता" कुसु० । सेवने च "उपासनामेत्य पितुः स्म रज्यते" नैष० । शाण्डिल्योक्ता भक्तिरूपोपासना भक्तिशब्दे वक्ष्यते ।

उपासा स्त्री उप+आस भावे अ । उपासने "उपासाभिदम्य प्रसंगामात्मम्" सां० सू०

उपासादित त्रि० उप+आ+सद–णिच् कर्म्मणि क्त । १प्राप्ते भावे क्त । २प्राप्तौ ततः तत्कृतमनेन इष्टा० इनि उपासादितिन् कृतलाभे स्त्रियां ङीप् ।

उपासित त्रि० उप+आस–सेवनार्थत्वात् कर्म्मणि क्त । कृतोपासने यस्योपासनं कृतं तस्मिन् देवादौ ।

उपास्ति स्त्री उप+आस-क्तिन् स्त्रीप्रत्ययत्वेऽपि वा० युच् अ वा न क्तिनो बाधकः । उपासनायाम् "स्वर्गापवर्गयोर्मार्गमामनन्ति

मनीषिणः । यदुपास्तिमसावत्र परमात्मा निरूप्यते" कुल्लू० ।

उपास्त्र न० उपगतमस्त्रम् उपकरणत्वेन अत्या० स० । अस्त्रोपकरणे तूणादौ" । "राजानौ नीतिमार्गरतौ अस्त्रोपास्त्रकृतिनौ भा० व० १८६ अ० ।

उपास्य त्रि० उप+आस–सेवनार्थत्वात् कर्मणि ण्यत् । १सेवनीये २चिन्तनीये "पुत्रवच्च ततो रक्ष्या उपास्या गुरवच्च ते" भा० अनु० ८अ० । "गङ्गा सर्वैरात्मवद्भिरुपास्या" भा० अनु० २६अ० । उप+आस–ल्यप् । ३सेवयित्वेत्यर्थे ४चिन्तयित्वेत्यर्थे च अव्य० । ४उपास्य सन्ध्यां विधिवत्" स्मृतिः ।

उपाहित पु० उप आसन्नमहितं यतः । १उल्कापातादौ अग्न्युत्पातरूपे उपद्रवे उप+आ–धा-क्त । २आरोपिते, त्रि०

उपेक्ष पु० गान्दिनीसुते अक्रूरभ्रातृभेदे । "अक्रूरः सुषुवे तस्मात् श्वफल्कात् भूरिदक्षिणः । उपमद्गुस्तथा मद्गुर्मुदरश्चारिमेजयः । अविक्षिपस्तथोपेक्षः शत्रुघ्नोऽथारिमर्द्दनः" हरि० ३५ तत्रैव ३८अध्याये च गान्दिनीसुतत्वमस्योक्तम्

उपेक्षक त्रि० उप+ईक्ष–ण्वुल् । उपेक्षाकारके योगिनि "उपेक्षकोऽसङ्कुसुको मुनिर्भावसमन्वितः" मनुः "दृष्टा मयेत्युपेक्षक एको दृष्टाहमित्युपरता त्वन्या" सां० का०

उपेक्षण न० उप+ईक्ष–भावे ल्युट् । १त्यागे २औदासीन्ये च ३राज्ञां सप्तविधोपायान्तर्गते उपायभेदे "साम्ना दानेन भेदेन दण्डेनोपेक्षणेन च" भा० व० १५० । उपेक्षणस्य यथोपायत्वं तथा उपायशब्दे उक्तम् ।

उपेक्षणीय त्रि० उप+ईक्ष–अनीयर् । १त्याज्ये २प्रतीकारार्थमनालोचनीये च "नश्यत् पुरस्तादनुपेक्षणीयम्" रघुः ।

उपेक्षा स्त्री उप+ईक्ष–अ । १त्यागे इदं न मम स्यादिति इच्छाभेदे २औदासीन्ये ४अनपेक्षणे च । उपेक्षा च परस्वत्वानभिसन्धानापूर्वकस्वत्वप्रागभावासमानकालीनस्वत्वाविषयेच्छा । उपेक्षायाः स्वत्वनाशकत्वम् स्मृतौ व्यवस्थापितम् "उपेक्षानात्मकं तत्र निश्चयः कारणं भवेत्" भाषोक्ते ५इदमुपादेयं न भवतीत्याकारकज्ञानभेदे च "कुर्यामुपेक्षां हतजीवितेऽस्मिन्" रघुः । ६योगशास्त्रोक्ते चित्तप्रसादनार्थभावनाचतुष्टयान्तर्गते भावनाभेदे । "मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम्" पात० सू०

उपेत त्रि० उप+इण–क्त । १उपगते २समीपगते सेवादिधर्मेण ३प्राप्ते ४उपनीते च । "यं प्रव्रजन्तमनुपेतमपेतकृत्यम्" भा० स्क० । "न स्त्री जुहुयान्नानुपेतः" स्मृतिः । "अनुपेतः अनुपनीतः" म० त० रघु० । गर्भाधानार्थं ५स्त्रियमुपगते च "गर्भाधानमुपेतो ब्रह्मगर्भं सन्दधाति" हारीतः "उपेतः स्त्रियमुपगतः" सं० त० रघुनन्दनः ।

उपेन्द्र पु० उपगत इन्द्रम् अनुजत्वात् अत्या० स० । १विष्णौ । स हि कश्यपात् अदितौ इन्द्रादनन्तरं वामनरूपतया संजातः इति तस्य तथात्वम् । "उपेन्द्रो वामनः प्रांशुः" विष्णु स० । अत्र भाष्ये अन्यापि निरुक्तिर्दर्शिता यथा । "ममोपरि यथेन्द्रस्त्वं स्थापितो गोभिरीश्वरः । उपेन्द्र इति कृष्ण ! त्वां गास्यन्ति दिवि देवताः" इति हरिवंशवचनात् उपरि इन्द्रः उपेन्द्रः" इति । अत्र वासुदेवस्यैव यथोपेन्द्रनामता, तथा गोवर्द्धनोद्धारणेन गोषु रक्षितासु तत्प्रीतये गोभिस्तस्य सर्वोपरिलोकस्थितत्वेन उपेन्द्रनामतयाऽभिषेकः कृत इति वर्णितं हरिवं० ७६अ० यथा । "अपामधस्ताल्लोकोऽयं तस्योपरि महीधराः । नागानामुपरिष्टाद्भूः पृथिव्युपरि मानुषाः । मनुष्यलोकादूर्द्ध्वं तु खगानां गतिरुच्यते । आकाशस्योपरि रविर्द्वारं स्वर्गस्य भानुमान् । देवलोकः परस्तस्माद्विमानगमनो महान् । यत्राहं कृष्ण ! देवानामैन्द्रे विनिहितः पदे । स्वर्गादूर्द्ध्वं ब्रह्मलोको महर्षिगणपूजितः । तत्र सोमगतिश्चैव ज्योतिषाञ्च महात्मनाम् । तस्योपरि गवां लोकः सिद्धास्तं पालयन्ति हि । स हि सर्वगतः कृष्ण ! महाकाशगतो महान् । उपर्युपरि तत्रापि गतिस्तव तपोमयी । यां न विद्म वयं सर्वे पृच्छन्तोऽपि पितामहम् । लोकास्त्वधो दुष्कृतिनां नागलोकस्तु दारुणः । पृथिवी कर्मशीलानां क्षेत्रं सर्वस्य कर्मणः । खमस्थिराणां विषयो वायुना तुल्यवर्त्तिनाम् । गतिः शमदमाढ्यानां स्वर्गः सुकृतकर्मणाम् । ब्राह्मे तपसि युक्तानां ब्रह्मलोकः परा गतिः । गवामेव तु गोलोको दुरारोहा हि सा गतिः । स तु लोकस्त्वया कृष्ण ! सीदमानः कृतात्मना । धृतो धृतिमता वीर ! निघ्नतोपद्रवं गवाम् । तदहं समनुप्राप्तो गवां वाक्येन नोदितः । ब्रह्मणश्च महाभाग ! गौरवात्तव चानघ ! । अहं भूतपतिः कृष्ण ! देवराजः पुरन्दरः । अदितेर्गर्भपर्याये पूर्वजस्ते पुरातनः । तेजस्तेजस्विनश्चैव यत्ते दर्शितवानहम् । मेघरूपेण तत्सर्वं क्षन्तुमर्हसि मे विभो ! । एवं शान्तमनाः कृष्ण ! स्वेन सौम्येन तेजसा । ब्रह्मणः शृणु मे वाक्यं गवाञ्च गजविक्रम ! । आह त्वां भगवान् ब्रह्मा गावश्चाकाशगा दिवि । कर्मभिस्तोषिता दिव्यैस्तव संरक्षणादिभिः । भवता रक्षिता लोका गोलोकश्च महानयम् । तदयं पुङ्गवैः सार्द्धं वर्द्धिभिः प्रसवैस्तथा । कर्ष-

तान् पुङ्गवैर्वाह्यैर्मध्येन हविषा सुरान्। त्रियं च शत्-प्रवृत्तेन तर्पयिष्यामः कामदाः। तदस्माकं गुरुस्त्वं हि माधव महाबल!। अद्यप्रभृति नो राजा त्वमिन्द्रो वै भव प्रभो!। तस्मात्त्वं काञ्चनैः पूर्णैर्दिव्यस्य पयसो घटैः। एभिरद्याभिषिच्यस्व मया हस्तावनामितैः। अहं किलेन्द्रो देवानां त्वङ्गवामिन्द्रतां गतः। गोविन्द इति लोकास्त्वां स्तोष्यन्ति भुवि शाश्वतम्। ममोपरि यथेन्द्रस्त्वं स्थापितो गोभिरीश्वरः। उपेन्द्र इति कृष्ण! त्वां गास्यन्ति दिवि देवताः"।

"ततः शक्रस्तु तान् गृह्य घटान् दिव्यपयोधरान्। अभिषेकेण गोविन्दं योजयामास योगवित्। दृष्ट्वाऽभिषिच्यमानं तं गावस्ताः सह यूथपैः। स्तनैः प्रस्रवसंयुक्तैः सिषिचुः कृष्णमव्ययम्। मेघाश्च दिवि शुभ्राभिः सामृताभिः समन्ततः। सिषिचुस्तोयधाराभिः सिच्यमानं तमव्ययम्। वनस्पतीनां सर्वेषां सुस्रावेन्दुनिभं पयः। ववर्षुः पुष्पवर्षञ्च नेदुस्तूर्याणि चाम्बरे। स्तुवन्ति मुनयः सर्वे वाग्भिर्मन्त्रपरायणाः। एकार्णवविनिर्मुक्ता दधार वसुधा वपुः। प्रसादं सागरा जग्मुर्ववौ ता जगद्धिताः। मार्गस्थो विबभौ भानुः सोमो नक्षत्रसंयुतः। ईतयः प्रशमं जग्मुर्जग्मुर्निर्वैरतां नृपाः। प्रवालपत्रशवलाः पुष्पवन्तश्च पादपाः। मदं प्रसुस्रुवुर्नागा यातास्तोषं वने मृगाः। अलङ्कृता मानरूपैर्धातुभिर्भान्ति पर्वताः। देवलोकोपमो लोकस्तृप्तोऽमृतरसैरिव। आसीत् कृष्णाभिषेके हि दिव्यः स्वर्गरसोचितः। अभिषिक्तन्तु तं गोभिः शक्रो गोविन्दमव्ययम्। दिव्यमाल्याम्बरधरं देवदेवोऽब्रवीदिदम्। एष ते प्रथमः कृष्ण! नियोगो गोषु यः कृतः"। तत्रैव १७अ०। "शक्रस्तु स्वयमागत्य दैवतैः सह दृत्रहा। अभिषिच्याब्रवीत् कृष्णमुपेन्द्रेति शचीपतिः"। वासुदेवस्येन्द्रेण उपेन्द्रनाम्नाऽभिषेकः कृतः इत्युक्तम्। भा०८स्क०२३ अ० तु वामनस्यैव तन्नामतोक्ता यथा वामनेन बलेर्दमनानन्तरम्। "कश्यपस्यादितेः प्रीत्यै सर्व्वभूतभवाय च। लोकानां लोकपालानामकरोत् वामनं पतिम्। वेदानां सर्वदेवानां धर्मस्य यशसां श्रियः। मङ्गलानां व्रतानाञ्च कल्पं स्वर्गापवर्गयोः। उपेन्द्रं कल्पयाञ्चक्रे इति सर्वविभूतये इति" "प्राप्य त्रिभुवनञ्चेन्द्र उपेन्द्रभुजपालितः" इति तत्रैव। वामनस्य उपेन्द्रत्वमिन्द्रानुजातत्वात् वासुदेवस्य तु पूर्वोक्तप्रकारेण तन्नामता उभयोरेव एकपरमेश्वरांशत्वान्न विरोधः। "तदिन्द्रसन्दिष्टमुपेन्द्र! यद्वचः" माघे नारदस्य वासुदेवसम्बोधनतया प्रयोगः।

उपेन्द्रवज्रा स्त्री "उपेन्द्रवज्रा जतजास्ततो गौ" इति वृ०र० उक्ते एकादशाक्षरपादके छन्दोभेदे। अस्याश्च इन्द्रवज्रया संमेलने यथोपजातित्वं तथा इन्द्रवज्राशब्दे दर्शितम्।

उपेय त्रि० उप+इण्–यत्। १उपायसाध्ये, २प्राप्तव्ये च। २उपगम्ये "उपेतारमुपेयञ्च सर्वोपायाश्च कृत्स्नशः" मनुः "ज्ञातित्वेनानुपेयास्ताः" मनुः।३अन्विष्य गम्ये "भूधरस्थिरमुपेयमागतम्" माघः। "उपेयमन्विष्य गम्यम्" मल्लि०

उपेयिवस् त्रि०उप+इण–क्वसु लोकेऽपि नि०। उपगते "पदाङ्केदमुपेयुषे" कुमा० "उपेयिवांसि कर्त्तारः पुरीमाजातशात्रवीम्। राजन्यकानि" "उपेयुषोमोक्षपथं मनस्विनः" माघः। स्त्रियां ङीपि उपेयुषी।

उपोढ त्रि० उप+वह–क्त। सन्निवेशविशेषयुक्ते १व्यूढे सैन्ये २निकटे, "तदुपोढैश्च नभश्चरैः पृषत्कैः" किरा०१३ "वराहमुपोढैः प्रत्यासन्नैः" मल्लि०। ३जढे कृतविवाहे च। भावे क्त। सैन्यविन्यासभेदे व्यूहे न०।

उपोत त्रि०उप+वेञ् क्त। उपस्यूते। गौरा०ङीष्। पूतिकायां स्त्री शब्दरत्ना०

उपोत्तम त्रि० उपगतमुत्तमम् अव्यधानेन अत्या० स०। उपान्तिमे अन्त्यात् पूर्व्वतने। "गुरूपोत्तमयोः ष्यङ् गोत्रे"। "योपधाद्गुरूपोत्तमाद्वुञ्" "भत्युपोत्तमम्" "उपोत्तमं रिति" पा०

उपोदक पु० उपगतमुदकम् अत्या०स०। उदकसमीपस्थे। "प्रजापतौ त्वा देवतायामुपोदके" यजु०३५,६, "अयं वै लोक उपोदकस्तदेनं प्रजापतौ देवतायामुपोदके लोके निदधाति" शत०ब्रा०१३,८,२,२, सामीप्ये अव्ययी०। २उदकसमीपे अव्ययम्।

उपोदकी स्त्री उपगतमुदकमत्र गौरा०ङीष्। पूतिकायाम् (पुइशाक)। राजनि०। "द्वादश्यां पारणं कुर्य्याद् वर्ज्जयित्वाप्युपोदकीम्" ऐ०त० कूर्म्मपुराणम्।

उपोदिका स्त्री. उपाधिकमुदकं यत्र उदादेशः संज्ञायां कन् अतइत्त्वम्। पूतिकायाम् अमरः तत्पाकादि प्रकारगुणादि वैद्यके उक्तम्। "एकाहं षड्गमोपेता किमन्यैर्व्यञ्जनान्तरैः। तण्डुलैरानतव्याजैर्हस्त्येषा उपोदिका। वटपत्रपक्कुभपत्रिका परितप्ततैलसुपाचिता। नवहिङ्गुवाससुवासिता परिभोक्तृचित्तसुविकाशिका। सुतप्ततैलविपाचिता सुघनाम्लतक्रसुपाचिता। स्फोटिकाव्यभर्ज्जिता भोक्तृराघ रसमायनस्य की। पोदिका शीतला शक्या श्लेष्मला

वातपित्तहा । पथ्यात्र दीपनमनी निद्राकुष्टिकरी मता" उपाधिकस्तदर्त्तं यत्र उदादेयः गौरा० ङीष् स्वार्थे कन् वा ह्रस्वः । उपोदीकाप्यत्र स्त्री

उपोद्ग्रह पु० उप+उद्+ग्रह–अप् । ग्रहणे । "तस्माद्द सुखमुपोद्गृह्णन्निति" शा० ब्रा०। "उपोदुपूर्वकग्रहेः ग्रहणार्थ त्वदर्शनात् तथार्थत्वम् ।

उपोद्घातः पु० समीपवर्त्तिनः प्रकृतस्य उद्घातः उद्घननम् ग्रहणं चिन्तनम् यत्र । उप+उद्–हन-गतौ गत्यर्थत्वात् ज्ञानार्थतः आधारे घञ् । १प्रकृतसिद्ध्यर्थमालोचनात्मके सङ्गतिप्रभेदे । "चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधाः" अवसरशब्दे विवृतिः । २तदर्थवर्णने च । लक्षणोपोद्घातेन विशिष्टज्ञानस्य कारणत्वं व्यवस्थापयति" दीधि० ३प्रारम्भे च

उपोद्दलन न० उप+उ+दुबल–ल्युट् । उद्दीपने उत्तेजने ।

उपोषण न० उप+उष–ल्युट् । उपवासे अहोरात्राभोजने । "प्राप्ते श्रीरामनवमीदिने मर्त्त्यो विमूढधीः । उपोषणं न कुरुते कुम्भीपाके महीयते" । "उपोषणं नवम्यान्तु दशम्यामेव पारणम्" ति० त० अगस्त्यसं० । उपवास-शब्दे विवृतिः । उपवासस्य उपदाहसाधनत्वात् तथात्वम् ।

उपोषित न० उप+वास+भावे–क्त । १उपवासे । "नास्ति स्त्रीणां पृथग्यज्ञः न व्रतं नाप्युपोषितम्" मनुः । कर्त्तरि क्त । २उपवासकर्त्तरि त्रि० । "उपोषितो द्वितीयेऽह्नि पूजयेत् पुनरेव ताम्" दुर्गो० त०पु० ।

उपोष्य त्रि० उप+वस–अकर्मकधातुयोगे कालस्य कर्मसंज्ञा विधानात् कर्मणि वा० क्यप् । १उपवासेन यापनीये तिथ्यादौ । "त्रिसन्ध्यव्यापिनी या तु सैवोपोष्या सदा तिथिः" कालमा०पु०। उप+वस–ल्यप् । २उपवासं कृत्वेत्यर्थे अव्य० ।

उप्त त्रि०वप-क्त । १कृतवापे धान्यादौ अधिकरणे क्त । २उप्त-धान्यादौ क्षेत्रे । "सर्व्वं क्षणेन तदभूदसदीश ! रिक्तं भस्मन् हुतं कुहकराद्धमिवोप्तमूष्याम्" भाग० । ३मुण्डिते च । "पर्य्युप्तशिरस्कमिति" पार० सू० । परितः सर्व्वतोभावेन उप्तशिरसम् मुण्डितशिरसम्" हरिनाथः। भावे क्तिन् । उप्ति वपने स्त्री "बीजानामुप्तिविच्च स्यात्" मनुः ।

उप्तकृष्ट त्रि० पूर्व्वमुप्तं पश्चात् कृष्टं पूर्व्वकालेत्यादिना स० । बीजवपनानन्तरं कृष्टे क्षेत्रे (बीजाकते क्षेत्रे) । (आउड़ान)

उप्त्रिम त्रि० वप+क्त्रि मप् च । वपनजाते ।

उप्य त्रि० वप–वा० कर्मणि क्यप् । वपनीये केशादौ "दीक्षितस्य इ पतस्येतोप्यानां देनेच्छेद् विचिकित्सेत्" कात्या० २५,१२,२० । "उप्यानां व्रीहियवादीनाम्" कर्कः ।

उब्ज आर्जवे तुदा०पर० सक० सेट् । उब्जति औब्जीत् । णिचि उब्जयति ते औब्जिजत् त । "इन्द्राग्नीरक्ष उब्जतम्" ऋ० १,२१,५ । "उब्जन्तु तं सुभ्वः पर्व्वतासः" ६,५२,१ । यङ् नि०वस्य दः समुद्रः अभ्युद्रः । नि+उब्ज (उबटान) उत्तानस्यावतानकरणे न्युब्जति उत्तानं वस्तु अवतानं-करोतीत्यर्थः ।

उब्जक त्रि० उब्ज–ण्वुल् । आर्ज्जवयुक्ते । ततः तिका० फिञ् औब्जायनि तदपत्ये पुंस्त्री । तिककितवादित्वात् गोत्रप्रत्ययस्य बहुषु द्वन्द्वे लुक् । उब्जककुभाः ।

उभ(म्भ) पूर्त्तौ तुदा० प० सक० सेट् । उभति औभीत् । उवोभ । उम्भति उम्भीत् अयं मुचादिरिति कविकल्पद्रुमे औम्भत्' नोपधत्वात् नोपधालोपः उम्भाम् बभूव आस चकार । वेदे गणव्यत्ययः उनप्ति उम्नाति "दृढाम्यौम्नादुपमानमोजः" ऋ० ४,१९,४ । "दृषमुब्धं गा ये मानस् परिषन्तमद्रिम्" ऋ० ४,१,१५ । "सर्व्वमस्मिन् काकुत्स्थमौम्भत्तीक्ष्णैः शिलीमुखैः" भट्टिः । पा० मते लुङि रूपम् । अन्यमते लुङि रूपम् ।

उभ त्रि० द्वि०। उङ्गतौ–मक् । उभ–पूर्त्तौ क वा । द्वित्वविशिष्टे एकत्वापेक्षाबुद्ध्या प्रथमं द्वित्वस्यैव जननेन द्वित्वस्यैकत्वेन ज्ञानद्वारा गम्यमानत्वात् पूर्त्तसाधनत्वाद्वोपचारात् तथात्वम् । "उभौ यदि व्योम्नि पृथक् पतेताम्" माघः । "उभावपि हि तौ भर्त्तारौ सम्प्रयुक्तौ मनीषिभिः" "ब्रह्मचर्ये नयथावुभौ" "आचम्य प्रयतोनित्यमुभे सन्ध्ये समाहितः" मनुः । ततः द्वित्रिमात्रे नित्यम् अयच् । "उभयपक्षविनीतनिद्राः" रघुः । उभयविधः, उभयथा उभयतः उभयत्र । अस्य सर्वादि० सर्व्वनामकार्य्यम् तेनास्य द्विवचनान्तत्वेन अन्यकार्य्याभावेऽपि टेरकच् । उभकौ गावौ । स्वार्थे तद्धितकनि तु अयच्प्रसङ्गः । ततः प्रथमायस्तुभौ सप्तम्यर्थे तसिल् अयच् । उभयतस् । ताभ्यां द्वाविक्षये द्वयोरित्यर्थे च अव्य० "तज्ञः पुनात्युभयतः पुरुषानेकविंशतिम्" याज्ञ० । "यक्ति चोभयतस्तीक्ष्णकाल" दण्डमेव वा" । "ओषध्यः फलपाकान्ता बहुपुष्पफलोपगाः । अपुष्पाः फलवन्तीये ते वनस्पतयः स्मृताः । पुष्पिणः फलिनश्चैव वृक्षास्तूभयतः स्मृताः" मनुः । प्रकारे थाल् अयच् । उभयथा द्विप्रकारार्थे अव्य० । "मेव नः प्रियतमोभयथासौ यद्यसुं न ददाते प्रदाता" नैष० । "विनाशे नार्थं वा तव सति विच्छेदोऽप्युभयथा" ।

प्रशो०। सप्तम्यर्थे त्रल् अयच्। उभयत्र द्वयोरित्यर्थे अव्य० "उभयत्रचरीं मुनीन्द्राः" जातकप०। "द्वौ दैवे पितृकार्य्ये त्रीनेकैकमुभयत्र वा" छन्दो०। अह्नि द्युस् एद्युस् चाऽयच्। उभयद्युस् उभयेद्युस् च द्वयोरह्नोरित्यर्थे अव्य०। "यो अन्येद्युरुभयद्युरभ्येति" अथ० १,२५,४। "उभयेद्युस्तथा प्राप्तौ परीपोष्या मनीषिभिः" स्मृतिः।

उभय त्रि० उभ+अयच्। द्व्यर्थत्वे द्वित्वविशिष्टे अस्य द्वित्वबोधकत्वेऽपि एकवचनबहुवचनान्ततयैव प्रयोगः न द्विवचनप्रयोगः। सि० कौ०। "उभयमानशिरे वसुधाधिपाः" रघुः। सर्वादि० सर्वनामकार्य्यम्। उभयस्मै उभयेषाम्। "यथा न उभयेषाममृत मर्त्यानाम्" ऋ० १,२६,९। जसि वा घी। उभये उभयाः। "परेऽवर उभया अमित्राः" ऋ० २,१२, १८। "ये जना उभये भुञ्जते विशः" २,२४,१०। "किं तत्साध्यं यदुभये साधयेयुर्न सङ्गताः" रघुः। स्त्रियां गौरा० ङीष्। "उभयीं सिद्धिमुभाववापतुः" रघुः।

उभय(त्र)चर पुंस्त्री० उभयत्र उभयोर्वा चरति चर–ट। १भूम्यन्तरिक्षचरे पक्षिभेदे स्त्रियां ङीप्। सूर्य्याक्रान्तराशेर्द्वितीयस्थग्रहयोगभेदे स्त्री "सूर्य्याद्व्ययेऽपि च धने च तयोभयत्र संस्थैर्विना विधुमुशन्ति खगैस्तु योगान्। वेशीं च वोशिमुभयत्रचरीं मुनीन्द्राः स्पष्टं फलानि विविधानि वदन्ति तेषाम्" "समो राज्ञोभयचरीप्रभवो बहुभृत्यभाक्" जातकपद्धतिः।

उभयतोदत्(न्त) पुंस्त्री उभयतो दन्ताः दन्तपङ्क्तिरस्य वा दत्रादेशः। उभयदन्तपङ्क्तियुक्ते मनुष्यादौ। "पशून् मृगान् मनुष्यांश्च व्यालांश्चोभयतोदतः" मनुः। स्त्रियां ङीप्। दत्रादेशाभावपक्षे तत्रैवार्थे स्त्रियां वा ङीष्। "उभयतोदन्ताः प्रजाः प्रजायन्ते" शत० ब्रा० १,६,२,२,

उभयतोमुख त्रि० उभयतो मुखे यस्य। द्विमुखे गृहादौ "उभयतोमुखाभ्यां पात्राभ्याम्" शत० ब्रा० ४,७,१,७, स्त्रियां स्वाङ्गत्वाभावे टाप् स्वाङ्गे तु ङीष्। उभयतोमुखी धेनुः। "यावत्सा रोमतुल्यानि युगान्युभयतोमुखी। दातास्याः स्वर्गमाप्नोति पूर्वेण विधिना ददत्। यावद्वत्सस्य पादौ द्वौ मुखं योनौ च दृश्यते। तावत् गौः पृथिवी ज्ञेया यावद्गर्भं न मुञ्चति" याज्ञ० उक्तो धेनुभेदः। अन्यत्र द्वयमेव उत्क्रान्तिसंज्ञयोक्ता। "उत्क्रान्ते तु प्रसूतस्य मुखोत्क्रान्तिसमुद्भये। तथ्यं संप्रददे नाम्ना गावमुत्क्रान्तिसंज्ञिताम्" विधा० पा० बह्वामनन्तः।

उभयतश्शीर्ष्णी स्त्री उभयतः शीर्षं यस्याः शीर्षन्नादेशः ङीप् अल्लोपः विसर्गस्य वा शः। उभयतःशीर्षत्वञ्च प्रायणीयादियुक्तायां गवि "अदितिरस्युभयतश्शीर्ष्णी" यजु० ४,१९, "उभयतः शीर्षं यस्याः ज्योतिष्टोमस्याद्यन्तयोः प्रायणीयोदयनीययोः शीर्षत्वम् "द्वे शीर्षे प्रायणीयोदयनीये" यास्कोक्तेः" वेददी०।

उभयवेतन पु० उभयोः भेद्ये स्वामिनि च वेतनं यस्य अयच्। दूतभेदे यो हि स्वामिसकाशात् प्रच्छन्नां भृतिं गृहीत्वा तद्भेद्यशत्रुसकाशे तदीयदासत्वेनात्मानं ख्यापयित्वा तत्सकाशात् भृतिं गृह्णन्नपि पूर्वस्वामिनोगृहीतभृतिनिष्क्रयार्थमुत्तरस्य सचिवादिभेदं जनयति स उभयवेतन इत्युच्यते। "अज्ञातदोषैर्दोषज्ञैरुद्दूष्योभयवेतनैः। भेद्याः शत्रोरभिव्यक्तशासनैः सामवायिकाः" माघः। तादृशदूताश्च मुद्राराक्षसे चाणक्यप्रेषिता बहवो वर्णिताः ते च मलयकेतोः प्रधानसचिवादीन् राक्षसादीन् ततो विभिद्य चाणक्यकार्य्यं साधितवन्तः तत्तु तत एवावसेय विस्तरभयान्नोक्तम्।

उभयादन्ति अव्य० उभौ दन्तौ प्रहरणं यत्र युद्धे द्विदण्ड्या० इच् समा० अयच्। उभयदन्तसाध्ये युद्धे एवम् उभयाञ्जलि उभयाबाहु उभयाहस्ति उभयाकर्णि इत्यादयोऽपि नि० साध्याः तत्तत्साधनयुद्धे। उभाहस्ति उभाकर्णि उभाबाहु उभादन्ति इत्यादयः नि० साधवः तत्र नायच्। तेऽपि तत्तदर्थेषु।

उम् अव्य० उ–बा० डुमि। १रोषे, २स्वीकारे, ३प्रश्ने च।

उमा स्त्री ओः शिवस्य मा लक्ष्मीरिव उं शिवं माति मन्यते पतित्वेन मा+क वा। शिवपत्न्याम् १दुर्गायाम् "उ मेति मात्रा तपसो निषिद्धा पश्चादुमाख्यां सुमुखी जगामेति" कुमारे निरुक्तायां २पार्वत्याम्। "यदाह तपसे पुत्रीं वनं गन्तुञ्च मेनका। उ मेति, तेन सोमेति नाम प्राप तदा सती" कालि० पु०। "मात्रा निषिद्धा तपसे यदा सा ययामुमाख्यां भवभक्तिभाविनी" शिवपु० अत्र पक्षे उ मेति शब्दः नामहेतुत्वेनास्त्यस्याः अर्श आ० अच् "यस्येति" पा० आलोपे टाप्। "उमामुखे बिम्बफलाधरोष्ठे" "उमामुखन्तु प्रतिपद्य लोला" "उमारूपेण ते यूयम्" "उमा वधूर्भवान् दाता" इति च कुमा०। "नियोजयितुकामस्तु उमायां चन्द्रशेखरम्" शि०पु० उमामाहेश्वरव्रतम्। व्रतशब्दे वक्ष्यते। वे–बा० मक् संप्रसारणम्। ३हरिद्रायाम् ४अतसीवृक्षे (मसिना) उमाकटः उम्यः औमीनः। ५कीर्त्तौ ६कान्तौ, ७शान्तौ च।

उमाकट पु० उमाया अतस्या हरिद्राया वा रजः कटच् । अतस्या हरिद्रायाश्च रजसि ।

उमागुरु पु० ६त० । हिमालये तस्य उमायाजनकत्वा-त्तथात्वम् । उमाजनकादयोऽप्यत्र । तस्याश्च तदुत्पत्ति कथा शिवपु० दृश्या ।

उमाचतुर्थी स्त्री उमायाजन्मदिनम् चतुर्थी । ज्यैष्ठशुक्लच-तुर्थ्याम् "ज्यैष्ठशुक्लचतुर्थ्यान्तु जाता पूर्वमुमा सती । तस्मात् सा तत्र संपूज्या स्त्रीभिः सौभाग्यवृद्धये" ब्र०पु०

उमापति पु० ६त० । महादेवे । स च यथा तामुपयेमे तत्कथा शिवपु० दृश्या तन्मूलकं कुमारे च वर्णिता एवमन्यत्रापि पुराणे दृश्या । "मेनां यावत् सती प्राप्य हिमाचलपतिव्रताम् । उमरूपा हि तपसा पतिं प्राप पिनाकिनम्" । काशीख० उमाधवादयोऽप्यत्र

उमावन न०उमाप्रीतये वनमत्र । पुरभेदे शोणितपुरे हेम०

उमासहाय पु० ६त० । महादेवे दुर्गासहायतत्सह-चरादयोऽप्यत्र ।

उमासुत पु०६त०। कार्त्तिकेये । तत्कथा अग्निकुमारशब्दे ५५ पृ० शिवपुराणे च दृश्या । उमातनयपार्वतीसुतादयोऽप्यत्र

उम्बर पु०उमित्यव्यक्तशब्दं वृणाति वृ अच् । १द्वारोर्द्धकाष्ठे, २गन्धर्वभेदे च । "उम्बरस्तुम्बुरुश्चैव जगुरन्ये च सद्-गणान्" हरि० १२८अ० ।

उम्बी स्त्री उम्+वा—क गौरा०ङीष् पृषो०वस्य बः । "मञ्जरी त्वर्द्धपक्वा या यवगोधूमयोर्भवेत् । तृणानलेन सम्भृष्टा बुधैरुम्बीति सा स्मृता" इति भा०प्र०उक्तायाम् अर्द्धपक्वय-वगोधूमयोर्मञ्जर्याम् । "उम्बी कफप्रदा बल्या लघ्वी पित्तानिलापहा" भा०प्र० ।

उम्बुर पु० उम्+वृ—क उत् रपरः । द्वारोर्द्धकाष्ठे ।

उम्भि त्रि०उम्भ—इन् । पूरके । ततः चतुरर्थ्यां०जाताद्यर्थे ढकञ् । औम्भेयक तज्जातादौ त्रि०

उम्य न० उमाया अतस्या भवनं क्षेत्रम् वा यत् । अतसीभ-वनक्षेत्रे पक्षे खञ् औमीन तत्रार्थे न०

उम्लोचा स्त्री अप्सरोभेदे । "क्रतुस्थला घृताची च विश्वाची पूर्वचित्त्यपि । उम्लोचेति च विख्याता" भा०आ०१२३अ०

उर गतौ भ्वा०पर०सक०सेट् । ओरति औरीत् उवोर ऊरतुः

उर पुंस्त्री उर—क । १मेषे स्त्रियाम् अजा०टाप् । "अता त्रि नेमिरेषामुराम्" ८,२४,१, 'उरां मेषीम्' भा० २गन्तरि त्रि० । "उरामथिरा वयुनेषु" ऋ० ८,६६,८ ।

उरःसूत्रिका स्त्री ७त० । मुक्ताहारे अमरः ।

उरग पुंस्त्री० उरसा गच्छति उरस्+गम—ड सलोपश्च । १सर्पे, स्त्रियां जातित्वात् ङीष् पादशून्यतया उरसैव तेषां हि गमनम् । "भित्त्वोत्थितं भूमिमिवोरगाणाम्" "बिलमग्ना-विवोरगौ" 'अङ्गुलीवोरगक्षता' रघुः । २तद्देवताके अश्लेषानक्षत्रे । 'उरगविधिमताख्याः शर्वरीनाथवारे" ज्यो०त० । ४सीसके तस्य नागशब्दजन्येनाऽभेदोपचा-रात्तथात्वम् । अहिशब्दे ५८१ पृ० विवृतिः ।

उरगभूषण पु० उरगोभूषणमस्य । सर्पभूषणे महादेवे

उरगराज पु० ६त० टच् समा० । १सर्पराजे वासुकौ । उरगोराजेव उपमि०स०। २महासर्पे च । "प्रहर्त्तुरेवो-रगराजरज्जवः" माघः उरगेश्वरादिन्द्रादयोऽप्युभयत्र । "उरगेन्द्रमूर्द्धरुहरत्नसन्निधेः" माघः । [तथात्वम् ।

उरगस्थान न० ६त० । पाताले तेषां तत्रास्थितत्वात पातालस्य

उरगाशन पु०उरगानश्नाति अश—ल्यु ६त० । सर्पभक्षके १गरुडे च २मयूरे उरगभक्षादयोऽप्यत्र । "स्वावासभाग मुरगाशनकेतुयष्ट्या" माघः ।

उरङ्ग पुंस्त्री उरसा गच्छति उरस्+गम-ड नि०। सर्पे स्त्रियां जातित्वात् ङीष् । [सर्पे स्त्रियां जातित्वात् ङीष् ।

उरङ्गम पुंस्त्री उरसा गच्छति उरस्+गम—खच् सलोपः ।

उरण पुंस्त्री ऋ—क्यु, धातोरुत्त्वं रपरः। १मेषे स्त्रियां जाति-त्वात् ङीष् । "वृकीवोरणमासाद्य मृत्युरादाय गच्छति" भा०शा०६५ अ० । "य उरणं जघान नव चख्वांसं नवतिं च बाहून्" ऋ०२,१४,४,२दद्रुमद्रुमे पु० स्वामी ।

उरणाक्ष पु० उरणस्य मेषस्य अक्षीव अक्षि पुष्पं यस्य । दद्रुघ्ने (दादमर्द्दन) वृक्षे । स्वामी त उरणाख्यस्तत्रार्थे इत्याह । तन्मते उरणस्याख्या आख्या यस्येति विग्रहः

उरभ्र पुंस्त्री उरु उत्कटं भ्रमति भ्रम-ड पृषो० उलोपः । १मेषे स्त्रियां जातित्वात् ङीष् २दद्रुमद्रुमे पु० स्वामी । तस्येदम् अण् । औरभ्र मेषमांसादौ "हविषाऽन्नेन वै मासं पायसेन च वत्सरम् । मात्स्यहारिणकौरभ्रशाकुनच्छाग पार्षतैः । ऐणरौरववाराहशाशैर्मांसैर्यथाक्रमम् । मासाभिवृ-द्ध्या तृप्यन्ति दत्तेनेह पितामहाः" याज्ञ० । "दर्पिता ध्वाङ्क्षखड्गाह्वमहिषोरभ्रकुक्कुराः" इत्युक्ते पशुषु तस्य दर्पितत्वमुक्तम् स च ग्राम्यपशुः "अश्वाश्वतरगो-खरोष्ट्रवस्तोरभ्रमेदःपुच्छप्रभृतयो ग्राम्याः" सुश्रु० तन्मां सगुणास्तत्रैव "ग्राम्या वातहराः सर्वे बृंहणाः कफपि-त्तलाः । मधुरा रसपाकाभ्यां दीपना बलवर्द्धनाः" "बृंहणं मांसमौरभ्रं पित्तश्लेष्मावहं गुरु" ।

उरभ्रसारिका स्त्री उन्दुरोके कीटभेदे कीटशब्दे विवृतिः ।

उररी अव्य० उर—बा०अरीक् । १अङ्गीकारे, २विस्तारे च । ऊर्य्यादि गतित्वात् तेन सह समासः उररीकृत्य इति “काल्पनिकं भेदमुररीकृत्य” सा०द० । घञ् उररीकार अङ्गीकारे पु० । क्त । उररीकृत स्वीकृते त्रि०

उरल त्रि० उर—बा० कलच् । गतियुक्ते ततो बला०चतुरर्थ्यां यत् । उरल्य तत्सन्निकृष्टदेशादौ त्रि० ।

उरश पु० मुनिभेदे तस्यापत्यम् पाठान्तरे तिका०फिञ् औरशा-यनि तस्य भर्गा०स्त्रियां तत्प्रत्ययस्य न लुक् औरशायनी।

उरश्छद पु० उरश्छाद्यतेऽनेन छद—णिच्-घ ह्रस्वः । कवचे

उरस् बलार्थे कण्ड्वा०प०अक०सेट्। उरस्यति बलवान्भवतीत्य-र्थः औरसीत् औरसीत् उरस्याम्(साम्)बभूव आस चकार

उरस् न०ऋ-असुन् धातोरुश्च रपरः। वक्षःस्थले।“कवाटविस्ती-र्णमनोरमोरःस्थलस्थित श्रीललनस्य तस्य” “जनितमुदमु-दस्थादुच्चकैरुच्छ्रितोरःस्थलनियतनिषण्णश्रीस्तुतां शुश्रुवान् सः” माघः। “उरोमुकुलितस्तनं जघनमंसबन्धोद्धुरम्”मालती० अस्य ब०व०अन्तस्य सकप्समा० “व्यूढोरस्को वृषस्कन्धः” रघुः । “प्रकृत्यैव शिलोरस्कः”कुमा०। क्वचित् ।“हारोरा वनमार सा” सुप्रसिद्धपद्यम् । तेन निर्मित अण् औरस,-पुत्रभेदे “औरसः क्षेत्रजश्चैव दत्तःकृत्रिमएव चेति”कालि० पु०उरोजातमात्रे च औरसं भयम् । पक्षे यत् उरस्य। वक्षोगते । २श्रेष्ठे न०। तस्य ६त०अन्ते अच् समा०। अश्वोरस अश्वप्रधाने । २ऋषिभेदे पु०तस्यापत्यम् तिका० फिञ् औरसायनि । उरशवत् भर्गादिकार्यम् । उरः प्रशस्तमनेनास्य अर्श्आ० अच् । उरस प्रशस्तोरस्के त्रि० । पाठान्तरे तिकादिषु उरसशब्दोऽपि पठ्यते उर-शवत् फिञ् भर्गादिकार्यञ्च ।

उरसिज पु० उरसि जायते जन—ड त० सप्तम्या अलुक् । स्त्रीवक्षोजाते स्तने । “परिपस्पृशिरे चैनं पीनैरुरसिजैः मुडः” रामा० । उरसिजातोरसिरुहादयोऽप्यत्र । “फेनानामुरसिरुहेषु हारलीलाम्” माघ:

उरसिल त्रि०उरः प्रशस्तमस्त्यस्य पिच्छा०इलच् । प्रशस्तो-रस्के । पक्षेमतुप् मस्य वः। उरस्वत् तत्रार्थे स्त्रियां ङीप् ।

उरस्कट पु० उरः कटते आव्रियतेऽनेन कट-घञर्थे करणे क । १बालानामुत्तरीयभेदे तदीये यज्ञोपवीताकारे २वस्त्र-भेदे च । (बुकशाहाड़) । त्रिका० ।

उरस्तस् अव्य०उरसैका दिक् तसिः, पञ्चम्याद्यर्थे तसिल् वा । १हृदयैकदेशभवे घृते २वक्षस इत्याद्यर्थे च अत एवत्वात् स्वरितस्वर इतिभेदः । [ल्युट् । उरस्त्राणमप्यत्र न० ।

उरस्त्र न० उरस्त्रायते त्रै—क । वक्षोरक्षके कवचे । करणे

उरस्य पु०उरसैका दिक् यत् । वक्षसैकदेशगत “कर्णशा-खाप्युरस्येन वक्षो यस्य विदारितम्” सुश्रुतः निर्म्मितार्थे यत् । २पुत्रे

उरी अव्य०उर—गतौ बा० ईक् । १अङ्गीकारे, २विस्तारे च । ऊर्य्यादि० कृञि गतित्वम् तेन समा० । ल्यप् उरीकृत्य “तदुरीकृत्य कृतिभिर्वाचस्पत्यं प्रतायते” मात्र

उरीकार पु० उरी+कृ—घञ् । १स्वीकारे, विस्तारे च ।

उरीकृत त्रि० उरी+कृ—क्त । १अङ्गीकृते, २विस्तृते, च ।

उरु त्रि० ऊर्णु—कु नुलोपो ह्रस्वश्च । १विशाले, २वृहति च “विस्तीर्णं हृदयन्तुरम्बरप्रकाशं तेऽगाधं निधिमुरुमम्भ-सामनन्तम्” भा० आ० २२अ० । ३बहुले निघ० “सुविजाता उरुज्रया” ऋ०१,२,९, “उरुस्वा बहुनि-वासौ” भा० “रथे युक्तन्नुरुचक्रे” । ४विस्तीर्णे च इहत्त्वस्य विस्तारस्याऽयत्तत्वात् । “जनाय उरु ज्योतं तुज-निमा चकार” ऋ०७,१००,४,“स्वस्तिमदुरुचितौ दधोहि” ऋ०६,८४,१, उरुगायः “उरुगव्यूतिरभयानि” ऋ० ९,९०,४, “अहोस्विदश्वा उरुधन्तिरङ्कुतः” २,२६,४, “अन्यामिषस्तुरुधारामरङ्कृतम्” ८,१,१०, “उरुप्रथाः प्रथमानम्”यजु०२०,१९, “गाधयोरौ रथ उरुयुगे”ऋ० ८,९८,९, ।५दीर्घे च“गतोरुमार्गाः”माघः भाषितपुंस्का-त्वात् क्लीबे तृतीयादौ अचि वा पुंवत् । उरवे उरुणे इत्यादि स्त्रियां गुणवचनत्वात् वा ङीष्। “शिरोभिस्ते गृहीत्वोर्वीं स्वजमारकाव सवः” मनुः उरोर्भावः इम्बा० इमनिच् । वरिमन् तद्भावे । पक्षे त्व, उरुत्व न०। तल् उरुता स्त्री अण् औरव न०। तद्भावे ।

उरुकाल पु० उरुः कालः पाकोऽस्य । (राखालशशा) १महा-कालवतायाम्” रत्नमा०। कर्म्म०। २दीर्घकाले ।

उरुक्रम पु० उरवः भूम्यादिव्यापकत्वात् क्रमाः पादविक्षेपा अस्य । १वामनरूपे भगवदवतारे“यस्योरुषु त्रिषु विक्रमणेष्वधि-क्षियन्ति भुवनानि विश्वा” ऋ०१,१५४,२, “यस्य विष्णो-रुरुषु विस्तीर्णेषु त्रिसंख्याकेषु विक्रमणेषु पादप्रक्षेपेषु विश्वा सर्वाणि भुवनानि भूतजातान्याश्रित्य निवसन्ति स विष्णुः स्तूयते” भा०। इति तस्योरुक्रमत्वे लिङ्गमुक्तम् । “शं न इन्द्रो वृहस्पतिः शं नो विष्णुरुरुक्रमः” ऋ०१,९, ९, उरु विस्तीर्णं क्रामति पादान् विक्षिपतीत्युरुक्रमः विष्णुः” भा० । उरु प्रधानं पदमाश्रमं क्रामति-क्रम—

अच् ईत॰। भगवतोऽष्टमावतारे २ऋषभदेवे च। "अष्टमे मेरुदेव्यान्तु नाभेर्जात उरुक्रमः। दर्शयन् वर्त्म धीराणां सर्वाश्रमनमस्कृतम्" भा॰ १स्क॰ ३अ॰ ऋषभशब्दे विवृति र्दृश्या।

उरुगाय पु॰ उरुभिः श्रेष्ठैर्गीयते गम्यते वा गै—गाने गाङ् गतौ वा कर्म्मणि घञ्। परमेश्वरे वासुदेवे "सोमाः क उरुगाय! विक्रमे" ऋ॰ ८,२९,७, "उरुभिर्बहुभिर्गातव्यः बहुषु देशेषु गत्वा बहुकीर्त्तिर्वा" भा॰ बहुकीर्त्तिरिति पक्षे गीयते गायः कीर्त्तिरित्यर्थः "अत्राह तदुरुगायस्य विष्णोः" यजु॰ ६,३, "विष्णु उरुगायैषः" यजु॰ ८,१, "यः पार्थिवानि त्रिभिरिद्वि गामभिरुरु क्रमिष्टोरुगायाय जीवसे" ऋ॰ १,१५५,४, "उरुगायाय उरुगातव्याय" भा॰। गाङ् गतौ भावे घञ् गायो गतिः कर्म॰। २विस्तीर्णायां गतौ "सोममहदुरुगायं प्रतिष्ठां दृष्ट्वा" कठवल्ली। "उरुगायं विस्तीर्णां गतिम्" शा॰भा॰ "असम्भावानुरुगायवतोऽभिध्याय तं" का॰उ॰ उरुगायवतो विस्तीर्णगतीन्" गै गाने घञ् कर्म्म॰। ३बहुकीर्त्तने। "प्राणस्य वातायोरुगायं कुरुते" शत॰ ब्रा॰,१,२,१४,

उरुचक्षस् त्रि॰ उरु यथा स्यात् तथा चष्टे चक्ष-असुन्। १महादर्शने "वर्षिष्ठक्षत्रा उरुचक्षसा नराः" ऋ॰ ८, १०१,२, सर्वद्रष्टृत्वात् २सूर्ये पु॰ "नमोभिरुरुचक्षो नृन्भिख्यान्" ६,५१,९. "यं नः सूर्य उरुचक्षा उदेतु" ७,३५,८,

उरुज्मन् त्रि॰ उर्व्वी ज्मा क्षितिर्यत्र। बहुभूमियुक्ते "उरुष्या, ण उरुज्मन्नप्रयुच्छन्" अथ॰ ६,४,२,

उरुज्रयस् त्रि॰ ज्रि—अभिभवे करणे असुन् उरु ज्रयो वेगोऽस्य विस्तीर्णवेगे। वेगेन हि सर्व्वाभिभवात् ज्रयसस्तथात्वम्। "उरुज्रयसमिन्दुभिः" ऋ॰ ८,६,२७. "उरुज्रयसम् विस्तीर्णवेगम्" भा॰। "उरुज्रयसं घृतयोनिमाहुतम्" ५,८,६, "येहानः पूतना उरु ज्रयः" ८,२६,१, इत्यत्र ज्रयसो वेगार्थकस्यासुन्नन्ततया प्रयोगात् तस्यादन्तकल्पनं प्रमादिकम्।

उरुज्रि त्रि॰ उरु यथा तथा ज्रयति ज्रि क्विप् वेदे नि॰ न तुक्। नृ-बा॰ किंवा। प्रभूतगतियुक्ते। "अर्वाक्पथ उरुज्रयः कृणुध्वम्" ऋ॰ ७,२९,२, "उरुज्रयः प्रभूतगमनाः" भा॰।

उरुण्ड पु॰ उपद्रावके असुरभेदे। "ऋलजाः शकधूमजा उरुण्डा ये च मट्मटाः। कुम्भमुष्का अयाशवः। तामस्मा ब्रह्मणस्पते प्रतिबोधेन नाशय" अथ॰ ८,६,१५,

उरुबिल त्रि॰ उरु वृहत् बिलमस्य। बृहच्छिद्रयुक्ते पात्रे स्त्रियां ङीप् गौरा॰ ङीष्। "यद्येषोखा भिद्येत वाऽभिन्ना नवा स्यात्सुरुबिली स्यात्तस्यामिमं पर्य्यावपेत्" शत॰ ब्रा॰१,६, ४,८,

उरुज्ज पु॰ उरुभ्योऽद्भ्यो जायते जनयति अन्तर्भूतण्यर्थे जन—ड पृषो॰ अल्लोपः। प्रभूतपयोजनके। "गवामुरुज्जमभ्यर्षति व्रजम्" ऋ॰ ९,७७,४. "उरुज्जं प्रभूतानामपां जनकम्" भा॰

उरुरी अव्य॰ उरु राति रा—बा॰ की। १अङ्गीकारे २विस्तारे च।

उरुलोक न॰ उरु यथा तथा लोक्यते लोक—कर्म्मणि घञ्। १अन्तरिक्षे तस्य सर्व्वलोकेभ्यो महत्त्वेन ख्यानात् तथात्वम्। "आकाशात्मदिशां सर्व्वगतत्वं परमं महत्" भाषोक्तेस्तस्य परममहत्त्वम्। "ममान्तरिक्षमुरुलोकमस्तु" ऋ॰ १०,१२८,२। कर्म॰। २श्रेष्ठलोके पु॰।

उरुवु पु॰ उरु वायति वै शोषणे क। एरण्डवृक्षे "शम्पाकोरुवुबर्ब्बूवाजिगन्धानिशाख्यदैः" सुश्रु॰ स्वार्थे कन् तत्रैव। रायमुकुटस्तु उरुवुकस्थाने उरुवकइत्यङ्गीचकार पृषो॰ साधु।

उरुवूक पु॰ उरु वायति वै शोषणे "उलूकादयश्च" उणा॰ नि॰। रक्तैरण्डे "पुनर्नवावरुणतर्कार्य्युरुवूकवत्सादनीबिल्वशाकप्रभृतीनि उष्णानि स्वादुतिक्तानि वातप्रशमनानि च" सुश्रु॰। "पटोलवार्त्ताकुकारवेल्लकटुकिकाकेवुकोरुवूकपर्पटककिरातित्तिककर्कोटकारिष्टकोषातकीवेतकरीराटरूषार्कपुष्पप्रभृतीनि रक्तपित्तहराण्याद्यानि लघूनि कुष्ठमेहज्वरश्वासकासारुचिहराणि च" सुश्रुत:।

उरुव्यचस् त्रि॰ उरु विचति व्यच—व्याजे (विशेषव्याप्तौ) असुन् अतिव्यापके। "ओरुव्यचाः पृथताम्" ऋ॰ २,५॰१। "उरुव्यचाः प्रभूतव्याप्तिः" भा॰। २विस्तीर्णे "उरुव्यचसे महिने" ऋ॰ ७,३१,११। "उरुव्यचसा विस्तीर्णे" भा॰। "मनदुरुव्यचा अदितिः" ५,४६,६। "उरुव्यचसोधाम्ना पत्यमानाः" यजु॰ २७,१६,

उरुषा त्रि॰ उरु सनोति षन—विट् ङा वेदे षत्वम्। बहुदातरि "महीमकभ्यमुरुषामुरुज्रयः" ऋ॰ ५,४४, ६। "उरुषां बहुदातारम्" भा॰।

उरुष्य रक्षणे पर॰ सक॰ सेट्। उरुष्यति औरुष्यीत्। "उरुष्य राय एषो यजस्व" यजु॰ ७,४, अस्य व्याख्याने "उरुष्य रक्ष उरुष्यती रक्षणकर्म्मा" वेददी॰। "उरुष्यदग्निः पित्रोरुपस्थे" ऋ॰ ३,५,८। "अरक्षत् रक्षत" भा॰। "गोपीथे न उरुष्यतम्" ऋ॰ ५,६५,६।

उरुष्या स्त्री उरुष्यं रक्षणमिच्छति क्यच् अ यलोपः रक्षणेच्छायाम्। "उरुष्या पायुरभवत् सखिभ्यः" ऋ० ६,४४,७। "उरुष्या रक्षणेच्छया" भा० तृतीयाया लुक्। ततः उ। "उरुष्यु रक्षणेच्छावति "इमे मा पीता यशस उरुष्यवोरथम्" ऋ० ८,४८,५। "उरुष्यवः रक्षाकामाः" भा०।

उरूची स्त्री उरु अञ्चति क्विप् ङीप् अल्लोपे पूर्व्वाणो दीर्घः। अतिव्यापिन्यां स्त्रियाम्। "उरूची विश्वे यजते निपातम्" ऋ० ४,५६,४। "शं न उरूची भवतु स्वधाभिः" ऋ० ७,३५,२ 'विभ्रयमाणो अमतिमुरूचीम्' ऋ० ७, ४५,२ "या ते जिह्वा मधुमती सुमेधा अग्ने देवेषूच्यत उरूची" ऋ० ३,५७,५। स्त्रीभिन्ने उरु+अच् तथार्थे यथा-दावपि उरुचः उरुचा इत्यादि।

उरूणस् त्रि० उरु दीर्घे नासिके तस्य नसादेशः वेदे णत्वं दीर्घश्च। दीर्घनासिकायुक्ते "उरूणसावसुतृपा" ऋ० १०,१४,१२।

उरोज पु० उरसि जायते जन—ड "जे विभाषा" पा० सप्तम्या लुक्। स्त्रीस्तने "दधदुरोजद्वयमुर्व्वशीतलम्" "रेजाते रुचिरदृशामुरोजकुम्भौ" माघः स्तनादिकं सूक्ष्मरूपेण जन्मकाले उत्पन्नमपि यौवने उद्भिद्यते। यथाह भावप्रका०। "बालानां शुक्रमस्त्येव किन्तु सौक्ष्म्यान्न दृश्यते। तेषां तदेव तारुण्ये पुष्टत्वादुद्गमिष्यति कुसुमानां प्रफुल्लानां गन्धः प्रादुर्भवेद्यथा। रोमराज्यादयः पुंसां नारीणामपि यौवने। जायन्ते तत्तयोर्भेदो ज्ञेयो व्याख्यानतः स च"। तथा च पुंसां रोमराजीश्मश्रुप्रभृतयः नारीणां तु रोमराजीस्तनस्तन्यार्त्तवप्रभृतयः"। आर्त्तवस्तनोद्भेदकालश्च एकादशवर्षादुत्तरः स्मृतावुक्तः। "अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी। दशमे कन्यकाप्रोक्ता तत ऊर्द्ध्वं रजस्वला" उ०त० स्मृतिः। इदमपि सम्भावितविषयम् धातुभेदेन तत उत्तरमपि भवतीति लोके दृश्यते सम्भावनाभिया दशमाद्दादर्शाक् देयेति तत्त्वम्। सुश्रुते तु द्वादशवर्षोपरि रजःसम्भव उक्तः। "रसादेव रजः स्त्रीणाम् मासि मासि त्र्यहं स्रवेत्। तद्वर्षाद् द्वादशादूर्द्ध्वं याति पञ्चाशतः क्षयम्" रजःपदं स्तनोद्भेदस्याप्युपलक्षणम्। गर्भिण्याः पीनस्तनत्वे दुग्धवत्त्वे च कारणमुक्तम् भा०प्र०। "गृहीतगर्भाणां स्त्रीणामार्त्तववहानां स्रोतसां गर्भेणावरोधादार्त्तवं न स्रवति तदेव प्रतिहतमूर्द्ध्वमागतमुपचीयमानमपरा भवति शेषञ्चोर्द्ध्वतरमागतं पयोधरौ याति तस्माद् गर्भिण्याः पीनोन्नतौ पयोधरौ भवतः" इति। उरोभूप्रभृतयोऽप्यत्र "उरोभुवा कुम्भयुगेन जृम्भितम्" नैष०।

उरोभूषण न० उरो भूष्यतेऽनेन भूष—करणे ल्युट् ६त०। १वक्षोऽलङ्कारे हारे। उरो भूषयति ल्यु। २तदर्थे त्रि०।

उरोबृहती स्त्री वैदिके छन्दोभेदे। "बृहती जागतस्त्रयश्च गायत्राः। पथ्या पूर्व्वश्चेत्तृतीयः। न्यङ्कुसारिणी द्वितीयः। स्कन्धग्रीवी क्रौष्टुकेः। उरोबृहती यास्कस्य" कात्या० उक्तेः यास्कमते द्वितीयचरणस्य जागतात्मकत्वे अन्येषां त्रयाणां गायत्रात्मकत्वे च सा भवतीत्यर्थः।

उरोहस्त न० उरसि हस्तचपेटाघातोयत्र। बाहुयुद्धभेदे बाहुयुद्धप्रकारः भा०स०२२अ० दर्शितः यथा
"करग्रहणपूर्वन्तु कृत्वा पादाभिवादनम्। कक्षैः कक्ष्यां विधुन्वानावास्फोटं तत्र चक्रतुः। स्कन्धे दोर्भ्यां समाहत्य निहत्य च मुहुर्मुहुः। अङ्गमङ्गैः समाश्लिष्य पुनरास्फालनं विभो!। चित्रहस्तादिकं कृत्वा कक्ष्याबन्धं च चक्रतुः। गलगण्डाभिघातेन सस्फुलिङ्गेन चाशनिम्। बाहुपाशादिकं कृत्वा पादाहतशिरावुभौ। उरोहस्तं ततश्चक्रे पूर्णकुम्भौ प्रयुज्य तौ। करसंपीडनं कृत्वा गर्जन्तौ वारणाविव। दुर्दान्तौ मेघसङ्काशौ बाहुप्रहरणावुभौ। तलेनाहन्यमानौ तु अन्योन्यं कृतवीक्षणौ। सिंहाविव सुसंक्रुद्धावाकृष्याकृष्य युध्यताम्। अङ्गेनाङ्गं समापीड्य बाहुभ्यामुभयोरपि। आवृत्य बाहुभिश्चापि उदरं च प्रचक्रतुः। उभौ कट्यां सुपार्श्वे तु तक्षवन्तौ च शिक्षितौ। अधोहस्तं स्वकण्ठे तूदरस्योरसि चाक्षिपत्। सर्वातिक्रान्तमर्यादं पृष्ठभङ्गञ्च चक्रतुः। संपूर्णमूर्च्छां बाहुभ्यां पूर्णकुम्भं प्रचक्रतुः। तृणपीडं यथाकामं पूर्णयोगं समुष्टिकम्। एवमादीनि युद्धानि प्रकुर्वन्तौ परस्परम्"। व्याख्यातञ्चैतत् नीलकण्ठेन "कक्षैः दोर्मूलैः कक्ष्यां प्रकोष्ठगतां रज्जुं धुन्वानौ। यतः तत्र कक्षैः आस्फोटं चक्रतुः बाहुमूलास्फालनेन अङ्गदबन्धरज्जुशेषं कम्पयन्तावित्यर्थः। चित्रहस्तादिकं हस्तस्यातिवेगेन आकुञ्चनप्रसारणोपर्यधश्चालनमुष्टीकरणानि चित्रहस्ताः आदिपदात् पादस्याप्याकुञ्चनादि। कक्ष्याबन्धं परस्परकक्ष्यायां हस्तौ कृत्वा बन्धनम् गलेन गण्डेन भालदेशेनाभिघातस्तेन पाषाणसङ्घाताद्गुत्वात्तयोरभिघातेन विस्फुलिङ्गोत्पत्त्याऽशनिं वज्रमिव ससृजतुरित्यर्थः। बाहुपाशादिकं चरणपाश आदिशब्दार्थः। पादाभ्याम् आहताः

शिरः स्नायशोयाभ्यान्तौ हृदप्रहारौ नाड़ीपर्य्यन्तमपि मदनावन्तावित्यर्थः। उरोहस्तं उरसि चपेटाप्रहारम्। पूर्णकुम्भौ हित्वं परस्परं द्वावपि चक्रतुरिति वक्तुम्। तलेन चपेटया। आहत्य जानुदेशे पृष्ठं कृत्वा बाहुभिः बद्धत्वाद्द्वावपि मिथः उदरम् आदाय प्रचक्रतुः प्रचिक्षिपतुः कृ विक्षेपेऽस्य छान्दसं रूपम्। एवं कक्षां सुपार्श्वं च प्रचक्रतुः। तत्रवन्तौ तत्रस्तनूकरणं गात्रसङ्कोच इत्यर्थः तद्वन्तौ। अधोहस्तं उदरस्याधस्तात् हस्तं कृत्वा हस्ताभ्यामुदरमावेष्ट्य स्वकण्ठे स्वोरसि च कण्ठोरःसमीपे आनीय आक्षिपत् आस्फालितवान्। पृष्ठस्य भूसम्बन्धेन जातं भङ्गं पराभवं बाहुभ्यां उदरादिनिपीड़ने सम्पूर्णमूर्च्छा तृणपीड़ं पूर्णयोगं योगोविश्रम्भघातनं तत्र पूर्णम्। अन्यत्र मुष्टेः पातं प्रदर्श्य अन्यत्र पातनमित्यर्थः एवमादिनियुद्धानि पादाकर्षणशीर्षकण्डीकरणादीनि"

उ(ऊ)र्ज जीवने वा चु० उभ० अक० पक्षे भ्वा० पर० सेट्। उ(ऊ)र्ज्जयति ते उ(ऊ)र्ज्जति। और्ज्जिजत्-त और्ज्जीत्। उ(ऊ)र्ज्जयाम् बभूव आस चकार चक्रे पक्षे उ(ऊ)र्जाम् बभूव आस चकार। क्त उ(ऊ)र्ज्जित, दृढे बलान्विते। णिजन्तत्वे वर्द्धिते त्रि० दीर्घादिरयमिति बहवः

उ(ऊ)र्णनाभ पु० ऊर्णेव सूत्रं नाभौ गर्भेऽस्य अच् समा० ह्रस्वः। लूतायाम् (माकडसा) दीर्घादिरयमिति केचित्।

उ(ऊ)र्णा स्त्री ऊर्णूयते आच्छाद्यते ऊर्णु-ड ह्रस्वः। १मेषादिलोम्नि २ललाटस्थलोमसमूहात्मके चिह्नभेदे। "ललाटपट्टे नवनलिननालभङ्गतन्वीयमूर्णा परिस्फुरति" काद०। दीर्घादिरयमिति बहवः

उ(ऊ)र्द दाने स्वादे सक० क्रीड़ायाम् अक० भ्वा० आत्म० सेट्। उ(ऊ)र्दते और्द्दिष्ट दीर्घादिरयमिति बहवः।

उ(ऊ)द्र पु० उर्द-रक्। जलविडाले (उदविडाल) दीर्घादिरयमिति बहवः।

उ(ऊ)र्व हिंसायां भ्वा० पर० सक० सेट्। उ(ऊ)र्वति और्वीत्। क्विपि वलोपे ऊः ऊरौ दीर्घादित्वे ऊरौ इति भेदः।

उर्व्व पु० उर्वी पृथिवी सञ्चारस्थानम्येनास्त्यस्य अर्श० अच्। १पृथिवीसञ्चारिणि पितृभेदे ताण्ड्य० ब्रा० ढम्यः। २ऋषिभेदे ततः विदा० अञ्। और्व तदपत्ये पुंस्त्री।

उर्वट पु० उरु यथा तथाऽटति अट+अच् ६त०। वत्से त्रिका०। तस्य दीर्घोल्लम्फादिना अटनात् तथात्वम्।

उर्वरा स्त्री उरु शस्यादिकमृच्छति ऋ-अच् ६त०। १सर्वशस्याढ्यभूमौ "पततां गणैः पिबतु सार्वमुर्वरा" माघः २भूमिमात्रे विश्वः ३अधिके त्रि० उर्वरमधिकं जातमस्य तारका० इतच्। उर्वरित आधिक्ययुक्ते (उपचान) अधिके। उरुन् महत ऋच्छति ऋ-अच् ६त०। अप्सरोभेदे "कलानिधिर्गुणनिधिकर्पूरतिलकोर्व्वरा" काशीख०।

उर्वरासा त्रि० उर्वरां भूमिं सनोति सन-विट् ङा। भूमिविभाजके पुत्रादौ "क्षेत्रासां ददथुरुर्वरासाम्" ऋ० ४, २८,१, उर्वरासां पुत्रम्" भा०। २उर्व्वराविभाजके त्रि० "त्वं नः सहस्रभरमुर्वरासाम्" ६,२०,१। "उर्वराणां भूमीनां सनितारं संभक्तारम्" भा०।

उर्वरी स्त्री ऋ-गतौ वनिप् ङीप् वनोरच। आधिक्यप्राप्तायां स्त्रियाम् "ओषधीनामहं वृण उर्वरीरिव साधुया" अथ० १०,४,२. अन्यलिङ्गे उर्वन् इत्येव

उर्वर्य त्रि० उर्वरायां भवः यत्। १सर्वशस्याढ्यभूमिभवे रुद्रभेदे "नम उर्वर्याय खल्याय" यजु० १६,३३, रुद्राध्यायः।

उर्वशी स्त्री उरून् अश्नुते वशीकरोति उरु+अश-क गौरा० ङीप्। स्वर्गवेश्याभेदे। अप्सरोभेदाश्च अप्सरःशब्दे उक्ताः इयञ्च नारायणोरुं भित्त्वा जाता यथोक्तं हरिवं० ८५ अ० "नारायणोरुं निर्भिद्य सम्भूता वरवर्णिनी। ऐलस्य दयिता देवी योषिद्रत्नं किमुर्वशी" ततश्च ऊरुं नारायणोरुं कारणत्वेनाश्नुते प्राप्नोति अश-क ङीष् पृ० ह्रस्वः। इति विग्रहः। इयमेव पुरूरवसःपत्नी आसीत्। "पुत्रोबुधस्योत्तमवीर्यकर्मा पुरूरवा यस्य सुतो सुदेवः। तथैव यज्ञात्मकमे महात्मा पुरोर्वशीमप्सरसां वरिष्ठाम्" १५४ अ० "पुरूरवाः सुतोविद्वानिलायां समपद्यत" इत्युपक्रम्य "षट् सुता जज्ञिरे चैलादायुर्धीमानमावसुः। दृढायुश्च वनायुश्च शतायुश्चोर्वशीसुताः" भा० आ० ७५ अ०। सा च इन्द्रलोकगतार्ज्जुनस्य समीपे रिरंसया गत्वा तेन प्रत्याख्याता तस्मै शापं ददाविति कथा भा० व० ४६ अ० "तव पित्राभ्यनुज्ञातां स्वयञ्च गृहमागताम्। यस्मान्मां नाभिनन्देथाः कामबाणवशं गताम्। तस्मात्त्वं नर्त्तनः पार्थ! स्त्रीमध्ये मानवर्जितः। अपुमानिति विख्यातः षण्ढवद्विचरिष्यसि" २नदीभेदे उर्वशीतीर्थशब्दे उदा०।

उर्वशीतीर्थ न० भारतोक्ते तीर्थभेदे। "उर्वशीतीर्थमासाद्य ततः सोमाश्रमं बुधः" भा० व० ८४। तच्च नदीरूपम्। "उर्वशीं कृत्तिकायोगे गत्वा चैव समाहितः लौहित्ये विधिवत् स्नात्वा पुण्डरीकफलं लभेत्" भा० अनु० २५ अ०।

उर्वशीरमण पु० उर्वशीं रमयति रम-ल्यु ६त०। चन्द्रवंश्ये

बुधपुत्रे पुरूरवसि न्टपे उर्वशीवल्लभादयोऽप्यत्र ।

उर्वारु पु॰ उरु-यथा तथा ऋच्छति ऋ—उण् । कर्कट्याम् । स्वार्थे कन् अत्रैव । "उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्" ऋ॰ ७,५९, १२, । यजु॰ ३,६, "उर्वारुकमिव बन्धनादितो मुक्षीय मामुतः" ३,७, अस्य स्त्रीत्वमपि अप्राणिजातिवचनत्वात् ऊङ् । उर्वारूः तदर्थे 'छिन्ध्यस्य बन्धनं मूलमुर्वार्वा इव" अथ॰ ६,१४,१,

उर्वी स्त्री उरु+गुणवचनत्वात् स्त्रियां वा ङीप् । १वृहत्त्वयुक्तायां स्त्रियाम् "उर्वीं स्रजम्" उरुशब्दे उदा॰ २पृथिव्यां च तस्यावृहत्त्वात् तथात्वम् । "तैरुर्वीनिहितचलत्पदं प्रचेले माघः । "अनन्यशासनामुर्वीं शशासैकपुरीमिव" "स्थितः सर्व्वोन्नतेनोर्वीम्" रघुः वेदे "सुपांसुलुगित्यादिना" पा॰ सर्वविभक्तौ डियजादेशः "सिन्धुर्नक्षोद उर्विया व्यश्वैत्" ऋ॰ १,९२,१२, "उर्विया महती" भा॰ "प्रतीची चक्षुरुर्विया विभाति" १,९२,९ । ३नद्याम् निरु॰ ।

उर्वीधर पु॰ उर्वीं धरति धृ—अच् ६त॰। पर्व्वते तेषां कीलकरूपेण अवष्टम्भनेन पृथिव्याधारकत्वात् तथात्वम् भूधरादयोऽप्यत्र "गर्भोऽभवत् भूधरराजपत्न्याः" कुमा॰

उर्वीधव पु॰ ६त॰। पृथिवीनाथे राजनि । उर्वीशोर्वीश्वर तन्नाथादयोऽप्यत्र

उर्वीभृत् पु॰ उर्वीं बिभर्त्ति धारयति पालयति वा भृ-क्विप् तुक् ६त॰। १पर्वते २राजनि च एवं पृथिवीभृद्धरणीभृदादयोऽप्यत्र। "उदयति स्म तदद्भुतमालिभिर्धरणीभृद्भुवि तत्र विमृष्य यत् । अनुमितोऽपि हि बाष्पनिरीक्षणात् व्यभिचचार न तापकरोऽनलः" नैष॰ तत्र धरणीभृत् राजा पर्वतश्च अत्र व्यभिचारश्च साधनसमानाधिकरणाभावप्रतियोगित्वरूपः तेन साध्ये तत्सम्भवः तादृशव्यभिचारश्च उपाधिवादे चिन्तामणौ अङ्गीकृतः तच्च उपाधिशब्दे दर्शितम्

उर्वीरुह पु॰ उर्व्यां रोहति रुह-क ७त॰ । वृक्षे "हिरण्मयोर्वीरुहवल्लितन्तुभिः" माघः

उर्व्या स्त्री उरोर्भावः बा॰ष्यत् उलोपश्च । महत्त्वे "रुद्राणामुर्व्यायां स्वादित्याः" शत॰ ब्रा॰ १,५,१,१७, "उर्व्यायां महत्त्वे" भा॰

उल दाहे (सौत्रः)पर॰सक॰सेट् । ओलति औलीत्

उल पु॰ उल—दाहे कर्मणि घञर्थे क । मृगभेदे "उलो हलिक्ष्णो वृषदंशस्ते धात्रे" यजु॰ २४,३१ । "उलोमृगभेदः" वेददी॰ । ततः चतुरर्थ्यां बला॰य । उल्य तत्कर्षनिकृष्टदेशादौ त्रि॰ ।

उ(ओ)लड उत्क्षेपे इदित् वा चुरा॰ उभ॰ पक्षे भ्वा॰ पर॰ सक॰सेट् । उ(ओ)लण्डयति ते उ(ओ)लण्डति औलिलण्डत् त औलण्डीत् अयं लडि ओदित् इत्येके ।

उलन्द्र(न्द) पु॰राजभेदे तेन निर्वृत्तम् अरीहणादि॰ वुञ् । औलिन्द(न्द्र)क तन्निर्म्मितपुरादौ त्रि॰

उलप पु॰न॰वल—कपच् संप्रसारणम् । १शाखापत्रप्रचययुतायां लतायाम् २कोमले तृणभेदे न॰ (उलुखड) । 'मृगीलपालङ्कृतशैवलाभः" "उत्तीर्णभारलघुनाप्यलघूलपौघसौहित्यनिःसहतरेण तयोरधस्तात्" माघः ।

उलप्य पु॰ उलपे भवः यत् । रुद्रभेदे । "नमोलोप्याय चोलप्याय" यजु॰ १६,४५, रुद्राध्यायः

उलिन्द पु॰वल-बा॰किन्दच् संप्र॰। देशभेदे उणादिकोषः।

उलु त्रि॰उरु रस्य लः । १वृहति २वृद्धियुक्तशब्दे च विवाहादौ स्त्रीभिरुच्चार्य्ये शब्दभेदे "प्रकारे गुणवचनस्य" पा॰ प्रकारे द्वित्वम् । उलूलु उरुप्रकारे । "उच्चैरुलूलुध्वनिरुच्चचार" नैष॰ "यत्तदजायत सोऽसावादित्यस्तं जायमानं घोषा उलूलवोऽनूदतिष्ठन् सर्व्वाणि च भूतानि सर्व्वे च कामास्तस्मात्तस्योदयं प्रति प्रत्यायनं प्रति घोषा उलूलवोऽनुतिष्ठन्ति" छा॰ उ॰ । "उलूलवः उरुरवः विस्तीर्णरवाः" शा॰भा॰।

उलुप पु॰ उरु पायते रक्ष्यते अस्मात् पा रक्षणे—अपादाने घञर्थे क रस्य लः । उलपतृणे । "तृणोलुपपुलाकचिक्कानुमेयैर्जरत्कान्तारकूपैरिव" काद॰

उलुलि पु॰ उल—उलि । वृद्धिसूचकशब्दे । "पृथग् घोषा उलूलयः केतुमन्त उदीरताम्" अथ॰ ४,१९,६,

उलूक पु॰वल—समवाये ऊक संप्रसारणम् ।१पेचके, जातित्वात् स्त्रियां ङीष् उलूकीसा च ताम्रायाः कन्यायाः श्येन्याः कन्या "षट् सुतास्तु महासत्वास्ताम्रायाः परिकीर्त्तिताः" इत्युपक्रम्य "शुकी शुकानजनयदुलूकी प्रत्युलूककान्" विष्णुपु॰। २इन्द्रे, कैतव्ये ३दुर्य्योधनदूतभेदे ४तृणभेदे । (उलुखड़) "त्यजति मुदमुलूकः प्रीतिमांश्चक्रवाकः" माघः "श्वगोधोलूककाकांश्च शूद्रहत्याव्रतं चरेत्" मनुः "यदुलूको वदति मोघमेतत्" ऋ॰१०,१६५,४, "त्रिविधाश्चैव सम्पोड़ाः काकोलूकैश्च भक्षणम्" मनुः । अत्र काकोलूकैरित्युक्तेः काकोलूकमित्यादि विरोधे समाहारैकत्वविधानं प्रायिकमिति गम्यते । "उलूकान् सुषुवे काकी श्येनी श्येनान् व्यजायत" भा॰आ॰६३ । उलूकनामा दूतश्च युधिष्ठिरादीनां समीपे दुर्य्योधनेन प्रेषितः यथा "आहूयोपह्वरे

राजन्नुलूकमिदमब्रवीत् । उलूक! गच्छ कैतव्य! पाण्डवान् सहसोमकान्” इत्यादिना भा० उ० ५०अ० । उलूकश्च कैतव्यः कितव्यस्यापत्यम् । तदागमनमधिकृत्यैव उलूकदूतगमनपर्व्व उद्योगपर्व्वान्तर्गतं पर्व्व ।४ देशभेदे । “उलूकवासिनं राजन् बृहन्तमुपजग्मिवान्” । “उलूकानुत्तरांश्चैव तांश्च राज्ञः समानयत्” भा० स० अ० । अयञ्च देशः “प्रययावुत्तरां तस्मात् दिशं धनदपालिताम्” इत्युपक्रम्य तस्य कीर्त्तनात् धनञ्जयस्य उत्तरदिग्विजय एव तस्य उलूकदेशस्य वर्णनाच्च उत्तरदेशवर्त्तीति गम्यते । ५ तद्देशनृपे च “उत्तरं पर्वतोद्देशं ये ते दुर्गसहा नृपाः । आरोहन्त त्रिमहन्तो वज्रप्रतिमगौरवाः । उलूकः कैतवेयश्च” हरिवं० ९९।

उलूकयातु पु० उलूकरूपेण याति या—तुन् । असुरभेदे । “उलूकयातुं शुशुलूकयातुं जहि” ऋ० ७,१०४,१२ । “उलूकरूपेण यातमुलूकयातुम्” भा० ।

उलूखल न० ऊर्द्ध्वं खम् उलूखं पृषो० तत् लाति गृह्णाति ला—क । धान्यादिकण्डनसाधने काष्ठमये १ पात्रे (उखरी) तच्च यज्ञियपात्रभेदः । तल्लक्षणमुक्तम् “उलूखलमुषले वारणमात्रे औदुम्बरे प्रादेशमात्रं चतुरस्रमुलूखलं मध्यसंगृहीतमूर्द्ध्वं वृत्तम्, मुषलं दक्षिणमुलूखलात्” कात्या० १७,५,२ । तदुत्तरत्र सूत्रेऽपि उदा० । “वनस्पतिभ्य इत्येव मुषलोलूखले हरेत्” मनुः “स्फ्यस्य शकटानाञ्च मुषलोलूखलस्य च । अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससाम्” तस्य मनूक्तशौचं ज्ञेयम् उलूखलशब्दस्य यास्केनान्यथा निरुक्तिर्दर्शिता यथा । “उलूखलमुत्करं वोर्करं वोद्धकं वोरु मे कुर्वित्यब्रवीत्तंडुलखलमभयमुत्करं वै तदुलूखलमित्याचते परोक्षेण” । स्वार्थे कन् तत्रार्थे “गृहे गृह उलूखलकं” ऋ० १,२८,५ । तदस्य साधनत्वेनास्त्यस्य ठन् । उलूखलिकः । तत्साधनके जने “दन्तोलूखलिकोऽपि वा” मनुः ।२ गुग्गुलौ पु०

उलूखलसुत पु० ३त० । उलूखलेनाभिषुते सोमरसे “उलूखलसुतानामवेद्विन्द्रः” ऋ० १,२८,१,२,१ ।

उलूत पु० उल—बा० ऊतच् । अजगरसर्पे त्रिका० ।

उलूपिन पु० स्त्री. यम्भोः रूपमस्त्यस्य इनि रस्य लः । शिशुमारे अमरः । पृ० ह्रस्वादौऽपि तत्रैव उलुपिन् इत्यपि पाठः क्वचित् तत्रार्थे ।

उलूपी स्त्री कौरव्यनागकन्याभेदे तत्कथा भा० आ० २४१अ० । “उलूप्युवाच ऐरावतकुले जातः कौरव्यो नाम पन्नगः । तस्यास्मि दुहिता राजन्! उलूपी नाम पन्नगी । साऽहं त्वामभिषेकार्थमवतीर्णं समुद्रगाम् । दृष्ट्वैव पुरुषव्याघ्र! कन्दर्पेणाभिमूर्च्छिता । तां मामनङ्गग्लपितां त्वत्कृते कुरुनन्दन! । अनन्यां नन्दयस्वाद्य प्रदानेनात्मनोऽनघ! । अर्जुन उवाच । ब्रह्मचर्य्यमिदं भद्रे! मम द्वादशवार्षिकम् । धर्म्मराजेन चादिष्टं नाहमस्मि स्वयंवशः । तव चापि प्रियं कर्त्तुमिच्छामि जलचारिणि! । अनृतं नोक्तपूर्वञ्च मया किञ्चन कर्हिचित् । कथञ्च नानृतं मे स्यात्तव परिप्रियं भवेत् । न च पीड्येत मे धर्म्मस्तथा कुर्य्यां भुजङ्गमि! । उलूप्युवाच । जानाम्यहं पाण्डवेय! यथा चरसि मेदिनीम् । यथा च ते ब्रह्मचर्य्यमिदमादिष्टवान् गुरुः । परस्परं वर्त्तमानान् द्रुपदस्यात्मजां प्रति । यो नोऽनुप्रविशेन्मोहात् स वै द्वादशवार्षिकम् । वने चरेद्ब्रह्मचर्य्यमिति वः समयः कृतः । तदिदं द्रौपदीहेतोरन्योऽन्यस्य प्रवासनम् । कृतवांस्तत्र धर्म्मार्थमत्र धर्म्मो न दुष्यति । परित्राणञ्च कर्त्तव्यमार्त्तानां पृथुलोचन! । कृत्वा मम परित्राणं तव धर्म्मो न लुप्यते । यदि वाऽप्यस्य धर्म्मस्य सूक्ष्मोऽपि स्याद्व्यतिक्रमः । स च ते धर्म्म एव स्याद्दत्त्वा प्राणान्ममार्जुन! । भक्ताञ्च भज मां पार्थ! सतामेतन्मतं प्रभो! । न करिष्यसि चेदेवं मृतां मामुपधारय । प्राणदानान्महाबाहो! चर धर्म्ममनुत्तमम् । शरणञ्च प्रपन्नाऽस्मि त्वामद्य पुरुषोत्तम । दीनाननाथान् कौन्तेय! परिरक्षसि नित्यशः । साऽहं शरणमभ्येमि रोरवीमि च दुःखिता । याचे त्वां चाभिकामाऽहं तस्मात् कुरु मम प्रियम् । स त्वमात्मप्रदानेन सकामां कर्त्तुमर्हसि । वैशम्पायन उवाच । एवमुक्तस्तु कौन्तेयः पन्नगेश्वरकन्यया । कृतवांस्तत्तथा सर्व्वं धर्म्ममुद्दिश्य कारणम् । स नागभवने रात्रिं तामुषित्वा प्रतापवान् । उदितेऽभ्युत्थितः सूर्य्ये कौरव्यस्य निवेशनात् । आगतस्तु पुनस्तत्र गङ्गाद्वारं तया सह । परित्यज्य गता साध्वी उलूपी निजमन्दिरम् । दत्त्वा वरमजेयत्वं जले सर्व्वत्र भारत! । साध्या जलचराः सर्व्वे भविष्यन्ति न संशयः” ।

उल्का स्त्री उष-दाहे क नि० षस्य लः । रेखाकारे गगनात् पतत्तेजःपुञ्जे । अग्न्युत्पातशब्दे १२५० तत्स्वरूपफलादिकमुक्तम् । “बाधेतोल्काक्षतिपतचमरीबालभारो दवाग्निः” मेघ० । “उल्काभिघातकेतूंश्च ज्योतींष्युच्चावचानि च” । “उल्कापाते दिशां दाहे गोमायुविरुते तथा” “विद्युत्स्तनितवर्षेषु महोल्कानां च संप्लवे” मनुः । “स्फुर-

लताकृति विक्षिपन्त्वनेषु" किरा० । उल्काकारत्वमुक्तम् श्रीपतिना "यासां गतिर्दिवि भवेत्क्षणितेन गम्या तास्तारकाः सकलखेचरतोऽतिदूरे । तिष्ठन्ति या अनियतोद्गतयश्च ताराश्चन्द्रादधोऽपि निवसन्ति तदन्वितास्ताः । शीतांशुवज्जलमयास्तपनात् स्फुरन्ति ताश्चावहप्रवहमारुतसन्धिसंस्थाः । पूर्व्वानिलैस्तिमितभावमुपागतेऽस्मिंस्ताराः पतन्ति कुहविद्रुतवायवेन" । (ज्वलत्खटेरनुड़ा) २शुष्कतृणवस्त्रादिदीपिते (मशाल) इति प्रसिद्धे ३दीपभेदे च । "तुलाराशिं गते भानौ अमावास्यां नराधिपः । स्नात्वा देवान् पितॄन् भक्त्या संपूज्याथ प्रणम्य च । कृत्वा तु पार्व्वणश्राद्धं दधिक्षीरगुड़ादिभिः । ततोऽपराह्णसमये घोषयेन्नगरे नृपः । लक्ष्मीः संपूज्यतां लोका! उल्काभिश्चापि वेष्ट्यताम्" ति० त० ज्यो० उल्कादाने दर्शद्वैधे निर्णयः । "तुलासंस्थे सहस्रांशौ प्रदोषे भूतदर्शयोः । उल्काहस्ता नराः कुर्युः पितॄणां मार्गदर्शनम्" ति० त० ज्यो० वचनात् प्रदोषव्यापिदर्शे कार्यम् । उभयत्र प्रदोषप्राप्तौ परदिने एव, युग्मादिशास्त्रात् । "दण्डैकरजनीयोगोदर्शस्य स्यात् परेऽहनि । तदा विहाय पूर्वेद्यु परेद्युः सुखरात्रिका" ज्योतिर्वचनाच्च । उभयत्र प्रदोषाप्राप्तावपि उल्कादानं पूर्वोक्तपार्व्वणानुरोधात्, न पूर्व्वदिने भूताहे ये प्रकुर्वन्ति उल्काग्रहमचेतसः । निराशाः पितरो यान्ति शापं दत्त्वा सुदारुणम्" ज्योतिर्वचनात् । उल्काग्रहणादि पितृकृत्यत्वात् प्राचीनावीतिना दक्षिणाभिमुखेन कार्यम् । "प्राचीनावीतिना सम्यगपसव्यमतन्द्रिणा । पित्र्यमा निधनात् कार्यं विधिवद्दर्भपाणिना" मनूक्तेः । तद्दानमन्त्रादि ति० त० दृश्यम् । ४ज्योतिषोक्ते नाक्षत्रिकदशाभेदे । "मङ्गला पिङ्गला धान्या भ्रामरी भद्रिका तथा । उल्का सिद्धा सङ्कटा च ह्यष्टौ ज्ञेया महादशाः" ज्यो० । तदानयनञ्च "वह्निभाज्जीननक्षत्राज्जन्मर्क्षाच्च त्रिभादय" इत्युक्तेः मतभेदेन कृत्तिकानक्षत्रात् पूर्व्वभाद्रपदचतुर्थपादात् जन्मनक्षत्राद्वाऽऽरभ्य एकैकास्त्रिरावृत्त्या क्रमेण मङ्गलादिका दशा भवन्ति इत्येवं चतुर्विंशतिनक्षत्रेषु त्रिरावृत्त्या अष्टौ दशा अवसेयाः ततोऽन्तिमत्रिभेषु मङ्गलाद्यास्तिस्रो भवन्ति । एवमन्यत्राप्यूह्यम् । तासां भोगकालश्च । "एकाद्येकोत्तरा अष्टयोगिनीवत्सरा मताः इत्युक्त्या मङ्गलायाः १एकोवर्षः पिङ्गलायाः २द्वौ, धान्यायास्त्रयः, भ्रामर्याः ४वर्षाः, भद्रिकायाः पञ्च, उल्कायाः षट्, सिद्धायाः सप्त, सङ्कटायाः अष्टौ वर्षाः, तेषां योगेन ३६वर्षा मङ्गलाद्यानां भोगकालः, इत्येवं त्रिरावृत्त्या अष्टोत्तरशतवर्षास्तासां भोगकालः । अन्तर्दशादिकं योगिनीशब्दे वक्ष्यते ।

उल्काचक्र न० रुद्रयामलोक्ते ग्राह्यमन्त्रशुभाशुभज्ञापक चक्रभेदे "उल्काचक्रं सर्व्वसारं मन्त्रदोषादिनिर्णयम् । मत्स्याकारभूर्मुखं सर्वमन्त्रादिविग्रहम् । स्कन्धदेशावधि नाथ! पुच्छपर्यन्तमेव च । अकाराक्षरमारभ्य द्वादशाक्षरमात्रकम् । विलिखेत् पृष्ठदेशं तु शुभाशुभविशुद्धये । त्रयोदशाक्षरान्नाथ! एकविंशाक्षरान्तकम् । नेतव्यं साधकैर्मन्त्रं पृष्ठस्थं समुदाहृतम् । तथा श्रीशुभदं प्रोक्तं कण्ठादिपुच्छकान्तकम् । द्वाविंशादि चतुस्त्रिंशदक्षरान्तं शुभं मनुम् । पुच्छस्थं नापि गृह्णीयात् मुखस्थञ्च तथा ध्रुवम् । शीर्षस्थञ्चापि गृह्णीयात् तदक्षरं शृणु प्रभो! । पञ्चत्रिंशादि द्विचत्वारिंशद्वर्णान्तमेव च । मस्तकस्थं शुभं प्रोक्तं मुखवर्णान् शृणु प्रभो । त्रिचत्वारिंशद्वर्णादि एकपञ्चाशदन्तकम् । मुखस्थमन्त्रं मन्त्री तु न गृह्णीयात् कदाचन । पुच्छस्थं शृणु यत्नेन निरर्थकमहार्त्तिदम् । भ्रमो गात्रस्य पीडाभिः देवता कुप्यतेऽनिशम् । द्विपञ्चाशदक्षरादि एकषष्टिमान्तिकान् । वर्णान् पुच्छस्थितान् प्रोक्तान् नेत्रस्थान् शृणु वल्लभ! । द्विषष्टितमवर्णादि चतुःषष्ट्यक्षरान्तकम् । अङ्गं लोचनमन्त्रञ्च ततोऽन्यत् रसनास्थितम् । तत् सर्वं शुभदं प्रोक्तं एतदन्यतमं शृणु । वैष्णवानाञ्च शैवानां शाक्तानां मन्त्रजापनम् । अन्यदेवेषु भक्तानां भक्तिमुक्तिप्रदं नृणाम्" । "एतञ्च चतुःषष्टिस्त्रिषष्टिर्वा वर्णाः शम्भुमते मताः । स्वराविंशतिरेकश्च स्पर्शानां पञ्चविंशतिः । यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमास्तथा । अनुस्वारो विसर्गश्च+कँपौ चापि पराश्रितौ । दुस्पृष्टश्चेति विज्ञेयो लृकारः प्लुत एव च" इति शिक्षोक्तविभागाभिप्रायं चतुःषष्टेरन्यकथनम् लृकारस्य दीर्घसत्त्वमतेनेति बोध्यम् ।

उल्काजिह्व पु० उल्केव जिह्वाऽस्य । रामा० प्रसिद्धे राक्षसभेदे

उल्कामुख पु० उल्केव मुखमस्य । प्रेतभेदे "वान्ताश्युल्कामुखः प्रेतो विप्रो धर्मात् स्वकात् च्युतः" मनुः (श्याक् सेओयालि) इति प्रसिद्धे जन्तुभेदे स्त्री ङीप् ।

उल्कुषी स्त्री उल्–दाहे क्विप् उला दाहेन कुष्णाति कुष–क गौ० ङीष् । उल्कायाम् । "अशनिरेव प्रथमोऽद्दुयाज्जः ह्रादुनिर्द्वितीय उल्कुषी तृतीयः" । "उल्कुष्यस्तु जहीति तृतीयम्" "उल्कुषीश्च तमनयाजोऽर्हन्ति" सत-

मन् भुवनं परिधावति । योगाचार्य्यामिताकारो दैत्यानामभवद्गुरुः" । तस्य नक्षत्रविशेषगत्या वर्षादिफलादिकम् बृ० सं० ९ अ० उक्तम् "नागगजैरावतवृषभगोजरद्गवमृगाजदहनाख्याः । अश्विन्याद्याः कैश्चित् त्रिभाः क्रमाद्वीथयः कथिताः । नागा तु पवनयाम्यानलानि पैतामहात्त्रिभास्त्रिस्रः । गोवीथ्यामश्विन्यः पौष्णं द्वे चापि भाद्रपदे । जरद्गव्यां श्रवणात् त्रिभं मृगाद्यात् त्रिभं च मैत्राद्यम् । हस्तविशाखात्वाष्ट्राण्यजेत्यषाढाद्वयं दहना । तिस्रस्तिस्रस्तासां क्रमादुदङ्मध्ययाम्यमार्गस्थाः । तासामप्युत्तरमध्यदक्षिणावस्थितैकैका । वीथीमार्गानपरे कथयन्ति यथा स्थिता भमार्गस्य । नक्षत्राणां तारा याम्योत्तरमध्यमास्तद्वत् । उत्तरमार्गो याम्यादिर्निगदितो मध्यमस्तु भाग्याद्यः । दक्षिणमार्गोऽषाढादिः कैश्चिदेवं कृता मार्गाः । ज्योतिषमागमशास्त्रं विप्रतिपत्तौ न योग्यमस्माकम् । स्वयमेव विकल्पयितुं किन्तु बहूनां मतं वक्ष्ये ।

उत्तरवीथिषु शुक्रः सुभिक्षशिवकृद्गतोऽस्तमुदयं वा । मध्यासु मध्यफलदः कष्टफलो दक्षिणस्थासु । अत्युत्तमोत्तमोनं सममध्यन्यूनमधमकष्टफलम् । कष्टतमं सौम्याद्यासु वीथिषु यथाक्रमं ब्रूयात् । भरणीपूर्वं मण्डलमृक्षचतुष्कं सुभिक्षकरमाद्यम् । वङ्गाङ्गमहिषवाह्लीककलिङ्गदेशेषु भयजननम् । अत्रोदितमारोहेद्ग्रहोऽपरो यदि सितं ततो हन्यात् । भद्राश्वशूरसेनकयौधेयककोटिवर्षनृपान् । भचतुष्टयमार्द्राद्यं द्वितीयममिताम्बुशस्यसम्पत्त्यै । विप्राणामशुभकरं विशेषतः क्रूरचेष्टानाम् । अन्यग्रहाभिक्रान्ते म्लेच्छाटविकाश्वजीविगोमन्तान् । गोनर्दनीचशूद्रान् वैदेहांश्चानयः स्पृशति । विचरन् मघादिपञ्चकमुदितः शस्यप्रणाशकृच्छुक्रः । क्षुत्तस्करभयजननो नीचोन्नतिसङ्करकरश्च । पित्राद्येऽवष्टब्धो हन्त्यरेनाविकाञ्छबरशूद्रान् । पुण्ड्रापरान्त्यशूलिकवनवासिद्रविडसामुद्रान् । स्वात्याद्यं भत्रितयं मण्डलमेतच्चतुर्थमभयकरम् । ब्रह्मक्षत्रसुभिक्षाभिवृद्धये मित्रभेदाय । अत्राक्रान्ते मृत्युः किरातभर्त्तुः पिनष्टि चेक्ष्वाकून् । प्रत्यन्तावन्तिपुलिन्दतङ्गणाञ्छूरसेनांश्च । ज्येष्ठाद्यं पञ्चर्क्षं क्षुत्तस्कररोगदं प्रबाधयते । काश्मीराश्मकमत्स्यान् सचारुदेवानवन्तींश्च । आरोहेऽत्राभीरान् द्रविडाम्बष्ठत्रिगर्तसौराष्ट्रान् । नाशयति सिन्धुसौवीरकांश्च काशीश्वरस्य वधः । षष्ठं षण्नक्षत्रं शुभमेतन्मण्डलं धनिष्ठाद्यम् । भूरिधनगोकुलाकुलमनल्पधान्यं क्वचित् सभयम् । अत्रारोहे शूलिकगान्धारावन्तयः प्रपीड्यन्ते । वैदेहवधः, प्रत्यन्तयवनशकदासपरिवृद्धिः । अपरस्यां स्वात्याद्यं ज्येष्ठाद्यं चापि मण्डलं शुभदम् । पित्र्याद्यं पूर्वस्यां शेषाणि यथोक्तफलदानि । दृष्टोऽनस्तगतेऽर्के भयकृत् क्षुद्रोगकृत् समस्तमहः । अर्धदिवसं च सेन्दुर्नृपबलपुरभेदकृच्छुक्रः । भिन्दन् गतोऽनलर्क्षं कूलातिक्रान्तवारिवाहाभिः । अव्यक्ततुङ्गनिम्ना समा सरिद्भिर्भवति धात्री । प्राजापत्ये शकटे भिन्ने कृत्वेव पातकं वसुधा । केशास्थिशकलशबला कापालमिव व्रतं धत्ते । सौम्योपगतो रसशस्यसङ्क्षयायोशनाः समुद्दिष्टः । आर्द्रागतस्तु कोशलकलिङ्गहा सलिलनिकरकरः । अश्मकवैदर्भाणां पुनर्वसुस्थे सिते महाननयः । पुष्ये पुष्टा वृष्टिर्विद्याधरगणविमर्दश्च । अश्लेषासु भुजङ्गमदारुणपीडावहश्चरन् शुक्रः । भिन्दन् मघां महामात्रदोषकृद्भूरिवृष्टिकरः । भाग्ये शबरपुलिन्दप्रध्वंसकरोऽम्बुनिवहमोक्षाय । आर्यम्णे कुरुजाङ्गलपाञ्चालघ्नः सलिलदायी । कौरवचित्रकराणां हस्ते पीडा जलस्य च निरोधः । कूपकृदण्डजपीडा चित्रास्थे शोभना वृष्टिः । स्वातौ प्रभूतवृष्टिर्दूतवणिग्नाविकान् स्पृशत्यनयः । ऐन्द्राग्नेऽपि सुवृष्टिर्वणिजां च भयं विजानीयात् । मैत्रे क्षत्रविरोधो ज्येष्ठायां क्षत्रमुख्यसन्तापः । मौलिकभिषजां मूले त्रिष्वपि चैतेषु नावृष्टिः । आप्ये सलिलजपीडा विश्वेशे व्याधयः प्रकुप्यन्ति । श्रवणे श्रवणव्याधिः पाषण्डिभयं धनिष्ठासु । शतभिषजि शौण्डिकानामजैकपे द्यूतजीविनां पीडा । कुरुपाञ्चालानामपि करोति चास्मिन् सितः सलिलम् । आहिर्बुध्न्ये फलमूलतापकृद्यायिनां च रेवत्याम् । अश्विन्यां हयपानां याम्ये तु किरातयवनानाम् । चतुर्दशे पञ्चदशे तथाष्टमे तमिस्रपक्षस्य तिथौ भृगोः सुतः । यदा व्रजेद्दर्शनमस्तमेति वा तदा मही वारिमयीव लक्ष्यते । गुरुर्भृगुश्चापरपूर्वकाष्ठयोः परस्परं सप्तमराशिगौ यदा । तदा प्रजा रुग्भयशोकपीडिता न वारि पश्यन्ति पुरन्दरोज्झितम् । यदा स्थिता जीवबुधारसूर्यजाः सितस्य सर्वेऽग्रपथानुवर्त्तिनः । नृनागविद्याधरसङ्गरास्तदा भवन्ति वाताश्च समुच्छ्रितान्तकाः । न मित्रभावे सुहृदो व्यवस्थिताः क्रियासु सम्यङ्न रता द्विजातयः । न चाल्पमप्यम्बु ददाति वासवो भिनत्ति वज्रेण शिरांसि भूभृताम् । शनैश्चरे म्लेच्छबिडालकुञ्जराः खरा महिष्योऽसितधान्यसूकराः । पुलिन्दशूद्राश्च

ज्वलति विक्षिपन्त्यनेषु" किरा०। उल्काकारगमुक्तम् श्रीपतिना "यासां गतिर्दिवि भवेद्गणितेन गम्या तास्तारकाः सकलखेचरतोऽतिदूरे। तिष्ठन्ति या अनियतोद्गतयश्च ताराश्चन्द्राद्धोऽहि निवसन्ति तदन्वितास्ताः। शीतांशुवज्जलमयास्तपनात् स्फुरन्ति ताश्चावहप्रवहमारुतसन्धिसंस्थाः। पूर्व्वानिलैस्तिमितभावमुपागतेऽस्मिंस्ताराः पतन्ति कुहचिद्गुरुतापयेन"। (ज्वलन्तखटेरनुड़ा) २शुष्कतृणवस्त्रादिदीपिते (मशाल) इति प्रसिद्धे ३दीपभेदे च। "तुलाराशिं गते भानौ अमावास्यां नराधिपः। स्नात्वा देवान् पितॄन् भक्त्या संपूज्याथ प्रणम्य च। कृत्वा तु पार्व्वणश्राद्धं दधिक्षीरगुड़ादिभिः। ततोऽपराह्णसमये घोषयेन्नगरे नृपः। लक्ष्मीः संपूज्यतां लोका! उल्काभिश्चापि वेष्ट्यताम्" ति०त०ज्यो०। उल्कादाने दर्शद्वैधे निर्णयः। "तुलासंस्थे सहस्रांशौ प्रदोषे भूतदर्शयोः। उल्काहस्ता नराः कुर्युः पितॄणां मार्गदर्शनम्" ति०त०ज्यो०वचनात् प्रदोषव्यापिदर्शे कार्यम्। उभयत्र प्रदोषप्राप्तौ परदिने एव, युग्मादिशास्त्रात्। "दण्डैकरजनीयोगो दर्शस्य स्यात् परेऽहनि। तदा विहाय पूर्वेद्युः परेद्युः सुखरात्रिका" ज्योतिर्वचनाच्च। उभयत्र प्रदोषाप्राप्तावपि उल्कादानं पूर्वोक्तपार्व्वणानुरोधात्, न पूर्व्वदिने भूताहे ये प्रकुर्वन्ति उल्काग्रहमचेतसः। निराशाः पितरो यान्ति शापं दत्त्वा सुदारुणम्" ज्योतिर्वचनात्। उल्काग्रहणादि पितृकृत्यत्वात् प्राचीनावीतिना दक्षिणाभिमुखेन कार्यम्। "प्राचीनावीतिना सम्यगपसव्यमतन्द्रिणा। पित्र्यमानिधनात् कार्यं विधिवद्दर्भपाणिना" मनूक्तेः। तद्दानमन्त्रादि ति०त०द्रष्टव्यम्। ४ज्योतिषोक्ते नाक्षत्रिकदशाभेदे। "मङ्गला पिङ्गला धान्या भ्रामरी भद्रिका तथा। उल्का सिद्धा सङ्कटा च ह्यष्टौ ज्ञेया महादशाः" ज्यो०। तदानयनञ्च "वह्निभाज्जीननक्षत्राज्जन्मर्क्षाच्छिवभादथ" इत्युक्तेः मतभेदेन कृत्तिकानक्षत्रात् पूर्व्वभाद्रपदचतुर्थपादात् जन्मनक्षत्राद्वाऽऽरभ्य एकैकास्त्रिरावृत्त्या क्रमेण मङ्गलादिका दशा भवन्ति इत्येवं चतुर्विंशतिनक्षत्रैः त्रिरावृत्त्या अष्टौ दशा अवसेयाः ततोऽन्तिमत्रिभेषु मङ्गलाद्यास्तिस्रो भवन्ति। एवमन्यत्राप्यूह्यम्। तासां भोगकालश्च। "एकाद्येकोत्तरा अष्टयोगिनीवत्सरा मताः" इत्युक्त्या मङ्गलायाः १एको वर्षः पिङ्गलायाः २द्वौ, धान्यायास्त्रयः, भ्रामर्याः ४वर्षाः, भद्रिकायाः पञ्च, उल्कायाः षट्, सिद्धायाः सप्त, सङ्कटायाः अष्टौ वर्षाः, तेषां योगेन ३६वर्षा मङ्गलाद्यानां भोगकाला, इत्येवं त्रिरावृत्त्या अष्टोत्तरशतवर्षास्तासां भोगकालः। अन्तर्दशादिकं योगिनीशब्दे वक्ष्यते।

उल्काचक्र न० रुद्रयामलोक्ते ग्राह्यमन्त्रशुभाशुभज्ञापके चक्रभेदे "उल्काचक्रं सर्वसारं मन्त्रदोषादिनिर्णयम्। मनुष्याकारमूर्द्ध्वमुखं सर्वमन्त्रादिविग्रहम्। स्कन्धदेशावधि नाथ! पुच्छपर्यन्तमेव च। अकाराक्षरमारभ्य द्वादशाक्षरमात्रकम्। विलिखेत् पृष्ठदेशं तु शुभाशुभविशुद्धये। त्रयोदशाक्षरान्नाथ! एकविंशाक्षरान्तकम्। नेतव्यं साधकैर्नित्यं पृष्ठस्थं समुदाहृतम्। तथा श्रीशुभदं प्रोक्तं कण्ठादिपुच्छकान्तकम्। द्वाविंशादि चतुस्त्रिंशदक्षरान्तं शुभं मनुम्। पुच्छस्थं नापि गृह्णीयान्मुखस्थञ्च तथा ध्रुवम्। शीर्षस्थञ्चापि गृह्णीयात् तदक्षरं शृणु प्रभो!। पञ्चत्रिंशादि द्वाचत्वारिंशद्वर्णान्तमेव च। मस्तकस्थं शुभं प्रोक्तं सुखवर्णान् शृणु प्रभो!। त्रिचत्वारिंशवर्णादि एकपञ्चाशदन्तकम्। मुखस्थमन्त्रं मन्त्री तु न गृह्णीयात् कदाचन। पुच्छस्थं शृणु यत्नेन निरर्थकमहार्णिदम्। भ्रमो गात्रस्य पीडाभिः देवता कुप्यतेऽनिशम्। द्विपञ्चाशदक्षरादि एकषष्टिमान्तिकान्। वर्णान् पुच्छस्थितान् प्रोक्तान् नेत्रस्थान् शृणु वल्लभ!। द्विषष्टितमवर्णादि चतुःषष्ट्यक्षरान्तकम्। अङ्गं लोचनमन्त्रञ्च ततोऽन्यत् रसनास्थितम्। तत् सर्वं शुभदं प्रोक्तं एतदन्यतमं शृणु। वैष्णवानाञ्च शैवानां शाक्तानां मन्त्रजापनम्। अन्यदेवेषु भक्तानां भक्तिमुक्तिप्रदं नृणाम्"। "एतच्च चतुःषष्टिस्त्रिषष्टिर्वा वर्णाः शम्भुमते मताः। स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः। यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमास्तथा। अनुस्वारो विसर्गश्च+कँपौ चापि पराश्रितौ। दुःस्पृष्टश्चेति विज्ञेयो ऌकारः प्लुत एव च" इति शिक्षोक्तविभागाभिप्रायं चतुःषष्टेरन्यकथनम् ऌकारस्य दीर्घस्य सत्तेनेति बोध्यम्।

उल्काजिह्व पु० उल्केव जिह्वाऽस्य। रामा० प्रसिद्धे राक्षसभेदे।

उल्कामुख पु० उल्केव मुखमस्य। प्रेतभेदे "वान्ताश्युल्कामुखः प्रेतो विप्रो धर्म्मात् स्वकात् च्युतः" मनुः (स्याङ सेओयालि) इति प्रसिद्धे जन्तुभेदे स्त्री ङीष्।

उल्कुषी स्त्री उल-दाहे क्विप् उला दाहेन कुष्णाति कुष-क गौ० ङीष्। उल्कायाम्। "अयमिरेव प्रथमोऽनुयाजः ह्राडुनिर्द्वितीय उल्कुषी तृतीयः"। "उल्कुषीमु जहीति तृतीयम्" "उल्कुषीव तमनयाजोऽर्हन्ति" सत्-

सन् भुवनं परिधावति । योगाचार्य्योमिताहारो दैत्यानामभवद्गुरुः" । तस्य नक्षत्रविशेषगत्या वर्षादिफलादिकम् वृ०सं०९अ० उक्तम् "नागगजैरावतवृषभगोजरद्गवमृगाजदहनाख्याः । अश्विन्याद्याः कैश्चित् त्रिभाः क्रमाद्वीथयः कथिताः । नागा तु पवनयाम्यानलानि पैतामहात्त्रिभास्तिस्रः । गोवीथ्यामश्विन्यः पौष्णं द्वे चापि भाद्रपदे । जरद्गव्यां श्रवणात् त्रिभं मृगाख्यात् त्रिभं च मैत्राद्यम् । हस्तविशाखात्वाष्ट्राण्यजेत्याषाढाद्वयं दहना । तिस्रस्तिस्रस्तासां क्रमादुदङ्मध्ययाम्यमार्गस्थाः । तासामप्युत्तरमध्यदक्षिणावस्थितैकैका । वीथीमार्गानपरे कथयन्ति यथा स्थिता भमार्गस्य । नक्षत्राणां तारा याम्योत्तरमध्यमास्तद्वत् । उत्तरमार्गो याम्यादिर्निगदितो मध्यमस्तु भाग्याद्यः । दक्षिणमार्गोऽषाढादिः कैश्चिदेवं कृता मार्गाः । ज्योतिषमागमशास्त्रं विप्रतिपत्तौ न योग्यमस्माकम् । स्वयमेव विकल्पयितुं किन्तु बहूनां मतं वक्ष्ये ।

उत्तरवीथिषु शुक्रः सुभिक्षशिवकृत्तथोऽस्तमुदयं वा । मध्यासु मध्यफलदः कष्टफलो दक्षिणस्थासु । अत्युत्तमोत्तमोनं सममध्यन्यूनमधमकष्टफलम् । कष्टतमं सौम्याद्यासु वीथिषु यथाक्रमं ब्रूयात् । भरणीपूर्वं मण्डलमृक्षचतुष्कं सुभिक्षकरमाद्यम् । वङ्गाङ्गमहिषबाह्लीककलिङ्गदेशेषु भयजननम् । अत्रोदितमारोहेद्ग्रहोऽपरो यदि सितं ततो हन्यात् । भद्राश्वशूरसेनकयौधेयककोटिवर्षनृपान् । भचतुष्टयमार्द्राद्यं द्वितीयममिताम्बुशस्यसम्पत्त्यै । विप्राणामशुभकरं विशेषतः क्रूरचेष्टानाम् । अन्येनात्राक्रान्ते म्लेच्छाटविकाश्वजीविगोमन्तान् । गोनर्द्दनीचशूद्रान् वैदेहांश्चानयः स्पृशति । विचरन् मघादिपञ्चकमुदितः शस्यप्रणाशकृच्छुक्रः । क्षुत्तस्करभयजननो नीचोन्नतिसङ्करकरश्च । पित्र्याद्येऽवष्टब्धो हन्त्यन्येनाविकाञ्छबरशूद्रान् । पुण्ड्रापरान्त्यशूलिकवनवासिद्रविडसामुद्रान् । स्वात्याद्यं भत्रितयं मण्डलमेतच्चतुर्थमभयकरम् । ब्रह्मक्षत्रसुभिक्षाभिवृद्धये मित्रभेदाय । अत्राक्रान्ते मृत्युः किरातभर्तुः पिनष्टि चेक्ष्वाकून् । प्रत्यन्तावन्तिपुलिन्दतङ्गणाञ्छूरसेनांश्च । ज्येष्ठाद्यं पञ्चर्क्षं क्षुत्तस्कररोगदं प्रबाधयते । काश्मीराश्मकमत्स्यान् सचारुदेवामवन्तींश्च । आरोहेऽत्राभीरान् द्रविडाम्बष्ठत्रिगर्तसौराष्ट्रान् । नाशयति सिन्धुसौवीरकांश्च काशीश्वरस्य वधः । षड् वरुणाद्यं शुभमेतन्मण्डलं धनिष्ठाद्यम् । भूरिधनगोकुलाकुलमनल्पधान्यं क्वचित् सभयम् । अत्रारोहे शूलिकगान्धारावन्तयः प्रपीड्यन्ते । वैदेहवधः, प्रत्यन्तयवनशकदासपरिवृद्धिः । अपरस्यां स्वात्याद्यं ज्येष्ठाद्यं चापि मण्डलं शुभदम् । पित्र्याद्यं पूर्वस्यां शेषाणि यथोक्तफलदानि । दृष्टोऽनस्तगतेऽर्कं भयकृत् क्षुद्रोगकृत् समस्ताङ्गः । अर्धदिवसं च सेन्दुर्नृपबलपुरभेदकृच्छुक्रः । भिन्दन् गतोऽनलर्क्षं कूलातिक्रान्तवारिवाहाभिः । अव्यक्ततुङ्गनिम्ना समा सरिद्भिर्भवति धात्री । प्राजापत्ये शकटे भिन्ने कृत्वेव पातकं वसुधा । केशास्थिशकलशबला कापालमिव व्रतं धत्ते । सौम्योपगतो रसशस्यसङ्क्षयायोशनाः समुद्दिष्टः । आर्द्रागतस्तु कोशलकलिङ्गहा सलिलनिकरकरः । अश्मकवैदर्भाणां पुनर्वसुस्थे सिते महाननयः । पुष्ये पुष्टा वृष्टिर्विद्याधरगणविमर्दश्च । अश्लेषासु भुजङ्गमदारुणपीडावहश्चरञ्छुक्रः । भिन्दन् मघां महामात्रदोषकृद्भूरिवृष्टिकरः । भाग्ये शबरपुलिन्दप्रध्वंसकरोऽम्बुनिवहमोक्षाय । आर्यम्णे कुरुजाङ्गलपाञ्चालघ्नः सलिलदायी । कौरवचित्रकराणां हस्ते पीडा जलस्य च निरोधः । कूपकृदण्डजपीडा चित्रास्थे शोभना वृष्टिः । स्वातौ प्रभूतवृष्टिर्दूतवणिग्नाविकान् स्पृशत्यनयः । ऐन्द्राग्नेऽपि सुवृष्टिर्वणिजां च भयं विजानीयात् । मैत्रे क्षत्रविरोधो ज्येष्ठायां क्षत्रमुख्यसन्तापः । मौलिकभिषजां मूले त्रिष्वपि चैतेषु नावृष्टिः । आप्ये सलिलजपीडा विश्वे व्याधयः प्रकुप्यन्ति । श्रवणे श्रवणव्याधिः पाषण्डभयं धनिष्ठासु । शतभिषजि शौण्डिकानामजैकपे द्यूतजीविनां पीडा । कुरुपाञ्चालानामपि करोति चास्मिन् सितः सलिलम् । अहिर्बुध्न्ये फलमूलतापकृद्यायिनां च रेवत्याम् । अश्विन्यां हयपानां याम्ये तु किरातयवनानाम् । चतुर्दशे पञ्चदशे तथाष्टमे तमिस्रपक्षस्य तिथौ भृगोः सुतः । यदा व्रजेद्दर्शनमस्तमेति वा तदा मही वारिमयीव लक्ष्यते । गुरुर्भृगुश्चापरपूर्वकाष्ठयोः परस्परं सप्तमराशिगौ यदा । तदा प्रजा रुग्भयशोकपीडिता न वारि पश्यन्ति पुरन्दरोज्झितम् । यदा स्थिता जीवबुधारसूर्यजाः सितस्य सर्वेऽपपथानुवर्त्तिनः । नृनागविद्याधरसङ्गरास्तदा भवन्ति वाताश्च समुच्छ्रितान्तकाः । न मित्रभावे सुहृदो व्यवस्थिताः क्रियासु सम्यङ्न रता द्विजातयः । न चाल्पमप्यम्बु ददाति वासवो भिनत्ति वज्रेण शिरांसि भूभृताम् । शनैश्चरे म्लेच्छबिडालकुञ्जराः खरा महिष्योऽसितधान्यसूकराः । पुलिन्दशूद्राश्च

सदक्षिणापथाः क्षयं व्रजन्त्यशिवमरुद्रुद्रोद्भवैः। निहन्ति शुक्रः क्षितिजेऽग्रतः प्रजा हुताशशस्त्रक्षुदहृष्टितस्करैः। चराचरं व्यक्तमथोत्तरापथं द्विषोऽग्निविद्युद्रजसा च पीडयेत्। इहस्ततौ हन्ति पुरःस्थिते सितः सितं समस्तं द्विजगोसुरालयान्। दिशं च पूर्वां करकास्रजोऽम्बुदा गलेगदा भूरि भवेच्च शारदम्। सौम्येऽस्तोदययोः पुरो भृगुसुतस्यावस्थितस्तोयकृद् रोगान् पित्तजकामलांश्च कुरुते पुष्णाति च ग्रैष्मिकम्। हन्यात् प्रव्रजिताग्निहोत्रिकभिषग्रङ्गोपजीव्यान् हयान् वैश्यान् गाः सह वाहनैर्नरपतीन् पीतानि पश्चाद्दिशम्। शिखिभयमनलाभे शस्त्रकोपश्च रक्ते कनकनिकषगौरे व्याधयो दैत्यपूज्ये। हरितकपिलरूपे श्वासकासप्रकोपः पतति न सलिलं खाद्भस्मरूक्षासिताभे। दधिकुमुदशशाङ्ककान्तिभृत् स्फुटविकसत्किरणो बृहत्तनुः। सुगतिरविकृतो जयान्वितः कृतयुगरूपकरः सिताह्वयः।" "उशने काव्याय" ऋ० ६,२०,११। "उशने उशनसे" भा० छान्दसम्।

उशनसस्तोम पु० उशनसः स्तोमो यत्र अलुक्समा० वा विसर्गस्य लुक्। एकाहसाध्ये यागभेदे "उशनसस्तोमेन गरगीर्णमिवात्मानं मन्यमानो यजेत" आ० श्रौ० ९,५,१। "उशनसस्तोमो नाम एकाहसाध्यः पुनः स्तोम इति चास्यैव संज्ञा गरो विषं गीर्णो येन स गरगीर्णः यो बहुप्रतिग्रहादिना पापादिभयात् गरगीर्णमिवात्मानं मन्यते स एतेन यजेत" नारा० वृ० "उशना यत् सहस्यैरयातं त्वमपीयद्वेतुर्वंशायेति सूक्तमुखीये" इति तत्रैव सूक्तप्रारम्भः २सूत्रे उक्तः।

उशाना स्त्री वश–ताच्छील्ये चानश्। सोमसाधनभूतायां गिरिजातायामोषधौ। "यद्यदाप्यायन्ति देवो वै सोमो दिवि हि सोमो वृत्रो वै सोम आसीत् तस्यैतच्छरीरं यद्गिरयः यदश्मानस्तदेषोशाना नामौषधिर्जायत इति स्माह श्वेतकेतुरौद्दालकिस्तामेतदाहृत्याभिषुण्वन्ति" शत० ब्रा० ३,४, ३,१०। "उशानाख्या ओषधिर्जायते इत्येवं श्वेतकेतुराह अतस्तामेव गिरावुत्पन्नाम् इदानीन्तना यजमाना अभिषुण्वन्ति न साक्षात् सोमम्" भा०।

उशिज् पु० वश–इजि किच्च संप्र०। १अग्नौ २घृते च उज्ज्व०। तत्र वह्नेः हविःकामयमानत्वात्, घृतस्य तु काम्यमानत्वात् तथात्वम्। ३कामयमाने त्रि०। "उशिगसि कविरिति" "उशिगसि वसुभ्य इति"च ता० ब्रा०। "इषन्नुशिजोययाविधः" ऋ० १, १२१,५, "उशिजः कामयमानान् यजमानान्" भा०। उशिजो मनीषिणः" ऋ० २,२१,२, "उशिज इन्द्रं कामयमानान्" भा०। "स हव्यवाडमर्त्य उशिग्दूतश्चनोहितः" ३,११,२। "उशिक् हविःकामयमानः" भा० "उशिजो यविष्ठो वह्नितमानाम्" ३,१५, २३। "प्र पूर्वादिशुरुशिजः" यजु० "उशिजः हवींषि कामयमानान्" वेददी० ४काम्ये "उशिक् त्वं देव! सोमाग्नेः प्रियं पाथोऽपीहि" यजु० ८,५५ "उशिक् काम्यमानः" वेददीपः। "उशिगसि कविः" ५,३२। "उशिक्कामयमानः" वेददी० ५अग्ने तस्य काम्यमानत्वात्तथात्वम्। "उशिजा वसुभ्योवसून् जिन्व" यजु० १५,६। उशिजा वश कान्तौ इति उशिगत्वं तेन" वेददी०। ततः प्रज्ञा स्वार्थे ण। औशिजः उक्तार्थे। करणे इजि। ६इच्छाहेतौ मेधायाम् निरु०। मेधारूपज्ञानस्येच्छाहेतुत्वात् तथात्वम्। ततः अस्त्यर्थे अर्श० अच्। उशिजः मेधाविनि त्रि० निरु०

उशी स्त्री वश–ई–संप्र०। इच्छाभेदे उशीनरः।

उशीनर पु० १वृष्णिवंशोद्भवे क्षत्रियभेदे। "उशीनरश्च विक्रान्तो वृष्णयस्ते प्रकीर्त्तिताः" भा० आ० १८६ अ०। २पौरवे नृपभेदे "शृणु पूरोर्महाराज! वंशमुत्तमपौरुषम्" इत्युपक्रम्य "सृञ्जयस्याभवत् पुत्रो वीरो राजा पुरञ्जयः। जनमेजयो महाराजो पुरञ्जयसुतोऽभवत्। जनमेजयस्य राजर्षेर्महाशीलोऽभवत् सुतः। महामना नाम सुतो महाशीलस्य धार्मिकः। महामनास्तु द्वौ पुत्रौ जनयामास भारत!। उशीनरं च धर्मज्ञं तितिक्षुञ्च महाबलम्" हरिवं० ३१अ०। तस्य चरितं वर्णितम्" भा० व० "अत्रागच्छन्नृपवरं ज्ञातुमग्निः सवासवः। जिज्ञासमानो वरदो महात्मानमुशीनरम्। इन्द्रःश्येनः कपोतोऽग्निर्भूत्वा यज्ञेऽभिजग्मतुः। ऊरुं राज्ञः समासाद्य कपोतः श्येनजाद्भयात्। शरणार्थी तदा राजन्! निलिल्ये भयपीडितः" १३०अ०। "श्येन उवाच। धर्मात्मानं त्वा ऐकं सर्वे राजन्महीक्षितः। स वै धर्मविरुद्धं त्वं कस्मात् कर्म्म चिकीर्षसि?। विहितं भक्षणं राजन्! पीड्यमानस्य मे क्षुधा। मा रक्षीर्धर्म्मलोभेन धर्म्ममुत्सृष्टवानसि। राजोवाच। सन्त्रस्तरूपस्त्राणार्थी त्वत्तो भीतो महाद्विज!। मत्सकाशमनुप्राप्तः प्राणगृध्नुरयं द्विजः। एवमभ्यागतस्येह कपोतस्याभयार्थिनः। अप्रदाने परं धर्म्मं कथं श्येन! न पश्यसि?। प्रस्पन्दमानः संभ्रान्तः कपोतः श्येन! लक्ष्यते। मत्सकाशे जीवितार्थी

वेददी० ४ब्राह्ममुहूर्त्ते "उषावै अश्वस्य मेध्यस्य विग्याम" वृ०उ०। "उषा ब्राह्मो मुहूर्त्तकालः" ग०भा०। ५दिवोदुहितृदेवतायाम् स्त्री प्रौढ़मनोरमा।

उषसी स्त्री उषं तापकत्वात् दिवसं स्यति सो–क गौरा० ङीष्। सायं सन्ध्यायाम् मेदिनिः।

उषस्ति पु०ऋषिभेदे "उषस्तिर्ह चाक्रायणः" छा०उ०। उपस्तोऽप्यत्र "अथ हैनमुषस्तश्चाक्रायणः पप्रच्छ" "ततो होषस्तश्चाक्रायण उपरराम" इति च शत०ब्रा०१४,६,५,१।

उषा स्त्री ओषत्यन्धकारम् उष+क। १प्रातरादिसन्ध्यासु "वेनोरदुषतश्चासिसः" ऋ०८,४१,२। तिस्र प्रातःसायं मध्याह्नरूपा उषाः" भा०। "उषा विभातीरनु भासि पूर्व्वीः" २,६,७, "तेजःपरिहाणिरुषा भानोरर्द्धोदयं यावत्" वृ० सं०उक्ते २काले नक्षत्रप्रभाक्षय· काल उषा। तेन पञ्च-पञ्चाशद्घटिकोत्तरमारभ्य सूर्य्यार्द्धोदयपर्य्यन्तः स कालः। लग्नाद्यलाभे उषाकाले यात्रा शस्ता यथाह ज्यो० "प्रनष्टद्युतितारका स्फुटतटी प्राची भवेन्निर्म्मला स्तोषद्रक्तविलोहितान्तरतला देवैः सदा वाञ्छिता। नो वारं न तिथिं न योगकरणं लग्नञ्च नापेक्षते हत्वा दोषसहस्र-मञ्चयमुषा नूनं करोत्युन्नतिमिति"। "तिथ्यादिषु निषिद्धेषु चन्द्रताराविलोमतः। उषां गोधूलियोगं वा वीक्ष्य गमनं चरेत्। प्राच्यामुषां प्रतीच्याञ्च गोधूलिं वर्जयेन्नृप!। दक्षिणेऽभिजितं चैवमुत्तरे च निशां तथा"। "आरक्तबिम्बं रजनीविरामं वदन्त्युषायोगमिह प्रवीणाः। व्यासः" "आहुः प्रयातुः सकलार्थसिद्धिः संलक्ष्यते हस्तगतस्थितेव" ज्यो०त०व्यासः। अन्धकारेण सन्तापकारिण्यां ३रात्रौ मेदि० "अधिवसन्त्विरयेषामभ्युषां जागरित्वा" माघः। ४वाणभूमौ। ततः क्वचित् गौरा० ङीष्। "भवान् कुर्त कुहकरादमिवोपासुष्याम्" भाग० ५स्त्रीगव्यां हेम० ६उखायां विश्वः ७स्थाल्यां रमानाथः। दैत्यबाणराजसुतायाञ्च तत्र दीर्घादित्वमपि भारतादौ तथैव निर्द्देशात्। तया च यथा अनिरुद्धः पतित्वे-प्राप्तः तथा वर्णितं भाग०१०स्क०६२अ०यथा (बाणस्य) "तस्योषा नाम दुहिता स्वप्ने प्राद्युम्निना रतिम्। कन्यालभतकान्तेन प्रागदृष्टश्रुतेन सा। सा तत्र तमपश्यन्ती क्वासि कान्तेति वादिनी। सखीनां मध्य उत्तस्थौ विह्वला व्रीड़िता भृशम्। बाणस्य मन्त्री कुम्भाण्डश्चित्रलेखा च तत्सुता। सख्यपृच्छत् सखीं मूषः कौतूहलसमन्विता। कं त्वं मृगयसे सुभ्रु! कीदृशस्ते मनोरथः। हस्तग्राहं न तेऽद्यापि राजपुत्र्युपलक्षये। उषोवाच। दृष्टः कश्चिन्नरः स्वप्ने श्यामः कमललोचनः। पीतवासा बृहद्बाहुर्योषितां हृदयङ्गमः। तमहं मृगये कान्तं पाययित्वाऽधरं मधु। क्वापि यातः स्पृहयतीं क्षिप्त्वा मां वृजिनार्णवे। चित्रलेखोवाच। व्यसनन्तेऽपकर्षामि त्रिलोक्यां यदि भाव्यते। तदानेष्ये नरं! यस्ते मनोहर्त्ता तमादिश। इत्युक्त्वा देवगन्धर्व्वसिद्धचारणपन्नगान्। दैत्यविद्याधरान् यक्षान् मनुष्यांश्च तथाऽलिखत्। मनुजेषु च सा वृष्णीन् शूर-मानकदुन्दुभिम्। व्यलिखत् रामकृष्णौ च प्रद्युम्नं वीक्ष्य लज्जिता। अनिरुद्धं विलिखितं वीक्ष्योषाऽवाङ्मुखी ह्रिया। सोऽसावसाविति प्राह स्मयमाना महीपते!। चित्रलेखा तमाज्ञाय पौत्रं कृष्णस्य योगिनी। ययौ विहायसा राजन्! द्वारकां कृष्णपालिताम्। तत्र सुप्तं सुपर्य्यङ्के प्राद्युम्निं योगमास्थिता। गृहीत्वा शोणितपुरं सख्यै प्रियमदर्शयत्। सा च तं सुन्दरवरं विलोक्य मुदितानना। दुष्प्रेक्ष्ये स्वगृहे पुंसा रेमे प्राद्युम्निना समम्। परार्द्ध्यवासःस्रग्गन्धधूपदीपासनादिभिः। पानभोजनभक्ष्यैश्च वाक्यैः शुश्रूषयार्च्चितः। गूढः कन्यापुरे शश्वत् प्रवृद्धस्नेहया तया। नाहर्गणान् स बुबुधे उषयोपहृतेन्द्रियः" विस्तरस्तु हरिवं०१७६अ०। प्रातःकाले अव्य० मेदि० अव्ययत्वात् ततो भवार्थे ट्युल् तुट् च्। उषातन तद्भवे त्रि० स्त्रियां ङीप्।

उषाकल पु० उषायां कलोरवो यस्य। कुक्कुटे।

उषापति पु० ६त०। कृष्णपौत्रे प्रद्युम्नपुत्रे यदुवंश्ये अनिरुद्धे तत्पतित्वप्राप्तिकथा उषाशब्दे उक्ता उषानाथादयोऽप्यत्र, अमरे "अनिरुद्ध उषापतिरिति" ह्रस्वपाठः भारतादौ तु दीर्घपाठः।

उषित त्रि० वस क्त। १पर्य्युषिते २कृतवासे च। उष–दाहे क्त। ३दग्धे मेदि०। ४त्वरिते धरणिः। भावे क्त। ५वासे न० "चारुकालैरुषितं यत्र" शु०त० देवलः।

उषीर पुंन० उष–कीरच्। वीरणमूले रायमुकुटः।

उष्टृ पु० उक्ष–सेचने तृन् वेदे नेट्। १सम्यक्सेक्तरि बलीवर्द्दे। तस्यामोघवीर्य्यत्वात् तथात्वम् "ओष्टारौ वा" कात्या० ५,११,१२। "ओष्टारौ महाबलीवर्द्दौ" कर्कः। आ+सम्यक् उष्टारौ इति विग्रहः। "उष्टारेव फर्व्वरेषु श्रयेथे" ऋ० १५,१०६,२। लोके तु उक्षितृ इत्येव। सेक्तरि त्रि० स्त्रियां ङीप्।

उष्ट्र पुंस्त्री० उष+ष्ट्रन् कित्। (उट) प्रसिद्धे पशुभेदे

षट्शिखापथाः श्चयं व्रजन्त्यशिवमहद्गदोद्भवैः । निहन्ति शुक्रः क्षितिजेऽस्तः प्रजा हुताशशस्त्रक्षुदुद्भटितस्करैः । चराचरं व्यक्तमथोत्तरापथं दिशोऽग्निविद्युद्रजसा च पीडयेत् । बृहस्पतौ हन्ति पुरःस्थिते सितः सितं समस्तं द्विजगोसुरालयान् । दिशं च पूर्वां करकाम्बुजोऽम्बुदा गलेगदाः भूरि भवेच्च शारदम् । सौम्योऽस्तोदययोः पुरो भृगुसुतस्यावस्थितस्तोयहृद् रोगान् पित्तजकामलांश्च कुरुते पुष्णाति च पैत्तिकम् । हन्यात् प्रव्रजिताग्निहोत्रिकभिषङ्नृत्योपजीव्यान् हयान् वैश्यान् गाः सह वाहनैर्नरपतीन् पीतानि पश्चाद्दिशम् । शिखिभयमनलाभे शस्त्रकोपश्च रक्ते कनकनिकषगौरे व्याधयो दैत्यपूज्ये । हरितकपिलरूपे श्वासकासप्रकोपः पतति न सलिलं खाद्भस्मरूक्षासिताभे । दधिकुमुदशशाङ्ककान्तिभृत् स्फुटविकसत्किरणो बृहत्तनुः । सुगतिरविकृतो जयान्वितः कृतयुगरूपकरः सिताह्वयः” “उशने काव्याय” ऋ० ६,२०,११। “उशने उशनसे” भा० छान्दसम् ।

उशनसस्तोम पु० उशनसः स्तोमो यत्र अलुक्समा० वा विसर्गस्य लुक् । एकाहसाध्ये यागभेदे “उशनसस्तोमेन गरगीर्णमिवात्मानं मन्यमानो यजेत” आ० श्रौ० ९,५,१ । “उशनसस्तोमोनाम एकाहसाध्यः पुनः स्तोम इति चास्यैव संज्ञा गरोविषं गीर्णो येन स गरगीर्णः यो बहुप्रतिग्रहादिना पापादिभयात् गरगीर्णमिवात्मानं मन्यते स एतेन यजेत” नारा० वृ० “उशना यत् सहस्यैरयातं त्वमपोयद्वेतुर्वशायेति सूक्तमुखीये” इति तत्रैव सूक्तप्रारम्भः २सूक्ते उक्तः ।

उशाना स्त्री वश–ताच्छील्ये चानश् । सोमसाधनभूतायां गिरिजातायामोषधौ । “यद्यदाप्यायन्ति देवो वै सोमो दिवि हि सोमो हतो वै सोम आसीत् तस्यैतच्छरीरं यद्गिरयः यदश्मानस्तदेषोशाना नामौषधिर्जायत इति स्माह श्वेतकेतुरुद्दालकिस्तामेतदाहृत्याभिषुण्वन्ति” शत० ब्रा० ३,४, ३,१० । “उशानाख्या ओषधिर्जायते इत्येवं श्वेतकेतुराह अतस्तामेव गिरावुत्पन्नाम् इदानीन्तना यजमाना अभिषुण्वन्ति न साक्षात् सोमम्” भा० ।

उशिज् पु० वश–इजि किच्च सं प्र० । १अग्नौ २घृते च उज्ज्व० तत्र वह्नेः हविःकामयमानत्वात्, घृतस्य तु काम्यमानत्वात् तथात्वम् । ३कामयमाने त्रि० । “उशिगसि कविरिति” “उशिगसि वसुभ्य इति” च ता० ब्रा० “हवन्नुशिजो ययाविदः” ऋ० १, १३१,५, “उशिजः कामयमानान् यजमानान्” भा० । उशिजोमनीषिणः” ऋ० २,२१,२, “उशिज इन्द्रं कामयमानान्” भा० । “स हव्यवाडमर्त्य उशिग्दूतश्च नोहितः” ३,११,२ । “उशिक् हविःकामयमानः” भा० उशिजोयविष्ठो वक्षितमानाम्” ३,१५, २१। “प्र पूर्वादिगुरुशिजः” यजु० “उशिजः हवींषि कामयमानान्” वेददी० ४काम्ये “उशिक् त्वं देव ! सोमाग्नेः प्रियं पाथोऽपीहि” यजु० ८,५५ “उशिक् काम्यमानः” वेददीपः । “उशिगसि कविः” ५,२२, । उशिक्कामयमानः” वेददी० ५अन्ने तस्य काम्यमानत्वात्तथात्वम् । “उशिजा वसुभ्योवसून् जिन्व:” यजु० १५,६ । उशिजा वश कान्तौ इति उशिगन्नं तेन” वेददी० । ततः प्रज्ञा स्वार्थे ण । औशिजः उक्तार्थे । करणे इजि । ६इच्छा हेतौ मेधायाम् निरु० । मेधारूपज्ञानस्येच्छाहेतुत्वात् तथात्वम् । ततः अस्त्यर्थे अर्श० अच् । उशिजः मेधाविनि त्रि० निरु०

उशी स्त्री वश–ई–संप्र० । इच्छाभेदे उशीनरः ।

उशीनर पु० १वृष्णिवंशोद्भवे क्षत्रियभेदे । “उशीनरश्च विक्रान्तो वृष्णयस्ते प्रकीर्त्तिताः” भा० आ० १८६ अ० । २पौरवे नृपभेदे “शृणु पूरोर्महाराज ! वंशमुत्तमपौरुषम्” इत्युपक्रम्य “सृञ्जयस्याभवत् पुत्रो वीरो राजा पुरञ्जयः । जनमेजयो महाराजो पुरञ्जयसुतोऽभवत् । जनमेजयस्य राजर्षेर्महाशालोऽभवत् सुतः । महामना नाम सुतो महाशालस्य धार्मिकः । महामनास्तु द्वौ पुत्रौ जनयामास भारत ! । उशीनरं च धर्मज्ञं तितिक्षुञ्च महाबलम्” हरिवं० ३१अ० तस्य चरितं वर्णितम्” भा० व० “अत्रागच्छन्नृपवरं ज्ञातुमग्निः सवासवः । जिज्ञासमानो वरदो महात्मानमुशीनरम् । इन्द्रः श्येनः कपोतोऽग्निर्भूत्वा यज्ञेऽभिजग्मतुः । ऊरुं राज्ञः समासाद्य कपोतः श्येनजाद्भयात् । शरणार्थी तदा राजन् ! निलिल्ये भयपीड़ितः” १२०अ० । “श्येन उवाच । धर्म्मात्मानं त्वा रेकं सर्व्वे राजन्महीक्षितः । स वै धर्म्मविरुद्धं त्वं कस्मात् कर्म्म चिकीर्षसि ? । विहितं भक्षणं राजन् ! पीड्यमानस्य मे क्षुधा । मा रक्षीर्धर्म्मलोभेन धर्म्ममुत्सृष्टवानसि । राजोवाच । सन्त्रस्तरूपस्त्राणार्थी त्वत्तो भीतो महाद्विज ! । मत्सकाशमनुप्राप्तः प्राणगृध्नुरयं द्विजः । एवमभ्यागतस्येह कपोतस्याभयार्थिनः । अप्रदाने परं धर्म्मं कथं श्येन ! न पश्यसि ? । प्रस्पन्दमानः संभ्रान्तः कपोतः श्येन ! लक्ष्यते । मत्सकाशे जीवितार्थी

वेददी० ४ब्राह्ममुहूर्त्ते “उषाव अश्वस्य मेध्यस्य विव्याध” इ०उ०। “उषा ब्राह्मो मुहूर्त्तकालः” श०भा०। ५दिवोदुहितृदेवतायाम् स्त्री प्रौढ़मनोरमा।

उषसी स्त्री उषं तापकत्वात् दिवसं स्यति सो—क गौरा० ङीष्। सायं सन्ध्यायाम् मेदिनिः।

उषस्ति पु० ऋषिभेदे “उषस्तिर्ह चाक्रायणः” छा०उ०। उग-स्तोऽप्यत्र “अथ हैनमुषस्तश्चाक्रायणः पप्रच्छ” “ततो होषस्तश्चाक्रायण उपरराम” इति च शत०ब्रा०१४,६,५,१।

उषा स्त्री ओषत्यन्धकारम् उष+क। १प्रातरादिसन्ध्यासु “वेनीरनुव्रतमुषास्तिस्रः” ऋ०८,४१,३। तिस्रः प्रातःसायं मध्याह्नरूपा उषाः” भा०। “उषा विभातीरनु भासि पूर्वीः” २,६,७, “तेजःपरिहाणिरुषा भानोरर्द्धोदयं यावत्” इ० सं०उक्ते २काले नक्षत्रप्रभाक्षय काल उषा। तेन पञ्च-पञ्चाशद्घटिकोत्तरमारभ्य सूर्य्यार्द्धोदयपर्य्यन्तः स कालः। लग्नाद्यलाभे उषाकाले यात्रा शस्ता यथाह ज्यो० “प्र-त्युष्टद्युतितारका स्फुटतटी प्राची भवेन्निर्म्मला त्वीष-द्रक्तविलोहितान्तशबला देवैः सदा वाञ्छिता। नो वारं न तिथिं न योगकरणं लग्नस्य नापेक्षते हत्वा दोषसहस्र सञ्चयमुषा नूनं करोत्युन्नतिमिति”। “तिथ्यादिषु निषिद्धेषु चन्द्रताराविलोमतः। उषां गोधूलियोगं वा स्वीकृत्य गमनं चरेत्। प्राच्यामुषां प्रतीच्याञ्च गोधूलिं वर्जयेन्नृप। दक्षिणेऽभिजितं चैवमुत्तरे च निशां तथा”। “आरक्तविम्बं रजनीविरामं वदन्त्युषायोगमिह प्रवीणाः। व्यासः” “आहुः प्रयातुः सकलार्थसिद्धिः संलक्ष्यते हस्तत-लस्थितेव” ज्यो०त०व्यासः। अन्धकारेण सन्तापकारिण्यां ३रात्रौ मेदि० “अधिकरुचिरशेषामप्युषां जागरित्वा” माघः। ४वारभूमौ। ततः क्वचित् गौरा० ङीष्। “भवन् कृतं कुहकराद्भिरोप्युषष्याम्” भाग० ५स्त्रीगव्यां हेम० ६उखायां विश्वः ७स्थाल्यां रमानाथः। ८वाणराजसुतायाञ्च तत्र दीर्घादित्वमपि भारतादौ तथैव निर्द्देशात्। तया च यथा अनिरुद्धः पतित्वेनाप्तः तथा वर्णितं भाग०१०स्क०६२अ० यथा (वाणस्य) “तस्योषा नाम दुहिता स्वप्ने प्राद्युम्निना रतिम्। कन्या लब्धवती कान्तेन प्रागदृष्टश्रुतेन सा। सा तत्र तमपश्यन्ती क्वासि कान्तेति वादिनी। सखीनां मध्य उत्तस्थौ विह्वला व्रीड़िता भृशम्। वाणस्य मन्त्री कुम्भाण्डश्चित्रलेखा च तत्सुता। सख्यपृच्छत् सखीं मूषः कौतूहलसमन्विता। कं त्वं मृगयसे सुभ्रु! कीदृगस्ते मनोरथः। हस्तग्राहं न तेऽद्यापि राजपुत्र्युपलक्षये। उषोवाच। दृष्टः कश्चिन्नरः स्वप्ने श्यामः कमललोचनः। पीतवासा वृहद्वाहुर्योषितां हृदयङ्गमः। तमहं मृगये कान्तं पाययित्वाऽधरं मधु। क्वापि यातः स्पृहयतीं क्षिप्त्वा मां वृजिनार्णवे। चित्रलेखोवाच। व्यसनन्तेऽपकर्षामि त्रिलोक्यां यदि भाव्यते। तदानेष्ये वरं यस्ते मनोहर्त्ता तमादिश। इत्युक्त्वा देवगन्धर्व्वसिद्धचारणपन्नगान्। दैत्यविद्याधरान् यक्षान् मनुष्यांश्च तथाऽलिखत्। मनुजेषु च सा वृष्णीन् शूरमानकदुन्दुभिम्। व्यलिखत् रामकृष्णौ च प्रद्युम्नं वीक्ष्य लज्जिता। अनिरुद्धं विलिखितं वीक्ष्योषाऽवाङ्मुखी ह्रिया। सोऽसावसाविति प्राह स्मयमाना महीपते!। चित्रलेखा तमाज्ञाय पौत्रं कृष्णस्य योगिनी। ययौ विहायसा राजन्। द्वारकां कृष्णपालिताम्। तत्र सुप्तं सुपर्य्यङ्के प्राद्युम्निं योगमास्थिता। गृहीत्वा शोणितपुरं सख्यै प्रियमदर्शयत्। सा च तं सुन्दरवरं विलोक्य मुदितानना। दुष्प्रेक्ष्ये स्वगृहे पुंसा रेमे प्राद्युम्निना समम्। परार्द्ध्यवासःस्रग्गन्धधूपदीपासनादिभिः। पानभोजनभक्ष्यैश्च वाक्यैः शुश्रूषयार्च्चितः। गूढः कन्यापुरे शश्वत् प्रवृद्धस्नेहया तया। नाहर्गणान् स बुबुधे उषयोपहृतेन्द्रियः” विस्तरस्तु हरिवं०१७६अ०। प्रातःकाले अव्य० मेदि० अव्ययत्वात् ततो भवार्थे ट्युल् तुट् च। उषातन तद्भवे त्रि० स्त्रियां ङीप्।

उषाकल पु० उषायां कलो रवो यस्य। कुक्कुटे।

उषापति पु० ६त०। कृष्णपौत्रे प्रद्युम्नपुत्रे यदुवंश्ये अनिरुद्धे तत्पतित्वप्राप्तिकथा उषाशब्दे उक्ता उषानाथादयोऽप्यत्र, अमरे “अनिरुद्ध उषापतिरिति” ह्रस्वपाठः भारतादौ तु दीर्घपाठः।

उषित त्रि० वस क्त। १पर्य्युषिते २कृतवासे च। उष—दाहे क्त। ३दग्धे मेदि०। ४त्वरिते धरणिः। भावे क्त। ५वासे न० “चाण्डालैरुषितं यत्र” शु०त० देवलः।

उषीर पुंन० उष—कीरच्। वीरणमूले रायमुकुटः।

उक्ष् पु० उक्ष—सेचने तृन् वेदे नेट्। १सम्यक्सेक्तरि वलीवर्दे। तस्यामोघवीर्य्यत्वात् तथात्वम् “ओष्टारौ वा” कात्या० ५,११,१२। “ओष्टारौ महावलीवर्द्दौ” कर्कः। आ+सम्यक् उष्टारौ इति विग्रहः। “उष्टारेव फर्वरेषु श्रयेथे” ऋ० १५,१०६,२। लोके तु उक्षितृ इत्येव। सेक्तरि त्रि० स्त्रियां ङीप्।

उष्ट्र पुंस्त्री० उष+ष्ट्रन् कित्। (उट) प्रसिद्धे पशुभेदे

स्त्रियां जातित्वात् ङीष्। "हस्तिगोऽश्वोष्ट्रदमकोनक्षत्रैर्यश्च-जीवति" "नाधीयीताश्वमारूढ़ो न रथं न च हस्तिनम्। न नावं न खरं नोष्ट्रं नेरिणस्थो न यानगः" मनुः। तद्यान-निषेधमाह "उष्ट्रयानं समारुह्य खरयानं तु कामतः। स्नात्वा तु विप्रो दिग्वासाः प्राणायामेन शुध्यति" मनुः। कामतः" इत्युक्त्या कर्म्मभेदे तद्याने न दोष इति सूचितम् अतएव "उष्ट्रमारोक्ष्यन्नभिमन्त्रयते त्वाष्ट्रोऽसि" पार० गृ०सू० मन्त्रलिङ्गेन तद्यानं विहितम्। तस्य मांसं न भक्ष्यम् "भक्ष्यान् पञ्चनखेष्वाहुरनुष्ट्रांश्चैकतोदतः" मनूक्तेः। तेनास्य एकदन्तपङ्क्तियुक्तत्वम्। "गौरजो महिषः कृष्णः शूकरो गवयोरुरुः। द्विशफाः पशवश्चेमे अ-श्वखरोष्ट्राश्च सत्तम!" भाग० उक्तेः गवादयः उष्ट्रान्ता द्विशफाः इति बोध्यम्। वृथा तद्वधाते दोषः "मनुष्यमारणे क्षिप्रं चौरवत् किल्विषं भवेत्। प्राणभृत्सु महत्-स्वर्द्धं गोगजोष्ट्रहयादिषु" मनूक्तेः। ब्रह्महत्याशेष-पापेन तज्जातिर्भवति यथाह मनुः "यां यां योनिन्तु जीवोऽयं येन येनेह कर्म्मणा। क्रमशो याति लोकेऽस्मिंस्तत्तत् सर्वं निबोधत। बहून् वर्षगणान् घोरा-न्नरकान् प्राप्य दारुणान्। संसारान् प्रतिपद्यन्ते महा-पातकिनस्त्विमे। श्वशूकरखरोष्ट्राणां गोऽजाविमृगपक्षि-णाम्। चण्डालपुक्कसानाञ्च ब्रह्महा योनिमृच्छति"। यान-हरणपापेऽप्युष्ट्रयोनिप्राप्तिमाह हृत्वेत्यनुवृत्तौ मनुः "स्त्री-मृगः स्तोककोवारि, यानान्युष्ट्रः, पशूनजः। तद्वधे प्रायश्चि-त्तमाह "हयच्छागाविकोष्ट्रेषु गर्द्दभेषु च मारणात्। प्राजा-पत्यार्द्धमेवेह प्रायश्चित्तं विधीयते" प्रा० वि० विष्णुः। तद्भ-क्षणे प्रायश्चित्तमाह भुक्त्वेत्यनुवृत्तौ प्रा० वि० शङ्खः "गामश्वं कुञ्जरोष्ट्रौ च सर्वं पञ्चनखं तथा। क्रव्यादं कुक्कुटं ग्राम्यं कुर्य्यात् संवत्सरव्रतम्" "अथोष्ट्रवामीशतवाहितार्थः" रघुः। "ष्टतिञ्च तत्र कुर्व्वीत यामुष्ट्रोनावलोकयेत्" मनुः। "अन्योन्यतः पथि वतातिभीतामिभोष्ट्रौ" माघः। तन्मूत्रगुणाः सुश्रु० उक्ताः। "अथ मूत्राणि गोमहि-षाजाविगजहयखरोष्ट्राणां तीक्ष्णानि कटून्युष्णानि ति-क्तानि लवणानुरसानि लघूनि शोधनानि कफवातक्रिमि-मेदोविषगुल्मार्शउदरकुष्ठशोफारोचकपाण्डुरोगहराणि हृद्यानि दीपनानि च सामान्यतः। भवन्ति चात्र। तत्सर्वं कटु तीक्ष्णोष्णं लवणानुरसं लघु। शोधनं कफ-वातघ्नं क्रिमिमेदोविषापहम्। अर्शोजठरगुल्मघ्नं शोफा-रोचकनाशनम्। पाण्डुरोगहरं भेदि हृद्यं दीपनपाच-नम्"। सामान्यत उक्त्वा "अर्शोघ्नं कारभं मूत्रमिति" विशे-षगुण उक्तः। तन्मांसगुणाःसुश्रुते उक्ताः तच्च उरभ्रशब्दे दर्शितम्। तस्य ग्राम्यत्वं तत्रोक्तम्। तच्च उरभ्रशब्दे दर्शितम्। किन्तु तस्यारण्यत्वमपि अतएव "उष्ट्रमारण्य-मनु ते दिशामि" यजु० १२.२४, तस्यारण्यत्वमुक्तम्। तस्य त्वष्टृदेवतायै अश्वमेधे देयतोक्ता "बृहस्पतये गवयां-स्त्वष्ट्र उष्ट्रान्" यजु० २४,२८, द्वित्वे गोयुगच् उष्ट्रगोयुग उष्ट्रद्वित्वे न०। शालायां गोष्ठच्। उष्ट्रगोष्ठ उष्ट्रशालायां न०। षट्के षड्गवच्। उष्ट्रषड्गव उष्ट्रषट्के न०। तस्ये-दमण्। औष्ट्र तत्सम्बन्धिमांसादौ त्रि०। "परं चौष्ट्रं मैषं नरमहिषयोश्छागमपि वा" कर्पूरस्तवः।

उष्ट्रकर्णिक पु० उष्ट्रस्य कर्णः भेदनम् कर्ण+भिदि—अच्। सोऽस्त्यस्य ठन्। दक्षिणस्थे यवनदेशभेदे तद्देशवासिभिर्हि भोजनार्थम् उष्ट्रभेदनात् तद्देशस्य तथात्वम्। सहदेवदक्षि-णदिग्विजयवर्णने "अन्ध्रांस्तालवनांश्चैव कलिङ्गानुष्ट्रकर्णि-कान्। आटवीं च पुरीं रम्यां यवनानां पुरीं तथा" भा०स० २० अ० उष्ट्रतुल्यकर्णजनवत्त्वाद्वा तथात्वम्।

उष्ट्रकाण्डी स्त्री उष्ट्र इव काण्डोऽस्य जातित्वात् ङीष् (उटाटी) क्षुपभेदे राजनि०।

उष्ट्रग्रीव पु० उष्ट्रग्रीवा आकारत्वेनास्त्यस्य अर्श० अच्। सुश्रुतोक्ते पैत्तिके भगन्दररोगभेदे। तन्निदानस्वरू-पादि तत्रोक्तं यथा "वातपित्तश्लेष्मसन्निपातागन्तुनिमित्ताः शतपोनकोष्ट्रग्रीवपरिस्राविशम्बूकावर्त्तोन्मार्गिणो यथासङ्ख्यं पञ्च भगन्दरा भवन्ति। ते तु भगगुदवस्तिप्रदेशदारणाच्च भगन्दरा इत्युच्यन्ते। अपक्वाः पिड़काः पक्वास्तु भगन्दराः। तेषान्तु पूर्वरूपाणि कटीकपालवेदना गुदकण्डूर्दाहः शोफश्च गुदस्य भवति" इत्युपक्रम्य। "पित्तन्तु प्रकुपितमनिलेनाधः-प्रेरितं पूर्ववदवस्थितं रक्तां तन्वीमुच्छ्रितामुष्ट्रग्रीवाकारां पिड़कां जनयति। साऽऽस्वचोषादीन्वेदनाविशेषान् जनयत्य-प्रतिक्रियमाणा च पाकमुपैति वह्न्यग्निक्षाराभ्यामिव दह्यते दुर्गन्धमुष्णमास्रावं स्रवत्युपेक्षितश्च वातमूत्रपुरी-षरेतांसि विसृजति, तं भगन्दरमुष्ट्रग्रीवमित्याचक्षते"। उष्ट्रशिरोधरोऽप्यत्र "प्रकोपणैः पित्तमतिप्रकोपितः करोति रक्तां पिड़कां गुदागताम्। तदाशुपाकाहिमपूतिवाहिनीम् भगन्दरं तूष्ट्रशिरोधरं वदेत्" निदानम्।

उष्ट्रधूसरपुच्छी स्त्री उष्ट्रस्येव धूसरः पुच्छ इव मञ्जरी अस्याः जातित्वात् ङीष्। (विछाति) वृक्षभेदे रत्नमाला स्वार्थे कन् ह्रस्वः। तत्रार्थे।

उष्ट्रपादिका स्त्री उष्ट्रस्य पादा इव पादोमूलमस्याः कपि अत इत्त्वम् । (मदनमाली) भूमिलतायाम् रत्नमा०

उष्ट्रस्थान न०६त०। उष्ट्रस्य शालायाम् । तत्र भवः अण् । स्थानान्तत्वात् तस्य लुक् । उष्ट्रस्थान तत्रभवे त्रि०तद्धित लुकि विशेष्यलिङ्गत्वनियमात् त्रिलिङ्गत्वम् ।

उष्ट्रासिका स्त्री आसनम् आसिका आस–भावे ण्वुल् उष्ट्रस्येवासिका । उष्ट्रस्येव आसने । “उष्ट्रासिकाः आसन्ते” पा० भाष्यम् अत्र क्रियाविशेषणस्यापि यथा बहुवचनान्तताऽक्लीवता च तथाकारे समर्थितम् तच्च शब्दार्थरत्ने अस्माभिर्दर्शितम् ।

उष्ट्रिका स्त्री उष्ट्रस्याकारः पृष्ठावयव इव आकारोऽस्त्यस्याः ठन् । मृण्मये मद्यभाण्डभेदे विश्वः “धूर्भङ्गविक्षेपविदारितोष्ट्रिका” माघः। उष्ट्री+स्वार्थे कन्। उष्ट्रजातिस्त्रियाञ्च ।

उष्ण पु०उष+नक् । १ग्रीष्मे, ऋतौ, २आतपे, ३पलाण्डौ ४नरकभेदे, ५शीतविरोधिस्पर्शे च । अर्श०अच् ।६तद्वति, ७आलस्यरहिते दक्षे च त्रि० । “मृतके मृतके चैव न स्नायादुष्णवारिणा” स्मृतिः “आदद्रे नातिशीतोष्णः नभस्वानिव दक्षिणः” रघुः“अर्भाह्णमुष्णै रपि तस्य शोषणः” “म्लापयन्नभिमानोष्णैर्वनमालां मुखानिलैः” माघः ८तापे पु०मुष्णमुष्णं ततिभिस्तडूणाम्” माघः “उष्णं तापम्” मल्लि० । तत्र ग्रीष्मस्य सूर्य्यतापाधिक्यवत्त्वात् उष्णत्वम् “ग्रीष्मातीव्रकरोभानुर्न हेमन्ते तथाविधः” इति प्रश्ने “अत्या सन्नतया तेन ग्रीष्मे तीव्राः कराः रवेः । देवभागेऽसुराणान्तु हेमन्ते मन्दताऽन्यथा” सू०सि०तयैवोक्तेः । विवृतञ्चेदं रङ्गनाथेन “तेन उत्तरदक्षिणगोलयोः सूर्य्यस्योत्तरदक्षिणचारकृतप्रकारेणेत्यर्थः । देवभागे जम्बूद्वीपे अत्यासन्नतया सूर्य्यस्यात्यन्तनिकटस्थत्वेन ग्रीष्मे ग्रीष्मर्त्तौ सूर्य्यस्य तेजोगोलकस्यकिरणास्तीक्ष्णा अत्युष्णाः । असुराणां देवभाग इत्यस्य सम्बन्धग्राहैत्यानां भागे समुद्राद्दक्षिणप्रदेशे हेमन्ते हेमन्तर्त्तौ तुकारात् सूर्य्यस्यात्युष्णाः किरणाः सूर्य्यस्यात्यासन्नत्वात् । अन्यथा सूर्य्यस्य दूरस्थत्वे मन्दता किरणानामुष्णताभावः । देवभागे हेमन्तर्त्तौ कराणां मन्दता । अतएव तत्र शीताधिक्यम्, दैत्यभागे ग्रीष्मे कराणां मन्दता शीताधिक्य च । तथाच देवभागे दक्षिणगोले सूर्य्यस्य दूरस्थत्वमुत्तरगोले निकटस्थत्वं मध्यगतदेशानां क्रमेणाधिकाल्पत्वादीति भावः” । अतएवोक्तं मेषकर्कटयोर्मध्ये गाढं तपति भास्करः” ति०त० पु०। एतच्च देवभाग एव नासुरभागे, ग्रीष्म ऋतुश्च ज्यैष्ठाषाढात्मकः ।“मधुश्च माधवश्च वासन्तिकावृतुः शुक्रश्च शुचिश्च ग्रीष्मर्त्तुः”काल०मा०इष्टकोपधानमन्त्रोक्तेः । ततो भावे इमनिच् । उष्णिमन् पु० तल् उष्णता स्त्री त्व उष्णत्व न० ष्यञ् औष्ण्य न०। उष्णस्पर्शे स्वार्थे कन् उष्णस्पर्शाद्यर्थे । उष्णस्पर्शस्तु तेजसोगुणः “स्पर्श उष्णस्तेजसस्तु” भाषोक्तेः जलादीनां तेजःसंयोगविशेषादौपाधिकः । देहस्य तथात्वे कारणभूष्मन्शब्दे वक्ष्यते गुणवचनत्वात् प्रकारे द्वित्वम् उष्णोष्ण उष्णप्रकारे । “उष्णोष्णशीकरसृजः” माघः

उष्णक त्रि०उष्णमिव करोति कन् । १अनलसे, क्षिप्रकारिणि क्षिप्रकारी हि जाड्याधायकमालस्यमनाहत्य स्वकर्त्तव्ये व्याप्रियते इति तस्य तथात्वम् । उष्णं करोति उष्ण+णिच्–ण्वुल् । २ज्वरे पु० ।

उष्णकर पु० उष्णः करः किरणोऽस्य । १सूर्य्ये । उष्णकिरणोष्णदीधिति प्रभृतयोऽप्यत्र । उष्णं करोति कृ–अच् ६त०। २उष्णकारके त्रि०

उष्णकाल पु०कर्म्म०६त०वा । ग्रीष्मे ऋतौ ।“तक्रं नैव दद्यात् नोष्णकाले न दुर्व्वले” सुश्रुतः ।

उष्णग पु०उष्णमुष्णस्पर्शं गच्छति यत्र गम–बा०आधारे ड । ग्रीष्मे काले “मातङ्गोन्यपतत् भूमौ नदीरोधइवोष्णगे” भा०उ०२२३अ०। आधारे घञ् उष्णगमोऽप्यत्र हेम०।

उष्णगु पु० उष्णागावः कराः अस्य हृस्वः । सूर्य्ये । उष्णरश्म्यादयोऽप्यत्र “कुबेरगुप्तां दिशमुष्णरश्मौ” कुमा० ।

उष्णङ्करण न० ६त०करणे परे मुम् । उष्णसाधने ।

उष्णनदी स्त्री कर्म्म०। “यमद्वारे महाघोरे तप्ता वैतरणी नदी” इत्युक्तायाम् तप्तायां वैतरण्याम् नद्याम् ।

उष्णवारण न०उष्णं वारयति वृ–णिच्–ल्यु ६त०। आतपत्रे, छत्रे “यच्चर्यमम्भोजमिवोष्णवारणम्” कुमा०अस्योत्पत्त्यादिकम् आतपत्रशब्दे ६४८ पृ० उक्तम् । तल्लक्षणं वृह०सं० दर्शितं यथा “निचितं तु हंसपक्षैः कृकवाकुमयूरसारसानां च । दौकूलेन नवेन तु समन्ततश्छादितं शुक्लम् । मुक्ताफलैरुपचितप्रलम्बमालाविलं स्फटिकमूलम् । षड्ढस्तशुद्धहैमं नवपर्व नगैकदण्डं च । दण्डार्धविस्तृतं तत् समावृतं रत्नविभूषितमुदग्रम् । नृपतेस्तदातपत्रं कल्याणकरं विजयदं च । युवराजनृपतिपत्न्याः सेनापतिदण्डनायकानां च । दण्डोऽर्धपञ्चहस्तः समपञ्चकरार्धविस्तारः । अन्येषामुष्णघ्नं प्रसादपट्टैर्विभूषितशिरस्कम् । व्यालम्बिरत्नमालं छत्रं कार्यं च मायूरम् ।

अथैषां च नराणामातपवारणं तु चतुरस्रम्। समद्वत्तदण्डयुक्तं छत्रं कार्य्यं तु विप्राणाम्” उष्णप्रादयो ऽप्यत्र। तद्धारणे गुणाः सुश्रुते उक्ता यथा “वर्षानिलरजोघर्महिमादीनां निवारणम्। बल्यं चक्षुष्यमौजस्यं मङ्गलं छत्रधारणम्”।

उष्णवीर्य्य पु० उष्णमुष्णं वीर्य्यमस्य। १शिशुमाराख्ये जलजन्तौ। २उष्णवीर्य्यवति त्रि० हेम०। उष्णवीर्य्यद्रव्याणि च सुश्रुते नानास्थाने उक्तानि तानि तत्र एवावगम्यानि

उष्णांशु पु० उष्णाः अंशवोयस्य। सूर्य्ये।

उष्णागम पु० उष्णं आगम्यतेऽत्र गम+आधारे–अप्। निदाघकाले। उष्णाभिगमोऽप्यत्र शब्दच०।

उष्णालु त्रि०उष्णं न सहते आलु। उष्णाऽसहने। “उष्णालुः शिशिरे निषीदति तरोर्मूलालवाले शिखी” विक्रमो०।

उष्णासह पु०उष्णं आसह्यतेऽत्र आ+सह–अच्। १हेमन्तर्त्तौ। उष्णं न सहते अच्। २असह्योष्णे त्रि०।

उष्णिका स्त्री अल्पमन्नमस्याम् अल्पार्थे कन् नि० अन्नस्य उष्णादेशः। १यवाग्वाम् (जाउ)। उष्णकशब्दात् स्त्रियां टाप् अत इत्वम्। २दक्षायाम् स्त्रियाम्।

उष्णिज् पु० उष–इजिक् बा० तुट्। उष्णस्पर्शयुक्ते तत्त्र प्रज्ञा० स्वार्थे ण। औष्णिज तदर्थे।

उष्णिह् स्त्री उत्स्निह्यति क्विन् नि०उदोऽन्त्यलोपे षत्वम्। सप्ताक्षरपादके १छन्दोभेदे। खादौ कुः उष्णिक्। उष्णिग्भ्याम्। “गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च” इ०र०। “अथ छन्दांसि गायत्र्युष्णिगनुष्टुब् बृहती” इत्युपक्रम्य “द्वितीयमुष्णिक् त्रिपदाऽन्त्योद्वादशकः। आद्यश्चेत् पुरउष्णिक्, मध्यमश्चेत् ककुप्। त्रैष्टुभ जागतचतुष्काः ककुब्न्यङ्कुशिरकादशिनो: पर: षट्कस्तनुशिरा: मध्ये चेत् पिपीलिका मध्याद्यपञ्चकस्त्रयोऽष्टका अनुष्टुब्गर्भा चतुःसप्तकौष्णिगेव” सर्वानु० ५अ०। “एवमेषोष्णिहं सवितारं ग्रीवास्वनूके” इति सर्वानु० ४अ० उक्तेः तस्याः सवितृदेवताकत्वेन ग्रीवासु अनूके च न्यासः। तस्या उपधानप्रकारः शत०ब्रा० ८,६,२,२, आदौ दर्शितं तत एवावसेयः। २तदभिमानिदेवभेदे च। अश्वमेधे “त्रिवत्सा अनुष्टुभे तुर्य्यवाह उष्णिहे” यजु० २५,१२१। पशुविशेषाणामुक्तदेवतायैशोद्देशेन यूपादौ बन्धनमुक्तम्। अस्य हलन्तत्वेऽपि अजादि०टाप्। उष्णिहा “उष्णिहा छन्द इन्द्रियम्” यजु० २१,१२, “बृहत्युष्णिहा ककुप् सूचीभिः शम्यन्तु त्वा २३,३३, “मृणातु ग्रीवाः प्र श्नथा तूष्णिहा हलस्येव शचीपतिः” अथर्ववेदे ६,१३४,१,

उष्णीगङ्ग न०उष्णीभूता गङ्गा नदीभेदो यत्र मध्यपदलोपः। भृगुतुङ्गपर्वतस्थे तीर्थभेदे “अपां ह्रदं च पुण्याख्यं भृगुतुङ्गं च पर्वतम्। उष्णीगङ्गे च कौन्तेय! सामात्यः समुपस्पृश” भा०व०१२५ अ०।

उष्णीष पु०न०उष्णमीषते हिनस्ति ईष–क शक० पररूपम्। १शिरोवेष्टनवस्त्रे(पागड़ि)२किरीटे च “अथास्मा अध्वर्युरुष्णीषं प्रयच्छति तदञ्जलिना प्रतिगृह्य त्रिःप्रदक्षिणं शिरः सम्मुखं वेष्टयित्वा” आ०श्रौ०सू०६,७। सप्तदश लोहितोष्णीषा निस्त्रिंशिनो याजयेयुः” आ०श्रौ० ८, ७,४। “लोहितोष्णीषा ऋत्विजश्चरन्तीति” श्रुतिः। समावर्त्तनकाले च तस्य धारणमाचार्य्याय दानं च विहितम्। “अथैतान्युपकल्पयीत समावर्त्तमाने मणिकुण्डले वस्त्रयुगं छत्रमुपानद्युगं दण्डं स्रजमुन्मर्दनमनुलेपनमाञ्जनमुष्णीषमित्यात्मने आचार्य्याय च”। “यद्युभयोर्न विन्देताचार्य्यायैव” आ० गृ० ३,८,१,२। तद्धारणगुणाः सुश्रु० उक्ताः “पवित्रं केश्यमुष्णीषं वातातपरजोऽपहम्। वर्षानिलरजोघर्महिमादीनां निवारणम्”।

उष्णीषिन् त्रि० उष्णीष+अस्त्यर्थे इनि। १उष्णीषधारिणि स्त्रियां ङीप् २महादेवे पु०। “उष्णीषी च सुवक्त्रश्च उदग्रोविनतस्तथा” शिवस्तुतौ” भा०अनु०१७। “उष्णीषिणे सुवक्त्राय सहस्राक्षाय मीढुषे” भा० अनु० ८।

उष्णोदक न० कर्म०। अग्निना तप्तजले क्वाथ्यमानपादशेषार्द्धावशेषपादादिहीनके जले तद्गुणादि भावप्र० “अष्टमेनांशशेषेण चतुर्थेनार्द्धकेन वा। अथवा क्वथनेनैव सिद्धमुष्णोदकं वदेत्”। तद्गुणाः “श्लेष्मामवातमेदोघ्नं वस्तिशोधनदीपनम्। कासश्वासज्वरान् हन्ति पीतमुष्णोदकं निशि। क्वाथ्यमानन्तु निर्वेगं निष्फेनं निर्म्मलं तथा। अर्द्धावशिष्टं यत्तोयं तदुष्णोदकमुच्यते। ज्वरकासकफश्वासवातपित्तामेदसाम्। नाशनं वस्तिसंशोधि पथ्यमुष्णोदकं सदा। त्रिपादशेषं सलिलं पीतं शरदि शस्यते। हिमेऽर्द्धशेषं शिशिरे तथा वर्षावसन्तयोः” अन्ये तु “निदाघे त्वर्द्धपादोनं पादहीनन्तु शारदम्। शिशिरे च वसन्ते च हिमे चार्द्धावशेषितम्। अष्टमांशावशेषन्तु वारि वर्षासु शस्यते” केचित्तु “विधिज्ञेषु वाणेषु वेदेषु त्रिषु पञ्चयोः। एकभागावशेषं स्यादम्बु वर्षादिषु क्रमात्”। अत्र दोषाणां यथोल्वणता हीनता वा तथा व्यवस्था कल्पनीया। “तत् पादहीनं पित्तघ्न-

र्द्धहीनन्तु शातनुत् । त्रिपादहीनं श्लेष्मघ्नं संग्राह्यग्निकरं लघु"। त्रिपादहीनस्य तन्त्रान्तरे आरोग्याम्बु संज्ञा। तस्य लक्षणगुणास्तु। "पादशेषन्तु यत्तोयमारोग्याम्बु तदुच्यते। आरोग्याम्बु सदा पथ्यं कासश्वासकफापहम्। सद्यो-ज्वरहरं ग्राहि दीपनं पाचनं लघु। आनाहपाण्डु-शूलार्शोगुल्मशोथोदरापहम्"भा०प्र०"दिवा शृतन्तु यत् तोयं रात्रौ तद्गुरुतां व्रजेत्" वैद्यकम्। "संक्रान्तौ वर्षवृद्धौ च ग्रहणे चन्द्रसूर्य्ययोः। सूतके मृतके चैव न स्नायादुष्णवारिणा" स्मृतिः। "स्नितस्यसमुद्धृतं वापि शीतमुष्णमथापि वा। गाङ्गं पयः पुनात्याशु पापमामरणान्तिकम्" मरीचिः। "नित्यं नैमित्तिकञ्चैव क्रियाङ्गं मलकर्षणम्। तीर्थाभावे च कर्त्तव्यमुष्णोदकपरोदकैः" यमः। "उष्णाम्बुनाधःकायस्य परिषेको बलावहः। तेनैव चोत्तमाङ्गस्य बलहृत् केशचक्षुषोः" आ०त० आयुर्वेदः। उष्णोदकेनाचमननिषेध आचमनशब्दे उक्तः।

उष्णोपगम पु० उष्ण उपगम्यतेऽत्र आधारे घञ् अष्टद्धिः। निदाघकाले! ग्रीष्मर्त्तौ [कन्। तत्रैव आतपे च।

उष्म पु०उष—मक्। १घर्मे, २आतपे, ३ग्रीष्म ऋतौ च। स्वार्थे

उ(ऊ)ष्मन् त्रि०ऊष—आधारे मनिन् वा० वा ह्रस्वः। १ग्रीष्मर्त्तौ कर्त्तरि मनिन्। २आतपे "नोपतापि मनः सोष्म" "उष्णोष्णशीकरस्थलः प्रबलोष्मणोऽन्तः" "अभितप्तमुष्णैरपि तस्य सोष्मणः" माघः। दीर्घादिः ३शषसहवर्णेषु।

उ(ऊ)ष्मप पु०ऊष्माणं पिबति पा—क्विप्। भृगोः पुत्रे १पितृगणभेदे "सुकालिनो बर्हिषद उ(ऊ)ष्मपा आज्यपास्तथा"पितृगणनायां स्मृतिः। २उ(ऊ)ष्मपानकर्त्तरि तपस्विभेदे त्रि०। "उद्गतैरिव रविनिविष्टदृष्टिभिरु(रू)ष्मपैः" काद०। [घञ् अष्टद्धिः। निदाघकाले।

उ(ऊ)ष्मागम पु० उ(ऊ)ष्मा आगम्यतेऽत्र आ+गम—आधारे

उ(ऊ)ष्माय नामधा० उ(ऊ)ष्माणमुद्वमति उ(ऊ)ष्मन्+क्यङ्। उ(ऊ)ष्मायते औष्मायिष्ट उ(ऊ)ष्मायमाणः।

उस्र पु०वसन्ति रसा अत्र वस—रक् नि० न षत्वम्। १किरणे, सूर्य्यकिरणानां जलाकर्षकत्वेन रसवत्त्वात्तथात्वम्। २अन्येषां यथायथं रसवत्त्वम् बोध्यम्। २वृषे। ३सुरभ्यां ४लतायां ५पृथिव्यां च स्त्री निरु०। देवमात्रे पु०उज्ज्व० "उस्रावेतं धूर्षाहौ" यजु०४,२२। "उस्रौ अनड्वाहौ" वेददी० "क्रत्वा नावोस्रः पितेव"ऋ०६,१२,४। "उस्रो वृषभः"भा०"यदैरत्नैरिवोदीच्यानुद्धरिष्यन् रसानिव"रघुः "यो धर्त्ता भुवनानां य उस्राणामपीच्या" ऋ०८,४१,५। ७सूर्य्ये "प्रमित्रासो न ददुरुस्रो अग्ने" २,५८,४। "वसति नभसीत्युस्रः सूर्य्यः" भा०। सूर्य्यरश्मिसम्पर्कात् ८दिवसे च। "वसुमा उस्रयामा" ऋ०७,७१,४, उस्रयामा दिवसं प्रति गन्ता" भा० उस्रमिच्छति उस्रीयति "उस्रीमाङ्क्षाटः प्रतिषेधः" वार्त्ति० लङादौ नाट उस्रीत्युक्तेः षत्वाभावश्च औस्रीयत्। ९सहवासिनोः अश्विनीकुमारयोः द्वि०व०। "अग्नयः उस्रा जरन्त" ऋ० ४,४,५,५, उस्रा सहनिवसन्तावश्विनीसुतौ" भा०।

उस्रि स्त्री वस—बा० क्रि षत्वाभावः। गव्याम् "हिन्वन्ति सूरमुस्रयः" ऋ०९ ६५,१, "उस्रयः सर्वे त्र गन्त्यः" भा०।

उस्रिक पु० उस्र+अल्पार्थे स्वार्थे वा ठन्। अल्पशाइके १जीर्णवृषभे अल्पक्षीरस्राविण्यां २स्त्रीगव्याम् स्त्री

उस्रिय पु०उस्र+स्वार्थे अल्पार्थे वा घ। १जीर्णवृषभे "उस्रियो वृषभः क्रन्दतु द्यौः" ऋ०५,५८,६, २स्त्रीगव्याम् स्त्री निरु०। "गवामूर्व्वमुस्रियाणाम्"ऋ०५,१,४,उस्रियाणां क्षीरमुत्सारयन्तीनाम्"भा०।

उह अर्दने भ्वादि० पर० सक०सेट् इरित्। ओहति औहत्, औहीत्, उवोह ऊहतुः। अप अपसारणे तामपौहीत् निशाचरः"भट्टिः "अपोहदुत्तरः" रघुः

उह अव्य० उ च ह च द्व०। १संबोधने, २एवार्थे च।

उहह अव्य० उह च ह च। सम्बोधने।

उहू स्त्री उह—कू। १खेदसूचके शब्दे "नखानि विधुशङ्कया करतलेन तत्प्राहृणोत् ततः किसलयभ्रमात् करमथाक्षिपद्भूरतः। ततोवलयशिञ्जितैर्भ्रमरगुञ्जिताशङ्कया उहूरिति कुहूरवध्वनिभियाऽपतत् मुर्च्छिता"। वह—कू। वाहके त्रि०। "हिरण्य पर्णा उहुव उषर्बुधः" ऋ० १,४५,४, उहुवः वाहकाः" भा० उवङ् छान्दसः

उह्यमान त्रि०वह—कर्म्मणि शानच्। यस्य वहनं क्रियते तस्मिन् "यथोह्यमानःकिल भोगिवैरिणा" नैषध०।

उह्र पु० वह—रक्। वृषभे शब्दार्थचिन्तामणिः

इति वाचस्पत्ये उकारादिशब्दार्थसङ्कलनम्।

ऊ

ऊकारः स्वरवर्णभेदः "ओष्ठजावुपू" इत्युक्तेः ओष्ठस्थानोच्चारणीयः स च उदात्तानुदात्तस्वरितभेदात् त्रिविधः दीर्घएव द्वाभ्यां मात्राकालाभ्यामुच्चार्यत्वात् तस्य प्लुतत्वोक्तिश्चिन्त्या त्रिमात्रकालस्यैव प्लुतत्वात् व्यञ्जकाकारभेदाच्च प्लुतस्य पार्श्वस्थत्र्यङ्कचिह्नितह्रस्वाकारेणैव लेखनसमाचारात्। त्रिविधोऽपि अनुनासिकाननुनासिकभेदात् द्विधा तेन षड्विधः तस्योच्चारणे विवार आन्तरप्रयत्नः "स्वराणामूष्मणाञ्चैव विवृतं करणं स्मृतम्" शिक्षोक्तेः विवृतञ्च जिह्वाग्रादेः स्पर्शाभावः। "अचोऽस्पृष्टायणस्त्वीषत्, नेमस्पृष्टाः शलः स्मृताः" इति शिक्षोक्तेः तस्य तन्त्रे शुक्लाद्याकारतया ध्येयतोक्ता यथा "शुक्लकुन्दसमाकार ऊकारः परकुण्डली" कामधेनुतन्त्रम्। तस्य वामकर्णे सविन्दुकतया निर्विन्दुकतया वा मातृकान्यासे न्यासः। अतएव वामकर्णशब्देन तस्याभिधेयता "ईशानः सेन्दुवामश्रवणपरिगतो बीजमन्यन्महेशि।" कर्पूरस्तवे हूङ्कारमन्त्रोद्धारः। तत. स्वरूपे कारप्रत्ययः। तप्रत्ययश्च। अधिकं स्वरवर्णसमाप्तौ वक्ष्यते।

ऊ अव्य० वेञ् क्विप्। १सम्बोधने, २वाक्यारम्भे, ३दयायां, ४रक्षायाञ्च मेदि० उञः स्थाने इतौ परे अनुनासिक ऊँ इति आदेशे तदर्थे तस्य प्रगृह्यत्वादितौ न सन्धिः।

ऊ पु० अवतीति अव-क्विप् ऊठ्। १महादेवे २चन्द्रे च। ३पालके त्रि० शब्दरत्ना०

ऊढ़ पु० वह-प्रापणे प्रापणार्थत्वात् १कर्त्तरि क्त। १कृतविवाहे पुंसि "परिवेत्तानुजोऽनूढे ज्येष्ठे दारपरिग्रहात्" अमरः क्तवतु ऊढवत् तत्रैव पु०। कर्मणि क्त। कृतविवाहायां स्त्रियाम् स्त्री। "भार्योढं तमवज्ञाय तस्यै सौमित्रयेऽसकौ" भट्टिः "कन्या पितृधनहरो यद्यनूढा भवेत्तदा" स्मृतिः "ऊढानूढासमवायेऽनूढैव प्रथमं धनहारिणी" दायक०। ऊढमाख्यत् "इति वाक्ये औजढत् त सि०कौ०औडढत् त इत्यन्ये। २कृतवहने धृते त्रि०। अस्य प्रशब्देन प्रा० स०वृद्धिः। प्रौढः "प्रौढकन्यायादोषदर्शनात्" रघु० "अवयवद्रुपहरणे नार्थकस्येति" परिभाषया प्रोढशब्दनित्यत्व न वृद्धिः

ऊढकङ्कट पु० ऊढो धृतः कङ्कटः कवचोयेन। धृतकवचे वर्म्मिते।

ऊढि स्त्री वह-भावे क्तिन् संप्र०। १वहने २विवाहे च। प्र+ऊढि प्रा०स०वृद्धिः। प्रौढिः। ऊढिमाख्यत् औजिढत् त सि०कौ०औडिढत् त इत्यन्ये।

ऊत त्रि० वेञ्-क्त संप्र०दीर्घः। १कृतवयने २ग्रथिते। ऊयीतन्तुसन्ताने क्त। ३स्यूते "यस्मिन्नोतञ्च प्रोतञ्च" श्रुतिः। अव-क्त ऊठ्। ४रक्षिते त्रि०।

ऊति स्त्री अव-क्तिन् ऊठ्। १रक्षणे। "देवस्य यन्त्यूतयो विविधाः" ऋ०२,१४,६, "शतमस्माम् सहस्रमूतयः" ४,३१,१०. कर्त्तरि क्तिच् ऊठ्। २रक्षितरि "उरुष्यन्तमुमाध्वोदस्मा न ऊतीः" ऋ०४४,२, "ऊतीःऊतयःरक्षन्तः" भा० ऊय-वेञ् वा क्तिन्। ३सीवने (सेलाइ) ४वयने (वोना) ५स्मरणे शब्दचि०। ६लीलायाम् "नचास्य कश्चिन्निपुणेन धातुरवैति जन्तुः कुमनीष ऊतीः" भा०१,५,३८, "ऊतीर्लीलाः" श्रीधरः वेञ्-कर्मणि कर्त्तरि वा क्तिन् क्तिच् वा। पुराणलक्षणमध्ये ७कर्मवासनारूपे तल्लक्षणभेदे। "तस्मादिदं भागवतं पुराणं दशलक्षणम्" इत्युक्त्वा "अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः। मन्वन्तरेशानुकथा निरोधोमुक्तिराश्रयः" इति दश लक्षणान्युद्दिश्य तेषां लक्षणान्युक्तानि यथा "भूतमात्रेन्द्रियधियां जन्म सर्ग उदाहृतः। ब्रह्मणो गुणवैषम्यात् विसर्गः पौरुषः स्मृतः। स्थितिर्वैकुण्ठवि[illegible]: पोषणं तदनुग्रहः। मन्वन्तराणि सद्धर्मऊतयः कर्मवासनाः। अवतारानुचरितं हरेश्चास्यानुवर्त्तिनाम्। पुंसामीशकथाः प्रोक्ताः नानाख्यानोपबृंहिताः। निरोधोऽस्यानुशयनमात्मनः सह शक्तिभिः। मुक्तिर्हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थितिः। आभासश्च निरोधश्च यतोऽस्त्यध्यवसीयते। स आश्रयः परं ब्रह्म परमात्मेति शब्द्यते" भाग० २,१०,२,८ "कर्मणां वासनाः ऊयन्ते कर्मभिः संतन्यन्ते इत्यूतय यद्वा ऋद्धार्थात् संश्लेषार्थाद्वा वयतेर्धातोरिदं रूपम्। ऊयन्ते कर्मभिर्बद्ध्यन्ते संश्लिष्यन्ते वा ऊतयः" श्रीधरः

ऊधन् न० ऊधस्+पृषो० सस्य नः। स्त्रीपशोः दुग्धाधारस्थाने (मेड़) "वत्सो न मातुरुप सर्ज्यूधनि" ऋ०८,६९,११ "यदा पीतासो अंशवो गावो न दुह्र ऊधभिः" ८,९,१९। "प्र धेनवः सिस्रते वृष्ण ऊध्नः" ऋ०४,२२,६।

ऊधर् न० ऊधस्+पृ० सस्य रः। स्त्रीगव्यादेः ऊधसि (मेड़) "ऊधर्नग्ना जरन्ते" ऋ० ८,२,१२।

ऊधस् न० उन्द-क्लेदने असुन् किच्च दीर्घः। स्त्रीगव्यादेः दुग्धाधारे स्थाने (मेड) "गवामूधस्सु वक्षणासु" ऋ०१०,४९,१०।

"यदेव स्त्रियै स्तनावाप्यायेते ऊधः पशूनाम्" शत० ब्रा० २,५,१,५। अस्य बहु० स० अनङ् समा० ङीप्। पीनोध्नी घटोध्नी। "भुवं कोष्णेन कुण्डोध्नी मेध्येनावभृथादपि" रघुः। "अस्त्रियान्तु न कुण्डोध्नैधेनुकम्" सि० कौ०। अनन्तत्वेनैवोपपत्तौ अनङ्विधानं समासे सान्तप्रयोगवारणार्थम्। समासान्तविधेरनित्यत्वात् क्वचिच्च "मण्डूकनेत्रां स्वाकारां पीनोधसमनिन्दिताम्। अभिनन्द्य स तां राजन्नन्दिनीं गाधिनन्दनः" भा० आ० १७५ अ०। आर्षत्वाद्वा तथा प्रयोगः। लोके तु न तथा। तत्र भवः शरीरावयवत्वात् यत्। ऊधस्य तद्भवे दुग्धे न०। "ऊधस्यमिच्छामि तवोपभोक्तुम्" रघुः। प्राशस्त्ये मतुप् मस्य वः ङीप्। ऊधस्वती प्रशस्तोधोयुक्तायां गवि। "सिषिचुःस्म व्रजान् गावः पयसोधस्वतीर्मुदा" भा० १,१०,५। ऊधसे हितम् गवादि० यत् अनङ् च। ऊधन्य ऊधसोहिते द्रव्यभेदे, यद्भोजने आपीनं पीनं भवति तस्मिन् द्रव्ये त्रि०। २रात्रौ निरु० तस्याश्च हिमकरकरसम्पर्केण क्लेदयोगात्तथात्वम्।

ऊन परिहाणे अदन्तचुरा० उभ० सक० सेट्। ऊनयति ते औनिनत् त लुङि वा चङ् औनयीत् औनयिष्ट। ऊनः ऊनितः। "मा त्वायतोजरितुर्काममूनयीः" ऋ० १,५३,२,२।

ऊन त्रि० ऊन-हानौ अच्। १हीने, २असंपूर्णे च। "ऊनं न सत्त्वेष्वधिकोबबाधे" "किञ्चिदूनमनूनर्द्धेः शरदामयुतं ययौ" रघुः। "ऊने दद्यादगुरुकमेव यावत् सर्व्वलघुर्भवेत्" वृ० र०। "ऊनद्विवार्षिकं प्रेतं निदध्युर्बान्धवा बहिः" मनुः "ऊनं वाप्यधिकं वापि लिखेद्यो राजशासनम्" याज्ञ०। ऊनार्थशब्दयोगे तृतीया। एकेनोनः। ऊनार्थकशब्देन वा तृतीयास०। माषेणोनः माषोनः कलोनः कलयोनः। एकोनविंशतिः एकोनत्रिंशत् एकोनचत्वारिंशत् एकोनपञ्चाशत् एकोनषष्टिः एकोनसप्ततिः एकोनाशीतिः एकोननवतिः एकोनशतम्। तत्तत्संख्याया एकैकोनसंख्यायाम्। एवं द्व्यूनविंशत्यादयोऽपि अष्टादशादिसंख्यासु। संख्यासु एकत्वस्य प्रथमोपस्थितत्वात् एकशब्दाप्रयोगेऽपि एकत्वेनैवोनत्वावगमात् ऊनविंशत्यादिशब्दानामेकोनविंशत्यादीनां बोधकत्वम्। "एकेन द्वाभ्यामित्यूनके निपृतः" सर्व्वानु०।

ऊनचत्वारिंश त्रि० ऊनचत्वारिंशतः पूरणः डट्। ऊनचत्वारिंशत्संख्यापूरणे एवमूनविंश ऊनत्रिंश ऊनपञ्चाश इत्यादयः तत्तत्संख्यापूरणेषु। स्त्रियां ङीप्। तत्रार्थे तमप्। ऊनचत्वारिंशत्तम तदर्थे। एवमूनविंशतितमादयस्तत्तत्संख्यापूरणेषु स्त्रियां ङीप्।

ऊबध्य न० ऊ-ईषदर्थे बध्यं जीर्णम्। ईषज्जीर्णे तृणादौ "यदूवध्यमुदरस्यापवाति" ऋ० १,१६२,१० "ऊबध्यम् अजीर्णं तृणादि" भा० "अपामतिं दुर्मतिं बाधमाना ऊबध्यं वातं सव्वं तदारात्" यजु० १९,८४, "ऊबध्यमामाशयगतम्" वेददी०। २तत्स्थाने च "एतद्वाऽत्र तदरब्धमिति सर्पेभ्यो यत्तत्रास्तृणगूबध्यं यावत्स्तुतं भवति तद्वरन्ति सर्पाः" आश्व० गृ० ४,९,२६। अस्य अन्तःस्थ ब मध्यत्वमित्येके।

ऊबध्यगोह पु० ऊबध्यस्य गोहः प्रच्छादनं यत्र। आन्त्रप्रच्छादनस्थाने। "सव्यावृतः शामित्रोबध्यगोहचात्वालोत्करास्तावान्" आश्व० श्रौ० ५,२,१६, "ऊबध्यगोहोनाम आन्त्रप्रच्छादनस्थानम्" नारा० वृ०। [शाश्व।

ऊम् अव्य० ऊय-डुक्। १रोषोक्तौ, २प्रश्ने, ३निन्दायां, ४स्वी-

ऊम न० अव-मन् कित् ऊठ् च। नगरभेदे उज्ज्वलद०। कर्त्तरि मन्। २रक्षितरि त्रि०। "परि व ऊमेभ्यः सिञ्चता मधु" ऋ० १०,२२,५, "ऊमेभ्यो रक्षितृभ्यः" भा०। भावे मन्। ३रक्षणे न०। "ये मर्त्यं पृतनयान्तमूमैः" १,१६९,७, ऊमैः अस्मद्रक्षणैः" भा०। उज्ज्वलदत्तस्तु तस्य बा० ह्रस्वं प्रकल्प्य उमाशब्दमाह। स च उमाशब्दार्थे। वेदोक्तपम् यदि वाऽवतेः रूपमुभयथापि बा० ह्रस्व इति बोध्यम्।

ऊय तन्तुसन्ताने भ्वा० ईदित् आत्म० स० क० सेट्। ऊयते औयिष्ट। ईदित्त्वात् निष्ठायां नेट् ऊतः ऊतवान् ऊतिः।

ऊररी अव्य० ऊय-बा० ररीक्। १अङ्गीकारे, २विस्तारे च। कृभ्वस्ति गतिस० ऊररीकृत्य। क्त ऊररीकृत अङ्गीकृते विस्तीर्णे च त्रि०। घञ् ऊररीकारः अङ्गीकारे विस्तारे च पु०।

ऊरव्य पुंस्त्री ऊरौ भवः शरीरावयवत्वात् यत्। १वैश्ये तज्जातिस्त्रियां टाप् योपधत्वात् न ङीप्। वैश्यानां ब्रह्मण ऊरुजातत्वञ्च "ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः। ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत" यजु० ३१,११, उक्तेः "लोकानां स विवृद्ध्यर्थं मुखबाहूरुपादतः। ब्राह्मणं क्षत्रियं वैश्यं शूद्रञ्च निरवर्त्तयत्" मनूक्तेश्च। तस्य वृत्तिरपि तत्रोक्ता। "मुखबाहूरुपज्जानां पृथक् कार्य्याण्यतन्त्रितः" इत्युपक्रम्य" "पशूनां रक्षणं दानमिज्याध्ययनमेव च। वणिक्पथं कुसीदञ्च वैश्यस्य कृषिमेव च"। २ऊरुभवमात्रे त्रि०।

ऊरी अव्य० ऊय-बा० रीक्। १अङ्गीकारे, २विस्तारे च।

ऊर्व्वादि० च्चि गतिसमासादि ऊररीवत् द्रष्टव्यम् ।

ऊरु पु० ऊर्णूयते आच्छाद्यते ऊर्णु-कर्मणि कु नुलोपश्च । जानूपरिभागे तस्य वस्त्रादिभिराच्छादनीयत्वात् तथात्वम् । “निशान्तनारीपरिधानधूननस्फुटागसाप्यूरुषु लोलचक्षुषः” “करभकरोरुभिरूरुभिर्दधानैः” माघः । “कदली कदली, करभः करभः करिराजकरः करिराजकरः । भुवनत्रितये न बिभर्त्ति तुलामिदमूरुयुगं न चमूरुदृशः” प्रसन्नरा० । “धात्रीकराभ्यां करभोपमोरुः” “भुजमूर्द्धोरुबाहुल्या-देकोऽपि धनदानुजः” रघुः अस्य उपमानपूर्व्वकत्वे उत्तरपदस्यस्य बहु०स०स्त्रियाम् ऊङ्। करभोरूः“करभोरु ! रतिप्राप्ते द्वितीये पश्चमेऽप्यहम्” विद्यासुन्द० संहितश-फलक्षणवामपूर्वकस्यापि ऊङ् । संहितोरूः सम्यग्हितोरुका इत्यर्थः शफाविव संश्लिष्टौ ऊरू यस्याः शफोरूः । लक्षणयुक्तावूरू यस्याः लक्षणोरूः । वामौ मनोहरौ ऊरू यस्याः वामोरूः “नस्यन्तो चलशफरीविघट्टितोरूर्वामोरूरतिशयमाप विभ्रमस्य” किरा० । सहितसह-पूर्व्वकस्यापि तादृशस्य ऊङ् । सहितौ हितयुतौ ऊरू यस्याः सहितोरूः । भारं सहेते सहावूरू यस्याः सहोरूः । ऊरौ भवः शरीरावयवत्वात् यत् । ऊरव्य ऊरुभवे वैश्ये पुंस्त्री तद्भवमात्रे त्रि० । स्वाङ्गतयाऽस्मात् निष्ठान्तात् बहु०स स्त्रियां ङीष् । ऊरुभिन्नी ।

ऊरुग्राह पु ऊरू गृह्णाति स्तभ्नाति ग्रह-अण् उप०स० । ऊरुस्तम्भरोगे ऊरुस्तम्भशब्दे विवृतिः । “ऊरुग्राहगृहीताश्च केचित्तत्राभवन् भुवि” भा०द्रो०१४६ अ० ।

ऊरुज पुंस्त्री ऊरोर्जायते जन-ड । वैश्ये स्त्रियां जातित्वात् ङीष् ।२ ऊरुजातमात्रे त्रि०ऊरुजातोरुजन्मादयोप्युभयत्र । ३भृगुवंश्ये और्वे ऋषिभेदे पु०तस्य ऊरुतोजन्मकथा भा० आ०१७८,७९ पु० “कृतवीर्य इति ख्यातो बभूव पृथिवीपतिः । याज्यो वेदविदां लोके भृगूणां पार्थिवर्षभः । स तानग्रभुजस्तात ! धान्येन च धनेन च ! सोमान्ते तर्पयामास विपुलेन विशाम्पते ! । तस्मिन्नृपतिशार्दूले स्वर्यातेऽथ कथञ्चन । बभूव तत्कुलेयानां द्रव्यकार्य्यमुपस्थितम् । भृगूणान्तु धनं ज्ञात्वा राजानः सर्व्व एव ते । याचिष्णवोऽभिजग्मुस्तांस्ततो भार्गवसत्तमान् । भूमौ तु निदधुः केचित् भृगवो धनमक्षयम् । ददुः केचिद्द्विजातिभ्यो ज्ञात्वा क्षत्रियतो भयम् । भृगवस्तु ददुः केचित्तेषां वित्तं यथेप्सितम् । क्षत्रियाणां तदा तात ! कारणान्तरदर्शनात् । ततो महीतलं तात ! क्षत्रियेण यदृच्छया । खनताधिगतं वित्तं केनचिद्भृगुवेश्मनि । तद्वित्तं ददृशुः सर्वे समेताः क्षत्रियर्षभाः । अवमन्य ततः क्रोधाद्भृगूंस्ताञ्छरणागतान् । निजघ्नुः परमेष्वासाः सर्वांस्तान्निशितैः शरैः । आगर्भादवकृन्तन्तश्चेरुः सर्वां वसुन्धराम् । तत उच्छिद्यमानेषु भृगुष्वेवं भयात्तदा । भृगुपत्न्यो गिरिं दुर्गं हिमवन्तं प्रपेदिरे । तासामन्यतमा गर्भं भयाद्दध्रे महौजसम् । ऊरुणैकेन वामोरुर्भर्त्तुः कुलविवृद्धये । तद्गर्भमुपलभ्याशु ब्राह्मण्यास्तु भयार्दिता । गत्वैका कथयामास क्षत्रियाणामुपह्वरे । ततस्ते क्षत्रिया जग्मुस्तं गर्भं हन्तुमुद्यताः । ददृशुर्ब्राह्मणीं तेऽथ दीप्यमानां स्वतेजसा । अथ गर्भः स भित्त्वोरुं ब्राह्मण्या निर्जगाम ह । मुष्णन् दृष्टीः क्षत्रियाणां मध्याह्न इव भास्करः । ततश्चक्षुर्विहीनास्ते गिरिदुर्गेषु बभ्रमुः । ततस्ते मोहमापन्ना राजानो नष्टदृष्टयः । ब्राह्मणीं शरणं जग्मुर्दृष्ट्यर्थं तामनिन्दिताम् । ऊचुश्चैनां महाभागां क्षत्रियास्ते विचेतसः । ज्योतिःप्रहीणा दुःखार्त्ताः शान्तार्चिष इवाग्नयः । भगवत्याः प्रसादेन गच्छेत् क्षत्रं सचक्षुषम् । उपरम्य च गच्छेम सहिताः पापकर्मिणः । सपुत्त्रा त्वं प्रसादं नः कर्त्तुमर्हसि शोभने ! । पुनर्दृष्टिप्रदानेन राज्ञः सन्त्रातुमर्हसि । ब्राह्मण्युवाच । नाहं गृह्णामि वस्ताता ! दृष्टीर्नास्मि रुषान्विता । अयन्तु भार्गवो नूनमूरुजः कुपितोऽद्य वः । तेन चक्षूंषि वस्ताता ! व्यक्तं कोपान्महात्मना । स्मरता निहतान् बन्धूनादत्तानि न संशयः । गर्भानपि यदा नूनं भृगूणां घ्नत पुत्त्रकाः! । तदायमूरुणा गर्भो मया वर्षशतं धृतः । षडङ्गश्चाखिलो वेद इमं गर्भस्थमेव ह । विवेश भृगुवंशस्य भूयः प्रियचिकीर्षया । सोऽयं पितृवधाद्व्यक्तं क्रोधाद्वो हन्तुमिच्छति । तेजसा तस्य दिव्येन चक्षूंषि मुषितानि वः । तमिमं ताता ! याचध्वमौर्वं मम सुतोत्तमम् । अयं वः प्रणिपातेन तुष्टो दृष्टीः प्रमोक्ष्यति । वसिष्ठ उवाच । एवमुक्तास्ततः सर्वे राजानस्ते तमूरुजम् । ऊचुः प्रसीदेति तदा प्रसादञ्च चकार सः । अनेनैव च विख्यातो नाम्ना लोकेषु सत्तमः । स और्व इति विप्रर्षिरूरुं भित्त्वा व्यजायत । चक्षूंषि प्रतिलभ्याथ प्रतिजग्मुस्ततो नृपाः” ।

ऊरुदघ्न त्रि० ऊरु+“प्रमाणे द्वयसज्दघ्नञ्मात्रचः” “प्रथमश्च द्वितीयश्च ऊर्द्ध्वमाने मतौ मम” वार्त्तिकोक्तेः ऊर्द्ध्वमाने दघ्नच् । ऊरुपर्य्यन्तोर्द्ध्वमानान्विते खातादौ । “यावानुद्वाङ्ःपुरुषस्तावद् क्षत्रियस्य

कुर्य्यात् ऊरुदघ्नं ब्राह्मणस्योपस्थदघ्नं स्त्रिया ऊरुदघ्नं वैश्यस्यानीवद्घ्नं शूद्रस्यैवंवीर्य्या ह्येते” शत० ब्रा० १३,८,३,११। ‘ऊरुद्घ्नो द्वितीयोजानुदघ्नस्तृतीयः १२,२,१,२। अत्रार्थे द्वयसच् तत्परिमाणे उभयत्र स्त्रियां ङीप्।

ऊरुपर्व्वन् पु० ऊर्व्वोः पर्व्व। जानुनि (हांटु)।

ऊररी अव्य० ऊय-ईक्।१अङ्गीकारे२विस्तारे च ऊर्य्यादि० गतित्वात् कृभि स०। ऊररीकृत्य। घञ्। ऊररीकारः अङ्गीकारे विस्तारे च पु०। क्त। ऊररीकृत अङ्गीकृते विस्तीर्णे च लि०।

ऊरुस्तम्भ पु०ऊरू स्तभ्नाति स्तन्भ-अण् उप०स०। १रोगभेदे स च रोग: भावप्र० सनिदानपूर्व्वरूपादिर्दर्शितः यथा “शीतोष्णद्रवसंशुष्कगुरुस्निग्धैर्निषेवितैः। जीर्णाजीर्णे तथायासरक्षोभस्वप्नजागरैः। सश्लेष्ममेदःपवनः साममत्यर्थसञ्चितम्। अभिभूयेतरं दोषमूरू चेत् प्रतिपद्यते। सक्थ्यस्थिनी प्रपूर्य्यान्तः श्लेष्मणा स्तिमितेन सः। तदा स्तभ्नाति तेनोरू स्तब्धौ शीतावचेतनौ। परकीयाविव गुरू स्याता मतिभृशव्यथौ। ध्यानाङ्गमर्द्दस्तैमित्यतन्द्राच्छर्द्द्यरुचिज्वरैः। संयुतौ पादसदनकृच्छ्रोद्धरणसुप्तिभिः। तमूरुस्तम्भमित्याहुराढ्यवातमथापरे” “प्राग्रूपं तस्य निद्रा ऽतिध्यानं स्तिमितता ज्वरः। रोमहर्षोऽरुचिश्छर्द्दिर्जङ्घोर्व्वोः सदनं तथा। वातशङ्किभिरज्ञानात्तत्र स्यात् स्नेहनात् पुनः। पादयोः सदनं सुप्तिः कृच्छ्रादुद्धरणं तथा। जङ्घोरुग्लानिरत्यर्थं शश्वदादाहवेदना। पदं च व्यथते न्यस्तं शीतस्पर्शं न वेत्ति च। संस्थाने पीडने गत्यां चालने चाप्यनीश्वरः। अन्यनेयौ हि सम्भग्नावूरू पादौ च मन्यते। यदा दाहार्त्तितोदार्त्तो वेपनः पुरुषो भवेत्। ऊरुस्तम्भस्तदा हन्यात् साधयेदन्यथा नवम्” अन्यथा दाहाद्युक्तोपद्रवरहितं तमपि नवमुत्पन्नमात्रं साधयेत्। सात्विकभावेन २ऊर्व्वोःस्तम्भे च। “करिणीवोरुस्तम्भविष्टता” काद०।

ऊर्ज्ज बलाधाने जीवने वा चुरा०उभ० पक्षे भ्वा०पर० सक० सेट्। ऊर्ज्जयति ते ऊर्ज्जति। ऊर्ज्जितः। नाभयो वाजिनमूर्जयन्ति’ ऋ० ६,८६,४, “यो देवानामत्ति स प्राणाति तमूर्ज्जयति” शत०ब्रा० ७,५,१,१८, ‘तां वो देवाःसुमतिमूर्ज्जयन्तीमिषमश्याम” ऋ०५,४१,१८।

ऊर्ज्ज् स्त्री ऊर्ज्ज–भावे क्विप्।१बले। करणे क्विप्।२अन्ने न०। ३अन्नतरसाभिधेयेऽन्नस्य अत्यन्तसारभूते रसभेदे स्त्री“विश्वेदेवा वामूर्ज्जं मदन्ति” ऋ०७,४८,४, “यास्त ऊर्ज्जस्तन्वः सम्बभूवुः” अथ०१२,१,१२, इह पृथिव्याः सम्बोधनेन तस्या विकारानस्यूर्ज्जां शतमूर्ज्जायुक्तम्। “स ऊर्ज्जमुपजीवतीति” छ० उ० “ऊर्ज्जं दधानिति सूक्तम्” ऋ० २,२०, ‘उर्गस्याङ्गिरस्यूर्णम्रदा ऊर्ज्जं मयि धेहि” यजु०४,१०, “ऊर्क् अन्नरसरूपा”वेददी०ऊर्ज्जं बलं धेहि इत्यर्थः “अन्नमूलं बलं पुंसाम्” इत्युक्तेः अन्नरसस्य बलाधायकत्वम्।“तमःसमूहात्ततिमष्यवेगादूर्ज्जा जयन्तं प्रथितप्रकाशान्” भट्टिः ऊर्ज्जा बलेन “बलमूर्ज्जं च यच्छति” मनुः अत्र बलोर्ज्जेभेदो दैहिकमानसिकत्वाभ्यां शारीरिकं बलमूर्क् इति बोध्यम्। ४जले स्त्री।“ऊर्ज्जो नपातं स हि नायमस्मयुः” यजु०२७,४४, ऊर्क् शब्देनाप उच्यन्ते अद्भ्यो ह्याजायन्ते ततोऽग्निः इत्यग्नेरप्पौत्वम्। वेददी०। “ऊर्ज्जांपते पाहि” यजु०२७,४२।

ऊर्ज्ज पु०ऊर्ज्जति रसादिकं सोमोऽस्माधारे अच्। १कार्त्तिके मासि तस्य शरदृतोरुत्तरावयवत्वात् तत्र सोमेन रसवीर्य्याधिक्यवर्द्धनेन तथात्वम्।“इषोर्ज्जौ शरत्” इत्युपक्रम्य अयने विभज्य च “तयोर्द्दक्षिणं वर्षाशरद्धेमन्तास्तेषु भगवानाप्यायते सोमोऽम्लन्वणमधुररसा बलवन्तो भवन्त्युत्तरोत्तरं च सर्व्वप्राणिनां बलमभिवर्द्धते”सुश्रुते शरदृतोरन्तिमस्य कार्त्तिकस्य उत्तरोत्तरबलाधिक्याभिधानेनास्य तथात्वम्। करणे अच् घञ् वा सेट्कत्वान्न कुत्वम्। २उत्साहे। भावे अच् घञ् वा। ३बले ४जीवने च। करणे अच् घञ् वा। ५जले न० ‘ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालम्” यजु० २,३४। अन्नस्योर्ज्जाधायकतात् अन्नस्य जलाधीनतयैव बलहेतुत्वाञ्च तथात्वम् “ऊर्ज्जसम! ऊर्ज्जं धाः”ऋ०६,४,४, ‘ऊर्ज्जस्य सने! अन्नस्य दातः!” भा० “ऊर्ज्जाद उत यज्ञियासः” ऋ०१०,५३,४। ऊर्ज्जादः अन्नादाः भा० “अन्न ऊर्ज्जशब्दःअन्नगतं रसमभिधत्ते तेन तदाधायकत्वात् तथात्वम्। “तदन्वितर्पणादेव स्रभेतोर्ज्जमसंशयम्” सुश्रु० कर्त्तरि अच्। ६बलान्विते लि० “स्रतजगत्त्रयभूर्ज्जमतङ्गजम्” माघः।

ऊर्ज्जयोनि पु० ऋषिभेदे “ऊर्ज्जयोनिरुदारधीश्च नारदोऽपि महानृषिः” भा० अनु० ४अ०।

ऊर्ज्जव्य पु०राजभेदे“शिप्रेषु न ऊर्ज्जव्यस्य पुष्टेः”ऋ०५,४१, २०, ऊर्ज्जव्यस्य एतन्नामकस्य राज्ञः” भा०

ऊर्ज्जस् न० ऊर्ज्ज–असुन्। १उत्साहातिशयाधायके बले २अन्नरसभेदे च। ततोऽस्त्यर्थे विनि ऊर्ज्जस्विन्, मतुप् ऊ-

र्जस्वल, मतुप् मस्य वः। ऊर्ज्जस्वत्। तद्वति त्रि० तत्र विन्यन्तस्य मतुबन्तस्य च स्त्रियां ङीप्। "ऊर्ज्जस्वन्तं हविषोदस भागम्" ऋ०१०,५१,८, "ऊर्ज्जस्वती चासि पयस्वती च" यजु०१,२७, "ऊर्जस्वन्तं मन्यमानम् आत्मानं भगवानजः" भाग० ३,२०,४२, "ऊर्ज्जस्वलं हस्तितुरङ्गमेतत्" भट्टिः "भोक्तारमूर्ज्जस्वलमात्मदेहम्" रघुः "ऊर्ज्जस्विन्य ऊर्ज्जसेधाश्च यज्ञे" भा० अनु०७६ अ०। "अन्नमूर्ज्जस्करं लोके दत्त्वोर्ज्जस्वी भवेन्नरः" भा०अनु० ११२अ० ऊर्जः करोति। ऊर्जस्+कृ–अच् ६त०। अन्नतायमानरसाधायके त्रि०। "ऊर्ज्जस्करान् हव्यवाहान्" भा०व०२२अ०।

ऊर्जा स्त्री भ्वा०ऊर्ज–भावे अ। १बले २उत्साहे ३अन्नरसविकारे ४वृद्धौ च। ३ऊर्ज्जास्त्यस्य मतुप् मस्य वः। ऊर्जावत् बलान्विते वृद्धिमति च त्रि० स्त्रियां ङीप्। "ऊर्जावतीं महापुण्यां मधुमतीं त्रिवर्त्मगाम्" भा०अनु० २६अ०।

ऊर्ज्जित त्रि०ऊर्ज्ज–कर्त्तरि क्त। १बलान्विते २वृद्धियुक्ते च। "मातृकं च धनुरूर्ज्जितं दधत्" रघुः। "विनिहत्य बलमूर्ज्जितश्रीः" माघः। भावे क्त। ३बले ४सामर्थ्ये ५उत्साहे च न०। "उपपत्तिमदूर्ज्जिताश्रयम्" किरा०। णिच् क्त। कृतवृद्धौ ६वर्द्धिते त्रि०। "हिमकरोमकरोर्ज्जितकेतनम्" रघुः।

ऊर्ण न० ऊर्णा अस्त्यस्य कारणत्वेन अर्श०अच्। मेषलोमरचितवस्त्रादौ "ऊर्णञ्च राङ्कवं चैव कीटजं पट्टजं तथा। कुटीकृतं तथैवात्र कमलानां सहस्रशः। श्लक्ष्णं वस्त्रमकार्पासमाविकं मृदु चाजिनम्" भा०स० ५०अ०। २मेषलोम्नि स्त्री। "माङ्गल्योर्णावलयिनि पुरः पावकस्योच्छिखस्य" रघुः "कार्पासकीटजोर्णानां द्विशफैकशफस्य च" मनुः। ३ललाटस्थचिह्नभेदे ऊर्णाशब्दे उदा०। स च चक्रवर्त्तित्वसूचकः भ्रूद्वयमध्यगत मृणालतन्तुसूक्ष्मांशुनिभः प्रशस्तायतः। नरलक्षणशब्दे वक्ष्यते।

ऊर्णनाभ पु० ऊर्णं नाभवत्। (माकडशा) १लूतायाम् "यस्तूर्णनाभ इव तन्तुभिः प्रधानजैः" श्वे०उ०। गोत्रप्रवर्त्तके २ऋषिभेदे ततः अपत्ये शिवा० अण्। और्णनाभ तदपत्ये पुंस्त्री। स्त्रियां ङीप्। तस्य परिशीलितोदेशः राजन्या० वुञ्। और्णनाभक तच्छीलितदेशे। समासान्तविधेरनित्यत्वात् क्वचित् अच् न। "नाधारेण विना सृष्टिरूर्णनाभेरपीष्यते। न च निःसाधनः कर्त्ता कश्चित् सृजति किञ्चन" भट्टा०धृतवाक्यम्। "यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति" मुण्डकोप०।

ऊर्णम्रदस् त्रि० ऊर्णमिव ऊर्णानिर्म्मितवस्त्रमिव म्रदीयः अतिशयेन मृदु वेदे म्रदीयस्+नि० ईयसोरीयोलोपः। ऊर्णतुल्यातिमृदौ "ऊर्णम्रदा युवतिर्दक्षिणावतः" ऋ०१०,१८,१०, "ऊर्णम्रदसं त्वा स्तृणामि" यजु०२,२, "ऊर्गस्याङ्गिरस्यूर्णम्रदा ऊर्जं मयि धेहि ४,१०। अत्र मृदुत्वेनोर्णाया उपमानतोक्तेः काश्मीरदेशजस्य (पशम) प्रसिद्धस्य आविकलोम्न एव ऊर्णत्वं तस्यैवातिमृदुत्वात्।

ऊर्णवाभि पु० ऊर्णनाभिः पृ० परोक्षे षा नस्य वः। (माकड़शा)। लूतायां "यथोर्णवाभिस्तन्तुनोच्चरेत्" शत० ब्रा० १४,५,१,२२।

ऊर्णामय ऊर्णा+विकारे मयट्। मेषलोमविकारे सूत्रादौ "ऊर्णामयं कौतुकहस्तसूत्रम्" कुमा०।

ऊर्णायु त्रि० ऊर्णा–अस्त्यर्थे युस् सित्त्वात् भत्वाभावेन न आतो लोपः। १ऊर्णाविशिष्टे "इममूर्णायुं वरुणस्य नाभिम्" यजु०१३,५०। "ऊर्णायुमूर्णावन्तम्" वेददी०। २गन्धर्वभेदे "ऊर्णायुश्चित्रसेनश्च हाहा हूहूश्च भारत! हरिवं० १२८ अ० "बहुभिः सह गन्धर्वैः प्रागास्यत च तुम्बुरुः। महाद्युतिश्चित्रशिरा ऊर्णायुतनयस्तथा। "भा० २६१ अ०। "सोमदा नाम गन्धर्वी ऊर्णायुदुहिताऽभवत्" रामाय०।

ऊर्णावल त्रि० ऊर्णा अस्त्यर्थे बा० वलच्। ऊर्णायुक्ते। "अथावेः इममूर्णायुमित्यूर्णावलं इत्येतद्वरुणस्य नाभिम्" शत०ब्रा०७,५,२,२५।

ऊर्णास्तुक त्रि० अस्तीति विभक्तिप्रतिरूपकम् अव्ययम् ऊर्णास्यत्र बा० उक। ऊर्णायुक्ते "ऊर्णास्तुके लोमपक्षयोर्बद्धे भवतः" आश्व० गृ० १,७,१७,

ऊर्णु आच्छादने अदा०उभ०सक० सेट्। ऊर्णौति ऊर्णोति ऊर्णुतः ऊर्णुवन्ति ऊर्णुते। ऊर्णुयात् ऊर्णुवीत। ऊर्णौतु ऊर्णोतु ऊर्णुहि ऊर्णुताम्। और्णौत् और्णोत्। और्णुत। और्णुवीत् और्णावीत् और्णवीत् और्ण(र्णा)(र्णु)विष्ट ऊर्णुनाव ऊर्णुनुवतुः। ऊर्णुनुविरे। ऊर्णु(र्ण)विता। ऊर्णूयात् ऊर्णु(र्णु)विषीष्ट। ऊर्ण(र्णु)विष्यति ते और्णु(र्ण)विष्यत् त। ऊर्णुवन् ऊर्णुवानः ऊर्णुतः। "स द्यामौर्णोदन्तरिक्षम्" अथ०७,१,२, "ऊर्णुनाव दिशः शस्त्रैः" "हृद्योर्णुवानान् ककुभो बलौघान्" भट्टिः "ऊर्णना-

भिर्यथोर्ण्णुते" भा० २,९,२७,। सनि ऊर्ण्णुनूषति ते ऊर्ण्णुनुविषति ते ऊर्ण्णुनविषति ते।

अप+अपसृतावरणे "अपोढता अपोर्णुवन्तो अक्षुः" ऋ० १ १९०,६, "अपोर्ण्णुवन्तः अपगतनिरसनवन्तः" भा०।

अभि+आभिमुख्येन आच्छादने। "अभ्यूर्णोति यन्नग्नं भिषक्ति" ऋ० ८,७९,२, [२,१४,२

आ— समन्तादाच्छादने। "इन्द्रं सोमैरोर्णुत जूर्वस्त्रैः" ऋ०

प्र— प्रच्छादने। प्रोर्ण्णुवन् शरवर्षेण तानपीडीदिवाचरः"। "प्रोर्ण्णुवन्तं दिशोवाणैः" भट्टिः।

वि—विगतावरणे प्रकाशने। "सवितर्व्यूर्णुषेऽहुषीणा" ऋ० ४, ५४,२, "व्यूर्णुषे प्रकाशयसि" भा०

ऊर्द्द उर्द्द धातुवत्।

ऊर्द्द त्रि० ऊर्द्द—अच्। क्रीडायुक्ते स्त्रियां गौ० ङीष्।

ऊर्द्दर न० ऊर्ज्जा बलेन दृणाति दृ—"ऋज्जि दृणातेरलचौ पूर्व्वान्त्यलोपश्च" उणा० अक् अच् वा ऊर्ज्जोऽन्त्यलोपश्च उ० । १शूरे २राक्षसे च उज्ज्व०। उर्दीर्ण्णम् पूर्णम् उद् दृ-अच् पृषो० उद ऊरादेशः। धान्याधारभेदे कुसूले माधवः। "ऊर्दरं पृणता यवेनेवम्" ऋ०२,१४,११। उदुदीर्णम् ऊर्दरं कुसूलम्" भा०

ऊर्द्ध(र्द्ध्व) त्रि० उद्—हाङ्—ड पृषो०ऊरादेशः। १उच्चे २उपरि ३उपरितने च "प्रबोधयत्यूर्द्ध्वमुखैर्मयूखैः" कुमा० "भीतोर्द्धरेखायवखेन संसन्"। "व्यक्तोर्द्धरेखाभ्रुकुटीर्दधन्निः" "गङ्गेवोर्द्धप्रवर्त्तिनी" रघुः। ४उत्पाटिते ऊर्द्धकचः हेम०। ५अनुपविष्टे दण्डायमाने "आसीनः ऊर्द्धः प्रह्वो वा नियमोयत्र नेदृशः" छन्दो०। "ऊर्द्धः अनुपविष्टः" वा०त० रघु०। ६उत्क्षिप्ते "ऊर्द्धग्रावाणः" ऋ० ३,५४,१२। ऊर्द्धग्रावाणः सोमाभिषवार्थमुद्यतग्रावाणः भा०। श्रयतेर्वा च तेन सवकारत्वमपि तत्रार्थे

ऊर्द्ध(र्द्ध्व)क पु० ऊर्द्धः सन् कायति शब्दायते। मृदङ्गभेदे स च गोपुच्छवदाकारस्थितावपरिमितः हस्तेऽष्टाङ्गुलः ऊर्द्धं धृत्वा वाद्यते। "ऊर्द्धकोगोपुच्छसमस्थितावोऽष्टाङ्गुलो मुखे। धृत्वोर्द्धं वाद्यते" सङ्गीतदामोदरे:। "हरीतक्याकृतिस्तद्वत्तथाभिन्नग्रीवाकृतिः। ऊर्द्धकोदक्षिणस्तत्र स्यात् मुरजाभेदतोमताः" सङ्गीत०।

ऊर्द्ध(र्द्ध्व)कच त्रि० ऊर्द्धा उत्पाटिता कचा यस्य। विरूपे हेम०। स्त्रियां स्वाङ्गत्वात् वा ङीष्।

ऊर्द्ध(र्द्ध्व)कण्ठ त्रि० ऊर्द्धः कण्ठोऽस्य। १उन्नतकन्धरे स्त्रियां वा ङीष्। २महाशतावरीलतायां स्त्री ङीप् राजनि०।

ऊर्द्ध(र्द्ध्व)कर्म्मन् न० ऊर्द्धं ऊर्द्धदेशप्राप्त्यर्थं कर्म्म क्रिया। उत्थानक्रियायाम् उदोऽनूर्द्धकर्म्मणि" पा०। ऊर्द्धचेष्टोर्द्धक्रियादयोऽप्यत्र। बहु०व०। तत्कर्त्तरि त्रि० स्त्रियां वा टाप्।

ऊर्द्धकाय पुंन०। ऊर्द्धं कायस्य एकदे श त०। देहस्योर्द्धभागे

ऊर्द्धकेतु त्रि० ऊर्द्धः उच्छ्रितः केतुर्यस्य यत्र वा। १उच्छ्रितध्वजे राजादौ तथाभूतपुर्य्यां स्त्री। २जनकवंश्ये नृपभेदे पु०। "ऊर्द्धकेतुःसनद्वाजादजोऽथ पुरजित्सुतः" भाग० ९,१३,१९।

ऊर्द्धकेश पु० ऊर्द्धः केश इव कुमाण्डं यस्य। "ऊर्द्धकेशो भवेद् ब्रह्मा लम्बकेशस्तु विष्टरः" इत्युक्ते कुशमयब्राह्मणे। उन्नतकेशयुक्ते त्रि० स्त्रियां वा ङीष्

ऊर्द्धग त्रि०ऊर्द्धं गच्छति गम—ड। १उपरिगते। "सुधा सद्रोमाणमसञ्द्रूर्द्धगम्" कुमा० सदाशायीनिवाकारानूर्द्धगान् दीप्ततेजसः" भा० व० २२अ०। ऊर्द्धगतदेहस्थवायुकृते २रोगभेदे "ऊर्द्धगे रक्तपित्ते च पीतमद्यः प्रशस्यते" सुश्रु०। "तस्योर्द्धगोऽनिलः कासं दौर्बल्यं पाण्डुगात्रता" सुश्रु०। सर्व्वेषामुपरिगतत्वात् ३परमेश्वरे पु० "ऊर्द्धगः सत्पथाचारः" विष्णु स०। "सर्व्वेषामुपरि तिष्ठन्नूर्द्धगः" शा०भा०। ऊर्द्धगतिशालिनि ४धार्म्मिके त्रि० "धर्म्मेण गमनमूर्द्धमधस्तात्भवत्यधर्म्मेण" सां०का० धर्म्मेणोर्द्धगत्यभिधानात् धार्म्मिकस्य तथात्वम्। ऊर्द्धगतादयोऽप्यत्र। ५ऊर्द्धगतियुक्ते उत्थायिनि त्रि०।

ऊर्द्धगति स्त्री० ऊर्द्धं गतिः। १ऊर्द्धगमने। यथा अग्न्यादेः यथोक्तं सुश्रु० "अग्नावीर्य्योष्णकरसमुविशदं रूपगुणबहुलं मीमस्थवर्णं कटुकरसप्रायम् विशेषतश्चोर्द्धगतिस्वभावमिति तैजसं समूहनपचनदारणतापप्रकाशनप्रभावर्णकरमिति"। ऊर्द्धज्वलनादयोऽप्यत्र। "भ्रमणं रेचनं स्पन्दनोर्द्ध्वज्वलनमेव च। तिर्य्यग्गमनमप्यत्र गमनादेव लभ्यते" भाषा०। "प्रविशन्नूर्द्धज्वलनं हविर्भुजः" माघः ऊर्द्धगतिश्च लाघवातिशयेन भवति सत्वस्य च लघुत्वादूर्द्धगतिहेतुत्वमुक्तम्" सा०का० "सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकञ्चलञ्च रजः"। "तत्र कार्य्योद्गमने हेतुर्लाघवं गौरवप्रतिद्वन्द्वि, यतोऽग्नेरूर्द्धज्वलनं भवति" सा०कौ०। २ऊर्द्धलोके स्वर्गादौ गमने च तद्धेतुश्च धर्म्मः "धर्म्मेण गमनमूर्द्धमिति" सा०का०उक्तेः "ऊर्द्धं गच्छन्ति सत्वस्थाः" इति गीतोक्तेश्च सात्विकभावस्यापि तद्धेतुत्वम्। ऊर्द्धम् देशात् ३उत्क्रमणे। ऊर्द्धं गतिर्यस्य ४ऊर्द्धगामिनि त्रि०।

ऊर्द्ध्वगपुर न० कर्म०। अम्बरस्थपुरे खपुरे हरिश्चन्द्रपुरे त्रिका०। हरिश्चन्द्रपुरे तत्पुरस्योर्द्ध्वत्वं वक्ष्यते। २त्रिपुरासुरपुरे च तत्पुरस्याम्बरस्थत्वमुक्तम् हरिवं० १२४ अ० यथा
“त्रिपुरं पुरुषव्याघ्र! इष्टुमात्रसमीरितम्। विक्रामति नभोमध्ये मेघवृन्दमिवोत्थितम्। प्राकारेण प्रवृद्धेन काञ्चनेन विराजता। मणिभिश्च प्रकाशद्भिः सर्वरत्नैश्च तोरणैः। बभासे नभसो मध्ये श्रिया परमया ज्वलत्। गन्धर्वाणामिवोदग्रं कर्म्मणा साधितं पुरम्। वाजिनः पक्षसंयुक्ता वहन्ति वरदर्पिताः। पुरं प्रभाकरं श्वेत मनोभिः कामचारिणः। धावन्तो वेगसम्पन्ना विक्रमैः प्राणसंभृतैः। आक्रमन्त इवाकाशं खुरैः पद्मदलप्रभैः। वायुवेगसमैर्वेगैः कम्पयन्त इवाम्बरम्। सर्वतः धमदग्यन्त पक्षुभिर्विदितात्मभिः। करिभिर्ध्वजमप्रख्यैस्तपसा दग्धकिल्बिषैः। गीतवादित्रबहुलं गन्धर्वनगरोपमम्। चित्रायुधसमाकीर्णैः प्रतप्तकनकप्रभैः। भवनैर्मुक्तवर्णैश्च पांशुभिः समलङ्कृतैः। देवेन्द्रभवनाकारैः शुशुभे तन्महाद्युति। प्रासादाग्रैः प्रवृद्धैश्च कैलासशिखरप्रभैः। शुशुभे दैत्यनगरं बहुरूप्यमिवाम्बरम्। पताकाध्वजसम्पन्नं तप्तकाञ्चनसप्रभम्। क्ष्वेडितोत्कुष्टबहुलं सिंहनादविनादितम्। बभौ पत्तुजनाकीर्णं वनं चैत्ररथं यथा। समुन्नतपताकं तदृषिभिश्च विराजितम्। रराज त्रिपुरं राजन्! महाविद्युदिवाम्बरे”।

ऊर्द्ध्वचरण पु० ऊर्द्ध्वं ऊर्द्ध्वस्थः चरणोऽस्य। १तपस्विभेदे ऊर्द्ध्वपादादयोऽप्यत्र। २अष्टपादे शरभे च तस्याष्टानां पादानां मध्ये चतुर्णामूर्द्ध्वस्थत्वात् तथात्वम्।

ऊर्द्ध्वजानु त्रि० ऊर्द्ध्वमुन्नतम् जानु यस्य। ऊर्द्ध्वजानुके वा कप् ऊर्द्ध्वजानुक तदर्थे। कबभावपक्षे वा जानुनोर्ज्ञुः ऊर्द्ध्वज्ञु तदर्थे “चरणमयमत्सूय सम्मूर्द्ध्वज्ञुरेव” माघः अत्रार्थे ऊर्द्ध्वज्ञः इति द्विरूपकोषः पृषो० साधु।

ऊर्द्ध्वथा अव्य० ऊर्द्ध्व+था० थाल्। ऊर्द्ध्वप्रकारे ऊर्द्ध्व इत्यर्थे च “प्र यस्त्र दोधुवदूर्ध्वथाऽभूत्” ऋ० १०,२१,१।

ऊर्द्ध्वदंष्ट्रकेश पु० ऊर्द्ध्वदन्तकाणामुन्नतदंष्ट्राणां भूतानामीशः। १महादेवे “नमोर्द्ध्वदंष्ट्रकेशाय शुष्काायावततायच। विलोहिताय धूम्राय नीलग्रीवाय वै नमः” भा० शा० २८६ अ० नमोर्द्ध्वेत्यत्र “सैषदाशरथी रामः” इति वत् पादपूरणाय सन्धिः।

ऊर्द्ध्वदृष्टि स्त्री ऊर्द्ध्वा भ्रुवोर्मध्यस्था दृष्टिः। उपासनाङ्गे योगार्थं भ्रुवोरन्तरालस्थदृष्टौ २ऊर्द्ध्वोत्थितुद्धृष्टौ च ऊर्द्ध्वा दृष्टिरस्य बहु०। ३ताटस्थदृष्टियुते ४ऊर्द्ध्वोत्थितुद्धृष्टियुक्ते च ऊर्द्ध्वनेत्रोर्द्ध्वभादयोऽप्यत्र।

ऊर्द्ध्वदेव पु० ऊर्द्ध्वः उच्चो देवः। १परमेश्वरे २विष्णौ शब्दरत्ना०

ऊर्द्ध्वदेह पु० ऊर्द्ध्वः मरणोत्तरं भावी देहः। मरणोत्तरभाविनि देहे “ऊर्द्ध्वदेहनिमित्तार्थमथ दातुं जलाञ्जलीन्” रामा० ऊर्द्ध्वदेहाय साधु “ऊर्द्ध्वन्दमाच्च देहाच्च लोकोत्तरपदस्य च” पा० ठञ्। और्द्ध्वदेहिक मरणोत्तरकर्त्तव्ये श्राद्धादौ तच्च कर्म्म स्मृतिषु प्रसिद्धम् और्द्ध्वदेहिकशब्दे विवृतिः।

ऊर्द्ध्वनभस् पु० ऊर्द्ध्वं नभो यस्य। नभोमध्ये वर्त्तमाने वायौ “स्वाहाकृते ऊर्द्ध्वनभसं मारुतं गच्छतम्” यजु० ६,१६,

ऊर्द्ध्वन्दम त्रि० ऊर्द्ध्वम्+दम—खच्। ऊर्द्ध्वस्थे त्रिका० ततो भवाद्यर्थे ठञ्। और्द्ध्वन्दमिक तद्भवादौ त्रि०।

ऊर्द्ध्वपात्र न० ऊर्द्ध्वं नेतव्यं पात्रम्। यज्ञपात्रे चमसादौ “सौवर्णराजतीनामूर्द्ध्वपात्रग्रहाश्मनाम्” याज्ञ० “ऊर्द्ध्वपात्रम् यज्ञियोलूखलादि ग्रहादिशब्दपर्य्यायौ” मिता०

ऊर्द्ध्वपुण्ड्र पु० ऊर्द्ध्वं ऊर्द्ध्वमुखः पुण्ड्रः इक्षुदण्ड इव। ललाटस्थे ऊर्द्ध्वमुखे पुण्ड्रेक्षुवत् रेखात्मके तिलकभेदे। तद्धारणे विधिनिषेधादिकं निरूप्यते। “ऊर्द्ध्वपुण्ड्रं मृदा कुर्यात् त्रिपुण्ड्रं भस्मना सदा। तिलकं वै द्विजः कुर्याच्चन्दनेन यदृच्छया” ब्रा० त० पु०। “ऊर्द्ध्वपुण्ड्रं द्विजः कुर्यात् क्षत्रियस्तु त्रिपुण्ड्रकम्। अर्द्धचन्द्रन्तु वैश्यस्य वर्त्तुलं शूद्रयोनिजः” ब्रा० त० ब्रह्मा० पु०। “अशुचिर्वाप्यनाचारो मनसा पापमाचरन्। शुचिरेव भवेन्नित्यमूर्द्ध्वपुण्ड्राङ्कितो नरः” ऊर्द्ध्वपुण्ड्रधरो मर्त्यो म्रियते यत्र कुत्रचित्। श्वपाकोऽपि विमानस्थो मम लोके महीयते” इति ब्रह्मपु०। तद्धारणे वैदिकद्विजातिरिक्तस्यैवाधिकारः यथोक्तं देवीभागवते श्रीनारायणेन “ऊर्द्ध्वपुण्ड्रं त्रिशूलञ्च वर्त्तुलं चतुरस्रकम्। अर्द्धचन्द्रादि वा लिङ्गं वेदनिष्ठो न धारयेत्। जन्मना लब्धजातिस्तु वेदपन्थानमाश्रितः। पुण्ड्रान्तरं भ्रमाद्वापि ललाटे नैव धारयेत्। ख्यातिकान्त्यादिसिद्ध्यर्थमपि विष्ण्वागमादिषु। स्थितं पुण्ड्रान्तरं नैव धारयेद्वैदिको जनः”। नि० सि० धृतस०। “विष्ण्वागमादितन्त्रेषु दीक्षितानां विधीयते। शङ्खचक्रगदादग्धैरङ्कनं नान्यदेहिनाम्। वेदमार्गैकनिष्ठस्तु मोहेनाप्यङ्कितोयदि। पतत्येव न सन्देहस्तथा पुण्ड्रान्तरादपि। शङ्खचक्राद्यङ्कनं च गीतनृत्यादिकं तथा। एकजातेरयं धर्म्मो न जातु स्यात् द्विजन्मनः”। “शङ्खचक्रंमृदा यस्तु कुर्य्यात् तप्तायसेन वा। स शूद्रवद्बहिः कार्य्यः सर्व्वस्मा-

द्विजधर्म्मिणः" यथा श्मशानजं काष्ठमनर्हं सर्व्वकर्म्मसु । द्विजस्तु तप्तशङ्खादिलिङ्गाङ्किततनुस्तथा । संभाष्य रौरवं याति यावदिन्द्राश्चतुर्द्दश" इत्यद्या०। "शिवकेशवयोरङ्कान् शूलचक्रादिकान् द्विजः । न धारयेत मतिमान् वैदिके वर्त्मनि स्थितः" ततश्च त्रिपुण्ड्रादिधारणविधायकवाक्यं वैदिकेतरद्विजविषयम् शूद्रविषयञ्च । यदपि ब्राह्मणस्य तद्धारणविधानम् "अग्निहोत्रं यथा नित्यं वेदस्याध्ययनं यथा । ब्राह्मणस्य तथैवेह तप्तमुद्रादिधारणम्" पद्मपु० । "ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा यदि वेतरः । शङ्खचक्राङ्किततनुस्तुलसीमञ्जरीधरः । गोपीचन्दनलिप्ताङ्गो दृष्टश्चेत्तदघं कुतः" काशी० । तदपि वैदिकेतरविप्रपरम् सर्व्वसामञ्जस्यात् एवं शास्त्रार्थे स्थितेऽपि कुलाचारात् तस्य सर्व्वैः कर्त्तव्यता । तथैव भारतटीकायां नीलकण्ठेन निर्णीतम् यथा

"श्येनामेक उदकं गामवाजति मांसमेकः पिंशति सूनया भृतम् आ निम्रुचः शकृदेको अपाभरत् किं स्वित् पुत्रेभ्यः पितरावुपावतुः" श्रुतिः। "अस्यार्थः हे ऋभवः! भवतां मध्ये एकः श्येनां श्लक्ष्णां गां मृदं गोपीचन्दनादिरूपां तीर्थनिकटस्थां तुल्यकर्मभूतां प्रति उदकं जलं गौणकर्म अवाजति अवगमयति अन्तर्भावितण्यर्थोऽजतिः । श्येनां गाम् उदकेन मिश्रयतीत्यर्थः श्येनां गां रक्तचन्दनादिरूपां वा तथा। एकः सूनया हिंसया तत्कर्त्रा आभृतं आहृतं मांसं गोरोचनाख्यं पिंशति पिनष्टि उदकेन सह इति शेषः निम्रुचः नितरामस्तं गच्छतो दग्धेन्धनस्याग्नेः सम्बन्धि शकृत गोमयं शुष्कगोमयोत्थं भस्मेति यावत् अपाभरत् अपाहृतवान् अत्राप्युदकेन सहेति शेषः व्यवहिताश्चेति छन्दसि व्यवहितेनाप्युपसर्गेण क्रियायाः सम्बन्धः। हृग्रहोर्भश्छन्दसीति हस्य भः । एतानि मन्त्रपदानि असंपूर्णार्थत्वात् स्वार्थलाभाय ब्राह्मणमपेक्षन्ते इषे त्वोर्जे त्वेत्यादिमन्त्रवत् तत्र यथा "इषे त्वेति शाखां छिनत्ति ऊर्जे त्वेत्यनुमार्ष्टीति" ब्राह्मणानुसारात् हे शाखे त्वा त्वाम् इषे अन्नाय छिनद्मीति ऊर्जे पशुभ्यः अनुमार्ज्मीति व्याख्यातम् एवमिहापि वासुदेवोपनिषद्ब्राह्मणतन्त्रपुराणोपबृंहणानुसारात् ऊर्द्ध्वपुण्ड्रार्थं श्लक्ष्णां मृदं जलेन मिश्रयेदिति व्याख्येयं तथा कालाग्निरुद्रबृहज्जाबालाद्युपनिषद्ब्राह्मणतन्त्रपुराणोपबृंहणानुसारात् त्रिपुण्ड्रकर्त्तुः निम्रुचः शकृदपाभरदिति च व्याख्येयम् एवमितरस्यापि पदस्य ब्राह्मणमन्त्रलिङ्गाद्युपबृंहणे स्मृतिभ्यश्चाष्टकाप्रपा-विधिवदनुमेयं तथाच श्येनामिति पदस्य रक्तामिति व्याख्याने सौरशाक्तगाणेशानां रक्तमेव पार्थिवं द्रव्यं पुण्ड्रार्थे तत्तत्तन्त्रे विधीयते वैष्णवानां पीतं शैवानां भस्मेति अनेन तत्तत्पुण्ड्रविशेषोपलक्षिततत्तद्देवता भजनेनापि देवताभावं प्राप्नुवन्तीति विधीयते। केवलवैदिकानां तु श्येनां श्लक्ष्णामिति व्याख्यानेन त्रितयस्यापि समुच्चयः "स्नात्वा पुण्ड्रं मृदा कुर्यात् धृत्वा चैव तु भस्मना । देवान् विप्रान् समभ्यर्च्य चन्दनेन समाचरेदिति" स्मृतिभ्यः अत्र गोरोचनाग्रहणं चन्दनाद्यष्टगन्धोपलक्षणार्थम् एतेषां विकल्पसमुच्चयपक्षाणां पितृपैतामहपरंपराक्रमेण व्यवस्थामाह किं स्वित् पुत्रेभ्यः पितरावुपावतुरिति पुत्रहितार्थं यत्किञ्चिद्व्रतं पितरौ माता पितरौ पितृपितामहौ वा उपेत्य स्वीकृत्य अवतुः प्रकृं सम्यक् परिपालयामासतुः तदेव तस्य श्रेयः साधनमित्यर्थः एवं सति तीर्थानि यज्ञादयस्तन्त्रमार्गेण सूर्य्याद्यन्यतमोपास्तिः केवलवैदिकता चेति देवताभावप्राप्तिसाधनानि" इत्यन्तेन ।

श्राद्धकर्म्मणि तु त्रिपुण्ड्रादौ विधिनिषेधयोर्व्यवस्था नि० सि० उक्ता यथा ।

"जपे होमे तथा दाने स्वाध्याये पितृकर्म्मणि । तत्सर्वं नश्यति क्षिप्रमूर्द्ध्वपुण्ड्रबिनाकृतमिति" हेमाद्रावुक्तेः । "यज्ञो दानं जपो होमः स्वाध्यायः पितृकर्म च । वृथा भवति विप्रेन्द्रा ! ऊर्द्ध्वपुण्ड्रविनाकृतमिति" वृहन्नारदीयात् "ऊर्द्ध्वञ्च तिलकं कुर्य्याद्दैवे पित्र्ये च कर्मणीति" वृद्धपराशरोक्तेश्च ऊर्द्ध्वपुण्ड्रधारणं पैत्रे विहितम् । अन्ये तु "ऊर्द्ध्वपुण्ड्रो द्विजातीनामग्निहोत्रसमोविधिः । श्राद्धकाले च संप्राप्ते कर्त्ता भोक्ता च वर्जयेदिति" "वामहस्ते च ये दर्भा वृष्टे रङ्गवल्लिस्तथा । ललाटे तिलकं दृष्ट्वा निराशाः पितरो गताः" इति संग्रहोक्तेः "ऊर्द्ध्वपुण्ड्रं त्रिपुण्ड्रं वा चन्द्राकारमथापि वा । श्राद्धकर्त्ता न कुर्वीत यावत् पिण्डान्न निर्वपेत्" इति विश्वप्रकाशे वचनाच्च न धार्य्यमित्याहुः । अत्र कुलाचारादेव व्यवस्था । अत एव वृहन्नारदीये "ऊर्द्ध्वपुण्ड्रञ्च तुलसीं श्राद्धे नेच्छन्ति केचन" इत्यत्र केचनेत्युक्तम् ऊर्द्ध्वपुण्ड्रविधिः श्राद्धभोक्तृपरः, निषेधः कर्तृपरः इति पृथ्वीचन्द्रः । यत्तु हेमाद्रौ देवलः "ललाटे पुण्ड्रकं दृष्ट्वा स्कन्धे माल्यं तथैव च । निराशाः पितरो यान्ति दृष्ट्वा च वृषलीपतिमिति"। तद्भस्मत्रिपुण्ड्रविषयम् । "प्राक्पिण्डदानात् गन्धाद्यैर्नालङ्कुर्यात्स्वविग्रहम्" इत्याश्वलायनोक्तेः

पुण्ड्रं वर्त्तुलमित्यपरार्के मदनरत्ने च। पृथ्वीचन्द्रस्तु "पुण्ड्रं त्रिपुण्ड्रम् ऊर्द्ध्वञ्च तिलकं कुर्य्यान्न कुर्य्याद्वै त्रिपुण्ड्रकम्। निराशाः पितरो यान्ति दृष्ट्वा चैव त्रिपुण्ड्रकमिति" वृद्धपराशरोक्तेः। भोक्तुस्तिर्य्यग्रूपो भवत्येव। "वर्ज्जयेत्तिलकं भाले श्राद्धकाले च सर्वदा। ऊर्द्ध्वपुण्ड्रं त्रिपुण्ड्रं वा धारयेत्तु प्रयत्नतः" इति व्यासोक्तेरित्याह"। पृथ्वीचन्द्रोदये ब्राह्मे "सहदर्भेण हस्तेन यः कुर्य्यात्तिलकं बुधः। आचम्य स विशुध्येत दर्भत्यागेन चैव हि"।

ऊर्द्ध्वपृश्नि पु० ऊर्द्ध्वाः पृश्नयोविन्दवोऽस्य। पशुभेदे। अश्वमेधे तृतीययूपे बध्यमानीयमारुतपशुकीर्त्तने "पृश्निस्तिरश्चीनपृश्निरूर्द्ध्वपृश्निस्ते मारुताः" यजु०२४,४,

ऊर्द्ध्वबर्हिस् पु० ऊर्द्ध्वं प्रागग्रं बर्हिर्येषाम्। सोमपाख्ये पितृभेदे "स्वाहा पितृभ्य ऊर्द्ध्वबर्हिर्भ्यो धर्मपावभ्यः" यजु० २,१५, "ऊर्द्ध्वबर्हिर्भ्यः सोमपाभ्यः" वेददी०

ऊर्द्ध्वबाहु पु० ऊर्द्ध्व उत्तोलितो बाहुः कर्म्म०। १ऊर्द्ध्वोत्तोलिते बाहौ "तद्यदेनमूर्द्ध्वबाहुमभिषिञ्चति" शत०५,४,१,१७,। बहु०। २प्रसारितबाहुके त्रि० ऊर्द्ध्वबाहुः प्राञ्चं प्रगृह्णात्यूर्द्ध्वं ऊ भू ण इति" कात्या० १६,२,८, ऊर्द्ध्वबाहुः प्रसारितबाहुः" कर्कः "पञ्चमोरैवतो नाम मनुस्तामससोदरः" इत्युपक्रम्य "हिरण्यरेतावेदशिरा ऊर्द्ध्वबाह्वादयो द्विजाः" इति" भाग०८,५,२,श्लोकोक्ते ३रैवतमन्वन्तरीयसप्तर्षिभेदे ते च"वेदबाहुर्यदुध्रश्च मुनिर्वेदशिरास्तथा। हिरण्यरोमा पर्जन्य ऊर्द्ध्वबाहुश्च सोमजः। सत्यनेत्रस्तथाऽत्रेय एते सप्तर्षयोमताः" हरिवं० ७अ० विशेषत उक्ताः। ऊर्द्ध्वमुत्क्षिप्तो बाहुर्येन। ४तपस्यार्थमूर्द्ध्वोत्क्षिप्तबाहौ तपस्विभेदे।

ऊर्द्ध्वबुध्न पु० ऊर्द्ध्वं बुध्नं शिरोऽस्य। ऊर्द्ध्वशिरस्के चमसे "अर्वाग्बिलश्चमस ऊर्द्ध्वबुध्नस्तस्मिन् यशोनिहितं विश्वरूपम्। तस्यासत ऋषयः सप्त तीरे वागष्टमी ब्रह्मणा संविदानेति" "अर्वाग्बिलश्चमस ऊर्द्ध्वबुध्न इति तच्छिरः एष ह्यर्वाग्बिलश्चमस ऊर्द्ध्वबुध्नस्तस्मिन् यशोनिहितं विश्वरूपमिति प्राणा वै यशोनिहितं विश्वरूपं प्राणानेतदाह तस्यासत ऋषयः सप्त तीरे इति प्राणा वा ऋषयः प्राणानेतदाह" श०ब्रा०। "देहस्य चमसरूपेण रूपकमिदम् अर्वाग्बिलश्चमस ऊर्द्ध्वबुध्नः इद तच्छिरः चमसाकारं हि तत् कथम्? एष ह्यर्वाग्बिलः मुखस्य बिलरूपत्वात्, शिरसोबुध्नाकारत्वात् ऊर्द्ध्वबुध्नः तस्मिन् यशोनिहितं विश्वरूपमिति यथा सोमश्चमसे एवं तस्मिन् शिरसि विश्वरूपं नानारूपं निहितं भवति, किं पुनस्तद्यशः? प्राणा वै यशोविश्वरूपम्। प्राणाः श्रोत्रादयः सप्त ऋषयः धीराः(श्रोत्रे द्वे नासिके द्वे नेत्रे द्वे रसना चैकेति सप्त) तेषां परिस्पन्दात्मकशब्दादिज्ञानहेतुत्वात्"। ऋषिधातोर्गत्यर्थतया परिस्पन्दात्मकवृत्तिमत्त्वम् ज्ञानहेतुत्वेन धीरत्वमिति बोध्यम्।

ऊर्द्ध्वभाग पु० ऊर्द्ध्वः उपरिस्थोभाग एकदेशः कर्म्म०। उपरितनदेशे "ताल्वादिषु सभागेषु ऊर्द्ध्वभागे निष्पन्नोऽजुदात्तः" सि०कौ०।

ऊर्द्ध्वभाज् त्रि०ऊर्द्ध्वं भजते भज—ण्वि। १उपरिभागस्थे २ऊर्द्ध्वदेशस्थे वह्निभेदे पु०। "ऊर्द्ध्वभागूर्द्ध्वभाङ् नाम कविः प्राणाश्रितस्तु यः" भा० व०२१८अ० अग्निनामतत्कर्म्मभेदकथने।

ऊर्द्ध्वम् अव्य० उद्-ह्वेञ् डम् आदेरूरादेशश्च। ऊर्द्ध्वशब्दार्थे। "ऊर्द्ध्वं प्राणाह्युत्क्रामन्ति यूनःस्थविर आयति" "तिष्ठन्नूर्द्ध्वं रजः) पिबेत्" मनुः "अधश्चोर्द्ध्वञ्च प्रसृतास्तस्य शाखाः" गीता।

ऊर्द्ध्व(र्द्ध)मन्थिन् पु० ऊर्द्ध्वं ब्रह्मचर्य्यादुत्तराश्रमं गार्हस्थ्यादि मथ्नाति मन्थ—णिनि ईत०। नैष्ठिकब्रह्मचारिणि स हि ब्रह्मचर्य्योत्तरगार्हस्थ्याद्याश्रमं त्यजतीति तस्य तथात्वम्। "धर्म्मान् प्रदर्शयितुकामोवातरशनानां श्रमणानामृषीणामूर्द्ध्वमन्थिनां शुक्लया तन्वाऽवततार" भाग०५,२,२१,

ऊर्द्ध्व(र्द्ध)मान न० ऊर्द्ध्वमारोप्य मीयते येन मा-करणे ल्युट्। पलकर्षादिमिते पाषाणादौ(बाटखारा)। तेन हि तुलादावारोपितेन स्वर्णादेर्गुरुत्वमुन्मीयते। भावे ल्युट्। २उच्चतापरिच्छेदकपरिमाणे च "ऊर्द्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः। आयामस्तु प्रमाणं स्यात् संख्या बाह्या तु सर्वतः" व्या० का०। अयमर्थः। तुलादावारोपितस्य स्वर्णादेर्गुरुत्वमितिःतुलापरकोटिदेशे आरोपाद्युदुन्मीयते तदुन्मानम्। प्रस्थादिना स्वगताभ्यामारोहपरिणाहाभ्यां व्रीह्यादेः सर्वतोमानात् परिमाणम्। आयामोदैर्घ्यं वस्त्रादेर्जलादेश्च मितिर्हस्तदण्डादिना यत् मीयते तत् प्रमाणम्। सर्व्वतः उक्तप्रकारमानत्रयाद्बाह्या बहिर्भूता संख्या द्वित्वादिरित्यर्थः। "प्रमाणे द्वयसज्दघ्नञ्मात्रचः" पा० विहितौ द्वयसज्दघ्नचौ प्रत्ययौ ऊर्द्ध्वमानादेव, "प्रथमश्च द्वितीयश्च ऊर्द्ध्वमाने मतौ मम" वार्त्तिकोक्तेः।

ऊर्द्ध्वमुख त्रि० ऊर्द्ध्वं मुखमस्य। १ऊर्द्ध्वगतप्रथमप्रसरे "प्र-

बोधयत्यूर्द्धमुखैर्मयूखैः" कुमा०२ ऊर्द्धस्थिताग्रभागे "अधो-मुखैरूर्द्धमुखैश्च पत्त्रिभिः" रघुः। ३उन्नमितवदने च स्वाङ्गत्वात् स्त्रियां ङीप्। ऊर्द्धं मुखमस्य एक०त०। ४मुखस्योर्द्धभागे न० "दन्तान्तोर्द्धमुखं सयोषदकमम्" तन्त्रसा०। मातृकान्यासे मुखस्योर्द्धभागे विन्दोर्न्यस्त-त्वादभेदोपचारात् विन्दुवर्णेऽप्य तदर्थः।

ऊर्द्धमूल त्रि० ऊर्द्धं मूलमस्य। १ऊर्द्धस्थितमूलभागे वृक्षादौ ऊर्द्धः क्षरादुत्कृष्टः पुरुषोत्तमो मूलमस्य। २संसारे च "ऊर्द्धमूलमधःशाखमश्वत्थं प्राहुरव्ययम्" गीता।

ऊर्द्धरेतस् पु० ऊर्द्धमूर्द्धगं नाधःपतत् रेतो यस्य। १महा-देवे, २सनकादिमुनौ ३तपस्विभेदे, ४भीष्मे च। रेतो हि पुंचिह्नेन प्रायः सर्वेषामधो गच्छति यस्तस्य अधोगतं संरुणद्धि स ऊर्द्धरेता इत्युच्यते। सनकादीनां निवृत्ति-धर्म्मपरत्वेन नैष्ठिकब्रह्मचारितया तथात्वम् "अष्टाशीति-सहस्राणि ऋषीणामूर्द्धरेतसाम्" भा० स०११अ०। "इत्युक्त्वा चोर्द्धमनयद्रेतोऽहमभवाहनः। ऊर्द्धरेताः समभवत् ततः प्रभृति चापि सः" भा०अनु०८४अ०। "ऊर्द्धरेता ऊर्द्धलिङ्ग ऊर्द्धशायी नभःस्थलः" भा०अनु० १७० अ० शिवस्तुतौ। भीष्मस्य च कृतसमावर्त्तनस्यापि पितृकाम्यविवाहार्थं सत्यवतीसमीपे गार्हस्थ्यपरित्याग-प्रतिज्ञानात् तथात्वम् तत्कथा "अद्यप्रभृति मे दाश! ब्रह्मचर्य्यं भविष्यति" भा०आ० १००अ० दृश्या।

ऊर्द्धरोमन् पु० ऊर्द्धानि रोमाण्यस्य। १ऊर्द्धमुखतया विकट-रोम्णि यमदूतादौ "स पापकर्माणीनुद्दा पुरुषान् भय-दारुणान्। बद्धहस्तानूर्द्धरोम्ण आत्मानं नेतुमागतान्" भा० ६,१,२६। २कुशद्वीपस्थसीमापर्व्वतभेदे च। कुशद्वीप-वर्णने "तेषां वर्षेषु सीमागिरयो नद्यश्चाभिजाताः सप्तैव। चक्रश्चतुःशृङ्गः कपिलश्चित्रकूटो देवानीक ऊर्द्धरोमा द्रविण" इति भाग०५,२०,११। ऊर्द्धमुखरोमयुक्ते त्रि०। "रक्ताक्षमूर्द्धरोमाणं कालजङ्घाविनाशिनम्" भा०अनु० ६८ अ०। स्त्रियां वा डाप्।

ऊर्द्धलिङ्ग पु० ऊर्द्धमुत्कृष्टं लिङ्गं चिह्नमस्य। १महादेवे "ऊर्द्ध-लिङ्गं विरूपाक्षमिति" सन्ध्याङ्गमन्त्रः "ऊर्द्धरेता ऊर्द्ध-लिङ्ग ऊर्द्धशायी नभःस्थलः! त्रिजटश्चीरवासाश्च रुद्रः सेनापतिर्विभुः" भा० अनु०१७०।

ऊर्द्धलोक पु० कर्म्म०। स्वर्गे।

ऊर्द्धवात पु० ऊर्द्धगतो वातः। सुश्रुतोक्ते स्वाभाविकगतिरोधेन ऊर्द्धगते वायौ। स च मूत्रादिवेगधारणाद्भवति यथोक्तं सुश्रु०। "अधश्चोर्द्धञ्च भावानां प्रवृत्तानां स्वभावतः। न वेगान् धारयेद्धीमान् वातादीनां जिजीविषुः"। अभिक्र-मुदावर्त्तशब्दे ११६२४० उक्तम्। "आटोपशूलौ परिवर्त्तनञ्च सङ्गः पुरीषस्य तथोर्द्धवातम्" सुश्रु०। २सप्तवाततान्त-र्गते परीवहे वायौ तस्य सर्ववायूनामुपरिस्थत्वात् तथा-त्वम् आवहशब्दे विवृतिः।

ऊर्द्धवृत त्रि० ऊर्द्धगत्या वेष्टनेन वृतः। ऊर्द्धमावर्त्तनेनावृते दक्षिणावर्त्तनेनाधर्त्तिते सूत्रादौ "कार्पासमुपवीतं स्यात् विप्रस्योर्द्धवृतं त्रिवृत्" मनुः। यथा च दक्षिणावर्त्ति-तस्यैव तथात्वम् तथोपवीतशब्दे उक्तम्।

ऊर्द्धबृहती स्त्री वैदिके छन्दोभेदे। "चतुर्थं बृहती" इत्युप-क्रम्य "षट्त्रिंशिनोर्मध्ये दशकोविहारबृहती त्रिजागतोर्द्ध-बृहती" सर्व्वानु० ५अ०।

ऊर्द्धशायिन् त्रि० ऊर्द्धः सन् शेते शी–णिनि। १उत्तान-शायिबालके। स्त्रियां ङीप्। २महादेवे पु०। ऊर्द्ध-लिङ्गशब्दे उदा०।

ऊर्द्धशोषम् अव्य० ऊर्द्धः सन् शुष्यति ऊर्द्ध+शुष–णमुल्। ऊर्द्धं तथा शुष्के वस्त्रादिषु यथाविध्यनुप्रयोगनियमात् शुषधात्वनुप्रयोग एवास्य साधुत्वम्। "ऊर्द्धशोषं शुष्यति वृक्षः ऊर्द्धः सन् शुष्यतीत्यर्थः" सि०कौ०। "यद्योर्द्धशोषं तृणवद्विशुष्कः" भट्टिः।

ऊर्द्धसानु पुंन० कर्म्म०। १पर्वतादीनामुपरिस्थे सानौ। ऊर्द्धं सनोति सो–नु। २उपर्य्युपर्य्युन्नते "कनिक्रदत् पतयदूर्द्ध-सानुः" ऋ० १,१५२,५। "ऊर्द्धसानुरुपर्य्युपरिसमुच्छ्र-यवः" भा०।

ऊर्द्धस्थिति स्त्री ऊर्द्धं स्थितिर्येन यस्य वा। १अश्वपृष्ठभागे त्रिका०। २ऊर्द्धस्थे त्रि०। ऊर्द्धं स्थितिः। ३ऊर्द्धस्थाने स्त्री

ऊर्द्धस्रोतस् पु० ऊर्द्धम् ऊर्द्धगतं नाधोगामि स्रोतः रेतसः प्रवाहोऽस्य। १ऊर्द्धरेतसि योगिभेदे स हि उत्पतनचेष्ठा-सत्त्वाधिक्येन रेतःप्रवाहमूर्द्धमानयतीति तस्य तथात्वम् सत्त्वबाहुल्ये एव यथोर्द्धस्रोतस्त्वं तथा सां०कौ० उक्तम् यथा "केचित् खलु सत्त्वबहुलाः सत्त्वनिकाया यथो-र्द्धस्रोतस इति" ऊर्द्धं स्रोत आहारसञ्चारोऽस्य २वनस्पत्यादिषु "वनस्पत्योषधिलतात्वक्सारवीरुधोद्रुमाः। उत्स्रोतसस्तमःप्रायाः अन्तःस्पर्शविशेषिणः" भाग० १, ८,२०, तेषां तथात्वोक्तेः "ऊर्द्धं स्रोत आहारसञ्चारो-येषाम्" श्रीधरः। मूले सिक्तजलादीनां मूलेनैवोर्द्धमाक-र्षणात् तेषामूर्द्धस्रोतस्त्वम्।

ऊर्द्धायन त्रि॰ऊर्द्धमयनं यस्य । १ऊर्द्धगत प्लक्षद्वीपस्थे २वैश्यवर्णस्थानीये पक्षिभेदे । प्लक्षद्वीपवर्णने अरुणादिसप्तनदीरुक्त्वा "यासां जलोपस्पर्शनविधूतरजस्तमसो हंसपतङ्गोर्द्धायनसत्याङ्गसंज्ञाश्चत्वारोवर्णाः" भाग॰५,२०,७ । "हंसादयः पक्षिणः ब्राह्मणादिस्थानीयाः" श्रीधरः । २ऊर्द्धगतौ न॰

ऊर्द्धाम्नाय पुं ऊर्द्धमाम्नायते आ+म्ना—कर्म्मणि घञ् । वेदमार्गातिरिक्तबोधके तन्त्रभेदे

ऊर्द्धावर्त्त पु॰ ऊर्द्धमावर्त्ततेऽत्र आ+वृत आधारे घञ् । १अश्वस्य ग्रीवास्थाने लिङ्गा॰भावे घञ् ६त॰ । २दक्षिणावर्त्ते च

ऊर्द्धासित पु॰ऊर्द्धमुपरिभागे असितः कृष्णः आसितो वा । १कारवेल्ले (करेला) त्रिका॰ २ऊर्द्धोपविष्टे त्रि॰ ।

ऊर्द्धेह पु॰ऊर्द्धमीहा चेष्टा । उत्थानानुकूलायामूर्द्धचेष्टायाम् "उदोऽनूर्द्धहे" मुग्ध॰ऊर्द्धेहायत्न इत्थी ।

ऊर्म्मि पुंस्त्री॰ऋ-मि-अर्त्तेरुच्च । १तरङ्गे, "व्योमगङ्गोर्म्मिवायुभिः" रघुः "महोर्म्मिभिर्व्याहतवाञ्छितार्थैः" २प्रकाशे, ३वेगे, ४वस्त्रसङ्कोचरेखायाम्, ५पीडायाम्, ६उत्कण्ठायाम्, ७बुभुक्षादिषु, षट्सु देहमनःप्राणानां यथायथं धर्म्मेषु ते च "बुभुक्षा च पिपासा च प्राणस्य, मनसः स्मृतौ । शोकमोहौ, शरीरस्य जरामृत्यू षडूर्म्मयः" शा॰ ति॰ विभज्योक्ताः "पङ्क्तीलतानामश्वानां गतमोत्तमनाकृति । अतिवेगसमायुक्ता गतिरूर्म्मिरुदाहृता" वैजयन्त्युक्तलक्षणायाम् ८अश्वगतौ स्त्री "तथं पयोधयरुर्म्मिभिराप्लुतम्" माघः "क्षिपद्भिरूर्म्मीनपरैरिवोर्म्मिभिः" माघः "पक्षे ऊर्म्मिभिरश्वगतिभिरित्यर्थः ।

ऊर्म्मौ भवः यत् । ऊर्म्म्य ऊर्म्मिभवे त्रि॰रात्रौ स्त्री निरु॰ "तिरस्तमोदद्दृश ऊर्म्यास्तु" ऋ॰६,४८,६, "ऊर्म्यासु रात्रिषु" भा॰ । रुद्रभेदे पु॰ "नम ऊर्म्याय चावर्म्याय च" यजु॰१६,३१ ।

ऊर्म्मिका स्त्री ऊर्म्मिरिव कायति कै—क । १तरङ्गवत् प्रकाशमाने अङ्गुरीयके । स्वार्थे कन् । २तरङ्गादौ च । ३उत्कण्ठायाम् ४भृङ्गनादे ५वस्त्रभङ्गे च हेम॰

ऊर्म्मिन् त्रि॰ऊर्म्मिरस्त्यस्य वा॰ इनि । ऊर्म्मियुक्ते स्त्रियां ङीप् । "सम्पृच्यध्वमृतावरीरूर्म्मिणा मधुमत्तमाः" कात्या॰ ४,२,२२, "प्रक्षापयन्त्यूर्म्मिणम्" ऋ॰ ८,९८,६, २समुद्रे पु॰ "ततः सागरमासाद्य कुक्षौ तस्य महोर्म्मिणः" भा॰व॰२०अ॰ ।

ऊर्म्मिमत् त्रि॰ ऊर्म्मिरिव वक्रतास्त्यस्य मतुप् यवा॰ मस्य न वः । १वक्रे । "दीर्घेषु नीलेष्वथ चोर्म्मिमत्सु अपाङ्गेषु नरेन्द्रपत्नीम्" भा॰स॰६५अ॰ २तरङ्गवति च ।

ऊर्म्मिमालिन् पु॰ ऊर्म्मिमालाऽस्त्यस्य इनि । समुद्रे "चन्द्रं प्रवृद्धोर्म्मिरिवोर्म्मिमाली" रघुः

ऊर्म्मिला स्त्री लक्ष्मणपत्न्याम् जनकस्यौरस्यां कन्यायाम् "पार्थिवीमुदवहद्रघूद्वहो लक्ष्मणस्तदनुजामथोर्म्मिलाम्" रघुः

ऊर्य्यादि पु॰ पाणिन्युक्ते गतिसंज्ञानिमित्ते शब्दसमूहे स च गणः ऊरी, उररी, तन्थी, ताली, आताली, वेताली, धूली, धूसी, शकला, संशकला, ध्वंसकला, भ्रंसकला, गुलुगुधा, सजूः, फल, फली, विक्ली, आलोष्ठी, केवाली, केशाली, पर्याली, शेवाली, वर्षाली, अत्यूमशा, वश्मसा, मस्मसा, मसमसा, श्रौषट्, वौषट्, वषट्, स्वाहा, स्वधा, बन्धा, प्रादुस्, श्रत्, आविस्, अत्र पाठान्तरम् उररी उरीति उरीकृत्य ।

ऊर्व पु॰ऊरुः कारणत्वेनास्त्यस्य अर्श॰अच् संज्ञापूर्वकविधेरनित्यत्वेन स्वायम्भुववत् न गुणः । १और्वे ऋषिभेदे उपचारात् तज्जाते २वाडवानले "ऊर्व इव प्रथे" ऋ॰१,२,१८, ऊर्वः वाडवानलः भा॰३तद्वति समुद्रे "अपार ऊर्वेऽमृतं दुहानाः" ऋ॰ १,१,१६, समानमूर्वं नद्यः पृणन्ति" ऋ॰ २,३५,३, ऊर्वः शाडवस्येनास्त्यस्य अच् । वाडवानलतुल्ये ४महति "दिव ऊरुवर्वां अभितः" २,१३,७, "ऊर्वान् महतः" भा॰तत्तुल्ये ५विस्तृते च "महश्चिदग्न एनसो अभीक ऊर्वात् ४,१२,५, "ऊर्वात् विस्तृतात्" भा॰ ।

ऊर्वङ्ग न॰ऊरुरिव अङ्गम् यस्य । छत्रिकायाम् शिलीन्ध्रे हारा॰

ऊर्वशी स्त्री ऊरुं नारायणोरुं कारणत्वेनाश्नुते अश—अच् ६त॰गौरा॰ङीष् । ऊर्वश्याम् । पृ॰ अस्य दन्त्यसवत्त्वमपि ।

ऊर्वष्ठीव न॰ऊरू च अष्ठीवन्तौ च समा॰ द्वन्द्वः नि॰ । ऊर्वोरष्ठीवतोश्च समाहारे

ऊर्वी स्त्री ऊरु मध्यस्थत्वेनास्त्यस्य अर्श॰अच् स्वायम्भुववत् न गुणः गौरा॰ङीष् । ऊरुमध्यस्थाने "ऊरुमध्ये ऊर्वी नाम तत्र शोणितक्षयात् सक्थिशोषः "ऊर्व्या ऊर्द्धमधोवङ्क्षणसन्धेरुरुमूले लोहिताख्यमिति" लोहिताख्यापि जानुर्वी कूर्चः शिटकूर्परा" इति च सुश्रु॰ ।

ऊर्व्य पु॰ऊर्वे वाडवानले भवः यत् । अधिष्ठातृतया वाडवानलस्थिते रुद्रे "नम ऊर्व्याय च सूर्व्याय च" यजु॰१६,४,

ऊर्षा स्त्री उर—स नि॰ नेट् । देवताड़कणे शब्दच॰ ।

ऊलुपिन् पु॰उलुपिन्+पृ॰दीर्घः । १जलजन्तुभेदे २मत्स्यभेदे च

ऊलूक पुंस्त्री॰ उल-ऊकच् दीर्घश्च । पेचके स्त्रियां ङीप् ।

ऊष पु॰ रुजायाम् भ्वा॰पर॰सक॰सेट् । ऊषति औषीत्

ऊषाम् बभूव आस चकार । ऊषित: ऊषः ऊषणः ।

ऊष पु० ऊष–रुजायां क । १क्षारे, २कर्णरन्ध्रे, ३चन्द्र-नाद्रौ च । "कौषेयाविकयोरूषैः" मनुः । "सोषैरुदकगो-मूत्रैः शुध्यत्याविककौषिकम्" या० । तत्र चन्दनाद्रेः विरहितापकत्वात् कर्णच्छिद्रस्य अल्पजन्त्वादिप्रवेशेन उद्वेग-हेतुत्वात् क्षारमृत्तिकाया मलापहारकत्वात् तथात्वम् इति भेदः । ऊषति अन्धकारं पेचकः वा । ४प्रभाते ५रेतसि न० । तस्य च क्षारवत्तीव्रत्वात् उष्णत्वाच्च तथात्वम् । यथा च रेतस ऊषत्वम् तथाह "रेतो वा ऊषाः प्रजननं तदेनं प्रजनन आभजत्येतज्ज वै पितरः प्रजननस्याभक्ता भवन्ति यदेषां प्रजाभवति" शत० ब्रा० १२,८,१,१४ । ५क्षारमृत्तिकायां स्त्री [शब्दच० ।

ऊषक न० ऊषति अन्धकारं पेचकं वा ऊष–ण्वुल । प्रत्यूषे

ऊषण न० ऊष–ल्यु । १मरिचे, २पिप्पलीमूले, ३शुण्ठ्याञ्च । (चिता) ४चित्रके पु० । ५पिप्पल्यां ६चव्ये च(चइ)स्त्री । मरीच्यादीनां कटुत्वेन जिह्वोद्वेजकतया तथात्वम् । त्र्यूषणं त्रिकटु शुण्ठी पिप्पली मरिचं च यथाह "विश्वो-पकुल्या मरिचं त्र्यूषं त्रिकटु कथ्यते । कटुत्रिकं त्रिकटुकं त्र्यूषणं व्योषमुच्यते । त्र्यूषणं दीपनं हन्ति श्वासकास-त्वगामयान् । गुल्ममेहं च त्वक्स्थौल्यं मेदसा सह पीन-सान्" भावप्र० । त्र्यूषणं सकणामूलं कथितं चतुरूषणकम् । व्योषस्यैव गुणाः प्रोक्ता अधिकं चतुरूषणे" भा० प्र० । षडूषणम् । "पिप्पली पिप्पलीमूलम् चव्या चित्रकनागरैः । पञ्चभिः कोलमात्रञ्च पञ्चकोलम् तदुच्यते । पञ्चकोलं समरिचं षडूषणमिहेष्यते" भावप्रकाशः ।

ऊषर त्रि० ऊष+मत्वर्थीयो रः, ऊषं क्षारमृत्तिकां राति ददाति कः वा । क्षारमृत्तिकायुक्ते देशे यत्र उप्तं बीजं न प्ररोहति । "अनूषरमविवादिष्णु भूमि" आश्व०गृ० २, ७,२ । आधानाङ्गोषरसृदुपहरणम् शत०ब्रा० २,१,१,६ । उक्तम् यथा "अथोषान् सम्भरति ।"असौ ह वै द्यौरस्यै पृथिव्या एतान् पशून् प्रददौ तस्मात् पशव्यमूषरमित्याह" । "वर्षुकस्य किमपः कृतोन्नतेरम्बुदस्य परिहार्य्यमूषरम्" माघः। "तत्र विद्या न वप्तव्या शुभं बीजमिवोषरे" मनुः "नचोषरां न निर्दग्धां महीं दद्यात् कदाचन" भा० अनु० २२४ अ०।

ऊषरज न० ऊषराज्जायते जन–ड । (पाङ्गा) लवणभेदे । तद्गुणादि सुश्रु० "ऊषसूतं बालुकैलं शैलं मूलाकरोद्भवम्" लवणं विभज्य "लवणं कटुकं छेदि विहितं पटु चोच्यते" सुश्रु० ।

ऊषवत् त्रि० ऊष–मतुप् मस्य वः । ऊषरस्थाने । स्त्रियां ङीप्

ऊषा स्त्री बाणराजसुतायाम् उषाशब्दे तत्कथोक्ता ।

ऊष्म पु० ऊष–मक् । १शीतविरोधिनि स्पर्शे । अर्श–अच् । २तद्वति त्रि० । ३निदाघकाले अमरः ।

ऊष्मण त्रि० पामादि० अस्त्यर्थे न । ऊष्मयुक्ते मतुप् मस्य वः ऊष्मवत् तदर्थे त्रि० स्त्रियां ङीप् ।

ऊष्मण्य त्रि० ऊष्मा निवारणीयत्वेनास्त्यस्य यत् । ऊष्मनिवारणार्हे "ऊष्मण्या पिधानां चरूणामङ्काः" ऋ० १,१६२, १३ । "ऊष्मण्य ऊष्मनिवारणार्हाणि पात्राणि" भा० ।

ऊष्मन् पु० ऊष–मनिन् । १ग्रीष्मे २तेजोद्रव्यस्य सूक्ष्मावयवे (भाप) "भुवा सहोष्माणममुञ्चदूर्द्ध्वगम्" कुमा० "यथाग्निर्धूम उदयत एवमेषामूष्मोदयते" शत०ब्रा० १, ६,२,१,५ । व्याकरणोक्तेषु शोष्मवायुनोच्चार्य्यमाणेषु शषसहरूपेषु वर्णेषु । "स्वराणामूष्मणाञ्चैव विवृतं करणं मतम्" शिक्षा । "शष-सहा ऊष्माणः" सि० कौ० । "सर्वे स्वरा घोषवन्तो बलवन्तो वक्तव्याः इन्द्रे बलं ददानीति । सर्व्व ऊष्माणोऽग्रस्ता अनिरस्ता विवृता वक्तव्याः प्रजापतेरात्मानं परिददानीति" छा० उ० । "सर्व्व ऊष्माणोऽग्रस्ता अन्तरप्रवेशिता अनिरस्ता अबहिराक्षिप्ता विवृता विवृतप्रयत्नोच्चारिताः प्रजापतेरात्मानं परिददानि प्रय-च्छामि" शा०भा० । "अथ यद्येनमूष्मसूपालभेत प्रजापतेः शरणोऽभूवं स त्वा प्रतिपेक्ष्यतीत्येनं ब्रूयात्" छा०उ० । "स्पर्शस्तस्याभवज्जीवः स्वरो देह उदाहृतः । ऊष्माणमि-न्द्रियाण्याहुरन्तस्था बलमात्मनः । स्वराः सप्त विहारेण भवन्ति स्म प्रजापतेः" भाग० ३,१२,३०, ऊष्माणं शषसह इति चतुष्टयम् अन्तःस्था यरलवाः सप्त स्वराः षड्जादयः विहारेण क्रीड़या" श्रीधरः । "खे खानि वायौ निश्वासां स्तेजःसूष्माणमात्मवान् । अप्स्वसृक्श्लेष्मपूयानि क्षितौ शेषं यथोद्भवम्" भाग० ७,१२,२४, । अत्र तेज ऊष्माण मिति स्वकारणे लयाभिधानात् तस्य तेजःकार्य्यता गम्यते । श्रुतेश्च तस्य तेजःकार्य्यत्वदुक्तं तच्च उष्णशब्दे दर्शितम् । देहस्योष्मा च ब्रह्माग्निस्थ कौक्षेयानलोपाधिकजीवसंयोगेनैव भवति यथोक्तं छा० उ० भाष्ययोः । "अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्व्वतः पृष्ठेषु अनुत्तमेषूत्तमेषु लोकेष्विदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योतिस्तस्यैषा दृष्टिः विजानाति" उप० । "इदं वावेदमेव तद्यदिदमस्मिन् पुरुषेऽन्तर्मध्ये ज्योतिः चक्षुःश्रोत्रग्राह्येण लिङ्गेनोष्णि-म्ना शब्देन चावगम्यते । यत्त्वचा स्पर्शरूपेण गृह्यते तच्चक्षुषैव । दृढ़प्रतीतिकरत्वात्त्वचोऽविनाभूतत्वाच्च रूप-

स्पर्शयोः । कथं पुनस्तस्य ज्योतिषो लिङ्गं त्वग्दृष्टिगोचरत्वमापद्यते? इत्याह यत्र यस्मिन् काले एतदिति क्रियाविशेषणं अस्मिन् शरीरे हस्तेनालभ्य संस्पर्शेनोष्णिमानं रूपसहभाविनमुष्णस्पर्शभावं विजानाति स ह्युष्णिमा नामरूपव्याकरणाय देहमनुप्रविष्टस्य चैतन्यात्मज्योतिषो लिङ्गमव्यभिचारात्। न हि जीवन्तमात्मानमूष्णिमा व्यभिचरति।"उष्ण एव जीविष्यन् शीतो मरिष्यन्निति" हि विज्ञायते। मरणकाले च "तेजः परस्यां देवतायामिति" परेणाविभागत्वोपगमादतोऽसाधारणं लिङ्गमौष्ण्यमग्नेरिव धूमः। अतस्तस्य परस्यैषा दृष्टिः साक्षादिव दर्शनं दर्शनोपाय इत्यर्थः" ।

एतद्वाक्यञ्च कौक्षेयानलोपाधिकजीवाभिन्नब्रह्मपरं तस्यैव ज्योतिःशब्दाभिधेयत्वेन तत्सम्पर्कादेव देहस्यौष्ण्यसम्भवः तदेतत् शा० सू० भाष्ययोः समर्थितं यथा "ज्योतिश्चरणाभिधानात्" शा० सू० "इदमामनन्ति अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योतिरिति" तत्र संशयः किमिह ज्योतिःशब्देनादित्यादिकं ज्योतिरभिधीयते? किं वा पर आत्मेति?। अर्थान्तरविषयस्यापि शब्दस्य तल्लिङ्गाद्ब्रह्मविषयत्वमुक्तम् इह तल्लिङ्गमेवास्ति नास्ति वेति विचार्यते किन्तावत् प्राप्तं आदित्यादिकमेव ज्योतिःशब्देन परिगृह्यते इति। कुत? प्रसिद्धेः तमो ज्योतिरिति ह्येमौ शब्दौ परस्परप्रतिद्वन्द्विविषयौ प्रसिद्धौ। चक्षुर्वृत्तेर्निरोधकं शार्वरादिकन्तम उच्यते। तस्या एवानुग्राहकमादित्यादिकं ज्योतिः। तथा दीप्यते इतीयमपि श्रुतिरादित्यादिविषया प्रसिद्धा न हि रूपादिहीनं ब्रह्म दीप्यत इति मुख्यां श्रुतिमर्हति। किञ्च द्युमर्यादत्वश्रुतेश्च। न हि चराचरवीजस्य ब्रह्मणः सर्वात्मकस्य द्यौर्मर्यादा युक्ता कार्यस्य तु ज्योतिषः परिच्छिन्नस्य द्यौर्मर्यादा स्यात् 'परो दिवो ज्योतिरिति" च ब्राह्मणम् ननु कार्यस्यापि ज्योतिषः सर्व्वत्र गम्यमानत्वात् मर्यादावत्त्वमसमञ्जसं अस्तु तर्ह्यत्रिवृत्कृतन्तेजः प्रथमजम्। न अत्रिवृत्कृतस्य तेजसः प्रयोजनाभावादिति। इदमेव प्रयोजनं यदुपास्यत्वमिति चेन्न प्रयोजनान्तरप्रयुक्तस्यैवादित्यादेरुपास्यत्वदर्शनात्। "तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति" चाविशेषश्रुतेः। नचात्रिवृत्कृतस्यापि तेजसो द्युमर्यादत्वं प्रसिद्धम्। अस्तु तर्हि त्रिवृत्कृतमेव तेजो ज्योतिःशब्दम्। नन्वक्तमर्वागपि दिवो गम्यतेऽग्न्यादिकं ज्योतिरिति, नैष दोषः सर्वत्रापि गम्यमानस्य ज्योतिषः परो दिव इत्युपासनार्थः प्रदेशविशेषपरिग्रहो न विरुध्यते न तु निःप्रदेशस्य ब्रह्मणः प्रदेशविशेषकल्पनाभागिनी। सर्व्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विति चाधारबहुत्वश्रुतिः कार्ये ज्योतिष्युपपद्यतेतराम्। "इदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योतिरिति"च कौक्षेये ज्योतिषि परं ज्योतिरध्यस्यमानं दृश्यते सारूप्यनिमित्ताश्चाध्यासा भवन्ति यथा "तस्य भूरिति शिरः एकं शिर एकमेतदक्षरमिति" कौक्षेयस्य तु ज्योतिषः प्रसिद्धमब्रह्मत्वं तस्यैषा दृष्टिस्तस्यैषा श्रुतिरिति चौष्ण्यघोषविशिष्टत्वश्रवणात् "तदेतद्दृष्टञ्च श्रुतञ्चेत्युपासीतेति"च श्रुतेः। "चक्षुष्यः श्रुतो भवतीति य एवं वेदेति" चाल्पफलश्रवणादब्रह्मत्वं महते हि फलाय ब्रह्मोपासनमिष्यते। नचान्यदपि किञ्चित् स्ववाक्ये प्राणाकाशवत् ज्योतिषोऽस्ति ब्रह्मलिङ्गम्। न च पूर्वस्मिन्नपि वाक्ये ब्रह्म निर्दिष्टमस्ति। "गायत्री वा इदं सर्वं भूतमिति" छन्दोनिर्देशात्। अथापि कथञ्चित् पूर्व्वस्मिन् वाक्ये ब्रह्म निर्दिष्टं स्यात् एवमपि न तस्येह प्रत्यभिज्ञानमस्ति। तत्र हि त्रिपादस्यामृतं दिवीति द्यौरधिकरणत्वेन श्रूयते। अत्र पुनः परो दिवो ज्योतिरिति द्यौर्मर्यादात्वेन। तस्मात् प्राकृतं ज्योतिरिह ग्राह्यमित्येवं प्राप्ते ब्रूमः। ज्योतिरिह ब्रह्म ग्राह्यं कुतः? चरणाभिधानात् पादाभिधानादित्यर्थः। पूर्व्वस्मिन् हि वाक्ये चतुष्पाद् ब्रह्म निर्दिष्टं "तावानस्य महिमा ततो ज्यायांश्च पुरुषः पादोऽस्य सर्वाभूतानि त्रिपादस्यामृतं दिवि" इत्यनेन मन्त्रेण। तत्र यत् चतुष्पदो ब्रह्मणः त्रिपादमृतं द्युसम्बन्धिरूपं निर्दिष्टं तदेवेह द्युसम्बन्धान्निर्दिष्टमिति प्रत्यभिज्ञायते तत् परित्यज्य प्राकृतं ज्योतिः कल्पयतः प्रकृतहानाप्रकृतप्रक्रिये प्रसज्येतायाम्। न केवलं ज्योतिर्वाक्य एव ब्रह्मानुवृत्तिः परस्यामपि हि शाण्डिल्यविद्यायामनुवर्त्तिष्यते ब्रह्म। तस्मादिह ज्योतिरिति ब्रह्म प्रतिपत्तव्यम्। यत्तूक्तं ज्योतिर्दीप्यते इति चैतौ शब्दौ कार्ये ज्योतिषि प्रसिद्धाविति, नायन्दोषः प्रकरणाद्ब्रह्मावगमे सत्यनयोः शब्दयोरविशेषकत्वात् दीप्यमानकार्यज्योतिरुपलक्षिते ब्रह्मण्यपि प्रयोगसम्भवात् "येन सूर्यस्तपति तेजसेद्धः" इति च मन्त्रवर्णात्। यद्वा नायं ज्योतिःशब्दश्चक्षुर्वृत्तेरेवानुग्राहके तेजसि वर्त्तते। अन्यत्रापि प्रयोगदर्शनात् "वाचैवायं ज्योतिषास्ते" "मनो ज्योतिर्जुषतामिति" च। तस्माद्यद्यत्कस्य चिदवभासकन्तत्

ज्योतिःशब्देनाभिधीयते। तथा सति ब्रह्मणोऽपि चैतन्यस्वरूपस्य समस्तजगदवभासहेतुत्वादुपपन्नो ज्योतिःशब्दः "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्व्वमिदं विभाति"। "तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम्" इत्यादिश्रुतिभ्यश्च। यदप्युक्तं द्युमर्य्यादत्वं सर्व्वगतस्य ब्रह्मणो नोपपद्यते इति। अत्रोच्यते सर्व्वगतस्यापि ब्रह्मण उपासनार्थः प्रदेशविशेषपरिग्रहो न विरुध्यते। ननूक्तं निःप्रदेशस्य ब्रह्मणः प्रदेशविशेषकल्पना नोपपद्यत इति। नायं दोषः निष्प्रदेशस्यापि ब्रह्मण उपाधिविशेषसम्बन्धात् प्रदेशविशेषकल्पनोपपत्तेः। तथा हि आदित्ये चक्षुषि हृदय इति प्रदेशविशेषसम्बन्धीनि ब्रह्मण उपासनानि श्रूयन्ते। एतेन "विश्वतः पृष्ठेष्वित्याधारबहुत्वमुपपादितम्। यदप्येतदुक्तं औष्ण्यघोषाभ्यामनुमिते कौक्षेये कार्य्ये ज्योतिष्यध्यस्यमानत्वात् परमपि दिवः कार्य्यं ज्योतिरेवेति। तदप्ययुक्तं परस्यापि ब्रह्मणो नामादिप्रतीकत्ववत् कौक्षेयज्योतिःप्रतीकत्वोपपत्तेः। "दृष्टञ्च श्रुतञ्चेत्युपासीतेति" तु प्रतीकद्वारकं दृष्टत्वं श्रुतत्वञ्च भविष्यति। यदप्यल्पफलश्रवणान्न ब्रह्मेति तदप्यनुपपन्नम्। न हि इयते फलाय ब्रह्माश्रयणीयमियते नेति नियमे हेतुरस्ति। यत्र हि निरस्तसर्व्वविशेषसम्बन्धं परं ब्रह्मात्मत्वेनोपदिश्यते तत्रैकरूपमेव फलं मोक्ष इत्यवगम्यते यत्र तु गुणविशेषसम्बन्धं प्रतीकविशेषसम्बन्धं वा ब्रह्मोपदिश्यते तत्र संसारगोचराण्येवोच्चावचानि फलानि दृश्यन्ते "अन्नादो वसुदानो विन्दते वसु य एवं वेद" इत्याद्यासु श्रुतिषु। यद्यपि न स्ववाक्ये किञ्चित् ज्योतिषो ब्रह्मलिङ्गमस्ति तथापि पूर्व्वस्मिन् वाक्ये दृश्यमानं ग्रहीतव्यं भवति। तदुक्तं सूत्रकारेण ज्योतिश्चरणाभिधानादिति। कथं पुनर्वाक्यान्तरगतेन ब्रह्मसन्निधानेन ज्योतिःश्रुतिः स्वविषयात् प्रच्याव्य शक्या व्यावर्त्तयितुम्। नैष दोषः। "यदतः परो दिवो ज्योतिरिति" प्रथमतरपठितेन यच्छब्देन सर्व्वनाम्ना द्युसम्बन्धात् प्रत्यभिज्ञायमाने पूर्व्ववाक्यनिर्दिष्टे ब्रह्मणि स्वसामर्थ्येन परामृष्टे सत्यर्थात् ज्योतिःशब्दस्यापि तद्विषयत्वोपपत्तेः। तस्मादिह ज्योतिरिति ब्रह्म प्रतिपत्तव्यम्" भा०। श्रुत्यन्तरे तु कौक्षेयाग्निसंबन्धात् देहस्यौष्ण्यमुक्तम्। तत्रापि कौक्षेयाग्नेरपि जीवस्थितिनियतत्वात् जीवाधीनत्वं कल्प्यमित्याकरे प्रपञ्चः

ऊह वितर्के भ्वादि० आत्म० सक० सेट्। ऊहते औहिष्ट। ऊहाञ्चभूव आस चक्रे। ऊहितः ऊहमानः ऊहितुम् ऊहः। "औहिष्ट तान् वीतविरुद्धबुद्धीन्" भट्टिः। कर्म्मणि ऊह्यते औहि णिच्। ऊहयति ते औजिहत् त। "रूपेण तावौजिहतां नृसिंहौ" भट्टिः अस्य ऊहशब्दे वक्ष्यमाणेऽर्थेऽपि वृत्तिः। परस्मैपदित्वमप्यस्य ऊहति, इत्युहेत्द्विदैवतं दैविकेषु" कात्या० १०१,२,१,१७, यादौ उपसर्गात् परस्यादेर्ह्रस्वः। समुह्यते

अति—एकदेशस्थितस्य तद्विपरीतदेशप्रेरणे "द्रोणकलशमत्यूह्य" कात्या० ६,२,१६। "अत्युह्य प्राञ्चमेव प्रतीच्यां प्रेर्य्य" कर्कः।

अधि+अञ्जने। "अग्निमग्नीत् संमृड्ढीति यथाधुरमध्यूहेदेवं तद्यत् पूर्व्वमाघार माघार यत्यध्युह्य हि धुरं युञ्जन्ति" शत० ब्रा० १,४,४,१२,

अप+निरसने दूरीकरणे। "अपोह्य बर्हींषि" कात्या० २,२,१७, "एतैर्व्रतैरपोहेत पापं स्तेयकृतं द्विजः" मनुः। "सर्वान् रसानपोहेत कृतान्नं च तिलैः सह" मनुः प्रतिकूलतर्केण प्रकृततर्कापनयने अपोहः।

अप+वि+निवारणे "व्यपोहत शरांस्तस्य सर्वानेव धनञ्जयः" भा० आ० ४७०। [२८। "अभ्यूहति आच्छादयति" भा०।

अभि+आच्छादने। "अथाङ्गारैरभ्यूहति" शत० ब्रा० १,२,४,

उत्+उत्कर्षणे। "रशनामुदुह्य प्राच्याम्" कात्या० १,६,१। "उदुह्य उत्कृष्य" कर्कः निरसने च। "तेन प्राचोऽङ्गारानुदूहति" शत० ब्रा० १,२,१,४। [१,२,५,१७।

प्रति+उत्+प्रक्षेपणे "दक्षिणतः पुरीषं प्रत्यूहेत" शत० ब्रा०

वि+उत्+अन्ते विवर्द्धने। "चतुरङ्गुलमुभयतो बाह्यतो व्युदूहति" शत० ब्रा० १०२,१,४। व्युदूहति अन्ते विवर्द्धयति" भा०

उप+अधस्तात् प्रवेशने। "पश्चाच्छम्यामुपोहति" कात्या० २,५,४। "उपोहति अधस्तात् प्रवेशयति" कर्कः।

निर्+निष्काश्य ग्रहणे पृथक्करणे च। गार्हपत्यादुष्णं भस्म निरुह्य" शत० ब्रा० १२,४,२,२। "शिरः श्रियमस्य निरौहत्" शत० ब्रा० १०,५,४। वपान्तेऽनपेक्षमध्वर्युः प्रेष्यति निरूहैतं गर्भमिति" "निरुह्यमाणमभिमन्त्रयीत" कात्या० २५,१०,४,५। निरुह्यमाणं पृथक्क्रियमाणम् वेददी० निरूहणम्

परि+परितः खातपूरणे। "अरत्निमात्रे संतरे शोपवधाति-पर्य्यूहति च" कात्या० ८,५,२५। पर्य्यूहति पांशुभिरन्तरालं परितः पूरयति" कर्कः। पर्य्यूहणम्।

प्र+देशान्तरनयने। "प्रोह्य द्रोणकलशम्" कात्या० ९,५,१४। "प्रोह्य प्रेर्य्य"कर्कः। पातने च "कृष्णाजिने प्रोहति" कात्या० २,५,७। प्र+ऊहस्यादेर्वृद्धिः प्रौहः।

प्रति+उपरिस्थापने। "दीक्षितोरौ दक्षिणे प्रत्यूह्य वासः" कात्या० ७,८,२२। "प्रत्यूह्य उपरि स्थापयित्वा" वेददी० निवारणे च। "प्रत्यौहतमश्विनो मृत्युमस्मात्"यजु० २७, "प्रत्यौहतं न्यवर्त्तयताम्" वेददी०।

वि+विपरीततया प्रेरणे "जुहूपभृतौ व्यूहति" कात्या० ३,५,१७। सैन्यानां सन्निवेशविशेषेण स्थापने च। व्यूहः। "प्रहर्षयेद्बलं व्यूह्य तांश्च सम्यक् परीक्षयेत्" मनुः। समवेतभवने। "योर्वैम्रियते कृतशोऽस्य व्युह्यन्ते" शत० ब्रा० ८,७,१२,११,

प्रति-वि प्रतिरूपव्यूहकरणे। "बार्हस्पत्यविधिं कृत्वा प्रतिव्यूह्य निशाचरम्" भा० व० २८४ अ०। विरोधाचरणे च प्रत्यूहः

सम्- समवेतभवने संहनने सम्यक्प्रापणे च। "यद्गुगव्यन्ता द्वा जना स्वर्यन्ता समूहसि" ऋ० १,१२१,२, समूहसि प्रापयसि भा०। सम्यक्पूरणे "अङ्गारैरभि समूहति" शत० ब्रा० ४,५,२,१८, समूहः

उप+सम् समीपे सङ्कोचने "पक्षाउपसमूहन्ते" शत० ब्रा० १०,२,१,१, "समूहन्ते मध्यभागसमीपे सङ्कोचयन्ति" भा०।

परि-सम्-समन्तात् परिमार्जने "वेदिं परिसमुह्य" कात्या० २,६,१२, "परिसमुह्य सम्मार्ज्य" कर्कः। "अग्निं प्रतिष्ठाप्यान्वाधाय परिसमुह्य" आश्व० गृ० १,३,१, "परिसमूहनं नाम चाग्नेः समन्तात् परिमार्जनम्" नारा० वृ०।

समूढ़व्यूढ़निरूढादिकमस्यैव रूपमाहुः केचित्। अस्य-सेट्कत्वात् ऊहित इत्यादय एव स्युः। अतस्तानि उपसृष्टस्य वहतेरेव रूपाणीत्यन्ये। अस्यैव आङ्पूर्व्वकस्य ओहते इति रूपम्। न तु केवलस्य, दीर्घोपधत्वेन गुणाप्रसक्तेः।

ऊह पु० ऊह-घञ्। १वितर्के आगमाविरोधिना तर्केण आगमार्थस्य संशयपूर्व्वपक्षनिवारणपूर्व्वकोत्तरपक्षव्यवस्थापनेन निर्णयरूपे २परीक्षणे, ३अनन्वितार्थकविभक्तिलिङ्गत्यागपूर्व्वके अन्वययोग्यविभक्त्यादिकल्पने, यथा पार्वणे सौम्यास इति बहुवचनमन्वितमपि एकोद्दिष्टे अनन्वितत्वात् सौम्य इत्येकवचनान्ततया कल्पनम्। ४पदान्तरेणाकाङ्क्षापूरणार्थे अध्याहारे च। "ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः। दानञ्च सिद्धयोऽष्टौ सिद्धेः पूर्व्वोऽङ्कुशस्त्रिविधः" सा० का० उक्ते ताराख्ये ५सिद्धिभेदे "ऊहस्तर्कः आगमाविरोधिन्यायेनागमार्थपरीक्षणम्। संशयपूर्व्वपक्षनिराकरणेनोत्तरपक्षव्यवस्थापनं तदिदं मननमाचक्षते आगमिनः सा तृतीया सिद्धिस्तारमुच्यते" सा० कौ० "रक्षोहागमलघ्वसन्देहाः प्रयोजनम्" का० वार्त्ति०। "ऊहः खल्वपि न सर्व्वैर्लिङ्गैर्नैव सर्व्वाभिर्विभक्तिभिर्वेदे मन्त्रा निगदितास्ते चावश्यं यज्ञगतेन पुरुषेण यथायथं विपरिणमयितव्याः तान्नावैयाकरणः शक्नोति विपरिणमयितुम् तस्मादध्येयं व्याकरणम्" महाभा०। "ऊहः खल्वपीति। इह यस्मिन् यागे इतिकर्त्तव्यतोपदिष्टा यागान्तरेणोपजीव्यते सा प्रकृतिः येन चोपजीव्यते सा विकृतिः प्रकृतिवद्विकृतिः कर्त्तव्येति मीमांसकैर्व्यवस्थापिते न्याये प्रकृतिप्रत्ययादीनामूहं वैयाकरणस्सम्यग्विजानाति। तत्र अग्नेर्मन्त्रोऽस्ति "अग्नये त्वा जुष्टन्निर्वपामीति" तत्र "सौर्य्यं चरुं निर्वपेत् ब्रह्मवर्चसकाम" इति सौर्य्ये चरौ मन्त्र ऊह्यते सूर्य्याय त्वा जुष्टं निर्वपामीति। विस्तरेण भर्त्तृहरिणा प्रदर्शित ऊहः" कै०। "ऊहः खल्वपीत्यस्य प्रयोजनमिति शेषः। ननु यत्र प्रकरणे ये मन्त्राः पठितास्तत्र तेषां तथैव प्रयोग इष्ट इति नोहेन प्रयोजनमित्याशङ्क्य प्रकृतावूहाभावेऽपि विकृतावूह इति दर्शयितुम् प्रकृतिशब्दार्थमाह। इहेति। यस्मिन्नाग्नेयादौ। यागान्तरेण सौर्य्यादिना। प्रकृतिविकृत्यवगमस्तु द्विदैवत्यत्वैकदेवत्यत्वादिसाम्येन बोध्यः। अन्यत्र पठितमन्त्राणाङ्कथमन्यत्र गमनमत आह प्रकृतिवदिति। यथा सोपकारा प्रकृतिरनुष्ठीयते तथा विकृतिरपीति तदर्थः तदनेनोपकारातिदेशे तत् पृष्ठभावेन पदार्था अप्यतिदिश्यन्ते इतिकर्त्तव्यतायामावनायास्साकाङ्क्षत्वादेतन्मूलकमेव प्रकृतिवदितीति मीमांसकसरणिः। यागान्तर्गताश्च मन्त्राः। तत्र अग्निसम्बन्धिनिर्वापप्रकाशकमन्त्रस्याग्निपदस्य सूर्य्यसम्बन्धिनिर्वापप्रकाशनासमर्थत्वात्तदपहाय तत्स्थाने सूर्य्यायेत्यूह्यमित्याह। तत्राग्नेरिति। मन्त्र ऊह्यत इति। यद्यप्यूहे न मन्त्रत्वं तथाप्येकदेशस्योहेऽपि अनेकपदसमुदाये मन्त्रत्वप्रत्यभिज्ञानात्तद्घटिते समुदाये मन्त्रत्वव्यवहारः, कर्म्मण स्माङ्गत्वञ्चेति बोध्यम्। सोऽयम्प्रकृत्यूहः अन्येऽप्यूह्याः। ऊहस्य हि आर्त्विज्यलाभेन द्रव्यप्राप्तिद्वारा ऐहिकसुखसिद्धिः फलमिति बोध्यम्। भाष्ये लिङ्गपदञ्च प्रकृत्यादेरुपलक्षणम्। यथायथमिति। अर्थप्रकाशनसामर्थ्यानतिलङ्घनेनेत्यर्थः" उद्योतः।

तादृशोहभेदस्तु अधिकरणमालादौ दृश्यः । द्रव्यप्रतिनिधौ तु नोहः। "तैलं प्रतिनिधिं कुर्यात्घृतार्थे याज्ञिको- यदि । प्रकृत्यैव तदा होता ब्रूयात् घृतवतीमिति" मीमां॰ कात्यायनसूत्रादौ प्रतिनिधिविषये ऊहाभावोदर्शितो यथा

"अथेदं चिन्त्यते विहितद्रव्यस्याभावे द्रव्यान्तरे प्रतिनिधित्वेनोपात्ते छागाभावे मेषरूपे अनुवाचनप्रैषादौ किमूहं कृत्वा प्रतिनिहितद्रव्यशब्दस्य प्रयोगः कार्य्यः "अग्नीषोमाभ्यां मेषस्य वपाया" इत्येवम् उत विहितद्रव्य शब्दस्यैव अग्नीषोमाभ्यां छागस्येत्येवमेवेति । तत्र मन्त्रेण द्रव्यमभिधेयम् न चानूहितः प्रतिनिहितं द्रव्यं शक्नोत्यभिधातुम् तस्मादूहित्वा प्रतिनिहितद्रव्यवाचिशब्दस्य प्रयोगे प्राप्त आह" "शब्देऽविप्रतिपत्तिः" कात्या॰ १, ४, ९, "प्रतिनिधावुपात्तेऽपि विहितद्रव्यवाचिनि- शब्दे अविप्रतिपत्तिरविपरिणामः अनूहो भवति अग्नीषोमाभ्यां छागस्य वपाया इत्यनूहितमेव मेषेऽपि प्रयोक्तव्यम् न तु मेषस्येत्येवं विपरिणतरूपमित्यर्थः कुतः ? प्रतिनिधिः श्रुतद्रव्यबुद्ध्या गृह्यते न तु द्रव्यान्तर बुद्ध्या अतश्छाग एवायमिति बुद्ध्या गृहीतत्वात्तच्छब्देनैवाभिधानम् । यद्यत्र मेषश्छागवत् साधनं भवेत्ततस्तत्- प्रकाशकम् मेषपदं प्रक्षिप्येत न त्वेवम्, किं तर्हि मेषगता ये छागांशास्त एवात्र साधनम् ते च छागगता इव मेषगता अपि छागशब्देनैव प्रकाशयितुं शक्यन्त इत्यनूहेनैव प्रयोगः । यत्र तु द्रव्यान्तरं वचनेन विधीयते यथा "सारस्वतीं मेषीमिति" "ऐन्द्रं मेषमिति" "ऐन्द्र औरभ्रः" इति तत्र द्रव्यान्तरबुद्धिर्भवति तत्र ऊहोऽपि भवति । नचात्रैवंविधं किमपि वचनमस्ति तस्मादवहूनामवयवानां सामान्याच्छ्रुतद्रव्यमेवेदमिति बुद्ध्या मेषादिद्रव्यस्य छागादिप्रतिनिधित्वेनोपादानम् । तेन श्रुतद्रव्यशब्देनैवाभिधानं युक्तमिति साधूक्तम् शब्देऽविप्रतिपत्तिरिति । यत्र तु वचनेन द्रव्यान्तरं विधीयते तत्र ऊहो भवतीत्युक्तम् तेन सोमाभावे पूतीकानभिषुणुयादिति पूतीकानां वाचनिकत्वादूहो भविष्यतीत्याशङ्क्याह" कर्कः "सोमेन जात्यभावात्" का॰ सू॰ १॰ "सोमेनेति तृतीयेकवचनम् । सोमाभावे पूतीकेषूपात्तेषु सोमशब्देनैव पूतीकानामभिधानं कर्त्तव्यम् । "अंशुरंशुष्टे देव ! सोम ! प्यायतामित्येवम् न तु पूतीकाशब्देन । अथ वा सोमे इति सप्तम्येकवचनम् नेनि निषेधः । सोमप्रतिनिधित्वेनोपात्तेषु अर्ज्जुनश्येनहृतपूतीकादिषु सोमे सोमशब्दे ऊहो न भवति कुतः जात्यभावात् जात्यन्तरबुद्ध्यभावात् नह्यत्र वचनेन द्रव्यान्तरं विधीयते किं तर्हि सोमाभावे यागस्यावश्यकर्त्तव्यत्वादनेकेषु दृष्टशेष्वीषत्सदृशेषु च प्राप्तेषु पूतीकादेर्नियमः क्रियते तेनैन्द्रमेषइतिवद् वाचनिक जात्यन्तराभावादतोऽप्यूहो न भवति" कर्कः ।

"छाग ! त्वं वलिरूपेणेत्यादिमन्त्रे च बहुपशुघाते न बहुत्वोहः । तदेतत्" ति॰त॰ "बहुपशुघातेऽपि मन्त्रे एकवचनान्त एव प्रयोज्यः न बहुवचनोहः । "नरं पञ्चत्वमागतम्" इत्यत्र नार्य्यां स्त्रीत्वोहाभाववत् अतएव सपत्नीकयजमानप्रयोगेऽपि "पत्नीं सन्नह्येति" मन्त्र एकवचनान्त एवेति । ऊहं प्रकृत्य "प्रकृतावपूर्व्वत्वात्" कात्यायनेनोहस्य प्रकृतौ प्रतिषेधात् । विकृतावेवोहः । "ऊहोऽपूर्व्वोत्प्रेक्षणमिति" जै॰ तल्लक्षणात् न चान्वयबाधःवैभक्तिकार्यापेक्षया प्राथमिकत्वेन बलवतः प्रातिपदिकार्थस्य समन्वितत्वेनाविरोधात् । एवञ्च प्रकृतौ नररूपबहुपशौ बहुवचनोहाभावात् छागादौ विकृतिभूतेऽपि न बहुवचनोहः किन्तु एकवचनमात्रमिति" वदता रघुनन्दनेन तथा समर्थितम् । संकल्पादिवाक्ये तु ऊह इति भेदः। ऋत्विगादिप्रयोगे च अस्मदादिपदघटिते "दातारोनोऽभिवर्द्धन्तामित्यादि" मन्त्रेऽपि नोहः तैस्तथा प्रयोगेऽपि यजमानगतानामेव तत्तत्फलानामवगम इत्याकरे प्रपञ्चः । तथाचासमवेतार्थस्य समन्वयाय मन्त्रे समवेतार्थकरणरूपमपूर्व्वस्योत्प्रेक्षणमूहः । ५आरोपे ६समूहने च । "इमे मनुष्या दृश्यन्ते ऊहापोहविशारदाः" भा॰ अनु॰ १४५ अ॰ "ऊहापोहाभ्यां तत्त्वावधारणम्" पातञ्ज॰ भा॰।

ऊहगान न॰ सामगानभेदे ऊहगीतिरप्यत्र स्त्री ।

ऊहा स्त्री ऊह अ स्त्रीत्वात् टाप् ।१अध्याहारे २ऊहशब्दार्थे

ऊहिनी स्त्री ऊह-णिनि । समवेतायाम् "अक्षात् परस्य तस्यादेर्ऋद्धिः अक्षौहिणी सेना ।

ऊह्य त्रि॰ ऊह-ण्यत् । १तर्कणीये २उद्भावनीये ३अध्याहार्य्ये ४मीमांसकोक्तोहविषये च। अनीयर् । ऊहनीय तदर्थे त्रि॰

ऊह्यगान न॰ सामगानभेदे ।

इति वाचस्पत्ये ऊकारादिशब्दार्थसङ्कलनम् ।

ऋ

ऋकारः स्वरवर्णभेदः मूर्द्धन्यः "ऋटुरषाणां मूर्द्धा" इत्युक्तेः। स तु उदात्तानुदात्तस्वरितभेदात् त्रिविधः। अनुनासिकाननुनासिकभेदात् प्रत्येकं द्विधेति षड्विधः। स च ह्रस्वः एकमात्राकालेनोच्चार्य्यत्वात्। तस्य च रक्तविद्युल्लताकारेण ध्येयतोक्ता। "रक्तविद्युल्लताकारमृकारं प्रणमाम्यहम्" काम०त०। तस्य च मातृकान्यासे वामनासिकायां न्यस्तता उक्ता तेन अभेदोपचारात् वामनासादिशब्दवाच्यता। स्वरूपपरत्वे ततः तकारकारप्रत्ययौ ऋत् ऋकारः तत्कालोच्चार्य्ये "तपरस्तत्कालस्यैव" पा० उक्तेः। व्याकरणशास्त्रे अनतुबन्धः ऋ इत्येतत् अष्टादशविधस्य ऋवर्णस्य, द्वादशविधस्य लृकारस्य संज्ञा भवति तेन "ऋ इति त्रिंशतां संज्ञा" इति सि०कौ०। अधिकं स्वरवर्णादिशब्दसमाप्तौ वक्ष्यते समानवर्णग्रहणद्योतनार्थम् वर्णशब्दोत्तरः प्रयुज्यते ऋवर्णः त्रिंशतां संज्ञा।

ऋ गतौ भ्वा०पर०सक०अनिट्। शिति ऋच्छादेशः। ऋच्छति आर्च्छत् आरत्–आर्षीत्। आर आरिथ अर्त्ता अर्य्यात् अरिष्यति। आरिष्यत्। ऋच्छन् ऋतः ऋतिः अर्त्तव्यः अरणीयः अर्य्यः यत् वैश्यस्वामिनोः अन्यत्र ण्यत् आर्य्यः। अर्त्ता आरो आरिवान् अर्त्तुम्। सङ्गमार्थत्वेनाकर्म्मकात् समपूर्व्वकात् ततः आत्म०। समृच्छते। समारत समार्त्त। "वारमानवरारोहा-वनमार सा"उद्भटः। ऋ–णिच् अर्पयति ते। सन् अरिरिषति समरिरिषते गत्यर्थत्वेऽपि कौटिल्ये यङ्। अरार्य्यते "किमभीररराय्यसे" भट्टिः। कर्म्मणि अर्य्यते। आरि।

ऋ गतौ प्रापणे च जुहो०पर०सक० अनिट्। लडादौ श्लोर्लुक्त्वेन शितूपरत्वाभावात् न ऋच्छादेशः। शत्थानपोस्तु तदादेशः। इयर्त्ति इयृतः इयृति। इयृयात्। इयर्त्तु इयृहि इयराणि। ऐयः ऐयृताम् ऐयरुः। आरत्-आर्षीत् सृसाहचर्य्यात् अङ्विधौ श्वादेरेव ग्रहणमित्यन्ये तन्मते आर्षीदित्येव। समारत समार्त्त इत्यन्ये आर इत्यादि भ्वादिवत्। शित्त्वात् इयृच्छन् समृच्छान इति भेदः। अयं वैदिक एवेति बहवः "बहुलं छन्दसीति"पा०सिद्धेः "अर्त्तिपिपर्त्त्योश्च"पा० इतीत्त्वविधानसामर्थ्यादयं भाषायामपि" सि०कौ०। "शुभ्र इयर्त्ति प्रध्वतो मे अद्रि"ऋ०१,१६५,४। "इयर्त्ति वाचमरितेव नावम्"२,४२,१। अनयोर्गत्यर्थत्वात् उपसर्गभेदेनार्थभेदस्तु इणधातुवत् स च तच्छब्दे उक्तः "अभैषुः कपयोऽन्वारत् कुम्भकर्णं मरुत्सुतः" "सीतां जिघांसु सौमित्रे राक्षसावारतां ध्रुवम्" भट्टिः। आ+ऋत आर्त्तः इष्टिः "तथार्त्तोऽपि क्रियां धर्म्याम्" भट्टिः "उदयर्षि भानुना" ऋ०१०,१४०,२,"समुद्रादूर्म्मिमुदियर्त्ति वेनः"१०,१२३, २, "यदा शसा निःशसा भिशसोपारिम जाग्रतो यत् स्वपन्तः" ऋ०१०,१६४,३, एवं यथायथमुपसर्गपूर्व्वस्य उदाहरणं द्रष्टव्यम्।

ऋ हिंसायां स्वा०पर०सक०अनिट्। ऋणोति। ऋणुयात ऋणोतु ऋणु आर्णत्। आर्षीत् लिङादौ भ्वादिवत् शतृ–ऋण्वन् क्त ऋणम् इतिभेदः "त्वेषस्ते धूम ऋण्वति" ऋ०६,२,६, "ऋणं देयमदेयञ्च येन यत्र यथा च यत्" याज्ञ० स्मृतिः। "अपद्वारा मतीनां प्रत्ना ऋण्वन्ति कारवः"ऋ०९'१०,६,ऋणोरक्षं न शचीभिः" ऋ०१,३०, १५, अस्य रिकारादित्वमित्यन्ये रिणोति इत्यादि।

ऋट अव्य० ऋ–क्विप् बा०न तुक्। १सम्बोधने २गर्हणे ३वाक्ये च मेदि० ४परिहासे वाक्यविकारे शब्दरत्ना० ५देवमातरि स्त्री।

ऋटकृछस् अव्य० ऋच्+शस्। ऋचम् ऋचमित्यर्थे "ऋग्वेदशब्दे चरणव्यूहभाष्यधृतब्राह्मणवाक्ये उदा० द्रष्टव्यम्।

ऋटक्ण त्रि० व्रश्च–क्त पृ०वलोपः। ह्रस्वे छिन्ने "वाचमेव तदाप्तां शान्तामृक्णवर्ही वहराविणीमृच्छन्ति" ऐत०।

ऋटक्थ न० ऋच्–थक्। १धने २स्वर्णे स्मृतिप्रसिद्धे ३दायरूपे धने च "ऋक्थग्राही ऋणं दाप्यः" याज्ञ०"स्वामी ऋक्थक्रयसंविभागपरिग्रहाधिगमेषु"गौत०तत्र "ऋक्थमप्रतिबन्धोदायः यथा पुत्राणां पौत्राणाञ्च पुत्रत्वेन पौत्रत्वेन च पितृधनं पितामहधनं च स्वं भवतीत्यप्रतिबन्धः"मिता० क्वचित् सप्रतिबन्धदायवाचिताऽपि "पुत्रहीनस्य ऋक्थिनः" इति याज्ञ०प्रयोगात् तथा च सम्बन्धनिमित्तस्वत्वास्पदीभूतं द्रव्यमृक्थम्। क्वचिद्धनमात्रेऽपि प्रयोग। ऋक्थं गृह्णाति णिनि ऐत०। ऋक्थग्राहिन् दायहरे त्रि० स्त्रियां ङीप्। "ऋक्थग्राही ऋणं दाप्यः" या० अण् उप०स०। ऋक्थग्राहोऽप्यत्र त्रि०स्त्रियां टाप् तद्धितास्यान्तस्यैव ङीप् सि०कौ०। ऋक्थ+अस्त्यर्थे इनि। ऋक्थिन् तद्ग्राहके"पुत्रहीनस्य ऋक्थिनः" याज्ञ०स्त्रियां ङीप्।

ऋटक्ष पु०स्त्री ऋष–स किच्च। १भल्लूके तज्जातिस्त्रियां संयोगोपधत्वात् न ङीप् किन्तु टाप्। २नक्षत्रे।

३मेषादिराशौ च न० ४भल्लूके वृक्षे (भेला) ५शोनाकवृक्षे (शोना)६पर्व्वतभेदे च पु०मेदि०। स च रैवतापरनामकः "ऋक्षोऽपि रैवताज्जज्ञे तस्य पर्व्वतमूर्द्धनि। ततो रैवत उत्पन्नः पर्वतः सागरान्तिके। नाम्ना रैवतको नाम भूमौ भूमिधरः स्मृतः" हरिवं०२२अ०।स च कुलाचलपर्व्वतः यथोक्तं सि० शि०। "माहेन्द्रशुक्तिमलयर्क्षकपारियात्राः सह्यः सविन्ध्य इह सप्त कुलाचलाख्याः" इति। ७नृपभेदयोः तत्रैकः "आजमीढपुत्रः। "धूमिन्या स तया देव्या त्वजमीढः समीयिवान्। ऋक्षं संजनयामास धूम्रवर्णं सुदर्शनम्। ऋक्षात् संवरणो जज्ञे कुरुः संवरणात्तथा" अपरो विदूरथस्य पुत्रः "विदूरथस्य दायाद ऋक्ष एव महारथः। ऋक्षस्य च द्वितीयस्य भीमसेनोऽभवन्नृपः" इति हरि०३२अ०। भल्लूकवारण्यपशुः जरायुजश्च। "जरायुजानां प्रवराः मानवाः पशवश्च ये। नानारूपधरा राजन्! एषां भेदाश्चतुर्द्दश। अरण्यवासिनः सप्त सप्तैषां ग्रामवासिनः। सिंहव्याघ्रा वराहाश्च महिषा वारणास्तथा। ऋक्षाश्च वानराश्चैव सप्तारण्याः स्मृता नृप।" भा०आ० तत्र प्रवरा इति विशेषणात् एतद्भिन्नानामारण्यत्वमस्त्येव तेनोष्ट्रस्याप्यारण्यत्वं सूच्यते उक्तम् तच्च उष्ट्रशब्दे उक्तम्। ८अरिहपुत्रे च "अरिहः खल्वाङ्गेयीमुपयेमे सुदेवां नाम तस्यां पुत्रमजीजनदृक्षम्" भा०आ०९५अ०। ९उत्तर दिशि स्त्री मेद०। यद्यपि नक्षत्रस्य सामान्यतो गगनस्थिततारामात्रवाचकता तथापि ज्योतिषे येषामुदयास्तज्ञापनं तेषामेव ऋक्षशब्देन व्यवहारः तानि च सप्तविंशतिः। अभिजिद्वेत्यष्टाविंशतिः। "अश्विनी भरणी चैव कृत्तिका रोहिणी तथा। मृगशीर्षस्तथा चार्द्रा पुनर्वसुकपुष्यकौ। अश्लेषा च मघा पूर्वफल्गुन्युत्तरफल्गुनी। हस्ता चित्रा तथा स्वाती विशाखा चानुराधिका। ज्येष्ठा मूलं तथाषाढ पूर्वोत्तरपदादिके। श्रवणा च धनिष्ठा च शतभिषगाद्यभाद्रिका। उत्तरादिभाद्रपदा रेवती भानि च क्रमात्" ज्योति०। अभिजित् अभिजिच्छब्दे उक्तम्। एतानि द्वादशधाविभक्तराशिचक्रघटकत्वात् प्राधान्यात् ऋक्षशब्देन व्यपदिश्यन्ते एतेषां स्वरूपप्रमाणाधिष्ठातृदेवताः नक्षत्रशब्दे ४९७पृ० श्रीपतिवाक्येनोक्ताः। अन्यान्यपि यानि उदयास्तभाञ्जि गगनमण्डले सन्ति तेषामपि गतिर्ज्यौतिषे आनीता तान्यपि ऋक्षपदवाच्यानि। ऋक्षकक्षाप्रमाणमुक्तं सि०शि०। "अभ्रेषुभाङ्कगजकुञ्जरगोऽश्वपक्षाः(२५९८८९८५० योजनानि) कक्षां रटन्ति नक्षत्रका भगणस्य चैताम्"। नक्षत्रकक्षाया भूमध्यादुच्छ्रितिमानम् "नागाश्वषड्गुणरसाग्निकुवेदसंख्यो(४१३६२६५८ योजनमितः) नक्षत्रमण्डलभवः श्रवणोनिरुक्तः" ज्यो० उक्तम्। "तेषामन्येषाञ्चोदयादिज्ञानाय" सि०शि०। ध्रुवकभागा उक्ता यथा "अष्टौ नखा गजगुणाः शशरास्त्रिषट्काः सप्ततवस्त्रिनव चाङ्कदिशोऽष्टकाष्ठाः। गोऽर्कास्तथाद्रिमनवः शरबाणचन्द्राः खात्यष्टयस्त्रिधृतयो नवनन्दचन्द्राः। अर्काश्विनो जिनयमा नव बाहुदस्राः कुद्व्यश्विनो जलधितत्त्वमिताश्च भागाः। षट्त्र्यश्विनश्च पवनोत्कृतयोऽष्टभानि खाङ्काश्विनो नखगुणा रसदन्तसंख्याः। सप्तामराः खमिति भध्रुवका निरुक्ता दृक्कर्मणा च नभवेन सहाश्विधिष्ण्यात्। ब्रह्माग्निभध्रुवलवा रदलिप्तिकोना मैत्रेन्द्रयोर्द्व्यधिपभस्य च सेषुलिप्ताः" शि०। "अष्टौ नखा इत्यादयोऽश्विन्यादीनां साभिजितां ध्रुवभागा वेदितव्याः। तत्रापि विशेषमाह। ब्रह्माग्निभध्रुवलवा इत्यादि। कृत्तिकारोहिणीनक्षत्रयोर्द्वात्रिंशत्कलोनाः। विशाखानुराधाज्येष्ठानां कलापञ्चकेनाधिका ध्रुवकभागा वेदितव्याः" प्रमि०। एषां शरानाह "दिशोऽर्काश्च सार्धाब्धयः सार्धवेदा दशेशा रसाः खं खराः खं च सूर्य्याः। त्रिचन्द्राः कुचन्द्राः त्रिपादौ च दस्रौ तुरङ्गाग्नयः सत्रिभागं च रूपम्। त्रिपादं द्वयं सार्धरामाश्च सार्धा गजाः सत्रिभागेषवो मार्गणाश्च। द्विषष्टिः शरामाश्च षड्वर्गसंख्यास्त्रिभागो जिना उत्कृतिः खं च भानाम्। निरुक्ताः स्फुटाः योमत राशरांशास्त्रयं ब्रह्मधिष्ण्याद्विशाखादिषट्कम्। करो वारुणं त्वाष्ट्रभं सार्पमेषां शरा दक्षिणा उत्तराः शेषभानाम्" सि०शि०। "दिशोऽर्का इत्यादयस्तेषां भानां शरांशा ज्ञेयाः। शेषं स्पष्टार्थम्। अत्रोपपत्तिः। तत्र भवेधार्थं गोलबन्धोक्तविधिना विपुलं गोलयन्त्रं कार्य्यम्। तत्र खगोलस्यान्तर्भगोल आधारवृत्तद्वयस्योपरि विषुवद्वृत्तम्। तत्र च यथोक्तं क्रान्तिवृत्तं भगणांशा ३६० ङ्कितं च कार्य्यम्। ततस्तद्गोलयन्त्रं सम्यग्ध्रुवाभिमुखयष्टिकं जलसमक्षितिजवलयं यथा भवति तथा स्थिरं कृत्वा रात्रौ गोलमध्यगचिह्नगतया दृष्ट्या रेवतीतारां विलोक्य क्रान्तिवृत्ते यो मीनान्तस्तं रेवतीतारायां निवेश्य मध्यगतयैव दृष्ट्याश्विन्यादेर्नक्षत्रस्य योगतारां विलोक्य तस्योपरि वेधवलयं निवेश्यम्। एवं कृते सति वेधवलयस्य क्रान्ति-

दृक्तस्य च यः संपातः कोनान्ताद्यतोयावद्भिरंशैस्तावन्तस्तस्य धिष्ण्यस्य ध्रुवांशा ज्ञेयाः । अथ वेधवलये तस्यैव सपातस्य योगतारायाश्च यावन्तोऽन्तरेंऽशास्तावन्तस्तस्य शरांशा उत्तरा दक्षिणा वा वेदितव्याः । अथ ये ध्रुवभागाः पठितास्ते कृतदृक्कर्मका एव । ये तु शरांशाः पठितास्ते स्फुटा एव । यतो ध्रुवद्वयकीलयोः प्रोतं वेधवलयम् । तस्मिन् वेधवलये यो ज्ञातः शरः स ध्रुवाभिमुखः । ध्रुवाभिमुखः शरः स स्फुटः । अस्फुटस्तु कदम्बाभिमुखः । अत एव पूर्वं भगणोत्पत्तिकथने ग्रहवेधवलयं कदम्बकीलयोः प्रोतं कर्त्तव्यमित्युक्तम् । अत एव कारणात् कृतदृक्कर्मका एव भध्रुवाः । यतो ध्रुवाद्ग्रहोपरि नीयमानं सूत्रं यत्र क्रान्तिवृत्ते लगति तत्र कृतायनदृक्कर्मको ग्रह इति दृक्कर्मवासनायां पूर्वं कथितमेव । अथागस्त्यलुब्धकयोराह" प्रमि० । "अगस्त्यध्रुवः सप्तनागास्तु भागास्तुरङ्गादयस्तस्य याम्याः शरांशाः । षड़ष्टौ लवा लुब्धकस्य ध्रुवोऽयं नभोऽम्भोधिभागाः शरस्तस्य याम्यः" सि०शि० । स्पष्टम् "अस्योपपत्तिः पूर्ववत् । अथेष्टघटिका आह" प्रमि० । "अगस्त्यस्य नाड़ीद्वयं प्रोक्तमिष्टं सषड्भागनाड़ीद्वयं लुब्धकस्य । त्रिभागाधिकं स्थूलभानामणूनां ततश्चाधिकं तारतम्येन कल्प्यम्" सि०शि०स्पष्टार्थम् । "अत्रोपपत्तिः अगस्त्यस्य नाड़ीद्वयं यदिष्टं तत् तस्य द्वादश कालांशा उत्पद्यन्ते । सषड्भागनाड़ीद्वयं लुब्धकस्येति । तत्र त्रयोदश १३ कालांशाः त्रिभागाधिकं स्थूलमानामिति । यानि स्थूलानि नक्षत्राणि तेषां चतुर्दश कालांशाः । अणूनां ततश्चाधिकमिति केषाञ्चित् पञ्चदश केषाञ्चित् षोड़शेति कल्प्यते । अत्र ग्रहाणां भानां वा ये कालांशास्ते स्थूलसूक्ष्मत्वतारतम्यपर्य्यालोचनया । याः स्थूलास्तारास्ता अर्कोदयादल्पेन कालेनान्तरिता दृश्या भवन्ति । याः सूक्ष्मास्ता अधिकेनेत्युपपन्नम्" प्रमि०

सू०सि०रङ्गनाथाभ्यान्तु तदुदयज्ञानार्थमन्यप्रकार उक्तो यथा "प्रोच्यन्ते लिप्तिका भानां स्वभोगोऽथ दशाहत । भवन्त्यतीतधिष्ण्यानां भोगलिप्त युता ध्रुवाः" सू०सि० । "भानामश्विन्यादिनक्षत्राणामुत्तराषाढाभिजिच्छ्रवणधनिष्ठावर्जितानां लिप्तिका योगसञ्ज्ञाः कलाः प्रोच्यन्ते समनन्तरमेव कथ्यन्ते । अथानन्तरं स्वभोगः स्वाभीष्टनक्षत्रभोगः कलात्मको वक्ष्यमाणो दशभिर्गुणितः कार्यः । तत्र स्वाभीष्टनक्षत्रगतनक्षत्राणामश्विन्यादीनां भोगलिप्ताः । "भभोगोऽष्टशती लिप्ताः" इत्युक्ताष्टशतकलाः । प्रत्येकं युताः । अश्विन्याद्यतीतनक्षत्रसङ्ख्यागुणिताष्टशतयुतमित्यर्थः । ध्रुवा नक्षत्राणां भवन्ति" । रङ्ग० । अथ प्रतिज्ञाता नक्षत्रभोगलिप्ता उत्तराषाढ़ाभिच्छ्रवणधनिष्ठाव्यतिरिक्तानां तेषां ध्रुवकान्नक्षत्रशरांश्चाष्टश्लोकैराह । "अष्टार्णवाः शून्यकृताः पञ्चषष्टिर्नगेषवः । अष्टार्था अब्धयोऽष्टागा अङ्गागा मनवस्तथा । कृतेषवो युगरसाः शून्यबाणा वियद्रसाः । खवेदाः सागरनगा गजागाः सागरर्त्तवः । मनवोऽथ रसा वेदा वैश्वम्याधभोगगम् । आप्यस्यैवाभिजित्प्रान्ते वैश्वान्ते श्रवणस्थितिः । त्रिचतुःपादयोः सन्धौ श्रविष्ठा श्रवणस्य तु । स्वभोगतो वियन्नागाः षट्कृतिर्यमलाश्विनः । रन्ध्राद्रय क्रमाद्या विक्षेपाः स्वादपक्रमात् । दिङ्मासविषयाः सौम्ये याम्ये पञ्च दिशो नव । सौम्ये रसाः खं याम्ये गाः सौम्ये खार्कास्त्रयोदश । दक्षिणे रुद्रयमलाः सप्तत्रिंशदथोत्तरे । याम्येऽध्यर्धत्रिककृता नवसार्धशरेषवः । उत्तरस्यां तथा षष्टिस्त्रिंशत् षट्त्रिंशदेव हि । दक्षिणे त्वर्धभागस्तु चतुर्विंशतिरुत्तरे । भागाः षड्विंशतिः खं च दस्रादीनां यथाक्रमम्" सू० "अश्विन्यादिनक्षत्राणां क्रमाद्भोगा एते । तत्राश्विन्या अष्टचत्वारिंशत् कलाः । भरण्याश्चत्वारिंशत् कृत्तिकायाः कलाः पञ्चषष्टिः । रोहिण्याः सप्तपञ्चाशत् कलाः । मृगशिरसोऽष्टपञ्चाशत् । आर्द्रायाश्चत्वारः । अत्राब्धय इत्यत्र गोऽब्धयो गोऽग्नय इति वा पाठस्त्वयुक्तः । शाकल्यसंहिताविरोधात् । एतेन "सौरोक्तरुद्रभस्यांशास्त्वद्रयोऽगाब्धयः कलाः" इति नार्मदोक्तम् "दशकलोनपञ्चदशभागा मिथुने" सर्वजनाभिमतध्रुवको दशकलायुतत्रयोदशभागाः पर्वताभिमतध्रुवकश्च निरस्तः । पुनर्वसोरष्टसप्ततिः । पुष्यस्य षट्सप्ततिः । अश्लेषायाश्चतुर्दश । तथेति छन्दःपूरणार्थम् । मघायाश्चतुःपञ्चाशत् । पूर्व्वफाल्गुन्याश्चतुःषष्टिः । उत्तरफाल्गुन्याः पञ्चाशत् । हस्तस्य षष्टिः । चित्रायाश्चत्वारिंशत् । स्वात्याश्चतुःसप्ततिः । विशाखाया अष्टसप्ततिः । अनुराधायाश्चतुःषष्टिः । ज्येष्ठायाश्चतुर्दश । अनन्तरं मूलस्य षट् । पूर्वाषाढ़ायाश्चत्वारः । उत्तराषाढाया ध्रुवकमाह । वैश्वमिति । उत्तराषाढायोगतारानक्षत्रम् । आप्यार्धभोगगम् । आप्यस्य पूर्वाषाढानक्षत्रस्यार्धभोगः । धनूराशेर्विंशतिभागस्तत्र स्थितं ज्ञेयम् । अष्टौ राशयो विंशतिभागा उत्तराषाढ़ाया ध्रुव इत्यर्थः । एतेन पूर्वाषाढायोगतारायाः सकाशादुत्तराषाढ़ायोगतारा

विंशतिकलोनसप्तभागान्तरिता । तेन पूर्व्वाषाढ़ाध्रुवकोऽष्टराशयश्चतुर्द्दश भागा विंशतिकलोनसप्तभागैर्युत उत्तराषाढाया ध्रुवश्चत्वारिंशत्कलाधिकोऽक्षभ्रुव इति पर्व्वतोक्तमपास्तम् ब्रह्मसिद्धान्तविरोधात् । अभिजिद्ध्रुवकमाह । चाप्यस्येति । पूर्व्वाषाढाया अवसाने धनूराशेर्विंशतिकलोनसप्तविंशतिभागेऽभिजिद्योगतारा ज्ञेया । चत्वारिंशत्कलाधिकषड्विंशतिभागाधिका अष्टौ राशयोऽभिजितो ध्रुव इत्यर्थः । एवकारोऽन्ययोगव्यवच्छेदार्थः । तेन संहितासम्मतं श्रवणपञ्चदशांशस्थानं विंशतिविकलायुतत्रयोदशकलायुतचतुर्द्दशभागादिकनवराशयो निरस्तम् । श्रवणस्य ध्रुवकमाह । वैश्वान्त इति । उत्तराषाढ़ाया अवसाने श्रवणयोगताराया: स्थानं ज्ञेयम् । नव राशयो दश भागा: श्रवणध्रुवक इत्यर्थः । धनिष्ठाया ध्रुवकमाह । त्रिचतु:पादयोरिति । श्रवणस्य तृतीयचतुर्थचरणयो: क्रमेणान्तादिसन्धौ मकरराशेर्विंशतिभागे श्रविष्ठा धनिष्ठा ज्ञेया । नव राशयो विंशतिभागा धनिष्ठाध्रुव इत्यर्थः । तुकारात् खेटान्तर्गतधनिष्ठास्थानं कुम्भस्य विंशतिकलोनसप्तभागा निरस्तम् । शतताराया भोगमाह । स्वभोगत इति । धनिष्ठाभोगात् कुम्भस्य विंशतिकलोनसप्तभागावधेरित्यर्थः । शतताराया अशीतिर्भोगः । अत: प्राग्वद्ध्रुवा इति ज्ञापनार्थं स्वभोगत इत्युक्तम् । शततारया: स्थानं शततारकाध्रुव इति पर्य्यवसन्नम् । अवशिष्टनक्षत्राणां भोगानाह । षट्कृतिरिति । पूर्व्वभाद्रपदाया: षट्त्रिंशत् कला भोग: । उत्तरभाद्रपदाया द्वाविंशति: । रेवत्या एकोनाशीति: । अथ ध्रुवकानयनं यथा । अश्विन्या भोग: । ४८ । दशगुणित: ४८० । अतीतनक्षत्राभावाद्भोगयोजनाभाव: । अतोऽश्विन्या: कलात्मको ध्रुव: । ४८० । राश्याद्यस्तु । ०८ । भरण्या भोग: । ४० । दशाहत: । ४०० । अतीतनक्षत्रस्यैकत्वादष्टशतयुतो भरण्या: परिभाषया राश्याद्यो ध्रुव: । ० । २० । एवमार्द्राभोग: । ४ दशाहत: ४० । अतीतनक्षत्राणां पञ्चतया पञ्चगुणिताष्टशतेन ४००० चतु:सहस्रात्मकेन युत: कलाद्यो ध्रुव:४०४०राश्याद्यस्तु २ । ७ । २० । एवं पूर्व्वाषाढाया दशगुणितो भोग: । ४० । एकोनविंशतिगुणिताष्टशतेन । १५२०० युत: परिभाषया राश्याद्यो ध्रुव: । ८ । १४ । शतताराया दशगुणितो भोग: । ८०० । त्रयोविंशतिगुणिताष्टशतेन । १८४०० । युतश्चतुर्विंशतिगुणिताष्टशतरूपो । १९२०० । जातो ध्रुवो राश्याद्य: । १० । २० । पूर्व्वभाद्रपदाया दशगुणितो भोग: २६० । चतुर्विंशतिगुणिताष्टशतेन । १९२०० युत: । १९५६० जातो ध्रुवो राश्याद्य: । १० । २६ । उत्तराषाढ़ाभिजिच्छ्रवणधनिष्ठानां स्वभोगस्थानात् पश्चात् स्थितत्वेनोक्तरीत्यसम्भवाद्विपरीत्या ध्रुवका उक्ता: स्वादिस्थानाद्योगतारा यदन्तरकलाभि: स्थितास्ता लाघवादृशापवर्त्तिता भोगसञ्ज्ञा उक्ता: । तथा च ब्रह्मसिद्धान्ते । “अष्टौ विंशतिरर्धेन गजाग्निर्व्यर्धखेषव: । त्रितर्का: सत्रिभागाद्रिरश्वास्त्वङ्काश्च षट्शतम् । नवाशा नवसूर्य्याश्च वेदेन्द्रा: शरशाणभू: । खात्यष्टि: खष्टतिर्गोऽतिधृतिर्विश्वाश्विनस्तथा । वेदाकृतिर्गोऽद्रिहस्ता: कश्विहस्ता दुगार्थहक् । खोत्कृतिस्त्र्यंशहीनाश्च रदहस्ता: खहस्तिदृक् । खगोऽश्विन: खदन्ता: षड्दन्ता: शैलगुणाग्नय: । मेषाद्यश्वादिमध्यांशा: षडंशोना: खषड्गुणा:” इति । अथ नक्षत्राणां विक्षेपभागानाह । एषामिति । उक्तध्रुवकसम्बन्धिनामश्विन्यादिनक्षत्राणां यथाक्रमं क्रमादित्यर्थः । स्वात् स्वकीयापक्रमात् क्रान्त्यपात् क्रान्तिवृत्तस्थध्रुवकस्थानादित्यर्थः । विक्षेपा विक्षेपभागा दक्षिणा उत्तरा वा भवन्ति । तत्रोत्तरदिश्यश्विन्यादित्रयाणां दिङ्मासविषया: क्रमेण दश द्वादश पञ्चेत्यर्थः । दक्षिणदिशि रोहिण्यादित्रयाणां पञ्च दश नव । उत्तरस्यां पुनर्वसो: षड्भागा: । पुष्यस्य खं विक्षेपाभाव: । अत्र पञ्चमाक्षरस्य गुरुत्वेन छन्दोभङ्ग आर्षत्वान्न दोष: । दक्षिणस्यामश्लेषाया: सप्त । उत्तरस्यां मघादित्रयाणां शून्यं द्वादश त्रयोदश । दक्षिणस्यां हस्तचित्रयोरेकादश द्वौ । अनन्तरं स्वात्या उत्तरदिशि सप्तत्रिंशत् । दक्षिणस्यां विशाखादीनां षण्णां सार्धैकं त्रयं चत्वार: नव सार्धपञ्च पञ्च क्रमेण उत्तरदिशि तथा विक्षेपभागा: । अभिजित: षष्टि: । श्रवणस्य त्रिंशत् । धनिष्ठाया: षट्त्रिंशत् । एवकारो न्यूनाधिकव्यवच्छेदार्थ: । चकार: पूरणार्थ: । दक्षिणस्यां तुकारस्तथा । अर्धभाग: शतताराया: । तुकारस्तथा । उत्तरस्यां पूर्व्वभाद्रपदायाश्चतुर्विंशति: । तस्यामेव दिशि भागा विक्षेपभागा उत्तरभाद्रपदाया: षड्विंशति: । रेवत्या विक्षेपाभाव: । चकार: पूरणार्थ: । अथागस्त्यलुब्धकवह्निब्रह्महृदयताराणां ध्रुवकविक्षेपांस्तदुपपत्तिं श्लोकत्रयेणाह”रङ्ग० । “अशीतिभागैर्याम्यायामगस्त्यो मिथुनान्तग: । विंशे च मिथुनस्यांशे मृगव्याधो व्यव-

स्थितः । विक्षेपो दक्षिणे भागैः स्वार्णवैः स्वादपक्रमात् । हुतभुग्ब्रह्महृदयौ वृषे द्वाविंशभागगौ । अष्टाभिस्त्रिंशता चैव विक्षिप्तावुत्तरेण तौ । गोलं बद्ध्वा परीक्षेत विक्षेपं ध्रुवकं स्फुटम्" सू० "स्वकीयात् क्रान्तिविभागस्थानाद्दक्षिणस्यामशीत्यंशैस्तारात्मकोऽगस्त्यो मिथुनान्तगः कर्कादिभागे स्थितः । अगस्त्यनक्षत्रस्य राशित्रयं ध्रुवकः । दक्षिणविक्षेपोऽशीतिरित्यर्थः । मृगव्याधो लुब्धको मिथुनराशेः विंशतिभागे स्थितः । चकारः समुच्चये । लुब्धकनक्षत्रस्य राशिद्वयं विंशतिभागा ध्रुवक इत्यर्थः । दक्षिणस्यां चत्वारिंशता भागैः परिमितस्तस्य च क्रान्तिवृत्तस्थानाद्विक्षेपः । वृषराशौ वह्निब्रह्महृदयौ द्वाविंशभागस्थितौ वह्निब्रह्महृदयनक्षत्रयोर्द्वाविंशतिभागाधिकैकराशिध्रुवकः । तौ वह्निब्रह्महृदयौ । अष्टाभिस्त्रिंशता । चकारः क्रमार्थे । एवकारो न्यूनाधिकव्यवच्छेदार्थः । उत्तरेणोत्तरस्यामित्यर्थः । विक्षिप्तौ विक्षेपवन्तौ । वह्नेर्विक्षेपोऽष्टभागः उत्तरः । ब्रह्महृदयस्योत्तरे विक्षेपस्त्रिंशदित्यर्थः । नन्वेते ध्रुवा विक्षेपाश्च कालक्रमेण नियता अनियता वेत्यत आह । गोलमिति । गोलं बध्यमानं बद्ध्वा वंशशलाकादिभिर्निबध्य स्फुटं विक्षेपं क्रान्तिसंस्कारयोग्यं ध्रुवाभिमुखं ध्रुवकं स्फुटमायनदृक्कर्मसंस्कृतं परीक्षेत । तत्तत्काले दृग्गोचरसिद्धमङ्गीकुर्वीत । तथा च क्रान्तिसंस्कारयोग्यविक्षेपायनसंस्कृतध्रुवकयोरयनांशवशादस्थिरत्वादपि मयेदानीन्तनसमयानुरोधेन साधनार्थमायनदृक्कर्मसंस्कृता ध्रुवाः क्रान्तिसंस्कारयोग्यविक्षेपाश्च नियता उक्ताः । कालान्तरे गोलयन्त्रेण वेधसिद्धा ज्ञेयाः । नैत इति भावः । गोलयन्त्रेण वेधस्तु गोलबन्धोक्तविधिना गोलयन्त्रं कार्य्यम् । तत्र खगोलस्योपरि भगोलम्, आधारवृत्तस्योपरि विषुवद्वृत्तम् । तत्र यथोक्तं क्रान्तिवृत्तं भगणांशाङ्कितं च बद्ध्वा ध्रुवयष्टिकीलयोः प्रोतमन्यच्च वेधवलयम् । तच्च भगणांशाङ्कितं कार्य्यम् । ततस्तद्गोलयन्त्रं सम्यग्ध्रुवाभिमुखयष्टिकं जलसमक्षितिजवलयं च यथा भवति तथा स्थिरं कृत्वा रात्रौ गोलमध्यच्छिद्रगतया दृष्ट्या रेवतीतारां विलोक्य क्रान्तिवृत्ते मीनान्ताद्दशकलान्तरितपश्चाद्भागं रेवतीतारां निवेश्य मध्यगतयैव दृष्ट्याश्विन्यादेर्नक्षत्रस्य योगतारां विलोक्य तस्या उपरि तद्वेधवलयं निवेश्यम् । एवं कृते सति वेधवलयस्य क्रान्तिवृत्तस्य च यः सम्पातः स मीनान्तादग्रतो यावद्भिरंशैस्तावन्तस्तस्य नक्षत्रस्य ध्रुवांशा ज्ञेयाः । वेधवलये तस्यैव सम्पातस्य योगतारायाश्च यावन्तोऽन्तरेंऽशास्तावन्तस्तस्य विक्षेपांशा दक्षिणा उत्तरा वा वेद्याः । अथ कदम्बप्रोतवेधवलयेन वेधे तु सदा स्थिरा ध्रुवका आयनदृक्कर्मसंस्कृताः परन्तु कदम्बतारयोरभावादशक्यमिति यथोक्तवेधेनैवायनदृक्कर्मसंस्कृता ध्रुवाः शराश्च ध्रुवाभिमुखाः स्फुटाः सिद्धा भवन्तीति दिक् । अथ रोहिणीशकटभेदमाह" रङ्ग० । "वृषे सप्तदशे भागे यस्य याम्योंऽशकद्वयात् । विक्षेपोऽभ्यधिको भिन्द्याद्रोहिण्याः शकटं तु सः" सू० । "वृषराशौ सप्तदशेऽंशे यस्य ग्रहस्य भागद्वयादधिको विक्षेपो दक्षिणः स ग्रहो रोहिण्याः शकटं शकटाकारसन्निवेशं भिन्द्यात् । तन्मध्यगतो भवेदित्यर्थः । तुकाराद्ग्रहविक्षेपो रोहिणीविक्षेपादल्प इति विशेषार्थकः । विक्षेपस्य दक्षिणस्य रोहिणीविक्षेपादधिकत्वे शकटाद्बहिर्दक्षिणभागे ग्रहस्य स्थितत्वेन तद्भेदकत्वाभावात् । अत्र शकटापिमनक्षत्रस्य ध्रुव एकराशिः सप्तदशांशाः दक्षिणः शरो भागद्वयमिति वेधसिद्धा स्पष्टा युक्तिः । अथ ग्रहयोगसाधनार्थं ग्रहयोगसाधनरीत्यतिदेशमाह" रङ्ग० । "ग्रहवद्द्युनिशे भानां कुर्य्याद्दृक्कर्म पूर्ववत् । ग्रहमेलकवच्छेषं ग्रहभुक्त्या दिनानि च" सू० । "ग्रहवद्द्युनिशे ग्रहाणां यथा दिनरात्रिमाने आक्षदृक्कर्मार्थं कृते तथा दिनमानरात्रिमाने भानां नक्षत्रध्रुवकाणामाक्षदृक्कर्मार्थं गणकः कुर्यात् । तदनन्तरं पूर्ववन्नक्षत्रनित्योदयास्तौ साधयित्वाभीष्टकाले दिनगतशेषाभ्यां नतं कृत्वा विषुवच्छाययाभ्यस्तादित्यादिनेत्यर्थः । दृक्कर्म कुर्यात् । अत्र नक्षत्रध्रुवके पर्वतेनायनदृक्कर्माप्युदाहरणे कृतं तदयुक्तम् । तस्य ध्रुवके स्वतः सिद्धत्वात् । तदनन्तरं शेषं नक्षत्रग्रहयुतिसाधनं ग्रहध्रुवतुल्यतारूपं ग्रहमेलकवद्ग्रहयोगसाधनरीत्या ग्रहान्तरकला इत्यादिना कार्य्यम् । ननु तत्र ग्रहान्तरकलाः स्वस्वभुक्तिलिप्ताप्तमाहृताः । भुक्त्यन्तरेण विभजेदित्युक्तेर्नक्षत्रस्य का गतिर्ग्राह्येत्यत आह । ग्रहभुक्त्येति । केवलया ग्रहगत्या ग्रहस्य फलं ग्रहध्रुवान्तररूपपक्षे संस्कार्यं ध्रुवसमो ग्रहो भवति । नक्षत्रस्य पूर्वगत्यभावाद्ध्रुवो यथास्थित इत्यर्थः । ननु तथापि ग्रहनक्षत्रयुतिकालसाधनं भुक्त्यन्तराभावात् कथं कार्यमिति मन्दाशङ्क्यत आह । दिनानीति । अभीष्टसमयाद्विवरमित्यादिना केवलया ग्रहगत्या ग्रहनक्षत्रयुतिदिनानि साध्यानि । चः समुच्चये । नक्षत्राणां गत्यभावात् । अथाभीष्टकालादुपरिनक्षत्रयुतिकालस्य गतैष्यत्वसम्भ्रमार्थं पुनराह" रङ्ग० ।

"एष्यो हीने ग्रहे योगो ध्रुवकादधिके गतः । विपर्य्ययाद्वक्रगते ग्रहे ज्ञेयः समागमः" सू० । "नक्षत्रध्रुवादुक्ताद्ग्रह आयनदृक्कर्म्मसंस्कृतग्रह आक्षदृक्कर्म्मसंस्कृतनक्षत्रध्रुवकात् दृक्कर्म्मद्वयसंस्कृतोग्रह इति विवेकार्थः । न्यूने सति योगो नक्षत्रग्रहयोगः स्वाभीष्टसमयाद्भावी । अधिके सति पूर्व्वं जातः । वक्रगते ग्रहे विपर्य्ययादुक्तवैपरीत्यात् समागमो नक्षत्रग्रहयोगो ज्ञेयः । हीने ग्रहे गतोऽधिके ग्रह एष्यो योगः । अत्रोपपत्तिर्नक्षत्रस्य गत्यभावेन सदा स्थिरत्वाद्ग्रहगमनेनैव योगसम्भवादिति सुगमतरा । अश्विन्यादिनक्षत्रस्य बहुतारात्मकत्वात् कस्यास्तारायाएते ध्रुवका इत्यस्य योगतारायाध्रुवकत्वमित्युत्तरं मनसि धृत्वाश्विन्यादिनक्षत्राणां योगतारां विवक्षुः प्रथममेषां नक्षत्राणां योगतारामाह" रङ्ग० ।
"फाल्गुन्योर्भाद्रपदयोस्तथैवाषाढयोर्द्वयोः । विशाखाश्विनिसौम्यानां योगतारोत्तरा स्मृता" सू० । "एषामुक्तनक्षत्राणां प्रत्येकं स्वताराणु योत्तरादिकस्था तारा सा योगतारा गोलतत्त्वज्ञैरुक्ता । अथान्ययोरनयोराह" रङ्ग० । "पश्चिमोत्तरताराया द्वितीया पश्चिमे स्थिता । हस्तस्य योगतारा सा श्रविष्ठायाश्च पश्चिमा" सू० ।

"हस्तनक्षत्रं पञ्चतारात्मकं हस्तपञ्चाङ्गुलिसन्निवेशाकारम् । तत्र नैर्ऋत्यदिगाश्रितपश्चिमावस्थितताराया उत्तरदिगवस्थितताराया द्वितीया पूर्व्वोक्तातिरिक्ता पश्चिमे वायव्याश्रिते या स्थिता सा हस्तस्य योगतारा ज्ञेया । उत्तरतारासन्ना पश्चिमाश्रिता तारा हस्तस्य योगतारेति फलितार्थः । धनिष्ठाया योगतारामाह । श्रविष्ठाया इति । धनिष्ठायास्ताराणु या पश्चिमदिक्स्था सा तस्या योगतारा । चः समुच्चये । अथान्यासामेषामाह" रङ्ग० । "ज्येष्ठाश्रवणमैत्राणां बार्हस्पत्यस्य मध्यमा । भरण्याग्नेयपित्र्याणां रेवत्याश्चैव दक्षिणा" सू० ।
"ज्येष्ठाश्रवणानुराधानां पुष्यस्य च प्रत्येकं तारात्रयात्मकत्वान्मध्यमतारा योगतारा स्यात् । भरणीकृत्तिकामघानां रेवत्याः । चः समुच्चये । प्रत्येकं स्वताराणु या दक्षिणदिक्स्था सा योगतारा । अथान्येषामवशिष्टानां चाह ।" रङ्ग० "रोहिण्यादित्यमूलानां प्राची सार्पस्य चैव हि । तथा प्रत्यवशेषाणां स्थूला स्याद्योगतारका" सू० "रोहिणीपुनर्व्वसुमूलानामश्लेषायाश्च प्रत्येकं स्वताराणु या पूर्व्वदिक्स्था सैव योगतारेत्येवह्योरर्थः । प्रत्यक्शेषाणामवशिष्टनक्षत्राणामार्द्राचित्रास्वात्यभिजिच्छततारणां स्वताराणु यात्यन्तस्थूला महती सा योगतारा स्यात् । अथ ब्रह्मप्रजापत्योस्तारावस्थानमाह" रङ्ग० । "पूर्व्वस्यां ब्रह्महृदयादंशकैः पञ्चभिः स्थितः । प्रजापतिर्वृषान्तेऽसौ सौम्येऽष्टत्रिंशदंशकैः" सू० "ब्रह्महृदयस्थानात् पूर्व्वभागे पञ्चभिरंशैः प्रजापतिस्तारात्मको ब्रह्मा क्रान्तिवृत्ते स्थितः । कुत्रेत्यत आह । वृषान्त इति । वृषान्तनिकटे । एकराशिः सप्तविंशत्यंशा ब्रह्मध्रुवक इत्यर्थः । अस्य विक्षेपमाह । असाविति । ब्रह्मा उत्तरस्यामष्टत्रिंशद्भागैः स्थितः । अष्टत्रिंशद्भागा अस्य विक्षेप इत्यर्थः । अथापांवत्सापयोस्तारयोरवस्थानमाह" र० । "अपांवत्सस्तु चित्रायामुत्तरेंऽशैस्तु पञ्चभिः । बृहत् किञ्चिदतो भागैरापः षड्भिस्तथोत्तरे" सू० "चित्रायाः सकाशादपांवत्ससंज्ञकस्तारात्मकः पञ्चभिर्भागैरुत्तरस्यां स्थितः । प्रथमतुकारश्चित्राध्रुवतुल्यध्रुवकार्थकः । द्वितीयतुकारश्चित्राविक्षेपस्य दक्षिणभागद्वयात्मकत्वादपांवत्सविक्षेप उत्तरस्त्रिभाग इति स्फुटार्थकः । अतोऽपांवत्सात् किञ्चिदल्पान्तरेण बृहत् स्थूलस्तारात्मक आपःसंज्ञकः तथाऽपांवत्सात् षड्भिरंशैरुत्तरस्यां स्थितश्चित्राध्रुवक एवापस्य ध्रुवको विक्षेप उत्तरे नवांशा इत्यर्थः" रङ्ग० ।

नक्षत्राणामुदयास्तकालनिरूपणम् उदयशब्दे ११२८ पृष्ठादौ दर्शितम् ।

नक्षत्रघटितत्वात् राशीनां तथात्वम् । "राशिनाम भवेत् नाम भर्क्षं गृहनाम च" ज्यो० । राशयश्च द्वादश "पुनर्द्वादशधात्मानं व्यभजद्राशिसंज्ञकम् । नक्षत्ररूपिणं भूयः सप्तविंशात्मकं वशी" सू० सि० उक्तेः । ते च मेषवृषमिथुनकर्कटसिंहाः कन्या तुलाथ वृश्चिकभम् । धनुरथ मकरः कुम्भोमीन इति च राशयः कथिताः" ज्योति० उक्ताः राशिश्च "विकलानां कला षष्ट्या तत्षष्ट्या भाग उच्यते । तत्त्रिंशता भवेद्राशिर्भगणो द्वादशैव ते" सू० सि० उक्तः १०८००० विकलात्मकः १८०० कलात्मकः त्रिंशत्भागात्मकः । तैर्द्वादशभिः ३६० अंशैर्भगणोराशिचक्रं स्यात् तत्र सप्तविंशतिनक्षत्रात्मकराशिचक्रे द्वादशधा विभक्ते सपादनक्षत्रद्वयस्यैव प्रत्येकराशिघटकता तेन प्रत्येकनक्षत्रस्य ८०० कलात्मकत्वम् । "भभोगोऽष्टशती लिप्ताः" सू० सि० उक्तेः । राशिभेदे नक्षत्रभेदनिरूपणमुडुचक्रशब्दे १०७१ पृ० दृश्यम् ।
"भास्करादीन् न शोधयेत्" "जन्मर्क्षे उपतापिते" ज्यो० ।
"दक्षिणां दिशमृक्षेषु वार्षिकेष्वेव भास्करः" रघुः

ऋक्षगन्धा स्त्री ऋक्षान् गन्धयति हिनस्ति गन्ध-अण् ६त० ।

१जाङ्गलीवृक्षे, (खपिजाङ्गलो) २महाश्वेतायां, ३क्षीरविदार्याञ्च। (क्षीरताड़) स्वार्थे कन् तत्रैव

ऋक्षगिरि पु० कर्म०। कुलाचलभेदे ऋक्षनामके पर्वते।

ऋक्षचक्र न० ६त०। नक्षत्रसमुदाये ऋक्षाणां चक्रमिव गगनस्थे नक्षत्रात्मके चक्राकारे पदार्थभेदे। उडुचक्रशब्दे तद्विवृतिः। भचक्रस्य प्रवहवायुना प्रत्यहं पश्चाद्गमनेऽपि ग्रहाणां यथा प्राग्गतित्वं भवेत्तथा सू० सि० रङ्गनाथव्याख्ययोः यथा “अथ ग्रहपूर्वगत्युत्पत्तौ कारणमाह। “पश्चाद्व्रजन्तोऽतिजवान्नक्षत्रैः सततं ग्रहाः। जीयमानास्तु लम्बन्ते तुल्यमेव स्वमार्गगाः” सू० सि०। “पश्चादनन्तरं पुनराहत्त्या पश्चात् पश्चिमदिगभिमुखं नक्षत्रैस्तारकादिभिः सह ग्रहाः सूर्यादयोऽतिजवात् प्रवहवायुसत्वरगतिवशात् सततं निरन्तरं व्रजन्तो गच्छन्तः स्वमार्गगाः स्वकक्षावृत्तस्था जीयमाना नक्षत्रैः पराजिता नक्षत्राणामग्रे गमनात्। अतएव लज्जयेव गुरुभूता इति तात्पर्यार्थः। तुल्यं समम्। एवकारादधिकन्यूनव्यवच्छेदः। लम्बन्ते स्वस्थानात् पूर्वस्मिन् लम्बायमाना भवन्ति। यथा लज्जितः पश्चाद्भवति नाग्रे। तुकारादधोऽधः कक्षाक्रमानुरोधेन शन्यादिग्रहाणां चन्द्रान्तानां गुरुतापचयः शनिरतिगुरुभूतस्तस्मात् किञ्चिन्न्यूनोगुरुस्तस्मादपि भौम इत्यादि यथोत्तरम्। यस्य कक्षा महती तस्य गुरुत्वाधिक्यं यस्य लघ्वी तस्य तदनुरोधेन गुरुताल्पत्वमिति। एतदुक्तं भवति। ब्रह्मणा प्रवहवायौ नक्षत्राधिष्ठितो मूर्त्तो गोलः स्थापितस्तदन्तर्गताः स्वस्वाकाशगोलस्थाः शन्यादयो नक्षत्राधिष्ठितमूर्त्तगोलस्थक्रान्तिवृत्तस्थरेवतीयोगतारासन्नरूपमेषादिप्रदेशसमस्थलस्थाः स्थापिताः। क्रान्तिवृत्तं तु मेषतुलास्थाने विषुवद्वृत्तलग्नं सम्पातात् त्रिभान्तरितक्रान्तिवृत्तप्रदेशाभ्यां चतुर्विंशत्यंशान्तरेण दक्षिणोत्तरौ मकरकर्कादिरूपौ तदेवं द्वादशराश्यात्मकं वृत्तं ग्रहचारभूतम्। विषुवद्वृत्तं तु भूवमध्यस्थं निरक्षदेशोपरिगम्। तत्र प्रवहवायुना स्वाघातेन मूर्त्तो नक्षत्रगोलो नाक्षत्रषष्टिघटीभिः परिवर्त्तते। तदन्तर्गतवायुभिस्तदाघातेन वा ग्रहा भ्रमन्तोऽपि नक्षत्रगोलस्थितक्रान्तिवृत्तीयमेषादिप्रदेशेन समं न गच्छन्ति वायूनां स्वल्पत्वात् तदाघातस्याल्पत्वाद्बिम्बानां गुरुत्वाच्च। अतस्तत्स्थानादुग्रहाणां लम्बना दृश्यन्ते। अतएव नक्षत्रोदयकाले तेषां द्वितीयदिने नोदयः किन्तु ग्रहो लम्बितप्रदेशेन वायुना तदनन्तरमूर्द्धमागच्छतीत्यनन्तरमुदयः। लम्बनं तु शन्यादीनां कक्षानुरोधेन गुरुत्वाद्वायूनां तद्घातानां वा कक्षानुरोधेन बह्वल्पत्वात् तुल्यम्। यद्यपि वायोर्भ्रुवानुरोधेन स्वल्पत्वादुग्रहवलम्बनं विषुवद्वृत्ते भवितुमुचितं न क्रान्तिवृत्ते। तथा च वक्ष्यमाणक्रान्त्यनुपपत्तिः क्रान्तिवृत्तस्थद्वादशराशिभोगेन वक्ष्यमाणानां भगणानामनुपपत्तिश्च। तथापि वायुनावलम्बितो ग्रहो विषुवन्मार्गगोऽपि तद्विषुवप्रदेशासन्नक्रान्तिवृत्तप्रदेशेन ग्रहाकाशगोल एव स्वसमस्थले णाक्रष्यत इति नानुपपत्तिः। अतएव स्वमार्गगा इति क्रान्तिवृत्तानुसृतस्वाकाशगोलस्थकक्षामार्गगता इत्यर्थकमुक्तमिति सङ्क्षेपः” रङ्ग०। “अथात एव ग्रहाणां लोके प्राग्गमित्वं सिद्धमित्याह। ‘प्राग्गतित्वमतस्तेषां भगणैः प्रत्यहं गतिः। परिणाहवशाद्भिन्ना तद्वशाद्भानि भुञ्जते” सू० सि०। “अतोऽवलम्बनादेव तेषां ग्रहाणां प्राग्गतित्वं प्राच्यां दिशि गतिर्येषां ते प्राग्गतयस्तद्भावः प्राग्गतित्वं सिद्धम्। लम्बनस्वरूपैव ग्रहाणां पूर्वगतिरुत्पन्ना लोकैः कारणानभिज्ञैः प्रत्यक्षावगता तच्छक्तिजनिता कल्पितेत्यर्थः। सा कियतीत्यत आह। भगणैरिति। वक्ष्यमाणभगणैः प्रत्यहं प्रतिदिनं गतिः प्राग्गमनरूपा भगणानां गत्युपन्नत्वात् भगणसम्बन्धिवक्ष्यमाणदिनैः सूर्यसावनैर्ग्रहभगणा लभ्यन्ते तदैकेन दिनेन केत्यनुपाताज्ज्ञेया। ननु ग्रहभगणानां तुल्यत्वाभावात् प्रतिदिन ग्रहगतिर्भिन्नेति पूर्वं लम्बनरूपा ग्रहगतिरयुक्तोक्ता ग्रहलम्बनस्याभिन्नत्वादित्यत आह। परिणाहवशादिति। परिणाहः कक्षापरिधिस्तद्वशात् तदनुरोधादियं ग्रहगतिर्भिन्नाऽतुल्या। अयमभिप्रायः ग्रहाणां लम्बनं तुल्यप्रदेशेन, परन्तु स्वस्वकक्षायां तत्तत्प्रदेशे तुल्या: कलात्मा गतिकलास्तास्तु महति कक्षावृत्तेऽल्पा अणुकक्षावृत्ते बह्व्यः सर्वकक्षापरिधीनां चक्रकलाङ्कितत्वात्। भगणास्तु गतिवशादेव यस्य कक्षावृत्तं महत् तस्याल्पा यस्य च लघु कक्षावृत्तं तस्य बह्वस्तदुत्पन्ना गतिरपि तथेति न विरोधः। नन्वेकरूपगतिं विहाय भिन्नरूपा गतिः कथमुक्तोक्तेत्यत आह। तद्वशादिति। भिन्नगतिवशाद्भानि राशीन् नक्षत्राणि भुङ्क्ते ग्रहा भुञ्जन्तीत्यर्थः। तथा च ग्रहराश्यादिभोगस्यानार्थमियमेव गतिरुपयुक्ता नैकरूपेति भावः” रङ्ग० “अथ भभोगे विशेषं वदन् वक्ष्यमाणभगणस्वरूपमाह। “शीघ्रगस्तान्यथाल्पेन कालेन महताऽल्पगः। तेषां तु परिवर्त्तेन पौष्णान्ते भगणः स्मृतः” सू० सि०। “अथशब्दः पूर्वोक्तैर्विशेषसूचकः। शीघ्रगतंग्रह-

त्वानि भान्यल्पेन कालेन भुनक्त्यल्पगतिग्रहो बहुकालेन भुनक्ति तुल्यराश्यादिभोगो मन्दशीघ्रगतिग्रहयोस्तुल्यकालेन न भवतीति विशेषार्थः । तेषां राशीनां परिवर्त्तेन भ्रमणेन । तुकाराद्ग्रहादिगतिभोगजनितेन भगणः प्राप्तैकः । क्रान्तिवृत्ते द्वादशराशीनां सत्त्वात् तद्भोगेन चक्रभोगसमाप्तेर्यत् स्थानमारभ्य चलितो ग्रहः पुनस्तत् स्थानमायाति स चक्रभोगः परिवर्त्तसंज्ञोऽपि द्वादशराशिभोगात्मगण इत्यर्थः । ननु क्रान्तिवृत्ते सर्वप्रदेशेभ्यः परिवर्त्तसम्भवादत्र कः परिवर्त्तादिभूतः प्रदेश इत्यत आह पौष्णान्त इति । सृष्ट्यादौ ब्रह्मणा क्रान्तिवृत्ते रेवतीयोगतारासन्नप्रदेशे सर्वग्रहाणां निवेशितत्वात् तदवधितो ग्रहचलनाच्च पौष्णस्य रेवतीयोगताराया अन्ते निकटे प्रदेशे तथा च रेवतीयोगतारासन्नाविमस्थानमेवाद्यन्तावधिभूतमिति" रङ्ग० ।

तत्सन्निवेशप्रकारः सि०शि० उक्तो यथा "ब्रह्मा भचक्रं कमलोद्भवेन ग्रहैः सहैतद्भगणादिसंस्थैः । शश्वद्भ्रमे विश्वसृजा नियुक्तं तदन्ततारे च तथा ध्रुवत्वे । ततोऽपराशाभिमुखं भपञ्जरे सखेचरे शीघ्रतरे भ्रमत्यपि । तदल्पगत्येन्द्रदिशं नभश्चराश्चरन्ति नीचोच्चतरात्मवर्त्मसु"

"यदेतद्भचक्रं ग्रहैः समं भ्रमद्दृश्यते तद्विश्वसृजा जगदुत्पादकेन कमलोद्भवेन ब्रह्मणा सृष्ट्यादौ सदा ततः शश्वद्भ्रमेऽनवरतभ्रमणे नियुक्तम् । एतदुक्तं भवति । भाश्विन्यादीन्यन्यानि विशिष्टानि ज्योतींषि तेषां समूहश्चक्रं, ग्रहाश्च सूर्यादयस्तैः सह सृष्टम् । तानि भानि प्राक्संस्थया समन्तान्निवेशितानि । ग्रहास्तु भगणादावश्विनीमुखे निवेशितास्त उपर्युपरिसंस्थया । तत्रादौ तावदधश्चन्द्रः । तदुपरि बुधः । ततः शुक्रः । ततो रविः । तस्माद्भौमः । ततो गुरुः । ततः शनिः । सर्वेषामुपरि दूरे भचक्रम् । एषां कक्षाप्रमाणानि कक्षाध्याये प्रतिपादयिष्यन्ते । ग्रहो यद्यूर्ध्वोर्ध्वस्था ग्रहास्तदुपरि दूरतो भगणस्तत् कथं भगणादिसंस्थैर्ग्रहैरित्युच्यते । सत्यम् । अत्र भूमध्ये सूत्रस्यैकमग्रं बद्धा द्वितीयमग्रं भचक्रेऽश्विनीमुखे किल निबद्धम् । तस्मिन् सूत्रे प्रोता मणय इव चन्द्रादयो ग्रहाः सृष्ट्यादौ ब्रह्मणा निवेशिताः । भमण्डलं द्वादशधा विभज्यैवं भूमध्यात् सूत्राणि प्रतिभागं नीत्वा किल बद्धानि तैः सूत्रैः सह ग्रहकक्षायां ये संपातास्ते तासु कक्षासु राश्यन्ताः । तद्वदपरा राशय इति संक्षिप्तमिहोक्तम् । कक्षाध्याये गोले च किञ्चिद्विस्तार्य वक्ष्यामः । एवंविधं भचक्रं सृष्ट्वा ब्रह्मणा गगने निवेशितम् । यत्र निवेशितं तत्र प्रवहो नाम वायुः । स च नित्यं प्रत्यग्गतिः । तेन समाहतं भचक्रं सखेचरं पश्चिमाभिमुखभ्रमे प्रवृत्तम् । यत् तत्र प्रत्यग्भ्रमणं तच्छीघ्रतरम् । यत एकेनाह्ना भमण्डलस्य (भूमेः) परिवर्त्तः । एवं तस्मिन् भपञ्जरे सखेचरे शीघ्रतरे भ्रमत्यपि खेचरा इन्द्रदिशं चरन्ति पूर्वाभिमुखं व्रजन्ति । नीचोच्चतरात्मवर्त्मसु । अनन्तरकथितेषु स्वस्वमार्गेषु तेषां प्राग्भ्रमणम् । तत् तदल्पगत्या । प्रत्यग्गतेर्बहुत्वात् प्रागल्पगत्या व्रजन्तो नोपलक्ष्यन्त इति भावः । तथा तस्य भपञ्जरस्य यो दक्षिणोत्तरावन्तौ तत्र ये तारे ते ध नियुक्ते" प्रमि० । राशिचक्रस्य प्रवहवायुना पश्चाद्भ्रमणोक्तेरपि व्यवदेशोपरिगतत्वाभिप्रायेण देवासुरयोस्तु सू०सि० सव्यापसव्यभ्रमणोक्तेः यथा "सव्यं भ्रमति देवानामपसव्यं सुरद्विषाम्" इति "व्यक्ते पश्चाद्गतिः सदेति" वक्ष्यएव पश्चाद्गतेरुक्तेश्चेति द्रष्टव्यम् ।

ऋक्षर पु० ऋष-क्सरन् । १ऋत्विजि । ऋच्छतेः क्षन्तेः कषतेर्वा वा निरु० क्सरन् प्र० । २कण्टके "स्योना पृथिवी भवानृक्षरा निवेशनी" यजु० ३५,२१, "अनृक्षरा अकण्टका" वेददी० ३धारिधारायां स्त्री मेदिनिः ।

ऋक्षराज पु० ६त०टच्समा० । १नक्षत्रेशे चन्द्रे २भल्लूकेशे जाम्बवति च । "अथ सिंहं प्रधावन्तमृक्षराजो महाबलः" हरिवं० ३९अ० "लेभे जाम्बवतीं कन्यामृक्षराजस्य सम्मताम्" हरिवं० ३९ "जाम्बवानृक्षराजेन्द्रः" भाग०८,२१,४ । ऋक्षनाथादयोऽप्यत्र ।

ऋक्षला स्त्री ऋक्ष-सलच् किच्च । गुल्फाधःस्थनाड्याम् "क्रमणं स्थूराभ्यामृक्षलाभिः कपिञ्जलान्" यजु०२५,३, "ऋक्षला गुल्फाधःस्था नाड्यः" वेददी०

ऋक्षवत् पु० ऋक्षाः बाहुल्येन सन्त्यत्र मतुप् मस्य वः । नर्मदातीरस्थे पर्वतभेदे "वप्रक्रियामृक्षवतस्तटेषु" रघुः "नर्मदाकूलमेकाकी मेखलां ऋक्षवाहनीम् । ऋक्षवन्तं गिरिं जित्वा शुक्तिमत्यामुवास सः" हरिवं० १७अ० उक्तेः तस्य नर्मदातीरस्थत्वम् बोध्यम् "ऋक्षवन्तं गिरिवरं विन्ध्यञ्च गिरिसत्तमम्" हरिवं० ३९अ० ।

ऋक्षवन्त ऋक्ष+वा० वन्त । शम्बरासुरपुरे नगरभेदे "तमृक्षवन्ते नगरे निहत्यासुरसत्तमम् । स्तुता मायावती देवीमागच्छन्नगरं पितुः" हरिवं० १६अ० तं शम्बरम् ।

ऋक्षीक त्रि० ऋक्ष इव इवार्थे ईकन् । जनपदस्थे हिंस्रे ।

"ऋक्षीकाः पुरुषव्याघ्राः परिमोषिण आव्याधिन्यस्तस्करा अरण्येष्वाजायेरन्" शत० ब्रा० १३,२,४,२,४, २ऋक्षाकारपुरुषमेधीयदेवताभेदे स्त्री ।"नदीभ्यः पौञ्जिष्ठमृक्षीकाभ्यो नैषादम्" यजु०३०,८ । पुरुषमेधे उक्तम् ।

ऋक्षेष्टि स्त्री नक्षत्रविशेषविहिते इष्टिभेदे ।

ऋक्षोद पु० ऋक्षं नक्षत्रमिव स्वच्छम् उदकं यत्र उदादेशः । पर्वतभेदे । "ऋक्षोदः पर्वतोऽभिजनो येषाम् अण् । आर्क्षोदा द्विजाः" सि०कौ० ।

ऋक्संहिता स्त्री ६त० । ऋग्वेदसंहितायाम् ऋग्वेदशब्दे विवृतिः "ऋक्संहितां त्रिरभ्यस्य यजुषां वा समाहितः । साम्नां वा सरहस्यानां सर्वपापैः प्रमुच्यते" मनुः वेदोहि मन्त्रब्राह्मणभेदेन द्विविधः तत्र मन्त्रात्मको भागः संहिता । "अग्निमीळे" इत्यादिकः ऋक्समुदायात्मकः ऋक्संहिता । मन्त्रेतरवेदभागो ब्राह्मणम् । संहिताकृपसन्धिकार्यनियताश्रयतया संहितात्वं ब्राह्मणे पदग्रन्थे च न संहितानियम इति तयोर्न संहितात्वमिति भेदः संहितास्थपदविच्छेदज्ञापकोग्रन्थः पदग्रन्थः । स च ऋष्यादिकृतःपौरुषेय इति बोध्यम् ।

ऋक्सम न० ऋचा समम् । सामभेदे । "जगत्या ऋक्समम् ऋक्समाच्छुक्रः" यजु० १३,५६, "ऋक्समम् ऋक्समसंज्ञं यत् साम" वेददी० ।

ऋक्साम न०द्वि० । ऋक् च साम तदाकृढगानं च द्वयोः समाहारः अच् समा०नि०द्वि० । ऋगृपमन्त्रभेदतदाकृढगानयोः समाहारे "ऋक्सामाभ्यां संतरन्तः" यजु० ४,१ । "ऋक्सामयोः शिल्पे स्थः" ४,९ । ऋचश्च सामानि चेति बहुत्वे तु नाच् । ऋक्सामन् इत्येव ।"ऋक्सामाभ्यमरस एष्योनाम" यजु०१८,४३ ।

ऋगयन न० ऋचामयनम् । ऋक्पारायणपक्ष्मे पूर्वपदात् णत्वं नेह गत्यर्थाभावात् । ऋगयनस्य व्याख्यानो ग्रन्थः ऋगयनादि० अण् । आर्गयन तद्व्याख्यान ग्रन्थे ।

ऋगयनादि पु० पाणिन्युक्ते तस्य व्याख्यान इत्यर्थे अण्प्रत्ययनिमित्तप्रकृतिभूतशब्दसमुदाये । स च गणः "ऋगयन, पदव्याख्यान, छन्दोमान, छन्दोभाषा, छन्दोविचिति, न्याय, पुनरुक्त, निरुक्त, व्याकरण, निगम, वास्तुविद्या, क्षत्रविद्या, अङ्गविद्या, विद्या, उत्पात, उत्पाद, उद्याव संवत्सर, मुहूर्त, उपनिषद्, निमित्त, शिक्षा, भिक्षा"

ऋगावान न० आ+नेञ् भावे ल्युट् ऋचामावानं ग्रथनं संहिताकार्य्येण कृतसन्धानम् । वेदपाठकाले अर्द्धर्चादीनां संहितया पूर्व्वोत्तरयोः सन्धाने "ऋचमृचमनावानमुक्त्वा प्रणुत्यावस्येत्" आश्व० श्रौ० ४,६,२ । "तेनार्द्धर्चाः संहितयैव वक्तव्याः" नारा० वृ० । ऋचामन्ते तु न संहितया ग्रथनमित्यर्थः ।"अभिष्टुयाहगावानम्"५,६,१ । "तस्योक्तमृगावानधर्मेण" ५, ११,२ । "तस्याद्यां पच्छ ऋगावानं पच्छः शस्या चेत्" ५,२०,३ ।

ऋग्गाथा स्त्री ऋचामिव गाथा । लौकिकगीतिभेदे । "ऋग्गाथापाणिकादक्षविहिताब्रह्मगीतिका:" याज्ञ० ।

ऋग्मत् त्रि० ऋक् स्तुतिः पूजा वा अस्त्यस्य मतुप् ।१स्तोतरि २अर्चनीये पूजनीये । "राजानमुपतस्थु ऋग्मियम्" ऋ० ६,८,४ ऋतेर्निरुक्तौ ऋग्मियमृग्मन्तमर्चनीयं पूजनीयम्" निरुक्तकारः । ऋग्मानिव स्वार्थे घ द्वितीयाचः मलोपः । ऋग्मियोऽप्यत्र । "नाभिप्रमन्तमृग्मियम्" ऋ०१,९,६ ।

ऋग्मिन् त्रि० ऋच्+अस्त्यर्थे मिनि । स्तोतरि ।"गिरा यदि निर्णिजमृग्मिणो ययुः" ऋ० ९,८६,४६ । "ऋग्मिणः स्तोतारः" भा० ।

ऋग्विधान न० ऋचा ऋग्वेदेन कर्मविशेषस्य विधानम् । ऋग्वेदोक्तमन्त्रभेदेन कर्मविशेषविधाने तच्च हेमाद्रौ व्रतखण्डे विस्तरेणोक्तम् । वह्निपुराणोक्तमत्र दर्श्यते

"अग्निरुवाच प्रतिवेदन्तु कर्म्माणि काम्यानि प्रवदामि ते । प्रथमं ऋग्विधानं वै शृणु त्वं भुक्तिमुक्तिदम् । अन्तर्जले तथा होमे जपतो मनसेप्सितम् । कामं करोति गायत्री प्राणायामाद्विशेषतः । गा .त्रादशसाहस्रो जपोनक्ताशनोद्विजः । आश्रमाद्बहिः स्नातश्च सर्व्वकल्मषनाशनः । दशायुतानि जप्त्वाथ हविष्याशी स मुक्तिभाक् । प्रणवोहि परं ब्रह्म तज्जपः स च पापहा । ओङ्कार शतजप्तस्तु नाभिमात्रोदके स्थितः । जलं पिबेत् स सर्व्वैस्तु पापैर्विप्रः प्रमुच्यते । मात्रात्रयं त्रयोवेदास्त्रयोदेवास्त्रयोऽग्नयः । महाव्याहृतयःसप्त लोकाहोमोमलापहः । अन्तर्जले तथा राम । प्रोक्तश्चैवाघमर्षणः ; अग्निमीळे पुरोहितं सूक्तोऽयं वह्निदैवतः । शिरसा धारयन् वह्निं योजयेत् परिवत्सरम् । होमं त्रिषवणं भैक्ष्यमनग्निपक्वञ्च चरेत् । अतःपरमृचां सप्त आद्याद्या याः प्रकीर्त्तिताः । भोजयन् प्रयतोनित्यमिष्टान् कामान् समश्नुते । मेधाकामोजपेन्नित्यं सदसस्पतिमित्यृचम् । अम्ब यजन्ति याः प्रोक्ता नवर्चो मृत्युनाशनः । शुनःशेफमृषिं वद्धः सन्निरुद्धोऽथ वा जपेत् । मुच्यते सर्व्वपापेभ्यो गदी चाप्यगदी भवेत् । यइच्छेत् शाश्वतं कामं मित्रं प्राज्ञं

पुरन्दरम् । ऋग्भिः षोड़शभिः कुर्य्यादिन्द्रस्येति दिने दिने । हिरण्यस्तु समित्येतत् जपन् शत्रून् प्रबाधते । क्षेमी भवति चाध्वाने ये ते पन्था जपन्नरः । रौद्रीति षड्भिरीशानं स्तूयाद्दुयोवै दिने दिने । चरुं वा कल्पयेद्रौद्रं तस्य शान्तिः परा भवेत् । उद्यद्युदितमादित्यमुपतिष्ठन् दिनेदिने । क्षिपेज्जलाञ्जलीन् सप्त मनोदुःखविनाशनः । द्विषन्तमित्यथर्व्वेदं यद्विष्यान्तं जपन् स्मरेत् । आगस्यो सप्तरात्रेण विद्वेषमधिगच्छति । आरोग्यकामो रोगी च प्रत्नस्यान्यात्तमञ्जपेत् । उत्तमस्तस्य चार्द्धर्चोजपेद्वैरिविनाशने । उदयस्यायुरक्षय्यं तेजो मध्यंदिने जपेत् । अस्तं प्रतिगते सूर्य्ये द्विषन्तं प्रतिबाधते । नव यश्चेति सूक्तानि जपन् शत्रून्नियच्छति । एकदेशं सुवर्णस्य सर्व्वकामान् विनिर्द्दिशेत् । आध्यात्मिका क इत्येता जपन्मोक्षमवाप्नुयात् । आ नोभद्रा इत्यनेन दीर्घमायुरवाप्नुयात् । त्वा सोमेति च सूक्तेन नवं पश्यन्निशाकरम् । उपतिष्ठेत् समित्पाणिर्व्वासांस्याप्नोत्यसंशयम् । आयुरायूंषि समिति कोषसूक्तकन्दाजपेत् । अपानः शोशुचदिति स्तुत्वा मध्ये दिवाकरम् । यथा मुञ्चति चेषीकान्तथा पापं प्रमुञ्चति । जातवेदस इत्येतज्जपेत् स्वस्त्ययनं पथि । भयैर्विमुच्यते सर्व्वैः स्वस्तिमानाप्नुयाद् गृहम् । व्युष्टायाञ्च तथा रात्रावेतद्दुःस्वप्ननाशनम् । प्रमन्दिनेति सूयत्यां जपेद्गर्भविमोचनम् । जपन्निन्द्रमिति स्नातो वैश्वदेवं तु सप्तकम् । सुस्नात्येभ्यस्तथा जुह्वत् सकलं किल्विषं नरः । इमामिति जपन् शश्वत् कामानाप्नोत्यभीप्सितान् । मा नस्तोक इति द्वाभ्यां त्रिरात्रोपोषितः शुचिः । औदुम्बरीश्च जुहुयात् समिधश्चाज्यसंप्लुताः । छित्त्वा सर्व्वान् मृत्युपाशान् जीवेद्रोगविवर्ज्जितः । ऊर्द्ध्वबाहुरनेनैव स्तुत्वा शम्भुं तथैव च । मा नस्तोकेति च ऋचा शिखाबन्धे कृते नरः । अधृष्यः सर्व्वभूतानां जायते संशयं विना । चित्रमित्युपतिष्ठेत त्रिसन्ध्यं भास्करं तथा । समित्पाणिर्नरोनित्यमीप्सितं धनमाप्नुयात् । दुःस्वप्नं तुदते कृत्स्नं भोजनं चाप्नुयाच्छिवम् । हतेपयामीति तथा रक्षोघ्नः परिकीर्त्तितः । यदि वाचा इत्यृचेन जपन् कामानवाप्नुयात् । नमोयवस्त्विति जपन् सुप्रगे तापनः शुचिः । कयान इति च जपन् जातिश्रैष्ठ्यमवाप्नुयात् । इमन्तेसोममित्येतत् सर्व्वान् कामानवाप्नुयात् । पितुर्नुपतिष्ठेत नित्यमन्नमुपस्थितम् । अग्ने तत् पति सूक्तेन स्निग्धमाप्नोत्यनुत्तमम् । योमेराजन्नित्यपान्तु दुःस्वप्रशमनीमृचम् । अध्वनि प्रस्थितो यस्तु पश्येच्छुभमथाशुभम् । अप्रशस्तं प्रशस्तं वा कनिक्रदमिमं जपेत् । द्वाविंशकं जपन् सूक्तमाध्यात्मिकमनुत्तमम् । पूर्व्वं सुप्रयतोनित्यमिष्टान् कामान् समश्नुते । कृणुष्वेति जपेन्मन्त्रं जुह्वदाज्यं समाहितः । अरातीनां हरेत् प्राणं रक्षांस्यपि च नाशयेत् । उपतिष्ठेत् स्वयं वह्निं परीत्य च दिने दिने । सुरक्षति स्वयं वह्निर्व्विश्वतो विश्वतोमुखः । हंसं शुचिषदित्येत् शुचिर्वीक्षेत् दिवाकरम् । कृषिं प्रपद्यमानन्तु स्थालीपाकं यथाविधि । जुहुयात् क्षेत्रमध्ये तु स्थालीपाकांस्तु पञ्चभिः । इन्द्र यममरुत्सूर्य्यपर्ज्जन्याय भगाय च । यथालिङ्गं तु विहरे लाङ्गलन्तु कृषीवलः । प्रोक्तोधान्याय सीतायै शुनासीरमथोत्तरम् । गन्धमाल्यनमस्कारैर्जपेदेताश्च देवताः । प्रवापने प्रलवने खले स्थापनहारयोः । अमोघं कर्म्म भवति वर्द्धते सर्व्वदा कृषिः । समुद्रादिति सूक्तेन कामानाप्नोति पावकात् । वैश्वानर इति द्वाभ्यां य ऋग्भ्यां वह्निमर्हति । स तरत्यापदः सर्व्वा यशः प्राप्नोति चाक्षयम् । विपुलां श्रियमाप्नोति जयं प्राप्नोत्यनुत्तमम् । अग्ने त्वमिति च स्तुत्वा धनमाप्नोति चोच्छ्रितम् । प्रजाकामोजपेन्नित्यमरुणादेवमित्यृचम् इत्यात्रेयं जपेत् प्रातः सदा स्वस्त्ययनं महत् । स्वस्ति पन्था इति प्रोच्य स्वस्तिमान् व्रजतेऽध्वनि । विजिगीषुर्व्वसते शत्रूणां व्याधिदश्च भवेत् । स्त्रियागर्भप्रसूतायाः गर्भमोक्षणमुत्तमम् । आ बद्वादिति सूक्तञ्च दृष्टिकामः प्रयोजयेत् । निराहारः क्लिन्नवासो नचिरेण प्रवर्षति । मनसः काममित्येतां पशुकामो नरोजपेत् । कर्द्दम इति स्नायात् प्रजाकामः शुचिव्रतः । अपो पूर्व्वामिति स्नायाद्राज्यकामस्तु मानवः । रोहिते चर्म्मणि स्नायात् ब्राह्मणस्तु यथाविधि । क्षत्रचर्म्मणि वै व्याघ्रे छागे वैश्यस्तथैव च । दशसाहस्रिकोहोमः प्रत्येकं परिकीर्त्तितः । आ गा वहेति सूक्तेन गोष्ठे गां लोकमातरम् । उपतिष्ठेज्जपेच्चैव यदीच्छेत्ताः सदाऽक्षयाः । उपेते तिसृभीराशो दुन्दुभिं चाभिमन्त्रयेत् । तेजोबलञ्च प्राप्नोति शत्रूंश्चैव नियच्छति । तृणपाणिर्जपेत् सूक्तं रक्षोघ्नं दस्युभिर्वृतः । ये केचिच्चेत्यृचं जप्त्वा दीर्घमायुरवाप्नुयात् । जीमूतस्येति सूक्तेन वाहनान्यभिमन्त्रयेत् । यथा लिङ्गं ततो राजा विनिहन्ति रणे रिपून् । अमीमेतितिसृभिः सूक्तैर्धनमाप्नोति चाक्षयम् । अमीवहेति सूक्तेन भूतानि स्थापयेन्निशि । संबाधे विषमे

दुर्गे बद्धो वा निगडैः क्वचित् । पलायन् वा गृहीतो वा सूक्तमेतत्तदा जपेत् । त्रिरात्रमपि चोपोष्य श्रपयेत् पायसं चरुम् । तेनाहुतिशतं पूर्णं जुहुयात् त्र्यम्बकेत्यृचा । समुद्दिश्य महादेवं जीवेदब्दशतं सुखम् । तच्चक्षुरित्यृचा स्नात उपतिष्ठेद्दिवाकरम् । उद्यन्तं मध्यमं चैव दीर्घमायुर्जिजीविषुः । सूक्ताभ्यां परभागाभ्यां भूताभ्यां भूतिमाप्नुयात् । इन्द्रा सोमेति सूक्तन्तु कथितं शत्रुनाशनम् । यस्य लुप्तं व्रतं मोहाद्व्रात्यैः संसृजेत वा । उपोष्याज्यं स जुहुयादग्ने व्रतपते इति । आदित्य इत्यसाम्नाज्यं जप्त्वा वादे जयी भवेत् । नदीतीति चतुष्केण मुच्यते महतो भयात् । ऋचं जप्त्वा यदित्येतत् सर्वान् कामानवाप्नुयात् । द्वाचत्वारिंशकं चैन्द्रं जप्त्वा नाशयते रिपून् । रायस्पोषीति जप्त्वा च प्राप्नोत्यारोग्यमेव च । शन्नोभवेति द्वाभ्यान्तु भुक्त्वान्नं प्रयतः शुचिः । हृदयं पाणिना स्पृष्ट्वा व्याधिभिर्नाभिभूयते । उत्तमेदमिति स्नातो भूत्वा शत्रुं प्रमापयेत् । त्वन्नो अग्नेति सूक्तेन हुतेनान्नमवाप्नुयात् । कन्यावा मिति सूक्तेन दिग्दोषात् विप्रमुच्यते । यदद्य कच्चेत्युदिते जपन् वश्यं जगद्भवेत् । यद्वागिति च जप्तेन वाणी भवति शाश्वती । वाचोविदमितीत्येतां जपन् वाचं समश्नुते । पवित्राणां पवित्रन्तु पावमान्य ऋचां मताः । वैखानसा ऋचस्त्रिंशत् पवित्राः परमा मताः । ऋचोद्विषष्टिः प्रोक्ताश्च यश्चेत्यृषिसत्तम ! । सर्वकल्मषनाशाय परिणामशिवाय च । स्वादिष्ठयेति सूक्तानां सप्तषष्टिरुदाहृता । दशोत्तराण्युपास्यैताः पावमानीः शतानि षट् । एतज्जपंश्च जुह्वंश्च घोरं मृत्युभयं जयेत् । आपोहिष्ठेति वारिस्थो जपेत् पापभयार्द्दने । प्रवेदनेति नियते जपेन्मरुधन्वसु । प्राणान्तिके भये प्राप्ते क्षिप्रं प्राणांस्तु विन्दति । व्युष्टायामुदिते सूर्य्ये ये चेति जयमाप्नुयात् । आयुर्हीमिति मूढश्च पन्थानं पथि विन्दति । शोचेर्युवति मन्त्रेण यं कञ्चिद्धृदयप्रियम् । यत्तेयमेति सुस्नातस्तस्य मूर्द्धानमालभेत् । सहस्रकृत्वः पञ्चाहं तेनायुर्विन्दते महत् । इदं मेध्येति जुहुयाद् घृतं प्राज्ञः सहस्रशः । पशुकामो गवाङ्गोष्ठे ह्यर्थकामश्चतुष्पथे । वयः सुवर्णा इत्येतां जपन् वा विन्दते प्रियम् । हविष्यन्तीं समभ्यस्य सर्वपापैः प्रमुच्यते । तस्य रोगा विनश्यन्ति कायाग्निर्वर्द्धते सदा । त्यन्नामयः स्वस्त्ययनं सर्वव्याधिविनाशनम् । इहस्मृते अतीत्येतद्दृष्टिकामः प्रयोजयेत् । सर्वं त्वेति परा शान्तिर्जयाप्रतिरथस्तथा । मृताश्वं कश्यपञ्चित्यं प्रजाकामस्य कीर्त्तितम् । अहं रुद्रेभिरित्येतद्वाग्मी भवति मानदः । न योनौ जायते विद्वान् जपंस्त्रिष्वपि रात्रिषु । रात्रिसूक्तं जपन् रात्रौ रात्रिं क्षेमां नयेन्नरः । आकल्पयन्तीति जपेन्नित्यं कृत्याविनाशनम् । आयुष्यञ्चैव सर्वस्य सूक्तं दाक्षायणं महत् । उत देवा इति जपेदास्रापान्तं धृतव्रतः । अप्रमार्गं तु जनिते जपेदग्निभये सति । अरण्यानीत्यरण्येषु जपेत्तद्भयनाशनम् । ब्राह्मीमासाद्य सूक्ते द्वे वरां ब्राह्मीं शतावरीम् । पृथगद्भिश्च तेनाथ मेधां लक्ष्मीञ्च विन्दति । मास इत्यसपत्नघ्नं संग्रामं विजिगीषतः । ब्रह्मणोऽग्निं संविदानं गर्भमृत्युनिवारणम् । अपैहीति जपेत् सूक्तं शुचिर्दुःस्वप्ननाशनम् । येनेदमिति वै जप्त्वा समाधिं विन्दते परम् ! मयोभूर्वात इत्येता जपेत् स्वस्त्ययनं परम् । शामदीमिन्द्रजननम् बाधामेतेन वारयेत् । महिसीणामवोऽस्त्विति पथि स्वस्त्ययनं जपेत् । अग्नये द्विषद्वेषं जपेच्च रिपुनाशनम् । वास्तोष्पतेति मन्त्रेण जपेच्च गृहदेवताः । जपस्यैष विधिः प्रोक्तो हुतो ज्ञेयो विशेषतः । होमान्ते दक्षिणा देया पापशान्तिकृतेन तु । हुतं शमुति चान्नेन अपहोमप्रदानतः । विप्राशिषस्त्वमोघाः स्युर्व्वह्निः स्नातं च सर्व्वतः । सिद्धार्थका यवा धान्यं पयो गव्यघृतं तथा । क्षीरवृक्षास्तेयधन्तु होमा वै सर्व्वकामदाः । समित् कण्टकिनश्चैव राजिका रुधिरं विषम् । अभिचारे तथा शैलमशनं शक्तवः पयः । दधि भैक्ष्यं फलं मूलमृग्विधानमुदाहृतम्”।

ऋग्वेद पु० ऋच्यते स्तूयते ऋक् कर्म्म०। वेदभेदे । स च मन्त्रब्राह्मणोभयात्मकः । तत्र मन्त्रसमूहात्मकः ऋक्यजुः बक्ष्यमाणलक्षणगात्मकः संहितारूपो ग्रन्थः । तत्र दश मण्डलानि तत्राद्ये मण्डले २४ अनुवाकाः “अग्निमीळे” इत्यादीनि आग्नेयानि१९१सूक्तानि तानि शतर्चिभिर्दृष्टानि अध्यायोपाकरणोत्सर्गयोर्विनियुक्तानि ।

द्वितीये शौनकगृत्समदर्षिदृष्टे चत्वारि अनुवाकाः । त्वमग्न इत्यादीनि ४२ सूक्तानि आग्नेयानि उपाकरणोत्सर्गयोर्विनियुक्तानि । शौनक गृत्समदः ऋषिरेतन्मण्डलद्रष्टा स च पूर्व्वमाङ्गिरसकुले शुनहोत्रस्य पुत्रः सन् यज्ञकालेऽसुरैर्गृहीत इन्द्रेण मोचितः । पश्चात्तद्वचनेनैव भृगुकुले शुनकपुत्रो गृत्समदनामाऽभूत् । “य आङ्गिरसः शौनहोत्रो भूत्वा भार्गवः शौनकोऽभवत् स गृत्समदो द्वितीयमण्डलमपश्यत्” सर्वानु० उक्तेः । “त्वमग्न इति गृत्समदः शौनको भृगुतां गतः । शौनहोत्रः प्रकृत्या तु य

आङ्गिरस उच्यते" इति ऋष्यनुक्रमोक्तेश्च । ऋग्वेदभाष्यम्।

तृतीये विश्वामित्रदृष्टे पञ्चानुवाकाः सोमस्य मेत्यादीनि ६२ सूक्तानि । तानि च आग्नेयानि प्रातरनुवाकाश्विनशस्त्रयोस्त्रैष्टुभे छन्दसि विनियुक्तानि ।

चतुर्थे वामदेवर्षिदृष्टे पञ्चानुवाकाः । आग्नेयानि त्वां ह्यग्ने इत्यादीनि ५८ सूक्तानि । आद्याध्यायोपाकरणे मण्डलादिहोमे च विनियुक्तानि ।

पञ्चमे आत्रेयबुधगविष्ठिराद्यर्षिके षड् अनुवाकाः ८७ अबोध्यग्निरित्यादीनि सूक्तानि आग्नेयानि आग्नेये क्रतौ त्रैष्टुभे छन्दस्याश्विनशस्त्रे चत्वारि शिष्टानि अध्यायोत्सर्जनोपाकरणयोर्विनियुक्तानि ।

षष्ठे भरद्वाजदृष्टे षडनुवाकाः त्वं ह्यग्ने प्रथम इत्यादीनि ७५ सूक्तानि आग्नेयानि तत्र प्रातरनुवाके आग्नेये क्रतौ त्रैष्टुभे छन्दसि एतदादिसूक्ताष्टकं द्वितीयवर्ज्जं विनियुक्तम् शिष्टानि आद्योपाकरणे विनियुक्तानि ।

सप्तमे वसिष्ठदृष्टे ६ अनुवाकाः अग्निं नर इत्यादीनि१०४ सूक्तानि आग्नेयानि तेषां विशेषतो विनियोगोबाहुल्यात् नोक्त आकरे द्रष्टव्यः ।

अष्टमे मेधातिथिमेध्यातिथ्यादिनामर्षिके । दशानुवाकाः । इन्द्रादिदैवत्यानि "मा चिदन्यद्वीत्यादीनि १०२ सूक्तानि महाव्रतादौ विनियुक्तानि ।

नवमे वैश्वामित्रमधुछन्दआद्यृषिके सप्तानुवाकाः पावमानसोमादिदेवताकानि स्वादिष्ठयेत्यादीनि ११४ सूक्तानि तेषाञ्च उपाकर्म्मणि मण्डलादिग्रहणे च यथायथं विनियोगः ।

दशमे मण्डले आप्रत्रिताद्यर्षिके द्वादशानुवाकाः अग्ने बृहन्नित्यादीनि १९१ सूक्तानि आग्नेयादीनि । प्रातरनुवाकाश्विनशस्त्रयोराग्नेये क्रतौ त्रैष्टुभे छन्दसीत्यादि कर्मसु विनियुक्तानि । इत्येवं दशसु मण्डलेषु १म० १९१, २म० ४३, ३म० ६२, ४म० ५८, ५म० ८७, ६म० ७५, ७म० १०४, ८म० १०२, ९म० ११४, १०म० ११९१ । इत्येवं समष्टिभूतानि १०२८ सूक्तानि । सूक्तानि च एकद्व्यादिवर्ग घटितानि यथायथं तत्तत्सूक्तेषु द्रष्टव्यानि । एतत्संख्या च वालखिल्यसहितानां तदतिरिक्तानि तु १०१७ सूक्तानि तच्च चरणव्यूहभाष्ययोः स्पष्टम् । तस्य च प्रकारान्तरेण विभागः तस्य अष्टाष्टकानि प्रत्येकाष्टके च अष्टौ अष्टौ अध्यायाः इत्येवं ६४ अध्यायाः

तत्र च वर्गा २००६ संख्यकाश्चरणव्यूहोक्ताः खिलसहितस्तु ततोऽप्यधिकाः। चरणव्यूहभाष्ययोर्दर्शितविभागो दृश्यते यथा ।

"चातुर्वेद्य चत्वारोवेदा विज्ञाता भवन्ति ऋग्वेदोयजुर्वेदः सामवेदोऽथर्ववेदश्चेति तत्र ऋग्वेदस्याष्टभेदा भवन्ति चर्चा श्रावकश्चर्चक श्रवणीयपारः क्रमपारः क्रमजटाः क्रमदण्डश्चेति चतुष्पारायणमेतेषां शाखाः पञ्च भवन्त्याश्वलायनी सांख्यायनी शाकला बाष्कला माण्डूकाश्चेति तेषामध्ययनम् । अध्यायानां चतुःषष्टिर्मण्डलानि दशैव तु । वर्गाणां परिसंख्यातं द्वे सहस्रे षडुत्तरे सहस्रमेकं सूक्तानां निश्चितं विकल्पितम् । दश सप्त च पर्यन्ते संख्यातं वै पदक्रमात् । एकशतसहस्रं वा द्विपञ्चाशत्सहस्राद्धमेतानि चतुर्दश वासिष्ठानामितरेषां पञ्चाशीतिः । ऋचां दश सहस्राणि ऋचां पञ्चशतानि च । ऋचामशीतिः पादश्च पारायणं प्रकीर्त्तितम् । एकर्चे एकवर्गश्च नवकश्च तथा स्मृतः । द्वौ वर्गौ द्विऋचौ ज्ञेयौ ऋक्त्रयं शतं च स्मृतम् । चतुर्ऋचां पञ्चसप्तत्यधिकञ्च शतं तथा । पञ्चऋचां तु द्विशतं सहस्रं रुद्रसंयुतम् । पञ्चचत्वार्यधिकं तु षड्ऋचां च शतत्रयम् । सप्त ऋचां शत ज्ञेयं विंशतिश्चाधिकाः स्मृताः । अष्टऋचां तु पञ्चाशत् पञ्चाधिकास्तथैव च । दशाधिकद्विसहस्राः पञ्चशाखासु निश्चिताः । वर्ग संज्ञा न सूक्तस्य चत्वारश्चात्र कीर्त्तिताः" चरणव्यूहः । वेदपारायणचतुर्विभागात् चरण उच्यते । तस्य व्यूहः समुदायः, चतुर्वेदानां समुदायं व्याख्यास्यामः इत्यर्थः । कथमेकोवेदः तदुक्तं आरण्यके, "सर्वे वेदाः सर्वघोषा एकैव व्याहृतिः प्राणा एव प्राणा ऋच इत्येता विद्यादिति" तस्य चतुर्धा भागः कृतः। तथा चोक्तं भागवते । "तेनासौ चतुरो वेदाः चतुर्भिर्वदनैः प्रभुः । सव्याहृतिकान्सोङ्कारांश्चातुर्होत्रविवक्षया । पुत्रानध्यापयंस्तां तु ब्रह्मर्षिर्ब्रह्मकोविदान् । ते तु धर्मपदेष्टारः स्वपुत्रेभ्यः समादिशन् । ते परम्परया प्राप्तास्तत्तच्छिष्यैर्धृतव्रतैः । चतुर्युगेष्वथ व्यस्ता द्वापरादौ महर्षिभिः । क्षीणायुःक्षीणसत्वान् दुर्मेधान् वीक्ष्य कालतः । वेदान् ब्रह्मर्षयो व्यस्तान् हृदिस्थाऽच्युतनोदितः । अस्मिन्नप्यन्तरे ब्रह्मन् भगवान् लोकभावनः । ब्रह्मेशाद्यैर्लोकपालैर्याचितोधर्मगुप्तये । पराशरात् सत्यवत्यामंशांशकलया विभुः । अवतीर्णोमहाभागो वेदं चक्रे चतु-

विधम्। ऋगथर्वयजुःसाम्नोराशीनुद्धृत्य वर्गशः। चतस्रः संहिताश्चक्रे मन्त्रैर्मणिगणा इव। तासां स चतुरः शिष्यान् उपाहूय महामतिः। एकैकसंहितां ब्रह्मन्नेकैकस्मै ददौ विभुः। पैलाय संहितामाद्यां बह्वृचाख्यामुवाच ह। वैशम्पायनसंज्ञाय 'निगदाख्यं' यजुर्गणम्। साम्नां जैमिनये प्रादात्तथा छन्दोगसंहिताम्। अथर्वाङ्गिरसं नाम स्वशिष्याय सुमन्तवे। पैलः स्वसंहितामूचे इन्द्रप्रमितये मुनिः। बाष्कलाय च सोऽप्याह शिष्येभ्यः संहितां स्वकाम्। चतुर्धा व्यस्य बोध्याय याज्ञवल्क्याय भार्गव !। पराशरायाग्निमित्रे इन्द्रप्रमितिरात्मवान्। अध्यापयत् संहितां स्वां माण्डूकेयमृषिं कविम्। तच्छिष्यो देवमित्रश्च सौभार्यादिभ्य ऊचिवान्। (इन्द्रप्रमतिसुतो माण्डूकेयः। माण्डूकेयसुतः शाकल्यः। शाकल्यशिष्यो देवमित्रः)। शाकल्यस्तत्सुतः स्वान्तु पञ्चधा व्यस्य संहिताम्। वात्स्यमुद्गलशालीयगोखल्यशिशिरेष्वधात्। जातूकर्ण्यश्च तच्छिष्यः सनिरुक्तां स्वसंहिताम्। बलाकपैलजाबालविरजेभ्यो ददौ मुनिः। बाष्कलिः प्रतिशाखाभ्यो बालखिल्याख्यसंहिताम्। चक्रे बालायनिर्भज्यः काशारश्चैव तां दधुः। बह्वृचाः संहिता ह्येता एभिर्ब्रह्मर्षिभिर्धृताः। श्रुत्वैव छन्दसां व्यासं सर्वपापैः प्रमुच्यते" भाग० १२,६ अ०। "ब्रह्मणा नोदितो व्यासो वेदान् व्यस्तुं प्रचक्रमे। अथ शिष्यान् स जग्राह चतुरो वेदपारगान्। ऋग्वेदश्रावकं पैलं जग्राह महामतिः। वैशम्पायननामानं यजुर्वेदस्य चाग्रहीत्। जैमिनिः सामवेदस्य तथैवाथर्ववेदवित्। सुमन्तुस्तस्य शिष्योऽभूद्व्यासस्य धीमतः" विष्णु पु० गृह्यसूत्रम्। "सुमन्तुजैमिनिवैशम्पायनपैलाः सूत्रभाष्यमहाभारतधर्माचार्याः" इति। जलतिबाहवीत्यारभ्य माण्डूकेया इत्यन्ता माण्डूकगणाः गर्गोशाचक्रवीत्यारभ्य सांख्यायनमित्यन्ताः सांख्यायनगणाः। एतेषां कौषीतकीसूत्रं ब्राह्मणम् आरण्यकं च। ऐतरेय इत्यारभ्य आश्वलायनान्ताः आश्वलायनगणाः एषान्तु ऐतरेय आरण्यकं ब्राह्मणम्। आश्वलायनसूत्रम्।

तत्र यदुक्तं चातुर्वैद्यं चत्वारो वेदा विज्ञाता भवन्ति। अर्थात् यस्य चातुर्वैद्यं तेन चत्वारो वेदा विज्ञाता भवन्ति ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदश्चेति इति स्पष्टार्थः। वेदा हि यज्ञार्थम् अभिप्रवृत्ताः। ते यज्ञाः द्विविधाः। अग्नौ हूयमाना, अनग्नौ प्रहुताः। अग्नौ हूयमाना वैतानिकाः। अनग्नौ प्रहुता नित्याभ्यासो ब्रह्मयज्ञः पारायणं च। अत्र गृह्यसूत्रे ब्रह्मयज्ञखण्डे "यदृचोऽधीते पयआहुतिभिरेव तद्देवतास्तर्पयति यद्यजूंषि घृताहुतिभिः, यत्सामानि मध्वाहुतिभिः, यदथर्वाङ्गिरसः सोमाहुतिभिः, यत् ब्राह्मणानि कल्पान् गाथानाराशंसीरितिहासपुराणानीत्यमृताहुतिभिर्यदृचोऽधीते स्वधा अस्य पितॄन् उपचरन्ति" इति। तत्र ऋग्वेदस्याष्टभेदा भवन्ति। स्थानानि भवन्तीति पाठान्तरम्। शाकलबाष्कलौ २ ऐतरेयब्राह्मणारण्यकौ ४ शाङ्खायनमाण्डूकौ ६। कौषीतकीय ब्राह्मणारण्यकाविति ८ अष्टभेदाः। अन्यच्च "वेदाश्च विकृतिः शाखाभेदस्तु त्रिविधस्ततः। पृथग्नामाभिधानेन व्यासेन कथितं पुरा" इति। अत्राष्टभेदेनाष्टस्थानेन वा प्रकृतिर्ग्राह्या विकृतिस्तु अग्रे वक्ष्यामः। तस्मात् ब्रह्मयज्ञार्थं पारायणार्थं च ऋग्वेदस्याध्ययनं कर्त्तव्यम्। ततश्चतुष्पदेन वक्ष्यति। चर्चेत्यादि चर्चाध्ययनम्। ताल्वोष्ठपुटव्यापारेण शब्दस्योच्चारणं क्रियते सा चर्चा। तस्याध्ययनस्य गुरुः श्रावकः। तस्य चर्चकः शिष्यः श्रवणीयपारः। श्रवणीयो वेदः। तस्य पारं समाप्तिः। इति चतुष्पदेन अध्ययनं सूचितम्। अग्रे चतुष्पदेन चत्वारि पारायणानि सूचयति। तत्पारायणं द्विविधम्। प्रकृतिविकृतिरूपम्। का प्रकृतिः ?। प्रकृतिः संहिता। सा द्विविधा रूढा योगा च रूढा यथा। 'अग्निमीळे पुरोहितमिति। योगा यथा। अग्निम् ईळे पुरोहितमिति। प्रातिशाख्ये द्वितीयपटले भाष्यकारेण व्याख्यातम्। अथ चतुष्पारायणं यथा। क्रमपारः क्रमपदः क्रमजटाः क्रमदण्डश्चेति चतुष्पारायणम्। क्रमशब्देन उभयसंहिता वाच्या स कथम् ?। "अनुलोमविलोमाभ्यां द्विवारं हि पठेत् क्रमम्। विलोमे पदवत्सन्धिरनुलोमे यथाक्रमम्"। यथाक्रमं यथा संहिता इत्यर्थः। अन्यच्च वर्णक्रमः। अक्षरसमाम्नाय एवेत्यारण्यके। "कथमभिष्टुयादित्यक्षरशः चतुरक्षरशः पच्छः अर्द्धर्चशः ऋक्शः"। इति ब्राह्मणम्। क्रमः संहितावाची कथम् ?। पदप्रकृतिः संहिता इति नैरुक्तवचनात्। सा क्रमरूपा इत्यर्थः। क्रमपदः। क्रमः संहिता तस्याः पदानि इति प्रकृतिपारायणे द्वे प्रकृतिरूपे। विकृतिस्तु अष्टधा भवति। तत्र "जटा माला शिखा लेखा ध्वजो दण्डो रथो घनः। अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा महर्षिभिः" इति आसां मध्ये जटादण्डयोः प्राधान्यं तत्कथम् ?। जटानुसारिणी शिखा दण्डानुसारिणो मालालेखाध्वजोरथाश्च। घनस्तु उभयो-

देवानुसारी। तत्र जटापटले जटावाक्यम्। "क्रमे यथोक्ते पदजातमेव द्विरभ्यसेदुत्तरमेव पूर्व्वम्। अभ्यस्य पूर्व्वं च तथोत्तरे पदेऽवसानमेवं हि जटाभिधीयते" अस्यार्थः। क्रमे यथोक्ते सति क्रमोत्क्रमाभ्यामित्युक्ते क्रमप्रकारे पदजातं पदद्वयं वा पदत्रयं वा द्विवारमभ्यसेत्। द्विवारम्पठेत्। अभ्यासप्रकारः। उत्तरमेव पूर्व्वम्। क्रमवत्पदद्वयं गृहीत्वा पूर्व्वेण समं प्रथमम् उत्तरपदमभ्यसेत्। ततः उत्तरपूर्व्वपदयोः अभ्यासद्वारा पूर्व्वम् द्विरभ्यस्योत्तरपदे अवसानम् एवंप्रकारेण अध्ययनं जटा अभिधीयते उदाहरणेन दर्श्यते। अग्निमीळे ईळेऽग्निमग्निमीळे ईळे पुरोहितं पुरोहितमीळ ईळे पुरोहितमित्यादि ज्ञेयम्। अथ दण्डलक्षणम्। "क्रममुक्तं विपर्य्यस्य पुनश्च क्रममुत्तरम्। अर्द्धर्चादेव मुक्त्योक्तः क्रमदण्डोऽभिधीयते। उदाहरणम्। अग्निमीळे ईळेऽग्निम् अग्निमग्निमीळे ईळेपुरोहितम् पुरोहितमीळेऽग्निमित्यादि ज्ञेयम्। अथ मालालक्षणम्। "ब्रूयात् क्रमविपर्य्यासावर्धर्चस्यादितोऽन्ततः। अन्तं चादिवदेवं क्रममालेति गीयते। माला मालेव पुष्पाणां पदानामनुग्रथिनी हिता। आवर्त्तने क्रमस्तस्यां क्रमव्युत्क्रमसंक्रमा॰। अथ शिखालक्षणम्। "पदोत्तराज्जटामेव शिखामार्य्याः प्रचक्षते। अथ लेखालक्षणम्। क्रमद्वित्रिचतुःपञ्चपदक्रममुदाहरेत्। पृथक् पृथक् विपर्य्यस्य लेखामाहुः पुनः क्रमात्"। अथ ध्वजलक्षणम्। "ब्रूयादादेः क्रमं सम्यगान्तादुत्तारयेद्यदि। वर्गे च ऋचि यत्र स्यात् पठनं स ध्वजः स्मृतः"। अथ रथलक्षणम्। "पादयोर्द्धर्चयो वापि सहोक्त्या दण्डवद्रथः"। अथ घनलक्षणम्। "जटामुक्त्वा विपर्य्यस्य घनमाहुर्मनीषिणः"। अन्यच्च। "जटाशिखाघनाः प्रोक्ता क्रमपूर्व्वा मनीषिभिः"। इति विकृतिलक्षणान्युक्तानि। अध्ययने संहितापारायणम् पदपारायणम् जटापारायणम् क्रमदण्डपारायणं चतुष्पारायणमित्यर्थः। एतेषां शाखाः पञ्च भवन्ति। एतेषां वेदपारायणानां पञ्च शाखा भवन्तीत्यर्थः। ताः काः ? । आश्वलायनी शांख्यायनी शाकला बाष्कला माण्डूका चेति इति प्रसिद्धाः। तेषामध्ययनम्। तेषाम् आश्वलायनादिशाखानां समानाध्ययनं सूचयति। अध्यायाश्चतुःषष्टिः। अग्निमीळे अयं देवायेत्यादि। चतुःषष्टिरध्याया इत्यर्थः। मण्डलानि दशैव तु। अग्निमीळे—कुशुम्भकम् इत्यादि उपाकर्म्मणि प्रसिद्धानि इत्यर्थः। वर्गाणां परिसंख्यातन्द्वे सहस्रे षडुत्तरे। वर्गादिः आश्वलान्ताः संख्या वालखिल्यैर्विना ज्ञेया। षडुत्तरसहस्रद्वयं वर्गा इत्यर्थः। सहस्रमेकं सूक्तानां निर्विशङ्कं विकल्पितम्। दश सप्त च पठ्यन्ते। सप्तदशाधिकसहस्रं सूक्तानीत्यर्थः। संख्यातं वै पदक्रमम्। एकं शतसहस्रं च द्विपञ्चाशत्सहस्रकम् सार्द्धम् चतुर्दश शाखिनानामितरेषां पञ्चाशीतिः। एकलक्षद्विपञ्चाशत्सहस्रपञ्चशतं चतुर्दश शाकलानां वसिष्ठगोत्रिणाम् इन्द्रोभिरेकसप्ततिपदात्मकोवर्गोनास्ति। एतद्गोत्रीयाणां पञ्चाशीत्यधिकपदानीत्यर्थः। अथ वालखिल्यसहितपदसंख्या उच्यते। सर्व्वकन्तु त्रिपञ्चाशत्सहस्रं शतसप्तकम्। पदानि च द्विनवतिः प्रमाणं शाकलस्य च। एकलक्षत्रिपञ्चाशत्सहस्रसप्तशतं द्विनवति चाधिकानि पदानि इत्यर्थः। पदानि वालखिल्यस्य अर्कसंख्याशतानि च। अधिकानि तु सप्तैव वर्गा अष्टादश स्मृताः। सप्ताधिकद्वादशशतानि पदानीत्यर्थः। इत्याश्वलायनानाम् शांख्यायनानान्तु वालखिल्यसहितपदसंख्या उच्यते। शाकल्यदृष्टे पदलक्षमेकं सार्द्धं तथैव त्रिसहस्रयुक्तम्। शतानि सप्तैव तथाधिकानि चत्वारिंशच्च पदानि चर्चा। शाकल्योमाण्डूकगणस्य चतुःसंहितापदानि एकलक्षत्रिपञ्चाशत्सहस्रसप्तशतचतुस्त्रिंशदधिकानि पदानीत्यर्थः। पदानि वालखिल्यस्य रुद्रसंख्याशतानि च षड्शीत्यधिकानि वर्गाः सप्तदशापि च। एकादशशतषट्पञ्चाशदधिकानि वालखिल्यपदानीत्यर्थः। अष्टपञ्चाशत्पदात्मकक्त्रयस्य यत्र त्रिजो वर्गोनास्ति आश्वलायनानाश्चतुर्ऋचात्मको वर्गः। इत्याश्वलायनशांख्यायनशाखयोरध्ययनयोर्भेद इत्यर्थः। अथ पारायणे ऋक्परिमाणमुच्यते। ऋचां दश सहस्राणि ऋचां पञ्चशतानि च। ऋचामशीतिः पादश्च पारायणं प्रकीर्त्तितम्। एतत्पारायणं वालखिल्यैर्विना संख्यातम्। वालखिल्यानि पारायणे न सन्ति। तदुच्यते। ऋग्वेदान्तर्गतवालखिल्यमेकादशसूक्तम् सूक्तसहस्रसप्तदशाधिकमित्यत्र ऋचां दशसहस्राणीत्येतत्संख्या व्यतिरिक्तानि वालखिल्यानीति प्रसिद्धिः" भाष्यम्। अत्र प्रधान शाखाभेदाभिप्रायेण पञ्चविधत्वमुक्तम् "ऋग्वेदस्य तु शाखाः स्युरेकविंशतिसंख्यकाः" मुक्तिकोपनिषदि एकोनविंशतिभेदोक्तिः प्रशाखाभिप्रायेण अत एव प्रशाखाश्च इति प्रागुक्तभाग॰ वाक्ये तथोक्तम्। एष उपनिषद्वेदस्य उपनिषच्छब्दे उक्तः। "ऋग्वेदो देवदैवत्यो यजुर्वेदस्तु मानुषः। सामवेदः स्मृतः पैत्रस्तस्मात्तस्याशुचिर्ध्वनिः

मनुः ।"ऋग्वेदाधिपतिर्जीवः" ज्यो०उक्तेः जीवस्य ऋग्वेदाधिपत्वं तेन तस्य वारे तद्दृते च तत्तत्कर्म ऋग्वेदिभिः करणीयम् "शाखाधिपे बलिनि वीर्य्ययुतेऽथवास्मिन्" । ज्यो०त० तद्ध्यानं तु "ऋग्वेदः पद्मपत्राक्षो गायत्राः सोमदैवतः । आत्रेयगोत्रः" इति विष्णु०धा० उक्तम् । ऋग्वेदोऽध्येयत्वेनास्त्यस्य इनि । ऋग्वेदिन् तत्पाठके ।

ऋघा स्त्री ऋह-बा०घन् किच्च । हिंसायाम् । "कविर्यस्त ऋघावान्" ऋ० १,१५२,२, "ऋघावान् हिंसकः" भा० । "महाव्रातस्तुवि कूर्मिर्ऋघावान्" ऋ०२,२०,२ ।

ऋच स्तुतौ तुदा० पर० सक० सेट् । ऋचति आर्चीत् । आनर्च । कर्मणि ऋच्यते आर्चि ।"याभ्यां गायत्रमृच्यते" ऋ० ८,३८,१० "ब्रह्माण्यृच्यन्ते युवभ्याम्"७,७०,६,

ऋच् स्त्री ऋच्यते स्तूयतेऽनया ऋच-करणे क्विप् । वेदमन्त्रभेदे "यत्रार्थवशेन पादव्यवस्थितिः सा ऋक्"जै० । "ऋचो यजूंषि सामानि निगदामन्त्राः"कात्या० १,२,१, । "ऋगादयो निगदान्ताश्चत्वारोमन्त्राः । तत्रार्थवशेन वृत्तवशेन वा यत्र पादव्यवस्था, सा ऋक् तत्र "समिधाग्निं दुवस्यत" इत्यादौ यत्र प्रत्यक्षेण समाप्तोऽर्थोऽवस्यते तत्रार्थवशेन पादव्यवस्था यत्र च क्रियापदानुपादानात् "सुसमिद्धाय शोचिषे तं त्वा समिद्भिरङ्गिरः" इत्यादौ अपर्यवसितोऽर्थस्तत्र वृत्तवशेन पादव्यवस्था भवति अतश्च यत्र नियताक्षराणि नियताश्च पादानियतानि चावसानानि सा ऋगित्युच्यते । अनियताक्षरपादावसानं यजुः यद्यपि प्रगीतं मन्त्रवाक्यं सामेत्यभियुक्तप्रयोगः तथापि तत्र विशेषणं गीतिः विशेष्याण्यृगक्षराणि नाम्नश्चैतद्विशेषणा विशेष्ये-बुद्धिरिति प्रथमं प्रतीयमानत्वात् गीतिरेव सामेत्युच्यते तथा च "कवतीषु रथन्तरं गायति" "यद्योन्यां तदुत्तरयोर्गायति""ऋच्यध्यूढं साम गायति" प्रजापतेर्हृदयमनृच गायतीत्याद्युपपन्नं भवति अत ऋगक्षरातिरिक्तं यद्गीतिशब्दवाच्यं तत् सामशब्देनोच्यते । ननु यदि रथन्तरादिशब्दा गीतेरेव वाचकाः तदा "रथन्तरेण स्तुवीतेति" कथं स्तुतिसाधनत्वम् गुणगुणिसम्बन्धकीर्त्तनं हि स्तुतिः सा च गीतिरूपेण साम्ना न सम्भवति । उच्यते गीतेः स्वयंस्तुतिवाचकत्वाभावेऽपि गत्यक्षरप्रकटनद्वारा स्तुतिसाधनत्वं भवतीति नोक्तदोषः । निगदाः प्रैषाः परसम्बोधनार्थाः "प्रोक्षणीरासादय""अग्नीदग्नीन्विहर" इत्येवमादयः । ननु निगदा अपि यजूंष्येव ततः किमर्थं पृथगुक्ताः । उच्यते "उपांशु यजुषा उच्चैर्निगदेनेति" धर्मभेदेन यजुःष्वमन्त्रभीवशङ्कया पृथग्वचनम् । वस्तुतस्तु निगदानां यजुष्ट्वमेव परसम्बोधनार्थत्वात्तु उच्चैर्निगदेनेति धर्मभेदः न च धर्मभेदाद्भेदः ऋक्सामयोरपि क्वचिदुपांशुप्रयोगविधानात् अतस्त्रैविध्यमेव मन्त्राणाम् । तथाचोक्तम् "अहेबुध्न्यमन्त्रं मे गोपाय यमृषयस्त्रैविदा विदुः" ऋचः सामानि यजूंषीति त्रीन्वेदान्विदन्तीति त्रिविदः त्रिविदां सम्बन्धिनोऽध्येतारस्त्रैविदाः ते च यं मन्त्रभागमृगादिरूपेण त्रिविधमाहुस्तं गोपायेति योजना । ऋग्यजुःसामात्मको मन्त्रभेदोऽभिहितः तदवान्तरभेदाकाङ्क्षायामृचां च साम्नां चाध्येतृप्रसिद्धत्रैव भेदे सिद्धे लक्षणं न क्रियते" कर्क; । "ऋचैव हौत्रमकरोद्यजुषाध्वर्य्यवं साम्नोद्गीथम्" ऐत० "त्रिधा विहिता वागृचो यजूंषि सामानि" शत०ब्रा० ६,६,२,४ । "ऋचः सामानि जज्ञिरे पुरुषसू०।"तदेतदृचाभ्यनूक्तम्"छा०उ०। २विश उत्तरे निरु०। समासे तदन्तात् अच् । अर्द्धर्चः एकर्चम् द्व्यृचं षड्ृचम् इत्यादि । बहु०। अध्येतर्य्येव अच् । अन्नृचः बह्वृचः इत्यादि अन्ये तु न अच् । अनृक् साम। प्राचुर्ये मयट् । ऋङ्मय तत्प्रचुरे त्रि० स्त्रियां ङीप् । "एतं यत्नमृङ्मयं यजुर्मयम् साममयमाहुतिमयम्" शत०ब्रा० ४, २,४,५ । भावे क्विप् । ३स्तुतौ ४पूजायाञ्च ।

ऋचस् त्रि० ऋच-बा०कसुन् । स्तोतरि । "मा अर्वतो नर्ऋचसे ररीहि" ऋ०६,२८,५ ।"ऋचसे स्तोत्रे"भा०

ऋचसे अव्य०ऋच-तुमर्थे कसेन् । स्तोतुमित्यर्थे । "प्र वां मन्मान्यृचसेन वानि"ऋ० ७,६१,६ ।

ऋचीक पु० ऋच-ईकक् ।१दिवःपुत्रे सविष्टभेदे ।"दिवः पुत्रो बृहद्भानुश्चक्षुरात्मा विभावसुः । सविता स ऋचीकोऽर्कोभानुराशावहोरविः"भा०आ०१अ० । भृगुवंश्ये २जमदग्निपितरि ऋषिभेदे । "तस्मिंश्चियुक्ते विधिना योगक्षेमाय भार्गवे । अन्यसुतपादयास पुत्रं भृगुरनिन्दितम् । च्यवनं दीप्ततपसं धर्मात्मानं यशस्विनम् । यः सरोषाच्च्युतोगर्भात् मातुर्मोक्षाय भारत ! । आरुषी तु मनोः कन्या तस्य पत्नी मनीषिणः । और्वस्तस्यां समभवदूरुं भित्त्वा महायशाः । महातेजा; महावीर्य्योबाल एव गुणैर्युतः । ऋचीकस्तस्य पुत्रस्तु जमदग्निस्ततोऽभवत्" भा० आ० ६६ अ० । तस्य चरितम् । भा०अनु०प०४अ० विस्तरेण वर्णितम् संक्षेपतस्तु हरिवंशे २८अ० यथा "गाधेः कन्या महाभागा नाम्ना सत्यवती शुभा । तां गाधिर्भृगुपुत्राय ऋचीकाय ददौ प्रभुः । तस्याः प्रीतोऽभव-

भर्त्ता भार्गवो भृगुनन्दनः । पुत्रार्थं कल्पयामास चरुं गाधेस्तथैव च । उवाचाहूय तां भर्त्ता ऋचीको भार्गवस्तदा । उपयोज्यश्चरुरयं त्वया मात्रा त्वयं तव । तस्यां जनिष्यते पुत्रो दीप्तिमान् क्षत्रियर्षभः । अजेयः क्षत्रियैर्लोके क्षत्रियर्षभसूदनः । तवापि पुत्रं कल्याणि ! धृतिमन्तं तपोधनम् । शमात्मकं द्विजश्रेष्ठं चरुरेष विधास्यति । एवमुक्त्वा तु तां भार्यामृचीको भृगुनन्दनः । तपस्यभिरतो नित्यमरण्यं प्रविवेश ह । गाधिः सदारस्तु तदा ऋचीकाश्रममभ्यगात् । तीर्थयात्राप्रसङ्गेन सुतां द्रष्टुं नरेश्वरः । चरुद्वयं गृहीत्वा तदृषेः सत्यवती तदा । चरुमादाय यत्नेन सा तु मात्रे न्यवेदयत् । माता व्यत्यस्य दैवेन दुहित्रे स्वं चरुं ददौ । तस्याश्चरुमथाज्ञानादात्मसंस्थं चकार ह । अथ सत्यवती गर्भं क्षत्रियान्तकरं तदा । धारयामास दीप्तेन वपुषा घोरदर्शनम् । तामृचीकस्ततो दृष्ट्वा योगेनाभ्यनुसृत्य च । तामब्रवीद्द्विजश्रेष्ठः स्वां भार्यां वरवर्णिनीम् । मात्राऽसि वञ्चिता भद्रे ! चरुव्यत्यासहेतुना । जनिष्यते हि पुत्रस्ते क्रूरकर्माऽतिदारुणः । भ्राता जनिष्यते चापि ब्रह्मभूतस्तपोधनः । विश्वं हि ब्रह्म तपसा मया तस्मिन् समर्पितम् । एवमुक्ता महाभागा भर्त्रा सत्यवती तदा । प्रसादयामास पतिं पुत्रो मे नेदृशो भवेत् । ब्राह्मणापसदःत्वत्त इत्युक्तो मुनिरब्रवीत् । नैष सङ्कल्पितः कामो मया भद्रे ! तथाऽस्त्विति । उग्रकर्मा भवेत् पुत्रः पितृमातुश्च कारणात् । पुनः सत्यवती वाक्यमेवमुक्ताऽब्रवीदिदम् । इच्छन् लोकानपि मुने ! सृजेथाः किं पुनः सुतम् । शमात्मकमृजुं त्वं मे पुत्रं दातुमिहार्हसि । काममेवंविधः पौत्रो मम स्यात्तव च प्रभो ! । यद्यन्यथा न शक्यं वै कर्त्तुमेतद्द्विजोत्तम ।। ततः प्रसादमकरोत् स तस्यास्तपसो बलात् । भद्रे । नास्ति विशेषो मे पौत्रे च वरवर्णिनि । त्वया यथोक्तं वचनं तथा भद्रे ! भविष्यति । ततः सत्यवती पुत्रं जनयामास भार्गवम् । तपस्यभिरतं दान्तं जमदग्निं शमात्मकम् । भृगोश्चरुविपर्यासे रौद्रवैष्णवयोः पुरा । जमनाद्वैष्णवेऽथांशे जमदग्निरजायत । सा हि सत्यवती पुण्या सत्यधर्मपरायणा । कौशिकीति समाख्याता प्रवृत्तेयं महानदी । इक्ष्वाकुवंशप्रभवो रेणुर्नाम नराधिपः । तस्य कन्या महाभागा कामली नाम रेणुका । रेणुकायान्तु कामल्यां तपोविद्यासमन्वितः । आर्चीको जनयामास जामदग्न्यं सुदारुणम् । सर्वविद्यान्तगं श्रेष्ठं धनुर्वेदस्य पारगम् । रामं क्षत्रियहन्तारं प्रदीप्तमिव पावकम् । और्वस्यैवमृचीकस्य सत्यवत्यां महायशाः । जमदग्निस्तपोवीर्याज्जज्ञे ब्रह्मविदांवरः । मध्यमश्च शुनः शेफः शुनःपुच्छः कनिष्ठकः । विश्वामित्रन्तु दायादं गाधिः कुशिकनन्दनः । जनयामास पुत्रन्तु तपोविद्याशमात्मकम् । प्राप्य ब्रह्मर्षिसमतां योऽयं सप्तर्षितां गतः । विश्वामित्रस्तु धर्मात्मा नाम्ना विश्वरथः स्मृतः । जज्ञे भृगुप्रसादेन कौशिकाद्वंशवर्द्धनः" । "अथर्चीकादयोऽभ्येत्य पितरो राममब्रुवन् । राम ! राम ! महाभाग ! प्रीताः स्म तव भार्गव !" भा० आ० २अ० । २भरतसुतभुमन्युसुते नृपभेदे । "ततो महद्भिः क्रतुभिरीजानो भरतस्तदा । लेभे पुत्रं भरद्वाजाद् भुमन्युं नाम भारत ! इत्युपक्रम्य "पुष्करिण्यामृचीकश्च भुमन्योरभवत् सुतः" भा० आ० ९४अ० ।

ऋचीष न० ऋच्–कीषन् । पिष्टपचनपात्रे हेम० ।

ऋचीषम पु० ऋचा स्तुत्या समः वेदे नि० ईत्त्वं षत्वञ्च । स्तुत्यवशेषेण समानगुणे । "इह श्रुत इन्द्रो अस्मे अद्य स्तवे वज्र्यृचीषमः" ऋ० १०.२२,२ । ऋचीषमः । "वव्राथ इन्द्र ! ते शतं शतं भूमीरुत स्युः । न त्वा वज्रिन्" इत्यादिऋचा ऋ० ८,७०,५ । स्तुत्या समानगुणकः" भा० "परोमात्रमृचीषममिन्द्रमुग्रम्" ऋ० ८,६८,६ । ऋचीषमम् ऋचा स्तुत्या समम् यद्यप्यपरिच्छिन्नस्तथापि स्तुतिर्यावन्मात्रं विषयीकरोति तत्समम्" इत्यर्थः भा० । "अवचष्ट ऋचीषमः" ऋ० ८,६२,६ । "हत्वा परमज्या ऋचीषमः" ८,९०,१ । "२दीप्त्या समे च "अहन् वृत्रमृचीषमः ऋचा दीप्त्या समः" भा० ।

ऋचेयु च० राजभेदे । पूरुवंशवर्णने "रौद्राश्वस्य महेष्वासा दशाप्सरसि सूनवः" इत्युपक्रम्य "ऋचेयुरथ कक्षेयुः स्थण्डिलेयुश्च वीर्यवान्" भा० आ० ९४अ० ।

ऋच्छ मोहे मूर्त्तौ (कठिनीभावे) अक० गमने सक० तुदा० पर० सेट् । ऋच्छति आर्च्छीत् आनर्च्छ । उपसर्गात् अस्यादेर्वृद्धिः प्रार्च्छति उपार्च्छति । "उपसर्गाः क्रियायोगे" पा० इत्युक्तेः यत्क्रियया योगस्तत्क्रियायामेवोपसर्गत्वम् तेन प्रगतः ऋच्छकोऽस्मात् वाक्ये प्रादि० ब० । प्रर्च्छकः इत्यादौ न वृद्धिः अत्र प्रस्य गमेरुपसर्गत्वेन ऋच्छोपसर्गत्वाभावात् ।

ऋच्छरा स्त्री ऋच्छ–कर्मणि करणे वा घञ् । वेश्यायाम् । उज्ज्वल० साधारणत्वेन सर्वैर्गम्यत्वात् इन्द्रियभोगजनकसाधनत्वाच्च तस्यास्तथात्वम् ।

ऋज गतौ अर्ज्जने (बलाधाने) अर्ज्जने च भ्वा० आत्म० सक० स्थैर्य्ये अक० सेट् । अर्ज्जते आर्ज्जिष्ट आनृजे ।

ऋञ्ज भर्ज्जने इदित् भ्वा० आ० सक० सेट् । ऋञ्जते आर्ञ्जिष्ट । ऋञ्जां बभूव आस चक्रे । ऋञ्जमानः ।

ऋजिप्य त्रि० ऋजु आप्नोति गच्छति आप–यत् पृ० । ऋजुगामिनि "ऋजिप्यं श्येनं प्रुषितप्सुम्" ऋ० ४, २८,२ । "ऋजु आप्नोति गच्छतीत्यृजिप्यः" भा० । "ऋजिप्य इमिन्द्रावतः" ४,२७,४ ।

ऋजिश्वन् पु० राजभेदे "अयमृष्यमृजिश्वने दातं दाशुषे" ऋ०६,२०,७ । ऋजिश्वने एतन्नामकाय राज्ञे" भा० ।

ऋजीक त्रि० ऋज-गतौ ईकन् किच्च । १इन्द्रे २धूमे च उज्ज्व० । उपाजीकशब्दे उदा० करणे ईकन् । ३साधने च "आविरृजीको विदथा" ऋ० ४,३८,४ । "आविरृजीका आविर्भूतसाधना" भा० ।

ऋजीति पु० ऋजु गच्छति ई–गतौ क्तिच् पृ०। ऋजुगामिनि वाचे "ऋजीते ! परि वृङ्धि नोऽश्मा" ऋ०६,७५,१२ । "ऋजु गच्छति ऋजीतिरेषुः" भा०।

ऋजीष न० अर्ज्यते रसोऽस्मिन् अर्ज्ज आधारे कीषन् ऋजादेशः । १पिष्टपचनपात्रे २नरकभेदे पिष्टपचनाकारपात्रभेदेन पापिनां पचनहेतुत्वेन तस्य तथात्वम् । नरकगणनायाम मनुः । "लोहशङ्कुमृजीषञ्च" नरकशब्दे विवृतिः । ३नीरसे सोमलताचूर्णे "सोमो राजामृतं सुत ऋजीषेणाजहान्मृत्युम्" यजु० १९,७२ "ऋजीषं नीरसं सोमलताचूर्णम्" वेददी० । ४गतसारे सोमे पु०।"समुद्रे त इति ऋजीषकुम्भं प्लावयति"काव्या० १०,९,१ । "गतसारः सोमः ऋजीषस्तेन पूर्णकुम्भम्" कर्कः । यथा मादकद्रव्यस्याभिषवणेन सारांशे स्रुते अवशिष्टः नीरसभागः (सिटि) अवतिष्ठते एवं सोमस्याभिषवणे निःसारांश ऋजीष इत्युच्यते । कर्मणि कीषन् । ५अभिषुते सोमे च "कुविद्राजानं मघवन्नृजीषिन्" ! ऋ०३,४३,५ । "ऋजीषिन् ! सोमवन् !"भा०।"अन्तरिक्षादृजीषी" २,४६,२ । "ऋजीषी सोमवान्" भा०। तैत्ति० अस्य निरुक्तिर्दर्शिता "तेनांशुमद्यदभिषुणोति तेनेर्जीषि" ततः जातार्थे तारका० इतच् । ऋजीषित नीरसतया जाते त्रि०। ऋजीषं दत्त्वं देयत्वेनास्त्यस्य इनि । ऋजीषिन् गतसारसोमद्रव्यसम्प्रदाने देवे 'इन्द्र ! सोमं सोमपते पिबेमं माध्यन्दिनं सवनं चारु यत्ते । प्रप्रुथ्या शिप्रे मघवन्नृजीषिन् ! विमुच्या हरी इह मादयस्व" ऋ० ३,३२,१, ऋजीषशब्देन गतसारं सोमद्रव्यमुच्यते" भा० ।

ऋजु त्रि० अर्जयति गुणान् अर्ज्ज–कु नि० ऋजादेशः । १प्रगुणे २सरले अवक्रे । सरलस्य बहुगुणार्ज्जकत्वात तथात्वम् । स्त्रियां गुणवचनत्वात् वा ङीष् । "ऋज्वीर्दधानैरवनतशिरः कन्धराः" माघः । "ऋज्वायताः स्नेहमिव स्रवन्तीः" भट्टिः "उमां स पश्यन् ऋजुनैव चक्षुषा" कुमा०"ऋजवस्ते तु सर्वे स्युरव्रणाः सौम्यदर्शनाः" मनुः ते दण्डाः ।"ऋजवोदर्भाः"गोभि०सू०। नान्दीमुखादौ दैवे पैत्रे च दर्भा ऋजवः कार्य्याः । "धर्मप्रधाना ऋजवः पुत्रवन्तो धनान्विताः" या० । ततः वेदे वा० प्रकारे धाच । ऋजुधा सरलप्रकारे अव्य० "यज्ञमेव तदृजुधा प्रतिष्ठापयति" ऐत० । भावे पृथ्वा० इमनिच् । ऋजिमन् सारल्ये अकौटिल्ये पु० । भावे तल् । ऋजुता तदर्थे स्त्री "ऋजुतां नयतः स्मरामि ते" कुमा० । त्व । ऋजुत्व न० गुणवचनत्वात् अण् आर्ज्जव न० तत्रार्थे । ४अनुकूले ५कल्याणे । "ऋजुहस्ता ऋजुवनिः" ऋ० ५,४१,१५ ।"ऋजुहस्तास्तदनुकूलहस्ता ऋजुवनिः कल्याणदाना"भा०। ६शोभने च"धारवाकेष्वृजुगाथः"! ऋ०५, ४४,५"ऋजुगाथ ! शोभनस्तुतिकः"भा०। ७वसुदेवपुत्रभेदे पु०। "वसुदेवस्तु देवक्यामष्ट पुत्रानजीजनत् । कीर्त्तिमन्तं सुषेणञ्च भद्रसेनमुदारधीः । ऋजुं संमर्द्दनं भद्रं सङ्कर्षणमहीश्वरम् । अष्टमस्तु तयोरासीत स्वयमेव हरिः किल । सुभद्रा च महाभागा तव राजन् ! पितामही" भाग० ९,२४, अ०२५,२६ । ऋजुत्वञ्च आर्ज्जवशब्दे ८०६ पृष्ठे व्याख्यातम् वाक्यस्य तत्त्वञ्च सटार्थत्वम । "धर्मशास्त्रमृजुभिर्मिताक्षरैः" मिता० ।

ऋजुकाय पु० ऋजुः कायोऽस्य । १कश्यपमुनौ त्रिका० २अकुटिलदेहमात्रे त्रि०।"तास्मिन् स्वस्तिकमासीन ऋजुकायः समभ्यसेत्"भाग०२,२८,९ ।[हारिणि २वाणे पु०।

ऋजुग त्रि० ऋजु यथा तथा गच्छति गम ड । १सरलव्यव-

ऋजुरोहित न० कर्म्म०। सरले इन्द्रधनुषीति केचित् वस्तुतः "रोहितं रुधिरे प्रोक्तमृजुशक्रशरासने" विश्वोक्तेः उत्पातसूचके सरले इन्द्रधनुषि रोहितशब्दस्यैव वृत्तिः तेन "इन्द्रायुधं शक्रधनुस्तदेव ऋजु रोहितम्" अमरे 'सन्तानश्च धनुर्देवायुध तदृजु रोहितम्' हेमचन्द्रे च तदेव ऋजु लेत रोहितमिति व्याख्यानात न विशिष्टनामेत्यवधेयम् ।

ऋजुसर्प पु० कृष्णपर्वंवत् नित्यसमा० । सुश्रुतोक्ते दर्व्वीकरविशेषे सर्पभेदे । "तत्र दर्व्वीकरा कृष्णसर्पः ऋजुसर्पः

श्वेतोदरो महाशिरा अलगर्द्दाशीविष” इति उक्तम् ।

ऋजूक पु० ऋज–बा० ऊकङ् । देशभेदे विपाशानदी-जन्मभूमौ । ऋजूके भवा ठञ्–पृषो०। आर्जीकीया तत्-प्रभवायां विपाशायाम् “इमं मे गङ्गे ! यमुने ! सरस्वति ! शतुद्रि ! स्तोमं सचता परुष्ण्या । असिक्न्या मरुद्वृधे वितस्तयार्जीकीये ! शृणुह्या सुषोमया” ऋ० १०,७५,५, इमामुदाहृत्य निरुक्ते आह । “आर्जकीयां विपाडित्याहुः ऋजूकप्रभवा ऋजुगामिनी वा” तेन विपाशानद्युत्-पत्तिस्थानमृजूक इति गम्यते ।

ऋजूकरण न० अनृजुः ऋजुः क्रियतेऽनेन ऋजु+अभूततद्भावे च्वि+कृ–करणे ल्युट् । १सरलतासम्पादनसाधने सुश्रु-तोक्ते १यन्त्रव्यापारभेदे । “यन्त्रकर्म्माणि तु निर्घातनपूरण-बन्धनव्यपवर्त्तनचालनविवर्त्तनविवरणपीडनमार्गविशोधन-विकर्षणाहरणाञ्छनोन्नमनविनमनभञ्जनोन्मथनाचूषणैषण-दारणर्ज्जूकरणप्रक्षालनप्रधावनप्रमार्जनानि चतुर्विंशतिः” सुश्रु०। २तथाभूतव्यापारमात्रे च ।

ऋजूयत् त्रि० अजु गच्छति ऋतुं गच्छति वा ऋजु+अत+–बा क्यच् ऋजूय–पृषो० तस्य जो वा शतृ । १ऋजु-गामिनि २ऋतुगामिनि च “देवानां भद्रा सुमतिरृजूयतां देवानां रातिरभि नो निवर्त्तताम्” ऋ० १,८९,१, स्मृतिमा-श्रित्य “ऋजूयतामृजुगामिनामृतुगामिनां वेति” निरुक्तम् ।

ऋज्र पु० ऋज–गत्यादिषु रन् नि०। १नायके उज्ज्वल० । २ऋजुगामिनि त्रि०। “सू मन्यू ऋज्रा वातस्याश्वा” ऋ० १, १९४,५ । “ऋज्रा ऋजुगामिनौ” भा० । “ऋज्रा वाजं न गध्यम्” ऋ० ४,१६,११ ।

ऋज्वी स्त्री ऋजु+स्त्रियां वा ङीष् । १आर्ज्जववत्यां स्त्रियाम् ऋजुशब्दे उदा० । सू० सि० उक्ते ग्रहाणां २गतिभेदे । “वक्रानुवक्रा कुटिला मन्दा मन्दतरा समा । तथा शीघ्रा शीघ्रतरा ग्रहाणामष्टधा गतिः । तत्रातिशीघ्रा शीघ्राख्या मन्दा मन्दतरा समा । ऋज्वीति पञ्चधा ज्ञेया या वक्रा सानुवक्रगा” सू०। “तत्राष्टविधगतिषु अतिशीघ्रेत्यादिः समेत्यन्ता इत्येवं पञ्चधा गतिः ऋज्वी-मार्गी गतिर्ज्ञेया या गति: सानुवक्रगा अनुवक्रगमनेन सह वर्त्तमाना पूर्व्वश्लोकेऽनुवक्रगतेर्वक्रकुटिलमध्येऽभिधा-नात् उभयासन्नत्वाच्च सानुवक्रा कुटिलेति गतिर्वक्रा ज्ञेया तथा च ग्रहाणां मार्गी वक्रेति गतिद्वयम्” रङ्ग०।

ऋञ्जसान पु० ऋजि–असानच् । मेघे उज्ज्वल० ।

ऋण गतौ तना० उभ० सक० सेट् । ऋणोति ऋणोति, ऋणुते आर्णीत् आर्णिष्ट । आनर्ण आनृणतुः आनृणे । ऋणः ।

ऋण त्रि० ऋण–क । १गन्तरि । “यवीयानृणो न तायुरति धन्वा राट्” ऋ० ६,१२,५ “ऋणः शीघ्रगन्ता” भा० “उष ऋणेव यातय” १०,१२७,७ । ऋ–क्त नि०। २अवश्यदेये (धार) अर्थे न० पुंन०। “ऋतावानश्चयमाना ऋ-णानि” ऋ० २,२७,४ । “ऋणानि शोधयितव्यानि देयानि” भा०। “पर ऋणा सावीरध मत्कृतानि” ऋ०२,२८ ९ । “ऋणानि पित्रादिभिः कृतानि अस्माभिर्देयानि । अथ मत्कृतानि ऋणानि” भा० तच्च अवश्यशोध्यत्वेन लौकिकमलौकिकञ्च । तत्र देवादिविषयाणां चतुर्णां पञ्चानां वा अवश्यशोध्यत्वादलौकिकर्णत्वम् अशोधने पापहेतु-त्वात्तस्य तथात्वम् । ऋणानपक्रियाया उपपातकशब्दे उक्त-शास्त्रेण पापहेतुत्वम् । “देवानाञ्च पितॄणाञ्च ऋषीणाञ्च तथा नरः। ऋणवान् जायते यस्मात् तन्मोक्षे प्रयतेत् सदा । देवानामनृणो जन्तुर्यज्ञैर्भवति मानवः । अत्ल-वित्तश्च पूजाभिरुपवासव्रतैस्तथा । श्राद्धेन प्रजया चैव पितॄणामनृणो भवेत् । ऋषीणां ब्रह्मचर्य्येण श्रुतेन तपसा तथा” विष्णुधर्म्मो० पु० । “जायमानो वै ब्राह्म-णस्त्रिभिरृणवान् भवति ब्रह्मचर्य्येण ऋषिभ्यो, यज्ञेन देवेभ्यः, प्रजया पितृभ्यः” मिता० श्रुतिः । “न च जातमात्रोऽकृतदाराग्निपरिग्रहो यज्ञादिष्वधिक्रियते । तस्मादधिकारी जायमानो ब्राह्मणादिर्यज्ञादीननुतिष्ठेत्” मिता०। “ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् । अनपाकृत्य मोक्षं तु सेवमानः पतत्यधः” । “महर्षिपितृदेवानां गत्वानृण्यं यथाविधि । पुत्रे सर्व्वं समासज्य वसेन्माध्यस्थ्यमाश्रितः” मनुना क्रमेण चातु-राश्रम्यपक्षमाश्रित्योक्तम् । यथा च ब्रह्मचर्य्यादेव प्रव्र-ज्याधिकारस्तथा आश्रमशब्दे ८२९ पृ० उक्तम् । अवश्यदेयत्वेन चतुर्विधं पञ्चविधञ्चर्णं दर्शितं भा० आ० १२० अ० । “ऋणैश्चतुर्भिः संयुक्ता जायन्ते मानवा भुवि । पितृदेवर्षिमनुजैर्देयं तेभ्यश्च धर्म्मतः” इत्युपक्रम्य “यज्ञैस्तु देवान् प्रीणाति स्वाध्यायतपसा मुनीन् । पुत्रैः श्राद्धैः पितॄंश्चापि आनृशंस्येन मानवान्” “ऋणमु-न्मुच्य देवानामृषीणाञ्च तथैव च । पितॄणामथ विप्राणाम-तिथीनाञ्च पञ्चमम्” अनु० २७अ० । “ऋणाभिधानात् स्वयमेव केवलं तदा पितॄणां मुमुचे स बन्धनात्” “अस-ह्यपीडं भगवन्नृणमन्त्यमवेहि मे” “नचोपलेभे पूर्व्वेषामृण-निर्मोक्षसाधनम्” रघुः । लौकिकमृणम् (धार) (कर्ज्ज)

ऋणादानशब्दे वक्ष्यते। २दुर्गे ३भूमौ ५जले च सि॰ कौ॰ प्रवत्सरकम्बलवसनस्य दशपूर्वकात् ऋणादेर्वृद्धिः प्रार्णम् वत्सरार्णं कम्बलार्णं वसनार्णम् दशार्णो-देशो दशार्णा नदी। ऋणशोधनार्थमृणमृणार्णम्। ऋङ्क-शास्त्रोक्ते कुतश्चित् राश्यन्तरादवश्यं वियोज्यसंख्यान्विते पदार्थे। तत्सूचकसंख्यायाः सजातीयेन विजातीयेन धनेन च योगवियोगादिक्रियादिकं बीजग॰ उक्तं यथा।

"धनर्णसङ्कलने करणसूत्रं वृत्तार्द्धम्। योगे युतिः स्यात् क्षययोः स्वयोर्वा धनर्णयोरन्तरमेव योगः। उदा॰। रूपत्रयं रूपचतुष्टयं च क्षयं धनं वा सहितं वदाशु। स्वर्णं क्षयं स्वं च पृथक् पृथङ्मे धनर्णयोः सङ्कलनामवैषि। अत्र रूपाणामव्यक्तानां चाद्याक्षराण्युपलक्षणार्थं लेख्यानि। यानि ऋणगतानि तान्यूर्द्ध्वबिन्दूनि। न्यासः रू ३˙ रू ४˙ योगे जातं रू ७˙ न्यासः रू ३ रू ४ योगे जातं रू ७। न्यासः रू ३ रू ४˙ योगे जातं रू १˙। न्यासः रू ३˙ रू ४ योगे जातं रू १। एवं विभिन्नेष्वपि। धनर्णव्यवकलने करणसूत्रं वृत्तार्द्धम्। संशोध्यमानं स्वमृणत्वमेति स्वत्वं क्षयस्तद्युतिरुक्तवच्च। उदा॰ त्रयाद्द्वयं स्वात् स्वमृणादृणं च व्यस्तं च संशोध्य वदाशु शेषम्। न्यासः रू ३ रू २ अन्तरे जातं रू १। न्यासः रू ३˙ रू २˙ अन्तरे जातं रू १˙। न्यासः रू ३ रू २˙ अन्तरे जातं रू ५ न्यासः रू ३˙ रू २ अन्तरे जातं रू ५˙।

गुणनभागे करणसूत्रं वृत्तार्द्धम्। स्वयोरस्वयोः स्वं बधः स्वर्णघाते क्षयो भागहारेऽपि चैवं निरुक्तम्। उदा॰। धनं धनेनर्णमृणेन निघ्नं द्वयं त्रयेण स्वमृणेन किं स्यात्। न्यासः रू २ रू ३ धनं धनघ्नं धनं स्यादिति। रू ६। न्यासः रू २˙ रू ३˙ ऋणमृणघ्नं धनं स्यादिति जातं रू ६। न्यासः रू २ रू ३˙ धनमृणगुणमृणं स्यादिति जातं रू ६˙। न्यासः रू २˙ रू ३ ऋणं धनगुणमृणं स्यादिति जातं रू ६˙। इति धनर्णगुणनम्।

भागहारेऽपि चैवं निरुक्तमिति। उदा॰। रूपाष्टकं रूपचतुष्टयेन धनं धनेनर्णमृणेन भक्तम्। ऋणं धनेन स्वमृणेन किं स्यादुद्रुतं वदेदं यदि बोबुधीषि। न्यासः रू ८ रू ४ धनं धनहृतं धनं स्यादिति जातं रू २। न्यासः रू ८˙ रू ४˙ ऋणमृणहृतं धनं स्यादिति जातं रू २। न्यासः रू ८˙ रू ४ ऋणं धनहृतम् ऋणं स्यादिति जातं रू २˙। न्यासः रू ८ रू ४˙ धनमृणहृतमृणं स्यादिति जातं रू २˙। इति धनर्णभागहारः।

वर्गमूलयोः करणसूत्रं वृत्तार्द्धम्। कृतिः स्वर्णयोः स्वं स्वमूले धनर्णे न मूलं क्षयस्यास्ति तस्याकृतित्वात्। उदा॰। धनस्य रूपत्रितयस्य वर्गः क्षयस्य च ब्रूहि सखे ममाशु। न्यासः रू ३ रू ३˙ जातौ वर्गौ रू ९ रू ९। धनात्मकानामधनात्मकानां मूलं नवानां च पृथग्वदाशु। न्यासः रू ९ मूलं रू ३ वा रू ३˙। न्यासः रू ९˙ एषामवर्गत्वान्मूलं नास्ति। इति धनर्णवर्गमूले।

खसङ्कलव्यवकलने करणसूत्रं वृत्तार्द्धम्। खयोगे वियोगे धनर्णं तथैव च्युतं शून्यतस्तद्विपर्य्यासमेति। उदा॰ रूपत्रयं स्वं क्षयगं च खं च किं स्यात् खयुक्तं वद खाच्च्युतं च। न्यासः रू ३ रू ३˙ रू ० एतानि खयुतान्यविकृतान्येव। रू ३ रू ३˙ रू ० एतानि खाच्च्युतानि रू ३˙ रू ३ विपर्य्यस्तानि"।

"छेदं गुणं गुणं छेदं वर्गं मूलं पदं कृतिम्। ऋणं स्वं स्वमृणं कुर्य्याद्दृश्ये राशिप्रसिद्धये" लीला॰।

ऋणकाति त्रि॰ ऋणवदवश्यफलप्रदा कातिः स्तुतिर्यस्य। अवश्यफलदायकस्तुतिशालिनि "सासहिमृणकातिमदाभ्यम्" ऋ॰ ८,६१,१२। ऋणकातिः ऋणवदवश्यफलप्रदस्तुतिकः भा॰।

ऋणञ्चय पु॰ नृपभेदे "ऋणञ्चयस्य प्रयता मघानि" ऋ॰ ५, ३०,१२, "ऋणञ्चयस्यैतन्नामकस्य राज्ञः" भा॰ ऋणञ्चये राजनि रुशमानाम्" ऋ॰ ५,३०,१४।

ऋणचित् पु॰ ऋणमिव चिनोति चि—क्विप्। ऋणस्येव स्तोटकामस्याधायके यजमाने। "स ऋणचिदृणया ब्रह्मणस्पतिः" ऋ॰ २,२३,१७। ऋणचित् स्तोटकामऋणमिव चिनोति" भा॰।

ऋणदास पु॰ ऋणात् मोचनेन कृतोदासः। दासभेदे। "गृहजातस्तथा क्रीतो लब्धोदायादुपागतः। अनाकालभृतस्तद्वदाहितः स्वामिना च यः। मोचितो महतश्चर्णाद्युद्धे प्राप्तः पणे जितः। तवाहमित्युपगतः प्रव्रज्यावसितः कृतः। भक्तदासश्च विज्ञेयस्तथैव बडवाहृतः। विक्रेता चात्मनःशास्त्रे दासाःपञ्चदश स्मृताः" नारदः। "गृहे दास्याञ्जातो गृहजातः। क्रीतोमूल्येन, लब्धः प्रतिग्रहादिना। दायादुपागतः पित्रादिदासः। अनाकालभृतोदुर्भिक्षे यो दासत्वाय मरणाद्रक्षितः। आहितः स्वामिना धनग्रहणेनाधितां नीतः। ऋणमोचनेन दासत्वमभ्युपगतः ऋणदासः" मिता॰।

ऋणमत्कुण पु॰ ऋणं परकृतर्णं ममैवेति कुणति कुण-क

सुप्सुपेति स०। प्रतिभुवि (जामिन्) शब्दर०। स हि परकीयर्णस्य मदीयत्वेन ख्यापयतीति तस्य तथात्वम् ।

ऋणमार्गण पु० ऋणं र. ‘गते परर्णं स्वगतत्वेन प्रार्थयते मार्ग–ल्यु ६त०। (जामिन) प्रतिभुवि हारा०।

ऋणमुक्ति स्त्री ऋणान्मुच्यतेऽनया मुच–करणे क्तिन् । ऋणशोधने त्रिका०। ऋणमोक्षोऽप्यत्र हारा०।

ऋणमोचन न० ऋणात् मोचयति मुच–णिच्–ल्यु ५त०। काशीस्थे तीर्थभेदे काशीखण्डे प्रसिद्धम् ।

ऋणलेख्य न० ऋणसूचकं लेख्यं लेख्यपत्रम् । ऋणग्रहणसूचके व्यवहारोपयोगिनि (खत) (तमःसुक) इत्यादि प्रसिद्धे पत्रभेदे । तल्लेखनप्रकारादि मिता० दर्शितं यथा “तत्र लेख्यं द्विविधं शासनं जानपदं चेति । शासनं निरूपितं जानपदमभिधीयते । तच्च द्विविधम् स्वहस्तकृतमन्यकृतं चेति । तत्र स्वहस्तकृतमसाक्षिकम्, अन्यकृत ससाक्षिकम् । अनयोश्च देशाचारानुसारेण प्रामाण्यम् यदाह नारदः । “लेख्यन्तु द्विविधं ज्ञेयं स्वहस्तान्यकृतं तथा । असाक्षिमत्साक्षिमच्च सिद्धिर्देशस्थितेस्तयोरिति” तत्रान्यकृतमाह । “यः कश्चिदर्थोनिष्णातः स्वरुच्या तु परस्परम् । लेख्यन्तु साक्षिमत् कार्यं तस्मिन् धनिकपूर्वकम्”या०। धनिकाधमर्णयोर्योऽर्थो हिरण्यादिः परस्परं स्वरुच्या इयता कालेनैतावद्देयमियतीयती च प्रतिमासं वृद्धिरिति निष्णातो व्यवस्थितः तस्मिन्नर्थे कालान्तरे विप्रतिपत्तौ वस्तुतत्त्वनिर्णयार्थं लेख्यम् साक्षिमदुक्तलक्षणसाक्षियुक्तम् धनिकः पूर्वो यस्मिन् तद्धनिकपूर्वकम् धनिकनामलेखनपूर्वकमिति यावत् कार्यं कर्त्तव्यम् । उक्तलक्षणाः साक्षिणो वा कर्त्तव्याः “कर्त्ता तु यत्कृतं कार्यं सिद्ध्यर्थन्तस्य साक्षिणः। प्रवर्त्तन्ते विवादेषु स्वकृतं वाप्यलेखकमिति” स्मरणात् । अपि च “समामासतदर्द्धाहर्नामजातिस्वगोत्रकैः । सब्रह्मचारिकात्मीयपितृनामादिचिह्नितम्” या० समा संवत्सरः मासः चैत्रादिस्तदर्द्धः पक्षः शुक्लः कृष्णो वा अहस्तिथिः प्रतिपदादिः । नाम धनिकाधमर्णयोः । जातिः ब्राह्मणादिः स्वगोत्रं वाशिष्ठादिगोत्रमेतैः समादिभिश्चिह्नितम् । तथा सब्रह्मचारिकं बह्वृचादिशाखाप्रयुक्तं गुणनाम बह्वृचः कठ इति । आत्मीयपितृनाम धनिकर्णिकपितृनाम । आदिग्रहणाद्द्रव्य जाति संख्याचारादेर्ग्रहणम् । एतैश्चिह्नितं लेख्यं कार्यमिति गतेन सम्बन्धः । किञ्च “समाप्तेऽर्थे ऋणी नाम स्वहस्तेन निवेशयेत् । मतं मेऽमुकपुत्रस्य यदत्रोपरि लेखितम्”या० धनिकाधमर्णयोर्योऽर्थः स्वरुच्या व्यवस्थितः तस्मिन्नर्थे समाप्ते लिखिते ऋणी अधमर्णोनामात्मीयं स्वहस्तेनास्मिँल्लेख्ये यदुपरि लेखितं तन्ममामुकपुत्रस्य मतमभिप्रेतमिति निवेशयेत् पत्रे विलिखेत् । तथा“साक्षिणश्च स्वहस्तेन पितृनामकपूर्वकम् । अत्राहममुकः साक्षी लिखेयुरिति ते समाः”या०। तस्मिन् लेख्ये ये साक्षिणो लिखिताः तेऽप्यात्मीयपितृनामलेखनपूर्वकमस्मिन्नर्थे अहममुको देवदत्तः साक्षीति स्वहस्तेनैकैकशो लिखेयुस्ते च समाः संख्यातो गुणतश्च कर्त्तव्याः। यद्यधमर्णः साक्षी वा लिपिज्ञो न भवति तदाऽधमर्णोऽन्येन साक्षी च साक्ष्यन्तरेण सर्वसाक्षिसन्निधौ स्वमतं लेखयेत् । यथाह नारदः ‘अलिपिज्ञ ऋणी यः स्यात् स्वमतं तु स लेखयेत् । साक्षी वा साक्षिणान्येन सर्वसाक्षिसमीपतः” इति अपि च “उभयाभ्यर्थितेनैतन्मयाह्यमुकसूनुना । लिखितं ह्यमुकेनेति लेखकोऽन्ते ततो लिखेत्”या० ततो लेखको धनिकाधमर्णिकाभ्यामुभाभ्यां प्रार्थितेन मयाऽमुकेन देवदत्तेन विष्णुमित्रसूनुना एतल्लेख्यं लिखितमित्यन्ते लिखेत्” साम्प्रतं स्वकृतं लेख्यमाह । “विनापि साक्षिभिर्लेख्यं स्वहस्तलिखितं तु यत् । तत्प्रमाणं स्मृतं लेख्यं बलोपधिकृतादृते”या०। यल्लेख्यं स्वहस्तेन लिखितं अधमर्णेन तत् साक्षिभिर्विनापि प्रमाणं स्मृतं मन्वादिभिः। बलोपधिकृतादृते । बलेन बलात्कारेण, उपधिना छललोभक्रोधभयमदादिलक्षणेन यत्कृतं तस्माद्विना । नारदोऽप्याह “मत्ताभियुक्तस्त्रीबालबलात्कारकृतं च यत् । तदप्रमाणं लिखितं भयोपधिकृतन्तथेति”। तच्चैतत् स्वहस्तकृतं परहस्तकृतञ्च यल्लेख्यं देशाचारानुसारेण सबन्धकव्यवहारे बन्धकव्यवहारयुक्तमर्थक्रमापरिलोपेन लिप्यक्षरापरिलोपेन च लेख्यमित्येतावच्च पुनः साधुशब्दैरेव प्रातिस्विकदेशभाषयापि लेखनीयम् यथाह नारदः “देशाचाराविरुद्धं यद्व्यक्ताधिविधिलक्षणम् । तत्प्रमाणं स्मृतं लेख्यमविलुप्तक्रमाक्षरमिति” । विधानं विधिराधेर्विधिराधीकरणन्तस्य लक्षणम् गोप्याधिभोग्याधिकालकृतमित्यादि तद्व्यक्तं विस्पष्टं यस्मिंस्तद्व्यक्ताधिविधिलक्षणम् । अविलुप्तक्रमाक्षरम् अर्थानां क्रमः क्रमश्चाक्षराणि च क्रमाक्षराणि अविलुप्तानि क्रमाक्षराणि यस्मिंस्तदविलुप्तक्रमाक्षरम् । तदेवंभूतं लिखितं प्रमाणम्। राजशासनवच्च साधुशब्दनियमोऽत्रेत्यभिप्रायः । लेख्यप्रसङ्गेन लेख्याद्धमपूर्णं त्रिभि-

रेव देयमित्याह "ऋणं लेख्यकृतं देयं पुरुषैस्त्रिभिरेव तु। यथा साक्ष्यादिकृतमृणं त्रिभिरेव देयम् तथा लेख्यकृतमप्याहर्तृपुत्रतत्पुत्रैस्त्रिभिरेव देयम्। न चतुर्थादिभिरिति नियम्यते। ननु पुत्रपौत्रैर्ऋणन्देयमित्यविशेषेणर्णमात्रं त्रिभिरेव देयमिति नियतमेव। बाढम्। स्वैवोत्सर्गस्य पत्रारूढर्णविषये स्मृत्यन्तरप्रभवामपवादशङ्कामपनेतुमिदं वचनमारब्धम्। तथा हि पत्रलक्षणमभिधाय कात्यायनेनाभिहितम् "एवं कालमतिक्रान्तं पितॄणां दाप्यते ऋणमिति"। इत्थं पत्रारूढमतिक्रान्तकालमपि पितॄणां सम्बन्धि दाप्यते। अत्र पितॄणामिति बहुवचननिर्देशात् कालमतिक्रान्तमिति वचनाच्चतुर्थादिर्दाप्यत इति प्रतीयते। तथा हारीतेनापि "लेख्यं यस्य भवेद्धस्ते लाभन्तस्य विनिर्दिशेदिति"। अत्रापि यस्य हस्ते पत्रमस्ति तस्यर्णलाभ इति सामान्येन चतुर्थादिभ्योऽप्यृणलाभोऽस्तीति प्रतीयते। अतस्तैतदाशङ्कानिवृत्त्यर्थम् एतद्वचनमिति युक्तम्। वचनद्वयन्तु योगीश्वरवचनानुसारेण योजनीयम्। अस्यापवादमाह "आधिस्तु भुज्यते तावद्यावत्तन्न प्रदीयते"। सबन्धकेऽपि पत्रारूढे ऋणे त्रिभिरेव देयमिति नियमाद्दणापकरणानधिकारेणाऽऽध्याहरणेऽप्यनधिकारप्राप्ताविदमुच्यते। यावच्चतुर्थेन पञ्चमेन वा ऋणं न दीयते तावदेवाधिर्भुज्यत इति वदता सबन्धकर्णापाकरणे चतुर्थादेरप्यधिकारो दर्शितः। नन्वेतदप्ययुक्तमेव। "फलभोग्यो न नश्यतीति" सत्यम्। तदपि तस्मिन्नपवादवचने पुरुषत्रयविषयमेव स्यादिति सर्वमनवद्यम्। प्रासङ्गिकं परिसमाप्य प्रकृतमेवानुसरति। "देशान्तरस्थे दुर्लेख्ये नष्टोन्मृष्टे हृते तथा। भिन्ने दग्धेऽथवा छिन्ने लेख्यमन्यत्तु कारयेत्" या०। व्यवहाराक्षमे पत्रे पत्रान्तरं कुर्यादिति विधीयते। व्यवहाराक्षमत्वं चात्यन्तव्यवहितदेशान्तरस्थे पत्रे दुर्लेख्ये दुष्टानि सन्दिह्यमानानि अवाचकानि वा लेख्यानि लिप्यक्षराणि पदानि वा यस्मिंस्तस्मिन् दुर्लेख्ये नष्टे कालवशेन, उन्मृष्टे मसीदौर्बल्यादिना, मृदिते लिप्यक्षरे, हृते तस्करादिभिः, भिन्ने विदलिते, दग्धे अग्निना, छिन्ने द्विधाभूते सति हि भवति। एतच्चार्थिप्रत्यर्थिनोः परस्परानुमतौ सत्यां विमत्यान्तु व्यवहारप्राप्तौ। देशान्तरस्थपत्रानयनाद्यपेक्षया कालो दातव्यः दुर्देशावस्थिते नष्टे वा पत्रे साक्षिभिरेव व्यवहारनिर्णयः कार्यः। यथा ह नारदः "लेख्ये देशान्तरन्यस्ते शीर्णे दुर्लिखिते हृते। सतस्तत्कालकरणमसतो द्रष्टृदर्शनमिति"। सतो विद्यमानपत्रस्य देशान्तरस्थस्यानयनाय कालकरणं कालावधिर्दातव्यः। असतः पुनरविद्यमानस्य पत्रस्य पूर्वं ये द्रष्टारः साक्षिणस्तैर्दर्शनं व्यवहारपरिसमापनं कार्यम्। यदा तु साक्षिणो न सन्ति तदा दिव्येन निर्णयः कार्यः। "अलेख्यसाक्षिके दैवीं व्यवहारे विनिर्दिशेदिति" स्मरणात्। एतच्च जानपदं व्यवस्थापत्रं सन्दिग्धं चेत् स्वहस्तलिखितादिभिः शोधनीयम् "सन्दिग्धलेख्यशुद्धिः स्यात् स्वहस्तलिखितादिभिः युक्तिप्राप्तिक्रियाचिह्नसम्बन्धागमहेतुभिः" या० उक्तेः।

ऋणादान न० ऋणमादीयते यत्र। स्मृत्युक्ते अष्टादशविवादान्तर्गते व्यवहारभेदे "तेषामाद्यमृणादानमित्यादीनि अष्टादश व्यवहारपदानि मनुना दर्शितानि। तल्लक्षणादि नारदादिवाक्येन मिता० दर्शितं यथा "अधुनाष्टादशानां व्यवहारपदानामाद्यमृणादानपदं दर्शयति। "अशीतिभागो वृद्धिः स्यादित्यादिना मोच्य आधिस्तदुत्पन्ने प्रविष्टे द्विगुणे धने" इत्येवमन्तेन। तच्चर्णादानं सप्तविधम्। ईदृशमृणन्देयमीदृशमदेयमनेनाधिकारिणा देयमस्मिन् समये देयमनेन प्रकारेण देयमित्यधमर्णे पञ्चविधमुत्तमर्णे दानविधिरादानविधिश्चेति द्विविधमिति। एतच्च नारदेन स्पष्टीकृतम् "ऋणन्देयमदेयञ्च येन यत्र यथा च यत्। दानग्रहणधर्मश्च ऋणादानमिति स्मृतमिति" तत्र प्रथममुत्तमर्णस्य दानविधिमाह तत्पूर्वकत्वादितरेषाम्। "अशीतिभागो वृद्धिः स्यान्मासि मासि सबन्धके। वर्णक्रमाच्छतं द्वित्रिचतुष्पञ्चकमन्यथा" या० "मासिमासि प्रतिमासं विश्वासार्थं यदाधीयते आधिरिति यावत् बन्धकेन सह वर्त्तत इति सबन्धकः प्रयोगस्तस्मिन् सबन्धके प्रयोगे प्रयुक्तस्य द्रव्यस्याशीतितमो भागो वृद्धिर्धर्म्या भवति। अन्यथा बन्धकरहिते प्रयोगे वर्णानां ब्राह्मणादीनां क्रमेण द्वित्रिचतुःपञ्चकं शतं धर्म्यं भवति। ब्राह्मणेऽधमर्णे द्विकं शतम्, क्षत्रिये त्रिकं, वैश्ये चतुष्कं, शूद्रे पञ्चकं, मासिमासीत्येव। द्वौ वा त्रयो वा चत्वारो वा पञ्च वा द्वित्रिचतुःपञ्चाः द्वित्रिचतुःपञ्चा अस्मिन् शते वृद्धिर्दीयते इति द्वित्रिचतुःपञ्चकं शतम्। "तदस्मिन् वृद्ध्यायलाभशुल्कोपदा दीयते इति (पा०) कन्। इयं वृद्धिर्मासिमासि गृह्यत इति कालिका। इयमेव वृद्धिर्दिवसगणनया विभज्य प्रतिदिवसं गृह्यमाणा कायिका भवति तथा च नारदेन। "कायिका कालिका चैव कारिता ५ तथाऽपरा। चक्रवृद्धिश्च शास्त्रेषु तस्य वृद्धिश्चतुर्विधा"

इत्युक्तम् "कायाविरोधिनी शश्वत्पणपादादिः कायिका। प्रतिमासं स्रवन्ती या वृद्धिस्सा कालिका मता। वृद्धिःसा कारिता नाम यर्णिकेन स्वयं कृता। वृद्धेरपि पुनर्वृद्धिश्चक्रवृद्धिरुदाहृतेति"। गृहीतृविशेषेण वृद्धेः प्रकारान्तरमाह। "कान्तारगास्तु दशकं सामुद्रा विंशकं शतम्" या०। कान्तारमरण्यन्तत्र गच्छन्तीति कान्तारगाः ये वृद्ध्या धनं गृहीत्वाधिकलाभार्थमतिगहनं प्राणधनविनाशशङ्कास्थानं प्रविशन्ति ते दशकं शतं दद्युः। ये च समुद्रगास्ते विंशकं शतं मासिमासीत्येव। एतदुक्तम्भवति कान्तारगेभ्यो दशकं शतं सामुद्रेभ्यश्च विंशकं शतम् उत्तमर्णं आददात् मूलविनाशस्यापि शङ्कितत्वात् इति। इदानीं कारितां वृद्धिमाह। "दद्युर्वा स्वकृतां वृद्धिं सर्वे सर्वासु जातिषु" या०। "सर्वे ब्राह्मणादयोऽधमर्णा सबन्धके अबन्धके वा स्वकृतां स्वाभ्युपगतां वृद्धिं सर्वासु जातिषु दद्युः। क्वचिदकृतापि वृद्धिर्भवति यथाह नारदः "न वृद्धिः प्रीतिदत्तानां स्यादनाकारिता कचित्। अनाकारितमप्यूर्द्धं वत्सरार्द्धाद्विवर्द्धते" इति। यस्तु याचितकं गृहीत्वा देशान्तरं गतस्तं प्रति कात्यायनेनोक्तम्। "यो याचितकमादाय तमदत्त्वा दिशं व्रजेत्। ऊर्द्ध्वं संवत्सरात्तस्य तद्धनं वृद्धिमाप्नुयादिति" यश्च याचितकमादाय याचितोऽप्यदत्त्वा देशान्तरं याति तम् प्रति तेनैवोक्तम्। "कृतोद्धारमदत्त्वा यो याचितस्तु दिशं व्रजेत्। ऊर्द्ध्वं मासत्रयात्तस्य तद्धनं वृद्धिमाप्नुयादिति" यः पुनः स्वदेशे स्थित एव याचितो याचितकं न ददाति तं याचनकालादारभ्य वृद्धिं दापयेद्राजा। यथाह "स्वदेशेऽपि स्थितो यस्तु न दद्याद्याचितः क्वचित्। तन्ततोऽकारितां वृद्धिमनिच्छन्तं च दापयेदिति"। अनाकारितवृद्धेरपवादो नारदेनोक्तः "पण्यमूल्यम्भृतिर्न्यासो दण्डोयश्च प्रकल्पितः। वृथादानाक्षिकपणा वर्द्धन्ते नाविवक्षिताः"। अविवक्षिता अनाकारिता इति। अधुना द्रव्यविशेषे वृद्धिविशेषमाह। "सन्ततिस्तु पशुस्त्रीणाम्" या० "पशूनां स्त्रीणां सन्ततिरेव वृद्धिः पशूनां स्त्रीणाम्पोषणासमर्थस्य तत्पुष्टिसन्ततिकामस्य प्रयोगः सम्भवति। पयसश्च क्षीरपरिचर्यार्थिनः। अधुना प्रयुक्तस्य द्रव्यस्य वृद्धिग्रहणमन्तरेण चिरकालावस्थितस्यैकस्य द्रव्यस्य कियती परा वृद्धिरित्यपेक्षिते आह "रसस्याष्टगुणा परा। वस्त्रधान्यहिरण्यानाञ्चतुस्त्रिद्विगुणा परा" या०। "रसस्य तैलघृतादेर्वृद्धिग्रहणमन्तरेण चिरकालावस्थितस्य स्वकृतया वृद्ध्या वर्द्धमानस्याष्टगुणा वृद्धिः परा नातः परं वर्द्धते। तथा वस्त्रधान्यहिरण्यानां यथासंख्यं चतुर्गुणाः त्रिगुणाद्विगुणा च वृद्धिः परा। वशिष्ठेन तु रसस्य त्रैगुण्यमुक्तम् "द्विगुणं हिरण्यं त्रिगुणं धान्यम् धान्येनैव रसा व्याख्याताः पुष्पमूलफलानि च तुलाधृतं त्रितयमष्टगुणमिति"। मनुना तु धान्यस्य पुष्पमूलफलादीनाञ्च पञ्चगुणत्वमुक्तम्। "धान्ये शदे लवे वाह्ये नातिक्रामति पञ्चतामिति" शदः क्षेत्रफलं पुष्पमूलफलादि। लवोमेषोर्णा चमरीकेशादि। वाह्योबलीवर्द्दतुरगादिः। धान्यशदलववाह्यविषया वृद्धिः पञ्चगुणत्वन्नातिक्रामतीति। तत्राधमर्णयोग्यतावशेन दुर्भिक्षादिकालवशेन च व्यवस्था द्रष्टव्या। एतच्च सकृत्प्रयोगे सकृदाहरणे च वेदितव्यम्। पुरुषान्तरसंक्रमणेन प्रयोगान्तरकरणे तस्मिन्नेव वा पुरुषे अनेकशः प्रयोगान्तरकरणे सुवर्णादिकं द्वैगुण्याद्यतिक्रम्य पूर्ववद्वर्द्धते। सकृत्प्रयोगेऽपि प्रतिदिनम् प्रतिमासम्प्रतिवत्सरं वा वृद्ध्याहरणेऽधमर्णदेयस्य द्वैगुण्यसम्भवात् पूर्वाहृतवृद्ध्या सह द्वैगुण्यमतिक्रम्य वर्द्धत एव यथाह मनुः "कुसीदवृद्धिर्द्वैगुण्यं नात्येति सकृदाहृता"। सकृदाहितेत्यपि पाठोऽस्ति। उपचयार्थं प्रयुक्तं द्रव्यं कुसीदन्तस्य वृद्धिः कुसीदवृद्धिर्द्वैगुण्यं नात्येति नातिक्रामति यदि सकृदाहिता सकृत्प्रयुक्ता पुरुषान्तरसंक्रमणादिना प्रयोगान्तरकरणे द्वैगुण्यमत्येति। सकृदाहृतेति पाठे शनैः प्रतिदिनम्प्रतिमासं प्रतिवत्सरं वाऽधमर्णादाहृता द्वैगुण्यमत्येतीति व्याख्येयम्। तथा गौतमेनाप्युक्तम् "चिरस्थाने द्वैगुण्यम् प्रयोगस्येति" प्रयोगस्येत्येकवचननिर्देशात् प्रयोगान्तरकरणे द्वैगुण्यातिक्रमोऽभिप्रेतः। चिरस्थान इति निर्देशाच्छनैःशनैर्वृद्धेर्ग्रहणे द्वैगुण्यातिक्रमोदर्शितः। ऋणप्रयोगधर्मा उक्ताः साम्प्रतम् प्रयुक्तस्य धनस्य ग्रहणधर्मा उच्यन्ते। "प्रपन्नं साधयन्नर्थं न वाच्यो नृपतेर्भवेत्। साध्यमानोनृपङ्गच्छन् दण्ड्योदाप्यश्च तद्धनम्" या०। प्रपन्नमभ्युपगतमधमर्णेन धनं साक्ष्यादिभिर्भावितं साधयन् प्रत्याहरन् धर्मादिभिरुपायैः उत्तमर्णो नरपतेर्न वाच्योनिवारणीयो न भवति। धर्माद्यश्चोपाया मनुना दर्शिताः। "धर्मेण व्यवहारेण छलेनाचरितेन च। प्रयुक्तं साधयेदर्थं पञ्चमेन बलेन चेति" धर्मेण प्रीतियुक्तेन सामवचनेन, व्यवहारेण साक्षिलेख्याद्युपायेन, छलेन उत्सवादिव्याजेन भूषणादेर्ग्रहणेन, आचरितेन अभोजनेन। पञ्चमेनोपायेन बलेन निगडबन्धनादिना

उपचयार्थं प्रयुक्तं द्रव्यमेतैरुपायैरात्मसात्कुर्य्यादिति । प्रपन्नं साधयन्नर्थं न वाच्य इति वदन्नप्रतिपन्नं साधयन् राज्ञा निवारणीय इति दर्शयति । एतदेव स्पष्टीकृतङ्कात्यायनेन “पीडयेद्यो धनी कश्चिदृणिकं न्यायवादिनम् । तस्मादर्थात् स हीयेत तत्समं प्राप्नुयाद्दममिति”। यस्तु धर्म्मादिभिरुपायैः प्रपन्नमर्थं साध्यमानो याच्यमानो नृपं गच्छेत् । राजानमभिगम्य साधयन्तमभियुङ्क्ते स दण्ड्यो भवति पणानुसारेण । धनिने तद्धनन्दाप्यश्च । राज्ञा दापने च प्रकारा दर्शिताः “राजा तु स्वामिने विप्रं सान्त्वेनैव प्रदापयेत् । देशाचारेण चान्यांस्तु दुष्टान् सम्पीड्य दापयेत् । रिक्थिनं सुहृदं वापि छलेनैव प्रदापयेदिति” या०। साध्यमानो नृपङ्गच्छेदित्येतत् स्मृत्याचारव्यपेतेनेत्यस्य प्रत्युदाहरणं बोद्धव्यम् । बहुषूत्तमर्णिकेषु युगपत्प्राप्तेष्वेकोऽधमर्णिकः केन क्रमेण दाप्यो राज्ञेत्यपेक्षित आह । “गृहीतानुक्रमाद्दाप्यो धनिनामधमर्णिकः । दत्त्वा तु ब्राह्मणायैव नृपतेस्तदनन्तरम्” या०। समानजातीयेषु येनैव क्रमेण धनं गृहीतन्तेनैव क्रमेणाधमर्णिको दाप्यो राज्ञा, भिन्नजातीयेषु तु ब्राह्मणादिक्रमेण । यदा तु पुनरुत्तमर्णो दुर्ब्बलः प्रतिपन्नमर्थन्धर्म्मादिभिरुपायैः साधयितुमशक्नुवन् राज्ञा साधितार्थो भवति तदाऽधमर्णस्य दण्डमुत्तमर्णस्य च भृतिदानमाह “राज्ञाऽधमर्णिको दाप्यः साधिताद्दशकं शतम् । पञ्चकञ्च शतन्दाप्यः प्राप्तार्थो ह्युत्तमर्णिकः” या०। अधमर्णिको राज्ञा प्रतिपन्नार्थात् साधिताद्दशकं शतं दाप्यः” प्रतिपन्नस्य साधितस्यार्थस्य दशमांशं राजाधमर्णिकाद्दण्डरूपेण गृह्णीयादित्यर्थः । उत्तमर्णिकस्तु प्राप्तार्थः पञ्चकं शतं भृतिरूपेण दाप्यः साधितस्यार्थस्य विंशतितमम्भागम् उत्तमर्णाद्राजा भृत्यर्थं गृह्णीयादित्यर्थः । अप्रतिपन्नार्थसाधने तु दण्डविभागो दर्शितः “निह्नवे भावितो दद्यात्” इत्यादिना । सधनमधमर्णिकमभ्युक्तमधुना निर्द्धनमधमर्णिकम्प्रत्याह । “हीनजातिम्परिक्षीणमृणार्थं कर्म कारयेत् । ब्राह्मणस्तु परिक्षीणः शनैर्दाप्यो यथोदयम्” या०। ब्राह्मणादिजातिरुत्तमर्णो हीनजातिं क्षत्रियादिम्परिक्षीणं निर्द्धनमृणार्थमृणनिवृत्त्यर्थं कर्म स्वजात्यनुरूपं कारयेत्तत्कुटुम्बाविरोधेन । ब्राह्मणः पुनः परिक्षीणो निर्द्धनः शनैःशनैर्यथोदयं यथासम्भवमृणन्दाप्यः । अत्र हीनजातिग्रहणं समजातेरप्युपलक्षणमतश्च समजातिमपि परिक्षीणं यथोचितं कर्म कारयेत् । ब्राह्मणग्रहणं च श्रेयोजातेरुपलक्षणमतश्च क्षत्रियादिरपि क्षीणो वैश्यादेः शनैःशनैर्दाप्यो यथोदयम् एतदेव स्पष्टीकृतं मनुना “कर्म्मणापि समं कुर्य्याद्धनिकेनाधमर्णिकः । समोऽपकृष्टजातिश्च दद्याच्छ्रेयांस्तु तच्छनैरिति” । उत्तमर्णेन समं निकृष्टोत्तमर्णाधमर्णव्यपदेशमात्मानमधमर्णः कर्म्मणा कुर्य्यादित्यर्थः । किञ्च ‘दीयमानं न गृह्णाति प्रयुक्तं यः स्वकं धनम् । मध्यस्थस्थापितं तत्स्याद्वर्द्धते न ततः परम्’ या० उपचयार्थं दत्तं धनमधमर्णेन दीयमानमुत्तमर्णो वृद्धिलोभाद्यदि न गृह्णाति तदाऽधमर्णेन मध्यस्थहस्ते स्थापितं स्यात्तदा ततः स्थापनादूर्द्धं न वर्द्धते । अथ स्थापितमपि याच्यमानो न ददाति ततः पूर्व्ववद्वर्द्धत एव ।

इदानीन्देयमृणं यदा येन च देयन्तदाह । “अविभक्तैः कुटुम्बार्थे यदृणन्तु कृतम्भवेत् । दद्युस्तद्रिक्थिनः प्रेते प्रोषिते वा कुटुम्बिनि” या० अविभक्तैर्बहुभिः कुटुम्बार्थमेकैकेन वा यदृणं कृतन्तदृणं कुटुम्बी दद्यात्तस्मिन् प्रेते प्रोषिते वा तद्रिक्थिनः सर्व्वे दद्युः । येन देयमित्यत्र प्रत्युदाहरणमाह । “न योषित् पतिपुत्राभ्याञ्च पुत्रेण कृतम्पिता । दद्यादृते कुटुम्बार्थान्न पतिः स्त्रीकृतन्तथा” या० । पत्या कृतमृणं योषिद्भार्य्या नैव दद्यात् । पुत्रेण कृतं योषित् माता न दद्यात् । तथा पुत्रेण कृतम्पिता न दद्यात्तथा भार्य्याकृतम्पतिर्न दद्यात्कुटुम्बार्थादृते इति सर्व्वशेषमतश्च कुटुम्बार्थं येन केनापि कृतं तत्कुटुम्बिना देयम् “कुटुम्बार्थेऽध्यधीनोऽपि व्यवहारं समाचरेत् । स्वदेशे वा विदेशे वा तन्न विद्वान् विचालयेत्” इति मनु (अध्यधीनः दासः)। तदभावे तद्दायहरैर्देयमिति उक्तमेव । पुत्रपौत्रैर्ऋणन्देयमिति वक्ष्यति तस्य पुरस्तादपवादमाह “सुराकामद्यूतकृतन्दण्डशुल्कावशिष्टकम् । वृथादानन्तथैवेह पुत्रो दद्यान्न पैतृकम्” या०। सुरापानेन यत् कृतमृणं कामकृतं स्त्रीव्यसनेन कृतम् । द्यूते पराजयनिवृत्तं दण्डशुल्कयोरवशिष्टं वृथादानं धूर्त्तवन्दिमल्लादिभ्यो यत् प्रतिज्ञातम् ‘धूर्त्ते वन्दिनि मल्ले च कुवैद्ये कितवे शठे चाटचारणचौरेषु दत्तं भवति निष्फलमिति” स्मरणात् । एतदृणम् पित्रा कृतं पुत्रादिः शौण्डिकादिभ्यो न दद्यात् । अत्र दण्डशुल्कावशिष्टकमित्यवशिष्टग्रहणात् सर्व्वं दातव्यमिति न मन्तव्यम् “दण्डं वा दण्डशेषं वा शुल्कन्तच्छेषमेव वा । न दातव्यन्तु पुत्रेण यच्च न व्यावहारिकम्” इत्यौशनसः स्मरणात् । गौतमेनाप्युक्तम “मद्यशुल्कद्यूतदण्डा न पुत्रानध्याभवेयुरिति”।

न पुत्रस्योपरि भवन्तीत्यर्थः । अनेनादेयमृणमुक्तम् । न पतिः स्त्रीकृतं तथेत्यस्यापवादमाह । “गोपशौण्डिकशैलूषरजकव्याधयोषिताम् । ऋणं दद्यात् पतिस्तासां यस्माद्वृत्तिस्तदाश्रया” या० । गोपो गोपालः शौण्डिकः सुराकारः शैलूषो नटः रजको वस्त्राणां रञ्जकः । व्याधो मृगयुः एषां योषिद्भिर्यदृणं कृतन्तत्पतिभिर्देयं यस्मात्तेषां वृत्तिर्जीवनं तदाश्रया योषिदधीना । यस्माद्वृत्तिस्तदाश्रयेति हेतुव्यपदेशादन्येऽपि ये योषिदधीनजीवनास्तेऽपि योषित्कृतमृणं दद्युरिति गम्यते । पतिकृतम्भार्या न दद्यादित्यस्यापवादमाह “प्रतिपन्नं स्त्रिया देयं पत्या वा सह यत् कृतम् । स्वयंकृतं वा यदृणं नान्यत स्त्री दातुमर्हति” या० । “मुमूर्षुणा प्रवत्स्यता वा पत्या नियुक्तया ऋणदाने यत्प्रतिपन्नन्तत्पतिकृतमृणन्देयं यच्च पत्या सह भार्यया कृतन्तदपि भर्त्रभावे भार्यया अपुत्रया देयम् । यच्च स्वयमेव कृतमृणं तदपि देयम् । ननु प्रतिपन्नादित्रयं स्त्रिया देयमिति न वक्तव्यम् सन्देहाभावात् उच्यते । “भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः । यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनमिति” वचनान्निर्धनत्वेन प्रतिपन्नादिष्वदानशङ्कायामिदमुच्यते । प्रतिपन्नं स्त्रिया देयमित्यादि । न चानेन वचनेन स्त्र्यादीनां निर्धनत्वमभिधीयते पारतन्त्र्यमात्रप्रतिपादनपरत्वात् । एतच्च विभागप्रकरणे स्पष्टीकरिष्यते । नान्यत् स्त्रीदातुमर्हतीत्येतर्हि न वक्तव्यम् विधानेनैवान्यत्र प्रतिषेधसिद्धेः । उच्यते ‘प्रतिपन्नं स्त्रिया देयं पत्या वा सह यत् कृतम्’ इत्यनयोरपवादार्थमुच्यते । अन्यच्च सुराकामादिवचनोपात्तं प्रतिपन्नमपि पत्या सहकृतमपि न देयमिति । पुनरपि यदृणं दातव्यं येन च दातव्यं यत्र च काले दातव्यं तत्त्रितयमाह “पितरि प्रोषिते प्रेते व्यसनाभिप्लुते । पुत्रपौत्रैरृणन्देयं निह्नवे साक्षिभावितम्” या० । पिता यदि दातव्यमृणमदत्त्वा प्रेतो दूरदेशङ्गतोऽचिकित्सनीयव्याध्याद्यभिभूतो वा तदा तत्कृतमृणमवश्यन्देयं पुत्रेण पौत्रेण वा पितृधनाभावेऽपि पुत्रत्वेन पौत्रत्वेन च । तत्र क्रमोऽप्ययमेव पित्रभावे पुत्रः, पुत्राभावे पौत्र इति । पुत्रेण पौत्रेण वा निह्नवे कृतेऽर्थिना साक्ष्यादिभिर्भावितमृणन्देयं पुत्रपौत्रैरित्यन्वयः । अत्र पितरि प्रोषित इत्येतावदुक्तं कालविशेषस्तु नारदेनोक्तो द्रष्टव्यः । “नार्वाक् संवत्सराद्विंशात् पितरि प्रोषिते सुतः । ऋणं दद्यात् पितृव्ये वा ज्येष्ठे भ्रातर्य्यथापि वेति” प्रेतेऽप्यप्राप्तव्यवहारकालस्तु न दद्यात् प्राप्तव्यवहारकालस्तु दद्यात् स च कालस्तेनैव दर्शितः । “गर्भस्थैः सदृशो ज्ञेय आष्टमाद्वत्सरात्शिशुः । बाल आषोडशाद्वर्षात् पौगण्डश्चेति शब्द्यते । परतो व्यवहारज्ञः स्वतन्त्रः पितरावृत इति” । यद्यपि पितृमरणादूर्द्धं बालोऽपि स्वतन्त्रो जातस्तथापि न ऋणभाग् भवति । यथाह “अप्राप्तव्यवहारश्चेत् स्वतन्त्रोऽपि हि नर्णभाक् । स्वातन्त्र्यं हि स्मृतं ज्येष्ठे ज्यैष्ठ्यं गुणवयःकृतमिति” । तथा आसेधाह्वाननिषेधश्च दृश्यते । “अप्राप्तव्यवहारश्च दूतोदानोन्मुखो व्रती । विषमस्थश्च नासेध्यो न चैतानाह्वयेन्नृपः” इति तस्मात् । “अतः पुत्रेण जातेन स्वार्थमुत्सृज्य यत्नतः । ऋणात् पिता मोचनीयो यथा नो नरकं व्रजेदिति” । पुत्रेण व्यवहारज्ञतया ज्ञातेन निष्पन्नेनेति व्याख्येयम् । श्राद्धे तु बालस्यापि अधिकारः “न ब्रह्माभिव्याहारयेदन्यत्र स्वधानिनयनादिति” गौतमस्मरणात् । पुत्रपौत्रैरिति बहुवचननिर्देशाद्बहवः पुत्रा यदि विभक्ताः, स्वांशानुरूपेणर्णं दद्युः । अविभक्ताश्चेत् सम्भूय समुत्थानेन, गुणप्रधानभावेन वर्त्तमानानां प्रधानभूतएव दद्यादिति गम्यते यथाह नारदः “अत ऊर्द्ध्वं पितुः पुत्रा ऋणं दद्युर्यथांशतः । अविभक्ता विभक्ता वा यस्तां चोद्वहते धुरमिति” । अत्र च यद्यपि पुत्रपौत्रैरृणं देयमित्यविशेषेणोक्तम् । तथापि पुत्रेण यथा पिता सवृद्धिकन्ददाति तथैव देयं पौत्रेण तु समं मूलमेव दातव्यं न वृद्धिरिति विशेषोऽवगन्तव्यः । “ऋणमात्मीयवत् पित्र्यं पुत्रैर्देयं विभावितम् । पैतामहं समं देयमदेयं तत्सुतस्य तु” इति बृहस्पतिवचनात् । अत्र विभावितमित्यविशेषोपादानात् साक्षिभावितमित्यत्र साक्षिग्रहणं प्रमाणोपलक्षणम् । समं यावद्गृहीतं तावदेव देयं न वृद्धिः तत्सुतस्य प्रपौत्रस्यादेयमगृहीतधनस्य । एतच्चोत्तरश्लोके स्पष्टयिष्यते । ऋणापकरणे ऋणी तत्पुत्रः पौत्र इति त्रयः कर्त्तारो दर्शिताः तेषाञ्च समवाये क्रमोऽपि दर्शितः ।

इदानीं कर्त्रन्तरसमवाये च क्रममाह । “रिक्थग्राह ऋणं दाप्यो योषिद्ग्राहस्तथैव च । पुत्रोऽनन्याश्रितद्रव्यः पुत्रहीनस्य रिक्थिनः” या० । अन्यदीयं द्रव्यमन्यस्य क्रयादिव्यतिरेकेण यत् स्वीयं भवति तद्रिक्थं विभागद्वारेण यद्रिक्थं गृह्णातीति रिक्थग्राहः स ऋणं दाप्यः । एतदुक्तम् भवति यो यदीयन्द्रव्यं रिक्थरूपेण गृह्णाति स तत्कृतम् ऋणं दाप्यो न चौरादिरिति । योषितं भार्य्यां गृह्णातीति योषिद्ग्राहः स तथैव ऋणं दाप्यः । यो यदीयां योषितं

गृह्णाति स तत्कृतमृणं दाप्यः योषितोऽविभाज्यद्रव्यत्वेन ऋक्थव्यपदेशानर्हत्वाद्भेदेन निर्देशः। पुत्रश्चानन्याश्रितद्रव्य ऋणं दाप्यः अन्यमाश्रितमन्याश्रितम् मातृपितृसम्बन्धि· द्रव्यं यस्यासावन्याश्रितद्रव्यः न अन्याश्रितद्रव्योऽनन्याश्रित द्रव्यः पुत्रहीनस्य ऋक्थिन ऋणं दाप्य इति सम्बन्धः। एतेषां समवाये क्रमश्च पाठक्रमएव ऋक्थग्राह ऋणं दाप्य-स्तदभावे योषिद्ग्राहस्तदभावे (तथाभूतः) पुत्र इति। नन्वेतेषां समवाय एव नोपपद्यते। "न भ्रातरो न पितरः, पुत्रा ऋक्थहराः पितुरिति" पुत्रे सत्यन्यस्य ऋक्थग्रहणासम्भवात्। योषिद्ग्राहोऽपि नोपपद्यते "न द्वितीयश्च साध्वीनां क्वचिद्भर्त्तोपदिश्यते" इति स्मरणात्। तदर्थं पुत्रो दाप्य इत्यप्ययुक्तं पुत्रपौत्रैरृणं देयमित्युक्तत्वात्। अनन्याश्रितधन इति विशेषणमप्यनर्थ-कम् पुत्रे सति द्रव्यस्यान्याश्रयणासम्भवात् सम्भवे च ऋक्थग्राह इत्यनेनैव गतार्थत्वात् पुत्रहीनस्य ऋक्थिन इत्येतदपि न वक्तव्यम्। पुत्रे सत्यपि ऋक्थग्राह ऋणं दाप्य इति स्थितमसति पुत्रे ऋक्थग्राहः सुतरां दाप्यः इति सिद्धमेवेति। अत्रोच्यते। पुत्रे सत्यप्यन्य ऋक्थ-ग्राही सम्भवति क्लीवान्धबधिरादीनां पुत्रत्वेऽपि ऋक्थ-हरत्वाभावात्। तथा च क्लीवादीननुक्रम्य "भर्त्तव्यास्तु निरंशकाः"इति वक्ष्यति तथा "सवर्णापुत्रोऽप्यन्यायवृत्तो न लभेतैति केषामिति" गौतमवचनात्। अतश्च क्लीवादिषु पुत्रेषु सत्स्वन्यायवृत्ते च सवर्णापुत्रे सति ऋक्थग्राही पितृव्यतत्पुत्रादिः। योषिद्ग्राहो यद्यपि शास्त्रविरोधेन न सम्भवति तथाप्यतिक्रान्तनिषेधः पूर्वपतिकृतर्णापक-रणाधिकारी भवत्येव। योषिद्ग्राहोयश्चतसृणां स्वैरिणी-नामन्तिमां गृह्णाति, यश्च पुनर्भ्वोन्तिसृणां प्रथमाम्, यथाह नारदः "परपूर्वाः स्त्रियस्त्वन्याः सप्त प्रोक्ता यथाक्रमम्। पुनर्भूस्त्रिविधा तासां स्वैरिणी तु चतुर्विधा। कन्यैवाऽक्षतयोनिर्या पाणिग्रहणदूषिता। पुनर्भूः प्रथमा प्रोक्ता पुनःसंस्कारकर्मणा। देशधर्मानपेक्ष्य स्त्री गुरु-भिर्या प्रदीयते। उत्पन्नसाहसाऽन्यस्मै सा द्वितीया प्र-कीर्त्तिता"। उत्पन्नसाहसा उत्पन्नव्यभिचारा। "असत्सु देवरेषु स्त्री बान्धवैर्या प्रदीयते। सवर्णाय सपिण्डाय सा तृतीया प्रकीर्त्तिता। स्त्री प्रसूताऽप्रसूता वा पत्या-वेव तु जीवति। कामात् समाश्रयेदन्यं प्रथमा स्वैरिणी तु सा। कौमारं पतिमुत्सृज्य या त्वन्यं पुरुषाश्रिता। पुनःपत्युर्गृहं यायात् सा द्वितीया प्रकीर्त्तिता। मृते भर्त्तरि तु प्राप्तान् देवरादीनपास्य या। उपगच्छेत् परं कामात् सा तृतीया प्रकीर्त्तिता। प्राप्ता देशाद्धनक्रीता क्षु-त्पिपासातुरा तु या। तवाहमित्युपगता सा चतुर्थी प्र-कीर्त्तिता। अन्तिमा स्वैरिणीनां या प्रथमा च पुनर्भुवाम्। ऋणन्तयोः प्रतिज्ञतं दद्याद्यस्ते उपाश्रितः"इति। तथा-न्योऽपि योषिद्ग्राहः ऋणापाकरणाधिकारी तेनैव दर्शितः "या तु सप्रधनैव स्त्री सापत्या वान्यमाश्रयेत्। सो-ऽस्या दद्यादृणं भर्त्तुरुत्सृजेद्वा तथैव ताम्"। प्रकृष्टेन धनेन सह वर्त्तत इति सप्रधना बहुधनेति यावत्। तथा "अधनस्य ह्यपुत्रस्य मृतस्योपैति यः स्त्रियम्। ऋणं वोढुः स भजते सैव चास्य धनं स्मृतमिति"। पुत्रस्य पुनर्वचनं क्रमार्थम्। अनन्याश्रितद्रव्य इति बहुपुत्रेषु ऋक्था-भावेऽप्यंशग्रहणयोग्यस्यैवर्णापाकरणाधिकारोनायोग्यस्या-न्धादेरित्येवमर्थम्। "पुत्रहीनस्य ऋक्थिन"इत्येतदपि पुत्रपौत्रहीनस्य प्रपौत्रादयो यदि ऋक्थं गृह्णन्ति तदर्णं दाप्यानान्यथेत्येवमर्थम्। पुत्रपौत्रौ तु ऋक्थग्रहणा-भावेऽपि दाप्यावित्युक्तम् यथाह नारदः "क्रमाद-भ्यागतं प्राप्तं पुत्रैर्यन्नर्णमुद्धृतम्। दद्युः पैतामहं पौत्रा-स्तच्चतुर्थान्निवर्त्तते"इति सर्वं निरवद्यम्। यद्वा योषि-द्ग्राहाभावे पुत्रोदाप्य इत्युक्तन्तस्याभावे योषिद्ग्राहो दाप्य इत्युच्यते। पुत्रहीनस्य ऋक्थिशब्देन योषिदेवो-च्यते "सैव चास्य धनं स्मृतमिति" स्मरणात् "यो यस्य हरते दारान् स तस्य हरते धनमिति" च। ननु यो-षिद्ग्राहाभावे पुत्र ऋणं दाप्यः पुत्राभावे योषिद्ग्रा-ह इति, परस्परं विरुद्धम् उभयसद्भावे ः कश्चिद्दाप्य इति, नैष दोषः अन्तिमस्वैरिणीग्राहिणः प्रथमपुनर्भू-ग्राहिणः सप्रधनस्त्रीहारिणश्चाभावे पुत्रोदाप्यः। पुत्रा-भावे तु निर्द्धननिरपत्ययोषिद्ग्राहो दाप्य इति। एतदे-वोक्तं नारदेन "धनस्त्रीहारिपुत्राणामृणभाग् यो धनं हरेत्। पुत्रोऽसतोः स्त्रीधनिनोः स्त्रीहारी धनि-पुत्रयोः"। धनस्त्रीहारिपुत्राणां समवाये यो धनं हरेत् स ऋणभाक्। पुत्रोऽसतोः स्त्रीधनिनोः स्त्री च धनञ्च स्त्रीधने ते विद्येते ययोः तौ स्त्रीधनिनौ तयोः स्त्रीध-निनोः असतोः पत्र एवर्णभाक्। धनिपुत्रयोरसता· स्त्रीहार्य्येवर्णभाक् स्त्रीहार्य्यभावे पुत्र ऋणभाक्; पुत्राभावे स्त्रीहारीति विरोधप्रतिभासपरिहारः पूर्ववत्। पुत्रहीनस्य ऋक्थिनः इत्यस्यान्या व्याख्या, एते धन स्त्रीहारिपुत्रा ऋणं कस्य दाप्याः? इति विवक्षायामुत्तम-

र्णस्य दातुस्तदभावे तत्पुत्रादेः पुत्राद्यभावे कस्य दाप्या इत्यपेक्षायामिदमुपतिष्ठते । पुत्रहीनस्य ऋक्थिन इति पुत्राद्यन्वयहीनस्योत्तमर्णस्य य ऋक्थी ऋक्थग्रहणयोग्यः सपिण्डादिस्तस्य ऋक्थिनो दाप्याः । तथा च नारदेन "ब्राह्मणस्य तु यद्देयं सान्वयस्य न चास्ति सः । निर्वापयेत् सकुल्येषु तदभावेऽस्य बन्धुषु" इत्यभिधायाभिहितम् "यदा तु न सकुल्याः स्युर्न च सम्बन्धिबान्धवाः । तदा दद्याद्द्विजेभ्यस्तु तेष्वसत्स्वप्सु विनिक्षिपेदिति" । अधुना पुरुषविशेषे ऋणापहरणप्रतिषेधनप्रसङ्गादन्यदपि प्रतिषेधति । "भ्रातॄणामथ दम्पत्योः पितुः पुत्रस्य चैव हि । प्रातिभाव्यमृणं साक्ष्यमविभक्ते न तु स्मृतम्" या० । प्रतिभुवो भावः प्रातिभाव्यम् । भ्रातॄणां दम्पत्योः पितापुत्रयोश्च । अविभक्ते द्रव्ये द्रव्यविभागात् प्राक् प्रातिभाव्यमृणं साक्ष्यञ्च न स्मृतं मन्वादिभिः । अपि तु प्रतिषिद्धं साधारणधनत्वात् प्रातिभाव्यसाक्षित्वयोः पक्षे द्रव्यव्ययावसानत्वात् ऋणस्य चावश्यप्रतिदेयत्वात् । एतच्च परस्परानुमत्या अनुमत्या त्वविभक्तानामपि प्रातिभाव्यादि भवत्येव । विभागादूर्द्धन्तु परस्परानुमतिव्यतिरेकेणापि भवति । ननु दम्पत्योर्विभागात् प्राक् प्रातिभाव्यादिप्रतिषेधो न युज्यते तयोर्विभागाभावेन विशेषणानर्थक्याद्विभागाभावश्च आपस्तम्बेन दर्शितः "जायापत्योर्न विभागो विद्यत" इति । सत्यं श्रौतस्मार्त्ताग्निसाध्येषु कर्म्मसु तत्फलेषु च विभागाभावो न पुनः सर्वकर्म्मसु द्रव्येषु च । तथा हि "जायापत्योर्न विभागो विद्यते" इत्युक्त्वा किमिति न विद्यत इत्यपेक्षायां हेतुमुक्तवान् "पाणिग्रहणाद्धि सहत्वङ्कर्मसु तथा पुण्यफलेषु चेति" हि यस्मात् पाणिग्रहणादारभ्य कर्मसु सहत्वं श्रूयते "जायापती अग्निमादधीयातामिति" । तस्मादाधाने सहाधिकारादाधानसिद्धाग्निसाध्येषु कर्मसु सहाधिकारः । तथा "कर्म स्मार्त्तं विवाहाग्नावित्यादि" स्मरणात् विवाहसिद्धाग्निसाध्येष्वपि कर्मसु सहाधिकार एव । अतश्चोभयविधाग्निनिरपेक्षेषु कर्मसु पूर्त्तेषु जायापत्योः पृथगेवाधिकारः सम्पद्यते । तथा पुण्यानां फलेषु स्वर्गादिषु जायापत्योः सहत्वं श्रूयते "दिवि ज्योतिरजरमारभेतामित्यादि" । येषु प्रत्यक्कर्मसु सहाधिकारस्तेषां फलेषु सहत्वमिति बोद्धव्यम् । न पुनः पूर्त्तानां भर्त्तुरनुज्ञयानुष्ठितानां फलेष्वपि । ननु द्रव्यस्वामित्वेऽपि सहत्वमुक्तम् "द्रव्यपरिग्रहेषु च न हि भर्त्तुर्विप्रवासे नैमित्तिकदाने स्तेयमुपदिशन्तीति" सत्यं द्रव्यस्वामित्वं पत्न्या दर्शितमनेन न पुनर्विभागाभावः यस्माद्द्रव्यपरिग्रहेषु चेत्युक्त्वा तत्र कारणमुक्तम्भर्त्तुर्विप्रवासे नैमित्तिकेऽवश्यकर्त्तव्यदानेऽतिथिभोजनभिक्षादानादौ हि यस्मान्न स्तेयमुपदिशन्ति मन्वादयः तस्माद्भार्य्याया अपि द्रव्यस्वामित्वमस्ति अन्यथा स्तेयं स्यादिति तस्माद्भर्त्तुरिच्छया भार्य्याया अपि द्रव्यविभागो भवत्येव न स्वेच्छया यथा यज्ञप्रति "यदि कुर्य्यात् समानांशान् पत्न्यः कार्य्याः समांशिकाः" इति । अधुना प्रातिभाव्यं निरूपयितुमाह । "दर्शने प्रत्यये दाने प्रातिभाव्यं विधीयते । आद्यौ तु वितथे दाप्यावितरस्य सुता अपि" या० प्रातिभाव्यं विश्वासार्थं पुरुषान्तरेण सह समयः, तच्च विषयभेदात् त्रिधा भिद्यते । यथा दर्शने दर्शनापेक्षायामेनं दर्शयिष्यामीति, प्रत्यये विश्वासे मत्प्रत्ययेनास्य धनं प्रयच्छ नायं त्वां वञ्चयिष्यते यतोऽमुकस्य पुत्रोऽयमुर्व्वराप्रायभूरस्य ग्रामवरोऽस्तीति, दाने यद्ययं न ददाति तदानीमहमेव धनं दास्यामीति, प्रातिभाव्यं विधीयत इति प्रत्येकं सम्बन्धः । आद्यौ तु दर्शनप्रत्ययप्रतिभुवौ वितथे अन्यथाभावे अदर्शने विश्वासव्यभिचारे च दाप्यौ राज्ञा प्रस्तुतं (अष्टद्विकम्) धनमुत्तमर्णस्य । इतरस्य दानप्रतिभुवः सुता अपि दाप्याः । वितथे इत्येव शाठ्येन निर्द्धनत्वेन वा अधमर्णेऽप्रतिकुर्व्वति । इतरस्य सुता अपीति वदता पूर्व्वयोः सुता न दाप्याः इत्युक्तम् । सुता इति वदता न पौत्रा दाप्या इति दर्शितम् । एतदेव स्पष्टीकर्त्तुमाह । "दर्शनप्रतिभूर्यत्र मृतः प्रात्ययिकोऽपि वा । न तत्पुत्रा ऋणं दद्युर्दद्युर्दानाय यः स्थितः" या० यदा दर्शनप्रतिभूः प्रात्ययिको वा प्रतिभूर्दिवंगतः तदा तयोः पुत्राः प्रातिव्यायातं पैतृकम् ऋणं न दद्युः । यस्तु दानाय स्थितः प्रतिभूर्दिवं गतस्तस्य पुत्रा दद्युर्न पौत्राः । ते च मूलमेव दद्युर्न वृद्धिम् । "ऋणं पैतामहं पौत्राः प्रातिभाव्यागतं सुतः । समं दद्यात् तत्सुतौ तु न दाप्याविति निश्चयः" इति व्यासवचनात् । प्रातिभाव्यव्यतिरिक्तं पैतामहमृणं पौत्रः समं यावद्गृहीतं तावदेव दद्यान्न वृद्धिम् । तथा तत्सुतोऽपि प्रातिभाव्यागतं पितृऋणं सममेव दद्यात्तयोः पौत्रपुत्रयोः सुतौ प्रपौत्रपौत्रौ च प्रातिभाव्यायातमप्रातिभाव्यायातं चर्णं यथाक्रममगृहीतवित्तौ न दाप्याविति । यदपि स्मरणम् "खादको वित्तहीनः स्याल्लग्नको वित्तवान् यदि । मूलं तस्य भवेद्देयं न वृद्धिं दातुमर्हतीति" तदपि लग्नकः प्रतिभूः खादकोऽध-

मर्णः, लग्नको यदि वित्तवान् मृतस्तदास्य पुत्रेण मूलमेव दातव्यं न वृद्धिरिति व्याख्येयम् । यत्र दर्शनप्रतिभूः प्रत्ययप्रतिभूर्वा बन्धकपर्याप्तं गृहीत्वा प्रतिभूर्जातः तत्पुत्रा अपि तस्मादेव बन्धकात् प्रातिभाव्यायातमृणं दद्युरेव । यथा ह कात्यायनः “गृहीत्वा बन्धकं यत्र दर्शनेऽस्य स्थितो भवेत् । विना पित्रा धनात्तस्मात् दाप्यः स्यात् तदृणं सुतः” इति । दर्शनग्रहणं प्रत्ययोपलक्षणम् विना पित्रा पितरि प्रेते दूरदेशङ्गते वेति । यस्मिन्ननेकप्रतिभूसम्भवस्तत्र कथं दातव्यमित्याह । “बहवः स्युर्यदि स्वांशैर्दद्युः प्रतिभुवोधनम् । एकच्छायाश्रितेषु धनिकस्य यथारुचि” या० । यद्येकस्मिन् प्रयोगे द्वौ बहवो वा प्रतिभुवस्तदृणं विभज्य स्वांशेन दद्युः । एकच्छायाश्रितेषु प्रतिभूषु एकस्याधमर्णस्य छाया सादृश्यं तामाश्रिताः एकच्छायाश्रिताः अधमर्णो यथा कृत्स्नद्रव्यदानायस्थितस्तथा दानप्रतिभुवोऽपि प्रत्येकं कृत्स्नदानाय स्थिताः एवं दर्शनप्रत्यये च तेष्वेकच्छायाश्रितेषु प्रतिभूषु सत्सु धनिकस्योत्तमर्णस्य यथारुचि यथाकामम् । अतश्च धनिको वित्ताद्यपेक्षया स्वार्थं यं प्रार्थयते स एव कृत्स्नं दद्यान्नांशतः । एकच्छायाश्रितेषु यदि कश्चिद्देशान्तरं गतस्तत्पुत्रश्च सन्निहितस्तदा धनिकेच्छया स सर्वं दाप्यः मृते तु कस्मिंश्चित् स्वपित्रंशं सवृद्धिकं दाप्यः । यथाह कात्यायनः “एकच्छायाप्रविष्टानां दाप्योयस्तत्र दृश्यते । प्रोषिते तत्सुतः सर्वं पित्रंशं तु मृते सति” प्रातिभाव्यऋणदानविधिमुक्त्वा प्रतिभूदत्तस्य प्रतिक्रियाविधिमाह । “प्रतिभूर्दापितो यत्तु प्रकाशं धनिनो धनम् । द्विगुणं प्रतिदातव्यमृणिकैस्तस्य तद्भवेत्” या० । यदृणं प्रतिभूस्तत्पुत्रो वा धनिकेनोपपीड़ितः प्रकाशं सर्वजनसमक्षं राज्ञा धनिनो दापितो न तु द्वैगुण्यलोभेन स्वयमुपेत्य दत्तम् । यथाह नारदः यच्चर्णं प्रतिभूर्दद्याद्धनिकेनोपपीड़ितः । ऋणिकस्तं प्रतिभुवे द्विगुणं प्रतिदापयेदिति” । ऋणिकैरधमर्णैस्तस्य प्रतिभुवस्तद्द्रव्यं द्विगुणं प्रतिदातव्यं स्यात् । तच्च कालविशेषमनपेक्ष्य सद्य एव द्विगुणं दातव्यम् वचनारम्भसामर्थ्यात् । एतच्च हिरण्यविषयम् । नन्विदं वचनं द्वैगुण्यमात्रं प्रतिपादयति तच्च पूर्वोक्तकालकलाक्रमाबाधेनाप्युपपद्यते यथा जातेष्टिविधानं शुचित्वाबाधेन । अपि च सद्यः सवृद्धिकदानपक्षे पशुस्त्रीणां सद्यःसन्तत्यभावान्मूलदानमेव प्राप्नोतीति तदसत् “वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणा परा” इत्यनेनैव कालकलाक्रमेण द्वैगुण्यसिद्धेर्द्वैगुण्यमात्रविधान इदं वचनमनर्थकं स्यात् । पशुस्त्रीणान्तु कालक्रमपक्षे सन्तत्यभावे स्वरूपदानमेव । यदा प्रतिभूरपि द्रव्यदानानन्तरं कियता कालेनाधमर्णेन संघटते तदा संततिरपि सम्भवत्येव यद्वा पूर्व्वसिद्धसन्तत्या सह पशुस्त्रियोदास्यतीति न किञ्चिदेतत् । अथ प्रातिभाव्यं प्रीतिकृतमतश्च प्रतिभुवा दत्तं प्रीतिदत्तमेव न च प्रीतिदत्तस्य याचनात् प्राक् वृद्धिरस्ति यथाह “प्रीतिदत्तं तु यत्किञ्चिद्वर्द्धते न त्वयाचितम् । याच्यमानमदत्तञ्चेद्वर्द्धते पञ्चकं शतमिति” । अतश्च प्रीतिदत्तस्यायाचितस्यापि दानदिवसादारभ्य यावत् द्विगुणं कालक्रमेण वृद्धिरित्यनेन वचनेनोच्यत इति । तदप्यसत् अस्यार्थस्यास्माद्वचनादप्रतीतेः द्विगुणं प्रतिदातव्यमित्येतावदिह प्रतीयते तस्मात् कालक्रमनपेक्ष्यैव द्विगुणं प्रतिदातव्यं वचनारम्भसामर्थ्यादिति सुष्ठूक्तम् । प्रतिभूदत्तस्य सर्वत्र द्वैगुण्ये प्राप्तेऽपवादमाह “सन्ततिः स्त्रीपशुष्वेव धान्यं त्रिगुणमेव च । वस्त्रं चतुर्गुणं प्रोक्तं रसश्चाष्टगुणस्तथा” या० । हिरण्यद्वैगुण्यवत् कालानादरेणैव स्त्रीपश्वादयः प्रतिपादितवृद्ध्या दाप्याः श्लोकस्तु व्याख्यातएव यस्य द्रव्यस्य यावती वृद्धिः पराकाष्ठोक्ता तद्द्रव्यं प्रतिभूदत्तं स्वादकेन तया वृद्ध्या सह कालविशेषमनपेक्ष्य सद्यो दातव्यमिति तात्पर्य्यार्थः । यदा तु दर्शनप्रतिभूः संप्रतिपन्ने कालेऽधमर्णं दर्शयितुमसमर्थस्तदा तदन्वेषणाय तस्य पक्षत्रयं (अवधिभूतम्) दातव्यम् । तत्र यदि दर्शयति तदा मोक्तव्योऽन्यथा प्रस्तुतं धनं दाप्यः “नष्टस्यान्वेषणार्थन्तु देयं पक्षत्रयं परम् । यद्यसौ दर्शयेत् तत्र मोक्तव्यः प्रतिभूर्भवेत् । काले व्यतीते प्रतिभूर्य्यदि तं नैव दर्शयेत् । निबन्धं दापयेत्तन्तु प्रेते चैष विधिः स्मृतः” इति कात्यायनवचनात् । लग्नके विशेषनिषेधश्च तेनैवोक्तः । “न स्वामी न च वै शत्रुः स्वामिनाधिकृतस्तथा । निरुद्धो दण्डितश्चैव संदिग्धश्चैव न क्वचित् । नैव रिक्थी न मित्रञ्च नचैवात्यन्तवासिनः । राजकार्य्यनियुक्तश्च ये च प्रव्रजिता नराः । न शक्तो धनिने दातुं दण्डं राज्ञे च तत्समम् । जीवन्वापि पिता यस्य तथैवेच्छाप्रवर्त्तकः । नाविज्ञातो ग्रहीतव्यः प्रतिभूः स्वक्रियां प्रतीति” सन्दिग्धोऽभिशस्तः । अत्यन्तवासिनो-नैष्ठिकब्रह्मचारिणः । इति प्रतिभूविधिः । धनप्रयोगे द्वौ “विश्वासहेतू प्रतिभूराधिश्च यथाह नारदः । विश्रम्भहेतू द्वावत्र प्रतिभूराधिरेव चेति” । प्रतिभूर्निरूपितः ” मिता०

आधिस्तु विस्तरेणाधिशब्दे ७११ पृष्ठादौ निरूपितः ।

अत्र विशेषः वीरमि० व्यासः "सबन्धे भाग आशीतः षष्टोभागः सलग्नके । निराधाने द्विकशतं मासलाभ उदाहृतः" अत्र आधानपदं प्रतिभुवोऽप्युपलक्षणम् । तत्रैव नारदः । "स्थानलाभनिमित्तं यद्दानग्रहणमिष्यते । तत्कुसीदमिति ज्ञेयम् तेन वृत्तिः कुसीदिनाम्" स्थानं मूलधनस्यावस्थानं लाभो वृद्धिः तन्निमित्तं तत्प्रयोजनम् । कुसीदशब्दार्थमाह वृह० । "कुत्सितात् सीदतश्चैव निर्विशङ्कैः प्रगृह्यते । चतुर्गुणं चाष्टगुणं कुसीदाख्यमतः स्मृतः" । कुत्सितात् सीदतश्च अधमर्णात् इत्यर्थः । वृद्धौ विशेषमाह स एव । "वृद्धिश्चतुर्विधा प्रोक्ता पञ्चधान्यैः प्रकीर्त्तिता । षड्विधान्यैः समाख्याता तत्त्वतस्तां निबोधत । कायिका कालिका चैव चक्रवृद्धिरतोऽपरा । कारिता च शिखा वृद्धिर्भोगलाभस्तथैव च । कायिका कर्म्मसंयुक्ता मासग्राह्या तु कालिका । वृद्धेर्वृद्धिश्चक्रवृद्धिः कारिता ऋणिना कृता । प्रत्यहं गृह्यते या तु शिखा वृद्धिस्तु सा स्मृता । गृहात्तोयः फलं क्षेत्रात् भोगलाभः प्रकीर्त्तितः" कर्म्मसंयुक्ता कायिका यत्र बन्धकीकृतस्य गवाश्वादेर्दोहनवहनादिकं कर्म्म वृद्धित्वेन स्थापितं तत्र सा कायिका । यथाह व्यासः 'दोह्यवाह्यकर्म्मयुता कायिका समुदाहृता" प्रत्यहं गृह्यते या तु शिखा वृद्धिस्तु सा स्मृता । शिखेव वर्द्धते नित्यं शिरश्छेदान्निवर्त्तते । मूले दत्ते तथैवैषा शिखावृद्धिर्निवर्त्तते" । परमवृद्धौ विशेषस्तत्रैव वृह० "हिरण्ये द्विगुणा वृद्धिस्त्रिगुणा वस्त्रकुप्यके । धान्ये चतुर्गुणा प्रोक्ता शदवाह्यलवेषु च । उक्ता पञ्चगुणा शाके बीजेक्षौ षड्गुणा स्मृता । लवणस्नेहमद्येषु वृद्धिरष्टगुणा मता । गुडे मधुनि चैवोक्ता प्रयुक्ते चिरकालिके" कुप्यं त्रपुसीसादि शदः क्षेत्रफलं धान्यस्य पृथग्ग्रहणात्तद्व्यतिरिक्तं पुष्पफलादि । कात्या० 'तैलानाञ्चैव सर्व्वेषां मद्यानामथ सर्पिषाम् । वृद्धिरष्टगुणा ज्ञेया गुडस्य लवणस्य च" । सर्व्वेषां सर्व्वप्रकाराणां सर्व्वत्रान्वयः । गुडादौ विभक्तिव्यत्ययेन सर्व्वस्येत्यन्वयः । वसिष्ठः "वज्रशुक्तिप्रवालानां हेम्नश्च रजतस्य च । द्विगुणा त्विष्यते वृद्धिः कृतकालानुसारिणी" कात्या० "मणिमुक्ताप्रवालानां सुवर्णरजतस्य च । तिष्ठती द्विगुणा वृद्धिः फलकौटाविकस्य च" फलं फलजं कार्पासादि आविकशब्दश्चर्य्यात् कौटं कीटोद्भवं पट्टसूत्रादि आविकं कम्बलादि । वसिष्ठः 'ताम्रायःकांस्यरीतीनां त्रपुणः सीसकस्य च । त्रिगुणा तिष्ठती वृद्धिः कालात् चिरकृतस्य तु" विष्णुः "अनुक्तानां त्रिगुणा" । देशाचारभेदादुक्तायाः सव्वप्रकारवृद्धेरन्यथात्वमाह नारदः "ऋणानां सार्व्वभौमोऽयं विधिर्वृद्धिकरः स्मृतः । देशाचारस्थितिस्त्वन्या यत्रर्णमवतिष्ठते । द्विगुणं त्रिगुणञ्चैव तथान्यस्मिंश्चतुर्गुणम् । तथाष्टगुणमन्यस्मिन् तत्र देशेऽवतिष्ठते" । द्रव्यभेदेऽक्षयवृद्धिमाह वृह० "तृणकाष्ठेष्टकासूत्रकिण्वचर्म्मास्थिवर्म्मणाम् । हेतिपुष्पफलानाञ्च वृद्धिस्तु न निवर्त्तते । किण्वं सुराद्रव्योपकरणं द्रव्यविशेषः । वसिष्ठः "दन्तचर्म्मास्थिशृङ्गाणां मृण्मयानां तथैव च । अक्षया वृद्धिरेतेषां पुष्पमूलफलस्य च" पुष्पादौ पूर्व्वापरविरोधः अधमर्णसत्यपेक्षानपेक्षाभ्यां समाधानीयः । शिखावृद्ध्यादौ वृद्धेरक्षयमाह वृह० "शिखावृद्धिं कालिकाञ्च फलभोगं तथैव च । धनी तावत् समादद्यात् यावन्मूलं न शोधितम्" "क्वचिदनङ्गीकृताऽपि वृद्धिर्भवतीत्याह" विष्णुः "यो गृहीत्वा ऋणं पूर्व्वं शोदास्यामीति सामकम् । न दद्याल्लोभतः पश्चात् तदहात्तद्वृद्धिमाप्नुयात्" सामकं समसेवावृद्धिकं श्वोदास्यामीति प्रतिश्रुत्येर्थः श्व इति पदं दानकालोपलक्षणम् । अङ्गीकाराभावे क्वचित् विषये वृद्ध्यभावमाह स एव० "न वृद्धिः स्त्रीधने लाभे निःक्षिप्ते च यथास्थिते । सन्दिग्धे प्रतिभाव्ये च यदि न स्यात् स्वयं कृता" स्त्रीधने "अधिविन्नस्त्रियै देयमाधिवेदनिकं समम्" इत्युक्त्याद्युक्तेः स्त्रियै दातव्ये धने स्त्रीशुल्कधने च लाभे कृष्याद्याये वाणिज्याद्युत्पन्ने आये च कालातिक्रमेऽपि न वृद्धिः । कात्या० "धर्म्मकृत्यावश्यद्यूते पण्यमूल्ये च सर्व्वदा । स्त्रीशुल्केषु न वृद्धिः स्यात् प्रातिभाव्यागतेषु च" धर्म्मकृत्ये प्रतिश्रुत्यादत्ते, द्यूते कृतपणे पराजितपणे च सुरापाणार्थपणे क्रीतद्रव्यस्य पण्यस्य मूल्ये प्रातिभाव्यागतेषु सन्दिग्धप्रातिभाव्यागतेषु प्रागुक्तसंवर्त्तवाक्यैकवाक्यत्वात् अत्र सर्व्वदेति विशेषणम् याचनेऽपि न वृद्धिरिति सूचनार्थम् । व्यासः 'न वर्द्धते चिरस्थं च मद्यशुल्कप्रतिश्रुतम्" । शुल्कं घट्टादिदेयं राजकरादि । पूर्णावधौ ऋणदानासामर्थ्ये विशेषमाह मनुः "ऋणं दातुमशक्तो यः कर्त्तुमिच्छेत् पुनः क्रियाम् । स दत्त्वा निर्जितां वृद्धिं करणं परिवर्त्तयेत् । अदर्शयित्वा तत्रैव हिरण्यं परिवर्त्तयेत् । यावती सम्भवेद्वृद्धिस्तावतीं दातुमर्हति । चक्रवृद्धिं समारूढो देशकालव्यवस्थितः । अतिक्रामन् देशकालौ न तत्फलमवाप्नुयात्" । निर्जितां लभ्यत्वेनात्माधीनत्वं नीताम् । करणमन्यद्रणलेख्यं कुर्यात् । अदर्शयित्वा

साक्षिभ्यो देयद्रव्यमदर्शयित्वैव अधमर्णेन मया एतावती वृद्धिरियन्मूलमित्येवमङ्गीकारेण देयमृणं परिवर्त्तयेत् सवृद्धिकत्वेनाधिकतया अन्यथाभावप्राप्नोति ... तदेव पत्रे साक्षिमल्लेख्यम् एतच्च यावतीं वृद्धिं तदा दातुं शक्नोति तावतीं दत्त्वा लेख्यं कार्यं तथाकृते सति द्विगुणातिक्रमेण वृद्धिर्भवतीत्यर्थः तथाकृते च वृद्धेरपि वृद्धिः तस्य सवृद्धिकस्य मूलस्थानीयत्वात् यथाह वृह० "पूर्णावधौ शान्तलाभमृणमुद्घाहयेद्धनी । कारयेद्वा ऋणी लेख्यं चक्रवृद्धिव्यवस्थया । द्विगुणस्योपरि यथा चक्रवृद्धिः प्रगृह्यते । भोगलाभस्तथा तत्र मूलं स्यात् सोदयमृणम्" ऋणग्रहणोपायाश्च मिता० सक्ताः उपायशब्दे च १२५५पृ० विस्तरेण दर्शिताः । अवधिमध्ये सवृद्धिकसर्वर्णदानासम्भवे क्रमेण दाने सलेख्यप्रयोगे लेख्यपृष्ठे लिखित्वैव दानप्रकारमाह याज्ञ०। "लेख्यस्य पृष्ठेऽभिलिखेद्दत्त्वादत्त्वर्णिको धनम् । धनी वोपगतं दद्यात् स्वहस्तपरिचिह्नितम्" उपगतशब्दे १२०१पृ० व्याख्यातम् । विष्णुः "अधमर्णदाने लेख्यासन्निधाने चोत्तमर्णः स्वलिखितं दद्यात्"(रसीद) प्रवेशपत्रादाने विशेषमाह नारदः । "गृहीत्वोपगतं दद्यादृणिकायोदयं धनी । अददद्याच्यमानश्च शेषहानिमवाप्नुयात्" "उदयं प्राप्तम् । सर्वस्वदाने तु ऋणलेख्यच्छेदनमाह "दत्त्वर्णं पाटयेल्लेख्यं शुद्ध्यै वान्यत्तु कारयेत् । साक्षिमच्च भवेद्यद्वा तद्दातव्यं ससाक्षिकम्" या०।

तत्राशक्तौ विशेषमाह कात्या० "धनदानासहं बुद्ध्वा स्वाधीनं कर्म कारयेत् । अशक्तौ बन्धनागारे प्रवेश्यो ब्राह्मणादृते" । अशुभकर्मकारणं बन्धनागारप्रवेशनञ्च राजावेदनपूर्वकमेव कार्य्यमन्यथा दण्डमाह कात्या०। "यदि शूद्रादवमादिष्टमशुभं कर्म कारयेत् । प्राप्नुयात् साहसं पूर्वमृणात्म्रच्येत चर्णिकः" अनादिष्टम् राज्ञाऽनिवेदितम् । ऋणदातृपुत्रं विशेषयति कात्या० "ऋणं तु दापयेत् पुत्रम् यदि स्यान्निरुपद्रवः । द्रविणार्हश्च धुर्यश्च नान्यथा दापयेत् सुतम् । व्यसनाभिप्लुते पुत्रे बाले वा यत् प्रदृश्यते । द्रव्यहृद्दापयेत्तं तु तस्याभावे पुरन्ध्रिहृत्" कुटुम्बार्थे कृतर्णे विशेषमाह वृह० "पितृव्यभ्रातृपुत्रस्त्रीदासशिष्यानुजीविभिः । यत् गृहीतं कुटुम्बार्थे तद्गृही दातुमर्हति" । नारदः "शिष्यान्तेवासिदासस्त्रीप्रैष्यक्रयकरैश्च यत् । कुटुम्बहेतोर्यत् क्षिप्तं दातव्यं तत् कुटुम्बिना" शिष्यः वेदशिष्यः अन्तेवासी शिल्पशिष्यः ।

"कुटुम्बार्थमृणं दर्शयति" कात्या० "कुटुम्बार्थमशक्ते तु गृहीतं व्याधिते तथा । उपप्लवनिमित्तं च विद्यादापत्कृतन्तु तत् । कन्यावैवाहिके चैव प्रेतकार्य्येषु यत् कृतम् । एतत् सर्वं प्रदातव्यं कुटुम्बेन कृतं प्रभोः" । पुत्रकृते विशेषमाह नार० "पितुरेव नियोगाद्वा कुटुम्बभरणाय वा । कृतं वा यदृणं कृच्छ्रे दद्यात् पुत्रस्य तत्पिता" । स्त्रियाः पतिकृतस्य दाने विशेषमाह कात्या० "भर्त्तुकामेन या भर्त्रा उक्ता देयमृणं त्वया । प्रतिपन्ना च सा दाप्या धनं यद्याश्रितं स्त्रियाम्" । नार० "दद्यादपुत्रा विधवा नियुक्ता या मुमूर्षुणा । या वा तद्रिक्थमादद्यात् यतो रिक्थमृणं ततः" । मातुर्निर्धनत्वेऽपि तत्कृतस्य पुत्रेण देयमाह" नारदः "पुत्रिणी तु समुत्सृज्य पुत्रं स्त्री यान्यमाश्रयेत् । तस्या ऋणं हरेत् सर्वं निःस्वाया पुत्र एव तु" । अधनत्वे तामूढोढैव दद्यात" यथाह कात्या० "बालपुत्राधिकार्थां स्यात् भर्त्तारं यान्यमाश्रिता । आश्रितस्तमृणं दद्यात् बालपुत्राविधिः स्मृतः" । अविभक्तर्णे विशेषमाह विष्णुः "अविभक्तैः कृतमृणं यस्तिष्ठति स दद्यात्" । नारदः "पितृव्येणाविभक्तेन भ्रात्रा वा यदृणं कृतम् । मात्रा वा यत् कुटुम्बार्थे दद्युस्तत् सर्वरिक्थिनः" अविभक्तकाले कुटुम्बार्थे कृतमृणं विभक्तैरपि देयमाह मनुः । "ग्रहीता यदि नष्टः स्यात् कुटुम्बार्थे कृतो व्ययः । दातव्यं बान्धवैस्तत् स्यात् प्रविभक्तैरपि स्वतः" । कामकृतर्णमाह कात्या० । "लिखितं मुक्तकं वापि देयं यत्तु प्रतिश्रुतम् । परपूर्वस्त्रियै तत्तु विद्यात् कामकृतं न्वृणाम्" मुक्तकं लेखरहितम् । अनेकधनिसमवाये विशेषमाह कात्या०। "नानर्णसमवाये तु यद्यत् पूर्वकृतं भवेत् । तत्तदेवाग्रतो देयं राज्ञः स्याच्छ्रोत्रियात् परम् । एकाहे लिखितं यत्र तत्र कुर्याद्दणं समम् । ग्रहणं रक्षणं लाभमन्यथा तु यथाक्रमम्" । भिन्नदिवसे कृतं श्रोत्रियपूर्वकं देयम् । एकदिनकृतनानर्णसमवाये युगपद्देयम् धनाल्पत्वबहुत्वयोस्तु तदनुसारेण भागं परिकल्प्य देयमित्यर्थः । अत्र विशेषमाह कात्या "यस्य द्रव्येण यत्पण्यं साधितं यो विभावयेत् । तद्द्रव्यमृणिकेनैव दातव्यं तस्य नान्यथा" यदुत्तमर्णात् द्रव्यं गृहीत्वा वाणिज्यादिकं करोति तस्मात् लब्धधनं तस्मै एव देयं तत्सत्त्वे नान्यस्मै इत्यर्थः । पैतामहपित्रर्णयोरपि देयतामाह वृह० "पित्र्यं पूर्वमृणं देयं पश्चादात्मीयमेव च । तयोः पैतामहं पूर्वं देयमेवमृणं

सदा । पितर्य्यपि विद्यमाने तु न च पुत्रो धनं हरेत् । देयं तद्धनिके द्रव्यं मृते पौत्रैस्तु दाप्यते”। एवं मातृकर्णेऽपि “मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेऽन्वयः” या० उक्तेः। पुत्रपौत्रादिभिर्देय ऋणे विशेषमाह विष्णुः “धनग्राहिणि प्रेते प्रव्रजिते वा द्विदशाः समाः प्रोषिते वा तत्पुत्रपौत्रैर्देयं नातः परमनीप्सुभिः” प्रेते अप्राप्तव्यवहारस्य विंशतिवर्षोत्तरं, संन्यस्ते प्रोषिते च सर्वस्यैव तत्कालोत्तरं देयम् । एतच्च अप्राप्तधनस्य गृहीतधनस्य तु तत्क्षणाद्देयता ऋणावशेषधनग्रहणस्यैव प्रागुक्तयास्तसिद्धेः । ऋणापकरणाभावे दोषमाह व्यासः “तपस्वी चाग्निहोत्री वा ऋणवान् म्रियते यदि । तपश्चैवाग्निहोत्रञ्च सर्वं तद्धनिनो भवेत्” । अन्यकृतपुण्यस्यान्यत्र संक्रमासम्भवात्स्य चिन्द्यार्थवादता तेन तत्तत्पुण्यनाशकतेति पर्य्यवसितोऽर्थः । कात्या० “उद्धारादिकमादाय स्वामिने न ददाति यः । स तस्य दासो भृत्यः स्त्री पशुर्वा जायते गृहे” तथा नारदः “याच्यमानं न दद्याद्य ऋणं वापि प्रतिग्रहम् । तद्द्रव्यं वर्द्धते तस्य यावत् कोटिशतं भवेत् । ततः कोटिशते पूर्णे वेष्टितस्तेन कर्म्मणा । अश्वः खरो हयो दासो भवेज्जन्मनि जन्मनि” तेनर्णानपक्रियाया उक्तपश्वादियोनिप्राप्तिहेतुदुरदृष्टजनकत्वम् । ऋणग्रहणमेव पापहेतुः तच्छोधनस्य तन्नाशकतेति गदाधर आह स्म ।

ऋणावन् त्रि० ऋण—वनिप् दीर्घश्च । ऋणवति । “ऋणावानं न पतयन्त सर्गैः” ऋ० १, १६९, ७ । “ऋणावानमृणम्लम्” भा० । “ऋणावा बिभ्यद्धनम्” ऋ० १०, ३४, १० ।

ऋणान्तक पु० ऋणमन्तयति अन्ति—नामधा० ण्वुल् । मङ्गलग्रहे शब्दरत्ना० तत्सेवने ऋणमोचनात्तस्य तथात्वम् ।

ऋणापकरण न० ६ त० । ऋणशोधने ऋणापनयनादयोऽप्यत्र ।

ऋणिक त्रि० ऋणमस्त्यस्य ठन् । ऋणयुक्ते (खातक) “द्विगुणं प्रतिदातव्यमृणिकैस्तस्य तद्धनम्” या० ।

ऋणिन् त्रि० ऋणमस्त्यस्य इनि स्त्रियां ङीप् । ऋणयुक्ते (खातक) “ऋणी न स्यात् यथा पिता” स्मृ० । “समाप्तेऽर्थे ऋणी नाम स्वहस्तेन निवेशयेत्” । “जायमानो वै ब्राह्मणस्त्रिभिर्ऋणैर्ऋणी भवति” श्रुतिः ।

ऋणिधनिचक्र न० तन्त्रोक्ते ग्राह्यमन्त्रस्य शुभाशुभज्ञानार्थे चक्रभेदे तच्चक्रलेखनप्रकार उक्तः तन्त्रसारे “अथ ऋणिधनिचक्रम् । तद्यथा रुद्रया० “कोष्ठान्येकादशैवेह वेदेन पूरितानि च । अकारादिहकारान्तं लिखेत् कोष्ठेषु तन्त्रवित् । प्रथमं पञ्चकोष्ठेषु ह्रस्वदीर्घक्रमेण तु । द्वयं द्वयं लिखेत् तत्र विचारे खलु साधकः । शेषेष्वेकैकशोवर्णान् क्रमतस्तु लिखेत् सुधीः । षट्कालकालवियदग्निशशाङ्कवेदखाकाशभून्यदहनाः खलु साध्यवर्णाः । युग्मद्विपस्ववियदम्बरयुक्शशाङ्कव्योमाब्धिवेदशशिनः खलु साधकार्णाः । नामाक्षराद्कठबाङ्कजभक्तशेषं स्यात्वोभयोरधिकशेषमृणं धनं स्यात्”। अस्यार्थः साध्यवर्णान् स्वरव्यञ्जनरूपेण पृथक्कृतान् षट्कालाद्यङ्कैर्गणितान् (मिलितान्) तथा साधकनामाक्षराणि स्वरव्यञ्जनरूपेण पृथक्कृतानि युग्माद्यैरङ्कैर्गणयित्वा (सङ्कलय्य) अष्टसंख्याभिर्हृत्वा उभयोः साध्यसाधकयोरधिकम् ऋणं शेषं धनं ज्ञात्वा मन्त्रं दद्यात् । मन्त्रश्चेदृणी भवति तदा मन्त्रः शुभदायको भवति धनी चेन्न । तन्त्रान्तरे “मन्त्रस्तृणी शुभफलोऽप्यशुभो धनी च तुल्यो यदा समफलः कथितो मुनीन्द्रैः” । अन्यच्च “शून्ये मृत्युमवाप्नोति धने च विफलो भवेत् । ऋणे तु प्राप्तिमात्रेण सर्वसिद्धिस्तु जायते” तथा रुद्रयामले “मन्त्रो यद्यधिकाङ्कः स्यात्तदा मन्त्रं जपेत् सुधीः । समेऽपि जपेन्मन्त्रं न जपेत् तु ऋणाधिके । शून्ये मृत्युं विजानीयात् तस्मात् शून्यं विवर्ज्जयेत् ।“तथा इन्द्रर्त्तुनेत्ररविपक्षदशर्त्तुवेदशक्राशुधाष्टभिर्गुणितानथ साध्यवर्णान् । दिग्भूगिरिश्रुतिगजाग्निमुनीषुवेदैः षड्वह्निभिस्तु गुणितानथ साधकार्णान्”इदन्तु वचनं विष्णुविषयम् रामार्चनचन्द्रिकाधृतत्वादिति केचित् । वस्तुतस्तु पूर्वस्यैव विवरणं तथा हि इन्द्रर्त्तुनेत्रेत्याद्यनन्तरं “नामार्णकोष्ठाङ्कमथाभिहन्यात् एकादिरुद्राङ्कगतक्रमेण”। यदुक्तं रुद्रयामले “साध्याङ्कान् साधकाङ्कांश्च पूरयेदुपदेशसंख्यया । गुणिते तु हृतेऽष्टाभिर्यच्छेषं जायते स्फुटम् । तदङ्कं कथयाम्यत्र एकादशगृहस्थितम्” इत्युक्त्वा षट्कालेत्याद्युक्तम् । प्रकारान्तरं यथा “नामाद्यक्षरमारभ्य यावत् मन्त्रादिमाक्षरम् । त्रिधा कृत्वा स्वरैर्भिन्नं तदन्यद्विपरीतकम्”। अस्यार्थः साधकनामाद्यक्षरतोगणनया यावत् मन्त्रादिमाक्षरम् तत्संख्यां त्रिधा कृत्वा सप्तभिर्हृत्वा अधिकम् ऋणं शेषं धनं स्यात् । तदन्यदिति मन्त्राद्यक्षरमारभ्य यावत् साधकाद्यक्षरं भवेत् तावत् संख्यां सप्तगुणां कृत्वा त्रिभिर्हरेत् । अन्यच्च ‘साध्यनाम द्विगुणितं साधकेन समन्वितम् । अष्टभिश्च हरेच्छेषं तदन्यद्विपरीतकम्” । अस्यार्थः साध्यनामस्वरव्यञ्जनभेदेन द्विगुणीकृत्य साधकनाम्ना स्वरव्यञ्जनभेदेन मिलितं कृत्वा अष्टभिर्हरेत् अधिकम् ऋणं शेषं धनम् । तदन्यदिति साधकनाम स्वरव्यञ्जनभेदेन

द्विगुणीकृत्य साध्यं न युक्तं कृत्वा चाष्टभिर्हरेत् । नामप्रकारमाह पिङ्गलामते । “प्रसिद्धं यद्भवेन्नाम किं वास्य जन्मनामतः । यद्दीनां पुष्पपातेन गुरुणा यत् कृतं भवेत् । लोकप्रसिद्धमथ वा मात्रा पित्रा तथा कृतम्” । यामले “सुप्तोजागर्त्ति येनासौ दूरस्थश्च प्रभाषते । वदत्यन्यमनस्कोऽपि तन्नाम चाद्यमन्त्र तु” । सनत्कुमारीये “पितृमातृकृतं नाम त्यक्त्वा शर्मादिदेवकाम् । श्रीवर्णञ्च ततो विद्वान् चक्रेषु योजयेत् क्रमात्”

ऋत गतौ जुगुप्सायाञ्च सौत्रः सक०सेट् सार्वधातुके ईयङ् आत्म० आर्द्धधातुके वा ईयङ् ईयङभावे पर० । ऋतीयते ऋतीयेत ऋतीयताम् आर्त्तीयत । आर्त्तीयिष्ट आर्त्तीत् । ऋतीयाम्—बभूव आस चक्रे आनर्त्त । ऋतीयिता—अर्त्तिता । ऋतीयिषीष्ट ऋत्यात् । ऋतीयिष्यते अर्त्तिष्यति । आर्त्तीयिष्यत आर्त्तिष्यत् । ऋतीयमानः भावे क्त । ऋतीया । “तस्मान्नर्तीयेरन् स योऽवं विद्वान् नर्त्तीयतेऽप्रियं द्विषतां करोति” शत० २,४,२,२ । ते ऋत्तीयमाने ऊचतुः ३,६,२,२ । यद्वै सेनायां च समितौ चर्त्तीयन्ते” ८,६.१,१६ ।

ऋत न० ऋ-क्त । “ऋतमुञ्छशिलं ज्ञेय”मित्युक्ते ब्राह्मणस्य १उपजीव्यवृत्तिभेदे २मोक्षे, ३जले, “तन्न ऋतं पातु शतशारदाय” ऋ० ७, १०१,६ । “ऋतमुदकम्”भा० । “न गावो नवनृन्ऋतं जरितारस्त इन्द्र !”ऋ०७,२२,४ । “ऋतमुदकम्”भा० “ऋतस्य धाराः सुदुघा दुहानाः” ऋ० ७,४३,४ “गोजा ऋतजा अद्रिजा ऋतम्”ऋ०४,४०,५ । ४ कर्मफले “ऋतं पिबन्तौ सुकृतस्य लोके”श्रुतिः ५सुप्रिये वाक्ये ६मानसादिसत्ये च । ७दीप्ते, ८पूजिते च त्रि० । ९यज्ञे पु० “पीतये चारुऋताय पीतये” ऋ० १,१. २७,२ । ‘ऋताय यज्ञाय” भा० । “चारु ऋताय पीतये ९,१७,८ । “ऋताय यज्ञाय”भा०१०सूर्ये पु० । “एष ते योनिर्ऋतायुभ्याम्” यजु०७,१० “ऋतायुभ्यां मित्रावरुणाभ्याम् । ऋतशब्देन मित्रः आयुशब्देन वरुणः”वेददी० । “ब्रह्म वा ऋतं ब्रह्म हि मित्रो ब्रह्म ह्यृतं वरुण एवायुः”शत०ब्रा०४,१,४,१० । ११आदित्ये न० । “ऋतं सत्यमृतं सत्यम्” यजु० ११,४७. “ऋतमादित्यः” वेददी० । ऋतमिति मन्त्राव्ययमिति तु न्याय्यम् “ऋतञ्च सत्यञ्चाभीद्धात्” अघमर्षणोक्तेः १२परब्रह्मणि । “ऋतमेकाक्षरं ब्रह्म सत्यं स्थानमनन्तकम्”स्मृ० १३सत्ये च वाक्यादौ । “एतौं वाचमृतां कर्त्तुमर्हसि त्वमरिन्दम !”भा० आश्व०६७ । “तस्मात् साक्ष्यं वदेदृतम्” “साक्ष्यं पृच्छेदृतं द्विजान्”मनुः । “सर्वमेतदृतं मन्ये यन्मां वदसि केशव !” गीता १४तद्वति च त्रि० । १५ऋतदेवनामके देवभेदे पु० । “ऋतस्य हि शुरुधः सन्ति”ऋ०४,२३,८ “ऋतस्य ऋतदेवस्य” भा० । “गर्भमृतस्पतिः” ऋ० ६, ४८,५ । “ऋतस्य यज्ञस्योदकस्य वा पतिः”भा०पृषो० सुडागमः “ऋतचिद्धि सत्यः” ऋ०१,१४५,५ । “ऋतस्य यज्ञस्य जलस्य वा चित् चेतयिता ज्ञाता”भा० । १६वह्नेर्र्षिभेदे “ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च”यजु०१७,८२ ।

ऋतजित् पु० ऋतं जयति जि-क्विप् ईत० । १यक्षभेदे । “त्वष्टा च जमदग्निश्च कम्बलोऽथ तिलोत्तमा । ब्रह्मापेतोऽथ ऋतजित् धृतराष्ट्रश्च सत्तमः । माघमासे वसन्त्येते सप्त मैत्रेय ! भास्करे” विष्णु० १०अ० । “ब्रह्मापेतो ब्रह्मराक्षसः ऋतजित् यक्षभेदः”श्रीधरः । २यज्ञजयिनि त्रि० “ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्च अन्तिमित्रश्च दूरेऽमित्रश्च गणः” यजु० १७,८२ । अयञ्चाग्नेर्धामप्रियभेदः ‘सप्त तेऽग्ने ! समिधः, सप्त जिह्वाः, सप्तऋषयः, सप्तधामप्रियाणि । सप्त होत्राः सप्तधा त्वा यजन्ति । सप्त योनीरापृणस्व घृतेन स्वाहा” यजु० १७,७९ इत्युपक्रम्य “अग्नेः समिधादिसप्तसप्तकोपक्रमेषु धामप्रियरूपमध्ये तस्याभिधानात् ।

ऋतद्युम्न त्रि०ऋतं द्युम्नं कीर्त्तिर्दीप्तिर्वाऽस्य । १सत्येन दीप्यमाने २सत्ययशस्के च । “ऋतं वदन्नृतद्युम्न! सत्यं वदन्त्सत्यकर्मन् !” ऋ० ९,११३,४ । हे ऋतद्युम्न ! ऋतेन दीप्यमान ! सत्ययशस्क ! वा” भा० ।

ऋतधामन् पु० ऋतं धामास्य । १विष्णौ त्रिका० । “ऋतं प्रियवाक्यं सामगानं धाम स्थानमस्य । २सामगानस्थानयुक्ते त्रि० “ऋतधामासि स्वर्ज्योतिः”यजु०५,३२ । “ऋतं सामगानं धाम स्थानमस्याः औदुम्बर्याः”वेददी० ऋतं सत्यमविनश्वरं स्थानमस्य । ३अविनश्वरस्थानयुक्ते त्रि० । “ऋताषाडृतधामाग्निः” यजु० १८,३८ । ४इन्द्रभेदे स च द्वादशमन्वन्तरीयः इन्द्रभेदः । “भविता रुद्रसावर्णी राजन् द्वादशमो मनुः । ऋतधामा च देवेन्द्रो देवाश्च हरितादयः” भाग०८,१३,१२ । ५यदुवंश्ये नृपभेदे । “कङ्कश्च कर्णिकायां वै ऋतधामाजयावपि”भाग०९,२,२३ ।

ऋतध्वज पु० १ब्रह्मर्षिभेदे । “कुमारोनारद ऋभुरित्युपक्रम्य” “हिरण्यनाभः कौशल्यः श्रुतदेव ऋतध्वजः । एते परे च सिद्धेशाश्चरन्ति ज्ञानहेतवः” भाग० ६,१५,११ । २शिवे च तन्नाम कथने “मन्युर्मनुर्महिमसोमहान् शिव ऋतध्वजः

उपरेता भवःकालो वामदेवो धृतव्रतः” भाग० ३,१२,१० ।

ऋतनि त्रि० ऋतं जलं यज्ञं वा नयति नी+क्विप् वेदे नि० ह्रस्वः । आदित्ये तस्य जलदायकत्वेन उदयेन यज्ञप्रवर्त्तकत्वेन च तथात्वम् । “यो राजभ्य ऋतनिभ्यो ददाश” ऋ० २,२७,१२ । लोके तु ऋतनीरित्येव ।

ऋतपर्ण सूर्य्यवंश्ये नृपभेदे । “भगीरथसुतो राजा” इत्युपक्रम्य “अयुताजित्सुतस्त्वासीदृतपर्णो महायशाः । दिव्याक्षहृदयज्ञोऽयं राजा नलसखो बली । ऋतपर्णसुतस्त्वासीदार्त्तपर्णिर्महीपतिः” हरिवं० १६ अ० । तस्य च नलेन सख्यमक्षहृदयज्ञत्वञ्च भा० व० ७२ अ० दर्शितं यथा “एवमुक्तो नलेनाथ तदा भाङ्गासुरिर्नृपः । आससाद वने राजन् ! फलवन्तं विभीतकम् । तं दृष्ट्वा वाहुकं राजा त्वरमाणोऽभ्यभाषत । ममापि सूत ! पश्य त्वं सङ्ख्याने परमं बलम् । सर्वः सर्वं न जानाति सर्वज्ञो नास्ति कश्चन । नैकत्र परिनिष्ठास्ति ज्ञानस्य पुरुषे क्वचित् । वृक्षेऽस्मिन् यानि पर्णानि फलान्यपि च वाहुक ! । पतितान्यपि यान्यत्र तत्रैकमधिकं शतम् । एकपत्राधिकं पत्रं फलमेकञ्च वाहुक । पञ्चकोट्योऽथ पत्राणां द्वयोरपि च शाखयोः । प्रचिनुह्यस्य शाखे द्वे याश्चाप्यन्याः प्रशाखिकाः । आभ्यां फलसहस्रे द्वे पञ्चोनं शतमेव च । ततो रथमवस्थाप्य राजानं वाहुकोऽब्रवीत् । परोक्षमिव मे राजन् ! कत्थसे शत्रुकर्षण ! । प्रत्यक्षमेतत् कर्त्तास्मि शातयित्वा विभीतकम् । अथात्र गणिते राजन् ! विद्यते न परोक्षता । प्रत्यक्षं ते महाराज ! शातयिष्ये विभीतकम् । अहं हि नाभिजानामि भवेदेवं न वेति वा । सङ्ख्यास्यामि फलान्यस्य पश्यतस्ते जनाधिप ! । मुहूर्त्तमपि वार्ष्णेयो रश्मीन् यच्छतु वाजिनाम् । तमब्रवीन्नृपः सूतं नायं कालो विलम्बितुम् । वाहुकस्त्वब्रवीदेनं परं यत्नं समास्थितः । प्रतीक्षस्व मुहूर्त्तं त्वमथ वा त्वरते भवान् । एष याति शिवः पन्था याहि वार्ष्णेय ! सारथिः । अब्रवीदृतुपर्णस्तु सान्त्वयन् कुरुनन्दन ! । त्वमेव यन्ता नान्योऽस्ति पृथिव्यामपि वाहुक ! । त्वत्कृते यातुमिच्छामि विदर्भान् हयकोविद ! । शरणं त्वां प्रपन्नोऽस्मि न विघ्नं कर्त्तुमर्हसि । कामञ्च ते करिष्यामि यन्मां वक्ष्यसि वाहुक ! । विदर्भान् यदि यात्वाद्य सूर्य्यं दर्शयितासि मे । अथाब्रवीद्वाहुकस्तं संख्याय च विभीतकम् । ततो विदर्भान् यास्यामि कुरुष्वैवं वचो मम । अकाम इव तं राजा गणयस्वेत्युवाच ह । सोऽवतीर्य्य रथात्तूर्णं शातयामास तं द्रुमम् । ततः स विस्मयाविष्टो राजानमिदमब्रवीत् । गणयित्वा यथोक्तानि तावन्त्येव फलानि च । अत्यद्भुतमिदं राजन् ! दृष्टवानस्मि ते बलम् । श्रोतुमिच्छामि ते विद्यां यथैतज्ज्ञायते नृप ! । तमुवाच ततो राजा त्वरितो गमने नृपः । विद्ध्यक्षहृदयज्ञं मां सङ्ख्याने च विशारदम् । वाहुकस्तमुवाचाथ देहि विद्यामिमां मम । मत्तोऽपि चाश्वहृदयं गृहाण पुरुषर्षभ । ऋतुपर्णस्ततो राजा वाहुकं कार्य्यगौरवात् । हयज्ञानस्य लोभाच्च तं तथेत्यब्रवीद्वचः । यथोक्तं त्वं गृहाणेदमक्षाणां हृदयं परम् । निक्षेपो मेऽश्वहृदयं त्वयि तिष्ठतु वाहुक !” । नलस्य वाहुकच्छद्मरूपतामुपवर्ण्य अन्त, उक्तं यथा “ऋतुपर्णोऽपि शुश्राव वाहुकच्छद्मिनं नलम् । दमयन्त्या समायुक्तं जहृषे च नराधिपः । तमानाय्य नलं राजा क्षमयामास पार्थिवम् । स च तं क्षमयामास हेतुभिर्बुद्धिसम्मतः ! । स सत्कृतो महीपालो नैषधं विस्मिताननः । उवाच वाक्यं तत्त्वज्ञो नैषधं वदतां वरः । दिष्ट्या समेतो दारैः स्वैर्भवानित्यभ्यनन्दत । कच्चित्तु नापराधं ते कृतवानस्मि नैषध ! । अज्ञातवासं वसतो मद्गृहे वसुधाधिप ! । यदि वा बुद्धिपूर्वाणि यद्यबुद्धापि कानिचित् । मया कृतान्यकार्य्याणि तानि त्वं क्षन्तुमर्हसि । नल उवाच । न मेऽपराधं कृतवांस्त्वं स्वल्पमपि पार्थिव ! । कृतेऽपि च न मे कोपः क्षन्तव्यं हि मया तव । पूर्वं ह्यपि सखा मेऽसि सम्बन्धी च जनाधिप ! । अत ऊर्द्ध्वन्तु भूयस्त्वं प्रीतिमाहर्त्तुमर्हसि । सर्वकामैः सुविहितैः सुखमस्म्युषितस्त्वयि । न तथा स्वगृहे राजन् ! यथा तव गृहे सदा । इदञ्चैव हयज्ञानं त्वदीयं मयि तिष्ठति । तदुपाहर्त्तुमिच्छामि मन्यसे यदि पार्थिव ! । एवमुक्त्वा ददौ विद्यामृतपर्णाय नैषधः । स च तां प्रतिजग्राह विधिदृष्टेन कर्म्मणा । गृहीत्वा चाश्वहृदयं राजन् ! भाङ्गासुरिर्नृप ! । निषधाधिपतेश्चापि दत्त्वाक्षहृदयं नृप !” । भा० व० ७५ अ० । “कर्कोटकस्य नागस्य दमयन्त्या नलस्य च । ऋतपर्णस्य राजर्षेः कीर्त्तनं कलिनाशनम्” भा० “ऋतपर्णमाहृतम्” नैष० ।

ऋतपेय पु० ऋतं स्वर्गादिफलं पेयं भोग्यमस्मात् । एकाहे २यागभेदे । “यः कामयेत नैःस्निह्यं पाप्मन इयामिति स ऋतपेयेन यजेत” आ० श्रौ० ९,७,२५ । “निःस्नेहस्य भावो नैःस्निह्यम् यः पाप्मनोनैःस्निह्यमियां गच्छेयमिति कामयेत स ऋतपेयनामकेन एकाहेन यजेत अल्पमपि

पापं मयि नो तिष्ठेत् इति यः कामयेत स ऋतपेयेन यजेतेत्यर्थः” भारा०वृ०। सप्तदशस्तोमकेषु पञ्चसु क्रतुषु मध्ये स्वर्गकामकर्त्तव्ये २क्रतुभेदे च। “सप्तदशाः पञ्च” कात्या० २२,८,६। इत्युपक्रम्य “स्वर्गकामस्यर्त्तपेयः” १० सूत्रे दर्शितः।

ऋतपेशस् पु० ऋतमुदकं पेशोरूपमस्य। जलात्मके वरुणे “वरुणाय ऋतपेशसे दधीत” ऋ० ५,६६,१।

ऋतप्सु पु० ऋतं यज्ञियहविः प्साति प्सा–बा० कु। १यज्ञियह-विर्भोजके देवे। ऋतं सत्यं प्सु रूपमस्येति। २सत्यस्वरूपे देवे च। “अन्तर्यच्छनिनो वामृतप्सू” ऋ० १,१८०,२। “ऋतप्सू यज्ञियहविर्भक्षयितारौ सत्यस्वरूपौ वा” भा०।

ऋतम् अव्य० ऋत–कमि। सत्यमित्यर्थे। ऋतम्भरः।

ऋतम्भर पु० ऋतमित्यव्ययं तद्बिभर्त्ति अच्। १सत्यपालके परमेश्वरे “ततोगतो ब्रह्मगिरोपहूत ऋतम्भरध्याननिवारिताघः” भाग० ६,१२,१२। प्लक्षद्वीपान्तर्गते २नदीभेदे स्त्री। तस्य वर्षाद्यभिधाय “तेषु गिरयोनद्यश्च सप्तैवाभिज्ञाताः” इत्युक्त्वा “अरुणा नृम्णाङ्गिरसी सावित्री सुप्रभाता ऋतम्भरा सत्यम्भरेति महानद्यः” भाग० ५,२०,६। पात० उक्ते ३विपर्य्यासशून्ये समाधिस्थप्रज्ञाभेदे च स्त्री “ऋतम्भरा तत्र प्रज्ञा” सू० “तस्मिन् समाहितचित्तस्य या प्रज्ञा जायते तस्या ऋतम्भरेति संज्ञा भवति अन्वर्था च सा सत्यमेव बिभर्त्ति न तत्र विपर्य्यासज्ञानगन्धोऽप्यस्तीति। तथा चोक्तम् “आगमेनानुमानेन ध्यानाभ्यासरसेन च। त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तममिति” पा०भा०। तस्याः शाब्दादिभ्यो विशेषादिकमुक्तं तत्रैव। “श्रुतानुमानप्रज्ञाभ्यामन्यविषयविशेषार्थत्वात्” सू०। “श्रुतमागमविज्ञानं तत् सामान्यविषयं न ह्यागमेन शक्यो विशेषोऽभिधातुं कस्मात्? नहि विशेषेण कृतसंकेतः शब्द इति। तथानुमानं सामान्यविषयमेव यत्र प्राप्तिस्तत्र गतिः यत्राप्राप्तिस्तत्र न भवति गतिरित्युक्तम् अनुमानेन च सामान्येनोपसंहारः तस्मात् श्रुतानुमानविषयो न विशेषः कश्चिदस्तीति न चास्य सूक्ष्मव्यवहितविप्रकृष्टस्य वस्तुनो लोकप्रत्यक्षेण ग्रहणम्। न चास्य विशेषस्याप्रमाणकस्याभावोऽस्त्विति” समाधिप्रज्ञानिर्ग्राह्य एव स विशेषो भवति भूतसूक्ष्मगतो वा पुरुषगतो वा तस्मात् श्रुतानुमानप्रज्ञाभ्यामन्यविषया सा प्रज्ञा विशेषार्थत्वादिति। समाधिप्रज्ञाप्रतिलम्भे योगिनः प्रज्ञाकृतः संस्कारो नवो नवोजायते। समाधिप्रज्ञाभवः संस्कारोव्युत्थानसंस्काराशयं बाधते व्युत्थानसंस्काराभिभवात् तत्प्रभवाः प्रत्यया न भवन्ति पात० भा०।

“तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी” सू०। “प्रत्ययनिरोधे समाधिरुपतिष्ठते ततः समाधिजा प्रज्ञा ततः प्रज्ञाकृताः संस्कारा इति नवोनवः संस्काराशयो जायते ततः प्रज्ञा ततश्च संस्कारा इति। कथमसौ संस्कारातिशयश्चित्तं समाप्ताधिकारं न करिष्यतीति? न ते प्रज्ञाकृताः संस्काराः क्लेशक्षयहेतुत्वात् चित्तमधिकारविशिष्टं कुर्व्वन्ति चित्तं हि ते स्वकार्य्यादवसादयन्ति। ख्यातिपर्य्यवसानं हि चित्तचेष्टितमिति” पात०भा०। विवृतञ्चैतत् वाचस्पतिना। “अत्रैव योगिजनप्रसिद्धान्वर्थसंज्ञाकथनेन योगिसंमतिमाह। ऋतम्भरेति आगमेनेति वेदविहितं श्रवणमुक्तम्। अनुमानेनेति मननं, ध्यानं चिन्ता तत्राभ्यासः पौनःपुन्येनानुष्ठानं तस्मिन् रस आदरः तदनेन निदिध्यासनमुक्तम्। स्यादेतत् आगमानुमानगृहीतार्थविषयभावनाप्रकर्षलब्धजन्मा निर्विचारा आगमानुमानविषयमेव गोचरयेत् न खल्वन्यविषयानुभवजन्मा संस्कारः शक्तोऽन्यत्र ज्ञानं जनयितुम्, अतिप्रसङ्गात् तस्मान्निर्विचारा चेदृतम्भरा आगमानुमानयोरपि तत्प्रसङ्ग इत्यत आह। श्रुतानुमानेत्यादि। बुद्धिसत्त्वं हि प्रकाशस्वभावं सर्व्वार्थदर्शनेसमर्थमपि तमसावृतं यत्रैव रजसोद्घाट्यते तत्रैव गृह्णाति यदा त्वभ्यासवैराग्याभ्यामपास्तरजस्तमोमलमनवद्यवैशारद्यमुद्द्योतते तदास्यातिपतितसमस्तमानमेयसीम्नः प्रकाशवत्त्वे सति किं नाम यन्न गोचर इति भावः। व्याचष्टे श्रुतमागमज्ञानं तत्सामान्यविषयं कस्मात्? नह्यागमेन शक्योविशेषोऽभिधातुं, कुतः? यस्मादानन्त्याद्व्यभिचाराच्च न विशेषेण कृतसङ्केतः शब्दः यस्मादस्य विशेषेण सह वाच्यवाचकसम्बन्धः प्रतीयेत नच वाक्यार्थोऽपीदृशो विशेषः सम्भवति। अनुमानेऽपि लिङ्गलिङ्गिसम्बन्धग्रहणाधीनजन्मनि गतिरेषैवेत्याह तथानुमानमिति। यत्र प्राप्तिरिति यत्रतत्रशब्दयोः स्थानपरिवर्त्तनेन व्याप्यव्यापकभावो गमयितव्यः। अतोऽत्रानुमानेन सामान्येनोपसंहारः। उपसंहरति तस्मादिति। अस्तु तर्हि सम्बन्धग्रहानपेक्षं लोकप्रत्यक्षं न तत् सामान्यविषयमित्यत आह। न चास्येत्यादि। मा भूत् सम्बन्धग्रहाधीनं, लोकप्रत्यक्षमिन्द्रियाधीनन्तु-स्यात्। नचेन्द्रियाणामस्मिन्नस्ति योग्यतेत्यर्थः नतु च यद्या-

गमानुमानप्रत्यक्षागोचरः विशेषः तर्हि नास्ति प्रमाणाभावादित्यत आह न चेति । न हि प्रमाणं व्यापकं कारणं वा प्रमेयस्य, येन तन्निवृत्तौ निवर्त्तेत । न खलु कलावतश्चन्द्रस्य परभागवर्त्तिहरिणसद्भावं प्रति सन्दिहते प्रामाणिका इत्यर्थः । तस्मात् समाधिप्रज्ञानिर्ग्राह्य एवेति । अत्र च विवादाध्यासिताः परमाणवः आत्मानश्च प्रातिस्विकविशेषशालिनः द्रव्यत्वे सति परस्परं व्यावर्त्तमानत्वात् ये द्रव्यत्वे सति परस्परं व्यावर्त्तन्ते ते प्रातिस्विकविशेषशालिनः यथा खण्डमुण्डादय इत्यनुमानेनागमेन च ऋतम्भरप्रज्ञोपदेशपरेण यद्यपि विशेषो निरूप्यते तदनिरूपणे संशयः स्यात् न्यायप्राप्तत्वात् तथाप्यदूरविप्रकर्षेण तत्तत्त्वं कथञ्चिद्गोचरयतः श्रुतानुमाने तु साक्षात्कार्थमिव संसंशयादि पदानि लिङ्गसंख्यायोगितया, तस्मात् सिद्धं श्रुतानुमानप्रज्ञाभ्यामन्यविषयेति । स्यादेतत् भवतु परमार्थविषयसम्प्रज्ञातो यथोक्तोपायाभ्यासात् अनादिना तु व्युत्थानसंस्कारेण निगूढनिविड़तया प्रतिबध्यनीया समाधिप्रज्ञा वातव्यावर्त्तमध्यवर्त्तिप्रदीपपरमाणुरिवेति शङ्कामपनेतुं सूत्रमवतारयति समाधिप्रज्ञेति सूत्रं पठति ।तज्ज इति तदिति निर्विचारां समापत्तिं परामृशति अन्येति । व्युत्थानमाह । भूतार्थपक्षपातो हि धियां स्वभावः, तावदेवेयमनवस्थिता भ्राम्यति न यावत् तत्त्वं प्रतिलभते तत्प्रतिलम्भे तत्र स्थितपदा सती संस्कारबुद्धिः संस्कारबुद्धिचक्रक्रमेणावर्त्तमाना सती अनादिमप्यतत्त्वसंस्कारबुद्धिक्रमं बाधत एवेति तथा च बाह्या अप्याहुः“निरुपद्रवभूतार्थस्वभावस्य विपर्ययैः । न बाधो नादिमत्त्वेऽपि बुद्धेस्तत्पक्षपाततः” इति । स्यादेतत् समाधिप्रज्ञातोऽस्तु व्युत्थानजन्यसंस्कारस्य निरोधः समाधिजस्तु संस्कारातिशयः समाधिप्रज्ञाप्रसवे हेतुरस्त्वप्यधिकल इति तदवस्थैव चित्तस्य साधिकारतेति चोदयति कथमसाविति । परिहरति न त इति । चित्तस्य हि कार्य्यद्वयं शब्दाद्युपभोगः विवेकख्यातिश्चेति तत्र क्लेशकर्माशयसहितं शब्दाद्युपभोगे वर्त्तते प्रज्ञाप्रभवसंस्कारोन्मूलितनिखिलक्लेशकर्माशयस्य तु चेतसोऽवसितप्रायाधिकारभावस्य विवेकख्यातिमात्रमवशिष्यते कार्यम् । तस्मात् समाधिसंस्काराश्चित्तस्य न भोगाधिकारहेतवः प्रत्युत तत्परिपन्थिन इति स्वकार्य्याद्भोगलक्षणादवसादयन्ति व्यसमर्थं कुर्व्वन्ति इत्यर्थः । कस्मात् ? विवेकख्यातिपर्य्यवसानं हि चित्तचेष्टितम् । तावद्धि भोगाय चित्तं चेष्टते न यावद्विवेकख्यातिमनुभवति सञ्जातविवेकख्यातेस्तु क्लेश निवृत्तौ न भोगाधिकार इत्यर्थः । तदत्र भोगाधिकारप्रशान्तिः प्रयोजनं प्रज्ञासंस्काराणामित्युक्तम्” तत् प्रचितु चित्तप्रसाधनीश्वतसोमैत्र्यादिभावनाः प्रसीदतु ते विशोका ज्योतिष्मती नाम चित्तवृत्तिः समापयतु परस्य तत्प्रसादज ऋतम्भराभिधानप्रवाहः साधनोपाधेयः”सी०च०।

ऋतव्य त्रि० ऋतुस्तदभिमानी देवो देवताऽस्य यत् । ऋतुदेवताके इष्टकादौ “ऋतव्ये मधुश्च माधवश्चेति” कात्या० १७, ४,२४ । विश्वज्योतिषः पुरोहे पद्ये प्राणभृत्ये ऋतव्ये इष्टके अनूकमभित उदङ्मुख उपदधाति” वेददी० “अथर्त्तव्ये उपदधाति ऋतव एते यदृतव्ये ऋतूनेवैतदुपदधाति मधुश्च माधवश्च वासन्तिकावृतू इति द्वे इष्टके भवतो द्वौ हि मासावृतुः” इति शत०ब्रा० ७,४,२,२९ । “अथ ऋतव्ये उपदधाति”इत्यादि प्राग्वत् ।“शुक्रश्च शुचिश्च ग्रैष्मावृतू” इत्युक्त्वा प्राग्वत् ८,२,१,१६ । “नावासदोऽनूकेषु पूर्व्ववर्जम्तव्यवेलायाम्” कात्या० १७,१२,१ ।

ऋतव्रत पु० ऋतमविनश्वरफलकं व्रतं यस्य । शाकद्वीपस्थे भगदुपासकभेदे । शाकद्वीपवर्णने”भाग०५,२०,१८ ।“तेषु पुरुषा ऋतव्रतसत्यव्रतदानव्रतानुव्रतानाम भगवन्तं वायुात्मकं प्राणायामविधूतरजस्तमसः परमसमाधिना यजन्ते” ऋतव्रतादयोवर्णस्थानीया इति बोध्यम् । अन्यद्वीपेषु वर्णभेदोक्तेरिह तु तेषामेव तत्स्थानीयत्वौचित्यात् चतुःसंख्यासाम्याच्च ।

ऋतसद् पु० ऋते यज्ञे सीदति सद–क्विप् ७त० । वह्नौ “नृषद्वरसदृतसद्व्योमसदब्जाः” ऋ० ४,४०,५ ।‘ऋतसद्ग्निः” भा० ।

ऋतसदन न० ऋतस्य यज्ञार्थं सीदत्यस्मिन् सद–आधारे ल्युट् ६त०। यज्ञार्थमुपवेशनस्थाने ।‘वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमासीद” यजु० ४,२६ । स्त्रियां ङीप् । “वरुणस्य ऋतसदन्यसि” तत्रैव ।

ऋतसाप् त्रि० आप+क्विप् सहापा साप् प्राप्ता ६त० । यज्ञस्य प्रापयितरि“ये चिद्धि पूर्व्वं ऋतसाप आसन्” ऋ० १,१७९,२ । “ऋतसाप ऋतस्य यज्ञस्यापयितारः” भा०।

ऋतस्पति पु० ऋतस्य पतिः बा० वेदे सुट् । यज्ञपतौ “तव वायवृतस्पते” । ऋ० ८,२६,२१। “ऋतस्पते ! यज्ञानां पते !”भा० लोके तु ऋतपतिरित्येव ।

ऋतावन् त्रि०ऋतमस्त्यस्य“छन्दसीवनिपौ”पा० वनिप् दीर्घश्च

यज्ञवति । "ऋतावानं महिषं विश्वदर्शतमग्निम्" यजु० १२,१११ । "ऋतावानो जने जने" ऋ० ५,६८,४ । "ऋतावानः यज्ञवन्तः" भा० । लोके तु मतुप् मस्य वः । ऋतवत् इत्येव । "ऐक्याद्वयस्य ऋतवानिति विप्रलब्धः" भाग० १५,२० । "ऋतवान् सत्यवान्" इति श्रीधरः ।

ऋतावृध् त्रि० ऋतं यज्ञं वर्द्धयति वृध–अन्तर्भूतण्यर्थे क्विप् दीर्घः । यज्ञवर्द्धके । "विश्वयन्तामृतावृधो द्वारः" यजु० २८,५ । "सुतः सोम ऋतावृधः" ७,९ । "देवीरृता ऋतावृधः" ४,१२ ।

ऋताषाह् त्रि० ऋतं सहते असत्यं न, सह–ण्वि दीर्घः ६त० पृ० "सहेः पृतनर्त्ताभ्याञ्चेति" पा० षत्वम् । सत्यसहने असत्ये कुपिते "ऋताषाडृतधामाग्निः" यजु० १८,३८ ।

ऋति स्त्री ऋ–क्तिन् । १गतौ २स्पर्द्धायाम् ३निन्दायाञ्च । कर्म्मणि क्तिन् । ४वर्त्मनि ५मङ्गले च । ६पुरुषमेधयज्ञियदेवभेदे । तत्र चतुर्थबूमे बन्धनीयपशुकीर्त्तने । "ऋतये स्तेनहृदयम्" यजु० ३०,१३ । कर्त्तरि क्तिच् । ७शत्रौ पु० निरु० । अग्निरक्षामृतीषहम्" ऋ० ६,१४,४ "शरव्यामुखेऽपि नह्यमान ऋतिर्हन्यमाना" अथ० १२,५,२५ । [कारके ।

ऋतिङ्कर त्रि० ऋतिं पीड़ां करोति कृ–खच् मुम् । पीड़ा-

ऋतीय नामधा० ऋतामिच्छति ऋतीयति आर्त्तीयत् । ऋतीयाम् बभूव आस चकार । वेदे तु "न छन्दसि" पा० न ईत्त्वम् । ऋतयति इत्येव "अकृत्सार्वधातुकयोः" पा० क्वचिदात्त्वं ऋतायति । ऋतायन् । "देवा ऋतायते दमे" ऋ० ४,८,२ । "ऋतायते यज्ञमिच्छते" भा० । "अग्निमृतयन्सादि" ऋ० ५,१२,७ । "ऋतयन् यज्ञमिच्छन् भा० । अर्वती ऋतायन्" ऋ० ७,८७, १ "ऋतायन् शोभ्रगमनमिच्छन्" भा० । तत उ ण् । ऋतयु यज्ञकामे "त्वं न इन्द्र ऋतयुस्त्वानिदो नि तृम्पसि" ऋ० ८,७०,१० । दीर्घे ऋतायु तत्रार्थे "न धा यतस्य ब्राह्मणा ऋतायवः" तै० स० २,२, ५,५, भावे अ । ऋतया ऋताया वा "श्रियं वने ऋतया सपन्ता" ऋ० २,११,१२ । "ऋतया ऋत कर्मफलं तत्कामनया" भा० । बद सुपांसुलुगित्यादिना तृतीयास्थाने आ० ।

ऋतीया स्त्री ऋत–ईयङ् भावे अ । जुगुप्सायाम् अमरः ।

ऋतीषह् त्रि० ऋतिं पीड़ां शत्रुं वा सहते क्विप् दीर्घः । "सहेः प्रतनर्त्ताभ्याञ्च" पा० चात् ऋतिशब्दादपि षत्वम् । १पीड़ासहे २शत्रुजयने च "अग्निरक्षामृतीषहम्" ऋ० ६,१४,४ ऋतीषहम् अरातीनां सोढारम्" भा० ।

ऋतु पु० ऋ–तु किच्च । शिशिरः पुष्पसमयो ग्रीष्मो वर्षा शरद्धिमः । माघादिमासयुग्मैस्तु ऋतवः षट् क्रमादिमे इत्युक्ते १कालभेदे । "ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोड़श स्मृताः" इति मनूक्ते स्त्रीणां २शोणितदर्शनयोग्ये गर्भधारणसमर्थे च काले "ऋतौ भार्य्यामुपेयात्" श्रुतिः "स्वदारनिरतः सदा ऋतुकालाभिगामी स्यात्" मनुः । ऋतुरस्य प्राप्तः अण् । आर्त्तव स्त्रीरजसि न० आर्त्तवशब्दे ८०८ पृष्ठे विवृतिः । ३दीप्तौ ४मासे च । मासद्वयात्मक ऋतुश्च सौरश्चान्द्रश्च यथा काल० मा० "ऋतुशब्दस्य ऋ गतावित्यस्माद्धातोर्निष्पन्नः । इयर्त्ति गच्छति अशोकपुष्पविकासान् साधारणलिङ्गमिति वसन्तादिकालविशेष ऋतुः । स च षड्विधः "षड्वा ऋतव इति" श्रुतेः । यत्तु "द्वादश मासाः पञ्चर्त्तव" इति श्रुतं तत्र हेमन्तशिशिरयोरेकीकरणं विवक्षितं याजमानेषु पञ्चप्रयाजानुमन्त्रणमन्त्रेषु हेमन्तशिशिरयोरेकस्मिन्नेकेनैव पदेनैकीकरणमित्युक्तं तथा हि "वसन्तमृतूनां प्रीणामि ग्रीष्ममृतूनां प्रीणामि वर्षा ऋतूनां प्रीणामि शरदमृतूनां प्रीणामीति" चतुर्णां प्रयाजानां पृथक् पृथगनुमन्त्रणमन्त्रानाम्नाय पञ्चमप्रयाजस्यानुमन्त्रणे मन्त्र एवं श्रूयते "हेमन्तशिशिरावृतूनां प्रीणामीति" एतदेवाभिप्रेत्य बह्वृचब्राह्मणे द्वादश मासाः पञ्चर्त्तवो हेमन्तशिशिरयोः समासेनेति" यत्त्वनयोर्मन्त्रब्राह्मणयोर्द्विवचनं तत्स्वरूपद्वैविध्याभिप्रायेण शिशिरस्य षष्ठस्यान्तिमत्वात्तेनानुमन्त्रणीयस्य षष्ठप्रयाजस्याभावाच्च तस्यैव पञ्चमे हेमन्तेऽन्तर्भावोन्याय्यः । अतएव प्रयाजब्राह्मणे "वसन्तमेवर्तूनामवरुन्धे" इत्यादिना चतुरः प्रयाजान् प्रशस्य पञ्चमे प्रयाजे केवलेन हेमन्तेन प्रशंसा "स्वाहाकारं यजति हेमन्तमेवावरुन्धे" इति । अस्तु नाम यथा तथा पञ्चसंख्या तथापि स्वरूपेण षोढा भिद्यते द्वादमासात्मके संवत्सरे एकैकस्य ऋतोर्मासद्वयात्मकत्वे सत्येकादश द्वादशमासयोर्वर्ज्जयितुमशक्यत्वात् षड्तौ पृथगनुष्ठानविधानाच्च तच्चोपरिष्टादुदाहरिष्यामः । मासद्वयात्मकत्वं चाग्निचयने ऋतव्येष्टकोपधानब्राह्मणे श्रूयते । "द्वन्द्वमुपदधाति तस्माद् द्वन्द्वमृतव" इति । एकस्मिन् ऋतौ कयोर्मासयोर्द्वन्द्वं ग्रहीतव्यमिति चेत् वसन्ताद्यृतुक्रमेण चैत्रमासादि द्वन्द्वमिति ब्रूमः । तच्चेष्टकोपधानमन्त्रेषु श्रूयते "मधुश्च माधवश्च वासन्तिकावृतू" "शुक्रश्च शुचिश्च ग्रैष्मावृतू" "नभश्च नभस्यश्च वार्षिकावृतू" इषश्चोर्जश्च "शारदावृतू" "सहश्च सहस्यश्च हैमन्तिकावृतू" "तपश्च तपस्यश्च

शिशिरादृतू" एषु च वाक्येषु ऋतू इति द्विवचनं मासाभिप्रायम् अन्यथा षडृतव इति श्रूयमाणा षट्संख्या बाध्येत। अवयवावयविनोर्वसन्तादेरेकात्मत्वं सौत्रामणीयहौत्रमन्त्रेषु एकवचनेन व्यवहारादवगन्तव्यं "वसन्तेन ऋतुना देवाः, ग्रीष्मेण ऋतुना देवा" इत्यादि हि तत्र पठ्यते तथैवाधानब्राह्मणे श्रूयते "वसन्तो वै ब्राह्मणस्यर्त्तुः, ग्रीष्मो वै राजन्यस्यर्त्तुः, शरद्वैश्यस्यर्त्तुरिति" यद्यप्येते षडृतवो घटीयन्त्रवन्नैरन्तर्येण प्रवर्त्तन्ते तथापि संवत्सरोपक्रमरूपत्वेन वसन्तस्य प्राथम्यं द्रष्टव्यम् एतदेवाभिप्रेत्य श्रूयते "मुखं वा एतदृतूनां वसन्त" इति पूर्वोदाहृतेषु मन्त्रब्राह्मणेषु सर्वत्र वसन्तोपक्रमणाच्च वसन्तस्य प्राथम्यं ते च वसन्ताद्यृतवो द्विविधाः चान्द्राः सौराश्च। चैत्रादयश्चान्द्राः तच्चोदाहृतं "मधुश्च माधवश्चेत्यादिना" न च तत्र चैत्रादयो नोक्ता इति शङ्कनीयं मध्वादिशब्दानां चैत्रादिपर्यायत्वात्। अत एवाहुः "चैत्रोमासो मधुःप्रोक्तो वैशाखो माधवो भवेत्। ज्यैष्ठमासस्तु शुक्रः स्यादाषाढः शुचिरुच्यते। नभोमासः श्रावणः स्यान्नभस्यो भाद्र उच्यते। इषश्चाश्वयुजोमासः कार्त्तिकश्चोर्जसंज्ञकः। सहोमासो मार्गशिरः सहस्यः पुष्यनामकः। माघमासस्तपाः प्रोक्तस्तपस्यः फाल्गुनः स्मृतः" इति। एतेषां चैत्राद्यात्मकानां वसन्तादीनां चन्द्रगतिपरिकल्प्यत्वाच्चान्द्रत्वम्। अतएव होतृमन्त्रेषु आम्नायते "चन्द्रमाः षड्ढोता स ऋतून् कल्पयति तथा" सूक्तविशेषे सूर्याचन्द्रमसौ प्रकृत्य आम्नायते "पूर्वापरं चरन्तौ माययैतौ शिशू क्रीडन्तौ परियातो अध्वरम्। विश्वान्यन्योभुवनाभिचष्ट ऋतूनन्योविदधज्जायते पुनरिति" अत्र पुनर्जायत इति लिङ्गादृतुविधाता चन्द्र इति अवगम्यते। नन्वस्त्वेवं मध्वादीनां चान्द्रमासानां वसन्ताद्यृतुत्वं संसर्पाख्यस्य तु त्रयोदशस्य चान्द्रमासस्य कथमृतुषु निर्वाहः। तन्मासषड्भावर्त्तुपशुब्राह्मणे मन्त्रानुवादपुरःसरमाम्नायते "उपयामगृहीतोऽसि संसर्पोऽसि अंहस्पत्यायत्वेत्याहास्ति त्रयोदशोमास इत्याहुस्तमेव तत् प्रीणातीति" तथा प्रवर्ग्यब्राह्मणेऽपि "अस्ति त्रयोदशोमास इत्याहुः यत्त्रयोदश परिधिर्भवति तेनैव त्रयोदशं मासमवरुन्धे" इति। तदुत्पत्तिप्रकारोऽस्माभिर्मलमासनिर्णये वक्ष्यते। विद्यतामेवं त्रयोदशोमासस्तस्य का उपपत्तिर्वसन्तादिषु ऋतुषु इति चेत् उच्यते किमयं सप्तम ऋतुः? आहोस्विदुक्तेष्वेव षट्सु अन्तर्भावः? उतर्त्तुद्वयान्तरालवर्त्ती कश्चिदनृतुरूपः? न तावत् प्रथमः 'ऋतुर्ऋतुनानुद्यमान" इति ऋतूनां नैरन्तर्यश्रवणात्; नाप्यन्तिमः। 'षड्वा ऋतवः" इति षट्संख्यानियमात्। वसन्तादिवन्मन्त्रब्राह्मणयोर्नामान्तराश्रवणाच्च नापि मध्यमः मध्वादिषु अपाठात्। उच्यते ययोर्मासयोर्मध्ये मलमासो दृश्यते तयोरुत्तरस्मिंस्तस्यान्तर्भावः। तथा चासौ षष्टिदिवसात्मकोमलिनशुद्धभागद्वयात्मक इति मध्वादिशब्दवाच्यत्वेनोक्तेष्वन्तर्भावान्न काप्यनुपपत्तिः। सौरेषु ऋतुषु बौधायनेन मीनमेषयोर्मेषवृषयोर्वा वसन्त इत्यभिधानात् मीनादित्वं मेषादित्वं च वैकल्पिकं वसन्तस्याङ्गीकृतम्। तथा च तदनुसारेण उत्तरे ग्रीष्मादयोऽपि यथायथं विकल्प्यन्ते। विनियोगश्चैषां ऋतुविशेषाणां श्रुतिस्मृतिपुराणेष्ववगम्यते। तत्र श्रुतिः। "वसन्ते ब्राह्मणोऽग्निमादधीत; ग्रीष्मे राजन्य आदधीत, शरदि वैश्य आदधीतेत्यादि" स्मृतिरपि "वसन्ते ब्राह्मणं उपनयीत, ग्रीष्मे राजन्यं शरदि वैश्यमिति" विष्णुधर्मोत्तरेऽपि परामूर्त्तिव्रते वसन्ताद्यृतुषु पृथक्पूजा विशेषतः कथिताः। तथा तत्रैव वसन्ते स्नानानुलेपादिदानम् ग्रीष्मे मानकादिदानमुक्तं देवीपुराणे। वर्षासु तिलदानं तथा शरद्यन्नदानं हेमन्ते वस्त्राग्निदानं शिशिरे वस्त्रदानमित्येतानि विष्णुधर्मोत्तर एवोक्तानि एवमन्यदप्युदाहार्य्यम्"।

"वसन्तेन ऋतुना देवा वसवस्त्रिवृतास्तुताः" "ग्रीष्मेण ऋतुना देवा रुद्राः पञ्चदशे स्तुताः" "वर्षाभिर्ऋतुनादित्या स्तोमे सप्तदशे स्तुताः" "शारदेन ऋतुना देवा एकविंश ऋभवस्तुताः" "हेमन्तेन ऋतुना देवास्त्रिणवे मरुतस्तुताः" "शैशिरेण ऋतुना देवास्त्रयस्त्रिंशेऽमृतास्तुताः प्राणस्यात्" यजु० २१,२२,२४,२५,२६,२७,२८। सूर्य्यसिद्धान्ते तु सौरत्वमङ्गीकृतम्। यथा "द्विराशिनाथा ऋतवस्ततोऽपि शिशिरादयः। मेषादयो द्वादशैते मासास्तैरेव वत्सरः"। ऋतुमध्ये च वत्सरारम्भकत्वं वसन्तस्यैव तच्च काल०मा० उक्तम् अतएव गीतायाम् "ऋतूनां कुसुमाकरः" इत्यनेन वसन्तस्य ऋतुषु प्रथमत्वेव भगवद्विभूतित्वमुक्तम्" म०त०ब्रह्मपु०। "चैत्रे मासि जगत् ब्रह्मा ससर्ज्ज प्रथमेऽहनि। शुक्लपक्षे समग्रन्तु तदा सूर्य्योदये सति। प्रवर्त्तयामास तदा कालस्य गणनामपि। ग्रहान्राशीन् ऋतून् मासान् वत्सरान् वत्सराधिपान्"। मासस्तु वत्सराश्च। व्यक्तं चान्द्रत्वमुक्तम ब्रह्मसिद्धान्तेऽपि "चैत्रसितादेरुदयाद्भानोर्दिनमासयुगकल्पाः। सृष्ट्यादौ लङ्कायां समं प्रवृत्ता दिनेऽर्कस्य"। चैत्रसितादेश्चैत्रशुक्लप्रतिपदा-

रभ्येयर्थैः दिनैस्तिथिभिः" म०त०। ५ मासद्वयमात्रे "मुख्यं स्याद्वं माघि मासि अपर्य्याप्तावृत्तं प्रति" स्मृतिः। सुश्रुते ऋतुनिरूपणं तद्गुणलिङ्गादि च दर्शितं यथा "अथात ऋतुचर्य्याध्यायं व्याख्यास्यामः कालोहि नाम भगवान् स्वयम्भूरनादिमध्यनिधनोऽत्र रसव्यापत्सम्पत्ती जीवितमरणे च मनुष्याणामायत्ते स सूक्ष्मामपि कलां न लीयत इति कालः सङ्कलयति कालयति वा भूतानीति कालः। तस्य संवत्सरात्मनोभगवानादित्यो गतिविशेषेणाक्षिनिमेषकाष्ठाकलामुहूर्त्ताहोरात्रपक्षमासर्त्त्वयनसंवत्सरयुगप्रविभागं करोति। तत्र लघ्वक्षरोच्चारणमात्रोऽक्षिनिमेषः। पञ्चदशाक्षिनिमेषाः काष्ठा। त्रिंशत्काष्ठाः कला विंशतिकलोमुहूर्त्तः कलादशभागश्च। त्रिंशन्मुहूर्त्तमहोरात्रम्। पञ्चदशाहोरात्राणि पक्षः। स च द्विविधः शुक्लः कृष्णश्च तौ मासः। तत्र माघादयो द्वादश मासा द्विमासिकमृतुं कृत्वा षडृतवो भवन्ति। ते शिशिरवसन्तग्रीष्मवर्षाशरद्धेमन्ताः। तेषां तपस्तपस्यौ शिशिरः। मधुमाधवौ वसन्तः। शुचिशुक्रौ ग्रीष्मः। नभोनभस्यौ वर्षा। इषोर्जौ शरत्। सहःसहस्यौ हेमन्त इति। त एते शीतोष्णवर्षलक्षणाश्चन्द्रादित्ययोः कालविभागकरत्वादयने द्वे भवतो दक्षिणमुत्तरञ्च। तयोर्दक्षिणं वर्षाशरद्धेमन्तास्तेषु भगवानाप्यायते सोमोऽम्ललवणमधुराश्च रसा बलवन्तो भवन्त्युत्तरोत्तरञ्च सर्वप्राणिनां बलमभिवर्द्धते। उत्तरञ्च शिशिरवसन्तग्रीष्मास्तेषु भगवानाप्यायतेऽर्कस्तिक्तकषायकटुकाश्च रसा बलवन्तोभवन्त्युत्तरोत्तरञ्च सर्वप्राणिनां बलमपहीयते। भवति चात्र। शीतांशुः क्लेदयत्युर्वीं विवस्वान् शोषयत्यपि। तावुभावपि संश्रित्य वायुः पालयति प्रजाः। अथ खल्वयने द्वे युगपत्संवत्सरो भवति। ते तु पञ्च युगमिति संज्ञां लभन्ते। स एष निमेषादि युगपर्य्यन्तः कालश्चक्रवत्परिवर्त्तमानः कालचक्रमुच्यत इत्येके। इह तु वर्षाशरद्धेमन्तवसन्तग्रीष्मप्रावृषः षडृतवो भवन्ति दोषोपचयप्रकोपोपशमनिमित्तम्। ते तु भाद्रपदाद्येन द्विमासिकेन व्याख्याताः। तद्यथा भाद्रपदाश्वयुजौ वर्षाः। कार्त्तिकमार्गशीर्षौ शरत्। पौषमाघौ हेमन्तः। फाल्गुनचैत्रौ वसन्तः। वैशाखज्यैष्ठौ ग्रीष्मः। आषाढश्रावणौ प्रावृडिति। तत्र वर्षास्वोषधयस्तरुणोऽल्पवीर्या आपश्चाप्रसन्नाः क्षितिमलप्रायास्ता उपयुज्यमाना नभसि मेघावतते जलप्रक्लिन्नायां भूमौ क्लिन्नदेहानां प्राणिनां शीतवातविष्टब्धाग्नीनां विदह्यन्ते विदाहात् पित्तसञ्चयमापादयन्ति स सञ्चयः शरदि प्रविरलमेघे वियत्युपशुष्यति पङ्केऽर्ककिरणप्रविलापितः पैत्तिकान् व्याधीन् जनयति। ता एवौषधयः कालपरिणामात्परिणतवीर्य्या बलवत्यो हेमन्ते भवन्त्यापश्च प्रसन्नाः स्निग्धा अत्यर्थं गुर्व्यस्ता उपयुज्यमाना मन्दकिरणत्वाद्भानोः सतुषारपवनोपस्तम्भितदेहानां देहिनामविदग्धाः स्नेहाच्छैत्याद्गौरवादुपलेपाच्च श्लेष्मणः सञ्चयमापादयन्ति स सञ्चयो वसन्तेऽर्करश्मिप्रविलापित ईषत्स्तब्धदेहानां देहिनां श्लैष्मिकान् व्याधीन् जनयति। ता एवौषधयो निदाघे निःसारा रूक्षा अतिमात्रं लघ्व्यो भवन्त्यापश्च ता उपयुज्यमानाः सूर्य्यप्रतापोपशोषितदेहानां देहिनां रौक्ष्याल्लघुत्वाद्वैशद्याच्च वायोःसञ्चयमापादयन्ति स सञ्चयः प्रावृषि चात्यर्थं जलोपक्लिन्नायां भूमौ क्लिन्नदेहानां प्राणिनां शीतवातवर्षेरितो वातिकान् व्याधीन् जनयति। एवमेष दोषाणां सञ्चयप्रकोपहेतुरुक्तः। तत्र वर्षाहेमन्तग्रीष्मेषु सञ्चितानां दोषाणां शरद्वसन्तप्रावृट्सु च प्रकुपितानां निर्हरणं कर्त्तव्यम्। तत्र पैत्तिकानां व्याधीनामुपशमो हेमन्ते, श्लैष्मिकाणां निदाघे, वातिकानां घनात्यये, स्वभावत एव। त एते सञ्चयप्रकोपोपशमा व्याख्याताः। तत्र पूर्वाह्णे वसन्तस्य लिङ्गं मध्याह्ने ग्रीष्मस्य, अपराह्णे प्रावृषः, प्रदोषे वार्षिकम्, शारदमर्द्धरात्रे प्रत्यूषसि हैमन्तमुपलक्षयेत्। एवमहोरात्रमपि वर्षमिव शीतोष्णवर्षलक्षणं दोषोपचयप्रकोपोपशमैर्जानीयात्। तत्राव्यापन्नेष्वृतुष्वव्यापन्ना ओषधयो भवन्त्यापश्च ता उपयुज्यमानाः प्राणायुर्बलवीर्यौजस्कर्यो भवन्ति। तेषां व्यापदोऽदृष्टकारिताः। शीतोष्णवातवर्षाणि खलु विपरीतान्योषधीर्व्यापादयन्त्यपश्च, तासामुपयोगाद्विविधरोगप्रादुर्भावो मरको वा भवेदिति। तत्राव्यापन्नानामोषधीनामपाञ्चोपयोगः कदाचिदव्यापन्नेष्वप्यृतुषु कृत्यापिशाचरक्षःक्रोधाधर्मैरुपध्वस्यन्ते जनपदाः। विषौषधीपुष्पगन्धेन वायुनोपनीतेनाक्रम्यते यो देशस्तत्र दोषप्रकृत्यविशेषेण कासश्वासवमथुप्रतिश्यायशिरोरुग्ज्वरैरुपतप्यन्ते ग्रहनक्षत्रचरितैर्वा गृहदारशयनासनयानवाहनमणिरत्नोपकरणगर्हितलक्षणनिमित्तप्रादुर्भावैर्वा। तत्र स्थानपरित्यागशान्तिकर्मप्रायश्चित्तमङ्गलजपहोमोपहारेज्याञ्जलिनमस्कारतपोनियमदयादानदीक्षाभ्युपगमदेवताब्राह्मणगुरुपरैर्भवितव्यमेवं साधु भवति। ऋतूनामत ऊर्द्ध्वमव्यापन्नानां लक्षणान्युपदेक्ष्यामः। वायुर्वात्युत्तरः शीतो रजोधूमाकुला दिशः। छन्नस्तु-

षारः सविता हिमानद्धा जलाशयाः । दर्पिता ध्वाङ्क्षखड्गाह्वमहिषोरभ्रकुञ्जराः । लोध्रप्रियङ्गुपुन्नागाः पुष्पिता हिमसाह्वये । शिशिरे शीतमधिकं वातवृष्ट्याकुला दिशः । शेषं हेमन्तवत्सर्वं विज्ञेयं लक्षणं बुधैः । दिशो वसन्ते विमलाः काननैरुपशोभिताः । किंशुकाम्भोजवकुलचूताशोकादिपुष्पितैः । कोकिलाः षट्पदगणैरुपगीता मनोहराः । दक्षिणानिलसंवीताः सुमुखाः पल्लवोज्ज्वलाः । ग्रीष्मे तीक्ष्णांशुरादित्यो मारुतो नैरृतोऽसुखः । भूस्तप्ता सरितस्तन्व्यो दिशः प्रज्वलिता इव । भ्रान्तचक्राह्वयुगलाः पयःपानाकुला मृगाः । ध्वस्तवीरुत्तृणलताविपर्णीकृतपादपाः । प्रावृष्यम्बरमानद्धं पश्चिमानिलकर्षितैः । अम्बुदैर्विद्युदुद्योतप्रस्रुतैस्तुमुलस्वनैः । कोमलश्यामशस्याढ्या शक्रगोपोज्ज्वला मही । कदम्बनीपकुटजसर्जकेतकिभूषिता । तत्र वर्षासु नद्योऽम्भःपूरोद्भग्नतटद्रुमाः । वाप्यः प्रोत्फुल्लकुमुदनीलोत्पलविराजिताः । भूरव्यक्तस्थलश्वभ्रा बहुशस्योपशोभिता । नातिगर्जत्स्रवन्मेघनिरुद्धार्कग्रहं नभः । बभ्रुरुष्णः शरद्यर्कः श्वेताभ्रविमलं नभः । तथा सरांस्यम्बुरुहैर्भान्ति हंसांसघट्टितैः । पङ्कशुष्कद्रुमाकीर्णा निम्नोन्नतसमेषु भूः । बाणसप्ताह्वबन्धूककाशासनविराजिता । स्वगुणैरतियुक्तेषु विपरीतेषु वा पुनः । विषमेष्वपि वा दोषाः कुप्यन्त्यृतुषु देहिनाम् । हरेद्वसन्ते श्लेष्माणं पित्तं शरदि निर्हरेत् । वर्षासु शमयेद्वायुं प्राग्विकारसमुच्छ्रयात्" ऋतुचर्य्याध्यायः । भा० त० ऋतुगुणादि यथा "मार्गादिसंख्यैर्मासाद्यैः क्रमात् षडृतवः" स्मृताः । हेमन्ते कुपिताद्वायोः स्वादम्ललवणान् रसान् । गोधूमपिष्टमांसेक्षुक्षीरोत्थविकृतिर्भजेत् । नवमन्नं रसान् तैलं शौचे तप्तोदकं नरः । शय्यार्ककिरणान् स्वेदं पादत्राणञ्च सर्वदा । उष्णस्वभावैर्लघुभिः प्रावृतः शयनं भजेत् । अयमेव विधिः कार्य्यः शिशिरेऽपि विशेषतः । वसन्ते कुपितः श्लेष्मा ह्यग्निमान्द्यं करोत्यतः । तीक्ष्णं वमननस्यादि कवलग्रहमञ्जनम् । व्यायामोद्वर्त्तनं धूमं शौचे तप्तोदकं भजेत् । पुराणयवगोधूमक्षौद्रजाङ्गलमांसभुक् । गुरुष्णस्निग्धमधुरं दिवा स्वप्नञ्च वर्जयेत् । स्वादु शीतं द्रवं स्निग्धमनुपानं सशर्करम् । घृतं पयः सशाल्यन्नं भजन् ग्रीष्मे न सीदति । मध्याह्ने शीतले हर्म्यात् निशि वातहिमान्विते । लवणाम्लकटूष्णानि व्यायामञ्चात्र वर्जयेत् । वर्षास्वग्निबले क्षीणे कुप्यन्ति पवनादयः । अग्नेः संवर्द्धकं द्रव्यं जीर्णधान्यं रसान् लघु । जाङ्गलं पिशितं मुद्गान् दिव्यं कौपं जलं शुचि । हृद्याम्ललवणं स्नेहं संशुष्कं क्षौद्रमेव च । नदीजलोदमन्थाहःस्वप्नायासातपांस्त्यजेत् । शरदि कुपिते पित्ते विरेकं रक्तमोक्षणम् । स्वादुतिक्तकषायेक्षुशालिमुद्गसरोजलम् । तुषारक्षारसौहित्यदधितैलवसातपान् । क्षाराम्लतीक्ष्णदिवास्वप्नप्राचीवातान् विवर्जयेत् । नित्यं सर्वरसाभ्यासः स्वस्वाधिक्यमृतावृतौ । ऋतूनां शेषसप्ताहे सेवितव्यः परःक्रमः । तच्च नित्यं प्रयुञ्जीत स्वास्थ्यं येन प्रवर्त्तते । अजातानां विकाराणामनुत्पत्तिकरञ्च यत् । व्यायामादपतर्पणादभिभवाद्भङ्गात् क्षयाज्जागरात् वेगानाञ्च विधारणादतिशुचः शैत्यादतित्रासतः । रूक्षक्षोभकषायतिक्तकटुकैरेभिः प्रकोपं व्रजेद्वायुर्वारिधरागमे परिणते चान्नेऽपराह्णेऽपि च । कट्वम्लोष्णविदाहितीक्ष्णलवणक्रोधोपवासातपस्त्रीसम्पर्कतिलातसीदधिसुराशुक्तारनालादिभिः । भुक्ते जीर्य्यति भोजने च शरदि ग्रीष्मे सति प्राणिनाम् मध्याह्ने च तथार्द्धरात्रसमये पित्तप्रकोपं व्रजेत् । गुरुमधुररसातिस्निग्धदुग्धेक्षुभक्ष्यद्रवदधिदिननिद्रापूपसर्पिःप्रपूरैः । तुहिनपतनकाले श्लेष्मणः संप्रकोपः प्रभवति दिवसादौ भुक्तमात्रे वसन्ते" । ६कालमात्रे ऋतुधातुशब्दे उदा० । ७तदभिमानिदेवे पु० । ऋतव्यशब्दे उदा० । ८विष्णौ पु० । "ऋतुः सुदर्शनः कालः" विष्णुस० । "कालात्मना ऋतुशब्देन लक्ष्यते इति ऋतुः" भा० । "प्रधानपुरुषक्षोभकं यत्कालाख्यं रूपं तदृतुशब्देन लक्ष्यते" आनन्दगि० । ऋतुरस्य प्राप्तः अण् । आर्त्तव प्राप्तर्त्तुके त्रि० स्त्रियां ङीप् । छन्दसि घस् मिस्याच्च गुणः । ऋत्विय तदर्थे त्रि० । ऋतुर्देवताऽस्य यत् । ऋतव्य ऋतुदेवताके इष्टकादौ ।

ऋतुकाल पु० वसन्तरूपवत् कर्म्म० राजशिरोवत् ६त० वा । स्त्रीणां पुष्पदर्शनयोग्ये षोड़शरात्र्यात्मके काले । "ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोडश स्मृताः" मनुः । "ऋतुकालाभिगामी स्यात्" मनुः । पर्व्वादिवर्ज्जं तत्काले च स्त्रीगमनं नियम्यते । तत्र नियमस्वरूपनिर्वाहककारणादिप्रदर्शनेन ऋत्वभिगमस्य यथानियमविधित्वं तथा मा० त० न्यायवाक्येनोक्तम् यथा "स्वेच्छया क्रियमाणे तु यत्नावश्यं क्रिया क्वचित् । नोद्यते नियमस्तत्र ऋतावभिगमो यथा" मीमांसकवाक्यम् । ऋत्वभिगमनस्य परिसंख्यापरत्वनिराकरणेन नियमपरत्वं समर्थितं मिता० यथा ।

"तस्मिन् युग्मासु संविशेदिति" । "किमयं विधिर्नियमः परिसंख्या वा । "विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति । तत्र चान्यत्र च प्राप्तौ परिसंख्या निगद्यते" । उच्यते । न तावद्विधिः, प्राप्तार्थत्वात् । नापि परिसंख्या, दोषत्रयसमासक्तेः । अतो नियमम्प्रपेदिरे न्यायविदः । कः पुनरेषां भेदः । उच्यते । अत्यन्ताप्राप्तप्रापणं विधिः । यथा अग्निहोत्रं जुहुयात् "अष्टकाः कर्त्तव्याः" इति । पक्षे प्राप्तस्याप्राप्तपक्षान्तरप्रापणं नियमः । यथा "समे यजेतेति" "दर्शपूर्णमासाभ्यां यजेतेति" यागः कर्त्तव्यतया विहितः स च देशमन्तरेण कर्त्तुमशक्य इत्यर्थात् देशः प्राप्तः । स च समो विषमश्चेति द्विविधः । यदा यजमानः समे यियक्षते तदा "समे यजेतेति" वचनमुदास्ते स्वार्थस्य प्राप्तार्थत्वात् । यदा तु विषमे देशे यियक्षते तदा समे यजेतेति" स्वार्थं विधत्ते स्वार्थस्य तदानीमप्राप्तत्वात् । विषमदेशनिवृत्तिस्त्वार्थिकी नोदितदेशेनैव यागनिष्पत्तेः । अनोदितदेशोपादानेन यथाशास्त्रं यागोऽननुष्ठितः स्यादिति । तथा "प्राङ्मुखोऽन्नानि भुञ्जीतेति" । इदमपि स्मार्त्तमुदाहरणं पूर्व्वेण व्याख्यातम् । एकस्यानेकत्र प्राप्तस्यान्यतो निवृत्त्यर्थमेकत्र पुनर्व्वचनं परिसंख्या । तद्यथा । "इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते" इत्ययं मन्त्रः स्वसामर्थ्यादश्वाभिधान्या गर्द्दभाभिधान्याश्च रशनाया ग्रहणे विनियुक्तः । पुनरश्वाभिधानीमादत्त इति वचनेनाश्वाभिधान्यां विनियुज्यमानो गर्द्दभाभिधान्या विनिवर्त्तते । तथा "पञ्च पञ्चनखा भक्ष्याः" इत्यत्र यदृच्छया शशादिषु श्वादिषु च भक्षणं प्राप्तम् । पुनः शशादिषु श्रूयमाणं श्वादिभ्यो निवर्त्तत इति । किं पुनरत्र युक्तं परिसंख्येत्याह । तथाहि कृतदारसंग्रहस्य स्वेच्छयैव ऋतौ गमनं प्राप्तमिति न विधेरयं विषयः । नापि नियमस्य, गृह्यस्मृतिविरोधात् । एवं हि स्मरन्ति गृह्यकाराः "दारसंग्रहानन्तरं त्रिरात्रं द्वादशरात्रं संवत्सरं वा ब्रह्मचारी स्यादिति" । तत्र द्वादशरात्रात् संवत्सरात् वा पूर्व्वमेवर्त्तुसम्भवे ऋतौ गच्छेदेवेति नियमात् ब्रह्मचर्य्यस्मरणं बाध्येत । अपि च प्राप्ते भावार्थे वचनं विशेषणपरं युक्तम् । प्राप्तश्चर्त्तौ भार्य्यागमनमिच्छयैवातो यदि गच्छेदृतावेवेति वचनव्यक्तिर्युक्ता । किञ्च नैयमिकात् पुत्रोत्पत्तिविधेरेवर्त्तौ नित्यं गमनं प्राप्तमेवेति ऋतौ गच्छेदेवेति नियमोऽनर्थकः स्यात् । नियमे चादृष्टं कल्पनीयम् । किञ्च ऋतौ गन्तव्यमेवेति नियमेऽसन्निहितस्य व्याध्यादिनाऽसमर्थस्यानिच्छोश्चाशक्योऽर्थ उपदिष्टः स्यात् । विध्यनुवादविरोधश्च नियमे । तथा हि एकः शब्दः सकृदुच्चरितस्तमेवार्थं पक्षेऽनुवदति पक्षे विधत्ते चेति । तस्मादृतावेव गच्छेन्नान्यत्र इति परिसंख्यैव युक्ता । तदिदमभारुचिविश्वरूपादयो नानुमन्यन्ते । यतो नियम एव युक्तः पक्षे स्वार्थविधिसम्भवात् । अगमने दोषश्रवणाच्च यथाह पराशरः "ऋतुस्नातान्तु यो भार्य्यां सन्निधौ नोपगच्छति । घोरायां भ्रूणहत्यायां युज्यते नात्र संशय इति" न च विध्यनुवादविरोधोऽनुवादाभावात् विध्यर्थत्वाद्वचनस्य । तत्र हि विध्यनुवादविरोधो यत्र विधेयावधितया तदेवानुवदितव्यमप्राप्ततयान्योद्देशेन विधातव्यञ्चेति । यथा वाजपेयाधिकरणे पूर्व्वपक्षे "वाजपेयेन स्वाराज्यकामो यजेतेति" वाजपेयलक्षणगुणविधानावधित्वेन यागोऽनुवदितव्यः स एव स्वाराज्यलक्षणफलोद्देशेन विधातव्यश्चेति । न चानुवादेनेह कृत्यमस्ति । यत्तु नियमेऽदृष्टं कल्पनीयमित्युक्तं तत्परिसंख्यायामपि समानम् । अनृतौ गच्छतो दोषकल्पनात् । यत्तु नैयमिकपुत्रोत्पादनविध्याक्षेपेणैव ऋतौ नित्यगमनप्राप्तेर्न नियम इति । तदसत् स एवायं नैयमिकः पुत्रोत्पादनविधिः । स्यान्मतम् "एवं गच्छन् स्त्रियं क्षामां लक्षण्यं पुत्रं जनयेदिति" स्वाभिगमनातिरिक्तः पुत्रोत्पादनविधिरिति । तन्न गमनकरणिकाया भावनाया एव पुत्रोत्पत्तिकर्म्मता प्रतीयते । "एवं गच्छन् लक्षण्यं पुत्रं जनयेदित्यनेन" यथाग्निहोत्रं जुह्वत् स्वर्गं भावयेदिति । न चासन्निहितादेरशक्यार्थविधिप्रसङ्गः सन्निहितशक्तयोरेवोपदेशात् "ऋतुस्नातां तु यो भार्य्यां सन्निधौ नोपगच्छतीति" "यः स्वदारानृतुस्नातान् स्वस्थः सन्नोपगच्छतीति" विशेषोपादानात् । अनिच्छानिवृत्तिस्तु नियमविधानादेव । न च विशेषणपरता पक्षे भावार्थविधिसम्भवात् । नापि गृह्यस्मृतिविरोधः संवत्सरात् पूर्व्वमेवर्त्तुदर्शने संविशतो न ब्रह्मचर्य्यस्खलनदोषः । यथा श्राद्धादिषु, तस्मात् स्वार्थहानिपरार्थकल्पनप्राप्तबाधलक्षणदोषत्रयवती परिसंख्या न युक्ता । "पञ्च पञ्चनखा भक्ष्याः" इत्यत्र यद्यपि शशादिषु भक्षणस्य पक्षे प्राप्ते नियमः, शशादिषु श्वादिषु च प्राप्ते परिसंख्येति उभयसम्भवस्तथापि नियमपक्षे शशाद्यभक्षणे दोषप्रसङ्गः । श्वादिभक्षणे चादोषप्रसङ्गेन प्रायश्चित्तस्मृतिविरोध इति परिसंख्यैवाश्रिता । एतेन "साय

प्रावर्हिं जातीनामयनं श्रुतिनोदितम्" इत्यत्रापि नियमो व्याख्यातः "नान्तरा भोजनं कुर्यादिति" च पुनरुक्तं स्यात् परिसंख्यायाम् । एवं च 'नियमे सकलस्वकृत्ताष्टता विति" दोषा लभ्यते "निमित्तावृत्तौ नैमित्तिकमप्यावर्त्तेत" इति न्यायात् । "यदा कामी भवेदित्यपि" नियम एवानृतावपि स्त्रीकामनायां सत्यां स्त्रियमभिरमयेदेवेति" । "ऋतावुपेयात् सर्वत्र वा प्रतिषिद्धवर्जम्" इत्येतदपि गौतमीयं वचनद्वयं नियमपरमेव । ऋतावुपेयादेवानृतावपि स्त्रीकामनायां प्रतिषिद्धवर्जमुपेयादेवेत्यलमतिप्रसङ्गेनेति" । "अनृतावृतुकाले च मन्त्रसंस्कारकृत् पतिः । सुखस्य नित्यं दातेह परलोके च योषितः" "महृतो रतिकाम्यया" इति च मनुना अन्यकाले स्त्रीकामनया गमनस्योक्तेः "यथा कामी भवेद्वापि स्त्रीणां वरमनुस्मरन्" या० अन्यकाले स्त्रीगमनोक्तेश्च न परिसंख्यापरत्वम् । तासां स्त्रीणां वरश्च इन्द्रदत्तः । स च मिता० श्रुतौ दर्शितो यथा "ता अब्रुवन् वरं वृणीमहै ऋत्वियात् प्रजां विन्दामहै ऋत्वियो भर्त्तुः काममाविजनितोः सम्भवामेति तस्मादृत्वियाः स्त्रियः प्रजां विन्दते काममाविजनितोः सम्भवन्तीति वरं वृतं ह्यासाम्" इति तासां वरस्तुपवर्णं "भवतीनां कामविहन्ता पातकी स्यादिति" इन्द्रेण तासां वरो दत्तः । वृत्रासुरवधजन्यब्रह्महत्याया भागशः स्त्रीभिर्ग्रहणतोषितेन शक्रेण तासां वरदानम् भारतादौ वर्णितम् ।

ऋतुग्रह पु० ऋतूनां ग्रहः पात्रभेदग्रहणं यत्र । यागभेदे तत्प्रचारपाटी कात्या० ९,१२अ० दर्शिता यथा "उपविष्टेऽच्छावाके" इत्युपक्रम्य । "ऋतुग्रहैश्चरतः" १सू० । "अच्छावाके सदः प्रविश्य स्वस्य धिष्ण्यस्य पश्चादुपविष्टे सत्यध्वर्युप्रतिप्रस्थातारौ ऋतुग्रहैश्चरतः । अत्रेडाभक्षणे पत्नीयजमानाभ्यामृत्विग्भिश्चागते च कृते मार्ज्जनभागपरिहरणाजिनयागप्रणीताविमोकरान्तभागभागावेक्षणं-गमागमनानि कर्त्तव्यानि तत्र ऋतुग्रहप्रचारः । अथ "ऋतुग्रहप्रचारस्य विधिमुपदिशति" कर्कः । "द्रोणकलशादुपयामगृहीतोऽसि मधवे त्वेति द्वादशप्रतिमन्त्रम्" २सू० । "ऋतुग्रहान् गृह्णीतः द्रोणकलशादिति नियमाद्युक्तम् । मन्त्रविभागमाह" कर्कः "अध्वर्योः पूर्वः" ३सू० । पूर्वोमन्त्रः । षण्णां मन्त्रयुग्मानां पूर्वोमन्त्रोऽध्वर्योः स्यात्" कर्कः । "उत्तर उत्तरः प्रतिप्रस्थातुः" ४सू० । "युगपत्प्रथमौ गृह्णीतः" ५सू० । "उत्तमौ च" ६सू० । "व्यत्यासम्" ७सू० "मध्ये न युगपत् प्रचरणं च सर्वेषाम्" ८सू० । "सर्वेषाम् द्वादशानामप्यृतुग्रहाणां प्रचरणं सांगानुष्ठानं चकारात् व्यात्यासं व्यात्यासेनैव पूर्व्वमध्वर्योः ततः प्रतिप्रस्थातुः । पुनरध्वर्य्योः पुनःप्रतिप्रस्थातुरित्येवं सर्वेषामपि । स व्यत्यासः कथं कर्त्तव्य इत्यपेक्षायामाह । "निष्क्रामत्येकः प्रविशतीतरः" ९सू० । "हविर्धानमध्यात् अपरो हविर्धानं प्रविशति" कर्कः । "उत्तरउत्तरः प्रतिप्रस्थाता परकालत्वात्" १०सू० । अत्र ग्रहणे प्रचरणे च देशतः कालतश्च प्रतिप्रस्थाता उत्तरो भवेत् कुतः अपरकालत्वात् प्रतिप्रस्थातृमन्त्राणां पश्चात्कालीनत्वात् परकालत्वादिति केचित् स एवार्थोऽस्मिन्नपि पाठे "उभयतोऽध्वर्युं पात्रेण परिमगृह्णाति" ११सू० । उभयत इति "स वै हविर्धानान्निष्क्रामन्तं हविर्धाने प्रविशन्तं चाध्वर्युं प्रतिप्रस्थाता पात्रेण परिगृह्णाति अव्यवायार्थं पात्रमध्वर्योर्दक्षिणतोहरति स्वयमुत्तरतो यातीत्यर्थः मानवे "हुत्वा गृहीत्वा च प्रतिप्रस्थाता दक्षिणेनाध्वर्युमभिप्रयस्य पात्रं हरति नान्योऽन्यमभि प्रपद्येते येपे पूर्वस्योत्तरमभि परिगृह्णीतः" इति काठके "प्रपद्यमानः प्रतिप्रस्थाता दक्षिणेनाध्वर्योः पात्रं हरेदुत्तर एव सञ्चरेदिति" कर्कः । "सर्वहुताः प्रागुत्तमाभ्याम्" १२सू० । "उत्तमाभ्यामेकादशद्वादशाभ्यां प्राग्ये दश ऋतुग्रहाः ते सर्वहुताः कार्याः सकृदेव सर्वं होतव्यम् अनुवषट्कारोऽपि न भवति" कर्कः । "ऋतुनेति षट् प्रेष्यतः" १३सू० । "आद्येषु षट्सु ऋतुग्रहयागेषु ऋतुना प्रेष्येत्येवं मैत्रावरुणं प्रेष्यतः" कर्कः । "ऋतुभिरिति चतुरः पात्रमुखे विपर्यस्य" १४सू० । "ततः पात्रमुखयोर्विपर्यासं कृत्वा सप्तमाष्टमनवमदशमेष्वृतुग्रहयागेषु ऋतुभिः प्रेष्येत्येवं प्रशास्तारं प्रेष्यतः मानवे "ऋतुना प्रेष्येति षड्भिः प्रचरतो यतो हुतम् । ततः पात्रे गृहीत्वा ऋतुभिः प्रेष्येति चतुर्भिर्यथादितस्तथा गृहीत्वा ऋतुना प्रेष्येति द्वाभ्यामिति" अतश्च षस्रामग्रेण होमः । ततश्चतुर्णां पात्रमूलेन होमोऽग्रं हस्ते गृहीत्वा उत्तमयोः पुनरग्रेणैव ग्रहणमपि पात्रमुखयोर्विपर्यासश्चैव कार्यम्" कर्कः । "सहदुत्तमौ" १५सू० "उत्तमावेकादशद्वादशावृतुग्रहौ सहैव प्रचरतः तेन पात्रयोरग्रेण होमः ऋतुना प्रेष्येति चेत्येतद्वतिना गृह्यते कःपुनर्मन्त्रार्थः ऋतुना इत्येवंरूपां तृतीयैकवचनान्तर्तुशब्दयुक्तां याज्यां प्रेष्येत्यर्थः ऋतुनेत्येतत्पदयुक्तेन प्रैषेण वा एवमृतुभिः प्रेष्येत्यत्रापि" कर्कः । "य·

मानः प्रेषितो होतरेतद्यजेति ब्रूयात्" १६सू०। "द्वादशे ऋतुग्रहे गृहपते! यजेत्येवं प्रशास्ता प्रेषितो यजमानः होतरेतद्यजेति एवं ब्रूयात् ततस्तां यजमानयाज्यां होता ब्रूयात्" कर्कः। "अध्वर्यू च" १७सू० "एकादशे ऋतुग्रहे प्रशास्ता अध्वर्यू यजतमित्येवं प्रेषितावध्वर्यू होतरेतद्यजेति एवं ब्रूयाताम् ततश्च तद्याज्यामपि होतैव ब्रूयात्। शाखान्तरे तु विकल्पेन होतुः प्रेषणं स्वयं वा याज्यापठनमित्येवमुक्तमस्ति। मानवे 'एकादशे प्रैषेऽध्वर्यू यजतमित्युक्ते तयोरन्यतरो मध्यमस्य परिधेः पश्चादुपविश्य ये यजामहेऽश्विनावध्वर्यू आध्वर्यवादृतुना सोमं पिबतां वौषडिति प्रैषेण यजेदथ चेद्दचा। ये यजामहेऽश्विना पिबतं मधु दीद्यग्नी शुचिव्रत ऋतुना यज्ञवाहसा वौषडित्यनवानं यजेति होतरेतद्यजेति वा न प्रेष्यत्युत्तमे प्रैषे यजमानस्य याज्यानि प्रैषो वेति' काठके विशेषः "द्वारे हविर्धानस्योपविश्याध्वर्यू यजतमित्युक्तेऽश्विनावध्वर्यू यजतम् आध्वर्यवादृतुना सोमं पिबतमिति होतारं वा प्रेष्येद्धोतरेतद्यजेति यद्यध्वर्युर्यजेतोन्नेता प्रैषेण चरेदिति" कर्कः। "त्रयोदशं गृह्णीयादित्यनुपयामगृहीतोऽस्यंहसस्पतये त्वेति" १८सू०। शत०ब्रा० ४,३,१,१, द्वादशादिपक्षपक्षे हेतुर्दर्शितो यथा "सर्वेऽच्छावाके। ऋतुपात्रैश्चरति तद्यत् सर्वेऽच्छावाक ऋतुपात्रैश्चरति मिथुनं वा अच्छावाक ऐन्द्राग्नो ह्यच्छावाको द्वौ हीन्द्राग्नी द्वन्द्वं हि मिथुनं प्रजननं स एतस्मान्मिथुनात् प्रजननादृतून् संवत्सरं प्रजनयति यद्वेव सर्वेऽच्छावाके ऋतुपात्रैश्चरति सर्वं वा ऋतवः संवत्सरः सर्वमेवैतत् प्रजनयति तस्मात् सर्वेऽच्छावाक ऋतुपात्रैश्चरति तान्वै द्वादश गृह्णीयात्। द्वादश वै मासाः संवत्सरस्य तस्माद्द्वादश मासा इति द्वादश त्वेव गृह्णीयाद्देवैव सम्पत्। द्रोणकलशाद् गृह्णीयात् प्रजापतिर्वै द्रोणकलशः स एतस्मात् प्रजापतेर्ऋतून् संवत्सरं प्रजनयति उभयतोमुखाभ्यां पात्राभ्यां गृह्णाति। कुतस्तयोरन्तोऽयं उभयतोमुखे तस्मादयमनन्तः संवत्सरः परिप्लवते तं गृहीत्वा न सादयति तस्मादयमसन्नः संवत्सरः नानुवाक्यमन्वाह। द्रवति वाऽनुवाक्यया गतोह्येवायमृतुर्यदि दिवा यदि नक्तं नानुवषट्करोति नेदृतून्प्रवृणजा इति सहैव प्रथमौ ग्रहौ गृह्णीतः सहोत्तमावित्यमेवैतत् सर्वं संवत्सरेण परिगृहीतं तदिदं सर्वं संवत्सरेण परिगृहीतम्। निरेवान्यतरः क्रामति प्रान्यतरः पद्यते तस्मादिमेऽन्वञ्चौ मासा यन्त्यथ यदुभौ वा सह निष्क्रामेतामुभौ वा सह प्रपद्येयातां पृथगु हैवेमे मासा ईयुस्तस्मान्निरेवान्यतरः क्रामति प्रान्यतरः पद्यते। तौ वा ऋतुनेति वषट् प्रचरतः। तद्देवा अहरसृजन्तर्तुभिरिति चतुस्तद्रात्रिमसृजन्त स यद्धैतावद्देवाभविष्यद्रात्रिर्हैवाभविष्यन्न व्यवत्स्यत् तौ वा ऋतुनेत्युपरिष्टादुद्विचरतः। तद्देवाः परस्तादहरदधुस्तस्मादिदमद्याहरथ श्वोऽहर्भविता। ऋतुनेति वै देवा मनुष्यानसृजन्तर्तुभिरिति पशूंस्तद्यत् तन्मध्ये येन पशूनसृजन्त तस्मादिमे पशव उभयतः परिगृहीता वशमुपेता मनुष्याणाम्। तौ वा ऋतुनेति वषट्प्रचर्य इतरथा पात्रे विपर्यस्येते ऋतुभिरिति चतुश्चरित्वेतरथा पात्रे विपर्यस्येते अन्यतरत एव तद्देवा अहरसृजन्तान्यतरतो रात्रिमन्यतरत एव तद्देवा मनुष्यानसृजन्तान्यतरतः पशून्। अथातो गृह्णात्येव उपयामगृहीतोऽसि मधवे त्वेत्येवाध्वर्युर्गृह्णात्युपयामगृहीतोऽसि माधवाय त्वेति प्रतिप्रस्थातैतावेव वासन्तिकौ स यद्वसन्त ओषधयो जायन्ते वनस्पतयः पच्यन्ते तेनो हैतौ मधुश्च माधवश्च। उपयामगृहीतोऽसि शुक्राय त्वेत्येवाध्वर्युर्गृह्णात्युपयामगृहीतोऽसि शुचये त्वेति प्रतिप्रस्थातैतावेव ग्रैष्मौ स यदेतयोर्बलिष्ठं तपति तेन हैतौ शुक्रश्च शुचिश्च। उपयामगृहीतोऽसि नभसे त्वेत्येवाध्वर्युर्गृह्णात्युपयामगृहीतोऽसि नभस्याय त्वेति प्रतिप्रस्थातैतावेव वार्षिकावमुतो वै दिवो वर्षति तेनो हैतौ नभश्च नभस्यश्च। उपयामगृहीतोऽसि इषे त्वेत्येवाध्वर्युर्गृह्णात्युपयामगृहीतोऽस्यूर्जे त्वेति प्रतिप्रस्थातैतावेव शारदौ स यच्छरद्यूर्क्स ओषधयः पच्यन्ते तेनो हैताविषश्चोर्जश्च। उपयामगृहीतोऽसि सहसे त्वेत्येवाध्वर्युर्गृह्णात्युपयामगृहीतोऽसि सहस्याय त्वेति प्रतिप्रस्थातैतावेव हैमन्तिकौ स यद्धेमन्त इमाः प्रजाः सहसेव स्वं वशमुपनयते तेनो हैतौ सहश्च सहस्यश्च। उपयामगृहीतोऽसि तपसे त्वेत्येवाध्वर्युर्गृह्णात्युपयामगृहीतोऽसि तपस्याय त्वेति प्रतिप्रस्थातैतावेव शैशिरौ स यदेतयोर्बलिष्ठं श्यायति तेनो हैतौ तपश्च तपस्यश्च। उपयामगृहीतोऽसि अंहसस्पतये त्वेति त्रयोदशं ग्रहं गृह्णाति यदि त्रयोदशं गृह्णीयादथ प्रतिप्रस्थाताध्वर्योः पात्रे संस्रवमवनयत्यध्वर्युर्वा प्रतिप्रस्थातुः पात्रे संस्रवमवनयत्याहरति भक्षम्। अथ प्रतिप्रस्थाता भक्षितेन पात्रेण ऐन्द्राग्नं ग्रहं गृह्णाति तद्यदभक्षितेन पात्रे-

यैन्द्राग्नं ग्रहं गृह्णाति न वा ऋतुग्रहाणामनु वषट्कुर्वन्त्येतेभ्यो वा ऐन्द्राग्नं ग्रहं ग्रहीष्यन् भवति तदाश्चैन्द्राग्नेनैवानुवषट्कृता भवन्ति यद्वेवैन्द्राग्नं ग्रहं गृह्णाति सर्वं वा इदं प्राजीजनद्य ऋतुग्रहानग्रहीत्स इदं सर्वं प्रजनय्येदमेवैतत् सर्वं प्राणोदानयोः प्रतिष्ठापयति तदिदं सर्वं प्राणोदानयोः प्रतिष्ठितमिन्द्राग्नी हि प्राणोदानाविमे हि द्यावापृथिवी प्राणोदानावनयोर्हीदं सर्वं प्रतिष्ठितम्। यद्वेवैन्द्राग्नं ग्रहं गृह्णाति। सर्वं वा इदं प्राजीजनद्य ऋतुग्रहानग्रहीत्स इदं सर्वं प्रजनय्यास्मिन्नेवैतत् सर्वस्मिन् प्राणोदानौ दधाति ताविमावस्मिन् सर्वस्मिन् प्राणोदानौ हितौ। अथातो गृह्णात्येव। इन्द्राग्नी आगतं सुतं गीर्भिर्नभो वरेण्यम्। अस्य पातं धियेषिता। उपयामगृहीतोऽसीन्द्राग्निभ्यां त्वैष ते योनिरिन्द्राग्निभ्यां त्वेति सादयतीन्द्राग्निभ्यां ह्येनं गृह्णाति। अथ वैश्वदेवग्रहं गृह्णाति। सर्वं वा इदं प्राजीजनद्य ऋतुग्रहानग्रहीत्स यद्वै तावदेवाभविष्यन्न प्राजनिष्यन्त। अथ यद्वैश्वदेवं ग्रहं गृह्णाति। इदमेवैतत् सर्वमिमाः प्रजा यथायथं व्यवसृजति तस्मादिमाः प्रजाः पुनरभ्यावर्त्तं प्रजायन्ते शुक्रपात्रेण गृह्णात्येष वै शुक्रो य एष तपति तस्य ये रश्मयस्ते विश्वे देवास्तस्माच्छुक्रपात्रेण गृह्णाति। अथातोगृह्णात्येव ओमासश्चर्षणीधृतो विश्वे देवास आगत। दाश्वांसो दाशुषः सुतम् उपयामगृहीतोऽसि विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य इति सादयति विश्वेभ्यो ह्येनं देवेभ्यो गृह्णाति"।

ऋतुथा अव्य० वीप्सार्थे था० थाल्। काले काले इत्याद्यर्थे "ऋतवस्त ऋतुथा पर्व शमितारो विशासतु" यजु० २३,४०, "ऋतुथा ऋतौ ऋतौ काले काले" वेददी०। "या ते गात्राणामृतुथा कृणोमि" ऋ० १,१६२,१९।

ऋतुपति पु० ६त०। वसन्तकाले तस्य सर्वर्त्तुषु प्रथमत्वात् "ऋतूनां कुसुमाकरः" गीतायां भगवद्विभूतित्वेनोक्तेश्च तथात्वम्। ऋतुनाथादयोऽप्यत्र। [मित्वर्त्तुपर्य्ययें" मनुः।

ऋतुपर्य्याय पु० ६त०। ऋतूनां परिपाट्या गमने। "स्वय-

ऋतुपा पु० ऋतून् पाति निर्वाहकतया, ऋतुषु सोमं पिबति ऋतुभिर्मरुद्भिः सह सोमं पिबतीति वा पा-पालने पा-पाने वा क्विप्। वर्षपालके तथाभूतसोमपातरि च १इन्द्रे "उत ऋतुभिर्ऋतुपाः पाहि सोममिन्द्र!" ऋ० २,३७,२ २ऋतुयाजदेवे च। "सजोषा इन्द्र! वरुणेन सोमम् सजोषाः पाहि गिर्वणो मरुद्भिः। अग्रेपाभिर्ऋतुपाभिः सजोषाः" ऋ० ४,३४,७। "ऋतुपाभिः ऋतुयाजदेवैः" भा०

ऋतुपात्र न० ऋतूनुद्दिश्य पात्रम्। आश्वत्थे श्रीपर्णीवृक्षभवे वा यज्ञिये ग्रहरूपे पात्रभेदे तदाकारश्च "ऋतुपात्रे पूर्व्वे स्रुक्पुष्करावृतौ उभयतोमुखे काश्मर्य्यमये आश्वत्थे वा" कात्या० ९,२,१२ उक्तः। "पूर्वे आप्ययणस्थाल्याः पूर्वौ द्वे ऋतुग्रहपात्रे योजनीये स्रुक्पुष्करस्येवाकारोययोस्ते अपि मूले च मुखं ययोस्ते द्विमुखे इत्यर्थः। काश्मर्य्यमये श्रीपर्णीवृक्षविकारौ आश्वत्थे वा पिप्पलवृक्षकाष्ठनिर्म्मिते वा" कर्कः। "तद्यन्नरत्नीयान् गृह्णातीत्युपक्रम्य। "तस्मादाश्वत्थे ऋतुपात्रे स्यातां काश्मर्य्यमये त्वेव भवतः" शत० ४,३,३,४।

ऋतुप्राप्त त्रि० ऋतुस्तद्योग्यः पुष्पादिः प्राप्तोऽनेन निष्ठान्तस्य परनि०। फलेग्रहौ अवन्ध्यवृक्षे।

ऋतुबल पु० ऋतौ ऋतुभेदे बलं यस्य। शिशिरादिषु बलयुक्तरव्यादिग्रहेषु ते च यथा। "शशिशुक्रकुजेन्दुसुतगुरवः शिशिरादिषु। भवन्ति कालबलिनो योग्मे सूर्यस्तथैव च" ज्यो०।

ऋतुमत् त्रि० ऋतुस्तत्कालयोग्यप्रशस्तपुष्पफलादिर्भोग्यतयाऽस्त्यस्य ऋतु+प्राशस्त्ये मतुप्। १प्रशस्तर्त्तुफलपुष्पभोक्तरि। "कल्पन्ते हास्मा ऋतव ऋतुमान् भवति यएवं विद्वानृतुषु पञ्चविधं सामोपास्ते" छा० उ०। "आर्त्तवैर्भोगैश्च सम्पन्नो भवति" भा०। ऋतुकाले २यजनीयपितृभेदे पु०। "अग्निष्वात्तानृतुमतो हवामहे" यजु० १९,६१। ऋतुः स्त्रीरजःकालः प्राप्तत्वेनास्त्यस्याः मतुप् स्त्रियां ङीप्। २आर्त्तववत्यां स्त्रीधर्म्मिण्यां स्त्रियाम् "काममामरणात् तिष्ठेत् गृहे कन्यर्त्तुमत्यपि" मनुः। "तत्र प्रथमदिवसे ऋतुमत्यां मैथुनगमनमनायुष्यं पुंसां भवति" सुश्रु०। "उपाध्यायानी ते ऋतुमती उपाध्यायश्च प्रोषितोऽस्या यथायमृतुर्वन्ध्यो न भवति तथा क्रियताम्" भा० आ० ३अ०। ऋतुमत्या धर्म्मश्च आर्त्तवशब्दे उक्तः। विशेषस्त्वयम् "स्त्रीधर्म्मिणी त्रिरात्रन्तु स्वं मुखं नैव दर्शयेत्। स्ववाक्यं श्रावयेच्चापि यावत् स्नाता न शुद्धितः। सुस्नाता भर्त्तृवदनमीक्षतेऽन्यस्य न कस्यचित्। अथ वा मनसि ध्यात्वा पतिं भानुं विलोकयेत्" काशीख०।

ऋतुमयी स्त्री० ऋतुप्रचुरा चितिः ऋतु+प्राचुर्य्ये मयट् ङीप्। ऋतुप्रधाने चितिभेदे तदुपधानप्रकारः शत० ब्रा० ८,१,२,१० उक्तः यथा "अथ उत्तरतः ग्रीष्मस्तासां प्रथमा, वर्षा द्वितीया, हेमन्तस्तृतीया, हेमन्तश्चतुर्थी, वर्षाः पञ्चमी

ग्रीष्मः षष्ठी, ग्रीष्मः सप्तमी, वर्षा अष्टमी, हेमन्तो नवमी, यजमान एवात्र दशमी सएव यजमान एतस्यां विराज्यधिच्छ्रुतः प्रतिष्ठितः ऋतुमय्यामर्व्वाचीश्च पराचीश्चोपदधाति"

ऋतुमुख न० ६त०। गौणचान्द्रमासप्रथमदिने प्रतिपद्रूपे तिथिभेदे। "चातुर्मास्येषु चर्तुमुखश्रुतेः" कात्या० १, २,१२। "चातुर्मास्येषु च न याथाकाम्यम् कुतः ऋतुमुखश्रुतेः 'ऋतुमुख ऋतुमुखे चातुर्मास्यैर्यजेतेति" श्रौतश्रवणात् ऋतोर्मुखं प्रथमदिनं प्रतिपत् तत्रेत्यर्थः। अत एव वैश्वदेववरुणप्रघासादीनि चातुर्मास्यपर्वाणि प्रतिपद्येव क्रियन्ते न पौर्णमास्यामित्यवसीयते यतः प्रतिपदेव चर्तुमुखं न पौर्णमासीति तथा च श्रूयते" "एषा ह संवत्सरस्य प्रथमा रात्रिर्यत् फाल्गुनी पौर्णमासी योत्तरैषोत्तमा या पूर्वा मुखतएव तत् संवत्सरमारभते" शत०ब्रा०६,२,१,१७, कर्कः। "द्वे ह वै पौर्णमास्यौ द्वे अमावस्ये" इति श्रुतेः योत्तरा पौर्णमासी कृष्णप्रतिपदित्यर्थः। तथा च पौर्णमास्यां दीक्षा प्रतिपदि पौर्णमास्येष्टिसमापनम् ऋतुसन्धिशब्दे विवृतिः। एतश्च पौर्णमासेष्टिविषयम् अमावास्येष्टौ दर्शएव दीक्षा शत० ब्रा० ६,२,२,२०,२६, "अमावास्यायां दीक्षते" इत्युपक्रम्य "या प्रथमामावास्या तस्यां दीक्षित एतद्वै संवत्सरस्य प्रथमान्यहानि तान्यस्य तदारभते" २०इत्युक्तेः।

ऋतुराज पु० ऋतूनां राजा ६त० टच् समा०। वसन्ते ऋतौ

ऋतुलिङ्ग न० ६त०। वसन्तादिषु जायमाने चूतमञ्जर्य्यादिरूपे तल्लिङ्गे "यथर्त्तुलिङ्गान्यृतवः स्वयमेवर्त्तुपर्य्यये" मनुः। तल्लिङ्गानि च ऋतुशब्दे दर्शितश्रुतवाक्यादवगम्यानि।

ऋतुवृत्ति पु० ऋतूनां वृत्तिः पर्य्यायेणावर्त्तना यत्र। १वत्सरे लिङ्का०। ६त०। २ऋतुधर्म्मे स्त्री।

ऋतुशस् अव्य० कारकार्थे ऋतु+शस्। ऋतौ ऋतौ इत्याद्यर्थे "यद्वविष्यमृतुशोदेवयानम्" ऋ० १,१६२,४। "ऋतुशः ऋतावृतौ काले काले" भा० "कति होतार ऋतुशो यजन्ति" यजु० २३,५७। ऋतुशः काले काले" वेददी०।

ऋतुष्ठा(स्था) त्रि० ऋतौ तिष्ठति स्था—क्विप् वेदे षत्वं लोके तु न। वसन्तादिषु स्थायिनि। "ऋतवः स्थ ऋतावृधः ऋतुष्ठाः स्थ ऋतावृधः" यजु० १७,३,।

ऋतुसंहार पु० ऋतूनां संहारः समूहीवर्णनत्वेन यत्र। कालिदासप्रणीते काव्यभेदे।

ऋतुसन्धि पु० ऋत्वोः सन्धिः। दर्शान्तमुख्यचान्द्रमासपक्षे १दर्शे, पौर्णमासान्तगौणचान्द्रमासपक्षे २पौर्णमास्याम्। ऋतोर्मासघटितत्वात् मासस्य च पर्व्वसन्धियुक्तत्वेन पर्वसन्धिरेव ऋतुसन्धिः अतः प्रसङ्गात् पर्व्वसन्धिर्निरूप्यते स च कालमा० उक्तः यथा "कुहूव्यतिरिक्तानां लघ्वक्षरोच्चारणपरिमितः कालः सन्धिरित्युच्यते कुहूस्त्वक्षरद्वयपरिमितः कालः तदेतदुक्तं भगवतीपुराणे "अनुमत्याश्च राकायाः सिनीवाल्याः कुहूं विना। एतासां द्विलवः कालः कुहूमात्रा कुहूः स्मृतेति" तत्र लवस्वरूपं स्मृत्यन्तरे दर्शितम् "लघ्वक्षरचतुर्भागस्त्रुटिरित्यभिधीयते। त्रुटिद्वयं लवः प्रोक्तो निमेषस्तु लवद्वयमिति" एवं च सति त्रुटिशब्दाभिधेयानां भागानां चतुष्टयं लवद्वयरूपं लघ्वक्षरसमं भवति तस्मिन् लघ्वक्षरपरिमिते काले एकः पर्वणोभागः, द्वितीयः प्रतिपदः, तदुभयं मिलित्वा सन्धिर्भवति कुहूप्रतिपदोः सन्धिस्तु पूर्वस्मात् द्विगुणः अक्षरद्वयपरिमितत्वात् मत्स्य ब्रह्माण्डपुराणयोः "राका चानुमतिश्चैव सिनीवाली कुहूस्तथा। एतासां द्विलवः कालः कुहूमात्रा कुहूस्तथा। कुहूरितिकोकिलेनोक्ते यावान् कालः समाप्यते। तत्कालसंमिता चैषा अमावस्या कुहूः स्मृता। इत्येष पर्वसन्धीनां कालोयोद्विविधः स्मृत" इति।

एवं सन्धौ निरूपिते सति योऽयं प्रक्रान्तोविचारस्तत्र सन्धिरेवेष्टिकाल इति तावत् प्राप्तम् "सन्धौ यजेतेति" श्रुतेः नैवं सूक्ष्मत्वात्तत्र यागानुष्ठानानुपपत्तेः का तर्हि श्रुतेर्गतिः पार्श्वद्वयलक्षणेति ब्रूमः यथा गङ्गायां घोष इत्यत्र गङ्गाशब्दः प्रवाहेऽनुपपन्नस्तत्समीपं तीरं लक्षयति तथा सन्धिशब्दोऽपि पार्श्वद्वयं लक्षयतु। अतएव श्रुत्यन्तरं "सन्धिमभितो यजेतेति" बौधायनोऽपि "सूक्ष्मत्वात् सन्धिकालस्य सन्धेर्विषय उच्यते। सामीप्यं विषयं प्राहुः पूर्वेणाप्यपरेण चेति" अत्र पूर्वापरशब्दाभ्यां सन्धेः प्राचीनं प्रतिपद्दिनं चाभिधीयते। तत्र पूर्व्वस्मिन्पर्वदिने प्रयोगप्रारम्भः नोत्तरस्मिन्, प्रतिपद्दिने यागसमाप्तिः अन्वाधानमिध्माबर्हिःसम्पादनमग्निपरिग्रहणमुपस्तरणं चेत्येवमादि प्रयोगप्रारम्भः स पूर्वेद्युरनुष्ठेयः तथा च तैत्तिरीय ब्राह्मणे श्रूयते "पूर्व्वेद्युरिध्माबर्हिः करोति यज्ञमेवारम्य श्वोभूतेयजते" शतपथब्राह्मणेऽपि "पूर्वेद्युरग्निं गृह्णाति उत्तरमहर्यजतीति" तत्र ग्रहणं नामाध्वर्युणा आहवनीयगार्हपत्यदक्षिणाग्निषु "ममाग्ने वर्च्च" इत्यादिभिर्मन्त्रैः समिदाधानलक्षणे अन्वाधाने क्रियमाणे पार्श्ववर्त्तिना यजमानेनाग्निं गृह्णामीत्यादीनां मन्त्राणां पठनं तदिदं पर्वदिने क्रियते। प्रतिपद्दिने तु "कस्त्वा वो देवेभ्य" इ·

स्थ्यादिभिरध्वर्युहस्तप्रक्षालनतण्डुलनिर्वापपुरोडाशप्रदानादिलक्षणप्रयोगं करोति तदिदं यजनम् । एतदेवाभिप्रेत्य गोभिल आह “पञ्चान्ता उपवस्तव्याः पञ्चादयोऽपि यष्टव्याः” इति अत्रोपवासशब्देन स्तरणादिर्विवक्षितः तस्मिन् क्रियमाणे यजमानसमीपे देवतानां निवासात् तदेतत्तैत्तिरीयब्राह्मणे दर्शितम् “उपास्मिन् श्वो यक्ष्यमाणे देवताः सन्ति य एवं विद्वानग्निमुपस्तृणातीति” उपवासशब्दाभिधेयस्य पर्वदिने कर्त्तव्यस्यान्वाधानादेः पर्व्वणि चतुरंशवति आद्यास्त्रयोंऽशाविहितः कालः न तु चतुर्थोंऽशः यागशब्दाभिधेयस्य पुरोडाशप्रदानादेः पूर्वोक्तः पर्वचतुर्थोंऽशः प्रतिपदंशास्त्रयश्च विहितः कालः न तु प्रतिपच्चतुर्थोंऽशः । तदेतदाह लौगाक्षिः “त्रीनंशानौपवस्तस्य यागस्य चतुरोविदुः । द्वावंशावुत्सृजेदन्त्यौ यागे च व्रतकर्मणीति” तमेतं यत्नकालं यत्नपार्श्वोऽप्याह “पञ्चदश्याः परः पादः पञ्चादेः प्रथमास्त्रयः । कालः पार्वणयागे स्यादन्त्ये तु न विद्यत इति” वृद्धशातातपोऽपि “पर्वणोयश्चतुर्थोंऽश आद्याः प्रतिपदस्त्रयः । यागकालः स विज्ञेयः प्रातरुक्तो मनीषिभिरिति” अत्र प्रातरिति विशेषणात् सूर्योदयस्योपरि मुहूर्त्तत्रयं यागकाल इत्युक्तं भवति प्रतिपच्चतुर्थांशं निषेधति कात्यायनः “न यष्टव्यं चतुर्थेंऽशे यागैः प्रतिपदः क्वचित् । रक्षांसि तद्धि लुम्पन्ति श्रुतिरेषा सनातनीति” तदेवं पर्वण्यन्वाधानादिकं प्रतिपदि चेष्टिरिति सन्धिपार्श्वयोरुभयोः प्रारम्भपरिसमाप्ती व्यवस्थिते । यदा पर्वप्रतिपदावुदयमारभ्य सम्पूर्णतिथी भवतः तदा न सन्देहः यदा तु खण्डतिथी तदा निर्णयोऽभिधीयते तत्र गोभिलः “आवर्त्तने यदा सन्धिः पर्वप्रतिपदोर्भवेत् । तदहर्याग इष्येत परतश्चेत् परेऽहनि । पर्वप्रतिपदोः सन्धिरर्वागावर्त्तनाद् यदि । तस्मिन्नहनि यष्टव्यं पूर्वेद्युस्तदुपक्रमः । आवर्त्तनात् परः सन्धिर्यदि तस्मिन्नुपक्रमः । परेद्युरिष्टिरित्येष पर्वद्वयविनिश्चयः” इति आवर्त्तनमह्नोमध्यभागः । लौगाक्षिरपि “पूर्वाह्ने वाऽथ मध्याह्ने यदि पर्व समाप्यते । उपोष्य तत्र पूर्वेद्युस्तदहर्याग इष्यते । अपराह्णेऽथवा रात्रौ यदि पर्व समाप्यते । उपोष्य तस्मिन्नहनि श्वो भूते याग इष्यत” इति एषु वचनेषु मध्याह्नादिशब्दा यौगिकाः न तु पञ्चधा विभागमाश्रित्य प्रवृत्तास्तथा सत्यह्नोमध्यो मध्याह्न इति व्युत्पत्तेरावर्त्तनं मध्याह्नशब्देनाभिधीयते अतएव गोभिलेनावर्त्तनशब्दः प्रयुक्तः शातातपेनापि मध्यमशब्दः प्रयुक्तः “पूर्वाह्णे मध्यमे वापि यदि पर्व समाप्यते । तदोपवासः पूर्वेद्युस्तदहर्याग इष्यते” इति अह्नोऽपरोभागोऽपराह्णः अतस्ताभ्यां शब्दाभ्यामावर्त्तनात् पूर्वोत्तरभागावभिधीयेते । वाजसनेयिनान्तु विशेषमाह भाष्यार्थसंग्रहकारः “मध्यंदिनात् स्यादहनीह यस्मिन् प्राक् पर्वणः सन्धिरियं तृतीया । सा खर्विका वाजसनेयिमत्या तस्यामुपोष्याथ परेद्युरिष्टिरिति” आवर्त्तनादूर्द्ध्वमस्तमयादर्वाक् यदा सन्धिर्भवति तदाहःसन्धिमती तिथिः प्रथमा, रात्रौ सन्धिश्चेत् सा तिथिर्द्वितीया उभे अपेक्ष्य पूर्वाह्णे सन्धिमती पर्वतिथिस्तृतीया भवति तस्यां तृतीयतिथौ पर्वकालस्याल्पत्वात् सा खर्विकेत्युच्यते । शाखान्तराध्यायिनामीदृशे विषये पूर्वेद्युरन्वाधानादिकं सन्धितिथाविष्टिर्वाजसनेयिनान्तूत्तरतिथाविष्टिः एवं सति वाजसनेयिनां न क्वापि सन्धिदिनात्पूर्वेद्युरन्वाधानादिकमस्ति सोऽयं विशेषः आवर्त्तनेतः पुरा वा यदा सन्धिर्भवति तदा वाजसनेयिव्यतिरिक्तानां पर्वचतुर्थांशे इष्टिः प्राप्नोति तत्र विशेषमाह गार्ग्यः “प्रतिपद्यप्रविष्टायां यदि वेष्टिः समाप्यते । पुनः प्रणीय तत्रेष्टिः कर्त्तव्या यागवित्तमैरिति” पर्वणश्चतुर्थांशः प्रतिपदस्त्रयोऽंशाश्च यागकालत्वेन विहिताः । अत्र पर्वचतुर्थांशस्य विषय उदाहृतः प्रतिपदंशानां विषय उदाह्रियते । उषःकाले सन्धौ प्रतिपदः प्रथमांशो यागकालः निशीथे सन्धौ द्वितीयांशः रात्रिप्रारम्भे सन्धौ तृतीयांशः अनेनैव न्यायेनापराह्णे सन्धौ प्रतिपच्चतुर्थांशस्य यागकालत्वं प्राप्नोति तच्च प्रतिषिद्धं “न यष्टव्यं चतुर्थेऽंशे” इति स्मृतेः अतस्तादृशे विषये याग एव लुप्येतेति चेत् नैवं वृद्धशातातपेन प्रतिप्रसवाभिधानात् “सन्धिर्यद्यपराह्णे स्याद्यागं प्रातःपरेऽहनि । कुर्वाणः प्रतिपद्भागे चतुर्थेऽपि न दुष्यतीति” एवं तर्हि प्रतिषेधो निर्विषयः स्यादिति चेन्नैवं सद्यस्कालविषये चरितार्थत्वात् तं च विषयं दर्शयति कात्यायनः “सन्धिश्चेत् सङ्गवादूर्द्ध्वं प्रागावर्त्तनाद्रवेः । सा पौर्णमासी विज्ञेया सद्यस्कालविधौ तिथिरिति” भाष्यार्थसंग्रहकारोऽपि “अन्वाहितिपरिस्तरणोपवासः पूर्वेद्युरेते खलु पौर्णमास्याम् । आवर्त्तनात् प्राग्यदि पर्वसन्धिस्तदैव यागः क्रियते समस्तः” इति । आपस्तम्बोऽपि “पौर्णमास्यामन्वाधानपरिस्तरणोपवासाः सद्यो वा सद्यस्कालायां सर्वं क्रियते” इति सङ्गवावर्त्तनयोर्मध्ये पौर्णमासीप्रतिपदोः सन्धौ सति पूर्वोदाहृतैर्वचनैः सन्धिदिनात् पूर्वेद्युरन्वाधानादिकं प्राप्तं तच्च

सद्यस्कालवाक्यैः सन्धिदिन उत्कृष्यते । नन्वीदृशे विषये सन्धिदिनात् परदिने याग उत्कृष्यतां तथा सत्यपराह्णादिसन्धिविशान्वाधानयागयोर्दिनभेदो भविष्यति । अस्ति च दृष्टान्तः वाजसनेयिनामीदृशे विषये, अन्वाधानोत्कर्षे सति यागस्याप्युत्कृष्टत्वात् मैवम् अन्वयव्यतिरेकरूपाभ्यां विधिनिषेधाभ्यामस्याः शङ्काया निवारितत्वात् तत्र सद्यस्कालविधयोऽन्वयरूपाः, प्रतिपच्चतुर्थांशे प्रतिषेधाश्च व्यतिरेकरूपाः एवं च सति प्रतिषेधवाक्यं सावकाशं भवति । अमावास्यायां विशेषमाह वृद्धशातातपः“द्वितीया त्रिमुहूर्त्ता चेत् प्रतिपद्यापराह्णिकी । अग्न्याधानं चतुर्दश्यां परतः सोमदर्शनादिति” सोऽयं विशेषोनाश्वलायनापस्तम्बविषयः किन्तु बौधायनमतानुयायिविषयः अतएव बौधायनः“द्वितीया त्रिमुहूर्त्ता चेत् प्रतिपद्यापराह्णिकी । अन्वाधानं चतुर्दश्यां परतः सोमदर्शनात् । चतुर्दशी चतुर्यामा अमावास्या न दृश्यते । श्वोभूते प्रतिपच्चेत् स्यात् पूर्वां तत्रैव कारयेत् । चतुर्दशी च संपूर्णा द्वितीया क्षयगामिनी । प्रातरिष्टिरमायां स्याद्भूते कव्यादिका क्रियेति”एतेषां वचनानामयमर्थः अह्नि चतुर्दशी संपूर्णा अस्तमयादर्वागमावास्या स्वल्पा तत एवापराह्णव्याप्त्यभावाच्छ्राद्धायान्वाधानाय वा पूर्वोक्तरीत्या यद्यपि निमित्तभावं न भजते तथापि प्रतिपदि द्वितीयायां सत्यां चन्द्रस्य दृश्यमानत्वात्तद्दर्शने चेष्टेर्निषिद्धत्वात् प्रतिपद्युतायाममावास्यायामिष्टिः स्वल्पामावास्योपेतायां चतुर्दश्यां श्राद्धाग्न्याधानादिकं कर्त्तव्यमिति । एतदेवाभिप्रेत्य स्मृत्यन्तरे“आदितेऽस्तमिते चन्द्रः प्रतीच्यामुदियात् यदा । प्रतिपद्यतिपत्तिः स्यात् पञ्चदश्यां यजेत्तदेति” दृष्टवसिष्ठोऽपि “ऐन्द्रे निरुप्ते पयसि पुरस्तादुदिते विधौ । यद्वैगुण्यं कृतं तस्मिन् पश्चादपि हि तद्भवेदिति” अस्यायमर्थः यदा सपूर्णचतुर्दश्यामविचारेणामावास्याबुद्धिं कृत्वा अग्न्याधानादिकं कृत्वा हविर्निर्वापे कृते तस्मिन् उषःकाले पूर्वस्यां दिशि चन्द्रमा उदेति । तदा न दर्शकर्म भवितुमर्हति दर्शकालस्याप्राप्तत्वात् किन्तु कामापराधं निमित्तीकृत्य दर्शदेवता अपनीय दात्रादिगुणविशिष्टाग्न्यादिदेवतान्तराण्युद्दिश्य हविःप्रक्षेपो विहितः तदेतत् तैत्तिरीयब्राह्मणे श्रूयते “यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेति त्रेधा तण्डुलान् विभजेद्ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्यात् ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुम् ये क्षोदिष्ठास्तान् विष्णवे शिपिविष्टाय शृते चरुमिति” सोऽयं दृष्टान्तोऽविधि निरुप्ते सति तदूर्ध्वं पूर्वस्यां दिशीन्दावुदिते सति दर्शकर्मविधेर्यद्वैगुण्यमुक्तरीत्यावस्थितं तदेव वैगुण्यं होमदिने पश्चिमदिशि चन्द्रोदये भवतीति । एतदेव बोधायनमतमुपोद्बलयति श्रुतिः “यस्मिन्नहनि पुरस्तात्पश्चात् सोमोन दृश्यते तदहर्यजेतेति” अयमर्थः सिनीवाल्यां पुरस्ताच्चन्द्रदर्शनं भवति द्वितीयायुक्तायां प्रतिपदि पश्चाच्चन्द्रो दृश्यते तयोरुभयोर्मध्यवर्त्तिन्यां कुह्वां द्विविधमपि चन्द्रदर्शनं नास्ति अतस्तस्मिन् दिने यष्टव्यमिति चन्द्रदर्शनोपेतायां शुक्लप्रतिपदि यागानुष्ठाने प्रायश्चित्तमाह कात्यायनः ‘यजनीयेऽह्नि सोमश्चेद्वारुण्यां दिशि दृश्यते । तत्र व्याहृतिभिर्हुत्वा दण्डं दद्याद्द्विजातये”इति चन्द्रदर्शनराहित्यमेवाभिप्रेत्य बौधायनकारिकासु पठ्यते “दृष्टेरत्र प्रातिपदादि नाड्यः सप्ताष्ट वा यत्र भवन्ति तत् स्यात् । क्षीणासु नाडीषु दिनस्य पूर्वः कल्पोऽथ दृष्टौ च भवेद्द्वितीयः” इति अयमर्थः अमावास्यातिथेः सम्बन्धिनीषु नाडीषु क्षीणासु सतीषु तस्मिन् दिने अस्तमयात् पूर्वं प्रतिपत्सम्बन्धिन्यो नाड्यः सप्ताष्ट वा यदि भवन्ति तदा तद्दिनमिष्टेरत्र योग्यं सोऽयमेकः पक्षः । अमावास्याप्रतिपदौ यदा वर्द्धेते तदा द्वितीयः कल्पो भवेत् । अमायामग्निमाधाय सोमदर्शनरहिते प्रतिपद्दिने यागः कर्त्तव्य इति । स्मृत्यन्तरेऽपि“अर्वागस्तमयात् यत्र द्वितीया तु प्रदृश्यते । तत्र यागं न कुर्वीत स्युर्देवास्तु पराङ्मुखाः”इति बौधायनमतानुसारिणामग्न्याधानवद्दर्शश्राद्धमपि स्वल्पामावास्योपेतायां चतुर्दश्यां कर्त्तव्यं तथा च बौधायनेनोक्तम्“यदा चतुर्दशी यामन्तुरीयमनुपूरयेत् । अमावास्या क्षीयमाणा तदैव श्राद्धमाचरेत् । चतुर्दश्यां चतुर्यामे अमा यत्र न दृश्यते । श्वोभूते प्रतिपद्यत्र भूते कव्यादिका क्रियेति”चतुर्थे यामे अमावास्या सम्पूर्णा न दृश्यते किन्त्ववसाने स्वल्पा सा चेत् परदिने क्षीयते तदानीं चतुर्दश्यां श्राद्धमाचरेत् । ननु चन्द्रदर्शनोपेतायां प्रतिपदीष्टिः समाम्नाता तथा च शतपथब्राह्मणम् “यदहः पश्चाच्चन्द्रमा अभ्युदेति तदहर्यजन्तेमाल्लोँकानभ्युदेतीति”। तैत्तिरीयब्राह्मणमपि “एषा वै सुमना नामेष्टिर्यमद्येजानं पश्चाच्चन्द्रमा अभ्युदेतास्मिन्नेवास्मै लोके समर्द्धुकं भवतीति” अयमर्थः येयमिष्टिश्चन्द्रदर्शनोपेते दिने क्रियते सेयमिष्टिः सुमनःशब्दवाच्या तादृशीमिष्टिं कृतवन्तं यजमानमभिलक्ष्य तस्मिन् दिने पश्चाच्चन्द्रमा उदेति तस्मै यजमानायास्मिँल्लोके समृद्धिर्भवतीति बाढं तदेतच्छ्रुतिद्वयं बौधायनमतानुसारिव्यति-

रिक्तविषयम् एतदेवाभिप्रेत्य प्रतिपच्चतुर्थ्यंशे याग उदाहृतः । ननु बौधायनव्यतिरिक्तानामपि चन्द्रदर्शनयोग्यं द्वितीयायुतं प्रतिपद्दिनमिष्टौ निषिद्धं तथा च स्मृतिः “पर्व्वणोऽंशे चतुर्थे तु कार्या चेष्टिर्द्विजोत्तमैः । द्वितीयासहितं यस्मादुपयन्त्याश्वलायनाः” इति तदेतदावर्त्तनतत्पूर्व्वकालयोः सन्धौ सति द्रष्टव्यं अपराह्णादिसन्धिषु चतुर्थस्येष्टावप्राप्तत्वात् । तदेवं प्रकृतिरूपाया इष्टेः कालो निरूपितः विकृतेस्तु कालो निरूप्यते तत्र कात्यायनः “आवर्त्तनात् प्राग्यदि पर्व्वसन्धिः कृत्वा तु तस्मिन् दिवसे प्रकृत्याः । तत्रैव यागः परतो यदि स्यात्तस्मिन् विकृत्याः प्रकृतेः परेद्युरिति” आवर्त्तने तत पुरा वा पर्व्वसन्धौ तस्मिन् सन्धिदिने प्रकृतियागं कृत्वा पश्चाद्विकृतिसम्बन्धी यागः कर्त्तव्यः । यद्यावर्त्तनात्परतः सन्धिस्तदा केवलं विकृतियागः सन्धिदिने कर्त्तव्यः प्रकृतियागस्तु सन्धिदिनात्परेद्युरनुष्ठेय इत्यर्थः । आवर्त्तनतः पूर्व्वकाले ततः परकाले वा सन्धिरित्येतेषु त्रिष्वपि पक्षेषु सन्धिदिन एव विकृतेरनुष्ठानं प्रकृतेस्तु पूर्व्वोक्तरीत्या सन्धिदिने परेद्युर्वानुष्ठानं व्यवतिष्ठते

इतीनां सर्व्वासां प्रकृतिर्दर्शपूर्णमासौ “ऐन्द्राग्नमेकादशकपालं निर्व्वपेत् प्रजाकाम” इत्यादयः काण्डान्तरपठिताः काम्येष्टयोविकृतयः । तत्र “प्रकृतिर्विकृतिः कर्त्तव्येति” न्यायेन विकृतीनामपि सन्धिदिनात् परेद्युः कदाचिदनुष्ठानं प्राप्तं तदेतदुदाहृतेन वचनेन निवार्य्यते” ।

तेन सन्धेः स्वल्पकालत्वेन कर्म्मानर्हत्वात् संक्रान्तिवत्तदुपलक्षितदिनविशेषे तत्तत्कर्म्म कर्त्तव्यमिति फलितम् । अत एव “ऋतुसन्धिषु वापयेत्” इतियतिधर्म्मे स्मृतिः तत्र यदि दर्शान्तविवक्षा स्यात् तदा दर्शस्यैव सन्धित्वात् तत्रैव वपनं कुर्य्युः कुर्व्वन्ति तु पूर्णिमायां तस्मात् दर्शान्तत्वपूर्णिमान्तत्वयोः समो विकल्पः अनुष्ठाने तु तत्र वचनविशेषाच्छिष्टाचाराच्च व्यवस्था” कालमा० । अयञ्च कालः श्रौतस्मार्त्तकर्म्माङ्गम् वैद्यके तु कालविशेषोऽपि परिभाषितः “यथा ऋत्वोरन्त्यादि सप्ताहावृतुसन्धिरिति स्मृतः । तत्र पूर्व्वोविधिस्त्याज्यः सेवनीयः परोविधिः” वाग्भटः । ज्योतिःशास्त्रे तु ऋत्वोः सन्ध्युपलक्षितस्य कालभेदस्य “रवेर्भवेदेकगृहाधिकस्य यदंशवृन्दं खलु सायनस्य । तदत्र राशिद्वभागतष्टं स्वष्टं वसन्तादृतवो भवन्ति । तत्सन्धयोऽगाङ्क ६७घटीसमाः स्युर्द्विसंगुणा (१२४ घटीसमाः) अथ विषुवायनीयाः । स सन्धिसन्धिः खलु यत्र शेषं शून्यं भवेदेष विशेषपुण्यः”क्षेपशार्कैस्य सन्धिसन्धित्वे नापि परिभाषा कृता तत्र शून्यावशेषे स्नानदानादौ विशेषपुण्यफलम् । इतरस्य विवाहे वर्ज्जना । यथाह स एव “सन्धौ पुरन्ध्री शुचमेति वन्ध्या मृतप्रजा वा यदि सन्धिसन्धिः” इति ।

ऋतुसेव्य त्रि० ऋतुभेदे सेव्यं वैद्यकोक्तगुणयुतमाहारादि । सुश्रुतोक्ते ऋतुभेदे सेवनीये पथ्यरूपे वस्तुभेदे तच्च सुश्रुते दर्शितं यथा । “यस्मिन्यस्मिनृतौ ये ये दोषाः कुप्यन्ति देहिनाम् । तेषु तेषु प्रदातव्याः रसास्ते ते विजानता ।

प्रक्लिन्नत्वाच्छरीराणां वर्षासु खलु देहिनाम् । मन्देऽग्नौ कोपमायान्ति संहर्षान्मारुतादयः । तस्मात् क्लेदविशुद्ध्यर्थं दोषसंहरणाय च । कषायतिक्तकटुकै रसैर्युक्तमथाऽद्रवम् । नातिस्निग्धं नातिरूक्षमुष्णं दीपनमेव च । देयमन्नं न्टपतये यज्जलं चोक्तमादितः । तप्तावरतमम्भो वा पिबेन्मधुसमायुतम् । अह्नि मेघानिलाविष्टेऽत्यर्थशीताम्बु सङ्कुले । तरुणत्वाद्विदाहञ्च गच्छन्त्योषधयस्तदा । प्रतिमांस्तन्निमित्तञ्च नैव व्यायाममाचरेत् । अत्यम्बुपानावश्यायपाम्यधर्मातपांस्तथा । भूवाष्पपरिहारार्थं शयीत च विहायसि । शीते साग्नौ निवाते च गुरुप्रावरणे गृहे । यायान्नागवधूभिश्च प्रशस्तागुरुभूषितः । दिवास्वप्नमजीर्णञ्च वर्ज्जयेत्तत्र यत्नतः” । वर्षासेव्यासेव्ये ।

“सेव्याः शरदि यत्नेन कषायस्वादुतिक्तकाः । क्षीरेक्षुविकृतिक्षौद्रशालिमुद्गादिजाङ्गलाः । सलिलञ्च प्रसन्नत्वात् सर्व्वमेव तदा हितम् । सरःस्वाप्लवनञ्चैव कमलोत्पलशालिषु । प्रदोषे शशिनः पादाश्चन्दनञ्चानुवासनम् । तिक्तस्य सर्पिषः पानैरसृक्स्रावैश्च युक्तितः । वर्षास्वुपचितं पित्तं हरेच्चापि विरेचनैः । नोपेयात्तीक्ष्णमत्युष्णं क्षारं स्वप्नं दिवाऽऽतपम् । रात्रिजागरणञ्चैव मैथुनञ्चापि वर्जयेत् । स्वादु शीतजलं मद्यं शुचिस्फटिकनिर्मलम् । शरच्चन्द्रांशुनिर्धौतमगस्त्योदयनिर्विषम् । प्रसन्नत्वाच्च सलिलं सर्व्वमेव तदा हितम् । सचन्दनं वा कर्पूरं वाससामलिनं लघु । भजेच्च शारदं माल्यं सौधेः पानञ्च युक्तितः । पित्तप्रशमनं यच्च तच्च सर्व्वं समाचरेत्” । शरदि सेव्यासेव्ये

“हेमन्तः शीतलो रूक्षो मन्दसूर्य्योऽनिलाकुलः । ततस्तु शीतमासाद्य वायुस्तत्र प्रकुप्यति । कोष्ठस्थः शीतसंस्पर्शादन्तःपिण्डीकृतोऽनलः । रसमुच्छोषयत्याशु तस्मात् स्निग्धं तदा हितम् । हेमन्ते लवणक्षारतिक्ताम्लकटुकोत्कटम् । सर्पिस्तैलमहिममशनं हितमुच्यते । तीक्ष्णान्यपि च पानानि पिबेदगुरुभूषितः । तैलाभ्यक्तः सुखोष्णे च वारिकोष्ठेऽवगाहयेत् । साङ्गारधाने महति कौषेयास्तरणास्तृते । शयीत

शयने वापि इते गर्भगृहोदरे। स्त्रीःस्निग्धागुरुधूपाढ्याः पीनोरुजघनस्तनीः। प्रकामञ्च निषेवेत मैथुनं तर्पितो नृपः। मधुरं तिक्तकटुकमम्लं लवणमेव च। अन्नपानं तिलान् माषान् शाकानि च दधीनि च। तथेक्षुविकृतीः शालीन् सुगन्धांश्च नवानपि। प्रसह्यानूपमांसानि क्रव्यादबिलशायिनाम्। औदकानां प्लवानाञ्च पादिनाञ्चोपलायते। मद्यानि च प्रसन्नानि यच्च किञ्चिद्बलप्रदम्। कामतस्तन्निषेवेत पुष्टिमिच्छन् हिमागमे” हेमन्तसेव्यादि

“एष एव विधिः कार्यः शिशिरे समुदाहृतः”।

“हेमन्ते निचितः श्लेष्मा शैत्याच्छीतशरीरिणाम्। औष्ण्याद्वसन्ते कुपितः कुरुते च गदान् बहून्। ततोऽम्लमधुरस्निग्धलवणानि गुरूणि च। वर्जयेद्वमनादीनि कर्म्माण्यपि च कारयेत्। षष्टिकान् यवान् शालीन् मुद्गान् नीवारकोद्रवान्। लावादिविष्किररसैर्द्द्याद्यूषैश्च युक्तितः। पटोलनिम्बवार्त्ताकुतिक्तकैश्च हिमात्यये। सेवेत माधवेऽरिष्टान् सीधु माध्वीकमासवान्। व्यायाममञ्जनं धूमं तीक्ष्णञ्च कवलग्रहम्। सुखाम्बुना च सर्वार्थान् सेवेत कुसुमागमे। तीक्ष्णरूक्षकटुक्षारकषायं कोष्णमद्रवम्। यत्सुक्ष्ममधुप्रायं वसन्ते भोजनं हितम्। व्यायामोऽत्र नियुद्धाध्वशिलानिर्घातजो हितः। उत्सादनं तथा स्नानं वनिताः काननानि च। सेवेत निर्हरेच्चापि हेमन्तोपचितं कफम्। शिरोविरेकवमननिरूहकवलादिभिः। वर्ज्जयेन्मधुरस्निग्धदिवास्वप्नगुरुद्रवान्” वसन्तसे०

“व्यायाममुष्णमायासं मैथुनञ्चातिशोषि च। रसांश्चाग्निगुणोद्रिक्तान् निदाघे परिवर्जयेत्। सरांसि सरितोऽपि वनानि रुचिराणि च। चन्दनानि परार्ध्यानि स्रजः सकमलोत्पलाः। तालवृन्तानिलाहारांस्तथा शीतगृहाणि च। घर्मकाले निषेवेत वासांसि सुलघूनि च। शर्क्कराखण्डदिग्धानि सुगन्धीनि हिमानि च। पानकानि च सेवेत मन्थांश्चापि सशर्करान्। भोजनं च हितं शीतं सघृतं मधुरद्रवम्। शृतेन पयसा रात्रौ शर्करामधुरेण च। प्रत्यग्रकुसुमाकीर्णशयने हर्म्यसंस्थिते। शयीत चन्दनार्द्राङ्गः स्पृश्यमानोऽनिलैः सुखैः” ग्रीष्मसेव्यादि।

“तापात्यये हिता नित्यं रसा ये मधुरास्तथा। पयोमांसरसाः कोष्णास्तैलानि च घृतानि च। दृंहणञ्चापि यत्किञ्चिदभिष्यन्दि तथैव च। निदाघोपचितञ्चैव प्रकुप्यन्तं समीरणम्। निहन्यादनिलघ्नेन विधिना विधिकोविदः। नदीजलं रूक्षमुष्णमुदमन्थं तथाऽऽतपम्। व्यायामञ्च दिवास्वप्नं व्यवायञ्चात्र वर्ज्जयेत्। यवषष्टिकगोधूमान् शालींश्चाप्यनवांस्तथा। हर्म्यमध्ये निवाते च भजेच्छय्यां मृदूत्तराम्। सविषप्राणिविण्मूत्रलालानिष्ठीवनादिभिः। समाप्लुतं तदा तोयमान्तरीक्षं विषोपमम्। वायुना विषदुष्टेन प्रावृष्येण च दूषितम्। तद्धि सर्व्वप्रयोगेषु तस्मिन्नृकाले विवर्जयेत्। निरूहैर्बस्तिभिश्चान्यैस्तथान्यैर्मारुतापहैः। कुपितं शमयेद्वायुं वार्षिकं वा चरेद्विधिम्। ऋतावृतौ य एतेन विधिना वर्त्तते नरः। घोरानृतुकृतान् रोगान्नाप्नोति स कदाचन” प्रावृट्से०

ऋतुस्तोम पु० एकाहसाध्ये यागभेदे “नाकसद ऋतुस्तोमादिकस्तोमाश्चाभिप्लवाहानि” आश्व० श्रौ० ६,८,२६। “ऋतुस्तोमनामानश्च षडेकाहाः” नारा०।

ऋतुस्थला स्त्री अप्सरोभेदे “ऋतुस्थला घृताची च विश्वाची पूर्व्वचित्यपि” भा० आ० १२२ अ० अप्सरोभेदकथने।

ऋतुस्नाता स्त्री ऋतौ ऋतुकाले विहितदिने (चतुर्थदिवसे) स्नाता। ऋतुकाले चतुर्थदिवसे शुद्ध्यर्थं कृतस्नानायां स्त्रियाम्। “ऋतुस्नातां तु यो भार्य्यां सन्निधौ नोपगच्छति” मिता० स्मृतिः धर्म्मलोपभयाद्राज्ञीमृतुस्नातामिमां स्मरन्” रघुः। “पूर्व्वं पश्येदृतुस्नाता यादृशं नरमङ्गना। तादृशं जनयेत् पुत्रं भर्त्तारं दर्शयेदतः” सुश्रुतः। अधिकस्तुक्रमार्त्तवशब्दे ऋतुमतीशब्दे च। दारविशेषणत्वे पुंस्त्वम् “यः स्वदारानृतुस्नातान् स्वस्थः सन्नोपगच्छति” मिता० स्मृतिः।

ऋतुस्नान न० ऋतौ शुद्ध्यर्थं स्नानम्। रजस्वलायाश्चतुर्थदिनकर्त्तव्ये स्नाने तस्या आर्त्तायाः स्नानप्रकारश्चार्त्तवशब्दे ८०८पृ० उक्तः।

ऋतुहरितकी स्त्री ऋतुभेदे द्रव्यभेदे न सेव्या हरितकी। वर्षादिषु ऋतुषु क्रमेण सैन्धवशर्क्कराशुण्ठीजीरकमधुगुडैर्मिश्रणेन सेव्यायां हरीतक्याम्। “सिन्धूत्थशर्कराशुण्ठीकणामधुगुडैः क्रमात्। वर्षादिष्वभया प्राश्या रसायनगुणैषिणा” भावप्र०।

ऋते अव्य० ऋत (सौत्रः) के। १वर्ज्जने २विनार्थे च। “अवेहि मां प्रीतमृते तुरङ्गमात्” रघुः “अंशादृते निषिक्तस्य नीललोहितरेतसः” कुमा०। “शक्तोऽन्यः सहितुं वेगमृते देवं पिनाकिनम्” भा०व० ३९ अ०। “नाभिव्याहारयेद्ब्रह्म स्वधानिनयनादृते” मनुः “अभ्रातृको हरेत्सर्वं दुहितॄणां सुतादृते” या०। एतच्छब्दस्य विनार्थत्वात्

तद्योगे पञ्चमी द्वितीया तृतीया च भवति उक्तोदाहरणेषु पञ्चमी द्वितीयाद्रष्टव्या। तृतीयाया उदाहरणं मृग्यम्।

ऋतेकर्म्म अव्य० वेदे द्वा० वर्ज्जने अव्ययो० अच्समा०। कर्म विनेत्यर्थे। "ये कर्म्मणः क्रियमाणस्य मह्न ऋतेकर्म्म-मुदाजायन्त देवाः" ऋ० १०,५५,६०

ऋतेजा त्रि० ऋते यज्ञनिमित्तं जायते जन-विट् अलुक्-स०। यज्ञनिमित्तजाते। "अग्ने म चेषदतपा ऋतेजाः" ऋ० ६.३.१। "ऋतेजा यज्ञनिमित्तं जातः" भा०।

ऋतेयु पु० वरुणस्य ऋत्विजि १ऋषिभेदे। "दृढेयुश्च ऋतेयुश्च परिव्याधश्च कीर्त्तिमान्। एकतश्च द्वितश्चैव त्रितश्चादित्यसन्निभाः॥ अत्रेः पुत्रश्च धर्म्मात्मा ऋषिः सारस्वतस्तथा। वरुणस्यर्त्विजः सप्त पश्चिमां दिशमाश्रिताः" भा० आनु० १५० अ०। २पौरवे नृपभेदे। "पूरोर्वंशं प्रवक्ष्यामि" इत्युपक्रम्य। "संयातिस्तस्याहंयातीरौद्राश्व-स्तत्सुतः स्मृतः। ऋतेयुस्तस्य कक्षेयुस्थण्डिलेयुकृतेयवः। जलेयुः सन्नतेयुश्च धर्म्मसत्यव्रतेयवः। दशैतेऽप्सरसः पुत्रा वनेयुश्चावमः स्मृतः। घृताच्या इन्द्रियाणीव मुख्यस्य जगदात्मनः। ऋतेयोरन्तिनावोऽभूत्" भाग० ९।२०, ३।

ऋतेरक्षस् पु० ऋते उद्देश्यतया वर्ज्जितं रक्षो यतः। यज्ञे "ऋतेरक्षा वै यज्ञः" ऐत० ब्रा०। यज्ञस्य रक्षोभ्यो रक्षणीयत्वात् तथात्वम्।

ऋतोद्य न० ऋत+वद्-भावे क्यप्। सत्यकथने "ऋतं वदन्ता ऋतोद्येषु" अथ० १४,१,२१।

ऋत्विज् पु० ऋतु+यज्-किन् उ० प०। १याजके, "अग्न्याधेयं पाकयज्ञानग्निष्टोमादिकान् मखान्। यः करोति वृतो यस्य स तस्यर्त्विगिहोच्यते" इति मनूक्ते २स्वानुष्ठेयवैदिककर्मकरे। ऋत्विजश्च षोडश तत्र मुख्याश्चत्वारः तेषां प्रत्येकं सहकारिणस्त्रयस्त्रय इति षोडश। विवृतिरध्वा-वाकशब्दे ८५ पृ० दृश्या। "अयर्त्विजो यां काञ्चिदाशिषमाशासते सा यजमानस्यैवेति श्रुतेः "ऋत्विग्वादेनियुक्तौ च समौ संपरिकीर्त्तितौ। यज्ञे स्वाम्याप्नुयात् पुण्यं हानिं वादेऽथवा जयम्" इति वृहस्पत्युक्तेश्च ऋत्विक्कृतयज्ञफलं वेतनदक्षिणादिना वरयितुरेव। "श्रौतस्मार्त्तक्रियाहेतोर्वृणुयादृत्विजः स्वयम्" या०। "तस्य सांख्यपुरुषेण तुल्यतां बिभ्रतः स्वयमकुर्वतः क्रियाः। कर्त्तृता तदुपलम्भतोऽभवद्वृत्तिभाजि करणे यथार्त्विजि" मा०। ऋत्विजः कर्म ष्यञ्। आर्त्विज्य ऋत्विक्कर्मणि आर्त्विज्यशब्दे उदा०। ऋत्विक्कर्मार्हति खञ्। आर्त्विजीन ऋत्विक्कर्मार्हे "दाक्षिण्यदिष्ट कृतमार्त्विजीनैः" भट्टिः।

ऋत्विय त्रि० ऋतुरस्य प्राप्तः तत्र भवं तत्रानुष्ठेयं वा वेदे घस् इत्त्वात् भत्वाभावेन न गुणः। १प्राप्तर्त्तुकाले २काल-भवे ३ऋतुकालानुष्ठेये च "अयं वो गर्भऋत्वियः प्रत्नं सधस्थमासदत्" यजु० ११,४८। "दधे ह गर्भमृत्वियं यतो जातः प्रजापतिः" २३,६३। ऋत्वियावान् लोके तु यत्। ऋतव्य इत्येव तेष्वर्थेषु त्रि०।

ऋत्वियावत् त्रि० ऋत्वियमृतुकालभवं प्रजोत्पादनकर्म्म तत्रा-नुष्ठेयकर्म वास्त्यस्य मतुप् मस्य वः दीर्घः। १प्रजोत्पादन-कर्मयुक्ते २तत्रानुष्ठेयकर्मयुक्ते च। "कृतं न ऋत्वियावतः" ऋ० ८,८,१० स्त्रियां ङीप्। "इयं त ऋत्वियावती धीतिरेति नवीयसी" ऋ० ८,१२,१०। "ऋतौ वसन्ता-दिकालेऽनुष्ठेयं यज्ञकर्म ऋत्वियं तद्वती" भा०।

ऋत्व्य त्रि० ऋतुरस्य प्राप्तः तत्र भवं तत्रानुष्ठेयं वा कर्म यत् संज्ञापूर्वकविधेरनित्यत्वात् न गुणः अवङ्च। ऋत्वियश-ब्दार्थे "अपश्यं त्वा मनसा दीध्यानां स्वायां तनू ऋत्व्ये नाधमानाम्" ऋ० १०,१८३,२।

ऋदूदर त्रि० मृदु उदरं यस्य वेदे पृ० मलोपः। मृदूदरे निरु०। "ऋदूदरः सुहवो मा नो अस्यै" ऋ० २,३३,५, "ऋदूदरेण सख्या सचेय" ऋ० ८,४८,१०।

ऋदूपा त्रि० पृषो०। १अर्द्दनपातिनि २गमनपातिनि ३दू-रपातिनि निरु०। "उभा ते बाहू रण्या सुसंस्कृत ऋदूपे चिदृदूवृधा" ऋ० ८,७७,११। इमामेवर्चमधिकृत्य यास्केन तथार्थतया निर्वचनं कृतम्।

ऋदूवृध पु० पृषो०। १मर्मण्यर्द्दनवेधिनि २गमनवेधिनि ३श-ब्दवेधिनि ४दूरवेधिनि च निरु०। ऋदूपाशब्दे उदा०। तामेवर्चमधिकृत्य यास्केन तथार्थतया निरुक्तम्।

ऋद्ध न० ऋध-क्त। १पक्वमर्दितधान्ये २सिद्धान्ते ३वृद्धौ च। ४समृद्धे ५सम्पन्ने त्रि० "इयमृद्धवणी वृथाऽवनी" नैष०। "अवा-प्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यम्" गीता "धर्मज्ञानवैराग्यादिभिः सम्पन्ने प्रपञ्चरूपेण विवर्त्तमाने च ६विष्णौ पु०। "ऋद्धः स्पष्टाक्षरो मन्त्रः" विष्णुस० "धर्मादिभिरुपेतत्वात् ऋद्धः" भा०। "महर्द्धिरृद्धो वृद्धात्मा" विष्णुस०। "प्रपञ्चरूपेण वर्द्धमान ऋद्धः" भा०।

ऋद्धि स्त्री ऋध-भावे क्तिन्। १वृद्धौ २सम्पत्तौ ३सिद्धौ च। "परिच्छिन्नप्रभावर्द्धिर्न मया न च विष्णुना" कुमा०। "ऋद्ध्या भवान् ज्योतिरिव प्रकाशते" भा० व० १११। कर्त्तरि क्तिच्। ४पार्व्वत्यां शब्दरत्ना०। ५लक्ष्म्यां

६देवभेदे । करणे क्तिच् । ७ओषधिभेदे स्त्री राजनि० । तल्लक्षणं यथा । "ऋद्धिर्वृद्धिश्च कन्दौ द्वौ भवतः कोशयामले । श्वेतलोमान्वितः कन्दो लताजातः सरन्ध्रकः । स एव ऋद्धिर्वृद्धिश्च भेदमप्येतयोर्ब्रुवे । तूलग्रन्थिसमा ऋद्धिर्वामावर्त्तफला च सा । वृद्धिस्तु दक्षिणावर्त्तफला प्रोक्ता महर्षिभिः । 'ऋद्धिर्बल्या त्रिदोषघ्नी शुक्रला मधुरा गुरुः । प्राणैश्वर्यकरी मूर्च्छारक्तपित्तविनाशिनी" भावप्र० । "काकोली क्षीरकाकोली जीवकर्षभकावुभौ । तथा मेदा महामेदा ऋद्धिर्वृद्धिर्मधूलिका । निरूहेषु यथालाभमेष वर्गो विधीयते" सुश्रु० । तयोरलाभे वर्गमध्ये वाराही देया ऋषभशब्दे प्रमाणम् । ८कुबेरपत्न्याञ्च । "तदौ तत्र निबध्याथ कश्यपं प्रददौ शुभा । अदितिर्मम पुत्रार्थं सौभाग्यार्थं तथैव च । निष्क्रयेण मया मुक्तः कश्यपस्तु तपोधनः । इन्द्रोदत्तस्तथेन्द्राण्या सौभाग्यार्थं ततो मम ! सोमश्चाप्यथ रोहिण्या ऋद्ध्या च धनदस्तथा । एवं सौभाग्यदोऽत्यन्तः पारिजातो न संशयः" हरिवं० १२६ । "ऋद्धिः कुबेरकान्ता च जज्ञेश महिषी तथा" हरिवं० १३६अ० । "सावित्री ब्रह्मणःसाध्वी कौशिकस्य शची सती । मार्कण्डेयस्य धूमोर्णा ऋद्धिर्वैश्रवणस्य च" भा० अनु० १४६ अ० । "शक्रः शचीपतिर्देवोयमोधूमोर्णया सह । वरुणः सह गौर्य्या च सहर्द्ध्या च धनेश्वरः" हरि० १५४अ० । साऽस्यास्ति मतुप् । ऋद्धिमत् ऋद्धियुक्ते त्रि० स्त्रियां ङीप् । "तमृद्धिमद्बन्धुजनाधिरूढैः" कुमा० । "धाराग्टहेष्वातपमृद्धिमन्तः" रघुः तन्त्रोक्ते ठखकारे । "अथाभिधास्ये त्वरितां त्वरितं फलदायिनीम् । "नादो रमा धर्म्मयोन्मृद्धिरोगस्वरान्विता" ऋद्धिः खकारः" तन्त्रसारः ।

ऋध वृद्धौ दिवा० स्वा० च पर० अक० सेट् उदित् इरित्त्व । दि० ऋध्यति ऋध्यात् ऋध्यतु आर्द्ध्यत् स्वा० ऋध्नोति ऋध्नुवन्ति ऋध्नुयात् ऋध्नोतु ऋध्नुहि आर्ध्नोत् । उभयतः । आर्द्धत्—आर्द्धीत् । आनर्द्ध आनृधतुः । अर्द्धिता ऋध्यात् अर्द्धिष्यति आर्द्धिष्यत् । अर्द्धितव्यः अर्द्धनीयः । ऋध्यः । ऋद्धः ऋद्धिः । ऋध्यन् ऋध्नुवन् अर्द्धः । उदित्त्वात् वेट् अर्द्धित्वा-ऋद्ध्वा । समृध्य । "नाब्रह्म क्षत्रमृध्नोति नाक्षत्रं ब्रह्म वर्द्धते" मनुः "सपत्नामृध्यतो दृष्ट्वा हीनमात्मानमेव च । सोऽहं न स्त्री नचाप्यस्त्री न पुमान् नाप्रमानापि" भा०स०४६अ० । "पृथिव्यामग्नये समनमन्त् स आर्ध्नोत्" अथ० ४,३९,१ । ये भक्षयन्तो न वसून्यानृधुः" २,२५,८ । आत्मनेपदित्वमपि "ते च लोमश ! लोकेऽस्मिन्नृध्यन्ते केन हेतुना" भा०व० ९४ । वेदे गणव्यत्यासात् श्नम् । "य एषां भृत्यामृणधत् स जीवात्" ऋ०१,८४,१६ । मन्मानि धीतिरुत यज्ञमृन्धन्" १०,११०, २ । अन्तर्भूतण्यर्थत्वात् सक० । णिचि अर्द्धयति ये "त्वां यज्ञैर्यज्ञिये अर्द्धयन्ति" अ०७,८३,४ । सनि वेट् अर्दिधिषति ईर्त्सति । वेदे गणव्यत्यासात् श तेन । "इन्धानास्त्वा शतं हिमा ऋधेम" अथ०१९,५५, ४ । ऋधक्शब्दे उदा० । "ऋधद्यस्ते धिया मर्त्तः शशमते" ऋ० ६,२४। स्वा० तर्पणे वर्द्धने च सक० । "आदृभ्नोति हविष्कृतिम्" ऋ० १,१८,८ । "अन्तत एव तद्देवानृध्नुवन्ति" ऐ०ब्रा० । "सोऽहं प्रागभवतैव मृतजननीमृध्नोमि" भवभूतिः ।

अधि+अधिकवृद्धौ । "यदस्मिन्निदं सर्वमध्यार्ध्नोत्तेनाध्यर्द्धः" इति शत०ब्रा०१४,६,१० ।

आ+समृद्धौ । "ऋणाद्योनर्समेत् समानो यमस्य लोकेऽधिरज्जुरायत्" अथ० ६, ११८,२ । ताच्छील्ये चानश् ।

उप+उपगमे । "तस्मादेतत् क्षत्रिय एव नक्षत्रमुपेत् सेज्जिघांसतीव" शत०ब्रा०२,१,२,१७ । "उपेर्त्सेत् स्वोकुर्य्यात्" भा० । "एतेषामेव संवत्सरमुपेर्त्सेत्" २,३,२,१४ ।

वि+ऋद्धिविगमे विगतायां वृद्धौ "अथ यस्मान्न कृत्तिकास्वादधीतर्क्षाणां वा एता अग्रे पत्न्य आसुः सप्तर्षीन् ह स्म वै पुरर्क्षा इत्याचक्षते ता मिथुनेन व्यार्द्धन्तामी ह्युत्तराहि सप्तर्षय उद्यन्ति पुर एता अशमिव वै तद्योमिथुनेन व्यृद्धः स नेन्मिथुनेन व्यृद्धा" इति शत०ब्रा० २,१,२,४ । "व्यार्द्धन्त विगतर्द्धिका अभवन्" भा० । गणव्य० साधुः । "यद्यज्ञमुखे यज्ञमुखे जुहुयात् पशुभिर्व्यृध्येत पापीयान्त्स्यात्" १२,१,३,८ । "अव्ययं विभक्तीत्यादि" पा० सूत्रे विगता ऋद्धिः व्यृद्धिः" सि०कौ० ।

सम्+ऋद्धेराधिक्ये अतिशयितवृद्धौ । "अव्ययं विभक्तीत्यादि" पा० "ऋद्धेराधिक्यं समृद्धिः" सि०कौ० । "कः क्षिण्वंस्तान् समृध्नुयात्" मनुः । "शत्रुपक्षं समृध्यन्तं यो मोहात् समुपेक्षते" भा० व० ५४ अ० "अयं कामः समृध्यताम्" यजु० २६,२ । पदव्यत्यासः ।

ऋधज्(क्) अव्य० ऋध-बा० अजि(कि)क् स्वरा० । १सत्ये, २वियोगे, ३शैघ्र्ये, ४सामीप्ये, ५लाघवे, च मेदिनि० । वियोगः पृथक्करणम् । "ऋधग्द्वेषः कृणुत" ऋ०८,१,८,११ । "ऋधक् पृथक् कृणुत कुरुत" भा० । "यदि-

न्द्रो दिवि पर्य्यौ यदृधक्” ऋ० ६,४०,५ । “ऋधक् सा वो मरुतः” ७,६७,४ । “ऋधगद्देवा इह यजा चिकित्वः” २,२५,१ । “ऋधगित्या स मर्त्यः” ऋ० ८,१०१,१ । “ऋधक् सत्यम्” भा० । “ऋधग्यतो ऽनिमिषं रक्षमाणाः” ६१,२ । “ऋधग्यतः सत्येन गच्छतः” भा० । कर्त्तरि क्विन् । ६समृद्धे, ७वर्द्धके च त्रि० । “ऋधगया ऋधगुतायमिष्ठाः” यजु० ८,२० । “ऋधक् समृद्धमयाः” “ऋधक् यत्तं समर्द्धयन्” वेददी० । “ऋधक् सोम ! स्वस्तये” ऋ० ९, ६४,३० । “ऋधक् ऋधून् तथा च” यास्कः० “ऋधगिति पृथग्भावस्यानुप्रवचनम् भवति अथाप्यृध्नोत्यर्थे दृश्यते” भा० । “ऋधग्घुवेम कविनेषितासः” ऋ० ६, ५९,१० । “ऋधक् समृद्धं यथा तथा हुवेम” भा० ।

ऋधत् त्रि० ऋध० शतृ वेदे गणव्यत्यासः । वर्द्धमाने । “दश श्यावा ऋधद्रयोवीतवारास आशवः” ऋ० ८,४६,२२ । “ऋधद्रयोऽवृद्धवेगाः” भा० । रयशब्दो वेगवाची जसः स्थाने प्रथमा । “शमाभिर्ऋधद्वारायाग्नये ददाश” ६,२, २ । “ऋधद्वाराय ऋधत् समृद्धं वारं वरणीयं धनं यस्य” भा० ।

ऋन्फ(म्फ) हिंसायां तुदा० मुचा० सक० पर० सेट् । ऋम्फति आर्म्फीत्—आर्फीत् ऋम्फाम्-बभूव आस चकार आनर्फ

ऋफ दाने हिंसायां निन्दायां युद्धे च सक० श्लाघायाम् अक० तुदा० पर० सेट् । ऋफति आर्फीत् । कविकल्पद्रुमे ऋफधातुस्तदर्थे पा० मते रिफधातुस्तेष्वर्थेषु ऋफधातुस्तु हिंसायामिति भेदः । आनर्फ आनृफतुः ।

ऋबीस न० ऋ+वर्जने भास–अच् पृ० । १पृथिव्यां निरु० तत्स्थे २अग्नौ च । “हिमेनाग्निं घ्रंसमवारयेथां पितुमतीमूर्जमस्मा अधत्तम् । “ऋबीसे अत्रिमश्विनावनीतमुन्निन्यथुः सर्वगणं स्वस्ति” ऋ० १,११६,८ । इमामृचमधिकृत्य यास्केन ऋबीसमपगतभासमन्तर्हितभासं गतभासम् वा इति निरुच्योक्तम् “योऽयं ऋबीसे पृथिव्यामग्निरन्तरोषधिवनस्पतिष्वप्सु तस्मिन्नन्यनुः” “युवमृबीसमुत तप्तमत्रये” ऋ० १०,३९,९ । “तप्तमृबीसमग्निकुण्डम्” भा० । “अत्रिर्यद्वामवरोहन्नृबीसम्” ऋ० ५,७८,४ । “ऋबीसं तुषाग्निम्” भा० । “अनृतातिथ्यपनोदपूतिदार्वीधानर्बीसपक्वनाप्युदकानि वर्जयेत्” कात्या० ४,१०१,५ । “ऋबीसशब्दः पृथिवीवाची “योऽयमृबीसे पृथिव्यामिति” यास्कोक्तेः ऋबीसे यत् पक्वं तिन्दुकादि” कर्कः ।

ऋभु पु० ऋत् स्वर्गे अन्तरिक्षे वा भवति ऋत्+भू–डु । १देवे । तेन ऋभुशब्दस्य स्वर्गवाचित्वं द्रष्टव्यं तच्च प्रमादात् पूर्वमनुक्तमिति तस्य च स्वर्गे पुंस्त्वम् बोध्यम् । “समीचीनास ऋभवः समस्वरन्” ऋ० ८,३,७ । “तं नेमिमृभवो यथा” ऋ० ७५,५ । २मेधाविनि निरु० । “अग्नये ब्रह्म ऋभवस्ततक्षुः” ऋ० १०,८०,७ । “ऋषिर्विप्रः पुर एता जनानामृभुर्धीर उशना काव्येन” ऋ० ९,८७,३ । ३देवानामपि यष्टव्ये देवे । “ऋभवोनाम तत्रान्ये देवानामपि देवताः । तेषां लोकाः परतरे यान् यजन्तीह देवताः” भा० व० १५४५९ । चाक्षुषमन्वन्तरीये ४देवगणभेदे च । “चाक्षुषस्यान्तरे तात ! मनोर्देवानिमान् शृणु । आप्याः प्रभूताः ऋभवः पृथुकाश्च दिवौकसः । लेखानाम महाराज ! पञ्च देवगणाः स्मृताः” हरिवं० ७ । त्रैवर्णिकहीने ५जातिभेदे “ऋभूणां त्वेति रथकृतः” कात्या० ४,९,५, “ऋभुः सौधन्वन सात्वतापरपर्यायस्त्रैवर्णिकेभ्यो हीनो नियतः कश्चिज्जाति विशेषः इति पार्थसारथिमिश्राः” कर्कः । तृतीयसवनीये सुधन्वनः पुत्ररूपे ६देवभेदे च । “इहोपयात शवसो नपातः सौधन्वना ऋभवो माप भूत” ऋ० ४,३५,१, एतत्सूक्ते च नवर्चैस्तस्यैव गुणादिवर्णनम् । ऋ+भा–डु । ७उरुभासमाने त्रि० “ऋभुमृभुक्षणो रयिम्” । ऋ० ४, ३७,५, “ऋभुमुरुभासमानम्” भा० ऋभुरस्त्यस्य छन्दस्यतया मतुप् । ऋभुमत् ऋभुदेवताके त्रि० । “ऋभुमन्तं वाजवन्तं त्वा कवे” ! ऋ० २,५२,६ । ऋभुणा दृष्टं साम अण् । आर्भव तद्दृष्टे सामभेदे आर्भवशब्दे उदा० । क्विप् । ऋभूरपि देवे पु० ।

ऋभुक्ष पु० ऋभवो देवाः क्षियन्ति वसन्त्यत्र क्षि+आधारे बा० ड । १स्वर्गे २वज्रे ३इन्द्रे च रायमुकुटः । ऋभुनाम्ना क्षीयते गम्यते कर्मणि बा० ड । ऋभुनामके देवे “उप नो वाजा अध्वरमृभुक्षाः” ऋ० ४,३७,१, “ऋभुक्षा ऋभवः” भा०

ऋभुक्षन् पु० ऋभुनाम्ना क्षायते क्षै–क्षये धातूनामनेकार्थत्वात् ख्यातौ कर्मणि कनिन् । ऋभुनामख्याते देवभेदे “स्तोमो-याजा ऋभुक्षणो ददे वः । “ऋभुमृभुक्षणो रयिम्” ऋ० ४,३७,२,५ ।

ऋभुक्षिन् पु० ऋभुक्षः वज्रं स्वर्गोवाऽस्यास्ति इनि । इन्द्रे स्वादौ ऋभुक्षा ऋभुक्षाणौ शसादावजादौ टिलोपः ऋभुक्ष इत्यादि “इन्द्रो विभ्वां ऋभुक्षा वाजो अर्य्यः” ऋ० ७,४८,३, “ऋभुक्षेवाचरति ऋभुक्षिन्+आचारे क्विप् अनुनासिकदीर्घः ऋभुक्षीयति । ततः क्विप् ऋभुक्षीन् तद्वदाचारान्विते त्रि० ।

ऋभ्व त्रि॰ उरुभूतः पृषो॰। महति उरुभूते निरु॰। "स्तुषेय्यं पुरुवर्पसमृभ्वमिनतममाप्त्यमाप्त्यानाम्" ऋ॰ १०,१२०,६, अस्या ऋचः यास्केन "स्तोतव्यं बहुरूपमुरुभूतमीश्वरतममाप्तव्यमाप्तव्यानामिति" क्रमेण पदानि निरुक्तानि। ऋभ्वः उरुभूत इवाचरति ऋभु+आचारे क्विप् ततो वा॰ अतु। ऋभ्वत् उरुभूते महति। "पुरुहूतोयः पुरुगूर्त्त ऋभ्वाँ एकः पुरुप्रशस्तः" ऋ॰ ६,२४,२, "ऋभ्वान् महान्" भा॰ अत्वन्तत्वान्नान्त्यलोपः। कनिन्। ऋभ्वन् तदर्थे "जुषद्वव्या मनुषस्योर्द्ध्वस्तस्थावृभ्वा यज्ञे" ऋ॰ १०,२०,५ बा॰ असच्। ऋभ्वस अतिदृढे। "सत्यशवसमृभ्वसम्" ऋ॰५,५२,८, "ऋभ्वसम् अतिमहद्दमिति" भा॰ "इन्द्रं न यज्ञैश्चितयन्त आयवः स्तोमेभिरिन्द्रमायवः। विश्वगूर्त्तमृभ्वसमधृष्टम्" ऋ॰८,७०,२,

ऋश हिंसायां गतौ च सौ॰पर॰सक॰सेट्। अर्शति आर्शीत् आनर्श आनृशतुः अर्शः। ऋश्यः।

ऋश्य त्रि॰ ऋश-कर्मणि क्यप्। १हिंस्ये २मृगे पुंस्त्री शब्दरत्ना॰। स्त्रियां जातित्वेऽपि योपधत्वात् टाप्। "ऋश्यो न तृष्यन्नवपानमा गहि" ऋ॰८,४,१०, "ऋश्यः ऋश्याख्यो मृग इव तृष्यन्" भा॰ "वसुभ्य ऋश्यानालभेत" यजु॰ २४,२७, "ऋश्यो मयूरः सुपर्णस्ते गन्धर्वाणाम्" यजु॰ २४, २७, ततः चतुरर्थ्याम् ऋश्या॰ क। ऋश्यक तत्सन्निकृष्टदेशादौ। भावे क्यप्। २हिंसायां न॰। ऋश्यं हिंसां पतनेन ददाति दा—क। ऋश्यद कूपे पु॰ "युवं बन्दनमृश्यदादुदूपथुः" ऋ॰ १०,३९,८। "ऋश्यदात् कूपात्" भा॰।

ऋश्यपाद् त्रि॰ ऋश्यस्येव पादावस्य अन्त्यलोपः समा॰। मृगवदृश्यपादयुक्ते स्त्रियां ङीप् पद्भावश्च। "ऋश्यपदीं वृषदतीं गोषेधां विधमाम्युत" अथ॰ १,१८४,

ऋश्यादि पु॰ पाणिन्युक्ते चतुरर्थ्यां कप्रत्ययनिमित्ते शब्दगणे स च गणः। "ऋश्य, न्यग्रोध, शर, निलीन, निवास, निवात, निधान, निबन्ध, विबद्ध, परिगूढ, उपगूढ, असनि, सित, मत वेश्मन्, उत्तराश्मन्, अश्मन्, स्थूल, बाहु, खदिर, शर्करा, अनडुह्, अरडु, परिवंश, वेणु. वीरण, खण्ड, दण्ड, परिवृत्त, कर्दम, अंशु"।

ऋष गतौ वधे च तुदा॰पर॰सक॰सेट्। ऋषति आर्षीत्। आनर्ष आनृषतुः अर्षिता ऋष्यात् अर्षिष्यति आर्षिष्यत्। अर्षितव्यः अर्षणीयः ऋष्यः। अर्षिता ईदित् ऋष्टः ऋष्टवान् ऋष्टिः। "शृङ्गाभ्यां रक्ष ऋषत्यवतिम्" अथ॰६, ४,१७। "अथ दक्षिणायुग्यस्यार्षति" शत॰ ब्रा॰ ५, ४,३,८। "ह्रदं न हि त्वा न्यृषन्त्यूर्मयः" ऋ॰१,५२,७. "यदुदर्य्यस्य मेदस परिशिष्यते तद्गुदे न्यृषेत्" शत॰ ब्रा॰२,८,४,५। "अथ पर्य्यृषति" इत्युपक्रम्य "समं भूमिं पर्यृषणं करोति" २,६,१,१८। अस्य वेदे भ्वादित्वमपि दृश्यते। गणव्यत्यासात् साधुः। "अर्षन्त्वापस्त्वयेह प्रसूताः" ऋ॰ २,३०९। "ऋषो गतौ व्यत्ययेन शप्" भा॰ "तस्मा आपोघृतमर्षन्ति सिन्धवः" १,१२५,५। "मही न धारात्यन्धो अर्षति" ९,८६,४४। "एता अर्षन्त्यनला भवन्ती" ४,१८,६। "एता अर्षन्ति हृद्यात् समुद्रात्" ४,५८,५। "शशमास्कन्दमर्षति" यजु॰ २३,५५।

अभि+आभिमुख्येन गतौ "अभ्यर्षत सुष्टुतिं गव्यमाजिमस्मासु" ऋ॰४,५८,१०। "कृण्वन्ति वरिवो गवे अभ्यर्षन्ति सुष्टुतिम्" ९,६२,३।

नि+परि+सम्+इत्यादौ गत्यर्थधातोरिवार्थे। "गुहाकरिन्द्रं याता वीर्य्येण न्यृष्टम्" ऋ॰४,१८,०। "न्यृष्टं नितरां प्राप्तम्" भा॰। "अयं निधिः सरमे अद्रिबुध्नोगोभिरश्वेभिर्वसुभिर्न्यृष्टः" १०,१०८,७।

ऋषङ्गु पु॰ यदुवंश्ये राजभेदे। "यदुस्तस्मान्महासत्वः क्रोष्टा तस्माद्भविष्यति" इत्युपक्रम्य "वृजिनीवतस्तु भविता ऋषङ्गुरपराजितः। ऋषङ्गोर्भविता पुत्रस्ततश्चित्ररथस्तथा" भा॰ अनु॰ १४७ अ।

ऋषभ पु॰ ऋष—अभक्। १ओषधिभेदे, ओषधिभेदश्च द्रव्यगणान्तर्गत। स च सुश्रु॰दर्शितः यथा "अथातो द्रव्यसंग्रहणीयमध्यायं व्याख्यास्यामः। समासेन सप्तत्रिंशद्द्रव्यगणा भवन्ति। तद्यथा विदारिगन्धा विदारी सहदेवा विश्वदेवाश्वदंष्ट्रा प्रत्यकपर्णी शतावरी सारिवा कृष्णसारिवा जीवकर्षभकौ महासहा क्षुद्रसहा वृहत्यौ पुनर्णवैरण्डो हंसपादी वृश्चिकाल्यृषभी चेति"। तल्लक्षणाद्युक्तं भावप्र॰ "ऋषभातिविषा कृष्णा काकनाशा च वामरैः। जीवकर्षभकौ ज्ञेयौ हिमाद्रिशिखरोद्भवौ। रसोनकन्दवत्कन्दौ निःसारौ सूक्ष्मपत्रकौ। जीवकः कूर्चकाकार ऋषभो वृषशृङ्गवत्। जीवकोमधुरः शृङ्गी ह्रस्वाङ्गः कूर्चशीर्षकः। ऋषभो वृषभोवीरो विषाणी ग्राम्य इत्यपि। जीवकर्षभकौ बल्यौ शीतौ शुक्रकफप्रदौ। मधुरौ पित्तदाहघ्नौ कासवातक्षयापहौ"। अयञ्चाष्टवर्गान्तर्गतः। "जीवकर्षभकौ मेदे काकोल्यौ ऋद्धिवृद्धिके। अष्टवर्गोऽष्टभिर्द्रव्यैः कथितश्चरकादिभिः" भावप्र॰। "राज्ञामप्यष्टवर्गस्तु यतोऽयमतिदुर्लभः। तस्मादस्य प्रतिनिधिं गृह्णीयात्तद्गुणं

भिषक्। मेदा जीवककाकोलो ऋद्धिर्वृद्धिस्तथाऽपरौ। वरीविदार्य्यश्वगन्धावाराहीस्तु क्रमात् क्षिपेत्” भावप्र०। २मुनिभेदे च। ऋषभकूटशब्दे मुनिभेदो दृश्यः। वर्षति रेतः वृष—अभक् पृ०वलोपः। ३वृषभे “ते ते भवन्त्वृक्षण ऋषभासो वशा उत”ऋ० ६,१६,४७। ऋषभासो रेतोवर्षकावृषभाः” भा०। “उप ऋषभस्य रेतस्युपेन्द्र! तव वीर्य्ये”२८,८ ‘ततो नियुक्ताः पशवो यथा शास्त्रं मनीषिभिः। तं तं देवं समुद्दिश्य पक्षिणश्च यथाविधि ऋषभाः शास्त्रपठितास्तथा जलचराश्च ये” सर्वांस्तानभ्ययुञ्जंस्ते तत्राग्निचयकर्मणि” भा० आश्व०८८। अश्वमेधस्य वृषभादयश्च सलक्षणा अश्वमेधशब्दे दर्शिताः अस्य व्याघ्रादिषु पाठात् उपमितसमासः। नरःऋषभ इव वाक्ये नरर्षभः एवं राजर्षभः पुरुषर्षभ इत्यादि। सर्वत्र प्राशस्त्यं तेन द्योत्यते। ‘स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः। सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः” अमरोक्तेः। क्वचिद्वाक्येऽपि श्रेष्ठत्वं द्योत्यते। “सात्वतामृषभं सर्वे भूतावासममंसत’ भाग० ३०२,१०। “स्वलक्षणा प्रादुरभूत् किलास्यतः स मे ऋषीणामृषभः प्रसीदतु”भाग० २,४,२२। गोलक्षणान्तर्गतवृषभलक्षणमुक्तं वृहसं०‘सास्राविलरूक्षाक्ष्यो मूषकनयनाश्च न शुभदा गावः। प्रचलच्चिपिटविषाणाः करटाः खरसदृशवर्णाः। दशसप्तचतुर्दन्त्यः प्रलम्बमुण्डानना विनतपृष्ठाः। ह्रस्वस्थूलग्रीवा यवमध्या दारितखुराश्च। श्यावातिदीर्घजिह्वा गुल्फैरतितनुभिरतिवृहद्भिर्वा। अतिककुदाः कृशदेहा नेष्टा हीनाधिकाङ्ग्यश्च। वृषभोऽप्येवं स्थूलातिलम्बवृषणः सिराततक्रोडः। स्थूलसिराचितगण्डस्त्रिस्थानं मेहते यश्च। मार्जाराक्षः कपिलः करटो वा न शुभदो द्विजस्येष्टः। कृष्णौष्ठतालुजिह्वः श्वसनो यूथस्य घातकरः। स्थूलशकृन्मणिशृङ्गः सितोदरः कृष्णसारवर्णश्च। गृहजातोऽपि त्याज्यो यूथविनाशावहो वृषभः। श्यामकपुष्पचिताङ्गो भस्मारुणसन्निभो विड़ालाक्षः। विप्राणामपि न शुभं करोति वृषभः परिगृहीतः। ये चोद्धरन्ति पादान् पङ्कादिव योजिताः कृशग्रीवाः। कातरनयना हीनाश्च पृष्ठतस्ते न भारसहाः। मृदुसंहतताम्रोष्ठास्तनुस्फिचस्ताम्रतालुजिह्वाश्च। तनुह्रस्वोच्चश्रवणाः सुकुक्षयः स्पृष्टजङ्घाश्च। आताम्रसंहतखुरा व्यूढोरस्का वृहत्ककुद्युक्ताः। स्निग्धश्लक्ष्णतनुत्वग्रोमाणस्ताम्रतनुशृङ्गाः। तनुभूस्पृग्वालधयो रक्तान्तविलोचना महोच्छ्वासाः। सिंहस्कन्धास्तन्वल्पकम्बलाः पूजिताः सुगताः। वामावर्तैर्वामे दक्षिणपार्श्वे च दक्षिणावर्तैः। शुभदा भवन्त्यनडुहो जङ्घाभिश्चैणकनिभाभिः। वैदूर्य्यमल्लिकाबुद्बुदेक्षणाः स्थूलनेत्रवर्त्माणः। पार्ष्णिभिरस्फुटिताभिः शस्ताः सर्वेऽपि भारवहाः। घ्राणोद्देशे सबलिर्मार्जारमुखः सितश्च दक्षिणतः। कमलोत्पललाक्षाभः सुबालधिर्वाजितुल्यजवः। लम्बैर्वृषणैर्मेषोदरश्च सङ्क्षिप्तवङ्क्षणक्रोडः। ज्ञेयो भाराध्वसहो जवेऽश्वतुल्यश्च शस्तफलः। सितवर्णः पिङ्गाक्षस्ताम्रविषाणेक्षणो महावक्त्रः। हंसो नाम शुभफलो यूथस्य विवर्धनः प्रोक्तः। भूस्पृग्वालधिराताम्रवङ्क्षणो रक्तदृक् ककुद्मी च। कल्माषश्च स्वामिनमचिरात् कुरुते पतिं लक्ष्म्याः। यो वा सितैकचरणो यथेष्टवर्णश्च सोऽपि शस्तफलः। मिश्रफलोऽपि ग्राह्यो यदि नैकान्तप्रशस्तोऽस्ति”। “ऋषभाख्यमेतदुदितं सजसाः सगौ चेत्”इत्युक्ते ४छन्दोभेदे ५कर्णच्छिद्रे ६कुम्भीरपुच्छे मेदि० ७पर्वतभेदे धरणी। ८वराहपुच्छे ९जिनभेदे च हेम० “नाभिमूलात् यदा वायुरुत्थितः कुरुते ध्वनिम्। वृषभस्येव निर्याति हेलया ऋषभः स्मृतः”इति सङ्गीतदा० उक्ते १०स्वरभेदे। “निषादर्षभगान्धारषड्जमध्यमधैवताः। पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताःस्वराः” अमरः। ११भगवदवतारभेदे स च नाभेर्मेरुदेव्यामजान भाग०५।६ अ०।“नाभिरपत्यकामो मेरुदेव्या भगवन्तं यज्ञपुरुषमवहितात्माऽयजत्” इत्युपक्रम्य तपःप्रसन्नो भगवांस्तयोः प्रत्तयाऽवतीर्णः इत्युक्तं तत्रैव। यथा “भवद्भिरवितथगीर्भिर्वरमसुमभियाचितो यदमुष्यात्मजो मया सदृशो भूयादिति’ १८। यथाहमेवाभिरूपश्च कैवल्यात् १९ अथापि ब्रह्मवादो न मृषा भवितुमर्हति ममैव हि मुखं यद्द्विजदेवकुलम्। तत आग्नीध्रीयेऽंशकलयाऽवतरिष्याम्यात्मतुल्यमनुपलभमान इति निशामयन्त्या मेरुदेव्याः पतिमभिधायान्तर्दधे भगवान्! वर्हिषि तस्मिन्नेव विष्णुदत्त भगवान् परमर्षिभिः प्रसादितो नाभेः प्रियचिकीर्षया तदवरोधायने मेरुदेव्यां धर्मान् प्रदर्शयितुकामो वातरशनानां श्रमणानामृषीणामूर्द्ध्वमन्थिनां शुक्लया तन्वाऽवततार” ६अ० “शुक उवाच अथ तस्योत्पत्त्यैवाभिव्यज्यमानभगवल्लक्षणं साम्योपशमवैराग्यैश्वर्य्यमहाविभूतिभिरनुदिनमेधमानानुभावं प्रकृतयः प्रजा ब्राह्मणा देवताश्चावनितलसमवनायातितरां जगृधुः। तस्य ह वा इत्थं वर्ष्मणा वरीयसा वृहच्छ्लो-

केन च ओजसा बलेन श्रिया यशसा वीर्य्यशौर्य्याभ्याञ्च पिता ऋषभ इतीदं नाम चकार । यस्य हीन्द्रः स्पर्द्धमानो भगवान् वर्षे न ववर्ष तदवधार्य्य भगवानृषभदेवो योगेश्वरः प्रहस्यात्मयोगमायया स्वं वर्षमजनाभं नामाभ्यवर्षत् । नाभिस्तु यथाभिलषितं सुप्रजास्त्वमवरुध्यातिप्रमोदभरविह्वलो गद्गदाक्षरया गिरा स्वैरं गृहीतनरलोकसाधर्म्यं भगवन्तं पुराणपुरुषं मायाविलसितमतिर्वत्स तातेति सानुरागमुपलालयन् परां निर्वृतिमुपगतः । विदितानुरागमापौरप्रकृतिजनपदो राजा नाभिरात्मजं समयसेतुरक्षायामभिषिच्य ब्राह्मणेषूपनिधाय सह मेरुदेव्या विशालायां प्रसन्ननिपुणेन तपःसमाधियोगेन नरनारायणाख्यं भगवन्तं वासुदेवमुपासीनः कालेन तन्महिमानमवाप । यस्य ह पाण्डवेय ! श्लोकावुदाहरन्ति । को नु तत् कर्म राजर्षेर्नाभेरन्वाचरेत् पुमान् । अपत्यतामगाद्यस्य हरिः शुद्धेन कर्मणा । ब्रह्मण्योऽन्यः ! कुतो नाभेर्विप्रा मङ्गलपूजिताः । यस्य बर्हिषि यज्ञेशं दर्शयामासुरोजसा । अथ ह भगवानृषभदेवः स्वं वर्षं कर्मक्षेत्रमनुमन्यमानः प्रदर्शितगुरुकुलवासो लब्धवरैर्गुरुभिरनुज्ञातो गृहमेधिनां धर्माननुशिक्षमाणो जयन्त्यामिन्द्रदत्तायामुभयविधलक्षणं कर्मसमाम्नायमभियुञ्जन्नात्मजानामात्मसमानानां शतं जनयामास । येषां खलु महायोगो भरतोज्येष्ठः श्रेष्ठगुण आसीत् येनेदं वर्षेति भारतमिति व्यपदिशन्ति"। १२राजकर्त्तव्ये ऋषभसहस्रादिदक्षिणके एकाहसाध्ये यागभेदे "ऋषभगोसवौ" कात्या० २२,११,२, "ऋषभश्च गोसवश्च क्रतू भवतः" कर्कः "पूर्वौरात्रः"४ । "पूर्वः ऋषभसंज्ञोरात्रः" कर्कः "दक्षिणा ऋषभसहस्रं द्वादशं वा शतम्" ५ । "ऋषभाणां सहस्रं द्वादशाधिकं शतं वा" संग्रहः । १२ यशतरपुत्रे नृपभेदे च । "एकविंशस्तोमेन ऋषभो याशतर ईजे शिक्रानां राजा तदेतद्गाथयाऽभिगीतम् । याशतुरे यजमाने ब्रह्माण ऋषभे जनाः । अश्वमेधे धनं विप्रा विभजन्तेस्म दक्षिणाः" शत०१२,५,४,१५,

ऋषभकूट पुं० हेमकूटपर्वते भा०व०११०अ०। "पर्वतं स समासाद्य हेमकूटमनामयम् । अचिन्त्यानद्भुतान् भावान् ददर्श सुबहून् नृप !" इत्युपक्रम्य तदाश्चर्य्यमूलप्रश्ने युधिष्ठिरं प्रति लोमशवाक्यं यथा

"अस्मिन्नृषभकूटेऽभूदृषभोनाम तापसः । अनेकशतवर्षायुस्तपस्वी कोपनोभृशम् । स वै सम्भाष्यमाणोऽन्यैः कोपाद्गिरिमुवाच ह । य इह व्याहरेत् कश्चिदुपलानुत्सृजेत्स्व। वातञ्चाहूय मा शब्दमित्युवाच स तापसः । व्याहरंश्चेह पुरुषो मेघशब्देन वार्य्यताम् । एवमेतानि कर्माणि राजंस्तेन महर्षिणा । कृतानि कानि चित् क्रोधात् प्रतिषिद्धानि कानि चित् । नन्दां त्वभिगता देवा पुरा राजन्निति श्रुतिः । अन्वपद्यन्त सहसा पुरुषा देवदर्शिनः । ते दर्शनं त्वनिच्छन्तो देवाः शक्रपुरोगमाः । दुर्गञ्चक्रुरिमं देशं गिरिप्रत्यूहरूपकम् । तदा प्रभृति कौन्तेय ! नरा गिरिमिमं सदा । नाशक्नुवन्नभिद्रष्टुं कुत एवाधिरोहितुम् । नातप्ततपसा शक्यो द्रष्टुमेष महागिरिः । आरोढुं वाऽपि कौन्तेय ! तस्मान्नियतवाग्भव । इह देवास्तदा सर्वे यज्ञानाजह्रुरुत्तमान् । तेषामेतानि लिङ्गानि दृश्यन्तेऽद्यापि भारत ! । कुशाकारेव दूर्वेयं संस्तीर्णेव च भूरियम् । यूपप्रकारा बहवो वृक्षाश्चेमे विशाम्पते ! । देवाश्च ऋषयश्चैव वसन्त्यद्यापि भारत ! ।"

ऋषभगजविलसित न० "भत्निनगैः स्वरात् स्वृषभगजविलसितमिति" वृ०र०उक्ते षोड़शाक्षरपादके वर्णवृत्तभेदे ।

ऋषभतर पु० तनुः ऋषभः तनुत्वे ष्टरच् । भारवहने मन्दशक्तौ वृषभे । जातित्वेन षित्त्वात् स्त्रियां ङीष् । वृषभतरी ।

ऋषभद्वीप पु०न० ऋषभ इव श्वेतः द्वीपः । द्वीपभेदे श्वेतद्वीपे यत्र क्रौञ्चपर्वतोऽस्ति स च कुमारेण विदारितः "ऋषभद्वीपमासाद्य सेव्यं क्रौञ्चनिसूदकम्" भा०व०८४अ० ।

ऋषभध्वज पु० ऋषभो वृषभो ध्वजोऽस्य । वृषवाहने १महादेवे । ऋषभकेतनादयोऽप्यत्र । २अर्हद्विशेषे मेदिनिः ।

ऋषभी स्त्री ऋषभ+गौरा०ङीष् जातौ वा ङीष् । १नराकारायां स्त्रियाम् २शूकशिम्ब्याम् ३शिरालायाम् ४विधवायाञ्च मेदिनिः । ५ऋषभजातिस्त्रियां स्त्रीगव्याम् ६कपिकच्छ्वाञ्च । ऋषभशब्दे उदा० ।

ऋषि पु० ऋषति ज्ञानेन संसारपारं ऋषी गतौ कि । ज्ञानेन संसारपारगते १वशिष्ठादौ २शास्त्रकृदाचार्य्ये ३वेदे ४किरणे च तस्य व्युत्पत्तिर्यथा । ऋषी हिंसा गतौ धातुर्विद्यासत्यतपःश्रुतिः । एष सन्निचयो यस्मात् ब्राह्मणस्य ततस्त्वृषिः । निवृत्तसमकालं तु बुद्ध्या व्यक्तिरृषिस्त्वयम् । ऋषन्ति परमां यस्मात् परमर्षिस्ततः स्मृतः । गत्यर्थादृषतेर्धातोर्नामनिर्वृत्तिकारणम् । यस्मादेतत् स्वतम्भूतस्तस्माच्च ऋषिता मतेति" मत्स्य०पु०१२०अ० "अजान् ह वै पृश्नींस्तपस्यमानान् ब्रह्म स्वयम्भ्वभ्यानर्षत्ते ऋषयोऽभवन् तदृषीणामृषित्वम्" ऐत०ब्रा० इत्यादिरप्यत्र "विद्यानिदग्धमतयोविषयः प्रसिद्धाः" भरतः । "सप्त ब्रह्मर्षिदेवर्षिम-

ह्र्षिपरमर्षयः। काण्डर्षिश्च श्रुतर्षिश्च राजर्षिश्च क्रमावराः” रत्नकोषोक्तं सप्तविध ऋषिर्भवति। तेषां विशेषः त्रिका०उक्तः यथा “व्यासाद्यास्तु महर्षयः। परमर्षयस्तु भेलाद्याः देवर्षयः कणादयः। ब्रह्मर्षयो वसिष्ठाद्याः सुश्रुताद्याः श्रुतर्षयः। ऋतपर्णादयो राजर्षयः काण्डर्षयस्तमो। जैमिन्य द्याः” वसिष्ठाद्याश्च मरीच्याद्याः दश। “भृगुर्मरीचिरत्रिश्च अङ्गिरा पुलहः क्रतुः। मनुर्दक्षो वसिष्ठश्च पुलस्त्यश्चेति ते दश। ब्रह्मणो मानसा ह्येते उत्पन्नाः स्वयमीश्वराः। परत्वेनर्षयस्तस्माद्भूतास्तस्मान्महर्षयः” मत्स्य१०१२०अ०। तेषां पुत्राणां तु तपसैव ऋषित्वं यथोक्तं तत्रैव “ईश्वराणां सुतास्तेषामृषयस्तान् निबोधत। काव्यो वृहस्पतिश्चैव कश्यपश्च्यवनस्तथा। उतथ्यो वामदेवश्च अगस्त्यः कौशिकस्तथा। कर्द्दमो बालखिल्याश्च विश्रवाः शक्तिवर्चसः। इत्येते ऋषयः प्रोक्तास्तपसा ऋषितां गताः”। किन्तु मरीच्यादीनामेव ऋषित्वं भूरि प्रसिद्धम्। तत्र भोगसमाप्तौ नक्षत्ररूपेण गगनमण्डले उत्तरस्यां सारुन्धतीकाः स्थिताश्चरन्त्यन्ते तेषां च गति कालसहितचारादि निरूपितं वृह० सं० यथा “सैकावलीव राजति ससितोत्पलमालिनी सहासेव। नाथवतीव च दिग्यैः कौवेरी सप्तभिर्मुनिभिः। ध्रुवनायकोपदेशान्नरिनर्त्तीवोत्तरा भ्रमद्भिश्च। यैश्चारमहं तेषां कथयिष्ये वृद्धगर्गमतात्। आसन्मघासु मुनयः शासति पृथ्वीं युधिष्ठिरे नृपतौ। षड्द्विकपञ्चद्वियुतः (२५२६) शककालस्तस्य राज्ञश्च। एकैकस्मिन्नृक्षे शतं शतं ते चरन्ति वर्षाणाम्। प्रागुत्तरतश्चैते सदोदयन्ते ससाध्वीकाः। पूर्वे भागे भगवान् मरीचिरपरे स्थितो वसिष्ठोऽस्मात्। तस्याङ्गिरास्ततोऽत्रिस्तस्यासन्नः पुलस्त्यश्च। पुलहः क्रतुरिति भगवानासन्नानुक्रमेण पूर्वाद्याः। तत्र वसिष्ठं मुनिवरमुपाश्रितारुन्धती साध्वी। उल्काशनिधूमाद्यैर्हता विवर्णा विरश्मयो ह्रस्वाः। हन्युः स्वं स्वं वर्गं विपुलाः स्निग्धाश्च तद्वृद्ध्यै। गन्धर्वदेवदानवमन्त्रौषधिसिद्धयक्षनागानाम्। पीड़ाकरो मरीचिर्ज्ञेयो विद्याधराणां च। शकयवनदरदपारतकाम्बोजांस्तापसान् वनोपेतान्। हन्ति वसिष्ठोऽभिहतो विवृद्धिदो रश्मिसम्पन्नः। अङ्गिरसो ज्ञानयुता धीमन्तो ब्राह्मणाश्च निर्दिष्टाः। अत्रेः कान्तारभवा जलजान्यम्भोनिधिः सरितः। रक्षःपिशाचदानवदैत्यभुजङ्गाः स्मृताः पुलस्त्यस्य। पुलहस्य तु मूलफलम् क्रतोस्तु यज्ञाः सयज्ञभृतः”।

एते च स्वायम्भुव मन्वन्तरे सप्तर्षय आसन् ततोऽधिकारसमाप्तौ नक्षत्ररूपेण नभोमण्डले स्थिताः। मन्वन्तरभेदे तु अन्ये एव सप्तर्षयोभवन्ति यथाह हरि०।

१ “मरीचिरत्रिर्भगवानङ्गिराः पुलहः क्रतुः। पुलस्त्यश्च वसिष्ठश्च सप्तैते ब्रह्मणः सुताः। उत्तरस्यां दिशि तथा राजन्। सप्तर्षयः स्मृताः। नाम्ना नाम तथा देवास्त्वासन् स्वायम्भुवेऽन्तरे”।

२ और्वो वसिष्ठपुत्रश्च स्तम्बः काश्यप एव च। प्राणो-वृहस्पतिश्चैव दत्तोनिश्च्यवनस्तथा। एते महर्षयस्तात! वायुप्रोक्ता महाव्रताः।

३ वसिष्ठपुत्राः सप्तासन् वासिष्ठा इति विश्रुताः। हिरण्यगर्भस्य सुता ऊर्ज्जानाम सुतेजसः। ऋषयोऽत्र मया प्रोक्ताः कीर्त्त्यमानान्निबोध तान्।

४ काव्यः पृथुस्तथैवाग्निर्जन्हुर्धामा च भारत। कपीवान कपीवांश्च तत्र सप्तर्षयोऽपरे।

५ वेदबाहुर्यदुध्रश्च मुनिर्वेदशिरास्तथा। हिरण्यरोमापर्जन्य ऊर्द्धबाहुश्च सोमजः। सत्यनेत्रस्तथाऽत्रेय एते सप्तर्षयोऽपरे

६ भृगुर्नभो विवस्वांश्च सुधामा विरजस्तथा। अतिनामा सहिष्णुश्च सप्तैते तु महर्षयः। चाक्षुषस्यान्तरे तात! मनोर्द्देवानिमान् शृणु

७ अत्रिर्वसिष्ठो भगवान् कश्यपश्च महानृषिः गौतमश्च भरद्वाजोविश्वामित्रस्तथैव च। तथैव पुत्रो भगवानृचीकस्य महात्मनः। सप्तमोजमदग्निश्च ऋषयः साम्प्रतं दिवि। मन्वन्तरे व्यतिक्रान्ते चत्वारः सप्तका गणाः। कृत्वा कर्म दिवं यान्ति ब्रह्मलोकमनामयम्। ततोऽन्ये तपसा युक्ताः स्थानं तत्पूरयन्त्युत। अतीतावर्त्तमानाश्च क्रमेणैतेन भारत!। एतान्युक्तानि कौरव्य! सप्तातीतानि भारत!

८ रामो व्यासस्तथात्रेयो दीप्तिमानिति विश्रुतः। भारद्वाजस्तथाद्रौणिरश्वत्थामा महाद्युतिः। गौतमस्यात्मजश्चैव शरद्वान्नाम गौतमः। कौशिको गालवश्चैव रुरुः काश्यप एव च। एते सप्त महात्मानोभविष्या मुनिसत्तमाः। ब्रह्मणः सदृशाश्चैते धन्याः सप्तर्षयः स्मृताः।

९ मेधातिथिस्तु पौलस्त्योवसुः काश्यप एव च। ज्योतिष्मान् भार्गवश्चैव द्युतिमानङ्गिरास्तथा। सवनश्चैव वासिष्ठ आत्रेयो हव्यवाहनः। पौलहः सत्यः इत्येते मुनयो रोहितेऽन्तरे

१० दशमे त्वथ पर्याये द्वितीयस्यान्तरे मनोः। हविष्मान

पौलहश्चैव सुकृतिश्चैव भार्गवः । आपोमूर्त्तिस्तथात्रेयो वासिष्ठश्चाष्टकः स्मृतः । पौलस्त्यः प्रमतिश्चैव नभोगश्चैव काश्यपः । अङ्गिरानभसः सत्यः सप्तैव परमर्षयः ।

११ एकादशे तु पर्य्याये तृतीयस्यान्तरे मनोः । तस्य सप्त ऋषींश्चापि कीर्त्त्यमानान्निबोध मे । हविष्मान् काश्यपश्चापि हविष्मान् यश्च भार्गवः । तरुणश्च तथात्रेयोवासिष्ठ स्तनयः स्तथा । अङ्गिराश्चोद्‌धिष्णश्च पौलस्त्योनिश्चरस्तथा । पुलहश्चाग्नितेजाश्च भव्याः सप्त महर्षयः ।

१२ चतुर्थस्याथ सावर्णं ऋषीन् सप्तश्टणुष्व मे । द्युतिर्वसिष्ठ पुत्रश्च आत्रेयः सुतपास्तथा । अङ्गिरास्तपसोमूर्त्ति स्तपस्वी काश्यपस्तथा । तपोधनश्च पौलस्त्यः पौलहश्च तपोरविः । भार्गवःसप्तमस्तेषाम्”

१३ त्रयोदशेऽथ पर्याये भव्ये मन्वन्तरे मनोः । अङ्गिराश्चैव धृतिमान् पौलस्त्यो हव्यपस्तु यः । पौलहस्तत्त्वदर्शी च भार्गवश्च निरुत्सुकः । निष्प्रकम्पस्तथात्रेयो निर्म्मोहः काश्यपस्तथा । वेतपाश्चैव वासिष्ठः सप्तैते तु महर्षयः ।

१४ चतुर्द्दशेऽथ पर्य्याये भौत्यस्यैवान्तरे मनोः । अग्नीध्रः काश्यपश्चैव पौलस्त्यो भार्गवस्तथा । भार्गवोह्यतिबाहुश्च शुचिराङ्गिरसस्तथा । युक्तश्चैव तथात्रेयः शुक्रोवासिष्ठ एवच । अजितः पौलहश्चैव अन्त्याः सप्तर्षयश्च ते । सप्तर्षीणां उत्तराह्युदयश्च” शत०ब्रा० २,१,२,१ । उक्तः यथा “सप्तर्षीनुह स्म वै पुरर्क्षा इत्याचक्षते अमीह्युत्तराहि सप्तर्षय उद्यन्ति” ।

विश्वामित्रसृष्टाः सप्तर्षयस्तु दक्षिणस्यां नभोमण्डले स्थिताः तदुक्तं “ततो ब्रह्मतपोयोगात् प्रजापतिरिवापरः । ससर्ज दक्षिणे भागे सप्तर्षीनपरान् पुनः” । “मनुमेकाग्रमासीनमभिगम्य महर्षयः” । “ऋषयो दीर्घसन्ध्यत्वाद्दीर्घमायुरवाप्नुयुः” । “ऋषयःसंयतात्मानः इति च” मनुः । “वसन् ऋषिकुलेषु सः” “आक्रोशमृषिपत्नीनाम्” रघुः । “ऋषीन् ज्योतिर्मयान् सप्त” “सप्तर्षिहस्तावचितावशेषाण्यधो विवस्वान् परिवर्त्तमानः” कुमा० । वेदमन्त्रस्य प्रथमं १४द्रष्टरि च । “येन यदृषिणा दृष्टं सिद्धिः प्राप्ता च येन वै । मन्त्रेण, तस्य तत् प्रोक्तमृषिभावः स उच्यते” योगि या० । येन ऋषिणा कल्पादौ योमन्त्रोदृष्टस्तस्य मन्त्रस्य स ऋषिः । तज्ज्ञानावश्यकत्वमार्षशब्दे दर्शितम् तत्र वैदिकमन्त्राणामृषिनिरूपणस्य सर्वानुक्रमणिकादौ दृश्यं संक्षेपेण तत्रोक्तमत्रोच्यते । “सर्वमाग्नेयं गायत्रं गौतमीयम्, सर्वं सावित्रमौष्णिहं भारद्वाजीयम्, सर्वं सौम्यमानुष्टुभमाथर्व्वणिकम् । सर्वं बार्हस्पत्यं बार्हतमाङ्गिरसम्, सर्वं वारुणं पाङ्क्तमालम्बायनीयम्, सर्वमैन्द्रं त्रैष्टुभं याज्ञवल्कीयं, सर्वमादित्यदैवतं जागतम् कौत्सम् । ज्योतिष्टोमे दीक्षाप्रभृति वक्ष्यमाण दीक्षायां भृगुरग्नाविष्णू गायत्री । प्रायणीये, आङ्गिरसोऽदितिरुष्णिक्, क्रये विश्वामित्रः सोमोऽनुष्टुप् । आतिथ्ये वसिष्ठो विष्णुर्बृहती, प्रवर्ग्ये कश्यप आदित्यः पङ्क्तिः । उपसत्स्वात्रेय उपसद्देवता त्रिष्टुप् । अग्नीषोमीयेऽगस्त्योऽग्नीषोमौ जगती । प्रायणीयेऽतिरात्र आग्निवेश्योऽहोरात्रे अतिजगती, चतुर्विंशत्यहे सौकरायणः संवत्सरः शक्करी । अतिप्लवे षड़हे सावर्णोऽर्द्धमासा मासाश्चेति शक्करी, पृष्ठ्ये षड़हे सावकायन ऋतवोऽष्टिः, अभिजिति, प्रियव्रतोऽग्निरत्यष्टिः,स्वरसामसु सरस्वत्यापो धृतिः,विषुवति रौहिणायन आदित्योऽतिधृतिः, विश्वजिति सौभर इन्द्र निर्ऋतिः कृतिः,गो आयुषोर्वार्क्षिर्मित्रावरुणौ प्रकृतिः, दशरात्र आचार्यो विश्वेदेवा आकृतिः, दशरात्रिके पृष्ठ्ये षड़हे मावेयो दिशो विकृतिः, छन्दोगेषु औल्लायन इमे लोकाः संकृतिः,दशमेऽहनि पराशरः संवत्सरोऽतिकृतिः, महाव्रते शैबिनः प्रजापतिरुत्कृतिः, उदयनीयेऽतिरात्रे भौवनायनो वायुश्छन्दांसि सर्वाणि, ऋषिभिरुपलक्षितं वाक्यमृषयः” । अधिकं हेमा० व्रत० दृश्यम् । भावे कि । १५दर्शने १६ज्ञाने च । ऋषिकृत् ऋषिमना: । १७तन्त्रोक्तमन्त्रस्य प्रथमोपासानेन सिद्धे ऋष्यादिशब्दे पु० उदा० ।

ऋषिकुल्या स्त्री ऋषीणां कुल्येव । १नद्यां त्रिका० । ऋषीणां कृतिमा सरित् । मानससरोऽन्तिकस्थे ऋषिनिर्म्मितसरोवरे “तांस्तु सान्त्वेन निर्ज्जित्य मानसं सर उत्तमम् । ऋषिकुल्यास्तथा सर्वा ददर्श कुरुनन्दनः । सरो मानसमासाद्य हाटकानभितः प्रभो ! । गन्धर्वरक्षितं देशमजयत् पाण्डवस्ततः” भा०स० २७ अ० । २तीर्थभेदे “ऋषिकुल्यां समासाद्य वासिष्ठञ्चैव भारत ! वासिष्ठीं समभिक्रम्य सर्वे वर्णा द्विजातयः । ऋषिकुल्यां समासाद्य नरःस्नात्वा विकल्मषः । देवान् पितॄंश्चार्चयित्वा ऋषिलोकं प्रपद्यते” भा०व०८४अ० । “भूमिभागास्तथा पुण्या गङ्गाद्वारमथापि च । ऋषिकुल्यास्तथामेध्या नदी चित्रवहातथा” भा०अनु०१६५अ० । ऋषिकुलाय हितं यत् । ४ऋषिकुलहिते त्रि० । “उभयोरृषिकुल्यायाः सरस्वत्याः सुरोधसोः” भाग०३,२२,२६ । “ऋषिकुल्यायाः ऋषिकुलहितायाः सरस्वत्याः” श्रीधरः । ऋषिकुलमर्हति

यत्। ५ऋषिकुलयोग्ये त्रि०। “अथ तस्योशतीं देवी-मृषिकुल्यां सरस्वतीम्” भाग० ३,१६,१३,। सा च “भूम्न ऋषिकुल्यायामुद्गीथस्ततः प्रस्तारो देवकुल्यायाम्” भाग० ५,१५,६। भारतवर्षस्थे ६महानदीभेदे तत्रत्यमहानदीकीर्त्तने भा० ५,१९,१८। चन्द्रवशा ताम्रपर्णीत्युपक्रम्य “ऋषिकुल्याऽद्रिसामा कौशिकी मन्दाकिनीति ताः प्रदर्श्य इति महानद्य इत्युक्तम्।

ऋषिकृत् त्रि० ऋषिं दर्शनं करोति कृ–क्विप् ६त०। सर्व्वद्रष्टरि।“ऋषिमनाश्च ऋषिकृत् स्वर्षाः” ऋ०९,९६,१८,

ऋषिगिरि पु० गिरिव्रजाख्यमागधदेशस्थजरासन्धपुरसन्निकृष्टस्येषु पञ्चसु पर्व्वतेषु मध्ये पर्वतभेदे “एष पार्थ! महान् भाति पशुमान्नित्यमम्बुमान्। निरामयः सुवेश्माढ्यो निवेशो मागधः शुभः। वैहारोविपुलः शैलो वराहो वृषभस्तथा। तथा ऋषिगिरिस्तात! शुभाश्चैत्यकपञ्चमाः। एते पञ्च महाशृङ्गाः पर्व्वता शीतलद्रुमाः। रक्षन्तीवाभिसंहत्य संहताङ्गागिरिव्रजम्” भा०स०२०अ० [रत्नमा०

ऋषिजाङ्गलिकी स्त्री ऋषिप्रिया जाङ्गलिकी। ऋक्षगन्धायाम्

ऋषितर्पण न० ऋषीणां तर्पणम्। ऋषीनुद्दिश्य जलाञ्जलिदाने तद्विधिः आ०त० “कृतोपवीती देवेभ्यो निवीती च भवेत्ततः। मनुष्यांस्तर्पयेद्भक्त्या ऋषिपुत्रानृषींस्तथा। सनकश्च सनन्दश्च तृतीयश्च सनातनः। कपिलश्चासुरिश्चैव वोढुः पञ्चशिखस्तथा। सर्वे ते तृप्तिमायान्तु मद्दत्तेनाम्बुना सदा। मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम्। प्रचेतसं वशिष्ठञ्च भृगुं नारदमेव च। देवान् ब्रह्मऋषीन् सर्वान् तर्पयेदक्षतोदकैः” अक्षता अत्र यवाः “अक्षताश्च यवाः प्रोक्ताः” इत्युक्तेः। तच्च स्नानकाले नित्यं कर्त्तव्यम् यथाह शाता० “तर्पणञ्च शुचिः कुर्यात् प्रत्यहं स्नातकोद्विजः। देवेभ्यश्च ऋषिभ्यश्च पितृभ्यश्च यथाक्रमम्। “नित्यं स्नात्वा शुचिः कुर्याद्देवर्षिपितृतर्पणम्” मनुः। तर्पणस्य प्रधानाङ्गभेदेन द्विविधता तर्पणशब्दे वक्ष्यते।

ऋषिपञ्चमी स्त्री ऋषीणां सप्तर्षीणां पूजाङ्गं पञ्चमी। भाद्रशुक्लपञ्चम्याम्। तत्र हि सप्तर्षीन् प्रतिमास्थान् पूजयित्वाऽकृष्टभूमिजशाकेन वर्त्तनम् कार्यम्। सप्त वर्षाण्येवं कृत्वा अष्टमेऽब्दे सप्तकुम्भस्थितासु प्रतिमासु सप्तर्षीन् संपूज्य तन्मन्त्रेणाष्टोत्तरशतं तिलैर्हुत्वा सप्त ब्राह्मणान् भोजयेदिति विधिः। मूलं हेमाद्रौ व्रतखण्डे दृश्यम्। सा च मध्याह्नव्यापिनी ग्राह्या “पूजाव्रतेषु सर्वेषु मध्याह्नव्यापिनी तिथिरिति” माधवीये हारीतोक्तेः दिनद्वये तथालाभे हेमाद्रिमते परा ग्राह्या “पराविद्धा स्यात् पञ्चमीति” दीपिकोक्तेः माधवमते पूर्व्वा “सर्वत्र पञ्चमी पूर्वा” इत्युक्तेः दुर्म्मशास्त्राञ्च। ‘ऋषिपञ्चमी षष्ठीयुतैव ग्राह्येति’ दिवोदासः। [षपर्ण्याम्” रत्नमा०।

ऋषिप्रोक्ता स्त्री ऋषिणा धन्वन्तरिणा भैषज्याय प्रोक्ता। मा-

ऋषिबन्धु पु० ऋषिर्बन्धुः उत्पादकोऽस्य। १ऋषिवंशजाते ब्राह्मणे २शरभनामके ऋषौ च। “वस्वपाद्रृषे: शरभाय ऋषिबन्धवे” ऋ०८,१००,५। ६त०। ३ऋषिमित्रे च।

ऋषिमनस् पु० ऋषिर्वीर्थदर्शि मनोऽस्य। सर्वार्थदर्शिमनस्के ऋषिकृच्छब्दे उदा०।

ऋषियज्ञ पु० ऋष्युद्देश्यको यज्ञः ऋषिर्वेदस्तदध्ययनरूपो यज्ञो वा। नित्यं गृहस्थकर्त्तव्यपञ्चयज्ञान्तर्गते वेदाध्ययनरूपे ब्रह्मयज्ञे “ऋषियज्ञं देवयज्ञं भूतयज्ञञ्च सर्वदा। नृयज्ञं पितृयज्ञञ्च यथाशक्ति न हापयेत्। एतानेके महायज्ञान् यज्ञशास्त्रविदो जनाः”। स्वाध्यायेनार्चयेतर्षीन् होमैर्देवान् यथाविधि। पितॄन् श्राद्धैश्च नॄनन्नैर्भूतानि बलिकर्मणा” मनुः

ऋषिलोक पु० ऋषिभिर्भोग्योलोकः। सत्यलोकसन्निकृष्टस्थे ऋषीणां भोगस्थानभेदे ऋषिकुल्याशब्दे उदा०। स च लोकः शनिलोकादूर्द्ध्वं ध्रुवलोकादधोवर्त्तमानः यदाह काशीखण्डे शनिलोकवर्णनानन्तरं “नेत्रयोः प्राघुणीचक्रे ततः सप्तर्षिमण्डलम्” इत्युपक्रम्य ‘शिवशर्मन्! शिवमते! सदा सप्तर्षयोऽमलाः। वसन्तीह प्रजाः स्रष्टुं विनियुक्ताः प्रजासृजा। मरीचिरत्रिः पुलहः पुलस्त्यः क्रतुरङ्गिराः। वशिष्ठश्च महाभागा ब्रह्मणोमानसाः सुताः। सप्त ब्रह्माण इत्येते पुराणे निश्चयं गताः। संभूतिरनसूया च क्षमा प्रीतिश्च सन्नतिः। स्मृतिरूर्जा क्रमादेषां पत्न्योलोकस्य मातरः। एतेषां तपसा चैतद्धार्य्यते भुवनत्रयम्। उत्पाद्य ब्रह्मणा पूर्व्वमेतत् प्रोक्ता महर्षयः। प्रजाः सृजत रे पुत्रा! नानारूपाः प्रयत्नतः” इत्यादिकमुपवर्ण्य “ध्रुवतोरिति संकथां तथा गणयोर्विष्णवयोस्तदावहाम्। ध्रुवलोक उपागतस्तयोर्नयनातिथ्यमतथ्यवर्ज्जितः” १८अ०।

ऋषिश्राद्ध न० ६त०। ऋषीणां कर्त्तव्ये श्राद्धे। तत्र हि बह्वारम्भे लघुक्रिया तदुक्तम् “अजायुद्धे ऋषिश्राद्धे प्रभाते मेघडम्बरे। दम्पत्योः कलहे चैव बह्वारम्भे लघुक्रिया”।

ऋषिसाह् त्रि० ऋषीन् सहते अभिभवति सह्–क्विप् ६त०। ऋषीणां द्रष्टॄणामभिभावके। ‘ऋतस्य धीतिमृषिषाडवीवशत्” ऋ०९,७६,४। “ऋषेसाड” पा० षत्वपक्षे

षत्वमन्यत्र ऋषिषाह्ो इत्यादौ न षत्वमिति भेदः ।

ऋषिषाण पु० ऋषिभिः सायते भज्यते षण–संभक्तौ कर्मणि घञ् वेदे षत्वम् । ऋषिभिः संभक्ते । “ये त्वा सृजन्त्यृषिषाण ! वेधसः” ऋ०९,८६,४। “ऋषिषाण ! ऋषिभिः संभक्त” भा० । लोके तु न षत्वम् ।

ऋषि(ष्टि)षेण पु० नृपभेदे । ततो विदा० अञ् । आर्षि(र्ष्टि)षेणः । तद्गोत्रापत्ये पुंस्त्री० स्त्रियां ङीप् ।

ऋषिष्टुत त्रि० ऋषिभिः स्तुतः वेदे षत्वम् । ऋषिभिः स्तुते “ऋषिष्टुता जरयन्ती” ऋ०७,७५,५ । २अग्नौ च “ऋषिष्टुत इति ऋषयोह्येतमग्रेऽस्तुवंस्तस्मादाहर्षिष्टुत इति” शत० १,४,२,६ । लोके तु न षत्वम् । क्वचिल्लोकेऽपि षत्वम् । “ऋषिष्टुतां विष्णुपदीं पुराणाम्” भा० अनु० २७

ऋषिस्तोम पु० एकाहसाध्ये यागभेदे । “ऋषिस्तोमा व्रात्यस्तोमाश्च पृष्ठ्याहानि” आश्व० श्रौ० २५ । “ऋषिस्तोमा नाम सप्त एकाहाः । उभयत्र सप्तमोज्योतिष्टोमः प्रकृतिः” नारा० ।

ऋषिस्वर पु० ऋषिभिः स्वर्य्यते शब्द्यते स्तूयते स्वृ–कर्मणि अप् ईत० । ऋषिभिः स्तुत्ये । “ऋषिस्वरं चरति यासु नाम ते” ऋ० ५,४४,८ । “ऋषिस्वरमृषिभिः स्तुत्यम्” भा० । [कृते जगत्सर्जने ।

ऋषिसर्ग पु० ऋषिभिः कृतः सर्गः । ब्रह्मणानियुक्तैरृषिभिः

ऋषी स्त्री ऋषि+गौरा० स्त्रियां ङीष् । ऋषिपत्न्याम् ।

ऋषि(षी)क पु० ऋष्यां भवः क वा ह्रस्वः । ऋषिपत्नीगर्भजाते ऋषेरौरसे पुत्रे । “ऋषिपुत्रा ऋषीकास्तु मैथुनात् गर्भसम्भवात् । परत्वेनर्षयस्ते वै भूताये ऋषिकास्ततः। ऋषीकाणां सुताये वै विज्ञेया ऋषिपुत्रकाः” इत्युपक्रम्य कतिचिदृषीनुक्त्वा “तेषां पुत्रानृषीकांस्तु गर्भोत्पन्नान्निबोधत” इत्युपक्रम्य ऋषीणामौरसान् कतिचिदुक्त्वा “इत्येते ऋषिकाः सर्वे सत्येन ऋषितां गताः” मत्स्यपु० १२० अ० ।

ऋषीवत् त्रि० ऋषिः स्तोतृत्वेनास्त्यस्य मतुप् ‘छन्दसीरः’ पा० मस्य वः दीर्घः । ऋषिस्तोतृके ऋषिस्तुते । “शिप्रिन्नृषीवः शचीवो” ऋ० ८,२,२८, “ऋषीवः ! ऋषिभिर्युक्त” भा० । अत्र “मतुवसोरु सम्बुद्धौ छन्दसि” पा० सम्बुद्धौ नस्थाने रुः । ऋषीवःशब्दकल्पनं प्रामादिकमेव । लोके तु ऋषिमत् इत्येव ।

ऋषीवह त्रि० ऋषीन् वहति पचा० अच् ईत० ‘इकोवहेः पीलो” पा० दीर्घः । ऋषिवाहके

ऋष्टु पु० ऋष–गतौ कु । “अनवरतगतियुक्ते सूर्य्यरश्मौ” ज्येष्ठभियौ भानुभिरृष्टूणां पर्य्येति” ऋ०१०,१, “ऋष्टूणां सूर्य्यरश्मीनाम्” भा० १गन्तृमात्रे २महति ३बलवति ४ज्ञातृमात्रे च “अप्यरेभोन जरत ऋष्टूणां जूर्णिर्होत ऋष्टूणाम्” ऋ०१,१२०, “ऋष्टूणामागन्तॄणाम्” ‘ऋष्टूणां महताम् ज्ञानवताञ्च” भा० । ५मन्त्रद्रष्टरि ऋषौ च “इच्योभुवहस्तुऋष्टूणाम्” ऋ०८,७१,१५, ऋष्टूणामृषीणां सूक्तादिद्रष्टॄणाम्” भा० ।

ऋष्टि स्त्री ऋष–करणे क्तिन् । उभयतो धारायुक्ते १खड्गे । २खड्गमात्रे अमरः । ३आयुधमात्रे च “चित्रोवोयामः प्रयतास्वृष्टिषु” ऋ०१,१६६,४, “ऋष्टिषु युद्धस्यहेतिषु” भा० । “अंसेष्वेषां निमिमृक्षुरृष्टयः” ऋ०१,६४,४, “ऋष्वा ऋष्टीरसृक्षत” ऋ०५,५२,६, “ऋष्टीरायुधविशेषान्” भा० “वाशीमन्त ऋष्टिमन्तो मनीषिणः” ऋ०५, ५७,२, “ऋष्टिर्नाम छुरिका” भा० “शरशक्त्यृष्टि हृष्टिभिः” देवीमा० “धनूंषि चापग्राणि शराश्च चित्रा शक्त्यृष्टयः काञ्चनभूषणाश्च” भा० आ० १९४ अ० “कोवोऽन्तर्मरुत ऋष्टिविद्युतः” ऋ०१,१६८,५, ‘ऋष्टिविद्युत ऋष्ट्या मेघभेदनायुधविशेषेण विद्योतमानाः” भा० भावे क्तिच् । ४हिंसायाम् ५अनिष्टोत्पादने । “हिरण्यनिर्णिगुपरा ऋष्टिः” ऋ०१,१६७६, रिष हिंसायां रिष्टिरप्यत्र ‘गोचरे वा विलग्ने वा ये ग्रहा रिष्टिसूचकाः” ज्योति० ६दीप्तौ च । ऋष्टिरस्त्यस्य मतुप् । रिष्टियुक्ते दीप्तियुक्ते त्रि० स्त्रियां ङीप् ‘विद्युद्रथा मरुत ऋष्टिमन्तो दिवोमर्य्या” ऋ० ३,५४,१३ “ऋष्टिमन्तो दीप्तिमन्तः” भा०

ऋष्टिषेण पु० नृपभेदे ततः पाठान्तरे विदा० अञ् शिवा० अण् वा । आर्ष्टिषेण तत्पुत्रे । “आर्ष्टिषेणोहोत्रमृषिर्निषीदन्देवापिर्देवसुमतिं चिकित्वान्” एतामृचमधिकृत्य यास्केनेतिहासो वर्णितः यथा “तत्रेतिहासमाचक्षते देवापिश्चार्ष्टिषेणः शान्तनुश्च द्वौ कौरव्यौ भारतौ बभूवतुः स शान्तनुः कनीयानभिषेचयाञ्चक्रे देवापिस्तपः प्रपेदे ततः शान्तनोराज्ये द्वादश वर्षाणि देवो न ववर्ष तमूचुर्ब्राह्मणाः अधर्मस्त्वया चरितो ज्येष्ठं भ्रातरमन्तरेत्याभिषेचितं तस्मात्ते देवो न वर्षतीति” ऋष्टिषेणस्य नामान्तरं प्रतीप इति । “प्रतिश्रवसः प्रतीपः खलु शैव्यामुपयेमे सुतं नाम तस्यां पुत्रानुत्पादयामास देवापिं शान्तनुं बाह्लीकं चेति देवापिः खलु बाल एवारण्यं विवेश शान्तनुस्तु महीपालो बभूवेति” भा० आ० ९५ । “ऋक्षस्तस्माद्दिलीपोऽभूत् प्रतीपस्तस्य चा-

त्मजः। देवापिः शान्तनुस्तस्य बाह्लीक इति चात्मजाः। पितृराज्यं परित्यज्य देवापिस्तु वनं गतः। अभवच्छान्तनूराजा प्राङ्महाभिषसंज्ञितः। समा द्वादश तद्राज्ये न ववर्ष यदा विभुः। शान्तनुर्ब्राह्मणैरुक्तः परिवेत्ता यदग्रभुक्। राज्यं देह्यग्रजायाशु पुरराष्ट्रविवृद्धये। एवमुक्तो द्विजैर्ज्येष्ठं छन्दयामास सोऽब्रवीत्। नाहं राजा त्वमेवाङ्ग विप्रान् दृष्ट्वा शृणु! प्रभो। तन्मन्त्रिप्रहितैर्विप्रैर्वेदाद्विभ्रंशितोगिरा। वेदवादातिवादान् वै ततो देवो ववर्ष ह। देवापिर्योगमास्थाय कलापग्राममास्थितः। सोमवंशे कलौ नष्टे कृतादौ स्थापयिष्यति" भाग०९,२२, १२ श्लो०। आर्ष्टिषेणशब्दस्यावयवार्थौ निरु० दर्शितौ यथा "आर्ष्टिषेण ऋष्टिषेणस्य पुत्रः इषितसेनस्येति वा। सेना सेश्वरा समानगतिर्वा। पुत्रः पुरु त्रायते निपरणाद्वा पुन्नरकं ततस्त्रायते इति वा"।

ऋष्य पु० ऋष–हिंसायां कर्मणि क्यप् अमग्रादि० यत् नि०। "ऋष्योनीलाण्डकोलोके सरोम इति कीर्त्तितः" इत्युक्ते १मृगभेदे।

ऋष्यकेतु पु० अनिरुद्धे त्रिका०। ऋष्यकेतनादयोऽप्यत्र।

ऋष्यगता स्त्री ऋष्यइव गता प्राप्ता। ऋष्यप्रोक्तावृक्षे शब्दरत्ना०

ऋष्यगन्धा स्त्री ऋष्यस्य गन्ध इव गन्धो यस्याः। १वृद्धदारके वृक्षे। २क्षीरविदार्यां ३महाश्वेतायाम्।

ऋष्यजिह्व न० सुश्रुतोक्ते महाकुष्ठरोगभेदे। सुश्रुते। "सप्त महाकुष्ठानि" इत्युपक्रम्य "तत्र महाकुष्ठान्यरुणोदुम्बरर्ष्यजिह्वकपालकाकणपुण्डरीकदद्रव इति" विभज्य। तत्र "वातेनारुणं, पित्तेनौदुम्बरर्ष्यजिह्वकपालकाकणानि। श्लेष्मणा पौण्डरीकं दद्रुकुष्ठञ्चेति" तन्निदानमुक्त्वा "ऋष्यजिह्वाप्रकाशखरत्वानि ऋष्यजिह्वानि" लक्षितम्।

ऋष्यप्रोक्ता स्त्री ऋषिभिरप्रोक्ता ऋष्य इव प्रोक्ता इति वा। १शतावर्याम्, २अतिबलायाम्, ३शूकशिम्बीवृक्षे च। "ऋष्यप्रोक्ता वयस्या च" सुश्रु०।

ऋष्यमूक पु० ऋष्या मृगो मूको यत्र। "ऋष्यमूकस्तु पम्पायाः पुरतः पुष्पितद्रुमः" इति रामायणोक्ते पम्पासरोऽन्तिकस्थे पर्वतभेदे "ऋष्यमूकमगात् कपिः" भट्टिः। अयञ्च पर्वतः कूर्मविभागे वृह० दक्षिणस्यतयोक्तः "अथ दक्षिणेन" इत्युपक्रम्य "क्रौञ्चद्वीपजटाधरकावेर्यं ऋष्यमूकश्च"।

ऋष्यशृङ्ग पु० ऋष्यस्य मृगभेदस्य शृङ्गमिव शृङ्गमस्य। विभाण्डकमुनिपुत्रे लोमपादराजकन्यायाः शान्तायाः पत्यौ ऋषिभेदे तस्योत्पत्त्यादि भा०व० ११० अ० उक्तं यथा। "विभाण्डकस्य विप्रर्षेस्तपसा भावितात्मनः। अमोघवीर्यस्य सतः प्रजापतिसमद्युतेः। शृणु पुत्रो यथा जात ऋष्यशृङ्गः प्रतापवान्। महाह्रदे महातेजा बालः स्थविरसम्मतः। महाह्रदं समासाद्य काश्यपस्तपसि स्थितः। दीर्घकालं परिश्रान्त ऋषिः स देवसम्मतः। तस्य रेतः प्रचस्कन्द दृष्ट्वाप्सरसमुर्वशीम्। अप्सूपस्पृशतो राजन्! मृगी तच्चापिबत्तदा। सह तोयेन तृषिता गर्भिणी चाभवत्ततः। सा पुरोक्ता भगवता ब्रह्मणा लोककर्त्तृणा। देवकन्या मृगी भूत्वा मुनिं सूय विमोक्ष्यसे। अमोघत्वाद्विधेश्चैव भावित्वाद्दैवनिर्म्मितात्। तस्यां मृग्यां समभवत्तस्य पुत्रो महानृषिः। ऋष्यशृङ्गस्तपोनित्यो वन एवाभ्यवर्त्तत। तस्यर्षेः शृङ्गं शिरसि राजन्नासीन्महात्मनः। तेनर्ष्यशृङ्ग इत्येवं ततः स प्रथितोऽभवत्। न तेन दृष्टपूर्व्वोऽन्यः पितुरन्यत्र मानुषः। तस्मात्तस्य मनो नित्यं ब्रह्मचर्य्येऽभवन्नृप। एतस्मिन्नेव काले तु सखा दशरथस्य वै। लोमपाद इति ख्यातो अङ्गानामीश्वरोऽभवत्। तेन कामात् कृतं मिथ्या ब्राह्मणस्येति नः श्रुतम्। स ब्राह्मणैः परित्यक्तस्तदा वै जगतः पतिः। पुरोहितापचाराच्च तस्य राज्ञो यदृच्छया। न ववर्ष सहस्राक्षस्ततोऽपीड्यन्त वै प्रजाः। स ब्राह्मणान् पर्य्यपृच्छत्तपोयुक्तान्मनीषिणः। प्रवर्षणे सुरेन्द्रस्य समर्थान् पृथिवीपते!। कथं प्रवर्षेत् पर्जन्य उपायः परिदृश्यताम्। तमूचुर्नोदितास्ते न स्वमतानि मनीषिणः। तत्र त्वेको मुनिवरस्तं राजानमुवाच ह। कुपितास्तव राजेन्द्र! ब्राह्मणा निष्कृतिं चर। ऋष्यशृङ्गं मुनिसुतमानयस्व च पार्थिव!। वानेयमनभिज्ञञ्च नारीणामार्जवे रतम्। स चेदवतरेद्राजन् विषयं ते महातपाः। सद्यः प्रवर्षेत् पर्जन्य इति मे नात्र संशयः। एतच्छ्रुत्वा वचो राजन्! कृत्वा निष्कृतिमात्मनः। स गत्वा पुनरागच्छत् प्रसन्नेषु द्विजातिषु। राजानमागतं श्रुत्वा प्रतिसंजहृषुः प्रजाः। ततोऽङ्गपतिराहूय सचिवान्मन्त्रकोविदान्। ऋष्यशृङ्गागमे यत्नमकरोन्मन्त्रनिश्चयम्। सोऽध्यगच्छदुपायन्तु तैरमात्यैः सहाच्युत!। शास्त्रज्ञैरलमर्थज्ञैर्नीत्यां च परिनिष्ठितैः। तत आनाययामास वारमुख्या महीपतिः। वेश्याः सर्व्वत्र निष्णातास्ता उवाच स पार्थिवः। ऋष्यशृङ्गमृषेः पुत्रमानयध्वमुपायतः। लोभयित्वाभिविश्वास्य विषयं मम शोभनाः!"।

ततोवेश्याभिप्रवृत्तेन तस्योपहरणमुपवर्ण्य "ततो राजन्!

कश्यपस्यैकपुत्रं प्रवेश्य योगेन वितुच्य नावम्। प्रमोदयन्त्यो विविधैरुपायैराजग्मुरङ्गाधिपतेः समीपम्। संस्थाप्य तामाश्रमदर्शने तु सन्तारितां न्यायमथातिबुद्धाम्। तीरादुपादाय तथैव चक्रे नाव्याश्रमं नाम वनं विचित्रम्। अन्तःपुरे तं तु निवेश्य राजा विभाण्डकस्यात्मजमेकपुत्रम्। ददर्श देवं सहसा प्रवृष्टमापूर्यमाणञ्च जगज्जलेन। स लोमपादः परिपूर्णकामः सुतां ददावृष्यशृङ्गाय शान्ताम्” अनेनैव याजयित्वा दशरथेन पुत्रचतुष्टयं लेभे इति कथा रामायणादिस्थानुसन्धेया “मान्योमुनिः स्वां पुरमृष्यशृङ्गः” भट्टिः।

ऋष्यादि पु० ऋषिरादिरस्य। वैदिकमन्त्रस्यावश्यज्ञातव्ये ऋषिप्रभृतिपञ्चके तच्च पञ्चकं यथा “आर्षं छन्दश्च दैवत्यं विनियोगस्तथैव च। वेदितव्यं प्रयत्नेन ब्राह्मणेन विपश्चिता” योगिया०। ब्राह्मणेन सह आर्षादिकमित्यर्थः व्यक्तमाह स एव “यस्तु जानाति तत्त्वेन आर्षं छन्दश्च दैवतम्। विनियोगं ब्राह्मणञ्च मन्त्रार्थज्ञानकर्म च। एकैकस्या ऋचः सोऽभिवन्द्योऽतिथिवद्भवेत्। देवतायाश्च सायुज्यं गच्छत्यत्र न संशयः। पूर्वोक्तेन प्रकारेण ऋष्यादीन् वेत्ति यो द्विजः। अधिकारो भवेत्तस्य रहस्यादिषु कर्मसु। मन्त्रे मन्त्रे प्रयत्नेन ज्ञातव्यं ब्राह्मणेन तु। विज्ञानपरिपूर्णस्तु स्वाध्यायफलमश्नुते। छन्दांस्ययातयामानि भवन्ति फलदान्यपि। श्रेयश्च लभते सोऽत्र धर्ममायुश्च विन्दति। दिव्यं वर्षसहस्रन्तु स्वस्थाने ऋषिभिः सह। तिष्ठन्ति तत्र तैः सार्द्धं तत्तुल्यश्चैव जायते”। ऋष्यादिपदार्थानाह स एव। “येन यदृषिणा दृष्टं सिद्धिः प्राप्ता च येन वै। मन्त्रेण, तस्य तत्प्रोक्तमृषिभावस्तदात्मकः। छादनाच्छन्द इत्युक्तं वाससीवाऽथ वा क्रते। आत्मा तु च्छादितो देवैर्मृत्योर्भीतैस्तु वै पुरा। आदित्यैर्वसुभी रुद्रैस्तेन च्छन्द इतीरितम्। यस्य यस्य च देवस्य उद्दिष्टा या च देवता। तदाकारं भवेत्तस्य दैवतं देवतोच्यते। पुरा कल्पे समुत्पन्ना मन्त्राः कर्मार्थमेव च। अनेनेदं तु कर्त्तव्यं विनियोगः स उच्यते। निरुक्तं यस्य मन्त्रस्य समुत्पत्तिः प्रयोजनम्। प्रतिष्ठानं स्तुतिश्चैव ब्राह्मणं त्वभिधीयते। एवं पञ्चविधं प्रोक्तं जपकाले तु सुस्मरेत्। होमे चान्तर्जले योगे स्वाध्याये याजने तथा”।

ऋष्यादिन्यास पु० ऋष्यादीनां न्यासः। तन्त्रोक्ते मूर्द्धादिषु ऋष्यादीनां न्यासे। ऋष्यादिशब्दार्थप्रदर्शनपूर्व्वकं तन्न्यासप्रकारः तन्त्रसा० उक्तः। “महेश्वरमुखाज्ज्ञात्वा यः साक्षात्तपसा मनुम्। संसाधयति शुद्धात्मा स तस्य ऋषिरीरितः। गुरुत्वात् मस्तके चास्य न्यासस्तु परिकीर्त्तितः। सर्वेषां मन्त्रतत्त्वानां छादनात् छन्द उच्यते। अक्षरत्वात् पदत्वाच्च मुखे छन्दः समीरितम्। सर्वेषामेव जन्तूनां भावनात् प्रेरणात्तथा। हृदयाम्भोजमध्यस्था देवता तत्र तां न्यसेत्। ऋषिच्छन्दोऽपरिज्ञानान्न मन्त्रफलभाग्भवेत्। दौर्बल्यं याति मन्त्राणां विनियोगमजानताम्”। तन्त्रान्तरे “ऋषिं न्यसेन्मूर्द्ध्नि देशे छन्दस्तु मुखपङ्कजे। देवतां हृदये चैव बीजन्तु गुह्यदेशके। शक्तिञ्च पादयोश्चैव सर्वाङ्गे कीलकं न्यसेत्”। “आदावृष्यादिकन्यासः करशुद्धिस्ततःपरम्। अङ्गुलिव्यापकन्यासौ हृदादिन्यास एव च। तालत्रयञ्च दिग्बन्धः प्राणायामस्ततःपरम्। ध्यानं पूजा जपश्चेति सर्वतन्त्रेष्वयं विधिः” तन्त्रस०”। तत्तद्देवमन्त्राणां विशेषत ऋष्यादयस्तु तन्त्रसारादौ दृश्याः।

ऋष्व त्रि० ऋष ब—उल्वादयश्च नि०। महति महन्नामसु निरु०। “अजा इन्द्रस्य गिरयश्चिदृष्वाः” ऋ० ६,२४,८, “ऋष्वा महान्तः” भा०। “गम्भीरय ऋष्वया यः” ऋ० ६,१८,१०। “गिरिर्न यः स्वतवाँ ऋष्व इन्द्रः” ऋ० ४,२०,६। “त्वं भुवः प्रतिमानं पृथिव्या ऋष्ववीरस्य पतिर्भूः” ऋ० १,५२,१३। “प्रास्तौदृष्वौजा ऋष्वेभिस्ततक्ष” ऋ० १०,१०५,६। “ऋष्वा ऋष्टीः” ऋष्टिशब्दे

ऋहत् त्रि० रह-शतृ पृ० साधु। ह्रस्वकायादौ। “ऋहन्तं चिदृहते रन्धयानि” १०,२८,९। “ऋहते ह्रस्वकायाऽल्पाय” भा०।

इति वाचस्पत्ये ऋकारादिशब्दार्थसङ्कलनम्।

———

ॠ

ॠकारः स्वरवर्णविशेषः मूर्द्धन्यः स च दीर्घः उदात्तानुदात्तस्वरितभेदात् त्रिविधः पुनः अनुनासिकाननुनासिकभेदेन प्रत्येकं द्विधेति षट्। मातृकान्यासे वामनासायां तस्य न्यस्यतया वामनासाशब्देनाप्यभिधेयता। तस्य कामधेनुतन्त्रे ध्येयस्वरूपमुक्तं यथा। “ॠकारं परमेशानि! स्वयं परमकुण्डलीम्। पीतविद्युल्लताकारं पञ्चदेवमयं

सदा। चतुर्ज्ञानमयं वर्णं पञ्चप्राणयुतं सदा। त्रिशक्तिसहितं वर्णं प्रणमामि सदा प्रिये!"। अस्य प्लुतत्वोक्तिश्चिन्त्या दीर्घस्य द्विमात्रत्वेन त्रिमात्रोच्चार्य्यप्लुताङ्गिसत्वात् आकारभेदाच्च।

ॠ गत्यां क्र्यादि० प्वादि० पर० सक० सेट्। प्वादि० श्नाप्रत्यये ह्रस्वः। ऋणाति ऋणीतः ऋणन्ति। ऋणीयात् ऋणातु ऋणीहि। आर्णीत् आर्णीताम् आर्णन्। आरीत्। आर। आरतुः। अरिता। ईर्य्यात्। अरिष्यति। आरिष्यत्। अरितव्यः अरणीयः आर्य्यः। अरिता। ऋणन्। ईर्णः। अरः।

ॠ अव्य० ऋ-क्विप् बा० इत्वाभावः। १वाक्यारम्भे २रक्षायां मेदि०। ३निन्दायां ४भये च शब्दरत्ना०। ५देवमातरि ६दानवमातरि ७स्मृतौ ८गतौ च स्त्री०वच्चसि न०मेदि०। ९भैरवे १०दनुजे पु० मेदि०।

इति वाचस्पत्ये ॠकारादिशब्दार्थसङ्कलनम्।

ऌ

ऌकारः स्वरवर्णभेदः स च दन्तमूलीयः। उदात्तानुदात्तस्वरितभेदात् त्रिविधः अनुनासिकाननुनासिकभेदात् प्रत्येकं पुनर्द्विधेति षड्विधः। तस्य मातृकान्यासे दक्षगण्डे न्यस्ततया तच्छब्देनाप्यभिधानम्। तस्य ध्येयरूपं कामधेनुतन्त्रे उक्तं यथा। "ऌकारश्चञ्चलापाङ्गि! कुण्डली परदेवता। अत्र ब्रह्मादयः सर्व्वे तयोऽस्ति सततं प्रिये!। पञ्चदेवमयं वर्णं चतुर्ज्ञानमयं सदा। पञ्च प्राणयुतं वर्णं तथागुणत्रयात्मकम्। विन्दुत्रयात्मकं वर्णं पीतविद्युल्लता यथा"। अस्य प्लुतत्वोक्तिश्चिन्त्या एकमात्रत्रिमात्रत्वाभ्यां तयोर्भेदात्। तकाररहितस्तु द्वादशानां बोधक इति सि०कौ० ऋशब्दे विवृतिः।

ऌ अव्य० ऋगतौ ऋ-क्विप् गुणभावः लत्वम्। १देवमातरि २भूमौ ३पर्व्वते च मेदि०।

इति वाचस्पत्ये ऌकारादिशब्दार्थसङ्कलनम्।

ॡ

ॡकारः तन्त्रमते मुग्धबोधमते च स्वरवर्णभेदः पा०मते तस्य दीर्घत्वं नास्ति तेन उदात्तानुदात्तस्वरितभेदात् अनुनासिकानुनासिकभेदाच्च षड्विधः। अत्रेदं बोध्यम् ऌवर्णस्य दीर्घत्वाभावेऽपि "ऌति ॡ वा"वार्त्ति०उक्तेः ऌकारद्वययुत ॡवर्ण एव तत्र विधेयः तत्र लकारद्वयरूपव्यञ्जनद्वयस्य एका मात्रा अचश्चापरा इति द्विमात्रत्वं तेन होॡकारः इत्यादौ दीर्घत्वव्यवहारः। मुग्धबोधे ऌलयमित्युक्तिरपि एकमात्रद्विमात्रत्रिमात्रत्वभेदापेक्षया। तेन न विरोधः। अतएव शिक्षायां "दुःस्पृष्टश्चेति विज्ञेय ऌकारः प्लुतएव वेति"ऋकारऌकारयोः दुःस्पृष्टत्वोक्तिः। दुःस्पृष्टत्वञ्च ईषत्स्पृष्टत्वं तस्य रकारलकारादित्वे एव सम्भवति "अचोऽस्पृष्टायणस्त्वीषन्नेमस्पृष्टाःशलस्तथा" शिक्षायां यवरलानामीषत्स्पृष्टत्वोक्तेः। "तेन ऋकारऌकारयोरीषत्स्पृष्टत्वात् दुःस्पृष्टत्वम्। एवं सर्वसामञ्जस्ये ॡवर्णस्य न दीर्घत्वकल्पनमिति सूक्ष्ममीक्षणीयम्। अस्य च लकारद्वयघटितत्वात् दन्त्यता। अन्ते च स्वरवर्णयोगात् अस्पृष्टत्वम्। तस्य च उदात्तादिभेदैः षड्विधत्वमपि। मातृकान्यासे च तस्य वामगण्डे न्यस्तता तेन तच्छब्देनाप्यस्याभिधानम्। कामधेनुतन्त्रे तस्य ध्येयस्वरूपमुक्तम् यथा "ॡकारं परमेशानि पूर्णचन्द्रसमप्रभम्। पञ्चदेवात्मकं वर्णं पञ्चप्राणात्मकं तथा। गुणत्रयात्मकं वर्णं तथाविन्दुत्रयात्मकम्। चतुर्वर्गप्रदं देवि! ध्यायेत् परमकुण्डलीम्"।

ॡ अव्य० ऌ-रस्य लः। १देवनार्याम् २दैत्यस्त्रियाम् ३दनुजमातरि ४कामधेनुमातरि च स्त्री एकाक्षरकोषः। ५महादेवे पु०एकाक्षरकोषः।

इति वाचस्पत्ये ॡकारादिशब्दार्थसङ्कलनम्।

ए

एकारः स्वरवर्णभेदः एषः "एदैतौ कण्ठतालव्यावित्युक्तेः कण्ठताल्वोः स्थानयोरुच्चार्य्यः । स च दीर्घः द्विमात्रत्वात् उदात्तानुदात्तस्वरितभेदैरनुनासिकाननुनासिकाभेदाभ्याञ्च षड्विधः । तस्य मातृकान्यासे जङ्घोर्ध्वस्थाने न्यस्ततया तच्छब्देनाप्यभिधेयता । तस्य ध्येयरूपं कामधेनुतन्त्रे । "एकारं परमं दिव्यं ब्रह्मविष्णुशिवात्मकम् । रङ्गिनी कुसुमप्रख्यम् पञ्चदेवमयं सदा । पञ्चप्राणात्मकं वर्णं तथा विन्दुत्रयात्मकम् । चतुर्वर्गप्रदं देवि ! ध्यायेत् परम कुण्डलीम्" । एशब्दस्य वाचकाः शब्दास्तन्त्रे उक्ता यथा "एकारो वास्तवं शक्तिर्झिण्टीशौष्ठौ भगं मरुत् । सूक्ष्मो भूतोऽर्द्धकेशी च ज्योत्स्ना श्रद्धा प्रमर्द्दनः । भयं ज्ञानं तथा धीरा जङ्घा सर्वसमुद्भवः । वह्निर्विष्णुर्भगवती कुण्डली मोहिनी वसुः । योषिदाधारशक्तिश्च त्रिकोणा ईशसंज्ञकः । सन्धिरेकादशी भद्रा पद्मनाभः कुलाचलः" । "एकारो वामगण्डान्तः शक्तिर्झिण्टी भगन्तथा । माधवीजङ्घ विजया ओष्ठः एकादशस्वरः" इति वीजवर्णाभिधानम्

ए अव्य० इ–विच् वा० न ह्रस्वः । १स्मृतौ २असूयायाम् ३अनुकम्पायाम् ४संबोधने ५आह्वाने च" मेदिनिः ६विष्णौ पु० एकाक्षरकोषः ।

एक त्रि० इण्–कन् । १एकत्वरूपप्रथमसंख्यान्विते, २केवले, ३मुख्ये, ४अन्यार्थे, ५सत्ये, ६अद्वितीये, ७समाने, ८अल्पे च । प्रायशः संख्यावाचकस्य संख्यासंख्येयोभयपरत्वेऽपि एकशब्दस्य भूरिशः एकत्वसंख्यान्वितपरत्वम् । तेन एकोघट इत्यादि न तु घटस्यैकः । क्वचित्तु भावप्रधाननिर्द्देशपरत्वेन संख्यावाचकत्वमपि । "द्व्येकयोर्द्विवचनैकवचने" पा० । इह द्वित्वम् एकत्वं च द्व्येकशब्दयोरर्थः । अत्र द्विवचनान्तत्वमेव तथार्थत्वे लिङ्गम् संख्येयपरत्वे द्व्येकेषामिति स्यात् द्वन्द्वार्थानां संख्यान्वितानां बहुत्वात् । तेन एकद्विवचनशब्दोऽपि एकत्वद्वित्वार्थकः तत्रार्थे तयोःपरिभाषितत्वात् अतएव "सुपां कर्म्मादयोऽप्यर्थाः संख्या चैव तथा तिङाम्" इति सुपां तिङाञ्च संख्यावाचकत्वमुक्तम् । तथा "अनेकमन्यपदार्थे" पा० सूत्रे अनेकपदस्य एकवचनान्ततया प्रयोगात् नास्ति एकत्वं यत्र इति विग्रहेण एकत्वशून्यार्थकता । एकसंख्यान्वितपरत्वे अनेको इति स्यात् "पतन्त्यनेके जलधेरिवोर्मय" इत्यादौ बहुवचनान्ततयैवानेकशब्दस्य प्रयोगात् । स्वारसिकप्रयोगे तु न लक्षणा तेन घटस्यैक इत्यादि न प्रयोगः इति द्रष्टव्यम् । इतरसंख्यासु एकत्वस्यानुगमात् द्वित्वादीनामेकत्वबुद्ध्यैव जननाञ्च इण्धात्वर्थानुगमात् तस्य अन्वर्थनामता । संख्या च द्रव्यसमवेतो गुणविशेषः गुणादौ च संख्यान्वयः परम्परयेति विशेषः । एकत्वादेर्जातित्वनिरासेन गुणत्वव्यवस्थापनं कणा० सू० वृत्त्योःकृतं यथा

"रूपरसगन्धस्पर्शव्यतिरेकादर्थान्तरमेकत्वम्" क० सू० "रूपरसगन्धस्पर्शेति संख्यादिपञ्चकभिन्नगुणोपलक्षणं व्यतिरेकादिति व्यभिचारात् । तदयमर्थः, एकोघट इति विशिष्टप्रतीतिर्विशेषणज्ञानजन्या, तत्र विशेषणं न रूपादि, तद्व्यतिरेकेण जायमानत्वात् । न च घटत्वादिकमेव निमित्तम्, पटेऽपि जायमानत्वात्, न चैकत्वं सत्तावत् सामान्यम्, सत्तया सहान्यूनानतिरिक्तवृत्तित्वात्, न च द्रव्यमात्रे सामान्यं तत्, द्रव्यत्वेनान्यूनानतिरिक्तदेशत्वात्, न चान्यूनानतिरिक्तदेशत्वेऽपि प्रतीतिभेदाद्भेदः, प्रतीतिभेदस्य स्वरूपकृतत्वे सत्ताऽपि भिद्येत, विषयभेदकृतत्वे तु विषयभेदानुपपत्तेरुक्तत्वात् अन्यथा घटत्वकलसत्वयोरपि भेदापत्तेः । न च स्वरूपाभेद एकत्वमिति भूषणोक्तं युक्तम् । घटस्वरूपभेदश्चेदेकत्वं तदा पटादावेकत्वप्रत्ययो न स्यात् स्वरूपभेदोद्वित्वादिकमित्यपि भूषणमतमनुपपन्नं स्वरूपभेदस्य त्रिचतुरादिसाधारण्येन व्यवहारवैचित्र्यानुपपत्तेरिति भावः" । वैया० सू० संख्यानिरूपणपूर्वकं तद्विवक्षादिनिरूपणं यथा "अभेदैकत्वसंख्याया वृत्तौ भानमिति स्थितिः । कपिञ्जलालम्भवाक्ये त्रित्वन्यायाद्यथोच्यते । उक्तञ्च वाक्यपदीये । "यथौषधिरसाः सर्वे मधुन्याहितशक्तयः । अविभागेन वर्त्तन्ते संख्यां तां तादृशीं विदुरिति" । परित्यक्तविशेषं वा संख्यासामान्यं तत् । उक्तञ्च "भेदानां वा परित्यागात्संख्यात्मा स तथाविधः । व्यापाराज्जातिभागस्य भेदापोहेन वर्त्तते । अगृहीतविशेषेण यथा रूपेण रूपवान् । प्रख्यायते न शुक्लादि भेदापोहस्तु गम्यते इति" । अस्याः वृत्तौ समासादौ भानं न्यायसिद्धमिति शेषः । इति मतस्थितिवैयाकरणानाम् । अयं भावः राजपुरुष इत्यादौ राज्ञोराज्ञोः राज्ञां वायं पुरुष इति जिज्ञासा जायते । विशेषजिज्ञासायां सामान्यरूपेण तत्प्रतीतिः शब्दादव-

व्यक्तो ऽतस्तस्यां शक्तिरिति । तस्या एकत्वेन प्रतीतौ न्यायमाह कपिञ्जलेति । बहुत्वगणनायां त्रित्वस्यैव प्रथमोपस्थितत्वात् तद्रूपेणैव भानवदेकत्वस्य सर्वतः प्रथमोपस्थितत्वमस्तीति । वस्तुतस्तु जिज्ञासैव नानुभवसिद्धा । तथात्वे वा ज्ञानेच्छयोः समानप्रकारकत्वेन हेतुहेतुमद्भावात्तत्तद्रूपेणैव वाच्यता स्यादिति ध्येयम्" ।

तथा च उत्सर्गात् सर्वत्र अभेदैकत्वसंख्यैव वृत्तौ प्रतीयते न तु विशेषेण । अत एव "संख्या तु व्यञ्जकाभावादव्यक्ता मातरादिवत् । यत्र तु व्यञ्जकं किञ्चित् तत्र संख्या प्रतीयते" इति वाक्यपदीये उक्तम्

तेन राजपुरुष इत्यादौ न विशेषसंख्याप्रतीतिः व्यञ्जकाभावात् त्वत्पुत्रः अस्मज्जनम् इत्यादौ तु विशेषेण तत्प्रतीतिः त्वादेशतदभावयोर्व्यञ्जकत्वात् "त्वमावेकवचने" इति पा० एकवचने त्वमादेशस्य विधानात् । तदभावादेव द्वित्वबहुत्वयोर्विशेषेण प्रतीतिः । एवं द्रव्यैक्ये एकदेशितत्पुरुषविधानात् अर्द्धपिप्पलीत्यादौ एकत्वप्रतीतिः द्वित्वादौ विवक्षिते तु पिप्पल्यर्द्धमित्याद्येव स्यादिति तत्र विशेषसंख्याप्रतीतिः । "एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके कामधुग्भवति" श्रुतिः एकमेवाद्वितीयं ब्रह्म" श्रुतिः । ६भेदत्रयशून्ये परमेश्वरे पु० । "एकोऽनेकः स्वः कः किम्" विष्णुस० । "परमार्थतः सजातीयविजातीयस्वगतभेदराहित्यात् एकः" भा० । सजातीयभेदः यथा वृक्षे वृक्षान्तरात् भेदः विजातीयभेदः यथा वृक्षे पटाद्भेदः । स्वगतभेदः यथा वृक्षे शाखादिभ्योभेद इत्येवं भेदत्रयराहित्यञ्च सर्वस्य ब्रह्मात्मकत्वात् कार्य्यकारणयोरभेदात् तदतिरिक्तपरमार्थवस्त्वन्तराभावाच्च । तदेव "एकमेवाद्वितीयमिति" श्रुतौ पदत्रयेणोक्तम् इह तु अन्यपदाभावात् एकशब्दस्यैव तथा भेदत्रयराहित्यपरत्वमिति बोध्यम् । सांख्यमते तु "एकोऽद्वितीय इति वेदवचांसि पुंसि वैधर्म्यलक्षणभिदाविरहं वदन्ति" इत्युक्तवैधर्म्यरूपभेदराहित्यमेकत्वमिति बोध्यम् । न्यायमते तु "एकत्वमनुपश्यतः" इति श्रुत्यन्तरात् एकत्वेन चिन्त्यतया, प्राधान्येन वा एकत्वं समर्थनीयम् । "एकातपत्रा पृथिवीभृतामृणैः" माघः । "त्वमेकदृश्यं नयनैः पिबन्त्यः" "ममात्र भावैकरसं मनः स्थितम्" कुमा० त्वमेकोह्यस्य सर्वस्य विधानस्य स्वयम्भुवः" मनुः । "अजामेकां लोहितशुक्लकृष्णां वह्वीः प्रजाः सृजमानां सरूपाः । अजोह्येकोजुषमाणोऽनुशेते" श्रुतिः । "एकातपत्रं जगतः प्रभुत्वम्

"त्वमेका कल्याणी गिरिशरमणी कालि! सततम्" कर्पू० स्त० "हेतोरेकाश्रये येषां स्वसाध्याव्यभिचारिता" भाषा० । विशेषणयोरेकस्य विशेष्यत्वविवक्षया क०स० एकशब्दस्य पूर्वनिपातः एकधनुर्द्धर इत्यादि "अमोघं सन्दधे शस्त्रं धनुष्येकधनुर्द्धरः" रघुः । वीरशब्देन समासे तु एकवीरः वीरैक इति रूपद्वयं भवतीति भेदः । वस्तुतस्तत्र वीरैकः इत्येव एकेषु मुख्येषु वीरयते इति वीरधातोरुपवीरशब्देन सप्तमीतत्पुरुषे एकवीर इति प्रौढम० । एकशब्दस्य संख्यावाचकत्वेऽपि "संख्यापूर्वो द्विगुः" पा० न द्विगुत्वमिति । अस्य सर्वनामकार्यम् एके एकस्मै एकस्मात् एकेषाम् एकस्मिन् । स्त्रियाम् एकस्यै एकस्याः एकासामेकस्यामित्यादि नञ्तत्पुरुषे तु । अनेक एकभिन्ने द्वि० ब० व० । तत्र एकत्व संख्यान्वयासम्भवान्नैकवचनप्रयोगः । तत्र च सर्वनामकार्यम् "अनेके अनेकस्मै इत्यादि अनेके सेवन्ते भवदधिकगीर्वाणनिवहान्" कर्पू० स्त० । एकत्वार्थकेन तेन बहुव्रीहौ एकवचनप्रयोगोऽपि "अनेकमन्यपदार्थे" पा० ।

एकस्य भावः त्व । एकत्व न० तल् । एकता स्त्री, ष्यञ् ऐक्य न० एकत्वसंख्यायां साम्ये श्रेष्ठत्वे अभेदे च । "तत्र कोमोहः कः शोक एकत्वमनुपश्यतः" श्रुतिः "अर्थान्तरमेकत्वम्" कणा० सू० । "एकत्वं सागता यस्मात्" स्मृतिः । "समालोक्यैकतामेव शशिनो भास्करस्य च" भा० व० २२२ । "व्रजतोरपि प्रणयपूर्वमेकताम्" माघः "ऐक्यं सोऽन्वये" मुग्धबो० । "द्रव्यैक्ये" सि० कौ० ।

डतर । एकतर द्वयोर्मध्ये जातिगुणक्रियादिभिर्निर्धार्य्ये एकस्मिन् त्रि० एकतरो ब्राह्मणः एकतरः कठः एकतरोमोक्षः एकतरस्वत्व इत्यादि । "अस्त्राणि वा शरीरं वा ब्रह्मन्नेकतरं वृणु" भा० आ० १६६ अ० । "एकतरपक्षपातिनो युक्तिर्विनिगमना" न्याय० । स च शब्दः अन्यतरान्यतमवत् अव्युत्पन्नं प्रातिपादिकमित्यन्ये अतएव "अद्ड्डतरादिभ्यः" पा० एकतरशब्दान्न अद्ड् । एकतरं कुलम् । तेन न सर्वनामकार्य्यम् "द्वयोरेकतरे बुद्धिः क्रियतामित्यादि, एकशब्दस्य भिन्नार्थकत्वेन एकतरशब्दोऽपि भिन्नार्थे अमरः । डतम । एकतम बहूनां मध्ये जात्यादिभिः निर्धार्य्ये एकस्मिन् त्रि० "यदि त्वेकतमोऽप्येषां स्त्रीधनं भक्षयेद्बलात्" कात्या० स्मृ० । सर्वनामकार्य्यम् एकतमे एकतमस्मादित्यादि क्लीबे स्वमोः अद्ड् एकतमत् । तसिल् । एकतस् एकस्मिन्नित्यर्थे अव्य० "एकतोदतः" मनुः "तामेक-

तस्तत्र बिभर्त्ति गुरुर्विनम्रो" रघुः । त्रल् । एकत्र एकस्मिन्नित्यर्थे अव्य० "एकत्र स्फटिकतटांशुभिन्ननीराः" माघः । "तथैकत्र करे दद्य" मनुः "अन्त्यजैर्गर्हिभेरुद्रैः सहैकत्रावतिष्ठते" या० । दाच् । एकदा एकस्मिन् काले अव्य० । "स स्म भुङ्क्ते सहस्राणां बहूनामन्नमेकदा । एकदा स्वल्पकं भुङ्क्ते" भा०अनु०१५९ अ० । अल्पार्थकात् कारकार्थे वीप्सार्थे शस् । एकशस् अल्पमल्पमेकमेकं वेत्याद्यर्थे, अव्य० "परिस्तीर्य तं पूर्ववत् पात्रासादनमेकशः" कात्या० ४,२,४ । एवमेकेनैकेन एकैकस्मै इत्याद्यर्थेऽपि । प्रकारे धा । एकधा एकप्रकारे "एकधा बहुधा चैव दृश्यते जलचन्द्रवत्"श्रुतिः । ध्यमुञ् ऐकध्यम् एकधेत्यर्थे अव्य० ।

एकक त्रि०एक+असहायेऽर्थे वा कन् । असहाये"समाचरिष्णुकं भरतामप यद्रप:"ऋ० १०,५६,६ । "महानप्येकको वृक्षः सर्वतः सुप्रतिष्ठितः । प्रसह्यैव हि वातेन शक्यो धर्षयितुं यतः" पञ्चत० । "विधिरेककचक्रचारिणम्" नैषधम् । सर्वनामत्वेन टेरकचि तु । एकशब्दार्थे इति भेदः

एककपाल त्रि० एककपाले संस्कृतः अण् तस्य लुक् । एककपालसंस्कृते पुरोडाशादौ । "एतं द्यावापृथिव्यमेककपालं पुरोडाशम्" शत० ब्र० २,४,२ ।

एककर त्रि० एकं करोति एक+कृ—"दिवाविभेत्यादिना" पा० संख्यापूर्वकत्वेन अणोबाधकः ट उप०स० स्त्रियाम् ङीप् । एकमात्रकारके एवं द्विकर,त्रिकरादयोऽपि तत्तत्संख्यान्वितकारके त्रि० स्त्रियां ङीप् ।

एककार्य्य त्रि०एकं समानं कार्य्यं यस्य । समानकार्य्यकरे एकस्य पाककर्त्तुर्दर्शने अन्यस्य पाककर्त्तुःस्मरणं भवतीति स्मारकगणमध्ये गौत०सू० उक्तम् यथा । "प्रणिधान निबन्धाभ्यासलिङ्गलक्षणसादृश्यपरिग्रहाश्रयाश्रितसंबन्धानन्तर्य्य वियोगैककार्य्यविरोधातिशयप्राप्तिव्यवधानसुखदुःखेच्छाद्वेषरागार्थित्वक्रियाधर्म्माधर्म्मनिमित्तेभ्यः" सू० । "एककार्य्यात् एककर्त्तुर्दर्शनात् कर्त्त्रन्तरस्य स्मृतिः" वृत्तिः । एकं कार्य्यं ययोः तयोर्भावः । एककार्य्यत्व-तुल्यकार्य्यकरत्वरूपे सङ्गतिभेदे । तथा च समानकार्य्यकारित्वं स्वकर्तव्यकार्य्यकारित्वं सङ्गतिः । "सप्रसङ्ग उपोद्घातो हेतुतावसरस्तथा । निर्वाहकैककार्य्यत्वं षोढा सङ्गतिरिष्यते" अनुमानजा० । कर्म्मधार० । एकस्मिन् कार्य्ये "एककार्य्ये सहद्यन्तौ कृष्णौ युद्धेऽपराजितौ" भा० स०१०अ० । "गुणागुणमनासक्तमेककार्य्यमनन्तरम् । एतत्तु ब्रह्मणो वृत्तमाहुरेकपदं द्वयम्" भा०व०२१२अ० ।

एककाल कर्म्मधारयः । एकस्मिन् काले "एककालं चरेद्भैक्ष्यं न प्रसज्जेत विस्तरे"मनुः । "मुनिभिर्द्विरशनमुक्तम्" इत्युक्तेर्भोजनस्य द्विकालिकत्वं सार्व्वजनीनं यतेस्तु भिक्षाचिह्नभोजनस्य रागप्राप्ततया तदंशे विधित्वासम्भवेन एककालशब्देन द्वितीयकालनिवृत्त्यर्था परिसंख्यैवेहागत्याश्रयणीया न च नियमः, एककालभोजनाकरणे दोषाश्रवणात् । एककालोजनकतयास्त्यस्य ठन् । "कालाट्ठञ्"तु न भवति समासप्रतिलयविधौ तदन्तविधेः प्रतिषेधात् । एककालिक एककालभवे त्रि० । "तेभ्यो लब्धेन भैक्ष्येण वर्त्तयेदेककालिकम्" स्मृतिः । तत्रभवः खञ् । एककालीनोऽप्यत्र त्रि० ।

एककुण्डल पु०एकं कुण्डलमस्य । १बलरामे २कुबेरे च मेदि०

एककुष्ठ न० एकमसाध्यत्वात् प्रधानं कुष्ठम् । सुश्रुतोक्ते कुष्ठभेदे । तत्र "एकादशक्षुद्रकुष्ठानीति" उद्दिश्य "क्षुद्रकुष्ठान्यपि स्थूलारुष्कं महाकुष्ठमेककुष्ठं चर्म्मदलम् विसर्पः परिसर्पः सिध्म विचर्चिका किटिभं पामा रकसेति" विभज्य "कृष्णारुणं येन भवेच्छरीरं तदेककुष्ठं प्रवदन्त्यसाध्यमिति" लक्षितम् ।

एकगम्य त्रि० एकत्वेन गम्यः । १निर्विकल्पकसमाधिगम्ये अखण्डाकारे चिदात्मनि । तत्र च मितिमातृमेयशून्यत्वेनैकरूपतया ज्ञानात् तथात्वम् । परमीमतया गम्ये २परमेश्वरे च "नृणामेको गम्यस्त्वमसि पयसामर्णव इव" पुष्पदन्तेन तस्यैकपगम्यत्वोक्तेस्तथात्वम् ।

एकगुरु पु० एकोऽभिन्नो गुरुर्य्यस्य । समानाध्यापके सतीर्थ्ये ।

एकग्राम पु० कर्म० । १अभिन्नग्रामे ।"एकग्रामे चतुःशाले दुर्भिक्षे राष्ट्रविप्लवे । पतिना नीयमानायाः पुरः शुक्रो न दुष्यति" ज्यो० । तत्रभवः ख । एकग्रामीण एकग्रामभवे त्रि० । "नैकग्रामीणमतिथिं विप्रं साङ्गतिकं यथा । गृहे उपस्थितं विद्यात् भार्य्या यत्राग्नयोऽपि वा"मनुः अस्य गहा०पाठात् छ एव एकग्रामीय तत्रार्थे । एकग्रामीणप्रयोगस्तु आर्षः । एकोग्रामोऽस्य । २समानग्रामवासिनि त्रि० ।

एकचक्र न०एकं श्रेष्ठं वा चक्रं यत्र । १हरिस्तोत्रे २सूर्य्यरथे पु० । ३पुरीभेदे स्त्री यत्र बकासुरस्य बधो भीमेन कृतः । "एकचक्रोरथो यस्य"सूर्य्यस्तुतिः "पृथुवर्त्तुलतन्नितम्बकृन्मिहिरस्यन्दनशिल्पशिक्षया । विधिरेककचक्रचारिणं किमु निर्मितुमात मान्मथं रथम्" नैष० सूर्य्यरथस्यैकचक्रता-

रित्युक्तम्” । ४ असहायवरे त्रि० “सूर्यरथवर्णनञ्च” ऋ० १,१६४,२ । “सप्त युञ्जन्ति रथमेकचक्रमेकोऽश्वो वहति सप्तनामा । त्रिनाभि चक्रमजरमनर्वं यत्रेमा विश्वा भुवनाधितस्थुः” । व्याख्यातैषा भाष्यकृता यथा

“एकचक्रमेकरथाङ्गोपेतम् । यद्यपि त्रीणि चक्राणि तथापि तेषामेकरूपत्वादेकचक्रमित्युच्यते रथं रंहणस्वभावं सूर्यस्य सम्बन्धिनं सप्तैतत्संख्यका अश्वा युञ्जन्ति अनुबध्नन्ति वहन्त्यहोरात्रनिर्वाहाय किं वस्तुतः सप्त नेत्याह । एकोऽश्वः सप्तनामा । एक एव सप्ताभिधानः सप्तधा नमनप्रकारो वा एक एव वायुः सप्तरूपं कृत्वा वहतीत्यर्थः वायुधीनत्वादन्तरिक्षसञ्चारस्य एकचक्रमित्युक्तं कीदृशं तदित्यत आह । त्रिनाभि वलयत्रयमध्यस्थितनाभिस्थानीयच्छिद्रत्रयोपेतम् । अजरम् अमरणधर्माकम् । अनर्वम् अशिथिलं पुनस्तदेव विशेष्यते । यत्र यस्मिंश्चक्रे इमा विश्वा भुवना इमानि प्रसिद्धानि सर्वाणि भूतजातान्यधि आश्रित्य तस्थुः तिष्ठन्ति । यद्वा एकचक्रमेकचारिणमसाहाय्येन सञ्चरन्तं रथमादित्यमण्डलं सप्त युञ्जन्ति सर्पणस्वभावाः सप्तसंख्या वा रश्मयः सप्तप्रकारकार्य्या असाधारणाः परस्परविलक्षणाः षड़्तवः एकः साधारण इत्येवं रूपाः अथवा मासद्वयात्मकाः षट् अपरोऽधिमासात्मक एक इत्येवं सप्तर्त्तवो युञ्जन्ति । एतस्य कार्यं निर्वहन्तीत्यर्थः । स चैकोऽसहायोऽश्वो व्यापनशील आदित्यः सप्तनामा सप्तरसानां सन्नमयितारोरश्मयो यस्य तादृशः । सप्त ऋषिभिः स्तूयमानो ह्यादित्यो वहति धारयति भ्रमयतीत्यर्थः । किं भूतं ? त्रिनाभि चक्रम् । तिस्रो नाभिस्थानीया सन्ध्यासन्धा वा एय ऋतवो यस्य तत्तादृशं के ते ग्रीष्मवर्षाहेमन्ताख्याः यद्वा भूतभविष्यद्वर्त्तमानाख्यास्त्रयः कालास्त्रिनाभयः । तद्विशिष्टं चक्रं चक्रवत् पुनःपुनः परिभ्रममाणं संवत्सराख्यचक्रमजरममरणं न हि कदाचिदपि कालोम्रियते “अनादिनिधनः कालः” इति स्मृतेः । अनर्वमप्रतिहतम् । ईदृशं संवत्सराख्यं चक्रं नानाकालावयवोपेतमयमादित्यः पुनः पुनरावर्त्तयति संवत्सरादर्वाचीनानां तत्रान्तर्भावात् युगादीनां तदावृत्तिसाध्यत्वात् संवत्सरस्य चक्रत्वेन रूपणम् । पुनः कीदृशं तत् । यत्र यस्मिंश्चक्र इमा विश्वा भुवना इमानि सर्वाणि भूतान्यधितस्थुः । आश्रित्य तिष्ठन्ति कालाधीनत्वात् सर्वस्याः स्थितेः । ईदृशस्य कालस्य कारणभूतपरमेश्वरपारज्ञानेन मोक्षसद्भावात् ज्ञानमोक्षाक्षरप्रशंसा चेत्यनुक्रमण्यामुक्तम् । अयमपि मन्त्रो यास्केन सप्त युञ्जन्ति रथमेकचक्रमेकचारिणमित्यादिना व्याख्यातः तदत्राप्यनुसन्धेयम्” भा० ।

भाष्येऽनुसन्धेयतयोक्तं यास्कवाक्यमुदाह्रियते “सप्त युञ्जन्ति रथमेकचक्रमित्यादि” श्रुतिमधिकृत्योक्तम् सप्त युञ्जन्ति रथमेकचक्रमेकचारिणम् । चक्रं चकतेर्वा चरतेर्वा क्रामतेर्वा । एकोऽश्वो वहति सप्तनामादित्यः सप्तास्य रश्मयो रसानभि संनामयन्ति सप्तैनमृषयः स्तुवन्तीति वा । इदमपीतरं नामैतस्मादेवाभिसंनामात् । संवत्सरप्रधान उत्तरोऽर्धर्चः । त्रिनाभि चक्रं त्र्यृतुः संवत्सरो ग्रीष्मो वर्षा हेमन्त इति । संवत्सरः संवसन्तेऽस्मिन् भूतानि । ग्रीष्मोग्रस्यन्तेऽस्मिन्रसाः, वर्षा वर्षत्यासु पर्जन्यो हेमन्तो हिमवान् हिमं पुनर्हन्तेर्वा हिनोतेर्वा । अजरमसरणधर्माणमनर्वमप्रत्यृतमन्यस्मिन् यत्रेमानि सर्वाणि भूतान्यभि संतिष्ठन्ते तं संवत्सरं सर्वमात्राभिः स्तौति । “पञ्चारे चक्रे परिवर्त्तमानः” श्रुतिः पञ्चर्त्तुतया । “पञ्चर्त्तवः संवत्सरस्येति” इति च ब्राह्मणं हेमन्तशिशिरयोः समासेन । “षडर आहुरर्पितमिति” श्रुतिः षड़्तुतया । अराः प्रत्यृता नाभौ । षट् पुनः सहतेः । “द्वादशारं नहि तज्जराय द्वादशप्रधयश्चक्रमेकम्” इति श्रुतिः मासानाम् । मासा मानात् । प्रधिः प्रहितोभवति “तस्मिन्त् साकं त्रिंशता न शङ्कवोऽर्पिताः षष्टिर्न चलाचलासः” श्रुतिः । “षष्टिश्च ह वै त्रीणि च शतानि संवत्सरस्याहोरात्रा इति च” ब्राह्मणं समासेन । “सप्तशतानि विंशतिश्च तस्थुः” श्रुतिः । “सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्रा इति च” ब्राह्मणं विभागेन” ५ दनोः पुत्रभेदे पु० “चत्वारिंशद्दनोः पुत्राः” इत्युपक्रम्य “एकपादेकचक्रश्च विरूपाक्षमहोदरौ” भा० अ० ६५ । स एव प्रतिविन्ध्यतया जातः यथाह भा० आ० ६७ । “एकचक्र इति ख्यात आसीद् यस्तु महासुरः । प्रतिविन्ध्य इति ख्यातो बभूव प्रथितः क्षितौ” भा० पुरीभेदस्तु “एकचक्रां ततो गत्वा पाण्डवाः संशितव्रताः” इत्युपक्रम्य “माता सहैकचक्रायां ब्राह्मणस्य निवेशने । तत्रासाद क्षुधितं पुरुषादं वृकोदरः । भीमसेनो महाबाहुर्वकं नाम महाबलम्” भा० आ० ६१ अ० उक्तः । एकमेव चक्रं सैन्यसंघो यत्र । ६ एकराजचिह्ने त्रि० । “तावत् शशास क्षितिमेकचक्रामेकातपत्रामजितेन पार्थः” भाग० ३,१,६० । “एकस्यैव चक्रं सैन्य

वत्” श्रीधरः । “बकराक्षसमित्र गृहीतैकचक्राम्” काद० । बकस्य तत्पुरीपरपीडकस्य भीमकर्त्तृकवधकथा च भा०आ० १५७ अध्यायादौ । “एकचक्रां गतास्ते तु कुन्तीपुत्राः महाबलाः” इत्यादिना ‘भक्ष्यमानस्य भीमेन तस्य घोरस्य रक्षसः” इत्यन्तेन १६३अ० वर्णिता ।

एकचत्वारिंशत् स्त्री एकाधिका चत्वारिंशत् शा०त० । (एकचल्लिश) १एकाधिकचत्वारिंशत्संख्यायां २तत्संख्यान्विते च बहुत्वबोधकत्वेऽपि उभयत्र नित्यैकवचनम् । एवमेकविंशति एकत्रिंशत् एकपञ्चाशत् एकषष्टि एकसप्तति एकाशीति एकनवति इत्येते शब्दाःक्रमेण एकविंशत्यादिसंख्यायां तदन्विते च स्त्री एकाधिकादश इत्यत्र तु स्यात् एकादश इति भेदः सर्वेभ्यः पूरणे डट् । एकचत्वारिंशादिस्तत्तत्संख्यापूरणे त्रि० स्त्रियां ङीप् ।

एकचर त्रि० एकः सन् चरति चर–पचा० अच् सुप्सुपेति स० । एकाकीभूत्वा चारिणि असहायचारिणि । “मुनिरेकचरः श्रीमान्” धर्म्मौ विग्रहवानिव” भा० व० ७६अ० । “अनीकशायी लघुरल्पचारश्चरन् देशानेकचरः स भिक्षुः” भा० आ० ६१अ० । “न भक्षयेदेकचरान् अज्ञातांश्च मृगद्विजान्” मनुः । ‘ये एकाकिनः प्रायेण चरन्ति सर्पादयस्तानेकचरान्” कुल्लू० “अयमेकचरोऽभिवर्त्तते माम्” किरा० । “पृथिव्यामेकचरः परिबभ्राम” भा० ५,५,२० ।

एकचरण पु० एकश्चरणो यस्य । एकपादयुक्ते १मनुष्यभेदे २तद्युक्तजनपदभेदे च स च देशः बृहत्सं० कूर्मविभागे ऐशान्यामुक्तः । “ऐशान्यामेकलव्यराज्यपशुपालकवीरकाश्मीरा” इत्युपक्रम्य ‘एकचरणानुविश्वाः सुवर्णभूर्वसुवनं दिविष्ठाश्च” [यशमने

एकचर्य्या स्त्री एकस्य चर्य्या चर–भावे क्यप् ६त० । असहा-

एकचारिन् त्रि० एकः सन् चरति चर-णिनि “सुप्सुपेति” स० । असहायचरे १एकचरे त्रि० । २बुद्धसहचरभेदे पु० त्रिका० ।

एकच्छाया स्त्री एकस्य ऋणशोधनेऽन्यासहायस्याधमर्णस्य च्छाया सादृश्यम् । अधमर्णसादृश्ये । “बहवः स्युर्यदि स्वांशान् दद्युः प्रतिभुवो धनम् । एकच्छायाश्रितेष्वेषु धनिकस्य यथारुचि” या० । “एकच्छायाश्रितेषु प्रतिभूषु एकस्याधमर्णस्य छाया सादृश्यं तामाश्रिताः एकच्छायाश्रिताः अधमर्णो यथा ऋणदानाय स्थितस्तथा दानप्रतिभुवोऽपि प्रत्येकं द्रव्यदानाय स्थिताः” मिता० । “एकच्छायाप्रविष्टानां दाप्यो यस्तत्र दृश्यते । प्रोषिते तत्सुतो दाप्यः पित्र्यमर्थं मृते सति” कात्या० स्मृ० । एकैव च्छाया आच्छादनरूपा यत्र । तुल्यच्छादने त्रि० “एकच्छायं चक्रतुस्तावाकाशं शरवृष्टिभिः” भा० वि० १८७ ।

एकज त्रि० एकस्मात् जायते जन–ड ५त० । १एकस्माज्जाते “शाकजानां सप्तथमाहुरेकजम्” ऋ० १, १६४,१५ । शाकंजाभामेकस्मादादित्यात् सहोत्पन्नानाम् ऋतूनां मध्ये सप्तथं सप्तममृतुम् एकजमेकेनोत्पन्नमाहुः कालतत्त्वविदः, चैत्रादीनां द्वादशानां मासानां द्वयमेलनेन वसन्ताद्याः षड्-तवो भवन्ति अधिमासेनैक उत्पद्यते सप्तमर्त्तुः” भा० । एकेन जातमित्युक्तिश्चिन्त्या कर्त्तृकरणयोरेव तृतीयासमासो न हेतुतृतीययेति नियमात् । २सोदरासोदरभ्रातरि तयोरेकशरीरोत्पन्नत्वात् एकजत्वम् ३भगिन्यां स्त्री जन–क्त । ५त० । एकजातादयोऽप्यत्र “सर्वेषामेकजातानामेकश्चेत् पुत्रवान् भवेत् । सर्वांस्तांस्तेन पुत्रेण पुत्रिणोमनुरब्रवीत्” स्मृतिः “बह्वीषु चैकजातानां नानास्त्रीषु निबोधत” मनुः । एकः असहाय एव जायते जन–ड सुप्सुपेति स० । ४असहायतया जाते “एकजम्” कात्या० ६, १,१ । ‘एकः असहाय एव भूमेर्जातः तमेकं यूपं वृश्चति” कर्कः । “उप ते पाजो न त्वा रुरुभ्रे वशी वशं नयस एकज ! त्वम्” ऋ० १०,८४,२ ।

एकजटा स्त्री एका जटा यस्याः । सर्व्वतारिणीगणप्रकृतिरूपे देवीभेदे तदाविर्भावः कालिका० ६१अ० वर्णितो यथा “सर्वे सुरगणाः सेन्द्रास्ततोगत्वा हिमाचलम् । गङ्गावतारनिकटे महामायां प्रतुष्टुवुः । अनेकशः स्तुता देवी तदा सर्वामरोत्करैः । मातङ्गवनितामूर्त्तिर्भूत्वा देवानपृच्छत । युष्माभिरमरैरत्र स्तूयते का च भाविनी । किमर्थमागतायूयं मातङ्गस्याश्रमं प्रति । एवं ब्रुवन्त्या मातङ्ग्यास्तस्यास्तु कायकोषतः । समुद्भूता ब्रवीद्देवी मां स्तुवन्ति सुरा इति । शुम्भो निशुम्भोह्यसुरौ बाधेते सकलान् सुरान् । तस्मात् तयोर्बधायाहं स्तुयेऽद्य सकलैः सुरैः । विनिःसृतायां देव्यान्तु मातङ्ग्याः कायतस्तदा । भिन्नाञ्जननिभा कृष्णा साभूत् गौरी क्षणादपि । कालिकाख्याऽभवत् सापि हिमाचलकृताश्रया । तामुग्रतारामृषयो वदन्तीह मनीषिणः । उग्रादपि भयात् त्राति यस्माद्भक्तान् सदाम्बिका । एतस्याः प्रथमं वीजं कथितं तन्त्रमेव च । एषैवैकजटा ख्याता यस्मात्तस्या जटैकिका । शृणुतं चिन्तनं चास्याः सम्यक् वेतालभैरवौ ! । यथा ध्यात्वा महादेवीं भक्तः प्राप्नोत्यभीप्सितम् । चतुर्भुजां कृष्णवर्णां मुण्डमालाविभूषिताम् । खड्गं दक्षिणपाणिभ्यां बिभ्रतीन्दीवरं त्वधः । कर्त्रीञ्च

खर्परञ्चैव क्रमाद्वामेन बिभ्रती । खं लिखन्ती जटामेकां बिभ्रती शिरसा स्वयम् । मुण्डमालाधरा शीर्षे ग्रीवायामपि सर्वदा । वक्षसा नागहारन्तु बिभ्रती रक्तलोचना । कृष्णवस्त्रधरां कट्यां व्याघ्राजिनसमन्विता । वामपादं शवहृदि संस्थाप्य दक्षिणं पदम् । विन्यस्य सिंहपृष्ठे तु लेलिहानाऽऽसवं स्वयम् । साट्टहासमहाघोरारावयुक्ताऽति भीषणा । चिन्त्योग्रतारा सततं भक्तिमद्भिः सुखेप्सुभिः । एतस्याः संप्रवक्ष्यामि या अष्टौ योगिन्योमताः । महाकाल्यश्च रुद्राणी उग्रा भीमा तथैव च । घोरा च भ्रामरी चैव महारात्रिश्च सप्तमी । भैरवी चाष्टमी प्रोक्ता योगिनीस्तु प्रपूजयेत्" । तन्त्रसा० पञ्चाक्षरीं विद्यां प्रदर्श्य "पञ्चाक्षरी एकजटा(ओम्)ताराभावे महेश्वरि ! । (ओम्) ताराद्या तु भवेद्देवि! श्रीमन्नीलसरस्वती"। "अन्यासां विद्यानामेकजटैव देवता प्रकृतित्वात्" कृष्णा० । तद्भेदाश्च "ताराचोग्रा महोग्रा च वज्रा काली सरस्वती । कामेश्वरी च चामुण्डा इत्यष्टौ तारिणीभिदाः" तन्त्रसा० ।

एकजन्मन् पु० एकं प्रधानं जन्म यस्य एकेभ्यो प्रधानेभ्यो दिक्पालांशेभ्यो वा जन्म यस्य वा । १नृपे त्रिका० इतरमनुष्यापेक्षया प्रधानभोगसाधनजन्मत्वेन दिक्पालांशभूतत्वेन च तथात्वम् । एकमेव न द्वितीयं जन्म यस्य । २शूद्रजातौ पुंस्त्री तस्य सावित्रजन्माभावात् गर्भमात्रजन्मकत्वात्तथात्वम् स्त्रियां वा ङाप् ।

एकजाति पुंस्त्री एका जातिर्जन्मास्य । शूद्रजातौ "ब्राह्मणः क्षत्रियोवैश्यस्त्रयोवर्णा द्विजातयः । चतुर्थ एकजातिस्तु शूद्रो नास्ति तु पञ्चमः" मनुना तस्यैकमात्रजन्मत्वप्रतिपादनेन द्विजातिवत् सावित्रजन्मराहित्येन एकजातित्वम् । "एकजातिर्द्विजातींस्तु वाचा दारुणया क्षिपन्" मनुः । "एकजातेरयं धर्मो यद्विजोलिङ्गधारणम्" पुरा० । सुश्रुतोक्ते २कीटभेदे । "एकजातीनतस्तूर्द्ध्वं कीटान् वक्ष्यामि भेदतः । सामान्यतोदृष्टलिङ्गैः साध्यासाध्यक्रमेण च । त्रिकण्टकः कुणी चापि हस्तिकक्षोऽपराजितः । चत्वार एते कणभा व्याख्यातास्तीव्रवेदनाः" इति कीटशब्दे विवृतिः । एका तुल्या जातिः सामान्यधर्मोऽस्य । ३तुल्यधर्मयुक्ते त्रि० कर्मधा० । ४तुल्यधर्मे स्त्री । तामर्हति छ । एकजातीय समानधर्मान्विते त्रि० "एवमेकजातीयानां महाशरीरेभ्यः क्षुद्रशरीराः प्रधानतमाः" सुश्रु० "एकः प्रकारः जातीयर् । एकजातीय । तुल्यप्रकारे त्रि० ।

एकजीववाद पु० एक एव जीव इत्येवं वादः। एकं चैतन्यमेकयैवाविद्यया बद्धं संसरति तदेव ज्ञानेन कदाचिन्मुच्यते नास्मदादीनां बन्धमोक्षौ स्त इत्येवं रूपे वेदान्त्येकदेशिवादभेदे । उक्तौ चैकानेकजीववादौ वेदा० प० यथा "एकजीववादेऽविद्याप्रतिबिम्बो जीवः अनेकजीववादे तु अन्तःकरणप्रतिबिम्बः स च जाग्रत्स्वप्नसुषुप्तिरूपावस्थात्रयवान् । तत्र जाग्रद्दशा नाम इन्द्रियजन्यज्ञानावस्था अवस्थान्तरे इन्द्रियाभावान्नातिव्याप्तिः । इन्द्रियजन्यज्ञानञ्चान्तःकरणवृत्तिः स्वरूपज्ञानस्यानादित्वात् । साचान्तःकरणवृत्तिरावरणाभिभवार्थेत्येकं मतम् । तथाहि अविद्योपहितचैतन्यस्य जीवत्वपक्षे घटाद्यधिष्ठानचैतन्यस्य जीवरूपतया जीवस्य सर्वदा घटादिभानप्रसक्तौ घटाद्यवच्छिन्नचैतन्यावरकमज्ञानं मूलाविद्यापरतन्त्रमवस्थापदवाच्यमभ्युपगन्तव्यम् । एवं सति न सर्वदा घटादेर्भानप्रसङ्गः अनावृतचैतन्यसम्बन्धस्यैव भानप्रयोजकत्वात् । तस्य चावरणस्य सदातनत्वे कदाचिदपि घटभानं न स्यादिति तद्भङ्गे वक्तव्ये तद्भञ्जकं न चैतन्यमात्रं, तद्भासकस्य तदनिवर्त्तकत्वात् नापि वृत्त्युपहितं चैतन्यं परोक्षस्थलेऽपि तन्निवृत्त्यापत्तेरिति परोक्षव्यावृत्तवृत्तिविशेषस्य आवरणभङ्गकत्वमित्यावरणाभिभवार्था वृत्तिरुच्यते । सम्बन्धार्था वृत्तिरित्यपरं मतम् । तत्राविद्योपाधिकोजीवोऽपरिच्छिन्नः स च घटादिप्रदेशे विद्यमानोऽपि घटाद्याकारापरोक्षवृत्तिविरहदशायां न घटादिकमवभासयति घटादिना समं सम्बन्धाभावात् तत्तदाकारवृत्तिदशायां तु भासयति तदा सम्बन्धसत्त्वात् । ननु अविद्योपाधिकस्य जीवस्यापरिच्छिन्नस्य स्वतएव समस्तवस्तुसम्बद्धस्य वृत्तिविरहदशायां सम्बन्धाभावाभिधानमसङ्गतं असङ्गत्वश्रुत्या सम्बन्धाभावाभिधाने च वृत्त्यनन्तरमपि सम्बन्धो न स्यादिति चेत् उच्यते न हि वृत्तिविरहदशायां जीवस्य घटादिना सह सम्बन्धसामान्यं निषेधामः किन्तर्हि घटादिभानप्रयोजकं सम्बन्धविशेषम् । स च सम्बन्धविशेषोविषयावभासकस्य जीवचैतन्यस्य च व्यङ्ग्यव्यञ्जकतालक्षणः कादाचित्कस्तत्तदाकारवृत्तिनिबन्धनः । तथाहि तैजसमन्तःकरणं स्वच्छद्रव्यत्वात् स्वतएव जीवचैतन्याभिव्यञ्जनसमर्थं घटादिकन्तु न तथा अस्वच्छद्रव्यत्वात् । स्वाकारवृत्तिसंयोगदशायान्तु वृत्त्यभिभूतजाड्यधर्मकतया वृत्त्युत्पादितचैतन्याभिव्यञ्जनयोग्यताश्रयतया च वृत्त्युदयानन्तरं चैतन्यमभिव्यनक्ति ।

तदुक्तं विवरणे अन्तःकरणं हि स्वच्छिद्रन स्वसंसर्गिण्यपि घटादौ चैतन्याभिव्यक्तियोग्यतामापादयतीति। इदञ्चास्वच्छद्रव्यस्यापि स्वच्छद्रव्यसम्बन्धदशायां प्रतिविम्बग्राहित्वम्। घटादेरभिव्यञ्जकत्वञ्च तत्प्रतिविम्बग्राहित्वम् चैतन्यस्याभिव्यक्तत्वञ्च तत्र प्रतिविम्बितत्वम्। एवंविधाभिव्यञ्जकत्वसिद्ध्यर्थमेव वृत्तेरपरोक्षस्थले बहिर्निर्गमनाङ्गीकारः। परोक्षस्थले तु वह्न्यादेर्वृत्तिसंयोगाभावेन चैतन्यानभिव्यञ्जकतया नापरोक्षत्वम्। एतन्मते च विषयाणामपरोक्षत्वं चैतन्याभिव्यञ्जकत्वमिति द्रष्टव्यम्”। “एकानेकजीववादौ सिद्धान्तलेशे दर्शितौ यथा। “अथ विद्योदये सत्युपाधिविलयादपेतजीवभावस्य किमीश्वरभावापत्तिरुत शुद्धचैतन्यमात्ररूपेणावस्थानमिति विवेचनीयम्। उच्यते। एकजीववादे तदेकाज्ञानकल्पितस्य जीवेश्वरविभागादिकृत्स्नभेदप्रपञ्चस्य तद्विद्योदये विलयान्निर्विशेषचैतन्यरूपेणैवावस्थानम्। अनेकजीववादमभ्युपगम्य बद्धमुक्तव्यवस्थाङ्गीकारे यद्यपि कस्यचिद्विद्योदये तदविद्याकृतप्रपञ्चविलयेऽपि बद्धपुरुषान्तराविद्याकृतोजीवेश्वरविभागादिप्रपञ्चोऽनुवर्त्तते तथापि जीववदीश्वरोऽपि प्रतिविम्बविशेष इति पक्षे मुक्तस्य विम्बभूतशुद्धचैतन्यरूपेणैवावस्थानम् अनेकोपाधिष्वेकस्य प्रतिविम्बे सत्येकोपाधिविलयेन तत्प्रतिविम्बस्य विम्बभावेनैवावस्थानौचित्येन प्रतिविम्बान्तरत्वापत्त्यसम्भवात् तत्सम्भवे कदाचिज्जीवरूपविम्बान्तरत्वापत्तेरपि दुर्वारत्वेनावच्छेदपक्ष इव मुक्तस्य पुनर्बन्धापत्तेः। अतएवानेकजीववादेऽवच्छेदपक्षोनाद्रियते तदवच्छेदेनान्तःकरणान्तरसंसर्गे पुनरपि बन्धापत्तेः प्रतिविम्बो जीवः विम्बस्थानीय ईश्वर उभयानुस्यूतं शुद्धचैतन्यमिति पक्षे तु मुक्तस्य यावत्सर्वमुक्ति सर्वज्ञत्वसर्वेश्वरत्वसत्यकामत्वादिगुणकपरमेश्वरभावापत्तिरिष्यते यथानेकेषु दर्पणेषु एकस्य मुखस्य प्रतिविम्बे सत्येकदर्पणापनये तत्प्रतिविम्बोविम्बभावेनावातिष्ठते। न तु मुखमात्ररूपेण, तदानीमपि दर्पणान्तरसन्निधानप्रयुक्तस्य मुखे विम्बत्वस्यानपायात् तथैकस्य ब्रह्मचैतन्यस्यानेकेषूपाधिषु प्रतिविम्बे सत्येकस्मिन् प्रतिविम्बे विद्योदयेन तदुपाधिविलये तत्प्रतिविम्बस्य विम्बभावेनावस्थानावश्यम्भावात्। न च मुक्तस्याविद्याऽभावात् सत्यकामत्वादिगुणविशिष्टसर्वेश्वरत्वानुपपत्तिः तदविद्याभावेऽपि तदानीं बद्धपुरुषान्तराऽविद्यासत्त्वात् न हीश्वरस्येश्वरत्वं सत्यकामादिगुणविशिष्टत्वञ्च स्वाविद्याकृतं तस्य निरञ्जनत्वात् किन्तु बद्धपुरुषाविद्याकृतमेव तत्सर्वमनवद्यम्”।

एकत पु॰ पिष्टलिप्तपात्रीप्रक्षालनजलनिनयनदेश्ये देवभेदे। तस्योत्पत्तिकथा यज्ञांशभागित्वकथा च शत॰ ब्रा॰ १,२,३,१, दर्शिता यथा। “चतुर्धा विहितोह वा अग्रेऽग्निरास। स यमग्रेऽग्निं होत्राय प्रावृणत स प्रैवाधन्वद्यं द्वितीयं प्रावृणत स प्रैवाधन्वद्यं तृतीयं प्रावृणत स प्रैवाधन्वदथ योऽयमेतर्ह्यग्निः स भीषा निलिल्ये सोऽपः प्रविवेश तं देवा अनुविद्य सहसैवाद्भ्य आनिन्युः सोऽपोऽभितिष्ठेवावष्ठ्यूता स्थ या अप्रपदनं स्थ याभ्यो वोमामकामं नयन्तीति तत आप्त्याः सम्बभूवुस्त्रितो द्वित एकतः। त इन्द्रेण सह चेरुः यथेदं ब्राह्मणो राजानमनुचरति स यत्र त्रिशीर्षाणं त्वाष्ट्रं विश्वरूपं जघान तस्य हैतेऽपि वध्यस्य विदाञ्चक्रुः शश्वद्धैनं त्रित एव जघानात्यह तदिन्द्रोऽमुच्यत देवो हि सः। त उ हैत ऊचुः। उपैवेमएनो गच्छन्तु येऽस्य वध्यस्याविदुरिति किमिति यज्ञ एवैषु मृष्टामिति तदेषु तद्यज्ञो मृष्टे य देभ्यः पात्रीनिर्णेजनमङ्गुलिप्रणेजनं निनयन्ति। त उ हाप्त्या ऊचुः। अत्येव वयमिदमस्मत् परो नयामेति कमभीति य एवादक्षिणेन हविषा यजाता इति तस्मादक्षिणेन हविषा यजेताप्त्येषु ह यज्ञो मृष्ट आप्त्या उ ह तस्मिन् मृजते, यो दक्षिणेन हविषा यजते। ततो देवाः, एतां दर्शपूर्णमासयोर्दक्षिणामकल्पयन् यदन्वाहार्यं नेददक्षिणं हविरसदिति तन्नाना निनयति तथैभ्योऽसमदं करोति तदभि तपति तथैषां शृतं भवति स निनयति त्रिताय त्वा द्विताय त्वैकताय त्वेति” “यं होत्रकर्मणे प्रावृणत ते देवा इत्यर्थः। प्राधन्वत् प्रागच्छदम्रियत धवि गमने। भीषा पूर्वाग्निवन्मरणभयेन निलीनोऽन्तर्हितो बभूव। ष्ठिव् निरसने। अप्रपदनमनाश्रयभूताः। वः युष्मभ्यं चतुर्थी युष्मत् शब्दात्। ततो निष्ठीवनलक्षणवीर्यधारणात्ताभ्योऽद्भ्यः सकाशात्। यथेदानीं ब्राह्मणः पुरोहितः। तं वध्यं वधार्हं ज्ञातवन्तः। अनन्तरं चैनं विश्वरूपं त्रित एवेन्द्रसाहाय्यार्थं जघान इन्द्रश्च तद्धननजनितात् पापादति मुक्तोऽभवत् यस्मात्स इन्द्रो देवः अतोऽस्मिन् पापसंश्लेषो न युक्त इत्यर्थः। ते लौकिकाजना विश्वरूपहननानन्तरमेतदूचुः। एषु त्रितादिषु वधार्हविश्वरूपवधजनितमेनस्तद्यज्ञो मृजीत शोधयेदिति अत एतत् एतेन पात्रीनिर्णेजनादिनिनयनेन एषु तदेनो यज्ञः संशोधयति तस्मादवहननपेषणादिजनितमेनसो रूपं पा-

त्वगादिनिर्णेजनमात्रेभ्यो निनेतव्यमित्यर्थः। अयमर्थोऽनेन: परःपरस्मादन्यत्राधारान्तरे अन्यत्राप्त ते नयाम अन्वाहरति यज्ञसम्बन्धि दोषजातं परिहरत्यनेनेति अन्वाहार्य्योनाम ऋत्विग्भ्यो देय ओदनः। निनीतसुदकमङ्गारेण प्रतपति" भा०।

"त्रिताय त्वा, द्विताय त्वा, एकताय त्वा" यजु०१।२२, "पात्राङ्गुलिप्रक्षालनोदकं त्रिताय त्रितनाम्ने देवाय त्वा त्वां निनयामीति, तथा द्विताय त्वा निनयामि, तथा एकताय त्वा निनयामि इति व्याख्याय शत०ब्राह्मणोक्ता कथा संक्षेपेण दर्शिता यथा "पूर्व्वं कुतश्चित् कारणात् भीतोऽग्निरपः प्राविशत्ततोदेवास्तं ज्ञात्वा जलस्थस्तदाग्निना वीर्य्यमप्सु सक्तं तत आप्त्या उत्पन्नाः त्रितद्वितैकतसंज्ञास्ते देवैः सह चरन्तो यज्ञे पात्रप्रक्षालनजलरूपं भागं लेभिरे" इति वेददी०। "तदुदकनयनप्रकारः" कात्या० २,५,२५,दर्शितो यथा "पात्राङ्गुलिप्रक्षालनमात्रेभ्यो निनयत्यभितप्य प्रत्यगसंस्पन्दमानं त्रिताय त्वेति प्रतिमन्त्रम्" सू० "पिष्टलिप्तपात्रोप्रक्षालनं पिष्टलिप्ताङ्गुलिप्रक्षालनम् अभितप्य पात्रोस्यमेव ज्वलतोल्मुकेन तापयित्वा प्रत्यक्संस्पन्दमानं परस्परसङ्गतिमप्राप्नुवदाप्तेभ्यो देवभूतेभ्यो निनयति स्विष्टकृद्देवोभयरूपमेतत् कर्म प्रतिपत्तिरूपमपूर्व्वोत्पादकञ्च। तेन द्रव्यविनाशेऽपि स्विष्टकृद्वद्द्रव्यान्तरेणापि निनयनं कर्त्तव्यम्। अपरे तु द्रव्यप्रधानत्वात् तद्विनाशे नोत्पत्तिमिच्छन्ति" कर्कः। ब्रह्मणोमानसपुत्रे ऋषिभेदे "प्रजापतिसुताश्चात्र सदस्याश्चाभवंस्त्रयः। एकतश्च द्वितश्चैव त्रितश्चैव महर्षयः" "द्वितैकतत्रिताश्चोचुस्तदा चित्रशिखण्डिनम्" "वयं हि ब्रह्मणः पुत्रामानसाः परिकीर्त्तिताः" भा० शा० ३३८अ०। स एव वरुणस्त्विक्षट्कान्तर्गतः तत्र प्रमाणम् ऋतेयुशब्दे भा०अनु०१५०अध्यायस्थवाक्यमुदाहृतम्।

एकतान त्रि० एकं तानयति चु० तन+श्रद्धायाम् अण् उ० स०। १अनन्यचित्तवृत्तौ एकविषयासक्तचित्ते २तद्गतचित्ते च। "सहैकतानमतयः प्रवाहैःश्रुतत्वश्चरैणैकतानयोः" भाग०१, २०,२,। ण्वुल्। एकतानकोऽप्युक्तार्थे त्रि० "एकस्तानो विस्तारो गीतिभेदोऽस्य। ३एकरूपविस्तारे ४एकताप्राप्ते स्वरभेदे च। "तानोनाम स्वरान्तरप्रवर्त्तकः रागादिस्थितिप्रवृत्त्यादिहेतुः अंशापरनामा वंशावयवसाध्यः स्वरविशेषः। 'गाता यं यं स्वरं गायेत् तं तं वंशेन तानयेत्" इति भरतः" कुमा०टी०मल्लिनाथः

एकताल पु० एक. समस्तालोमानं यत्र। १समन्वितलये, विच्छेदरहिते नृत्यवाद्यगीतादौ। एक एव तालोयत्र। २वाद्यभेदे च (एकताला)।

एकतीर्थिन् एकं समानं तीर्थमाश्रममस्त्यस्य इनि। समानाश्रमयुक्ते। "वानप्रस्थयतिब्रह्मचारिणाचक्थभागिनः। क्रमेणाचर्य्यसच्छिष्यधर्म्मभ्रात्रेकतीर्थिनः" इति या० "एकतीर्थी एकाश्रमी" मिता०।

एकतोदत् त्रि०एकतोदन्ता अस्य दत्रादेशः। एकपार्श्वे दन्तपङ्क्तियुक्ते पशुभेदे गवादौ "अनुष्ट्रांश्चैकतोदतः" मनुः।

एकत्रिक पु०अन्नाद्यकामकर्त्तव्ये एकाहसाध्ये यागभेदे "एकत्रिकेण त्र्यैकेण वान्नाद्यकामेन" आश्व०श्रौ०९,५,१३,सू०। "एकत्रिकः त्र्यैकश्च द्वावेकाहौ तयोरन्यतरेणान्नाद्यकामो यजेत। एकत्रिक एवं भवति एकस्तोमो बहिष्पवमानः त्रिस्तोमोहोतुराज्यम्, एवं व्यत्यासेन सर्व्वतो स्तोमौ भवतः त्र्यैकस्त्वेतावेव स्तोमौ विपरीतौ भवतः त्रिस्तोमो बहिष्पवमानः एकस्तोमोहोतुराज्यम्। एवमेव व्यत्यस्य व्यत्यस्य समापयेत्" नारा०। कात्या० २२;३,२४, २५,२६ सूत्रैः तस्य साद्यस्कत्वेन परिभाषां कृत्वा तद्विधानाद्युक्तम्। "षट् साद्यस्क्राः" ९ सू० इत्युपक्रम्य पञ्च क्रतून्क्रमेण प्रदर्श्य षष्ठमेकत्रिकं प्रतिपादयितुं तद्धर्माः प्रथमसुक्ताः "साद्यस्कधर्म्मा हिरण्यस्रग्वत्" २४ सू०। "साद्यस्कशब्देनात्र श्येनोऽभिधीयते तस्य धर्म्मालोहितोष्णीषादयः हिरण्यस्रग्वत्। यद्यस्योक्तं तत्तस्य भवति" कर्कः। "साद्यस्कधर्म्मा लोहितवस्त्रादय यथा वाजपेये हिरण्यस्रजो यथोपसक्तं दीयन्ते एवमत्रापि येन यद्वस्त्रादि परिहितं तत्तस्मै देयम्" संप० "एकत्रिके दक्षिणा षष्टिशतं षट् च २५सू०। एकत्रिकः षष्ठः साद्यस्कः तत्र षट्षष्टिशतं दक्षिणा" कर्कः। इतःपरं साद्यस्कधर्म्माः २६सूत्रजातैः उक्ताः। तत्र स्तोमादि सामसं० भा० निरूपित यथा

"एकत्रिकनामकः कश्चित् क्रतुर्भवति, सचैवं श्रूयते "अथैष एकत्रिकस्तस्यैकस्यां बहिष्पवानम्। तिसृषु होतुराज्यम् एकस्यां मैत्रावरुणस्य तिसृषु ब्राह्मणाच्छंसिनः, एकस्यामच्छावाकस्य तिसृषु माध्यन्दिनः पवमानः" इति। सन्ति प्रकृतौ माध्यन्दिनपवमानस्य त्रयस्तृचाः "उच्चा ते जातम्" इत्ययं (उ१प्र,८सू० २,३ ख०) प्रथमोगायत्रीच्छन्दस्कः, "पुनानः सोम" इत्ययं (उ१प,९सू० १,२,३ ख) द्वितीयोबृहतीच्छन्दस्कः, "प्र तु

इत्या” इत्ययं (ता॰११प्र,१॰ख॰ १,२,२ श्रु) तृतीयस्त्रि-ष्टुप्छन्दस्कः ।” एतदेवाभिप्रेत्य स्मृतम्, त्रिच्छन्दाश्चाथा-घोमाध्यन्दिनः इति । एवं सति एकत्रिकस्य माध्यन्दि-नपवमाने तिसृष्विति यदुक्तं तत्र किं तयाणां तृचाना-माद्यास्तिस्रः ऋचो ग्राह्याः? किं वा प्रथमतृचस्याः क्रम-पठितास्तिस्रः? इति संशयः । तत्र त्रिच्छन्दस्त्वश्रुत्या प्रबलया दुर्बलं पाठक्रमं बाधित्वा प्रथमपक्षो ग्राह्यः इति प्राप्ते, अभिधीयते यदेतत् त्रिच्छन्दस्त्वं तदेतत् प्राकृतम्, तत्र छन्दस्त्रयोपेतस्य तृचत्रयस्योपदिष्टत्वात् विकृतावपि तत्सर्वमतिदिष्टमिति चेत् बाढम् ! अत एव पाठक्रमोऽप्यतिदिष्टः, तथा सति प्रक्रान्तगायत्रीच्छन्द-स्कस्य तृचस्य समाप्तौ सत्यां पश्चाद् बृहतीच्छन्दस्के तृचे प्रथमायाः ऋचः प्रारम्भावसरः स चारम्भस्तिसृषु इति विशेषविधानेन बाध्यते, तस्मादाद्य ऋचोनिखिलो ग्राह्यः”

एकत्वादिविवक्षान्याय पु॰ जैमिनयोक्ते एकत्वादिसंख्या-विवक्षावधारणार्थे न्याये स च न्यायः ४अ॰ १पादे ११सूत्र भाष्यादौ दर्शितो यथा “तत्रैकत्वमयज्ञाङ्गमर्थस्य गुणभूत-त्वात्” ११सू॰“अस्ति ज्योतिष्टोमे पशुः अग्नीषोमीयो, यो दीक्षितः ‘यत् अग्नीषोमीयं पशुमालभते” इति, तथा, “अनड्वाहौ युनक्ति” इति, तथा, अश्वमेधे, “वस-न्ताय कपिञ्जलानालभते” इति । तत्र सन्देहः, किं वि-वक्षितम्, एकत्वं द्वित्वं बहुत्वं च, उत अविवक्षितम्? इति । तत्र एकत्वमयज्ञाङ्गभूतं न विवक्षितम्, इत्यर्थः, अर्थस्य गुणभूतत्वात् न आलम्भस्य गुणभूता संख्या नियोजनस्य वा । कस्य तर्हि? पशोः अनडुहोः कपि-ञ्जलानां च, विभक्तिर्हि श्रुत्या प्रातिपदिकार्थगतं संख्यार्थं ब्रूते, वाक्येन वा यज्ञाङ्गं ब्रूयात्, वाक्याच्च श्रुतिर्बली-यसी । तस्मात् न यज्ञाङ्गं विवक्षितम् इति” “आह मा भूत् यज्ञाङ्गम्, पश्वादीनामङ्गम्, विवक्षितं तथापीति” उच्यते, न, पश्वादीनामङ्गेन उक्तेन अनुक्तेन वा किञ्चित् प्रयोजनमस्ति, यज्ञाङ्गेन हि अविपन्नेन प्रयोजनम्, विपन्नेऽपि हि पश्वाद्यङ्गेऽविगुण एव क्रतुर्भवति, यज्ञाच्च फलं न पश्वादेः । तस्मात् पश्वादेर्गुणेन आम्नातेन प्रातेन वा न किञ्चित् प्रयोजनमस्ति इति न तत् विवक्षितम्, यद्धि प्रयोजनवत् तत् विवक्षितम् इत्युच्यते” भा॰ । “एकश्रुतित्वाच्च” १२सू॰ “भवति च किञ्चित् वचनं येन विज्ञायते, न तत् विवक्षितम् इति, ‘यदि सोममपहरे-युरेकां गां दक्षिणां दद्यात्, इति, यदि हि विवक्षितं भवेत्, नैकामिति ब्रूयात्, गामित्येकवचनस्य विवक्षि-तत्वात्, तथा, “अजौ द्वे धेनू द्वे” इत्यत्रापि द्वे इति वचनं ज्ञापकम्, अविवक्षितम् अजौ इति द्वित्वम् इति “त्रीन् ललामान्” इत्यत्रापि त्रीनिति वचनं लिङ्गम् । ललामानितिबहुवचनम् अविवक्षितम् इति” भा॰। “प्रतीयते इति चेत्” १३सू॰ “एवं चेत् पश्यसि, अ-विवक्षिता संख्या इति, तत् न, प्रतीयते हि संख्या आख्यातवचनस्य अङ्गभूता, यथा “पशुमानय” इत्युक्ते एक एवानीयते, पशू इति, द्वौ, पशून् इति बहव आ-नीयन्ते, यच्च प्रतीयते स शब्दार्थः, तस्मात् यज्ञस्याङ्ग-भूता संख्या इति शब्दात् गम्यते, न च शब्दात् गम्यमा-नम् ऋते कारणात्, अविवक्षितं भवति” भा॰ “नाशब्दं तत्प्रमाणत्वात् पूर्ववत्” १४सू॰ “नैतदेवं, सत्यं प्रती-यते, न तु अयं शब्दार्थः व्यामोहादेषा प्रतीतिः । कुतः एतत्? व्याकृताद्धि यज्ञाङ्गम् इत्यवगम्यते, वाक्यं च श्रुत्या बाध्यते । तस्मात् अशब्दार्थोऽयं यत् एकत्वादीति अशब्दार्थोऽपि हि प्रतीयते, यथा पूर्वो धावति इति, स पूर्व इत्युच्यते, यस्य अपरोऽस्ति, तेन पूर्वः इ-त्युक्ते, अपरो गम्यते, न तु, अपरो, धावति इति श्रवणात् प्रतीयते, एवम् इहापि पशुम् इत्येकत्वं गम्यते, न तु यज्ञे यथैव हि पूर्व इत्युक्तेऽपरो गम्यते एव केवलं, न तु स विधीयते कस्मिंश्चिदर्थे, एवम् इहापि संख्या प्रतीयते एव केवलं, न तु कर्त्तव्यतया यज्ञे विधी-यते न पशौ । कथं न पशौ विधीयते? इति चेत् विधायकस्याभावात् । आख्यातशब्दो विधायको भवि-ष्यति इत्येतदपि नोपपद्यते, द्रव्यदेवतासम्बन्धस्य स वि-धायकः सन् आलभते इति न संख्यासंख्येयसम्बन्धं वि-धातुमर्हति इति, भिद्येत हि तथा वाक्यम् । तस्मात् अविवक्षिता संख्या इति” भा॰ । “शब्दवत्तूपलभ्यते त-दागमे हि तत् दृश्यते तस्य ज्ञानं यथान्येषाम्” १५सू॰ “तुशब्दः पक्षं व्यावर्त्तयति, न तत् अस्ति, न यज्ञे संख्या शब्देन श्रूयते इति, आख्यातवाच्ये हि अर्थे उ-पलभ्यते, लोके पशुमानय इत्येकवचने सति एकत्वपशुवि-शिष्टो गम्यते, तत्र हि एकत्वमर्थेति, द्वित्वमुपजायते । यस्य चागमे यत् उपजायते, स तस्य अर्थः इति गम्यते तस्य ज्ञानं, यथान्येषाम् शब्दानाम्, अश्वमानयेति उक्ते अश्वानयनं प्रतीयते, न गामानय इति ज्ञायते, अश्व-शब्दस्य अश्वोऽर्थो गोशब्दस्य गौः इति । यदुक्तं, श्रुत्वा

वाक्यार्थौ बाध्यते, इति, उच्यते, न श्रुतिर्ब्रूते, वाक्यार्थो नास्ति इति, केवलं तु प्रातिपदिकार्थगतां संख्यामाह । तादृशी संख्या वाक्येन यत्र विधीयते, प्रातिपदिकार्थो हि आख्यातवाच्येन सम्बध्यते, विभक्त्यर्थोऽपि, तथा हि तद्विशेषणविशिष्ट आलम्भो गम्यते, तत्र एकार्थत्वात् एक वाक्यम् अवकल्पते। पशौ हि संख्यायां विधीयमानायामेव आख्यातशब्दो न शक्नुयात्, आख्यातार्थं विधातुम्, संख्यासंख्येयसम्बन्धं च । तस्मात् पशौ विवक्षिता संख्या इति" भा० "तद्वच्च लिङ्गदर्शनम्" १६सू० । किम् ? इति । "कर्णायास्या, अवलिप्ता रौद्रा, नभोरूपाः पार्जन्याः, तेषाम् ऐन्द्राग्नो दशमः" इति, यदि त्रित्वं विवक्षितं तदा ऐन्द्राग्नो दशमो भवति । तथा "कृष्णा भौमाः, धूम्रा आन्तरिक्षाः, बृहन्तो दिव्याः, शबला वैद्युताः, सिध्मास्तारकाः" इति प्रकृत्य आह । "अर्द्धभागानां वा एतत् रूपं यत् पञ्चदशिनः" इति तस्मात् अपि पश्यामि, विवक्षिता संख्या इति । यत्तु उक्तम्, "एकां गाम्" इत्यविवक्षां दर्शयति इति । अत्र उच्यते गोसंख्यासम्बन्धं विधातुम्, एतत् उच्यते, इतरथा हि, गोदक्षिणासम्बन्धो विहितो गम्यते । तस्मात् विवक्षितेऽपि वाच्यमेतत् । अपि द्वे धेनू द्वे तीनृषभामान् इति च अनुवादाः" भा० "तथा च लिङ्गम्" १७सू० "एवं च कृत्वा समानश्रुतिकं लिङ्गमपि विवक्षितं भविष्यति, तत्र इदं दर्शनम् उपपद्यते, "वसन्ते प्रातराग्नेयीं कृष्णग्रीवामालभते, ग्रीष्मे माध्यन्दिने संहितामैन्द्रीं शरदि अपराह्णे श्वेतां बार्हस्पत्याम्" इति । तत्र श्रूयते, "गर्भिण्यो भवन्ति" इति, गर्भः स्त्रीणां गुणः, तेन स्त्रियोर्दर्शयति इति भविष्यति । तथा "अथ ऋषभो वृष्णिर्वस्तः पुरुषः इति ते प्राजापत्याः" इति । तत्र श्रूयते "तूपरा भवन्ति सेन्द्रियत्वाय" इति, तूपरत्वं पुंसां गुणः, तेन पुंप्राप्तिं दर्शयति इति । अधिकरणान्तरं वा, तथा च लिङ्गम् इति, संख्याधिकरणं लिङ्गाधिकरणेऽतिदिश्यते । लिङ्गम् अविवक्षितं, श्रुत्या वाक्यस्य बाधितत्वात्, न च; विवक्षितमिव श्रूयते इति, भवति लिङ्गं, "स्त्री गौः सोमक्रयणी" इति, स्त्रीवचनात् सोमक्रयणी इत्यविवक्षितमेव लिङ्गं प्रतीयते । 'ननु कथं अगोमात्रम् इति न स्तनः आमीयते ?" नैवम्, तत्, अशब्दस्तु पूर्वौ धावति इति यथा । लिङ्गं विवक्षितं वाशब्दार्थस्य श्रुत्याऽप्रतिषिद्धत्वात्, यथा च लिङ्गम् "गर्भिण्यो भवन्ति" इति, तथा "तूपरा भवन्ति" इति । यदुक्तं, "स्त्री गौः सोमक्रयणी" इति, तत्र स्त्रीत्वविवक्षितं, तथा "प्रजापतये पुरुषान् हस्तिन आलभते" इति, पुरुषग्रहणम् अविवक्षितं, विस्पष्टो हि न्याय उक्तो लिङ्गविवक्षायाम् । तस्मात् विवक्षितं लिङ्गम् इति"भा०।

तत्त्वबोधिन्यां स्पष्टमुक्तं यथा "अग्नीषोमीयं पशुमालभेत" "पशुना रुद्रं यजेत्" इत्यादौ पशोरेकत्वं विवक्षितं न वेति संशयः । तत्र पशुमित्यत्र द्वितीयान्तादिश्रुत्या पुंस्त्वदेकत्वयोरुपस्थितयोः परस्परान्वये परस्पराकाङ्क्षाभावात् तयैवापेक्षणे पश्वेकत्वयोः परस्परमन्वयः पश्चाद् आलभेतेत्यादि पदान्तराकाङ्क्षया वाक्यादेकत्वाश्रयपशोर्यागादावन्वय इति वाक्यात् श्रुतेर्बलीयस्त्वेन पशुविशेषणत्वेनोपक्षीणस्यैकत्वस्य न यागादावन्वयः निराकाङ्क्षत्वात् तथा च सूत्रम् "एकत्वमयज्ञाङ्गमर्थस्य गुणभूतत्वात्" । अर्थस्य पशोर्गुणभूतत्वात् विशेषणत्वेन प्रागनन्वयात् तस्मादेकत्वमविवक्षितं द्वाभ्यां बहुभिरपि यागसिद्धिरिति प्राप्ते उच्यते । पशुमित्यादौ प्रकृत्या पशुरुपस्थापितः प्रत्ययेन चैकत्वं कारकत्वञ्च तत्रैकपदोपात्तत्वप्रत्यासत्त्या एकत्वस्य कर्मत्वादौ कारकेऽन्वयः कारकत्वञ्च क्रियानिमित्तत्वमिति क्रिया चोपस्थितयागादिरिति पशोः प्रथमं कारकद्वारा क्रियायामन्वयः । पश्चाच्चामूर्त्तस्यैकत्वस्य क्रियासाधनत्वान्यथानुपपत्त्या द्रव्यद्वारा तदन्वयार्थं पशुविशेषणत्वेनान्वयः अरुणान्यायादिति विवक्षितमेकत्वमतो द्वाभ्यां बहुभिर्वा न यागसिद्धिः तदुक्तं "समानप्रत्ययस्थेन कारकेणात्मवानृता । क्रिया वै नीयते संख्या न परस्पंपदाङ्गवेदिति" । एवमनड्वाहौ युनक्ति कपिञ्जलानालभेतेत्यादौ द्वित्वबहुत्वयोर्विवक्षितत्वम् । एवं पुंस्त्वमपि विवक्षित प्रत्ययार्थत्वेन कारकान्वयित्वात् । अथ कथं लिङ्गं विवक्षितं शब्दार्थस्य तदनुष्ठानस्य विचारे तदुपयोगादर्शनात् अपुंस्यपि पशौ इषशब्दः, मक्षिकादौ चास्त्रियामपि मक्षिकादिशब्दः प्रयुज्यत इति लिङ्गं न शब्दार्थः अपितु प्रयोगसाधुतामात्रार्थं तत्प्रयत्नोऽनुष्ठाने एकत्वविशिष्टपशुत्वस्याविशेषात् स्त्रियामपि अनुष्ठानसाम्यात् आत्मैकत्वादिवत् लिङ्गस्य इतव्यवहारेणान्वयव्यतिरेकाभ्यां शब्दार्थावगमात् तस्य च तत्तत्पदसमभिव्याहारेण तत्तत्पदवाच्यत्वाभ्युपगमात् इत्यादिषु न वास्तवं पुंस्त्वं किन्तु अभियुक्तोक्तिबलेन तेषां पुंसि साधुतेति । न चानुष्ठानसाम्यं पुंपशौ विशेषसम्भवात् "बाहू ते आप्यायताम्" इत्यादि

मध्ये मदनवत्स्याप्यायनकाले "मेदं ते आप्यायताम्" इति प्रमथवत्साप्याप्यायनश्रवणात्। यत्र च सारस्वतमेधीयया-मादौ स्त्रिया आज्यमनुक्तं तत्र स्त्रीत्वं विवक्षितम्"।
उद्देश्यगतसंख्यायास्तु विवक्षा नास्तीति यच्च न्यायशब्दे वक्ष्यते एकत्वविवक्षास्थले गदाधरेण धर्म्मिपारतन्त्र्येण एकत्वादेर्योगाद्वान्वयोऽभ्युपगतः धर्मिणः पश्वोर्यागान्वये प्रकृतैकत्वस्य स्वाश्रयपशुकरणकत्वस्वानाश्रयपश्वकरणकत्वो-भयसम्बन्धेन यागेऽन्वय इति तेनोक्तः।

एकदंष्ट्र पु० एका दंष्ट्रा यस्य। गणेशे त्रिका०। तस्य परशुरामेणैकदन्तस्योत्पाटनात् तथात्वम् परशुरामेण त-द्दन्तस्योन्मूलनकथा च ब्रह्मवै०पु० गणेशखण्डे दर्शिता। शिवपार्व्वत्योः रहसि वर्त्तमानयोर्द्वारपालत्वेन स्थितेन गणपतिना परशुरामस्य शिवं द्रष्टुं अन्तःपुरमध्ये जिगमिषोर्द्वाररोधे कृते तयोः कलहवादमुपवर्ण्य "चिक्षेप पर्शुमव्यर्थं शिवतुल्यं तु तेजसा" इति गणेशं प्रति पर्शुनिक्षेपमुक्त्वा "निपत्य पर्शुवेगेन छित्वा दन्तं समूलकम्। जगाम रामहस्तं तु महादेववरेण च" इत्युक्त्वा "पपात भूमौ दन्तश्च महान्तं शब्दमुच्चरन्" इत्युक्तम् अत्र दन्त इत्येकवचननिर्द्देशात् एकस्यैव दन्तस्य भग्नता प्रतीयते। एकदन्तादयोऽप्यत्र। "कपिलश्चैकदन्तश्च" गणेशस्तवः।

एकदण्डिन् पु० एकः केवलः शिखायज्ञोपवीतादिशून्यो वा दण्डोऽस्यास्ति इनि। "यदा हृदाध्यवसितं परं ब्रह्म सनातनम्। तदैकदण्डं संगृह्य सोपवीतां शिखां त्यजेत्" इत्युक्तलक्षणे परिव्राजके। संन्यासी तावत् चतुर्विधः कुटीचकबहूदकहंसपरहंसभेदात्, तत्र कुटीचकबहूदकयोस्त्रिदण्डधारणं हंसस्यैकदण्डधारणम् परमहंसस्य न दण्डधारणमिति भेदः। तदेतत् निर्ण०सि० निरूपितं यथा
"कुटीचकोबहूदकोहंसश्चैव तृतीयकः। चतुर्थः परमहंसोयोयः पश्चात् स उत्तमः" हारीतः। आद्यः पुत्रादिना कुटीं कारयित्वा तत्रैव वसन् काषायवासाः शिखोपवीतत्रिदण्डवान् बन्धुषु स्वगृहे वा भुञ्जान आत्मज्ञो भवेत्। एतदत्यन्ताशक्तपरम्। द्वितीयस्तु बन्धून् हित्वा सप्तागाराणि भैक्षं चरन् पूर्वोक्तवेषः स्यात्। हंसस्तु पूर्वोक्तवेषोऽप्येकदण्डः। "एकन्तु वैणवं दण्डं धारयेन्नित्यमादरादिति" स्कान्दात्। विष्णुरपि "यज्ञोपवीतं दण्डं च रज्जुं गोवालनिर्मिताम्। शिखां यज्ञोपवीतं च नित्यं कर्म परित्यजेत्" अयमप्येकदण्ड एव। ये तु शिखोपवीतादित्यागमभिधेयास्ते कुटीचकादिपराः।

यत्तु मेधातिथिः "यावन्न शुद्धयो दण्डास्तावदेकेन वर्त्तयेदिति"। तदपि तत्परमेव। यच्चात्रिः "चतुर्वो भिक्षवः प्रोक्ताः सर्वे चैव त्रिदण्डिनः" इति तत् वाग्दण्डादिपरं न यष्टिपरम्। "वाग्दण्डोऽथ मनोदण्डः कर्मदण्डस्तथैव च। यस्यैते नियता दण्डाः स त्रिदण्डीति चोच्यते" इति मनूक्तेः। तस्मात् परमहंसस्यैकदण्ड एव। सोऽप्यविदुषः। विदुषस्तु सोऽपि नास्ति। "न दण्डं न शिखां नाच्छादनं चरति परमहंस" इति महोपनिषदुक्तेः "ज्ञानमेवास्य दण्ड इति" वाक्यशेषाच्च। यत्तु यमः "काष्ठदण्डो धृतो येन सर्वाशीज्ञानवर्जितः। स याति नरकान् घोरान्महारौरवसंज्ञकानिति" तद्वैराग्यं विना जीवनार्थं संन्यासपरम्। "एकदण्डं समाश्रित्य जीवन्ति बहवो नराः। नरके रौरवे घोरे कर्मत्यागात्पतन्ति ते" इति स्मृतेः। यच्चाश्वमेधिके "एकदण्डी त्रिदण्डी वा शिखी मुण्डित एव वा। काषायमात्रसारोऽपि यतिः पूज्यो युधिष्ठिरेति" तस्यापि पूर्वोक्ता व्यवस्था ज्ञेया। "त्रिदण्डो एकदण्डो वेति" बौधा० "चतुर्थमाश्रमं गच्छेत् ब्रह्मविद्यापरायणः। एकदण्डी त्रिदण्डी वा सर्वसङ्गविवर्ज्जितः" इत्युशनोमतमस्य व्यवस्थितविकल्पाश्रयणात् कुटीचकबहूदकविषयम् इति शङ्कराचार्य्यमतानुसारिणः। रामानुजमतानुसारिणस्तु त्रिदण्डधारणमेवाचरन्तः सम्प्रदाय एव व्यवस्थाभेदक इति कल्पयन्ति। एतेषां शिखायज्ञोपवीतधारणमपि वैकल्पिकम्। "शिखी मुण्डी वेति" गौतमवचनात् "मुण्डोममोऽपरिग्रह" इति वशिष्ठवचनात्। "सशिखान् केशान्निकृत्य विसृज्य यज्ञोपवीतमिति" काठकश्रुतेः "कुटुम्बपुत्रदारांश्च वेदाङ्गानि च सर्व्वशः। केशान् यज्ञोपवीतञ्च त्यक्त्वा गूढश्चरेन्मुनिः" याज्ञवल्क्योक्तेः मिता०। एतदपि कुटीचकबहूदकविषयकम् व्यवस्थितविकल्पाश्रयणेनावगम्यम्। अत्र प्रसङ्गात् यतिधर्म्मा उच्यन्ते ते च मिता० दर्शिता यथा
"सर्व्वभूतहितः शान्तस्त्रिदण्डी सकमण्डलुः। एकारामः परिव्रज्य भिक्षार्थी ग्राममाश्रयेत्" या०।
"काषायी मुण्डः त्रिदण्डी सकमण्डलुः पवित्रपादुकासनकन्थामात्र" इति देवलः। शौचार्थं कमण्डलुग्रहितश्च भवेत्। एकारामः प्रव्रजितान्तरेणासहायः सन्यासिनीभिः स्त्रीभिश्च "स्त्रीणाञ्चैके" इति बौधायनेन स्त्रीणामपि प्रव्रज्यास्मरणात्। तथा च दक्षः "यतोभिक्षु-

यथोक्तश्च द्वावेव मिथुनं स्मृतम्। ततोग्रामः समाख्यात ऊर्द्ध्वं तु नगरायते। राजवार्त्तादि तेषान्तु भिक्षावार्त्ता परस्परम्। अपि पैशुन्यमात्सर्य्यं सन्निकर्षान्न संशयः" इति। परिव्रज्य परिपूर्व्वो व्रजतिस्त्यागे वर्त्तते। अतश्चाहंममाभिमानन्तत्कृतञ्च लौकिकङ्कर्म्मनिचयं वैदिकञ्च नित्यकाम्यात्मकं सन्त्यज्य। तदुक्तं मनुना "सुखाभ्युदयिकञ्चैव नैःश्रेयसिकमेव च। प्रवृत्तञ्च निवृत्तञ्च द्विविधङ्कर्म्म वैदिकम्। इह चामुत्र वा काम्यं प्रवृत्तङ्कर्म्म कीर्त्यते। निष्कामं ज्ञानपूर्वं तु निवृत्तमुपदिश्यते। यथोक्तान्यपि कर्म्माणि परिहाय द्विजोत्तमः। आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवानिति"। अत्र वेदाभ्यासः प्रणवाभ्यासः। तत्र यत्नवान्। भिक्षाप्रयोजनार्थं ग्राममाश्रयेत् प्रविशेत् न पुनः सुखनिवासार्थम्। वर्षाकाले तु न दोषः। "ऊर्द्ध्वं वार्षिकाभ्यां मासाभ्यां नैकस्थानवासीति" शङ्खस्मरणात्। अशक्तौ पुनर्मासचतुष्टयपर्य्यन्तमपि स्थातव्यम्। "न चिरमेकत्र वसेदन्यत्र वर्षाकालात्" इतिस्मरणात्। "एकरात्रं वसेत् ग्रामे नगरे पञ्चरात्रकम्। वर्षाभ्योऽन्यत्र वर्षासु मासांस्तु चतुरोवसेत्" इति काण्वस्मरणात् कथम्भिक्षाऽऽदानङ्कार्य्यमित्यत आह। "अप्रमत्तश्चरेद्भैक्ष्यं सायाह्ने नाभिलक्षितः। रहिते भिक्षुकैर्ग्रामे यात्रामात्रमलोलुपः" अप्रमत्तो वाक्चक्षुरादिचापलरहितोभैक्ष्यञ्चरेत्। वशिष्ठेनात्र विशेषोदर्शितः। "सप्तागाराण्यसङ्कल्पितानि चरेद्भैक्ष्यमिति"। सायाह्ने अह्नः पञ्चमे भागे। तथाच मनुः "विधूमे सन्नमुषले व्यङ्गारे भुक्तवज्जने। वृत्ते शरावसम्पाते नित्यम्भिक्षां यतिश्चरेत्" तथा "एककालञ्चरेद्भैक्ष्यन्नप्रसज्जेत विस्तरे। भैक्ष्ये प्रसक्तो हि यतिर्विषयेष्वपि सज्जतीति"। अनभिलक्षितः ज्योतिर्विद्यानोपदेशादिना अचिह्नितः। "नचोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया। नानुशासनवादाभ्याम्भिक्षां लिप्सेत कर्हिचिदिति" तेनैवोक्तत्वात्। यत्तु नृसिंहवचनम् 'ब्राह्मणकुले यल्लभेत तद्भुञ्जीत सायम्प्रातर्मांसवर्जमिति"। तदशक्तविषयम्। "भिक्षुकैर्भिक्षणशीलैः पाषण्ड्यादिभिर्वर्जिते ग्रामे। मनुना चात्र विशेष उक्तः। "न तापसैर्ब्राह्मणैर्वा वयोभिरपि वा श्वभिः। आकीर्णम्भिक्षुकैरन्यैरागारमुपसं व्रजेदिति"। यावता प्राणयात्रा वर्त्तते तावन्मात्रं भैक्ष्यञ्चरेत्। तथाच संवर्त्तः "अष्टौ भिक्षाः समादाय स मुनिः सप्त पञ्च वा। अद्भिः प्रक्षाल्य ताः सर्वास्ततोऽश्नीयाच्च वाग्यतः" इति। अलोलुपः मिष्टान्नव्यञ्जनादिष्वप्रसक्तः। भिक्षाचरणार्थं यतिपात्राण्याह। "यतिपात्राणि मृद्वेणुदार्वलाबुमयानि च। सलिलैः शुद्धिरेतेषाङ्गोबालैश्चावघर्षणम्" या०। मृदादिप्रकृतिकानि यतीनां पात्राणि भवेयुः। तेषां सलिलङ्गोबालावघर्षणञ्च शुद्धिसाधनम्। इयञ्च शुद्धिर्भिक्षाचरणादिप्रयोगाङ्गभूताऽमेध्याद्यनुपहतिविषया तदुपघाते द्रव्यशुद्धिप्रकरणोक्ता द्रष्टव्या। अतएव मनुना "अतैजसानि पात्राणि यस्य स्युर्निर्व्रणानि च। तेषामद्भिः स्मृतं शौचञ्चमसानामिवाध्वरे" इति चमसदृष्टान्तोपादानेन प्रायोगिकी शुद्धिर्दर्शिता। पात्रान्तराभावे भोजनमपि तत्रैव कार्य्यम् "तद्भैक्ष्यं गृहीत्वैकान्ते तेन पात्रेणान्येन वा तूष्णीं मात्रया भुञ्जीतेति" देवलस्मरणात्। एवम्भूतस्य यतेरात्मोपासनाङ्गनियमविशेषमाह। "सन्निरुध्येन्द्रियग्रामं रागद्वेषौ प्रहाय च। भयं हृत्वा च भूतानाममृतीभवति द्विजः" या०। चक्षुरादीन्द्रियसमूहं रूपादिविषयेभ्यः सम्यङ्निरुध्य विनिवर्त्य रागद्वेषौ प्रियाप्रियविषयौ प्रहाय त्यक्त्वा चशब्दादीर्ष्यादीनपि। तथा भूतानामपकारकरणेन भयमकुर्वन् शुद्धान्तःकरणः सदद्वैतसाक्षात्कारेणामृती भवति मुक्तो भवति। किञ्च। "कर्त्तव्याशयशुद्धिस्तु भिक्षुकेण विशेषतः। ज्ञानोत्पत्तिनिमित्तत्वात्स्वातन्त्र्यकरणाय च" या०। विषयाभिलाषद्वेषजनितदोषकलुषितस्याशयस्यान्तःकरणस्य शुद्धिः कल्मषक्षयः प्राणायामैःकर्त्तव्यः। तस्याः शुद्धेरात्माद्वैतसाक्षात्काररूपज्ञानोत्पत्तिनिमित्तत्वात्। एवञ्च सति विषयासक्तिजनितदोषात्मकप्रतिबन्धक्षये सत्यात्मध्यानधारणादौ स्वतन्त्रोभवति। भिक्षुकेण त्वेषा शुद्धिर्विशेषतोऽनुष्ठेया। तस्य मोक्षप्रधानत्वात् मोक्षस्य च शुद्धान्तःकरणतामन्तरेण दुर्लभत्वात्। यथाह मनुः "दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः। तथेन्द्रियाणान्दह्यन्ते दोषाः प्राणस्य निग्रहादिति"।

तेषां कर्त्तव्यानि च निर्ण० सि० दर्शितानि यथा

"प्रातरुत्थाय ब्रह्मणस्पते इति जपित्वा दण्डादीनि भूमौ निधाय मूत्रपुरीषयोर्गृहस्थचतुर्गुणं शौचं कृत्वाऽऽचम्य पर्वद्वादशीवर्ज्जं प्रणवेन दन्तधावनं कृत्वा तेनैव मृदा बहिःकटिं प्रक्षाल्य जलतर्पणवर्जं स्नात्वा पुनर्जङ्घे प्रक्षाल्य वस्त्रादीनि गृहीत्वा केशवादिनामोल्लनामभितर्पयित्वा भूस्तर्पयामीत्यादिव्यस्तसमस्ताभिर्व्याहृतिभिर्महर्जनस्तर्पयामीति तर्पयेत्। ओं भूः स्वा-

हेति स्वाहान्तैर्मन्त्रैस्तैरेव पुनस्तर्पयेदिति केचित् । तत आचम्याञ्जलिना प्रणवेन जलमादाय व्याहृतिभिरुद्धृत्य गायत्र्या त्रिः क्षिप्त्वा त्रिः गायत्रीं जपेत् । उदिते सूर्ये प्रणवेन व्याहृतिभिर्वार्घ्यं निर्दत्त्वा मित्रस्य चर्षणीधृत्यादिः पूर्वोक्तैः सौरैः इदं विष्णुरिति वैष्णवैः ब्रह्मयज्ञानमिति चोपस्थाय सर्वभूतेभ्यो नम इति प्रदक्षिणमावर्त्तते । ततो नत्वादित्याय विद्महे सहस्राक्षाय धीमहि । तन्नः सूर्यः प्रचोदयात् इति त्रिर्जपेत् । एवं त्रिकालम् । विष्णुपूजां ब्रह्मयज्ञं च कुर्य्यात् । अथ भिक्षा । “विधूमे सन्नमुसले व्यङ्गारे” इत्यादिमनूक्तकाले उद्वयमित्यादिनोपस्थाय तेनैक्यं ध्यात्वा “आकृष्णेनेति प्रदक्षिणं कृत्वा “ये ते पन्थान” इति जप्त्वा “योऽसौ विदाख्ये आदित्ये पुरुषोऽन्तर्हृदि स्थितः । सोऽहं नारायणो देव इति ध्यात्वा प्रणम्य तम् । त्रिदण्डं दक्षिणे त्वंसे ततः सन्धार्य्य बाहुना । पात्रं वामकरे क्षिप्त्वा स्थापयेद्दक्षिणेन त्विति” बौधायनोक्तदिशा त्रीन् पञ्च सप्त वा गृहान् गत्वा भवत्पूर्वं भिक्षां याचित्वा “पूर्णमसि पूर्णं मे भूयाः” इत्यागत्य शुचिरन्नं प्रोक्ष्य ओं भूः स्वधा नम इत्यादिव्यस्तसमस्तव्याहृतिभिः सूर्य्यादिभ्यो भूतेभ्यश्च भूमौ क्षिप्त्वा भुक्त्वाऽऽचम्य प्रणवेन षोडशप्राणायामान् कुर्यादिति संक्षेपः । गौतमव्याख्यायां भृगुः । “यतिहस्ते जलं दद्याद्भैक्षं दद्यात् पुनर्जलम् । भैक्ष्यं पर्वतमात्रं स्यात् तज्जलं सागरोपमम्” अत्र सर्वत्र मूलं माधवापरार्कमदनरत्नस्मृत्यर्थसारादौ ज्ञेयम् । जावालिश्रुतौ “शून्यागारे देवगृहे तृणकुटीवल्मीकवृक्षमूलकुलालशालाग्निहोत्रगृहनदीपुलिनगिरिकुहरनिर्झरस्थण्डिलेष्वनिकेतनः” इति । मात्स्ये “अष्टौ मासान् विहारः स्याद्यतीनां संयतात्मनाम् । एकत्र चतुरो मासान् वार्षिकान् निवसेत् पुनः । अविमुक्ते प्रविष्टानां विहारस्तु न विद्यते” । अत्रिः । “भिक्षाटनं जपं स्नानं ध्यानं शौचं सुरार्चनम् । कर्त्तव्यानि षडेतानि सर्वथा नृपदण्डवत् । मञ्चकं शुक्लवस्त्रं च स्त्रीकथा लौल्यमेव च । दिवास्वापश्च यानं च यतीनां पतनानि षट् । आसनं पात्रलोपश्च संचयः शिष्यसंग्रहः । दिवास्वापो वृथाजल्पो यतेर्बन्धकराणि षट्” । दक्षः “नाध्येतव्यं न वक्तव्यं न श्रोतव्यं कथञ्चन” । मदनरत्ने उश० “पितृर्थकल्पितं पूर्वमन्नं देवादिकारणात् । वर्जयेत् तादृशीं भिक्षां परबाधाकरीं तथा” बृहस्पतिः “न तीर्थवासी नित्यं स्यान्नोपवासपरो यतिः । न चाध्ययनशीलः स्यान्न व्याख्यानपरो भवेत्” । एतद्वेदभिन्नपरम् । अत्रिः “स्नानं सुरार्चनं ध्यानं प्राणायामोऽबलिस्ततः । भिक्षाटनं जपः सन्ध्यात्यागः कर्मफलस्य” च । अन्येऽपि माधवीयमिताक्षरादौ ज्ञेयः । यतिधर्मसमुच्चये “न स्नानमाचरेद्भिक्षुः पुत्रादिनिधने श्रुते । पितृमातृक्षयं श्रुत्वा स्नात्वा शुध्यति साम्बरः” । वापनं च पौर्णमास्यां कार्यम् “ऋतुसन्धिषु वापयेत्” कालमा०धृतवाक्यात् । [कदिक्” पा० ।

एकदिश् त्रि० एका समाना दिक् यस्य । तुल्यदिक्स्थे “तेनै-

एकदृश् त्रि० एका दृक् यस्य । १एकनेत्रे काणे । २काके पु० एकं सर्वमभिन्नं पश्यति दृश–क्विन् । ३शिवे । एकत्वेन सर्वद्रष्टरि ४तत्त्वज्ञे त्रि० ।

एकदृष्टि स्त्री एका अभिन्ना अनन्यविषयत्वात् दृष्टिः । अनन्यविषयदर्शने । “सततमेकदृष्ट्या तमवलोकयन्” पञ्चत० । बहु० । २तथादृष्टियुक्ते ३काणे च त्रि०काणत्वञ्च चक्षुःशून्यैकगोलकवत्त्वमन्धत्वं चक्षुरिन्द्रियशून्यत्वमिति भेदः । ४काके पु०

एकदेव पु० कर्म० । मुख्यदेवे परमेश्वरे “एकोदेवः सर्वभूतेषु गूढः इति” श्रुतेस्तस्य तथात्वम् “स हि पूर्वेषामपि गुरुः कालेनानवच्छेदात्” पात०उक्तेः यो “ब्रह्माणं विदधाति पूर्वमिति” श्रुतेश्च ब्रह्मणोऽप्युत्पादकत्वात्तस्य तथात्वम् ।

एकदेवत त्रि० एका देवताऽस्य । एकदेवताके १अग्निहोत्रादौ । “एकदेवतेषूभयम्” कात्या० २२, ८, ४ । “यत्र पुनः कर्मण्येकैव देवता यथाऽग्निहोत्रे पुनराधेये च तत्रोभयं तद्देवत्यञ्चेति” कर्कः । एकदैवतोऽप्यत्र कर्मधा० । एकस्यां देवतायां स्त्री ।

एकदेवत्य त्रि० एका श्रेष्ठादेवताता मर्हति यत् । १श्रेष्ठदेवताके । “तस्मादाहुरिन्द्रः सर्वदेवता इन्द्रश्रेष्ठादेवा इत्येतद्वै देवास्तेऽभैकदेवत्या अभवन्” शत०ब्रा० १, ६, ३, २२ । २एकदेवताके च । “सोमादिषु उभयमेकदेवत्यं भवति” कात्या० संग्रहव्याख्या । एकदैवत्योऽप्यत्र त्रि० ।

एकदेश पु० कर्म० । १अवयवे, प्रतीके । अवयवश्च समुदायस्यांशरूपः स च वास्तवो बुद्धिकल्पितश्च सावयवानां घटादीनामंशविशेषः ग्रीवामूलादिः वास्तवः, कालवियदादीनां निरवयवानां तु बुद्धिकल्पितः यथा पूर्वाह्णः पूर्वरात्र इत्यादि । तथा गुणविशेषाणामपि शब्दादीनां बुद्धिकल्पितस्तथा “एकदेशविकृतमनन्यवद्भवतीति” व्या०परिभाषा “एकदेशन्तु वेदस्य वेदाङ्गान्यपि वा पुनः” मनुः मन्त्रसमूहात्मकवेदस्य वौद्धमेव तथात्वम् । “सम्भोगहीनसम्पद्विटस्तु धूर्त्तः कलैकदेशज्ञः” सा०द० । विद्याविशेषरूपक-

णानां तथात्वम् । "उदाहृतः सर्वथा ते गुणानां मयैकदेशः प्रसमीक्ष्य बुद्ध्या" भा० अनु० २६अ० अत्रापि तथा । "तान्येकदेशान्निभृतं पयोधेः" माघ० "शामित्रैकदेशमाहवनीये प्रास्यति" कात्या० २, ६, १४ । एकदेशशब्दस्य पूर्वापरमध्योत्तरादिशब्दः तेन सहैकदेशिना षष्ठीसमासापवादकः एकदेशिसमासः । "पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे" पा० "सर्वोऽप्येकदेशः कालेन सह समस्यते" सि० कौ० । "उपारताः पश्चिमरात्रगोचरात्" किरा० । एवं मध्यरात्र इत्यादि । एकाधिकरणे इत्युक्तेः पूर्वश्छात्राणामित्यादौ न । तत्रार्द्धशब्दस्यैकदेशवाचकत्वेऽपि समांशवाचिन एव एकदेशिसमा० अर्द्धं पिप्पल्या इति वाक्ये अर्द्धपिप्पलीत्यादि । असमांशवाचित्वे तु षष्ठीसमासः "क्रोशार्द्धं स्तिमितजवेन गत्वा" रघुः । द्रव्यैक्य एव तेन पिप्पलीनामर्द्धमित्यादौ न किन्तु ६त० । एकदेशोऽस्त्यस्य इनि । एकदेशिन् उक्तांशयुक्ते त्रि० स्त्रियां ङीप् । "अमुमेव शब्दमाश्रित्य प्रवृत्तसमासस्य एकदेशिसमाससंज्ञा तत्र प्रमाणम् । "पूर्वापरेत्यादि" पा० सू० ।

एकदेशविभावितन्याय पु० एकदेशो विभावितः प्रमाणादिना ससाक्ष्याङ्गीकारितो येन तमधिकृत्य न्यायो न्यायसाध्यस्तर्कविशेषः । ऋणादानादिव्यवहारे सुवर्णादिबहुद्रव्याभियोगे प्रतिवादिनाऽपह्नवे वादिनैकदेशमात्रस्य प्रमाणैः साधने एकदेशे तयोः सत्यमिथ्यात्वावधारणमूलके सर्वधनदापनानुकूले तर्कभेदे तत्र एकदेशसाधने क्वचित् पूर्व्वं निवेदितसर्वधनदापनं क्वचिन्नेति विषयविशेषव्यवस्थापनम् मिता० यथा । "निह्नुते लिखितन्नैकमेकदेशविभावितः । दाप्यः सर्वं नृपेणार्थं, न ग्राह्यस्त्वनिवेदितः" या० नैकमनेकं सुवर्णरजतवस्त्रादि लिखितमभियुक्तमर्थिना प्रत्यर्थी यदि सर्व्वमेव निह्नुते अपजानीते तदार्थिनैकदेशे हिरण्ये साक्ष्यादिभिः प्रत्यर्थी भावितोऽङ्गीकारितः सर्वं रजताद्यर्थं पूर्व्वलिखितं दाप्योऽर्थिने नृपेण न ग्राह्यस्त्वनिवेदितः पूर्व्वं भाषाकाले अनिवेदितः पश्चादर्थिना पूर्व्वं मया विस्मृतम् इति निवेद्यमानो न ग्राह्यो नादर्त्तव्यो नृपेण । एतच्च न केवलं वाचनिकमेकदेशे प्रत्यर्थिनो मिथ्यावादित्वसम्भवात् । अर्थिनश्चैकदेशे सत्यवादित्वनिश्चयादेकदेशान्तरेऽपि सत्यवादित्वसम्भवात् । एवं तर्कापरनामसम्भावनाप्रत्ययानुगृहीतादस्मादेव योगीश्वरवचनतः सर्व्वं दापनीयम् नृपेण इति निर्णयः । एवञ्च तर्कवाक्यानुसरणेन निर्णये क्रियमाणे वस्तुनोऽन्यथात्वेऽपि व्यवहारदर्शिनान्न दोषः तथा च गौतमः" "न्यायाधिगमे तर्कोऽभ्युपेयस्तेनाभ्युह्य यथास्थानङ्गमयेत्" इत्युक्त्वा "तस्माद्राजाचार्य्यावनिन्द्यौ" इत्युपसंहरति । नचैकदेशविभावितोऽनुपादेयवचनः प्रत्यर्थीत्येतावदिह गम्यते एकदेशविभावितो नृपेण सर्वन्दाप्य इति वचनात् । यत्तु कात्यायनेनोक्तम् । "अनेकार्थाभियोगेऽपि यावत् संसाधयेद्धनी । साक्षिभिस्तावदेवासौ लभते साधितन्धनमिति" तत् पुत्रादिदेयपित्राद्यृणविषयम् । तत्र हि बहूनर्थानभियुक्तः पुत्रादिर्न जानामीति प्रतिवदन् निह्नववादी न भवतीत्येकदेशविभावितोऽपि न क्वचिदसत्यवादीति "निह्नुते लिखितन्नैकमिति शास्त्रन्तत्र न प्रवर्त्तते । निह्नवाभावादपेक्षिततर्काभावाच्च" "अनेकार्थाभियोगेऽपीति" कात्यायनवचनं सामान्यविषयं विशेषशास्त्रस्य विषयं निह्नवोत्तरं परिहृत्याज्ञानोत्तरे प्रवर्त्तते । ननु "ऋणादिषु विवादेषु स्थिरप्रायेषु निश्चितम् । ऊने वाप्यधिके चार्थे प्रोक्ते साध्यन्न सिध्यतीति" वदता कात्यायनेन अनेकार्थाभियोगे साक्षिभिरेकदेशे विभाविते अधिके वा भाविते साध्यं सर्वमेव न सिध्यतीत्युक्तम् । तथा सत्येकदेशे भाविते अभावितैकदेशसिद्धिः कुतस्त्यात् ? उच्यते लिखितसर्वार्थसाधनतयोपन्यस्तैः साक्षिभिरेकदेशाभिधानेऽधिकाभिधाने च कृत्स्नमेव साध्यं न सिध्यतीति तस्यार्थस्तत्रापि निश्चितन्न सिध्यतीति वचनात्पूर्व्ववत् संशय एवेति प्रमाणान्तरस्यावसरोऽस्त्येव "छलं निरस्येति" नियमात् । साहसादौ तु सकलसाध्यसाधनतयोपदिष्टैः साक्षिभिरेकदेशेऽपि साधिते कृत्स्नसाध्यसिद्धिर्भवत्येव तावतैव साहसादेः सिद्धत्वात्कात्यायनवचनाच्च । "साध्यार्थांशेऽपि गदिते साक्षिभिः सकलम्भवेत् । स्त्रीसङ्गे साहसे चौर्य्ये यत्साध्यं परिकीर्त्तितम्" ।

अमुमेवार्थमवलम्ब्य एकदेशविभावितन्यायः प्रवर्त्तते इत्येकदेशविभावितन्यायस्य तादृशार्थकत्वम् इति बोध्यम् ।

एकदेह पु० एकः श्रेष्ठो देहोऽस्य । १बुधग्रहे त्रिका० तस्य ग्रहेषु अतिसुन्दरत्वात् तथात्वम् । एकस्तुल्यो देहो यत्र एकस्मात् देहो यत्र वा । २वंशरूपे गोत्रे तत्र सर्वेषां तुल्यदेहत्वादेकस्मादुत्पन्नदेहत्वाच्च तथात्वम् । "बहूनि विप्र! गोत्राणि मुनीनां भावितात्मनाम् । एकदेहानि तिष्ठन्ति विभक्तानि विना प्रजाः" हरिवं० ४६ । ३समानदेहारम्भे सार्द्धखण्डे च एकमेकतां गतं देहमस्य । ४दम्पत्योः तयोर्विवाहेन एकदेहतोत्पादनात्तथात्वम् "अस्थिभिर

स्थीनि मांसैर्मांसानि त्वचा त्वचमिति” श्रुतेः। “आम्नाये स्मृतितन्त्रे च लोकाचारे च सूरिभिः। शरीरार्द्धं स्मृता जाया पुण्यापुण्यफले समा। यस्य नोपरता भार्य्या देहार्द्धं तस्य जीवति। जीवत्यर्द्धशरीरे तु कथमन्योधनं हरेत्” बृह०स्मृतेश्च तयोरेकदेहत्वम्। तत्र पुंसि पुं०, स्त्रियां स्त्रीति भेदः एकाङ्गादयोऽप्यत्र। स्त्रियां ङीष् इति भेदः। कर्म्म०। ५एकस्मिन् देहे न०।

एकदू पु० एकेन परात्मना दीव्यति दिव–क्विप् ऊठ् ३त०। आत्मारामे ऋषौ सहि आत्मनैव रमत इति प्रसिद्धम्। “घ्नन्तीदेकद्यूर्देवाउत याश्च देवीः” ऋ०८,८०,१०, “एकद्यूः ऋषिः” भा०।

एकधन न० एकमेव धनम्। १एकमात्रधने “हृतानां धावतामेकधनमुपाहितम्” शत०ब्रा०११,४,१,१, “एकमेकममयुग्मं धनं धीयमानमुदकं यत्र। २अयुग्मसंख्याके उदकाधारे कलसे “अयुजा अयुजा एकधना भवन्ति “त्रयो वा पञ्च वा, पञ्च वा सप्त वा, सप्त वा नव वा, नव वैकादश वा, एकादश वा त्रयोदश वा, त्रयोदश वा पञ्चदश वा द्वन्द्वमहर्मिथुनं प्रजननम्। अथ य एष एकोऽतिरिच्यते स यजमानस्य श्रियमभ्यतिरिच्यते स वा एषां सधनं यो यजमानस्य श्रियमभ्यतिरिच्यते तद्यदेषां सधनं तस्मादेकधना नाम” शत०ब्रा०३,९,२,४, “प्रत्यगेकधनानयुग्मानुदहरणांस्त्रिप्रभृत्यापञ्चदशभ्यः” कात्या० ९, ३,२२, “उत्तरस्यैवानसोऽधात् प्रत्यक् अधोभूमौ एकधनानयुग्मसंख्याच्चिदधाति एकधनशब्दार्थं स्वयमेव व्याचष्टे उदहरणानिति उदकं ह्रियते एभिरित्युदहरणाः कलशास्तान् त्र्यादिपञ्चदशपर्य्यन्तायुग्मसंख्यान् विषमसंख्यान्। तत्राग्निष्टोमे त्रयः पञ्च वा, अत्यग्निष्टोमेऽपि तावन्त एव, उक्थ्ये पञ्च वा सप्त वा, षोड़शिनि सप्त नव वा, वाजपेये नवैकादश वा, अतिरात्रे एकादश त्रयोदश वा आप्तोर्यामे त्रयोदश पञ्चदश वेति” कर्कः “अत्र कलशपरत्वात् पुंस्त्वम् अपां विशेषणत्व स्त्रीत्वम् “आवर्त्ततीरधनुद्विधारा इत्याद्यत्वास्त्वेकधनासु” आश्व० श्रौ० ५,१,६। “द्विविधा आपः वसतीवर्य्य एकधनाश्च तत्र पूर्वेद्युरेव वसतीवर्य्यो गृहीता एकधना इदानीं गृह्यन्ते। ता गृहीता यज्ञदेशाद्देव यजनदेशं प्रति यथा वर्त्तन्ते तदेशमनुवक्ष्या” नारा० वृ०। अपाम्बाधारं विना देशान्तरगमनासम्भवात् प्रागुक्तवाक्याच्च पुनरयुग्मकलसे दाहरणं कर्त्तव्यमिति बोध्यम्। वस्तुतः एकधनशब्देन अयुग्मसंख्याककलसा एवोच्यन्ते। स आधारत्वेनास्त्यस्य अच्। २तत्स्थे जलादौ त्रि०इत्येव न्याय्यम् “तावन्त्यैकधनानाम्” कात्या०९.२,२२,सू० “एकधनानामेकधनस्थानामपामिति” कर्केण तथा व्याख्यानात् “एकधनांस्त्रीनुन्नयन्ति”कात्या० ३,१०, “एकधनान् उन्नयन्ति उदकेन पूरयित्वा उत्क्षिपन्ति जलमध्यादूर्द्ध्वं निनयन्ति निष्काशयन्ति” कर्कः एकं मुख्यं धनम् कर्म०। ४मुख्ये धने न० “सोममाप्यायतामिन्द्रायैकधनविदे” यजु०५,७, “एकं धनं मुख्यं धनं सोमरूपं विन्दते लभते स एकधनवित्। यद्वा सोमकण्डनाय यैर्जलमानीयते ते कुम्भाः एकधना एकं धनं सोमरूपं यत्रेति वेत्ति जानातीति”वेददी० “एकधनस्ताऽङ्क् कलसः अस्त्यस्य इनि। एकधनिन् तादृशैकधनयुक्ते त्रि०“प्रत्नोरुदानयैकधनिनः”शत०ब्रा०३,९,२,१७, “एकं समानं साधारणं धनं यस्य। ५अविभक्ते ६संसृष्टिनि च त्रि०। अविभक्तधनानां संसृष्टधनानाञ्च साधारणधनत्वात् तथात्वम्। ७एकमात्रधनयुक्ते त्रि०।

एकधर्म्मन् त्रि० एकस्तुल्योधर्म्मो यस्य अनिच् स०। तुल्यधर्मयुक्ते स्त्रियां वा डाप्। एकोधर्मोऽस्त्यस्य इनिरप्यत्र साधुः। “सर्वेषामेकधर्मिणाम्” स्मृतिः। अत्र स्त्रियां ङीप्

एकधुरा स्त्री एका धूः कर्म्म०अ समा०। १एकभारे। तद्वहतीत्यर्थेऽण् तस्य लुक्। एकधुर–एकभारवाहके २गवादौ त्रि०। अस्त्यर्थे अच्। ३एकधुरायुक्ते त्रि०। एकधुरं वहति ख। एकधुरीण एकधुरवाहके त्रि०।

एकधुरावह त्रि० एकधुरां वहतीति वह–अच् ६त०। एकभारवाहके गवादौ।

एकनक्षत्र न० एकं नक्षत्रं यत्र। एकतारात्मके नक्षत्रभेदे आर्द्रा चित्रा स्वातिश्च एकतारात्मकं नक्षत्रं तच्च अश्वेशाशब्दे ४९७पृ०दर्शितम्। शत०ब्रा०भाष्ये तु पुष्यस्यैकतारात्मकत्वमुक्तं तदनुसारेण शब्दकल्पद्रुमेऽप्यभिहितं किन्तु तन्मूलं ज्योतिषवचनं मृग्यम्। वस्तुतोऽत्र एकशब्दस्यायुग्मपरत्वं पुष्यस्य च त्रितारात्मकत्वेन तथात्वाभिप्रायेण पुष्यस्योक्तिः “अयुग्मं हि पितृणामेकनक्षत्रे एकनक्षत्र हि पितृणाममावास्यायाम् अमावास्या वा एकनक्षत्रमेको हि यद्देतां रात्रिं सर्वाणि भूतानि संवसन्ति तेनो तं काममाप्नोति या सर्वेषु नक्षत्रेषु” शत० ब्रा० १०,१२,८,१,२। ‘एकनक्षत्रे कात्या० २१, ३,२। एकं नक्षत्रं हि पितृणामिति” एकनक्षत्रं च यत्रैका तारा चित्रा स्वाति रेवत्यादि यथा”

कर्क्षः। अत्र रेवत्या द्वात्रिंशत्तारत्मकत्वम् अश्लेषा-शब्दे उक्तम् अतस्तस्या एकत्वाभावात् रेवत्यादिश-ब्देन बहु॰अश्विनीति बोध्यम् तस्याश्च त्रितारत्वेनायुग्मप-रत्वम्। अमावास्या वा एकनक्षत्रमित्युक्तेः २अमावास्या-याञ्च। तत्र च रविचन्द्रयोरेकनक्षत्रस्थितत्वात् एकनक्ष-त्रतुल्यफलदातृत्वाद्वा तथात्वम् कर्म॰। ३एकस्मिन् नक्षत्रे

एकनट पु॰एको मुख्यो नटः। नाट्यप्रवर्त्तके मुख्यनटे त्रिका॰

एकपक्ष पु॰एकः पक्षो यस्य। १सहाये कर्म॰। एकत्र २पक्षे पु॰

एकपत्नी स्त्री एकः समानः अनन्योवा पतिर्य्यस्याः नान्तादेशः नान्तत्वात् ङीप् १सपत्न्याम् "सर्वासामेकपत्नीनामेका चेत् पुत्रिणी भवेत्। सर्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुः" मनुः २पतिव्रतायाञ्च। "यो धर्म एकपत्नीनां काङ्क्षन्ती तमनुत्तमम्" मनुः "तांश्चावश्यं दिवसगणनातत्परामेकपत्नीम्" मेघ॰। "कामेकपत्नीं व्रतदुःखशीलाम्" कुमा॰। एकःपतिरीशो यस्य वा कप्। एकपतिक एकस्वामिके त्रि॰ स्त्रियां टाप्। "पत्युर्नो यज्ञसम्बन्धे" इत्यधिकारात् भर्त्तर्य्येकस्यैव नादेशङीपौ नेतरस्य।

एकपत्रिका स्त्री एकं गन्धयुक्ततया श्रेष्ठं पत्रं यस्याः कप् टापि अत इत्त्वम्। गन्धपत्राद्वक्षे राजनि॰।

एकपद न॰ एक पदं पदोच्चारणयोग्यकालो यत्र। एकपदोच्चारणयोग्यकाले १तत्काले। कर्म॰। एकस्मिन् २स्थाने ३सुप्तिङन्तरूपे पदे च "निहन्त्यरीनेकपदे य उदात्तः स्वरानिव" माघः। "अनुदात्तं पदमेकवर्जम्" पा॰ एकपदे अन्यस्वरस्य उदात्तेन निघातविधानात्तेन सादृश्यमिहोक्तमिति बोध्यम् "कथमेकपदे निरागसम्" रघुः। एकं पदं चरणो यस्य। ४एकचरणमनुष्ये ५तद्युक्ते देशभेदे पु॰ स च देशः वृहत्सं॰कूर्म्मविभागे प्राच्यामुक्तः। अथ पूर्वस्यामञ्जन इत्याद्युपक्रम्य "एकपदतामलिप्तिककोशलकावर्द्धमानाश्चेति" एकं पदं कोष्ठं पूजास्थानं यस्य। वास्तुमण्डले एककोष्ठपूज्ये ६देवभेदे पु॰ "भृगुश्चैकपदोज्ञेयः" वास्तु॰ त॰ देवीपु॰। एकं पदं कोष्ठरूपं स्थानम्। कर्म॰। वास्तुमण्डलस्थे ७एककोष्ठात्मकस्थाने न॰ "इन्द्रश्चेन्द्रात्मजश्चोभावेकैकपद संस्थिता" तत्रैव। तत्कोष्ठलिखनादिप्रकारोवास्तुशब्दे वक्ष्यते। एकं पदं चरणोऽस्य। ८मृगभेदे पुंस्त्री। स्त्रियां जातित्वात् ङीष्। "कर्णैकैकपदाश्वास्यैर्निजुष्टं एकतास्तिभिः" भाग॰ ४,६,१५। एकं सुबन्तं पदं वाचकं यस्य। ९एकपदवाच्ये त्रि॰ "किं स्विदेकपदं धर्म्यं किं स्विदेकपदं यशः। किंस्वदेकपदं स्वर्ग्यं किं स्विदेकपदं सुखम्"। यक्षप्रश्ने "दाक्ष्यमेकपदं धर्म्यं दानमेकपदं यशः। सत्यमेकपदं स्वर्ग्यं शीलमेकपदं सुखम्" भा॰ व॰३१२ अ॰। युधिष्ठिरेणैकपदबोध्यदाक्ष्याद्युत्तरे उक्तम् एकं पद पदविन्यासविशेषो यत्र। १०रतिबन्धभेदे पु॰ "पादमेकं हृदि स्थाप्य द्वितीयं स्कन्धसंस्थितम्। स्त्रीणां कृत्वा रमेत् कामी बन्धस्त्वेकपदः स्मृतः" रतमालोक्तेः।

एकपदि अव्य॰एकः पादः साधनं यस्मिन् प्रहरणे। द्विदण्ड्यादि॰इच्समा॰ भत्वात् पद्भावश्च। पादसाधने प्रहरणे।

एकपदी स्त्री एकं गन्तुः समानं पदं तच्चिह्नमत्र गौ॰ङीष्। पथि अमरः। तत्र हि गन्तुः पदसमानचिह्नं दृश्यते इति तस्य तथात्वम्। एकः पादो यस्याः संख्यापूर्वकत्वात् पाद्भावः कुम्भपद्या॰ ङीष् पद्भावश्च। २एकचरणयुक्तायां स्त्रियाम् ३एकवृत्तचतुर्थांशयुक्तायामृचि च "गायत्र्यस्येकपदी द्विपदी त्रिपदी" श्रुतिः। "एकपदीं द्विपदीं त्रिपदीं चतुष्पदीमष्टापदीम्" यजु॰८,३१।

एकपरि अव्य॰ एकेन विपरीतं वृत्तम् "अक्षशलाकासंख्याः परिणा" पा॰अव्ययी॰। एकेन विपरीततया पतनेन पराजये द्यूते व्यवहारेवायं प्रयोगः। यस्य यथा पातने जयोभवति तस्य एकस्यान्यथाचारेः पातने एवं प्रयोजनः एवं व्यवहारेऽपि।

एकपर्णा स्त्री एकं पर्णं तपःसाधनतया आहारो यस्याः। शैलराजस्य मेनायादुत्पन्नदुहितृत्रयमध्ये १दुहितृभेदे। "तिस्रः कन्यास्तु मेनायां जनयामास शैलराट्। अपर्णामेकपर्णाञ्च तृतीयामेकपाटलाम्" इत्युपक्रम्य। "आहारमेकपर्णेन एकपर्णा समाचरत्" हरि॰१८अ॰। स्वार्थे कन् बहु॰कप् वा अत इत्त्वम् अपर्णिकाप्यत्र। "अप्यपर्णा निराहारा एकाशा एकपर्णिका" देवीपु॰४५अ॰। अस्य पूर्वोक्तवाक्येनैकवाक्यतया हिमवत्कन्याभेदपरत्वम् न तु दुर्गापरत्वमिति बोध्यम्। एकमात्रं पर्णमस्य। एकपत्रावशेषे-वृक्षादौ त्रि॰

एकपर्व्वतक पु॰ पर्वतभेदे "कुरुभ्यः प्रस्थितास्ते तु (कृष्णभीमार्ज्जुनाः) मध्येन कुरुजाङ्गलम्। रम्यं पद्मसरोगत्वा कालकूटमतीत्य च। गण्डकीञ्च महाशोणं सदानीरां तथैव च। एकपर्वतके नद्यः क्रमेणेत्याव्रजन्त ते। उत्तीर्य्य सरयूं रम्यां दृष्ट्वा पूर्वांश्च कोशलाम्" भा॰स॰२१९अ॰।

एकपलाश पु॰एकःपलाशो यत्र। एकपत्रमात्रवृक्षे तत्र भवः तस्येदं वा गहा॰छ। एकपलाशीय तत्रभवे तदीये च त्रि॰

एकपाटला स्त्री एकं पाटलं पुष्पं तपःसाधनतया आहारो

यथा:। हिमवतोमेनायासुतृपन्नदुहितृत्रयमध्ये दुहितृभेदे एकपर्णाशब्दे मूलं दृश्यं तत्रैव तन्नामनिरुक्तिर्येया। "पाठलापुष्पमेकञ्च आद्धधावेकपाटला"।

एकपातिन् त्रि० एकः सन् पतति पत–णिनि "सहसुपेति" स०। १एकाकितया पतनशीले अतिरात्रयागसंस्थे २अहर्विशेषे न० "एकपातीनि लङ्घानान्यतिरात्राः" आश्व०श्रौ०१२,६,२२। "चतुर्विंशाभिजिद्विषुवन्महाव्रतादीनि एकपातीन्यहानि तानि अतिरात्रसंस्थानि भवन्ति" नारा०। ३ऋग्भेदे स्त्री ङीप्। "धाय्याश्चात्मैकपातिनीः" आश्व०श्रौ० ५,१९,११। "अग्निर्होता गृहपतिः स राजेति प्रतिपदेकपातिनो पच्छः"६,५,६।

एकपाद् त्रि० एकः पादोऽस्य अन्त्यलोपः. समा०। १विष्णौ "चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात्" विष्णुसं०। "एकः पादोऽस्येत्येकपात् पादोऽस्य विश्वाभूतानीति" श्रुतेः "विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्" गीतोक्तेश्च" भा०। परमेश्वराभिन्नत्वेन एकपादयुक्तत्वेन वा २शिवे च। स च रुद्रभेदः। "अजैकपादहिर्बुध्नोविरूपाक्षश्च रेवतः। हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः। रुद्राएकादश प्रोक्ता जयन्तश्चापराजितः" विष्णुध० अन्यनामानोऽपि रुद्राः सन्ति तत्र दानादौ त एव पूज्याः। अजेतिनामान्तरं तेन एकादशसंख्यापूर्त्तिः अतएव विष्णुध० "अजनामा महारुद्रः" इत्यादिना तद्ध्यानमुक्तम् "एकपादभिधो विप्र! रुद्रः स्यादहन् परम्। चक्रं डमरुकं शूलं सुरूरं तदधोऽपरम्। वामं शूलं मेखलावान् खट्वाङ्गंचांस्य मस्तके। धनुर्घण्टां कपालञ्च कौमुदीं तर्ज्जनीघटम्। परशुं चक्रमाधत्ते क्रमाद्वामाष्टके करे। अनेकभोगसम्पत्तिं कुरुते यजन्तः सदा"इति तत्रैव एकपदोध्यानान्तरमुक्तम्। ३एकपादयुक्ते त्रि० स्त्रियां ङीपि पद्भावः एकपदीति भेदः एकपदीशब्दे उदा०।

एकपाद पु० कर्म०। १एकमात्रचरणे "व्युत्तिष्ठदकपादेन परमं योगमास्थितः" भा०अनु ०८३अ०। "उत्तिष्ठदेकपादेन दृढ्शे विबुधर्षभान्" भाग० ४,१,१९. "एकःपादोऽस्य सम्बसान्तविधेरनित्यत्वात् नान्त्यलोपः।एकपादयुक्ते २परमेश्वरे। "पादोऽस्य विश्वाभूतानीत्युक्तेः तस्य सर्वभूतरूपैकपादत्वात् तथात्वम् "तत्र शिश्रियेऽज एकपादः" अथ० १३,१,६,२. एकचरणयुक्तमात्रे त्रि० स्त्रियां स्वाङ्गत्वात् ङीष् टाप् वा। "द्वयीं त्र्यक्षीं त्रियाक्षीं दीर्घजिह्वामजिह्विकाम्। त्रिस्तनीमेकपादाञ्च त्रिजटामेकलोचनाम्" भा०व०२७९अ० "एकपादांश्च पुरुषान् केरलान् वनवासिनः". भा० स० ३०अ० सहदेवदक्षिणदिग्विजये" "एकपादांश्च तत्राहमपश्यं द्वारि वारितान्" ५०अ०। ४असुरभेदे "एकपादमहोदरौ" भा०आ० असुरगणनायाम्। एकपादोऽवलम्बनत्वेनास्त्यस्य अच्। ५एकपादमात्रावलम्बके। "पर्वतारोहणं कृत्वा एकपादो विभावसुम्। निरीक्षेत निराहार ऊर्द्ध्वबाहुः कृताञ्जलिः" भा०आ०१२५अ०

एकपादिका स्त्री एकः पादोऽवलम्बनत्वेनास्त्यस्याः ठन्। एकपादावलम्बनेन खगानां स्थितिभेदे "यथावलम्ब्य खमेकपादिकाम् तदा निदद्राबुपपल्वलं खगः"नैष०।

एकपिङ्ग पु० एकं पिङ्गं नेत्रमस्य। कुबेरे। तस्य क्रूरदृष्ट्या पार्वतीदर्शने वामनेत्रस्य स्फुटने शिववाक्येन प्रसन्नायास्तस्या वरेण पिङ्गलं वामनेत्रं जातमिति तस्य तथात्वम् तत्कथा काशी० यथा

"प्रसार्य्य नयने पूर्व्वसमासेव व्यलोकयत्। शम्भोः समीपे का योषिदेषा सर्वाङ्गसुन्दरी। अनया किं तपस्तप्तं? ममापि तपसोऽधिकम्। अहो रूपमहो प्रेम सौभाग्य श्रीरहो भृशम्। क्रूरदृग्वीक्षते यावत् पुनः पुनरिदं वदन्। तावत् प्रस्फोटितं नेत्रं वामं वामविलोकनात्। अथ देव्यब्रवीद्देव! किमसौ दुष्टतापसः। असकृद्वीक्ष्य मां वक्ति व्यकुर्व्वन्मे तपःप्रभाम्। असकृद्दक्षिणेनाक्ष्णा पुनर्मामेव पश्यति। असूयमानो मे रूपं प्रेमसौभाग्यसम्पदः। इति देवीगिरं श्रुत्वा प्रहस्य प्राह तां प्रभुः। उमे! त्वदीयपुत्रोऽयं न च क्रूरेण चक्षुषा। स पश्यति तपोलक्ष्मीं तव किन्त्वधिवर्णयन्। इति देवीं समाभाष्य तमीशः पुनरब्रवीत्। वरं ददामि ते वत्स! तपसाऽनेन तोषितः। निधीनामधिनाथस्त्वं गुह्यकानां भवेश्वरः। यक्षाणां किन्नराणाञ्च राजा राजाञ्च सुव्रत!। पतिः-पुण्यजनानाञ्च सर्वेषां धनदोभव। मया सख्यञ्च ते नित्यं वत्स्यामि च तवान्तिके। अलकां निकषा मित्र! तव प्रीतिं विवर्द्धयन्। आगच्छ पादयोरस्याः पत ते जननी त्वियम्। इति दत्त्वा वरान् देवः पुनराह शिवः शिवाम्। प्रसादं कुरु देवेशि! तपस्विन्यङ्गजे तव। देव्युवाच। वत्स! ते निर्मला भक्तिर्भवे भवतु सर्व्वदा। भवैकपिङ्गोनेत्रेण वामेन स्फुटितेन च। देवदत्तास्तु ये तुभ्यं वरास्सन्तु तथैव ते। कुवेरो भव नाम्ना त्वं मम रूपेर्ष्यया सुत!"एकपि-

ङ्गलोऽप्यत्र । एकपिङ्गलशब्दे नेत्रयुक्तत्वात्तस्य तथात्वम् ।

एकपिण्ड त्रि० एकः समानः पिण्डः देहः आद्देयपिण्डो वा यस्य । १सपिण्डे तस्य एकदेहारब्धदेहकत्वात् दातृत्व-भोक्तृत्वान्यतरसम्बन्धेनैकपिण्डवत्त्वाद्वा तथात्वम् । "त्र-याणामुदकं कार्य्यं त्रिषु पिण्डः प्रवर्त्तते । चतुर्थः संप्र-दातैषां पञ्चमोनोपपद्यते"इति मनूक्तेः । लेपभाजश्चतुर्था-द्याः पित्राद्याः पिण्डभागिनः" इत्युक्तेः "जीवति यत्-पिण्डदाता स मृतः सन् तत्पिण्डभोक्तेत्युक्तेश्च सप्ता-नामेव सपिण्डत्वमिति दायभागानुसारिणः ।

एकपुरुष पु० एकः श्रेष्ठः पुरुषः । १पुरुषोत्तमे परमेश्वरे तस्य श्रेष्ठत्वमुक्तं गीतायाम् "यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्त-मः" तस्य च पुरुषत्वमन्तर्यामितया सर्व्वदेहे पुरि वा-सात् । "द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्न-न्योऽभिचाकशीति" श्रुतौ वृक्षरूपदेहे वासोक्तेश्च पुरु-षत्वम् । २प्रधानपुरुषे च । एकः पुरुषो यस्मिन् । ३एकपुरुषान्विते त्रि० । "तदैकपुरुषं राष्ट्रं विलम्बाद्दष्ट-निर्गमम्"भाग० ६,५,७, "एकः पुरुषोभोक्ता यत्र । ४ए-कपुरुषभोक्तृके भोगभेदे तत्रायं भेदः प्रपितामहादीनां त्रयाणां जीवित्वे एकपुरुष एव भोगः यथाह दा० त० व्यासः "पिता पितामहो यस्य जीवेच्च प्रपितामहः । त्रयाणां जीवतां भोगोविज्ञेयोह्येकपुरुषः" । "युगपद्भोगे वर्षशतेऽपि न त्रैपुरुषिकः प्रपितामहस्य तत्र स्वातन्त्र्यात् तस्यैव भोगस्तेन तत्रैकपुरुषो भोगः" दाय० त० रघु०

एकपुष्कल(र) पु० एकं पुष्करं मुखं यस्य रस्य वा लः । काहले वाद्यभेदे । "अथ प्रयाते दाशार्हे प्रावाद्यन्तैकपुष्क(रा)-लाः"भा० उ० ८३ अ० एकपुष्कराः काहलाः" नीलकण्ठः

एकपुष्पा स्त्री एकं पुष्पं यस्याः । वृक्षभेदे यस्यैकमात्रं पुष्पं जायते तस्मिन् जातित्वेऽपि अजा० टाप् ।

एकप्रस्थ पु० कर्म० । १एकस्मिन् प्रस्थे धान्यमानभेदे माषादि० आद्युदात्तोऽयम् । एकः प्रस्थोऽस्य । २एकप्रस्थयुक्ते पर्वते पु०

एकफला(ली) स्त्री एकं फलमस्याः मुग्धबोधमते टाप् । मा० मते ङीप् । एकमात्रफलके ओषधिभेदे

एकभक्त न० एकं भक्तं भोजनं यत्र । स्मृत्युक्ते व्रतभेदे तत्स्व-रूपकालादिनिरूपणं कालमाधवीये यथा

"अथैकभक्तनिर्णयः । ब्रह्मपुराणे वैश्वानरव्रते पठ्यते "प्रतिपद्येकभक्ताशी समाप्ते कपिलाप्रदः" इति । तत्रादा-वेकभक्तव्रतं त्रिविधम् स्वतन्त्रमन्याङ्गमुपवासप्रतिनिधि-रूपं चेति । तेष्विदानीमुदाहृतं स्वतन्त्रम् । तत्रेदं चिन्त्यते । किमुपवासवत् तिथिरस्मिन् ग्रहीतव्या ? उत प्रकारान्तरेणेति ? । उपवासवदिति तावत् प्राप्तम् "दैवं पित्र्यं तथा कार्य्यम्" इति वचनेन उपवासैकभक्तादिव्रत-स्य दैवस्य विवक्षितत्वात् । न च कर्मकालव्याप्त्या तन्निर्ण-य इति शङ्कनीयम् । तत्कालस्य व्याप्त्यनिर्णीतत्वात् । किञ्च तन्निर्णये कर्मकालव्याप्तिवचनस्य पित्र्यविषय-त्वेनोपपत्तेः । तस्मादुपवासवत्तन्निर्णय इति प्राप्ते ब्रू-मः । कर्मकालव्याप्तिरेवात्र निर्णयहेतुः । कर्मकालस्त-त्कर्मस्वरूपं चेत्युभयं स्कान्दपुराणे दर्शितम् । "दिनार्द्ध-समयेऽतीते भुज्यते नियमेन यत् । एकभक्तमिति प्रोक्त-मतस्तत् स्याद्दिवैव हीति" । देवलोऽपि "दिनार्द्धसमये-ऽतीते भुज्यते नियमेन यत् । एकभक्तं तु तत् प्रोक्तं न्यूनं ग्रासत्रयेण त्विति" । अत्र च दिनार्द्धस्योपरि सार्द्धमुहूर्त्त-परिमितोमुख्यः कालः पञ्चधा विभागे मध्याह्नस्यापरभाग एकभक्तस्य कालः दिनार्द्धेऽतीते सति समनन्तरत्वात् । अस्तमयात् प्राचीनोऽवशिष्टोगौणः कालः दिवेत्यभ्य-नुज्ञानात् एवंस्थिते सति मुख्यकालव्यापिनी तिथि-र्ग्रहीतव्या अतएव पद्मपुराणम् । "मध्याह्नव्यापिनी ग्राह्या एकभक्ते सदा तिथिरिति" । बौधायनोऽपि "उदये तूपवासस्य नक्तस्यास्तमये तिथिः । मध्याह्नव्यापिनी ग्राह्या एकभक्तव्रते तिथिरिति" नचात्रोपवासन्यायो युक्तः तत्र पूर्वविद्धायामेव विशेषशास्त्रपर्य्यवसानात् । द्विविधं हि विशेषशास्त्रं तिथिप्रयुक्तमेकं कर्मप्रयुक्तमपरम् । तत्र "पौर्वाह्णिकास्तु तिथयोदैव"इत्यनेन कर्मविषयेण सा-मान्यशास्त्रेणोत्तरविद्धायां प्राप्तायाम्"उपोष्याः परसंयुक्ताः पराः पूर्व्वेण संयुताः" इत्यनेन कर्मविषयेण विशेषशास्त्रेण पूर्वविहिततिथिविषये अपि सामान्यविशेषशास्त्रे उदासेते "पूर्वाह्णिकास्तु तिथय"इति तिथिमात्रमुपजीव्य प्रवृत्तत्वात् सामान्यशास्त्रम्"प्रतिपत् सम्मुखी कार्येति"तिथिविशेषमुप-जीव्य प्रवृत्तत्वाद्विशेषशास्त्रम् । तथा सति द्विविधेनापि विशेषशास्त्रेण पूर्वविद्धायामेवोपवासः सुस्थितः । अत्र तु मध्याह्नव्यापिनीत्येतत्कर्मविषयं विशेषशास्त्रम् । अत-स्तदनुसारेण निर्णयो युज्यते । ननु प्रतिपत्सम्मुखी का-र्य्येत्यनेन तिथिविषयेण विशेषशास्त्रेण कुतो न निर्णय इति चेत् उपवासविषयत्वेनापि तस्योपपत्तेरिति ब्रूमः । ननु मध्याह्नव्याप्तिवचनमपि तिथ्यन्तरैकभक्तविषयत्वेनोप-

पादयितुं शक्यम् अतः कर्मविशेषशास्त्रतिथिविशेषशास्त्रयोः समानबलत्वमिति चेत् अस्तु नाम किं नश्छिन्नं मध्याह्नव्यापित्वसंमुखत्वयोः पूर्वविद्धायामापादयितुं शक्यत्वेन विरोधाभावात्। यदा तूत्तरविद्धायामेव मध्याह्नव्यापित्वं तदा विरोध इति चेत्। बाढम्। तथापि तिथिविषयविशेषशास्त्रात् कर्मविषयविशेषशास्त्रं प्रबलं मध्याह्नतिथेर्गुणत्वात् कर्मणश्च प्रधानत्वात्। तस्मादेवं विधैर्विषयैः कर्मकालव्याप्त्यैव निर्णेतव्यम्। अत्र निर्णेतव्योविषयोभिद्यते। पूर्वेद्युरेव मध्याह्नव्यापित्वम् परेद्युरेव तद्व्यापित्वम्। उभयत्र तद्व्यापित्वम् उभयत्र तदव्यापित्वम् उभयत्र साम्येन तदेकदेशव्यापित्वम्। उभयत्र वैषम्येण तदेकदेशव्यापित्वं चेति। तत्र प्रथमद्वितीययोर्मध्याह्नव्यापित्वस्य निर्णायकत्वम्। तृतीये पूर्वविद्धा ग्राह्या मुख्यकालव्याप्तेः समत्वेऽपि गौणकालव्याप्तेरधिकत्वात्। अनेनैव न्यायेनोभयत्र मुख्यकालव्याप्त्यभावेऽपि गौणकालव्याप्तिलाभात्पूर्व्वविद्धैव। पञ्चमेऽप्ययमेव न्यायो योज्यः। षष्ठे तु यदा पूर्व्वेद्युर्मध्याह्नैकदेशमधिकं व्याप्नोति तदाधिकगौणकालव्याप्तेश्च पूर्व्वेद्युर्ग्राह्या। यदा परेद्युर्मध्याह्नैकदेशमधिकं व्याप्नोति तदा गौणकालव्याप्त्यभावेऽपि मुख्यकालव्याप्त्याधिक्यानुसारेण परेद्युर्ग्राह्या! नन्वस्त्वेवं स्वतन्त्रैकभक्ते निर्णयः अन्याङ्गे तु कथम्?। तत्रकानुपपत्तिः? इति चेत्। "पूजाव्रतेषु सर्वत्र मध्याह्नव्यापिनी तिथि"। "मध्याह्ने पूजयेन्नृपेत्यादि" शास्त्रैरङ्गिनः पूजादेर्मध्याह्ने विहितत्वेनाङ्गस्यैकभक्तस्यापराह्णादौ मुख्यकालासम्भवः। मा भूदोङ्गविषये मुख्यःकालः। प्रधानानुसारेण गुणस्य नेतव्यत्वात्। यदा स्वतन्त्रैकभक्तेऽपि केनचिन्निमित्तेन मुख्यकालासम्भवे गौणकालोऽभ्यनुज्ञायते तदा किमु वक्तव्यम् अन्याङ्गे। यत्तूपवासप्रतिनिधिरूपमेकभक्तं तदुपवासतिथौ कार्य्यं तस्य गौणेऽभ्यनुज्ञातत्वात्। अतएव सुमन्तुः "तिथौ यत्रोपवासः स्यादेकभक्तेऽपि सा तथेति" नच तादृशमेव नाङ्गीति शङ्कनीयम्। उपवासव्रतं प्रक्रम्य रोगादिना तदशक्तौ गुर्व्वनुज्ञयातस्यैकभक्तस्य सम्भावितत्वात्। 'अष्टौ तान्यव्रतघ्नानि आपोमूलं फलम्पयः। हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधमिति' शास्त्रात्"। "एकभक्तेन नक्तेन तथैवायाचितेन च" या०। एकस्मिन् नान्यस्मिन् भक्तः। २नितान्तभक्ते ३अन्यस्मिन्नभक्ते च त्रि० "प्रोष्यानन्यैकभक्तास्तु" मनुः। एकभक्तास्तु अन्यानासक्तास्वरक्तास्तु।

एकभक्ति स्त्री एका अनन्यविषया भक्तिः। १नितान्तभक्तौ २अनन्यभक्तौ एकस्मिन् अनन्यस्मिन् भक्तिरस्य। २नितान्तभक्ते त्रि० "एकभक्तिर्विशिष्यते" गीता।

एकभङ्गीनय पु० एका भङ्गी रीतिस्तस्य तामधिकृत्य नयः। एकरूपाणां बहूनां मध्ये एकस्य यथा प्रवृत्तिरन्यस्यापि तथा प्रवृत्तिरित्येवं ज्ञापके न्यायभेदे "सर्वेषामेकरूपाणामेकस्यापि यदुच्यते। सर्वेषामेव तत्कुर्य्यादेकरूपा हि ते स्मृताः" इत्युक्तेस्तथात्वम्।

एकभार्य्या स्त्री एकस्यैव भार्य्या। १अनन्यपतिकायां साध्व्यां स्त्रियां "तामेकभार्य्यां परिवादभीरोः" रघुः। "एकभार्य्याम् स साध्वीम्" मल्लि०। एका भार्य्या यस्य। २अन्यस्त्रीरहिते पु०। एकेन भार्य्यः। ३एकभर्त्तव्ये त्रि०।

एकभाव पु० एको भावः। अनन्यविषये १रागे २एकस्वभावे ३एकाशये "स्त्रीणांशत्रोः कुमित्रस्य पण्यस्त्रीणां विशेषतः। यो भवदेकभावेन न स जीवति मानवः" इति पञ्चत०। एकस्य भावः ष्यञ्। ४अभिन्नत्वे अभेदे "स्वतेजसा सत्वगुणप्रवाहमात्मैकभावेन भजध्वमद्धा" भाग० ४,२१,१६, एकोभावोयस्य। ५तुल्यभावके त्रि० "या वै यूयं सोदर्यैकभावः" भा० अनु० ७६अ०।

एकभूत त्रि० अनेक एको भूतः च्व्यर्थे अभूततद्भावे ग०स०। १एकीभूते। एकस्मिन् भूतः। २एकासक्ते च "नियतेनैकभूतेन मनसा वरदर्षभम्" भा०शा० ४२अ०।

एकभूम पु० एका भूमिर्यत्र अ समा० सुग्ध०। एकभूमिरस्त्यस्य अर्श० अच् पा०। (एकतला) प्रासादभेदे एवं द्विभूमादयोऽपि (दोताला) (तेतला) इत्यादि प्रासादभेदे।

एकमति स्त्री एका मतिः। एकस्यां मतौ "तथा मनुर्वीभगवान् पितामहोयमेकमत्या पुरुदक्षिणैर्मखैः" ४,१,२४, एका मतिर्यस्य। २एकविषयमतियुक्ते "तैरेकमतिभिर्भूत्वा यत्प्रोक्तं शास्त्रमुत्तमम्" भा० शा० २२७अ०। मतेरेकत्वञ्च एकरूपविषयावलम्बनं विरोतविषयानवलम्बनञ्च तस्य भावः ष्यञ्। ऐकमत्य एकविषयज्ञाने विसंवादिज्ञानाभावे च "कैकमत्यं महाधियाम्" पुरा०।

एकमुख न० एकं मुखं प्रधानं यत्र। १एकप्रधाने द्यूतादौ "द्यूतमेकमुखं कार्य्यं तस्करज्ञानकारणात्" या०। एकं मुखं द्वारं यत्र। २एकद्वारे मण्डपभेदे। 'मण्डपं कारयेत्तत्र प्राङ्मुखं चाप्युदङ्मुखम्"पुरा० अश्वत्थादौ एकमुखमण्डपं विहितम् अन्यत्र तु चतुर्मुखमिति भेदः।

एकं मुखमिवोद्गताकारविशेषोऽस्य । एकवक्त्राकारोन्नतांश-विशिष्टे १रुद्राक्षफलभेदे । तत्फलस्य एकादिवदनवत्ता शास्त्रे उक्ता । तन्मुखन्तु "रुद्राक्षस्योन्नतं प्रोक्तं मुखं पुच्छन्तु निम्नगम्" तन्त्रसा० स्वच्छन्दमहेश्वरे उक्तम् । रुद्राक्षशब्दे विवृतिः । एकवक्त्रादयोऽप्यत्र ।

एकमूला स्त्री एकं मूलमस्त्यस्य अच् । एकं मूलमस्याः बहु० वा जातौ ङीष् स्यात् । (शालपान) १शालपर्ण्याम् अतस्याश्च वैद्यकम् । २एकमूलयुक्ते त्रि० ।

एकयष्टिका स्त्री एका यष्टिरिवावली यस्याः ब०कप् । (एकनर) एकावलीहारभेदे ।

एकयोनि त्रि०एका समा योनिर्जातिरस्य ।१समानजातौ"एत-द्विधानं विज्ञेयं विभागमेकयोनिषु" मनुः "समानजा-तिषु" कुल्लू० कर्म० । २एकस्मिन्नुत्पत्तिस्थाने स्त्री एका योनिरुत्पत्तिस्थानं यस्य । ३समानोत्पत्तिस्थानके त्रि० ।

एकरज पु० एकं श्रेष्ठतया रज्यते केशोऽनेन रन्ज-घञर्थे करणे क । भृङ्गराजे जटा० । स च केशरञ्जनद्रव्यम् ।

एकरस त्रि० एकोऽनन्यविषयकोरसः रागः अभिप्रायः एको-ऽभिन्नः स्वभावो वाऽस्य । १एकरागे २एकाभिप्राये ३अ-भिन्नस्वभावे च"अस्थूलमनण्वह्रस्वमदीर्घममन्तमनपरम-वाह्यं प्रज्ञानघनमेकरसम्" इति श्रुतिः "चिदेकरसवस्तुनि वेदा० । एकोरसोयत्र । ४एकरागविषये त्रि०"तपस्येक रसे रतम्" रामा० । एकोरसोवर्ण्यत्वेन यत्र । प्राधा-न्येन एकरसयुक्ते ५नाटके न० । "एकएव भवेदङ्गी शृ-ङ्गारो वीरएव वा । अङ्गान्यन्ये रसास्तत्र" इति सा०द० उक्तेः नाटकस्य प्राधान्येन शृङ्गारवीररसान्यतरवत्त्वेन वर्णनीयत्वात्तथात्वम् ।

एकराज् पु०एको राजते क्विप् । १सार्वभौमे"हिरण्यकशि-पूराजन्नजेयमजरामरम् । आत्मानमप्रतिद्वन्द्वमेकराजं व्यधित्सत" भाग०७,३,१, "तस्मिन् महेन्द्रभवने महा-बलो महासुरोनिर्जितलोकएकराट्" भाग०७ ४, ११, "यावदीशो महानुर्व्यामाभिमन्यव एकराट्" भाग० १,१८,६, "एकएव राजते राज-क्विप् । २पर-मेश्वरे तस्यैव भासा सर्वस्य भासनात् तस्य तथात्वम् । तथा हि "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" श्रुत्या "यदादित्यगतं तेजो जगद्भासयतेऽखि-लम् । यच्चन्द्रमसि यच्चाग्नौ तत्तेजा विद्धि मामकम्" गीतोक्तेः "अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् । आद्यं त्रिकं ब्रह्मरूपं मायारूपं ततो द्वयम्" इत्युक्तेश्च तस्य सर्वेषां भानप्रयोजकत्वात् "एष स्वयंज्योतिरिति श्रुतेस्तस्य स्वयंप्रकाशमानत्वात् स्वप्रकाशे अन्यानपे-क्षणाच्च तथात्वम् ।

"स वा एष द्रष्टा नापश्यद्दृश्यमेकराट्" भाग०३,५,२०,

एकराज पु०एको राजा टच्सा० । एकस्मिन् श्रेष्ठे च राजनि

एकरात्र न०एका रात्रिः—नि०अच् संख्यापूर्वकतया रात्रा-न्तत्वेऽपि न पुंस्त्वम् । एकाहोरात्रे । "एकरात्रं तु नियसन्नतिथिर्ब्राह्मणः स्मृतः" "यत् करोत्येकरात्रेण वृष-लीसेवनात् द्विजः" । "एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतः" मनुः । रात्रिपदमहोरात्रपरम् । "कललं त्वेक-रात्रेण" भाग०३,३१,२ । एकरात्रभोजने पर्याप्तम् ठञ् । एकरात्रिक एकदिनभोजननिर्वाहपर्याप्ते त्रि० "आददीताममेवास्मादवृत्तावेकरात्रिकम्" मनुः ।

एकराशि पु० कर्म० । १एकस्मिन् मेषादौ राशौ । "एकराशि-गतौ स्यातामेकर्क्षविषये यदा" ज्यो० । २एकस्मिन् धान्यादेः स्तूपे च । "एकराशिं पञ्चधा कुरुते" सि०कौ० ।

एकरिक्थिन् त्रि० एकस्य पितुः रिक्थमस्त्यस्य इनि । एकपित्रंशहरे । "यद्येकरिक्थिनौ स्यातामौरसक्षेत्रजौ सुतौ" मनुः । एकं समानं रिक्थमस्त्यस्य इनि । २अवि-भक्ते ३संसृष्टे च । स्त्रियां ङीप् ।

एकरूप त्रि० एकं समानं रूपमस्य । १तुल्यरूपे "सर्वेषामेक-रूपाणामेकस्यापि यदुच्यते । सर्वेषामेव तत् कुर्यादेक-रूपाहि ते स्मृताः" स्मृतिः । कर्मधा० । २एकस्मिन् रूपे । "पुरुषार्थं प्रति विमोचयत्येकरूपेण सां०का० । एक-रूपस्य भावः ष्यञ् । ऐकरूप्य तुल्यरूपे न० । त्वएक-रूपत्व न० तल्, एकरूपता स्त्री तत्रार्थे ।

एकरूप्य त्रि० एकस्मात् एकस्मा वा आगतः रूप्यप् । १एकत आगते । कर्म० । २केवलरजते न० बहु० । ३तद्वति त्रि० ।

एकर्च पुंन० एका ऋक् अ समा० अर्द्धर्चादि । १एकस्यामृचि एका ऋक् यत्र । २एकर्चयुक्ते सूक्ते न० । "चतुरुत्तराण्ये-कर्चानि" शत०ब्रा०१०,१,२,६, ३एकर्चस्तुत्ये देवभेदे "त्र्यृ-चेभ्यः स्वाहा एकर्चेभ्यः स्वाहा" अथ० १६,२२,२०,

एकल त्रि० इण-विट् एगता कला यस्य । १असहाये एकलस्थायते गच्छते स्नायते ला-घञर्थे क "स्व-सुपेति" स० । २असहाये एकके "अथ ऊर्द्ध उदेत्य नैवेदेता नास्तमेतैकल एव मध्ये स्थाता" छा०उ० "एकलोऽ-द्वितीयोनयवो वा" भा० "जायेत चैकलः प्राणीम्रियेत तथैकलः । एकलः सुकृतं भुङ्क्तेऽश्नीयाद्दुष्कृतमेकलः" काशी०

एकमेकत्वं लाति ला क । एकत्वान्वये “तस्मिन् वाव किल स एकलः पुलहाश्रमोपवने” भाग० ५, ७, १२ ।

एकलव्य पु० निषादराजस्य हिरण्यधनुषः पुत्रे तत्कथा भारते आ० १२४ अ० ।

“ततो निषादराजस्य हिरण्यधनुषः सुतः । एकलव्यो महाराज! द्रोणमभ्याजगाम ह । न स तं प्रतिजग्राह नैषादिरिति चिन्तयन् । शिष्यं धनुषि धर्म्मज्ञस्तेषामेवान्ववेक्षया । स तु द्रोणस्य शिरसा पादौ गृह्य परन्तप! । अरण्यमनुसंप्राप्य कृत्वा द्रोणं महीमयम् । तस्मिन्नाचार्य्यवृत्तिञ्च परमामास्थितस्तदा । इष्वस्त्रे योगमातस्थे परं नियममास्थितः । परया श्रद्धयोपेतो योगेन परमेण च । विमोक्षादानसन्धाने लघुत्वं परमाप सः । अथ द्रोणाभ्यनुज्ञाताः कदाचित् कुरुपाण्डवाः । रथैर्विनिर्ययुः सर्व्वे मृगयामरिमर्द्दन! । तत्रोपकरणं गृह्य नरः कश्चिद्यदृच्छया । राजन्ननुजगामैकः श्वानमादाय पाण्डवान् । तेषां विचरतां तत्र तत्तत् कर्म्मचिकीर्षया । श्वा चरन् स वने मूढो नैषादिं प्रतिजग्मिवान् । स कृष्णमलदिग्धाङ्गं कृष्णाजिनजटाधरम् । नैषादिं श्वा समालक्ष्य भषंस्तस्थौ तदन्तिके । तदा तस्याथ भषतः शुनः सप्त शरान्मुखे । लाघवं दर्शयन्नस्त्रे मुमोच युगपद्यथा । स तु श्वा शरपूर्णास्यः पाण्डवानाजगाम ह । तं दृष्ट्वा पाण्डवा वीराः परं विस्मयमागताः । लाघवं शब्दवेधित्वं दृष्ट्वा तत् परमं तदा । प्रेक्ष्य तं व्रीडिताश्चासन् प्रशशंसुश्च सर्व्वशः । तं ततोऽन्वेषमाणास्ते वने वननिवासिनम् । ददृशुः पाण्डवा राजन्नस्यन्तमनिशं शरान् । न चैनमभ्यजानंस्ते तदा विकृतदर्शनम् । अथैनं परिपप्रच्छुः को भवान् कस्य वेत्युत । एकलव्य उवाच । निषादाधिपतेर्व्वीरा! हिरण्यधनुषः सुतम् । द्रोणशिष्यञ्च मां वित्त धनुर्व्वेदकृतश्रमम् । वैशम्पायन उवाच । ते तमाज्ञाय तत्त्वेन पुनरागम्य पाण्डवाः । यथावृत्तं वने सर्व्वं द्रोणायाचख्युरद्भुतम् । कौन्तेयस्त्वर्ज्जुनो राजन्नेकलव्यमनुस्मरन् । रहो द्रोणं समासाद्य प्रणयादिदमब्रवीत् । अर्ज्जुन उवाच । तदाहं परिरभ्यैकः प्रीतिपूर्व्वमिदं वचः । भवतोक्तो न मे शिष्यस्त्वद्विशिष्टो भविष्यति । अथ कस्मान्मद्विशिष्टो लोकादपि च वीर्य्यवान् । अन्योऽस्ति भवतः शिष्यो निषादाधिपतेः सुतः । वैशम्पायन उवाच । मुहूर्त्तमिव तं द्रोणश्चिन्तयित्वा विनिश्चयम् । सव्यसाचिनमादाय नैषादिं प्रति जग्मिवान् । ददर्श मलदिग्धाङ्गं जटिलं चीरवाससम् । एकलव्यं धनुष्पाणिमस्यन्तमनिशं शरान् । एकलव्यस्तु तं दृष्ट्वा द्रोणमायान्तमन्तिकात् । अभिगम्योपसंगृह्य जगाम शिरसा महीम् । पूजयित्वा ततो द्रोणं विधिवत् स निषादजः । निवेद्य शिष्यमात्मानं तस्थौ प्राञ्जलिरग्रतः । ततो द्रोणोऽब्रवीद्राजन्नेकलव्यमिदं वचः । यदि शिष्योऽसि मे वीर! वेतनं दीयतां मम । एकलव्यस्तु तत् श्रुत्वा प्रीयमाणोऽब्रवीदिदम् । एकलव्य उवाच । किं प्रयच्छामि भगवन्नाज्ञापयतु मां गुरुः । न हि किञ्चिददेयं मे गुरवे ब्रह्मवित्तम! । द्रोण उवाच । यद्यवश्यं त्वया देयमेकलव्य! प्रयच्छ मे । एकाङ्गुष्ठं दक्षिणस्य हस्तस्येति मतं मम”। “एकलव्यस्तु तच्छ्रुत्वा वचो द्रोणस्य दारुणम् । प्रतिज्ञामात्मनो रक्षन् सत्ये च नियतः सदा । तथैव हृष्टवदनस्तथैवादीनमानसः । छित्वाऽविचार्य्य तं प्रादात् द्रोणायाङ्गुष्ठमात्मनः । ततः शरन्तु नैषादिरङ्गुलीभिर्व्यकर्षत । न तथा च स शीघ्रोऽभूद्यथा पूर्व्वं नराधिप!”। अयञ्च निषादराजस्य पालित पुत्रः श्रुतदेवपुत्रः यथोक्तं हरिवं० ३५ अ० । “श्रुतदेवात् प्रजातस्तु नैषादिर्यः प्रतिश्रुतः । एकलव्यो महाराज! निषादैः परिवर्द्धितः” अतएवांशावतारे “रुक्मी च नृपशार्दूल! राजा च जनमेजय”! इत्युपक्रम्य एकलव्यप्रभृतीन् कतिचिन्नृपानुक्त्वा “गणात् क्रोधवशादेष राजपूगोऽभवत् क्षितौ” आ० ६७ अध्याये तस्य राजवंशत्वेन राजपूगान्तर्गततोक्तिः । “एकलव्यमिव जन्मान्तरगतम्” काद० ।

एकलिङ्ग न० एकं पञ्चक्रोशमध्ये लिङ्गं यत्र । १सिद्धिसाधन क्षेत्रभेदे “पञ्चक्रोशान्तरे यत्र न लिङ्गान्तरमीक्ष्यते । तदेकलिङ्गमाख्यातं तत्र सिद्धिरनुत्तमा” आगमः । एकं लिङ्गं पुंस्त्वादि यस्य । २नियतैकलिङ्गे शब्दे पु० । एकं लिङ्गमिन्द्रियं चक्षुर्यस्य । ३कुवेरे शब्दरत्ना० ।

एकलू पु० एकं लुनाति लू-क्विप् ६ त० । ऋषिभेदे ततः गोत्रे गर्गा० यञ् । ऐकलव्य तद्गोत्रापत्ये पुंस्त्री बहुत्वे यञो लुक् । एकलव इत्येव स्त्रियां न लुक् ऐकलव्यः स्त्रियः

एकवक्त्र पु० । १असुरभेदे “एकवक्त्रो महावक्त्रो द्विवक्त्रः कालसन्निभः” हरिवं २६२ अ० । २एकमुखे रुद्राक्षफले न० ।

एकवचन न० एकमेकत्वमुच्यतेऽनेन वच–करणे ल्युट् ६ त० । व्याकरणोक्ते एकत्वसंख्यावाचके “द्व्येकयोर्द्विवचनैकवचने” पा० उक्ते स्वादौ तिङादौ च । “एकत्वबोधकाच

सु अम् टा ङे ङसि ङस् ङि इत्येवं रूपाः तिप् सिप् मिप् ते से इ इत्येवं रूपाश्च प्रत्ययभेदाः "अथोनेदेकवचनेन बहुवचनं व्यवायामेति" शत० ब्रा० १२,५,१,१८।

एकवत् अव्य० एकस्येव वति। १एकताश्रयस्य सदृशे कार्य्ये "नपुंसकमपुंसकेनैकवच्चास्यान्यतरस्याम्" पा०। शुक्लः पटः शुक्ला शाटी शुक्लं वस्त्रम् इत्येषां वाक्ये नपुंसकमात्रशेषे विकल्पेन एकवत् कार्य्यविधानात् इदं शुक्लम् इमानि शुक्लानीति वा" सि०कौ०। २एकवचनवदित्यर्थे च। "एकवच्चान्वान्वादेशेऽकौ हि" विष्णुः। "एकवत् एकवचनवत् यथा स्यात्तथोक्तेति" आ०त०रघु०। एकेन तुल्यक्रियावति। ३एकेन तुल्यक्रियायाम् अव्य०।

एकवद्भाव पु० एकेन तुल्यो भावः भवनम्। एकत्वाश्रयस्याद्येकवचनान्ततारूपे शब्दनिष्ठे कार्य्यभेदे।

एकवर्ण त्रि० एकोवर्णो रूपं यस्य। अन्यरूपामिश्रितवर्णयुक्ते। एकोवर्णः जातिभेदो यत्र। २ब्राह्मणादिवर्णविभागशून्ये कलियुगावशेषस्यलोके। "एकवर्णस्तदा लोको भविष्यति युगक्षये" भा०व०१९० अ०। वर्ण्यतेऽनेन वर्णः एकः वर्णः स्वरूपं यस्य। ३एकस्वरूपे। "य एकवर्णं तमसः परम्" (उपासते) भाग० ८,५ १८। एकवर्णमेकस्वरूपं ज्ञानम् एकरूपमित्यर्थः। कर्मधा०। एकस्मिन् ४शुक्लादौ रूपे एकस्मिन् ५ब्राह्मणादौ जातिभेदे एकस्मिन्नक्षररूपे ६शब्दे च। ७श्रेष्ठवर्णे ८श्रेष्ठजातौ च पु०। तमर्हति ठक्। ऐकवर्णिक ब्राह्मणादि आद्यवर्णमात्रार्हे व्रतधर्मादौ त्रि०। "द्विजातीनाम्व्रतं धर्मोह्येकस्वैकवर्णिकः। यज्ञाध्ययनदानानि त्रयः साधारणाः स्मृताः" भा०व० १५० अ०। ९वीजगणितोक्ते सजातीये तुल्यवर्णे दृढभेदे च।

एकवर्णसमीकरण न० एकवर्णौ तुल्यरूपौ समीक्रियेते अनेन करणे ल्युट् ६त०। वीजगणितोक्ते वीजचतुष्टयान्तर्गतवीजभेदे अव्यक्तशब्दे तद्गणितप्रकारो दर्शितः 'प्रथममेकवर्णसमीकरणं वीजं, द्वितीयमनेकवर्णसमीकरणं वीजम्, यत्रैकवर्णयोर्द्वयोर्बहूनां वा वर्गादिगतानां समीकरणं तन्मध्यमाहरणम्, यत्र भावितस्य तद्भावितमिति वीजचतुष्टयं वदन्त्याचार्य्याः" भास्कराचार्य्यः। अस्योदाहरणम्। "एकस्य रूपत्रिंशती षडश्वा अश्वादशान्यस्य तु तुल्यमूल्याः। ऋणं तथा रूपशतञ्च तस्य तौ तुल्यवित्तौ च किमश्वमूल्यम्" एतच्चाव्यक्तशब्दे व्याख्यातम्। अत्र तुल्यमूल्यस्याश्वरूपस्यैकविधस्यैव पृष्टसंख्यान्वितस्य समीकरणात् एकवर्णसमीकरणमित्यनुगतार्थसंज्ञा।

एकवर्णी स्त्री एकमसहायं यथा तथा वर्ण्यते शब्द्यतेऽनया वर्ण–करणे अच् २त० गौरा० ङीष्। करतालीरूपे वाद्ये शब्दरत्ना०। कराभ्यामितरकारणानपेक्षया तद्वाद्यवादनात् तथात्वम्।

एकवर्षिका स्त्री एको वर्षो वयःकालोयस्याः कप् अत-इत्त्वम्। एकहायन्यां स्त्रीगव्याम् हेम० एकवर्षभवे त्रि०।

एकवस्त्र त्रि० एकं वस्त्रं यस्य। १उत्तरीयवस्त्रशून्ये २एकजातीयवस्त्रान्विते च एकवासःप्रभृतयोऽप्यत्र। कर्म्म०। एकस्मिन् वस्त्रे उत्तरीयरहितपरिधानमात्रवस्त्रे न०। तन्मात्रे स्नाननिषेधमाह आ०त० गौतमः "एकवस्त्रेण यत्स्नानं कृच्छ्रा विद्धेन चैव हि। स्नातस्तु न च विशुद्धः स्यात् श्रिया च परिहीयते" अतएव "स्नानं तर्पणपर्य्यन्तं कुर्य्यादेकेन वाससा"। इति यदि समूलं तदा प्रेततर्पणपरमिति। तत्र "एकवस्त्रा ज्ञातयः" इत्यादिना एकवस्त्रत्वविधानात् "एकेन एकजातीयेन इति" वाचस्पतिमिश्रः 'येन वाससा स्नानं कृतं जलस्थस्य तेनैव तर्पणम्" इति कल्पतरुवार्णवः। न च "स्नानशाट्यान्तु दातव्यास्तदशिरस्कोविशुद्धये। जलमध्ये तु यः कश्चित् द्विजातिर्ज्ञानदुर्बलः। निष्पीडयति तद्वस्त्रं स्नानं तस्य वृथा भवेत्"। इति वशिष्ठवचने स्नानशाटीमिति तद्वस्त्रमिति एकवचननिर्देशेन च स्नानेऽप्येकवस्त्रत्वमिति वाच्यम्। अत्र विशुद्धय इत्यभिधानेनाधोधृतवस्त्रस्यैव मन्त्रयेण प्रक्षालनं मदुत्तरीयस्य एतदर्थमेकवचनम्। अतएव "सन्त्रयेणाधरीयवस्त्रं प्रक्षाल्य" इत्याह्निकचिन्तामणिः। वशिष्ठवचनैकवाक्यतया "स्नातोनाङ्गानि निर्मृज्यात् स्नानशाट्या न पाणिना" इति विष्णुपुराणीयेनाधरीयवस्त्रेणैव गात्रमार्ज्जनं निषिध्यते। एतेन "निष्पीड्य स्नानवस्त्रमिति" कात्यायनवचने एकत्वमविवक्षितमिति निरस्तम्। अतएव सर्वत्रैकवचननिर्देशः" आ०त० रघु०। एवं वैदिककर्म्ममात्रे एकवस्त्रतानिषेधः उत्तरीयशब्दे दर्शितः

एकवाक्य न० एकम् एकार्थं वाक्यम्। वाक्यार्थाकाङ्क्षिताकाङ्क्षापूरणेन विशिष्टैकार्थबोधके १वाक्यभेदे तच्च द्विविधं पदैकवाक्यं वाक्यैकवाक्यञ्च तच्च वेदा०प० निरूपितं यथा "एवमर्थवादवाक्यानां प्रशंसापराणां प्राशस्त्ये लक्षणा, सोऽरोदीदित्यादिनिन्दार्थवादवाक्यानां निन्दितत्वे लक्षणा अर्थवादगतपदानां प्राशस्त्यादिलक्षणाभ्युपगमे एकेन पदेन लक्षणया तदुपस्थितिसम्भवे पदान्तरवैयर्थ्यं स्यात्

एवञ्च विध्यपेक्षितप्राशस्त्यरूपपदार्थप्रत्यायकतया अर्थवादपदसमुदायस्य पदस्थानीयतया विधिपदेनैकवाक्यता भवतीत्यर्थवादवाक्यानां पदैकवाक्यता । क्व तर्हि वाक्यैकवाक्यता ? यत्र प्रत्येकं भिन्नभिन्नसंसर्गप्रतिपादकयोर्वाक्ययोराकाङ्क्षावशेन महावाक्यार्थबोधकत्वं यथा "दर्शपौर्णमासाभ्यां स्वर्गकामो यजेत" इत्यादिवाक्यानां "समिधो यजति" इत्यादिवाक्यानाञ्च परस्पराङ्गाङ्गिभावबोधकतयैकवाक्यता । तदुक्तम् भट्टपादैः "स्वार्थबोधे समाप्तानामङ्गाङ्गित्वाद्यपेक्षया । वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते इति" । एकमविसंवादितया तुल्यरूपं वाक्यम् । अविसंवादितया तुल्यरूपे २वाक्ये च । "अवध-कटु नृपाणामेकवाक्यं विवव्रुः" रघुः । "एकमविसंवादिवाक्यमेकवाक्यम्" मल्लि० ।

एकवाद् पु० एकेन हस्तेन वाद्यते वाद-कर्मणि ण्यत् । १डिण्डिम वाद्ये शब्दरत्ना० तस्यैकहस्तेन वादनात् तथात्वम् । वादः कथाभेदः एकस्य एकत्वस्य ब्रह्माभिन्नत्वस्य वादः । २वेदान्तिभिरुक्ते वादभेदे सर्वेषां ब्रह्माभिन्नत्वेनैकत्वस्य प्रतिपादनात्तद्वादस्य तथात्वम् ।

एकविंशत् स्त्री एकाधिका विंशतिः ष्टु० । (एकुश) १संख्याभेदे २तदन्विते च एकविंशतिशब्दोऽप्यत्र स्त्री । एकविंशतः एकविंशतेर्वा पूरणः डट् । एकविंश तत्संख्यापूरणे स्वार्थे कन् तत्रैवार्थे "दश पूर्वान् परान् वंश्यानात्मानं चैकविंशकम्" मनुः । पूरणार्थे डटि वा तमटि तु एकविंशत्तम एकविंशतितम इतिभेदः तत्पूरणार्थे स्त्रियां ङीप् । तदस्मिन्नधिकं शते सहस्रे वेत्यर्थे कन् । एकविंशतिक एकविंशक एकविंशत्यधिकशतादौ वृद्ध्यायलाभोपदारूपेण दीयते इत्यर्थे कन् । एकविंशतिक एकविंशत्क इत्यादिरूपेण दीयमानविंशतिके शते । अवयवे कन् रूपसमत्वात् एकविंशतिसंख्यायां न० । एकविंशतिर्मन्त्राः परिमाणमस्य स्तोमस्य ड । एकविंश १तावन्मन्त्रके स्तोमभेदे एकविंशस्तोमशब्दे विवृतिः । "शत्शनोडिनिर्वक्तव्यः" "विंशतेश्च" वार्त्ति० डिनि । एकविंशिन् एकविंशतिसंख्यायुक्ते त्रि० स्त्रियां ङीप् । प्रकारे धा एकविंशतिधा एकविंशतिप्रकारे अव्य० । एकाधिका विंशतिः संख्येया यत्र ब० समा० । एकाधिकविंशतिसंख्येये । एकविंश संख्यातः स्तोमोऽस्त्यस्य मतुप् मस्य वः । एकविंशवत् एकविंशस्तोमान्विते त्रि० स्त्रियां ङीप् । "त्रिवृद्वतीं पुरस्तादुपदधात्येकविंशवतीं पश्चात्" शत०ब्रा०८,४,४,१।

एकविंशस्तोम पु० कर्म्म० । एकविंशतिमन्त्रपरिमिते स्तोमभेदे "एकविंशस्तोमेन ऋषभो याज्ञतुरईजे" शत०ब्रा० १२,५,४,१५. स्तोमश्च सोमादियागेषु सामगैः क्रियमाणः पृष्ठ्यादिसंज्ञः स्तुतिभेदः । एकविंशस्तोमस्य विष्टुतिप्रकारः ताण्ड्य० ब्रा० भा० दर्शितो यथा "एकविंशस्तोमस्य चतस्रो विष्टुतयः । तत्र सप्तसप्तिन्याख्यां प्रथमां विष्टुतिं दर्शयति" भा०। "सप्तभ्यो हिङ्करोति स तिसृभिस्स तिसृभिस्स एकया, सप्तभ्यो हिङ्करोति स एकया स तिसृभिः स तिसृभिः, सप्तभ्यो हिङ्करोति स तिसृभिस्स एकया स तिसृभिः, सप्तसप्तिन्येकविंशस्य विष्टुतिः" ब्रा० । "अथास्यैव स्तोमस्य उद्यत्याख्यां द्वितीयां विष्टुतिमाह" भा० । "पञ्चभ्यो हिङ्करोति स तिसृभिः स एकया स एकया, सप्तभ्यो हिङ्करोति स एकया स तिसृभिः स तिसृभिः, नवभ्यो हिङ्करोति स तिसृभिः स तिसृभिः स तिसृभिरुद्यत्येकविंशस्य विष्टुतिः" ब्रा०। "अथास्यैव स्तोमस्य प्रतिष्टुतिर्नाम तृतीया विष्टुतिः प्रदर्श्यते" भा० । "नवभ्यो हिङ्करोति स तिसृभिः स तिसृभिः स तिसृभिः, पञ्चभ्यो हिङ्करोति स एकया स तिसृभिः स एकया, सप्तभ्यो हिङ्करोति स तिसृभिः स एकया स तिसृभिः, प्रतिष्टुतिः" ब्रा० । "त्रिवृदादिस्तोमचतुष्टयप्रतिरूपकत्वात् अस्याः प्रतिष्टुतिरिति संज्ञा यौगिकी अथास्यैव स्तोमस्य सूर्म्याख्यां चतुर्थीं विष्टुतिं दर्शयति" भा० । "नवभ्यो हिङ्करोति स तिसृभिः स तिसृभिः स तिसृभिः, तिसृभ्यो हिङ्करोति स पराचीभिः, नवभ्यो हिङ्करोति स तिसृभिः स तिसृभिः स तिसृभिः सूर्म्युभयत आदीप्ता" ब्रा० । "उभयत आद्यान्त्ययोः पर्याययोर्न्यूनवकान्तेन त्रिवृत्त्वादुभयतः आदीप्ता त्रिवृत्साम्नश्च प्रजापतिमुखात् सहोत्पत्तेरादीप्ता सूर्म्मी कथा मध्ये स्थूलेतरा तत्पादस्थादस्या अप्येषा संज्ञा । अस्या अपि मध्यमपर्यायस्य ऋक्त्रयात्मकत्वेन न्यूनवकाभ्यामल्पत्वात्" भा० । अत्र उद्यतीशब्दे दर्शिततद्भाष्यानुसारेण एतदर्थोदर्श्यते एकैकस्य साम्नः पञ्च भक्तयः प्रस्तावोद्गीथप्रतिहारोपद्रवनिधनाख्याः तत्र हिङ्कारस्तु त्रिभिस्त्रिभिरुद्गातृभिः कर्त्तव्यः "साम्ने साम्ने हिंकुर्य्युरिति" सूत्रकृतोक्तेः । तथा च सप्तभ्य इति चतुर्थी सप्त ऋचो गातुं हिङ्कुर्य्युरित्यर्थः । तत्र एकैकं सूक्तं त्रिरावर्त्तनीयम् । तत्राद्यावृत्तौ आद्याया द्वितीयायाश्च त्रिरभ्यासः । द्वितीयावृत्तौ द्वितीयाया अन्त्यायाश्च त्रिरभ्यासः । तृतीयावृत्तौ

आद्यान्त्ययोस्त्रिरभ्यासः। एवं सप्तसप्तिनी नाम विष्टुतिः। पर्य्यायत्रयेऽपि सप्तर्चैः स्तवनात् तथात्वम् सप्त सप्त स्तव प्रतिपर्य्यायं परिमाणमस्यां “मन्मतो डिनि” वार्त्ति० डिनि ङीप्। सप्तसप्तिनीति व्युत्पत्तेरन्वर्थसंज्ञा। पञ्चर्च-योगात् हिङ्कुर्य्युरित्यर्थः। तत्र पञ्चानां मध्ये आद्यावृत्तौ आद्याया स्त्रिरावृत्तिः। द्वितीयावृत्तौ सप्तर्चयोगात् हिङ्कुर्य्युः तत्र मध्यमान्त्ययोस्त्रिरावृत्तिः। तृतीयावृत्तौ नवर्चयोगात् हिङ्कुर्य्युः तत्र च सर्वासां त्रिरावृत्तिः इयस्त्र्यत्येकविंश-स्तोमस्य विष्टुतिः। पञ्चर्चसप्तर्चनवर्चानां यथोत्तरस-ङ्ख्याधिक्येन उद्यतीतिसंज्ञाऽन्वर्था। नवर्चयोगात् हिङ्कुर्य्युः तत्राद्यावृत्तौ सर्वासां त्रिरभ्यासः। ततः पञ्चर्चयोगात् हिङ्कुर्य्युः। तासु द्वितीयायाः त्रिरा-वृत्तिः। ततः सप्तर्चयोगात् हिङ्कुर्य्युः। तृतीयावृत्तौ तासु आद्यान्त्ययोस्त्रिरभ्यासः। इयं प्रतिष्टुतिर्नाम तस्य स्तोमस्य विष्टुतिः। नवर्चयोगात् हिङ्कुर्य्युः आद्यावृत्तौ तासु सर्वासां त्रिराभ्यासः। ततस्त्रिसप्तर्चयोगात् हि-ङ्कुर्य्युः। द्वितीयावृत्तौ तासां कस्याश्चपि न त्रिरा-वृत्तिः। ततो नवर्चयोगात् हिङ्कुर्य्युः तत्र तृतीयावृत्तौ सर्वासां त्रिरावृत्तिः। इयमस्य स्तोमस्य ऊर्मी नाम विष्टुतिः तत्संज्ञानिमित्तं भाष्ये उक्तम्।

एकविध त्रि० एका विधा प्रकारोऽस्य। एकप्रकारे “मा-नुष्यश्चैकविधः समासतो भौतिकः सर्गः” सां०का।

एकविलोचन त्रि० एकं विलोचनं यस्य १काणे। २तत्प्र-धानदेशभेदे च स च देशः वृहत्सं० कूर्म्मविभागे पश्चिमो-त्तरस्यामुक्तः। पश्चिमोत्तरस्यामित्युपक्रम्य “एकविलो-चनशूलिकदीर्घग्रीवास्यकेशाश्च”। ३कुवेरे पु० तस्य वामने-त्रस्य स्फोटनात् तथात्वम्। एकपिङ्गशब्दे विवृतिः। ४काके पुंस्त्री स्त्रियां जातित्वात् ङीष्। तस्योभयगोल-कसत्त्वेऽपि एकमेव नेत्रेन्द्रियमुभयगोलके सञ्चरतीति तस्य तथात्वम्। एकलोचनादयोऽत्र। कर्म्म०। ५एकस्मिन् लोचने न० बौद्धभेदैर्हि। एकमेव लोचनं नासास्थिभेदेन व्यवधानाद्द्वित्वेन प्रतीयते इत्यङ्गीक्रियते तदेतन्मतमुत्थाप्य गौत०सू० वृत्त्योः खण्डितं यथा

“नैकस्मिन्नासास्थिव्यवहिते द्वित्वाभिमानात्” सू० एकमिदं चक्षुर्मध्ये नासास्थिव्यवहितं तस्यान्तौ गृह्यमाणौ द्वित्वा-भिमानं प्रयोजयतः मध्यव्यवहितस्य दीर्घस्येव” वृ०। “एक-विनाशे द्वितीयाविनाशान्नैकत्वम्” सू० “एकस्मिन् उपहते चोद्धृते वा चक्षुषि द्वितीयमवतिष्ठते चक्षुर्विषयग्रहण-लिङ्गम् तस्मादेकस्य व्यवधानानुपपत्तिः” वृ०। “अवयवनाशे-ऽप्यवयव्युपलब्धेरहेतुः” सू० “एकविनाशे द्वितीयाविनाशा-दित्यहेतुः कस्मात् वृक्षस्य हि कासुचिच्छाखासु छिन्नासूपल-भ्यत एव वृक्षः” वृ०। “दृष्टान्तविरोधादप्रतिषेधः” सू० “न कारणद्रव्यस्य विभागे कार्य्यद्रव्यमवतिष्ठते नित्यत्वप्रसङ्गात् बहुष्ववयविषु यस्य कारणानि विभक्तानि तस्य विनाशः। येषां कारणान्यविभक्तानि तान्यवतिष्ठन्ते अथवा दृश्य-मानार्थविरोधो दृष्टान्तविरोधः मृतस्य हि शिरःकपाले द्वाववटौ नासास्थिव्यवहितौ चक्षुषः स्थाने भेदेन गृह्येते न चैतदेकस्मिन्नासास्थिव्यवहिते सम्भवति। अथ चैकविनाश-स्यानियमात् द्वाविमाववयवौ तौ च पृथगावरणोपघातौ अ-नुमीयेते विभिन्नाविति अवपीडनाच्चैकस्य चक्षुषो रश्मि-विषयसन्निकर्षस्य भेदाद्दृश्यभेद इव गृह्यते तच्चैकत्वे विरुध्यते अवपीडननिवृत्तौ चाभिन्नप्रतिसन्धानमिति तस्मा-देकस्य व्यवधानानुपपत्तिः” अवपीडनं चिपिटीकरणम्।

एकवीर पु० कर्म्म० वा० एकशब्दस्य पूर्वनि०। १श्रेष्ठवीरे “यस्त्वेकवीरोऽतिरथो विजिग्ये” भाग० २,१,४०। “गोप्तैकवीरो नरदेवनाथः” ४,१६,१९। २महावृक्षे “मादकोऽम्लपणकटुकस्तोदवातादिनाशकः। चटुलोऽकटि-पृष्ठादिवलपक्षादिघातकः” इति वैद्यकोक्तगुणके ४वृक्षभेदे वीरैक इत्यपि साधुः वस्तुत एकशब्दस्य संख्यापरत्वे वीरैकः श्रेष्ठपरत्वे एकवीर इति व्यवस्था।

एकवीराकल्प पु० एकः प्रधानं वीरः कुलाचारी यस्याः ताहृश्याः तारादिविद्यायाः कल्पः उपासनाज्ञापक-शास्त्रम्। तन्त्रभेदे यत्र वीराचारसेव्यायाः देव्या रहस्यादिकमुक्तं तस्मिन् तन्त्रशास्त्रभेदे।

एकवृक्ष पु० एकोवृक्षोयत्र। “चतुः क्रोशान्तरे यत्र न वृक्षा-न्तरमीक्ष्यते। एकवृक्षः स विज्ञेयोदेशः सिद्धिप्रदायकः” इत्यागमोक्ते १देशभेदे। कर्म्म०। २एकस्मिन् वृक्षे “एकवृक्षो यत्र नौका भवतीति” सारमञ्जरी।

एकवृत् स्त्री एकधैव वर्त्तते अजर्भूतगत्यर्थे वृत-भावे क्विप्। १एकधावर्त्तने एकावृत्तौ “एकवृत्करणम्” कात्या० ८,२, २८। कर्त्तरि क्विप्। २एकधा वर्त्तमाने। एकधा वर्त्ततेऽत्र आधारे क्विप्। ३स्वर्गलोके। “एकोत्तरा-ञ्जुहोत्येकवृद्वै स्वर्गो लोकएकधैवैनं स्वर्गं लोकं गमयति” शत० ब्रा० १२,२,१,५।

एकवृन्द पु० “वृत्तोन्नतोयः श्वयथुःसदाहः कण्डून्वितोऽपाक्य मृदुर्गुरुश्च। नाम्नैकवृन्दः परिकल्पितोऽसौ” इति सु-

श्रुतोक्ते १रोगभेदे स च कण्ठगतो मुखरोगभेदः । "मुखरोगाः पञ्चषष्टिः" इत्युपक्रम्य तेषां मध्ये सप्तदश कण्ठमूले इत्युक्त्वा "अथ कण्ठगतास्तु रोहिण्यः पञ्च कण्ठशालूकमधिजिह्वो वलयोबलास एकवृन्दोवृन्दः शतघ्नीगिलायुर्गलविद्रधिर्गलौघःस्वरघ्नो मांसतानोविदारी चेति" इति कण्ठगतान् विभज्य तेषां लक्षणाभिधाने एतल्लक्षणस्योक्तेस्तस्य मुखरोगत्वम् । "एकवृन्दं तु विस्राव्य विधिं शोधनमाचरेत्" सुश्रु० । कर्म्म० । एकस्मिन् वृन्दे २एकराशौ न ।

एकवृष पु० कर्म्म० । १एकस्मिन् वृषे तस्य स्वामिनोऽनिष्टदायकत्वम् यथा "एकोवृषस्त्रयोगावः सप्ताश्वा नवदन्तिनः । सिंहप्रसूतिका गावः कथिताः स्वामिघातकाः" पुरा० वङ्ग० । २एकवृषयुक्ते त्रि० "एकवृष इन्द्रसखा जिगीवान्" अथ० ४,२२,६ "इमं विशामेकवृषं कृणु त्वम्" अथ० ४,२२,१ ।

एकवेणि(णी) स्त्री एकीभूता संस्काराभावेन जटावत् संहतिं प्राप्ता वेणी । प्रोषितभर्त्तृकायाः स्त्रियः केशसंस्काररहित्येन एकीभूततां प्राप्तायां जटाकारायां वेण्याम् । "गण्डाभोगात् पतनविषयामेकवेणीं करेण" मेघ० । "एकवेणीम् एकीभूतां वेणीम्" मल्लि० । वेणीनां संस्काराभावेन एकीभूतत्वेन गुम्फितत्वम् "प्रोषितेषु पतिषु द्युयोषितां गुम्फिताः शिरसि वेणयोऽभवन्" इति माघे वर्णितम् । "ततः प्रविशत्येकवेणीधरा शकुन्तला" शकु० ।

एकशत न० एकाधिकं शतम् शा०त० । १एकाधिकशते एकमितं शतम् । २एकमिते शते ३तत्संख्यान्विते च । तत्र संख्येये "विश्वामित्रस्य चैवासन् पुत्रा एकशतं नृप!" भाग० ६,१६,१७ । संख्यायाम् "प्रमाप्य वैश्यं वृत्तस्थं दद्याच्चैकशतं गवाम्" मनुः ततः पूरणे डट् तमट् च । एकशततमः तत्पूरणे त्रि० स्त्रियां ङीप् । एकशतं परिमाणमेषाम् कन् । एकशतक तत्परिमाणे त्रि० । अवयवे कन् । एकशतक तत्संख्यायां न० । प्रकारे धाच् । एकशतधा एकशतप्रकारे अव्य० वीप्सार्थे कारकार्थवृत्तेः शस् । एकशतश् एकशतमेकशतमित्याद्यर्थे अव्य० ।

एकशफ पु० एकं शफं खुरो यस्य । एकखुरयुक्ते खरादौ ते च "खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा । एते चैकशफाः क्षत्तः! शृणु पञ्चनखान् पशून्" भा० २,१०,२२ उक्ताः । "अजाविकं चैकशफं न जातु विषमं भजेत्" मनुः अविक्रेयमध्ये "मद्यं नीलीञ्च लाक्षाञ्च सर्वांश्चैकशफांस्तथा:" मनुः अभक्ष्यमध्ये "अनिर्दिष्टांश्चैकशफान् टिट्टिभञ्च विवर्जयेत्" मनुः "कार्पासकीटजोर्णानां द्विशफैकशफस्य च" "एकशफो वा एष पशुर्यदश्वः" शत० ब्रा० ७,५,२,२१ । "इमं मा हिंसीरेकशफं पशुं कनिक्रदं वाजिनं वाजिनेषु" यजु० १३,४८ "एकविंशत्यास्तुवतैकशफाः पशवोऽसृज्यन्त वरुणोऽधिपतिरासीत्" यजु० १४,३० । "एकविंशत्यास्तुवतैभिः । दशहस्त्या अङ्गुल्यः दश पाद्याः आत्मैकविंशस्तेनैतदस्तुवतैकशफाः पशवोऽसृजन्तैकशफाः पशवोऽत्रासृज्यन्त वरुणोऽधिपतिरासीत्" शत० ब्रा० ८,४,१,१ । एकशफमांसगुणाः "वृंहणं मांस मौरभ्रं पित्तश्लेष्मावहं गुरु । मेदः पुच्छोद्भवं वृष्यमौरभ्रसदृशं गुणैः । औरभ्रवत्तु लवणं मांसमेकशफोद्भवम्" सुश्रुते उक्ताः ।

एकशाख त्रि० एका तुल्या शाखा वेदशाखा यस्य । १तुल्यशाखे "एकशाखोद्भवोदत्तो गृहीतश्चोपनायितः" स्मृतिः । एका शाखा यस्य । एकशाखके २वृक्षे च । ततः गहादि० भवादौ छ । एकशाखीय तद्भवादौ त्रि० ।

एकशाला स्त्री कर्म० । एकस्यां शालायाम् । शैष ठञ् । एकशालिक वा ठक् ऐकशालिक तत्सदृशे त्रि० ।

एकशितिपाद् पु० एकः शितिः कृष्णः पादोऽस्य । अश्वभेदे । स च अश्वमेधे वरुणदैवत्यः पशुः । "वारुणः कृष्णः एकशितिपात्मेत्वा" यजु० २६,५८ । अस्य कुम्भारोह्यादि० आद्युदात्तता । तद्गणे कृतान्तपाठात् नि० अन्तलोपः ।

एकशृङ्ग त्रि० एकं शृङ्गं मङ्गल्यं यस्य । (एकशृङ्गो) ओषधिभेदे "प्रसूपतोस्तम्भिनीरेकशृङ्गाः प्रतन्वतीरोषधीरावदामि" अथ० ८,७,४,

एकशृङ्ग पु० एकमेकत्वं शृङ्गं प्रधान्यमस्य । एकत्वस्वभावे १विष्णौ त्रिका० । २पितृगणभेदे । "पितॄणाञ्च गणान् विद्धि सप्त वै पुरुषर्षभ ! । मूर्त्तिमन्तो वै चत्वारस्त्रयश्चाप्यशरीरिणः । वैराजाश्च महाभागा अग्निष्वात्ताश्च भारत ! । गार्हपत्या नाकचराः पितरोलोकविश्रुताः । सोमपा एकशृङ्गाश्च चतुर्वेदकलास्तथा । एते चतुर्षु वर्णेषु पूज्यन्ते पितरो नृप ! । एतैराप्यायितैः पूर्वं सोमश्चाप्यायते पुनः" भा० स० ११ अ० । ३शुकदेवमहिष्याम् स्त्री । शृङ्गशब्दस्य प्राधान्यवाचकतया अस्वाङ्गवाचित्वात् न ङीष् । "तवैव वंशे या दत्ता शुकस्य महिषी प्रिया । एकशृङ्गेति विख्याता साध्वीनां कीर्त्तिवर्द्धिनी" हरिवं० ११८अ० । एकं शृङ्गं शिखरमस्य । ४एकशिखरे पर्वते पु० । एकं शृङ्गमस्य । ५एकशृङ्गयुक्ते पशौ पुंस्त्री० स्त्रियां ङीष् ।

एकशेप पु॰ एकः शेपोमूलमस्य ।(एकशिकड़युक्त)एकमूले वृक्षभेदे

एकशेष पु॰ एकः शिष्यतेऽन्योलुप्यते यत्र शिष–आधारे घञ् ।"सरूपाणामेकशेष एकविभक्तौ"इत्यादिना पा॰उक्ते वृत्तिभेदे । अस्य समासत्वतदभावौ मतभेदेन सरलाया-मस्माभिर्दर्शितौ यथा सरूपाणां समानार्थानां समानानु-पूर्व्वीकाणां च मध्ये एक एव शिष्यमाणस्तत्तत्समुदाय व्यक्तिबोधकः" तत्र अपरांशोलुप्यते इति बोध्यम् । अय-ञ्चैकशेषः "प्रत्यर्थंशब्दनिवेशः"इति मते व्यक्तिभेदापेक्षया द्वन्द्वप्राप्तौ तदपवादकः । एष च सुबुत्पत्तेः पूर्व्वमेवोत्प-द्यतेऽतः पदनिमित्तकद्वन्द्वबाधकइत्येके । सुबुत्पत्त्यनन्तर-मुत्पद्यत इत्यन्ये । तत्र पदनिमित्तकत्वाभावे समासत्वं नास्तीत्यतः कृत्तद्धितसमासैकशेषेत्यादिवृत्तिभेदगणने पृथङ्निर्द्दिष्टतया च समासत्वाभावेन पन्थानावित्यत्र न-समासान्त इति एकपक्षः । अस्य पदनिमित्तकत्वेऽपि गो-बलीवर्द्दन्यायेन वृत्तिभेदगणने पृथग्ग्रहणं समासान्ताभा-वश्च तत्तत्सूत्रे एकशेषभिन्नत्वेन निवेशनाद्वेति पक्षान्तरम् । "विरूपाणामपि समानार्थानामिति" वार्त्ति॰ घटश्च कलशश्च घटौ कलशौ वा । तथा च समानानुपूर्व्वीकाणां भिन्नानुपूर्व्वीकाणाञ्च समानार्थानामेकशेषः । स प्रकारा-न्तरेण द्विविधः समानार्थकानां भिन्नार्थकानाञ्चेति भेदात् । तत्र घटौ इत्यादौ समानार्थकानामेकशेषः । भिन्नार्थकैकशेषः यथा पितरौ श्वशुरौ भ्रातरावित्यादि । एकः प्रधानं शेषोऽन्तः । २एकान्ते पु॰ बहु॰ । ३अतिश-यिते त्रि॰ । "कृत्तद्धितसमासैकशेषस । नाद्यन्तधातवः वृत्तयः पञ्च" सि॰ कौ॰ ।

एकश्रुति त्रि॰एका श्रुतिर्यस्य । १उदात्तानुदात्तस्वरितानाम-विभागेनैकस्वरश्रवणायोच्चारिते शब्दभेदे कर्म्म॰। २तथैक-स्वरश्रुतौ स्त्री । कुत्र कुत्रैकश्रुतिर्भवतीति पा॰ उक्तं यथा "एकश्रुति दूरात् सम्बुद्धौ" पा॰ दूरात् सम्बुद्धौ वाक्यमेकश्रुति स्यात् । उदात्ताद्यपवादः ।"यज्ञकर्मण्यजप-न्यूङ्खसामसु" पा॰यज्ञक्रियायायां मन्त्र एकश्रुतिः स्यात् जपादीन् वर्ज्जयित्वा । यज्ञेत्युक्तेः स्वाध्यायकाले य-थोक्तस्वराः प्रयोक्तव्याः । जपोनाम उपांशुप्रयोगः । यथा जले निमग्नस्य । न्यूङ्खानाम षोड़श ओकाराः सामानि गीतयः । एषु यथोक्तस्वरा नैकश्रुतिरिति बो-ध्यम् । "उच्चैस्तरां वा वषट्कारः" पा॰ यज्ञकर्मणि वषट्शब्द उदात्तो वा स्यात् पक्षे एकश्रुतिः । "विभाषा छन्दसि" पा॰ व्यवस्थाविकल्पः संहितायां यथोक्त स्वराः ब्राह्मणे तु एकश्रुतिर्बह्वृचानाम् अन्येषान्तु यथा-सम्प्रदायात् व्यवस्था । अस्यापवादः । "न सुब्रह्मण्यायां स्वरितस्य तूदात्तः" पा॰ सुब्रह्मण्याख्ये निगदे "यज्ञ कर्मणीति" "विभाषा छन्दसीति" प्राप्ता एकश्रुति र्न स्यात् स्वरितस्योदात्तश्च स्यात् । "स्वरितात् संहिता-यामनुदात्तानाम्" पा॰ स्वरितात् परेषामनुदा-त्तानामेकश्रुतिः स्यात् एकश्रुतेरेव प्रचयनाम" सि॰ कौ॰ । एकश्रुतेर्भावः ष्यञ् ऐकश्रुत्य "उदात्तानुदा-त्तस्वरितानां परःसन्निकर्ष ऐकश्रुत्यम्" आश्व॰ श्रौ॰ १,२,९ उक्ते उच्चारणभेदे "उदात्तानुदात्तस्वरितानाम-भिव्यञ्जका ये प्रयत्ना आयामविश्रम्भाक्षेपास्तेषामन्यतम-स्यैकस्यैवात्यन्तसन्निकर्षेणासजातीयप्रयत्नाव्यवधानेन यदु-च्चारणं तदैकश्रुत्यम्"नारा॰। कतिचिदृच उक्ता "ता एक-श्रुतिसन्ततमनुब्रूयात्" आश्व॰ श्रौ॰ १,२,८ । एका श्रुतिः कर्णौ यत्र । क्षेत्रव्यवहारे भुजकोटिवर्गयोगस्य मूल-मितकर्णयुक्ते त्रिकोणादौ ३क्षेत्रे ४एककर्णयुक्ते त्रि॰ । एका श्रुतिर्वेदः कर्म्म॰। एकस्मिन् ५वेदवाक्ये ।"उभयो-रेकश्रुतिमूलकत्वादिति" स्मृतिनिबन्धेषु भूरिप्रयोगः ।

एकषष्ट त्रि॰ एकषष्ट्याः पूरणः डट् संख्यापूर्व्वकत्वात् डटि न तमट् । एकषष्टिपूरणे यत्संख्यया एकषष्टिः पूर्य्यते तत्संख्यान्विते स्त्रियां ङीप् । एकषष्ट्या युतं शतादि डट् सुप्स॰। २एकषष्ट्या युते शते सहस्रे च तेन स्वयं कविकल्पद्रुमे उक्तम् "इति स्फीतः सप्तदशशत्या षट्-कोनषष्ट्या" । पा॰ मते तु नात्र डट् तेन दशान्तात् शदन्तात् विंशतेश्च तदस्मिन्नधिकमित्यर्थे डटोविधानादिति भेदः । तेन तन्मते एकषष्टिरस्यस्याधिकतया अर्श॰अच् । तेन तद्रूपसिद्धिः स्वरे भेदः । इदन्त्ववधेयम् येषाम् अच्-प्रत्ययेन न रूपनिष्पत्तिस्तेषामेव सूत्रकृता दशान्तस्य शदन्तस्य विंशतेश्च ग्रहणं कृतम् षष्टिसप्तत्यशीतिनवत्य न्तानां तु अच्प्रत्ययेनैव तद्रूपसिद्धेर्न तेषां ग्रहणमिति । एवमेकसप्ततादयोऽपि तत्तत्संख्यापूरणे त्रि॰ तत्तत्संख्या-धिके शते सहस्रे च न॰। एकषष्ट्यादि परमाणमेषां ड । एकषष्टैकसप्ततादि तत्तत्संख्यामिते त्रि॰ एकषष्ट्यादि अधिकमस्मिन् शते सहस्रे वा कन् एकषष्टिकैकसप्ततिकादि-तत्तत्संख्याधिके, शते सहस्रे च । अवयवे कन् । एक-षष्टिकैकसप्ततिकादयस्तत्तत्संख्यायां न॰ ।

एकसभ त्रि॰एका सभा गोष्ठी समुदायो यत्र । अगदात्मैकगोष्ठी-युक्ते "भ्रमसि वदसि पूर्णमसि प्रसाद्यमस्येकसभमसि"

शत० ब्रा० १४.६,२.६। "याखल्वेका सभा जगदात्मिका सा त्वदात्मिकैवेति त्वमेकसभमसीति" भा०।

एकसर्ग पु० एक एकविषयः सर्गः चित्तवृत्तिः यत्र। १एकाग्रे एकताने एकमात्रासक्तचित्ते अमरः। कर्म्म०। २एकसृष्टौ पु०

एकसूत्र पु० एकं सूत्रं वादनसाधनं यत्र। डमरुरूपे वाद्ये शब्दरत्ना०। तस्य एकसूत्रवेष्टनेन वादनात् तथात्वम्।

एकस्थ त्रि० एकस्मिन् तिष्ठति स्था-क ७त०। एकत्रस्थिते "एकस्थसौन्दर्य्यदिदृक्षयेव" कुमा०। "तान्येकस्थानि सर्वाणि ततस्त्वं प्रतिपत्स्यसे" भा०व० ३७ अ०। "हन्तैकस्थं क्वचिदपि न ते चण्डि! सादृश्यमस्ति" मेघ०। स्था-क्त ७त०। एकस्थितादयोऽप्यत्र त्रि०।

एकहंस म० एकः श्रेष्ठो हंसोऽत्र। सरोभेदरूपे तीर्थभेदे "एकहंसे नरः स्नात्वा गोसहस्रफलं लभेत्। कृतशौचं समासाद्य तीर्थसेवी नराधिप!। पुण्डरीकमवाप्नोति कृतशौचो भवेच्च सः" भा० व० ८३ अ०। "हन्ति गच्छति जाग्रदाद्यवस्था इहलोकपरलोकौ वा हंसः कर्म०।२जीवे। "शुक्रमादाय पुनरैति स्थानं हिरण्मयः पौरुष एकहंसः" "स ईयते अमृतो यत्र कामं हिरण्मयः पौरुष एकहंसः" शत० ब्रा० १४,७,१, १२,१३। "शुक्रं शुद्धं ज्योतिष्मदिन्द्रियादिमात्रारूपं गृहीत्वा पुनः स्वप्नेहेतुकर्म्मोपरमानन्तरं जाग्रद्भोगहेतुकर्म्मणा जागरितं स्थानमागच्छति हिरण्मयश्चैतन्यज्योतिःस्वभावः पौरुषः पुरुषएव स्वार्थे अण् एकहंसः एकश्चासौ हंसश्चेत्येकहंसः एक एव जाग्रत्स्वप्नाविहलोकपरलोकौ च हन्ति गच्छति हिनस्तीति वा एकहंसः" भा० जीवस्योपाधिकृतजाग्रदाद्यवस्थाभिर्न किञ्चिद्विकृतत्वमिति द्योतनार्थमेकत्वविशेषणम्।

एकहायनी स्त्री एकोहायनो वयोमानं यस्याः ङीप्। एकवर्षवयस्कायां स्त्रीगव्यादौ। एकहायन एकवर्षवयस्के पशुमात्रे त्रि०। "अजमेवावनड्वाहं स्वरं चैवैकहायनम्" मनुः। २एकवर्षोत्पन्ने धान्यादौ त्रि०तत्र वयोवाचित्वाभावेन स्त्रियां न ङीबिति भेदः एकहायना इत्येव

एका स्त्री सर्वत्र अभिन्नत्वेन स्थितायां १दुर्गायाम् "एका सा तु पृथक्त्वेन विना सर्वत्र विश्रुता। यथा तु व्यज्यते वर्णैर्विचित्रैः स्फटिकोमणिः। तथा गुणवशाद्देवी नानाभावेषु वर्त्तते" देवीपु० ४५अ०। २द्वितीयरहितस्त्रियाम्। "एकैवाहं जगत्यत्र का द्वितीया ममापराः" देवीमा०। ३एकत्वान्वितस्त्रियाञ्च "अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः" इति श्रुतिः "एका सुमित्रा सह लक्ष्मणेनेति" भट्टिः। पुत्रयोरेकत्वोत्पत्तिकथनार्थमेकेति विशेषणम्। अन्ये तु ए विष्णौ कायति अभिरमते कै-क अलुक् स०। विष्णुरतेत्यर्थमाहुस्तेन ४तदर्थे त्रि०।

एकाकिन् त्रि० एक+असहाये पक्षे आकिनि। सजातीयसहचररहिते "एकाकी हयमारुह्य जगाम गहनं वनम्" देवीमा०। अत्र हयस्य विजातीयत्वात् तत्सहायत्वेऽपि न क्षतिः। असहायत्वञ्च एकजातीयक्रियाकरणे अन्यसहायरहितत्वम् तेन हयस्य स्वगतिक्रियां प्रति सहचरत्वाभावात् नानुपपत्तिः। तत्रान्यत्वं प्रकृत्यर्थसंख्यान्वितपदार्थभिन्नत्वम् तेन "एकाकिनोऽपि परितः पौरुषेयवृता इव" माघे प्रत्येकमेकत्वसंख्यान्वितानां रामकृष्णोद्धवानामन्यासहायकत्वात् एकाकिन इति प्रयोगः। "एकाकी चिन्तयेन्नित्यं विविक्ते हितमात्मनः। एकाकी चिन्तयानोहि परं श्रेयोऽधिगच्छति" मनुः। "एकाकिना चात्ययिके" मनुः। स्त्रियां ङीप्। "एकाकिन्यपि यामि सत्वरमतः स्रोतस्तमालाकुलम्" सा० द०।

एकाक्ष पु०एकमक्षि यस्य षच् समा०। १काके। २काणे त्रि०। स्त्रियां ङीप्। काकस्य यथा तथात्वं तथोक्तं रामा०अ० का० १०५ अ० यथा

"एवमुक्तस्तु रामेण संप्रधार्य्य स वायसः। अभ्यगच्छद्द्वयोरक्ष्णोस्त्यागमेकस्य पण्डितः। सोऽब्रवीद्राघवं काको नेत्रमेकं त्यजाम्यहम्। एकनेत्रोऽपि जीवेयं त्वत्प्रसादाच्चराधिप!। रामानुज्ञातमेकं तत् (इषीकास्त्रम्) काकनेत्रमघातयत्"। तज्जातीयत्वादन्येषामपि तथात्वम्। एकनेत्रादयोऽप्युभयत्र। स्त्रियामुभयार्थे टाप्।

एकाक्षर न० एकमद्वितीयमक्षरम्। १एकमात्रवर्णे "एकाक्षरद्व्यक्षराण्येव प्रथमं वदन् कुमारो वदति" शत०ब्रा० ११,११६,४।२एकस्वरवर्णे ""एकाक्षरात् कृतोजातेः सम्प्रत्याञ्च न तौ स्मृतौ"व्या०का० ओमित्येकाक्षरस्त्रीयमुपासीत" छा०उ०। "एकाक्षरं परं ब्रह्म इति" मनुः। "एकाक्षरम् ओङ्कारः" कुल्लू०। ओङ्कारस्य द्विवर्णत्वेऽपि एकस्वरवर्णवत्त्वात् एकाक्षरत्वम्। अष्टाक्षराऽनुष्टुबदौ स्वरवर्णैनैवाक्षरत्वव्यवहारात् स्वरवर्णमनुच्चार्य्य केवलव्यञ्जनवर्णस्य प्राक् अनुच्चार्य्यत्वात् तस्य सर्वत्र उच्चारणे क्षरणाभावात् अक्षरत्वम्। एकमक्षरं यत्र। ३एकाक्षरयुक्ते त्रि० स्त्रियां गौरा० ङीष्। "शिरो मे कालिका पातु क्रीङ्कारैकाक्षरी परा" श्यामाकवचम्।

एकागार न० एकमसहायमगारम्। द्वितीयजनानधिष्ठित गृहे तत्प्रयोजनमस्य ठञ् ऐकागारिक चौरे त्रि० स्त्रियां ङीप् "केनचित्तु हस्तवतैकागारिकेण" दशकुमा०। चौरादन्यत्र छत्वात् छ। एकागारीय सुन्यादौ त्रि०।

एकाग्र त्रि० एकमग्रं विषयप्रवणता यस्य। १विषयान्तरव्यावृत्तैकमात्रविषयकचित्तवृत्तिके २विक्षेपरहितध्याने च। "मनुमेकाग्रमासीनमभिगम्य महर्षयः" मनुः। स्वार्थे अण्। ऐकाग्र अत्रार्थे त्रि०। तस्य भावः ष्यञ् ऐकाग्र्य तद्भावे न० "मनसश्चेन्द्रियाणाञ्चाप्यैकाग्र्यं निश्चितं तपः" भा० ?.२५ अ०। "तद्गीतिश्रवणैकाग्र्या संसदश्रुमुखी बभौ" रघु०। तल् एकाग्रता स्त्री, त्व एकाग्रत्व न० तत्रार्थे।

एकाग्रता च चित्तस्य धर्म्मविशेषः विषयान्तरावलम्बनरूपसंसर्गशून्यः। एकविषयकधारावाहिकवृत्तिरूपः स च त्रिगुणात्मकस्य चित्तस्य सत्त्वगुणोद्रेके रजोगुणकृतविक्षेपाभावात् तमोगुणकृततन्द्राद्यभावाच्च उदेति। तत्र बाह्याभ्यन्तरकारणान्युक्तानि" पात० सू० भाष्यविवरणेषु यथा "यस्य चित्तस्यावस्थितस्येदं शास्त्रेण परिकर्म्म निर्द्दिश्यते, तत्कथम्? भा०।
"मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम्" सू०।
"तत्र सर्वप्राणिषु सुखसम्भोगापन्नेषु मैत्रीं भावयेत् दुःखितेषु करुणाम्, पुण्यात्मकेषु मुदिताम्, अपुण्यशीलेषूपेक्षाम्। एवमस्य भावयतः शुक्लो धर्म्म उपजायते ततश्चित्तं प्रसीदति प्रसन्नमेकाग्रं स्थितिपदं लभते" भा०।
"अपरिकर्म्मितमनसोऽसूयादिमतः समाधितदुपायसम्पत्त्युत्पादाय चित्तप्रसादनोपायानसूयादिविरोधिनः प्रतिपादयितुमुपक्रमते-यस्य,-चित्तस्यावस्थितस्येदमिति। मैत्रीकरुणेत्यादि प्रसादनान्तम्। सुखितेषु मैत्रीं सौहार्द्दं भावयत ईर्षाकालुष्यं निवर्त्तते चित्तस्य। दुःखितेषु च करुणामात्मनीव परस्मिन् दुःखप्रहाणेच्छां भावयतः परापकारचिकीर्षाकालुष्यं चेतसो निवर्त्तते। पुण्यशीलेषु प्राणिषु मुदितां हर्षं भावयतः असूयाकालुष्यं चेतसो निवर्त्तते। अपुण्यशीलेषु चोपेक्षां माध्यस्थ्यं भावयतोऽमर्षकालुष्यं चेतसो निवर्त्तते। ततश्चास्य राजसतामसधर्म्मनिवृत्तौ सात्त्विकः शुक्लो धर्म्म उपजायते। सत्त्वोत्कर्षसम्पन्नः सम्भवति। वृत्तिनिरोधपक्षे तस्य प्रसादलाभाच्चित्तं प्रसीदति प्रसन्नञ्च वक्ष्यमाणेभ्य उपायेभ्यः एकाग्रं स्थितिपदं लभते। असत्यां पुनर्मैत्र्यादिभावनायां न ते उपायाः स्थित्यै कल्पन्ते-तानिदानीं स्थित्युपायानाह" वाचस्पतिविवरणम्।
"प्रच्छर्द्दनविधारणाभ्यां वा प्राणस्य" सू०।
"कोष्ठ्यस्य वायोर्नासिकापुटाभ्यां प्रयत्नविशेषात् वमनं प्रच्छर्द्दनं, विधारणं प्राणायामः ताभ्यां वा मनसः स्थितिं संप्रसादयेत्" भा०
"वाशब्दो वक्ष्यमाणोपायान्तरापेक्षो विकल्पार्थो न, मैत्र्यादिभावनापेक्षया तया सह समुच्चयात्। प्रच्छर्द्दनं विवृणोति-कोष्ठ्यस्येति। प्रयत्नविशेषात् योगशास्त्रविहितात् येन कौष्ठ्यो वायुर्नासिकापुटाभ्यां शनैरेच्यते। विधारणं विवृणोति विधारणं प्राणायामः रेचितस्य कौष्ठ्यस्य वायोर्यदायामो बहिरेव स्थापनं न तु सहसा प्रवेशनं तदेताभ्यां प्रच्छर्द्दनविधारणाभ्यां वायोर्लघूकृतशरीरस्य मनः स्थितिपदं लभते। अत्र चोत्तरसूत्रगतात् स्थितिनिबन्धनीतिपदात् स्थितिग्रहणमाकृष्य सम्प्रसादयेदित्यर्थप्राप्तेन सम्बन्धनीयः" विव०। "स्थित्युपायान्तरमाह" भा०
"विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबन्धनी" सू०
"नासिकाग्रे धारयतोऽस्य या दिव्यगन्धसंवित्सा गन्धप्रवृत्तिः, जिह्वाग्रे रससंवित्, तालुनि रूपसंवित्, जिह्वामध्ये स्पर्शसंवित्, जिह्वामूले शब्दसंवित्, इत्येताः प्रवृत्तय उत्पन्नाश्चित्तं स्थितौ निबध्नन्ति संशयं विधमन्ति समाधिप्रज्ञायाञ्च द्वारीभवन्तीति" भा०।
"व्याचष्टे-नासिकाग्रे धारयत इति। धारणाध्यानसमाधीन् कुर्वतस्तज्जयात् या दिव्यगन्धसंवित् साक्षात्कारः एवमन्यास्वपि प्रवृत्तिषु योज्यम्। एतच्चागमात् प्रत्येतव्यं नोपपत्तितः" विवरणम्।
तत्र सामान्यकारणञ्च शौचमेव तत्रोक्तम् "शौचात् स्वाङ्गजुगुप्सा परैरसंसर्गः" सू० "सत्त्वशुद्धिसौमनस्यैकाग्र्येन्द्रियजयात्मदर्शनयोग्यत्वानि च" सू०। "शुचेः सत्त्वशुद्धिस्ततः सौमनस्यं तत ऐकाग्र्यं तत इन्द्रियजयस्ततश्चात्मदर्शनयोग्यत्वं बुद्धिसत्त्वस्य भवतीति एतत् शौचस्थैर्यादधिगम्यते" भा०। तत्राद्यं सूत्रं बाह्यशौचसूचकं द्वितीयन्तु आन्तरशौचसूचकम् "चित्तमलानां क्षालने चित्तममलं भवति वैमल्यात् सौमनस्यं स्वच्छता स्वच्छत्वादैकाग्र्यं ततो मनोवश्यादिन्द्रियाणां जयस्तज्जयादात्मदर्शनयोग्यं भवतीति क्रमेण आन्तरशौचस्य फलमुक्तम्। एतच्च विवरणे स्थितम् एकाग्रताया आविर्भावे यथा समाधिलाभस्तथा तत्रैवोक्तम् "सर्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधिपरिणामः"

सू० "सर्व्वार्थता चित्तधर्म्मः एकाग्रता च चित्तधर्म्मः सर्व्वार्थतायाः क्षयस्तिरोभाव इत्यर्थः एकाग्रताया उदय आविर्भाव इत्यर्थः तयोर्धर्म्मित्वेनानुगतं चित्तं, तदिदं चित्तमपायोपजनयोः स्वात्मभूतयोर्धर्म्मयोरनुगतं समाधीयते स चित्तस्य समाधिपरिणामः" भा० ।

"संप्रज्ञातसमाधिपरिणामावस्थां चित्तस्य दर्शयति । सर्व्वार्थेत्यादि । विक्षिप्तता सर्व्वार्थता । क्षय विनश्यतीति क्षयस्तिरोभावः, नासदुत्पद्यत इति उदय आविर्भावः । आत्मभूतयोः सर्व्वार्थतैकाग्रतयोः धर्म्मयोः यौ अपायोपजनौ सर्व्वार्थताया अपायः एकाग्रताया उपजनस्तयोरनुगतं चित्तं समाधीयते पूर्व्वापरीभूतसाध्यमानसमाधिविशेषणं भवतीति" वा०विवरणम् ।

"ततः पुनः शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रता परिणामः" सू० ।

"समाहितचित्तस्य पूर्व्वप्रत्ययः शान्त उत्तरस्तत्सदृश उदितः समाधिचित्तमुभयोरनुगतं पुनस्तथैव आ समाधिभ्रेषादिति । स खल्वयं धर्म्मिणश्चित्तस्यैकाग्रता परिणामः" भा० ।

"पुनः समाधेः पूर्व्वापरीभूताया अवस्थायाः निष्पत्तौ सत्यां शान्तोदितावतीतवर्त्तमानौ तुल्यौ च तौ प्रत्ययौ चेति तुल्यप्रत्ययौ एकाग्रतायान्तु द्वयोः सादृश्यं समाहितचित्तस्येति समाधिनिष्पत्तिः दर्शिता । तथैवैकाग्र्यस्यावधिमाह आसमाधिभ्रेषात् । असमाधिभ्रंशादिति" । वा० विवरणम् ।

एकाग्र त्रि० एकमग्रं यस्य । एकताने एकावलम्बने ।

एकाङ्ग पु० एकं प्रधानम् सुन्दरत्वेनाङ्गमस्य । ग्रहमध्ये-अतिसुन्दराङ्गे १बुधग्रहे त्रिका० । एकं सुन्दरमङ्गं यस्मात् । २चन्दने न० हारा० । कर्म्मधा० । ३एकस्मिन्नङ्गे न० । "अप्येकाङ्गेऽप्यधोवस्तुमिच्छामि च सुकृतस्थिते" भा० अनु० ८२ अ० ३श्रेष्ठाङ्गे मस्तके च । एकमङ्गमस्य । एकदेहतां प्राप्तयोः ४दम्पत्योः क्रमेण पुंस्त्री० स्त्रियां ङीष् ।

एकाण्ड पु० एकमण्डं वृषणमस्य । अश्वभेदे अश्वशब्दे विवृतिः

एकात्मन् पु० कर्म्म० । १एकस्मिन्नात्मनि । एक आत्मा स्वरूपम् स्वभावो वा यस्य । २एकस्वरूपे ३एकस्वभावे त्रि० स्त्रियां वा डाप् । एकोऽसहाय आत्मा यस्य । ४असहायात्मनि त्रि० । "नार्थन्यूनैर्नावगणैरेकात्मभिरसाधनैः" भा० स० ८२अ० । तस्य भावः ष्यञ् । ऐकात्म्य तद्भावे न० । "अवबोधरसैकात्म्यमानन्दमनुसन्ततम्" भाग० ४,१२,८ । "वर्गस्वर्गापवर्गाणां प्रायेणैकात्म्यहेतुना" भाग० ४,२१,२९

एकादशन् त्रि० एकाधिका दश नि० आत् । (एगार) १संख्यान्विते २तत्संख्यायाञ्च ततः पूरणे डट् । एकादश तत्पूरणे यत्संख्यया एकादशसंख्या पूर्य्यते तादृशसंख्यान्विते त्रि० स्त्रियां ङीप् । एकादशी सा च चन्द्रस्य सूर्य्यमण्डलप्रवेशनिर्गमक्रियायुक्तैकादशचन्द्रमण्डलकलाक्रियारूपे तत्क्रियोपलक्षिते वा तिथिभेदे स्त्री । डटि संख्यापूर्व्वकादपि क्वचित् सुट् । एकादशम तदर्थे त्रि० । "मनुर्वै धर्मसावर्णिरेकादशम आत्मवान्" भाग० ८,१३,१२ । स्त्रियां ङीप् । एकादश परिमाणमस्य संघस्य कन् । एकदशक तत्संख्यामिते गणे । "एकादशकस्य गणस्तन्मात्रपञ्चकस्यैव" "सात्त्विक एकादशकः प्रवर्त्तते वैकृतादहङ्कारात्" सां०का० स च गणस्तत्रैव दर्शितः "बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि । वाक्पाणिपादपायूपस्थानि कर्म्मेन्द्रियाण्याहुः । उभयात्मकमत्र मनः" सां०का० । एवं रुद्रगणः । एकादशानामवयवः कन् । एकादशक तत्संख्यायाम् न० "रुद्रैकादशकेऽधिकम्" सुश्रु० ।

एकादशद्वार न० एकादश द्वाराणि छिद्राण्यस्य । शरीरे तत्र नवद्वारत्वप्रसिद्धावपि क्वचिदेकादशद्वारत्वं स्मर्य्यते । सप्तशीर्षण्यानि नाभिसहितान्यधःस्थाने त्रीणि शिरस्येकं ब्रह्मरन्ध्रमित्येकादशच्छिद्रवत्त्वात्तस्य तथात्वम् । नवद्वारव्यवहारस्तु नाभिशिरसोश्छिद्रस्य सूक्ष्मत्वात् "प्रधानेन व्यपदेशा भवन्तीति" न्यायात् । प्रधाननवच्छिद्रावलम्बनेन ।

एकादशाह पु० एकादशानामह्नां समाहारः टच् समाहारे नाह्नादेशः अह्नान्तत्वात् पुंस्त्वम् । एकादशानामह्नां समाहारे । ङौ तु एकादशाहे एकादशाह्नि एकादशाहनि रूपाणि । स साधनतयाऽस्त्यस्य अच् । एकादशाहसाध्ये यागभेदे "एकादशाहैरयजन् सदक्षिणैर्द्वादशाहैरश्वमेधैश्च देव" भा० अनु० १०३ अ० । ब्राह्मणजातीनामेकादशाहकर्त्तव्ये २श्राद्धे च । तमधीष्टो भृतो भूतो वेत्यर्थे ख । एकादशाहीन उक्तार्थे त्रि० ।

एकादशिन् त्रि० एकादश संख्या परिमाणमस्य डिनि । एकादशसंख्यामितस्तोमादौ स्त्रियां ङीप् । "एकामेकादशिनीमपश्यत्" "स एकादशिन्या द्वा प्रजापतिः पुनरात्मानम्" "तस्मै कमेकादशिन्या यजेत" शत० ब्रा० ३,९,१,४,५ । "यूपैकादशिनी स्यात्" ३,७,१,२२ । यद्यु पश्वेकादशिनी स्यात् ३,९,१,२३ ।

एकादशी त्रि० एकादशानां पूरणी उभयपक्षीयप्रतिपदादितः

एकादशपूरण्यां तिथौ । यत्र हि हरिवासरव्रतम् । अस्यां व्रतस्य नित्यत्वादिसमर्थनतद्व्रतकालव्यवस्थादि कालमा० दर्शितं यथा "अथैकादशी निर्णीयते । तत्रैकादश्यामुपवासविधिवाक्येषु नित्यशब्दसदाशब्दादीनां नित्यत्वसाधकानां श्रवणान्नित्यत्वसिद्धिः । तानि च साधकानि संग्रहकारेण संगृहीतानि । "नित्यं सदा यावदायुर्न कदाचिदतिक्रमेत् । उपेत्याऽतिक्रमे दोषश्रुतेरत्यागनोदनात् । फलाश्रुतेर्वीप्सया च तन्नित्यमिति कीर्त्तितम्" । अत्र च नित्यशब्दादीन्यष्टौ नित्यत्वसाधकानि । नित्यशब्द उदाहृतो गारुड़पुराणे "उपोष्यैकादशी नित्यं पक्षयोरुभयोरपीति" । सदाशब्द उक्तः सनत्कुमारसंहितायाम् "एकादशी सदोपोष्या पक्षयोः शुक्लकृष्णयोरिति" यावदायुःशब्द उक्तो विष्णुरहस्ये "द्वादशी न प्रमोक्तव्या यावदायुः प्रवृत्तिभिरिति" । आग्नेयपुराणेऽपि "उपोष्यैकादशी राजन्! यावदायुः प्रवृत्तिभिरिति" अतिक्रमनिषेधः कण्वेन दर्शितः "एकादश्यामुपवसेन्न कदाचिदतिक्रमेदिति" विष्णुनापि "एकादश्यां न भुञ्जीत कदाचिदपि मानवः" इति । अकरणे दोषमाह सनत्कुमारः "न करोति हि यो मूढ एकादश्यामुपोषणम् । स नरो नरकं याति रौरवन्तमसावृतम् । एकादश्यां मुनिश्रेष्ठ! यो भुङ्क्ते मूढचेतनः । प्रतिमासं स भुङ्क्ते तु किल्विषं श्वादिविट्समम् । निष्कृतिर्मद्यपस्योक्ता धर्मशास्त्रे मनीषिभिः । एकादश्यन्नकामस्य निष्कृतिः क्वापि नोदिता । मद्यपानात् मुनिश्रेष्ठ! पातैव नरकं व्रजेत् । एकादश्यन्नकामस्तु पितृभिः सह मज्जतीति" नारदीये "पापानि कानि चिद् यानि ब्रह्महत्यासमानि च । अन्नमाश्रित्य तिष्ठन्ति संप्राप्ते हरिवासरे । तानि पापान्युपाश्नाति भुञ्जानो हरिवासरे" इति स्कान्दे "मातृहा पितृहा चैव भ्रातृहा गुरुहा तथा । एकादश्यां तु यो भुङ्क्ते पक्षयोरुभयोरपीति" अकरणे इवासमापने दोष उक्तो विष्णुरहस्ये । "परिगृह्य व्रतं सम्यगेकादश्यादिकं नरः । न समापयते तस्य गतिः पापीयसी भवेदिति" अत्यागनोदना दर्शिता विष्णुरहस्ये "परामापदमापन्नोऽहर्षे वा समुपस्थिते । सूतके मृतके चैव न त्यजेत् द्वादशीव्रतमिति" विस्पष्टं फलाश्रवणञ्च केषुचिद्वाक्येषु तत्र कात्यायनः "एकादश्यां न भुञ्जीत पक्षयोरुभयोरपीति" स्कान्देऽपि "उपोष्यैकादशी सम्यक् पक्षयोरुभयोरपीति" कूर्मपुराणेऽपि "वदन्तीह पुराणानि भूयोभूयो वरानने! । न भक्तव्यं न भक्तव्यं संप्राप्ते हरिवासरे" वीप्सामाह सनत्कुमारः "पक्षे पक्षे च कर्त्तव्यमेकादश्यामुपोषणमिति" नारदोऽपि "नित्यं भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः । पक्षे पक्षे च कर्त्तव्यमेकादश्यामुपोषणमिति" तदेवं नित्यशब्दादिभिर्हेतुभिरुपवासस्य नित्यत्वं सिद्धम् । काम्यत्वं च सायुज्यादिश्रवणादवगम्यते तदुक्तं विष्णुरहस्ये "यदीच्छेद्विष्णुसायुज्यं सुतान् सम्पदमात्मनः । एकादश्यां न भुञ्जीत पक्षयोरुभयोरपीति" । कूर्मपुराणेऽपि "यदीच्छेद्विष्णुसायुज्यं श्रियं सन्ततिमात्मनः । एकादश्यां न भुञ्जीत पक्षयोरुभयोरपीति" कात्यायनः "संसारसागरोत्तारमिच्छन् विष्णुपरायणः । ऐश्वर्यं सन्ततिं स्वर्गं मुक्तिं वा यद्यदिच्छति । एकादश्यां न भुञ्जीत पक्षयोरुभयोरपीति" स्कन्दपुराणे "यदीच्छेद्विपुलान् भोगान् मुक्तिं चात्यन्तदुर्लभाम् । एकादश्यामुपवसेत् पक्षयोरुभयोरपीति" नारदोऽपि "एकादशीसमं किञ्चित् पापत्राणं न विद्यते । स्वर्गमोक्षप्रदा ह्येषा राज्यपुत्रप्रदायिनी । सुकलत्रप्रदा ह्येषा शरीरारोग्यदायिनीति" । तदेवं फलश्रवणात् काम्यत्वं सिद्धम् । ननु काम्यत्वमनित्यत्वमसति कामे परित्यक्तुं शक्यत्वात् तथा सत्येकस्य कर्मणो नित्यत्वकाम्यत्वाभ्यां द्वैरूप्याङ्गीकारे नित्यानित्यसंयोगविरोधः, नायं दोषः खादिरादिवत् प्रमाणद्वयेन द्वैरूप्योपपत्तेः । तथा हि । "खादिरो यूपो भवतीति" क्रतौ नित्यः खादिरो विहितः । "खादिरं वीर्यकामस्य यूपं कुर्वीतेति" तस्मिन्नेव क्रतौ काम्यत्वेनानित्यः खादिरो विहितः । तत्र यथा प्रमाणद्वयसम्बन्धादेकस्यापि खादिरस्य द्वैरूप्यमङ्गीकृतं तद्वदत्रापि द्विविधप्रमाणसद्भावादुपवासस्य द्वैरूप्यं किं न स्यात्? । ननु विषमो दृष्टान्तः नित्यः खादिरः क्रत्वर्थः काम्यस्तु पुरुषार्थः । उपवासस्तु नित्योऽपि पुरुषार्थ एव तस्य खादिरवत् क्रत्वङ्गत्वबोधकप्रमाणाभावात्, बाढम् । अस्तु एवं वैषम्यं, प्रयोजकं तु द्वैरूप्ये प्रमाणद्वयमस्त्येव । सूत्रकारेण प्रमाणद्वयस्यैव द्वैरूप्यसाधकत्वोपन्यासात् । तथा च सूत्रम् "एकस्य तूभयत्वे संयोगपृथक्त्वमिति" (जै०) । अतः केवलपुरुषार्थस्याप्युपवासस्य द्वैरूप्यमविरुद्धम् । यदि तु ध्यारोहस्य सदृशो दृष्टान्तोऽपेक्षितः तर्ह्यग्निहोत्रादिर्दृष्टान्तोऽस्तु । न ह्यग्निहोत्रं क्रत्वर्थं तस्य स्वयमेव क्रतुत्वात् । तस्य च नित्यकाम्यत्वे वाक्यद्वयादवगम्येते । "यावज्जीवमग्निहोत्रं जुहोतीति" नित्यत्वावगमकं वाक्यम् । "अग्निहोत्रं जुहुयात् स्वर्गकामः"

इति च काम्यत्वावगमकम्। तस्य च क्रत्वर्थत्वाभावेन केवलपुरुषार्थतैव। अतोऽग्निहोत्रे नित्यत्वं काम्यत्वं चेति द्वैरूप्यमस्ति। तत्र शब्दान्तराभ्यासादिकर्मभेदहेत्वभावेनैकस्यैव कर्मणः सतः प्रयोगभेदोऽवगन्तव्यः। प्रयोगभेदश्च यावज्जीवाधिकरणे निर्णीतः। तस्य चाधिकरणस्य संग्राहकावेतौ श्लोकौ भवतः। "यावज्जीवं जुहोतीति धर्मः कर्मणि पुंसि वा। काम्यः पुरुषधर्मोऽतः काम्य एकः प्रयुज्यताम्। न कालो जीवनं तेन निमित्तप्रविभागतः। काम्यः प्रयोगभिन्नः स्याद्यावज्जीवप्रयोगतः" इति। अयमर्थः "अग्निहोत्रं जुहुयात् स्वर्गकाम" इति। काम्याग्निहोत्रं श्रूयते तथा वाक्यान्तरं पठ्यते "यावज्जीवमग्निहोत्रं जुहोतीति" तत्र संशयः। किं यावज्जीवमित्यनेनाधिकारान्तरं नोद्यते किं वा काम्याग्निहोत्रे गुणविधिरिति। यदर्थमर्थान्तरचिन्ता किं यावज्जीवमित्यस्यार्थः कर्मधर्मः उत पुरुषधर्म इति। यावज्जीवशब्देन पुरुषायुषपरिमितः कालोऽभिधीयते। काम्येन चाग्निहोत्रेण कालविशेष आकाङ्क्षितः। तस्य च कालस्यानेन समर्पणादयं कर्मधर्मः। तस्मात् गुणविधिः। तथा चाग्निहोत्रस्य काम्यप्रयोगः एक एव न त्वन्यो नित्यप्रयोग इति प्राप्ते, ब्रूमः यावज्जीवशब्दो न कालस्य वाचकः। किन्तु लक्षकः। वाच्यार्थस्तु तत्तज्जीवनं तच्च न कर्मधर्मत्वेन विधातुं शक्यं पुरुषधर्मत्वादिति जीविधातुः प्राणधारणमभिधत्ते न तु कालम्। प्राणधारणं च पुरुषधर्मः कालस्य तदसम्भवात्। तेन स्वर्गकामनेव जीवनमपि किञ्चिन्निमित्तम्। तस्मादधिकारान्तरनोदना। तथा सति जीवननिमित्तो नित्यप्रयोगः कामनिमित्तः कादाचित्कप्रयोगश्च परस्परं भिद्येते इति सिद्धान्तः। अनेनाग्निहोत्रन्यायेन प्रकृतस्याप्युपवासस्य निमित्तभेदेन नित्यप्रयोगः काम्यप्रयोगश्चास्तु। नन्वेकस्य कर्मणः कालभेदेन कर्त्तृभेदेन वा विना द्वौ प्रयोगौ न सम्भवतः। न चात्र कालभेदः संभवति नित्यकाम्योपवासयोरेकादश्यामेव विधानात्। नाप्यत्र कर्त्तृभेदोऽस्ति। यद्यपि काम्यं परित्यज्य केवलं नित्यमनुष्ठातुं शक्यं तथापि काम्यमनुतिष्ठासुना नित्यस्य परित्यक्तुमशक्यत्वात्। अतः कर्त्रैक्यात् कालैक्याच्च नित्यकाम्यरूपौ द्वौ प्रयोगौ न घटेते। नायं दोषः, विविदिषाधिकरणन्यायेन सकृदेवानुतिष्ठतः प्रयोगद्वयसिद्धेः। तस्य चाधिकरणस्य संग्राहकावेतौ श्लोकौ भवतः "विद्यार्थमाश्रमार्थं च द्विःप्रयोगोऽथ वा सकृत्। प्रयोजनविभेदेन प्रयोगोऽपि विभिद्यते। श्राद्धं भुक्त्वा यथा तृप्तिर्विद्यार्थेनाश्रमस्तथा। अनित्यनित्यसंयोग उक्तिभ्यां खादिरे मतः" इति। अयमर्थः "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेनेति" श्रुतिवाक्येन यज्ञादय आत्मविद्योदयाय विहिताः गृहस्थाद्याश्रमधर्मत्वन्तु यज्ञादीनां सर्वश्रुतिस्मृतिषु प्रसिद्धम्। तत्र संशयः किं यज्ञादीनां द्विःप्रयोग? उत सकृदिति?। तत्र प्रयोजनभेदात् प्रयोगभेद इति पूर्वपक्षः। निमन्त्रितेन ब्राह्मणेन क्रियमाणभोजनेन यथा अन्यकर्तृकश्राद्धनिष्पत्तिः स्वतृप्तिश्च न च द्विर्भुज्यते। तद्वद्ब्रह्मविद्यार्थमनुष्ठितेन कर्मणा प्रयोजनद्वयं सिध्यति। न च नित्यानित्यसंयोगविरोधः खादिरवद्वाक्यद्वयेन तदुपपत्तेः। तच्च पूर्वमुपपादितं तस्मात् सकृदेव प्रयोग इति। एवमत्रापि सकृदेवोपवासं कुर्वतः काम्यप्रयोगो नित्यप्रयोगश्चेत्युभयं सिध्यति। ननु सकृदनुष्ठानेनानेकार्थसिद्धिर्द्विधा भवति तन्त्रेण वा प्रसङ्गेन वा। तद्यथा दर्शपूर्णमासयोः षण्णां प्रधानयागानां मध्ये त्रयाणां सकृत्सकृदनुष्ठितेन प्रयाजाद्यङ्गेनोपकारः सिध्यति। तदिदं तन्त्रम्। पश्वर्थमनुष्ठितेन प्रयाजादिना पशुतन्त्रमध्यपातिनः पशुपुरोडाशस्याप्युपकारः सिध्यति सोऽयं प्रसङ्गः। एवं सति प्रकृतेऽपि तन्त्रप्रसङ्गयोः कतरस्योपादानमिति चेत्। प्रसङ्गस्येति ब्रूमः। काम्यप्रयोगेणैव नित्यप्रयोगस्यापि सिद्धत्वात् तथा च स्मृतिः। "काम्येऽपि नित्यसिद्धिः स्यात् प्रसङ्गेनोभयात्मकः इति" तदेवमेकादश्युपवासस्य नित्यत्वकाम्यत्वलक्षणद्वैरूप्ये विरोधाभावात् द्वैरूप्यमभ्युपेयमिति स्थितम्।

अतोपवासाङ्गविधिनिर्णयस्य वेधाधीनत्वात् प्रथमं दशमीवेधो निरूप्यते। स च वेधस्त्रिविधः अरुणोदयवेधः सूर्य्योदयवेधः पञ्चदशनाडीवेधश्चेति। तत्रारुणोदयवेधो भविष्यत्पुराणे दर्शितः। "अरुणोदयकाले तु दशमी यदि दृश्यते। सा विद्धैकादशी तत्र पापमूलमुपोषणमिति"। "अरुणोदयवेलायां दिशो गन्धो भवेद्यदि। दुष्टं तत्तु प्रयत्नेन वर्जनीयं नराधिप!"। गारुडपुराणेऽपि "दशमीवेधसंयुक्तो यदि स्यादरुणोदयः। नैवोपोष्यं वैष्णवेन तद्दिनैकादशीव्रतमिति"। अरुणोदयस्य प्रमाणं स्कान्दनारदाभ्यामुक्तम्। "उदयात् प्राक्चतस्रस्तु नाडिका अरुणोदय" इति। तस्मिन्नरुणोदये वेधा बहुविधाः। ते च प्रश्नोत्तराभ्यां ब्रह्मवैवर्त्ते दर्शिताः। "कीदृशस्तु भवे-

द्वेधो योगोविप्रेन्द्र! कीदृशः?। योगवेधौ समाख्यातौ याभ्यां दुष्टमुपोषणम्। चतस्रोघटिकाः प्रातररुणोदयनिश्चयः। चतुष्टयविभागोऽत्र वेधादीनां किलोदितः। अरुणोदयवेधःस्यात्सार्द्धन्तु घटिकात्रयम्। अतिवेधोद्विघटिकः प्रभासन्दर्शनाद्रवेः। महावेधोऽपि तत्रैव दृश्यतेऽर्कों न दृश्यते। तुरीयस्तत्र विहितोयोगः सूर्य्योदये सतीति"। अयमर्थः वेधातिवेधमहावेधयोगाश्चत्वारउपवासस्य दूषकाः। तत्र रवेः प्रभासन्दर्शनात्पूर्व्वं सार्द्धघटिकात्रयमेकादश्या व्याप्तं ततः प्राचीने घटिकार्द्धे अरुणोदयसम्बन्धिनि दशमीसद्भावे वेध इत्युच्यते। यदा सूर्य्यदर्शनात्पूर्व्वं घटिकाद्वयमुपरितनमेकादशीव्याप्तं पूर्व्वं तु घटिकाद्वयं दशमीव्याप्तं तदाऽतिवेध इत्युच्यते। यदा सूर्य्योदयस्य दर्शनादर्शनसन्देहकालमेकादशी व्याप्नोति ततः प्राक् कृत्स्नोऽरुणोदयकालो दशमीव्याप्तस्तदा महावेधः। यदा सूर्य्योदये स्पष्टे सति पश्चादेकादशी प्रवृत्ता ततः प्राच्यामुदयवेलायां दशमी विद्यते तदा योगशब्देनाभिधेयोदोषोभवति। स च वेधाद्यपेक्षया तुरीयोभवतीति। नन्वरुणोदयात्पूर्व्वमपि यदि मध्यरात्रानन्तरं दशमीकला विद्येत तदा नोपवासस्तदभावे तूपवासश्च कर्त्तव्यः। तथा च स्मृतिः "अर्द्धरात्रात्परा यत्र एकादश्युपलभ्यते। तत्रोपवासः कर्त्तव्यो न तु वै दशमीकलेति"। अतोयथानिर्दिष्टेभ्य स्त्रिभ्योऽन्योऽपि कश्चिद्वेधोऽस्तीति चेत् नैवम्। अर्द्धरात्रवेधोऽपि यदा वर्ज्यस्तदा किमु वक्तव्यम् अरुणोदयवेध इति वक्तुमर्धरात्रवेधउपन्यस्तो न तु वेधाभिप्रायेण। तदेव ब्रह्मवैवर्त्ते शौनकेन स्पष्टीकृतम्। "अर्द्धरात्रे तु केषाञ्चिद्दशम्या वेध इष्यते। अरुणोदयवेलायां नावकाशो विचारणे। कापालवेध इत्याहुराचार्य्या ये हरिप्रियाः! न तन्मम मतं यस्मात्त्रियामा रात्रिरिष्यत" इति। य एते वेधातिवेधमहावेधयोगाःपूर्व्वमभिहितास्तेषु त्रयोऽरुणोदयवेधाश्चतुर्थउदयवेधः। तञ्चोदयवेधङ्कण्वोऽप्याह "उदयोपरिविद्धा तु दशम्येकादशी यदा। दानवेभ्यः प्रीणनार्थं दत्तवान् पाकशासन इति"। स्मृत्यन्तरेऽपि। "दशम्याः प्रान्तमादाय यदोदेति दिवाकरः। तेन स्पृष्टं हरिदिनं दत्तं जम्भासुराय त्विति"। पञ्चदशनाडीवेधस्तु स्कान्दपुराणे दर्शितः "नागोद्वादशनाडीभिर्दिक् पञ्चदशभिस्तथा। भूतोऽष्टादशनाडीभिर्दूषयत्युत्तरान्तिथिमिति"। तदेवं वेधत्रयं निरूपितम्। तत्र पञ्चदशनाडीवेधस्य वेधान्तरस्य च विषयव्यवस्था निगमे दर्शिता। "सर्व्वप्रकारवेधोऽयमुपवासस्य दूषकः। सार्द्धसप्तमुहूर्त्तस्तु वेधोऽयं बाधते व्रतमिति"। सर्व्वप्रकार इत्यत्र प्रकारशब्देन कलाकाष्ठादयोवेधातिवेधादयो वा गृह्यन्ते नात्र तिथ्यन्तरवत्त्रिमुहूर्त्तत्वं वेधेऽपेक्षितं किन्तु लवकलाकाष्ठादिकमपि ग्राह्यम्। तदुक्तं नारदीये। "लवार्द्धवेधे विप्रेन्द्र! दशम्येकादशीं त्यजेत्। सुराया बिन्दुना स्पृष्टं गङ्गाम्भ इव निर्म्मलमिति"। स्कान्दपुराणेऽपि "कलाकाष्ठादिमात्रेण दृश्यते दशमी विभो!। एकादश्यां न कर्त्तव्यं व्रतं राजन्! कदाचनेति"। स्मृत्यन्तरेऽपि। "कलार्द्धेनापि विद्धा स्याद्दशम्येकादशी यदि। तदाप्येकादशीं हित्वा द्वादशीं समुपोषयेदिति"। सोऽयं कलाकाष्ठादिवेधोऽरुणोदये सूर्य्योदये च समानः। तत्रारुणोदयवेधोवैष्णवविषयः। तच्च गारुडपुराणे विस्पष्टमवगम्यते। "दशमीशेषसंयुक्तोयदि स्यादरुणोदयः। नैवोपोष्यं वैष्णवेन तद्दिनैकादशीव्रतमिति"। वैष्णवश्च सपञ्चरात्रादिवैष्णवागमोक्तदीक्षां प्राप्तोवैष्णवः। अत एव स्कान्दपुराणे वैष्णवस्वरूपमभिहितम् "परमापदमापन्नोऽहर्षे वा समुपस्थिते। नैकादशीं त्यजेद्यस्तु यस्य दीक्षाऽस्ति वैष्णवी। समात्मा सर्व्वजीवेषु निजाचारादविच्युतः। विष्ण्वर्पिताखिलाचारः स हि वैष्णव उच्यते" इति। विष्णुपुराणेऽपि। "न चलति निजवर्णधर्मतो यः सममतिरात्मसुहृद्विपक्षपक्षे। न हरति न च हन्ति किञ्चिदुच्चैः सितमनसं तमवेहि विष्णुभक्तमिति"।

यथोक्तगुणसम्पन्नो वैष्णवदीक्षां प्राप्तोयस्तं प्रति तिथिवेधोनिर्णीयते। एकादशी द्विविधा अरुणोदयवेधवती शुद्धा चेति। तत्र वेधवती सर्व्वा त्याज्या। "तद्दिनैकादशीव्रतमिति" गारुडपुराणे सामान्येन प्रतिषेधात्। विशेषस्तु संपृक्तादिभेदेन प्रतिषेधोद्रष्टव्यः य एते वेधातिवेधमहावेधयोगाख्यादोषाः पूर्व्वमुक्तास्तेषु सत्स्वेकादशी संपृक्तसंदिग्धसंयुक्तसंकीर्णनामभिर्व्यवह्रियते। अरुणोदयस्य प्रथमघटिकायां दशमीसद्भावे वेध इत्युक्तः। स च द्विविधः। घटिकाप्रारम्भे कृत्स्नघटिकायां च दशमीदृष्टिभेदात्। तत्र प्रारम्भमात्रदशमीयुक्तैकादशी संपृक्तेत्युच्यते। कृत्स्नघटिकावर्त्तिदशमीसद्भावयुक्तैकादशी सन्दिग्धा। अरुणोदयप्रथममुहूर्त्तादधोदशमीव्याप्तिरतिवेधस्तदुपेतैकादशी संयुक्तेत्युच्यते। सूर्य्यमण्डलदर्शनसन्देहवेलायां दशमीसद्भावे महावेधः तद्यु-

ऽकादशी संकीर्णेत्युच्यते । ता एताः संपृक्तादयस्तस्रोऽपि त्याज्याः । तथा च गोभिलः "अरुणोदयवेलायां यदिदशमीसङ्गता । संपृक्तैकादशी तान्तु मोहिन्यै दत्तवान् प्रभुरिति" । गारुडपुराणे "उदयात्प्राक् त्रिघटिकाव्यापिन्येकादशी यदि । संदिग्धैकादशी नाम वर्ज्ज्येयं धर्म्मकाङ्क्षिभिः । उदयात्प्राङ्मुहूर्त्तेनव्यापिन्येकादशी यदा । संयुक्तैकादशी नाम वर्जयेद्धर्म्मवृद्धये । आदित्योदयवेलाया आरभ्य षष्टिनाडिका । संकीर्णैकादशी नाम त्याज्या धर्म्मफलेप्सुभिः। पुत्रपौत्रप्रवृद्ध्यर्थं द्वादश्यामुपवासयेत् । तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणमिति" । यद्यपि पूर्व्वत्र वेधवाक्ये "सार्द्धं तु घटिकात्रयम्" इत्युक्तम् अत्र तु सन्दिग्धैकादशीवाक्ये त्रिघटिकेत्युक्तं तथापि नैतावता वैषम्येण विरोधः शङ्कनीयः शास्त्रद्वयस्याऽपि दशमीवेधत्यागपरत्वात् । तदेवं सामान्यविशेषाभ्यां प्रतिषिद्धत्वादरुणोदयविद्धैकादशी वैष्णवेन परित्याज्या । यस्तु योगसत्कचतुर्णां योगस्तस्य त्याज्यत्वमर्थात्सिद्धम् । अरुणोदयवेधोऽपि यदा त्यज्यते तदा किमु वक्तव्यं सूर्य्योदयवेध इति । वचनन्त्वत्र कण्वप्रोक्तं पूर्व्वमेवोदाहृतम् । या तु चतुर्व्विधवेधरहिता शुद्धैकादशी सा द्विविधा । आधिक्येन युक्ता तद्रहिता चेति । आधिक्यञ्च त्रिविधम् एकादश्याधिक्यं द्वादश्याधिक्यमुभयाधिक्यं चेति । त्रिष्वप्येतेषु पक्षेषु अरुणोदयमारभ्य प्रवृत्तां शुद्धामप्येकादशीं परित्यज्य परेद्युरुपवासः कर्त्तव्यः । तत्रैकादश्याधिक्ये नारदः "सम्पूर्णैकादशी यत्र द्वादश्यां वृद्धिगामिनी । द्वादश्यां लङ्घनं कार्य्यं त्रयोदश्यां तु पारणमिति" । स्मृत्यन्तरेऽपि "एकादशी यदा पूर्णा परतः पुनरेव सा । पुण्यं क्रतुशतस्योक्तं त्रयोदश्यां तु पारणमिति" विष्णुरहस्येऽपि "एकादशीकलाप्राप्ता येन द्वादश्युपोषिता । तस्य क्रतुशतं प्रोक्तं त्रयोदश्यान्तु पारणमिति" द्वादश्याधिक्ये व्यास आह "एकादशी यदा लुप्ता परतो द्वादशी भवेत् । उपोष्या द्वादशी तत्र यदीच्छेत् परमां गतिम्" उभयाधिक्ये गुरुराह "संपूर्णैकादशी यत्र प्रभाते पुनरेव सा । तत्रोपोष्या द्वितीया तु परतो द्वादशी यदीति" नारदोऽपि "संपूर्णैकादशी यत्र प्रभाते पुनरेव सा । सर्व्वैरेवोत्तरा कार्य्या परतो द्वादशी यदीति" स्मृत्यन्तरेऽपि "एकादशी यदा पूर्णा परतो द्वादशी यदि । एकादशीं परित्यज्य द्वादशीं समुपोषयेदिति" । उभयाधिक्यरहितायां न कोऽपि सन्देहोऽस्ति । इति वैष्णवदीक्षायुक्तानामेकादशी निर्णीता ।

अथ श्रौतस्मार्त्तपर्य्यवसितानां पञ्चरात्रादिदीक्षारहितानाम् एकादशी निर्णीयते । अरुणोदयवेधस्य वैष्णवविषयत्वे व्यवस्थिते सत्युदयवेधः स्मार्त्तानुष्ठानविषयत्वेन परिशिष्यते । अतएव स्मर्य्यते "अतिवेधा महावेधा ये वेधास्तिथिषु स्मृताः । सर्व्वेऽप्यवेधा विज्ञेया वेधः सूर्य्योदये मतः" इति । एवञ्च सति सूर्य्योदयवेधमपेक्ष्यैकादशी द्विधा भिद्यते शुद्धा विद्धा चेति । तत्र शुद्धायां पूर्व्ववच्चत्वारो भेदा भवन्ति एकादश्याधिक्यं द्वादश्याधिक्यमुभयाधिक्यमनुभयाधिक्यं चेति । एवं विद्धायामपि चत्वारो भेदा उन्नेयाः । शुद्धायामेकादश्याधिक्ये द्वयोस्तिथ्योरुपवासयोग्यतामाह वृद्धवशिष्ठः "संपूर्णैकादशी यत्र प्रभाते पुनरेव सा । लुप्यते द्वादशी तस्मिन्नुपवासः कथम्भवेत् ? । उपोष्ये द्वे तिथी तत्र विष्णुप्रीणनतत्परैरिति" । उभयोरधिकारिभेदेन व्यवस्था स्कान्दपुराणे दर्शिता "प्रथमेऽहनि संपूर्णा व्याप्याहोरात्रसंयुता । द्वादश्यां च तथा तात ! दृश्यते पुनरेव च । पूर्व्वा कार्य्या गृहस्थैस्तु यतिभिस्तूत्तरा तिथिरिति" एतच्च परेद्युर्द्वादश्यभावविषयम् तथा च स्मृत्यन्तरे । "पुनः प्रभातसमये घटिकैका यदा भवेत् । अत्रोपवासो विहितश्चतुर्थाश्रमवासिनाम् । विधवायाश्च तत्रैव परतो द्वादशी न चेदिति" । गारुड़पुराणेऽपि "पुनः प्रभातसमये घटिकैका यदा भवेत् । अत्रोपवासो विहितो वनस्थस्य यतेस्तथा । विधवायाश्च तत्रैव परतो द्वादशी न चेदिति" । पुराणान्तरे "एकादशी यदा पूर्णा परतः पुनरेव सा । पुण्यं क्रतुशतस्योक्तं त्रयोदश्यान्तु पारणमिति" एवमेकादश्याधिक्यपक्षे गृहिणोव्यवस्थाऽभिहिता । द्वादश्याधिक्ये पूर्व्वेद्युरुपवासमाह नारदः "न चेदेकादशी विष्णौ द्वादशी परतः स्थिता । उपोष्यैकादशी तत्र यदीच्छेत् परमं पदमिति" । स्कान्दपुराणेऽपि "शुद्धा यदा समा हीना समहीनाऽधिकोत्तरा । एकादश्यामुपवसेत् शुद्धां वैष्णवोऽपीति" दशमीवेधरहिता शुद्धैकादशी यदा परेद्युरुदयादूर्द्ध्वं नास्ति किन्तूदये समा ततोन्यूना वा द्वयोरपीत्यर्थः । एवं च सति प्रकृते द्वादश्याधिक्येऽपि एकादशी समन्यूनयोरन्यतरत्वात् प्रथमैवोपोष्येत्युक्तं भवति । उभयाधिक्ये परेद्युरुपवासो गारुड़पुराणे दर्शितः "संपूर्णैकादशी यत्र प्रभाते पुनरे-

व सा । तत्रोपोष्या पराऽऽयुष्या परतो द्वादशी यदीति” वराहपुराणेऽपि ।“एकादशी विष्णुना चेत् द्वादशी परतः स्थिता । उपोष्या द्वादशी तत्र यदीच्छेत् परमं पदमिति” स्मृत्यन्तरेऽपि “संपूर्णैकादशी यत्र प्रभाते पुनरेव सा । वैष्णवी च त्रयोदश्यां घटिकैकापि दृश्यते । गृहस्थोऽपि परां कुर्यात् पूर्वां नोपवसेत्तदा । पूर्वाप्येकादशी त्याज्या वर्द्धते द्वितयं यदीति” एवमेकैकाधिक्ये द्वितयाधिक्येऽपि निर्णयो दर्शितः । अनुभयाधिक्ये तु नास्ति सन्देहः । इति शुद्धायां चत्वारोभेदाव्यवस्थिताः । अथ विद्धायां चत्वारोभेदा व्यवस्थाप्यन्ते । तत्राप्येकादश्याधिक्ये पूर्ववद्गृहियत्योर्व्यवस्था द्रष्टव्या । तदाह प्रचेताः “एकादशी विद्धा चेच्छुक्ले कृष्णेऽविशेषतः । उत्तरान्तु यतिः कुर्यात् पूर्वामुपवसेद्गृहीति” नचैतद्वाक्यं शुद्धाधिक्ये चरितार्थमिति शङ्कनीयम् बाधकाभावेन विद्धाधिक्येऽपि तद्वचनप्रवृत्तेर्निवारयितुमशक्यत्वात् । द्वादश्याधिक्ये परेद्युरुपवासः । तदाह व्यासः “एकादशी यदा लुप्ता परतो द्वादशी भवेत् । उपोष्या द्वादशी तत्र यदीच्छेत् परमां गतिमिति” लुप्ता आदौ दशमीमिश्रितत्वात् परतोवृद्ध्यभावाच्च क्षयं गतेति यावत् । उभयाधिक्येऽपि परेद्युरुपवासः । तदुक्तं भविष्यपुराणे “एकादशीं दिवा युक्तां वर्द्धमाने विवर्ज्जयेत् । क्षयमार्गस्थिते सोमे कुर्वीत दशमीयुतामिति” उभयानाधिक्ये तु नैवास्ति सन्देहः कोट्यन्तराभावात् । न च विद्धत्वादस्ति सन्देह इति वाच्यं कोट्यन्तराभावे विद्धाया अप्युपादेयत्वात् । तथा च विष्णुरहस्ये ‘एकादशी भवेत् काचिद्दशम्या दूषिता तिथिः। वृद्धिपक्षे भवेद्दोषः क्षयपक्षेऽतिपुण्यदेति” । इति विद्धाभेदाव्यवस्थापिताः। अत्र शुद्धाविद्धयोरप्येष निर्णयसंग्रहः । एकादशीद्वादश्योरुभयोरपि वृद्धौ परेद्युरुपवासः । द्वयोरप्यवृद्धौ पूर्व्वेद्युः । एकादशीमात्रवृद्धौ गृहियत्योर्व्यवस्था । द्वादशीमात्रवृद्धौ शुद्धायां सर्व्वेषां पूर्व्वेद्युः विद्धायां परेद्युरिति”तदेवं शास्त्रार्थे व्यवस्थिते यावन्ति मुनिवाक्यानि विधायकानि निषेधकानि सर्व्वाणि तान्यविरोधेन व्यवस्थापनीयानि । तत्र व्यवस्थापनप्रकारं दर्शयामः स्कन्दपुराणे ‘प्रतिपत्प्रभृतयः सर्व्वा उदयादोदयाद्रवेः । संपूर्णा इति विख्याता हरिवासरवर्ज्जिताः” इति हरिवारेषु तु संपूर्णत्वं प्रकारान्तरेणोक्तं गारुडपुराणे “उदयात् प्राग्यदा विप्र ! मुहूर्त्तद्वयसंयुता । संपूर्णैकादशी ज्ञेया तत्रैवोपवसेद्गृहीति” भविष्यपुराणेऽपि “आदित्योदयवेलायां प्राङ्मुहूर्त्तद्वयान्विता । एकादशी तु संपूर्णा विद्धाऽन्या परिकल्पितेति” । तदेतद्वचनद्वयमरुणोदयवेधोपजीवनेन प्रवृत्तत्वाद्वैष्णवविषयम् । दशमीवेधे निन्दकानि तु वचनानि द्विविधान्युपलभ्यन्ते । कानिचिदरुणोदयानुवादेन प्रवृत्तानि, कानिचित्तदननुवादेनेति । यथा भविष्यपुराणे “अरुणोदयकाले तु दशमी यदि दृश्यते । तत्र नैकादशी कार्य्या धर्म्मकामार्थनाशिनीति” कौर्म्मे ‘अरुणोदयवेलायां विद्धा गान्धार्य्युपोषिता । तस्याः पुत्रशतं नष्टं तस्मात् तां परिवर्ज्जयेदिति” एतादृशानि सर्व्वाणि वैष्णवविषयाणि द्रष्टव्यानि । अरुणोदयानुवादमन्तरेण दशमीविद्धानिन्दकानि च कानिचिद्वचनान्युपलभ्यन्ते तद्यथा नारदः ‘दशम्यनुगता यत्र तिथिरेकादशी भवेत् । तत्रोपवासे नाशस्य परेत्य नरकं व्रजेदिति’ ब्रह्मवैवर्त्ते “दशमीशेषसंयुक्तां यः करोति विमूढधीः । एकादशीफलं तस्य नश्येत् द्वादशवार्षिकमिति” विष्णुरहस्येऽपि “दशमीशेषसंयुक्तामुपोष्यैकादशीं किल । संवत्सरकृतेनेह नरो धर्म्मेण मुच्यते” इति ईदृशानि सर्व्वाण्यपि वेधविषये वैष्णवविषयाण्यन्यविषये तूभयाधिक्ये द्वादश्याधिक्ये च सर्व्वपुरुषविषयाणि द्रष्टव्यानि । दशमीविद्धाभ्यनुज्ञापकानि च कानिचिद्वचनान्युपलभ्यन्ते तद्यथा स्कान्दपुराणे ‘त्रयोदश्यां न लभ्येत द्वादशी यदि किञ्चन । उपोष्यैकादशी तत्र दशमीमिश्रितापि चेति” स्मृत्यन्तरे “उपोष्यैकादशी तत्र द्वादशी न भवेद्यदि । दशम्यापि हि मिश्रैव एकादश्येव धर्म्मकृदिति” वृहद्वशिष्ठः “द्वादशी स्वल्पस्वल्पापि यदि न स्यात् परेऽहनि । दशमीमिश्रिता कार्य्या महापातकनाशिनीति’ ऋष्यशृङ्गः “एकादशी न लभ्येत सकला द्वादशी भवेत् । उपोष्यैकादशी विद्धा ऋषिरुद्दालकोऽब्रवीदिति” हारीतोऽपि ‘त्रयोदश्यां यदा नष्टं द्वादशीघटिकाद्वयम् । दशम्यैकादशी विद्धा सैवोपोष्या सदा तिथिरिति” एतादृशानि वाक्यानि सर्व्वाणि अनुभयाधिक्ये सर्व्वपुरुषविषयाणि एकादश्याधिक्ये तु स्मार्त्तगृहस्थविषयाणि द्रष्टव्यानि न त्वेतानि वैष्णवविषयाणि वैष्णवप्रकरणेषु विद्धाभ्यनुज्ञाया अदर्शनात् । संपूर्णैकादशीपरित्यागविषयाणि कानिचिद्वचनान्युपलभ्यन्ते । तद्यथा स्कन्दपुराणे “एकादशी भवेत् पूर्णा परतो द्वादशी यदि । तदा ह्येकादशीं त्यक्त्वा द्वादशीं समुपोषयेदिति” तथा कालिकापुराणे ‘एकादशी यदा

पूर्णा परतो द्वादशी भवेत्। उपोष्या द्वादशी तत्र तिथिवृद्धिः प्रशस्यत इति” गारुडपुराणे “पूर्णा भवेद् यदा नन्दा भद्रा चैव विवर्द्धते। तदोपोष्या तु भद्रा स्यात् तिथिवृद्धिप्रशस्तिर इति”। एतादृशानि सर्व्वाणि वैष्णवविषयाणि। दिनत्रयविषयाणि कानिचिद्वचनान्युपलभ्यन्ते। यदाह नारदः “यदि दैवात्तु संभिद्येदेकादश्यां तिथित्रयम्। तत्र क्रतुशतं पुण्यं द्वादशीपारणे भवेदिति” कूर्म्मपुराणेऽपि “द्विस्पृगेकादशी यत्र तत्र सन्निहितो हरिः। तामेवोपवसेत् काममकामो विष्णुतत्परः” इति अत्राद्यन्तयोर्दशमीद्वादश्यौ मध्ये एकादशीत्येतद्दिनत्रय यदाप्नोति तदा परतो द्वादश्या वृद्धिरवृद्धिश्चेत्युभयं सम्भवति। तत्र यद्यवृद्धिस्तदा यथोक्तं दिनत्रयमुपोष्यम्। तदुक्तं पुराणान्तरे “दिनत्रयस्पृते! देवि नोपोष्या दशमी युता। सैवोपोष्या सदा पुण्या परतश्चेत् त्रयोदशीति” द्वादशीवृद्धौ “एकादशी यदा लुप्ता” इत्यनेन व्यासवचनेन परेद्युरुपवास इति पूर्व्वमेव निर्णीतं यदा त्वाद्यन्तयोरेकादशी त्रयोदश्योर्मध्ये द्वादशीत्येतादृशं दिनत्रयं तदा नारदेन स्मर्य्यते “एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणम्”। “एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। त्रिस्पृशा नाम सा प्रोक्ता ब्रह्महत्यां व्यपोहतीति”। तदेतद्वैष्णवविषयं यतिविषयं वा द्रष्टव्यम्। गृहस्थे तु तन्निषिद्धम् तथा च कूर्म्मपुराणे “एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। उपवासं न कुर्व्वीत पुत्त्रपौत्त्रसमन्वितः” इति पद्मपुराणे “एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। त्र्यहस्पृग्यदहोरात्रं नोपोष्यं तत् सुतार्थिभिरिति” यत्तु भव्यशृङ्गेणोक्तम्। “अविद्धानि निषिद्धैश्च न लभ्यन्ते दिनानि तु। मुहूर्त्तैः पञ्चभिर्व्विद्धा ग्राह्यैवैकादशी तिथिः। तदर्द्धविद्धान्यन्यानि दिनान्युपवसेद्बुधः। पूर्व्वविद्धा न कर्त्तव्या षष्ठ्येकादश्यथाष्टमी। एकादशीं तु कुर्व्वीत क्षीयते द्वादशी यदीति” अत्र निषेधो यतिविषयः, विधिर्गृहस्थविषयः वेधशङ्कस्ये देयत्वशङ्का मा भूदिति पञ्चभिर्मुहूर्त्तैरित्युक्तम्। तदेवं नानाविधवचनस्य व्यवस्थापनप्रकारो वक्तुत्वादिनः। अनया व्युत्पत्त्या मन्दबुद्धिरपि व्यवस्थापयितुं शक्नोत्येव। इत्युपवासतिथिर्निरूपिता।

अथाधिकारी निरूप्यते तत्र नारदः “अष्टाब्दादधिको मर्त्त्योह्यपूर्णाशीतिहायनः। भुङ्क्ते यो मानवो मोहादेकादश्यां स पापकृदिति” कात्यायनोऽपि “अष्टवर्षाधिको मर्त्त्यो ह्यशीतिन्यूनवत्सरः। एकादश्यामुपवसेत् पक्षयोरुभयोरपीति”। गृहस्थस्य तु शुक्लैकादश्यामेव नित्योपवासः यथा कूर्म्मपुराणे “एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि। वानप्रस्थो यतिश्चैव शुक्लामेव सदा गृहीति” भविष्योत्तरेऽपि “एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि। ब्रह्मचारी च नारी च शुक्लामेव सदा गृहीति” नारी विधवा तस्या एव यतिधर्म्मत्वात्। पतिमत्यास्तूपवासं निषेधति विष्णुः “पत्यौ जीवति या नारी उपोष्य व्रतमाचरेत्। आयुष्यं हरते भर्त्तुर्नरकं चैव गच्छतीति” मनुः “नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणमिति” मार्कण्डेयपुराणे “नारी खल्वननुज्ञाता भर्त्त्रा पित्रा सुतेन वा। निष्फलं तु भवेत् तस्या यत्करोति व्रतादिकमिति” आदिशब्दात्पुष्पालङ्कारगन्धधूपाञ्जनानामुपसंग्रहः मनुः “पुष्पालङ्कारवस्त्राणि गन्धधूपानुलेपनमिति” पत्युरनुमत्या व्रतादिष्वधिकारिणी भवति तदाह कात्यायनः। “भार्य्या पत्युर्मतेनैव व्रतादीनाचरेत् सदेति” शुक्लामेवेत्येवकारः कृष्णैकादश्युपवासनिषेधपरः। तथा च कूर्म्मपुराणे “संक्रान्त्यां कृष्णपक्षे च रविशुक्रदिने तथा। एकादश्यां न कुर्व्वीत उपवासञ्च पारणमिति” गौतमोऽपि “आदित्येऽहनि संक्रान्त्यामसितैकादशीषु च। व्यतीपाते कृते श्राद्धे पुत्त्री नोपवसेद्गृहीति”। अत्र पुत्त्रीति विशेषणं पुत्त्रवतो दोषविशेषप्रतिपादनार्थम् तथा च पद्मपुराणे “संक्रान्त्यामुपवासेन पारणेन युधिष्ठिर!। एकादश्यां च कृष्णायां ज्येष्ठःपुत्त्रो विनश्यति” नारदीयेऽपि “इन्दुक्षयेऽर्कसंक्रान्त्यामेकादश्यां सितेतरे। उपवासं न कुर्व्वीत यदीच्छेत्सन्ततिं शुभामिति”। अत्र संक्रान्त्यादिषूपवासस्य निषेधः संक्रान्त्यादिनिमित्तकस्य। तथा च कात्यायनः “एकादशीषु कृष्णासु रविसंक्रमणे तथा। चन्द्रसूर्य्योपरागे च न कुर्य्यात्पुत्त्रवान् गृही। तत्रशुक्लोपवासस्य निषेधोऽयमुदाहृतः। निमित्तान्तरयुक्तस्य न विधिर्न निषेधनमिति” जैमिनिरपि “तन्निमित्तोपवासस्य निषेधोऽयमुदाहृतः। नानुषङ्गकृतोपाद्योयतोनित्यमुपोषणमिति”। अयमर्थः एकादश्युपवासस्य नित्यत्वात् क्रान्त्याद्युपवासस्य च काम्यत्वात्काम्योपवासनिषेधे सति न नित्योपवासनिषेधः सिध्यतीति। संक्रान्त्यादिनिमित्तकोपवासः संवर्त्तेनोक्तः। “अमावास्या द्वादशी च संक्रान्तिश्च विशेषतः। एताः प्रशस्तास्तिथ-

यो भानुवारस्तथैव च । अत्र स्नानं जपो होमो देवतानाञ्च पूजनम् । उपवासस्तथा दानमेकैकं पावनं स्मृतमिति" । गृहस्थस्य तु शुक्लायामेव नित्योपवास इत्युक्तम् । नैमित्तिककाम्योपवासौ तु कृष्णायामपि कर्त्तव्यौ । तत्र नैमित्तिकः स्मृत्यन्तरे पठ्यते । "शयनीबोधनीमध्ये या कृष्णैकादशी भवेत् । सैवोपोष्या गृहस्थेन नान्या कृष्णा कदाचनेति" । काम्यस्तु स्कन्दपुराणे "पितॄणां गतिमन्विच्छन् कृष्णायां समुपोषयेदिति" सनत्कुमारः "भानुवारेण संयुक्ता कृष्णा संक्रान्तिसंयुता । एकादशी सदोपोष्या सर्व्वसम्पत्करी तिथिरिति" । मत्स्यपुराणेऽपि "एकादश्यां तु कृष्णायामुपोष्य विधिवन्नरः । पुत्त्रानायुः समृद्धिं च साम्राज्यं च स गच्छतीति"। दिनक्षये पुत्त्रवतो गृहस्थस्योपवासोऽपि निषिद्धः तथा च पितामहः "एकादश्यां दिनक्षये उपवासं करोति यः। तस्य पुत्त्रा विनश्यन्ति मघायां पिण्डदो यथेति" । मत्स्यपुराणेऽपि "दिनक्षयेऽर्कसंक्रान्तौ ग्रहणे चन्द्रसूर्य्ययोः । उपवासं न कुर्व्वीत पुत्त्रपौत्त्रसमन्वितः" इति । दिनक्षयलक्षणं पद्मपुराणे "द्वौ तिथ्यन्तावेकवारे यस्मिन् स स्याद्दिनक्षयः" इति । वशिष्ठोऽपि "एकस्मिन् सावने त्वह्नि तिथीनां त्रितयं यदा । तदा दिनक्षयः प्रोक्तस्तत्र साहस्रिकं फलमिति"। फलमत्रोपवासव्यतिरिक्तदानादिजन्यं द्रष्टव्यम् उपवासस्य निषिद्धत्वात् । ईदृशे विषये किं कर्त्तव्यमित्याकाङ्क्षायां वायुपुराणे पठ्यते "उपवासे निषिद्धे तु भक्ष्यं किञ्चित्प्रकल्पयेत् । न दुष्यत्युपवासेन उपवासफलं लभेत्" । "नक्तं हविष्यान्नमनोदनं वा फलन्तिलाः क्षीरमथाम्बु चाज्यम् । यत्पञ्चगव्यं यदि वापि वायुः प्रशस्तमत्रोत्तरमुत्तरं चेति" । उपवासासमर्थस्त्वेकभक्तादीनि कुर्य्यात् तथा च स्मृतिः । "उपवासेष्वशक्तानामशीतेरूर्द्ध्वजीविनाम् । एकभक्तादिकं कार्य्यमाह बौधायनो मुनिरिति" । मार्कण्डेयपुराणे "एकभक्तेन नक्तेन तथैवायाचितेन च । उपवासेन दानेन न निर्द्वादशिको भवेदिति" । कूर्म्मपुराणेऽपि "एकभक्तेन नक्तेन क्षीणवृद्धातुरः क्षिपेत् । नातिक्रामेद्द्वादशीन्तु उपवासव्रतेन चेति" । स्मृत्यन्तरेऽपि "एकभक्तेन नक्तेन बालवृद्धातुरः क्षिपेत् । पयोमूलं फलं वाऽपि न निर्द्वादशिको भवेदिति"। भविष्यपुराणेऽपि "एकादश्यामुपवसेन्नक्तं वापि समाचरेदिति"। नित्यकाम्ययोरशक्तास्तु प्रतिनिधिभिर्व्रतङ्कारयेयुः । तथा च विष्णुरहस्ये "असामर्थ्ये शरीरस्य व्रते च समुपस्थिते । कारयेद्धर्म्मपत्नीं वा पुत्त्रं वा विनयान्वितमिति" । पैठीनसिः "भार्य्या पत्युर्व्रतं कुर्य्याद्भार्य्यायाश्च पतिर्व्रतम् । असामर्थ्ये परस्ताभ्यां व्रतभङ्गो न जायते" इति । स्कन्दपुराणे "पुत्त्रं वा विनयोपेतं भगिनीं भ्रातरन्तथा । एषामभाव एवान्यं ब्राह्मणं विनियोजयेत्" । अन्यत्रापि "भ्रातरं भगिनीं शिष्यं कारयेद्ब्राह्मणादिभिरिति" । स्मृत्यन्तरेऽपि "पितृमातृपतिभ्रातृश्वश्रूगुर्व्वर्य्यभूभुजाम् । उद्देशार्थमुपोषित्वा स्वयञ्च फलभाग्भवेदिति" कात्यायनः । "पितृमातृस्वसृभ्रातृगुर्व्वर्थे च विशेषतः । उपवासं प्रकुर्व्वाणः पुण्यं शतगुणं लभेत् । दक्षिणा नात्र दातव्या शुश्रूषा विहिता च सा । नारी च पतिमुद्दिश्य एकादश्यामुपोषिता । पुण्यं शतगुणं प्राहुर्मुनयः पारदर्शिनः । उपवासफलं तस्याः पतिः प्राप्नोत्यसंशयम् । राज्यस्य क्षत्रियार्थे च एकादश्यामुपोषितः । पुरोधाः क्षत्रियस्यार्द्धं फलं प्राप्नोति निश्चितम् । पितामहादीनुद्दिश्य एकादश्यामुपोषणे । कृते ते तु फलं विप्राः ! समग्रं समवाप्नुयुः । कर्त्ता दशगुणं पुण्यं प्राप्नोत्यत्र न संशयः । यमुद्दिश्य कृतं सोऽपि सम्पूर्णं फलमाप्नुयादिति" । प्रतिनिधौ च कश्चिद्विशेषः स्मृतौ "काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्तिके च सः । काम्येऽप्युपक्रमादूर्द्ध्वं केचित्प्रतिनिधिं विदुरिति"। अयमर्थः नित्यं नैमित्तिकं च प्रतिनिधिनाप्युपक्रम्य कारयेत् काम्यं तु सामर्थ्यं परीक्ष्य स्वयमेवोपक्रम्य कुर्य्यात् असामर्थ्ये उपक्रमादूर्द्ध्वं प्रतिनिधिनापि तत् कारयेत् ।

उपवासाकरणे प्रायश्चित्तं स्मर्य्यते "अष्टम्याञ्च चतुर्दश्यां दिवा भुक्त्वैन्दवं चरेत् । एकादश्यां दिवा रात्रौ नक्तञ्चैव तु पर्व्वणीति" स्मृत्यन्तरे "अर्के पर्व्वद्वये रात्रौ चतुर्दश्यष्टमीदिवा । एकादश्यामहोरात्रं भुक्त्वा चान्द्रायणञ्चरेत्" ।

अथ काम्योपवासक्रमः तत्राङ्गिराः "सायमाद्यन्तयोरह्नोः सायं प्रातश्च मध्यमे । उपवासफलं प्रेप्सुर्जह्याद्भक्तचतुष्टयम्" इति। देवलः "दशम्यामेकभक्तस्तु मांसमैथुनवर्जितः एकादशीमुपवसेत् पक्षयोरुभयोरपि। देवतास्तस्य तुष्यन्ति कामितं चास्य सिध्यतीति" बृहस्पतिरपि "दिवानिद्रां परान्नं च पुनर्भोजनमैथुने । क्षौद्रं कांस्यामिषं तैलं द्वादश्यामष्ट वर्जयेदिति" कूर्म्मपुराणे "कांस्यं मांसं मसूरांश्च चणकान् कोरदूषकान् । शाकं मधु परान्नञ्च त्यजेदुपवसन् स्त्रियमिति" स्मृत्यन्तरेऽपि "शाकं मांसं मसूरांश्च

पुनर्भोजनमैथुने । द्यूतमत्यम्बुपानञ्च दशम्यां वैष्णवस्त्यजेदिति" विष्णुधर्म्मोत्तरे "असम्भाष्यान् हि सम्भाष्य तुलस्यसिकादलम् । आमलक्याः फलं वापि पारणे प्राश्य शुध्यति" "असकृज्जलपानञ्च दिवास्वापञ्च मैथुनम् । ताम्बूलचर्व्वणं मांसं वर्ज्जयेद् व्रतवासरे" इति च । वशिष्ठः "उपवासे तथा श्राद्धे न खादेद्दन्तधावनम् । दन्तानां काष्ठसंयोगो हन्ति सप्त कुलानि चेति" दन्तधावने प्रायश्चित्तं च विष्णुरहस्ये "श्राद्धोपवासदिवसे खादित्वा दन्तधावनम् । गायत्र्याः शतसंपूतमम्बु प्राश्य विशुद्ध्यतीति" हारीतः "पतितपाषण्डिनास्तिकसम्भाषणमनृताश्लीलादिकमुपवासादिषु वर्जयेदिति" कूर्म्मपुराणे "बहिर्ग्रामान्त्यजान् सूतिं पतितञ्च रजस्वलाम् । न स्पृशेन्नाभिभाषेत नेक्षेत व्रतवासरे" इति विष्णुरहस्ये "स्त्र्यालोकनगन्धादिस्वादनं परिकीर्त्तनम् । अन्नस्य वर्जयेत् सर्वं ग्रासानाञ्चाभिकाङ्क्षणम् । गात्राभ्यङ्गं शिरोऽभ्यङ्गं ताम्बूलं चानुलेपनम् । व्रतस्थो वर्ज्जयेत् सर्वं यच्चान्यत्र निराकृतमिति" ब्रह्माण्डपुराणे "कांस्यं मांसं सुरां क्षौद्रं लोभं वितथभाषणम् । व्यायामञ्च प्रवासञ्च दिवास्वप्नं तथाञ्जनम् । तिलपिष्टं मसूरांश्च द्वादशैतानि वैष्णवः । द्वादश्यां वर्ज्जयेन्नित्यं सर्वपापैः प्रमुच्यते" इति ।

एकादश्यां श्राद्धं कृत्वापि न भोक्तव्यं तदाह कात्यायनः "उपवासो यदा नित्यः श्राद्धं नैमित्तिकं भवेत् । उपवासं तदा कुर्य्यादाघ्राय पितृसेवितमिति" तथा "मातापित्रोः क्षये प्राप्ते भवेदेकादशी यदा । अभ्यर्च्य पितृदेवांस्तु आजिघ्रेत् पितृसेवितमिति" यत्तु वचनम् "श्राद्धं कृत्वा तु यो विप्रो न भुङ्क्ते पितृसेवितम् । हविर्देवा न गृह्णन्ति कव्यञ्च पितरस्तथेति" तदेकादशीव्यतिरिक्तविषयम् आघ्राणेनापि भोजनकार्य्यं सिध्यति तस्य भोजनकार्य्ये विधानात्"

सूतकादौ दानार्च्चनरहितमुपवासमात्रं कुर्य्यात् तदुक्तं कूर्म्मपुराणे "काम्योपवासे प्रक्रान्ते त्वन्तरा मृतसूतके । तत्र काम्यं व्रतं कुर्य्यात् दानार्च्चनविवर्जितम्" इति वराहपुराणे "सूतके च नरः स्नात्वा प्रणम्य मनसा हरिम् । एकादश्यां न भुञ्जीत व्रतमेवं न लुप्यते । मृतके न च भुञ्जीत एकादश्यां सदा नरः । द्वादश्यान्तु समश्नीयात् स्नात्वा विष्णुं प्रणम्य चेति" । तत्र परित्यक्तं देवार्च्चनं सूतकान्ते कुर्य्यात् तदुक्तं मत्स्यपुराणे "सूतकान्ते न स्नात्वा पूजयित्वा जनार्द्दनम् । दानं दत्त्वा विधानेन व्रतस्य फलमश्नुते" इति । स्त्रीणां रजोदर्शनेऽपि न व्रतत्यागः किन्तु देवतार्च्चनादिरहितं सूतकादाविवोपवासमात्रं कार्य्यं तदाह पुलस्त्यः "एकादश्यां न भुञ्जीत नारी दृष्टे रजस्यपि" इति । ऋष्यशृङ्गः "संप्रवृत्तेऽपि रजसि न त्याज्यं द्वादशीव्रतमिति" । सत्यव्रतोऽपि "प्रारब्धदीर्घतपसां नारीणां चेद्रजो भवेत् । न तत्रापि व्रतस्य स्यादुपरोधः कदाचनेति" शुद्ध्यनन्तरं देवतार्च्चनादिकं कुर्य्यात् तथा च स्मृतिः "स्नाता भर्त्तुश्चतुर्थेऽह्नि शुद्धा स्यात्परिचारणे । पञ्चमेऽहनि शुद्धा स्याद्दैवे पित्र्ये च कर्म्मणीति"

नित्योपवासप्रकारो विष्णुरहस्येऽभिहितः "अथ नित्योपवासी चेत्तायं प्रातर्भुजिक्रियाम् । वर्जयेन्मतिमान् विप्रः संप्राप्ते हरिवासरे" इति ब्रह्मवैवर्त्तेऽपि "इति विज्ञाय कुर्वीत नित्यमेकादशीव्रतम् । विशेषनियमाशक्तोऽप्यहोरात्रं भुक्तिवर्जितः । निगृहीतेन्द्रियः श्रद्धासहायो विष्णुतत्परः । उपोष्यैकादशीं पापान्मुच्यते नात्र संशयः" । शक्तौ सत्यां नियमानाचरेत् तथा च कात्यायनः "शक्तिमांस्तु ततः कुर्य्यान्नियमं सविशेषणमिति" ।

यदा द्वादश्यां श्रवणनक्षत्रम्भवेत् तदा शुद्धैकादशीमपि परित्यज्य द्वादश्यामेवोपवसेत् तथा च नारदीये "शुक्ला वा यदि वा कृष्णा द्वादशी श्रवणान्विता । तयोरेवोपवासश्च त्रयोदश्यां च पारणमिति" तथा "एकादश्यान्त्वविद्धायां संप्राप्ते श्रवणे तदा । उपोष्या द्वादशी शुद्धा सर्व्वपापक्षयावहेति" यदा पारणपर्य्याप्ता द्वादशी स्यात्तदा तस्यामेव पारणा कार्य्या न तु त्रयोदश्यां तदुक्तम् "भवेद्यत्र त्रयोदश्यां द्वादश्यास्तु कलाद्वयम् । द्वादश द्वादशीर्हन्ति त्रयोदश्यां तु पारणम् । कलार्द्धं लवं वापि द्वादशीं न व्यतिक्रमेत् । पारणे मरणे नृणां तिथिस्तात्कालिकी स्मृतेति" ननु द्वादश्यतिक्रमेऽपि नास्ति दोषः "सा तिथिः सकला ज्ञेयेति" वचने साकल्यविधानादिति चेत् नैवं साकल्यस्य स्नानादिविषयत्वात् वाक्यशेषे "स्नानदानजपादिषु" इत्यभिधानात् । पारणे तु साकल्यवचनं न प्रवर्त्तते "तिथिस्तात्कालिकी ज्ञेयेत्युक्तेः

अल्पद्वादशीकाले यदा पारणन्तदा सद्भिः प्रागेव सर्व्वाः क्रियाः कर्त्तव्याः तदुक्तं नारदीये "अल्पायामथ विप्रेन्द्र! द्वादश्यामरुणोदये । स्नानार्च्चनाक्रियाः कार्य्या दानहोमादिसंयुताः । एतस्मात्कारणाद्विप्र! प्रत्यूषे स्नानमाचरेत् । पितृतर्पणसंयुक्तं स्वल्पां दृष्ट्वा च द्वादशीम् । महाहानिकरी ह्येषा द्वादशी लङ्घिता न

णाम् । करोति धर्म्महरणमज्ञातेव सरस्वतीति" गरुडपुराणेऽपि "यदा स्वल्पा द्वादशी स्यादपकर्षे भुजिर्भवेत् । प्रातर्मध्याह्निकस्यापि तत्र स्यादपकर्षणमिति" । स्कन्दपुराणेऽपि "यदा भवेदतीवाल्पा द्वादशी पारणादिने । उषःकाले द्वयं कुर्य्यात् प्रातर्मध्याह्निकञ्च यदिति" । तत्र पारणासम्भवे अद्भिः पारणं कुर्य्यात् तदाह कात्यायनः "सन्ध्यादिकम्भवेन्नित्यं पारणन्तु निमित्ततः । अद्भिस्तु पारयित्वाथ नैत्तिकान्ते भुजिर्भवेदिति" देवलोऽपि "सङ्कटे विषमे प्राप्ते द्वादश्यां पारयेत्कथम् ? । अद्भिस्तु पारणं कुर्य्यात्पुनर्भुक्तं न दोषकृदिति" । यदा कलयापि द्वादशी नास्ति तदा त्रयोदश्यामपि पारणं कुर्य्यात् तदुक्तं नारदीये "त्रयोदश्यां तु शुद्धायां पारणं पृथिवीफलम् । शतयज्ञाधिकं वापि नरः प्राप्नोत्यसंशयमिति" । पारणञ्च नैवेद्यमिश्रितं कुर्य्यात् तदुक्तं स्कन्दपुराणे "कृत्वा चैवोपवासन्तु योऽश्नाति द्वादशीदिने । नैवेद्यं तुलसीमिश्रं हत्याकोटिविनाशनमिति" ।

अस्यामेकादश्यां यान्युपवासप्रतिनिधिरूपाणि एकभक्तनक्तायाचितदानानि तेषां प्रतिपद्युक्तन्यायेनोपवासतिथावेवानुष्ठानं, यानि तु स्वतन्त्राण्येकभक्तनक्तादीनि तेषां पूर्व्वोक्तन्यायेन मध्याह्नादिव्यापितिथिग्रहणप्राप्तौ दशमीविद्धा प्रतिषिध्यते द्वादशीकल्पे "पूर्व्वविद्धांदिनार्द्धेन नन्दां पूर्णामपि त्यजेत् । यदीच्छेदात्मसन्तानं नियमेषु चतुर्ष्वपि । नोपोषितं च नक्तञ्च नैकभक्तमयाचितम् । नन्दायां पूर्व्वविद्धायां कुर्य्याद्दैवस्य मोहितः । एकादशी द्रुता यस्मा द्वादश्या समुपोषणे । नक्ते चायाचिते नित्यमेकभक्ते तथाऽनघ ! । नक्तञ्चायाचितं तात ! नैकभक्तमाचरेत् । दशमीसहिते दानमनर्थं हरिवासरे" इति दिनार्द्धेन सार्द्धसप्तमुहूर्त्तैरित्यर्थः । एतदेवाभिप्रेत्य "दिक्पञ्चदशनिश्चयेति" उदाहृतम् । तथा "सार्द्धसप्तमुहूर्त्तैस्तु वेधोऽयं बाधते व्रतमिति" एतद्गुणवेधे तु तिथ्यन्तरवमध्याह्नादिव्याप्तिर्ग्रहीतव्या" ।

व्रताधिकारिविषये हरि०भ० आग्नेये "गृहस्थो ब्रह्मचारी वा आहिताग्निर्यतिस्तथा । एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि" । पाद्मोत्तरखण्डे "वर्णानामाश्रमाणाञ्च स्त्रीणाञ्च वरवर्णिनि ! । एकादश्युपवासस्तु कर्त्तव्यो नात्र संशयः" । "एतस्मात् कारणाद्देवि ! एकादश्यां सुपोषणम् । कुर्य्यान्नरो वा नारी वा पक्षयोरुभयोरपि" विष्णुधर्म्मोत्तरीयम् "वैष्णवो वाथ शैवो वा कुर्य्यादेकादशीव्रतम्" । सौरपुराणम् "वैष्णवो वाथ शैवो वा सौरोऽप्येतत् समाचरेत्" । स्कान्दम् । "न शैवो न च सौरो वा नाश्रमी तीर्थसेवकः । योभुङ्क्ते वासरे विष्णोः श्वपचादधिको हि सः । विप्रियं तेन मे गौरि ! कृतं दुष्टेन पापिना । मद्भक्तिबलमाश्रित्य येन भुक्तं हरेर्दिने" । "विधवा या भवेन्नारी भुञ्जीतैकादशीदिने । तस्यास्तु सुकृतं नश्येत् भ्रूणहत्या दिनेदिने" कात्या० । एकादशीं विना रण्डा यतिश्च सुमहातपाः । पच्यते ह्यन्धतामिस्रे यावदाहूतसंप्लवम्" नारदीयम् । "सधवायास्तु पत्यनुमत्या सह वाधिकारः । "सपुत्रश्च सभार्य्यश्च स्वजनैर्भक्तिसंयुतः । एकादश्यामुपवसेत् पक्षयोरुभयोरपि" विष्णुध० । तदनुमत्या सधवाया अधिकारिता कालमा० दर्शिता ।

"वैष्णवस्योभयपक्षयोर्नित्याधिकारः यथाह तत्त्वसागरे । "यथा शुक्ला तथा कृष्णा यथा कृष्णा तथेतरा । तुल्ये ते मनुते यस्तु स वै वैष्णव उच्यते" एवमेव ए०त०रघु० । "व्याधिभिः परिभूतानां पित्ताधिकशरीरिणाम् । त्रिंशद्वर्षाधिकानाञ्च नक्तादिपरिकल्पनम्" मार्क० पु० । प्रागुक्तकालमाधवमतानुसारिण्येकादशीव्रतकालादिव्यवस्था सर्व्वदेशवासिभिः प्रायेणाद्रियते । गौड़निवासिभिस्तु रघुनन्दनोक्ता व्यवस्थाद्रियते । तन्मतसिद्धव्यवस्था तु एकादशीत०प्रतवचनजातादनुसन्धेया तत्र संक्षेपस्तत्र दर्शितो यथा "तत्र संक्षेपः पारणादिने द्वादशीलाभे सर्व्व एव पूर्व्वां त्यक्त्वा खण्डामुपवसेत् तदलाभे गृही पूर्व्वां तदन्यः परां विधवापि । यदा तु पूर्व्वदिने दशम्या उत्तरदिने द्वादश्या युक्तैकादशी तदोत्तरामुपोष्य द्वादश्यां पारणं कुर्य्यात् । परदिने द्वादश्यनिर्गमे त्रयोदश्यामपीति । यदा तु सूर्य्योदयानन्तरं दशमीयुतैकादशी अथ च परदिने न निःसरति तदा तां विहाय द्वादशीमुपवसेत् । (अत्र माधवमते भेदः) यदा तु सूर्य्योदयात् प्राक्कालीनदशमीविद्धैकादशी परदिने न निःसरति तदा तामुपवसेत् । यदा तु तथाविधा सती परदिनेऽपि निःसरति तत्परदिने च द्वादशी तदा तां विहाय खण्डामुपोष्य द्वादश्यां पारयेत् । यदा तु पूर्व्वदिने तद्विद्धैकादशी परदिने च द्वादशी तदा षष्टिदण्डात्मिकां विद्धामुपोष्य परदिने द्वादश्याः प्रथमपादमतीत्य पारयेत् । वैष्णवस्तु तत्रापि शुक्लपक्षे परामुपोष्य त्रयोदश्यां पारयेदिति ।

सर्व्वासां कृष्णैकादश्यां वैष्णवानां सपुत्राणां गृहस्थानामप्युपवासो नित्यः। ब्राह्मणस्य तु विशेषतो नित्यः। वैष्णवेतरेषान्तु शाक्तानां हरिशयनमध्यवर्त्तिनीषु कृष्णैकादशीषूपवासो नित्यः। अपुत्त्रवतां गृहिणान्तु सर्व्वास्वेव नित्याधिकारः। काम्योपवासे तु अविशेषेणैव सर्व्वेषामधिकारः। नित्योपवासे तु रविसंक्रमादिदोषो नास्ति अष्टाब्दादधिकोऽशीतिवर्षपूर्णाशीतिवत्सरो नित्याधिकारी विधवायास्तु सर्व्वास्वेव नित्याधिकारः।

अत्र मलमासादिदोषो नास्ति। यथा ज्योतिः पराशरः "अनादिदेवताऽर्च्चासु कालदोषो न विद्यते। नित्यस्वाध्याययोगे च तथैवैकादशीव्रते" एका० त० रघु०।

अत्र विशेषो हेमाद्रौ स्कान्दे। "एकादशी कला यत्र द्वादशी च क्षयं गता। नक्तं तत्र प्रकुर्व्वीत नोपवासं गृहाश्रमी"। अत्रोपवासविधायकसामान्यशास्त्रस्य नक्तविधायकविशेषशास्त्रेण बाधः। "एकादशी कलाप्येका द्वादशी यत्र लुप्यते। तत्रोपवासं कुर्व्वीत निष्कामो विष्णुतत्परः" तत्रैव स्कान्दम्। "तत्र पूर्व्वापरवचनपर्य्यालोचनया नक्तविधानं कामिनः काम्योपवासव्रतविषयं, निष्कामस्य, नित्योपवासार्थिनो विष्णुपरायणस्य गृहस्थस्याप्युपवासः" ए० त० रघु०। वाचस्पतिमते "निष्कामस्तु गृही कुर्य्यादुत्तरैकादशीं तथा। सकामस्तु तदा पूर्व्वां कुर्य्याद्बौधायनोऽब्रवीत्" विष्णुरहस्यात् सकामेन तत्र दशमीविद्धा कार्य्या निष्कामेण द्वादशीयुक्तोपोष्येति भेदः।

वेधविषये हेमाद्रौ तु सार्द्धघटिकात्रयोत्तरष्टाविंशतिमानरात्रिविषया मदनरत्नस्तु रात्रीरपेक्ष्य चतस्रो घटिकाप्याह "निशःप्रान्ते तु यामार्द्धे देववादित्रवादने। सारस्वतामध्ययने चारुणोदय उच्यते इति" स्मृतेरित्युक्तम्। हेमाद्रिमतानुसारेण निस०सि० एकादशीभेदा अष्टादशेत्युक्ता तद्व्यवस्था तत्रोक्ता यथा

"शुद्धा विद्धा द्वयी नन्दा त्रेधा न्यूनसमाधिकैः। षट्प्रकाराः पुनस्त्रेधा द्वादश्यूनसमाधिकाः" इत्यष्टादशैकादशीभेदाः तत्र शुद्धाधिकन्यूनद्वादशिका शुद्धाधिकसमद्वादशिका च सकामैः पूर्व्वा निःकामैरुत्तरा कार्य्या "प्रथमेऽहनि संपूर्णेति" पूर्व्वोक्तस्कान्दात् "ऊनद्वादशिकायां तु विष्णुप्रीतिकामैरुपवासद्वयं कार्य्यम्" "संपूर्णैकादशी यत्र प्रभाते पुनरेव सा। लुप्यते द्वादशी तस्मिन्नुपवासः कथं भवेत्?। उपोष्ये द्वे तिथी तत्र विष्णुप्रीणनतत्परैरिति" इतवधिः

उक्तेः। "शुद्धन्यूना शुद्धाधिका शुद्धसमा विद्धन्यूना विद्धसमाधिकद्वादशिका च सर्व्वेषां परैवेति" हेमाद्रिः मदनरत्ने तु शुद्धाधिका परा। "संपूर्णैकादशी यत्रेति" पूर्व्वोक्तेः। "शुद्धा यदा समा हीना समा होनाधिकोत्तरा। एकादशी उपवसेत शुद्धां वैष्णवोऽमपोति" स्कान्दात् अत्र शुद्धा एकादशी, उत्तरा द्वादशी "नचेदेकादशी विष्णावित्रिति" नारदोक्तेश्च। यत्तु "अविद्धापि च विद्धा स्यादिति" पाद्मातु तच्छुद्धाधिकापरम्। यत्तु "संपूर्णैकादशी त्याज्या परतो द्वादशी यदि। उपोष्या द्वादशी शुद्धा द्वादश्यामेव पारणम्" इत्यादि तद्वैष्णवपरम्। स्मार्त्तानां तु पूर्व्वैवेत्युक्तम्। विद्धन्यूना समद्वादशिका तु मुमुक्षूणां पुत्रवतां च परा अन्येषान्तु पूर्व्वा। पुत्रवतोऽपि पूर्व्वैव मदनरत्ने। विद्धसमा समद्वादशिकोनद्वादशिका च मुमुक्षुभिः पराऽन्यैः पूर्व्वा कार्य्या। "दशमी मिश्रिता पूर्व्वा द्वादशी यदि लुप्यते। शुद्धैव द्वादशी राजन्नुपोष्या मोक्षकाङ्क्षिभिरिति" व्यासोक्तेः मोक्षकाङ्क्षिपदस्वारस्यादन्येषां पूर्व्वैव। "पारणाहे न लभ्येत द्वादशी कलयापि चेत्। तदानीं दशमीविद्धाप्युपोष्यैकादशी तिथिरिति" ऋष्यशृङ्गोक्तेश्च। विद्धाधिका समद्वादशिका च सर्व्वेषां परैव माधवमते त्वत्र गृहिणः पूर्व्वा यतेरुत्तरा "सर्व्वत्रैकादशी कार्य्या द्वादशीमिश्रिता नरैः। प्रातर्भवतु वा मा वा यतो नित्यमुपोषणमिति" पाद्मोक्तेः। विद्धाधिका न्यूनद्वादशिका मोक्षपरैः विष्णुप्रीतिकामैः परा कार्य्या गृहस्थेन तु नक्तं कार्य्यम् "एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। उपवासं न कुर्व्वीत पुत्रपौत्रसमन्वित" इति कौर्म्मे दिनक्षये उपवासनिषेधात्। "दशम्यैकादशी विद्धा द्वादशी च क्षयं गता। क्षीणा सा द्वादशी ज्ञेया नक्तं तु गृहिणः स्मृतमिति" हृद्यातातपोक्तेश्च गृहिणः पूर्व्वत्रोपवासः। एकादश्याः शुद्धन्यूनत्वे शुद्धसमत्वे वा द्वादश्या न्यूनसमत्वयोरेकादश्यामुपवासः। यानि तु "दशम्यनुगता हन्ति द्वादशद्वादशीफलम्। धर्म्मापत्यधनायूंषि त्रयोदश्यां तु पारणमिति" कौर्म्मादीनि दशमीवेधत्रयोदशी पारणयोर्निषेधकानि तानि विहितभिन्नपराणि, अत्र मूलवचनानि तद्व्यवस्था चाकरे ज्ञेया। यत्तु कालहेमाद्रौ "बहुवाक्यविरोधेन सन्देहो जायते यदा। द्वादशी तु तदा ग्राह्या त्रयोदश्यां तु पारणमिति" मार्कण्डेयोक्तेः "सन्दिग्धेषु च वाक्येषु द्वादशीं समुपोषयेत्। विवादेषु च सर्व्वेषु द्वादश्यां समुपोषणम्। पारणं च त्रयोदश्यामाज्ञैवं मा-

फली हते !" इति पाद्मोक्तेश्च वेधसन्देहे ज्योतिर्विदां विप्रतिपत्तौ वा परा कार्य्येत्युक्तम् । तत्तु वैष्णवविषयम्"

"अथात्रोपयुक्तं किञ्चिदुच्यते । तत्र दशम्यामेकादशीयोगे दशमीमध्य एव भोजनम् । "एकादश्यां न भुञ्जीतेति" तस्या एव निमित्तत्वात्, "निषेधस्तु निवृत्त्यात्मा कालमात्रमपेक्षते" इति देवलोक्तेश्च । केचित्तु एकादशीव्रताङ्गत्वेन पूर्व्वेद्युरेकभक्तविधानाद्विधिस्पृष्टे च विषये निषेधानवकाशेन काम्यव्रताङ्गे न भोजननिषेध प्रवर्त्तते तेनैकादशीमध्येऽपि पूर्व्वदिने भोजनमित्याहुः" निर्ण०सि०। तत्रैकादशीदिवसे श्राद्धप्राप्तौ विशेषः नि०सि० उक्तः

माधवीये "उपवासो यदा नित्यः" इत्यादि प्रागुक्तकात्यायनवाक्यमाश्रित्य उपवासदिनेश्राद्धं कृत्वा श्राद्धशेषघ्राणं कार्य्यमिति व्यवस्थाप्योक्तम् । "हेमाद्र्यादिसर्व्वनिबन्धेष्वेवम् । एतेनैकादशीनिमित्तकं श्राद्धं द्वादश्यां कार्य्यमिति" वदन्तः परास्ताः किञ्च, महालये । "स पक्षः सकलः पूज्यः श्राद्धषोडशकं प्रतीति, स्मृतं षोडशत्वम् । पौषैकादश्यां च मन्वादिश्राद्धं, क्षयाहापरिज्ञाने च कृष्णैकादश्यां विहितं श्राद्धं बाधितमेव स्यात् । यदपि स्मृतिचन्द्रिकायां पठन्ति । "अन्नाश्रितानि पापानि तद्भोक्तुर्दातुरेव वा । मज्जन्ति पितरस्तस्य नरके शाश्वतीः समा" इति । तस्यापि रागप्राप्तभुजिगोचरस्य वैधं श्राद्धं गोचरयतां महत्साहसमित्यलम् । योऽपि "अकृतश्राद्धनिचया जलपिण्डविनाकृताः" इति वृहन्नारदीये एकादश्यां श्राद्धादिनिषेधः स मातापितृभिन्नविषयः पूर्व्ववाक्ये तदुपहणात्"

हरिभक्तिविलासानुसारिणस्तु वैष्णवदीक्षावतां तद्दिने श्राद्धनिषेधः द्वादश्यां तत् करणीयमिति वदन्ति यथा "अथोपवासदिने श्राद्धनिषेधः । पाद्मे पुष्करखण्डे "एकादश्यां यदा राम ! श्राद्धं नैमित्तिकं भवेत् । तद्दिनं तु परित्यज्य द्वादश्यां श्राद्धमाचरेत्" । तत्रैवोत्तरखण्डे "एकादश्यान्तु प्राप्तायां मातापित्रोर्म्मृताहनि । द्वादश्यां तत् प्रदातव्यं नोपवासदिने क्वचित् । गर्हितान्नं नाश्नन्ति पितरश्च दिवौकसः" । स्कान्दे "एकादशी यदा नित्या श्राद्धं नैमित्तिकं भवेत् । उपवासं तदा कुर्य्यात् द्वादश्यां श्राद्धमाचरेत्" । ब्रह्मवैवर्त्ते । "ये कुर्व्वन्ति महीपाल ! श्राद्धं त्वेकादशीदिने । त्रयस्ते नरकं यान्ति दाता भोक्ता परेतकः" । हरिभक्ति० धृतवाक्यानि ।

"एकादश्यां यदा रामेत्यादिना उपवासदिने श्राद्धं निषिद्धम् । यच्च स्कान्दादौ "श्राद्धदिनं समासाद्य उपवासो यदा भवेत् । तदा कृत्वा तु वै श्राद्धं भुक्तशेषन्तु यद्भवेत् । तत् सर्व्वं दक्षिणे पाणौ गृहीत्वाद्य शिखिध्वज ! । अवजिघ्रेदनेनाथ भवेत् श्राद्धं शिखिध्वज ! । पितॄणां तृप्तिदं तात ! व्रतभङ्गो न विद्यते" इत्यादि । तच्च वैष्णवेतरविषयं मन्तव्यम् वैष्णवपितॄणामपि श्रीविष्णुदिने श्राद्धभक्षणायोगादिति" तट्टीका ।

अत्रेदं बोध्यं स्मृतिचन्द्रिकास्थवचनेन हरिभक्तिविलासधृतवचनचतुष्टयेन च उपवासदिने श्राद्धनिषेधात् प्रागुक्तकात्यायनस्कान्दादिवचनेन श्राद्धशेषभोजनासम्भवेऽपि आघ्राणमात्राङ्गकतया श्राद्धविधानात् परस्परं विरोधस्तयोर्व्विरोधपरिहाराय कर्त्तृभेदविषयकत्वमवश्यं कल्पनीयं तद्विना तदपरिहारात् तत्र वैष्णवेतरविषतया आघ्राणाङ्गश्राद्धस्य, वैष्णवविषयकतया च श्राद्धनिषेधस्य कल्पनं युक्तं न च विनिगमनाविरहेण वैपरीत्यं शङ्कनीयं वैष्णवस्य सत्वगुणाधिकविष्णोः सेवकत्वेन सात्विकपुराणोक्तविधेरेव ग्राह्यतया सात्विकपुराणेषु च पाद्मस्य कीर्त्तनात् वैष्णवैः पाद्मोक्तविधेरेव ग्राह्यतौचित्येन स्कान्दस्य तामसत्वेन तदुक्तविधेस्तदितरैर्ग्राह्यतौचित्येन च विनिगमनासम्भवात्"पाद्मस्कान्दयोर्यथा सात्विकतामसत्वं तथोक्तम्" मात्स्यं कौर्म्मं तथा लैङ्गं शैवं स्कान्दं तथैव च । आग्नेयञ्च षडेतानि तामसानि निबोधत । वैष्णवं नारदीयञ्च तथा भागवतं शुभम् । गारुडञ्च तथा पाद्मं वाराहं शुभदर्शने । सात्विकानि पुराणानि विज्ञेयानि शुभानि षट्" पद्मपु० । एवञ्च सति पाद्मवाक्यस्य वैष्णवविषयकत्वनिश्चये स्कान्दकात्यायनादिवाक्यस्य तदितरविषयत्वं निर्णीयते । निर्णयसिन्धुकृता श्राद्धनिषेधवाक्यस्य मातापितृश्राद्धव्यतिरिक्तविषयकत्वं यत्कल्पितं तन्न मनोरमं पाद्मोक्तवाक्ये गर्हितान्नं न गृह्णन्ति पितर इति पितृमात्रस्योपग्रहणोक्तेः सर्व्वश्राद्धस्यैव निषेधात् मातापित्रोर्म्मृताहमात्रादिपाद्मोत्तरवचने तयोरपि श्राद्धनिषेधात् । तेन कैमुतिकन्यायेनेतरश्राद्धस्यापि निषेधः सूपपन्न एव । किञ्च शेषभोजननिमित्तकालयोरुभयोपरक्ततया स्मार्त्तानां शेषभोजनरूपाङ्गबाधः वैष्णवानां तु कालबाध इत्युभयोरपि एकतरबाधस्य शास्त्रबोधिततया न दूषकत्वम् । स्मार्त्तैरपि पक्षोदयादिनिमित्तकोपवासदिने श्राद्धं निषिध्य पश्चात् परेद्युः श्राद्धविधानेन कालरूपाङ्गबाधस्य तत्र स्वीकारात् तद-

दत्वापि एकादश्युपवासदिनव्याप्तविद्धताहरूपकालबाधेनोत्तरदिने श्राद्धविधानेनावैषम्यम्। तथा च “पक्षोदये यदा चन्द्रे प्रत्यब्द समुपस्थितम्। तद्दिने चोपवासः स्यात् प्रत्यब्दं तु परेऽहनि” “पक्षाविवास्तमानं तु रवीन्दू प्राप्नुतो यदि। प्रत्यब्दं तु तदा कार्य्यं परेऽह्न्येव सर्व्वदा” नि० सि० धृतवचनैः निमित्तकालबाधेनापरेद्युः श्राद्धकालः। एतेन एकादशीव्रतदिवसे श्राद्धनिषेधे विप्रपतितश्राद्धस्य कृष्णैकादश्यां विधानम् अश्वयुक्कृष्णपक्षनिमित्तकषोडशश्राद्धविधानञ्च निर्विषयं स्यादित्यापत्तिरपास्ता विषयभेदेन व्यवस्थासम्भवात्। तथाहि विप्रपतितश्राद्धे श्राद्धकालव्याप्तैकादशीतिथिमात्रस्य निमित्तता तस्य व्रतदिवसात् पूर्व्वेद्युरपि कदाचित् सम्भवेन तद्रूपविषयलाभेन निर्विषयत्वाभावात् क्वचिदेकदिने तत्प्रसक्तावपि सामान्यमुखेन प्रवृत्तशास्त्रस्य उपवासदिनव्यतिरिक्ततिथिखण्डविषयकत्वकल्पनेनाविरोधः। किञ्चात्र कर्तृभेदेनव्यवस्थाप्युपपद्यते वैष्णवेतरसपुत्रगृहस्थस्य कृष्णैकादश्युपवासस्य नित्यत्वाभावेन तत्परं श्राद्धविधानं, वैष्णवविषयः श्राद्धनिषेध इति कर्तृभेदसम्भवात्। अश्वयुक्कृष्णपक्षनिमित्तकषोडशश्राद्धविधानमपि न निर्विषयं तिथिह्रासादिवशादेकसावनदिवसे तत्रविहितश्राद्धद्वयवद् वैष्णवैः द्वादश्यां श्राद्धद्वयकरणेन षोडशसंख्यापूर्त्तिसम्भवात्। पौषैकाकाशारूपमन्वादिनिमित्तकश्राद्धस्यापि नैमित्तिकतया मन्वादिकृत्यत्वेन पूर्व्वाह्णे विहितत्वेन उपवासदिन एव तत्खण्डस्यैव लाभसम्भवेन पूर्व्वदिवसे च तदसम्भवेन विरोधप्रसङ्गेऽपि वैष्णवानां द्वादश्यामेव मृताहश्राद्धस्येव तस्य कर्त्तव्यता वैष्णवेतरगृहस्थस्य तद्दिने कर्त्तव्यतेति कर्तृभेदात् व्यवस्थाया नानुपपत्तिः।

पाद्मे नैमित्तिकमित्युक्तेः मृताहवत्तु परेतकृत्युक्तेश्च आद्यश्राद्धमपि एकादश्युपवासदिवसे वैष्णवैर्न कर्त्तव्यमेव। “एकोद्दिष्टं तु यत् श्राद्धं तन्नैमित्तिकमुच्यते। तदप्यदैवविकं कार्य्यमयुग्मानाशयेद् द्विजान्” इति भविष्य पु० एकोद्दिष्टस्य नैमित्तिकत्वेन परिभाषितत्वात्प्रेतोद्देशकश्राद्धस्य च एकोद्दिष्टत्वाच्च तस्यापि तद्दिने निषेध एव प्रेतश्राद्धस्य यथैकोद्दिष्टत्वं तथैकोद्दिष्टशब्दे वक्ष्यते इत्थं स्मार्त्तवैष्णवकर्तृभेदात् व्यवस्थाभेदः।

एकादशगुरु पु० एकदशमिता गुरवः। “आचार्य्यश्च पिता ज्येष्ठोभ्राता चैव महीपतिः। मातुलः श्वशुरस्त्राता मातामहपितामहौ। वर्णज्येष्ठः पितृव्यश्च पुंस्येते गुरवोमताः” इति देवलोक्तेषु आचार्य्यादिषु। त्राता त्राणकर्त्ता। वर्णज्येष्ठः क्षत्रियादीनां ब्राह्मणादिः। “अनेनैकादश गुरवःसङ्केतिताः। कथमनेकेषामेकगुरुशब्दवाच्यत्वमेकस्य प्रवृत्तिनिमित्तस्याभावात् इति चेन्न “गुरुरनुगन्तव्यः” इत्यादि श्रुत्या सदापरितोषणीयत्वादिधर्म्मात्मकस्योपाधित्वात् यद्यप्याचार्य्यस्यैव परितोषणीयता श्रूयते तथापि तदन्येष्वतिदिश्यते अतोऽतिदिष्टधर्म्मोऽप्येकपदप्रवृत्तावुपाधिर्भवति इष्टिशब्दप्रवृत्ताविव तद्धर्म्मसंबन्धः शास्त्रीयगुरुपदप्रवृत्तिविषयत्वं वोपाधिर्भवतु विशेषापहादव्यादिशब्दवदनेकार्थतैव कोदोषः” प्रा० वि०। अयञ्च शब्द एकादशिन्शब्दात् पूर्व्वं बोध्यः प्रमादात्तत्र न लिखितोऽतोऽत्र लिखितः।

एकादशराशिक न० एकादश राशीनधिकृत्य प्रवृत्तं गणनम् कन्। लीलावत्युक्ते गणनप्रकारभेदे तत्प्रकारश्च तत्रैव यथा “पञ्चसप्तनवराशिकादिकेऽन्योन्यपक्षनयनं फलच्छिदाम्। संविभाय बहुराशिजे वधे स्वल्पराशिवधभाजिते फलम्” इत्युक्तदिशा फलानयनम्। तत्रोदा० “पिण्डे येऽर्कमिताङ्गुलाः किल चतुर्वर्गाङ्गुला विस्तृतौ

पि० १२ ८ पट्टादीर्घतया चतुर्दश कराश्त्रिंशन्मिताः”

वि० १६ १२ “एता विस्तृतिदीर्घपिण्डमितयो येषां

दी० १४ १० चतुर्व्वर्जिताः” इति नवराशिके उक्ता।

मि० ३० १४

“पट्टीये प्रथमोदितप्रमितयोगव्यूतिमात्रे गतास्तेषा-

वि० १२ ८ मानमनाय चेच्छकटेनां द्रम्माष्टकं भाट-

वि० १६ १२ कम्। अन्ये ये तदनन्तरं निगदितामाने

दी० १४ १० चतुर्व्वर्जितास्तेषां का भवतीति भाटक-

मि० ३० १४ मितिर्गव्यूतिषट्के वद”। अत्र फलस्येतर-

ग० १ ६ पक्षनयने तस्य बहुराशिकत्वं तद्रहितपक्षस्य

भा० ८ ० स्वल्पराशिता तेन समानाङ्केनोभयपक्षयोरपवर्त्तने फलसहितबहुराशिपक्षस्याङ्कस्य परस्परगुणने जाताः ४८अङ्काः फलरहितपक्षाङ्कानां परस्परघातनिष्पन्नेन ६ षड़ङ्केन भाजिते लब्धाः ८अष्टौ अङ्कास्तेन अष्ट द्रम्मास्तत्र भाटकमितिरिति तत्र निश्चयः। अत्रेदमवधेयम् फलच्छिदामित्युक्तावपि फलच्छेदभिन्नराशिच्छेदस्यैव अन्योन्यपक्षनयनम् न तु फलच्छेदस्येति। अयञ्च शब्दः एकादशद्वारशब्दात् परं बोध्यः प्रमादात्तत्र न लिखितोऽतोऽत्रोक्तः।

एकादि त्रि० एक आदिर्यस्य। १एकत्वसंख्यान्वितमारभ्य परार्द्धान्तसंख्यायुक्ते। २तत्प्रकारके रेखासन्निवेशविशेषरूपे-

अङ्के च। अङ्काश्च नव तेषामेव स्थानविशेषयोगभेदेन विभिन्नसंख्याज्ञापकत्वम्। अथ एकाद्यङ्कैः यद् यत्संख्यान्विताः ज्ञाप्यन्ते तदुच्यते। १इत्यङ्केन एकः एवं २,द्वौ,३,त्रयः, ४,चत्वारः ५,पञ्च ६,षट् ७,सप्त८,अष्टौ९,नव १०,दश। दशानामेकादिनवभिरङ्कैराधिक्ये ११,१२,१३,१४,१५,१६,१७,१८,१९ इत्येतेऽङ्काः क्रमेण एकादशद्वादशत्रयोदशचतुर्दशपञ्चदशषोड़शसप्तदशाष्टादशनवदशानां ज्ञापकाः। दशाङ्कस्य च द्व्यादिनवभिर्गुणने क्रमेण २०,३०,४०,५०,६०,७०,८०,९० एतेऽङ्काः क्रमेण विंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिसंख्यान्वितानां ज्ञापकाः। एषाञ्च एकादिकनवभिराधिक्ये २१,२२,२३,२४,२५,२६,२७,२८,२९, इत्येतेऽङ्का एकविंशत्यादीनां ज्ञापकाः। एवं ३१इत्यादयोऽङ्का एकत्रिंशदादीनां ज्ञापकाः। दशभिर्गुणिते दशाङ्के १००इत्यङ्कः शतस्य ज्ञापकः। क्रमेण दशोत्तरगुणने “एकदशशतसहस्रायुतलक्षप्रयुतकोटयः क्रमशः। अर्बुदमब्जं खर्वनिखर्वं महापद्मशङ्कवस्तस्मात्। जलधिश्चान्त्यं मध्यं परार्द्धमिति दशगुणोत्तराः संज्ञाः संख्यायाः स्थानानां व्यवहारार्थं कृताः पूर्वैः” इति लीलावत्युक्तदिशावसेयम्। संक्षेपेण तत्रैकाद्यङ्कानां क्रमशः स्थितानां योगजसंख्याज्ञानार्थमुपायान्तरमुक्तं तत्रैव यथा “एकादिनवानामङ्कानां योगे का संख्येति प्रश्ने “सैकपदघ्नपदार्द्धमथैकाद्यङ्कयुतिः किल सङ्कलिताख्या” इत्युक्तरीत्या दृष्टसंख्यापदं एकयुक्तेन तेन १०अङ्केनाहतं दृष्टाङ्कार्द्धम् ९/२ ४५ सङ्कलितसंख्या। तथाचैकादिनवाङ्कानां योगे ४५ संख्या भवतीति निश्चय एवमन्यत्राप्यूह्यम्। “एकाद्येकोत्तरा अङ्का व्यस्ता भाज्याः क्रमस्थितैः” लीला०

एकादिसंख्यानां वाचकाश्च कतिचित् शब्दाः कविकल्पलतायां संगृहीताः यथा।

“एको ब्रह्मेन्द्रहस्त्यश्वगजाश्वदन्तश्मकडक् १। द्वयं पक्षनदीकूलासिधाराराममनन्दनौ २। त्रयं कालोऽग्निभुवनं गङ्गामार्गाः शम्भुगुणाः। वीणारेखा कालिदासकाव्यम् स्थूलशिखा वलिः। सन्ध्यापुरपुष्कराणि रामविष्णुपदं वयः ३। चत्वारि वेदब्रह्मास्यवर्णाब्धिहरिबाहवः। अर्हन्दिन्तसेनाङ्गोपायशामयुगाश्रमाः ४। पञ्च पाण्डवरुद्राक्षेन्द्रियस्वर्द्रुमताग्नयः। महापापमहाभूतमहाकाव्यमहामखाः। पुराणलक्षणान्यङ्गानिलकर्मेन्द्रियार्थकाः ५। षट् वक्त्रकोणत्रिशिरोनेत्रतर्काङ्गदर्शनम्। चक्रवर्त्तिमहासेनवदनानि गुणा रसाः ६। सप्त पातालभुवनमुनिद्वीपार्कवाजिनः। धाराब्धिस्वरपराज्याङ्गत्रीहिवङ्क्षिशिखाद्रयः ७। अष्टौ योगाङ्गश्वेशमूर्त्तिदिग्गजसिद्धयः। ब्रह्मश्रुतिव्याकरणदिक्पालाहिकुलाचलाः ८। नवाङ्कद्वारभूखण्डरत्नरावणमस्तकाः। व्याघ्रीस्तनग्रहाकुण्डसेव्यछिद्ररसपदाः ९। दश हस्ताङ्गुलीशम्भुबाहुरावणमौलयः। कृष्णावतारदिग्विश्वेदेवावस्थेन्दुवाजिनः १०। एकादश महादेवाः सेनाश्च कुरुभूपतेः ११। द्वादशार्कमासराशिसंक्रान्तिगुहबाहवः। शारीकोष्ठकसेनानीनेत्रच्छायापतिमण्डलाः १२। त्रयोदश स्युस्ताम्बूलगुणाः १३ अथ चतुर्दश। विद्यामनुत्रिदिवराड्भुवनध्रुवतारकाः १४। तिथयः स्युः पञ्चदश १५ षोडशेन्दुकलात्मिकाः १६। अष्टादश द्वीपविद्यापुराणस्मृतिधान्यकम् १८। विंशतीरावणभुजाङ्गुलयो २०ऽथ शतं यथा। धार्त्तराष्ट्राः शतभिषक्तारकाः पुरुषायुषम्। रावणाङ्गुष्ठमज्जदलशक्रयज्ञाब्धियोजनम् १००। सहस्रं जाह्नवीवक्त्रशेषशीर्षाम्बुजच्छदम्। रविवाणार्जुनकरा वेदशाखेन्द्रदृष्टयः” । १००० ।

शा॰ ति॰ केषाञ्चित् संख्याभेदान्विततयोत्पत्तिकथनेन तेषां तत्तत्संख्याबोधकत्वं सूचितं यथा “हंसवर्णौ पराख्यानौ शब्दार्थौ वागरूपे। सृजत्येषा परा देवी तदा प्रकृतिपूरुषौ। यद्यदन्यज्जगत्यस्मिन् युग्मं तत्तदजायत२। त्रिगुणोऽनलसर्वाङ्गो चिद्रूपा शिवगेहिनी। प्रसूते सैपुरं मन्त्रम्” इत्युपक्रम्य “लोकत्रयगुणत्रये। धामत्रयं सा वेदानां त्रयं वर्णत्रयं शुभम्। त्रिपुष्करं स्वरान्देवी ब्रह्मादीशां त्रयं तथा। वह्निकालत्रयं शक्तित्रयं वृत्तित्रयं महत्। नाडीत्रयं त्रिवर्गं सा यद्यदन्यत्त्रिधा मतम्। चतुःप्रकारगुणिता शाम्भवी शर्मदायिनी” इत्युपक्रम्य “चतुरः सागरानन्तःकरणानां चतुष्टयम्। ब्रह्मादींश्चतुरो भावान् विष्णोर्मूर्त्तिचतुष्टयम्। चतुष्टयं गणेशानामात्मादीनां चतुष्टयम्। उड्डियानादिकं पीठं धर्मादीनां चतुष्टयम्। दमकादीन् गजान् देवी यद्यदन्यच्चतुष्टयम्४। पञ्चधा गुणिता पत्नी शम्भोः सर्वार्थसाधिनी। पञ्चरत्नं महादेवी सर्वकामफलप्रदम्। पञ्चाक्षरं महेशस्य पञ्चवर्णान् गरुत्मतः। सम्मोहनान् पञ्च बाणान् कामान् पञ्च सुरद्रुमान्। पञ्च प्राणादिकान् वायून् पञ्च वर्णान् महेशितुः। मूर्त्तीः पञ्च कलाः पञ्च पञ्च ब्रह्मऋचः क्रमात्। सृजत्येषा परा शक्तिर्वेदवेदार्थरूपिणी५। षोढा संगुणिता देवी धत्ते मन्त्रं षडक्षरम्। ऋतून् वसन्तप्रमुखाना॰

मोदादीन् गणाधिपान् । कोणामूर्तीन् रसान् शक्तीर्डाकिन्याद्याः षडध्वनः । शम्भुं षड्गुणितं शक्तेः षडाधारानजीजनत् । षड्विधं यज्जगत्यस्मिन् सर्वन्तु परमेश्वरीर्द् । सप्तधा गुणिता नित्या शङ्कराद्धशरीरिणी । सप्तार्णं त्रिपुरामन्त्रं सप्तवर्णं विनायकम् । सप्तकं व्याहृतीनां सा सप्तवर्णं सुदर्शनम् । लोकानद्रीन् स्वरान् धातून् मुनीन् द्वीपान् यहानपि । समिधः सप्त संख्याताः सप्तजिह्वा हविर्भुजः । अन्यत् सप्तविधं यद्यत्तदस्याः समजायत७ । अष्टधा गुणिता शक्तिः शैवमष्टाक्षरद्वयम् । गन्धाष्टकं शुभं देवीदेवानां हृदयङ्गमम् । मातृब्राह्म्याद्या भैरवान् सर्वान् मूर्त्तीरीशोर्वस्वनपि । अष्टपीठं महादेव्या अष्टाष्टकसमन्वितम् । अष्टौ सा प्रकृतीर्विघ्नान् वक्रतुण्डादिकान् क्रमात् । अणिमादिगुणाष्टागान् वस्त्रेमूर्त्तीर्यमादिकान् । अष्टात्मकं जगत्यन्यत् सर्वं वितनुते तदा ८ । गुणिता नवधा नित्या सूते मन्त्रं नवात्मकम् । नवकं शक्तितत्त्वानां तत्त्वरूपा महेश्वरी । नवकं पीठशक्तीनां स्वङ्काराद्दीन् रसानपि । माणिक्यादीनि रत्नानि नववर्णयुतानि सा । नवकं प्राणवृत्तीनां मण्डलं नवकं शुभम् । यद्यन्नवात्मकं लोके सर्वमस्यास्तदस्तु ९ । दशधा गुणिता शम्भोर्भामिनी भवदुःखहा । दशकं शक्तितत्त्वानां तत्त्वरूपा महेश्वरी । नाडीनां दशकं विष्णोरवतारान् दश क्रमात् । दशकं लोकपालानां यद्यन्यत्कस्यशत्यसौ१० । एकादश क्रमात् संविद् गुणिता सा जगन्मयी । रुद्रैकादशनामाद्या शक्तेरैकादशाक्षरम्११ । सम्प्रावर्त्तित सर्वात्मा गुणिता द्वादश क्रमात् । राशीन् मासान् हरेर्मूर्त्तीर्यन्त्रं सा द्वादशात्मकम् । अन्यद्देवादृशं सर्वं यत् तदस्याव्यजायत" ।

अत्र च यो यः पदार्थः यद्यत्संख्यान्विततया-उत्पन्नः सः स्वगतसंख्यातुल्यसंख्यासूचकः भवति च निदर्शित पदार्थानां तत्तत्संख्यायुक्ततया लोकशास्त्रप्रसिद्धिः इत्यत स्तत्तच्छब्दानां तत्तत्संख्याकारकत्वम् । तथाचैकविधसंख्यागुणितप्रकृतिकार्य्यत्वेन तुल्यसंख्याबोधकत्वम् । अन्येऽपि केचित् संख्याविशेषसूचकाः भा० व० १२४ अ० दर्शिता यथा । "वन्दुवाच । एक एवाग्निर्बहुधा समिध्यत एकः सूर्य्यः सर्व्वमिदं विभाति । एको वीरो देवराजोऽरिहन्ता यमः पितॄणामीश्वरश्चैक एव१ । अष्टावक्र उवाच । द्वाविन्द्राग्नी चरतो वै सखायौ द्वौ देवर्षी नारदपर्व्वतौ च । द्वावश्विनौ द्वे रथस्यापि चक्रे भार्य्यापती द्वौ विहितौ विधात्रा२ । वन्दुवाच । त्रिः सूयते कर्म्मणा वै प्रजेयं त्रयीयुक्ता वाजपेयं वहन्ति । अध्वर्य्यवस्त्रिसवनानि तन्वते त्रयो लोकास्त्रीणि ज्योतींषि चाहुः३ । अष्टावक्र उवाच । चतुष्टयं ब्राह्मणानां निकेतं चत्वारो वर्णा यज्ञमिमं वहन्ति । दिशश्चतस्रो वर्णचतुष्टयञ्च चतुष्पदा गौरपि शश्वदुक्ता४ । वन्दुवाच । पञ्चाग्नयः पञ्चपदा च पङ्क्तिर्यज्ञाः पञ्चैवाप्यथ पञ्चेन्द्रियाणि । दृष्टा वेदे पञ्चचूडाप्सराश्च लोके ख्यातं पञ्चनदञ्च पुण्यम्५ । अष्टावक्र उवाच । षडाधाने दक्षिणामाहुरेके षड् वै चेमे ऋतवः कालचक्रम् । षडिन्द्रियाण्युत षट् कृत्तिकाश्च षट् साद्यस्काः सर्व्ववेदेषु दृष्टाः६ । वन्दुवाच सप्त ग्राम्याः पशवः सप्त वन्याः सप्त च्छन्दांसि क्रतुमेकं वहन्ति । सप्तर्षयः सप्त चाप्यर्हणानि सप्ततन्त्री प्रथिता चैव वीणा७ । अष्टावक्र उवाच । अष्टौ शाणाः शतमानं वहन्ति तथाष्टपादः शरभः सिंहघाती । अष्टौ वसून् शुश्रुम देवतासु यूपश्चाष्टास्रिर्व्विहितः सर्व्वयज्ञे८ । वन्दुवाच । नवैवोक्ताः सामिधेन्यः पितॄणां तथा प्राहुर्नवयोगं विसर्गम् । नवाक्षरा बृहती संप्रदिष्टा नवाङ्कयोगो गणनामेति शश्वत्९ । अष्टावक्र उवाच । दिशो दशोक्ताः पुरुषस्य लोके सहस्रमाहुर्दशपूर्णं शतानि । दशैव मासान् बिभ्रति गर्भवत्यो दशेरका दश दाशा दशार्हाः१० । वन्दुवाच । एकादशैकादशिनः पशूनामेकादशैवात्र भवन्ति यूपाः । एकादश प्राणभृतां विकारा एकादशोक्ता दिवि देवेषु रुद्राः११ । अष्टावक्र उवाच । संवत्सरं द्वादशमासमाहुर्जगत्याः पादो द्वादशैवाक्षराणि । द्वादशाहः प्राकृतयज्ञ उक्तो द्वादशादित्यान् कथयन्तीह धीराः१२ । वन्दुवाच । त्रयोदशी तिथिरुक्ता प्रशस्ता त्रयोदशद्वीपवती मही च । लोमश उवाच । एतावदुक्त्वा विरराम वन्दी श्लोकस्यार्द्धं व्याजहाराष्टावक्रः । अष्टावक्र उवाच । त्रयोदशाहानि ससार केशी त्रयोदशादीन्यतिछन्दांसि चाहुः" १३ अस्य नीलकण्ठोक्तदिशाव्याख्या यथा एकोऽग्निः सूर्य्यो वा इतराप्रकाश्योऽन्यप्रकाशकश्च । एवं देवानामिन्द्रियाणां राजा प्रधानभूतः अरिहन्ता पराभिभूततत्त्वान्तराभिभावकः। यमः सर्वेन्द्रियाणां नियन्ता पितॄणां विषयोपहारद्वारा पालयितॄणामिन्द्रियाणाम् ईश्वरो भोक्ता कर्त्ता प्रधानभूत एक एव १। सखायौ सत्वजीवौ जीवेश्वरौ वा । २ पुण्येन देवस्थावरमनुष्यरूपं, पापेन नारकस्थावरतिर्य्यग्यो-

निरूपं जन्मत्रयम् । वाजपेयोपलक्षितं कर्ममात्रम् तच्च वेदभेदात् द्विजभेदाच्च त्रयम् । त्रीण्येव प्रातर्मध्याह्न तृतीयसवनानि । त्रयो लोकाः स्वर्गो नरकं भूश्चेति भोगभूमयः । त्रीणि ज्योतींषि जाग्रदाद्यवस्थात्रयम् । ३ । निकेतमाश्रमम् यज्ञमिह ज्ञानयज्ञं तेन चातुर्वर्ण्यमध्ये शूद्रस्यापि तत्राधिकारः। दिशः विराट्सूत्रान्तर्यामितुर्य्यसाक्षात्काररूपाः चतस्रः दिशः । वाङ्मयप्रणवस्य वर्ण चतुष्टयम् अकारउकारोमकारः अर्द्धमात्रा इत्येवं चतुष्टयम् । चतुष्पदा परा पश्यन्ती मध्यमा वैखरीति भेदात् गौर्वाक् चतुष्पदा ४ । पञ्चाग्नयः गार्हपत्यदक्षिणाग्न्याहवनीयसभ्यावसथ्याख्याः । पञ्चपदाऽष्टाक्षरैः पादैः पङ्क्तिः छन्दः पञ्चपदा । यज्ञाः पञ्च ब्रह्मर्षिपितृनृभूतयज्ञाः पञ्च स्मार्त्ताः, अग्निहोत्रं दर्शपौर्णमासौ चातुर्मास्यानि पशुः सोम इति श्रौता वा पञ्च । अप्सु शरीराकारपरिणतासु जलप्रधानासु मात्रासु वर्त्तते गच्छतीत्यप्सराः चितिः पञ्चचूडा तत्तद्विषयाकारतया प्रमाणविपर्य्ययविकल्पनिद्रास्मृतिरूपवृत्तिपञ्चकसारूप्येण शिखापञ्चकवती पञ्चानां विषयरूपस्रोतसां समाहारः पञ्चनदम् ५ षट् आधाने गाइति शेषः। मनस इन्द्रियत्वमभ्युपेत्य षट्कोपपत्तिः षाड्गुण्या यज्ञविशेषाः ६ । “ग्राम्यारण्याः पशवश्चतुर्दश गौरविरजोऽश्वोऽश्वतरोगर्दभोमनुष्यश्चेति सप्त ग्राम्याः महिषवानरराक्षसरीसृपरुरुपृषन्मृगाश्चेति सप्तारण्याः” पैठीनस्युक्ताः । सप्त छन्दांसि गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगतीसमाख्यानि । सप्तर्षयः सप्त प्राणाः “प्राणा वै ऋषय” इति श्रुतेः मनोबुद्धिसहिताः प्राणादयः पञ्च सप्तर्षयः । सप्त अर्हणानि अर्हणीयानि सुखानि पञ्चभिरिन्द्रियैः मनोबुद्धिभ्यां प्राप्याणि सुखानीतिभेदात् सुखानि सप्त । ७ “अष्टौ ग्रहा अष्टावतिग्रहाः” श्रुतेः शाणाः शाणनिर्मिता गौण्यः आवपनविशेषा इव इन्द्रियप्रवेशयोग्याः अष्टौ ।८। पितृणामिष्टौ “उशन्तस्त्वा निधीमहीति” ऋक् त्रिरभ्यस्ता प्रत्येकं त्रिसमित्का नव सामधेन्योऽग्निसमिन्धनार्था ऋचः संपद्यन्ते । तथा एका प्रकृतिरेव त्रिगुणा एकद्विगुणप्रधानभावविमर्द्दनैः प्रत्येकं त्रिविधा नवैव संपद्यते तथा नवैवाङ्काः क्रमस्थानभेदात् यथेष्टसंख्यावाचिनो भवन्ति९ । दिश उपदेष्टारः दाशा तत्त्वज्ञेपकाः। अर्हास्तत्त्वाधिकारिणश्च दश१०। इन्द्रियाणि मनसा सह ज्ञानकर्म्मेन्द्रियाणि तेषां विषयाः तद्रूपहृत्ताविकाराश्च एकादश ११ । प्राकृतयज्ञः द्वादशाहताध्यत्वात् द्वादशाहः १२ । त्रयोदशद्वीपवती भूरादिषट्केन पातालसप्तकेन युक्ता च मध्यस्था मही त्रयोदशद्वीपवती १३ । एवमेकादिसंख्याया बोधकत्वं तत्तत्पदार्थानाम् दर्शितम् । अन्ये च शब्दाः शास्त्रान्तरेषु एकादिसंख्याबोधकतया प्रयुज्यन्ते ते च शब्दाः पूर्व्वदर्शितशब्दाश्च यथा तत्तत्संख्य बोधकाभवन्ति तथा दृश्यन्ते तत्र सर्व्वत्र शब्दतदर्थयोरभेदात् स्ववाच्यार्थगतसंख्यातुल्यसंख्याबोधकत्वेन स्ववाच्यार्थसंख्यापूर्व्वसंख्यातुल्यसंख्याबोधकत्वेन वा तथात्वं बोध्यम् । सर्वेषाञ्च क्वचित् तत्तत्संख्यापूरणवाचकतापि “युग्माग्नी कृतभूतानि षण्मुनी वसुरन्ध्रयोः” स्मृतौ युग्मादिभिः तत्संख्यापूरणद्वितीयादीनां बोधनात् ।

१ तत्रादौ एकत्वबोधकाः। कवि०ल०। ब्रह्मणः “एकमेवाद्वितीयं ब्रह्मेति” श्रुतेरेकत्वात्तथात्वम् विरञ्चिवाचिब्रह्मणो प्येकमहासर्गे एकत्वात्तथा क्ष्मेन्दिन्द्रे ति पाठे भूमिचन्द्रयोरेकत्वात्तथा । इन्द्रहस्तिन ऐरावतस्य तदश्वस्योच्चैःश्रवसश्चैकत्वात् तथा । गणेशदन्तस्य शुक्रनेत्रस्य चैकत्वात् तथा एवं काकनेत्रस्यापि । भा०व०उक्ताः । स्वप्रकाशस्य अन्यप्रकाशकस्य सूर्य्यस्याग्नेश्च यमस्य सर्व्वनियन्तुरीश्वरस्य, इन्द्रपदाभिधेयस्य तथा “इन्द्रोमायाभिः पुरुरूप ईयते इति” श्रुतेरीश्वरस्येन्द्रपदवाच्यत्वात् । रूपम् वैशेषिकमतसिद्धचतुर्विंशतिगुणेषु आद्यत्वात् तथा । “भजेच्छिदोऽंशैरथ तैर्विमिश्रैः रूपं भजेत् स्यात् परिपूर्त्तिकालः” लीला० । अश्विनी तस्याः तारास्वाद्यत्वात् अभेदात्तदधिपाश्विशब्दोऽपि । तस्य स्वपरत्वे द्वित्वबोधकतेति भेदः । उक्था तस्या एकाक्षरपादकत्वात् प्रधानवाची प्रकृतिशब्दस्तथा “अजामेकां लोहितशुक्लकृष्णाम्” इत्यादिश्रुतेस्तदर्थस्यैकत्वात् ।

२ द्वित्वबोधकाः । कवि०ल० उक्ताः । चान्द्रमासघटकयोः पक्षिच्छदरूपयोर्वा पक्षयोः,नदीकूलयोः,असिधारयोः,कुशलवरूपयोर्दाशरथिपुत्रयोश्च तथा । श०ति०” उक्ताः । हंस इति वर्णौ जीवपरमरूपौ परात्मानौ शब्दार्थौ दिनरात्री स्त्रीपुरुषौ, परस्परविरोधिगुणरूपा शीतोष्णसुखदुःखादयश्च तथा । भा०व० उक्ताः । इन्द्राग्नी सत्यजीवौ नारदपर्व्वतौ अश्विनौ रथचक्रे च तथा । एवम् भरणी तारासु तस्या द्वितीयत्वात् तदभेदात् तदधिपोयमोऽपि । यमशब्दस्य यमयितरीश्वरपरत्वे एकत्वस्य, यमजपरत्वे द्वित्वस्य योगाद्वय-

रत्वे अष्टत्वस्य बोधकतेति भेदः। प्रेतराजपरकालशब्दस्यापि तथात्वम्। तस्य समयपरत्वे त्रित्वस्य, शिवपरत्वे आर्द्राधिपत्वस्य षट्कस्येति भेदः। अत्युक्त्या द्व्यक्षरपादत्वात्तथा। शकटांशभेदार्थकयुगशब्दस्तथा तस्य शकटादौ द्वित्वसंख्यकतयैव योजनात्। एवं द्वन्द्वार्थकयुगशब्दोऽपि। अयनशब्दोऽपि तथा वर्षे तदर्थयोर्द्वयोरेव घटकत्वात्। पर्वसन्धिः चान्द्रमासे तयोर्द्वित्वात्। शब्दः ध्वन्यात्मकवर्णात्मकरूपः, अदृष्टम् पुण्यापुण्यरूपम्, शब्दशक्तिः अभिधालक्षणारूपा, बुद्धिः अनुभवस्मृतिरूपा, गन्धः सुरभिदुर्गन्धरूपः, ध्वनिधर्मः तारत्वमन्द्रत्वात्मकः, स्पर्शः उष्णानुष्णात्मकः, मृदुत्वकाठिन्यात्मको वा, अभावः, संसर्गाभावभेदात्मकश्च द्वित्वस्य बोधकः। सामान्यं व्याप्यव्यापकात्मकम्, क्रिया सिद्धसाध्यात्मिका वेदान्तिमते पदार्थः चिज्जडरूपः दृग्दृश्यरूपो वा आर्हतमते जीवाजीवरूपो वा न्यायमते भावाभावरूपो वा, परिमाणम् वेदान्तिमते अणुत्वमहत्त्वरूपं च द्वित्वात्तथा। वैशेषिकमते तु अणुमहत्त्वह्रस्वत्वदीर्घत्वरूपं चतुष्कात् चतुष्कस्य तथेति भेदः। पदम् सुबन्ततिङन्तरूपत्वात्, धात्वर्थः फलव्यापाररूपत्वात् तथा। प्रयोजनं गौणमुख्यरूपत्वात्तथा। न्यायमते व्याप्तिः अन्वयव्यतिरेकरूपत्वात्तथा।

वेदान्तादिमते व्यतिरेकव्याप्तेरभावात् तस्याः एकत्वादेकत्वस्येति भेदः। संयोगः कर्मजसंयोगजात्मकः, विभागः कर्मजविभागजात्मकश्च द्वित्वात् तथा। नाटकप्रस्ताव्यवस्तु आधिकारिकप्रासङ्गिकरूपं द्वित्वात् तथा। काव्यम् दृश्यश्राव्यरूपं द्वित्वात् तथा अवान्तरभेदपरत्वे ध्वन्यादिपरत्वात् त्रित्वस्येति भेदः। गुरुत्ववद्द्रव्यम् रसवद्द्रव्यञ्च क्षितिजलात्मकत्वात्तथा। नैमित्तिकद्रववद्द्रव्यं क्षितितेजोरूपत्वात्तथा। समाधिः सविकल्पनिर्विकल्पात्मकः सवीजनिर्वीजात्मकः संप्रज्ञातासंप्रज्ञातात्मकोवा द्वित्वात्तथा। समापत्तिः सविचारनिर्विचारात्मिका द्वित्वात् तथा। परस्मुक्तिर्विदेहकैवल्यात्मिका द्वित्वात्तथा। सालोक्यादिपरत्वे चतुष्कस्येति भेदः। समाधिप्रज्ञा ज्योतिष्मत्यृतम्भरात्मिका द्वित्वात्तथा। कर्मकारकं मुख्यगौणात्मकं द्वित्वात्तथा। कर्तृकारक स्वतन्त्रप्रयोजकरूपं, सम्प्रदानकारकं प्रेरकानुमन्तृरूपञ्च द्वित्वात्तथा। प्रत्यक्षं लौकिकालौकिकात्मकतया द्वित्वात् तथा अवान्तरप्रत्यक्षपरत्वे षट्त्वस्येति भेदः। ज्ञानं सविकल्पकनिर्विकल्पकात्मकं तथा। अनुमानं स्वार्थपरार्थात्मकं अनुमानफलं तत्त्वनिर्णयविजयरूपं तथा। ब्रह्म सगुणनिर्गुणरूपम्, जीववादः एकानेकविषयात्मकः वेदान्तिमते ज्ञानं वृत्तिवृत्त्यवच्छिन्नचैतन्यात्मकम् जीवभेदकः अवच्छेदप्रतिविम्बरूपश्च द्वित्वात् तथा। कर्म शुक्लकृष्णात्म पुण्यापुण्यसाधनम् विहितनिषिद्धरूपं, धर्मः प्रवृत्तिनिवृत्तिलक्षणः चेदमेयं सिद्धसाध्यरूपं, प्रयागः पश्चिमदक्षिणरूपः, वेदान्तिमते अविद्या कार्यकारणरूपा तूलाविद्यामूलाविद्यात्मिका द्वित्वात्तथा। काञ्चिः विष्णुशिवकाञ्चिरूपत्वात् तथा। आगमरूपप्रमाणशब्दः दृष्टादृष्टार्थकत्वात्तथा उदाहरणं साधर्म्यवैधर्म्यकृतम्, शृङ्गारः विप्रलम्भसंभोगात्मकः, मानश्च प्रणयेर्ष्याजातः द्वित्वात्तथा

२ त्रित्वबोधकाः कवि० ल० उक्ताः। कालः भूतभविष्यद्वर्त्तनरूपत्वात्, अग्निः दक्षिणाग्निगार्हपत्याहवनीयरूपत्वात्, लोकः स्वर्गमर्त्यपातालरूपत्वात्, गङ्गावर्त्म त्रिलोकस्थत्वात्, शिवनेत्रम् सूर्य्येन्दुवह्निरूपत्वात्, गुणः सत्वरजस्तमोरूपत्वात् तथा। नीतिशास्त्रप्रसिद्धगुणपरत्वे षट्कस्य, द्रव्यधर्मभेदपरत्वे चतुर्विंशतित्वस्य बोधकइति भेद। पीवारेखा, कालिदासकृतकाव्यं कुमाररघुवंशमेघदूतरूपत्वात्, त्रिशूलशिखा, देहोदराधःस्थलवलितमांसरूपवलिश्च त्रित्वात् तथा। प्रातर्मध्यसायाह्नरूपसन्ध्यानां, त्रिपुरासुरस्वर्गादिस्थपुराणां, भरतिशिनक्षत्रभेदात्मकज्योतिषोक्तपुष्करदोषाणाम्, परशुरामदाशरथिबलभद्रात्मकरामाणां, त्रिलोकव्यापिवामनरूपविष्णुपदानां, बाल्ययौवनजरारूपवयसाञ्च त्रित्वात् तथा। शा० ति० उक्ताः। सूर्य्येन्दुवह्निरूपधाम्नाम्, ऋग्यजुःसामरूपत्रय्यात्मकवेदानां त्रित्वात् तथात्वम्। अथर्ववेदसहितत्रयीपरत्वे तु चतुष्टयस्य बोधकतेति भेदः। प्रणववर्णानाम् अकारोकारमकाररूपाणाम्, उदात्तानुदात्तस्वरितरूपस्वराणाञ्च त्रित्वात् तथा। स्वरस्य षड्जादिपरत्वे सप्तकस्य अच्वर्णपरत्वे षोड़शत्वस्येति भेदः। देवीनां गायत्रीसावित्रीसरस्वतीरूपाणां, ब्रह्मविष्णुशिवरूपेश्वरमूर्त्तीनाञ्च त्रित्वात् तथा। कृषिपाशुपाल्यवाणिज्यरूपा याजनाध्यापनप्रतिग्रहरूपा वा आजीविकात्मिका वृत्तिस्तथा मनोवृत्तिपरत्वे चतुष्कस्य, प्रमाणादिवृत्तिपरत्वे पञ्चकस्य, शब्दनिष्ठबोधनाशक्तिरूपवृत्तिपरत्वे आलङ्कारिकमते त्रित्वस्य, अन्यमते द्वित्वस्य, वाचकशब्दभेदपरत्वे तद्धितादिपञ्चत्वस्येति भेदः। ज्येष्ठारौद्री वामारूपा, ज्ञानेच्छाक्रियारूपा वा प्रभावोत्साह-

मन्त्रजारूपा वा शक्तिः तथा, नाडी इड़ापिङ्गला-सुषुम्णात्मकप्रधाननाड़ीरूपा तथा। गान्धार्य्यादिनाड़ी-परत्वे सप्तत्वस्य, दण्डपरत्वे तस्याः षष्टिपलात्मकत्वात् दिवसे षष्टिसंख्यकत्वाच्च षष्टित्वस्येति भेदः। भा०व०उक्ताः। प्रजा देवतिर्य्यग्मनुष्यरूपा, त्रयीभेदात् द्विजभेदाच्च वा-जपेयादिकर्म च तथा। प्रातर्मध्यसायाह्नकर्त्तव्यानि सव-नानि, ज्योतिः विश्वप्राज्ञतैजसरूपम् तथा। एवम् कटु शुण्ठीपिप्पलीमरिचरूपतया, फलम् हरीतक्यामलकीवय-स्थारूपतया, दोषः वातपित्तकफरूपतया रागद्वेषमोहरूप-तया वा तथा। कृत्तिका तस्या राशिचक्रे तृतीयत्वात्, अभे-दोपचारात् तदधिप वह्निरपि। तद्घटकतारापरत्वे तु षट्कस्य बोधिका इति भेदः। सन्ध्या त्र्यक्षरपादत्वात् तथा शब्दवृत्तिः शक्तिलक्षणाव्यञ्जनारूपा तथा इत्यालङ्कारिकाः अन्यमते द्वित्वस्येत्युक्तम्। कारणम् समवाय्यसमवायि-निमित्तात्मकं त्रित्वात् तथा। फलावहहेतुः दैवपुरुष-कारकालात्मकः "दैवं पुरुषकारश्च काले फलति पार्थिव!। त्रयमेतन्मनुष्यस्य पिण्डितं फलवाहम्" इत्युक्ते स्त्रयाणां तथात्वात्तथा। "अधिष्ठानं तथा कर्त्ता करणञ्च पृथग्विधम्। विविधाश्च पृथक्चेष्टा दैवञ्चैवात्र पञ्चमम्" गीतोक्तत्वात् पञ्चत्वस्यापि। संस्कारः स्थितिस्था-पनवेगभावनात्मकस्त्रित्वात् तथा, गर्भाधानादिपरत्वे दश-त्वस्य चत्वारिंशत्त्वस्य वेति भेदः। संसर्गाभावः प्रागभाव-ध्वंसात्यन्ताभावात्मकत्वात्तथा। यत्नः प्रवृत्तिनिवृत्तिजीवन-योनिरूपत्वात्तथा। दुःखम् आध्यात्मिकाधिभौतिकाधिदै-विकात्मकत्वात्तथा। त्यागिकर्त्तृकरणकर्म्मज्ञानबुद्धिधृतिसु-खसुखादिकं गीतोक्तं प्रत्येकं सात्त्विकराजसतामसरूपतया त्रित्वात्तथा। अवस्था सांख्यमते आविर्भावतिरोभावाभि-व्यक्तिरूपा वेदान्तमते जागृत्स्वप्नसुषुप्तिरूपा, अधिकारश्च गङ्गास्रोतोमण्डूकप्लुत सिंहावलोकितात्मकः त्रित्वात् तथा

असिद्धिः आश्रयासिद्धिव्याप्यत्वासिद्धिस्वरूपासिद्धि-रूपत्वात् तथा, विरुद्धहेतुदोषः साधारणासाधारणा-नुपसंहारिरूपत्वात् तथा। न्यायमते "प्रकृतिः प्रत्य-यश्चैव निपातश्चेति स त्रिधा" इत्युक्तानां प्रकृत्यादीनां सार्थकशब्दानां त्रित्वात् तथा। वाचकशब्दः रूढयौगि कयोगरूढरूपतया त्रित्वात्तथा वाचकशब्दशक्तिः नैमित्तिकौपाधिकीपारिभाषिक्यात्मकतया त्रित्वात्तथा। लक्षणा जहत्स्वार्थाऽजहत्स्वार्थाजहदजहत्स्वार्थात्मिका त्रित्वात्, आलङ्कारिकमते षड्त्वस्येति भेदः। ग्रामः

स्वरारोहावरोहक्रमात्मकः त्रित्वात्तथा "सप्त स्वरास्त्रयो-ग्रामा मूर्च्छनाश्चैकविंशतिः। तालाश्चैकोनपञ्चाशत् मात्रातिस्रोलयास्त्रयः। स्थानत्रयं यतीनाञ्च षडास्यानि रसा नव। रागाः षट्त्रिंशत्तु भावाश्चत्वारिंशत्ततः (तान) स्मृताः" भरतोक्तेः द्रुतमध्यविलम्बितकालरूपा मात्रा, लयः उत्तममध्याधममानात्मकः, आदिमध्यान्त्यरूपयतिस्थानं, च त्रित्वात् तथा। शिष्टफलम् भूमिहिरण्यमित्रलाभा-त्मकं त्रित्वात् तथा। काव्यं ध्वनिगुणीभूतव्यङ्ग्याव्यङ्ग्या-त्मकमुत्तममध्यमाधमात्मकं त्रित्वात् तथा। देहः कारण-स्थूलसूक्ष्मात्मकः त्रित्वात् तथा। भूतभेदः देहेन्द्रियवि-षयात्मकस्तथा। सर्गः सात्त्विकराजसतामसात्मकस्तथा। दुःखसिद्धिः दुःखत्रयाभिघातात्मिका प्रमोदमुदितमो-दमानाभिधेया त्रित्वात् तथा। सिद्ध्यङ्कुशः विपर्य्यया-शक्तितुष्टिरूपस्त्रित्वात् तथा। कर्मविपाकः जात्या-युर्भोगात्मकस्त्रित्वात् तथा। अतीन्द्रियगुणः गुरुत्वा-दृष्टभावनात्मकः त्रित्वात् तथा। कर्मजगुणः वेग-संयोगविभागात्मकस्त्रित्वात्तथा। मित्रभेदः मित्र-भेदश्च सहजप्राकृतकृत्रिमात्मकस्त्रित्वात्तथा। संसृतिमार्गः देवयानपितृयान यमयानात्मकः त्रित्वात्तथा। वि-त्वपत्रम् तस्य प्रत्येकपत्रे त्रित्वात् तथा। वेदान्तिमते सत्ता पारमार्थिकीव्यावहारिकीप्रातिभासिकीरूपा त्रि-त्वात्तथा। स्रोतः ऊर्द्ध्वाधस्तिर्य्यग्रूपं त्रित्वात्तथा। ईप्सिततमकर्म्म निर्वर्त्त्यविकार्य्यप्राप्यात्मकं त्रित्वात्तथा। आधारकारकम् औपश्लेषिकाभिव्यापकवैषयिकात्मकं त्रि-त्वात् तथा। अपादानकारकम् निर्दिष्टविषयोपात्त-विषयापेक्षितक्रियात्मकं त्रित्वात्तथा। व्यापारः कायिक-वाचिकमानसात्मकस्तथा। ऋणं देवर्षिपितृसम्बन्धिरूपं तथा। अलौकिकसन्निकर्षः सामान्यलक्षणाज्ञानलक्ष-णायोगजात्मकस्त्रित्वात्तथा। काव्यगुणः माधुर्य्यौजःप्रसा-दात्मकः त्रित्वात्तथा। श्लेषौदार्य्यादीनामोजस्यन्तर्भावात् त्रित्वम् सा० द०। नायिका स्वकीयापरकीयासाधार-णात्मिका, मुग्धा मध्या प्रगल्भात्मिका वा तथा तासा-मेकैकस्या उभयधर्मत्वे नवत्वस्य अवस्थाभेदात् बहुत्वस्येति भेदः। अनुमितिलिङ्गं पूर्ववच्छेषवत्सामान्यतोदृष्टात्मकं केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिरूपं वा त्रित्वात्तथा छलं वाक्सामान्योपचारछलात्मकं त्रित्वात्तथा।

४ चतुष्कबोधकाः कवि० ल० उक्ताः। वेदः ऋग्यजुःसा-माथर्व्वात्मकः, चतुर्वक्त्रब्रह्मणो मुखानि, पूर्व्वापरदक्षिणो-

श्मनादेश, चतुष्ट्वात् तथा । लवणसमुद्रादिपरत्वे सप्तत्वानाक इति भेदः । चतुर्भुजविष्णुबाहुशब्दोऽपि तथा । स्वर्गहस्तिनामैरावतादीनां चतुर्दन्तानामुत्तरं दन्तशब्दस्तथा । हस्त्यश्वरथपादातरूपसेनाङ्गम्, उपायः सामदानभेददण्डरूपः, दिनरात्रयोश्चतुर्थांशरूपयामशब्दश्च तथा । युगं सत्यत्रेताद्वापररूपं तथा शकटांशविशेषपरत्वे द्वन्द्वपरत्वे च द्वित्वबोधकमिति । आश्रमः ब्रह्मचर्यगार्हस्थ्यवानप्रस्थसंन्यासरूपस्तथा । शा० ति० उक्ताः । तत्त्वम् आत्मविद्याशिवतत्त्वरूपम् प्रधानादितत्त्वपरत्वे चतुर्विंशतिसंख्याबोधकमिति भेदः । मनोवृत्तिः संशयनिश्चयगर्वाभिमानरूपा तथा । वाग्वृत्तिः परापश्यन्तीमध्यमावैखरीरूपा तथा । अर्थबोधनशक्तिविशेषपरत्वे द्वित्वस्य त्रित्वस्य वा मतभेदेन बोधिकेति भेदः । भावः वेदान्तिमते जाग्रत्स्वप्नसुषुप्तितुरीयरूपस्तथा । सांख्यमते तु धर्माद्यष्टपरत्वेनाष्टत्वबोधकः वैशेषिकमते षट्त्वस्येति भेदः । विष्णुमूर्त्तिः वासुदेवानिरुद्धसंकर्षणप्रद्युम्नरूपा तथा । शङ्खादिचतुष्टयविन्यासभेदकृता तन्मूर्त्तिस्तु चतुर्विंशतित्वस्य बोधिकेति भेदः । गणेशः "गणाधिपं गणेशानं तृतीयं गणनायकम् । गणक्रीडं पीतगौररक्तनीलरुचः क्रमात्" शा० ति० १२प० उक्तपीतादिवर्णयुक्तगणाधिपादिरूपस्तथा । आत्मादि आत्मान्तरात्मजीवात्मपरात्मरूपस्तथा । पीठशब्दः उड्डियानजालन्धरपूर्णगिरिकामार्थकः तथा । धर्मादि धर्मज्ञानैश्वर्यवैराग्यरूपम् अधर्मादि अधर्माज्ञानानैश्वर्यावैराग्यरूपञ्च तथा सांख्यमते धर्मादि अष्टत्वस्य बोधकमिति भेदः । लक्ष्मीगजः दमकादिरूपः, दिशः प्राच्यवाचीपश्चिमोत्तररूपा तथा । अवान्तरदिक्परत्वे अष्टत्वस्य दशत्वस्य वा बोधिका इति भेदः । ज्योतिः विश्वराजस्तत्त्वात्मान्तर्यामिरूपम् । एवमन्येऽपि यथा रोहिणी राशिचक्रे तस्याश्चतुर्थत्वात् तदभेदात् तदधिपब्रह्माऽपि तथा । प्रतिष्ठा तस्याश्चतुरक्षरपादकत्वात् तथा । सत्ययुगार्थककृतशब्दः चतुस्त्रिद्व्येकसंगुणा" सू० सि० उक्तेः "महायुगप्रमाणद्वादशसहस्रदशांशस्य चतुर्गुणरूपत्वात्तस्य तथात्वम् । सार्थकशब्दः नामाख्यातनिपातोपसर्गात्मकत्वात्, पुरुषार्थश्च धर्मार्थकाममोक्षरूपत्वात् तथा । नायकः धीरोदात्तधीरोद्धतधीरललितधीरप्रशान्तात्मकत्वात् दक्षिणधृष्टानुकूलशठात्मकत्वाद्वा तथा तेषां प्रत्येकमुभयधर्मत्वे षोडशभेदत्वात् षोडशत्वस्येति भेदः । काव्यरीतिः वैदर्भीगौडीपाञ्चालीलाटिकात्मिका चतुर्द्धा-

त्तथा । प्रलयः नित्यनैमित्तिकप्राकृतात्यन्तिकात्मकत्वात् तथा भगवद्भक्तः "चतुर्विधा भजन्ते माम्" इत्युपक्रम्य "आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी च पुरुषर्षभ !" इति गीतोक्तेः चतुष्कत्वात् तथा । अभिनयः आङ्गिकवाचिकाहार्य्यसात्त्विकात्मकः चतुष्कत्वात् तथा । नायकादिव्यापारविशेषात्मकरीतिः कौशिकीसात्त्वत्यारभटीभारतीरूपा चतुष्कत्वात्तथा । कौशिक्यङ्गम् "नर्म्म च नर्म्मस्फूर्जो नर्म्मस्फोटश्च नर्म्मगर्भश्च" इत्युक्तनर्मादिरूपं तथा । सात्त्वत्यङ्गम् । "उत्थापकोऽथ संघात्यः संलापः परिवर्त्तकः । विशेषा इति चत्वारः सात्त्वत्याः परिकीर्त्तिताः" इत्युक्तोत्थापकादिरूपस्तथा । आरभट्यङ्गम् "वस्तूत्थापनसंफेटौ संक्षिप्तिरवपातनम् । इति भेदास्तु चत्वार आरभट्याः प्रकीर्त्तिताः" इत्युक्तवस्तूत्थापनादिरूपं तथा । अनेकाश्रितगुणः संयोगविभागद्वित्वादिसंख्याद्व्यादिपृथक्त्वरूपः चतुर्द्धात्तथा । आध्यात्मिकतुष्टिः "आध्यात्मिक्यश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः" सा० का० उक्तप्रकृत्यादिरूपा चतुर्द्धात्तथा । चित्तपरिकर्मार्थभावना मैत्रीकरुणामुदितोपेक्षात्मिका चतुर्द्धात्तथा । समाधिविघ्नः लयविक्षेपकषायरसास्वादात्मकः चतुष्कत्वात्तथा । संन्यासी कुटीचकबहूदकहंसपरमहंसात्मकस्तथा । अनुबन्धः विषयप्रयोजनसम्बन्धाधिकारिरूपस्तथा । ब्रह्मविविदिषासाधनम् इहामुत्रार्थफलभोगविरागनित्यानित्यवस्तुविवेकशमादिषट्कमुमुक्षारूपं तथा । कल्पितकर्मकारकम् । औदासीन्यप्राप्ताप्रेप्सिताकथितान्यपूर्वकरूपं तथा । बीजम् एकानेकवर्णसमीकरणमध्यमाहरणभावितात्मकं तथा । सङ्केतविषयः जातिद्रव्यगुणक्रियारूपस्तथा । द्रव्यारम्भकः स्पर्शवद्द्रव्यञ्च क्षितिजलतेजोवायुरूपत्वात्तथा । अपरमुक्तिः सालोक्यसायुज्यसार्ष्टिसारूप्यात्मिका तथा । कार्य्योत्पत्तिप्रकारः असतः सदुत्पत्तिः सतोऽसदुत्पत्तिः सतोविवर्त्तः सतः सदुत्पत्तिश्चेति चतूरूपत्वात् तथा । वृत्तिः कायिकाकालिकाकारिताचक्रवृद्धिरूपा तथा । सिद्धान्तः सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थितिरूपः चतुर्द्धात्तथा । वर्णोत्पत्तौ आभ्यन्तरप्रयत्नः स्पृष्टेषत्स्पृष्टविवृतसंवृतात्मकचतुष्कत्वात्तथा । विप्रलम्भः, पूर्वरागमानप्रवासकरुणात्मकः चतुष्कत्वात्तथा ।

५ पञ्चत्वबोधकाः । कवि०ल० युधिष्ठिरभीमार्जुननकुलसहदेवानाम् पाण्डुपुत्राणां, पञ्चाननशिवमुखानां, श्रोत्रत्वग्नेत्ररसनघ्राणात्मकानां ज्ञानेन्द्रियाणाम्, वाक्पाणि-

पादपायूपस्थरूपाणां कर्मेन्द्रियाणां वा, सन्तानकल्पवृक्षमन्दारपारिजातहरिचन्दनानां देववृक्षाणां, महानाम्न्यादिवेदपठनार्थानां व्रतानाम्, दक्षिणाग्निगार्हपत्याहवनीयान्वाहार्य्यपचनावसथ्यानां वह्नीनां, ब्रह्महत्यासुरापाणब्राह्मणस्वामिकसुवर्णहरणगुर्वङ्गनागमनतत्संसर्गजानां पातकानाम्, क्षित्यप्तेजोमरुद्व्योमरूपाणां भूतानां, कुमाररघुवंशमाघकिरातनैषधाख्यानां महाकाव्यानां, होमस्वाध्यायपाठपितृतर्पणातिथिपूजनवैश्वदेवबलिरूपाणां गृहस्थकर्त्तव्यानां स्मार्त्तानाम्, अग्निहोत्रादीनां मो॰क॰ प्राग्दर्शितानां श्रौतानां वा यज्ञानां, सर्गप्रलयमन्वन्तरराजवंशतच्चरितरूपाणां पुराणलक्षणानाम्, प्राणापानसमानोदानव्यानरूपाणां देहस्थवायूनाम्, उत्क्षेपणावक्षेपणाकुञ्चनप्रसारणगमनात्मिकानां क्रियाणां, ज्ञानेन्द्रियविषयाणां शब्दस्पर्शरूपरसगन्धात्मकानां, कर्मेन्द्रियविषयाणां वचनादानगमनविसर्गानन्दात्मकानां वा पञ्चत्वात् तथा। शा॰ति॰ उक्ताः। नीलकहीरकपद्मरागप्रबालमौक्तिकरूपाणां स्थाप्यघटे देयानां रत्नानां पञ्चत्वस्य बोधकता वास्तुभूमावारोप्यरत्नानां कालिदासादिकवीनाञ्च नवत्वात् तत्परत्वे नवत्वस्य बोधकतायै वक्ष्यते। श्वेतगौररक्तहरितश्यामरूपाणां वर्णविशेषाणाम् पञ्चत्वात् तथा पाटलादिवर्णानां मिश्रणेनैव जातत्वात् न पृथग्वर्णता, वर्णशब्दस्य ब्राह्मणादिजातिपरत्वे चतुष्कस्य, अक्षरपरत्वे तन्त्रमते पञ्चाशल्लिपिभिर्विभक्तेत्याद्युक्तेः पञ्चाशत्त्वस्य, शिक्षामते "चतुःषष्टिस्त्रिषष्टिर्वा वर्णाः सम्भवतो मताः" इत्युक्तसंख्याबोधकत्वमिति भेदः। तत्पुरुषाघोरसद्योजातवामदेवेशानरूपाणां शिवमूर्त्तीनाम्, "सम्मोहनस्तापनश्च शोषणः स्तम्भनस्तथा। उन्मादनश्च कामस्य बाणाः पञ्च प्रकीर्त्तिताः" इत्युक्तानां कामबाणानाम् "निवृत्तिः सुप्रतिष्ठा स्यात् विद्या शान्तिरनन्तरम्। शान्त्यतीता कलाः पञ्च विज्ञेयाः" इति उक्तानां कलाविशेषाणाम्, ईशानमनोभवतत्पुरुषमकरध्वजाघोरकुमारतेजोवामदेवसन्मथसद्योजातकामदेवात्मकानाम् तन्त्रैव उक्तानां कामदेवभेदानां च पञ्चत्वात्तथा। तत्पुरुषादिमन्त्ररूपाणां ब्रह्मक्ष्वाञ्च पञ्चत्वात् तथा, भा॰व॰उक्ताः। प्रमाणविपर्य्ययविकल्पस्मृतिनिद्रारूपाणां वृत्तीनाम्, इन्द्रियवृत्तिरूपाणां स्रोतसाम्, "किरणा धूतपापा च गुप्ततोया सरस्वती। गङ्गा च यमुना चैव पञ्च नद्यः प्रकीर्त्तिताः" काशी॰ उक्तानां नदीनां वा पञ्चत्वात्तथा। वृत्तिः कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपा, पल्लवश्च "आम्राश्वत्थवटप्लक्षयज्ञोडुम्बरपल्लवाः। पञ्चपल्लवमित्युक्तम्" इत्युक्तानां पल्लवानां पञ्चत्वात्तथा। मूलम् "बिल्वशोनाकगाम्भारीपाटलागणिकारिका। पञ्चमूलमिति ख्यातम्" इत्युक्तबिल्वादिमूलानां पञ्चत्वात्तथा। कषायः "जम्बुशाल्मलिवाट्यालम्बकुलं बदरं तथा। कषायाः पञ्च विज्ञेयाः" इत्युक्तजम्ब्वादीनां कषायाणां पञ्चत्वात् तथा। कोषः वेदान्तोक्तानामन्नप्राणमनोविज्ञानानन्दमयानां कोषाणां पञ्चत्वात्तथा। देहत्वक्परत्वे षट्कबोधकतायै वक्ष्यते। गव्यम् "पञ्चगव्यं दधि क्षीरं घृतगोमूत्रगोमयैः" इत्युक्तानां दध्यादीनां, पञ्चत्वात्तथा। तत्त्वम् "मद्यं मांसं तथा मत्स्यो मुद्रा मैथुनमेव च। पञ्चतत्त्वमिदं प्रोक्तम्" इत्युक्तमद्यादीनां पञ्चत्वात् तथा। वल्कलम् "न्यग्रोधोदुम्बराश्वत्थप्लक्षवेतसवल्कलम्। पञ्चवल्कलमित्युक्तम्" इति न्यग्रोधादिवल्कलानां पञ्चत्वात् तथा। शस्यम् "धान्यं मुद्गास्तिला माषा यवाः सिद्धार्थकोऽपि वा। पञ्चशस्यमिति प्रोक्तम्" इत्युक्तानां धान्यादीनां पञ्चत्वात्तथा। सुगन्धिः कर्पूरकक्कोललवङ्गपुष्पगुवाकजातिफलरूपाणां सुगन्धिकानां पञ्चत्वात् तथा। सूना "पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः। कण्डनी चोदकुम्भश्च" इत्युक्तचुल्ल्यादिरूपवध्यस्थानानां पञ्चत्वात् तथा। एकवृक्षाङ्गम् "त्वक् पत्रं कुसुमं मूलं फलञ्चैकस्य शाखिनः। एकत्वस्य तु पञ्चाङ्गम्" इत्युक्तानां एकस्य वृक्षस्य त्वगादीनां पञ्चत्वात् तथा। पुरश्चरणाङ्गम् "जपहोमौ तर्पणञ्चाभिषेको विप्रभोजनम्। पञ्चाङ्गोपासनं शास्त्रे पुरश्चरणमिष्यते" इत्युक्तानां जपादीनां पञ्चत्वात् तथा। अमृतम् "दुग्धं च शर्करा चैव घृतं दधि तथा मधु। पञ्चामृतमिदं प्रोक्तम्" इत्युक्तानां दुग्धादिरूपाणाममृततुल्यस्वादूनां पञ्चत्वात्तथा। नाट्योक्तिः स्वगतप्रकाशापवारितजनान्तिकाकाशगतात्मिका पञ्चत्वात् तथा। अनुप्रासः छेकवृत्तिश्रुत्यन्त्यलाटानुप्रासात्मकः पञ्चत्वात् तथा। बहुलौहकम् "सुवर्णं रजतं ताम्रं रङ्गं नागं तथैव च। पञ्चलौहमिति प्रोक्तम्" इत्युक्तसुवर्णादिलौहानां पञ्चत्वात्तथा। मृगशिरा तस्याः राशिचक्रे पञ्चमत्वात्तथात्वम्। अभेदोपचारात्तदधिपचन्द्रोऽपि तथा। सुप्रतिष्ठा तस्याः पञ्चाक्षरपादत्वात्तथा। तर्कः आत्माश्रयान्योन्याश्रयचक्रकानवस्थाप्रमाणबाधितार्थकप्रसङ्गरूपतया पञ्चत्वात्तथा। कार्य्यावस्था

आरम्भयत्नप्राप्त्याशानियताप्तिफलागमात्मिका पञ्चत्वात्तथा। नाटकस्य सन्धिः मुखप्रतिमुखगर्भविमर्शोपसंहृतिरूपः पञ्चत्वात्तथा। प्रस्तावना उद्घात्यककथोद्घातप्रयोगातिशयप्रवर्त्तकावलगितात्मिका पञ्चत्वात् तथा। प्रयोजनसिद्धिहेतुः बीजबिन्दुपताकाप्रकरीकार्य्यात्मा तथा। विपर्य्ययः अविद्याऽस्मितारागद्वेषाभिनिवेशात्मकः तथा। अश्वगतिः "आस्कन्दितं धौरितकं रेचितं वल्गितं प्लुतम्" इत्युक्तास्कन्दितादिलक्षणा तथा। गर्भस्यानुगामिधर्मः "आयुः कर्म्म च वित्तं च विद्या निधनमेव च। पञ्चैतानि हि सृज्यन्ते गर्भस्थस्यैव देहिनः" इत्युक्तायुरादिलक्षणस्तथा। योगाङ्गासनं "पद्मासनं स्वस्तिकाख्यं भद्रासने तथा। वीरासनमिति प्रोक्तं क्रमादासनपञ्चकम्" शा॰ति॰उक्तस्वस्तिकादीनां पञ्चत्वात्तथा। पूजाङ्गासनं तु आसनशब्दे उक्तसंख्याबोधकमिति भेदः। हेत्वाभासः अनैकान्तविरुद्धासिद्धसत्प्रतिपक्षबाधात्मकः तथा। न्यायावयवः प्रतिज्ञाहेतूदाहरणोपनयनिगमनात्मकः तथा। वेदान्तिमते तु त्रित्वस्येति भेदः। कालगुणः दिग्गुणः मूर्त्तामूर्त्तसाधारणगुणश्च संयोगविभागपरत्वापरत्वपृथक्त्वात्मकः तथा। बाह्येन्द्रियग्राह्यगुणः शब्दस्पर्शरूपरसगन्धात्मकस्तथा "दुःखं संसारिणः स्कन्धास्ते च पञ्च प्रकीर्त्तिताः। विज्ञानं वेदना संज्ञा संस्काराे रूपमेव च" इत्युक्तविज्ञानादिलक्षणः स्कन्धस्तथा। प्रातिपदिकार्थः विशेष्यविशेषणसंख्याकारकलिङ्गात्मकस्तथा। अधिकरणावयवः "विषयो विषयश्चैव पूर्व्वपक्षस्तथोत्तरम्। निर्णयश्चेति सिद्धान्तः शास्त्रेऽधिकरणं स्मृतम्" इत्युक्तसंशयादिरूपस्तथा वर्णविभजकोपाधिः "वर्णान् जनयते तेषां विभागः पञ्चधा मतः। स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः" शिक्षोक्तेः उदात्तादिस्वरोच्चारणकालस्थानाभ्यन्तरबाह्यप्रयत्नानां पञ्चत्वात् तथा।

षट्संख्याबोधकाः कवि॰ क॰ उक्ताः। षड्रसास्तकोणानां, त्रिमूर्द्धसुरनेत्राणां; तर्काणां ज्ञानसाधनप्रमाणानां प्रत्यक्षानुमानोपमानागमार्थापत्त्यनुपलब्धिरूपाणाम्, विनियोगशास्त्ररूपाणां श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यात्मकानां वा षट्कत्वात्तथात्वम्। आपादकशास्त्राभ्यां नापाद्यज्ञानरूपपरत्वे आत्माश्रयादिपञ्चविधप्रसङ्गरूपत्वात् पञ्चत्वस्य इति भेदः। अङ्गानां मस्तकबाहुद्वयपदद्वयमध्यरूपाणाम् प्रधानाङ्गानां, शिक्षाकल्पव्याकरणनिरुक्तज्योतिषच्छन्दोरूपाणां वेदाङ्गानां वा, न्यायवैशेषिकसांख्यपातञ्जलमीमांसावेदान्तात्मकानां तत्त्वज्ञानसाधनानां, दर्शनानाम् चक्रवर्त्तिनां चक्रावयवरूपाणाम् अराणां, कलौ शकप्रवर्त्तकानाम् "युधिष्ठिरो विक्रमशालिवाहनौ धराधिनाथो विजयाभिनन्दनः। इमे तु नागार्ज्जुनमेदिनीविभुर्बलिः क्रमात् षट् शककारकाः कलौ" ज्योतिर्वि॰ उक्तानां युधिष्ठिरादीनां सार्व्वभौमानां वा, षडाननकार्त्तिकेयमुखानां, सन्धिविग्रहयानासनद्वैधाश्रयरूपाणां नृपगुणानाञ्च षट्त्वात्तथात्वम्। गुणशब्दस्य सत्त्वादिपरत्वे त्रित्वस्य, द्रव्यधर्मभेदपरत्वे चतुर्विंशतित्वस्येति भेदः। मधुरकटुकषायाम्लतिक्तलवणानां रसानां षट्कत्वात्तथा। शृङ्गारादिरसपरत्वे नवत्वस्य बोधकतेति भेदः। शा॰ति॰ उक्ताः। आमोदप्रमोदसुमुखदुर्मुखविघ्नविघ्नकर्त्तृरूपाणां गणेशानां, क्रमेणोक्तामोदादिप्रियाणां सिद्धिसमृद्धिकान्तिमदनावतीमदद्रवाद्राविणीरूपाणाम्, "स्नाय्वस्थिमज्जशुक्राणि त्वङ्मांसरुधिराणि च। षाट्कौषिकमिदं प्रोक्तं सर्वदेहेषु देहिनामिति" तन्त्रोक्तानां स्नाय्वादीनां कोषाणाम्, बुभुक्षापिपासाशोकमोहजरामृत्युरूपाणामूर्मीणाम्, डाकिनीराकिणीलाकिनीकाकिनीशाकिनीहाकिनीरूपाणाम् षट्चक्राधिष्ठितानां शक्तीनाम्, "कलाध्वा चैव तत्त्वाध्वा भुवनाध्वेति च त्रयम्। वर्णाध्वा च पदाध्वा च मन्त्राध्वेत्यपरं त्रयम्" इत्युक्तानां कलाध्वादीनामध्वनाम्, मूलाधारस्वाधिष्ठानमणिपूरानाहतविशुद्धाज्ञारूपाणां देहस्थचक्रभेदरूपाणां डाकिन्यादिषट्शक्त्याधाराणां च षट्कत्वात्तथा। ऋतूनां वसन्तग्रीष्मवर्षाशरद्धेमन्तशिशिरात्मकानां षट्त्वात्तथा भा॰व॰उक्ताः। आधाने दक्षिणात्वेन विहितगवानां षट्त्वात्तथात्वम्। कृत्तिकाः तासां षट्तारात्मकत्वात् तथा नक्षत्रचक्रस्थतृतीयर्क्षपरत्वे त्रित्वस्येति भेदः। एकाहसाध्यानामेकाहकर्त्तव्यदीक्षोपसदुत्याह्वकानां सद्यस्क्रियावतां "षट् साद्यस्काः" कात्या॰१२,२,६, सू॰उप॰क्रम्य १२,१२,२५, सूत्रान्तेषु दर्शितानां साद्यस्कदीर्घाधिश्रयणादिकामकर्त्तव्यानुक्रीविश्वजिच्छिल्पस्यैकत्रिकरूपाणाम् षट्त्वात् तथात्वम्। आर्द्रा राशिचक्रे तस्याः षष्ठत्वात् तथा तदभेदात् तदधिपशिवकालादिशब्दोऽपि तथा। गायत्री तस्याः षडक्षरपादत्वात्। भावविकाराणां जन्मसत्त्ववृद्धिविपरिणामापक्षयनाशरूपाणां यास्कोक्तानां षट्त्वात्तथा। भावपदार्थानां वैशेषिकसूत्रोक्तानां द्रव्यगुणकर्मसामान्यविशेषसमवायात्मकानां षट्कत्वात्तथा। "ऐश-

र्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इहोच्यते" इत्युक्तभगस्य षट्संख्यायोगात्तथा । कारकाणामपादानसंप्रदानकरणाधारकर्म्मकर्त्तृरूपाणां षट्कत्वात्तथा "सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां तिङा । सुबन्तेनेति च प्रोक्तः समासः षड्विधो बुधैः" इत्युक्तानां, द्वन्द्वकर्म्मधारयद्विगुतत्पुरुषबहुव्रीह्यव्ययीभावात्मकानां वा समासानां षट्त्वात्तथा । सङ्गतिः प्रसङ्गोपोद्घातहेतुतावसरनिर्वाहकैककार्य्यत्वरूपा षट्कत्वस्य, शास्त्राध्यायपादसङ्गतिरूपा तु त्रित्वस्य, अधिकरणसङ्गतिरूपावान्तरसङ्गतिस्तु आक्षेपदृष्टान्तप्रत्युदाहरणादिरूपा बहुत्वस्येति भेदः । अङ्गन्यासः शीर्षशिखासुखहृदयनेत्रकरतलतत्पृष्ठन्यासरूपतया षट्त्वस्य, अभिज्ञा दिव्यचक्षुःश्रोत्रपरचित्तज्ञानपूर्व्वनिवासानुस्मृतिस्वात्मतत्त्वज्ञानवियद्गतिकायव्यूहादिसिद्धिरूपबौद्धधर्मभेदरूपा षट्त्वस्य, नृपसैन्यं मौलभृत्यसुहृच्छ्रेणीपराजितशत्रुसैन्याटविकात्मकम् षट्त्वात् तथा । सुरापाणसमम् "ब्रह्मोज्झता वेदनिन्दा कौटसाक्ष्यं सुहृद्वधः । गर्हितान्नाद्ययोर्जग्धिः सुरापाणसमानि षट्" इत्युक्तम् षट्त्वात् तथा । नारीदूषणानि "पानं दुर्ज्जनसंसर्गः पत्या च विरहोऽटनम् । स्वप्नोऽन्यगेहवासश्च नारीणां दूषणानि षट्" काशी० उक्तानि षट्त्वात्तथा । शास्त्रतात्पर्य्यनिर्णायकः "उपक्रमोपसंहारावभ्यासोऽपूर्व्वता फलम् । अर्थवादोपपत्ती च हेतुस्तात्पर्य्यनिर्णये" इत्युक्तेः षट्त्वात् तथा । प्रीतिलक्षणम् "ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति । भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम्" इत्युक्तदानाद्यात्मकम् षट्कत्वात् तथा । गीताङ्गवसन्तादिरागः षट्त्वात् तथा । पताकास्थानाङ्गफलम् "इष्टार्थरचनाश्चर्य्यलाभोवृत्तान्तविस्तरः । रागप्राप्तिः प्रयोगस्य गोप्यानां गोपनं तथा । प्रकाशनं प्रकाश्यानामङ्गानां षड्विधम् फलम्" इत्युक्तेष्टार्थरचनादिरूपं षट्त्वात्तथा । रिपुः कामक्रोधलोभमोहमदमात्सर्य्यात्मकः षट्त्वात्तथा जन्मलग्नावधिकषष्ठस्थाने चिन्तनीयत्वाद्वा तथा । विप्रकर्म्म यजनयाजनाध्ययनाध्यापनदानप्रतिग्रहात्मकं षट्त्वात् तथा । अभिचारः मारणोच्चाटनविद्वेषणस्तम्भनमोहनवशीकरणात्मकः षट्त्वात् तथा । शमादिः शमदमोपरतितितिक्षाश्रद्धासमाधिरूपस्तथा । प्रत्यक्षम् श्रावणत्वाचचाक्षुषरासनघ्राणजमानसात्मकं षट्त्वबोधकम् लौकिकप्रत्यक्षसन्निकर्षः इन्द्रियार्थसंयोगतत्संयुक्तसमवायतत्संयुक्तसमवेतसमवायसमवायसमवेतसमवायसंयुक्तविशेषणतात्मकः षट्कत्वात्तथा । आकाशगुणः संख्यापरिमाणपृथक्त्वसंयोगविभागशब्दात्मकः षट्त्वात्तथा । निमित्तासमवायिकारणतापन्नगुणः उष्णस्पर्शद्रवगुरुत्ववेगसंयोगविभागात्मकः षट्त्वात्तथा । मानभङ्गोपायः सामदानभेदनत्युपेक्षारसान्तरात्मकः षट्कत्वात्तथा ।

७ सप्तसंख्याबोधकाः । कवि०ल० उक्ताः । लोकः भूर्भुवःस्वर्महोजनतपःसत्यात्मक ऊर्द्ध्वस्थः, अतलवितलसुतलतलातलमहातलरसातलपातालात्मकः अधःस्थो वा, द्वीपः जम्बुशाकशाल्मलिकुशक्रौञ्चगोमेदपुष्करात्मकः, मुनिश्च वैवस्वतमन्वन्तरे वशिष्ठकश्यपात्रिविश्वामित्रजमदग्निगौतमभारद्वाजात्मकः स्वायम्भुवान्तरे मरीच्यत्रिपुलस्त्यपुलहक्रतुप्रचेतोवशिष्ठात्मको वा सप्तत्वात् तथा । सूर्य्यहयः तदश्वानां सप्तत्वात् तथा । समुद्रः लवणेक्षुसुराघृतदधिक्षीरस्वादूदकात्मकः, नृपराज्याङ्गम् स्वाम्यमात्यसुहृत्कोषराष्ट्रदुर्गबलात्मकम्, धान्यम् यवव्रीहितिलमाषश्यामाककङ्गुमुद्गात्मकं सप्तत्वात् तथा । वह्निशिखा कालीकरालीमनोजवासुलोहितासुधूम्रवर्णास्फुलिङ्गिनीविश्वधामात्मिका, अद्रिश्च महेन्द्रमलयसह्यशुक्तिमदृक्षविन्ध्यपारियात्रकुलपर्व्वतरूपात्मकः सप्तत्वात् तथा । शा०ति० उक्ताः । सुदर्शनम् आचक्रविचक्रसुचक्रधीचक्रसञ्चक्रज्वालाचक्रसुदर्शनचक्रात्मकम्, स्वरश्च निषादर्षभगान्धारषड्जमध्यमधैवतपञ्चमात्मकः सप्तत्वात् तथा उदात्तादित्वे त्रित्वस्य, अज्वर्णरूपत्वे षोड़शत्वस्येति भेदः । ग्रहः रविचन्द्रभौमबुधगुरुशुक्रशनिरूपः सप्तत्वात् तथा । राहुकेत्वोर्ग्रहत्वमते तु नवत्वस्य यज्ञियपात्रभेदत्वे दशत्वस्य "दश ग्रहान् गृह्णातीति" श्रुतौ दशानामेव सोमग्रहणपात्राणां विधानात् । "अष्टौ ग्रहा अष्टावतिग्रहाः" इति श्रुतेः ज्ञानसाधनात्मत्वे पञ्चज्ञानेन्द्रियमनोबुद्ध्यहङ्कारात्मकाष्टविषयग्रहणहेतुत्वात् अष्टत्वबोधक इति भेदः । समिधाम् अर्कपलाशखदिरापामार्गपिप्पलोडुम्बरशमीरूपाणां, नी०क० उक्तानां ग्राम्यपशूनां गवादीनां, वन्यपशूनां महिषादीनाञ्च भूरादीनां व्याहृतीनाञ्च सप्तत्वात् तथा । भा०व० उक्ताः मनोबुद्धिसहितज्ञानेन्द्रियपञ्चकात्मप्राणरूपः ऋषिः सप्तत्वात् तथा । मनोबुद्ध्यादिप्राप्याणि सुखानि सप्तत्वात् तथा, वीणातन्त्रीतासां लोके सप्तत्वप्रसिद्धेस्तथा । छन्दः गायत्र्यादिजगत्यन्तवैदिकछन्दोरूपम् सप्तत्वात्तथा लौकिकछन्दःपरत्वे

षड्विंशतित्वस्येति भेदः। साममक्तिः ओङ्कारहिङ्कारप्रस्तावोद्गीथप्रतिहारोपद्रवनिधनरूपा सप्तत्वात् तथा। "लोकेषु सप्तविधं सामोपासीतेति" श्रुतौ साम्नां सप्तविधत्वोक्तेस्तथात्वम्। वैशेषिकमते पदार्थः द्रव्यगुणकर्म्मसामान्यविशेषसमवायाभावात्मकः सप्तत्वात् तथा। प्रकृतिविकृतिः महदहङ्कारशब्दस्पर्शरूपरसगन्धतन्मात्रात्मिका सप्तत्वात् तथा। पुनर्वसुस्तत्ताराशिचक्रे सप्तमत्वात् तथा। अभेदात्तदधिपतिरदितिरपि। उष्णिक् तस्याः सप्ताक्षरपादत्वात् तथा। अश्वजन्मस्थानम् "अमृताद् बाष्पतोवह्नेर्वेदेभ्योऽण्डाच्च गर्भतः। साम्नोऽश्वयानादुत्पत्तिः सप्तधा परिकीर्त्तिता" इत्युक्तानां सप्तत्वात्तथा। तादृशोत्पत्तिस्थानकत्वेन अश्वशब्दोऽपि तथा। मदस्रुतिर्यस्य 'करात् कटाभ्यां मेढ्राच्च नेत्राभ्याञ्च मदस्रुतिः' इत्युक्तानां सप्तत्वात् तथा। वरगुणः "कुलञ्च शीलञ्च सनाथता च विद्या च वित्तं च वपुर्वयश्च। एतान् गुणान् सप्त विचिन्त्य देया कन्या बुधैः शेषमचिन्तनीयम्" इत्युक्तकुलादीनां सप्तत्वात् तथा। पौनर्भवा "सप्त पौनर्भवाः कन्या वर्ज्जनीयाः कुलाधमाः। वाचा दत्ता मनोदत्ता कृतकौतुकमङ्गला। उदकस्पर्शिता या च या च पाणिगृहीतिका। अग्निं परिगता या च पुनर्भूप्रभवा च या" इत्युक्तानां सप्तत्वात् तथा। धर्म्यवित्तागमः "सप्त वित्तागमा धर्म्या दायोलाभः क्रयोजयः। विभागः संप्रयोगश्च सत्प्रतिग्रह एव च" इत्युक्तदायादीनां सप्तत्वात् तथा। मरुत्, आवहप्रवहोद्वहसंवहविवहपरावहपरीवहात्मकः सप्तत्वात्तथा। अवान्तरभेदपरत्वे ऊनपञ्चाशत्त्वस्येति भेदः। मोक्षदपुरी "अयोध्या मथुरा माया काशी काञ्चिरवन्तिका। पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः" इत्युक्तपुरीणां सप्तत्वात्तथा।

अष्टबोधकाः कवि०ल० उक्ताः। योगाङ्गं यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधिरूपं, शिवमूर्त्तिः क्षित्यादिपञ्चभूतचन्द्रसूर्य्ययजमानरूपा, ऐरावतपुण्डरीकवामनकुमुदाञ्जनपुष्पदन्तसार्वभौमसुप्रतीकरूपोदन्ती च अष्टत्वात्तथा एकशेषात् करिणीशब्दोऽपि तथा करिण्यश्च अभ्रमुकपिलापिङ्गलानुपमाताम्रकर्णीशुभ्रदन्त्यङ्गनाञ्जनावतीरूपाः। सिद्धिः अणिमलघिमप्राप्तिप्राकाम्येशितावशिताव्याप्तिकामावसायितात्मिका अष्टत्वात् तथा। चतुर्वदनब्रह्मकर्णस्तथा। व्याकरणम् इन्द्रचन्द्रकाशकृत्स्नापिशलिशाकटायनपाणिन्यमरजैनेन्द्रात्मकाष्टकर्त्तृकृतम् अष्टत्वात् तथा। दिक्पालः इन्द्रवह्नियमनिर्ऋतिवरुणवायुकुबेरेशानात्मकः प्राच्यादीनामष्टानां दिशामीश्वराणामेषामष्टत्वात् तथा। ऊर्द्ध्वाधोदिक्सहितदिक्पालपरत्वे दशत्वस्येति भेदः। अहिः शेषवासुकिपद्ममहापद्मतक्षककुलीरकर्कटशङ्खात्मकः अष्टत्वात्तथा। कुलाचलः मतान्तरे हिमाचलसहितः पूर्व्वोक्तमहेन्द्रादिरूपः अष्टत्वात्तथा। कुलाचलानां सप्तत्वप्रसिद्धावपि क्वचिदष्टत्वव्यवहारः। "अष्टकुलाचलसप्तसमुद्राः" मोहमुद्गरः। शा०ति० उक्ताः। भैरवः असिताङ्गरुरुचण्डोन्मत्तकपालिभीषणक्रोधनसंहारात्मकः। प्रकृतिः प्रधानमहदहङ्कारपञ्चतन्मात्रात्मिका अष्टत्वात्तथा। प्रकृतिशब्दः प्रधानपरत्वे एकत्वस्य तत्त्वान्तरोपादानत्वपरत्वे अष्टत्वस्येति भेदः। गणेशः वक्रतुण्डैकदंष्ट्रमहोदरगजाननलम्बोदरविकटविघ्नराजधूम्रवर्णात्मकः अष्टत्वात्तथा। अग्निमूर्त्तिः "जातवेदाः सप्तजिह्वो हव्यवाहनसंज्ञकः। अश्वोदरजसंज्ञः स्यात् पुनर्वैश्वानराह्वयः। कौमारतेजाः स्याद्विश्वमुखो देवमुखः स्मृतः" शा०ति० उक्तानां जातवेदआदीनामष्टत्वात्तथा भा०व० उक्ताः। प्राणः आवपनतुल्यपूरणीयः महदहङ्कारचित्तसहितज्ञानेन्द्रियरूपः अष्टत्वात्तथा। शरभपादस्य लोके ऽष्टत्वप्रसिद्धेस्तथा। यूपकोणस्य वेदे अष्टत्वप्रसिद्धेस्तथा। द्विजगुणाः "दया सर्व्वभूतेषु क्षान्तिरनसूया शौचमनायासो मङ्गलमकार्पण्यमस्पृहेति" गौतमोक्तानामष्टत्वात्तथा। वैशेषिकोक्तेश्वरगुणः संयोगविभागपृथक्त्वसंख्यापरिमाणबुद्धीच्छाकृतिरूपः अष्टत्वात्तथा। राज्याङ्गम् पौरश्रेणीसहितस्वाम्यमात्यादिसप्तकम् अष्टत्वात्तथा। नृपगतिः "आदाने च विसर्गे च तथा प्रैषनिषेधयोः। पञ्चमे चार्थवचने व्यवहारस्य चेक्षणे। दण्डशुद्ध्योरवक्तः स्यात्तेनाष्टगतिको नृपः" उशनसोक्तगतिरूपा अष्टत्वात्तथा। तारिणी "तारा चोग्रा महोग्रा च वज्रा काली सरस्वती। कामेश्वरी च चामुण्डा इत्यष्टौ तारिणीमताः" इत्युक्तानां तारामूर्त्तिभेदानामष्टत्वात्तथा। होमद्रव्यम् "अश्वत्थोडुम्बरप्लक्षन्यग्रोधसमिधस्तिलाः। सिद्धार्थपायसाज्यानि द्रव्याण्यष्टौ विदुर्बुधाः" इत्युक्तानामष्टत्वात्तथा। धातुः "स्वर्णं रौप्यञ्च ताम्रञ्च वङ्गं यशदमेव च। सीसं लौहं रसश्चेति धातवोऽष्टौ प्रकीर्त्तिताः" इत्युक्तानामष्टत्वात् तथा देहस्थधातुपरत्वे सप्तत्वस्येति भेदः। महासरस्वतीभुजस्तस्या अष्टभुजत्वात्तथा। सात्त्विकभावः "स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः। वैवर्ण्यमश्रु

प्रलय इत्यष्टौ सात्त्विकाः स्मृताः” सा० द० उक्तस्तम्भादीनामष्टत्वात्तथा। असमवायिकारणगुणः रूपरसगन्धस्पर्शपरिमाणैकपृथक्त्वस्नेहशब्दात्मकः अष्टत्वात्तथा। निमित्तकारणगुणः बुद्धिसुखदुःखेच्छाद्वेषयत्नादृष्टभावनात्मकस्तथा। मनोगुणः संख्यापरिमितिपृथक्त्वसंयोगविभागपरत्वापरत्ववेगात्मकस्तथा। मङ्गलम् “मृगराजो वृषो नागो कलसो व्यजनं तथा। वैजयन्ती तथा भेरी दीप इत्यष्टमङ्गलम्” इत्युक्तानां “लोकेऽस्मिन् मङ्गलान्यष्टौ ब्राह्मणो, गौर्हुताशनः। हिरण्यं सर्पिरादित्यो माला राजा तथाष्टमः” इत्युक्तानां चाष्टत्वात्तथा। नायिकावस्था स्वाधीनभर्त्तृका खण्डिताभिसारिका कलहान्तरिता विप्रलब्धा प्रोषितभर्त्तृका वासकसज्जा विरहोत्कण्ठितात्मिका अष्टत्वात् तथा। शुद्धलौहम् “सुवर्णं रजतं ताम्रं सीसकं कान्तिकं तथा। रङ्गं लौहं तीक्ष्णलौहं लौहान्यष्टौ इमानि तु” इत्युक्तानामष्टत्वात् तथा। लघुलौहपरत्वे पञ्चत्वस्य बोधकमित्युक्तम्। आयुर्वेदाङ्गम् “शल्यं शालाक्यं कायचिकित्सा भूतविद्या कौमारभृत्याऽगदतन्त्रं रसायनतन्त्रं वाजीकरणतन्त्रमिति” सुश्रुतोक्तानामष्टत्वात्तथा। अर्घाङ्गम् “आपः क्षीरं कुशाग्रञ्च दधि सर्पिः सतण्डुलम्। यवः सिद्धार्थकश्चैव अष्टाङ्गोऽर्घः प्रकीर्त्तितः” इति इत्युक्तानाम् “आपः क्षीरं कुशाग्राणि घृतं मधु तथा दधि। रक्तानि करवीराणि तथा वै रक्तचन्दनम्। अष्टाङ्ग एव वा अर्घ” इत्युक्तानां चाष्टत्वात् तथा। प्रणामाङ्गम् “जानुभ्याञ्च तथा पद्भ्यां पाणिभ्यामुरसा धिया। शिरसा वचसा दृष्ट्या प्रणामोऽष्टाङ्ग ईरितः” इत्युक्तानामष्टत्वात्तथा। “मैथुनाङ्गम् स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम्। संकल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च। एतन्मैथुनमष्टाङ्गम्” इत्युक्तानामष्टत्वात्तथा। पुष्यं तस्य राशिचक्रे अष्टमत्वात् तथा। तदभेदात् तदधिपो जीवोऽपि। अनुष्टुप् तस्याः अष्टाक्षरपादत्वात् तथा। तमः अव्यक्तमहदहङ्कारपञ्चतन्मात्रात्मकेष्वनात्मभूतेष्वात्मबुद्धिरूपमष्टविधविषयत्वात् तथा। “भेदस्तमसोऽष्टविधो मोहस्य च तथा” सा० का०। मोहः अणिमादिसिद्धीनामात्मगतानां शाश्वतिकत्वाभिमानरूपः अणिमाद्यष्टविधविषयत्वात् तथा। विवाहः ब्राह्मदैवार्षप्राजापत्यासुरगान्धर्वराक्षसपैशाचात्मकः अष्टत्वात् तथा। सिद्धि “ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः। दानञ्च सिद्धयोऽष्टौ” सा० का० उक्तोहादीनामष्टत्वात्तथा।

उक्तसिद्धीनां नामान्तराणि सां० कौ० दर्शितानि। तारसुतारतारतारम्यकसदामुदितप्रमोदमुदितमोदमानरूपाणि। खगगतिः “संपातं विप्रपातञ्च महापातं निपातनम्। वक्रं तिर्य्यक् तथा चोर्द्धमष्टमं लघुसंज्ञकम्” इत्युक्तसम्पातादिरूपा अष्टत्वात् तथा परिकर्म्म अङ्कशास्त्रोक्तयोगवियोगगुणनभागवर्गतत्पदघनतत्पदरूपम् अष्टत्वात् तथा” वर्णोत्पत्तिस्थानम्। “अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा। जिह्वामूलं च दन्तोष्ठौ नासामूलं तालु च” शिक्षोक्तोरआदीनामष्टत्वात् तथा। अव्रतघ्नम् अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः। हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम्” स्मृत्युक्तावादीनामष्टत्वात्तथा। महारोगः उन्मादत्वग्दोषराजयक्ष्मश्वासमधुमेहभगन्दरोदराश्मरीरूपः अष्टत्वात् तथा।

नवत्वसंख्याबोधकाः कवि० ल० उक्ताः। मुखनासिकानेत्रकर्णद्वयोपस्थपायुरूपाणां देहद्वाराणाम् नवसंख्यायोगात् तथा भारतकिन्नरहरिकुरुहिरण्मयरम्यकेलावृतभद्रतुरगकेतुमालाख्याणां भूखण्डानाम्, तपस्याकाले स्वयंकृत्तानां रावणमस्तकानाम्, व्याघ्रीस्तनानां “गौड़ी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा” इति त्रिविधसुरायाः सात्त्विकराजसतामसाधिकारिभेदसेव्यतया नवत्वात्तथा। कुण्डानां अष्टासु दिक्षु अष्टौ ऐशानीप्राच्योर्मध्ये आचार्य्यकुण्डमेकमिति मण्डपाङ्गकुण्डानां नवत्वात्तथा। “पद्मोऽस्त्रियाः महापद्मः शङ्खो मकरकच्छपौ। मुकुन्दकुन्दनीलाश्च खर्वोऽपि निधयो नव” हारा० उक्तानां पद्मादीनाम्” अङ्कानामेकादीनां नवान्तानां, शृङ्गारवीररौद्रकरुणाद्भुतहास्यभयानकवीभत्सशान्ताख्यानामलङ्कारोक्तानां रसानाम्, रविचन्द्रभौमबुधगुरुशुक्रशनिराहुकेतुरूपाणां ग्रहाणाञ्च नवत्वात् तथात्वम्। शा० ति० उक्ता “सच्चिदानन्दविभवात् सकलात् परमेश्वरात्। आसीच्छक्तिस्ततो नादो नादाद्बिन्दुसमुद्भवः। परशक्तिमयः साक्षात् त्रिधाऽसौ भिद्यते पुनः। बिन्दुर्नादो बीजमिति तस्य भेदाः समीरिताः। बिन्दुः शिवात्मको बीजं शक्तिर्नादस्तयोर्मिथः। समवायः समाख्यातः सर्वागमविशारदैः। रौद्री बिन्दोस्ततो नादात् ज्येष्ठा बीजादजायत। वामा, ताभ्यः समुद्भूताः रुद्रब्रह्मरमाधिपाः” तन्त्रवाद्ये उक्तानां शक्तित्वानां पीठशक्तीनां तत्तद्देवताभेदेन भिन्नानां तन्त्रोक्तानाम् “मुक्तामाणिक्यवैदूर्य्यगोमेदान् वज्रविद्रुमौ। पुष्परागं मरकतं नीलञ्चेति न्यसेत् क्रमात्” इत्युक्तानां रत्नानां

नवत्वात् तथा। वर्णानामकचटतपयशलरूपाणाम् नवत्वात् तथा लोके लवरूपलवर्गस्याभावात् अष्टसंख्याबोधक इति भेदः। प्राणरूपकदुर्गाभेदरूपाणाम् शा० ति० २३प० उक्तानां प्राणदूतीनाम्, नवत्वात्तथा। भा० व०। सामधेनी तस्याश्च यथा नवत्वं तथा मी० क०व्या० दर्शितं प्रकृतिसंयोगः उ च इष्टौ यथा नवधा योगस्तथोक्तं प्राक्।

ईश्वरलक्षणम् जगज्जन्मस्थितिप्रलयेषु प्रत्येकं ज्ञानचिकीर्षाप्रयत्नात्मतया नवत्वात्तथा। "विश्वसर्गविसर्गादिनवलक्षणलक्षितम्" श्रीधरः। पत्रिका कदली दाडिमी धान्यं हरिद्रामानकं कचुः। विल्वोऽशोको जयन्ती च विज्ञेया नव पत्रिकाः" इत्युक्तानां पत्रिकाणां नवत्वात् तथा। नवपत्रिकास्थदेवीरूपा दुर्गा ब्रह्माणीरक्तदन्तिकालक्ष्मीजयन्तीचामुण्डाकालिकाशिवा शोकरहिताकार्त्तिकीरूपाणां नवत्वात् तथा। कविश्रेष्ठार्थकरत्नशब्दः "धन्वन्तरिः क्षपणकोऽमरसिंहशङ्कुवेतालभट्टघटकर्परकालिदासाः। ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य" ज्योतिर्वि०उक्तानां विक्रमादित्यसभास्थकविश्रेष्ठानां नवत्वात् तथा। विष्णुभक्तिः "श्रवणं कीर्त्तनं-विष्णोःस्मरणं पादसेवनम्। अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्। इति पुंसाऽर्पिता विष्णौ भक्तिश्चेन्नवलक्षणा" भाग० ७,५ उक्तश्रवणादिरूपा नवत्वात् तथा। तुष्टिः "आध्यात्मिक्यश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः। बाह्या विषयोपरमात् पञ्च नव तुष्टयो भवन्तीह" सां०का० उक्तानां नवत्वात् तथा। अभ्यागतेऽव्ययकार्य्यम्। "नवैतानि गृहस्थेन कार्य्याण्यभ्यागते सदा। अन्यर्थानि च यत् सौम्यं वाक्यं१ चक्षुः२ मनो३ मुखम्४। अभ्युत्थान५ मिहायाते स्नेहः६ पूर्वभाषणम्७। उपासन८ मनुव्रज्या९" काशी० उक्तानि नवत्वात् तथा। अभ्यागते ईषद्व्ययसाध्यकार्य्याणि। "तथैवद्रव्ययुक्तानि कार्य्याण्यभ्यागते नव। आसनं१ पादशौचं२ च यथाशक्त्यशनं३ स्थितिः४। शय्या५ तृणं६ जलं७ अभ्यङ्ग८ दीपा९ गार्हस्थ्यविदिदाः" काशी० दर्शितानि नवत्वात्तथा। गृहस्थावश्यत्याज्यनिन्द्यकार्य्याणि "तथा नव विकर्माणि त्याज्यानि गृहमेधिना। पैशुन्यं परदाराश्च द्रोहः क्रोधानृताप्रिये। द्वेषोदम्भश्च माया च स्वर्गनार्गार्गलाणि च" काशी० उक्तानि नवत्वात्तथा। अवश्यकर्त्तव्यानि "नवावश्यककर्म्माणि कार्य्याणि प्रतिवासरम्। स्नान सन्ध्या जपोहोमः स्वाध्यायो देवतार्चनम्। वैश्वदेवं तथातिथ्यं नवमं पितृतर्पणम्" काशी० उक्तानि नवत्वात् तथा। गोप्यानि "जन्मर्क्षं मैथुनं मन्त्रो गृहच्छिद्रञ्च वञ्चनम्। आयुर्धनापमानं स्त्री न प्रकाश्यानि सर्वथा" काशी० उक्तानि नवत्वात्तथा। प्रकाश्यानि "नवैतानि प्रकाश्यानि बहुपापमकुत्सितम्१। प्रायोग्य२ऋणशुद्धिश्च३ स्वान्वयः४ क्रय५ विक्रयौ६। कन्यादानं७ गुणोत्कर्षः८" काशी० दर्शितानि नवत्वात्तथा। अक्षयदानपात्राणि। "पात्रमित्रविनीतेषु दीनानाथोपकारिषु। पितृमातृगुरुष्वेतन्नवकं दत्तमक्षयम्" काशी० उक्तानि नवत्वात्तथा। निष्फलदानपात्राणि "निष्फलं नवकं स्पष्टं चाटचारणतस्करे। कुवैद्ये कितवे धूर्त्ते शठे मल्ले च बन्दिनि" काशी० उक्तानि नवत्वात्तथा। अदेयवस्तूनि "आपत्स्वपि न देयानि नव वस्तूनि सर्वदा। अन्वये सति सर्वस्वं दाराश्च शरणागताः। न्यासाधी कुलवृत्तिश्च निक्षेपः स्त्रीधनं सुतः" काशी० उक्तानि नवत्वात्तथा। साधारणकर्म "सत्यं शौचमहिंसा च क्षान्तिर्दानं दया दमः। अस्तेयमिन्द्रियाक्षोभः कर्म्म साधारणं नवम्" काशी० उक्तानि नवत्वात् तथा। द्रव्यं क्षितिजलतेजोवाय्वाकाशकालदिग्मनआत्मरूपं नवत्वात् तथा। तमसोद्रव्यत्वमते दशत्वबोधकमिति भेदः। स्थायिभावः "रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा। जुगुप्सा विस्मयश्चेत्यमष्टौ प्रोक्ताः शमोऽपि च" सा०द०उक्तरत्यादीनां नवत्वात्तथा।

१० दशत्वबोधकाः। काव०व० उक्ताः। इन्द्राङ्गुलीनां, दशभुजशम्भुबाहूनां, दशमुखरावणमौलीनां, मीनकूर्म्मवराहनृसिंहवामनपरशुरामदाशरथिबलभद्रबुद्धकल्किरूपाणां कृष्णावताराणाम्, पूर्व्वाग्नेयीदक्षिणनैर्ऋतीपश्चिमावायव्योत्तरैशान्यूर्द्ध्वाधोरूपाणां दिशां,गविश्वेषां देवानां गणदेवताभेदानां, क्रतुदक्षवसुसत्यकामकालध्वनिरोचकपुरूरवोमाद्रवोरूपाणाम्, दशाश्वरथचन्द्राश्वानाञ्च दशत्वात्तथा शा०ति०। शक्तितत्त्वानि "निवृत्त्याद्याः कलाः पञ्च ततो विन्दुकला पुनः। नादः शक्तिः सदापूर्वः शिवश्च प्रकृतेर्विदुः" इत्युक्तनिवृत्त्यादिरूपाणि दशत्वात्, तथा। नाडीनाम् इडापिङ्गलासुषुम्णासहितानाम् "गान्धारीहस्तिजिह्वाख्या सप्तमालम्बुषा मता। यशस्विनी शङ्खिनी च कुहूः सु:

सप्त नाडिकाः” इत्युक्तानां दशत्वात् तथा। भा० व०। पुरुषस्य वागादीनामधिदैवमधिभूतं स्थितानां विषयसर्पण वत्मीत्मकादीनां दशधातृतया “ता वा एता दशैव भूतमात्रा अधियज्ञं प्रज्ञामात्रा अधिभूतमिति” श्रुतेस्तथात्वम्। गर्भमासानाम्, उपनिषद्भेदेन उपदेशकमहावाक्यानाम् “ब्रह्माहमस्मीति” एवमादीनां तद्विनेयानां तद्विक्षेपकाणाञ्च दशत्वात्तथा।

महाविद्या “काली तारा महाविद्या षोडशी भुवनेश्वरी। भैरवी छिन्नमस्ता च विद्या धूमावती तथा। बगला सिद्धविद्या च मातङ्गी कमलात्मिका। एता दश महाविद्याः सिद्धविद्याः प्रकीर्त्तिताः” इत्युक्तकाल्यादीनां दशत्वात् तथा। ब्राह्मणः सारस्वतकान्यकुब्जगौडमैथिलोत्कलद्राविडमहाराष्ट्रतैलङ्गगुर्जरनागररूपतया दशत्वात्तथात्वम्। पापानि “अदत्तानामुपादानं हिंसा चैवाविधानतः। परदारोपसेवा च कायिकं त्रिविधं स्मृतम्। पारुष्यमनृतं चैव पैशुन्यं चापि सर्व्वशः। असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम्। परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम्। वितथाभिनिवेशश्च त्रिविधं कर्म्म मानसम्। एतानि दश पापानि” इत्युक्तानां दशत्वात्तथा योगाङ्गरूपो यमः “अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यं क्षमार्जवम्। दया धृतिर्मिताहारः शौचं चेति यमा दश” इत्युक्ताहिंसादीनां दशत्वात्तथा। नियमः “तपः सन्तोषआस्तिक्यं दानं देवस्य पूजनम्। सिद्धान्तश्रवणं चैव ह्रीर्मतिश्च जपोहुतम्। दशैते नियमाः प्रोक्ताः” शा०ति० उक्ततपआदीनां दशत्वात् तथा। रूपककाव्यम् “नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः। ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश” इत्युक्तनाटकादीनां दशत्वात्तथा लास्याङ्गम् “गेयं पदं स्थितपाठ्यमासीनं पुष्पगण्डिका। प्रच्छेदकान्त्रिमूढं च सैन्धवाख्यं द्विगूढकम्। उत्तमोत्तमकं चान्यदुक्तप्रत्युक्तमेव च। लास्ये दशविधं ह्येतदङ्गमुक्तं मनीषिभिः” इत्युक्तगेयादीनां दशत्वात्तथा। धर्म्मलक्षणम् “धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः। धीर्विद्या सत्यमक्रोधो दशकं धर्म्मलक्षणम्” इत्युक्तधृत्यादीनां दशत्वात् तथा। पञ्चमूलद्वयम् “उभाभ्यां पञ्चमूलाभ्यां दशमूलमुदाहृतम्” इत्युक्तानां दशत्वात्तथा। पञ्चमूले च “श्रीफलः सर्व्वतोभद्रा पाटला गणिकारिका। शोनाकः पञ्चभिश्चैतैः पञ्चमूलमुदाहृतम्। शालपर्णी पृश्निपर्णी बृहती कण्टकारिका। गोक्षुरः पञ्चभिश्चैतैः कनिष्ठं पञ्चमूलकम्” भा० प्र० परिभाषिते। तेन प्रत्येकमूलशब्दः पञ्चार्थकत्वात् पञ्चत्वस्य बोधक इति भेदः। उपनिषद् “ईशाकेनकठप्रश्नमुण्डमाण्डूक्यतित्तिरिः। ऐतरेयं च छान्दोग्यं बृहदारण्यकं दश” इत्युक्तेशादीनां प्रधानोपनिषदां दशत्वात्तथा। मन्त्रसंस्कारः तन्त्रोक्तदशविधतया दशविधत्वात्तथा।

न्यायावयवः केषांचिन्मते जिज्ञासासंशयशक्यप्राप्तिप्रयोजनसंशयव्युदाससहितानां प्रतिज्ञाहेतूदाहरणोपनयनिगमानां दशत्वात्तथा। मघा राशिचक्रे तस्या दशमत्वात्तथा तदभेदात् तदधिपपितृशब्दोऽपि तथा। पङ्क्तिः दशाक्षरपादत्वात्तथा दशरथ इत्यर्थे पङ्क्तिरथः इत्यादिः। बौद्धबलम् “दानं शीलं क्षमा वीर्य्यं ध्यानं प्रज्ञा बलानि च। उपायः प्रणिधिर्ज्ञानं दश बुद्धबलानि वै” इत्युक्तदानादीनां दशत्वात्तथा। वह्निकला “धूम्रार्चिरुष्मा ज्वलिनी ज्वालिनी विस्फुलिङ्गिनी। सुश्रीः सुरूपा कपिला हव्यकव्यवहे अपि” इत्युक्तधूम्रार्चिरादीनां दशत्वात्तथा। योगभङ्गः “तिथ्यङ्कवेदैकदशोनविंशभैकादशाष्टादशविंशसंख्याः। इष्टोडुना सूर्य्ययुतोडुयोगाद्योगा अमूषेत् दश योगभङ्गाः” ज्यो० उक्तयोगजातपञ्चदशाद्यङ्कानां दशत्वात्तथा। विप्राशौचदिनम् “शुध्येद्विप्रो दशाहेन” मनूक्तेः विप्राशौचस्य दशदिनव्यापित्वात्तथा। अशुद्धिजसंस्कारः गर्भाधानपुंसवनसीमन्तोन्नयनजातकर्म्मनामकरणनिष्क्रामणान्नप्राशनचूडोपनयनविवाहरूपतया दशत्वात्तथा। बृहत्संस्कारस्तु अष्टचत्वारिंशच्छब्दे उक्तचत्वारिंशत्त्वावबोधक इति भेदः। महापुराणलक्षणम् “सर्गोऽस्याथ विसर्गश्च वृत्तीरक्षान्तराणि च। वंशोवंशानुचरितं संस्था हेतुरपाश्रयः। दशभिर्लक्षणैर्युक्तं पुराणं तद्विदोविदुः। केचित् पञ्चविधं चक्षुर्महदल्पव्यवस्थया” भाग० १२,७। महामोहः दिव्यादिव्यशब्दादीनां तद्विषयाणां दशत्वात् तथा। “दशविधो महामोहः” सा०का०।

देहस्थवायुः प्राणादिपञ्चकसहितनागकूर्म्मधनञ्जयकृकलदेवदत्ताख्यानाम् देहस्थानां दशत्वात्तथा। वह्निः “भ्राजकोरञ्जकश्चैव क्लेदकः स्नेहकस्तथा। धारकोबन्धकश्चैव द्रावकाख्यश्च सप्तमः। व्यापकः पावकश्चैव श्लेष्मकः दशमःस्मृतः” इति पदार्थादर्शोक्तानाम् देहस्थाग्नीनां “तेजकोदीपकश्चैव शिष्टमन्मथोमथाः। आवसथ्याहवनीयौ दक्षिणाग्निस्तथैव च। अन्वाहार्य्यो गार्हपत्य इत्येते दश वह्नयः” इति तन्त्रोक्तानां बाह्यवह्नीनां वा दशत्वात्त-

था। दिक्पालवाहनम् ऐरावतच्छागमहिषसिंहमकरहरिणाश्ववृषभहंसपद्मरूपम् दशत्वात् तथा। मतान्तरे सोमस्थाने कुवेराधिपतित्वे तस्य नरवाहनत्वमिति भेदः। दिक्पालास्त्रम् वज्रशक्तिदण्डखड्गपाशाङ्कुशगदात्रिशूलचक्रपद्मरूपम् दशत्वात् तथा। दुर्गाभुजःतस्या दशभुजत्वात् तथा। सामान्यगुणः संख्यापरिमितिपृथक्त्वसंयोगविभागपरत्वापरत्वनैमित्तिकद्रवगुरुत्ववेगरूपो दशत्वात् तथा। तेषाञ्च अनेकद्रव्यगुणत्वात् सामान्यत्वम्। अमूर्त्तगुणः "धर्माधर्मौ भावना च शब्दो बुद्ध्यादयोऽपि च। एतेऽमूर्त्तगुणाः सर्वे" इत्युक्तधर्मादीनां दशत्वात् तथा। बुद्ध्यादयश्च षट् बुद्धिसुखदुःखेच्छाद्वेषयत्नरूपा इति दशत्वम्। मूर्त्तगुणः 'रूपं रसःस्पर्शगन्धौ परत्वमपरत्वकम्। द्रवो गुरुत्वं स्नेहश्च वेगो मूर्त्तगुणा अमी" इत्युक्तरूपादीनां दशत्वात् तथा।

एकादशबोधकाः कवि०ल० उक्ताः रुद्राणाम् "अजैकपादहिर्बुध्नोविरूपाक्षश्च रैवतः। हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः। रुद्रा एकादश प्रोक्ता जयन्तश्चापराजितः" इत्युक्ताजादिकानामेकादशत्वात् तथा। दुर्य्योधनसेनानामेकादशाक्षौहिणीमितत्वात् तथा।

भा०व० उक्ताः। पशुयागे स्तोमभेदानां, तत्तत्यूपानां चैकादशत्वात्तथा मनसासहितज्ञानकर्मेन्द्रियाणां तद्ग्राह्यविषयाणाञ्च एकादशत्वात् तथा।

इन्द्रियघातः "बाधिर्य्यं कुण्ठिताऽन्धत्वं जडताऽजिघ्रता तथा। मूकता कौण्यपङ्गुत्वक्लैवोदावर्त्तमन्दताः" इत्युक्तबाधिर्य्यादीनामेकादशत्वात्तथा। "एकादशेन्द्रियबधाः" सां०का०। पूर्वफाल्गुनी तस्याः नक्षत्रचक्रे एकादशत्वात् तदधिपोभगश्च तथा। तेजोगुणः रूपस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्ववेगनैमित्तिकद्रवरूपतया एकादशत्वात् तथा। कारणोद्भवगुणः अपाकजरूपरसगन्धस्पर्शापाकजद्रवस्नेहवेगगुरुत्वैकपृथक्त्वपरिमाणस्थितिस्थापकसंस्काररूपत्वात् एकादशत्वबोधकः। अव्याप्यवृत्तिगुणः बुद्धिसुखदुःखेच्छाद्वेषयत्नाऽदृष्टभावनाशब्दसंयोगविभागरूपतया एकादशत्वात् तथा।

द्वादशबोधकाः कवि०ल० उक्ताः "धाता मित्रोऽर्य्यमा रुद्रो वरुणः सूर्य्य एव च। भगो विवस्वान् पूषा च सविता दशमः स्मृतः। एकादशस्तथा त्वष्टा विष्णुर्द्वादश उच्यते" विष्णुधं० उक्तधात्रादीनां चान्द्रचैत्रवैशाखज्यैष्ठाषाढ़श्रावणभाद्राश्विनकार्त्तिकमार्गशीर्षपौषमाघफाल्गुनरूपाणां मासानां, मेषवृषमिथुनकर्कटसिंहकन्यातुलावृश्चिकधनुर्मकरकुम्भमीनरूपाणां राशीनां, तेषु सूर्य्यादिसंक्रान्तीनाञ्च द्वादशत्वात् तथा। कार्त्तिकबाहूनां, तन्नेत्राणां शारीफलककोष्ठानाम् अरिषड्के दर्शितराजमण्डलस्य च द्वादशत्वात् तथा शा०ति०। आदित्यानां विष्णुधर्ममूर्त्तीनाञ्च तथात्वम्। तत्रैव १५ प० "द्वादशादित्यसहितामूर्त्तीर्द्वादश विन्यसेत्। केशवाद्याः क्रमाद्देहे वक्ष्यमाणविधानतः। ललाटे केशवं १धात्रा, कुक्षौ नारायणं २पुनः। अर्य्यम्णा हृदि मित्रेण३माधवं ३कण्ठदेशतः। वरुणेन४ च गोविन्दं४, पुनर्दक्षिणपार्श्वके। अंशुना५ विष्णु५ मंसस्थं भगेन६ मधुसूदनम्६। गण्डे विवस्वता८ युक्तं त्रिविक्रम७ मनन्तरम्। वामपार्श्वस्थमिन्द्रेण८ वामनाख्य८ मथांसके। पूष्णा९ श्रीधरनामानं९ गले पर्जन्य१० संयुतम्। हृषीकेशाह्वयं १० पृष्ठे पद्मनाभं११ ततःपरम्। त्वष्ट्रा११ दामोदरं१२ पश्चात् विष्णुना१२ ककुदि न्यसेत्१२" इत्युक्तानां द्वादशत्वात् तथा। भा०व०। जगती तस्याः द्वादशाक्षरपादत्वात्तथा। प्राकृतयज्ञसाधनाहः तस्य द्वादशाहसाध्यत्वात् तथा।

नाटकीयमुखाङ्गम् "उपक्षेपः परिकरः परिन्यासो विलोभनम्। युक्तिः प्राप्तिः समाधानं विधानं परिभावना। उद्भेदः कारणं भेद एतान्यङ्गानि वै मुखे" सा०द० उक्तोपक्षेपादिरूपतया तथा। बौद्धमतसिद्धमायतनम् 'अर्थानुपार्ज्य बहुशो द्वादशायतनानि वै। परितः पूजनीयानि किमन्यैरिह पूजितैः। ज्ञानेन्द्रियाणि पञ्चैव तथा कर्मेन्द्रियाणि च। मनोबुद्धिरिति प्रोक्तं द्वादशायतनं बुधैः" इत्युक्तायतनानां द्वादशत्वात् तथा। उत्तरफाल्गुनी राशिचक्रे तस्या द्वादशत्वात् अभेदोपचारात् तदधिपार्य्यमापि तथा। तुषितः "प्राणापानसमानाश्च उदानोव्यान एव च। चक्षुः श्रोत्ररसाघ्राणस्पर्शोबुद्धिर्मनस्तथा। द्वादशैते च तुषिता देवाः स्वायम्भुवेऽन्तरे" इत्युक्तप्राणादिनामकगणदेवात्मकत्वात्तथा। जटाधरमते 'षट्त्रिंशत्तुषितामताः"इत्युक्तेः षट्त्रिंशत्त्वस्येति भेदः। क्षत्रियाशौचदिनम् "द्वादशाहेन भूमिपः" इति मनूक्तेस्तस्याशौचस्य द्वादशाहसमाप्यत्वात्तथा। साध्यः "मनोमन्ता तथा प्राणो नरोऽपानश्च वीर्य्यवान्। विनिर्भयोनयश्चैव दंशो नारायणो वृषः। प्रभुश्चेति समाख्याताः साध्याः द्वादश पौर्विकाः" इत्युक्तमनादिगणदेवात्मकः द्वादशत्वात्तथा। सूर्य्यकला 'तपिनी तापिनी धूम्रा मरीचि-

ज्वालिनी रुचिः। सुषुम्णा भोगदा विश्वा बोधिनी धारिणी क्षमा" शा०ति० उक्ततपिन्यादीनां द्वादशत्वात् तथा मद्यम् "पानसं द्राक्षमाधूकं खार्ज्जूरं तालमैक्षवम् माक्षिकं टाङ्कमाध्वीकमैरेयं नारिकेलजम्। समानानि विजानीयान्मद्यान्येकादशैव तु। द्वादशन्तु सुरामद्यं सर्वेषामधमं स्मृतम्"। पुलस्त्योक्तपानसादीनां द्वादशत्वात्तथा

१३ त्रयोदशसंख्याबोधकाः। कवि०ल०उक्ताः ताम्बूलगुणः ताम्बूलशब्दे वक्ष्यमाणत्रयोदशविधत्वात्तथा। भा० व०। महोद्वीपः ऊर्द्धलोकषट्काधोलोकसप्तकरूपत्रयोदशद्वीपतुल्ययोगात्तथा। अतिच्छन्दः गायत्र्यादिवैदिकच्छन्दःसप्तकातिक्रान्तातिजगतीच्छन्दोरूपम् त्रयोदशाक्षरपादतया तथा। प्रतिमुखाङ्गं "विलासः परिसर्पश्च विधूतं तापनं तथा। नर्म्म नर्म्मद्युतिश्चैव तथा प्रशमनं पुनः। विरोधश्च प्रतिमुखे तथा स्यात् पर्य्युपासनम्। पुष्पं वज्रमुपन्यासो वर्णसंहार इत्यपि" सा०द० उक्तविलासादीनां तथात्वात्तथा। गर्भाङ्गम् "अभूताहरणं मार्गो रूपोदाहरणे क्रमः। संग्रहश्चानुमानञ्च प्रार्थना क्षिप्तिरेव च। त्रोटकाधिबलोद्वेगा गर्भे स्युर्विद्रवस्तथा" तत्रोक्ताभूताहरणादीनां तथासंख्यत्वात्तथा। विमर्षाङ्गम् "अपवादोऽथ संफेटो व्यवसायो द्रवः स्मृतिः। शक्तिः प्रसङ्गः खेदश्च प्रतिषेधो विरोधनम्। प्ररोचना विमर्षे स्यादादानं छादनं तथा" सा० द० उक्तापवादादीनां त्रयोदशत्वात्तथा। हस्तनक्षत्रं तस्य राशिचक्रे त्रयोदशत्वात्तथा तदभेदात् तदधिपदिनकृदपि तथा। करणं "करणं त्रयोदशविधम्" सा०का० उक्तज्ञानकर्म्मेन्द्रियदशकमनोबुद्ध्यहङ्काररूपं त्रयोदशत्वात्तथा।

चतुर्द्दशसंख्याबोधकाः कवि०ल० उक्ताः। विद्या "अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः। धर्म्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्द्दश" इत्युक्ताङ्गविद्यादिरूपा" मनुः "स्वायम्भुवो मनुरभूत् प्रथमस्ततोऽसौ स्वारोचिषोत्तमजतामसरैवताख्याः। षष्ठस्तु चाक्षुष इति प्रथितः पृथिव्यां वैवस्वतस्तदनु सम्प्रति सप्तमोऽयम्" सि०शि०उक्तानां "सावर्णिर्दक्षसावर्णिर्ब्रह्मसावर्णिकस्तथा। धर्म्मसावर्णिरुद्रसावर्णी रौच्यश्च भौत्यकः" पुराणोक्तानां च चतुर्द्दशत्वात्तथा। इन्द्रः इन्द्रशब्दे मन्वन्तरभेदे उक्तनामयुक्तः, भुवनम् भूरादिसप्तकातलादिसप्तकरूपं ध्रुवतारकयोगताराश्च चतुर्द्दशत्वात् तथा। एवं यममूर्त्तिः यमधर्म्मराजमृत्य्वन्तकवैवस्वतकालसर्वभूतक्षयौडुम्बरदध्ननीलपरमेष्ठिवृकोदरचित्र-चित्रगुप्तात्मिका चतुर्द्दशत्वात्तथा। क्षितिगुणः रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्ववेगगुरुत्वद्रवत्वात्मकः, जलगुणः गन्धहीनः स्नेहसहितक्षितिगुणात्मकः, आत्मगुणश्च बुद्धिसुखदुःखेच्छाद्वेषयत्नसंख्यापरिमाणपृथक्त्वसंयोगविभागभावनाधर्म्माधर्म्मात्मकः चतुर्द्दशत्वात्तथा। चित्रा तस्या राशिचक्रे चतुर्द्दशत्वात्तथा तदभेदात्तदधिपत्वष्टापि तथा। शक्करी तस्याश्चतुर्द्दशाक्षरपादकत्वात् तथा। श्रीविद्यायन्त्रबाह्यकोणम् तन्त्रे तेषां चतुर्द्दशत्वोक्तेस्तथा। निर्वहणाङ्गम्। "सन्धिर्विबोधो ग्रथनं निर्णयः परिभाषणम्। कृतिः प्रसादआनन्दः समयोऽप्युपगूहनम्। भाषणं पूर्ववाक्यञ्च काव्यसंहार एव च। प्रशस्तिरिति संहारे उक्तान्यङ्गानि नामतः" सा०द० उक्तसन्ध्यादीनां चतुर्द्दशत्वात्तथा।

पञ्चदशसंख्याबोधकः विशेषव्यवहार्य्या चन्द्रकलाक्रियात्मिका तिथिः उभयपक्षीयप्रतिपदादिरूपा पञ्चदशत्वात्तथा। चन्द्रस्यामाकलायाः सामान्यतिथित्वेऽपि तस्या विशेषतो व्यवहाराभावात् न पञ्चदशत्वव्याघातः। स्वातिनक्षत्रं तस्यर्क्षचक्रे पञ्चदशत्वात् तदभेदात् तदधिपपवनोऽपि तथा अतिशक्करी तस्याः पञ्चदशाक्षरपादकत्वात् तथा। वैश्याशौचाहः "वैश्यः पञ्चदशाहेन" मनूक्तेस्तस्याशौचस्य पञ्चदशाहव्यापकत्वात्तथा। पक्षमानं तस्य पञ्चदशतिथिरूपत्वात् तथा। कालीयन्त्रकोणं "त्रिपञ्चारे पीठे" इत्युक्तेस्तेषां पञ्चदशत्वात्तथा।

षोडशसंख्याबोधकाः इन्दुकला "अमृता मानदा पूषा तुष्टिः पुष्टीरतिर्धृतिः। शशिनश्चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरङ्गदा। पूर्णा पूर्णामृता कामदायिन्यः स्वरजाः कलाः" शा०ति०। उक्तामृतादिरूपा, कलाशब्दे वक्ष्यमाणा दिगादिरूपा ब्रह्मकला च षोडशत्वात् तथा। स्वरवर्णः तन्त्रमते अकारादिविसर्गान्तकः षोडशत्वात् तथा। शिक्षामते "स्वरा विंशतिरेकश्चेति" इत्युक्तेः एकविंशतिस्तस्येति भेदः। अष्टिः षोडशाक्षरपादत्वात् तथा। विशाखा राशिचक्रे तस्याः षोडशत्वात् तथा। तदभेदात् तदधिपौ इन्द्राग्नी अपि तथा। तत्त्वज्ञानोपयोगितया न्यायव्यपदार्थः "प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानरूपः गौतमोक्तः षोडशत्वात्तथा। प्रेतश्राद्धम् आद्यद्वादशमासिकषाण्मासिकद्वयसपिण्डीकरणरूपं षोडशत्वात्तथा। नृप षोडशराजिके प्रथितमरुत्तादिरूपः षोड-

त्वात्तथा। ते च नृपाः "मरुत्तः, १सुहोत्रः २ पौरवोऽङ्गः ३ श्रौशीनरशिविः ४ दाशरथिरामः ५ भगीरथः ६ ऐलविल-दिलीपः ७, यौवनाश्वोमान्धाता ८, नाहुषययातिः ९ नाभागोऽम्बरीषः १० शशविन्दुः ११, गयः १२ साङ्कृतिः रन्तिदेवः १३, दौष्मन्तिर्भरतः १४, वैन्यः १५, जामदग्न्यो-रामः १६ इत्येते भा० द्रो० ५५, ७० अ० दर्शिताः। तत्त्वान्तरानुपादानलक्षणः सांख्योक्तः विकारः एकादशे-न्द्रियपञ्चमहाभूतात्मकत्वेन षोड़शत्वात्तथा। "षोड़शकस्तु विकारः" सां० का०।

१७ सप्तदशसंख्याबोधकाः। अनुराधा राशिचक्रे तस्याः सप्तदश-त्वात् तथा तद्भेदात्तदधिपमित्रोऽपि तथा। अत्यष्टिः सप्त-दशाक्षरपादत्वात् तथा। लिङ्गदेहावयवः "पञ्चप्राणमनोबुद्धि-दशेन्द्रियसमन्वितम्। अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोग-साधनम्" इत्युक्तानां सप्तदशत्वात् तथेति वेदान्तिनः। सांख्यमते तु पञ्चप्राणस्थाने पञ्चतन्मात्राणीति भेदः "स सप्तदशकेनापि युज्यते नात्र संशयः"। "सप्तदशैकं लिङ्गम्" सां० सू०।

१८ अष्टादशसंख्याबोधकाः कवि० क० सप्त द्वीपाः महाद्वीपा जम्बुप्रभृतयः एकादश उपद्वीपा इत्यष्टादशत्वात् तथा। "अष्टादशद्वीपनिखातयूपः" रघुः "नवद्वयद्वीपपृथग्-जयश्रियामिति" नैष०। विद्या धनुर्वेदायुर्वेदगान्धर्वार्थ शास्त्रसहितचतुर्दशविद्यारूपा अष्टादशत्वात् तथा। महापुराणम् उपपुराणशब्दे दर्शितब्राह्मादिरूपम् अष्टादशत्वात् तथा। स्मृतिः अष्टादशस्मृतिकारिशब्दे-दर्शितविष्णुप्रभृतिप्रणीता अष्टादशत्वात् तथा। धान्यम् अष्टादशधान्यशब्दे दर्शितयवादिरूपम् तथा। महा-लक्ष्मीभुजाः तस्या अष्टादशभुजत्वात्तथा। ज्येष्ठा राशि-चक्रे तस्या अष्टादशत्वात्तथा तद्भेदात् तदधिप इन्द्रोऽपि तथा। धृतिः तस्या अष्टादशाक्षरपादत्वात्तथा। विवादः अष्टादशविवादपदशब्दे दर्शितऋणादानादीनामष्टादश-त्वात्तथा। कुण्डसंस्काराः "अष्टादश तु संस्काराः कुण्डानां तन्त्रनोदिताः। वीक्षणं मूलमन्त्रेण ह्यस्त्रेण प्रोक्षणं मतम्। तेनैव ताड़नं दर्भैर्वर्मणाभ्युक्षणं स्मृतम्। अस्त्रेण खननोद्धारौ तन्मन्त्रेण प्रपूरणम्। समीकरण-मस्त्रेण सेचनं वर्मणा मतम्। कुट्टनं हेतिमन्त्रेण वर्म-मन्त्रेण मार्जनम्। विलेपनं कलारूपं कल्पनं तदनन्त-रम्। त्रिसूत्रीकरणं पश्चाद्हृदयेनार्चनं मतम्। अस्त्रेण हतशीकरणं हृदा स्रेवे कुशैः शुभैः। चतुष्पथं ततुतेन तनुयाचेत्रपाटनम्" शा० ति० उक्तानाम् अष्टादशत्वात्तथा। भाषा संस्कृता शौरसेनी महाराष्ट्री मागधी अर्द्धमागधी आवन्तिका दाक्षिणात्या शाकरी वाह्लिकी द्राविडी आभीरी चाण्डाली शावरी पैशाची प्राकृता चेति सा० द० उक्तानां षोडशानां राक्षसीपाश्चात्त्यासहितानामष्टादश-त्वात् तथा "अष्टादशभाषावारविलासिनी" सा० द०। व्यसनम् "दश कामसमुत्थानि तथाष्टौ क्रोधजानि च। व्यसनानि दुरन्तानि प्रयत्नेन विवर्जयेत्। मृगयाऽक्षो-दिवास्वप्नः परिवादः स्त्रियोमदः। तौर्य्यत्रिकं वृथा-ट्या च कामजोदशकोगणः। पैशुन्यं साहसं द्रोह ईर्ष्या-ऽसूयाऽर्थदूषणम्। वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः" मनूक्तमृगयादीनामष्टादशत्वात्तथा। भारत पर्व्व तेषामष्टादशत्वात्तथा।

१९ ऊनविंशतिबोधकाः। धर्म्मशास्त्रकारकः "मन्वत्रिविष्णुहा-रीतयाज्ञवल्क्योशनोऽङ्गिराः। यमापस्तम्बसंवर्त्ताः का-त्यायनबृहस्पती। पराशरव्यासशङ्खलिखिता दक्षगौत-मौ। शातातपोवसिष्ठश्च धर्म्मशास्त्रप्रयोजकाः" इत्युक्त मन्वादीनामूनविंशतित्वात्तथा। मूलनक्षत्रम् तस्य राशिचक्रे ऊनविंशतितमत्वात्तथा। तद्भेदात् तदधिप-निर्ऋतिरपि तथा। अतिधृतिस्तस्या ऊनविंशत्यक्षरपादत्वा-त्तथा। अभिजिन्नामम् तस्याः उत्तराषाढापञ्चदशदण्ड-श्रवणचतुर्दण्डरूपतयोनविंशतिदण्डात्मकत्वात्तथा।

२० विंशतिबोधकः रावणभुजानां, नखानाम्, अङ्गुलीनां च हस्तपादयोस्तावन्मितत्वात् तथा। पूर्व्वाषाढा राशिचक्रे तस्या विंशत्वात्तथा। तद्भेदात् तदधिपजलमपि तथा। छन्दोरूपा कृतिस्तस्याः विंशत्यक्षरपादत्वात्। शनेस्तुला-यास्त्रंशः मेषे नीचांशश्च तथा। तत्र तस्य विंशांशे एव परमोच्चनीचयोः ज्यो० उक्तत्वात्। ताजकोक्तपञ्चोच्चबलम् "त्रिंशत्खभे विंशतिरञ्चभे खे" नी० क० उक्ते-स्तस्य विंशतितमत्वात्तथा।

२१ एकविंशतिसंख्याबोधकाः। परशुरामक्षितिजयस्तस्य एकविं-शतिमितत्वात् तथा। उत्तराषाढा तस्या भचक्रे एक-विंशत्वात्तथा। तद्भेदात् तदधिपविश्वोऽपि तथा। छन्दोरूपा प्रकृतिस्तस्या एकविंशत्यक्षरपादत्वात्तथा। मूर्च्छना "मूर्च्छनाश्चैकविंशतिः" भरतोक्तेः सप्तस्वराणाम् आरोहावरोहक्रमरूपैस्त्रित्वात् एकविंशतिरूपतया तथा। स्वरवर्णः "स्वरा विंशतिरेकश्चेति" शिक्षोक्तेस्तन्मते स्वराणां तत्संख्यत्वात्तथा।

२२ द्वाविंशतिसंख्याबोधकाः । श्रवणा तस्या नक्षत्रचक्रे द्वाविंश-त्वात्तथा । तदभेदात् तदधिपहरिरपि तथा । आकृतिः तस्या द्वाविंशत्यक्षरपादत्वात्तथा । निग्रहस्थानम् "प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासो हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभाविक्षेपो मतानुज्ञा पर्य्यनुयोज्योपेक्षणम् निरनुयोज्यानुयोगोऽपसिद्धान्तोहेत्वाभासाश्च" गौ० सू० उक्तानां प्रतिज्ञाहान्यादीनां द्वाविंशतित्वात् तथा ।

२३ त्रयोविंशतिसंख्याबोधकाः । धनिष्ठा तस्या नक्षत्रचक्रे त्रयोविंशत्वात्तथा । तदभेदात् तदधिपवसुरपि तथा । विकृतिः तस्याः त्रयोविंशत्यक्षरपादत्वात् तथा ।

२४ चतुर्विंशतिसंख्याबोधकाः । तत्त्वम् प्रधानमहदहङ्कारशब्दस्पर्शरूपरसगन्धतन्मात्रैकादशेन्द्रियपञ्चस्थूलभूतरूपं चतुर्विंशतित्वात् तथा । पुरुषसहितप्रधानादिपरत्वे पञ्चविंशतित्वस्य पुरुषेश्वरयुततत्परत्वे षड्विंशतित्वस्य बोधकमिति भेदः । गायत्र्यक्षरम् तस्या षडक्षरपादत्वाच्चतुष्पाद्यां तथासंख्यायोगात् तथात्वम् । जिनः ऋषभाजितसम्भवाभिनन्दनसुमतिपद्मप्रभसुपार्श्वचन्द्रप्रभसुविधिशीतलश्रेयांशवासुपूज्यविमलानन्ततीर्थकृद्धर्मशान्तिकुन्थ्वरमल्लिमुनिसुव्रतनमिनेमिपार्श्ववीराख्यकश्चतुर्विंशतित्वात् तथा । ज्या क्रान्तिश्च सि० शि० चतुर्विंशतिमितत्वोक्तेस्तथा । शतभिषा तस्या राशिचक्रे चतुर्विंशत्वात्तथा तदभेदात् तदधिपवरुणोऽपि । खगततारासमुदायपरत्वे शतत्वस्येति भेदः । संकृतिस्तस्याश्चतुर्विंशत्यक्षरपादत्वात्तथात्वम् । जातिः न्यायोक्तदोषभेदरूपा प्रतिषेधहेतुः चतुर्विंशतित्वात् तथा । सा च गौ० सू० दर्शिता यथा "साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्य्यसमाः" इति । वैशेषिकोक्तः द्रव्याश्रितः गुणः रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषयत्नगुरुत्वद्रवत्वस्नेहसंस्कारपुण्यापुण्यशब्दात्मकत्वात् चतुर्विंशतित्वस्य बोधकः । अन्यार्थपरत्वे त्रित्वादीनां बोधक इत्युक्तं प्राक् । विष्णुमूर्त्तिः शङ्खचक्रगदापद्मानां दक्षवामहस्तेषु विन्यासविशेषेण जातचतुर्विंशतिभेदा तथा । तस्य मूर्त्तभेदाध्यानशब्दे वक्ष्यते ।

२५ पञ्चविंशतिसंख्याबोधकाः "मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त । षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः" सां० का० उक्तपुरुषसहितप्रधानादिपञ्चविंशतितत्त्वानामङ्गीकारात् तथा । "पञ्च पञ्चजनाः" इति श्रुतिरेव तत्र मानतया तैरङ्गीकृता । शा० भा० तु तस्याः श्रुतेः देवपितृगन्धर्व्वासुररक्षआदीनां पञ्चप्राणादीनां पञ्चविंशतित्वपरतेत्युक्तम् । पूर्वभाद्रपदा तस्या राशिचक्रे पञ्चविंशत्वात्तथा । तदभेदात् तदधिपः अजैकपादपि तथा । उत्कृतिः तस्याः पञ्चविंशत्यक्षरपादत्वात्तथा । स्पर्शः कादिमावसानवर्णानां पञ्चविंशतित्वात् तथा । "स्पर्शानां पञ्चविंशतिः" शिक्षा ।

२६ षड्विंशतिसंख्याबोधकाः तत्त्वम् जीवेश्वरसहितप्रकृत्यादिरूपं तस्य षड्विंशत्वात्तथा । उत्तरभाद्रपदा तस्याः राशिचक्रे षड्विंशत्वात् तथा तदभेदात् तदधिपाहिबुध्नोऽपि तथा । संकृतिस्तस्याः षड्विंशत्यक्षरपादात्तथा ।

२७ सप्तविंशतिः । नक्षत्रं उडुचक्रशब्दे दर्शितराशिचक्रस्याश्विन्यादिसप्तविंशतिरूपत्वात् तथा । रेवती तस्या राशिचक्रे सप्तविंशत्वात्तथा । शुक्रस्य मीने स्वच्चं कन्यायां सुनीचं च तथा ।

२८ अष्टाविंशतिसंख्याबोधकाः साभिजिन्नक्षत्रम् तस्याष्टाविंशत्वात्तथा । सात्त्विकनार्य्यलङ्कारः "यौवने सत्त्वजास्तासामष्टाविंशतिसंख्यकाः । अलङ्कारास्तत्र भावहावहेलास्त्रयोऽङ्गजाः । शोभा कान्तिश्च दीप्तिश्च माधुर्य्यञ्च प्रगल्भता । औदार्य्यं धैर्य्यमित्येते सप्तैव स्युरयत्नजाः । लीला विलासो विच्छित्तिर्विव्वोकः किलकिञ्चितम् । मोट्टायितं कुट्टमितं विभ्रमो ललितं मदः । विकृतं तपनं मौग्ध्यं विक्षेपश्च कुतूहलम् । हसितं चकितं केलिरित्यष्टादशसंख्यकाः" सा० द० उक्तदशस्वभावजभावसहितलीलादीनामष्टानामष्टाविंशतित्वात्तथा ।

३२ द्वात्रिंशत्त्वबोधकाः दन्तः तस्य नरमुखे द्वात्रिंशत्संख्यकत्वात्तथा । भगवदपराधः अपराधशब्दे २२२ पृ० दर्शितानां यानगमनादीनां चलितशिखासमोजनादीनां वा द्वात्रिंशत्त्वात्तथा ।

३३ त्रयस्त्रिंशत्त्वबोधकः । नाट्यालङ्कारः "आशीराक्रन्दकपटाऽक्षमागर्वोद्यमाश्रयाः । उत्प्रासनं स्पृहाक्षोभपश्चात्तापोपपत्तयः । आशंसाऽध्यवसायौ च विसर्पोल्लेखसंज्ञितौ । उत्तेजनं परीवादो नीतिरर्थविशेषणम् । प्रोत्साहनञ्च साहाय्यमभिमानोऽनुवर्त्तनम् । उत्कीर्त्तनं तथा याच्ञा परीहारो निवेदनम् । प्रवर्त्तनाख्यान

युक्तिप्रहर्षासोपदेशनम्” सा० द० उक्तांशीरादीनां तत्संख्यकत्वात्तथा। व्यभिचारिभावः “निर्वेदावेगदैन्यश्रममदजडता औग्र्यमोहौ विबोधः स्वप्नापस्मारगर्वामरणमलसताऽमर्षनिद्रावहित्थाः। औत्सुक्योन्मादशङ्काः स्मृतिमतिसहिता व्याधिसंत्रासलज्जा हर्षासूयाविषादाःसधृतिचपलताग्लानिचिन्तावितर्काः” सा० द० उक्तानां तत्संख्यत्वात्तथा।

३६ षट्त्रिंशत्संख्याबोधकाः। रागिणी “रागा· षट् त्रिंशच्च भार्य्याः इति भरतोक्तेः वसन्तादिरागभार्य्याणां तत्संख्यकत्वात् तत्संख्याबोधकता। रागिणीशब्दे ताश्च वक्ष्यन्ते। नाटकलक्षणम् सा०द० “षट्त्रिंशल्लक्षणान्यत्र” इत्युपक्रम्य “भूषणाक्षरसंघातौ शोभोदाहरणं तथा। हेतुसंशयदृष्टान्तास्तुल्यतर्कः पदोच्चयः। निदर्शनाभिप्रायौ च प्राप्तिर्विचार एव च। दिष्टोपदिष्टे च गुणातिपातातिशयौ तथा। विशेषणनिरुक्ती च सिद्धिर्भ्रंशविपर्य्ययौ। दाक्षिण्यानुनयौ मालार्थापत्तिर्गर्हणा तथा। पृच्छा प्रसिद्धिः सारूप्यम् संक्षेपोगुणकीर्त्तनम्। लेशो मनोरथोऽनुक्तसिद्धिः प्रियवचस्तथा” इत्युक्तभूषणादीनां षट्त्रिंशत्त्वात्तथा।

३८ अष्टत्रिंशत्संख्याबोधकाः सोमसूर्य्याग्निकला “सोमसूर्य्याग्निभेदेन मातृकावर्णसम्भवाः अष्टत्रिंशत्कलास्तत्तत्सम्बन्धेषु व्यवस्थिताः” शा० ति० उक्तानां सोमषोडशकला सूर्य्यद्वादशकलावह्निदशकलारूपाणामष्टत्रिंशत्त्वात्तथा।

४० चत्वारिंशत्संख्याबोधकः। तानः “चत्वारिंशत्ततामताः” इति भरतोक्तेः ततशब्दवाच्यतानानां तत्संख्यत्वात्तथा।

४९ ऊनपञ्चाशत्संख्याबोधकः। अनिलः अनिलशब्दे दर्शितोनपञ्चाशद्भेदत्वात्तथा।

५० पञ्चाशत्संख्याबोधकः। मातृकालिपिः तस्याः तन्त्रमते पञ्चाशदक्षरात्मकत्वात्तथा। “पञ्चाशल्लिपिभिर्विभक्तत्वादि” शा०ति०।

५१ एकपञ्चाशद्बोधकः महापीठः महापीठशब्दे वक्ष्यमाणभेदानां महापीठविशेषाणां तत्संख्यकत्वात्तथा।

६४ संख्याबोधकाः। वर्णाः शिक्षामते “चतुःषष्टिस्त्रिषष्टिर्वा वर्णाः सम्भवतोमताः। स्वराविंशतिरेकश्च स्पर्शानां पञ्चविंशतिः। यादयश्च स्मृताह्यष्टौ चत्वारश्च यमाः स्मृताः। अनुस्वारोविसर्गश्च+कँपौ चापि पराश्रितौ। दुःस्पृष्टश्चेति विज्ञेय लृकारः प्लुतएव वा” इतिशिक्षोक्तेस्तथा। कलाः कलाशब्दे वक्ष्यमाणभेदानां तासां चतुःषष्टित्वात्तथा।

महादेवीपीठम् “मायामङ्गलनागवासमसहाजन्मीचरित्राग्रगुच्छायाच्छत्रहिरण्यहास्तिनमहेन्द्रोड्डीशचम्पापुरम्। पद्मं क्षीरकमक्षनेश्वरपटेलीचन्द्रपूः श्रीगिरिः कोल्लाकुक्कुटपूर्स्स पर्व्वतकुरुक्षेत्रैकलिङ्गार्बुदाः। काश्मीरैकाम्रकाञ्चीमलयगिरिवरेकारकृन्भूतदेवीकौ दाम्नाक्षेशजालन्धरसुरभिमणीशाद्रिकाशीप्रयागाः। त्रिस्रोतःकाककोल्लोज्जयिनिसमथुरं कोशलाकान्यकुब्जौ ड्रावेङ्काराट्टहासा विरज इह ततः कुण्डिनं राजगेहम्। नेपालं पुण्ड्रवर्द्धन मालवपारसीकामरूपकेदाराः। विन्ध्यमहामठगोश्रुतिकम्पिल्लाश्रीपीठमरुदेशाः” पदार्थादर्शोक्तानां तत्संख्यकत्वात्तथा।

१०० शतसंख्याबोधकाः पुरुषायुषम् “शतायुर्वै पुरुषः इति श्रुतेस्तथा। रावणहस्ताङ्गुलिः तस्य विंशतिबाहुत्वेन प्रत्येकं बाहौ पञ्चाङ्गुलियोगात् शतत्वेन तथात्वम्। इन्द्रयज्ञः तस्य शतयज्ञत्वेन तद्यज्ञानां शतत्वात् तथा।

१००० सहस्रबोधकाः। इन्द्रनेत्रः तस्य सहस्रनेत्रतया तन्नेत्राणां सहस्रत्वेन तथा। विराट्पुरुषचक्षुः तत्पादः तद्बाहुस्तन्मूर्द्धा च तथा। “सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्” श्रुतिः। कार्त्तवीर्य्यार्जुनबाहुः बाणासुरबाहुश्च तयोः सहस्रबाहुत्वात् तथा। अनन्तशीर्षम् तस्य सहस्रशीर्षतया तथा। गङ्गास्रोतोमुखम् सागरसङ्गमसमीपस्थाने सहस्रमुखतया तस्याः प्रवहमाणत्वात्तथात्वम्। सामवेदशाखा तद्वेदस्य सहस्रशाखत्वात् तथा।

१०००० अयुतसंख्याबोधकः रामराज्यकाल “दश वर्षसहस्राणि रामोराज्यमकारयत्” रामा० उक्तेस्तथा।

अत्रेदं बोध्यम्। शास्त्रकारैः ये ये पदार्थाः यद्यत्संख्यकतया उक्तास्तत्तच्छब्दास्तत्तत्संख्याबोधकाः। तेषु दिङ्मात्रमत्र दर्शितम् अनयैव रीत्यान्येषामपि सम्भूताद्युक्तभेदयुक्ततत्तत्पदार्थपराणां शब्दानां तत्तत्संख्यार्थकत्वं कल्पनीयम्। शब्दार्थयोरभेदाच्च कचिच्छब्दस्य तदर्थकता उक्ता कचिच्चार्थस्यैव तत्तत्संख्यायोगउक्तः तेनैव तत्तदर्थकशब्दस्य तत्तत्संख्याबोधकता उन्नेया। इयांस्तु विशेषः समुदायवर्त्तिपदार्थस्यैकदेशवृत्तित्वाभिप्रायेण बहुसंख्यान्वितपदार्थबोधकानामपि एकवचनादिप्रयोगोऽपि। यथा “रामोऽगवेदैर्जलधिस्तु मैत्रैरित्यादौ” रामजलध्योः त्रित्वचतुष्ट्वबोधकत्वेऽपि एकवचनान्तता अगवेदैरित्यादौ सप्तत्वचतुष्ट्वबोधकयोः बहुवचनान्तता। एवमन्यत्रापि। उक्तशब्दानां कचित्संख्यापरत्वम् कचित्संख्येयपरत्वम्

क्वचिच्च पूरणार्थताऽपि यथा "दिग्भिर्गुणैरष्टयमैः शरैकैर्वर्णैभसंख्यैर्नखसंमितैश्च" नी०क०दिगादिशब्दानां दशमाद्यंशपरत्वम्। एवं "युग्माग्नी कृतभूतानि षण्मुनी वसुरन्ध्रयोः" इत्यादौ युग्माग्निप्रभृतीनां तत्तत्संख्यापूरणी द्वितीयादिपरत्वम्। अत्र च ये शब्दा उक्तास्तत्पर्य्यायशब्दा अपि तत्तत्संख्याबोधकाः इति।

एकादेश पु० कर्म०। पाणिन्युक्ते उभयस्थानिप्रभवे एकस्मिन्नादेशे। एकादेशश्च यथा सुरारिरित्यत्र सुरशब्दस्य अन्त्याकारस्य अरिशब्दादिभूताकारस्य चेत्युभयोः स्थाने दीर्घभूत एक आकारः एवमन्यत्रापि। "एकादेश उदात्तेनोदात्तः" पा०।

एकादुन(न्न)विंशति स्त्री एकेन न विंशतिः। एका+न+आदुक् दस्य वा न। १एकोनविंशतिसंख्यायां, २तद्युक्ते च एवमेका(दुन)त्रिंशदादयः।

एकानंशा स्त्री एको न अंशोयस्याः असमर्थसमा०। अनेकशांत्वर्यां दुर्गायां सा च यशोदागर्भसंभूता प्रजापतेरंशजाता। तयोक्तं हरिवं०६०अ०यथा "नन्दगोपस्य भार्य्यैका वसुदेवस्य चापरा। तुल्यकालं हि गर्भिण्यौ यशोदा देवकी तथा। देवक्यजनयद्विष्णुं यशोदा तान्तु कन्यकाम्" इत्युपक्रम्य "वसुदेवस्तु संगृह्य दारकं क्षिप्रमेव च। यशोदायागृहं रात्रौ विवेश सुतवत्सलः। यशोदायास्त्वविज्ञातस्तत्र निक्षिप्य दारकम्। गृहीत्वा दारिकां तां च देवकीशयने न्यसत्। परिवर्त्तिते ताभ्यां गर्भाभ्यां भयविक्लवः। वसुदेवः कृतार्थो वै निर्जगाम निवेशनात्। उग्रसेनसुतायाथ कंसायानकदुन्दुभिः। निवेदयामास तदा कन्यां तां वरवर्णिनीम्। तच्छ्रुत्वा त्वरितः कंसोरक्षिभिः सह वेगितः। आजगाम गृहद्वारं वसुदेवस्य वीर्य्यवान्। स तत्र त्वरितं द्वारि किं जातमिति चाब्रवीत्। दीयतां शीघ्रमित्येवं वाग्भिः समभितर्ज्जयन्। ततो हाहाकृताः सर्व्वा देवकीभवने स्त्रियः। उवाच देवकी दीना वाष्पविक्लवया गिरा। दारिका पुत्त्र! जातेति कंसं समभियाचती। श्रीमन्तो मे हताःसप्त पुत्त्रगर्भास्त्वया विभो!। दारिकेयं हतैवैषा पश्यस्व यदि मन्यसे। दृष्ट्वा कंसस्तु तां कन्यामकृष्यत मुदा युतः। हतैवैषा यदा कन्या जातेत्युक्त्वा दृथामतिः। सा गर्भशयनक्लिष्टा गर्भाम्बुक्लिन्नमूर्द्धजा। कंसस्य पुरतोन्यस्ता पृथिव्यां पृथिवीसमा। पादे तां गृह्य पुरुषः समाविध्यावधूय च। उद्यच्छन्नेव सहसा शिलायां समपोथयत्। साऽवधूता शिलापृष्ठे निष्पिष्टा दिवमुत्पतत्। हित्वा गर्भतनुं सा तु सहसा मुक्तमूर्द्धजा। जगामाकाशमाविश्य दिव्यस्रगनुलेपना। कन्यैव चाभवत् सा तु दिव्या देवैरभिष्टुता। नीलपीताम्बरधरा गजकुम्भोपमस्तनी। रथविस्तीर्णजघना चन्द्रवक्त्रा चतुर्भुजा। विद्युद्विस्पष्टवर्णाभा बालार्कसदृशेक्षणा। पयोधरस्तनवती सन्ध्येव सपयोधरा। सा वै निशितमोघस्ते सर्व्वभूतगणाकुले। नृत्यन्ती हसती चैव विपरीतेन भस्वति। विहायसि गता रौद्री पपौ पानमनुत्तमम्। जहास च महाहासं कंसञ्च रुषिताऽब्रवीत्। कंस कंसात्मनाशाय यदहं घातिता त्वया। सहसा च समुत्क्षिप्य शिलायामभिपोथिता। तस्मात्तवान्तकालेऽहं कृष्यमाणस्य शत्रुणा। पाटयित्वा करैर्देहमुष्णं पास्याभि शोणितम्। एवमुक्त्वा वचो घोरं सा यथेष्टेन वर्त्मना। खं सा देवालयं देवी सगणा विचचार ह। सा कन्या ववृधे तत्र वृष्णिसद्मनि पूजिता। पुत्रवत् पाल्यमाना सा देवदेवाज्ञया तदा। विद्धि चैनामथोत्पन्नामंशाद्देवीं प्रजापतेः। एकानंशां योगकन्यां रक्षार्थं केशवस्य च। तां वै सर्व्वे सुमनसः पूजयन्ति स्म यादवाः। देवोऽपि दिव्यवपुषं कृष्णः संरक्षितो यया। तस्यां गतायां कंसस्तु तां मेने मृत्युमात्मनः"।

"सा कन्या ववृधे तत्र वृष्णिसद्मनि पूजिता। पुत्रवत् पाल्यमाना वै वसुदेवाज्ञया तदा। एकानंशा तु यामाहुरुत्पन्नां मानवाभुवि। योगकन्यां दुराधर्षाम्" इति च। वृहत्सं० मूर्त्तिलक्षणे "एकानंशा कार्य्या देवी बलदेवकृष्णयोर्मध्ये"।

एकानुदिष्ट त्रि० एकमनु दिष्टम् "सुप्सुपा" पा०। एकोद्देशेन दत्तश्राद्धे। "यावदेकानुदिष्टस्य गन्धोलेपश्च तिष्ठति। विप्रस्य विदुषोदेहे तावद्ब्रह्म न कीर्त्तयेत्" मनुः।

एकान्त त्रि०एकः अन्तः निश्चयः सीमा वा। २अत्यन्ते अतिशये "तेजःक्षमा वा नैकान्तं कालज्ञस्य महीपतेः" माघः। "शकुन्तमेकान्तमनोविनोदिनम्" नै०। क्रियाविशेषणत्वे शात्वन०। "एकान्तविध्वंसिषु मद्विधानाम्" रघु० "नात्यश्नतस्तु योगोऽस्ति नचैकान्तमनश्नतः" गीता। तद्वति ३द्रव्ये त्रि०। "एकान्तपाण्डुस्तनलम्बिहारम्" रघुः। "एकान्तशैत्यात् कदलीविशेषाः" कुमा०। एक एवान्तो यत्र। निर्जने ४रहसि। "तस्मादुष्वान्ते हर्म्यस्यान्तः शय्यैकान्ते कर्त्तव्या" ज्यो०त०। "वासे बहूनां कलहो भवेद्वार्त्ता द्वयोरपि। तस्मादेकान्तमास्थाय चिन्तयेत् नित्यसंयुतः, पुरा०। ततः तसिल्। एकान्ततस् एका-

न्ते इत्याद्यर्थे। "दृष्टे साऽपार्था चेन्नैकान्ततोऽत्यन्ततोऽभावात्" सां॰का॰। तत्र भवः ठञ्। ऐकान्तिक एकान्तभवे त्रि॰ स्त्रियां ङीप्। "ऐकान्तिको हरेर्भक्तिरुत्पातायैव कल्पते" पुरा॰। एक एवान्तः स्वभावो यस्य। एकरूपताप्राप्ते त्रि॰। "विलोक्यैकान्तभूतानि भूतान्यादौ प्रजापतिः। स्त्रियं चक्रे स्वदेहार्द्धं यया पुंसां मतिर्हृता" भाग॰ ६,१८,२२।

एकान्तत्यागवाद पु॰ वस्तुनः एकान्तता एकस्वरूपता अस्तीत्यादिसम्बन्धरूपता तस्य त्यागप्रतिपादकोवादः। अर्हद्विशेषोक्तवादभेदे। स च वादः अर्हच्छब्दे स्याद्वाद प्रकरणे ३८६ पृ॰ दर्शितः।

एकान्तदुःषमा स्त्री दुष्टा समा वर्षो दुःषमा सुषमा॰ षत्वम् एकान्तं दुःषमा २त॰। बौद्धकल्पिते कालभेदे हेमच॰। यथा "कालो द्विविधोऽवसर्पिण्युत्सर्पिणीषु भेदतः। सागरकोटिकोटीनां विंशत्या स समाप्यते। अवसर्पिण्यां षडरा उत्सर्पिण्यां त एव विपरीताः। एवं द्वादशभिररैर्विवर्त्तते कालचक्रमिदम्। तत्रैकान्तसुषमारश्चतस्रः कोटिकोटयः। सागराणां सुषमा तु तिस्रस्तत्कोटिकोटयः। सुषमदुःषमाने द्वे दुःषमसुषमा पुनः। सैका सहस्रैर्वर्षाणां द्विचत्वारिंशतोनिता। अथ दुःषमैकविंशतिरब्दसहस्राणि तावती तु स्यात्। एकान्तदुःषमापि ह्येतत्संख्याः परेऽपि विपरीताः। प्रथमारत्रये मर्त्त्यास्त्रिद्व्येकपल्यजीविताः। त्रिद्व्येकगव्यूत्युच्छ्राया स्त्रिद्व्येकदिनभोजनाः। कल्पद्रुफलसंतुष्टाश्चतुर्थे त्वरके नराः। पूर्व्वकोव्यायुषः पञ्चधनुःशतसमुच्छ्रयाः। पञ्चमे तु वर्षशतायुषः सप्तकरोच्छ्रयाः। षष्ठे पुनः षोडशाब्दायुषो हस्तसमुच्छ्रयाः एकान्तदुःखप्रचिता उत्सर्पिण्यामपीदृशाः। पश्चानुपूर्व्व्या विज्ञेया अरेषु किल षट्स्वपि"।

एकान्तर त्रि॰ एकमन्तरं व्यवधानम्। १एकव्यवधाने "एकान्तरे त्वानुलोम्यादम्बष्ठोग्रौ तथा स्मृतौ" मनुः। बहु॰। २एकान्तरवर्त्तिनि त्रि॰। "एकान्तरासु जातानां धर्म्यं विद्यादिमं विधिम्" मनुः। एकदिनव्यवधानेन भोजनरूपे ३व्रतभेदे न॰ एकदिनव्यवधानेन जायमाने ४ज्वरभेदे पु॰।

एकान्तसुषमा सुष्ठु समा वर्षः सुषमा सुषमादि॰ षत्वम् २त॰। बौद्धमतसिद्धे कालभेदे एकान्तदुःषमाशब्दे विवृतिः।

एकान्तिन् त्रि॰ एकान्तमस्त्यस्य इनि स्त्रियां ङीप्। १अतिशययुक्ते एकान्तः एकस्वरूपः उपास्यत्वेनास्त्यस्य इनि। स्त्रियां ङीप्। २भगवद्भक्तविशेषे त्रि॰। "एकान्तेनासमोविष्णुर्यस्मादेवं परायणः। तस्मादेकान्तिनः प्रोक्तास्तद्भागवतचेतसः" गरुडपु॰ १३१।

एकान्न त्रि॰ एककालमेवान्नं भक्ष्यं यत्र। १एककालिकभक्षणे एकभक्तरूपे व्रते कर्म्म॰। २एकमात्रभक्ष्ये अन्ने न॰। "ऊर्ज्जे यत्रान्नमश्नीयादेकान्नमथ वा पुनः। वृन्ताकं सूरणञ्चैव शूकशिम्बीश्च वर्जयेत्" काशी॰। "भैक्षेण वर्त्तयेन्नित्यं नैकान्नादी भवेद् व्रती" मनुः। "क्रीत्वा लब्ध्वा प्राप्य गृहमेकान्नमलवणमेकरात्रं त्रिरात्रं वा भोक्तव्यमिति" शु॰त॰ स्मृतिः। एकस्मिन् स्थाने पचनीयमन्नं यस्य। अविभक्ते भ्रात्रादौ "एकान्नवर्त्तिनाञ्चैव एकोद्दिष्टं न पार्वणम्। एकपाकेन वसतां पितृदेवद्विजार्च्चनम्। एकं भवेद्विभक्तानां तदेव स्यात् गृहे गृहे" वृह॰।

एकायन त्रि॰ एकमयनं विषयोऽवलम्बनं वा यस्य। १विषयान्तरव्यावृत्तचित्ते एकाग्रमनस्के २एकावलम्बने च। "तानि वा एतानि संकल्पैकायनानि संकल्पप्रतिष्ठितानि" छा॰उ॰। एकमयनमवलम्बनीयं यस्य। ३एकावलम्बनीये त्रि॰। "एवमेकायनं धर्ममाहुर्वेदविदोजनाः" भा॰शा॰ ७८७२ श्लो॰। एकस्यायनं गतिर्यत्र। ४एकमात्रगमनयोग्ये त्रि॰ "भ्रातरं भीमसेनन्तु विज्ञाय हनुमान् कपिः। दिवङ्गमं रुरोधाथ मार्गं भीमस्य कारणात्। अनेन हि पथा मा वै गच्छेदिति विचार्य्य सः। आस्त एकायने मार्गे कदलीखण्डमण्डिते। भ्रातुर्भीमस्य रक्षार्थम्" भा॰ व॰ १४६अ॰। कर्म्म॰। ५एकस्थाने न॰। "यः स्यादेकायने लीनस्तूष्णीं किञ्चिदचिन्तयन्" भा॰ अनु॰ ५२२श्लो॰।

एकार्थ पु॰ एकः अर्थः प्रयोजनमभिधेयम् पदार्थो वा। एकस्मिन् १प्रयोजने २अभिधेये ३पदार्थे च। "वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः" सा॰द॰। बहु॰। ४एकाभिधेये शब्दभेदे एकार्थश्च एकशक्त्योपस्थापितार्थकः। ५एकप्रयोजनयुक्ते त्रि॰। अभूततद्भावे च्वि+भू-घञ्। एकार्थीभाव अनेकार्थानामेकार्थताप्राप्तौ पु॰ "समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्। बहूनां वृत्तिधर्माणां वचनैरेव साधने। स्यान्महत् गौरवं तस्मादेकार्थीभाव आश्रितः" इति भर्त्तृहरिः। कर्त्तरि क्त। एकार्थीभूत परस्परमन्विते एकस्मिन् विशिष्टार्थे च "एकार्थमनेकशब्दं वाक्यम्" निरु॰। वै॰मते वाक्येऽपि शक्तिः अखण्डवाक्यस्फोटस्यैव वाचकत्वात् "पदे न वर्णाविद्यन्ते वर्णेष्ववयवा न च। वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन।

ब्राह्मणार्थो यथा नास्ति कश्चिद् ब्राह्मणकम्बले । देवदत्तादयो वाक्ये तथैव स्युर्निरर्थकाः” इति “वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतस्थितिरिति च” हरिः ।

एकावली स्त्री एकाऽद्वितीया आवली माला मणिश्रेणी । (एकनर) हारभेदे, सा०द० उक्तेऽर्थालङ्कारभेदे अलङ्कारशब्दे ३९८ पृ० विवृतिः ।

एकाब्दा स्त्री एकः अब्दो वयोमानं यस्याः । १एकहायन्यां स्त्रीगव्याम् । “एकाब्दा त्वेकहायनी” अमरः । २एकवर्षयुक्ते त्रि० । एकवर्षादयोऽप्यत्र । “एकवर्षे गवि हते कृच्छ्रपादो विधीयते” स्मृतिः । एकहायनोऽप्यत्र हायनस्य वयोवाचित्वेन संख्यापूर्व्वकत्वात् स्त्रियां ङीप् इति भेदः । “अरुणया पिङ्गाक्ष्यैकहायन्या गवा सोमं क्रीणाति” श्रुतिः ।

एकाशीतिपद न० एकाशीतिः पदान्यत्र । गृहारम्भप्रवेशादौ वास्तुपूजार्थं कर्त्तव्ये तावन्मितकोष्ठके वास्तुमण्डलभेदे । तच्च मण्डलं तिर्य्यगूर्द्ध्वस्थाभिर्दशभीरेखाभिः एकाशीतिकोष्ठात्मकं गृहारम्भाद्यर्थं वास्तुयागे लेख्यम् यथाह देवीपु० । “प्रासादे च चतुःषष्टिरेकाशीतिपदं गृहे” तल्लेखनप्रकारादि वास्तुमण्डलशब्दे वक्ष्यते ।

एकाश्रय त्रि० एक आश्रय आधारोऽवलम्बनं वा यस्य । १अनन्यगतिके ।२एकाधारवृत्तौ ३वैशेषिकोक्तगुणभेदे च ते च गुणाः अनेकाश्रितगुणभिन्नाः । “संयोगश्च विभागश्च संख्याद्वित्वादिकास्तथा । द्विपृथक्त्वादयस्तद्वदेतेऽनेकाश्रिता गुणाः । अतः शेषगुणाः सर्वे मता एकैकवृत्तयः” भाषा० दर्शिताः । एवं च रूपरसगन्धस्पर्शशब्दाः एकत्वमेकपृथक्त्वं परिमाणपरत्वापरत्वानि बुद्धिसुखदुःखेच्छाद्वेषयत्नगुरुत्वस्नेहसंस्काराऽदृष्टानि च तादृशाः, तेषां प्रत्येकस्य एकैकवृत्तित्वात् संयोगादीनान्तु एकैकस्यैव द्विवृत्तित्वमिति न तथात्वम् । एकाधिकरणादयोऽप्यत्र । कर्म० । ४एकस्मिन् आधारे पु० “हेतोरेकाश्रये येषां स्वसाध्यव्यभिचारिता” भाषा० ।

एकाष्टका स्त्री एका अष्टका । १माघकृष्णाष्टम्याम् २तत्कर्त्तव्ये श्राद्धे च । अष्टकानां तासु कर्त्तव्यश्राद्धानां च त्रित्वेऽपि आ०श्रौ०सू० “हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका एकस्यां वेति” एकस्या अपि कर्त्तव्यतया विधानात्तया । सा च मध्यत्वेन माघकृष्णाष्टमी ग्राह्या । अत एव “गवामयनार्थैकाष्टकायां दीक्षा” कात्या०१२,१,२, सू० व्या० “एकाष्टका नाम माघस्य कृष्णाष्टमी प्रसिद्धेः” कर्केणोक्तम् । ३तदभिमानिदेव्यां शच्याम् “एकाष्टका तपसा तप्यमाना जजान गर्भं महिमानमिन्द्रम् । तेन देवा असहन्त शत्रून् हन्तासुराणामभवच्छचीभिः” सा०ब्रा०२प्र०३क० । शचीभिरित्यत्र शचीपतिरिति” अथ०६,१०,१२,पाठः । “एकाष्टके ! सुप्रजसः सुवीरा वयं स्याम पतयो रयीणाम्” अथ०३,१०,५

एकाष्ठील पु० एकमस्थीव काण्डं तद्वत्कठिनत्वात् लाति ला-क पृषो०षत्वं दीर्घश्च । वकवृक्षे अमरः पाठायां स्त्री । (आकनादी) राजनि० ।

एकाह पु० एकमहः टच्समा० एकशब्दोत्तरत्वात् नाह्नादेशः । “अह्नाह्नान्ताः पुंसि” पा० पुंस्त्वम् । “एकस्मिन् दिवसे “एकाह्नेनैव निर्वपेत्” कात्य०स्मृतिः “सब्रह्मचारिण्येकाहः” मनुः । “अश्वस्यैकाहगमः” पा० । उपचारात् । २एकाहसाध्ये अग्निष्टोमादौ यागभेदे च । “उक्तप्रकृतयोऽहीनैकाहाः” आश्व० ९,१,१ । “उक्तो ज्योतिष्टोम एकाहाहीनसत्राणां प्रकृतिभूतः उक्तानि पञ्चविंशतिरहानि सात्रिकाणि एतेभ्य एव सात्रिकेभ्योऽहोभ्यो ऽहीनैकाहा व्याख्यायन्त इत्युक्तम् इदानीं तानेकाहाहीनान् वक्तुकामेनाचार्य्येण “उक्ता प्रकृतयोऽहीनैकाहा” इत्युक्तम् । तस्यायमर्थः उक्ता प्रकृतिर्येषां ते इमे उक्तप्रकृतयोऽहीनैकाहाः । प्रकृतिः प्रकारो न रूपान्तरमित्यनर्थान्तरं ज्योतिष्टोमोहि सर्वेषामेकाहाहीनसत्राणां प्रकृतिरिति सिद्धम्” नारा० । “अप्रतिदेशे त्वेकाहो ज्योतिष्टोमो द्वादशशतदक्षिणस्तेन शस्यमेकाहानाम्” ९,१,२ ।

एकाहगम पु० एकाहेन गम्यते गम-कर्म्मणि घञ् । एकाहगम्ये देशे “अश्वस्यैकाहगमः” पा० ।

एकाहार पु० एकस्मिन् दिने एक आहारः । एकस्मिन् दिने सकृद्भोजने “एकाहारस्तया (विधवया) कार्य्यो न द्वितीयः कथञ्चन” शु०त०पुरा० । “मुनिभिर्द्विरशनमुक्तम्” इत्यादिना द्विर्भोजनस्य विधानेऽपि एककालमात्रभोजनं तस्या विहितम् । एकाहारे च परिसंख्यैव आहारस्य रागप्राप्तेः न द्वितीय इत्यनेन तथैव प्रतिपादनात् । एक आहारो यस्य । एकस्मिन्नह्नि सकृद्भोजिनि त्रि० “प्रौष्ठपदं तु यो मासमेकाहारो भवेन्नरः” भा० अनु०१०६अ० ।

एकीकरण न० एक+अभूततद्भावे च्वि-कृ-अनुप्रयोगः ल्युट् । अनेकधान्यादेः राशिकरणेन एकतापादने । कर्म्मणि क्त ।

एकीकृत तथापादिते धान्यादौ त्रि० एकी+भू-घञ् । एकीभाव अनेकधान्यादेः राशितापादनरूपे व्यापारे पु० । कर्त्तरि क्त । एकीभूत एकत्वप्राप्ते अनेकधान्यादिराश्यादौ । कृ-ल्यप् । एकीकृत्य तथापादनं कृत्वेत्यर्थे अव्य० भू-ल्यप् । एकीभूय एकत्वं प्राप्येत्यर्थे अव्य० ।

एकीय त्रि० एक+भवार्थे तस्येदमित्यर्थे वा छ । १एकपक्षभवे सहाये, २एकसम्बन्धिनि च ।

एकेक्षण पु० एकमीक्षणं यस्य । १काके २एकचक्षुर्युतमात्रे काणे त्रि० । ३शुक्राचार्य्ये पु० । बलिना वामनाय दीयमानत्रिपदभूमिं प्रतिषेधतः शुक्रस्य वचनमनादृत्य तद्दानाय प्रवर्त्तमानं बलिं वीक्ष्य दानार्थगृहीतजलपात्रद्वारं सूक्ष्ममूर्त्त्या प्रविश्य रुन्धतस्तस्य छलं बुद्ध्वा जलद्वारावरणनिवारणच्छलेन कुशेन तस्यैकं नेत्रं वामनेन विदारितमिति तस्य तत्काणत्वादेकनेत्रतेति पौराणिकी कथाऽत्रानुसन्धेया ।

एकैक त्रि० सुबन्तस्य एकस्य वीप्सार्थे द्वित्वम् “एकं बहुव्रीहिवत्” पा० द्विरुक्त एकशब्दो बहुव्रीहिवत् तेन सुब्लोपपुंवद्भावौ । प्रत्येकपदार्थे इह द्वयोरपि सुपोर्लुकि कृते सति बहुव्रीहिवद्भावादेव प्रातिपदिकत्वात् समुदायात् पुनः सुप् । स्त्रियां टाप् । एकैका आहुतिः । “न बहुव्रीहौ” पा० सर्वनामसंज्ञानिषेधः मुख्यबहुव्रीहिपरस्तेन एकैकस्मै एकैकस्मात् इत्यादौ सर्व्वनामकार्य्यम् । “दश दश वा एकैकस्मिन् प्राणाः” श०ब्रा० ८,१,१,२ । ततः कारकार्थे शस् । एकैकशस् कारकरूपप्रत्येके अव्य० । “एकैकशश्चरेत् कृच्छ्रं द्विजः पापापनुत्तये” प्रा०त० विश्वा० “ब्राह्मणस्य चयाहस्य यत् प्रमाणं समासतः । एकैकशो युगानां तु क्रमशस्तान् निबोधत” मनुः । स्वार्थे यत् । एकैकश्य तदर्थे न० “एकैकश्येनानुपूर्व्या भूत्वा भूत्वेह जायते” भा०७,१५,४२ “एकैकश्यं तदा योधा धार्त्तराष्ट्रस्य भारत । पर्य्यवर्त्तन्त गन्धर्व्वैर्दशभिर्दशभिः सह” भा०व० । २४० । नीलकण्ठेन “एकैकस्येति पठित्वा एकैकमिति व्याख्यातम्” एकैकशो भावः यत् । एकैकश्य “एकैकराशिभवने “एकैकश्येन यथानुपूर्व्यम्” भाग०५.१,२५ ।

एकैषिका स्त्री नित्यकर्म्मधा० । (आकनादी) इति रत्नमाला । “एकैषिकाजशृङ्गी च प्रलेपे श्लेष्मशोषहृत्” । “एकैषिकातैलं सुहतमतिशीतं पित्तहरमनिलप्रकोपणं श्लेष्माभिहरणम्” इति च सुश्रु० । क्वचित् रत्नमालायाम् एकोषिकेतिपाठं दृष्ट्वा शब्दकल्पद्रुमे तादृशशब्दोल्लिखितः ।

एकोक्ति स्त्री एका उक्तिः अभिधाशक्तिः । उभयपदार्थविषयिण्यामेकस्यां शक्तौ । यथा पुष्पवन्तौ इत्यादौ पुष्पवत्पदेन दिवाकरनिशाकरयोरुभयोरेव बोधः न तु अन्नपदादिवत् प्रत्येकपदार्थबोध इत्याकरे दृश्यम् । एवं “जात्याकृतिव्यक्तयः पदार्थः” गौ०सू० जात्यादीनामेकशक्त्यैव बोध इति व्युत्पत्तिवादे गदाधरः ।

एकोत्तर त्रि० एकैकमुत्तरं यत्र वृत्तौ मयूरव्यंसकत्वात् संख्याशब्दस्य वीप्सार्थता । एकैकाधिके । “एकाद्ये कोत्तरा अङ्का व्यस्ताभाज्याः क्रमस्थितैः” लीला० । “सर्गादौ तु यथा काशं वायुं ज्योतिर्जलं महीम् । सृजत्येकोत्तरगुणां स्तथाद्यत्ते भवन्नपि” । “तन्मात्रादीन्यहङ्कारादेकोत्तरगुणानि च” इति च याज्ञ० । “यथासंख्यमेकोत्तरपरिवृद्धाः शब्दस्पर्शरूपरसगन्धाः” सुश्रु० एकाधिकादयोऽप्यत्र त्रि० ।

एकोदक पुंस्त्री एकं समानमुदकं यस्य । समानोदके सप्तमपुरुषादूर्द्धं चतुर्दशपुरुषपर्य्यन्ते गोत्रजे “समानोदकभावस्तु निवर्त्तताचतुर्दशात्” स्मृतेस्तत्पर्य्यन्तानामेकोदकत्वम् । “जन्मन्येकोदकानां तु त्रिरात्राच्छुद्धिरिष्यते” मनुः ।

एकोदर पु० एकं समानमुदरं गर्भस्थानं यस्य । समानोदरे १भ्रातरि स्त्रियां टाप् । कर्म्म० । २समाने उदरे न० । “एकोदरप्रसूतानाम्” स्मृतिः ।

एकोद्दिष्ट न० एकः प्रेतः उद्दिष्टोयत्र । प्रेतोद्देश्यके श्राद्धभेदे तस्य इतिकर्त्तव्यतादिकं श्रा०त० निरूपितं यथा । गोभिलः । “अथैकोद्दिष्टमेकं पवित्रमेकोऽर्घ एकः पिण्डो नावाहनं नाग्नौकरणं नात्र विश्वेदेवाः स्वदितमिति तृप्तिप्रश्नः सुस्वदितमिति प्रत्युत्तरम् उपतिष्ठतामित्यक्षय्यस्थाने, अभिरम्यतामिति विसर्गे, अभिरतोऽस्मीति प्रतिवचनमेतत् प्रेतश्राद्धमिति” । अथेत्यनेनैकोद्दिष्टस्य पार्व्वणानन्तर्य्याभिधानं तयोः प्रकृतिविकृतित्वं सूचयति । अतएवैकोद्दिष्टे पार्व्वणधर्मप्राप्त्याशावाहनादिप्राप्तौ नावाहनमित्यादिनिषेध उपपद्यते अन्यथा प्राप्त्यभावान्निषेधोऽनुपपन्नः स्यात् । एतत् प्रेतश्राद्धमित्युपसंहारात् एकं प्रेतमुद्दिश्य यद्दीयते श्राद्धं तदेकोद्दिष्टमिति वैदिकप्रयोगाधीनयौगिकम् । अतएव प्रतिसांवत्सरिकस्य नैकोद्दिष्टत्वं किन्त्वेकोद्दिष्टविधिकत्वम् । अत्रायेकशाद्विदलरूपसङ्केतितपवित्रैक्यप्राप्तौ एकं पवित्रमिति पुनरभिधानसार्थकत्वाय तदवयवैकदलपरम् ।

आज्योत्पवनप्रकरणे "बर्हिषः प्रादेशमात्रे पवित्रे कुरुते" इति गोभिलसूत्रे पवित्रपदस्य द्वित्वपरत्ववत् । अत्र नावाहनं नाग्नौकरणमिति निषेधयोः पौर्व्वापर्य्यादग्नौकरणपूर्व्वकालीनं प्रधानसम्बन्धि श्राद्धसूत्रोदितं श्राद्धाङ्गावाहनमेव निषिध्यते नत्वप्रधानसम्बन्धि पितृयज्ञवदित्यतिदेशप्राप्तं पिण्डाङ्गावाहनमिति । एतेन पिण्डाङ्गावाहननिषेधो मैथिलोक्तो हेयः । अत्राग्नौकरणनिषेधेन हुतशेषस्यालाभे "हुतशेषं दत्त्वा पात्रमालभ्य जपति पृथिवीत्यादि स्वाहेत्यन्तसूत्रोक्तपात्रालम्भनस्यापि बाधः आनन्तर्य्याभावात् अमृतमिति मन्त्रलिङ्गविरोधाच्च । स्वदितमिति तृप्तिप्रश्न इति तृप्ताः स्थ इति तृप्तिप्रश्ने, स्वदितमित प्रश्नः । कुशमयब्राह्मणपक्षे तु प्रतिवचनानुपपत्त्या प्रश्नस्यापि निवृत्तिः अक्षय्यशब्दस्थाने उपतिष्ठतामिति प्रयोगः अत्रोपतिष्ठतामित्यनेनान्नादिकमित्यस्यान्वये अस्त्वित्यस्यान्वयानुपपत्त्या तस्याप्यप्रयोगः । अतएव पितृदयितायामन्नादिकमुपतिष्ठतामिति लिखितम् । ततश्च "प्रेतायाक्षय्यमस्तु च" इति ब्रह्मपुराणीयं "ततो वदेत् पुनर्धीमानक्षय्यमुपतिष्ठताम्" इति मार्कण्डेयपुराणीयञ्च गोभिलविरुद्धत्वात् शाखान्तरीयम् । अभिरम्यतामिति "वाजे वाजे" इति स्थानेऽभिरम्यतामित्यनेन विसर्जनमिति । एतेन "प्रेतश्राद्धेषु सर्व्वेषु न स्वधा नाभिरम्यताम् । स्वस्त्यस्तु विसृजेदेवं सकृत् प्रणववर्जितम्"

इत्याश्वलायनगृह्यपरिशिष्टात् एकोद्दिष्टे प्रणववर्जितं स्वस्त्यस्त्वित्यनेन यद्विसर्जनं तत्प्रेतश्राद्धविषयम् अभिरम्यतामिति तु सांवत्सरिकविषयमिति कल्पतरुश्रीदत्तवाचस्पतिमिश्राद्युक्तं निरस्तम् । बह्वृचानामेव पार्व्वणेऽभिरम्यतामिति विसर्जनस्य प्राप्तत्वादेकोद्दिष्टेऽपि तथात्वात् सर्व्वशाखिसाधारणनिषेधानुपपत्तेश्च । एतदिति पूर्व्वोक्तेतिकर्त्तव्यताकश्राद्धमित्यर्थः । प्रेतश्राद्धं नह पार्व्वणविकृतित्वेन प्राप्तपितृलोकरूपपितुः श्राद्धम् अकृतसपिण्डीकरणस्य तथाविधपितृत्वाभावात् । अतएव तन्न्यायमूलकमेवाश्वलायनगृह्यपरिशिष्टेऽपि "पितृशब्दं न युञ्जीत पितृहा चोपजायते" इत्युक्तम् । अतएव विष्णुना "प्रेतस्य नामगोत्राभ्यां दत्त्वाक्षय्योदकेषु" च इत्यत्र प्रेतनामगोत्राभ्यामित्यनेन प्रेतस्येत्युक्तं नतु सम्बन्धिन इत्युक्तम् ततश्च मन्त्रे प्राप्तपितृलोकोपाधिकएव पितृपदस्थाने प्रेतपदोहो नतु अग्निष्वात्ताद्युपाधिके । एवमभिलापवाक्ये सम्बन्धित्वेन नोल्लेखः किन्तु प्रेतत्वेन असम्बन्धिनोऽपि मठब्राह्मणादेरपि प्रेतश्राद्धाधिकारित्वात् । अतएव शातातपेनापि "प्रेतान्तनामगोत्राभ्यामुत्सृजेदुपतिष्ठताम्" इत्युक्तम् । अत्र प्रेतस्यान्तः प्रेतान्तो नतु सम्बन्धिवाचकस्यान्तः यथा मैथिलोक्तो बहुव्रीहिस्तस्य तत्पुरुषापेक्षया जघन्यत्वात्, प्रेतपदस्य सम्बन्धिस्थानीयत्वेन तत्पुरुषस्यैव युक्तत्वाच्च । ततश्च प्रेतान्तनाम च गोत्रञ्च इति द्वन्द्वः अतएव तर्पणे विष्णुः "ततश्च सर्व्वे सपिण्डिनो गत्वा पितृपदस्थाने प्रेतपदोहेन द्वितीयान्तं तर्पयेयुः पितृशब्दोच्चारणे पितृहा भवति" इति । एतेषां वचनानां न्यायमूलकत्वात् सांवत्सरिकश्राद्धे एकोद्दिष्टविकृतीभूतेऽपि प्राप्तपितृलोकोपाधिकपितृपदवन्मन्त्रेऽभिलापे च सम्बन्धिबोधकपितृत्वेनैवोल्लेखः । एवञ्च देवताभ्यः पितृभ्यश्चेत्यत्र न प्रेतपदोहः तत्र पितृपदस्य दिव्यपितृपरत्वात् एवं नैकवचनोहोऽपि तथा "मधु द्यौरस्तु नः पिता" इत्यस्य द्यौः स्वर्गः पिता पितेव सर्व्वस्याधिगम्यत्वात् मध्वस्तु मधुमयी भवत्विति भाष्यव्याख्याने द्यौरिति पितेतिपदयोः सामानाधिकरण्यं प्रतीयते अत्र च द्युत्वपितृत्वयोर्भेदेऽपि धर्म्मिणोः सामानाधिकरण्येनाभेदावगमात् दिवः पितृसाधर्म्म्यप्राप्तिरिति पितृपदं पितृतुल्यपरं नतु जनकपरं प्राप्तपितृलोकपरं वेति तेनात्र मन्त्रे पितेत्येव वक्तव्यं नतु प्रेतपदोहः नवा "पितृशब्दं न युञ्जीत" इत्यनेन निषेधः । एवम् आमावेति मन्त्रे पितरेत्यत्र नोहः यदाऽहं श्राद्धं करोमि तदा मातरपितरावागच्छतामित्युद्भजने क्रियमाणे श्राद्धफलस्य प्रार्थनीयत्वात् । एवं वृद्धिश्राद्धेऽप्येतेषु नान्दीमुखविशेषणं न देयमेवेति अन्यत्र सर्व्वत्रोत्सर्गवाक्ये मन्त्रे च पितृपदप्रयोगनिषेधात् प्रेतपदोहः कार्य्यः ।

"अत्रैकोद्दिष्टे गोभिलानुक्तो विशेषोऽभिधीयते । यथाह विष्णुः "एकवन्मन्त्रानूहेतैकोद्दिष्टे" इति एकवत् एकवचनवद्यथा स्यात्तथोहेत "अपूर्व्वोत्प्रेक्षणमूहः" (जै॰) इत्युक्तेन पूर्व्वाप्राप्तैकवचनान्तत्वकल्पनेन बहुवचनान्तान्मन्त्रान् विकृतान् कुर्य्यात् एकस्मिन् पितरि बहुवचनस्यासमवेतार्थत्वात् प्रकृतावर्थप्रकाशनाख्यदृष्टप्रयोजनकस्य मन्त्रस्य विकृतौ बहुवचनस्थाने एकवचनोहः कर्त्तव्य इति न्यायमूलमिदं वचनम् । यद्वा "पवित्रे स्थो वैष्णव्यावित्यत्र "पवित्रासि वैष्णवी" इति न चात्र पवित्रमसि वैष्णवम् इति पितृदयितोक्तं युक्तं "पवित्रे स्थो वैष्णव्याविति" मन्त्रस्य हे पवित्रे युवां विष्णुदेवताके स्थः भवथः स्त्रीलिङ्गत्वं छान्दसमिति सायणाचार्य्यव्याख्याने शुष-

विष्णुनापि तथा व्याख्याने सम्बुद्ध्यन्तताप्रतीतेः । एवं “विष्णोर्मनसा पूते स्थः” इत्यत्रापि पूतमसीति । “अत्र पितरो मादयध्वं यथाभागमावृषायध्वम्” इति मन्त्रे अत्र प्रेत ! मादयस्व यथाभागमावृषायस्वेत्यूह्यम् । प्रार्थनार्थकतृतीयलकारीयमध्यमपुरुषबहुवचनस्थाने तदेकवचनस्यैव उह्यत्वात् न तु भूतार्थकचतुर्थलकारीयमावृषायथा इत्यनिरुद्धभट्टोक्तो युक्तः अतएव श्रीदत्तादिभिरपि “मादयस्वेत्युक्तम् “अमीमदन्त पितरः” इत्यत्र अमीमदत्प्रेतेति वृषायिषतेत्यत्र वृषायिष्टेति । एत पितर इत्यादिपिण्डाह्वानमन्त्रे एहि प्रेतेति, सौम्यास इत्यत्र सौम्येति दत्ताभ्यमित्यत्र देह्यभ्यमिति, नियच्छतेत्यत्र नियच्छेति, नमोव इत्यादिमन्त्रेषु पितर इति स्थानचतुष्टये प्रेतेत्युह्यम् । एषं व इत्यत्र ते इति । आशीःप्रार्थने च येभ्य इत्यत्र यस्मै इति तेषामित्यत्र तस्येत्युह्यम् । एतद्वः पितर इत्यत्र तु प्रेता इति विकृतावूहो न तु बहुवचनस्य “एतद्वः पितरो वास इति जल्पन् पृथक् पृथक्” इति ब्रह्मपुराणेन प्रकृतावेव पार्व्वणे पित्रादिषु प्रत्येकमेतद्वः पितर इति बहुवचनान्तमन्त्रप्रयोगात् आम्नानर्थक्येन तद्विकृतावेकोद्दिष्टेऽप्यसमवेतार्थबहुवचनस्यैव युक्तत्वात् । ततश्च प्रकृतौ समवेतार्थस्यैव विकृतावूहः । सांवत्सरिके त्वेकवचनान्ततयैवोहो न तु पितृपदस्य तत्र प्राप्तपितृलोकत्वेन तथैव युक्तत्वात्” श्रा० त० रघुनन्दनः ।

एकोद्दिष्टञ्च “द्वादश प्रतिमास्यानि आद्यं षाण्मासिके तथा” इत्युक्तपञ्चदशश्राद्धात्मकम् । अत्र द्वादशपदं त्रयोदशानामप्युपलक्षणम् “संवत्सरे विवृद्धेऽपि प्रतिमासञ्च मासिकमिति” काल० मा० कौथुमिना वत्सरषटकप्रतिमासे तस्य विधानात् अत एव “द्वादश मासाः संवत्सरः क्वचित् त्रयोदश मासाः संवत्सरः” इति श्रुतौ वत्सरस्य त्रयोदशमासात्मकत्वमुक्तम् ।

अथैकोद्दिष्टनिमित्तकालो निरूप्यते स च श्रा० त० रघुनन्दनेन दर्शितो यथा

याज्ञवल्क्यः । “मृताहनि तु कर्त्तव्यं प्रतिमासन्तु वत्सरम् । प्रतिसंवत्सरञ्चैवमाद्यमेकादशेऽहनि” । एकादशेऽहनीति स्वस्वाशौचान्तद्वितीयदिनोपलक्षणम् । “अन्तादिः कृतशान्ते तु भोजयेदयुजो द्विजान्” इति मत्स्यपुराणैकवाक्यत्वात् । आद्यं षोडशश्राद्धानामादिभूतम् । तथा च छन्दोगपरिशिष्टम् । “श्राद्धमग्निमतः कुर्य्यात् दाहादेकादशेऽहनि । ध्रुवाणि तु प्रकुर्व्वीत प्रमिताहनि सर्व्वदा । द्वादश प्रतिमास्यानि आद्यं षाण्मासिके तथा । सपिण्डीकरणञ्चैव इत्येवं श्राद्धषोडशम् । एकाहेन तु षण्मासा यदा स्युरपि वा त्रिभिः । न्यूनाः संवत्सरश्चैव स्यातां षाण्मासिके तदा” । अग्निमतः श्रौताग्निमतो दाहादेकादशेऽहनि श्राद्धं कर्त्तव्यं तस्य दाहावधिदशाहाशौचित्वात् । अन्येषान्तु मरणावधि तथा च मनुः “मरणादेव कर्त्तव्यम् संयोगो यस्य नाग्निना । दाहादूर्द्ध्वमशौचं स्याद्यस्य वैतानिको विधिः” । वैतानिकः श्रौतो होमः तस्मादग्निपदं श्रौताग्निपरम् । ततश्च केवलस्मार्त्ताग्निमतो निरग्नेश्च मरणादेवाशौचम् । ध्रुवाणि एतानि षोडश श्राद्धानि नित्यानि सर्व्वदा मृतधनालाभेऽपि । प्रमिताहनि मृततिथौ आद्यश्राद्धषाण्मासिकश्राद्धद्वयेतरश्राद्धानि कार्य्याणि आद्यश्राद्धस्यैकादशाहे विधानात् षाण्मासिकयोस्तु कालान्तरविधानात् । अत्राशौचान्तद्वितीयदिवसीयाद्यश्राद्धस्यादिभवत्वसमाख्यानुरोधेन तदुत्तरकर्त्तव्यमासिकतिथेर्मृततिथित्वानुपपत्त्या तत्सजातीयत्वमेव प्रतीयते । तेन प्रथममृततिथिं विहायान्यमृततिथिमादाय मासिकादिसिद्धिरिति । एवञ्च एकाहेन तु षण्मासा न्यूना इत्यनेन मृततिथिपूर्व्वतिथिः प्रतीयते । एवं त्रिभिरित्यत्रापि तथा संवत्सरस्याप्येकाहादिन्यूने । अत्र संवत्सरकर्त्तव्यस्यापि षाण्मासिकत्वं द्वितीयषण्मासभवत्वाद्यानुपपन्नम् । संवत्सराभिधानन्त्वादिमध्याधिमासयुक्तप्रथमाब्दस्य “द्वादश मासाः संवत्सरः क्वचित् त्रयोदश मासाः संवत्सरः” इति श्रुत्यनुसारेण त्रयोदशमासघटितत्वात् त्रयोदशमास एव द्वितीयषाण्मासिककरणाय कालः सप्तममासकर्त्तव्यस्य षाण्मासिकत्वं ‘षष्ट्या तु दिवसैर्मासः कथितो बादरायणैः’ इत्यनेनाविरुद्धम् । ननु षोडशश्राद्धगणने द्वादशमासिकत्वमुक्तं कथं मलमासयुताब्दे त्रयोदशमासिकत्वमिति चेन्न “संवत्सरस्य मध्ये तु यदि स्यादधिमासकः । तदा त्रयोदशश्राद्धं कार्य्यं तदधिकं भवेत्” इतिसत्यव्रतवचनेन द्वादशमासिकादधिकं त्रयोदशमासिकं श्राद्धमित्युक्तेः । एतद्वचनं न्यायमूलकम् । “एवं मृताहनि प्रतिमासं श्राद्धं कुर्य्यादतन्द्रितः” “मृताहनि तु कर्त्तव्यं प्रतिमासन्तु वत्सरम्” इति वचनद्वयेन पूर्व्वोक्तश्रुतिप्राप्तत्रयोदशमासात्मकं संवत्सरं व्याप्य मृततिथेर्मृततिथिं यावच्चान्द्र इत्युक्ततत्प्रतिमासकर्त्तव्यमासिकानुरोधेन तत्पक्षीयततत्तिथिषु श्राद्धमिति बोधयता अर्थापत्त्या वैशाखादि

भूतस्यान्त्यमासिकं तन्मासीयतत्पक्षीयतत्तत्तिथिषु कर्त्तव्यमिति बोधनात् मध्येऽधिमासपाते द्वादशे मासि मृतमासीयतिथ्यप्राप्त्या वर्षान्तविहितस्य मासिकस्य सपिण्डनस्य चाप्राप्तेः। एवमाद्याधिमासेऽपि अतएवाद्याब्देऽधिमासपातेऽपि लघुहारीतेन द्वादशमासे यद्द्वादशमासिकमित्युक्तं तदन्याधिमासविषयम् तत्र द्वादशमासे मृतमासीयतत्तत्तिथिप्राप्तेः। यथा लघुहारीतः 'प्रत्यब्दं द्वादशे मासि कार्य्या पिण्डक्रिया द्विजैः। क्वचित्त्रयोदशेऽपि स्यादाद्यं मुक्त्वा तु वत्सरम्। चक्रवत् परिवर्त्तेत सूर्य्यः कालवशाद्यतः। अतः सांवत्सरं श्राद्धं कर्त्तव्यं मासचिह्नितम्। मासपक्षन्तु कर्त्तव्यं पौषमाघाद्यमेव हि। यतस्तत्र विधानेन मासः स परिकीर्त्तितः। असंक्रान्तेऽपि कर्त्तव्यमाब्दिकं प्रथमं द्विजैः। तथैव मासिकं पूर्व्वं सपिण्डीकरणन्तथा। गर्भे वार्द्धुषिकत्वे च मृतानां पिण्डकर्मसु। सपिण्डीकरणे चैव नाधिमासं विदुर्बुधाः"। सपिण्डीकरणादूर्द्धं यत् किञ्चित् श्राद्धिकं भवेत्। दृष्टं वाप्यथ वा पूर्त्तं तन्न कुर्य्यान्मलिम्लुचे" श्रा०त० रघुनन्दनः।

एकोद्दिष्टञ्च मध्याह्नकालव्यापितिथौ कर्त्तव्यं यथाह "आमश्राद्धं तु पूर्व्वाह्णे एकोद्दिष्टन्तु मध्यतः। पार्व्वणं चापराह्णे तु प्रातर्वृद्धिनिमित्तकम्" हारी०। "पूर्व्वाह्णे दैविकं श्राद्धमपराह्णे तु पार्व्वणम्। एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकम्" मनुः। "यो यस्य विहितः कालस्तत्कालव्यापिनी तिथिः। तया कर्म्माणि कुर्वीत ह्रासवृद्धी न कारणम्" याज्ञ०। मध्याह्नकालश्च त्रिधा विभक्तदिनतृतीयभागरूप एव। तत्रापि कुतपप्रथमभागस्यैव तदारम्भकालः "कुतपे प्रथमे भागे एकोद्दिष्टमुपक्रमेत्। आवर्त्तनसमीपे वा तत्रैव नियतात्मवान्" काल० व्यासोक्तेः आवर्त्तनं पश्चिमदिगवस्थितच्छायायाः पूर्व्वदिग्गमनारम्भकालः तत्समीपे कुतपशेषदण्डे। गौतमोऽपि "आरभ्य कुतपे श्राद्धं कुर्य्यादारौहिणं बुधः। विधिज्ञो विधिमास्थाय रौहिणन्तु न लङ्घयेत्" अत्र कुतपस्यारम्भकालतयोक्तेः पूर्व्वेद्युः रौहिणमात्रलाभे परदिने कुतपमात्रलाभेऽपि परेद्युरेव श्राद्धं "यो यस्य विहितः कालः कर्म्मणस्तदुपक्रमे। तिथिर्याभिमता सा तु ग्राह्या नोपक्रमोज्झिता" बौधायनेनोपक्रमयोग्यतिथेरेव ग्राह्यतोक्तेः। उभयदिने कुतपालाभे रौहिणमात्रलाभे तु तत्रैव श्राद्धम् "रौहिणन्तु न लङ्घयेदित्युक्तेः। उभयदिने तयोरलाभे सप्तममुहूर्त्ते कार्य्यं तस्यालाभे तयोर्लाभे वा पक्षभेदेन व्यवस्था "शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः। तया कर्म्माणि कुर्वीत ह्रासवृद्धी न कारणम्। कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविः। तया कर्म्माणीत्यादि स्कन्दपु०उक्तेः। "द्वितीयादिकयुग्मानां पूज्यता नियमादिषु। एकोद्दिष्टादिवृद्ध्यादौ ह्रासवृद्ध्यादिदेशना" व्यासोक्तेश्च। तत्र स्कान्दवाक्ये ह्रासवृद्धिशब्दः तिथिविषयः व्यासवाक्ये चन्द्रह्रासवृद्धिपरत्वेन कृष्णशुक्लपक्षभेदेन व्यवस्थेति स्थितम्। तदेतत् कालमा० निर्णीतम् यथा। "नन्वत्र क्षयवृद्ध्युपजीवनेन निर्णयः क्रियते। स चानुपपन्नः। व्यासवाक्ये ह्रासवृद्धिनोदनायाः पित्र्याविषयत्वाभिधानात्। "एकोद्दिष्टादिवृद्ध्यादौ ह्रासवृद्ध्यादिनोदनेति" हि पूर्व्वमुदाहृतम्। "दानव्रते चैतदेवेति" च अतः कथमनयोर्वृद्धिक्षयाभ्यां निर्णयः। किञ्चोदाहृतयाज्ञवल्क्यस्कान्दपुराणगार्ग्यवचनेषु "ह्रासवृद्धी न कारणमित्युक्तं तत्कथमत्र ह्रासवृद्ध्योर्निर्णयकारणत्वम्। अत्रोच्यते। सन्ति ह्यन्यानि ह्रासवृद्धिवाक्यानि। तत्रोशनाः, "खर्व्वो दर्पस्तथा हिंसस्त्रिविधं तिथिलक्षणम्। खर्व्वदर्पौ परौ कार्य्यौ हिंसा स्यात् पूर्व्वकालिकी"। पितामहोऽपि "खर्व्वो दर्पस्तथा हिंसस्त्रिविधं तिथिलक्षणम्। खर्व्वदर्पौ परौ पूज्यौ हिंसं पूर्व्वत्र पूजयेदिति" भविष्योत्तरे "खर्व्वो दर्पस्तथा हिंसा त्रिविधं तिथिलक्षणम्। खर्व्वदर्पौ परौ कार्य्यौ हिंसा स्यात् पूर्व्वकालिकीति"। खर्व्वः साम्यमल्पक्षयो वा। दर्पो वृद्धिः। हिंसाधिकक्षयः। एतैः खर्व्वादिवाक्यैः सह यस्मिन्विषये युग्मादिवाक्यस्य विरोधः प्राप्नोति तत्र दैवपित्र्यभेदेन व्यवस्थापकं व्यासवाक्यम् नतु प्रकृतयोः क्षयवृद्ध्योः पित्र्यविषयत्वप्रतिपादकयाज्ञवल्क्यादिवचनेष्वपि कर्म्मकालव्याप्तिशास्त्रस्य खर्व्वदर्पादिशास्त्रस्य च विरोधे प्राप्ते सति कर्म्मकालव्याप्तिशास्त्रस्य प्राबल्यमुच्यते न तु प्रकृतयोः क्षयवृद्ध्योः निर्णयहेतुत्वं प्रतिषिध्यते। ननु व्यासः खर्व्वादिवाक्यानि पित्र्यविषयत्वेन संकोचयामास, याज्ञवल्क्यादयस्तु पित्र्येऽपि कर्म्मकालव्याप्त्या खर्व्वादिवाक्यान्यबाधन्त, हन्तैवं निर्विषयत्वमेषां प्रसज्येतेति चेत् नैवं यदा पूर्व्वोत्तरदिनयोः पित्र्यविषयकर्म्मकालव्याप्तिः समाना यदा वा दिनद्वयेऽपि कर्म्मकालव्याप्त्यभावः तत्रोभयत्र खर्व्वादिवाक्यैर्निर्णेतुमशक्यत्वात्"। तत्रैवास्य विषयलाभ इति भावः।

"एकोद्दिष्टे तु संप्राप्ते यदि विघ्नं प्रजायते मासेऽन्यस्मिन् तिथौ तस्मिन् तदा दद्यात् विचक्षणः

देवलः"। एकोद्दिष्टविकृतित्वात् सांवत्सरिकं श्राद्धमपि एकोद्दिष्टशब्देन शास्त्रे व्यवह्रियते।"एकोद्दिष्टं सुता दश" "एकोद्दिष्टं न पार्वणम्" इति च स्मृत्योः सांवत्सरिकेऽपि तथा प्रयोगात्।

एकोद्दिष्टाधिकारिणस्तु निर्ण॰सि॰दर्शिताः यथा "चन्द्रिकायां सुमन्तुः "मातुः पितुः प्रकुर्वीत संस्थितस्यौरसः सुतः। पैतृमेधिकसंस्कारं मन्त्रपूर्वकमाहृतः"। तत्रैव हेमाद्रौ शङ्खः "पितुः पुत्रेण कर्त्तव्या पिण्डदानोदकक्रिया। पुत्राभावे तु पत्नी स्यात्तदभावे तु सोदरः। अत्र पुत्रपदं यद्यपि क्षेत्रजादिद्वादशविधपुत्रपरम्। ते च द्वादशपुत्रा याज्ञवल्क्येनोक्ताः "औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः। क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा। गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः। कानीनः कन्यकाजातो मातामहसुतः स्मृतः। अक्षतायां क्षतायां वा जातः पौनर्भवः स्मृतः। दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत्। क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः स्यात् स्वयंकृतः। दत्तात्मा तु स्वयंदत्तो गर्भे विन्नः सहोढजः। उत्सृष्टो गृह्यते यस्तु सोऽपविद्धो भवेत्सुतः। पिण्डदोंऽशहरश्चैषां पूर्वाभावे परःपरः"। इति तथापि "दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः" इति हेमाद्रावादित्यपुराणे कलावितरेषां पुत्रत्वनिषेधादौरसदत्तपरमेव। यद्यपि "पिण्डदोंऽशहरश्चैषां पूर्वाभावे परःपरः" इति याज्ञवल्क्योक्तेरौरसाभावे दत्तकप्राप्तिस्तथाप्यौरसाभावे पौत्रः प्रपौत्रस्तदभावे दत्तकादय इति ज्ञेयम्। "पुत्रेण लोकान् जयति पौत्रेणानन्त्यमश्नुते" इति "अथ पुत्रेण पौत्रेण ब्रध्नस्याप्नोति विष्टपमिति" जीमूतवाहनधृतहारीतवशिष्ठशङ्खलिखितोक्तेः "लोकानन्त्यं दिवःप्राप्तिः पुत्रपौत्रप्रपौत्रकैरिति" याज्ञवल्क्योक्तेश्च। "पुत्रः पौत्रश्च तत्पुत्रः पुत्रिकापुत्र एव च। पत्नी भ्राता च तज्जश्च पिता माता स्नुषा तथा। भगिनी भागिनेयश्च सपिण्डः सोदकस्तथा। असन्निधाने पूर्वेषामुत्तरे पिण्डदाः स्मृताः" इति स्मृतिसंग्रहे प्रपौत्रानन्तरं पुत्रिकापुत्रोक्तेस्तत्समत्वाच्च दत्तकस्य। यद्यपि बृहस्पतिना "पौत्रश्च पुत्रिकापुत्रः स्वर्गप्राप्तिकरावुभौ। रिक्थे च पिण्डदाने च समौ तौ परिकीर्त्तिताविति" पौत्रसाम्यमुक्तम्। याज्ञवल्क्येन च "औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः" इत्यौरससाम्यमुक्तम् "तथापि लोके राजसोमन्त्वीत्यादौ किञ्चिन्न्यूने समशब्दप्रयोगाद्गौण

मुख्ययोः साम्यायोगाच्च स्तुत्यर्थत्वात् न तु समविकल्प इति भ्रमितव्यम्। "पुत्रः पौत्रः प्रपौत्रो वा भ्राता वा भ्रातृसन्ततिः। सपिण्डः सन्ततिर्वापि क्रियार्हो नृप! जायते। एषामभावे सर्वेषां समानोदकसन्ततिः। मातृपक्षः सपिण्डेन सम्बद्धो यो जलेन वा। कुलद्वयेऽपि चोच्छिन्ने स्त्रीभिः कार्य्या क्रिया नृप!। तत्सङ्घान्तर्गतैर्वापितद्रिक्थात्कारयेन्नृपः" इति विष्णुपुराणाच्च प्रपौत्रानन्तरं दत्तकादयः इति पृथ्वीचन्द्रमदनरत्नकालादर्शादयः। मदनपारिजातेऽप्येवम्। वोपदेवरुद्रधरादयस्तु "पुत्रेषु विद्यमानेषु नान्यो वै कारयेत्स्वधाम्" इति सुमन्तूक्तेः "पितामहः पितुः पश्चात्पञ्चत्वं यदि गच्छति। पौत्रेणैकादशाहादि कर्त्तव्यं श्राद्धषोडशम्। नैतत्पौत्रेण कर्त्तव्यं पुत्रवांश्चेत्पितामहः" इति छन्दोगपरिशिष्टे च पुत्रशब्दस्य द्वादशविधसुतपरत्वात् पूर्वाभावे परःपर इत्यस्यानन्यपरत्वाच्च दत्तकाद्यभावे पौत्रादीनामधिकार इत्याहुः। अतएव निषेधादुपनीतपौत्रसत्त्वेऽप्यनुपनीतपुत्रस्यैवाधिकारः। औरसस्याप्यनुपनीतोऽपि कुर्य्यादित्याह पृथ्वीच॰ सुमन्तुः। "श्राद्धं कुर्य्यादवश्यं तु प्रमीतपितृको द्विजः। व्रतस्थो वाऽव्रतस्थो वा एक एव भवेद्यदि" वृद्धमनुः। "कुर्य्यादनुपनीतोपि श्राद्धमेको हि यः सुतः। पितृयज्ञाहुतिं पाणौ जुहुयाद्ब्राह्मणस्य सः" मनुः "नह्यस्मिन् युज्यते कर्म्म किञ्चिदामौञ्जिबन्धनात्"। सुमन्तुरपि नाभिव्याहारयेद्ब्रह्म यावन्मौञ्जी निबध्यते। मन्त्राननुपनीतोऽपि पठेदेवैक औरसः"। ब्रह्म वेदम् मन्त्रपाठस्त्रिवर्षकृतचूडस्यैव। "अनुपेतोऽपि कुर्वीत मन्त्रवत्पैतृमेधिकम्। यद्यसौ कृतचूडः स्याद्यदि स्याच्च त्रिवत्सरः" इति सुमन्तूक्तेः। यत्तु व्याघ्रः "कृतचूडस्तु कुर्वीत उदकं पिण्डमेव च। स्वधाकारं प्रयुञ्जीत वेदोच्चारं न कारयेदिति" यच्च स्मृतिसंग्रहे "कृतचूडोऽनुपेतश्च पित्रोः श्राद्धं समाचरेत्। उदाहरेत्स्वधाकारं न तु वेदाक्षराण्यसाविति"। तत्प्रथमवर्षचूडाविषयमिति माधवमदनरत्नपृथ्वीचन्द्राः। त्रिवर्षोर्द्ध्वं मन्त्रवत्त्वस्य विकल्प इति चन्द्रिका वोपदेवश्च। मदनरत्ने स्कान्दे। "यज्ञेषु मन्त्रवत्कर्म पत्नी कुर्य्याद्यथा नृप!। तथौर्द्ध्वदेहिकं कर्म कुर्य्यात् सा धर्मसंस्कृता"। अग्नौ तु कात्यायनः। "असंस्कृतेन पत्या च अग्निदानं समन्त्रकम्। कर्त्तव्यमितरत्सर्वं कारयेदन्यमेव हि"। पुत्रश्च न जन्मतोऽधिकारी किन्तु वर्षोत्तरमिति कालादर्शः "चौलाद्याद्विद-

कादर्व्वाक् न कुर्य्यात् पैतृमेधिकम्” इत्युक्तेः। मदनरत्ने सुमन्तुरपि “पुत्रश्चोत्पत्तिमात्रेण संस्कुर्य्यादृणमोचनात् । पितरं नाविद्कश्चौलात् पितृमेधेन कर्म्मणा”। एतच्चौरसस्यैव दत्तकादीनां तूपनीतानामेवाधिकारः इति कालादर्शः । शुद्धिच० स्कान्दे “पित्रोरनुपनीतोऽपि विदध्यादौरसः सुतः । और्द्ध्वदेहिकमन्ये तु संस्कृताः श्राद्धकारिणः” इति । अन्यत्रापि दर्शमहालयादावनुपनीतस्याधिकारोऽस्माभिः पूर्व्वमुक्तः । प्रपौत्राभावे दत्तकादयो द्वादश पुत्राः । तदभावे भर्त्तुः पत्नी तस्याश्च सः “अपुत्रा शयनं भर्त्तुः पालयन्ती व्रते स्थिता । पत्न्येव दद्यात् तत्पिण्डं कृत्स्नमंशं लभेत चेति” वृद्धमनूक्तेः । “भार्य्यापिण्डं पतिर्दद्याद्भर्त्तुर्भार्य्या तथैव च । श्वश्र्वादेश्च स्नुषा चैव तदभावे सपिण्डकाः” इति । पुत्राभावे तु पत्नी स्यात्पत्न्यभावे सहोदरः” इति च हेमाद्रौ शङ्खोक्तेः । देवयाज्ञिकस्तु “कानीनगूढ़सहजपुनर्भूतनयाश्च ये । पत्न्यभावेऽपि कुर्य्युस्ते अप्रशस्ताः स्मृताः हि ते” इति स्मृतिसंग्रहात् पत्न्यभावे कानीनादय इत्याह । पत्न्युरपि सपत्नीपुत्रे सति नाधिकारः । “पितृपत्न्यः सर्व्वा मातरः” इति सुमन्तूक्तेः । “विदध्यादौरसः पुत्रो जनन्या और्द्ध्वदेहिकम् । तदभावे सपत्नीजः क्षेत्रजाद्यास्तथा सुताः । तेषामभावे स्वपतिस्तदभावे सपिण्डकाः” इति मदनरत्ने कात्यायनोक्तेः “बह्वीनामेकपत्नीनामेष एव विधिः स्मृतः । एका चेत् पुत्रिणी तासां सर्व्वासां पिण्डदस्तु सः” इति वृहस्पतिवचनाच्च । अपरार्कोऽप्येवम् । तेन यच्छ्राद्धविवेके उक्तम् “सत्यपि सपत्नीपुत्रे पत्न्युरेवाधिकार इति तन्निरस्तम् । यच्च तत्रैव कात्यायनः “न भार्य्यायाः पतिर्दद्यादपुत्राया अपि क्वचित्” । यच्च विष्णुपु० “कुलद्वयेऽपि चोच्छिन्ने स्त्रीभिः कार्य्या क्रिया नृपेति” । यच्च मार्क० पु० “सर्व्वाभावे स्त्रियः कुर्य्युः स्वभर्त्तॄणाममन्त्रकमिति” । तदासुरादिविवाहोढाविषयम् “धर्म्म्यैर्विवाहैरूढ़ा या सा पत्नी परिकीर्त्तिता । क्रयक्रीता तु या नारी न सा पत्न्यभिधीयते । न सा दैवे न सा पित्र्ये दासीं तां मुनयो विदुरिति” माधवीये शातातपोक्तेः । यत्तु शुद्धिरत्नाकरः स्मृत्यपार्थिव ‘अपुत्रस्य च या पुत्री सैव पिण्डप्रदा भवेत् । तस्य पिण्डान् दशैकं वा एकाहेनैव निःक्षिपेत्, इति जाबालोक्तेः “भर्त्तुर्धनहरा पत्नी तां विना दुहिता स्मृता । अङ्गादङ्गात् सम्भवति पुत्रवद्दुहिता स्वधामिति” वृहस्पतिना दुहितुर्धनहारित्वोक्तेश्च पुत्राभावे कन्या तदभावे पत्नी इत्याहतुः । तत् पूर्व्वविरोधात् “मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेऽन्वयः” इति दुहितुर्मातृधनहारित्वेन पुत्रस्य तच्छ्राद्धानधिकारापत्तेश्चोपेक्ष्यम् । वचनं भ्रातृपुत्राद्यभावविषयम् । पत्न्यभावे अविभक्तस्य सोदरः पूर्व्वोक्तशङ्खवचनात् । विभक्तस्य तु दुहिता धनहारित्वात् पूर्व्वोक्तजाबालवचनाच्च । तत्राप्यूढ़ानूढ़ासमवायेऽप्यूढैव “दुहिता पुत्रवत् कुर्य्यान्मातापित्रोस्तु संस्कृता । अशौचमुदकं पिण्डमेकोद्दिष्टं सदा तयोरिति” भरद्वाजोक्तेः । तदभावे दौहित्रः धनहारित्वात् । “मातापित्रोरुपाध्यायाचार्य्ययोरौर्द्ध्वदेहिकम् । कुर्व्वन्मातामहस्यापि व्रती न भ्रश्यते व्रतादिति” चन्द्रिकायां वृद्धमनूक्तेः “यथा व्रतस्थोऽपि सुतः पितुः कुर्य्यात्क्रियां नृप ! । उदकाद्यां महाबाहो ! दौहित्रो दुहिताहतीति” अपरार्के भविष्योक्तेश्च । एतद्धनहारिण आवश्यकं नान्यस्येत्याह तत्रैव स्कान्दः “श्राद्धं मातामहानां तु अवश्यं धनहारिणा । दौहित्रेणार्थनिष्कृत्यै कर्त्तव्यं पूर्व्वमुत्तरमिति” । तेन दौहित्रोऽत्र पुत्रीकृत इति देवयाज्ञिकोक्तिः परास्ता । अत्र पत्नीदौहित्रसमवायेऽर्थहरत्वात्पत्न्येव कुर्य्यात् । दौहित्रभ्रातृपुत्रसत्त्वे विभक्तस्य दौहित्रः । अविभागे भ्रातृपुत्रः । भ्रातृतत्पुत्रसत्त्वे कनिष्ठश्चेद्भ्रातैव । ज्येष्ठश्चेत्तत्पुत्रः कुर्य्यादिति दाक्षिणात्यपन्थः । हारलतादौ तु ‘भ्रातुर्भ्राता स्वयं चक्रे तद्भार्य्या चेन्न विद्यते । तस्य भ्रातृसुतश्चक्रे यस्य नास्ति सहोदरः” इति ब्राह्मोक्तेः ‘पत्नी कुर्य्यात् सुताभावे पत्न्यभावे सहोदरः” इति कौर्म्माच्च । ज्येष्ठभ्रातैव कुर्य्यान्न तत्पुत्रः । यत्तु “नानुजस्य तथाग्रजः” इति, तत्कनिष्ठभ्रातृसत्त्वविषयम् । यच्च मनुः “सर्व्वेषामेकजातानामेकश्चेत् पुत्रवान् भवेत् । सर्व्वांस्तांस्तेन पुत्रेण पुत्रिणो मनुरब्रवीत्” इति तत् सोदराभावविषयमित्युक्तम् । एतेन पुत्रस्यातिदेशोऽयम् अतस्तस्मिन् सत्येकादश पुत्राः प्रतिनिधयो न कार्य्याः । स एव पिण्डदोंऽशहरश्च” इत्यत्रापीति वाचस्पतिमनुटीकाकृत्रत्नाकरादयः परास्ताः । मदनरत्ने स्मृतिसंग्रहे “पुत्रः कुर्य्यात्पितुः श्राद्धं पत्नी च तदसन्निधौ । धनहार्य्यपि दौहित्रस्ततो भ्राता च तत्सुतः । भ्रातोः सहोदरोभावे कुर्य्याद्दाहादि तत्सुतः । ततस्तत्सोदरभ्राता तद-

भावे च तत्सुतः" इति । भ्रातृपुत्राभावे क्रमेण पितृमातृस्नुषास्वसृतत्पुत्रादयः धनहारित्वात् । "भगिनीतत्सुतयोर्विशेषमाह मदनरत्ने कात्यायनः "अनुजो ह्यग्रजो वापि भ्रातुः कुर्वीत सत्क्रियाम् । ततस्तत्सोदरस्तद्वत्क्रमेण तर्पयेत्तयोः" अपरार्के कार्ष्णाजिनिः । "पुत्रः शिष्योऽपि वा पत्नी पिता भ्राता स्नुषा गुरुः । स्त्रीहारो धनहारी यः कुर्यात्पिण्डोदकक्रियाम्" । मार्कण्डेयपुराणे "पुत्रो भ्राता च तत्पुत्रः पत्नी माता तथा पिता । वित्ताभावे तु शिष्यश्च कुर्वीरन्नौर्ध्वदेहिकम्" । तेन धनहारी एतद्भिन्न इति कालादर्शः । अत्र पाठक्रमो न विवक्षितः पूर्ववाक्येषु अथ ततःशब्दादिभिः श्रौतक्रमोक्तेः "अथ जिह्वाया अथ वक्षसः" इति वत् । पृथ्वीचन्द्रोदये वृद्धमनुः । "स्नुषास्वस्रीयतत्पुत्रज्ञाति सम्बन्धिबान्धवाः । पुत्राभावे तु कुर्वीरन् सपिण्डान्तं यथाविधि" । मार्कण्डेयपुराणे "पुत्राद्युच्छिन्नबन्धोश्च सखापि श्वशुरस्य च । जामाता स्नेहवत् कुर्यादखिलं पैतृमेधिकम्" । चन्द्रिकायां वृद्धशातातपः "मातुलो भागिनेयस्य स्वस्रीयो मातुलस्य च । श्वशुरस्य गुरोश्चैव सख्युर्मातामहस्य च । एतेषाञ्चैव भार्य्याणां श्वश्र्वा मातुः पितुस्तथा । श्राद्धमेषां तु कर्त्तव्यमिति वेदविदो विदुः"। शुद्धिविवेके ब्राह्मे "दत्तानां वाप्यदत्तानां कन्यानां कुरुते पिता । चतुर्थेऽहनि तास्तेषां कुर्वीरन् सुसमाहिताः" । दत्ता वाग्दत्ताः । "मातामहानां दौहित्राः कुर्व्वन्त्यहनि चापरे । तेऽपि तेषां प्रकुर्वन्ति द्वितीयेऽहनि सर्वदा । जामातुः श्वशुराश्चक्रुस्तेषान्तेऽपि च संयताः । मित्राणां तदपत्यानां श्रोत्रियाणां गुरोस्तथा । भागिनेयसुतानां च सर्वेषान्त्वपरेऽहनि । राज्ञोऽसति सपिण्डे तु निरपत्ये पुरोहितः । मन्त्री वा तदशौचान्ते पुरा चौर्ध्वीकरोति सः" । अत्र द्वितीयाहादौ श्राद्धविधानमस्थिसञ्चयनपरम् । कालादर्शे "दाहादि सर्व्वतः पित्रोर्निदध्यादौरसः सुतः । तदभावे तु पौत्रश्च प्रपौत्रः पुत्रिकासुतः । दौहित्रो धनहारी च भ्राता तत्पुत्र एव च । पिता माता स्नुषा चैव स्वसा तत्पुत्र एव च । सपिण्डः सोदकोमातुः सपिण्डश्च सहोदकः । स्त्री च शिष्यर्त्विगाचार्य्यौ जामाता च सखाऽपि च । उच्छिन्नबन्धोरिक्थेन कारयेदवनीपतिः" । गौतमः "पुत्राभावे सपिण्डाः शिष्याश्च दद्युस्तदभावे ऋत्विगाचार्य्यौ" । यत्तु चन्द्रिकायां वृद्धशातातपः "मौल्या श्राद्धं प्रकर्त्तव्यं सर्वेषां वर्णलिङ्गिनामिति" तत्सवर्णविषयम् । "ब्राह्मणस्त्वन्यवर्णानां न कुर्यात्कर्म्म किञ्चन । कामाल्लोभाद्भयान्मोहात् कृत्वा तज्जातितां व्रजेत्" इति ब्राह्मोक्तेः "न ब्राह्मणेन कर्त्तव्यं शूद्रस्याप्यौर्ध्वदेहिकम् । शूद्रेण वा ब्राह्मणस्य विना पारशवात् क्वचित्" इति पारस्करोक्तेश्च । पारशवः ऊढशूद्रापुत्रः । अत्रेदन्तत्त्वं सर्व्वपुत्रादेः पूर्व्वस्याभावे पत्न्यादेरधिकार उक्तः । तत्राभावोऽसन्निधिः नाशश्चोच्यते । अतएव पूर्व्वत्र "असन्निधाने पूर्व्वेषाम्" इत्युक्तम् । तत्रासन्निधौ पत्न्यादेः सर्व्वाधिकारे प्राप्ते "प्रोषितावसिते पुत्रः कालादतिचिरादपि । एकादशाद्याः क्रमशोज्येष्ठस्य विधिवत्क्रियाः" "अथ नैव च यत्कृतम्" इत्याद्यैर्देशान्तरेऽपवादात् पुत्रनाश एव पत्न्यादेः सपिण्डनादावधिकारः । असन्निधौ तु पूर्व्वमेव बोद्धम् । अतोऽनधिकारिणा भ्रात्रादिना कृतमप्यकृतमेवेति पुनरावर्त्तनीयम् । मासिकापकर्षोऽप्यावर्त्तनीयः । एकादशाहमासिकानि नावर्त्त्यन्ते "तज्ज्यायसापि कर्त्तव्यं सपिण्डीकरणं पुनरिति" तदावृत्तिविधानाभावादिति केचित् । तन्न अस्य निर्मूलत्वात् । अतस्तदपि कनिष्ठकृतमावर्त्त्यते वृद्धिश्रौतपिण्डपितृयज्ञार्थं तु कृतं नावर्त्त्यते । "नासपिण्डेऽग्निमान् पुत्रः पितृयज्ञं समाचरेत् । न पार्व्वणं नाभ्युदयिकं कुर्व्वन् लभते फलमिति" इत्युत्तरनिषेधनादिति "भ्राता वा भ्रातृपुत्रो वा" इत्यादिहारीतादिवचोभ्यः कनिष्ठादेरप्यधिकारात् तथा चात्र ज्येष्ठकर्तृकत्वबाधः । सपिण्डने तु बहु वक्तव्यं तद्विषये वक्ष्यामः। अधिकारिविशेषेण क्रियाव्यवस्थोक्ता विष्णुपुराणे (पूर्व्वादिक्रियाः शुद्धितत्त्वे दर्शयिष्यमाणाः) । "प्रेते पितृत्वमापन्ने सपिण्डीकरणादनु । क्रियन्ते याः क्रिया पुत्रैः प्रोच्यन्ते तानृपोत्तराः । पितृमातृसपिण्डैश्च समानसलिलैस्तथा । तत्सङ्घातान्तर्गतैश्चैव राज्ञा वा धनहारिणा । पूर्व्वा मध्याश्च कर्त्तव्याः पुत्राद्यैरेवचोत्तराः । दौहित्रैर्वा नरश्रेष्ठ ! कार्य्यास्तत्तनयैस्तथा । मृताहनि तु कर्त्तव्या स्त्रीणामप्युत्तराः क्रियाः" । दौहित्रतत्पुत्रयोर्धनहारिणोरिदम् । एवमन्यत्र धनहर्त्तुः । "यश्चार्थहरः स पिण्डदायी स्यात्" यमोक्तेः । "प्रेतस्य प्रेतकार्य्याणि अकृत्वा धनहारकः । वर्णानां यद्वधे प्रोक्तं तद्व्रतं प्रयतश्चरेदिति" पृथ्वीचन्द्रोदये व्याघ्रपादोक्तेः । मदनरत्ने स्कान्देऽपि "सर्व्वमेतन्मनुष्याणां द्रविणं यत्प्रकीर्त्तितम्" इत्युक्त्वा "ऋषिभिस्तस्य

निर्द्दिष्टा निष्कृतिः पावनी परा । आदेहपतनात्तस्य कुर्य्यात्पिण्डोदकक्रियाम्” इत्युक्तम् । क्रियानिबन्धे कात्यायनः “न च माता न च पिता कुर्य्यात्पुत्रस्य पैतृकम् । नाप्यजश्च तथा भ्राता भ्रातृणां तु कनीयसाम्” । पृथ्वीचन्द्रोदये बौधायनः । “पिता श्राद्धं न कर्त्तव्यं पुत्राणां तु कथञ्चन । भ्राता चैव न कर्त्तव्यं भ्रातॄणाञ्च कनीयसाम् । यदि स्नेहेन कुर्वीत सपिण्डीकरणं विना । गयायां तु विशेषेण ज्यायानपि समाचरेत्” । अन्याभावे पित्रादिरपि कुर्य्यात् । “उच्छिन्नबान्धवं प्रेतं पिता भ्राताथ वाऽग्रजः । जननी वापि संस्कुर्य्यान्महदेनोऽन्यथा भवेदिति” सुमन्तूक्तेः । ब्रह्मचारिणां तु शुद्धिविवेके ब्राह्मे “असमाप्तव्रतस्यापि कर्त्तव्यं ब्रह्मचारिणः । श्राद्धं तु मातापितृभिर्न तु तेषां करोति सः” । श्राद्धं मासिकाब्दिकादि सर्वं कार्य्यमित्यर्थः । नत्विति निषेधोऽन्यसत्त्वे । यत्तु छन्दोगपरिशिष्टे “न त्यजेत्सूतके कर्म्म ब्रह्मचारी स्वयं क्वचित् । न दीक्षणात्परं यज्ञे न कृच्छ्रादितपश्चरन् । पितर्य्यपि मृते नैषां दोषो भवति कर्हिचित् । अशौच कर्म्मणां न स्यात् त्र्यहं वा ब्रह्मचारिणाम्” । यच्च याज्ञवल्क्यः “न ब्रह्मचारिणः कुर्य्युरुदकम्पतितास्तथेति” । तदप्यन्यसत्त्वे । अन्याभावे तु ब्रह्मचारिणापि कार्य्यम् पूर्व्वोक्तवृद्धमनुवचनात् । “आचार्य्यपित्रुपाध्यायान् निर्हृत्यापि व्रतोव्रती । स तदन्नं च नाश्नीयाच्च तैः सह संवसेदिति” तेनैवोक्तेः । “ब्रह्मचारिणः शवकर्म्मणो व्रतान्निवृत्तिः अन्यत्र मातापित्रोरिति” वशिष्ठोक्तेः । अत्राशौचमेकाहं वक्ष्यामः । प्रागुपनयनात्तु पञ्चवर्षोत्तरं सपिण्डीकरणवर्ज्जं षोडशश्राद्धादि सर्व्वं कार्य्यमित्युक्तं देवजानीये “असंस्कृतानां भूमौ पिण्डं दद्यात्संस्कृतानां कुशेष्विति” प्रचेतोवचनात् । एतच्चाग्रे वक्ष्यामः । अविभक्तानां विशेषमाह पृथ्वीचन्द्रोदये मरीचिः । “बहवः स्युर्यदा पुत्राः पितुरेकत्रवासिनः । सर्व्वेषां तु मतङ्कृत्वा ज्येष्ठेनैव तु यत्कृतम् । द्रव्येण चाविभक्तेन सर्व्वैरेव कृतम्भवेत्” । ज्येष्ठस्य कर्त्तव्येऽपि सर्व्वे फलभागिन इत्यर्थः । तेन ये ब्रह्मचर्य्यपराद्यवर्ज्जनादयः कथिताः संस्कारास्ते सर्व्वेषां भवन्तीति सिद्धम् संसृष्टिनामप्येवम् तुल्यत्वात् । विभक्तानां विशेषमाहोशनाः । “नवश्राद्धं सपिण्डत्वं श्राद्धान्यपि च षोडश । एकेनैव तु कार्य्याणि संविभक्तधनेष्वपि” । लघुहारीतः “सपिण्डीकरणान्तानि यानि श्राद्धानि षोडश । पृथङ्नैव सुताः कुर्युः पृथग्द्रव्या अपि क्वचित् । ऊर्द्ध्वं सपिण्डीकरणात् सर्व्वे कुर्युः पृथक्पृथक्” । मदनरत्ने “विभक्तास्तु पृथक्कुर्युः प्रतिसंवत्सरादिकम् । एकेनैवाविभक्तेषु कृते सर्व्वैस्तु तत्कृतम्” । एतेनाब्दिकादिष्वविभक्तानामनियम इति वदन् शूलपाणिः परास्तः । अयमधिकारिक्रमो दाक्षिणात्यप्रचलितः ।

गौड़देशवासिभिस्तु रघुनन्दनमतानुसारिणी व्यवस्था ध्रियते सा च व्यवस्था शुद्धितत्त्वे तेन दर्शिता यथा

व्याघ्रः “कृतचूड़स्तु कुर्वीत उदकं पिण्डमेव च” । एतच्च पुत्रेतरपरम् “असंस्कृतः सुतः श्रेष्ठो नापरो वेदपारगः” इति दायभागधृतात् । अन्यथा सुतत्वेन विशेषोपादानं व्यर्थं स्यात् । श्राद्धेऽनुपनीतस्य मन्त्रपाठाधिकारमाह मनुः । “नाभिव्याहारयेद्ब्रह्म स्वधानिनयनादृते । शूद्रेण हि समस्तावद्यावद्वेदे न जायते” । अभिव्याहारयेत् वदेदिति यावत् स्वार्थे णिच् । तत्र प्रथमतो ज्येष्ठपुत्रः यथाह मरीचिः ‘मृते पितरि पुत्रेण क्रिया कार्य्या विधानतः । बहवः स्युर्यदा पुत्राः पितुरेकत्र वासिनः । सर्वेषान्तु मतं कृत्वा ज्येष्ठेनैव तु यत् कृतम् । द्रव्येण चाविभक्तेन सर्व्वैरेव कृतं भवेत्’ । तदभावे यथाक्रमं कनिष्ठपुत्रपौत्रप्रपौत्राः । तथाच विष्णुपुराणम् ‘पुत्रः पौत्रः प्रपौत्रो वा तद्वद्वा भ्रातृसन्ततिः । सपिण्डसन्ततिर्वापि क्रियार्हा नृप ! जायते” । एतच्च षोडशश्राद्धपर्य्यन्तम् तथाच छन्दोगपरिशिष्टम् “पितामहः पितुः पश्चात् प्रेतत्वं यदि गच्छति । पौत्रेणैकादशाहादि कर्त्तव्यं श्राद्धषोडशम् । नैतत् पौत्रेण कर्त्तव्यं पुत्रवांश्चेत् पितामहः” । सपिण्डीकरणपर्य्यन्तमपृथक्कर्त्तव्यमाह लघुहारीतः ‘सपिण्डीकरणान्तानि यानि श्राद्धानि षोडश । पृथङ्नैव सुताः कुर्य्युः पृथग्द्रव्या अपि क्वचित्” । एषामभावे पत्नी तथाच शङ्खः ‘पितुः पुत्रेण कर्त्तव्यां पिण्डदानोदकक्रिया । तदभावे तु पत्नी स्यात्तदभावे सहोदरः । भार्य्यापिण्डं पतिर्दद्यात् भर्त्रे भार्य्या तथैव च’ । इति “अपुत्रधनं पत्न्यभिगामि तदभावे दुहितृगामीत्यादि” विष्ण्वादिवचनेन धनाधिकारस्मृतेः । तदभावे इति प्रपौत्रपर्य्यन्ताभावपरं पार्व्वणपिण्डदातृत्वेन धनाधिकारित्वेन च तेषां बलवत्त्वात् । ‘अपुत्रा स्त्री यथा पुत्रः पुत्रश्चापि भर्त्तरि । पिण्डं दद्यात् जलञ्चैव जन्ममात्रन्तु पुत्रिणी’ इति निर्मूलं समूलत्वेऽपि कालदेशान्तरितपुत्रसद्भावविषयमिति श्राद्धविवेकप्रभृतयः । पत्न्यभावे कन्या । ‘अपुत्रस्य तु

या पुत्री सैव पिण्डप्रदा भवेत् । तस्य पिण्डान् दशैवैतानेकाहेनैव निर्वपेत्" इति ऋष्यशृङ्गवचनात् "गोत्ररिक्थानुगः पिण्डः" इति मनुवचनेन दत्ताद्यपेक्षया तस्याबलवत्वात् । कन्याभावे यथाक्रमं वाग्दत्तादत्तादौहित्राः "दत्तानां चाप्यदत्तानां कन्यानां कुरुते पिता । चतुर्थेऽहनि नास्तेषां कुर्वीरन् सुसमाहिताः" इति ब्रह्मपुराणवचनात् । ननु "दुहिता पुत्रवत् कुर्य्यान्मातापित्रोश्च संस्कृता । अशौचमुदकं पिण्डमेकोद्दिष्टं सदा तयोः" इति शङ्खवचनात् पुत्रानन्तरमेव दुहित्रधिकारश्रुतेः इति चेन्न पत्न्याः प्रथमं धनाधिकारश्रुतेः यथा याज्ञवल्क्यः । "पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा । तत्सुतो गोत्रजो बन्धुः शिष्यः सब्रह्मचारिणः । एषामभावे पूर्व्वेषां धनभागुत्तरोत्तरः" इति । तथा "मातामहानां दौहित्राः कुर्वन्त्यहनि चापरे" । इति ब्रह्मपुराणात् । "पौत्रदौहित्रयोर्लोके न विशेषोऽस्ति धर्म्मतः । तयोर्हि माता पितरौ सम्भूतौ तस्य देहतः" । इति मनुवचनेन "पौत्रदौहित्रसंयुक्ता ये तथा चिरजीविनः । प्रियङ्कराश्च बालानां ते नराः स्वर्गगामिनः" इति विष्णुधर्म्मोत्तरेण पौत्रतुल्यताभिधानाच्च । तेन यथा पुत्राभावे पौत्रस्तथा दुहित्रभावे दौहित्रः । न च दत्तकन्यादौहित्राभ्यां प्राक् सगोत्रत्वात् सोदराधिकार इति वाच्यम् गोत्रत्वापेक्षया पिण्डदानादेर्धनसाध्यत्वात् ऋक्थग्राहिणोर्दुहितृदौहित्रयोर्बलवत्त्वात् । अत एव दुहितृधनाधिकारे तद्धनेन स्वतोपकारकारणं हेतुरत्याहापस्तम्बः । "अन्तेवास्यर्थांस्तदर्थेषु धर्म्मकृत्येषु प्रयोजयेत् दुहिता वेति" तदर्थेषु मासिकादिना तद्भोगार्थं धर्म्मकृत्येष्वदृष्टार्थमिति । "गोत्ररिक्थानुगः पिण्डः" इति मनूक्तेः । "अनंशौ क्लीवपतितौ जात्यन्धबधिरौ तथा । उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः" । इति मनूक्तानां "पितृद्विट्पतितः षण्ढो यश्च स्यादौपपातिकः । औरसा अपि नैतेऽंशं लभेरन् क्षेत्रजाः कुतः" इति नारदोक्तानाञ्च भागानधिकारिणां पिण्डदानानधिकारः । जात्यन्धबधिरौ जन्मप्रभृत्यन्धबधिरौ निरिन्द्रियाः पङ्ग्वादयः श्रौतस्मार्त्तकर्म्मानधिकारिणोऽपि गृह्यन्ते इति रत्नाकरः । तथाच वृद्धशातातपः । "चाण्डालं पतितं व्यङ्गमुन्मत्तं शवहारकम् । सूतिकां सूयिकां नारीं रजसा च परिप्लुताम् । श्वकुक्कुटवराहांश्च ग्राम्यान् संस्पृश्य मानवः । सचेलं सशिरः स्नात्वा तदानीमेव शुध्यति" । व्यङ्गः पाण्यादिविकलः । व्यङ्गोन्मत्तयोः सदाचारहीनत्वात् अस्पृश्यतेति प्रायश्चित्तविवेकः । श्रौतस्मार्त्तक्रियानधिकारित्वं सदाचारहीनत्वञ्च मूत्रपुरीषाद्यशौचापनयनासमर्थत्वेनेति बोध्यम् । सूयिकां प्रसवकारयित्रीम् । पितृद्विट् पोषणौर्द्धदेहिकविमुखः । औपपातिकः उपपातकैः संसृष्टः । उपपातकेति प्रकारकारपाठेऽपि स एवार्थः । अपपात्रित इति पाठे तु राजवधादिदोषेण बान्धवैर्यस्य घटापवर्ज्जनं कृतमिति कल्पतरुः । अत्र याज्ञवल्क्येनोक्तम् "न ब्रह्मचारिणः कुर्य्युरुदकं पतिता न च । पाषण्डमाश्रिताः स्तेना व्रात्या न विकर्म्मिणः । गर्भभर्त्तृद्रुहश्चैव सुरापाश्चैव योषितः" । पाषण्डं त्रयीबाह्यधर्म्मम् । स्तेनाः सततं चौर्य्यवृत्तयः । व्रात्याः षोडशवर्षपर्य्यन्तमप्राप्तोपनयनाः, विकर्म्मिणः आलस्येनाश्रद्दधानतया स्वधर्म्मानुष्ठायिनः व्यङ्गत्वादिना स्वधर्म्मानुष्ठानासमर्थाश्च बोध्या इति "कश्चित् क्षिपति सत्पुत्रो दौहित्रो वा सहोदरः । गृहीत्वास्थीनि तद्भक्त्या नीत्वा तोये विनिःक्षिपेत्" इत्यादिपुराणे क्रमदर्शनादत्रापि दौहित्राभावे सोदरः पूर्व्वोक्तशङ्खवचनेऽप्येवं क्रमो बोध्यः । अत्र ज्येष्ठः कनिष्ठश्चाविशेषात् । "नानुजस्य तथाग्रज" इति छन्दोगपरिशिष्टं कनिष्ठभ्रातृवद्भावविषयं तयोरभावे तथाविधौ वैमात्रेयौ । "भ्रातुर्भ्राता स्वयं चक्रे तद्भार्य्या चेन्न विद्यते । तस्य भ्रातृसुतश्चक्रे यस्य नास्ति सहोदरः" इति ब्रह्मपुराणाद्वैमात्रेयस्यापि एकजातत्वेन भ्रातृत्वात् । "देशान्तरस्थक्लीवैकवृषणानसहोदरान्" इत्यादिछन्दोगपरिशिष्टेन परिवेदने वैमात्रेयस्य भ्रातृत्वप्रसक्तावसहोदरानित्यनेन प्रतिप्रसवाच्च । पितृव्यपुत्रादौ भ्रातृपदप्रयोगो गौणः । गुणश्च वीजिपुरुषापेक्षया समानसंख्यजनकजन्यत्वमिति । धनिपित्रादिपिण्डद्वयदातुः सोदरपुत्रात् धनिपित्रादिपिण्डत्रयदातृत्वाद्वैमात्रेयस्य धनाधिकारित्वेन बलवत्त्वाच्च । तत्र सहोदर इति पूर्व्वोक्तानुरोधात् वैमात्रेयपरमपि अन्यथा सहोदराभावे वैमात्रेयसत्त्वे वैमात्रेयपुत्राधिकारापत्तेः । तेन वैमात्रेयाभावे सोदरवैमात्रेयभ्रातृक्रमवत् सोदरपुत्रस्तदभावे वैमात्रेयपुत्रः । तन्मातृभोग्यपिण्डदातृतया प्रथमाधिकारित्वेन बलवत्त्वात् तस्यातिदिष्टपुत्रत्वाच्च । तदभावे पिता । "पुत्रो भ्राता पिता वापि मातुलो गुरुरेव च । एते पिण्डप्रदा ज्ञेयाः सगोत्राश्चैव बान्धवाः" इति प्रचेतोवचनात् । "न पुत्रस्य पिता दद्यात्" इति छन्दोग-

परिशिष्टं भ्रातृपुत्रपर्य्यन्तसद्भावविषयम् । तदभावे माता । "पुत्रोभ्राता पिता वापि" इत्यत्रापिशब्देन मातुः समुच्चयात् । "पितरौ भ्रातरश्चेत्यादौ धनाधिकारे तथा दर्शनाच्च । अतएव श्राद्धविवेके, पितुरभावे तुल्यन्याय-तया मातापीत्युक्तमिति । तदभावे पुत्रवधूः । तथाच शङ्खः "भार्य्यापिण्डं पतिर्द्द्यात् भर्त्त्रे भार्य्या तथैव च । श्वश्र्वादेश्च स्नुषा चैव तदभावे द्विजोत्तमः" । श्वश्र्वादिप दात् श्वशुरादेरपि परिग्रहः इतरस्य स्नुषात्वाभावात् । द्विजोत्तमइत्यत्र सपिण्डक इति मैथिलानां पाठः । स्नुषा-पदोपात्तसपिण्डविशेषाभावे "अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं भवेत्" इति धनाधिकारे तथादर्शनादत्रापि सन्निधितारतम्येन माता पुत्रवधूः पौत्री पौत्रवधूः प्रपौत्री प्रपौत्रवधूः पितामहः पितामही पितृव्यादयः सपिण्डाश्चाधि-कारिणः" "पुत्राभावे स पिण्डाः" इति वक्ष्यमाणवचनात् । शङ्खवचनस्यमैथिलपाठाच्च । तदभावे समानोदकाः । "सपि-ण्डसन्ततिर्वापि" इति वक्ष्यमाणात् । सपिण्डसन्ततिः समानोदकाइत्यर्थः । तदभावे सगोत्राः "सगोत्रश्चेति" "गोत्रक्रथानुगःपिण्डः" इत्युक्तत्वात् "एषामभावे सर्व्वेषां समानोदकसन्ततिरिति" वक्ष्यमाणाच्च । तदभावे माता-महः "दातामहानां दौहित्राः कुर्व्वन्त्यहनि चापरे । तेऽपि तेषां प्रकुर्व्वन्ति द्वितीयेऽहनि सर्व्वदा" इति ब्रह्मपुरा-णात् । तदभावे मातुलः तदभावे भागिनेयः "मातु-लोभागिनेयस्य स्वस्रीयोमातुलस्य च" इति शातातपीयपाठ-क्रमात् । तदभावे सन्निधिक्रमेण मातामहसपिण्डाः । तद-भावे मातामहसमानोदकाः । "सपिण्डसन्ततिर्व्वापि क्रियार्हा नृप! जायते । एषामभावे सर्व्वेषां समानोदकसन्ततिः । मातृपक्षस्य पिण्डेन सम्बद्धा ये जलेन वा" विष्णुपुरा-णात् । तदभावे श्वशुरः तदभावे जामाता "जामातुः श्वशुरायश्च तेषां तेऽपि च संयताः" इति ब्रह्मपुराण-पाठक्रमात् । तदभावे पितामहीभ्राता । "भागिनेयसुता-नाञ्च सर्व्वेषान्त्वपरेऽहनि । श्राद्धं कार्य्यञ्च प्रथमे स्नात्वा कृत्वा जलक्रियाम्" इति ब्रह्मपुराणात् । अपरेऽहनि इत्यत्राशौचान्तदिनस्येति शेषः । तदभावे यथाक्रमं शिष्यर्त्विगाचार्य्याः, गौतमेन "पुत्राभावे सपिण्डाः मातृसपिण्डा वा शिष्या वा दद्युः तदभावे ऋत्विगा-चार्य्यौ" इत्युक्तत्वात् । तदभावे सुहृत्पितृसुहृदौ "मित्राणां तदपत्यानामिति" ब्रह्मपुराणपाठक्रमात् । तद-भावे एकग्रामवासी । "संघातान्तर्गतैर्वापि कार्य्या प्रेतस्य-

सत्क्रिया" इति विष्णुपुराणात् तदभावे तद्धनं गृहीत्वा यः कश्चित् सवर्णः । "उत्सन्नबन्धुरिक्थाद्वा कारयेदवनी-पतिः" इति विष्णुपुराणात् । और्द्ध्वदेहिकमधिकृत्य वि-ष्णुपुराणं "ब्राह्मणस्त्वन्यवर्णानां न करोति कदाचन । कामाल्लोभाद्भयान्मोहात् कृत्वा तज्जातितामियात्" । स्त्रियास्तु यथाक्रमं पुत्रपौत्रप्रपौत्राः विष्णुपुराणे "पुत्रः पौत्रः प्रपौत्रो वा" इत्यविशेषश्रुतेः । तदभावे कन्या । "अपुत्रस्य च या पुत्री" इत्यस्योद्देश्यगतलिङ्गाविव-क्षया स्त्री पुंसाधारणत्वात् धनाधिकारित्वाच्च । तदभावे वाग्दत्ता "दत्तानामप्यदत्तानाम्" इत्यत्रापि पितृपदस्य मातृपदोपलक्षकत्वात् । तदभावे दत्ता "दुहिता पुत्रवत् कुर्य्यात्मातापित्रोश्च संस्कृता" इति मनुवचनात् । तदभावे दौहित्रः प्रागुक्तब्रह्मपुराणे तथा दर्शनात् । "पौत्रदौहित्रयोर्लोके न विशेषोऽस्ति धर्म्मतः । तयोर्हि मातापितरौ सम्भूतौ तस्य देहतः" इत्यनेन यथा पुत्रा-भावे पौत्रः तथा दुहित्रभावे दौहित्रः इति प्रागेव उक्तत्वात् । "मातुलोभागिनेयस्य स्वस्रीयोमातुलस्य च । श्वशुरस्य गुरोश्चैव सख्युर्मातामहस्य च । एतेषां चैव भार्य्याभ्यः स्वसुर्मातुः पितुस्तथा । पिण्डदानन्तु कर्त्तव्य-मिति वेदविदां स्थितिः" इति वृद्धशातातपवचनेन मा-तामह्याश्च साक्षात् दौहित्रेण पिण्डदानश्रुतेः धनाधि-कारित्वाच्च । दौहित्राभावे सपत्नीपुत्रः । तस्य पुत्र-त्वकरणात् । यथाह मनुः । "सर्व्वासामेकपत्नीनामेका चेत् पुत्रिणी भवेत् । सर्व्वास्तास्तेन पुत्रेण प्राह पुत्र-वतीर्म्मनुः" । एकपत्नीनामिति एकः पतिर्यासामिति अत्र सपत्नीपुत्रस्य पुत्रत्वातिदेशात् तत्सत्त्वेऽपि स्त्रीणां सपिण्डनं मैथिलैरुक्तं तत्र "पुत्रेणैव तु कर्त्तव्यं सपि-ण्डीकरणं स्त्रियाः । पुरुषस्य पुनस्त्वन्ये भ्रातृपुत्रादयोपि च" इति लघुहारीतवचने एवकारेणातिदिष्टपुत्रनिषे-धात् । अतएवोत्तरार्द्धे भ्रातृपुत्रोपादानं सङ्गच्छते । अन्यथा पुंसां तत्र पुत्रत्वातिदेशात् पुत्रत्वेनैव प्राप्तेः भ्रातृपुत्रोपादानं व्यर्थं स्यात् । तथाह मनुः । "भ्रा-तृणामेकजातानामेकश्चेत् पुत्रवान् भवेत् । सर्व्वे ते तेन पुत्रेण पुत्रिणोमनुरब्रवीत्" एकजातानामेकपितामातृ-जातानां तथाच "बृहस्पतिः । यद्येकजातावहवोभ्रातरः स्युः सहोदराः । एकस्यापि सुते जाते सर्व्वे ते पुत्रि-णोमताः" । एतन्न्यायमूलं तदिति चेन्न श्वादिपदग्रा-ह्येषु "भ्राता वा भ्रातृपुत्रो वा सपिण्डः शिष्यएव वा ।

सहपिण्डक्रियां कृत्वा कुर्य्यादभ्युदयन्ततः” इति वृद्धहारीतोक्तेषु न्यायानुपपत्तेः । भ्राता वेति वाशब्दात् पूर्व्वेषां दौहित्रादीनां तदपेक्षया प्रधानाधिकारिणां समुच्चयः । अत एव सपिण्डत्वेनैव भ्रातृतत्पुत्रयोरधिकारसिद्धौ पृथगुपादानं प्राधान्यज्ञापनार्थम् । पुत्रत्वातिदेशफलन्तु पुन्नामनरकनिस्तारः । अतस्तत्सत्त्वे क्षेत्रजाद्यकरणञ्च । तथाहि “पुन्नाम्नोनरकाद्यस्मात्त्रायते पितरं सुतः । मुखसन्दर्शनेनापि तदुत्पत्तौ यतेत सः” इति मनुवचने पुन्नामनरकत्राणाय पुत्त्रोत्पादनं विहितम् । तच्च फलं यद्यतिदिष्टपुत्राभ्यां भ्रातृसपत्नीजाभ्यां निष्पन्नं तदा सिद्धे इच्छाविरहात् तदुपायान्तरपुत्रप्रतिनिधीभूतक्षेत्रजादेर्नोपादानम् । पुत्रोत्पादनन्तु तथापि कार्य्यं पुत्रसत्त्वेऽपि पुत्रान्तरेच्छाविधानेन तत्कर्त्तव्यताप्रतीतेः यथा मत्स्यपुराणम् । “एष्टव्या बहवः पुत्रा यद्यप्येकोगयां व्रजेत् । यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत्” । एवमेव कल्पतरुपारिजातस्मृतिसारमहामहोपाध्यायरत्नाकरवाचस्पतिमिश्रादयः । स्त्रीणामपि पुत्त्रात् पुन्नामनरकनिस्तारणमाह वृद्धरत्नाकरे शङ्खलिखितौ “आत्मा पुत्त्र इति प्रोक्तः पितुर्मातुरनुग्रहात् । पुन्नाम्नस्त्रायते पुत्त्रस्तेनापि पुत्त्रसंज्ञितः” । पूर्व्वोक्तवृद्धहारीतवचने पुत्त्रेणेति तत्सत्त्वमात्रं विवक्षितम् । “सपिण्डीकरणान्तानाम् पुत्त्राभावे न विद्यते” इति मार्कण्डेयपुराणैकवाक्यत्वात् । “यानि पञ्चदशाद्यानि अपुत्त्रस्येतराणि च । एकस्यैव तु दातव्यमपुत्त्रायाश्च योषितः” इति छन्दोगपरिशिष्टेनापुत्त्राया एवाद्यपञ्चदशश्राद्धैः प्रेतत्वपरिहारोक्तत्वाच्च । एतत् पत्युरभावे द्रष्टव्यम् । “अपुत्त्रायां मृतायान्तु पतिः कुर्य्यात् सपिण्डनम् । श्वश्र्वादिभिः सहैवास्याः सपिण्डीकरणं भवेत्” इति पैठीनसिवचनात् । ततश्च यथा शिशौ पुत्रेऽन्येनापि सपिण्ड्यते । एवं पतिसत्त्वेऽपि । अतएव मैथिलैरवीरायाः सपिण्डनं नास्तीत्युक्तम् तदभावे पतिः । “भार्य्यापिण्डं पतिर्दद्यात्” इति यज्ञवचनात् । “न जायायाः पतिः कुर्य्यादपुत्राया अपि क्वचित्” इति छन्दोगपरिशिष्टवचनम् सपत्नीपुत्रपर्य्यन्तसद्भावविषयम् । पत्यभावे स्नुषा “श्वश्र्वादेश्च स्नुषा चैव” इति यमवचनात् । तदभावे सान्निध्यक्रमेण सपिण्डाः । यज्ञवचने “तदभावे सपिण्डकाः इति मैथिलपाठात्” । “तदभावे सपिण्डः” इति पूर्व्वोक्तगोतमवचने सामान्यतः श्रुतेश्च । तदभावे समानोदकाः । “सपिण्डसन्ततिर्वेत्यविशेषश्रुतेः । तदभावे सगोत्राः । समानोदकसन्ततिरिति वक्ष्यमाणात् । श्राद्धविवेकेऽप्येवम् । एषामभावे पिता । “दत्तानाञ्चाप्यदत्तानां कन्यानां कुरुते पिता” इत्युक्तत्वात् । तदभावे भ्राता । “पुत्रोभ्राता पिता वापि” इत्यविशेषश्रुतेः । तदभावे यथाक्रमं दायभागोक्तोपकारतारतम्येन. “मातुलोभागिनेयस्य स्वस्रीयोमातुलस्य च । श्वशुरस्य गुरोश्चैव सख्युर्मातामहस्य च । एतेषाञ्चैव भार्य्याभ्यः स्वसुर्मातुः पितुस्तथा । पिण्डदानन्तु कर्त्तव्यमिति वेदविदां स्थितिः” इति शातातपवचनात् भगिनीपुत्रभर्त्तृभागिनेयभ्रातृपुत्रजामातृभर्त्तृमातुलभर्त्तृशिष्याः पत्यपेक्षया पौत्रादिवत् पिण्डदानतारतम्येन क्रमेणाधिकारिणः । तथाहि तत्पिण्डतत्पुत्रदेयतत्पित्रादिपिण्डत्रयदातृत्वात् भगिनीपुत्रः । तदभावे भर्त्तृभागिनेयः । पुत्राद्भर्त्तुर्दुर्बलत्वेन तत्स्थानपातिनोऽपि तथैव बलाबलस्य न्याय्यत्वेन तद्भर्त्तृदेयपुरुषत्रयपिण्डतद्भर्त्तृपिण्डदत्वात् । तदभावे भ्रातृपुत्रः । तत्पिण्डतत्पुत्रदेयतत्पित्रादिपिण्डद्वयदत्वात् । तदभावे जामाता । “मातृष्वसा मातुलानी पितृव्यस्त्री पितृष्वसा । श्वश्रूः पूर्व्वजपत्नी च मातृतुल्या प्रकीर्त्तिता” इति वृहस्पतिवचनेन मातृष्वस्रादीनां मातृतुल्यत्वाभिधानात् । स्वस्रीयाद्यैः सह जामातुः पुत्रतुल्यत्वप्रतीतेः । अतएव तेषां धनभागित्वमाह वृहस्पतिः । “यदासामौरसोन स्यात् सुतोदौहित्र एव वा । तत्सुतो वा धनं तासां स्वस्रीयाद्याः समाप्नुयुः” । धनग्राहित्वेनापि पिण्डदातृत्वमाह मनुः । “गोत्ररिक्थानुगः पिण्डः” इति । तदभावे भर्त्तृमातुलभर्त्तृशिष्याः क्रमेणाधिकारिणः शातातपीयपाठक्रमानुरोधात् । प्रातिस्विकानामभावे पितृवंश्यमातृवंश्यौ । “पितृमातृसपिण्डैश्च समानसलिलैर्नृप !” इति ब्रह्मपुराणेऽविशेषश्रुतेः । तयोरभावेऽसम्बन्धी द्विजोत्तमः पूर्व्वोक्तयज्ञवचने द्विजोत्तम इति गौड़ीयपाठात् संघातान्तर्गतैर्व्वापीति अविशेषश्रुतेः ।

त्रिधाक्रियाकर्त्तृनाह विष्णुपुराणम् “पुत्रः पौत्रः प्रपौत्रोवा तद्वद्वा भ्रातृसन्ततिः । सपिण्डसन्ततिर्व्वापि क्रियार्हो नृप ! जायते । एषामभावे सर्व्वेषां समानोदकसन्ततिः । मातृपक्षस्य पिण्डेन सम्बद्धा ये जलेन वा । कुलद्वयेऽपि चोत्सन्ने स्त्रीभिः कार्य्या क्रिया नृप । संघातान्तर्गतैर्व्वापि कार्य्या प्रेतस्य सत्क्रिया ।

उत्सन्नबन्धोर्न्न कुर्य्याद्वा कारयेदवनीपतिः। पूर्व्वाः क्रिया मध्यमाश्च तथा चैवोत्तराः क्रियाः। त्रिप्रकाराः क्रियाश्चैतास्तासां भेदान् शृणुष्व मे। आदाहवार्य्यायुधादिस्पर्शाद्यन्ताश्च याः क्रियाः। ताः पूर्व्वा मध्यमा मासि मास्येकोद्दिष्टसंज्ञिताः। प्रेते पितृत्वमापन्ने सपिण्डीकरणादनु। क्रियन्ते याः क्रियाः पित्र्याः प्रोच्यन्ते ता नृपोत्तराः। पितृमातृसपिण्डैश्च समानसलिलैस्तथा। संघातान्तर्गतैर्व्वापि राज्ञा वा धनहारिणा। पूर्व्वक्रियास्तु कर्त्तव्याः पुत्राद्यैरेव चोत्तराः। दौहित्रैर्व्वा नरश्रेष्ठ! कार्य्यास्तत्तनयैस्तथा। मृताहनि तु कर्त्तव्याः स्त्रीणामप्युत्तराः क्रियाः। प्रतिसंवत्सरं राजन्! एकोद्दिष्टं विधानतः"। आदाहेति दाहावधेराशौचान्तविहितवार्य्यायुधादिस्पर्शाद्यन्ताश्च याः पूर्व्वाः। मासि मासीत्येकादशाहादिसपिण्डनान्तप्रेतक्रियोपलक्षणम्। सपिण्डनोत्तराः पार्व्वणादिक्रिया उत्तराः। अत्र पुत्रादिसपिण्डादयः पूर्व्वाः क्रिया अवश्यं कुर्य्युः। मध्यमक्रियायामनियमः। उत्तरक्रियायां पुत्रादयो भ्रातृसन्ततिपर्य्यन्ता नियताः। श्राद्धविवेकेऽप्येवम्। दौहित्रैर्व्वेति वाशब्दः समुच्चयार्थः तेन दौहित्रोऽप्युत्तरक्रियायां नियताधिकारी। दौहित्रतनयैरिति पुत्रिकापुत्रविषयमिति कल्पतरुः। कर्त्तृप्रकरणात् स्त्रीणामिति "वा कर्त्तरि कृत्ये" इति कर्त्तरि षष्ठी। उत्तरक्रियायां प्रतिसंवत्सरमेकोद्दिष्टविधाननियमात्। न पार्व्वणवृद्धिश्राद्धादौ स्त्रीणामधिकारः। मार्कण्डेयपुराणम् "सर्व्वाभावे स्त्रियः कुर्य्युः स्वभर्त्तॄणाममन्त्रकम्। तदभावे च नृपतिः कारयेत् स्वकुटुम्बवत्। स्त्रीणामप्येवमेवं तदेकोद्दिष्टमुदाहृतम्। मृताहनि यथान्यायं नृणां यद्वदिहोदितम्"। स्त्रियोऽत्र सवर्णोढाऽपरिणीता वेति श्राद्धविवेकः। सवर्णोढायाः पुत्रपौत्रपर्य्यन्ताभावएव विधानात्। स्त्रीणामिति तु संप्रदानपरम्। एवमेवामन्त्रकमिति श्राद्धविवेकः। अत्र स्त्रियइत्यस्यासवर्णोढाऽपरिणीतापरत्वव्याख्यानात् स्त्रीणां मन्त्रनिषेधोऽपि तत्संप्रदानकश्राद्धएवावगम्यते। नतु स्त्रीमातृसंप्रदानके। एतच्च विप्रेतरपरं तस्य हीनवर्णश्राद्धनिषेधात्। कल्पतरौ तु स्त्रीणामप्येवमिति सम्बन्धेन स्त्रीणामेतत् कर्त्तव्यमिति एतद्व्याख्याने स्त्रीसम्प्रदानकश्राद्धे सुतरां मन्त्राः पाठ्याः। याज्ञवल्क्येनापि समन्त्रकमेकोद्दिष्टं सपिण्डीनश्चोक्ता। एतत् सपिण्डकरणमेकोद्दिष्टं स्त्रिया अपि इत्यनेन स्त्रियाश्चापि तथैवेत्युक्तम्। "मातुः सपिण्डीकरणं पितामह्या सहोदितम्। यथोक्तेनैव कल्पेन पुत्रिकाया न चेत् सुतः" इति छन्दोगपरिशिष्टेनापि यथोक्तेनैव कल्पेनेत्यनेन मन्त्रादिकमतिदिष्टम्। व्यवहारोऽपि तथेति।

तदयं संक्षेपः। ज्येष्ठपुत्रकनिष्ठपुत्रपौत्रप्रपौत्रापुत्रपत्नीक्षमासमर्थपुत्रयुक्तपत्नीकन्यावाग्दत्तादत्तकन्यादौहित्रकनिष्ठसहोदरज्येष्ठसहोदरकनिष्ठवैमात्रेयज्येष्ठवैमात्रेयकनिष्ठसहोदरपुत्रज्येष्ठसोदरपुत्रकनिष्ठवैमात्रेयपुत्रज्येष्ठवैमात्रेयपुत्रपितृमातृपुत्रवधूपौत्रीपौत्रवधूप्रपौत्रीप्रपौत्रवधूपितामहपितामहीपितृव्यादिसपिण्डसमानोदकसगोत्रमातामहमातुलभागिनेयमातृपक्षसपिण्डतत्समानोदकासवर्णभार्य्याऽपरिणीतस्त्रीश्वशुरजामातृपितामहीभ्रातृशिष्यर्त्विगाचार्य्यमित्रपितृमित्रक्रयामवाप्तगृहीतवेतनसजातीयाः अष्टचत्वारिंशत्प्रकाराः क्रमेणाधिकारिणः।

स्त्रियास्तु ज्येष्ठपुत्रकनिष्ठपुत्रपौत्रप्रपौत्रकन्यावाग्दत्तादत्तादौहित्रसपत्नीपुत्रपतिस्नुषासपिण्डसमानोदकसगोत्रपितृभ्रातृभगिनीपुत्रभर्त्तृभागिनेयभ्रातृपुत्रजामातृभर्त्तृमातुलभर्त्तृशिष्यपितृसमानोदकपितृवंश्यमातृसमानोदकमातृवंश्यद्विजोत्तमाश्चतुर्व्विंशतिप्रकाराः" इति

अथाब्दिकश्राद्धरूपैकोद्दिष्टे विशेषः श्रा० त० निर्णीतः यथा गोभिलः। "अतऊर्द्धं संवत्सरे संवत्सरे प्रेतायान्नं दद्यात् यस्मिन्नहनि प्रेतः स्यादिति"। अतऊर्द्धं सपिण्डीकरणान्तश्राद्धनिमित्तादाद्यसंवत्सरादूर्द्धं संवत्सरे संवत्सरे प्रतिवर्षं यस्मिन्नहनि मृतस्तस्मिन्नहनि मृताय दद्यात्। व्याघ्रः। 'प्रतिसंवत्सरञ्चैवमेकोद्दिष्टं मृताहनि"। एतेन सपिण्डीकरणापकर्षे आद्यसंवत्सरेऽपि मृताहे श्राद्धान्तरं कर्त्तव्यमिति मैथिलोक्तं हेयम्। व्यक्तमाह हेमाद्रिधृतवचनम्। 'पूर्णे संवत्सरे श्राद्धं षोड़शं परिकीर्त्तितम्। तेनैव च सपिण्डत्वं तेनैवाब्दिकमिष्यते"। अत्र पूर्णसंवत्सरक्रियमाणश्राद्धाद्यथोभयनिर्व्वाहस्तथापकृष्टसपिण्डीकरणश्राद्धादप्युभयनिर्व्वाहो न पूर्णसंवत्सरे आब्दिकान्तरम् एवं पञ्चदशश्राद्धेऽप्यूह्येयम्। मत्स्यपुराणम् "ततःप्रभृति संक्रान्तावुपरागादिपर्व्वसु। त्रिपिण्डमाचरेत् श्राद्धमेकोद्दिष्टं मृताहनि"। ततः प्रेतत्वपरीहारात् त्रिपिण्डं त्रैपुरुषम्। निरुपपदमृताहशब्दः मृतसम्बन्धिमासपक्षतिथिविशेषपरः। उपपदात्तु क्वचित्तिथिविशेषमात्रपरः। यथा मृताहे प्रतिमासम् कुर्य्यादित्यादौ। शङ्खः "सपिण्डीकरणादूर्द्ध्वं यद्यस्मै प्रदीयते। तत्र तत्र त्रयम्

कुर्य्यात् वर्जयित्वा मृताहनि । अमावस्याम् क्षयो यस्य प्रेतपक्षेऽथवा पुनः । सपिण्डीकरणादूर्द्ध्वं तस्योक्तः पार्व्वणो विधिः” । त्रयं सम्प्रदानानां त्रयं कुर्य्यात् त्रिभ्यो दद्यादित्यर्थः । मृताहपर्य्युदस्तत्रिदैवतत्वस्य प्रतिप्रसवमाह अमावस्यामिति प्रेतपक्षोऽत्र पितृपक्षः आश्वयुक्कृष्णपक्ष इति यावत् न तु कृष्णपक्षमात्रं कृष्णपक्षसामान्यपरत्वेऽमावास्यापदवैयर्थ्यापत्तेः। पितृपक्षं विशेषयति हेमाद्रिमाधवाचार्य्यधृतं नागरखण्डम् 'नभोवाथ नभस्योवा मलमासो यदा भवेत् । सप्तमः पितृपक्षः स्यादन्यत्रैव तु पञ्चमः” । अत्र श्रावणभाद्रयोरन्यतरस्य मलमासत्वे आषाढ्यपेक्षया सप्तमपक्षस्य पितृपक्षत्वम् । अत्रमृतस्यैव प्रेतपक्षमृतत्वं न तु मलमासभाद्रकृष्णपक्षमृतस्य । ततश्च तत्र मृतस्य वर्षान्तरेऽश्वयुक्कृष्णपक्षेऽपि तच्छ्राद्धकरणे न पार्व्वणं किन्त्वेकोद्दिष्टमिति । अत्र पार्व्वणोविधिः पार्व्वणेतिकर्त्तव्यताकैकोद्दिष्टविधिरिति नव्यवर्द्धमानप्रभृतयः । तन्न पूर्व्ववचनोक्तत्रैपुरुषिकस्य मृताहे पर्य्युदस्तस्य पार्व्वणो विधिरित्यनेन प्रतिप्रसवात् तस्मात् सदैवैकोद्दिष्टं त्रैपुरुषिकं नतु षाट्पौरुषिकं 'कर्षूसमन्वितं मुक्त्वा तथाद्यं श्राद्धषोड़शम् । प्रत्याब्दिकञ्च शेषेषु पिण्डाः स्युः षड़िति स्थितिः” इति छन्दोगपरिशिष्टवचनेन प्रत्याब्दिकव्यतिरेकेण षट्संख्यानियमात् । एवममावास्यादिमरणनिमित्तेन मातुरपि प्रत्याब्दिकं पार्व्वणविधिनैव 'अपुत्रा ये मृताः केचित् स्त्रियोवा पुरुषाश्च ये । तेषामपि च देयं स्यादेकोद्दिष्टं न पार्व्वणम्” इति आपस्तम्बवचने अपुत्त्रा इति विशेषणोपादानात् सपुत्राणां पार्व्वणाभ्यनुज्ञानात् । एतच्च मात्रादित्रितयदैवतं कार्य्यम् । “मात्रे पितामह्यै प्रपितामह्यै च पूर्व्ववत् ब्राह्मणान् भोजयित्वा” इत्यन्वष्टकायां तथादर्शनात् अवसानदिननिमित्तत्वेन पार्व्वणविधिना छन्दोगैरपि मात्रादित्रिकाणां श्राद्धं कर्त्तव्यं “न योषिद्भ्यः पृथग्दद्यादवसानदिनादृते” इति छन्दोगपरिशिष्टवचने विशेषतः प्रतिप्रसवात् । एवं सपिण्डीकरणेऽपि । एतच्च मृताहपार्व्वणं मातापित्रोरेव । तथाच हेमाद्रिधृतं कात्यायनवचनम् । “सपिण्डीकरणादूर्द्ध्वं पित्रोरेव हि पार्व्वणम् । पितृव्यभ्रातृमातृणामेकोद्दिष्टं सदैव तु” । मातृपदं सपत्नीमातृपरम् । सपत्नीमात्रित्यत्र मातृपदस्य राजदन्तादित्वात् परनिपातः । ततश्च वाक्ये मातृसपत्नीति न प्रयोज्यं किन्तु सपत्नीमातरित्यादिकम् । एवं साग्निकौरसक्षेत्रजाभ्यां मृताहे पार्व्वणं कर्त्तव्यम् । 'औरसक्षेत्रजौ पुत्रौ विधिना पार्व्वणेन तु । प्रत्यब्दमितरे कुर्य्युरेकोद्दिष्टं सुता दश” इति जावालिवचनस्य “यत्र यत्र प्रदातव्यं सपिण्डीकरणात् परम् । पार्व्वणेन विधानेन देयमग्निमता सदा” इति मत्स्यपुराणवचनस्य चैकवाक्यत्वात् । उशना च 'प्रत्यब्दं दर्शवच्छ्राद्धं साग्निः कुर्वीत वै द्विजः । एकोद्दिष्टं सदा कुर्य्यान्निरग्निः श्राद्धदः सुतः” । अत्र प्रागुक्तयुक्त्या प्रेतश्राद्धस्य एकोद्दिष्टत्वाभिधानात् सांवत्सरिकश्राद्धे यदेकोद्दिष्टपदमुक्तं तत् प्रेतश्राद्धधर्म्मग्राहित्वार्थम् । ततश्च योग्यत्वादेकार्घ्यादिलाभः न च यथा प्रेतश्राद्धे पितृपदस्थाने प्रेतपदोहः तथात्रापीति वाच्यं सांवत्सरिके प्रेतत्वाभावात्तथाविधानानुपपत्तेः । एवं प्रतिसांवत्सरिकश्राद्धे सम्बन्धार्थकपदं आशीःप्रार्थनं शेषभोजनञ्च कर्त्तव्यम् ।

रजस्वलायां विशेषयति गोतमः 'अपुत्रा तु यदा भार्य्या सम्प्राप्ते भर्त्तुराब्दिके । रजस्वला भवेत् सा तु कुर्य्यात्तत्पञ्चमे दिने' । कुर्य्याच्छ्राद्धमिति शेषः । यत्तु श्राद्धचिन्तामणौ “एकोद्दिष्टं त्रैवर्णिकेन सिद्धान्नेन कर्त्तव्यम् । “एकोद्दिष्टन्तु कर्त्तव्यं पाकेनैव सदा स्वयम् । अभावे पाकपात्राणां तदहः समुपोषणम्” इति कात्यायनवचनात् पाकपात्राभावः पाकसामग्र्यभावोपलक्षणं तदापि नामश्राद्धं किन्तूपोषणमेव श्राद्धस्थानीयमित्यर्थः । स्वयमित्यभिधानादपाटवादिनापि नान्यद्वारा कारयितव्यम् अतएव उपवासेनैव श्राद्धस्थानीयेन तदकरणप्रायश्चित्तेन वा कृतकृत्यतया श्राद्धविघ्नइत्यादिवचनादपि नैकादश्यामनुष्ठानमिति” तन्न पितृप्रेरजातत्वेनैकादश्यां तदनुष्ठानस्य युक्तत्वात् । अन्यथा षोड़शश्राद्धाधिकारिणः कदाचित्तथात्वे 'यस्यैतानि न दीयन्ते प्रेतश्राद्धानि षोड़श । पिशाचत्वं ध्रुवं तस्य दत्तैः श्राद्धशतैरपि” इति यमवचनेन षोड़शश्राद्धाभावे प्रेतत्वपरीहारो न स्यात् । तस्मादुपवासेन श्राद्धार्थः किन्तु तदानीन्तनाकरणप्रायश्चित्तार्थः यथा स्वकालाकृतसंस्कारे प्रायश्चित्तं कृत्वा कालान्तरे तत् करणं तथात्रापि तद्दिने उपवासं कृत्वा एकादश्यां श्राद्धं कर्त्तव्यमिति । एकोद्दिष्टं नान्यद्वारा कार्य्यमित्यत्रापि गोत्रजेतरत्वेन विशेषणीयं 'न कदाचित् सगोत्राय श्राद्धं कार्य्यमगोत्रजैः' इति प्रेतश्राद्धे ब्रह्मपुराणात् । अत्र हि नागोत्रजस्य साक्षात् कर्त्तृत्व निषिध्यते सगोत्रायेत्यस्यव्यापत्तेः तस्मादगोत्रजैर्द्वारभूतैः सगोत्राय श्राद्धं न

कार्य्यमित्यर्थः । तथाच पर्य्युदासपक्षे गोत्रजद्वारा कारयितव्यमिति सुव्यक्तमेव प्रसज्यपक्षे तु अगोत्रजविशेषणस्वरसात् गोत्रजलाभः। प्रेतश्राद्धधर्म्मप्राप्तिहित्वात् सांवत्सरिकमपि तथेति श्राद्धविवेकः। कल्पतरुरत्नाकरयोस्तु स्वगोत्रायेति पठितं स्वमात्मीयं गोत्रं यस्य स स्वगोत्रः विद्यमानगोत्र इत्यर्थः। यस्मै श्राद्धं कर्त्तव्यं तस्य स्वगोत्रजे विद्यमानेऽन्यगोत्रजेन संघातान्तर्गतेन राज्ञा श्राद्धं न कारयितव्यमिति व्याख्यातञ्च। एतन्मतेऽप्यूढदुहित्रादीनामसगोत्रत्वेऽपि न निषेधः। वस्तुतस्तु तत्पाठेऽपि कर्म्मधारयापेक्षया बहुव्रीहेर्जघन्यत्वात् स्वमात्मीयञ्च तत् गोत्रञ्चेति तस्मै अन्यगोत्रजद्वारा श्राद्धं न कार्य्यमित्यर्थः। अतोलघुहारीतवचने स्वयंपदं स्वगोत्रपरम्। अन्यथा ब्रह्मपुराणोक्तागोत्रजपदवैयर्थ्यापत्तेः। एवञ्च भविष्यपुराणप्रभासखण्डयोः “मृताहनि पितुर्यस्तु न कुर्य्यात् श्राद्धमादरात्। मातुश्चैव वरारोहे! वत्सरान्ते मृताहनि। नाहन्तस्य महादेवि! पूजां गृह्णामि नोहरिः” ।मरीचिः। “पतिताऽस्नानिनोमूर्खास्त्रियोऽथ ब्रह्मचारिणः। मृताहं समतिक्रम्य चाण्डालेष्वभिजायते”। इत्याभ्यां कालमाधवीयधृताभ्यां वचनाभ्यां सांवत्सरिकश्राद्धस्य मृताहकर्त्तव्यत्वेनावश्यकत्वात् भविष्यन्मृताहे स्वयं कर्त्तव्यत्वसम्भावनारहितेन मृताहात् पूर्वकालेऽपि प्रतिनिधीयते। ‘प्रक्षिप्याग्निं स्वदारेषु परिकल्प्यर्त्विजं तथा। प्रवसेत् कार्य्यवान् विप्रोवृथैव न चिरं क्वचित” इति छन्दोगपरिशिष्टोक्तस्नाय प्रातर्होमप्रतिनिधिवत्। एवं सति प्रतिनिध्यकरणएव एकादश्यां क्रियते। नच पाकस्याङ्गत्वेन प्रधानतिथिकर्त्तव्यतानियम इति वाच्यम्। ‘व्रतोपवासनियमे घटिकैका यदा भवेत्। सा तिथिः सकला ज्ञेया पित्रर्थे चापराह्णिकी” इति वचनेन मुहूर्त्तमात्रलाभेऽपि कर्त्तव्यतोपदेशात् तदानीं पाके तदसम्भवात्। ‘एवमुदीच्याङ्गशेषभोजनेऽपि न तन्नियम इति”। एतच्च पुत्रदुहित्रोर्नित्यं प्रागुक्तवचनेभ्यः। मृतपितृकपौत्रस्यापि तथा।“मृतमासस्य यः पक्षस्तत्तिथौ प्रतिवत्सरम्। “यावत्चरति पौत्रोऽपि एकमुद्दिश्य दापयेत्”प्रचेतोवाक्यात्

लघुहारीतवाक्ये न द्विजानां सिद्धान्नेनैकोद्दिष्टकरणविधानात् तत्पाकेऽधिकारिविशेषोनिरूप्यते। तत्र श्रा०त० देवलः “तथैवामन्त्रितोदाता प्रातः स्नातः सहाम्बरः। आरभेत नवैः पात्रैरन्नारम्भं सबान्धवः”। अत्र सबान्धव इत्युक्तेः सपिण्डानामपि पाकाधिकारः इति गौड़ाचारः। नि० सि० विशेष उक्तः। हेमा० आश्वला० “समानप्रवरैर्मित्रैः सपिण्डैश्च गुणान्वितैः। कृतोपकारिभिश्चैव पितृकार्यं प्रशस्यते”। व्यासः “महिला चैव सुस्नाता पाकं कुर्यात् प्रयत्नतः। निष्पन्नेषु च पाकेषु पुनः स्नानं समाचरेत्” पृथ्वीचन्द्रोदये ब्राह्मे। “रजस्वलाञ्च पाषण्डां पुंश्चलीं पतितां तथा। त्यजेच्छूद्रां तथा वन्ध्यां विधवाम् चान्यगोत्रजाम्। व्यङ्गकर्णां चतुर्थाहस्नातामपि रजस्वलाम्। वर्ज्जयेच्छ्राद्धपाकार्थमसमातृपितृवंशजाम्” स्मृतिसारे “न पाकं कारयेत् पुत्रीमन्यां वाप्यसगोत्रजाम्! मृतवन्ध्यां पुंश्चलीं च गर्भिणीञ्चैव दुर्मुखाम्”।

एकोनचत्वारिंशत् स्त्री एकेनोना चत्वारिंशत्। (ऊनचल्लिश) १सङ्ख्यायां २तत्सङ्ख्यान्विते च एवम् एकोनविंशत्यादयोऽपि एकेनोनतत्सङ्ख्यासङ्ख्येययोः स्त्री।

एकौघ पु० एकः अविच्छिन्नओघः प्रवाहः। अविच्छिन्नप्रवाहे “एकौघेन स्वर्णपुञ्जैर्द्विषन्तः” माघः।

एज कम्पने भ्वा०आत्म०अक०सेट्। एजते ऐजिष्ट एजांबभूव आस चक्रे। एजकः एजितव्यः एजिता। एजितः एजमानः एजनम् णिच्। एजयति जनमेजयः। “क्षुद्रमन्त्वमत एजयतेऽच्छिणी मे” भाग०५,२,१५। वेदे गणव्यत्यासः। “एजतु दशमास्यो गर्भः” यजु०,२८ अथास्य मध्यमेजतु” २३,२७ शुष्का विदस्या एजतो गोपक” २३,२८। “उदेजति पतति यस्य तिष्ठति” अथ० २०८ ११,१। “सुखेन वृष्णिरेजति” ऋ० १,१०,२ उदङ्ङेजत्यन्तरा वा एतदाहवनीयम्” श०ब्रा० १,५,१,२५ क्वचिल्लोके तथा। “शतान्यशीतिरष्टौ च सहस्राणि च विंशतिः। सर्पाणां प्रपद्दा यान्ति धृतराष्ट्रोऽयमेजति” भा०आ० ८० अ० ‘त्वत्तःपरं नापरमप्यनेजदेजच्च किञ्चिद् व्यतिरिक्तमस्ति” भाग० ७,३,३०। वलीपलित एजत्कः” भाग० ६,९,४२, एजत्कः कम्पमानशीर्षः”

अप+अपगमने एङि पररूपम् अपेजते। क्वचिदन्तर्भूतण्यर्थेऽपि। “अपेजते शूरो अस्तेव शत्रून्” ऋ०६,६४,३ “शत्रून् अपेजते अपगमयति भा०। उद्+ऊर्द्ध्वगतौ उदेजते। “उदेजतु प्रजापति र्वृषा शुष्मेण वाजिना अथ० ४,४,२, “उदेजयान् भूतगणान्यषेधीत्” भट्टिः। प्र+प्रकर्षचलने पररूपम् प्रेजते। सम्+सङ्गतौ नियमेन चलने ‘एवेदनु द्यून् किरणं समेजात्” ऋ० १०,२७,५। ‘समेजात् नियमेन प्रयाति” भा०।

एज दीप्तौ भ्वादि० पर० अक० सेट्। एजति ऐजीत्। एजाम्-बभूव आस चकार। एजन्। [धुटे” अथ० १२,१,१८।

एजथु पु० एज–वा० भावे अथु। कम्पे "महाँ इव एजथुर्वेप-

एजय त्रि० एज–णिच्–खश्। कम्पके जनमेजयः अङ्गमेजयः अरिमेजयः विश्वमेजयः।

एजि त्रि० एज–इन्। वातरोगयुक्ते ततोऽपत्ये कुर्वा० ण्य। ऐज्य तदपत्ये पुंस्त्री।

एज्य त्रि० आ+यज–कर्म्मणि क्यप्। सम्यग्यजनीये "आयजतामेज्या इष इति प्रजाया इमाः एतद्याजूकाः" शत० ब्रा० १,७,२,१५।

एठ बाधने भ्वादि० आत्म० सक० सेट्। एठते ऐठिष्ट एठाम् बभूव आस चक्रे। एठनम् एठितः। बाधनमत्र यातनम्

एड पुंस्त्री इल–स्वप्ने अच् डस्य लः। १मेषे "चैडकराचेडूढ भारा मावीदं विश्वारिति" कात्या० २५,४,१८। स्त्रियां जातित्वात् ङीष् २बधिरे त्रि०। एडमूकः।

एडक पुंस्त्री० इल–ण्वुल् डस्य लः। १वनच्छागे, २वृहत्पुच्छे मेषे ३मेषमात्रे च जातित्वात् स्त्रीत्वे अजादित्वात् टाप् क्षिपकादि० नात इत्त्वम् एडका। एड इव प्रतिकृतौ कन्। मेषसदृशे दक्षिणापथप्रसिद्धे ४पशुभेदे। "यज्ञान्ते पक्षिसंघाश्च तथा पशुगवेडकम्" भा० व० १४२अ०। तस्येदम् अण्। ऐडक तत्सम्बन्धिनि त्रि० स्त्रियां ङीप्। "अनैडकीरूर्णाः प्रवाल्य" कात्या० ५,२,७। "एडको नाम दक्षिणापथे मेषाकृतिः पशुः तस्येमाः ऐडक्यः" कर्क०। "तयोर्मेष्यं मेष्यां च यद्यनैडकीरूर्णा विन्देत ताः प्रणिज्य निक्षेपयेत्" शत० ब्रा० २,५,२,१५, एडकमिवाचरति क्यच् एडकीयति उपसर्गस्यावर्णात् परस्य वा पररूपम् उपे(पै)डकीयति

एडगज पु० एडो मेष एव गज इव भक्ष्यत्वादस्य। (दादमर्द्दन) चक्रमर्द्दे दद्रुघ्ने वृक्षे अमरः। [श्रुतिरहिते।

एडमूक त्रि० श्रुतिरहितएडो बधिरस्तथा मूकः। वाक्श्रुति-

एडु(डू)क न० ईड-(ऊ)उक उलूका० नि० गुणः। १अन्तर्न्यस्तास्थियुक्ते २अन्तर्न्यस्तकठिनद्रव्ययुक्ते च कुड्ये तभित्तिमात्रे च। "एडूकचिह्ना पृथिवी न देवगृहभूषिताः" भा० व० १०। तत्र पुंस्त्वमपि "एडूकान् पूजयिष्यन्ति वर्ज्जयिष्यन्ति देवताः" भा० व० १९०अ०। स्वार्थेऽण्। ऐडूकमपि वा० अोकः एडोकमपि तत्रैव द्विरूपकोषः।

एण पुंस्त्री इ–ण तस्य नत्वम्। कृष्णवर्णे मृगे। स्त्रियाम् ङीप् "तस्य स्तनप्रणयिभिर्मुहुरेणशावैः" रघुः। "अष्टावेणस्य मांसेन रौरवेण नवैव तु" मनुः। तस्य कृष्णत्वमुक्तम् छन्दोग० "अन्टचोमायवोत्येय एणः कृष्णमृगः स्मृतः। रुरुर्गौरमुखः प्रोक्तः शंबरः शोण उच्यते"। "तं त्वेणकुणकं कृपणं स्रोतसानुह्यमानम्" भाग० ५,८,८ "एणकुणकं मृगशावकम्" श्रीधरः। एण्या क्रीतम् "एण्या ढञ्" पा० ढञ्। ऐणेय एणीक्रीते त्रि०। एणेन क्रीतमित्यत्राणेव। ऐण तत्क्रीते त्रि०। स्वार्थे कन्। एणक तत्रैव शब्दरत्ना०। [हारा०।

एणतिलक पु० एणस्तिलकमिव चिह्नं यस्य। मृगाङ्के चन्द्रे

एणभृत् पु० एणं बिभर्त्ति भृ-क्विप् ईत०। चन्द्रे तस्य मृगाङ्कत्वात् तथात्वम्।

एणीपचन न० एणी पच्यते अत्र पच-आधारे ल्युट् "एणीपाकाधारे देशभेदे स्त्रीपशोरवध्यत्वेऽपि तद्देशवासिभिर्निषेधमुल्लङ्घ्य तत्पचनात्तथात्वम्। तत्र भवः पक्षे छ। एणीपचनीय तद्देशभवे त्रि० [एणीपादाकारपादयुक्ते।

एणीपद त्रि० एण्याः पादाविव पादावस्य अच् नि० पद्भावः।

एत पु० इण–तन्। १कर्व्वुरवर्णे। २तद्वति त्रि०। तोपधवर्णवाचित्वात् स्त्रियां ङीप् तस्य नश्च। "एन्यः शलल्याः" श्रुतिः 'मैत्रावरुण्योऽन्यत एन्यो मैत्र्यः' यजु० २४,८। वर्णवाचिनि एते परे "वर्णो वर्णेष्वनेते" पा० एतशब्दपर्य्युदासात् तत्पुरुषे पूर्व्वपदं न प्रकृत्या। कृष्णैतः शुक्लैत इत्यादौ न प्रकृतिस्वरः। आ+इण–कर्त्तरि क्त। २आगते त्रि०। "कया मती कुत एतास एतेऽर्चन्ति" ऋ० १,६५,१। "एतास आगताः" भा० "सखीभिरेता उपयुज्महे" ऋ० १,६६,५। "एतानागन्तून्" भा०

एतग्व पु० एतवर्णोऽश्वः पृषो०। १चित्रवर्णाश्वे। "एतग्वा चिद्य एतशा युयोजते हरी" ऋ० ८,७०,७। "एतग्वा एतवर्णावश्वौ" भा०। "पिपर्त्त्येतग्वा चिद्य सयुजा युजानः" ऋ० ७०,७,२। २अश्वमात्रे निरु०।

एतद् त्रि० इण्–अदि तुक् च। बुद्धिस्थे समीपवर्त्तिनि "इदमस्तु सन्निकृष्टं समीपवर्त्ति चैतदो रूपम्। अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात्" इत्युक्तेः समीपवर्त्ति बुद्धिस्थोपलक्षितधर्म्मावच्छिन्ने एतदो वृत्तिः। क्रियाविशेषणत्वेऽस्य क्लीवता "न वा उ एतन्म्रियसे" ऋ० १,१६२,२१। अस्य सर्व्वनामकार्य्यम्। एते एतस्मै एतस्मात् एतेषाम् एतस्मिन् एतस्या एतासामित्यादि। "एते वयममी दाराः" कुमा०। "देवा एतस्यामवदन्त पूर्व्वे" १०,१००,१४। "एष वै प्रथमः कल्पः" मनुः। "एतदि-

न्तरे देवी'' देवीमा० ''एतान् महाराज ! विशेषधर्म्मान्'' मु० त० पुरा० । ''एषा तेऽभिहिता सांख्ये'' ''एतत्ते सर्वमाख्यातम्'' गीता । अनूक्तौ तु ''द्वितीयाटौस्स्वेनः'' पा० एनम् एनौ एनान् एनेन एनयोः । ''एनोनिवृत्तेन्द्रियवृत्तिरेनम्'' रघुः । ''महाशनोमहापाप्मा विद्ध्येनमिह वैरिणम्'' गीता क्लीबेऽपि अनूक्तौ एनादेशः । इदं कुलं शोभते एनत्पश्य । परिमाणे वतु आदन्तादेशश्च । एतावत् एतत्परिमाणे त्रि० ''एतावानेव पुरुषोयज्जायात्मा प्रजेति ह'' मनुः ''किंवेतावन्मात्रमुपजानीत'' शत० ब्रा० १,६,१,४ । ''एतावदुक्त्वा विरते मृगेन्द्रे'' रघुः ''एतावता नन्वनुमेयशोभि'' कुमा० स्त्रियां ङीप् । ''एतावती महिमा सं बभूव'' ऋ० १०,१२५,८ । एतदि दृश—क्विन् क्स टक् । आदन्तादेशः । एतादृश् एतादृक्ष एतादृश एतत्तुल्यदर्शने त्रि० तत्र क्विनन्तस्य झलि पदान्ते च कुः ''एतादृक्कृशता कुतः'' सा० द० । टगन्तस्य स्त्रियां ङीप् । ''अस्थाने पतता-मतीव महतामेतादृशी स्याद्गतिः'' उद्भटः । तस्येदमित्यर्थे छ । एतदीय एतत्सम्बन्धिनि त्रि० । एतदात्मकः मयट् एतन्मय एतदात्मके त्रि० । परिमाणे मात्रच् । एतन्मात्र एतत्परिमाणे त्रि० स्त्रियां ङीप् । दिग्देशकालवृत्ते-रभावात् प्रथमापञ्चमीसप्तम्यर्थे त्रल् तसिश्च । एतत्र एतस् प्रथमाद्यर्थयुक्ततच्छब्दार्थदिगादौ अव्य० । अन्वादेशे ''एतदोऽश् त्रतसोस्त्रतसौ चानुदात्तौ'' पा० उक्तेः अशादेशे अत्र अतः इत्येवेति भेदः । [गतित्वात्तथा ।

एतन पु० आ+इण्-तन । निश्वासे हेमच० । निश्वासस्य सन्तत-

एतर्हि अव्य० इदम्+काले र्हिल् ''एतेतौ रथोः'' पा० एतादेशः । अस्मिन् काले इत्यर्थे ''अथ यो ऽयमेतर्ह्यग्निः स भीषा निलिल्ये'' शत० ब्रा० १,२,३,१ । ''एतर्हि खलु वा एतद्यज्ञमुखम्'' तैत्ति० ।

एतश पु० इण्-तशन् । १ब्राह्मणे उज्ज्व० २अश्वे निरु० । ''येन दृश्वादेतशो ब्रह्मणस्पतिः'' ऋ० १०,५३,९ । ''यत्रैतशोऽभिधीयसे'' यजु० ४,२२ । ''सजूः सूर एतशेन'' १२,७४ । एतशेनाश्वेनेति'' वेददी० ''उभे चक्रं न वर्त्यैतशस्'' ऋ० ८,६,३८ ।

एतशस् त्रि० इण्—तशन् । १ब्राह्मणे २अश्वे च ।

एदिधिषुःपति पु० इण्-क्विच् कर्म्म० पृषो० मध्ये सुट् । अग्रेदिधिषूपतौ । ''निर्ऋत्यै, परिविन्दानमाराध्या अदित्यै, एदिधिषुःपतिं निष्कृत्यै'' यजु० ३०,९ । पुरुषमेधीयपशुदेवताभेदकीर्त्तने

एध वृद्धौ भ्वादि० आत्म० अक० सेट् । एधते ऐधिष्ट । एधाम्-बभूव-आस-चक्रे । एधितव्यः एधनीयः एध्यः एधिता एधितः एधनम् एधः एधमानः एधित्वा समेध्य एधांसि । ''हिरण्यभूमिसंप्राप्त्या पार्थिवो न तथैधते'' मनुः । क्वचिदस्य आमभावः ''यत्र मैथुनैरेधिरे प्रजाः'' भाग० ३,२१,१ । आर्षत्वात् समाधेयः ''तपसा महतैधित'' भा० आ० ८८३ । 'विवर्द्ध ज्वलना इवैधमानाः'' ७१,५५ । ''लोकयोरुभयोः शक्यं नित्यदा सुखमेधितुम्'' रामा० । क्वचित् पर० । ''न हि साहसकर्त्तारः सुखमेधन्ति भारत !'' भा० व० २४५ अ० । णिचि एधयति-ते ऐदिधत् त । ''किं त्वं मामजुगुप्सिष्टानैदिधः स्वपराक्रमम्'' भट्टिः । उपसर्ग-स्यावर्णात् वृद्धिरेव न पररूपं प्रैधते एङादित्वे एव तया तेन मा प्रेदिधत् इत्यादौ न वृद्धिः ।

एध पु० इध्यतेऽग्निरनेन इन्ध—करणे घञ् नि० नलोपगुणौ । काष्ठे ''एधान् हुताशनवतः स मुनिर्ययाचे'' रघुः ''एधो-दकं मूलफलमन्नमभ्युदितं च यत्'' मनुः । ''यथैधः स्वस-मुत्थेन वह्निना नाशमृच्छति'' भा० व० ८४ अ० ।

एधतु पु० एध—कर्त्तरि चतु । १पुरुषे उज्ज्व० । २अग्नौ मे० ३वृद्धियुक्ते त्रि० शब्दर० भावे चतु । ४वृद्धौ स्त्री । ''युवं हिष्मा पुरुभुजेममेधतुम्'' ऋ० ८,८६,२, 'एधतुं धनादि-वृद्धिम्'' भा० ''ते हैतामेधतुमेधाञ्चक्रिरे'' शत० ब्रा० ६,२,२, ''एतामेधतुमृद्धिम्'' भा०

एधस् न० इध्यतेऽग्निरनेन इन्ध—असि नि० नलोपगुणौ । काष्ठे ''यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्ज्जुन ।'' गीता । ''अनलायागुरुचन्दनैधसे'' रघुः । ''फलैधः कुसु-मस्तोयमधैर्य्यञ्च मलावहम्'' ''यथैधस्तेजसा वह्निः'' मनुः ।

एधा स्त्री एध—भावे अ । समृद्धौ अमरः

एधित त्रि० एध—कर्त्तरि क्त । १वृद्धे णिच्-कर्म्मणि क्त । २वर्द्धिते त्रि० । ''मधुसमृद्धिसमेधितमेधया'' माघः ।

एनस् न० एति गच्छति प्रायश्चित्तेन क्षमापणेन वा आगसि अर्थे इण-असुन् नुट् च । १अपराधे । ईश्वराज्ञा लङ्घनरूपनिषिद्धाचरणापराधजन्यत्वात् २पापे च । ''एनोनिवृत्तेन्द्रियवृत्तिरेनम्'' । ''अकामोपनतेनेव साधोर्हृदयमेनसा'' । ''एनसां स्थूलसूक्ष्माणां चिकीर्ष-न्नपनोदनम्'' मनुः । पापभेदाश्च प्रा० वि० दर्शिताः यथा ''अथ पापोद्देशः । तत्र विष्णुः ''अथ पुरुषस्य काम क्रोधलोभाख्यं रिपुत्रयं सुघोरं भवति परिग्रहप्र-सक्ताद्विशेषेण ब्रह्मास्मिणवेनायमाक्रान्तोऽतिपातक

महापातकानुपातकोपपातकेषु प्रवर्त्तते । जातिभ्रंशकरेषु सङ्करीकरणेषु अपात्रीकरणेषु मलावहेषु प्रकीर्णेषु च" । अनेन नवविधत्वं पापस्योक्तम् । हारीतस्तु पञ्चविधत्वमाह "पञ्चविधमशुद्धं भवति प्रासङ्गिकोपपातकपातकमहापातकान्यनुपातकानि" पूर्व्ववचने पूर्व्वं पूर्व्वं गरीयः अत्र तूत्तरोत्तरम् । प्रासङ्गिकं जातिभ्रंशकरादिपञ्चकम् । पातकपदमनुपातकपर्य्यायः । ननु नवस्वेव पापेषु पातकशब्दो दृश्यते यथा पैठीनसिः "स्त्रीगोवधलवैश्यक्षत्रियघातो शूद्रसहभोजी कन्यादूष्यगारदाही वृषलीपतिः अग्न्युच्छेदी चेति पातकानि" नवविधं पापमभिधायाह विष्णुः । "एवं पातकिनः पापमनुभूय सुदुःखिताः । तिर्य्यग्योनौ प्रपद्यन्ते दुःखानि विविधानि च" । याज्ञवल्क्यः "नीचाभिगमनं गर्भपातनं भर्तृहिंसनम् । विशेषपतनीयानि स्त्रीणामेतान्यपि ध्रुवम्" । पतनीयानि पातकानीत्यर्थः । "कृत्यल्युटोबहुलमिति" करणेऽनीयर् । तथा गौतमः "ब्रह्महासुरापगुरुतल्पगमातृपितृयोनिसम्बन्धागस्तेन नास्तिकनिन्दितकर्म्माभ्यासिपतितात्याग्यपतितत्यागिनः पतिताश्च पातकसंयोजकाश्च तैश्चाब्दं समाचरन्" । पातकसंयोजकाः सुरापानादौ यः परान् प्रयोजयति सः । बाढम् । सामान्यशक्तस्यापि विशेषशक्तिर्भविष्यति स्तगादिपदस्येव, हारीतेन विशेषगणने पाठात् । तथा च्यवनः "अथ पातकोपपातकमहापातकानि व्याख्यास्यामः" इति । तथा च पठन्ति । "महापातकतुल्यानि पापान्युक्तानि यानि तु । तानि पातकसंज्ञानि तदूनमुपपातकमिति" । ततो महापातकतुल्यपापविशेषेष्वस्य शक्तिः । पतनशब्दार्थमाह गौतमः "द्विजातिकर्म्मभ्योहानिः पतनम् परत्र चासिद्धिस्तमेके नरकम्" । द्विजातिकर्म्म श्रौतमग्निहोत्रादि स्मार्त्तमष्टकादि प्रायश्चित्ततदङ्गजपादिव्यतिरिक्तम् तेभ्योहानिरनधिकारः इति । द्विजातिग्रहणं प्राधान्यार्थम् शूद्रस्यापि वाक्यान्तरेण पातित्याभिधानात् । इहलोके तावत् पातित्यलक्षणमनिष्टं परलोके चासिद्धिः पापकर्म्मप्रतिबन्धादुपात्तसुकृतफलानिष्पत्तिः नरकं वा । सूतकादिव्यावृत्त्यर्थमिदम्" ।

पापलक्षणं पापसत्तायां प्रमाणञ्च प्रा॰वि॰दर्शितं यथा "ननु किं पापलक्षणम्" उच्यते "चोदनालक्षणार्थोधर्म्मः" इत्यस्मिन् सूत्रे वेदैः प्रतिपाद्योऽर्थोधर्म्म इति धर्म्मलक्षणं कुर्व्वता सूत्रकारेण जैमिनिना वेदैकप्रतिपाद्योऽनर्थोऽधर्म्म इत्यधर्म्मलक्षणं सूचितम् । अनर्थश्चानिष्टसाधनं तथाचोक्तं भाष्यकृता "कोऽर्थोयोऽभ्युदयाय कोऽनर्थोयोऽनभ्युदयायेति" । ननु पापसत्तायां किं प्रमाणं न तावद्वेदः तस्य कार्ये कार्य्यान्विते वा प्रामाण्यात् न च दुरितापूर्व्वं कार्य्यं कार्य्यान्वितं वा । न च नित्यकर्म्मानाचरणस्य निषिद्धाचरणस्य च वेदोक्तप्रत्यवायसाधनत्वानुपपत्त्या कल्प्यम् तस्य तथाविधशब्दाभावेन सिद्धत्वेन चावगन्तुमशक्यत्वात् उच्यते "यो ब्राह्मणायावगुरेत्तं शतेन यातयेदिति" श्रुतौ लिङ्द्वयश्रुतेरवगोरणशतयातनयोः साध्यसाधनफलभावोऽवगम्यते "हेतुहेतुमतोर्लिङिति" पा॰लिङः स्मरणादिति यथोक्तं शंयुधिकरणे, तथाऽत्रापि क्वचित् पञ्चम्या क्वचित् तृतीयया क्वचिच्च विशेषणपदादवगम्यते । यथा याज्ञवल्क्यः "विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् । अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति" । मनुः "शरीरजैः कर्म्मदोषैर्याति स्थावरतां नरः । वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम् । इह दुश्चरितैः केचित् केचित् पूर्व्वकृतैस्तथा । प्राप्नुवन्ति दुरात्मानोनराक्षपविपर्य्ययम्" । तथा विष्णुपुराणम् "नरकं कर्म्मणःपापादेवमाहुर्महर्षयः" । तथा यमः "सुरापो ब्रह्महा गोघ्नः सुवर्णस्तेयकृन्नरः । पतितैः संप्रयुक्तश्च कृतघ्नोगुरुतल्पगः । एते पतन्ति सर्व्वेषु नरकेष्वनुपूर्व्वशः" । अत्र ते सुरापादयः पतन्तीति सुरापादीनां पतनकर्तृत्वावगतेः कर्तृत्वञ्च साधनत्वविशेषः अतः सुरापानादिविशिष्टस्य पुरुषस्य पतनसम्बन्धे विशेषणस्य सुरापानादेः सति सम्भवे पतनसाधनत्वमवगम्यते "सप्तदश प्राजापत्यान् पशूनालभेतेति" वत् । एवं "वारिदस्तृप्तिमाप्नोति" इत्यादावपि । नरकसाधनत्वस्य कार्य्यान्वयाभावान् कथं शब्दादवगतिरिति चेत् शंयुवद्विषयविशेषणतया इति ब्रूमः यथा शतयातनासाधनादवगोरणान्निवर्त्तितव्यमिति विधिः, तथा नरकसाधनात् सुरापानादेर्निवर्त्तेतेति, नित्येऽपि यस्याकरणे प्रत्यवायस्तस्मिन् कर्म्मणि प्रवर्त्तेतेति विध्यङ्गीकारात् । अथवा यद् यत्साधनं तदभावस्तत्परीहारसाधनमिति लोकादवगतत्वात् अर्थात् प्रत्यवायपरिहारस्योपस्थितत्वात् तदर्थिनोऽधिकारोनित्यनिषेधेष्वपि । ननु "अहरहः सन्ध्यामुपासीत" इत्यादौ जीवनस्य सन्ध्योपासनव्याप्त्यवगमात् जीवनवतोऽधिकारः । "न कलञ्जम्भक्षयेत्" इत्यादौ निवृत्तिस्वभावनिषेधाप्रवृत्ते रधिकारिविशेषण तथाचोचोक्त "मनसा तु प्र-

हतस्य मृतचेष्टावतोऽपि वा । यदनागतभावस्य वर्ज्जनं तन्निवर्त्तनमिति" अतः कथं प्रत्यवायपरीहारार्थिनोऽधिकारः उच्यते प्रत्यवायपरीहारस्याप्युपस्थितत्वात् जातेष्टिवत् संवलिताधिकार एव भविष्यति तथा च जाबालः "अयं केचिदुपात्तस्य दुरितस्य प्रचक्षते । अनुत्पत्तिं तथा चान्ये प्रत्यवायस्य मन्वते । नित्यक्रियान्तर्वान्ये ह्यनुषङ्गफलां श्रुतिम्" । अनुत्पत्तिमित्यनेन प्रत्यवायपरीहारः फलमित्युक्तम् । अथवा प्रायश्चित्तविधिषु रात्रिसत्रन्यायेनार्थवादिकपापक्षयार्थिनोऽधिकारात् । एवं च विधयः पापसत्तां बोधयन्ति तथाचाङ्गिराः "उद्गच्छन् यद्वदादित्यस्तमः सर्व्वं व्यपोहति । तद्वत् कल्याणमातिष्ठन् नरं पापं व्यपोहति" । पापञ्चेह पुरुषं कृत्वा कल्याणमभिपद्यते । मुच्यते पातकैः सर्व्वैर्महाभ्रैरिव चन्द्रमाः" । कल्याणं प्रायश्चित्तम् । यमः "तपसोऽन्ते विशुद्ध्यन्ति कर्म्मणां सापरिक्षयात् । तस्मात् कर्त्तव्यमेतत्तु प्रायश्चित्तं विशुद्धये" । कर्म्मणां भोगेन परिक्षयादित्यर्थः । अपरं स्मृत्यन्तरे ज्ञेयमिति । ननु किं पापोत्पत्तिकारणम् ? उच्यते विहिताकरणं निषिद्धाचरणञ्च पापकारणं तदाह मनुः । अकुर्व्वन् विहितं कर्म्म निन्दितञ्च समाचरन् । प्रसक्तश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नरः" । प्रायश्चित्तार्हताज्ञापनेन पापसत्तां प्रतिपादयति । तथा याज्ञवल्क्यः । "विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् । अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति" ।

पापस्य यथा वेदबोध्यत्वं तथा मीमां०भा०दर्शितम् यथा "उभयमिह चोदनया लक्ष्यते अर्थोऽनर्थश्च इति कोऽर्थः ? यो निःश्रेयसाय ज्योतिष्टोमादिः । कोऽनर्थः ? यः प्रत्यवायाय श्येनो वज्र इषुरित्येवमादिः तत्र अनर्थो धर्म्म उक्तो मा भूत् इति अर्थग्रहणम् । कथं पुनरनर्थः ? हिंसा हि सा साच प्रतिषिद्धेति । कथं पुनरनर्थः कर्त्तव्यतयोपदिश्यते ? । उच्यते नैव श्येनादरः कर्त्तव्यः विज्ञायते यो हि हिंसितुमिच्छेत् तस्यायमभ्युपायः इति हि तेषामुपदेशः "श्येनेनाभिचरन् यजेत" इति समामनन्ति हि "नाभिचरितव्यम्" । "अतएव मूलकर्म्मरूपाभिचारस्योपपातकसंज्ञा कृता मनुना तेन तस्यानर्थहेतुत्वं सव्यक्तमेव । यथा च कलञ्जभक्षणश्येनादेरनिष्टसाधनत्वेऽपि वेदबोध्यत्वं तथा प्रत्य०चि० समर्थितं यथा तत्र "न कलञ्जं भक्षयेत्" इत्यत्र विध्यर्थनिषेधानुपपत्तिः तद्भक्षणस्य इष्टसाधनत्वात् । न चासुराविद्यावत् पर्य्युदासलक्षणया विरोध्यनिष्टसाधनताबोधनं, नञोऽसमस्तत्वात् क्रियासङ्गतत्वेन प्रतिषेधवाचकत्वव्युत्पत्तेश्चेति चेत् न विशेषवति विशिष्टनिषेधस्य "सविशेषणे हीति" न्यायेन विशेषणनिषेधपर्य्यवसायितया कलञ्जभक्षणनिष्टोत्पत्तिनान्तरीयकदुःखाधिकदुःखसाधनमिति "न कलञ्जं भक्षयेत्" इत्यनेन बोधनात् । इष्टसाधनतावाचकस्य विधेः सामान्ये निषेधानुपपत्तेर्बलवदनिष्टाननुबन्धीष्टसाधनविशेषे तात्पर्य्यम् तथा चाशक्यविशेषणनिषेधपरत्वं नञ इति कश्चित् तन्न यथाह्ययोग्यतया छिद्रं विहाय घटत्वेन तदितरान्वयो न तु छिद्रेतरत्वेन, युगपद्वृत्तिद्वयविरोधात् तथेहापि बलवदनिष्टाननुबन्धित्वेन नोपस्थितिरिति कथं निषेधः ? । "श्येनेनाभिचरन् यजेत" इत्यत्र कथं विधिप्रवृत्तिः हिंसाया बलवदनिष्टसाधनत्वादिति चेत् तत्र कृतिसाध्यत्वे सति इष्टसाधनता योग्यतयान्वेति न तु बलवदनिष्टाननुबन्धित्वमपि अयोग्यत्वात् निन्दार्थवादेन प्रायश्चित्तोपदेशेन च हिंसाया बलवदनिष्टसाधनत्वोपगमात् । अत एव विहितेऽपि श्येने विदुषामनास्तिकप्रवृत्तिः । रागद्वेषयोरुत्कटत्वेनानिष्टाननुबन्धित्वस्य तिरोधानात्तु कस्यचित् प्रवृत्तिरित्येके । अन्ये त्वभिचारस्य वैरिवधफलत्वेन श्रुतत्वात् तत्साधनत्वेन श्येनो विधीयते न तु वधसाध्यनरकसाधनत्वेनाश्रुतत्वात् । न च जनकजनकस्य जनकत्वनियमः कुम्भकारपरम्परायाः कुम्भकारणत्वापत्तेः विधिनैव श्येनस्य बलवदनिष्टाननुबन्धित्वस्य बोधनाच्च । न च श्येनस्य नरकाहेतुत्वेनापेक्षितवैरिवधहेतुत्वे सत्यविगीतत्वेन प्रवृत्तिः स्यादिति वाच्यम् । श्येनाद्वैरिवधो वधाच्चावश्यं नरकमिति प्रतिसन्धानेन विगानात् । ननु श्येनो मरणफलकव्यापारत्वेन हिंसा हिंसा च नरकजनिकेति चेन्न । नहि साक्षात् परम्परासाधारणमरणफलकव्यापारो हिंसा कूपादौ नष्टे गवि तत्कर्त्तुर्हन्तृत्वप्रसङ्गात् वध्यस्यापि हन्तृमन्यूत्पादनद्वारा हन्तृत्वप्रसङ्गाच्च । न ह्युत्पादितमन्युः कश्चित् कञ्चित् व्यापादयति । नन्वनुनिष्पादितमरणफलकव्यापारो हिंसा यदनन्तरं मरणं भवत्येव न च श्येनस्तथा किन्तु खड्गहननादिकमेव । अथ मरणानुकूलो व्यापारो मरणोद्देशेनानुष्ठीयमानो हिंसा श्येनश्च तथा, कूपादौ च न मरणोद्देशेनानुष्ठीयमानत्वमिति चेत् एवं सति गौरवात् मरणोद्देशेन विप्रमारणसाधने ब्राह्मणे हिंसा न स्यात् ।

हिंनसिध।त्वर्थतावच्छेदकं फलमव्यवहितमेव मरणम् अव्यवहितफलकव्यापारस्यैव धात्वर्थत्वात् अन्यथा परम्परया विक्लित्तिफलकान्नकामे तण्डुलं कुर्वत्यपि पचतीति प्रसङ्गात् अथ खड्गघातानन्तरं यत्र विलम्बेन मरणं व्रणपाकपरम्परया वा, अन्ने विषप्रयोगेण वा तत्र हन्तृत्वं प्रायश्चित्तादि च न स्यादिति चेत् न प्रायश्चित्ततुल्यत्वार्थं हि तत्र हन्तृत्वव्यपदेशो गौणः विनिगमनन्तु लाघवमेव

वस्तुतस्तु मरणोद्देशेन कृतोऽदृष्टाद्वारकस्तदनुकूलो-व्यापारः हिंसा श्येनयागादृष्टद्वारा मरणसाधनमतो न हिंसा। यद्यदृष्टद्वारा मरणसाधनं हिंसा स्यात्तदा सप्रमीतैलाभ्यङ्गस्यादृष्टद्वारेण विनाशसाधनत्वात् तत्कर्त्तुः हिंसकत्वापत्तिः। अत एव कूपादौ गोमरणेऽपि न गोबधकर्त्तृता तत्कर्त्तुः, गललग्नान्नमरणेन भक्तुरात्महन्तृत्वं, परिवेषयितुर्वा ब्राह्मणहन्तृत्वम्। व्रणपाकपरम्परया विलम्बेन विषप्रयोगेण च हन्तृत्वं मुख्यमेव। नाप्यनुनिष्पादितमरणफलकत्वं, गललग्नान्नमरणे स्वहन्तृत्वापत्तेः। अन्योद्देशेन छिन्नना राचहते ब्राह्मणे ब्राह्मणहन्तृत्वं न स्यादिति चेत् न इष्टापत्तेः। व्यपदेशः प्रयोगो वा लक्षणया समर्थयितुं शक्यते, तत्पक्षेऽतिप्रसङ्गो वारयितुं न शक्यत इतीदमेव विनिगमनम्। अन्योद्देशेन कृतेऽपि निषिद्धे प्रायश्चित्ताद्र्धमुक्तम्। अपरे तु अनभिसंहितावान्तरव्यापारमद्वारीकृत्य मरणसाधनं हिंसा, खड्गकारस्यानभिसंहितावान्तरव्यापारद्वारा मरणसाधनत्वं तस्य हि अवान्तरव्यापारोनाभिसंहितः। किन्तु धनलाभ इति खड्गकारो न घातकः विषस्यान्ने प्रक्षेपणमवान्तरव्यापारो भोजनमेवाभिसंहितम् अनेनेदं भोक्तव्यमिति सन्धाय विषप्रयोगादिति हि तैव विषप्रयोग इति तत्र गललग्नान्नकवलाद्यत्र मरणं तत्र परिवेषयितुर्घातकत्वापातात् अनेनेदं भोक्तव्यमित्यभिसन्धायैवान्नपरिवेषणात् भोक्तुःहन्तृत्वापत्तेश्च अनभिसंहितमवान्तरव्यापारमद्वारीकृत्य मरणानुकूलभक्षणानुष्ठानात्। अत एव अव्यवहितप्राणवियोगफलकोव्यापारो हिंसा व्रणपाकपरम्परयामृते न हन्तृत्वं व्यापारव्यवधायकत्वादिति निरस्तम्”

श्येनादेर्वेदबोधितत्वेऽपि यथाऽनर्थहेतुत्वं तथाऽभिचारशब्दे दर्शितवचनैरुक्तम् अधिकं श्येनशब्दे वक्ष्यते। एनसाकृतम् यत्। एनस पापरचिते त्रि०“यच्चमेनसम्” अथ० ८,७,२। एनोऽस्त्यस्य मतुप् मस्य वः। एनस्वत् विनि। एनस्विन् पापयुक्ते त्रि० उभयत्र स्त्रियां ङीप। “मा त एनस्वन्तो यक्षिन् भुजेम” ऋ०७,८८,६। एनस्वन्तं चिदेनसः सुदानवः८,१८,१२। “एनस्विभिरनिर्णिक्तो नार्थं किञ्चित् समाचरेत्”। ‘अवदाह्मिन्द्रमित्येतदेनस्वी सप्तकं जपेत्” मनुः। ‘‘इण आगसोति” उणा० अपराध एव साधुत्वम् पापे तु ईश्वराज्ञालङ्घनरूपापराधजन्यत्वेनोपचारात् इति बोध्यम्।

एम त्रि० इण-कर्मणि म। १प्राप्ये। “अर्थश्च म एमश्च” यजु० १८,१५, “एमः प्राप्तव्यार्थः” वेददी०।

एमन् न०एत्यनेन मार्गेण इण-करणे मनिन्। १गतिमार्गे “कृष्णं त एम रुशतः”ऋ०४,७,९।, “कृष्णं त एम रुशदूर्मे १,५८,४। “एमनशब्देन गमनमार्ग उच्यते” भा० एत्यत्र आधारे मनिन्। २अवस्थितिस्थाने। “पृष्ठे सदस्येमन्” यजु०१२,१७, ‘‘एमन् अवस्थाने” वेददी०। “अपां त्वेमन्त्सादयामि” १३,५३। सप्तम्या लुकि न नलोपः। भावे मनिन्। ३गमने। “दूरे दृशो ये चितयन्त एमभिः” ऋ०५,५९,२ एमभिर्गमनैः” भा०।

एरका स्त्री इण-बा० र ततः संज्ञायां कन्। निर्पन्थितृणभेदे (नलखाडा) “एरका गुन्द्रमूला च शिम्बी गुन्द्रा शरीति च। एरका शिशिरा दृष्या चक्षुष्या वातकोपिनी। मूत्रकृच्छ्राश्मरीदाहपित्तशोणितनाशिनी” भावप्र०। ‘ददार करजैरुरावेरकां कटकृद्यथा” भाग० १,२१९, “एरकायां तदा सृष्टं कोपाज्जघान केशवः”। भा०मौस०२अ० “एरकारूपिभिर्वज्रैर्निजघ्नुरितरेतरम्” भा० आ० २अ०। २कौरव्यवंशजे सर्पभेदे ‘एरकः कुम्भलोवेणी वेणीस्कन्दः कुमारकः” भा०आ०५७अ०। नागनामकीर्त्तने

एरङ्ग पु० आ+ईर-अङ्गच्। मत्स्यभेदे, “एरङ्गोमधुरः स्निग्धो विष्टम्भी शीतलो गुरुः” राजनि० तद्गुणाः।

एरण्ड पु०ईरयति वायुम् मलं वाऽधः ईर-अण्डच् नि०गुणश्च। १वृक्षभेदे (एरडी)। (भेरण्डा)। “एरण्डयुग्मं मधुरमुष्णं गुरु विनाशयेत्। शूलशोथकटीवस्तिशिरःपीडोदरज्वरान्। व्रध्नश्वासकफानाहकासकुष्ठाममारुतानिति” एरण्डयुग्मम् शुक्लरक्तैरण्डौ “एरण्डपत्रं वातघ्नं कफकृमिविनाशनम्॥ मूत्रकृच्छ्रहरञ्चापि पित्तरक्तप्रकोपणम्। वाताग्र्यदलं गुल्मवस्तिशूलहरं परम्। कफवातकृमीन् हन्ति वृद्धिं सप्तविधामपि। एरण्डफलमत्युष्णं गुल्मशूलानिलापहम्। यकृत्प्लीहोदरार्शोघ्नं कटुकं दीपनं मतम्। तद्वन्मज्जा च विड्भेदी वातश्लेष्मोदरापहं। कार्येऽस्य मूलं संग्राह्यमित्याडरपरे जनाः”

"एरण्डतैलं तीक्ष्णोष्णं दीपनं पिच्छिलं गुरु। वृष्यं त्वच्यं वयःस्थापि मेधाकान्तिबलप्रदम् । कषायानुरसं सूक्ष्मं योनिशुक्रविशोधनम् । विस्रं स्वादुरसं पाके सुतिक्तं कटुकं सरम् (रेचकम्) विषमज्वरहृद्रोगपृष्ठगुह्यादिशूलनुत् । हन्ति वातोदरानाहगुल्माष्ठीलाकटिग्रहान् ॥ वातशोणितविड्बन्धशोथामविद्रधीन् । आमवातगजेन्द्रस्य शरीरवनचारिणः । एक एव निहन्तायमेरण्डस्नेहकेशरी" भावप्र० । स्वार्थे कन् । तत्रैव । एरण्डस्य फलम् अण् । ऐरण्ड तत्फले । "ऐरण्डं कोमलं ग्राह्यं फलं तक्रेण स्वेदितम् । पाचितं कटुतैलेन हिङ्गुनातिसुवासितम् । कफानिलहरं हृद्यं रूक्षमुष्णञ्च पित्तलम् । अग्निसंजननं रुच्यं गुरु पाकेऽतिपिच्छिलम्" भावप्र० । "फले लुक्" पा० श्चोलुग्विधानात् एरण्डमित्येव साधु । २पिप्पल्यां स्त्री शब्दच० । टाप् गौ० ङीष् वा ।

एरण्डपत्रिका स्त्री एरण्डस्य पत्रमिव पत्रमस्याः कप् संज्ञायां वा कन् अत इत्त्वम् । दन्तीवृक्षे । [वृक्षे । राजनि० ।

एरण्डफला स्त्री एरण्डस्य फलमिव फलमस्याः । लघुदन्ती-

एरु ति० आ+ईर–उन् । गन्तरि । "एजाति ग्लहा कन्येव तत्रैरु तुन्दाना पत्येव जाया" अथ० ६,२२,२,

एर्वारु पु० आ+ईर–क्विप् एरं वारयति वृ–णिच् उण् । चिर्भट्याम् कर्कटीभेदे (काकुड) "एर्वारुबीजं तोयेन पिबेद्वा लवणान्वितम्" सुश्रु० । "कटूर्वारौ यथा पक्के मधुरः सनुरसोऽपि न" या० स्वार्थे कन् तत्रैव ।

एलक पुंस्त्री एडक+डलयोः लः । मेषे स्त्रियां अजा० टाप् चिपा० नातइत्त्वम् डलयोरैकत्वस्मरणात् ।

एलङ्ग पुस्त्री आ+इल–अङ्गच् । (राइखड़ा) मत्स्यभेदे स्त्रियां ङीष् । "एलङ्गोमधुरोऽष्मः संग्राही कफवातहा । मेधाग्निपुष्टिकारी च शीतलः स्रंसनो गुरुः" राजनि० ।

एल(ला)वालु न० एलेव वलते वल–उण् ङ्याप्पोरिति संज्ञायां वा ह्रस्वः । (वालुका) सुगन्धिद्रव्यभेदे "पुन्नागैलेलवालूनि नागपुष्पोत्पलासिता" सुश्रु० । स्वार्थे कन् एल(ला)वालुकमप्यत्र न० ।

एला स्त्री इल–अच् । १स्वनामख्यातलतायाम् । (एलाची) तद्भेदगुणादि भावप्र० उक्तम् । "एला स्थूला च बहुला पृथ्वीका त्रिपुटापि च । भद्रैला बृहदेला च चन्द्रबाला च निष्कुटी । स्थूलैला कटुका पाके रसे वा वाताहकन्लघुः । रूक्षोष्णा श्लेष्मपित्तास्रकफश्वासतृषापहा । हृल्लासविषवस्त्यास्यशिरोरुग्वमिकासनुत् । सूक्ष्मैला कुञ्चिका तुच्छा कोरङ्गी द्राविडी त्रुटिः । एला सूक्ष्मा कफश्वासकासार्शोमूत्रकृच्छ्रहृत् । रसे तु कटुका शीता लघ्वी वातहरी मता" "एलालताभिङ्गितचन्दनासु" रघुः । तस्याः फलम् अण् तस्य लुप् लुपि प्रकृतिलिङ्गत्वेन तत्फलेऽपि स्त्री । "ससङ्कुरस्वक्षुरसानामेलानामुत्पतिष्णवः" रघुः । "सजना नयौ शरदयतिरियमेला" वृ०र० उक्ते २पञ्चदशाक्षरपादके छन्दोभेदे ।

एला विलासे कण्ड्वा० प० अक०सेट् । एलायति ऐलायीत् । एलायां बभूव आस चकार ।

एलाक पु० एलाय-ण्वुल् । ऋषिभेदे गर्गा० यञ् । ऐलाक्य तदपत्ये पुंस्त्री० । स्त्रियां ङीपि यलोपः । ऐलाकी ।

एलादिगुटिका स्त्री "एलापत्रत्वचोऽर्द्धाक्षाः पिप्पल्यर्द्धपलं तथा । सितामधूकखर्जूरमृद्वीकाश्च पलोन्मिताः । संचूर्ण्य मधुना युक्ता गुटिकाः कारयेद्भिषक्" चक्रद०उक्ते रक्तपित्ताधिकारस्थे गुटिकारूपौषधभेदे ।

एलापत्र पु० एलापत्रमिवाकारोऽस्त्यस्य अच् । नागविशेषे "नागस्तथा पिञ्जरकः एलापत्रोऽथ वामनः" भा० आ० ३५ अ० । नागनामकीर्त्तने । [(काटा आमरुल) ।

एलापर्णी स्त्री एलायाः पर्णमिव पर्णमस्याः । रास्नायाम्

एलापुर न० नगरभेदे ।

एलीका स्त्री आ+इल–ईकन् । सूक्ष्मैलायाम् (गुजराटि) राजनि० । ["च सर्वेषु लवणेषु च" सुश्रु० ।

एलुक न० इल–उक । गन्धद्रव्यभेदे । "भद्रदार्वेलुकाश्चैव"

एलुवालुक न० एलवालुक पृषा० लुडागमः । एलवालुके सुगन्धिद्रव्ये (वालुका) राजनि०

एव अव्य० इण्–वन् । १सादृश्ये, २अनियोगे, ३वाक्यभूषणे, ४चारनियोगे, ५विनिग्रहे, ६परिभवे ७ईषदर्थे च । विशेष्यसङ्गतः ८अन्ययोगव्यवच्छेदे । यथा पार्थ एव धनुर्द्धरः इत्यादौ पार्थान्यपदार्थे प्रशस्तधनुर्द्धरत्वम् व्यवच्छिद्यते । विशेषणसङ्गतः ९अयोगव्यवच्छेदे यथा शङ्खः पाण्डर एवेत्यादौ शङ्खे पाण्डरत्वायोगो व्यवच्छिद्यते । क्रियासङ्गतः १०अत्यन्तायोगव्यवच्छेदे यथा नीलं सरोजं भवत्येवेत्यादौ सरोजे नीलत्वात्यन्तायोगो व्यवच्छिद्यते । ११गन्तरि त्रि० । "एवेत्यवधारणानियोगौपम्यनियोगेषु" इत्युक्ता गणरत्ने यथाक्रममुदाहृतम् । "अहमेव ददामि । अद्यैव । इत्थैव । ओलश्च-

मेऽस्तु। अद्यैव गच्छ। अत्रानियोगोऽनवधारणम्। "एवे चानियोगे" वार्त्ति०। तत्र क्वेव भोक्ष्यसे" इत्यत्र पररूपैकादेशः। एतद्योगे च "न च वाहाहैवयुक्ते" पा० न वस्नसाद्यादेशः। "ब्राह्मणस्यैव कर्म्मैतदुपदिष्टं मनीषिभिः"। "स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः" मनुः। १२एवमित्यर्थे च। "एवा न इन्द्रोतिभिः" ऋ० ४,२२,७, एवा एवम् भा०। अत्र वेदे "एवा तु दूर्वे प्रतनु" इत्यादि वत् दीर्घः। तत्र गन्तरि "एवा न देव्यादितिरनर्वा" तैत्ति० २,१,१,५, "एवा गमनशीला" भा०। शीघ्रगन्तृत्वात् १३अश्वे पु०। "शूरोनाम पतयद्भिरेवैः" ऋ० १,१५८,२, 'एवैरश्वैः" भा०। करणे भावे वा वन्। १४गमनसाधने १५गमने च। "एवेन सद्यः पर्य्येति पार्थिवम्" ऋ० १,१२८,३, "एवेन गमनसाधनेन गमनेन वा" भा०।

एव त्रि०एवमस्त्यस्य अच् अव्य०ढिलोपः। एवंक्रियमाणप्रकारे "सुदानूनेवया मरुतः" ५,४१,१६, एवया एवं क्रियमाणप्रकारेण" भा० तृतीयस्थाने याच्।

एवथ पु० अव–भावे अथ पृषो० अतः एत्वम्। गमने "न की राया नैवथा न भन्दना" ऋ०८,२४,१५, एवथा शत्रुपुराणि संग्रामं प्रति गमनेन। तृतीयास्थाने आङ्।

एवम् अव्य० इण–बा०वम्। "एवमिति प्रकृतपरामर्शप्रकारेवार्थोपदेशनिर्द्देशनिश्चयाङ्गीकारवार्थेषु" गणर० उक्तेषु अर्थेषु। क्रमेण उदा० तत्रैव। १प्रकृतपरामर्शे "एवं वादिनि देवर्षौ" कुमा०, २प्रकारे। एवं कुरुते। इवार्थे ३सादृश्ये अग्निरेवं विप्रः। ४उपदेशे एवं पठ। ५निर्द्देशे एवं तावत्। ६निश्चये। एवमेतत् कः सन्देहः। ७अङ्गीकारे एवं कुर्म्मः। वार्थे इदमुच्चयार्थे "अहार्य्यमेवं स्वगनाभिपतत्म्"। "अथैतमनेवम्" शा० सू०। ८समन्वये १०परकृतौ ११प्रश्ने च मेदि०। तत्र एवम्भूतः एवंकृत इत्यादौ क्रियाविशेषणत्वम् एवंविधः एवंप्रकारइत्यादौ द्रव्यविशेषणत्वमिति भेदः 'एवंविधेनाह्वचेष्टितेन" रघुः। "एवमादीन् विजनीयात् प्रकाशाल्लोककण्टकान्" "अन्येषाञ्चैवमादीनाम् मद्यानामोदनस्य च" मनुः।

एवया त्रि० एव एवं अवनं वा याति या–क्विप् पृषो०। रक्षके "द्युम्न एवया उ सप्रथाः" ऋ० १,१५६,१, "एवया रक्षणप्रापयिता" भा०

एवयामरुत् पु० एवया रक्षकोमरुद्यस्य। ऋषिभेदे। "मरुत्वते गिरिजा एवयामरुत्। "एतन्नामकस्य ऋषेः षष्ठ्यालुक्" भा०।

एवयावन् पु० एवस्य एवंप्रकारस्य याता या–वनिप्। १रक्षके विष्णौ। "विश्वजन्यामप्रयुतामेवयावो मतिं दाः" ऋ०७,१००,२, "एवयावः ! विष्णो !" भा०, वेदे सम्बुद्धे रुत्वम्। एव गन्तरि त्रि० "तान्वो महो मरुत् एवयाव्नः" ऋ० २,३४,११, स्त्रियां ङीप् वनोरश्च। एवयावरी। "या शुभ्रैरेवयावरी" ऋ० ६,४८,१२,

एवार पु०एव एवमृच्छति ऋ–अण्। सोमभेदे। "एवारे वृषभा सुते" ऋ०८,४५,३८, "एवारोनाम कश्चित सोमः" भा०

एवावद पु० एव एवमावदति आ+वद–अच्। ऋषिभेदे "प्रहि वतस्य मनसस्य चित्तिभिरेवावदस्य यजतस्य सध्रेः" अवत्सारस्य स्पृणवाम्" ऋ० ५,४४,१, "वतस्य मनसस्यैवावदस्य यजतस्य सध्रेरवत्सारस्य चैषामृषीणाम्" भा०

एष गतौ भ्वा० आत्म० सक० सेट्। एषते ऐषिष्ट एषाम् बभूव आस चक्रे। एषणीयः एषितव्यः एषितः एषिता। एषितुम् एष्टिः एषणम् एषा एषमाणः। "पराङ्मित्र एष त्वर्वाची गौरुपेषतु" अथ० ६,६७,२, वेदे गणव्यत्यासात् पर०। उपेषतु एङिपररूपम्"। "स वै मत आयमतिस्त्वर्षते यः कर्म्मणां पारमपारकर्म्मणः" भाग० २,१२,४४, धातूनामनेकार्थत्वात् अवलोकयतीत्यर्थः" "तस्माद्दिवा नष्टैष एति" शत०ब्रा०१२,२,४,२,।

परि+अन्वेषणे पर्य्येषते पर्य्येष्टिः लोकेऽपि क्वचित् गणव्यत्यासः। "जग्मुः संविग्नमनसः पर्य्येषन्तो विभावसुम्" भा०अनु०८५।

एष स्त्री एष–भावे क्विप्। गतौ "तावामेषे रथानामुर्वीम्" ऋ० ५,६६,३, "एषे गन्तुम्" भा०। "राय एषेऽवसे दधीत" ५,४१,५, "एषे प्राप्तुम्" भा०। 'तेभ्यः स्वंमेव चकार" शत०ब्रा०२,४,२,४,। इष–क्विप्। २इच्छायां। "न चोदोऽह्णीतमेषे" ऋ० १,१८०,४, एषे लोष्ट्रमिच्छते" भा०।

एषण पु०एषते शत्रु हृदयम् ल्यु। १लौहमयशाणे इष्वायुधः। इष इच्छायां णिच् भावे–युच्। एषणा २प्रेरणायां ३पुत्रलोकवित्तकामनायाञ्च स्त्री "को कश्चिदन्यः पंसार उक्तादस्यैषणालयात्" वेदा०। "तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्य्यं चरन्ति। या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणोभे ह्येते एषणे

भवतः" शत॰ब्रा॰ १४,६,४,१, "पुत्रैषणा पुत्रोत्पत्तिमुद्दिश्य दारसंग्रहेच्छालक्षणा। वित्तं द्विविधं मानुषं गवादि, दैवं विद्यादि, तस्य कर्मणा साधनस्य गवादेरुपादानरूपा इच्छा वित्तैषणाऽनेन कर्म कृत्वा पितृलोकं जेष्यामीति विद्यासंयुक्तेन वा देवलोकम्। केवलया वा हिरण्यगर्भविद्यया दैवेन वित्तेन देवलोकं जेष्यामीतीच्छा लोकैषणा। एवमेकत्वेऽपि लोकैषणायाः साधनमन्तरेणासिद्धेः साध्यसाधनाभेदेन द्वैविध्यमाह उभे ह्येति" भा॰। "अपहृतसकलैषणामलात्मन्यविरतमेधितभावनोपहूतः" भाग॰ ४,२१,१८, एष्यते ज्ञायते मानमनया करणे ल्युट् ङीप् एषणी। ४तुलासाधने (निक्ति) मानयन्त्रभेदे मेदिनिः। स्वार्थे कन्। एषणिकाऽप्यत्र। अमरः। एषते व्रणपारमनया करणे ल्युट् ङीप्। (वेलकार) ५व्रणस्फोटनास्त्रभेदे मेदि॰। भावे ल्युट्। सुश्रुतोक्ते ६व्रणविदारणव्यापारभेदे। तत्र हि "यन्त्रकर्माणि तु निर्घातनपूरणेत्याद्युपक्रमे "चूषणैषणदारणेत्यादि पठित्वा चतुर्विंशतिरित्युक्तम्। तत्र एषणमभ्यन्तरे शस्त्रप्रवेशनेन पूयादेरपसारणम्। तत्साधनशस्त्रमेषणी यथाह सुश्रुतः "विंशतिः शस्त्राणि तद्यथा मण्डलाग्रकरपत्रेत्याद्युपक्रमे "वडिशदन्तशङ्क्वेषणी" इत्युक्त्वा "एषण्येषणे चानुलोम्ये च" इति तत्प्रयोजनमुक्तम्। एषणमभ्यन्तरगमनमानुलोम्यं विस्रावणम् तत्रैव एषणीलक्षणं "एषणी गण्डूपदाकारमुखी" उक्तम्।"एष्ये स्वेषण्यलाभे तु बालाङ्गुल्यङ्कुरा हिताः" सुश्रुतः।

एषणीय त्रि॰ इष-एष-वा कर्मणि अनीयर्। १आशास्ये "जायापती लौकिकमेषणीयम्" कुमा॰। २गम्ये च।

एषा स्त्री एष-अ। इच्छायां जटाधरः।

एषावीर पुंस्त्री। एषायां यथेष्टं धनादिप्रतिपादेच्छायां वीरः। यतः कुतश्चित् प्रतिपादके निन्दितब्राह्मणभेदे। स्त्रियां जातित्वात् ङीष्। "यद्येनमेषावीरा याजयेयुः" शत॰ ब्रा॰ ११,२,७,२२, "एषावीरोनाम निन्दितब्राह्मणजातिविशेषः तत्संबन्धिन ऋत्विजः" भा॰

एषिन् त्रि॰ इष-णिनि। इच्छौ अभिलाषुके। "यौवने विषयैषिणाम्" "बभूव युद्धं तुमुलं परस्परजयैषिणोः" रघुः। स्त्रियां ङीप्।"तदाश्रिता हि सा ज्ञेया बुद्धिस्तत्त्वैषिणी भवेत्" भा॰व॰ ८१ अ॰।

एष्टव्य त्रि॰ इष् वाञ्छायाम् तव्य। वाञ्छनीये। "एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत्" पु॰त॰ मत्स्यपु॰

"तद्वैव ब्राह्मणेनैष्टव्यम्" शत॰ब्रा॰ १,९,२,१७।

एष्टि स्त्री आ+यज-आ+इष-वा क्तिन्। १अभियजने २अभिकामनायाञ्च।"पितॄणां शश्वद्बभूथ सुहवएष्टौ"ऋ॰६,२१ ८,। "एष्टौ आयजनेऽभिकामने वा" भा॰ करणे क्तिन् ३आशासनसाधनेषु ऋक्सामेषु। "प्रजापतिर्वै विश्वकर्मा स हीदं सर्वमकरोत् मनोगन्धर्वस्तस्य ऋक्सामान्यप्सरसः इति मनोह गन्धर्वः ऋक्सामैरप्सरोभिर्मिथुनेन सहोक्रामैष्टयोनामेत्यृक्सामानि वा एष्टय ऋक्सामैर्ह्याशासते इति नोऽस्त्विति नोऽस्त्विति" शत॰ब्रा॰ ९,४,१,१२। "प्रजापतिर्विश्वकर्मा मनोगन्धर्वस्तस्य ऋक्सामान्यप्सरस एष्टयोनाम" यजु॰ १८,४२।

एष्य त्रि॰इष-कर्मणि ण्यत्। १वाञ्छनीये भावे ण्यत् सुश्रुतोक्ते "तत्र शस्त्रकर्माष्टविधं तद्यथा छेद्यं भेद्यं लेख्यं वेध्यमेष्यमाहार्यं विस्राव्यं सीव्यमित्युक्तेषु अष्टसु मध्ये २शल्यकर्मभेदे न॰। "एष्येष्वेषण्यलाभे" सुश्रु॰ "घुणोपहत काष्ठे वेणुनलनालीशुष्कालाबुमुखेष्वेष्यस्य" इत्युक्तेषु तत्कर्माचरणम्। कर्मणि ण्यत्। ४एषणकर्मसाध्ये त्रि॰। "एष्या नाड्यः सशल्याश्च व्रणा उन्मार्गिणश्च ये" सुश्रु॰ एष गतौ ण्यत्। ५गन्तव्ये त्रि॰। "गतैष्यदिवसाद्येन गतिर्निघ्नी खषड्हृता" नील॰ता॰। इष गतौ दि॰ इष इच्छायां भ्वा॰ इष आभीक्ष्ण्ये क्र्या॰ एभ्यः ण्यत्। एष्य तत्तद्धात्वर्थकर्मणि प्राचु प्रैष्य इत्येव प्रेष्यस्तु ईष गतिहिंसादर्शनेषु इत्यस्य ण्यदन्तस्य रूपम् इति भेदः।

एह त्रि॰ आ+ईह अच्। १सम्यक् चेष्टायुक्ते। एला एहाः परिपातें दहश्वान्" अथ॰ १२,२,२२। आ ईषदर्थे ईह-घञर्थे करणे क। २क्रोधे निरु॰। क्रुद्धस्य सम्यक्कार्यानर्हत्वात् ईषच्चेष्टावत्त्वेन तथात्वम्। [ङीन्। एही।

एहि त्रि॰ आ+ईह-त इन्। सम्यक् चेष्टान्विते स्त्रियां शार्ङ्ग॰

एहीड न॰ एहि ईडे इत्युच्यते यस्मिन् कर्मणि मयूर॰ नि॰। एहि ईडे इत्युच्यते यस्मिन् कर्मणि तादृशे कर्मणि एवं एहिकटा एहिवाणिजका एहिद्वितीया एहिस्वागता एहिविघसा इत्यादयोऽपि तत्तत्क्रियायाम् स्त्री एहियवं तु तत्कर्मणि न॰ इति भेदः।

इति वाचस्पत्ये एकारादिशब्दार्थसङ्कलनम्।

ऐ

ऐकारः स्वरवर्णभेदः एदैतौ कण्ठतालव्याविन्युक्तेः कण्ठतालुस्थानयोरुच्चार्यः । स च दीर्घः द्विमात्रत्वात् प्लुतस्तु त्रिमात्र इति भेदः । द्विमात्रस्य उदात्तानुदात्तस्वरितभेदैः प्रत्येकमनुनासिकाननुनासिकभेदाभ्याञ्च षड्विधः एवं प्लुतस्यापीति द्वादशविधः । तन्त्रे तस्य वाचकशब्दा उक्ता यथा ।"ऐर्लज्जा भौतिकः कान्ता वायवी मोहिनी विभुः। दक्षा दामोदरः प्रज्ञो धरो विकृतमुख्यपि । चमात्मकोजगद्योनिः परः परनिबोधकृत् । ज्ञानामृता कपर्द्दि श्रीः पीठेशोऽग्निः समात्रकः । त्रिपुरा लोहिता राज्ञी वाग्भवो भौतिकासनम् । महेश्वरी द्वादशी च विमलश्च सरस्वती । कामकोटो वामजानुरंशुमान् विजयो जटा" । "ऐकारः कोठराज्ञी च मालिन्युन्मत्तभैरवी"इति च वर्णाभिधा० । मातृकान्यासेऽधरोष्ठे न्यस्तत्वात् तच्छब्दाभिधेयता । तस्य ध्येयरूपं कामधेनुत० उक्तं यथा "ऐकारं परमं दिव्यं महाकुण्डलिनीं स्वयम् । कोटिचन्द्रप्रतीकाशं पञ्चप्राणमयं सदा । ब्रह्मविष्णुमयं वर्णं तथा रुद्रमयं प्रिये ! । सदाशिवमयं वर्णं विन्दुत्रयसमन्वितम्" । तपरत्वे कारपरत्वे च तत्स्वरूपपरः ।

ऐ अव्य० आ+इण—विच् । १आह्वाने २स्मरणे ३आमन्त्रणे च ४महेश्वरे पु० तस्य सर्वगत्वात्तथात्वम् ।

ऐक वि० एक+स्वार्थे अण् । एकशब्दार्थे ततोभवाद्यर्थे गहा० छ । ऐकीय एकसम्बन्धिनि तद्भवादौ च त्रि० ।

ऐकध्यम् अव्य० एकधा+धास्थाने ध्यमुञ् एकधेत्यर्थे "ऐकध्यं च श्रपणम्" कात्या० १४,३,२४ । "एतदैकध्यं संहृत्य" सुश्रु० । ततः स्वार्थे ड । ऐकध्य तदर्थे न० "ऐकध्येन श्रपणम्" उक्तकात्या० सूत्रभाष्ये कर्कः ।

ऐकपत्य न० एकपतेर्भावः कर्म वा ष्यञ् । सार्वभौमत्वे "अप्रतिद्वन्द्वतामैकपत्यञ्च सर्वदेहिनाम्" भाग०७,३,२४ । एकपतौ भवः पत्युत्तरपदत्वात् ण्य । एकपतिभवे त्रि० ।

ऐकपदिक त्रि० एकस्मिन् पदे स्थाने विभक्त्यन्ते वा भवः ठञ् । १एकस्थानभवे २एकविभक्त्यन्तपदभवे च । एकपदाय प्रभवति ठञ् । "अतोऽन्यैकपदिका भवन्ति यथा व्रततिर्दमूनाः" इत्यादि निरु० 'एकार्थमनेकशब्दमित्येतदुक्तम् अथ यान्यनेकार्थान्येकपदानि तान्यतोऽनुक्रमिष्यामोऽनवगतसंस्कारांश्च निगमान् तदैकपदिकमित्याचक्षते इति निरु०उक्ते अनेकशब्दे एकार्थपरे समासादिशक्तिरूपे ३वाक्यभेदे च ।

ऐकपद्य न० एकपदस्य एकार्थकैकविभक्त्यन्तस्य भावः ष्यञ् । संसृष्टार्थत्वे अनेकपादानामेकार्थबोधकतासम्पादने समासादिभावे । [भावत्वे ।

ऐकभाव्य न० एको भावो यस्य तस्य भावः ष्यञ् । एकस्वभावत्वे ।

ऐकमत्य न० एकं मतं येषां तेषां भावः ष्यञ् । तुल्यसम्मतौ "स्वर्गामिपत्वस्य तमैकमत्यात्" रघुः । "ऐकमत्यं हि नोराजन् ! सर्वेषामेव लक्षये" भा०व० ७अ० । "ऐकमत्यञ्च सर्वस्य जनस्याथ नृपं प्रति" भा०व० २६८ अ० । "सुहृदश्चैकमत्यात्" भा०उ० २२ अ० । "कैकमत्यं महाधियाम्" नीतिः । ऐकमत्यमत्रास्ति अच् । ऐकमत्ययुक्ते त्रि० । "गर्हैतान्योन्यमतयो मन्त्रिणो ब्रुवते सदा । नचैकमत्यः श्रेयोऽस्ति मन्त्रः सोऽधम उच्यते" रामा० ।

ऐकराज्य न० एकराजो भावः ष्यञ् । चक्रवर्त्तित्वे "यश्चुसुपर्णो येनैकराज्यमजयो हि ना" आश्व०श्रौ०५,१६,४ ।

ऐकलव्य पुंस्त्री एकस्वः अपत्यं गर्गा० यञ् । एकलूनामकर्षेर्गोत्रापत्ये स्त्रियां ङीप् यलोपः ऐकलवी । ऐकलव्यस्य छात्राः कण्वा० ततोऽण् यलोपः । ऐकलव तच्छात्रेषु स्त्रियां ङीप् ।

ऐकशतिक त्रि० एकशतमस्यास्ति ठञ् । एकशतपरिमितद्रव्यस्वामिनि । एवमैकसहस्रिकादयोऽपि तत्तत्संख्यद्रव्ययुक्ते त्रि० ।

ऐकश्रुत्य न०एका श्रुतिर्यत्र तस्य भावः ष्यञ् ।"उदात्तानुदात्तस्वरितानां परः सन्निकर्ष ऐकश्रुत्यम्" आश्व०श्रौ० १,२ ६, सूत्रोक्ते स्वरभेदे । एकश्रुतिशब्दे विवृतिः ऐकस्वर्यमप्यत्र न० ।

ऐकागारिक त्रि० एकमसहायमगारं प्रयोजनमस्य ठञ् । चौरे स्त्रियां ङीप् । "ऐकागारिकवद्भूमौ दूराज्जन्मुरदर्शनम्" माघः "केनचिदैकागारिकेण हस्तवता"दशकु० ।

ऐकाग्र त्रि० एकाग्र+स्वार्थेऽण् । एकाग्रचित्ते एकतानचित्ते

ऐकाग्र्य न० एकाग्रस्य भावः । अनन्यासक्तचित्तत्वे एकमात्रालम्बिचित्तत्वे एकाग्रताशब्दे विवृतिरुदाहरणञ्च ।

ऐकात्म्य न० एक आत्मा स्वरूपं यस्य तस्य भावः ष्यञ् । १ऐक्ये २एकस्वरूपत्वे । "तथैकात्म्यानुभावानां विकल्परहितः स्वयम्" भाग० ६,८,३१ । "एतेषां श्रेयआशासे उतैकात्म्यं महात्मनि" ७,१३,३६ । "एकात्म्यगमनात् सद्यः कलुषाद्विप्रमुच्यते" भा०अनु० १७५ । ३अभेदे च

"ऐकात्म्यं वासुदेवस्य मोक्षधानञ्जुनस्य च" भा० आ० १अ०। एकआत्मा तस्य भावः। ४आत्मन एकत्वे ऐकात्म्यवादः ऐकात्म्यवादी

ऐकादशिन त्रि० एकादशानां संघ इनि एकादशिनी खलिनीवत् स्त्रीत्वं सा साधनतयाऽस्त्यस्य अण्। एकादशिनीसाध्यफले। "द्वे त्वेवैते एकादशिन्यावालभेत य एवैकादशिनेषु कामस्तस्याप्त्यै" शत० ब्रा० १३,२,२,२ तत्राश्वमेधिकविधैकादशसंख्यपशुभेदाः देवतासहिताः यजु० २९,५८,५९ उक्ता यथा

"आग्नेयः कृष्णग्रीवः१ सारस्वती मेषी २बभ्रुः सौम्यः३ पौष्णः श्यामः४ शितिपृष्ठो बार्हस्पत्यः५ शिल्पो वैश्वदेव६ ऐन्द्रोऽरुणो७ मारुतः कल्माष८ ऐन्द्राग्नः संहितो९ ऽधोरामः सावित्रो १०वारुणः कृष्ण एकशितिपात्११पेत्वः"५८ "अश्वमेधे श्रुतिरस्ति द्वे त्वेवैते एकादशिन्यावालभेतेति" तयोरेकादशिन्योः पशवस्तद्देवताश्च कण्डिकाद्वयेनोच्यन्ते नेनेमानि ब्राह्मणवाक्यानि द्रव्यदेवताप्रतिपादकानि नतु मन्त्राः। कृष्णा ग्रीवा यस्य स कृष्णग्रीवः पशुराग्नेयः अग्निदेवत्यः १, मेषी सारस्वती सरस्वतीदेवताका२ बभ्रुः पिङ्गलवर्णः पशुः सौम्यः सोमदेवत्यः३ श्यामः कृष्णवर्णः पौष्णः पूषदेवत्यः४ शिति श्यामं पृष्ठमस्य स शितिपृष्ठः बार्हस्पत्यः बृहस्पतिदेवत्यः५ शिल्पो विचित्रवर्णो वैश्वदेवः विश्वदेवदेवत्यः६ अरुणः रक्तः ऐन्द्रः इन्द्रदेवत्यः७ कल्माषः कर्बुरो मारुतः मरुद्देवत्यः८ संहितः दृढाङ्गः ऐन्द्राग्नः इन्द्राग्निदेवत्यः९ अधोरामः अधोदेशे श्वेतः सावित्रः सवितृदेवत्यः१० एकः शितिः श्वेतः पादोऽस्य स एकशितिपात् एकपदे श्वेतोऽन्यत्र कृष्णः पेत्वः पतनशीलो वेगवान् पशुः वारुणः वरुणदेवत्यः११। एवमेकादश" वेददी०। "अग्नयेऽनीकवते रोहिताञ्जिरनड्वानधोरामौ सावित्रौ पौष्णौ रजतनाभी वैश्वदेवौ पिशङ्गौ तूपरौ मारुतः कल्माषः आग्नेयः कृष्णोऽजः सारस्वती मेषी वारुणः पेत्वः"५९। "द्वितीयैकादशिनीपशुदेवानाह। रोहितो रक्तोऽञ्जिस्तिलको यस्य सोऽनड्वान् वृषभोऽनीकवतेऽग्नये आलभ्य' अनीकं मुखं सैन्यं वा यस्य सोऽनीकवान् तस्मै १अधोरामौ अधोभागे श्वेतौ द्वौ पशू सावित्रौ सवितृदेवतौ२,३। रजतवर्णा नाभिर्ययोस्तौ रजतनाभी द्वौ पौष्णौ पूषदेवत्यौ४,५ "पिशङ्गौ पीतौ तूपरौ निःशृङ्गौ वैश्वदेवौ विश्वदेवदेवत्यौ६,७कल्माषः कर्बुरो मारुतः८ कृष्णः श्यामोऽजोमेषः आग्नेयः आग्निदेवत्यः९ मेषी सारस्वती१० पेत्वः वेगवान् वरुणदेवत्यः११ एवमेकादश" इति वेददीपः

ऐकाधिकरण्य न० एकाधिकरणस्य भावः ष्यञ्। एकाधिकरणवृत्तित्वे सामानाधिकरण्ये। "अथवा हेतुमन्निष्ठविरहाप्रतियोगिना। साध्येन हेतोरैकाधिकरण्यं व्याप्तिरुच्यते" भाषा०। तुल्यविभक्तिकपदयोः स्वोपस्थाप्यार्थयोरभेदबोधकत्वे च।

ऐकान्तिक त्रि० एकान्तमवश्यं भावी ठञ्। १अवश्यभव्ये। "सुखस्यैकान्तिकस्य च" मनुः। "ऐकान्तिकमात्यन्तिकमुभयमाप्नोति कैवल्यम्" सां०का०। ऐकान्तिकमवश्यं भावि" कौ०। एकान्तं भूतः स्वसत्तया व्यापी ठञ्। २एकान्तस्य स्वसत्तया व्यापके "कृष्णश्चैकान्तिकः सुहृत्" भाग० ३,२, स्त्रियां ङीप् "ऐकान्तिकी हरेर्भक्तिरुत्पातायैव कल्पते" वरा०पु०।

ऐकान्यिक त्रि० एकमन्यत् विपरीतं वृत्तमध्ययनेऽस्य। "कर्माध्ययने वृत्तम्" पा० ठक्। यस्याध्ययने प्रवृत्तस्य परीक्षाकाले विपरीतोच्चारणरूपं स्खलनमेकं जातम् तादृशे कुपाठके छात्रे।

ऐकायन पुंस्त्री एकस्य तन्नाम्नोमुनेर्गोत्रापत्यम् नडा० फक्। एकस्यर्षेर्गोत्रापत्ये स्त्रियां टाप्।

ऐकार्थ्य न० एकार्थस्य भावः ष्यञ्। एकशब्दा विशिष्टैकार्थोपस्थापने एकार्थीभावे। १एकप्रयोजने च। "२प्रभ्रष्टेनैकार्थ्यं सन्धिः" सि०कौ०।

ऐकाह्निक त्रि० एकाहमधीष्टोभूतोभृतोभावी वा ठञ्। १एकाहसाध्ये यागादौ स्त्रियां ङीप्। ततोऽन्यान्यैकाह्निकानि" आश्व० श्रौ० ८,१६,१६, "ताभ्यां पूर्वे ऐकाह्निके" २,१०,१०, "अन्यासामैकाह्निकानामुत्तमान्" २एकाहव्यापके ज्वरादौ "समुद्रस्योत्तरे तीरे द्विपदोनाम वानरः। ऐकाह्निकज्वरं हन्ति तस्य नामानुकीर्त्तनात्"। ऐकाह्निकज्वरस्य एकाहानन्तरे एकदिनं व्यापकोज्वरः इति वैद्यके प्रसिद्धम्। एकाहभृते ३दासे एकाहमधीष्टे सत्कृत्य व्यापारिते ४अध्यापके स्वसत्तया एकाह व्याप्यकाले ५ एकाहभाविनि लतवाटौ च। एकाहसाध्ययागभेद एकाहः तस्य दक्षिणा ठञ् ङीप्। ६एकाहसाध्ययागदक्षिणायां स्त्री।

ऐक्य न० एकस्य भावः ष्यञ्। १एकत्वे २अभिन्नत्वे ३एकार्थीभावे ४ "दैक्यं सोऽन्वये" सुग्ध० "ऐक्यसंयोगनानात्वसमवायविशारदः" भा०स०५अ०। ४ऐकमत्ये सौहार्दे च "तेषां द्वयोर्द्वयोरैक्यं विभिद्ये न कथञ्चन" रघुः। एकस्या-

वत्स्य गर्गा० यञ् । एकापत्ये पुंस्त्री० स्त्रियां ङीप् यलोप ऐक्ष्वी ।

ऐक्षव त्रि० इक्षोर्विकारः बिल्वा० अण् । इक्षुविकारे गुडादौ इक्षुविकारभेदाश्च इक्षुशब्दे ९०९ पृ० उक्ताः । "ऐक्षवं गुडवर्जितम्" "फलान्यगुडमैक्षवमिति" च स्मृतिः । २मद्यभेदे च । "पानसं द्राक्षमाधूकं खार्जूरं तालमैक्षवम् । माक्षिकं टाङ्कमाध्वीकमैरेयं नारिकेलजम् । समानानि विजानीयान्मद्यान्येकादशैव तु । द्वादशन्तु सुरामद्यं सर्व्वेषामधमं स्मृतम्" पुलस्त्यः । मद्यान्येकादशेत्युक्तिः अधिकदोषार्था अन्येषामपि मद्यानां मदनशालेन दर्शितत्वात् । प्रसङ्गात् तान्यत्र गुणसहितानि दर्श्यन्ते ।

"मद्यं हाला सुरा शुण्डा मदिरा वरुणात्मजा । इरा गन्धोत्तमा कल्या देवसृष्टा च वारुणी । मद्यं पित्तकरं प्रायं सरं रोचनदीपनम् । विदाहि दृष्टिविस्रुत्वं तीक्ष्णं वातकफापहम् । विधिना तु युतं पीतं तस्मादमृतसन्निभम् । अन्यथा कुरुते रोगानातपीतं विषोपमम् । १द्राक्षोत्थमविदाहि स्याद्रक्तपित्तेषु शस्यते । बल पुष्टिकरं मद्यं रक्तार्शोहारि दीपनम् । माध्वीकस्य गुणं किञ्चित् २खार्जूरमनिलप्रदम् । तदेव विशदं रुच्यं श्लेष्मघ्नं कर्षणं लघु । शालिषष्टिकपिष्टादिकृतं मद्यं सुरा ३मता । सुरा गुर्वी बलस्तन्यपुष्टिमेदःकफप्रदा । ग्राहिणी शोथगुल्मार्शोग्रहणीमूत्रकृच्छ्रनुत् । पुनर्नवाशालिपिष्टैर्विहिता वारुणी ४मता । सुरावद्वारुणी लघ्वी पीनसाध्मानशूलनुत् । प्रसन्ना ५स्यात् सुरामण्डस्तस्मात्कादम्बरी ६घना । ७जङ्गलस्तदधः प्रोक्तो जङ्गलान्मेदको ८घनः । पक्वसो ९जङ्गलः सारः सुराबीजन्तु किण्वकम् १० । प्रसन्नानाहशूलार्शोऽच्छर्दिरोचकवातजित् । दीपन्याध्मानहृल्लासविबन्धशूलप्रणाशिनी । कादम्बरी गुरुर्हृद्या दीपनी वातकृत् सरा । जङ्गलः कफनुद् ग्राही शोफार्शोग्रहणीहरः । मेदको मधुरो बल्यः स्तम्भनः शीतलो गुरुः । पक्वसो हृतसारत्वात् विष्टम्भी वातवर्द्धनः । किण्वकं वातशमनमहृद्यं दुर्ज्जरं गुरु । आक्षिकी ११या सुरा या स्यादक्षत्वकशालितण्डुलैः । आक्षिकी पाण्डुशोथार्शःपित्तास्रकफकुष्ठनुत् । किञ्चिद्वातकरी रूक्षा दीपनी रेचनी लघुः । यवपिष्टकृतं मद्यं प्रोक्तं यवसुरा १२च सा । काकोलिकी १३हला चैया मैरेयो १४धान्यजासवः । आसवस्य सुरायाश्च द्वयोरप्येकभाजनम् । साधनं तद्विजानीयान्मैरेयमुभयात्मकम् । कश्चित्तु धातकीपुष्पं गुडधान्याम्लसाधितम् । गुर्वी यवसुरा रूक्षा स्याद्विष्टम्भत्रिदोषकृत् । काकोली बृंहणी हृद्या दृष्टिमान्द्यप्रदा गुरुः । मैरेयं बृंहणं हृद्यं गुरु सन्तर्पणं सरम् । मद्यं सर्व्वरसं जातं मधूलकमुदीर्य्यते । मधूलकं १५गुरु स्वादु स्निग्धं शुक्रकफप्रदम् । शर्करो १६दीपन स्वादुः पाचनो रोचनो लघुः । स्त्रीविलासकरो वातशोषत्रस्तिविकारनुत् । मध्वासवो १७लघू रूक्षः कुष्ठमेहविषापहः । गौडो१८ऽग्निवर्द्धनो वर्ण्यो बलकृत्तर्पणः कटुः । तिक्तको बृंहणः स्वादुः सृष्टविण्मूत्रमारुतः । इक्षोः शीतरसः १९पक्वः सीधुः २०पक्वरसः स्मृतः । आमैः स एव विहितो बुधैः शीतरसो मतः । सीधुः पक्वरसः श्रेष्ठः स्वराग्निबलवर्णकृत् । वातपित्तकरो ह्यस्नेहनो रोचनो जयेत् । विबन्धमेहशोथार्शःशोषोदरकफामयान् । तस्मादल्पगुणः शीतरसः संलेखनः स्मृतः । जाम्बवः क्षौद्रसम्भूतः अम्बूरसगुडोद्भवः । जाम्बवो २१बद्धनिष्यन्दः कषायोऽनिलकोपनः । अरिष्टासवसीधूनां गुणान् कर्म्माणि चादिशेत् । बुद्ध्वा यथास्वं संस्कारमवेक्ष्य कुशलो भिषक् । सान्द्रं विदाहि दुर्गन्धि विरसं क्रमिसङ्कुलम् । अहृद्यं तरुणं रूक्षमुष्णं दुर्भोजने हितम् । अल्पौषधं पर्य्युषितमत्यर्थपिच्छलञ्च यत् । कफप्रकोपि तन्मद्यं दुर्जरञ्च विशेषतः । पित्तप्रकोपि बहुलं तीक्ष्णमुष्णं विदाहि च । अहृद्यं फेनिलं पूतिकृमिलं विरसं गुरु । तथा पर्य्युषितं चापि विन्द्यादनिलकोपनम् । सर्व्वदोषैरुपेतन्तु सर्व्वदोषप्रकोपणम् । चिरस्थितं जातरसं दीपनं कफवातजित् । रुच्यं प्रसन्नं सुरभि मेध्यं सेव्यं मद्यासवम् । तस्मान्नैकप्रकारस्य मद्यस्य रसवीर्य्यतः । स सौक्ष्म्यादौष्ण्यवातत्वाद् विकाशित्वाच्च वह्निनुत् । समेत्य हृदयं प्राप्य धमनीरूर्द्ध्वमार्गगाः । विक्षोभ्येन्द्रियचेतांसि मदयत्याशु वीर्य्यतः । चिरेण श्लैष्मिके पुंसि पातनो जायते मदः । अचिराद्वातिके दृष्टः, पैत्तिके शीघ्रमेव च । नवं मद्यमभिष्यन्दि त्रिदोषजनकं सरम् । अरिष्टं बृंहणं दाहि दुर्गन्धि विशदं गुरु । जीर्णं तदेव रोचिष्णु क्रमिश्लेष्मानिलापहम् । हृद्यं सुगन्धि सगुणं लघु स्रोतोविशोधनम् । सात्त्विके गीतहास्यादि राजसे साहसादिकम् । तामसे निन्द्यकर्म्माणि निद्रादि कुरुते तदा । शुक्तं कफघ्नं तीक्ष्णोष्णं लघु रोचनपाचनम् । पाण्डुक्रमिहरं रूक्षं भेदनं रक्तपित्तकृत् । गौडादिरसयुक्तानि मद्योक्तानि यानि च । यथापूर्वं गुरुतराण्यभिष्यन्दकराणि च ।

स्यात्काञ्जिकन्तु २२सौवीर २३मारनालं २४तु दीपकृत् । काञ्जिकं शिशिरस्पर्शं पाचनं रोचनं लघु । तुषोदकं यवैरामैः सतुषैः सकलैः कृतम् । सौवीरकं कृतन्त्वामैः पक्वैर्वा निस्तुषैर्यवैः । सर्व्वैरेभिरसाम्लं २५स्यात् सौवीरकमिति क्वचित् । तुषाम्बु दीपनं हृद्यं पाण्डु कृमिगदापहम् । सौवीरकं यकृद्ग्रहणीनाशनं भेदि दीपनम् । धान्याम्लं२५ धान्ययोनित्वात्प्रीणनं लघु दीपनम् । स्पर्शदाहकरं पानात्पाचनं श्लेष्मनाशनम् । गण्डूषान्मुखवैरस्यदौर्गन्ध्यकफकृन्तनम्"। ऐक्षवस्य द्वैविध्यमाह भावप्र० "इक्षोः पक्वैः रसैः सिद्धः सीधुः पक्वरसश्च सः । आमैस्तैरेव यः सीधुः स च शीतरसः स्मृतः" इति । इक्षुः काशमूलं तस्येदम् अण् । ३काशमूलावयवभूते स्त्रियां ङीप् । इक्षुः इक्षुपत्राकारः अस्त्यस्य अण् । ४इक्षुपत्राकारे च स्त्रियां ङीप् । "ऐक्षव्यौ विष्टती" कात्या० ८,१,१४, "विष्टती ऐक्षव्यौ काशमूलावयवभूते अत्र भवतः "काशमयः प्रस्तरः काशमूलमये विष्टती" शाखान्तरीयवाक्यशेषात्" कर्कः । अधिकरणमालायां "बर्हिःप्रस्तरयोरन्तराले तिर्य्यक्प्रसार्य्यमाणौ दर्भौ विष्टती ते अत्र इक्षुपत्ररूपे स्याताम्" इति माधवः । तेनात्र ऐक्षव्यशब्दकल्पनं प्रामादिकम् । "द्रोणकलशं वायव्यानिश्मकाश्मर्यमयान् परिधीनाश्वशालं प्रस्तरमैक्षव्यौ विष्टती तद्बर्हिरुपसंनद्धं भवति" शत०ब्रा० ३,६,३,१०,

ऐक्षुक त्रि० इक्षौ साधु गुडा० ठञ् । इक्षुसाधुनि क्षेत्रादौ इक्षुं भारभूतं वहति आवहति वा ठञ् । १भारभूतेक्षुवाहके २तदावाहके च । इक्षवःसन्त्यस्यां नडादि० छ कुक् च । इक्षुकीया भूमिस्तस्यां भवः अण् बिल्वकादि० छमात्रस्य लुक् । ऐक्षुकः तादृशभूमिभवे त्रि० ।

ऐक्षुभारिक त्रि० इक्षुभारं वहत्यावहति वा ठञ् । इक्षु १वाहके २तदावाहके च ।

ऐक्ष्वाक पु० इक्ष्वाकोर्गोत्रापत्यम् अण् नि० । १सूर्य्यवंश्ये नृपे बहुषु अणो लुक् । "इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः" रघुः । इक्ष्वाकोरयं जनपदः । ऐक्ष्वाक २तद्राजके जनपदे च बहुषु लुक् । तत्र भवः कोपधत्वात् अण् ऐक्ष्वाक तज्जनपदभवे बहुषु लुक् । क्वचिन्न लुक् । "ऐक्ष्वाकेषु च मैथिलेषु च फलन्त्यस्माकमद्याशिषः" इति मुरारिः । "ऐक्ष्वाक पुरुषव्याघ्रमतिमात्रपराक्रमम्" भा० शा०२९अ० । "त्रिशङ्कुर्बन्धुभिर्मुक्त ऐक्ष्वाकः प्रीतिपूर्व्वकम्" भा० अनु० ३अ० । अत्र ऐक्ष्वाकुरितिपाठस्तु आर्षत्वात् साधुः । [इङ्गुदीवृक्षफले (जिँ आपुतौ)

ऐङ्गुद न० इङ्गुद्याः फलम् फले अण् तस्य प्लक्षा० न लुक् ।

ऐच्छिक त्रि० इच्छया निर्वृत्तः ठञ् । इच्छया कृते स्त्रियां ङीप्

ऐड पु० इडाशब्दोऽस्त्यत्रानुवाकेऽध्याये वा विमुक्ता० अण् । इडाशब्दयुक्ते १अध्याये २अनुवाके च एडस्येदम् अण् ३मेषसम्बन्धिनि त्रि० स्त्रियां ङीप् । इडा+अपत्ये शिवा० अण् । इडापत्ये पुरूरवसि पु० ।

ऐडक पुंस्त्री एडक एव स्वार्थेऽण् । १मेषाकारे दक्षिणापथप्रसिद्धे पशुभेदे "त्रयो वा पशवोऽमेध्याद्दुर्वराह ऐडकः श्वा च" शत०ब्रा० १२,४,६,४ । एडकस्येदम् अण् तत्संबन्धिनि त्रि० एडकशब्दे उदा० ।

ऐड(ल)विड(ल) पु० इड(ल) विडा(ला) या अपत्यम् "ऋष्यन्धकवृष्णिकुरुभ्यश्च" ... "वृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः" पा० ढकोऽपवादः अण् डलयोरेकत्वस्मरणात् उभयत्र अन्यतरतो वा डस्य लो वा । कुबेरे । "तस्य प्रीतेन मनसा तान् दत्त्वैडविडस्ततः" भाग० ४,१२,८ ।

ऐडिविड पु० सूर्य्यवंश्ये क्षत्रियभेदे "नारीकवच इत्युक्तो निःक्षत्रे मूलकोऽभवत् । ततो दशरथः पुत्रस्तस्मादैडिविडस्ततः" भाग० ९,९,३२ । सूर्य्यवंशवर्णने ।

ऐण त्रि० एणस्य कृष्णमृगस्येदम् अण् । कृष्णमृगचर्म्मादौ । एणशब्दे उदा० । [एणीपचनदेशभवे ।

ऐणीपचन त्रि० एणीपचनदेशे भवः छाभावपक्षे अण् ।

ऐणेय त्रि० एण्या इदम् ढक् । १कृष्णमृगचर्म्मादौ "ऐणेयरौरवाजानि अजिनानि" गोभि० । २रतिबन्धभेदे हेम० ।

ऐतर त्रि० इतरस्यादूरभवादौ सङ्कलादि० चतुरर्थ्याम् अण् । इतरादूरभवदेशतत्सन्निकृष्टदेशादौ ।

ऐतरेय न० इतरस्य तन्नाम्न ऋषेरपत्यम् शुभ्रा० ढक् । १इतरर्षेरपत्ये । "महिदासः ऐतरेयः ऋषि तेन प्रोक्तम् ठ० अण् । २आरण्यकादि स्वताख्यापके ऋग्वेदीयब्राह्मणभेदे "ऐतरेयञ्च छान्दोग्यं बृहदारण्यकं दश" इत्युक्ते तदीये ३उपनिषद्भेदे ४वेदशाखाभेदे च तदधीयते इनि । ऐतरेयिन् तदध्येतृषु "अन्तरेण हविषो विष्णुमुपांश्वैतरेयिणः" आश्व०श्रौ०१,३,१२ "अग्नीषोमावेवमित्यैतरेयिणः २,६,२ । एकाहांश्चैतरेयिणः" १०,१,१२ ।

ऐतिकायन पुंस्त्री इतिकस्यर्षेर्गोत्रापत्यं नडादि० फक् । इतिकर्षेर्गोत्रापत्ये । अनन्तरापत्ये तु इञ् । ऐतिकिरिति

ऐतिशायन पुंस्त्री ऐतिकवत् । इतिशर्षेर्गोत्रापत्ये ।

ऐतिहासिक त्रि० इतिहासादागतः इतिहासं वेत्त्यधीते वा

ठक् । १इतिहासप्रबन्धज्ञे २तद्वेत्तरि ३तदध्येतरि च ।

ऐतिह्य न॰ इतिह पारम्पर्य्योपदेशः अनिर्द्दिष्टप्रवक्तृकोपदेश इति यावत् स्वार्थे ष्यञ् । पारम्पर्य्योपदेशे । यथात्र वटे यक्षः प्रतिवसतीत्यादि परम्परोपदेशमात्रम् न तु केनाप्येतदुपलभ्य कथितम् । अष्टप्रमाणवादिनः पौराणिका इदं प्रमाणान्तरमङ्गीचक्रुः तदेतन्मतं सां॰ कौ॰ निराकृतम् यथा “यच्चानिर्द्दिष्टप्रवक्तृकं प्रवादपारम्पर्य्यमात्रम् इति होचुरित्यैतिह्यं यथा इह वटे यक्षः प्रतिवसतीति न तत् प्रमाणम् अनिर्द्दिष्टप्रवक्तृकत्वेन सांशयिकत्वात् आप्तप्रवक्तृकत्वनिश्चये त्वागम इत्युपपन्नं त्रिविधम् प्रमाणमिति” “स्मृतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टयम्” ऐतरे॰ “ऐतिह्यमनुमानञ्च प्रत्यक्षमपि चागमम् । ये हि सम्यक् परीक्षन्ते कुतस्तेषामबुद्धिता” रामा॰ । [साधौ

ऐदंयुगीन त्रि॰ इदंयुगे साधु प्रतियुगा॰ खञ् । इदंयुग-

ऐनस न॰ एन एव प्रज्ञा॰ स्वार्थे अण् । पापे ।

ऐन्दव न॰ इन्दुर्देवताऽस्य । १मृगशिरोनक्षत्रे २इन्दुदेवताके हविरादौ त्रि॰ । तस्येदम् अण् । ३चान्द्रे मासे पु॰ “ऐन्दवस्तिथिभिस्तद्वत् संक्रान्त्या सौर उच्यते” सू॰ सि॰ । ४चन्द्रसम्बन्धिनि त्रि॰ । इन्दुः इन्दुलोकप्राप्तिः प्रयोजनमस्य अण् । ५चान्द्रायणे व्रतभेदे । “सङ्करापात्रकृत्यासु मासं शोधनमैन्दवम्” मनुः । “कर्त्तव्यमैन्दवद्वयम्” स्मृतिः तद्व्रतस्य यथा चन्द्रलोकप्राप्तिफलकत्वं तथा चान्द्रायणशब्दे वक्ष्यते । ६सोमराज्याम् स्त्री ङीप् ।

ऐन्द्र त्रि॰ इन्द्रो देवताऽस्य अण् । इन्द्रदेवताके १हविरादौ “ऐन्द्रं दधि ऐन्द्रं पयः” श्रुतिः । २ऋग्विशेषे स्त्री । “ऐन्द्र्या गार्हपत्यमुपतिष्ठते” श्रुतिः । सा च ऋक् “कदाचन स्तरीरसीत्यादि” । ३तद्देवताके ज्येष्ठानक्षत्रे न॰ “ऐन्द्रे गुरुः शशी चैव प्राजापत्ये रविस्तथा” प्रा॰ त॰ पुरा॰ । तस्येदम् अण् । ४इन्द्रसम्बन्धिनि त्रि॰ “ऊढं हि राज्यं पदमैन्द्रमाहुः” “ऐन्द्रं पदं भूमिगतोऽपि भुङ्क्ते” रघुः । ऐन्द्रं स्थानमुपासीना ब्रह्मभूता हि ते सदा” “ऐन्द्रस्थानमभिप्रेप्सुर्य्यशश्चाक्षयमव्ययम्” मनुः । ५तच्छक्तिरूपदेवीमूर्त्तिभेदे स्त्री ङीप् । “ऐन्द्रीतमसुरेश्वरम्” देवीमा॰ तन्त्रोक्ते भूतशुद्ध्यङ्गे ६धारणाभेदे “ऐन्द्र्या धारणया देहं स्थिरीकृत्येति भूतशुद्धौ” रघु॰ । तत्र भवः अण् । ७अर्ज्जुने ८वालिवानरे च पु॰ तयोस्तत उत्पत्तिमत्त्वात् ।

अपत्ये तु इञ् । ऐन्द्रिरित्येव ९वनार्द्रके न॰ राजनि॰ । “ज्यैष्ठे मूले च नक्षत्रे चरेद्यदि बृहस्पतिः । ऐन्द्रः संवत्सरः स स्यात् सर्वभूताशिवप्रदः” विष्णु ध॰ उक्ते द्वादशवर्षमध्ये १०संवत्सरभेदे पु॰ । तत्फलञ्च “ज्यैष्ठे जातिकुलश्रेण्यो श्रेष्ठा नृपाः सर्वधर्म्मिणः । पीड्यन्ते सर्वधान्यानि हित्वा कङ्गुशमीजानि” मल॰ त॰ ।

ऐन्द्रजालिक त्रि॰ इन्द्रजालेन चरति ठक् । मायाविनि (वाजिकर) जटाधरः ।

ऐन्द्रद्युम्न न॰ इन्द्रद्युम्नमधिकृत्य कृतमाख्यानमण् । इन्द्रद्युम्नन्पाधिकारेण कृते आख्याने “ब्रीहिद्रौणिकमाख्यानमैन्द्रद्युम्नं तथैव च” भा॰ आ॰ १अ॰ । इदञ्चाख्यानं ब्रीहिद्रौणिकाख्यानात् परं मुद्रितभारते न दृश्यते कचित् पुस्तकान्तरेऽस्ति ।

ऐन्द्रमहिक त्रि॰ इन्द्रमहः प्रयोजनं कारणं फलं वास्य ठञ् । १ऐन्द्रमहकारणके २तत्फलके च ।

ऐन्द्रवायव त्रि॰ इन्द्रश्च वायुश्च इन्द्रवायू वायुशब्दयुक्तत्वात् देवताद्वन्द्वेऽपि नानङ् तौ देवते अस्य अण् । इन्द्रवायुदेवताके हविरादौ । “ऐन्द्रवायवपात्रं ततस्य द्वितीयम्” शत॰ ब्रा॰ ४,१,५,१६ “यदैन्द्रवायवाग्रान् प्रातःसवने” ४,४,१,१७ ।

ऐन्द्रशर्म्मि पु स्त्री इन्द्रशर्म्मणोऽपत्यं बाह्वा॰ इञ्-टिलोपश्च । इन्द्रशर्म्मनामकस्यापत्ये स्त्रियां ङीप् ।

ऐन्द्रहव त्रि॰ ऐन्द्रहव्यस्य छात्रः कण्वा॰ अण् यञो लुक् । ऐन्द्रहव्यछात्रे । इन्द्रहूशब्दे इन्द्रहव्यसाधनं दृश्यम् ।

ऐन्द्राग्न त्रि॰ इन्द्राग्नी देवते अस्य अण् । इन्द्राग्निदेवताके हविरादौ । “एता ऐन्द्राग्ना द्विरूपा अग्नीषोमीयाः” यजु॰ २४,८ “ऐन्द्राग्नः संहितोऽघोरासः” २६,५८ । “ऐन्द्राग्नेन विधानेन” भा॰ अनु॰ ६० अ॰ ।

ऐन्द्रापौष्ण त्रि॰ इन्द्रश्च पूषा च द्वन्द्वे आनङ् इन्द्रापूषणौ देवते अस्य अण् उपधाऽतोलोपः । इन्द्रापूषदेवताके हविरादौ । “ऐन्द्रापौष्णं चरुमिति” शत॰ ब्रा॰ ४,२,५,५ । “अग्नापौष्णः ऐन्द्रापौष्णः” कात्या॰ १५,२,१४ एवम् ऐन्द्रामारुतैन्द्राबार्हस्पत्यादयोऽपि इन्द्रसहित तत्तद्देवताके हविरादौ त्रि॰ ।

ऐन्द्रायण पु॰ इन्द्रस्यापत्यम् न॰ फक् । इन्द्रापत्ये ततः चतुरर्थ्यां अरीह॰ वुञ् । ऐन्द्रायणक तेन निर्वृत्तादौ त्रि॰

ऐन्द्रि पु॰ इन्द्रस्यापत्यम् इञ् । १जयन्ते २अर्ज्जुने ३वालिवानरे ४काके च” मेदिनिः । तत्र काके । “ऐन्द्रिः किल

मखेशस्यः" रघुः। अवन्ते "कामस्तु कमलेक्षणः। ऐन्द्रिमभ्यर्द्दयामास वायव्यैराग्नेयैर्विषोपमैः" हरिवं० १२२ अ० अर्ज्जुने "सम्मोहनं शत्रुसहोऽन्यदस्त्रं प्रादुश्चकारैन्द्रिरवारणीयम्" भा०वि० ६६ अ०।

ऐन्द्रिय त्रि० इन्द्रियेण प्रकाश्यते अण्। १इन्द्रियप्रकाश्ये प्रत्यक्षात्मके ज्ञानभेदे तस्येदम् अण्। २इन्द्रियसम्बन्धिनि त्रि० "चतुर्थस्त्वैन्द्रियः सर्गः" भा०३,१०,१६। स सर्गः "मनसश्चेन्द्रियाणाञ्चेति" भाग० ३,१५,२६, उक्तः। स च तैजसएव "तैजसानीन्द्रियाण्येव" भा० ३,२५,३१, उक्तेः। इन्द्रियमेव स्वार्थेऽण्। ३इन्द्रिये न०। "वैकारिकं तामसमैन्द्रियं सृजे" भाग०५,२४,१७।

ऐन्द्रियक त्रि० इन्द्रियेण प्रकाश्यः वुञ्। इन्द्रियप्रकाश्ये १प्रत्यक्षात्मके ज्ञाने २तद्विषये च "स च परिणामभेद ऐन्द्रियक इति नास्ति प्रत्यक्षादनवस्थोविषय इति" सां०कौ० "यथा मनोरथः स्वप्नः सर्व्वमैन्द्रियकं मृषा" भाग० ७,२,४४

ऐन्द्री स्त्री इन्द्रस्येयम् इन्द्रोदेवताऽस्या वा अण् ङीप्। १शच्याम्। २ज्येष्ठायां तारायां ३पूर्वस्यां दिशि ४अलक्ष्म्याम् त्रिका०। इन्द्रवारुण्यां (राखालशशा) रत्नमा० ६सूक्ष्मैलायाम्' राजनि०। ऐन्द्रशब्दोक्तार्थेषु च।

ऐन्वायन पुंस्त्री इन्वस्यर्षेर्गोत्रापत्यम् नडा० फक्। इन्व-नामर्षेर्गोत्रापत्ये स्त्रियां टाप्। [र्य्यभवे २स्वामिभवे च।

ऐन्य त्रि० इने सूर्य्ये स्वामिनि वा भवः कुर्वा० ण्य। १सू-

ऐभावत पु० इभावतोऽपत्यम् अण्। ऋषिभेदे प्रतीदर्शे। "तद्धैतत् पपच्छुः सृञ्जयाः श्वाञ्जयः प्रतीदर्शमैभावतम्" शत०ब्रा० २,८,२१२।

ऐभी स्त्री इभ इभवाचकशब्दः अस्त्यस्याः प्रज्ञा०अण् ङीप्। १हस्तिघोषलतायाम् राजनि० इभस्येयम् अण् ङीप्। २हस्तिसम्बन्धिनि त्रि०।

ऐर त्रि०इरायाम् अन्ने पृथ्व्यां जले वा भवः अण्। १अन्नभवे मण्डे २तत्पूर्णे ब्रह्मलोकस्थे सरसि न०। 'तदैरं मदीयं सरः' छान्दो०उ०। "तत् तत्रैव इराम्नं तन्मय ऐरोमण्डस्तेन पूर्णमैरम् मदीयं तदुपयोगिनां मदकरं हर्षोत्पादकं सरः" भा०। तेन ऐरमित्येकं पदम् मदीयमित्यपरं पदम् ऐरंमदीयमित्येकशब्दत्वभ्रमं प्रामादिकमेव। ३भूमिभवे ४जलभवे च त्रि०।

ऐरका त्रि०एरका+भवार्थे कुर्व्वादि०ण्य। एरकाभवादौ त्रि०।

ऐरावण पु० इरा सुरा वनमुदकं यत्र तत्र भवः अण्। पूर्व्वपदादिति णत्वम्। १इन्द्रगजे ऐरावते। इरया उदकेन वणति शब्दायते वण-अच् इरावणः समुद्रस्तत्र भवः अणित्येव न्याय्यम्। "श्वेतैर्दन्तैश्चतुर्भिस्तु महाकायस्ततः परम्। ऐरावणो महानागोऽभवत् वज्रभृता धृतः" भा०आ०१८अ०। तस्य क्षीरसमुद्रोद्भवत्वेन सुरासमुद्रोद्भवत्वाभावात्। सुरैरपेयत्वात् वनमुदकमस्य तत्र भवः अण् णत्वमित्यपि साधु। प्रागुक्ता क्षीरस्वाम्युक्ता व्युत्पत्तिस्तु काल्पनिकी सुरासमुद्रे तस्याजातत्वात्। २सर्पभेदे "वासुकिस्तक्षकश्चैव नागश्चैरावणस्तथा" भा०स०९ अ०। वरुणलोकवर्णने।

ऐरावत त्रि० इरा जलानि भूम्ना सन्त्यस्य इरा+मतुप् मस्य व इरावान् समुद्रस्तत्र भवः अण्। समुद्रजाते इन्द्रगजे। "प्राहेश्वं पयोवाहं विद्युदैरावताविव" ऐरावतास्फालनविश्लथं हरिः" रघुः। "ऐरावतास्फालनकर्कशेन" कुमा० "कुर्वन् कामं क्षणमुखपटप्रीतिमैरावतस्य" मेघ०। ३नारङ्गवृक्षे ४लकुचद्रुमे च मेदि०। ५पञ्चकलमात्राप्रस्तारे आदिलघुके अन्त्यगुरुद्वयके प्रथमे भेदे पु० ६ऋजुदीर्घे शक्रधनुषि मेदि०। इरावत्याः नद्याः सन्निकृष्टोदेशः अण्। ७भरतखण्डभेदे न०। "बभूव परमाश्वाना मैरावतपथे यथा" भा०व०१६२अ० तत्र भवः "धन्वयोपधाद्वुञ्" पा० वुञ्। ऐरावतक ऐरावतरूपधन्वदेशभवे त्रि०।

ऐरावती स्त्री इराः सन्त्यस्य भूम्ना मतुप् मस्य वः इरावान् मेघः तत्र भवा अण्। १विद्युति। २ऐरावतयोषायां च मेदि० ३वटपत्रीवृक्षे राजनि०। ४पाञ्चालदेशस्थे नदीभेदे।

ऐरिण न० इरिणे ऊषरे भवम् अण्। लवणभेदे। (पांशु) राजनि० [तत्र भवः ढक्। २मल्ले पु० ३कषादौ त्रि०

ऐरेय न०इरायामन्ने भवम् ढक्।१अन्नपिष्टभवे मद्ये। इराभूमि

ऐर्म्म न० इर्माय हितम् अञ्। "नष्टवीर्य्यस्तु धरकः कुष्ठमेहापहः परः। सोऽन्तर्धूमस्तस्य मज्जा तु दग्धः त्रिप्रस्तैः सैन्धवं चाञ्जनञ्च। ऐर्म्मं हन्त्यादिमन्नाम्लकाचार्ब्बुदरोग तैमिरं चाञ्जनेन" सुश्रुतोक्ते अञ्जनभेदे अञ्जनेन नेत्रलेपनेन।

ऐल पु०इलाया अपत्यम् शिवा०अण्। १बुधपुत्रे पुरूरवसि। "सोमपुत्राद्बुधाद्राजंस्तस्यां जज्ञे पुरूरवाः। जनयित्वा सुतं सा तमिला सुद्युम्नतां गता" हरिवं० १०अ०। इडाशब्दे विवृतिः। "षट्सुता जज्ञिरे चैलादायुर्धीमानमावसुः। दृढायुश्च वनायुश्च शतायुश्चोर्व्वशीसुताः" भा० आ० ७५अ०। इला पृथ्वी तस्यां भवः। २भौमे

मङ्गले । इलानामन्नानां समूहः अण् । ३अन्नसमूहे न० । इलायाः पृथिव्या इदम् अण् । ४पृथिवीजाते अन्ने च । “ये पथां पथि रक्षय ऐलबृदा आयुर्युधः” यजु०१६,६०, ऐलमन्नसमूहमन्नं वा बिभ्रति ऐलभृतः पृषोदरत्वात् भत-कारयोर्दकारौ । डलयोरैक्यात् ऐडशब्दोऽप्युक्तार्थेषु

ऐलवालुक एलवालुकमेव स्वार्थे अण् । एलवालुके (वालुका) गन्धिद्रव्ये शब्दरत्ना० ।

ऐलविल न० राजभेदे । “भरतश्चापि दौष्मन्तिर्लेभे भूमिशयां दृशम् । तस्माल्लेभे च धर्मज्ञो राजश्चैलविलस्तथा । ततश्चैलविलाल्लेभे” भा० शा०१६१अ० । अलिविद्यावंशवर्द्धने । २कुबेरे च । “वरासनगतं तत्र यथैवैलविलं तथा” हरिवं०१७७अ० । ऐडविडशब्दे व्युत्पत्तिः ।

ऐलाक त्रि० ऐलाक्यस्य छात्रः कण्वा० अण् यञोलोपः । ऐलाक्यछात्रे ।

ऐलिक पु० इलिन्यां भवः ठक् पुंवत् । इलिन्यपत्ये दुष्मन्तादिपितामहे तंसौ राजनि “इलिनीनाम तस्यासीत् कन्या वै जनमेजय! । ब्रह्मवादिन्यधि स्त्री च तंसुस्तामभ्यगच्छत । तंसोः सुरोधो राजर्षिर्धर्मनेत्रः प्रतापवान् । ब्रह्मवादी पराक्रान्तस्तस्य भार्य्योपदानवी । उपदानवी सुतान् लेभे चतुरस्त्वैलिकात्मजात् । दुष्मन्तमथ सुष्मन्तं प्रवीरमनघं तथा” हरिव०२२

ऐलेय पु० इलायाः अपत्यम् ढक् । १भौमे मङ्गले इलायां भवः ढक् । २एलुवालुके गन्धद्रव्ये न० शिवादौ० इलाशब्दस्तु भातुपुत्रीडापरस्तेन ततोऽण्वेवेति भेदः ।

ऐश त्रि० ईशस्येदम् अण् । ईशसंबन्धिनि “सुरसरिदिव तेजो वह्निनिष्ठ्यूतमैशम्” रघुः “यो लोकवीरसमितौ धनुरैशमुग्रम्” भाग० ८,१०,६ । एवमैशानेश्वरादयोऽप्यत्र स्त्रियां ङीप् । ऐशानी “पूर्वोत्तरयोरन्तरालदिशि “ऐशानीक्रमतो रेखोत्तरापा देवमण्डले । नैर्ऋतीक्रमतोरेखा प्रागपा पितृमण्डले” स्मृतिः । “ऐशान्यां शरणं ध्रुवं निगदितं दिग्लक्षणं खञ्जने”ति०त०वर्षकृत्यम् । ईश्वरसम्बन्धिनि त्रि० “पश्य मे योगमैश्वरम्” गीता “ऐश्वरं धनुरभाजि यत्त्वया” रघुः २दुर्गायां स्त्री ।

ऐश्वर्य्य न० ईश्वरस्य भावः ष्यञ् । १प्रभुत्वे “तस्मै निशाचरैश्वर्यं प्रतिशुश्राव राघवः” रघु० । इच्छानभिघातात्मके २ईश्वरधर्मे ३अणिमादौ च “ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः” इति पुरा० । ऐश्वर्यञ्च द्विविधं नित्यं नित्येश्वरानुध्यानजन्यं योगजं वा तत्र नित्यैश्वर्य्यमीश्वरस्य स्वाभाविकम् “स्वाम्यं यस्य निजं जगत्सु” आत्मत० । योगजञ्च बुद्धेः सात्त्विकगुणभेदः यथोक्तम् “अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्य्यम् । सात्त्विकमेतद्रूपम् तामसमस्माद्विपर्य्यस्तम्” सां०का० । व्याख्यातञ्चेदं वाचस्पतिना “ऐश्वर्य्यमपि बुद्धिधर्मः यतोऽणिमादिप्रादुर्भावः । तत्राणिमा अणुभावः यतः शिलामपि प्रविशति । लघिमा लघुभावः यतः सूर्य्यमरीचीनालम्ब्य सूर्य्यलोकं याति । महिमा महतोभावः यतोमहान् संभवति । प्राप्तिरङ्गुल्यग्रेण स्पृशति चन्द्रम् । प्राकाम्यमिच्छानभिघातो यतोभूमावुन्मज्जति निमज्जति यथोदके । वशित्वं भूतभौतिकं वशीभवत्यस्यावश्यम् । ईशित्वं भूतभौतिकानां प्रभवस्थितिमोक्षे यत्र कामावसायित्वं सत्यसङ्कल्पता यथास्य सङ्कल्पो भवति भूतेषु तथैव भूतानि भवन्ति । अन्येषां निश्चया निश्चेतव्यमनुविधीयन्ते योगिनस्तु निश्चेतव्याः पदार्था निश्चयमिति चत्वारः सात्त्विका बुद्धिधर्माः” ।

पातञ्जलसूत्रभाष्यविवरणेषु कारणफलसहितं तस्य स्वरूपादिकं दर्शितं यथा । “कायाकाशयोः सम्बन्धसंयमाल्लघुतूलसमापत्तेश्चाकाशगमनम्” ४१ सू० ।

“यत्र कायस्तत्राकाशं तस्यावकाशदानात् कायस्य तेन सम्बन्धप्राप्तिस्तत्र कृतसंयमो जित्वा तत्सम्बन्धं लघुषु तूलादिष्वापरमाणुभ्यः समापत्तिं लब्ध्वा जितसम्बन्धो लघु भवति लघुत्वाच्च जले पादाभ्यां विहरति ततस्तूर्णनाभितन्तुमात्रे विहृत्य रश्मिषु विहरति ततो यथेष्टमाकाशगतिरस्य भवतीति” भा० ४१ ।

“कायाकाशसम्बन्धसंयमाद्वा लघुनि वा तूलादौ कृतसंयमात्समापत्तिं चेतसस्तत्समलघुतां लब्ध्वेति सिद्धिक्रममाह जल इति” वि० ४१ ।

“बहिरकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः” सू० “शरीराद्बहिर्मनसोवृत्तिलाभोविदेहा नाम धारणा सा यदि शरीरप्रतिष्ठस्य मनसोबहिर्वृत्तिमात्रेण भवति सा कल्पितेत्युच्यते या तु शरीरनिरपेक्षा बहिर्भूतस्यैव मनसो बहिर्वृत्तिः सा खल्वकल्पिता । तत्र कल्पितया साधयन्त्यकल्पितां महाविदेहामिति यया परशरीराण्याविशन्ति योगिनः ततश्च धारणातः प्रकाशात्मनोबुद्धिसत्त्वस्य यदावरणं क्लेशकर्मविपाकत्रयं रजस्तमोमूलं तस्य च क्षयोभवति” भा० ४२ ।

“अपरमपि परशरीरावेशहेतुसंयमं क्लेशकर्मविपाकक्षयहेतुं विदेहामाह शरीरादिति । अकल्पिताया

महाविदेहाया य उपायस्तत्प्रदर्शनाय कल्पितां विदेहामाह स यदीति। वृत्तिमात्रं कल्पनाज्ञानमात्रं तेन महाविदेहामाह या त्विति। उपायोपेयते कल्पिताकल्पितयोराह तत्रेति। किं परशरीरावेशमात्रमितो नेत्याह ततश्चेति। ततोधारणातो महाविदेहाये मनसि प्रवृत्ते चित्ते क्लेशश्च कर्म्म च ताभ्यां विपाकत्रयं जात्यायुर्भोगाः तदेतद्रजस्तमोमूल निगलितरजस्तमसः सत्वमात्रात् विवेकख्यातिमात्रसमुत्पादात्तदेतद्विपाकत्रयं रजस्तमोमूलतया तदात्मकं सद्बुद्धिसत्वमावृणोति तत्क्षयाच्च निरावरणं योगिचित्तं यथेच्छं विहरति जानाति" वि० "स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमाद्भूतजयः" सू० ४२। "तत्र पार्थिवाद्याः शब्दादयोविशेषाः सहकारादिभिर्धर्म्मैः स्थूलशब्देन परिभाषिता एतद्भूतानां प्रथमं रूपं द्वितीयं रूपं स्वसामान्यं मूर्त्तिर्भूमिः स्नेहोजलं वह्निरुष्णता वायुः प्रणामी सर्व्वतोगतिराकाशइत्येतत् स्वरूपशब्देनोच्यते अस्य सामान्यस्य शब्दादयोविशेषाः तथाचोक्तम् 'एकजातिसमन्वितानामेषां धर्म्ममात्रव्यावृत्तिरिति" सामान्यविशेषसमुदयोऽत्र द्रव्यः। द्विष्ठोहि समूहः प्रत्यस्तमितभेदावयवानुगतः शरीरं वृक्षोयूथं वनमिति शब्देनोपात्तभेदावयवानुगतः समूह उभये देवमनुष्याः समूहस्य देवा एकोभागो मनुष्या द्वितीयोभागस्ताभ्यामेवाभिधीयते समूहः। स च भेदाभेदविवक्षित आम्राणां वनं ब्राह्मणानां सङ्घः 'आम्रवन ब्राह्मणसंघ"इति स पुनर्द्विविधोयुतसिद्धावयवोऽयुतसिद्धावयवश्च युतसिद्धावयवः समूहोवनं सङ्घ इति। अयुतसिद्धावयवः सङ्घातः शरीरं वृक्षः परमाणुरिति। अयुतसिद्धावयवभेदानुगतः समूहो द्रव्यमिति पतञ्जलिः। एतत् स्वरूपमित्युक्तम्। अथ किमेषां सूक्ष्मरूपं? तन्मात्रं भूतकारणं तस्यैकोऽवयवः परमाणुसामान्यविशेषात्मा अयुतसिद्धावयवभेदानुगतः समुदाय इत्येवं सर्व्वतन्मात्राणि एतत् तृतीयम्। अथ भूतानां चतुर्थं रूपं ख्यातिक्रियास्थितिशीलगुणाः कार्य्यस्वभावानुपातिनोऽन्वयशब्देनोक्ताः। अथैषां पञ्चमरूपमर्थवत्त्वं भोगापवर्गार्थता गुणेष्वन्वयिनो गुणास्तन्मात्रभूतभौतिकेष्विति सर्वमर्थवत्। तेष्विदानीं भूतेषु पञ्चसु पञ्चरूपेषु संयमात्तस्य तस्य रूपस्य स्वरूपदर्शनं जयश्च प्रादुर्भवति तत्र पञ्चभूतस्वरूपाणि जित्वा भूतजयो भवति तज्जयाद्वत्सानुसारिण्य इव गावोऽस्य सङ्कल्पानुविधायिन्योभूतप्रकृतयो भवन्ति" भा०। स्थूलञ्च स्वरूपञ्च सूक्ष्मञ्चान्वयश्चार्थवत्त्वञ्चेति स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वानि तेषु संयमात्तज्जयः। स्थूलमाह तत्रेति पार्थिवाः पाथसीयास्तैजसा वायवीया आकाशीयाः शब्दस्पर्शरूपरसगन्धा यथासम्भवं विशेषाः षड्जगान्धारादयः शीतोष्णादयः नीलपीतादयः कषायमधुरादयः सौरभादयश्च, एते हि नामरूपप्रयोजनैः परस्परतोभिद्यन्तइति विशेषाः एतेषां पञ्च पृथिव्यां, गन्धवर्ज्जञ्चत्वारोऽप्सु, गन्धरसवर्जं त्रयस्तेजसि, गन्धरसरूपवर्जं द्वौ नभस्वति, शब्दएवाकाशे। तत्र ईदृशा विशेषाः सहकारादिभिर्धर्म्मैः स्थूलशब्देन परिभाषिताः शास्त्रे तत्रापि पार्थिवास्तावद्धर्म्माः। "आकारो गौरवं रौक्ष्यं वरणं स्थैर्य्यमेव च। वृत्तिभेदः क्षमा कार्ष्ण्यं काठिन्यं सर्व्वभोग्यता"। अपां धर्म्माः "स्नेहः सौक्ष्म्यं प्रभा शौक्ल्यं मार्द्दवं गौरवञ्च यत्। शैत्यं रक्षा पवित्रत्वं सन्धानं चौदका गुणाः"। तैजसाधर्म्माः "ऊर्द्ध्वभाक् पाचकं दग्धृ पावकं लघु भास्वरम्। प्रध्वंस्योजस्वि वै तेजः पूर्व्वाभ्यां भिन्नलक्षणम्"। वायवीयाधर्म्माः 'तिर्य्यग्यानं पवित्रत्वमाक्षेपो नोदनं बलम्। चलमच्छायता रौक्ष्यं वायौ धर्म्माः पृथग्विधाः"। आकाशीया धर्म्माः "सर्व्वतो गतिरव्यूहो विष्टम्भश्चेति च त्रयः। आकाशधर्म्मा व्याख्याता पूर्व्वधर्म्मविलक्षणाः" इति। तत्र आकारप्रभृतयो धर्म्मास्तैः सहेति आकार सामान्यविशेषो गोत्वादि। द्वितीयरूपमाह। द्वितीयं रूपं स्वसामान्यं मूर्त्तिः सांसिद्धिकं काठिन्यं, स्नेहः जलं सक्तुजलपुष्टिबलाधानहेतुः। वह्निरुष्णता औदर्य्ये सौरे भौमे च सर्व्वत्रैव तेजसि समवेतोष्णतेति सर्व्वत्रैतद्धर्म्मधार्म्मिणोरभेदविवक्षयाभिधानम्। वायुः प्रणामी वहनशीलः तदाह "चलनेन तृणादीनां शरीरस्फोटनेन च। सर्व्वगं वायुसामान्यं नामित्वमनुमीयते" सर्व्वतोगतिराकाशः सर्व्वत्र शब्दोपलब्धिदर्शनात् श्रोत्राश्रयाकाशगुणेन हि शब्देन पार्थिवादिशब्दोपलब्धिरित्युपपादितमधस्तात् एतत् स्वरूपशब्देनोक्तम्। अस्यैव मूर्त्यादिसामान्यस्य शब्दादयः षड्जादयः उष्णत्वादयः शुक्लादयः कषायत्वादयः सुरभित्वादयो मूर्त्यादीनां भेदाः सामान्यान्यपि मूर्त्यादीनि जम्बीरपनसामलकफलादीनि रसादिभेदात् परस्परं व्यावर्त्तन्ते तेवैतेषाम् एते रसादयो विशेषाः तथा चोक्तम् "एकजातिसमन्वितानां प्रत्येकं पृथिव्यादीनामेकैकया जात्या मूर्त्ति स्नेहादीनां समन्वितानामेषां षड्जादिधर्म्ममात्रव्यावृत्तिरिति। तदेवं सामान्यं मूर्त्याद्युक्तं विशेषाश्च शब्दादय उक्ताः।

ये चाहुः "सामान्यविशेषाश्रयो द्रव्यमिति" तान् प्रत्याह सामान्यविशेषसमुदायोऽत्र दर्शने द्रव्यम् येऽपि तदाश्रयो द्रव्यमास्थिषत तैरपि तत्समुदायोऽनुभूयमानो नापह्नोतव्यः नच तदपह्नवे तदाधारो द्रव्यमिति भवति तस्मात्तदेवास्तु द्रव्यं न तु ताभ्यां, तत्समुदायाच्च तदाधारमपरद्रव्यमुपलभामहे पञ्चभ्यो धावसमुदायादिभ्य तदाधारमपरं पृथग्विधं शिखरं समूहो द्रव्यमित्युक्तम् । तत्र समूहमात्रं द्रव्यमिति भ्रमापनुत्तये समूहविशेषोद्रव्यमिति निर्द्धारयितुं समूहप्रकारानाह । द्विष्ठोहीति यस्मादेवं तस्माच्च समूहमात्रं द्रव्यमित्यर्थः । द्वाभ्यां प्रकाराभ्यां तिष्ठतीति द्विष्ठः । एकं प्रकारमाह । प्रत्यस्तमितेति प्रत्यस्तमितोभेदो येषामवयवानां ते तथोक्ता प्रत्यस्तमितभेदा अवयवा यस्य स तथोक्तः एतदुक्तं भवति शरीरवृक्षयूथवनशब्देभ्यः समूहः प्रतीयमानोऽप्रतीतावयवभेदस्तद्वाचकशब्दाप्रयोगात् समूह एकोऽवगम्यते इतियुतायुतसिद्धावयवत्वेन चेतनाचेतनत्वेनचोदाहरणचतुष्टयम् । युतायुतसिद्धावयवत्वञ्चाग्रे वक्ष्यते । द्वितीयं प्रकारमाह । शब्देनोपात्तभेदावयवानुगतः समूहः उभये देवमनुष्या इति देवमनुष्याः इति हि शब्देनोभयशब्दवाच्यस्य समूहस्य भागौ भिन्नावुपात्तौ । ननूभयशब्दात्तावदवयवभेदो न प्रतीयते तत्कथमुपात्त भेदावयवानुगत इत्यतआह । ताभ्यां भागाभ्यामेव समूहोऽभिधीयते उभयशब्देन भागद्वयवाचिशब्दसहितेन समूहोवाच्यः वाक्यस्य वाक्यार्थवाचकत्वादिति भावः । पुनर्द्वैविध्यमाह स चेति । भेदेन चाभेदेन च विवक्षितमाह । आम्राणां वनं ब्राह्मणानां समूह इति । भेदएव मतोऽस्मृतेः । यथा गर्गाणां गौरिति । अभेदं विवक्षितमाह । आम्रवनम् । आम्राश्च ते वनञ्चेति समूहसमूहिनोरभेदं विवक्षित्वा सामानाधिकरण्यमित्यर्थः । विधान्तरमाह । स पुनर्द्विविधः युतसिद्धावयवः समूहः युतसिद्धाः पृथक्सिद्धाः सान्तरालाः अवयवा यस्य स तथोक्तः यूथं वनमिति सान्तराला हि तदवयवा वृक्षाश्च नागाश्चायुतसिद्धावयवश्च समूहो वृक्षोगौः परमाणुरिति निरन्तराह तदवयवाः सामान्यविशेषा वा शब्दादयोवेति । तदेतेषु समूहेषु द्रव्यभूत समूहं निर्धारयति अयुतसिद्धेति तदेवं प्रासङ्गिकं द्रव्यं व्युत्पाद्य प्रकृतमुपसंहरति एतत्स्वरूपमित्युक्तमिति । तृतीयं रूपं विवृणुः पृच्छति अथेति । उत्तरमाह । तन्मात्रमिति । तस्यैकोऽवयवः परिणामभेदः परमाणुसामान्यं मूर्त्तिः । शब्दादयोविशेषाः तदात्मानः अयुतसिद्धा निरान्तरायेऽवयवाः सामान्यविशेषात्मकदुभेदेष्वनुगतः समुदायः यथा च परमाणुः सूक्ष्मं रूपम् एवं सर्वतन्मात्राणि सूक्ष्मं रूपमिति उपसंहरति एतदिति । अथ भूतानां चतुर्थं रूपं ख्यातिक्रियास्थितिशीलागुणाः कार्य्यस्वभावमनुपतितुमनुगन्तुं शीलं येषां ते तथोक्ताः अतएवान्वयशब्देनोक्ताः । अथैषां पञ्चमं रूपमर्थवत्त्वं विवृणोति भोगेति । नन्वेवमपि सन्तु गुणा अर्थवन्तस्तत्कार्य्याणां तु कुतोऽर्थवत्त्वमित्यत आह । गुणा इति । भौतिका गोघटादयः । तदेवं संयमविषयमुक्त्वा संयमं तत् फलञ्चाह तेष्विति । भूतप्रकृतयो-भूतस्वभावाः" ४२ वि० ॥

"ततोऽणिमादिप्रादुर्भावः कायसम्पत्तद्धर्मानभिघातश्च"सू० "तत्राऽणिमा भवत्यणुः । लघिमा लघुर्भवति । महिमा महान् भवति । प्राप्तिरङ्गुल्यग्रेणापि स्पृशति चन्द्रमसम् । प्राकाम्यमिच्छानभिघातः भूमावुन्मज्जति मज्जति यथोदके । वशित्वं भूतभौतिकेषु वशीभवत्यवश्यश्चान्येषाम् ईशित्वं तेषां प्रभवाप्ययव्यूहानामीष्टे यच्च कामावसायित्वं सत्यसङ्कल्पता यथासङ्कल्पस्तथाभूतप्रकृतीनामवस्थानम् । न च शक्तोऽपि पदार्थविपर्य्यासं करोति, कस्मात् अन्यस्य यथा कामावसायिनः पूर्वसिद्धस्य तथा भूतेषु सङ्कल्पादिति । एतान्यष्टावैश्वर्य्याणि । कायसम्पद्वक्ष्यमाणा तद्धर्मानभिघातश्च पृथ्वी मूर्त्त्या न निरुणद्धि योगिनः, शरीरादिक्रियाः शिलामप्यनुविशतीति, नापः स्निग्धाः क्लेदयन्ति, नाग्निरुष्णो दहति न वायुः प्रणामी वहत्यनावरणात्मकेऽप्याकाशे भवत्यावृतकायः सिद्धानामप्यदृश्योभवति" भा० ।

"सङ्कल्पानुविधाने भूतानां किं योगिनः सिध्यतीत्यत आह "स्थूलसंयमविजयाद्भूतस्य सिद्धयो भवन्तीत्याह । तत्राणिमा १महानपि भवत्यणुः । लघिमा २महानपि लघुर्भूत्वेषीकातूल इवाकाशे विहरति । ३महिमाऽल्पोऽपि नागनगगगनपरिमाणो भवति । प्राप्तिः ४सर्वे भावाः सन्निहिता भवन्ति योगिनस्तद्यथा भूमिष्ठ एवाङ्गुल्यग्रेण स्पृशति चन्द्रमसम् । स्वरूपसंयमविजयात् सिद्धिमाह । प्राकाम्यमिच्छानभिघातो ५नास्य रूपं भूतस्वरूपं मूर्त्त्यादिभिरभिहन्यते भूमावुन्मज्जति मज्जति च यथोदके । सूक्ष्मविषयसंयमजयात् सिद्धिमाह वशित्वं भूतानि पृथिव्यादीनि भौतिकानि गोघटादीनि तेषु वशी स्वतन्त्रोभवतिर्द६ । तेषां त्ववश्यं तत्कारणतन्मात्रपृथिव्यादिपरमाणुवशीकारात्तत्कार्य्यवशीकारस्तेन यानि

यथावस्थापयति तानि तथावतिष्ठन्ते इत्यर्थः। अन्वयविषयसंयमजयात् सिद्धिमाह ईशितृत्वं ७ तेषां भूतभौतिकानां विजितमूलप्रकृतिः सन् यः प्रभव उत्पादो यथा-पायोविनाशो यश्च व्यूहो यथावदवस्थारूपः तेषामीष्टे। अर्थवत्त्वसंयमात् सिद्धिमाह। यच्च कामावसायित्वं ८सत्य-सङ्कल्पता विजितगुणार्थवत्त्वो हि योगी यद्यदर्थतया सङ्कल्पयति तत्तस्मै प्रयोजनाय कल्पते। विषमप्यमृत-कार्य्ये सङ्कल्प्य भोजयन् जीवयतीति। स्यादेतद् यथा शक्तिविपर्य्यासङ्करोत्येवं पदार्थविपर्य्यासमपि कस्मान्न करोति तथाच चन्द्रमसमादित्यं कुर्य्यात् कुहूञ्च सिनीवालीमित्यत आह न च शक्तोऽपीति। न खल्वेते यत्रकामावसायिनस्तत्र तत्रभवतः परमेश्वरस्याज्ञामतिक्रमितुमुत्स-हन्ते। वस्तुपदार्थानां जातिदेशकालावस्थाभेदेनानियतस्वभावा इति युज्यते तासु तदिच्छानुविधानमिति। एतान्यष्टावैश्वर्य्याणि तद्धर्म्मानभिघात इति अणिमादिप्रादुर्भाव इत्यनेनैव तद्धर्म्मानभिघातसिद्धौ पुनरुपादानं कायसिद्धिवत् एतत् सूत्रोपनिबद्धसकलविषयसंयमफल-वत्त्वज्ञापनाय। सुगममन्यत्” ॥४४ वि०।

वेदान्तिमते नित्यैश्वर्य्यमीश्वरस्यैव योगिनान्तु ऐश्वर्य्यं तदधीनमित्यतोन जगत्सर्ज्जने तेषां शक्तिः। यथोक्तं शारीरकसूत्रभाष्येषु

“जगद्व्यापारवर्ज्जं प्रकरणादसन्निहितत्वाच्च” सू०। “ये सगुणब्रह्मोपासनात् सहैव मनसेश्वरसायुज्यं व्रजन्ति किन्तु एषां निरवग्रहमैश्वर्य्यं? भवत्याहोस्वित् सावग्रहमिति संशयः। किन्तावत् प्राप्तं निरङ्कुशमेवैषामैश्वर्य्यं भवितुमर्हति“आप्नोति स्वाराज्यम्”“सर्व्वेऽस्मै देवावलिमावहन्ति” “तेषां सर्व्वेषु लोकेषु कामचारोभवतीत्यादि” श्रुतिभ्यः। इत्येवं प्राप्ते पठति जगद्व्यापारवर्ज्जमिति। जगदुत्-पत्त्यादिव्यापारं वर्जयित्वाऽन्यदणिमाद्यात्मकमैश्वर्य्यं मुक्तानां भवितुमर्हति जगद्व्यापारस्तु नित्यसिद्धस्यैवेश्वरस्य। कुतः? तस्य तत्र प्रकृतत्वादसन्निहितत्वाच्चेतरेषाम्। पर एव हीश्वरो जगद्व्यापारेऽधिकृतः तमेव प्रकृत्योत्-पत्त्याद्युपदेशान्नित्यशब्दनिबन्धनत्वाच्च तदन्वेषणविजि-ज्ञासनपूर्व्वकमितरेषामादिमदैश्वर्य्यं श्रूयते तेनास-न्निहितास्ते जगद्व्यापारे। समनस्कत्वादेव चैषामनैक-मत्ये कस्य चित् स्थित्यभिप्रायः कस्यचित् संहाराभिप्राय इत्येवं विरोधोऽपि कदाचित् स्यात्। अथ कस्यचित्सङ्-कल्पमन्वन्यस्य सङ्कल्प इत्यविरोधः समर्थ्येत। ततः पर-मेश्वराकूततन्त्रत्वमेवेतरेषामिति व्यवतिष्ठते” भा०।

ऐषमस् अव्य० अस्मिन् वत्सरे नि०। वर्त्तमानवत्सरे। ततः भवार्थे ट्युल् तुट् च। ऐषमस्तन तद्भवे स्त्रियां ङीप्। पक्षे त्यप्। ऐषमस्त्य तदर्थे त्रि० स्त्रियां टाप्।

ऐषीक न० इषीकमेव स्वार्थे अण्। इषीकाशब्दार्थे।

ऐषुकारि पु० इषुकारस्यापत्यम् इञ्। शरकारापत्ये तस्य विषयोदेशः भक्तल्। ऐषुकारिभक्त तद्विषये देशे।

ऐषुकार्य्यादि पु० पाणिन्युक्ते विषये देशेऽर्थे भक्तलप्रत्ययनिमित्ते शब्दगण भेदे। स च गणः “ऐषुकारि, सारसायन। चान्द्रायण। द्व्याक्षायण। त्र्याक्षायण। औडायन। जौलायन। खाडायन। दासमित्रि दासमित्रायण शौद्रा-यण द्राक्षायण, शायण्डायन। तार्क्ष्यायण। शौभ्रायण। सौवीर। सौवीरायण। शयण्ड। शौण्ड। शयाण्ड। वैश्वमानव। वैश्वधेनव। नड। तुण्डदेव। विश्वदेव। सापिण्डि”।

ऐष्टिक पु० इष्टेर्व्याख्यानो ग्रन्थः द्व्यच्कत्वात् ठक्। इष्टेर्व्या-ख्याने १ग्रन्थे इष्टाय हितम् ठक्। इष्टरूपयागादे-र्हिते २अन्तर्वेदिके कर्मभेदे “दानधर्मं निषेवेत नित्य-मैष्टिकपौर्त्तिकम्” मनुः। “अस्ति तावत् प्राचीनवंशशाला तस्यामाहवनीयाद्यग्नित्रयमैष्टिकवेदिश्च” यजु० ५,१४ वेददी० इष्टेः प्रभवति ठक्। ३इष्टिसाधनसमर्थे प्रयोगे च। “अ-जमानशब्दादैष्टिकेषु निगमेषु” आश्व० श्रौ० ५,१,७,। तेषां समावापादि यथार्थमभिधानमैष्टिके तन्त्रे” ४,१,९।

ऐहलौकिक त्रि० इहलोके भवः ठञ् द्विपदवृद्धिः। इह-लोकजाते “ऐहलौकिकमेवेह उताहो पारलौकिकम्” भा०व० २८१ अ०। “ऐहलौकिकमीहन्ते मांसशोणित-वर्द्धनम्” भा०व० ११८ अ०। स्त्रियां ङीप्।

ऐहिक त्रि० इह भवः कालाट्ठञ्। १इहलोकभवे २स्वकीय-शरीरसम्बन्धिनि स्रक्चन्दनादिसुखानुभवादौ च। “कचित् सुमवदैहिकार्थेषु स्पृहेषु” भाग० ५,१४,२२। “यथैहि-कामुष्मिककामलम्पटः” भाग० ५,१९,१४। इह विदितः ठञ्। ३इहविदिते ४“ऐहिकब्रह्ममपतेर्दोहादिनिषेधात् जन्मान्तरीणतत्पापवत एव सहमरणेनोद्धारः” शु०त० रघु०। स्त्रियां ङीप्।

इति वाचस्पत्ये ऐकारादिशब्दार्थसङ्कलनम्।

ओ

ओकारः स्वरवर्णभेदः कण्ठौष्ठस्थानयोरुच्चार्य्यः दीर्घः द्विमात्रत्वात् प्लुतस्तु त्रिमात्रः। सचोदात्तानुदात्त स्वरितभेदैः प्रत्येकमनुनासिकाननुनासिकाभ्यां द्वैविध्यात् षड्विधः तथा प्लुतोऽपि षड्विधः एवं द्वादशविधः। तपरत्वे कारपरत्वे च स्वरूपपरः। तन्त्रे तस्य वाचकशब्दा वर्णाभिधाने उक्ता यथा "ओकारः सत्यपीयूषौ पश्चिमास्यः श्रुतिः स्थिरा। सद्योजातो वासुदेवो गायत्री दीर्घजङ्घकः। आप्यायनी चोर्द्ध्वदन्तो लक्ष्मीर्वाणीमुखो द्विजः। उद्देश्य दर्शकस्तीव्रः कैलासो वसुधाक्षरः। प्रणवांशो ब्रह्मसूत्रमजेयः सर्वमङ्गला। त्रयोदशी दीर्घनासारतिनाथो दिगम्बरः। त्रैलोक्यविजया प्रज्ञा प्रीतिबीजादिकर्षिणी" इति। तदधिष्ठातृदेवता च तत्रैवोक्ता "ज्वालास्त्वौकारगा ज्ञेया भीमा च मत्तमालिनी"। तस्य ध्येयरूपं कामधे०त० उक्तं यथा। "ओकारं चञ्चलापाङ्गि! पञ्चदेवमयं सदा। रक्तविद्युल्लताकारं त्रिगुणात्मानमीश्वरम्। पञ्चप्राणमयं वर्णं नमामि देवमातरम्। एतद्वर्णं महेशानि! स्वयं परमकुण्डलीम्"।

ओ अव्य० उ—विच्। १सम्बोधने २आह्वाने ३स्मरणे ४अनुकम्पने च मेदि०। ५ब्रह्मणि पु० एकाक्षरकोषः।

ओक पु० उच—घ चस्य कः। १पक्षिणि २वृषले ३आश्रये च। "अनोकशायी लघुरल्पप्रचारश्चरन् देशान्नेकचरः स भिक्षुः" भा०आ० ९१अ०। उच भावे घञ् कुः। ४समवाये च। ओकाय हित यत्। ओक्य निवासाय हिते त्रि० "ज्योतीरथः पवते राय ओक्यः" ऋ०९,८६,४५। [(उकुण) केशकीटे शब्दर०।

ओकण(णि) पु० उ—विच् ओः सन् कणति कण—अच्-इन् वा

ओकस् न० उच—असुन् न्यङ्क्वादित्वात् कुत्वम्। १गृहे २आश्रयमात्रे च। "यस्मिन्निन्द्रः प्रदिवि वावृधान ओको दधे ब्रह्मण्यन्तश्च नरः" ऋ० २,१९,१। "यस्मिन् देवा ओकांसि चक्रिरे" १,४०,५। "लोभाणाश्च शुभाः पार्थ! गौतमौकःसमीपजाः" भा०स० २०। वनौकसः त्रिदिवौकसः दिवौकसः जलौकस इत्यादि।

ओकिवस् त्रि० उच-समवाये क्वसु वेदे नि०। समवेते "ओकिवांसा सुते सचा" ऋ०६,५९,२। ओकिवांसा ओकिवांसौ समवेतौ" भा०।

ओकुल पु० उच—उलक् न्यङ्क्वा० नि० कु। अर्द्धाग्निदग्धे अपक्वे गोधूमे (हडा) "ओकुलस्तु गुरुर्वृष्योमधुरो बलकारकः। रक्तपित्तापहः स्निग्धो हृद्योमदविवर्द्धनः" राजनि०। [गौ०ङीष्। (उकुण) केशकीटे शब्दरत्ना०।

ओकोदनी स्त्री ओक आश्रयः मूर्द्धरूपम् अदनं भक्ष्यं यस्याः

ओक्कणी स्त्री उच्—विच् ओक् सती कणति कण—अच् गौ०ङीष्। (उकुण) केशकीटे शब्दरत्ना०।

ओख शोषे सामर्थ्ये अक० भूषणे वारणे सक०भ्वा० पर० सेट् इदित्। ओखति औखीत् ओखाम् बभूव आस चकार। ओखितः ओखनम्। ओखः णिचि ओखयति ते मा भवान् ओचिखत् त ऋदित्त्वात् न ह्रस्वः। उपसर्गावर्णात् पररूपम् प्रोखति परोखति।

ओगण त्रि० अव—गण्यते अव+गण कर्म्मणि घञर्थे क सम्प्र०। अवगण्ये अधरतया गण्ये। "महि व्राधन्तओगणास इन्द्र" ऋ०१०,८९,१५ ["बलं सत्यादोगीयः" वृह०उ०।

ओगीयस् त्रि० ओजीयस् वेदे नि०। अत्यन्तौजस्विनि।

ओघ पु०उच—घञ् पृषो०व। १समूहे,२जलवेगे,३दृ,तन्त्व्यादौ ४आध्यात्मिक तुष्टिभेदे च सा च तुष्टिः प्रव्रज्यायां चिरकालसमाध्यनुष्ठानेन या तुष्टिः सा कालाख्या तुष्टिरोघ इत्युच्यते" इति सां०प्र०भा०उक्ता। इयं तुष्टिः सां०कौ० मेघत्वेन परिभाषिता यथा "प्रव्रज्यापि ते न सद्यो निर्वाणदेति सा च कालपरिपाकमपेक्ष्य सिद्धिं ते विधास्यति अलमुत्तप्ततया तवेत्युपदेशे या तुष्टिः सा कालाख्या मेघ उच्यते"। क्वचित् पुस्तके मेघ इत्यत्र ओघ इत्येव पाठः। तत्र जलवेगे "ओघवाताहृतं बीजं यस्य क्षेत्रे प्ररोहति" मनुः। "भङ्गीभक्त्या विरचितवपुः स्तम्भितान्तर्जलौघः" मेघ०। "पुनरोघेन हि युज्यते नदी" कुमा०। समूहे "स्त्रीर्य्योर्ज्जितमघौघमवाप्य कुरुसत्तमः" भा०व० २५५ अ० "गजवाजिरथौघेन बलेन महताऽगमत्" भा० ११२अ०। ५परम्परायाम् ६उपदेशे मेदि० परम्पराऽविच्छिन्ना सन्ततिः" "तोऽद्यौघमब्धिमुद्वहन्"भाग०४,१२,११।

ओघरथ पु० ओघवतो नृपतेः पुत्रे। "अयोघवान्नाम नृपो नृगस्यासीत् पितामहः। तस्यायोघवतो कन्या पुत्रश्चोघरथोऽभवत्" भा०अनु० २अ०।

ओघवत् त्रि० ओघः जलवेगादिरस्त्यस्य मतुप् मस्य वः। १जलवेगादियुक्ते स्त्रियां ङीप्। "एषा सरस्वती रम्या दिव्या चौघवती नदी"भा०व०१२९। २नृगनृपस्य पितामहे २नृपभेदे पु० ३तत्कन्यायां स्त्री ङीप्। सा च भर्त्तुराज्ञया

द्विजरूपधरधर्म्मरूपातिथेः आत्मपर्य्यन्तप्रदानादिरूपपरि-
चरणेन तुष्टधर्म्मवरेण अर्द्धदेहेन लोकानां पावनार्थं
नदीत्वमाप्ता इति तन्नामप्रसिद्धे कुरुक्षेत्रस्थे २नदी-
भेदेऽपि। तत्कथा भा०अनु० २अ० यथा "तस्यां सम-
भवत्पुत्त्रो नाम्नाग्नेयः सुदर्शनः। सुदर्शनस्तु रूपेण
पूर्णेन्दुसदृशोपमः। शिशुरेवाध्यगात्सर्व्वं परं ब्रह्म
सनातनम्। अथौघवान्नाम नृपो नृगस्यासीत्पिता-
महः। तस्यौघवती कन्या पुत्त्रश्चौघरथोऽभवत्।
तामोघवान् ददौ तस्मै स्वयमोघवतीं सुताम्। सुदर्शनाय
विदुषे भार्य्यार्थे देवरूपिणीम्। स गृहस्थाश्रमरतस्तया
सह सुदर्शनः। कुरुक्षेत्रेऽवसद्राजन्नोघवत्या समन्वितः।
गृहस्थश्चावजेष्यामि मृत्युमित्येव स प्रभो!। प्रतिज्ञामकरो-
द्धीमान् दीप्ततेजा विशाम्पते!। तामथौघवतीं राजन्!
स पावकसुतोऽब्रवीत्। अतिथेः प्रतिकूलं ते न कर्त्तव्यं
कथञ्चन। येन येन च तुष्येत नित्यमेव त्वयाऽतिथिः।
अप्यात्मनः प्रदानेन न ते कार्य्या विचारणा। एतद्व्रतं
मम सदा हृदि संपरिवर्त्तते। गृहस्थानाञ्च सुश्रोणि!
नातिथेर्व्विद्यते परम्। प्रमाणं यदि वामोरु! वचस्ते मम
शोभने!। इदं वचनमव्यग्रा हृदि त्वं धारयेः सदा।
निष्क्रान्ते मयि कल्याणि! तथा सन्निहितेऽनघे!। नाति-
थिस्तेऽवमन्तव्यः प्रमाणं यद्यहं तव। तमब्रवीदोघवती
तथा मूर्द्ध्नि कृताञ्जलिः। न मे त्वद्वचनात्किञ्चिदकर्त्तव्यं
कथञ्चन। जिगीषमाणस्तु गृहे तदा मृत्युः सुदर्शनम्।
पृष्ठतोऽन्वगमद्राजन् रन्ध्रान्वेषी तदा सदा। इध्मार्थन्तु
गते तस्मिन्नग्निपुत्त्रे सुदर्शने। अतिथिर्ब्राह्मणः श्रीमां-
स्तामाहौघवतीं तदा। आतिथ्यं कृतमिच्छामि त्वयाद्य
वरवर्णिनि!। प्रमाणं यदि धर्म्मस्ते गृहस्थाश्रमसंमतः।
इत्युक्ता तेन विप्रेण राजपुत्त्री यशस्विनी। विधिना
प्रतिजग्राह वेदोक्तेन विशाम्पते!। आसनञ्चैव पाद्यञ्च
तस्मै दत्त्वा द्विजातये। प्रोवाचौघवती विप्रं केनार्थः
किं ददामि ते। तामब्रवीत्ततो विप्रो राजपुत्त्रीं सुद-
र्शनाम्। त्वया ममार्थः कल्याणि! निर्व्विशङ्कैतदाचर।
यदि प्रमाणं धर्म्मस्ते गृहस्थाश्रमसंमतः। प्रदानेनात्मनो
राज्ञि! कर्त्तुमर्हसि मे प्रियम्। स तया छन्द्यमानोऽ-
न्यैरीप्सितैर्नृपकन्यया। नान्यमात्मप्रदानात्स तस्या वव्रे
वरं द्विजः। सा तु राजसुता स्मृत्वा भर्त्तुर्व्वचनमादितः।
तथेति लज्जमाना सा तमुवाच द्विजर्षभम्। ततो विहस्य
विप्रर्षिः सा चैवोपविवेश ह। संस्मृत्य भर्त्तुर्व्वचनं गृह-
स्थाश्रमकाङ्क्षिणः। अथेध्मान्समुपादाय स पावकिरुपागमत्।
मृत्युना रौद्रभावेन नित्यं बन्धुरिवान्वितः। ततस्त्वाश्रम-
मागम्य स पावकसुतस्तदा। तां व्याजहारौघवतीं क्वासि
यातेति चासकृत्। तस्मै प्रतिवचः सा तु भर्त्त्रे न प्रददौ
तदा। कराभ्यां तेन विप्रेण स्पृष्टा भर्तृव्रता सती।
उच्छिष्टास्मीति मन्वाना लज्जिता भर्त्तुरेव च। तूष्णीं-
भूताऽभवत्साध्वी न चोवाचाऽथ किञ्चन। अथ तां पुन-
रेवेदं प्रोवाच स सुदर्शनः। क्व सा साध्वी कुतो याता
गरीयः किमतो मम। पतिव्रता सत्यशीला नित्यं चैवा-
र्जवे रता। कथं न प्रत्युदेत्यद्य स्मयमाना यथा पुरा।
उटजस्थस्तु तं विप्रः प्रत्युवाच सुदर्शनम्। अतिथिं
विद्धि संप्राप्तं ब्राह्मणं पावके! च माम्। अनया छन्द्यमा-
नोऽहं भार्य्यया तव सत्तम। तैस्तैरतिथिसत्कारैर्ब्रह्मन्नेषा
वृता मया। अनेन विधिना सेयं मामर्च्चति शुभानना।
अनुरूपं यदत्रान्यत्तद्भवान् कर्त्तुमर्हति। कूटमुद्गरहस्तस्तु
मृत्युस्तं वै समन्वगात्। हीनप्रतिज्ञमत्रैनं वधिष्यामीति
चिन्तयन्। सुदर्शनस्तु मनसा कर्म्मणा चक्षुषा गिरा।
त्यक्तेर्ष्यस्त्यक्तमन्युश्च स्मयमानोऽब्रवीदिदं। सुरतं तेऽस्तु
विप्राग्र्य! प्रीतिर्हि परमा मम। गृहस्थस्य तु धर्म्मो-
ऽग्र्यः सम्प्राप्तोऽतिथिपूजनम्। अतिथिः पूजितो यस्य
गृहस्थस्य हि गच्छति। नान्यस्तस्मात्परो धर्म्म इति
प्राहुर्म्मनीषिणः। प्राणा हि मम दाराश्च यच्चान्यद्वि-
द्यते वसु। अतिथिभ्यो मया देयमिति मे व्रतमाहितम्।
निःसन्दिग्धं मया वाक्यमेतत्ते समुदाहृतम्। तेनाहं
विप्र। सत्येन स्वयमात्मानमालभे। पृथिवी वायुराकाश-
मापो ज्योतिश्च पञ्चमम्। बुद्धिरात्मा मनः कालो दिश-
श्चैव गुणा दश। नित्यमेते हि पश्यन्ति देहिनां देह-
संश्रिताः। सुकृतं दुष्कृतं चापि कर्म्म धर्म्मभृतां वर।
यथैषा नानृता वाणी मयाद्य समुदीरिता। तेन सत्येन
मां देवाः पालयन्तु दहन्तु वा। ततो नादः समभवद्दिक्षु
सर्व्वासु भारत!। असकृत् सत्यमित्येवं नैतन्मिथ्येति सर्व्वतः।
उटजात्तु ततस्तस्मान्निश्चक्राम स वै द्विजः। वपुषा द्याञ्च
भूमिञ्च व्याप्य वायुरिवोद्यतः। स्वरेण विप्रः शैक्ष्येण
त्रीँल्लोकाननुनादयन्। उवाच चैनं धर्म्मज्ञं पूर्व्वमामन्त्र्य
नामतः। धर्म्मोऽहमस्मि भद्रन्ते जिज्ञासार्थं तवानघ!।
प्राप्तः सत्यञ्च ते ज्ञात्वा प्रीतिर्म्मे परमा त्वयि। विजि-
तश्च त्वया मृत्युर्योऽयं त्वामनुगच्छति। रन्ध्रान्वेषी तव
सदा त्वया धृत्या वशीकृतः। न चास्ति शक्तिस्त्रैलोक्ये

कस्यचित् पुरुषोत्तम! । पतिव्रतामिमां साध्वीं तवोद्वोढुमिहाच्युत । रक्षिता त्वद्गुणैरेषा पातिव्रत्यगुणैस्तथा । अदृष्ट्वा यदियं ब्रूयास्तथा तन्नान्यथा भवेत् । एषा हि तपसा स्वेन संयुक्ता ब्रह्मवादिनी । पावनार्थञ्च लोकस्य चरिष्णुर्भविष्यति । अनेन चैतद्देहेन लोकांस्त्वमिह पत्स्यसे । अर्द्धेनौघवती नाम त्वामर्द्धेनानुयास्यति”

ओङ्कार पु॰ ओम्+स्वरूपे कारप्रत्ययः । प्रणवे । “प्राणायामैस्त्रिभिः पूतस्तत ओङ्कारमर्हति” मनुः । “ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा”पुरा॰ अधिकम् ओम्शब्दे वक्ष्यते ।“ओङ्कारं पूर्व्वमुच्चार्य्य पश्चाद्वेदमधीयते”इति स्मृतेः “तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः । प्रवर्त्तन्ते विधानोक्ताः” इति गीतोक्तेः “स्वस्त्यनोङ्कृतं सर्व्वम्” इत्युक्तेश्च ओङ्कारस्य सर्व्वकर्म्मारम्भादौ पाठ्यत्वात् आरम्भसाधनत्वेन २आरम्भे । सप्तानां सामावयवानां ३प्रथमावयवे च । उद्गीथशब्दे ११७० पृ॰ सप्तावयवसामानि दृश्यानि । ओङ्कारः तदाकारः अस्त्यस्य अच् । काशीस्थे ४शिवलिङ्गभेदे “ओङ्कारं प्रथमं लिङ्गं द्वितीयन्तु त्रिलोचनमिति” काशीस्थचतुर्द्दशप्रधानलिङ्गकथने । तदाविर्भावकथा तत्रैव ७३अध्याये “यथोङ्कारस्य लिङ्गस्य प्रादुर्भाव इहाभवत् । पुरानन्दवनेऽत्र ब्रह्मणा विश्वयोनिना । तपस्तप्तं महादेवि! समाधिं दधता परम् । पूर्णे युगसहस्रेऽथ भित्त्वा पातालसप्तकम् । उदतिष्ठत् पुरोज्योतिर्विद्योतितहरिन्मुखम् । यदन्तराविरभवन्निर्व्याजेन समाधिना । तदेव परमं धाम बहिराविरभूद्विधेः । अभूच्चटचटाशब्दः स्फुटितो भूमिभागतः । तच्छब्दाद्वारस्रजद्वेधाः समाधिं क्रमतो वशी । स्पष्टाऽदृश्यत तत्सानौ यावदुन्मील्य लोचने । पुरःपश्चाद्ददर्शापि तावदक्षरमादिमम् । अकारं सत्त्वसम्पन्नमृक्-वेदं सृष्टिपालकम् । नारायणात्मकं साक्षात्तमःपारे प्रतिष्ठितम् । ओङ्कारमथ तस्यापि रजोरूपं यजुर्जनिम् । विधातारं समस्तस्य स्वाकारमिव चिन्तितम् । नीरवध्वान्तसङ्केतसदनाभं तदग्रतः । मकारं स ददर्शाथ तमोरूपं विशेषतः । साम्नां योनिं लये हेतुं साक्षाद्रुद्रस्वरूपिणम् । अथ तत्पुरतो धाता व्यधात् स्वनयनातिथिम् । विश्वरूपमथोङ्कारं सगुणञ्चापि निर्गुणम् । अनाख्यनादगदनं परमानन्दविग्रहम् । शब्दब्रह्मेति यत् ख्यातं सर्व्वशास्त्रमयकारणम् । अथोपरिष्टाच्चादस्य बिन्दुरूपं परात् परम् । कारणं कारणानाञ्च जगदानन्दनं परम् । विधिर्विलोकयाञ्चक्रे तपसा गोचरीकृतम् । अवनादोमिति ख्यातं सर्व्वस्यास्य स्वभावतः । भक्तमुन्नयते यस्मात्तदोमिति यदीरितः । अरूपोऽपि स्वरूपाढ्यः स धाता नेत्रयोः कृतः । तारयेद्यद्भवाम्भोधेः स्वजपासक्तमानसम् । ततस्तार इति ख्यातो यस्तं ब्रह्मा व्यलोकयत् । प्रणूयते यतः सर्व्वैः पुरनिर्व्वाणकामुकैः । सर्व्वेभ्योऽभ्यधिकस्तस्मात् प्रणवोयः प्रकीर्त्तितः । सुसेवितारं पुरुषं प्रणमेद्यः परस्मादम् । अतस्तं प्रणवं शान्तं प्रत्यक्षीकृतवान् विधिः । त्रयीमयस्तुरीयोयस्तुर्य्यातीतोऽखिलात्मकः । नादबिन्दुस्वरूपो यः स प्रैक्षि द्विजगामिना । प्रावर्त्तन्त यतो वेदाः साङ्गाः सर्व्वस्य योनयः । स वेदादिः पद्मभुवा पुरस्तादवलोकितः । वृषभो यस्त्रिधा बद्धो रोरवीति महोदयः । स नेत्रविषयीचक्रे परमः परमेष्ठिना । चत्वारि शृङ्गाणि यस्यासन् हस्ताः सप्त एव च । द्वे शीर्षे च त्रयः पादाः स देवो विधिनेक्षितः । यदन्तर्लीनमखिलं भूतं भावि भवत् पुनः । तद्बीजं बीजरहितं द्रुहिणेन विलोकितम् । लीनं स्म्येत यत्रैतदाब्रह्मस्तम्भभाजनम् । अतः सभाज्यते सद्भिर्यल्लिङ्गं तद्विलोकितम् । पञ्चार्थी यत्र भासन्ते पञ्चब्रह्ममयं हि यत् । आदिपञ्चस्वरूपं यद्विरिञ्चि ब्रह्मणा हि तत् । तमालोक्य ततो वेधा लिङ्गरूपिणमीश्वरम्” । ओङ्कारेश्वरोऽप्यत्र । ४बुधशक्तिभेदे स्त्री त्रिका॰ । अवर्णाऽस्यादेः पररूपम् ।

ओज बले अद॰ चुरा॰ उभ॰ अक॰ सेट् । ओजय-ति-ते औजिजत् त ओजयाम् बभूव आस चकार चक्रे । ओजितः

ओज पु॰ ओज-अच् । “ओजोऽथ युग्मं विषमः समश्च” । ज्यो॰ त॰ उक्ते मेषादीनां द्वादशानां मध्ये १अयुग्मे विषमे राशौ यथा १,३,५,७,९,११,अङ्कैर्बोधिता मेषमिथुनसिंहतुलाधनुःकुम्भाः ओजराशयः “ओजे रवीन्द्वोः समइन्दुरव्योः” नील॰ता॰ । ओजस् शब्दोऽप्यत्र न॰ । “कुजार्किगुरुसौम्यानां भागाः शुक्रस्य च क्रमात् । पञ्चपञ्चाष्टसप्तेषु ज्ञेयमोजस्य राशिषु”ज्यो॰त॰ अत्र ओजेषु राशिषु इत्येव क्वचित्पाठः । २अयुग्ममात्रे (विजोड) च “भत्रयगोजगतं गुरुणा चेत्” “ओजे तपरौ जरौ गुरुश्चेत्” इत्यादौ अयुग्मपादे प्रयोगात्

ओजस् न॰ उब्ज-असुन् बलोपे गुणः । १दीप्तौ २अवष्टम्भे, ३प्राणबले, ४प्रकाशे, ५सामर्थ्ये ६ज्योतिषोक्ते प्रथमतृतीयादौ विषमराशौ, ७शस्त्रादिचैषद्ये ८धातुतेजसि, ९ज्ञानेन्द्रियाणां ६पाटवे, १०काव्यगुणभेदे, ११गौडा॰रीत्याम्,

वैद्यकोक्ते, "भ्रमरैः फलपुष्पेभ्यो यथा सम्भ्रियते मधु। तद्वदोजः शरीरेभ्यो धातुभिर्भ्रियते नृणाम्"इति १२लक्षणे धातुरसपोषके वस्तुभेदे च। अच्। ओजशब्दोऽप्यत्र। ओजःस्वरूपं मिता०स्मृत्यन्तरे दर्शितं यथा।"हृदि तिष्ठति यत् शुद्धमीषदुष्णं सपीतकम्। ओजः शरीरे संख्यातं तन्नाशान्नाशमृच्छति"।"पुनर्द्धात्रीं पुनर्गर्भमोजस्तस्य प्रधावति। अष्टमे मास्यतोगर्भोजातः प्राणैर्वियुज्यते"या०स्मृतिः सुश्रुते तु बलपर्य्यायत्वमस्योक्त्वा तत्फलान्युक्तानि यथा "बललक्षणं बलक्षयलक्षणमत ऊर्द्ध्वं वक्ष्यामः। तत्र रसादीनां शुक्रान्तानां धातूनां यत्परं तेजस्तत्खल्वोजस्तदेव बलमित्युच्यते स्वशास्त्रसिद्धान्तात्। तत्र बलेन स्थितोपचितमांसता सर्व्वचेष्टास्वप्रतिघातः स्वरवर्णप्रसादो बाह्यानामाभ्यन्तराणाञ्च करणानामात्मकार्य्यप्रतिपत्तिर्भवति। भवन्ति चात्र। "ओजः सोमात्मकं स्निग्धं शुक्लं शीतं स्थिरं सरम्। विविक्तं मृदु मृत्स्नञ्च प्राणायतनमुत्तमम्। देहस्यावयवस्तेन व्याप्तो भवति देहिनाम्। तदभावाच्च शीर्य्यन्ते शरीराणि शरीरिणाम्। अभिघातात्क्षयात्कोपाच्छोकाद्ध्यानात् श्रमात् क्षुधः। ओजः संक्षीयते ह्येभ्यो धातुग्रहणनिःसृतम्। तेजः समीरितं तस्माद्विस्रंसयति देहिनः। तस्य विस्रंसो व्यापत् क्षय इति लिङ्गानि व्यापन्नस्य भवन्ति। सन्धिविश्लेषो गात्राणां सदनं दोषच्यवनं क्रियासन्निरोधश्च विस्रंसे। स्तब्धगुरुगात्रता वातशोथोवर्णभेदो ग्लानिस्तन्द्रा निद्रा च व्यापन्ने। मूर्च्छा मांसक्षयो मोहः प्रलापो मरणमिति क्षये। भवन्ति चात्र। "एते दोषा बलस्योक्ता व्यापद्विस्रंसनक्षयाः। विश्लेषसादौ गात्राणां दोषविस्रंसनक्षयाः। अप्राचुर्य्यं क्रियाणाञ्च बलविस्रंसलक्षणम्। गुरुत्वं स्तब्धताङ्गेषु ग्लानिर्व्वर्णस्य भेदनम्। तन्द्रा निद्रा वातशोथौ बलव्यापदि लक्षणम्। मूर्च्छा मांसक्षयो मोहः प्रलापोऽज्ञानमेव च। पूर्व्वोक्तानि च लिङ्गानि मरणञ्च बलक्षये। तत्र विस्रंसे व्यापन्ने च क्रियाविशेषैरविरुद्धैर्बलमाप्याययेत्। नष्टसंज्ञमितरञ्च वर्जयेत्"।

"ओजः समासभूयस्त्वं मांसलं पदडम्बर"मित्युक्तलक्षणः काव्य गुणभेदः। सा०द०तु 'रसस्याङ्गित्वमाप्तस्य धर्म्माः शौर्य्यादयो यथा। एवं माधुर्य्यमोजोऽथ प्रसाद इति ते" त्रिधा इति गुणान् विभज्य तत्तल्लक्षणमुक्तम् "ओजश्चित्तस्य विस्ताररूपं दीप्तत्वमुच्यते। वीरबीभत्स रौद्रेषु क्रमेणाधिक्यमस्य तु"इति। तद्व्यञ्जकवर्णादयश्च तत्रोक्ताः। "वर्गस्याद्यतृतीयाभ्यां युक्तौ वर्णौ तदन्तिमौ। उपर्य्यधोद्वयोर्वा स्यात् रेफः टठडढैः सह शकारश्च षकारश्च तस्य व्यञ्जकताङ्गताः तथा समासबहुला घटनौद्धत्यशालिनी" "रुद्रौजसा तु प्रहृतं त्वयाऽस्याम्"रघुः। "महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुद" "पुरुषाणां महौजसाम्" "महात्मानो महौजसः" इति मनुः। अतस्तृतीयायाः ऋतादौ अलुक्। ओजसाकृतम् तस्यापत्यम् इञ्। औजसाकृतिः तदपत्ये। ५तद्विशिष्टे त्रि०ततः भृशा० अभूततद्भावे क्यङ् सलोपश्च। "ओजायते ओजायमाना तस्यार्घ्यं प्रणीय जनकात्मजा" भट्टिः। "ओजायमानस्तन्वस्य शुम्भते" ऋ० १,१४०,६।

ओजसीन न० "ओजसोऽहनि यत्खौ"पा० ओजोऽस्त्यस्मिन्नहनि ख्नर्थे ख। ओजोयुक्तेऽहनि। "शुचिः शुक्रे अहन्योजसीना"वैदि० "पथो यत् ओजसमहः" सि०कौ० "मत्वर्थे मासतन्वो" पा० मत्वर्थे यत्। ओजस्या तनुः।

ओजस्वत् त्रि० अजोऽस्त्यस्य मतुप् मस्य वः। बलवति तेजस्विनि "महत्वन्तमृजीषिणमोजस्वन्तम्" ऋ०८,७६,५ विनि। तत्रार्थे त्रि० "रूपं तदोजस्वि तदेव वीर्य्यम्" रघुः। "ओजस्विवर्णोज्ज्वलवृत्तशालिनम्" माघः। "शतक्रतुरिवौजस्वी धर्म्मात्मा संशितव्रतः" भा० आश्व ५अ०। स्त्रियामुभयतो ङीप्। "ओजस्वतीस्थ राष्ट्रदा राष्ट्रममुष्मै दत्त" यजु०१०,२२। ताभ्याम् अतिशायने तरप् तमप् वा। ओजस्वितर ओजस्वितम अत्यन्तौजोयुक्ते। तत्रार्थे इष्ठन् ईयसुन् वा। मतोर्लुक्। ओजिष्ठ ओजीयस् तदर्थे त्रि० ईयसुन्नन्तात् स्त्रियां ङीप् इति भेदः अजीयसी।

ओज्मन् त्रि० आ+वज–इमनिप् वा० सम्प्र०। १प्रेरके २वेगे पु० "अपामोज्मानं परि गोभिः"ऋ०३,४७,२७। "ओज्मानं प्रेरकं वेगं वा" भा०।

ओडव पु० सङ्गीतदामोदरोक्तेषु पञ्चस्वरयुक्तरागभेदेषु तत्र पञ्चस्वराश्च ऋषभपञ्चमवर्ज्जिताः निषादगान्धारषड्जमध्यमधैवतात्मकाः।

ओडिका स्त्री उ–ड तस्य नेत्त्वम् गौरा० ङीष् स्वार्थे क ह्रस्वः। (उड़िधान) नीवारे स च "नीवारः शीतलोग्राही पित्तघ्नः कफवातकृत्" भावप्र० उक्तगुणकः।

ओडी स्त्री उ-ड तस्य नेत्त्वम् गौरा० ङीष्। (उड़िधान)नीवारे

ओड्र न०आ+ईषत् उनत्ति उन्द रक् नि०दस्य डः। १जवापुष्पे २उत्कलदेशे पु०(उड़िया) तद्देशस्य राजा तत्रभवो वा

अण् । औड्र, तद्देशभेदे तद्भवे मनुष्ये च बहुषु तु तस्य लुक् । ओड्रास्तज्जनपदवासिनः तद्देशभेदाश्च ते च क्रमेण शूद्रत्वं प्राप्ता यथाह मनुः । “शनकैस्तु क्रियालोपादिमाः क्षत्रजातयः । वृषलत्वं गता लोके ब्राह्मणादर्शनेन च । पौण्ड्रकाश्चौड्रद्रविडाः काम्बोजाः जवनाः शकाः । पारदाः पह्लवाश्चीनाः किराता दरदाः खशाः” । उत्कलदेशश्च वृह० सं० कूर्म्मविभागे पूर्व्वदिक्स्थिततया उक्तः । अथ पूर्वस्यामञ्जनेत्याद्युपक्रमे “उदयगिरिभद्रगौडकपौण्ड्रोत्कलकाशिमेकलाम्बष्ठाः” उत्कलशब्देऽधिकमुक्तम् । “तत्रैव चौड्राः पौण्ड्राश्च वामचूलाः सकेरलाः” हरि० २२६

ओड्रपुष्प पु० ओड्रं पुष्पमस्य । जवावृक्षे ।

ओण अपनयने अपसारणे ऋदित् भ्वादि० पर० सक० सेट् । ओणति औणीत् । ओणाम् बभूव आस चकार ओणनम् क्वनिप् अवावा स्त्रियाम् अवावरी । ओणयति ते मा भवान् ओणिणत् त ।

ओणि त्रि० ओण–इन् । १अपनयनकारके २द्यावापृथिव्योः स्त्री ङीप् द्वि० निरु० । “प्रते सोतार ओण्योरसम् मदय” ऋ० ९,१६,१ । “तं त्वा धर्त्तारमोण्योः” ९,६५,११, “ओण्योः द्यावापृथिव्योः” भा० ।

ओत त्रि० आ+वेञ्+क्त । १अन्तर्व्याप्तौ कर्म्मणि क्त । २तथाभूते त्रि० “यस्मिंश्चित्तं सर्व्वमोतं जनानाम्” यजु० ३४,५ । “ओतञ्च प्रोतञ्चेति” श्रुतिः । ३पटीयदीर्घतन्तौ च (टानारसुत) । “यदिदं सर्व्वमप्स्वोतञ्च प्रोतञ्च, कस्मिन्नु खल्वाप ओताश्च प्रोताश्च” इत्यादि । छा०उ० बहुशस्तत्प्रयोगः । तत्र स्थूलानां परिच्छिन्नानां कारणेन सूक्ष्मेण आपरमात्मपर्य्यन्तं व्याप्यत्वमेवेति छा० उ० भाष्ययोर्निर्णीतं यथा “यदिदं सर्व्वमप्स्वोतञ्च प्रोतञ्च, कस्मिन्नु खल्वाप ओताश्च प्रोताश्चेति” छा० उप० । “यदिदं सर्व्वं पार्थिवं धातुजातमप्सूदके ओतञ्च दीर्घपटतन्तुवदोतञ्च तिर्य्यक्तन्तुवदुपरितनं वा अद्भिःसर्व्वतोऽन्तर्बहिर्भूताभिर्व्याप्तमित्यर्थः । अन्यथा सक्तुमुष्टिवद्विशीर्य्येत । इदं तावदनुमानमुपन्यस्तम् । यत्कार्य्यं परिच्छिन्नं स्थूलं कारणेनापरिच्छिन्नेन सूक्ष्मेण व्याप्तमिति दृष्टम् । यथा पृथिव्यद्भिस्तथा पूर्व्वं पूर्व्वमुत्तरेणोत्तरेण व्यापिना भवितव्यमित्येष आसर्व्वान्तरादात्मनः प्रश्नार्थः । तत्र भूतानि पञ्च संहतान्येवोत्तरोत्तरं सूक्ष्मभावेन व्यापकेन कारणरूपेण च व्यवतिष्ठन्ते । न च परमात्मनोऽर्व्वाक्तद्व्यतिरेकेण वस्त्वन्तरमस्ति “सत्यस्य सत्यमिति” श्रुतेः । सत्यञ्च भूतपञ्चकं सत्यस्य सत्यं च पर आत्मा । कस्मिन्नु खल्वाप ओताश्च प्रोताश्चेति । तासामपि कार्य्यत्वात् स्थूलत्वात्परिच्छिन्नत्वाच्च क्वचिद्धि ओतप्रोतभावेन भवितव्यम् । क्व तासामोतप्रोतभाव इत्येवमुत्तरोत्तरं प्रश्नप्रसङ्गो योजयितव्यः” भा० ।

“वायौ गार्गीति, कस्मिन्नु खलु वायुरोतश्च प्रोतश्चेति, अन्तरिक्षलोकेषु गार्गीति, कस्मिन्नु खल्वन्तरिक्षलोका ओताः प्रोताश्चेति, गन्धर्व्वलोकेषु गार्गीति, कस्मिन्नु खलु गन्धर्व्वलोका ओताश्च प्रोताश्चेति, आदित्यलोकेषु गार्गीति, कस्मिन्नु खल्वादित्यलोका ओताश्च प्रोताश्चेति, चन्द्रलोकेषु गार्गीति, कस्मिन्नु खलु चन्द्रलोका ओताश्च प्रोताश्चेति, नक्षत्रलोकेषु गार्गीति, कस्मिन्नु खलु नक्षत्रलोका ओताश्च प्रोताश्चेति, देवलोकेषु गार्गीति, कस्मिन्नु खलु देवलोका ओताश्च प्रोताश्चेति, इन्द्रलोकेषु गार्गीति, कस्मिन्नु खल्विन्द्रलोका ओताश्च प्रोताश्चेति, प्रजापतिलोकेषु गार्गीति, कस्मिन्नु खलु प्रजापतिलोका ओताश्च प्रोताश्चेति, ब्रह्मलोकेषु गार्गीति, कस्मिन्नु खलु ब्रह्मलोका ओताश्च प्रोताश्चेति, सहोवाच गार्गि ! मातिप्राक्षीर्मा ते मूर्द्धा व्यपप्तदनतिप्रश्न्यां वै देवतामतिपृच्छसि गार्गि ! मातिप्राक्षीरिति ततो ह गार्गी वाचक्नव्युपरराम” उपनि० ।

“वायौ गार्गीति । नन्वग्नाविति वक्तव्यम् । नैष दोषोऽग्नेः पार्थिवमपां वा धातुमनाश्रित्येतरभूतवत् स्वातन्त्र्येणात्मलाभो नास्तीति । तस्मिन्नोतप्रोतभावो नोपदिश्यते । कस्मिन्नु खलु वायुरोतश्च प्रोतश्चेत्यन्तरिक्षलोकेषु गार्गीति । तान्येव भूतानि संहतान्यन्तरिक्षलोकास्तान्यपि गन्धर्व्वलोकेषु गन्धर्व्वलोका आदित्यलोकेष्वादित्यलोकाश्चन्द्रलोकेषु चन्द्रलोका नक्षत्रलोकेषु नक्षत्रलोका देवलोकेषु देवलोका इन्द्रलोकेष्विन्द्रलोका विराड्शरीरारम्भकेषु भूतेषु प्रजापतिलोकेषु प्रजापतिलोका ब्रह्मलोकेषु ब्रह्मलोका नामाण्डारम्भकाणि भूतानि । सर्व्वत्र हि सूक्ष्मतारतम्यक्रमेण प्राण्युपभोगाश्रयाकारपरिणतानि संहतानि । तान्येवं पञ्चेति बहुवचनभाञ्जि । कस्मिन्नु खलु ब्रह्मलोका ओताश्च प्रोताश्चेति । स होवाच याज्ञवल्क्यो हे गार्गि ! मातिप्राक्षीः स्वं प्रश्नं न्यायप्रकारमतीत्यागमेन प्रष्टव्यां देवतामनुमानेन मा प्राक्षीरित्यर्थः । पृच्छन्त्याश्च मा ते तव मूर्द्धा शिरो व्यपप्तद्विस्पष्टं मा पतेत् । देवतायाः प्रश्नः स्वविष-

वत् । गीता “ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् । यः प्रयाति त्यजन् देहं स याति परमाङ्गतिम्” । ओङ्कारस्य मात्राविशेषाभिध्यानफलम् प्रश्नोप निर्णीतं यथा

“एतद्वै सत्यकाम ! परञ्चापरञ्च ब्रह्म यदोङ्कारस्तस्माद्विद्वानेतेनैवायतनेनैकतरमन्वेति । स यद्येकमात्रमभिध्यायीत स तेनैव संवेदितस्तूर्णमेव जगत्यामभिसम्पद्यते । तमृचो मनुष्यलोकमुपनयन्ते स तत्र तपसा ब्रह्मचर्य्येण श्रद्धया सम्पन्नो महिमानमनुभवति । अथ यदि द्विमात्रेण मनसि सम्पद्यते सोऽन्तरिक्षं यजुर्भिरुन्नीयते । स सोमलोकं, स सोमलोके विभूतिमनुभूय पुनरावर्त्तते । यः पुनरेतन्त्रिमात्रेणैवोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि सूर्य्ये सम्पन्नः । यथा पादोदरस्त्वचा विनिर्म्मुच्यत एवं ह वै स पाप्मना विनिर्म्मुक्तः स सामभिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनात् परात् परं पुरिशयं पुरुषमीक्षते तदेतौ श्लोकौ भवतः । “तिस्रो मात्रा मृत्युमत्यः प्रयुक्ता अन्योन्यसक्ता अनविप्रयुक्ताः । क्रियासु बाह्यान्तरमध्यमासु सम्यक् प्रयुक्तासु न कम्पते ज्ञः । ऋग्भिरेतं, यजुर्भिरन्तरिक्षं, स सामभिर्यत्तत्कवयो वेदयन्ते । तमोङ्कारेणैवायतनेनान्वेति विद्वान् यत्तच्छान्तमजरममृतमभयं परञ्चेति”उ० ।

“एतद्ब्रह्म वै परञ्चापरञ्च ब्रह्म परं सत्यमक्षरं पुरुषाख्यमपरञ्च प्राणाख्यं प्रथमजं यत्तदोङ्कार एवोङ्कारात्मकमोङ्कारप्रतीकत्वात् । परं हि ब्रह्मशब्दाद्युपलक्षणानर्हं सर्व्वधर्म्मविशेषवर्जितमतो न शक्यमतीन्द्रियगोचरत्वात्केवलेन मनसाऽवगाहितुमोङ्कारे तु विष्ण्वादिप्रतीमास्थानीये भक्त्यावेशितब्रह्मभावे ध्यायिनां तत्प्रसीदतीत्यवगम्यते शास्त्रप्रामाण्यात् । तथाऽपरञ्च ब्रह्म । तस्मात्परञ्चापरञ्च ब्रह्म यदोङ्कार इत्युपचर्य्यते । तस्मादेवं विद्वानेतेनैवात्मप्राप्तिसाधनेनैव ओङ्काराभिध्यानेनैकतरं परमपरमन्वेति ब्रह्मानुगच्छति नेदिष्ठं ह्यालम्बनमोङ्कारो ब्रह्मणः । स यद्यप्योङ्कारस्य सकलमात्राविभागज्ञो न भवति तथाप्योङ्काराभिध्यानप्रभावाद्विशिष्टामेव गतिं गच्छति किन्तर्हि यद्यप्येवमोङ्कारमेकमात्राविभागज्ञ एव केवलोऽभिध्यायीतैकमात्रं सदा ध्यायीत स तेनैव मात्राविशिष्टोङ्काराभिध्यानेनैव संवेदितः सम्बोधितस्तूर्णं क्षिप्रमेव जगत्यां पृथिव्यामभिसम्पद्यते किं मनुष्यलोकमनेकानि जन्मानि जगत्यां तत्र तं पाठकं जगत्यां मनुष्यलोकमेवोपनयन्ते उपनिगमयन्ति ऋचः ऋग्वेदरूपा ह्योङ्कारस्य प्रथमा एका मात्रा । तदभिध्यानेन स मनुष्यजन्मनि द्विजाग्र्यः सन् तपसा ब्रह्मचर्य्येण श्रद्धया च सम्पन्नो महिमानं विभूतिमनुभवति न वीतश्रद्धो यथेष्टचेष्टो भवति योगभ्रष्टः कदाचिदपि न दुर्गतिं गच्छति । अथ पुनर्यदि द्विमात्राविभागज्ञो द्विमात्रेण विशिष्टमोङ्कारमभिध्यायीत स्वप्नात्मके मनसि मननीये यजुर्मये सोमदैवत्ये सम्पद्यते एकाग्रतयात्मभावं गच्छति स एवं सम्पन्नो मृतोऽन्तरिक्षाधारं द्वितीयरूपं द्वितीयमात्रारूपैरेव यजुर्भिरुन्नीयते सोमलोकं सौम्यं जन्म प्रापयन्ति तं यजूंषीत्यर्थः । स तत्र विभूतिमनुभूय सोमलोके मनुष्यलोकं प्रति पुनरावर्त्तते । यः पुनरेतमोङ्कारं त्रिमात्रेण त्रिमात्राविषयविज्ञानविशिष्टेनोमित्येतेनैवाक्षरेण प्रतीकेन परं सूर्य्यान्तर्गतं पुरुषमभिध्यायीत तेनाभिध्यानेन प्रतीकत्वेन त्वालम्बनत्वं प्रकृतमोङ्कारस्य, परञ्चापरञ्च ब्रह्मेति भेदाभेदश्रुतेरोङ्कारमिति च द्वितीयानेकशः श्रुता बाध्येत अन्यथा यद्यपि तृतीयाभिधानत्वेन करणत्वमुपपद्यते तथापि प्रकृतानुरोधात्त्रिमात्रं परं पुरुषमिति द्वितीयैव परिणम्या ।“त्यजेदेकं कुलस्यार्थे”इति न्यायेन । स तृतीयो मात्रारूपस्तेजसि सूर्य्ये सम्पन्नो भवति ध्यायमानो मृतोऽपि सूर्य्यात्सोमलोकादिवन्न पुनरावर्त्तते किन्तु सूर्य्यसम्पन्नमात्र एव । यथा पादोदरः सर्पस्त्वचा विनिर्मुच्यते जीर्णत्वग्विनिर्म्मुक्तः स पुनर्नवो भवति । एवं ह वै एष यथा दृष्टान्तः स पाप्मना सर्पत्वक्स्थानीयेनाशुद्धिरूपेण विनिर्मुक्तः सामभिस्तृतीयमात्रारूपैरूर्द्ध्वमुन्नीयते ब्रह्मलोकं हिरण्यगर्भस्य ब्रह्मणो लोकं सत्याख्यम् । स हिरण्यगर्भः सर्वेषां संसारिणां जीवानामात्मभूतः स ह्यन्तरात्मा लिङ्गरूपेण सर्वभूतानां तस्मिन् लिङ्गात्मनि संहताः सर्वे जीवाः । तस्मात्स जीवघनः स विद्वांस्त्रिमात्रोङ्काराभिज्ञः । एतस्माज्जीवघनाद्धिरण्यगर्भात् परात्परं परमात्माख्यं पुरुषमीक्षते । पुरिशयं सर्वशरीरानुप्रविष्टं पश्यति ध्यायमानः । तदेतावस्मिन्यथोक्तार्थप्रकाशकौ मन्त्रौ भवतः । तिस्रस्त्रिसङ्ख्याका अकारोकारमकाराख्या ओङ्कारस्य मात्राः । मृत्युर्यासां विद्यते ता मृत्युमत्यः मृत्युगोचरादनतिक्रान्ता मृत्युगोचरा एवेत्यर्थः । ता आत्मनो ध्यानक्रियासु प्रयुक्ताः । किञ्चान्योन्यसक्ता इतरेतरसम्बद्धाः । अनविप्रयुक्ता विशेषेणैकैकविषय एव प्रयुक्ताः । तथा न विप्रयुक्ता अविप्रयुक्ता नाविप्रयुक्ता अनविप्रयुक्ताः

किन्तर्हि विशेषेणैकस्मिन् ध्यानकालेऽतिसृष्टासु क्रियासु बाह्याभ्यन्तरमध्यमासु जाग्रत्स्वप्नसुषुप्तिस्थानपुरुषाभिध्यानलक्षणासु योगक्रियासु सम्यक्प्रयुक्तासु सम्यग्ध्यानकाले प्रयोजितासु न कम्पते न चलति ज्ञः ज्ञो योगी यथोक्तविभागज्ञ ओङ्कारस्येत्यर्थः। न तस्यैवंविदश्चलनमुपपद्यते। यस्माज्जाग्रत्स्वप्नसुषुप्तपुरुषाः सह स्थानैर्मात्रात्रयरूपेणोङ्कारात्मरूपेण दृष्टाः। स ह्येवं विद्वान् सर्व्वात्मभूत ओङ्कारमयः कुतो वा चलेत्कस्मिन् वा। सर्व्वार्थसङ्ग्रहार्थो द्वितीयो मन्त्रः। ऋग्भिरेतं लोकं मनुष्योपलक्षितम्। यजुर्भिरन्तरिक्षं सोमाधिष्ठितम्। सामभिर्यत्तद्ब्रह्मलोकमिति तृतीयं कवयो मेधाविनो विद्यावन्त एव नाविद्वांसो वेदयन्ते। तं त्रिविधलोकमोङ्कारेण साधनेनापरब्रह्मलक्षणमन्वेत्यनुगच्छति विद्वान्। तेनैवोङ्कारेण यत्तत्परं ब्रह्माक्षरं सत्यं पुरुषाख्यं शान्तं विमुक्तं जाग्रत्स्वप्नसुषुप्त्यादिविशेषसर्व्वप्रपञ्चविवर्जितमत एवाऽजरं जरावर्जितममृतं मृत्युवर्जितमेव। यस्माज्जराविक्रियादिरहितमतोऽभयम्। यस्मादेवाभयं तस्मात्परं निरतिशयम्। तदप्योङ्कारेणायतनेन गमनसाधनेनान्वेतीत्यर्थः” भा०।

स च सामावयवभेदः ब्रह्मवाचकः आत्मबोधकाक्षररूपश्च तदेतत् छा० उप० भाष्ययोर्दर्शितं यथा।

“ओमित्येतदक्षरमुद्गीथमुपासीत” छा० उ०॥

“ओमित्येतदक्षरमुपासीत। ओमित्येतदक्षरम्। परमात्मनोऽभिधानं नेदिष्ठम्। तस्मिन् हि प्रयुज्यमाने स प्रसीदति प्रियनामग्रहण इव लोकः। तदिहेति परं प्रयुक्तमभिधायकत्वाद्व्यावर्त्तितं शब्दस्वरूपमात्रे प्रतीयते। तथार्चादिवत्परस्यात्मनः प्रतीकं सम्पद्यते।

एवं नामत्वेन प्रतीकत्वेन च परमात्मोपासनसाधनं श्रेष्ठमिति सर्व्ववेदान्तेष्ववगतम्। जपकर्म्मस्वाध्यायाद्यन्तेषु बहुशः प्रयोगात्प्रसिद्धमस्य श्रैष्ठ्यम्। अतस्तदेतदक्षरं वर्णात्मकमुद्गीथभक्त्यवयवत्वादुद्गीथशब्दवाच्यमुपासीत। कर्म्माङ्गावयवभूते ओङ्कारे परमात्मप्रतीके दृढामैकाग्र्यलक्षणां मतिं सन्तनुयात्” भा०।

“ओमित्युद्गायति तस्योपव्याख्यानम्। एषां भूतानां पृथिवी रसः पृथिव्या आपो रसः। अपामोषधयो रस ओषधीनां पुरुषो रसः, पुरुषस्य वाग्रसो, वाच ऋग्रस, ऋचः साम रसः, साम्न उद्गीथो रसः। स एष रसानां रसतमः परमः परार्द्ध्योऽष्टमो यदुद्गीथः। कतमा कतमर्क्, कतमत्कतमत्साम, कतमः कतम उद्गीथ इति विमृष्टं भवति। वागेवर्क्, प्राणः साम, ओमित्येतदक्षरमुद्गीथः, तद्वा एतन्मिथुनं यद्वाक् च प्राणश्चर्क् च साम च। तदेतन्मिथुनमोमित्येतस्मिन्नक्षरे संसृज्यते यदा वै मिथुनौ समागच्छत आपयतो वै तावन्योन्यस्य कामम्। आपयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते। तद्वा एतदनुज्ञाक्षरं यद्धि किञ्चानुजानात्योमित्येव तदाहैषो समृद्धिर्यदनुज्ञा, समर्द्धयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते। तेनेयं त्रयी विद्या वर्त्तते ओमित्याश्रावयत्योमिति शंसत्योमित्युद्गायत्येतस्यैवाक्षरस्यापचित्यै महिम्ना रसेन” उप०।

“स्वयमेव श्रुतिरोङ्कारस्योद्गीथशब्दवाच्यत्वे हेतुमाह। ओमिति ह्युद्गायति। ओमित्यारभ्य हि, यस्मादुद्गायति अत उद्गीथ ओङ्कार इत्यर्थः। तस्याक्षरस्योपव्याख्यानमेवमुपासनमेवं विभूत्येवं फलमित्यादिकथनमुपव्याख्यानम्। प्रवर्त्तत इति वाक्यशेषः। एषां चराचराणां भूतानां पृथिवी रसो गतिः परायणमवष्टम्भः। पृथिव्या आपो रसोऽप्सु ह्योता च प्रोता च पृथिव्यतस्ता रसः पृथिव्याः। अपामोषधयो रसोऽप्परिणामत्वादोषधीनाम्। तासां पुरुषो रसोऽन्नपरिणामत्वात्पुरुषस्य। तत्रापि पुरुषस्य वाग्रसः। पुरुषावयवानां हि वाक् सारिष्ठा। अतो वाक् पुरुषस्य रस उच्यते। तस्या अपि वाचः ऋग्रसः सारतरा। ऋचः साम रसः सारतरम्। तस्यापि साम्न उद्गीथः प्रकृतत्वादोङ्कारः सारतरः। एवं स एष उद्गीथाख्य ओङ्कारो भूतादीनामुत्तरोत्तररसानामतिशयेन रसो रसतमः परमात्मप्रतीकत्वात् परार्द्धः अर्द्धं स्थानं परञ्च तदर्द्धञ्च तदर्हतीति परार्द्ध्यः परमात्मस्थानार्हः परमात्मवदुपास्यत्वादित्यभिप्रायः। अष्टमः पृथिव्यादिरससङ्ख्यायां यदुद्गीथः य उद्गीथः। वाच ऋग्रस इत्युक्तम् कतमा सा ऋक् कतमत्तत्साम कतमो वा स उद्गीथः। कतमा कतमेति वीप्सादरार्था। ननु ‘वा बहूनां जातिपरिप्रश्ने डतमच्’ पा० इति ऋग्जातिबहुत्वं कथं डतमच्प्रत्ययः। नैष दोषो जातौ परिप्रश्नो जातिपरिप्रश्न इत्येतस्मिन् विग्रहे जातावृग्व्यक्तीनां बहुत्वोपपत्तेः। न तु जातेः परिप्रश्न इति विगृह्यते। ननु जातेः परिप्रश्न इत्यस्मिन्विग्रहे कतमः कठ इत्याद्युदाहरणमुपपन्नं जातौ परिप्रश्न इत्यत्र तु न युज्यते। तत्रापि कठादिजातावेव व्यक्तिबहुत्वाभिप्रायेण परिप्रश्न इत्यदोषः। यदि जातेः परिप्रश्नः स्यात् कतमा

कतमा ऋगित्यादौ उपव्याख्यानं कर्त्तव्यम् स्यात्। विमृष्टं भवति विमर्शः कृतो भवति। विमर्शे हि कृते सति प्रतिवचनोक्तिरुपपद्यते वागेवर्क् प्राणः सामेति। वाक्प्राणयोरेकत्वेऽपि नाष्टमत्वव्याघातः पूर्व्वस्माद्वाक्यान्तरत्वादाप्तिगुणसिद्धये ओमित्येतदक्षरमुद्गीथ इति वाक् प्राणावृक्सामयोनी इति वागेवर्क् प्राणः सामेत्युच्यते। यथाक्रममृक्सामयोन्योर्वाक्प्राणयोर्ग्रहणे हि सर्व्वासामृचां सर्व्वेषाञ्च साम्नामवरोधः कृतः स्यात्। सर्वर्क्सामावरोधे चर्क्सामसाध्यानां च सर्वकर्म्मणामवरोधः कृतः स्यात्। तदवरोधे च सर्वे कामा अवरुद्धाः स्युः। ओमित्येतदक्षरमुद्गीथ इति भक्त्याशङ्का निवर्त्त्यते। तद्वैतदिति मिथुनं निर्दिश्यते। किन्तन्मिथुनमित्याह यद्वाक् च प्राणश्च सर्वर्क्सामकारणभूतौ मिथुनम् ऋक् च साम चेति ऋक्सामकारणौ ऋक्सामशब्दोक्ताविति अर्थः। न तु स्वतन्त्रम् ऋक् च साम च मिथुनम्। अन्यथा हि वाक् च प्राणश्चेत्येकमिथुनमृक्साम चापरं मिथुनमिति द्वे मिथुने स्याताम् तथा च तदेतन्मिथुनमित्येकवचननिर्द्देशोऽनुपपन्नः स्यात्। तस्मादृक्सामयोन्योर्वाक्प्राणयोरेव मिथुनत्वम्। तदेतदेवंलक्षणं मिथुनमोमित्येतस्मिन्नक्षरे संसृज्यते। एवं सर्वकामाप्तिगुणविशिष्टं मिथुनमोङ्कारे संसृष्टं विद्यत इत्योङ्कारस्य सर्वकामाप्तिगुणवत्त्वं प्रसिद्धम्। वाङ्मयत्वमोङ्कारस्य प्राणनिष्पाद्यत्वञ्च मिथुनेन संसृष्टत्वं मिथुनस्य कामापयितृत्वं प्रसिद्धमिति दृष्टान्त उच्यते। यथा लोके मिथुनौ मिथुनावयवौ स्त्रीपुमांसौ यदा समागच्छतो ग्राम्यधर्म्मतया संयुज्येयातां तदाऽऽपयतः प्रापयतोऽन्योन्यस्येतरेतरस्य तौ कामम्। तथा च स्वात्मानुप्रविष्टेन मिथुनेन सर्वकामाप्तिगुणवत्त्वमोङ्कारस्य सिद्धमित्यभिप्रायः। तदुपासकोऽप्युद्गाता तद्धर्म्मा भवतीत्याह आपयिता ह वै कामानां यजमानस्य भवति य एतदक्षरमेवाप्तिगुणवदुद्गीथमुपास्ते तस्यैतद्यथोक्तं फलमित्यर्थः। "तं यथा यथोपासते तदेव भवतीति" श्रुतेः। समृद्धिमांश्चोङ्कारः कथं? तदा एतत्प्रकृतमनुज्ञाक्षरमनुज्ञा च साक्षरञ्च तत् अनुज्ञानुमतिरोङ्कार इत्यर्थः। कथमनुज्ञेत्याह श्रुतिरेव। यद्धि किञ्च यत्किञ्च लोके ज्ञानं धनं वानुजानाति विद्वान्धनी वा तत्रानुमतिं कुर्व्वन्नोमित्येव तदाह। तथा च वेदे यत्र देवास्त्रयस्त्रिंशदित्योमिति होवाचेत्यादि। तथा च लोकेऽपि तवेदं धनं गृह्णामि इत्युक्त ओमित्याह। अत एषा उ एषैव समृद्धिर्यदनुज्ञा या अनुज्ञा सा समृद्धिस्तन्मूलत्वादनुज्ञायाः समृद्धो ह्योमित्यनुज्ञां ददाति तस्मात्समृद्धिगुणवानोङ्कार इत्यर्थः। समृद्धिगुणोपासकत्वात्तद्धर्म्मा समर्द्धयिता ह वै कामानां यजमानस्य भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्त इत्यादि पूर्ववत्। अथेदानीमक्षरं स्तौति उपास्यत्वात् प्ररोचनार्थम्। कथं? तेनाक्षरेण प्रकृतेनेयमृग्वेदादिलक्षणा त्रयी विद्या विहितं कर्म्मेत्यर्थः। नहि त्रयी विद्यैवाश्रावणादिभिर्वर्त्तते कर्म्म तु तथा प्रवर्त्तत इति प्रसिद्धम्। कथमोमित्याश्रावयत्योमिति शंसत्योमित्युद्गायतीति लिङ्गाच्च सोमयाग इति गम्यते तच्च कर्म्म एतस्यैवाक्षरस्यापचित्यै पूजार्थम्। परमात्मप्रतीकं हि तत्। तदपचितिः परमात्मन एव सा। "स्वकर्म्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः" इति स्मृतेः। महिम्ना एतेन किञ्चैतस्यैवाक्षरस्य महिम्ना महत्त्वेन ऋत्विग्यजमानादिप्राणैरित्यर्थः" भा०।

ओम्शब्दस्य मङ्गलं तु नार्थः किन्तु मङ्गलसाधनत्वं श्रवणेन भवतीत्येतमर्थमभिसन्धाय तदुत्कीर्त्तनम् अथशब्दवत्। अतएव "ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा। कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभौ" इत्यत्र ओङ्कारस्य माङ्गलिकत्वमुक्तम् तथाचार्थान्तरे प्रयुक्तावथोङ्कारशब्दौ श्रुत्या अभिप्रेतार्थसिद्धिरूपमङ्गलं जनयत इत्याकरे दृश्यम्। "अवर्णात् ओम् शब्दस्यादेः पररूपैकादेशः ओम्+कृ-घञ्। ओमित्यस्य करणे ओङ्कार कृ। ओङ्कृत अङ्गीकृते ओमित्यादावुच्चारणयुक्ते च त्रि०। स्वस्त्यनोङ्कृतं सर्व्वं मन्त्रः।

ओमन् पु० अव-मनिन् ऊट् गुणः। अवने रक्षणे "शंसमोमना वा यो गात्" ऋ० ७,६८,४। "ओमनाऽवनेन रक्षणेन" भा० "यो वामोमानं दधते प्रियः सन्" ७,६८,५। "ओमानं रक्षणम्" भा०। "विश्वेभिर्ग्न्वोमभिर्द्देवानः" ऋ० ५,४२,१२। "ओमभिः रक्षणैः" भा०। ओमाविद्यतेऽस्य मतुप् मस्य वः नि० नलोपः। ओमन्वत् ओमयुक्ते रक्षके "ओमन्वन्तं चक्रथुः सप्तवध्रये" ऋ०१०,३९,९। "ओमन्वन्तं रक्षणवन्तम्" भा० ओम्ना त्रायते त्रै क नलोपदीर्घौ। ओमात्र अवनेन त्राणकर्त्तरि त्रि०। "त ओमात्रां रुशतीविदुः" ५०,५, ओमनि हितम् यत् टिलोपः। ओम्य रक्षणहिते त्रि० "वसूनां रातौ स्याम रुद्राणामोम्यायाम्" सांख्या०

श्रौ० सू० १,६,२। ततोऽस्त्यर्थे मतुप् पूर्व्वस्य दीर्घः ओम्यावत् तद्युक्ते त्रि०। "तन्नधर्म्मेमोम्यावन्तमवये" ऋ०१,११२,७

ओल पु० ओनत्ति आ+उन्द्-क नलोपे पृषो० दस्य लत्वम्। १सूरणे (ओल) इति ख्याते कन्दे। २आर्द्रे-त्रि० (भिजा) त्रिका०। ओलस्य गुणाः भावप्र० "सूरणः कन्द-ओलश्च कन्दलोऽर्शोघ्न इत्यपि। सूरणोदीपनोरूक्षः कषायः कण्डूकृत् कटुः। विष्टम्भी विशदोरुच्यः कफार्शः-कृन्तनोलघुः। विशेषादर्शसे पथ्यः प्लीहागुल्मविनाशनः। सर्वेषां कन्दशाकानां सूरणः श्रेष्ठ उच्यते। दद्रूणां रक्तपित्तानां कुष्ठानां न हितो हि सः। सन्धानयोगं सम्प्राप्तः सूरणोगुणवत्तरः" उक्ताः।

ओलज उत्क्षेपे इदित् भ्वा०पर०सक०सेट्। ओलञ्जति औलञ्जीत्। ओलञ्जाम्-बभूव आस चकार।

ओलड क्षेपे इदित् वा चुरा०उभ० पक्षे भ्वादि० पर०सक० सेट्। ओलण्डयति ते औलिलण्डत् त ओलण्डयाम् बभूव आस चकार चक्रे। पक्षे ओलण्डति औलण्डीत् ओलण्डाम् बभूव आस चकार।

ओल्ल पु० ओल+पृषो०। ओले सूरणे राजनि०।

ओष पु० उष-घञ्। १दाहे। "अग्निक्षाराभ्यामोषचोषपरी-दाहाश्च भवन्ति"। "वैवर्ण्यतोदस्तम्भत्वगुरुत्वोषसमन्विता" "तेषां चतुर्णामप्योषचोषपरीदाहधूमायनानि शिरोत्थान प्रपाकभेदित्वानि कृमिजन्म च सामान्यानि लिङ्गानि" सुश्रु०। २पाके च ओषः ३क्षिप्रे न०निघ०।

ओषण पु०उष-ल्यु। कटुरसे (झाल) इति ख्याते १रसभेदे। गौ०ङीष्। ओषणी (पुडिया) २शाकभेदे स्त्री। "ओषणी कफवातनुत्" राजवल्लभः।

ओषधि(धी) स्त्री ओषः पाको धीयतेऽत्र ओष+धा-कि जातिविषयत्वात् स्त्रीत्वे वा ङीष् ओषधी च। फलपाका-न्ते व्रीहियवादौ स्थावरभेदे। ओषधिश्च स्थावरभेदो यथाह सुश्रुतः "तासां स्थावराश्चतुर्विधाः वनस्पतयो वृक्षा वीरुध ओषधयः। तास्वपुष्पाः फलवन्तो वनस्पतयः। पुष्पफलवन्तो वृक्षाः प्रतानवत्यः स्तम्बिन्यश्च वीरुधः। फलपाकान्ता ओषधयः" मनुरप्याह "उद्भिज्जाः स्थावराः सर्वे बीजकाण्डप्ररोहिणः। ओषध्यः फलपाकान्ता बहुपुष्पफलोपगाः। अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः। पुष्पिणः फलिनश्चैव वृक्षास्तूभयतः स्मृताः। गुच्छगुल्मं तु विविधं तथैव तृणजातयः। बीजकाण्डरुहा-ण्येव प्रताना वल्ल्य एव च। तमसा बहुरूपेण वेष्टिताः कर्म्महेतुना। अन्तःसंज्ञाभवन्त्येते सुखदुःखसमन्विताः"। ओषधीनामुत्पत्तिः तन्निर्वचनञ्च" "तां (आहुतिम्) हैनां नाभिराधयांचकार केशमिश्रेव हास तां व्यौषदोषं धयेति तत ओषधयः समभवंस्तस्मा-दोषधयो नाम" शत०ब्रा० २,२,३,५ दर्शितम्। "ता-स्वाहुतिं तस्मिन्नग्नौ व्यौषत् अत्यजत् इदमाहुतिद्रव्यम् ओषं पक्वं कृत्वा धय पिबेति अग्नौ प्रक्षिप्तास्तस्मादोषधयः पृथिव्यां समभवन्" भा०। निरु० "या ओषधीः पूर्वजा-ताः" इत्येतामृचमधिकृत्य अन्याऽपि निरुक्तिर्दर्शिता "ओ-षधय ओषं धयन्तीति वौषत्येनाधयतीति वा दोषं धय-न्तीति वा"। सर्वत्र पृषो०। भाग० ३,१०अ० स्थावराणां षड्भेदा उक्ताः यथा "सप्तमो मुख्यसर्गस्तु षड्विधस्तस्थुषां चयः। वनस्पत्योषधिलतात्वक्सारा वीरुधोद्रुमाः। उत्-स्रोतसस्तमःप्राया अन्तःस्पर्शा विशेषिणः" १६,२०,श्लो०। "मुखमेव मुख्यः प्रथमः मुख्यसर्गः तस्थुषां स्थावरा-णाम्। षड्विधत्वमेवाह ये पुष्पं विना फलन्ति ते वन-स्पतयः,१ ओषधयः फलपाकान्ताः२, लता आरोहणा-पेक्षाः३ त्वक्सारा वेणवादयः४ लता एव काठिन्येना-रोहणानपेक्षा वीरुधः,५ ये पुष्पैः फलन्ति ते द्रुमाः६ तेषां साधारणलक्षणमाह ऊर्द्ध्वं स्रोत आहारसञ्चारो येषां ते तमःप्रधाना अव्यक्तचैतन्या अन्तःस्पर्शमेव जानन्ति नान्यत् तदप्यन्तरेव न बहिः, विशेषिणः अव्यवस्थितपार-णामाद्यनेकभेदवन्तः" श्रीधरः। तत्र भैषज्योपयोगिनीः कतिचिदोषधीः सुश्रुतो लक्षणसहिता दर्शयामास यथा "अथ वक्ष्यामि विज्ञानमोषधीनां पृथक् पृथक्। मण्डलैः कपिलैश्चित्रैः सर्पाभा पञ्चपर्णिनी। पञ्चारत्निप्रमाणा या विज्ञेयाऽजगरी१ बुधैः। निष्पत्रा कनकाभासा मूले द्व्यङ्गुलसम्मिता। सर्पाकारा लोहितान्ता श्वेतकापोति२ रुच्यते। द्विपर्णिनीं मूलभवामरुणां कृष्णमण्डलाम्। द्व्यरत्निमात्रां जानीयाद्गोनसीं ३गोनसाकृतिम्। सक्षीरां रोमशां मृद्वीं रसेनेक्षुरसोपमाम्। एवंरूपरसाञ्चापि कृष्णकापोति४-मादिशेत्। कृष्णसर्पस्वरूपेण वाराही ५ कन्दसम्भवा। एकपत्रा महावीर्य्या भिन्नाञ्जनसमप्रभा। छत्रातिच्छत्रके६,७ विद्याद्रक्षोघ्ने कन्दसम्भवे। जरामृत्युनिवारिण्यौ श्वेत-कापोतिसंस्थिते। कान्तैर्द्वादशभिः पत्रैर्म्मयूराङ्गरुहो-पमैः। कन्दजा काञ्चनक्षीरी कन्या ८ नाम महौषधी। करेणुः ९ सुबहुक्षीरा कन्देन गजरूपिणी। हस्तिकर्ण-

महायसस्तुल्यपर्णा द्विपर्णिनी । अजास्तनाभकन्दा तु सक्षीरा क्षुपरूपिणी । अजा १०महौषधी ज्ञेया शङ्खकुन्देन्दुपाण्डुरा । श्वेतां विचित्रकुसुमां काकादन्या समां क्षुपाम् । चक्रका ११मोषधीं विद्याज्जरामृत्युनिवारिणीम् । मूलिनी पञ्चभिः पत्रैः सुरक्तांशुककोमलैः । आदित्यपर्णिनी १२ज्ञेया सदादित्यानुवर्त्तिनी । कनकाभा जलान्तेषु सर्वतः परिसर्पति । सक्षीरा पद्मिनीप्रख्या देवी ब्रह्मसुवर्चला १३ । अरत्निमात्रक्षुपका पत्रैर्द्व्यङ्गुलसम्मितैः । पुष्पैर्नीलोत्पलाकारैः फलैश्चाञ्जनसन्निभैः । श्रावणी १४महती ज्ञेया कनकाभा पयस्विनी । श्रावणीपाण्डुराभासा महाश्रावणिलक्षणा । गोलोमी १५चाजलोमी १६च रोमशे कन्दसम्भवे । हंसपादी १७च विच्छिन्नैः पत्रैर्मूलसमुद्भवैः चवला बहुपुष्पी च १८समाना सर्परूपतः । वेगेन महतान्विता सर्पनिर्मोकसन्निभा । एषा वेगवती १९नाम जायते कन्दसम्भवे । सप्तादौ सर्वरूपिण्यो याश्चौषध्यः प्रकीर्त्तिताः । तासामुद्धरणं कार्य्यं मन्त्रेणानेन सर्वदा । महेन्द्ररामकृष्णानां ब्राह्मणानां गवामपि । तपसा तेजसा वापि प्रशाम्यध्वं शिवाय वै । मन्त्रेणानेन मतिमान् सर्वासामभिमन्त्रयेत् । अश्रद्दधानैरलसैः कृतघ्नैः पापकर्म्मभिः । नैवासादयितुं शक्याः सोमाः २०सोमसमास्तथा । पीतावशेषममृतं देवैर्ब्रह्मपुरोगमैः । निहितं सोमवीर्य्यासु सोमे चाप्योषधीपतौ । देवसुन्दे ह्रदवरे तथा सिन्धौ महानदे । दृश्यते च जलान्तेषु मध्ये ब्रह्मसुवर्चला । आदित्यपर्णिनी ज्ञेया तथैव हि हिमात्यये । दृश्यतेऽजगरी नित्यं गोनसी चाम्बुदागमे । काश्मीरेषु सरो दिव्यं नाम्ना क्षुद्रकमानसम् । करेणुस्तत्र कन्या च छत्रातिच्छत्रके तथा । गोलोमी चाजलोमी च महती श्रावणी तथा । वसन्ते कृष्णसर्पाख्या गोनसी च प्रदृश्यते । कौशिकीं सरितं तीर्त्वा सञ्जयन्त्यास्तु पूर्वतः । क्षितिप्रदेशो वल्मीकैराचितो योजनत्रयम् । विज्ञेया तत्र कापोती श्वेता वल्मीकमूर्द्धसु । मलये नलसेतौ च वेगवत्योषधी ध्रुवा । कार्त्तिक्यां पौर्णमास्याञ्च भक्षयेत्तामुपोषितः । सोमवच्चात्र वर्त्तेत फलं तावच्च कीर्त्तितम् । सर्वा विज्ञेयास्त्वोषध्यः सोमे चार्बुदे गिरौ । सघट्टैर्देवचरितैरम्बुदानीकभेदिभिः । व्याप्तश्चोर्वैश्च विख्यातैः सिद्धर्षिचरसेवितैः । गुहाभिर्भीमरूपाभिः सिंहनादितकुक्षिभिः । नगालोडित तोयाभिरापगाभिः समन्ततः । विविधैर्धातुभिश्चित्रैः सर्वतश्चोपशोभितः । नदीषु शैलेषु सरस्सु वापि पुण्येष्वरण्येषु तथाश्रमेषु । सर्वत्र सर्वाः परिमार्गितव्याः सर्वत्र भूमिर्हि वसूनि धत्ते" । शारिवाप्रभृत्योषधीनां लक्षणादिकं भावप्र० दर्शितं तत्तच्छब्दे उक्तं यथास्थानं वक्ष्यते च । वैदिककर्म्मोपयोगिन्य ओषधयो ग्राम्यारण्यभेदेन चतुर्दशविधाः यथा "तिलमाषव्रीहियवाः प्रियङ्गवो गोधूमाश्चेति सप्त ग्राम्या ओषधयः । वेणुश्यामाकनीवारजर्त्तिला गवेधुका मर्कटका गार्मुताश्चेति सप्त आरण्या ओषधयः" इति तैत्तरीयसंभाष्ये ४र्थ काण्डे ५प्रपाठके ६अनुवाके । "अथौषधीनामधिपस्य वृद्धौ" "महोषधीं नक्तमिवात्मभासः" कुमा० "भोगीव मन्त्रौषधिरुद्धवीर्य्यः" । "नवोदयं नाथमिवौषधीनाम्" रघुः । ओषधीनामृतुभेदे गुणविशेषा ऋतुशब्दे १४२५पृ०उक्ताः । २देवपत्नीषु च । "देवानां हैतामपो पत्नीर्देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽङ्गिरस्वद्दधुस्ताभिरेवैनामेतद्दधाति ता है ता ओषधय एवौषधयो वै देवानां पत्न्य ओषधिभिर्हीदं सर्वं हितमोषधिभिरेवैनामेतद्दधाति" शत०ब्रा० ६,५,४,४ ।

ओषधिगर्भ पुं० ओषधीनां गर्भ उत्पत्तिर्यस्मात् । १चन्द्रे तत्किरणसम्पर्कादोषधीनामुत्पत्तेस्तस्य तथात्वम् । २सूर्य्ये च । तस्य च वृष्टिद्वारा ओषधीगर्भधायकत्वात् "अपां गर्भं दर्शतमोषधीनाम्" ऋ० १,१६४,५२ मन्त्रे सूर्य्यस्यौषधीगर्भाधायकत्वोक्तेश्च तथात्वम् ।

ओषधिज त्रि० ओषधिभ्यो जायते जन+ड ५व० । ओषधीजाते १औषधे २तज्जाते वह्नौ पु० । "ज्वलयतौषधिजेन वह्निना" माघः ।

ओषधिपति पु०६त० । चन्द्रे तस्य किरणैरोषधीनामाप्यायनात् "अमायां तु सदा सोम ओषधीः प्रतिपद्यते । तमोषधिगतं गावःपिबन्त्यमृतवत् तथा" कालमा० सोमोत्पत्तिवाक्याच्च तथात्वम् "अपमार्गमोषधिपतिः स करैः" माघः ओषधीनाथौषधीपादयोऽप्यत्र । २कर्पूरे ३सोमलतायाञ्च । यथा च चन्द्रस्यौषधिपतित्वं तथा हरिवं० २५अ०अत्रेः सोमोत्पत्तिप्रकरणे उक्तं यथा "तस्य यत्स्रावितं तेजः पृथिवीमन्वपद्यत । ओषध्यस्ताः समुत्पन्नास्तेजसा प्रज्वलन्त्युत । ताभिर्धार्य्यास्त्रयोलोकाः प्रजाश्चैव चतुर्विधाः । पोष्टा हि भगवान् सोमो जगतां जगतीपते ! । स लब्धतेजा भगवान् संस्तवैस्तैश्च कर्म्मभिः । तपस्तेपे महाभागः पद्मानां दशतीर्दश । हिरण्यवर्णा या देव्यो धारयन्त्यात्मना जगत् । विभुस्तासामभूत्

देवः प्रख्यातः स्वेन कर्म्मणा । ततस्तस्मै ददौ राज्यं ब्रह्मा ब्रह्मविदां वरः । बीजौषधीनां विप्राणामपाञ्च जनमेजय ! । सोऽभिषिक्तो महाराज राज्येन द्विजराजराट् । लोकान् भासयामास स्वभासा भास्वतां वरः" । काशीख०१४अ० सोमोत्पत्तिरुक्तोक्तम् । "तस्य यत् स्रावितं तेजः पृथिवीमन्वपद्यत । तेनौषध्यः समुद्भूता याभिः संधार्य्यते जगत् । स लब्धतेजा भगवान् ब्रह्मणा वर्द्धितः स्वयम् । तपस्तेपे महाभागः पद्मानां दशतीर्दश । अविमुक्तं समासाद्य क्षेत्रं परमपावनम् । संस्थाप्य लिङ्गममृतं चन्द्रेशाख्यं स्वनामतः । बीजौषधीनां तोयानां राजाऽभूदद्विजन्मनाम् । प्रसादाद्देवदेवस्य विश्वेशस्य पिनाकिनः । तुष्टेन देवदेवेन स्वमौलौ यो धृतः सदा । आदाय तां कलामेकां जगत् संजीवनीं पराम् । पश्चाद्दक्षेण शप्तोऽपि मासान्ते क्षयमाप्य च । आप्याय्यतेऽसौ कलया पुनरेव यया शशी" ।

ओषधिप्रस्थ पु० ओषधियुक्तं प्रस्थमत्र । हिमालयराजधान्याम् "तत् प्रयातौषधीप्रस्थं स्थितये हिमवत्पुरम्" "आसे दुरोषधिप्रस्थम्" "इत्यौषधिप्रस्थविलासिनीनाम्" कुमा० ।

ओषम् अव्य० उष–णमुल् । अभीक्ष्ण्यं पक्षे त्वर्थे "ओषं-धयेति" शत०ब्रा०वाक्यम् ओषधिशब्दे दर्शितम् ।

ओषिष्ठ त्रि० उष–दाहे णिनि अतिशयेन ओषी इष्ठन् टि-इन्त्वात् टिलोपः । दाहकतरे "ओषिष्ठहनं शिनिकया-भ्याम्" तैत्ति० १,४,२६,१ ।

ओष्ट्राविन् त्रि० उष+करणे ष्ट्रन् तदस्यास्ति विनि । "छन्दो-विन् करणे ओष्ट्रमेखलादिति" वार्त्ति० दीर्घः । दाह-करणयुक्ते । "पुनरोष्ट्राविण्यधत" श्रुतिः सि०कौ० ।

ओष्ठ पु० उष्यते उष्णाहारेण उष–कर्म्मणि थन् । (ओठ) दशनच्छदे । "अवनिष्ठीवतो दर्पाद्द्वावोष्ठौ छेदयेत् नृपः" मनुः । निरुपपदोष्ठशब्दस्य प्रायेण उत्तरोष्ठएव कविभिः प्रयुज्यते । "ताम्रौष्ठपर्य्यस्तरुचःस्मितस्य" कुमा० । "ओष्ठेन रामो रामौष्ठबिम्बचुम्बनचुञ्चुना" माघः । उपपदे तूभयतः "उमामुखे बिम्बफलाधरोष्ठे" कुमा० । अधरोष्ठ उत्तरोष्ठ इत्यादि । "यस्याधरौष्ठः पतितः क्षिप्तश्चोर्द्धं तथोत्तरः । उभौ वा जाम्बवाभासौ दुर्लभं तस्य जीवितम्" सुश्रुतः । ओष्ठस्य स्वाङ्गत्वात् संयोगोपधत्वेऽपि उपसर्ज्जने स्त्रियां वा ङीष् । "बिम्बोष्ठी चारुनेत्रा गजपतिगमना दीर्घकेशी सुमध्या" महाना० । समासे उत्तरपदस्थेऽस्मिन् पूर्व्वस्यावर्णस्य वा पररूपम् । बिम्बोष्ठः बिम्बौष्ठः । शरी-रावयवत्वात् भवादौ यत् । ओष्ठ्य तद्भवे त्रि० उवर्णे पवर्गे च "ओष्ठजावुपू" शिक्षोक्तेः तयोस्तद्भवत्वात्तथात्वम् । ओष्ठे प्रचितः कन् । ओष्ठकः ओष्ठसंस्कारप्रचिते त्रि० । ओष्ठस्य मूलं जाहच् । ओष्ठजाह तन्मूले न० ।

ओष्ठकोप पु० ओष्ठस्य कोपो यत्र । सुश्रुतोक्ते मुखरोगभेदे । मुखरोगनिरूपणे तत्रोक्तं यथा
"तत्रौष्ठकोपा वातपित्तश्लेष्मसन्निपातरक्तमांसमेदोऽभिघातनिमित्ताः । कर्कशौ परुषौ स्तब्धौ कृष्णौ तीव्ररुगन्वितौ । दाल्येते परिपुट्येते ओष्ठौ मारुतकोपतः१ । आचितौ पिडकाभिस्तु सर्षपाकृतिभिर्भृशम् । सदाहपाकसंस्रावौ नीलौ पीतौ च पित्ततः२ । सवर्णाभिस्तु चीयेते पिडकाभिरवेदनौ । कण्डूमन्तौ पिच्छिलौ च शीतलौ कफजौ३ गुरू । सकृत्कृष्णौ सकृत्पीतौ सकृच्छ्वेतौ तथैव च । सन्निपातेन४ विज्ञेयावनेकपिड़काचितौ । खर्ज्जूरफलवर्णाभिः पिडकाभिः समाचितौ । रक्तोपसृष्टौ५ रुधिरं स्रवतः शोणितप्रभौ । मांसदुष्टौ६ गुरू स्थूलौ मांसपिण्डवदुद्गतौ । जन्तवश्चात्र मूर्च्छन्ति सृक्कस्योभयतो मुखात् । मेदसा ७घृतमण्डाभौ कण्डूमन्तौ स्थिरौ मृदू । अच्छस्फटिकसङ्काशमास्रावं स्रवतो गुरू । क्षतजाभौ विदीर्य्येते पाट्येते चाभिघाततः८ । ग्रथितौ च समाख्यातावोष्ठौ कण्डूसमन्वितौ" । इत० ओष्ठरोगादयोऽप्यत्र ।

ओष्ठपुष्प पु० ओष्ठोपमानं पुष्पं यस्य । बन्धुकवृक्षे । राजनि० ।

ओष्ठी स्त्री ओष्ठ इवाचरति ओष्ठ+क्विप् ततः अच् गौरा० ङीष् । बिम्बफलनामके (तेलाकुचा) वृक्षे । रत्नमाला ।

ओष्ठोपमफला स्त्री ओष्ठ उपमीयतेऽनेन ओष्ठोपमं फलं यस्याः । शिम्बिकालतायाम् (तेलाकुचा) जटाधरः ।

ओष्ण पु० ईषदुष्णः आ+उष्ण प्रा०स० । ईषदुष्णे ।

ओह पु० आ+वह घञर्थे क संप्र० । १सम्यग्वहने । "दशागोरोहेण तौग्र्यो न जीव्रिः" ऋ०१,१८०,५ । "ओहेन वहनेन" भा० । कर्त्तरि मूलविभु०क । २वाहके ३प्रापके च त्रि० । "अध्यामा त ओहैः" ऋ०४,१०,१ । "ओहैः इन्द्रादिप्रापकैःस्तोमैः" भा० ।

ओहब्रह्मन् पु० ऊह एषां ब्रह्मेति वा निरुक्तोक्तेः पृषो० । ऊहब्रह्मयुक्ते । "वेद्याभिरोहब्रह्मणो विचरन्तु त्वे" निरु०१२,१२, । धृता श्रुतिः । स्तोत्रेण" भा० ।

ओहस् त्रि०आ+ऊह असुन् । वहनसाधने स्तोत्रादौ । "न ये देवास ओहसा" ऋ०६,६८,९, "ओहसा वहनसाधनेन" भा० इति वाचस्पत्ये ओकारादिशब्दार्थसङ्कलनम् ।

औ

औकारः स्वरवर्णभेदः कण्ठौष्ठस्थानयोरुच्चार्य्यः दीर्घः द्विमात्रत्वात्। प्लुतस्तु त्रिमात्रः। स च उदात्तानुदात्तस्वरितभेदात् त्रिविधोऽपि अनुनासिकाननुनासिकाभ्यां पुनर्द्वैविध्यात् षड्विधः एवं प्लुतोऽपि षड्विधः। तेन द्वादशविधः। तपरत्वे कारपरत्वे च स्वरूपमात्रपरः। तन्त्रे तस्य वाचकशब्दा वर्णाभिधाने उक्ता यथा। "औकारः शक्तिकोनादस्तैजसोवामजङ्घकः। मनुरूर्द्ध्वमुखेशश्च शङ्कुकर्णः सदाशिवः। अधोदन्तश्च कण्ठोष्ठौ सङ्कर्षणः सरस्वती। आज्ञा चोर्द्ध्वमुखी शान्ता व्यापिनी प्रकृतिःपरा। अनन्ता ज्वालिनी व्योमा चतुर्द्दशी रतिप्रियः। नेत्रमात्राकर्षिणी च ज्वालामालिनिका भृगुः"। तदधिष्ठातृदेवता च तत्रैवोक्ता। "औकारे डाकिनी सिंहनादिनी चण्डभैरवी" तस्य ध्येयरूपं कामधे॰त॰ उक्तं यथा "रक्तविद्युल्लताकारमौकारं कुण्डलीं स्वयम्। अत्र ब्रह्मादयः सर्व्वे तिष्ठन्ति सततं प्रिये!। पञ्चप्राणमयं वर्णं सदाशिवमयं सदा। सदा ईश्वरसंयुक्तं चतुर्व्वर्गप्रदायकम्"। मातृकान्यासेऽधोदन्तपङ्क्तौन्यस्तत्वात्तच्छब्दवाच्यताऽस्येति बोध्यम्।

औ अव्य॰ आ+अव–क्विप् ऊठ्। १आह्वाने २सम्बोधने मेदि॰। ३विरोधे ४निर्णये" शब्दरत्ना॰। ५अनन्ते पु॰ एकाक्षरकोषः ६निस्वने पु॰मेदि॰। ७पृथिव्यां स्त्री मेदि॰ स च "चतुर्द्दशस्वरोयोऽसौ सेतुरौकारसंज्ञितः। सचानुस्वारनादाभ्यां शूद्राणां सेतुरुच्यते" तन्त्रसारधृत कालिकापु॰ उक्तेः शूद्राणां जप्यमन्त्रभेदः।

औकथ त्रि॰ उकथ–गर्गा॰ अपत्ये यञ् औक्थ्यः तस्य छात्रः कण्वादि॰ अण् यञोलुक्। औकथाश्छात्रे

औक्थिक त्रि॰ उक्थं सामावयवभेदं वेत्त्यधीते वा ठक्। १उक्थाध्यायिनि २तद्वेत्तरि च। तेषां धर्म्म आम्नायो वा ततः ञ्य। औक्थ्य औक्थिकानां धर्म्मे तदाम्नाये च न॰।

औक्ष न॰ उक्ष्णां वृषाणां समूहः अण् टिलोपः। १वृषसमूहे। वुञ्। औक्षक तत्समूहे न॰। तस्येदमण् टिलोपः। २वृषसम्बन्धिनि त्रि॰। अपत्ये अणि तु औक्ष्ण इत्येव। वेदे क्वचित् इदमर्थेऽपि उपधातोलोपः। "तामौक्षैर्वृषभिः पचात्" शत॰ब्रा॰१,२,५,२।

औखीय त्रि॰ उखेन प्रोक्तमधीयते छण्। उखप्रोक्त शाखाध्यायिषु ब॰व॰।

औख्य त्रि॰ उखायां संस्कृतं यत् ततः स्वार्थे ष्यञ्। १स्थालीपक्वेऽन्नादौ। २नगरीभेदे स्त्री। उख्यायां जातादि कत्त्र्यादि॰ ढकञ्। औख्येयक तत्रजातादौ त्रि॰।

औघ पु॰ वहति पुंसि संज्ञायां घ पृषो॰ततः स्वार्थेऽण्। जलसंघाते "औघ इमाः सर्व्वाः प्रजा निर्वोढा" शत॰ ब्रा॰ १,८,१,२, "वहतीत्योघ उदकसंघातः" भा॰।

औच(त)थ्य पु॰ उतथ्यस्यापत्यम् अण् वेदे पृषो॰। उतथ्यापत्ये दीर्घतमसि "उपस्तुतिरौचथ्यमुरुष्येयाः" ऋ॰ १, १५८,४, "औचथ्यस्तथ्यपुत्र दीर्घतमसम्" भा॰। "दशा ह यद्रेक्ण औचथ्यः" ऋ॰ १,५८,१, उतथ्यस्यैव नामान्तरमुचथ्येति तेन "उचथ्यानामाङ्गिरसौचथ्यगौतमेति" आश्व॰श्रौ॰१२,११,१, उक्तम्। तस्य च गोत्रप्रवर्त्तकत्वम् उक्तवाक्यात्। लोके तु उतथ्यः औतथ्य इत्येव।

औचित्य न॰ उचितस्य भावःष्यञ्। युक्तत्वे। "एता अपि यथौचित्यादुत्तमाधममध्यमाः" सा॰द॰। निस्वसामर्थ्यात् स्त्रीत्वमपि तत्र ङीष् यलोपश्च। औचिती तत्रार्थे। सामर्थ्यमौचिती देशः कालोव्यक्तिः स्वरादयः" सा॰द॰ इदा॰इसनिच् उचितिमाप्यत्र पु॰।

औजसिक त्रि॰ ओजसा वर्त्तते ठक्। शूरे तेजस्विनि

औजस्य न॰ ओजस्+स्वार्थे ष्यञ्। ओजसि। "दौर्गत्याद्यैरनौजस्यं दैन्यं मलिनतादिकृत्" सा॰द॰।

औज्जयनक त्रि॰ उज्जयिन्यां जातादि धूमा॰ वुञ्। उज्जयिनीनगरजातादौ।

औज्जिहानि पुंस्त्री उज्जिहानस्यापत्यमत इञ्। उज्जिहानापत्ये ततः इञन्तत्वात् यूनि फक् पैलादि॰तस्य लुक्। तदीययुवापत्येऽपि।

औड त्रि॰ उन्द–क नलोपः नि॰ दस्य ड स्वार्थेऽण्। आर्द्रे ततः नड़ा॰फक्। औडायन आर्द्रस्य युवापत्ये तस्य विषयोदेशः ऐषुकार्य्या॰ भक्तल्। औडायनभक्त तदीये विषये देशे

औडव पु॰ ओडव+स्वार्थेऽण्। "औडवः पञ्चभिः प्रोक्तः स्वरैः षड्भिस्तु षाडवः। सम्पूर्णः सप्तभिः प्रोक्ता रागजातिस्त्रिधा मता" सङ्गीतरत्ना॰ उक्ते रागभेदे। स च भल्लारादिः इति संगीतदामोदरः।

औडवि त्रि॰ ओडवं रागविशेषमनुशीलयति इञ्। ओडव रागानुशीले। ततः स्वार्थे दामन्या॰छ औडवीय। तदर्थे

औडुप त्रि० उडुपेन निर्वृत्तादि सङ्काशादि० अण्। १चन्द्र-निर्वृत्ते २प्लवनिर्वृत्ते ३तत्सन्निकृष्टदेशे च।

औडुपिक त्रि० उडुपेन प्लवेन तरति ठक्। १प्लवेन तारके उडुपेन हरति उत्सङ्गा० ठक्। २प्लवेन हारके च त्रि०।

औडु(दु)म्बर त्रि० उडु(दु)म्बरस्य विकारः रजतादि० अञ्। १ताम्रविकारे पात्रादौ। "गृहीत्वौडु(दु)म्बरं पात्रम् स्मृतिः "सौवर्णराजतौडुम्बरखाड्गमणिमयानां पात्राणाम्" गोभि०। २यज्ञाङ्गवृक्षविकारे च। "पश्चात्पतिर-वस्थाय युगमन्त्रमौडु(दु)म्बरं शलाटुग्रथ्नं सा बध्नाति"गोभि०। स्त्रियां ङीप्। औडु(दु)म्बरीं स्पृष्ट्वा गायेत" श्रुतिः। "औडु(दु)म्बरीं शाखामुपगूहति"शत०ब्रा०५,४,२,२५, ३तपस्विविशेषे पु०। "वैखानसा वालखिल्यौडुम्बराः फेन-पायिने। न्यासे कुटीचरः पूर्व्वम् बह्वोदो हंसनिष्क्रियौ" भाग०२,१२,२७। "औडु(दु)म्बराः प्रातरुत्थाय यां दिशं प्रथमं पश्यन्ति तत आहृतफलादिभिः जीवन्तः" श्रीधरः। औडुम्बरं तत्फलं तस्येवाकारोऽस्त्यस्य अर्श० अच्। ४महाकुष्ठभेदे। "तत्र महाकुष्ठान्यरुणौडुम्बरर्ष्य-जिह्वकपालकाकणपुण्डरीकदद्रुकुष्ठानीति" विभज्य "पित्तेन पक्वौडुम्बरफलाकृतिवर्णान्यौडुम्बराणीति" तल्लक्षणं सुश्रुते उक्तम्। स च रोगः ताम्रस्तेयकर्मविपाकः यथाह शाता० "औडु(दु)म्बरी ताम्रचौरो नरकान्ते प्रजायते"। ५यमभेदे च "औडुम्बराय दध्नाय" यमतर्पणमन्त्रः।

औडुलोमि पुंस्त्री उडुलोम्नोऽपत्यम् बाह्वा० इञ्। उडुलोम्नोऽपत्ये बहुषु च। उलोमाः उडुलोमान्

औड्र पु० ओड्रदेशानां राजा अण्। १ओड्रदेशनृपे ओड्र शब्दे विवृतिः २तद्देशवासिनि च। बहुषु अणो लुक्।

औत्कण्ठ्य न० उत्कण्ठैव चातुर्व० स्वार्थे ष्यञ्। उत्कण्ठा-याम् "औत्कण्ठ्याश्रुकलाक्षस्य हृद्यासीन्मे शनैर्हरिः" भाग० १,६,१७। "औत्कण्ठ्याद्देवकीसुतः" १,१० ४।

औत्कर्ष्य न० उत्कर्ष+स्वार्थे ष्यञ्। उत्कर्षे।

औत्क्षेप पुंस्त्री उत्क्षेपस्य ऊर्द्ध्वक्षेपकस्यापत्यं शिवा० अण्। उत्क्षेपकस्यापत्ये स्त्रियां ङीप्।

औत्तम त्रि० उत्तमेन निर्वृत्तादि सङ्काशा० अण्। १उत्तमेन निर्वृत्ते २तत्सन्निकृष्टदेशादौ च।

औत्तमि पु० उत्तमस्यापत्यम् इञ्। मनुभेदे उत्तमशब्दे उदा०। "स्वारोचिषश्चौत्तमिश्च तामसो रैवतस्तथा" मनुः तस्य पत्नी उत्तमी तस्या अपत्यम् ढक्। उत्तमपत्न्यपत्ये बहुत्वाच "औत्तमेयान् महाराज! दश पुत्रान् निबोध तान्" हरिवं०७अ० उत्तमशब्दे ते च नामतो दर्शिताः।

औत्तर त्रि० उत्तरत्यस्मात् उद्+तॄ—अपादानेऽप् ततः स्वार्थेऽण्। उत्तारके "इतरेषामुपदेशेन दुःखादिनिस्तारके ऋषौ। "यत्रौत्तराणां सर्वेषामृषीणाम् नाकुषस्य च" भा०व० १०,५४६।

औत्तरपथिक त्रि० उत्तरपथेन गच्छति तेनाहृतं वा ठञ्। उत्तरपथेन अर्च्चिरादिमार्गेण १गन्तरि उपासकभेदे २तेनाहृते च।

औत्तरपदिक त्रि० उत्तरपदं गृह्णाति ठक्। उत्तरपद-ग्राहके।

औत्तरवेदिक त्रि० उत्तरवेद्यां भवः ठञ्। उत्तरवेद्यां भवे कर्मादौ "औत्तरवेदिकं कर्म कृत्वा" शत०ब्रा० ७,२२,१७

औत्तराधर्य्य न० उत्तरे च अधरे च तेषां भावः ष्यञ्। ऊर्द्ध्वनीचभावेन स्थितौ। "संघे चानौत्तराधर्य्ये" पा०

औत्तराह त्रि० उत्तरस्मिन् कालादौ भवः "उत्तरादाहञ्" पा० उत्तर+आहञ्। उत्तरकालादौ भवे।

औत्तरेय पु० उत्तराया अपत्यम् ढक्। अभिमन्युसुते विराट दुहितुरुत्तरायाः पुत्रे परिक्षिन्नृपे "औत्तरेयेण दत्तानि न्यवसत्तन्निदेशकृत्" भाग० १,१७,४०। "अवधार्य्य मतिं कृष्ण औत्तरेयः सतीं व्यधात्" भाग० २,४,२।

औत्तानपाद(दि) पु० उत्तानपादे नृपे भवः अण्। उत्ता-नपादभवे ध्रुवे "ध्रुवस्यौत्तानपादस्य ब्रह्मर्षीणां तथैव च" भा० अनु० २अ०। "उत्तानपाद! भगवांस्तव शार्ङ्गधन्वा" भाग० ४,१०,२५। अपत्ये तु इञ्। तत्रैव। "उत्तानपा-दिर्निर्गत्य ततः काननतो द्विज!" काशी०। तस्य यथा तपस्यया सर्वनक्षत्राधारतापदप्राप्तिस्तथा वर्णितम् भाग० ४, ८,६, "जाये उत्तानपादस्य सुनीतिःसुरुचिस्तयोः। सुरुचिः प्रेयसी पत्युर्नेतरा यत्सुतो ध्रुवः। एकदा सुरुचेः पुत्र-मङ्कमारोप्य लालयन्। उत्तमं नारुरुक्षन्तं ध्रुवं राजाभ्य-नन्दत। तथा चिकीर्षमाणं तं सपत्न्यास्तनयं ध्रुवम्। सुरुचिः शृण्वतो राज्ञः सेर्ष्यमाहातिगर्व्विता। न वत्स! नृपतेर्धिष्ण्यं भवानारोढुमर्हति। न गृहीतो मया यत्त्वं कुक्षावपि नृपात्मज!। बालोऽसि तव नात्मानमन्यस्त्री गर्भसंभृतम्। नूनं वेद भवान् यस्य दुर्लभेऽर्थे मनोरथः। तपसाराध्य पुरुषं तस्यैवानुग्रहेण मे। गर्भे त्वं साध-यात्मानं यदीच्छसि नृपासनम्। श्रीमैत्रेय उवाच। मातुः सपत्न्याः सुदुरुक्तिविद्धः श्वसन् रुषा दण्डहतो यथाऽहिः। हित्वा मिषन्तं पितरं सन्नवाचं जगाम मातुः स रुदन् सकाशम्। तं निःश्वसन्तं स्फुरिताधरोष्ठं

-सुनीतिसुतमङ्कमुद्वह्य बालम् । निशम्य तत्पौरमुखान्नितान्तं सा विव्यथे यद्गदितं सपत्न्या । सोत्सृज्य धैर्य्यं विललाप शोकदावाग्निना दावलतेव बाला । वाक्यं सपत्न्याः स्मरती सरोजश्रिया दृशा बाष्पकलामुवाह । दीर्घं श्वसन्ती वृजिनस्य पारमपश्यती बालकमाह बाला । माऽमङ्गलं तात ! परेषु मंस्था भुङ्क्ते जनो यत् परदुःखदस्तत् । सत्यं सुरुच्याभिहितं भवान्मे यद्दुर्भगाया उदरे गृहीतः । स्तन्येन वृद्धश्च विलज्जते यां भार्य्येति वा वोढुमिडस्पतिर्माम् । आतिष्ठ तत्तात ! विमत्सरस्त्वमुक्तं समात्रापि यदव्यलीकम् । आराधयाधोक्षजपादपद्मं यदीच्छसेऽध्यासनमुत्तमो यथा । यस्याङ्घ्रिपद्मं परिचर्य्य विश्वविभावनायात्तगुणाभिपत्तेः । अजोऽध्यतिष्ठत् खलु पारमेष्ठ्यं पदं जितात्मश्वसनाभिवन्द्यम् । तथा मनुर्वो भगवान् पितामहो यमेकमत्या पुरुदक्षिणैर्मखैः । इष्ट्वाऽभिपेदे दुरवापमन्यतो भौमं सुखं दिव्यमथापवर्गम् । तमेव वत्साश्रय भृत्यवत्सलं मुमुक्षुभिर्मृग्यपदाब्जपद्धतिम् । अनन्यभावे निजधर्म्मभाविते मनस्यवस्थाप्य भजस्व पूरुषम् । नान्यं ततः पद्मपलाशलोचनाद्दुःखच्छिदं ते मृगयामि कञ्चन । यो मृग्यते हस्तगृहीतपद्मया श्रियेतरैरङ्ग ! विमृग्यमाणया । एवं संजल्पितं मातुराकर्ण्यार्थागमं वचः । संनियम्यात्मनात्मानं निश्चक्राम पितुः पुरात् । नारदस्तदुपाकर्ण्य ज्ञात्वा चास्य चिकीर्षितम् । स्पृष्ट्वा मूर्द्धन्यघघ्नेन पाणिना प्राह विस्मितः । अहो तेजः क्षत्त्रियाणां मानभङ्गममृष्यताम् । बालोऽप्ययं हृदा धत्ते यत् समातुरसद्वचः । श्रीनारद उवाच । नाधुनाप्यवमानं ते सम्मानं वापि पुत्त्रक ! । लक्षयामः कुमारस्य सक्तस्य क्रीडनादिषु । विकल्पे विद्यमानेऽपि न ह्यसन्तोषहेतवः । पुंसो मोहमृते भिन्ना यल्लोके निजकर्म्मभिः । परितुष्येत्ततस्तात ! तावन्मात्रेण पूरुषः । दैवोपसादितं यावद्वीक्ष्येश्वरगतिं बुधः । अथ मात्रोपदिष्टेन योगेनावरुरुत्ससि । यत्प्रसादं स वै पुंसां दुराराध्यो मतो मम । मुनयः पदवीं यस्य निःसङ्गेनोरुजन्मभिः । न विदुर्मृगयन्तोऽपि तीव्रयोगसमाधिना । अतो निवर्त्ततामेव निर्बन्धस्तव निष्फलः । यतिष्यति भवान् काले श्रेयसां समुपस्थिते । यस्य यद्दैवविहितं स तेन सुखदुःखयोः । आत्मानं तोषयन् देही तमसः पारमृच्छति । गुणाधिकान्मुदं लिप्सेदनुक्रोशं गुणाधमात् । मैत्रीं समानादन्विच्छेन्न तापैरभिभूयते । श्रीध्रुव उवाच । सोऽयं शमो भगवता सुखदुःखहतात्मनाम् । दर्शितः कृपया पुंसां दुर्दर्शोऽस्मद्विधैस्तु यः । अथापि मेऽविनीतस्य क्षात्त्रं घोरमुपेयुषः । सुरुच्या दुर्वचोवाणैर्न भिन्ने श्रयते हृदि । पदं त्रिभुवनोत्कृष्टं जिगीषोः साधु वर्त्म मे । ब्रूह्यस्मत्पितृभिर्ब्रह्मन्नन्यैरप्यनधिष्ठितम् । नूनं भवान् भगवतो योऽङ्गजः परमेष्ठिनः । वितुदन्नटते वीणां हिताय जगतोऽर्कवत् । मैत्रेय उवाच । इत्युदाहृतमाकर्ण्य भगवान्नारदस्तदा । प्रीतः प्रीत्याह तं बालं सद्वाक्यमनुकम्पया । श्रीनारद उवाच । जनन्याभिहितः पन्थाः सर्वनिःश्रेयसस्य ते । भगवान् वासुदेवस्त्वं भज तं प्रवणात्मना । धर्म्मार्थकाममोक्षाख्यं य इच्छेच्छ्रेय आत्मनः । एकं ह्येव हरेस्तत्र कारणं पादसेवनम् । तत्तात ! गच्छ भद्रन्ते यमुनायास्तटं शुचि । पुण्यं मधुवनं यत्र सान्निध्यं नित्यदा हरेः । स्नात्वानुसवनं तस्मिन् कालिन्द्याः सलिले शिवे । कृत्वोचितानि निवसन्नात्मनः कल्पितासनः । प्राणायामेन त्रिवृता प्राणेन्द्रियमनोमलम् । शनैर्व्युदस्याभिध्यायेन्मनसा गुरुणा गुरुम् । प्रसादाभिमुखं शश्वत् प्रसन्नवदनेक्षणम् । सुनसं सुभ्रुवं चारुकपोलं सुरसुन्दरम् । तरुणं रमणीयाङ्गमरुणोष्ठेक्षणाधरम् । प्रणताश्रयणं नृम्णं शरण्यं करुणार्णवम् । श्रीवत्साङ्कं घनश्यामं पुरुषं वनमालिनम् । शङ्खचक्रगदापद्मैरभिव्यक्तचतुर्भुजम् । किरीटिनं कुण्डलिनं केयूरवलयान्वितम् । कौस्तुभाभरणग्रीवं पीतकौषेयवाससम् । काञ्चीकलापपर्य्यस्तं लसत्काञ्चननूपुरम् । दर्शनीयतमं शान्तं मनोनयनवर्द्धनम् । पद्भ्यां नखमणिश्रेण्या विलसद्भ्यां समर्च्चताम् । हृत्पद्मकर्णिकाधिष्ण्यमाक्रम्यात्मन्यवस्थितम् । स्मयमानमभिध्यायेत् सानुरागावलोकनम् । नियतेनैकभूतेन मनसा वरदर्षभम् । एवं भगवतो रूपं सुभद्रं ध्यायतो मनः । निर्वृत्या परया तूर्णं सम्पन्नं न निवर्त्तते । जपश्च परमो गुह्यः श्रूयतां मे नृपात्मज ! । यं सप्तरात्रं प्रपठन् पुमान् पश्यति खेचरान् । ओं नमो भगवते वासुदेवाय । मन्त्रेणानेन देवस्य कुर्य्याद्द्रव्यमयीं बुधः । सपर्य्यां विविधैर्द्रव्यैर्देशकालविभागवित् । सलिलैः शुचिभिर्माल्यैर्वन्यैर्मूलफलादिभिः । शस्ताङ्कुरांशुकैश्चार्च्चेत्तुलस्या प्रियया प्रभुम् । लब्ध्वा द्रव्यमयीमर्च्चां क्षित्यम्ब्वादिषु वार्च्चयेत् । आभृतात्मा मुनिः शान्तो यतवाङ्मितवन्यभुक् । स्वेच्छावतारचरितैरचितं निजमायया । करिष्यत्युत्तमश्लोकस्तं ध्यायेद्धृदयङ्गतम् । परिचर्य्या भगवतो यावतीः

पूर्वसेविताः । ता मन्त्रहृदयेनैव प्रयुञ्ज्यान्मन्त्रमूर्त्तये । एवं कायेन मनसा वचसा च मनोगतम् । परिचर्य्यमाणो भगवान् भक्तिमत्परिचर्य्यया । पुंसाममायिनां सम्यग् भजतां भाववर्द्धनः । श्रेयो दिशत्यभिमतं यद्धर्म्मादिषु देहिनाम् । विरक्तश्चेन्द्रियरतौ भक्तियोगेन भूयसा । तं निरन्तरभावेन भजेताद्धा विमुक्तये । इत्युक्तस्तं परिक्रम्य प्रणम्य च नृपार्भकः । ययौ मधुवनं पुण्यं हरेश्चरणचर्च्चितम् । तपोवनं गते तस्मिन् प्रविष्टोऽन्तःपुरं मुनिः । अर्हितार्हणको राज्ञा सुखासीन उवाच ह । श्रीनारद उवाच । राजन् ! किं ध्यायसे दीर्घं मुखेन परिशुष्यता । किं वा न रिष्यते कामो धर्म्मो वार्थेन संयुतः । श्रीराजोवाच । सुतो मे बालको ब्रह्मन् स्त्रैणेनाकरुणात्मना । निर्व्वासितः पञ्चवर्षः सह मात्रा महान् कविः । अप्यनाथं वने ब्रह्मन् मा स्मादन्त्यर्भकं वृकाः । श्रान्तं शयानं क्षुधितं परिम्लानमुखाम्बुजम् । अहो मे बत दौरात्म्यं स्त्रीजितस्योपधारय । योऽङ्कं प्रेम्णारुरुक्षन्तं नाभ्यनन्दमसत्तमः । श्रीनारद उवाच । मा मा शुचः स्वतनयं देवगुप्तं विशाम्पते ! । तत्प्रभावमविज्ञाय प्रावृङ्क्ते यद्यशो जगत् । सुदुष्करं कर्म्म कृत्वा लोकपालैरपि प्रभुः । एष्यत्यचिरतो राजन् यशो विपुलयंस्तव । इति देवर्षिणा प्रोक्तं विश्रुत्य जगतां पतिः । राजलक्ष्मीमनादृत्य पुत्त्रमेवान्वचिन्तयत्" । "तत्राभिषिक्तः प्रयतस्तामुपोष्य विभावरीम् । समाहितः पर्य्यचरदृष्यादेशेन पुरुषम् । त्रिरात्रान्ते त्रिरात्रान्ते कपित्थबदराशनः । आत्मवृत्त्यनुसारेण मासं निन्येऽर्च्चयन् हरिम् । द्वितीयञ्च तथा मासं षष्ठे षष्ठेऽर्भको दिने । तृणपर्णादिभिः शीर्णैः कृतान्नोऽभ्यर्च्चयद्विभुम् । तृतीयञ्चानयन्मासं नवमे नवमेऽहनि । अब्भक्ष उत्तमश्लोकमुपाधावत् समाधिना । चतुर्थमपि वै मासं द्वादशे द्वादशेऽहनि । वायुभक्षो जितश्वासो ध्यायन् देवमधारयत् । पञ्चमे मास्यनुप्राप्ते जितश्वासो नृपात्मजः । ध्यायन् ब्रह्मपदैकेन तस्थौ स्थाणुरिवाचलः । सर्व्वतो मन आकृष्य हृदि भूतेन्द्रियाशयम् । ध्यायन् भगवतो रूपं नाद्राक्षीत् किञ्चनापरम् । आधारं महदादीनां प्रधानं पुरुषेश्वरम् । ब्रह्म धारयमाणस्य त्रयो लोकाश्चकम्पिरे । यदैकपादेन स पार्थिवात्मजस्तस्थौ तदङ्गुष्ठनिपीडिता मही । ननाम तत्रार्द्धमिभेन्द्रधिष्ठिता तरीव सव्येतरतः पदेपदे । तस्मिन्नभिध्यायति विश्वमात्मनो द्वारं निरुध्यासुमनन्यया धिया । लोका निरुच्छ्वासनिपीडिता भृशं सलोकपालाः शरणं ययुर्हरिम् । श्रीदेवा ऊचुः । नैवं विदामो भगवन् ! प्राणरोधं चराचरस्याखिलसत्त्वधाम्नः । विधेहि तन्नो वृजिनाद्विमोक्षं प्राप्ता वयं त्वां शरणं शरण्यम् । श्रीभगवानुवाच । मा भैष्ट बालं तपसो दुरत्ययान्निवर्त्तयिष्ये प्रतियात स्वधाम । यतो हि वः प्राणनिरोध आसीदौत्तानपादिर्म्मयि संगतात्मा । तएवमुत्सन्नभया उरुक्रमे कृतावनामाः प्रययुस्त्रिविष्टपम् । सहस्रशीर्षाऽपि ततो गरुत्मता मधोर्व्वनं भृत्यदिदृक्षयागतः । स वै धिया योगविपाकतीव्रया हृत्पद्मकोशे स्फुरितं तडित्प्रभम् । तिरोहितं सहसैवोपलक्ष्य बहिःस्थितं तदवस्थं ददर्श । तद्दर्शनेनागतसाध्वसः क्षितावबन्दताङ्गं विनमय्य दण्डवत् । दृग्भ्यां प्रपश्यन् प्रपिबन्निवार्भकश्चुम्बन्निवास्येन भुजैरिवाश्लिषन् । स तं विवक्षन्तमतद्विदं हरिर्ज्ञात्वास्य सर्व्वस्य च हृद्यवस्थितः । कृताञ्जलिं ब्रह्ममयेन कम्बुना पस्पर्श बालं कृपया कपोले । स वै तदैव प्रतिपादितां गिरं दैवीं परिज्ञातपरात्मनिर्णयः । तं भक्तिभावोऽभ्यगृणादसत्वरं परिश्रुतोरुश्रवसं ध्रुवक्षिति"ः । ततो ध्रुवेण स्तुतो भगवान् तस्मै यथा वरं दत्तवांस्तथा वर्णितं तत्रैव "यथाभिष्टुत एवं वै सत्सङ्कल्पेन धीमता । भृत्यानुरक्तो भगवान् प्रतिनन्द्येदमब्रवीत् । श्रीभगवानुवाच । वेदाहं ते व्यवसितं हृदि राजन्यबालक ! । तत् प्रयच्छामि भद्रं ते दुष्प्रापमपि सुव्रत ! । नान्यैरधिष्ठितं भद्र ! यद्भ्राजिष्णु ध्रुवक्षिति । यत्र ग्रहर्क्षताराणां ज्योतिषां चक्रमाहितम् । मेढ्यां गोचक्रवत् स्थास्नु परस्तात् कल्पवासिनाम् । धर्म्मोऽग्निः कश्यपः शुक्रो मुनयो ये वनौकसः । चरन्ति दक्षिणीकृत्य भ्रमन्तो यत् सतारकाः । प्रस्थिते तु वनं पित्रा दत्त्वा गां धर्म्मसंश्रयः । षट्त्रिंशद्वर्षसाहस्रं रक्षिताव्याहतेन्द्रियः । त्वद्भ्रातर्य्युत्तमे नष्टे मृगयायां तु तन्मनाः । अन्वेषती वनं माता दावाग्निं सा प्रवेक्ष्यति । इष्ट्वा मां यज्ञहृदयं यज्ञैः पुष्कलदक्षिणैः । भुक्त्वा चेहाशिषः सत्या अन्ते मां संस्मरिष्यसि । ततो गन्तासि मत्स्थानं सर्व्वलोकनमस्कृतम् । उपरिष्टादृषिभ्यस्त्वं यतो नावर्त्तते गतिः"

नक्षत्ररूपतत्सन्निवेशविशेषस्तत्रैव ५ स्क० उक्तो यथा "अथ तस्मात् (शनिलोकात्) परतस्त्रयोदशलक्षयोजनान्तरतो यत्तद्विष्णोः परमं पदमभिवन्दन्ति यत्र महाभागवतो ध्रुव औत्तानपादिरग्निनेन्द्रेण प्रजापतिना कश्यपेन धर्म्मेण च समकालयुग्भिः सह बहुमान दक्षिणतः क्रियमाण इदानीमपि कल्पजीविनामाजीव्य उपास्ते

तस्य महानुभाव उपवर्णितः । स हि सर्वेषां ज्योतिर्गणानां ग्रहनक्षत्रादीनां अनिमिषेणाव्यक्तरंहसा भगवता कालेन भ्राम्यमाणानां स्थाणुरिवावष्टम्भ ईश्वरेण विहितः शश्वदवभासते । यथा मेधीस्तम्भ आक्रमणपशवः संयोजितास्त्रिभिः सवनैर्यथा स्थानं मण्डलानि चरन्ति । एवं भगणा ग्रहादय एतस्मिन्नन्तर्बहिर्योगेन कालचक्र आयोजिता ध्रुवमेवावलम्ब्य वायुनोदीर्य्यमाणा आकल्पान्तं परितः क्रामन्ति । नभसि यथा मेघाः श्येनादयो वायुवशाः कर्म्मसारथयः परिवर्त्तन्ते । एवं ज्योतिर्गणाः प्रकृतिपुरुषसंयोगानुगृहीताः कर्मनिर्मितगतयो भुवि न पतन्ति । केचिदेतत् ज्योतिरनीकं शिशुमारसंस्थानेन भगवतो वासुदेवस्य योगधारणायामनुवर्णयन्ति । यस्य पुच्छाग्रेऽवाक्शिरसः कुण्डलीभूतदेहस्य ध्रुव उपकल्पितः” ५,२२,१स्क०अ० ।

सि०शि० सर्वनक्षत्राद्याधारौ द्वौ ध्रुवौ अङ्गीकृतौ यथा “निरक्षदेशे क्षितिमण्डलोपगौ ध्रुवौ नरः पश्यति दक्षिणेतरौ । तदाश्रितं खे जलयन्त्रवत् तथा भ्रमद्भचक्रं निजमस्तकोपरि । उदग्दिशं याति यथा नरस्तया तथा स्वान्नतमृक्षमण्डलम् । उदग्ध्रुवं पश्यति चोन्नतं क्षितेस्तदन्तरे योजनजाः पलांशकाः । योजनसंख्या भांशैर्गुणिता स्वपरिधिहृता भवन्त्यंशाः । भूमौ कक्षायां वा भागेभ्यो योजनानि च व्यस्तम्”शि० । “उदग्दिशं याति यथा यथा नर इत्यनेनापक्षारयोजनैरनुपातः सूचितः । यदि भूपरिधियोजनैश्चक्रांशा लभ्यन्ते तदापक्षारयोजनैः किमिति । फलमक्षांशाः । यदि चक्रांशमितपरिधिना भूपरिधिर्लभ्यते तदाक्षांशैः किमिति फलं निरक्षदेशस्वदेशयोरन्तरयोजनानि स्युः शेषं स्पष्टम् । एवं निरक्षदेशात् क्षितिचतुर्थांशे किल मेरुः । तत्र नवतिः ९० पलांशाः” प्रमि० । “सौम्यं ध्रुवं मेरुगताः खमध्ये याम्यं च दैत्या निजमस्तकोर्ध्वे । सव्यापसव्यं भ्रमदृक्षचक्रं विलोकयन्ति क्षितिजप्रसक्तम्” शि० ।

औत्पत्तिक उत्पत्त्या भावेन अवियुक्तः ठक् । १नित्यसंबन्धे शब्दार्थयोः सम्बन्धस्य नित्याविंयुक्तत्वात् औत्पत्तिकत्वम् जै० सू० भाष्ययोर्दर्शितं यथा

“औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत् प्रमाणं वादरायणस्यानपेक्षत्वात्” । सू०

“औत्पत्तिक” इति नित्यं ब्रूमः, उत्पत्तिर्हि भाव उच्यते लक्षणया । अवियुक्तः शब्दार्थयोर्भावः सम्बन्धः नोत्पन्नयोः पश्चात् सम्बन्धः, औत्पत्तिकः शब्दस्यार्थेन सम्बन्धः, तस्य अग्निहोत्रादिलक्षणस्य धर्मस्य प्रत्यक्षादिभिरनवगतस्य ज्ञानं निमित्तम् । कथं ? । उपदेशो हि भवति, “उपदेशः” इति विशिष्टस्य उच्चारणम् । अव्यतिरेकश्च ज्ञानस्य, न, हि तदुत्पन्नं ज्ञानं विपर्य्येति ! यच्च नाम ज्ञानं न तत् शक्यते वक्तुं ‘न एतदेवम्” इति, यथा विज्ञायते, न तथा भवति, यथैतन्न विज्ञायते, तथैतदिति, अन्यदस्य हृदये, अन्यद्वाचि स्यात्, एवं वदतो विरुद्धमिदं गम्यते, अस्ति नास्ति चेति । तस्मात् तत् प्रमाणमनपेक्षत्वात् । न ह्येवं सति प्रत्ययान्तरमपेक्षितव्यं, पुरुषान्तरं वापि, अयं प्रत्ययो ह्यसौ । वादरायणग्रहणं वादरायणस्येदं मतं कीर्त्त्यते वादरायणं पूजयितुं, नात्मीयं मतं पर्य्युदसितुम् ।

उत्पत्तिर्भवः १स्वकालः तत्र भवः ठक् । २स्वभावे स्वभावस्य यावद्द्रव्यभावित्वात् तथात्वम् । “मातुरनुग्रहादौत्पत्तिकेनैव संहननबलोपेताः पित्रा विभक्ताः” भा० ग०५,२,२१, तक्षिशम्याथ हर्म्यस्था औत्पत्तिकमनीषया भाग० ६,५,१० ।

औत्पात त्रि०उत्पातस्य तज्ज्ञापकशास्त्रस्य व्याख्यानो ग्रन्थः तत्रभवो वा ऋगयना० अण् । १उत्पातावेदकग्रन्थव्याख्याने ग्रन्थे २तत्रभवे च ।

औत्पातिक त्रि० उत्पाते दैवारिष्टे भवः ठक् १दैवारिष्टभवे- “औत्पातिकं मेघ इवाश्मवर्षम्” रघुः । “औत्पातिकं तदिह देव । विचिन्तनीयम्” उद्भटः । “औत्पातिके महाघोरे तथा दुःस्वप्नदर्शने” वटुकस्तवः उत्पाताय प्रभवति ठक् । उत्पातसम्पादनसमर्थे “प्रयाते तु ततः स्कन्दे बभूवौत्पातिकं महत्”भा०व०२३०अ० ।

औत्पाद त्रि० उत्पादं तदावेदकग्रन्थं वा वेत्त्यधीते वा तत्रभवो वा ऋगयना० अण् । १भावानामुत्पादवेत्तरि २तदावेदग्रन्थाध्येतरि ३तत्रभवे च ।

औत्पुट त्रि०उत्पुटेन निर्वृत्तादि सङ्कला० चतुरर्थ्याम् अण् । उत्पुटेन उन्मुद्रेण १निर्वृत्ते २तत्सन्निकृष्टदेशादौ च ।

औत्पुटिक त्रि० उत्पुटेन हरति उत्सङ्गा० ठक् । उत्पुटेन हारके ।

औत्पुतिक त्रि० उत्पुतेन हरति उत्सङ्गा० ठक् । उत्पवनसंस्कारान्वितेन हारके ।

औत्स त्रि० उत्से भवः अञ् । प्रस्रवणभवे स्त्रियां ङीप् ।

औत्सङ्गिक त्रि० उत्सङ्गेन हरति ठक् । क्रोडेन हारके ।

औत्सर्गिक त्रि० उत्सर्गं सामान्यविधिमर्हति ठञ् । सामान्यविधियोग्ये स्त्रियां ङीप् । [फञ् । उत्सर्गस्य गोत्रापत्ये ।

औत्सायन पुंस्त्री उत्स ऋषिभेदस्तस्य गोत्रापत्यम् अश्वा०

औत्सुक्य न० उत्सुकस्य भावः ष्यञ् । उत्कण्ठायाम् । "औत्सुक्येन कृतत्वरा सहभुवा व्यावर्त्तमाना ह्रिया" रत्नावली "तमाहितौत्सुक्यमदर्शनेन" रघुः । "रथचरणसमाह्वस्तावदौत्सुक्यनुन्ना" माघः "इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे" मेघ० । तच्च अलङ्कारोक्त व्यभिचारिभावभेदः सा०द०निर्वेदावेगेत्याद्युपक्रमे "औत्सुक्योन्मादशङ्का" इत्युक्त्वा "इष्टानवाप्तेरौत्सुक्यं कालक्षेपासहिष्णुता" लक्षितम् । २इच्छामात्रे च । "औत्सुक्यनिवृत्त्यर्थं यथा क्रियासु प्रवर्त्तते लोकः" सा०का० । "औत्सुक्यमिच्छा सा च इष्यमाणप्राप्तौ निवर्त्तते इष्यमाणञ्च स्वार्थं इष्टलक्षणत्वात् फलस्य" त०कौ० । "मनोयस्येन्द्रियस्येह विषयान् याति सेवितुम् । तस्यौत्सुक्यं संभवति प्रवृत्तिश्चोपजायते" भा०व० ११४ श्लो० ।

औदक त्रि० उदकेन पूर्णं गृह्णाति उदकस्येदं वा अण् । १उदकपूर्णकुम्भग्राहके "अपरेणाग्निमौदकोऽनुसंव्रज्य पाणिग्राहं मूर्द्धदेशेऽवसिञ्चति" गोभिलः । "औदको गृहीतोदकुम्भः" सं०त०रघु० । २उदकसम्बन्धिनि । "औदकेनैव विधिना निर्वपेत् दक्षिणामुखः" मनुः । उदके भवः अण् । ३जलभवे च । "यानि चैवं प्रकाराणि स्थलजान्यौदकानि च" "स्थलजौदकशाकानि पुष्पमूलफलानि च" मनुः

औदकि पुंस्त्री "उदङ्क उदक (संज्ञायाम्)" पा०ग० बाह्वा० अपत्ये इञ् । उदकनामर्षेरपत्ये ततः स्वार्थे दामन्या० छ । औदकीय तत्रार्थे । एवम् औदङ्कि औदङ्कीय इत्यपि उदङ्कापत्ये पुंस्त्री । [स्यापत्ये ।

औदग्मायनि पुंस्त्री उदग्मस्यर्षेरपत्यं तिका० फिञ् । उदग्म-

औदञ्चन त्रि० उदच्यते उत्क्षिप्य भ्रियतेऽस्मिन् उदञ्चनो जलाधारः मणिकस्तस्येदम् अण् । मणिकस्थिते जलादौ (जालारजल) "एनां (शफरीम्) तत आदाय न्यधादौदञ्चनोदके" भाग० ८,२४,१५ । "औदञ्चनोदके मणिकस्थजले" श्रीधरः उदञ्चनस्य सन्निकृष्टदेशादि अरीहणादि० वुञ् । औदञ्चनक मणिकस्य सन्निकृष्टदेशादौ त्रि० । [नामकर्षेरपत्ये ।

औदश्रवि पुंस्त्री उदश्रोरपत्यं बाह्वा० इञ् । उदश्रु-

औदश्रि पुंस्त्री उदश्रापत्यम् इञ् । १उदश्रापत्ये ततः यूनि फिञ् पैला० तस्य लुक् । २तदीययुवापत्येऽपि ।

औदनिक त्रि० ओदनाय प्रभवति संतापा० ठञ् । ओदनमित्यादनाय समर्थे सूपकारे ।

औदन्य पु० उदन्यायुक्ते ऋषौ भवः अण् । पिपासायुक्तर्षिभवे मुण्डिभे ऋषौ । "एतां ह वै मुण्डिभ औदन्यः ब्रह्महत्यायै प्रायश्चित्तिं विदाञ्चकार" शत०ब्रा० १३,३,५,४ । तस्यापत्ये तु इञ् । औदन्यि इत्येव तत्रार्थे ततः युवप्रत्ययस्य फिञः पैला० लुक् । तदीययुवापत्ये च ।

औदपान त्रि० उदपानादागतः शुण्डिका० अण् । आयस्थानरूपोदपानादागते १राजग्राह्यकरादौ । उदपाने भवः पलद्या० अण् । २उदपाननामग्रामभवे करादौ त्रि० । उदपाने जलाधारस्थानभेदे भवः उत्सा०अञ् । ३उदपानभवे त्रि० । स्त्रियां सर्वत्र ङीप् ।

औदभृज्जि पुंस्त्री उदभृज्जस्यापत्यम् इञ् । १उदभृज्जस्यापत्ये ततो युवप्रत्ययस्य पैलादि० लुक् । २तदीययुवापत्ये च । एवं औदमज्जि औदमेघि औदव्रजि औदशुद्धि इत्येतेऽपि शब्दाः तत्तदपत्ये तत्तद्युवापत्ये च । [सम्बन्धिनि ।

औदमेधीय त्रि० उदमेघेरिदम् रैवतिकादि० छ । औदमेधि

औदमेयि पुंस्त्री उदमेयस्यापत्यम् इञ् । उदमेयस्यापत्ये ततः मनुष्यजातित्वात् स्त्रियां ङीष् । [स्त्रियां ङीप् ।

औदयिक त्रि० उदये लग्नकाले भवः ठञ् । लग्नकालभवे

औदरिक त्रि० उदरे प्रसितः ठक् । आद्यूने, (पेटुक) उदरमात्रपूरणापेक्षके । "ऐश्वर्य्यवन्तं रौद्रं च शूरं चण्डमसूयकम् । एकाकिनमौदरिकमाहुः सत्त्वमीदृशम्" सुश्रुते तस्यासुरसत्त्वलक्षणम् । अमरे विजिगीषाविवर्जितस्य तथात्वमुक्तम् । विजिगीषा च विगानेच्छा सा च स्वोदरपूरणासक्ततया निन्देच्छा तस्याः त्याग एवास्य प्रवृत्तिः । "सर्व्वमेवौदरिकस्याभ्यवहार्य्याय कल्पते" नाट०

औदर्य्य त्रि० उदरे भवः यत् उदर्य्यः ततः स्वार्थे अण् । १उदरभवेऽनलादौ । २अभ्यन्तरप्रविष्टे च । "स त्वयाराधितः शुक्लो वितन्वन् मामकं यशः । छेत्ता ते हृदयग्रन्थिमौदर्य्यो ब्रह्मभावनः" भाग० ३.२४,५ ।

औदल त्रि० चिकितगालवकालववमनुतन्तुकुशिलानां वैश्वामित्रदेवरातौदलेति" आ०श्रौ० १२,१४,२, उक्ते चिकितादीनां षण्णां प्रवरर्षिभेदे ।

औदवापि पुंस्त्री उदवापस्यापत्यम् इञ् । उदवापापत्ये स्त्रियां ङीप् । तस्येदं रैवतिका० छ । औदवापीय तत् सम्बन्धिनि त्रि० ।

औदवाहि पु० उदवाहस्यापत्यम् इञ् । ऋग्वेदिनाम्

प्राचीनावीतितया तर्पणीयर्षिभेदे । द्वादशर्षितर्पणानन्तरम् । "प्राचीनावीती" "सुमन्तुजैमिनिवैशम्पायनपैलसूत्रभाष्यभारतमहाभारतधर्माचार्या जानन्तिबाहविगार्ग्यगौतमशाकल्यबाभ्रव्यमाण्डव्यमाण्डूकेया गार्गी वाचक्नवी वडवा प्रातिथेयी सुलभा मैत्रेयी कहोलं कौषीतकं पैङ्ग्यं महापैङ्ग्यं सुयज्ञं साङ्ख्यायनमैतरेयं महैतरेयं शाकलं बाष्कलं सुजातवक्त्रमौदवाहिं महौदवाहिं सौजामिं शौनकमाश्वलायनं ये चान्ये आचार्य्यास्ते सर्वे तृप्यन्त्विति" आश्व०गृ० ३,४,४, "त्रयोविंशति वाक्यानि तत्र कहोलादिषु अर्थात् तर्पयामीतिशब्दः कार्य्यः । सर्व्वत्र प्रतिवाक्यं तर्पणं कुर्य्यात् "एकमन्त्राणि कर्म्माणीति" न्यायात्" नारा० । "औदवाहेश शाण्डिल्याच्च शाण्डिल्यः" शत०ब्रा० १४,७,३,२६, वंशवर्णने

औदश्वित त्रि० उदश्विति तक्रभेदे संस्कृतः अण् । उदश्विद्रूपतक्रे संस्कृतभक्ष्यद्रव्ये । पक्षे ठक् उदश्वित्कोऽप्यत्र उदश्विदिव अङ्गुल्या० ठक् । औदश्वित्क तत्सदृशे त्रि० ।

औदस्थान त्रि० उदस्थानं शीलमस्य छत्रा० ण । १उदस्थानशीले । उदस्थाने भवः उत्सा० अञ् । २उदकस्थानभवे च ।

औदार्य्य न० उदारस्य भावः गुणवचनत्वात् ष्यञ् । उदारतायाम् । "औदार्य्यन्तु नायकयोरयत्नसिद्धसात्त्विकालङ्कारविशेषः । यथाह सा० द० "शोभा कान्तिश्च दीप्तिश्च माधुर्य्यञ्च प्रगल्भता । औदार्य्यं धैर्य्यमित्येते सप्तैव स्युरयत्नजाः" इति विभज्य । "औदार्य्यं विनयः सदेति" लक्षितम् । सात्त्विकपुरुषगुणभेदश्च यथाह तत्रैव । "शोभा विलासो माधुर्य्यं गाम्भीर्य्यं धैर्य्यतेजसी । ललितौदार्य्यमित्यष्टौ सत्त्वजाः पौरुषा गुणाः" इति विभज्य । "दानं सप्रियभाषणमौदार्य्यं शत्रुमित्रयोः समतेति" लक्षितम् ।२वाक्यस्यार्थसम्पत्तौ च ।"ससौष्ठवौदार्य्यविशेषशालिनीं विनिश्चितार्थामिति वाचमाददे" किरा० । "औदार्य्यमर्थसम्पत्तिः" मल्लि० । तच्च वाग्गुणभेदः "संस्कारवत्त्वमौदीर्य्यमित्यादिना" हेमच०वाग्गुणदर्शने उक्तेः ।

औदासीन्य न० उदासीनस्य भावः ष्यञ् । शुभाशुभयोरुपेक्षायाम् ताटस्थ्ये । "पर्य्याप्तोऽसि प्रजाः पातुमौदासीन्येन वर्त्तितुम्" रघुः । २राहित्ये ३रागनिवृत्तौ च "न च स्वभावप्राप्तहन्त्यर्थानुरागेण नञः शक्यमप्राप्तनिषेधार्थत्वं कल्पयितुम्, हननक्रियानिवृत्त्यौदासीन्यव्यतिरेकेण" "अभावबुद्धिश्चौदासीन्यकारणम्" "तस्मात् प्रकृतक्रियानिवृत्त्यौदासीन्यमेव "ब्राह्मणो न हन्तव्य" इत्यादिषु प्रतिषेधार्थं मन्यामहे" इति च शारीरकभाष्यम् ।

औदास्य न० उदास्ते उद्+आस-अच् तस्य भावः ष्यञ् । वैराग्ये रागशून्यतायाम् २मनोयोगविरहे । "औदास्यसंविदवलम्बितशून्यमुद्रामक्ष्णोर्द्वयोर्निपतितामवगम्य भैम्याः" नैष० "क्षौणीविलसनहेतोर्व्वयमपि कुब्जाः किमौदास्यम्" पद्यावली ।

औदुम्बरक पु० उदुम्बरस्य विषयो देशः राजन्या० वुञ् । १उदुम्बरविषये देशे । तस्य समूह इत्यधिकारात् राजन्या० वुञ् । २तत्समूहे न० ।

औदुम्बरायण पुंस्त्री उदुम्बरस्य गोत्रापत्यम् नडा० फक् । उदुम्बरस्य गोत्रापत्ये । अनन्तरापत्ये तु इञ् । औदुम्बरि तदीयानन्तरापत्ये पुंस्त्री स्त्रियां ङीप् ।

औद्गात्र न० उद्गातुर्धर्म्मः ऋदन्तत्वात् अञ् । उद्गातुः ऋत्विग्भेदस्य १धर्म्मे "स्वरित्यौद्गात्र आहवनीये" कात्या० २५,१,८, उद्गातृवेदावहिते भ्रेषे स्वरित्याहवनीये जुहोति" कर्कः । उद्गातुः कर्म्म भावो वा उद्गात्रा० अण् । उद्गातुः उच्चैर्गानात्मके २कर्म्मणि ३तद्भावे च ।

औद्गाहमानि पुंस्त्री उद्गाहमानस्यापत्यम् इञ् ततो यूनि फक् तस्य पैला० लुक् । १उद्गाहमानस्यापत्ये २तदीये युवापत्ये च स्त्रियां गौरा० ङीष् । ततो भवादौ गहा० छ । औद्गाहमानीय तद्भवादौ त्रि० ।

औद्ग्रभण त्रि० उद्ग्रहणाय साधु अण् वेदे हस्य भः । ऊर्द्धग्रहणसाधने "सर्वाणि ह वै दीक्षाया यजूंष्यौद्ग्रभणानि" उद्ग्रभ्नीते वा एषोऽस्माल्लोकाद्देवलोकमभि यद्दीक्षते" शत०ब्रा० ३,१,४,१, "औद्ग्रभणानि जुहोति स्थाल्याः स्रुवेणात्ता इति प्रतिमन्त्रम्" कात्या० ७,२,१६ । भत्वाभावे औद्ग्रहणमप्यत्र ।

औद्दण्डक त्रि० उद्दण्डस्य सन्निकृष्टदेशादि अरीहणा० वुञ् । उद्दण्डसन्निकृष्टदेशादौ ।

औद्दालक न० उद्दालेन उद्दलनेन निर्वृत्तः अण् संज्ञायां कन् । "प्रायो वल्मीकमध्यस्थाः कपिलाः स्वल्पकीटकाः । कुर्वन्ति कपिलं स्वल्पं तत् स्यादौद्दालकं मधु" इत्युक्ते वल्मीककीटसम्भृते मधुनि "औद्दालकं रुचिकरं स्वर्य्यं कुष्ठविषापहम् । कषायमुष्णमम्लञ्च कटुपाकञ्च पित्तकृत्" तद्गुणा वैद्यकोक्ताः ज्ञेयाः ।

औद्दालकि पुंस्त्री उद्दालकस्यर्षेरपत्यम् इञ् । उद्दालकापत्ये गौतमे ऋषौ स्त्रियां मनुष्यजातित्वात् ङीष् । ततः

यूनि फक्। औद्दालकायन तदीययुवापत्ये प्राच्यभरते तु बह्वच्कत्वात् तस्य बहुषु लुक्। उद्दालकाः। तदीययुवापत्यानि प्राच्यानि भारतानि वा

औद्धत्य न० उद्धतस्य भावः। अविनीतभावे तच्च "असूयान्यगुणर्द्धीनामौद्धत्यादसहिष्णुता" सा०द० उक्तलक्षणम्।

औद्धारिक त्रि० उद्धाराय उद्धृत्य दानाय प्रभवति ठञ्। विभागकाले उद्धारार्थं देये द्रव्यभेदे। "विप्रस्यौद्धारिकं देयमेकांशश्च प्रधानतः" मनुः।

औद्दालकि पु० उद्दालकस्यर्षेरपत्यम् इञ्। उद्दालकर्षेः पुत्रे श्वेतकेतौ ऋषौ। "श्वेतकेतुर्हवा औद्दालकिरस्य प्राबिर्वरं वेद" शत०ब्रा० १,८,२४,१। [राजनि०।

औद्भिज्ज न० उद्भिद्य जायते जन-ड स्वार्थेऽण्। पांशुलवणे

औद्भिद न० उद्भिनत्ति उद्+भिद-क-स्वार्थेऽण्। १पांशुलवणे। "औद्भिदं पांशुलवणं यज्जातं भूमितः स्वयम्। क्षारं गुरु कटुस्निग्धं श्लेष्मलं वातनाशनमिति" तस्य गुणाः "विदार्य भूमिं निम्नां यन्महत्या धारया स्रवेत्। तत्तोयमौद्भिदं नाम वदन्तीति महर्षयः" इत्युक्ते २जलभेदे च "औद्भिदं वारि पित्तघ्नमविदाह्यतिशीतलम्। प्रीणनं मधुरं बल्यमीषद्वातकरं लघु"। वैद्यकान्तरम्

सुश्रुते आन्तरिक्षजलमुक्त्वा "तस्यालाभे भौमं तच्चाकाशगुणबहुलं तत्पुनः सप्तविधम्। तद्यथा कौपं नादेयं सारसं ताडागं प्रास्रवणमौद्भिदं चौण्ठ्यमिति। तत्र वर्षास्वान्तरिक्षमौद्भिदं वा सेवेत महागुणत्वात्" इत्यादि उक्त्वा "कफघ्नं दीपनं हृद्यं लघु प्रस्रवणोद्भवम्। मधुरं पित्तशमनमविदाह्यौद्भिदम् स्मृतम्"। तद्गुणाः उक्ताः। औद्भिदलवणगुणास्तु तत्रैव। "लघु तीक्ष्णोष्णमुत्क्लेदि सूक्ष्मं वातानुलोमनम्। सुतिक्तं कटु संक्षारं विद्याल्लवणमौद्भिदम्"

औद्भिद्य न० उद्भिदोभावः ष्यञ्। वृक्षादीनामुत्पत्तौ। "क्षेत्रं च म औद्भिद्यं च मे यज्ञेन कल्पन्ताम्" यजु० १८,९, उद्भिदोभावः औद्भिद्यं चूतादितरोरुत्पत्तिः वेददी०।

औद्याव त्रि० उद्यावस्य व्याख्यानोग्रन्थः तत्र भवो वा ऋगयना० अण्। १उद्यावव्याख्यानग्रन्थे २तत्र भवे च।

औद्वाहिक त्रि० उद्वाहकाले लब्धं दीयते वा ठञ्। विवाहकाले १लब्धे दीयमाने च "विद्याधनन्तु यद्यस्य तत्तस्यैव धनं भवेत्। मैत्रमौद्वाहिकञ्चैव माधुपर्किकमेव च" स्मृतिः "पितृद्रव्याविनाशेन यदन्यत् स्वयमर्जयेत्। मैत्रमौद्वाहिकञ्चैव दायादानां न तद्भवेत्" याज्ञ०। तत्सर्वैरविभाज्यम्। [हंसे २तत्सन्निकृष्टदेशादौ च

औद्वेप त्रि०उद्वेप+चतुरर्थ्याम् सङ्का० अण्। उद्वेपेन १नि-

औधस त्रि० ऊधस इदम् अण्। ऊधःसम्बन्धिनि "यश्च अ- न्ध्यनुदिनं नैव दोग्ध्यौधसं पयः" भाग० ४,१०,१९, भवार्थे तु शरीरावयवत्वात् यत् ऊधस्यमित्येव। "अ- धस्यमिच्छामि तवोपभोक्तुम्" रघुः। औधस्यमिति क- चित् पाठः स्वार्थेऽणन्ततया समर्थ्यः।

औन्नेत्र न० उन्नेतुः कर्म भावो वा उद्गात्रादि० अञ्। उन्नेतुः १कर्मणि उन्नयने २तद्भावे च। तस्य धार्म्यांम् कृदन्तत्वात् अञ्। २उन्नेतृधर्म्मे च।

औपकर्णिक त्रि० उपकर्णं प्रायभवः ठक्। कर्णसमीपे प्रायप्रभवे। "औपकर्णिकलोचनः"। भट्टिः।

औपकलाप्य त्रि० उपकलापं भवः परिमुखा० ञ्य। कलापसमीपभवे।

औपकायन पुंस्त्री उपकस्य गोत्रापत्यं नडा० फक्। उपकस्य गोत्रापत्ये। बहुत्वे द्वन्द्वेऽद्वन्द्वे च वा फको लुक्। उपकाः उपकायनाः। उपकलामकाः औपकायनलामकायनाः।

औपगव पुंस्त्री उपगतोगौरस्य उपगुर्गोपः तस्यापत्यम् अण्। १गोपालकपुत्रे २तद्याजिपुत्रे च लक्षणया उपगुशब्दस्तद्याजिविप्रोऽपि उपगुशब्देनोच्यते "यं वर्षं याजयेद्यस्तु स तद्दर्शत्वमाप्नुयात्। सद्योवर्षेण वर्षैश्चेत्येवमेवाब्रवीद्भृगुः" हारीतोक्तेः। तत्सम्बन्धिनि ३लक्षणे ४अङ्के ५संघे च तस्यापत्ये तु स्त्रियां ङीप्। औपगवस्येदम् गोत्रचरणात् वुञ्" पा० वुञ्। औपगवक औपगवसम्बन्धिनि "तत आगत" इत्यधिकारे "गोत्रादङ्कवत्" पा० वुञ्। औपगवक ततआगतेऽर्थे। तेषां समूहः गोत्रोक्षोष्ट्रेत्यादिना वुञ्। औपगवक तत्समूहे न० औपगवोभक्तिरस्य "गोत्रक्षत्रियाख्येभ्यो बहुलम् वुञ्"पा०। औपगवक तद्भक्तियुक्ते त्रि

औपगवि पुंस्त्री उपगतो गां गिरं पतित्वेन उपगवोगीष्पतिस्तस्यापत्यम् छात्रो वा इञ्। १गीष्पतेरपत्ये २तच्छात्रे उद्धवे पु० "नर्णमिव पुलिने यमस्वसुस्तां समुषित औपगविर्निशां ततोऽगात्" भाग०३,४,२८ "औपगविरुद्धवः" श्रीधरः"

औपग्रस्तिक पु० उपग्रस्तं ग्रासकालं भूतः सर्वतया व्याप्तः "तमधीष्टोभृतो भूतोभावी वा" पा० ठञ्। उपग्रासकालस्य सर्वतया व्यापके १चन्द्रे २सूर्य्ये च शब्दर०

औपच(ज)न्धनि पु०उपच(ज)न्धनस्यापत्यम् इञ्। ऋषिभेदे०

ब्राह्मण वंशीये ऋषिभेदे। "औपच(ज)न्धनेरौपच(ज)न्धनिः" शत० १४,५,५,२१। १४,७,३,२६, ब्राह्मणे च।

औपचारिक पु० उपचार+स्वार्थे—विनयादि० ठक्। उपचारे उपचारश्च लक्षणया बोधनम् सेवनञ्च। उपचारः प्रयोजनमस्य ठञ्। उपचारहेतुके त्रि०। स्त्रियां ङीप्। औपचारिकी उक्तिः।

औपच्छन्दसिक त्रि० उपच्छन्दसा निर्वृत्तं वा० ठक्। उपच्छन्देन निर्वृत्ते। "आतन्वानं सुरारिकान्ताखौपच्छन्दसिकं क्रीडा विनोदम्" छन्दोमञ्ज०। "षड्विषमेऽष्टौ समे कलास्ताश्च समे स्युर्नो निरन्तराः। न समात्र पराश्रिता कला" इति वैतालीयाद्यलक्षणयुक्ते "पर्य्यन्ते र्यौ तथैव शेषमौपच्छन्दसिकं सुधीभिः" वृ० र० उक्ते २मात्रावृत्तभेदे न०। "पुष्पिताग्राभिधं केचिदौपच्छन्दसिकं विदुः" इत्युक्ते ३पुष्पिताग्राख्यवर्णवृत्तच्छन्दोभेदे च।

औपजानुक त्रि० उपजानु जानुसमीपे प्रायभवः ठक्। जानुसमीपपर्य्यन्तव्यापके "पाणी यस्यौपजानुकौ" भट्टिः।

औपतस्विनि पु० उपतस्विनस्यापत्यम् इञ्। उपतस्विनस्यापत्ये रामनामके ऋषौ। "तदु होवाच राम औपतस्विनिः" शत० ब्रा० ४,६,१,७।

औपदेशिक त्रि० उपदेशेन जीवति वेतना० ठक्। उपदेशोपजीविनि। उपदेशेन प्राप्तः वा० ठक्। २उपदेशेन प्राप्ते च

औपद्रविक त्रि० उपद्रवमधिकृत्य कृतो ग्रन्थः ठक्। उपद्रवाधिकारेण सुश्रुतान्तर्गते ग्रन्थभेदे स च "अथात औपद्रविकमध्यायं व्याख्यास्यामः" इत्युपक्रम्य उत्तरतन्त्रागतः सुश्रुतकृतः।

औपद्रष्ट्र पु० उपद्रष्टृ+स्वार्थे ष्यञ्। पुरुषमेधीये देवभेदे। "विविक्त्यै क्षत्तारम्, औपद्रष्ट्र्यायानुक्षत्तारम्" यजु० ३०,१३। तत्र तदुद्देशेनानुक्षत्ता द्वारपालसेवकः आलभ्यत्वेन विहितः।

औपधर्म्य उपधर्म+स्वार्थे चातुर्व० ष्यञ्। अपकृष्टधर्मे। "लोकान् भ्रतां मतिविमोहमतिप्रलोभं वेषं विधाय बहु भाष्यत औपधर्म्यम्" भाग० २,७,७८।

औपधेनव पु० उपगताधेनुरस्य तस्यापत्यम् अण्। सुश्रुतोक्ते धन्वन्तरिं प्रति प्रश्नकारके ऋषिभेदे। "काशीराजं दिवोदासं धन्वन्तरिमौपधेनववैतरणौरभ्रपुष्कलावतकरवीर्य्यगोपुररक्षितसुश्रुतप्रभृतयः ऊचुः। "औपधेनवमौरभ्रं सौश्रुतं पौष्कलावतम्" सुश्रु०। [रथाङ्गे।

औपधेय न० उपधीयते इत्युपधिः रथाङ्गं ततः स्वार्थे ढञ्।

औपनायनिक त्रि० उपनयनं प्रयोजनमस्य ठक् अनुश० द्विपदवृद्धिः कुल्लू०। वस्तुतः उपनायनशब्दोऽपि उपनयनार्थे प्रागुक्तः ततः ठक् इत्येव न्याय्यम्। उपनायनप्रयोजनके विधाने "एष प्रोक्तो द्विजातीनामौपनायनिको विधिः" मनुः। उपनायनाय हितः ठञ्। २उपनयसाधने च। ३ब्रह्मचारिवियां काल औपनायनिकः परः" याज्ञ०।

औपनासिक त्रि० उपनासं भवः ठञ् स्त्रियां ङीप्। नासासमीपभवे। "द्विद्वौ च नासायां तासामौपनासिकाश्चतस्रस्ताः परिहरेत्" सुश्रुतः।

औपनिधिक न० उपनिधिरेव स्वार्थे ठक्। "वासनस्थमनाख्याय हस्तेऽन्यस्य यदर्प्यते। द्रव्यं तदौपनिधिकं प्रतिदेयं तथैव तत्" याज्ञ० विवृतिरुपनिधिशब्दे दृश्या।

औपनिषत्क त्रि० उपनिषदा तदुक्तोपदेशेन जीवति वेतना० ठक्। उपनिषदुक्तोपदेशेनोपजीविनि।

औपनिषद पु० उपनिषत्स्वेवाभिव्यज्यते शैषिकोऽण्। उपनिषन्मात्रवेद्ये १परमात्मनि। "तन्त्वौपनिषदं पुरुषं पृच्छामि" वृ० उ०। उपनिषत् ब्रह्मविद्या तस्या इदम्। २ब्रह्मप्रतिपादके वाक्यादौ स्त्रियां ङीप्। "विविधाश्चौपनिषदीरात्मसंसिद्धये श्रुतीः" मनुः। उपनिषदि भवः प्रकाश्यः तस्य व्याख्यानो ग्रन्थो वा ऋगयना० अण्। उपनिषत्प्रकाश्ये ३ब्रह्मणि तस्य व्याख्याने ४ग्रन्थे च।

औपनीविक त्रि० उपनीवि नीविसमीपे प्रायभवः ठक्। नीविसमीपे प्रायभवे "औपनीविकमरुन्ध किल स्त्री वल्लभस्य करमात्मकराभ्याम्" माघः "वक्षोदुर्बलरचार्यमसिर्येनौपनीविकः" भट्टिः।

औपपक्ष्य त्रि० उपपक्षं बाहुमूलं तस्येदम् ष्यञ्। बाहुमूलसम्बन्धिनि। "तस्मादिमाः प्रजा लोमशा जायन्ते यस्मादासां पुनरिव श्मश्रूण्यौपपक्ष्याणि दुर्वीरणानि जायन्ते" शत० ब्रा० ११,४,१,६। "उपपक्षं बाहुमूलं तत्सम्बन्धीनि" भा०।

औपपत्तिक त्रि० उपपत्त्या कल्पितम् ठक्। उपपत्त्या १कल्पिते २युक्ते। "औपपत्तिकमाहारं प्रयच्छस्वेति भारत!" भा० अनु० ९२ अ०।

औपपातिक त्रि० उपपातेन उपपातकेन गोवधादिना संसृष्टः ठक्। उपपातकैः संसृष्टे "पितृद्विट् पतितः षण्डो यश्च स्यादौपपातिकः" नार० "यश्च स्यादुपपातकीति" प्रकाशधृत पाठः। [बाहोरपत्ये।

औपबाहवि पुंस्त्री उपबाहोरपत्यम् बाह्वा० इञ्। उपगत

औपभृत त्रि० उपभृता पात्रेण सञ्चितः शैषिकोऽण् । १उपभृत्पात्रेण सञ्चिते हविरादौ । "ब्रह्मानुज्ञातोऽनुयाजैस्त्रिभिश्चरत्यौपभृतं समानीय" कात्या० ३,५,२ अध्वर्युरौपभृतमाज्यं सर्वं जुह्वां समानीय" कर्कः । तस्येदम् अण् । २उपभृत्सम्बन्धिनि "औपभृतासादनम्" कात्या० ५,४,२८, औपभृतमुपभृत्सम्बन्ध्यासादनम्" कर्कः । "सव्या औषिरित्यौपभृतानि" कात्या०६,७,७ ।

औपमन्यव पुंस्त्री उपमन्योरपत्यं विदा० अञ् । उपमन्योरपत्ये स्त्रियां ङीप् । "प्राचीनशालऔपमन्यवः सत्ययज्ञः पौलुषिः" । "औपमन्यव ! किं त्वमात्मानमुपास्स्व ?" इति च छा०उ० ।

औपमिक त्रि०उपमया निर्द्दिष्टः ठक् । उपमया निर्द्दिष्टे । "अभ्यासकाया इत्यनिर्वाहे औपमिकः" 'मधु सोमसित्यौपमिकं माद्यतेः". "पीपिलिकामध्येत्यौपमिकं ...पिलिका मेलतेर्गतक ...:" इति च निरु० ।

औपम्य न० उपमा+चातु स्वार्थे ष्यञ् । १उपमायाम् २सादृश्ये "प्राणा यथा मोऽभीष्टा भूतानामपि ते तथा । आत्मौपम्येन सर्वत्र दयां कुर्वन्ति साधवः" हितोप० । "आत्मौपम्येन सर्वत्र" गीता "सा पूर्णा यदि सामान्यधर्म औपम्यवाचि च" । "औपम्यवाचिनो लोपसमासे तद्धिते द्विधा" इति च सा०द० ।

औपयज त्रि० उपयज इदम् अण् । उपयजः सम्बन्धिनि उपयट् च तच्छब्दे दर्शितः । "मार्जिते प्रेष्यत्यग्नीदौपयजानङ्गारानाहरति" कात्या० ६,८,७,

औपयिक त्रि० उप+अय—घञ् उपायस्तेन लब्धः ठक् ह्रस्वश्च । १उपायलब्धे, २युक्ते न्यायागतवस्तुनि च । "एतत्तव महाराज ! पुत्रेषु तेषु चैव हि । इत्तमौपयिकं मन्ये भीष्मेण सह भारत !" भा०आ०२०४अ० । स्त्रियां ङीप् । "नचैवौपयिकी भार्य्या मानुषी कृपणा तव" भा० व० २८०अ० "यदत्रौपयिकं कार्य्यं तच्चिन्तयितुमर्हसि" भा०उ० १७७ अ० । उपाय एव विनया० स्वार्थे ठक् ह्रस्वश्च । २उपाये पु० । "शिवमौपयिकं गरीयसीम्" किरा० ।"औपयिकम् उपायम्" मल्लि० ।

औपयोगिक त्रि० उपयोगः प्रयोजनमस्य ठञ् । उपयोगनिमित्ते "अथातः स्नेहौपयोगिकं चिकित्सितं व्याख्यास्यामः" सुश्रु० स्त्रियां ङीष् ।

औपरिष्ट त्रि० उपरिष्टात् भवः अण् । अमेहक्कतसिलेभ्य एव"वार्त्ति०नियमात् न ल्यप् टिलोपः । उपरिष्टाद्भवे ।

औपरोधिक त्रि० उपरोधः प्रयोजनमस्य ठक् । १उपरोधनिमित्ते २पैलवे दण्डे पु० हेमच० ।

औपल त्रि० उपलादागतः शुण्डिका० अण् । १आयस्थानरूपोपलादागते । उपलस्येदम् अण् । २प्रस्तरसम्बन्धिनि "यथा प्लवेनौपलेन निमज्जत्युदके तरन्" मनुः ।

औपवसथिक त्रि० उपवसथे भवः ठञ् । उपवसथकर्त्तव्ये कर्म्मादौ । उपवसथश्च यामः यागपूर्वदिनश्च उपवसथशब्दे उक्तः । ष्यञ् औपवसथ्य तत्रार्थे । "अग्निप्रणयनीया औपवसथ्येऽनियमः" आश्व०श्रौ० ४,१,२६ । स्वार्थे ष्यञ् । "यागपूर्व्वदिने च । "औपवसथ्येऽह्नि" श्रुतिः ।

औपवस्त न० उपवस्तमेव प्रज्ञा० अण् । १उपवस्ते उपवस्तुः कर्म अण् । २उपवासे । उपवस्ता प्राप्तोऽस्येति विग्रहः "ऋतोरण्" पा० स्त्रप्रदर्शनं प्रामादिकमेव । तत्र ऋतुशब्दस्यैव ग्रहणं न तु ऋदन्तस्य तथात्वे ऋतोऽण् इत्येव स्यात् आर्त्तवमित्युदाहरणं चासङ्गतम् इति बोध्यम् "माषान् मधुमसूरांश्च वर्ज्जयेदौपवस्त तत्" स्मृतिः

औपवास त्रि० उपवासे दीयते व्युष्टा० अण् । उपवासव्रते दीयमाने द्रव्ये ।

औपवासिक त्रि० उपवासे साधु गुडा० ठञ् । १उपवासे साधौ । तस्मै प्रभवति सन्तापा० ठञ् । २उपवाससमर्थे च

औपवास्य न० उपवास+चातुर्व० स्वार्थे ष्यञ् । उपवासे "लक्ष्मणेन यदानीतं पीत्वा वारि समाहितः । औपवास्यं तदाऽकार्षीद्राघवः सह सीतया" रामा० ।

औपवाह्य पु० उपवाह्य एव स्वार्थेऽण् । उपवाहने रथादौ "औपवाह्यः कुबेरस्य सार्वभौम इति स्मृतः" रामा० । सर्वासु भूमिषु विदितः अण् । सार्वभौम इत्यर्थः ।

औपविन्दवि पुंस्त्री । उपविन्दोरपत्यम् बाह्वा० इञ् । उपविन्दोरपत्ये स्त्रियां ङीप् । [वेशेनोपजीविनि ।

औपवेशिक त्रि० उपवेशेन जीवति वेतना० ठञ् । उप-

औपश्लेषिक त्रि० उपश्लेषेण निर्वृत्तः ठक् । एकदेशेन सम्बन्धे आधारभेदे "औपश्लेषिको वैषयिकोऽभिव्यापकश्चेत्याधार स्त्रिधा" सि०कौ० ।

औपसंक्रमण त्रि० उपसंक्रमणे दीयते व्युष्टा० अण् । उपसंक्रमणे देये स्त्रियां ङीप् ।

औपसद पु० उपसच्छब्दोऽस्मिन्नस्ति विमुक्ता० अण् । उपसच्छब्दयुक्ते १अध्याये २अनुवाके च । उपसत् समीपस्थानं तदस्त्यस्य मत्वा० अण् । १इन्द्रे "प्रजापतिकामस्यौपसदः" कात्या० २२,१०,११ । "औपसदोहन्" कर्कः

औपसर्गिक त्रि० उपसर्गाय प्रभवति सन्तापा० ठञ् । उपसर्गसमर्थे । स च सुश्रुतोक्तः रोगभेदः यथा "व्याधिविशेषास्तु प्रागभिहिताः सर्व एवैते त्रिविधाः साध्या याप्याः प्रत्याख्येयाश्च तत्र तान् भूयस्त्रिधा परीक्षेत किमयमौपसर्गिकः प्राक्केवलोऽन्यलक्षण इति तत्रौपसर्गिको यः पूर्वोत्पन्नं व्याधिं जघन्यकालजातो व्याधिरुपसृजति स तन्मूल एवोपद्रवसंज्ञः" इति । वैद्यकान्तरे तु "कफोऽनुलोमवातेन यदि पित्तानुगो भवेत् । स्वेदशैत्यतृषार्त्तश्चेत्तदा भवति मानवः । प्रतिलोमः पुनस्तेन स्वास्थ्यमायाति तत्क्षणात् । औपसर्गिक एवायं सन्निपात उदाहृतः" इत्युक्ते २वातादिसन्निपाते च । ३दैवारिष्टसूचके पाहदौस्थ्यादौ । ४उपसर्गसम्बन्धिनि त्रि० शब्दकल्पद्रुमः । तन्मूलं मृग्यम् सम्बन्धिन्यर्थे ठकोऽस्मरणात् कोशान्तराभावाच्च । षीवे उपासके ।

औपस्थान त्रि० उपस्थानं शीलमस्य छत्रा० ण । उपस्थान-

औपस्थानिक त्रि० उपस्थानेन सेवनेन जीवति वेतना० ठक् । सेवनोपजीविनि ।

औपस्थ्य न० उपस्थस्य भावः कर्म वा ष्यञ् । उपस्थव्यापारसाध्ये सुखे । "औपस्थ्यजैह्व्यकार्पण्यात्" भाग० ७,१५,१६ "औपस्थ्यजैह्व्यं बहु मन्यमानः" भाग० ७,६,१४ । औपस्थ्यं मैथुनं जैह्व्यञ्च सुखम्" श्रीधरः ।

औपहारिक त्रि० उपहाराय साधु ठक् । उपहारार्थे द्रव्ये "परमान्नेन यो दद्यात् पितृणामौपहारिकम्" भा० अनु० ६० २० श्लो० ।

औपाधिक त्रि० तेन निर्वृत्तः बा० ठञ् । उपाधिकृते स्त्रियां ङीप् "रूढं सङ्केतवन्नाम सैव संज्ञेति कीर्त्यते । नैमित्तिकी पारिभाषिक्यौपाधिक्यपि तद्भिदा" शब्दश० पुरुषस्य बन्धस्तु औपाधिक एव न नैमित्तिकः नापि तात्त्विकः इत्येतत् सां० सू० भाष्ययोर्निर्णीतं यथा

"न स्वभावतो बद्धस्य मोक्षसाधनोपदेशविधिः" सू०

"दुःखात्यन्तनिवृत्तेर्मोक्षत्वस्योक्ततया बन्धोऽत्र दुःखयोग एव तस्य बन्धस्य पुरुषे न स्वाभाविकत्वं वक्ष्यमाणलक्षणमस्ति यतो न स्वभावतो बद्धस्य मोक्षाय साधनोपदेशस्य विधिरनुष्ठानं नियोज्यानां घटते । न ह्यग्नेः स्वाभाविकादौष्ण्यान्मोक्षः सम्भवति । स्वाभाविकस्य यावद्द्रव्यभावित्वादित्यर्थः । तदुक्तमीश्वरगीतायाम् ।

"यद्यात्मा मलिनोऽस्वच्छो विकारी स्यात् स्वभावतः ।
न हि तस्य भवेन्मुक्तिर्जन्मान्तरशतैरपि" ।

"यस्मिन् सति कारणविलम्बादिविलम्बो यस्योत्पत्तौ न भवति तस्य तत् स्वाभाविकमिति स्वाभाविकत्वलक्षणम् । ननु सर्वदोपलम्भापत्तेर्दुःखस्य स्वाभाविकत्वमङ्गैव नास्तीति चेन्न त्रिगुणात्मकत्वेन चित्तस्य दुःखस्वभावत्वेऽपि सत्त्वाधिक्येनाभिभवात् सदा दुःखानुपलब्धिवदात्मनोऽपि तदनुपलब्धिसम्भवात् । दुःखस्वाभाविकत्ववादिभिर्बौद्धैश्चित्तस्यैवात्मताभ्युपगमाच्च । अथैवमात्मनाशादेव मोक्षोऽस्त्विति चेन्न । अहं बद्धो विमुक्तः स्यामिति बन्धसामानाधिकरण्येनैव मोक्षस्य पुरुषार्थत्वादिति । भवत्वननुष्ठानं तेन किमित्यत आह" भा० ।

"स्वभावस्यानपायित्वादननुष्ठानलक्षणमप्रामाण्यम्" सू० ।

"स्वभावस्य यावद्द्रव्यभावित्वान्मोक्षासम्भवेन तत्साधनोपदेशश्रुतेरननुष्ठानलक्षणमप्रामाण्यं स्यादित्यर्थः भा० । ननु श्रुतिबलादेवानुष्ठानं स्यात् तत्राह ।

"नाशक्योपदेशविधिरुपदिष्टेऽप्यनुपदेशः" सू० ।

"नाशक्याय फलायोपदेशस्यानुष्ठानं सम्भवति । यत उपदिष्टेऽपि विहितेऽप्यशक्योपाये स उपदेशो न भवति । किन्तूपदेशाभास एव "बाधितमर्थं वेदोऽपि न बोधयतीति" न्यायादित्यर्थः" भा० । अत्र शङ्कते ।

"शुक्लपटवद्बीजवच्चेत्" सू० ।

"ननु स्वाभाविकस्याप्यपायो दृश्यते । यथा शुक्लपटस्य स्वाभाविकं शौक्ल्यं रागेणापनीयते । यथा च बीजस्य स्वाभाविक्यप्यङ्कुरशक्तिरग्निनापनीयते । अतः शुक्लपटवद्बीजवच्च स्वाभाविकस्य बन्धस्याप्यपायः पुरुषे सम्भवतीति तद्वदेव तत्साधनोपदेशः स्यादिति चेदित्यर्थः" भा० समाधत्ते ।

"शक्त्युद्भवानुद्भवाभ्यां नाशक्योपदेशः" सू० ।

"उक्तदृष्टान्तयोरपि नाशक्याय स्वाभाविकापायोपदेशो लोकानां भवति । कुतः शक्त्युद्भवानुद्भवाभ्याम् दृष्टान्तद्वये हि शौक्ल्यादेराविर्भावतिरोभावावेव भवतः न तु शौक्ल्याङ्कुरशक्त्योरभावो भवति । रजकादिव्यापारैर्योगिसङ्कल्पादिभिश्च रक्तपटभृष्टबीजयोः पुनः शौक्ल्याङ्कुरशक्त्याविर्भावादित्यर्थः । नन्वेवं पुरुषेऽपि दुःखशक्तितिरोभाव एव मोक्षोऽस्त्विति चेन्न दुःखात्यन्तनिवृत्तेरेव लोके पुरुषार्थत्वानुमानात् श्रुतिस्मृत्योः पुरुषार्थत्वसिद्धेश्च न तु दृष्टान्तयोरिव तिरोभावमात्रस्येति । किञ्च दुःखशक्तितिरोभावमात्रस्य मोक्षत्वे कदाचिद्योगीश्वरसङ्कल्पादिना शक्त्युद्भवस्य भृष्टबीजेष्विव मुक्तेष्वपि सम्भवेनानिर्मोक्षाप-

त्तिरिति" भा० । स्वभावतो बन्धं निराकृत्य निमित्तेभ्योऽपि बन्धमपाकरोति सूत्रजातेन । पुरुषे दुःखस्य नैमित्तिकत्वे ज्ञानाद्युपायोच्छेद्यत्वं न घटेत । अनागतावस्थस्य दुःखस्य यावद्द्रव्यभावित्वादित्याशयेन नैमित्तिकत्वं निराक्रियते ।

"न कालयोगतो व्यापिनो नित्यस्य सर्व्वसम्बन्धात्" सू० ।

"नापि कालसम्बन्धनिमित्तकः पुरुषस्य बन्धः कुतः ? व्यापिनो नित्यस्य कालस्य सर्व्वावच्छेदेन सर्व्वदा मुक्तामुक्तसकलपुरुषसम्बन्धात् सर्व्वावच्छेदेन सदा सकलपुरुषाणां बन्धापत्तेरित्यर्थः । अत्र च प्रकरणे कालदेशकर्मादीनां निमित्तत्वसामान्यं नापलप्यते श्रुतिस्मृतियुक्तिभिः सिद्धत्वात् । किन्तु यन्नैमित्तिकत्वं पाकजरूपादिवन्निमित्तजन्यत्वं तदेव बन्धे प्रतिषिध्यते पुरुषे बन्धस्यौपाधिकत्वाभ्युपगमात् । ननु कालादिनिमित्तकत्वेऽपि सहकार्य्यन्तरसम्भवासम्भवाभ्यां व्यवस्था स्यादिति चेत् एवं सति यत्संयोगे सत्यवश्यं बन्धस्तस्यैव सहकारित्व लाघवाद्बन्धो युक्तः पुरुषे बन्धव्यवहारस्यौपाधिकत्वेनाप्युपपत्तेरिति कृतं नैमित्तिकत्वेनेति" भा० "न देशयोगतोऽप्यस्मात्" सू० ।

"देशयोगतोऽपि न बन्धः कुतः ? अस्मात् पूर्व्वसूत्रोक्तान्मुक्तामुक्तसर्व्वपुरुषसम्बन्धात् मुक्तस्यापि बन्धापत्तेरित्यर्थः" भा० ।

"नावस्थातो देहधर्म्मत्वात् तस्याः" सू० ।

"सङ्घातविशेषरूपताख्या देहरूपा यावस्था न तन्निमित्ततोऽपि पुरुषस्य बन्धः । कुतः ? तस्या अवस्थाया देहधर्म्मत्वात् अचेतनधर्म्मत्वादित्यर्थः । अन्यधर्म्मस्य साक्षादन्यबन्धकत्वेऽतिप्रसङ्गात् । मुक्तस्यापि बन्धापत्तेरित्यर्थः" भा० । ननु पुरुषस्याप्यवस्थायां किं बाधकं तत्राह ।

"असङ्गोऽयं पुरुष इति" सू० ।

"इति शब्दो हेत्वर्थे । पुरुषस्यासङ्गत्वादवस्थाया देहमात्रधर्म्मत्वमिति पूर्व्वसूत्रेणान्वयः । पुरुषस्यावस्थारूपविकारस्वीकारे विकारहेतुसंयोगाख्यः सङ्गः प्रसज्येतेति भावः । असङ्गत्वे च श्रुतिः । "स यदत्र किञ्चित् पश्यत्यनन्वागतस्तेन भवति असङ्गो ह्ययं पुरुष" इति । सङ्गश्च संयोगमात्रं न भवति । कालदेशसम्बन्धस्य पूर्व्वमुक्तत्वात् । श्रुतिस्मृतिषु पद्मपत्रस्यजलेनेव पद्मपत्रस्यासङ्गतायाः पुरुषासङ्गतायां दृष्टान्ततास्रवणाच्च" भा० ।

"न कर्म्मणान्यधर्म्मत्वादतिप्रसक्तेश्च" सू० ।

"न हि विहितनिषिद्धकर्म्मणापि पुरुषस्य बन्धः कर्म्मणामनात्मधर्म्मत्वात् । अन्यधर्म्मेण साक्षादन्यस्य बन्धे च मुक्तस्यापि बन्धापत्तेः । ननु स्वस्वोपाधिकर्म्मणा बन्धाङ्गीकारे नायं दोष इत्याशयेन हेत्वन्तरमाह । अतिप्रसक्तेश्चेति । प्रलयादावपि दुःखयोगरूपबन्धापत्तेश्चेत्यर्थः । सहकार्य्यन्तरविलम्बतो विलम्बकल्पनं च प्रागेव निराकृतं न कालयोगत इत्यादिसूत्र इति" भा० ।

नन्वेवं दुःखयोगरूपोऽपि बन्धः कर्म्मसामानाधिकरण्यानुरोधेन चित्तस्यैवास्तु दुःखस्य चित्तधर्म्मतायाः सिद्धत्वात् । किमर्थं पुरुषस्यापि कल्प्यते बन्ध इत्याशङ्कायामाह

"विचित्रभोगानुपपत्तिरन्यधर्म्मत्वे" सू० ।

"दुःखयोगरूपबन्धस्य चित्तमात्रधर्म्मत्वे विचित्रभोगानुपपत्तिः । पुरुषस्य हि दुःखयोगं विनापि दुःखसाक्षात्काराख्यभोगस्वीकारे सर्व्वपुरुषदुःखादीनां सर्व्वपुरुषभोग्यता स्यान्नियामकाभावात् । ततश्चायं दुःखभोक्तायं च सुखभोक्तेत्यादिरूपभोगवैचित्र्यं नोपपद्येतेत्यर्थः । अतो भोगवैचित्र्योपपत्तये भोगनियामकतया दुःखादियोगरूपो बन्धः पुरुषेऽपि स्वीकार्य्यः । स च पुरुषे दुःखयोगः प्रतिबिम्बरूप एवेति प्रागेवोक्तम् । प्रतिबिम्बश्च स्वोपाधिवृत्तेरेव भवतीति न सर्व्वपुंसां सर्व्वदुःखभोगः इति भावः । "चित्तवृत्तिभोगे च पुरुषस्यानादिः स्वस्वामिभावः सम्बन्धो हेतुरिति" योगभाष्यादयं सिद्धान्तः सिद्धः । चित्ते च पुरुषस्य स्वत्वं स्वभुक्तवृत्तिवासनावत्त्वमिति । यत्र तु चित्तस्यैव बन्धमोक्षौ न पुरुषस्येति श्रुतिस्मृतिषु गीयते तद्बिम्बरूपदुःखयोगरूपं पारमार्थिकं बन्धमादाय बोध्यम्" भा० ।

साक्षात् प्रकृतिनिमित्तकत्वमपि बन्धस्यापाकरोति ।

"प्रकृतिनिबन्धनाच्चेन्न तस्या अपि पारतन्त्र्यम्" सू० ।

"ननु प्रकृतिनिमित्ताद्बन्धो भवत्विति चेन्न यतस्तस्या अपि बन्धकत्वे संयोगपारतन्त्र्यमुत्तरत्र वक्ष्यमाणमस्ति । संयोगविशेषं विनापि बन्धकत्वे प्रलयादावपि दुःखसम्बन्धप्रसङ्गादित्यर्थः । प्रकृतिनिबन्धना चेदिति पाठे तु प्रकृतिनिबन्धना चेद्बन्ध इत्यर्थः" भा० । अतो यत्परतन्त्रा प्रकृतिर्बन्धकारणं सम्भवेत् तस्मादेव संयोगविशेषादौपाधिको बन्धोऽग्निसंयोगाज्जलौष्ण्यवदिति स्वसिद्धान्तमनेनैव प्रसङ्गेनान्तरात्र एवावधारयति ।

"न नित्यशुद्धबुद्धमुक्तस्वभावस्य तद्योगस्तद्योगादृते" सू० ।

"तस्मात् तद्योगादृते प्रकृतिसंयोगं विना न पुरुषस्य तद्योगो बन्धसम्पर्कोऽस्ति । अपि तु स एव बन्धहेतुः । बन्धस्यौपाधिकत्वलाभाय नञ्द्वयेन वक्रोक्तिः । यदि हि बन्धः

प्रकृतिसंयोगजन्यः स्यात् पाकजरूपवत् तदा तद्वदेव तद्वियोगेऽप्यनुवर्त्तेत । न च द्वितीयक्षणादेर्दुःखनाशकत्वं कल्प्यं कारणनाशस्य कार्य्यनाशकतायाः क्लृप्तत्वेन तेनैवोपपत्तावधिकाऽकल्पनात् । वृत्तिर्हि दुःखादेरुपादानम् । अतो दीपशिखावत् क्षणभङ्गुराया वृत्तेराशुविनाशित्वेनैव तद्धर्माणां दुःखेच्छादीनां विनाशः सम्भवतीति । अतः प्रकृतिवियोगे बन्धाभावादौपाधिक एव बन्धो न तु स्वाभाविको नैमित्तिको वेति । तथा तत्संयोगनिवृत्तिरेव साक्षाद्धानोपाय इत्यपि वक्रोक्तिफलम् । तथा च स्मृतिः
"यथा ज्वलद्गृहाश्लिष्टं गृहं विच्छिद्य रक्ष्यते ।
तथा सदोषप्रकृतिविच्छिन्नोऽयं न शोचति" ।
वैशेषिकाणामिव पारमार्थिको दुःखयोग इति भ्रमो मा भूदित्येतदर्थं नित्येत्यादि । यथा स्वभावशुद्धस्य स्फटिकस्य रागयोगो न जपायोगं विना घटते तथैव नित्यशुद्धादिस्वभावस्य पुरुषस्योपाधिसंयोगं विना दुःखसंयोगो न घटते अतो दुःखाद्यसम्भवादित्यर्थः तथाह सौरे
"यथा हि केवलो रक्तः स्फटिको लक्ष्यते जनैः ।
रञ्जकाद्युपधानेन तद्वत् परमपूरुषः" ।
नित्यत्वं कालानवच्छिन्नत्वम् । शुद्धादिस्वभावत्वं च नित्यशुद्धत्वादिकम् । तत्र नित्यशुद्धत्वं सदा पापपुण्यशून्यत्वम् । नित्यबुद्धत्वमलुप्तचिद्रूपत्वम् । नित्यमुक्तत्वं सदा पारमार्थिकदुःखायुक्तत्वम् । प्रतिबिम्बरूपदुःखयोगस्त्वपारमार्थिको बन्धः इति भावः । आत्मनो नित्यशुद्धत्वादौ च श्रुतिः । "अयमात्मा सन्मात्रो नित्यशुद्धः बुद्धः सत्यो मुक्तो निरञ्जनो विभुरित्यादिः" भा० ।

अयमेव पक्षो वेदान्तिभिरप्यङ्गीकृतः "तद्गुणसारत्वादित्यादि" शा०सूत्रभाष्ये "न हि बुद्धेर्गुणैर्विना केवलस्यात्मनः संसारित्वमस्ति बुद्ध्युपाधिधर्म्माध्यासनिमित्तं हि कर्त्तृत्वभोक्तृत्वलक्षणं संसारित्वमकर्त्तुरभोक्तुश्चासंसारिणो नित्यमुक्तस्य सत आत्मनः" इति "यावदात्मभावित्वादित्यादि" शा०सूत्रभाष्ये च "यावदेव चायं बुद्ध्युपाधिसम्बन्धस्तावदेव चास्य जीवत्वं संसारित्वञ्च । परमार्थतस्तु न जीवो नाम बुद्ध्युपाधिपरिकल्पितस्वरूपव्यतिरेकेण" इति च संसारित्वस्य बुद्ध्युपाधिसंबन्धाधीनतयौपाधिकत्वस्योक्तेः । इयांस्तु विशेषः एतन्मते बन्धस्येव जीवभेदस्यापि औपाधिकत्वं तदपि शां०सू०भाष्ययोर्निर्णीतं यथा "अतएव चोपमा (जल)सूर्य्यकादिवत्" सू० "अतएव चायमात्मा चैतन्यस्वरूपो निर्विशेषो वाङ्मनसातीतः परप्रतिषेधेनोपदिश्यते अतएव चास्योपाधिनिमित्तामपारमार्थिकीं विशेषवत्तामभिप्रेत्य जलसूर्य्यकादिवदित्युपमोपादीयते मोक्षशास्त्रेषु "यथाह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन् । उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मेति" । "एकएव तु भूतात्मा भूते भूते व्यवस्थितः । एकधा बहुधा चैव दृश्यते जलचन्द्रवदिति चैवमादिषु । अत्र प्रत्यवस्थीयते" भा० । "अम्बुवदग्रहणात्तु न तथात्वम्" सू० । "न जलसूर्य्यादितुल्यत्वमिहोपपद्यते तद्वदग्रहणात् । सूर्य्यादिभ्यो हि मूर्त्तेभ्यः पृथग्भूतं विप्रकृष्टदेशं मूर्त्तञ्च जलं गृह्यते तत्र युक्तः सूर्य्यादिप्रतिबिम्बोदयो नत्वात्मा मूर्त्तः न चास्मात् पृथग्भूता विप्रकृष्टदेशाश्चोपाधयः, सर्व्वगतत्वात् सर्व्वानन्यत्वाच्च तस्मादयुक्तोऽयं दृष्टान्त इति । अत्र प्रतिविधीयते । भा० "वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम्" सू० । युक्त एव त्वयं दृष्टान्तः विवक्षितांशसम्भवात् न हि दृष्टान्तदार्ष्टान्तिकयोः क्वचित् कञ्चिद्विवक्षितमंशं मुक्त्वा सर्व्वसारूप्यं केनचिद्दर्शयितुं शक्यते सर्व्वसारूप्ये हि दृष्टान्तदार्ष्टान्तिकभावोच्छेद एव स्यात् । न चेदं स्वमनीषया जलसूर्य्यकादिदृष्टान्तप्रणयनम् । शास्त्रप्रणीतस्य त्वस्य प्रयोजनमात्रमुपन्यस्यते । किं पुनरत्र विवक्षितं सारूप्यमिति ? तदुच्यते वृद्धिह्रासभाक्त्वमिति । जलगतं हि सूर्य्यप्रतिबिम्बं जलवृद्धौ वर्द्धते जलह्रासे ह्रसते जलचलने चलति जलभेदे भिद्यते इत्येवं जलधर्म्मानुविधायि भवति न तु परमार्थतः सूर्य्यस्य तथात्वमस्ति एवं परमार्थतोऽविकृतमेकरूपमपि सद्ब्रह्म देहाद्युपाध्यन्तर्भावाद्भजतएवोपाधिधर्म्मान् वृद्धिह्रासादीन् एवमुभयोर्दृष्टान्तदार्ष्टान्तिकयोः सामञ्जस्यादविरोधः" भा० । "दर्शनाच्च" सू० । "दर्शयति च श्रुतिः परस्यैव ब्रह्मणो देहादिषूपाधिष्वनुप्रवेशम् "पुरः स चक्रे द्विपदः पुरश्चक्रे चतुष्पदः । पुरः स पक्षी भूत्वा पुरः पुरुष आविशदिति" "अनेन जीवेनात्मनानुप्रविश्येति" च तद्युक्तमेतत्" ।

उपाधिरेव विनया० स्वार्थे ठञ् । साध्यसमव्यापकत्वे सति साधनाव्यापकत्वरूपे प्रागुक्ते उपाधौ "अनौपाधिको व्याप्तिः", अनुमा० चि० ।

औपाध्यायक त्रि० उपाध्यायादागतः वुञ् । उपाध्यायाल्लब्धे

औपानह्य पु० उपानहे अयम् । "तदर्थं विकृतेः प्रकृतौ" पा० इत्यधिकारे ञ्य । उपानद्रूपविकारसाधने तत्प्रकृतौ १ वृक्षे २ चर्म्मणि न० ।

औपावि पुंस्त्री उपावस्यापत्यम् इञ् । उपावर्षेरपत्ये

"तत्र औपाविनैव जानश्रुतायनेन प्रत्यवरूढम्" शत० ब्रा० ५,१,१,५ । स्त्रियां ङीप् ।

औपासन त्रि० उपास्यते प्रतिदिनमित्युपासनो गृह्योऽग्निस्तत्र भवः अण् । गृह्याग्नौ कर्त्तव्ये सायंप्रातर्होमादौ कर्म्मणि । गृह्याग्निश्च विवाहाग्निः । तत्र कर्त्तव्यं दर्शितं "नौपासनश्रुतेः" कात्या० १,१,२, "यदुक्तम् वैतानिकेष्वेवाग्निषु श्रौतं स्मार्त्तं च कर्त्तव्यमिति तच्च कुतः? औपासनश्रुतेः यत आहिताग्नेरप्यौपासनः श्रूयते पितृमेधे "अग्रहारेण्यौपासनं निरस्यतीति" यदि स्मार्त्तमपि वैतानिकेष्वेव क्रियते तदा आहिताग्नेः पितृमेधे औपासनदर्शनं न स्यात् अस्ति च । तस्मात् स्मार्त्तान्यौपासने कर्त्तव्यानीति तथा च स्मृतिः "स्मार्त्तं कर्म्म विवाहाग्नौ कुर्व्वीत प्रत्यहं गृही । दायकालाहृते वापि श्रौतं वैतानिकाग्निषु"इति" । "तस्मिन् गृह्याणीत्यापस्तम्बस्मरणाच्च" । गृहाय हितं गृह्यम् गृहशब्दश्च दम्पत्योर्वर्त्तते तस्मिन्नित्यावसथ्ये । अतश्च यत्किञ्चिद्दम्पत्योर्हितं कर्म शान्तिकपौष्टिकव्रताङ्गहोमादिकं स्मार्त्तं तत् सर्वमावसथ्येऽग्नौ भवतीति । तथा च खादिरगृह्यसूत्रकारिकायाम् "होमानात्मार्थपत्न्यर्थान् कुत्स्नामौपासने न च । परार्थानिक्षेपेऽग्नौ स यान्ते लौकिको भवेत्" अत एव कात्यायनः (कर्मप्रदी०पे) "न स्वेऽग्नावन्यहोमः स्यान्मुक्त्वैकां समिदाहुतिम् । स्वकर्म्म सत्क्रियार्थस्य यावन्नासौ प्रजायते । अग्निस्तु नामधेयादौ होमे सर्व्वत्र लौकिकः । न हि पित्रा समानीत पुत्रस्य भवति क्वचित्" । अतश्च सीमन्तोन्नयनमपि स्मार्त्ताग्नावेव कार्य्यम् ! अपि च आधानेनोत्पादितानां गार्हपत्यादीनामग्नीनाम् प्रयोजनापेक्षायां सत्यां "गार्हपत्ये हवींषि श्रपयत्याहवनीये जुहोति दक्षिणाग्नावन्वाहार्य्यं पचतीति" प्रत्यक्षवचननिर्द्दिष्टैरेव प्रयोजनैर्निराकाङ्क्षाणाम् न सामर्थ्यमात्रेणोक्तादन्यत्र विनियोगः कल्पयितुं शक्यते । तस्मात् स्मार्त्तान्यौपासन एव कार्य्याणि इति" कर्कः ।

विधानपा० तस्यारम्भकालादि निरूपितं यथा गृह्यपरिशिष्टे "अथ नित्यौपासनं तस्य सायमारम्भः" इति । शौनकोऽपि यस्मिन्नह्नि विवाहः स्यात्सायमारभ्य तस्य तु । परिचर्य्यां विवाहाग्नेर्विदधीत स्वयं द्विजः । यदि रात्रौ विवाहाग्निरुत्पन्नः स्यात्तथा सति । उपक्रमोत्तरस्याह्नः सायं परिचरेदमुमिति" । इदमपि नवनाड्यातिक्रमे द्रष्टव्यम् । तथा चापस्तम्बसूत्रे भाष्यकृत्सुदर्शनाचार्य्यः । "अस्यारम्भणं रात्रावेव यदि नव नाड्यो नातीताः । अतीताश्चेत् परेद्युः सायमेवाग्निहोत्रवेलायामारम्भ इति" । अन्यत्रापि । "प्रातर्होमे सङ्गवान्तः कालस्त्वनुदितेऽथ वा । सायमस्तमिते होमः कालस्तु नवनाडिकेति" । अत्रानुदितहोमकालस्तु वाजसनेयिनां वेदितव्यः । तथा च कात्यायनसूत्रम् । "औपासनस्य परिचरणमस्तमितानुदितयोरिति" । तेषामौपासनसमारम्भोऽपि चतुर्थीहोमानन्तरमाहितेऽग्नौ भवति न तु विवाहाग्नौ "आवसथ्याधानं दारकाले दायाद्यकाले वेति" कात्यायनसूत्रात् तद्भाष्यमपि । "दारकालश्चतुर्थ्युत्तरकालः । दायाद्यकालो धनविभागकाल इति" औपासनात्पूर्व्वं यदि विवाहाग्निः शाम्येत तदा प्रायश्चित्तमुक्तं विश्वादर्शे "उद्वाहौपासनात् पूर्व्वमनले शान्तिमागते । स्थालीपाकं ततः कृत्वा ह्यौपासनमथाचरेत् । नवनाडीभ्य ऊर्द्ध्वं चेत्स्थालीपाको भवेत्तु वै । औपासने तदा कुर्य्यात् परेद्युः सायमेव चेति" । तस्य प्रादुष्करणकाल उक्तः आश्वलायनसूत्रे "तस्याग्निहोत्रेण प्रादुष्करणहोमसकालौ व्याख्याताविति" तत्कारिकायामपि । "ज्वालयेदपराह्णेऽग्निमस्तं याते दिवाकरे । पर्य्युक्ष्याग्निं परिस्तीर्य्य पर्य्युक्ष्य च ततः परमिति" । स्पष्टमाह कात्यायनः । "सूर्य्ये तु शैलमप्राप्ते षड्भिर्द्विरष्टाङ्गुलैः । प्रादुष्करणमग्नीनां प्रातराशोमदर्शनम्" । तथा "दुहित्रा स्नुषया वाग्निविहारो न विरुध्यते । निर्लेपनं च पात्राणामुपलेपनमेव चेति" । उक्तकाले प्रादुष्करणाभावे प्रायश्चित्तमुक्तम् आश्वलायनकारिकायाम् । "प्रायश्चित्तं विशेषेण यत्र नोक्तं भवेद्विधिः । होतव्याज्याहुतिस्तत्र भूर्भुवःस्वरितीति चेति" । कात्यायनः अनुदितास्तमयलक्षणमाह । "रात्रेस्तु षोडशे भागे ग्रहनक्षत्रभूषिते । कालं त्वनुदितं ज्ञात्वा तत्र होमं प्रकल्पयेत्" । तथा "यावत्सम्यङ्न भासन्ते नभस्यृक्षाणि सर्वतः । न च लौहित्यमायाति तावत्सायं तु हूयते" । अत्राश्वलायनादीनां होमे मुख्यकालमाह चन्द्रिकायामत्रिः "हस्तादूर्द्ध्वं रविर्यावद्गिरिं हित्वा न गच्छति । तावद्धोमविधिः पुण्यो नान्योऽभ्युदितहोमिनाम् । रात्रौ प्रदोषो मुख्यःस्यादिति वेदविदो विदुरिति" । अत्र गौणकालमाह शौनकः "पश्चादस्तमयात्कालो यो भवेत्त्रिमुहूर्त्तकः । स सायंहोमकालःस्यात् प्रदोषान्त उदाहृतः । यस्तु षड्नाडिकाकालः पश्चादेवोदयाद्रवेः । स होमकालो विप्राणां सङ्गवान्त इति स्मृत" इति । यदि गौणकालोऽप्यतीतस्तदा गृह्यपरिशिष्टे प्रायश्चित्तमुक्तम्

'नित्यहोममतोऽत्र मनस्तत्रा चतुर्गृहीतं जुहुयात् द्वादशरात्रादूर्द्ध्वं पुनराधानमिति"। केचित्तु प्रायश्चित्तं कृत्वा प्रातर्होमकालात् पूर्व्वं सायंहोमः कार्य्यः सायंहोमात्पूर्व्वं प्रातर्होमः कार्य्यइत्याहुः "आसायकर्मणः प्रातराप्रातः सायकर्म्मणः। आहुतिं नातिपद्येत पार्व्वणं पार्व्वणान्तरादिति" बौधायनस्मृतेरिति। अस्याग्निहोत्रवद् विधानं प्रदर्शितं शौनकेन। "अग्निहोत्रवदित्यत्र शौनकेन प्रपञ्चितम्। पुनः पर्य्युक्ष्य चाङ्गारान् दग्नेरपोह्य च। होम्यानां द्वादशानां तु पक्वमेतेष्वधिश्रयेत्। पयोयवागूः सर्पिश्च ओदनं दधि तण्डुलाः। सोमस्तैलमपो व्रीहिर्द्वादशैते तिलायवाः। पय आदीनि चत्वारि विदुः पक्वानि याज्ञिकाः। दध्यादीनामपक्वानामधिश्रयणमिष्यते। उल्मुकेनैव ज्वलयेदपक्वं पक्वमेव च। अधिश्रिते स्रुवेणापः परिषिञ्चेत्सयाधिकाः। पुनस्त्रिर्ज्वलता तेन परिव्युह्य प्रहृत्य तत्। उदक्पूर्वं त्रिधोक्षाप्याङ्गारानतिसृज्य च। अग्नेः पश्चात् तृणेष्वेव निधाय समिधा सह। त्रिवारमेकं संकल्प्य गृहीत्वा सायमग्नये (तेषां द्वादशद्रव्याणां मध्ये एकं द्रव्यमित्यर्थः)। स्वाहेति मन्त्रमुच्चार्य्य कुर्व्वीत प्रथमाहुतिम्। प्रातर्होमे तु सूर्य्याय स्वाहेति प्रथमाहुतिम्। तूष्णीं प्रजापतिं ध्यायन्नुभयत्र द्वितीयिकामिति"। अत्रान्योविशेषः स्वशाखोक्तोऽवगन्तव्यः। होमस्थानं स्मृत्यर्थसारे "बहुशुष्के न्धनेनाग्नौ सुसमिद्धे हुताशने। अङ्गारे वेलिहाने च होतव्यं नान्यथा क्वचित्। योऽनर्चिषि जुहोत्यग्नौ व्यङ्गारे चैव मानवः। मन्दाग्निरामयावी च दरिद्रश्चोपजायते। अग्निः प्रदक्षिणावर्त्तः शर्मदश्च शुभावहः" इति। अग्न्युपस्थानमन्त्रानाह शौनकः "परिसमुह्य च पर्य्युक्ष्याभ्युपतिष्ठेद्धविर्भुजम्। अग्नेः स्तनैश्च सौरैश्च प्राजापत्यैश्च नित्यशः" याज्ञ०। हुत्वाग्नीन् सूर्य्यदैवत्यान् जपेन्मन्त्रान् समाहितः" एतद्धोमं प्रशंसत्यङ्गिराः "यद्दद्यात्काञ्चनं मेरुं पृथिवीं च ससागराम्। तत्सायं प्रातर्होमस्य तुल्यं भवति वा नवेति"। अन्यत्रापि "नाग्निहोत्रात्परोधर्म्मो नाग्निहोत्रात्परं तपः। नाग्निहोत्रात्परं ज्ञानं नाग्निहोत्रात्परा गतिरिति" अकरणे प्रत्यवायमाह गर्गः "कृतदारो न तिष्ठेत क्षणमप्यग्निना विना। तिष्ठेत चेद्द्विजोव्रात्यस्तथा च पतितो भवेत्। यथा स्नानं यथा सन्ध्या वेदस्वाध्ययनं यथा। तथैवौपासनं कार्य्यं न स्थितिस्तद्वियोगतः। यो हि हित्वा विवाहाग्निं गृहस्थ इति मन्यते। अन्नं तस्य न भोक्तव्यं वृथापाको हि स स्मृतः। वृथापाकस्य भुञ्जानः प्रायश्चित्तं समाचरेत्। प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यतीति"।

तस्याशौचेऽपि कर्त्तव्यतामाह याज्ञ०। "वैतानौपासनाः कार्य्याः क्रियाश्च श्रुतिनोदनात्"। ङीबभाव आर्षः लोके तु औपासनीत्येव

औपोदिति पुंस्त्री उपोदितस्यापत्यम् इञ्। उपोदितेरपत्ये स्त्रियां ङीप्। तस्या अपत्यम् ढक्। औपोदितेयः तस्या अपत्ये। 'उतोऽहस्याहौपोदितेय एववाव मह्यं गा दास्यति" शत० ब्रा० १,९,२,१६। [स्याविकारे।

औमा(क) त्रि० उमाया विकारः अण् वुञ् वा। अत-

औमायन त्रि० उमाया निमित्तं संयोग उत्पातो वा अश्वा० फञ्। अतस्या निमित्ते संयोगे उत्पाते च स्त्रियां ङीप्। [क्षेत्रे।

औमीन त्रि० उमानां भवनं क्षेत्रम् खञ्। अतसीभवने

औरग न० उरगोदेवताऽस्य अण्। १सर्पाधिष्ठातृदेवताके अश्लेषानक्षत्रे। तस्येदम् अण्। २सर्पसम्बन्धिनि त्रि० स्त्रियां ङीप्।

औरभ्र न० उरभ्रस्य मेषस्येदम् अण्। १मेषलोमजाते कम्बले २तत्सम्बन्धिनि त्रि०। "औरभ्रेणाथ चतुरः शाकुनेनाथ पञ्च वै" मनुः। "बृंहणं मांसमौरभ्रं पित्तश्लेष्मावहं गुरु" सुश्रु०। धन्वन्तरिं प्रति प्रश्नकारकर्षिमध्ये ३ऋषिभेदे पु० औपधेनवशब्दे उदा०।

औरभ्रक न० उरभ्राणां समूहः वुञ्। मेषसमूहे।

औरभ्रिक त्रि० उरभ्रः पण्यमस्य ठञ्। मेषविक्रयोपजीविनि "औरभ्रिको माहिषिकः परपूर्व्वापतिस्तथा" मनुः। स्त्रियां ङीप्।

औरस पु० उरसा निर्म्मितः यदभावे अण्। "स्वक्षेत्रे संस्कृतायां स्वयमुत्पादयेत्तु यम्। औरसं तं विजानीयात् पुत्रं प्रथमकल्पितम्" मनूक्ते पुत्रभेदे "औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च" मनुना द्वादशविधपुत्रमध्ये तस्य प्राथम्योक्तेः "अङ्गादङ्गात् सम्भवति" आत्मा वै जायते पुत्र." श्रुतेश्च स्वदेहजातत्वेनास्य तथात्वम्। १उरसानिर्म्मितमात्रत्वेन असवर्णापुत्रे परपूर्व्वापुत्रेऽपि औरसशब्दस्य वृत्तिः अतएव "अर्जुनस्य परपूर्व्वायां नागकन्यायामुत्पन्नमैरावतमभिप्रेत्य" भा०भी० ९१अ० "अजानन् अर्जुनश्चापि निहतं पुत्रमौरसम्" ऐरावतस्य औरसत्वविशेषणम्। "एकएवौरस पुत्रः सर्व्वस्य वसुनः प्रभुः" मनुः

"औरसः क्षेत्रजः पुत्रौ पितृरिक्थस्य भागिनौ" स्मृतिः "औरसे पुनरुत्पन्ने तृतीयांशहराः सुताः" मनुः उरस इदमण्। २हृदयभवे त्रि० उरसा नाम पुरीभेदः तत्र भवः सिन्ध्वा० अण्। ३औरस उरसापुरीभवे त्रि०।

औरसिक न० उरएव अङ्गुल्या० स्वार्थे ठक्। १उरसि। "इसुसुक्तान्तात् कः" पा० उक्तेरिसुसादिभिन्नत्वात् औरस्क इति शब्द कल्पनं प्रामादिकमेव।

औरस्य न० उरसि भवः शरीरावयवत्वात् यत् ततः स्वार्थे अण्। उरसिभवे। "इकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम्। औरस्यं तं विजानीयात्" शिक्षा "औरसपुत्रे तु उरस एव "उरसोऽण् चेति" सूत्रे चाद् यद्विधानात् अतएव औरसपर्य्याये उरस्यशब्द एवामरे बोध्यः तथैव टीकाकृद्भिर्व्याख्यानात्। [क्षौमविकारे कम्बलादौ।

और्ण(क) त्रि० ऊर्णायाः विकारः अञ् पक्षे वुञ्। मेष-

और्णवत त्रि० उर्णावतोऽयम् अण्। ऋषिभेदे ततः स्वार्थे ष्यञ्। और्णवत्योऽप्यत्र। [तन्निमित्तादौ स्त्रियां ङीप्।

और्णिक त्रि० ऊर्णायानिमित्तं संयोग उत्पातो वा ठञ्।

और्द्धकालिक त्रि० ऊर्द्धकाले भवः काश्या० ठञ् ञिठच्। ऊर्द्धकालभवे। ठञि स्त्रियां ङीबिति भेदः।

और्द्धदेह त्रि० ऊर्द्धदेहस्येदम् अण्। ऊर्द्धदेहसम्बन्धिनि "और्द्धदेहनिमित्तार्थमश्रतीर्य्योदकं नदीम्" रामा०

और्द्धदेहिक त्रि० ऊर्द्धदेहाय साधु-ठञ्। ऊर्द्धदेहप्रापके शास्त्रोक्ते क्रियादौ मरणोत्तर हि मनुष्याणां प्रथममातिवाहिकदेहोत्पत्तिस्ततः पूरकपिण्डदानेन प्रेतदेहप्राप्तिः आद्यादिसपिण्डान्तक्रियाभिः प्रेतदेहनिवृत्त्या भोगदेहप्राप्तिस्तत्र च पूर्ब्बोत्तरभवे क्रिये हेतू। तदेतत् शुद्धितत्त्वे निर्णीतं यथा।

"अत्रेदं बीजं पूर्ब्बक्रियायाआतिवाहिकदेहत्यागोत्तरदेहान्तरजननं, मध्यक्रियायाअपि प्रेतत्वपरिहारोत्तरदेहान्तरजननं तत्रश्चैकयैव तत्सिद्धौ पुनस्तत्करणं वचनाभावेऽनर्थकम्। तथाच विष्णुधर्म्मोत्तरम् "तत्क्षणादेव गृह्णाति शरीरमातिवाहिकम्। ऊर्द्धं व्रजन्ति भूतानि त्रीण्यस्मात्तस्य विग्रहात्"। त्रीणि भूतानि तेजोवाय्वाकाशानि, पृथिवीजले तु अधोगच्छतः। तत्क्षणात् मृत्युक्षणात्। तथा "आतिवाहिकसंज्ञोऽसौ देहोभवति भार्गव!। केवलं तन्मनुष्याणां नान्येषां प्राणिनां क्वचित्"। तथा "प्रेतपिण्डैस्तथा दत्तैर्देहमाप्नोति भार्गवः। भोगदेहमिति प्रोक्तं क्रमादेव न संशयः। प्रेतपिण्डा न दीयन्ते यस्य तस्य विमोक्षणम्। श्मशानिकेभ्योभूतेभ्यस्तत्र कल्पं नैव विद्यते। तत्रास्य यातना घोरा शीतवातातपोद्भवाः। ततः सपिण्डीकरणे बान्धवैस्तु कृते नरः। पूर्णे संवत्सरे देहमतोऽन्यं प्रतिपद्यते। ततः स नरके याति स्वर्गे वा स्वेन कर्म्मणा"। तथा वायुपुराणम् "पूरकेण तु पिण्डेन देहोनिष्पाद्यते यतः। कृतस्य करणायोगात् पुनर्नावर्त्तयेत् क्रियाम्"। अतएवातिवाहिकदेहपरित्यागाय तत्कालीनकर्म्मासमर्थपुत्रसत्त्वेऽप्यन्येन दाहादि क्रियते। "पितृमातृसपिण्डैस्तु समानसलिलैस्तथा। संघातान्तर्गतैर्व्वापि राज्ञा वा धनहारिणा। पूर्व्वाः क्रियास्तु कर्त्तव्याः पुत्राद्यैरेव चोत्तराः"।

तत्र क्रियाश्च त्रिविधाः विष्णुपुराणे दर्शिता यथा "पूर्व्वाः क्रिया मध्यमाश्च तथा चैवोत्तराः क्रियाः। त्रिप्रकाराः क्रिया ह्येतास्तासां भेदान् शृणुष्व मे। आदाहाद्वार्य्यायुधादिस्पर्शाद्यन्ताश्च याः क्रियाः। ताः पूर्व्वा मध्यमा मासिमासेकोद्दिष्टसंज्ञिताः। प्रेते पितृत्वमापन्ने सपिण्डीकरणादनु। क्रियन्ते याः क्रियाः पित्र्याः प्रोच्यन्ते ता नृपोत्तराः। पितृमातृसपिण्डैश्च समानसलिलैस्तथा। संघातान्तर्गतैर्व्वापि राज्ञा वा धनहारिणा। पूर्व्वाः क्रियास्तु कर्त्तव्याः पुत्राद्यैरेव चोत्तराः। दौहित्रैर्वा नरश्रेष्ठ! कार्य्यास्तत्तनयैस्तथा। मृताहानि तु कर्त्तव्याः स्त्रीणामप्युत्तराः क्रियाः। प्रतिसंवत्सरं राजन्! एकोद्दिष्टं विधानतः"। आदाहेति दाहावधेरमीपान्तविहितवार्य्यायुधादिस्पर्शाद्यन्तास्ताः पूर्व्वाः, मासिमासीत्येकादशाहादिसपिण्डनान्तप्रेतक्रियोपलक्षणम्। सपिण्डनोत्तराः पार्व्वणादिक्रिया उत्तराः। अत्र पुत्रादिसपिण्डादयः पूर्व्वाः क्रिया अवश्यं कुर्युः। मध्यमक्रियायामनियमः। उत्तरक्रियायां पुत्रादयो भ्रातृसन्ततिपर्य्यन्ता नियताः। श्राद्धविवेकेऽप्येवम्। दौहित्रैर्वेति वाशब्दः समुच्चयार्थः तेन दौहित्रोऽप्युत्तरक्रियायां नियताधिकारी"। अत्राधिकारिणश्च एकोद्दिष्टशब्दे १५२५ पृ० उक्ताः "अकरोत् स तदौर्द्धदैहिकम्" रघुः। अनुशतिका० द्विपदवृद्धिरिति मल्लि० अनुशतिकादिगणे तस्य पाठाभावेऽपि आकृतिगणत्वात् तत्सिद्धिरिति तदाशयः। किन्तु बहुषु स्थलेषु एकपदवृद्धियुक्तं दृश्यते तेन उभयमपि साधु इति तत्त्वम्। "भृत्यानामुपरोधेन यत्करोत्यौर्द्धदेहिकम्। तद्भवत्यसुखोदर्कं जीवतश्च मृतस्य च" मनुः। "उपानहौ च वस्त्रञ्च प्रतिमुञ्चौर्द्धदेहिकम्" भारते अनु० पर्व्वणि ६२२८ श्लो०

और्द्धदमिक त्रि० ऊर्द्धदमे भवः "ऊर्द्धात् दमाच्च देहाच्च लोकोत्तरपदात्तथा" इत्युक्तेः ठञ् । ऊर्द्धदमभवे त्रि० स्त्रियां ङीप् ।

और्द्धस्रोतसिक त्रि० ऊर्द्धस्रोतसि ऊर्द्धरेतसि प्रसक्तः ठक् । शैवे पिवभक्ते त्रिका० ।

और्व पु० उर्व्वस्यापत्यम् ऋष्यण् । १उर्व्वर्षेरपत्ये गोत्रापत्ये तु विदा० अञ् । २उर्व्वगोत्रापत्ये उभयतः स्त्रियां ङीप् । उर्व्व्यां भवः अण् । ३पांशुलवणे न० राजनि० । ४उर्वीभवमात्रे त्रि० । ऊरुतोजातः ऊरु+अण् संज्ञापूर्व्वकविधेरनित्यत्वान्न गुणः । भृगुवंश्ये ५ऋषिभेदे । तत्र भवः अण् । ६वाड़वानले । तदुत्पत्तिकथा ऊरुजशब्दे १२८५ पृ० उक्ता ततो वाड़वनलोत्पत्तिकथा तु भा०आ०१८०।८१ अ० उक्ता यथा "ब्राह्मण्युवाच । "नाहं गृह्णामि वस्तात। दृष्टीर्नोस्मि रुषान्विता । अयन्तु भार्गवो नूनमूरुजः कुपितोऽद्य वः । तेन चक्षूंषि वस्तात ! व्यक्तं कोपान्महात्मना । स्मरता निहतान् बन्धूनादत्तानि न संशयः । गर्भानपि यदा यूयं भृगूणां घ्नत पुत्रकाः ! । तदायमूरुणा गर्भो मया वर्षशतं धृतः । षड़ङ्गश्चाखिलो वेद इमं गर्भस्थमेव ह । विवेश भृगुवंशस्य भूयः प्रियचिकीर्षया । सोऽयं पितृवधाद्व्यक्तं क्रोधाद्वो हन्तुमिच्छति । तेजसा तस्य दिव्येन चक्षूंषि मुषितानि वः । तमिमं तात याचध्वमौर्व्वं मम सुतोत्तमम् । अयं वः प्रणिपातेन तुष्टो दृष्टीः प्रमोक्ष्यति । वशिष्ठ उवाच । एवमुक्तास्ततः सर्व्वे राजानस्ते तमूरुजम् । ऊचुः प्रसीदेति तदा प्रसादञ्च चकार सः । अनेनैव च विख्यातो नाम्ना लोकेषु सत्तमः । स और्व्व इति विप्रर्षिरूरुं भित्त्वा व्यजायत । चक्षूंषि प्रतिलभ्याथ प्रतिजग्मुस्ततो नृपाः" ।

"इच्छन्नपचितिं कर्त्तुं भृगूणां भृगुनन्दनः । सर्व्वलोकविनाशाय तपसा महतैधितः । तापयामास ताल्लोँकान् सदेवासुरमानुषान् । तपसोग्रेण महता नन्दयिष्यन् पितामहान् । ततस्तं पितरस्तात ! विज्ञाय कुलनन्दनम् । पितृलोकादुपागम्य सर्व्वे ऊचुरिदं वचः । पितर ऊचुः । और्व्व ! दृष्टः प्रभावस्ते तपसोग्रस्य पुत्रक ! । प्रसादं कुरु लोकानां नियच्छ क्रोधमात्मनः । नानीशैर्हि तदा तात भृगुभिर्भावितात्मभिः । वधो ह्युपेक्षितः सर्व्वैः क्षत्रियाणां विहिंसताम् । आयुषा विप्रकृष्टेन यदा नः खेद आविशत् । तदास्माभिर्व्वधस्तात ! क्षत्रियैरीप्सितः स्वयम् । निखातं यच्च वै वित्तं भृगुभिर्भृगुवेश्मनि । वैरायैव तदा न्यस्तं क्षत्रियान् कोपयिष्णुभिः । किं हि वित्तेन नः कार्य्यं स्वर्गेप्सूनां द्विजोत्तम ! । यदस्माकं धनाध्यक्षः प्रभूतं धनमाहरत् । यदा तु मृत्युरादातुं न नः शक्नोति सर्व्वशः । तदास्माभिरयं दृष्ट उपायस्तात ! सम्मतः । आत्महा च पुमांस्तात ! न लोकाँल्लभते शुभान् । ततोऽस्माभिः समीक्ष्यैवं नात्मनात्मा निपातितः । न चैतन्नः प्रियं तात ! यदिदं कर्त्तुमिच्छसि । नियच्छेदं मनः पापात् सर्व्वलोकपराभवात् । मा वधीः क्षत्रियांस्तात ! न लोकान् सप्त पुत्रक ! । दूषयन्तं तपस्तेजः क्रोधमुत्पतितं जहि" ।

"और्व्व उवाच । उक्तवानस्मि यां क्रोधात् प्रतिज्ञां पितरस्तदा । सर्व्वलोकविनाशाय न सा मे वितथा भवेत् । वृथारोषप्रतिज्ञो वै नाहं भवितुमुत्सहे । अनिस्तीर्णो हि मां रोषो दहेदग्निरिवारणिम् । यो हि कारणतः क्रोधं संजातं क्षन्तुमर्हति । नालं स मनुजः सम्यक् त्रिवर्गं परिरक्षितुम् । अशिष्टानां नियन्ता हि शिष्टानां परिरक्षिता । स्थाने रोषः प्रयुक्तः स्यान्नृपैः सर्व्वजिगीषुभिः । अश्रौषमहमूरुस्थो गर्भशय्यागतस्तदा । आरावं मातृवर्गस्य भृगूणां क्षत्रियैर्वधे । संहारो हि यदा लोके भृगूणां क्षत्रियाधमैः । आगर्भोच्छेदनात् क्रान्तस्तदा मां मन्युराविशत् । संपूर्णकोपाः किल मे मातरः पितरस्तथा । भयात् सर्व्वेषु लोकेषु नाधिजग्मुः परायणम् । तान् भृगूणां यदा दारान् कश्चिन्नाभ्युपपद्यते । माता तदा दधारेयमूरुणैकेन मां शुभा । प्रतिषेद्धा हि पापस्य यदा लोकेषु विद्यते । तदा सर्व्वेषु लोकेषु पापकृन्नोपपद्यते । यदा तु प्रतिषेद्धारं पापो न लभते क्वचित् । तिष्ठन्ति बहवो लोकास्तदा पापेषु कर्मसु । जानन्नपि च यः पापं शक्तिमान्न नियच्छति । ईशः सन् सोऽपि तेनैव कर्म्मणा सम्प्रयुज्यते । राजभिश्चेश्वरैश्चैव यदि वै पितरो मम । शक्तैर्न शकितास्त्रातुमिष्टं मत्वेह जीवितम् । अत एषामहं क्रुद्धो लोकानामीश्वरो ह्यहम् । भवताञ्च वचो नालमहं समतिवर्त्तितुम् । ममापि चेद्भवेदेवमीश्वरस्य सतो महत् । उपेक्षमाणस्य पुनर्लोकानां किल्विषाद्भयम् । यश्चायं मन्युजो मेऽग्निर्लोकानादातुमिच्छति । दहेदेष च मामेव निगृहीतः स्वतेजसा । भवतां च विजानामि सर्व्वलोकहितेप्सुताम् । तस्माद्विदध्वं यच्छ्रेयो लोकानां मम चेश्वराः ! । पितर ऊचुः । य एष मन्युजस्तेऽग्निर्लोकानादातुमिच्छति । अप्सु तं मुञ्च भद्रन्ते लोका ह्यप्सु प्रतिष्ठिताः । आपोमयाः सर्व्वरसाः सर्व्वमापो-

मयं जगत्। तस्मादस्य विसृजेमं क्रोधाग्निं द्विजसत्तम!। अयं तिष्ठतु ते विप्र! यदीच्छसि महोदधौ। मन्युजोऽग्निर्दहन्नापो लोकाँ ह्यापोमयाः स्मृताः। एवं प्रतिज्ञा सत्येयं तवानघ! भविष्यति। न चैवं स-मरा लोका गमिष्यन्ति पराभवम्। वशिष्ठ उवाच। ततस्तं क्रोधजं तात! और्व्वोऽग्निं वरुणालये। उत्ससर्ज्ज स चैवाप उपयुङ्क्ते महोदधौ। महद्धयशिरो भूत्वा यत्तद्वेदविदो विदुः। तमग्निमुद्गिरन् वक्त्रात् पिबत्यापो महोदधौ"।

वाड़वानलस्य स्थितिस्थानम् सि॰शि॰ उक्तम् भूमेर्यास्येऽर्द्धे सप्तद्वीपसमुद्राणां स्थितिकीर्त्तनान्ते "स्वादूदकान्तर्वडवानलोऽसौ पातालको लोकाः पृथिवीपुटानि" इति। और्वस्य च प्रवरर्षित्वम् आर्षेयशब्दे उक्तम्। "जामदग्न्यवत्सानामेषां पञ्चार्षेयो भार्गवच्यावनाप्नवानौर्वजामदग्न्येति च आश्व॰श्रौ॰ १२,१०,६,८ और्वमधिकृत्य कतोपन्यासः। भारतान्तर्गते और्वचरिताख्याने। "तापत्यमथ-वासिष्ठमौर्वं चाख्यानमुत्तमम्" भा॰ आ॰ १। तच्चाख्यानं भा॰ आ॰ १८६ अध्यायादौ दृश्यम्।

और्वश पु॰ उर्व्वशी तच्छब्दोऽस्त्यत्र विसृक्ता॰ अण्। और्वशी शब्दयुक्ते १स्वाध्याये २अनुवाके च। उर्व्वश्या इदम् अण्। २उर्व्वशीसम्बन्धिनि त्रि॰।

और्वशेय पु॰ उर्व्वश्या अपत्यम् ढक्। १अगस्त्ये मुनौ हेमच॰ तस्य च उर्व्वशीं दृष्ट्वा मित्रावरुणयोः स्खलितरेतोजाततया तथात्वम् तत्प्रमाणञ्चागस्तिशब्दे ४७पृ॰ उक्तम्। ऐलशब्दे दर्शितेषु उर्वशीगर्भजातेषु पुरूरवसः सुतेषु २आयुरादिषु षट्सु च

औलपि पु॰ उलपस्य कलाप्यन्तेवासिविशेषस्यापत्यम् इञ्। उलपापत्ये ततः स्वार्थे दामन्या॰ छ। औलपीय तदर्थे बहुषु तस्य लुक्। औलपय इत्यादि।

औलपिन् पु॰ ब॰व॰। उलपेन प्रोक्तं छन्दोऽधीयते कलाप्यन्तेवासित्वात् णिनि। उलपप्रोक्तछन्दोऽध्यायिषु

औलान न॰ अवलम्बनं वेदे पृषो॰। अवलम्बने। "विद्वान् पथ ऋतुशोदेवयानानप्यौलानं दिविषे" ऋ॰१०,९८,११।

औलूक न॰ उलूकानां समूहः खण्डिका॰ अञ्। पेचकसमुदाये

औलूक्य पु॰ उलूकर्षेरपत्यम् गर्गा॰ यञ्। उलूकनामर्षेरपत्ये कणादे वैशेषिकसूत्रकारे तस्य छात्राः कण्वादि॰ अण्। ततो यञो लुक्। औलूक औलूक्यच्छात्रे वैशेषिकमतानुगे। उलूक इति सूत्रमध्यं केचिदाहुः

औलूक्यदर्शनन्तु वैशेषिकदर्शनं तत्प्रतिपाद्यविषया उच्यन्ते

"अथातो धर्मं व्याख्यास्यामः"। १सू॰

"तापत्रयपराहता विवेकिनस्तापत्रयनिवृत्तिनिदानमनुसन्दधाना नानाश्रुतिस्मृतीतिहासपुराणेष्वात्मतत्त्वसाक्षात्कारमेव तदुपायमाकलयाम्बभूवुः। तत्प्राप्तिहेतुमपि पन्थानं जिज्ञासमानाः परमकारुणिकं कणादं मुनिमुपसेदुः। अथ कणादो मुनिस्तत्त्वज्ञानवैराग्यैश्वर्यसम्पन्नः षण्णां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानमेवात्मतत्त्वसाक्षात्कारप्राप्तये परमः पन्था इति मनसिकृत्य तच्च निवृत्तिलक्षणाद्धर्मादितेषामनायासेन सेत्स्यतीति लक्षणतः स्वरूपतश्च धर्ममेव प्रथममुपदिश्यानन्तरं षडपि पदार्थानुद्देशलक्षणपरीक्षाभिरुपदेक्ष्यामीति हृदि निधाय तेषामवधानाय प्रतिजानीते। अथातो धर्ममित्यादि" उप॰

"यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः"। २सू॰

"को धर्मः किंलक्षणश्चेति? सामान्यतः शिष्यजिज्ञासायां यतोऽभ्युदयनिश्रेयससिद्धिरित्युपतिष्ठते" तथा च यतोऽभ्युदयसिद्धिर्यतश्च निःश्रेयससिद्धिस्तदुभयं धर्मः एवं पुरुषार्थासाधारणकारणं धर्म इति वक्तव्ये परमपुरुषार्थयोः सुखदुःखाभावयोर्विशेषतः परिचयार्थमभ्युदयनिःश्रेयससिद्धिरित्युक्तं स्वर्गापवर्गयोरेवान्येच्छानधीनेच्छाविषयत्वेन परमपुरुषार्थत्वात्। साधयिष्यते च दुःखाभावस्यापि पुरुषार्थत्वम्" उपस्कारः।

"तद्वचनादाम्नायस्य प्रामाण्यम्"। ३सू॰

"ननु निवृत्तिलक्षणो धर्मस्तत्त्वज्ञानद्वारा निःश्रेयसहेतुरित्यत्र श्रुतिः प्रमाणं श्रुतेरेव प्रामाण्ये वयं विप्रतिपद्यामहे अनृतव्याघातपुनरुक्तदोषेभ्यः, पुत्रेष्टौ कृतायामपि पुत्रानुत्पादादनृतत्वम् "उदिते जुहोति अनुदिते जुहोति समयाध्युषिते जुहोतीति" विधेः प्राप्त एवोदितादिकाले होमो व्याहन्यते "श्यावोऽस्याहुतिमभ्यवहरति य उदिते जुहोति योऽनुदिते जुहोति श्यावशवलावस्याहुतिमभ्यवहरतो यः समयाध्युषिते जुहोति" इत्यादिना। तथा "त्रिः प्रथमामन्वाह त्रिरुत्तमामन्वाह" इत्यनेन प्रथमोत्तमसामिधेन्योस्त्रिरुच्चारणाभिधानात् पौनरुक्त्यमेव। न चाम्नायप्रामाण्यप्रतिपादकं किञ्चिदस्ति प्रमाणम् नित्यत्वे विप्रतिपत्तौ नित्यनिर्दोषत्वमपि सन्दिग्धं पौरुषेयत्वे तु भ्रमप्रमादविप्रतिपत्तिकरणापाटवादिसम्भावनया आप्तोक्तत्वमपि सन्दिग्धमेवेति न निःश्रेयसं न वा तत्र तत्त्वज्ञानं द्वारं न वा धर्म इति

सर्वमेतदाकुलमत आह । तदुद्वचनादाम्नायस्येत्यादि । तदित्यनुपक्रान्तमपि प्रसिद्धिसिद्धतयेश्वरं परामृशति यथा "तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः" इति गौतमीयसूत्रे तच्छब्देनानुपक्रान्तोऽपि वेदः परामृश्यते । तथा च तद्वचनात्तेनेश्वरेण प्रणयनादाम्नायस्य वेदस्य प्रामाण्यं यद्वा तदिति सन्निहितं धर्ममेव परामृशति तथाच धर्मस्य वचनात् प्रतिपादनात् आम्नायस्य वेदस्य प्रामाण्यं यद्धि वाक्यं प्रामाणिकमर्थं प्रतिपादयति तत्प्रमाणमेव यत इत्यर्थः । ईश्वरस्य तदाप्तत्वञ्च साधयिष्यते गौतमोक्तानृतव्याघातपुनरुक्तदोषेभ्य इति तत्रानृतत्वे जन्मान्तरीयफलकल्पनं कर्मकर्तृसाधनवैगुण्यकल्पनं वा श्रौतात् साक्षात् कर्मणः फलावश्यम्भावनियमात् न च कारीरीवदैहिकमात्रफलकत्वं तत्र हि शुष्यत्सस्यसञ्जीवनकामस्याधिकारः पुत्रेष्टौ पुत्रकामस्येति विशेषात् नच व्याघातोऽपि उदितादिहोमं विशेषतः प्रतिज्ञाय तदन्यकाले होमानुष्ठाने "श्यावोऽस्याहुतिमभ्यवहरति" इत्यादिनिन्दाप्रतिपादनात् न च पुनरुक्ततादोषोऽपि एकादशसामिधेनीनां प्रकृतौ पाठात् "पञ्चदशावरेण याज्यत्रेणावसाधे तमिमं भ्रातृव्यम्" इत्यत्र सामिधेनीनां पञ्चदशत्वस्य प्रथमोत्तमसामिधेन्योस्त्रिरभिधानमन्तरेणानुपपत्तेस्तथाभिधानात्"। उपस्का० २।

शिष्याकाङ्क्षानुरोधेन स्वरूपतोलक्षणतश्च धर्मं व्याख्यायाभिधेयसम्बन्धफलप्रतिपादनायाह "धर्मविशेषप्रसूतात् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्" ४सू ।

"एतादृशं तत्त्वज्ञानं वैशेषिकशास्त्राधीनमिति तस्यापि निःश्रेयसहेतुत्वं दण्डापूपायितम् । तत्त्वं ज्ञायतेऽनेनेति करणव्युत्पत्त्या शास्त्रपरत्वे धर्मविशेषप्रसूतादित्यनेनानन्वयापत्तेः । सर्वपदार्थप्रधानो द्वन्द्वात्र समासः सर्वपदार्थतत्त्वज्ञानस्य निःश्रेयसहेतुत्वात् तदत्र शास्त्रनिःश्रेयसयोर्हेतुहेतुमद्भावः शास्त्रतत्त्वज्ञानयोर्व्यापारव्यापारिभावः निःश्रेयसतत्त्वज्ञानयोः कार्य्यकारणभावः द्रव्यादिपदार्थशास्त्रयोः प्रतिपाद्यप्रतिपादकभावः सम्बन्धोऽवगम्यते एतेषाञ्च सम्बन्धानां ज्ञानान्निःश्रेयसार्थिनामिह शास्त्रे प्रवृत्तिः । मोक्षकारणाच्च मुनेर्गृहीतप्रभावा एव शास्त्रे प्रवर्त्तन्ते । निःश्रेयसमात्यन्तिकी दुःखनिवृत्तिः । दुःखनिवृत्तेरात्यन्तिकत्वं समानाधिकरणदुःखप्रागभावासमानकालीनत्वं युगपदुत्पन्नसमानाधिकरणसकलात्मविशेषगुणध्वंससमानकालीनत्वं वा । अशेषविशेषगुणध्वंसावधिकदुःखप्रागभावो वा मुक्तिः नचासाध्यत्वान्नायं पुरुषार्थः, कारणविघटनमुखेन प्रागभावस्यापि साध्यत्वात् नच तस्य प्रागभावत्वक्षतिः प्रतियोगिजनकाभावत्वेन तथात्वात्, जनकत्वञ्च स्वरूपयोग्यतामात्रम्, नहि प्रागभावश्चरमसामग्री येन तस्मिन् सति कार्य्यमवश्यम्भवेत् तथा सति कार्य्यस्यानादित्वप्रसङ्गात् तथाच यथा सहकारिविरहादियन्तं कालं नाजीजनत् तथाग्रेऽपि तद्विरहान्न जनयिष्यति हेतूच्छेदे पुरुषव्यापारात् इत्यस्यापि प्रागभावपरिपालन एव तात्पर्य्यात्, अत एव गौतमीयद्वितीयसूत्रे "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः" इत्यत्र कारणाभावात् कार्य्याभावाभिधानं दुःखप्रागभावरूपामेव मुक्तिं द्रढयति नहि दोषापाये प्रवृत्त्यपायः, प्रवृत्त्यपाये जन्मापायः, जन्मापाये दुःखापाय इत्यत्रापायो ध्वंसः किन्त्वनुत्पत्तिः सा च प्रागभाव एव न च प्रतियोग्यप्रसिद्धिः सामान्यतो दुःखत्वेनैव प्रतियोगिप्रसिद्धेः प्रायश्चित्तवत् तत्रापि प्रत्यवायध्वंसद्वारा दुःखानुत्पत्तेरेवापेक्षितत्वात् लोकेऽपि कण्टकादिनिवृत्तेर्दुःखानुत्पत्तिफलकत्वदर्शनात् दुःखसाधननिवृत्त्यर्थमेव प्रेक्षावतां प्रवृत्तेः । केचित्तु दुःखात्यन्ताभाव एव मुक्तिः स च यद्यपि नात्मनिष्ठस्तथापि लोष्टादिनिष्ठ एवात्मनि साध्यते सिद्धिश्च तस्य दुःखप्रागभावासहवर्त्तिदुःखध्वंस एव तस्य तत्सम्बन्धतयोपगमात् तस्मिन् सति तत्र दुःखात्यन्ताभावप्रतीतेः एवञ्च सति "दुःखेनात्यन्तं विमुक्तश्चरति" इत्यादिश्रुतिरप्युपपादिता भवतीत्याहुः तन्न दुःखात्यन्ताभावस्यासाध्यत्वेनापुरुषार्थत्वात् दुःखध्वंसस्य च न तत्र सम्बन्धत्वं परिभाषापत्तेः "दुःखेनात्यन्तं विमुक्तश्चरति" इति श्रुतेर्दुःखप्रागभावस्यैव कारणविघटनमुखेनात्यन्ताभावसमानरूपत्वतात्पर्य्यकत्वात् । नन्वयं न पुरुषार्थः निरुपाधीच्छाविषयत्वाभावात् दुःखकाले सुखं तावन्नोत्पद्यते इति सुखार्थिनामेव दुःखाभावार्थं प्रवृत्तिरिति चेन्न वैपरीत्यस्यापि सुवचत्वात् सुखेच्छापि दुःखाभावौपाधिकीत्येव किं न स्यात् शोकाकुलानां सुखविमुखानामपि दुःखाभावमात्रमभिसन्धाय विषभक्षणोद्बन्धनादौ प्रवृत्तिदर्शनात् । ननु पुरुषार्थोऽप्ययं ज्ञायमान एव मुक्तेस्तु दुःखाभावस्य ज्ञायमानतैव नास्ति अन्यथा मूर्च्छाद्यवस्थायामपि प्रवर्त्तेतेति चेन्न श्रुत्यनुमानाभ्यां ज्ञायमानत्वावेद्यत्वानुपपत्तेः । अस्ति हि श्रुतिः "दुःखेनात्यन्तं विमुक्त-

चरति” “तमेव विदित्वाऽतिमृत्युमेति” इत्यादिका। अनुमानमप्यस्ति दुःखसन्ततिरत्यन्तमुच्छिद्यते सन्ततित्वात् प्रदीपसन्ततिवदित्यादि चरमदुःखध्वंसस्य दुःखसाक्षात्कारेण सह विषयीकरणात् प्रत्यक्षवेद्यताऽपि। योगिनां योगजधर्म्मबलेनागामिनो दुःखध्वंसस्य प्रत्यक्षोपगमाच्च। तथापि तुल्यायव्ययतया नायं पुरुषार्थो दुःखवत् सुखस्यापि हाने द्वयोरपि समानसामग्रीकत्वादिति चेत् उत्सर्गतो वीतरागाणां दुःखदुर्द्दिनभीरूणां सुखखद्योतिकामात्रेऽलम्पत्ययवतां तत्र प्रवृत्तेः। ननु तथापि दुःखनिवृत्तिर्न पुरुषार्थः, अनागतदुःखनिवृत्तेरशक्यत्वात् अतीतदुःखस्यातीतत्वात् वर्त्तमानदुःखस्य पुरुषप्रयत्नमन्तरेणैव निवृत्तेरिति चेन्न हेतूच्छेदे पुरुषव्यापारात् प्रायश्चित्तवत् तथाहि सवासनं मिथ्याज्ञानं संसारहेतुस्तदुच्छेदश्चात्मतत्त्वज्ञानात् तत्त्वज्ञानं च योगविधिसाध्यमिति तदर्थं प्रवृत्त्युपपत्तेः” उपस्कारः कियदन्तरे च “धर्मविशेषप्रसूतादिति तत्त्वज्ञानादित्यस्य विशेषणं तत्र धर्मविशेषो निवृत्तिलक्षणो धर्मः इदि तु तत्त्वं ज्ञायतेऽनेनेति तत्त्वज्ञानं शास्त्रमुच्यते तदा धर्मविशेष ईश्वरनियोगप्रसादरूपो वक्तव्यः श्रूयते हीश्वरनियोगप्रसादवधिगम्य कणादो महर्षिः शास्त्रं प्रणीतवानिति तत्त्वज्ञानमात्मतत्त्वसाक्षात्कार इह विवक्षितस्तस्यैव सवासनमिथ्याज्ञानोन्मूलनक्षमत्वात् “तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽनाय” इत्यत्र “द्वे ब्रह्मणी वेदितव्ये” इत्यत्र च वेदनपदस्य साक्षात्कारपरत्वात् “पश्यत्यचक्षुः” इत्यत्रापि तथा। स च शास्त्रान्मननिदिध्यासनादिपरम्परयेति हेतुपञ्चम्या तथैवाभिधानात्” उप० न्यायकन्दल्यां प्रयोजनस्थलमित्थं विवृतं यथा “तच्चेश्वरनोदनाभिव्यक्ताद्धर्म्मादेवेति” भाष्यप्रतीकव्याख्यायाम् “यस्य वस्तुनो यो भावस्तत् तस्य तत्त्वम् साधारणो धर्मः साधर्म्यम् असाधारणोधर्मो वैधर्म्यं तयोस्तत्त्वज्ञानं निःश्रेयसहेतुः विषयसंयोगजं सुखं तावत् क्षणिकं विनाशि दुःखबहुलं स्वर्गादिपदं प्राप्यमपि सप्रत्ययं, सातिशयञ्च तथा च कस्यचित् स्वर्गमात्रमपरस्य स्वर्गराज्यम् अतस्तदपि सततं प्रच्युतिशङ्कया परसमुत्कर्षोपतापाच्च दुःखाक्रान्तं न निश्चितं श्रेयः। आत्यन्तिकी दुःखनिवृत्तिरसह्यसंवेदननिखिलदुःखासंवेदनारूपत्वादपरावृत्तेश्च निश्चितं श्रेयः तस्य कारणं द्रव्यादिस्वरूपज्ञानम्। एतेनैतत् प्रत्युक्तमण्डनेन यदुक्तं विशेषगुणनिवृत्तिलक्षणा मुक्तिरुच्छेदपक्षान्न भिद्यत इति। विशेषगुणोच्छेदे हि सति आत्मनः स्वरूपेणावस्थानं नोच्छेदोनित्यत्वात् नचायमपुरुषार्थः समस्तदुःखोपरमस्य पुरुषार्थत्वात् समस्तसुखाभावादपुरुषार्थत्वमिति चेत् न सुखस्यापि क्षयितया बहुलप्रत्यनीकतया साधनप्रार्थनायतपरिक्लिष्टतया च सदा दुःखाक्रान्तस्य विषमिश्रस्येव मधुनोदुःखपक्षे निक्षेपात्”। कियदन्तरे तत्रैव। “तत् निःश्रेयसं धर्म्मादेव भवति द्रव्यादि तत्त्वज्ञानं तस्य कारणत्वेन निःश्रेयससाधनम् इत्यभिप्रायः तत्त्वतोज्ञातेषु बाह्याध्यात्मिकेषु विषयेषु दोषदर्शनाद्विरक्तस्य समीहानिवृत्तावात्मज्ञस्य तदर्थानि कर्म्माण्यकुर्व्वतस्तत्परित्यागसाधनानि च श्रुतिस्मृत्युदितानि असङ्कल्पितफलान्युपाददानस्यात्मज्ञानमभ्यस्य ततः प्रकृष्टविनिवर्त्तकधर्म्मोपचये सति परिपक्वात्मज्ञानस्यात्यन्तिकशरीरवियोगस्य भावादुदृष्टोहि विषयाणामहिकण्टकादीनां, परित्यागो विषयदोषदर्शनादभिसन्धितनिवर्त्तकात्मविशेषगुणात् प्रयत्नात् तेन शरीरादीनामात्यन्तिकः परित्यागोविषयदोषदर्शनपूर्वकानभिसन्धितनिवर्त्तकात्मविशेषगुणनिमित्तविघात इति मोक्षाधिकारे वक्ष्यामः। धर्म्मोऽपि केवलं न तावन्निःश्रेयसं करोति यावदीश्वरेच्छया नानुगृह्यते तेनेदमुक्तम् ईश्वरनोदनेत्यादि। नोद्यन्ते प्रेर्य्यन्ते स्वकार्य्येषु प्रवर्त्त्यन्तेऽनया भावा इति नोदना ईश्वरस्य नोदना ईश्वरेच्छाविशेषः अभिव्यक्तिः कार्य्यारम्भं प्रत्याभिमुख्यम् ईश्वरनोदनयाऽभिव्यक्तात् ईश्वरेच्छाविशेषेण कार्य्यारम्भाभिमुखीकृताद्धर्म्मादेव निःश्रेयसं भवतीति वाक्ययोजना”। एवं विषयप्रयोजनादिकं चतुःसूत्र्यामभिहितं तत्र प्रतिपाद्यविषयाश्च सर्व्वद० दर्शिता यथा

इह खलु निखिलप्रेक्षावन्निसर्गप्रतिकूलवेदनीयतया निखिलसंवेदनसिद्धं दुःखं जिहासुस्तद्धानोपायं जिज्ञासुः परमेश्वरसाक्षात्कारमुपायमाकलयति “यदा चर्म्मवदाकाशं वेष्टयन्तीह मानवाः। तदा शिवमविज्ञाय दुःखस्यान्तोभविष्यति” इत्यादिवचननिचयप्रामाण्यात्। परमेश्वरसाक्षात्कारश्च श्रवणमननभावनाभिर्भावनीयः यदाह “आगमेनानुमानेन ध्यानाभ्यासरसेन च। त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तममिति” तत्र मननमनुमानाधीनमनुमानञ्च व्याप्तिज्ञानाधीनं व्याप्तिज्ञानञ्च पदार्थविवेकापेक्षम्। अतः पदार्थषट्कम्”। “अथातो धर्म्मं व्याख्यास्याम इत्यादिकायां दशलक्षण्यां कणभक्षेण भगवता व्यवस्थापि तत्राह्निकद्वयात्मके प्रथमे

ऽध्याये समवेताशेषपदार्थकथनमकारि। तत्रापि प्रथमाह्निके जातिमन्निरूपणं, द्वितीयाह्निके जातिविशेषनिरूपणम्। आह्निकद्वययुक्ते द्वितीयेऽध्याये द्रव्यनिरूपणं, तत्रापि प्रथमाह्निके भूतविशेषलक्षणं, द्वितीये दिक्कालप्रतिपादनम्। आह्निकद्वययुक्ते तृतीये आत्मान्तःकरणलक्षणं, तत्राप्यात्मलक्षणं प्रथमे, द्वितीये अन्तःकरणलक्षणम्। आह्निकद्वययुक्ते चतुर्थे शरीरतदुपयोगिविवेचनं, तत्रापि प्रथमे तदुपयोगिविवेचनं द्वितीये शरीरविवेचनम्। आह्निकद्वयवति पञ्चमे कर्मप्रतिपादनं, तत्रापि प्रथमे शरीरसम्बन्धिकर्मचिन्तनं, द्वितीये मानसकर्मचिन्तनम्। आह्निकद्वयशालिनि षष्ठे श्रौतधर्मनिरूपणं, तत्रापि प्रथमे दानप्रतिग्रहधर्मविवेकः, द्वितीये चातुराश्रम्योचितधर्मनिरूपणम्। तथाविधे सप्तमे गुणसमवायप्रतिपादनं, तत्रापि प्रथमे बुद्धिनिरपेक्षगुणप्रतिपादनं, द्वितीये तत्सापेक्षगुणप्रतिपादनं समवायप्रतिपादनञ्च। अष्टमे निर्विकल्पकसविकल्पकप्रत्यक्षप्रमाणचिन्तनम्। नवमे बुद्धिविशेषप्रतिपादनम्। दशमे अनुमानभेदप्रतिपादनम्। तत्र उद्देशो लक्षणं परीक्षा इति त्रिविधास्य शास्त्रस्य प्रवृत्तिः। ननु विभागापेक्षया चातुर्विध्ये वक्तव्ये कथं त्रैविध्यमुक्तमिति चेन्नैवं संस्याः विभागस्य विशेषोद्देश एवान्तर्भावात्। तत्र द्रव्यगुणकर्मसामान्यविशेषसमवाया भावा इति षडेवैते पदार्था इत्युद्देशः। किमत्र क्रमनियमे कारणम्? उच्यते समस्तपदार्थायतनत्वेन प्रधानस्य द्रव्यस्य प्रथममुद्देशः। अनन्तरं गुणत्वोपाधिना सकलद्रव्यवृत्तेर्गुणस्य, तदनु सामान्यवत्त्वसाम्यात् कर्मणः, पश्चात्त्त्रितयाश्रितस्य सामान्यस्य, तदनन्तरं समवायाधिकरणस्य विशेषस्य, अन्ते अवशिष्टस्य समवायस्येति क्रमनियमः। ननु षडेव पदार्था इति कथं कथ्यते, अभावस्यापि सद्भावादिति चेन्नैवं बोधः नञर्थानुल्लिखितधीविषयतया भावरूपतया षडेवेति विवक्षितत्वात् तथापि कथं षडेवेति नियम उपपद्यते विकल्पानुपपत्तेः तथाहि नियमव्यवच्छेद्यं प्रमितं न वा प्रमितत्वे कथं निषेधः अप्रमितत्वे कथन्तराम्, नहि कश्चित् प्रेक्षावान् मूषिकविषाणं प्रतिषेद्धुं यतते, तदयानुपपत्तेर्नो नियम इति चेन्नैवं भाषिष्ठाः सप्रमतया प्रमिते अन्धकारादौ भावत्वस्य भावतया प्रमिते शक्तिसादृश्यादौ सप्रमत्वादेश्च निषेधादिति कृतं विस्तरेण।

तत्र द्रव्यादित्रितयस्य द्रव्यत्वादिजातिर्लक्षणम्। द्रव्यत्वं नाम गगनारविन्दसमवेतत्वे सति नित्यगन्धासमवेतम्। (गगनसमवेतत्वे सति पद्मसमवेतत्वे सति नित्यत्वे सति गन्धासमवेतत्वं द्रव्यत्वलक्षणम्। सत्तारूपजातिव्यवच्छेदाय गन्धासमवेतत्वमुक्तम् कालिकसम्बन्धेन द्रव्यत्वस्य गन्धवृत्तित्वादसम्भववारणाय गन्धसमवेतत्वमुक्तम् संयोगादेर्गन्धासमवेतत्वेन गगनादिसमवेतत्वेनातिप्रसङ्गवारणाय नित्यत्वे सतीति विशेषणम्। पद्मत्वपृथिवीत्वजातौ पद्मसमवेतत्वस्य नित्यत्वस्य गन्धासमवेतत्वस्य च सत्त्वादतिप्रसङ्गवारणाय गगनसमवेतत्वे सतीति विशेषणम् गगनपरिमाणस्य नित्यस्य गन्धासमवेतस्य तथात्ववारणायारविन्दसमवेतत्वे सतीति विशेषणम् इतिबोध्यम्)। गुणत्वं नाम समवायिकारणासमवायिकारणभिन्नसमवेतसत्तासाक्षाद्व्याप्यजातिः। (सत्तासाक्षाद्व्याप्यस्य समवायिकारणद्रव्यसमवेतस्य द्रव्यत्वस्य, असमवायिकारणसमवेतस्य कर्मसमवेतस्य कर्मत्वस्य च तथात्ववारणाय तदुभयभिन्नसमवेतत्वं जातौ विशेषणम् गुणत्वस्य तु तथात्वम् गुणेषु ज्ञानादिषु असमवायिकारणभिन्नेषु समवेतज्ञानत्वादेः सत्तासाक्षाद्व्याप्यत्वेऽपि नातिप्रसङ्गः) कर्मत्वं नामानित्यसमवेतत्वघटितसत्तासाक्षाद्व्याप्यजातिः। (अनित्यमात्रसमवेतत्वे सति सत्तासाक्षाद्व्याप्यजातित्वम् कर्मत्वलक्षणम् द्रव्यत्वस्य गुणत्वस्य च नित्यमात्रसमवेतत्वाभावाच्च तथात्वम्। संयोगत्वादेस्तथात्वेऽपि सत्तासाक्षाद्व्याप्यत्वाभावान्नातिप्रसङ्गः) सामान्यन्तु प्रध्वंसप्रतियोगित्वरहितमनेकसमवेतम्। (संयोगविभागादौ अनेकसमवेतेऽतिप्रसङ्गवारणाय ध्वंसप्रतियोगित्वरहितेति अत्यन्ताभावे तथात्ववारणाय समवेतत्वं विशेषणम्)। विशेषो नामान्योन्याभावविरोधिसामान्यरहितः समवेतः। समवायस्तु समवायरहितः सम्बन्ध इति षण्णां लक्षणानि व्यवस्थितानि।

"द्रव्यं नवविधं पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसीति। तत्र पृथिव्यादिचतुष्टयस्य पृथिवीत्वादिजातिर्लक्षणम्। पृथिवीत्वं नाम पाकजरूपसमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिः। अप्त्वं नाम सरित्सागरसमवेतत्वे सति सलिलसमवेतं सामान्यम्। तेजस्त्वं नाम चन्द्रचामीकरसमवेतत्वे सति ज्वलनसमवेतं सामान्यम्। वायुत्वं नाम त्वगिन्द्रियसमवेतद्रव्यत्वसाक्षाद्व्याप्यजातिः। आकाशकालदिशामेकैकत्वादपरजात्यभावात् पारिभाषिक्यस्तिस्रः संज्ञा भवन्ति आकाशः कालो दिगिति। संयोगाजन्यजन्यविशेषगुणसमानाधिकरणविशेषाधिकरणमाका

मद् । विभुत्वे सति दिगसमवेतपरत्वासमवायिकारणाधिकरणम् कालः । अकालत्वे सत्यविशेषगुणा महती दिक् । आत्ममनसोरात्मत्वमनस्त्वे । आत्मत्वं नाम अमूर्त्तसमवेतद्रव्यत्वापरजातिः । मनस्त्वं नाम द्रव्यसमवायिकारणत्वरहिताणुसमवेतद्रव्यत्वापरजातिः । रूपरसगन्धस्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाश्च कण्ठोक्ताः सप्तदश चशब्दसमुच्चिताः गुरुत्वद्रवत्वस्नेहसंस्कारादृष्टशब्दाः सप्तैवेत्येवं चतुर्विंशतिर्गुणाः । तत्र रूपादिशब्दान्तानां रूपत्वादिजातिर्लक्षणम् । रूपत्वं नाम नीलसमवेतगुणत्वापरजातिः । अनया दिशा शिष्टानां लक्षणानि द्रष्टव्यानि । कर्म पञ्चविधम् उत्क्षेपणावक्षेपणाकुञ्चनप्रसारणगमनभेदात् । भ्रमणरेचनादीनां गमन एवान्तर्भावः । उत्क्षेपणादीनामुत्क्षेपणत्वादिजातिर्लक्षणम् । तत्र उत्क्षेपणं नाम ऊर्द्ध्वदेशसंयोगासमवायिकारणप्रमेयसमवेतकर्मत्वापरजातिः । एवमवक्षेपणादीनां लक्षणं कर्त्तव्यम् । सामान्यं द्विविधं परमपरञ्च परं सत्ता द्रव्यगुणसमवेता गुणकर्मसमवेता वा । अपरं द्रव्यत्वादि तल्लक्षणं प्रागेवोक्तम् । विशेषाणामनन्तत्वात् समवायस्य चैकत्वाद्विभागो न सम्भवति तल्लक्षणञ्च प्रागेवावादि । (सर्व्वत्वापरत्वं व्याप्यत्वम् अल्पदेशवृत्तित्वं वा) ।

“द्वित्वे च पाकजोत्पत्तौ विभागे च विभागजे । यस्य न स्खलिता बुद्धिस्तं वै वैशेषिकं विदुरिति” आभाणकस्य सद्भावात् द्वित्वाद्युत्पत्तिप्रकारः प्रदर्श्यते । तत्र प्रथममिन्द्रियार्थसन्निकर्षस्तस्मादेकत्वसामान्यज्ञानं ततोऽपेक्षाबुद्धिः ततो द्वित्वोत्पत्तिस्ततो द्वित्वसामान्यज्ञानं तस्मात् द्वित्वगुणज्ञानं ततः संस्कारः” । तदाह

“आदाविन्द्रियसन्निकर्षघटनादेकत्वसामान्यधीरेकत्वोभयगोचरा मतिरतो द्वित्वं ततो जायते । द्वित्वत्वप्रमितिस्ततोऽनु परतो द्वित्वप्रमानन्तरं द्वे द्रव्ये इति धीरिय निगदिता द्वित्वोदयप्रक्रियेति”।

द्वित्वादेरपेक्षाबुद्धिजन्यत्वे किं प्रमाणम् अत्राहुराचार्याः“अपेक्षाबुद्धिर्द्वित्वादेरुत्पादिका भवितुमर्हति व्यञ्जकत्वानुपपत्तौ तेनानुविधीयमानत्वात् शब्दं प्रति संयोगवदिति” । वयन्तु ब्रूमः द्वित्वादिकमेकत्वद्वयविषयानित्यबुद्धिव्यङ्ग्यं भवति अनेकाश्रितगुणत्वात् पृथक्त्वादिवदिति ।

निवृत्तिक्रमो निरूप्यते अपेक्षाबुद्धित एकत्वसामान्यज्ञानस्य द्वित्वोत्पत्तिसमकालनिवृत्तिः अपेक्षाबुद्धेर्द्वित्वसामान्यज्ञानात् द्वित्वगुणबुद्धिसमसमयं द्वित्वस्यापेक्षाबुद्धिनिवृत्तेर्द्रव्यबुद्धिसमकालं गुणबुद्धेः, द्रव्यबुद्धितः संस्कारोत्पत्तिसमकालं द्रव्यबुद्धेस्तदनन्तरसंस्कारादिति । तथाच संग्रहः “आदावपेक्षाबुद्ध्या हि नश्येदेकत्वजातिधीः । द्वित्वोदयसमं पश्चात् सा च तज्जातिबुद्धितः । द्वित्वाख्यगुणधीकाले ततो द्वित्वं निवर्त्तते । अपेक्षाबुद्धिनाशेन द्रव्यधीजन्मकालतः । गुणबुद्धिर्द्रव्यबुद्ध्या संस्कारोत्पत्तिकालतः । द्रव्यबुद्धिश्च संस्कारादिति नाशक्रमो मतः” इति ।

बुद्धेर्बुद्ध्यन्तरविनाश्यत्वे संस्कारविनाश्यत्वे च प्रमाणं विवादाध्यासितानि ज्ञानानि उत्तरोत्तरकार्य्यविनाश्यानि क्षणिकविभुविशेषगुणत्वात् शब्दवत् । द्रव्यारम्भकसंयोगप्रतिद्वन्द्विविभागजनककर्मसमकालमेकत्वसामान्यचिन्तया आश्रयनिवृत्तेरेव द्वित्वनिवृत्तिः कर्मसमकालमपेक्षाबुद्धिचिन्तनादुभाभ्यामिति सङ्क्षेपः । अपेक्षाबुद्धिर्नाम विनाशकविनाशप्रतियोगिनी बुद्धिरिति बोद्धव्यम् ।

अथ द्व्यणुकनाशमारभ्य कतिभिः क्षणैः पुनरन्यद् द्व्यणुकमुत्पद्य रूपादिमद्भवतीति जिज्ञासायामुत्पत्तिप्रकारः कथ्यते । नोदनादिक्रमेण द्व्यणुकनाशः नष्टे द्व्यणुके परमाणावग्निसंयोगात् श्यामादीनां निवृत्तिः निवृत्तेषु श्यामादिषु पुनरन्यस्मादग्निसंयोगाद्रक्तादीनामुत्पत्तिः उत्पन्नेषु रक्तादिषु अदृष्टवदात्मसंयोगात् परमाणौ द्रव्यारम्भणाय क्रिया तया पूर्व्वदेशाद्विभागः विभागेन पूर्व्वदेशसंयोगनिवृत्तिः तस्मिन्निवृत्ते परमाण्वन्तरेण संयोगोत्पत्तिः संयुक्ताभ्यां परमाणुभ्यां द्व्यणुकारम्भः आरब्धे द्व्यणुके कारणगुणादिभ्यः कार्य्यगुणादीनां रूपादीनामुत्पत्तिरिति यथाक्रमं नव क्षणाः । दशक्षणादिप्रकारान्तरं विस्तरभयान्नेह प्रतन्यते । इयं पीलुपाकप्रक्रिया पीठरपाकप्रक्रिया तु नैयायिकधीसम्मता ।

विभागजविभागो द्विविधः कारणमात्रविभागजः कारणाकारणविभागजश्च । तत्र प्रथमः कथ्यते कार्य्यव्याप्ते कारणे कर्मोत्पन्नं यदावयवान्तराद्विभागं विधत्ते न तदाकाशादिदेशाद्विभागः । यदा त्वाकाशादिदेशाद्विभागः न तदावयवान्तरादिस्थिति नियमः कर्मणो गगनविभागाकर्त्तृत्वस्य द्रव्यारम्भकसंयोगविरोधिविभागारम्भकत्वेन धूमस्य धूमध्वजवत्त्वेनैव व्यभिचारानुपलम्भात् ततश्चावयवकर्म अवयवान्तरादेव विभागं करोति नाकाशादिदेशात् तस्माद्विभागाद्द्रव्यारम्भकसंयोगनिवृत्तिः ततः कारणाभावात् कार्य्याभाव इति न्यायादवयविनिवृत्तिः निवृत्तेऽवयविनि तत्का-

एतयोरवयवयोर्वर्त्तमानो विभागः कार्य्यविनाशविशिष्टं कालं स्वतन्त्रं वावयवमपेक्ष्य सक्रियस्यैवावयवस्य कार्य्यसंयुक्तादाकाशदेशाद्विभागमारभते न निष्क्रियस्य,कारणाभावात्। द्वितीयस्तु हस्ते कर्म्मोत्पन्नमवयवान्तराद्विभागं कुर्व्वत् आकाशादिदेशेभ्यो विभागानारभते, ते कारणाकारणविभागाः। कर्म्म यां दिशं प्रति कार्य्यारम्भाभिमुखतामपेक्ष्य कार्य्याकार्य्यविभागमारभते यथा हस्ताकाशविभागाच्छरीराकाशविभागः न चासौ शरीरक्रियाकार्य्यस्तदा तस्य निष्क्रियत्वात् नापि हस्तक्रियाकार्य्यः व्यधिकरणस्य कर्म्मणो विभागकर्तृत्वानुपपत्तेः अतः पारिशेष्यात् कारणाकारणविभागस्य कारणत्वमङ्गीकरणीयम्।

यदवादि अन्धकारादौ भावत्वं निषिध्यत इति तदसङ्गतं तत्र चतुर्द्धा विवादसम्भवात् तथाहि द्रव्यं तम इति भाट्टाः वेदान्तिनश्च भणन्ति, आरोपितनीलरूपमिति श्रीधराचार्य्याः आलोकज्ञानाभाव इति प्राभाकरैकदेशिनः आलोकाभाव इति नैयायिकादयः इति चेत्तत्र द्रव्यत्वपक्षो न घटते विकल्पानुपपत्तेः द्रव्यं भवदन्धकारं द्रव्याद्यन्यतमम् अन्यद्वा नाद्यः यत्रान्तर्भावोऽस्य तस्य यावन्तो गुणास्तावद्गुणवत्त्वप्रसङ्गात् न च तमसो द्रव्यबहिर्भाव इति साम्प्रतं निर्गुणस्य तस्य द्रव्यत्वासम्भवेन द्रव्यान्तरत्वस्य सुतरामसम्भवात्। ननु तमालश्यामलत्वेनोपलभ्यमानं तमः कथं निर्गुणं, स्यादिति, नीलं नभ इतिवत् भ्रान्तिरेवेत्यलं बहुबोधया। अत एव नारोपितनीलरूपं तमः अधिष्ठानप्रत्ययमन्तरेणारोपायोगात् बाह्यालोकसहकारिरहितस्य चक्षुषो रूपारोपे सामर्थ्यानुपलम्भात्। न चायमचाक्षुषः प्रत्ययः तदनुविधानस्यानन्यथासिद्धत्वात्। न च विधिप्रत्ययवेद्यत्वायोगो भावे इति साम्प्रतं प्रलयविनाशावधानादिषु व्यभिचारात्। अत एव नालोकज्ञानाभावः अभावस्य प्रतियोगिग्राहकेन्द्रियग्राह्यत्वनियमेन मानसत्वप्रसङ्गात्। तस्मादालोकाभाव एव तमः न चाभावे भावधर्म्माध्यारोपो दुरुपपादः दुःखाभावे सुखत्वारोपस्य संयोगाभावे विभागत्वाभिमानस्य च दृष्टत्वात्। नचालोकाभावस्य घटाद्यभाववद्रूपवदभावत्वे नालोकसापेक्षचक्षुर्जन्यज्ञानविषयत्वं स्यादित्येषितव्यं, यद्ग्रहे यदपेक्षं चक्षुस्तदभावग्रहेऽपि तदपेक्षत इति न्यायेनालोकग्रहे आलोकापेक्षाया अभावेन तदभावग्रहेऽपि तदपेक्षाया अभावात्। न चाधिकरणग्रहणावश्यम्भावः अभावप्रतीतावधिकरणग्रहणावश्यम्भावानङ्गीकारादपरथा निवृत्तः कोलाहल इति शब्दप्रध्वंसप्रत्ययो न स्यादिति अप्रामाणिकं तव वचनं परम्। तत्सर्व्वमभिसन्धाय भगवान् कणादः प्रणिनाय सूत्रं द्रव्यगुणकर्म्मनिष्पत्तिवैधर्म्म्यादभावस्तम इति प्रत्ययवेद्यत्वेनापि निरूपितम्।

अभावस्तु निषेधमुखप्रमाणगम्यः सप्तमो निरूप्यते। स चासम्बन्धत्वे सत्यसमवायः (अनुयोगित्वप्रतियोगित्वतादात्म्यान्यतमसम्बन्धेन समवायशून्यत्वमसमवायत्वम्) स च संक्षेपतो द्विविधः संसर्गाभावान्योन्याभावभेदात् संसर्गाभावोऽपि त्रिविधः प्राक्प्रध्वंसात्यन्ताभावभेदात् तत्रानित्यः अनादिसान्तः प्रागभावः, उत्पत्तिमान् विनाशी प्रध्वंसः, प्रतियोग्याश्रयोऽभावोऽत्यन्ताभावः। नन्वन्योन्याभाव एवात्यन्ताभाव इति चेत् अहो राजमार्ग एव भ्रमः अन्योन्याभावो हि तादात्म्यप्रतियोगिकः प्रतिषेधः यथा घटः पटात्मा न भवतीति संसर्गप्रतियोगिकः प्रतिषेधोऽत्यन्ताभावो यथा वायौ रूपसम्बन्धो नास्तीति। न चास्य पुरुषार्थौपयिकत्वं नास्तीत्याशङ्कनीयं दुःखात्यन्तोच्छेदापरपर्य्यायनिःश्रेयसरूपत्वेन परमपुरुषार्थत्वात्"।

शास्त्रान्ते च १०अ० २आह्निके "इष्टानां दिष्टप्रयोजनानां दृष्टाभावे प्रयोगोऽभ्युदयाय" सू०। "इष्टानां प्रमाणत उपलब्धानां यागदानस्नानादीनां दिष्टप्रयोजनानां दिष्टमुपदिष्टं प्रयोजनं येषां तेषाम् तथाहि "स्वर्गकामो यजेत" 'अग्निहोत्रं जुहुयात् स्वर्गकाम" इत्यादौ विधिसमभिव्याहृतमेव फलम्, क्वचिदार्थवादिकं यथा "यएता रात्रीरधीयीत तस्य पितरो घृतकुल्या मधुकुल्याः क्षरन्ति" इत्यादौ, क्वचिच्चौपपादनिकम्, यथा "विश्वजिता यजेत" इत्यादौ, अत्र हि न विधिसमभिव्याहृतमर्थवादोपस्थितमित्यौपपादनिकं काल्पनिकं स्वर्गस्यैव स्वतः सुन्दरस्य फलस्य कल्पनीयत्वात्, तथाचाशुतरविनाशिनामेतेषां कर्म्मणां चिरभाविने फलाय कारणत्वमनुपपद्यमानमत एषां प्रयोगोऽनुष्ठानमभ्युदयायापूर्व्वायेत्यर्थः। ननु श्रुतिप्रामाण्ये सति स्यादेवं तदेव तु दुर्लभं नहि मीमांसकानामिव नित्यनिर्दोषत्वेन श्रुतिप्रामाण्यं त्वयेष्यते पौरुषेयत्वेनाभ्युपगमात्, पुरुषस्य च भ्रमप्रमादविप्रलिप्सादिसम्भवादत आह दृष्टाभाव इति दृष्टं पुरुषान्तरेऽस्मदादौ भ्रमप्रमादविप्रलिप्सादिकं पुरुषदूषणं तदभावे सतीत्यर्थः। क्षितिकर्तृत्वेन वेदकर्तृत्वेन वाऽनुमितस्य पुरुषधौरेयस्य निर्दोषत्वेनैवोपस्थितेः, तथा च तद्वचसां न निरभिधेयता न विपरीताभिधेयता न निष्प्रयोजनाभिधे-

वता, भूतेन्द्रियमनसां दोषात् अनवप्रमादकरणापाटवादि-प्रयुक्ता एव वचनामविशुद्धयः सम्भाव्यन्ते, न चेश्वरवचसि तासां सम्भवः, तदुक्तम् “रागाज्ञानादिभिर्वक्ता ग्रस्तत्वादनृतं वदेत् । ते चेश्वरे न विद्यन्ते स ब्रूयात् कथमन्यथेति”।

ननु तेनेश्वरेण वेदस्य प्रणीत इत्यत्रैव विप्रतिपत्तिरत आह । उप॰ “तद्वचनादाम्नायस्य प्रामाण्यमिति” १०सू॰। “इति शास्त्रपरिसमाप्तौ । तद्वचनात्तेनेश्वरेण वचनात् प्रवचनादाम्नायस्य वेदस्य प्रामाण्यं तथाहि वेदास्तावत् पौरुषेया वाक्यत्वादितिसाधितं नचास्मदादयस्तेषां सहस्रशाखावच्छिन्नानां वक्तारः सम्भाव्यन्ते, अतीन्द्रियार्थत्वात्, नचातीन्द्रियार्थदर्शिनोऽस्मदादयः। किञ्चाप्तोक्ता वेदा महाजनपरिगृहीतत्वात् यन्नाप्तोक्तं न तन्महाजनपरिगृहीतं महाजनपरिगृहीतञ्चेदं तस्मादाप्तोक्तम् । स्वतन्त्रपुरुषप्रणीतत्वञ्चाप्तोक्तत्वम् । महाजनपरिगृहीतत्वञ्च सर्व्वदर्शनान्तःपातिपुरुषानुष्ठीयमानार्थत्वम्, क्वचित् फलाभावः कर्म्मकर्त्तृसाधनवैगुण्यादित्युक्तम् । कर्त्तृस्मरणाभावान्नैवमिति चेन्न कर्त्तृस्मरणस्य पूर्व्वमेव साधितत्वात्, तत्प्रणीतत्वञ्च स्वतन्त्रपुरुषप्रणीतत्वादेव सिद्धम्, न त्वस्मदादीनां सहस्रशाखवेदप्रणयने स्वातन्त्र्यं संभवतीत्युक्तत्वात् । किञ्च प्रमाया गुणजन्यत्वेन वैदिकप्रमायामपि गुणजन्यत्वमावश्यकं तत्र च गुणो वक्तृयथार्थवाक्यार्थज्ञानमेव वाच्यस्तथा च तादृश एव वेदे वक्ता, यः स्वर्गापूर्व्वादिविषयकसाक्षात्कारवान्, तादृशश्च नेश्वरादन्य इति सुष्ठु” ।

औलूखल त्रि॰ उलूखले क्षुण्णं शैषिकोऽण् । १उलूखलेपिष्टयावकादौ । उलूखले भवः अण् । २उलूखलभवे शब्दादौ च । “अभिषुणतीलूखलानुद्रायता” कात्या॰ १०,२,११, । “उलूखलेभवा औलूखलाः ध्वनयः” कर्कः

औवेणक न॰ “अपरान्तकमुल्लोप्यं मद्रकं प्रकरीं तथा । औवेणकं सरोविन्दुमुत्तरं गातकानि च” या॰उक्ते गीतिभेदे

औशनस न॰उशनसा शुक्रेण प्रोक्तम् अण् । शुक्रेण प्रणीते १उपपुराणे “तथैवौशनसेरितम्” कूर्म्मपु॰ २दण्डप्रणयनरूपे शास्त्रे च। ३धर्म्मशास्त्रभेदे तच्च प्रतिलोमजातवर्णसङ्करविभागप्रतिपादकप्रायम् । उशनसा दृष्टं साम अण् । ४उशनसा दृष्टे सामनि । तस्येदम् अण् । ५तत्सम्बन्धिनि त्रि॰ । “व्युह्य चौशनसं व्यूहम्” भा॰व॰ २८४अ॰ । “लोकमौशनसं दिव्यं शक्रलोकञ्च गच्छति” भा॰अनु॰१०७अ॰ । उशनसि भवः अण् । ६शुक्रभवे स्त्रियां ङीप् सा च ७देवयान्याख्यायां तदीय दुहितरि “विद्ध्यौशनसि ! भद्रन्ते न त्वमर्होऽस्मि भाविनि !” भा॰ आ॰ ८१ अ॰ देवयानीं प्रति कचोक्तिः ।

औशिज पु॰ उशिगेव प्रज्ञा॰अण् । १इच्छायुक्ते । “औशिजाय वणिजे दीर्घश्रवसे” ऋ॰ १,११२,११ । २प्रवरर्षिभेदे “काक्षीवताङ्गिरसौचथ्यगौतमौशिजकाक्षीवतेति” आश्व॰ श्रौ॰ १२,११,२ ।

औशीनर पु॰ उशीनरस्यापत्यम् उत्सा॰अञ् । उशीनरस्यापत्येषु शिबिप्रभृतिषु । उशीनरनृपस्य१२७५पृ॰उशीनरशब्दे उक्ताः । तत्सुताश्च “उशीनरस्य पत्न्यस्तु पञ्च राजर्षिवंशजाः । नृगा कृमिर्नवा दर्वा पञ्चमी तु दृशद्वती । उशीनरस्य पुत्रास्तु पञ्च तासु कुलोद्वहाः । तपसा चैव महता जाता वृद्धस्य चात्मजाः । नृगायास्तु नृगःपुत्रः कृम्याः कृमिरजायत । नवायास्तु नवः पुत्रो दर्व्वायाः सुव्रतो ऽभवत् । दृशद्वत्यास्तु संजज्ञे शिबिरौशीनरो नृपः” हरिवं॰२१अ॰ उक्ताः तच्चरितञ्च भा॰वन॰१९६अ॰। “देवानां कथा संजाता महीतलं गत्वा महीपतिं शिबिमौशीनरं साध्वेनं जिज्ञासिष्याम इति । एवं भो इत्युक्त्वा अग्नीन्द्रावुपातिष्ठेताम् । अग्निः कपोतरूपेण तमभ्यधावदामिषार्थमिन्द्रः श्येनरूपेण । अथ कपोतो राज्ञो दिव्यासनासीनस्य उत्सङ्गं न्यपतत् । अथ पुरोहितो राजानमब्रवीत् । प्राणरक्षार्थं श्येनाद्भीतो भवन्तं प्राणार्थी प्रपद्यते । वसु दद्यात्तु अत्रवान् पार्थिवोऽस्य निष्कृतिं कुर्य्यात् । घोरं कपोतस्य निपातमाहुः । अथ कपोतो राजानमब्रवीत् । प्राणरक्षार्थं श्येनाद्भीतो भवन्तं प्राणार्थी प्रपद्ये । अङ्गैरङ्गानि प्राण्यार्थी मुनिर्भूत्वा प्राणांस्त्वां प्रपद्ये । स्वाध्यायेन कर्षितं ब्रह्मचारिणं मां विद्धि । तपसा दमेन युक्तमाचार्य्यस्याप्रतिकूलभाषिणम् एवं युक्तमपापं मां विद्धि । गदामि वेदान् विचिनोमि छन्दः सर्वे वेदा अक्षरशो मे अधीताः । न साधु दानं श्रोत्रियस्य प्रदानं मा प्रदाः श्येनाय न कपोतोऽस्मि । अथ श्येनो राजानमब्रवीत् । पर्य्यायेण वसतिर्म्मा भवेषु सर्गे जातः पूर्व्वमस्मात् कपोतात् । त्वमाददानोऽद्य कपोतमेनं मा त्वं राजन् ! विघ्नकर्त्ता भवेथाः । राजोवाच । केनेदृशी जातु पुरा हि दृष्टा वागुच्यमाना शकुनेन संस्कृता । यो वै कपोतोऽथ इतो माञ्च श्येन उभौ विदित्वा कथमस्तु साधु । नास्य वर्षति वर्षकाले नास्य वीजं रोहति काल उप्तम् । भीतं प्रपन्नं योहि ददाति शत्रवे न त्राणं

लभते त्राणमिच्छन् स काले । जाता ह्रस्वा प्रजा प्रमीयते सदा न वै वासं पितरोऽस्य कुर्वते । भीतं प्रपन्नं योहि ददाति शत्रवे नास्य देवाः प्रतिगृह्णन्ति हव्यम् । मोघमन्नं विन्दति चाप्यचेताः स्वर्गाल्लोकाद्भ्रश्यति शीघ्रमेव । भीतं प्रपन्नं यो हि ददाति शत्रवे सेन्द्रा देवाः प्रहरन्त्यस्य वज्रम् । उक्षाणं पक्त्वा सह ओदनेन अस्मात् कपोतात् प्रति ते नयन्तु । यस्मिन् देशे रमसेऽतीव श्येन ! तत्र मांसं शिवयस्ते वहन्तु । श्येन उवाच । नोक्षाणं राजन् प्रार्थयेयं न चान्यदन्यन्मांसमधिकं वा कपोतात् । देवैर्दत्तः सोऽद्य ममैष भक्ष्यस्तन्मे ददस्व शकुनानामभावात् । राजोवाच । उक्षाणं वेहतमनूनं नयन्तु ते पश्यन्तु पुरुषा ममैव । भयाहितस्य दायं ममान्तिकात्त्वां प्रापयन्तु त्वं श्येनं मा हिंसीः । त्यजे प्राणानेव दद्यां कपोतं सौम्यो ह्ययं किन्नु जानासि श्येन ! । यथा क्लेशं मा कुरुष्वेह सौम्य ! नाहं कपोतमर्पयिष्ये कथञ्चित् । यथा मां हि वै साधुवादैः प्रहृष्टाः प्रशंसेयुः शिवयः कर्म्मणा त । यथा श्येन ! प्रियमेव कुर्य्यां प्रशाधि मां यद्वदेस्तत् करोमि । श्येन उवाच । ऊरोर्दक्षिणादुत्कृत्य स्वपिशितं तावद्राजन् ! यावन्मांसं कपोतेन समम् । तथा त्वस्मात् साधु त्रातः कपोतः प्रशंसेयुः शिवयः कृतञ्च प्रियं स्यान्ममेति । अथ स दक्षिणादूरोरुत्कृत्य स्वमांसपेशीं तुलया धारयन् गुरुतर एव कपोत आसीत् । पुनरन्यदुच्चकर्त्त गुरुतर एव कपोतः । एवं सर्व्वं समधिकृत्य शरीरं तुलायामारोपयामास तत्तथापि गुरुतर एव कपोत आसीत् । अथ राजा स्वयमेव तुलामारुरोह । न च व्यलीकमासीद्राज्ञ एतद्वृत्तान्तं दृष्ट्वा त्रात इत्युक्त्वा प्रालीयत श्येनः । अथ राजा अब्रवीत् कपोतं विदुः शिवयस्त्वां कपोत ! पृच्छामि ते शकुने ! को नु श्येनः । नानीश्वर ईदृशं जातु कुर्य्यादेतं प्रश्नं भगवन्मे विचक्ष्व । कपोत उवाच । वैश्वानरोऽहं ज्वलनो धूमकेतुरथैव श्येनो वज्रहस्तः शचीपतिः । साधु त्वाहं त्वामृषभं सौरथेयं नौ जिज्ञासया त्वत्सकाशं प्रपन्नौ । यामेतां पेशीं मम निष्कृत्याय प्रादाद्भवानसिनोत्कृत्य राजन् । एतद्वो लक्ष्म शिवं करोमि हिरण्यवर्णं रुचिरं पुण्यगन्धम् । एतासां प्रजानां पालयिता यशस्वी सुरर्षीणामथ सम्मतो भृशम् । एतस्मात् पार्श्वात् पुरुषो जनिष्यति कपोतरोमेति च तस्य नाम । कपोतरोमाणं शिविनोद्भिदं पुत्रं प्राप्स्यति नृपवृषं संहननं यशोदीप्यमानं द्रष्टासि शूरमृषभं सौरथानाम्" उशीनरश्च ? दर्शिततच्चरितमेवंरूपं तच्च शिवेरेवेति बहुभिः कल्प्यते तत्र पितापुत्रयोरभेदोपचारात् उशीनरशब्दप्रयोगात् इति । वस्तुतः कल्पभेदात् उशीनरस्य तत्पुत्रशिवेश्च तथा चरित्रमित्यविरोधः । अयञ्च ययातेर्दौहित्रः तेन च ययातेः पुण्यक्षये स्वर्गात् पतने तस्मै स्वपुण्यं दत्त्वाऽसौ पुनः स्वर्गलोकं प्रापितः तत्कथा यथा । "पृच्छामि त्वां शिविरौशीनरोऽहं ममापि लोका यदि सन्तीह तात ! । यद्यन्तरीक्षे यदि वा दिवि श्रिताः क्षेत्रज्ञं त्वां तस्य धर्म्मस्य मन्ये । ययातिरुवाच । यत्त्वं वाचा हृदयेनापि साधून् परीप्समानान्नावमंस्था नरेन्द्र ! । तेनानन्ता दिवि लोकाः श्रितास्ते विद्युद्रूपाः स्वनवन्तो महान्तः । शिविरुवाच । तांस्त्वं लोकान् प्रतिपद्यस्व राजन् मया दत्तान्यदि नेष्टः क्रयस्ते । न चाहं तान् प्रतिपत्स्येह दत्त्वा यत्र गत्वा नानुशोचन्ति धीराः" "अन्ते च यज्ञातिरस्मि नहुषस्य पुत्रः पूरोः पिता सार्व्वभौमस्त्विहासम् । गुह्यं चार्थं मामकेभ्यो ब्रवीमि मातामहोऽहं भवतां प्रकाशम्" भा० आ० ९२ अ० । उशीनरस्य गोत्रापत्यम् इञ् । औशीनरि तद्गोत्रापत्ये पुंस्त्री स्त्रियां ङीप् । "शूद्रायां गौतमो यत्र महात्मा संशितव्रतः । औशीनर्य्यामजनयत् काक्षीवाद्यान् सुतान् मुनिः" भा० स० २० अ० । तस्यापत्यम् अत इञपि । औशीनरि शिविरूपे । "आर्ष्टिषेणो दिलीपश्च महात्मा चाप्युशीनरः । औशीनरिः पुण्डरीकः शर्य्यातिः शरभः शुचिः" भा० स० ८ । यमसभावर्णने ।

औशीर न० अश-ईरन् किच्च ततः स्वार्थे प्रज्ञाद्यण् । १सक्कद-तयोः शय्यापीठयोः क्षीरस्वामी । २शय्यायाम् ३आसने च पृथक् इति सुभूतिः । "अभ्यवहार्य्य परमान्नमौशीरेऽद्य कामचारः कृतोऽभूत्" दशकुमा० । उशीरमिवाकारोऽस्य अण् । ४चामरे तस्य नलदमूलाकारत्वात्तथात्वम् । औशीरं चामरमस्त्यस्य अच् । ५चामरदण्डे अमरः । हेमच० दण्डार्थतोक्तिश्चामरदण्डपरा "छत्रं वेष्टनमौशीरमुपानद्व्यजनानि च । यातयामानि देयानि शूद्राय परिचारिणे" भा० श० ६० अ० । उशीरस्येदम् अण् । ६उशीरजे "स्नानस्यौशीरम्" शब्द० ।

औषणशौण्डी स्त्री ऊषण एव स्वार्थेऽण् औषणे कटुरसे शौण्डी ७त० । शुण्ठ्याम् तस्याः कटुरसत्वात्तथात्वम् ।

औषदश्वि पु० उषदश्वस्य नृपस्यापत्यम् इञ् । उषदश्वि नृपभेदापत्ये वसुमति ययातिदौहित्रे । "पृच्छामि त्वां वसुमानौषदश्विर्य्यद्यस्ति लोको यदि मे नरेन्द्र !" भा० आ०

६२अ० । अस्य च यथा ययातिर्मातामहस्तथा औशीनरिशब्दे दर्शितः । तत्र भवच्छब्देनैतस्यापि परामर्शात् ध न० ओषधेरिदम् “ओषधेरजातौ” पा० अण् । ओषधिजाते १अन्नादौ २रोगनाशके द्रव्यभेदे । स्वार्थेऽण् । ३ओषधौ च । औषधशब्दार्थश्च सुश्रुते दर्शित' “एवमेतत्पुरुषो व्याधिरौषधम् क्रियाकाल इति चतुष्टयं व्याख्यातम्” इत्युक्त्वा “औषधग्रहणात् द्रव्यगुणरसवीर्य्यविपाकप्रभावानामादेशः” इत्युक्तम् । तेन द्रव्यमात्रसाध्यस्यौषधत्वम् । अतएव तैलघृतजलविषविशेषाणामप्यौषधत्वम् । “रोगमादौ परीक्षेत ततोऽनन्तरमौषधम् । ततः कर्म्म भिषक् पश्चात् ज्ञानपूर्ब्बं समाचरेत्” चक्रद० परिपाटीमुक्त्वा रोगभेदेन औषधविशेषा उक्तास्तत एव तेऽधिगम्याः । तदुपयोगिभूम्यादिकं सुश्रुते दर्शितं यथा

“अथातो भूमिप्रविभागविज्ञानीयमध्यायं व्याख्यास्यामः श्वभ्रशर्कराश्मविषमवल्मीकश्मशानाघातनदेवतायतनसिकताभिरनुपहतामनूषरामभङ्गुरामदूरोदकां स्निग्धां प्ररोहवतीं मृद्वीं स्थिरां समां कृष्णां गौरीं लोहितां वा भूमिमौषधार्थं परीक्षेत तस्यां जातमपि क्रिमिविषशस्त्रातपपवनदहनतोयसम्बाधमार्गैरनुपहतमेकरसं पुष्टं पृथ्व्यवगाढमूलमुदीच्यां चौषधमाददीतेत्यौषधभूमिपरीक्षाविशेषः सामान्यः । विशेषतस्तु तत्राश्मवती स्थिरा गुर्व्वी श्यामा कृष्णा वा स्थूलवृक्षशस्यप्राया स्वगुणभूयिष्ठा । स्निग्धा शीतला सन्नोदका स्निग्धशस्यतृणकोमलवृक्षप्राया शुक्लाऽम्बुगुणभूयिष्ठा । नानावर्णा लघ्वश्मवती प्रविरलाल्पपाण्डुवृक्षप्ररोहाऽग्निगुणभूयिष्ठा । रूक्षा भस्मरासभवर्णा तनुवृक्षकोटराल्परसवृक्षप्रायाऽनिलगुणभूयिष्ठा । मृद्वी समा श्वभ्रवत्यव्यक्तरसजला सर्व्वतोऽसारवृक्षा महापर्व्वतवृक्षप्राया श्यामा चाकाशगुणभूयिष्ठा । तत्र केचिदाहुराचार्य्याः । प्रावृड्वर्षाशरद्धेमन्तवसन्तग्रीष्मेषु यथासंख्यं मूलपत्रत्वक्क्षीरसारफलान्याददीतेति तत्तु न सम्यक् कस्मात्सौम्याग्नेयत्वाज्जगतः । सौम्यान्यौषधानि सौम्येष्वृतुष्वाददीताग्नेयान्याग्नेयेष्वेवमव्यापन्नगुणानि भवन्ति । सौम्यान्यौषधानि सौम्येषु ऋतुषु गृहीतानि सोमगुणभूयिष्ठायां भूमौ जातान्यतिमधुरस्निग्धशीतानि जायन्ते । एतेन शेषं व्याख्यातम् । तत्र पृथिव्यम्बुगुणभूयिष्ठायां भूमौ जातानि विरेचनद्रव्याण्याददीताग्न्याकाशमारुतगुणभूयिष्ठायां वमनद्रव्याणि । उभयगुणभूयिष्ठायामुभयतोभागानि । आकाशगुणभूयिष्ठायां संशमनान्येवं बलवत्तराणि भवन्ति । सर्व्वाण्येव चाभिनवान्यन्यत्र मधुघृतगुडपिप्पलीविडङ्गेभ्यः । सर्व्वाण्येव सक्षीराणि वीर्य्यवन्ति तेषामसम्पत्तावनतिक्रान्तसंवत्सराण्याददीतेति । भवन्ति चात्र । गोपालास्तापसा व्याधा ये चान्ये वनचारिणः । मूलाहाराश्च ये तेभ्यो भेषजव्यक्तिरिष्यते । सर्व्वावयवसाध्येषु पलाशलवणादिषु । व्यवस्थितो न कालोऽस्ति तत्र सर्व्वो विधीयते । गन्धवर्णरसोपेता षड्विधा भूमिरिष्यते । तस्माद्भूमिस्वभावेन बीजिनः षड्रसैर्युताः । अव्यक्तः किल तोयस्य रसो नित्यं विनिश्चितः । रस एव स चाव्यक्तो व्यक्तो भूमिरसाद्भवेत् । सर्व्वलक्षणसम्पन्ना भूमिः साधारणा स्मृता । द्रव्याणि यत्र तत्रैव तद्गुणानि विशेषतः । विगन्धेनापरामृष्टमविपन्नं रसादिभिः । नवं द्रव्यं पुराणं वा ग्राह्यमेव विनिर्दिशेत् । विडङ्गं पिप्पली क्षौद्रं सर्पिश्चाप्यनवं हितम् । शेषमन्यत्त्वभिनवं गृह्णीयाद्दोषवर्जितम् । जङ्गमानां वयःस्थानां रक्तरोमनखादिकम् । क्षीरमूत्रपुरीषाणि जीर्णाहारेषु संहरेत् । प्लुतमृद्भाण्डफलकशङ्कुविन्यस्तभेषजम् । प्रशस्तायां दिशि शुचौ भेषजागारमिष्यते” ।

औषधग्रहणे परिभाषादिकमुक्तं भावप्र० यथा

“प्रशस्तदेशे सञ्जातं प्रशस्तेऽहनि चोद्धृतम् । अल्पमात्रं बहुगुणं गन्धवर्णरसान्वितम् । दोषघ्नमग्लानिकरमधिकं न विकारि यत् । समीक्ष्य काले दत्तञ्च भेषजं स्याद्गुणावहम् । आग्नेया विन्ध्यशैलाद्याः सौम्यो हिमगिरिः स्मृतः । अतस्तदौषधानि स्युरनुरूपाणि हेतुभिः । आग्नेयाः अधिकाग्न्यंशाः सौम्यः अधिकसोमांशः । औषधय एवौषधानि । अत्र स्वार्थे अण् । अनुरूपाणि सदृशानि । अन्येष्वपि प्ररोहन्ति वनेषूपवनेषु च । गृह्णीयात्तानि सुमनाः शुचिः प्रातः सुवासरे । आदित्यसम्मुखो मौनी नमस्कृत्य शिवं हृदि । साधारणधराद्रव्यं गृह्णीयादुत्तराश्रितम् । साधारणधराद्रव्यम् सर्व्वभूमिभवन्द्रव्यम् । उत्तराश्रितं स्यात् उत्तरदिग्भवम् । वल्मीककुत्सितानूपश्मशानोषरमार्गजाः । जन्तुवह्निहिमव्याप्ता नौषध्यः कार्य्यसाधिकाः । शरद्यखिलकार्य्यार्थं ग्राह्यं सरसमौषधम् । विरेकवमनार्थन्तु वसन्तान्तः समाहरेत् । वसन्तान्तः वसन्तमध्ये समाहरेत् संगृह्णीयात् । अतिस्थूलजटा याः स्युस्तासां ग्राह्यास्त्वचो ध्रुवम् । गृह्णीयात् सूक्ष्ममूलानि सकलान्यपि बुद्धिमान् । अन्यच्च । महान्ति येषां मूलानि

काष्ठगर्भाणि सर्व्वतः। तेषान्तु वल्कलं ग्राह्यं स्नुक्मूलानि सर्व्वशः। न्यग्रोधादेस्त्वचो ग्राह्या सारःस्याद्बीजकादितः। तालीशादेश्च पत्राणि फलं स्यात् त्रिफलादितः। क्वचिन्मूलं क्वचित् कन्दः क्वचित् पत्रं क्वचित् फलम्। क्वचित् पुष्पं क्वचित् सर्व्वं क्वचित् सारः क्वचित् त्वचः। चित्रकं सूरणं निम्बो वाला च त्रिफला क्रमात्। धातकी कण्टकारी च खदिरः क्षीरपादपः। क्वचिन्निम्बस्य गृह्णीयात् पत्राभावे त्वचामपि। बालम्फलन्तु विल्वस्य पक्कमारग्वधस्य च। अङ्गेऽनुक्ते जटा ग्राह्या भागेऽनुक्तेऽखिलं समम्। पात्रेऽनुक्ते मृदः पात्रं कालेऽनुक्ते लहर्मुखम्। नवान्येव हि योज्यानि द्रव्याण्यखिलकर्मसु। विना विड़ङ्गकृष्णाभ्यां गुडधान्याज्यमाक्षिकैः। धान्यमन्नम्। पुराणन्तु प्रशस्तं स्यात्ताम्बूलङ्काञ्जिकन्तथा। शुष्कन्नवीनद्रव्यन्तु योज्यं सकलकर्मसु। आर्द्रन्तु द्विगुणं युञ्ज्यादेष सर्व्वत्र निश्चयः। गुडूची कुटजो वाला कुष्माण्डश्च शतावरी। अश्वगन्धा सहचरी शतपुष्पा प्रसारिणी। प्रयोक्तव्या सदैवार्द्रा द्विगुणं नैव कारयेत्। सहचरी कुरण्टकः (कटरैया) इतिलोके। वासानिम्बपटोलकेतकबला कुष्माण्डकेन्दी वरी वर्षाभूः कुटजाश्च कन्दसहिता सा पूतिगन्धा स्मृता। ऐन्द्री नागबला कुरण्टक पुरी ह्यवाम्मता सर्व्वदा। सार्द्रा एवत कुत्रचित् द्विगुणिता कार्य्येषु योज्या बुधैः। ऐन्द्री इन्द्रवारुणी। वरी शतावरी पूतिगन्धा गन्धप्रसादनी नागबला (गुलशकरि) कुरण्टकः(पीतपुष्पझाँटि) (कटसरैया) पुरो गुग्गुलुः। घृतलैलञ्च पानीयं कषायं व्यञ्जनादिकम्। पक्वा शीतीकृतं चोष्णं तत्सर्व्वं स्याद्विषोपमम्।

द्रव्याणां परीक्षा। स्वच्छास्थिमांसला पथ्या सर्वकर्म्मणि पूजिता। क्षिप्राम्भसि निमज्जेद्या भल्लातक्य स्तथोत्तमाः। वराहमूर्द्धवत्कन्दो वाराहीकन्दसंज्ञकः। सौवर्चलन्तु काचाभं सैन्धवं स्फटिकप्रभम्। सुवर्णच्छविकं ज्ञेयं स्वर्णमाक्षिकमुत्तमम्। इन्द्रपुष्पप्रतीकाशा मनोज्ञा चोत्तमा मता। श्रेष्ठं शिलाजतु ज्ञेयं प्रक्षिप्तं न विशीर्य्यते। तोयपूर्णे कांस्यपात्रे प्रतानेन विवर्द्धते। कर्पूरस्तुवरः स्निग्धः एला स्वच्छफला वरा। श्वेतचन्दनमत्यन्तं सुगन्धि गुरु पूजितम्। रक्तचन्दनमत्यन्तं लोहितम्प्रवरं मतम्। काकतुण्डानिभः स्निग्धोऽगुरुः श्रेष्ठो गुरुर्मतः। सुगन्धि लघु रूक्षञ्च सुरदारु वरं मतम्। सरलं स्निग्धमत्यर्थं सुगन्धि च गुणावहम्। अतिपीता प्रशस्ता तु ज्ञेया दारुनिशा बुधैः। जातीफलं गुरु स्निग्धं समं शुभ्रान्तरं वरम्। मृद्वीकोत्तमा ज्ञेया या स्यान्नोस्तानसन्निभा। करमर्द्द फलाकारा मध्यमा सा प्रकीर्त्तिता। गोस्तनसन्निभा। (मुनक्का) इति लोके। करमर्द्द फलाकारा। (करोन्दीदाख) इति लोके। खण्डन्तु विमलं श्रेष्ठं चन्द्रकान्तसमप्रभम्। गव्याज्यसदृशं रुच्यगन्धं मधु वरम्मतम्। अथ स्वभावतो हितानि। शालीनां लोहितः शालिः षष्टिकेषु च षष्टिका। शूकधान्येष्वपि यवोगोधूमः प्रवरो मतः। शिम्बीधान्ये वरो मुद्गो मसूरश्चाढ़की तथा। रसेषु मधुरः श्रेष्ठो लवणेषु च सैन्धवम्। दाड़िमामलकद्राक्षाखर्ज्जूरञ्च परूषकम्। राजादनं मातुलुङ्गं फलवर्गेषु शस्यते। परूषकं (फालसा) इति लोके। राजादनं (खिरणी) इति लोके। मातुलुङ्गं (वीजपूरा) इतिलोके। शाकेषु वास्तूकं जीवन्ती पोतिका वरा। पटोलं फलशाकेषु कन्दशाकेषु सूरणम्। एणः कुरङ्गो हरिणो जाङ्गलेषु प्रशस्यते। पक्षिणां तित्तिरिर्लावो वरो मत्स्येषु रोहितः। हरिणस्ताम्रवर्णः स्यादेणः कृष्णतया मतः। कुरङ्गस्ताम्रउद्दिष्टो हरिणः कृत्तिको महान्। जलेषु दिव्यं दुग्धेषु गव्यमाज्येषु गोभवम्। तैलेषु तिलजन्तैक्षवेषु सिता हिता। अथ स्वभावादहितानि। शिम्बीषु माषान् पोष्यार्त्तौ, लवणेष्वौषरं त्यजेत्। फलेषु लकुचं शाके सार्षपं न हितम्मतम्। गोमांसं ग्राम्यमांसेषु महितं सहिमीयसा। मेषीपयः कुसुम्भस्य तैलन्त्याज्यञ्च फाणितम्। इक्षुरसः परिपक्वो योऽर्द्धघनःत तृफाणितम् तद्धि (राब) इति लोके। अथ संयोगविरुद्धानि। मत्स्यानूपमांसञ्च दुग्धयुक्तं विवर्ज्जयेत्। कपोतं सर्षपस्नेहभर्ज्जितं परिवर्जयेत्। मत्स्यानिक्षोर्तिकारेण तथा क्षौद्रेण वर्ज्जयेत्। सक्तून् मांसपयोयुक्तानुष्णं दधि विवर्ज्जयेत्। उष्णैरम्भोऽम्बुना क्षौद्रं पायसं कृशरान्वितम्। रम्भाफलं त्यजेत् तक्रं दधि विल्वफलान्वितम्। दशाहमुषितं सर्पिः कांस्ये, मधुघृतं समम्। कृताञ्च कषायञ्च पुनरुष्णीकृतं त्यजेत्। एकत्र बहुमांसानि विरुध्यन्ते परस्परम्। मधुसर्पिर्वसातैलं पानीयं वा पयस्तथा। अथ भेषजपर्य्यायसङ्केतः। लवणं सैन्धवं प्रोक्तं चन्दनं रक्तचन्दनम्। चूर्णस्नेहासवस्नेहाः साध्या धवलचन्दनैः। कषायलेपयोः प्रायो युज्यते रक्तचन्दनम्। अन्तःसम्मार्ज्जने ज्ञेया ह्यजमोदा यवानिका। बहिःसम्मार्ज्जने सैव विज्ञातव्याजमोदिका। पयः सर्पिः प्रयोगेषु गवामेवाहि

गृह्यते । अथ प्रतिनिधिः । चित्रकाभावतो दन्ती क्षारः शिखरिणोऽथवा । अभावे धन्वयासस्य प्रक्षेप्या दुरालभा । शिखरी अपामार्गः । तगरस्याप्यभावे तु कुष्ठं दद्याद्भिषग्वरः । मूर्वाभावे त्वचो ग्राह्या जिङ्गिनीप्रभवा बुधैः । अहिंस्राया अभावे तु मानकन्दः प्रकीर्त्तितः । लक्ष्मणाया अभावे तु नीलकण्ठशिखा मता । नीलकण्ठशिखा मयुरशिखा । बकुलाभावतो देयं कह्लारोत्पलपङ्कजम् । नीलोत्पलस्याभावे तु कुमुदं देयमिष्यते । जातिपुष्पं न यत्रास्ति लवङ्गं तत्र दीयते । अर्कपर्णादिपयसो ह्यभावे तद्रसो मतः। पौष्कराभावतः कुष्ठं तथा लाङ्गल्यभावतः । स्थौणेयकस्याभावे तु भिषग्भिर्दीयतेऽगदे । चविकागजपिप्पल्यौ पिप्पलीमूलवत् स्मृतौ । अभावे सोमराज्यास्तु प्रपुन्नाटफलं मतम् । यदि न स्याद्दारुनिशा तदा देया निशा बुधैः । सोमराजी वाकुची । प्रपुन्नाटफलं चक्रमर्द्दफलम् । दारुनिशा दारुहरिद्रा निशा हरिद्रा । रसाञ्जनस्याभावे तु सम्यग्दार्व्वी प्रयुज्यते सौराष्ट्र्यभावतो देया स्फटिका तद्गुणा जनैः ! सौरष्ट्री (सोरटीमाटी) इति लोके । स्फटिका (फटिकारी) इति लोके । तालीशपत्रकाभावे स्वर्णताली प्रशस्यते । भार्ग्यभावे तु तालीसं कण्टकारी जटाऽथ वा । रुचकाभावतो दद्याल्लवणं पांशुपूर्व्वकम् । अभावे मधुयष्ट्यास्तु धातकीञ्च प्रयोजयेत् । रुचकं(सोहार) इति लोके पांशुलवणं (खारी) अथ वा (रेह इति लोके । अम्लवेतसकाभावे चुक्रं दातव्यमिष्यते । द्राक्षा यदि न लभ्येत प्रदेयं काश्मरीफलम् । तयोरभावे कुसुमं बन्धूकस्य मतं बुधैः । लवङ्गकुसुमं देयं नखस्याभावतः पुनः । कस्तूर्य्यभावे कक्कोलं चेपणीयं विदुर्बुधाः । कक्कोलस्याप्यभावे तु जातीपुष्पं प्रदीयते । सुगन्धोत्पलकं देयं कर्पूराभावतो बुधैः । कर्पूराभावतो देयं ग्रन्थिपर्णं विशेषतः । कुङ्कुमाभावतो दद्यात् कुसुम्भकुसुमं नवम् । श्रीखण्डचन्दनाभावे कर्पूरं देयमिष्यते । अभावे त्वेतयोर्वैद्यः प्रक्षिपेत् रक्तचन्दनम् । रक्तचन्दनकाभावे नवोशीर विदुर्बुधाः । मुस्ता चातिविषाभावे शिलाभावे शिरा मता । अभावे नागपुष्पस्य पद्मकेशरमिष्यते । मेदा जीवककाकोली ऋद्धिद्वन्द्वेऽपि वा सति । वरी विदार्य्यश्वगन्धा वाराही च क्रमात् स्मृता । वरी शतावरी । वाराह्याश्च तथाभावे चर्म्मकारालुको मतः । वाराहीकन्दसंज्ञस्तु पश्चिमे ब्टष्टिसंज्ञकः । वाराहीकन्दएवान्यचर्म्मकारालुको मतः । अनूपसम्भवे देशे वराह इव लोमवान् । भल्लातकास्यम्भवे तु रक्तचन्दनमिष्यते । भल्लाताभावतश्चित्रं नलश्चोरभावतः । सुवर्णाभावतः स्वर्णमाक्षिकं प्रक्षिपेत् बुधः । श्वेतन्तु माक्षिकं ज्ञेयं बुधैः रजतवत् ध्रुवम् ! माक्षिकस्याप्यभावे तु प्रदद्यात् स्वर्णगैरिकम् । सुवर्णमथ वा रौप्यं मृतं यत्र न लभ्यते । तत्र कान्तेन कर्म्माणि भिषक्कुर्य्याद्विचक्षणः । कान्ताभावे तीक्ष्णलोहं योजयेद्वैद्यसत्तमः । अभावे मौक्तिकस्यापि मुक्ताशुक्तिं प्रयोजयेत् । मधु यत्र न लभ्येत तत्र जीर्णगुड़ो मतः । मत्स्याण्डप्रभावतो दद्युर्भिषजः सितशर्करम् । असम्भवे सितायास्तु बुधैः खण्डं प्रयुज्यते । क्षाराभावे रसो मौद्गो माद्गुरो वा प्रदीयते । अत्र प्रोक्तानि वस्तूनि यानि तेषु च तेषु च । योज्यमेकतराभावे परं वैद्येन जानता । रसवीर्य्यविपाकाद्यैः समं द्रव्यं विचिन्त्य च । युञ्ज्याद्विविधमन्यच्च द्रव्याणान्तु रसादिवित् । योगे यद्प्रधानं स्यात्तस्य प्रतिनिधिर्म्मतः । यत्तु प्रधानं तस्यापि सदृशं नैव गृह्यते । व्याधेरयुक्तं यत् द्रव्यं गुणोक्तमपि तत् त्यजेत् । अनुक्तमपि युक्तं यत् योजयेत् तद्रसादिवित् । द्रव्यगतपञ्चपदार्थकर्म्माण्याह । द्रव्ये रसो गुणो वीर्य्यविपाकः शक्तिरेव च । पदार्थाः पञ्च तिष्ठन्ति स्वंस्वं कुर्व्वन्ति कर्म्म च"।

"वीर्य्यवन्त्यौषधिनीव विकारे सान्निपातिके" कुमा० । "द्वेष्योऽपि सम्मतः शिष्टस्तस्यार्त्तस्य यथौषधम्" रघुः । "' स्य विषमौषधम्"उद्भट: "भवौषधात् श्रोत्रमनोऽभिरामात्" भाग०१,१, 'औषधं जाह्नवीतोयं वैद्योनारायणः स्वयम्" पुरा० । संसाररूपदुःखदायकरोगनिवारके ४परमेश्वरे च "औषधं जगतां सेतुः" विष्णु०सं० ।

औषधि स्त्री आ+ओषधि–प्रा०स० । सम्यगोषधौ । "विरमन्ति न ज्वलितुमौषधयः" किरा० वा ङीप् । औषधी ।

औषर न० उषरे भवः अण् । पांशुलवणे राजनि० ।

औषरक न० औषरमिव कन् । (खारी) लवणभेदे राजनि०

औषस न० उषसि भवः सन्धिवेलेत्यादिना योगविभागात् अण् ।१उषसिभवे। वस्तुतः भवार्थे "कालाट्ठञ्"पा०उक्तेः ठञ् स्यात् तेन औषस इदम् इत्यण् इत्युचितम् । २उषःसम्बन्धिनि । "अनुदितौषसरागेति "औषसातपभयादपलीनम्" इति च" किरा० स्त्रियां ङीप् । "या औषाः पत्न्यौषसी सा" शत० ब्रा० ६,१,२,८. उषस्+वा० यत् स्वार्थे अण् । औषस्य उषोभवे त्रि० ।

औप(स्त)स्त्य त्रि॰ उपस्तेरिदम् अण् ष्यञ् वा । उपस्तिचरितात्मके का॰उ॰ ब्राह्मणकाण्डभेदे । तत्र "उपस्तिर्ह चाक्रायणः" इत्यादि तत्रत्यं ब्राह्मणं "औपस्ते(स्त्ये) काण्डेऽविदुषामपि आर्त्विज्यदर्शनात्" छा॰उ॰भा॰।

औषसिक त्रि॰ उषसा चरति ठक् टिलोपः । १उषसाचारिणि । उषसि भवः कालाट्ठञ्" पा॰ ठञ् । २उषसिभवे च ।

औषिक त्रि॰ उषा उषसि भवः ठञ् । उषाभवे स्त्रियां ङीप्

औष्ट्र न॰ उष्ट्रस्येदम् अण् । उष्ट्रदुग्धादौ । "औष्ट्रं दुग्धं लघु स्वादु लवणं दीपनं तथा । कृमिकुष्ठकफानाहशोथो दरहरं सरम्" भावप्र॰ । "अनिर्दशायाः गोः क्षीरमौष्ट्रमैकशफं तथेति" मनुः उष्ट्रशब्दे विवृतिः ।

औष्ट्रक न॰ उष्ट्राणां समूहः गोत्रोक्षोष्ट्रेत्यादिना वुञ् । उष्ट्रसमूहे । उष्ट्रस्य विकारोऽवयवोवा वुञ् । २उष्ट्रविकारे ३तदवयवे च त्रि॰ ।

औष्ट्ररथ न॰ उष्ट्ररथस्येदम् "पत्त्रपूर्व्वादञ्" पा॰ रथादित्यनुवृत्तौ अञ् । उष्ट्रवाह्यरथसम्बन्धिनि ।

औष्ट्रायण पुंस्त्री उष्ट्रस्यापत्यम् बा॰ फक् । उष्ट्रापत्ये ततः चतुरर्थ्याम् अरीहणादि॰ वुञ । औष्ट्रायणक तत्सन्निकृष्टदेशादौ त्रि॰ ।

औष्ट्रिक त्रि॰ उष्ट्रे भवः ठक् । उष्ट्रभवे दध्यादौ "विपाके कटु सक्षारं गुरु भेद्यौष्ट्रिकं दधि" सुश्रुतः ।

औष्ठ त्रि॰ ओष्ठ ओष्ठाकारोऽस्त्यस्य प्रज्ञा॰ अण् । ओष्ठाकारकाष्ठावयवयुक्ते आश्विनग्रहपात्रे । "औष्ठमाश्विनम्" कात्या॰ ९,२,७, "ओष्ठावयवयुक्तमाश्विनग्रहपात्रम्" कर्कः "तद्द्विदेवत्यमौष्ठमाश्विनपात्रम्" शत॰ब्रा॰ ४,१,५,१९ ।

औष्ठ्य त्रि॰ ओष्ठे भवः यत् स्वार्थे अण् । ओष्ठभवे उवर्णपवर्गयोः "ओष्ठजावुपू" इतिशिक्षोक्तेस्तयोस्तथात्वम्

औष्णिज न॰ उष्णिज्+प्रज्ञा॰स्वार्थेऽण् । उष्णिगर्थे ।

औष्णिह त्रि॰उष्णिहि भवः उत्सा॰ अञ् तस्येदमण् वा । १उष्णिक्छन्दोभवे २तत्सम्बन्धिनि च । उष्णिहा स्तुतः अण् । ३उष्णिक्छन्दसा स्तुते सवितरि "सवित्र उष्णिहाय" यजु॰ १९,६ ।

औष्णीक त्रि॰ उष्णीषे शोभते अण् पृषो॰ । १उष्णीषधारिणि २तद्धारिजनपदविशेषे ३तन्नृपे च "औष्णीकानन्तवासांश्च योधकान् पुरुषादकान्" भा॰स॰ ५० ।

औष्ण्य न॰ उष्णस्य भावः गुणवचनत्वात् ष्यञ् । उष्णस्पर्शे स च "उष्णस्पर्शस्तु तेजसः" इत्युक्तेः तेजस एव स्वाभाविकधर्मः तत्संयोगादितरेषामौपाधिकः । सुश्रुते तत्कार्य्यपित्तस्य धर्म इत्युक्तं यथा "औष्ण्यतैक्ष्ण्यरौक्ष्यलाघववैशद्यगुणलक्षणं पित्तं तस्य समानयोनिः कटुकोरसः सोऽस्यौष्ण्यादौष्ण्यं वर्द्धयति" सुश्रु॰ ।

औष्म्य न॰ऊष्मणोभावः ऊष्मैव वा ष्यञ् । उष्णस्पर्शे । "पूर्व्वराजवियोगौष्म्यं कृत्स्नस्य जगतोहृतम्" रघुः । उष्णस्पर्शो यद्यपि तेजोयोगात् भवति तथापि देहस्य तथा स्पर्शः सम्प्रदायाक्ततत्त्वदेहसंयोगादेव तथोक्तं शा॰ सूत्रभाष्ययोः "अस्यैव चोपपत्तेरेष ऊष्मा" सू॰ "अस्यैव च सूक्ष्मशरीरस्यैष ऊष्मायमेतस्मिन् जीवच्छरीरे संस्पर्शेनोष्णिमानं विजानाति तथाहि मृतावस्थायामवस्थितेऽपि देहे विद्यमानेष्वपि च, रूपादिषु देहगुणेषु नोष्मोपलभ्यते जीवदवस्थायामेव तूपलभ्यते इत्यत उपपद्यते प्रसिद्धशरीरव्यतिरिक्तव्यपाश्रय एवैष ऊष्मेति तथा च श्रुतिः "उष्ण एव जीविष्यञ्छीतो मरिष्यन्निति" भा॰ । तदुपाधिकत्वात् जीवस्यापि ऊष्मत्वं व्यवह्रियते इत्युक्तं प्राक् ।

इति वाचस्पत्ये औकारादिशब्दार्थसङ्कलनम् ।

इति श्रीतारानाथ-तर्कवाचस्पति-भट्टाचार्य्य-विरचिते वाचस्पत्ये ऽभिधाने स्वरवर्णादिशब्दार्थसङ्कलनं समाप्तम् ।

ओं तत्सत्

PK Tarkavachaspati, Taranatha
925 Vācaspatyam
T37
v.2

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY